श्रीमद्भागवतम् ॥

महर्षिप्रवर श्री[illegible]द्वैपा[illegible]प्रणीतम् ।

[illegible] भावार्थ [illegible] दीपिका श्रीराधारमणदास गोस्वामि विरचित [illegible] [illegible] श्रीमद्भागवत [illegible] श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली [illegible] श्रीमद् [illegible] चार्य [illegible] [illegible] वाचार्य [illegible] श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ [illegible] [illegible] [illegible] [illegible] सारार्थदर्शिनी तथा श्रीनिम्बार्क सम्प्रदायि श्रीशुकदेवकृत सिद्धान्तप्रदीप [illegible]
टीका सप्तक समेतम् [illegible] ।

[illegible] परि[illegible] चार्य [illegible] [illegible] ज्ञानस्वरूपेण पूज्यपादशिष्य
श्री[illegible]रूप[illegible]चार्येण ।
सम्पादितम् ।

[illegible] मास [illegible] श्रीराधा[illegible] प्रेम सेवा परायण राजर्षि राव
[illegible]नमालि[illegible] बहादुरस्य
सम्पूर्ण सा[illegible]
प्रकाशितम् ।

निगमकल्पतरोर्गलितं फलं, शुकमुखादमृतद्रवसं[illegible]
[illegible] भागवतं रसमालयं, मुहुरहो रसिका भुवि भावुकाः ॥

[illegible]न्दावनधामनि ।

श्रीमद्[illegible] [illegible] [illegible] श्रीनित्यम [illegible]
मुद्रितम्

सम्वत् १९[illegible]

[redacted]ागवत

द्वितीयस्कन्धः ।

प्रथमोऽध्यायः ।

ॐ नमो भगवते वासुदेवाय ॥

श्रीशुक उवाच । वरीयानेष ते प्रश्नः कृतो लोकहितं नृप ।
आत्मवित्सम्मतः पुंसां श्रोतव्यादिषु यः परः ॥ १ ॥
श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः ।
अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ॥ २ ॥
निद्रया ह्रियते नक्तं व्यवायेन च वा वयः ।
दिवा चार्थेहया राजन् कुटुम्बभरणेन वा ॥ ३ ॥
देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ।
तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यन्नामकीर्त्तनं दानतपोयोगादिसत्फलम् । तं नित्यं परमानन्दं हरिं नरमहं भजे ॥
द्वितीये तु दशाध्यायैः श्रीभागवतमादितः । उद्देशलक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते ॥
तत्र तु प्रथमाध्याये कीर्त्तनश्रवणादिभिः । स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते ॥
उक्तः पूर्व्वमुपोद्घातः सप्रसङ्गः शुकागमः । राज्ञा पृष्टं नृणां कृत्यमथाह शुकसन्मुनिः ॥ ० ॥

राज्ञः प्रश्नमभिनन्दति वरीयानिति । ते त्वया पुंसां श्रोतव्यादिषु मध्ये यः परः श्रेष्ठः प्रश्नः कृतः एष वरीयान् । यतो लोकहितमेतत् मोक्षहेतुत्वात् । आत्मविदां मुक्तानाञ्च सम्मतो यतः ॥ १ ॥

तत्र तावत् स्वाभाविकक्रियाणामनर्थहेतुतां वदन् ब्रूहि यद्वा विपर्य्ययम् इत्यस्योत्तरमाह श्रोतव्यादीनीति त्रिभिः । गृहेषु सक्तानाम् अतएव गृहमेधिनां तद्गतपञ्चसूनापराणाम् । मेधार्त्तिः सार्थः ॥ २ ॥

तेषां वृथैवायुर्व्ययो भवतीत्याह निद्रयेति । नक्तं रात्रौ यत् वयः आयुः तन्निद्रया व्यवायेन रत्या वा ह्रियते । दिवा अह्नि यद्वयः तत् अर्थेहया अर्थार्थमुद्यमेन सिद्धेऽर्थे कुटुम्बभरणेन वा । [illegible] अमुक समुच्चायकौ ॥ ३ ॥

ननु नश्वरकुटुम्बाद्यर्थं कथमायुर्व्ययं कुर्य्यात् तत्राह । देहादिषु आत्मनः सैन्येषु परिकरेषु असत्सु मिथ्याभूतेष्वपि प्रमत्तः प्रसक्तः तेषां पित्रादिदृष्टान्तेन नाशं पश्यन्नपि नानुसन्धत्ते ॥ ४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

उद्देशेति—नाममात्रेण सङ्कीर्त्तनमुद्देशः । लक्ष्यते [illegible] अनेनेति लक्षणम् असाधारणधर्म्मकथन[illegible] । तद्द्विविधम्—इतरभेदानुमापकं व्यवहारप्रयोजकञ्च । उपोद्घात इति—[illegible] न्यायशास्त्रे षोढा निरूपिता—सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा । [illegible]कैककार्य्यत्वं षोढा सङ्गतिरिष्यते ॥ इति [illegible] । तत्र स्मृतस्योपेक्षणानर्हत्वं प्रसङ्गत्वम् । चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः । हेतुता कारणता [illegible]रावश्यकवक्तव्यमवसरः । निर्व्वाहकं कारणतानिर्व्वाहकं कार्य्यैत्वम् । एककार्य्यत्वमेककार्य्यस्यानुकूलत्वं कार्य्यत्व[illegible] । तथाहि प्रकृतप्रस्तावे उपोद्घातत्वं प्रसङ्गत्वं वा कथमस्तीति पाठकैः स्वयमेव चिन्त्यम् ॥ १ ॥

अहीति प्रथमस्कन्धीयैकोनविंशाध्यायस्य [illegible] श्लोकः ॥ पञ्चसूनेति । पञ्चप्रकारप्राणिवधस्थानं यथा—पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च [illegible] वाहयन् ॥ इति शुद्धितत्त्वम् । तज्जन्यपापं गृहस्थस्य प्रतिदिनं भवति । तस्य प्रायश्चित्तं वैश्वदेवः । यथा—लौकिके वैदिके [illegible] जले क्षितौ । वैश्वदेवन्तु कुर्व्वीत पञ्चसूनाऽपनुत्तये ॥ इति आह्निकत त्त्वधृतशातातपवचनम् ॥ अशौचकालोत्पन्न[illegible]पापस्य दानादिनाश्यत्वं यथा—दशाहात्तु परं सम्यक् विप्रोऽधीयीत धर्म्मवित् । दानञ्च विधिना देयमशुभात् तारकं [illegible]ति शुद्धितत्त्वधृतसंवर्त्तवचनम् ॥ २—४ ॥

श्रीमद्वीरराघवाचार्य [illegible] भागवतचन्द्रिका ।

श्रीहयग्रीवायनमः ॥ वेदान्तोपबृंहणा [illegible] [illegible] शुकः श्रोतव्यादयः [illegible] प्रतिराजापृष्टश्चेदानीं राजा प्रश्नमभिनंदति । वरीयानिति । [illegible] पुंसां श्रोतव्यादिषु श्रोतव्यमंतव्यनिदिध्या-सितव्यार्थेषु यः गोचरः श्रोतव्याद्यर्थतत्वविषयः । लोकहितमितिपाठप्रतीतिशेषः लोकहितंप्रतिपः प्रकृतएषः प्रश्नोवरीयान्श्रेष्ठः कुत-त्यतआह । यद्यतः । आत्मवित्संमतः आत्मज्ञानिनांसंस्तुतः । ननुनायमात्मविषयकश्रवणमननादिप्रश्नः । यच्छ्रोतव्यमथोजप्यंब्रूहि यद्वा-थपर्ययमितिसामान्येनपृष्टत्वादतः । कथमात्मवित्संमत्याप्रश्नाभिनंदनमितिचेन्मैवं । किमयंपृष्टा आत्मविषयकश्रवणादीनां मुक्तिसाधनत्वं जानातिनवा । नांत्यः म्रियमाणस्ययत्कर्तव्यं यच्छ्रोतव्यमिति पुरुषविशेषकर्तृकप्रश्नायोगात् । नाद्यःसुतरांप्रश्नानुपपत्तेरतः सामान्या-कारेणात्मश्रवणादीनां मुक्तिसाधनत्वंजानतो विशेषतश्चात्मनः । श्रवणादीनां च स्वरूपमजानतोऽयं प्रश्न इति प्रश्नस्यविशेषनिष्ठत्वादात्म-वित्संमत्याभिनन्दनोपपत्तेः ॥ १ ॥

अथब्रूहियद्वाविपर्ययमित्यस्यप्रश्नस्यश्लोकत्रयेणोत्तरमाह । श्रोतव्यादीनीति । हे राजेन्द्र ! गृहमेधिनां । नृणांश्रोतव्यादीनिसहस्रशः संन्ति । मुमुक्षोस्तुब्रह्मैकमेवत्यभिप्रायः । तदनुबंधित्वेनोपासनादीनां श्रवणमर्थसिद्धं । गृहमेधिनांतुनपंचसूनापराणांमेधःहिंसार्थः । यद्वा । मेधाबुद्धिःगृहेष्वेमेधाएषामस्तीतिगृहमेधिनः गृहासक्ताः । यद्वामेधः पशुः "उपनयनमेत परआशासानामेधपतिभ्यामेध" मितिवैदिक-प्रयोगात् । तत्संबंधिव्यापारोपिउपचारान्मेधः स एषामस्तीतिगृहमेधिनः पशुर्हियज्ञांगभूतै [illegible]दीनांप्रीतिजनकः तद्वदेतेऽपिकेवलकर्मानु-[illegible]नासक्तास्तत्प्रीतिसंपादकाइतिपशुसाम्यमुच्यते । केवलैहिकामुष्मिकफलासक्तागृहस्थाइति [illegible] । अतएवात्मतत्वमात्मयाथात्म्यम-[illegible] शः संतीत्यनेन "बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिना" मितिरीत्या सांसारिक[illegible]लसाधनानामानन्त्यं तारतम्यंचाभिप्रेतं २

एतैश्चवृथैवायुर्याप्यत इत्याह । निद्रयेति । नक्तंरात्रौयद्वयस्तन्निद्रयाव्यवायेन मिथुनीभावेन वा ह्रियतेयाप्यते दिवायद्वयस्तदर्थेहया अर्थार्जनानुकूलचेष्टया संपादितैः [illegible] कुटुंबभरणेन कुटुंबपोषणेनचकारवाकारावनुक्तसमुच्चयार्थौ [illegible]क्तातिरिक्तव्यापारांतरेणापीत्यर्थः ॥ ३ ॥

ननुनश्वरकुटुंबाद्यर्थंकथमायुर्व्ययःस्यात्तत्राह । देहेति । आत्मसैन्येषुआत्मनः स्वस्यपरिजनेष्वसत्सुअंतवत्स्वपिदेहापत्यकलत्रादिषु-प्रसक्तः । अन्येषां निधनं । अंतवत्त्वंपश्यन्नपितेषां देहादीनामंतवत्त्वंस्वात्मनिनपश्यतिनानुसंधत्ते ॥ ४ ॥

———————

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः । श्रीगुरुभ्यांनमः । श्रीवेदव्यासायनमः । वरीयान्प्रश्नयोनिगमविषयोयोऽस्यजनकोवराहाधा-त्मायोऽवतरतिसुरारातिहतये । अदाक्षान्नेज्ञानंसकलविषयंयश्चविनुतस्तमंगोपास्यत्वंहृदयसततंस्वप्रकृतये ॥ १ ॥

संप्रतिपरीक्षित्प्रश्नं परिहरिष्यन्स्तौति वरीयानिति श्रीभागवतसंहिताप्रारंभकारणंसविस्तरमभिधायेदानींश्रीभागवतसंहिताप्रारभ्य-तइत्याह वरीयानिति यच्छ्रोतव्यमथोजप्यमित्यादिनायस्त्वयाकृतःसएषप्रश्नोवरीयान् अङ्गीकार्यतमः सर्वोत्कृष्टत्वात् लोकहित-मितिक्रियाविशेषणं यथालोकस्यहितंभवतितथाकृतइत्यनेनकेवलंतवैवहितकरोऽयंकिंतुसर्वस्येत्युक्तंभवति उत्कृष्टत्वेहेतुगर्भविशेषणमाह आत्मविदिति मुख्यतआत्मविदोब्रह्मादयस्तेषामपिसंमतत्वात् तत्कथमत्राह पुंसामिति आत्मविदित्यनुवर्तते इहजगतिनृणांसहस्रशः श्रोतव्यानि संतिम्रियमाणानामम्रियमाणानांचपुंसांश्रोतव्यादिषु परःपरमात्मासएवात्मवित्समतइतियस्तस्मादित्यर्थः "आत्मावाअरे-द्रष्टव्य"इत्यादिश्रुतेः अनेनपरमात्मविषयत्वेनास्यवरीयस्त्वमित्युक्तंभवति इतोऽपिपरमात्मश्रवणादिकमंतरेणसंसारस्यतज्ज्ञाननिबंधन-स्यदुरुच्छेद्यत्वात्सएवतंपुमुख्यत्वेनसंमतइत्युपसंहरन्नज्ञलोकप्रवृत्तिप्रकारमाह अपश्यतामित्यादिना हरिस्त्वज्ञानार्थः आत्मनःपरमात्मन-स्तत्त्वमनारोपितरूपंज्ञानादिलक्षणं आत्मनोलक्ष्मीब्रह्मादिचेतनानांकदाप्यनभिभूततरतमभावेनावस्थितिंचापश्यतामजानतां निद्रयेत्यत्र-स्यत्राप्यनुसंधेयं गृहमेधिनां गृहमेधा गृहाश्रमएवकर्तुंयोग्याःपंचमहायज्ञाः स्मृतिविहितप्रत्यवायपरिजिहीर्षयातान्कर्तुंशीलमेषामस्तीति-गृहमेधिनः तेषांगृहेषुगृहाश्रमेष्वेववर्तमानानांपुंसाम ॥ २ ॥

निद्रयाव्यवायेनचस्त्रीभोगेनचनक्तंरात्रिर्नवयोह्रियते दिवाचार्थेहयाश्रीनारायणाराधनानुपयोगिहिरण्याद्युपादनायासेन "अष्ट-कार्येशतंकृत्वाभर्तव्यामनुरब्रवी"दितिवचनात् कुटुंबभरणेनवा ह्रियतइत्यन्वयः ॥ ३ ॥

आत्मतत्वाज्ञानेकारणमाहदेहेत्यादिना अपिगर्हार्थः आत्मनःस्वस्यदीनत्वंक्षीणत्वमापादयंतीत्यात्मदैन्यानि तेषु दीनभयसंनिपातो-यद्वास्वतएवदीनभावोयेषांतेतथातेषु अतएवासत्स्वभद्रेषुनतुक्तं "सद्भावेसाधुभावेचेति" निधनंनाशं प्रकर्षेणासक्तःप्रसक्तः सपश्यतिस्वस्यापि-इति अपिनाऽसच्छब्दस्यमिथ्यार्थाभिधायित्वं गर्हितमितिदर्शयतिवेषुप्रमत्तोनिधनमितिपाठोऽनन्वितः ॥ ४ ॥

———————

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

द्वितीयैकमसन्दर्भे सन्दर्भाणां समाहृतिः । क्रियते यथिवेतेन स मेऽनन्यगतेर्गतिः ॥ ० ॥

"अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः" इत्यादिना श्रीकृष्णे एव [illegible] व्यज्य म्रियमाणानां श्रोतव्यादिप्रश्नेनैवास्ते-श्रीकृष्ण एव मन्युरिदइयतामिति श्रीराजाभिप्रायानन्तरं शुक उवाच वरीयानेष इति । त त्वया पुंसां श्रोतव्यादिषु मध्ये यः श्रीकृष्णश्रवणाभिप्रायेण परमः प्रश्नः कृतः यद्वा त्वया कृतः यः प्रश्नोऽपि श्रोतव्यादिषु परः यस्य प्रश्नस्यापि श्रवणादौ परमपुरुषा-भिध्यतीत्यर्थः एष वरीयान् सर्वावतारावतारिप्रश्नेभ्यः परममहान् । स च लोकहितं यथा स्यात् तथैव कृतः । स्वन्तु तथाभूत श्रीकृष्णैकनिर्वन्धप्रेमत्वात् कृतार्थ एवेति भावः । तदुक्तम्—वैयासकिरिति वचस्तत् [illegible]मात्मनः । उपधार्य्य मतिं कृष्णे औत्तरेयः सती व्यधात् ॥ इति । सती विद्यमाना श्रीकृष्णे या मतिस्तामेव विशेषेण धृतवान् इत्यर्थः । एतदेव व्यक्तीकरिष्यते राज्ञा—"हरेरद्भुत-वीर्यस्य कथा लोकसुमङ्गलाः । कथयस्व महाभाग यथाहमखिलात्मनि । कृष्णे नि[illegible] नि:सङ्गं मनस्त्यक्ष्ये कलेवरम्" ॥ इति । एवमेवः

* तथाचात्रनिद्राशब्दोऽविद्यापरपर्यायबंधकप्रकृतिपरइतिभावः ॥

तत्र भगवदाविर्भावमात्रस्य श्रवणादेरावश्यकत्वेन कमुत्थमाह श्रोतव्यादीनीति चतुर्भिः। आत्मतत्त्वं भगवत्तत्त्वं, तस्मात् इत्युपसंहरिष्य-माणत्वात्, तत् अपश्यतां परमश्रोतव्यत्वेनाजानतामित्यर्थः ॥ २ ॥
भाति प्राकृतानान्तु निद्रयेत्यादि ॥ ३—४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

ॐ श्रीकृष्णायनमः ॥

स्कन्धेतु प्रथमे प्रोक्ता [illegible] अधिकारिणः। तेषां कर्त्तव्यनिर्द्धारो द्वितीये विनिरूप्यते ॥ १ ॥
तस्मिन्निर्द्धारिते [illegible] संकथा। अग्रेच तां प्रवक्ष्यामस्तृतीयादिभि रुत्तमैः ॥ २ ॥
निर्द्धारणे [illegible] पुरा। श्रद्धाचैव विमर्शश्च वस्तु निर्द्धारणं [illegible]
प्रमाणेन प्रमेयेन [illegible] च। एकत्र मानमेयेहि फलं साधन [illegible]
अतोऽत्र वस्तु [illegible] त्रयं मतं। श्रद्धापि द्विविधालोके [illegible]
फलोपका [illegible] तां विशेत्। विमर्शोपि द्विधापूर्वं उत [illegible]
त्रिविधे द्वेत [illegible] शास्ततोदश। तत्रतु प्रथमेऽध्याये कर्त्तव्यं [illegible]

वस्तुनस्तत्व निर्द्धारो मानमेय विभेदतः पूर्वस्कन्धे अधिकार निरूपणं परीक्षितो मुख्या [illegible] मत्यपेक्षायां श्रीशुकरूपयासत्संगे सति सर्व तत्व जिज्ञासार्थे प्रश्नः कर्त्तव्य इति प्रथमं प्रश्नद्वयं कृतं सर्वात्मना [illegible] म्रियमाणेश्च किंकर्त्तव्यमिति, सर्वात्मनाकर्त्तव्यं नाम यस्मिन्नकृतेकापि पुरुषार्थो नसिध्यति। तत्सर्वात्मनाकर्त्तव्यं तत्राधिकारिणो ननिर्द्धारिताः। सत्तोत्तरदानसमये निरूपणीयः। म्रियमाणानां कर्त्तव्यनिर्द्धारो द्वितीयः ये पुनः श्रोतव्यादि पंचपदार्थाः पृष्टाः ते यथायथं एतन्निरूपणेनैव निरूपिता भविष्यंति। कांश्चिदग्रेनिरूपयिष्यामः। अतोद्वयनिरूपणीयं सर्वात्मनाकर्त्तव्यं म्रियमाणेश्च कर्त्तव्यमिति। तदर्थसर्वेषां वस्तूनांयाथात्म्यं-ज्ञेयं फलमुख्यसंगश्रद्धांनिरूप्य विचारश्चनिरूप्यः। एतेषामावश्यकत्वं तत्तत्प्रकरणेनिरूपयिष्यामः तत्रसर्वात्मनाकर्त्तव्यनिर्द्धारंचतुर्दशभिराह वरीयानित्यादिभिः। कर्त्तव्यनिरूपणात्पूर्वं अभिनंदनंकर्त्तव्यं प्रश्नश्रवणहेतुत्वाय यथा क्षुधितस्यान्नदानं। तथासाकांक्षस्यकर्त्तव्य-मेव अधिकारनिर्द्धारश्चकर्त्तव्यः विशेषतः पूर्वप्रश्नशेषतयाअनिरूपणात्। प्रेक्षापूर्वकारिणां प्रवर्त्तयन्फलमनिरूप्यविबोधः प्रवर्त्तयितुंन-शक्यते। अतःफलनिर्द्धारार्थं अधिकारनिरूपणाय तत्रदोषत्रयं निराकार्यंतदर्थत्रयःश्लोकाः। तत्र प्रथमंप्रश्नमभिनंदति। वरीयानिति। तत्त्वादिषु प्रश्नेषुमध्येयः प्रथमतः पृष्टः सर्वात्मना कर्त्तव्यमिति। एषप्रश्नोवरीयान्श्रेष्ठः उत्तमत्वेहेतुमाह यतः सतु ते तवोपकाराय सर्वेषां अस्मिन्नर्थेमहतांसंमतिमाह। आत्मवित्संमतइति। आत्मविदामप्ययंप्रश्नःसंमतः अनेनायंप्रश्नोसर्गणाबुद्धआरादयइतिसूचितं। पुंसां सर्वेषामेव विचारकाणांस्वतंत्राणां अयंप्रश्नःसंमतइतिसंबंधः। तस्मादत्रोत्तरं कथयिष्यामीतिभावः ॥ १ ॥
इदानींफलप्रेप्सुमधिकारिणं निर्द्धारयितुं सर्वेषामेक कर्त्तव्यंनास्तीत्याह। श्रोतव्यादीनीति। अग्रिमप्रश्नाभिनंदनात् गौणतासूचितैव। यदिपियदिराज्ञस्तत्राकांक्षाइदाभवेत् तदाप्रथमोत्तरमुच्यमानं न सम्यगवगम्येत अतोऽधिकारनिरूपणप्रस्तावे श्रोतव्यादीन्यपनिरा-करोति। राजेन्द्रेतिसंबोधनात् बहुविधाः पुरुषास्त्वयैवदृष्टाः बहूनिचशास्त्राणि। तत्रतत्रतेषांनकोऽपिपुरुषार्थःसिद्ध इति तदनुभवस्य-सिद्धिः प्रदर्शिता। प्रश्नेनृभारतिवचनात् तदूक्षापनायोत्तरमाह तर्हितानिकुतोनवक्तव्यानि तत्राह संतिसहस्रशइति मत्कथनात्पूर्वमेव जनमनपेक्ष्यसहस्रशःसंति। सामान्येषु स्वाभिप्रेतानामप्रवेशार्थमाह अपश्यतामात्मतत्त्वमिति। आत्मनस्तत्वमनारोपितरूपं तच्छा-स्त्राभावादपश्यतां लोकव्यवहारेण आत्माआरोपितोदृश्यतेदेहादिरूपःसंवलितोवा ननुकथमुपायं विद्यमानेतआत्मतत्वंनजानंति तत्राह गृहमेधिनामिति। तैर्विविक्तात्मस्वरूपं [illegible] त्वकिंकर्त्तव्यं तेहिगृहमेधिनः गृहएवपर्यवसितमतयः तेषां गृहोपयोगियद्भवेत् तदेव-कर्तव्यं विविक्तात्मातुगृहस्यबाधकः अतोनज्ञातव्य [illegible] निमित्तसप्तमी तेषांगृहेष्वेवबुद्धिरस्ति गृहेकनिष्ठाभविष्यामइति अतोगृहाः-श्रोतव्याः। तस्मात्तथैवबुद्ध्वागृहसिद्धितामेवबुद्धिंसंपादयंति [illegible] अतस्तद्विषयकस्तत्वप्रश्नान-पेक्षितः। अनेनम्रियमाणविषयकोयः प्रश्नः सतस्तु [illegible] उत्तरमग्रेवक्ष्यतीतिसंभाव्यते ॥ २ ॥
ननुकेवलंगृहार्थेकथंतेषांबुद्धिः सद्बुद्धिसाधनीभू [illegible] । तत्राह। निद्रयाह्रियतेनक्तमिति [illegible] नीभूतः समयएव-नास्ति तत्समयस्याप्यैवापहारात्। तदाह। निद्र [illegible] आयुर्हतवत्योस्वप्नेनिद्रयानक्तंवयःह्रियते [illegible] रात्रिसंबंधिआयु अपग-च्छति। दिवाचदिनसंबंधिआयुःअर्थेहयाण [illegible] सर्वमायुर्गच्छतीत्युक्तंभवति ननुनसर्वाणिरात्रिनिद्रयागच्छति। तत्राह। व्यवायेनचवेति चकारात्तत्साधनेन [illegible] नान्यःपक्षस्तेषुसंभाव्यः वय.शब्देनपुरुषार्थसाधनीभूतमायुस्तारुण्य-मेव तथावृत्तंजरठःकिंनुसाधयेत् बालोवा अर्थे [illegible] चकारात्तिद्रया अर्थार्थप्रयत्नेन सिद्धोऽर्थेकुटुंबभरणेनता ॥ ३ ॥
ननु वैराग्यसाधनानां जायमानत्वात्कथं [illegible] मानजायते। तत्राह देहापत्येति। त्रयो गृहमुख्याः। देहः पुत्राभार्याश्च। कलत्राश्रयं तेचस्वभावतो गुणतश्च दु [illegible] । येहियस्य परिकराभवन्ति तेतंपोषयंति। एते आत्मसैन्यानि अपि-आत्मानमेव शत्रुभिर्घातयंति अतो ऽसंतः। [illegible] आत्मघातदोषेण धनेनपोषिता निधनंनाशं प्राप्नुवंति। तदादुष्टानांनाशात् कानिष्ठाभवेत्। तदंतेष्वदोषाजायतइ [illegible] यथाअत्यंतंमदिरामत्तः गतमपि वस्त्रंस्पृशन्नपि देहेवस्त्रागमनं नानु संधत्ते तथमपि मृतानपितान् पश्यन्जीवन [illegible] बाह्यांतरदोषव्याप्तत्वात् आयुषोवृथाक्षयात् गृहएवपरं वसितबुद्धित्वात् श्रोतव्यादिन प्रष्टव्यमित्यर्थः। "बुद्धि [illegible] वः कारणंमतः। यस्य नैतंभाविष्यति तस्य नास्त्यधिकारिता" ॥ ४ ॥

[illegible]
गोपरामाजनप्राप्रेयसेऽखिलभूतात्मने । तदीयमिपदाश्चाप मां महीपालं हरे ॥
दशाध्यायं द्वितीयेऽस्मिन्नक्के मारायणादितः । प्रवृत्तस्यास्य शास्त्रस्य प्रक्रमं व्यासनन्दनः ॥
अध्यायैस्त्रिभिरुत्कर्षो भक्तेरेकेन सम्मतिः । हरेर्धातुर्नारदस्य संवादस्त्रिभिरुच्यते ॥
प्रश्ना एकेन विष्णूपदेश एकेन धातरि । एकेन लक्षणान्यस्य दशेति स्कन्धसंग्रहः ॥
तत्र तु प्रथमेऽध्याये यमाद्यष्टाङ्गयोगिनः । वैराजमूर्त्तेः पातालपादमूलादिधारणा ॥ ० ॥

पूर्वस्कन्धान्ते "अतः पृच्छामि संसिद्धिम्" इति पुरुषस्येह यत् कृत्यमिति वाक्याभ्यां सम्यक् सिद्धिः का अत्र साधनञ्च किं [illegible] तत्रापि श्रव्यजप्यादिकं किं तथैवाश्रव्याजप्यादिकञ्च किमिति राज्ञः प्रश्नमभिनन्दति । वरीयान् श्रेष्ठः ते त्वया कृतः प्रश्न एव लोकानां हितम् । न चायं प्राकृतः प्रश्न इत्याह आत्मविदाम् एषां युष्मत्सभोपविष्टानां सम्मतः एतदर्थमेवैतेषामत्रागमनादिति भावः । यतः श्रोतव्यादिष्वति सतां प्रश्नोऽपि श्रूयते कीर्त्यते स्मर्यत इत्यतः श्रोतव्यादिषु प्रश्नेषु मध्ये यः प्रश्नः परः इतोऽन्यस्योत्कृष्टस्याभावात् सर्वान्तिमः इमं प्रश्नमेव श्रुत्वा कीर्त्तयित्वा स्मृत्वा पुमांसः सर्वतोऽप्यतिकृतार्था भवन्ति किं पुनरेतत्प्रश्नस्योत्तरं मया दत्तं श्रुत्वा त्वं कृतार्थो भविष्यसीति भावः । इत्थमेवाग्रेऽपि वक्ष्यते—वासुदेवकथाप्रश्नः पुरुषांस्त्रीन् पुनाति [illegible] । वक्तारं प्रच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥ इति ॥ १ ॥

[illegible]प्राप्तिरेव संसिद्धिस्तत्र कृत्यं तन्नामलीलाश्रवणकीर्त्तनाद्येव सर्वोत्कृष्टमित्यग्रे प्रतिपादयिष्यन् प्रथमं ब्रूहि यद्वा विपर्ययम् इत्यस्योत्तरत्वेन कर्म्मयोगमाह श्रोतव्यादीनीति त्रिभिः । आत्मनां तत्त्वं के वयं किं कुर्म्मः किमुदर्का भविष्यामः कथं निस्तारं प्राप्नुम इति अपश्यतां किन्तु गृहेषु [illegible]नां गृहमेधिनां गृहगतपञ्चसूनापराणाम । मेधृ हिंसायाम् ॥ २ ॥

तेषां वृथैवायुर्व्ययो भवतीत्याह । नक्तं यदायुस्तन्निद्रया ह्रियते इति रात्रेः प्रायः कर्म्मानर्हकालत्वात् । व्यवायेन रमणेन वा इति कर्म्मिणां स्त्रीसङ्गस्यानिषिद्धत्वात् । अर्थेहया अर्थस्पृहया अर्थाम् विना कर्म्मासिद्धेः । सिद्धे चार्थे कुटुम्बभरणेन वेति कर्म्मयोग कुटुम्बभरणस्य विहितत्वात् ॥ ३ ॥

अपश्यतामात्मतत्त्वमिति यदुक्तं तद्विवृणोति । देहादिषु आत्मनः सैन्येषु स्वसैन्यतुल्येषु कालेन सह योद्धुमिवेति भावः । असत्स्वपि जीवात्मनो देहादिसम्बन्धाभावान्मिथ्याभूतेष्वपि तेषु प्रमत्तः प्रसक्तः । यद्वा असत्स्वपि असाधुष्वपि बहिर्मुखत्वादसमर्थेष्वपीत्यर्थः । प्रमत्तः अनवहितः । यतस्तेषां निधनं कालेनैव नाशम् अनघानामपि पित्रादिदृष्टान्तेन नाशं पश्यन्नपि नानुसन्धत्ते । तेनायं कालेनैव ग्रस्यते भगवद्भक्तस्तु भगवदुन्मुखैर्देहादिभिरप्रमत्तः कालमपि जयतीति भावः ॥ ४ ॥

———————

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

श्रीकृष्णायनमः ॥ श्रीनिम्बार्कनमस्कृत्यवेदांतार्थप्रकाशकम् । द्वितीयस्कंधेसिद्धान्तप्रदीपोऽयंविरच्यते । जन्माद्यस्येत्यादिश्लोकत्रयी सर्वस्यश्रीमद्भागवतस्यसूत्रम् तदीविवरणभूतः प्रथमस्कंधः । तद्विस्तारः सर्वोप्ययंग्रंथः तत्रापिमूलरूपो द्वितीयस्कंधः विवरणभूताः अन्येस्कंधाः । सोऽयंद्वितीयःस्कंधोयथामतिव्याख्यायते अतिक्रांतस्कंधांते राज्ञाकृतंप्रश्नमभिनंदतिभगवान्शुकः । वरीयानिति । हे नृप ! एषतेप्रश्नः वरीयान् । अतिशयेनवरःश्रेष्ठः श्रेष्ठत्वादेवात्मविस्संमतः नन्वनात्मविदामयाकृतः कथमात्मवित्संमतोभवेदित्यत्रनभवाननात्मवित् किन्त्वात्मविदेवभवतापरोपकारायप्रश्नःकृतइत्याह कृतोलोकहितमिति लोकहितंप्रतीत्यर्थः । पुंसां श्रोतव्यादिषुमध्येयःपरः उपादेयतयाश्रेष्ठः ॥ १ ॥

राज्ञायत्पृष्टंब्रूहियद्वाविपर्ययमिति तस्योत्तरमाह श्रोतव्यादीनीतिश्लोकत्रयेण । हे राजेंद्र ! गृहमेधिनां "कंडनीपेषणीचुल्लीउदकुंभीचमार्जनीपंचसूनागृहस्थस्यताभिः स्वर्गंनगच्छती"ति इत्युक्तसूनाशब्दार्थोगृहेषु मेधोमेधतेर्हिंसार्थत्वाद्धिंसारूपोव्यापारः एषामस्तीतिगृहमेधिनस्तेषांगृहेषुश्रोतव्यादीनिसहस्रशःसन्ति अतएववहिर्दृष्टित्वादात्मतत्त्वमपश्यताम ॥ २ ॥

अतएवनक्तंरात्रौयद्वय आयुस्तन्निद्रयाऽथवाव्यवायेनमैथुनेनचकाराद्वसन्मनोरथादिनादिवाऽहिचार्थेहयाऽर्थार्जनचेष्टयासत्यर्थे कुटुम्बभरणेनचाह्रियते ॥ ३ ॥

ननुकुतःकुटुंबादेरनित्यत्वमाज्ञायानिर्विण्णाः । सन्हरिभजनपरोनस्यादत्राह देहेति आत्मनः सैन्येषुभोगायतनतदुपकरणेषुदेहतदनुबंधिषु असत्स्वपि । अहि[illegible]वापप्रमतः तन्नित्यत्वबुद्ध्याभ्रांतं तेषांनिधनंलोकतः पश्यन्नपि न पश्यतिनानुसंधत्ते ॥ ४ ॥

———————

भाषा टीका ।

१ हे नृप ! 'मनुष्योंके श्रोतव्यादिको में क्या श्रेष्ठ है' यह तुमने प्रश्न जो किया [illegible] उत्तम है, क्योंकि मोक्ष का हेतु है । लोक का
हित है । और आत्मवित् मुक्तों का संमत है ॥ १ ॥
२ राजेन्द्र ! आत्म तत्व के न जानने वाले गृहों में पड़े गृहस्थि जनो को हजारों [illegible] ज्ञातव्य विषय है ॥ २ ॥
३ राजन् । एसे पुरुषों की वय रात्रिमें स्त्री प्रसंग और निद्रासे व्यतीत होती है। [illegible]धना पार्जन की चेष्टा अथवा कुटुंब भरण
मे व्यतीत होती है ॥ ३ ॥
४ असत्य देह पुत्र स्त्री आदिक आत्मा के परिकर में प्रसक्त पुरुष । इन सबका [illegible] कर भी नहीं देखता है ॥ ४ ॥

———————

श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम् ॥ ५ ॥

एतावान् सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ।
जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥ ६ ॥

प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः ।
नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥ ७ ॥

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम् ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एवं विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादिप्रश्नस्योत्तरमाह तस्मादिति । हे भारत भरतवंश्य । सर्वात्मेति [illegible] सौन्दर्यम् ईश्वर इति आवश्यकत्व हरिरिति बन्धहारित्वम् । अभय मोक्षम् इच्छता ॥ ५ ॥

अतः परमन्यत् श्रेयो नास्तीत्याह । एतावानेव जन्मना लाभः फलम् । तमाह नारायणस्मृतिरिति [illegible] तथा स्वानन्दियया लाभत्वं वारयति । सांख्यम् आत्मानात्मविवेकः योगः अष्टाङ्गः । अन्ते तु स्मृतिः [illegible] इत्यर्थः ॥ ६ ॥

तत्र सदाचारं प्रमाणयति प्रायेणेति । विधिषेधतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये [illegible] स्थिता अपि (हरेर्गुणानुकथने कीर्तने रमन्ते) । स्म प्रसिद्धम् ॥ ७ ॥

किमिदमपूर्वं कथयसि । सत्यम् । अन्यपूर्वमेवेदमित्याह । इदं भगवतप्रोक्तं तन्नामैकप्रधानं पुराणं ब्रह्मसम्मितं सर्ववेदतुल्यम् । यद्वा ब्रह्म सम्यक्मितं येन । कुतस्त्वया प्राप्तम् अत आह अधीतवानिति ॥ ८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

प्रेष्ठत्वमिति । प्रियतमत्वमित्यर्थः । अतिशयविशिष्टार्थवृत्तेः प्रियशब्दात् स्वार्थे अतिशायने तमबिष्ठनौ (पा ५ । ३ । ५५) इति सूत्रेण इष्ठन् प्रत्यये प्रिय-स्थिर-स्फिरोरु-बहुल-गुरु-वृद्ध तृप्र-दीर्घ-वृन्दारकाणां प्र-स्थ स्फ-वर्-बंहि-गर्-वर्षि-त्रप्-द्राघि-वृन्दाः (पा ६ । ४ । १५८) इति सूत्रेण प्रियशब्दस्य प्रादेशे प्रेष्ठशब्दः साधनीयः ॥ ५—७ ॥

[द्वापरादाविति । अत्र विजयध्वजः—द्वापरान्ते कृष्णावतारापेक्षया द्वापरे आदौ च न तु द्वापरस्य आदाविति । व्यासः षट्शत-वर्षीयां धृतराष्ट्रमजीजनदिति वचनात् द्वापरान्ते भारतकथाप्रवृत्तिकथनाच्चेति ॥ किञ्चात्र कृष्णावतारादनतिपूर्वमेव सत्यवत्यां द्वैपायनस्य प्रादुर्भावात् द्वापरादाविति न सङ्गच्छते । तस्मात् द्वापरशब्देनात्र द्वापरान्त एव लक्ष्यते ॥ ८—१५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादि प्रश्नस्योत्तरमाह तस्मादिति । हे भारत भरतवंश्य सर्वात्मा सर्वजीवानामन्तर्यामी "अंतःप्रविष्टः शास्ता जनाना"मिति श्रुतिप्रत्यभिज्ञानात् । अनशब्दस्य चेतनमात्रे स्वारस्यात् । हरिः । आश्रितदुरितहर्ता अनेनोपासकानां स्वप्राप्तिविरोधि दुरितनिवर्तकत्वमुक्तं भवति भगवानित्यनेन देवताविशेष उक्तः । भगवानिति शब्दोऽयमीनिस्मरणात् ईश्वरः कार्यकारणावस्थचेतनाचेतन-नियन्ता अनेन कारणत्वमभिप्रेतं "कारणं तु ध्येयः [illegible]" । अभयं मोक्षं कामयमानेन श्रोतव्य इत्यादिविषयीकर्तव्यः । स्वरूपरूप-गुणविभूतिविशिष्टपरमात्मविषयक श्रवणादि [illegible] मुमुक्षुणा कार्यं नान्यविषयकमित्यर्थः । "आत्मा वारे द्रष्टव्यः तमेवैकमात्मानं जानथ । अन्या वाचो विमुंचथ" इति श्रुतेः । एवं च शारीरक[illegible] "अथातो ब्रह्मजिज्ञासे"ति प्रथमसूत्रार्थोऽनुसंहितो भवति ॥ ५ ॥

एतस्मादन्यत्कर्तव्यं नास्तीत्याह । एता[illegible] योगः फलाभिसंधिरहितकर्मयोगः । (ज्ञानयोगः) "ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिना"मिति भगवद्वचनात् । [illegible] तदुपासनमिति यावत् तस्य परनिष्ठया निर्विघ्नेन परिसमाप्त्या च । अन्ते देहावसाने नारायणस्मृतिः । साध्येति [illegible] जन्मलाभः फलं ज्ञानकर्मयोगानुगृहीतभगवदुपासनासाध्या नारायण-स्मृतिरन्तकाले संपाद्येत्यर्थः ॥ ६ ॥

अत्र सदाचारं प्रमाणयति । प्रायेणेति [illegible] निषेधात्मकवेदबोधितात्काम्यात्कर्मणो निवृत्ताः । नत्वावश्यकात्पंचमहा-यज्ञादेर्नुष्ठानरूपात्फलं अभक्षणादिनिषेधा[illegible] न्वयनादिश्रुतेरश्वघत् । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति । क्रिया-वानेष ब्रह्मविदां वरिष्ठः । नाविरतो दुश्चरिता[illegible]ति विधिनिषेधानुवर्तनाभावे तदुपासनानिवृत्त्यभाव प्रतिपादनात् । न च तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्यं न ति[illegible] निर्विद्याथ मुनिरिति बाल्यस्य यत्कर्म कामचारादिकं तद्विदुष उपादेयतया श्रुत-मिति वाच्यम् अनाविःकुर्वन्नन्वयादि[illegible] माहात्म्यानाविष्काररूपं कर्म तद्विदुष उपादेयं न तु कामचारादिकमिति विज्ञातितत्वात् ब्राह्मणाधिष्ठाना पांडित्यं[illegible] परिशुद्धं परिपूर्णं । च विदित्वा वेदनं प्रतिलभ्य यत्स्वभावानाविष्काररूपं कर्म-नष्ठुर्वस्यमनो वर्तेतेति तस्यार्थः । मुनयः शु[illegible] इदं श्रवणानंतरभाविमननं विद्यापांडित्यवाच्य[illegible] तरभाविनो मननं

तरस्वायुकद[illegible] विहितवानगुंयव[illegible]हितमहात्मव्यासस्तु पाम-
कृत्वर्थः हरेराश्रितदुरितहारिणोगुणाननुकथनेगुणानुवादिरमन्तेस्म ॥ ७ ॥

नकेवलंपूर्वपवरमंतेऽहमपितत्रवरमइत्याहइदमितिद्वयेन। भगवत्प्रोक्तंभागवतंचतुःश्लोक्यामूलभूतायास्तत्प्रोक्तत्वात्। यद्वा भगवत्स्व-रूपरूपादिप्रतिपादकत्वेनभागवतंब्रह्मवेदस्तेनसंमितंतुल्यं। यद्वाब्रह्मसम्यग्मितंप्रमितंयेनतादृवंपुराणंकमपितुद्वैपायनाद्व्यासाद्द्वापरादौद्वा-परमादिर्यस्यसः द्वापरादिः कालयुगादिः। तस्मिन्नुशंतनुचक्रवर्त्तिसमकालस्वप्रसिद्धव्यासावतारस्यमहमधीतवान् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यतः श्रीनारायणश्रवणादिविनानसंसारनिवृत्तिस्तस्मात्सर्वात्मासर्वव्यापी। सर्वप्रभाष्टमावदामोवा। भगवान्निरतिशयैश्वर्यादि-गुणवान्ब्रह्मादिचेतनराशिपूज्योवा हरिःस्मरणमात्रेणाशेषसंसारक्लेशसंहर्ता सर्वजगदीश्वरोनित्यभयरूपादस्मात्संसारादभयमीक्ष-मिच्छतापुरुषेणश्रवणादिविषयःकर्त्तव्यइत्यन्वयः श्रवणादित्रयेणाज्ञानसंशयादिनिरासंकरोति "श्रुत्वामत्वातथाध्यात्वातदज्ञानविपर्यय-संशयंचपराणुदलभतंब्रह्मदर्शनं"मितिवचनात् श्रवणेनाज्ञानं। कीर्त्तनापरपर्यायमननेनसंशयविपर्ययौ निरस्यस्मरणलक्षणध्यानेनब्रह्मा-परोक्षज्ञानंलभतइति। श्रोतव्योव्याख्या[illegible]न्यइतिशंकानिरासार्थंश्रवणादीनांचतुर्णामेकविषयत्वं द्योतयितुंसर्वात्मेत्यादिविशेषणचतुष्टय-मुपात्तम् अहंकार[illegible]रूपेणसर्वव्यापित्वेनसर्वात्माकद्रःकिमस्यादित्यतउक्तं हरिर्भगवानिति तथापि पूर्वादन्यतमः किमस्यादतउक्तमीश्वरइति ईशानुग्राह्यइदा[illegible]तस्यरुद्रप्रसिद्धिरपिनिरस्तेतिज्ञातव्यं ॥ ५ ॥

एतदेवसर्ववेदेतिहासे[illegible]तात्पर्येणप्रतिपादितमितिदर्शयति एतावानिति अन्तेमरणकालेनारायणस्मरणंयथास्यात्तथावहुशाखा-ध्यायः कर्त्तव्यइतिभावेनेत्यतोमाह एतावानिति सांख्यशास्त्रोक्तसांख्यनतत्त्वज्ञानेनयोगशास्त्रोक्तभगवत्पूजादियोगानुष्ठानेन तथा स्वधर्मपरि-निष्ठयास्वविहितवर्णाश्रमोक्तस्वधर्मानुष्ठानेनचांतेमरणकालेनारायणस्मृतिरितियावानेतावानियानेवपुंसांपरउत्कृष्टोजन्मलाभः [illegible] सा-फल्यमित्यन्वयः अतोवेदादिशास्त्रेषुप्रियमाणेनसर्वथानारायणस्मरणंकर्त्तव्यंनान्यदितिप्रतिपाद्यमइति अतःप्रष्टुःपरिहारःसुप्रसिद्ध-इतिसिद्धं ॥ ६ ॥

सर्वथानारायणश्रवणादिकार्यमित्यत्रकैमुत्यन्यायमाह प्रायेणेति मुनयःस्वस्वयोग्यज्ञानदंतांविधिनिषेधाभ्यांनिवृत्ताः निर्गुणोभगवान्-तेनदीयमानत्वात्तत्संबंधिनिर्गुणानैर्गुण्यंतत्रस्थामुक्ताहरेर्गुणानुकथनेरमंतइत्यन्वयः गुणान्स्मारंस्मारंकथयंतइत्यस्मिन्नर्थेरमंतिपदं कदा-चिद्ध्यानाभिप्रायेणोक्तंप्रायेणेति अतोज्ञानार्थिभिर्निरंतरंहरिगुणश्रवणादिकार्यमितिकिंवाच्यमित्यर्थः ॥ ७ ॥

इदानींभागवतप्रतिपाद्यमर्थंतस्माद्भारतेत्यादिश्लोकत्रयेणाभिधायपुनस्तद्विस्तरेणवक्तुमुपक्रमते इदमिति श्रुतिस्मृतिइतिहासादिरूपमि-त्युच्यते ब्रह्मसंमितंवेदसमं। तदर्थव्याख्यानरूपत्वात् द्वापरादौकृष्णायनारापेक्षयाद्वापरंभावोच। ननुद्वापरस्यादाविति "व्यासःपट्पञ्चा-शर्षोधृतराष्ट्रमजीजनदितिवचनात् द्वापरान्तेभारतकथाप्रवृत्तिकथनाच्च ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

अभयं सर्वभयनिवारकसर्वानन्दमयपुरुषार्थं गतवानभयं हरिम् इति वक्ष्यमाणात् मर्त्यो मृत्युव्यालभीत इत्यादेश्च ॥ ५—६ ॥

तदेव कैमुत्येन दर्शयति प्रायेणेति ॥ ७ ॥

ब्रह्मसम्मितं नराकृतिपरब्रह्मणः श्रीकृष्णस्य तुल्यं कृष्णे स्वधामोपगते इत्यादेः। द्वापरादौ वृक्षशाखादिवत्तदग्रत्वव्यवहारेण द्वाप-रान्ते इत्यर्थः। यद्वा द्वापर एवादिर्यस्य तत्र तदीयान्ते सन्ध्यांशे इत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

एवंप्रथममिमंचसाधारणं परिहृत्यअभयमिच्छतामुपायमाह। तस्मादिति। यस्मादाद्यएवप्रश्नःसमीचीनः यस्मादन्यविषयकप्रश्नाःसमी-चीनः तस्माद्येषांसंसाराद्भयमस्तितद्भयनिवृत्त्यर्थंचयतंते। तेषामभयमिच्छतांभगवान्श्रोतव्यः। यद्यप्यत्रयुक्तिर्वक्तव्या तथापिग्रहिमुखस्य बुद्धिर्युक्तिमपिनगृह्णातीति स्वभावतोधिकारोवक्तव्यस्तदाह। भारतेति। विशिष्टाधिकारद्योतकं उक्तविश्वासाय दीर्घानित्यगाम्भाया-मिति भरतस्यमायामोहाभावात् तद्धर्मपुरःसरं तद्वंशोत्पन्नानामपि मायामोहाभावात्तुक्तविश्वासः। ननुवैदिकाविधर्माधिनानां अग्निहोत्रा-दीनां आत्मजिज्ञासायां[illegible] कथनंपरित्यज्य कथं भगवच्छ्रवणंविधीयते। वेदवाक्येषुवक्तृणां तस्याविधानादित्यर्थः अर्वाक्कथाकथ्यते। सर्वात्मेति। प्रमाणबलात्प्रमेयबलंमहदित्यग्रेवक्ष्यते प्रमेयेचयुक्तिर्बलिष्ठा तत्रैवयुक्तिः अभयार्थंसर्वस्वैवर्णिकाएवभवंतीतिनास्तिनियमः। अन्येषामपिक्षतपुण्यपुंजानां अभयेच्छासंभवात् अतस्तेषामुपायोवेदेनोक्त इति [illegible]तेनैव साधनेनत्रैवर्णिकानामपि पुरुषार्थ-सिद्धौआवश्यकत्वाल्लाघवायसर्वोपयोग्येकएवोपायोवक्तव्यः। स च सर्वात्मकत्व[illegible]: तद्विषयएवकश्चिद्वक्तव्यः। नहिस्वस्यात्माक-स्यचिदश्रोतव्यः आत्मलाभान्नपरंविद्यते तरतिशोकमात्मविदितिश्रुतेः। तत्र [illegible]बोध्यमाने बाधकस्य वाक्यार्थपर्यवसान-मेवस्यात्। आत्मनःप्रकृतिविकृतिभावाभावाच्च। तस्मात्सर्वेषामेकोय आत्माभवति। [illegible]व्यः श्रुतावप्यात्मपदं सर्वात्मपरम्। ननुजाति-वाचकत्वमात्मपदस्य तथा सतिव्यक्तिरूपस्य स्वस्यगौणत्वेनाश्रोतत्वात् क्रियावत्[illegible]पपत्तभावाच्चनात्मनः कार्यसिद्धिरेव। संज्ञान-व्यात्मज्ञानस्य विद्यमानत्वात् श्रुतौ प्रकारविशेषस्यानुक्तत्वात् ज्ञानार्थं प्रयास[illegible] [illegible]पचारिताभवेत् अतःसर्वात्मैवश्रोतव्यः। तस्यचशारीरस्य च भेदाभावात् न स्वस्यगौणता। किंच फलमतउपपत्तेरितिन्यायेन [illegible]मात्रेणफलम्। किंतु श्रवणादिभिस्तोषितः सन् तत्फलंप्रयच्छति तदभिन्नंमंकंशादिरूपंवास्यात्फलदाने असमर्थमेवस्यात् अतःफलदातृत्वसामर्थ्यरूपएवआत्माश्रोतव्यइत्याह। भग-वानिति। षड्गुणैश्वर्यसंपन्नः ननुभक्तानां प्रतिपन्नः वैदाग्न्यमेवेत्यत्राह [illegible] किंच [illegible]दुःखाभावःसुखंच। तत्र प्रथमंदुःखाभावार्थः

[illegible] तीपरमानंदोनस्यात् । परमानंदंवास्वर्गादिवदुःखानिवृत्तिर्नस्यात् सात्मयोगशिप्त्वेपि फलदातृत्वाद्भगवतःद्वयंप्रयच्छति [illegible] हारपृथक्त्वन्यायोभज्येत अतः श्रवणादेवतादृग्विषयोवक्तव्यः यस्तूभयरूपोभवति तदाह हरिरीश्वरइति । हरित्वेनसर्वदुःख-[illegible] श्वरत्वेन सर्वफलदातृत्वेन च श्रोतव्यः । "तं यथायथोपासत" इति श्रुतेः । अतोधर्मचतुष्टययुक्तत्वेन गुणोपसंहारन्यायेन तादृशः [illegible] तीतिविषयव्यावर्तकधर्मैःपरिच्छिद्य तत्र कर्तव्यमाह श्रोतव्यादित्रयं । नन्वस्यशास्त्रस्यभक्तिफलकत्वात् श्रवणादिकं न धर्मरूपं । [illegible] कथनाच्च । अतोनवविधापिभक्तिःकर्तव्यत्वेनवक्तव्या तत्कथंत्रयमेवोच्यत इतिचेत् सत्यं नवविधभक्तेर्वक्तव्यत्वेपि प्रेमानंतर-[illegible] येषांत्रयमेवोक्तं । त्रिभिःस्नेहजाते अन्येषांकर्तव्यता अनुक्तसिद्धैव । ननुभगवान्श्रोतव्यइतिकोऽर्थः तद्वाचकाःशब्दाः श्रोत्रेण-[illegible] सामर्थ्याज्ज्ञातव्यः । अभिप्रायोवा सर्वैर्वाक्यैःकेषांचिदेववा आद्येविधिर्व्यर्थः प्रमाणावस्तुपरतंत्रत्वेनज्ञानस्य श्रोत्रेन्द्रियवतः[illegible] [illegible] इत्युच्चारितेज्ञानंभविष्यत्येव । गृहीतसंकेतस्यतुपुनःअर्थज्ञानमपिभविष्यति । न च तत्संपादनेयत्नःकर्तव्य इति [illegible] [illegible] तत्संभवात् अथ सर्वदा अशक्यत्वात् जीवनानुपपत्तिश्च । किंच भगवद्वाचकानांसर्वेषां पदवा[illegible] [illegible] [illegible] यत्किंचित्पदवाक्यमात्रस्य सर्वत्रीनीनत्वादवक्तव्यत्वं अथवा शक्तितात्पर्यनिर्धारपूर्वक[illegible] [illegible] सर्वेषांपदवाक्यानामनुपस्थितेःनिर्धारस्याशक्यत्वात्यत्किंचित्पदवाक्यमात्रस्यतु [illegible] इति तापर्यानु[illegible] मेव । [illegible] विषयत्वेनलीलादशविधापुर्वः उक्तेवासुदेवस्यतदर्थपराकृतिः शक्तितात्पर्यनि[illegible]

एवाश्रेतननात्मकेवृत्यां भगवान्दशविधलीलायुक्तः श्रोतव्य अन्यथाविषयवाचक एवचतुष्टयेन [illegible] विदशस्कंधकृतिवैयर्थ्यंच एतावतायुक्तितात्पर्यनिर्धारः सामान्यन्यायेनव्याकरणतन्मीमांसावश्यापेक्षि[illegible] [illegible] पर्ताह-चत्वारोगुणाः अधिकारिफलानुरूपकत्वेनोक्ताः ननुश्रोतव्यत्वेन अवच्छेदकत्वेनैवतदुपयोगात् । गु[illegible] यादशलीलासुसर्व प्रवेशः तथोत्तरत्र वक्ष्यते । अनुप्रवेशोऽपितथाऽनंत्यं तथापिवक्ष्यते । अथात्र त्रयं नविधातव्यं । एकेनैव [illegible] अभयसिद्धेः । नचमिलितानां त्रयाणां साधकत्वं परीक्षितिं तदभावेनाभयाभावप्रसंगात् । श्रवणस्यावैश्यकत्वाच्चनविकल्पेनानेकविधानमिति वाच्यं । अत्रोच्यते । त्रयाणामस्योभयनिर्वाहकत्वेनविधानं तथाहिकीर्तनाविधानेश्रवणमेव ननिर्वहेत । नचाध्ययनविधिवदेकविधानेनान्यप्राप्तिरिति वाच्यं । अध्ययनस्य संस्कारिकर्तव्यत्वेन विधिविनापि वृत्तित्वेन प्राप्तत्वात् । नचात्रतथा श्रवणेनकृतार्थस्य कीर्तनेप्रवृत्त्यनुपपत्तेः तर्हिकीर्तनमेव विधीयतांश्रवणंत्वर्थादेवभविष्यतीति । नापरीक्षिति तदभावात् । अभयेवैलक्षण्याभावाच्च तस्माच्छुकादीनामपि निरपेक्षाणामपि कीर्तने प्रवृत्तिसिध्यर्थं कीर्तनविधानं तदैवश्रवणसिद्धिः । फलंतुप्रत्येकमेव अभयंतुभगवत्प्रवेशरूपं तदैवसर्वभयनिवृत्तेः । तर्हिस्मरणानविधातव्यं नचश्रवणानंतरमस्मरणेविस्मरणात् कीर्तनानुपपत्तिरितिवाच्यं । अन्यलभ्यत्वेन विध्यनुपपत्तेरितिचेत् न सकृत् कृतकीर्तनस्यापि विस्मरणसम्भवात् न कीर्तनशेषत्वेन स्मरणमायाति विहितेतुस्मरणे श्रवणकीर्तने सदाभवतः । दोषांतरप्रसंगश्च किंच त्रयाणांदेह पातपर्यंतमावृत्तानामेवाभयसाधकत्वं उत्तरावधिर्देहपातएव । पूर्वावधिः संसारभयज्ञानं "आवृत्तिरसकृदुपदेशा" दिति न्यायेनस्मरणांतर व्यावृत्त्यर्थं यद्यपि स्नेहजातेआवृत्तिर्नविधातव्या स्वतएवतत्संभवात् । अथापि भस्त्रावत्कदाचिदन्यासक्तिर्भवेत् नचतथासतिअधिकाराभा-वादेवविधिर्व्यर्थइतिवाच्यं तदभावार्थमेवविधानात् । तस्माद्यथासंभवंदेहपातपर्यंतं त्रयाणामावृत्तिःकर्तव्या । ननुमनननिदिध्यासनेकुतो नविहिते ज्ञानसाध्यत्वेनकुतोनोक्तं "ज्ञानादेवतुकैवल्य"मिति श्रुतिविरोधश्च । नचज्ञानस्यार्थात्सिद्धिः । तथासतिज्ञानस्य व्यापारत्वंस्यात् । [illegible] तान्वक्षितत्वाद्वार्तिचेन्न । मनननिदिध्यासनयोरंगत्वेन श्रवणमध्यपातात् । तदत्रैवोत्तरत्रवक्ष्यते ज्ञानंतु शाब्दंसिद्धमेव प्रेम्णाक्रियमाणेत्रिभिर्भगवत्साक्षात्कारोपि संभवति । तथापि श्रवणादीनामेवकारणत्वं । अंतिमसाक्षात्कारस्य तुफलनांतरीयकत्वात् फल-मध्यपातः नत्वाध्यात्मिकश्रवणवत् । श्रवणाद्याहितसंस्कारसध्रीचीनेनमनसाशारीरात्मसाक्षात्कारवत् भगवत्साक्षात्कारोवक्तुंशक्यः । [illegible] वेदैरितिवाक्यात् । नचशारीर साक्षात्कारएवफलं संघातादुद्धृतस्य कैवल्यप्राप्तस्य भगवच्चरणमुख्याधिकारात् । एतावदंशस्तव-सुतत्वमिति ब्रह्मप्रकरणस्थत्वात् ब्रह्मात्मविषयकमेव । भगवतश्च स्वतंत्रत्वात् नान्येनप्रकारेणाविर्भावः संभवति । यत्तुवाक्यात्स्वप्र-[illegible] ब्रह्मात्मभावस्फूर्तिः तेनवासनाविद्यानिवृत्तिः स्वचरितार्थतावा तत्तुज्ञानदुर्बलानांमनोरथमात्रमेव । शुकसनकादीनामपि परिभ्रमणात् तस्मात्सायुज्यएवसर्वभयनिवृत्तिः । ब्रह्मैवसन् ब्रह्माप्येतीति श्रुतिश्चसमनार्थंवक्ति नचोपनिषद्वैयर्थ्यं अस्यैवार्थस्य अधिकारिभेदेन प्रकार-भेदेनविधानात् । फलंत्वेकमेव "तैप्राप्नुवंतिमा[illegible] स्यात् ।" "वेदैश्च सर्वैरहमेव वेद्य" इति च "सर्वेवेदायत्पदमामनंति । तद्विष्णोःपरमपद-मिति च" । तदेवब्रह्मपरमंकवीनामिति च । त[illegible] तप्रकारेण वा भगवतिप्रवेशस्त्रैवर्णिकानां अन्येषांतुभागवतप्रका-रेणैव नत्वत्रास्थिताविकल्पः । किंपुनर्ब्राह्म[illegible] क्लेशोधिकतरस्तेषामिति च । अतएवजातीयप्रतिषेधोपिनास्ति । शांडिल्यस्य तथावचनं पूर्वस्मिन्शुद्धिस्तथ[illegible] दयः । चित्तशोधकानांवैदिकमार्गे क्लेशसंघात् अतः स्वपक्ष स्थापनमात्रपरत्वात्रितरपक्षनिन्दावचनानां [illegible] विरोधः संभवति तस्मात्सूत्रविचारानुसारि वैदिकमार्गेण भागवतमार्गेण वायथाधिकारं सर्वेषांपरमपुरुषार्थप्राप्तेः स[illegible] विशेषविचारस्तुनकर्तव्यः तव्यप्रत्ययस्य विधावविधानात् लिङ्लोट्पंचमल-कारणामेवविधौविधानात् लोकवदप्रसिद्ध[illegible] संभवति भक्तिशास्त्रत्वाच्च फलसाधनतातुतादर्थ्येनविधानात्सम-भिव्याहाराद्वलभ्यते वाक्यार्थस्यापूर्वत्व[illegible] पूर्वमीमांसाभाष्यएव निराकृतः अयंचतव्यप्रत्ययः आवश्यकेविहितः कृत्याश्चेतिसूत्रेण प्रश्नानुगुणश्चायं तस्म[illegible] यथासंभवं त्रयाणामावृत्तिः कर्तव्येति सिद्धं श्रोतव्यः कीर्तित व्यश्च कीर्तितव्यः अंतव्यश्च स्मर्तव्यः प[illegible] चकारद्वयं इच्छतेतिपदात् श्रवणाद्यकरणे अभयमेव नभविष्यति नतु दकरणातः प्रत्यवायोपीति सूचितं [illegible] स्यात् ॥ ५ ॥

स्मरणकीर्तनयोः फलहेतुत्वं साधन[illegible] निराकरणाय तत्रप्रथमंइतरापेक्षत्वात् स्मरणस्य फलसाधकत्वं साधयति एतावानिति पंचसिद्धांताः स्वतंत्रतयाधि[illegible] बौद्धमप्रधानत्वेनोक्तौपशुपति मतस्य कल्पभेदेन तामसपरत्वेन उत्कर्षजनन-[illegible] परं परत्वायदारम्बमुपयोगः क्रममु[illegible] पर[illegible] योगोधर्मशास्त्रं सर्वांगत्वेनप्रतिपादितं स्वतंत्रतयाब्रह्ममीमांसायां

[illegible] ॥ ७ ॥

न केवलं पूर्णपदरमं तेऽहमपि तमेव रमं [illegible] । [illegible] तत्प्रोक्तत्वात् । यद्वा [illegible] रूपरूपादिप्रतिपादकत्वेन भागवतं ब्रह्मवेदस्तेन संमितं तुल्यं । यद्वा ब्रह्मणः सम्मितं प्रमितं यस्मात् [illegible] कर्मपितुर्द्वैपायनाद् [illegible] परमादिर्यस्य सः द्वापरादिः कालयुगादिः । तस्मिन् [illegible] समकालत्वप्रसिद्ध्यर्थं [illegible] ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यतः श्रीनारायणश्रवणादिविना न संसारनिवृत्तिस्तस्मात् सर्वात्मा सर्वव्यापी । सर्वप्रभा [illegible] । भगवानिति [illegible] गुणवान् ब्रह्मादिदेवतनराशिपूज्यो वा हरिः स्मरणमात्रेण [illegible] संसारक्लेशसंहर्ता सर्वज्ञ [illegible] मित्यमयरूपात्तस्मात् संसारा [illegible] मिच्छतां पुरुषेण श्रवणादिविषयः कर्तव्य इत्यन्वयः श्रवणादिविषयेणाज्ञानसंशयादिनिरासं [illegible] "[illegible]" इति वचनात् [illegible] । कीर्तनापरपर्यायं मननं [illegible] निरन्तर [illegible] । [illegible] कानिराशार्थं श्रवणादीनां चतुर्णामेकविषयं [illegible] [illegible] किमस्यादित्यत उक्तं हरिर्भगवानिति तथापि [illegible] [illegible] तिज्ञातव्यं ॥ ५ ॥

[illegible] तात्पर्यं प्रतिपादितमिति दर्शयति एतावानिति अन्ते मरणकाले [illegible] [illegible] एतावानिति सांख्यशास्त्रोक्तसांख्यनतत्त्वज्ञानेन योगशास्त्रोक्त [illegible] पूजादियोगानुष्ठानेन [illegible] निष्ठया [illegible] विहितवर्णाश्रमोक्त [illegible] नेन चान्ते मरणकाले नारायणस्मृतिरिति [illegible] [illegible] मित्यन्वयः अतो वेदादि [illegible] नारायणस्मरणं कर्तव्यं [illegible] इति सिद्धं ॥ ६ ॥

सर्वथा नारायणश्रवणादिकार्यमित्यत्र कैमुत्यन्यायमाह प्रायेणेति मुनयः [illegible] गुणानुकथनेरमं [illegible] प्रायेणेति अतो [illegible] गुणश्रवणादिकार्यमिति [illegible] ॥ ७ ॥

इदानीं भागवतप्रतिपाद्यमर्थं [illegible] पुनस्तद्विस्तरं [illegible] उपक्रमते इदमिति [illegible] ब्रह्मसंमितं वेदसमं । तदर्थव्याख्यानरूपत्वात् द्वापरादौ [illegible] । ननु द्वापरस्य [illegible] "[illegible] [illegible]" इति वचनात् द्वापरान्ते भारतकथाप्रवृत्तिकथनाच्च ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अभयं सर्वभयनिवारकत्वान्न्यभयपुरुषार्थं गतवानभयं हरिम् इति अध्ययनात् मत्र्यो मृत्युव्यालभीत इत्यादेश्च ॥ [illegible] ॥

तदेव कैमुत्येन दर्शयति प्रायेणेति ॥ ७ ॥

ब्रह्मसम्मितं नराकृतिपरब्रह्मणः श्रीकृष्णस्य तुल्यं कृष्णे स्वधामोपगते इत्यादेः । द्वापरादौ [illegible] द्वापरान्ते इत्यर्थः । यद्वा द्वापर एवादिर्यस्य तत्र तदीयान्त सन्ध्यांशे इत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं प्रथममिमं यत्साधारणं परिहृत्य अभयमिच्छतामुपायमाह । तस्मादिति । यस्मा [illegible] प्रश्नः समीचीनः [illegible] चीनः तस्माद्येषां संसाराद्भयमस्ति तद्भयनिवृत्त्यर्थं यतन्ते । तेषामभयमिच्छतां भगवान् [illegible] । यद्यप्यत्र युक्तिर्वक्तव्या तथापि [illegible] बुद्धियुक्तिमपि न गृह्णातीति स्वभावतोधिकारी वक्तव्यस्तत्राह । भारतेति । [illegible] मिति भरतस्य मायामोहाभावान् तद्धर्मपुरःसरं तद्वंशोत्पन्नानामपि [illegible] । मनुर्वेदकार्यविकारविश्रितानां [illegible] दीनां आत्मजिज्ञासायां [illegible] परित्यज्य कथं भगवच्छ्रवणं विधीयते । [illegible] विधानमित्यर्थः [illegible] सर्वात्मेति । प्रमाणबलात्प्रमेयबलं महदित्यग्रे वक्ष्यते प्रमेये युक्तिर्बलिष्ठा [illegible] [illegible] अन्येषामपि क्षतपुण्यपुंजानां अभयं [illegible] अतस्तेषामुपायो [illegible] तेनैव साधनं [illegible] [illegible] सर्वोपयोग्येक एवोपायो वक्तव्यः । स च सर्वात्म [illegible] । [illegible] [illegible] श्रोतव्यः आत्मलाभात्परं विद्यते [illegible] [illegible] बोधकस्य वाक्यार्थ [illegible] मेयत्वात् । आत्मसु प्रकृतिविकृति [illegible] [illegible] सर्वात्मपरम् [illegible] वाचकत्वमात्मपदस्य तथा सति व्यक्तिरूपस्य [illegible] [illegible] ज्यात्मज्ञानस्य विद्यमानत्वात् श्रुतौ प्रकारविशेषस्यानुक्तत्वात् [illegible] तव्यश्च [illegible] च भेदाभावात् न [illegible] फलमतउपपन्नं [illegible] फलम् । किंतु [illegible] [illegible] तत्फलं [illegible] असमर्थ [illegible] [illegible] भातीति । [illegible] ।

[illegible] परमानंदोमस्यात् । परमानंदेवाक्यांदिषु [illegible] सामवेगामिशयत्वादि फलवातृत्वाद्गमतः [illegible] हारपृथक्कृत्यायोभज्यंत अतः श्रवणपदेनांशविषयोविवक्तव्यः यस्तूभयरूपमर्थात तदाह हारीश्वरत्वात । हारत्वेनसर्वदुःख-हरत्वेन सर्वफलदातृत्वेन च श्रोतव्यः । "तं यथायथोपासत" इति श्रुतेः । अतो धर्मचतुष्टययुक्तत्वेन गुणोपसंहारन्यायेन तादृशः [illegible] विषयव्यावर्तकधर्मैः परिच्छिद्य तत्र कर्तव्यमाह श्रोतव्यादित्रयं । नन्वस्य शास्त्रस्य भक्तिफलकत्वात् श्रवणादिकं न धर्मरूपं । [illegible] । अतोनवधाभक्तिः कर्तव्यत्वेनवक्तव्या तत्कथंत्रयमेवोच्यत इति चेत् सत्यं नवविधभक्तेर्धर्मत्वेपि प्रेमान्तर-[illegible] त्रयमेवोक्तं । त्रिभिः [illegible] अन्येषांकर्तव्यता अनुक्तसिद्धैव । ननु भगवान् श्रोतव्य इति कोऽर्थः तद्वाचकाः शब्दाः श्रोत्र-[illegible] अभिप्रायोवा सर्वेषांवाक्येषांचिद्वेषा आद्येत्रिभिरर्थः प्रमाणवस्तुपरतंत्रत्वेनज्ञानस्य श्रोत्रेन्द्रियवत् अतः [illegible] । गृहीतसंकेतस्यतु पुनः अर्थज्ञानमपि भविष्यति । न च तत्संपादने यत्नः कर्तव्य इति [illegible] मभवात् अथ सर्वदा [illegible] जीवनानुपपत्तिश्च । किञ्च भगवद्वाचकानां सर्वेषां [illegible] यत्किञ्चित्पदवाक्यमात्रस्य सर्वे [illegible] अथवा शक्तितात्पर्यनि [illegible] र्वेषांपद [illegible] मनुपस्थितेः [illegible] ष्टार्थकानित्पदवाक्यमात्रस्यतु [illegible] उक्ते वासुदेवस्यतद्धर्मपराकृतिः शक्तितात्पर्यनि [illegible] भगवान् [illegible] लीलायुक्तः श्रोतव्य [illegible] अन्यथा विषयवाचक [illegible] त्वतुष्टयेनैव [illegible] पर्यनिर्धारः सामान्यन्यायेनव्याकरणपूर्वमीमांसा [illegible] अनुग्राः [illegible] कारिफलानुरूपक [illegible] ननुश्रोतव्यत्वेन [illegible] नैवतदुपयोगात् । [illegible] दशलीलासुसर्व प्रवेशः तयोस्तत्र [illegible] । अनुप्रवेशेऽपिपदार्थान्तं तथापि [illegible] । अथात्र त्रयं नविधातव्यं । एकेनैव [illegible] भयसिद्धेः । न चामिलितानां [illegible] परं क्षिति तदभावेनाभावप्रसंगात् । [illegible] कल्पेनानेकविधानमिति वाच्यं । अत्रोच्यते । [illegible] विधानं तथाहि कीर्तनाविधानंश्रवणमेव नानिर्वहेत् । न चाध्ययनविधि [illegible] विधानेनान्यप्राप्तिरिति वाच्यं । [illegible] संसारिकर्तव्यत्वेन विधिंविनापि वृत्तित्वेन प्राप्तत्वात् । न चात्रतथा श्रवणमकृतार्थस्य कीर्तनप्रवृत्त्यनुपपत्तेः तर्हि कीर्तनमेव विधीयतां श्रवणं [illegible] भविष्यतीति । नापरीक्षिति तदभावात् । अभयेवैलक्षण्ययाभावाच्च तस्मात्तुकादीनामपि निरपेक्षाणामपि कीर्तने प्रवृत्तिसिद्ध्यर्थं कीर्तनविधानं तदेव श्रवणसिद्धिः । फलंतुप्रत्येकमेव अभयंतु भगवत्प्रवेशरूपं तदैवसर्वभयनिवृत्तेः । तर्हि स्मरणमत्रविधातव्यं [illegible] नंतरमस्मरणे निस्मरणात् कीर्तनानुपपत्तिरिति वाच्यं । अन्यलभ्यत्वेन विध्यनुपपत्तेरिति चेत् न सकृत् कृतकीर्तनस्यापि [illegible] न कीर्तनशेषत्वेन स्मरणमायाति विहितेतुस्मरणे श्रवणकीर्तने सदा भवतः । दोषान्तरप्रसंगश्च किञ्च त्रयाणांदेह पातपर्यंतमावृत्तानामेवाभयसाधकत्वं उत्तरावधिर्देहपातएव । पूर्वावधिः संसारभयज्ञाने "आवृत्तिरसकृदुपदेशात्" इति न्यायेन स्मरणांतर व्यावृत्त्यर्थं यद्यपि [illegible] विधातव्या स्वतएवतत्संभवात् । [illegible] भरतवत्कदाचिदन्यासक्तिर्भवेत् न च तथासति अधिकाराभा-[illegible] इतिवाच्यं तदभावार्थमेवविधानात् । तस्माद्यथासंभवं देहपातपर्यंतं त्रयाणामावृत्तिः कर्तव्या । ननु मनननिदिध्यासनं कुतो न विहितं ज्ञानसाध्यत्वेन कुतोनोक्तं "ज्ञानादेवतु कैवल्य" मिति श्रुतिविरोधश्च । न च ज्ञानस्यार्थात्सिद्धिः । तथा मतिज्ञानस्य व्यापारत्वंस्यात् । [illegible] विवक्षितत्वाच्चेति चेत् । मनननिदिध्यासनयोरंगत्वेन श्रवणमध्यपातात् । तत्रैवोत्तरत्र वक्ष्यते ज्ञानंतु शाब्दंसिद्धमेव [illegible] क्रियमाणेषु भगवत्साक्षात्कारोपि संभवति । तथापि श्रवणादीनामेवकारणत्वं । अंतिमसाक्षात्कारस्य तु फलनांतरीयकत्वात् फल-[illegible] न चात्यन्तिक श्रवणादेः । श्रवणाद्याहितसंस्कार [illegible] मनसाशरीरात्मसाक्षात्कारवत् भगवत्साक्षात्कारोऽवश्यंभावी [illegible] निवर्तकत्वात् । न च शारीर साक्षात्कारएवफलं संघातानुप्रतस्य कैवल्यं प्राप्तस्य भगवच्चरणामुख्याधिकारात् । एतावदंशस्तत्व-[illegible] तस्यमिति ब्रह्मप्रकरणस्थत्वात् ब्रह्मात्मविषयकमेव । भगवतश्च स्वतंत्रत्वात् नान्येनप्रकारेणाविर्भावः संभवति । यस्तुवाक्यात्ब्रह्म [illegible] भावस्फूर्तिः तेनचासर्वाविद्यानिवृत्तिः [illegible] तावानुज्ञानतुर्यत्रामीमनोरथमात्रमेव । शुकसनकादीनामद्यापि परिभ्रमणात् तस्मात्तत्त्वविषयकमनर्थभयनिवृत्तिः । ब्रह्मैवसन् [illegible] इति श्रुतिश्चतमेवार्थवक्ति न चोपनिषदांवैयर्थ्यं अस्यैवार्थस्य अधिकारिभेदेन प्रकार-भेदेनविधानात् । फलैकमेव "तेप्राप्नुवंतिमा [illegible] "वेदैश्च सर्वैरहमेव वेद्य" इति च "सर्वेवेदायत्पदमामनंति । तद्विष्णोः परमपद-मिति च" । तदेवब्रह्मपरमंकवीनामिति च । [illegible] तप्रकारेण वा भगवत्प्रवेशस्यशिकानां अन्येषांतु भागवतप्रका-[illegible] व्यवस्थितविकल्पः । किंपुनर्ब्राह्म [illegible] शोधिकतरस्तेषामिति च । अनिकेषांतुर्थप्रतिबंधोपिनास्ति । [illegible] तथावचनं पूर्वंचित्तशुद्धिस्तथ [illegible] दयः । चित्तशोधकानांवैदिकमार्गे क्लेशसाध्यत्वात् अतः स्वपक्ष [illegible] परत्वादितरपक्षनिन्दापरत्वात् [illegible] भवति तस्मात्सूत्रविचारानुसारि वैदिकमार्गेण भागवतमार्गेण [illegible] सर्वेषांपरमपुरुषार्थप्राप्तेः स [illegible] रस्तुनकर्तव्यः तव्यप्रत्ययस्य विधावविधानात् लिङ्लोट्प्रभृतिमल [illegible] विधानात् लोकवत्प्रसिद्ध [illegible] संभवति भक्तिशास्त्रस्य फलसाधनतातुनावश्यमविधानात्सम-[illegible] वाक्यार्थस्यापूर्वस्य [illegible] मीमांसाभाष्यएव निराकृतः अयंतव्यप्रत्ययः आवश्यकेविहितः [illegible] प्रमानुगुणाश्चायं तस्म [illegible] यथासंभवं त्रयाणामावृत्तिः कर्तव्येति सिद्धं श्रोतव्यः कीर्तित [illegible] व्यः स्मर्तव्यः [illegible] कारणं इच्छतेति पदात् अपवाद्यकरणे अभयमेव न भविष्यति नतु [illegible] सूचितं [illegible] त्वात् ॥ ५ ॥

[illegible] फलहेतुत्वं साधन [illegible] याय तत्रप्रथमं तत्र [illegible] त्वात् स्मरणस्य फलसाधकत्वं साधयति [illegible] सिद्धान्ताः स्वतंत्रतया [illegible] मप्रधानत्वेनोक्तोपशुपति मतस्य कल्पभेदेन तामसपरत्वेन उत्कर्षजनन-[illegible] पदे [illegible] नुपयोगः कमनु [illegible] मार्गोधर्म [illegible] सर्वांगत्वेनप्रतिपादितं अतः एतयाब्रह्ममीमांसाया

[illegible] स्मरणं [illegible]

[illegible] परोजन्मलाभः [illegible] पेयादिविधिप्रकारेण [illegible] तथापि मुर्खानां [illegible]
इत्यादिप्रयत्नेनजन्मसंसिद्धः स्ततोयातिपरांगति मित्युपसंहारात् योगिनाम्यपि [illegible] बहूनां जन्मनामंते [illegible]
तइति वाक्यात् ज्ञानिष्ठयोप्यधिकामनइति योगप्रशंसावाक्याच्च [illegible] तमजन्मसाधकत्वं [illegible] भगव[illegible]णामपि [illegible]
साधकत्वं अतोऽन्यमद्देहे सर्वे उपसर्गाः न त्वसौ विदेहः स्वरूपभूतः [illegible]फलसाधकः [illegible]मतिः [illegible]गतिरिति न्यायात् [illegible]
भावमिति भगवद्वाक्याच्च अंतेभगवत्स्मरणाहेतुत्वेन तदुपयोगः [illegible] कस्मिश्चिदपि देहे अंते भगवत्स्म[illegible]
तदापूर्वात्परबलीयस्त्वमितिन्यायनसएवदेहः अंतिमोपि अंतिमत्वमापद्यमानः लाभत्वेनसंपद्यते योगादयश्च [illegible] दूरफ[illegible]
[illegible]प्रविशंति: अतोदेहसाधकानांयोगादीनां देहस्य चायमेवलाभः यदंतेनारायणस्मृतिरिति अतोऽस्य साक्षाद्भगवत्प्रबंध[illegible]
विधिशेषतया श्रुतिसंवादापेक्षितः यद्यपिभगवदीयत्व मपिजन्मलाभः तथापिततोप्ययंपरः पुंसामिति साधारणानामपि अतीम[illegible]
स्मरणस्य सर्वदाभगवान्स्मर्तव्यइति सिद्धं ॥ ६ ॥

इदानींकीर्तनस्य तथात्वंसाधयति प्रायेणेति कीर्तनंतु ततोप्यधिकं नेममंति नैजन्मजा जीवन्मुक्ताः केवलगुणातीताएव [illegible]
पुनरावृत्तिसंभावनारहिताः तेपिहरेर्गुणानुकथने श्रवणानंतरभाविनि कीर्तनेपरमानंदरसमुपलभमानाः साधनदशायामेवंसुखं [illegible]
[illegible]दशायांकीदृशं सुखं भविष्यतीतिमन्यमानाः रमंतेस्मेतिप्रसिद्धेः केवलपुनः मननएवपर्यवसिताः [illegible] अर्द्ध[illegible]
[illegible] भावावतरमन्ते तद्व्यावृत्त्यर्थं । प्रायग्रहणम् राजन्निति संबोधनम् तद्भूत शमीकस्मरणाय [illegible]
[illegible] तेहिकृतिगुणदोष संबंधरहिताः तदाह निवृत्ताविधिनिषेधतइति विधिसहिता निषेधाच्चिवृत्ताः इदंतया[illegible]
[illegible] भयातीतवाक्यात् विधिसहितनिषेधकथनेन च एतद्ज्ञापयति बुधोबालकवत् क्रीडेदिति
वाक्यानि यद्यपि विधिकल्पानि तथाप्यस्याग्रेनिषेधाभावाच्चैतेषांग्रहणमिति नैर्गुण्येगुणत्रयातीते [illegible]स्थिताः विरोधाभासबोधनार्थं
गुणग्रहणं तस्मात्स्वतंत्र पुरुषार्थत्वात्कीर्तनेशंकापि नकर्त्तव्या ॥ ७ ॥

एवं गुणत्रयं समर्थयित्वा त्रयस्यापि पुरुषार्थसाधकत्वेसाधिते युक्तिमूलकमिदमप्रामाणिकमिति शंकास्यात् [illegible]
इदमिति पुराणमिति प्रमाणंभागवतंनामेति तदवांतरभेदः यौगिकत्वायन्तेन प्रोक्तंभगवत्प्रतिपादकं भगवत्फलकं चेति अस्य दुर्व-
कत्वं वारयति ब्रह्मणावेदेनसंमितं परब्रह्मणासम्यक् मितंज्ञातं यत्र गुरु परम्परामाह पितुर्द्वैपायनादिति तदानींतनकालस्य प्राणिबुद्धि-
नाशकत्वमाह द्वापरादाविति द्वापरस्यादौतदानीमपि क्षिप्रबुद्धिमेजाताः अन्धीतवानिति वेदवत् नियमेन अर्थबोधपूर्वक [illegible]
पितुरिति पितैवोपनयेत्पुत्रमिति न्यायेनउपयनाध्यापनयोरेक कर्तृकत्वात् अध्ययनप्रकारः सर्वोपिसुसम्पन्नइति सूचितं ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

अतः कृतार्थीभवितुं कर्म्मादिकमकुर्व्वाणा भक्तिमेव कुर्व्वीरन्नित्याह तस्मादिति । हे भारतवंश्य अभयं [illegible]
पुंसा हरिः श्रोतव्यः । अत्र हरिरिति विशेष्यपदम् । सर्व्वात्मादिविशेषणानि [illegible] मोक्षाभिसन्धिनी रागानुगा वैधी च [illegible]
तत्र प्रथमायाम् अभयं मोक्षम् इच्छता सर्व्वेषामात्मा परमात्मा हरिः श्रोतव्य इति । द्वितीयायाम् अभयं निष्कम्पं [illegible]
इच्छता लाभवता पुंसा भगवान् अतिसुन्दरो नन्दसूनुः श्रोतव्य इति "भगं श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्त्तिषु" इत्यमरः । [illegible]
न बिभेत्यस्मादित्यभयो हरिरेव मुहूर्त्तात् सर्व्वमुत्सृज्य गतवानभयं हरिम् इत्यभिमन्त्रोकरछन्दम् इच्छता [illegible]
इच्छता वा ईश्वरो हरिरीशितव्येन पुंसा श्रोतव्य इत्यादि । कीर्त्तितव्यश्च स्मर्त्तव्यश्चेति चकाराभ्यां श्रवणानन्तरं कीर्त्तन[illegible]
कालत्वं विहितमिति श्रोतव्यादिप्रश्नस्योत्तरमुक्तम् ॥ ५ ॥

ज्ञानिकर्म्मिप्रभृतयोऽन्येऽपि साधुसङ्गवशात् यदि भक्ता भवन्ति न पुनः कर्म्मादिकं कुर्व्वन्ति तदा तेऽपि कृतार्था इत्याह एतावा-
निति । सांख्ययोगस्वधर्म्मनिष्ठाभिरिति विशेषणे तृतीया जटाभिस्तापसमद्राक्षीदितिवत् । तथाच तैर्विशिष्टानां पुंसामेतावान् जन्मनो
लाभः परः श्रेष्ठः । कोऽसौ अन्ते प्रत्यासत्तिन्यायेन ज्ञानयोगकर्म्मणामवसाने [illegible]प्रभृतीनामिव नारायण-
स्मृतिः शुद्धा भक्तिः यदि स्यात् । अन्ते इति यदि पुनरपि भक्ति लब्ध्वा ज्ञानादिषु [illegible] न भवन्तीत्यर्थः । अत एवमेव [illegible]
[illegible] यजतामिह निःश्रेयसोदयः । भगवत्यचलो भावो यद्भागवतसङ्गतः [illegible] इति । अन्यत् एवान्ते नारायणस्मृतिः परो [illegible]
केचिदाहुः ॥ ६ ॥

संसिद्धिस्तु भगवद्रूपगुणमाधुर्य्यानुभव एव स च ब्रह्मसायुज्यादप्यतिश्रेष्ठ इति महदनुभवप्रमाणमाह प्रायेणेति । विधिनिषेधतः
विधिनिषेधाभ्यां निवृत्ता नैर्गुण्ये स्थिता मुक्ता अपीत्यर्थः । गुणानुकथने एव रमन्ते न तु निर्व्विशेषब्रह्मसुखेऽपीत्यर्थः । प्रायेणेति क्वचि-
दन्ये जीवन्मुक्तास्ततो निकृष्टाः सायुज्यार्थं गुणानुकथनं कुर्व्वन्ति न तु तत्र रमन्ते ॥ ७ ॥

किमिदमद्भुततरमपूर्व्वं कथयसि । सत्यम् । अपूर्व्वमेवेदमित्याह । भागवतं भग[illegible] कृतं भगवता प्रोक्तं वा भगवत [illegible]
[illegible] इदं युष्मदस्मत्प्रश्नोत्तर[illegible]श्रीभगवल्लीलामयमद्भूतयुष्म[illegible]
[illegible]रूपमर्वाचीनमेव मत्पित्रा बादरायणेनाविर्भावितम् । ब्रह्मसम्मितं [illegible] मितं येनेति वा । [illegible]
अत आह अधीतवानिति । अस्य शास्त्रस्यार्थो बुद्धिबलेन स्वयं ज्ञातुमशक्य इति [illegible]
प्रादुर्भावात् द्वापरादाविति न सङ्गच्छते । [illegible] द्वापरान्त [illegible]
[illegible]र्थोव्याख्येयः ॥ ८ ॥

गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥ ९ ॥
तदहं तेऽभिधास्यामि महापौरुषिको भवान्।
यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती ॥ १० ॥
एतन्निर्विद्यमानानामिच्छतामकुतोभयम्।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्त्तनम् ॥ ११ ॥
किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह।
वरं मुहूर्त्तं विदितं घटेत श्रेयसे यतः ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

अथ यच्छ्रोतव्यमथो जप्यं यत्कर्तव्यं नृभिः प्रभो। स्मर्तव्यं भजनीयं वेति प्रश्नपञ्चकस्योत्तरमाह। तस्मादिति तस्मात् [illegible] निवेदेन मुखा [illegible]। हे भारत अभयं हरिपदमिच्छता मुमुक्षुणा हरिः स्वपदप्राप्तिप्रवर्तक [illegible] हरिर्हरति पापानि दुष्टचित्तैरपि स्मृत इत्यादिस्मृति प्रसिद्धः श्रोतव्यः गुरुमुखात् कीर्तितव्यश्च शिष्यादिभ्यः हरये नम इत्येवमुखैः कीर्तितव्यश्च [illegible] मूर्तिस्तु [illegible] कीर्तितव्यः। अथ जप्यमित्यस्योत्तरमुक्तम् स्मर्तव्यः चकाराद्भजनीयः सेवनीयः द्वितीयचकारात् [illegible] सर्वक्रियाभिराराधनीय इत्यन्वयः। तत्र हेतुप्रदर्शनार्थं हरिं विशिनष्टि सर्वात्मा [illegible] श्रीमुखोक्त [illegible] निःसमानातिशयः यदन्यो भजनीयो नास्तीत्यर्थः "मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय" इति स्मृतेः। तमेवैकं [illegible] श्रुतेः भगवान् स्वाभाविकषडैश्वर्यसम्पन्नः। ईश्वरः नियन्ता सर्वभक्तकामपरिपूरक इति पदद्वयार्थः ॥ ५ ॥

हरेरेव भजनीयत्वं तद्भजनस्य परमपुरुषार्थत्वं चोपपादयन् योगत्रयस्य भगवत्स्मृति साधनत्वमाह। एतावानिति "एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु" इति श्रीमुखवचनात्। सांख्यशब्दः ज्ञानवाचकः योगशब्दश्च निष्कामकर्मयोगवाचकः ज्ञानयोगेन निष्कामकर्मयोगेन स्वधर्मपरिनिष्ठया भक्तियोगनिष्ठया च। अन्ते प्राणप्रयाणसमयेपि नारायणस्मृतिः इत्येतावानेव पुंसां परउत्कृष्टः जन्मनो लाभः ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन्देहं स याति परमां गतिमिति स्वस्मृतिफलं च स्वमुखेनैवोक्तम् ॥ ६ ॥

हरिभजनानन्देनिमग्नानाम प्राप्तविधिनिषेधावसराणां महामुनीनामाचारं चात्र प्रमाणयति प्रायेणेति नैर्गुण्यस्थाः प्राकृतगुणास्पृष्टब्रह्मनिष्ठाः मुनयस्तन्मननैकस्वभावाः हरिस्यावैकनिष्ठाः हरेर्गुणानुकथनमुपर्क्षणमन्येषां भजनप्रकाराणाम्। अतो विधिनिषेधतो विधिनिषेधाभ्यां निवृत्ताः [illegible] त्र किमुत विषयजेऽथस्य निषिद्धस्यावकाशो नास्तीति वक्तव्यमिति। अतएवोक्तं पुराणान्तरे "स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् सर्वे विधिनिषेधाः स्युरेतयोरेव किंकरा" इति प्रायेणेत्यविधानिषेधौ लोकसंग्रहाय [illegible] तया वर्णितं इत्यर्थः ॥ ७ ॥

[illegible] व्यतिरिक्तमवणादिकमनुपादेयं तच्छ्रवणादिकं चोपादेयमित्युक्तमथ तच्छ्रवणादिनिष्ठापादकं शास्त्रं श्रावयितुं प्रतिजानीते इदमित्यादि त्रिभिः। भगवता वेदव्यासेन प्रोक्तं भागवतम् ब्रह्मणा वेदेन संमितं तुल्यम् पितुर्वेदव्यासात् द्वापरआदिर्यस्य द्वापरान्तस्य तस्मिन्काले अहमधीतवान् ॥ ८ ॥

भाषा टीका।

भारत ! इसीसे अभय इच्छा करनेवाले पुरुषों को भगवान् ही सर्वात्म भावसे श्रोतव्य कीर्तितव्य और स्मर्तव्य हैं ॥ ५ ॥
[illegible] पुरुषस्य [illegible] पातालं पादमूलं पादस्याधोभागं [illegible] पठन्ति पातालं [illegible] । पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागरसातलं [illegible] । विश्वसृजः [illegible] ॥ २६ ॥

विश्वमूर्त्तेर्जानुनी सुतलं । [illegible] महीतलं भूर्लोकं [illegible] लोकं [illegible] ॥ २७ ॥

[illegible] ज्योतिर्गणमयूखं [illegible] महर्लोकः [illegible] जनलोकः [illegible] तपोलोकं ररादिं ललाटं सत्यं सत्यलोकं शीर्षाणि शिरां [illegible] उपासकाः ॥ २८ ॥

भाषा टीका ।

इस [illegible] संयुक्त ब्रह्माण्ड शरीर में जो यह विराट् अन्तर्यामी भगवान् पुरुष हैं यही धारणा के आश्रय हैं ॥ २५ ॥

विराट् अन्तर्यामी की धारणा में ब्रह्माण्ड के स्थूल पदार्थों को श्रीभगवान् के अङ्गों में ध्यान करते हैं उसका यह प्रकार है पाताल इसका पाद मूल है रसातल एड़ी और पैरों का अग्र भाग हैं महातल विश्वसृष्टा भगवान् का गुल्फ है तलातल पुरुष के जङ्घा हैं ॥ २६ ॥

विश्व मूर्त्ति का सुतल दोनों जानु हैं वितल अतल दोनों ऊरु हैं हे महीपते ! महीतल उसका जघन [illegible] नाभि [illegible] ॥ २७ ॥

[illegible] इसका उरस्थल है महर्लोक ग्रीवा और जनलोक मुख है । तपोलोक आदि पुरुष का ललाट है सत्यलोक [illegible] के शिर हैं ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

[illegible] देवाः तेजोमयत्वात् [illegible] ॥ २९ ॥

[illegible] प्रस्थहना। परमेष्ठिधिष्ण्यं ब्रह्मपदम्। तालु: अधि-[illegible]
[illegible] द्विजानि दन्ता: यमदंष्ट्रमार्थम्। दुरन्त: अपार: सर्ग इति [illegible]
[illegible] ॥ ३१ ॥
[illegible] पृष्ठभाग:। क: प्रजापति:। [illegible] ॥ ३२ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी।

[दंष्ट्रा दीक्ष्णाग्रदन्तविशेष:। 'हाढ़ा' इति हिन्दीभाषा: ॥ ११—३४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका।

इन्द्रादयउक्ता: इत्याबाहवस्त्वाहु: अमुष्यकर्णौश्रोत्रेन्द्रियाधिष्ठानभूतकर्णविलेदिश: तदधिष्ठेयंश्रोत्रेन्द्रियन्तुशब्द: ध्वन्यात्मको-वर्णात्मकश्च एवमग्रेपि परमस्यसमाध्यधिकरांहतस्यनासापुटेनासत्यदस्रावश्विनौगन्ध: शान्तोग्रादिरूपेणानाविधोगन्ध: तदिन्द्रियं-घ्राणं दीप्त: अग्निस्तस्यमुखं ॥ २९ ॥

द्यौर्लोक: आक्षिणीनेत्रगोलकं तत्रचक्षुरिन्द्रियंपतङ्ग: सूर्य: विष्णोर्वैराजस्य पक्ष्माणिउभेऽहनीअहोरात्र: तस्यवैराजस्यभ्रूविजृम्भ: भ्रूविक्षेप: भ्रूविलासइतियावत् परमेष्ठिधिष्ण्यंपरमेष्ठिन: चतुर्मुखस्यस्थानमस्यवैराजस्यतालुआप: तदभिमानिवरुण: अस्यजिह्वा-रस: ॥ ३० ॥

अनन्तसर्वविविधपरिच्छेदशून्यमन्यशिरश्छन्दांसिगृणन्तिदंष्ट्रायम: द्विजानि दन्ता: नपुंसकत्वमार्षं स्नेहकला: [illegible] दादीनांस्नेहकलावैराजस्यदन्तास्त्यर्थ: तस्यहास: दुरन्तजनोन्मोहकरीमाया आश्चर्यशक्ति: मायाशब्दस्यसर्वत्रानुगतंप्रकृतिनिमित्तमा[illegible]-मेव तथाविस्मयनीयस्वरूपं तथानानाविधकार्यकरत्वात् यस्यापाङ्गमोक्ष: दुरन्तसर्ग: अपारसर्ग: ॥ ३१ ॥

व्रीडाउत्तरोष्ठ: अधर: अधरोष्ठ: लोभ: धर्म: स्तन: अधर्मपथ: अधर्ममार्ग: अस्यपृष्ठ: पृष्ठभाग: तस्यवैराजस्यमेढ्र: प्रजापति: वृषणौमित्रावरुणौसमुद्र: कुक्षिरस्थिपञ्जरयस्तस्यास्थिसङ्घा: ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

इन्द्रादयोलोकपालास्तस्यबाहवस्त्याहु: दिश: कर्णौगोलकस्थानीयौ। अमुष्यहरे: श्रोत्रमिन्द्रियं शब्दइति। नासत्यदस्रावश्विनौ-नासिके गन्धोभूमेर्गुण: घ्राणशब्दःघ्राणेन्द्रियंगन्धजनकमाहुरित्यर्थ: दहनं दीप्त: ॥ २९ ॥

द्यौर्लोक:। अक्षिणीगोलके पतङ्ग: सूर्य: मनुष्याणामहर्नादयदीनामहर्नीइतिउभेचविष्णो: पक्ष्माणितताजातिनदाभिरेव परमेष्ठि-धिष्ण्यंब्रह्मलोक: मधुराविरस: ॥ ३० ॥

अनन्तपारश्छन्दांसिगिरोयबानिगृणन्ति अर्यमन्तूसूर्यश्चन्द्रौदंष्ट्रयाज्ञानाविनिशेष: मद्रूपत्वान्पुनर्वचनं। बहुस्नेहबहुत्वतहारि-वचनात् उष्णगाश्चनक्षत्राणि द्विजानि दन्ता: अत्रप्रगृह्यसञ्ज्ञाऽभावोलिङ्गव्यत्ययश्चवैलक्षण्यद्योतनायेतिज्ञातव्यं मायामोहनशक्ति: हासोहा-सापाङ्गमोक्षा सप्तसुप्रथमेतिसूत्रात् दुरन्तसर्गोऽनवसानविश्वसृष्टि: ॥ ३१ ॥

व्रीडाउत्तरोऽधरोष्ठ:। एवशब्दोऽन्ययोगव्यवच्छेदक: क: प्रजापति: मेढ्रमिन्द्रियं वृषणौबीजद्वयंमित्रइत्युपलक्षणंवरुणश्च ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ:।

इन्द्रादय इति। अत्र टीकायाम् एवं नासिकादिष्वपि इति प्रायिकमेव, चक्षुषि व्यभिचारात्, न च हि सूर्यस्यैव हि गोलकस्येव प्रकाशकत्वात्। तदेवमत्र युक्तिर्नानुसन्धेया किन्तु उप[illegible]ासनैव कारणमिति सर्वं समञ्जसम् ॥ २९ ॥

आप: तदधिष्ठाता वरुण: ॥ ३०—३८ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

एवं लीलानामासनिवंसमुक्तातमन्यान जीवानांसन्निधे ह इन्द्रादयस्त्यादिना यद्यपितेषां स्थानंतन्निधित्र्व्यर्णादकमवनि तथापित्रियतत्वान्जीवानांवन्मानिरूपणं। यतादेवा: सर्वधुलोकेषुपरिभ्रमन्ति। भगवाभगवदिन्द्रियाणां आधारत्वेनभावण्यर्नोनितत्त्व-रूपत्वादिन्द्रियरूपत्वं। आधिदैविकास्तेदेवा: अन्येऽपितत्प्रकारानिकापिनाइतमञ्च रूपादय इन्द्रादयोदेवा: उक्ता: कर्मफलदातार: भाग-वतमुखसदोवर्जनाव्यन्तं उतऊर्ध्वं मरणातऊर्ध्वमनन्तरूपंदार्तावत्यत्तवानिरूपणात्। भगवद्वाहवेश्चफलदातार:। भगवत:कर्णौब्रह्माण्ड-छिद्राणि। ब्रह्माण्ड सम्भवत: श्रोत्रमिन्द्रियं। नासत्यदस्रौअश्विनौनासे। परमस्यनासिकाद्वयं। परमस्यपदस्य यज्ञरूपतत्कृतोपकारात् भगवदिन्द्रियाधिष्ठातार: भगवदिन्द्रियगोलकानि। विषयास्त्विन्द्रियं। गन्ध:अस्यघ्राणं। दहनोज्वलनोग्नि: अतोभगवन्मुखंयदयज्ञ-[illegible] ॥ २९ ॥

द्यौ: स्वर्गलोक:। शिशुमारस्थानभूत:। अक्षिणीगोलके। चक्षुरिन्द्रियंपतङ्ग: सूर्य:। पतङ्गमेवगतीति। चक्षुरपिभगवतीयंत्वस्मिन् [illegible] यस्यपक्ष्माणिभवन्ति। उन्मीलननिमीलनकर्तृणि। विष्णोरतिकालरूपस्य। यज्ञरूपस्यवा। अहनीराऽत्र्यहनी। उभेमुहूर्तैव मनुष्यभेदेन। चक्रपालितब्रह्माण्डेऽपि परमेष्ठिधिष्ण्यंब्रह्मस्थानं। सत्यलोकस्थित। तस्यभगवतोभ्रूविजृम्भ:। भ्रूभ्रमि-

[illegible] विभूतय [illegible]

[illegible]

छन्दांसि [illegible] [illegible]

[illegible]कला: । [illegible] द्विजा [illegible]

[illegible] यथा [illegible] ॥ ३१ ॥

[illegible]

[illegible] मतस्तुन: [illegible] [illegible]

[illegible] प्रजापति: मेढ्ऋषि: [illegible] [illegible] [illegible] [illegible]

[illegible] वंक्षव: ॥ ३२ ॥

श्रीमद्[illegible]

उस्रा: देवा:, इन्द्रादयो देवा बाहव इत्याहु: । दिशः [illegible] देवता: [illegible] [illegible] [illegible] एवमेव सर्वत्र [illegible] । [illegible] [illegible] दिग्देवता [illegible] [illegible] इन्द्राधिष्ठाउयो देवताश्च स्युरिति कार्यकारणयोरभेदोपचारादैक्येन दिक्शब्दादिभि: समष्टिविराजोऽस्य [illegible] [illegible] देवा । [illegible] अग्निर्नो मासे मासापुटे । [illegible] ॥ २९ ॥

[illegible] अन्तरिक्षं [illegible] सूर्यो [illegible] अभिकल्पं । [illegible] [illegible] इति [illegible] [illegible] । [illegible] [illegible] न तु सूर्ये उच्यते, [illegible] [illegible] [illegible] [illegible] [illegible] वायु: [illegible] [illegible] ॥ इत्याद्यभिमवाक्यविरोधात् । [illegible] [illegible] [illegible] परमेष्ठिधिष्ण्यं ब्रह्मपदम् । आप: [illegible] तालु: अधिष्ठानम् । जिह्वा [illegible] ॥ ३० ॥

छन्दांसि वेदा: । शिर: [illegible] । [illegible]: पूर्वाद्[illegible] द्विजानि दन्ता: [illegible] । [illegible] [illegible]

धर्म्म स्तनो [illegible], धर्म: [illegible] इत्युक्त: । क: प्रजापति: मेढ्ऋषि: । [illegible] [illegible] [illegible] ॥ ३२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप: ।

इन्द्रादयश्च [illegible]देवा: बाहवइत्याहु: । दिश: [illegible] [illegible] [illegible] । अस्मदादि [illegible] [illegible] [illegible] मासेमासापुटे । [illegible] [illegible] ॥ २९ ॥

द्यौर्लोक: । [illegible]: । सूर्यश्चक्षुरिन्द्रियम् [illegible] । [illegible] [illegible] [illegible] [illegible] । आप[illegible] तालुरधिष्ठानम् । रस:जिह्वेन्द्रियम् ॥ ३० ॥

[illegible] छन्दांसि वदाव । [illegible] । [illegible]: [illegible] [illegible] । [illegible] [illegible] दुरन्तसर्ग: अपार: [illegible] [illegible]

[illegible] अधर्मपथ: अधर्ममार्ग: [illegible] पृष्ठभाग: क: प्रजापति: [illegible] [illegible] ॥ ३२ ॥

भाषा टीका ।

इन्द्रादिक देवगण बाहु है, दिशा कर्ण है, इन सबका शब्द उनका श्रोत्र है, [illegible] [illegible] [illegible] और दीप्त अग्नि इनका मुख है ॥ २९ ॥

द्यौ (अन्तरिक्ष) उनकी आंखे है पतङ्ग (सूर्य) चक्षु है, [illegible] [illegible] [illegible] जल उनका तालु और रस जिह्वा है ॥ ३० ॥

वेदों को भगवान का शिर कहते है । [illegible] [illegible] कराहमाया को दुरन्त सर्ग कहते है ॥ ३१ ॥

लज्जा भगवान के ऊपर का ओष्ठ, लोभ अधर, [illegible] धर्म स्तन और अधर्म पृष्ठ है । प्रजापति मेढ्र ([illegible] समुद्र कुक्षि और पर्वत अस्थि समूह है ॥ ३२ ॥

नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र ।
अनन्तवीर्य्यः श्वसितं मातरिश्वा गतिर्वयः कर्म्म गुणप्रवाहः ॥ ३३ ॥
ईशस्य केशान् विदुरम्बुवाहान् वासस्तु सन्ध्यां कुरुवर्य्य भूम्नः ।
अव्यक्तमाहुर्हृदयं मनश्च स चन्द्रमाः सर्व्वविकारकोषः ॥ ३४ ॥
विज्ञानशक्तिं महिमामनन्ति सर्व्वात्मनोऽन्तःकरणं गिरित्रम् ।
अश्वाश्वतर्य्युष्ट्रगजा नखानि सर्व्वे मृगाः पशवः श्रोणिदेशे ॥ ३५ ॥
वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः ।
गन्धर्व्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्य्यः ॥ ३६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अनन्तं वीर्य्यं यस्य सः । वयः कालः तस्य गमनम् । गुणप्रवाहः प्राणिनां संसारः कर्म्म तस्य क्रीड़ा ॥ ३३ ॥

भूम्नः विभोः । अव्यक्तं प्रधानम् । सः प्रसिद्धः चन्द्रमाः तदीयं मनः सर्व्वेषां विकाराणां कोष इवाश्रयभूतम् ॥ ३४ ॥

विज्ञानशक्तिं चित्त । महिं महत्तत्त्वम । अन्तःकरणम । गिरित्रं श्रीरुद्रम । गर्द्दभात् वड़वायामुत्पन्ना अश्वतरी ॥ ३५ ॥

वयांसि पक्षिणः तस्य व्याकरणं नामरूपं व्याकरवाणीति श्रुत्युक्तं विचित्रं शिल्पनैपुणयम् । यथाहुः—येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः । मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ इति । मनुः स्वायम्भुवः मनीषा बुद्धिः । मनुजः पुरुषः निवास आश्रयः, पुरुषश्च वाविस्तरामात्मा इति श्रुतेः । गन्धर्व्वादीनां छन्द्वषयं गन्धर्व्वादयः स्वरस्मृताः षड्जादिस्वरस्मृतय इत्यर्थः । असुरानीक वीर्य्यं यस्य । स्वरः स्मृतिरसुरानीकवर्य्यं इति पाठे गन्धर्व्वादयः स्वरः असुरसमूहश्रेष्ठः प्रह्लादः स्मृतिस्तस्येति ॥ ३६ ॥

———

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

[नखानि नखोपलक्षितानि ऋक्षादीनीति केचित् ।] वड़वा घोटकी तस्यामित्यर्थः ॥३५—३९॥

———

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

नद्यः गंगायमुनादयोऽस्यनाड्यः तनूरुहाणिरोमाणिमहीरुहाः वृक्षा विश्वतनोर्विश्वशरीरकस्यहेनृपेन्द्र ! अनन्तवीर्यंश्वसितमनन्तवीर्यस्यापारवीर्यस्यश्वसितंप्राणःमातरिश्वा वायुःगतिर्गमनञ्चयःकालःतस्यकर्मगुणप्रवाहःगुणानांसत्वरजस्तमसांप्रवाहःकार्यप्राणिनांसंसारइत्यर्थः ॥ ३३ ॥

ईशस्यभगवतःकेशानंबुवाहान्मेघान्विदुः हे कुरुवर्य ! भूम्नः विभोर्वासः वस्त्रंसन्ध्येसायंप्रातःसन्ध्येतस्यहृदयंहृदयकमलमव्यक्तं प्रधानमाहुः सप्रसिद्धःसर्वविकारकोशः सर्वौषधिविकारहेतुः चन्द्रमा तदीयंमनःसर्वविकाराश्रयइत्यर्थः ॥ ३४ ॥

विज्ञानशक्तिंव्यवसायशक्तिं तांमहिं महत्तत्वमामनन्ति उपासते सर्वात्मनः सर्वान्तर्यामिणः गिरित्रंरुद्रम अन्तःकरणमहङ्कारम अतएव रुद्रोवक्षमिचाभवदितिविश्वरूपेणकथितम अहङ्कारःअज्ञानात्मन्यात्माभिमानहेतुरिति मोहकस्यगिरित्रस्यतदात्मकत्वयुक्तं रासभाद्वड़वायामुत्पन्नाऽश्वतरी अश्वाश्वतर्युष्ट्रगजास्तस्यनखानिसर्वे मृगाःपशवश्चतस्यश्रोणिदेशेउपास्यास्तत्वेनानुसन्धेया इत्यर्थः ॥ ३२ ॥

वयांसिवंदात्मकानिपक्षिणस्तस्यव्याकरणं "नामरूपे व्याकरवाणीतिश्रुत्युक्तंशिल्पनैपुणयमनुर्मन्त्रः तस्यमनीषाबुद्धिः मनुजः मनुष्यवर्गः तन्निवासस्थानं गन्धर्वादीनांद्वन्द्वैक्यंगन्धर्वादिरप्सरोऽन्तोवर्गः अस्यस्वरःषड्जादिस्वरःतेषांगानादन्वयात्तःस्वरतंवदुत्तम असुरानीकवर्यः असुरसमूहश्रेष्ठः प्रह्लादस्तस्यस्मृतिः ॥ ३६ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

विश्वात्तत्वपदार्थैर्युतिरूपतितनुर्यस्यसतथा तस्य विश्वतनुः प्रतिमायस्यसतथा तस्येतिवा वीर्यंरतोऽस्मप्राणिभोग्यं गतिर्गमनं तस्माद्वयःआयुःप्राणिनांजीवनावधिलक्षणमुत्पन्नं कर्मव्यापारः तस्मात्सत्त्वादिगुणानांप्रवृत्तिक्रमः ॥ ३३ ॥

सन्ध्ये द्वे अव्यक्तंमूलप्रकृतिं मनोभिमानत्वाच्चन्द्रस्यकामादिनानाविकारगृहत्वमुपचारः मनोमनसोजातः ॥ ३४ ॥

विज्ञानंशक्तिविरिञ्चं गिरिंकैलासंत्रायतइतिगिरेर्वायोस्त्राणंयस्यसःतथेतिवा गिरित्रोरुद्रः सर्वात्मनः सर्वस्वामिनः अन्तकरणमहङ्कारःतस्माज्जातः नखानिनखेभ्यः । गर्दभाद्वड़वायामुत्पन्नाऽश्वतरी श्रोणिदेशस्थितास्तस्माज्जाताश्च ॥ ३२ ॥

वयांसिलौकिक वैदिकानिविचित्रंतस्यव्याहरणंशब्दःव्याहरणाभितानितज्जातानिच मनुर्वायुः तस्यमनीषाबुद्धिः तेषायथेमनवेवाधितायेश्रुतिः मनुस्वायंभुवोवा मनीषाविचारःभगवद्विचारशक्तिजातत्वात्स्मृतिकर्तृत्वंमनोर्निवासोनिवसनंकर्मजनितत्वात् गन्धर्वादीनामुत्पादिकेस्वरस्मृतीयस्यसतथा स्वरःषड्जादिलक्षणः स्मृतिरतीतादिविषया असुरानीकस्यजनकंवीर्यंयस्यसतथा ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

नद्योऽस्य नाड्यः भगवतो नाड्यः तनूरुहाणि लोमानि अर्थात् वृक्षाः पर्वतप्रायस्तृणसमिति वेत्यर्थः। राजसा सात्त्विकास्तामसाः देवा इव वृक्षादयः सात्त्विकाः। महीरुहा वृक्षाः षड्विधा अपि भगवतो लोमानि विश्वतनोरिति विश्वं तनुर्यस्य अनेन तस्य विश्वरूपत्वं निरूपितं। अस्याच्छादनरूपत्वात् नृपेन्द्रेति सम्बोधनम् महाराजस्य राज्ये एकस्मिन्नपि वृक्षे छिन्ने लोमच्छेदनवत् क्रीडां भवतीत्यनुभवस्य सम्वादार्थम्। अनन्तवीर्यस्य भगवतः श्वसितं नासापुटस्य वायुः मातरिश्वा अयं वायुः भगवतो गतिः वयः कालः कर्म भगवतो गुणप्रवाहः सत्वरजस्तमसां देवतिर्यङ्मनुष्यादिसृष्टिरूपः ॥ ३३ ॥

ईशस्य ईश्वररूपस्य अम्बुवाहा मेघाः चिकुरा इति पूर्ववत् प्रमाणं वासः पीताम्बरम् सन्ध्ये सन्ध्याजयं शुक्लदेव माया पक्षस्याकृतिः भूम्न इति-कालस्य कुरुवर्येति सम्बोधनम् भगवतो महत्त्वज्ञापनार्थम् अव्यक्तं प्रकृतिः। भगवतो हृदयम् आहुरिति पूर्ववत्। स चन्द्रमाः आधिदैविकरूपः सर्वविकाराणां कोशरूपभगवन्मनः तद्विकाशे सर्वे विकारा उत्पद्यन्ते इति ॥ ३४ ॥

विज्ञानशक्तिं ज्ञानशक्तिं महिं महत्तत्वम् अन्तःकरणम् अहङ्कारं। गिरित्रं महादेवं सर्वात्मक इति अहङ्कारस्य सर्वत्रस्थितिरुक्ता। अश्वादय-श्चत्वार अवयवचतुष्टयनखानि तत्राद्यो हस्तयोः वामहस्तनखानां स्वीपूपयोग इति अश्वतरी। सर्वे मृगाः पशवश्च भगवतोऽवयवत्वाभवेऽपि श्रोणि-देशे श्रोणिस्थाने भवन्ति अथवा मृगाः पशवश्च श्रोणिस्थाना इत्यम् ॥ ३५ ॥

वयांसि पक्षिणः तस्य भगवतो व्याकरणं मयूराश्चित्रिता येनेति वाक्यात्। मनुः स्वायम्भुवादिः मनीषा इच्छा मनुजो मनुष्यः निवासो गृहं। गन्धर्वादय अप्सरोन्ताः एकवद्भावं प्राप्ताः स्वरा भगवत्कर्णकरा विशेषः असुरानीकवर्यः प्रह्लादः स्मृतिः स्मृतीः स्मृतयः पाठान्तरेः अप्सरोन्ताः प्रह्लादश्च स्वरस्मृती आद्यः स्वरः द्वितीयः स्मृतिः। वीर्यमिति पाठे पूर्वोक्ता एव स्वरस्मृतयः असुरानीके वीर्यं यस्य स समास एव उद्देश्य-विधेयभावः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी।

अनन्तः शेषो वीर्य्यं विक्रमो यस्य सः। वयः कालः तस्य गतिः गमनम्। गुणप्रवाहः प्राणिनां संसारः कर्म क्रीडा ॥ ३३ ॥

भूम्नः विभोः। अव्यक्तं प्रधानम् तस्य हृदयं बुद्धिः। सः प्रसिद्धः चन्द्रमास्तदीयं मनः सर्व्वेषां विकाराणां कोष इवाश्रय-भूतम् ॥ ३४ ॥

विज्ञानशक्तिं चित्तम्। महिं महत्तत्त्वम्। अन्तःकरणम् अहङ्कारम्। गिरित्रं रुद्रम्। गर्द्दभात् वडवायामुत्पन्ना अश्वतरी ॥ ३५ ॥

वयांसि पक्षिणः तस्य व्याकरणं नामरूपे व्याकरवाणीति श्रुत्युक्तं शिल्पनैपुण्यम्। यथाहुः—येन शुक्लीकृता हंसाः शुकाश्च हरि-तीकृताः। मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ इति। मनुः स्वायम्भुवः मनीषा विचारवती बुद्धिः। मनुजः पुरुषः पुरुषश्चै-वाविस्तरामात्मा इति श्रुतेः। गन्धर्व्वादीनां द्वन्द्वैक्यं गन्धर्व्वादयः स्वरः षड्जादिः। असुरानीकवर्य्यः प्रह्लादः स्मृतिः। स्वरस्मृती-रसुरानीकवीर्य्य इति पाठे—स्वराणां स्मृतयः। असुरानीकं वीर्य्यं यस्य सः ॥ ३६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

तनूरुहाणि रोमाणि अनन्तवीर्यः महाबलो मातरिश्वा वायुः श्वसितं प्राणः वयः कालस्तस्य गतिर्गमनम् गुणानां सत्वादीनां प्रवाहः यत्र सुरनरादयः नदीप्रवाहे तृणानीव स्रवन्ति स स्तस्य कर्म क्रीडा ॥ ३३ ॥

ईशस्य सर्वनियन्तुर्भगवतः केशानम्बुवाहान् घनान् विदुः भूम्नः विभोर्वासः सन्ध्यां वाससी सन्ध्ये इत्यर्थः। अव्यक्तं प्रधानं हृदयं हृदयकमल-माहुः सम्प्रसिद्धः सर्वविकारकोशः सर्वौषधिप्रवृत्तिहेतुः चन्द्रमा मनो ज्ञेयम् ॥ ३४ ॥

सर्वात्मनः सर्वस्य चतुर्दशभुवनस्यात्मनः विज्ञानशक्तिं चित्तात्मिकां महत्तत्त्वाख्यं महिमामनन्ति तस्यान्तःकरणमहङ्कारं गिरित्रमाम-नन्ति अश्वाश्वतर्युष्ट्रगजास्तस्य नखानि ध्यातृभिर्ज्ञेयानीत्यर्थः सर्वे मृगाः पशवस्त[illegible]देशे ज्ञेयाः ॥ ३५ ॥

वयांसि पक्षिणस्तस्य व्याकरणं शिल्पनैपुण्यम् मनुः स्वायंभवस्तस्य मनीषा बुद्धिः [illegible]जो मनुष्यस्तस्य तिवासः। निवासस्थानम् गन्ध-र्वादीनां द्वन्द्वैक्यं गन्धर्वविद्याधरचारणाप्सरसस्तस्य स्वरः षड्जादिसप्तस्वरसमूहः [illegible]भवो ज्ञेयः असुरानीकवर्यः प्रह्लादस्तस्य स्मृतिः ॥ ३६ ॥

भाषा टीका।

नदी इनकी नाड़ी वृक्ष रोम हैं। हे नृपेन्द्र! अनन्तवीर्य मातरिश्वा (पवन) श्वास, काल गमन और गुणप्रवाह संसार विश्वतनुका कर्म अर्थात् क्रीड़ा है ॥ ३३ ॥

अम्बुवाह (मेघ) ईशके केश और सन्ध्या वस्त्र है। हे कुरुवर्य! प्रधान को भगवान का हृदय और सर्व विकार कोश चन्द्रमा मन कहलाता है ॥ ३४ ॥

महत्तत्व को सर्वात्मा की विज्ञानशक्ति और गिरित्र (शिव को) अन्तः करण कहते हैं। अश्व अश्वतरी ऊंट और गज नख हैं और समस्त मृगपशु श्रोणिदेशमे हैं ॥ ३५ ॥

पक्षीगण उनका विचित्र शिल्पनैपुण्य, स्वायम्भुव मनु मनीषा (बुद्धि) और मनुष्य निवास है। गन्धर्व, विद्याधर, चारण, अप्सरा, षड्जादि स्वर और असुरसमूह उनका वीर्य है ॥ ३६ ॥

ब्रह्माननं क्षत्रभुजो महात्मा विडूरुरङ्घ्रिश्रितकृष्णवर्णः ।
नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्म्म वितानयोगः ॥ ३७ ॥
इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते ।
सन्धार्य्यतेऽस्मिन् वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति किञ्चित् ॥ ३८ ॥
स सर्व्वधीवृत्त्यनुभूतसर्व्व आत्मा यथा स्वप्नजनेक्षितैकः ।
तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ॥ ३९ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ब्रह्म विप्रः तस्य आननं मुखम् । क्षत्रं क्षत्रियो भुजौ यस्य सः । विट् वैश्यः ऊरू यस्य । अङ्घ्रिश्रितः कृष्णवर्णः शूद्रो यस्य । नाना अभिधा नामानि येषां ते च ते अभीज्या देवाः तेषां गणैर्वसुरुद्रादिभिः उपपन्नो युक्तः द्रव्यात्मकः हविःसाध्यः वितानयोगः यज्ञप्रयोगः तस्य कर्म्म कार्य्यम् आवश्यकोऽभिप्रेत इत्यर्थः ॥ ३७ ॥

इयान् एतावान् सन्निवेशः अवयवसंस्थानम् । अस्मिन् स्वबुद्ध्या मनः सन्धार्यते मुमुक्षुभिः । यतः यद्व्यतिरिक्तं किञ्चिन्नास्ति तस्मिन् ॥ ३८ ॥

तदेवं चित्तस्थैर्य्यार्थं विराड्देहजीवेश्वराणामभेदेनोपासनमुक्तम् । तत्र तु देहजीवावीश्वरे प्रविलाप्य स एव ध्येय इति निर्द्धारयति स इति । सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन सः एक एव सर्वान्तरात्मा । तमेव सत्यं भजेत । अन्यत्र उपलक्षणे न सज्जेत । यतः आसक्तात् आत्मनः पातः संसारो भवति । एकस्य तत्तदिन्द्रियैः सर्व्वानुभूतौ दृष्टान्तः स्वजनानामीक्षिता यथेति । स्वप्ने हि कदाचित् बहून् देहान् प्रकल्प्य जीवस्तत्तदिन्द्रियैः सर्वं पश्यति तद्वत् । ईश्वरस्य तु विद्याशक्तित्वान्न बन्धः ॥ ३९ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

ब्रह्म ब्राह्मणास्तस्याननंमहात्मावैराजः क्षत्रभुजःक्षत्रंक्षत्रियाभुजौयस्यसः विड्वैश्यःऊरूयस्यतथोक्तः अङ्घ्रिश्रितकृष्णवर्णः अङ्घ्रौश्रितः कृष्णवर्णः शूद्रोयस्यसः कृष्णवर्णस्तुतदाश्रितत्वेनानुसन्धेयइत्यर्थः नानाभिधाभीज्यगणः नानानामकाअभीज्यायष्टव्यावसुरुद्रादयस्तेषां गणैरुपपन्नोयुक्तः योद्रव्यात्मकोहविःसाध्यःवितानयोगः यज्ञादियोगः सतस्याराधनरूपंकर्मेत्यर्थः ॥ ३७ ॥

ईश्वरविग्रहस्यवैराजविग्रहस्ययःसन्निवेशःअवयवसन्निवेशःकथितःअसौइयानेतावानेवस्थविष्ठेऽस्मिन्वैराजसम्बन्धिनिवपुषिस्वकीयबुद्ध्यामुमुक्षुभिर्मनः सन्धार्यतेयतः यस्मादीश्वरशरीरादन्यद्बहिर्भूतंनास्ति सर्वंतच्छरीरान्तर्भूतमित्यर्थः ॥ ३८ ॥

एतदेवाह सइति दृश्यतश्रूयतेपिवेतिश्रुत्यर्थउच्यते सर्वधीवृत्तिभिः प्रत्यक्षानुमानादिसर्वविधज्ञानैरनुभूताः सर्वेयेपदार्थास्तेऽस्तर्यहिसाधिष्ठेयतयायस्यसःतथोक्तः एवञ्चतदधिष्ठेयपदार्थानांतच्छरीरत्वमर्थसिद्धं तत्रदृष्टान्तमाह यथाएक आत्माजीवःस्वप्नेक्षितःस्वप्नजनद्रष्टास्वप्नजनद्रष्टाह्यात्मास्वकीयसुकृतदुष्कृतानुसारेणपरमात्मसृष्टान्स्वेनैवानुभाव्यान्तत्कालमात्रावसानान्पदार्थानधिष्ठायराज्याभिषेक-शिरश्छेदादिसुखदुःखमनुभवति तथाअत्रैकस्यानेकपदार्थेष्वधिष्ठातृत्वमात्रेदृष्टान्तः । एवंदृष्टश्रुतचेतनाचेतनशरीरकत्वेऽपिशरीरगतदोषासंस्पर्शित्वमाह सत्यमिति सत्यंस्वरूपतोगुणतश्चनिर्विकारन्तस्यपुरुषार्थत्वमाह आनन्दनिधिमिति आनन्दाश्रयमित्यर्थः आनन्दस्वरूपत्वस्याप्युपलक्षणं आनन्दंब्रह्मणोविद्वान्विज्ञानमानन्दमित्युभयत्रापि श्रवणात् । भजेतउपासीत यद्वा सत्यमित्यचिद्व्यावृत्तिः आनन्दनिधिमितिबद्धव्यावृत्तिः अन्यत्रनसज्जेद्ब्रह्मात्मकस्वतन्त्रवस्तुकिञ्चित्परिकल्प्यतत्रासक्तोनभवेत् यतस्तदासंगादात्मपातः । आत्मनः स्वरूपात् संसारःस्यात्तस्मान्नसज्जेदित्यर्थः ॥ ३९ ॥

इति श्रीवत्साम्बयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोःसुतेनतच्चरणकमलपरिचयप्रसन्नतत्सूक्ति समधिगत श्रीमद्भागवतार्थ हृदयेन श्रीविष्णुदासेन श्रीवीरराघवविदुपाविलिखितायां श्रीमद्भागवतचन्द्रिकायां द्वितीयस्कन्धसमाख्यायां प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्म ब्राह्मणजातेर्जनकमाननंयस्यसतथा क्षत्रजातेरुत्पादकौभुजौयस्यसतथा विशांजनकौऊरूयस्यसतथा । अङ्घ्रिश्रितःकृष्णवर्णः शूद्रजातिर्यस्यसतथा देवपितृभ्यो विनियुज्यमानस्वाहास्वधातयोरुत्पादकोवीर्यगुणोरेतोगुणस्तेनोपपन्नः हव्यजनकआत्मामध्यदेहोयस्यसः तथा अग्निष्टोमादिकर्मवितानस्योत्पादकोयोगउपायोयस्यसःतथा वितानंविस्तारः ॥ ३७ ॥

उक्तार्थमुपसंहरति इयानिति ईश्वरविग्रहस्यवैराजाख्यहरिदेहस्ययः सन्निवेशोऽवस्थितिविशेषः सइयानित्थंभूतोमयातेतवकथितः यतोऽस्मादीश्वरविग्रहात्स्थविष्ठमुत्तमंनास्ति । योगिभिर्यमोऽस्मिन्स्थविष्ठेसर्वोत्तमेवपुषिस्वबुद्ध्यासन्धार्यते । मनोनैर्मल्यार्यतिशयइत्यर्थः ॥ ३८ ॥

इति श्रीमद्भागवतेमहापुराणेद्वितीयस्कन्धेविजयध्वजकृतटीकायांप्रथमोऽध्यायः ॥ १ ॥

एतदुक्तां विराड्धारणामुक्त्वा तदपवादेनापि तां पूर्वोक्तां भक्तिमेवाह स सर्व्वेति । यः सर्व्वेन्द्रियगुणत्वात् स मे भजतीति अयितव्यस्य कर्त्तुर्विद्यमानत्वादयमर्थः—सः तथाभूतविराड्धारणासिद्धो योगी विराड्गताभिः सर्व्वाभिर्धीवृत्तिभिर्नानेन्द्रियैरनु-भूतं सर्व्वं विराड्गतं येन तथाभूतः सन्, तं सत्यमानन्दनिधिं विराड्न्तर्यामिणं श्रीनारायणमेव भजेत । अन्यत्र विराड्गतं तद्धारणा-न्तरफले च कुत्रापि न सज्जेत । यतः सज्जनात् आत्मपातः संसार एव स्यात् । तस्य सर्व्वानुभूतौ दृष्टान्तः, आत्मा स्वप्नद्रष्टा जीवः यथा स्वप्नगतानां सर्व्वेषां जनानां तदुपलक्षितानां वस्तूनाञ्च एक एव ईक्षिता भवतीति । अत्र तमित्यनेन स ऐक्षत इति स्वाभाविकी ज्ञानबलक्रिया च इति श्रुतिप्रसिद्धपरानपेक्षज्ञानादिसिद्धस्तथा सन्ध्ये सृष्टिराह हि मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति न्यायप्राप्तेन स्वप्नस्यापि तत्कर्त्तृकत्वेन आब्रह्मादिमयजगत्कर्त्तृत्वस्य पूर्णत्वप्राप्तेर्बलक्षयं दर्शितं, सत्यादिद्वयेन परमपुरुषार्थत्वञ्चेति ज्ञेयम ॥ १९ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी ।

ब्रह्मभावःकश्चिद्धर्मः यस्मिन्विद्यमानेब्राह्मणशब्दवाच्योभवतिपुरुषः । ब्राह्मण्यापरनाम ब्राह्मण्यंनजातिः व्यक्तिसङ्ख्यादेरपिव्याप-त्वात् । ब्राह्मण्याद्वर्हीयतइतिवाक्यानुरोधात्वृत्त्यतरकल्पनायां प्रमाणाभावात् नियतव्यञ्जकाभावाच्च ब्राह्मण्यंब्राह्मण्यजातत्वं चतु-र्वेशतत्पुत्रपुमानसेषु च अव्यापकं ऋषभपुत्रपुण्यकाशीतिर्ब्राह्मणाग्रभूवुरितिवाक्याच्च । तस्माच्छास्त्रबहुवाक्याविरोधात् ब्राह्मण्यंकाचिद्द-र्मातात्मायस्मिन्देहेअभिव्यक्ताभवतितंब्राह्मणाइत्युच्यते अतएवशापादिनाशूद्रत्वञ्चण्डालत्वं अनुग्रहेणब्राह्मण्यमिति । मायोधनयनेनदेह-व्रमायाति तदाबहुनिवाक्यानिसंगच्छन्ते । एवंक्षात्रं अतएवपरशुरामेतुभयनिषेधः ब्रह्मआननंयस्य क्षत्रभुजोयस्य पूर्वसिद्धाग्निमुखत्वं-नोक्तः वाक्प्रकाशार्थं अतोवागिन्द्रियंदेवताऽग्निः इन्द्रादयश्चभोक्तारःबाहवःपूर्वमुक्ताः । अत्रतुरसाधिष्ठात्रीदेवतावरुणः रसभोक्तृ-ब्राह्मण्यं तथारणात्कर्त्तृत्वमिर्मितिविट्ऊरूयस्यवितलातलरूपस्यापिगुरुत्वयस्यावैश्यत्वस्थितिसाधकत्वेन पूर्ववाङ्विशेषः वृत्तेश्चतुर्विधत्वा-द्बहुवचनं । विशःउरूयस्येति एवमग्निश्रितकृष्णवर्णः अग्निश्रितः कृष्णवर्णोऽयं कृष्णवर्णःशूद्रत्वं वेदरहिताविद्याच कर्माद्विविधं । स्वाभाविकंवैशेषिकञ्च स्वार्थपरार्थमितियावत् तत्रपरार्थंपूर्वमुक्तं कर्मगुणप्रवाहइति अत्रतुस्वार्थंकर्म वितानयोगःयज्ञविस्तारः वितानाः सप्ततंतुर्विताना: तेषांयोगोयत्रसत्राहीनेष्टसभगवत्कर्म तस्यद्वयगतामाह । नानाभिधाःनानानामानःइज्यगणाःदेवगणाःपूज्यगणाः तत्रा-प्यभितःप्रधानगुणभावेनतेनउपपन्नः । इज्यात्मकश्चव्रीहियवादिसाध्यपुरोडाशः देवतोद्देशेनद्रव्यात्यागोयागः ॥ ३७ ॥

तत्रदेवताद्रव्यञ्चाङ्गं एवंसर्वपदार्थानांभगवत्स्वरूपत्वायउद्देशप्रकारेणभगवच्छरीरेसमावेशनमुक्त्वानुपसंहरति । इयानसाविति । ईश्वरविग्रहस्याविहेहस्य सन्निवेशः अवयवविन्यासप्रकारःइयान् एतावानेवनाधिकोविन्यासोस्तीत्यर्थः । असौअयमेवविन्यासःनत्वन्योऽ-पिविन्यासोऽस्ति अथवा असौप्राकृतरूपविन्यासःइयानेतावान् । आनन्दमयस्यत्वन्यः सउत्तरत्रवक्ष्यते अत्रपदार्थानांविनिवेशस्यवक्तव्यत्वा-प्रकरणत्वात्नास्माभिर्विवरणमुक्तम अग्रेविमर्शनीयकव्यत्वात् । एवंनिवेशकथनस्यप्रयोजनमाह सन्धार्यइति अस्मिन्नेवचवपुषिसर्वयोगिभिः मनःसन्धार्यंत योगाङ्गधारणाविषयः अयमेवोक्तयतोस्यावपुरितिपूर्ववत् वसुवंपुषानीतिवपुःदेहापरपर्यायःतुल्यार्थत्वादस्याप्यर्थस्तत्रे-वोक्तः स्वबुद्ध्याआत्मबुद्ध्याआत्मरूपत्वेन अन्यथासर्वप्रवेशानस्यात् । परमभक्तिराकांक्षाभावश्चनभवेत् । फलञ्च मां अतिक्रमच्चन-भवेत् एतस्मिन्धारणाविषयेजातेकुत्रधारणाकर्त्तव्याकुत्रनेत्यादिसन्देहागच्छेयुः यतोनयतोस्तीकिञ्चित ॥ ३८ ॥

यस्माद्रूपात्कर्त्तव्यमन्य अन्यत्भिन्नंकिमपिनास्ति साधारणानांपञ्चप्रश्नेषु कर्त्तव्यमन्यंएवश्रोतव्यस्मर्त्तव्ययोरनुप्रवेशाच्चनामानु-कीर्त्तनेनैवजपस्योक्तत्वात् एवकर्त्तव्यस्यप्रवेशाद्विकल्पिकपक्षत्वाच्चान्येषां भजनीयप्रश्नोवशिष्यते तमाह सर्वधीवृत्त्यनुभूतसर्वइति । योऽत्रधारणाविषयत्वेनोक्तः सर्वात्मपदेन च श्रोतव्यविषयतावच्छेदकवाचकेननिरूपितः । यस्याविवरणार्थमयंसन्निवेशोनिरूपितः । यः श्रवणादिनाभजनीयः श्रवणादिनाभगवत्सन्निधानंगत्वातत्सायुज्यंवाप्राप्यमान्तात्समेवभजेत अन्यत्रफलसाधनान्तरेण अनेनवासाधनेन-सक्तः स्वस्थानादपिपतेत यस्यामवस्थायांतिष्ठतिततोपियतेत अनेनप्रथमंफलार्थंभवतु पश्चात्तदर्थमर्यास्त्यपिपक्षोनिवारितः नत्वस्यफलत्वं भजनीयत्वं वा कथ तत्राह आनन्दनिधिमिति भजनीयंफलमेव साधनस्यपुरुषशेषत्वात् यद्यपि फलमपिपुरुषशेषःपुरुषानुभवविषयत्वात् अनुभवरूपत्वाद्वा तथापिरसत्वेनरसप्रधानत्वेनैव भोगेरसिकताभवतीतिफलंसर्वत्र परमानन्दः सोपिनगणनयाप्राप्तोब्रह्मणिस्थितः परिमितत्वात् किञ्चानन्दनिधिः आनन्दोनितरान्धयतेस्मिन्निति पूर्णानन्दोभगवानेवसेव्यः आनन्दपोषस्योक्तत्वात् तस्यतिरोभावमाशं-क्याह सत्यमिति ननुफलान्तरविपर्यायेवसद्भावेकिंविधेयं उद्यतस्यकामस्यप्रतिवादोनशक्यतइतिन्यायात् तत्राह सर्वधीवृत्त्यनुभूतसर्व-इति सर्वधीवृत्तिभि सर्वेषांसर्वज्ञानजनकेन्द्रियवृत्तिभिः अनुभूतंसर्वंयेन यत्किंचित्फलांयेनकेनचिदुपभोग्यंतत्तदिन्द्रियद्वाराअनेनैवयोग्य-तःस्वरूपतोऽस्मात् यथा अन्यन्नावशिष्यते तथा फलमपि एतदन्तमुपभोग्यंफलञ्चनावशिष्यते ननुकथमस्यभोक्तृत्वं तत्तदधिष्ठातृणां विद्यमानत्वात् तत्राह आत्मायथेति तत्तदिन्द्रियाधिष्ठातृणामिन्द्रादीनां विद्यमानत्वेपि यथा आत्मासर्वेन्द्रियानुभूतसर्वःएवंभगवानपि सर्व्वैकदेशाभिमानिनम अविगण्यतेनाधिष्ठितैरवेन्द्रियैः सर्वमनुभवतीत्यर्थः नत्वात्मनः इन्द्रियाधिष्ठातृणामप्रतीतत्वात् आत्मीयत्वेनैव इन्द्रियाणांग्रहणात् तस्य स्वगृहीतमात्रानुभवोभवतुनाम । भगवतस्तुसमष्टिरूपस्यव्यष्टिषुदेहस्थितकीटादिविषयप्रतीत्यभावात् आत्मीय-त्वानावाचत इन्द्रियाणां कथंसर्वधीवृत्तिभिर्भगवाननुभवति तत्राह स्वप्नजनानामीक्षिताइव यथैकःस्वप्नस्यमायिकत्वेऽपिवस्तुतोनमायिकत्व-त्वात्मरूपत्वात् तत्रस्वप्नदृष्टाःपुरुषाःसर्वंपश्यन्तीति प्रतीतिरस्ति तत्रपुरुषदेहानांमायिकत्वंन्यायसिद्धं तथापि तन्निष्ठाप्रतीतिसाम-ग्रयिकी तत्रचैतन्यान्तराभावात् भगवतोवाजीवस्यवाचैतन्यंभवति स्वस्यापिद्रष्टृत्वाभावात् इन्द्रियाणां गोलकाभावेनप्रदर्शना सामर्थ्यं गोलकस्यचस्वाप्नस्यचमिथ्यात्वात् भगवानेवपश्यतीतियुक्त्याध्यवसीयते निद्रावशाच्चतेनसहभेदोनस्फुरति तथान्यत्रापिसएवपश्यतीत्य-ध्यवसीयतेस्वप्नदृष्टान्तेन ततस्तेषुदेहेषुजीवसद्भावेअसद्भावेवाभगवानेव द्रष्टेतिनिर्णीयतेतत्रचास्मादिन्द्रियगोलकापेक्षानास्ति देव-तानामेवगोलकत्वात् विषयस्यचेन्द्रियत्वात् विषयत्वादस्मदादीन्द्रियवत्वात् कारणव्यपदेशोपपत्तितया तत्रविषयेसद्भावात् कारणस्या

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

कर्मलीनानामपि प्रकाशसम्भवात् लयांगीकारेगौरवाद्विषयेष्वलयांगीकर्तव्यः अन्यथानिद्रायामप्यवधायकत्वात्पुनरुद्बोधः कथंक्रियेत अहंकारःआत्माध्यासरूपइन्द्रियवल्लीयतेमनस्त्विन्द्रियकारणभूतः तथासतिपुनःसृष्ट्यभावान्नोत्पद्येरन् अतोविषयलीनानीन्द्रियाणि भगवदि-न्द्रियलीनानिभवन्ति अतःस्वप्नप्रपञ्चविचारेक्रियमाणेयथासर्वेष्वप्यसर्वेषामात्माभूत्वासर्वंपश्यतीतिनिश्चयः एवंजागरणविरयायामपि तत्रतद्विषयेप्रविष्टानीन्द्रियाणिभगवदिन्द्रियप्रवेशाद्भगवद्रूज्ञानसाधकानिभवन्ति अन्यथाभगवतइन्द्रियातिरिक्तस्यविषयस्याभावात्किंगृह्णी-यात् तत्रेन्द्रियसम्बन्धं आत्मानंगृह्णन्नपंवद्यत्वाकांक्षायांआत्ममनोवेद्यत्वात्परेन्द्रियवेद्यत्वंन इन्द्रियस्यैववेद्यत्वसम्भवति अतोऽन्यदम-हिन्द्रियापेक्षा स च सर्वत्रैकः भेदकप्रमाणाभावात् स्वप्नदृष्टान्तेन व्यावर्तकानामप्यावर्तकत्वात् अतस्तेनैव सर्वभोगसिद्धेःपुनरन्ता-न्तरेणभोगोनसाधनीयः आत्मनःपातसम्भवाच्च देहस्थितकीटेषुतुस्वस्यसर्वात्मभावतिरोभावात्जीवत्वाद्ज्ञानस्फुरणमिति सर्व-मविवादम् ॥ ३९ ॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज श्रीवल्लभविरचितायां द्वितीयस्कन्ध प्रथमाध्यायविवरणम् ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

ब्रह्म ब्राह्मणः आननम् । क्षत्रं क्षत्रियः भुजा यस्य सः । विट् वैश्य ऊरू यस्य सः । अंघ्रौ श्रितः कृष्णवर्णः शूद्रो यस्य सः । नाना अभिधा नामानि येषां ते च ते अभीज्या देवाः तेषां गणैर्वसुरुद्रादिभिरुपपन्नो युक्तः, द्रव्यात्मकः हविःसाध्यः वितानयोगः यज्ञप्रयोगः तस्य कर्म्म आवश्यकं कृत्यम् ॥ ३७ ॥

इयान् एतावान् सन्निवेशः अवयवसंस्थानम् । अस्मिन् वपुषि स्वबुद्ध्या सारथिभूतयेत्यर्थः मनः सन्धार्यते योगिभिः । यतो व्यतिरिक्तं किञ्चिदपि नास्ति तस्मिन् । अयमर्थः—मनो हि स्वचाञ्चल्यवशाद्यत्र यत्र भ्रमति तत्र तत्रैव भगवत इदममुकमङ्गमिति स्वबुद्ध्या विचारयेत्, एवञ्च मनसः स्वाभाविकाः सर्वे एव विषया भगवदङ्गान्येवेति सर्वमपि चिन्तनं भगवच्चिन्तनत्वेन पर्यवस्येत्, तथा स्पर्शश्रवणादयो भावा नैवोत्पद्येरन्, स्पर्शादिविषयाणां मनुष्यगन्धर्वादीनामपि भगवदङ्गभूतत्वेन ध्येयत्वादेवेति ॥ ३८ ॥

नन्वेवं भगवद्धारणाभ्यासस्यानुषङ्गिकाणि फलानि भोगैश्वर्यादीन्यवश्यमुत्पद्यन्त एव योगी तानि स्वतःप्राप्तान्युपभुञ्जीत न वा । आद्ये योगशैथिल्यप्रसङ्गः । यदुक्तम्—यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेऽङ्ग । अनन्यहेतुष्वथ मे गतिः स्यादात्य-न्तिकी यत्र न मृत्युहासः ॥ इति । द्वितीये उपस्थितभोगत्यागस्य दुष्करत्वमिति । सत्यम् । विवेकेनैव सर्वं सुकरमिति विवेकप्रकारं दर्शयति । सः योगी सर्व्वाभिधियां वृत्तिभिरिन्द्रियलक्षणाभिः प्राचीनसहस्रसहस्रजन्मवर्त्तिनीभिरनुभूतमेव सर्वं देवेन्द्रत्वनरेन्द्रत्वा-दिकं भोगैश्वर्यादिकं येन सः किं पुनश्चर्वितचर्वणं करोति भावः । न च तस्य तस्यापि न स्थिरत्वमित्यत्र दृष्टान्तः आत्मा जीवः यथा स्वप्ने जनानां पात्रमित्रसैन्यादीनां तदुपलक्षितराज्यादि भोगानाञ्च स्वसृष्टानामेक एव ईक्षिता अनुभविता । अतस्तं सत्यंसर्वकालदेशा-वर्त्तिनम् आनन्दानां निधिं भगवन्तमेव भजेत, न त्वन्यत्र असारत्वादिकत्वादसत्ये अनानन्दनिधौ विषयसुखे इत्यर्थः ॥ ३९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । द्वितीये प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

ब्रह्मब्राह्मणास्तस्याननंमुखम् महात्माविराजःपुरुषः क्षत्रंक्षत्रियोभुजायस्यसतस्यविट्वैश्यः ऊरूयस्यसतथा अंघ्रिश्रितः कृष्णवर्णः शूद्रोयस्यसतथा नानाऽभिधाः बहुनामकाः येऽभीज्याःदेवास्तेषाङ्गणैरुपपन्नोयोद्रव्यात्मकोहविः । साध्योवितानयोगः यज्ञयोगस्तस्या-राधनभूतंकर्म ॥ ३७ ॥

ईश्वरविग्रहस्यपुरुषशरीरस्ययः सन्निवेशः पादादिसन्निवेशः मयातेतुभ्यंकथितः असौइयानेतावानेव अस्मिन्नीश्वरविग्रहेस्वबुद्ध्या-मुमुक्षुभिर्मनः सन्धार्यतेस्थिरीक्रियते यतोऽन्यत्किञ्चिन्नास्ति ॥ ३८ ॥

सइति । यःस्थूलदेहभजनीयतयोक्तःसभगवान् सर्वधीवृत्तिभिरनुभूतंसर्वंचराचरंयेनसथोक्तः यतःसआत्मासर्वंयदात्मकमेवातः सर्व-तदूज्ञानगोचरम् स्वप्नजीवस्यफलविशेषभोगायपुरुषसृष्ट्यादीन्भगवान्करोतितान् । जीवात्मायथाएकएवपश्यतितद्वत् स्वप्नसृष्टिभंगवत्क-र्तृकेतिवेदान्तकौस्तुभेस्थितम् एवम्भूतन्तम्भगवन्तंसत्यमानन्दनिधिभजेत अन्यत्राऽब्रह्मात्मकतयाकस्मिंश्चिदुपासनाबुद्ध्यानसज्जेत् । सतआसङ्गादात्मपातः ॥ ३९ ॥

इति श्रीसनत्कुमारसन्ततिप्रवर्त्तक भगवन्निम्बार्कचरणचिन्तक शुकसुधीप्रणीते श्रीमद्भागवतसिद्धान्तप्रदीपे द्वितीयस्कन्धीये प्रथमाध्यायार्थप्रकाशः ॥ १ ॥

भाषा टीका ।

ब्राह्मण आनन, क्षत्रिय भुज और महात्माके वैश्य ऊरु एवं कृष्णवर्ण शूद्र अंघ्रितल में आश्रित हैं । वसु रुद्रादि नाना नामवाले देवगण से उपपन्न द्रव्यात्मक वितानयोग (यज्ञ) उनका कर्म है ॥ ३७ ॥

इतनाही! यह ईश्वर विग्रहका संनिवेश है । जोमैंने तुम से कहाहै । इसी स्थूल विराट् रूप में बुद्धिसे मन धारण करते हैं कि जिस से व्यतिरिक्त कुछ और नहीं है ॥ ३८ ॥

जैसे द्रष्टा जीव अपने तात्कालिक भोगके निमित्त जैसा ईश्वर सृष्ट स्वप्नके देह लोक और विषयोंका आप एकही भोक्ता होता है ऐसेही समस्त ज्ञानेन्द्रियोंसे सब अनुभव करनेवाला योगी, उन सत्यस्वरूप आनन्दनिधिका भजन करै । और कहीं भोगमें आसक्त होनेसे आत्माका अधःपात होता है ॥ ३९ ॥ प्रथम अध्याय समाप्त ।

द्वितीयोऽध्यायः ।

शुक उवाच । एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ।
तथा ससर्जेदममोघदृष्टिर्यथाप्ययात् प्राग्व्यवसायबुद्धिः ॥ १ ॥
शाब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः ।
परिभ्रमंस्तत्र न विन्दतेऽर्थान्मायामये वासनया शयानः ॥ २ ॥
अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः ।
सिद्धेऽन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥
सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ।
सत्यञ्जलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

द्वितीये तु ततः स्थूलधारणातो जितं मनः । सर्वसाक्षिणि सर्वेशे विष्णौ धार्यमितीर्यते ॥
दृश्यालम्बनरूपैवमुक्ता वैराजधारणा । ईहोच्यते तु तत्साध्या सर्वान्तर्यामिधारणा ॥ ० ॥

तत्र तावत् पूर्वोक्तधारणाया अवान्तरफलमाह । एवं या धारणा तया तुष्टाद्धरेः पुरा प्रलयसमये नष्टां सृष्टिस्मृतिं प्रत्यवरुध्य लब्ध्वा अप्ययात् प्राक्दिवं विश्वं यथासीत्तथा ससर्ज । व्यवसायात्मिका बुद्धिर्यस्य सः अतएवामोघा दृष्टिर्यस्येति अतस्तया धारणया विश्वसृष्टिसामर्थ्यं भवति ॥ १ ॥

उपासनाफलादपि विरक्तस्य शुद्धात्मधारणायामधिकारः, अतो वैराग्यार्थं सर्वकर्मफलं निन्दति । शाब्दं शब्दमयं ब्रह्म वेदस्तस्य एषः पन्थाः कर्मफलबोधनप्रकारः । कोऽसौ अपार्थैः अर्थशून्यैरेव स्वर्गादिनामभिर्धीः ध्यायति तत्तदिच्छां करोति इति यत् । अपार्थत्वमेवाह तत्र मायामये पथि सुखमिति वासनया शयानः स्वप्नान् पश्यन्निव परिभ्रमन्नर्थान्न विन्दति तत्तल्लोकं प्राप्तोऽपि निरवद्यं सुखं न लभते इत्यर्थः ॥ २ ॥

तर्हि सर्वथा कर्मफलत्यागे सद्य एव देहपातः स्यादित्याशङ्क्याह । अतः कविर्नाममात्रेषु भोग्येषु यावता अर्थेन अर्थो देहनिर्वाहो यस्य सः तथाभूतः स्यात् । अप्रमत्तः तावन्मात्रेऽप्यनासक्तः । व्यवसायबुद्धिः नेदं सुखमिति निश्चयवान् । तदापि तत्र तस्मिन् अर्थे अन्यथैव सिद्धे सति तत्र प्रयत्ने परिश्रमं पश्यन् न यतेत ॥ ३ ॥

अन्यथासिद्धिमाह सत्यामिति द्वाभ्याम् । कशिपोः शय्यायाः । स्वतःसिद्धे बाहौ सति उपबर्हणैः उच्छीर्षकैः । पुरुधा बहुप्रकारया अन्नपात्र्या भोजनपात्रेण ॥ ४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

० ॥ १ ॥

निरवद्यम् इति । ऐकान्तिकात्यन्तिकलक्षणमित्यर्थः । तत्रैकान्तिकत्वं दुःखासम्भिन्नत्वमवश्यम्भावः आत्यन्तिकत्वं नाम निवृत्तस्य दुःखस्य पुनरनुत्पाद इति ॥ २ ॥

कविरिति । धीर इत्यर्थः ॥ ३—५ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एवं वैराजधारणामुक्त्वा मुमुक्षोर्हृदये उपास्यन्तदुपासनानिष्ठस्यार्चिरादिनागतिश्च वक्ष्यन्नुक्ताया वैराजधारणाया एवतावन्माहात्म्यमाह मुनिः । एवमिति एवया धारणा तया तुष्टाद्धरेः पुरा प्रलयसमये नष्टां पूर्वकल्पे चतुर्मुखेन महाविनष्टां स्मृतिं । सर्गविषयकज्ञानं प्रत्यवरुध्य लब्ध्वा व्यवसायबुद्धिः स्मृतिविषयव्यवसायरूपज्ञानः अतएवामोघदृष्टिरमोघा यथावस्थिततादृष्टिस्तत्तद्वस्तुविषयज्ञानं यस्य सतथोक्तः आत्मयोनिश्चतुर्मुखः अप्ययात्प्रलयात्प्राग्यथा तथा ससर्ज । पूर्वकल्पपदार्थसजातीयानेवपदार्थान्ससर्जेत्यर्थः अत्र यद्यपि पूर्वकल्पेविनष्टां स्मृतिपरिलब्ध्येत्यनेनपूर्वकल्पेयश्चतुर्मुखः सएवास्मिन्कल्पेपिप्रतीयते । तथापि प्रतिकल्पं चतुर्मुखानां भेदएवन्याय्यः तत्तत्कल्पचतुर्मुखस्य ब्रह्मणा सहतेसर्वेसंप्राप्तेप्रतिसञ्चरेतेब्रह्मलोकेतुपरान्तकालेपराभूतात्परिमुच्यन्तिसर्वेइतिमुक्त्यवगमेन पुनरावृत्त्यसम्भवात् भगवत्पूर्णकृपापात्रस्यपुनःसंसारायोगाच्च । तथाहि वक्ष्यति भगवान् ऋषिमाद्यंनबध्नातिपापीयांस्त्वांरजोगुणः यन्मामपीदस्यस्मिंस्तेधर्मीयाग्मदनुग्रह इति अतः प्रतिकल्पंभिन्ना एवचतुर्मुखाः अतएव यद्यपिपूर्वानुभूतवस्तुविषयकज्ञानपरःस्मृतिशब्दः तथापीहसर्गविषयक ज्ञानमात्रपरः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

स्मृतिशब्दप्रयोगस्तु प्रागनुभूतानामर्थानां तत्सजात्याभिप्रायकृतः पूर्वदृष्टात्यन्तसजातीयेन घान्तरे सएवायं गौरिति प्रत्यभिज्ञावत् । ननु वैराजधारणायां विश्वसृष्टिसामर्थ्ये विश्वसृष्टौ च सत्यां सृष्टानां पातालादीनां वैराजपादतलादिरूपेण धारणेतीतरेतराश्रयत्वं भाति न च प्रागेव मायापदार्थविषयक ज्ञानसद्भावेन पातालादीनामवयवत्व कल्पनं युक्तं स्मृतिं प्रत्यवरुध्येत्यनेन ज्ञानस्यापि धारणातो लभ्यत्वावगमात्सत्यं भगवन्नाभिकमलाच्चतुर्मुखे उत्पन्ने तपश्चर्यया भगवति प्रसन्ने भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयां ताभ्यामन्तर्हृदि ब्रह्मन्लोकान्द्रक्ष्यस्यपावृतान् । तत आत्मनि लोके च भक्तियुक्तः समाहितः द्रष्टासि मां ततं ब्रह्मन्मयि लोकांस्त्वमात्मनि इति वक्ष्यमाणरीत्या स्रक्ष्यमाणेषु सर्वेषु पदार्थेषु दृष्टेषु तेषां च पदार्थानां भगवदवयवत्वेन धारणायां सृष्टिविषयज्ञानसृष्टिसामर्थ्यलाभस्यात्राभिधानात् । दैनन्दिनकल्पाभिप्रायं वा एवं प्रपञ्चशरीरकतया भगवद्ध्यानाद्ब्रह्मणः सृष्टिक्षमत्वलाभ उक्तः ॥ १ ॥

अथ मुमुक्षुभिर्हृदि उपास्यं रूपं वक्ष्यन् यावानर्थ उदपाने सर्वतः संप्लुतोदके इति न्यायेन वेदं मुमुक्षोः साकल्येनार्थानुपादेयत्वमाह । शाब्दस्येति शाब्दस्य शब्दात्मकस्य ब्रह्मणो वेदस्यैषपंथा एषा दिक् कर्त्यत आह यदिति अपार्थैरपगतपरमपुरुषार्थैर्नामभिः स्वर्गादिविषयशब्दैर्धीर्बुद्धिर्ध्यायति चिन्तां करोतीति यत्स्वर्गादिफलेश्रुतेतद्धीः । प्रवणास्यादित्यर्थः नाम्नां सारवत्त्वं न स्वरूपत इति द्योतनार्थं नामपदप्रयोगः तृतीयाचाध्ययनेन वसतीत्यादिवत्तत्त्वर्थेनाममात्रसारभूतस्वर्गाद्यर्थकर्मणि बुद्धिप्रावण्यापादनामिति यद्यं वेदमार्गइत्यर्थः स्वर्गादीनामपार्थत्वमेवाह परिभ्रमन्निति मायामयं प्रपञ्चे वासनया ऽनादिकर्मवासनया शयानो वर्त्तमानः तत्र स्वर्गादिविषये परिभ्रमन्नर्थान्मोक्षतदुपायादीन्नविंदते न लभते ॥ २ ॥

ननु मातापितृसहस्रेभ्योपि वत्सलतमो वेद आत्मोज्जीवने प्रवृत्तः कथं नाममात्रसारभूतस्वर्गाद्यर्थकर्मबोधयन्प्रतारयेदित्याशङ्कां परिहरन्मुमुक्षोरपेक्षितांशस्योपादेयतामाह । अतइति अतः वेदोक्तस्य साकल्येनानुपादेयत्वात्कविः त्याज्योपादेयविषय विवेकवान्नतेनोक्तान्कांकापरिहृता वेदोहितमः प्रचुराणां रजः प्रचुराणां सत्वप्रचुराणां च लोकानां वत्सलतयैव हितमवबोधयति । यद्येषां स्वगुणानुगुण्येन स्वर्गादि साधनमेवहितं नाववोधयेत्तदा एते रजस्तमःप्रचुरतया सात्विकफलमोक्षविमुखाः स्वापेक्षितफलमजानन्तः कामप्रावण्यवशात् अनुपाये उपायभ्रान्त्या प्रनष्टाभवेयुरिति गुणत्रयप्रचुराणां स्वर्गादिफलानि तत्साधनानि चाववोधयति । केवलसात्विकस्य तु मुमुक्षोस्तानि परित्याज्यानि परिगृहीतानि वा तत्फलानि परित्यज्य सर्वाणि कर्माणि मोक्षैकफलतयानुष्ठेयानीति विवेकसम्पन्नः अप्रमत्तः कदाचिदिह देहधारणार्थतया परिप्राप्तेष्वप्यन्नपश्वादिष्वनासक्तः व्यवसायबुद्धिः स्वर्गादीनां क्षयिष्णुत्वसातिशयत्वनिश्चयात्मक ज्ञानवान्नाममात्रसारभूतेषु भोगेषु यावदर्थः स्यात् यावत्प्रयोजनवान्स्यात् न तु प्रयोजनाभासेषु रतः स्यादित्यर्थः । नानाविधेषु फलेषु तत्साधनभूतेषु बहुषु कर्मसु वेदबोधितेषु सत्स्वपि यावता देहधारणीमुपासनानिर्वृत्तिश्च भवति तावत्परिग्रहवान्स्यादित्यर्थः देहधारणार्थं क्षुद्रफलेष्वपि यतितव्यमित्यत आह । सिद्धइति अर्थेऽपेक्षितेऽर्थेऽन्यथापूर्वकर्मानुरूपे सिद्धे सति तत्तत्क्षुद्रफलतदुपायादिष्वपि न यतेत कथम्भूतो न यतेत तत्र यत्ने क्रियमाणे परिश्रमं समीक्षमाणः भवितव्यमेव भवति परिश्रमस्तु फलति इत्यर्थः ॥ ३ ॥

अन्यथासिद्धिं विवृणोति सत्यामित्यादिना द्वयेन क्षितौ सत्यां कशिपोः शय्यायाः पर्यङ्कादेः प्रयासैस्तदर्जनानुकूलप्रयत्नैः किं न किमपि । किंतु परिश्रम एवेत्यर्थः स्वतः सिद्धे बाहौ सत्युपबर्हणैः किं अञ्जलौ सति पुरुधा अन्नपाद्यानानाविधये भोजनपात्रैः किं उपधानैः दिक्वल्कलादौ सति दिक्षु उत्तरीयस्थानीयासु सतीषु वल्कलेषु अन्तरीयस्थानीयेषु सत्सु न तु वल्कलाभावेदिक्षु सतीष्वित्यर्थः स्वरसः अपवित्रकरो नमहति नम्रस्य कर्मानर्हत्व स्मरणान्मुमुक्षोरप्यावश्यकानामनुष्ठेयत्वात् दुकूलैः क्षौमैः किं ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं वैराजाख्यस्थूलरूपस्य धारणाश्रयत्वमुक्त्वा ऽस्मिन्नध्यायेतस्य हृदयकमलकर्णिकान्तर्वर्तिनो हरेरन्तर्याम्याख्यरूपस्य धारणाविषयत्वं तदुपासकानां फलं चोपदिशति । तत्र प्रथमतो धारणायां क्षिप्रप्रवृत्तये कुत्रकस्य दृष्टफलेयं धारणेति चक्षुगंकुरुन्मूलयन्निहि यद्वा विपर्ययमिति प्रश्नं परिहरति एवमित्यादिना आत्मा परमात्मा योनिः कारणं यस्य स तथा स ब्रह्मा पुराभादिसृष्टौ कालेन नष्टां तिरोहितां प्राक्कल्पविषयां स्मृतिमेवमुक्तधारणया प्रत्यवरुध्य ऽङ्कुरीकृत्य प्रतिलभ्य तुष्यन्नलं बुद्धिं गच्छन् व्यवसाये जगत्सर्जनलक्षणोद्योगे बुद्धिर्यस्य स तथा तत एव धारणायाएवामोघदृष्टिः अप्ययात्प्रलयात्पूर्वं यथावस्थितं तथेदं जगत्ससर्जेत्यन्वयः ब्रह्मणो दृष्टफलत्वादियं विश्वसर्जनार्यैर्निश्चितेत्यागते ॥ १ ॥

वाङ्मनोऽगोचरस्य कथं धारणावलंबनत्वमत्राह शाब्दस्येति उक्तप्रकारेणाथोतव्यादित्वेनाविश्रुतांसमनत्वात्स्वतन्त्रत्वात् ब्रह्मादिसर्वजगत्स्रष्टृत्वात्सर्वांतःस्थितत्वात्सर्वस्य तदधीनत्वात्सर्वगुणसम्पूर्णत्वाच्च शब्दस्य ब्रह्मणो वेदादिसर्वशब्दराशेरेष हरिः पन्थाविषयो मुख्यवाच्य इत्यन्वयः । इन्द्रादिनाम्नां पुरन्दरादिष्वेवरूढत्वात् हरेस्तन्नाम वाच्यत्वे रूढेःक्वाप्यप्रयोजकत्वमत्राह यन्नामभिरिति मायामयं स्वेच्छानिर्मितत्वात्तदधीने संसारे शयानः परिभ्रमन्किमप्यजानन्वर्तमानो तएव वासनया नानाकर्मवासनया नानायोनिषु परिभ्रमन्योजीवस्तस्य धीर्यत्पुरन्दरादिकमिन्द्रादिनामभिर्ध्यायति तत्र पुरन्दरादावर्थानिन्द्रादिनाम्नामनुपहतपरमैश्वर्यादिलक्षणानर्थान्विन्दते न लभते सुखमप्राप्नोति किञ्च तदुपास्तीतेभ्यः पुरुषार्थाश्च न लभते । कुत इत्यत उक्तं अपार्थैरिति तत्रैश्वर्याद्यर्थानाममसम्भवात् अतो हरिरेव परमैश्वर्यादिगुणाकारत्वेनाभिधेय इति स एव स्मर्तव्य इति अन्यत्सर्वमस्मर्तव्यं प्राधान्येनेति भावः अनुपसर्गोपक्लृप्तप्रत्ययविधानाद्ध्यायती निर्धीर्ज्ञानाश्रयः पुरुषो वा यदित्यव्ययं यत्स्वेनापार्थैरित्यनेन संयोज्य पदपार्थैर्यस्मिन्पुरन्दरादावपार्थैरिन्द्रादिनामभिः पुरन्दरादिकं ध्यायति तत्र पुरन्दरादावर्थितवा सर्वनामावाच्यो विष्णुस्तदन्यार्थो न तु स्मरेदिति स्मृतिप्रसिद्धिमाह शब्दमाह ॥ २ ॥

सर्वशब्दानां विष्ण्वेकविषयत्वे विबुधाभिवादनादि सर्वव्यवहारोच्छेदप्रसङ्ग इति तत्राह अतइति एवं सर्वनामार्थतया हरिरेव ध्येय स्तद्व्यवहार्यश्च यतोऽतः कविः सर्वज्ञः । अप्रमत्तो जागरणशीलो नाम्नां हरिविषयत्वमविस्मरन्नित्यर्थः अतएव व्यवसायबुद्धिर्निश्चयबुद्धिर्नामसु हरेस्तदविषयेषु घटादिषु अभिवदनादिना यावदर्थः स्वप्रयोजनं यस्य स तथा स्यात् । नाताधिकप्रयोजन इत्यर्थः अन्यथा घटादिलोकविषयव्यवहारमन्तरेणार्थस्वप्रयोजनं सिद्धेस्वयमेव सम्पन्नोऽतत्र यतेतेत्यन्वयः कुतोऽत्राह तत्रेति तत्तत्पदार्थेषु तत्तत्परिश्रममर्थं पूर्त्यभावे मनःक्लेशं समीक्षमाण इत्यन्वयः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

इदानीं स्वतःसिद्धिप्रकारं दर्शयति मत्वामिति देवनिर्मितायां क्षितौ सत्यां कुशिपोः शय्यायां सत्यां स्वतःप्राप्तैरेव प्रयासैः किमपि किमपि प्रयोजनं । शरीर ८ प्राणिनिर्वाहस्य प्रत्यान्तरगतासमर्थत्वादिति भावः । बाहौ स्वसिद्धे सत्युपधानायासेन किं अञ्जलौ सति .... पात्रैः किं । कटाद्यभावे सति पुरुभिर्विस्तीर्णैः पर्णपात्रैः किं वल्कलपर्णादलंपत्रमित्यभिधानं दिशामेवाम्बराणां लाभे सति दुकूलैर्निष्कापायसो मादिवसनैः किं ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

० ॥ १ ॥

शाब्दस्येति । यत यस्मात् यं श्रुत्वेत्यर्थः ॥ २—५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

माननेयविनिर्धारस्तत्वार्थे विनिरूपितः । फलसाधननिर्धारो द्वितीये विनिरूप्यते ॥ १ ॥

द्विविधस्तत्वनिर्देशो बाह्याभ्यंतरभेदतः । बाह्यो निरूपितस्तत्र मानमेयपुरःसरं ॥ २ ॥

आन्तरो भक्तिमार्गेण फलसाधनबोधनः । अतः साधननिर्धारः प्रथमं क्रियते स्फुटः ॥ ३ ॥

पश्चात्फलस्य निर्धारस्ततस्तत्वफलिष्यति एवं पूर्वाध्याये सर्वेषां संसूतानां प्रमाणतः प्रमेयतश्च तत्वं निर्धारितं । भिन्नतया प्रतीतानामपि भगवति प्रवेशात् । भगवतां प्रष्टुत्वाच्च प्रसङ्गाद्भगवतः साधनत्वं फलत्वं चोक्तं तथापि बाह्यत्वात्तयोस्तत्वनिर्धारः इदानीं सर्वेषां केन रूपेण साधनता केन रूपेण च फलतेति विचार्यते । तत्र त्यागविषयत्वेन साधनता । अवान्तरफलत्वे न च फलतेति सर्वपरित्यागेन जीवस्य रूपस्य साधनत्वं ब्रह्मस्वरूपस्य च फलत्वं निर्धारितं भविष्यति तत्र पूर्वोक्तफलस्य साधनस्य वा प्रकृतोपयोगं वक्तुं वैराग्यशेषत्वेन तदुपयोगमाह एवंपुरेति तथा सामर्थ्यं फलमिति केचित् तदयुक्तं .... त्वात् नष्टस्मृतेः प्रत्यवरोधवचन विचारणीयं नष्टपदेन च नवधानाशो पुनस्तु तेन भगवता तत्संपादनेतोषहेतुत्वमेव भवेत् ननु सामर्थ्यहेतुत्वमपि अन्यथासिद्धत्वात् । अत्र तु पूर्वं विस्मृतोत्पन्नबोधहेतुत्वेऽपि वैराग्य हेतुत्वं भगवत्तोषेणासर्वहेतुत्वमिति । प्रथमन्तत्प्रत्ययवशेऽपुनः ससर्जेति सम्बन्धः तुष्टादिति हेतौ पञ्चमी तुष्टाद्भगवतः सकाशाद्भगवद्दत्तो हेतु भावाद्वा यथा पूर्वं तथा ससर्ज । तोषे पूर्वज्ञानमेव हेतुः यथा कश्चित्कञ्चन पदार्थं सङ्गोप्य बालकं व्यामोहितं सञ्चेत् पायेन तज्ज्ञापयेत् तदा सन्तुष्टो भवेत् पितृत्वात् तथा स्वस्यापि सृष्टेः पूर्वं भगवत्सन्निकटे स्थितत्वात् भीमभगार्थमागतस्य तद्विस्मरणात् । उपायेन तत्स्मरणात्तुष्टः सन् स्वरूपं प्रापयेदिति मुख्यं साधनं पूर्वोक्तधारणैव तोषसाधनम् अपि तु प्रतुतत्रकिमलभ्यमिति न्यायेन अन्यत्सर्वं सुगमं भविष्यतीति तदवद्यं साधनं कर्तव्यं । सृष्टिसामर्थ्यत्वप्रयोजकं । परमधिकारित्वेन प्रतिबन्धकं आत्मयोनिर्ब्रह्मा नष्टां विस्मृतां स्मृतिपदार्थज्ञानं सृष्टेरनादित्वात् पूर्वमपि स्मरणेनैव कृतं अतः संस्कारनाशो नोक्तः । तुष्टाद्भगवतः सकाशात् इदं सर्वं भगवत्येव लीनं स्थितं पुनस्तथैव यथाप्ययात् प्रलयात् प्राक्पूर्वं यथेयं सृष्टिः यथा वाव्यवसायात्मिका बुद्धिर्यस्य तथाभूतः सन् तथा ससर्जेत्यर्थः ॥ १ ॥

इदानीमिहामुत्रार्थ फलभोगवैराग्यं सर्वविषयत्यागार्थं साधनान्तरमाह शब्दस्येति सर्वे विषयास्त्यक्तव्याः तत्र महतां लौकिकबाधा भावेऽपि परित्यागे वैदिकं बाधकं भवेत् । यावज्जीवमग्निहोत्रं जुहुयात् स्वर्गकामः प्रजाकामः पशुकाम इति तत्र यावज्जीवाधिकारस्य नित्यत्वे अग्निप्रजाकामनादीनां वा नित्यत्वे वैराग्यमकर्तव्यमेव स्यात् कर्तव्यत्वे वा आन्तरमेव कर्तव्यं स्यात् । आत्मन्यग्निसमारोपणं वा कृत्वा अग्निहोत्रं कुर्वाण एव प्रव्रजेद्वा जरामर्यादाग्निहोत्रं वा कुर्यात् सर्वेषां पदार्थानां श्रुतिमूलकत्वेन तद्विरोधेन पदार्थकल्पनाया अशक्यत्वात् । तस्माद्यथोक्ता एव पदार्थाः फले साधने चावगन्तव्याः तस्माद्वैराग्यं पूर्वोक्तप्रकारेण शास्त्रार्थनिर्धारो वा न सम्भवतीत्याशङ्क्य सर्वस्यापि वेदस्यार्थमाह यथा परब्रह्म भगवानर्थरूपः । एवं वेदोऽपि शब्दराशिभूतं ब्रह्म अम्बुराशिवत् यथा ब्रह्मणि सर्वत्रानन्दः पूर्णः एवं शब्दब्रह्मण्यपि सर्वत्र फलमुच्यत स्वस्य ब्रह्मत्वख्यापनाय शब्दप्रस्थानत्वाच्च शब्दमात्रं अर्थस्तु परब्रह्मरूपमिति फलन्तदुक्तं अन्यथा एकस्मिन् कर्मणि प्रतिसाधनं धर्मधर्मिभेदेन क्रियाभेदेन च उच्यमानानि फलानि अप्रामाण्यं अन्यानर्थक्यं वा सम्पादयेयुः यथा स्वर्गाय यापतानि लोकायरूपन्त इत्युपक्रम्य दक्षिणाहोम आहुतिचतुष्टयं नैमित्तिकं दक्षिणासंस्कारत्वेन क्रियमाणं गार्हपत्ये आहुतिद्वयं । आग्नीध्र उत्तरवेद्यां चैकैकाहुतिः तत्र प्रतिकर्म संख्यादीनामपि माहात्म्यं वेदेन बोध्यते द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमान प्रतिष्ठित्या इति यद्येतदाहुतिद्वयमेव यजमानः प्रतिष्ठितः तदा अन्यानर्थक्यमेव स्यात् । विरोधेन अप्रामाण्यं वा स्यात् विकल्पस्तु न भवत्येककर्मत्वात् किञ्च आग्नीध्रे जुहोति अन्तरिक्ष एवाक्रमत इति यदाग्नीध्रहोममात्रेणैव अन्तरिक्षाक्रमणसामर्थ्यं स्यात् तदा श्रुतिः अप्रमाणं स्यात् तत्प्रत्यक्षविरोधात् असम्भावितं आहवनीये जुहोति स्वर्गमेवैनं लोकं गमयतीति तदानीमेव यजमानस्य स्वर्गप्राप्तिर्नामनिष्ठमिति प्रवृत्तिप्रतिबन्धकता च स्यात् किञ्च आहुतिद्वयसंख्यया यजमानस्य प्रतिष्ठितत्वमुक्त्वा सौरीभ्या मृग्भ्यां गार्हपत्ये जुहोत्यमुमेवैनं लोकं समारोहयतीति होमसाधनऋचोः सूर्यप्रकाशकत्वेन धर्मेण स्वर्गाक्रमणलक्षणं फलमुक्तं तच्च संख्याफलेन विरुध्यते एवं सर्वत्र बहुफलत्वं अन्योन्यविरुद्धफलत्वं च कर्मणां वदन् अप्रामाण्यमेव स्यात् अतः प्रामाण्यार्थं किञ्चित्तात्पर्यं वर्णनीयं यथा च शब्दार्थो बाधितो न भवेत् तथा च वर्णनीयं । तत्र षोडशर्त्विग्रूपयजमानात्मकस्य यज्ञस्य सर्वलोकान्तःपातिनः भगवद्रूपस्य लीलासर्वं वर्णयन्त यथा स भगवान् एकत्रैव सर्वरसानां विद्यमानत्वात् सर्वत्र सर्वपूर्णोऽपि यथायथं येन भागेन लीलां कृतवान् तथा वेदो वदतीति निश्चीयते तत्र काण्डद्वयेऽपि अयमेव भगवान् विराड्रूपः यज्ञपरमात्मा प्रतिपाद्य इति यदस्माभिः स्थूलाधारणा उक्ता वेदेनापि तदेवोक्तं .... अस्म तुकपवपन्थाः किन्तु लोको भ्राम्यति वाक्यार्थापरिज्ञानात् यतः यत्र स्थितैर्नामभिः वाक्यार्थे सम्बन्धरहितैरेव पदार्थे विनिविष्टस्य यत्र साधनतां ज्ञात्वा तत्तत्कर्माणि करोति ततस्तमेवार्थं ध्यायति न हि पदानां वाक्यार्थबोधने पदार्थस्यापि बोधकत्वं युगपद्वृत्तिद्वयविरोधात् । अतः स्वार्थे अपार्थैरेव नामभिर्लोको भ्राम्यति । ततः स्वबुद्ध्या वेदार्थमत्वा तत्र प्रवृत्त्या परिभ्रमन् तदर्थं कर्म वा कुर्वन् अर्थान् फलत्वेनो कामान् विन्दति । किन्तु वासनया कामनाहतोऽनन्तमेवार्थं विचारयन् शयानो भवति .... तात्पर्यं तस्माद् स्मदुक्ते वेदोक्ते च सन्देहाभावात् प्रामाण्यसन्देहः कर्तव्य इति भावः ॥ २ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

नैपुणादेवैतो निष्प्रकारकमप्यर्थं प्रतिपादयेत्। तदाकस्यापि कोऽपि पुरुषार्थो न सिध्येत् सर्वकरणासामर्थ्यात् तस्मान्नैवं निर्णयो युक्त इत्याशंक्य प्रसिद्धार्थानुवादकत्वेन महावाक्योपयोगार्थमवांतरफलान्यनुवदति। तानि लोकसिद्धत्वात् युक्तियुक्तानि साधनानि तादृशफलार्थं कर्तव्यानि यथाधनं विना प्रयाणमसि। अग्नेः क्रतुतो लोकसिद्धाप्रपाप्तांतीक्रियते। तथाकारीर्यां वृष्टिकामो यजेत श्येनेनाभिचरन् यजेतेति फलानि प्रत्यक्षसंवादीनि भगवल्लीलार्थमेव प्रतिपादितानि। महावाक्यार्थोपयोगीनि श्रुतेस्तात्पर्यं लोकप्रशंसारूपमत्र गंतुं निपुणो भूत्वा यदनुवादफलेषु साधनेषु इत्थं कार्यं सिध्यतीति तावन्मात्रपरः स्यात्। शांतो दांत उपरतस्तितिक्षुः शमदमादिकमुपक्रम्य आत्मन्येवात्मानं पश्येत्। एवं सर्वमिदं जगत् सम्भूतं अध्यमित्युक्त्वा आत्मेव तमेवं मत्वा हृदा च भूत्वा नेमृत्युमुपयाति विद्वानिति। शंभस्य पारस्त्युपक्रम्य य एवं विदुरमृतास्ते भवन्तीत्युपसंहाररूपं यद्वस्ययत्राधिकारः तावन्मात्रं भवेत्। तत्राप्यप्रमत्तः। नह्येवंज्ञानमात्रेण अग्निमकृतिनिरपेक्षेणाकार्यं सिध्यति। नन्वेवं गोधूमराशिपतितयवं धारणावत् प्रतिनिदर्शभुरालोकादिबलाभावात् अशक्यमेवस्यादित्याशंक्याह व्यवसायबुद्धिरिति। व्यवसायात्मिका बुद्धिर्यस्य अतिविचारेण सर्वमालोड्य स्वार्थमुद्धृत्य निश्चित्य तत्साधनकरणार्थं दृढां भवेदित्यर्थः। तत्र किं कर्तव्य मित्याकांक्षायां प्रथमतो लोकप्राप्तं देहादिनिर्वाहार्थं कार्यं न कर्तव्यमित्याह सिद्धेऽन्यथार्थ इति। अन्यथैव कालेन भगवता वा स्वभावेन कर्मणा लोकैर्वा देहनिर्वाहे सिद्धे स्वयं तत्र प्रयत्नं न कुर्यात् स्वस्य हि परिमितः प्रयत्नः। स भगवत्संबंधार्थं स्थापितो नान्यत्र विनियोगमर्हति किंच तत्तत्परिश्रमं तत्र समीक्षमाणः। न केवलमन्यथा सिद्धत्वमात्ररूपणं। तत्र देहनिर्वाहे तत्तत्परिश्रमं तेषां तेषां परिश्रममेकैकस्मिन् शय्यादिपदार्थे देहेंद्रियबुद्ध्यादीनां परिश्रमं समीक्षमाणो न यतेतेति सम्बन्धः॥ ३॥

अन्यथा सिद्धिं श्लोकद्वयेन साधयति। सत्यां क्षितौ विति क्षितौ विस्तीर्णतया प्रसारितशय्यारूपायां वालुकादौ कोमलरूपायां वा। उपार्जनक्लेशव्यतिरेकेणैव सत्यां सिद्धायां कशिपोस्तूलिकायाः वस्त्रकार्पाससीवनधूननास्तरणप्रयासैः किं फलं। साधनसुखस्य तुल्यत्वेऽपि अत्र दुःखाधिक्यात्। किंच स्वतः सिद्धे बाहौ महापुरुषस्य इंद्रियावैकल्यशंकाभावादेवमुक्तम्। उपबर्हणैः शिरस्पृष्ठतासाधनभूतैः गल्लुयां पादयाश्च सतूलवस्त्रपुटैः किं प्रयोजनं। भिन्नं वाक्यम् अतस्तात्पर्येणैकवाक्यता करपात्रेणापि भिक्षानिर्वाहे अनेकविधान्नपात्राणामादिमध्यान्तिकैः सर्वत्र प्रयासानुसंधानं कर्तव्यम् उष्णकाले दिशः। शीतकाले वल्कलादीनि आदिशब्देन चीरपत्रादीनि। दुकूलैः पट्टवस्त्रैः किं किंच नहि विरक्तस्य अन्नैरपि किं। लोका अपि सर्वस्य कव्या इत्यर्थः॥ ४॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

द्वितीये चिद्घनवपुर्धारणासिद्धयोगिनः। देहं जिहासोः सायुज्यप्राप्ताप्युक्तं सृतिद्वयम्॥
भगवत्त्वमिहारोप्य दृश्यप्राकृतवस्तुषु। धारणोक्ताथ तन्माध्या भगवद्धारणोच्यते॥

उक्तलक्षणधारणाया अवान्तरफलमाह। प्रत्यवरुध्य प्राप्य तुष्टात् परमेश्वरात्। अप्ययात् प्रलयात् प्राक् इदं विश्वं यथासीत् तथा ससर्ज। व्यवसायं भगवत्प्रेरणावशात् स्रक्ष्याम्येवेति निश्चये बुद्धिर्यस्य सः॥ १॥

अत्र म्रियमाणः किं कुर्व्वीतेति प्रश्ने स्वर्गसाधनं यागादिकं कर्मैव कुर्वीतात्र वेदः सर्व एव प्रमाणमित्याचिख्यासूंस्तत्र कांश्चन प्रत्याह। शाब्दं शब्दमयं ब्रह्म वेदस्तस्य एष पन्थाः। कोऽसौ यन्नामभिः नाममात्रैरेव स्वर्गादिभिः धीः साधकस्य बुद्धिः ध्यायति स्वर्गे सुखमेव प्राप्स्यामीति विचारयति वृथैव। यतोऽपार्थैः अपार्थत्वमेवाह मायामये तत्र स्वर्गादौ सुखमिति वासनया शयानः स्वप्नान् पश्यन्निव परिभ्रमन् अर्थान् न विन्दति तत्तल्लोकं प्राप्तोऽपि क्षयिष्णुत्वान्निरवद्यं सुखं न लभते इत्यर्थः॥ २॥

एवं योगप्रसङ्गे एव कर्म्मिणां मतम् अतिबहिरङ्गत्वेन स्पष्टमेव विनिन्द्य कर्मफलेषु वैराग्यं भक्तज्ञानिनोरपि साधारणं योगारूढानामवश्यकर्त्तव्यत्वमाह। अतो बुद्धिमान् भोगार्थं न ध्यायेत् न यतेन च। किन्तु कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता इत्युक्तन्यायेन तावत्सु भोग्यवस्तुषु यावता अर्थेन स्वीकृतेन अर्थः स्वकृत्यनिष्पत्त्यर्थं देहनिर्वाहस्तावानेवार्थो ग्राह्यो यस्य तथाभूतः स्यात्। यतोऽयम् अप्रमत्तः स्वसाधनसिद्धौ सावधानः। किञ्च विघ्नबाहुल्यदर्शनेऽपि स्वयोगान्न परावर्त्ततेत्याह। व्यवसायबुद्धिः यद्भवेत् तद्भवतु मय तु यन्निश्चितं तन्निश्चितमेवेति दृढविचार इत्यर्थः। किञ्च यावदर्थतापि कस्यचिदतिसुकुमारस्यैवोक्ता न तु स्वतःसमर्थस्येत्याह। अन्यथा प्रकारान्तरेण अर्थे स्वदेहनिर्वाहे सिद्धे सति तत्र पिष्टपेषन्यायेन न यतेत। यतः तत्र यत्ने परिश्रमं धनिकजनोपासनादिकम्॥ ३॥

समर्थस्यान्यथासिद्धिमाह सत्यामिति। कशिपोः शय्यायाः बाहौ स्वसिद्धे स्वतःसिद्धे सति उपबर्हणैः उच्छीर्षकैः पुरुधा पुरुः बहुप्रकारे धा अन्नपात्र्या भोजनपात्रेण॥ ४॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

पूर्वाध्याये साधनरूपस्थूलविग्रहवतो वैराजस्य भगवतो धारणोक्तेदानीं तत्साध्यरूपांसर्वान्तर्यामिणो भक्तेच्छयाविष्कृताप्राकृत शरीरस्य धारणां वक्ष्यन् पूर्वोक्तायाधारणाया अवांतरफलमाह एवमिति एवमुक्तलक्षणया धारणया तुष्टाद्वैराजात्पुराप्रलयवेलायां नष्टां स्मृति स्मृतिं प्रत्यवरुध्य पूर्वप्रजातुल्याया उत्तरप्रजायाः रचनार्हांपुनः प्राप्य अतएवाऽमोघा धीर्यस्य सः अतएव व्यवसायबुद्धिः आत्मयोनिर्भगवत्पुत्रः ब्रह्मा अप्ययात्प्रलयात्प्राक् इदंविश्वंयथासीत्तथा तादृशमेवससर्ज "सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत्" इति श्रुतेः ननुपूर्वसृष्टिकर्तुर्ब्रह्मणः "ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मानः प्रविशंतिपरंपदम्" इतिवचनाद्ब्रह्मयोनेर्मुक्तत्वादिदानींप्रपद्यतइतिवक्तव्यं सर्वेषां चैतुर्मुखानामेकैकेनजन्मनाऽपुनरावृत्तिवाक्याभावात्। नचवाच्यंप्रतिकल्पसृष्टिविषयकस्मृतिंप्राप्नोतीति तत्रस्मृतिनाशासंभवात्॥ १॥

ननु नानोपमेषुद्धिश्यमानोपिजनः किंचिदपि यथेष्टसुखं नप्राप्नोतियदीश्वरधारणयाविश्वसृष्टिसामर्थ्यं भवति तस्य भगवतः सुखसाध्येमहाफलोपधिकृतोनभवर्ततेत्यत्राह शाब्दस्येति शब्दस्य "वेदैश्चसर्वैरहमेववेद्यः" इतिस्मृतेः सर्वेवेदायत्पदमामनंतीतिश्रुतेश्चवेदैकप्रमाणकस्यब्रह्मणः

चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ।
रुद्धा गुहाः किमजितोऽवति नोपसन्नान् कस्माद्भजन्ति कवयो धनदुर्मदान्धान् ॥ ५ ॥
एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः ।
तं निर्वृतः नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥ ६ ॥
कस्तां त्वनादृत्य परानुचिन्तामृते पशूनसतीं नाम कुर्यात् ।
पश्यन् जनं पतितं वैतरण्यां स्वकर्मजान् परितापान् जुषाणम् ॥ ७ ॥
केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

एषपंथाः तस्यनभवति कस्य यत्यस्यबुद्धिः अपार्थैःपुरुषार्थवर्जितैः नामभिर्नामेतिरूपस्याप्युपलक्षणंतथाचनामरूपैरित्यर्थः मध्यवर्त्मेन-वसतीतिषष्तृतीयाहेत्वर्थे हेतुभूतैः दाराऽपत्यादिभिः ध्यायति अतएवमायामयंप्राकृतेलोकेवासमयाशयानः परिभ्रमन्तमायामयंतानर्था-न्स्वकर्मानुरूपान्दारापत्यादीन्विदतेनतुयोगसिद्धिमित्यर्थः ॥ २ ॥

एवंबद्धजीवस्वभावमुक्त्वावक्ष्यमाणधारणाया अधिकारिणं मुमुक्षुं प्रतिरहस्यमुपदिशतिभगवान्शुकः । अतइतिपञ्चभिः अतो-बद्धस्यविवेकिनोनामरूपासक्त्यायोगेऽधिकाराभावाद्धेतोः कविःक्रांतदर्शीहेयोपादेयविवेकवान् । व्यवसायबुद्धिः सर्वपरित्यागपूर्वकं हरिभजनंकर्तव्यमितिनिश्चयवान्मुमुक्षुःनामसुनामरूपेषुभगवद्ध्यानयोगे उक्तरीत्याऽनधिकारापादकेषुयावदर्थएवस्यात् । भोजना-च्छादनादिरूपोहरिसेवार्थं देहधारणार्थकोऽर्थोयस्यतथाभूतःस्यात् । भोजनाच्छादनादिनिर्वाहकेषु नामरूपेष्वप्यप्रमत्तोऽनासक्तः । ताव-न्मात्रेऽप्यर्थेऽन्यथासिद्धेभूयोनयतेततप्रयत्नेपरिश्रमंसमीक्षमाणः ॥ ३ ॥

सिद्धेऽन्यथार्थेइत्येतद्विवृणोति सत्यामितिद्वयेन क्षितौपृथिव्यांसत्यांकशिपोः शय्यायाः पर्य्यंकादेःप्रयासैः प्रयत्नैः किंनकिमपि स्वतःसिद्धेबाहौसतिउपबर्हणैः शिरोपधानैःकिम् अञ्जलौसतिउरुधाबहुविधया अन्नपात्र्याकिम् । दिग्वल्कलादावपितिवल्कलादौसतितद-भावेदिक्षुसतीष्वित्यर्थः नप्रात्यंतत्यागिमुमुक्षुविषयम् अतएवोक्तंशुकलक्षणंदिगंबरमिति । "अपवित्रकरोनग्न" इत्यादिवाक्यंतुकेवलकर्म-विषयम् आदिनावस्त्रखंडादिपरिग्रहः बहुयत्नसाध्यैर्दुकूलैः किम् ॥ ४ ॥

———————

भाषा टीका

द्वितीय अध्याय ।

श्रीशुक उवाच—ऐसी धारणासे सन्तुष्ट ईश्वरसे प्रलयकाल की नष्टस्मृतिको फिर प्राप्तकर निश्चय बुद्धि आत्मयोनि (ब्रह्मा) ने यथावत् इस जगत्‌की सृष्टिकी । जैसी प्रलयके पूर्व मे थी ॥ १ ॥

शब्द ब्रह्मका यही पन्था है की अपार्थ नामोंसे साधककी बुद्धि ध्यान किया करती है । और वह जन मिथ्या अर्थात् मैथमना वासनासे मायामय पथ में शयान अर्थोको नहीं प्राप्त होता है ॥ २ ॥

इसी से कवि (क्रान्तदर्शी) को चाहिये कि नाममात्र के (मिथ्या) अर्थोमें यावदर्थ रहकर अप्रमत्त रहे । और अर्थके मिथ्या होने मे निश्चय बुद्धि हो । एवं परिश्रम देखकर अन्यथा (स्वतः) सिद्ध अर्थ मे यत्न न करे ॥ ३ ॥

(भोगकी स्वतःसिद्धता दिखलाते हैं) इतनी बड़ी पृथ्वी के रहते पलङ्गका क्या प्रयोजन है । जब अपनी बाहु अपने शरीर ही मे है तब उपबर्हण (तकिया) का क्या प्रयोजन है । अञ्जली रहते थाली लोटा कटोरा का क्या काम है । दिशा और वल्कलके होते वस्त्र से क्या काम है ॥ ४ ॥

———————

श्रीधरस्वामिकृत भावार्थदीपिका ।

ननु दिक्सद्भावो नाम नग्नत्वमेव वल्कलम् अन्नं तोयं वासः स्थानञ्च याच्ञाप्रयत्नं विना कथं प्राप्येत तत्राह । चीराणि वस्त्र-खण्डानि । परान् बिभ्रति पुष्णन्ति फलादिभिर्ये । गुहाः गिरिदर्यः ननु कदाचिदेषामलाभे किं कार्यं तत्राह अजितः हरिः उपसन्नान् शरणागतान् किं न अवति न रक्षति । किञ्चास्य पूर्वत्रापि सम्बन्धः । उक्तञ्च—भोजनाच्छादने चिन्तां वृथा कुर्वन्ति वैष्णवाः । योऽसौ विश्वम्भरो देवः कथं भक्तानुपेक्षते इति अतेन यो दुर्मदस्तेनान्धान् ॥ ५ ॥

तदा तेन किं कर्त्तव्यम् हरिस्तु सेव्य इत्याह । एवं विरक्तः सन् तं भजेत । भजनीयत्वे हेतवः स्वचित्ते स्वत एव सिद्धः । यत आत्मा अतएव यः प्रियः तस्य च सेवा सुखरूपैव । अर्थः सत्यः न त्वनात्मवन्मिथ्या भगवान् भजनीयगुणः । अनन्तः नित्यः । य एवम्भूतः तं भजेत नियतार्थः निश्चितस्वरूपः । तदनुभवानन्देन निर्वृतः सन्निति स्वतःसुखरूपत्वं दर्शितम् । किञ्च एवं भजने सति संसारहेतोरविद्याया उपरमो नाशो भवति ॥ ६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एतदेवान्यचिन्ताभिन्दया द्रढयति क इति । तां तथाभूतां परस्य हरेरनुचिन्तां धारणामनादृत्य पशून् कर्म्मजडान् विना "यथापशुरेवं स देवानाम्" इति श्रुतेः असतीं विषयचिन्तां को नाम कुर्य्यात् । तया चिन्तया वैतरण्यां पतितं तत्र च स्वकर्म्मजानाध्यात्मिकादिक्लेशान् सेवमानं जनं पश्यन् । वैतरणी यमद्वारस्था नदी तत्तुल्यत्वात् संसृतिर्वैतरणी ॥ ७ ॥

तामेव धारणां सविशेषमाह केचिदिति षड्भिः । केचित् विरलाः । स्वदेहस्य अन्तर्मध्ये यत् हृदयं तत्र योऽवकाशस्तस्मिन् वसन्तम् । प्रादेशस्तर्ज्जन्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति हृदयपरिमाणं तत्रोपचर्य्यते । कञ्जं पद्मम् । रथाङ्गं चक्रम् ॥ ८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

निश्चितेति । निश्चितं स्वरूपं येन स निश्चितस्वरूप इति ॥ ६—९ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

ननु वल्कलमन्नंतोयंवासःस्थानञ्चयाच्ञादिप्रयत्नंविनाकथंप्राप्येततत्राह । चीराणीति जीर्णानिवस्त्राणि पथिमार्गेनसंतिकिं । परभृतःपरान्बिभ्रतिपुष्णंतिफलादिभिर्येतेऽघ्रिपाः भिक्षांनदिशंतिवाकिनप्रयच्छन्तिकिमित्यर्थः । सरितोनद्यःअशुष्यन्किं गुहाःपर्वतबिलानिरुद्धाःनिरुद्धाःकिं ननुकदाचिदेषामलाभेकिंकार्यंस्याततत्राह अजितइतिउपसन्नान्शरणागतानजितःसर्वेश्वरःनावतिनरक्षतिकिं । कवयोधनमदोदुर्मदः तेनांधान्कार्यानभिज्ञान्कस्माद्धेतोः भजन्तिकविभिरन्नाद्यर्थमपिदुर्मदांधानभजनीयाइत्यर्थः ॥ ५ ॥

इतरेदुःसेव्याःहरिस्तुसुसेव्यउक्तरीत्याद्यस्थितेरवैतृष्ण्याद्भगवत एवप्रीतिविषयत्वादित्याह एवमिति स्वचित्तेस्वकीयचित्ते एवंसिद्धउक्तानुसन्धानपरेसतिविषयान्तरविरक्तचित्तविषयभूतोयआत्मत्वादिगुणकः यत्रयस्मिन्सेव्यमाने संसारहेतुपरमभवबन्धहेतुभूताविद्यानिवृत्तिश्चभवतितंभजेतेत्यन्वयः भजनीयत्वस्योपायिकगुणानाह आत्मेत्यादि आत्माऽन्तःप्रविश्यधारकः धार्य्यस्यशरीरस्य जीवात्मनःधारकपरमात्मानुवर्त्तित्वंयुक्तमित्यभिप्रायः यतआत्माऽतएवप्रियःनिरतिशयप्रीतिविषयकः आत्मसम्बन्धादेवहिदेहापत्यकलत्रादिकंसर्वंप्रियवद्भाति आत्मनोऽप्यात्माहरिःप्रियइतिनिरतिशयसुखस्वरूपत्वस्याप्युपलक्षणम् अतएवार्थःनिरतिशयपुरुषार्थस्वरूपः निरतिशयसुखमेवहिपरमपुरुषार्थः पुरुषार्थस्वरूपस्यापिदुर्भगत्वेऽभजनीयत्वंस्यादतआह भगवान्हेयप्रतिभटसमग्रज्ञानशक्तिबलैश्वर्य्यवीर्यतेजःसम्पन्नःस्वरूपस्यज्ञानादिगुणानाञ्चपरिच्छिन्नत्वशङ्कांव्यावर्त्तयति अनन्तइतितमुक्तविधं स्वप्राप्तिविरोधिभूताविद्यानिवर्त्तकमात्मानंनिर्वृत्तइतरविषयवैतृष्ण्याभिर्रातशयसुखरूपपरमात्मोपासनायांसुखितःनियतार्थः नियतप्रयोजनः फलान्तरानिवृत्तइत्यर्थः उपासीतेत्यर्थः ॥ ६ ॥

एतदेवार्थान्तरचिन्तानिन्दयाद्रढयतिकइति तमीश्वरमनादृत्यमामितिपाठेऽश्वरचिन्तामनादृत्येत्यर्थःकोलोकः ऋतेपशून्पशून्विनापरानुचिन्तामर्थान्तरचिन्तामसतीमशोभनांकुर्यात्नामपशुरेवतथाकुर्य्यात्तथाकुर्वन्पशुरित्यर्थः परानुचिन्तयावैतरण्यांयमलोकमिन्धौतत्सदृशेसंसारेइत्यर्थः । पतितं तत्रतत्रस्वकर्म्मजानाध्यात्मिकादिक्लेशानुजुषाणंसेवमानंपश्यन्कःकुर्यादितिपूर्वेणसम्बन्धः ॥ ७ ॥

एवंफलान्तरतदुपायनिवृत्तस्य भगवद्ध्यानप्रकारमाह केचिदित्यादिना भगवदुपासनाबाहुल्येन उपासकबाहुल्यात्केचिदित्युक्तिः ननुस्वासम्मतत्वेन स्वदेहस्यान्तर्मध्येयोहृदयावकाशस्तत्रवसन्तंप्रादेशमात्रंप्रादेशसम्बन्धिनीमात्रावपुः परिमाणंयस्यतंहृदयान्तः प्रादेशसम्बन्धिमात्रयापरिच्छिन्नम् । "यस्त्वेतमेवंप्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्ते" इतित्रैलोक्यशरीरकेऽप्युपासकानुग्रहाय उपासनायाः प्रदेशसम्बन्धिमात्रया परिच्छिन्नत्वश्रवणात हृदयकमलस्यांगुष्ठमात्रत्वाच्च एतेनतर्जन्यंगुष्ठविस्तारं प्रादेशकृतपरिमितमित्ययुक्तमितिबोध्यं कञ्जकमलंरथाङ्गञ्चकन्दाक्षिणबाहुभ्याङ्गरथाङ्गवामाभ्यांशङ्खगदेबिभ्रतमित्यर्थः एवम्विधं पुरुषंकेचिद्योगीश्वराःधारणया स्मरन्तिधारणापूर्वकमुपासतइत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

ननुभवादृशानांयोगिनांक्षित्यादिनाशरीरयात्रामिक्षावप्यपरिग्रहयोगिनांपुंसांकथमुपभोगःसम्पत्स्यतइत्यत्राह चीराणीति "पदवीरथ्यागृहिभिर्दयानिपथितोरणो दरिद्राणाञ्चभिक्षूणामाच्छादनकराणिच" इतिस्मृतेः पथितोरणोगृहस्थैर्निहितानिचीराणिजीर्णवस्त्राणिमूषकादिप्रभिन्नानिवा । नसन्तिकिं भोजनार्थमितिचेत्परान्फलपाकादिनाबिभ्रतीतिपरभृतः अंघ्रिपावृक्षाःफलानिभिक्षांनाददतिवादिशंत्येव शयनार्थमितिचेत् गुहारुद्धाःपिहिताःकिं केनचिदितिशेषः गुहासुसिंहादिभयेनकथंवासःसम्पद्यतइतितत्राह किमिति कृष्णोबधुलानांधूलिधूसरांगानांसुहृन्नकिम । सुहृदेव अतोनम्रधाशयाकवयोधनादिदुर्मदेनांधान्विवेकचक्षुरहितान् राजादीन्कस्माद्भजन्तिनभजन्त्येव अतोमुमुक्षुणायदृच्छयालब्धाशनादिनाभाव्यमितिभावः ॥ ५ ॥

इदानीमुक्तानुष्ठानपरिपाककारमाह एवमिति एवमुक्तप्रकारेणयदृच्छयालब्धाशनादिनावृत्तिरष्टाप्रसक्तस्यस्वतःस्वतंत्रस्यहरेः प्रसादाच्चित्तेस्वाधीनतयावर्त्तमानेसन्निभगवानैश्वर्यादिगुणसमुद्रोऽनन्तःपरिच्छेदशून्यः आत्मापरमात्मादेहपुत्रादिभ्योऽत्यंतप्रियोऽर्थइतिकृत्वानिर्वृतःसमुद्भूतरोमाञ्चोनियतार्थः*"एतामितःप्रेत्याभिसम्भवितास्मि" इतिनिश्चितार्थःपुरुषस्तंभगवन्तम्भजेत । कदाचिदपितन्नजननमुक्तेत् । ततःकिंफलमत्राह संसारेति यत्रयस्मिन्संजमानेसेवकस्यसंसारहेतूनामविद्यादीनामुपरमः । अविद्यादीनांसद्भावेसोऽस्तीतिशङ्कयशङ्कातएवनसन्तियतइतिशङ्कमाबोऽसुरप्रकृतिरितिभावः तदेवप्रेयइत्यादिश्रुतिसिद्धंहरेः प्रियार्थत्वञ्च । नकेवलंसंसारहेतूपरमःफलं । किन्तुनिर्दुःखानन्दानुभवलक्षणमोक्षप्राप्तिश्चेतिचशब्दः ॥ ६ ॥

---

* इतश्चरमदेहात् प्रेत्यमृत्वा एतंहरिं अभि आभिमुख्येन सम्भवितास्मि सम्यक् यथायोग्यंभुक्तोभोगान्प्राप्स्यामीतिनियतार्थइति ।

श्रीमद्विजयध्वजकृतपदरत्नावली ।

भजनापरपर्यायोपासनं गुणोपसंहारेणाकार्यमितियतस्ततद्गुणकथनपूर्वकं तदेवोपासनं स्पष्टीकुर्वन् विशिनष्टि आत्मकमाह सर्वविदिति "प्राणएवैतस्मिन्पुरेजाग्रति" इतिश्रुतेः पञ्चवृत्तिरेकोमुख्यप्राणएवयथासुप्तजनस्येश्वितावृद्धा। तथासहरिः सर्वोप्येतानि सर्वविल्व हृदिस्थित्वा-नुभूयशेषानंदानुभवनात् सर्वोगुणपूर्णः आत्मास्वामीत्येवंगुणानुपसंहृत्यसत्यसर्वतः सारमानन्दानिधिंतं विष्णुंभजेतोपासीत आधिव्या-ध्यादिसमुद्भवेऽप्युपासनंनह। तथ्यमित्याशयेनोक्तं सर्वात्मनेति अतोऽन्यतः परमात्मानुप. सनेऽपिआत्मघातः अहितकरणादिनास्वात्महननाख्य दोषापरयानित्यदुःखनमप्राप्ति स्यादित्यन्वयः चशब्दस्तत्तद्योग्यतानुसारेणेत्यस्मिन्नर्थे "यथैकस्तुबहून्सुतानसुतःपश्यतिप्रभुः यथेष्टभवनात् विष्णुरनुभूःपरिकीर्तित" इत्यादेरुक्तएवार्थइति । स्वेच्छयानुकूलविग्रहग्रहणाद्वाऽनुभूः अनेनप्राणानंदत्वानिचेष्टालक्षणानिकर्माणिस्यामन्-शब्देनकर्मणयुक्तयन्ततेषांफलपर्यन्तं निभ्रायकत्वेनानिधिपालनत्वात् स्वामित्वाद्वाऽऽनन्दनिधिर्हरिरस्त्विति ॥ ७ ॥

भगवदुपासनामकुर्वाणस्यपशोरपिविलक्षणत्वंनास्तीत्याह कस्तमिति नरकंविगततरणं वावैतरणीनामनदीयातस्यांहरेरनुपासनाख्य-दोषात्पतितंस्वकर्मजान्स्वकृतकर्मसमुद्भूतानूपरितापानूसर्वतोदिशमागतानदुःखविशेषानूजुषाणंभुंजानंजनंगुरुशास्त्रोपदेशदृष्ट्यापश्यंस्तदाश-स्यस्यचितनादशदुःखानिवर्तकालंयुगोचरमुखप्रदंहरिंचपश्यन्कोवियेर्कांतभगवंतमनादरत्यासतीमशुभांपरजुचितामितरविषयामुपासित लक्षणांस्मृतिंयुंज्यात् पशुत्वंविवेकर्याद्वराहित्यमृते । यदियुंज्यात्तर्हिसपशुरेवनविवेकीत्यन्वयः "चतुर्वेदधरोविप्रोवासुदेवंनविंदति वेद-भारभराक्रांतःसवैब्राह्मणगर्दभ" इति ॥ ७ ॥

योग्यतातारतम्येनाधिकारिणांबहुत्वात्स्थूलरूपोपासनायोग्यानांतदुपास्तिमभिधायाधुनास्वदेहहृदयकमलकर्णिकानिकेतनात्मोपासना-योग्यानां तदुपासनाविधत्ते केचिदिति केचिदात्मोपासनायोग्याः स्वदेहांतर्हृदयावकाशेवसंतंप्रादेशमात्रंप्रादेशपरिमाणं । कंजंपद्मंरथां-गंसुदर्शनंशंखंपांचजन्यंगदांकौमोदकींधारयतीति कंजरथांगशंखगदाधरस्तंधारणाशीतेलधार। चतुर्भुजमित्यमनोवृत्त्यास्मरंतीत्यन्वयः ॥ ८ ॥

—————

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

एवं तत्र तत्र भगवत्येव तात्पर्ये सति स्वचित्ते स्वत एव सिद्धः श्रीभगवानेव परमपुरुषार्थतया सेव्यः किं तत्तदाग्रहेणेत्याह एवं स्वचित्ते इति तस्माद्भारत सर्वात्मा इत्यादिना यदुक्तं तदेव पुनर्निर्णीयत इति भावः । चशब्देनानुषङ्गिकमेवाविद्यानिवृत्तिः फलमिति बोधितम् ॥ ६ ॥

व्यतिरेकेण तदेव द्रढयति कस्तामिति ॥ ७ ॥

अथ तत्राप्येकदेशिनां मतमाह केचिदित्यादिसार्द्धचतुष्कैः व्यष्ट्यन्तर्यामिण एव धारणेयम् । गर्भोदकशायिरूपसमष्ट्यन्तर्यामिधा-रणा तु तृतीयस्कन्धे तद्वर्णनानुसारेण ज्ञेया । सैव सूचिता तं सत्यमानन्दनिधिं भजेत इत्यनेनेति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

—————

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

ननु सर्वत्र सर्वपदार्थाः अन्यदीयाः साधनेनैव सिध्यंति । क्षितिरपिकस्यचिद्भवति । अतस्तदाश्रयास्थातव्यं । तदनुरोधेनकर्म देहश्च पराधीनः । वल्कलादिकमपि साधन साध्यम् । अतः सर्वदा सर्वनैरपेक्ष्यस्याऽशक्यत्वात् किंचित्सापेक्षतायां कर्तव्यायां मध्यमेप्यालालं वि-शेदितिन्यायेनसर्वथापेक्षनैवास्तु तत्राह । चीराणि किं पथिनसंतीति चीराणिवस्त्रखण्डाः । पर्यातिततसंपादनार्थ मप्यन्यत्रगंतव्य मिति सूचितम् । अंघ्रिपाः वृक्षाः परभृतः परानेवबिभ्रति । ननुतत्फलैस्तेषामुपकारः कश्चन तर्हि पक्वंफलं स्वतएवत्यजंति ईषच्चालनेन तेतु वदान्यरूपाःवैष्णवाश्च भगवज्जीवार्थं जगतःसृष्टत्वात् एकपरित्याग अन्यदीयं तद्भवति अतश्चीराण्यपिभगवदीयानि मार्गाश्चभगवदीयाः गतिसाधनत्वात्। अतस्तेऽपिकिंवस्त्राणिनप्रयच्छंतीतियोजनीयम्। पादसंबंधास्तद्दानंलक्ष्यते। गमनमात्रेवक्षाणांबलंवाद्वाफलदानात्भिक्षाप्रदाः तेषां हस्तस्यागुरुत्वंचानवारितम् अंघ्रिपाइति। जलातिरिक्तं चनभक्षयंतिजलंच अंघ्रिभिरेवापिबंति। आतपादिभिश्चशाखाःशुष्काः चनस्थाः महिम्नावश्चपरार्थैकांतजीविनश्च अतस्तेष्वेवमाधुकरीकर्तव्या। जलार्थमपिनलौकिकापेक्षा इत्याह। सरितोऽप्यशुष्यन्तीति तदापि कूपा-पेक्षा भवति । सरितां बहुत्वं महत्त्वंच सर्वप्रसिद्धं शीतवातातपवर्षानिवारणार्थं मपिनान्यापेक्षाकर्तव्येत्याह रुद्धागुहाइति । तेषां निरोधस्याश्रवणात् । ननुकदाचित्सर्वाभावे गुहासुखव्याघ्रादिभये किं कर्तव्यं। तत्राह । किमजितोऽवतीति । केनापिनजितःअतिसमर्थः उपपन्नान् शरणागतान् किनावति । आग्रहेण सर्वत्र कथनं तथाधिकारिणोऽपितथान कुर्वतीति । एवंसर्व कार्येष्वपिसिद्धेषु अधिका-रिणोऽपिभूत्वा धनदुर्मदांधानूभजंति धनेनयोदुष्टो मदोगर्वस्तेन अंधान् आगतस्वरूपानभिज्ञान् । कस्माद्भजंतीतिन जानीमः ॥ ५ ॥

एवं प्रसंगादन्यानुपदिश्यताहशेननिरपेक्षेणयत्कर्तव्यं तदाह । एवं स्वचित्तइति । भजनीयोपार्जन क्लेशाभावायाह । एवंस्वचित्तइति एवं प्रकारेण सर्वनैरपेक्ष्येणांतःकरण प्रेरणा या साधयति । सोऽहंकरणोतिष्ठतीत्यविवादम् । अतएवमस्मादेतो येवं प्रकारेण स्वचित्ते स्वाधीनेचित्तेस्वतएवचव्यतिरेकेणैवसिद्धेसतिसिद्धोवतितं भजेतेतिसंबंधः । तादृशस्यभगवतः भजनीयरूपत्वकुं सर्व पुरुषार्थहेतुभूतं

सर्वविद्धृदयनुभूश्चसर्वआत्मायथासुप्तजनेद्धितैकः ।
तंसत्यमानंदनिधिंभजेतसर्वात्मनातोऽन्यतआत्मघातः ॥ ७ ॥

* अत्रसर्वविदात्मासत्यमानंदनिधिमितिपदचतुष्टयेनाऽऽनंदादयः प्रधानस्येत्यत्रोक्तं सर्वाधिकारिसाधारणमुपसंहार्यसविदानंदात्मे-तिगुणचतुष्टयंसूचितमिति ज्ञातव्यम् ॥

श्रीमद्धनुमदाचार्यकृत सुबोधिनी ।

ननु भगवत्सकाशाद् आत्मैवात्मानं बेवेः आत्मत्वात्प्रियत्वम् प्रियत्वाद्धर्मस्य अर्थत्वाद्भगवत्स्वम् भगवत्त्वाद्धर्मत्वमिति हेतुहेतुमद्भावोऽपि विशेषणानां प्राणिनां सर्वोपयिककृपाविषयंच । स्वात्मा देहः धनम् ईश्वरः नित्यकर्मंच । तत्र भगवानूर्ध्व कृपोपीप्रस्वाह । प्रथमस्तत्रैषाम् स्माध्दस्तुतः अधिकारिणां प्रतिसत्त्वेन प्रकाशमानोऽपि । तस्मात्त्वहृदयं सेव्यः । उपपत्त्यासेवनमुक्तं रुच्यासेवनमाह । प्रियइति यथाप्राणाः यथावादेहः प्राणिनां प्रीतिविषयोभवति । आत्मत्वेनप्रीतिविषयत्वे प्राप्तेऽपिपुनर्यत्प्रीतिविषयकथनंप्रीतेः परिच्छिन्नत्वज्ञापनार्थम् । अतः सा प्रीतिरेकत्र विनियुक्ता नान्यंतथात्वेनगृह्णाति । अतः सर्वरूपे एकस्मिन्नेवप्रीतिः कर्तव्या । अन्यथा खंडशः एकस्मिन्नेकरूपेवाक्रियमाणा नसर्वपुरुषार्थं साधयेत् । प्रीतिस्तुभगवद्धर्मः । भगवान् सर्वेभ्योजीवेभ्यः तदंशत्वोदत्तवान् सुखार्थम् । अतोयत्रैवप्रीयते तत एवसुखं भवति । ततःस्वसुखमेवस्वस्यभवतीत्युक्तं भवेत् । अतोदेहादिभ्यः प्रीतिमाच्छिद्यभगवतितस्यापर्यवसितिभावः । अर्थोधनरूपः । यावत्कार्यं तेनभविष्यति तत्सर्वं भगवताभविष्यतीति । अर्थशब्दस्यपंचार्थवाचकत्वात् पंचरूपोऽपिभगवान् । सर्ववदार्थः सर्वधनरूपः सर्ववस्तुरूपश्च । सर्वप्रयोजनरूपः । सर्वानिवृत्तिरूपेण सर्वनिवर्तकश्च । भजनेच्चैतेधर्माः भजनीयविषयतावच्छेदकत्वेन गुणोपसंहारन्यायेन प्राप्ताः तथासतिसर्वात्मकतयाभजनंभवति किंच भगवान्षड्गुणैश्वर्यसम्पन्नः ऐश्वर्याद्यर्थमपिसत्स्यसेवनं भवति । श्रीमद्वंदनान्नशोभाप्राप्ता किंच अनंतः देशकाला परिच्छिन्नः नित्यः एतावतापंचविंशति तत्त्वानिषड्विंशश्चमहाविष्णुः षड्विंशति प्रकारेणसेवितव्यः तत्रात्मा द्विविधः जीवब्रह्मभेदेन । प्रियएकादशविधः एकादशेन्द्रियभोग्यत्वात् अर्थःपञ्चविधउक्तः । भगवान् षड्विधः । अनंतोद्विविधश्च । एवंसर्वप्रकारेणसेवितव्यइत्यर्थः । सेवकस्यअधिकारिविशेषणभूतधर्मद्वयमाह तस्मिन्वृत्तोनियतार्थइति एकंसर्वतोऽन्यनिवृत्त्यर्थम् एकंच भगवतिदार्ढ्यार्थम् इमौचधर्मावावश्यकौ अन्यथासर्वप्रकारेणसेवितोऽपि न पुरुषार्थोभवति सर्वतोनिवृत्तः अन्यथाप्रज्ञाक्षाग्रोभवेत् नियतः भगवत्येव अर्थःपुरुषार्थोयस्य भगवान्वा अन्यथासंशयात्माविनश्यति । यद्यपिभगवानेवफलंनचान्यदपेक्षते । तथापि आनुषंगिकफलं संसारहेतोःअज्ञानस्य । भगवद्बहिर्मुखस्यचानिवृत्तिर्भवति । चकारात्सायुज्यादि ॥ ६ ॥

एवं भजनस्यसर्वोत्तमत्वंप्रतिपाद्यतादृशस्याकर्तुर्शोच्यमाह कस्तामिति । तांभगवतःपरानुचितांध्यानरूपांचितनामृतपणून्विनापशून् नरस्यभक्ताचासत्तांचितकनाशकांदेहादिचितांनामेतिप्रसिद्धेयुंज्यात् स्त्रियमिवयोजयेत् । अज्ञानाद्वस्तुनामयोजनं । तत्कृतमपकारंज्ञात्वा कस्तांयुंज्यात् अपकारंगणयति पश्यन्जनमिति यथाभगवद्भजने भगवदीयाःषड्गुणाःस्वस्मिन् संक्रमंते तथादेहादिभजनेतद्गताः षड्दोषाःसंक्रमंते । उत्पत्तिः नाशः दुःखं कर्माणि परितापः हीनत्वंच तदाह जनमुत्पद्यमानम् । पतितंस्वस्थानाच्च्युतंमृतमितिवाचत वैतरिण्यांयमद्वारस्थितनद्याम् अनेनासतांपरम्रेहमृतौवैतरिण्यांपततीतिसूचितम् । स्वकृतविविधकर्मफलंचसेवमानम् । परितापःशोकादयः अतःकोवाअमृतंविहायविषंभक्षयिष्यतीतिप्ररोचनार्थंनबहुवक्तव्यमितिभावः । एवंसर्वार्थनिश्चयपूर्वकं भक्तिमार्गानुसारेणभगवद्विषयकश्रवणादिकं साधनं कर्तव्यमितिसिद्धम् ॥ ७ ॥

अत्रकेषांचिन्मतेसर्वनिर्णयोरोव्यर्थः मुख्यभगवद्रूपंचतुर्भुजादिआनंदमात्रकरपादमुखोदरादिरूपंज्ञात्वाभजनंकर्तव्यमिति धारणायां स्थूलस्यानेभजनीयंभगवतःआनंदरूपंयोजयंति । केचिदितिवचनात् नात्रसर्वसंमतिः । अनेनहृद्यामेदादिभावएवक्रियते नतुदोषनिवृत्तिः । यदिचांतरीयकपापादिनिवृत्तिःक्रियते तथापिसर्वभावत्वसंपादकत्वाभावात्रागादिनिवृत्तिः भगवतोरूपाणिचत्वारिध्येयानि । अंगुष्ठमात्रं प्रादेशमात्रं पुरुषमात्रं पूर्वोक्तंच तत्रस्वमेकस्यप्रादेशमात्रस्यैवेति वैश्वानरविद्यायासिद्धत्वात् शुद्धेचस्वहृदयेमातुवाक्यत्वात् अथवा अत्यतिष्ठद्दशांगुलमितिपुरुषादति रिक्तरूपमांतरेकार्यभजंते । अतिरिक्तमपि पुरुषाकारंवसंतं तृतीयंपुरुषं । तस्यमूलरूपं दर्शयति चतुर्भुजमिति कंजंकमलं रथांगंचक्रं हस्तचतुष्टयेऽप्यायुधधारिणम् अनेनसर्वतोरक्षासूचिता । प्रत्येकेऽपितस्यानि तत्रस्थापयित्वा अर्थधर्मचिंतांदाति । धारणायापूर्वोक्तया इमरंतांतविद्यमानत्वात् भांतमेनमाकल्पनमपेक्षते ॥ ८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

ननु शीतत्राणोपायः कः तत्र साक्षेपं कुध्यन्निवाह । चीराणि वस्त्रखण्डानि । ननु ततोऽपि जाठरानलो दुर्वारः तत्र तथैवाह । अङ्घ्रिपा अपि किं नैव भिक्षां दिशन्ति ददति मनुष्याः खलु मा ददतु नामेति भावः यतः परान् बिभ्रति फलादिभिः पुष्णन्तीति । तर्हि पानार्थं जलन्तु मृग्यमेवेति चेत् धिक् तव बुद्धिमित्याह सरितोऽपीति । ननु शिलावर्षात् त्राणार्थं पर्णशाला कुड्यादिकृदपेक्षितव्येति चेत्तत्राह कथा इति । गुहां प्रविश्य व्याघ्रादयः खादन्ति चेत्तत्राह किमजित इति । व्याघ्रादीनामपि स एवान्तर्यामी भक्तवत्सलस्तान् कथं तत्प्रेरयिष्यतीति भावः ॥ ५ ॥

ननु तर्हि भजनीयेश्वरस्य तद्भजनोपकरणानां चान्वेषणं तु कर्तव्यमेव योगिभिरिति चेत्तत्राह । स्वयमिति स्वत एव सिद्धः यतः आत्मा चिन्ताविज्ञाता वासुदेव इति नान्यांवाहनादिभ्रम इति भावः । किञ्च तस्य भजनं स्वत एव भवितुमुचितमित्याह प्रिय इत्यादि विशेषणैः । प्रियः स्वभावत एव प्रेमास्पदम् न च प्रेमास्पदत्वेऽपि पतिपुत्रादिरूपोऽनर्थः । यतोऽर्थः परमवस्तुरूपः । वस्तुरूपत्वेऽपि न केवलमान्तरात्मैव । यतो भगवान् सौन्दर्यादि गुणवत्त्वेन दृश्यः । न च तत्र देशनियम इत्याह । अनन्तः सर्वव्यापकत्वात् सर्वत्रैव देशे स्थितः । न च भजने श्रमः कोऽपीत्याह । निर्वृतः भजनानन्दमग्नः सन् । नियतः प्रेमैव भक्तावनुसंहितोऽर्थः प्रयोजनं यस्य तथाभूतः सन् । यद्वा नित्यमेतावन्ति नामानि गृहीतव्यानि एतावती कथा श्रोतव्या एतावन्तः प्रणतयः कर्तव्याः एतावत् वार्ड ज्ञानं कर्तव्यमित्येवं नियमयुक्तानि कीर्तनश्रवणादीनि यस्य तथाभूतः सन् भजेत । यत्र भजने संसारहेतोरविद्याया उपरमश्च अनभिसंहितं फलं न भवेत् ॥ ज्ञानियोगिनोमते तु संसारहेतूपरम एवानुसंहितं फलम् । चकारः पादपूरणे नियतार्थः निश्चलत्वेन इत्यर्थः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यविरचिता भागवतचन्द्रचन्द्रिका।

व्यतिरेकेण तदेवाह क इति यस्य हरेरनुचिन्तां तां प्रसिद्धां, भक्तिम् अनादृत्य पशून् कर्मजडान् विना "पशुरेव स देवानाम्" इति श्रुतेः असतीं विषयचिन्तां को नाम कुर्यात् ॥ ७ ॥

एवञ्च वैराग्यं भक्तेरन्वयव्यतिरेकौ च प्रदर्श्य पुनरपि योगिनां पूर्वोक्तधारणातोऽप्यतिश्रेष्ठामन्तर्यामिणश्चिद्घनरूपस्य धारणा-माह। केचिदिति पूर्वोक्तवैराजधारणानिष्ठेभ्योऽप्यतिश्रेष्ठा इत्यर्थः। किंवा वक्ष्यमाणवार्त्तानुसारेण वैराजधारणाऽभ्यासेन शुद्धचित्ता एव तदन्तर्यामिणश्चिद्घनरूपस्य धारणां कुर्युरित्यभिप्रायेणाह केचिदिति। अत्र धारणायां चतुर्विधा योगिनः सम्भवन्ति। तत्र प्रथमा भगवद्रूपमनालम्बमानाः प्राणमनोधारणावन्तः श्रीभागवतासम्मता विगीता एव। द्वितीयाः पूर्वोक्तवैराजधारणया शुद्ध-चित्ताः मृणालगौरायतशेषभोगेत्यादितृतीयस्कन्धोक्तव्यष्ट्यन्तर्यामिधारणावन्तः। तृतीया वैराजधारणानन्तरव्यष्टिविराडन्तर्यामिचतुर्भु-जरूपधारणावन्तः। चतुर्थाः स्वत एव शुद्धचित्ताः। प्रथमत एव व्यष्ट्यन्तर्यामिचतुर्भुजधारणावन्तस्त एवात्र केचिच्छब्देनोच्यन्ते। प्रादेशमात्रमिति प्रादेशप्रमाणहृदये ध्येयत्वात्। पुरुषं तावन्मात्रप्रदेशेऽप्यचिन्त्यशक्त्या पञ्चदशवर्षीयपुरुषाकारप्रमाणं, सन्तं वयसि कैशोरे इत्युक्तेः। वसन्तं तत्रान्तर्यामितया कृतावासम् ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

कवयोधनदुर्मदान्धान्कस्माद्धेतोर्भजन्ति कविभिस्ते नभजनीया इत्यर्थः। ननु तर्हि वस्त्रखण्डादिलाभः कुतो भवेदत्राह चीराणि किमप-थि न सन्ति परान्पुष्णान्तियेते अंघ्रिपाः वृक्षाः दयादिधर्माघ्रिपालकाः वा भिक्षां किं नैव दिशन्ति नैव प्रयच्छन्ति सरितः गंगायमुनाद्याः नद्यः शिवजलाः अशुष्यन् किं निर्जला जाताः किम् गुहाः गोवर्द्धनादिगिरिदर्य्यः रुद्धाः किम् किञ्च अजितः श्रीकृष्णः उपसन्नान् किम् अव-ति न रक्षति अपितु रक्षत्येव ॥ ५ ॥

एवंनियतः अनायाससिद्धः देहनिर्वाहरूपोऽर्थप्रयोजनं यस्य सः निर्वृतः वैराग्यसुखसंपन्नः सन् तं भजेत यत्र भजने संसारहेतोः कार्य-कारणरूपप्रकृतिसंगस्योपरमश्च भवति चकारस्तत्प्राप्तिसमुच्चिनोति "मद्भक्तः यातिमामपि" इति श्रीमुखवचनात् विद्याऽविद्यायां निवृत्ताया-मुपास्योपासकस्वरूपयाथात्म्यज्ञानवान् श्रवणमनननिदिध्यासनावृत्त्या जन्ममरणाख्यं संसारहेतोः प्रकृतिसंबंधाद्विमुक्तो भवतीत्यर्थः त-दावृत्तिमाह भगवान् सूत्रकारः आवृत्तिरसकृदुपदेशात् ॥४।१।१॥ इति भजनीयं दर्शयति भगवान् स्वाभाविकषड्ैश्वर्यसंपन्नः। अनेनतद्भक्तै श्चर्यतोऽश्वावृत्ताः प्रियोऽर्थः अनेनाप्रियपदार्थान्तराभावउक्तः आत्मा "कृष्णमेनमवेहित्वमात्मानमखिलात्मनाम्" इति वक्ष्यमाणात् कृष्णाख्य आत्मपदार्थः भजनीयो न तु तदात्मकः जीवात्मेत्यर्थः स्वचित्तस्वतएवसिद्धः अनेन सर्वत्रस्वतः सिद्धत्वेन तत्संनिहिततादर्शिता अनंत इत्यनेन तदपरिच्छिन्नतोक्ताथ एवंभूतस्तमिति योजना ॥ ६ ॥

भगवद्भजनहीनकर्मनिष्ठजनानिंदया भजननिष्ठां द्रढयति क इति वैतरण्यां पतितं स्वकर्मजान्परितापान् जुषाणं सेवमानं जनं स्वकर्मणा-रापश्यन् वैतरणीतुल्यायां संसृतौ वा पतितं पश्यन् यत्र संसारहेतूपरमः तां भजननिष्ठामनादृत्य असतीमसद्विषयानुचिंतां भगवच्चिंतां "पशुरेवसदेवानाम्" इति श्रुतिप्रसिद्धं कर्मजडं विनापशुतुल्यं विवेकहीनं जनं विना वा को नामकुर्यात् अनेनानित्यत्वञ्चोक्तं सूचितः ॥ ७ ॥

तामेव भजननिष्ठामाह केचिदिति चतुर्भिः। तत्र पंचभिर्धारणामेकेनध्यानम् केचिद्भागवताः स्वदेहस्यान्तर्मध्ये यावकाशस्तत्रवसन्तं प्रादेशमात्रं प्रादेशस्तर्जन्यंगुष्ठमात्रा सा मात्रा परिमाणंयस्यतं श्रुतेः "अंगुष्ठमात्रं पुरुषं मध्य आत्मनि संस्थितं तं ज्ञात्वामृत्युमत्येति नान्यः पंथाविमुक्तये" इत्युक्तम् उभयत्र हृदय कमलापेक्ष्य व्यापकस्यैव सूक्ष्मत्वं विवक्षितं। चतुर्भुजं कंजरथांग शंख गदाधरं पद्मचक्रशंखगदाधरं धारणयास्मरंति ॥ ८ ॥

भाषा टीका।

क्या मार्गमें पुराने कपड़ा के टूक नहीं हैं क्या वृक्ष फलों की भिक्षा नहीं देते हैं क्या जलको नदी सूख गई हैं क्या रहने को पर्वत कंदरा रुकगई हैं क्या व्याघ्रादिकों से परमेश्वर शरणागतों की रक्षा नहीं करते हैं फिर ज्ञानी लोग होकर धन मदसे अंधे जनोंका क्यों सेवन करते हैं ॥ ५ ॥

इस प्रकार से अपने चित्तमें आपही सिद्ध प्रिय आत्मा अर्थ रूप भगवान् अनंतको सुखी होकर विश्वास से भजे जिससे कि संसार के हेतु का नाश होजाय ॥ ६ ॥

केवल पशुओं को छोड़कर उस परमात्मा कि चिन्ता को अनादर करके असत् चिन्ता कौन करैगा जोकि अपने कर्मों के दुःखों को भोगते हुये वैतरणी नदीमें पड़े मनुष्यों को देखता है ॥ ७ ॥

कोई महात्मा अपने हृदय के मध्यमे अंगुष्ठ मात्र विराजमान चतुर्भुज शंख, चक्र, गदा, पद्म धारि परम पुरुष को ध्यानसे स्मरण करते हैं ॥ ८ ॥

प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम् ।
लसन्महारत्नहिरण्मयाङ्गदं स्फुरन्महारत्नकिरीटकुण्डलम् ॥ ९ ॥
उन्निद्रहृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवम् ।
श्रीलक्ष्मणं कौस्तुभरत्नकन्धरमम्लानलक्ष्म्या वनमालयाचितम् ॥ १० ॥
विभूषितं मेखलयाङ्गुलीयकैर्महाधनैर्नूपुरकङ्कणादिभिः ।
स्निग्धामलाकुञ्चितनीलकुन्तलैर्विरोचमानाननहासपेशलम् ॥ ११ ॥
अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्य्यनुग्रहम् ।
ईक्षेत चिन्तामयमेतमीश्वरं यावन्मनो धारणयावतिष्ठते ॥ १२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

नलिनं पद्मं तद्वत् प्रसन्ने आयते दीर्घे ईक्षणे यस्य । कदम्बकुसुमस्य किञ्जल्कः केशरः तद्वत् पिशङ्गे पीते वाससी यस्य । लसन्ति महारत्नानि येषु तानि स्वर्णमयानि अङ्गदानि यस्य । स्फुरन्ति च तानि महारत्नानि च तन्मयानि किरीटकुण्डलानि यस्य ॥ ९ ॥

उन्निद्रं विकसितं यत् हृदयपङ्कजं तस्य कर्णिकैवालयः स्थानं तस्मिन् योगेश्वरैरास्थापितौ पादपल्लवौ यस्य । श्रीरेव लक्ष्म चिह्नं तद्युक्तं पामादिविहितो मत्वर्थीयो न-प्रत्ययः । कौस्तुभरत्नं कन्धरायां यस्य । अम्लाना लक्ष्मीः शोभा यस्याः तया वनमालया आचितं व्याप्तम् ॥ १० ॥

स्निग्धत्वादिविशिष्टैः कुन्तलैर्विरोचमाने आनने यो हासः तेन पेशलं सुन्दरम् ॥ ११ ॥

अदीनमुदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिन्नुल्लसन्तो ये भ्रूभङ्गाः भ्रूविक्षेपाः तैः संसूचितो भूर्य्यनुग्रहो येन । चिन्तामयं चिन्तया आविर्भवन्तम् ॥ ॥ १२ ॥

श्रीराधारमणदास गोस्वामि विरचिता दीपनाख्य तट्टिप्पणी ।

न-प्रत्यय इति । लोमादि-पामादि-पिच्छादिभ्यः शनेलचः (पा० ५ । २ । १००) इति सूत्रेण न-प्रत्यय इति यावत् ॥ १०—१८ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

एवमेवपुरुषंविशिनष्टि प्रसन्नवक्त्रमिति अनुग्रहोन्मुखंमुखंनलिनंपद्मंतद्वत्प्रसन्नेआयतेदीर्घेईक्षणे यस्य कदंबकुसुमस्य किंजल्क केसरस्तद्वत्पिशंगवाससीयस्य लसंति महारत्नानियेषु तानिहारांगदानियस्य स्फुरंतिमहारत्नानितन्मयानिकिरीटकुंडलानि यस्यतम ॥९
उन्निद्रंविकसितंयद्धृदयपंकजंहृदयकमलंतस्य कर्णिकैवालयःस्थानं तस्मिन् योगीश्वरास्थापितौध्यानविषयीकृतौपादपल्लवौयस्य श्रीलक्ष्मीरेवलक्ष्मचिन्हंयस्यास्तीति श्रीलक्ष्मणः पामादिविहितमत्वर्थीयोनप्रत्ययः तस्याकृतिगणत्वात् कौस्तुभरत्नंकंधरायांयस्य अत्र कंधराशब्दस्तद्दासन्नवक्षः परः अम्लानालक्ष्मीः शोभायस्यास्तयावनमालयाआचितंव्याप्तम ॥ १० ॥
मेखलयाकाञ्चिसूत्रेणमहाधनैरनर्घ्यैरंगुलीयकैर्नूपुरकंकणादिभिश्च विभूषितं विशेषेणालंकृतं स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमाने आननेयोहासस्तेनपेशलं सुंदरं तत्र स्निग्धाः सस्नेहा आकुंचितावक्राः ॥ ११ ॥
अदीनमुदारंयल्लीलाहसितंतेनयुक्तंयदीक्षणंतेनोल्लसंतोयेभ्रूभंगाः भ्रूविक्षेपाः तैः संसूचितोभूर्यनुग्रहोयेन तंचिंतामयंचिंताविषयं चिंताप्रचुरंईक्षेतेतिक्रियाविशेषणंवा एवं विधमीश्वरं यावद्धारणया मनोऽवतिष्ठतेतावदीक्षेतोपासीतेत्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

श्लोकचतुष्टयेनतमेवविशिनष्टि प्रसन्नवक्त्रमित्यादिना नलिनवद्रक्तपद्मदलवदायतेदीर्घेईक्षणेयस्यसतथातं कदंबःकुसुमप्रियरतरुस्तस्य-पुष्पस्यकिंजल्कमंकुरविशेषस्तद्वत्पिशंगंपीतंवासोयस्यसतथातं लसन्महाहारश्चहिरण्मयांगदश्चेतिलसन्महाहाराहिरण्मयांगदस्तं । स्फुरं-तिशोभमानानिमहांतिचरत्नानितैर्युक्तंकिरीटकुंडलेचयस्यसतथातम ॥ ९ ॥

उन्निद्रस्यविकसितस्यहृत्पंकजस्य कर्णिकाख्यालयेयोगेश्वरैः सनकादिभिरास्थापितौपादपल्लवौयस्यसतथातं श्रीरेवलक्ष्मणांचिह्नंयस्य सश्रीलक्ष्मणस्तं कुस्तुभास्समुद्राज्जातंकौस्तुभंतेनरत्नेनयुक्ताकंधरायस्यसतथातम अम्लानानांनवपल्लवदलानांलक्ष्मीर्यस्याः सातथातया॥१०॥
मेखलयाकांच्या अंगुलीयकैरंगुलीभूषणैः महांतिधनानिगृह्णंतीतिमहाधनानितैः स्निग्धाश्चामलाश्चतेतैः कुंचितावक्राश्चनीलाश्चतेकुं-तलास्तैर्विरोचमानेआननेयोहासस्तेनपेशलंसुंदरम ॥ ११ ॥

अदीनलीलयोन्नताभ्यांहसितेक्षणाभ्यामुल्लसंत्योर्भ्रुवोर्भंगेनस्फुरणविशेषेणसंसूचितोभूर्यनुग्रहोयेनसतथातम । ईक्षेतचिंतयेत चिंतामयं-चिंताप्रधानं "प्रसन्नास्संचिंतितोविष्णुश्चिंतितंप्रददात्यज" इत्यादेः कियंतंकालंचिंतनमत्राह यावदिति यावद्धारणयासमप्रांगेमनोऽवलम्ब-तिष्ठतेतावदितिशेषः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका।

दर्शनीयत्वार्थकम् ॥ १२ ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

किंच प्रसन्नवक्त्रं प्रसन्नं भक्तेभ्यः फलदानार्थं वक्त्रं यस्य नलिनवत् आयते दीर्घे ईक्षणे यस्य कदंबकिंजल्कवत् अर्धपीतारक्तयुक्त तभागे वांतमुक्ताफलसहितं रेखाकारं च कदंबकिंजल्कवत् सुवर्णदंडाकारं नूतनं च मुक्ताफलं तत् कृतार्धीकृतं तोषजीवयुक्तं वेवरूपम् । एतादृशं भगवतः पीताम्बरं लसंति महारत्नानि यस्मिन् हिरण्मये अंगदे अंगदं बाहाभरणं । स्फुरंति महारत्नानि किरीटे कुंडलयोश्च यस्य ॥ ९ ॥

उन्निद्रे विकसिते हृदय रूपे पंकजे या कर्णिका तस्मिन् यदालयं गृहं सूर्येन्दुवाय्वग्निगतं तस्मिन् आलये योगेश्वरैः समंतात् स्थापितं पादपल्लवं यस्य श्रीः लक्ष्मीचिन्हं यस्य कौस्तुभरत्नं कंधरायां यस्य अम्लानालक्ष्मीर्यस्याः सर्वदाप्रत्यग्रविकसितपुष्पयुक्ता । तादृश्या वनमालया अंचितं पूजितम् ॥ १० ॥

मेखलया कटिदोरकरूपया अंगुलीयकैश्च महाधनैः अमूल्यरत्नादियुक्तैः उभयत्र विशेषणं नूपुरमेकं महाराजचिन्हरूपं आदिशब्देन वलयादि स्निग्धानि चतानि अमलानि च कुंचितानि नीलानि यानि कुंतलानि तैः विरोचमानं यदाननं तेन यो हासस्तेन सुंदरम् ॥ ११ ॥

अदीनं यल्लीलाहसितं सर्वेभ्यो याचकेभ्यः सर्वफलदानेऽपि असंकोचयुक्तम् अदीनं लीलाहसितेन युक्तं यदीक्षणं तेन उल्लसंतौ यौ भ्रुवौ तयोर्भंगः तेन सूचितः भूरिः अधिकः अनुग्रहो येन एतादृशं चिंतया प्रकटीभूतं राजाधिराजरूपमीश्वरमीक्षेत यावत् मनः धारणाया सर्वांगस्थितया अवतिष्ठते चांचल्यं न प्राप्नोति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी।

महारत्नानि पद्मरागादीनि ॥ ९

उन्निद्रं विकसितं हृत्पङ्कजं तस्य कर्णिकैवालयस्तत्र योगेश्वरैरास्थापितौ पादपल्लवौ यस्य तमिति तत्प्रकारान् योगेश्वरानपि ध्यायेदिति भावः । श्रीलक्ष्मणं श्रीरेव लक्ष्म वामस्तनोर्ध्वे लक्ष्मीरेखा तद्युक्तं पामादिविहितो मत्वर्थीयो न-प्रत्ययः । कौस्तुभरत्नं तद्ग्रथनहिरण्मयसूत्रं कन्धरायां यस्य तम् । आचितं व्याप्तम् ॥ १० ॥

महाधनैः बहुमूल्यैः । स्निग्धत्वादिविशिष्टैः कुन्तलैर्विरोचमाने आनने यो हासः तेन पेशलं मनोहरम् ॥ ११ ॥

अदीनमतिमाधुर्यं यल्लीलाहसितं तद्युक्तमीक्षणञ्च उल्लसदुल्लासं प्राप्नुवन् भ्रूभङ्गश्च ताभ्यां संसूचितो भूरिरनुग्रहो येन तम् । चिन्तामयं चिन्तयैवाविर्भवन्तम् ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

प्रसन्नं ध्यात्रानंदप्रदं वक्त्रं यस्य नलिनं पद्मं तद्वदायते दीर्घे ईक्षणे यस्य कदंबकिंजल्कवत् कदंबपुष्पकेसरवत् पिशंगे वाससी यस्य लसंति महारत्नानि येषु तानि हिरण्मयान्यंगदानि यस्य स्फुरंति च तानि महारत्नानि च तन्मयानि किरीटकुंडलानि यस्य तम् ॥ ९ ॥

उन्निद्रहृत्पंकजस्य विकसितहृदयकमलस्य कर्णिकैवालयः स्थानं तत्र योगेश्वरैरास्थापितौ ध्यानगोचरीकृतौ पादपल्लवौ यस्य श्रीरूपं लक्ष्म चिह्नं विद्यते यस्य सः श्रीलक्ष्मणस्तम् पामादिविहितो मत्वर्थीयो न प्रत्ययः तस्याकृतिगणत्वात् कौस्तुभरत्नं कंधरायां यस्य अम्लाना विस्फूर्यमाणा लक्ष्मीः शोभा यस्यास्तया आचितं सर्वतो विस्फूर्यमाणाम् ॥ १० ॥

मेखलया कटिसूत्रेणांगुलीयकादिभिश्च विभूषितम् स्निग्धैः सस्नेहैरमलैरुज्वलैः कुंचितैर्वक्रैर्नीलवर्णैरेवंविधैः । कुंतलैर्विरोचमाने आननेयो हासस्तेन पेशलं सुंदरम् ॥ ११ ॥

अदीनमोदारं यल्लीलाहसितं तेन युक्तं यदीक्षणं तेनोल्लसद्भिर्भ्रूभंगैर्भ्रूविक्षेपैः सम्यक्सूचितो भूर्यनुग्रहो येन तम् चिंतामयं चिंतया ध्यानादाविर्भूतं तत आगतइत्यधिकारमयट् एवंध्येयमीश्वरमंतर्यामिणम् यावन्मनो धारणयावतिष्ठते तावदीक्षेत ॥ १२ ॥

भाषाटीका।

प्रसन्न है मुखारविंद जिनका कमल सरीके चौड़े नेत्रवाले कदंब पुष्पके केसर सरीके पीत वस्त्र धारण किये हुए प्रकाशमान बहुमूल्य रत्न जड़ित सुवर्ण के वड़े बाजूबन्द धारण किये हुए चमकते हुये बहु मूल्य रत्नोंके किरीट कुंडल धारण किये हुये ॥ ९ ॥

खिला हुआ हृदय कमल स्थानमें योगीश्वरोंने जिनके चरण कमलकू स्थापित कियाहै जिनके लक्ष्मीका चिह्न है कौस्तुभमणि जिनके कंठमें है निर्मल शोभा वाली वनमाला से शोभित हैं ॥ १० ॥

कटिमेखला मुद्रिका बहु मूल्य नूपुर कंकणादिकों से तथा चीकने निर्मल घुंघवारे केशोंसे सुशोभित हैं औ प्रकाशमान हास्य से सुशोभित हैं ॥ ११ ॥

उदारलीला वाली हसीयुक्त नेत्रों के सुंदर भृकुटी के चलनसे बड़ी कृपा भक्तों पर जनाते हुये ऐसे भगवान इस ईश्वरकी आकृति देखे जबतक कि मन धारणा में स्थित रहसके तबतक ॥ १२ ॥

एकैकशोऽङ्गानि धियानुभावयेत् पादादि यावद्धसितं गदाभृतः ।
जितं जितं स्थानमपोह्य धारयेत् परं परं शुध्यति धीर्यथा यथा ॥ १३ ॥
यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत् स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ १४ ॥
स्थिरं सुखञ्चासनमास्थितो यतिर्यदा जिहासुरिममङ्ग ? लोकम् ।
काले च देशे च मनो न सज्जयेत् प्राणान् नियच्छेन्मनसा जितासुः ॥ १५ ॥
मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत् तमात्मनि ।
आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात् ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तस्यैव ध्यानमाह एकैकश इति । अनुभावयेत् ध्यायेत् । यद्यत् जितं जितम् अयत्नतः स्फुरितं पादगुल्फादि स्थानम् अवयवं तत्तत् अपोह्य त्यक्त्वा परं परं जङ्घाजान्वादि धारयेत् ध्यायेत् । शुध्यति तस्मिन् निश्चला भवति ॥ १३ ॥

पूर्वोक्तवैराजधारणाया एतद्धारणाङ्गत्वमाह यावदिति । परे ब्रह्मादयोऽवरे कनिष्ठा यस्मात् कुतः, विश्वेश्वरे, द्रष्टरि न तु दृश्ये चैतन्यघनत्वात् अनेन कर्म्मापि भक्तियोगपर्य्यन्तमेवेत्युक्तम् ॥ १४ ॥

एवं तावदासन्नमृत्योः पुंसः कृत्यमुक्तम् इदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह स्थिरमिति सार्द्धैश्चतुर्भिः । अङ्ग हे राजन् ! एवम्भूतो यतिर्यदा इमं लोकं देहं जिहासुः हातुमिच्छति तदा देशे पुण्यक्षेत्रे काले च उत्तरायणादौ मनः न सज्जयेत् सङ्गं न प्रापयेत् न देशकालौ योगिनः सिद्धिहेतू किन्तु योग एवेति दृढनिश्चयो भूत्वा स्थिरं सुखकरञ्चासनमास्थितः प्राणान् इन्द्रियाणि नियच्छेदित्यर्थः ॥ १५ ॥

एतां बुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि निलयेत् प्रविलापयेत् । तञ्च क्षेत्रज्ञम् आत्मनि शुद्धे । तञ्च शुद्धमात्मानम् आत्मनि ब्रह्मणि अवरुध्य एकीकृत्य लब्धोपशान्तिः प्राप्तनिर्वृतिः सन् कृत्याद्विरमेत् ततः परं प्राप्याभावात् ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

युगपत्कृत्स्नशुभाश्रयगोचरध्यानाशक्यात्तदुपायभूतमुक्तरूपस्यैवध्यानक्रमविशेषमाह । एकैकश इति गदाभृतः परमात्मनः पादादि पादप्रभृतियावद्धसितंमन्दस्मितावधि । अंगानि एकैकशः प्रत्येकंधियानुभावयेच्चिन्तयेत् । जितं जितं भावनयास्फुरितंप्रतिष्ठितमितियावत् स्थानंपादगुल्फाद्यवयवमपोह्यस्वकर्त्तृविशेषाकारेणेतिभावः । सामान्याकारेणकृत्स्नशुभाश्रयगोचरज्ञानस्यापेक्षितत्वात्परंपरंजंघाजान्वादिस्थानंधीर्यथाशुद्ध्यतिप्रसीदत्यनाकुलीभवतितथाधारयेत् ।कृत्स्नशुभाश्रयगोचरभक्तियोगोत्पत्तेः पूर्वमिदमवयवशोविभावनंयत्नेनकर्त्तव्यमुत्पन्नायांतुभक्तौहानायोगात् ॥ १३ ॥

अतस्तत्सर्वेयत्नेनध्येयमवयवशइत्याह यावदिति । परेब्रह्मादयोऽवरेयस्मात्सपरावरः तस्मिन्विश्वेषामीश्वरेनियन्तरिद्रष्टरिसर्वज्ञेऽस्मिन्कविप्रहर्षविशिष्टेपुरुषेभक्तियोगः विशेषाकारेणकृत्स्नशुभाश्रयगोचरः प्रीतिपूर्वकोऽविच्छिन्नोध्यानयोगः । यावन्नजायेतनोत्पद्येततावत्क्रियावसाने आवश्यकानुष्ठानांतेपुरुषस्यप्रादेशमात्रं पुरुषमित्युक्तस्यपुरुषस्यस्थविष्ठरूपंदिव्यात्मस्वरूपापेक्षयास्थविष्ठंविग्रहंप्रयतः समाहितमनस्कः स्मरेदित्यर्थः । स्थविष्ठरूपंवैराजस्यपूर्वोक्तरूपमितितुमंदरूपांतरोपासनायाएतद्रूपोपासनानुपयुक्तत्वात् ॥ १४ ॥

एवमेकैकमवयवंविशिष्यचिन्तयित्वापश्चादेकैकांगध्यानपूर्वकंकृत्स्नध्यानाभ्यासउक्तः । अथेदृशोपासनानिष्ठस्यदेहत्यागप्रकारंवदन्स्वात्मनःपरमात्मनिसमर्पणप्रकारमाह स्थिरमिति यतिर्योगीयदापारपूर्यभक्तियोगसंपादकशरीरावस्थितिहेतुभूतप्रारब्धावसानकालेऽंगहेराजन्निमंलोकंप्राकृतंलोकंजिहासुर्हातुमिच्छुर्भवतितदागंगातीरोत्तरायणादिदेशकालादिषुमनोनसज्जयेत्सक्तंनकुर्यात्किन्तुजितप्राणः जितासुःस्थिरंनिर्भयदेशस्थंसुखमृद्वासनमास्थितः मनसाप्राणानिन्द्रियाणिनियच्छेदनन्यपराणिकुर्यात् ॥ १५ ॥

स्वबुद्ध्यानिश्चयात्मिकयाबुद्ध्याऽमलयाभगवदुपासनेननिर्धूतमलया मनः नियम्यबुद्धिव्यापारमात्ररतंकृत्वाएतांबुद्धिंक्षेत्रज्ञेजीवेनिनयेत् विलयेत्क्षेत्रज्ञमात्मनिनियच्छेदित्यर्थः एवमात्मानंजीवमात्मनिपरमात्मनिअवरुध्यसमर्प्यलब्धोपशांतिः प्राप्तनिर्वृतिः सन्कृत्याद्विरमेत् अंतकालेपरमात्मनिस्वात्मसमर्पणाधिकमन्यत्त्याज्यमितिकृत्याद्विरमेतेत्यनेनावगम्यते । आप्रयाणात्तत्रापिहिदृष्टम् ॥४।१।१२॥ इतिन्यायेनोपासनायाआप्रयाणादनुवर्तनीयत्वेनतन्निष्पादककृत्स्नस्याप्याप्रयाणादनुवर्तनीयत्वात् हिमुमूर्षोः कृत्यविरतिर्विधेयास्ततएवाविरतेः। अथयद्यपियदा जिहासुरिममंगलोकमित्यनेनयोगिनांस्वच्छन्दमरणानांकृत्यमेवप्रतीयतेतथापि "तस्यतावदेवचिरंयावन्नविमोक्ष्येऽथसंपत्स्ये" इतिकृत्स्नयोगद्वारारब्धप्रारब्धावसानएवपरमात्मसंपत्तिश्रवणात्तेषामिदंकृत्यंनतुमुमूर्षोरनवाहितकरणत्वेनाशक्यत्वात्सक्तोनियच्छेद्विरमेतेत्यादिविधिविषयत्वानुपपत्त्यास्वच्छन्दमरणानांकृत्यमेवेदमितिवक्तुंयुक्तंयोगप्रभावातिशयेनकरणानांस्वायत्तत्वात् । येषयोगमाहात्म्यादविनष्टएवप्रारब्धेऽपिदेहत्यागेच्छापुनःसंसारपातयेभीष्मादीनामुत्तरायणादिकालप्रतीक्षाप्रारब्धस्याविनष्टत्वात् अतोयदेत्यस्यप्रारब्धावसानइत्युक्तएवार्थः वाच्यः ॥ १६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

सर्वांगस्मरणाशक्तस्यस्मरणप्रकारमाह एकैकशइति ध्यानेनजितमनावासेनध्यानविषयत्वानमवयवमपीक्षवशीकृत्यपरंपरमाजितमन-स्यस्तमवयवंपादमारभ्ययावद्धसितं*पुष्पितंवनमितिवत्वक्त्रासनेविकसितंमुखंहसितमितिलक्ष्यते। मुखपर्यन्तंसांगोपांगंप्रतिवियात्मनोधार येत्।यथायथाधीःशुध्यातेसर्वांगध्यानक्षमाभवतितथातथाऽवयवंतत्तुबोदतः सर्वांगध्यानासामर्थ्येतावत्पर्यंतमेकैकावयवमनुभावयेदित्यर्थः॥१३

इममेवार्थमुपसंहरति यावदिति परात्ब्रह्मादयोऽप्यवरायस्मात्सपरावरस्तस्मिन् । द्रष्टरिसर्वसाक्षिणि । विश्वेश्वरेहरौ । यावत्सर्वो-त्तमोत्तममममहोपकारकोऽतएवसर्वतःप्रियतमइतिज्ञानपूर्वकप्रेमलक्षणभक्तिपरं । पुरुषस्य । स्यवीयोऽतिस्थूलंरूपं । स्मरेत । तत्रापिनिरन्तर ध्यानासक्तःसन्नित्यक्रियावसानेप्रयतःप्रयत्नवान्स्मरेतेत्यन्वयः ॥ १४ ॥

इदानीमुक्तविधोपासनाजनितज्ञानेनापरोक्षकृतपरमात्मतत्त्वस्यतत्प्रसादाद्विज्ञात ब्रह्मादिनस्वरूपज्ञानिनोयदावेहत्यागेच्छा तदाखदेह गतेंद्रियाद्यभिमानिदेवतालयस्मरणपूर्वकंमोक्षप्रकारमाह स्थिरमिति यतिर्निर्जितेंद्रियग्रामोऽपरोक्षज्ञानीइमंलोकंदेहंयदाजिहासुस्त्यक्तु मिच्छति तदायथासुखंभवति तथास्थिरमचलमासनमास्थितःकालेदेशेचकालस्थेषुदेहस्थेषुचविषयेषुयथाचमनोनसज्जेत्सक्तंनकुर्यात् अथमनसास्ववशेनप्राणान्विषयाननुधावंतीन्द्रियाणिचनियच्छेत् तत आहरेदाहृत्यप्राणान्नियच्छेत्प्राणायामान्कुर्यादयजितासुर्भवेत्तथा प्राप्तप्राणप्रसादइन्द्रियप्रेरकान्दिशादिदेवान्मनोऽभिमानिनींद्रेनियच्छेतइंद्राधीनांश्चिंतयेत् ॥ १५ ॥

मनश्चमनोऽभिमानिनमिन्द्रश्चामलयाबुद्ध्याबुद्धिदेवतयोमयानियम्यतदधीनंस्मृत्वैतांबुद्धिदेवतामुमांक्षेत्रज्ञेजीवान्तर्यामिणि हरौनिनयेत् नितरांतदधीनांश्चिन्तयेत् तंक्षेत्रज्ञमात्मानिदेहमध्यस्थेहरौनिनयेत्तदैक्येनचिन्तयेत् तंदेहगतमात्मानं हरिमात्मनिसर्वगतेहरावेकव्यत-देकीभावेनसञ्चिन्त्यदेहावुत्क्रम्यलब्धोपशान्तिः प्राप्तसर्वाधिकमङ्गलाख्यविष्णुरूपोधीरः कृत्याद्विधिनिषेधलक्षणात्कार्याद्विरमेदित्यन्वयः "भक्त्याप्राणांवशेनीत्वाजितप्राणोभवत्युत जीवस्योभगवान्विष्णुः क्षेत्रज्ञइतिगीयते इत्यतस्तुसएवात्माव्याप्तोऽप्यात्मेतिभण्यते हरौइदेभेदे नीतिस्तदेकत्वस्यचिन्तनम् अन्यत्रतन्नियम्यादिचिन्तनंनीतिरुच्यत"इतिप्रमाणोऽस्य उक्तएवार्थोऽन्योनस्वकपोलकल्पितइतिभावः । मनस्तत्वं बुद्धितत्त्वेबुद्धितत्त्वंक्षेत्रज्ञेऽधिष्ठानभूतेतंक्षेत्रज्ञद्रष्टारमात्मनिशोधिततत्त्वंपदार्थेचिन्मात्रेतमात्मानं शोधिततत्त्वंपदार्थंभूतमात्मनिशोधिततत्पदार्थ भूतेपरमात्मन्यखण्डैकीकृत्यभेदहेतुर्भविद्याधिष्ठानम् यथार्थज्ञानेन निरस्यकृत्यात् विरमेत्तेतिमायावादिनः एतांव्यष्टिरूपांबुद्धिंक्षेत्रज्ञे समष्टिरूपहिरण्यगर्भात्मनिकारणात्मकेकारणात्मानमात्मनिशुद्धेब्रह्मणयवष्टभ्य कृत्याद्विरतःस्यादितिपौराणिकंमन्याः इतिद्वयमपि प्रमाणविरुद्धत्वादुपेक्षणीयंमनश्चेतिचशब्देनमनः शब्दवाच्यंरुद्रं बुद्धिशब्दवाच्यांवाणींधरिचलक्ष्मीद्वाराक्षेत्रज्ञेलयं तत्त्वानांक्षत्रकारके वुकल्पतइतिज्ञातव्यम् "उपोधिकेसमीपेन्तेति शांतिःप्रशममंगलेइतिच मंगलंभगवान्विष्णुः"इतिच ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

यावदिति । भक्तियोगः केचित् स्वदेहान्तः इत्यादिनोक्तसाधनलक्षणाभिनिवेशः अन्यत्तैः ॥ १४ ॥

अनन्तरं पूर्ववत् च यदि महत्कृपाविशेषेण विच्यदर्शिता भवति, तदा विशेषोपलब्धिश्च भवेत् । न चेत्, निर्विशेषचिन्मात्रब्रह्मानु-भवेन तल्लीन एव भवति । तथैव निदिध्यासनमपि तेषाम् । तथाच स्थिरमित्यादि ॥ १५ ॥

तथा मन इति । तत्र क्षेत्रज्ञं स्वरूपभूतया बुद्ध्या आत्मनि तद्द्रष्टृत्वादिरहिते शुद्धे जीवे । अन्यत्तैः ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

सर्वांगास्फुरणे पुनःएकैकशः अंगानिधारयेत् एकंधृत्वातस्यस्वाधीनतायां जातायां द्वितीयंधारयेदिति धियेत्युक्तम् अत्रधारणायां क्रमोविवक्षितः तदाह पादादियावद्धसितमिति तृतीयस्कन्धेस्पष्टंभविष्यति गदाभृतइति प्राणानिश्चलतासूचिता जितंजितंस्थानं स्वाधीनं स्वाधीनंस्थानंपादादिअपंचाह्याहक बुद्ध्यग्रगामाधात् त्याजयित्वा तेनाग्रेणअन्यद्ग्राह्यं अन्यग्रहणे न तथा भगवदवयवस्यअधिकागुणाः स्मर्तव्याः यथाबुद्धिदोषाअपगच्छेयुः तदपगमेबुद्धिर्विशदाभवति तथाअवयवांतरमपिमाति एवमुत्तरत्रापि यथायथाबुद्धिःशुद्ध्यति तथा तथापरंधारयेदित्यर्थः इयंचधारणासंजातभक्तेर्भवति ॥ १३ ॥

यावत्पुनर्भक्तिर्जायतं तावत्पूर्वोक्तधारणाकर्तव्येत्याह यावदिति परेऽवरेयस्मात् परावरत्वस्फुरणमपि सर्वोत्तमत्वरूपं प्रेमभक्ते रंगं माहात्म्यज्ञानापरपर्यायम् अस्मिन्निति स्वयंभक्त्यातंपश्यन्नाह द्रष्टरिसर्वसाक्षिणि पूर्वोक्तन्यायेन सर्ववस्तुषुचेनान्यरूपेणवा प्रत्यक्प्रपेणावाप्रकाशमाने योगपदेनस्वसाधनं साधनभूतं भक्तेः स्थिरंरूपमुक्तं तावत्स्थवीयःस्थूलं पुरुषस्यपूर्वोक्तस्य क्रियावसाने अग्निहोत्रादिकंकृत्वा अव्यग्रशुद्धावस्थायां सन्यासंगृहीत्वेतिकेचित् तदानिरंतरंस्मरणं भवति परक्रियायाहेतुत्वंनस्यात् प्रतिबंधः कल्पकल्पनापेक्षया साधकत्वकल्पनायाउत्कृष्टत्वात् पुण्यतीर्थे जलाप्लुतइति नियमानामुक्तत्वाच्च प्रयतःसावधानोभूत्वा नियमोऽपिधर्मः अन्यभावनापरित्यागार्थंवा ॥ १४ ॥

एवमंतकालेपाक्षिकदोषपरिहारार्थं योगंसाधयित्वातस्यरक्षोपायत्वज्ञापनायबुद्धिपूर्वकं मरणप्रकारमाह स्थिरमित्यादिना क्रमेणमुक्त-मेवदंगसंनिविहतमुत्तरांगमितिकेचित् । भवांतरव्यापाररहितपरे । स्थिरमचंचलं । सुखंकोमलं । पद्मासनादिरूपंवृष्यादिरूपंवा । आस-मंतात्स्थितः । मनसाप्यन्यत्रगमनंनिवारितम् । अतः परंसन्यासोनित्यः । तदावासत्यस्तःकर्तव्यइत्याह । यदितिति । प्राणायामंकृत्वापुर्वा-रसन्यासमंत्रंवर्जयित्वाअभयममभयंभूतेभ्य इतिभूताभयदानमुक्त्वा[illegible]जीवयोरैक्यंभावयेत्तत्त्वम् । एवंभूत्वातदाअन्यदावायदाजिहासुर्भवति इमंलोकंदेहं तदादेशकालापेक्षानकर्तव्येत्याह [illegible]

---

* पुष्पितमित्युक्ते यथावर्नामत्यर्थोलक्ष्यतेतद्वदित्यर्थः ।

श्रीमद्धनुमाचार्यकृत सुबोधिनी ।

जेयेति देशोबदरिकाश्रमादिपुण्यस्थाने कालेउत्तरायणे बकाराद्युमयांगधर्मेपुण्यमासकं कुर्यात् । विशेषणभूतपवदेशादौ मिसंन्यासुतंमाभवे दितितदाकेवलंभगवतिस्थं मनः कृत्वा यद्दशादिभिर्मविष्यति तद्भगवतैवभाविष्यतीतिमनस्थैर्यंविधायप्राणान्नियच्छेत् । मूलाधारादपानंसंयोज्यतत्प्राणान्नियायकुण्डलिनीमपोषनेनप्राणांताप्राणापानसहितांसुषुम्नाद्वारे निवेश्यवायुमूर्द्धनयेदित्यर्थः । मनसाबुद्धिसहितेन देहपालनादिकमकृत्वा पतत्सामर्थ्यजिज्ञासोरेवभवतीतिततव्यसरस्मारयति । जितासुरिति पवंकृतेवाजितासुर्भवति ॥ १५ ॥

यदाकश्चित्स्वप्रामाभिप्काश्यतेतदाजयःसिद्धोभवति । तदनंतरंस्वबुद्ध्यात्मबुद्ध्या संघातव्यतिरिक्तरूपयाअमलयाभक्त्यादिभिः शुद्धया नियम्यस्थिरंकृत्वाप्रयत्नं त्याजयित्वा दंडवत्पतत्वेतियावत् स्वस्मिन्वास्थापयित्वा बुद्ध्यावासंयोज्यतांबुद्धिं मनःसहितांवा क्षेत्रज्ञे शारीरे आत्मनि यःक्षेत्रंदेहादिअहमितिममेदमितिच अभिमन्यतेतस्मिन् प्रवेशयेत् तंचक्षेत्रज्ञं भगवतोरूपविशेषे सर्वजीवसमूहरूपेआत्मनि "अहमात्मागुडाकेशः सर्वभूताशयस्थित" इति वाक्यनिरूपिते भगवद्विभूतिरूपे तमात्मानं भगवति तस्मिन्नेव वा भगवद्रूपे अवरुध्यएकीकृत्यपुनर्देहानुसंधानार्थमिच्छामकृत्वाधीरोभूत्वातत्रात्मनि लब्धोपशांतिःकृत्यात्कर्तव्यात् कोटिजन्मकृतात् सर्वेऽप्यपवप्रयत्नेऽप्युपरतोभवेत् समाधाविवस्थितत्वापुनर्नागच्छेदित्यर्थः अत्रैवमुक्तिरित्येकःपक्षः पवंस्थितेदेहः स्वयमेवस्वकारणालयादूगच्छति परंतत्रानुसंधत्ते पतत्तृतीयेवक्ष्यते ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

अस्यैव ध्यानमाह एकैकश इति । नु निश्चितं भावयेत् ध्यायेत् । जितं जितं ध्यानेनाभ्यस्तं स्थानं पादगुल्फादि अपोह्य त्यक्त्वा परं परं जङ्घाजान्वादि धारयेत् स्वमनः प्रयोज्य ग्राहयेदित्यर्थः । यथा यथा धीश्च शुध्यति विषयलाम्पट्यं त्यजति तथा तथा धारयेदिति चित्तशुद्धितारतम्येनैव ध्यानतारतम्यमुक्तम् । तेनात्यन्ताशुद्धचित्तस्य नात्राधिकारः किन्तु वैराजधारणायामेवेति व्यञ्जितम् ॥ १३ ॥

अतएवाशुद्धचित्तत्वादेतद्रूपं यावद्ध्यातुं न शक्नुयात् तावद्वैराजरूपमेव ध्यायेदित्याह यावदिति । परे ब्रह्मादयोऽवरे यस्मात् । कुतः, विश्वेश्वरे, द्रष्टरि न तु दृश्ये । भक्तियोगः योगाङ्गभूतध्यानलक्षणः । क्रियावसाने आवश्यककर्मानुष्ठानानन्तरम् ॥ १४ ॥

अथ तस्यैव भक्तिमिश्रयोगिनः स्वयं देहत्यागकृत्यमाह स्थिरमिति । लोकं देहं यदा जिहासुर्भवेत् तदा देशे पुण्यक्षेत्रे काले चोत्तरायणादौ मनः न सज्जयेत् सङ्गं न प्रापयेत् । योगिनः कालदेशौ न सिद्धिहेतू किन्तु योग एवेति दृढनिश्चयो भूत्वा प्राणान् इन्द्रियाणि मनसा नियच्छेत् प्राणान्मनोनियम्यान् कुर्यादित्यर्थः । तेन नियन्तरि मनसि इन्द्रियाणि प्रविलापयेदिति द्योतितम् ॥ १५ ॥

ततश्च तन्मनः स्वबुद्ध्या नियम्येति मनो बुद्धौ प्रविलापयेदिति भावः । एतां स्वबुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि जीवे निलयेत् प्रविलापयेत् तञ्च क्षेत्रज्ञम् आत्मनि शुद्धजीवे तम् आत्मानम् आत्मनि ब्रह्मणि अवरुध्य एकीकृत्य लब्धोपशान्तिः प्राप्तनिर्वृतिः सन् कृत्याद्विरमेत् । मुक्तस्य कर्तव्यान्तराभावादिति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

ध्यानमाह एकैकशइति गदाभृतोध्येयस्यध्यातृत्राणायगृहीतकौमोदकेः पादादियावद्धसितंहसितयुक्तमुखावधिअङ्गानिएकैकशः धियाभावयेद्ध्यायेत् । जितंजितंस्थानंसुष्ठातंपादगुल्फादम । अपोह्यसुष्ठातत्वेनहृदिनिधायपरंपरंजंघाजान्वादि धीर्यथायथाशुद्ध्यतितत्र-तत्रनिष्ठांप्राप्नोतितथातथाधारयेद्ध्यायेत् ॥ १३ ॥

वैराजधारणासाधनभूतातावदनुष्ठेयैवयावत्साध्यधारणाश्रयेभक्तिर्नभवेदित्याह यावदिति । अस्मिन्मुक्तशरीरिणि द्रष्टरिसर्वांतर्यामिणिपरेऽवरेयस्मात्तस्मिन् विश्वेश्वरेसर्वेश्वरेयावत्भक्तियोगोनजायेततावत्क्रियावसाने आवश्यककर्मानुष्ठानावसानेपुरुषस्यवैराजस्यस्थवीयं स्थूलं चतुर्दशभुवनात्मकं प्रयतः स्मरेत ॥ १४ ॥

अथेत्थंभजननिष्ठावतोदेहविसर्जनप्रकारंवक्तुंभगवत्यात्मसमर्पणप्रकारंभगवत्स्वरूपंचाह स्थिरमितिचतुर्भिः अंगहेराजन् ! यतिर्भगवद्ध्यानयोगीयदाप्रारब्धकर्मक्षयकाले इमंलोकं प्राकृतं लोकंजिहासुर्हातुमिच्छुःस्यात् तदादेशेपुण्यक्षेत्रेकाले उत्तरायणादौचमनोनसञ्जयेन्नप्रापयेत् । किन्तुस्थिरंसुखमासनमास्थितः जितासुर्जितप्राणः मनसाप्राणमिन्द्रियगणानियच्छेद्भगवत्परंकुर्यात् ॥ १५ ॥

तन्मनःस्वबुद्ध्यानियम्य एतांबुद्धिंक्षेत्रज्ञे आत्मनिजीवेनिनगेन्नियच्छेत् । सर्वंदेहेन्द्रियरूपंजडवर्गंस्वानियम्यंस्वस्मात्पृथक्चिंतयेदित्यर्थः । तमात्मानंजीवम् आत्मनिभगवतिनिरुध्यसमर्प्यधीरोलब्धोपशांतिः कृत्याद्विरमेत अनेनस्वात्मसमर्पणावधिसाधनानुवृत्तिर्दर्शिता ॥ १६ ॥

भाषाटीका ।

एक एक अंगकूं बुद्धिसे भावना करे गदाधर भगवान के पाद से लगाकर मुख हास पर्यंत जिस जिस स्थान में ध्यान लगजाव उस उसको छोड़कर जैसे जैसे मन शुद्ध हो तैसे दूसरे दूसरे स्थान कूं [अंगकूं] मन से ग्रहण करे ॥ १३ ॥

जब पर्यंत ब्रह्मादिकोंसे बड़े रूप वाले द्रष्टा विश्वेश्वर में भक्ति योग उत्पन्न न हो तब तक नित्य कर्म के अंत में परम पुरुष के स्थूल रूप कूं सावधान सें स्मरण करा करे ॥ १४ ॥

हे राजन् ! स्थिर सुखदायक आसन में बैठा हुआ योगी यदि इस लोक कूं छोड़ना चाहे तो पवन को जीतने वाला आप उत्तम देश काल में मन न लगावे केवल प्राण वायू को रोक देव ॥ १५ ॥

अपनी निर्मल बुद्धी से मन को रोककर इस बुद्धि को क्षेत्रज्ञमे स्थापन करे उस क्षेत्रज्ञ जीवकों परमात्मा में स्थापन करे आत्मा को आत्माही मे स्थित करके धीरे पुरुष योगी शांति को प्राप्त होकर संसार कार्यों से निवृत्त होजाय ॥ १६ ॥

न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे ।
न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान्न प्रधानम् ॥ १७ ॥
परं पदं वैष्णवमामनन्ति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ।
विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे ॥ १८ ॥
इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः ।
स्वपार्ष्णिनापीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥ १९ ॥
नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः ।
ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तदेवाह न यत्रेति । यत्र आत्मस्वरूपे कालः न प्रभुः किमपि कर्तुं न समर्थः अतएव देवा न प्रभव इत्याह । अनिमिषां देवानां परः प्रभुः कालोऽपि यत्र न प्रभुः, तत्र कुतो नु देवाः प्रभवः स्युः । देवनियम्यानां जगतां प्राणिनां का वार्तेत्याह जगतामिति । कुतो न प्रभवन्तीत्यपेक्षायां निरुपाधिकत्वादित्याह न यत्रेत्यादि । यद्वा जगत्कारणान्यपि न यस्य सृष्ट्यादौ प्रभवन्तीत्याह न यत्रेति । विकारः अहङ्कारः ॥ १७ ॥

निरुपाधित्वं कुतः इत्यत आह परमिति । यत् यस्मात् 'अतत् आत्मव्यतिरिक्तं नेति नेति इति एवम् उत्स्रष्टुमिच्छवः दौरात्म्यं देहाद्यात्मत्वं विसृज्य अर्हस्य पूज्यस्य श्रीविष्णोः पदं पदे क्षणे क्षणे हृदा उपगुह्य आश्लिष्य नान्यस्मिन् सौहृदं येषां तथाभूताः सन्तः तद्वैष्णवं पदम् अतएव परं सर्वतः श्रेष्ठम् आमनन्तीत्यन्वयः ॥ १८ ॥

तस्मात् इत्थं ब्रह्मत्वेन व्यवस्थितो मुनिरुपरमेत् । तु शब्देन यदि प्रयास्यन्निति वक्ष्यमाणात् सकामाद्विशेष उक्तः । तमाह । विज्ञायतेऽनेनेति विज्ञानं शास्त्रं तेन जाता दृक् ज्ञानं तस्या वीर्यं बलं तेन सुरन्धिता विहिंसिता आशयाः विषयवासना यस्य सः ॥ १९ ॥

इदानीं तस्य देहत्यागप्रकारमाह । स्वपार्ष्णिना पादमूलेन गुदं मूलाधारम् आपीड्य निरुध्य अनिलं प्राणम् उन्नमयेत् ऊर्ध्वं नयेत् । जितः क्लमो येन । षट्सु स्थानेषु नाभ्यादिषु । नाभ्यां मणिपूरके स्थितं हृदि अनाहतचक्रे अधिरोप्य । उरसि कण्ठावधोदेशे स्थिते विशुद्धचक्रे । तम् अनिलम् ॥ २० ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

यदि प्रयास्यन्नित्यस्याध्यायस्यैव द्वाविंशश्लोको द्रष्टव्यः ॥ १९ ॥

नाभ्यादिष्विति । अत्र परोक्तेषु मणिपूरानाहतविशुद्धतालुमूलाज्ञाचक्रब्रह्मरन्ध्रेष्वित्यर्थः ॥ [षट्चक्रभेदस्य विशेषविवृतिरस्मत्प्रकाशिते महानिर्वाणतन्त्रे सप्तपञ्चाशदधिकशततमसंख्याङ्कितपत्रे द्रष्टव्या ।] ॥ २०—२४ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

अथप्राप्यंपरमात्मस्वरूपंवक्ष्यंस्तस्मिन्स्वात्मसमर्पणावधिकर्मनस्याऽज्यमित्याह नयत्रेति यत्रवैष्णवेपदेकालोनप्रभुः किमपिकर्तुंन समर्थः अतएवदेवानिप्रभवइत्याह अनिमिषांब्रह्मादीनांदेवानांपरः प्रभुःकालोयत्रनप्रभुःतत्रकुतोदेवाःप्रभवःस्यु देवनियम्यानांजगतां प्राणिनांकावार्तेत्याह जगतांप्राणिनांयेईशिरेजगतियेन्ययमयन्देवाःतेकुतोनप्रभवः तन्नियाम्यानांजगतांत्वप्रभुत्वंकैमुत्यन्यायसिद्धमित्यर्थः सर्वैरनियाम्यंसर्वनियन्त्रित्यर्थः किंचयत्रपदेप्रधानंतद्गुणाःसत्त्वादयःप्रधानकार्यभूतमहदहंकारादयश्चस्वकीयकार्यजननक्षमानभवंति ॥१७॥

यद्विष्णोःसंबंधिपरंसर्वोत्कृष्टंपदं प्राप्यंस्वरूपंपद्यतेगम्यतइतिविद्युत्पत्तिः आमनंतिवेदाइतिशेषः किंकर्तुमिच्छव आमनंति यदुत्सिसृक्षवेति नेतीतिउत्सिसृक्षवः तद्व्यतिरिक्तमुत्स्रष्टुमिच्छवः व्यावर्तयितुमिच्छवः अब्रह्मात्मकंअतंतंवस्तुनेतिनेतीतिबाधयंतः कालादिभिरनियाम्यंकालादीनांचनियंतृसत्त्वादिकार्यास्पृष्टंच वैष्णवं प्राप्यंस्वरूपंवेदांताः आमनंति दौरात्म्यं रागाद्युपहतचित्तत्वंविसृज्यत्यक्त्वा तदर्हपदमर्हस्याराधनीयस्यभगवतः परमनन्यसौहृदाअनन्यसौहृदयेनहृदयस्यइवादंशः यद्वाऽनन्यसौहृदावेदांताः आमनंतीतिपूर्वेणान्वयः अनन्यतात्पर्यकाइत्यर्थः हृदाहृदयेनोपगुह्यपदेपदेक्षणेक्षणे आश्लिष्यकृत्याद्विरमेततदाकृतकृत्योभवेदितिपूर्वेणान्वयः ॥ १८ ॥

अथदेहादुत्क्रांतिमाह इत्थमिति इत्थंतूपरमेतदेहादितिशेषः तुशब्दः कृत्याद्विरतेर्देहादुपरामस्यवैषम्यद्योतकः इत्थंव्यवस्थाब्रह्माकारत्वेन एतदेवोपपादयति विज्ञानेति सर्वंब्रह्मात्मकमितिव्यवस्थितमितिमतिर्विज्ञानं भगवदुपासनात्मकं ज्ञानंतदेवदृग्दर्शनात्मकं प्रत्यक्षतापन्नमित्यर्थः तादृशस्यज्ञानस्ययद्वीर्यंसामर्थ्यंतेनसुरंधितः विहिंसितः निःशेषनिवृत्तः आशयोवासनायस्यसतथोक्तः योगीस्वपार्ष्णिनास्वपादमूलेनगुदंमूलाधारमापीड्यनिरुध्यतत आपीडनानंतरमनिलंप्राणंषट्सुनाभ्यादिषुस्थानेषुउन्नमयेत् जितःक्लमोयेन तिष्ठत्तश्रमइत्यर्थः ॥ १९ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

नाभ्यां मणिपूरके स्थितं प्राणं हृदयमाहृत्य हृदयकमलेऽधिरोप्य तस्माद्धृदः उदानगत्योदानस्योदानवायोर्गत्या संचारप्रकारेण उरसि कण्ठादधो दशस्थिते विशुद्धचक्रे तं प्राणं नयेत् तत उरसः धियानुसंधाय गन्तव्यमनुसंधाय मनस्वी यतचित्तः स्वतालुमूलं स्वजिह्वाग्रपूर्वभागस्थं वा प्रभागं शनकैः ततो बहुधा गमनसंभवाच्छनकैरित्युक्तं नयेत् प्रापयेत ॥ २० ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

एवमुत्क्रान्तो यामीयं लोकमाप्नोति तमितरलोकेभ्यो व्यावर्तयति नयत्रेति यत्र यस्मिल्लोकेऽनिमिषाणां रुद्रादिदेवानां प्रभुः कालो वायुर्न प्रभुः स्वशकेऽरहो वकः "हरिश्च प्रकृतिश्चैव महद्वायुस्तथैव चेत्यादेः* येरुद्रादयो देवा †जगतामीशिरे जगति स्वस्वकार्ये प्रवर्तयामासुस्ते देवा न प्रभवंति कुतोन्यावकाशो न कुतोऽपीत्यर्थः । यत्र यस्मिन्स्थाने सत्त्वादिगुणत्रयं च स्वशक्तिप्रकाशकं न । विकारो वैभूतेन्द्रियात्मको हंकारश्च न । महान्महत्तत्त्वं च प्रधानं प्रकृतिश्च न । जरादिस्वधर्मा पादिकान भवंतीत्यर्थः ॥ १८ ॥

ननु कालादिसंसर्गाभावाच्छ्रवणविषयत्वं नास्तीति तत्राह परं पदमिति तद्वैष्णवं विष्णोर्विद्यमानं परं पदं प्राप्तव्यो यस्मंलोकमामनंति पठंतीत्यन्वयः । अनेन यथा कालादिकृतोपद्रवो हरेर्नास्ति तथा लोकस्यापीत्युक्तं भवति यत्संबंधाल्लोकोऽपि तादृङ्महिमा स विष्णुः किंमहिमेति तत्राह यत्नेतीति वैष्णवमित्यनेन प्रस्तुतो विष्णुरयमुच्यते अतत्तस्मात् ब्रह्मणाऽऽरतसंसारलक्षणाद्दुःखमुक्तिमृक्षवस्त्यक्तकामाः विशिष्टाधिकारिणोयं विष्णुर्नेतिनेति पृथिव्यादिवन्नाकाशादिवच्च न तत्कारणमहदादिवच्च न तदभिमानिवच्च नेत्युपास्य तद्दौरात्म्यं दुरात्मना मसुरप्रकृतीनां विद्यमानं संसारदुःखं विसृज्यानन्यसौहृदा अनन्यभक्ता हृदा निरतिशयस्नेहलक्षणभक्त्योपगुह्य पदे पदे मनसा निरंतरं परिरभ्यामुमापुः एवंविधस्य हरेर्विद्यमानमिति पूर्वेणान्वयः यद्वा यत्सर्वोत्तमं परममंगलं विष्णुरूपमाप्तवानूनद्रूपमितरेभ्यो व्यावर्तयति नयत्रेति अतत्तस्माद्ब्रह्मणोऽन्यद्जगदुत्तिसृक्षवस्त्याजयितुकामाः सवा एष आत्मा नेतिनेतीत्यामनंतितदित्यन्वयः वेदानामचेतनत्वेन बुद्धिपूर्वकप्रवृत्त्यसंभवात्कथं तदुक्तं निर्णेतुं शक्यत इत्यत्राह विसृज्येति । त्वदोक्तेन विनिर्णीय दौरात्म्यं दुष्टोपास्तिमक्यविषयं विसृज्य पदे पदेऽन्वहं हृदोपगुह्याक्रोशीकृत्यानन्यसौहृदाभूत भवद्भविष्यंतोऽमुमापुराप्नुवंत्याप्स्यंति वा तायुक्तमुक्तमिति ॥ १८ ॥

संप्रति ज्ञानिनां देहादुत्क्रमणप्रकारमाह इत्थमिति तुशब्दः प्रकरणभेदार्थः इत्थं स्थिरं सुखं चासनमित्युक्तप्रकारेण मुनिस्परमेदुत्क्रमितो भवेत् । कथमत्राह व्यवस्थित इति देहादुत्क्रमणे व्यवस्थितो निश्चितबुद्धिः । विज्ञानमात्मयोग्यज्ञानं स्वविर्बाधपर्यंतं देहक् तस्यावीर्येण सुष्ठु रुंधितादश्च आशयो बाह्यांतःकरणं यस्य स तथोक्तः । विज्ञानं ब्रह्मेति श्रुतेर्विज्ञानस्य ब्रह्मणो दर्शो धार्येण तिवा जितक्लमः शरीरग्लानिरहितः प्रथमं स्वपार्ष्णिना गुल्फाधोभागेन गुदमपानद्वारमापीड्य ततोपानद्वारनिरोधानंतरं । ततो मूलाधाराच्चतुर्दलपद्मादनिलमुदानवायुमुत्थाप्य नाभिहृदयोरस्तालुमूलभ्रूमध्यमूर्धसु षट्स्थानेषु क्रमादुन्नमयेदूर्ध्वगमयेदित्यन्वयः ॥ १९ ॥

संक्षिप्योक्तं विशिनष्टि नाभ्यामित्यादिना मुनिर्मूलाधाराच्चतुर्दलपद्मादुन्नीय नाभ्यां स्थितं षट्दलपद्मे नीतमुदानगत्या ब्रह्मनाड्या हृदि दशदलपद्मेऽधरोप्य सन्निधाय ततो दशदलपद्मात्समुरसि द्वादशदलपद्मं नयेत् मनस्वी मनःसमाधाननिरतस्ततो द्वादशदलपद्माद्यथा नाड्यंतरं न गच्छेत् तथा धियानुसंधाय शनकैरसंभ्रमेण स्वतालुमूलं षोडशदलकमलं नयेत् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तत्फलञ्च द्विविधं ब्रह्मकैवल्यप्राप्तिर्वैकुण्ठप्राप्तिश्च, भक्तिसिद्धज्ञाननिष्ठत्वाद्भक्तिमयज्ञाननिष्ठत्वाच्च । तत्र पूर्वावस्था उक्ता । अथ उत्तरावस्थामजामिलादिन्यायेन तत्रैव वैकुण्ठाभिव्यक्तिदर्शनार्थमाह, न यत्रेति युग्मकेन । अत्र श्रीवैकुण्ठस्य सच्चिदानन्दरूपत्वं श्रीभगवतैवोक्तम् । तद्यथा—एवमेतान् मयादिष्टाननुतिष्ठन्ति मे पथः—ज्ञानकर्म्मभक्तिलक्षणान् मत्प्राप्त्युपायान्; ज्ञानकर्म्मणोरपि भक्तेषु भक्तेः प्रथमतः क्वचित् कदाचित् किञ्चित्साहाय्यकारित्वात् । क्षेमं—मद्भक्तिमङ्गलमयम् । यत् स्थानं परमं ब्रह्मेति विदुर्जानन्ति। इत्थमेवोदाहरिष्यते च दशमे—इति सञ्चिन्त्य भगवान् महाकारुणिको विभुः । दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥ सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनम् । यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः ॥ इति । उभयत्रापि चकाराद्यध्याहारादिना त्वर्थान्तरं कष्टं भवति । तैरेव च तमसः प्रकृतेः परमिति वैकुण्ठस्यापि विशेषणत्वेन व्याख्यातमिति ॥ १७ ॥

परं पदमिति । अतत् चिद्व्यतिरिक्तं नेति नेतीत्येवमुत्स्रष्टुमिच्छवः दौरात्म्यं भगवदात्मनोर्भेददृष्टिं विसृज्य अहृदय श्रीभगवतः पदं चरणारविन्दं पदे पदे प्रतिक्षणं हृदा उपगुह्य आश्लिष्य अनन्यसौहृदाः नान्यस्मिन् सौहृदं येषां तथाभूताः सन्तः यत् आमनन्ति जानन्ति तद्वैष्णवं पदं श्रीवैकुण्ठाख्यमिति ब्रह्मस्वरूपमेव तदिति तात्पर्य्यम् । अनेन भक्तिलक्षणसाधनलिङ्गेन निराकाररूपमर्थान्तरं निरस्तम् । अत्र निराकारपरायणस्यापि मुक्ताफलटीकाकृतो दैवाभिव्यञ्जिता गीर्यथा—तत् परं पदं वैष्णवमामनन्ति अधिकृताधिष्ठितराजाधिष्ठितत्ववत् ब्रह्मादिपदानामपि विष्णुनाधिष्ठितत्वात् परमित्युक्तम् । विष्णुनैवाधिष्ठितमित्यर्थ इति । अतएव श्रुतावपि तस्य स्वमहिमैकप्रतिष्ठितत्वम्—स भगवान् कस्मिन् प्रतिष्ठित इति स्वे महिम्नि इति । अतएवोक्तम्—क इत्था वेद यत्र स इति ॥ १८ ॥

इत्थमित्यर्द्धकम् ॥ १९ ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

तस्य मुक्तिस्थानं वदति नयत्रेति यत्रात्मनि कालो न प्रभुः अनिमिषां देवानां परमुत्कृष्टः मुख्याधिकारी प्रभुः तेषामपि नियन्ता अनेनाधिकारसामर्थ्यमुक्तं तथापि भगवति स्थितत्वान्न प्रभुः कुतोऽनुदेवाः इन्द्रियाधिष्ठातारः ते हि सर्वदा समाधिस्थितं निष्काशयन्ति तेषामपि

* कालश्चेरिताः कर्मादितिशेषतात्पर्ये ? † कर्मणिषष्ठी ।

इतोनिष्काशनेसामर्थ्येकैमुतिकन्यायेननिवारितं तेषांसामर्थ्यमाह अमर्त्यावईशिरइति सर्वेजगतिप्रभवः अतःकालस्यकालनियम्यान ञानतत्रसामर्थ्यमित्युक्तं यद्यपिकालप्रेरकव्यतिरेकगुणानभुञ्जंति अभुञ्जानाश्चरूपाणप्रख्यापयंति तथापिक्षोभकोकालोगुणाधीशइति तेषांपृथङ्निराकरणमाह नयत्रेति चकारात्प्रकृतिगुणाः अहंकारगुणाश्च येनिश्चयेनअहंकारोऽपिसत्तुसर्वेशाश्चरूपप्रख्यापकः अतोविकारः महान्महत्तत्त्वं प्रधानंप्रकृतिः तत्रस्थितंकोऽपिनचालयतीत्यर्थः ॥ १७ ॥

नन्वेवंतस्यस्थानस्यकथंमाहात्म्यंतदाह परंपदमिति तत्सर्वेभ्यःपदेभ्यःस्थानेभ्यःउत्कृष्टंपदम् अक्षररूपंपुरुषोत्तमपादरूपम् अतएववैष्णवं यतोवैष्णवंपरंपदमामनंतीतियोजनायादित्युद्देश्यम् आमनंतीतितत्रप्रमाणम्केवलश्रुतेःप्रमाणत्वेउपचरितार्थत्वंवाकल्प्येतअतआहनेतिनेती- त्यतदुत्सिसृक्षवइति अतत्आत्मव्यतिरिक्तम् अस्मिन्संघातेयंउत्सिसृक्षवोभवंति तेतद्वैष्णवंपदमितिवदंति तदेकंप्राहयम् अन्यत्याज्य- मितिविवेकः नच तेषामुत्तमाधिकारादेवस्फुरणंभविष्यतीत्याशंक्यतेषामधिकारमाह विसृज्येति तेषामपेक्षितंगुणत्रयंवर्त्तते सर्वथा देहादौआत्मस्फूर्त्तित्यागः सर्वदोषाभावरूपः नविद्यतेअन्यस्मिन् सौहृदंयेषाम् अनेनपूर्वोक्तन्यायेनभगवतिपरमाप्रीतिरुक्ता साधनमाह अर्हपदं भगवच्चरणारविंदं पदेपदेक्षणेक्षणेमनसःस्थापनस्यानेवा उपगुह्यआलिंग्य आमनंतीतिसंबंधः एतादृशैरुक्तंनान्यथा भवतीत्यर्थः ॥ १८ ॥

इत्थमित्युपसंहारः एवंस्थितेदेहादिःस्वयमेवगमिष्यतीतिभावः पक्षांतरमाह मुनिस्त्विति यदितत्रस्थितोनभवेत् मननवत्साधनपरो- भवेत् भिन्नतत्स्वरूपंभासयतेचेत्तदातस्मादुपरमेत् प्रकारांतरेणपुरुषार्थःसाधनीयइति तमेवप्रकारांतरमाह व्यवस्थितइति विशेषाकारेणतस्मिन्नेवपदेमनःस्थिरीकृत्यआत्मानंयोजयित्वाभगवत्साक्षात्कारंब्रह्मभावंवाबहुकालमनुभूयतस्यविज्ञानस्यबलंप्राप्यविज्ञान मेवया दृक्अनुभवरूपंयज्ज्ञानं तस्यवीर्यंशास्त्रसामर्थ्यंनसर्वाज्ञाननिवर्त्तकरूपेण सुष्ठुरंधितःशोधितःरागादिनिराकरणेनशुद्धःकृतः आशयो यस्यताहशोभवेत् सम्यक्चित्तशोधनंकुर्यादित्यर्थः तदाशुद्धंचित्तंदेहत्यागार्थं यत्नंकुर्यादितितस्यागोपायमाह स्वपार्ष्णिनापीड्येति मूलाधारस्यपीडनंपार्ष्णिनाकर्त्तव्यम् एकवचनेनपार्ष्णिद्वयप्रक्षेपोनिवारितःगुदंमूलाधारस्थानं ततःकुंडलिनीप्रबोधात् ततःमूलाधारात् अनिलमुत्थाप्यषट्चक्रभेदनेनोर्ध्वंनयेत् तत्रवायोः स्थानभूतानिषट्चक्राणि मूलाधार स्वाधिष्ठान मणिपूरक अनाहत विशुद्धि आज्ञारूपाणि गुदे गुह्यमूले नाभौ हृदये तालुमूले भ्रूमध्येचस्थितानि तानिस्थानानिपद्मत्वेनोक्तानि चतुर्दलं षड्दलं अष्टदलं द्वादशदलं षोडशदलं द्विदलमिति । तेषांवायोरूर्ध्वनयनमार्जवेननभवतीति अन्यत्रगमनशंकयासाधनमाह जितक्लमइति वाय्वाकर्षणेजितः क्लमो- येन ॥ १९ ॥

नाभिपर्यंतमार्जवम् अग्रेवक्रता अतोनाभ्यांस्थितंमहतीप्रयत्नेनहृद्यधिरोपणीयं तत्रहृत्पुंडरीकमूर्ध्वनालमधोमुखंतद्वायुवशादूर्ध्वमुखं कर्त्तव्यं ततःप्रयत्नाधिक्यान्नाभ्यांस्थितमित्यनूद्यहृद्यधिरोपणमुक्तं तस्मादप्यग्रे नयनंदुर्घटं तालुमूलस्थानेउरसिउदानवायुरेवतिष्ठति अन्योऽपियोगच्छेत्तत्रसतद्भावमापन्नएवगच्छेत् अतआह। उदानगत्योरसितंनयेदिति पूर्वाधिकारेहृदयपर्यंतमेववायोरानयनम् अस्यत्वग्रे नयनमितिपूर्ववदाह मुनिरिति तत्रसमावस्थितभावप्राप्तस्य अग्रेगमनार्थंतद्भावत्यक्त्वापूर्वभावमनुसंधाय तयामहत्यावुद्ध्याग्रहणस्थापन समर्थयामनस्वी महाबुद्धिमान् स्वतालुमूलं तस्यैवाग्रिमस्थानंशीघ्रंनीतस्यमुखादिद्वारेणनिर्गमनशंकयाशनकैर्नयेत् तत्रबुद्धेःसूक्ष्मता विधेया स्थापनार्थंनयनार्थंचेत्याह सुधीरिति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

न च मुक्तं कोऽप्यतिक्रामयतीत्याह । यत्र प्राप्तब्रह्मस्वरूपं तस्मिन् अनिमिषां देवानामपि परः शास्ता कालो न प्रभुः । तत्र कुतो नु देवाः प्रभवेयुः । ये देवा इन्द्राद्याः जगतां प्राकृतजगत्स्वेव ईशिरे ईशाञ्चक्रिरे । ननु तदेव ब्रह्म किंस्वरूपं तत्राह न यत्र सत्त्वमिति । यत्र ब्रह्मणि । विकारः अहङ्कारः ॥ १७ ॥

सत्त्वादयः कथं न सन्ति इत्यत आह । परं प्रधानात् परम् अतएव वैष्णवं पदं विष्णोर्निर्विशेषं स्वरूपं तत् प्रसिद्धमेव तदपि भगवद्भक्ता नारदादय एव यथा जानन्ति न तथा ज्ञानिनोऽपीत्याह । यत् ब्रह्म नेति नेतिस्वरूपम् अतत् तद्व्यतिरिक्तं वस्तु उत्सिसृक्षवः आ सम्यगेव आमनन्ति जानन्ति किं कृत्वा दौरात्म्यं केवलज्ञानिनामिव निर्बुद्धित्वं विसृज्य । कीदृशाः । अनन्यसौहृदाः विष्णु- सम्बन्धव्यतिरिक्तवस्तुनि स्नेहाभाववन्तः । अर्हस्य पूज्यस्य श्रीविष्णोः पदं चरणारविन्दं पदे पदे क्षणे क्षणे हृदा उपगुह्य इदमेवा- स्माकं सर्व्वस्वमित्यालिङ्ग्य । अत्र अतदुत्सृजन्तः इत्यनुक्तेर्यदा स्वप्रभोर्ब्रह्मस्वरूपं केवलमनुबुभूषन्ति तदा अतत् त्यक्तुमिच्छवो भवन्ति सर्व्वथा तु भगवत्सन्तापकरणत्वात् हृदयं जगन्न त्यजन्तीत्यर्थो लभ्यते । दौरात्म्यमिति विष्णोर्देहे मायिकत्वबुद्धिमन्तो दुरात्मान एव ज्ञेयाः ॥ १८ ॥

इत्थं ब्रह्मण्येव व्यवस्थितो मुनिः । तुशब्देन यदि प्रयास्यामीति वक्ष्यमाणात् सकामाद्विशेष उक्तः । विज्ञानमनुभव एव दृग्दृष्टि- स्तस्या वीर्य्येण बलेन सर्व्वतो निभालनाधिक्येन सुष्ठु रन्धिता आशया अतिसूक्ष्मा अपि विषयवासना येन सः ॥ १९ ॥

इदानीं तस्य देहत्यागे प्रकारमाह । स्वपार्ष्णिना पादमूलेन गुदं मूलाधारम् आपीड्य निरुध्य अनिलं प्राणं षट्सु स्थानेषु नाभिहृदुर स्तालुमूलभ्रूमध्यब्रह्मरन्ध्रेषु उन्नमयेत् । तत्र प्रथमं नाभेरधः स्वाधिष्ठानचक्रादुपरि नाभ्यां मणिपूरके स्थितम् अनिलं हृदि अनाहतचक्रे अधिरोप्य । उरसि कण्ठादधोऽवस्थिते विशुद्धचक्रे ॥ २० ॥

तस्माद्भ्रुवोरन्तरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः ।
स्थित्वा मुहूर्त्तार्द्धमकुण्ठदृष्टिर्निर्भिद्य मूर्द्धन् विसृजेत् परं गतः ॥ २१ ॥
यदि प्रयास्यन् नृप ? पारमेष्ठ्यं वैहायसानामुत यद्विहारम् ।
अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥ २२ ॥
योगेश्वराणां गतिमाहुरन्तर्वहिस्त्रिलोक्याः पवनान्तरात्मनाम् ।
न कर्म्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥ २३ ॥
वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा ।
विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं नृप ? शैशुमारम् ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

यत्रभगवतिस्वात्मसमर्पणपात्रेअनिमिषांदेवानांपरः भयदः कालोऽपिप्रभुः किंचित्करोनतत्रदेवाः कालनियम्याः कुतः प्रभवः । देवनियम्यानांजगतांप्राणिनांतुकाकथेत्याह जगतांयईशिरेइति । येजगंति नियमयंतितेतत्रनप्रभवः तत्रजगतांकाकथेत्यर्थः । यत्रप्रधानंततत्कार्यभूतौमहदहंकारौप्रधानगुणाश्चकिंचिदपिकर्तुनक्षमाः ॥ १७ ॥

अतद्ब्रह्मव्यतिरिक्तम नेतिनेतीति उत्सिसृक्षवः उत्स्रष्टुमिच्छवः अनन्यसौहृदाः अनन्यविषयाः वेदांताः यत्परंसर्वोत्कृष्टंवैष्णवंपदं विष्णुस्वरूपमामनंति । जगत्कारणत्वेनसर्वात्मत्वेनसर्वशक्तिमत्त्वेनसत्यत्वादिमत्त्वेनचप्रतिपादयंति । तदर्हस्यपूज्यस्यविष्णोः पदंस्वरूपंस्वतंत्रोऽस्मीतिदौरात्म्यमब्रह्मात्मकत्वं विसृज्यहृदापदेपदंप्रतिक्षणमुपगुह्यसंप्राप्यकृत्याह्निरमेतेतिसंबंधः ॥ १८ ॥

एवं"नतस्यप्राणाउत्क्रामंतिब्रह्मैवसन्ब्रह्माप्येति यदासर्वेप्रमुच्यंतेकामायेऽस्यहृदिस्थिताः अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुते"इतिश्रुतिप्रोक्तांविद्वदवस्थायां ब्रह्मप्राप्तिमुक्त्वा अर्चिरादिमार्गेण मुक्तावस्थायां ब्रह्मप्राप्तिप्रकारंवक्तुंतावद्देहादुत्क्रांतिप्रकारमाह इत्थमितित्रिभिः विज्ञानदृग्वीर्यसुरंधिताशयः विज्ञानेशास्त्राचार्यानुग्रहाल्लब्धंविशिष्टंयत्तत्त्वज्ञानंतदेवदृक्परिपाकावस्थापन्नंसाक्षात्तत्त्वदर्शनं तस्यर्धार्यण प्रभावेनसुरंधिताः आशयाः विषयवासनायेस्यतथा उक्तप्रकारेणव्यवसितः भगवतिकृतात्मसमर्पणः इत्थंवक्ष्यमाणप्रकारेण मुनिस्तूपरमेद्देहादितिशेषः अनिलोत्थापनादिक्रियानभिज्ञस्यमुमुक्षोर्नाडीविशेषज्ञानंभगवदनुग्रहाद्भवतीति "हार्दानुगृहीतःशताधिकयेति सूत्रकारेणसूचितम तस्मान्मुनेरनिलोत्थापनादिक्रियाभिज्ञस्यविशेषत्वद्योतकस्तुशब्दः तमेवप्रकारमाह स्वपार्ष्णिनेतिद्वाभ्याम स्वपार्ष्णिनास्वपादमूलेनगुदंमूलाधारमापीड्यनिरुध्यततस्तदनंतरमनिलंप्राणंषट्सुस्थानेषुनाभ्यादिपून्नमयंदूर्ध्वंनयेत जितक्लमः जितश्रमः॥१९॥

नाभ्यांमणिपूरके स्थितमनिलंहृदिअनाहतचक्रेऽधिरोप्यततोऽनाहतचक्रादुदानस्यवायोर्गत्यातमनिलमुरसिकंठादधोदेशे स्थितेविशुद्धिचक्रेनयेत् मनस्वीजितचित्तः ततोबहुधागमनसंभवात्तमनिलंधियानुसंधाय शनकैस्तालुमूलंतस्यैवविशुद्धिचक्रस्याग्रदेशंनयेत ॥ २० ॥

भाषाटीका ।

तब वह योगी उस वैकुंठ को जाता है जहां कि देवताओं का भी प्रभु जो काल सो भी नहीं है तो जगतों के ईश्वर देवता तो कैसे प्रभु होंगे जहां पर सत्त्व रजः तमः अहंकार महत्तत्त्व प्रधान यह भी कोई नहीं है ॥ १७ ॥

परमेश्वर से दूसरे में सौहृद नहीं रखने वाले अपने दुरात्मता कूं छोडकर हृदय में परमात्मा के चरण कूं क्षण क्षण में आलिंगन करके बाह्य पदार्थों को छोडकर नेति नेति इस रूपसे वर्णन करते हैं उसको वैष्णव परम पद कहते हैं ॥ १८ ॥

इस प्रकार निश्चय करने वाला मुनि विज्ञान दृष्टि से जिसके अन्तःकरण शुद्ध होगये हैं सो मुनि अपने पावकी एडी से गुद द्वार को दवाकर फिर अपानवायु को परिश्रम जीतकर षट्चक्रों के स्थानों में ऊपरकूं लेजाय ॥ १९ ॥

उन्हीं चक्रों में नाभि में स्थित पवन को हृदय में स्थापन करके उपर गति से हृदय में लेजाय तिसके अनंतर ठीक अनुसंधान कर के मन के द्वारा उत्साह वाला योगी धीरे धीरे अपने तालु मूल को लेजाय ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

मनस्वी जितचित्तः । स्वतालुमूलं तस्यैव चक्रस्याग्रदेशम् । ततो बहुधा गमनसम्भवात् शनकैरित्युक्तम् । तस्मात् भ्रुवोरन्तरम् आज्ञाचक्रम् । निरुद्धानि सप्त अयनानि श्रोत्रे नेत्रे नासिके मुखञ्चेत्येवं सप्त प्राणमार्गा येन सः अनपेक्षः क्रममुक्तवत् पारमेष्ठ्यादिलोककौतुकानपेक्षः मूर्द्धन् मूर्द्धनि ब्रह्मरन्ध्रे निर्भिद्य देहमिन्द्रियाणि च विसृजेत् ॥ २१ ॥

सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीति द्वाभिः । यदि तु पारमेष्ठ्यं पदं प्रयास्यन् भवति । वैहायसानां खेचराणां सिद्धानां यत् विहारं क्रीडास्थानम् । कीदृशम् अष्ट आधिपत्यानि अणिमाद्यैश्वर्याणि यस्मिन् । तदपि प्रयास्यन् । क गुणसन्निवाये गुणसमुदाय रूपे ब्रह्माण्डे सञ्चेत्यर्थः । तर्हि देहत्यागावसरे मनश्च इन्द्रियाणि च न त्यजेत् किन्तु तैः सहैव तत्तल्लोकंभोगार्थं गच्छेत् ॥ २२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यतः कर्मगतिवत् न योगगतिः परिच्छिन्नेत्याह । योगेश्वराणां त्रिलोक्या अन्तः बहिश्च महर्लोकादिषु ब्रह्माण्डात् बहिश्च गतिं आहुः । अन्तर्भवतु पवनं अन्तः आत्मा लिङ्गशरीरं येषामिति । विद्या उपासना, तपो भगवद्धर्मः, योगोऽष्टाङ्गः, समाधिर्ज्ञानं, तान् ये भजन्ति तेषां या गतिस्ताम् ॥ २३ ॥

तामाह वैश्वानरमित्यष्टभिः । विहायसा आकाशेन तत्र च ब्रह्मलोकपथेन गतः सन् । तत्र प्रथमं वैश्वानरम् अग्न्यभिमानिनीं देवतां याति । केनोपायेन सुषुम्णाया नाड्या । सा च देहाद्बहिरपि वितताऽस्तीत्याह शोचिषा ज्योतिर्मय्या । विधूतस्त्यक्तः कल्को मलं येन सः अव्यसज्जमान इत्यर्थः । उदस्तात् उपरिष्टात् वर्तमानं, हरेः ध्रुवनिध तारारूपनारायणाधिष्ठानमित्यर्थः । शैशुमारं चक्रं पञ्चमस्कन्धे वक्ष्यमाणं शिशुमाराकारं ज्योतिश्चक्रम् । चक्रस्थानि आदित्यादिध्रुवान्तानि पदानि प्रयातीत्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

तस्मात्स्वतालुमूलाद् भ्रुवोरन्तरं भ्रूमध्यस्थानं चक्रं प्रत्युन्नयेत ऊर्ध्वं नयेत कथंभूतः निरुद्धसप्तायतनः निरुद्धानि सप्तायतनानि श्रोत्रद्वयाक्षिद्वयनासारंध्रद्वयास्यरूपाणि स्थानानि येन सः विषयांतरनिरपेक्षः भ्रूमध्ये मुहूर्तार्द्धं स्थित्वाकुंठदृष्टिः स्वगतव्यविषयाप्रतिहतज्ञानसम्पन्नः परंपरमात्मानं प्राप्तः अनुसंदधन्मूर्द्धन्मूर्द्धानं सुपांसुलुक् ॥ ६।२।० ॥ इति सुब्लुक् निर्भिद्य शीर्षकपालं भिन्नत्वाति श्रुतिः स्मारिता विसृजेत्स्थूलदेहमिति शेषः ॥ २१ ॥

अथ मुमुक्षोर्गन्तव्यमर्चिरादि मार्गं वक्ष्यंस्तस्य मुमुक्षोर्धूमादि मार्गस्य हेयत्वज्ञापनाय धूमादि मार्गेणागतानां गन्तव्यलोकानाह । यदीति । एते सृती ते नृप वेदगीते इति मार्गद्वयस्य वक्ष्यमाणत्वादस्मिन्नध्याये धूमादिमार्गविषयग्रन्थान्तराभावाच्च । "तासां मूर्द्धानमभिनिःसृतैकातयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" इति श्रुतेः । मूर्द्धनिष्क्रान्तस्यार्च्चिरादिलोकगत्यनुपपत्तेश्च यदीत्यादि श्लोकद्वयं धूमादिमार्गगतागतस्य चारप्रदर्शनपरमेव । नच "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति सद्योमुक्तिरेका प्रतीयते "तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न" इत्यादिना क्रममुक्तिरन्या प्रतीयते अत्रापि विसृजेत्परं गतः इति सद्योमुक्तिः । वैश्वानरं याती ति क्रममुक्तिश्च प्रतीयते । अतः क्रममुक्ति सद्योमुक्तिरूपमार्गद्वयस्यैवैते सृती ते इति वक्ष्यमाणत्वाच्च धूमादिमार्गगतागन्तव्यप्रदर्शनपरमिति श्लोकद्वयमिति चेदुच्यते । सद्योमुक्ति स्तावदप्रामाणिकैव । ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसम्भवन्तीत्यादिना सपतान्ब्रह्मगमयतीत्यंतेन ब्रह्मोपासीनानामर्चिरादि नागतानामेव ब्रह्मप्राप्त्यवगमात् "विकल्पोऽविशिष्टफलत्वात् ॥ ३।३।० ॥" इति न्यायेन सर्वब्रह्मविद्यानामेकफलत्वेनार्चिरादिगतेः सर्वब्रह्मविद्यानिष्ठानां समत्वाच्छास्त्रप्रतिपाद्यायाः सद्योमुक्तेरभावात् । अथ ब्रह्मणः सर्वगतत्वात् तत्प्राप्तये देशान्तरगमनापेक्षेति "न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन् ब्रह्माप्येति" इत्यादेः कोऽर्थ इति चेदुच्यते ॥ अत्राऽस्मिल्लोके उपासनदशायां ब्रह्मानुभवति तस्य ब्रह्मप्रेप्सोः प्राणा नोत्क्रामन्ति तं विहाय न गच्छन्ति किन्तूपासनफलभूतब्रह्मप्राप्तये तदधिष्ठितलोकांतरगमनाय सहैव तिष्ठंतीत्यर्थः इति अतो धूमादिनागतानां गन्तव्यप्रदर्शनपरमिदं श्लोकद्वयमित्याह । यदीति हे नृप ! पारमेष्ठ्यं चतुर्मुखलोकं वैहायसानां स्वेच्छचराणां सिद्धानां यद्विहारस्थानं कीदृशम् अष्टाधिपत्यमणिमाद्यष्टैश्वर्यसंपन्नं यदि प्रयास्यन्नुगमिष्यन्नुभवति तदा गुणसंनिवाये मनसेन्द्रियैश्च सहैव गच्छेत्स्थूलदेहस्यैव भस्मीभावात्सूक्ष्मदेहेनैव गच्छतीत्यर्थः अर्वाचीनलोकान्गच्छतां भूतसूक्ष्मेन्द्रियात्मकलिंगशरीरेणैव सह गमनं ब्रह्मप्रेप्सोस्तु किंचिद्दूरं गच्छतां मध्ये विश्लेष इति विशेषः ॥ २२ ॥

योगेश्वराणां भगवद्भक्तिव्यतिरिक्तयोगनिष्ठानामब्रह्मात्मकस्वतंत्रजीवोपासकानां त्रिलोक्याः बहिः जनलोकादिषु पवनांतरात्मनां पवनस्यांतरात्मा पवनांतरात्मा तेन वायुभूतसूक्ष्मदेहेन गतिमाहुरित्यर्थः यद्वा वायुमनुप्रविश्य गच्छतीति वायुतुल्यवेगो गच्छतीत्याहुरित्यर्थः भगवद्भक्तिव्यतिरिक्तयोगनिष्ठानां गतिरितरैर्न लभ्यत इत्याह नेति विद्या शास्त्रजन्यं ज्ञानं तपः कर्मयोगः योगो यमनियमादिः समाधिरब्रह्मात्मकस्वात्मस्वरूपानुसंधानम् एतान् भजंति ये तेषां योगीश्वराणां तां गतिं ब्रह्मांडांतर्गतापेक्षितलोकगतिं कर्मभिरभिसंहितफलैः कर्मिणो न प्राप्नुवंति केवलकर्मिभ्योऽधिको योगी केवलयोगिभ्योऽधिको भगवदुपासक इत्यभिप्रायः यद्वा भगवद्भक्तानां गतिः कर्मभिर्नावाप्यत इत्याह योगीश्वराणामिति भगवद्भक्तियोगनिष्ठानामित्यर्थः त्रिलोक्यां त्रिलोकांतर्भूतचतुर्दशभुवनात्मकांडकोशाद्बहिः समाधिः परमात्मोपासनमिति भेदः एवं हेयत्वेन धूमादिमार्गगतिरुक्ता ॥ २३ ॥

अथ मुमुक्षोरर्चिरादिमार्गमाह वैश्वानरमिति छांदोग्ये "यथा पुष्करपलाश आपो न श्लिष्यंते एवमेवंविदि पापं कर्म न श्लिष्यते" इत्युपक्रम्य ब्रह्मविद्यामुपदिश्याम्नाता "अथ यदु चास्मिञ्छव्यं कुर्वंति यदु च नार्चिषमेवाभिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथः एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तंते" इत्याम्नातश्रुतिः सर्वेपुनर्मैद्याविषश्च तेगामित्यंतेनाभिमता अत्रानुक्ता हरादिप्रदेशास्तदर्थसिद्धो वेदितव्यः शीर्षकपालभेदनानंतरमेव वैश्वानरप्राप्त्यसंभवात् श्रुतावपि वरुणेन्द्रप्रजापत्यादयोऽन्यत्र श्रुता अर्थसिद्धा इति वेदितव्यम् ब्रह्मपथेनेति सुषुम्णाविशेषणं ब्रह्मप्रेप्सोर्मार्गभूतया शोचिषा प्रकाशमानया सुषुम्णया सुषुम्णाख्यया नाड्या देहान्निर्गतः शोचिषेत्यनेन "तेन प्रद्योतेनैष आत्मा निष्क्रामति" इति श्रुत्युक्तसुषुम्णासंबंधिहृदयकमलाग्रस्यप्रकाशनं स्मारितं "तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ ४।२।० ॥" इति सूत्रकारः तदोकः तस्य ब्रह्मप्रेप्सोर्जीवस्य स्थानभूतं यद्धृदयकमलं तस्याग्रं सुषुम्णाख्यनाडीद्वारं तस्य ज्वलनं प्रकाशनं भवति अयं जीवः हार्दानुगृहीतः हृदयकमलस्थपरमात्मानुगृहीतः तेन परमात्मना प्रकाशितसुषुम्णाद्वारो विद्यायाः, ब्रह्मविद्यायाः सामर्थ्याद्ब्रह्मविद्यांगभूतार्चिरादिगतिस्मृतियोगाच्च शताधिकया सुषुम्णया गच्छतीति सूत्रार्थः एवंभूतसुषुम्णया गतः विहायसा शीर्षकपालबहिष्ठाकाशेन वैश्वानरमर्चिः शब्दवाच्यमातिवाहिकं देवतं याति "अग्निर्ज्योतिरहः

श्रीमद्वी[illegible]कृत [illegible]टीका ।

[illegible]सम्भवतीत्यतो[illegible] सूचयति विधूतकल्क इति "पुण्यपापे विधूय निरंजनः [illegible] इति हि श्रूयते नहि धूमादिमार्गेण[illegible] पुण्यपापप्रहाण[illegible] विधूतकल्कः [illegible] इदमादित्यस्योपरिष्टात्स्थितं शिशुमारचक्रं प्रयाति हे नृप ! शिशुमारचक्र[illegible]वक्ष्यते ॥ २४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

तस्माद् भ्रुवोरन्तरं भ्रूमध्यस्थितं द्विदलं कमलमुन्नयेत तत्राद्भुतिकं [illegible]तयामाध्यमित्याह निरुध्येति निरुद्धाः सप्तानामश्वानां [illegible] नासिकादिसंज्ञानां पंथानो येन स तथोक्तः । अनपेक्षो [illegible] । अत्रापीत्थं भावमाह स्थित्वेति मनसा परं गतो भ्रूमध्ये तु मुहूर्तार्धं स्थित्वा मार्गेणान्यविशेषेष्वकुंठदृष्टिर्मूर्धन्यमूर्धभिः शिरोमध्ये यामिभिद्य विसृजेत् शरीरामिति शेषः गतइत्यनेनार्चिरादिमुच्यते अथैकयोर्ध्वमुदानः प्राणा-[illegible]पिंगलायां [illegible] व्यानः संधिषु सर्वत्र उदानो ब्रह्मनाडि[illegible] इति श्रुतिस्मृतिभ्यामुदानगतिर्ब्रह्मनाड्यामिति सिद्धम् इत्थं मुनिरित्थ-[illegible]निर्गुणविद्याफलमुक्त्वा [illegible] सगुणविद्याविदो देहोत्क्रमणप्रकार उच्यत इत्येतदनुपपन्नमेकवाक्यतया मुख्यार्थसंभवति वाक्य-भेदायोगादिति ॥ २१ ॥

एवं देहादुत्क्रान्तानां योगिनां प्राप्यस्थानं गम्यं चाह यदीत्यादिना श्लोकद्वयेन अत्र यदि अथ उत इति शब्दाः पुनरावृत्त्यान्वेतव्याः तथाहि यदि सम्यक्पक्वभक्त्यादिसाधनवांस्तर्हि अथोत्क्रमणानंतरमेव पारमेष्ठ्यं परमेष्ठिनो ब्रह्मणो लोकं प्रयास्यति तत्रायं किं करोतीति तत्राह अथेति अथ तल्लोकप्राप्त्यनंतरं पुनरुत्पत्तिहीनो ब्रह्मसालोक्यमात्रं प्राप्य अथ भक्त्यादिलक्षणपरिपाकाय योगी वसति अनन्तरं ब्रह्मप्रलये ब्रह्मणा सह-[illegible]मुक्तिं प्राप्नोतीति शेषः । उतशब्दोऽप्यर्थे यद्यपि तत उत पूर्वोक्तयोगिनोऽप्यपरिपक्वभक्त्यादिकलया [illegible]वांस्तर्हि वैहायसानां वैमानिकानां-[illegible]विहारक्रीडास्थानं महर्लोकादिं प्रयास्यति तत्रास्य योगफलमाह अणाधिपत्यमिति अथ महर्लोकादिस्थाने ऽणानामणिमादियोगाना-माधिपत्यमवाप्य वसति अथ यदि सम्यक्पक्वभक्त्या विमानप्रतीकालंबनस्तर्हि यत्र पवनस्यांतरात्मा वैकुंठनाथस्तत्र वैकुंठनाथलोके ऽमुक्तस्था--नेऽमुक्तैर्देवैरुपास्यमानं हरिं प्रयास्यति यदि प्रतीकालंबनस्तर्हि यत्र पवनश्चासावंतरात्मा चेति वायुर्ब्रह्मा च तत्र सत्यलोके वायुं ब्रह्माणं च प्रयास्यति ॥ २२ ॥

किमुक्तं भवतीति तत्राह ॥ योगेश्वराणामिति । त्रिलोक्या भूर्भुवःस्वर्गसंज्ञाया बहिर्महर्लोकादौ योगेश्वराणां गतिमामनंति नन्वर्वाक् । तत्तल्लोकप्राप्तौ साधनविशेषमाह विद्येति विद्याऽपरोक्षज्ञानं तद्वानि[illegible]पुरुषार्थसाधनसामग्रीमतां पुंसां तां महर्लोकादिगतिं केवलकर्मभिर्नाप्नुवंति किं [illegible] अत्रायं [illegible]विशेषः गुणानां [illegible]सन्निवायः सन्निधासो यत्र सगुणसन्निवायस्तस्मिन्महर्लोकादिवैकुंठामुक्तस्थाना [illegible] बाह्येन्द्रियमनोभिः सहैव गच्छेत् "आविष्कृतनिजरूपस्यापितस्यारब्धकर्मभोगपर्यंतं दग्धपटवत्तेषां स्थित्युक्तेः [illegible]गुणसन्निवाये मुक्तस्थाने चिन्मात्रेन्द्रियमनोभिः सहैव वसति तदुक्तं "चिन्मात्राणींद्रियाणि यथा मुक्तानामन्यदेव तु विदि-[illegible]लोकान्[illegible] तन्मुख्याहारियांति तदन्ये वायुमेव तु अपकायेन तेयांति वायुं वाहारमेव वा स्थानमात्राश्रितास्ते तु पुनर्[illegible]विवर्जिता" इति समाख्यावचनबलादध्याहारेण व्याख्यातं । न तु समनीपोत्प्रेक्षाबलादिति यदि पारमेष्ठ्यादिलोकं प्रयास्यति तर्हि मनसें-द्रियैः सहैव गच्छेदिति वान्वयः यत्र योगेश्वराणां गतिं त्रिलोक्या बहिरामनंति यत्र पवनांतरात्मा तत्र विद्याविभाजः तां गतिं कर्मभिर्नाप्नुवं-तीति वा ॥ २३ ॥

तत्र योगिनो मार्गमाह । वैश्वानरमिति सुषुम्णायानाड्योत्क्रम्य विहायसा हृदयाकाशेन ब्रह्मपथेन सुषुम्णाख्यया शोचिषा । शोचिः शोचि-[illegible]मभिधानं । गतो निर्गतोऽर्चिरादिदेवाननुगत्वाथ वैश्वानरं याति अथ वैश्वानरप्राप्त्या विधूतकल्को दग्धपापपुण्यस्ततो वैश्वानरलोका-दुदस्तादुपरिष्टात् शिशुमारचक्रं शिशुमाररूपं प्रयातीत्यन्वयः । "वैश्वानरेषु नद्यां वा सूर्ये वा देहपथवा विधूयसर्वपापानि यांति किं तु [illegible]-[illegible] वेति सूचितम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तत्र इति सार्द्धकम् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवं तालुमूले स्थिरीकृतं मुखादिच्छिद्रद्वारा निर्गमनशंकया निरुद्धसप्तास्यपथः निरुद्धा निसप्त[illegible] प्राणस्य अयना निर्गमनानि येन तादृशो [illegible]पूर्वस्थानात् भ्रुवोरन्तरं मूर्धानं येत तत्र आज्ञाचक्रे तं वायुं स्थिरीकृत्य अतः करणशुद्धेः पूर्वं निरूपितत्वात् सर्वापेक्षारहितो भूत्वा तत्र [illegible]निर्भावजातेन वाऽकुंठदृष्टिर्मुहूर्तार्धं स्थित्वा परे भगवति गतः सायुज्यं प्राप्तः पूर्वमेव बाह्योर्बहिर्निर्गमनार्थं प्रयत्नस्य [illegible]निर्भिद्य विसृजेत् इन्द्रियाणि विसृजेत् प्राणानामपि भिः सारणं केचिदिच्छन्ति अप्येतेषामप्युपयोगात् केचित्त्वहं [illegible]प्राणानामेवात्मनिष्ठमूलभूता[illegible] स्थितिमिच्छंति प्राणस्य भोगसाधकत्वं च तमुत्क्रामंतं प्राणो [illegible] उत्क्रान्तिरपि [illegible] प्राणशब्देनेन्द्रियाण्युच्यंते गमनेनायुर्वोभावात् [illegible] तस्मादिन्द्रियाणि[illegible] प्राणैर्बहिर्निःसारित इत्यर्थः ॥ २१ ॥

[illegible]

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

रिमध्येवागप्रयाप्स्यन् भवति तत्रैव सहृदयःक्षेत्... ताराद्यासनाभिःप्रासैर्वा नवैर्वसामर्थ्यैकदेशीयवैश्यार्थश्चाह योगेश्वराणामिति । येषां स्वाधीनोयोगः यद्यपिव्रतोगमनसामर्थ्यंभवति तथापियांनेतद्भवतीतिसर्वीणतवक्ष्यते त्रिलोक्याःअंतर्बहिश्चेति बहिःस्थितानांच अंतरायांति अंतस्थितास्तुअपिवहिर्गच्छंति तत्रहेतुः पवनांतरात्मनामिति पवनस्यांतः आत्मालिङ्गशरीरंयेषाम् अयंभिलोकीपदत्रयाकाभिप्रायं किंतुलोकत्रयमेव यद्यपिकर्मभिरपिसर्वत्रगमनमस्ति तथापितेषांस्वेच्छागमनमित्याह तामिति वाक्यद्वयोगिनांसाधकर्मिणामित्यर्थः ननुउपायस्यतुल्यत्वेऽपियोगस्यकथंगौणताकथंकर्मणांमुख्यत्वमितितत्राह विद्यातपोयोगसमाधिभाजामिति कर्मतुस्वतंत्रमसहायं जीवंस्वाधीनंकरोति योगेतुविद्यादयोऽन्येपिचत्वारःसंति तत्संबंधात्जीवोयोगःस्वाधीनंकर्तुंनशक्नोति एवमन्येऽपि ततश्चजीवएवस्वतंत्रः अन्येतुगुणभूताःस्वेच्छयागमनंमहायभूताभवंति विद्याउपासना मंत्रप्रकारेण तपःकृच्छ्रादि ज्ञानंवा योगोऽष्टांगः समाधिः समाधिस्थित भगवद्दर्शनेनतज्जनितभक्तिसहितःपरमधर्मउच्यते एतेषुकस्यचिदभावेऽपि[illegible]कर्ममार्गेतुविद्यमानेतवेति ॥ २३ ॥

एवंपुरुषस्यस्वाधीनतांनिरूप्यगमनप्रकारमाह वैश्वानरंयातीत्यादिना यावदवसाने आनंदमयः तावद्यातीतिसंबंधः वैश्वानरमग्न्यधिष्ठातृदेवतालोकम् अग्निर्ज्योतिरहःशुक्लइतिवाक्यप्रकारेणागमनम् ननुतस्यलोकस्यदूरंविद्यमानत्वात्बहुकालव्यवधानेनअंतराभोगाभावात्भोगाभिनिवेशस्यविद्यमानत्वात्पुनरागमनंस्यात् तदर्थमाह विहायसागतइति आकाशमार्गेणागतःपूर्वमेवपवनांतरात्मनामित्युक्तत्वात्यथावायोर्गमनं तथातेषामपीत्यर्थः ननुवायोरंतस्ततोगमनसंभवात्तद्वत्स्यापिनऋजुमार्गेणवैश्वानरगमनंसंभवति तत्राह सुषुम्णयेति सुषुम्णामार्गेणागच्छतीतिनान्यत्रगमनं ननुसुषुम्णायाःपकथंनान्यत्रगच्छति तत्राह ब्रह्मपथेति ब्रह्मणःपंथाःब्रह्ममार्गत्वात्स्वापिवैकुंठएवगच्छति ननुसुषुम्णायानाडीरूपत्वात् कथंदेहाद्बहिर्निर्गमनं तत्राह शोचिषेति तेजोरूपया एवंतेनमार्गेणवैश्वानरलोकंगतस्यपूर्वमांद्यःसंपरिष्वक्तस्यगमनात्कामनाधातुल्येनचाम्नकल्कत्वात् तत्रभोगेअग्निमध्यभोगात्कल्कशोषः अतस्तदनंतरंज्योतिश्चक्रगमनंआदित्यादिध्रुवपर्यंतगमनंविधूतकल्कोभूत्वा अर्वाक्क्रमेणतेजोमयशरीरेणहरेर्भगवतःस्वरूपभूतं शिशुमाररूपंचक्रमुपयाति यद्यपिशिशुमारचक्रस्यभूमेःपरितोविद्यमानत्वात्सर्वत्रगमनमायातितथाप्युपरिष्टादूर्ध्वमेवगच्छति नृपेतिसंबोधनंशुद्धसत्वात्मकस्यऊर्ध्वगमनस्यसंवादबोधकं यथानरपालकस्यनृभिरूर्ध्वनयनमिति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

मनस्वी जितचित्तः । स्वतालुमूलं तस्यैव चक्रस्याग्रदेशम् । ततो बहुधा गमनसम्भवात् शनकैरित्युक्तम् । तस्मात् भ्रुवोरन्तरम् आज्ञाचक्रम् । निरुद्धानि सप्त अभ्ययनानि श्रोत्रे नेत्रे नासिके मुखञ्चेत्येवं सप्त प्राणमार्गा येन सः । अनपेक्षः क्रममुक्तवत् पारमेष्ठ्यादिपदभोगकौतुकानपेक्षः मूर्द्धन् मूर्द्धनि ब्रह्मरन्ध्रे निर्भिद्य देहमिन्द्रियाणि च विसृजेत् ॥ २१ ॥

इति सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीति । पारमेष्ठ्यं ब्रह्मपदं यदि प्रयास्यन् भवेत् । तथा वैहायसानां खेचराणां यत् विहारं विहरत्यस्मिन्निति विहारं क्रीड़ास्थानम् । कीदृशम् अष्टावाधिपत्यानि अणिमाद्यैश्वर्य्याणि यस्मिन् तत्र प्रयास्यन् । क गुणसमुदायरूपे ब्रह्माण्डे सर्व्वत्रेत्यर्थः । तर्हि देहत्यागावसरे मनश्चेन्द्रियाणि च न त्यजेत् किन्तु तैः सहैव तत्तल्लोकभोगार्थं गच्छेत् ॥ २२ ॥

भोगेऽपि योगिनो न कर्म्मिभिः साधारण्यमित्याह । योगेश्वराणां त्रिलोक्या अन्तः बहिश्च महर्लोकादिषु ब्रह्माण्डबहिश्च गतिमाहुः । तत्र हेतुः पवनस्यान्तः आत्मा लिङ्गशरीरं येषां तेषाम् । विद्या भगवदुपासना, तपो भगवद्धर्म्मः, योगोऽष्टाङ्गः, समाधिर्ध्यानं, तान् ये भजन्ति तेषां या गतिस्ताम् ॥ २३ ॥

तत्र प्रथमं वैश्वानरम् अग्न्यभिमानिनीं देवतां याति । विहायसा आकाशेनैव सुषुम्णया नाड्या । कीदृश्या ब्रह्मपथेन ब्रह्मलोकमार्गरूपेणेत्यर्थः । सा च देहाद्बहिरपि वितताऽस्तीत्याह शोचिषा ज्योतिर्म्मय्या । विधूतकल्कः त्यक्तमालिन्यः काम्यसङ्गमाक इत्यर्थः । अथ हरेः भगवतः सम्बन्धि उदस्तात् इत ऊर्ध्वं स्थितं चक्रं शैशुमारं शिशुमाराकारम् । चक्रस्थानि आदित्यादीनि ध्रुवान्तानि ब्रह्माणि प्रयातीत्यर्थः ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तस्मात् स्थानात् । भ्रुवोरंतरमाज्ञाचक्रं प्रत्यनिलमुन्नयेत । कथंभूतः निरुद्धानिसप्तायतनानिछिद्राणियेनससतथा तानिच श्रोत्रे नेत्रे नासिके मुखमित्येवं सप्त । विपर्यांतरानपेक्षः आज्ञाचक्रेनियमितानिलोमुहूर्त्तार्द्धंस्थित्वा । अकुंठदृष्टिः प्रस्तुतगमनेसमाहितदृष्टिः । परंगतः । उक्तप्रकारेण यद्यावस्थायांभगवंतं प्राप्नोति । मुक्तबंधनत्वेनभगवत्प्रेप्सुः । मूर्द्धन्मूर्द्धनिभिर्भिद्यस्थूलं देहंविसृजेत ॥ २१ ॥

एवं मूर्द्धनिनिर्भिद्योत्क्रान्तस्य मुमुक्षोरर्च्चिरादि मार्गेण ब्रह्मप्राप्तिमाह । यदीति दशभिः तत्रेयंप्रक्रिया । विद्वान्स्थूलशरीरात्सूक्ष्मरूपेण[illegible]स्यानिष्क्रम्यसलिंगशरीरएवसूर्यरश्मीनाश्रयब्रह्मपदं गन्तुमिच्छति तदार्चिषोभिमानिनातिवाहिकेनसुसत्कृत्यचिरा[illegible]स्ततस्तथैवतेन पक्षाभिमानिनातेन संवत्सराभिमानिनातेन वायुंतेन रश्मिनं छिद्रंदत्त्वादित्यंततश्चतेन चन्द्रमसन्तेन विद्युदभिमानिनंदेवताविशेषंनीयतेतदनंतरंवरुणमिंद्रंप्रजापतिंच प्राप्यब्रह्माणमभित्वाविरजांप्राप्नोति तदाकारणेलिंगशरीरंहित्वातान्तीर्त्वाब्रह्मलोकं प्राप्यब्रह्मसाधर्म्यलक्षणंमोक्षंप्राप्नोति । विस्तरत्वाकल्पेनृहत्वः तत्कानिचित्स्वानाम्याय [illegible]तवाक्यानि । यदि[illegible]स्थूलशरीरवियोगकालेहेनृप ! गुणसंनिवायेगुणसमुदायरूपेब्रह्माण्डे पारमेष्ठ्यं प्रजापतिलोकं वैहायसानामुत[illegible]विहारं । [illegible]क्रीडास्थानञ्च अष्टावाधिपत्यानि अणिमाद्यैश्वर्याणियस्मिन् तत् प्रयास्यन् भवति तदामनसाइन्द्रियैश्च सहैवगच्छेत् । स्थूलशरीर[illegible]सूक्ष्मशरीरत्यागोनास्तितेनैव सहविरजापर्यंतं [illegible] ॥ २२ ॥

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ।
नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते ॥ २५ ॥
अथो अनन्तस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वम्
निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैपरार्द्ध्यं तदु पारमेष्ठ्यम् ॥ २६ ॥
न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् ।
यच्चित्ततोदः कृपयानिदंविदां दुरन्तदुःखप्रभवानुदर्शनात् ॥ २७ ॥
ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोऽनलमूर्तिरत्वरन् ।
ज्योतिर्म्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम् ॥ २८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

नकेवलं त्रिलोक्यंतर्गतपारमेष्ठ्याद्यावेवयोगसिद्धानां गतिरपितुब्रह्माण्डाद्बहिरस्तीत्याह । योगइति । पवनान्तरः प्राणगर्भः आत्मा-लिङ्गशरीरं येषान्तेषांयोगेश्वराणां योगसिद्धानाम । उर्ध्वाधोमध्यभेदत्रयम पातालादिसत्यांताः लोकास्तेषां समाहारस्त्रिलोकीतस्याः अंतर्मध्येपातालादि सत्यांतेषुलोकेषु बहिर्निरावरणलोके च गतिमाहुः । "तस्य सर्वेषु लोकेषु कामचारोभवति" इत्यादयः श्रुतयः तत्रहेतुगर्भ-विशेषणम विद्यातपोयोगसमाधिभाजामिति विद्याब्रह्मजिज्ञासाजन्यं ज्ञानम । तपःसाधनावृत्तिः योगःसमाधिः विद्यातपसोः परि-पाकावस्थाज्ञान् येभजन्ति तेषाम । "एतेनमार्गेण ब्रह्मप्रतिपद्यमानाः इमंमानवमावर्तं नावर्तंते" इत्यादि श्रुति प्रोक्तस्योपादेयस्यापुनरावृत्ति मार्गस्य प्रस्तुतस्य दार्ढ्यार्थमनुपादेयं पुनरावृत्तिमार्गं सूचयति नकर्मभिस्तांगति माप्नुवन्तीति । "यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते" । इत्यादि श्रुति प्रसिद्धमार्गसाधनैः कर्मभिः । विद्यातपोयोगसमाधि भाजान्ताङ्गतिं नकर्मठाः प्राप्नुवन्तीत्यन्वयः ॥ २३ ॥

एवमर्चिरादि मार्गप्राप्तस्यधूममार्गस्यानुपादेयत्वेनोक्त्वार्चिरादिमार्गं दर्शयति । वैश्वानरमिति । विहायसाआकाशेनमूर्द्धनिसुषुम्णा छिद्रेण ब्रह्मप्राप्तिमार्गेण तत्रचरोचिषाऽज्योतिर्मय्यादेहादपि बहिश्चिततयासुषुम्णायानाड्यागतोनिर्गतः । विधूतकल्कोनिष्पापः कल्कः पापंसु च पुण्यस्याप्युपलक्षणं । तथासतिपुण्यापुण्यवर्जितः "अश्वइवरोमाणि विधूयपापं चन्द्रइवराहोर्मुखात्प्रमुच्यधूत्वाशरीरमकृतं कृतात्माब्रह्मलोकमभिसंभवामि" इति । ताण्डिरहस्येश्रवणात् । "तदाविद्वान्पुण्यपापेविधूयनिरंजनः परमंसाम्यमुपैति" इत्यथर्वणे श्रवणाच्च । प्रथमंवैश्वानरंयाति अग्न्यभिमानिनींदेवतांप्राप्नोति तदनन्तरंदिनाद्यभिमान्यातिवाहिकद्वाराउदस्तादुपरिष्टाद्वर्तमानंहरेः विष्णोः शैशुमारं चक्रंशिशुमाराख्यं ज्योतिश्चक्रं हेनृप ! प्रयाति अनेनादित्याद्यातिवाहिकप्राप्तिरुक्ता ॥ २४ ॥

भाषाटीका ।

तदनंतर भ्रूमध्यमे लेजाय बाह्यलोकों की अपेक्षा नकरके सात इंद्रियों के द्वारोंको रोककर निश्चल दृष्टिसे आधा मुहूर्त रहकर मस्तक भेदन कर परमात्मा को प्राप्त होकर इस देहको त्याग देय ॥ २१ ॥

हे राजन् ! यदि ब्रह्माके लोक या सिद्धों के विहारस्थान या अष्ट अधि पतियों के स्थान इन्हों मे जानाहोतो देहत्याग समय मे मन तथा इन्द्रियों के सहित ही गमन करे ॥ २२ ॥

पवन स्वरूप वाले योगियों की गति त्रिलोकी के बाहेर भीतर सर्वत्र होती है विद्या तप योग समाधियों को भजनेवाले तथा कर्म करनेवाले भी उस गतीकों नहीं प्राप्त होसकते हैं ॥ २३ ॥

हे राजन् ! आकाश मार्गसे जानेवाला योगी प्रकाश मान ब्रह्म मार्ग सुषुम्णा नाडीके द्वारा अर्चिरादि मार्गको जाता है तदनंतर निर्मल रूपसे उपरमे श्रीहरि के शिशुमार चक्र को प्राप्त होता है ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तत् विष्णोश्चक्रम । विश्वस्य नाभिं सूर्य्याद्याश्रयभूतम । अणीयसाऽलिङ्गत्वाच्चाभिशब्दस्य न षण्डत्वम । अतिवर्त्य अतिक्रम्य । परतः स्वर्गिणां गत्यभावात् एक एव निर्म्मलेन लिङ्गशरीरेण ब्रह्मविदां स्थानम अन्यैर्नमस्कृतं महर्लोकमुपैति । यत् यस्मिन् । विबुधाः महान्तः कल्पायुषः भृग्वादयः ॥ २५ ॥

अथो अनन्तरं कल्पान्ते सति सः विश्वं त्रैलोक्यम अतिशयेन दह्यमानं निरीक्ष्य तत्राप्युष्णप्राप्तेः यत् द्विपरार्द्धस्थायि तत् पारमेष्ठ्यं पदं प्रति निर्याति । सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिन् तत् । उ इति श्रेष्ठ्यं सूचितम ॥ २६ ॥

तदेवाह न यत्रेति । आर्तिः दुःखम । उद्वेगः भयम । किन्तु चित्ततो हेतोः यत् दुःखम अत ऋते तदेकं विना । तत् कुतो भवति अविदन्निदम् इदं भगवतो ध्यानमजानतां प्राणिनां दुरन्तदुःखो यः प्रभवो जन्म तस्यानुदर्शनात् तेषां कृपया । यच्च चित्ततोदो मनः-पीडेति यत् तद्विना कुतश्चिदपि यत्र शोकादयो न सन्तीति ॥ २७ ॥

श्रीवंशीधरकृत-भावार्थदीपिकाप्रकाशः।

तत्र च ब्रह्मलोकगतानां प्राणिनां त्रिविधा गतिः। ये पुण्योत्कर्षेण गताः ते कल्पान्तरे पुण्यतारतम्येनाधिकारिणो भवन्ति। ये तु हैरण्यगर्भाद्युपासनाबलेन गताः ते ब्रह्मणा सह मुच्यन्ते। ये तु भगवदुपासकाः ते तु [illegible] ब्रह्माण्डं भित्वा वैष्णवं पदमारोहन्ति। तत्र प्रस्तुतस्य तस्य भगवद्भक्तस्य ब्रह्माण्डभेदनप्रकारमाह तत इत्यादिना। तत्रेयं प्रक्रिया—ईश्वराधिष्ठितायाः प्रकृतेः केनचिदंशेन महत्तत्त्वं भवति, तस्यांशेनाहङ्कारः, तस्यांशेन शब्दतन्मात्रद्वारा नभः तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः, तस्यांशेन रूपतन्मात्रद्वारा तेजः, तस्यांशेन रसतन्मात्रद्वारा आपः, तदंशेन गन्धतन्मात्रद्वारा पृथ्वी; तैश्च मिलितैश्चतुर्दशभुवनात्मकं विराट्शरीरम्। तस्य च पञ्चाशत्कोटियोजनविशालस्य पृथिव्येवाण्डकटाहविशेषशब्दवाच्या कोटियोजनविशालं प्रथमावरणं; पञ्चाशत्कोटियोजनविशालमित्येके। ततोऽबादीनां यऽपरिणता अंशाः तान्येवोत्तरोत्तरं दशगुणान्यावरणानि। अष्टमं तु प्रकृत्यावरणं व्यापकमेव। तदेवं स्थिते पृथिव्याद्यावरणभेदप्रकारः कथ्यते। ततो विशेषं प्रतिपद्य लिङ्गदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम्। निर्भयः कथं यास्यामीति शङ्काशून्यः। तेनात्मना पृथिवीरूपेण तन्निरन्तरा अपः प्रतिपद्य। अत्वरन् त्वरामकुर्वन्; तत्तदात्मत्वेऽपि क्लेशदाहादिशङ्काभावात् यथेष्टं भोगान् भुञ्जान इत्यर्थः। एवं ज्योतिर्म्मयः सन्। काले भोगावसाने। बृहदात्मनो लिङ्गं परमात्ममूर्त्तित्वेनोपासनेयुक्तं; यद्वा शब्दात्मना तस्य प्रमापकमिति ॥ २८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी।

आविष्टलिङ्गत्वात् अजहल्लिङ्गत्वादित्यर्थः २५—२७ ॥

अधिकारिणा इति। अत्र आधिकारिका इति च पाठः। आधिकारिका अधिकारे नियुक्ताः इति गोविन्दभाष्यम् ॥ तन्निरन्तरा इति। अन्तरमवकाशः। पृथिव्यन्तररहिताः इति यावत् ॥ २८—३१ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका।

विश्वनाभिं विश्वस्य ग्रहतारकानक्षत्रादेः कृत्स्नस्याश्रयभूतं विष्णोः स्थानमिति शेषः। विरजेन प्रक्षीणपुण्यपापेन अणीयसा सूक्ष्मतरेणात्म आलिंगशरीरेणैकः असहाय नमस्कृतं ब्रह्मविदां ब्रह्मविद्भिर्नमस्कृतम् इदं शिशुमारचक्रविशेषणं तदतिवर्त्येत्यन्वयः। अनेन चन्द्रप्राप्तिरपि सिद्धा तस्याव्यवहितः शिशुमारः यद्यत्र कल्पायुषः विबुधा आकल्पान्तायुषः देवाः रमंते तं जनलोकमुपैति प्रयाति ॥ २५ ॥

अथ अधस्तात्स्थितस्यानंतस्य मुखानलेनावांतरप्रलये शेषमुखोद्भूतरुद्रगणपातालानलेन दंदह्यमानमिति। मस्तकस्थायी इह मृत्युरिस्थुकरीत्या सत्त्वाभिप्रायो वर्त्तमाननिर्देशः निरीक्ष्य त्रिकालज्ञानबलादपरोक्षं दृष्ट्वेत्यर्थः। जनलोके स्थितस्याकल्पांतरे तत उपैतीत्ययमर्थोऽनुपपन्नः। पुण्यपापविधूननस्योक्तत्वेन तत्रावस्थितिहेतुभूतकर्माभावात्तेषु लोकेषु स्थित्ययोगात्। अतो द्विपरार्द्धं द्विपरार्द्धस्थायि सिद्धेश्वरैर्जुष्टानि विमानानि यस्मिंस्तद्ब्रह्मपारमेष्ठ्यं चतुर्मुखसंबंधि स्थानं याति निर्यातीत्यर्थः। वरुणेन्द्रादिप्राप्तिस्त्वर्थसिद्धा ॥ २६ ॥

चतुर्मुखलोकस्य स्वर्गाद्यपेक्षया चिरकाल स्थायित्वमभिप्रयन्नाह नयत्रेति। यत्रेत्यस्य तत्र दुरंतदुःखप्रभवानुदर्शनादित्युपरितनेनान्वयः आर्तिर्दुःखम् उद्वेगो मनः क्षोभः भयमागामिदुःखदर्शनजं ज्ञानं कुतश्चिदिति यस्य भयमित्यनेनान्वयः। कुतश्चिच्छीतातपवातवर्षादिभ्यः। एवंविधेऽपि चतुर्मुखलोके ब्रह्मविदां निर्वेदमाह यच्चिततद् इति यद्यस्मादित्यर्थः। अनिदंविदाम् इदंशब्दवाच्यपरिदृश्यमानप्रपंचविलक्षणपरं ब्रह्मविदाम् क्रियया कर्मणा हेतुभूतेन दुरंतदुःखप्रभवानुदर्शनात्। दुरंतमपारं यद् दुःखं तस्य प्रभवः प्रभवत्यस्मादिति प्रभवः दुःखहेतुभूतसंसारस्तस्यानुदर्शनम् उत्प्रेक्षणं तस्माच्चित्तार्थ्यं तनादद: दुरंतदुःखमिति यच्चतुर्मुखलोकेऽपि ब्रह्मविद्भिः कर्महेतुकं दुरंतदुःखं चिंतेनानुमीयत इति यत्तत एवहेतोर्विशेषं प्रतिपद्येत्युत्तरत्रान्वयः। अर्थांतरपरत्वमनुपपन्नमध्याहारबाहुल्यात्। यस्य हिरण्यगर्भस्याचिरात्तदुपासनात् अव्यक्तस्य स्थानमुपासककैर्लभ्यत इति यदायोजनात् तदुपासकैर्लभ्यते इत्यध्याहारः। अनिदंविदां हिरण्यगर्भोपासनरहितानां दुरंतदुःखप्रभवानुदर्शनात् तदुपासकानामेव दुःखनिवृत्तिस्थान ब्रह्मलोकाख्यं लभ्यते इति नोपपद्यते। हिरण्यगर्भस्थानस्यापि दुःखनिवृत्तिहेतुत्वाभावाच्चतुर्मुखलोकगतस्यापि तावत् स्वराज्ञः पुनर्भुवमागम्य प्रतिदिनं स्वीयशय्यभक्षणं प्रसिद्धम्। आवृत्तेर्दर्शनाच्च ब्रह्मलोकस्थयोगिनां न पुनरावृत्तिदुःखभयं। तन्मोक्षमात्रत्वनिश्चयादिति चेन्न भूतलस्थयोगिनामपि मोक्ष्यमाणत्वनिश्चयात् अपुनरावृत्तिमर्यामीतमुमुक्षूणां महीतलचतुर्मुखलोकयोः को विशेषः "आब्रह्म भुवनाल्लोकाः पुनरावर्तिनोऽर्जुन" इति हि स्मर्यते। तच्च द्विपरार्ध्यमित्यनेन सूचितम्। अतो यथोक्त एवार्थः ॥ २७ ॥

विशेषं पृथिवीमयमंडकटाहं प्रतिपद्य व्याप्येत्यर्थः अनेन "पृथिवीमंडं भिनत्ति" इति श्रुतिर्व्याख्याता। विशेषशब्दः पृथिवीवाचकः "महदाद्या विशेषांता" इति प्रयोगात्। अत्रापि विशेषस्तु विकुर्वाणाद् भ[illegible]गंधवान् भूरिति [illegible] विशेषं प्रतिपद्य निर्यातीत्यनुषंगः [illegible]। [illegible]त्रोपैतीत्यनेनान्वयः। तेनात्मना स्वरूपेणोपलक्षितः आपः आवरणजलं प्रतिपद्येत्यन्वयः। आवरणान्यभिव्यापि [illegible] [illegible]तावरणाग्निं प्रतिपद्यात्वरन् त्वरामकुर्वन् क्लेशदाहादिशंकाभावादित्यभिप्रायः ज्योतिर्मयः वायुर्भूत्वा [illegible] शब्दः वायुम् आवरणवायुमुपेत्य काले पूर्वपूर्वकावरणास्थापनांतरकाले [illegible] आत्मना वायुसंश्लिष्टरूपेणोपलक्षितो [illegible] बृहत्। आत्मलिंगं ज्ञाताधारणशब्दलिंगकं [illegible] आवरणाकाशमुपेत्य आत्मलिंगमित्यत्र आत्मा ज्ञाताधारणशब्दः लिंगमात्मा [illegible] [illegible] [illegible]त्यर्थः लिंगं [illegible] [illegible]। [illegible] [illegible] ॥ २८ ॥

वैश्वानरंनाम कथमितितत्राह यदिति योभूतानामंतःकोष्ठगाग्नीस्थित्वात्भुक्तंचतुर्विधमन्नंपचति यश्चब्रह्मांडमध्यगःसपुरप्रत्यगस्तर्पति सर्वानतःसप्रधानत्वाद्वैश्वानरस्तस्यो अज्ञादेवपितृलोकगंतुर्मुनेर्योगिनःकर्मयोगिनश्चगम्यत्वान्मार्गइतीरितइत्यन्वयः। "पितृयानंदेवयानं ब्रह्मयानमितित्रिधा। गच्छन्वैश्वानरंयातितस्मान्मार्गःसईरितः"। देवयानेनगंतृणांवैश्वानरादर्वागर्चिरादयोगम्याःसंति। अतोदेवपितृलोकगंतृभिःसर्वैरपिवैश्वानरःप्राप्यतइतिद्योतनायवैश्वानरंयातीतिप्रथमतएववैश्वानरप्राप्तिकथनमितिज्ञातव्यम् ॥ २५ ॥

केतानीत्यतितत्राह देवयानमिति शरीरदक्षिणपार्श्वस्थपिंगलाख्यनाडीभिः शतायुषामरणात्कर्योरक्रमणादह्नान्यह्ःसंज्ञंदेवयानमेति इडाभिधेदक्षामपार्श्वस्थेडाख्यनाडीभिःशतायुषामरणेनरात्रीः रात्रिसंज्ञंपितृणांयानंपितृयानमेति। देवयानपितृयानमार्गस्थानामहरादिकालाभिमानिनीनांदेवतानांप्राचुर्यंदह्यानिरात्रीरितिबहुवचनं"दक्षिणा:पिंगला:सर्वाइडाखामा:प्रकीर्तिता:।नाड्योऽथमध्यमाप्रोक्तासुषुम्णा वेदपारगैः"इति"देवयानस्यमार्गस्थाअहःशब्दाभिसंज्ञिताःपितृयानस्यमार्गस्थारात्रिशब्दाह्वयामता"इतिवा पिंगलेडामध्यस्थयासुषुम्णाख्यया शतायुषाविशिष्टसुखवत्त्वात्तद्विषुवसाख्यंब्रह्मयानमेति। विशिष्टंसुखंविषु तदस्यास्तीतिविषुवत्। तस्यभावोविषुवत्तातां। सवयोरभेदात्वीत्युपसर्गयोगाद्वासकारस्यषकारः "विषुवत्ताब्रह्मयानंविशेषेणासुखंयत"इतिरागोपरक्तसुखादिदातृत्वात्पिङ्गलादेर्देवयानादिशब्दवाच्यत्वं तदुक्तं "पिङ्गलादेवयानंस्यात्पिंगाख्यसुखदायतःइडाप्रदानात्पितृणामेवंमार्गोःप्रकीर्तिता"इति अत्रदेवयानब्रह्मयानभेदोऽवांतरोऽवगन्तव्यः ॥ २६ ॥

अधुनाशिशुमारलोकादुपरितनमार्गप्रकारमाह। तदिति। शैशुमारइत्यनेनतद्रूपमुक्तंविष्णोस्तद्विश्वनाभिंविश्वाधाररूपंप्रतिपद्य शुद्धात्सुचितामृतदनुज्ञामादाय। विराजेनविगतरागादिदोषेणाऽणीयसासूक्ष्मतरेणात्मस्वरूपेणासर्वोऽपिब्रह्मज्ञानिजनस्तल्लोकमुपैति तंविशिनष्टि कल्पायुषइति कल्पायुषोविबुधायत्रस्मरंतेक्रीडंतितामितिशेषः। किंविशिष्टंरूपं। ब्रह्मविदांसमुदायेननमस्कृतमेकंमुख्यंकेवलंमितिवा "मन्वंतरायुषःस्वर्गेमहर्लोकेतुकाल्पिका"इति पिंगलाभिरुत्क्रम्यदेवयानेनगतः परांतेब्रह्मप्रयास्यंस्तत्रमहर्लोकेऽष्टाधिपत्यमित्युक्तोऽणिमाद्यैश्वर्यशालीवसति कश्चनजनलोकेकश्चनतपोलोकेज्ञानादिपरिपाकायास्ते कश्चित्सत्यलोकेद्वयोर्ब्रह्मयावसति ब्रह्मयानेनगताः अप्रतीकालंबनाःप्रतीकालंबनाश्चशैशुमारहरिणानुज्ञातास्तत्रैवानिरुद्धप्रद्युम्नसंकर्षणादिदेवान्प्राप्यविबस्पतिंवायुंप्राप्यतेनकार्यंब्रह्मप्रापिताः तदुपदेशंप्राप्यप्रतीकोपासकानिवसंति अन्येतुतेनवायुनापरंब्रह्मप्रापितास्तल्लोकेनिवसंतीत्यादिविशेषस्तुशब्देनसूचितइतिज्ञातव्यम् ॥ २७ ॥

महर्लोकादिषुविहरतांतथाज्ञानादिसाधनपरिपाकायचनिवसतांचतुर्मुखप्राप्तिप्रकारमाह अथोइति महर्लोकादिषुवसन्सज्ञानिसंघोऽपद्विपरार्धावसानेब्रह्मप्रलयेब्रह्मणासहमुक्तियास्यन्सिद्धैःसनकादिभिर्जुष्टस्यचतुर्मुखस्यधिष्ण्यंनिवासस्थानं यत्द्वेपरार्ध्येद्वयोः परार्धयोःसंबंधि। चतुर्मुखस्याऽऽयुषःपरेतिनामचतुर्मुखायुर्लक्षणाशतसंवत्सरभोग्यमित्यर्थः। तत्पारमेष्ठ्यंनिर्याति महर्लोकादेर्निर्गत्यसत्यलोकमाप्नोतीत्यर्थः गंतुर्हेतुमाह अनंतस्येति अनंतस्यभगवतोमुखानलेनमुखनिर्गताग्निनापुनःपुनर्दह्यमानंविश्वंनिरीक्ष्य। संकर्षणमुखाग्निनाअपत्रस्यदाहोहेतुरित्यर्थः चशब्दोब्रह्मलोकंप्राप्यतेनैवसहमुक्तिंप्राप्नोतीत्यस्मिन्नर्थेवर्तते ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

अथो लीलागृहीतशरीरेण तद्योगानन्तरम् ॥ २६ ॥ २७ ॥

ततो विशेषमिति। अत्र टीकायामेकब्रह्माण्डपक्ष एव सङ्गमितः। बहुब्रह्माण्डपक्षस्त्वेवम्—ब्रह्माण्डानि खल्वेकत्रैवानुश्रेणीबद्धेन मण्डलीभूय वर्त्तन्ते। तेषां पृथिव्यावरणं प्रत्येकं पृथगेव। जलावरणन्तु तन्मण्डलाद्बहिः पूर्व्वावरणाद्दशगुणमेकमेव। यस्योपरि च सर्व्वब्रह्माण्डकारणं कारणार्णवशाय्येक एव शेते। यत्तु मण्डलाभ्यन्तरेऽपि यत्किञ्चिज्जलं प्रविशति तस्यावरणसंज्ञं न भवति अनिश्चितमानत्वात्। तदेवमेवाहङ्काराद्यावरणानां सर्व्वभूतावारकत्वं सङ्गच्छेत इति। विशेषं प्रतिपद्य प्राचीनस्थूलदेह इव तत्र लिङ्गदेहावेशं कृत्वा। पुनश्च तेन विशेषाविष्टेन लिङ्गदेहाख्येनैव आत्मना अपः जलावरणं प्रतिपद्य प्राचीनस्थूलदेहत इव विशेषत स्तत्क्रमपूर्व्वकं तत्र तदावेशं कृत्वा। पुनश्च पूर्व्ववदमलमूर्त्तिः सन्नित्यादि योज्यम्। तत्र तत्र लोकविशेषेषु भोगाश्च लीलाशरीरमपि मन्तव्यम् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी।

शिशुमारचक्ररूपमग्रेवक्ष्यते। तत्रध्रुवस्थानंशिशुमारस्यान्तेभवति। तदग्रांशस्यनाभिस्थानीयम्। ततोऽग्रेलोकचतुष्टयम्। तत्रतुशब्देनपूर्वरूपात्तद्रूपांतरंकरणानुक्रम्। विष्णोरित्युभयत्रसंबध्यते। तत्रगमनयोग्यंशरीरंवर्णयति। अणीयसाविरजेनात्मनेति। पूर्वापेक्षयातदणीयः। वायुप्रधानत्वात्। प्रशिथिलावयवइत्यर्थः। तत्रापिविरजः वायोरपिलोकत्रयएवरजःसंबंधः। अथवा पूर्वशरीरंतामसंस्थितंतद्वैश्वानरलोकेत्यक्तम् ततोद्वितीयंध्रुवेत्यक्तम्। तृतीयमिदमितितमोरजसोरभावात्तद्विरजेनेत्युक्तं केवलसत्त्वमयेनसत्त्वमिश्रेणवा। केवलसत्त्वेनब्रह्मांडभेदकत्वमायास्यात्। आत्मनापूर्ववदात्मत्वेनगृहीतेनदेहेन। एकइति तत्रवैमानिकानांगमनाभावात् असहायत्वेनैकाकित्वं ब्रह्मविदांख्यातमंत्वैर्नमस्कृतं केवलज्ञानिनामेवस्थितियोग्यंमहर्लोकं यत्रमहर्लोकेकल्पायुषःब्रह्मकल्पपर्यंतमायुर्येषांविशेषेणाबुधाःज्ञानिनःभृग्वादयःरमंते प्रणवस्मरणानुस्मरणैः ज्ञानेनवासमाधिरूपेण। अयमपितत्रगतःब्रह्मकल्पपर्यंततिष्ठति ॥ २५ ॥

ततःभगवत्त्वनेजातिअनंतस्यसंकर्षणस्यमुखाग्निनात्रैलोक्यमस्यतदह्यमानंनिरीक्ष्यततोनिर्यातिभृग्वादिभिःसह। गमनस्वबहुकालसाध्यत्वात् अतीतअथोइत्युक्तम्। सिद्धेश्वरैर्युष्माभिःविमानानियत्रजनस्तपोलोके। पारमेष्ठ्यंसत्यलोकस्थानंतदपितुपूर्वकल्पसिद्धेश्वरसेवितमित्यर्थः ॥ २६

तत्रमुक्तिप्रकारमाह नयत्रेति यत्रब्रह्मलोकेशोक अज्ञानकार्यंनास्ति अथाजरा देहधर्मः नवामृत्युःमृत्युप्रासः नाधिःमनःपीडा

पिन । अंतःकरणधर्मोभावः । मृत्योःप्राणग्राहकत्वात्तद्धर्मंद्वारिकोऽपि न, [illegible] । [illegible] दुःखनापहित । तथाप्यम्यतोर्भक्तुस्तनपस गवार्द प्रतेकुताश्चादिति अन्यस्मात्ते किंतु [illegible] । [illegible] पनिसतो हरति । [illegible] सिद्धांचित्ततःचित्ताखेतां यत्दुःखमित्यर्थः तत्स्वानुभवगम्यम् । अतोविशेषतोभवकुं [illegible] मितितयोक्तम् । तत्र [illegible] माह अनिदं [illegible] दुःख प्रभवानुदर्शनादिति ह्देस्थानम् । एततसाधनंज्ञानमात्मप्रकारंवा भविदंतीतितथा दुरंतंदुःखंतस्यप्रभवायप्रसंसारेतस्यअनुपश्याद्दर्शनम् । एकशारमुत्पन्नामपिविवेकिनोऽपिपुनस्तत्रैवगच्छंतीतितथा ॥ २७ ॥

ततःस्वेच्छयाब्रह्मांडभेदनमाह ततोविशेषमिति अश्वमेधयाजिनोऽपितत्रगच्छंति तथाहिरण्यगर्भोपासका: पूर्वोक्ताश्च तत्र "आब्रह्मभुवनाल्लोका" इतिवाक्यात्कर्मिणांपुनरावृत्तिः हिरण्यगर्भोपासकानांब्रह्मणासहब्रह्मणोगतिःसागतिः पूर्वोक्त [illegible] ततःसत्यलोकाद्विशेषंपृथिव्यावरणरूपंप्रतिपद्य पृथिवीरूपोभूत्वातत्रप्रविष्टः पृथिव्यावरणातिक्रमेआवरणरूपपृथिवीसायुज्यंप्राप्यतामतिक्रम्यपुनर्जलरूपेणानलसायुज्यंप्राप्यतदतिक्रम्येत्यंक्रमेणऽपिआकाशातिक्रमपर्यंतंगच्छति सर्वत्रतेनात्मनेतिज्ञातव्यम् अवरणेतितत्रतत्रगंधादिभोगान्भुंजानएवविलंब्य कालेभोगेच्छाक्षमामेउत्तरत्रगमनमितिसर्वत्र समाकाशं ततबृहत् अनंतमेव शब्दब्रह्मरूपंवा माहात्मकंवा तस्यबृहत्त्वेहेतुः आत्मनः भगवतः लिंगशरीरम् "आकाशशरीरंब्रह्म" इतिश्रुतेः भगवतोऽव्यापकत्वम् अंतर्बहिर्व्यवहारहेतुत्वंपरिच्छेदापरिच्छेदो शब्दब्रह्माभयत्वमित्यादिधर्मबोधकम् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

ततश्च तत् विष्णोश्चक्रम अतिपत्य अतिक्रम्य । कीदृशं विश्वस्य नाभिं विश्वात्मकपुरुषस्य नाभिस्थानीयम् । अणीयसा अणिमादिसिद्धिमत्त्वादतिसूक्ष्मेण विरजेन निर्मलेन लिङ्गशरीरेण सह । ततः परत्र स्वर्गिणां गन्तुमभावादेकः नमस्कृतं पूज्यं ब्रह्मविदां स्थानं महर्लोकमुपैति । यत् यस्मिन् विबुधा महाकल्पायुषः रमन्ते खेलन्ति ॥ २५ ॥

अथो अनन्तरं यदि कल्पपर्य्यन्तं कौतुकवशात् तत्रैव स्थातुमिच्छति तदा कल्पान्ते सति विश्वं लोकत्रयम् । निरीक्ष्य उपरीभूतात् महर्लोकादूर्द्ध्वं यत् द्वैपरार्द्ध्यं द्विपरार्द्धपर्य्यन्तस्थायि यत् पारमेष्ठ्यं सत्यलोकं प्रति याति । सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिंस्तत् ॥ २६ ॥

सत्यलोकस्य माहात्म्यमाह न यत्रेति । आर्त्तिः दुःखम् । उद्वेगः भयम् । किन्तु चित्ततो हेतोः यत् दुःखम् अतः श्रुते तदेकं विना । तदेव किं कथं वा भवेत् तत्राह । अनिदंविदाम् इमं वैष्णवयोगमजानतां त्रिलोकस्थजनानां दुरन्तदुःखो यः प्रभवः संसारस्तस्यानुदर्शनाया कृपा तया । तेन व्याजस्तुत्या सत्यलोकस्थास्ते महाकृपालवो धन्या एवेति भावः ॥ २७ ॥

अथ तत्रैव यदि महाकल्पपर्य्यन्तं स्थातुमिच्छति तदा ब्रह्मणा सहैव मुच्यते । यदि च तदन्तरेव मोक्षमिच्छति तदा सप्तावरणानि निर्भिद्यैव ब्रह्म प्रविशतीति तत्प्रकारमाह । ततो विशेषं पञ्चाशत्कोटियोजनविशालस्य ब्रह्माण्डस्य प्रथमावरणरूपां पृथिवीं पञ्चाशत्कोटियोजनप्रमाणां प्रतिपद्य प्राप्य । केन प्रकारेण तेनात्मना पृथिवीरूपेण । एवमुत्तरत्रापि द्रष्टव्यम् । निर्भयः तत्तदात्मत्वेन क्षुद्दाहादिशङ्काशून्य इत्यर्थः । ततोऽपः पृथिवीदशगुणप्रमाणाः प्रतिपद्य अबात्मनेति शेषः । ततोऽनलमूर्त्तिः अब्दशगुणं तेज आवरणं प्राप्येत्यर्थः । अत्वरन् भवेत् । तत्र तत्र पृथिव्यां जलादिषु घ्राणरसनादीन्द्रियैर्गन्धरसादीन् विविधभोग्यविषयान् भोक्तुमेवेति भावः । ततो ज्योतिर्म्मयः काले वाय्वात्मना वायुं तेजोदशगुणम् उपेत्य । ततो वायुदशगुणमाकाशं, बृहदात्मनो लिङ्गं परमात्ममूर्त्तित्वेनोपासनेयुक्तं, यद्वा वेदशब्दात्मना तत्प्रभापकमिति ॥ २८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तद्विष्णोश्चक्रं शिशुमारं विश्वनाभिं सूर्यादि ग्रहनक्षत्रादेः सर्वस्याश्रयम् अतिपत्यातिक्रम्यविरजेनपुण्यापुण्यरहितेन अणीयसासूक्ष्मतरेणात्मनालिंगशरीरेण एकः विद्वान् । यत् यस्मिन् कल्पायुषोविबुधारमन्ते तद्ब्रह्मविदांभृग्वादीनांस्थानं नमस्कृतं नमनीयं महर्लोकमुपैति प्राप्नोति ॥ २५ ॥

अथो अनन्तरं कल्पांतेअनन्तस्य मुखानलेन अधस्थस्यशेषस्य मुखोद्भूताग्निनाविश्वं त्रैलोक्यंदह्यमानं सविद्याशिरीक्ष्यवक्ष्यमाणद्वारायद्वैपरार्ध्यंस्थायि सिद्धेश्वरैर्जुष्टानि युक्तानि धिष्ण्यानि विमानानि यस्मिंस्तत्पारमेष्ठ्यंपरमेष्ठिपदंप्रति निर्याति भोगार्थी महर्लोकेस्थिरोभूत्वात्रैलोक्यं दह्यमानं निरीक्ष्यततः पलायतेइति नशङ्क्यं । प्राकृतपदार्थभोगयोगाभावात् ॥ २६ ॥

यत्रलोके अनिदंविदाम् । इदंप्रस्तुतमपुनरावृत्तिवर्त्मब्रह्मयाजानंतीतीदंविदस्तद्भिन्नानांप्रस्तुतविद्वद्व्यतिरिक्तानांपुनरावृत्तिधर्मेनातत्वगतानाम् । दुरंतदुःखोयः प्रभवः पुनरावृत्त्याजन्मतस्यानुदर्शनात् कृपयायच्चित्ततोभवति । अतः श्रुतेशोकादि कुतश्चिन्नभवति । ततः पुनरावृत्तिस्तु "ऐश्वर्यपारमेष्ठ्यं च तेतिकर्मविनिर्मितं निवृत्यपुनरायान्तिगुणाव्यतिकरेसति" इति वक्ष्यमाणात् । "आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन" इति भगवद्वचनाच्च ॥ २७ ॥

अथावरणभेदन प्रकारमाह । ततइति । "दशोत्तराणि शेषाणि मैत्रेयैतानि सप्त वै" इति पुराणान्तरात् पृथिव्याद्यावरणानि दशगुणोत्तराणि सप्ततत्र कोटियोजनमानमण्डकटाहसंज्ञकं प्रथमावरणम् । "कोटियोजनमानस्तु कटाहः संव्यवस्थितः" इतिपुराणान्तरात् । महांतत्र समवृत्यप्रधानं संव्यवस्थितम् । अनन्तस्य तस्यान्तमिति वचनाद्व्यापकमहमंप्रकृत्यावरणं निर्भयः [illegible] ततः पारमेष्ठ्याल्लोकात् । तेनात्मनालिंगदेहेनोपलक्षितः विशेषं पृथिवीमयमण्डकटाहं प्रतिपद्यतद्भावं प्राप्यप्रतिपद्येत्यादीनाम् [illegible] मुपैतीत्यनेनान्वयः नचिरन्त्वरा आपःप्रतिपद्यततोऽनलमूर्तिः अनलभावं प्रतिपद्येत्यर्थः । [illegible] तन्मयाभावात् ततोज्योतिर्मयः । अनलमूर्तिः कालेअनलोत्तरवायुमेवकाले वायुमुपेत्यततोव्याप्यात्मनोपलक्षितः [illegible] । पुनः कथंभूतमात्मलिंगम् । आत्मानुगुणभूतः शब्दएवलिङ्गं [illegible] ॥ २८ ॥

घ्राणेन गन्धं रसनेन वै रसं रूपञ्च दृष्ट्या श्वसनं त्वचैव ।
श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी ॥ २९ ॥
स भूतसूक्ष्मेन्द्रियसन्निकर्षं मनोमयं देवमयं विकार्य्यम् ।
संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसन्निरोधम् ॥ ३० ॥
तेनात्मनात्मानमुपैति शान्तमानन्दमानन्दमयोऽवसाने ।
एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ? ॥ ३१ ॥
एते सृती ते नृप ? वेदगीते त्वयाभिपृष्टे च सनातने च !
ये वै पुरा ब्रह्मणे आह पृष्ट आराधितो भगवान् वासुदेवः ॥ ३२ ॥

भाषाटीका ।

उस विष्णु के नाभी को उल्लंघन करके सूक्ष्म निर्मल आत्मा से इकलाही उस स्थान को जाता है कि जो स्थान ब्रह्मज्ञानियों से नमस्कृत है और जहां पर कल्पांत आयु वाले ज्ञानी लोग रमते हैं ॥ २५ ॥

तदनंतर वह योगी अनंत के मुखाग्नि से खूब जलते संसार को देखकर परमेष्ठी का जो स्थान सिद्धेश्वरों से सेवित है द्विपरार्ध स्थायी है उस स्थान को चला जाता है ॥ २६ ॥

जहां पर कोई शोक नहीं है जरा नहीं है मृत्यु नहीं है कहीं से उद्वेग तथा दुःख भी नहींहै केवल परमेश्वरके तत्त्व को न जाननेवाले संसारियों का अत्यन्त दुःख देखना मात्र वहां पर दुःख मालूम देता है ॥ २७ ॥

तदनंतर निर्भय होकर पृथ्वी तत्त्व को प्राप्त होके तिसी से जलमूर्ती होकर धीरे से अग्निमय होकर समयपर वायु को प्राप्त होकर वायु रूप से आत्मा का प्रकाशक आकाश को प्राप्त होजाय ॥ २८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

इन्द्रियार्थानां भूतसूक्ष्माणाम् अतिक्रममाह । घ्राणेनाधिष्ठितेन गन्धमुपेत्य । श्वसनं स्पर्शनम् । नभोगुणत्वं शब्दात्मताम् । प्राणेन तत्तत्कर्म्मेन्द्रियेण आकूतिं तत्तत्क्रियाम् ॥ २९ ॥

तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहङ्कारप्राप्त्या महदादिप्राप्तिमाह । सः योगी विकार्य्यं संसाद्य विज्ञानतत्त्वं याति । विविधं कार्य्यमस्येति विकार्य्योऽहङ्कारः । स त्रिविधः तामसो राजसः सात्त्विक इति । तत्र तामसाज्जडानि भूतसूक्ष्माणि जायन्ते राजसाद्बहिर्मुखानि दशेन्द्रियाणि सात्त्विकान्मन इन्द्रियदेवताश्च । तेषां लयश्च तत्तदहङ्कारे । तत्र भूतसूक्ष्माणामिन्द्रियाणाञ्च सन्निकर्षं लयस्थानं तामसं राजसञ्च मनोमयं देवमयञ्च सात्त्विकं प्राप्य गत्या एवं गमनेन तेन अहङ्कारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति । ततो गुणानां सन्निरोधो लयो यस्मिन् तत् प्रधानं याति ॥ ३० ॥

तेनात्मना प्रधानरूपेण आनन्दमयः सन् उपाधीनामवसाने शान्तम् अविकृतम् आनन्दं परमात्मानमुपैति । न विषज्जते नावर्त्तते इत्यर्थः ॥ ३१ ॥

एते सृती मार्गौ प्रकाराविन्यर्थः । हे नृप ? अनपेक्षो निर्भिद्य मूर्द्धन् विसृजेत् परं गत इति या सद्योमुक्तिः सैका सृतिः, यदि प्रयास्यन् इत्यादिना क्रममुक्तिरिति द्वितीया सृतिश्च । एते सृती वेदेन गीते उक्ते, ननु स्वोत्प्रेक्षिते । तत्र—यदा सर्व्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति सद्योमुक्तिः, तेऽर्चिभिरभिसम्भवन्ति इत्यादिना क्रममुक्तिश्च वेदेनोक्ता । यद्वा न कर्म्मभिस्तां गतिमाप्नुवन्ति इति दक्षिणमार्गस्यापि सूचितत्वादेते सृती इति द्विवचनम् । त्वयाभिपृष्टे यच्छ्रोतव्यम् इत्यादिप्रश्नेन अर्थान्मुक्तिविषये द्वे अपि सृती पृष्टे । ब्रूहि यद्वा विपर्य्ययम् इति च दक्षिणमार्गोऽप्यर्थात् पृष्टः । एवं त्वया च ये पृष्टे ते एते सृती इत्यन्वयः ॥ ३२ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

यदा सर्व्वे इति कठोपनिषदि द्वितीयाध्याये षष्ठवल्ल्यां चतुर्दशमन्त्रः ॥ तेऽर्चिभिरभि—सम्भवन्तीति बृहदारण्यके अष्टमाध्याये—[illegible] षष्ठाध्याये द्वितीयब्राह्मणे पञ्चदशकण्डिका दक्षिणमार्गस्येति अत्र दक्षिणोत्तरमार्गादीनां विशेषजिज्ञासायामस्माभिः सम्पादिते श्रीमद्गोविन्दभाष्यसमेतवेदान्तदर्शने चतुर्थाध्यायीयद्वितीयतृतीयपादौ द्रष्टव्यौ ॥ यच्छ्रोतव्यमिति प्रथमस्कन्धीयैकोनविंशा-[illegible] श्लोकः ॥ ब्रूहि यद्वेति प्रथमस्कन्धीयैकोनविंशतितमाध्यायस्याष्टत्रिंशश्लोकस्यैकदेशः ॥ ३२ ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

गच्छतो मुक्तस्य सूक्ष्मदेहस्थेन्द्रियेस्तत्तद्भूतगुणग्रहणमाह । घ्राणेनेति । अनन्तरोक्तपार्थिवदेहो घ्राणेन्द्रियप्रधानः पृथिवीभूतमुपेत्य भोग्यत्वात्तद्गतगन्धादीन् गृह्णातीत्यभिप्रायः । घ्राणेन गन्धं पृथिवीं रसनेन्द्रियेण रसं तथा अपाम् रसनेन्द्रियं रसं चक्षुषा रूपं तेजोगुणम् । त्वचा स्पर्शं ... सांकर्याभावद्योतकः । ... गुणत्वं ... प्राणेनेतः करणेनाकूतिमभिप्रायं समानीयमाकूतिरिति श्रुतम् । अत्र प्राणशब्दे नेन्द्रियवृत्तिहेतुभूतमुख्यप्राणो न विवक्षितः तेनाकूतिग्रहणासंभवात् अतः करणं विवक्षितम् । अंतःकरणप्रसूतो ऽयमभिप्रायः एवं प्राणादिभिर्गन्धादीनुपेत्य तत्तद्भूतभेदनद्वारा तत्तद्गुणान् गृह्णातीत्यर्थः ॥ २९ ॥

अथाहंकारमहत्प्रभृतीनामतिक्रममाह । सइति । स योगी गत्यागमनेन विकार्यस्य कार्यरूपेण परिणामिनमहंकारं संसारपाशपरम्परायाः । विकार्यमेव विशिनष्टि । देवमयं विग्वातादिदेवताधिष्ठितेन्द्रियकारणं मनोमयं मनःकारणं भूतसूक्ष्मेन्द्रियसन्निकर्षभूतान्याकाशादीनि तत्सूक्ष्माणि शब्दादीनीन्द्रियाणि ज्ञानकर्मोभयेन्द्रियाणि एतेषां सन्निकर्षकारणं भूतसूक्ष्मसन्निकर्षमिन्द्रियसंनिकर्षत्वाभ्यां हि विधाहंकारभेदौ तामससात्विकाहंकारावुक्तौ । मनोमयं देवमयमिति च सात्विकाहंकारकार्यप्रदर्शनं । देवमयमित्येतावत्येव सिद्धे तत्कार्यप्रदर्शनार्थेन्द्रियसन्निकर्षात् मनोमयत्वोक्तिः इंद्रियसृष्टावनुग्राहकराजसाहंकारग्रहणाय अतएव राजसाहंकारस्य न पृथक्कार्यप्रदर्शनं तस्यानुग्राहकमात्रत्वेन पृथक्कार्याक्षमत्वात् एतच्चाग्रे स्फुटीभविष्यति तेनातिक्रान्ताहंकारेण सहोपलक्षितः विज्ञानतत्त्वं महान्तं याति विज्ञानसारथिर्यस्तु बुद्धिस्तु सारथिं महान्वैबुद्धिलक्षणमितिवच नानामैकार्थ्यात् गुणसाम्यावस्थप्रकृत्यतिक्रमणमाह गुणसंनिरोधमिति गुणानां सत्वरजस्तमसां संनिरोधः साम्यं यस्मिंस्तत्प्रधानं यातीत्यर्थः ॥ ३० ॥

अवसाने प्रकृतेरवधौ "गौरनाद्यन्तवती सा जनित्री भूतभाविनी सितासिता च रक्ता च सर्वकामदुघा विभोः" इति प्रकृतेर्नित्यत्वादेकावधिरवसानशब्दोक्तः स्वकीयभूतसूक्ष्मेन्द्रियाणां स्वकारणे प्रलयो ऽप्यवसानशब्दविवक्षितः तेनात्मना विरजसा स्वरूपेणोपलक्षितः शान्तः ऊर्मिषट्करहितमानन्दं निरतिशयानन्दस्वरूपम् आत्मानं आनन्दमयपरमात्मसाम्यापत्त्या आनन्दमयः स्वयं निरतिशयानन्दप्रचुरः उपैति आत्मानं ब्रह्माख्याम् "आत्मन आकाशः संभूतः आनंदो ब्रह्मेति व्यजानात्" इत्युपक्रमोपसंहारगतवाक्यद्वयं स्मारितम् एवं "क्षयन्तमस्य रजसः पराके आदित्यवर्णं तमसः परस्तात्तदक्षरे परमे व्योमन्" इत्युक्तप्रकृतिपुरुषातीतपरमाकाशस्थभगवत्प्राप्तिरर्चिरादिना गमनस्योक्ता एवं सप्रपञ्चब्रह्मगमनपरतीत्यस्यार्थ उक्तः अथ धूमाद्यर्चिरादिमार्गयोः श्रामाणिकत्वं कथयन्नेतेन प्रतिपाद्यमानार्थस्य शास्त्रार्थमाह एतामिति भागवतीं भगवद्दुद्दिश्यां गतिमर्चिरादिमार्गं योगतः सपुनरिह तस्य प्रकृतिं संसर्गं च कर्मार्थी अविदेहं प्रति न विषज्जते नासक्तो भवति ॥ ३१ ॥

अथ मार्गद्वयमुक्तं निगमयति एतेइति इमौ मार्गौ अर्चिरादिधूमादिमार्गौ वेदगीते । "ये चेमे ऽरण्ये श्रद्धां तप इत्युपासते ते ऽर्चिषमभिसंभवंति अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंति" इत्यादिवेदबोधिते ऽतएव सनातने नित्ये ऽतएव स्मृतौ हे नृप त्वया अभिपृष्टे यच्च प्रोक्तव्यमित्यनेनार्चिरादिमार्गस्य धूमादिमार्गस्यापि पृष्टत्वात् चकारान्मया कथितेइत्यर्थः सनातनत्वं विशदयति ये इति ये वै ये सृती पुरा कल्पादौ ब्रह्मणे चतुर्मुखायाराधितः सम्यगुपासनया प्रीतः वासुदेवः सर्वभूतान्तरात्मा भगवानाह उवाच तस्मात्सनातने इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

सत्यलोकस्येतरलोकेभ्यो वैशिष्ट्यमाह नयत्रेति यत्र ब्रह्मलोके सत्यलोके शोकादयो न संति आधिस्तु व्यसनं दुःखं वाऽधिष्ठानपर्यायोऽस्तीति व्यसनमाधिरत्रोच्यते यत्र अनिदंविदाम ब्रह्मविदां क्रियया दुःखस्य प्रभवस्य जननादिलक्षणस्य चानुदर्शनात् अनन्यत्वमसक्तो दुःसोऽपि नास्ति तं सत्यलोकमाप्नोतीति पूर्वेणान्वयः । अनादिलोकापेक्षया सत्यलोकस्य वैशिष्ट्यं न तु मुक्तिविशेषात् तदुक्तं "सर्वदुःखविहीना ये मुक्ताः प्रायस्तु तादृशाः अमुक्तास्तु जनाद्येषु विशेषेण तु सत्यगा" इति । ननु यदि ब्रह्मणा सहैव मुक्तिः सर्वेषां तर्हि ततः पूर्वमावासेन साधनसामग्रीसम्पादनं व्यर्थमिति चेन्न योग्यतावाहुविध्यान्मुक्तिप्राप्तेरपि बाहुविध्यात् तदुक्तं "विष्णोर्लोकं तदैवैके यान्ति कालान्तरे परे आब्रवेवहरेः केचिदपूर्तेः केचिदंजसा विहृत्यैवान्यलोकेषु मुच्यंते ब्रह्मणा सह" इति ॥ २९ ॥

एवं देवयानेन गत्वा सत्यलोके परब्रह्मलोके च स्थितानां ज्ञानिनां मोक्षं वक्तुं देवमुक्तिप्रकारमाह ततइति प्रतीकालंबनाप्रतीकालंबनसंज्ञः सन् निसंधो ब्रह्मप्रलये स्वविंबं प्रविष्टो गरुडशेषलक्षणमार्गद्वयेन वा श्रीप्रविष्टतया भौतिकशरीरं ब्रह्मणा संप्रविश्य ततस्तेन ब्रह्मणा सहाविशेषं पृथिवीं प्रतिपद्यते न* पृथिव्यात्मना सहापः प्रतिपद्यते नात्मनाऽनलमूर्ध्निं प्रतिपद्यतेन ज्योतिर्मयो ऽग्निप्रधानो भूत्वा वायुमुपेत्य मुक्तिकाले तेन वाच्यात्मनाहरेर्लिङ्गमाकाशवद्व्याप्तं नित्यं चेति बृहन्महत्त्वं ‡ प्रविशतीत्यन्वयः निर्भयः संसारभयान्मुक्तः अतएव त्वरत्वरमाणः । अत्रेदं तात्पर्यमवगन्तव्यं तथाहि विशेषाख्याण्डे ऽपर्वा स्थिते विशेषनाम्नि विरिंचे स्थितं वैराजाख्यं हरिं पुनस्तद्वाशुणाण्डकटाहात्मकविशेषाख्यपृथिव्यां स्थिते विरिंचे स्थितमनिमानं हरिं तेनात्मनाऽन्नाहरिणाप्सु स्थितं चतुर्मुखे स्थितमन्नाख्यं हरिं तेनात्मना विष्णुना तेजोगते विरिंचस्थे प्राणनामानं हरिं तेनाग्निगतेन हरिणा च † स्थितचतुराननस्थितं प्राणाख्यं प्राप्य तेन वायुस्थ विरिंचान्तर्यामिणाऽऽकाशस्थित विरिंचस्थं प्राणाख्यं हरिं प्रविशतीति पृथिव्यादिकार्याणां स्वस्वकारणेष्वपादिप्रधानान्तेषु लयः । तदभिमानिदेवतानां शरीराणां च । तत्र विरिंचस्य देवयोर्लयस्तस्य वैशिष्ट्येन स्वस्वरूपैरेकीभावो दीपानां दीपान्तरैरिव । अन्येषां द्वारमात्रमिति ज्ञानिनः प्रलये सर्वे ब्रह्मणा सह पार्थिवं भूम्यपामनाममात्रं ब्रह्मणा संस्थितमित्यादिवाक्यद्वयेन च शब्द गृहीते न मिथ्यामात्रमिति शिकाभिरस्तेति ज्ञातव्यम् ॥ ३० ॥

इदानीं पंचतन्मात्राप्रलयप्रकारमाह घ्राणेनेति घ्राणेन्द्रियाद्यधिष्ठितविरिंचस्येन हरिणा गंधतन्मात्राद्यभिमानविरिंचस्थितं हरिं योगी पुनरावृत्तिमुपैतीत्यन्वयः तत्र वाय्वादीनां पुनरावृत्तिलक्षणा आप्यायितत्वमुक्तं च ... प्रकारमाह घ्राणेनेति एवमुक्तः केवलचिदानंदैकदेहो योगी ... आदिभिरत्युत्तमावतरणां ... ऽप्रतिपादितस्वामेभ्याश्रितः प्रलये ऽपि न पुनरावृत्तिमुपैतीत्यन्वयः । ... भवति इयमेव मुक्तिर्नान्यत्तत्वादिकथिते स्येवशब्दः तुनामगस्यापि परे ... ॥ ३१ ॥

---

* पृथिव्यन्तर्यामिणा हरिणा ‡ भूताकाशं † भूतवायुः

[illegible] पूर्वोक्तरीत्या [illegible] ॥ [illegible] नामादिः [illegible] ॥ [illegible] ॥ "यदेवैनमहताकमालमहतिस्थूल" इति "[illegible] सर्वदेवे [illegible] त्वदन्तर्भूतः सर्वे" तिच [illegible] पुनाति [illegible] ॥ [illegible] पयाति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

घ्राणेन गन्धमिति । अनेनाकाशावरणादहिरेव सूक्ष्मरूपाण्यावरणानि लभ्यन्ते । पुरुषेण । कारणकारणानां बहिर्बहिरवस्थानं [illegible], व्यवहितानामपि कारणानामंशमंशमुपादायैवावरणं तत्तत्कार्य्यसृष्टेः, यथा गन्धतन्मात्रस्य अंशस्य चांशमुपादाय तेन पृथिवी सृष्टेत्यादि । किन्तु गन्धतन्मात्रादीनां सूक्ष्मत्वेनानुपलभ्यमानत्वादाकाशतुल्यत्वमिति आकाशान्तर्गतावरणान्यन्वेषयन्ते । [illegible] विवेचनीयम् । तत्र घ्राणेनेति घ्राणद्वारा गन्धमाविश्येत्यर्थः । एवमुत्तरत्रापि ॥ २९ ॥

तेनाहङ्कारेण सहेति तद्रूपं विज्ञानतत्त्वमित्यर्थः ॥ ३० ॥

[illegible] । आत्मना शुद्धेन स्वरूपेण । तेन प्रधानमावेशितेन पुनस्तत उत्क्रमितेन । आत्मानं परमात्मानं परमवैकुण्ठनाथमित्यर्थः, [illegible] गतिरित्युक्तेः । ततो विशेषमित्यत्र टीकावतारिकायाञ्च ये तु भगवदुपासकास्ते [illegible] ब्रह्माण्डं भित्त्वा वैष्णवं पदमायो- [illegible] इति । तस्मात्तन्मतेऽपि प्रकृत्यावरणाद्बहिर्महावैकुण्ठलोकः । प्रकृत्यावरणस्य व्यापकत्वं चापेक्षिकमिति ॥ ३१ ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

[illegible] परित्यागेमहाभूतानां परित्यक्ताः विषयातिक्रमेन्द्रियातिक्रममाह घ्राणेनेति घ्राणेनेतिपाठेऽपि स एवार्थः सर्वत्र [illegible] तत्संयोगानन्तरं तत्तदतिक्रम्येतिज्ञातव्यं नभोगुणत्वं शब्दत्वं घ्राणेनकर्मेन्द्रियसहितेन तद्रूपेण वा आकृतिक्रियापञ्चकमपि उपैति त्यजतीति [illegible] योगीतियोगसामर्थ्यादिविस्मरणाम ॥ २९ ॥

अहङ्कारातिक्रममाह स एव योगी भूतानां सूक्ष्माणामिन्द्रियाणां च संनिकर्षमुत्पत्तिस्थानं तामसं राजसं चाहङ्कारं मनोमयं देवमयमिति [illegible] विकारैर्मूकाहंकारं तेन रूपेण गत्या सह याति क्रियामहंकारं च त्यजतीत्यर्थः विज्ञानतत्त्वं महत्तत्त्वं गुणसंनिरोधं प्रकृति सर्वेश ॥ ३० ॥

तेनात्मनेति अग्रेपुरुषावरणं तत्रापि तेनात्मना आत्मानमुपैति ततः शांतमक्षरं ततः आनंदपुरुषोत्तमं [illegible] भूत्वाऽपैति [illegible] [illegible] परं मम नास्ति "मामुपेत्य तु कौंतेय" इति च । [illegible] गतिमिति ब्रह्मांडमध्ये हृदयमध्ये ब्रह्मांडात्परतो [illegible] भूत्वा आनंदरूपं भगवंतं प्रविशति स नैव पुनः संसारं प्रविशति ॥ ३१ ॥

एवं पुनरावृत्तिमार्गद्वयमुक्त्वा सद्योमुक्तिक्रममुक्तिरूपमुपसंहरति एते सृती इति एतेषां [illegible] [illegible] विमर्शाः [illegible] भविष्यति अग्रतो [illegible] कृतं [illegible] इति [illegible] नित्यत्वात्पुरुषार्थरूपे [illegible] तत्रापि [illegible] साधनं [illegible] भवति [illegible] मार्गं गच्छति [illegible] भविष्यति [illegible] प्रमाणमाह येवेपुरेति [illegible] पृष्टः सन् कथनेहेतुः आराधितइति एवं कथनेहेतुमाह वासुदेव इति मोक्षदातृत्वेनैव मुक्ता नित्यर्थः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

इन्द्रियार्थानां भूतसूक्ष्माणामतिक्रममाह । घ्राणेन घ्राणेन्द्रियेण [illegible] गन्धम् उपेत्य । एवं रसनेनेत्यादि । [illegible] स्पर्शम् । नभो- गुणत्वं नभोगुणं शब्दम् । प्राणेन कर्मेन्द्रियेण आकृतिं तत्तत्क्रियाम् । तत्र पृथिव्याद्यावरणेष्वेव गन्धादयः सन्ति तेषामतिक्रमं पूर्व- [illegible] ज्ञेयम ॥ २९ ॥

[illegible] स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहङ्कारप्राप्त्या महदादिप्राप्तिमाह । स योगी विविधं कार्यमस्येति विकार्य्योऽहङ्कारस्तं [illegible] । कीदृशं भूतसूक्ष्माणाम् इन्द्रियाणाञ्च सन्निकर्षो लयो यत्र तम् । तामसाहङ्कारे भूतसूक्ष्माणि राजसाहङ्कारे इन्द्रियाणि [illegible] इत्यर्थः । पुनः कीदृशं मनोमयं देवमयम् । सात्त्विकाहङ्कारे मनः देवताश्च प्रविलाप्यन्त इत्यर्थः । [illegible] तेन अहङ्कारेण सह [illegible] विज्ञानतत्त्वं महत्तत्त्वं याति । अहङ्कारं महत्तत्त्वे प्रविलापयतीत्यर्थः । ततस्तेन महत्तत्त्वेन गुणाः संनिरुध्यन्ते येन तत् प्रधानं याति । महत्तत्त्वं प्रधाने विलापयतीत्यर्थः ॥ ३० ॥

[illegible] प्रधानेन सह आत्मना [illegible] आत्मानं परं [illegible] उपैति, प्रकृत्यावरणात् परत्र कारणार्णव- [illegible] स्थितेः । ततोऽपवर्गं आनन्दमय इति [illegible] प्राप्नोतीत्यर्थः । न निवर्त्तते इह संसारं नावर्त्तते ॥ ३१ ॥

[illegible] । निर्भिद्य सूर्यं विमुखेन परं [illegible] इति [illegible] मुक्तिः यदि [illegible] इत्यादिका क्रममुक्तिश्च [illegible] सृतिः । एते सृती वेदेन गीते [illegible] इति स्थिताः । [illegible] इति [illegible] । [illegible] । त्वयाभिपृष्टे इति ब्रह्मणस्य किं [illegible] ॥ ३२ ॥

[illegible]

[illegible] । [illegible] ॥ २९ ॥

सर्वाणीविकार्य विविधं कार्यस्य [illegible] कारणं [illegible] त्रिविधोऽहंकारस्तत्र [illegible] । [illegible] वैकारिकोऽहंकारः । [illegible] गुणसन्निरोधं गुणसमुदायं प्रधानं प्रकृत्यात्मकं याति ॥ ३० ॥

अवसानेकार्यकारणरूपप्रकृति [illegible] शरीरस्यापि [illegible] । शान्तंपरमशान्तिप्रदम् आत्मानम् "आत्मन आकाशः सम्भूतः आत्मा [illegible]" इत्यादि श्रुति प्रतिपादितम् । आनन्दम् "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इत्यादि श्रुति प्रतिपादितम् । तेनरूपेण कार्यकारणरूपप्रकृति [illegible] आनन्दमयः आनन्दप्रचुरः "[illegible] आगता" इति श्रीशुकवचनात् "निरंजनःपरमं साम्यमुपैति" इत्यादि श्रुतेः । [illegible] परमानन्दसाधर्म्यः । आविर्भूतापहतपाप्मत्वादिगुणः उपैति । विस्तरस्तुवेदान्तभाष्ये द्रष्टव्यः । हेअंग ! एतामपुनरावृत्तिलक्षणां भागवतीं प्राप्यभूतस्य भगवतः [illegible] संसारे नविसज्जतेनैव सक्तो भवति ॥ ३१ ॥

हेनृप ! [illegible] अर्चिरादि मार्गरूपा पृष्टा [illegible] विपर्ययमित्यनेनाथो [illegible] पृष्टे एवं [illegible] नृपेत्यादि [illegible] कथंभूते "[illegible] तेऽर्चिषमभिसंभवंति । अथयेइमेग्रामेइष्टापूर्ते दत्तमित्युपासतेतेधूममभिसंभवन्ति" इति वेदेगति [illegible] ॥ ३२ ॥

भाषा टीका ।

वह योगी नासिका इंद्रिय द्वारा गंध गुणको प्राप्त होकर जिह्वा इंद्रिय से रसको० नेत्रसे रूपको त्वचा [illegible] प्राणसे क्रिया को प्राप्त होताहै ॥ २९ ॥

वह योगी पंचभूत तथा तन्मात्रा तथा इंद्रिय इनका कारण जो सात्विक राजसतामस अहंकार इनको गतीसे प्राप्त होकर महत्तत्व को तथा गुणोंकि साम्यावस्थारूप प्रकृति को प्राप्त होता है ॥ ३० ॥

इस प्रधानके द्वारा अंतमें आनंदस्वरूपसे शांत आनंद परमात्माको प्राप्त होता है हे राजन् इस भागवती गतीको जो प्राप्त हुआ है वो फिर इस संसारको नहीं प्राप्त होताहै ॥ ३१ ॥

यह दोनों मार्ग सनातन हैं वेदमें कथित हैं जो तुमने पूछे सो हमने कहे जो किपदप के आदि मे आराधन से संतुष्ट भये भगवान् वासुदेवने पूछने पर ब्रह्माको उपदेश कियेथे ॥ ३२ ॥

[illegible] टीकायां पंचविंशषड्विंशयोर्मूलम् ।

योऽन्तः पचतिभूतानां यस्तूपस्थेंऽडमध्यगः ।
सोऽग्निर्वैश्वानरोमार्गो देवानां पितृणां मुनेः ॥ २५ ॥

देवयानं पिंगलाभिरहान्येति शतायुषा ।
[illegible] पितृणां [illegible] ॥ २६ ॥

इति श्लोकौ ॥

द्वात्रिंशत्रयस्त्रिंशयोर्मूलम् ।

सभूतसूक्ष्मेंद्रियसन्निकर्षं [illegible] ऽभिगवाननादिः ।
मनोमयं देवमयं [illegible] ॥ ३२ ॥
विज्ञानितत्त्वं गुणसन्निरोधं [illegible] ।
आनंद मानंद मयोऽवसाने सर्वात्मकं ब्रह्माणि [illegible] ॥ ३३ ॥

इति श्लोकौ ॥

न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह ।
वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥ ३३ ॥
भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ।
तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवेत् ॥ ३४ ॥
भगवान् सर्व्वभूतेषु लक्षितः स्वात्मना हरिः ।
दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥ ३५ ॥
तस्मात् सर्व्वात्मना राजन् ! हरिः सर्व्वत्र सर्व्वदा ।
श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान्नृणाम् ॥ ३६ ॥
पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम् ।
पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वितीयस्कन्धे महापुरुषसंस्थानुवर्णनं नाम
द्वितीयोऽध्यायः ॥ २ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ननु सन्ति संसरतः पुंसो बहवो मोक्षमार्गास्तपोयोगादयः समीचीनत्वमभेदेनाह न हीति । कुतोऽनुष्ठिताद् भक्तियोगो भवेत् अतोऽन्यः शिवः सुखरूपो निर्विघ्नश्च नास्त्येव ॥ ३३ ॥

कुत एतदत आह । भगवान् ब्रह्मा कूटस्थः निर्व्विकारः एकाग्रचित्तः सन्नित्यर्थः, त्रिः त्रीन् वारान् कार्त्स्न्येन साकल्येन ब्रह्म वेदम् अन्वीक्ष्य विचार्य्य यतः आत्मनि हरौ रतिर्भवेत् तदेव मनीषया अध्यवस्यत् निश्चितवान् ॥ ३४ ॥

ननु अनुभूते अर्थे रतिर्भवति अननुभूते तु भगवति कथं रतिः स्यात् तत्राह । भगवान् लक्षितः दृष्टः । कथं स्वात्मना क्षेत्रज्ञान्तर्यामिरूपेण कैः दृश्यैर्बुद्ध्यादिभिः । तदेव द्वेधा दर्शयति । दृश्यानां जडानां बुद्ध्यादीनां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटते इत्युपपत्तिमुखेन लक्षणैः स्वप्रकाशान्तर्यामिलक्षकैः । तथा बुद्ध्यादीनि कर्त्तृप्रयोज्यानि करणत्वात् वास्यादिवदिति व्याप्तिमुखेनानुमापकैः अतस्तस्य ज्ञानेऽस्ति रतिसिद्धिः ॥ ३५ ॥

श्रोतव्यः कीर्त्तितव्यश्च इत्यादिप्रश्नस्य उत्तरमुपसंहरति तस्मादिति ॥ ३६ ॥

अथवा फलमभिनयेनाह पिबन्तीति । सताम् आत्मनः आत्मत्वेन प्रकाशमानस्य कथैवामृतम् । विषयैर्विदूषितं मलिनीकृतमाशयं पुनन्ति शोधयन्ति । तस्य चरणपद्मान्तिकं श्रीविष्णुपदं व्रजन्ति ॥ ३७ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

श्रीराधारमणदास गोस्वामि विरचिता दीपनाख्य टिप्पणी ।
[भगवान् आत्मन् [illegible] पिबन्ति ॥ ३४—३७ ॥]

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

सर्वादिभ्योऽपि विराडादिभ्यो भक्तियोगादिभ्यश्च उपायेभ्यः [illegible] भक्तियोगोपायात् नहीति [illegible] [illegible] भक्तियोगो यतो भवेत् [illegible] तथा [illegible] भक्तियोगं [illegible] "तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन" इति स्मरणादिति भावार्थः ॥ ३३ ॥

कथं वासुदेवे भक्तिरेव [illegible] भगवानिति "[illegible]" [illegible] एव ब्रह्म जगत्कारणं तद्भक्तिरेव मोक्षोपायः कथमित्यत आह कास्न्येंनेति [illegible] "मालोक्य सर्वशास्त्राणि विचार्य च पुनः पुनः" [illegible] इति [illegible] रतिः मुक्तौ आनंदः निरतिशयानंदपरमात्मानुभवजनितसर्वावस्थो [illegible] भक्तियोगात् [illegible] भक्तियोगो मुक्त्युपायः इति निश्चित्य निपुणतरा लोकः स्थित इत्यर्थः ॥ ३४ ॥

ननु नींद्रियेण भगवति कथं भक्तिः [illegible] रतिरिति [illegible] योगपरिशुद्धमनोविषयत्वानुभवमपि तं भवतीत्यभिप्रायेणाह भगवानिति [illegible] नायोगपरिशुद्धमनसा सर्वभूतेषु भगवान् लक्षितः साक्षात्कारार्हः "मनसा तु विशुद्धेन मनसाभिपश्यत" इति श्रुतेः [illegible] रत्यपरोक्ष्यत आह दृश्यस्यैः न केवलं योगपरिशुद्धमनोविषयत्वमात्रं [illegible] बुद्ध्यादिभिः महदादिभिः [illegible] लक्षणैरिति वचनात् कार्यभूतमहदादिभिर्दृष्टांत कारणभूतोऽनुमीयत इत्यर्थः न केवलमनुमानविषयत्वं [illegible] विषयोऽपीत्याह [illegible] मापकैरिति पदद्वयेन [illegible] "सत्यं ज्ञानमनंतं यतो वा इमानि भूतानि" इत्यादीनि [illegible] "सदेव सोम्येदमग्र आसीदि" त्यादीनि तैरनुमापकैः स्मृतिपर्यवैः स्मृतीनां [illegible] केवलानुमानगम्यत्ववादिनो वैशेषिका निरस्ताः तन्निरासस्तु "शास्त्रयोनित्वात् ॥१।१।३॥" इत्यधिकरणसाध्यः बुद्ध्यादिकार्य[illegible] जगत्कारणत्वतया शास्त्रैः प्रतिपन्नः [illegible] योगपरिशुद्धमनसा साक्षात्कुर्वंतीत्यागमोत्थविवेकजन्यज्ञान[illegible]विषयत्वमुक्तं भवति ॥ ३५ ॥

[illegible] इत्यादिप्रश्नोत्तरमुपसंहरति तस्मादिति स्पष्टोऽर्थः ॥ ३६ ॥

अस्तु योगपरिशुद्धमनोग्राह्यत्वं योगारंभो वा कथं स्यादित्यत आह पिबंतीति भगवत आत्मनः परमात्मनः कथामृतं ये पिबंति ते विषयविदूषितांशयं पुनंतीत्यन्वयः कथामृतं वा कथं लभ्यते इत्यत आह सतामिति [illegible] [illegible] श्रवणपुटेषु संभृतं पूरितम [illegible] मित्युक्तं भवति [illegible] विषयैः शब्दादिभिर्विदूषितं कलुषितमाशयमंतःकरणं पुनंति [illegible] योगात्तत्र [illegible] [illegible] भगवतश्चरणसरोरुहयोरंतिकं समीपं व्रजंति प्राप्नुवंति [illegible] योगारंभः [illegible] [illegible] ज्ञानाभ्यासाऽनुगृहीता [illegible] भक्तिरित्ययं क्रमोऽभ्योक्तः ॥ ३७ ॥

इति श्रीमद्भागवते द्वितीयस्कंधे श्रीवीरराघवाचार्यकृतटीकायां द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

तेन [illegible] हरि [illegible] मूलक [illegible] विज्ञाननामानं याति [illegible] [illegible] समष्टतत्त्वांतर्यामि विज्ञाननामा [illegible] नाम [illegible] याति [illegible] विष्णुः श्रियानुयातं [illegible] परार्धावसाने सर्वात्मके सर्वांतर्यामि [illegible] वासुदेवाख्ये- [illegible]रति । जीवसंघः [illegible] योग्यतानुसारे [illegible] मूलरूपे विहरतीति शेषः । इत्येषा देवानां मुक्तिरिति भावः [illegible] हरिं प्रविष्टानां पुनरावृत्तिर्नास्तीत्याह वासुदेवहति ॥ ३३ ॥

यो भागवत आत्यंतिकी [illegible] वासुदेवपदं सायुज्याख्यां गतिं मुक्तिं गतः [illegible] पुनरिह संसारे [illegible] [illegible] परस्परं [illegible] इत्यादि [illegible] याति [illegible] मानंदातिशये । [illegible] "वासुदेवाश्रिता [illegible] मुक्तबंधना" इत्यादिना [illegible] पुरा [illegible] पृष्टो भगवान् वासुदेवो [illegible] मृतो ब्रह्मणो आह । ते एते सृती मया ते कथिते इत्यन्वयः । [illegible] हेतुमाह त्वयेति [illegible] आह [illegible] "[illegible] पर्युपासते ते [illegible]" इत्यादि [illegible] सूचयति [illegible] सनातनेति नित्य- [illegible] हेतुत्वादित्यर्थः ॥ ३४ ॥

अतोऽन्यो[illegible] श्रेयसार्थिभिर्भागवतमेवाभ्यस्यं [illegible] इति भावेनाह नहीति [illegible] मृतो [illegible] भागवता [illegible] शिव [illegible] सज्जन [illegible] भागवतोक्त्वादिति शेषः । हेतुं [illegible] आह वासुदेवहति ॥ ३५ ॥

[illegible] भगवानिति [illegible] । [illegible] [illegible] निर्विकारो हरी [illegible] भागवतं पुरा [illegible] इत्यादिरन्वयः [illegible] इत्यादिकं सूचयति ॥ ३६ ॥

उत्तमाधिकारिणां [illegible] भगवत्[illegible] भगवानिति [illegible] हेतुत्वात् [illegible] भगवानिति [illegible] [illegible] सर्वभूतेषु [illegible] [illegible] [illegible] इति भावः [illegible] [illegible] तदुक्तं । "[illegible] [illegible]" इत्यादि ॥ ३७ ॥

[illegible] उपसंहरति तस्मादिति [illegible] [illegible] आह पिबंतीति [illegible] ॥ ३८ ॥

इति श्रीभागवते महापुराणे द्वितीयस्कंधे [illegible] ॥ २ ॥

श्रीमद्भागवतीयस्य क्रमसन्दर्भः ।

[illegible] इत्यादिना [illegible] इत्यादिना च क्रमेण [illegible] ज्ञानयोगयुक्ता [illegible] भक्तियोगहेतुमनवर्पितकर्म्म [illegible] तु कैमुत्यमेवागीतं वर्त्म, न हीति । टीका च—समि [illegible] कुतो वर्त्मनो [illegible] भक्तियोगादयः समीचीनस्तवमेवेत्याह न हीति । यतोऽनुष्ठिताद्भक्तियोगी भवेत् कुतोऽन्यः शिवः सुख- [illegible] नास्त्येव इत्येषा । [illegible] कर्म्मोच्यते, स वै पुंसां परो धर्म्मः इत्युक्तेः सम्मतेः ॥ ३३ ॥

स हि भक्तियोगः सर्व्ववेदसिद्ध इत्याह भगवानिति । भगवान् ब्रह्मा कूटस्थो निर्व्विकार एकाग्रचित्तः सन्निस्त्वर्थः त्रिः त्रीन् वारान् [illegible] साकल्येन ब्रह्म वेदमन्वीक्ष्य विचार्य्य यत् आत्मनि हरौ रतिर्भवेत् तदेव भक्तियोगाख्यं वस्तु मनीषया अध्यवस्यत् निश्चित- वान् । (त्रिरन्वीक्ष्येति कर्म्मज्ञानभक्तिप्रतिपादकतयाभिप्रेत्येति ज्ञेयम् ।) अत्राप्युपसंहारानुरोधेनात्मशब्दस्य हरिवाचकता । निरुक्तञ्च —आततत्वाच्च मातृत्वादात्मा हि परमो हरिः इति । अथवा (परमवेदविदा श्रीभगवता स एव मत इत्याह ।) भगवान् स्वप्रकाशासा- [illegible] विगुणः परमेश्वरोऽपि सर्व्ववेदाभिधेयसाराकर्षणलीलार्थं त्रिरन्वीक्ष्य तत्र शास्त्रविदन्तराणामीक्षणमनुकृत्य । अनन्तवैकुण्ठ- वैभवादिमयानामनन्तविरिञ्चिपाठभेदानां वेदानां तथेक्षणञ्च तेनैव संभवतीत्याह—कूटस्थः एकरूपतयैव कालव्यापीति । अतएवोक्तं [illegible]—किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥ इति । श्रीशुकेन च—निगमकल्पतरोर्गलितं फलम् इति ॥ ३४ ॥

नन्वितरेषां तावत् कथं तस्मिन् भगवति आस्तिक्यबुद्धिः स्यात् तत्राह भगवानिति । स्वात्मना स्वचित्तेन प्रथमं द्रष्टा जीवो लक्षितः कैः दृश्यैर्बुद्ध्यादिभिः । तदेव द्वेधा दर्शयति । दृश्यानां जड़ानां बुद्ध्यादीनां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुपपत्तिद्वारा लक्षणैः स्वप्रकाशद्रष्टृलक्षकैः । तथा बुद्ध्यादीनि कर्त्तृप्रयोज्यानि करणत्वात् वास्यादिवदिति व्याप्तिद्वारानुमापकैरिति । अथ भगवानपि लक्षितः । केन सर्व्वभूतेषु सर्व्वेषु तेषु द्रष्टृषु प्रविष्टेन स्वात्मना स्वांशरूपेणान्तर्यामिणा । आदौ सर्व्वैर्द्रष्टृभिरन्तर्यामी लक्षितः । तत- स्तेन भगवानपि लक्षित इत्यर्थः । स तु पूर्व्ववत् द्वेधैव लक्ष्यते । तथा हि कर्त्तृत्वभोक्तृत्वयोरस्वातन्त्र्यदर्शनात् कर्म्मणोऽपि जड़त्वात् सर्व्वेषामपि जीवानां तत्र तत्र प्रवृत्तिरन्तःप्रयोजकविशेषं विना न घटत इत्यनुपपत्तिद्वारा अन्तर्यामी लक्ष्यते । "एष ह्येनेनात्मना चक्षुषा दर्शयति श्रोत्रेण श्रावयति मनसा मानयति बुद्ध्या बोधयति तस्मादेतमाहुः स्मृतिरस्मृति"रिति माल्लवेयश्रुतिश्च । अथ तस्मै- वान्तर्यामित्वैश्वर्य्याय तेषु यदि सर्व्वांशेनैव प्रविशति कोऽपि परस्तदा स्वतःपूर्णत्वाभावादनीश्वरत्वमेव स्यादित्यनुपपत्तिद्वारान्तर्या- मिरूपेण तस्यांशेन भगवानपि लक्षितः । अतएव गीतोपनिषत्सु—अथवा बहुनैतेन किं ज्ञातेन तवार्ज्जुन । विष्टभ्याहमिदं कृत्स्नमेकां- शेन स्थितो जगत् ॥ इति । विष्णुपुराणे च—स्वशक्तिलेशावृतभूतसर्गः इति । तथा जीवाः प्रयोजककर्त्तृप्रेरितव्यापाराः अस्वातन्त्र्यात् तक्षादिकर्म्मकरजनवत् इत्येवमन्तर्यामिणि तद्व्याप्तिद्वारा सिद्धे पुनस्तेनैव भगवानपि साध्यते । तुच्छवैभवजीवान्तर्यामिस्वरूपमी- श्वरतत्त्वं निजांशितत्त्वाश्रयम् । तथैव पर्य्यासः । राजप्रभुत्वाश्रिततक्षादिकर्म्मकरप्रयोजकप्रभुत्ववदिति । अथवात्र—यथेन्द्रियैः पृथग्- द्वारैरर्थो बहुगुणाश्रयः । एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः इत्येवोदाहरणीयम् । अनेनैव गतिसामान्यञ्च सिध्यतीति ॥ ३५ ॥

अथ किन्तत् यतस्तत्र रतिः स्यात्तथैव यच्छ्रोतव्यम् इत्यादिप्रश्नस्योत्तरत्वेनोपसंहरति तस्मादिति । चकारात् पादसेवादयोऽपि गृह्यन्ते ॥ ३६ ॥

इत्युत्पत्तिमेव श्रवणप्राधान्येन दर्शयन् तन्महिमपराकाष्ठामाह पिबन्तीति । सताम् आत्मनः प्राणेश्वरस्य । यद्वा व्यधिकरणे षष्ठी सतां स्वरूप यो भगवान् तस्येत्यर्थः । तेषां भगवति स्वामित्वेन ममतास्पदत्वात् । अत्र पुनन्तीत्यनेन पूर्व्वोक्तः स्थूलधारणामार्गश्च परिहृतः भक्तियोगस्यैव स्वत पावनत्वादलं तत्प्रयासेनेति । तत्र कथामृतं प्रशस्यमानं श्रीभागवताख्यमेव मुख्यं, यस्यां वै श्रूयमाणा- याम् इत्यादिकञ्च तथैवोक्तमिति ॥ ३७ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवंफलंनिरूप्योपसंहृत्यएतन्मार्गप्रवेशेकियंतउपायाःसंतीत्याकांक्षायामाह नह्यतोऽन्यइति अस्मात्पूर्वोक्तात्अन्यः शिवः कल्याणरूपः साधनपक्षामपि [illegible] पंथा आर्हतमनिविष्टस्यपुनर्ब्रह्मभावार्थमार्गरूपःकोऽपिनास्ति बहूनांजगतियोग्यः एतदज्ञानेनइहसंसारेविशतां [illegible] संसारेकस्वभावानांतंमार्गपुनःस्मारयति वासुदेवेभगवतिभक्तियोगोयतोभवेदिति मोक्षदानार्थमागतेभगवतिसाक्षात्परब्रह्म- रूपेणत्वाकारेणपरिणतांतःकरणेनत्वासेनषड्गुणैश्वर्यरूपेणाविर्भूतेयेनैवोपायेनपरमाप्रीतिर्भवतिसएवोपायइत्यर्थः अवणादिभिःस्नेहः ततोमननिदिध्यासनरूपेणासर्वभावस्नेहःद्वितीयः ततोऽपिसुखमध्यानेनहृदिभगवतिसमागतेतत्रयःपरमस्नेहःसाक्षाद्भगवत्प्रवेशहेतुः सफल- [illegible] रूपोऽपिअर्वातरव्यापाररूपोऽपीतितद्धेतुर्मार्गः गृहाज्जिगतस्यगृहदेशपर्यंतांवितत: तत्रपूर्वभागः साधनरूपः मध्यमभागो- [illegible] व्यापाररूपः अग्रिमोभगवत्संबद्धःफलरूपः तत्रश्रवणादिध्यानद्वयंचक्रमाद्गतताभूमिः प्रीतिपादो साक्षात्प्रीतिःअन्मार्गेणतावत्पर्यंतं गच्छतितदाभगवंतंप्रापयति नान्यथेति ॥ ३३ ॥

फलसाधननिर्धारः पूर्वमेवजातइत्याह भगवानिति [illegible] पूर्वोक्तमनादिसिद्धं रात्रिभ- [illegible] मनीषयाविचारकबुद्ध्या [illegible] "एवमेवशृणुत" इत्यादिवाक्यैःप्रीतिर्भवतीत्यव्या- [illegible] तत्रापिकूटस्योनिश्चलः ॥ ३४ ॥

एवंप्रकारेणतुष्टयाय भक्तिमार्गेस्थिरीकृत[illegible] भगवानिति [illegible]
(?) तानिमस्सर्वथा वाधितविषयाविपर्यवसितपरोपयोगात् अनपायत्वे सर्वैः सर्वभूतेषु [illegible] [illegible]
हेरात्मत्वेन सांख्यादिभिः करणत्वेन अन्येभ्यस्त[illegible] [illegible] [illegible]
नुभवेनतुष्टयाय आत्मनानुभवेन दृश्यैर्द्रष्टा बुद्ध्यादिभिर्लक्षणैः [illegible] [illegible]
कैःतर्कसहकृतैःपरोक्षज्ञानजनकैः लक्षितइतिसंबंधः [illegible] ॥ १५ ॥

तस्मात्सर्वेषामेवदर्शनानामप्रयोजकत्वात्पूर्वोक्तप्रकारेणैवकर्तव्यमित्युपसंहरति तस्मादिति सर्वात्मनेतिउत्तरांगसाहित्येनराजन्निति
अवधारणसामर्थ्यमुक्तं हरिरितिसाधनदशायांजातदुःखदूरीकरणार्थं सर्वत्रसर्वदेतिदेशकालविचारोनकर्तव्यः पूर्ववत्श्रोतव्यादिकार्थे
भगवानिति नृणामितिमनुष्यमात्राधिकारित्वम् ॥ १६ ॥

एवंमार्गेवस्तुतत्त्वंचोक्त्वा प्रकरणस्यसमाप्तत्वात्साधारण्यश्रवणस्यापि मुक्तिद्वारा भगवत्प्रापकत्वमाह पिबंतियेभगवतइति बहिः [illegible]
प्रवेशनंपानं भगवतःआत्मनः सतामितिसर्वेषामेवभगवत्वेनभगवान्स्फुरतिसतांवात्मत्वेनापि सर्वेसकामाः संतः प्रेमकाङ्क्षितविभागः कथै
वामृतं श्रवणपुटेषु उत्तमितकर्णपुटेषुपूर्णे विषयैर्विदूषितमाशयंपुनंति यथांतरसाध्यरोगव्याप्ताः वैद्यैः अमृतरसेनसिद्धाः क्रियंते तथांतः
करणमपिविषयेअत्यंतसहितैःविशेषेणदूषितं सर्वथासन्मार्गेनहितादशमपिपुनंति क्रमात्तच्चरणसरोरुहांतिकंवैकुंठंभक्तिवाप्त्युवंतीत्यर्थः ॥

इतिश्री भागवत सुबोधिन्यांद्वितीयेस्कंधेद्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

किन्तु सर्व्वसाध्यपरमसारप्रापकस्त्वयमेव पन्था इत्याह न हीति । यतः भक्तियोगः प्रेमा भवेत् अतोऽन्यः शिवः सुखरूपो निर्विघ्नश्च पन्था नास्त्येव । अत्र पूर्व्वम् उक्तलक्षणं सृतिद्वयं यथा मोक्षप्रापकं तथायं पन्था भक्तियोगप्रापक इति प्रापकस्यास्य पथः परमोत्कर्ष-प्रतिपादनादेनतप्राप्यस्य भक्तियोगस्यापि सृतिद्वयप्राप्यान्मोक्षात् परमोत्कर्षो युक्तिसिद्ध इतिभक्तियोगस्यास्य प्रेमलक्षणस्य मोक्षसाधनत्वं न व्याख्यातुं शक्यमित्यवधेयम ॥ ३३ ॥

ननु त्वं मनीषया सर्व्वसारत्वेन स्वाभिमतत्वेन चेममेव पन्थानं निश्चिनोष्यन्यो वा तत्र सामान्यस्य वा का कथा भगवानेव स्वमनीषया प्रथममेव निरणैषीदित्याह । भगवान् स्वप्रकाशसार्व्वज्ञ्यादिगुणः परमेश्वरोऽपि स्वनिश्वासोद्भूतं ब्रह्म वेदं कात्स्न्र्येन त्रिरन्वीक्ष्येति यथान्ये मुनयः शास्त्रं त्रिस्त्रिरभ्यस्यैव तत्तात्पर्यं पर्य्यालोचयन्ति तथैव "स मुनिर्भूत्वा समचिन्तयत्" इति श्रुतेर्भगवानपि मुनिलीलत्वेनैव सर्व्ववेदाभिधेयसाराकर्षणलीलया वेदार्थानां दुर्ज्ञेयत्वं लोके व्यञ्जयन् त्रिर्विचार्य्येत्यर्थः । अनन्तवेदशाखाविभेदया-मामनन्तविरिञ्चिपाठभेदानां वेदानां तदर्थज्ञश्च तेनैव सम्भवतीत्याह कूटस्थः, "कालव्यापी स कूटस्थ एकरूपतयैव यः" इत्यमरः । अतएवोक्तं स्वयमेव—किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदय लोके नान्यो मद्वेद कश्चन ॥ इति । सः तत् वस्तु अध्यवस्यत् सर्व्ववेदप्रतिपाद्यत्वेन निश्चिकाय यतः आत्मनि स्वस्मिन् रतिः प्रेमा भवेत् । प्रेम्णो हि प्रथमावस्था रतिः ॥ ३४ ॥

सा च रतिः, येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् इति भगवद्वाक्येनाग्रे प्रतिपादयिष्यमाणा शान्तिप्रीति-सख्यवात्सल्यप्रियताभिधाना पञ्चविधा भवति । तत्र प्रथमं शान्ताख्याया रतेरसाधारण्येन प्रकारं विषयालम्बनञ्च दर्शयति भगवानिति । आत्मना स्वस्य जीवस्यात्मना अन्तर्यामिणैव स्वस्मिन्निव सर्व्वभूतेषु सर्व्वव्यापकत्वात् तद्रूपी भगवान् हरिः लक्षितः शान्तभक्तैरनुभवगोचरीकृत इत्यर्थः । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति भगवदुक्तेः । ननु जीव एव कथं लक्ष्यते तदन्तर्यामी वा येन भगवान् कृष्णो लक्षयितव्यः तत्राह । दृश्यैः बुद्ध्यादिभिर्हेतुभिः द्रष्टा जीवः लक्षितः दृश्यानां जडानां बुद्ध्यादीनां दर्शनं हि चेतनं द्रष्टारं विना न सम्भवेदित्यनुपपत्तिमुखेन तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वात् वास्यादिवदिति व्याप्तिमुखेन चानुमितः तथा अनुमापयन्ति यानि लक्षणानि चिह्नानि तैर्द्रष्टा अन्तर्यामी च लक्षितः ; तानि च सर्व्वस्यापि जीवस्य कर्तृत्वभोक्तृत्वयोरस्वातन्त्र्यं तथा कर्म्मसाम्येऽपि फलतारतम्यं क्वचित् फलाभावश्चेत्यादीनि ज्ञेयानि । तथाहि जीवाः प्रयोजककर्तृस्वामिकाः, अस्वातन्त्र्यात् यथायोग्य-स्वामिदत्तकर्म्मफलतारतम्यतदभाववत्त्वाच्च, तक्षादिकर्म्मकरजनवदिति ॥ ३५ ॥

भक्तियोगो यतो भवेत् इत्यत्र रतिरात्मन् यतो भवेत् इत्यत्र च यत्पदवाच्यं साधनमाह तस्मादिति । यस्मात् न ह्यतोऽन्यः शिवः पन्थाः तस्मादित्यर्थः यस्मात् सर्व्वभूतेषु भगवान् लक्षितस्तस्मादिति वा । सर्व्वत्र सर्व्वदेति नात्र देशकालनियमोऽपेक्षितव्य इत्यर्थः । सर्व्वात्मना मनसा, न च कश्चन मनोवृत्तौ कामकर्म्माद्यपेक्षास्त्विति भावः । तस्मादेकेन मनसा भगवान् सात्वतां पतिः । श्रोतव्यः कीर्तितव्यश्च इत्यनेनैकवाक्यत्वात् । श्रोतव्य इति प्राधान्यात् श्रवणकीर्त्तनस्मरणान्युक्तानि, पादसेवनादीन्यपि ज्ञेयानि ॥३६॥

प्रीत्यादिचतुर्व्विधाया रतेः साधारण्येनानुभावमेव प्रेम्णः साधनं वदन् तत्फलमपि दर्शयति । आत्मनः स्वस्य यो [illegible] तस्य नारायणस्य रामस्य कृष्णस्य वा कृष्णस्यापि [illegible] बाल्यस्य पौगण्डस्य किशोरस्य वा कथामृतं तथा [illegible] तस्य सतां भक्तानां नारदादीनां हनुमदादीनां नन्दादीनां श्रीदामादीनां गोपबालादीनाञ्च कथामृतम् । पिबन्तीत्यनेन तत्कर्म्मकर्त्तृ [illegible] रतित्वं व्यञ्जितं तथात्वं एव माधुर्य्योपलम्भेन पानपदप्रयोगात्सिद्धः । अजातरतीनां तु तस्मात् सर्व्वात्मना इत्यनेन [illegible] रतेः साधनान्युक्तान्येव । आशयमन्तःकरणं पुनन्ति [illegible] फलं [illegible] साक्षात् [illegible] कृष्णादि संसिद्धिम् इत्यस्य प्रश्नस्योत्तरमुक्तम् ॥ ३७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वितीयेऽत्र द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥ २ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

न ह्यतोऽन्यः शिव इत्यादि भगवान् हरिरीश्वरः इत्यादिभिः श्लोकैः श्रवणकीर्तनध्यानमनमभ्यासमयमनियमादीन्यंगान्युक्तानि प्रायेण मुमुक्षोरावश्यकनित्यविधिसेवतःनैर्गुण्यवस्थां मंतेस्मगुणानुकथनेहरेरिति हृदोपगुणाईपदपदेपदेहत्यादिनाभिपराभक्तिः प्रदर्शिता तेनात्मना स्वात्मनुपैतीति भगवत्प्राप्तिरूपंतत्फलं च दर्शितमथेदानींच भक्त्यंगस्य पुरुषार्थत्वमाह नह्यतोन्य इति द्वाभ्याम् यतोभक्तियोगो भवेदतोऽन्यः संसृतौ विशतोजीवस्यशिवःक्षेमकरः पंथानैवास्तिहीतिनिश्चये ॥ ३३ ॥

भगवान्ब्रह्मा कूटस्थःस्थिरप्रज्ञः समीक्ष्य त्रिःकृत्वाऽऽलोच्य अध्यवसीयवेदमन्वीक्ष्य विचार्ययतः आत्मनिपरमात्मनिरतिर्भवेत्तदेवाध्यवस्यत निश्चितवान् ॥ ३४ ॥

ननु लक्ष्येकर्थंरतिःस्यादित्यत्राह भगवानिति सर्वभूतेषुपरतंत्रतयोपलभ्यमानेषुजन्मवृद्ध्यपक्षयमृत्युधीतोष्णादयोविकारास्तत्रोभगवान् हरिर्लक्षितोदृष्टोऽस्तिकिंवदृश्येघटादिभिर्बुद्ध्यादिभिकरणानामनुमानतैश्चबुद्ध्याद्यैःमःस्वात्मकरणानांनियंताजीवोऽनुमीयते तेनस्वात्मना सर्वपुण्यापुण्यसाक्षीदृष्टाऽनिष्टफलकेवुकर्मेषुबलानियोजकतयालक्षितोऽस्ति शिष्यबुद्धिवैचित्र्यार्थमिदमुक्तम् वस्तुतस्तुवेदैकवेद्यो भगवानस्तीत्याहलक्षयंतीतिलक्षणानिवेदवाक्यानितैःतदर्थस्मारकैःस्मृतिवाक्यैर्भगवान्लक्षितः"सर्वेवेदायत्पदमामनंति वेदैश्चसर्वैरहमेववेद्य" इत्यादिभिः ॥ ३५ ॥

यस्माद्वासुदेवेभक्तियोगोभवेदतोऽन्यःशिवःपंथानास्तितस्माद्धेतोः हेराजन् ! परभक्तिलाभायसर्वत्रसर्वावस्थासुसर्वदाभगवान्हरिःसतिबकारेश्रोतव्यः सतिश्रांतर्कीर्तितव्यः उभयाभावेस्मर्तव्यः नृणांनृभिः ॥ ३६ ॥

श्रवणादिफलमाह पिबंतीति भगवतः आत्मनः परमात्मनः सतांमहतांधनभूतंकथामृतम् अर्थात्तैरेवसद्भिःश्रवणपुटेषुसंभृतंपूरितंये पिबंति तेविषयैर्विदूषितमपवित्रीकृतमाशयमंतःकरणंपुनंति पवित्रीकुर्वंति, ततोनिर्मलंज्ञानं ततः पराभक्तिस्तयातस्यभगवतश्चरणसरोरुहयोरंतिकंनिकटंव्रजंतिगच्छंति ॥ ३७ ॥

इतिश्रीमद्भागवतसिद्धांतप्रदीपेद्वितीयस्कंधीयेद्वितीयाध्यायार्थप्रकाशः ॥ २ ॥

भाषाटीका ।

जिस इसयोग से भगवान् वासुदेव में भक्ति योग होजाता है इस योग से संसार में प्रवेश होनेवाले को दूसरा कोईमार्ग नहींहै ३३

भगवान् ने वेदको सब प्रकारसे बुद्धि पूर्वक तीन वखत देखकर निर्विकार स्वरूप ने यह निश्चय किया कि जिससे परमात्मा में रति होसके वही परम पुरुषार्थ है ॥ ३४ ॥

भगवान् सर्वभूतात्मा सर्वसाक्षी श्रीहरि दृश्य अनुमापक बुध्यादि गुणोंसे स्वरूपही से लक्षित होतेहैं ॥ ३५ ॥

हे राजन् ! तिससे सर्वकाल सर्व देशमें भगवान् श्रीहरिही मनुष्यों के श्रोतव्य तथा कीर्तनीय तथा स्मरणीय होतेहैं ॥ ३६ ॥

*जो पुरुष भगवान् परमात्मा का कथारूप अमृत जोकि सज्जनोंका जीवनहै तिसको कर्णरूपी दोनाओं में भरकर पीते हैं वेपुरुष विषयोंसे दूषित अंतःकरणको नाशकर के उस परमात्मा के चरण कमल के समीप को चले आतेहैं ॥ ३७ ॥

इति द्वितीयस्कंध का दूसरा अध्याय ॥ २ ॥

तृतीयोऽध्यायः ।

शुक उवाच । एवमेतन्निगदितं पृष्टवान् यद्भवान् मम ।
नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणाम् ॥ १ ॥
ब्रह्मवर्च्चसकामस्तु यजेत ब्रह्मणः पतिम् ।
इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ २ ॥
देवीं मायान्तु श्रीकामस्तेजस्कामो विभावसुम् ।
वसुकामो वसून् रुद्रान् वीर्य्यकामोऽथ वीर्य्यवान् ॥ ३ ॥
अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान् ।
विश्वान् देवान् राज्यकामः साध्यान् संसाधको विशाम् ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं शृण्वतो मुनेः ।
भक्त्युद्रेकेण तत्कर्म्मश्रवणादर ईर्य्यते ॥ ० ॥

इदानीम् अन्यदेवताभजनस्यापि पुत्रादिभजनवदेव तुच्छफलत्वेन हेयत्वं वक्तुं पूर्व्वोक्तमनुवदति एवमिति । ममेति माम् । कदाचिद्दैवयोगेन मनुष्यत्वं प्राप्तेषु जीवेषु ये मनीषिणस्तेषां तत्रापि ये म्रियमाणास्तेषां विशेषतः एवम् एतत् हरिकथाश्रवणादिकं निगदितं विहितमित्यर्थः ॥ १ ॥

ब्रह्मणः पतिं वेदपतिं ब्रह्माणम् । इन्द्रियपाटवकामस्त्विन्द्रम् । प्रजापतीन् दक्षादीन् ॥ २ ॥

मायां दुर्गाम् । विभावसुम् अग्निम् । वसुकामः धनार्थी । वीर्य्यं प्रभावः तत्कामः वीर्य्यवान् सन् रुद्रान् यजेत ॥ ३ ॥

अन्नाद्यं भक्ष्यं भोज्यं (भोग्यं) च । अदितेः सुतान् द्वादशादित्यान् । विशां देशस्थप्रजानां स्वाधीनतामिच्छन् साध्यान् यजेत ॥ ४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

० ॥ १—४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एवंमुमुक्षोर्भगवच्छ्रवणादिकंकर्तव्यमित्युक्तम् अथतदेवव्यतिरेकमुखेनप्रदर्शयितुमन्यदेवतानांक्षुद्रफलत्वंवक्ष्यन्पूर्वोक्तमनुवदति एवमिति मनुष्येषुकदाचिद्दैववशान्मनुष्यत्वंप्राप्तेषुजीवेषुयेमनीषिणः तेषांतत्रापियेम्रियमाणास्तेषांविशेषतोयत्कर्तव्यंपुरामांप्रतिपृष्टवान् तद्भगवच्छ्रवणादिकमेवेत्येवंनिगदितमुक्तमित्यर्थः ॥ १ ॥

कामफलप्राप्त्यर्थमन्येषांदेवतानांभजनमाह ब्रह्मवर्चसेत्यादिना ब्रह्मवर्चसंकामयमानः ब्रह्मणस्पतिंवेदपतिंयजेत इंद्रियकामः इंद्रियसामर्थ्यकामःइंद्रंयजेतेत्यनुषंगः एवमग्रेऽपि प्रजापतीन्दक्षादीन् ॥ २ ॥

देवींदेवस्यविष्णोःसंबंधिनींमायांविस्मापनीयशक्तिं विभावसुमग्निं वसुकामः अर्थकामः वसून्यजेत वीर्यकामस्तुरुद्रान्यजेत यजनफलमाह वीर्यवानितिभवेदितिशेषः इदंसर्वंचतत्फलावाप्तेरुपलक्षणम् ॥ ३ ॥

अन्नंभोज्यम् आद्यंभक्ष्यं खरंविशदमभ्यवहार्यंभोज्यंखरंकठिनंविशदंविविक्तावयवंभक्ष्यमितिविशेषः तदुभयकामोऽदितियजेत् अदितेःसुतान्देवानादित्यान्वाविशांसाधकःदिक्पतित्वकामः ॥ ४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

हरेःश्रवणादिजनितभगवद्भक्तिरेवाशेषिताशेषपुरुषार्थसाधनंनान्यदन्यदेवतायागादिकंप्रातिस्विकफलंतदपिहरेर्यायत्तमित्येतदस्मिन्नध्यायेनिरूप्यते तत्रप्रथमंतावद्वृत्तमनुवदति एवमिति. भवान्मनुष्येषुमध्येम्रियमाणानांमनीषिणांनृणांयत्कर्तव्यत्वेनमत्सकाशात्पृष्टवान्तदेवंनिगदितं यद्वा मनुष्येषुम्रियमाणानांनृणांयत्कर्तव्यत्वेनमनीषिणामतंपृष्टवानेतदिति ॥ १ ॥

इदानींप्रातिस्विकफलप्रदयागप्रकारमाहब्रह्मेति ब्रह्मवर्चसकामोब्रह्माध्ययनसंपत्कामः । शिष्यप्रशिष्यादिषुवेदप्रणेतृत्वेन ब्रह्मणस्पतिं वेदस्यपतिंबृहस्पतिं बृहआंगिरसजीवकमकामलशब्दवाच्यंस्यादितिधातास्मि यजेत । तस्तंभोक्ततस्यबृहस्पतेरितिशेषः तुनाप्रजापतिषुचिरंसूर्यपति इंद्रियकामश्चक्षुरादींद्रियपाटवकामःशुक्लस्तंभवकामोवा प्रजाकामःप्रजातुजनपुत्रपौत्रादितियावत् प्रजापतीन्कश्यपादीन् ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

[illegible] विभावसुमग्निं "तेजोबलेप्रभावेऽप्यज्योतिष्यर्चिषि[illegible]" तिच वसुकामो हिरण्यकाम: वीर्यकाम: "वीर्यंपराक्रमेतेजस [illegible]ऽपि" इतिच ॥ ३ ॥

विश्वान्देवान्साध्यान् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ:

॥ ० ॥ १ ॥ २ ॥

वीर्यवान् गलकुंज्जरनादिमान्हस्तवानित्यर्थ: ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

श्रोतव्यविषयस्त्वेनतस्यमेवं निरूपितम् । उद्देशोनास्यनिपुणोसाधनं विनिरूप्यते ॥ १ ॥
भरद्वसाधनं वाप्यं हरेर्वाप्यत्र संमतम् । अन्यथाक्रियमाणस्तु विमर्शोऽप्यर्थतां व्रजेत् ॥ २ ॥
इंद्रियाणामनुष्ठत्वेह्यनुकूलेतथेश्वरे । साध्यं संपद्यते पूर्णमतोऽत्रद्वयमीर्यते ॥ ३ ॥
अज्ञापितदभिप्रायात् श्रोतुर्वक्तुश्च गम्यते । तस्मात्साधनसंयुक्त: शृणुयादंतरो नृपा ॥ ४ ॥

एवमध्यायद्वयेन श्रवणं सविषयं निरूप्य महाफले श्रवणे सर्वेषामप्रवृत्तिदृष्ट्वा किंचिदस्ति निमित्तं यत: सर्वे न प्रवर्तते इत्याशंकायां विषयवस्त्वाभि मुख्यात् करणदोषो वा तदधिष्ठातृदोषो वा भवेत् । इत्याशंक्य तयोरप्यधिष्ठातृबलिष्ठत्वात्तत्प्रतिबंधादेव श्रवणादिष्वप्रवृत्तिरिति विनिश्चि त्य देवतानां भजने तत्प्रतिबंधो गमिष्यतीति पूर्वं देवतांतरभजनं साधनमियम् । ततइंद्रियाणां च शोधनमित्याशंक्य देवतांतरभजने पुनर्बहिर्मुखत्वा- त्तेषां नियतफलजनकत्वात्तत्त्वप्रतिबंधाभावार्थं क्रियमाणे भजने दोषांतरमापद्येतेति तेषां फलानां नियतत्वं प्रतिपादयितुं प्रथमं पूर्वं [illegible] निवा- रयितुं पूर्वोक्तमुपसंहरति एवमेतदिति मममांप्रति नृणांमध्ये येम्रियमाणा: तेषामप्युक्तं मनुष्याणामपि मध्ये ये मनीषिण: तेषामप्यर्थं श्रवणादि कमुक्तमित्यर्थ: ॥ १ ॥

पूर्वोक्तमुपसंहृत्य देवतांतरभजननिराकरणार्थं स्वमते अष्टाविंशतिदेवा: तत्स्वरूपा: वेदेष्वपि त्रयस्त्रिंशद्देवा: वसवो रुद्रा आदित्या: इंद्र: प्रजापतिश्चे ति [illegible]का: तत्स्वरूपेण । किंबहुना सर्वे ते एवंतभूता: ते त्वष्टाविंशति: । एते देवा: कला विष्णोरितिवाक्यात् । तेच प्रजापतिप्रभृति सोमांता: । [illegible] ब्रह्मवर्चसकाम: गुणाभिमानिनी देवता ब्रह्मणस्पति: वेदादिकर्ता अग्निर्माता चेत्यर्थ: । तद्भजने ब्रह्मतेजो भवतीति ब्रह्मवर्चसकाम एवतं भजेदित्यर्थ: तत: सत्त्वाभिमानिनी इंद्रो देवतायत्स्वरूप: तद्भजने इंद्रियसिद्धिर्भवतीति इंद्रियकामस्तं भजेत । एवमुत्तरत्रापि । प्रजाकाम: पुत्रकाम: प्रजापतीन्म रीच्यादीन् तमोधिष्ठात्रीदेवताम् ॥ २ ॥

देवीं मायां प्रकृत्यधिष्ठात्रीं देवताम् । श्रीकाम: धनकाम: संपत्तिरूपं धनम् । तेजस्काम: स्वरश्मिवधृष्यं तेज: दुर्धर्षत्वमिति यावत् । विभावसु- रग्नि: वसुकाम: धनमात्रकाम: वसून्द्रोणादीन् । रुद्रान्वामादीन् वीर्यकाम: पराक्रमकाम: । अत्र फलेविशेषमाह अथवीर्यवानिति तदनंत- रमेव वीर्यवान् भवति वागभिमानिनी देवता अग्नि: गंधाभिमानिनी देवता वसव: रुद्रा आकाशस्य । अदितिर्भूमे: ॥ ३ ॥

अन्नाद्यकाम: अन्नभोजनकाम: अन्नमक्षणसामर्थ्यमन्नसमृद्धिर्वा । स्वर्गकाम: स्वर्गलोककाम: अदिते: सुतान्द्वादशादित्यान् । तेजोऽभिमा- निनी विश्वेदेवा: विश्वाया: पुत्रा: राज्यकाम: राजत्वकाम: साध्यान्साध्याया: पुत्रान् विशां देशस्थप्रजानां संसाधक: स्वाधीनकरत्वेच्छु: विश्वेदे [illegible] साध्याश्चायो: ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

तृतीये तु नृणां क्षुल्लफलेवान्यसुरार्चना ।
तथैवेन्द्रियवैफल्यश्चोक्तं भक्तिमृते हरे: ॥

म्रियमाणानां नृणां कृत्यं यत् पृष्टं तदेतत् योगमते स्मृतिद्वयं निगदितम् । तथा तेष्वेव मनुष्येषु मध्ये ये मनीषिणो म्रियमाणास्तेषां भवद्विधानामेवम् एतत् श्रवणकीर्तनस्मरणकथामृतादि निगदितम् ॥ १ ॥

ये च तेष्वेव मनुष्येषु मध्ये मन्दधियस्तेषाञ्च कृत्यं शृण्वित्याह । यद्वा किं वा भजनीयमिति यत् पृष्टं तत्र प्रथमं मन्दधियां भजनी- यानाह ब्रह्मवर्चसेत्यादिना कामकामो यजेत सोमम् इत्यन्तेन । ब्रह्मण: पतिं वेदपतिं ब्रह्माणम् । प्रजापतीन् दक्षादीन् ॥ २ ॥

मायां दुर्गाम् । विभावसुम् अग्निम् । वीर्यवान् बलवान् पुरुष: वीर्यकाम: बहुस्त्रीसम्भोगार्थं शुक्राधिक्यकामश्चेत् रुद्रान् यजेत् ३

अन्नाद्यं भोज्यं भक्ष्यञ्च । अदिते: पुत्रान् द्वादशादित्यान् । विशां कृषिवाणिज्यादीनां साधक: साधने प्रवृत्त: साध्यान् ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप: ।

[illegible] जनस्यमोक्षहेतुतयाशुश्रूषादेयत्वमुक्तमिदानींतदेवद्रढयितुमितरदेवभजनस्यतुच्छफलत्वं [illegible] पूर्वोक्तमनुवदति एवमि ति मनुष्येषु [illegible] योगेन मनुष्यत्वं प्राप्तेषु [illegible] मनीषिषु तेषां [illegible] म्रियमाणानां [illegible] प्रतिममप्रति पृष्टवान् । तदेवमे [illegible] निगदितमुक्तम् ॥ १ ॥

[illegible] कामयमानो जन: ब्रह्मणस्पतिं वेदपतिं यजेत् पूजयेत् इंद्रियसामर्थ्यकाम: प्रजापतीन्दक्षप्रभृतीन् ॥ २ ॥

देवीं [illegible] विभावसुमग्निं वसुकामो धनकाम: वीर्यकाम: प्रभावकाम: रुद्रान्यजेत [illegible] वीर्यवान्स्यात् ॥ ३ ॥

आयुस्कामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत् ।
प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥ ५ ॥
रूपाभिकामो गन्धर्व्वान् स्त्रीकामोऽप्सर-उर्व्वशीम् ।
आधिपत्यकामः सर्व्वेषां यजेत परमेष्ठिनम् ॥ ६ ॥
यज्ञं यजेत् यशस्कामः कोषकामः प्रचेतसम् ।
विद्याकामस्तु गिरिशं दाम्पत्यार्थ उमां सतीम् ॥ ७ ॥
धर्म्मार्थ उत्तमःश्लोकं तन्तुं तन्वन् पितॄन् यजेत् ।
रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अन्नंभोज्यंसंश्लिष्टावयवम् आद्यंभक्ष्यंविविक्तावयवम् ततुभयकामः अदितेःसुतानादित्यान् विश्वांदेवाश्च प्रजानांसंसाधकः साध्यान् यजेत ॥ ४ ॥

भाषा टीका ।

श्रीशुकउवाच—यह हमने तुम से कहा है जोकि तुमने हमसे पूछा है जोकि मनुष्यों के मध्यमें अवश्य मरने वालों को कर्त्तव्य है ॥ १ ॥

ब्रह्मतेज की कामना करने वाला पुरुष ब्रह्मा का यजन करे इंद्रिय पुष्टि कामना वाला इन्द्रका यजन करे प्रजाकी कामना वाला दक्षादि प्रजापतीयों को पूजै ॥ २ ॥

लक्ष्मी के कामनावाला मायादेवीकूं पूजै तेजकी कामना वाला अग्नीको पूजै धनकी कामना वाला वसुदेवताओं को पूजै और वीर्य्य की कामना वाला रुद्रों को पूजै ॥ ३ ॥

अन्नभोजनकामना वाला अदितिकों पूजै स्वर्ग कामना वाला देवताओंको पूजै राज्यकी कामना वाला विश्वदेवों कों पूजै देशोंकापति होना होतो साध्य नामक देवताओं का पूजन करै ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

इलां पृथ्वीम् । प्रतिष्ठा स्थानादप्रच्युतिः । रोदसी द्यावाभूमी ॥ ५ ॥

अप्सरसामसौ उर्व्वशी च ताम् ॥ ६ ॥

यज्ञं यज्ञोपाधिं विष्णुम् । कोषो वसुसञ्चयः । वसुकाम इत्यत्र धनमात्रमिति भेदः । दाम्पत्यम् अन्योऽन्यप्रीतिः । तदेवार्थो यस्य सः ॥ ६ ॥

धर्म्मार्थः धर्म्मकामः उत्तमःश्लोकोपाधिं विष्णुम् । तन्तुं तन्वन् सन्तानवृद्धिमिच्छन् । रक्षा बाधानिवृत्तिः तद्कामः पुण्यजनान् यक्षान् ; ओजो बलं तत्कामः मरुद्गणान् देवान् ॥ ८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तट्टिप्पणी ।

वसुकाम इत्यत्र इति । पूर्व्वोक्ततृतीयश्लोके इति यावत् ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

पुष्टिर्देहबलंतत्कामःइलांपृथ्वींयजेतप्रतिष्ठाकामःस्थानादप्रच्युतिकामःरोदसीद्यावापृथिव्यौ तयोःसर्वलोकाधारत्वाल्लोकमातृत्वम्॥५॥

रूपमभिकामयमानः अप्सरसामसावुर्वशीचतां सर्वेषामाधिपत्यकामः प्रभुत्वकामःपरमेष्ठिनंब्रह्माणम् ॥ ६ ॥

यज्ञंविष्णुं कोशोवसुसंचयः वसुकामइत्यत्रधनमात्रमितिभेदःप्रचेतसंवरुणंविद्याकामःज्ञानकामः दांपत्यार्थंदंपत्योरन्योऽन्यप्रीत्यर्थं सतीमित्युमाविशेषणंपतिव्रतामुमांदेवीमित्यर्थः ॥ ७ ॥

उत्तमश्लोकं विष्णुं तंतुंसंतानंतन्वन्विस्तारयन्सन्तानिमृद्धिकामइत्यर्थः रक्षाकामः बाधानिवृत्तिकामः पुण्यजनान्यक्षानोजस्कामः बलकामः ॥ ८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

इलांभूमिं प्रतिष्ठाकामःस्थानाप्रच्युतिकामः लोकमातरौलोकस्यमातापितरौ मातापृथिवी द्यौःपिता "मधुद्यौरस्तुनःपिता" इतिश्रुतेः ॥ ५ ॥

अप्सरसामसावुर्वशीचेत्यप्सर उर्वशी । तां परमेष्ठिनंचतुर्मुखम् ॥ ६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

यक्षमिति फलमेदायुक्तवक्ति: कोशकामो निधिकाम: प्रचेतसं वरुणं [illegible] विद्यार्थं गिरिशं सुखसूतिकरं दांपत्यार्थं उमां हितदांपत्याय ॥ ७ ॥
धर्मार्थं [illegible] पुण्यफलार्थमुत्तमश्लोकं विष्णुं "अकामो [illegible] मोक्षकाम [illegible] यजेत् अथवा सर्वकामोऽयः स विष्णुं पुरुषं यजेदि" इत्यनेन [illegible] पुरुषोत्तम इति निश्चीयते अकाम: पुरुषं पुमानित्य चापि पुरुषो विष्णुरेवास्मात् पुरुषप्रमाणात् तंतुं संतत्य विच्छेदं तन्वन् विततं कुर्वन् । पुण्यजनान् रक्षार्थमग्निमप्राहीन् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ: ।

उत्तम:श्लोका: पुण्यश्लोका धार्मिका नलादय: तदुपाधिं तदधिष्ठानकं विष्णुमित्यर्थ: । उत्तम:श्लोक: धर्मो वरणं ख्यातिर्वा ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

आयु:काम: आयुष्याभिवृद्धिकाम: आश्विनौ अश्विनीकुमारौ आयुर्देवता पुष्टिकाम: स्थूलत्वकाम: सर्वोऽन्योऽप्यकामयते इलाभूमि: शब्दाधिष्ठानदेवता प्रतिष्ठाकाम: लोकेसम्माननाकाम: पूजयति योग्यस्यैवैषा कामना एवमन्यत्रापि ज्ञातव्या रोदसी द्यावापृथिव्यौ लोकानां मातरौ लोकमातृत्वंगुणा: मातृकापूजायां विहितत्वा इस्ताभिमानिनी ॥ ५ ॥

रूपाभिकाम: सौंदर्यकाम: गंधर्वान् विश्वावसुप्रभृतीन् पतारान्प्रभृतीदेवता: "एतेवैगंधर्वाप्सरसोयद्राष्ट्रभृत" इतिश्रुते: स्त्रीकाम: सुंदर स्त्रीप्राप्तिकाम: अप्सरसोरूपामुर्वशीम् अधरारधिदेवतां देवपत्नीमप्येवा आधिपत्यकाम: सर्वेषामहमधिपतिर्भविष्यामीति परमेष्ठिनं गुणाधिष्ठातारम् ॥ ६ ॥

यज्ञं यज्ञपुरुषं वरुणाधिष्ठात्री यशस्काम: कीर्तिकाम: कोशकाम: भंडारकाम: कोशोधनसंचय: प्रचेतसं वरुणं रसनेंद्रियाधिष्ठातारं विद्याकाम: ब्रह्मविद्यादिविद्या: गिरिशं महादेवं अहंकाराधिष्ठातारं दांपत्यार्थं दंपत्यो: प्रीत्यर्थम् उमां सतीं जन्मद्वयव्यापिनीं महादेवभार्याम् ॥ ७ ॥

धर्मार्थ: धर्मसिद्ध्यर्थमुत्तमश्लोकं वेदवेद्यं तंतुं तन्वन् संततिविस्तारयन् पितृन् अग्निष्वात्तादीन् रक्षाकाम: भूतादिभ्य: रक्षांसि [illegible] पुण्यजनान् यक्षादीन् ओजस्काम: इंद्रियबलकाम: मरुद्गणान् दितिपुत्रान् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

इलां पृथ्वीम् । प्रतिष्ठा स्वपदादप्रच्युति: । रोदसी द्यावापृथिव्यौ ॥ ५ ॥
अप्सरा अप्सरासामुर्वशी च ताम् ॥ ६ ॥
यज्ञं यज्ञसंज्ञमिन्द्रम् । दाम्पत्यं स्त्रीपुरुषयो: परस्परोपरि प्रीति: ॥ ७ ॥
उत्तम:श्लोकं धर्मम् । तन्तुं तन्वन् सन्तानवृद्धिमिच्छन् । पुण्यजनान् यक्षान् । मरुद्गणान् देवान् ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप: ।

पुष्टिकाम: देहस्वबलंस्थौल्यमिच्छन् इलां पृथ्वीम् प्रतिष्ठाकाम: स्थानादप्रच्युतिकाम: रोदसी द्यावापृथिव्यौ लोकमातरौ लोकाधारभूते ॥ ५ ॥

रूपाभिकाम: रूपमभिकामयमान: अप्सरा अप्सरासामुर्वशीं च ताम् आधिपत्यकाम: प्रभुत्वंकामयमान: परमेष्ठिनं ब्रह्माणम् ॥ ६ ॥

यज्ञं यज्ञमूर्तिं विष्णुम् कोशकाम: विपुलधनालयकाम: प्रचेतसं वरुणं दंपत्यांरन्योऽन्यहितां वरणं दांपत्यं तदेवार्थ: प्रयोजनं यस्य स: ॥ ७ ॥

धर्मार्थ: धर्मकाम: उत्तमश्लोकं सर्वोत्तमकीर्तिविष्णुम् तंतुं तन्वन् सतानंविस्तारयन् रक्षाकाम: बाधानिवृत्तिकाम: पुण्यजनान् यक्षान् ओजस्काम: बलकाम: ॥ ८ ॥

भाषा टीका

आयु की कामना वाला अश्विनी कुमार देवों को पूजे पुष्टि की कामना वाला पृथि को पूजे प्रतिष्ठा चाहने वाला पुरुषतो लोक के माता पिता आकाश पाताल को पूजे ॥ ५ ॥

रूपकी कामना वाला गंधर्वों को पूजै स्त्रीकी कामना वाला उर्वशी अप्सरा को पूजे सबका अधिपति होने की कामना वाला चतुर्मुख ब्रह्मा को पूजे ॥ ६ ॥

यश की कामना वाला यज्ञनाम विष्णु को पूजे खजाने की कामना वाला वरुण को पूजे विद्या ज्ञान की कामनावाला श्रीमहादेवजी को पूजे स्त्रियोंके पति पत्नी भाव चाहने वाला सतीजी पार्वती को पूजे ॥ ७ ॥

धर्म चाहने वाला उत्तम श्लोकोपाधि विष्णु को पूजे संतानों के विस्तार की कामना वाला अग्निष्वात्तादि पितरों को पूजे बाधा निवृत्ति के कामना वाला मनि सहर्षि यक्षों को पूजे तेज की कामना वाला देवगणों का पूजन करै ॥ ८ ॥

राज्यकामो मनून् देवान् निर्ऋतिं त्वभिचरन् यजेत्।
कामकामो यजेत् सोममकामः पुरुषं परम्॥ ९॥

अकामः सर्व्वकामो वा मोक्षकाम उदारधीः।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम्॥ १०॥

एतावानेव यजतामिह निःश्रेयसोदयः।
भगवत्यचलो भावो यद्भागवतसङ्गतः॥ ११॥

ज्ञानं यदाप्रतिनिवृत्तगुणोर्म्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसङ्गः।
कैवल्यसम्मतपथस्त्वथ भक्तियोगः कोनिर्वृतो हरिकथासु रतिं न कुर्य्यात्॥ १२॥

श्रीधरस्वामिकृत भावार्थदीपिका।

राज्यं राजत्वं तत्कामः मनून् मन्वन्तराधिपान् देवान्। राज्ञः कर्म्म राज्यं तत्कामः विश्वान् देवानिति विवेकः। अभिचरन् शत्रु-रक्तमिच्छन् निर्ऋतिं राक्षसम्। कामकामः भोगेच्छुः। अकामः वैराग्यकामः। पुरुषं परं प्रकृतिव्यतिरेकोपाधिविशिष्टम्॥ ९॥
अकामः एकान्तभक्तः। उक्तानुक्तसर्व्वकामो वा। पुरुषं पूर्णं परं निरुपाधिम्॥ १०॥

पूर्व्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह एतावानिति। इन्द्रादीनपि यजतां इह तत्तद्यजनेन भागवतानां सङ्गतो भगवत्यचलः भावः भक्तिः भवतीति यत् एतावानेव निःश्रेयसस्य परमपुरुषार्थस्य उदयो लाभः। अन्यत्तु सर्व्वं तुच्छमित्यर्थः॥ ११॥

भागवतसङ्गत इत्यनेन सूचितां हरिकथारतिं स्तौति ज्ञानमिति। यत् यासु कथासु ज्ञानं भवति। कीदृशम् आ सर्व्वतः प्रतिनिवृत्तम् उपरतं गुणोर्म्मीणां रागादीनां चक्रं समूहो यस्मात्। उत अनन्तरं तद्धेतुरात्मप्रसादश्च। यत्र यासु मनःप्रसादहेतुः गुणेषु विषयेषु असङ्गः वैराग्यञ्च। उभयत्रेति पाठे इहामुत्र च गुणेष्वसङ्गः। अथ कैवल्यमित्येव सम्मतः पन्था यो भक्तियोगः। निर्वृतः अवधानेन अनवधानेन निर्वृत इति वा। तासु हरिकथासु को न रतिं कुर्य्यात्॥ १२॥

श्रीराधारमणदास गोस्वामि विरचिता दीपन्याख्य तट्टिप्पणी।

विशेष इति। पूर्व्वोक्तचतुर्थश्लोकादिति शेषः॥ ९॥ १०॥

संयोगपृथक्त्वेनेति। सम्बन्धस्य भिन्नत्वेनेत्यर्थः। तत्तद्देवतायजने तत्तदुक्तफलसिद्धिरिति पृथक्त्वम्। तत्तद्देवताभजनेन पाप-क्षयात् भागवतप्रसङ्गः तत्सङ्गत्या च भगवत्यचला भक्तिरिति संयोगः खादिराद्विर्य्यादिति व्याख्यालेशः। अथवा—एकस्य तूभयत्वे संयोगपृथक्त्वम्। अस्यार्थः—एकस्य तु उभयत्वे उभयफलसाधकत्वे संयोगपृथक्त्वम्। यथा—खादिरो यूपो भवति, खादिरो वीर्य्य-कामस्येति यथैकस्य खदिरयूपस्य क्रत्वङ्गत्वं वीर्य्यसाधकत्वञ्च, तथात्र नानादेवताभजनं तत्तत्फलसाधकं हरिभक्तिफलसाधकञ्च। तत्रोभयफलसाधकत्वे स्थिते हरिभक्तिकामनयेन्द्रादयो यष्टव्याः नान्यकामनयेति समुदायार्थः। यथा गोप कुमारिकाणां कृष्णकामनया कात्यायन्यर्च्चनम्॥ ११—१९॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका।

राज्यकामःमनुरूपान्देवानभिचरन्शत्रुमरणमिच्छन्निर्ऋतिंराक्षसं कामकामःभोगेच्छुः अकामःवैराग्यकामःपरंपुरुषंपरमपुरुषं "योयो यांयांतनुंभक्त" इतिश्रीत्यान्द्रादिरूपिणोऽपिपरमपुरुषस्यैवतत्तत्फलप्रदत्वात् तत्तत्फलेप्सुभिरिज्यमानःपरमपुरुषएवतत्तत्फलानिप्रयच्छति "अनन्याश्रितयंतोमामि"तिरीत्यानुभजमानस्तत्तपवमुक्तिंप्रयच्छतीत्यभिप्रायः॥ ९॥

उदारधीरितिमोक्षकामविशेषणं तीव्रेणअविच्छिन्नेनभक्तियोगेन॥ १०॥

एवंयजद्भिःकर्मोमोक्षोवाप्यतइत्यत्राह एतावानिति इहास्मिँल्लोकेयजतांनिःश्रेयसस्यमोक्षस्योदयोलाभः एतावानेवएतदेवयद्भा गवतसंगाद्भगवत्यचलोभावइतियत्भागवतसंगात्भगवत्यचलोभावोऽस्तितिनिःश्रेयसोदयःसिद्धएव तस्माद्भागवतसंगात् भक्तिर्मोक्षस्योपायइतिभावः॥ ११॥

यद्भागवतसंगतइत्यनेनसूचितांहरिकथांप्रस्तौति ज्ञानमिति यासुहरिकथासुज्ञानमेभिःसंपत्स्यन्तेतासुहरिकथासुरतिंकोनकुर्य्यादित्यन्वयः यद्वाहरिकथारतिर्ज्ञानंयांप्रतिनिवृत्ताः गुणाः सत्त्वादिकार्याणिऊर्म्मयः अशनायापिपासाशोकमोहजरामृत्यवोयस्मात्तथाभूतंज्ञानमात्मप्रसादः चित्तनैर्मल्यम् उभयत्रलोकद्वयेगुणेषुशब्दादिषुविषयेष्वसंगोवैराग्यं कैवल्येनमुक्त्यासंमतःपन्थाउपायःकैवल्यसंमतपथः तथाभूतोभक्तियोगश्च एतानिसर्वाणि यस्यांतेसंपत्स्यंते तथाभूतासुहरिकथासुनिर्वृतः सुखितःरतिमासक्तिंकोवाकुर्यात्सर्वोऽपिकुर्यादेवेत्यर्थः॥ १२॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

अनिमित्तस्वरूपसोपत्तुष्टकर्मकुर्वन् निवर्तंते कोधादिरूपति मानंवस्तुत अकामोनिःशेषकामराहित्य पुरुषंपूर्णंपरंपुमान् ॥ ९ ॥

सकामोकामत्वस्तावमंतरात्याऽन्यप्राकामःसर्वकामः इच्छति सर्वकामोऽप्यवेवताशुभवामिच्छन्परंपूरुषंयजेतविष्णुयजनेसाधनमाह तीव्रे-णेति ॥ १० ॥

काम्यानुष्ठानस्ववद्यामुक्तिसाधनतास्मात्तत्प्रकारमाह एतावानिति इहकर्मभूमौयजतांकाम्यानुष्ठानंकुर्वतांनिःश्रेयसोदयएतावान् भागवतानांसंगतःसेवालक्षणात् भगवतिहरौभक्तोभावोभक्तिलक्षणरतिरित्यर्थः ॥ ११ ॥

भागवतसंगादचलोभावःकथंस्यादित्याशंक्यतेषांसहसिप्रसक्तानांहरिकथामृतानांश्रवणलक्षणपानादिनाप्रसक्तांतःकरणस्यपुंसोहरेरि-तरविषयविरक्तस्य ज्ञानसाधनंभगवत्यचलाभक्तिस्तयाज्ञानंभविष्यतीत्याह ज्ञानमिति यदासत्सभासुप्रसक्ताभिःश्रुताभिर्याभिर्हरिकथाभिः पुंसःआत्मप्रसादोमनसःप्रसन्नतानैर्मल्यलक्षणा तदाभवज्ञइहपरत्रचभयवर्गोगुणेषुविषयेष्वसंगःफलस्नेहराहित्यलक्षणावैराग्यंभवति अथ भक्तिसाधनवैराग्यजन्मानंतरंकैवल्यसम्भृतपथः सम्यक्संपादितमोक्षमार्गोभक्तियोगोजायतेतुशब्दात्तज्ज्ञानंस्यापिअथात्मनोहरेः प्रसाद-स्यानंतरंहरेरपरोक्षज्ञानंभवति कीदृशंप्रतिनिवृत्तमपक्रांतंसत्त्वादिगुणानिमित्तानामस्तिजायतइत्यादिषड्भूर्मीणांचक्रंपुनःपुनरावर्तनंयेनतत्त-थोक्तं यद्वापसारितसत्त्वादिगुणाएवऊर्मयस्तरंगास्तेषांचक्रंयेनतत्तथेति यद्वा यासांहरिकथानांश्रवणाद्भगवदपरोक्षज्ञानंतदाप्रतिनिवृत्त गुणोर्मिचक्रंसत्त्वादिगुणनिमित्ताशनापिपासाशोकमोहरागद्वेषलक्षणाऊर्मयस्तेषांचक्रंनिरस्तंभवतितस्मादात्मप्रसादस्तस्मात्रुभयत्रगुणे-ष्वसंगस्तस्माद्वैराग्यात् केवलंयत्संश्रियतेऽनेनेतिकैवल्यसंभृतमपरोक्षज्ञानंतदेवपंथा मार्गोयस्यसतथोक्त एवंविधोभक्तियोगोजायते अथ-कस्मात्कोनिवृत्तोरसज्ञःपुरुषस्तासुहरिकथासुरतिंनकुर्यादित्यर्थः ॥ १२ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अकामः सर्व्वकामनाक्षयकामः । अत्र टीकायां पुरुषं प्रकृतिव्यतिरेकोपाधिमीश्वरमिति—प्रकृतेः सकाशात् यो व्यतिरेकः पूर्व्वं ततसम्बन्धमारोप्य पश्चात् तदभावचिन्तनं, वस्तुत एव तदभावात् सोऽप्युपाधिर्यस्य तमित्यर्थः । प्रकृत्येकोपाधिमिति तु पाठः क्वचित् ॥ ९ ॥

एवं प्राक्तनाध्यायाभ्यां कर्म्मयोगज्ञानेभ्यः श्रेष्ठत्वमुक्त्वा तदुत्तराध्यायेऽपि सर्व्वदेवतोपासनेभ्यः श्रेष्ठत्वप्रपञ्चनेन भगवद्भक्तियोग-स्यैवाभिधेयत्वमाह अकामः सर्व्वकामो वा इति । टीका च—अकाम एकान्तभक्तः । उक्तानुक्तसर्व्वकामो वा । पुरुषं पूर्णं परं निरुपा-धिम् इत्येषा । तीव्रेण दृढेन स्वभावत एवानुपघात्येनेति विच्छानवकाशतोक्ता । कामना तु याद्दच्छिकेनापि स्यात् । यथोक्तं महा-भारते—भक्त्याख्याने श्रवणं विप्राणां स्मृतिः सेवास्वदेहमनि । स्वभोज्यस्यार्पणं दानं फलमिन्द्रादिदुर्लभम् ॥ इति । तदुक्तं श्रीकर्द्दमं प्रति श्रीकपिलेन—न वै जातु मृषैव स्यात् प्रजाध्यक्ष मदर्हणम् इति अथवा यस्तत्कामस्तेनैव यजेत । ततश्च शुद्धिभक्तिसम्पादनायैवान्ने पर्य्यवसित्यत्यसावित्यमिप्रायेणा सविशेषणमुपादिष्टम् । तदनेन एकान्तभक्ते मुमुक्षौ वा तद्भक्तियोगस्यैवाभिधेयत्वं किं वक्तव्यम् अपि तु सर्व्वकामेष्वपीति तदेव सर्व्वथापि निर्णीतम् । यद्वा अकामत्वं भजनीयपरमपुरुषसुखमात्रस्वसुखत्वम् । भक्तिमात्रकामत्वे व्याख्याते धर्म्मपुरुषार्थैर्न्यतिव्याप्तिःस्यात् तीव्रेण सर्व्वेषु साध्येषु परमसाधकतमेन ॥ १० ॥

किञ्च एतावानिति । टीका च—पूर्व्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह एतावानिति । इन्द्रादीनपि यजताम् इह तत्तद्यजनेन भागवतानां सङ्गतो भगवत्यचलः भावः भक्तिः भवतीति यत् एतावानेव निःश्रेयसस्य परमपुरुषार्थस्य उदयः लाभः । अन्यत्तु सर्व्वं तुच्छमित्यर्थः इत्येषा । अत्र इन्द्रमिन्द्रियकामस्तु इत्याद्युक्तम् इन्द्रियपाटवादिकं पृथक्त्वेन फलं । भागवतेन संयोगे तु भावः फलम् । [खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्येत्यादौ] खादिरयूपसंयोग यागस्य फलवैशिष्ट्यवदिति ज्ञेयम् ॥ ११॥

ज्ञानमिति । प्रपञ्चातीतत्वात् कैवल्यरूप एव विद्वद्भिः सम्मतः पन्थाः भगवत्प्राप्त्युपायश्चेत्यर्थः । एको नारायणो देव इत्यादौ "परावराणां परम आस्ते कैवल्यसंज्ञितः" इत्युक्तदिशा कैवल्याय श्रीनारायणं लब्धुं सम्मतः पन्था उपायो यो भक्तियोगस्तत्प्रमा स॰च यत्रेति वा ॥ १२ ॥

———

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

राज्यकामः राज्याधिपत्यकामः मनून्देवान्स्वायंभुवादीन् तन्मन्वंतरदेवताश्च निःऋतिंमृत्युम् अभिचरन्शत्रुमरणमिच्छन् कामकामः कंदर्पं—वृद्धिमिच्छन् सोमम् । अकामःसर्वकामनाराहितस्तु परंपुरुषंपुरुषोत्तमम् अथमेकोनत्रिंशत्सर्वतस्यपतिः सोमोमनसः निःऋतिःपायो मनवोदेवाश्चक्षुषः मरुद्गणाःत्वचः पुण्यजनाःअरुस्य पितरोमहत्तत्त्वस्य उत्तमश्लोकः पुरुषस्य उमाश्रोत्रस्य ॥ ९ ॥

एवंकामनाभेदेनप्रकृतोपयोगिसर्वबलसिद्ध्यर्थंतत्तद्देवताभजनंकर्तव्यमित्युक्तं वैराग्यार्थंचभगवान् तत्रकामनाःब्रह्मवर्चसादिविषयाः । इत्यादिभक्तिःसाक्षात्परब्रह्मणोवासुदेवस्यअसाधारणोधर्मः स्नेहात्मानंदैवप्रकाशतेयदात्रवर्चः तेजः प्रकाशकंभवति वेदेनब्रह्ममात्रप्रकाश-वितुंशक्यंनतुब्रह्मधर्मोःसाक्षात्नापिप्रत्यक्षतया प्रत्यक्षसमवेतानपिधर्मानभिव्यंजकाभावे नप्रकाशन्ते अतोब्रह्मणि भगवतियद्वर्चः तदेवरविप्रका-शकेवरविपदस्तत्वसर्वपश्येत् अतः प्रथमंब्रह्मवर्चसकामनाकर्तव्या वेदस्यवाप्रकाशनसामर्थ्यं नहिचक्षुर्व्यतिरेकेणास्फीतालोकमध्यवर्त्यविषम-प्रकाशितं तद्रूपगतंवेदगतंवाकोवादातुंशक्तइतिविचारेयोब्रह्मणःपतिः वेदस्यवेदार्थस्यवानियामकः येनयातन्सामर्थ्यंतत्रानिहितंभवति तेनैव-सातुंशक्यइतिब्रह्मणमांसर्वोवसुदेवत्वाजगतिप्रकटनार्थैयादगुणदेवतासेवोपास्याप्रकटनार्थमेवतत्प्रवृत्तेःनापिकूटस्थं तदर्थं अप्रवृत्तत्वात् । एवत्रुस्वरूपाणिइंद्रियव्यतिरेकेणततोजीवात्माप्रकाशकेऽपिविषयंकेसेकरणाभावात् नज्ञातुंशक्यइतिइंद्रियमपेक्षम् इंद्रियगणेनैवभगवच्छा-स्त्रंप्रविचारी कोनुराजन्निंद्रियवानितिवाक्यात् तथेंद्रियेभ्यतोविषयमात्रमपिप्रकाशकिवाकर्तव्यंविज्ञानवदपिपदार्थेष्वनुबोधकत्वरूपत्वाभावादपे-क्षितेंद्रियाश्रित्यं इंद्रस्यदत्तंज्ञानद्विपदइंद्रियवीर्याणित्यादिश्रुतौतदिन्द्रियंप्रसिद्धं अन्यथातुनदरत्ववृत्प्रजापत्युपधारणं चक्षुत्वात् अतोकौकिकपदार्थेषु

मकरध्वजेन्द्रियप्राप्त्यर्थमिन्द्र उपास्यः तेनहितत्पुपायेनात [illegible]
[illegible]सेव्यः अन्यथेन्द्रस्यपुनःपुनरूपायनंसमयेव अतोविशेषेनं [illegible]
पुत्रादिरूपमपेक्ष्यते अन्यथाभगवद्भजनेनैमित्तिकत्वंनस्यात् तस्मात्ततोऽत्र प्रजाकामाः प्रजाः [illegible]
वसेव्याः तेहिप्रजया योऽभिप्रेतं कृतवंतइति इदानींभगवद्भजनेलक्ष्मीरूपासंपत्तिरपेक्षते [illegible]
वात् अतोभजनोपयिकांसंपत्तिमिच्छन्मायामेवभजेत तत्रैकामायाव्यामोहिका [illegible] तेजस्तेजस्वेअन्यवशाविष्टत्वात् देवता
रूपासात्त्विकी मोक्षदातुर्वासुदेवस्यमोक्षदानार्थमेवतादृशंरूपंगृहीतवतः तदुपयोगिसाधनसंपादनार्थेलक्ष्मीरेव "विष्णोर्हि [illegible]करो-
त्यैवात्मनस्तनु"मितिवाक्यात् तत्त्रार्थारूपेणमायारूपंगृहीतवती मयासहगंतव्यमितिनियोगकरणात्समायेत्यभिधानम् "इत्थंविविध[illegible]:
सतुवासुदेवनामाबभूवनिजकारणमुक्तिदाता तस्याज्ञयानियताऽथरमापिरूपंवत्रेद्वितीयमिवतत्प्रवदंति मायामि"तिवाक्यात् अतएवदुर्गान्दे-
माम्येतिवादिते किंच इंद्रियेणसंपत्त्यासहायेन प्रकाशेनचभगवद्धर्मेषुसमागमेतिपुरुषस्यधारणसामर्थ्यसिद्ध्यर्थंसत्स्विमन्तेजःअपेक्षते
अन्यथातेसमागतास्तत्रनानिविशेयुः निविष्टा वातदाश्रयंदहेयुः अतःस्वयोग्यतासिद्ध्यर्थंतेजःअपेक्षितं तद्धिसर्वाभिभावकंसर्वमेवरूपंस्वस
मानंकरोति तत्रगमविष्टमेवर्वाह्नाप्रासंविशेषेणभार्दीप्तिःवसुधनंयस्येतिविभावसुरग्निः शब्दनिर्वचनात् अतस्तेजस्कामःविभावसुमेवसेवेत।एवं
धनस्यापि भगवद्भक्तेषुआनत्यर्थश्रवणादिसिद्ध्यर्थमुपदेशनार्थंवायेयमपेक्षते साधनरूपश्रवणादिकं [illegible]
रूपं इष्टरूपत्वाच्चतदपेक्षातएव तत्तथाम्नायवसुष्वेवप्रतिष्ठितं तइमंलोकमयजन्निति श्रुतेः एवंवीर्यस्य बलरूपस्यापिभगवत्सेवोपयिकत्वात् बला
धिष्ठानदेवतावायोःस्थानभूतस्यांतरिक्षस्यरुद्राःप्रभवइति देवतापितद्धर्मेतिवीर्यकामःरुद्रानेवभजेत तेऽन्तरिक्षमयजन्नितिश्रुतेः एवमन्नाद्य
रपि अन्नभक्षणस्यवा "यद्यदिष्टतमंलोकेयच्चातिप्रियमात्मनः"इतिवाक्यात् अन्नाद्यमपिकाम्यं तत्रादितिरियमेवभूम्यधिष्ठात्रीदेवता।साहिदिति
रब्रवीद्वरंवृणुअथमयाभिगृह्णीध्वमित्युपाख्यानेतस्यास्तादृशत्वप्रसिद्धेःभूमौभगवद्भजनंकुर्वाद्व्यानांपदार्थानामभावात् स्वर्गेकर्तव्यमितिस्वर्ग
कामनाभवति तत्रादित्याःप्रभवःतेमुंलोकमयजन्नितिश्रुतेः विश्वेदेवास्तुराज्येअधिकारिणः सर्वदेवताधिष्ठातृदेवतारूपत्वात् राजाचसर्व
देवतामयः अतोऽत्रसर्वसंपत्त्याभजनसिद्ध्यर्थंराजत्वमपेक्षितं भक्तिमार्गस्त्वलौकिकइति असाध्यसाधकपदार्थसिद्ध्यर्थंतदधिकारिणः
साध्यान्भजेत सर्वाश्चेत्प्रजाः स्वाधीनाभवेयुः तदासर्वत्रभक्तिप्रचारोभवेदितिभक्तिप्रसरणार्थंतत्साधकत्वमपेक्ष्यते आयुषस्तुभक्तसंगा-
द्यर्थमुपयोगस्पष्टएव तत्राश्विनौआयुषःप्रभूइतितदुपाधावनमेवंपुष्टिरपि लोकातीता भगवत्कार्यसाधिकेतिसर्वपोषकर्त्री भूमिंभजेत्
यतोभूमिष्ठाएवसर्वेवर्द्धतेअंकुरादयः प्रतिष्ठायाअपितद्वृत्तानुवृत्त्याप्रचयार्थमपेक्षाभवति प्रतिष्ठाचमाहात्म्यात् वैविध्याद्वा तत्द्यावापृथि-
व्योरेवोभयंप्रसिद्धमिति भगवदधिष्ठानेषुरूपाभिव्यक्तिसामर्थ्यार्थंरूपमितिगंधर्वाइतिश्रुतेःतेसेव्याः नृत्यादिनाभगवद्भजनार्थंतादृशस्त्री
काममायामनेकरूपकरणसमर्थाउर्वशीसेव्या नारायणोत्पन्नत्वात् ऋषिमानृत्वात् वैराग्यबोधनेनमुक्तिदातृत्वाच्च पूर्वंचलत्वाच्चमुनेर्वरूपाः
आज्ञापनसामर्थ्यसिद्ध्यर्थंतथाभूतः परमेष्ठीचतुर्मुखःसेव्यः सहिसर्वानाज्ञापयतीति आज्ञापनस्यचभक्तिकारणतास्पष्टा तथायशसोऽपि
कीर्त्याहिसर्वेसमायांति पश्चात्तद्वृत्तमनुतिष्ठते यतोहियशःप्राप्तवान् देवार्थेसत्रमासततिसिद्धंपरिमितंयशस्कामाइत्यत्रयज्ञेनैवयशसः
प्राप्तत्वात्ससेव्यःप्रचेतानिधिपतिःअलौकिकार्थदानेहिभगवद्रसवादिर्भवति विद्यायास्तुसाक्षादुपयोगात् ईश्वराज्ज्ञानमन्विच्छेदितिवाक्यात्
प्रतिकूलेगृहंत्यजेदितिदांपत्यंभगवद्भजनार्थमपेक्षितं तत्रपरमभक्तायाःपरमभक्तैस्त्वयामितानिष्ठयाबहुजन्मसिद्धत्वाद्उमासेव्या धर्मेणचभक्ति
र्भवतीतिपूर्वंसाधितमुत्तमैश्चलौकिकवेदधर्मप्रतिपादकएवसेव्यते भक्तिमार्गस्यपरंपरासिद्ध्यर्थंसंतत्यपेक्षायांपितरोहितवाशंसकाइति तेषां
भजनं रक्षायांकूरणमपेक्षितत्वात्यक्षभजनं ओजःइंद्रियशक्तेश्चमनश्चोत्रपाटवरूपत्वात्मरुद्गणश्चपटवोभवंति बहुधाविद्वज्जाअपिम
मृताइति महापुरुषपूजयासिद्धाइतिपरित्यक्तदोषाइतितेसेव्याःअधिकारिणःसर्वविनियोगसामर्थ्यात्तएवमन्वंतराधिपतयःसेव्याः प्रति-
बंधकनिवृत्तेरपेक्षितत्वात्निर्ऋतिःसेव्यःकामनयासर्वंभवतीतिभगवद्विषयककामनोत्पत्त्यर्थंरासप्रकरणेनिरूपितरूपसोमस्यभजनंकर्तव्यं ।
तेनहिभगवतःकामःपूरितइतितादृशकामयितामहत्त्वाच्चएवंभगवद्दशातांतत्तत्साधकत्वमुक्त्वासाधनभक्तिसिद्ध्यर्थमपिभगवानेवसेव्यइ-
त्याहअकामइतिवैराग्यकामःपूर्वाध्यायोक्तन्यायेनस्वतंत्रतयानिष्कामोवासर्वकामःएतदध्यायोक्तकामःमोक्षकामोवाउदाराधीर्यस्येतिस्वतंत्रो
वा तीव्रेणशीघ्रंभगवत्प्रापकेन पूर्वोक्तमेवपरंपुरुषंभजेत भगवतैवसर्वसाधनंसाधयिष्यतीति ॥ १० ॥

ननुभजनमेवकर्त्तव्यंसद्धर्मतकामनाभावेवक्तव्यंप्रयासवर्णादित्याशंक्यकामनयातःसाधनेऽपिअंतरंगसाधनसाधकमेवसेव्यमित्यभिप्रायेणाह
एतावानेवेतिसर्वेषाम्येवसाधनानामत्रनवधेयप्रविशंतिभगवद्भक्तसंगसाधनत्वेनभगवतिरतिसाधकत्वेनचएतावानर्थःसिद्धःतदानान्यकाम
नाकर्तव्याअतएवयजतांमध्येइहअस्मिन्भक्तिमार्गेश्रेयसःपरमःउदयःएतावानेवद्वयमेवतदुक्तंतयोरप्येकसाधनंयेनतौभवतएव ॥ ११ ॥

तदाह ज्ञानमिति हरिकथास्वरतिःतयोःसाधिका कथारसिकसकस्यकथाकाऽपिमिलति प्रेमापिभवतीति आनुषंगिकंचान्यद्धेतुभवती
त्याह य.सुकथासुआसमंतात्प्रतिनिवृत्तगुणोर्मीणामुत्पत्त्यादीनांचक्रंरागादिधर्मसमुदायोयेनसर्वविद्यानिवर्तकमितियावत् तादृशंज्ञानं
भवति। तस्मात्मनःकरणप्रसादोऽपिभवति । तस्यापिसाधनमैहिकामुष्मिकगुणेषु वैराग्यम् एवं समाधनं ज्ञानमपिसिद्धमिति ।
संपायोमार्गो कैवल्यसंमतस्तुमार्गः भक्तियोगः। अथेति विभिन्नप्रक्रमे स्वतंत्रःज्ञानसाधनंनवातत्सहायः। किंतुपूर्वोक्तकामनया
सिद्धसाधनसाध्यः यत्रानुषंगिकज्ञानंभक्तिश्चभवति । भगवतिप्रेमभक्तसंगश्चमुख्यतयाभवति । तादृशीषुकथासुसन्मार्गवर्ती कोवारतिं
नकुर्यादित्यर्थः । तत्रापिनिर्वृतः अत्रसंतमार्गेषु; एवंससाधनंभक्तिमार्गमुपदिश्यतस्य विशेषाकांक्षायामन्यद्वक्तव्यमितितूष्णीं
भूतः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

राज्यं राज्यार्थं तत्कामः मन्वन्तरपालान् देवान् । राज्ञः कर्म राज्यं तत्कामः विश्वान् देवानिति विशेषः । अभिचरन् शत्रुमारण-मिच्छन् निर्ऋतिं राक्षसम् । कामकामः कामभोगेच्छुः । [illegible] सम्यग्धियां क्रायमुक्ता उदारधियां इत्याह । अकामः [illegible] । एवं पुरुषं पुरुषोत्तमं भगवन्तमित्यर्थः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

[illegible] एव परमपुरुषं यजेत् अपि तु उक्तानुक्तसर्वकामोऽपि निष्कामश्च भगवन्तमेव यजेदित्याह । अकामः एकान्तभक्त इति [illegible] अकामः भजनीयपरमपुरुषसुखमात्रकामुक इति सन्दर्भः । इत्यनेनैव सकामसामान्ये लब्धे मोक्षकाम इति पृथगुपादानं तदधिकारिणां वयं निष्कामा इत्यभिमानखण्डनार्थम् । किंवा सर्व्वकामेभ्योऽपि मोक्षकामस्य, सकामत्वातिशयज्ञाप-नार्थम् । तथाच स्वस्य दुःखशमनेच्छा सुखप्राप्तीच्छा च काम उच्यते । सा च स्वस्य तात्कालिकर्किञ्चिन्मात्रदुःखशमनार्थं नश्वरस्व-र्गादिसुखार्थञ्च प्रवृत्तेभ्यः कर्म्मिभ्यो देवतान्तरोपासकेभ्यश्च ज्ञानाधिकारिणां स्वीयसंसारदुःखखण्डने प्रवृत्तानां ब्रह्मसुखमनुबुभुक्षूणामधिकैव दृश्यते भक्तानान्तु भजनीयपरमेश्वरसुखार्थमेव प्रवृत्तानां निष्कामता तद्धर्मैरेवावसीयते । तानि च यथा—नाथ योनि-सहस्रेषु येषु येषु व्रजाम्यहम् । तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ॥ इति । स्वकर्म्मफलनिर्द्दिष्टां यां यां योनिं व्रजाम्यहम् । तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे ॥ इति । ततः समाधिशोपायं येन ते चरणाब्जयोः । स्मृतिर्यथा न विरमेदपि संसरतामिह इति । प्रायोपवेशारम्भे राज्ञोऽपि वचनं यथा—पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु । महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्व्वत्र नमो द्विजेभ्यः ॥ इति । उदारधीः सुबुद्धिः । कामराहित्ये कामसाहित्ये वा भक्तेर्भगवद्विषयत्वमेव सुबुद्धिच-चिह्नं तदभाव एव मन्दबुद्धित्वचिह्नमित्यर्थः । तीव्रेण ज्ञानकर्म्माद्यमिश्रेण मेघाद्यमिश्र एव सौराकिरणो यथा तीव्रः स्यात् तथेत्यर्थः १०

ननु फललक्षणानां देवतान्तरभक्तानां लब्धतत्तत्कामानामन्ते खलु का गतिः स्यादिति चेन्न कापि किन्तु यदि यादृच्छिकमहत्कृप स्यात् तदैव भक्तिः स्यादित्याह । एतावानेव यजतां देवतान्तरयाजिनां निःश्रेयसोदयः । कोऽसौ यत् यदि भागवतानां सङ्गतो हेतोर्भगवति भावः सेव्यत्वभावना स्यात् अन्यथा न निःश्रेयसम् । तत्तद्देवतानामपि निःश्रेयसाभावादिति भावः । तदुक्तं भगवता—येऽप्यन्यदेवता-भक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकम् ॥ अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभि-जानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ इति । देवतान्तरस्य यजनन्तु नैव भगवद्भावकारणं किन्तु भागवतसङ्ग एव । स च यदृच्छयैव भवे-दितिप्राक् प्रतिपादितम् ॥ ११ ॥

ननु यावज्जीवनपर्य्यन्तं यो यम् स्वाश्रितस्तस्यान्ते खल्वाश्रयान्तरानौचित्यमेव तस्मात् सर्व्वकालमेव तत्तद्देवोपासकस्यान्ते भाग वतसङ्गादपि भगवति भावः कथं कर्त्तुमुचित इति चेत् देवतान्तरोपासकः खलु को वराकः यतो ब्रह्मोपासकोऽपि भगवति शुद्धां भक्तिं करोतीत्यत्र कमरीतिं दर्शयन्नाह । ज्ञानं यदा स्यात् । कीदृशं प्रतिनिवृत्तमुपरतं गुणोर्म्मीणां चक्रं समूहो यस्मात् तत् । तदा आत्मप्रसादः स्यात् । यत्र आत्मप्रसादे सति गुणेषु असङ्गः वैराग्यम् । उभयत्रेति पाठे इहामुत्र च गुणेष्वसङ्गः । कीदृशः कैवल्यं सम्मतः पन्थाः । अथ तदनन्तरञ्च भक्तियोगः । भक्तियोगस्य यादृच्छिकतायाः प्राक्प्रतिपादितत्वाद सङ्गकार्य्यत्वं नाशङ्कनीयं भगवत्कृपया सनकादीनामिव भागवतकृपया शुकस्येव कीर्त्तनादिरूपः । अतः कः खलु निर्वृतः भक्तिसुखे निमग्नः । रतिम् आसक्तिम् । यो रतिं न कुर्य्यात् स त्वनिर्वृत इति भावः । अत्र कर्म्मज्ञानयोगदेवतान्तरोपासनेभ्यः शुद्धभक्तेरुत्कर्ष इति, तथा तत्तत्साध्यं केवलया भक्त्यैव सिद्ध्यतीति, तथा तत्तत्साधनवतामप्यन्ते पुनर्भक्त्यैव निःश्रेयसमिति, कर्म्मज्ञानादिनिरपेक्षा निष्कामा श्रवणकीर्त्तनस्मरण प्रधाना शुद्धा भक्तिरेव प्रेमभक्तिसाधनमिति शुकदेवस्य स्वाभिमतं, तत्रापि नामकीर्त्तनं सर्व्वोत्कृष्टतमामिति वस्तुपञ्चकं निरूपित मिति प्रकरणार्थसंक्षेपः ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

राज्यकामःमनून्देवान् विश्वान्देवानूराज्यकाम इतिद्विरुक्तिःगुणप्रधानविवक्षयाबोध्या अभिचरणंशत्रुमरणमिच्छन् निर्ऋतिंराक्षसं कामकामः भोगकामः सोमम्अकामःनिष्कामःपरंपुरुषंपुरुषोत्तमम् ॥ ९ ॥

किंच अकामः सर्वथासमाशून्यः अतएवोदारधीः सर्वकामोवाविशेषतोमोक्षकामोवातीव्रेणभक्तियोगेनपुरुषंपुरुषोत्तमंयजेत ॥ १० ॥

तीव्रेणभक्तियोगेनमोक्षकामोयजेतेतियदुक्तंतदुपपादयति एतावानिति इहलोकेयजतांसाधकानांनिःश्रेयसस्यमोक्षस्यउदयः उपक्रमः एतावानेवतमाह भगवति अचलोभावस्तीव्रोभक्तियोगइति ननुसकुतोवाप्यतेइत्यत्राह यद्भागवतसंगतइति भागवतानांसंगादवाप्यते ॥ ११ ॥

भागवतानांसंगतःमोक्षसाधारणोपायः अचलोभक्तियोगोभवतीत्युक्तंतदुत्पत्तिक्रममाह ज्ञानमिति भागवतसंगतोहरिकथाप्राप्तिरित्य थोलभ्यते यदायाशुभागवतसंगात्प्राप्तासुज्ञानमुत्पद्यते कथंभूतमासमंततः प्रतिनिवृत्तमुपरतंगुणानांगुणकार्याणांरागादीनांजन्ममरणशो-कमोहक्षुधापिपासाख्यानामुर्मीणांचचक्रंपुनःपुनरापतनंयस्मात्तत् तदनंतरमुभयत्र इहामुत्र असंगोवैराग्यंचभवति तदनंतरंकैवल्यसाध्य भूतेमोक्षेसंमतस्तदसाधारणोपायतयाभिमतः भक्तियोगोभवति ततआत्मनःभगवतःमोक्षलक्षणःप्रसादःस्यात् तासुहरिकथासुरतिंप्रीतिंको नकुर्यात् ॥ १२ ॥

भाषाटीका ।

राज्य की कामना वाला मनुओं को और देवतों को पूजे शत्रु मारण की इच्छा वाला निर्ऋति राक्षस को पूजे काम की कामना वाला सोम को पूजे निष्काम हो तो भी हरि को पूजे ॥ ९ ॥

निष्काम अथवा सर्व कामना वाला पुरुष अथवा उदार बुद्धि मोक्ष कामना वाला तीव्र भक्ति योग से परम पुरुष विष्णु का आराधन करे ॥ १० ॥

इस संसार में सब के पूजने वालोंको इतनाही परमपुरुषार्थ है जोकि भागवत (भगवद्भक्तों) के संगसे श्रीनारायणमें निश्चल प्रेम होजाना ॥ ११ ॥

जिन श्रीहरिके कथाओंमे क्षुधापिपासादि छै ह उर्मियोंकी निवृत्ति होकर विशद ज्ञान होता है, आत्माकि प्रसन्नता होती है, मोक्षका वर्णाको भक्तियोग होता है, सब प्रकार सुखकी प्राप्ति होती है, उन हरिकथाओंमे कौन प्रेम नहीं करेगा अर्थात् सबही करेंगे ॥ १२ ॥

शौनक उवाच । इत्यभिव्याहृतं राजा निशम्य भरतर्षभः ।
किमन्यत् पृष्टवान् भूयो वैयासकिमृषिं कविम् ॥ १३ ॥
एतच्छुश्रूषतां विद्वन् ! सूत ! नोऽर्हसि भाषितुम् ।
कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम् ॥ १४ ॥
स वै भागवतो राजा पाण्डवेयो महारथः ।
बालः क्रीड़नकैः क्रीड़न् कृष्ण-क्रीड़ां य आददे ॥ १५ ॥
वैयासकिश्च भगवान् वासुदेवपरायणः ।
उरुगाय-गुणोदाराः सतां स्युर्हि समागमे ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अभिव्याहृतम् उक्तम् । ऋषिं परब्रह्मदर्शिनम् । कविं शब्दब्रह्मनिष्णातम् ॥ १३ ॥
श्रवणेच्छायां हेतुः । हरिकथा एवोदर्कः उत्तरफलं यासु ताः कथाः सतां भागवतानां सदसि सभायां स्युः ॥ १४ ॥
एतत् प्रपञ्चयति स वै इति द्वाभ्याम् । कृष्णपूजादिरूपां क्रीडां यः स्वीकृतवान् ॥ १५ ॥
उरुगायस्य गुणैरुदारा महत्यः कथाः स्युः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एवंहरिकथाप्रभावेउक्तेपुनर्जगद्व्यापाररूपहरिकथाबुभुत्सयामुनिनृपयोः संवादमवतारयितुंशौनकःपृच्छति इतीत्यादिना । इतिपूर्वोक्तप्रकारेणाभिव्याहृतं निशम्यश्रुत्वाभरतर्षभः भरतवंशश्रेष्ठोराजापरीक्षीदृषिंपरब्रह्मदर्शिनंकविंशब्दब्रह्मणिनिष्णातंवैयासकिं व्यासपुत्रं श्रीशुकंप्रत्यन्यत्किंपृष्टवान् ॥ १३ ॥
एतच्छुश्रूषतांनःअस्माकंहेसूतहेविद्वन्!भाषितुंवक्तुमर्हसि तत्प्रश्नंतवकोलाभइतिचेत्तत्राह कथाइतिहरिकथैवउदर्कःउत्तरफलंयासांताःहरिकथोदर्काः हरिकथाप्रधानाइत्यर्थःतथाभूताः कथाः सतांभगवद्भक्तानांसंसदिसभायांराजशुकयोःस्युर्भवेर्युर्निश्चयः । अतः भगवत्कथाश्रवणमेवलाभइतिभावः ॥ १४ ॥
भगवद्भक्तत्वमेवाह सइतिसार्द्धेन । पांडवेयोमहारथोराजामहाभागवतः योराजाबालक्रीडनकैः बाल्यक्रीडाभिः क्रीडन्कृष्णक्रीडांश्रीकृष्णसेवारूपांक्रीडामाददे । तस्यक्रीडाअपिश्रीकृष्णपूजारूपाएवातः आबाल्यंभागवतइत्यभिप्रायः ॥ १५ ॥
एवंभगवान्, त्पत्तिप्रलयंचैवभूतानामित्यादिगुणविशिष्टोवैयासकिःवासुदेवः परायणंपरमप्राप्यंपरमोपायश्चयस्यसतथोक्तः एवमुभयोरपिभागवतत्वात्तत्संवादएवप्रष्टव्यइत्याह । हियस्मात्सतांभागवतानांसमागमेसंगतौ उरुगायस्यभगवतोगुणैरुदारामहत्यःकथाःस्युःप्रवृत्ताभवेयुः ॥ १६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

परीक्षित्पृष्टशुकोक्तभगवत्कथातोद्गुणभूतस्यैवस्यादित्याशयवान्शौनकःसूतंपृच्छति इतीति । ऋषिमात्रस्यत्रिकालदर्शित्वप्रतीतेःकविमितिभगवंतमपरोक्षतोजानातीति ॥ १३ ॥
शुश्रूषतांश्रोतुकामानां सत्सभायांकदाचित्प्रसंगादितरकथापिसंभाव्यतइतिनेत्याह कथाइति ध्रुवमित्यनेननियमोदर्शितः ॥ १४ ॥
अनयोरेकस्याप्यसत्त्वेनियमभंगःस्यादितिनेत्याह सवाइति तत्रहेतुमाह बालइति ॥ १५ ॥
अस्तूभयोःसत्त्वंततःकितत्राह उरुगायेति उरुगायेत्यनेनहरिकथायाअवश्यसद्भावंदर्शयति उरुभिर्वेदविद्यादिरहैर्महद्भिर्गीयतइति उरुगायःसतांसन्निधौप्राचुर्येणहरिकथासत्त्वेऽपिप्रसंगादन्यकथास्यात् नतथाश्रीशुकपरीक्षितोःइत्येतस्मिन्नर्थेहिशब्दः कथाइतिचेत्॥१६॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अन्यमिति । सम्भाव्यैवेदं पृच्छति ॥ १३ ॥
कथा इति । लौकिक कथा अपि । हरिकथास्तु आदित एव तद्रूपाः स्युरित्यर्थः ॥ १४ ॥
स वै इति । या या श्रीकृष्णस्य वृन्दावनादौ बालक्रीडा श्रुतास्ति तत्प्रेमावेशेन तत्सख्यादिभाववान् तां तामेव क्रीडां यः आनित्यर्थः ॥ १५ ॥
अतएव स वै भागवतो राजा इत्याद्यनन्तरं राज्ञा समानवासनत्वेन चकारमाह । वैयासकिश्चेति । चशब्दः प्रागुक्तविशेषण समुच्चयं बोधयति । तस्मात् श्रीवसुदेवनन्दनत्वेनैवात्रापि वासुदेवशब्दो व्याख्येयः । अन्येषामपि सतां समागमे तदनुरूपगुण गुणोदाराः कथा भवन्ति । तयोस्तु श्रीकृष्णचरितप्रधाना एव ता अभवन्निति भावः ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

[illegible]ति । अथमर्थो गुप्ततया निरूपित इति शौनकादीनामाहुर्यस्मात्ता[illegible]भिप्रायं शौनकः प्रकटयन् गुप्ततयो[illegible]मकटयितुमाह । इत्यभिव्याहृतमितियावत् [illegible] । तदाद्यि तत्साधनेषु प्रवृत्तिर्भवति । वस्तुसिद्धसाधनस्य भगवत्संगेऽपि सिद्धकथायामपि तस्यां भगवति तदेहार्थमेव प्रयत्नोऽवशिष्यत इति ॥

अस्मदर्थं तथा राजा महान् । अतस्तत्प्रश्नानुसारेणैव भक्त्युपायं ज्ञातं तत्कर्तव्यमित्यभिप्रायेण प्रथमं प्रश्नं पृच्छति । इत्यभिव्याहृत इति चतुर्भिः अभितोव्याहृतः उपदिष्ट इत्यर्थः । निशम्य तदभिप्रायं [illegible]मोहः अतः पूर्वोक्तमेव न पृष्टमित्यर्थः । अन्यदेव पृष्टवान् । यद्यपि सर्वमुक्तं रितं । तथापि प्रश्नान्तरेण तदुपपादकरूपेण वा किं भूयः पृष्टवानित्यर्थः । शुकस्य विरक्तत्वात् बहुकालस्थित्यभावेन न किंचि-त्पृष्टं भविष्यतीत्याशंक्याह वैयासकिमिति । सर्वविस्तरकर्तुः पुत्रोऽपि तादृश इति । तत्रापि भागवतलक्षणमन्त्राधिष्ठातृभगवदभिप्रायं जानाती-ति सर्वथा कथयिष्यतीति कीर्त्यभिप्रायेण [illegible]पदं । विशेषकथनसामर्थ्यार्थकविपदं ॥ १३ ॥

तेन किं भवतामित्यपेक्षायामाह एतदिति । एतच्छ्रवणमस्माकं महतीच्छा त्वं च जानासि । सर्वत्र कथनं च तवाधिकार एवेति संबोधनद्वयं विद्वन् सूतेति अतोऽस्मभ्यं भाषितुमर्हसि । श्रोतृवक्तृपरत्वव्यावृत्त्यर्थमाह । कथा हरिकथोदर्का इति । अन्या अपि कथाः सतां सदसि हरिकथो-दर्का एव भवति हरिकथैव उदर्क उत्तरफलं यासु ध्रुवमिति नात्र संदेहः । सत्सभायामेवैवं भवति सुतरामपूर्वसत्संगे तत्रोभयोः सत्त्वमुक्तात-त्संगे कथा वक्तव्यकत्वं वक्तव्यं ॥ १४ ॥

तत्र प्रथमं समागतस्य पृच्छकाधीनत्वात् पृच्छकस्य भगवद्भक्तत्वमाह स वै भागवत इति । निश्चयेन स राजापि भागवत एव अथवा राजा हि बहु पृच्छति भागवतश्च भगवदीयं तस्योभयरूपत्वात् भगवदीयं बहु पृच्छतीत्यर्थः । तस्य भगवदीयत्वे साधनभूतं हेतुद्वयं आह पांडवेय इति । भगवदीयवंशोऽवतीर्णत्वात् स्वधर्मनिष्ठत्वाच्च फलमुख्यमुत्तरसाधनं तस्यां च [illegible]भावो भगवत्पर इत्याह । यस्तु बाल्ये बालक्रीडनकैः क्री-डन् एकं भगवन्तं [illegible]मेव कम[illegible]लीलामिव क्रीडति । वृन्दावनस्थां भगवत्क्रीडां याऽभिनदेनानुकरोति ॥ १५ ॥

शुकोऽपि भगवद्भक्त इत्याह वैयासकिश्चेति । श्रोता तु भवदीयानां वंशजां भगवदीयः । शुकस्तु भगवतः पुत्रो भगवान् तथाभूतः स वासुदेव परायणाः [illegible] तादृशाः । अतः सर्वेऽपि सतः । तेषां च नूतनः समागमः । तादृशी कथाः सर्वभक्तानां सम्मताः । सर्वपुरुषार्थानां [illegible]तया साधनाभावे [illegible] भगवद्गुणाः ते यासु । अतस्ताः कथयेति पूर्वेणैव सम्बन्धः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

किमन्यद् पृष्टवानिति उक्तेनैतेनैव सर्वजिज्ञासितसिद्धेरिति विस्मयः सूचितः । ऋषिं परब्रह्मदर्शिनम् । कविं ऋषिष्वपि मध्ये तत्त्व[illegible]तिशयचतुरम् ॥ १३ ॥

श्रवणकीर्तनादीनां [illegible] स्वकर्तव्यत्वेन ज्ञात्वापि राज्ञा यदन्यत् पृष्टं तस्मात्तेषामेव श्रवणादीनां विषयाः कृष्णकथा एव पृष्टव्या अस्माकमित्यभिप्रायेणाह एतदिति । न च सर्गविसर्गमन्वन्तरनानाराजादिकथानामपि तदन्यकथात्वं वाच्यमित्याह । कथा अपि हरिकथा एव उदर्कः उत्तरफलं यासु ताः सर्गादिकथानामपि कृष्णकथायामेव पर्यवसितत्वात् ता अपि श्रवणादिविषया इति भावः ॥ १४ ॥

सतां सदस्यापि प्राचीनार्वाचीनेषु मध्ये सा सभा सर्वतः श्रेष्ठा यत्र श्रोता वक्ता च सर्वतोऽपि विलक्षणा इत्याह स वै इति द्वाभ्याम् । कृष्णक्रीडां कृष्णक्रीडानुकरणम् ॥ १५ ॥

भगवान् सर्वज्ञः । सतां समागमे सति उरुगायस्य कृष्णस्य गुणा एव उदारा मनोवाञ्छितार्थप्रदातारः तत्रस्थानां अभिव्यमाना-[illegible] जनानां ध्रुवं स्युः । अतस्तान् गुणानेव प्रवर्तयेति । तेन कृष्णकथोदर्काः कथाश्च भक्तैरास्वादनीया इति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

एवं संक्षेपतः सर्वशास्त्रार्थं श्रुत्वा पुनर्विस्तरतस्तच्छुश्रूषया शुकपरीक्षित्संवादमवतारयितुं शौनक आह । इतीति । अभिव्याहृतं । श्रीशुकेनोक्तं । निशम्य श्रुत्वा भूयः पुनः ऋषिं परब्रह्मदर्शिनं कविं ब्रह्मदर्शिनं वैयासकिं व्यासपुत्रं शुकम् प्रति । अन्यत् किं पृष्टवान् ॥ १३ ॥

हरिकथैव उदर्कः उत्तरफलं यासु ताः कथाः सतां भागवतानां सदसि सभायां ध्रुवं स्युः अतो यद्राज्ञा पृष्टमेतच्छुश्रूषतां श्रोतुमिच्छतां नो ऽस्माकं भाषितुमर्हसि ॥ १४ ॥

उभयोर्भागवतत्वं तयोः संवादे हरिकथाप्रवृत्तिं चाह स इति द्वाभ्याम् । यो बालक्रीडनकैः बालक्रीडाभिः क्रीडन् कृष्णक्रीडां [illegible] क्रीडामाददे अतः सहजभागवत एव भागवतः ॥ १५ ॥

[illegible] सतां समागमे संगतौ उरुगायस्य भगवतो गुणैरुदाराः श्रोतॄणां सर्वां[illegible] कथाः स्युः [illegible] ॥ १६ ॥

भाषा टीका ।

शौनकजी बोले परीक्षित महाराज इस प्रकार शुकदेवजी के वचन को सुनकर फिर त्रिकाल दर्शी ब्रह्मज्ञानी व्यासपुत्रजी से क्या प्रश्न करने लगे ॥ १३ ॥

हे विद्वन् ! हे सूतजी ! सुनने की इच्छावाले हम लोगों को आप कथन करने के योग्य हो क्योंकि महात्माओं के समाज में हरि कथा ही के फलवाली कथा होती है अवश्य से ॥ १४ ॥

[illegible] पाण्डवों का कुल [illegible] हैं जोकि बालकों की क्रीडा में भी श्रीकृष्ण ही की क्रीडाकू करते थे ॥ १५ ॥

[illegible] भगवान् के [illegible] के उदार गुणों वाली कथा होती है ॥ १६ ॥

आयुर्हरति वै पुंसामुद्यन्नस्तञ्च यन्नसौ ।
तस्यर्त्ते यत् क्षणो नीत उत्तमःश्लोक-वार्त्तया ॥ १७ ॥
तरवः किं न जीवन्ति ? भस्त्राः किं न श्वसन्त्युत ? ।
न खादन्ति ? न मेहन्ति ? किं ग्रामे पशवोऽपरे ॥ १८ ॥
श्व-विड्वराहोष्ट्र-खरैः संस्तुतः पुरुषः पशुः ।
न यत्कर्ण-पथोपेतो जातु नाम गदाग्रजः ॥ १९ ॥
विले वतोरुक्रम-विक्रमान् ये न शृण्वतः कर्ण-पुटे नरस्य ।
जिह्वासती दार्दूरिकेव सूत ! न चोपगायत्युरुगाय-गाथाः ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

किञ्च वृथैव क्षीयमाणामायुर्हरिकथया सफलं कुर्व्वित्याशयेनाह आयुरिति त्रिभिः । असौ सूर्य्यः उद्यन् उद्गच्छन् अस्तम् अदर्शनञ्च यन् गच्छन् यत् येन पुंसां उत्तमःश्लोकस्य वार्त्तया क्षणो नीतः तस्यायुः ऋते वर्ज्जयित्वा अन्येषां वृथैव हरति ॥ १७ ॥

ननु जीवनमेव तेषामायुषः फलमस्तु तत्राह तरव इति । ननु तेषां श्वासो नास्ति तर्हि भस्त्राश्चर्म्ममयकोषाः । ननु तासामाहारादिकं नास्ति तत्राह । न खादन्ति नाश्नन्ति । न मेहन्ति रेतःसेकं मैथुनं न कुर्व्वन्ति किम् ? । उत अपि । तमपि नराकारं पशुं मत्वाह अपरे इति ॥ १८ ॥

तदेवाह । श्वादिभिः संस्तुतः सदृशत्वेन निरूपितः । यस्य कर्णपथं कदाचिदपि न गतः सः । अवज्ञास्पदत्वात् श्वभिः कश्मल-विषयासक्तत्वात् विड्वराहैः ग्राम्यशूकरैः कण्टकवद्दुःखविषयासक्तत्वादुष्ट्रैः भारवाहित्वात् खरैस्तुल्य इत्यर्थः ॥ १९ ॥

तस्याङ्गानि च निष्फलानीत्याह विले इति पञ्चभिः । वत इति खेदे । नश्शृण्वतः अशृण्वतः नरस्य ये कर्णपुटे ते विले वृथारन्ध्रे । नचवुपगायति तस्य जिह्वा असती दुष्टा । दर्दुरो भेकः तदीया जिह्वेव ॥ २० ॥

श्रीराधारमणदासगोस्वामि विरचित दीपनाख्य टिप्पणी ।

[न चेति । चशब्दश्चेदर्थे इति वोपदेवीयमुक्ताफले कैवल्यदीपिका ॥ २०—२५ ॥]

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

किञ्चवृथैवक्षीयमाणामायुर्हरिकथायामेवसफलंकुर्वित्याशयेनाह आयुरितित्रिभिः असौसूर्यंउद्यन्नुदयं प्राप्नुवन्नस्तंचयन् तिरोधानं प्राप्नुवन्तिरोधानमित्यर्थः । उत्तमश्लोकस्यभगवतोवार्त्तयाकथयायत्क्षणोनीतःयःक्षणोनीतःतस्यऋतेतंक्षणंविनाआयुर्हृतंसतुक्षणोनहृतः सफलइत्यर्थः ॥ १७ ॥

ननुर्जीवनमेवतदायुषःफलमस्तुतत्राहतरवइति।उत्पत्तिनाशमध्यस्थितिर्जीवनंननुतेषांश्वासोनास्तितत्राह भस्त्राइति चर्मकोशानश्वसंति किं वायुमूर्ध्वंननिःसारयंति किं । ननुतासामाहारादिकंनास्तितत्राह ग्रामपशवः अपरेआयुर्व्ययंकुर्वतश्चनखादंतिनादन्तिनमेहंतिनरेतः सिंचंति मैथुनं न कुर्वतीत्यर्थः ॥ १८ ॥

विड्वराहः ग्रामशूकरः ॥ १९ ॥

ऊरुक्रमस्यभगवतोविक्रमान्व्यापारान्नशृण्वतोऽशृण्वतोनरस्ययेकर्णपुटेतेविलेवृथारंध्रे हे सूत ! उरुगायगाथाः भगवत्कथाः नचेदुपगायति तस्यजिह्वाऽसतीदुष्टादार्दुरिकीमंडूकीजिह्वेव ॥ २० ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

वासुदेवकथामंतरेणजीवनंव्यर्थमित्याह आयुरिति उद्यन्अस्तंचयन्गच्छन्असावादित्यःपुंसांयदायुर्हरतिवै । "आदित्यस्यगतागतै-रहरहःसंक्षीयतेजीवन"मितिवचनात् तस्यायुर्वीयउत्तमश्लोकवार्तयाऋतेविनाक्षणः कालविशेषः सनीतएववृथेत्यन्वयः ॥ १७ ॥

इहलोकेदीर्घकालंजीवन्पुमान्स्तूयतइतितत्राह तरवइति तरूणांश्वासाद्यभावाद्वित्यतउक्तंभस्त्राइति भस्त्राःदृतयः । अयःसंतापनार्थां-श्चर्मविशेषाः ॥ भस्त्राणामित्थंतस्याश्वतरसाम्यमत्राह नेति ग्रामपशवः सारमेयादयो मेहन्तिरेतोमूत्रादिकमुत्सृजंति अपरेतिर्यञ्चातिरिक्ताःस्त्रीपुरुषाः अनेनहरिचरितश्रवणाभावेचेतनत्वमप्रयोजकमित्युक्तंभवति ॥ १८ ॥

एतदेवविविनक्ति श्वविडिति विड्वराहोऽमेध्यशूकरः पशुर्विवेकशून्यः गदाग्रजइतिपाठेनवाभूतइतिपदार्थः ग्रामंभितइति वत् ॥ १९ ॥

इतोपिहरिकथाश्रावंश्रावंवर्तमानस्यपुंसःश्रोत्रादीन्द्रियसाफल्यमायुषःसाफल्यमन्यथाव्यर्थमित्याशयेनाह विलेइति [illegible] विलेएवेतरयोतिशेषः उरुगायगाथाःनप्रगायतिचेत्तर्हिदार्दुरिकादर्दुरस्यावियमानाजिह्वाऽसतीव ॥ २० ॥ ॥ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

अनन्तरं श्रीशौनकेनापि व्यतिरेकोक्त्या तस्यैवाभिप्रेतत्वं स्फुटीकृतम्। तदाह आयुर्हरतीति। असौ सूर्यः उद्यन् अस्तञ्च यन् गच्छन् हरति वृक्षाणामिव बलाद्विच्छिन्नत्तीव। यत् येन क्षणोऽपि नीतः तस्य आयुः ऋते वर्जयित्वा। तावतैव सर्व्वसाफल्यात्। यद्यपि क्षणं भगवद्वार्त्तयापि सर्व्वमायुः सामान्याकारेण सफलं जायते एकस्यां शाखायां फलितायामखण्डवृक्षवत् तथापि प्रति विशेषावस्थमपि सफलं जायतामित्येतदर्थं मम प्रश्न इति भावः ॥ १७ ॥

तत्रायुरेकदेशेऽपि तत्सम्बन्धबहिर्भूतांशस्य व्यर्थत्वमेव दर्शयति तरव इति त्रयेण। न च तरूणां श्वासो नास्तीति तेषु न्यूनत्वं वाच्यम्। सत्यपि श्वासे जीवनाभावदर्शनात् सोऽयमकिञ्चित्कर इत्याह भस्त्रा इति। ननु तरूणां रसनादिभोगो नास्ति तत्राह न खादन्तीति। न मेहन्ति मैथुनं न कुर्व्वन्ति। तानपि नराकारान् पशून् मत्वाह अपरे इति ॥ १८ ॥

तदेवाह श्वविड्वराह इति। श्वादितुल्यैस्तत्परिकरैः सम्यक् स्तुतोऽप्यकथी पुरुषः पशुः। तेषामेव मध्ये श्रेष्ठश्चेत्तर्हि महापशुरित्यर्थः। यद्वा श्वादिभिः संस्तुतः सम्यक् स्तुतः सर्व्वेषामस्माकं यत्किञ्चिद्गुणादिकं तत् सर्व्वमनेन धृतमित्यर्थः ॥ १९ ॥

अथायुर्विशेषावस्थावैफल्यदृष्टान्तत्वेन तत्तदङ्गविशेषवैफल्यमाह बिले बतेति त्रिभिः। न-शृण्वतः अशृण्वतः नरस्य ये कर्णपुटे ते बिले वृथारम्भे इत्यर्थः। असती दुष्टा। (भेकस्य कालापकर्षकत्वेन दृष्टान्तत्वम्। न योपति क्वचित् पाठः। स च स्वाम्यसम्मतः पूर्व्ववत् युक्तच्छन्दाभ्यामनन्वयात् चेच्छब्दाध्याहाराच्च) ॥ २० ॥

———

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

इदानींविद्यमानानां भक्त्यसाधकत्वे वैफल्यं वक्तुंभक्तिसाधकत्वे सफलत्वंवक्तुंकैमुतिकन्यायेनदर्शयति। आयुर्हरतीति। योऽसौतपन्नुदेति स सर्वेषां भूताना प्राणानादायोदेति मामेप्रजायामापशूनांमाममप्राणायादायोदगाः असौयोऽस्तमेति ससर्वेषांभूतानांप्राणानादायास्तमेति मामेप्रजायामापशूनामित्यादि श्रुतिवाक्ये असौसूर्यः सर्वेषां प्राणिनां उद्यन्नस्तमयन् सर्वेषामायुर्हरतीत्युक्तं। तत्रमामेप्रजाया इति कथनात् कस्यचिदायुर्नहरतीतिज्ञायते। तत्रकोयमित्यपेक्षायां आयुर्हरणार्थंस्थापितस्यसूर्यस्य अधिकारिणः लोकन्यायेन अधिकारदातुरंतरंगस्य न हरतीतिज्ञायते। हृतंचायुः भगवदीयेभ्यः प्रयच्छति। विनियोगस्यावश्यकत्वात् यद्यपिवाक्ये प्रार्थकस्यैव आयुषोनहरणं। तथापि हरणस्यानित्यत्वज्ञापनेनतथावसीयते तस्य आयुः ऋते। शतायुर्वैपुरुषइतिपुरुषस्यशतमायूंषिभवंति। एकेनवत्सरेणसर्वब्रह्मांड परिभ्रमणेनएकमायुर्हरति। तत्रतस्यायुः ऋतइति। यस्मिन्नायुषिक्षणोभवेत्यः उत्तमश्लोकवार्तयाभगवत्समीपंनीतःतदायुर्नगृह्णातीत्यर्थः। यत्तदोर्नित्यसंबंधात् तच्छब्देनक्षणएवोच्यते। संबंधित्वंचस्वरूपतएवेतिसर्वास्मन्नायुषिभवतीतिसिध्यति। वर्षमध्येएकोपिक्षणः उत्तमश्लोकवार्तया स्वार्थंभगवदर्थंवानीतश्चेत्स्वकार्यंवार्तयैवकृतमितिशिष्टमपिसैवहरिष्यतीतिस्वयंनहरतीतिभावः ॥ १७ ॥

एवंक्षणमात्रमपिभगवत्कथासंबंधेआयुषः कृतार्थतेतिउपलक्षणविधयासर्वेषांकृतार्थत्वंनिरूप्यतदभावेबह्वप्यायुःप्रार्थनयाऽकृतमपिव्यर्थमितिसदृष्टांतमाह। तरवइति। वृक्षाः किंबहुकालंनजीवंतिनतेषांस्वार्थंकश्चनउपयोगःमुक्ताश्चनभवंति। अतोबहुकालजीवनंप्रार्थनयापि प्राप्तंव्यर्थमित्यर्थः। ननुतेषामायुःप्राणंधृत्वानतिष्ठतीतिप्राणधारकत्वेननतदुपयोगोभविष्यतीत्याशंकयाह। भस्त्राः किंनश्वसंत्युतेतिपूर्वमपि नासाचर्मपुटरूपैवतन्मार्गेणवायुरागच्छतिगच्छतिच। भस्त्रायामप्येवमितिनप्राणधारणेनकोप्युपयोगःसिध्यति नन्वत्रस्वपरोपकारेणासिद्धत्वान्नदृष्टांततुल्यतेत्याशंकयाह। उतेतिपुनःतथाकृत्वापिव्यर्थइत्यर्थः। यथाङ्गालाभस्त्राःश्वासेनतप्ताभवंति। अन्येपितत्संबंधाल्लोहादयः। तप्तानामाघातश्चभवति। अतःपरोपतापायुपद्रवकर्तृत्वंतथाजीवनस्यापीतिनकोपिविशेषइतिभावः। पुरुषार्थासद्भावस्तूभयत्रतुल्यः। ननुभोगोस्तीतिचेत्तत्राह। लोकानांभोगभ्रमः भक्षादिभक्षणं। वस्तुतस्त्वेकत्रप्रविष्टोऽन्यत्रनिर्गच्छति। यथा स्वशरीरान्निर्गतंशूकरमुखं प्रविश्यपुनर्निर्गच्छति। तथाभूमिवृक्षादेर्निर्गतंस्वस्यापिमुखेप्रविश्यविनिर्गच्छतीतिनशूकरादिभ्यःकश्चनविशेषः तुल्यत्वंयस्यनस्फुरतितं प्रत्येतदापादनमनिष्टं। नत्वज्ञविदंप्रति। सहिप्राकृतःस्वात्मानंबहुमन्यते। अपरेइत्यनेनअयमप्येकःपशुः। तस्माद्वयःपशूनांहस्ताखाना इतिश्रुतेः। परंग्रामपशुत्वेननिंद्यत्वम् ॥१८॥

एवंनीचैःसहतुल्यतामापाद्यततोपिनीचतामाह। श्वविड्वराहोष्ट्रखरैरिति। एतेचत्वारःपशवःसर्वलोकेषुनिंदिताः तेषांस्तुतिकोपिनकरोति। भगवद्विमुखेपुरुषेचदृष्टेलोकास्तानेवस्तुवंतीतितैरयंसंस्तुतः। भगवद्विमुखेदृष्टेएतस्मात्श्वादयःसमीचीनाः इतिलोकास्तुवंति देशान्तरागमने स्वामिनमयंस्तावयतिसमीचीनइत्येतैरयंस्तुतोभवतीतिभावः। यद्यपिश्वापुच्छचालनादिनाप्यामममात्रेपिस्वलालसतांज्ञापयति। तथा अयमपिगृहस्थःपरंसस्वामिहितोभवति। अल्पसंतोषीच। प्राकृतस्तुतद्विपरीतः। एवंविड्वराहोपिकुत्सितविषयासक्तः ग्रामसूकरस्थानेरमते। तथायमपि। तथापिसर्वानुपयुक्तमुपजीवतिनतत्रकोपिभागिनः। अयंतुसर्वेषांभागंस्वयंमश्नाति। यद्यप्युष्ट्रःकंटकादीनपर्णविषयभोक्ताः तथापिस्वामिभारवाहकाः अयंतुतद्विपरीतः। नभगवतःकिंचित्कार्यंकरोति। यद्यपि खरःखरीपादताडनमेवापगच्छति पुरुषतुल्य तथापि न भक्तःभक्स्वामिकार्येहठंकरोति। अस्यतुतदीयादोषाएवगुणगणाःसंतीतिततोपिनिंदितइत्यर्थः। नैतत्पुरुषमात्रसाधारणं। येषांपुनरन्न भक्षणेउपयोगोस्तितद्व्यावृत्त्यर्थमाह। मोघमन्नंविंदतेअप्रचेताःअन्नेनप्राणाः अन्नात्प्राणाभवंतीतिचवैयर्थ्यंज्ञानभक्त्युपयोगोनअन्नस्यनिरूपितौ। तत्रवैयर्थ्यपक्षेतुल्यता। पक्षद्वयेतुपुरुषार्थपर्यवसानात्मतितद्विपरीतमाह। नयत्कर्णपथोपेतइति। यस्यकर्णमार्गंकदापिगदाग्रजः कृष्णःकेवलंभक्तिप्रकाशनार्थंप्रकटोयस्यकर्णमार्गेनगतः। स्वानामितिशुकयात्। अयंचतदीयोनभवतीतिनिश्चितं। अतोभक्तिमार्गेणानिवारिते। गदस्तुमातापित्रोर्दुःखदूरीकरणानंतरमुत्पन्नइतियत्रभगवत्कृतदुःखदूरीकरणमभिप्रेतंतत्रगदाग्रजइत्युच्यते ॥ १९ ॥

एवमायुषोदेहस्य च भोगायतनस्य वैफल्यमुक्त्वाइन्द्रियाणां वैफल्यमाह। बिलेइति। बतेतिखेदे उरुक्रमस्य अतिविचित्रचरित्रस्य विक्रमानशृण्वतः पुरुषस्यैवकर्णपुटेतेबिलेइत्यर्थः। तत्रस्वाभिप्रेतेन्द्रियाभावात् अपकारिसर्परूपप्राकृतेन्द्रियस्य विद्यमानत्वात् शरीरकपगृहे अपकारिच्छिद्रे। यथागृहे तादृशोबिलेप्रविष्टः सर्पः गृहपतिं खादति। तथाप्राकृत्यः कथाः एतत्कर्णे प्रविष्टाः एनंसर्वनाशयन्तीत्यर्थः। "तांस्तान्क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" इति वाक्यात्। जिह्वाच असती। भगवताहिसर्वेन्द्रियेभ्यः विरलीकृतारक्षिताच सर्वदामहत्त्वेभ्योरक्षांकरोति। एवमपिसानभगवत्परा किन्तुव्यभिचारिणी च। अन्यस्तोत्रकरणात् अन्यगामिनी। तत्रापि विशेषमाह।

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

दार्दुरिकेव। तस्य जिह्वानभगवता पृथक्कृता न स्वकार्येण हन्ता हन्ताः। साक्षात्तदेव एकथा कीटादीन् भक्षयति। तथाऽस्यापि जिह्वानि कमकरहिता स्वनएवक्रूरापरघातार्थं प्रवृत्तेत्यर्थः। एवमपि दुष्टाविषयार्थमपि उरुगायगाथाभिर्द्रावयति तदापि नकाचिच्चिन्ता तदपि नास्तीत्याह। नचोपगायतीति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

नात्र विलम्बः कार्य्य इत्याह आयुरिति। असौ सूर्य्यः उद्यन् उदयं प्राप्नुवन् अस्तम् अदर्शनञ्च यन् गच्छन्। तस्य आयुः ऋते विना यत् येन क्षणः अवसरः। यद्वा क्षणोऽपि निमेषत्रयमपि। तावतैव कालेन सर्व्वमायुः सफलं भवति। एकस्यामेव शाखायां फलितायां वृक्षोऽयं फलवानिति यथोच्यते। प्रतिशाखं फलवत्त्वे कैमुत्यमेव सर्व्वस्यायुषः कृष्णवार्त्तायुक्तत्वमपेक्ष्यम्। नन्वेवञ्चेत् आयुर्हरणाभावात् कृष्णवार्त्तायावितत्क्षणो जनो न म्रियेत। सत्यम्। सत्पात्रीकृतवित्तो जनोऽक्षयवित्तो यथोच्यते परत्र तद्भोगानन्त्यप्राप्तेः। "सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। अधीते शतसाहस्रमनन्तं वेदपारगे" इति स्मृतेः। तथैव कृष्णसात्कृतस्वायुर्जनः परत्र तत्पार्षदत्वप्राप्त्या ध्रुवमक्षयायुर्भवतीति कृष्णभक्तस्यायुर्हरणाभावो ज्ञेयः। जरामरणरोगादिकं तु भक्तेष्वपि यद्दृष्टं तत् मतान्तरोत्खाताभावार्थञ्च स्वभक्तेः रहस्यत्वरक्षणार्थञ्च भगवदिच्छयैव भवति, न तु तत्र वस्तुतः कालकर्म्मादेः कारणत्वमित्युपपादितं भीष्मनिर्याणाध्याये ॥ १७ ॥

न चायुर्हरणाभावस्य मर्त्यलोके जीवनमेव फलमित्यत आह तरव इति। प्रत्युत मनुष्येभ्योऽपि तेषां जीवनाधिक्यम्। ननु तेषां श्वासो नास्तीति अत आह भस्त्रा इति। प्रत्युत मनुष्येभ्योऽपि भस्त्रायां श्वासाधिक्यम्। ननु तासामाहारादिकं नास्तीति तत्राह न खादन्तीति। न मेहन्ति स्त्रीसम्भोगं न कुर्व्वन्ति। मेहनं रेतःसेकः। प्रत्युत मनुष्येभ्योऽपि तेषां खादनाद्याधिक्यम् अपरे इत्यनेन तेषामपि नराकारपशुत्वं व्यञ्जितम् ॥ १८ ॥

तेषां पशुत्वेऽप्यतिगर्हणीयत्वमाह। श्वादिभिः सम्यक् स्तुतः। अस्माकं चतुर्णामपि धर्म्मान् अयमेक एव धत्ते वयन्तु परस्परधर्म्मग्रहणेऽप्यसमर्था इति, तथा अयं मनुष्योऽपि भूत्वा वयन्तु पशवोऽपि भूत्वा पश्वन्तरस्यैकस्यापि धर्म्मं धर्त्तुं न शक्नुम इति, तथायं शास्त्रादिष्टं स्वधर्म्ममप्युल्लङ्घ्य अतिरागेणैव धत्ते वयन्तु नियतिकृते स्वस्वधर्म्म एव पतिता इति, तथायमस्मत्कर्म्मैः जनिष्यमाणं नरकं ज्ञात्वापि वयन्तु मूढा एवेति चतुर्धा स्तुतिः। तेषां श्वादीनां धर्म्मास्तु निर्हेतुरोषणत्वामेध्यभोजित्वमहाभारवाहित्वस्त्रीपादताडितत्वादयः। यस्य कर्णपथं न जातु, कदाचिदपि न, उपेतः गतः। गदाग्रजः इति गदस्य रोगस्याग्रे प्रतियोग्येव जायते प्रादुर्भवतीति श्लेषेण तस्यैव ते क्रोधादयः पुरुषस्य रोगा नश्यन्तीति भावः ॥ १९ ॥

एवं पुरुषमात्रं निन्दित्वा प्रत्येकभक्त्या विना प्रत्येकतदङ्गानि निन्दति बिले इति पञ्चभिः। बत खेदे। न-शृण्वतः अशृण्वतः पुंसो ये कर्णपुटे न बिले एव ग्राम्यवार्त्ताभुजङ्गगृहतुल्ये। दर्दुरो भेकस्तदीयेवासती मिथ्याभूता दुष्टा श्लेषेण असती स्त्रीव तस्य सुकृतसर्व्वस्वं विप्लावयति। अत्र यद्यपि भुजाद्येकाङ्गकृतयापि भक्त्या पुरुषः कृतार्थ एव भवति तदपि तस्याङ्गान्तराणि तु व्यर्थान्येव भवन्तीत्याशयेनाङ्गानां निन्दा ज्ञेया ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

हरिभजनंविनावृथैवदेहधारणमित्याह। आयुरित्यष्टभिः। यत्येनउत्तमश्लोकवार्त्तयाक्षणोनीतस्तस्यायुः ऋतेविना। असौसूर्यः उद्यन् उद्गच्छन् अस्तमदर्शनं च यन् गच्छन् पुंसामायुर्हरति वृथैवनाशयति ॥ १७ ॥

भस्त्राः चर्मकोषाः अपरेग्रामसिद्धपशुभ्योनराकाराःपशवः नमेहन्तिनरेतः सिञ्चति। देहधारणमात्रेण वा वायुधारणमात्रेण भोजनमैथुनपरत्वेन वायद्यायुः सफलंस्यात्तर्हि तर्वादिभ्यः पुंसांकोविशेषइति भावः ॥ १८ ॥

अतएवनामप्रसिद्धोयः गदाग्रजः श्रीकृष्णः यस्य जनस्य जातुकदाचिदपि कर्णपथोपेतोनभवति स श्वादिभिः संस्तुतः सदृशोनिरूपितः ॥ १९ ॥

बतेति खेदे उरुक्रमस्य त्रिविक्रमस्य भगवतः विक्रमान् नशृण्वतः अशृण्वतः नरस्यकर्णपुटेबिलेनिरर्थकेछिद्रेयः वक्तावस्तु उपगीयमानस्यभगवतः गाथाः कथाः नचउपगायति तस्य जिह्वा असतीदुष्टादार्दुरिकेवदर्दुरस्येयंदार्दुरिकातत्तुल्या ॥ २० ॥

भाषा टीका

यह सूर्य उदय तथा अस्त होता हुआ तिन पुरुषों के आयु को हरता है जिन लोगों का एक क्षण भी भगवद्वार्ता के बिना बीतता है ॥ १७ ॥

क्या वृक्ष नहीं जीते हैं क्या श्वास लेने को लोहार की भाथी नहीं श्वास लेती है क्या खाने को मल मूत्र करने को ग्राम के और कुक्करादि पशु नहीं करते है क्या ॥ १८ ॥

जिसके कर्ण मे कदापि भगवन्नाम नहीं पड़ा है वह पुरुषतो कुत्ता गाम सुअर ऊंट गधा इन सबों मे बड़ा मानने योग्य है ॥ १९ ॥

जिस पुरुषके जो दोनों कर्ण भगवत् कथा को नहीं सुनते हैं वेदर्थ बिलसरी के हैं जिसकी जो जिह्वा [illegible]
है वह जिह्वा मेढक की सरी की है ॥ २० ॥

भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ॥ २१ ॥
बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥ २२ ॥
जीवञ्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ।
श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गन्धम् ॥ २३ ॥
तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ २४ ॥
अथाभिधेह्यङ्ग ! मनोऽनुकूलं प्रभाषसे भागवतप्रधानः ।
यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वितीयस्कन्धे महापुरुषोपवर्णनं नाम
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

पट्टवस्त्रोष्णीषेण किरीटेन च जुष्टमपि शिरो यदि न नमेत् तर्हि केवलं भार एव । शावो मृतकः तत्करतुल्यौ । लसन्ति काञ्चनकङ्कणानि ययोस्तौ । अप्यर्थे वाशब्दः ॥ २१ ॥

ये नयने विष्णोर्मूर्तीर्न निरीक्षेते ते बर्हायिते मयूरपिच्छेन तुल्ये । द्रुमवज्जन्म भजेते इति तथा वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥

नाभिलभेत अभितो न स्पृशेत् न धारयेत् । श्रीविष्णुपद्याः विष्णुपदलग्नायाः । न वेदेति अवघ्राय नाभिनन्देदित्यर्थः ॥ २३ ॥

अश्मवत् सारो बलं काठिन्यं यस्य । विक्रियालक्षणमाह अथेति । गात्ररुहेषु रोमसु हर्षः उद्गमः ॥ २४ ॥

यस्मात् भक्तस्य सर्वमिदं त्वयं मनसोऽनुकूलश्च प्रियं ब्रूषे । अथ अतः साधु पृष्टः सन् वैयासकिर्नृपतिं प्रति यदाह तदभिधेहीति ॥ २५ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

यदिमुकुन्दंननमेन्ननमस्कुर्यात्तदुत्तमांगंशिरःपट्टकिरीटजुष्टंपट्टेनपट्टवस्त्रेण किरीटेनवाजुष्टमपिपरं केवलंभारःहरेःसपर्यांपूजांनोकुरुतः नकुर्वतौचेत्तौकरौहस्तौचलसन्तौकांचनकंकणौययोस्तथाभूतावपिशावौशवसंबंधिनाविवअमंगलावित्यर्थः ॥ २१ ॥

विष्णोर्लिंगानिमूर्तीः ननिरीक्षतश्चेत्तेनयनेबर्हायितेमयूरपिच्छनेत्रतुल्ये क्षेत्राणि श्रीरंगादीनि नानुव्रजतश्चेत्तौनृणांपादौद्रुमजन्मभाजौ द्रुमजन्मभजतः इतितथा वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥

भागवतांघ्रिरेणुंजातुकदाचिदपि यस्तुमर्त्योमनुष्यः नाभिलभेताऽभितोनस्पृशेन्नधारयेत्सजीवञ्छवः जीवन्नपिशवतुल्यः श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायाःतुलस्या गंधं सुगन्धंयस्तुमनुजोनवेदाभिघ्रायनाभिनन्देदित्यर्थः सश्वसन्नूजीवःप्राणायुक्तोपिशवतुल्यः ॥ २३ ॥

गृह्यमाणैः स्मरणकीर्तनादिभि र्गृह्यमाणैर्भगवन्नामभिर्यद्वीर्यं हृदयंनविक्रियेतविकारं नप्राप्नुयात् अथमुखेविकाराः नेत्रेजलमानंदाश्रुबिंदवः गात्ररुहेषुहर्षः रोमांचश्चनस्यात् तद्धृदयमश्मसारंकाष्ठ्यायसंबतेति खेदे यदामनोविकारोभवति तदाआनंदाश्रुः रोमांचश्चस्यादित्यर्थः ॥ २४ ॥

भागवतप्रधानस्त्वं मनसोऽनुकूलंप्रियंभाषसेअथोऽतः आत्मविद्यायांविशारदः निपुणः वैयासकिः श्रीशुकः पृष्टः सन्नृपतिं प्रतियदाह तदभिधेहीत्यन्वयः ॥ २५ ॥

इतिश्रीमद्भागवतमहापुराणे द्वितीयस्कंधे वीरराघवकृतटीकायां तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

वावदि । वाशब्दस्त्वविद्यमाने ॥ २१ ॥

बर्हायितेपिच्छनेत्रवद्दर्शनरहितेनिष्फलेनस्पर्शक्रियाविमतिजः द्रुमवद्जन्मभजतइति क्षेत्राणिपुण्यस्थानानि क्षेत्रंपुरेणदेहेकेदारयोनि- भार्ययोः पुण्यस्थानेसमूहेचघृतमात्येऽप्युसार्पिषोरितियादवः ॥ २२ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

भागवतस्य भगवद्भक्तजनस्यांघ्रिरेणुं यद्वा भागवतयोर्भगवतोर्विद्यमानयोरंघ्रिरेणुं ··· श्रीविष्णु-पद्याः श्रीविष्णुपदीप्रियायाः ··· ॥ २३ ॥

पुरुषस्य यत् हृदयं कथारूपेण गृह्यमाणैर्हरिनामधेयैर्न विक्रियेत भगवद्विषयकं विकारं नाप्नोति ··· अथवैवाप्यहीविकारः तस्येदं लक्षणं । मुखेविकासलक्षणो विकारः । नेत्रे जलं भवति । गात्रकेषु रोमहर्षो रोमांचलक्षणः स्या-दितिशेषः ॥ २४ ॥

यत एवं हरिकथाश्रवणाभावे जन्मादेर्नैष्फल्यमत एतन्मा भून्नृपतिनामापृष्टः आत्मविद्याविशारदः परमात्मविद्यायां पटुतरो वैयासकिर्नृ-पतिर्यदाह तन्मामभिधेहि हरिकथाभिधानं महत्त्वमनस्य किं न स्यात् ··· इत्याह मनईति मनोनुकूलं यथा भवति तथा प्रभाषसे हेत्वंतरमाह भागवतेति भतत्त्वतत्पवमोक्तुमिच्छा प्रवर्तत इति ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे विजयध्वजकृतटीकायां तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

भारः परमिति । पट्टवस्त्रोष्णीषेण किरीटेन वा जुष्टमपि । अप्यर्थे वाशब्दः ॥ २१ ॥

द्रुमवज्जन्म भजेते इति वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥

अथ तत्तत्सर्वेकारणविशेषं विना तत्तदपि न सम्पद्यते । तथा च श्रीवैष्णवचरणरजसि सर्वाङ्गस्नानमेव नमस्कारादिषु कार्यं श्रीचरणतुलसीगन्धस्तु हृद्विकारकार्यः हृद्विकारस्तु पुलकादिषु कारणमिति ज्ञेयम् । इत्यभिप्रायेणाह जीवञ्छव इति । श्रीविष्णुपद्याः तत्पदलग्नायाः ॥ २३ ॥

तदश्मसारमिति । अश्मवत् सारो बलं काठिन्यं यस्य । विक्रियालक्षणमाह अथेति । यदा हृद्विकारो भवेत् तदा नेत्रादौ जलादिकं भवतीत्यर्थः । इदमेवन्यायेन श्रीमता राज्ञा दृढीकरिष्यते । सा वाग्यया तस्य गुणान् गृणीते इत्याभ्याम् । तदेवं श्रीशुकवाक्यारब्ध्या-ध्यायत्रयाभिधेयत्वेन श्रीभक्तिरेव लब्धा । टीका च—तत्र तु प्रथमेऽध्याये कीर्तनश्रवणादिभिः । स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते द्वितीये तु ततः स्थूलधारणातो जितं मनः । सर्वसाक्षिणि सर्वेशे विष्णौ धार्यमितीर्यते ॥ तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं भुवनतो ऽन्येः । भक्त्युद्रेकेण तत्कर्मश्रवणादर ईर्यते ॥ इत्येषा ॥ २४ ॥ २५ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

पट्टाभिषिक्तस्य शिरः कुत्रापि न नमते तादृशमपि पट्टकिरीटजुष्टं पट्टकिरीटाभ्यां प्रीत्यासेवितं मोक्षदातारं चेन्न नमेत् तदा उत्तमाङ्गमपि भारएव सामान्योपयोगस्याप्यसिद्धत्वात् । भोगजीवने तु पूर्वं निषिद्धे । अतिभारवाहकोऽपि हि न नमति । शावो शवसंबन्धिनौ । अतः प्राणरहितौ । तथान्तर्भगवत्सेवारहितौ उपरिशोभापि तत्रापि शवालंकरणैः क्रियते । अत्रापि कांचनकंकणौ चेत्यमादरे ॥ २१ ॥

नयने पुनः मुखशोभां कुर्वती प्रयोजनान्तराभावात् मयूरपिच्छनेत्रवत् भगवतो वैचित्र्यं ज्ञापयतः न तु तत्र चैतन्यं । भगवतो हि द्विधा सृष्टिः चेतनाचेतना च भगवत्कार्यरहिता चैतन्यस्य भगवद्रूपत्वात् बर्हवदाचरतीति बर्हायिते लिंगानीति भक्ताः अधिष्ठानानि चेत्ये न निरीक्षतः नपश्यतः । पादावपि जंगमस्थावपि द्रुमजन्मैव भजतः । द्रुमेजन्म द्रुमजन्म यद्यपि । *यानसाधनं न भवतः । तथापि भूमिस्थितिमात्रेतदुप-योगात्तत्तुल्यता स्वावयवविनमुक्ततयास्थापयतः ॥ २२ ॥

जीवन्शवः शवो हि द्विविधः । अग्नजलेपतितो द्विविधस्तिष्ठति । मुमूर्षुर्मृतश्च । तत्र भागवताङ्घ्रिरेणुं यो न लभेत । आतिथ्येन तत्पूजां न कुर्यात् । यस्य वा गृहे तं कदापि नायान्ति । स तु केवलं मरणार्थमेव जीवतीत्यर्थः । यस्तु भगवत्प्रसादं न प्राप्नोति केनापि प्रकारेण तस्य तु जीवनमपि नास्ति । जीवनरूपस्य भगवदीयरसस्याभावात् परं श्वसिति । यथार्द्रजले केवलचेतनारहितेश्वसिति । अन्येषामपि कार्ये रुणाद्धि । तथा श्रीविष्णुपदैकनिष्ठत्वेनैव या प्रसिद्धा तुलसी तस्याः गंधं कदापि नाघ्रातवान् । भगवच्चरणारविंदप्रसादत्वेन नगृहीतवान् घ्राणस्य गंधग्राहकत्वात् तुलस्यां गंधस्य च विद्यमानत्वात् । सर्पपुच्छछेदने चलनवत् इन्द्रियतदधिष्ठातृदेवतापगमात् । केवलं क्रियामात्र मस्तीत्याह । श्रीविष्णुपद्या इति ॥ २३ ॥

अन्तःकरणवैफल्यमाह । तदश्मसारमिति । बतइति खेदे । यद्यपि धैर्यगुणाः । भगवच्चरित्रमपि श्रुत्वा धीरवद्वर्तते । तथापि लोकवृ-त्तस्य धैर्यं अश्मसारभूतं इदमिति भक्त्यावेशात् स्वकीयमेव निन्दति । अनेन तत्र भगवच्चरणारविन्दस्थापनसंभावना निवारिता । अतः तत्प्रक्षालनं व्यर्थमितिभावः । यद्धृदयं गृह्यमाणैः श्रवणमन्येन वा दुःखाभिनिवेशाद्व्यावृत्त्यर्थं हरेः नामधेयैः वाचकैः पदैः यदाविकारं न प्राप्नोति । यस्यां हि गृहं भगवदागमनं संभावितं तत्र हि मार्जननिषेचनाद्यलंकारा भवंति । यत्र तु संभावनैव नास्ति तत् जालगृहवत्तत् किञ्चित् मोस्पद्यते । अथविकारा निरूप्यं तेपरिज्ञानार्थं । यदा विकारः अन्तःकरणे भवेत् तदा ज्ञापकं भवेत् । नेत्रे जलं रोमांचश्च । विकारो हि भग-वदीयत्वेन परिणामः । तदा तदीयानां वैष्णवत्वं । तत्र रोम्णां हृष्टत्वात् जातिः वैष्णवत्वयुक्ता । रसस्यान्तः पूरणात् नेत्रं च कमलं भवति सजलम् । अन्यथा स्वस्थानच्युतं केवलं क्षुद्रमिति भावः ॥ २४ ॥

तस्मात्सर्वेन्द्रियाणां देहादेश्च साफल्यार्थं भगवत्कथामभिधेहीत्याह । अथाभिधेहीति । अंगेति कोमलसंबोधनं । ममाभिप्रायविचार-व्यतिरेकेणापि श्रवणमात्रेणैव त्वद्वाक्ये मनोहरता अनुभूयते । अतस्त्वं भागवतप्रधानः त्वद्वाक्ये भगवत्संबंधात् । परं वैयासकिर्यदाह । सहिषहिर्मुखवार्तां न करिष्यति आत्मविद्यायां निपुणत्वात् व्यासपुत्रत्वाच्च राजानं प्रति तेनैव प्रश्नोक्तेः कथकत्वाच्च अनेन लोकानां मनोऽपि वक्ष्यमाणमित्युक्तं भवति ॥ २५ ॥ इति श्रीभागवते सुबोधिन्यां द्वितीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

---

* पानसाधनमित्यपिपाठः ।

[illegible] शिरः [illegible] च किरीटेन च युक्तमपि भार एव भारः । संसारसिन्धौ अचिरान्मज्जयत्येवेति भावः । शावौ मृतकवत्तत्सम्बन्धिनाविति देवपित्रादयोऽपि तद्दत्तं जलादिकमशुचित्वात् न गृह्णन्तीति भावः । वा-शब्दोऽप्यर्थे ॥ २१ ॥

ते नयने विष्णोर्मूर्तीर्न निरीक्षेते ते बर्हायिते मयूरपिच्छतुल्ये इति तादृशमात्मानं उद्धारपदवीमपश्यन्तः संसारकण्टककाने एव पतन्तीति भावः । द्रुमजन्म भजेते इति तथा तौ वृक्षमूलतुल्याविति यमदूतैरेव कुठारैश्छिद्यमानौ तौ भविष्यत इति भावः ॥ २२ ॥

एकैकान्यङ्गानि निन्दित्वा समुदितानि निन्दति । नाभिलभेत अभितो न स्पृशेत् सर्व्वाङ्गेषु न धारयेदित्यर्थः । स जीवञ्छवः प्रेत शरीरविशेष इव चेष्टमानः साधून् भीषयते तत्पाचितकृतसपर्य्यादिकमपि भगवान् न गृह्णातीति भावः । श्रीविष्णुपद्याः विष्णुपदकमलस्थत्वेन विष्णुपदीत्यभिधानायास्तुलस्या गन्धं न वेद अवघ्राय नाभिनन्देदित्यर्थः । श्वसञ्छवः पूर्व्ववत् सोऽपि जीवञ्छव इत्यर्थः ॥ २३ ॥

तदेवं व्यस्तसमस्ततया बाह्यमङ्गं प्राधान्येन निन्दित्वा आभ्यन्तरमपि निन्दति । तत् अश्मसारं लोहमयमेव हृदयम् । यत् खलु गृह्यमाणैः कीर्त्यमानैरपि बहुभिर्हरिनामधेयैर्न विक्रियेत । विक्रियालक्षणमाह अथेत्यादि । गात्ररुहेषु रोमसु हर्षः रोमाञ्चः । बहुनाम-ग्रहणेऽपि चित्तद्रवाभावो नामापराधलिङ्गमिति सन्दर्भः । किञ्चाश्रुपुलकावेव चित्तद्रवलिङ्गमित्यपि न शक्यते वक्तुम् । यदुक्तं श्रीमद्रूपगोस्वामिचरणैः—स्वभावपिच्छिलस्वान्ते तदभ्यासपरेऽपि च । सत्त्वाभासं विनापि स्युः क्वाप्यश्रुपुलकादयः ॥ इति । तथा अतिगम्भीरमहानुभावभक्तेषु हरिनामभिश्चित्तद्रवेऽपि बहिरश्रुपुलकादयो न दृश्यन्ते इति । तस्मात् पद्यमिदमेवं व्याख्येयम् । यद्धृदयं न विक्रियेत । कदा । यदा विकारस्तदापीत्यर्थः । विकार एव कस्तत्राह नेत्रे जलमिति । ततश्च बहिरश्रुपुलकयोः सतोरपि यद्धृदयं न विक्रियेत तदश्मसारमिति वाक्यार्थः । ततश्च हृदयविक्रियालक्षणान्यसाधारणानि क्षान्तिनामग्रहणासक्त्यादीन्येव ज्ञेयानि । यदुक्तम्—क्षान्तिरव्यर्थकालत्वं विरक्तिर्मानशून्यता । आशाबन्धः समुत्कण्ठा नामगाने सदा रुचिः ॥ आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसति-स्थले । इत्यादयोऽनुभावाः स्युर्जातभावाङ्कुरे जने ॥ अश्रुपुलकादीनि तु साधारणान्येव । अयमर्थः—उत्तमाधिकारिणां निर्मत्सराणां नामग्रहणे सत्येव नाममाधुर्य्यस्यानुभवः स्यात्, तस्मिंश्च सति हृदयविक्रिया च स्यात्, सत्याञ्च तस्यां तद्व्यञ्जकाः क्षान्त्यादयोऽश्रु-पुलकादयश्च भवन्त्येव । कनिष्ठाधिकारिणां समत्सराणान्तु सापराधत्वान्नामग्रहणबाहुल्येऽपि तन्माधुर्य्यानुभवाभावे चित्तं नैव विक्रियेत, तद्व्यञ्जकाः क्षान्त्यादयोऽपि न भवन्ति, तेषामेवाश्रुपुलकादिसत्त्वेऽप्यश्मसारहृदयतया निन्द्येयम् । किञ्च तेषामपि साधु सङ्गेनानर्थनिवृत्तिनिष्ठारुच्यादिभूमिकारूढानां कालेन चित्तद्रवे सति चित्तस्याश्मसारत्वमपगच्छत्येव । येषान्तु चित्तद्रवेऽपि सति चित्त स्याश्मसारता तिष्ठेदेव ते तु दुश्चिकित्स्या एव ज्ञेयाः । तथा च वक्ष्यते तृतीये सबीजयोगध्याने—एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् । औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते ॥ इति । अत्र द्रवद्धृद एव इति चित्तद्रवः । तच्च चित्तबडिशमिति चित्तस्याश्मसारता, बडिशस्य लोहमयत्वात् अश्मसारस्य लोहपर्य्यायत्वात् । प्रतिलब्धो भावो येनेति भावोऽयमाभासरूप एव, चित्तद्रवोऽपि तादृश एव ज्ञेयः यथार्थत्वे शनकैर्वियुङ्क्ते इति तस्य पुरुषार्थबुद्ध्या त्यागानुपपत्तेः । अतएव तादृशध्यानभक्त्याप्ययं भक्तशब्देन नाभिधीयते, किन्तु योगिशब्देनैव । चित्तस्य बडिशत्वेन कठोरत्वकुटिलत्वाभ्यां तद्विषयस्य भगवदङ्गस्य दुःखदान एव पर्य्यासेरिति । एवञ्च सा वाग् यया तस्य गुणान् गृणाते करौ च तत्कर्मकरौ इत्यादिवक्ष्यमाणवाक्यै-रन्वयेन बिले बत इत्यादिवाक्यैर्व्यतिरेकेण च भक्तेरेव शास्त्राभिधेयत्वं दृढीकृतम् ॥ २४ ॥

यस्मादेवं तस्मादभिधेहि । ननु किमभिदधामीति तत्राह । त्वं मनोऽनुकूलं प्रभाषसे तस्माद्वैयासकिराह तदेव । ततोऽधिकमन्यत् किं वक्तव्यमस्तीति भावः ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वितीयेऽत्र तृतीयोऽपि सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

पट्टशब्दः पट्टोष्णीषवाचकः पट्टोष्णीषेणकिरीटेनचजुष्टमपि । उत्तमांगंशिरो । यदिमुकिन्दंननमेत्तर्हिपरंकवलंभारएव । लसंतीकांचनकंकणौयथयोस्तावपिवाशब्दोऽप्यर्थे । हरेःसपर्यांपूजांनकुरुतः नकुर्वतौतर्हिशावौशवोमृतकः तत्करतुल्यौ ॥ २१ ॥

विष्णोर्लिंगानिमूर्त्तीः । नराणांयेनयनेननिरीक्षतः ननिरीक्षेतेचेत् । तर्हितेबर्हायितेमयूरपिच्छनेत्रतुल्ये । हरेःक्षेत्राणिश्रीमद्वृन्दावनादीनियौनानुव्रजतश्चरतः । तौपादौद्रुमजन्मभाजौद्रुमजन्मभजतइति । तथाद्रुममूलतुल्यौ ॥ २२ ॥

यस्तुभागवतानामंघ्रिरेणुंजातुकदाचिदपिनाभिलभेत अभितोनस्पृशेत्धारयेतसजीवन् । अपिशवःमृततुल्यः यस्तुश्रीविष्णुपद्याः श्रीविष्णुपादलग्नायाः गंधंनवेदअवघ्रायनाभिनंदेतसश्वसन् । निश्वासान्मुंचन्नपिशवःशवतुल्यः ॥ २३ ॥

गृह्यमाणैः वैयासिकवदचर्चितैर्भागवतैरुच्चार्यमाणैर्हरिनामधेयैर्यन्नविक्रियेतविकारंनप्राप्नुयात् । तद्धृदयमश्मसारम् । काष्णांयसम् । विक्रियालक्षणमाहअथेति । नेत्रेविकारः । आरुपयंजलंचगात्ररुहेषुरोमसुहर्षःउद्गमः ॥ २४ ॥

हेभगवसूतयतोऽभक्तस्यसर्वंव्यर्थंम् । अथअतःराज्ञासाधुपृष्टःसन्वैयासकिः । नृपतिंप्रतियदाह । तदभिधेहित्वंचमनोनुकूलंमनसःप्रियं । भाषसेकृपेऽतोऽभिधेहि ॥ २५ ॥

इति श्रीमद्भागवतसिद्धांतप्रदीपेद्वितीयस्कंधेतृतीयाध्यायार्थप्रकाशः ।

राज पट्ट मुकुट से भूषित भी शिर मुकुन्द को जो नमस्कार नकरै तो बोझ और सूत है और जिन हाथों से हरि की पूजा नकरै वा हाथ कांचन के कंकणों से भूषित भी मुर्दों के हाथों के तुल्य हैं ॥ २१ ॥

और हरिके श्रीविग्रहों को जो नेत्र नहीं दर्शन करते हैं वे मोरके पिच्छ के तुल्य हैं और जिन पैरों से हरिके क्षेत्रों में न आवैं वे पैर वृक्ष मूलके तुल्य हैं ॥ २२ ॥

और जो पुरुष वैष्णवों के चरण रज को कभी न प्राप्त होवे वहां जीताभी मृत के तुल्य है और विष्णुपदी तुलसी जी के सुगंध को सूंघकर अनुमोदन करै वह जीता हुआ मुर्दा के तुल्य है ॥ २३ ॥

और हरि के नाम लेने से जिसका हृदय विकार को न प्राप्त होवे वह हृदय पाषाण के तुल्य है। विकार यही कि नेत्रों में जल और रोमटों में आनन्द ॥ २४ ॥

हे सूत वैष्णवों में श्रेष्ठ श्री शुक आत्म विद्या विशारद परीक्षित जी से जो कुछ मन के अनुकूल कहा हो वह आप कहिये ॥ २५ ॥

इति द्वितीयस्कन्ध का तीसरा अध्याय ॥ ३ ॥

चतुर्थोऽध्यायः ।

सूत उवाच । वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः

उपधार्य्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥

आत्मजायासुतागारपशुद्रविणबन्धुषु ।

राज्ये चाविकले नित्यं विरूढां ममतां जहौ ॥ २ ॥

पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः? ।

कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३ ॥

संस्थां विज्ञाय संन्यस्य कर्म्म त्रैवर्गिकञ्च यत् ।

वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ ॥

तुर्य्ये परीक्षिता पृष्टं सृष्ट्यादि हरिचेष्टितम् ।
शुकेन ब्रह्मतत्पुत्रसंवादेनोपवर्ण्यते ॥ ० ॥

राज्ञः प्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमाह चतुर्भिः । वैयासकेः शुकस्य इति एवम् आत्मनस्तत्त्वस्य निश्चयो यस्मात् तत् वचः उपधार्य्य आकलय्य सतीं शुद्धां कृष्णे एव सेव्यो नान्य इत्येवम्भूताम् ॥ १ ॥

आत्मा देहः । पशवः गजादयः ॥ २ ॥

इममेवार्थं हरिलीलाख्यम् ॥ ३ ॥

संस्थां मृत्युम् । त्रैवर्गिकं धर्म्मार्थकामप्रधानम् । संन्यस्य त्यक्त्वा । आत्मभावं परमप्रेम्णा भगवद्भावं गतः प्राप्तः सन् पप्रच्छ ॥ ४ ॥

———

श्रीराधारमणदास गोस्वामि विरचिता दीपन्याख्य तट्टिप्पणी ।

॥ ० ॥ १—१७ ॥

———

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

एवमापृष्टः सूतो राज्ञः प्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमाह वैयासकेरिति वैयासकेः श्रीशुकस्यात्मनः तत्त्वनिश्चयं यथावस्थितस्वरूपनि[illegible] वचः इत्युक्तप्रकारेणोपधार्य्य श्रुत्वौत्तरेयः उत्तरापुत्रः राजा श्रीकृष्णे सतीं मतिं व्यधात् अकरोत् ॥ १ ॥

किञ्च आत्मा देहः द्रविणं धनम् आत्मादिषु अविकले निरुपद्रवे राज्ये च विरूढां नित्यरूढां ममतां स्वाभिमानितां त्याज ॥ २ ॥

हे सत्तमाः! शौनकादयः इममेव हरिकथालक्षणमेवार्थं पप्रच्छ यं मां प्रति यूयं पृच्छथ यूयं कथंभूतः पप्रच्छ श्रीकृष्णानुभावश्रवणे श्रीकृष्णलीलाश्रवणे श्रद्दधानः अतएव महाशयाः ॥ ३ ॥

संस्थां मृत्युं विज्ञाय ज्ञात्वा त्रैवर्गिकं धर्मार्थकामसाधनं कर्म संन्यस्य त्यक्त्वा भगवति वासुदेवे आत्मभावं [illegible] वासुदेवादिषु [illegible] परं दृढं गतः प्राप्त इत्यर्थः एवंविधः परीक्षित्पप्रच्छेति पूर्वेणान्वयः ॥ ४ ॥

———

श्रीमद्विजयध्वजकृत पदरत्नावली ।

संक्षेपतः श्रुतहरिचरितस्यात्र [illegible] परीक्षितो [illegible] विशेषतः श्रोतुकामस्य हरि[illegible] श्रीशुकाचार्यस्य गुरुदेवतानमस्कारपुरःसरं तत्प्रश्नप्रतिवचनप्रतिज्ञाप्रकारश्चास्मिन्नध्याये प्रतिपाद्यते तत्र प्रथमतः शुकोपदेशात्तस्य [illegible] विरक्तिमनुवदति वैयासकेरिति आत्मनः सर्वगुणपूर्णस्य हरेस्तत्त्वस्य निश्चयो येन तत्तथा उपधार्य हरि[illegible] सतीं मतिं भक्तिपरिप्लुताम् ॥ १ ॥

आत्मजायाराज्यादिविषयां [illegible] आत्मेति [illegible] ममतां जहावित्यन्वयः हरेः [illegible] आत्मा देहः [illegible] प्रकृतिपूर्वा ॥ २ ॥

[illegible] पप्रच्छेति ॥ ३ ॥

[illegible] त्रैवर्गिकं धर्मार्थकाम[illegible] पप्रच्छ शुकमिति शेषः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

सती विद्यमाना कृष्णे या मतिस्तामेव व्यधात् विशेषेण अधात् । अकाम इत्यादिना सामान्याकारेणोपचारितेऽपि विशेष तात्पर्य्या वगमात् कृष्णे इति विशेषोक्तिः ॥ १ ॥

जहौ यः पूर्व्वमेवेति ज्ञेयं विमर्शितो हेयतया पुरस्तात् इत्युक्तेः ॥ २ ॥ ३ ॥

आत्मनो भावं प्रेमाणमेव दृढं यथा स्यात् तथा गतः प्राप्तः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

साधनं द्विविधं प्रोक्तं क्रियाकर्तृ विभेदतः ।
पूर्वाध्याये क्रियांगानि वर्णितानिद्विरूपतः ॥ १ ॥
प्रश्नेऽप्युत्तरशेषत्वात् क्रियायाश्च निरूपणात् ।
स्वरूपतांज्ञानतश्च कार्यसिद्धिर्यतो द्विधा ॥ २ ॥

साधनं श्रोतृवक्त्रोश्चविमर्षाधिक्रियायतः तदुच्यतेमुख्ययोर्हिप्रश्नस्याद्येससाधनः ज्ञात्वाथममनंदेवगुरावपिविशेषतः सामान्य मुत्तरंयच्चितद्वक्तुरधिकारकृत् अतोऽध्यायेचतुर्थेतुपरीक्षिच्छुकयोःक्रमात् विमर्षणाधिकारोहिविचारांगंनिरूप्यते व्यवसायात्मिकाबुद्धि-र्ममतात्यागएवच कथायाःश्रवणेश्रद्धासन्यासोज्ञानमेवच प्रश्नाश्चतुष्टयपूर्वंश्रोतुरंगमिहोच्यते एवंपूर्वाध्यायांतेराज्ञःशुकस्यचसंबंधिनी कथावक्तव्येतिप्रश्नउक्तः तत्रोत्तरमाह वैयासकेरितिचतुर्भिः प्रथमतोभगवतिसतीमतिकल्पनेत्याह यद्यपिपूर्वंभगवतिमतिःस्थितैव तथापिश्रद्धामात्रेणसाजातेतिअज्ञानसहितास्यअसतीवदेवभवति इदानींसामान्यतोभगवंतंज्ञात्वाअस्तिकाश्चिद्भगवानूफलरूपोभक्तिसाध्यः श्रवणाद्विनासेऽयइति । सर्वरूपोऽन्तरश्च तस्मिन्ध्यातेतत्सायुज्यंचफलमिति तद्भजनार्थमेवसर्वाकाममाकर्त्तव्या । साधनानिचतत्रैवयोजित व्यानीतिवैयासकेर्वचः श्रुत्वा । अनेनात्मतत्त्वंआत्मनोभगवतःस्वस्यचतत्त्वंयाथात्म्यंविनिश्चित्यमनसिपुनर्विचार्यतत्हृदयेस्थापयित्वाआरा ध्योभगवान्सर्वदेतिसद्बुद्धिंकृतवानित्यर्थः । पूर्वंसामान्यतोगृहंत्यक्तमपिममतायाविद्यमानत्वात् अत्यक्तमिवभवतितदिदानींवैयासकेर्वा क्यात्त्यक्तवानित्याह ॥ १ ॥

आत्मेति । ममताहिव्याप्तुत्यभगवतिप्रविष्टा । अतोममतायाउत्तमंविषयंप्राप्यपूर्वस्थानसमीचीनांत्यजति आत्मादेहःजायासुतागाराः भार्यापुत्रगृहाःगावोद्रविणंबंधवश्चतेषु राज्यचससाधनंसिंहासनोपवेशनप्रभृतिअद्यावधिनिर्व्यानरूढांममतांजहौ । पूर्वंयथाममताविषये देहादावितिकृत्यचिंतांकरोति । तथेदानींममताविषयंभगवतिइतिकृत्यचितापरपर्यायंसंदेहंतुच्छतिसिद्ध्यर्थंपृष्टवानित्याह ॥ २ ॥

पप्रच्छचेति । चकारस्तूक्तमनुक्तयार्थः अहोपप्रच्छच उक्तार्थस्य असाधनतासिद्ध्यर्थंतेनपूर्वमुत्तरमुक्तमिति इदानीमपिपृच्छयतेत्सूतप्र श्नेतस्यचप्रश्नेसरस्वतीसंवादेजातइत्याह । हे उत्तमाः ! यन्मांपृच्छत । इममेवार्थंसपृष्टवान् । शुकवाक्यस्यसाधनत्वात् तस्यचभवताञ्च श्रोतृत्वेनतुल्यत्वाद्यथाभवतांतथातस्यापिप्रश्नेबुद्धिरुत्पन्नायुक्तेत्यर्थः । परमवांतरभेदःकश्चिदस्तिभवतांतुतद्वाक्यप्रकारेणपदार्थज्ञानेच्छा तस्यतुभगवन्माहात्म्यज्ञानमेवेष्टमितितदाह कृष्णानुभावश्रवणेश्रद्दधानइति भगवन्माहात्म्यश्रवणेतस्यश्रद्धाजातं । श्रद्धामनसोविपुल ताच श्रद्धयातद्ग्रहणं विपुलतयाअपूर्त्तिः शिष्टमत्रत्यंकृत्यंकृतवानित्याह ॥ ३ ॥

संस्थांविज्ञायेति मममऽहनिमृत्युंविज्ञायधर्मार्थकामोपयोगिकर्मत्यक्त्वा तत्साधनान्यपित्यक्त्वा मोक्षदातरिभगवतिवासुदेवेआत्मनोन्तःकर णस्यभावंरतिस्नेहंदृढंप्राप्यपप्रच्छेतिसम्बन्धः । आत्मनःस्वरूपस्यवासत्तांअग्रेस्थितिरूपांआत्मत्वंवा । एवंप्रश्नसाधनान्युक्त्वाप्रश्नंचकुमारभि नंदनमाह ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

चतुर्थे तु शुकः प्रोक्तः सृष्टिलीलां परीक्षिता ।
प्रश्ननारदसंवादनाह नत्वा गुरुं हरिम् ॥ ० ॥

आत्मनस्तत्त्वस्य निश्चयो यस्मात् तत् । कृष्णे सतीं विद्यमानामेव मतिं विशेषेण अधात् । यत औत्तरेयः उत्तराया गर्भे प्रविष्टं कृष्णं तदवधि सदा स्मरन्नेवेत्यर्थः । यद्वा सतीम् अव्यभिचारिणीम् ॥ १ ॥

आत्मा देहः ॥ २ ॥

यन्मां पृच्छथ आयुर्हरति वै पुंसाम् इत्यादिवाक्यैर्व्यञ्जितां कृष्णकथां ब्रूहीति यत् पृच्छथ इममेवार्थं राजा शुकं पप्रच्छे-त्यर्थः ॥ ३ ॥

संस्थां मृत्युम् । संन्यस्य त्यक्त्वा । आत्मनो भावं प्रमाणं पूर्वंसिद्धमपि तदा दृढं गतः प्राप्तः ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

एवंमुनिनापृष्टःसूतःपरीक्षिच्छ्रयनिरूपणपूर्वकंतत्प्रश्नमाह । वैयासकेरिति । सार्द्धैस्त्रिभिः । औत्तरेयःपरीक्षित्वैयासकेःश्रीशुकस्य इत्थंभूतंपूर्वोक्तम् । आत्मनःस्वस्यतत्त्वेश्रीकृष्णेभजनीयेनिश्चयोयस्मात्तच्च उपधार्यश्रुत्वाकृष्णेसतीं । श्रीकृष्णपदसेव्योमेतदृत्येवंभूतांमतिं व्यधादकरोदित्यर्थः ॥ १ ॥

आत्मादेहः । अविकलेनिरुपद्रवेममतास्वकीयत्वबुद्धिंजहौतत्याज ॥ २ ॥

हे सत्तमाः ! हे मुनयः ! कृष्णानुभावश्रवणेकृष्णलीलाश्रवणेश्रद्दधानः यद्यूयंमांप्रतिपृच्छथइममेवार्थंहरिलीलाश्रवणंपप्रच्छ ॥ [illegible] संस्थांदेहविनाशंविज्ञायज्ञात्वा । यत्त्रैवर्गिकंधर्मार्थकामसाधनंप्रवृत्तंकर्मतत्संन्यस्यत्यक्त्वावासुदेवेऽधिति । आत्मनोप्रभूतद्भावं दृढंतिताद्दोरम्यंदृढंगतः : प्राप्तःसन्पप्रच्छ ॥ ४ ॥

राजोवाच । समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ ।
तमो विशीर्य्यते मह्यं हरेः कथयतः कथाम् ॥ ५ ॥
भूय एव विवित्सामि भगवानात्ममायया ।
यथेदं सृज्यते विश्वं दुर्विभाव्यं मुनीश्वरैः ॥ ६ ॥
यथा गोपायति विभुर्यथा संयच्छते पुनः ।
यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ।
आत्मानं क्रीड़यन् क्रीड़न् करोति विकरोति च ॥ ७ ॥
नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्म्मणः ।
दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् ॥ ८ ॥

भाषाटीका ।

सूतउवाच—आत्माके तत्वका निश्चय करनेवाला वैयासकी (शुकदेव) का यह वचन सुनकर औत्तरेय (राजा परीक्षित) ने कृष्ण में सती मती विधानकी ॥ १ ॥

और आत्मा (शरीर) जाया (स्त्री) सुत, आगार (घर) पशु, द्रव्य, बन्धु, और अविकल राज्य में नित्य निरत अपनी ममताको त्यागदी ॥ २ ॥

हे सत्तमाः कृष्ण के अनुभाव श्रवण में श्रद्धावान महा मना राजाने यही अर्थ पूछा जो आप मुझसे पूछते हैं ॥ ३ ॥

अपनी मृत्युको निश्चयजान धर्मार्थ काम प्रधान कर्म को त्यागकर वासुदेव भगवान में दृढ आत्मभाव को प्राप्त हुआ है ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

मह्यं मम तमः अज्ञानं विशीर्य्यते नश्यति । तव कथयतः सतः । अतः समीचीनम् ॥ ५ ॥

पुनश्च वेदितुमिच्छामि । इदं दुर्विभाव्यम् अवितर्क्यं विश्वं यथा सृजति ॥ ६ ॥

गोपायति पालयति । संयच्छते संहरते । पुरुशक्तिः बहुशक्तिमान् । क्रीडन् यथा करोति । आत्मानंब्रह्मादिरूपिणं क्रीडयन् विकरोति विविधं करोति ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

स्वबुभुत्सितमवतारयितुंमुनिवचोऽभिनंदति राजा समीचीनमिति हे ब्रह्मन्ननघमह्यंहरेःकथाः कथयतः सर्वज्ञस्यतववचः समीचीनं यतस्तमोऽज्ञानं विशीर्यतेनश्यति ॥ ५ ॥

बुभुत्सितपृच्छति भूयइति भूयःपुनःविवित्सामिवेदितुमिच्छामि अधीश्वरैर्ब्रह्मादिभिर्दुर्विभाव्यमप्रतर्क्यं इदंविश्वंयथासृजति ॥ ६ ॥

यथागोपायतिरक्षति यथापुनःसंयच्छतिसंहरतिपुरुशक्तिरनंतशक्तिःपरःपुमान्परमपुरुषः यांयांब्रह्मादिरूपांशक्तिशरीरंउपाश्रित्या-धिष्ठाय ॥ ७ ॥

आत्मानंब्रह्मरुद्रादिरूपेणस्वात्मानंक्रीडयन्सृष्ट्यादिव्यापारविशेषाभिनिविष्टंकुर्वन्स्वयंक्रीडन्स्वयत्यादिव्यापारंकुर्वन्करोतिस्वयमेवतत्तदं-तरात्मतयासृष्ट्यादिव्यापारंकरोतिविकरोतिविरुद्धंकरोति उपसंहरतियंजगद्व्यापाररूपाक्रीडास्वातंत्र्यमूलानतुवालादीनामिवकर्ममूल-त्वभिप्रायः ॥ ८ ॥

हे भगवन्नद्भुतकर्मणः विस्मयनीयव्यापारस्यहरेः । विचेष्टितंकविभिर्ज्ञानाधिकैरपिदुर्विभाव्यमप्रतर्क्यमिवाभातिप्रतीयते ॥ ८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

स्वाभीष्टंप्रष्टुंशुकवचनंस्तौति समीचीनमिति यदिष्टसाधनावबोधकंतत्प्रतिबंधनिवर्तकंचतदेववचनंसमीचीनंइष्टमेतत्कथमत्राह तमइति मह्यंममतमआंतरमज्ञानंविशीर्यतइत्यनेनसमूलभूतमुक्तिःयतइत्युक्तंभवति मह्यमित्यनेनस्वेष्टसाधनंज्ञानंचयेनदीयतइतिसूचितंभवति हेतु-र्वाभिनोच्यते मह्यंतमोविशीर्यतइतियेनतस्मात्समीचीनमिति ॥ ५ ॥

आत्ममायया स्वेच्छयाज्ञानियतया प्रकृत्यावाऽन्यैर्दुर्विभाव्यंदुरूपायमिदंविश्वंयथायेनप्रकारेणसृजते ॥ ६ ॥

येनप्रकारेणगोपायतिरक्षति पुनर्येनप्रकारेणसंयच्छतेसंहरतितंप्रकारंभूयःपुनरपिविविदिषामिज्ञातुमिच्छामिपुरुशक्तिरनंतशक्तिः परः पुमान् ॥ ७ ॥

[illegible] ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

यतो ममापि तमो विशीर्य्यते अतो हरेः कथां कथयतः कथयितुमारभमाणस्य सम्यक्त्वस्य तव वचः समीचीनमित्येव योजना ॥ ५ ॥

भूय इति । एतदपि ज्ञातुमिच्छामीत्यर्थः । आपाततः साक्षात् श्रीकृष्णचरितमयमेव तद्विषयक प्रश्नः स्यादिति. नित्य भक्त्यादिकमाश्रित्य तदेश्वर्यविशेषप्रश्नोऽयं ज्ञेयः ॥ ६ ॥

यथेति सार्द्धत्रिकम ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

समीचीनमिति यद्यपित्वद्वचनस्यार्थोज्ञायतेसर्वज्ञवचनत्वात् । तथापित्वद्वचनंसमीचीनं । ब्रह्मन्निति संबोधनं वक्तृदोषाभावाय । अनये त्यभिमानाद्यभावाय तथापिममस्वरूपाज्ञानरूपंतमःत्वद्वाक्याद्विशीर्यते । तत्तुमदर्थमेवोक्तं श्रयंतुमयाविनिश्चितं । त्वद्वाक्येनममाज्ञानंनष्टं मदर्थमेवचत्वयोक्तं । भगवतश्चकथाकथितेति अर्थापरिज्ञानात्संदेहात्तदानींविशेषाः पृच्छंतइत्याह ॥ ५ ॥

भूयएवेति । विविन्त्सामिज्ञातुमिच्छामि । तत्रसंदेहपञ्चकं उत्पत्तिस्थितिप्रलयेषुआधारेसाधनेषुच । तत्रोत्पत्तौसंदेहमाह । यथेवमिति इदंजगद्यथासृज्यते किंकुम्भकारवत् आहोस्वित्सिद्धवद्वाक्यमात्रेण । आहोस्विद्योगिवन्मनसा । आहोस्वित् कल्पवृक्षवत्प्रसूते आहोस्वित् अभिव्यनक्तीति उत्पत्तौपंचसंदेहाः एतएवरक्षाप्रलययोरनुवर्त्तते किंच दुर्विभाव्यमनीश्वरैरिति येनपापंचप्रश्नाःकृताः तेकेपिभगवति नसंभवंति यद्वायतःउत्पाद्यमानस्यमनसाप्याकलयितुमशक्यत्वात् ॥ ६ ॥

एवमुत्तरत्रापि तर्हिनकरोत्येवेतिकिमितिमानिश्चीयतेनपालयतिचेति तत्राह विभुरिति पुनःपुनर्नाशितस्यनाशनमुत्पादितस्यचोत्पादन मिति चतुर्थप्रश्नमाह यांयांशक्तिमिति अत्रसृज्यःकःपदार्थः किंकेवलआत्मा शक्तिसहितोवा सहित्येपिकिमात्मैवोत्पद्यतेशक्तिरेववेतिसं-देहेतेष्वपिपक्षेषुकालभेदेनज्ञातिभेदेनवाव्यवस्थितेषु कस्यांकृतौ यांशक्तिमुपाश्रित्यपुनर्द्वितीयकृतौयांशक्तिमिति एवंपंचस्वपि तत्राप्यवांतर भेदाःसंति यतःपुरुशक्तिः कालभेदाश्चबहवःसंतियतःकालादिनियंताअयंपुमान् आत्मानमेवकरोति विरुद्धमपिकरोति नकरोति विविधं वाकरोति अथवा आत्मानमेवक्रीडयन् अन्यदेवाकिंचित्करोतीत्यादिसंबंधः अथवाक्रीडन्आत्मानमेवकरोतीति चकारादन्येपिपक्षाःबहुधाः तर्कैर्वमनेकधासंदेहेगुरुःप्रष्टुंमार्हति अतिवादात् अतोन्यएवप्रष्टव्यइत्याशंक्याह ॥ ७ ॥

नूनमिति ब्रह्मन्निति अतिप्रश्नेप्यक्षोभाय भगवतोहरेरितिदुःखाभावसुखयोःसिद्ध्यर्थमुक्तम् किंच सामान्यतएवभगवतश्चरित्रंदुर्बोधं केन गुणेनकरोतीति तत्रापिहरःअन्यदुःखनिवारणार्थंकरोति तत्राप्येषामानंत्यात्दुःखानांचानंत्यात्केनप्रकारेणकृतेसर्वेषांदुःखंगच्छतीतिनज्ञाय ते तत्राप्यद्भुतकर्मणः अन्यत्करोत्यन्यत्संपद्यतइति अतएवकविभिरपिनिपुणैरपिअनेकधाकल्पकैरपिदुर्विभाव्यं अतोनान्यःप्रष्टुमर्हतीत्यर्थः किंच केनसाधनेनभवान्करोति गुणैरितिचेत्तान्गुणान्किंक्रमशोगृह्णातियुगपद्वा नहिसर्वेयुगपदुत्पद्यंतेलीयंतेवा किंच भूरिशोवा गृह्णाति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तमः अज्ञानम् । मह्यं मम ॥ ५ ॥

भूय एवेत्यत्र राज्ञोऽयमभिप्रायः—म्रियमाणस्य मम कृत्यानि श्रवणकीर्त्तनस्मरणान्येवोक्तानि, तेषाञ्च विषयाः कृष्णलीलारूप गुणाद्याः । तत्र प्रथमं मायाशक्तिमतस्तस्य सृष्ट्यादिलीला जिज्ञास्या ततश्च चिच्छक्तिमतो गोवर्द्धनोद्धरणाद्या इति । भूय एव पुनरपि विवित्सामि वेदितुमिच्छामि इत्यभाव आर्षः । दुर्विभाव्यं ध्यातुमप्यशक्यम ॥ ६ ॥

गोपायति पालयति । संयच्छते संहरति । पुरवो बहुधाश्चिन्मया जीवा अन्तरङ्गावहिरङ्गातटस्थाभिधानाः शक्तयो यस्य सः । क्रीडन् मायाशक्त्या सह दीव्यन् आत्मानं करोति महदहङ्कारादिरूपत्वेन सृजतीति सर्गप्रश्नः । तथा क्रीडयन् ब्रह्ममरीच्यादीन् देववत् विकरोति आत्मानं देवतिर्य्यङ्नरादिरूपत्वेन सृजतीति विसर्गप्रश्नः ॥ ७ ॥

नन्विदं त्वं प्रायः सर्व्वं जानास्येव तत् किं पृच्छसीति तत्राह । नूनं निश्चितमेव भगवतश्चेष्टितम् इदं सृष्ट्यादिचरितं कविभिरपि न्यायादिशास्त्रज्ञैरपि दुर्विभाव्यमिव दुर्ज्ञेयमिव विभाति । ममाज्ञस्यात्र का वार्त्तेति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अन्यंखलुमुमुक्षितमज्ञमावयितुंशुकवचोभिनंदतिसमीचीनमिति । मह्यंममतमोऽज्ञानंविशीर्यतेनश्यति ॥ ५ ॥

विविन्त्सामिवेदितुमिच्छामि । अधीश्वरैः ब्रह्मादिभिर्दुर्विभाव्यमचिंतनीयम् । यथेदंसृजति ॥ ६ ॥

विभुःव्यापकःपरःपुमान्सःसमानातिशयः पुरुशक्तिः यांयांशक्तिमुपाश्रित्याधिष्ठाय । यथागोपायतिरक्षतियथासंयच्छतेसंहरतेआत्मानं अक्रडनंक्रीडयन्स्वयंक्रीडन्यथाकरोति । यथाविकरोतिचसृष्टिस्थितिसंहारव्यापाराद्विपरीतंकरोतिमुक्तंकरोतिचेत्यर्थः ॥ ७ ॥

एकःपुरुषरूपेणयुगपत् भूरिशःसत्वनियंताख्यावतारः रजोनियंताच्चानुगृहीतः सेव्यतोब्रह्माद्वितीयावतारः । तमोनियंताचानुगृहीतः सेव्यः रुद्रस्तृतीयावतारः एवंजन्माभिर्गुणावतारैः क्रमशोनानाविधात्मकतोगुणान्विभर्तिगृह्णातितेचावताराः । नारायणीयोपाख्यानेश्रीकृष्णेनोक्ताः । तपोयज्ञश्चअहंचपुराणःपुरुषोविराट् । अनिरुद्धइतिप्रोक्तोलोकानांप्रभवाव्ययः । ब्रह्मा । रजोगुणत्वेप्राप्तेतस्यब्रह्मणस्तेजसः । प्रसादात्पुरमवस्यपद्मंपद्मनिभेक्षणः । ततोब्रह्मासमभवत्सतस्यैवप्रसादजः । अह्नःक्षयेललाटाच्चसुतोदेवस्यवैतथा । क्रोधाविष्टस्यसंजज्ञेरुद्रःसंहारकारकः । एतौद्वौविबुधश्रेष्ठौप्रसादक्रोधजावुभौ । तदादेशितपंथानौसृष्टिसंहारकारकौ । निमित्तमात्रंताववत्रसर्वप्राणिवरप्रदाविति ॥ ८ ॥

तथा गुणांस्तु प्रकृतेर्युगपत् क्रमशोऽपि वा ।
बिभर्षि भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ॥ ९ ॥
विचिकित्सितमेतन्मे ब्रवीतु भगवान् यथा ।
शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान् खलु ॥ १० ॥
सूत उवाच । इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः ।
हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥
शुक उवाच । नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ।
गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने ॥ १२ ॥

भाषा टीका ।

राजोवाच—हे ब्रह्मन् ! हे अनघ ! आप सर्वज्ञ है आपका वचन समीचीन है हरिकथा कहते हुए आपके वचनसे मेरे हृदयका अंधकार विनाश होता है ॥ ५ ॥

मैं फिर यह जानना चाहता हूं कि अधीश्वरों के दुर्विभाव्य इस विश्वको भगवान् अपनी मायामें जैसे सृजते है ॥ ६ ॥

पुरुशक्ति परपुरुष जिस जिस शक्तिका आश्रय कर जैसे इस विश्वकी रक्षा करते हैं और विभु भगवान फिर जैसे इस विश्वकी प्रलय करते है ॥ ७ ॥

हे ब्रह्मन् अद्भुत कर्मा हरि भगवान का चेष्टित निश्चय बडे बडे कवियों के भी दुर्विभाव्य, सा, प्रतीत होताहै ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एकः पुरुषरूपेण युगपत् । जन्मभिः ब्रह्माद्यवतारैः क्रमशो वा । यथा प्रकृतेर्गुणान् गृह्णासि ॥ ९ ॥

विचिकित्सितं सन्दिग्धम् । शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिन्ननुभवेन ॥ १० ॥

उपामन्त्रितः प्रार्थितः । प्रचक्रमे ईषत् गुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥

नमस्यति त्रयोदशभिः परस्मै सर्वोत्तमाय । तत्र हेतुः भूयसे अपरिमितमहिम्ने । तद्दर्शयति सतः प्रपञ्चस्य उद्भवादिषु निमित्तभूता या लीला तया गृहीतं ब्रह्मादिरूपेण रजआदि शक्तित्रितयं येन तस्मै । अन्तर्भवाय अन्तर्यामिणे । अतएव सर्वान्तरत्वात् अनुपलक्ष्यं वर्त्म यस्य तस्मै ॥ १२ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

अन्यदपिपृच्छति यथेति स्वयमेकः जन्मभिरवतारैर्भूरिशः कर्माणि चेष्टितानि कुर्वन्प्रकृतेर्गुणान्सत्त्वादीन्युगपद्विपाकं वा । यथाबिभर्षि अभूयथासृजतीतिनिमित्तोपादानाधिकरणानां प्रश्नः । यथागोपायतीत्यनेनरक्षितुः स्वस्यकिंसृष्टगताद्विचरक्षणेऽपिजीवान्तर्यामित्वेनोतस्वावतारैर्वैरक्षणमितिप्रश्नः । यथासंयच्छतइत्यनेनसंयमाधिकरणप्रश्नः । नारदीयानांप्रश्नानांतत्रैवावतारिष्यमाणत्वात् । यथागुणानित्यनेनभगवदवतारस्यगुणत्रयात्मकत्वमथवात्रयाणामेवमन्यतमगुणात्मकत्वमथवाऽप्राकृतत्वमेवेतिप्रश्नः अत्रयद्यपितृतीयपक्षः प्रश्नारूढः तथापिप्रष्टुरभिप्रेतः । तस्यैवसिद्धान्तकोटित्वात् ॥ ९ ॥

एतत्पूर्वोक्तमेममविचिकित्सितंविचारयितुमिष्टंभगवान्भवान्यथावद्ब्रवीतु । त्वमेवकथयितुंसमर्थइत्याह शाब्देब्रह्मणिशब्दब्रह्मात्मके । ब्रह्मणिनिष्णातःपरिनिष्ठितः । कृतब्रह्माभ्यासः । परस्मिंश्चब्रह्मणिनिष्णातःखल्वित्यन्वयः । अनेनपरब्रह्मविषयोगब्रह्मज्ञानसंपत्तिरुक्ता ॥ १० ॥

हरेर्गुणानुकथनइत्युक्तप्रकारेणोपामन्त्रितः प्रार्थितः हृषीकेशंभगवन्तंसर्वेन्द्रियनियन्तारमनुस्मृत्यप्रवक्तुंदेवतागुरुनमस्कारादिरूपमुपक्रमं कृतवान् ॥ ११ ॥

[illegible] त्रयोदशभिः नमइति परस्मैप्रकृतिपुरुषविलक्षणायपुरुषाय तत्रहेतुः भूयसेस्वरूपतोगुणतश्चा[illegible] तदेव [illegible] स्थानंपालनंनिरोधः संहारः तएवलीलातयागृहीतशक्तित्रितयायगृहीतहिरण्यगर्भस्वावतार[illegible] शक्तित्रितयंयेनतस्मै अनेनवैलक्षण्यमुक्तं [illegible] "अनेनसर्वस्यस्वव्याप्यत्वात्तदपेक्षयास्वस्यव्यापकत्वमुक्तम्" [illegible] ॥ १२ ॥

श्रीम[illegible]कृत [illegible]

अथाप्येकः प्रश्नोऽस्तीत्याह यथेति एकोहरिर्जन्मभिर्बहुभिरवतारैर्भूरिशः सृष्ट्यादिकर्माणि कुर्वन् प्रकृतेः सत्त्वादिगुणान् विभर्ति युगपत्क्रमशः कर्मणापीति तुशब्देन गुणानां विरुद्धस्वभावत्वेन युगपद्ग्रहणेऽनुपपत्तिं सूचयति अपिपदेन क्रमशोग्रहणे संभावितामिति ॥ ९ ॥

नकेवलं विविदिषामि किंतु वक्तव्यमिति प्रार्थयेइत्याह विचिकित्सितमिति यथायथावत् एतद्वक्तुं त्वत्पाण्डित्यं चास्तीत्याशयेनाह शब्देति अनेनालौकिकमपिवस्तु यथायोग्यं शक्यं तथावक्तावोधयितुं त्वं समर्थ इत्युक्तं भवति ॥ १० ॥

परीक्षित्पृष्टः किंचकारेतिसूतः शौनकस्य शङ्कां परिहरति इतीति इतिशब्दः प्रकारवचनः हृषीकेशमितियनेनमुक्ततोवागादीन्द्रियशक्तेर्बुद्धिप्रेरकत्वं हरेरित्यभिप्रैतिप्रतिवक्तुंप्रक्रमं प्रारब्धवान् भागवतसंहितामितिशेषः ॥ ११ ॥

परीक्षित्प्रश्नोत्तरकत्वेन भागवतपुराणं वक्तुकामः शुकः शिष्टाचारं परिपालयन्स्वेष्टदेवतां प्रणमति नमः परस्मा इत्यादिभिस्त्रयोदशभिः श्लोकैः। भूयसेऽनन्तरूपायपवर्गाय विरतिस्पृहाविमृष्टात्मने ...इत्याह भूयसेपरिपूर्णायेतिपरस्मैस्तत्त्वात् तत्र परिपालनमात्रेण गृहीतशक्तित्रयायेत्यर्थः वेदादिप्रमाणगम्यत्वमित्याह देहिनामितिदेहिनां जीवानां चक्षुरादिभिरनुपलभ्यवर्त्मने ... दुरत्ययत्वादितिवेत्याह अंतर्भवायेति अंतर्यामित्वेन सततमंतः स्थिताय यो वै भूमा तत्सुखं नाल्पे सुखमस्ति इत्यादिवाक्यप्रमाणात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तत्र प्रथमं भगवत्तत्त्वं विवृण्वन् नमस्करोति नम इति त्रयोदशभिः। परस्मै स्वयंभगवते श्रीकृष्णाय। यतः भूयसे सर्वतः परिपूर्णाय। अतोऽंशतः पुरुषादिरूपायस्वतस्त्वनुपलक्ष्यवर्त्मने ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

प्रकृतेर्गुणान्बहुविधान्कृत्वा भूरिशो राशिप्रकारेण गृह्णाति अथवा तु पुनः स्वयमेकोऽप्यनेकोभूत्वा युगपदादिभेदेन गृह्णाति किंच कर्माणि जन्मभिः कुर्वन् नानाजन्मानि कृत्वा कर्माणि कुर्वन्करोति कर्माधीनतया करोतीत्यर्थः एवं पञ्चप्रश्नान्निरूप्य साभिलाषतया पञ्चप्रश्नानुपसंहरति ॥ ९ ॥

विचिकित्सितमेतन्मइति मह्यमेतत्ज्ञातुमिष्टं यथायथावत् भगवान्प्रब्रवीतु कथयतु कथने सामर्थ्यमाह शब्देपरस्मिन्नपिब्रह्मणि तत्साधनैर्भवान्निष्णातः स्वलिप्तनिर्णमित्रो ॥ १० ॥

शुकोऽपि ससाधनमुत्तरमाहेत्याह इत्युपामंत्रितइति उपामंत्रणं प्रार्थना तदा स्मिन्नर्थे सर्वसंदेहवारको भगवानेवेति हृषीकेशं बुद्धिप्रेरकमनुस्मृत्य प्रत्युत्तरं दातुं प्रचक्रमे उपक्रमं कृतवानित्यर्थः उपक्रमो नाम देवतागुरुनमस्कारः हरेर्गुणानुकथने उपामंत्रितइति स्कंधाद्यावत् एकमेवतु सर्वशास्त्रार्थनिर्धारः सप्तभिर्नमनोक्तिभिः पंचभिः प्रार्थनावाक्यैर्माहात्म्यं तस्य वर्ण्यते एकेन व्यासनमनमेतावद्वक्तुमुचिते अन्यत्कथाप्रसंगेन परोक्तावानिरूपितं नमनादेवभगवान्सर्वसंशयवारकः प्रार्थितः कामनांदद्यात् नान्यथेतिद्वयेर्थी यद्यपि तेन पंचप्रश्नाः कृताः तथापि सर्वसंदेहनिवारणार्थं भगवान्स्मृतइति तत्त्संदेहनिवृत्तिपूर्वकं भगवंतमनुस्मरन्नमस्करोति ॥ ११ ॥

तत्रादौ सृष्टिप्रकारसंदेहानं प्रतिप्रकारं बहुनमस्यति नमइति आदौपरः असंगोदासीन एक एवेत्यर्थः तदनु स एव पुरुषः अनेनअशरीरस्य विष्णोः पुरुषशरीरस्वीकार आदौ कथितः तदनु बहु स्यामिति वांछया एकएकभूयान् तदनु क्रीडार्थं जगदुत्पत्तिस्थितिसंहारैः स्वमायया गुणभूशक्तित्रयस्वीकारमाह गृहीतशक्तित्रितयायेति सर्वात्ति वचनात् अमतः सत्ता निवारिता किंच तस्योद्भवः स्थानं निरोधश्च लीलार्थं स्वरूपेण भगवानुत्पद्यते तिष्ठति लीयते वेति अनेन क्रमोऽपि दर्शितः सदंशव्यापकत्वात् सृज्यमानस्य परिच्छेदाभावात् युगपदेव देशभेदेन एककालमेव यथालीला संपद्यते तथा करोतीत्यर्थः तदनु तत्रांतर्यामितया प्रविशतीत्याह देहिनामंतर्भवायेति नाहिर्वहिः स्थितोऽतः प्रविशति किंतर्हि वर्तमान एवेत्यर्थः सृष्टं नामरूपभेदवैरूप्यात्मनामसृष्ट्यर्थं सर्वमृष्ट्वा सर्वमनुप्रविश्य सर्वैरपि अनुपलभ्यं वर्त्म यस्य तादृशोजातइत्यर्थः तेन गुणैर्वेदैरपि रेव तत्प्रमाणमित्यर्थः एवं भगवतः मूलरूपसमारभ्य पर्यंतयामि फलरूपाणि पंच निरूपितानि सृष्टिस्थितिप्रलयभोगमोक्षार्थे इदानीमवतारैः प्रजनसंदेहवारणाय नमस्यति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी।

यथा एकः पुरुषरूपेण युगपत् प्रकृतेर्गुणान् बिभर्ति तत्रालिप्त एव ईक्षणादिभिर्धारयति पालयति च। तथा जन्मभिः ब्रह्मरुद्रादिप्रादुर्भावैः भूरिशः बहुरूपः क्रमशोऽपि कर्मणापि वा बिभर्ति। कीदृशः कर्माणि सृष्ट्यादीनि कुर्वन् ॥ ९ ॥

विचिकित्सितं सन्दिग्धम्। ननु कविभिरपि दुर्विमर्श्यमिदं चेदहं जानामीति तत्त्वं कथं जानासि तत्राह। यथा भगवान् कृष्णः तद्भक्तो भवानपि तथेत्यर्थः। तत्रापि शब्दे ब्रह्मणि वेदे विचारेण निष्णातः परस्मिन् ब्रह्मणि कृष्णे च स्वानुभवेनेति एवमपरे शास्त्रकर्त्तारस्तु नैवानुभवन्तीति ते न जानन्ति। किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत्। इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन इति भगवदुक्तेः। इह चिच्छक्तिप्राधान्येन कृष्णरामाद्यवतारलीला इव मायाशक्तिप्राधान्येन पुरुषावतारलीला ब्रह्माण्डनिर्माणादिवर्णावैः अंश्या एव नात्र कटाक्षः कार्य्य इति श्रीसूतशुकयोः परीक्षित्शुकयोरभिप्रायो वेदितव्यः ॥ १० ॥

हृषीकेशं सर्वेन्द्रियप्रवर्त्तकम् इति मह्यापि स एव स्फुरतु प्रतिवक्तुरितिप्रायेण। प्रचक्रमे देवतागुरुनमस्कारपूर्वकमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥

भूयो नमः सद्वृजिनच्छिदेऽसतामसम्भवायाखिलसत्त्वमूर्त्तये ।
पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥ १३ ॥
नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम् ।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥ १४ ॥
यत्कीर्त्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम् ।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥ १५ ॥
विचक्षणा यच्चरणोपसादनात् सङ्गं व्युदस्योभयतोऽन्तरात्मनः ।
विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तमेवाह । त्रयोदशभिः । परस्मै पुरुषाय पुरुषोत्तमाय श्रीकृष्णाय नमः । प्रथमैश्वर्यमाह । भूयसे पुरुषाद्यवतारैरपरिमितमहिम्ने । तत्र प्रथमंपुरुषावतारलीलामाह सदुद्भवंति । शक्तित्रितयं रजःसत्त्वतमः । द्वितीयतृतीयपुरुषावतारलीलामाह । देहिनां ब्रह्मादीनां समष्टिव्यष्टीनाम् अन्तर्भवाय अन्तर्यामिणे । अनुपलक्ष्यं योगिभिरपि दुर्ज्ञेयं वर्त्म भक्तियोगो यस्य तस्मै ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

एतत्पूर्वोक्तं । विचिकित्सितंसंदिग्धंयथावद्भगवान्प्रब्रवीतु । तत्रयोग्यतामाह । शाब्देइत्यादि ॥ १० ॥

हरेर्गुणानुकथनेउपामंत्रितः हृषीकेशंसर्वेन्द्रियनियंतारंश्रोतृणांश्रावयितुश्चेन्द्रियनैर्मल्यहेतुत्वेनोपकर्त्तारमनुस्मृत्य । प्रवक्तमेहरिगुणकथनस्याद्विरूपमुपक्रमंकृतवान् ॥ ११ ॥

तदेवाह । नमइतित्रयोदशभिः । परस्मैचिदचिद्भ्यांभिन्नस्वरूपायपुरुषायनमः । तत्रहेतुः । भूयसेऽपरिमितगुणस्वरूपायसतः प्रपञ्चस्य उद्भवस्थाननिरोधेषु । उत्पत्तिपालनसंहारेषुनिमित्तभूतयातयापाअवतारब्रह्मरुद्ररूपैर्गृहीतंरजः सत्वतमोलक्षणांशक्तित्रितयंयेन तस्मै अंतरात्मनेसम्यक्नोपलक्ष्यंवर्त्मप्राप्तिमार्गोयस्यतस्मै ॥ १२ ॥

भाषा टीका

जैसे प्रकृति भूरिशः गुणोंको युगपत् (एकबेर) वा क्रमशः एकही भगवान पुरुष रूपसे वा ब्रह्मादि जन्मसे कर्म करते हुए धारण करते हैं ॥ ९ ॥

भगवान् मेरे इन सब संदेहों को कहिये आप निश्चय शब्द ब्रह्म और परब्रह्म में निष्णात हैं ॥ १० ॥

सूतउवाच—हरिके गुणानु कथन में राजाने इस प्रकार प्रार्थना किये शुकदेवजी हृषीकेश का स्मरण कर प्रति वचन करते को प्रवृत्त हुए ॥ ११ ॥

शुकउवाच—इस सत् जगत् के उद्भव स्थान और निरोधलीला से जिन्होंने तीन शक्तियों को ग्रहण किया है, जो देहधारियों के अंतर्यामी और अनुपलक्ष वर्त्म हैं, उन अपरिमित परम पुरुषको नमस्कार है ॥ १२ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

विविधफलदातृत्वमनुस्मरन् प्रणमति । भूयः पुनश्च नमः । सतां धर्मवर्तिनां वृजिनच्छिदे दुःखहन्त्रे । असताम् अधर्मशीलानाम् असम्भवाय अनुद्भवहेतवे । अखिलसत्त्वमूर्त्तये तत्तद्देवादिरूपेण तत्तत्फलदायेत्यर्थः सम्यग्सत्त्वमूर्त्तये इति वा । पुनरिति पूर्वोक्तोभय-वैलक्षण्यमेवाह । पारमहंस्ये प्रत्यङ्निष्ठारूपे आश्रमे व्यवस्थितानां पुंसाम् अनुमृग्यम् अन्वेषणेन पुनः पुनर्मृग्यं यत् आत्मतत्त्वं तस्य दाशुषे दात्रे ॥ १३ ॥

सात्वतां भक्तानाम् ऋषभाय पालकाय । कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिगपि यस्य दुर्विज्ञेयायेत्यर्थः । सर्वं वैषम्यप्रतीता वपि निर्दोषत्वाय अचिन्त्यमैश्वर्यमाह । निरस्तं साम्यम् अतिशयश्च यस्य यदपेक्षया अन्यस्य साम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्येण स्वधामनि स्वस्वरूपे ब्रह्मणि रममाणाय ॥ १४ ॥

सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन् प्रणमति यत्कीर्त्तनमिति द्वाभ्याम् । अर्हणं पूजनम् । सुभद्रं सुमङ्गलं श्रवो यशो यस्य तस्मै ॥ १५ ॥

विचक्षणाः विवेकिनः यस्य चरणयोरुपसादनात् उपसत्तेर्भजनात् अन्तरात्मनः मनसः उभयतः इह परत्र च सङ्गं व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

सनुग्रहस्वभावत्वमेवानुपाद्यत्वंस्यादित्यतआह भूयोनमइति सद्वृजिनच्छिदेसतांपापच्छिदेअसतांदुष्कृतामसंभवायविनाशायाखिलसत्त्व मूर्त्तयेऽखिलपूर्णसत्त्वमेवमूर्तिर्यस्यतस्मैउपासपूर्णसत्त्वदेहायेत्यर्थः अतोऽनिन्द्रियत्वंर्णपसौलभ्यातिशयेनसौभूर्पारमहंस्यदुःकर्मानाशांव

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

[illegible] अखिलमनुजनयनविषयतां रामकृष्णादिरूपेणागतायेत्यर्थः प्रकृतिपुरुष[illegible]जगत्कारण[illegible]मुमुक्षूपास्यत्वं मोक्षप्रदत्वं चाह पारमहंस्य इति परमहंसानां संबंधिनि आश्रमे चतुर्थाश्रमे इत्यर्थः स्थितानां [illegible] परमहंसानां प्रायशो मुमुक्षुत्वात् तदाश्रमनिर्देशः ब्रह्मवियोगत्वेन तदाश्रमप्रयुक्तधर्मानुष्ठानपराणामनुमृग्यदाशुषे अनुमृग्यो [illegible] ऽर्थः तस्य दाशुषे दानशीलाय परब्रह्मभूताय भूयो नम इति ॥ १३ ॥

सौलभ्यविशिष्टमेव नमस्करोति नम इति सात्वतां यदूनामृषभाय श्रेष्ठाय [illegible] सात्वतश्रेष्ठत्वेनावतीर्णायेत्यर्थः एवं भूतोऽपि दुर्योगिनां दुर्लभ एवेत्याह विदूरकाष्ठायेति कुयोगिनां कुत्सितयोगिनां भगवद्भक्तिरहितयोगनिष्ठानां विदूरकाष्ठाय विदूरे दूरतर एव काष्ठा [illegible] यस्य तस्मै दुर्योगिभिः स्वदिगपि दूरेण यथा विधाय इत्यर्थः तदेवं वैषम्य प्रतीतावपि निर्दोषत्वायाचिन्त्यैश्वर्यमाह निरस्तेति स्वराधसा स्वतेजसा निरस्तं साम्यमतिशयश्च यस्य तेन तेजसा उपलक्षिते स्वधामनि स्वमहिम्नि प्रतिष्ठित इति श्रुत्युक्तरीत्या स्वप्रतिष्ठे स्वयंज्योतिषि [illegible] रमस्व [illegible] ते रमम [illegible] तुभ्यं नमो नमोऽस्तु [illegible] नमस्कृतेः पौनःपुन्यं निःसमाभ्यधिक [illegible] तेजसोपलक्षिते [illegible] स्मन् [illegible] रममाणस्य न किञ्चिदपि [illegible] प्रयोजनमिति नहि कल्पद्रुमस्य भजतामभीष्टान् ददतो [illegible] ॥ १४ ॥

यत एवं विचित्रैश्वर्यपरत्वेन [illegible] एव तत्कीर्तनस्मरणादेः समस्तदुरितनिवर्तकत्वमित्याह यत्कीर्तनमिति ईक्षणमवलोकनं [illegible] श्रवणं पूजनं यत्कीर्तनादिकं कीर्तनादिनिष्ठस्य कल्मषं दुरितं विधुनोति सद्यो विनाशयति तस्मै सुभद्रश्रवसे सुभद्रं सुमङ्गलं श्रवः कीर्तिः यस्य तस्मै नमः ॥ १५ ॥

न केवलं श्रवणादिभिर्दुरितनिवृत्तिः यत्कीर्तनादिभिर्विशुद्धेनात्मना परिपूर्णाभक्तियोगं ततो ब्रह्मप्राप्तिं लभन्त इत्याह विचक्षणा इति यच्चरणोपसादनात् चरणयोरुपसत्तेः भजनादित्यर्थः तस्मादन्तरात्मनो मनसः उभयतः इहामुत्र च सङ्गं व्युदस्य गतक्लमाः निवृत्तसांसारिकतापत्रयाः ब्रह्मगतिं ब्रह्माख्यां गतिं परमं प्राप्यं विदन्ति प्राप्नुवन्तीति प्रसिद्धिं द्योतयति ब्रह्मविदाप्नोति परमिति श्रुतिप्रसिद्धेः तस्मै सुभद्रश्रवसे नमो नम इत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

सर्वस्मात् नारायणप्रसादसाधनात् भक्तिपूर्वकं पुनःपुनर्नमनमेव तत्प्रीतिजनकमिति भावेनाह भूय इति भूयोऽपि पदस्य [illegible] यतः [illegible] ततः प्रतिबन्धकनिवृत्तिः स्यात् तामपवर्गद्वारेण कृपामिति तत्राह । सदिति सतां सन्मार्गप्रशस्तकर्मणां पुंसां वृजिनं दुःखकारणपापं छिनत्ति निर्मूलयतीति सद्वृजिनच्छित् तस्मै असतामप्रशस्तकर्मणामसुरादीनाम् अभवाय संसारापादकाय सुखप्रतिबन्धकजननिर्मूलकायेत्यर्थः । एतत्करणसामर्थ्यमस्यास्तीति भावेनाह अखिलेति अखिलसत्त्वमूर्तये पूर्णसाधुभावस्वरूपाय । निःशेषगुणपूर्णत्वात्स्वस्य [illegible] वचनात् साधुभावो गुणाद्विनिर्णायते अनेन समस्तचराचरलक्षणप्राणिमूर्तये इत्येतन्निरस्तम् अथाप्यस्मदिष्टावाप्तिः कथमित्यत आह पुंसामिति परमहंससंबन्धिन्याश्रमे ऽवस्थितानां संन्यासधर्मवतां पुंसामनुमृग्यदाशुषे निजानन्दानुभवलक्षणमोक्षदात्रे दाशृ दाने इति धातुः अवधारणार्थो वा पुनःशब्दोऽन्ययोगं निवारयति एतेभ्य एवानुमृग्यं ददातीत्यन्येभ्य इत्यर्थः ॥ १३ ॥

नन्वन्यशब्देन संन्यासीतराणां विवक्षायां तमेवं विद्वानमृत इतीह भवति [illegible] विवक्षायामज्ञानां ज्ञानदो विष्णुरिति [illegible] इति मन्दाशङ्कां परिहरिष्यन् भागवतशास्त्रोक्तविरुद्धयोगापेत इति वक्ति नमो नम इति सात्वतसंहितोक्तविधिना विष्णुमर्चयन्तः सात्वताः तेषां सात्वतां [illegible] ज्ञानं भासयति दीपयतीत्यृषभः ज्ञानमुद्दीप्य मुक्तिं ददातीत्यर्थः तस्मै सत्त्वं तु शोभनत्वं [illegible] सात्वता इति वचनात् सात्वताः शोभनत्ववन्तः तेषामनुरूपज्ञानानां तद्योगपुण्यवतां ज्ञानं ददातीत्यृषभः तस्मादितिवाऽनेनोक्तं वाक्यद्वयमपि प्रमाणमित्यायातमिति यः परस्मै पुरुषायेति प्रक्रान्तः ततस्मै यद्वा स्वचित्तस्थं संबोध्यते तुभ्यं नम इति एवंविधफलदातृत्वं न तत्स्वामीनि वाक्यार्थः । अम भागसंभक्तावयोरिति धातोरुपलोपेन सलोपः शास्त्रकुत्सितो योग एकध्यानलक्षणः स एषामस्तीति कुयोगिनः तेषां विदूरकाष्ठापरिपूर्तिः परि[illegible] यस्य सतथा तस्मै भगवदधिष्ठितदिङ्मात्रमपि न जानन्तीत्यतो वा विदूरकाष्ठायेति आशास्तु ककुभः काष्ठा इत्यमरः । स्वतस्तृप्तत्वेन स्वप्रयोजनमपेक्ष्य [illegible] विरहितत्वमिति भावेनाह निरस्तेति निरस्तौ साम्यातिशयौ येन तथोक्तं तेन राधसा संसिद्ध्या स्वधामनि स्वयंप्रकाशे ब्रह्मणि [illegible] आनन्दैकरसे रंस्यते रममाणाय सदातनोऽनुभावोऽयमिति शतृप्रत्ययः ॥ लोकविलक्षणोऽयं रतिरिति द्योतयितुं परस्मैपदप्रयोगः प्रतिपदमनुकम्पेय-मिति नमस्कारद्वयं ॥ १४ ॥

कीर्तनादीनामाविर्भूतफलमवश्यं नमस्क्रिया संपद्यत इति भावेनाह यत्कीर्तनमिति सुभद्रश्रवसे सुमङ्गलकीर्तये सद्य इत्यनेन भक्तिपूर्वकमिति सूचयति भद्रं [illegible] मङ्गल इति यादवः ॥ १५ ॥

वैराग्येणाभिभूतया भक्त्या भगवच्चरणनिषेवणं ब्रह्मज्ञानसाधनं भवतीति भावेनाह विचक्षणा इति यच्चरणोपसादनात् यच्चरणैकशरणत्वप्राप्तिलक्षणनिषेवणादन्तरात्मनोऽन्तःकरणस्य । उभयत इहामुत्र विषयेषु सङ्गं [illegible] व्युदस्य निरस्य ब्रह्मगतिं ब्रह्माज्ञानं तेन मोक्षं [illegible] विन्दन्ति ॥ [illegible] रूपस्य हरेश्चरणोपसत्तेरन्तरात्मनः क्षेत्रज्ञस्योभयतः सङ्गं स्थूलसूक्ष्मशरीरसङ्गं व्युदस्यापोह्य ब्रह्मगतिं [illegible] [illegible] वाचिना हि [illegible] निरस्तं यतो भेदः प्रत्यक्षादिप्रमाणसिद्धोऽतोऽनुपपन्न ऐक्यवादः । सुभद्रं श्रवः श्रवणीयं यस्य स तथा तस्मै ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तत्र स्वप्रयोजनं लीलावतारं दर्शयन्नाह भूय इति द्वाभ्याम् । सतां वेदमार्गानुसारिणां देवादीनां दुःखहन्त्रे । असतां तद्बहिर्मुखानां दैत्यादीनामपि असम्भवाय मुक्तिदाय । पुंसां पुनरिति । अत्रानुमृग्यं भक्तियोगैकसाध्यं स्वचरणारविन्दमेव ज्ञेयम् । तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥ इति प्रथमे, परमहंसमहामुनीनामन्वेषणीयचरणौ [illegible] इति तृतीये च निरूपितत्वात् ॥ १३ ॥

[illegible]माह । [illegible] [illegible] तेऽत्र [illegible]चिदानंदमवतीर्णेव । तथापि कुयोगिनां तद्बहिर्मुखयोगनिष्ठानां [illegible] । पुनश्च [illegible]स्थितिमेव दर्शयति निरस्तेति । [illegible] कथामपि [illegible] वैकुण्ठे रंस्यत इत्यपर्यायं रममाणाय ॥ १४ ॥

न केवलमवतारसमय एव तस्य तादृशत्वं किन्त्वन्यदापीत्याह यत्कीर्त्तनमिति । यच्छब्दाद्बहुवचनेन च सकृत् तत्सम्मात्रमपीत्यभिहितम् ॥ १५ ॥

शरणागतिमात्रमपि यस्य सिद्धिकरमित्याह विचक्षणा इति । तथोक्तं श्रीगीतान्ते मन्मना भव इत्यादि सर्व्वधर्म्मान् इत्यादि च । ब्रह्मगतिं ब्रह्मस्वरूपा च सा गतिः गम्यो लोकश्च ताम् ॥ १६ ॥ १७ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

भूयइति अंतर्यामितयाकरोत्येवपापादिनाशंबहिरपिकरोतीतिभूयःपदं अत्युपकारित्वाद्भाननमस्कारविशेषणं भगवतोऽवतारस्यसतांदुःखदूरीकरणमेवप्रयोजनं यद्यपिप्रकारांतरेणापिदुःखदूरीकरणंभवति तथापिनसर्वात्मनातन्निवृत्तंभवति साधुःखरूपंतिःभगवद्भिन्नेर्गमनमारभ्यपुनःप्रवेशपर्यंतउद्भूतानुद्भूतरूपेणतिष्ठति तांदूरीकर्त्तुंभगवत्संबंधएवशक्तइतिमध्येप्रादुर्भूतस्तांछिनत्ति किंच सतामसंभवाय पुनरुत्पत्त्यभावाय पदब्रह्मणोदेहग्रहणेआविर्भावेवानान्यन्निमित्तमस्ति सतांहिभगवद्धर्मसंबंधात्सत्त्वंप्राप्ताः ननुचिदानंदत्वं पुनःसंभवेसत्त्वरूपेदेहेऽपि साधूनामितुसत्त्वएवोपक्षीणामिति अतोभगवान्स्वयमाविर्भूतःतेषामाविर्भावाभावाय अतोदुःखच्छेदनमलपंतदीयोभावोपिक्षयमंगीकियतइति किंच अखिलानिसत्त्वानिसत्त्वगुणभेदाःमूर्त्तीयस्य सत्त्वगुणाः सर्वोशेनसाधनापेक्षायामपिस्वयमेवसर्वसाधनानिकरोति इत्यन्यदा आविर्भावयति एतदर्थमेवसत्त्वगुणाविर्भावइतिलोकप्रसिद्धिः अखिलात्मनिसत्त्वानिजीवगणामूर्त्तीयस्येतिवा अनेनानंतजन्मसंभवेपितत्प्रतिनिधितयासर्वविधसर्वजीवानुत्पादितवान् अतस्तेषांभगवदवतारेणैवस्वप्रतिनिधितयासर्वावताराःसर्वविधोभक्तवत्सलइतिभजनीयरूपमुक्तं किंच नकेवलंभक्तानामेवोद्धारार्थंभगवानवतीर्णः किंतु ज्ञानिनामपीत्याह पुंसामिति पारमहंस्यआश्रमेव्यवस्थितानांप्रतिकल्पेसन्यासिरूपेणैवजातानांसनकादीनांज्ञानेनपदार्थनैकत्र्य भासमानानांदूरस्थितत्वेपितथाभानरहितानांतदर्थमतिक्लेशंप्राप्नुवतां मृग्यंमृग्यमनु क्रममुक्तिसाक्षान्मुक्तिमवांतरभेदानपिसामीप्यादीनपिक्षणुपदार्थे अनुमृग्यानांदात्रे वैविकपदप्रयोगात्फलानांकेवल वैदिकत्वं अनुमृग्यंविचार्यंवा इदानीमपिजन्मकोटिभिः विचारमेवार्हति अतस्तेषांक्लेशनिराकरणायस्वात्मदइत्यर्थः नहिप्रकारांतरेणभगवानात्मालभ्यते ज्ञानेनापिआत्मत्वं नभासतएववालानांहस्ताग्रस्थचंद्रवत् पुनरितिपुनःपुनः पारमहंस्याश्रमइति प्रत्यक्निष्ठारूपआश्रमेतत्रप्रविष्टाअवहिर्मुखाएवभवंतीति हंसास्तुमानसेऽपिरमंते परमहंसास्तुततोप्यंतरतमेआत्मन्येव आत्मानात्मसंघातेवाआत्मविमर्शनादनुमृग्यत्वं एवमवतारसंदेहंवारयन्सर्वषांनामावश्यकभजनीयत्वंनिरूपितम् इदानींप्रयोजनसंदेहंवारयन्भक्तवैकल्यत्वंसोपपत्तिकमुपपादयन्नमस्यति ॥ १३ ॥

नमोनमस्तेऽस्त्विति अतएवभक्त्युद्रेकेणबहुवारंनमस्यन्तदेवप्रार्थयते शास्त्रेपूर्णानांभगवद्दर्शनेजातेनमस्कारएवकर्त्तव्यइतिसदुपदिष्टाभिचारेणान्यस्यशक्तोकर्त्तव्यत्वात्किमासनेतेगरुडासनायेत्यादिवाक्यात् अतस्तथाभूतानामस्माकंभगवत्साक्षात्कारेतथानमनमेवास्त्विति प्रार्थनेयापतावदेवप्रयोजनमित्युक्तंसर्वैरेवसाधनैः किंच ते तुर्य्यामितिप्रत्यक्षतयानतुमहामितितस्मादिति इतःपरमधिकंप्रयोजनंउद्देश्यंनास्तीति शास्त्रसंग्रहः किंच सात्वतामृषभायेति सात्प्रत्ययत्युक्तानांतदधीनवचनेसातिरितिसातिप्रत्ययःव्याकरणेविहितः आत्मसाद्विति तत्रसाधुत्काःसात्वंतःकदाचिदपिनस्वतंत्राःकिंतुभगवदधीनाएवेति तेषामृषभः एवंभावेनभगवत्स्वामित्वमपिप्रयोजनं मानेनमानैर्णायस्वतःपर्यवसानतदधीनत्वलक्षणोमाधिककधर्मेउपपन्नेस्वसेवामपिकारयमीतिवंदनानंतरंदास्यंप्रयोजनमितिनिरूपितं येपुनर्योगादिनातंप्राप्स्यामइतिविचारयंति तेकुयोगिनः पृथिव्यामेवयोगिनइति नहिभूमावेवस्थिताः ब्रह्मांडात्परतःस्थितंवस्तुप्राप्नुवंति अयंचकुत्सितोयोगः कुत्सितंफलंभूमिष्ठत्वाप्रयच्छेत् अतएवाणिमाद्यएवतत्फलत्वेननिरूपिताः योगस्तुस्वाधीनः भगवांश्चस्वाधीनः योगेश्वरश्च अतोयोगेव्यवस्थितमतीनांयस्याविंशिशभगवान्निरसाद्दिपिदूरे साधनान्यपितत्तोऽपिदूरेनयंतीतिविशेषेणादूरंकाष्ठायस्येति अनेनान्यसाधनसाध्यंप्रयोजनमित्युक्तं सकृत्कुयोगित्वेऽपिउत्तरत्रविद्यादियोगश्चेत्तत्रप्राप्नुयादपि मुहुःकुयोगित्वेमाशापिनास्तीत्यर्थः प्राप्त्याशाभावएवदूरकाष्ठात्वं मुहुःपदेनतेषांसाधनाभावःसूचितः अतोभक्त्यैकलभ्यत्वंसाधितमन्वयव्यतिरेकाभ्यां किंच निरस्तसाम्येति काचिद्भगवतःसिद्धिरहितराधसइतिशब्दव्याख्या भताद्शीसिद्धिःकचिदन्यत्रनभानमोप्यधिका तयासिद्धयाभगवान्स्वगृहएवरमते तत्वाक्षरात्मकंब्रह्म रंस्यति स्वानिष्ठमेवरसंततःसंबंधात् अभिपायकंकरोतीति एतावतास्वरूपस्थितिर्व्यतिरेकेणानन्यत्ररंस्यतीतिभगवदीयोरसस्तत्रैवप्राप्तव्यः गृहंचतस्यैवतत्साधनंचनिरस्तसाम्यातिशयसिद्धिः अतोऽन्येषांमध्येतत्रप्राप्तिर्दुर्लभागृहसेवकस्यतुसुलभेति सहिस्वगृहेतांनीत्वारंस्यतीति अनयाउपपत्त्याभक्त्यैकलभ्यत्वं अथवामनीत्यनेनब्रह्मन्यस्तसर्गतुस्यात्तुयाशक्तितीतिसूचितं ब्रह्मत्वाद्धेयत्वं निरंतररसप्रवाहात्नसायुज्यापेक्षा अतस्तादृशभक्तिभावंकेवलंनमनंकर्तव्यमिति तादृशायनमइत्याह रंस्यतेनमइति एवंज्ञात्वानमनमपिप्रयोजनमितिशुकादीनांतावन्मात्रपर्यवसानंसूचितम् ॥ १४ ॥

एवंभक्तिमतांनकिंचित्कर्त्तव्यमित्युक्त्वाबाह्यभक्तेःफलंनियमयन्नमस्यति यत्कीर्त्तनमिति संसारणांबाह्यषड्विधभक्त्यातत्क्षणापापक्षयइत्यर्थः ईक्षणंपादसेवनसाध्यं भवपापक्षयस्यतारतम्यंनिरूपयितुंभवःक्रमोनिरूपितः अत्रकीर्त्तनस्यस्यस्याम्येषांचसर्वपापनिवारकत्वात्अवणापेक्षयापिमहत्त्वनिरूपयितुंप्रथमंनिरूपितंतदनुतस्यापिमूलभूतस्यैतद्विधायकस्यस्वात्ममात्रनिष्ठस्यापिआध्यात्मिकपापनिराकरणात् अंतःकरणशोधकत्वेनस्मरणंनिरूपितम् एवंकीर्त्तनस्मरणाभ्यांप्रेमोद्गमेजातेयद्भगवतईक्षणंभगवदागमनेनस्वगमनेनवा सानुभावाधिष्ठानस्य भगवत्प्रतिनिधित्वात्प्रीतेश्चाल्पत्वात् भगवत्कालमाशंकोबहिस्तदीक्षणं अंतर्भावनया तद्दर्शनेनआधिदैविकपापनिवृत्तिः"यदृच्छानांचभ्रुव्यागोभस्ती"तिश्रुतेस्तत्पापंनिरूपितं तद्भगवद्दृष्टिविषयंतवाङ्मूलादिविनिवर्तितइतितद्दोषनिवृत्तिः तदनंतरंयद्वंदनंतद्भगवदीयापराधक्षमापणदोषनिवर्त्तकं वस्तुतोहिजीवःभगवत्सेवकोभूत्वाबहुकालंतत्सेवामकृत्वास्थितइतिस्वधर्मपरित्यागेनअधर्मोभवति तद्दर्शनानंतरंवंदनेनैवनिवर्त्तते [illegible]भगवत्सेवकोभूत्वा[illegible]तत्तदज्ञानकृतंपापंमूलभूतमिति निवर्त्ततेततोऽनंतरं[illegible]भगवतःश्रवणंपूजनंसत्कारेतियावत्तत्भगवच्छ्रवणंरूपंतच्छ्रवणमोहदोषवाकर्मपापंनिवर्त्तयति तदर्हणंहिप्रकृतिरूपं भवम्य

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

त्वाभावात्तस्वेनलभ्यपदमिदं अतोभक्तिमार्गनिविष्टानामन्येषामपि एवंप्रकारेणकर्तव्यसकलकर्माणितत्तदंशेन सर्वपापनिवृत्तिः कर्त्तंभवति अतोभगवत्कीर्तिमूलत्वात्सर्वेषांभगवत्कीर्तिःसुमङ्गलाभवति मङ्गलभद्रयोस्तुल्यत्वात् अमङ्गलनाशिकासुमङ्गलाभवति प्रथमश्लोकोक्तगुणसदाकीर्तित प्रविश्यालौकिकत्वेनभूतेभ्यः देहादिभ्यः पापनिवर्तनासमर्थमितिप्रथमंतत्रनिर्दिष्टं कीर्तनंतुतत्पात्रापितिविमितिविवेकः ॥ १५ ॥

एवंषड्विधभक्तेः षड्विधपापक्षयकर्तृत्वमुक्त्वाकीर्तिस्तावन्मात्रपर्यवसायित्वेनाक्षपर्यवसानाभावात्काश्चविरोधः प्रसज्येतेतितस्यामुक्तिपर्यवसायित्वंप्रकारांतरेणाहदति विचक्षणाइति अचतुराणामेषांषड्विधभक्तिरुक्ता एवंषड्विधयाचातुर्येसंपन्नेषड्विधचक्षणाःसंतःभगवच्चरणारविंदएवभवसक्तामभवंति नततःपदार्थांतरेउपयुक्ताभवंति तदातमेवाचसत्वाःउभयतः संगात्निवृत्ताभवंति भवसांसारिकसंगानांचोचितयुक्तमेव तत्रापिअंतःकरणेनभगवत्स्वरूपसादनात् अंतःकरणस्यैवउभयतःसंगव्युदासः तदापश्चात्कर्तव्यानामभावात्भगवतासहगमनसामर्थ्यं भवति चरणंहिउपसर्गाअचरणेनसहगंतुंसमर्थाभवंति अतोब्रह्मगतिंप्राप्नुवंति ब्रह्मणासहगतिः ब्रह्मणिवागतिः अक्षरस्यचरणत्वेनगूढत्वेनात्पुभयमुपपद्यते अतोमार्गांतरेणापिएवंसाधनेनपूर्वतुल्यताभवतीतिद्वयोरप्येकपदार्थइतिवक्ष्यमाणउपपन्नंभवति तस्याहिगतिर्ज्ञानरूपा अतएवज्ञानस्यक्रियात्वंधात्वर्थत्वंचोपपद्यते ज्ञानस्यचक्रियात्वंभगवत्क्रियात्वेनभगवतःइंद्रियाभावाअन्याक्रियानसंभवति नित्यातुक्रियानप्रसिद्धायागानांतुक्रियारूपंणाभगवदाविर्भावात्पदार्थांतरवत्क्रियापिभवति भगवद्रूपंतदेजनितदेजतीत्यादितुविरुद्धसर्वधर्माश्रयत्वेनधर्मरूपेणविभूत्वं प्रतिपादयति तस्मात्सच्चिदानंदत्वतनाक्रियास्वरूपभूताभवति अतोज्ञानमेवतेजःस्वभावंगच्छतीवप्रतिभातीतिसमरणेनमनोगच्छतीतिवत्भगवतांज्ञानमेवक्रियारूपं तस्माद्भगवतोगतिचैतन्यरूपंधिवंति अलभ्यलाभवत्प्राप्नुवंति चिंतितन्मात्रेणतदात्मकत्वादितिप्रकारेण । अतएवमुख्यसिद्धांतात्फलेऽपिभेदः हियुक्तश्चायमर्थः यतःकीर्तिर्मुक्तेः पर्यवसायिनी गतक्लमाइति मार्गांतरेणापिज्ञानादिनाअक्षरोपासनयावा तदेवस्वरूपंप्राप्नुवंति तथापिक्लेशाधिकतरस्तेषामितिवाक्यात्क्लेशयुक्ताभवंति कीर्तनप्रणालिकयातुवेगच्छंतितिगतक्लमाएवगच्छंतीतिमार्गांतराद्वैलक्षण्यम् अतएवकीर्तिपुरःसरंतंनमस्यति सुभद्रश्रवसइति पूर्ववत् वाश्रभक्त्याप्येवमनुग्रहंकरोतीत्यादरेणाममनवधिप्सोसोभयत्र ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

कृपामाधुर्य्यमाह । भूयः पुनरपि नमः । सद्वृजिनच्छिदे रामकृष्णाद्यवतारैः स्वभक्तदुःखहन्त्रे । असतां पापिनाम् अभक्तराक्षसासुरादीनामपि स्वकर्तृकवधेन असम्भवाय सम्यग्भवदुःखनिवर्त्तकाय । खिलं निकृष्टं प्राकृतं सत्त्वम, अखिलं प्रकृष्टम् अप्राकृतं सत्त्वं, शुद्धसत्त्वमेव मूर्त्तिः शरीरं यस्य तस्मै । परमहंसानां भावः पारमहंस्यं तस्मिन् विषये य आश्रमः तत्र विशेषतोऽवस्थितानां भक्तिमिश्रज्ञानिनां शुद्धभक्तानाञ्च अनुमृग्यो यो ब्रह्मानन्दः प्रेमानन्दश्च तस्य तस्य दाशुषे दात्रे ॥ १३ ॥

ऐश्वर्य्यमाधुर्य्ययोः परिपूर्णत्वमाह । नमो नम इति वीप्सया निरन्तरमेव नम इत्यर्थः । ते तुभ्यम् इति युष्मत्पदप्रयोगेण साक्षात्कारात् स्वेष्टदेवत्वं ध्वनितम् । सात्वतां यादवविशेषाणाम् ऋषभाय देवकीनन्दनाय । सात्वतां भक्तानां पालकत्वेऽस्यार्थस्तु पूर्वश्लोके व्यञ्जित एव । कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिगपि यस्य तस्मै । न च त्वं दूरे वा गुप्तो वा वर्त्तसे इत्याह । निरस्तं साम्यमतिशयश्च यस्य यदपेक्षया अन्यस्य साम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्य्येण स्वधामनि मथुरामण्डले रंस्यते रममाणाय रमणीचित्तजनैः सहेत्यर्थतो गम्यम् । स्वधामनि कीदृशे ब्रह्मणि ब्रह्मस्वरूपे "तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी हि" इति गोपालतापनीश्रुतेः । अत्र राधसस्त्यैश्वर्य्यं रंस्यत इति माधुर्य्यम् ॥ १४ ॥

तत्प्राप्तिप्रतिबन्धकं कल्मषं तत्कीर्त्तनादिभिरेव नश्यतीत्याह यदिति । यदीक्षणं यत्प्रतिमावलोकनम् । सुभद्रं सुमङ्गलं श्रवो यशो यस्येति कीर्त्तिमाधुर्य्यमुक्तम् ॥ १५ ॥

धौतकल्मषा ज्ञानिनोऽपि यमेव भजन्तीत्याह विचक्षणा इति । उभयतः इह परत्र च । व्युदस्य निरस्य । अन्तरात्मनः अन्तःकरणस्य गतक्लमा इति अन्ये त्वभजन्तः श्रममेव लभन्ते श्रेयःसृति भक्तिमुदस्य इत्यादेः ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

सतांसाधूनांवृजिनच्छिदेपापहन्त्रे भूयःपुनश्चनमः अखिलंसम्पूर्णंसत्त्वमेवमूर्तिर्यस्यतस्मै पारमहंस्येपरमहंसानांमुनीनामाश्रमेव्यवस्थितानाम् अनुमृग्यंलब्धुमिष्टंनिजपादपद्मद्वयंतदाशुषेदात्रे ॥ १३ ॥

सात्वतांनिजोपासकानां ऋषभायपालकायकुयोगिनांकुत्सितयोगिनांविदूराकाष्ठादिग्यस्यतस्मैनिरस्तंसाम्यं अतिशयश्चयस्यतेनराधसातेजसोपलक्षितेस्वधामनिस्वेमहिम्निब्रह्मणिसर्वास्मिन्रंस्यतेरममाणाय ॥ १४ ॥

अर्हणापूजनमसुभद्रंसुमंगलम् श्रवोयस्यतस्मै ॥ १५ ॥

विचक्षणाःविवेकिनःयस्यचरणयोरुपसादनादुपसत्तेरुपासनात् अन्तरात्मनःमनसःउभयतःइहामुत्रचसंगंव्युदस्यनिरस्यगतक्लमाःनिवृत्तक्लेशाः ब्रह्मगतिगम्यतेइतिगतिः ब्रह्मगतिस्तांविंदंतिप्राप्नुवंति ॥ १६ ॥

भाषा टीका ।

सत् पुरुषोंके वृजिनच्छिद और दुष्टोंके और असत् पुरुषों के अनुग्रहके हेतु अखिल सत्वमूर्ति, और परमहंस आश्रम में स्थित पुरुषोंको मुक्ति देनेवाले भगवानको फिर नमस्कार है ॥ १३ ॥

सात्वतों के ऋषभ, कुयोगियों को जिनकी काष्ठाभी दूरहै और न जिसके समान औरन अधिक ऐसे अपने तेजसे अपने धाम में रमण करते हुए भगवान को नमोनमः ॥ १४ ॥

तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः ।
क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥ १७ ॥
किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाः शकादयः ।
येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥ १८ ॥
स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः ।
गतव्यलीकैरजशङ्करादिभिर्वितर्क्यलिङ्गो भगवान् प्रसीदताम् ॥ १९ ॥
श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः ।
पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः ॥ २० ॥

भाषा टीका ।

जिनका कीर्त्तन जिनका श्रवण जिनका दर्शन जिनका वंदन जिनका स्मरण जिनका पूजन शीघ्रही लोकके कल्मषको विनाश करता है उन सुभद्रश्रवा भगवान को नमोनमः ॥ १५ ॥

विचक्षणजन जिनके चरणों के उपसादन से अन्तरात्मा का ऐहिक और पारत्रिक संगछोड़कर गतक्लम होकर ब्रह्मगति प्राप्त होते हैं उन सुभद्रश्रवा भगवान को नमोनमः ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

भक्तिशून्यानां सर्व्वसाधनवैफल्यं दर्शयन् नमति तपस्विन इति । मनस्विनः योगिनः । सुमङ्गलाः सदाचाराः । यस्मिन् तपआद्यर्पणं विना । सुभद्रश्रवसे इति । अस्यावृत्तिर्यशःश्रवणादेः प्राधान्यज्ञापनाय ॥ १७ ॥

भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह । किरातादयो ये पापजातयः अन्ये च ये कर्मतः पापरूपाः यदपाश्रया भागवताः तदाश्रयाः सन्तः शुध्यन्ति । असम्भावनाशङ्कां परिहरति प्रभविष्णवे प्रभवनशीलायेति ॥ १८ ॥

सर्व्वोपास्यत्वमनुस्मरन् प्रार्थयते । स एष आत्मवतां धीराणाम आत्मा आत्मत्वेनोपास्य इत्यर्थः । त्रयीमयत्वादिविशेषणैस्तत्तन्मार्गेणोपास्यत्वं विवक्षितम् । गतव्यलीकैः निष्कपटैर्भक्तैः वितर्क्येण अत्याश्चर्येण धीक्षणीयं लिङ्गं मूर्त्तिर्यस्य सः प्रसीदतु ॥ १९ ॥

सर्व्वपालकत्वमनुस्मरन्नाह श्रिय इति । पतिः सर्व्वापत्सु रक्षकः ॥ २० ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तट्टिप्पणी ।

किरातेति । शबरात् पर्णशबरीजाताः किराताः आटविकाः । वैदेहकात् पुल्कसीजाताः हूणाः । वैश्यात् ब्राह्मणीजातो वैदेहकः । वैदेहकपुत्रा आन्ध्राः पुतिस्वाः अज्ञातविप्रादिभाषाः मधुपायिनः । निषधात् किरातीजाताः पुलिन्दाः व्यभिचाराज्जातश्चाण्डालस्तस्माज्जाता वा । शूद्रात् ब्राह्मणीजातश्चाण्डालस्तस्माज्जाताः पुल्कसाः । ब्राह्मणाद्वैश्यायां जातोऽम्बष्ठः ब्राह्मणात् तस्याम्बष्ठस्य कन्यायां जाता आभीराः । कङ्काः कर्पराः । नृपाद्वैश्यायां जाता यवनाः श्मश्रुलाः । शकास्तुरुष्कविशेषाः । होम्बुकुरविन्दपुलिस्वपूर्वा आभिधानद्गृहीताः । तथा चातुर्कैः सह चतुःषष्टिजातयः । तथा चोक्तम्--ब्राह्मणस्य त्रयः पुत्रा वर्णास्त्रिष्वनुलोमजाः । शूद्रस्य च त्रयः पुत्रास्तेष्वेव प्रतिलोमजाः ॥ त्रयस्त्रयः क्षत्रविशोः प्रतिलोमानुलोमजाः । एतं द्वादश वर्णानां पुत्रा एकैकशस्तु ते ॥ चातुर्वर्ण्ये प्रसूयन्ते चतुरश्चतुरः सुतान् । ते चत्वारिंशदष्टौ च पूर्वैर्द्वादशभिः सह ॥ ब्राह्मणाद्यैश्चतुर्भिश्च चतुःषष्टिर्हि जातयः ते सर्व्वे दस्यवो दोषैश्चोभ्यौर्यैः सद्भिर्बहिष्कृताः ॥ इति जातिविवेकाभिधाने । इति विजयध्वजः ॥ १८—२३ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

भक्तिशून्यानांसर्वाण्यपिसाधनानिनिष्फलानीत्याह तपस्विनइति तपस्विनः कृच्छ्रचान्द्रायणादितपोनिष्ठाः मनस्विनः मनआदीन्द्रियनिग्रहपराः मंत्रविदःमंत्रजापपराः सुमंगलाःसदाचारपराः एतेसर्वेतपआदियदर्पणंयस्मिन् भगवतिसमर्पणंयदुपासनांगत्वेनानुष्ठानं विनेतियावत् क्षेमंतत्तत्तपआदेःपरमफलंनविंदंतिनलभंते यद्यपियत्किंचिद्दुरितनिवृत्त्यादिकंफलमाप्नुवंतितथापिनाक्षय्यंफलमाप्नुवंति भक्तियोगांगत्वेनतपआदिकुर्वाणास्तुनिरतिशयंफलंप्राप्नुवंतीत्यभिप्रायः ॥ १७ ॥

किंचकथंभागवताआत्मानंविशोध्यब्रह्मप्राप्नुवंतीतिभागवताश्रिताहीनजातीयाअपिप्राप्नुवंतीत्याह किरातेति किरातादयोहीनजातयः अन्येचयेपापाःपापजातयः यदुपाश्रयाश्रयाः यंपरमपुरुषमुपाश्रितायदुपाश्रयाभागवतास्तदाश्रयाभागवताश्रिताःशुध्यंति असंभावनाशंकांपरिहरति प्रभविष्णवेप्रभवनशीलायपूर्वोक्ततपआदीनांफलप्रदायेत्यर्थः अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवचेतिभगवद्वचनात्सर्वकर्मफलप्रदत्वेनसर्वसाधनानांतत्समर्पणमेवयुक्तमितिभावः ॥ १८ ॥

एतदेवोपपादयतिसइति सप्रसिद्धएषः आत्मापरमात्माआत्मवतांकेवलयोगनिष्ठानामधीश्वरःयोगफलप्रदःत्रयीमयःपूर्वभागोक्तकर्माराध्यस्तत्फलप्रदश्चेत्यर्थः धर्ममयःस्मार्तदानादिधर्माराध्यःतत्फलदइत्यर्थः तपोमयउपनिषद्भागोक्तोपासनात्मकज्ञानमयः तद्ब्रह्मप्राप्तुयंबेच इत्यकलदइत्यर्थः तदंदेवतान्तरस्तत्फलदातृत्वमस्याकथंतत्सर्वेषांसर्वकर्माराध्यत्वमित्यत्राह गतव्यलीकैर्गतदोषैरजशंकरादिभिर्ब्रह्मरुद्रादि

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

म्भिर्वितर्क्यो लिङ्गैः चिह्नैस्तु महाकवि लिङ्गं लक्षणं चिह्नं यस्य सः ब्रह्मादयोऽपि यदीयं लक्षणं वितर्कयन्ति तथाभूतः तेषामध्यन्तरात्मा ... रूपेण फलदाता हृदयं एवंविधं भगवान्प्रमादे ... भगवानिति अनेनैव ... विशेषणविशिष्टः ॥ १९ ॥

सर्वपालकत्वं प्रपञ्चयन्स्मरन्नाह श्रियइति श्रियः लक्ष्म्याः पतिर्भर्त्तेत्यर्थः यज्ञपतिः वैदिककर्ममर्यादापालकः प्रजापतिः ब्रह्मादिस्तम्बपर्यन्तप्रजापालकः धियां ध्यानानां उपासनानां पतिस्तन्मर्यादापालकः यज्ञपतिर्धियांपतिरिति भागद्वयाभिप्रायेणोक्तं लोकपतिः समस्तभुवनान्तर्गतानां च पालकाभिप्रायेण लोकपतिः प्रजापतिरिति चोक्तं धरापतिः भूलोकपालकः धरायाः लोकान्तर्गतत्वेऽप्यधर्मभरक्षुल्यापृथगुक्तिः राम कृष्णादिरूपेण भूर्लोकेऽवतीर्य दुष्कृतविनाशं कुर्वन्विशेषेण मर्यादापालकस्त्वित्यर्थः अवतारप्रयोजनमाह पतिरिति अंधकवृष्णियादवप्रभेदाः तेषामकूरोद्धवादीनां पतिर्गतिश्च पालकः प्राप्यश्च पतिर्गतिश्चेत्युभयोपादानेन साधुपरित्राणमेवावतारप्रयोजनं दुष्कृतविनाशनं त्वानुषङ्गिकमिति दर्शितं न केवलं स्वकुलीनानामेव सतां पतिः किंत्वन्येषामपि सतामित्याह सतांपतिः गतिश्चेत्यनुषज्यते एवंविधो भगवान्मम प्रसीदतु ॥ २० ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

सज्जनसेवायामप्येतादृशमाहात्म्यं किमुत भगवत्सेवायामिति भावेन तन्माहिमा । विशिष्टं नमति किरातेति किरातादयो येऽन्येपापास्ते सर्वे यदपाश्रयाश्रयाच्छुध्यन्तीत्यन्वयः यस्मादन्य आश्रयो नास्ति येषां ते यदपाश्रया इति प्रायस्तेषामाश्रयात्संबालक्षणात्शुध्यन्ति निष्पापा भवन्तीत्यर्थः शबरात्पर्णी(?)जाताः किराताः आन्ध्रिकाः वैदेहात्पुल्कसीजाता हूणाः । वैश्यात्ब्राह्मणीजातो वैदेहकः वैदेहकपुत्रा आन्ध्राः पुलिन्दा ब्राह्मणविप्रादिभाषा मधुपायिनः । निषादात्किरातीजाताः पुलिन्दाः व्यभिचाराज्जातश्चौरस्तस्माज्जाता घा शूद्राद्ब्राह्मण्यां जातश्चाण्डालस्तस्माज्जाताः पुल्कसाः ब्राह्मणात् वैश्यां जातोऽम्बष्ठः ब्राह्मणात्क्षत्रियायां जाताः अम्बष्ठस्य कन्यायां जाता आभीराः कङ्काः कर्पराः नृपात् शूद्र्यां जाता यवनाः इमश्रुलाः शकास्तु रुष्क विशेषाः डाबुकुरावकपूर्तिकपूर्वा आदिशब्दगृहीताः तथा चानुक्तैः सह चतुःषष्टिजातयस्तथा चोक्तं ब्राह्मणस्यत्रय पुत्रा वर्णास्त्रिष्वनुलोमजाः शूद्रस्य त्रय पुत्रास्ते च प्रतिलोमजाः त्रयस्त्रयः क्षत्रविशोः प्रतिलोमानुलोमजाः एतद्द्वादश वर्णानां पुत्रा एवं च षड्ब्रुते चानुवर्ण्य प्रसूयं तेषां तुरश्चतुरः सुतान् ते चत्वारिंशदष्टौ च पूर्वैर्द्वादशभिः सह ब्राह्मणाद्यैश्चतुर्भिश्च चतुःषष्टिर्हि जातयः ते रूढदस्यवोदोषैः (?) ... जातिविवेकाभिधानं अन्ये पापा ब्रह्महत्यादिकर्तारः तस्मै प्रभविष्णवे प्रभवनशीलाय नमइत्यन्वयः ॥ १८ ॥

य एवंविधमहिमत्वेन प्रसिद्धः स एव आत्मा परमात्मा भगवान्प्रसीदतामित्यन्वयः किंविशिष्टः । आत्मवतां भक्त्याऽपरोक्षीकृत परमात्मतत्त्वानां मुक्तानां प्रशंसायां मतुब्विति प्रशस्तमनसां ज्ञानिनां वाऽधीश्वरः वेदधर्मतपोनुसारिणां पुंसां वशगत्वात्त्रयीमयो धर्ममयस्तपोमयः ... वात्सल्यं दर्शितं तदुक्तं वेदानुसारि वशगः ... तत्र प्रमाणमाह गतेति व्यलीकं त्वप्रियेऽनृत इत्यभिधानात् गतव्यलीकैः शंकरादिभिः ब्रह्मशिवादिभिः विचर्यो विशेषेणानुमेयं लिङ्गं अजन्मादिलक्षणं यस्य स तथोक्तः ॥ १९ ॥

चित्तीकृतत्तदभीष्टसिद्ध्यर्थं तत्तद्गुणविशिष्टस्य हरेः प्रसादं प्रार्थयते श्रियः पतिरिति श्रीभूम्योः पतिः ... तद्देवतानामाधिपत्यं निवारयति यज्ञादिषाङ्गमात्राभिमानित्वेन ... ध्यानानामि बहुजनाश्रयत्वेन क्षमागुणनिधित्वेन स्थिराया धरायाः पतिः । मनआदीन्द्रियव्यापारस्याध्यात्मदेहान्तर भोग्यफलस्य यज्ञ कर्मणा फलदानृत्वेन तत्फलपालकः फलपालनं किमर्थमित्यत आह प्रजापतिरिति कर्मण्यधिकृतस्य यजनस्य जीवनहेतुत्वेन पतिः प्रजा तु जनपुत्रयोरिति । प्रजापतिशब्दवाच्यत्वं मुख्यमस्येति वा प्रवृत्तज्ञानपूर्वकत्वेन संभवात्सदर्थं धियां पतिरिति लोकपतिरित्यनेन पुरंदरादीनां तत्पतित्वं निवारयति पतिर्गतिश्चेत्यादिना भक्तवात्सल्यातिशयत्वं दर्शयति निरपेक्षत्वेन सतां स्वामित्वापेक्षानास्तीति ... निवारयति सतांपतिः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

भक्ताश्रितानां पापजीवानामपि परमशुद्धौ हेतुत्वं दर्शयन्नाह किरातेति । अत्र यदपाश्रयाश्रयत्वं व्यवहारेकदेव । परमार्थेन शुद्धौ तु पूर्वेषामपि भगवदपाश्रयाणां ततपूर्वं भक्तान्तराश्रयत्वं विद्यत एवेति न विशेषः स्यात् ॥ १८ ॥

प्रत्यक्षवत् स्फुरणात् स एव इत्युक्तम् । त्रयीमयः कर्मकाण्डोपास्यः । धर्ममयः मन्वादिधर्मशास्त्रोपास्यः । तपोमयः उपासनाकाण्डोपास्यः । गतव्यलीकैः प्रोज्झितकैतवैः मोक्षपर्यन्तकामनाशून्यैः परमभक्तैः ॥ १९ ॥

तदेवं निजोपास्यविशेषं रहस्यत्वेनाभिव्यज्य परमप्रेमावेशेनैव प्रकटं व्यञ्जयन्नाह । श्रियः सर्वसम्पदधिष्ठात्र्याः पतिः स्वामी । अत एव यज्ञानां सर्वश्रेयःसाधनानां च पतिः फलदाता । अतः प्रजानां सर्वासामेव पतिरीश्वरः । यतो धियां पतिः तासामन्तर्यामी च । ततस्ततश्च तासां ये लोका भोग्यभुवनानि तेषामपि पतिर्भोक्ता । य एव च धरापतिः कृपयाऽवतीर्य धरापतित्वलीलाञ्च व्यञ्जितवानित्यर्थः । कोऽसौ इत्यपेक्षायामाह पतिरिति । पतिः पालकः गतिः नित्याश्रयश्च । तत्र प्रमाणमाह । सतां तदनुभविनां पतिः आश्रय इति ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवं ज्ञानभक्तिमार्गौ निरूप्य गुणपात्रकर्ममार्गेऽपि भजनावश्यकत्वं वदन्तेषां स्वरूपसंदेहं वारयति तपस्विन इति यशस्विनः कृपारामादिकर्तारः मंत्रविदो मंत्रोपासका याज्ञिका वा सुमंगलाः सदाचाराः एते हि कर्ममार्गे वाक्शुद्धाः तपो हि संतापात्मकं तत्तुपाकः साधनपर्वं ... प्रयच्छति नहि देहेन्द्रियाणि किलष्टानि सुखं प्रयच्छन्ति विहितत्वात्फलदाने विद्वान् संबंधाभावात् ... तद्भोजनाविज्ञायात् अदृष्टद्वारा फलजनने मानाभावात् कथं तर्हि शरीरस्थं भूतग्राममिति ... दाकल्पनायोग्यानाभावात् भगवत्क्रीडापरिकल्पना संपादयन्देहं भगवद्योग्यं करोति ... निवृत्त्यर्थं वा ... नहि भगवतो ... एवं कर्मिणां ... अथ विशिष्टानि शोधयति ... ॥

पैवोङ्गानतर्थोवीवपदे:सुदर्शनक्षेमप्राप्ति: कृपाशमाद्दिर्चाविषअमलनत्वेनमणवाविकोवितकरणात् वृद्धवेवतस्यनिर्णय: मनस्विनस्तुयोगिनएवतेकुतोमिविभावैर्देववाविचारिता: सर्वेषामेवविरोवितत्त्वविद्या दृवेदवोहीमन्तेव भगवत्समर्पणेतुतत्त्वनेनतु कमेवकृतमितिनको अपिदोष:संभवति धर्ममार्गेऽभिवर्म:प्रवर्ततिवदीवनादिस्तोविदाशा संवर्वात्समर्पणंतुकं लोकेऽपिमहाराजसमर्पणात्वैमोगोवाकौलनाशोवा संभवति भगवदीयानांकाकनाशाभावात् भगवद्योगेपुनस्तदीयत्वंवाप्रसादोवाभविष्यतीतिपूर्ववदेवज्ञानमार्गेभक्तिमार्गेवाप्रवेशोभविष्यतीति सुमङ्गलं सदयुक्तं मार्गप्रवत्त्वात्अपिभगवदीयाइतिभगवत्कीर्ति: अन्येषांतुतत्प्रवेशाभावात् आहंरणाविप्सवानमनं एवंसाक्षाद्भगवत्संबंधिनांभगवत्प्रवेशप्रकारमुक्त्वासाक्षात्संबंधरहितानामपितत्प्रवेशप्रकारमाहरूतीवगातिव्यावृत्त्यर्थं तद्वयतिभगवान् उदासीनोऽपिवद्वर्ग्यइति तद्भगवदाश्रिताभगवदीयाश्रिताचापकत्व अन्येद्वितीयकोटावितिनिर्धारोऽवतिततत्राह ॥ १७ ॥

किरातेति किरातादयस्तत्तज्जातिस्वाभिनोऽन्यजा: जातित:कार्यतश्चदुष्टा:भक्तसमाश्रयसामर्थ्येनशुद्धाभवंतीति भक्ताद्वभगवत्सेवायोग्याभवंति अन्येऽपिपापा:प्रायश्चित्तानधिकृताअपि एतेनविविधागणिता: अर्थाद्वक्रमध्येविवक्षया भक्तद्वाराअपिमाहात्म्याप्रभाविष्णुत्वं अपवर्गीवर्जनादतिज्ञापनात् अपोपसर्ग: अतिशयार्थेऽपिवर्तते व्याप्त्यर्थेवा परितस्त्वर्थेवा तेनविश्वाधारत्वेनदुष्टानामपिदैत्यादीनांतदाश्रयत्वं निवारितं एवंस्वरूपत:प्रमाणतश्चसर्वसंदेहवारणंकृत्वाफलत:साधनतश्चतस्यमाहात्म्यमाह ॥ १८ ॥

सएषइति तत्रप्रथमंसाधननिर्धारमाह प्रसीदतामिति साधनंभगवत्प्रसादएवफलंसएवउभयोरेवविनिश्चय: तदाहभगवान्प्रसीदतामिति अन्यत्रसाधनंप्रसादोपक्षीणं लोकद्वारानुभवद्वाराचसर्वाणिशास्त्राणिप्रवृत्तानि वेदस्यापितत्परत्वेनार्थोनिरूप्यते तत्रअधिकारीप्रमाणंचसंतश्चप्रीतिहेतव: एतेऽत्यापातत:प्रोक्तास्तस्मात्संप्रार्थनंवरं संप्रार्थनंहिसुमहान्साधनंफलमेववा कायादिभि:करोत्येवतस्मात्साधननिश्चय: तत्राधिकारिणस्त्रिविधा: येहिभगवत्प्रसादयोग्या: तेआत्मवंत: आत्मशब्देनहिअंत:करणं आत्माच तत्रतेषामात्मत्वेनायंप्रकाशते येपुनरंत:करणवंत: यथासुखमंत:करणंकर्तुंसंभवंति तेषामधीश्वर: स्वामी अंत:करणप्रेरकोवा स्वसेवांवाकारयति तद्योग्यंवाकरोतीति प्रमाणंचत्रिविधं श्रुतिस्मृतिपुराणाख्यं तत्रप्राधान्येनवेदइति तेनापियज्ञ:प्रतिपादितइति यज्ञप्रतिपादकत्वेनत्रयीप्रमाणं स्मृतीनांतुधर्मप्रतिपादकत्वेन तैत्रार्थस्यैवप्राधान्यात्धर्मप्रयोग: पुराणांतुतप:प्रतिपादकं यावंतिहिफलानिनिरूपयतितपसैवतानिनिरूपयति तत्रितयरूपोऽपिभगवानेव अर्थतत्स्वरूपतश्च तत:किमधिकारेणकियाप्रमाणेन उभयोरपिफलकोटावेवप्रवेशात् सतामाश्रयणेऽपितथा यत: अजशंकरादिभिरविचिंत्यमेवलिंगंयस्य सतांहिपराकाष्ठाब्रह्मावामहादेवोवा तच्छिष्यास्तत्पुत्राश्चान्येतैरपिविशेषेणतत्त्वमेवलिंगंयस्य नत्विदमिष्टतयाश्रयं तर्कितंहिभवतिनभवतिच तेऽपिस्वस्यमाहात्म्यमेवद्रष्टाभगवत्कृपयातज्ञानितमितिभगवत्साक्षात्कारेणचतत्स्वरूपप्रसादयोर्निर्णयंकल्पयंति एतादृशोहिभगवान्एवंप्रसन्नोभवतीति तत्रप्रमाणेनानाप्रकारेणनिरूपणात्लोकतश्चतथाप्रतीते: नतावन्मात्रतेतिनिश्चीयते तेतुशब्दात्प्रत्यंचलीयइतिविशेषेणतर्कयंति तस्मादेवमवगम्यतेभगवानेवप्रसादंप्रार्थनीय: नान्यसान्योपि तस्मात्प्रार्थनायांसंभवत्यांनान्यत्कर्तव्यमिति सिद्धं यदिप्रार्थनायांभगवान्कुध्येत् लोकेहिअनधिकारिप्रार्थयन्क्रोधमुत्पादयति यद्यपिप्रसादस्यसाधारणत्वात्अन्यस्याप्रार्थितत्वात्क्रोधोनसंभवति तथापिसामान्येऽप्यनधिकारिणंप्रतितद्भवत्येव अतस्तन्निराकरणार्थंप्रार्थनायोग्यंरूपमाह ॥ १९ ॥

श्रिय:पतिरिति पति:प्रार्थनीयइत्यविवादंकुध्यतुमावातद्येषांपति:तै:प्रार्थनीय: तत्रप्रथमंप्रार्थ्यानांपतित्वंनिरूपयति प्रथमंभगवान्लक्ष्मीपति: ततोलक्ष्म्यंशै:स्त्रीभि: प्रार्थितोनकुध्यति अनेनस्नेहमार्गानुवर्तिभिरन्यैरपिप्रार्थितोनकुध्यति एवंयज्ञपति: यज्ञपुरुषै:प्रार्थितोनकुध्यति अतएवयज्ञेयत्कामयतेइति बहुधावचनंभगत्पतित्वज्ञापकं किंच प्रजापति: येकेवललौकिका:प्रजामात्ररूपा: प्रकर्षेणजाताचा तेषांपति: साधारणैरपिप्रार्थ्यं अल्पविशेषैरपि किंच धियांपति: येकेचित्कामपिबुद्धिजानंतिक्रियायांज्ञानेवा शब्दार्थतोवा तैरपिप्रार्थनीय: किंच लोकपति: स्वर्गादिलोकानांपति: अतस्तद्गतैरपिप्रार्थनीय:ततोधरायाश्चपति:अतोभूमिस्थैरपिप्रार्थनीय:स्त्रीभिश्चयाश्चिकैलोकैर्बुद्धिमद्भिरस्थितै:कश्चिदसाधनैरपिलोकै:प्रार्थनीयोहरि:पति: किंच अंधकवृष्णिसात्वतांपतिर्गतिश्च पूर्वभगवत्प्रार्थनायोग्यतानिरूपिता इदानींफलमुखतानिरूप्यते पति:फलं गति:स्वनिष्ठसाधनं तत्तत्फलंस्वनिष्ठत्वेसातिसाधनतांभजंत तदाफलोपभोगोभवति नहिस्वसुखंदूरस्थ अनाधनंवास्वसंबंधातस्यां क्रियायांहेतुर्भवति तद्भगवान्यादवै:प्रार्थित:पति:सन्तेषांक्रियारूपोऽपिजात: अतोअनेनयावत्कर्तुंशक्यतेतावत्तेषांभवति अत:फलमुखपतित्वमत्रसिद्धमितिक्रोधसंभावनाऽपिदूरं चकारात्क्रियासाध्यरूपश्च त्रिविधाविद्यादवागणिता: तामसराजससात्त्विकपुरुषभजनीयत्वंनिरूपितं किंच यत्रगुणान्यातैरपिभगवान्प्राप्यतेप्रार्थ्यतेच तत्रास्मदादीनांकाचिंतेतिप्रसीदतांमइत्याह मह्यंप्रसीदतामिति किंच सतामयंपति: येभगवत्येवसंतिगुणेषुप्रविष्टा: गुणद्वाराभगवदाश्रया:तेषांतुपतिरेव अन्यान्प्रत्यौपचारिकंपतित्वं गुणद्वाराश्रयाच सतामेवपति: अतोऽपि मह्यंप्रसीदतामितिभाव: ननुभगवद्गुणेषुपृष्टेषुतत्कथनंपरित्यज्यभगवत्प्रार्थनाकुत्रोपयुज्यते तत्राह ॥ २० ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

किं बहुना भक्तिं विना महात्मानोऽपि विफलसाधना विगीता एव भवन्तीत्याह । तपस्विनः ज्ञानिनः । दानपराः कर्मिणः । यशस्विनः कर्मविशेषाः अश्वमेधादिकर्त्तारः । मनस्विनः योगिनः । मन्त्रविदः आगमीयाः । सुमङ्गलाः सदाचाराः । सुभद्रश्रवसे इति । अस्याद्विर्वचनं श्रवणादेः प्राधान्यज्ञापनाय ॥ १७ ॥

भक्तिसम्बन्धेनापि केवलेन शुद्धाभवत् पापात्मानो विगीता अपि कृतार्थां भवन्तीत्याह । किरातादयो ये जातित एव पापाः अन्ये च ये कर्मत एव पापाः ते च शुध्यन्ति । यदपाश्रया वैष्णवा एव गुरुत्वेनाश्रयाः येषां ते तथाभूताः सन्तः इति सद्गुरुचरणाश्रयमात्रेणैव जातिकर्मभ्यां सकाशात् पापिनः शुध्यन्तीति प्रारब्धाप्रारब्धपापनाशकत्वं भक्तेर्व्यञ्जितम् । तथाहि किरातादीनामशुद्धौ दुर्जातिरेवकारणम् दुर्जात्यारम्भकं यत् पापं तत्प्रारब्धमेव । शुध्यन्तीति शुद्धत्वन्यथानुपपत्त्या दुर्जातित्वनाशो दुर्जातित्वस्य नाशान्यथाऽनुपपत्त्या च प्रारब्धपापनाशोऽवगम्यत एव । तथापि ते तज्जातित्वेन यदाभावन्ते तत् व्यवहारत एव, न तु तत् परमार्थत इति ज्ञेयम् । अर्च्ये विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिः इति तेषु जातिबुद्धेर्निषेधात् । तथाप्येके तादृशदुर्जातयोऽपि भक्तिमुपदेष्टुं इति विधिश्च प्राप्तः । श्रूयते चैका-

यदङ्घ्र्यभिध्यानसमाधिधौतया धियाऽनुपश्यन्ति हि तत्त्वमात्मनः ।
वदन्ति चैतत् कवयो यथारुचं स मे मुकुन्दो भगवान् प्रसीदताम् ॥ २१ ॥
प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि ।
स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदताम् ॥ २२ ॥
भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः ।
भुङ्क्ते गुणान् षोडश षोडशात्मकः सोऽलङ्कृषीष्टाखिलविद्भवान्ति मे ॥ २३ ॥
नमस्तस्मै भगवते वासुदेवाय वेधसे ।
पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम् ॥ २४ ॥
एतदेवात्मभू राजन् नारदाय विपृच्छते ।
वेदगर्भोऽभ्यधात् साक्षाद् यदाह हरिरात्मनः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वितीयस्कन्धे पुरुषसंस्थानुवर्णनं नाम
चतुर्थोऽध्याय ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

वशो—स्त्रियः शूद्रादयश्चापि तेऽनुकम्पया भवादृशाम् इत्यत्रापिपदेन दुर्जातय एव लक्ष्यन्ते । अत्रासम्भावनाविसर्व्वाक्षेपपरिहारार्थमाह प्रभविष्णव इति । एवाप्येका भगवतः प्रभुता स्वाभाविकी नात्र युक्तिर्योजनीयेति भावः ॥ १८ ॥

एवं श्लोकद्वयेन व्यतिरेकान्वयाभ्यां भक्तिमतामेव सर्व्वोत्कर्षमभिव्यज्य परेषामप्ययमेव प्रतिज्ञार्थसिद्धये उपास्य इत्याह । सः प्रसिद्धः एषः अधीश्वरः आत्मवतां ज्ञानिनां योगिनाञ्च आत्मा आत्मत्वेनोपास्यः । त्रयीमयत्वादिविशेषणैस्तत्तन्मार्गेणोपास्यत्वम् । न च कैरप्येष ज्ञातुं शक्य इत्याह । गतव्यलीकैः निष्कपटैः वितर्क्यमेव न तु निश्चयेन ज्ञातुं शक्यं लिङ्गं लक्षणमपि किमुत लिङ्गगर्भं स्वरूपं यस्य सः । सकपटानामात्मवादिनां का वार्त्तेति भावः ॥ १९ ॥

सर्व्वपालकत्वमाह श्रिय इति । तत्रापि विशेषमाह पतिः गतिश्च प्राप्यश्च अप्रकटप्रकाशे सः यादवरूपत्वेनेत्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

तपस्विनः कृच्छ्रादितपोनिष्ठाः दानपरायज्ञादिमिषेणासर्वस्वत्यागिनः यशस्विनः यशोऽर्थेशुभकारिणः मनस्विनः निर्जितकरणाः मंत्रविदः मंत्रार्थज्ञानपूर्वकतज्जपपराः सुमंगलाः सदाचारपराः । यद्यस्मिन् तप आद्यर्पणंविनाक्षेमं तपआदेः फलंनविंदंतिनप्राप्नुवंति॥१७॥

यस्योपाश्रयाः भागवतास्तदाश्रयाः सन्तः किरातादयोयेपापाः पापजातयः अन्येचयेकर्मतः पापास्तेशुद्ध्यंति तस्मैप्रभविष्णवे प्रभवनशीलायनमः ॥ १८ ॥

सएषअधीश्वरः एषसर्वेश्वरः प्रधानक्षेत्रज्ञपतिर्गुणेशः इत्यादिश्रुतिप्रसिद्धः भगवान् प्रसीदताम् कथंभूतः गतव्यलीकैर्गतदोषैः ब्रह्म-शिवादिभिः वितर्क्य उपासनार्थलिंगंचिन्हंयस्यसः एतदग्रेस्फुटीभविष्यति पुनः कथंभूतः त्रयीमयः तपोमयश्च केवलाश्रमधर्मोराध्यः तत्तदाश्रमधर्मफलदइत्यर्थः तत्रत्रयीमयइत्यनेनत्रयीप्रोक्ताग्निहोत्रादिगृहस्थधर्मेण धर्ममयइत्यनेनब्रह्मचारिधर्मेण तपोमयइत्यनेनाश्रमद्वयधर्म-स्यतपः प्रधानत्वात्तेनच आराध्यः तेषुयेज्ञानभक्तिसम्पन्नास्तान् प्रतिविशेषमाह आत्मात्मवतामिति आत्माश्रीभगवानुपास्यतयाविद्यतेयेषां तेषां महताम् आत्मा आश्रयः ॥ १९ ॥

पतिः पालकः गतिः सर्वापत्सुरक्षकः ॥ २० ॥

भाषा टीका ।

तपस्वी दानपर यशस्वी मनस्वी मंत्रवाले सुमंगल ये सब जिनके अर्पणविना क्षेमको नहीं प्राप्त होतेहैं उन सुभद्रश्रवा भगवान को नमोनमः ॥ १७ ॥.

किरात हूण अन्ध्र पुलिंद पुक्कस आभीर कंक यवन खस औरभी पापजाति सब जिनके भक्तों के आश्रय से शुद्ध होजाते हैं उन प्रभविष्णु भगवान को नमस्कार है ॥ १८ ॥

वह आत्मज्ञानियों का आत्मा अधीश्वर त्रयीमय धर्ममय तपोमय और गतव्यलीक (निष्कपट) अज, शंकर, आदि देवता के वितर्क्य लिंग भगवान प्रसन्न होओ ॥ १९ ॥

श्रियःपति यज्ञपति प्रजापति बुद्धिके पति लोकपति धरापति अन्धक वृष्णि और सात्वतों के पति और गति सब पुरुषों के अति भगवान मुझपर प्रसन्न होय ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

[illegible] अचक्षुर्लक्षणमाह यदिति द्वाभ्याम् । यस्याङ्घ्रेरभिध्यानमेव समाधिस्तेन धौतया शोधितया । यथावत् तत्त्वमुसारं [illegible] सगुणान्निर्गुणादिभेदैः यद्वा तत्र तत्प्रतिमा यथामतीत्यर्थः ॥ २१ ॥

किञ्च पुरा कल्प आदौ अजस्य हृदि सतीं सृष्टिविषयां स्मृतिं वितन्वता येन प्रचोदिता सती सरस्वती तस्य मुखतः किल प्रादुर्भूता [illegible] शिक्षादीनि लक्षणानि यस्याः सा । ऋषीणां ज्ञानप्रदानाम् ऋषभः श्रेष्ठः ॥ २२ ॥

इदानीं [illegible] स्वोक्तानां [illegible] प्रार्थयते भूतैरिति । स मे वचांसि अलङ्कृषीष्ट अलङ्करोतु । अन्यस्य [illegible] सामर्थ्येनालङ्कारासम्भवमाशङ्क्य तस्यान्तर्यामितामाविष्करोति । यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु पुरषु अन्तर्यामितया [illegible] वसति । अत पुरुषसमाख्यां प्रमाणयति यत् यस्मात् पूरुष इति । अतएव यः एकादशेन्द्रियपञ्चमहाभूतरूपाणि षोडश गुणान् कलाः भुङ्क्ते प्रकाशयति पालयतीति वा । तद्वा स्वात्मनेपदमार्षम् । तत्र हेतुः यतः षोडशानामात्मा चेतयिता कार्यं कः । न त्वत्र जीवत्वमुच्यते प्रार्थनाविरोधात् ॥ २३ ॥

श्रीव्यासं नमस्करोति नम इति । सौम्याः भक्ताः । यस्य मुखाम्बुरुहे आसवो मकरन्दस्तम् ॥ २४ ॥

इदानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं प्रस्तौति एतदिति । उत्पत्तिसमय एव वेदा गर्भे यस्य । साक्षात् हरिरयमाह ॥ २५ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीराधारमणदास गोस्वामिं विरचित दीपनाख्य टिप्पणी ।

[नमस्तस्मै इति ॥ भगवते अतीतानागतादिज्ञानवते । तथाच विष्णुपुराणम्—उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥ वासुदेवावतारत्वात् वासुदेवः तस्मै । यद्वा वसुदेवं शुद्धसत्त्वं तद्योगात् वासुदेवः तांत्रिकसमा [illegible] वेति दश । इति व्याख्यालेशः ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

ज्ञानप्रदत्वेन सतां पतित्वमेव व्यक्तीकुर्वन् तत्प्रसादं प्रार्थयति यदित्यादिद्वाभ्यां यस्याङ्घ्रेरभिध्यानमेव समाधिस्तेन धौतया शोधितया धिया आत्मनः तत्त्वं याथात्म्यं कवयः स्वयं पश्यन्ति जानन्ति अन्येभ्यश्च यथारुचं यथामतिरुक्तप्रतिमा वदन्ति च उपदिशन्ति चेत्यर्थः स भगवान्मुकुन्दो मे मह्यं प्रसीदताम् ॥ २१ ॥

किञ्च प्रचोदितेति पुरा कल्पादौ अजस्य ब्रह्मणः हृदि स्मृतिं सृष्टिविषयां स्मृतिं वितन्वता विस्तारयता येन परमात्मना प्रचोदिता सञ्चोदिता सरस्वती त्रयीरूपा स्वलक्षणा स्वरविशेषादिस्वसाधारणचिह्नवती आस्यतः मुखतः प्रादुरभूत् प्रादुर्भूतवती स प्रचोदयिता ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः मे प्रसीदताम् ॥ २२ ॥

इदानीं भगवानेव स्ववाचां प्रतिपाद्यः स्यादिति प्रार्थयते भूतैरिति स भगवान्मे वचांसि अलंकृषीष्ट अलंकरोतु प्रतिपाद्यः स्यादित्यर्थः वाचां भगवत्प्रतिपादकत्वमेव महालंकारः यथोक्तं तद्वाग्विसर्गो जनताघविप्लव इत्यादि ननु भवतो वाच्यमानानां नानार्थप्रशब्दानां कथं स एव प्रतिपाद्यः स्यादित्यत आह महद्भिर्भूतैर्महदादिपृथिव्यन्तैर्भूतैरिमाः पुरः पुराणि शरीराणि निर्माय विभुः स्वयं तत्तज्जीवान्तर्व्यापनस्वभावः अमूषु पुर्षु शेते अन्तःपूरुषः पुरिशयनात्पुरुषशब्दवाच्यः भवति एतेन केवलं शेते किंतु लीलारसमप्यनुभवतीत्याह षोडशगुणान् शब्दादिविषयान् पञ्च पञ्चबाह्येन्द्रियव्यापारान् प्राणादिवायुवृत्तीः पञ्च एकं मनसो गुणं संकल्पादि एतान् षोडशगुणान् स्वयं षोडशात्मकः एकादशेन्द्रियपञ्चभूतात्मभूतः भुंक्ते लीलारसमनुभवतीत्यर्थः जीवान्तर्यामित्वेन गुणान् गृह्णता भगवता गुणग्रहणं लीलारसः जीवस्य तु कर्मायत्तभोग इति भावः एवं च वेदादिना [illegible] णां परमात्मपर्यन्तत्वात् अतास्मत्सर्ववचसां प्रतिष्ठायत्रशाश्वतीतिन्यायेन मद्वचसां स एव विषयः स्यादिति युक्ता प्रार्थना ॥ २३ ॥

एवं भगवन्तं नमस्कृत्याथ स्वगुरुं पितरं च व्यासं नमस्करोति एतदेवेति व्यासस्यापि वासुदेवावतारत्वाद्वासुदेवायेत्युक्तिः वेधसे सर्वज्ञाय सौम्यास्तत्त्वाद्भक्ताः ज्ञानमयं यन्मुखाम्बुरुहासवं यन्मुखाम्भोजे यो मकरन्दः तं पपुः तस्मै नमस्त्यन्वयः ॥ २४ ॥

एवं गुरुदेवतं नमस्कृत्य प्रकृतप्रश्नस्य उत्तरमवतारयितुं तस्य सांप्रदायिकत्वसूचनाय नारदहिरण्यगर्भयोः प्रश्नस्योत्तरं संवादयति एतदिति [illegible] यथावत्पृष्टमेतदेवानुपृष्टं तेन नारदाय वेदाः यस्य गर्भे अन्तः स्थः स वेदगर्भः चतुर्मुखः अभ्यधात् किमित्यत आह हरिर्भगवानात्मनः [illegible] यदाह भगवान्ब्रह्मतुर्मुखायायदाह स च नारदायतद्वाहतद्वाहं भवते अभ्यधास्यामीत्यभिप्रायः ॥ २५ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धे वीरराघवकृतटीकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

उक्तार्थे जातनिर्वेदः किं प्रमाणकं कथं वा ज्ञातुं शक्यमिति तत्राह यदङ्घ्रीति कार्त्स्न्येनानिवृत्तविषयसंस्कारस्मरणमभिध्यानं निवृत्तविषयसंस्कारोऽसम्प्रज्ञाताख्यः समाधिः एवंविधविषयाभ्यां भ्यां धौतया निर्मलिकाधिया कामलवाभिधया आत्मनः परमात्मनस्तत्त्वमनुपश्यन्ति हि यस्मात् स्मात्तद्दर्शनं प्रमाणं ॥ यथायथा रुचं यथा [illegible] विशिष्यादिभ्यस्तत्तत्त्वं वदन्ति चेत्यतस्तदुपदेशगम्यो ज्ञातुं च शक्यमित्यर्थः ॥ २१ ॥

[illegible] सरस्वती चतुर्मुखादिप्रसादश्चाभीष्टसाधनं भवतीत्यभिप्रायेणाह प्रचोदितेति पुरा सर्गादौ अजस्याऽऽपरब्रह्मणो जातस्य चतुर्मुखस्य हृदि सतीं सर्वचेतनेभ्य उत्तमां स्थितिं तत्तन्नियमलक्षणां वितन्वता संस्कारोद्बोधद्वारेण विस्तारयता येन भगवता प्रचोदिता प्रेरिता स्वलक्षणा [illegible] लक्षणा [illegible] सरस्वती वाग्ऋगादिवेदरूपा तस्यास्यत आस्यचतुष्टयात्प्रादुरभूदाविरभूत् [illegible] वेदास्तथ [illegible] चतुष्टयादित्यादेश्च ऋषीणां ज्ञानप्रदानाम् [illegible] परमवागीश्वरीपतिर्भगवान् मे प्रसीदतां प्रसन्नो भवत्विति [illegible] किलेत्यनेन सर्वश्रुत्यादिसंवादं दर्शयति वार्तोर्वार्त्तयोः किलेति [illegible] यद्वा पुराणादिप्रबंधेऽभिहितेनाजस्य [illegible] परीक्षरस्य हृदि सतीं ज्ञानोपदेशलक्षणां स्थितिं वितन्वता येन व्यासेन प्रचोदिता संकल्पिता स्वलक्षणा स्वयोग्यसर्गादिदशलक्षणा सरस्वती भागवत-

श्रीमद्विजयध्वजकृत पदरत्नावली ।

बृंहितादूपावस्थाऽऽस्यतः प्रादुरभूत् स ममर्षीणामृषभोऽस्माकं प्रसीदतामित्यन्वयः । अत्र पितामहेऽस्माकमिति प्रयोगविवक्षायां तेषु ब्रह्मणा पुरेतिच छागे विष्णोर्हरेर्यज्ञस्य तोऽजस्य विष्णोः सतीं स्थितिं वितन्वतां हृदि लोकस्येति वेदवतिका ॥ २२ ॥

इदानीं देहेन्द्रियादिप्रवर्तकं हरिं प्रसादयति मूर्तीरिति यो विष्णुर्महदादिभिर्मूर्तीः पृथिव्यादिभिः पुरः शरीराणि निर्माय पूरुषपुंनामादिरूपैः शेते इति यत्तत एवायं पुरुषः पुरिशयनयोगेन पुरुषनामा । "तस्येदं मधिशिर" इतिश्रुतेः गोलकात्मकदेहव्याप्तत्वाद्प्राणोऽपि त्मकपञ्चाद्यैरिन्द्रियपञ्च भूतव्याप्तः षोडशगुणान् शब्दादिविषयसारान्भुंक्ते न तु आनिसभगवान्सर्वविषयगुणाभ्यां कर्मभ्यस्तत्कर्मफलं कुर्वीत मतिं स कानि कुर्यादित्यन्वयः ॥ २३ ॥

इदानीं भक्त्यातिशयेन देवकीनन्दनकटाक्षीकृत्य नमति नमइति सौम्याज्ञानस्तोमाद्याः प्रमादयो ज्ञानमयी ज्ञानात्मकं यस्मिन् हरेर्मुखाम्बुजाद्यास्य मामयं मधुपपुस्तस्मै वधसेकत्वं वासुदेवाय भगवते नमः सौम्या उद्धवादयो ज्ञानमयं यन्मुखाम्भोरुहासवं पुस्तस्मै वधसेकं वासुदेवं वासुदेवनाय शौरये नमस्तथा सौम्यानारदादयो ज्ञानमयं ज्ञानप्रतिपादकं भागवतपुराणनामकं मुखाम्भोरुहासवं पपुस्तस्मै वधसेकतुर्मुखाय नमः कीदृशाय वासुदेवाय नारायणपुत्रो यः शौरेः पुत्रः शौरिरितिवत् सौम्याः व्यासादयस्तस्मै वेधसे विधिपुत्रा वनारदाय वासुदेवाय वासुदेवभक्ताय सौम्याः वैशंपायनादयः तस्मै वासुदेवाय वासुदेवावताराय व्यासाय नमः वेधसे भारतादिशास्त्रकर्त्रे ॥ २४ ॥

इदानीं इत्थं तनाप्रमादं प्रार्थयित्वा सांप्रतं परीक्षित्प्रश्नं प्रतिवक्तुमुपक्रमते एतदेवेति हरिरात्मनः स्वकृतयत्पुराणमाह आत्मभूः परमात्मपुत्रो वेदगर्भो ब्रह्मा नरेन्द्रतत्समर्थमितित्वत्प्रश्नप्रकारेण पृच्छते नारदायाऽऽख्यद्वान्नित्यन्वयः अर्थोऽयत्यासांमार्हस्तत्त्रैवशब्दः एतदुक्तं भवति आदौ नारायणो नब्रह्मणे प्रोक्तं ब्रह्मणा नारदाय नारदेन व्यासाय व्यासेन मह्यं तदहं त्वत्प्रश्नपरिहारत्वेन वदयामीति ॥ २५ ॥

इति श्रीमद्भागवतमहापुराणे द्वितीयस्कंधे विजयध्वजकृतटीकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तादृशानुभवे कारणमुपन्यस्यन्नाह यदङ्घ्रीति । आत्मनः भगवतः तत्त्वं याथार्थ्यम् । अन्यदा तु कवयः परिहृतभ्रमा अपि यथाकथञ्च वदन्तीत्यर्थः । यद्वा तथाप्यनन्तमहिमत्वात् तेऽपि कवयो यथात्मप्रकाशमेव वदन्तीति ॥ २१ ॥

अथ तद्दर्शनसामग्री मम स एवेत्याह । प्रचोदितेति द्वयम् ॥ २२ ॥ २३ ॥

नम इति टीकायां श्रीव्यासं नमस्करोतीति । पर्युक्त्यादिस्वारस्यात् । उत्तरवाक्येन तु चतुःश्लोकीवक्तारमित्यायाति ॥ २४ ॥

आत्मन इति आत्मानं ब्रह्माणं प्रतीत्यर्थः ॥ २५ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

एवंप्रपन्नध्यानेनेति केवलं भगवत्प्रार्थनाव्यतिरेकेणापि अग्रपन्नध्यानमोक्षणावस्थातः पाद्यवस्थाने ऽपि इमाधि प्रक्षालनमात्रेण यःमलं प्रमाणैरपि रूपं तेन भवति तादृशमात्मतत्त्वं भगवत्स्वरूपयाथात्म्यं पश्यंति बुद्धिः स्वभावतो वस्तुप्रकाशिका मास्वावरणात् विषयावरणात् बुद्धपत्नाऽपि न विषयं प्रकाशयति इन्द्रियाणामावरणेनोत्पन्नमेव विषयमात्रं बुद्ध्युत्पत्तौ कारणत्वेन मृग्यते न तु यत्प्रकाशिका बुद्धिः तद्विशिष्टं रजतादिभ्रमानुपपत्तेः अतो विषयमात्रपुरस्कृत्य सामग्र्यंतरवशात् वस्तुनो याथात्म्यमयाथात्म्यं वा बोधयति तत्र शुद्धा वस्तुनो याथात्म्यं गृह्णाति अत्र भगवच्छास्त्रसर्वेषां पदार्थानां नित्यत्वात् कारणत्वेनापि तैरपि व्यक्तीक्रियते एकश्च पदार्थः न जातिव्यक्तिभेदकल्पना एक एव घटः अनेकधा भवति आविर्भावात् तिरोभावाच्च पदार्थानां सर्वेषां भगवत्त्वात् तथा शब्दानां नित्यत्वात् सर्वैरेवाभियुक्तैः कात्यायनादिभिर्ध्येयत्वत्वापितेतिनास्माभिरस्य निरूप्यते नित्यशब्दार्थसंबंधाति नित्ये शब्देऽर्थसंबंधइति च विचारणां आश्रयाभावेन जातिसंबंधयोः स्थितिकल्पनात्यंताप्रामाणिक इत्युक्तं स्पष्टाद्वेदयाथात्म्यज्ञाने शास्त्रतस्तत्र च गम्यते अतः एक एव घटो भगवत्त्वादनेकधा भवतीति स एकधा भवतीत्यादिश्रुतिबलात् अनुपपत्तौ निवृत्तायां बुद्धिबोधाद्न्यथाकल्पनं न प्रामाणिकं बहुकल्पनापत्तेश्च अत एकैक एव बुद्धिः बहुधा परिमृज्यमाना शोधकद्रव्याणां तारतम्येन मलनिराकरणं तारतम्येन बहुधा परिमृज्यमाना शोधकद्रव्यसंयोगसंघर्षेण निर्मला भवति दर्पणवत् तथा भगवच्चरणारविंदद्वयं बुद्धौ संगाज्यसंघर्षणेन यमाणो शुद्धिविशेषमाप्नोति अंजनादप्युनथा प्रसिद्धः यथांजनविशेषेणोलकमंयुक्तेन ततो निर्गताद्दृष्टिः देवानपि पश्यति तथात्रापीति न काऽप्यनुपपत्तिः अन्यथा तु वस्तुनां याथात्म्यं न बोधयति दोषावृतत्वात् यथायथा दोषनिवृत्तिः तथातथा वस्तुयाथात्म्यस्फूर्तिः अत एव अभ्यासस्य मोक्षकादीनामुपयोगः विषयेतु दोषो नास्त्येव सुतरां भगवद्विषये आत्मविषये च अपहतपाप्मत्वादिति श्रुतेः तु इति निश्चयेन अनुध्यानं नाम तत्परतया चिंतनं तथाचिंतने नापि तदात्मकता भवतीति समाधिः ननु योगसंबंधी किंच एतदात्मतत्त्वं कार्याकर्मयया बुद्धिर्निरूप्यते कश्चिदेवं च उत्प्रेक्षासामर्थ्येनाधिगत कश्चित्कथंचिदुत्प्रेक्षते वदति च तथा अतो भवाक्याल्लौकिकात् वस्तुयाथात्म्यस्फूर्तिः किंच भगवान्मुकुंदः मोक्षदाता वस्तुयाथात्म्यस्फूर्तिः मोक्षांगं तस्य तदैव संपद्येत यदा भगवान्मोक्षं दातुमिच्छति इच्छापुनः अग्रपनुध्यानेनैव भविष्यतीति तस्मात् यः कश्चिद्यत्किंचित्ज्ञातुमिच्छति तत्र भगवान्प्रार्थनीयः सकलतत्सिद्ध्यर्थं गुणा अपि ज्ञातायथका यथा: ज्ञानसाधनं चाग्रपनुध्यानं न केवलं तावन्मात्रमेव किंतु प्रार्थनासहितं भगवतः स्वतंत्रत्वात् आनुध्यानमात्रेण तथा कर्तुमिच्छति अत आह प्रसीदतामिति। यद्यपि भागवतनिर्मोहो विषयप्रकारार्थप्रकाशोऽनुत्पन्न तथाप्यस्य अर्थपुनर्भवेत् इदस्यापि रसोऽसिद्ध्यर्थं इदानीं सामान्यतः प्रसादं प्रार्थयित्वा प्रकृतोपयोगि प्रसादं प्रार्थयितुं अस्य प्रसादात् कस्य च प्राह ॥ २१ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

प्रचोदितायेनेति अवश्यमिन्द्रियव्यापारेफलेऽयंभगवान्प्रार्थनीयः तत्रापिवाग्विषये तत्रापिभगवदीयपदार्थवाचके यतोब्रह्मणाऽपिपूर्वं भगवद्ध्यानात्प्रार्थितोभगवान्तस्यब्रह्मणोहृदयंप्रविश्यस्वप्रकाशिका वेदरूपांवाणीमास्यतोनिष्कासितवान् अतोभगवद्गुणेषु वक्तव्येषु नित्यवाययेवतद्भवतीति प्रकृते भगवत्प्रार्थनाआवश्यकी ननु योगेन पदार्थान् स्मृत्वातद्वाचकपदाना- मुपनिबन्धनेसंभवति किंभगवद्ध्यानेनेत्यतआह यस्यब्रह्मणः हृदिसतीस्मृतिंवितन्वतेति वाक्यार्थवाक्ययोःनित्यत्वेऽपिपूर्वमनुभूतेऽपिस्मरणमावश्यकं स्मरणमात्रंचनप्रमाणमितिस्मृतपदार्थानुभवसहितामपेक्षिता योगवद्भगवद्ध्यानस्यापिप्रत्यासत्तित्वात् अतोऽन्तःकरणेप्रथमंस्मृतीभगवदनुभवसहितांस्मृतिंपूर्वानुभूतांभगवदीयानांपदार्थानांनिर्माणपश्चात्तेनैवहृदाभगवत्प्रेरितेनअतएवप्रादुर्भावात्पुनर्भगवत्प्रेरितावाणी आस्यतोनिर्गता नहिभगवद्वार्यास्वतोबहिर्निर्गन्तुंशक्नोति इयमपिवाक्तावत्क्रमयुक्तेत्याशंक्यविकलेत्याह स्वस्यलक्षणमेवलक्षणंयस्या नित्यत्व ब्रह्मशब्दव्याख्यानंतत्वादिरूपं अथवा स्वयमेवलक्षणंयस्याः वेदानामिदमेवासाधारणंचिह्नंयद्भगवानेववाच्यइति अतःपूर्वानुभूतस्मरणेतद्वाणीनिर्गमेऽपिसर्वेन्द्रियप्रेरकोभगवानप्रसीदतां एवंशब्दानांभगवदधीनत्वेनतत्प्रादुर्भावार्थंभगवत्प्रार्थनायुक्ताअर्थोऽपिभगवदधीनइतिअस्मन्मुखनिर्गतायांवाण्यपिभगवान्पतिरलंकरणरूपेणप्रविशतामितिप्रार्थयते ॥ २२ ॥

भूतैर्महद्भिरिति स्थितिर्भोगश्चसर्वत्रभगवत्कर्तृकोयतः अतोवाण्यपिस्थितःकृष्णःतांभुक्तामितिकामना यद्यपिविराट्पुरुषएवतथाप्रक्रिया सर्वत्रप्रसिद्धा तथापिपुरुषत्वाविशेषात्स्वस्यभगवत्त्वंभगवतैवसाधितमितिज्ञापनार्थंभगवतएवदेहशरीरमितिअभिमानाभावार्थंवाव्यष्टिष्वपिसमष्टित्वप्रक्रियामाह भूतैर्महद्भिःपंचमहाभूतैःस्थानिमितैरेवइमाःदेवतिर्यङ्मनुष्यादिरूपा अमूःपुरःपुरुष्वयमेवशेते अन्यथास्वस्यपुरुषत्वमेवनस्यात् पुरिशेतइतिव्युत्पत्त्याहियः इदंहिशयनंनानिद्रारूपं किंतुसंभोगार्थमिव अतएवदक्षिणेऽक्षिणीन्द्रः इतरेन्द्राणीत्युपाख्यानमेतत्परमेवभवति अत्र चक्षुस्थानेकेवलंस्पर्शमात्रमुपभुंक्तेकिंतुषोडशापिगुणान् भोगेऽपिषोडशात्मकोभूत्वाभुंक्तेजडंशुष्कंरमाभावात् भगवान्हिव्यापक आनंदमयश्च तत्रस्वरूपंगौणंस्वरूपानुभवेतथारसोनभवति स्त्रीपुरुषावयवेषुतथोपलंभात् अतःस्वस्थितरसाविर्भावेनस्वप्रभोगार्थंभेदरूपमात्मानंविभाव्यतस्मिन्स्वस्मिन्प्रविष्टेऽतद्धर्माभिन्नःसन्अन्योऽन्यस्यरसमनुभवति देहधारणप्रयत्नेनभोगेव्यासंगोभविष्यतीतियुक्त्यानथाभुंक्ते यद्यपि विषयाःपंच तथापिस्वत्वएवस्थानविशेषेसुखविशेषजननात्इन्द्रियपुरःसरत्वेनविषयःसंभवतयानिर्दिष्टइतिषोडशत्वं यत्रेन्द्रियाणांगौणत्वं तत्रविषयप्राधान्यं भोगेकाचिदिन्द्रियाणामप्राधान्येकाचिदिन्द्रियाणामेवप्राधान्यं महाराजशरीरवत् अतउभयविवक्षयाषोडशेतिवचनं एवंभगवन्माहात्म्यंसर्वत्रपूर्णमेवज्ञातंभवति अलंकृषीष्टमेववाणीमिअलंकरोतु छांदसोदीर्घः नन्वेवंनानात्वमापन्नःकथमलंकारार्थंप्रार्थ्यते तत्राह भगवानिति बहुवचनंसमार्थाभिप्रायमेहत्यन्यत्रसप्तार्थाभावोद्योतितः भागवतप्रवसप्तार्थायतः एवंप्रार्थनामुक्त्वास्वगुरुंव्यासंभगवंतंनमस्यति नमस्तस्मैभगवतइति वासुदेवइतिसर्वमोक्षदानार्थमेवभगवतोव्यासस्यावतारः शब्दरूपांसृष्टिंकरोतीतिवेधसइतिमोक्षोपायकथनं व्यासनमस्कारत्वंबोधयति पपुरिति ज्ञानमयंसर्ववस्तुयाथात्म्यज्ञानप्रकाशकंभारतादि सोम्यादिइतिशांत्याज्ञाननिष्ठयोग्यतासूचिता यस्यमुखमेवअम्बुजंकमलंतत्रत्योमकरंदएवप्रपंचविस्मारकत्वात्आसवशब्देनोच्यते मोक्षस्यफलत्वात्तत्कृष्णभगवत्त्वात्मुखासवपदाभ्यांपानेच्छाप्रतिबंधेऽपितान्सूचितं कामिनीमुखामोदेतथोपलंभात् तस्मात्सर्वेषांगुरुत्वाद्भगवत्वाद्सभायामपिव्यासनमनंयुक्तं एवंदेवतागुरुनमस्कारंकृत्वामहताप्रबन्धेनतन्निरूपयितुंपूर्वप्रश्नेउत्तरमाह ॥ २४ ॥

एतदेवेति यद्भवान्पृष्टवान् एतदेवनारदेनपृष्टः आत्मभूर्ब्रह्मा प्रमेयबलपुष्टः वेदगर्भेयस्मैतिप्रमाणबलपुष्टोऽपि प्रमेयस्यप्रमाणत्वेन विशिष्टबलपुष्टोऽपि यदाहहारिरात्मनइतिवाक्यात् तादृशमुखेनवतद्वाक्यैःसंदेहनिवृत्तिर्भविष्यतीतिपूर्ववत्पुनःसंदेह प्रश्नाभावायस्वतोऽनिरूपणं पूर्वमेवकरणानांदोषताऽस्यानिरूपितत्वात्तत्रपुनरुक्तिः साक्षादितिउभयत्रविशेषणं आत्मनब्रह्मार्थे परंपरा कथनेतुमध्यवर्तिदोषःप्रसज्जेतअतएवस्वतः कथनमपिनिवारितं दोषाभावोऽपिप्रार्थनयाज्ञानेनचसूचितः अनेनउत्पत्त्यापपत्त्याचविचारद्वयंसकृद्व्यक्तत्वेनप्रतिभातमिति सूचितम् ॥ २५ ॥

इति श्रीमद्भागवत सुबोधिन्यां द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

स श्रीकृष्ण एव मे ज्ञान प्रदो भवत्विति प्रार्थनां व्यञ्जयति । यदङ्घ्र्योरभिध्यानमेव समाधिर्नतु ततोऽन्यस्तेन धौतिमतया । चकारस्त्वर्थे । कवयस्तु स्वपाण्डित्यबलेनैव यथारुचंस्वस्वरुच्यनुसारेण एतत् परमात्मनस्तत्त्वं स्वरूपं साकारं निराकारं वा जीवात्मस्वरूपम् अणुप्रमाणं सर्वगतं वा, यद्वा एतत् विश्वं मिथ्यैव सत्यमेव नित्यमनित्यमेवं वदन्ति युक्त्या प्रतिपादयन्ति न तु तेषां धीर्धौता अत आत्मनस्तत्त्वं न पश्यन्ति ॥ २१ ॥

यथा ब्रह्मणो मुखाद्वेदं प्रवर्त्तयामास तथा मन्मुखात् स्वलीलाकथां स एव प्रवर्त्तयत्वित्याशास्ते । येन प्रचोदिता प्रेरिता सरस्वती वेदरूपा अजस्य ब्रह्मणः आस्यतः प्रादुरभूत् । येन कीदृशेन पुरा कल्पादौ अजस्य तस्य हृदि सतीं स्मृतिं वितन्वता प्रकाशयता । सरस्वती कथम्भूता स्वं श्रीकृष्णं लक्षयति उपास्यत्वेन दर्शयतीति सा । यदुक्तं भगवतैव—"मयाऽऽदौ ब्रह्मणे प्रोक्ता धर्म्मो यस्यां मदात्मक" इति ॥ २२ ॥

इदानीं मद्वचःसु स्वसृष्टेष्वेव स्वस्थित्यैव श्रोतृजनाह्लादिनीं शृङ्गारकरुणादिरसध्वनिं गुणालङ्कारशोभां करोत्वित्याशास्ते भूतैरिति । स मे वचांसि अलङ्कृषीष्ट तेषु स्वयं निवसन्नलङ्करोतु । यथा मनुष्यादिशरीराणि सृष्ट्वा तेषु स्वयं वसन्नेव तानि सफलीकरोतीत्याह । यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु पूर्षु अन्तर्यामितया शेते वसति । अत्र पुरुषसमाख्यां प्रमाणयति यत यस्मात् पूरुष इति । अतएव एकादशेन्द्रियपञ्चभूतरूपान् गुणान् भुङ्क्ते निर्लेप एव इष्टैवास्वादयति । अत्र अंशेषु मद्वचस्वपि गुणानास्वादयन् प्रसीदत्विति भावः । षोडशानामात्मा चेतयिता स्वार्थे कः । तेन शरीराणि निरात्मकानि वस्त्रालङ्कारादियुक्तान्यपि सद्भिरस्पृश्यानि यथा तथा मद्वचांसि तद्विनाभूतानि मा भवन्त्विति भावः ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

गुरुं श्रीव्यासं नमस्करोति । वासुदेवाय तदवताराय । वेधसे शास्त्रकर्त्रे । यन्मुखवाङ्मकरन्दम् । यद्वा वासुदेवाय कृष्णाय । सौम्याः कृष्णकान्ताः । ज्ञानमयमिति नृत्यगीतवाद्यकलावैदग्ध्यरसालङ्कारादिज्ञानं सर्वतो विलक्षणमशिक्षितमपि यं पीत्वैव प्रापुर्वयमपि तदनुगास्तत्तदाप्नुयामेति भाव इति रहस्यम् ॥ २४ ॥

इदानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं प्रस्तौति एतदिति । उत्पत्तिसमये एव वेदा गर्भे यस्य । साक्षात् हरिर्यदाह । आत्मनः आत्मानं प्रति ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वितीयेऽत्र चतुर्थोऽयं सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

यस्यांघ्र्यनुध्यानमेवसमाधिस्तेननिर्मलयाधियाआत्मनःभगवतस्तत्त्वंयाथात्म्यंकवयः क्रांतदर्शिनः स्वयंपश्यंतिएतदेवस्वदृष्टमात्मनस्तत्त्वंशिष्येभ्यः यथारुचरुक्प्रतिभातामनतिक्रम्यवदंति समुकुंदः ममह्यंप्रसीदताम् ॥ २१ ॥

पुराकल्पादौयेनअजस्यविरंचेः हृदिसतीपूर्ववत्सृष्टिविषयांस्मृतिंवितन्वताविस्तारयताप्रचोदितासरस्वतीवेदरूपावाणीस्वलक्षणास्वानिशिक्षादीनिलक्षणानियस्याः साआस्यतोमुखतः प्रादुरभूत्सऋषीणांमंत्रद्रष्टॄणामृषभःश्रेष्ठःप्रसीदताम् ॥ २२ ॥

अथस्वभावतएवभगवद्गुणस्वरूपादिप्रतिपादनरूपपरमगुणयुक्तानांस्ववाचांशृंगारकरणादिसौंदर्यंप्रार्थयते भूतैरिति सविभुःसर्वत्रसर्वंकर्तुंसमर्थः मेवचांसि अलंकृषीष्ट अलंकरोतु विभुत्वंप्रतिपादयति महद्भिर्भूतैः महदादिविशेषांतैः इमाःपुरःशरीराणिनिर्मायसृष्ट्वा अमूष्वासुपुरीषु अंतर्यामितयाशेतेवसति अतएवपुरिशयनात्पुरुषइति नचकेवलंशेतेकिंतुस्वानन्यभक्तार्पितान् एकादशेंद्रियपंचभूतरूपान्गुणान्भुंक्तेअनुभवति यतः षोडशानामात्माअंतरात्मास्वार्थकः अनेनभगवतः कर्मायत्तभोक्तृत्वंनास्तीतिसूचितम् ॥ २३ ॥

मुखाम्बुरुहयआसवोमकरंदस्तंसौम्याःस्निग्धाः शिष्याःपपुः ॥ २४ ॥

हेराजन्त्वयायत्पृष्टमेतदेवविपृच्छतेनारदायवेदगर्भेयस्यसः आत्मभूर्ब्रह्माअभ्यधात् ननुतेनकुतोज्ञातमित्यतआह साक्षाद्यदाह हरिरात्मनइति ब्रह्मणेयद्धरिरभ्यधाद्ब्रह्मानारदायतदहंतेऽभिधास्यामीतिभावः ॥ २५ ॥

इति श्रीमद्भागवतसिद्धांतप्रदीपेद्वितीयस्कंधये चतुर्थोध्यायार्थप्रकाशः ॥ ४ ॥

भाषा टीका ।

जिनके चरण कमलके ध्यानकी समाधि से धौत बुद्धिकेद्वारा भक्तजन आत्मतत्वका देखते हैं और कविजन इस तत्व का यथार्थ दर्शन करते हैं वह मुकुंद भगवान मुझपर प्रसन्न होय ॥ २१ ॥

सृष्टि के पूर्व ब्रह्माजी को सतीस्मृति विस्तार करते हुए जिन भगवान ने हृदय मे प्रेरणाकी हुई सरस्वती स्वलक्षणा ब्रह्माजी के मुखसे प्रादुर्भाव हुईथी वह ऋषियों के ऋषभ भगवान प्रसन्नहों ॥ २२ ॥

जो भगवान महा भूतोंसे इन शरीरों को निर्माण कर विभू होकरभी पुरुष रूपसे इन पुरोंमें (शरीरोंमे) शयन करते हैं, और षोडशात्मक षोडश गुणोंका भोग करते हैं वह भगवान मेरी वाणी को अलंकृत करें ॥ २३ ॥

उन ज्ञान मय व्यास स्वरूप भगवान वासुदेव को नमस्कार है कि जिनके मुख कमलसे निःसृत ज्ञानमय आसव को सौम्य ऋषियों ने पान किया है ॥ २४ ॥

हे राजन् पूछते नारदजी से आत्म भू वेद गर्भ ब्रह्माजी ने भी यही कहाथा जो साक्षात् आत्मा हरिने उनसे कहा है ॥ २५ ॥

द्वितीयस्कंधे चतुर्थोऽध्यायः ॥

पञ्चमोऽध्यायः ।

नारद उवाच । देवदेव नमस्तेऽस्तु भूतभावन पूर्व्वज ।
तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम् ॥ १ ॥
यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ।
यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः ॥ २ ॥
सर्व्वं ह्येतद्भवान् वेद भूतभव्यभवत्प्रभुः ।
करामलकवद्विश्वं विज्ञानावसितं तव ॥ ३ ॥
यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः ।
एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थ दीपिका ।

पञ्चमे नारदेनाथ पृष्टः सृष्ट्यादि वक्तृजः ।
हरेर्लीलां विराट्सृष्टिं कालकर्म्मादिशक्तिभिः ॥ ० ॥

नारदाय विपृच्छते वेदगर्भोऽभ्यधादित्युक्तम् । तत्र नारदप्रश्नमाह देवदेवेति । हे भूतभावन । अतएव सर्व्वेषां पूर्व्वज अनादे । ज्ञायते अनेनेति ज्ञानं तत्साधनं यत् तत् विजानीहि विशेषेण ज्ञापयेत्यर्थः । कथम्भूतम् आत्मतत्त्वं नितरां दृश्यते येन तत् ॥ १ ॥

उपलक्षणभूतं विश्वमेवात्मज्ञानसाधनम् अतस्तद्विशेषं पृच्छति । यद्रूपं येन रूप्यते प्रकाश्यते । यदधिष्ठानं यदाश्रयम् । यतः येन सृष्टम् । यत् संस्थं यस्मिन् लीयते यत्परं यदधीनम् । यच्चेति यदात्मकम् । स्वतः सत्कारणतो वेत्यर्थः । तस्य तत्त्वं याथार्थ्यं तत्त्वतो वद ॥ २ ॥

न जानामीति न च वक्तव्यमित्याह सर्व्वमिति । भूतं जातम् । भव्यं जनिष्यमाणम् । भवत् जायमानम् । तेषां प्रभुर्यतः । अतो विशेषेण ज्ञानेनावसितं निश्चितम् ॥ ३ ॥

आस्तामिदम् आदौ तावत् त्वामेव कथय इत्याह । यतो विज्ञानं यस्य कस्तव विज्ञानद इत्यर्थः । यदाधारः कस्तवाश्रयः । यत्परो यदधीनः । यदात्मकः यत्स्वरूपः । मम तु त्वमेव स्वतन्त्रः परमेश्वर इति बुद्धिः । तव तपश्चरणेन तु पराशङ्कया पृच्छामीत्याह सार्द्धैश्चतुर्भिः । एकः असहायः ॥ ४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

० ॥ १—११ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

नारदायविपृच्छतेवेदगर्भोऽभ्यधादित्युक्तंतत्रनारदप्रश्नमाह देवदेवेति हे देवदेवहेभूतभावनभूतस्रष्टः अतएव हे पूर्वजआत्मतत्वस्य-निदर्शनमितरांप्रकाशकंयद्ज्ञानंतद्विजानीहि अंतर्भावितणिजर्थः विशेषेणज्ञापयेत्यर्थः ॥ १ ॥

इदं कार्यं जगद्रूपं यस्यरूपंयदात्मकमित्यर्थः अथनिमित्तप्रश्नः यतःसृष्टंयतउपादानभूतात्सृष्टंयदुपादानकमिति यावत् यदधिष्ठानं यत्संस्थंयत्परमितिचबहुव्रीहिःयःआधारोयस्यतदधिष्ठानंयदाधारकमित्याधारप्रश्नः यस्मिन्संस्थालयोयस्यतत्यत्संस्थंमयंलयाधारप्रश्नः यत्परंयस्मात्परोविलक्षणःतद्यत्परंयदधीनमित्यर्थः यच्चयदप्यन्यद्यदुपकरणत्वादिकमस्तितत्तत्त्वंयाथात्म्यंतत्त्वतोवदेत्यर्थः ॥ २ ॥

नजानामीतिनवक्तव्यंइत्याह सर्वमिति यत्पृष्टंतदेतत्सर्वंभवानेवजानाति कुतइत्यतआह भूतभव्यभवत्प्रभुः भूतभविष्यद्वर्तमानकालीनकृत्स्नवस्तुजातस्यप्रभुरुत्पादकः किंचतवत्वयाविश्वंजगत्विज्ञानेनभगवत्प्रसादलब्धज्ञानेनावसितंनिश्चितंकरस्थामलकवत् एवंजगद्विषयःप्रश्नःकृतः ॥ ३ ॥

आस्तांतावदिदंत्वामेवत्वंकथयेत्याह यद्विज्ञानइति यस्मिन्विषयेतवविज्ञानमस्तीतिसप्तमीबहुव्रीहिः यतोविज्ञानंयस्ययद्विज्ञानस्तवविज्ञानःकइतिवा यदाधारःयआधारोयस्यसःकस्तवाश्रयः यत्परःयःपरोयस्यसःकस्तवस्वामी यदात्मकः यआत्मायस्यसः कस्त्वदात्मेत्यर्थः । ममंतुत्वमेवस्वतंत्रः परमेश्वरइतिभासितपश्चरणेनतुपरशंकयापृच्छामीत्याह सार्द्धैश्चतुर्भिः एकअसहायः आत्ममायया आत्मनः संकल्पेनभूतैःपृथिव्यादिभूतैर्भूतानिदेवादीनिभूतानिसृजसित्वामितिशेषः ॥ ४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

अस्मिन्नध्यायेवसर्गभेनारदाख्यायिकाकथनव्याजेनपंचमाध्यायेप्रतिज्ञातजगज्जन्मादिविकारशास्त्रलक्षणांतदेकनिष्ठमितिसप्रपंचंप्रतिपाद्यते तत्रादौनारदप्रश्नप्रकारमाह देवदेवेति यद्ज्ञानमात्मनःपरमात्मनस्तत्त्वंमित्थंशयतीत्यात्मतत्त्वनिदर्शनंतज्ज्ञानंमह्यंविधिनाविहितविज्ञापय आत्मब्रह्मणोस्तत्त्वज्ञानेमहान्विशेषोऽस्तीतिभेदस्यपरमेश्वरप्रसादमंतरेणाशागार्हिद्रियप्रवृत्तिरपिविपरीताभवतीतिततःस्वातंत्र्यस्यब्रह्माकर्ताऽहंकरणामिनिकरस्यविवक्षयाव्यत्ययस्योक्तं आद्यप्रश्नभेदोहरेःस्वातंत्र्यंनारदस्यकरणत्वमितित्रयंव्यत्ययार्थः तदुक्तंव्यत्ययोभेदस्वातंत्र्यकरणोऽध्याति॥ १ ॥

अयंपृच्छति यद्रूपमिति इदंविश्वंयस्यरूपमिवरूपंनतुसाक्षाद्रूपंचित्स्वेनसत्त्वेनसादृश्यात्तत्रूपमित्याह तदुक्तं तद्वशत्वादिदंरूपंहरेर्नैवस्वरूपतइति योऽधिष्ठानंमूलाधारोयस्यतद्यदधिष्ठानंनत्वारोपमात्रासर्पस्यरज्जुवदधिष्ठानं अधिष्ठानमितिप्रोक्तमूलाधारंविचक्षणाइति इदंयतःसृष्टंसंभूतं"यतोवाइमानिभूतानिजायंते"इतिश्रुतेः पीठवद्यस्मिन्संस्थासंस्थानंयस्यतद्यत्संस्थं ।यत्स्थितंइदयंतंवस्तुसंस्थानंतद्रूढमितमितिचपूर्वपृथिवीवत् अत्रतुपाठवदितिविशेषात्पुनरुक्तिःयःपरोयस्माज्जगतस्तद्यत्परं । हरिःपरोऽस्यजगतोह्यव्यक्तादेश्चकृत्स्नशइति यस्मात्संस्थामृत्युःसंहारोयस्यतद्यत्संस्थं यत्परंपालनंयस्यतद्यत्परं येनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीतिवा यश्चयदधीनंच यदधीनायस्यसत्तातत्त्वदित्येवभगवत्तइति विभेदविद्यमानेऽपिमिथोनित्यस्वरूपतइतिच तस्यहरेस्तत्त्वतत्त्वतोयथावद्वदेत्यन्वयः ॥ २ ॥

ममवक्तव्यांशभवतांज्ञानसामग्रीविद्यतइत्याह सर्वमिति हिशब्देन प्रजापतेस्त्वदेतान्यन्यइत्यादिश्रुतिप्रसिद्धिंद्योतयति सर्वमेतदिति प्रतिज्ञा भूतादिप्रभुरितिहेतुः हस्तेत्यामिदर्शनं करतलामलकवदितिनिदर्शनमविज्ञानेतिनिगमनम् ॥ ३ ॥

नैतत्सामान्यज्ञानंकितुविशिष्टमवहरिप्रसादाद्यस्त्वादितिभावेनाह यद्विज्ञानइति यस्यप्रसादाद्विज्ञानंयस्यतत्त्वस्मत्त्वंयद्विज्ञानः यआधारायस्यसतथा यःपरोयस्मात्सतथा यआत्मास्वामीयस्यसयदात्मकः त्वंतवैदतिशेषः उक्तादधिकंज्ञातुंपूर्वपक्षंदर्शयति एकःसृजसीत्यादिना एकस्त्वमेवात्ममाययास्वेच्छयाभूतानिचराचराणिपृथिव्यादिपंचभूतैःसृजसि ॥ ४ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

० ॥ १—३ ॥

यद्विज्ञान इत्यादौ तं वदंति शेषः । मम तु तत्तद्रूपत्वेन त्वं भासीत्याह एक इति । (अत्रास्ताम् इत्यादिटीकायां त्वामेव इत्यत्र आत्मानमेव कथयंति तु वाच्यम् ।) ॥ ४ ॥

———

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

विमर्शःपड्भिरध्यायैःक्रियतेसत्रिधामतः उत्पत्त्याचोपपत्त्याचतत्राद्योऽपिद्विधामतः स्थानांतर्यामिभेदेनमूर्त्तामूर्त्तविभेदतः स्थूलोऽपिद्विधिभक्तत्रस्थूलमूर्तविमर्शगो उत्पत्तौपंचमाध्यायः सोपपत्त्यानिरूपकः पूर्वपःक्रमतः शक्तिश्चयोगतत्त्वभावादिकृत इत्युक्तानारदाजाभ्यांजन्माभिर्नेतिगयते एकीभूतेप्रवेशेनानिर्गमादपिविह्वलः अथवादात्मैवता देवेनारदःपृच्छतिस्पष्टं प्रश्नत्रयंमारंदर्नाक्रियंतेतत्त्वानिर्णये आत्मनोन्यत्राप्यनिर्द्धारेभजनस्यच द्वयोनिर्द्धारेसोपत्त्येनतप्रत्युत्तरंततसाहितोऽस्य रूपमित्यर्थःस्थानादिराजोऽतसुत्वाद्विपरीतेनवर्णयेनस्थूललिंगविभेदोवातेनाध्यायद्वयंमतं प्रथमस्योत्तरंपश्चात्तदंतर्यामिभेदतः एवंपूर्वाध्यायेपरीक्षित्शुकयोःफलसुखसाधनंनिरूप्यपूर्वोक्तस्यसाधनस्यचाविचारार्थमध्यायपट्कारंभः तत्रपंचाध्यायेसाधनस्यस्थूलरूपस्यचउत्पत्त्यानिर्णयउच्यते तत्रप्रथमतत्त्वस्यदुर्ज्ञेयत्वात्तदनुवक्तारंविशिनष्टि देवदेवेति अयंनमस्कारःप्रश्नार्थः नारदाज्ञामार्थप्रवृत्तःप्रश्नेननमस्कारंनकृतवानित्याशंक्याह देवानादेवअनेनदेवतागुरूपोभवानेवममेतिनपृथक्नमस्कारःकर्त्तव्यइतिसूचितं अस्त्वितिप्रार्थनाप्रमेयसमाप्तिपर्यंतमंगलानुवृत्त्यर्थं आत्मानमुपदेक्ष्यतीतिनिश्चयेनातिस्वप्रवृत्तौहेतुज्ञापकविशेषणमाह भूतभावनेति भूतानिभावयत्युत्पादयतिशोधयतिवा स्वयंवेदानुद्दिश्यदिव्यानिरूपाणिदृश्यतस्वकीयानुजीवान्मुखानुकृत्यापश्चादभिव्यक्ताशयतीतिशोभकत्वं पूर्वजोतिहेतोपितः स्वदेहेपूर्वजप्रपूर्णत्वे अथवासर्वापेक्षयाभवानिवपूर्वमुत्पन्नःअतःकोऽप्यप्रमहामहास्तीतित्वमेवप्रष्टव्यइत्यर्थः एवंतत्त्वप्रश्नमाह तद्विजानीहीति तद्विशेषाकारेणाभिजानीहि उपायत्वाज्ञानंकिमिति सर्वोहिददंभिज्ञानंज्ञानमितिनतुकिंज्ञानंआत्मावा आत्मसाक्षात्कारोवा भगवत्साक्षात्कारोवा श्रुतिसहितोवा प्रवेशहेतुर्वा भक्तिजनकोवा परोक्षवा स्मृतिरूपंवेति तत्रनिर्द्धारेत्वयावक्तव्यमित्यर्थः किंच यत्रात्मतत्त्वस्याविमर्शोनविचारोभवति अतेनज्ञानेअंगद्वयमपिपृष्टं कआत्मा किंतत्त्वमितितत्रापिलोकेप्रसिद्धंतत्रभवति किंतुविचारसाध्यमिति विचारोऽपिकर्त्तव्यइतिसूचितम् ॥ १ ॥

एवंचत्वारःप्रश्नाःसंपन्नाः किंच तत्त्वभेदानुपृच्छामीत्याह यद्रूपमिति तस्यमनारोपितरूपंतत्सर्वस्यापिजगतोजन्यत्वात आत्मनोऽपिप्राद्भूतत्वात्सर्वस्यैवारोपविषयत्वात् अतस्तस्यरूपंवक्तव्यं यद्रूपंस्वरूपंयस्य आरोपितत्वानारोपितत्वंहिसाधिष्ठानेभवतः अतःस्वदधिष्ठानमपिवदेत्याह यदधिष्ठानमिति लोकेपिजगतस्तत्त्वव्यवहारात तत्त्वानांचतत्त्वव्यवहारातमूलतत्त्वाभावेतदघटतइति जगतःकारणमपितत्त्वंवदेत्याह यतःसृष्टमिदमिति वादिविप्रतिपत्तश्चकुतोजगज्जातमिति किंच यत्संस्थं यस्मिन्संस्थास्थितिर्यस्य संस्थामृत्युर्वानिमर्शेशपत्वेनजगतोवाप्रश्नः तदातत्त्वप्रश्नद्वयं सृष्टिप्रश्नचतुष्टयं उत्पत्तिस्थितिप्रलयाःस्वरूपंचेतितद्विषयाः तस्यभावस्तत्त्वमिति भगवतांभावोजगदेव आत्मातुतत् अथवासामान्यतस्तत्त्वविचार्यते तेनैवमनेकधाफलिष्यति यत्परमिति यःपरोनियंतायस्य अनेनांतर्यामिरूक्ता एकपक्षेतत्त्वस्यपरिभूतमिति कोवातत्त्वस्यग्राहकइत्यर्थः रूपंहिद्विविधंप्रमाणतःस्वरूपतश्च तत्रयद्रूपमितिप्रमाणतःयत्नेतिस्वरूपतः तत्त्वस्यजगद्रूपत्वेभिन्नत्वेवापदंगानिपृष्टानि एतेषांभेदानांज्ञानंयथातत्त्वतोज्ञानंभवति तथावदेत्यर्थः ॥ २ ॥

यथात्वंजानासितथाज्ञानमस्माकंकुर्वित्यभिप्रायेणतस्यसर्वज्ञतामाह सर्वंह्येतद्भवान्वेदेति अतीतानागतयोर्ज्ञानंनभविष्यतीतितस्यकालसाध्यत्वात्कालरूपस्ताभ्यंतावाभवानेवेत्याह यथारहट्घटितायांकेचनउद्गताःमज्जंतिउद्गच्छंतिच तथाकालेजगन्निमज्जति ततउद्गच्छति ततोयःकालेबहिरीतप्रतिसर्गाहस्सर्वंजानाति यथाजलेबहिरपिस्थितः किंच योगजधर्मेणापितत्सर्वंप्रत्यक्षमित्याह करामलकवदिति विज्ञानावसितंविज्ञानेस्थैर्यान्निश्चितमितिवा अधिगतमितिपाठेउत्तरकार्यार्थंसर्वमप्यज्ञानेनिवेशितं करस्थितमामलकफलंप्रतिनकोऽपिसंदिग्धे ॥ ३ ॥

[illegible] ... मृजसि [illegible] ... आहात्म्यबोधको [illegible] ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

पञ्चमे नारदं प्राह तस्वानां सृष्टिमात्मभूः ।
तैर्विराजश्च तत्पादाद्यैर्भूरादिकल्पनाम् ॥ ० ॥

भूतानि भावयन्ति सृजन्तीति भूतभावना मरीच्यादयः पूर्वजा अस्मद्भ्रातरो यस्मात् हे तथाभूत । आत्मनां परमात्मजीवात्मनो [illegible]र्शनं तत्त्वज्ञापकं यत् ज्ञानं तत् विजानीहि विशेषेण जानासि लडर्थे लोट् विज्ञापयसि वा ॥ १ ॥

इदं विश्वं यद्रूपं यदस्य लक्षणं, यदधिष्ठानं योऽस्याश्रयः, यतः येन सृष्टं, यत्संस्थं यस्मिन् लीयते, यत्परं यस्याधीनं, यच्च यदात्मकं [illegible] तत्तु याथार्थ्येन तत्त्वतो वद ॥ २ ॥

सर्वं परमात्मजीवात्मजगदिति त्रिकम् । भूतं पूर्वजातं प्राणिवृन्दम् । भव्यं जनिष्यमाणम् । भवत् जायमानम् । तेषां प्रभुर्यतः [illegible] विज्ञानेन ज्ञानेनावसितमवगतं करस्थम् आमलकफलमिव ॥ ३ ॥

आस्तामिदम् आदौ तावत् त्वामेव त्वं ब्रूहीत्याह । यद्विज्ञानः यतो विज्ञानं यस्य सः यस्तव विज्ञानप्रदः । यदाधारो यस्तवाश्रयः [illegible]परः यस्य त्वमधीनः । यदात्मकः यस्तवात्मा । मम तु त्वमेव स्वतन्त्रः परमेश्वर इति बुद्धिः । तव तपश्चरणेन पराधीनतया पृच्छामि [illegible] सार्वैर्धातुभिः । एकः असहायः ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

[illegible] श्रीब्रह्मोपदेशं वक्तुं तावत् श्रीनारदप्रश्नानाह देवदेवेति आत्मनस्तत्त्वस्य निदर्शनम् प्रकाशकम् यद्ज्ञानं तद्विजानीहि विशेषतो [illegible] ॥ १ ॥

इदंविश्वंयद्रूपं येनरूप्यतेप्रकाश्यते यत्प्रकाश्यम् यदधिष्ठानम् यदाधारकम् यत्सृष्टं येननिर्मितम् यस्मिन्संस्थालयो यस्यतयत्संस्थम् ॥ [illegible]धीनम् यच्चयदात्मकम् तत्सर्वंतस्यतत्त्वमुक्तषट्प्रश्नप्रत्युत्तरद्वारायाथात्म्यम् तत्त्वतोवदेतिषट्प्रश्नाः ॥ २ ॥

[illegible]सर्वमहत्याह एतदस्मत्पूर्वंसर्वंभवान्वेदयतोभूतभविष्यवर्तमानानांप्रभुस्तन्निर्णयेक्षमः तत्रहेतुः करस्थामलकवद्विश्वंतवाभिवि[illegible]ज्ञानेनावसितंनिश्चितम् ॥ ३ ॥

किंच यतोविज्ञानंयस्यसयद्विज्ञानः कुतोविज्ञानवानसीत्यर्थः यआश्रयोयस्यसयदाश्रयः कस्तवाश्रयआधारइत्यर्थः यत्परःयदधीनः [illegible]त्मकः यआत्मायस्यसयदात्मकः कस्तवात्मेत्यर्थः इतिचत्वारःप्रश्नाः अहंतुत्वामेवपरमेश्वरंजानामि यतएकः असहायस्त्वमात्ममायया [illegible]भूतैः पंचभूतैर्भूतानिदेवमनुष्यादीनिसृजसि ॥ ४ ॥

भाषा टीका ।

नारद उवाच—हे देवदेव ! तुमको नमस्कार है । हे भूत भावन ! हे पूर्वज ! जो आत्मतत्त्व का निदर्शन ज्ञान है वह [illegible] ॥ १ ॥

यह जगत् निरूपित होता है जो इसका अधिष्ठान है जिसने इसे सृजा है । जिसमें लय होता है जिसके आधीन है [illegible] [illegible] है अर्थात् यदात्मक है उसका तत्त्व यथार्थ रूप से कहिये ॥ २ ॥

[illegible] भूत भव्य भवत् के प्रभु हैं अतः यह सब (जो मैंने पूछा है) जानते हैं । आपने विज्ञान से इस विश्व को करामलकवत् [illegible] कर रखा है ॥ ३ ॥

आपको जिससे विज्ञान है जो आप का आधार है आप जिसके आधीन है और यदात्मक है आप अकेले ही अपनी माया से भूतों [illegible] से] भूतों को [मनुष्य पशु पक्षियों को] सृजते हो ॥ ४ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

[illegible] भावयसि पालयसि स्वयमेव पराभवमप्राप्तवान् । अक्लमः श्रमरहितः । [illegible] एव [illegible] सृजति [illegible] ॥ ५ ॥

[illegible] अस्मिन् विश्वस्मिन् परम् उत्तमम् अपरम् अधमं सर्वं मध्यमञ्च तत्रापि नाम मनुष्यादि रूपं द्विपदत्वादि गुणः [illegible] तथापि सदसत् स्थूलं सूक्ष्मञ्च किञ्चिदपि अन्यतो न वेद । किन्तु त्वत्त एव सर्वं भवतीति मन्ये ॥ ६ ॥

[illegible] तपोऽचरितिति [illegible] तेन योऽस्मान् [illegible] मोहयसि । यतः पराधीनः [illegible] ॥ ७ ॥

[illegible] विजानीहि विशेषेण ज्ञापय ॥ ८ ॥

आत्मन् भावयसे तानि न पराभावयन् स्वयम् ।
आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥ ५ ॥
नाहं वेद परं ह्यस्मिन्नापरं न समं विभो ।
नामरूपगुणैर्भाव्यं सदसत् किञ्चिदन्यतः ॥ ६ ॥
स भवानचरद्घोरं यत्तपः सुसमाहितः ।
तेन खेदयसे नस्त्वं पराशङ्कां प्रयच्छसि ॥ ७ ॥
एतन्मे पृच्छतः सर्व्वं सर्व्वज्ञ सकलेश्वर ।
विजानीहि यथैवेदमहं बुध्येऽनुशासितः ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

तानिसृष्टानिभूतान्यात्मन्नात्मनिस्वस्मिन्नित्यर्थः स्वयंनपराभावयन्स्वात्मानंपरिभवमप्रापयन् अमोघवीर्यइत्यर्थः भावयसेपालयसि । ऊर्णनाभिः सूत्रनाभिः कीटविशेषस्तद्वदात्मानं शक्तिप्रकृति मवष्टभ्याक्रम्यअस्पृष्टश्रमःसृजसिपासिसंहरसीत्यर्थः ॥ ५ ॥

एतदेवोपपादयति नाहमिति अहंत्वस्मिन्कारणविषयेपरमुत्कृष्टमवरंनिकृष्टंसमंमध्यमंदेवादिनामादिपदादिरूपशुक्लादिगुणैर्भाव्यं [illegible] दात्मकंचेतनाचेतनात्मकंकिंचिदपिवस्त्वन्यतोनवेद किंतुत्वत्तएवजानामीत्यर्थः यद्वा अस्मिन्कार्यावस्थंनामरूपाभ्यां [illegible] त्वयैवनिष्पादितंचेतनाचेतनात्मकंकिंचिदपिवस्त्विदमनेनसममिदंनिकृष्टमिदमुत्कृष्टमितिनजानामीत्यर्थः ॥ ६ ॥

यत्परस्त्वमित्यादिप्रश्नःकुतःप्रसक्तइत्यत्राहसइति घोरंइतरैश्चर्तुमशक्यंमहत्तपःसभवान्जगत्स्रष्टाभवान् भगवानितिपाठान्तरे [illegible] मित्यर्थःअचरदाचरितकृतवान् तेनतपश्चरणेनकिमस्मादपिपरमस्ती [illegible] तिशङ्कांप्रयच्छसिततस्त्वंनःखेदयसेपराशङ्काप्रदानेन [illegible] त्यर्थः ॥ ७ ॥

प्रश्नमुपसंहरति एतदिति हेसर्वज्ञसकलेश्वरत्वयाऽनुशासितःशिक्षितोऽहंइदंभवतोपदेश्यमानंयथैवबुध्येजानेतथैतत्सर्वंपृच्छतो [illegible] नीहिविशेषेणज्ञापय ॥ ८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

कुलालादेःकालाद्यधिष्ठानंदृष्टं किमस्याधिष्ठानमत्राहआत्मन्निति अक्लमस्त्वंतानिभूतानिसूत्रनाभिरूर्णनाभिरिवात्मशक्तिं [illegible] मवष्टभ्यात्मन्नात्मनिभावयसेउत्पादयसिपालयसिच पराकृत्वतान्नाहिनभावये: ॥ ५ ॥

भावयसेवर्धयसेचरतियत्तस्माद्स्माद्भवतोविश्वस्यपरमुत्तमकारणमहंनवेद अवरंहीनंसमंकारणंत्वनवेद तुशब्दोनोकार्थमवधारयति [illegible] निगमयतिनामेति नाम्नावाचकेनरूपेणशुक्लादिनागुणैःसत्त्वादिभिःसत्स्थूलमसत्सूक्ष्मंचकिंचिद्वस्तुयद्भाव्यमुत्पादित [illegible] गद्दितंविहितं अतस्त्वमेवसर्वकारणमित्यर्थः ॥ ६ ॥

ज्ञाततत्त्वेनत्वयाप्रश्नःकिमितिकृतइतितत्कारणमाह सभवानितितपोऽचरदितियत्तेनहेतुनात्वंनोऽस्मान्खेदयसे [illegible] सित्वदितरकर्तृसद्भावेपराशङ्कांचयच्छसीत्यन्वयः तस्मात्प्रश्नःकृतइतिभावः ॥ ७ ॥

एतन्मेपृच्छतःसर्वंसर्वज्ञसकलेश्वरेतिविशेषणद्वयमुक्तार्थस्थिरीकरणायोक्तं यथाबुद्ध्येजानामितथेतिशेषः त्वदर्थीज्ञापकः [illegible] पिकेशवेत्यनेनपूर्वपक्षोऽयमितिज्ञायते ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

आत्मनि भावयसे न पराभावयन्निति च स्वैश्वर्याधिक्येऽपि सतीति शेषः । सूर्य्यादौ विद्यमाने दीपादेः पराभव [illegible] उपादानकारणत्वमेव भवत आयाति । सूर्य्यादौ विद्यमाने दस्यादस्तदद्दीनादिति भावः ॥ ५ ॥

तदेवाह नाहमिति । तदेतत् तथोत्तरवाक्यञ्च तन्मुखेनैव अन्यान् शिक्षयितुमुक्तम् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

अत्रत्वसर्वेभवनसामर्थ्येनैवसर्वंसृजसि आत्मन्येवभावयसिपालयसि तान्येवस्वयंपराभावयन्नाशयन् अपराभावयन्निति [illegible] प्रापयन् यस्मात्त्वमेवस्रष्टात्वयैवजगदुत्पत्तिस्थितिनाशांकरोषीत्यर्थः आत्मानंवापराभवमप्रापयन्सृष्टिस्थितीकरोषीत्यर्थः [illegible] दृष्टान्तम् असहायकरणेदृष्टान्तमाह आत्मशक्तिमिति स्वस्यैवसामर्थ्यमवलम्ब्यआकाशगमनेपक्षिवदव ऊर्णनाभिःकीटविशेषः [illegible] रूपांस्तन्तुमुत्तोनिष्काश्यतैर्विहारस्थानंकृत्वाविहृत्यपुनर्गच्छति तथाऽपिश्रमरहितश्चभवति एवंभवानित्यर्थः ॥ ५ ॥

एतादृशंतवसामर्थ्यं स्वतएववपरतइति ममप्रतिरित्याह नाहंवेदेति अस्मिन्संसारेत्वत्तएवभवतीत्यहंजाने परस्य [illegible] समंवाअन्योऽन्यं एवंकरणसामर्थ्यमाह हेविभोइति किंच नामभेदाः रूपंजगत् गुणाःआत्मादयः तैः भाव्यंउत्पाद्यं सदसत् [illegible] कार्यकारणरूपं वा किंचिदपिअन्यस्मात्त्वद्व्यतिरिक्तात्भाव्यमित्यहंनजाने ॥ ६ ॥

[illegible] । [illegible] ।
यथाहं [illegible] ॥ ९ ॥
सानुतं तव तच्चापि यथा मां प्रब्रवीषि भोः ।
अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ १० ॥
येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् ।
यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ॥ ११ ॥
तस्मै नमो भगवते वासुदेवाय धीमहि ।
यन्मायया दुर्जयया मां वदन्ति जगद्गुरुम् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्य कृत सुबोधिनी ।

[illegible]तोऽयेतत्राह सभवानचरदिति नहि स्वतंत्रः घोरं तपः करोति [illegible]देन भगवत्तपोऽभ्युदासः नरनारायणादिभिः क्रियमाणं शान्तिपरः [illegible]समाहितइति अतिसावधानः स्वाभाविकतपोऽभ्युदासः तपोमेहृदयमिति वाक्यात् [illegible] मयैतत्पद [illegible] महिम्नः [illegible]करोति तेनज्ञायते एतस्मादन्योऽस्ति महान् यमाराधयितुं तपः करोतीति किंच तेनतपः करणं [illegible] [illegible] स्थितः अस्मात्सर्वोत्तमइति तपसि क्रियमाणे [illegible] परोऽन्योऽप्यस्तीत्याशंकाप्युपपद्यते अतः संदेहः ॥ ७ ॥
[illegible] कश्चिदास्तनचेति एतत्सर्वं कथयेत्याह एतन्मइति [illegible] आत्मप्रश्नः [illegible] सर्वं विजानीहि विशेषेण विचार्यैव बोधयेत् यथा अनुशासितः [illegible] सर्वज्ञत्वात् [illegible] सामर्थ्यं प्रश्नमात्रेण [illegible] मवति किंतु यथापिताकथयेत् [illegible] [illegible]उपपत्तौवक्ष्यते अनेन प्रश्नोत्तरेऽपि [illegible] अहंयथा [illegible] [illegible] अन्यथा भगवता [illegible] अतो यथाधिकारं पदार्थो वक्तव्य इति निर्धारितम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

[illegible] आत्मनि अधिष्ठाने भावयसे पालयसि । तानि न पराभावयन् अन्यतः पराभवमप्रापयन् । यथोर्णनाभिरात्मन एव शक्ति-[illegible] सृजति तद्वत् । अक्लमः श्रमरहितः ॥ ५ ॥
[illegible] अस्मिन् जगति, परम उत्तमम्, अपरम् अधमं, समं मध्यमञ्च, तत्रापि नाम मनुष्यादि, रूपं द्विपदत्वादि, गुणाः शुक्ल-[illegible], तैर्मोक्ष साध्यं, तत्रापि सदसत् स्थूलं सूक्ष्मञ्च किञ्चिदपि अन्यतो न वेद, किन्तु त्वत्त एव सर्व्वं भवतीति मन्ये ॥ ६ ॥
[illegible] ऽपि । पराशङ्काम् ईश्वरान्तराशङ्कां प्रयच्छसि ॥ ७ ॥
[illegible] ममैतत् सर्व्वमभिप्रेतं वक्तव्यमित्यर्थः । विशेषेण जानीहि स्वयं परामृश्य ततो वदेत्यर्थः । किञ्च यथैवेदम् अनुशासितः [illegible] तथा विजानीहि तेनास्योत्तरमवाधितं देहीति व्यञ्जितम् ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप ।

[illegible]भूतानि आत्मन आत्मनि विराट्शरीरे भावयसे पालयसि नपराभावयन्त्ययम् आत्मानं परिभवमप्रापयन् अक्लमः श्रम-रहितः [illegible]भिः आत्मन एव शक्तिमवष्टभ्य सृजति तद्वत् ॥ ५ ॥
[illegible] सदसत्स्थूलं [illegible] किञ्चिदन्यतो [illegible] किंतु त्वत्त एव सर्वं भवतीति जानामि ॥ ६ ॥
[illegible] तेन हेतुनाऽस्माकं [illegible] पराशङ्कामीश्वरान्तराशङ्कां प्रयच्छसि ॥ ७ ॥
[illegible] अनुशासितस्त्वत्तः [illegible] इदं प्रस्तुतं यथैवबुध्येजानीयाम् [illegible] विजानीहि विशेषेणज्ञापय ॥ ८

भाषा टीका ।

[illegible] जगत् को अपने ही से उन जीवों को पालन करते हैं अपनी शक्ति ही के आश्रय से आप यह सब कार्य करते हैं [illegible] बिना अन्य साधन के अपना आज्ञा पूर लेती है ॥ ५ ॥
[illegible] विश्व में आप से उत्तम अधम समान नहीं देखता हूं और नामरूप गुणों से युक्त इस स्थूल सूक्ष्म जगत् में जो कुछ है [illegible] किसी से नहीं है सब आपही से है ॥ ६ ॥
[illegible] जो बड़े सावधान होकर तप किया उससे हमको क्षोभ होता है और पर की आशंका होती है ॥ ७ ॥
[illegible] यह पूछता जो मैं हूं मुझे बताओ जिससे आपका अनुशासित यह सब मैं समझ जाऊं ॥ ८ ॥

[illegible] प्रश्नमभिनन्दति । हे वत्स पुत्र [illegible]
अत्र हेतुः यत् यतः परमधर्म्मे भगवद्‌[illegible]
ननु त्वमेव भर्त्त्वासीत्युक्तं त्वया एकः सृजसि भूतानीत्यादिना [illegible] । सत्यम् । यद्यपि [illegible] प्रभासते तथापि [illegible]
न्तमनृतम् । यतः कारणात् एतावतः एतावत्प्रमाणस्य आत्म [illegible] वेद्मि । किन्तु अतः परमीश्वरमविज्ञाय ब्रूवे । अतः [illegible]
इयेयं भ्रान्तिः न तु बुद्धिपूर्व्वकमनृतमित्यर्थः । अत्र ईश्वरस्य मम एतावत्त्वं तव अविज्ञाय इति [illegible] ॥ १० ॥
तर्हि कोऽसावीश्वर इत्यपेक्षायां भक्त्या नमस्कुर्व्वन्नेव तं कथयति त्रिभिः । येन [illegible] रोचिषं प्रकाशितमेव [illegible]
सृष्ट्याऽभिव्यक्तं करोमि । यथाऽर्कोऽग्निरन्यप्रकाश्यमेव प्रकाशयन्ति । तथाच श्रुतिः—न तत्र सूर्य्यो भाति न चन्द्रतारकं [illegible]
भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति ॥ इति ॥ ११ ॥
तस्मै नमो धीमहि । यस्य मायया विमोहिताः सन्तो युष्मदादयो मां जगद्गुरुं जगत्कर्त्तारं वदन्ति तस्मै ॥ १२ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

नमो धीमहीति । मनसा नमनं कुर्व्वीमहीत्यर्थः । एवमेव भगवतो स्वामिना प्रथम स्कन्धीयप्रथमाध्यायस्य [illegible] टीका-
यामुक्तमिति ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

अथब्रह्मा यथाप्रश्नमुत्तरयिष्यंस्तावत्प्रश्नमभिनन्दति सम्यगिति हेवत्सपुत्रकारुणिकस्त्वमतिकरुणयाहतः तेत्वयाहंसम्यक्[illegible]
सितंज्ञातुमिष्टं कुतइत्यतआह यद्यस्माद्दहंभगवद्वीर्यदर्शने भगवत्प्रभावज्ञापनरूपेऽर्थेप्रवर्त्तितः ॥ ९ ॥
भगिमतार्यजिघृक्षयाप्रश्नंविविनक्ति नानृतमिति श्रीनारदमांप्रतियथाप्रब्रवीषि एकःसृजसिभूतानीत्यादिनायत्पृच्छसितन्नाति[illegible]
चच:मानृतमतीवनासत्यं किंतुमत्तः परंभगवंतमज्ञात्वाब्रवीषीति अज्ञानहेतुमाह ममएतावत्त्वंएतावन्महिमवत्त्वंयत:परम[illegible]
तेमत्तः परमज्ञात्वाब्रवीषीत्यर्थः ॥ १० ॥
तर्हिकोऽसावीश्वरइत्यपेक्षायांभक्त्यानमस्करिष्यन्नाह येनेति अर्कोद्वयोभगवत्तेजसारोचितंविश्वंतत्तेजोलेशमुपजीव्य[illegible]
आत्मानमभिमन्यंतेएवमहमपीत्यर्थः नतत्रसूर्योभातीतिश्रुतिरत्रानुसंधेया ॥ ११ ॥
तस्मैवासुदेवायनमोधीमहिनमः कुर्महे यद्वा धीमहीत्यत्रार्थतिशेषं जेतुमवाक्ययायस्यभगवतोमाययामांजगद्गुरुंवदंति [illegible]
सकला देवा मनुष्याः पशवस्तथा विष्णुमायामहावर्त्तमोहांधतमसावृताइतिन्यायेनमाययामोहितामांजगद्गुरुंवदंति [illegible]
इत्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

नारदप्रश्नंपरिहरिष्यन्‌तज्जिज्ञासितंस्तौति सम्यगिति अहंभगवतोहरेर्वीर्यस्य सृष्ट्यादिलक्षणस्यदर्शनेख्यापनेचोदितइति [illegible]
चिकीर्षितंसम्यक्समीचीनमित्यन्वयः कारुणिकस्येत्यनेनलोकोपकारकंचेदमितिलक्षयति ॥ ९ ॥
तत्रप्रथमतःपूर्वपक्षांशमाक्षिपति नानृतमिति त्वमेकःसृजसीतियथामांप्रब्रवीषितथातदनृतंनाकिं । अनृतमेव यतत्व[illegible]
देवानुकंपासंतोषविस्मयामंत्रणोषतइतिवचनात् यद्यमत्तःपरमधिकमीश्वरमविज्ञायमांवेदपरंत्वमाहेतिमामात्यत[illegible]
कुतइतितत्राह अपीति अतिगर्हितत्वात् अपिःपदार्थसंभावनान्ववसर्गगर्हासमुच्चयेष्विति सूत्रात् गर्हासमुच्चयप्रश्नशंकासंभावना[illegible]
आनाक्य कस्मान्मयुक्तमाक्षिपसीतितत्राह एतावत्त्वमिति हिशब्दपवार्थे मेएतावत्त्वंतद्रोचिषारोचितरोचकत्वंश्रेय नातोऽधिक[illegible]
हितिबोध: ॥ १० ॥
एतदेवस्पष्टयति येनेति तत्रप्रमाणमाह यथेति तमेवाभांतमनुभातिसर्वं यदादित्यगतंतेजोजगद्भासयतेऽखिलमित्यादेः ११ ॥
बुभूषणात्कुमतश्रवणप्रासापराधोभगवत्प्रसनेनपरिहर्त्तव्यइतिभावेनमगवंतंनमति नमइति तस्मैवासुदेवायभगवतेनमः [illegible]
न्वयः अनेन ओंनमोभगवतेवासुदेवाय नारायणाय विद्महेवासुदेवायधीमहि तन्नोविष्णुःप्रचोदयात् इति[illegible]
द्विविधहिरण्यगर्भाणांनित्यंसेव्यइतिदर्शितं यद्वामत्तःपरमविज्ञायतथा एकःसृजसीत्यादिप्रकारंमांप्रब्रवीषितच्चतत्प्रकार[illegible]
नान्यत् यद्रूपमित्यादि तदेवानृतंकुतइत्यतआह नेतिप्रमाणविरोधात् नामावान्यविरोधिष्वितिवचनात् अयंपक्षःसंभावितइत्याह [illegible]
असंतीवहेतुत्वात् कुतोऽनृतमितितत्राह एतावत्त्वमिति एतावत्त्वमपि[illegible]एतावत्त्वंपरिच्छिन्नप्रभावत्वंहिप्रसिद्धं कथंप्रसिद्ध[illegible]
नेयविशिमहि येनेति अनेनहरे:करणत्वंतत्कर्तृत्वंप्रतीतं भनुहरे:[illegible]कर्तृत्वमित्याशंक्य दासभावकथनेनतत्स्पष्टयति [illegible]
मुक:धारोदायत्रप्रवृधीदित्यादावपिकरणत्वमपिमुख्यकर्तृत्वंप्रयोजयतीत्यतःकरणस्यप्रयोगोनकिंचिदकर: [illegible]
आह यन्माययेति त्रिविधामाया एकाहरेरिच्छामुख्याद्वितीयाऽमुख्याप्रकृतिस्तृतीयाऽमुख्यत
[illegible]धीबद्यातुर्जेयमाहरिभजनवर्जितेर्जेतुमशक्यया ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

किंवा तवेदमज्ञानमेवेति विषमान आह नानृतमिति ॥ १० ॥
[illegible]र्काद्वयस्तत्प्रकाशितास्तत्[illegible]तैव तत्तत् प्रकाशयन्तीत्यर्थः ॥ ११ ॥

[illegible] ।

[illegible] । [illegible] सदा [illegible] यस्य निर्दोषस्य मेरुणो दूरे स्थातुं विलज्जमानया अमुया [illegible] वयो दुर्धियः विकत्थन्ते [illegible] ॥ १२ ॥ १३ ॥ १४ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

[illegible] प्रथमं अंतिमप्रश्नोत्तरं वक्तुं सर्वेषां प्रश्नानामेकरूपत्वमाह सम्यगिति सर्वेषां प्रश्नानामुत्तरं भगवानेव सप्रश्नज्ञानादिः तत्रैवावांतरभेदा [illegible] ति तदेव स्कंधार्थत्वेन पर्यवसानं प्राप्स्यति तत्कथमित्यपेक्षायामाह यदहं प्रेरितः भगवद्वीर्यस्य दर्शने ज्ञानार्थमिति यदि सर्वे एव प्रश्नाः भगवा [illegible] त्वेन वक्तव्यो भवति तदैव संगच्छते परं केनचित्केनचिद्रूपेणातः प्रश्नास्तद्रूपं भगवान् तानि रूपाण्यप्रे वक्तव्यानि अत एव तस्य प्रश्नस्या [illegible] दरं अन्यथा कोपः कर्त्तव्यः स्यात् भगवद्वीर्यो ज्ञापकत्वेनोपस्थितत्वात् तदभावः यत्तवायं प्रश्नः सकारुणिकस्यैव अनेनव्याजेन सर्वेषां [illegible] रान्मोचनीया इति अहं च कृतार्थः कर्त्तव्य इति च अन्यथा परमभागवतस्य तव अज्ञानं न संभवतीत्यभिप्रायः वत्सेति स्नेहेन संबोधनं मातुरीध संपय [illegible] दयाज्जगद्व्यारित्रमुद्भूतमस्तीति ज्ञापयति विचिकित्सितं विचारितं ज्ञातुमिष्टं वा ॥ ९ ॥

एवं प्रश्नाभिनंदनमुक्त्वा संतोषणार्थं कृत्वाधिकारं च निरूप्य अंतिमप्रश्नस्योत्तरमाह नाहमेवेत्यस्य नानृतमिति यत्तवचनं तत्तोऽन्यो महात्मा- [illegible] तिन्नृतं न भवति अनृतं नामान्यथाज्ञानान्यथावचनं तत्त्वज्ञानात् तद्वचनमित्येव लोकप्रसिद्धिः अप्रामाण्यस्य तुल्यत्वेऽपि एवं वचनं अनृत [illegible] दोषो नास्तीत्यर्थः यथा मां प्रब्रवीषि त्वमेव महानिति सत्यं तु न भवतीत्याह अविज्ञाय परं मत्त इति मत्तः परमुत्कृष्टं मन्नियंतारमविज्ञाय [illegible] त्यर्थः कोऽसावित्यपेक्षायामाह एतावत्त्वं यतोऽहमहमिति यावंतः उत्कृष्टाः मयि धर्मास्त्वयोदिताः ते हि सर्वे यत्संबंधान्मयि जाताः स भग- [illegible] मित्यर्थः ॥ १० ॥

एवमंतिमप्रश्नोत्तरमुक्त्वा प्रथमप्रश्नोत्तरमाह येनेति भगवान् ज्ञानं भवति येन रूपेणातद्रूपं उच्यते ज्ञानं हि स्वप्रकाशं सन्नेव प्रकाशयति दीप [illegible] प्रकाशयतिपतः तस्मात्सर्वप्रकाशकं स्वप्रकाशकं यच्चैतन्यं भगवद्रूपं तद्ज्ञानमित्यर्थः येन भगवता स्वरोचिषा स्वप्रकाशेन स्वयमेव रोचते स्वा- [illegible] तीति स्वरोचिः विश्वं तेनैव रोचितं प्रकाशितं अव्यक्ते लीनं विश्वं तद्गोचिषा प्रकाशितं जातं [illegible] [illegible] मिति यथा महाकाष्ठस्थितो वह्निर्मथनेनाभिव्यक्तः एवं तृणादिभिरभिव्यज्यते न तु सहसा तृणादिभिरभिव्यक्तमर्हति तत्र श्रुतिसिद्ध [illegible] माह यथाऽर्कोऽग्निरिति अन्ये तु जडा न स्वप्रकाशाः तेजस्तु स्वप्रकाशं इव तदपि चेद्भगवता प्रकाश्यं तदा कः संदेहोऽन्यस्य तत्प्रकाश्यत्वे तत्र श्रुतिः [illegible] सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती"ति तत्र विद्युतां कादाचित्क- [illegible] यथाऽर्को ज्ञानेन प्रकाशितमेव स्वयं प्रकाशयति स्वयं च प्रकाशितः यदादित्यगतं तेज इति वाक्यात् तत्रापि भगवत्तेज एव प्रकाशकं तथा [illegible] पीत्यर्थः एवमग्न्यादयः ऋक्षाणि अश्विन्यादीनि ग्रहाः बुधादयः अन्यास्तारकाः ॥ ११ ॥

[illegible] रूपं भगवंतं प्रतिपाद्य तत्कर्त्तव्यांतराभावात् भक्त्यानमस्यति तस्मै नमो भगवत इति लोकवेदप्रसिद्धं तच्छब्देनोच्यते भगवत इति [illegible] धर्मैर्वनाशत्वं प्रयोजनं तु मोक्षः तदाह वासुदेवायेति भक्तिर्मननं निदिध्यासनमंतरंगं साधनं तदाह धीमहीति तन्नमो वा एवं [illegible] र्वेषां तद्ध्यानं युक्तमेवेति विरोधाभावायाह यन्मायथेति तस्य भगवतो ज्ञानरूपस्य वशवर्त्तिनी काचिच्छक्तिर्माया तस्सा जगत्कर्त्री माया [illegible] एतस्या व्यामोहएवफलं तस्यास्तु जगतः कर्तृत्वं कर्तृत्वं वा भगवदाश्रयात् मायायाः सामर्थ्यमाह दुर्जययेति तस्याः जयः प्राणिमात्र [illegible] इयमेव माया वेदस्तु तां मा रक्षायित्वेन वेदैः प्रार्थिता ते हि ज्ञानं बोधयंति एवातु मोहयति तस्याः फलं महतामपि इदयतइत्याह मां ब्रुवंति [illegible] मिति क्रियाशक्तेरन्याधीनत्वाज्जगद्गुरुमित्युक्तम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

प्रश्नमभिनन्दति । हे वत्स पुत्र । विचिकित्सितं सन्देहः । सम्यगिति समीचीनम् । कारुणिकस्येति सर्वज्ञेनापि त्वयैव पृच्छता [illegible] करुणैव कृता । यदहं विजानीहि इति परामर्शार्थकपदेन भगवतो वीर्यस्य विश्वसृष्ट्यादिमयस्य दर्शने विषये प्रेरितः । तदहं [illegible] मनसैव तत् पश्यामीत्यानन्द ॥ ९ ॥

किञ्च भोः पुत्र एकः सृजसि भूतानि इत्यादिना मामीश्वरत्वेन यथा प्रब्रवीषि तथापि नानृतं न मिथ्या । यतो मत्तः सकाशादपि [illegible] अविज्ञाय मत्तः परस्मिन् परमेश्वरे अविज्ञाते सतीत्यर्थः, मम एतावत्त्वं स्यादित्यनेककर्तृकत्वेऽपि क्त्वाप्रत्ययः आर्षः [illegible] मत्तः परम् अविज्ञाय मम एतावत्त्वं लोका ब्रुवन्तीति शेषः । त्वन्तु सर्वज्ञोऽपि तानेव ज्ञापयितुं ताननुकृत्या ब्रूषे इति भावः । [illegible] परम् अविज्ञाय ब्रवीषीति व्याख्याने तु नारद स्याज्ञत्वं प्रसज्य ज्ञातुमनुचितम् ॥ १० ॥

वस्तुतस्तु अहं को वा वराक इत्याह । येन स्वरोचिषा स्वप्रकाशेन परमेश्वरेणैव प्रकाशितमहं विप्रुपेपन्यायेन प्रकाशयामि सृष्ट्या [illegible] करोमि । यथाऽर्कादयस्तत्प्रकाशितमेव प्रकाशयन्ति । तथाच श्रुतिः—न तत्र सूर्यो भाति न च चन्द्रतारकं नेमा विद्युतो [illegible] कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभाति ॥ इति ॥ ११ ॥

ननु जगद्गुरुर्ब्रह्मा विश्वं सृजतीति सर्व्वत्रैव तव ख्यातिः तत्र सविस्मयं सोत्प्रासमाह तस्मै नमो धीमहीति ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

[illegible] प्रश्नमभिनंदति सम्यगिति हे वत्स पुत्र ते तव कारुणिकस्य सर्वजन करुणावतः इदं विचिकित्सितं निःसंदेहार्थं प्रश्नरूपं चेष्टितं सम्यक् यतो [illegible] भगवत्प्रभावज्ञापनेच्छोदितः प्रवर्त्तितः ॥ ९ ॥

[illegible] एकः सृजतीत्यादिवचोऽपि नानृतम् तत्र हेतुः अविज्ञायेति यतो भगवतः मे मम एतावत्त्वं [illegible] युक्तत्वं मत्तः परम् [illegible] परमेश्वरत्वेन मां प्रब्रवीषि ॥ १० ॥

विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ।
विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥ १३ ॥
द्रव्यं कर्म्म च कालश्च स्वभावो जीव एव च ।
वासुदेवात् परो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्त्वतः ॥ १४ ॥
नारायणपरा वेदा देवा नारायणाङ्गजाः ।
नारायणपरा लोका नारायणपरा मखाः ॥ १५ ॥
नारायणपरो योगो नारायणपरं तपः ।
नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तमेवस्वस्मात्परंकथयति येनेतित्रिभिः अहंयेनपरमेश्वरेणस्वकीयेनधर्मभूतेनरोचिषाप्रकाशेनरोचितंप्रकाशितमेवरोचयामिप्रकाशयामि नतुस्वातंत्र्येणकिंचिदपिकर्त्तुंशक्नोमीत्यर्थः यथाऽर्कादयोभगवत्प्रकाशयमेवप्रकाशयंति अनेनयद्रूपमित्यस्योत्तरमुक्तम् "नतत्रसूर्योभातिनचंद्र तारकंनेमाविद्युतोभांतिकुतोऽयमग्निस्तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाती"तिश्रुतेः ॥ ११ ॥

तस्मैवासुदेवायनमः धीमहि यस्यमाययायोगिभिरपितत्कृपांविनादुर्जयया मोहिताः मांजगद्गुरुंवदंति ब्रह्माद्याःसकलादेवामनुष्याःपशवस्तथा विष्णुमायामहावर्त्तमोहांधतमसावृताइतिस्मृतेश्च ॥ १२ ॥

भाषा टीका ।

ब्रह्मोवाच—हे वत्स ! यह तेरा संशय और संशय पूर्वक प्रश्न बड़ा उत्तम है तैंने जिज्ञासा करके भी मुझ पर कृपाही की है । क्योंकि जो मुझे श्री भगवान् के पराक्रमों के निदर्शना कराने को प्रेरणा किया है ॥ ९ ॥

तैंने मुझ को जैसा कहा है वह बात भी झूंठ नहीं है क्योंकि मुझ से भी पर जो है उसे बिना जाने कहा है और मैं ऐसा हूं भी ॥ १० ॥

जिन भगवान की शक्ति से प्रकाशित इस विश्व को मैं प्रकाश किया करता हूं जैसे सूर्य अग्नि चन्द्रमा ग्रह तारा सब सिद्ध ही घट पटादिक को प्रकाश किया करते हैं ॥ ११ ॥

मैं उन वासुदेव भगवान को नमस्कार करता हूं जिनकी दुर्जय माया से मुझे जगद्गुरु कहते हैं ॥ १२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यन्माययेति मायासम्बन्धोक्तेस्तस्या दुर्जयत्वोक्तेश्च तस्यापि किमस्ति संसारः । नैवेत्याह । मत्कपटमसौ जानातीति यस्य दृष्टिपथे स्थातुं विलज्जमानयेव तस्मिन् स्वकार्य्यमकुर्वत्या अमुया मायया विमोहिताः अस्मदादयो दुर्धियः अविद्यावृतकामा एव केवलं विकत्थन्ते श्लाघन्ते । अनेन यद्रूपमित्यस्य प्रश्नस्योत्तरमुक्तं भवति ॥ १३ ॥

तदेवं स्वस्मादन्यं परमेश्वरं निरूप्य इदानीं यदधिष्ठानमित्यादिनवप्रश्नानां स एवाधिष्ठानादिकं सर्व्वमित्युत्तरं वक्तुं तद्व्यतिरेकेणान्यस्यासत्त्वमाह द्रव्यमिति । द्रव्यं महाभूतानि उपादानरूपाणि । कर्म्म जन्मनिमित्तम् । कालस्तत्क्षोभकः । स्वभावस्तत्परिणामहेतुः । जीवो भोक्ता वासुदेवात् परोऽन्योऽर्थो नास्ति कारणाव्यतिरेकात् कार्य्यस्य ॥ १४ ॥

तत् प्रपञ्चयति द्वाभ्याम् । नारायणः परं कारणं येषां ते । अनेनैवशास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं सर्व्वज्ञत्वादिकञ्चोक्तम् । देवाश्च तदङ्गाज्जाताः अतो न तद्व्यतिरिक्ताः । लोकाः स्वर्गादयः तदानन्दांशाः । मखादयस्तत्साधनभूताः ॥ १५ ॥

योगः प्राणायामादिः । तपस्तत्साध्यं चित्तैकाग्र्यम् । ज्ञानं तत्साध्यम् । गतिः तत्फलम् । अनेनैतत् सर्व्वं तदधीनमित्युक्तम् ॥ १६ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य टिप्पणी ।

तस्यापीति परमेश्वरस्यापीत्यर्थः ॥ १३—१८ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

इतरेषांमायायादुर्जयत्वंभगवतस्तदसंस्पर्शंचाह विलज्जमानयेति यस्यभगवतईक्षापथेदृष्टिपथेस्थातुंविलज्जमानयातस्मिन्स्वकार्यमकुर्वन्त्याऽमुयामाययाविमोहिताःसंतोममाहमितिदुर्धियःविकत्थंते ॥ १३ ॥

विकत्थनमेवाह द्रव्यमिति द्रव्यंपृथिव्यादिभूतमेवकारणंइतिकेचित् कर्मैवकारणमितिकेचित् कालइत्यन्येस्वभावइत्यपरे कर्माजीवस्वकारणमित्यपरे एवंयन्माययामोहिताविकत्थंतेइत्यर्थःएवंतैःस्वतंत्रतयाऽभिमताःपदार्थाःभगवदधीनाइत्याह वासुदेवादिति द्रव्यादिष्वर्थेषुवासुदेवात्परोऽन्योऽर्थोनास्तियथावासुदेवात्परोनास्तितद्वत्तदात्मकमपरतंत्रंचनास्तीत्युक्तंयस्यमायोपसंचितम् ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एतदेवोपपादयति नारायणपरा इति वेदाः नारायणः परः कारणं येषां ते तथोक्ताः "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद" इत्यादिश्रुतेः यद्वा नारायणः परं प्रतिपाद्यं येषां ते तथोक्ताः "सर्वे वेदा यत्पदमामनन्ति" इति श्रुतेः देवा इन्द्रादयः नारायणस्याङ्गाज्जातास्तच्छरीरभूता इत्यपि विवक्षितं "चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत" इत्यादिश्रुतेः लोकाः नारायणपराः नारायणः परः स्वामी येषां ते तथोक्ताः मखाः क्रतवः नारायणः परः आराध्यो येषां ते तथोक्ताः ॥ १५ ॥

योगो विवेकादिजन्य उपासनात्मको योगो नारायणपरः नारायणः परो ध्येयो यस्य स तथोक्तः तपः विद्याङ्गभूतं कर्म नारायणपरं नारायणः कर्मवलाम्भूमिर्यस्य तथोक्तं ज्ञानं शास्त्रजन्यज्ञानं योगस्य पूर्वमुक्तं तदपि नारायणः परो ध्येयो यस्य तत्तथोक्तं गतिर्योगफलमर्चिरादिका साऽपि नारायणः परो गन्तव्यो यस्यास्तथाभूता ॥ ॥ १६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

यस्य हरेरीक्षापथे दृष्टिमार्गे स्थातुं विलज्जमानया चित्प्रकृत्याऽभिमन्यमानया शैवल्याख्यया जीवस्वरूपाच्छादिकया ऽमुया मायया मोहिताश्च स्यथाज्ञानमात्राभत एव दुर्धियो जना मम वशे विश्वमस्ति । सर्वस्याहं कर्तेति विकत्थन्ते तं धीमहीत्यन्वयः मुख्यामाया हरेः शक्तिरमुख्या प्रकृतिर्मतेत्यादिनाऽविद्याख्या वगमात्रं इन्द्रजाललक्षणा माया ऽत्रोच्यते ॥ १३ ॥

ननु विष्णोरितरत्कारणं नास्तीति कथमुच्यते । पृथिव्यादीनां प्रातिस्विककारणत्वप्रतीतेरित्यत आह द्रव्यमिति द्रव्यं पृथिव्यादि कर्म पुण्यपापलक्षणं पृथिव्यादीनां परिणामविशेषो वा कालः परिणामहेतुः त्रुटिलवात्मकः स्वभावः सात्त्विकादिः जीवः सुखदुःखाश्रयः द्रव्यं पुरोडाशादि कर्म ऋत्विगादिव्यापारः कालो वसन्तादिः स्वभावो ब्राह्मणत्वादिः जीवो यजमानसंज्ञ इति वा द्रव्याद्यन्यतरोऽन्यो ऽर्थो वासुदेवात्परोऽधिको नास्ति तर्हि तत्समः कश्चित्स्यादत्राह तात्त्वतः इति नेत्यनुवर्तते तात्त्वतः तद्व्यतिरिक्तः समोऽपि नास्तीत्यर्थः तद्व्यतिरिक्तं यत्तु तात्त्वतं तत्प्रचक्षत इति वचनात् अनेन द्रव्यादीनां प्रातिस्विककारणत्वस्य भगवदकानियतत्वेन हररेव कर्तृत्वं सुस्थिरमिति सिद्धम् ॥ १४ ॥

ननु "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता" इत्यादिश्रुतयस्तद्गुणप्रतिपादनपराः कथमन्यविषयाः स्युरित्याशङ्कय यदेतस्य स्वरूपमाहात्म्यगुणप्रतिपादकाइत्याशयेनाह नारायणपरा इति स्वप्रतिपाद्यगुणवस्तुना नारायण एव प्रतिपाद्यत्वेन परोऽधिको येषां ते तथोक्ताः सर्वस्मादुत्कृष्टं नारायणमेव प्रतिपादयन्तीत्यत आह देवा इति नारायणस्य चक्षुरादिभ्य उत्पन्ना जाता इत्यनेन देवानामवरत्वं नारायणस्योत्कृष्टत्वमुक्तमिति ज्ञायते नारायण एव पालकत्वेन परो येभ्यस्ते तथोक्ताः अहं हि सर्वयज्ञानामित्यादिस्मृतेर्विद्यादिष्वपि परः इति कृत्वा नारायणपरा मखा इत्युक्तम् ॥ १५ ॥

अष्टाङ्गयोगेन योज्यमानेष्वपि परो हरिरेव कृच्छ्रचान्द्रायणादितपसां विषयोऽपि स एव अत्रापि तपस्यायुज्यमानानां पर इत्यर्थः नारायणपरं ज्ञानं ज्ञानेन परमो ज्ञेयो हरिः नारायणपरा गतिराश्रयेषु गम्येषु वा मुख्याश्रयो मुख्यगम्यश्चायमेव तदुक्तं गम्येज्ये ज्ञेयध्येयेषु ज्येषु चापरो हरिरित्यादि अनेन हिरण्यगर्भादिशब्दानां चतुर्मुखादिविषयत्वमपहस्तितं "सर्वे वेदा यत्पदमामनन्ती"ति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

सर्वशास्त्रसमन्वयेन नारायणपरा इति द्वयम् । श्रीनारायण एव उपास्यत्वेन परः तात्पर्यविषयो येषां ते वेदाः । नन्वन्येऽपि देवास्तत्रोपास्यत्वेनाभिधीयन्ते । सत्यम् तेऽपि नारायणाङ्ग प्रभवत्वेनैव तथा वर्ण्यन्ते इत्यर्थः । तेऽपि तदाश्रया लोकास्तेऽपि, तत्पदप्राप्तिहेतवो मखाश्च तत्परा एव । तदानन्दांशाभासरूपत्वात् तत्साधनत्वाच्चेति भावः ॥ १५ ॥

तथा योगोऽष्टाङ्गः सांख्यश्च । तत्साध्यं तपः चित्तैकाग्र्यं तदुसाध्यं ब्रह्मज्ञानञ्च तत्परम् । तदीयसामान्याकारप्रकाशकत्वात् तज्ज्ञानस्य योगतपसोस्तत्साधनत्वादिति भावः । किं बहुना गतिस्तत्प्राप्यं ब्रह्मापि तत्परा तत्सामान्याकारप्रकाशत्वेन तदधीनाविर्भावत्वात् । तदुक्तं श्रीमत्स्यवचनेन सत्यव्रतं प्रति—मदीयं महिमानञ्च परब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ इति । अत्र मखादयस्तत्तदाकाशरूपाः गतिस्तु तत्तत्फलत्वात् तदानन्दांशभूतैव ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

तर्हि भूशक्तिर्मोहकरूपत्वात्स्वाश्रयमपि व्यामोहयेदित्याशङ्क्याह विलज्जमानयेति साहि भगवतो भार्या स्वस्य भगवता सह निरन्तररमणार्थमन्येषां बुद्धिं मोहयति तस्यास्तथात्वं भगवान् जानाति अतो विलज्जमाना ईक्षापथेऽपि स्थातुं विलज्जते अत एव ये तत्सन्मुखाः तांश्च व्यामोहयति पृष्ठतः प्रवृत्तानेव व्यामोहयति तदेवाह अमुया विमोहिताः ममाहमिति विकत्थन्ते मोहने द्वारमाह दुर्धिय इति यतो धियमेव व्यामोहयति ॥ १३ ॥

एवं ज्ञानं सपरिकरं निरूप्य भात्मनिरूपणार्थं प्रथमस्तत्त्वं निरूपयति द्रव्यमिति इदं हि तत्त्वं न नाना किंतु सर्वेषामेकमेव तत्त्वं तत्र सर्वे पञ्चानां तेषां पञ्चानां यदि भगवानेव तत्त्वं तदा तत्कार्याणां सुतरामेव तदेव तत्त्वं भवति तानि पञ्च गणयति द्रव्यं अधिभूतं समवायिकारणं महाभूतानि कर्म जगतो जन्मनिमित्तं साधारणं चकाराज्ज्ञानसंस्काररूपं च कालो गुणक्षोभकः चकारान्निमित्तभूतश्च यस्त्वाधारत्वेन सर्वत्र प्रतीयमानः द्रव्यं तच्चैव सर्वं प्रकृतिकार्यमग्रे निरूपयिष्यते एते सर्वे वासुदेवादन्येन भवन्ति एतेषां देवरूपत्वात्सत्त्वमूर्तिर्भगवान्निर्दिष्टः तत्त्वनिरूपणे स्वभावः परिणामहेतुः जीवो भोक्ता भगवदंशः चकारात्तदभिमानिनो देवताश्च तत्र कालकर्मस्वभावा निबन्धसम्बन्धिरूपिताः जीवोऽपि पृथङ्निरूपितः त्यक्तकर्मतत्त्वपतितत्वमीयमानतया अन्यत्वेऽपि परमार्थतो अन्यत्वं भवतो हितत्वं तस्यैव ब्रह्मज्ञानसंबोधनं निरूपितेऽयमसंभावनाऽथा युक्त्यर्थं यतस्त्वं ब्रह्माण्डमस्त्वमन्तर्लोकः संदेह इति भावः चकाराद्धर्मभेदोऽपि नास्तीत्यर्थः अन्यत्वेन स्वरूपभेदो निराक्रियते परत्वेनाधिष्ठानभेदः अर्थ इति युक्तिरुक्ता ।

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

नित्योहि शब्दार्थसंबंधः तत्र शब्दार्था अनित्याः तेयदि भगवद्रूपा एव भवंति तदेव सर्वेकरूपनित्यत्वं सिध्यतीति ॥ १४ ॥

एवं सर्वेषां तत्त्वं भगवानित्युत्तरमुक्त्वा विमर्शीयं यत्पृष्टं तत्रोत्तरमाह

नारायणपरा वेदा इति यदीभिमतार्थत्वं संभवति तदा भूयान्विचारः कर्तव्यो भवेत् तत्र स्वरूपतः अर्थतः फलतः साधनतः परंपरातः द्वितीयकांडेऽपि साधनतः कार्यतः फलतश्च भगवानेवेति कस्मिन्नप्यंशे विवादाभावात् भगवानेव तत्त्वमिति विमर्शः तत्र वेदानां भगवति श्वासात् [illegible] पुनस्तानेव प्रवेशमानानां तात्पर्यं नारायण इति निर्विवादं मध्यपि तस्वार्थं प्रत्याययंतेत दर्थस्य भगवद्रूपत्वात् भगवत्परा एव भवंति वैदिकानि चतुर्विधा न्यपि यद्यपि ते भगवद्रूपत्वे स्थितम् अर्थे व्याप्नुवंति संति तत्र लोके पुरुष प्रयत्नोपेतास्तमर्थमभिधाय कृतार्था भवंति निवर्तते भगवद्रूपत्वे स्थितामर्थ न जानंतीति हि नेषां प्रयासः ततो भगवदभिप्रेतार्थे साधकत्वादपि भगवत्परा एव एवंशब्दतोऽर्थतो निधानतश्च भगवत्पराः ननु संसर्गरूपो वाक्यार्थ स्तेषामभिप्रेतार्थो भवति स च चतुर्विधः विध्यर्थवादमंत्रनामधेयार्थात्मकः तत्र विध्यर्थस्य पुरुषप्रवर्तनालक्षणस्य पुरुषप्रवर्तने तात्पर्यं । पुरुषप्रयत्नाभिव्यंग्ये भावे वा विध्यर्थस्तवनेत्यर्थवादाः मंत्रा अपि याज्यानुव्यतिरिक्ताः देवताप्रतिपादनस्तुत्या वा नुपयुक्ताः याज्यास्तु देवतोद्देशद्रव्य त्यागेनामधेयान्यपि भावार्थविच्छेदनेतात्पर्ययुक्तानि । तस्मात्तत्तदर्थे उपक्षीणानि कथं भगवति तात्पर्यं घटिष्यंति । तत्राह देवा नारायणांगजाः नारायणपरा लोका नारायणपरा मखा इति सर्वो हि वेदः प्रवर्तमानः चतुर्विधेऽपि यागे उपयुज्यते महावाक्यार्थत्वाद्यागस्य तत्राह यागः करणं । स्वर्गादिः साध्यः तत्र सांप्रतं पुरुषप्रयत्नेनाभिव्यक्तायोगाः स्वव्यापारं देवताप्रीतिमध्ये जनयंति अन्यथा व्यापाराभावात् करणाभावात् वप्रच्यवंते अदृष्टादिकं तु न व्यापारः यागेनाजन्यत्वाद् दृष्टस्य व्यापारस्य विद्यमानत्वाच्च तेहि देवतोद्देशेन द्रव्यत्यागं कुर्वंतः स्वर्गं साधयंति देवता च अन्यदीयं हविर्विधानेन गृहीत्वा किंचिदुपकर्तुमुचिता भवतीति लोके तथोपलब्धेः अन्यथा तद्देशद्रव्यत्यागत्वयागस्य न स्यात् द्रव्यसंस्कारकत्वेनापि देवतोपयोगस्य वक्तुं शक्यत्वात् [illegible] संबंध वचनस्य प्रोक्षणादिनत् संस्कारकत्वं घटते यद्यपि देवतापदे पुविद्यमाना च तुर्थी तादर्थ्येनैव भवति उपपदविभक्तित्वात् । [illegible] कालांतरस्मारकस्याप्यभावात् तत्कल्पनायां गौरवं तथापि चतुर्थ्या निरर्थकत्वदोषनिवृत्त्यर्थं अवश्यमर्थो वक्तव्यः स चान्यत्र सिद्धत्वात् संप्रदानपदभक्ति देवतोद्देशप्रसिद्धेश्च । यस्यै देवतायै हविर्गृहीतं स्यादित्यत्र अग्नये जुष्टं निर्वपामीत्यादौ च चतुर्थ्यास्तदर्थत्वं न सिद्ध्यत्ननमस्त्यस्यादिपदानिसंनियोगेन पुनः स्वर्गः फलत्वेनाभिमत इति केचलं देवताया उद्देश्यत्वाभावात् अवांतरव्यापारो वक्तव्यार्थो न नस्वाहिस्वाहेत्युपपदविभक्तान्यासनेन च प्रीतिर्व्यापारः तस्यान्यधर्मत्वेन स्वर्गजनकत्वाभावात् देवतातु स्वर्गादावधिकृता फलं दातुं शक्नोति । अतो द्रव्येणाधीनादेवताव्यापारः सा चानित्याचेतना च यथानुरूपं च फलं नियन्तुं शक्ता परं तस्या अपुरुषार्थत्वात् पुरुषस्याभिप्रेता भवतीति न तत्प्रायणा यागस्यान्यथा सिद्धिः । अतो मध्ये व्यापाररूपदेवतापरत्वेऽपि भगवत्परत्वं यतो देवाः नारायणस्यांगेभ्यो हि आविर्भूय जाताः मखांगसेवार्थप्रवृत्ताः अंगतात्पर्ययुक्ता भवंति किंतु अंगिनियमस्यापि अंगिन्येव वक्तव्यानि यापि तेषां विग्रहस्यैवांगत्वात् तत्र जाता अंगजा भवंति प्रतिपक्षेऽपि दृष्टत्वात् प्रागाणिकत्वाच्च पुनः स्मरणादि कल्पने न गौरवाय किं च यत्र देवताव्यापारत्वेन गृहीता मस्वर्गादिः उद्देश्यो भवति तत्र स्यलोकात्वसुखविभागद्वैयत्वं न व्यभिचरति स्वर्गादिलोकानां हृदा स्वर्गादिलोक इत्यादिना तदवयवत्वेन प्रतिपादनात् "अस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंती"ति श्रुत्या भगवत एवानंदांशत्वात् स्वर्गादीनां यागकर्तुः स्वसंपादने भगवदानंदोपजीवकत्वात् फलदातृ भगवत्क्रियानिष्पादकत्वात् भगवत्परत्वं सुखस्यापि एवमवांतर महाफलयोर्भगवदीयत्वं तदर्थं प्रवृत्ता मखा अपि भगवत्परा इत्यधियाद्भुतो वाक्यार्थविवक्षायामपि भगवत्परत्वविमर्शः सिद्धः १५

अतः परं पुराणानां भगवत्परत्वविमर्शः कर्तव्यः पाक्षिको दोषः परिहर्तव्य इति तत्र पुराणार्थचतुष्टयं सांख्ययोगः पशुपतिमतवैष्णवप्रतिपाद्यं तत्रांतिमस्यैतत्प्रवेशाशविरोधशंका योगो हि चित्तवृत्तिनिरोधात्मकः स्वतो पुरुषार्थसाधनं भवितुमर्हतीति नैव वेदविरुद्धार्थकल्पयितुं शक्नोति अप्रामाणिकत्वप्रसंगात् न चाणिमादयः तस्य मुख्यं फलं मोक्षपर्यवसायित्वाभावे अशास्त्रत्वापातः सिद्धयस्तु अंतरायभूताः कालक्षपणहेतवश्च इत्यप्रेवस्य ते अतो मोक्षं साधयन् योगो भगवति चित्तैकाग्र्यं साधयन्नेव साधयति सबीजनिर्बीजध्यानयोः भगवच्चरणारविंदविषयत्वात् अतस्तस्यापि अवांतरविवक्षया पूर्ववद्भगवत्प्रीतिरवांतरव्यापार इति कल्पनीयं चित्तसंस्कारपरत्वेऽपि फलं भगवदधीनमेवेति भगवन्मुखानिसृतत्वमवश्यं कल्पनीयं योगा इति बहुवचनेन सर्वयोगभेदा भगवत्परा एव एतस्य भगवत्परत्वमग्रे विस्तरेण वक्ष्यते भगवत्प्राप्त्युपायत्वात् सामान्यतस्तत्परत्वमविवादं तपस्तु भगवदुपयोगिदेहेंद्रियसंपादकत्वेन तत्परमेव अन्यथा क्लेशात्मकस्य तस्य पुरुषार्थपर्यवसानं न स्यात् पशुपतिमतं तु तपस्यैवोपक्षीणं ज्ञानं द्विविधं औपनिषदं सांख्यसिद्धं च तच्चयद्यपि परस्परं विरुद्धं औपनिषदं हि सर्वस्यात्मत्वप्रतिपादनेनात्मत्वेन सर्वविषयकं भवति इदं तु सर्वस्यानृतत्वेनात्मविषयकं तथापि प्रथमप्रवृत्तस्य आत्मानात्मसंस्कारात् पृथक्कृत्यात्मावगमनं मुख्यं अन्यथा सर्वस्यात्मत्वप्रतिपादने आत्मज्ञानात् अशक्यमेव स्यात् ज्ञानस्य च ज्ञेय एव तात्पर्यं ज्ञेयस्तु नारायण एव आत्मत्वात् सर्वत्वात् ब्रह्मत्वाच्च गतिरपि पूर्वोक्ता भगवत्परैव सा हि ब्रह्मज्ञानफलं भवति तदुक्तं विदंति हि ब्रह्मगतिमित्यत्र ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

जगद्गुरुर्विश्वस्रष्टा त्वं भवस्येवेति तुभ्यमादरदायिनः सन्तः किं मायामोहिताः । सत्यम् । भगवत्सम्बन्धं विना ये आदरदायिनो ये च तस्मादादरग्राहिणश्च ते उभे अपि बहिर्दर्शिनो भगवतः पृष्ठदेशस्थया मायया मोहन्त एवेत्याह । विलज्जमानया ममकपटमसौ जानातीति कपटिन्या स्त्रिया इव यस्य दृष्टिपथे स्थातुं विलज्जमानया अर्थात् तत्पृष्ठदेशे एव स्थितवत्या अमुया मायया विमोहिता विकत्थन्ते । अत्र तद्वैमुख्यमेव तत्पृष्ठदेशो ज्ञेयः । तद्वैमुख्ये सत्येव तस्याः प्रभावो न साम्मुख्ये इत्यर्थः ॥ १३ ॥

यद्रूपमित्यादिप्रश्नद्वयस्योत्तरं वक्तुं प्रथमं भगवद्व्यतिरिक्तानामन्यस्याभावमाह द्रव्यमिति । द्रव्यं महाभूतानि उपादानरूपाणि । कर्म जन्मनिमित्तम् । कालः गुणक्षोभकः । स्वभावस्तत्परिणामहेतुः । जीवो भोक्ता । वासुदेवात् परोऽन्योऽर्थो नास्तीति द्रव्यादीनां मायाकार्यत्वात् मायया जीवस्य च तच्छक्तित्वादिति विश्वस्य वासुदेवरूपत्वमिति यद्रूपमित्यस्योत्तरमुक्तम् ॥ १४ ॥

नारायणः परः कारणं येषां ते । अनेनैव शास्त्रयोनित्वप्रतिपादनेन ईश्वरे प्रमाणं सर्वज्ञत्वादिकञ्चोक्तम् । तथा वेदादयो नारायणे आविर्भूताः नारायणाधीनत्वाच्च नारायणपरा इति यदधिष्ठान मित्यस्य चोत्तरमुक्तम् ॥ १५ ॥

[illegible]ध्यादिष्व वीक्षः ॥ १६ ॥

तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ।
सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥ १७ ॥
सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ।
स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥ १८ ॥
कार्य्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ।
बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥
स एष भगवाँल्लिङ्गैस्त्रिभिरेभिरधोऽक्षजः ।
स्वलक्षितगतिर्ब्रह्मन् सर्व्वेषां मम चेश्वरः ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप ।

नकेवलंभगवन्माययामोहितामामेवजगद्गुरुंमुवंत्यपित्वहमीश्वरोऽस्ममममेवेदमितिविकत्थंतेइत्याहुः विलज्जमानयेति यस्यप्रधानक्षेत्रज्ञपतिरि-त्यादि श्रुतेः चेतनाचेतनस्वामिनःईक्षापथेस्थातुंविलज्जमानयाऽमुयामाययाविमोहिताः अतएवदुर्धियःममाहमिति विकत्थंतेश्लाघंते ॥ १३ ॥

एवंस्वस्मात्परंपरमेश्वरंनिरूप्य अथयदधिष्ठानमित्यादिनवप्रश्नानांविश्वस्यभगवानेवाधिष्ठानादिकमित्युत्तरंवक्तुंमवंस्यस्वरूपताभिन्नत्वेऽपिचिदचिच्छक्तिमतःकारणाद्भगवतःसकाशात्पृथगवस्थानाभावेनाऽभिन्नत्वमाह द्रव्यमिति हेब्रह्मन् द्रव्यंप्राकृतम महदादिशरीरांतम कर्मजन्मनिमित्तम कालःक्षोभकः स्वभावः परिणामहेतुःजीवःक्षेत्रज्ञः एवमुक्तानुक्तःअर्थः अन्योवेदरूपःशब्दश्च वासुदेवात्परःअवासुदेवात्मकस्तत्त्वतोनैवास्ति"सर्वंखल्विदंब्रह्म"ति श्रुतेः वासुदेवःसर्वमितीतिस्मृतेश्च ॥ १४ ॥

एतदेवप्रपंचयति नारायणपराइतिद्वाभ्याम नारायणःपरःकारणंयेषांतेनारायणपराः "तस्यवामहतोभूतस्यनिःश्वसितमेतदृग्वेद" इति श्रुतेः देवाःअस्मदादयःनारायणांगाज्जाताः "नारायणाद्ब्रह्माजायतेनारायणाद्रुद्रोजायतेएकोहनारायण." इत्यादिश्रुतेः नारायणःपरःआश्रयो येषांतेतथोकाःनारायणःपरःफलंयेषांतेमखाःक्रतवः ॥ १५ ॥

योगःपूर्वोक्तः तपःकृच्छ्रादि ज्ञानंवेदांतजन्यम गतिरर्चिरादिः ॥ १६ ॥

भाषा टीका ।

जिनकी दृष्टिपथ में स्थित होने को विलज्जमान जिस माया से मोहित दुर्बुद्धि जन जगत् में 'मेरा' कह कर प्रलाप किया करते हैं ॥ १३ ॥

ब्रह्मन्—द्रव्य कर्म काल स्वभाव और जीव वासुदेव भगवान् से भिन्न तत्त्वतः कोईभी वस्तु नहींहै ॥ १४ ॥

वेद सब नारायण पर हैं देवता सब नारायण के अंगज है । लोक सब नारायण पर है । यज्ञ सब नारायण पर हैं ॥ १५ ॥

योगभी नारायण पर है तपभी नारायण पर है ज्ञानभी नारायण पर है गतिभी नारायण पर है ॥ १६ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

तर्हि त्वं किं करोषीत्यपेक्षायामाह । तस्य सृज्यमपि तेन सृष्टोऽहं सृजामि । ईक्षया कटाक्षेण । तत्र हेतवः द्रष्टुरित्यादयः ॥ १७ ॥

ननु कुतोऽयं जीवेश्वरविभागः यतस्त्वं प्रेर्य्यः स च प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह सत्त्वमिति त्रिभिः । निर्गुणस्यापीश्वरस्य एते त्रयो गुणाः बध्नन्तीत्युत्तरेणान्वयः । कथम्भूताः तेनैव स्वातन्त्र्येण स्थित्याद्यर्थं मायया गृहीताः ॥ १८ ॥

वस्तुतः सर्व्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्नन्ति । क । कार्य्यमधिभूतं कारणमध्यात्मं कर्त्ता अधिदैवं तेषां भावस्तत्त्वं तस्मिन् । द्रव्यं महाभूतानि, ज्ञानशब्देन देवताः, क्रियाः इन्द्रियाणि, तदाश्रयाः तेषां कारणभूताः । तत्तदभिमानेन बध्नन्ति ॥ १९ ॥

अतः स एव (एव) बद्धमायः । एभिर्गुणैर्लिङ्गैर्जीवानामावरकैरुपाधिभिः सुष्ठु अलक्षिता गतिस्तत्त्वं यस्य सः । स्वैर्भक्तैरेव लक्षिता गतिर्यस्येति वा ॥ २० ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तट्टिप्पणी ।

[गुणाः शुक्लादयः इत्यमरकोषविधानात् गुणाः शुक्लरक्तकृष्णवर्णा इति पूर्वश्लोकोक्तस्य त्रयो गुणा इति वाक्यस्य विशेषणम । यद्वा गुणोऽप्रधानमिति मेदिनीकोषात् स्थित्याद्यर्थं मायया गृहीता अप्रधानरूपा इति पूर्वश्लोकेनैव सम्बन्धः । अतः स्वामिकृतटीकासम्मतपूर्वश्लोकेनान्वितस्य बध्नन्तीतिपरश्लोकस्यान्तर्गतगुणाइतिपदस्य न पौनरुक्तिशङ्केति ॥] अधिभूतं गोलकम् । अध्यात्मम इन्द्रियम् । अधिदैवम इन्द्रियप्रवर्त्तकदेवता ॥ १९ ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एवंसर्वंतदधीनमितिकथनेनन्नाहंस्वेदपरंत्वस्मिन्नित्यंशस्योत्तरमुक्तंभवति तर्हित्वंकिंकरोषीत्यपेक्षायामाह तस्येति अखिलांतरात्मनः सर्वांतर्यामिणः अभिद्रष्टुः सर्वज्ञस्यईशस्वसर्वस्ववशीकृत्यामियंतुः कूटस्थस्यनिर्विकारस्येक्षयैवसंकल्पकरूपज्ञानेनैवसृष्टोऽहंतेनचांदितःसृज्यं सृजामीत्यन्वयः सतुप्रयोजकोहंतुप्रयोज्यइतिभावः ॥ १७ ॥

ननुकुतोऽयंनियोज्यनियोजकभावःकुतोवातस्यसर्वज्ञत्वादयोधर्माःस्वस्यतुतद्विपरीताइत्यपेक्षायांमायीश्वरस्त्वमायावश्यस्तावाज्यामित्याह सत्त्वमिति निर्गुणस्यहेयगुणरहितस्यकल्याणगुणानांसमनंतरमेवोक्तत्वाद्विभोर्व्यापकेनभगवतोमायाप्रकृतिद्वाराःस्थितिसर्गनिरोधेषुनिमित्तेषुस्थित्याद्यर्थं सत्त्वादयस्त्रयोगुणागृहीताः स्वनियम्यत्वेनपरिगृहीताः सृष्टिस्थितिसंहाररूपलीलापरिकरत्वेनसत्त्वादयईश्वरेणपरिगृहीताइत्यभिप्रायः ॥ १८ ॥

एवंगुणानामीश्वरलीलापरिकरत्वमुक्त्वाजीवबंधनत्वमाह कार्येति कार्यंशरीरंकारणमिंद्रियंताभ्यांकर्तृत्वेनिमित्तेपुण्यपापनिष्पादनार्थे गुणाःसत्त्वादयःस्वरूपतोऽव्ययंमायिनंमायावश्यंसंबंधमात्रेणनित्यंपुरुषंजीवंबध्नंतीत्यन्वयः गुणान्विशिनष्टि द्रव्येति मोहनप्रकाशनप्रवर्त्तनस्वभावाः द्रव्यशब्दस्यमोहनवाचित्वंपारिशेष्यादवगम्यते अतएवास्मिन्नध्यायेबहुशःप्रयोगाश्च सत्त्वंरजस्तमइतिगुणाःप्रकृतिसंभवाः निबध्नंतिमहाबाहोदेहेदेहिनमव्ययं तत्रसत्त्वंनिर्मलत्वात्प्रकाशकमनामयं सुखसंगेनबध्नातिज्ञानसंगेनचानघ रजोरागात्मकंविद्धि तृष्णासंगसमुद्भवंतन्निबध्नातिकौंतेयकर्मसंगनदेहिनं तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनां प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारतेति गीतावचनमाप्यत्रस्मार्त्तानि ॥ १९ ॥

एवंगुणानांजीवबंधकत्वमुक्त्वाथस्वलीलापरिकरीकृतमायःपरमेश्वरःसर्वेषांममचेश्वरइत्याह सइति ।लिंगैःसत्त्वादिगुणैःशरीरभूतप्रकृतिकर्तृरूपलक्षितः स्वलक्षितगतिःस्वलक्षितास्वच्छन्दागतिर्यस्यसतथोक्तः नतुनवादर्शितपथानावितिवदन्यवर्शितमार्गःसएवपर्वावधिश्वर्यसंपन्नो भगवानहे ब्रह्मन्नारदसर्वेषांममचेश्वरःनियंता ॥ २० ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

ननुभवतःस्रष्टृत्वाभावेकथंत्वन्नामलोकेस्यात्तंवर्त्ततइत्यतस्तत्प्रकारंदर्शयति तस्यापीति तद्दृष्टिप्रतिघट्टुंकोऽपिसमर्थोनास्तीति ईशस्येति ईशित्वंचवरादिप्रामंजति निर्विकारस्येति एतदपिबलवत्प्रतिबंधकेनान्यथानभवतीत्याखिलस्वामिनइति एवंविधस्यतस्यहरेरपिशब्दात्अव्यक्षईक्षयैवकटाक्षवीक्षणेनैवाभिचोदितस्तेनसृष्टोऽहंसृज्यंजगत्सृजामीत्यन्वयः एवशब्देनसृष्टौप्रयोजकांतरंनिवारयति ॥ १७ ॥

एवंहरेर्मुख्यकर्तृत्वंप्रदर्श्याधुनायुगपत्क्रमशोऽपिवेतिप्रश्नंपरिहरति सत्त्वंरजस्तमइति तेनहरिणानित्यंगृहीताअपिसत्त्वंरजस्तमइतित्रयोगुणानिर्गुणस्यसततंसत्त्वादिगुणरहितस्यविभोर्मायियेच्छयास्थित्यादिपुनिमित्तभूतेषुक्रमशोयुगपच्चगृहीताइत्यन्वयःमायेतिविशेषणान्मूलसृष्ट्यादिपुक्रमशोवेदंदिनसृष्ट्यादिषुयुगपत्गृहीताइतिविशेषः तदुक्तं नित्यंगृहीताःस्थित्यादिषुविशेषतः युगपत्क्रमशश्चेति ॥ १८ ॥

रजोगुणमुपादानीकृत्यसृष्टिवक्षयत्हरेःसत्त्वादिगुणोजीवबंधकत्वमहिमानमाह कार्येति पुरुषमितिजातावेकवचनं द्रव्यज्ञानक्रियाश्रयाः द्रव्यंतामसाहंकारकार्यंशरीरं ज्ञानंवैकारिकाहंकारकार्यमनःश्रोत्रेंद्रियाणिच क्रियातैजसाहंकारकार्यंवागादींद्रियजातं आश्रयोयेषांतेतथोक्ताः एवंविधाः प्रकृतेःसत्त्वादयोगुणाअभिमानमंतरेणनित्यदामुक्तंप्रकृतिसंबंधविधुरंमायिनंस्वतोज्ञानिनंपुरुषंजीवसमुदायंकार्यकारणकर्तृत्वेबध्नंतीत्यन्वयः तत्रायंविभागः तमोगुणःकार्यशरीरेतद्गतदुःखाद्यनुभवेनबध्नाति रजोगुणःकर्मकारणेंद्रियैःकारणेषुकर्मसुबध्नाति सत्त्वगुणस्तुमनसाज्ञानेंद्रियैश्चांतरंयत्सुखमनुभवामीतितत्रकर्तृत्वेबध्नाति इदमुक्तंभवति शरीरगतदुःखाद्यनुभवे तमोगुणःकर्मसुरजोगुणोऽहंसुखीतिसुखानुभवेसत्त्वगुणःकारणं गुणानामचेतनत्वेनस्वतःप्रवृत्त्यनुपपत्तेः तन्नियमनेकारणमीश्वरेच्छेतितदुक्तं ज्ञानेंद्रियैश्चमनसासत्त्वं बध्नातिपुरुषं रजःकर्मेंद्रियैर्नित्यंशरीरेणतमस्तथेत्यादि ॥ १९ ॥

नकेवलमेतानिदेहेंद्रियमनांसिबंधकानि । हरिप्रसादसामग्रीयोग्यानांमुक्तिसाधकानिचेत्याह सएषइति योगेनस्वरोचिषाविश्वमित्याद्यकार्यकारणकर्तृत्वमन्येनग्रंथेनप्रतिपादितःसएषोऽधोक्षजोभगवानेतैस्त्रिभिर्देहेंद्रियमनोभिर्लिंगैर्ज्ञानोपायलक्षणैर्यमादिसाधनैर्यतमानैरेतैर्जीवैःस्वलक्षितगतिःप्रदर्शितस्वरूपोभवति एतदुक्तंभवति देहेंद्रियमनोजयिनरंतरवसाधनैर्भगवत्प्रियंस्तंपश्यंतीति स्वप्रसादादिभिर्जीवःपश्यत्तेनस्वलक्षितमितिच अधःकृतेंद्रियजन्यज्ञानत्वेनमुक्तोऽप्यधोक्षजःस्यादित्यतःसर्वेषामिति सर्वेषांमुक्तानां स्वस्यसर्वांतर्भावेऽपिनारदस्य विशेषशंकापरिहारायममचेतिधिशेष्योक्तम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

सृज्यं स्रष्टुं योग्यमपि ॥ १७ ॥

ननु जीवेश्वरयोः प्रेर्यप्रेरकत्वं कुतस्तत्राह सत्त्वमिति त्रिभिः । निर्गुणस्यगुणास्पृष्टस्य विभोः स्वाभाविकशक्त्या व्याप्तसर्वस्य मायया विलज्जमानया यस्येत्याद्यनुसारेण बहिरङ्गया शक्त्या स्थित्यादिषु निमित्तेषु सत्त्वादयस्त्रयो गुणा गृहीता भवन्ति ॥ १८ ॥

त एव गुणाः कार्यादित्वे सत्तत्तादात्म्यपुरुषं जीवं बध्नन्तीति पृथगनुषङ्गः द्विःपाठात् । तत्र कार्यं गोलकम् अधिभूतम् । कारणमिन्द्रियमध्यात्मम् । तत्प्रवर्त्तकतया कर्त्री देवताऽधिदैवम् । कीदृशमपि बध्नन्ति तत्राह नित्यदा मुक्तमपि । नन्विदं विरुद्धं तत्राह मायिनमिति । मायःऽप्रमायाकृतो मोह उच्यते । स चानादिति एवेशविमुखस्य तस्य मायापारवश्यादेव । तेन च गुणावेश एव बन्ध इति साक्षाद्बन्धाभावान्नित्यमुक्तत्वमपि युज्यत इति भावः ॥ १९ ॥

त्रिभिर्लिङ्गैर्द्वारभूतैः सुष्ठु अलक्षिता यत्किञ्चिदेवानुमिता गतिर्यस्य सः । गुणप्रकाशैरनुमीयते भवानित्यादेः । यद्वा भगवान् सर्वभूतेष्वित्यादिरित्यनुमानेन त्रिभिर्लिङ्गैः कारणादितयोपलक्षितो भगवान् भक्तैरेवानुभूतस्वरूप इत्यर्थः । अत्रेत्थम्भूतलक्षणे तृतीया ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवं विमर्शेन निरूप्य यद्रूपमित्यादि षट्प्रश्नान् अग्रे यत्स्वरूपनिरूपयिष्यन् यद्विज्ञानमित्यादि प्रश्नचतुष्टयस्य चतुर्भिः श्लोकैरुत्तरमाह तस्यापीति तत्र प्रथमं यद्विज्ञानं तस्योत्तरं इदं विज्ञानं जगत्कार्योपयिकमिति न पूर्वेणागतार्थता यतो विज्ञानं यस्येति प्रश्नात् प्रथमं तस्य विज्ञानं वक्तव्यं तथा च उपादानगोचरापरोक्षज्ञानं तत्साधकप्रकारेण साधनं ज्ञानं च प्रथमं भगवतोऽस्तीत्याह तस्यैव कर्तृत्वात् तस्यापि यत्सृज्यं तत्तेनैवाभिध्यादिना सृजामीति संबंधः तस्य सृज्यत्वे हेतुः द्रष्टुरिति विश्वं कार्यं भगवतः सृज्यं तस्यैव द्रष्टृत्वात् कं दृष्ट्वा हि कार्यं कर्तुं शक्यं नहि ज्ञानमात्रेण कर्तुं शक्यमित्यत आह ईशस्येति ईशः समर्थः सर्वं कर्तुमिति ननु क्रियाज्ञानशक्तिमत्त्वेऽपि अप्राप्तवैशेषिकवत् क्लेशसंभवात् आत्मनो विकृतत्वापत्तेः भगवतः कर्तृत्वं न संभवतीत्याशंक्याह कूटस्थस्येति सोऽहमेव करोति कूटस्थ एव न तु विक्रियते यथा कामधेनुः कल्पवृक्षः चिन्तामणिर्वा योगी वा यथा मन सा सृजति अतः कूटस्थस्यैव कर्तृत्वसंभावनया काऽप्यनुपपत्तिः ननु भगवान् सृष्टिं नार्हति कर्तुं प्रयोजनविरोधात् न हि स्वार्थं जीवार्थं वा करोति स्वार्थकरणे जीवानामनुत्पादनं स्यात् तत्र भक्तिमार्गो विरुध्येत सर्वेऽपि मार्गा विरुध्येरन् बंधमोक्षाद्यभावात् वैचित्र्यमज्ञानं च न स्यात् अत उभयार्थं जीवार्थं वा कर्तव्यमिति मन्तव्यं तत्र स्वांशेऽस्वस्यानंदपूर्णत्वं भजनपरार्थत्वे वैषम्यनैर्घृण्ये प्रसज्येयातां अत आह अखिलात्मन इति अखिलानामात्मा आत्म सृष्टेन वैषम्यादि आनंदाविरोधस्तु नास्ति अखिलत्वात् यथाऽखिलाः आत्मानो न भवंति केनाप्यंशेन तेषां चार्थे सृष्टिः क्रियते उपभोगश्च संपाद्यते

एवं स्वस्य यः पूर्ण आनंदः तस्याप्यात्मभोगादिना तस्याप्युपचयं करोति तथापि तस्यानित्यत्वं न्यूनत्वं वा तस्मादुभयविधाऽपि सृष्टिः भगवतः कर्तुं युक्ता तथापीश्वरत्वात् भक्तिमार्गव्यवस्थापनाय मां सृष्ट्वा ईक्षयैवाज्ञाप्य मद्द्वारैव सर्वं सृष्ट्वा स्वयं कूटस्थ एवास्थितः तदा अहं तत्सृज्यं सृजामि तत एव ज्ञानशक्तिक्रियाशक्ती च लब्धे तदाह ईक्षयैवेति दृष्ट्या प्रेरणात् उभयप्राप्तिः ॥ १७ ॥

अनेन सामान्यतः स एवाधारः स एव नियंता तदात्मकश्चाहमित्युक्तमेव परमेतस्य हेतुर्विचार्यते कथमयं भगवान् त्वामन्यान्वा सृजति कथं वा त्वास्मिन्नियम्यनियामकभावस्तत्राह सत्त्वं रजस्तम इति द्वाभ्यां अवस्थितैरीति काशकृत्स्नइति मतमत्र सिद्धं भविष्यति यथोर्णनाभिः सृष्ट्यर्थं कामूर्णामुद्गमते तथा भगवानपि त्रिविधसृष्ट्यर्थं त्रीन् गुणानुद्गमेत् गुणरूपत्वाच्च गुणशब्दव्यवहारः सद्रूपेणानिर्गतं सत्त्वमित्युच्यते केवलं चिद्रूपेण निर्गतं क्रियाशक्तिप्रधानत्वात् सदानंदाभावाच्च रज इत्युच्यते आनंदांशाच्च तमः ते भगवद्रूपा एव भगवता सृष्टाः न च भगवति ते पूर्वं स्थिताः तथा सति भगवदात्मकास्तेन भवेयुः यथा कार्पासे न हि सूत्रं तदेव हि पश्चात्स्वावयवैः पौर्वापर्यमापद्यमानः सूत्रतामापद्यते अत एव भगवान्निर्गुणः ते गुणाः पुनः स्थितिसर्गनिरोधेषु उत्पत्तिस्थितिलयार्थं ते गृहीताः तेषामपि ग्रहणं मायया एषा हि माया जगत्कर्त्रीति तुल्या मोहिका तदाह विभोरिति समर्थस्य जगत्कर्तुरित्यर्थः सा हि तच्छक्तिः सर्वरूप भगवत्संबंधात् सर्वप्रतिकृतिरूपा सा जगत्कारणे करणरूपा अतः करणांशस्य तत्परत्वात् करणरूपेणैव निर्गता गुणा इति ॥ १८ ॥

माययैव गृहीता ते मायावशे तिष्ठंति तत्पुत्रा इव अतो य एव भगवदंशो जीवः तस्यां रंतुमिच्छति तत्कार्ये वा तं ते गुणा बध्नंतीत्याह कार्यकारणकर्तृत्व इति कार्यमधिभूतं देहः कारणमध्यात्ममिंद्रियाणि कर्ता आधिदैविकः अंतःकरणं एतेषां भावः कार्यकारणकर्तृत्वं संघातमिति यावत् जीवस्य संघाततत्त्वनिमित्तं यथा केवलो जीवः संघातरूपी भवति ते हि मायया गृहीताः स्वकार्ये स्थापिताः तदाह द्रव्यज्ञानक्रियाश्रया इति द्रव्यमधिभूतं ज्ञानमधिदैवं क्रिया आध्यात्मिकी तत्रयं तेषामाश्रयः प्रत्येकमेकस्य अतः स्वस्वाश्रये ते बध्नंति आध्यात्मिकादिभावं परित्यज्य केवलं भावं तु न प्रयच्छन्ति सर्वदा बध्नंति बंधने मायासंबंध एव हेतुः न च संबंधमात्रमेव हेतुः अन्यथा भगवतोऽपि बंधनं स्यात् किंतु तत्र स्वातंत्र्ययोरभिमन्यते तस्यैव पतिरहमिति तदाह पुरुष इति न तु तां करणत्वेन कार्यार्थं यो गृह्णाति अतो गुणा बद्धा नियोज्या गुणकर्ता नियोजक इति एकस्मिन्नेव रूपद्वयमुपपद्यते ॥ १९ ॥

एवं जीवब्रह्मभावभेदं निरूप्य सामान्येन उत्सरितमपि यदाधाराद्युत्तरं विशेषाकारेणाह स एवेति मायातत्कार्याणां द्रव्यादीनां विशेषाधारत्वं भगवतश्च सामान्याधारत्वमिति तत्रोत्तरमुक्त्वा मायित्वेन विशेषात्मकत्वं च बोधितमिति यत्पर इत्येतदवशिष्यते नियामकस्य दर्शनपूर्वमात्मत्वात्तद्दर्शनेऽपि नियमनं न संभविष्यतीति अतो मेऽयमलिंगैः सत्त्वादिभिः सुष्ठु अलक्षितागतिर्यस्य यद्यपि स एवैषः य सृष्टा स एव बद्धः तथापि स प्रभु भगवान् एते च गुणाः भगवतो लिंगभूताः ज्ञापकाः यदि निर्गता धूमवत् दूरादेव पुरुषं ज्ञापयंति न तु तं वेदयंति अन्ये बंधशंकां वारयति एतेरिति एताव्रंतपवते तर्हि बद्धः कथं न बध्यते तत्राह अधोक्षज इति ते च तं पश्यंति क्रियां वा प्राप्नुवंति तदा बध्नंति तत्तु तेषामसंभावितमिति अत एव सुष्ठु अलक्षितागतिर्यस्य स्वैर्वा बद्धातिरिक्तैः मुक्तैर्वा लक्षितागतिर्यस्य वस्तुतस्तु भक्ताः भगवता सह पश्चाद्धा समायांतीति सर्वत्र निश्चयः अत एवाहं प्रभुनूर्त्वं तादृशः तथापि सर्वेषां मम च कारणत्वं च भगवानीश्वरो नियंता ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तर्हि त्वं किं करोषीत्यत आह । तस्य सृज्यमपि तेन सृष्टोऽहं सृजामि । किं स्वेच्छया न हि न हि ईक्षया तस्याज्ञयेत्यर्थः । द्रष्टुरिति । तथापि मम तस्य साक्षित्वे ईश्वरत्वे कूटस्थत्वे सर्व्वान्तर्यामित्वे सत्येव नान्यथेति स्वस्य जीवत्वं तस्य चेश्वरत्वं व्यञ्जितम् । तथा च श्रुतयः—एको देवः सर्व्वभूतेषु गूढः सर्व्वव्यापी सर्व्वभूतान्तरात्मा । सर्व्वाध्यक्षः सर्व्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च । इति एष भूताधिपतिरेष लोकेश्वरो लोकपाल इति । ब्रह्मादिपिपीलिकापर्य्यन्तसर्व्वप्राणिबुद्धिष्वविशिष्टतयोपलभ्यमानः सर्व्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते इति च ॥ १७ ॥

ननु कुतोऽयं जीवेश्वरविभागो यतस्त्वं प्रेर्य्यः स प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह सत्त्वमिति त्रिभिः निर्गुणस्य सत्त्वादिगुणरहितस्यापि त्रयो गुणा भवन्ति केन प्रकारेणेत्यपेक्षायामाह । विभोर्मायया स्थित्याद्यर्थं गृहीता इति तच्छक्तिगुणत्वेन तद्गुणत्वमित्यर्थः । तत्र मायया नित्यमेव तद्गुणरूपत्वेऽपि गृहीता इति प्रयोगो नित्यनरविग्रहत्वेऽपि कृष्णस्य तत्स्वेच्छयात्तवपुरितिवत् प्राकृतलोकोक्त्यनुकारेणाज्ञेयः ॥ १८ ॥

अत एव गुणाः पुरुषं जीवं भगवतस्तटस्थशक्तिवृत्तिरूपं बध्नन्ति । मायिनं मायासङ्गसहितं पूर्व्वोक्तयुक्त्या भगवतः पृष्ठदेशस्थानां जीवानां पृष्ठदेशस्थया मायया स्वत एव सङ्गसम्भवादिति भावः । नित्यमुक्तमिति जीवस्य यथा अनाद्यज्ञानं तथा अनादिज्ञानमप्यस्तीति सतिमान्ते व्यक्तीभविष्यति । क बध्नन्ति । कार्य्यमधिभूतं कारणमध्यात्मं कर्त्ता अधिदैवं तेषां भावस्तत्त्वं तस्मिन् । द्रव्यं भूतानि

कालं कर्म्म स्वभावञ्च मायेशो मायया स्वया ।
आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥ २१ ॥
कालाद्गुणव्यतिकरः परिणामः स्वभावतः ।
कर्म्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥ २२ ॥
महतस्तु विकुर्व्वाणाद्रजःसत्त्वोपबृंहितात् ।
तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः ॥ २३ ॥
सोऽहङ्कार इति प्रोक्तो विकुर्व्वन् समभूत्त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ।
द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

ज्ञानशब्देन देवताः क्रिया इन्द्रियाणि तदाश्रयास्तेषां कारणभूतास्तत्तदभिमानेन बध्नन्ति । अत्र ज्ञानक्रिययोर्वैपरीत्येन यथासंख्यं ज्ञेयम् ॥ १९ ॥

अतः स मायाशक्तिमान् एतैर्गुणैर्लिङ्गैर्जीवानामावरकैरुपाधिभिर्हेतुभिः सुष्ठु अलक्षिता अर्थात् तैर्जीवैरज्ञाता गतिस्तत्त्वं यस्य सः यद्वा एतैर्लिङ्गैः करणैः स्वज्ञानिभक्तैः कर्तृभिर्लक्षिता गतिर्यस्य गुणप्रकाशैरनुमीयते भवानित्यादेः ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अहंतु तेनैवसृष्टः उत्पादितः तस्य भगवतः अभिद्रष्टुः सर्वज्ञस्य ईशस्य सर्वनियंतुः कूटस्थस्य सर्वकारणत्वेऽपि निर्विकारस्वरूपस्य अखिलानां चिदचित्पदार्थानामात्मनः ईक्षया दृष्ट्याऽभिचोदितः प्रवर्त्तितः सृज्यं सृजामि तत्कृतमेव करोमि न तु स्वातंत्र्येण किंचित्कर्त्तुं शक्नोमीत्यर्थः ॥ १७ ॥

न केवलमस्मदादीनां तत्प्रेर्यत्वमात्रमपि तु प्रकृतेस्तद्गुणानां च तन्नियम्यत्वमिति तन्मायागुणैः सर्वे जीवा बद्धास्तद्बंधननिवृत्तिपूर्वकं तत्प्राप्त्यैतद्भजनं कर्तव्यमिति चाह सत्त्वमिति त्रिभिः विभोः चेतनाचेतनरूपस्य प्रकृतिद्वयव्यापकस्वरूपस्य सत्त्वं रजस्तम इति त्रयो गुणाः संति ते कीदृशाः गुणाः नेति शंकां परिहर्तुं विभुं विशिनष्टि निर्गुणस्येति सत्त्वाद्यस्पृष्टस्वरूपस्येत्यर्थः ननु कथं तर्हि विभोः गुणा इत्युक्तमित्यत्र तदचेतनप्रकृतिगुणत्वे सति तस्यैव गुणा इत्याह मायया अचेतनात्मिकया गुणमय्या स्वप्रकृत्या कार्यार्थं विभुना गृहीताः कार्याभिमुखीकृता इत्यर्थः ननु किं तत्कार्यं मत्राह स्थितिसर्गनिरोधेष्विति स्थित्याद्यभिमुखीकृता इत्यर्थः ननु किं तत्कार्यं मत्राह स्थितिसर्गनिरोधेष्विति स्थित्याद्यभिमुखीकृता इत्यर्थः ॥ १८ ॥

भगवतो मायानियंतृत्वमुक्त्वा जीवस्य परा प्रकृतिलक्षणस्य मायाबद्धत्वमाह कार्येति पुरुषं जीवात्मानं नित्यदा ते गुणा बध्नंति जन्ममरणप्रवाहविषयं कुर्वंति कथंभूतम् अमुक्तम् "जहात्येनां भुक्तभोगामजोऽन्य" इति भगवत्या श्रुत्योक्तो यो मुक्तस्तद्भिन्नम् कस्तर्हि बद्ध इत्याकांक्षायाम् "जो ह्येको जुषमाणोऽनुशेते" इत्येवंभूत श्रुतेः पूर्वभागमुपबृंहयन्नाह मायिनमिति मायाभोग्यत्वेन प्रयुतमायस्यास्ति न तु पास्यत्वादिना भगवान् मायी तम् कथंभूताः द्रव्यज्ञानक्रियाश्रयाः द्रव्यं महाभूतानि ज्ञानशब्देन देवताः क्रिया इंद्रियाणि तेषां हेतवः अत एव स्वकार्येष्वधिभूतादिषु तत्तत्वंतीत्याह कार्यकारणकर्तृत्वे इति कार्यमधिभूतं भोग्यभोगायतनादिरूपम् कारणमध्यात्मं जीवस्य भोक्तुः रूपादिभोगे चक्षुरादिकरणम् कर्ताऽधिदैवतं जीवस्य चक्षुरादिना रूपादिभोगकर्तृरूपकार्यस्यापकर्तृभूतं चक्षुराद्यधिष्ठातृदैवतम् तेषां भावस्तत्त्वं तस्मिन् ॥ १९ ॥

स एष मायाधिपतिः भगवान् अधोक्षजः त्रिभिः सत्त्वादिभिर्लिंगैरावरकैरुपलक्षितानां तन्मायागुणावृतानां सर्वेषां जीवानां मम च कारणमायागुणवियुक्तानां च ईश्वरो नियंता स च सर्वैर्नज्ञातगतिर्भवति अपि तु अनन्यशरणैरित्याह स्वलक्षितगतिरिति स्वैरनान्यभक्तैर्लक्षिता गतिर्यस्य ॥ २० ॥

भाषा टीका ।

उसीद्रष्टा ईश निर्विकार अखिलात्मा के सृज्य इस जगतको उसी की सृष्टि में उनही की ईक्षासे मोहित सृजताहूं ॥ १७ ॥

सत्व रज और तम निर्गुण के तीन गुण हैं । स्थिति सृष्टि और प्रलय के विभुकी मायासे गृहीतहैं ॥ १८ ॥

द्रव्यज्ञान और क्रिया के आश्रय ये गुण कार्य कारण कर्तृत्वमें नित्यमुक्त मायी पुरुषको बांध लेतेहैं ॥ १९ ॥

वह अधोक्षज भगवान् इन तीनों लिंगोंमें भी अलक्षित गति है (किसी प्रकार अनुमान किया जाताहै) ब्रह्मन् ! वही सबका ईश्वर है और मेराभी ईश्वर है ॥ २० ॥

श्रीधरस्वामिकृत भावार्थ दीपिका ।

तस्य सृष्टिप्रकारमाह कालमिति । कर्म्म जीवादृष्टम् । विबुभूषुः विविधं भवितुमिच्छुः ॥ २१ ॥

गुणानां व्यतिकरः क्षोभः साम्यत्यागः । परिणामो रूपान्तरापत्तिः । पुरुषईश्वरः तेनाधिष्ठितत्वं त्रयाणां विशेषणम् । कर्म्मणो महतश्चस्य ॥ २२ ॥

ततो महतस्त्वात् विकुर्व्वाणात् विक्रियमाणात् । तस्य च क्रियाज्ञानशक्तित्वात् त्रिगुणत्वेऽपि रजःसत्वाभ्यामुपबृंहितत्वम् ।

श्रीधरस्वामिकृत भावार्थदीपिका ।

अहङ्कारस्य त्वावरकत्वात् तमःप्रधानत्वम् । अतएवाहङ्कारकार्य्येषु तामसमाकाशादिकं बहु, राजसं सात्त्विकं चाल्पम् । एवं तदुपाधिषु जीवेष्वपि तथैव तामसाधिक्यम् ॥ २३ ॥

स च विकुर्व्वन् रूपान्तरं गच्छन् । त्रैविध्यमेवाह । वैकारिकः सात्त्विकः । तैजसो राजसः । यद्भिदा यस्य भेदाः । द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि । द्रव्ये महाभूताख्ये शक्तिर्यस्य । क्रियासु इन्द्रियेषु शक्तिर्यस्य । ज्ञानेषु देवेषु शक्तिर्यस्य । हे प्रभो वांसु शक्र ॥ २४ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य टिप्पणी ।

[कालमिति । पौराणिककसृष्ट्यादेः प्रकृतेर्महान् महतोऽहङ्कार इत्यादिश्रुत्यन्तरमूलकत्वात् कल्पान्तरप्रसिद्धत्वाच्च वेदान्तोक्तसृष्टिप्रक्रियया सह न विरोधः मायायाः सर्व्वसम्भवादिति प्राञ्चः ॥ २१ ॥ २२ ॥

तस्येति महत्तत्त्वस्येत्यर्थः ॥ २३—२९ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

एवमेकःसृजसिभूतानीतिप्रश्नस्योत्तरमुक्त्वायद्रूपाणीत्यादेःप्रश्नस्योत्तरंवदंस्तावत्सृष्टिप्रकारमाह कालमिति मायेशोमायाधिपतिः स्वया माययास्वसंकल्पेनयद्वाद्वारभूतयाप्रकृत्याविबुभूषुःप्रकृतिद्वारानानानामरूपभाग्भवितुमिच्छुर्यदृच्छयाअहतुकमपरप्रेर्योऽकर्मपरवशःआत्मन्यात्मनिप्राप्तंसंगतंयुक्तंकालंकर्मस्वभावंचोपादद कालोगुणवैषम्यरूपगुणक्षोभहेतुः कर्मजीवादृष्टं स्वभावःप्रकृतेःपरिणामस्वभावः एतेषामुपादानं नामस्वस्वकार्योन्मुख्यापादनम् ॥ २१ ॥

कालकर्मस्वभावोपादानफलंदर्शयन्महतःसृष्टिमाह कालादिति कालाद्धेतुभूताद्गुणव्यतिकरात्कालकृतगुणवैषम्यादित्यर्थः परिणामस्वभावतःप्रकृतेःपरिणामस्वभावात्कर्मणोजीवादृष्टाद्धेतोःपरमपुरुषाधिष्ठितादव्यक्तान्महतोमहत्तत्त्वस्यजन्मोत्पत्तिरभूदित्यर्थः तदधिष्ठितत्वं तदाहितस्वकार्यजननसामर्थ्यवत्त्वं अत्राव्यक्तादित्यध्याहारः पुरुषाधिष्ठितत्वाच्चाव्यक्तानुग्रहेणेतिदर्शनात् व्यतिकरःमिश्रणंसमानांविषमत्वापत्तिः यत्र गुणानांव्यतिकरोयस्मिन्निति बहुव्रीहिःअव्यक्तादित्यर्थः ॥ २२ ॥

महतोऽहंकारोत्पत्तिमाह महतस्त्विति विक्रियमाणाद्रजःसत्त्वोपबृंहितान्महतःद्रव्यज्ञानक्रियात्मकःमोहनप्रकाशनप्रवर्त्तनस्वभावःतमःप्रधानःतमोगुणप्रधानःअभवत् महतस्त्रिगुणात्मकत्वेऽपिक्रियाशक्तिज्ञानशक्तिप्रधानत्वाद्रजःसत्त्वोपबृंहितादित्युक्तं एवमहंकारस्यतमःकार्यप्रधानत्वात्तमः प्रधानइत्युक्तिः अतएवाहंकारकार्येषुतामसंबहुराजसंसात्त्विकंचाल्पमेवंमहत्कार्येषुतामसमल्पंतदितरद्बहुभयंवाह्यतिमन्तव्यम् ॥ २३ ॥

—तमःप्रधानस्यकिंनामधेयमित्यतआह सइति तस्यत्रैविध्यमाह विकुर्वन्रूपांतरंगच्छन्नहंकारस्त्रिधासमभूत्सम्यगभूत् यद्भिदायस्याहंकारस्यभिदावैकारिकस्तैजसश्चतामसश्चेतिसात्त्विकराजसतामसाहंकाराणांक्रमेणनामानि तेषांप्रतिनियतस्वभावानाह द्रव्यशक्तिरिति प्रातिलोम्यनत्रयाणांस्वभावप्रदर्शनं द्रव्यशक्तिःविमूढामहाभूताख्यद्रव्योत्पादनेशक्तिःसामर्थ्यंयस्यसतथोक्तः सात्त्विकाहंकारानुग्राहकत्वरूपायाक्रियातस्यांशक्तिर्यस्यसतथोक्तः प्रवर्त्तनमेवहिरजःकार्यं ज्ञानशक्तिःशब्दादिविषयज्ञानसाधनेन्द्रियोत्पादनेशक्तिर्यस्यसतथोक्तः एकादशानामिन्द्रियाणांसात्त्विकाहंकारकार्यत्वाद्राजसस्यतुतदनुग्राहकत्वात् ॥ २४ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

सृज्यसृजामिसृष्टोऽहमितीममर्थंस्पष्टयितुंसृष्टिप्रकारमाह कालमिति ब्रह्मज्ञाने मुख्यलक्षणं जगज्जन्मादि कारणत्वमेवेतिज्ञापयितुमिलतोवासृष्टिप्रकारमाहकालमिति मायेशोलक्ष्मीपतिःपरनामस्वनिमेषांतेसृष्टिकालप्राप्तौविबुभूषुःबहुधाभवितुकामःअनादितएवात्मन्यात्मनियदृच्छयास्वेच्छयाप्राप्तमेवकालं कर्मजीवानांनानाविधादृष्टं स्वभावंसात्त्विकादिलक्षणं चशब्दात्सगुणत्रयांप्रकृतिंस्वमायया स्वशक्त्याधिशेषतउपाददेइत्यन्वयः प्रकृतिंप्रविश्यस्वशक्त्याक्षोभयामासेत्युक्तंभवति यत्रान्यहत्वभावःस्यादीश्वरेच्छादिनाविना तदिच्छाहियदृच्छास्यादलस्तत्रयदृच्छयेति कालकर्मस्वभावादिनित्ययेशेच्छयासदाप्राप्तमेवविशेषेणसृष्ट्यादावुपयत्यजइतिच ईशावह्नीःपुरःसृष्ट्वातेववहुरूपतां तत्तन्नियामकतयाप्राप्तंकालाद्युपाददइतिवचनेश्योनमायामयीसृष्टिरत्रोच्यतइतिसिद्धम् ॥ २१ ॥

गुणव्यतिकरात्मकमूलप्रकृतेर्महत्तत्त्वोत्पत्तिप्रकारमाह कालादिति यदासिसृक्षुर्विष्णुःकालकर्मस्वभावरजोगुणानाविश्यसृष्ट्येप्रेरकस्तमोगुणोरजोगुणेनचसंयुक्तोऽभूत्सःगुणवैषम्यात्मकोगुणव्यतिकरः तस्मात्कालादितिपंचमीतृतीयार्थेकालेनसृष्टिहेतुना कर्मणःकर्मणाहिरण्यगर्भादृष्टेनतदुपकृतात् परिणामःस्वभावतइतितसिःसतृतीयार्थे विकारस्वभावयामूलप्रकृत्याचसहितात्पुरुषाधिष्ठितादिति पुरुषेणविष्णुनाधिष्ठायक्षोभमाणान्महतांमहत्तत्त्वस्यचतुर्मुखदेहस्थानीयस्यजन्माभूदित्यन्वयः गुणानांव्यतिकरोविषमावस्थायस्मिन्तस्मादव्यक्तादिति वा तदुक्तंगुणकालस्वभावेश्यईशेनाधिष्ठितत्वतः जगदादिर्महत्तत्त्वमभूत्तस्येच्छयाहरेरिति ॥ २२ ॥

तुशब्देनकालादिकमनुकर्षतिकालकर्मस्वभावेश्योविकुर्वाणाद्रजःसत्त्वोपबृंहितात्सत्त्वेनानुस्यूतरजोगुणेनप्रवृद्धान्महत्तत्त्वात्तमःप्रधानतत्त्वविशेषोऽभवदित्यन्वयः द्वितीयस्तुशब्दोमहत्तत्त्वमपेक्ष्यतमःप्रधानत्वंनेतरापेक्षयातदपेक्षयासत्त्वप्रधानएवेत्यस्मिन्नर्थे इतोऽपतमःप्रधानत्वमौपचारिकमितिभावेनाहद्रव्येति द्रव्याणिभूतानिज्ञानंज्ञानेन्द्रियाणिक्रियाकर्मेन्द्रियाणिचात्मास्वरूपंयस्यसतथा ॥ २३ ॥

किंनामकोऽसौपदार्थइतितत्राह सोऽहंकारइति तद्विभागमाह कुर्वन्निति त्रीणिदर्शयति वैकारिकइति यस्याहंकारस्यभिदाभेदः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

आत्मनि प्राप्तं लीनं सन्तम्। यदृच्छया स्वैरितया उपाददे सृष्ट्यर्थमङ्गीकृतवान्। तच्च न स्वतः किन्तु माययैव ॥ २१ ॥

ईश्वरस्य प्रभावरूपत्वेन आदौ लीनत्वात् कालः स्वयमेव प्रथमं कारणम्। ततः स्वभावे परिणामहेतौ कर्म्मण एव धर्म्मविशेषे समुद्बुद्धे तद्द्वारा कारणम् ततश्च कर्मणय एवोद्बुद्धे तद्द्वारा कारणमिति ज्ञेयम्। पुरुषाधिष्ठितात् ईश्वरेच्छया प्रवृत्तात् ॥ २२ ॥

विकुर्व्वाणात् विशिष्टं क्रियमाणादित्यर्थः। तमःप्रधानस्त्वभवदित्यत्र च इत्यध्याहार्य्यम्। परेण स इत्यनेन योजयितव्यत्वात् ॥ २३ ॥

सोऽहमिति सार्द्धकम्। करणं कारश्रेणा विक्षेप इति यावत्, विगतः कारो विक्षेपो यस्मात् तत्, शान्तस्वभावं सत्त्वमित्यर्थः, तेन चरति प्रवर्त्तते वैकारिक इत्यर्थः। तैजस इति। क्षोभकत्वात् तेजो रजस्तत्र भवस्तैजसः। तामसस्तु स्पष्टार्थः। किन्तु रजस एव विकारहेतुत्वात् सत्त्वे तमसि च कार्य्योत्पत्तये तदंशसमवायो ज्ञेयः ॥ २४ ॥

———

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी।

एवंप्रश्नचतुष्टयंपरिहृत्ययद्रूपमित्यादिपदप्रश्नानुत्तरयितुमारभते कालंकर्मस्वभावमिति त्रयाणामत्राध्यायेउत्तरं त्रयाणामग्रिमाध्याये तत्र प्रथमंयद्रूपमित्यस्योत्तरमाह स्वभावलोयस्तदग्रेवक्ष्यते परिदृश्यमानरूपत्वोयत्तदिदं कालकर्मस्वभावरूपमिति अधिष्ठानंतुतत्त्वानि तत्सहिता भगवतःसृष्टिरेणामिति तत्रसर्वस्यापिजगतःकालकर्मस्वभाववत्त्वेपूर्वंभगवताकालकर्मस्वभावानांग्रहणंहेतुः एतेहिकालकर्मस्वभावाःभगवतो रूपविशेषाः अक्षरभेदाः सर्वत्रपरिभ्रमंति तेयदृच्छयाभगवत्सन्निकटेऽपिसमागताःतदाभगवतातेगृहीताःतेपुनःकरणकोटावेवनिविष्टाइतिमाययैव गृहीताः परमत्रमायाकरणं नतुकर्त्री सापिनव्यामोहिका किंतुस्वकीया मायायाश्चायनियामकः नतुमायाभावंप्राप्तः अस्यांसृष्टौजीवानांबंधने उत्पत्तिस्थितिप्रलयेषुचगुणानामुपयोगः नन्वस्यनानात्वं अतएवविशेषेणानुगृहीतः नानारूपोभविष्यामीतितानृगृहीतवान् ॥ २१ ॥

माययापुनर्गृहीतास्तेऽपिनियाज्याजाताःअतस्तेषांनियोगमाह कालाद्गुणव्यतिकरइति पूर्वंमायया गुणागृहीताःपश्चात्कालादयःअतस्ते गुणेषुप्रविष्टाःतत्रकालाद्गुणानां व्यतिकरोजातःसंपर्कोजातः तदनुस्वभावसंबंधात्संपृक्तागुणाःपरिणताजाताःतत्रापिकर्मजन्मनिमित्तं तत्रपरिणतिः परिणामंतत्रतुगुणत्रयमात्रेकर्मसंबंधाज्जन्मरूपंजातं अनेनत्रैविध्यंसृष्टमुक्तं यत्रकालाद्गुणव्यतिकरएवसभूतभविष्यद्वर्तमाना त्मकःसंततस्वरूपकालएवजातःतत्रापिस्वभावःअभिव्यक्तिःविपरिणामलंभतत्रवादिरूपंघटरूपंभवति ततोऽपिकर्मचेदाधिकं प्रविशति तदाजीवा भिमानदेहादिसंघातस्यजन्मभवति तदिदमाह जन्ममहत पुरुषाधिष्ठितादभूदिति पुरुषाधिष्ठानंसर्वत्र तथाऽपिपरिणतंवस्तुपुरुषाधिष्ठिता द्वेतःमहतोजन्मजातं तस्याहितमांतरभावात्प्रथमंस्थूलतयाउपपन्नमहादित्युच्यते ॥ २२ ॥

एवमकस्यजीवस्यकालकर्मस्वभावैर्देहसंबंधोनिरूपितः इदानींभगवच्छायायातेगुणाःमहत्तत्त्वएवलयाइत्याह महतस्त्विति कालकर्म स्वभावैः स्वस्मिन्गुणव्यतिकरादिकार्येकृतेसोऽपिविकुर्वाणोजातः तत्रगुणत्रयंसहायत्वेनप्रविशति तमस्तुप्राधान्येन तदाह रजःसत्त्वोपबृंहि तात्तमःप्रधानादिति कश्चित्त्रिगुणात्मकःपदार्थोजातः त्रयाणामनुप्रवेशात् तदाह द्रव्यज्ञानक्रियात्मकइति ॥ २३ ॥

अस्यनामाह सोऽहंकारइतिप्रोक्तइति पूर्वंतुस्थूलमेकंकार्यमुत्पन्नमितिभगवतामहानितिसंज्ञाकृता अस्यतुपितामहानमतुविशेषणेनामेति रमजानन्आत्मानंप्रकृतिंचपश्यन्उभयंनामत्वेननिर्दिशति अहंकारइति पित्रैवप्रोक्तः सोऽपिपूर्ववत्कालादिसंबंधंप्राप्यविकुर्वन्गुणानांप्रधान गुणभावेनियामकाभावात्स्वतन्त्रःसंतःस्वाधिकरणमहत्त्रैविध्याकृतवन्तइत्याह सममभूत्त्रिवृदितितेषांभेदानाह वैकारिकइति वैकारिकः सा- त्त्विकः तैजसोराजसः चकारादर्थांतरभेदाअपितयासंतीत्युक्तंभवति एवंनाममभेदस्यत्रापि यत्त्रिदायस्याहंकारस्यएवंत्रिरूपोभेदइत्यर्थः एतेषांस्वस्वकार्यकरणसामर्थ्यमाह द्रव्यशक्तिरिति तमसोजातामसोऽहंकारोद्रव्यजननसामर्थ्ययुक्तः सद्रव्यमेवजनयति अतस्तस्यगौणं नामंद्रव्यशक्तिरिति क्रियाशक्तिर्यस्यात एवराजसोऽहंकारःक्रियाशक्तिः सात्त्विकस्तुज्ञानशक्तिरिति तत्रप्रभोइतिसंबोधनंतथाहंकारोज्ञान शक्तिरूपइतिबोधनार्थम् ॥ २४ ॥

———

श्रीविश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

स्वमायाशक्तेर्गुणैर्जगत्कर्तृत्वं भगवतो यदुक्तं यतः सृष्टमिदमित्यस्य प्रश्नस्योत्तरं प्रपञ्चयति कालमिति। कालम् आत्मन् स्वस्मिन् प्राप्तं लीनत्वेन स्थितं कर्म्मजीवादृष्टं स्वभावञ्च आत्मनि जीवे लीनत्वेन स्थितं यदृच्छया स्वैरितया उपाददे सृष्ट्यर्थमङ्गीकृतवान्। तच्च न स्वतः किन्तु माययैव। विभुभूपुः विविधं भवितुमिच्छुः ॥ २१ ॥

कालादीनां प्रयोजनमाह। गुणानां व्यतिकरः क्षोभः स चेह साम्यत्यागः। परिणामो रूपान्तरापत्तिः। महतो महत्तत्त्वस्य। पुरुषाधिष्ठितादिति त्रयाणां विशेषणम् ॥ २२ ॥

विकुर्व्वाणात् कालादिभिर्विक्रियमाणात् रजः सत्त्वाभ्याम् उपबृंहितात् वर्द्धितादिति महत्तत्त्वस्य त्रिगुणात्वेऽपि क्रियाज्ञानशक्तित्वात् रजःसत्त्वयोराधिक्यम्। तथाभूतान्महतः सकाशात् तमःप्रधानः पदार्थविशेषः कश्चिदभवत्। यश्च य इत्यध्याहार्य्यं परेण स इत्यनेन योजयितव्यत्वात्। द्रव्यमधिभूतं ज्ञानमधिदैवं क्रिया अध्यात्मं तदात्मकस्त्रित्रितयकारणमित्यर्थः ॥ २३ ॥

त्रिधेति। त्रैविध्यमेवाह। वैकारिकः सात्त्विकः। तैजसो राजसः। यत्त्रिदा यस्य भेदः। द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि। द्रव्येषु महाभूतेषु आकाशादिषु शक्तिरुत्पादनसामर्थ्यं यस्य सः। एवं क्रियासु इन्द्रियेषु तथा ज्ञानेषु देवेषु शक्तिर्यस्य सः। हे प्रभो नारद त्वमत्र प्रभवसि सर्व्वं जानास्येवेत्यर्थः। अत्र साम्यावस्थं गुणत्रयमेव प्रधानम्। तस्य कालेन सत्त्वांशस्योद्रेको महत्तत्त्वम्। रजोंऽशस्योद्रेको महत्तत्त्वभेदः सूत्रतत्त्वम् तमोंऽशस्योद्रेकोऽहङ्कारतत्त्वम्। अतोऽहङ्कारकार्य्येषु तामसमाकाशादिकं बहु, राजसं सात्त्विकञ्चाल्पम्। एवं तदुपाधिकेषु जीवेष्वपि तामसाधिक्यम् ॥ २४ ॥

———

तामसादपि भूतादेर्विकुर्व्वाणादभून्नभः।
तस्य मात्रा गुणः शब्दो लिङ्गं यद्द्रष्टृदृश्ययोः ॥ २५ ॥
नभसोऽथ विकुर्व्वाणादभूत् स्पर्शगुणोऽनिलः।
परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम् ॥ २६ ॥
वायोरपि विकुर्व्वाणात् कालकर्म्मस्वभावतः।
उदपद्यत तेजो वै रूपवत् स्पर्शशब्दवत् ॥ २७ ॥
तेजसस्तु विकुर्व्वाणादासीदम्भो रसात्मकम्।
रूपवत् स्पर्शवच्चाम्भो घोषवच्च परान्वयात् ॥ २८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

अथसृष्टिप्रकारमाह कालमिति मायेशइत्युपलक्षणक्षेत्रज्ञादीनां "प्रधानक्षेत्रज्ञपतिर्गुणेशः" शःकालकालःगुणिसर्वविद्य एकमेवाद्वितीयंब्रह्मेत्यादिश्रुतिवेद्योभगवान्पुरुषोत्तमोऽनंतशक्तिः माययास्वशक्तिभूतयाविबुभूषुः विविधंभवितुमिच्छन् आत्मनूनानाशक्तिमतिस्वस्मिन् यदृच्छयास्वेतरनिमित्तंविनाकालं स्वशक्तिभूतंगुणक्षोभहेतुम् कर्मजीवादृष्टम् स्वभावंमायायोनिपरिणामित्वादिरूपम् उपाददे ॥ २१ ॥

कालाद्युपादानफलमाह कालादिति पुरुषाधिष्ठितादितिश्रयाणांविशेषणंकालात् गुणानांव्यतिकरः क्षोभःसाम्यत्यागः स्वभावतःपरिणामः रूपांतरापत्तिः कर्मणोजीवादृष्टात् महतोमहत्तत्त्वस्यजन्माभूत् एवमायया विबुभूषोजगत्कारणात्पुरुषोत्तमान्महदुत्पत्तिरभूदित्यर्थः ॥ २२ ॥

अहंकारोत्पत्तिमाह महतइति महतः पुरुषाधिष्ठितादितिविशेषणमत्रापिबोध्यम् कथंभूतात् रजःसत्त्वोपबृंहितात् तस्यत्रिगुणत्वेऽपिक्रियाशक्तिज्ञानशक्तिप्रधानत्वेनगुणद्वयोपबृंहितत्वम् विकुर्वाणात्विक्रियमाणात् द्रव्यज्ञानक्रियात्मकः महाभूतदेवतेंद्रियमूलभूतः तमः प्रधानःआवरकस्वभावतयातमोबहुलः अभवत् अतएवतत्कार्येष्वपितामसंबहुराजसंसात्त्विकंचाल्पम् ॥ २३ ॥

तस्यनामकथनपूर्वकंत्रैविध्यमाह सइतिसार्द्धेन स तमः प्रधानः अहंकारइतिप्रोक्तःसच्चविकुर्वन्रूपांतरंगच्छन् त्रिधासम्यगभूत तदेवाह यथाक्रमंवैकारिकःसात्त्विकः तैजसोराजसः तामसश्चेतिभिदाभेदः प्रातिलोम्येनतानेवाह द्रव्यंउत्पाद्यमहाभूताख्यंशक्तिरूपादिसामर्थ्यंयस्यसतथा क्रियासुइंद्रियेषुशक्तिर्यस्यसतथा ज्ञानेषुदेवेषुशक्तिर्यस्यसतथाहेप्रभो उपदिष्टार्थावधारणसमर्थ ॥ २४ ॥

भाषा टीका।

वह भगवान् जो विबुभूषु हुए अर्थात् जगत् की सृष्टि करना चाहा तब अपने में लीन काल कर्म स्वभाव को उस मायेश ने अपनी माया से ग्रहण करलिया ॥ २१ ॥

पुरुषाधिष्ठित काल से गुणों का व्यतिकर हुआ स्वभाव से परिणाम हुआ और कर्म से महत्तत्व का जन्म हुआ ॥ २२ ॥

रजोगुण और सत्वगुण के उपबृंहित महत्तत्व से द्रव्य ज्ञान क्रियात्मक तमःप्रधान हुआ ॥ २३ ॥

उसका नाम अहङ्कार है वह विकृत होता तीन प्रकार का हुआ। जिसके वैकारिक (सात्विक) तैजस (राजस) और तामस ये तीन भेद हैं। प्रभो ! (नारद !) इन्हीं को द्रव्य शक्ति क्रिया शक्ति और ज्ञान शक्ति कहते हैं ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका।

भूतादेरिति तामसस्य विशेषणम्। ननु तामसात् अहङ्कारात् प्रथमं शब्दो भवतीति प्रसिद्धम्। सत्यम्। स तु तस्य नभसो मात्रा सूक्ष्मं रूपं, गुणश्च अन्यान्यगुणोव्यावर्त्तको धर्म्मः, शब्दद्वारा नभ उत्पद्यत इत्यर्थः। एवमेव स्पर्शादिष्वपि द्रष्टव्यम्। शब्दस्य लक्षणं लिङ्गमिति। कुड्याद्यन्तरितेन केनचित्कुञ्जरो गज इत्युक्ते यो गजद्रष्टा यश्च तेन दृश्यो गजः तयोर्लिङ्गं बोधकम्। लिङ्गविशेषणत्वात् यच्छब्दस्य षण्डत्वम् ॥ २५ ॥

परस्य नभसः कारणत्वेनान्वयात् शब्दवांश्च वायुः। तस्यैव लक्षणम्—प्राणो देहधारणम् ओजःसहोबलानि इन्द्रियमनःशरीराणां पाटवानि तेषां हेतुरित्यर्थः ॥ २६ ॥

स्वतो रूपवत् तेजः वायुनभसोः कारणभूतयोरन्वयात् स्पर्शशब्दवच्च ॥ २७ ॥

एवमम्भसः परान्वयाधिक्याद्गुणाधिक्यम्। घोषः शब्दः ॥ २८ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका।

एवमहंकारस्यत्रैविध्यमुक्त्वातामसाहंकाराच्छब्दादितन्मात्रक्रमेणाकाशादिभूतस्यसृष्टिमाह तामसादिति भूतादिरितितामसाहंकारस्यैवनामांतरं विक्रियमाणाद्भूतादिनामकात्तामसाहंकारान्नभअभूत् शब्दद्वारानभःउदपद्यतेत्यर्थः एवमेवस्पर्शादिष्वपिद्रष्टव्यं एतदेवशब्दस्वभावत्वंकथयन्नुपपादयति लिंगमिति तस्यनभसोमात्रासूक्ष्मंरूपंगुणः व्यावर्त्तकोऽसाधारणोधर्मश्चयःशब्दःसोऽप्यभूदित्यर्थः यद्वातस्य

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

अस्य मात्रागुणः असाधारणगुणः शब्दस्य लक्षणं द्रष्टृदृश्ययोरात्मानात्मनोर्लिंगं प्रमाणं यत्स शब्द इत्यर्थः शब्दो हि शास्त्रात्मना आत्मानात्मनोः प्रमाणं यदाह सूत्रकारः "शास्त्रयोनित्वादिति" यदित्र नपुंसकत्वं लिंगापेक्षया ॥ २५ ॥

विकुर्वाणाद्रूपांतरं गच्छतः नभसः स्पर्शगुणोऽनिलो वायुरभूत् स्पर्शतन्मात्रद्वारा अभूदित्यर्थः परान्वयात्कारणनभोऽनुवृत्तेः शब्दवांश्च वायुरित्यर्थः सस्पर्शस्य वायोर्लक्षणमाह प्राणः अवस्थाविशेषापन्नो वायुर्हि प्राणः ओजः सहो बलमिति धर्मिप्रधानो निर्देशः ओजआदिविशिष्ट इत्यर्थः ओजः प्रवृत्तिशक्तिः सहो वेगो बलं धारणसामर्थ्यं ओजः सहो बलानींद्रियमनःशरीराणामपि द्रष्टव्यानि तेषां हेतुरिति केचित् ॥ २६ ॥

कालकर्मस्वभावतो हेतोर्विकुर्वाणाद्वायो रूपवत् कारणभूताकाशवायुगुणानुवृत्तेः स्पर्शशब्दवच्च तेज उदपद्यत कालकर्मस्वभावत इति सर्वत्रानुसंधेयम् ॥ २७ ॥

विक्रियमाणात्तेजसः रसात्मकं परान्वयाद्रूपस्पर्शशब्दवच्चांभ आसीत् घोषः शब्दः ॥ २८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

प्रकारांतरेणात्रेदमाह द्रव्यशक्तिरिति द्रव्यनामकपंचभूतोत्पादशक्तिमत्त्वात् क्रियानामककर्मेंद्रियजननशक्तिमत्त्वात्तथा ज्ञाननामकज्ञानेंद्रियजननशक्तिमत्त्वान्मनोदिगादिदेवानां चोत्पत्तिशक्तिमत्त्वात्तस्याहंकारात्मनः प्रभोरुद्रस्य द्रव्यशक्तिरित्यादिभेदोऽवगंतव्यः तथा चोक्तं "भूतानि द्रव्यनामानि ज्ञानं ज्ञानेंद्रियाणि च" इत्यादि द्रव्याद्युत्पादनशक्तिमत्त्वात् द्रव्यादिशक्तिरित्युक्तं प्रकारमाह तामसादपीति अपिशब्दः कालकर्माद्यनुकर्षणार्थः भूतादिर्भूतानां मूलकारणात् ॥ २५ ॥

तस्याकाशस्य मात्रागुणः पंचेंद्रियैर्मेयत्वान्मात्रागुणः शब्दोऽभूत्तस्मान्नभोऽप्यभूदित्युत्पत्तिविशेषोऽत्र ज्ञातव्यः तथा वक्ष्यमाणत्वात्तत्प्रयोजनमाह लिंगमिति यच्छब्दरूपं द्रष्टृदृश्ययोर्द्रष्टुर्हरेर्दृश्यस्य विश्वस्य च लिंगं ज्ञापकं प्रमाणं तदुक्तं "पंचेंद्रियाभिमेयत्वान्मात्रागुण इतीरितः शब्दे नैव परो ह्यात्मा ज्ञायते जगदेव च" इति च शब्दः क्वचिदाश्रितो गुणत्वादिति च स्पर्शाख्यो गुणस्त्वगिंद्रियैकग्राह्यो यस्य सतथा ॥ २६ ॥

परस्याकाशस्यान्वयात् संसर्गात् शब्दवान् शब्दगुणोपेतः वायोरौत्पत्तिकगुणानाह प्राण इति सर्वचेष्टयितृत्वात्प्राणः अभिभवशक्तित्वात् ओजोऽवष्टंभशक्तित्वात् अनभिभाव्यत्वात् सहः स्वेच्छाकरणशक्तिस्वरूपत्वाद्बलं तदुक्तं "सर्वचेष्टयितृत्वात्तु प्राणो" भिभवशक्तितः ओजस्त्वि त्यादि ओजोऽवष्टंभबलयोरिति यादवः कालकर्मस्वभावतो विकुर्वाणाद्वायोस्तेज उदपद्यत उत्पन्नमभूत् तेजःस्वतो रूपवत् कारणानुस्यूतत्वात् स्पर्शादिगुणवत् उपाधिवशात् स्पर्शादिगुणवत्त्वं न स्वत इति वैशेषिककल्पितं स्वकपोलकल्पितमिति दर्शितं वा इत्यनेन ॥ २७ ॥

विकुर्वाणात्तेजस इत्यादौ कालकर्मस्वभावत इत्यनदनुवर्त्तनीयं तदन्वयात्कारणपरंपरान्वयात् रसगुण आत्मा स्वरूपं यस्य स तथा रसगुणोत्पत्तिपूर्वकमिति भावः घोषवच्छब्दवत् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

कारणाश्रयायामुद्भववदवस्थायां तदात्मकः सन् मात्रा । कार्य्याश्रयायामुद्भूतावस्थायां स्वतस्तु गुणः । द्रष्टृदृश्ययोर्यत् लिङ्गं ज्ञापकं, तदेव च शब्द इत्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

इदानीं त्रयाणामपि कालादिसंबंधस्यात्सृष्टिकर्तृत्वात्प्रथमं तामसस्य तथात्वमाह तामसादपि भूतादेरिति तामसस्य भूतादिरित्यपरं नाम यौगिकं पृथिव्याद्याकाशांतानां सामान्यं नाम भूतमिति जातमित्यर्थः भूतानि च तामसानि अतस्तामसं यज्जातं तद्भूतमित्युच्यते तस्य आदिः कारणभूतादिरहंकारः सोऽपि यदा विकुर्वाणः कार्यजननार्थमुद्यतः तदा पूर्ववत्कालादिसंबंधात् नभो नाम किंचित्कार्यं जातं अत्यंततामसत्वात्प्रकाशप्रवृत्तिरहितत्वात् नावयवेन भायस्येति भाशब्दः प्रत्याविप्त्यस्य अप्रत्ययकृते आकारलोपे च कृते नभ इति भवति ननु तस्य सर्वात्मना भानराहित्ये कथं तत्प्रतीतिस्तत्राह तस्य मात्रागुण इति तस्य शब्दः मात्रा गुणश्च मानिपेधात्मिका माया तां त्रायत इति मात्रा भगवदावरणरूपां मायां हि पालयति अत एवमात्मास्वात्मस्कोनभगवंतं प्राप्नोति अनेन वर्णात्मकः शब्दो व्युदस्तः किंच गुणः सः आत्मधर्मकः इत्यर्थः पूर्वं गुणानां बंधकत्वोक्तेः मात्राणामपरिणामविशेषः आकाशः सर्वोपि व्यवहारः शब्दमात्रो भवतीति शब्दमात्रेणाकाशव्यवहारः किंच लिंगं यद्द्रष्टृदृश्ययोरिति मात्रत्वं गुणत्वं च शब्दगतधर्ममात्रं न त्वसाधारणो धर्मः तस्माच्छब्दस्य तत्तल्लक्षणं किंतु द्रष्टृदृश्यलिंगत्वं शब्दत्वमिति गजो गज इत्युक्ते स्वरेण गृहस्थितः पुरुषो बहिःस्थितमनुमीते द्रष्टारं दृश्यं च देवदत्तो गजं पश्यतीति ॥ २५ ॥

एवं तामसादहंकाराद् आकाशोत्पत्तिमुक्त्वा आकाशाद्वाय्वादीनामुत्पत्तिक्रमेणाह नभसोऽपि विकुर्वाणादिति स्पर्शो गुणो यस्य अनिलो वायुः वायोर्गुणद्वयं स्वाभाविकः स्पर्शः कारणान्वयाच्छब्दश्च कार्यद्वयं च तस्याधिकमित्याह प्राणो दशविधः ओजः इंद्रियशक्तिः सहो मनःशक्तिः बलं शरीरशक्तिः यद्यपि प्राणो राजसाहंकारकार्य इति वक्ष्यते तथापि घ्राणेंद्रियसहकारी गंधग्राहकः प्राणोऽत्र गृहीतः बुद्धिः प्राणश्च तैजसादिति मतांतरं वा प्राणादिरूपो वायुरित्यर्थः तत्रापि कालकर्मस्वभावमिति नोच्यते तत्राप्यनुषंगः कर्त्तव्यः अथवा अहंकाराकाशयोः कालकर्मकार्यस्वाभावात् लोकप्रतीत्यात्तथोक्तम् ॥ २६ ॥

वायोस्तु साधर्म्यविजातीयकार्यमुत्पद्यत इति निमित्तमात्रं माभवत्विति विशेषेण निरूपयति वायोरपीति उदपद्यत उत्पन्नं वै शब्देन नात्र संदेहः कर्त्तव्यः गुणाधिक्यादिवैलक्षण्यप्रतीतेः न तु वायोः कार्यं न भवतीति "वायोरग्नि"रिति श्रुतेः तेजसो गुणत्रयमाह रूपवत् स्पर्शशब्दवच्च त्रयोऽपि गुणास्तत्र प्रतीयंते ॥ २७ ॥

विशेषस्तु विकुर्व्वाणादम्भसो गन्धवानभूत् ।
परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥ २९ ॥
वैकारिकान्मनो जज्ञे देवा वैकारिका दश ।
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥ ३० ॥
तैजसात्तु विकुर्व्वाणादिन्द्रियाणि दशाभवन् ।
ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणश्च तैजसौ ।
श्रोत्रं त्वग्घ्राणदृग्जिह्वा वाग्दोर्मेढ्राङ्घ्रिपायवः ॥ ३१ ॥
यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः ।
यदायतननिर्म्माणे न शेकुर्ब्रह्मवित्तम ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

येषांकार्यकारणभावोनास्तितेषांपरंविवादः सचश्रुतिविरोधात्सिद्धांतउपेक्षणीयःतत्तुविजातीयेनविजातीयस्यारंभकमिति तत्तुतंतुपटयो रेवव्यभिचारः नहितंतुपटयोरेकाजातिः तंतुत्वंपटत्वंव्यापकं नापिपृथिवीत्वादयोऽत्रजातयोऽभिप्रेयंते नियामकाभावात् स्थूलाग्नेःकारणत्वेन वायोरेवोपलंभात् नचतदवयवास्तत्रोपलभ्यंते परेंतत्ववद्व तस्माच्छ्रुतिप्रत्यक्षाभ्यांबाधितंशास्त्रमुपेक्षणीयं रसात्मकं रसतन्मात्रयुक्तं परा न्वयात् रूपवत् स्पर्शवत्घोषवच्च घोषोध्वन्यात्मकःशब्दः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

भूतादेरिति तामसस्य विशेषणम । ननु तामसाहङ्कारात् प्रथमं शब्दो भवतीति प्रसिद्धम । सत्यम । स तु तस्य नाम्नो मात्रा सूक्ष्मं रूपं गुणश्चासाधारणो व्यावर्त्तको धर्मः । शब्दद्वारा नभ उत्पद्यते इत्यर्थः । *एवमेव स्पर्शादिष्वपि द्रष्टव्यम । शब्दस्य लक्षणमाह लिङ्गमिति । पुरावृत्तेषु परोक्षोऽपि यो वसुदेवदशरथादिर्द्रष्टा यश्च तेन दृश्यः कृष्णरामादिस्तयोर्द्वयोरपि यत् लिङ्गं स एव शब्दो ज्ञापकः । लिङ्गविशेषणत्वात् यच्छब्दस्य षण्डत्वम ॥ २५ ॥

परस्य नभसः कारणत्वेनान्वयात् शब्दवांश्च वायुः । वायोश्च लक्षणम—प्राणो देहधारणम ओजःसहोबलानि इन्द्रियमनःशरीराणां पाटवानि तेषां हेतुरित्यर्थः ॥ २६ ॥

स्वतो रूपवत् तेजः वायुनभसोः कारणभूतयोरन्वयात् स्पर्शशब्दवच्च ॥ २७ ॥

एवमम्भसः पृथिव्याश्च परान्वयाधिक्यादुगुणाधिक्यम । घाषः शब्दः ॥ २८ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

अथतामसाहंकाराच्छब्दतन्मात्रादि क्रमेणाकाशाद्युत्पत्तिमाह तामसात्तस्यनामांतरमाह भूतादेरिति विकुर्वाणाद्विक्रियमाणात् नभः अभूत् तस्यनभसः शब्दः मात्रासूक्ष्मंरूपम् गुणश्चासाधारणोव्यावर्त्तकोधर्मः तामसादहंकारात् शब्दतन्मात्रंततः शब्दगुणंनभः ततःस्पर्शगु णोवायुरित्येवंक्रमोऽभिप्रेतःद्रष्टव्यःशब्दस्यलक्षणमाह लिंगयद्दृष्टृदृश्ययोरिति अरुंधतींपश्यामीति यद्वचनं तद्दृष्टृदृश्ययोर्लिंगंज्ञापकम् ॥ २५ ॥

स्पर्शतन्मात्रद्वारानभसोऽनिलोवायुरभूत्स्पर्शः गुणोयस्यसः इत्यसाधारणगुणोक्तिः साधारणंगुणंदर्शयतिपरान्वयादिति परस्यन भसःकारणत्वेनान्वयाच्छब्दवांश्चानिलः एवंगुणभेदोऽग्रेऽपिबोध्यः सएवावस्थाविशेषापन्नोऽनिलः प्राणःतच्चभूतम् ओजः सहोबलानींद्रिय मनः शरीरपाटवानियस्मात्तत् ॥ २६ ॥

स्वरूपवत्कारणभूतयोर्वाय्वाकाशयोरन्वयात्स्पर्शवच्छब्दवच्च ॥ २७ ॥

स्वतः रसात्मकम् रसवत् परान्वयात् कारणानुवृत्तस्तुरूपवदस्पर्शवत् शब्दवच्च ॥ २८ ॥

भाषा टीका ।

विकुर्वाण (विकार प्राप्तहोते) तामस भूतादि (अहंकार) से नभ (आकाश) हुआशब्दगुण उसकी मात्राहै जो द्रष्टा और दृश्य का लिङ्ग है ॥ २५ ॥

विकुर्वाण नभसे स्पर्श गुण अनिल (वायु) उत्पन्नहुआ आकाशके संबंधसे उसमें शब्दभी है यह वायु प्राण ओज (इन्द्रियशक्ति) सह (मन की शक्ति) बल (शरीरशक्ति) स्वरूपहै ॥ २६ ॥

कालकर्म स्वभावसे विकुर्वाण वायुसे तेज उत्पन्नहुआ इसमें रूपस्पर्शऔर शब्द तीन गुण हैं ॥ २७ ॥

विकुर्वाण तेजसे रसात्मक अंभः (जल) उत्पन्नहुआ वह रूपवालास्पर्श वाला और परस्पर भूतोंके अन्वयसे शब्दवालाहै ॥ २८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका।

विशेषः पृथिवी। पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यम् ॥ २९ ॥

मनःशब्देनैव तदधिष्ठाता चन्द्रोऽपि द्रष्टव्यः। अन्ये च दश देवा वैकारिकाः सात्त्विकाहङ्कारकार्य्याः। तानाह दिशश्च वातश्च अर्कश्च प्रचेताश्च अश्विनौ च एते पञ्च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः। वह्निश्च इन्द्रश्च उपेन्द्रश्च मित्रश्च कश्च प्रजापतिः एते पञ्च वाक्पाणिपादपायूपस्थानाम् ॥ ३० ॥

यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहङ्कारकार्य्यौ अतो ज्ञानक्रियाविशेषरूपाणीन्द्रियाण्यपि तैजसाद्भवन्तीत्यर्थः। तान्याह श्रोत्रमिति। दोः पाणिः मेढ्र उपस्थः। क्रमस्त्वत्र न विवक्षितः ॥ ३१ ॥

एवं कारणसृष्टिमुक्त्वा कार्य्यसृष्टिमाह। यदा एते असङ्गता अमिलिता आसन्। अतएव यदा आयतनस्य शरीरस्य निर्म्माणे न शेकुः ॥ ३२ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपनाख्यतट्टिप्पणी।

[वैकारिकान्मन इति। अस्य तात्पर्य्येण चन्द्रमा मनसो जात इत्येकश्चोऽर्थो दर्शितः ॥ ३० ॥

कर्माण्यस्त्वति। क्रमस्तु श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि वाक्पाणिपादपायूपस्थाः ॥ ३१—३४ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका।

अथविकुर्वाणादंभसोगंधवान्परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितश्चविशेषःपृथिव्यभूत् ॥ २९ ॥

सर्वेषामिन्द्रियाणांसात्त्विकाहंकारादुत्पत्तिमाह वैकारिकादिति वैकारिकनाम्नःसात्त्विकाहंकाराद्दिगादयःश्रोत्राद्यधिष्ठानदेवताःताभिरधिष्ठितानीन्द्रियाणिमनश्चजज्ञिरेइत्यर्थः अग्निर्वाग्भूत्वेत्यादिवदधिष्ठात्रधिष्ठेययोरभेदोपचारात्सामानाधिकरण्यादित्यवैकारिकाइत्युक्तदेवतागणयति दिशश्चवातश्चाश्विनौचैतेपंचश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः वह्निश्चेन्द्रश्चोपेंद्रश्चमित्रश्चकश्चप्रजापतिः एतेपंचवाक्पाणिपादपायूपस्थानामधिष्ठातारः मनसस्त्वधिष्ठाताचन्द्रमाःएभिर्दशभिरधिष्ठितानिश्रोत्रादीनिजातानीत्यभिप्रायः ॥ ३० ॥

तैजसाहंकारकार्यमाह तैजसादिति तैजसात्तैजससंबंधिनःराजसाहंकारानुगृहीतात्सात्त्विकाहंकारादित्यर्थः अन्यथापूर्वग्रंथव्याघातात् पूर्वग्रंथेऽभिमानिदेवतासृष्टिरितिचेन्न इंद्रियैर्विनादेवतादहारभायोगाच्चतुर्मुखसृष्टत्वनाश्रवश्यमाणानामादित्येंद्रादीनामंडसृष्टेःप्राक्सृष्टययोगाच्च नचासृष्टानामेवाधिष्ठातृत्वमप्यनुपपन्नमितिवाच्यं परमाकाशस्थानांभगवत्संकल्पानुगृहीतानामधिष्ठातृत्वोपपत्तेःकोऽयंपरमाकाशइतिचेद्वैकुंठाख्योलोकः अतएवचतुःषोडशपंचशक्तिभिरितिवक्ष्यते नचपरमाकाशस्थाभिरेवाधिष्ठानोपपत्तेश्चतुर्मुखकर्तृकादिगादिसृष्टिर्व्यर्थेतिवाच्यं व्यष्टीन्द्रियाधिष्ठानार्थंदिगादिसृष्टेरावश्यकत्वात् अतःपरमाकाशेऽप्यस्तीत्ययमर्गतव्यं अतएवैभिरधिष्ठातृभिःपरमात्मानंप्रतिक्रियमाणास्तुतिरप्युपपद्यते अन्यथांडोत्पत्त्यनंतरसृज्यमानानामेषामंडोत्पत्तेःपूर्वमभावात्तत्कर्तृकास्तुतिरनुपपन्नास्यात् नन्वेषांसर्वेन्द्रियाधिष्ठातृत्वेतदिंद्रियाणांकेऽधिष्ठातारइतिचेदुच्यते तदिंद्रियाणामपिदशानामधिष्ठातारःसंत्येव एकैकमिंद्रियंत्वधिष्ठातृशून्यमवतिष्ठते तृप्रस्वपरनिर्वाहकत्वन्यायेनस्वेनैवचापरमात्मनावाऽधिष्ठीयतेइतिनानवस्थाप्रसंगइति यद्वा तैजसान्वितिपक्षांतरोक्तिः पक्षद्वयस्याविरोधमाह ज्ञानशक्तिरिति प्राणशब्दइंद्रियपरं ज्ञानशक्तिःप्राणाःज्ञानेन्द्रियगणाः क्रियाशक्तिश्चप्राणाःकर्मेंद्रियगणाः बुद्धिरन्तःकरणचतुष्टयंच तैजसोराजसाहंकारान्वितसामर्थ्यप्रसूतज्ञानकर्मेंद्रियाणामंतःकरणस्यचस्वकार्यप्रवृत्तिसमर्थत्वात्तत्कारणेनापिरजोगुणान्वितेनापिभवितव्यमित्येतत्तात्पर्यकत्वात्तैजसत्ववादस्यसर्वेंद्रियाणांराजसाहंकारानुगृहीतसात्त्विकाहंकारकार्यत्वमेवेतिनपक्षद्वयविरोधइत्यर्थः एवंभूतादेरपीन्द्रियसृष्टावनुग्राहकस्तैजसइतिवदितव्यं इंद्रियाणिगणयति श्रोत्रमिति दोःपाणिः मेढ्रमुपस्थःक्रमस्त्वत्रनविवक्षितः ॥ ३१ ॥

यदैतेभूतानींद्रियाणिमनश्चतेषांगुणाः तन्मात्राणिविषयाःशब्दादयएतेसर्वेऽसंहताःअमिलिताः आसन्नतएवयदायतनस्यब्रह्मांडस्यभगवच्छरीरस्यनिर्माणेब्रह्मवित्तमनशेकुर्नाशकुवन् ॥ ३२ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली।

सर्वेगुणाःपृथिव्यांविशिष्यंतइतिविशेषः पृथिवी गंधवानितिगंधतन्मात्रगुणोत्पत्तिपूर्वकमित्यर्थः परान्वयात्कारणसंसर्गात् ॥ २९ ॥

वैकारिकाहंकारात्सृष्टिप्रकारमाह वैकारिकादिति वैकारिकाहंकारात्सात्त्विकांशान्मनोऽतःकरणं शब्दज्ञानादिविशिष्टकार्यशक्तिस्वादैकारिकनामानोदेवाःअपितस्माज्जज्ञिरइतिशेषः तदुक्तं विशिष्टकार्यशक्तित्वाद्देवावैकारिकाःस्मृताइति न्यूनाधिकसंख्याव्यवच्छेदार्थंदशेतितेषांनामसंकीर्तनंकरोति दिग्वातेति प्रचेतावरुणः अश्वीइत्यश्विनौ उपेंद्रोविष्णुस्तस्यनपादाभिमानित्वं किंतुपादाभिमानिनोयज्ञनाम्नोदेवस्यांतर्यामित्वेनपादांगुष्ठमधिष्ठायशरीरधारकत्वात्तन्नामकीर्त्तनं अनाद्यनंतोऽपिहरिर्वैकारिकगुणध्वजः अवतीर्णःपदांगुष्ठमध्यास्तेविश्वभुग्विभुरित्यादेःकोदक्षप्रजापतिः ॥ ३० ॥

तैजसाहंकारकार्याणिकानीतिनोच्यंतइतिपक्षंभक्षयेतिभावेनाह तैजसादितिअत्रापिकालाद्यनुकर्षःकर्त्तव्यः तेषांशक्तिवैषम्यात्कोऽधिकारेणविभागमाह ज्ञानशक्तिरिति अचेतनानामिन्द्रियाणांज्ञानादिजनकत्वंकथंघटतइतितत्राह बुद्धिरिति ज्ञानेंद्रियाणांज्ञानंज्ञानजननेशक्तिर्यस्याःसाज्ञानशक्तिः बुद्ध्यभिमानिन्युमाबुद्धिः कर्मेंद्रियाणांक्रियायांक्रियाजननेशक्तिर्यस्य सक्रियाशक्तिः प्राणोऽहंकारिकश्चतैजसः तैजसाहंकारादुत्पन्नावित्यर्थः ज्ञानेंद्रियाणांदेवानांज्ञानशक्तिरुदाहृतेत्यावायुदीर्यमाणेवानांज्ञानादिशक्तिरपिबुद्धिप्राणयोःप्रसादादित्यवगंतव्यम् इंद्रियाणांतैजसाभिधानमतिजाज्वल्यमानत्वात् भूतानांतामसत्वंचज्ञानक्रियाशक्त्योरभावात् तदुक्तं अतिजाज्वल्यमानत्वात्तैजसानींद्रियाण्यथ पीत्यादि भूतानांद्रव्यत्वंचद्रवणप्राप्त्यानिमित्तं अर्द्धपूर्वमहंपूर्वमितिविवदमानयोरिवस्थितयोर्द्वयोः पृथिव्यपोर्वायुतेजसोर्वावेगलक्षणसंस्कारसंपर्काद्रमणाद्द्रवणंयुज्यतेआकाशस्यद्रवत्वेनद्रवणाभावेऽपिप्रदेशात्मनातत्संभवान्द्रव्यत्वंयुक्तंतदुक्तं द्रव्यंतुद्रवणप्राप्त्यंद्वयोर्विवदमानयोः पूर्ववेगादिसंबंधादाकाशश्चप्रदेशतइति ॥ ३१ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

इन्द्रियाणां विशेषसामान्याह श्रोत्रमिति श्रोत्रं त्वक्त्वगिन्द्रियं दोषौहस्तौ मेढ्रं गुदेन्द्रियं वाह्यसृष्टिमुक्त्वातेऽयस्तस्वेभ्योब्रह्मांडसृष्टिप्रकारमाह यदैतेहति यदैतेकथिता भूतेन्द्रियमनोगुणाइत्युपलक्षणं पंचभूतदशेन्द्रियतैजसबुद्धिप्राणमनःशब्दादिसत्त्वादिगुणमहदहंकाराव्यभावाः पदार्थाः तेअन्योन्यमसंगता असंश्लिष्टाः यदायतननिर्माणे ब्रह्मांडकरणेनशेकुःशक्तिमंतोनासन् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

मनसश्च सात्त्विकत्वं चित्तात् नातिभिन्नावस्थायां ज्ञेयम् । चित्तन्तु यथा कापिलेये—स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतस इति । उपेन्द्रोऽयं तदावेशो देवताविशेषः यदैते इत्यादिना वक्ष्यमाणेन तस्यापि भगवदधीनशक्तित्वेनावगमात् ॥ ३० ॥

तैजसादिति सार्द्धकम [प्राणस्य तैजसत्वात् तदीयक्रियाशक्तिमतामिन्द्रियाणां तैजसत्वं तथाबुद्धेस्तैजसत्वात् तदीयज्ञानशक्तिमतामिन्द्रियाणां तैजसत्वमित्यर्थः । संशयोऽथ विपर्य्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ॥ इति तृतीयोक्तेः ।] ॥ ३१ ॥

यदेति युग्मकम् । सदसत्त्वं मुख्यगौणत्वम् । भगवतः तत्त्ववर्गे प्रविष्टभगवदंशप्रथमपुरुषस्य शक्त्या संहननकारिण्या चोदिताः प्रयोजिताः ॥ ३२ ॥ ३३ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

अंमसोविकुर्वाणात्विशेषस्त्वभूत् विशेषःपृथिवी तुशब्देनसर्वेवलक्षण्यमस्याः गंधवानिति गंधोमुख्योगुणः परान्वयादन्येऽपिच-त्वारः ॥ २९ ॥

एवंतामसाहंकारसृष्टिमुक्त्वासात्विकाहंकारसृष्टिमाह वैकारिकादिति सत्त्वलक्षणोगुणःसद्रूपस्यप्रथमविकारभूतइतितस्यवैकारिकसंज्ञा वैकारिकात्सात्विकाहंकारात्मनःइंद्रियाधिष्ठातारोदेवाश्चजाताः अस्मिन्सिद्धांतेमनसोदेवतानापेक्षिता आत्मनेकत्वादात्मैवदेवता तदेवादि गादयः अग्रेश्रोत्रादीनींद्रियाणिवक्ष्यति तेषामेतेक्रमेणदेवाः अश्विशब्देनाश्विनीकुमारौमित्रकश्च ॥ ३० ॥

राजसाहंकारकार्यमाह तैजसादिति इंद्रियाणि इंद्रआत्माइंद्यतेअनेनेतींद्रियं आत्मानिचाक्षुषःनाप्यन्येन्द्रियग्राह्यः व्यवह्रियतेचदेवदत्त स्वंयज्ञदत्तस्त्वमिति सचपश्यतिशृणोतीत्येवप्रतीयते तानींद्रियाणिदश ननुज्ञानेंद्रियाणिज्ञानप्राधान्यात्सात्त्विकानिभवितुमर्हंति कर्मेंद्रियाणिचजडपर्यवसानात्तामसानिभवितुमर्हंति तत्कथमुभयंपरित्यज्यदशापीन्द्रियाणिराजसानीत्युच्यतइत्यतआहज्ञानशक्तिरिति अत्रेंद्रियाणांराजसत्वेनिमित्तमन्यदस्तिबुद्धेः प्राणश्चराजसाहंकारकार्येनत्वेतदप्यसंगतं बुद्धिर्ज्ञानरूपा सत्वात्संजायतेज्ञानमितिसात्त्विकीभवितुमर्हति प्राणश्चवायुरेव श्वासोच्छ्वासाभ्यांवायुत्वप्रतीतेः तत्राह ज्ञानशक्तिःक्रियाशक्तिरिति नह्यस्मन्मते बुद्धिर्ज्ञानं किंतुज्ञानशक्तिः ज्ञानजननशक्तिर्यस्येति योबुद्धिमान्तस्यपदार्थज्ञानंभवतीति सुबुद्धिरयंपदार्थान्जानातीतिचज्ञानकारणत्वेनबुद्धेर्व्यपदिश्यते कार्यकारणयोरभेदाव्यवहाराच्चबुद्धिज्ञानयोःपर्यायत्वव्यवहारः अन्यथाबुद्ध्यभाववालस्यनपदार्थज्ञानंभवतिसम्यक् तन्नस्यात् प्राणोऽपिवायोर्भिन्नएव "अथहैनमासन्यंप्राणमूचुः"रितिप्राणरूपांदेवतांविलक्षणामाहश्रुतिः "योवायुःसप्राणः"इतितुभगवत्प्राणस्यवायुत्वाभिप्रायं तस्माद्ज्ञानजननसामर्थ्यवत्त्वात्ज्ञानाद्बुद्धिर्भिन्ना नचसास्यात्तिकी इंद्रियमात्रसाध्यत्वात् साहिबुद्धिर्ज्ञानेंद्रियोपष्टंभकत्वेनसृज्यते यच्चात्त्विकमहत्त्वेनादींद्रियसाध्यमिति व्याप्तेः अतोज्ञानजननशक्तिर्यस्याःक्रियाजननशक्तिर्यस्येतिचतयोर्भिन्नधर्मत्वात्ताबुभौराजसाहंकारकार्यौ अतस्ताभ्यांपरिगृहीतानिद्विविधान्यपींद्रियाणिराजसाहंकारकार्याण्येव तुशब्दः पूर्वपक्षंव्यावर्त्तयति तानींद्रियाणिगणयति श्रोत्रमिति मेढ्रांघ्र्योःकोपेंद्रोदेवते मित्रश्चपायोः अन्येतुक्रमेणैव तत्रदिग्वातौश्रोत्रत्वचोःघ्राणदृश्योःवैपरीत्यइंद्रोवाह्वोःवह्निर्वाचः अश्विनौनासिकयाः प्रचेताजिह्वायाःअर्कोदृशोः एवंक्रमः ॥ ३१ ॥

एवंसर्वेषांसृष्टिमुक्त्वायदधिष्ठानत्वंयदन्तस्तत्त्वानांकार्यसृष्टिमाह यदैतेइति यदाएतेअसंहताः गुणत्रयकार्यत्वात् नाहितामसादयोभिन्नस्वभावाएकत्रमिलंतिअतएवयदायतननिर्माणेनशेकुःनसमर्थाजाताःतदाभगवत्प्रेरिताअंडमभसिसिमसृक्षुरितिसंबंधःभूतानिइंद्रियाणिमनोगुणाश्च गुणादेवाः शब्दादयोवा तामसानामाद्यंतानिवेशनंभूयस्त्वाय आयतनंभगवच्छरीरंब्रह्मांडं ब्रह्मानत्तमेति अस्मिन्नर्थेसंघत्वात्संवादार्थं संबोधनं तमप्रत्ययस्तुभगवदुत्कर्षज्ञानार्थम ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

विशेषः पृथिवी ॥ २९ ॥

वैकारिकात् सात्त्विकाहङ्कारात् । मनःशब्देनैव तदधिष्ठाता चन्द्रोऽपि द्रष्टव्यः । देवानेवाह दिशश्च वातश्च अर्कश्च प्रचेता वरुणश्च अश्विनौ च एते पञ्च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः । वह्निश्च इन्द्रश्च उपेन्द्रश्च मित्रश्च कः प्रजापतिश्च एते वाक्पाणिपादपायूपस्थानाम् ॥ ३० ॥

तैजसात् राजसाहङ्कारात् दशाभवन् । तत्र पञ्चज्ञानशक्तिर्बुद्धिः । पञ्चक्रियाशक्तिः प्राणः । बुद्धिप्राणौ तु तैजसौ । अतः पञ्च श्रोत्रादयो बुद्धिविशेषाः पञ्च वागादयः प्राणविशेषा इत्यर्थः । तत्र तामसाहङ्कारकार्य्योऽनिल एव प्राण रूपेण तैजसाहङ्कारकार्य्योऽपि भवतीति ज्ञेयम् । दोः पाणिः । मेढ्रं उपस्थः । पायुर्गुदम् । क्रमस्त्वत्र न विवक्षितः ॥ ३१ ॥

एवं कारणसृष्टिमुक्त्वा कार्य्यसृष्टिमाह । यदा एते असङ्गता अमिलिता आसन् अतएव यदा आयतनस्य शरीरस्य निर्म्माणे न शेकुः ॥ ३२ ॥

तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः।
सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः॥ ३३॥
वर्षपूगसहस्रान्ते तदण्डमुदकेशयम्।
कालकर्म्मस्वभावस्थो जीवोऽजीवमजीवयत्॥ ३४॥
स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः।
सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान्॥ ३५॥
यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः।
कट्यादिभिरधः सप्त सप्तोर्द्ध्वं जघनादिभिः॥ ३६॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

रसतोगंधवानपगान्वयाद्रसाद्यन्वितोविशेषः पृथिव्यभवत्॥ २९॥

मनोऽन्तःकरणचतुष्टयम् देवाः दिगादयः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानांवह्न्यादयोवाक्पाणिपादपायूपस्थानामधिष्ठातारःवैकारिकाः सात्त्विकाहंकारादुत्पन्नाः॥ ३०॥

ज्ञानशक्तिःबुद्धिः ज्ञानेन्द्रियवर्गः क्रियाशक्तिः प्राणाः कर्मेन्द्रियगणाः तौबुद्धिप्राणौतैजसौ एतदेवविवृणोति तैजसात्तुविकुर्वाणादिन्द्रियाणि दशाभवन्निति श्रोत्रत्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्राङ्घ्रिपायवइतिन्वि॥ ३१॥

ब्रह्मांडोपादानभूतमहदादयुत्पत्तिमुक्त्वाऽथब्रह्मांडोत्पत्तिमाह यदैतिद्वाभ्याम् हेब्रह्मवित्तम भूतानिआकाशादिमहाभूतानि उभयेंद्रियाणिच मनश्चगुणाः तन्मात्ररूपाः एतेभावाः पदार्थाःयदाअसंहताः असंयुताः आसन् ततएवयदा आयतनस्यब्रह्मांडस्यनिर्माणेनशेकुः॥ ३२॥

भाषा टीका।

विकुर्वाण जलसे गंधवान् विशेष (पृथ्वी) उत्पन्नहुई यह पर द्रव्योंके अन्वयसे रसस्पर्श शब्द और रूपगुणसे युक्त है॥ २९॥

वैकारिक (सात्विक अहंकार) से मन और दस वैकारिक देवता उत्पन्नहुए दिशावात अर्क प्रचेता अश्विनीकुमार वन्हि इन्द्रउपेन्द्र मित्र प्रजापति॥ ३०॥

विकुर्वाण तैजस (राजसअहंकार) से दस इन्द्रिय उत्पन्नभई ज्ञानशक्ति और क्रियाशक्ति बुद्धि और प्राणभी तैजसहैं येदश इन्द्रिय येहैं श्रोत्रत्वचाघ्राणनेत्र जिह्वावाक् दो (भुजा) मेढ्रअंघ्रिपायु॥ ३१॥

हेब्रह्मवित्तम जब ये सब भूत इन्द्रिय मनगुणभाव असंगत होनेके कारण आयतन (शरीर) निर्माण करने में असमर्थहुए॥ ३२॥

श्रीधरस्वामि कृत भावार्थदीपिका।

सदसत्त्वं प्रधानगुणभावम् उपादाय स्वीकृत्य। उभयं समष्टिव्यष्ट्यात्मकं शरीरम्॥ ३३॥

कालकर्मस्वभावान् अधिष्ठाय स्थितः जीवयतीति जीवः परमात्मा अजीवमचेतनम् अजीवयत् चेतयति स्म॥ ३४॥

निर्भिद्य पृथक्कृत्य स्थित इत्यर्थः॥ ३५॥

तदवयवैर्लोकरचनामाह यस्येति। कट्यादिरिति ऊरुमूलयोः पश्चाद्भागः। जघनं पुरोभागः। अधः सप्त लोकान् अतलादीन्। ऊर्द्ध्वं भूरादीन् सप्त॥ ३६॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तट्टिप्पणी।

[सहस्रोर्वङ्घ्रिबाह्वक्ष इति। अनेन सहस्रशीर्षेत्यर्द्धर्चस्यार्थ उक्तः॥ ३५॥ ३६॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका।

तदाभगवच्छक्त्याचोदिताःप्रेरिताःसंहत्यपंचीकरणोक्तप्रकारेणपरस्परंमिलित्वा सदसत्त्वं सत्त्वंपंचीकरणेनस्थूलत्वं असत्त्वं सूक्ष्मत्वम् तोभयमनुभयंपूर्वोक्तकालकर्मस्वभावांश्चउपादायाऽदःब्रह्मांडंससृजुः यद्वाअनुभयमित्यदःशब्दनिर्दिष्टब्रह्मांडविशेषणंअनुभयंकार्यकारणभावान्वितमंडंब्रह्मांडंससृजुरित्यर्थः कार्यमप्यंडमाकाशकार्यवायुवत्तस्यान्तरंनचतस्यांतरारंभकमतस्तत्वांतरतयाकार्यतत्वांतरापेक्षयाकारणंच भवतीत्यनुभयंब्रह्मांडमुक्तं चतुर्मुखोत्पत्त्यादिकमन्यत्रविस्तरेणवक्ष्यमाणमत्राप्यर्थसिद्धमनुसंधेयम्॥ ३४॥

वर्षपूगसहस्रांतेप्रलयकालावमानेइत्यर्थः अन्यथानक्रमेणविवृद्धंतज्जलंबुद्बुदवत्सर्गमितिविरोधात् जीवःदेवाद्यपेक्षयासमष्टिपुरुषब्रह्मास्यजीवशरीरकःपरमपुरुषःकालकर्मस्वभावाश्रितःसन्तंजीवमचेतनमुदकेशयमंडंब्रह्मांडमजीवयच्चेतयतिस्म अत्रोदकेशयमित्यनेनांडसृष्टेः पूर्वं गर्भोदकसंज्ञिकासृष्टिरर्थसिद्धाऽनुसंधेया परोक्षनिर्देशश्चतुर्मुखांतरसाम्याभिप्रायः॥ ३५॥

स एव पुरुषश्चतुर्मुखस्वरूपेणोपस्थितः परमपुरुषः अंडंनिर्भिद्य तस्मान्निर्गतः अंडभेदेनावकाशलाभादनुपरुद्धसंचारादिमानभूदित्यर्थः चतुर्मुखस्यभगवदात्मकत्वेसामानाधिकरण्येनाहसहस्रेतिचतुर्मुखशरीरकत्वेनावस्थितःसएवसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् सर्वतः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं सर्वतः श्रुतिमल्लोकेसर्वमावृत्य तिष्ठतीत्युक्तः सर्वत पाणिपादादिकार्यकर्ता परमपुरुष इत्यर्थः ॥ ३५ ॥

यस्य स्वर्गतः पाणिपादादिकार्यकर्तुर्विराजपुरुषस्यावयवैः पादतलाद्यवयवैर्लोकानतलादीन्मनीषिण उपासकाः कल्पयन्ति लोकान् यदव यवत्वेन रचयन्तीत्यर्थः तत्तदवयवप्रभवाणां तत्तदवयवत्वेनोपासनं युक्तं तदवयवैर्लोकरचनामाह कट्यादिभिरिति कटिरूरुमूलयोः पश्चा द्भागः जघनं पुरोभागः अधः सप्तलोकानतलादीनूर्ध्वं भूरादीन्सप्त कल्पयन्तीत्यन्वयः ॥ ३६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

तदा भगवन्तमभिष्टूय शरणागताः ततः स्तुतिप्रसन्नस्य तस्य चेष्टकरूपेणात्मगतां प्रविष्टस्य हरेः शक्त्या चोदिता मिथः संहत्य महदहङ्कारशब्दस्पर्शरूपरसगन्धसत्त्वरजस्तमोगुणसमवेताः कालकर्मस्वभावपृथिव्यादिभूतत्रयमाकाशवाय्वाख्यभूतद्वयं चोपादायोपादानीकृत्य नोऽस्माकं संसारभयजनकमदो ब्रह्माण्डं सृजेत्यन्वयः नोभ-यसंयमप्रिलक्षणानामित्यनेनोक्तं यत सम्यक्त्वं प्रत्यक्षादिप्रमाणसिद्धमिति हेतुर्वाचनाहि शब्दाद्ब्रह्माण्डं संसारेनाभयकारणमिति भयहेतुत्वं वा-प्रतीयते तदुक्तं ब्रह्माण्डे हि वर्तन्ते जीवानां भयकारणं तत्राह संसृतिरिति आकाशवायुत्वव्यक्तौ इतरेऽप्रकाशितत्वादि भूतानां सदसत्वं युक्तम् ॥ ३३ ॥

ब्रह्माण्डं सृष्टिकर्तुं हरेस्तत्प्रकारमाह वर्षपूगेति कालाद्युद्भावकत्वेन कालकर्मस्वभावस्थो जीवः संसारव्यतिरिक्तः परमेश्वरः सह-स्रवत्सरमुदके शयेमावरणजलमध्यात्मतदण्डमध्यं पूगमनभ्यागतैस्तत्त्वैः सह प्रविश्य तदण्डं यदा स्वात्मानं प्रसूततदा परिवृत्य जीवं स्वात्मानं तत्रा अजीवनात् जयामास यः प्राणधारणप्राणप्रसादात्कुरुतऽजीवं सजीवमिति सन्दिग्धत्वादजीवत्स्येव पदच्छेदः कालकर्मस्वभावस्थो वासुदेवः परः पुमान् सकारादेङ्मुखमात्मप्रसवकारणानिर्वचनात् अजीवमजीवय यद्वा जीवः प्राणधारकः परमात्मा जीवं तथाविधार्थं स्वात्मानं तत्रा अजनादिति प्राणान् धारयतेयस्मात्सजीवः परमेश्वर इति च जीवादत्युत्कृतेजस्त्वाद जीवो जगज्जीवहेतुत्वाज्जीव इति हेतुद्वयादिदं युक्तश्च अ-जीवोऽपि महात्तेजास्त्वथवाजीवयज्जगदिति वचनात् यद्वा अजीवः परमेश्वरो जीवैः सर्वजीवप्रधानं चतुर्मुखमुत्पाद्य तदन्तर्यामित्वेन प्राणधारकं स्वा त्मानमजीजनत् विरिञ्चस्यापि विराडाख्याण्डान्तर्वर्तिरूपजननस्याभिप्रेतत्वात् तदुक्तं ॥ अण्डजातं पुमांसोऽण्डाद्ब्रह्मा तथैव चेत्यादि ॥ ३४ ॥

तामेवाभिव्यक्तिं स्फुटीकरोति सएषइति अयमर्थः यो महदादितत्त्वानि सृष्ट्वा तदन्तर्विष्टस्तदुपादानतयाण्डं निर्माय तदन्तः प्रविशत्स एव पुरुषः करचरणाद्यवयवत्त्वेन पुरुषनामा हरिरण्डं निर्भिद्य बृंहायत्वात्तस्मादण्डान्निर्गतः प्रकाशिताऽभूत्पुरुषत्वेऽपि लोकविलक्षणोऽयमिति भावेनाविशिनष्टि सहस्रेति अत्र सहस्रशब्दस्य यथासंभवमर्थो वक्तव्यः ॥ ३५ ॥

पुरुषाख्यविष्णोरवयवेभ्य एव चतुर्दशभुवनसृष्टिरन्येभ्य इत्यस्य मुख्येतिभावेनाह यस्येति इह पञ्चाशत्कोटिविस्तीर्णब्रह्माण्डे आयामतो विस्तार तस्माद्विपुलान्तर्वादिदेहत्वेनावतीर्णस्य चतुर्दशभुवनेभ्योऽवार्य्याभिमन्यपुरुषाख्यस्य हरेरवयवैर्निमित्तकारणैर्मनीषिणश्चतुर्दशलोकान्सृष्टा-न् कल्पयन्तीति यत् यस्मात्तस्मात्सृष्टान्तिप्रत्यक्षसिद्धत्वात् अन्यतः सृष्टेरमुख्येतिभावः हरेरवयवैः सृष्टालोका इति विकल्पनमित्यादेश्च । तत्सृष्टिकल्पनाप्रकारमाह ऊर्वादिभिरिति ऊर्वादिभिः पादतलान्तैरवयवैरतलादिपातालान्ताः सप्तलोका निर्मिताः जघनादिभिर्मूर्धान्तैरवयवैरूर्ध्वं पृथिव्यादिसत्यान्ताः सप्तलोकाः सृष्टा इति ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

ततश्च वर्षेति । अजीवमनभिव्यक्तजीवत्वादचेतनं तदण्डम् । यः पूर्वं सृष्टिकार्ये कालकर्मस्वभावानेवोपायीकृत्य स्थितः पुरुष स एव जीवो जीवनहेतुः स्वांशेन तत् प्रविश्य जीवसमष्ट्यभिव्यञ्जकः सन् अजीवयत् ॥ ३४ ॥

स तस्मात्कलेव पुरुषः । अण्डं निर्भिद्य तस्मान्निर्गत इति । तदन्तर्बहिर्व्याप्य स्थित इत्यर्थः । तस्य स्वीयं रूपमाह सहस्रेति । पुरुषेण नारायणेनाभिप्रैति सहस्रशीर्षा पुरुष इति श्रुत्यन्तरात् ॥ ३५ ॥

कल्पितं रूपमाह यस्येति ॥ ३६ ॥ ३७ ॥ ३८ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

अन्योन्यं संहत्य मिलित्वा चकाराद्गुणभावमप्याश्रित्य भगवच्छक्तिरात्मशक्तिः तया चोदिताः प्रेरिताः सदसत्त्वं उच्चनीचत्वं कार्यकार णभावं वा सद्रूपमसज्जगत् प्रकाशाप्रकाशभावं वा चकारादन्यान् जीवगणांश्च तद्दृष्टानि वा तत्संस्कृतभूतानि वा उभयं समाश्रित्य उभयात्मकं स्थूललिङ्गशरीरे वा अदः तत् प्रसिद्धं युक्तोऽयमर्थः अस्मिन्नर्थे तृतीयस्कन्धे उपपादयिष्यते तेनाण्डं सृष्टं तस्य भगवदायतनत्वार्थं भगवानागत इति वक्तव्यं तत्कस्य हेतोरित्याकाङ्क्षायामाह ॥ ३३ ॥

वर्षपूगसहस्रान्त इति वर्षपूगानां सहस्रं पञ्चविधा अभिवर्षाः सहस्रं जाता तेषामन्ते सहस्रवर्षपर्यन्तमुदक एव स्थितमण्डं अजीवं न जीवो तत्र भोक्ता न कोऽपि प्रविष्टः एतदर्थमेव भगवता विलम्बः कृतः अतः परमुदके स्थितं विलीनं भविष्यतीति अजीवो जीवव्यतिरिक्तो भग-वान् अजीवं जीवरहितं अजीवयत् जीवयुक्तं कृतवान् स्वयं प्रविश्य प्राणानपि तत्र योजितवानित्यर्थः ॥ ३४ ॥

तदा भगवता प्राणेन चाधिष्ठितो विराट्पुरुषशब्दवाच्यो जातः तदा स एव पुरुषः तस्मादेव हेतोः जलाद्वा अण्डं निर्भिद्य कटाहं भित्त्वेति केचित् कश्चित्स एव कटाहाद्गोलकं पृथक् कृत्य निर्गतः अण्डकटाहमात्मानं च पृथक्कृतवानित्यर्थः वस्तुतोऽण्डभावं परित्यज्य पुरुषो भूत्वा यथासुखं परिवर्तत इतियुक्तं तस्य तद्रूपं वर्णयति सहस्रोर्वङ्घ्रिबाह्वक्ष इति सहस्रं ऊरवः अङ्घ्रयः बाहवः अक्षीणि च यस्य सहस्राननानि चयेषु तादृशशीर्षयुक्तः सहस्रशीर्षा पुरुष इत्यर्थसिद्ध्यर्थं रूपः संपन्नः ॥ ३५ ॥

तस्य सर्वाधारत्वमाह यस्येहावयवैरिति एतावता यतः सृष्टं यद्रूपमिति द्वयस्योत्तरमुक्तं यस्यावयवैः पादादिभिः लोकान् पातालादीन् मनीषिण इति ध्यानार्थमेषा कल्पना कट्यादिभिः पश्चाद्भागव्यवस्थया अधः अधोभागे सप्त अतलादयः जघनादिभिः अग्रिमभागादारभ्य अधोभागस्तु उपरिभागाद्विमुख अतः कट्यादेः जघनादेश्चाविरोधः ॥ ३६ ॥

पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ।
ऊर्व्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत ॥ ३७ ॥
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥ ३८ ॥
ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात् ।
मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ॥ ३९ ॥
तत्कट्याञ्चातलं क्लृप्तमूरुभ्यां वितलं विभोः ।
जानुभ्यां सुतलं शुद्धं जङ्घाभ्यान्तु तलातलम् ॥ ४० ॥
महातलन्तु गुल्फाभ्यां प्रपदाभ्यां रसातलम् ।
पातालं पादतलत इति लोकमयः पुमान् ॥ ४१ ॥
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
स्वर्लोकः कल्पितो मूर्द्ध्ना इति वा लोककल्पना ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां द्वितीयस्कन्धे पुरुषसंस्थानुवर्णनं
नाम पञ्चमोऽध्यायः ॥ ५ ॥

श्रीविश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तदा भगवतः तेष्वेव प्रविष्टस्य शक्त्या संहननकारिण्या चोदिताः योजिताः सन्तः सदसत्त्वं मुख्यगौणभावम् उपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकम् अदः अण्डरूपं शरीरं ससृजुः ॥ ३३ ॥

वर्षपूगैर्वर्षसमूहैर्यत् सहस्रे तदन्ते सहस्रवर्षान्ते इत्यर्थः । जीवो हिरण्यगर्भान्तर्यामी पुरुषः जीवयतीति व्युत्पत्तेः । यस्यात्मा शरीरमिति श्रुतेः । अजीवमचेतनमण्डमजीवयत् चेतयति स्मेति परमेश्वरस्यान्वय उक्तः ॥ ३४ ॥

सर्वव्यापकत्वाद्व्यतिरेकमाह । स एव हिरण्यगर्भान्तर्यामी पुरुषः तस्मादिति ल्यब्लोपे पञ्चमी तं हिरण्यगर्भं प्रविश्य स्थितोऽपि अण्डं निर्भिद्य निर्गतः तद्बहिःस्थितः । कीदृशः साक्षित्वापेक्षायां कारणांशत्वं तस्य स्वीयं निर्गुणं स्वरूपमाह सहस्रेति ॥ ३५ ॥

इह ब्रह्माण्डाभ्यन्तरे यस्य गुणमयरूपस्यावयवैर्लोकान् कल्पयन्ति स लोकमयः पुमान् विराट्पुरुषः इति षट्श्लोकस्थेनान्वयः । कटिरिति ऊरुमूलयोः पश्चाद्भागः । जघनं पुरोभागः । अधः सप्त लोकान् अतलादीन् । ऊर्द्ध्वं भूरादीन् ॥ ३६ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तदाभगवच्छक्त्याचोदितः प्रेरितः संहत्यपंचीकरणप्रकारेणमिलित्वासदसत्त्वं स्थूलसूक्ष्मभावमुपादायअतएवोभयंस्थूलसूक्ष्मरूपम् अदः आयतनम् ब्रह्मांडंससृजुः ॥ ३३ ॥

जीवयतीतिजीवः परमात्माकालादीनधिष्ठायस्थितः अजीवमचेतनम् अजीवयच्चेतयतिस्म ॥ ३४ ॥

सएवब्रह्मांडजीवयितापुरुषःअंडान्निर्भिद्यतस्मान्निर्गतः पृथक्स्थितः अप्राकृतंतच्छरीरंदर्शयति सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवानिति तथाचश्रुतिः "सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपाद्"इति ॥ ३५ ॥

यस्यभगवतःअवयवैः विराट्शरीरावयवैः मनीषिणोबुद्धिमंतः लोकान्कल्पयंतितदेवाहकट्यादिभिरिति कटिरूरुमूलयोःपश्चाद्भागः जघनंपुरोभागः कट्यादिभिरधःसप्तलोकानतलादीन्जघनादिभिरूर्द्ध्वंसप्तलोकान्भूरादीन् ॥ ३६ ॥

———

भाषा टीका ।

तब भगवत् शक्तिसे प्रेरितअन्योन्य संहत होकर सदसत्व लेकर इसस्थूलसूक्ष्मको उत्पन्न किया ॥ ३३ ॥

सहस्रों वर्ष योगके अनन्तर जलमें पड़े उस अंडको कालकर्म स्वभावस्थजीव (जीवनदातापरमात्मा) ने जीवित किया ॥ ३४ ॥

वही पुरुष उस अंडको निर्भेदकर अर्थात् उस से पृथक्रूप से निर्गतहुआ वह पुरुष ऊरू अंघ्रि बाहु आंख वालाहै और इस के हजारोंमुख और मस्तक हैं ॥ ३५ ॥

जिस पुरुष के अवयवोंमें मनीषीजनलोक कल्पनाकरते हैं । कटि से नीचे सातलोक और जघन से ऊपर सातलोक ॥ ३६ ॥

———

श्रीधरस्वामिकृत भावार्थदीपिका ।

वर्णानां तत उत्पत्तिं दर्शयति पुरुषस्येति । ब्रह्म ब्राह्मणः मुखमिति कार्यकारणयोरभेदविवक्षयोक्तम् । बाहव इति च क्षत्रियः ॥ ३७ ॥

इदानीमुपासनार्थं लोककल्पनाभेदान् दर्शयन् सप्तलोकपक्षमाह द्वाभ्याम् । भूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्यन्ताभ्याम् ॥ ३८ ॥

स्तनद्वयादिति । उपासनार्थत्वात् [लोकयोः] ऊर्ध्वाधोभाववैपरीत्यं न दोषः । यद्वा स्तनत् शब्दं कुर्वत् यत् ओष्ठद्वयं तस्मादित्यर्थः । ब्रह्मलोको वैकुण्ठाख्यः, स तु सनातनो नित्यः, न तु सृज्यप्रपञ्चान्तर्वर्त्तीत्यर्थः ॥ ३९ ॥

इदानीं चतुर्दशलोकपक्षं दर्शयति । तत्र जघनादिभिः भूरादयः पूर्वोक्ता एव सप्त । कट्यादिभिरधः सप्त लोकानाह तत् कट्यामिति द्वाभ्याम् । शुभं हरिभक्तनिवासत्वात् ॥ ४० ॥ ४१ ॥

त्रैलोक्यपक्षमाह । भूर्लोकः पातालादिसहितः ॥ ४२ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

———

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य टिप्पणी ।

[पुरुषस्य मुख मित्यादिना ब्राह्मणोऽस्य मुखमासी दित्येकऋचोऽर्थ उक्तः ॥ ३७ ॥]

भुर्वलोक इति । भुव इत्यव्ययम् अन्तरिक्ष लोकस्यनाम ॥ ३८—४१ ॥

[भूर्लोक इत्यादिना नाभ्या आसीदन्तरिक्षमित्येक ऋचोऽर्थः ॥ ४२ ॥

———

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

वर्णानां तद्विभूतित्वाच्चतुर्मुखरूपेणावस्थितात्ततउत्पत्तिंदर्शयति पुरुषस्येति ब्रह्मब्राह्मणः मुखमितिकार्यकारणयोरभेदविवक्षयोक्तं बाहव इति च क्षत्रं क्षत्रियः ॥ ३७ ॥

इदानीमुपासनार्थं लोककल्पनाभेद दर्शयँश्चतुर्दशलोकपक्षमाह भूरित्यादिचतुष्टयेन भूर्लोकःपातालमारभ्य पद्भ्यां कटिपर्यन्ताभ्यां कल्पितःभुवर्लोकः नाभितः नाभिमारभ्यस्तनद्वयात् हृदय कमलाकारंतदूर्ध्वभाग उरः ब्रह्मलोकः सनातन इति सत्यलोकविशेषणं सनातनत्वं च भूराद्यपेक्षया यद्वा ब्रह्मलोकोवैकुंठाख्य लोकः सनातनः नतुसृज्यप्रपंचांतर्वर्तीत्यर्थः ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

इदानीं संग्रहेण लोकत्रयकल्पनामाह भूर्लोकः कल्पित इति पादतलमारभ्य नाभितः भूर्लोकः नाभिमारभ्य मूर्द्धतः भुवर्लोकः मूर्द्धा-स्वर्लोकः कल्पितः अतलादीनां भूरादिष्वंतर्भावात ॥ ४२ ॥

इतिश्री मद्भागवत महापुराणे द्वितीय स्कन्धे वीरराघव कृत टीकायां पञ्चमोऽध्यायः ॥ ५ ॥

———

श्रीमद्विजयध्वजकृत पदरत्नावली ।

इदानींपुरुषस्यमुखाद्यंगेभ्योब्राह्मणादिजातिजनिमाह पुरुषस्येति ब्राह्मणोमुखमित्यंघमुखाज्जातत्वहेतुनइत्यादेर्मुखमित्यादिप्रथमापंचम्यर्थे प्रमाणांतरगवेषणायासांनकर्त्तव्योऽत्रैवदर्शनादितिभावेनाह ऊर्वोरिति अनेनपुरुषमाख्योहरेर्यथामुखाद्यंगेभ्यो ब्राह्मणादिजात्युत्पत्तिरेवं लोकसृष्टिरपितदंगेभ्यःसिद्धानान्यतः ॥ ३७ ॥

तामेवसृष्टिंप्रपंचयति भूर्लोकइति भूरितिभूमेरव्ययंनामांतरं भूर्लोकःपद्भ्यांजातइति * कल्पितइतिअन्वेतव्यं भुवइत्यंतरिक्षलोकः इदमव्ययं जघनपार्श्वयोःसामीप्याज्जघनादिभिरित्यनेननविरोधः ॥ ३८ ॥ ३९ ॥

कट्योर्जघनांतर्भावेऽप्यूर्वोस्तत्सामीप्यादूर्वादिभिरित्यस्याविरोधइति ॥ ४० ॥

उपसंहरति इतीति यतएवहरेर्लोकानमांतृत्वंलोकाधारत्वंलोकव्याप्तत्वंलोकोत्तमत्वंच अतोवैराजाख्योविष्णुर्लोकमयइतिउपासीतेतिशेषः ॥ ४१ ॥

प्रकारांतरेणपुरुषावयवेभ्योलोकसृष्टिप्रकारमाह भूर्लोकइति अत्रातलादीनांभूम्यंतर्भावेनमहरादीनांस्वर्लोकांतर्भावेनत्रिलोकविवक्षाज्ञेया अतोनोकविरोधःअत्रेदंतात्पर्यमुक्तंभवति चतुर्दशलोकपक्षस्त्वेकःसप्तलोकपक्षस्त्वपरः त्रिलोकपक्षस्त्वन्योऽधिकारभेदनध्यानार्थत्वात्कल्पनायास्ततोविकल्पउपपन्नइति ॥ ४२ ॥

इतिश्रीभा०म०द्वि०विज०टी०पंचमोऽध्यायः ॥ ५ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

स्तनद्वममारभ्य ग्रीवापर्य्यन्तेऽवयवेयथाक्रमं जनलोकस्तपोलोकश्चेत्यर्थः । ब्रह्मणो भगवतो लोकः ब्रह्मस्वरूपो लोक इति वा ॥ ३९ ॥

तत् कट्यामिति युग्मकम् ॥ ४० ॥ ४१ ॥

पद्भ्यां कटिपर्य्यन्ताभ्याम् । नाभितःउदरपर्यन्तेइत्यर्थः । मूर्ध्ना इदादिमूर्द्धपर्यन्तेन ॥ ४२ ॥

इतिश्रीमद्भागवत द्वितीयस्कन्धस्य ॥

श्री जीवगोस्वामिकृतक्रमसन्दर्भे पंचमोऽध्यायः ॥ ५ ॥

———

* ज्ञातः

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

एवं सामान्येन उद्देशमुक्त्वा भगवतो य कृष्णवर्णानां अवयवमध्यपातेऽपि मुख्यत्वात् तानग्रे निरूपयति पुरुषस्य मुखं ब्रह्मेति ऊर्वोरिति भेदेन निर्देशः भगवद्भावाप्तिनिषेधार्थः वैश्यशूद्रयोर्मुक्त्यभावायपद्भ्यां शूद्रः पद्भ्यामितपंचमी एतेब्राह्मणादयोऽधिकारिपुरुषाः तत्तदा त्यधिष्ठातृदेवतारूपा ॥ ३७ ॥

इदानीलोककल्पनामाह भूर्लोक इतिपद्भ्यां सप्तलोकपक्ष उच्यते पादादिकटिपर्यंतं भूर्लोकः भुवर्लोकस्तस्य नाभितः हृदयगतस्थानं उर एतदुपरि उच्चस्थानंमहात्मनइतिततः परक्षानितामग्रवास्यात् महांतःआत्मानोयत्रेति ॥ ३८ ॥

स्तनद्वयात् नासिकाद्वयात् स्तनशब्द इति व्युत्पत्त्या मूर्द्धभिःसप्तलोकाः तुशब्देनमतांतरेतत्रान्ये लोका उक्तास्तेनिवारिताः इदानीं चतुर्दशलोकपक्षं वक्तुं पूर्वोक्ता एवैते उपरितनालोकाः ॥ ३९ ॥

अधस्तनान् सप्ताह तत्कट्यामिति उपरितनलोकानामुत्तमत्वात् भगवदवयवानां कारणत्वमुक्तं अतलस्य तु मयपुत्रनिवासात् मोहक बाहुल्याच्च भगवदवयवस्याधारत्वमात्र कल्पतामिति पूर्वमेवतामसत्वाद्विशेषाभ्यामे तस्यानुपयोगात्वितले महादेवस्य विद्यमानत्वात् भगवतो महत्त्वमाह विभोरिति यस्तुमहादेवस्यापि सुखप्रद इत्यर्थः सुतले शुद्धं भगवतो विद्यमानत्वात् ॥ ४० ॥

लोकमय इति अवयवैःकल्प्मानां लोकानां तत्रैव विद्यमानत्वात् लोकमयत्वं पुमानिति नेदमुपासनार्थमुक्तं किंतुपुमानेवनान्यः ॥४१॥

त्रिलोकपक्षमाह भूर्लोकइतिपद्भ्यां कटिपर्यंताभ्यांनाभितः कट्यादिग्रीवापर्यंतात् मूर्ध्नोग्रीवा दिब्रह्मरंध्रपर्यंतेन इति या लोककल्पनेति कल्पनात्रयंत्रिविधा गुणतः विद्यातः यज्ञतश्चेति यथाधिकारंव्यवस्था सात्त्विकानां चतुर्दशलोकपक्षः राजसानांसप्ततामसानांत्रिलोकपक्षइति ४२

इति श्रीभागवतसुबोधिन्यांद्वितीयेपंचमः ॥ ५ ॥

श्रीविश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

प्रसंगेन वर्णानां परमेश्वरादुत्पत्तिमाह । ब्रह्मब्राह्मणो मुखमिति कार्यकारणयोरभेदविवक्षयोक्तम् । क्षत्रं क्षत्रियम । ब्राह्मणोऽस्य मुख मासीद्बाहूराजन्यः कृत इति श्रुतेः ॥ ३७ ॥

इदानीमुपासनार्थं लोककल्पनाभेदान् दर्शयन् सप्तलोकपक्षमाह द्वाभ्याम् । भूर्लोकः पातालमारभ्यपद्भ्यां कटिपर्यन्ताभ्याम् ॥ ३८ ॥

स्तनद्वयादिति उपासनार्थत्वात् ऊर्ध्वाधोभावविपर्यासेन दोषः । यद्वास्तनतल शैलं कुर्वत् यत् ओष्ठद्वयं तस्मादित्यर्थः । सत्यलोकः सप्तमः । तदुपरि ब्रह्मणो भगवतो लोकः वैकुण्ठः । स तु विराडङ्गत्वेन न ध्येयः यतः सनातनः ब्रह्माण्डमध्यवर्तित्वेऽपि भगवानिव नित्यः ॥ ३९ ॥

चतुर्दशलोकपक्षं दर्शयति । तत्र जघनादिभिर्भूरादयः पूर्वोक्ता एव सप्त । कट्यादिभिरधः सप्त लोकानाह तत्कट्यामिति द्वाभ्याम् शुद्धं प्रह्लादबलिप्रभृतिहरिभक्तनिवासत्वात् ॥ ४० ॥ ४१ ॥

त्रिलोकपक्षमाह । भूर्लोकः पातालादिसहितः ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ॥

द्वितीयेपंचमोऽध्यायः सङ्गतःसङ्गतःसताम् ॥ ५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अथवर्णानामुत्पत्तिमाह पुरुषस्येति ब्रह्म ब्राह्मणाः पुरुषस्यमुखम मुखजम् क्षत्रक्षत्रियः बाहवः बाहुजम् कार्यकारणयोर्भेदाभेदसंबंधात्मुखंब्र ह्मेत्यादिवाक्यद्वयमुपपन्नम् तथाचश्रुतिःब्राह्मणोऽस्यमुखमासीदित्यादिः॥३७॥

अथोपासनार्थलोककल्पनाभेदंदर्शयन्सप्तलोकपक्षमाह भूर्लोकइतिद्वाभ्याम भूर्लोकः पातालमारभ्यपद्भ्यांकटिपर्यंताभ्यांकल्पितः संपादितः ॥ ३८ ॥

जनलोकश्चस्तनद्वयात् ग्रीवायांतपोलोकः पाठक्रमादर्थक्रमोबलीयान् सप्तलोकस्यसनातनत्वंभृगाद्यपेक्षयाबोध्यम भृगादयोऽल्पकाल स्थायिनः सत्यलोकश्चिरकालस्थायीतिविवेकः यद्यपिवैकुंठलोकः सनातनस्तथापिप्राकृतलोकगणनायांतस्यासंभवात्सनेहगृह्यते॥३९॥

अथचतुर्दशलोकपक्षमाह तत्रजघनादिभिर्भूरादयः प्राक्प्रदर्शिताः एव सप्त कट्यादिभि रधः सप्तलोकानदर्शयति तदितिद्वाभ्याम् शुद्धहरिभक्तनिवासत्वात् ॥ ४० ॥

इतीत्थलोकमयः चतुर्दशभुवनमयः पुमान्पुरुषः देहदेहिनोरभेदविवक्षयापुंसोलोकमयत्वोक्तिर्युक्तैव ॥ ४१ ॥

अथलोकत्रयपक्षमाह भूर्लोकः पातालादिसहितःपद्भ्यांकल्पितः भुवर्लोकः नाभितः स्वर्लोकः सत्यलोकांतः मूर्ध्नाकल्पितः ॥ ४२ ॥

इतिश्रीमद्भागवतसिद्धांतप्रदीपेद्वितीय स्कंधेपंचमाध्यायार्थप्रकाशः ॥ ५ ॥

भाषा टीका ।

ब्रह्म ब्राह्मण पुरुषकामुख क्षत्रिय बाहु ऊरूवैश्य और भगवान के पादों से शूद्र जन्मा है ॥ ३७ ॥

चरणों से भूर्लोक नाभिसे भुवर्लोक हृदय से स्वर्ग लोक महात्माके उरसे महर्लोक ग्रीवासे जनलोक स्तनद्वय (ओंठों) से तपोलोक मूर्द्धाओंसे सत्यलोक और सनातन ब्रह्मलोक कल्पित है ॥ ३८ । ३९ ॥

उनकी कटि में अतल कल्पित है विभुके ऊरुओं में वितल जानुओं से शुद्ध सुतल जंघाओं में तलातल गुल्फोंसे महातल और प्रपदों रसातल और पादतल से पाताल कल्पितहै यह लोकमय पुरुष है ॥ ४० ॥ ४१ ॥

भूर्लोक चरणोंसे कल्पित है भुवर्लोक उनकी नाभि से और स्वर्लोक मूर्द्धा से यह भी लोक कल्पना है ॥ ४२ ॥

॥ द्वितीयस्कंधे पंचमोऽध्यायः ॥

षष्ठोऽध्यायः।

वाचो वन्हेर्मुखं क्षेत्रं छन्दसां सप्त धातवः।
हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥ १ ॥
सर्वासूनाञ्च वायोश्च तन्नासे परमायने।
अश्विनो रोषधीनाञ्च घ्राणो मोदप्रमोदयोः ॥ २ ॥
रूपाणां तेजसां चक्षु दिंवःसूर्यस्य चाक्षिणी।
कर्णौ दिशाञ्च तीर्थानां श्रोत्र माकाश शब्दयोः ॥ ३ ॥
तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनम्।
त्वगस्य स्पर्श वायोश्च सर्वमेधस्य चैव हि ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका।

षष्ठे विराड्विभूतिश्च प्रोक्ताध्यात्मादिभेदतः।
दृढीकृतश्च पूर्वोक्तं सर्वं पुरुषसूक्ततः ॥ ० ॥

इदानीं वैराजस्य विभूतिः सप्रपञ्चमनुवर्ण्यते। वाचाम् अस्मदादिवागिन्द्रियाणां तदधिष्ठातुर्वन्हेश्च तस्य मुखं क्षेत्रम् उत्पत्तिस्थानम्। छन्दसांगायत्र्यादीनांसप्तानां तस्य धातवः त्वगादयः क्षेत्रम् हव्यं देवानामन्नम्। कव्यं पितृणामन्नम्। अमृतं तदुभयशेषो मनुष्याणाम्। तेषामन्नानांसर्व्वरसस्य च मधुरादेः षड्विधस्य चकारात् अस्मदादिरसनेन्द्रियस्य तदधिष्ठातुर्वरुणस्य च एतस्य जिह्वाक्षेत्रम्। एवं सर्व्वत्रानुक्तमुन्नेयम् ॥ १ ॥

सर्व्वासूनाम् अस्मदादिप्राणानां तस्यनासे नासारन्ध्रे परमायने उत्तमक्षेत्रे। मोदप्रमोदयोश्च सामान्यविशेषगन्धयोर्घ्राणेन्द्रियं परमायनम् ॥ २ ॥

तेजसां रूपप्रकाशकानाम्। चक्षुः इन्द्रियम् अक्षिणी नेत्रगोलके। सर्व्वत्र षष्ठ्यन्तानां प्रथमान्तं क्षेत्रं द्रष्टव्यम्। कर्णौ श्रोत्राधिष्ठानं श्रोत्रमिन्द्रियम् ॥ ३ ॥

तस्य गात्रं शरीरं वस्तूनां ये सारांशास्तेषां भाजनं स्थानम् अस्य त्वक् स्पर्शस्य वायोश्चेत्यर्थः। सर्व्वस्य मेधस्य यज्ञस्य ॥ ४ ॥

———

श्रीराधारमणदास गोस्वामि विरचित दीपिनाख्य तट्टिप्पणी।

गायत्र्यादीनामिति। आदिना उष्णिकत्रिष्टुब्जगतीपंक्तिबृहतीनां ग्रहणम्। विशेषः तृतीयस्कन्धीयद्वादशाध्याये वक्ष्यति ॥ त्वगादय इति। आदिना चर्म्ममांसरुधिरमेदोमज्जाऽस्थ्नां ग्रहणं दशमाध्याये उक्तश्च ॥ मधुरादेरिति। आदिना कटुतिक्तकषायाम्ललवणानां ग्रहणम् ॥ १ ॥ २ ॥

[दिव इति। दिवोज्योतिश्चक्रस्येत्यर्थः ॥ ३ ॥ ४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका।

एवं कृत्स्नप्रपंचस्य महदादिक्रमेण सृष्टस्य वैराजविभूतित्वमभिधाय तदेव पुरुषसूक्तसंवादेन दृढीकुर्वन्यद्रूपमित्यादेरुत्तरमाह वाच इति वाचो वागिन्द्रियस्य तदधिष्ठातृदेवताभूताग्नेश्च भगवन्मुखं स्थानमाश्रयः गायत्र्युष्णिग्बृहतीपंक्ति जगतीत्रिष्टुबनुष्टुभां सप्तानां छन्दसां सप्तधातवः त्वगादिसप्तधातुस्थानीया भगवद्विग्रहावयवा स्थानं हव्यं देवानामन्नं कव्यं पितृणाममृतं तदुभयशेषो मनुष्याणां एषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य चकारादस्मदादिरसनेन्द्रियस्य तदधिष्ठातुर्वरुणस्य च तस्य जिह्वाक्षेत्रं एवं सर्वत्रानुक्तं मुन्नेयम् ॥ १ ॥

सर्वासूनामस्मदादिप्राणानां वायोश्च तस्य नासे नासारंध्रे परमायने उत्तमक्षेत्रे औषधीनामश्विनो मोदप्रमोदयोश्च तद्घ्राणेन्द्रियं स्थानं मोद अनुकूलवस्तुदर्शनजसुखविशेषः प्रमोदस्त्वनुकूलवस्तुनः स्वीयत्वबुद्धिजसुखविशेष इति भेदः ॥ २ ॥

रूपाणां शुक्लादीनां तेजसां रूपप्रकाशकानां च चक्षुः तच्चक्षुरिन्द्रियं स्थानं दिवः सूर्यस्य चाक्षिणी तन्नेत्रगोलकौ स्थानं सर्वत्र षष्ठ्यन्तनिर्दिष्टानां प्रथमान्तनिर्दिष्टं क्षेत्रं द्रष्टव्यं दिशांतीर्थानां तत्कर्णौ कर्णबिलं स्थानमाकाशशब्दयोस्तच्छ्रोत्रम् ॥ ३ ॥

वस्तूनां येसारांशास्तेषां सौभगस्य स्पृहणीयतायाश्च तद्गात्रं तच्छरीरं भाजनं स्थानं स्पर्शवायोः सर्वमेधस्य समस्तयज्ञस्य चास्य त्वक् स्थानम् ॥ ४ ॥

———

श्रीमद्विजयध्वजकृत पदरत्नावली।

आध्यात्मिकाधिदैवाधिभौतिकादिरूपस्यजगतोहरेर्मुखादिभ्यउत्पत्तिस्तस्यततोभिन्नत्वंतदुत्तमत्वंप्रतिमादिस्वरूपत्वंचप्रतिपाद्यतेऽस्मिन्नध्यायं तत्रप्रथममध्यात्मेन्द्रियतदभिमानिदेवतादिसर्वपदार्थानांतदंगेभ्यउत्पत्तिप्रकारमाह वाचइत्यादिना वाचोवागिन्द्रियस्यतत्कार्यस्यच तदभिमानिनोवन्हेरग्निदेवस्यचपुरुषस्यमुखंक्षेत्रंयोनिःकारणमुत्पादकमित्यर्थः क्षेत्रंपुरेगृहेदेहेकेदारेयोनिभार्ययोरिति योनिःस्त्रीणांभगेस्थानेका

श्रीमद्विजयध्वजकृत पदरत्नावली ।

तान्यस्य केपणा इतियादवः गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीमितानांसप्तानांछंदसामस्यपुरुषस्यत्वङ्मांसरुधिरमेदोमज्जास्थ्याख्याः सप्तधातवः क्षेत्रमित्यनुवर्त्तते अत्रतदुत्पन्नत्वंतदाश्रितत्वंचेतितात्पर्यमुत्तरत्राप्यनुसंधेयं हव्यादिसर्वान्नानांजिह्वेंद्रियस्यकषायमधुरादिसर्वरसस्यचतस्यपुरुषस्यजिह्वाक्षेत्रम् ॥ १ ॥

सर्वासूनांसर्वमरुतांमुख्यवायोश्चतन्नासेतस्यहरेर्नासापुटेक्षेत्रंपरमायनेचोत्तमाभयणोच अभिमानिनोरश्विनोर्व्रीह्याद्यौषधीनांचघ्राणेंद्रियस्यगंधस्यचसुरभ्यसुराभलक्षणस्यचतस्यघ्राणक्षेत्रंनपुंसकस्यघ्राणस्यपुंशक्तिमत्त्वद्योतनायघ्राणइत्युक्तंश्चविघ्राणंगंधवहांघ्राणनासाचनासिकेत्यमरः ॥ २ ॥

चक्षुरिंद्रियस्यतद्विषयाणांचरूपाणांविषयप्रकाशानांतेजसांज्योतिषांचहरेश्चक्षुःक्षेत्रं दिवांद्युलोकस्याभिमानिनः सूर्यस्यहरेरक्षिणीचक्षुर्गोलकेक्षेत्रमितिशेषः दिशांदिग्देवतानांतीर्थानांशास्त्राणांचहरेःकर्णौक्षेत्रं तीर्थंमंत्रागुपाध्यायेशास्त्रेष्वंभसिपावनइत्यभिधानं श्रोत्रेंद्रियस्यतद्विषयस्यशब्दस्याकाशस्यहरेः श्रोत्रेंद्रियकारणम् ॥ ३ ॥

वस्तुसाराणांवस्तुश्रेष्ठानांवस्तुबलानांवासौभाग्यस्यतस्यहरेर्गात्रमुत्पादकंभाजनंनिधानंनिधानपात्रंच त्वगिंद्रियस्यस्पर्शगुणस्यस्पर्शाभिमानिनांवायोःसर्वमेधस्यसर्वयज्ञस्यचास्यहरस्त्वगिंद्रियंक्षेत्रम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

मुखमितिसमष्टिसात्विकराजसाहङ्काररूपम् । प्राधान्यान्मुखमंचत्यथः । एवमुत्तरत्रापि ॥ १ ॥ २ ॥

तीर्थानाम् आगमानाम् ॥ ३ ॥

वायोर्नेतृत्वप्रधानत्वात् वाय्वाश्रयं तु त्वच्येव मुख्यं नेतृत्वं वर्त्तते । तस्मात् तत्तल्लोकनेतुर्यज्ञस्यापि सैवाश्रय इत्यर्थः ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

अनित्येजननं नित्ये परिच्छिन्ने समागमःनित्यपरिच्छिन्नतनौ...त्थं चेतिसाविधा उत्पत्तिस्थानसंबंधरूपा षष्ठेनिरूप्यतेस्थूलस्यामूर्त्तरूपस्य तद्भेददशिःफलं नारायणपरावेदा इत्यनेन निरूपितं सामान्येन तदेवात्र विस्तरेणनिरूप्यते पौरुषेणाचसूक्तेनानर्थारितमिहोदितं कार्यस्यवस्तुभेदोऽपि माहात्म्यंपरतस्तथा अमूर्त्तरूपं साधर्म्यसर्वत्रैव हरेर्वृहत् तेनसिद्धो वस्तुभेदःस्थूलं ध्यानंचसिद्ध्यति पूर्वाध्याये पूर्वमुद्दिष्टानांपदार्थानांमूर्त्तानां जननरूपाउत्पत्तिर्निरूपिता अनुद्दिष्टानामपिकालादीनांभगवत्त्वंस्पष्टतयैवोक्तंइदानींअमूर्त्तानांजीवानां मूर्त्तेनसहसंबंधानिरूप्यंत येऽपि पूर्वंदेवादय उत्पन्ना इत्युक्ताः तेऽपिविशिष्टाएवोत्पन्ना इति तत्रयदमूर्त्तं रूपं तदिदानीं पृथक्कृतस्थूलरूपं भगवत्यमूर्त्ते सर्वत्रविराजिप्रविष्टरूपे संबंधोनिरूप्यते जीवप्रकरणत्वादस्यसाधनंफलंचोत्पत्त्यानिरूपणीयंमाहात्म्यंचभगवतःअमूर्त्तमितितदप्यत्रनिरूप्यतेतत्रचत्वारोऽत्र पदार्थानिरूप्याःअमूर्त्तत्वसाधर्म्यादेवएकस्मिन्नध्याये निरूपणंप्रथमतःसर्वेषां जीवानांलिंगशरीरस्यामर्षा भगवतांलिंगशरीरे संबंधइति निरूप्यते तत्रवाचामस्मदादियाणेंद्रियाणांतदधिष्ठातुर्वह्नेश्चभगवतोमुखंविवरात्मकं क्षेत्र स्थान भगवतोहिमुखद्वयं इंद्रियरूपं गोलकरूपंचतत्रगोलकरूपे ब्राह्मणरूपत्वं पूर्वंनिरूपितं तथोत्पादितत्वर्थमितिनिरूपणाय तथापातालादीनामपि भगवदवयवेभ्यउत्पत्तिःभगवतिचस्थितिः अतःपातालादिरूपो भगवानिति निरूपितं अत्रतुतद्विपरीतं जगद्बुद्धिस्य भगवत्त्वंविधीयतेतत्रतुभगवंतमुद्दिश्य जगत्त्वं विहितंआधारत्वेनचनिरूप्यतइति अमूर्त्तानां छंदसां भगवदवयवा अमूर्त्ता आधिदैविकत्वेछंदसां स्थानमित्याह छंदसामिति गायत्री जगतीउष्णिकत्रिष्टुबनुष्टुप् पंक्ति बृहती च सप्तधातवः त्वङ्मांसरुधिर मेदो मज्जास्नायु अस्थिदेवतारूपाःएवंभगवन्मुखे मुखसंबंधिनमेपदार्थरूपाणां संबंधं निरूप्य तत्र रसनेंद्रियस्य विद्यमानत्वात्संबंधिनामपि तत्रसंबंधमाहद्रव्येतिहव्यं देवानामन्नं अस्मिन्नेवान्नमेवप्राणतत्त्वमारोप्यते तदापुरोडाशादीनां लौकिकानां हव्यत्व भवति एवं कव्य पितृणामन्नं अमृतं आतिथ्याद्यन्नं अयाचितप्राप्तं वा व्रतहेतुभूतं अन्नंब्राह्मणभुक्तशेष प्राणादिहाराद्यन्नसाधनंवा तेषांभगवतो जिह्वारसानां च षड्विधानां हव्यादिषु सर्वत्र विद्यमानानां चकाराद्रस्मदादिरसनेंद्रियतदधिष्ठातॄणांचस्थानं अनेनहव्यादिव्यतिरिक्तरसानां भगव जिह्वास्थानं नभवतीतिविमर्शः सर्वपदप्रयोगाद्ब्रवर्तीत्यन्ये ॥ १ ॥

तथासर्वेषामस्मदादीनां असूनां प्राणानां तदधिष्ठातृवायोः चकाराद्घ्राणसंबंधिनां सर्वेषांनासे नासापुटे आधिदैविके परमत्वमाधिदैविकत्वमेव अयनं स्थानं पुटद्वयमपि सर्वेषां स्थानं तत्रघ्राणेंद्रियं तुआश्विनादीनां स्थानं औषधीनां च व्रीह्यादिरूपाणां तस्माल्लोमभ्योऽतःप्राणा इति श्रुतेः वहिस्तल्लयस्यौषधीनां भगवतो घ्राणो घ्राणमिति वक्तव्ये अध्यात्ममपि घ्राणमंतर्नियंतृघ्राणइति मोदप्रमादौ सुगंधविशेषौ मोदोहिदूरादेवाति सुगंधः प्रमोदोहिसर्वगंधाभिभावकः ॥ २ ॥

रूपाणामनेकविधानां तैजसानांनक्षत्रादीनां भगवतश्चक्षुः गोलकरूपं दिवः स्वर्गस्य सूर्यस्यच चकारात्तत्संबंधिनां अक्षिणी पूर्ववत्गोलकभदेनेंद्रियांशभेदो वा कर्णगोलकरूपौ दिशामस्मदादिश्रोत्रेंद्रियदेवानां चकरादिंद्रियाणां च तीर्थानां गंगादीनां कर्णौ स्थानमित्यर्थः श्रोत्रमिंद्रियं आकाशशब्दयोः कर्णशष्कुल्यवच्छिन्ने नभसि उत्पन्नानांशब्दानां श्रोत्रेण ग्रहणात् विषयाधारयोर्भगवदिंद्रियं स्थानं वस्तूनां मध्ये ये सारभूताः सुपर्णादय उत्कृष्टरूपा वा देवताः परमार्थरूपा सौभगस्यसौंदर्यस्यच तत्संबंधिनामन्येषांचभगवद्गात्रंशरीरस्थानं भाजनमिति सर्वदास्थानरूपं व्यवहारदशायामपि अस्य भगवतस्त्वक्स्पर्शादीनांस्थानम् ॥ ३ ॥

मेध्यस्य पवित्रस्य सर्वेषामेवपावित्र्यंभगवत्त्वगिंद्रियेवर्त्तते लोकेहि जलात्शुद्धिर्भवति तदत्र भगवतः स्वेदरूपं अतो मेध्यस्य भगवत्त्वचोऽधिष्ठातृत्वेसंदेहो न कर्त्तव्य इत्याह चैव हीति चकारेण मेधाश्रयागृहीताःएवकारेण च त्वगेवस्थानं नान्यदिति इति युक्तत्वं तत्र लोमानि सति तानि उद्भिज्जादीनां स्थानानि ऊर्द्धमितन्नीत्युद्भित् अंकुरादिः तस्माज्जाता उद्भिज्जा वृक्षादयः तेषां जातयः अवांतरा धर्मपदित्यादयः सर्वेवृक्षा इति यावत् अथवायंपापवृक्षा विभीतकादयः तेषां तानि स्थानानीत्याह येषेति येःपलाशादिभि येन संभूतः निष्पादितः संभारहेतवोधाअश्वत्थादयः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

षष्ठे भगवदास्यादेर्विराड्वागाद्यभूदिति ।
तथा त्रिपादेकपादविभूत्यादिकमुच्यते ॥ * ॥

एवं मायाशक्तिसहितात् परमेश्वरात् समष्टिविराड्जायतेति प्रतिपादितम् । तत्र भूम्नोऽयमग्निः परतः समादिर्महानजादिर्मन इन्द्रियाणि सर्वेन्द्रियार्थां विबुधाश्च सर्वे ये हेतवस्ते जगतोऽङ्गभूताः इत्यत्रोक्तं परमेश्वरस्य कस्मात् कस्मादङ्गात् विराजः किं किमङ्गमभूदित्यपेक्षायामाह । वाचां समष्टिविराजो व्यष्टीनाञ्च वाचां वागिन्द्रियाणां, तदधिष्ठातुर्वह्नेश्च, मुखमिति सप्तमश्लोकस्थेन हरेरित्यनेन सम्बन्धः, क्षेत्रम् उत्पत्तिस्थानमिति मायिकाहङ्कारकार्य्यभूता अप्यमी वागादयो वह्न्यादयः सच्चिदानन्दमयस्य भगवतो मुखाद्यङ्गानां विभूतिरूपत्वात् तेभ्यो मुखादिभ्य एवामी उत्पद्यन्त इत्युच्यते । मायायास्तच्छक्तित्वात् शक्तिशक्तिमतोरभेदात् शक्तः कार्य्यं शक्तिमतोऽपि भवतीति न्यायात् । वैकुण्ठस्था वागादयस्तदंशभूतास्थिन्मया नित्या एव, तेषांचिद्धर्मत्वात्, जगद्वर्त्तिनस्त्वमी तत्तद्विभूतया मायिका अनित्या एवेति व्यवस्थितिः छन्दसां गायत्र्यादीनां सप्तानां तस्य धातव स्त्वगादयः क्षेत्रं, तस्य त्वगादिभ्यः सप्तच्छन्दांस्यभूवन्नित्यर्थः । एवमेव सर्व्वत्र षष्ठ्यन्तानां प्रथमान्त क्षेत्रम प्रथमान्ताच्च षष्ठ्यन्ताबभूवुरिति तेषां विभूत्याश्च द्रष्टव्यम । हव्यं देवानामन्नम । कव्यं पितॄणामन्नम । अमृतम् उभयशेषो मनुष्याणाम । तेषामन्नानां सर्व्वस्य मधुरादेः षड्विधरसस्य चजिह्वेन्द्रियं क्षेत्रं चकाराद्वरुणस्य तालु जिह्वेन्द्रियगोलकं क्षेत्रम ॥ १ ॥

तवासे तदीयनासारन्ध्रे अश्विनोरोषधीनाश्चात्यनयोः पूर्व्वेणैवान्वयः । मोदप्रमोदयोः सामान्यविशेषगन्धयोर्घ्राणः तदीयघ्राणेन्द्रियम् ॥ २ ॥

चक्षुस्तदीयचक्षुरिन्द्रियम । अक्षिणी तदीयनेत्रगोलके । कर्णौ तदीय श्रोत्राधिष्ठाने । श्रोत्रं तदीयश्रोत्रेन्द्रियम ॥ ३

त्वगिन्द्रियाधिष्ठानञ्च तत्त्वगात्मकम् । कमनस्पर्शस्य वायोश्च यज्ञोपयच्छन्दसः । सर्व्वस्य मखस्य यज्ञस्य । वस्तुसाराणां वस्तुशक्तीनाम् ॥ ४

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

एवं भावयो चतुर्दशभुवनात्मकविराट्शरीरस्योत्पत्तिः प्राक् दर्शिता तदेव समष्टिशरीरम तन्मुखादुत्पत्तिप्रकारो दशमेऽध्याये वक्ष्यते अत्र तु तन्मुखादितो व्यष्टिवागादिरूपविभूतिमात्र वाचामिति वाचामस्मदादिवागादीन्द्रियाणां वह्नेर्वागधिष्ठातुर्मेराजस्य मुखं क्षेत्रमुत्पत्तिस्थानम् गायत्र्युष्णिग्बृहतीपंक्तिजगतीत्रिष्टुबनुष्टुभां सप्तछन्दसाम तस्य सप्तधातवस्त्वगादयो क्षेत्रम हव्यं देवानां कव्यं पितॄणां सुभक्ष्यममृतममृतं मनुष्याणां च क्षुन्निवारकं वस्तु तान्यत्रान्नानि तेषां हव्याद्यन्नकव्यामृतान्नानां सर्व्वर स्यषड्विधस्य मधुरादेः चकारात् अस्मदादिरसनेन्द्रियस्य तदधिष्ठातुर्वरुणस्य च तस्य जिह्वाक्षेत्रम एवं सर्वत्रानुक्तमूह्यम ॥ १

सर्वभूतानामस्मदादिप्राणापानादीनाम वायोश्च तस्य नासे नासारन्ध्रे परमायने उत्कृष्टक्षेत्रे अश्विनोः नासत्यदस्रयोः औषधीनां मोदप्रमोदयोः सामान्यविशेषगन्धयो श्च तस्य घ्राणः घ्राणाख्यं क्षेत्रम ॥ २ ॥

रूपाणां शुक्लादीनां प्रकाश्यानां तेजसांतत्प्रकाशकानां चक्षुः तच्चक्षुरिन्द्रियम क्षेत्रं अक्षिणी चक्षुर्गोलके दिवः सूर्यस्य च क्षेत्रम दिशां तीर्थानां कर्णच्छिद्रं क्षेत्रम श्रोत्रमिन्द्रियम आकाशशब्दयोः क्षेत्रम तस्य गात्र शरीरम वस्तूनां यसारांशास्तेषां सौभाग्यस्य स्पृहणीयतायाश्च भाजनं स्थानम ॥ ३ ॥

अस्य वराजस्य त्वक्स्पर्शघायोः स्पर्शस्य वायोश्च सर्वमखस्य समस्तयज्ञस्य क्षेत्रम तस्य रोमाणि उद्भिज्जजातीनां सर्ववृक्षाणां यैर्वृक्षैर्वेदः संभृतः सम्यक्साधितस्तेषामपि क्षेत्रम ॥ ४ ॥

———

भाषा टीका ।

वागिन्द्रिय और उसका अधिष्ठातृ देवता अग्नि इनका उसविराट भगवान्‌का मुख क्षेत्र अर्थात् उत्पत्ति स्थानहै । और गायत्र्यादि सातों छन्दोंके इनके त्वगादि सप्तधातु धाभयहैं । हव्य, देवान्न कव्य, पित्रन्न अमृत, मनुष्यान्न और मधुरादिषड्विधरस इनका आश्रय उस भगवान की जिह्वा है ॥ १ ॥

अस्मदादिकों के प्राण और वायु इनका उत्तम स्थान उस परमात्माके नासिका के छिद्रहैं । अश्विनीकुमार, औषधि और मोदप्रमोद अर्थात् सामान्य विशेष गन्ध इनका आश्रय उस परमात्माकी घ्राणेन्द्रियहै ॥ २ ॥

शुक्लादिरूप और उनके प्रकाशक इनका चक्षु इन्द्रिय आश्रयहै । द्युलोक और सूर्य्य इनका आश्रय उसके अक्षि अर्थात् नेत्र गोलकहैं दिशा और तीर्थ इनके कर्णगोलक आश्रयहैं । शब्द और आकाशका आश्रय श्रोत्रेन्द्रियहै ॥ ३ ॥

वस्तुओंमें जो सार पदार्थ, और सौभाग्यता इनका उस परमात्माका शरीर भाजन अर्थात् आश्रयहै । स्पर्श, वायु, और यज्ञ इनका आश्रय उस परमात्मा की त्वगिन्द्रिय है ॥ ४ ॥

———

रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु सम्भृतः ।
केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् ॥ ५ ॥
बाहवो लोकपालानां प्रायशः क्षेमकर्म्मणाम् ॥ ६ ॥
विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च ।
सर्व्वकामवरस्यापि हरेश्चरण आस्पदम् ॥ ७ ॥
अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः ।
पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः ॥ ८ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

उद्भिज्जजातीनां सर्ववृक्षाणां येः वृक्षैर्यज्ञः सम्यक् साधितः तेषामेव वा । केशा मेघानां क्षेत्रं, पूर्वं तथोक्तेः । श्मश्रूणि विद्युताम् । पादकरनखानि शिलालोहानामिति सादृश्यादूह्यम् ॥ ५ ॥

क्षेमकर्म्मणां पालनकर्तॄणाम् ॥ ६ ॥

विक्रमः पादन्यासः भूरादिलोकानाम् आस्पदम् आश्रयः भूरादिशब्दानामव्ययत्वात् षष्ठ्यालुक् । क्षेमो लब्धरक्षणम् । शरणं भयात् रक्षणम् । सर्व्वेषांकामानां वरो वरणं तस्यापि हरेरङ्घ्रिरास्पदम् ॥ ७ ॥

वीर्यस्य शुक्रस्य । शिश्नोऽधिष्ठानम् । उपस्थ इन्द्रियम् । प्रजात्यानन्दः सन्तानार्थं सम्भोगः तेन या निर्वृतिस्तापहानिस्तस्याः ॥ ८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपिनाख्य टिप्पणी ।

पूर्व्वमिति । ईशस्य केशान् विदुरम्बुवाहानिति हितत्स्कन्धीय प्रथमाध्यायस्य चतुस्त्रिंशश्लोके तथोक्तत्वादित्यर्थः ॥ ५—१० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

उद्भिज्जजातीनां सर्ववृक्षाणांयैर्वृक्षैर्यज्ञः संभृतः साधितः तेषामेव तद्रोमाणि स्थानं शिलालोहाभ्रविद्युतामस्यकेशश्मश्रुनखानि स्थानं नखानिशिलालोहयोः स्थानमभ्रविद्युतोः केशश्मश्रूणी तिविवेकः ॥ ५ ॥

क्षेमकर्मणां रक्षाकारिणां लोकपालानां इंद्रादीनां तद्बाहवः स्थानं भूर्भुवः स्वरिति षष्ठ्यलुक्वचनांत भूरादीनां त्रयाणां लोकानां विक्रमस्तस्य त्रिविधपादविन्यासः स्थानं क्षेमस्य प्राप्तरक्षणस्य शरणस्य चानिष्टनिवारणस्य सर्वेषां कामानां वरस्य श्रेष्ठस्यापिहरेश्चरणो पादआस्पद आश्रयः ॥ ६ ॥

अपां वीर्यस्य शुक्रस्य सर्गस्य सृष्टेः पर्जन्यस्य प्रजापतेश्च पुंसो भगवतः शिश्नउपस्थेंद्रियाधिष्ठान मास्पदमित्यर्थः प्रजात्यानंदः संतानार्थं संभोगस्तेन यानिर्वृतिस्तापहानिस्तस्यास्तदुपस्थेंद्रियमाश्रयः ॥ ७ ॥

यमस्य मित्रस्य परिमोक्षस्य मलत्यागस्य च तस्य पायिंद्रियमाश्रयः हिंसादीनां तद्गुद आश्रयः ॥ पायुरिंद्रियं गुदमधिष्ठानम् ॥ ८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

यैरुद्भिज्जजातिविशिष्टैःपालाशादिवृक्षैर्यज्ञः संभृत संपादितः यज्ञकारिभिरितिशेषः तेषामुद्भिज्जजातीनांवृक्षाणांरोमाणिहरेरोममूलानि क्षेत्र येर्यज्ञःसंभृतोयज्ञादन्यःकार्यविशेषःसाधितस्तपांहरेरोमाणिभोगाः अर्थविकल्पोवाशब्दसूचनात् याज्ञिकारोममूलस्थारोमाणिस्थास्तुन त्वपरइतिवचनात्ज्ञायते तुशब्दउक्तार्थावधृतौवर्त्तते अस्यहरेःकेशाअभ्राणां श्मश्रूणिविद्युतांशिलालोहानां नखानिक्षत्रं पुनर्भवःकररुहोनखोऽस्त्रीनखरोऽस्त्रियामित्यमरः हरेःश्मश्र्वाश्रयाविद्युच्छिलालोहानखाश्रयाइतिवचनात् ॥ ५ ॥

ब्राह्मणवैश्यादीन्वर्जयितुंप्रायशइत्युक्तं भूर्भुवःस्वरितिभुवनत्रयमस्यहरेर्विक्रमःपादविक्षेपस्थानं क्षेमस्यमंगलस्यप्राप्तरक्षायावा शरणस्यमोक्षस्यच ॥ ६ ॥

सर्वकामवरस्यचसर्वाभिमतलाभस्यचहरेश्चरणमास्पदं दातृत्वेनेतिशेषः मोक्षःशांतिश्चशरणंनिर्वाणंचाभिधीयतइतिवचनात् शरणंमोक्षः भजेखगेंद्रध्वजपादमूलमित्यतोमोक्षोऽपिपादमूलमितिभावःस्वात्परयंगपुरंदानामन्येषांपादमूलतः मुक्तिस्तुविहिताविष्णोर्निर्दिष्टपृथगेवच इतिवचनाच्चशब्दसूचितात्सार्कविरोधः ॥ ७ ॥

अपांजलस्यवीर्यस्यरेतसःसर्गस्यसृष्टेर्जलाभिमानिनःपर्जन्यस्य सर्गाभिमानिनोदक्षप्रजापतेःशिश्नस्यचपरस्यपुंसःशिश्नंक्षेत्रं प्रजातिः प्रजननमानंदःसुखंताभ्यांसहितायानिर्वृतिः अथवाप्रजातिर्मैथुनक्रिया तन्निमित्तादानंदाद्यानिर्वृतिस्तस्याः हरेःउपस्थंगुह्येंद्रियं तुशब्दाद्गुह्येंद्रियस्यचक्षेत्रं मित्रनाम्नोदेवस्यपायिंद्रियस्यतद्विषयस्यपरिमोक्षस्यगुदक्रियायविषयस्ययमनाम्नोदेवस्यचपुंसः पायिंद्रियंक्षेत्रमित्येतन्मंदमतीनांसुबोधनार्थमन्वीयते ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

यैर्वेति वा शब्दः समुच्चये । यैर्द्रव्यैर्घृतादिभिर्यज्ञः सम्भृतस्तेषां मत्ययः । तु पादपूरणो ॥ ५ ॥

बाहव इत्यर्द्धकम् । बाहवः प्रायशः प्राचुर्य्येण लोकपालानां क्षेत्रम् । अन्येषामपि क्षेमकर्म्मणां पालनकर्तॄणामित्यर्थः ॥ ६ ॥

विक्रम इति परमात्मविराजोरभेदनोक्तिः ॥ ७ ॥

प्रजात्यानन्दाख्यां या निर्वृतिस्तस्याः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

भगवतः केशश्मश्रुनखानि शिलालोहाभ्रविद्युतां स्थानानि तत्र शिलायाः नखानि लोहस्य च अभ्राणां केशाः विद्युतां श्मश्रूणि हिरण्मय श्मश्रुत्वात् बाहवः भगवत इन्द्रियरूपा पालनकर्त्तारो देवा इन्द्रादयस्तेषां स्थानानि अन्येषामपि धर्मकर्तॄणां भगवद्बाहवः स्थानं जगद्रक्षकत्वात् सत्वाभिप्रायेण महान्ति वाक्यानि प्रायश इति सकामधर्मकर्तॄव्युदासार्थमुक्तम् ॥ ५ ॥

भगवतो विक्रमः पादविक्षेपः भूरादीनां स्थानं भूरादिशब्दा अव्ययानि तेनपञ्चम्यन्तत्वेनस्वरूपं लोके क्षेमपदार्थस्य लब्धपरिपालनात्मकस्य शरणपदार्थस्य च अभिनवरक्षणरूपस्य चकारात्प्रपत्तिभक्तस्यापि भगवद्विक्रमः स्थानं यद्यपि पादावेव स्थानं तथापि क्रियासहिता त्रिविक्रमउक्तः सर्वकामवरस्य सर्वेषां कामानां आशिषां वरस्य च देवप्रसादादिरूपकस्य अपिशब्दात् अणिमादीनां मोक्षस्य च हरेश्चरणाआस्पदं स्थानम् ॥ ६ ॥

अपांजलानां वीर्य्यस्य रेतसः सर्गस्यसृष्टेः पर्जन्यस्य मेघस्य प्रजापतेर्ब्रह्मणस्तस्य चकः इदानीं सृष्ट्यभिनिवेशाभावान्ममेति नोक्तं शिश्नो गोलक उपस्थइन्द्रियं तुशब्दः पूर्वव्यावृत्त्यर्थस्तथा प्रजातीनामनन्तो य आनंदः स्वभार्यायां ऋतुकाले संभोगजनितो यआनंदः निर्वृतः श्रमस्य उभयो अथवा प्रजातिः सकः आनंदः सुखं स्पर्शनिमित्तं निर्वृतिःकामशान्तिः अयमपि भगवदिन्द्रियं स्थानम् ॥ ७ ॥

भगवतःपायु स्थानं यमादीनां यमः पितृराजः मित्रः पायोरधिष्ठातृदेवता परिमोक्षस्यमलत्यागलक्षणस्य सव्यापारकर्मेन्द्रियस्य नारदेति संबोधनेन ये कलहकर्तारस्तेषामपि तत्स्थानमिति सूचनार्थं अथवा नारद इतिनिर्वाकरूपः अनुद्भूतकलहानां कलहमुद्भाव्य ततद्वारेण यो निवारकत्वात् हिंसायाः प्राणिवधस्य निर्ऋतेः विकृतिरूपायाः मृत्योः मारकस्य निरयस्य नरकस्य भगवतो गुदःस्थानं असमीचीनानां तत्स्थानं वदन् भीतःसन्नाह स्मृत इति एवं हिस्मर्यते पायुगुदयोःगोलकेन्द्रियरूपत्वम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

उद्भिज्जजातीनां सर्व्ववृक्षाणां, यैर्वृक्षैर्यज्ञः सम्भृतस्तेषामेव नान्येषामिति वा । केशा अभ्राणां मेघानां क्षेत्रम्, ईशस्य केशान् विदुरम्बुवाहानिति पूर्व्वोक्तेः । श्मश्रूण्यपि मेघानामेव, वर्णसाम्यात् । नखानि महाकान्तिमन्ति विद्युतां क्षतरक्ताशिलालोहानामित्यपि साहश्यादूह्यम् ॥ ५ ॥

क्षेमकर्म्मणांपालनकर्तॄणाम् ॥ ६ ॥

विक्रमः पादन्यासो भूर्भुवः स्वरिति भूरादिलोकानाम् अव्ययत्वात् षष्ठ्या लुक् । क्षेमस्य कल्याणस्य । शरणस्य रक्षकवस्तुनः । सर्व्वेषां कामानां वरस्य वरणस्य ॥ ७

वीर्य्यस्य शुक्रस्य । पर्जन्यस्यवृष्यमाणस्य । शिश्नोऽधिष्ठानम् । उपस्थ इन्द्रियम् । प्रजात्यानन्देनसन्तानार्थसंप्रयोगेण निर्वृतिस्तापहानिस्तस्याः ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

अस्य केशश्मश्रुनखानि शिलालोहाभ्रविद्युतां क्षेत्रम् तत्र केशा अभ्राणां मेघानाम् श्मश्रूणि विद्युताम् पावकनखानि शिलालोहानामितिविवेकः तस्य बाहवः प्रायशः क्षेमः प्रजापालनमेव कर्मयेषांतेषां लोकपालानामिन्द्रादीनां क्षेत्रम् कदाचिदाऽऽपदि पालनं न कुर्वन्ति इंद्रारिव्याकुलं लोकमित्युक्तेः अतः प्रायश इत्युक्तम् ॥ ५ ॥

हरेर्विक्रमः पादन्यासः भूरादिलोकानामास्पदमाश्रयः भूरादीन्यव्ययानि अतः षष्ठ्यालुक् क्षेमस्य प्राप्तरक्षणस्य शरणस्यानिष्टाद्रक्षणस्य किंबहुना सर्वेभ्यः कामेभ्य ऐहिकामुष्मिकेभ्यः वरस्य श्रेष्ठस्य मोक्षस्यापि हरेश्चरणमास्पदम् ॥ ६ ॥

पुंसः वैराजस्य शिश्नः उपस्थेंद्रियाधिष्ठानम् अपां वीर्यस्य शुक्रस्य सर्गस्य सृष्टेः पर्जन्यस्य प्रजापतेश्च आस्पदमपुंसः उपस्थस्तु प्रजात्यानंदेन संतानहेतुकभोगेन यानिर्वृतिः तापहानिस्तस्या आस्पदम् ॥ ७ ॥

हेनारद पुंसः पायुरिंद्रियम् यमस्य मित्रस्य परिमोक्षस्य मलत्यागस्य च आस्पदम् तस्य गुदं पायुरिंद्रियस्थानम् हिंसादीनामास्पदम् ॥ ८ ॥

भाषाटीका

सब वृक्षों में से जिनसे यज्ञ सम्भृत अर्थात् साधित होताहै उन वृक्षों के इस परमात्माके रोम आश्रयहैं । शिला, लोह, अभ्र और विद्युत् इनके आश्रय इस भगवान् के केश और श्मश्रु, और नखहैं ॥ ५ ॥

पालन करनेवाले जो इन्द्रादि लोकपाल हैं उनका आश्रय इनकी बाहु अर्थात् भुजा हैं ॥६॥ भूरादि तीनों लोकोंका आश्रय मन रूपधारी भगवानका विक्रम अर्थात् त्रिविध पाद विन्यास है क्षेम, प्राप्तरक्षण शरण, भयसंरक्षण और सब कामों में जो श्रेष्ठहै इनका हरिचरण

पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ।
हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदं स्मृतम् ॥ ९ ॥
पराभूतेरधर्म्मस्य तमसश्चापि पश्चिमः ।
नाड्यो नदनदीनाञ्च गोत्राणामस्थिसंहतिः ॥ १० ॥
अव्यक्तरससिन्धूनां भूतानां निधनस्य च ।
उदरं विदितं पुंसो हृदयं मनसः पदम् ॥ ११ ॥
धर्म्मस्य मम तुभ्यञ्च कुमाराणां भवस्य च ।
विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणम् ॥ १२ ॥

भाषा टीका ।

जल, वीर्य, सृष्टि, और प्रजापति इनका आश्रय इस पुरुष का शिश्न अर्थात् लिङ्ग आश्रय है । सन्तानार्थ संभोगसे जो सुख प्राप्त होता है उसका आश्रय उपस्थेन्द्रिय है ॥ ८ ॥

हे नारद ! यम, मित्र, और मलत्याग इनका अधिष्ठान पायु इन्द्रिय है । हिंसा, निर्ऋति, मृत्यु, और नरक इनका आश्रय उसकी गुदा है ॥ ९ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

परिमोक्षस्य मलत्यागस्य । पायुः इन्द्रियम् । गुद (गुदः) स्थानम् । निर्ऋतेरलक्ष्म्याः ॥ ९ ॥

तमसोऽज्ञानस्य । पश्चिमः पृष्ठभागः । गोत्राणां गिरीणाम् अस्थिसंघातः ॥ १० ॥

अव्यक्तं प्रधानं रसः अन्नादिसारः सिन्धवः समुद्राः तेषाम् । निधनस्य लयस्य । उदरं पदं स्थानं विदितं ज्ञानिभिः । मनस अस्मदादिलिङ्गशरीरस्य ॥ ११ ॥

तुभ्यं तव कुमाराणां सनकादीनाम् । भवस्य श्रीरुद्रस्य । आत्माचित्त परम् अयनम् ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपनाख्यतट्टिप्पणी ।

निधनस्येति । प्रलयस्येत्यर्थः । तदानीं सर्वेषां तत्र लयादिति व्याख्यालेशः ॥ ११ १२ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

पराभूतेरलक्ष्म्याः अधर्मस्य तमसोऽज्ञानस्यापि पश्चिमः तत्पृष्ठभागआश्रयः नदनदीनां नाड्यः स्थानं गोत्राणां गिरीणां तदस्थिसंहननम् ॥ ९ ॥

अव्यक्तं प्रधानं रसोऽन्नादिरसः सिन्धवः समुद्राः तेषां भूतानां निधनस्य लयस्य च तदुदरं स्थानं विदितं मनसः सर्वदेहिमनस्तत्त्वस्य पुंस ईश्वरस्य यद्धृदयं तत्पदं स्थानम् ॥ १० ॥

धर्मस्य मम चतुर्मुखस्य तुभ्यं तव कुमाराणां सनकादीनां भवस्य रुद्रस्य विज्ञानस्य च तत्त्वस्य महत्तत्त्वस्य परस्य भगवतः आत्मान्तःकरणं परायणं श्रेष्ठ स्थानम् ॥ ११ ॥

एवं परमात्मनो जातं कृत्स्नं जगत्तद्विभूतिभूतं तच्छरीरत्वेन ततोनतिरिक्तमित्युक्तं एतदेव पुरुषसूक्तार्थकथनेन प्रथयति तत्र सहस्रशीर्षेत्यत्रर्भस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्चार्थः पूर्वाध्याये कथितः पुरुष एवेदं सर्वमित्यस्यार्थमाह अहमित्यादिभिः सार्द्धैस्त्रिभिः अहं चतुर्मुखः भवान्नारदः भवो रुद्रः अग्रजाः मुनयः सनकादयः ॥ १२ ॥

श्रीमद्विजयध्वज कृत पदरत्नावली ।

हिंसादीनांपुंसोगुदोगुदमपानद्वारंक्षेत्रं पराभूतः पराजयस्याऽलक्ष्म्यावाऽधर्मस्यपापस्यतदभिमानिनोऽधर्मस्यकलेश्चतमसस्तमोगुणस्यचपश्चिमःपृष्ठभागःक्षेत्रम् ॥ ९ ॥

नदनदीनांशोणगंगादीनांतुशब्दादितरनदीनांचपुंसोनाड्यःक्षेत्रंगोत्राणांपर्वतानांहरेरस्थ्नांसंहतिःक्षेत्रं अव्यक्तस्यमूलप्रकृतेः रसादीनां मधुरादीनांसिन्धूनांसमुद्राणां भूतानांजीवानां निधनस्यसंहारस्यच ॥ १० ॥

पुंस उदरंक्षेत्रमितिविदितंमनसःपरस्यहृदयंपदंक्षेत्रं धर्मस्यसुकृतस्यतदभिमानिनोधर्माख्यदेवस्यचतुर्मुखनाम्नोममतुभ्यंतवकुमाराणांसनकादीनांचतुर्णांभवस्यरुद्रस्यच विज्ञानस्यतत्त्वस्यचतदभिमानिन्याःसरस्वत्याश्च परस्यपुंस आत्मामध्यदेहःपरायणं कुमारब्रह्मरुद्राद्याहं मध्यात्समुद्रात्त्यननात्माजीवधृतेरित्यादिभिधानेनापिसिद्धं सृजामितन्नियुक्तोऽहमितियत्सर्वंस्यातद्यहरेरुक्तं तत्पुरुषसूक्तसंवादेनविवृणोति - अहंभवानित्यादिना अग्रजा मुनयःसनकादयः ॥ ११ ॥ १२ ॥

श्रीमद्वल्लभाचार्य्य कृत सुबोधिनी ।

पराभूतेः पराजयस्य अधर्मस्य पापस्य तमस अज्ञानस्य अंधकारस्य वा पश्चिमः पृष्ठभागः आश्रयः चकारात्संसारस्यापि भगवतो नाडी नदनदीनामाश्रयानदाः शोणभद्रादयः नद्यायमुनाद्याः गोत्राणां पर्वतानां अस्थिसंहतिः अस्थिसंघातः आश्रयः ॥ ९ ॥

अव्यक्तं प्रकृतिः रसाः सिंधूनां क्षारादिसमुद्राणां भूतानां पृथिव्यादिपंचभूतानां अस्मदादीनां चनिधनस्य प्रलये प्रवेशस्य चकारात्प्रलयानां उदरं भगवतः स्थानं तथात्वेप्रमाणं विदितमिति पुंसउदरमिति मनसः अपि भगवतः हृदय अस्मदादीनां मनसः पद स्थानम् ॥ १० ॥

धर्मस्य प्रमाणा स्वनाज्ञातस्य ममचतुर्मुखस्य तुभ्यं तव अथवा तद्यत्प्रयोजनं रूपं भक्तिजनक तस्य चकारादन्यपिभक्तानां कुमाराणां सनकादीनां भवस्य महादेवस्य चकारादृज्ञानिनां शुकादीनां विज्ञानस्य तत्त्वस्य महत्तत्त्वस्य चकारात्सूत्रस्य परपात्मा परमस्य आत्मा अंतःकरणं परायणं स्थान मित्यर्थः ॥ ११ ॥

एवं सर्वेषां पारिगणितानां उत्पत्तिमुक्ता यदर्थमेतदुक्तं तदाह अहमिति सार्द्धैस्त्रिभिः ब्रह्मादयः सर्वेभगवत्स्वरूपाः समुदायो भगवान् प्रत्येक न एवेत्यपरं अतः परंफलानरूपणार्थं अधिकारिणा साधन निरूपयन् पुरुषसूक्तताभिरूपितत्वात् तत्प्रकारेणैव निरूपयति पुरुषएवेदं सर्वमितीति वाक्यं इव गुणाश्रयरूपार्थं श्लोकत्रयेणोच्यते तत्र अहं ब्रह्मा भवान्नारदः भवो महादेवः चकारात्वयसंबोधनः एवकारेणान्तपुरुषहाभावउक्तः विशेषरूपेणापि ते भगवंत इत्यर्थः ये इमे मरीच्यादयः अन्येऽपि मुनयः ते अग्रजाः तव ज्येष्ठभ्रातरः सनकादयः एत शुद्धसत्त्वकार्याः सुरामिश्रसत्त्वकार्याः असुरा रजोमिश्रकार्याः नगादयस्तमोमिश्रकार्याः नगाः पर्वताः नागाः गजाः खगाः पक्षिणः मृगाः हरिणादयः सरीसृपाः सर्पाः एत शुद्धतामसाः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

पायुरिन्द्रियम् । परिमोक्षस्य मलत्यागस्य । गुदं पायुर्गोलकम् । निर्ऋतेरलक्ष्म्याः । मृत्योरिन्द्रियाधिष्ठातुः । तत्र यद्यपि वह्न्यादीन्द्रो पेन्द्रमित्रकाः इति क्रमप्राप्तमित्रस्यैवाधिष्ठातृत्वमवलभ्यते, तथापि गुदं मृत्युरपानेन नोदितिश्रुतेर्विराडिति वक्ष्यमाणवाक्यप्रामाण्येन मृत्युरेवाधिष्ठातृत्वेन विवक्षितः । पायुर्यमस्य मित्रस्यति मित्रस्य तदुपकारकत्वमेवाभिप्रेतम् अधिष्ठातुर्मित्रस्य पायुरिंद्रियम् क्षेत्रमिति व्याख्यानंतु प्रक्रमभङ्गापत्तरुपेक्षितम् ॥ ९ ॥

तमसोऽज्ञानस्य । पश्चिमः पृष्ठभागः । गोत्राणां पर्वतानाम् ॥ १० ॥

अव्यक्तं प्रधानम् । रसोऽन्नादिसारः भूतानां निधनस्य प्राणिमात्र लयस्य ॥ ११ ॥

तुभ्यं तव । कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य । विज्ञानस्य बुद्धेः । सत्त्वस्य चित्तस्य । आत्मः कारणम् ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

पराभूतेः पराभवस्य अधर्मस्य अनृतादेः तमसः अज्ञानस्य च पश्चिमः पृष्ठभागः आस्पदम् नदनदीनां नाड्यः गोत्राणां गिरीणां च तस्य अस्थ्नां संहतिः संघातः आस्पदम् ॥ ९ ॥

अव्यक्तस्य प्रधानस्य रसस्य अन्नादिसारस्य सिंधूनां समुद्राणां भूतानां निधनस्य लयस्य च पुंसः उदरं पद स्थानं विदितम् पुंसः हृदयं मनसः पदम् ॥ १० ॥

परस्य परमात्मनः आत्मा चित्तम् धर्मस्य मम चतुराननस्य तुभ्यं नारदस्य कुमाराणां सनकादीनां भवस्य शिवस्य विज्ञानस्य जीवमात्रस्य सत्त्वस्य प्राणमात्रस्य परायणमुत्कृष्टमयनम् ॥ ११ ॥

एवंतावद्भगवतः उत्पत्तिविध्वं कार्यत्वम भिन्नमपिकारणात्मिरपेक्षास्थितिप्रवृत्त्या द्यभावात्तदभिन्नं यथा पृथिव्या ओषधयः भिन्नस्वरूपा अप्यभिन्नाः एतदेव पुरुषसूक्तार्थकथनद्वारादृढयति तत्र सहस्रशीर्षेत्यर्द्धस्य ब्राह्मणोऽस्य मुखमासीदित्यादिश्रुत्यंशः पूर्वाध्याये प्रकाशितः इदानीं पुरुष एवेद सर्वं यद्भूतं यच्चभाव्यमित्यस्यार्थमाह अहमितिसार्द्धैस्त्रिभिः ते अग्रजाः मुनयः सनकादयः ॥ १२ ॥

भाषा टीका ।

तिरस्कार, अधर्म, और अज्ञानादि इनका उत्पत्तिस्थान विराट भगवान् का पृष्ठभाग है नद और नदी । गङ्गा आदिका आस्पद नाडी अर्थात् नसें हैं और पर्वतों का आस्पद आस्थसंहति, अर्थात् हड्डियों का समूह है ॥ १० ॥

प्रकृति, अन्नादिका सार पदार्थ, और प्राणियों का लय इनका आस्पद पुरुष का उदर जानना और मनका पद, स्थान पुरुष का हृदय है ॥ ११ ॥

धर्म, चतुरानन, नारद, सनकादि, शिव, बुद्धि, और जीवमात्र इनका उत्तमक्षेत्र परमात्मा का अन्तःकरण है ॥ १२ ॥

इदानीं यदि यह जगत् परमात्मा से भिन्न है तथापि अभेदत्वेन वर्णन करते हैं जैसे कुण्डलादि अपने कारण सुवर्ण से भिन्न नहीं हैं ऐसेही यह संसार परमात्मा से भिन्न नहीं है मैं ब्रह्मा, तुम नारद, महादेव, और तुम्हारे अग्रजये सनकादि, देवता, दैत्य, मनुष्य, सर्प, पक्षी, मृग, सरीसृप, गन्धर्व, अप्सरा, यक्ष, राक्षस, भूतगण, उरग, पशु, पितर, सिद्ध, विद्याधर, चारण, वृक्ष, और जो अनेक प्रकारके जीव हैं जल, स्थल, और आकाश में रहनेवाले और जो सूर्य्यादिग्रह, अश्विन्यादि नक्षत्र और केतु आदि औत्पातिक ग्रह तारागण, विद्युत मेघ, भूत, भविष्य, और वर्त्तमान यह सब पुरुष ही है उस परमात्मा से यह सब विश्व व्याप्त है और वह पुरुष अधिकरण को व्याप्त करके स्थित है ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

अहं भवान् भवश्चैव त इमे मुनयोऽग्रजाः ।
सुरासुरनरा नागाः खगा मृगसरीसृपाः ॥ १३ ॥
गन्धर्व्वाप्सरसो यक्षा रक्षोभूतगणोरगाः ।
पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥ १४ ॥
अन्ये च विविधा जीवा जलस्थलनभौकसः ।
ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥ १५ ॥
सर्व्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ।
तेनेदमावृतं विश्वं वितस्तिमधि तिष्ठति ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एवं तावत् परमेश्वरात् जातं विश्वं ततोन भिन्नं यथा कुण्डलं सुवर्णात् न पृथक् सतु सर्व्वनियन्ता सर्व्वप्रकाशको नित्यमुक्त इत्यर्थो युक्तं भवति । एतदेव पुरुषसूक्तार्थकथनेन प्रदर्शयति । तत्र सहस्रशीर्षेत्यस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्च ऋक्त्रयस्यार्थः पूर्वाध्याय एव दर्शितः पुरुषएवेदं सर्वं मित्यस्यार्थं दर्शयति अहं भवानिति सार्द्धाभ्याम् । ततश्च अग्रजा इमे सनकादयः मरीच्यादयश्च ॥ १३ ॥ १४ ॥

जलञ्चस्थलञ्च नभश्च ओकांसि येषांते । नभौकस इति सन्धिरार्षः ॥ १५ ॥

सर्वम् (इदं) पुरुष एवन ततःपृथगित्यर्थः । प्रपञ्चेन तस्यापरिच्छेदं वक्तुं सभूमिमित्यस्यार्थमाह । तेन पुरुषेण विश्वमिति भूमिपदस्यार्थः वितस्तिमिति दशाङ्गुल पदस्य । अधीति अतिशब्दस्य । आवृतमिति वृत्वेत्यस्य । सर्व्ववितस्तिमधिकंव्याप्यतिष्ठतीति आधिक्य मात्रं विवक्षितं न तु प्रमाणम् अनुपयोगादपरिच्छिन्नत्वाच्च ॥ १६ ॥

—————

श्रीराधारमणदास गोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

सहस्रशीर्षेत्यर्द्धस्येति । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् (१) इति अर्द्धा ऋक् अस्याः सायणभाष्यं यथा-सर्व्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो । विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा । सहस्रशब्दस्य उपलक्षणत्वात् अनन्तैः शिरोभिः युक्त इत्यर्थः यानि सर्व्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तः पतित्वात् तदीयान्येवेति सहस्रशीर्षत्वम् । एवं सहस्राक्षत्वं सहस्रपात्वञ्च (१) ॥ ऋक्त्रयस्येति । ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यःकृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत (१२) ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्य्योअजायत । मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत (१३) ॥ नाभ्या आसीदन्तरिक्षं शीर्ष्णोद्यौः समवर्त्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकां अकल्पयन् (१४) ॥ इति त्रिऋक्त्रयम् । अस्य सायणभाष्यं यथाप्रजापतेः प्राणरूपो ब्राह्मणः [illegible] पुरुषोमुखमासीत् मुखादुत्पन्न इत्यर्थः । योऽयंराजन्यः क्षत्रियत्वजातिविशिष्टः स बाहू कृतो बाहुत्वेन निष्पादितः बाहुभ्यामुत्पादित इत्यर्थः तत् तदानीमस्य प्रजापतेर्यत् यौ ऊरू तद्रूपो वैश्यः सम्पन्नः ऊरुभ्यामुत्पादित इत्यर्थः । तथास्य पद्भ्यां पादाभ्यांशूद्रः शूद्रत्वजातिमान् पुरुषोऽजायत । * * * (१२) । यथा दध्याज्यादिद्रव्याणि गवादयः पशवः ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह । प्रजापतेर्मनसः सकाशात चन्द्रमा जातः । चक्षोश्चक्षुषः सूर्य्योऽप्यजायत । अस्य मुखादिन्द्रश्चाग्निश्च देवावुत्पन्नौ । अस्य प्राणात् वायुरजायत (१३) ॥ यथा चन्द्रादीन् प्रजापतेर्मनसःप्रभृतयोऽकल्पयन् तथान्तरिक्षादींल्लोकान् प्रजापतेर्नाभ्यादयो देवा अवयवा अकल्पयन् उत्पादितवन्तः । एतदेव दर्शयति । नाभ्याः प्रजापतेर्नाभेरन्तरिक्षमासीत् । शीर्ष्णः शिरसो द्यौः समवर्त्तत उत्पन्ना । अस्य पद्भ्यां पादाभ्यां भूमिरुत्पन्ना । अस्य श्रोत्रात् दिश उत्पन्नाः ॥ (१४) ॥ पूर्वाध्याये एव दर्शित इति । पञ्चमाध्याये यथाक्रमं ३५ । ३७ । ३० । ४२ श्लोकेषु दर्शित इति यावत ॥ पुरुष एवेदं सर्व्वमित्यस्येति । पुरुष एवेदं सर्व्वं यद्भूतं यच्च भव्यम् (२) इत्यस्येत्यर्थः । सायणभाष्यं यथा—यदिदं वर्त्तमानं जगत् सर्व्वं तत् पुरुष एव । यच्च भूतम् अतीतं जगत् यच्च भव्यं भविष्यत् जगत् तदपि पुरुष एव । यथाऽस्मिन् कल्पे वर्त्तमाना प्राणिदेहाः सर्व्वेऽपि विराट्पुरुषस्य अवयवास्तथैव अतीतागामिनोरपि कल्पयोर्द्रष्टव्यमित्यभिप्रायः । * * * (२) ॥

[नागा इति । नागाः निर्विषसर्पा इति भगवद्गीतायां दशमाध्यायस्य ऊनत्रिंशश्लोक टीकायां स्वामी । यद्वावासुक्यादयः प्रसिद्धा अपीनागा इति । अथवा कद्रु सन्ततिजा नागा इति चतुर्थस्कन्धीयाष्टादशाध्यायस्यद्वाविंश श्लोकटीकायां स्वामी । यद्वा नागा गजा इति बाल प्रबोधिनी ॥ सरी सृपा इति । सविषसर्पा इत्यर्थः ॥ गन्धर्वा इति । स्वर्गगायका उपदेवा इत्यर्थः ॥ अप्सरस इति । स्वर्गवेश्या इत्यर्थः ॥ यक्षाः गुह्यका धनरक्षका देवयोनि विशेषा इति यावत् ॥ रक्षः राक्षसो निशाचर इति यावत् । भूतगणा देवयोनि विशेषाः ॥ उरगाः सर्प जाति भेदाः। सर्प सिद्धान्त ग्रन्थ विशेषोद्रष्टव्यः ॥ पितरः अर्यमादयः॥ सिद्धा अणि माद्यष्ट गुणोपेता विश्वावसुप्रभृतयः विद्याध्रा विद्याधराः पुष्पदन्तादिकाम रूपिखेचराः देवयोनि विशेषाः ॥ चारणा देवयोनि विशेषाः] ॥ १३ ॥ १४ ॥

ग्रहाति । ग्रहाश्च रव्यादयः ऋक्षाणि साश्विन्या दीनि । केतवश्च धूमकेतु प्रभृतय औत्पातिका ग्रहविशेषाः । स्तनयित्नवो मेघाः ॥ १५ ॥]

श्रीराधारमणदास गोस्वामिविरचित दीपिन्याख्य तट्टिप्पणी ।

स भूमिमित्यस्येति । भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् (१) इत्यर्थश्चास्य । अस्यमायणभाष्यं यथा—स पुरुषो भूमिं ब्रह्माण्डगोलकरूपां विश्वतः सर्वतः वृत्वा परिवेष्ट्य दशाङ्गुलपरिमितं देशमत्यतिष्ठत् अतिक्रम्य व्यवस्थितः । दशाङ्गुलमित्युपलक्षणम् ब्रह्माण्डाद् बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः (१) ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

विद्याध्रा विद्याधराः ॥ १३ ॥

जले स्थले नभसि ओकांसि स्थानानि येषां ते जलस्थलनभौकसः इति संधिरार्षः ग्रहाः सूर्यादयः ऋक्षाणि नक्षत्राणि ताराः अपितक्षत्रव्यतिरिक्ताः तडितः विद्युतः स्तनयित्नवो मेघाः गर्जितानि वा ॥ १४ ॥

किंबहुनायच्च कालत्रयवर्तिवस्तुजातं तदिदं सर्वं पुरुष एव परमपुरुष एव कालत्रयवर्तिकृत्स्नवस्तु जातशरीरकत्वादपुरुषशरीरभूतं स्वतंत्रं वस्तु नास्तीत्यर्थः नामरूपविभागानर्हातिसूक्ष्मप्रकृतिपुरुषकालशरीरकस्य परमपुरुषस्यैव विभक्तनामरूपप्रकृतिपुरुष शरीरकं परमात्मात्मकं जगदाकारेणावस्थानात् ग्रमैक्योपदेश उपपन्नः सर्वश्रवदान्तेष्वेवमेवमैक्यं सर्वं खल्विदं ब्रह्म अयमात्मा ब्रह्म तत्त्वमसीत्यादिभिरुपदिश्यते पुरुष एवेदमिति सामानाधिकरण्यस्य व्याप्तिनिबंधनत्वमाह तेनेति अधातिष्ठद्यावितस्त्यानिनाध्यामुपरि तिष्ठति हृदयंतांकजानां यान्निश्वयायतन महदितिश्रुत्युक्तांदिशानाभ्या उपरि वितस्तिपरिच्छिन्नप्रदेशांत स्थितं हृदयमधितिष्ठता तेन परमात्मनेदं विश्वमावृतं व्याप्तम् ॥ १५ ॥

असौ हृदयांतर्वर्ती प्राणः परमात्मा स्वधिष्ण्यं स्वावासस्थानं शरीरं प्रतपन् अंतर्यामि प्रशासनाधीनं कुर्वन् बहिश्च स्वधिष्ण्याद्वहिष्ठमपि वस्तुजातं प्रशासनाधीनं यथा करोति—एवं विराज विराट्शब्दवाच्यानिरुद्धकार्यं प्रपंचं प्रशासनाधीनं कुर्वन्नंतर्बहिश्च प्रशासनाधीनं करोतीत्यर्थः । अत्र कार्यं कारणोपचारात् विराट्शब्दो ब्रह्मांडपरः एतेनापरिच्छिन्नत्वप्रतिपादकं स भूमिं विश्वतो वृत्वेत्यस्यार्थं व्याख्यातं भवति स परमात्मा भूमिं ब्रह्मांडरूपं प्रपंचं विश्वतः सर्वतः वृत्वा व्याप्य भूमिं दशांगुलमात्रमतिक्रम्यावस्थितः अत्यतिष्ठद्दशांगुलमित्याधिक्यमात्रं विवक्षितं न प्रमाणं अनुपयोगादपरिच्छिन्नत्वाच्चेति तस्या अर्थः ॥ १६ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

ग्रहादिबहुत्वानीति नभ आकाशोऽकारान्तोऽप्यस्ति ॥ १४ ॥

यदिदमस्मदादिकमात्रैर्गम्यं भूतं भव्यं भवज्जगदस्त्यस्मात्परोऽत्पन्नं तदिदं सर्वं पुरुष एव पुरुषाधीनसत्ताकमेव त्रिकालमपि तदधीनमेव न तु तेनैक्यं भूतं यदधीनादस्य सत्तानर्थक्यं भगवद्दर्शनवचनात् यद्वा पुरुष एवेदं पुरुषेणैवेदं व्याप्तं पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यमिति पुरुषेणैवेदं व्याप्तमानुगादार्कर्णात् सर्वं भगवानिनिमित्तव्याहतिरिति भूतः तामेव व्याप्तिं स्पष्टीकरोति तेनेदमिति वितस्तिमात्रं जीवहृदयमधितिष्ठतानेन पुरुषेण सर्वं पुरुष एवेति भगवते भवज्जगत् वितस्तिमात्रं हृदयमास्थाय व्याप्नुते जगदित्यादेः सर्वमिदम् ॥ १५ ॥

हृदयोपाध्यवाच्छन्नस्य हरेर्जीवविलक्षणमाह स्वधिष्ण्यमिति तपसंतापदर्शनयोरिति धातोः स्वधिष्ण्यं स्वस्थानं हृदयमधिष्ठाय अंतः सर्वं प्रतपन् पश्यन् असौ प्रकृष्टचेष्टायोगात् प्राणनामा परमात्मा देहाद् बहिश्च बहिष्ठान् विषयानपि प्रतपति पश्यति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अहमिति त्रिकम ॥ १३ ॥ १४ ॥ १५ ॥

एवं प्रपञ्चतत्कारणात्मकत्वेन दर्शयित्वा तदतीतत्वेनाप्याह तेनेदमित्यादि तत्र स भूमिं सर्वतः स्पृष्ट्वा अत्यतिष्ठद्दशाङ्गुलमिति मन्त्रार्थमाह तेनेत्यर्द्धकेन । तेन पुरुषरूपेण । विश्वमिति भूमिपदार्थः । वितस्तिमिति दशाङ्गुलपदार्थः । अधि इत्यतिशब्दस्य) दशाङ्गुलं दश दशगुणिता अङ्गुलिप्रमाणा दशा यस्मिन् तत् दशाङ्गुलम् । तदभिप्रायेणात्यल्पत्वात् दशाङ्गुलशब्देन निर्देशः । वितस्तिशब्दोऽपि तदभिप्रायकः तदतिक्रम्य तिष्ठतीत्यर्थः ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

गन्धर्वाप्सरसो रजोमिश्राः यक्षरक्षांसि तमोमिश्रा उरगा जातिसर्पा पशुप्रभृतयः सत्त्वमिश्राः पशवो गवादयः मिस्त्रदयस्तथ अंतरिक्षे सत्त्वादिगुणप्रधानाः द्रुमाः केवलतामसाः ॥ १३ ॥

नानाह अन्यच्चान विविधाम्मत्स्यादयः जलौकसः स्थलौकसो नभौकसश्च ग्रहाः बुधादयः ऋक्षा अश्विन्यादयः केतवः धूम्रकेतुप्रभृतयः ताराः अस्यानि नक्षत्राणि ताडनः विद्युतः स्तनयित्नवो गर्जितानि ॥ १४ ॥

सर्वानुद्दिश्यतानिरूप्य तेषां पुरुषत्वमाह सर्वं पुरुष एवेति पूर्वोक्तं निरूपितं सर्वं पुरुष एव इदमपि परिदृश्यमानं जडात्मकं सर्वं पुरुष एव कालत्रयाधीनस्य पुरुषत्वाभावमाशंक्याह भूतं भव्यं भवदिति चकारात्तयोत्पन्नानामपिग्रहणं यदिति प्रसिद्धं तेन श्रुतिसिद्धत्वात्तत्रयुक्तिर्वक्तव्येत्यर्थः अनेन पुरुष एवेदं ° ° सर्वं भवत्वार्थः कथितः भगवतो विश्वमात्रत्वे तेनपरिच्छेदसंभवात् अपरिच्छिन्नता व्याहतिरित्याशंक्याह तेनेदमिति विश्वेन न भगवानावृतः परिच्छिन्नः किंतु विश्वमेव तेन आवृतं परिच्छिन्नं जातिवत्परिच्छेदं वारयति वितस्तिमधिष्ठतेति जातिरिव सन्मात्रेस्थिता तं व्याप्नोति अयं तु वितस्तिमधितिष्ठति अत्यतिष्ठद्दशांगुलमिति सूक्तं दशांगुलमुक्तं वितस्तिस्तु द्वादशांगुले तथापि अंगुष्ठमानेनतदुपपद्यते दशांगुलावितस्तिः अंगुष्ठतर्जनीमध्यं तावदेव अनेनोभयथ्यानसंपूर्णो भगवानुक्तो भवति अतो विश्वात्मकः स्थूलवितस्त्यात्मकोऽतिरिक्तः तुल्यश्च प्रमाणतोऽपि भवति अप्रवितस्त्यात्मकः पुरुषः ततः सर्वतो वितस्त्यात्मकः अप्राप्तवितस्त्यात्मको भवति अधिकोऽपि भवति तस्माद्यावान् भगवान् सर्वं तावानधिकस्ततोऽप्यधिक इति नपरिच्छेदः संभवति किंच नायं वितस्तिमात्रे तिष्ठति किंतु ततोऽप्य

स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ ।
एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान् ॥ १७ ॥
सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ।
महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः ॥ १८ ॥
पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ।
अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु ॥ १९ ॥
पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ।
अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

धिकं तिष्ठति अतः सुतरामपरिच्छेदः ॥ १५ ॥

तत्रश्चितनस्य ततोऽप्यधिकव्याप्तौ दृष्टान्तमाह स्वधिष्ण्यमिति यथा प्राणः सूर्यः स्वधिष्ण्यं मंडलं प्रतपन् बहिरपि संपूर्णं ब्रह्मांडं प्रतपति प्राणो वा आसन्यस्वाधिष्ण्यरूपं शरीरं प्रतपन् सजीवं कुर्वन् बहिश्च फूत्कारान्तःश्वासं प्रतपति कार्य्यार्थं नानाप्रयुक्तान् करोति एवं पुरुषोऽपि विराजं प्रतपन् तद् बहिरपि तपति प्राणादीनां मध्यप्रकाशकत्वाभावात् सर्यादृष्टतया तत्रावयवाभावान्मंडलमध्यं न प्रकाशयति अयं तु ब्रह्मांडमध्यमपि प्रकाशयति तदाह अंतरिति पुरुषोऽहि स्थित्य सर्वतः प्रकाशयति ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

एवं मायाशक्तिमतः परमेश्वराज्जातं जगत् न ततो भिन्नमिति पुरुषसूक्तार्थकथनेन द्रढयति । तत्र सहस्रशीर्षेत्यर्कस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्च ऋकृत्रयस्यार्थः पूर्वाध्याय एव दर्शितः । पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति अहं भवानिति सार्धत्रिभिः ॥ ॥ १३ ॥ १४ ॥ १५ ॥

एवं प्रपञ्चकारणत्वं परमेश्वरस्य दर्शयित्वा तस्य प्रपञ्चातीतत्वं वदन् प्रपञ्चस्य तदपरिच्छेद्यत्वमाह । तेन परमेश्वरेण इदं विश्वमावृत न चतोऽपि विश्वस्मादधिक वितस्ति वितस्तिप्रमाणं देशं व्याप्य तिष्ठतीत्याधिक्यमात्रं निरूपितं, न प्रमाणम । तस्य अपरिच्छिन्नत्वेन प्रमाणतत्वात् । एवं स भूमिं सर्वतः स्पृष्ट्वा अत्यतिष्ठद्दशाङ्गुलमित्यस्यार्थो विवृतः । तत्र भूमिमित्यस्यार्थो विश्वमिति । दशाङ्गुलमित्यस्यार्थो वितस्तिमिति अत्यतिष्ठदित्यस्यार्थोऽधितिष्ठतीति ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

विद्याधा विद्याधराः ॥ १३ ॥

जलादीनि ओकांसि स्थानानि येषां ते तथा नभौकस इति संधिरार्षः ॥ १५ ॥

भूतं भविष्यं वर्तमानं चेदं सर्वं चिदचिदात्मकं शक्तिशक्तिमतोः कार्यकारणयोर्भेदाभेदसंबन्धस्य सर्वशास्त्रसंमतत्वात्पुरुष एव ते नत्वयमिदं सर्वमित्यादिश्रुतेः तदनन्यत्वमारम्भणशब्दादिभ्य इतिन्यायाच्च विश्वं न तस्यापरिच्छेदं दर्शयितुं स भूमिं सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलमित्यस्यार्थमाह तेनेदमिति तेन पुरुषेण इदं विश्वमावृतं व्याप्तं स च पुरुषो वितस्तिमधि अधिकं व्याप्य तिष्ठति वितस्तिशब्देनाधिक्यमात्रं विवक्षितं न तु परिमाणं स इति कर्तृपदं तेनेत्यनेन व्याख्यातं विश्वमिति भूमिपदस्यार्थः वितस्तिमिति दशाङ्गुलपदस्यार्थः अधितिष्ठतीत्यस्यार्थः ॥ १६ ॥

एतदेव सदृष्टान्तमाह स्वधिष्ण्यमिति असौ वा आदित्यः प्राण इति श्रुतिप्रसिद्धः असौ प्राण आदित्यः स्वधिष्ण्यं स्वकीयं मंडलं प्रतपन्प्रकाशयन् बहिः प्रतपति प्रकाशयति यथा एवं पुमान् विराजं विराट् शरीरं प्रकाशयन् बहिश्च प्रकाशयति ॥ १६ ॥

भाषा टीका ।

जैसे सूर्य नारायण अपने मण्डलको प्रकाश करते हुए बाहिर प्रकाश करते हैं वैसेही यह पुरुष विराट् शरीर को प्रकाश करता हुआ ब्रह्माण्ड के भीतर और बाहर प्रकाश करता है ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एतत् सदृष्टान्तमाह । असौ प्राणः आदित्यः, असौ वा आदित्यः प्राण इति श्रुतेः । स्वधिष्ण्यं मण्डलं प्रकाशयन् यथा बहिश्च प्रकाशयति । एवं विराड्देहं प्रकाशयन् ब्रह्माण्डमन्तर्बहिश्च प्रकाशयति ॥ १७ ॥

नित्यमुक्तत्वं दर्शयितुम् उतामृतत्वस्येत्यस्यार्थमाह स इति । अभयस्येति मन्त्रगतामृतपदव्याख्या । अन्नेनेति पदं विभक्तिव्यत्ययेन [illegible] । मर्त्यं मरणधर्मकम् अन्नं कर्मफलं यस्मात् अत्यगात् अतिक्रान्तवान् । अतो न केवलं सर्वात्मकः किन्तु अमृतत्वस्य निजान [illegible]र इत्यर्थः । ननु प्रपञ्चात्मकस्य कुतो नित्यमुक्तत्वम् इत्याशङ्क्य तत्परिहाराय एतावानस्येत्यस्यार्थमाह महिमेति । प्रपञ्चात्म

श्रीधरस्वामि कृत भावार्थदीपिका ।

कस्याप्यमृतेशत्वम् इत्येष महिमा दुरत्ययः अपारः । प्रपञ्चानभिभूतत्वादिति भावः । मन्त्रेण च एतावानस्य महिमा विभूतिः स ... ज्यायान् महत्तर इति वदतायमेवार्थ उक्तः ॥ १८ ॥

तदेवमीश्वरो नित्यमुक्त इत्युक्तम् । तदाश्रितानां भूतानां बन्धमोक्षौ व्यवस्थयेति दर्शयन् पादोऽस्य विश्वा भूतानीत्यस्यार्थमाह पादेष्विति । तिष्ठन्त्यत्रेति स्थितयो भूरादिलोकाः त पादा इव पादा अंशा यस्य स स्थितिपात् तस्य स्थितिपदः पादेषु अंशभूतेषु लोकेषु सर्वाणि भूतानि जीवान् विदुः । मन्त्रे तु पादोऽस्य विश्वा भूतानीति सामानाधिकरण्यम् अधिष्ठानाधिष्ठेयाभेदविवक्षया । पाद इत्येकवचनं समष्ट्यभिप्रायेणेति व्याख्यातं भवति । भूमादि फलवैचित्र्यं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थमाह । अस्येश्वरस्य सम्बन्धि त्रिपात् अमृतं नित्यसुखं दिव ऊर्ध्वलोकेषु न तु त्रिलोक्यामित्यर्थः । तदेव त्रिपाच्छब्दोक्तं त्रैविध्यं दर्शयन्नाह त्रयाणां लोकानां मूर्ध्नि महर्लोकस्य मूर्ध्नि तस्य तदुपरितनलोकास्तेषु त्रिषु यथाक्रमम् अमृतादिकम् अधायि निहितम् । तत्र त्रिलोक्यां नश्वरमेव सुखम् । महर्लोकस्य क्रममुक्तिस्थानत्वेऽपि कल्पान्ते तत्रत्यानां स्थानत्यागात् न अविनाशि सुखम् । जनलोके तु अमृतम् अविनाशि सुखं, यावज्जीवं स्वस्थानापरित्यागात् । किन्तु महर्लोकवासिनां कल्पान्ते त्रिलोकदाहोष्मपीडितानां तदा तत्रागमनात् अक्षेमदर्शनमस्ति । तपोलोके तु तस्याप्यभावात् क्षेममेव वक्ष्यति हि —त्रिलोक्यां दह्यमानायां शक्त्या सङ्कर्षणाग्निना । यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः इति । सत्यलोके त्वभयं मोक्षः तत्प्रत्यासत्तेः ॥ १९ ॥

एतदेव वैचित्र्यमधिकारिभेदेनोपपादयन् त्रिपादूर्ध्व इत्यस्यार्थमाह । न प्रजायन्ते पुत्रादिरूपेणेत्यप्रजाः नैष्ठिकब्रह्मचारिवानप्रस्थयतयः तेषामाश्रमास्त्रिलोक्या बहिरासन् । गृहमेधः गृहस्थस्तु अन्तः यस्मात् अबृहद्व्रतः ब्रह्मचर्यव्रतरहितः ॥ २० ॥

श्रीराधारमणदास गोस्वामि विरचित दीपिन्याख्य तट्टिप्पणी ।

उतामृतत्वस्येत्यस्येति । उतामृतत्वस्येशानो यदन्नेनातिरोहति (२) इत्यर्द्धर्चस्य । सायणभाष्यं यथा उत अपि च । अमृतत्वस्य देवत्वस्य अयमीशानः स्वामी । यत् यस्मात् कारणात् अन्नेन प्राणिनामन्नेन भोग्येन निमित्तेन अतिरोहति स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति । तस्मात् प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः (२) ॥ एतावानस्येत्यस्येति एतावानस्य महिमातो ज्यायांश्च पूरुषः (३) इत्यर्द्धर्चस्य । सायणभाष्यं यथा—अतीतानागतवर्त्तमानरूपं जगत् यावत् अस्ति एतावान् सर्वोऽप्यस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषः न तु तस्य वास्तवं स्वरूपम् । वास्तवस्तु पुरुषः अतो महिम्नोऽपि ज्यायान् अतिशयेनाधिकः । ३ ॥ १८ ॥

पादोऽस्य विश्वा भूतानीति (३) । अस्य सायणभाष्यं यथा—अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्त्तीनि प्राणिजातानि पादश्चतुर्थांशः (३) ॥ त्रिपादस्यामृतं दिवीति (३) । अस्य सायणभाष्यं यथा—अस्य पुरुषस्यावशिष्टं त्रिपात् स्वरूपम् अमृतं विनाशरहितं सत् दिवि द्योतनात्मके स्वप्रकाशस्वरूपे व्यवतिष्ठते इति शेषः । यद्यपि सत्यं ज्ञानमनन्तं ब्रह्मेत्याम्नातस्य परब्रह्मण इयत्ताया अभावात् पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षयाल्पमिति विवक्षितत्वात् पादत्वोपन्यासः (३) ॥ तदुपरितनलोका इति । जनतपःसत्यलोका इत्यर्थः । तद्गतौ तत्र गमनादिति तत्र जनलोके इत्यर्थः त्रिलोक्यामिति तृतीयस्कन्धीयैकादशाध्यायस्यैकोनत्रिंशच्छ्लोकः ।२९।

त्रिपादूर्ध्वमित्यस्येति । त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः (४) इत्यर्द्धर्चस्य । सायणभाष्यं यथा—योऽयं त्रिपात् पुरुषः संसारस्पर्शरहितो बहुलस्वरूपः (ब्रह्मस्वरूपः) सोऽयमूर्ध्व उदैत् । अस्मात् अज्ञानकार्यात् संसारात् बहिर्भूतोऽत्रत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान् तस्य योऽयं पादो लेशः सोऽयम् इह मायायां पुनरभवत् । सृष्टिसंहाराभ्यां पुनःपुनरागच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तम् विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति । * * * (४) ॥ नैष्ठिकब्रह्मचारीति । ब्रह्मचारी द्विविधः यथा—ब्रह्मचार्युपकुर्वाणो नैष्ठिको ब्रह्मतत्परः । योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् । उपकुर्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥ इति कौर्म्मे २ अध्याय ॥ गृहमेध इति । गृहे एव मेधा बुद्धिर्यस्य स गृहमेधः इति बालप्रबोधिनी ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

जीवान्तर्गतत्वेनैवसतोऽपि परमपुरुषस्याभोक्तृत्वं मोक्षप्रदत्वं च प्रतिपादयन् उतामृतत्वस्येत्यस्यार्थमाह मर्त्येति न विद्यते मर्त्यं यस्मात्तस्य मृतस्य मोक्षस्येशः प्रदाता यद्यस्मात् मर्त्यमनित्यमन्नं भोग्यं कर्मफलमत्यगादतिक्रम्य स्थितः अनश्नन्नन्यो अभिचाकशीति श्रुत्युक्तरीत्याऽसंभावितकर्मफलसंबन्धत्वात् परमात्मा मोक्षद इत्यर्थः श्रुतावन्नेनेति व्यत्ययेन द्वितीयार्थे तृतीया शरीरान्तरावस्थितजीववैलक्षण्यं चानुपपन्नमित्याशङ्कायां एतावानस्य महिमेत्यस्यार्थमाह महिमेति पुरुषस्य कृत्स्नचिदचिदात्मकप्रपञ्चान्तर्बहिश्च व्याप्य सर्वं स्वप्रशासनाधीनं कुर्वतः परमात्मन एषः महिमा अमृतस्येशानत्वरूपमहिमा दुरत्ययः अपारः कृत्स्नप्रपञ्चात्मकत्वेनावस्थितस्यापि प्रपञ्चगतदोषास्पर्शित्वम् अमृतेशितृत्वं चेत्येतदनुपपद्यमानमपि तस्य महिम्ना उपपद्यत इत्यभिप्रायः ॥ १७ ॥

अपारमहिमत्वमेव प्रतिपादयन्तः पादोऽस्य विश्वा भूतानीति वाक्यस्यार्थमाह पादेष्विति तिष्ठन्त्यत्रेति स्थितयो भूरादयो लोकास्ते पादा इव पादा अंशा यस्य स स्थितिपात् तस्य पादेष्वंशभूतेषु लोकेषु सर्वभूतानि देवादिचतुर्विधभूतानि विदुः एतेन मन्त्रेऽपि पादोऽस्य विश्वा भूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेययोरभेदविवक्षया पाद इत्येकवचनं च सामान्याभिप्रायेणेति व्याख्यातं भवति बद्धमुक्तयोरसांकर्येण प्राप्य स्थानानां तद्विभूतित्वप्रतिपादकस्य त्रिपादस्यामृतं दिवीत्यस्यार्थमाह अमृतमिति अस्येश्वरस्य संबन्धि त्रिपाद्विभवममृतमक्ष

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

[illegible] मूर्धीति श्रुत्यर्थः अथ त्रिपाच्छब्दोक्तांशत्रितयं वर्णयन्नाह अमृतं मरणादिविकाररहितमभयं तत्कार्यभयरहित [illegible] रूपप्रापणामित्यर्थः अपहतपाप्मत्वादिगुणाष्टकाविर्भावरूपमुक्तैश्वर्यं कोटित्रयेऽत्र संगृहीतं अमृत मितिविरजाविमृत्युरित्यर्थ उक्तः क्षेममिति सत्यकामत्वाद्यनुवृत्तिरुक्ता अभयमित्यपहतपाप्मविशोकादिशब्दार्थ उक्तः पाप्मादिभयहेतुः अशनाया शोकादिसंबन्धः अप्रसंगेन एवं त्रिमूर्ध्नो धामसु मुक्तैश्वर्यं मूर्धनि उपरिस्थानेष्वित्यर्थः तमसः परस्तादिति चतुर्लोकाविभूतः परस्तादमृतं क्षेमम भयं चाधायि निहितमित्यर्थः मूर्धास्विति पाठे उपरिस्थानेषूत्तमासु त्रिषु पादेष्वित्यर्थः ॥ १८ ॥

बद्धेभ्यो मुक्तानां जीवानां बहुत्वं तत्प्राप्यस्थानानन्त्य उभयोरप्येकविभूतित्वं बद्धानामल्पीयस्त्वं तत्प्राप्य स्थानं तस्यापि तद्विभूतित्वं च प्रतिपादयतस्त्रिपादूर्ध्वमित्यादेरर्थमाह पादा इति त्रयः पादा यस्य स त्रिपात्पुरुषः परमपुरुषः ऊर्ध्वं प्रकृतिप्राकृतस्य उपरिष्टादुदैदूर्ध्वं गतः स्वस्वोपासनविलसगतविग्रहः समस्तनित्यमुक्तभोग्य आस्ते इत्यर्थः अत्र पाच्छब्दः पादत्रयांशत्वेनावस्थितमुक्तानां तत्प्राप्य स्थानस्य च भागा नाह एव च त्रयः पादाः मुक्तजीववर्गस्य तत्प्राप्यस्थानस्य च भागात्रयभूतत्वेन यस्य स त्रिपात् इतीतरस्यतापेक्षया मुक्तस्तत्प्राप्यस्थाना नां त्रिभागत्वकथनं अनन्तत्वतात्पर्यकं अस्य परमपुरुषस्य पादः विभूतिभूत एको भाग इह प्रकृतिमंडलेऽभवद्बद्धाः तत्प्राप्य स्थानानि चैकां शेन स्थितो जगत्स्थावरजंगमात्मकं कलांशकांशं विश्वं विचित्रोन्नवांविष्णोर्विभागवृत्तामित्युक्तप्रकारेण तद्विभूत्येकदेश इति श्रुत्यर्थः एतदेव व्याचष्टे पादा इति त्रयः पादास्तद्बहिः प्रकृतिप्राकृतेभ्यो बहिरासन् ये तस्य पादास्तेऽप्रजानां जन्मरहितानां मुक्तानामाश्रयाः प्राप्या इत्य र्थः एकस्यावशिष्टस्यमाह अत इति अपरः सांसारिकक्षेत्रज्ञवर्गप्राप्यस्थानरूपः पादः त्रिलोक्याः अन्तरित्यर्थः तमेव पादं विशिनष्टि गृहमेधः अहंकारममकारादिमान्गृहाश्रमान्वितश्चेत्यर्थः बृहद्व्रतः कर्मवश्यः उपचारात्प्राप्यप्रापकभमव्यपदेशः ॥ १९ ॥

एवमपारमहिमत्वमुपपाद्य प्रसंगाद्बद्धमुमुक्षुणां च भगवल्लीलाविभूतावपादविभूतिगतिहेतुमार्गद्वयप्रतिपादकं ततो विष्वङ्ङिति वाक्य व्याचष्टे सृती इति विचित्रं सुष्ठु अचलतीति विष्वङ् क्षेत्रज्ञः सृती धूमार्चिरादिमार्गौ विचक्रमे आक्रमदाक्रान्तवानित्यर्थः कथंभूते सृती साशनान शनऽशनं भोगः भोगावस्थानतद्भावाख्यौ मार्गौ साशनानशनत्वं साशनानशनलक्षणमार्गद्वयप्राप्त्युपायमाह यदिति यद्यत्र मार्गद्वयमध्येऽ अविद्याकर्म अविद्याकर्मसु अन्येत्याद्युक्ते कर्मरूपाऽविद्या धूमादिमार्गप्राप्त्युपायभूता एकाविद्या अर्चिरादिप्राप्त्युपायभूता परमात्मोपासनरूपा ऽपरा पुरुषो जीवस्तूभयाश्रयः साधनद्वयनिष्ठः तं विद्याकर्मणी समन्वारभेते इति श्रुतेः समन्वारभेत संगते इत्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

एवं विराजं विराडाख्यां ज्ञात्वा भगवतो ब्रह्माण्डाद्यखिलपुंसु विशेषादिमूलप्रकृत्यन्तानन्तान्पदार्थानशेषविशेषणाकारेण तत्पतिपदयति पश्यन्नस्व भिन्नार्थेतह्मयात्रवाणिमयानपि एवमगदानतपश्यन्न हिः सर्वं च पश्यतीति वचनात् नन्वस्त्यमुक्तप्रपंचादन्तं लक्षणमुक्तप्रपंचवैलक्षण्यकुतश्चेति तत्राह सईति सपुरुषोऽभयस्य जननादभयदेहतस्यामृतस्यानन्तमुक्तसमुदायस्येशः स्वामीमत्तोऽभिप्रेतानीति शेषः आत्मनान्नभोग्यनित्यमुक्त लक्ष्मीतरस्तदभिमन्यमानमव्यक्तजडं तत्कार्यमर्त्यं देहनाशादिनाविनाशिनं महदादितत्त्वाभिमानिनं ब्रह्मादिसर्वजीवसमुदायं तानि तत्त्वादीनि चा नाद्यनन्तकालतोऽत्यगादिति शेषः ॥ १७ ॥

नानैकांतोऽयं हेतुर्विरिविभावेनाह महिमेति ब्रह्मादितत्त्वे पक्षान्तभूर्तामीतयक्लवदिति अव्यक्तमात्मनोऽन्तं महदादिविनाशिन्य यदतीतः परो विष्णुः सर्वात्मेति विमोक्षदस्मृतेः जीवानां परमांशत्वात्कथं तदन्ययत्वं महिम्नर्इतितत्राह पाद इति स्वरूपांशो भिन्नांशश्चेति द्विविधोंऽशो हरेरात्मतत्त्वसर्वभूतानि सर्वजीवाः अस्य पुरुषस्य पादो भिन्नांश इति किमर्थं विदुः सर्वस्य यथावत्स्थितिज्ञा विद्वांसः तस्य कालत्र्यंशत्वानन्माहात्म्ययन्नवयधानात्वित्प्रमाणविरुद्धत्वादेवं जीवानामपीति भावः ॥ १८ ॥

तर्हि स्वरूपांशाः कुत्र सन्तीति तत्राह अमृतमिति अमृतमनन्तासनाख्यं क्षेमं वैकुण्ठाख्यमभयं श्वेतद्वीपाख्यमिति पुरत्रयं त्रिमूर्ध्नो हरेस्त्रिपुम र्थमूर्धायिषु ऋत रूपांतर्गोलोकेषु ॥ नन्वनेनप्रश्नपरिहारः कथमागतस्त्यस्यापीदमेवोत्तरं तथाहि त्रिविधमुरोजीवास्त्वानपक्षदितोऽत्रमूर्धा तस्य हरेरमृतमनन्तगतरूपमनन्तासनमिति यावत् अनन्तस्तु तंगतरूपमिति अमनन्तायिदुर्बुधा इत्येकाक्षरमालायां । विकुण्ठासूनुपमृत्युलक्षणा क्षेम ञ्ज्ञानेतिक्षेमं वैकुण्ठाख्यं भार्गमार्गविनिधाते दीर्मा वर्गाधिष्ठादेभानिजलानियात्या प्रीतिआश्रयत्वेनस्य भयं नारायणाख्यमिति रूपत्रयम् । एव त्रिनूर्धमू समपत्कृलक्षणा त्रिवपुरेत्र्यायितं तस्मादनन्तासनवैकुण्ठनारायणाः स्वरूपांशायपलोकेपुत्रसन्तीति भावः तदुक्तं स्वरूपांशा श्चभिन्नांशा इति द्वैधांशस्य तस्यादि त्रिमूर्धासनहारध्वेतत्रयमूर्धाभिस्त्रिभिरित्यादिना ब्रह्म विष्णुमहेश्वरात्मनात्रयामूर्धानायस्य सत्रिमूर्धा तस्य मूर्धसु सत्य वैकुण्ठकैलासाख्यस्थानेषु तेषामेव नामांतरं विशिष्टममृतमित्यादिरूपत्रयमध्यायीत्यपव्याख्यानमपास्तम् । तेषु लोकाः त्रिलो कया बहिरेवास्मीत्याह पादा इति पादत्रयं ते प्रापयन्तीत्यात्मानोमिति पादाः येलोकायचन्तपुरुषतः स्वरूपांशाः अप्रजानामपुत्राणां भिक्षुपर्णिनां ब्रह्मादिदेवानामाश्रयास्ते भूम्यादित्रिलोक्याबहिरेवासन्नित्यन्वयः अत्र तु नामूर्विरतामिदं प्रमाणं अनन्तासन वैकुण्ठनारायणा पुराणास्त्य त्यादि ॥ १९ ॥

तर्हि त्रिलोक्यां विष्णोरखिलानां तद्गतस्वरूपांशावस्थाह अंतरिति बृहदितिभावप्रधानः सएव विष्णुस्त्रिलोक्या अंतरपरोऽयं पुरुषाख्यः गृहमेधगृहस्थैः । बृहत्त्वमब्रह्मत्वेन ब्रह्मार्पणाबुद्ध्येतियावत् हुतो वसतीति शेषः तुनात्वस्य तस्य शक्रलोकसामीप्यं सूचयति तदुक्तं सएवान्य स्वरूपगाशक्रलोकसमीपगइत्यादि ॥ नकेवलं शक्रलोकान्तिकस्थितिलोकस्थ एव पुरुषः अपितु त्रिलोक्या अन्तर्भुवादिलोकस्थोपीति इममर्थमपि तुशब्देनाह तदुक्तं यत्नाद्भुवलोकस्थाविनिन्तासमभ्यगइत्यादि एतत्त्रयोपि स्वरूपांशा इति निर्णयायमूलरूपवद्भिन्नांशापुरुषाः इस सर्वजीवपुंसां व्याप्तिप्रकारमाह सृतीति अनन्तासन वैकुण्ठनारायणाख्यस्त्रिपाद्भगवान्विद्या ब्रह्मविद्या तद्विद्या च अभिमतेति विरुद्धलक्षणत्वादुभे देवमनुष्य मंत्रसृती सरणी मार्गौ विष्वक्सर्वतो विचक्रमे अपि देवमनुष्यसंकुलं तत्रगतेरिति तत्राह साशनानशनइति साशना मनुष्या अनशना देवास्तद्रूप [illegible] यद्यविद्या विद्या च तं सृतीरित्यनेन तद्वतः पुरुषालक्ष्यन्ते तेषु विक्रम्यास्थितः तदुक्तं त्रिपात्स एव भगवान्सर्वप्राणिषु संस्थितः

श्रीमद्विजयध्वजकृत पदरत्नावली ।

निरयेषुपषिद्धस्सुत्रिदशेष्वितरेषुचेति ननुहरेराधेयत्वेनपारतंत्र्यमागतमत्राह पुरुषइति पुरुषोविष्णुरुभयोराश्रयआधारः तुशब्देनान्येभ्योऽस्य विशेषः स्वरूपांशाअपिसर्वेव्याप्तिमंतइतिसूच्यते। अण्डव्याप्तचतुर्मुखोत्पत्तिमाह तस्मादिति पूर्वमहदादितत्त्वोत्पादनायहरिणायदण्डंनिरमायि तस्मादण्डाद्ब्रह्मनामाविराट्जज्ञे अंडव्यापिनंतंविशिनष्टि भूतेति भूतानांपृथिव्यादीनांजीवानां वा इंद्रियाणांश्रोत्रादीनांगुणानांशब्दादिविषयाणांविषयवृत्तीसहकारिणांदिगादिदेवानांवाऽऽश्रय आधारः यद्वाऽस्वसृष्टात्तस्मादण्डाद्विश्वासौराट्चेतिविराट् विष्णुः अत्रशेषशायित्वेनप्रादुर्भूतः किंच यज्ञादभिव्यक्तात् तस्मात्क्षीरशायिनाहरेर्नाभिपद्मात्तरूपांतरणभूतेन्द्रियगुणाश्रयोविराट्ब्रह्माजज्ञइत्यन्वयः तस्माद्धरेरण्डमभूदंडाद्विश्वतोमुखइत्यादेरुक्तार्थएवायंश्लोकः ॥ २० ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

विराजं प्रतपन् विराट् प्रकाशकत्वेन प्रस्तूयमानः पुमान् श्रीभगवत्तत्त्वमपि एवम् अन्तः अन्तरङ्गं त्रिपाद्विभूतिरूपम्बहि बहिरङ्गं पाद विभूतिरूपं प्रतपति प्रकाशयति ॥ १७ ॥

तद्विभूतयः पाद्मोत्तरखण्डे—त्रिपाद्विभूतेर्लोकास्तु असंख्याः परिकीर्त्तिता । शुद्धसत्त्वमयाः सर्वे ब्रह्मानन्दसुखाह्वयाः ॥ सर्वे नित्या निर्विकारा हेयरागविवर्जिताः । सर्वे हिरण्मयाः शुद्धाः कोटिसूर्य्यसमप्रभाः ॥ सर्वे वेदमया दिव्याः कामक्रोधादिवर्जिताः । नारायणपदाम्भोजभक्त्येकरससेविताः ॥ निरन्तरं सामगानपरिपूर्णसुखं श्रिताः । सर्वे पञ्चोपनिषदस्वरूपा वेदवर्चसः ॥ इत्यादि । अत्र त्रिपाद्विभूतिशब्देन प्रपञ्चातीतलोकोऽभिधीयते पाद विभूतिशब्देन तु प्रपञ्च इति ॥ यथोक्तं तत्रैव—त्रिपाद्वर्यापिः परं धाम्नि पादोऽस्येहाभवत् पुनः । त्रिपाद्विभूतिर्नित्यं स्यादनित्यं पादमैश्वरम् ॥ नित्यं तद्रूपमीशस्य परं धाम्नि स्थितं शुभम् । अच्युतं शाश्वतं दिव्यं सदा यौवनमाश्रितम् । नित्यं सम्भोग्यमैश्वर्या श्रियाभूम्या च संवृतम् ॥ इति ॥ अतएवात्र द्वितीयस्कन्धेऽप्येवमेवोक्तम् । तथाहि सोऽमृतस्येति । अमृतादित्रयं तु तत्तृतीयत्वेन वक्ष्यमाणस्य क्षेमस्याप्युपलक्षणम् । श्रुतौ च उतामृतत्वस्येशान इत्यत्रामृतत्वं तदयुगलोपलक्षणम् । अत्र धर्म्मिप्रधाननिर्द्देशः । श्रुतौ तु तत्र धर्म्ममात्र निर्द्देशस्यापि तत्रैव तात्पर्य्यम् । तत्रामृतं—स्वदृष्टवद्भिः पुरुषैरभिष्टुतमिति परं न यत्परमित्याद्युक्तानुसारेण परमानन्दः । अतएव अमृतं विष्णुमन्दिरमिति तात्पर्य्यायोऽपि । अभयं—न च कालविक्रम इत्याद्युक्तानुसारेण भयमात्राभावः । अतएव द्विजा धामाकुतोभयमित्युक्तम् । क्षेमं—न यत्र मायेत्याद्युक्तानुसारेण भगवद्बहिर्मुखताकरगुणसम्बन्धाभावादूभगवद्भजनमङ्गलाश्रयत्वं क्षेमम् । तथा च नारदीये—सर्व्वमङ्गलमूर्द्धन्या पूर्णानन्दमयी सदा । द्विजेन्द्र! तव मय्यस्तु भक्तिरव्यभिचारिणी इति । अतएव क्षेमं विन्दन्ति मत्स्थानमित्युक्तम् । तत्र तत्तच्छब्देन लक्षणामयकष्टकल्पनया जनलोकादिवाच्यतां निषेधन् हेतुं न्यस्यति । मर्त्यं ब्रह्मणोऽपि भयं मत्तो द्विपरार्द्धं परायुष इत्यादिन्यायेन मरणधर्म्मकम् अतः कर्म्मादिफलं त्रिलोक्यादिकं यस्मात् अत्यगात् अतिक्रम्यैव तत्र विराजते इति । एष अमृताद्यैश्वर्य्यरूपः । दुरत्ययः ब्रह्मचर्य्यादिभिः केनचिन्मनसाप्यवरोद्धुमशक्यः ॥ १८ ॥

तदेवम् अमर्त्यमैश्वर्यं त्रिपात् मर्त्यमेकपादिति तस्य चतुष्पादैश्वर्यं पुनर्विवृणोति पादेषु सर्व्वभूतानीति । तिष्ठन्त्यत्र सर्व्वभूतानीति स्थितयो मर्त्यामर्त्यैश्वर्याणि तानि पादा इवाधिष्ठानभूतानि । पादान् दर्शयति । त्रयाणां सात्त्विकादिपदार्थानां मूर्द्धेव मूर्द्धा प्रकृतिः तस्य मूर्द्धसु तदुपरि विराजमानेषु श्रीवैकुण्ठलोकेषु अमृतं क्षेमम् अभयञ्च अधायि नित्यं धृतमेव तिष्ठतीत्यर्थः । ततः पूर्वस्य मर्त्यांशमात्रात्मकत्वात् एकपात्त्वम् । उत्तरस्यामृतादित्रयात्मकत्वात् त्रिपात्त्वमिति भावः । तदनन्तपादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि इत्यस्यार्थो दर्शितः अस्यपादस्तथास्यैव दिवि वैकुण्ठे यत् अमृताद्यात्मकं त्रिपात् तच्च विश्वा भूतानीत्यर्थः अत्राधिष्ठानाधिष्ठेययोरैक्योक्तिः ॥ १९ ॥

अथ चतुष्पात्त्वे त्रिलोकीव्यवस्थावत्पक्षान्तरं दर्शयति पादाइति । च शब्द उक्तसमुच्चयार्थः प्रपञ्चाद्बहिः पादास्त्रय आसन्नेव प्रपञ्चात्मकस्य चतुर्थपादस्यैव विभागविवक्षायान्तु त्रिलोक्या बहिश्चान्ये पादास्त्रय आसन्निति । एवं मंत्रेऽपि हि तथैव पुनः—शब्दः । ते के । अप्रजानां ब्रह्मचारिवानप्रस्थयतीनाम् आश्रमाः प्राप्या ये लोकाः । अतएव धर्मत्रयप्राप्यत्वात् चतुर्णामपि त्रिपात्त्वम् अपरस्तु चतुर्थः पादस्त्रिलोक्या अन्तरासीत् । गृहमेधस्ततप्राप्यः । यस्मात् अबृहद्व्रतो ब्रह्मचर्य्यरहित इति ॥ २०

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवमपरिछिन्नस्वप्रकाशकत्वंचोत्कृतिनिष्प्रत्वं साधयित्वा तस्य प्रपंचनिःप्रपंचफलदातृत्वं साधयितुं उभयस्वाम्यमाह सोऽमृतस्येति सहिपुरुषअमृतस्य नित्यसुखस्य अभयस्यमोक्षसुखस्यच ईशः स्वामी उभयंदातुंशक्त इत्यर्थः उभयदाने सामर्थ्यमाह मर्त्यमन्नमिति मर्त्यमन्नात्मकविराट्शरीरं यद्यस्मादत्यगात् अतिक्रम्य स्थित अत अमृतं दातुं शक्तः अन्नंअद्यते त्रिचभूतानीति मृत्युं कर्मफलं वायस्मादतिक्रम्य स्थित तस्मादभयस्येशः अनेन उतामृतत्वस्येशान इति अर्द्धचोर्थः कथितः तत्र अन्येनातिरोहतीति अन्येनहेतुना तिरोभावं न प्राप्नोति सर्वोहि मृत्युना कर्मणा वा तिरोभावं प्राप्नुवंति अयंतुनतथेत्यर्थः ननुयः सर्वो न स सर्वातिरिक्तः यो वा सर्वः यो वा अतिरिक्तः स न सर्वः प्रपञ्चस्यापरिछेदकत्वं नास्ति तथा राति निजानंदस्येशो न भवेत् तस्मादविरोधप्रकारेण समर्थनानुपपत्तेः परस्परविरुद्धधर्माश्रयत्वेन अभेदो न स्यादित्याशंक्याह महिमैषततोब्रह्मन्निति ततः विरुद्धोभयधर्माश्रयत्वात् भगवतो महिमा नहिविरुद्धधर्मोभयोस्त्वाश्रयभेदः कर्तुं शक्यते एकस्मिन्नेवाश्रय उभयोजातत्वात् किंतु धर्मानांपरस्परविरोधः लोकवत् कार्यकर्तुमसमर्थस्त्वाश्रयस्य महिमानं बोधयति सर्वत्र समर्थस्तत्रैवेदसमर्थस्तदा तस्मिन् कश्चिन्महिमावर्त्तते येन प्रतिबद्धः स्वकार्यकर्तुं नशक्नोतीति सिद्धं तस्मादेष एव महिमा यद्विरुद्धधर्माश्रयत्वमिति तस्य धर्मस्यानन्यसिद्धस्य कार्यसाधकत्वं न कश्चित्सिद्धमिति महिम्नः प्रतिबंधकता न युक्ता असमोर्द्धत्वाच्चधर्मस्य तथा अविरोधः उक्तिमात्रविरुद्धत्वात् अतोविरुद्धधर्माश्रयत्वमेव महिमा अलौकिकत्वात् स च महिमा दुरत्ययः केनाप्यतिक्रांतुमशक्यः दृष्ट्वाकृत्वावा अविरोधं वा एकधर्मनिराकरणं वा देशकालादिभेदेन व्यवस्थांवाकोऽप्यदपि कर्तुंशक्त लोके उभयकार्यदर्शनात् ब्रह्मन्निति

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

...यनार्थं सूक्ते तु महिम्नः तावत्त्वं प्रतिपाद्यते न पुरुषमाहात्म्यमाह महत्त्वेन हि अतिशयितं भवति स एव दुरत्य-
...॥

एवं भगवतः अपरिच्छेदनिरूपणेन माहात्म्यं निरूप्य उभयफलेशत्वं निरूपितं लोके तस्याप्रकटत्वे कृते व्यर्थं भवेदिति तत्प्रकटनार्थं पुरुषभेदं फलभेदं च निरूपयति पादेषुसर्वभूतानीति पादेषु भूरादिलोकेषु सर्वाणि भूतानीत्यर्थं अनेन स्थानभेदात्फलभेदो भविष्यतीति सूचितं ननुसर्वावयवेषु लोकत्वनिरूपणात् कथंपादेष्वेव सर्वेलोका इत्यत आह पुंसः स्थितिपद इति तिष्ठत्यस्मिन्निति स्थितयो भूरादिलोका स्थितिशब्दवाच्या भवंति स्थितयः पादायस्येति स्थितिपात् सर्वेहिलोकाः अवयवा अपि अवयविनं भगवत प्रतिपाद्या एव तत्तत्स्थानमभिप्रेत्याय गतोभगवान् तिष्ठतीति अत्र प्रमाणमाह विद्वुरित पादोस्यसर्वाभूतानीति भगवन्माहात्म्यार्थे सर्वाण्यपि भूतानिएकः पाद इत्युक्तं अथवा पादा पादस्थिताःपुरुषाश्च तात्स्थ्यात्तद्व्यपदेश इति न्यायेन पादा एव सर्वाणि भूतानि एकवचनं तुजात्यभिप्रायं एवं भगवदवयवेषु सर्वेषां जीवानां स्थितिमुक्त्वा तद्भोग्यस्य फलस्य स्थितिमाह अमृतमिति भगवति सुखचतुष्टयमस्ति अनित्यमेकं नित्यं त्रिविधमिति तस्य त्रिविधस्यापि अमृतं क्षेममभयमिति नामत्रयं तेषांस्थानमाह त्रिमूर्द्धोधायि मूर्द्धाष्वति त्रयाणां लोकानां मूर्द्धा महर्लोकः तस्य मूर्द्धसुजनतपः सत्यलोकेषु त्रिविधमपिसुखं स्थापितमित्यर्थः अत्रैव व्यवस्था त्रैलोक्यामनित्यमेवसुखं महर्लोकेपि स्थानत्यागलक्षणस्य दुःखस्य विद्यमानत्वात् यांत्युष्मणा महर्लोकादिति वाक्यात् तत्राप्यनित्य प्रायं सुखं अतः जनलोके अमृतं सुखं तस्य स्वरूपतः स्थानतश्चनाशाभावात् न तपोलोके तुक्षेमं अक्षेमदर्शनाभावात् जनलोकेतु महर्लोकात्पलायितागतानां दुःखितानां दर्शनरूपमक्षेमदर्शनमस्ति जनलोकस्थितास्तु नैवतपोलोकं गच्छन्तीति तत्रत्यं सुखं क्षेममेव सत्यलोकेतु अभयं सुखं मोक्षप्रत्यासन्नत्वात् अतोनित्य सुख त्रिष्वेवलोकेषु इदमेवाभयं सुखं ज्ञानिनः प्राप्नुवंति सन्यासिनः तदग्रे वक्ष्यते त्रिपादस्यामृतं दिवीत्यस्यायमेवार्थः अस्यत्रिपादमृतं दिवि उपरितनलोकेष्वित्यर्थः त्रिलोकापेक्षाभिप्रायेणादिवीत्युक्तम् ॥ १८ ॥

एतेषां सुखानां भोक्तृनाह पादा स्त्रयाबहिश्चासन्निति चत्वारो वर्णाः भगवतश्चत्वारापादाः यतो भगवांस्तानधितिष्ठति तत्रत्रयः पादाः ब्रह्मचारी वानप्रस्थः सन्यासी च तत्रयोपि त्रिलोक्याबहिश्चासन् चकारात्स्वेच्छया अंतरपि तेषां व्युत्क्रांतानां त्रयाणामेकं साधर्म्यमाह अप्रजानां य आश्रमा इति नप्रजायंते पुत्रादिरूपेणात्यप्रजा गृहस्थव्यतिरिक्ताः तेषां येआश्रमाआश्रमधर्मत्वेन तेन प्रजायन्ते नतुबन्ध्याः अर्थात्सुखत्रयस्यभोक्तारअनित्यसुखभोक्तारमाह अंतस्त्रिलोक्यास्त्वपर इति त्रिलोक्यांतःपरोहीन सगृहस्थःगृह एव मेधा बुद्धिर्यस्येति मेधा दोषः अबृहद्व्रत इत्यंतर वृहत्स्थूलं ऊर्द्ध्वरता रूपं व्रतं यस्य नास्ति स तथोक्तः ॥ १९ ॥

एव वर्णचतुष्टयस्य स्वरूपं फलं चोक्त्वा तथा वलक्षण्ये हेतुमाह सृतीविचक्रमे विष्वङ्ङिति नहिस्वभावत एव तेतथा जाताः किंतु भगवाने व मार्गद्वयेन गच्छति तदनुरोधेनतेपि लोका स्तमनुगच्छन्ति तदाह सृतीमार्गौविचक्रमे विशेषेणाक्रांतवान् विष्वङ् परितः एकस्मिन्नपिमार्गेप्रत्येकंशः अनाक्रांतोनास्तीत्यर्थः तत्रभेदकमाह शासनानशने उभे इति एकः साशनमार्गः अशनेन सहितं साशन कर्मफलभोगसहितं एकस्त्वनशनमार्गः कर्मफलभोगरहितः ते उभे तत्वन्ययोरत्र निरूपणं ननुभगवान् किमितिमार्गद्वयेन गच्छति तत्राह यदविद्याच विद्याचेति भगवतो गमने शक्तिद्वयं अविद्याविद्याच तत्राविद्यासाशनमार्गं एवचलति विद्यात्वनशनमार्गं भगवांस्तु उभयाश्रितस्तदनुरोधेनउभयत्र चलति अन्यथा भगवच्छक्तित्वं तयोनस्यात् चकारात्तत्कार्यं सामग्री च न मार्गांतरंगच्छतीत्यर्थः ॥ २० ॥

श्रीविश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

एतत् सदृष्टान्तमाह । असौ प्राणः प्राणवायुः स्वधिष्ण्यं देहान्तः प्रतपन् श्वासेन प्रतापयुक्तं कुर्वन् बहिश्च प्रतपति प्रभवति एवं विराजम् अन्तर्यामित्वेन स्थित्या प्रतपन् प्रतापवन्तं ज्ञानक्रियादिशक्तिमन्तं कुर्वन् अन्तर्बहिश्च प्रतपति प्रभवति ॥ १७ ॥

स परमेश्वरः अमृतस्य ईशः प्रभुर्भोक्ता भोजयिता दाता चेत्यर्थः स्वर्गीयसुधाव्यावृत्त्यर्थमाह अभयस्य संसारभयरहितस्य । अमृतत्वेशत्वे हेतुः मर्त्यं मरणधर्म्मकम् अन्नं वैषयिकं सुखं यत् यस्मात् अत्यगात् अतिक्रान्तवान् । न ह्यमृतभोजिनं चशाक चर्व्वणं गच्छेत इति भावः । यदि च कौतुकवशात् कदाचित्तांश्चर्व्वयति तत् अनासक्त्यैव । एवमेवान्तर्यामिणोऽपि अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च इत्यादिदृष्ट्या क्वचिद्भोक्तृत्वव्यपदेशोऽपि तदन्नातिक्रम एव दृष्टव्यः । एकस्तयोः खादति पिप्पलान्नमन्योऽनिरन्नोऽपि बलेन भूयानिति श्रुतौ निरन्नत्वं नाम अन्नासक्तिराहित्यं व्याख्यातम् । एवञ्च उतामृतत्वस्येशानो यदन्नेनातिरोहतीत्यस्यार्थो विवृतः । अमृतत्वस्येति स्वार्थोत्वप्रत्ययः । सुपां सुपो भवन्ति इत्यन्नमित्यर्थे अन्नेनेति पदम् । अतिरोहति अत्यक्रामत् । ततोहेतोः पुरुषस्य परमेश्वरस्य एष महिमा दुरत्यय अपारः एवञ्च एतावानस्य महिमातोज्यायांश्च पूरुष इत्यस्यार्थो विवृतः ॥ १८ ॥

अथ तस्य मायिकीरमायिकीश्च विभूतीर्विभज्य दर्शयति द्वाभ्याम् । स्थितिः सर्व्वलोकपालनं पादाश्चरणारविन्दाद्यस्य स स्थितिपात् तस्य पुंसः पादेषु अंशभूतेषु मायिकामायिकदशेषु सर्व्वभूतानि बद्धमुक्तजीवान् विदुः । तत्र च त्रिमूर्द्धः त्रिगुणमयस्थानां मूर्द्धाइव उपरिस्थानेषु परमव्योमस्वित्यर्थः । अमृतं मरणाभावः क्षेमं रोगाद्यभावः । अभयं परस्परहेतुकस्य भगवदपराधहेतुकस्य च भयस्याभावः । कालहेतुकभयस्यामृतशब्देनैव वारणं ज्ञेयम् । अधायि स्थापितम् तेन त्रिगुणमयस्थानेषु तद्विपरीतं मृतम् अक्षेमं भयञ्च निहितमिति त्रैगुणप्रपञ्चस्यानित्यत्वं त्रिगुणातीतस्य परव्योम्नो नित्यत्वं बोधितम् । वक्ष्यते चाग्रेतद्धामवर्णने—न च कालविक्रमः न यत्र मायेत्यादि । एवञ्च पादोऽस्य विश्वाभूतानीति सामानाधिकरण्यम् अधिष्ठानाधिष्ठेययोरभेदविवक्षया पाद इत्येकवचनं सामान्याभिप्रायेण दिवि सर्व्वोर्द्ध्व प्रदेशे अमृतम् अस्यास्त्रिपात् त्रिपाद्विभूतिरूपमित्यर्थः ॥ १९ ॥

पादेषु सर्व्वभूतानीत्यस्यार्थं विशिष्य विवृणोति । बहिस्त्रिमूर्द्धशब्दोक्तात् प्रकृत्यावरणात् परत्र त्रयः पादाः परव्योमशब्देनाभिधीयमाना आसन् । चकारात् क्वचित् कश्चित् प्रपञ्चमध्यवर्त्तिनोऽपि मथुरायोध्यादिनामानः । ये पादा अप्रजानां प्रकर्षेण न जायन्ते इत्यप्रजाः संसारमुक्ता जीवास्तेषाम् आश्रमाः स्थानानीति आश्रमाणामाश्रमस्थानाञ्च तेषां नित्यत्वं बोधितम् अमृतं क्षेममभयमिति पूर्वोक्तेः त्रिलोक्या

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

त्रिगुणालोकमय्याः प्रकृतेरन्तस्तु अपरश्चतुर्थः पाद इत्यर्थः। यत्र गृहमेधः कर्म्मिजन इत्यर्थः कीदृशः अबृहद्व्रत. ब्रह्मचर्य्यव्रतरहितो भगवद्.... इत्यर्थः तेन स चापि यदि कदाचिद्भक्तः स्यात् तदा तस्यापि त्रिपाद्विभूतिरेव स्थानमिति भावः एवञ्च त्रिपादूर्द्ध उदैत् पुरुषः पादोऽस्येहाभवत् पुनरिति श्रुत्यर्थो निवृतः। स्मृतिश्च यथा—त्रिपाद्विभूतेर्लोकास्तु असंख्या अरिकीर्त्तिताः। शुद्धसत्त्वमयाः सर्वे ब्रह्मानन्दसुखाह्वयाः। सर्व्वेनित्या निर्विकारा हयरागादिवर्जिताः। सर्व्वे हिरण्मयाः शुद्धाः कोटिसूर्य्यसमप्रभाः॥ सर्व्वे वेदमया (देवमाया) दिव्याः कामक्रोधादिवर्जिताः। नारायणपदाम्भोज भक्त्यैकरससेविनाः॥ निरन्तरं सामगान परिपूर्णसुख श्रिताः सर्व्वेपञ्चोपनिषत्स्वरूपा वेदवर्च्चसः (देवपर्च्चसः) इत्यादि। तत्र त्रिपाद्विभूति शब्देन प्रपञ्चातीतलोकोऽभिधीयते। पादविभूतिशब्देन तु प्रपञ्च इति। यथोक्तं तत्रैव त्रिपाद्विभूतिः परं धाम्नि पादोऽस्येहाभवत् पुनः। त्रिपाद्विभूतिर्नित्यं स्यादनित्यं पादमैश्वरम॥ नित्यं तद्रूपमीशस्य परं धाम्नि स्थितं शुभम। अच्युतं शाश्वतं दिव्यं सदा यौवनमाश्रितम् नित्यं सम्भोग्यमीश्वर्य्या श्रिया (भूम्या) च संवृतमिति सन्दर्भधृतं पाद्मोत्तरखण्डम्। तत्र त्रिमूर्द्धा महर्लोकस्तस्य मूर्द्धसु जनतपःसत्येषु क्रमेण अमृतं क्षेममभयं निहितं न एवत्रयः पादा ब्रह्मचारिवानप्रस्थयतीनाम् आश्रमा महर्लोकात् अधस्त्रिलोक्यां गृहस्था ब्रह्मचर्य्यं रहितस्तिष्ठतीति स्वामिचरणाः॥ २०॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

मोक्षप्रदत्वं कर्मफलानपेक्षत्वं च भगवतो दर्शयन् उतामृतत्वस्येशानो यदन्नेनातिरोहतीत्यस्यार्थमाह सोऽमृतस्येति सःपुमान् न विद्यते भयं यतस्तस्याभयस्यामृतस्य मोक्षस्येशःमोक्षदाने स एव समर्थ इत्यर्थःमुक्तिप्रदाता सर्वेषां विष्णुरेव न संशय इति स्मृत्येतराच्च यत् यस्मात् मर्त्यं जीवानुरूपमनित्यम् अन्नं भोग्यम् कर्मफलम् अत्यगात् अतिक्रान्तवान् कर्मफलभाक्जीवान्नियन्ता परमात्मा कर्मफलानपेक्ष इत्यर्थःद्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यःपिप्पलंस्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति श्रुतेः तेनेदमावृतं विश्वं वितस्तिमधितिष्ठतीत्यनेनोक्तस्यविश्वांतर्बहिरवस्थितस्यसोऽमृतस्याभयस्येश इत्यादिनोक्तं मोक्षप्रदत्वं कर्मफलानपेक्षत्वं च कुतः स्यादित्याशंक्य तद्दोतनाय एतावानस्य महिमा ततोज्यायांश्च पुरुष इत्यस्यार्थमाह महिमेति हेब्रह्मन्नारद! बंधविमोचकत्वं कर्मफलास्पृष्टत्वादि इत्येव पुरुषस्य महिमा ततः तस्माद्धेतोर्दुरत्ययः अपारः ज्यायानित्यर्थः पुरुष इतिशेषः अस्येतिमंत्रस्य पदस्यपुरुषस्येतिव्याख्या ज्यायानिति पदस्य दुरत्यय इति व्याख्या पुरुष इति विशेष्यपदं तु मंत्रादेवाध्याहृत्य योज्यम॥ १७॥

ज्यायस्त्वमेव दर्शयन् पादोऽस्य विश्वाभूतानीत्यस्यार्थमाह पादेष्विति तिष्ठत्पदेनेतिस्थितयोभूरादयोलोकाः तेपादाइव पादा अंशा यस्य स स्थितिपात् तस्य स्थितिपदः भूरादिलोकपदः पुंसः पादेषु भूरादिलोकेषु सर्वभूतानिविदुः मंत्रे तु पादइति जातावेकवचनम् पादोऽस्यविश्वाभूतानीति सामानाधिकरण्यं च भगवत्पादाभिन्नतयामंत्रेणोक्तेषु भूतेषु स्पर्द्धा रूपादिकं न कर्तव्यमित्यभिप्रायेण बोध्यम आश्रमधर्माः द्विविधा पुनरावृत्तिलोकप्रापकाः परमपदप्रापकाश्च ते च श्रीपराशरेण प्राजापत्यं ब्राह्मणानामित्यारभ्य ब्राह्मं संन्यासिनां स्मृतमित्येतेन पुनरावृत्तिलोकप्रापकाः एकांतिनःसदाब्रह्मध्यायिनो योगिनोहियेतपां तत्परमं स्थानं यद्वैपश्यंति सूरय इत्येतेन परमपदप्रापकाश्च प्रदर्शिताः ततः पुनरावृत्तिलोकप्रापकानामाश्रमधर्माणांफलं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थंदर्शयति अस्य पुरुषसूक्तोदितस्यपुरुषस्य संबंधित्रिपादस्त्रिविधंऽमृतं स्वर्गसुखापेक्षयानित्यं सुखं दिवि जनादित्रिकेऽस्तीतिश्रुत्यर्थः एतदेवाह त्रयाणां भूरादीनां मूर्द्धामहर्लोकस्तन्मूर्द्धानो जनादयो लोकाः तेष्वेकैकक्रमेणामृतं क्षेममभयमधायिनिहितम तथाहि जनलोके अमृतं नैष्ठिकब्रह्मचारिधर्मसाध्यंसुखम् त्रिलोक्यपेक्षया स्थिरत्वाच्चिरजीविभोग्यम् श्रीकुमारास्तुतत्र मुमुक्षुजनानुग्रहाय स्थिताः यथा श्वेतद्वीपेऽनिरुद्धः ननुकर्मफलभोगायेत्यन्यत्र विस्तरः तपोलोके क्षेमं निहितं त्रिलोक्यां वक्ष्यमाणायां शक्त्या संकर्षाग्निना यां यूष्णामहर्लोकाज्जनं भृग्वादयोदिताइति वक्ष्यमाणरीत्या भृग्वादिगमनेन जनलोके अक्षेमदर्शनमस्ति तपोलोके तस्याप्यभावात् सत्येऽभयं त्रयोदशलोकसुखाभिमानिकृतपराभवाभावः तपोलोके तु अभयं न सत्यस्थभूतकृतभयसंभवात् सत्यस्थानामपिपुनरावृत्तिः आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनेति भगवतोक्तो ब्रह्मा च तत्र लोकहितायैवास्ते तस्यभगवत्पुत्रत्वेन पातानर्हत्वादित्यलं विस्तरेण॥ १८॥

एतदेव त्रैविध्यमुपपादयन् त्रिपादूर्द्ध्वउदैत्पुरुष इत्यस्यार्थमाह त्रयोजनतपःसत्याख्याःपादा इव पाद अंशाःयस्य स त्रिपात्पुरुषः नैष्ठिकवानप्रस्थसंन्यासिधर्मफलदः स उर्द्ध्वलोकत्रयं तेन पादत्रयाख्येनांशेनोदैत्उपरिस्थितः इति श्रुत्यर्थः एतदेवाह न प्रजायन्तेपुत्रादिरूपेणेत्यप्रजा उर्द्ध्वरेतसः नैष्ठिकवानप्रस्थसंन्यासिनः तेषां ये आश्रमा वासस्थानानि स्वाश्रमधर्मफलभोगभूमयः ते त्रिलोक्या बाहः आसन् चतुर्थं पादं गृहस्थाश्रमधर्मफलभोगायतनमुत दर्शयन् पादोऽस्येहाभवत्पुनरित्यस्यार्थमाह अंत इति अस्य पुरुषस्य इह भूरादिरूपः पादः अंशः अभवदिति श्रुत्यर्थः अपरः अप्रजेभ्यः अन्य सप्रजः कथंभूतः अबृहद्व्रतः ब्रह्मचर्यव्रतरहितः गृहमेधः गृहे एव मेधा यज्ञो यस्य सः त्रिलोक्याः चतुर्थपादभूतायाः अंतर्मध्ये एव गृहस्थास्त्रिलोक्यामेव स्वाश्रमधर्मफलं अल्पकालस्थायि स्वर्ग्यं सुखं प्राप्नोतीत्यर्थः वर्णधर्मानामप्येषैव गतिरिति बोध्यम॥ १९॥

एवं द्वितीयस्कंधस्य प्रथमाध्यायमारभ्य अबृहद्व्रतइत्यंते ग्रन्थे उपादेयत्वेन मुमुक्षुरधिकारः तस्माद्भारतसर्वात्माभगवानीश्वरः श्रोतव्य इत्यादिना विस्तरतः प्रतिपादितः हेयत्वेन बुभुक्षुरधिकारश्च श्रोतव्यादीनि राजेन्द्र नृणांसंति सहस्रशः इत्यादिना विस्तरतः प्रतिपादितः भूतोभयाधिकारिविषये एते सृती ते नृप! वेदगीते इत्यनेनोपपादिते फले श्चोभयाधिकारियोग्ये तेनात्मनाऽस्मानमुपैति शांतमानंदमयोऽवसाने न पादेषु सर्वभूतानामित्यश्लोकद्वयेन च वर्णिते तत्रानंदप्राप्तिरूपमर्चिरादिमार्गेण गतस्य मुमुक्षोः भूरादिमर्त्यानलोकेषु स्वर्ग्यामृतक्षेमाभयाख्यानि फलानि धूममार्गेण गतानां बुभुक्षूणामिति विवेकः सत्याधिकारभेदः एकस्यैवावस्थाभेदनक्षेयः तथा च श्रुतिः तंविद्याकर्मणीसमन्वारभेते इति तं पुरुषं विद्याकर्मणी भुक्तिमुक्तिसाधने अवस्थाभेदेनसम्यक् अन्वारभेते,संगते भवतः जातायांमुमुक्षायां विद्यासंगता भवति बुभुक्षायां तुजातायां कर्मसंगतं भवतीति श्रुत्यर्थः एतदेव दर्शयन् ततोविष्वङ्ग्यक्रामदित्यस्यार्थमाह सृतीति विविधे

सृती विचक्रमे विष्वङ् साशनानशने उभे ।
यदविद्या च विद्या च पुरुषस्तूभयाश्रयः ॥ २१ ॥
यस्मादण्डं विराड्जज्ञे भूतेन्द्रियगुणात्मकः ।
तद्द्रव्यमत्यगाद् विश्वं गोभिः सूर्य इवातपन् ॥ २२ ॥
यदास्यनाभ्यान्नलिनादहमासं महात्मनः ।
नाविदं यज्ञसम्भारान् पुरुषावयवादृते ॥ २३ ॥
तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः ।
इदं च देवयजनं कालश्चोरुगुणान्वितः ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

सुष्ठु अंचतीति विष्वक् क्षेत्रज्ञः सृती धूमाद्यर्चिरादिमार्गौ कथं भूते सृती साशनाऽनशने भोगमोक्षप्राप्तिसाधनभूते विचक्रमे चलति स्म मार्गद्वयप्राप्तेः साधनद्वयमाह यदविद्या च विद्या चेति यत्तयोः सृत्योः क्रमेण अविद्याकर्मलक्षणा अविद्याकर्मसंज्ञान्येति वाक्यात् विद्या संवेदनोपासनाद्यपरपर्यायरूपा च क्रमेण साधन इत्यर्थः अधिकारिस्तु अवस्थाभेदेन एक एव इत्याह पुरुषस्तूभयाश्रय इति ॥ २० ॥

———

भाषा टीका ।

अनित्य भोग्य कर्मफलादि जिससे पृथक् है ऐसा जो अभय मोक्षका अधिष्ठाता परमात्मा है हे नारद ! उस पुरुष का यह महिमा अपार है ॥ १८ ॥

भूरादिलोक हैं पादांशरूप जिसके ऐसाजो पुरुषहै उसके भूरादि लोकोंमें सर्वभूत अर्थात् प्राणी जानने और भूरादिलोकोंके ऊपर जो महर्लोकहै और उसके ऊपर जो जन, तप, सत्य, लोकहैं उनमें क्रमसे अमृत, क्षेम, और अभय स्थितकियेगये हैं ॥ १९ ॥

अप्रज, सन्तान रहित जो ऊर्द्धरेता ब्रह्मचारी और नैष्ठिक जो वानप्रस्थ और सन्यासीहैं इनके जो त्रिपादरूप आश्रम अर्थात् कर्म्म फल भोग भूमिहै वे त्रिलोकीसे बाहिरजन लोकादि हैं और दूसरा ब्रह्मचर्य्य व्रत रहित जो चतुर्थ पादरूप गृहस्थाश्रम है उसकी जो कर्म्म फल भोग भूमिहै यह त्रिलोकी के भीतरही है ॥ २० ॥

———

श्रीधरस्वामिकृत भावार्थदीपिका ।

अथ अधिकारभेद एकस्यैवावस्थाभेदेन न त्वत्यन्तभिन्नविषय इति दर्शयन् ततो विष्वङित्यस्यार्थमाह सृती इति । विविधं सुष्ठु अञ्चति गच्छतीति विष्वङ् पुरुषः क्षेत्रज्ञः सृती मार्गौ दक्षिणोत्तरौ विचक्रमे चलतिस्म । कथम्भूते सृती साशनानशने भोगापवर्गप्राप्तिसाधनभूते । अत्र हेतुत्वेन पुनर्विशेषणम् यत् यतः अविद्या कर्मरूपा एका, विद्याच तत्साधनोपासनारूपाअन्या ॥ २१ ॥

तदेवं विराडन्तर्वर्त्तिनां फलवैचित्र्यमुक्त्वा तत्कारणेश्वरस्य तद्वैलक्षण्यं दर्शयितुं तस्माद्विराडजायतेत्यस्यार्थमाह । यस्मादण्डं जज्ञे तत्र च भूतेन्द्रियगुणात्मको विराट् च जज्ञे । स ईश्वरः तत् विश्वं विराड्देहं द्रव्यम् अण्डञ्च अतिक्रान्तवान् । सूर्य्य इवेति पूर्वोक्त एव दृष्टान्तः ॥ २२ ॥

नन्वेवं पुरुष एव चेत् सर्वं तर्हि यज्ञस्य तत्साधनानाञ्च अपृथग्भावात् यज्ञैः पुरुषाराधनं न सिध्येदित्याशङ्क्य तत्परिहाराय यत् पुरुषेण हविषेत्यादिमन्त्रार्थं संगृह्य दर्शयति यदेत्यादिना । अस्येति विराड्देहान्तर्यामिणः, तस्यैव प्रकृतत्वात् । नाभौ भवं नाभ्यं तस्मात् यज्ञस्य सम्भारान् साधनानि नापश्यम् ॥ २३ ॥

तदा तेषु सम्भारेषु साध्येषु सत्सु पुरुषावयवैरेतैःसम्भाराःसम्भृतामया इति चतुर्थेनान्वयः । वनस्पतयोयूपाः । देवयजनं यज्ञभूमिः । इदञ्चेति वचनात् यज्ञार्हे स्थाने उपविष्टःकथयतीति गम्यते । बहुगुणान्वितो वसन्तादिकालः ॥ २४ ॥

———

श्रीराधारमणदास गोस्वामि विरचित दीपिन्याख्य तट्टिप्पणी ।

ततोविष्वङ् इत्यस्येति । ततोविष्वङ् व्यक्रामत् साशनानशने अभि (४) इत्यर्द्धस्य । सायणभाष्यंयथा—ततोमायायामागत्यानन्तरं विष्वङ् देवतिर्यगादिरूपेण विविधःसन्व्यक्रामत् व्याप्तवान् किं कृत्वा । साशनानशने अभि अभिलक्ष्य । शासनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातम् । अनशनंतद्रहितमचेतनं गिरिनद्यादिकम् । तदुभयं यथास्यात् तथा । स्वयमेव विविधो भूत्वाव्याप्तवानित्यर्थः (४) ॥ २१ ॥

तस्माद्विराड्जायतेत्यस्येति । तस्माद्विराडजायत विराजो अधिपूरुषः । सजातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः (५) ॥ इत्यस्यार्थः सायणभाष्यं यथा—विष्वङ् व्यक्रामदिति यदुक्तं तदेवात्र प्रपञ्च्यते तस्मादिति । तस्मादादिपुरुषात् विराट् ब्रह्माण्डदेहोऽजायत उत्पन्नः । विविधानि राजन्ते वस्तून्यत्रेति विराट् । विराजो अधि विराड्देहस्योपरि तमेवदेहमधिकरणं कृत्वा पुरुषस्तद्देहाभिमानीकश्चि त् पुमान् अजायत । सोऽयं सर्ववेदान्तवेद्यःपरमात्मा । स एव स्वकीययामायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्माजीवोऽभवत् एतच्चाथर्वणिका उत्तरतापनीये विस्पष्टमामनन्ति । स वा एव भूतानीन्द्रियाणि विराजं देवताः

श्रीराधारमणदासगोस्वामिविरचित दीपन्याख्यटिप्पणी ।

कोऽर्थश्च सृष्ट्वा प्रविश्यामूढोमूढ इव व्यहरदासीत मायथैवेनिमज्जातो विराट्पुरुषः अत्यरिच्यत अतिरिक्तोऽभूत् देवतिर्यङ्मनुष्यादिरूपोऽ
पश्चात् देवादिजीवभावात् ऊर्द्ध्वं भूमिं ससर्जेति शेषः।अथाभूमेः सृष्टेरनन्तरं तेषां जीवानां पुरः समग्रं पूरयन्तेस्तैरभिर्धातुभिरितिमुरः शरीराणि
(५) सूर्यं इवेति । स्वस्मात् प्रकाशमानं मण्डलं विश्वञ्च । मण्डलमध्यवर्त्ती सूर्यः किरणैः सर्वतः प्रकाशयन् तदुभयम् अत्येति यथेत्यर्थः ।२२
यत् पुरुषेण हविषेत्यादिमन्त्रेति । यत् पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः (६) ॥ तं यज्ञं
बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये (७) तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् । पशून् तांश्च
क्रे वायव्यान् आरण्यान् ग्राम्याश्च ये (८) ॥ तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत (९)
तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः (१०) ॥ इत्यादयोऽपि मन्त्राः । एषां सायणभाष्य
यथा—यत् यदा पूर्वोक्तक्रमेणैव शरीरेषूत्पन्नेषु सत्सु देवा उत्तरसृष्टि सिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरासम्भवात् पुरुषस्व
रूपमेव मनसा हविष्ट्वेन सङ्कल्प्य पुरुषेण पुरुषाख्येन हविषा मानसं यज्ञम् अतन्वत अन्वतिष्ठन् ।तदानीमस्य यज्ञस्य वसन्तो वसन्तर्तुरेवाज्य
मासीदभूत् । तमेवाज्यत्वेन सङ्कल्पितवन्त इत्यर्थः । एवं ग्रीष्म इध्मआसीत् । तमेव इध्मत्वेन सङ्कल्पितवन्त इत्यर्थः । तथा शरत् हविरा
सीत् । तामेव पुरोडाशादिहविष्ट्वेन सङ्कल्पितवन्तइत्यर्थः । एवं पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन सङ्कल्पः । अनन्तरं वसन्तादीनामाज्या
दिविशेषरूपत्वेन सङ्कल्प इति द्रष्टव्यम् (६) । यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि मानसे यज्ञे प्रौक्षन् प्रोक्षित
वन्तः । कीदृशमित्यत्राह । अग्रतः सर्वसृष्टेः पूर्वं पुरुषं जातं पुरुषत्वेनोत्पन्नम् । एतच्च प्रागेवोक्तम्—तस्माद्विराडजायत विराजो अधि
पुरुष इति तेन पुरुष रूपेण पशुना देवा अयजन्त मानसं यागं निष्पादितवन्त इत्यर्थः । के ते देवा इत्यत्राह साध्याः सृष्टि साधनयोग्याः
प्रजापति प्रभृतयः तदनुकूला ऋषयो मन्त्र द्रष्टारश्च ये सन्ति ते सर्वेऽपि अयजन्तेत्यर्थः (७) । सर्वहुतः सर्वात्मकः पुरुषो यस्मिन् यज्ञे
हूयते सोऽयं सर्वहुत् तादृशात् तस्मात् पूर्वोक्तात् मानसात् यज्ञात् पृषदाज्यं दधिमिश्रमाज्यं संभृतं सम्पादितम् । दधि च आज्यञ्च
इत्येवमादि भोग्यजातं सम्पादितमित्यर्थः । तथा वायव्यान् वायुदेवताकान् एतान् लोकप्रसिद्धान् आरण्यान् पशून् चक्रे उत्पादितवान् ।
आरण्या हरिणादयः । तथा ये च ग्राम्या गवाश्वादयस्तानपि चक्रे । पशूनामन्तरिक्षद्वारा वायुदेवतात्वं यजुर्ब्राह्मणे समाम्नायते । वायवस्थ
त्याह । वायुर्वा अन्तरिक्षस्याध्यक्षो । अन्तरिक्षदेवत्याः खलु वै पशवः । वायव एवैनान् परिददातीति (८) । सर्वहुतस्तस्मात् पूर्वोक्ता
त् यज्ञात् ऋचः सामानि जज्ञिरे उत्पन्नाः । तस्मात् यज्ञात् छन्दांसि गायत्र्यादीनि जज्ञिरे । तस्मात् यज्ञात् यजुरजायत '९' । तस्मात्
पूर्वोक्तात् यज्ञात् अश्वा अजायन्त उत्पन्नाः । ये के चाश्वव्यतिरिक्तागर्दभा अश्वतराश्चउभयादतः ऊर्द्ध्वाधोभागयोर्दन्तयुक्ताः सन्तितेऽप्यजा
यन्त । तथा तस्मात् यज्ञात् गावश्च जज्ञिरे किञ्च तस्मात् यज्ञात् अजा अवयश्च जाताः । '१०' ॥ २३ ॥
देवयजनमिति देवाइज्यन्ते अस्मिन्निति देवयजनं यज्ञभूमिः ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

एवं बुभुक्षुमुमुक्षवधिकारिभेदेन तद्द्वयमार्गद्वयं तदुपाय चोक्त्वाऽथ भगवतः स्वविभूति भूत प्रपञ्चाद्विलक्षणं भगवत् प्रपञ्चाकारेणापरि
णामत्वञ्चतद्दोषास्पर्शित्वं च प्रतिपादकतस्माद्विराडजायतेत्यादिवाक्यं व्याचष्टे यस्मादिति विराट्अण्डकारणभूतोविराट्पुरुषोऽनिरुद्ध
अण्डादिति ल्यपूलोपे पञ्चमी यस्मात्स्वशरीरभूतात्प्रकृतेरण्डं सृष्ट्वा स्वयमपि भूतेन्द्रियगुणात्मकः देवादिव्यष्टिप्रपञ्च रूपाञ्जातत्प्रधान
तद्दृरूपं चमत्वं द्रव्यमत्यगात्तत्तत्परिच्छिन्नः ताहरविषयासमवानित्यर्थः तत्र दृष्टांतः आश्रयाद्घटपटादिपदार्थजातान्द्वाभिः किरणादित्यद्व
त्यगात् वेदान्तेषु सत्कार्यवादस्याभिहितत्वात्कारणभूतो विराडेवव्याष्टिरूपेण जञ्ज सूक्ष्मचिदचिच्छरीरको भगवानेव स्थूलचिदचिच्छरीरको
जातः जातश्चस्वयं शरीरभूतचेतनाचेतनगतदोषैरस्पृष्टः स्वकार्यभूतकृत्स्नप्रपञ्चमंतर्बहिश्च व्याप्य स्थित इत्यर्थः नामरूपविभागानर्हसूक्ष्म
प्रकृतिपुरुषशरीरकस्यपरमपुरुषस्यजगदुपादानत्वादुपादानत्वस्यावस्थाश्रयत्वरूपत्वात्प्रकृतिपुरुषेश्वराणांत्रयाणामप्यवस्थाश्रयत्वमस्ति
चतत्राचेतनस्यावस्थाश्रयत्वेस्वरूपान्यथाभावरूपंचेतनस्यतुस्वभावान्यथाभावरूपंईश्वरस्यतुकार्यावस्थचेतनाचेतननियंतृत्वरूपंतत्रहिकारणा
वस्थचेतनाचेतननियमनात्कार्यावस्थचेतनाचेतननिय मनमभिन्नमिति वक्तुं शक्यं किंचेश्वरस्य सद्वारकावस्थाश्रयत्वमस्त्येव एवम्स्यांक-
र्यणावस्थानांप्रतिनियतत्वाद्बकुलनीलादितंत्वारब्धेपटेशौक्ल्यादस्तत्प्रदेशगतत्ववच्चेतनाचेतनगता धर्मा अपरपरिणामित्वादयस्तत्रैवा
वतिष्ठंते नपरमात्मानस्पृशंति परमात्मा तु स्वयंनिरस्तनिखिलदोषोऽसंख्येयकल्याणगुणगणः स्वशरीरभूतचेतनाचेतन
गतस्वपर्यंतनामरूपनिर्वाहिकः कारणावस्थकार्यावस्थचेतनाचेतनशरीरकत्वेन तद्वाचिभिःशब्दैरभिधीयमानः सर्ववस्तुसमानाधिकृतोऽव
तिष्ठत इत्यभिप्रायः श्रुत्यर्थस्तु तस्मात्परमप्रस्तुतकारणपुरुषाद्विराडनिरुद्धोजज्ञेऽवतीर्णः विराजोऽनिरुद्धाद्विराजो ब्रह्मांडशरीरकः पुरु-
षो जज्ञे जातश्च स विराजः भूमिं विश्वं पश्चात्पुरपरिच्छेदकः अंतश्चात्यतिरिच्यते तद्विलक्षणोऽव्याप्तवानित्यर्थः ॥ २१ ॥
नन्वेवं पुरुष एव चेतस्सर्वं तर्हियज्ञस्य तत्साधनानां चापृथग्भावादेः पुरुषाराधनंनसिद्धेदित्याशंक्य तत्परिहारायपुरुषेत्यादि
मंत्रार्थं संगृह्यदर्शयति यदेति महात्मनःअस्य विराडाख्यानिरुद्धस्य नाभौभवःनाभ्यं तपोभूतान्नलिनात्कमलादहंचतुर्मुखःयदा
आसमभूवं तदापुरुषावयवादृतेयज्ञसंभारानन्यानि यज्ञसाधनानि नाविदंनापश्यम् ॥ २२ ॥
तेषु पुरुषावयवेषु यज्ञस्य साधनान्यासन्निति शेषःतान्याह पशव इति वनस्पतयोयूपादयोदेवयजनं देवा इज्यंतेऽस्मिन्निति देवयजनं
यागभूमिःइदंचेति वचनाद्यज्ञार्हेस्थाने उपविष्टःकथयतीति गम्यते बहुगुणान्वितःकालोवसंतादिः ॥ २३ ॥
वस्तूनि पुरोडाशादीनि तदर्थाओषधयः व्रीह्यादयः स्नेह आज्यादिः रसः सोमादिः रसः लोहः सुवर्णादि मृदः कपालादीनि चातुर्होत्र
चतुर्होतृशब्दवाच्यैर्मंत्रैः प्रकाश्यकर्मेहसत्तमसत्तमश्रेष्ठ ॥ २४ ॥

———

श्रीमद्विजयध्वजकृत पदरत्नावली ।

[illegible] नामचास्याभूदितिभावेनाह तदप्रत्यामति यदाब्रह्माण्डात् कृर्ध्वपूर्वादिविश्वमुत्पन्नतद्व्यंगोभिर्भक्तिज्ञानादिगुणा [illegible] कोऽभूत् कथमिवयथासूर्योविगतविश्रान्तैर्रश्मिभिरतरिक्षात्याश्रयमस्योतितयेत्यन्वयः तदुक्त यदाभयात्मकोजर्ब्रह्मा [illegible] इत्यादि प्रथमरूपस्याधिरिचस्यापिसएषपुरुषइत्युक्तस्यवैराजपुरुषाभिधस्यहरेर्मस्याधिष्ठानत्वाद्यस्यहावयवैरित्यायुक्तलक्षणंचतुर्मुखेसंभवति तत्परिहारायाह यदेतियदास्यनाभ्याअभिप्रदेशाज्जातान्नलिनाद्वहमासन्द्वितीयरूपणात्पन्नोऽभवं महात्मन इत्यनेनतस्मात्स्यात्स्वमाहात्म्यस्यात्यंतावोधानत्वंसूचयति ॥ २२ ॥

तदाभक्त्यानियियश्चुरहंपुरुषावयवानुतेअंडस्यपुरुषप्रतिमात्वात् लोकादियागसंभाराणामुक्तप्रकारेणातदवयवोत्पन्नत्वात्तदवयव्याश्रित्वाश्रितवावपुरुषावयवान्विहायलोकादियज्ञसंभारानाविदन्नलब्धवानित्यन्वयः अनेनयज्ञकर्मणाभगवद्विषयेणाशुद्धांतःकरणस्यपुंसःसमुद्रिक्तभक्तिज्ञानादिभिस्तत्प्रसादातिशयोभवतीत्युक्तं भवति पुनर्ब्रह्मणाकिमकारीत्याशंकयतदर्थत्वेनतत्सृष्टत्वेनतत्सन्निधानविशिष्टैस्तैरहरियजनाद्धरिप्रीतिर्भवतीतिविमृश्ययज्ञसंभरणप्रकारमाह तेष्विति तेषुपुरुषावयवेषुतदाश्रितयज्ञसंभारामयासंभृतःसाधितइत्यन्वयः यज्ञाअग्निष्टामादयः पशवोऽजादयः वनस्पतयोऽश्वत्थादयःयैरग्रयादिनिर्माणंक्रियते ॥ २३ ॥

देवयजनंयागभूमिः कालोवसंतादिः तस्यगुणाधर्मोद्याः वस्तूनिकांचनादीनि ओषधयोव्रीह्यादयः स्नेहा आज्यादयः रसाः क्षीरगुडाः लोहा अयः प्रभृतयः मृदोवल्मीकमृदिष्टकादयः जलंगंगादिगतम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अतएवोभयथापि पुरुषश्चतुष्पादित्याह सृती इति । विश्वङ् सर्वव्यापी, पुरुषः पुरुषोत्तमः, एते सृती ते प्रपञ्चाप्रपञ्चलक्षणे जीवस्य गती, विचक्रमे आक्रम्य स्थितः । कथम्भूते साशनानशने कर्मादिफलभोगतदतिक्रमयुक्ते । तस्यैव तत्तदाक्रमणे हेतुः । यत् ययोः जीवस्य सृत्योः अविद्या मायैकत्र, विद्या चिच्छक्तिरन्यत्राश्रय इत्यर्थः पुरुषोत्तमस्तु तयोर्द्वयोरप्याश्रयः । वक्ष्यते च—यस्मादण्डं विराड्जज्ञे इत्यादिना । तस्मात् सर्वैश्वर्यैकदेशैश्वर्येण च चतुष्पात्त्वमितिभावः ॥ २१ ॥

यस्मादिति । यस्मात् पूर्वोक्तात् पुरुषोत्तमात् ॥ २२ ॥

अस्य गर्भोदकशायिरूपस्य सतः । पुरुषावयवाद्दन इति तदानीं पश्वाद्यनुत्पत्तेः ॥ २३ ॥ २४ ॥

चत्वारो होत्रा उपलक्षिता उद्गातृब्रह्मऋत्विजश्चतुर्होतारस्तेषां कर्म्म चातुर्होत्रम् ॥ २५ ॥ २६ ॥ २७ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवंमार्गभेदेन भोक्तृभेदात्फलभेदं निरूप्य तस्मात्पुरुषादयं विराट् पुरुषो भिन्न इति वक्तुं तत उत्पन्नत्वमाह तस्मादिति तस्मात्परमपुरुषान्नारायणादंडं ब्रह्मांडं जातं तस्मादधिदैवादिदमध्यात्मिकमंडं जातमित्यर्थः तस्मादंडाद्विराड् जज्ञे सत्वभूतेंद्रियगुणात्मकः भूतानि आधिभूतं द्रव्यं इंद्रियाण्यध्यात्मं गुणाअधिदैवमिति अथवा महाभूतानि इंद्रियाणि शब्दादयश्च विषयाः शरीराद्यं विषयभोगकर्तेत्यर्थः सोऽपि पितृवदाक्रमणं कृतवानित्याह तद्द्रव्यमत्यगादिति तद्विश्वात्मकं द्रव्यं ब्रह्मांडरूपं स्वशरीरं अत्यगात् अतिक्रम्य दशांगुलवृद्ध्या स्थित इत्यर्थः सकलमपरिच्छेदसाम्य किंतुस्वप्रकाशकमपीत्याह गोभिः सूर्यइवातपन्निति गोभिःस्वकिरणैः यथा सूर्यः स्वाधिष्ण्यमपि तपति बहिरपि तद्वत् अयमपि स्वशरीरं बहिरपि प्रकाशितवानित्यर्थः ॥ २१ ॥

एव द्विविधं विश्वं प्रतिपाद्य नियम्य नियामकभावार्थंपुरुषद्वयं च प्रतिपाद्य अमूर्त्तानांसमागममुक्त्वा यज्ञ रूपस्या पि भगवतः सर्वपदार्थसंबंधश्रवणात्तत्साधनभूतानां पदार्थानां भगवद्भिन्नत्वे पूर्वोक्तसर्वत्वं विरुध्येतेत्याशंक्य तदीयपदार्थानामपि भगवानेव तत्त्वमित्याह यदास्यनाभ्यान्नलिनादिति यदेतन्निरूप्यते तदाजैमिनिसिद्धांतन्यायेन पदार्थलक्षणे पूर्वोक्तभगवत्स्वरूपवाचकानां वाक्यानां अर्थवादत्वं स्यात् अतोमहताकष्टेन निरूपितमप्यनिरूपित भवेत् तस्माद्यज्ञोपयोगिपदार्थानां भगवदवयवत्वं निरूपयति तत्रब्रह्मा स्वयमाह यदाअहमस्य नाभ्याः यन्नलिनंकमलं तस्मादहमासं तदामयाविचारितमयमाराधनीय इति यतोऽयं महान् महानात्मा स्वरूपमंतःकरणं वा यस्य अयं ह्याराधितो महत्फलं दास्यतीति तदाकिनाराधनीय इति जिज्ञासायां यद्यागजधर्मेण यज्ञमपश्यन् स कथं कर्त्तव्यमित्याकांक्षायां वेदपर्यालोचनेन संभारैःपशु पुरोडाशादिभिःकर्त्तव्य इतिज्ञातं तत्रकते पशुपुरोडाशादय इतिजिज्ञासायां यद्यागजधर्मेण ज्ञातवान् तदाह नाविदंयसंभारानिति पुरुषावयवव्यतिरेकेण अहं यज्ञस्य संभारान्नाविदं नज्ञातवानस्मि तदा स एव पुरुषो यज्ञरूपेण प्रादुर्भूत इत्यर्थः अनेनसाधनरूपः सइत्युक्तं भवति ॥ २२ ॥

तत्र के के संभारा स्तेष्ववयवेषु दृष्टा इत्याकांक्षायामाह तेष्विति तेष्ववयवेषु यज्ञस्य संबंधिनः पशवः अजादयःसवनस्पतयः वनस्पतिसहिताःयूपसहिता सवनस्पतयः कुशा इति वा संबंधः तदा वनस्पतयः अश्वत्थादयः कुशा बर्हीरूपाः इदं च देवयजनं देवा इज्यंते अस्मिन्निति यज्ञभूमिर्देवयजनं इदमित्यंगुल्याप्रदर्शितं अनेनयज्ञभूमौस्थित्वाभागवतं कथयतीति ज्ञापितं चकाराद्देवयजनांतरमपि कालः वसंतादिः चकाराद्योगविशेषनैमित्तिकः उरुगुणान्वित इति यदि तस्मिन् काले सूर्यो नाविःस्यात् पुरस्ताच्चन्द्रमा अभ्युदियात् तस्यसंपत्ति भवेत् अन्येऽपि गुणाः कालस्य बहवो वेदे उक्ताः स उरुगुणान्वितः ॥ २३ ॥

कालः वस्तूनि पात्रादीनि ओषधयः व्रीहियवादयः स्नेहाः घृतादयःरसाःदधिमध्वादयः लोहा स्वधित्यादयः मृदः महावीरादयो जलं वसतीवर्यादिप्रभृतयःऋचायजूंषि सामानि वेदत्रयमंत्राः चातुर्होत्रं होत्रादिचतुर्गुणसाध्यंकर्म चतुर्होतृनिदानकं वा अत्रसत्तमेतिसंबोधनं द्वकार्यविश्वासाय॥२४॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

उक्तलक्षणो एकपादत्रिपाद्विभूती जीव एव प्राप्नोतीत्याह । विष्वं (विश्वम्) अञ्चतीति विष्वङ् (विश्वक्) जीवः सृती एकोऽन्य त्रिपाद्विभूत्योः पन्थानौ विचक्रमे चलति लडर्थे लिट् । सृती कीदृश्यौ साशनानशने भोगापवर्गप्राप्तिसाधनभूते । तत्र योग्यतामाह । यत् यस्य जीवस्यैव अविद्या च विद्या च । अविद्यावस्थायाम् एकपादविभूतिं विद्यादशायां त्रिपादविभूतिं प्राप्नोति, किन्तु विद्याया उपशान्तेन लब्धया एकया भक्त्यैव, भक्त्याहमेकया ग्राह्य इति भगवदुक्तेः । पुरुषः परमेश्वरस्तु उभयस्य अविद्याविद्यात्मकमायाया आश्रय इति सृतिद्वयं तत्स्वामिकत्वात् तदधीनं भवति भावः । एवञ्च ततो विष्वङ् व्यक्रामत् साशनानशने अभीत्यस्यार्थो विवृतः ॥ २१ ॥

तत्र त्रिपाद्विभूतिरन्तरङ्गायाश्चिच्छक्तेर्विलास इति चिन्मय्यां तस्यामासक्त एव पादविभूतिस्तु बहिरङ्गाया मायाशक्तेर्विलास मायामय्यां तस्यामनासक्तएव परमेश्वरस्तां केवलमुपकरोतीत्याह । यस्मात् पुरुषात् अण्डं विराट् च जज्ञे । कीदृशः भूतेन्द्रियगुणात्मकः । स पुरुष ईश्वरः तत् अण्डं द्रव्य विराट्शरीरञ्च अत्यगात् तत् प्रविशन् प्रकाशयन्नपि तत्रनासक्तत्वात् अतिक्रम्यागात् गत्वा च स्वान्तरङ्ग स्थाने त्रिपाद्विभूतावेव सदास्थित इति भावः । तत्रानुरूपो दृष्टांतः गोभिः किरणैर्विश्वम् आतपन् प्रकाशयन् सूर्य्य इव स्वमण्डल स्थितः ॥ २२ ॥

नन्वेवं पुरुष एव चेत् सर्व्वं तर्हि तदुपासकानां तत्पूजोपचारद्रव्याणाञ्च ततः पृथक्त्वाभावात् तत्प्राप्तिसाधनं तत्परिचरणं नाम कीदृगिति चेत् । सत्यम् । तद्विना वस्तुतो वस्त्वन्तराभावात् तस्य परिचरणस्यावश्यकत्वाच्च पार्थिवैर्गन्धपुष्पादिभिः पृथिव्याआराधन मिव तदात्मकैरेव वस्तुभिस्तदाराधनं सिद्ध्यदत्र तदात्मैव प्रमाणमिति प्रदर्शयन् स्वदृष्टान्तयति । यदाऽस्य नाभ्यात् नाभिभवात् नलिनात् आसम् अभूवम् ॥ २३ ॥

तेषु सम्भारेषु साध्येषु सत्सु पुरुषावयवैरेते सम्भाराःसम्भृता इति चतुर्थेनान्वयः । वनस्पतयोयूपाः । देवयजनं यज्ञभूमिः । इदञ्चेति वचनात् यज्ञार्हे स्थाने उपविष्टःकथयतीति गम्यते । बहुगुणान्वितःवसन्तादिकालः २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

जीवस्यं 'विद्याऽविद्याश्रयस्य भोगापवर्गार्हत्वेनोपासकत्वं द्योतितं भगवतःसर्वकारणत्वादिगुणनिधेर्भुक्तिमुक्तिप्रदत्वेनोपास्यत्वं च द्योतयन् ततो विराड्जायते त्यस्यार्थमाह यस्मात्परमेश्वरात् अंडं ब्रह्मांडं जज्ञे तदेव भूतेन्द्रियगुणात्मकःविराट्पुरुषदेहःस परमेश्वरः तद्विश्वं तत्सर्वं द्रव्यमत्यगात् अतिक्रांतवान् तत्र दृष्टांतमाह गोभिःसूर्यःस्वधिष्ण्यं प्रतपन् यथाबहिश्चप्रतपतितद्वत् ॥ २० ॥

स एव ममापि जनकः अस्मदादिभिः सेव्य इति दर्शयन् यत्पुरुषेण हविषेत्यादि मंत्रार्थं संगृह्य दर्शयति यदेत्यादिना अस्य महात्मनः विराट्देहाभिमानिनः आत्मनः क्षेत्रज्ञस्य ममस्वामित्वान्महात्मा पुरुषावतारः प्रस्तुतस्तस्य नाभौ भवंनाभ्यं तस्मान्नलिनात् कमलादहं चतुराननः यदा आत्मसंभवं यदा च पुरुषावयवादृते यज्ञस्य संभारान् साधनानि नाविदम् नापश्यम् ॥ २१ ॥

तदा तेष्वेव पुरुषावयवेषु दृश्यमानेषु सत्सु तैरेव पुरुषावयवैरेते संभाराः संभृता मयेति चतुर्थेनान्वयः वनस्पतयो यूपाद्याः इदमश्चिगे चरम् देवाः इज्यन्तेयस्मिन्निति देवयजनंयज्ञस्थलम् कालोयज्ञार्हः वसंतादिः ॥ २२ ॥

भाषाटीका

भोग मोक्ष प्राप्ति साधनभूत जो धूमादि और अर्चिरादि दोनों मार्ग हैं उन दोनों में जीवात्मा चलता है परन्तु मार्गद्वयकी प्राप्ति साधन अविद्या और विद्या हैं अविद्यासे कर्म्म बन्धनहोताहै और विद्यासे मोक्ष और पुरुषतो अवस्था भेदमें अविद्या और विद्या दोनों का ही आश्रयभूतहै ॥ २१ ॥

जिस परमात्मासे ब्रह्माण्ड और भूतेन्द्रिय गुणात्मक विराट् उत्पन्न होता भया वह परमेश्वर तिस विराट् रूप द्रव्यको प्रकाशित करता हुआ जैसे सूर्य्य अपनी किरणों से विश्वको प्रकाशित करताहै ॥ २२ ॥

जिस समय इस महात्माके नाभि कमलसे मैं पैदा होता हुआ तब पुरुषके अवयवों से अतिरिक्त अन्ययज्ञसामिग्री नहीं देखता हुआ।२३ ।

पुरुषके उन अवयवों में यज्ञ पशु वनस्पति सहित कुशा, देवयजनस्थान, वसन्तादि समय ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

वस्तूनि पात्रादीनि । ओषधयो व्रीह्यादयः स्नेहा घृतादयः । रसाः मधुरादयः, लोहानि सुवर्णादीनि, मृदश्च । चातुर्होत्रं होत्रादिकं कर्म्म ॥ २५ ॥

नामधेयानि ज्योतिष्टोमादीनि । ऋगादीना सुक्तत्वात् मन्त्राः स्वाहाकारादयः । देवतानामनुक्रम उद्देशः । कल्पो बौधायनादि कर्म्मपद्धतिग्रन्थः । अनेनाहं यक्ष्ये इत्येवं सङ्कल्पः । तन्त्रम् अनुष्ठानप्रकारः ॥ २६ ॥

गतयो विष्णुक्रमाद्याः मतयो देवताध्यानानि । प्रायश्चित्तं कृतस्यभगवति समर्पणम् ॥ २७ ॥

वस्तून्योषधयः स्नेहो रसलोहमृदो जलम् ।
ऋचो यजूंषि सामानि चातुर्होत्रञ्च सत्तम ॥ २५ ॥
नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च ।
देवताऽनुक्रमः कल्पः सङ्कल्पस्तन्त्रमेव च ॥ २६ ॥
गतयो मतयश्चैव प्रायश्चित्तसमर्पणम् ।
पुरुषावयवैरेते सम्भाराः सम्भृता मया ॥ २७ ॥
इति सम्भृतसम्भारः पुरुषावयवैरहम् ।
तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् ॥ २८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

सम्भृताः सम्पादिताः सम्भारा येन सोऽहम् । तेनैव यज्ञेनैव । अनेन यज्ञेन यज्ञमयजन्तेति मन्त्रार्थः सूचितः ॥ २८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपनाख्य तात्पर्यम् ।

[ऋचो यजूंषि सामानीति वेदत्रयोक्ता मन्त्रा इत्यर्थः ॥ २५ ॥]

देवतानामिति । अग्न्यादीनामित्यर्थः ॥ २६ ॥

विष्णुक्रमाद्या इति विष्णुक्रमः यज्ञावान्तरकर्मविशेषः विष्णुप्रदक्षिणं वा । [एते इति । सम्भाराः साधनानि मया सम्भृताः सम्पादिता इत्यर्थः] ॥ २७ ॥

यज्ञेन यज्ञमयजन्तेति मन्त्रेति । यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः [१६] । इति हि मन्त्रः । अस्य सायणभाष्यं—पूर्वं प्रपञ्चनाकमर्थं संक्षेप्यात्र दर्शयति । देवाः प्रजापति प्राणरूपाः यज्ञं यथोक्तेन मानसेन सङ्कल्पेन यज्ञं यथोक्तं यज्ञस्वरूपं प्रजापतिमयजन्त पूजितवन्तः । तस्मात् पूजनात् तानि प्रसिद्धानि धर्म्माणि जगद्रूप विकाराणां धारकाणि प्रथमानि मुख्यानि आसन् । एतावता सृष्टिप्रतिपादकसूक्तभागार्थः सगृहीतः । अथोपासनतत्फलानुवादक भागार्थः संगृह्यते । यत्र यस्मिन् विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातना विराडुपास्तिसाधका देवाः सन्ति तिष्ठन्ति तं नाकं विराट् प्राप्तिरूपं स्वर्गं ते महिमानस्तदुपासका महात्मानः सचन्त समवयन्ति प्राप्नुवन्ति [१६] ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

नामधेयानि ज्योतिष्टोमादीनि ऋगादीनामुक्तत्वान्मन्त्राः स्वाहाकारादयः व्रतं पयोभक्षणादिकं देवतानुक्रमः देवतानामनुक्रमः उद्देशः पञ्चादयवर्तीनि पृथक्पद भाग च अनुक्रम अनुपाठः आनुपूर्वी वा कल्पः प्रयोगविधिः सङ्कल्पः कर्त्तव्य व्यवसायः तन्त्रं क्रियाकलापः ॥ २५ ॥

गतयो विष्णुक्रमाणाः मतयः देव तोषणानि श्रद्धा कर्त्तव्यविषयात्वरा प्रायश्चित्तं वैकल्यसमाधानं समर्पणं देवताः प्रतिहविषोऽर्पणं पुरुषावयवैः सम्भारा यज्ञसाधनानि सम्भृताः संपादितानि ॥ २६ ॥

इत्थं सम्भृताः संपादिताः संभारा येन सोऽहं तमेव पुरुषं नियन्तारं यज्ञं विष्णुं तेनैव यज्ञेनैवायजं इष्टवानस्मि अनेन यज्ञेन यज्ञमयजन्तेति मन्त्रार्थ उक्तः ॥ २७ ॥

तत देवा अयजन्तेत्यस्यार्थं स प्रपंचं दर्शयति तत इतिद्वाभ्यां ते तव भ्रातरः मरीच्यादयो नवप्रजापतयः सुसमाहितचित्ताः व्यक्तं इन्द्रादिरूपेण अव्यक्तं स्वतः पुरुषं परमपुरुषमयजन्निदत्येतः ॥ २८ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

नियतपादबद्धा ऋचः अनियतच्छन्दोऽवच्छिन्नानि यजूंषि गानप्रधानानि सामानि चतुर्भिरध्वर्य्वादिभिः क्रियमाणं कर्म चातुर्होत्रं नामधेयानि इत्यादीन्यग्निहोत्रदर्शादीनि वा मंत्रा द्विविधा बीजात्मका मालात्मकाः विंशद्वर्णादर्वाग्बीजमंत्राः ततोऽधिका मालामंत्राः तत्र देवताद्रूपा दिप्रकाशकाः चन्द्रकलान्त बिन्दुर्मीडतोशिरस्था वर्णा बीजाख्याः चतुर्थ्यन्तादिनामविशिष्टा नमःस्वाहाफडन्तामालामंत्राः उभये च जपाधिकान्यूनजपादि कर्म दक्षयन्तीति दक्षिणाः होत्रादिभ्यो द्रव्यदानमेव वा व्रतानि ब्रह्मचर्यादीनि ॥ २५ ॥

देवतास्तत्तन्मंत्रवाच्या अग्न्यादिकाः अनुक्रमस्तासां तारतम्यं पौर्वापर्यं लक्षणमनुपाठो वा कर्मक्रमो वा कल्पः प्रयोगविधिप्रतिपादको बौधायनादिः संकल्पः इदं कार्यमेवेति मनो वा गृह्यं स्मरणाकीर्तनलक्षणाः सूत्रं मीमांसासूत्रं च शब्दात्कर्मदेवमीमांसासूत्रं गृह्यते गतयः स्वर्गादिफलानि मतयो ज्ञानानि ऋषिमतभेदाभिज्ञानि वा श्रद्धा आस्तिक्यबुद्धिः इदसत्यमस्मत्प्रयोजनमस्तीत्येवंरूपा प्रायश्चित्तं मन्त्रलोपादिनिमित्तप्रायश्चित्तं स्वत्वतया कर्मफलसाधनं कर्म समर्पणं ब्रह्मणोति शेषः ॥ २६ ॥

इत शब्द आदिवचनः एवमादिसम्पादितयज्ञसाधनोऽहं पुरुषावयवैः कल्पितैः पश्वादिभिस्तमेव यज्ञपुरुषं नमस्यनुविष्टेन प्रेरितो देशकालप्राप्तिं द्रव्याधिनपुचाहितेन महर्षिविप्रगणाभ्यामिष्ट्वामित्यन्वयः ईश्वरमित्यनेन स्वेनयष्टव्यमाहात्म्यं सूचयति ॥ २७ ॥

श्रीमद्विजयध्वज कृत पदरत्नावली ।

तत्रक्षत्कृतयज्ञस्यव्याप्तिं कथयति ततइति अनेनस्वस्थमर्थस्मात्प्रभुपस्वकर्मणाः प्रामाण्यंच दर्शितं तेनयभ्रान्तरेभिर्गीरयाद्य:मसमकालयज्ञतिपा। स्थितानाति प्रजानांपतयइति व्यक्तंगम्यमव्यक्तमगम्यं अननसाधनसामग्र्यसामग्रीऽप्याहरंःकश्चनस्वभावांदर्शितः पुरुषबहुफलप्रदसमाहिता इदमेवश्रेयोमातोऽन्याविरयेकाग्रांचसगुणाः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

इति पूर्वोक्तपश्वादिरूपेण सम्भृतः सम्भारो येन सोऽहम् । कैः पुरुषावयवैः तत्तद्यज्ञसम्भारकारणभूतेभ्यस्तेभ्य एवोपासितेभ्य-स्तत्तद्रूपेणाविर्भावितैः ॥ २८ ॥ २९ ॥ ३० ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

नामधेयानि ज्योतिष्टोमादीनि मंत्रा स्वाहाकारादयः चकाराग्निगदाः दक्षिणागावः चकारात्कृता व्रतानि दीक्षादयः चकारान्मांस भक्षणादिनिषेधादयः देवताऽनुक्रमः इज्यानां देवतानामानुपूर्वी आग्नेयंकृष्णग्रीवइत्यादिरूपा कल्पः कल्पसूत्र संकल्पः कामनाविषयः सूत्र न्यायसूत्रं पद्धतिर्वा ॥ २५ ॥

गतयोविष्णुक्रमाद्याः मतयः देवता ध्यानानि चकारात् आचतुर्थात्कर्मणोऽभिमर्शनाक्षणादि प्रायश्चित्तं अनाज्ञानादि समर्पणं संस्थानि-वेदनं वा एतावता हि यज्ञ सभाराः ते पुरुषावयवैरेव कृता इत्याह पुरुषावयवांगैत अत्रअवयवादिव्यवस्थातृतीयस्कंधे वक्ष्यते एते संभा राः पुरुषावयवैरेव सभृताः मयेतिमाधारणाऽधिकारिणानैवं कर्तुं शक्यत इति सूचितम् ॥ २६ ॥

ततः किमत आह इति संभृतसंभार इति इत्यमुना प्रकारेण पुरुषावयवै रेव संभृतसंभारोभूत्वा तेन यज्ञेन तमेव पुरुषमयजं फलार्थं न यागः किंतु ईश्वरार्थमिति तदाह ईश्वरमिति यथामयायागः कृतः एव मेव करणमुचितं यज्ञीयान्पदार्थान् भक्त्याभगवदवयवादाविर्भावं कृत्वा ततउत्पाद्य भगवत्प्रीत्यर्थमेव तैर्भगवत्कर्मकरणं भगवतोह्यस्ति किंचित्कार्यं स्वार्थं यथा पुरुषस्य स्वप्रयोजनार्थं सर्वाणि कर्माणि तथा भगवतः प्रयोजनार्थं सर्वेयागाः ततश्च ते यदि भगवदवयवैरेवोत्पादितैः पश्वादिभि भगवत्कार्यं कुर्युः तदाभगवदर्थं तत्फलं भवति नान्यथा यद्यपि लौकिका अपि पदार्थास्तथैवोत्पन्ना स्तथापि तेसर्वार्थौ इति नैकांततो योगफलसाधकत्वं मध्यमाधिकारिणास्तुयज्ञार्थमेव तथा ज्ञात्वा तान् पदार्थान् संपाद्य यज्ञकरणफलं भवति परं तत्फलं समर्पणीयं तदापुनस्तथा अज्ञानात्तैःपदार्थैर्यागंकरोति तदातत्फलंभग वान्नगृह्णाति नहिअन्यदायैःकृतं भगवान् गृह्णाति यत्पुनर्यागार्थमेव न पदार्था संपादिताः किंतु साधारणास्ते तैस्तत् फलमेव नोत्पद्यते उत्प-द्यमानं वा काकतालीयन्याये नोत्पद्यते चेत्त पदार्थास्तदर्थं भवेयुः एवं यागश्चतुर्धानिष्पद्यते उत्तममध्यमनिकृष्टनिष्फलभेदेन तत्रपञ्चधःभग-वतः ऊरुदेशादुत्पन्ना लोमभ्यो वृक्षाः स्वेदसहितेभ्यः कुशाः देवयजनं पद्भ्यां कालः पक्ष्मभ्यः वस्तून्योष्ठादिभिः स्नेहा इच्छा रसा जिह्वातः मृदं घ्राणात् जलानि नाडीभ्यः ऋचो यजूंषि सामानि कर्णाभ्यां मस्तकाच्च चातुर्होत्रं कर्म बाहुभ्यः नामधेयानि मुखात् मंत्राश्चशिरो ऽवयवेभ्यः दक्षिणा गावः वामांगप्रदेशात् व्रतानि मनसः देवताऽनुक्रमः पर्वभ्यः कल्पो बलात् संकल्पोमुखं । सूत्रं प्राणात् विहारयोगरूपं वा गतयो विक्रमात् मतयः ज्ञानेंद्रियेभ्यः प्रायश्चित्तं कर्मेंद्रियेभ्यः समर्पणमात्मनःअन्येऽपि यज्ञीयाः पदार्था यथायथमूह्या अत एववेदे सर्वे यज्ञीयाः पदार्था भक्तमद्भिः साक्षात्क्रियंते पश्चात्तः अवयवात् तेषां पदार्थानामाहरणं क्रियते तदनंतरं यागः अन्यथा अपश्यत आहरत् अयजतेति वैयर्थ्यापत्तेः ॥ २७ ॥

एवं यथा मयाकृतं तथैव तत्करणानंतरं ते इमे भ्रातरः मरीच्यादयः नवविधप्रजानां पतयः नवविधाःस्वयं अयजन् ततःसात्विकसात्विकेषु व्यक्तो भगवान् तामसतामसेष्वव्यक्तः मध्यमे षु द्वयं तदाह व्यक्तमव्यक्तमिति सुसमाहिताः सावधाना अन्यार्थपदार्थैः अमेलनार्थं ज्ञानार्थं मुत्पादनार्थं वा ॥ २८ ॥

श्रीविश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

वस्तूनि पात्रादीनि । ओषधयो व्रीह्यादयः । स्नेहा घृतादयः रसा मधुरादयः लोहानि सुवर्णादीनि । चातुर्होत्रं होत्रादिकं कर्म्म ॥ २५ ॥

नामधेयानि ज्योतिष्टोमादीनि । देवतानामनुक्रम उद्देशः कल्पोबौधायनादिकर्म्मपद्धतिग्रन्थः । अनेनाहं यक्ष्ये इति सङ्कल्पः । तन्त्रमनु-ष्ठानप्रकारः ॥ २६ ॥

गतयो विष्णुक्रमाद्याः । मतयो देवताध्यानानि । कृतस्य भगवति समर्पणम ॥ २७ ॥

"यज्ञो विष्णुं यज्ञो वै विष्णुरिति श्रुतेः । एवञ्च यत् पुरुषेण हविषेत्यादेः" यज्ञेन यज्ञमयजन्तेत्यादेश्च मन्त्रस्यार्थः सूचितः ॥ २८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

वस्तूनि पात्रादीनि ओषधयः पुरोडाशाद्यर्था व्रीह्याद्याः स्नेहः आज्यादिः रसः सोमादिरसः लोहः सुवर्णादिः मृतश्चातुर्होत्रं चतुर्हो-तृसंस्कृतैर्मन्त्रैः प्रकाश्यं कर्म ॥ २५ ॥

'नामधेयानि ज्योतिष्टोमादीनि मृगादीना मुक्तरवान्मंत्रा इतिस्वाहाकारादयः दक्षिणाश्च व्रतानि पयोभक्षणादीनि देवतानामनुक्रमउद्दे शः कल्पः प्रयोगविधिः संकल्पः कर्तव्यतासंकल्पः तं तं क्रियाप्रकारः ॥ २६ ॥

ततस्ते भ्रातर इमे प्रजानां पतयो नव ।
अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ॥ २९ ॥
ततश्च मनवःकाले ईजिरे ऋषयोऽपरे
पितरो विबुधा दैत्या मनुष्याःक्रतुभिर्विभुम् ॥ ३० ॥
नारायणे भगवति तदिदं विश्वमाहितम् ।
गृहीतमायोरुगुणःसर्गादावगुणःस्वतः ॥ ३१ ॥
सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥ ३२ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

गतयो विष्णुक्रमाद्याः मतयो देवता ध्यानानि प्रायश्चित्तं वैकल्यसमाधानम् समर्पणं कृतस्य भगवति समर्पणम् संभृता संपादिताः ॥ २७ ॥

इत्येवं संभृताः संपादिताः संभारा येन सोऽहं तमेवपुरुषं पद्मनाभं यज्ञं विष्णुं तेनैव यज्ञेनैव अयजं पूजितवानस्मि अनेन यज्ञेन यज्ञमयजंतेति मंत्रउपबृंहितः ॥ २८ ॥

भाषा टीका ।

पात्रादि, घृत, सोमादिरस, शुक्लसर्षपादि, वल्मीकादिकीमट्टी, गङ्गाजलइत्यादि, ॥

ऋक्, यजु, साम, चातुर्होत्र, नामधेय, मन्त्र, दक्षिणा, व्रत, ॥ २६ ॥

देवतोद्देश्य, कल्प, संकल्प, सूत्र, गति, मति, श्रद्धा, प्रायश्चित्त, और समर्पण ॥ २७ ॥

हे नारद ! पुरुष के अवयवों करके मैंने इतनी सामग्री संपादितकरी ऐसे सम्पादित सामग्री होकर पुरुषके अवयवों से मैं तिसयज्ञ भगवान् को पूजनकरताहुआ ॥ २८ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

तेन देवा अयजन्तेत्यस्यार्थं सप्रपञ्चं दर्शयति तत इति द्वाभ्याम् । व्यक्तमिन्द्रादिरूपेण । अव्यक्तं स्वतः । अनेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः ॥ २९ ॥

काले स्वस्वावसरे ॥ ३० ॥

यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति नारायणे इति आहितम् अधिष्ठितम् । भगवत्त्वे हेतुः यः स्वतोऽगुणः । सर्गादौ गृहीतात्ममायया उरवो गुणा येन तस्मिन् ॥ ३१ ॥

यत्परस्त्वमित्येतत्प्रश्नोत्तरं यदुक्तस्सएव भगवान् विष्णुः । सर्वेषांवा ममचेश्वर इति तत् उपसंहरति सृजामीति । पालनन्तु स्वयमेव करोतीत्याहविश्वमिति । पुरुषरूपेण । विष्णुरूपेण त्रिशक्तिर्माया तां धरतीति तथासः ॥ ३२ ॥

श्रीराधारमणदास गोस्वामिविरचित दीपिन्याख्य तट्टिप्पणी ।

तेन देवा अयजन्निति । अत्र २० श—श्लोकदीपनी द्रष्टव्या ॥ पुरुषं जातमग्रत इति । अत्रापि २३ श—श्लोकदीपनी द्रष्टव्या ॥ [नवेति मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः भृगुर्वशिष्ठो दक्षश्चेति नव ।] ॥ २९ ॥ ३० ॥

यदधिष्ठानेति । एतत्स्कन्धीयपञ्चमाध्यायस्य द्वितीयश्लोकः ॥ ३१ ॥

यत्परस्त्वमिति द्वितीयपञ्चमाध्यायस्य चतुर्थश्लोकैकदेशः ॥ उक्तमिति । एतत्स्कन्धीयपञ्चमाध्यायस्य विंश श्लोके इति शेषः ॥३२॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

कालेस्वे स्वे कालेऽवसरे मन्वादयः क्रतुभिर्विभुं विष्णुं ईजिरे इत्यर्थः ॥ २९ ॥

एवं यद्रूपमित्यादिप्रश्नानां पुरुषसूक्तसंवादेनोत्तरार्थमभिधाय यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुप संहरति नारायणे इति आहितमवस्थितं एवं स्वात्मन्येव सूक्ष्मरूपेणावस्थितंविश्वं शरीरभूतेन मया सृजति रुद्ररूपेण हरति पुरुषरूपेण तु पातीत्युपसंहरति गृहीतेत्यादिना स्वत अगुणः सत्वादिगुणरहितः प्रत्यगात्मस्वरूपं हि स्वतः सत्वादिरहितमगुणोऽप्यहं गृहीता मायाया उरवोगुणा येन तथा भूतः सर्गादौ तन्नियुक्तस्तन्नियोज्यं संसृजामि हरोरुद्रः तद्वशः तदधीनः विश्वं हरति पुरुषरूपेणेत्यत्र तदप्रतीतेश्च सृष्टिसंहारौ ब्रह्मरुद्राख्यजीवांतर्यामित्वेन करोति पालनं तु स्वयमेव करोतीति वेदितव्यम् अतस्त्रिशक्तिधृक् सृष्टिस्थितिसंहाररूपशक्तित्रययुक्त एक एवेत्यर्थः ॥ ३० ॥ ३१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

यद्रूपमित्यादि प्रश्नानां यदात्मकस्त्वमित्यादिप्रश्नानां च सामान्येनोत्तरं यदुक्तं वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्वत इति पुरुष एवेदं सर्वं इति श्रुत्या च तद्दृढीकृतं तदुपसंहरति इतीति हेतात इदं विश्वं प्रति यथा मनुपृच्छसि विश्वविषयप्रश्नं करोषि तस्य प्रश्नस्योत्तरं चेतनाचेतनात्मकं कृत्स्नं जगत्किंचिदपि भगवतः अन्यत्पृथगिति नभाव्यं मानुसंधेयमिति ते तुभ्यमभिहितं कथितमित्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजकृत पदरत्नावली ।

कौलेयसंतादिसमये अपरेमरीच्यादिव्यतिरिक्ताः पितरोऽग्निष्वात्तादयः विबुधा इंद्रादयः दैत्याः प्रल्हादादयः मनुष्याः प्रियव्रतप्रख्याः भूतथ क्रतुभिर्यागैः अत्राहंभवानित्यारभ्यततश्चमनवइत्यंतैर्ग्रंथैः पुरुषसूक्तार्थोविवृतइतिज्ञातव्यंतथाहि सर्वंपुरुषइत्यनेनपुरुषएवेदंसर्वमित्यस्यार्थः प्रदर्शितः तेनेदमित्यनेनसहस्रशीर्षेत्यस्य सोऽमृतस्येत्यनेनउतामृतत्वस्येशानइत्यस्यमहिमैषइत्यनेनएतावानस्येत्यस्य पादास्त्रयइत्यनेनात्रिपादूर्ध्वइत्यस्य सृतीइत्यनेनततोविष्वाङ्क्रमदित्यस्य तस्मादंडादित्यनेनतस्माद्विराडजायतेत्यस्य तत्द्रव्यमित्यनेनसजातइत्यस्यतेंपुयज्ञादयइत्यनेनब्राह्मणोऽस्यमुखमासीदित्यस्य इतिसंभृतेत्यनेनयत्पुरुषेणेत्यस्य ततस्तेभ्रातरइत्यनेनयज्ञेनयज्ञइत्यादेः ॥ २९ ॥

तद्ब्रह्मत्यगादित्यनेनभक्त्यादिभिरेवोत्तमत्वमुच्यते नतुस्वरूपतइत्युक्तमेवार्थंस्फुटयन्नुपसंहरति नारायणइति श्रीमत्पुंडरीकाक्षकटाक्षप्रसादप्राप्तसर्वप्रभावोऽहंतमेवनारायणंयज्ञादिभिरयजमिति यस्मात्तस्मादिदमस्मदादिविश्वंतास्मन्नारायणएवाहितंतदाधारतयातदधीनतया तदुपासतयाऽवस्थितमित्यन्वयः आहितत्वेहेतुमाह गृहीनेति सत्वादिगुणाधीनंसर्वं * तेचानेनगृहीताः अतः सर्वंतस्मिन्नाहितं ग्रहउपादानइतिधातोः सर्गादावुपादानीकृतप्रकृत्युरुगुणो अन्यदासमीपावासमायोरुगुणो ननुहरेर्जीवजडवद्गुणसंबंधः किंनस्यादितितत्राह अगुणइतिजीवस्यस्वतोगुणराहित्येऽपिमिथ्याभिमानाज्जडस्यतुतन्मयत्वाद्गुणित्वंयुक्तं हरेस्तदुभयाभावादगुणित्वं* गुणस्वातंत्र्यात्बाहिःसमीपएवामदावस्थानात्गृहीतगुणत्वंयुक्तं उरुरित्यनेनहरे रतिशयितमाहात्म्यंसूचयति नित्यंगृहीताः सत्वाद्याजीववज्जडवन्नतु मिथ्यामानास्वरूपत्वात्स्वातंत्र्याद्धरेर्वास्त्वित्येदप्रमानम् ॥३० ॥

येन स्वरोचिषाविश्वमित्याद्युक्तमुपसंहरन्हरस्यसंहारस्वातंत्र्यंमंदमतीनांप्रतीयमानंपरिहरति सृजामीति पुरुषरूपेणविष्णुरूपेण त्रिशक्तिधृक्सृष्टिपालनसंहारशक्तिधरोज्ञानबलक्रियाशक्तिधरोवा ॥ ३१ ॥

प्रश्नप्रतिवचनमुपसंहरति इतीति अथकुत्रापिकदाचिदपिमेजगतः स्वातंत्र्यबुद्धिनकुर्वितिभावेनाह नान्यदिति सदसदात्मकंव्यक्ताव्यक्तात्मकंज्ञेयाज्ञेयस्वरूपत्वात्तत्स्वभावंभाव्यमुत्पाद्यंमहदहंकारादियज्जगत्किंचिदपिहरेरन्यत्स्वतंत्रंनभवतिकिंतुतदधीनसत्ताकमतायुज्यतेतदन्यदित्यर्थः तदुक्तं सदितिव्यक्तमुद्दिष्टमसदव्यक्तमुच्यतइत्यादि ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

नारायणे इति । स्वतो मायागुणास्पृष्टोऽपि सर्गादौ कार्य्ये यादृच्छिककटाक्षमात्रेणानुगृहीतमायोरुगुणो यस्तस्मिन् भगवति मायागुणातीतषड्गुणैश्वर्य्ये विश्वमाहितं माययैवारोपितं तत्सृष्टत्वेन प्रत्यायितमित्यर्थः ॥ ३१ ॥

आत्मनो हरस्य च तदाश्रयमयत्वमुक्त्वा विष्णोस्तु साक्षात्तद्रूपत्वं दर्शयति पुरुषरूपेणेति पुरुषः परमात्मा साक्षात्तद्रूपेणैव विष्णुनामावतारेण त्रिशक्तिधृक् पुरुष एव परिपाति न तु सर्गसंहारयोरिव तत्र तत्राविष्टांशेनेत्यर्थः ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

तदनंतरं बहुकालव्यवधानेन मनवः केवलमीजिरे ऋषयश्चापरेच एते सत्वादिभेदो द्वितीयकक्षायां ततस्तृतीयकक्षायां पितरो विबुधाः दैत्या राजसा सात्विकास्तामसाश्च मनुष्यास्तु चतुर्थकक्षायां अतस्तेसंनिपातरूपाः एकविधा एव तथापि भ्रमादपि कुर्वाणाः कामिकं किंचित्फलं प्राप्नुवंति समर्थत्वाद्भगवतः तदाह विभुमिति क्रतुभिरिति द्वादशाद्यादिभिः ॥ २९ ॥

एवं सर्वपदार्थानामुत्पत्तिं भगवतः सकाशादुक्त्वा स्थितिमाह नारायण इति विश्वाधारत्वेन भगवदाधारत्वव्युदासार्थं नारायण इत्युक्तं आपो नारा इति प्रोक्ता इति प्रकारेण पुरुष एव नारायणः तदिदमिति लौकिकं वैदिकं च आहितं स्थापितम् ॥ ३० ॥

ननुभगवतैव चेत्उत्पत्तिस्थिती क्रियेते अर्थात्प्रलयश्च तदा भवता क उपयोगस्तत्राह सृजामितद्नियुक्तोऽहमिति भगवान् हि प्रकारप्रदर्शनार्थं सर्वानेव पदार्थान् कृतवान् ततःपरं परानिष्पत्त्यर्थमामाज्ञापयति संहारार्थं च महादेवम् अतोयं भगवता उत्पादितः तद्द्वारा वा तेभगवतैव मारणीया न महादेवादिशक्त्या अतोभगवदवतारः पालनं तु भगवानेवकरोतीत्याह विश्वमिति स हि पुरुषरूपेण विश्वं परिपालयति अत एव तदनुरोधेनैव हरः संहरतीति तद्वशत्वमुक्तं यद्यप्येतावुत्पत्तिप्रलयौकुरुतः तथापि तत्करणसामर्थ्यं भगवदधीनमेवेत्याह त्रिशक्तिधृगिति ॥ ३१ ॥

एवमंशत्रयं निरूप्यमाहात्म्यं वक्तुं पूर्वोक्त मुपसंहरति इतीति पृष्टं तत्वया एतावदेव माहात्म्यकथनं त्वयोद्गायाति तदग्रे कथयिष्यामीति भावः किमुक्तमित्यपेक्षायामाह नान्यद्भगवत इति यावंतः प्रश्ना कृताः स्वरूपतः प्रकारतो वा तत्र सर्वत्र उत्तरं भगवानेव यतो भगवद्व्यतिरिक्तं किमपिनास्ति ननु सर्वाधारत्वेन वस्तुत्वरूपेण च मतांतरस्थैरपि सर्वं भगवानित्यंगीक्रियते ततोऽस्मिन्मार्गेकोविशेष इत्याकांक्षायामाह भाव्यमिति यत्क्रियया निष्पाद्यं यत्रहि क्रिया व्यापृता भवति तद्भगवानित्यर्थः ननुब्रह्मवादेऽपि सर्वं ब्रह्म ततोऽस्मिन्मार्गे को विशेष स्तत्राह सदसदात्मकमिति सदसद्व्यवहारयोग्यं घटादिकं शशकशृंगादिकमपि भ्रमविषयश्च तस्मादुभयत्रापि मिथ्या प्रत्ययस्तद्विषयोऽपि भगवान् अन्यथा तस्य मानं ज्ञानं च नोत्पद्येत अनुव्यवसायश्च न भवेत् ॥ ३२ ॥

इति तेऽभिहितं तात यथेदमनुपृच्छसि ।
नान्यद्भगवतः किञ्चिद्भाव्यं सदसदात्मकम् ॥ ३३ ॥
न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ।
न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठ्यवता धृतो हरिः ॥ ३४ ॥
सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवन्दितः पतिः ।
आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसम्भवः ॥ ३५ ॥
नतोऽस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमङ्गलम् ।
यो ह्यात्ममायाविभवं स्म पर्यगाद् यथा नभः स्वान्तमथापरे कुतः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

व्यक्तमिन्द्रादिरूपेण । अव्यक्तं स्वतः । एवञ्च तेन देवा अयजन्नित्यस्य पुरुष आत्मप्रश्न इत्यस्य चार्थो दर्शितः ॥ २९ ॥

कालेस्वस्वावसरे ॥ ३० ॥

यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति । आहितमधिष्ठितम् । सर्गादौ ब्रह्मरुद्रादिरूपेण गृहीता मायाया उरवो गुणा येन सः । स्वतोऽगुण एव ॥ ३१ ॥

सर्गादावित्येतत् स्पष्टयन् यत्परस्थमित्येतत्प्रश्नोत्तरमुपसंहरति सृजामीति । आत्मनोहरस्यच तन्नियम्यत्वेन रजस्तमोयोगहेतुकं ततः पार्थक्यमुक्त्वा विष्णोस्तु सत्त्वगुणयुक्तत्वेऽपि शुद्धसत्त्वे सत्त्वस्योपकारकत्वाभावेनोदासीन्यरूपत्वेन च वस्तुतस्तद्योग एवातिनिर्गुणत्वस्यैव फलितत्वात् साक्षादेव पुरुषरूपत्वं दर्शयति । पुरुषरूपेण पुरुषः परमात्मा त्रिशक्तिधृक् त्रिगुणमायाशक्तिधरः । अन्तरङ्गबहिरङ्गतटस्थशक्तिधरो वा ॥ ३२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तेन देवा अयजन्त साध्या ये ऋषयश्च ये इत्यस्यार्थमाह तत इति द्वाभ्याम् तत्र मरीच्यादयः व्यक्तमिन्द्रादिरूपेण अव्यक्तं स्वतः अयजन् पूजयन्तः ॥ २७ ॥

मनवश्चतुर्दश काले स्वस्वावसरे विभुं विष्णुम् ॥ २८ ॥

यदधिष्ठानमित्येतत्प्रश्नस्योत्तरार्थमुपसंहरति नारायण इति स्वतो योऽगुणः प्राकृतगुणशून्यः सर्गादौ गृहीताः मायायाः स्वशक्तिभूतायाः गुणा येन तस्मिन् इदं विश्वमाहितं संस्थितम् ॥ २९ ॥

एतदेव विवृणोति रजसा युक्तः तेन नारायणेन नियुक्तः अहं सृजामि तमसा युक्तः तद्वशः हरः हरति संहारं करोति स तु पुरुषरूपेण पारपाति तत्र केवलं रजस्तमोऽधिष्ठातृभूतब्रह्महरनियन्तृत्वेनैव तस्य श्रेष्ठत्वमपितु निखिलप्रकृतिस्वामित्वेनापीत्याह त्रिशक्तिधृगिति त्रिशक्तिः त्रिगुणा प्रकृति स्तद्धृक् अत एवोक्तं प्रथमे स्कंधे सत्वं रजस्तम इति प्रकृते गुणास्तै युक्तः परः पुरुष एक इहास्य धत्तेस्थित्यादये हरिविरंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युरिति ॥ ३० ॥

भाषा टीका ।

जिसके बाद ये तुम्हारे भ्राता प्रजों के पति तब सावधान होकर व्यक्त और अव्यक्त को यजन किया ॥ २९ ॥

तदनन्तर मनु और ऋषि और पितर और देवता और दैत्य और मनुष्य यज्ञों से भगवान् की पूजा की ॥ ३० ॥

यद्यपि भगवान् स्वभाव से अगुण हैं परन्तु सृष्टि के आदि में ग्रहण कर लिये हैं माया के गुण जिसने ऐसे भगवान् में अधिष्ठित यह संसार है ॥ ३१ ॥

उन्हीं भगवान करके प्रेरित मैं रचता हूं, और उन्हीं के वश में प्राप्त महादेव जी नाश करते हैं संसार का— और तीनों शक्ति को धारण करने वाले विष्णु भगवान पुरुष रूप से संसार का पालन करते है ॥ ३२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यच्च इदं विश्वं यदात्मकञ्च त्वम् इत्येवमादिसर्व्वप्रश्नानां सामान्येनोत्तरं यदुक्तं वासुदेवात् परो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्त्वतः । पुरुष एवेदं सर्व्वमिति श्रुत्या च यत् दृढीकृतं तत् उपसंहरति इतीति । सदसदात्मकं कार्य्यकारणात्मकं भाव्यं सृज्यं भगवतः सकाशात् अन्यत् पृथक् न भवतीति तेऽभिहितम् ॥ ३३ ॥

यदुक्तं एतावत्त्वं यतो हि मे तमविज्ञाय मामीश्वरं प्रब्रवीषीति तदुपपादयोपसंहरति न भारतीति । यद्यस्मान्मे मया औत्कण्ठ्यं तद्युक्तेनैव तदूयुक्तेन हृदा हरिर्धृतः ध्यातः । अङ्ग हे नारद अतो मे वाङ्मनइन्द्रियाणां वृत्तयः सत्यार्थाः न तु मत्प्रभावेनेत्यर्थः ॥ ३४ ॥

अत्र स्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्याम् । सोऽहंसमाम्नायादिभिः सर्व्वोत्कृष्टोऽपि योगं समाश्रित्यापि यत आत्मनः सम्भवो जन्म तमेव न ज्ञातवान् । कुतोऽन्यस्यवार्त्ता । एतच्च तृतीयस्कन्धे पद्मोद्भवे वक्ष्यति ॥ ३५ ॥

तदा अहं समीयुषां शरणागतानां भवच्छिदं संसारनिवर्त्तकं स्वस्त्ययनं मङ्गलावहं सुमङ्गलं सुसेव्यञ्च तस्य चरणं नतोऽस्मि । यतः अचिन्त्यमहिमत्वेन न ज्ञातवानस्मीति कैमुत्यन्यायेनाह यो हीति । स्वमायाविस्तारं यः स्वयमपि पर्य्यगात् । परिशब्दो निषेधे । एतावान् इति न ज्ञातवानित्यर्थः । अपरे कुतो जानीयुः । तस्य चरणं नतोऽस्मीति पूर्व्वेण सम्बन्धः । ननु सर्व्वज्ञः कथं न जानाति अन्ताभावादिति दृष्टान्तेनाह यथा खस्यान्तं नभो नाप्नोति तद्वत् । न हि खपुष्पादर्शनं सर्व्वज्ञत्वं विहन्तीति भावः । तथाच वक्ष्यति—द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि यदन्तरेत्यादि । श्रुतिश्च—योऽस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेदेति ॥ ३६ ॥

———

श्रीराधारमणदास गोस्वामि विरचित दीपिनादीपनटिप्पणी ।

सर्व्वप्रश्नानामिति । एतत्स्कन्धीयपञ्चमाध्यायोक्तानामिति शेषः ॥ वासुदेवादिति । एतत्स्कन्धीयपञ्चमाध्यायस्य चतुर्दश श्लोकः ॥ ३३ ॥ ॥

यदुक्तमिति । एतत्स्कन्धीयपञ्चमाध्यायस्य दशमश्लोके इति शेषः ॥ ३४ ॥ ३५ ॥

पूर्व्वेणेति । पूर्व्वपद्योक्तेनेत्यर्थः द्युपतय इति । दशमस्कन्धीयसप्ताशीतितमाध्यायस्यैकचत्वारिंशश्लोकः ॥ ३६—३९ ॥

———

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

यदुक्तमेतावत्त्वं यतो हि मे तमविज्ञाय मामीश्वरं प्रब्रवीषीति तदुपपादयितुमुपसंहरति न भारतीति मे भारती वाग्मृषा मिथ्या न दृश्यते मे मनसो गतिः वृत्तिः न मृषा हृषीकाणि इन्द्रियाणि असत्यर्थे ऽसद्विषये न पतन्ति न प्रवर्त्तन्ते यस्मान्मयौत्कण्ठ्यं आशा तद्वता हृदयेन हरिर्धृतः ध्यातः अंग हे नारद अतो मे वाङ् मन इन्द्रियाणां वृत्तयः सत्यार्था न तु मत्प्रभावेनेत्यर्थः ॥ ३३ ॥

अतो ममापि ज्ञानप्रदो मदचिन्त्यस्वरूपस्वभावः सर्वेश्वरो मत्तोऽन्योऽस्तीत्याह सोऽहमिति समाम्नायमयः समाम्नायप्रचुरः तपोमयः तपः प्रचुरः विद्यातपोभ्यां सर्वोत्कृष्ट इत्यर्थः प्रजापतीनां मरीच्यादीनामभिवन्दितः तैर्नमस्कृतः तेषां पतिश्चात्मनः परमात्मनः संभव उत्पन्नः तत्कृपालब्धज्ञानसंपन्नोऽहं समाहितः सन्निपुणं निर्विघ्नं योगं समास्थाय यः स्वमायाविभवं स्वयं गतस्तं परमात्मानं नाध्यगच्छ स्वरूपतो गुणतश्चैतावानिति न ज्ञातवान् ॥ ३४ ॥

अत स्तच्चरणं प्रति केवलं नतोऽस्मि कथंभूतं चरणं समीयुषां शरणागतानां भयच्छिदं संसृतिनिवर्त्तकं स्वस्त्ययनं मंगलानामाश्रयं सुमंगलं सुसेव्यं अनवगमे दृष्टांतः यथेति दोषास्पर्शाय दुर्ग्रहणायचनभ स्त्वदृष्टान्तः दुःस्पर्शः पाणिना वायुरिति महाभारतोक्तेः स्वमायाविभवं स्वयंगत इत्यनेन जवनिकां गत इतिवदन्याऽनुपलभ्यत्वमुक्तं नतुमायावश्यत्वं आत्ममायाविभवेनान्यानुपलभ्यत्वं गत इत्यर्थः एवंविधपरमात्मा न मुक्तविधोऽप्यहमेव नाध्यगच्छमन्ये नाधिगच्छंतीति किमुवक्तव्यमित्याह अथेति अपरे जीवाः कुतो हेतो र्विदुरित्यर्थः ॥ ३५ ॥

एतदेवोपपादयति नेति यूयमिति सनकाद्यभिप्रायेण बहुवचननिर्देशः वामदेवो नामकश्चिदृषिः शंकरो वा न चाहं न च शंकरश्च जानंतीति श्रीवैष्णवीयचतुर्मुखवाक्यान्तरात् यस्तां यस्य परमात्मन ऋतां सत्यां गतिं स्वरूपरूपयथावस्थितिं वत न द्रष्टिं इति पाठांतरं अस्मदादयो न विदुः कैमुत्यन्यायेनाह किमुतेति कुतो न विदुरित्यत आह तन्माययेति तस्य भगवतो मायया दैवी ह्येषा गुणमयी त्युक्तविधमायया मोहिता बुद्धिर्येषां ते तन्मायामोहितबुद्धित्वादेते न विदुरित्यर्थः तर्हि किंविदुरित्यत आह तेनैव विनिर्मितमिदमचेतनं शरीरमात्मसममात्मानं देहाकारं मन्यामह इत्यर्थः देहात्मविभागमप्यजानतां कथं परमात्म वेदनमिति भावः ॥ ३६ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

एवंविधमाहात्म्यस्यहरेः प्रसादः कस्यस्यादित्याशंक्य भक्तिनदीज्ञानेनविधूतमनोमलस्यसदाभगवदेकविषयेंद्रियव्यापारस्यस्यादितिभावेनाह नेति हृषीकाणींद्रियाणि अत्रहेतुमाह यन्मइति औत्कंठ्यंप्रियवस्तुनिमनोवृत्तिविशेषः स्नेहलक्षणाभक्तिस्तद्युताहृदामनसाधृतइतियस्मादित्यर्थः अनेनभगवत्प्रसादसामग्रीसंपादनेभक्तिरंगमित्युक्तंभवति ॥ ३३ ॥

इतोऽपिपुंसांभक्तिरेवसाध्यातत्प्रसादजननीमन्यथाऽसौदुर्ज्ञेयइतिभावेनाह सोऽहमिति मद्भक्तिविषयोयोविष्णुस्तस्यानुग्रहेणानंतरेणाम्नायमयोवेदप्रतिपाद्येषुप्रधानः समीचीनज्ञानसंप्रदायप्राचुर्योवा तपोमयस्तपस्विषुप्रधानः दक्षादिप्रजापतीनां पतिस्तैरभिवंदितश्चसमाहितपञ्च । प्रतप्यानिश्चलमनाभूत्वानिपुणंचतुरतमंयोगध्यानलक्षणमुपायमास्थायायतआत्मनोममसंभवस्तंभगवंतंनाध्यगच्छं संधीतिविशेषणादनंतत्वेनाधिगतविशेषस्याधिक्यात्नाज्ञासिषमित्यर्थः ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

नारदायैवंविधंहरिमहिमानंव्याचक्षाणः स्मारंस्मारंभक्तिप्रसरसिंधुनिमग्नःतस्मैतिकरोति नतोऽस्मीति योविष्णुःस्वात्ममायायाःस्वरूपभूत महिम्नोविभवंविविधभवनममनंतनांस्वयंगतःस्वयमेवजानाति विशेषोक्तौर्निमित्तमाह नाहमिति नभस्वान्वायुः अपरेषामीशेषाद्याः अथशब्दा त्साकल्यज्ञानमेवनिषिध्यतेनतुतद्विषयज्ञानमात्रं सर्वजीवनिकायेषुब्रह्मावायुर्हरेर्विदावित्यादिवाक्यसूचकादर्थविशेषोबोद्धव्यः प्रेक्षायतेति ॥ मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः अथातोनंतराप्यर्थेविकल्पारंभमंगलेइतिच समीयुषांशरणंप्राप्तानांस्वस्त्ययनमलंबुद्धिगोचरस्वा नंदानुभवप्रदं सुमंगलंमंगलानांमंगलंतच्चरणंतस्यहरेश्चरणंनतोऽस्मीत्येतावदेवसुशकमितिभावः मंगलानांचमंगलमितिच ॥ ३५ ॥

इदानींस्वात्मानंनिदर्शनीकृत्यकस्यापिसाकल्यज्ञानंनास्तीत्याह नाहमिति लुप्तोपममिदं यथाहंसाकल्येनतद्गतिंनवेद्मितथायूयंभवंतोऽपिन विदुः अत्रापिव्यत्ययात्साकल्यज्ञानमेवनिषिध्यते उत्तरखंडनस्वयोग्यज्ञानस्योक्तत्वादितिज्ञातव्यं त्रिपुरांतकःसर्वज्ञइत्यज्ञकादिरेवनाविद्बुद्धि रितिभावेनाह नवामदेवइति वामोनिर्दोषोदेवोनारायणोयस्यमतेसतथोक्तः वामंतुशुभेपेशलमित्यभिधानं अनेनैवान्यस * ज्ञावसिद्धमुह्यल यति किमुतेति अत्रहेतुमाह यन्मायर्येति यस्यहरेर्माययावंधकशक्त्यामोहितबुद्धित्वादित्यर्थः तत्फलमाहइदमितिविनिर्मितमिदंजगत् स्वात्म ममपरमात्मसदृशंविचक्ष्महे ननुभवंतोप्येवंचेकिमित्याशंक्यसत्यंविशेषोऽस्तीत्याह इदमिति यथंतुयनेदंनिर्मितंतंस्वात्मसमंस्वयोग्यतानुसारं विचक्ष्महे नातोऽधिकंतदपितत्प्रसादायत्तमतोनविदुरितिक्रमइत्ययंविशेषस्तुशब्दादवगंतव्यइति तुःस्यादभेदेऽवधारणइति स्वात्मसममितिपाठे स्वात्मपदार्थवदनित्यमस्वतंत्रमिदमतएवताश्रियामकेनस्वतंत्रेणपरमनित्येनभावितव्यमितिविचक्ष्महइतिभावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तथा भूतश्चासौ मम भक्त्युद्रेकेणैव स्फुरतीत्याह न भारतीति ॥ ३४ ॥

एतादृशीं भक्तिं विना तु पूर्वं ममच नानासाधनवतोऽपि नास्फुरदित्याह सोऽहमिति ॥ ३५ ॥

अतो नमस्कारादिमयतद्भक्तिरेव तस्मिन्नुपयुक्ता न तु ज्ञानप्रयास इत्याह नतोऽस्म्यहमिति । यतः यो हीति । आत्ममायाऽत्र स्वरूप शक्तिः । नभोदृष्टान्तश्रुतिस्तत्र—श्रुतीनामुदाहृतानां तत्रैव स्वारस्यलब्धेः । नभोदृष्टान्तस्त्वापातबोधनार्थ एव वस्तुतस्तु तस्यापि परि- च्छिन्नत्वात् ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवं पूर्वोक्तमुपसंहृत्य तस्य माहात्म्यं वदन् तत्प्रमाणमाह । माहात्म्यं प्रथममाह नभारतीमेऽङ्गेति हृदये तिरोहितो भगवान् असद्बुद्धिमुत्पाद यति अतः मया औत्कण्ठ्यवताप्रेमोद्गमवताहृदा भगवान् धृतः तत्र च भारती वर्त्तते सा हि भगवंतं मालिन्य सन्मुखात्सेन सह निःसरतीति कदाचिदपि मृषा नोपलक्ष्यते भावेनापिनबाधितविषया भवतीत्यर्थः तथा मनोव्यापारोऽपि तपःपदार्थोभावो नासद्विषयका न भवतीत्याह नवै कश्चिन्मेमनस इति परंपरासंबंधेऽपि माहात्म्यं भगवता सह असंबद्धः मम स्वाभिमानमात्रेण मनः प्रभृतयः संबद्धा इति ज्ञापनार्थं सर्वत्र तदुक्तं हृषीकाणि इंद्रियाणि असत्पथे निंदितमार्गे भक्तिसंबंधितुभगवान्हृदये स्थापित इति न तेन व्यभिचारः ननु धृतो भगवान् कथ मित्थं कृतवान् तत्राह हरिरिति औत्कण्ठ्यवताहृदेत्यनेन अयमर्थो निरूपितः चित्तंभगवत्प्रेमसंपादनीयं ततः प्रेमसंवलितं चित्तं सर्वत्र विद्य मानं भगवंतं विषयीकरिष्यति यथा रसनेंद्रियसहिता जिह्वा द्रव्येषुविद्यमानान् रसान् स्वयमेव गृह्णाति न तु तद्रसज्ञाने पूर्वमपेक्षते तथा भक्त्यानिर्मथितं स्वयमेव भगवंतं गृह्णाति प्रतिनियतेंद्रियवद्भगवद्ग्राह्यः भगवान् केवलभक्त्येकलभ्यः ॥ ३३ ॥

नच तत्र प्रमाणांतरमस्तीति बोधयितुमाह सोऽहमिति भगवद्ज्ञाने प्रथमं वेदाः प्रमाणं साधनं तपः प्रमाणाभिज्ञानं मननंनिदिध्यासन रूपं अंतरंगं साधनं योगः तत्फलं चित्तैकाग्र्यं तस्मिन्सति उत्तमाधिकारिणो भगवत्साक्षात्कारो भवतीति नगंतव्यमित्याह सोऽहमिति समाम्नायः पुनः पुनरावर्त्यमानो वेदः समाङुपसर्गाभ्यांसहितोम्नाधातुरभ्यासार्थे अर्थविज्ञानसहितं वेदाभ्यासं बोधयति तन्मयः तद्वि- कारस्तद्व्याप्तो वा तपोमय इतिसाधनपरता सहजं तप इति ज्ञापनार्थमुक्तं प्रजापतीनामभिवंदितइति सर्वोपदेष्टृत्वेन अर्थविचार उक्तः प्रजापतिशब्देन च तस्य ज्ञानस्य परंपराऽपिसूचिता तेचनप्रतार्याः इत्याह पतिरिति नाहंप्रजापतीनां पतिस्तान्वञ्चयामि एवं सांगं प्रमाणं निरूपितं प्रमाणं हि भगवत्साक्षात्कारे मनसः सहकारि अतो मनसोऽपि भगवद्ग्रहणयोग्यतामाह आस्थाय योगमिति निपुणमितिनाम- कादिभिर्निपुणमित्यर्थः एवं साधनसहितोऽपि तन्नाभ्यगच्छत् यत आत्मसंभव इति स्वस्याधिकारउत्कृष्टो निरूपितः तस्मात्तस्यैव वशो भवति ज्ञातश्च नान्यथेति निश्चयः ॥ ३४ ॥

तत्र किंविधेयं भक्त्यर्थं सर्वैरित्याकांक्षायामाह नतोऽस्म्यहमिति तच्चरणमहं नतोऽस्मि नमनातिरिक्तं मयाऽपि साधनं नज्ञायते कुतोऽन्ये ज्ञास्यंतीति भाव. ननुनमनेन किंस्यात्तत्राह समीयुषां भवच्छिदमिति तच्चरणं ये सम्यक् समीयुषः तत्प्राप्त्यर्थं कामार्पितत्रय्यां क्रियां कुर्वा- णाः तेषां संसारं दूरीकरोति पुनः संसारप्राप्त्यभावाय भवं छिनत्तीत्युक्तं मूलतश्छिन्नप्रवाहं अग्रे निवृत्तिः स्वत एवेति तथोक्तं नकेवलं दुःखमेव दूरीकरोति किंतु कल्याणमपि प्रयच्छतीत्याह स्वस्त्ययनंसुमंगलमिति स्वस्तिकल्याणस्यैहिकस्य अयनं स्थानं आमुष्मिकस्यापि सूचकं सुमंगलं अतश्चरणनमनमेव कर्त्तव्यं तेनैवार्थसिद्धिः ननु भगवान् भगवद्गुणा वा इदमित्थंतयाज्ञातुं शक्या तत्र गुणानांज्ञान अशक्यतामाह योहीति यो भगवान् आत्मनो मायायाः साधनभूताया विभवं ऐश्वर्यं स्वयमेव पर्यगात् परीतिनिषेधार्थे न ज्ञातवानित्यर्थः स्मेति प्रसिद्धे अनेन तथा वचनेस्वस्यदोषो निराकृतः ननु मायाया वैभवं भगवदीयमेवेति कथं भगवान् स्वसंबंधिनं पदार्थं न जानाति तत्रदृष्टांतमाह यथानभः स्वांतमिति विद्यमाने अंते यस्त्वंतं न जानाति सनसर्वज्ञः नत्व विद्यमानेऽपि नहियाशशशृंगाज्ञानं सार्वज्ञ्यप्रतिबंधकं यथा नभः स्वांतं न जानाति व्यापकत्वात् अंताभावाच्च तथा भगवानपीत्यर्थः ॥ ३५ ॥

---

* साकल्येनज्ञानास्यज्ञावमित्यर्थः

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवं गुणानामज्ञाननिरूप्यस्वरूपस्याप्यज्ञानं निरूपयति नाहमिति भगवंतं कश्चित्ज्ञास्यतीति नमंतव्यं वयमेव महान्तोऽधिकारिणः सर्वप्रकारेण तं च्येनमजानीमः कथमन्यो ज्ञास्यतीति तत्र अहं ब्रह्मा यूयं सनकाद्यंताः सर्वे मत्पुत्राः यस्य कृतां सत्यरूपां गतिं न विद्मः भगवद्ज्ञानं दूरे किंतु येनमार्गेण भगवान् गच्छति तां गतिमपि न जानीमः यथा देवानां मनुष्या न जानंति तथा वयमपि भगवत इत्यर्थः महादेवस्तु गुणावतारः सर्वगुरुः ईश्वरादृज्ञानमन्विच्छेदिति वाक्याज्ज्ञास्यतीत्याशंक्याह न वामदेव इति वामदेवो महादेवः अपरेतनो हीनाः अज्ञाने उपपत्तिमाह यन्माययेति पूर्ववदज्ञानसंबंधिन्या मायया मोहिता बुद्धि येषां बुद्ध्यागृहीतानि इंद्रियाणि हि ज्ञानं जनयंति तत्रबुद्धिश्चेन्मुग्धा ज्ञानवार्त्तादूरे तहींद्रियाणां वैफल्यं स्यात्तत्राह इदं विनिर्मितं आत्मसमंविचक्ष्महइति भगवतैर्वविनिर्मितमिदं कार्यं जगद्रूपं स्वबुद्ध्यनुसारेण विचक्ष्महे अनेन कार्यस्य प्रदर्शितत्वात् भगवान्नास्तीति पक्षो निराकृतः आत्मसमंमिति वचनात् तदपि न सम्यक् ज्ञायते अन्यथा विशेषानुमाने भगवतः सर्वे विशेषा ज्ञाता भवेयुः सर्वगुणप्रसिद्धिरूपत्वाज्जगतः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

प्रकरणमुपसंहरति इतीति सदसदात्मकं कार्य्यकारणात्मकं त्रिपादेकपादात्मकञ्च भगवतः सकाशात् अन्यत् त्वया न भाव्यं न चिन्तनीयम् ॥ ३३ ॥

ननु त्वममृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्द्धस्वित्यादिना त्रिगुणातीतायास्त्रिपाद्विभूतेर्नित्यत्वं ब्रूषे । तथा पादविभूतेस्त्रिगुणमयप्रपञ्चस्यापि भगवतोविलज्जमानयेत्यादेर्बहिरङ्गमायाशक्तिकार्य्यत्वेनानित्यत्वेऽप्य मिथ्यात्वमेव प्रतिपादयसि तथा मायिकवस्तूनाञ्च तद्योगसाधनत्वेन सत्यत्वं व्यञ्जयसि । अन्ये शास्त्रविदस्तु सर्व्वमिदं मनोविलासितत्वान्मिथ्यैव, भगवतः खलु भगवत्त्वमपि तटस्थलक्षणत्वाद् नित्यमेव तद्धामस्त्रिपाद्विभूतेः का वार्त्तेति व्याचक्षते, तत्राहं कुत्र विश्वसिमि, त्वद्वाचि तेषां वाचि वेत्यत आह, न भारतीति मम इयं तुभ्यमुक्ता वाक् न मृषा । तत्र हेतुः न वै इति । सर्व्वत्र हेतुरौत्कण्ठ्ययुक्तेन मनसा मया हरिर्धृत इति । यत्र हरिस्तत्रैव सर्व्वं सत्यमिति मद्वाच्येव विश्वसिहि । तैरन्यैः शास्त्रविद्भिरपि हरिर्मनसानधृतोऽतो मनसस्तस्य मृषैव गतिरतस्तेषां वागपि मृषैवेति मिथ्यावादिनां तेषां मतं माङ्गीकुरु इति भावः ॥ ३४ ॥

ननु ते वयमेव सर्व्ववेदशास्त्रतात्पर्य्य विद्वांसः परमेश्वरस्वरूपं जानीमहे इत्यभिमन्यन्ते तथैवान्यानपि युक्त्या बोधयन्ति चेति तत्राह न सोऽहं पूर्व्वश्लोकोक्तलक्षणः सोत्कण्ठहृदयवशीभूतहरिरप्यहं समाम्नायमय इति प्रथममाम्नाया ममैव मुखेभ्योनिस्सृता येषामयं मन्ये ते अद्यापि जिज्ञासन्त एवेति भावः । तपोमय इति स्पर्शेषु यत् षोडशमेकविंशं निष्किञ्चनानां नृप यद्धनं विदुरिति भवदादिष्टं तपः प्रथमं मयैव तप्तमिति स्वस्य ज्ञानविज्ञाने दर्शिते भगवद्दत्तमैश्वर्य्यञ्चाह प्रजेत्यादि तथा योगेश्वरत्वमपि मम नास्तीति न वक्तव्यमित्याह आस्थायेत्यादि समाहित एकाग्रीकृतचित्तोऽपि तं भगवन्तं नाभ्यगच्छं न ज्ञातवानस्मि । तत्र हेतुर्यत आत्मनो मम सम्भवः सृष्टिः रिति हन्त हन्त मत्सृष्टसृष्टसृष्टा अन्ये विज्ञम्मन्यास्तं कथं जानीयुर्ये तु भगवत्त्वं तटस्थलक्षणं ब्रुवते ते त्वन्धा एवेति भावः ॥ ३५ ॥

अहो अर्व्वाचीना वराका भगवत्तत्त्वं वयं ब्रूमहे इति प्रलपन्ति यतो भगवानपि स्वयं स्वतत्त्वं वेदितुं न प्रभवतीति भक्त्युद्रेकेण तं प्रणमति नत इति । समीयुषां शरणं गतानां भक्तानां भवच्छिदं संसारदुःखच्छेदकमित्यननुसंहितं फलं स्वस्त्ययनं स्वप्रेमसुखदायकमित्यनुसंहितम् । सुमङ्गलं सुष्ठु मङ्गलं यस्मात् तम् अन्येषामपि कर्म्मिज्ञानियोगिनां तद्भक्तिमिश्रत्वं विनामाङ्गल्याभावादिति भावः । यदि आत्मनायाविभवं स्वयोगमायाविस्तारं स्वयमपि पर्य्यगात् । परिशब्दोनिषेधे । एतावानिति न ज्ञातवानित्यर्थः । अपरे अस्मदादयः कुतो जानीयुः । ननु सर्व्वज्ञः कथं न जानाति अन्तभावादिति दृष्टान्तेनाह यथा स्वस्यान्तं नभः कस्तं नाप्नोति तद्वत् । न हि खपुष्पादर्शनं सर्वज्ञत्वं निहन्तीति भावः तथाच वक्ष्यति—द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि यदन्तराण्डनिचया ननु सावरणा इत्यादि । श्रुतिश्च—यो ऽस्याध्यक्षःपरमे व्योमन् सो अङ्ग वेदयदि वा न वेदेति ॥ ३६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

यदभिज्ञानमित्यादिप्रश्नानां यदात्मकस्त्वमित्यादिसर्वप्रश्नानां च सामान्यतो यदुत्तरमुक्तं वासुदेवात्परो ब्रह्मन्नचान्योऽर्थोऽस्ति तत्त्वत इति पुरुषपदेर्द भवांमिति श्रुत्वा च तद्दृढीकृतं तदुपसंहरति इतीति इदं सदसदात्मकम् स्थूलसूक्ष्मात्मकम् भगवत सकाशादन्यत् पृथक् न भाव्यं नानुसंधेयम् तत्कार्य्यत्वात्तद्व्याप्यत्वात्तदधीन स्थिति प्रवृत्तिमत्त्वाच्च तदपृथक्त्वेनानुसंधेयम् इति ते तुभ्यं यथात्वमनुपृच्छसि तथाऽभिहितं मया कथितम् अनेन सर्वात्मतया भगवान् ध्येयइत्युपदिष्टम् ॥ ३३ ॥

तद्ध्यानं तस्यस्वानुभवेनफलं च दर्शयति हे अंग पुत्र यत् यतः मे मया औत्कंठ्यं भक्त्युद्रेकस्तद्युक्तेन हृदा हरिः धृतो ध्यातः अतः मे मम भारती भाषा मृषा निरर्थिका न लक्ष्यते न दृश्यते मे मनसो गतिः वृत्तिः मृषा कचित् कस्यांचिदप्यवस्थायां न भवति हृषीकाणीन्द्रियाणि असत्पथेर्निर्दिर्तविषयं न पतन्ति ॥ ३४ ॥

भृते इत्यनेनतावत्त्वं प्रतीयमानं निराकरोति सोहमिति सोऽहं प्रसिद्धः समाम्नायमयः वेदप्रचुरः तपोमय श्च विद्यातपोभ्यां सर्वश्रेष्ठोऽपि प्रजापतीनामुभयप्रजापतीनां महर्षयः सप्तपूर्वे चत्वारो मनव स्तथा मद्भावा मानसा जाता येषां लोक इमाः प्रजा इति श्रीमुखेनोक्तानां सनकादीनां चतुर्णां मरीच्यादीनां सप्तानां चतुर्दशमनूनां च शिष्यरूपाश्च प्रजायाः पतीनामभिवंदितः तैरभिवादितः स्तुतो वाऽयोगं ध्यानयोगमास्थायाश्रित्यापि यतः भगवत आत्मनो मम संभवः उत्पत्तिः तसंनाभ्यगच्छत् एतावानिति न ज्ञातवान् ॥ ३५ ॥

ाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः ।
न्मायया मोहितबुद्धयस्त्विदं विनिर्म्मितञ्चात्मसमं विचक्ष्महे ॥ ३७ ॥
यस्यावतारकर्म्माणि गायन्ति ह्यस्मदादयः ।
न यं विदन्ति तत्त्वेन तस्मै भगवते नमः ॥ ३८ ॥
स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः ।
आत्मात्मन्यात्मनात्मानं स संयच्छतिच पाति च ॥ ३९ ॥
विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम् ।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥ ४० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

एतदेव द्रढयितुं भगवतो भुक्तिमुक्तिप्रदत्वं सर्वज्ञत्वं मायाधिपतित्वमन्येषां तुतन्मायामोहितत्वं च तच्चरणानतिपूर्वकमाह नतोऽस्मीति द्वाभ्याम तस्य भगवतः चरणं सुमंगलं नतोऽस्मि कथमूतम् समीयुषां शरणागतानाम् मुमुक्षूणां भवच्छिदम् संसारनिवर्त्तकम् बुभुक्षूणां स्वस्त्ययनम् यथा नभः नभोऽधिष्ठात्री देवता स्वान्तं नभोविपुल्यं जानाति तथा आत्मनः शक्तिभूतायाः मायायाः प्रकृतेः विभवं हि शब्दाच्च ततानां स्वभावं च पर्यगात् परितः सर्वतः ज्ञातवान् अथ अपरे जीवाः साकल्येन तंतन्मायाविभवादिकं च कुतो जानीयुः न कुतोऽपी त्यर्थ ॥ ३६ ॥

———

भाषाटीका

हे तात जिस तरह आप पूछते हो उसी प्रकार आपके लिये कहा परन्तु भगवान से पृथक् और सद् असत् वस्तु कोई नहीं है ॥३३॥

मैंने भगवान को मन से ध्यान कर लिया है इससे मेरी सरस्वती झूठ नहीं हो सक्ती कहीं पर भी, और मन की गति भी झूठ नहीं हो सक्ती और असन्मार्ग में इंद्री भी नहीं जाती है ॥ ३४ ॥

———

श्रीधरस्वामिकृत भावार्थदीपिका ।

एतत् प्रपञ्चयति नाहमिति द्वाभ्याम् । वामदेवः श्रीरुद्रः । यस्य ऋतां गतिं परमार्थस्वरूपम् । किञ्चिदिदं प्रपञ्चरूपं तस्य मायया विनिर्मितं विचक्ष्महे विप्राः । तदपि आत्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नम् । मोहितबुद्धय इत्यर्थः तदज्ञाने प्रपञ्चज्ञाने च हेतुः ॥ ३७ ॥

ननु सर्व्वेऽपि ते वर्णयन्तो दृश्यन्ते तत्राह यस्येति ॥ ३८ ॥

अवतारकर्माणि तु संक्षेपतो दर्शयति स एष (एव) आद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादि करोति । आत्माऽऽत्मन्यात्मनात्मानमिति कर्ता अधि करणं साधनं कर्म्म च स्वयमेवेत्यर्थः । पुरुषाख्योऽवतारः, सृष्ट्यादीनि कर्म्माणीति संक्षेपोक्तिः ॥ ३९ ॥

न यं विदन्ति तत्त्वेनेत्युक्तम् किं तत् तत्त्वमित्यपेक्षायामाह विशुद्धमिति । ज्ञानं केवलं सत्यं तत्त्वम् । घटाद्याकारवृत्तिज्ञानव्यवच्छेदार्थं विशेषणानि । विशुद्धं विषयाकारशून्यम् । यतःप्रत्यक् सर्व्वान्तरम् । अतएव सम्यक् सन्देहादि रहितम् । अवस्थितं स्थिरम् । यतो निर्गुणम् गुणकार्य्यं हि गुणव्यतिकराच्चञ्चलं भवति । यद्यपि वृत्तिज्ञानमपि स्वरूपज्ञानमेवेति न चाञ्चल्यादिदोषयुक्तं, तथाप्यन्तः करणवृत्तिदोषस्तया तथा भवतीति व्यवच्छिद्यते । एभिरेव विशेषणैःसत्यत्वमपि समर्थितम् । किञ्च यत् विकारवत् तत् असत्यं दृष्टम् । न चास्य जन्मादयः षड्विकाराः सन्तीत्याह अनाद्यन्तं जन्मनाशरहितम् । अतएव जन्मानरास्तित्वलक्षणोऽपि विकारो नास्ति । वृद्धिविपरिणामापक्षयाश्च न सन्ति । यतः पूर्णम् । सर्व्वत्र हेतुः नित्यमद्वयम् नित्यं सर्व्वदा द्वैतप्रतीतिसमयेऽपि परमार्थतोऽद्वयमिति ॥ ४० ॥

———

श्रीराधारमणदासगोस्वामिविरचित दीपिनाख्यटिप्पणी ।

घटादिवृत्तिज्ञानेति । यथा तड़ागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तः करणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते । स एव परिणामो वृत्तिरित्युच्यते । इति वेदान्तपरिभाषा ॥ षड्विकारा इति । जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीति षड्भावविकाराः ॥ ४० ॥

———

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

तर्हि मायातरणे क उपाय इत्यत आह यस्येति यस्य भगवतो ऽवताराणां कर्माणि चेष्टितान्यस्मदादय चतुर्मुखादयो गायंति यं तत्त्वेन याथात्म्येन न विदंति नजानंति किंतु तस्मै भगवते नमस्कुर्वंति तस्य गुणकर्मानुकीर्तनमेव मायातरणोपाय इत्यभिप्रायः ॥ ३७ ॥

केऽवताराः कानि चेष्टितानि च यदनुकीर्तनेन मायां तरंतीत्याशंकाया मवतारां स्तत्कर्माणि च वक्ष्यन्यद्रूपमित्यादिप्रश्नानां उत्तरयुप संहरति स एष इति अजः कर्माधीनजन्मरहितः एष आद्यः कारणभूतः परमपुरुषः कल्पे कल्पे प्रति कल्पमात्मन्येवाधारे आत्मना परमात्म भूत नात्मानं उपादानमात्मैव कर्ता सृजति संयच्छति संहरति पाति च ॥ ३८ ॥

नन्वयं जगद्व्यापारो भगवतः किं कर्माधीन इत्याशंक्य नेत्याह विशुद्धमिति पुण्यपापरूपकर्मरहितमतो नजगद्व्यापारः कर्माधीन इत्यर्थः एवं च कर्माधीन व्यापारजीवस्वरूपाद्वैलक्षण्यमुक्तं भवति जीवविलक्षणं चेत्तर्हि किजडमित्यत आह केवलं ज्ञानं क्वचिदप्यजडमित्यर्थः तर्हि किं घटपटाद्याकारवृत्तिज्ञानमित्यत आह प्रत्यक् स्वस्मै भासमानं ननु जीवोप्येवं रूपो ऽत आह सम्यगवस्थितं अर्थांतरानपेक्षास्थितिं जीवस्तु परमात्मधार्य इत्यभिप्रायः अन्यानपि चेतनाचेतनविलक्षणाकारानाह सत्यं स्वरूपतो धर्मतश्च निर्विकारमनेन स्वरूपतो विकार्य चेतनद्रव्यं स्वभावतोविकाराचेतनश्च व्यावृत्तः पूर्णमवाप्तसमस्तकामं निर्गुणं सत्त्वादिरहितमनाद्यंतं उत्पत्तिनाशरहितमत एव नित्यं कालाद्यनवच्छिन्नं अद्वयं समाभ्यधिकरहितएते यथा संभवं चेतना चेतनव्यावर्तकत्वेनानुसंधेयाः ॥ ३९ ॥

अत्राविद्वदनुभवं प्रमाणयति ऋषे इति हे ऋषे नारद आत्मा अंतः करणमाशयो वासना प्रणेता आत्मेंद्रियाशयायेषां ते कवयः उक्त विधं परमात्मस्वरूपं जानंति कवयः समीचीनतर्कैर्विविच्य तत्स्वरूपं चेतनाचेतनविलक्षणं शोधयंति कुतर्कैर्दुर्ज्ञेयत्वमाह असत्तर्कैरसता मेव वाहेतुवादैर्वाविप्लुतं उपद्रुतं स्यात्तदा तिरोधीयेतेत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

इतोऽपितत्स्वरूपसाकल्यज्ञानमेवानिषिध्यते नतुतद्विषयज्ञानमात्रमन्यथाचार्मेंद्रियप्रवृत्तिस्तद्विषयानोपपद्यते साचास्तितस्मादुक्तंयुक्तमि तिभावेनाह यस्येति एकदेशज्ञानमपिस्वानंत्ययोग्यत्याभिमानेतदर्पनस्यादितिभावेनपोनः पुन्येननमनमितिभावः ॥ ३७ ॥

युक्तंचानंतस्यरूपबाहुल्यंतन्नियमनलक्षणकर्मचानंतरगान्यावताराणांतत्कार्याणांचसद्भावेकिप्रमाणमित्याशंक्यसंक्षिप्यतदाहसएषइतियो मदादिभिःसर्वैःसाकल्येनाविज्ञातःसएवपुरुषः श्रीनारायणआत्मास्वयमेवकल्पेकल्पेआत्मनास्वेच्छयानियतमनसाऽऽत्मनिस्वाधारतयाऽऽत्मानं मत्स्यादिरूपेणसृजति दीपाद्दीपांतरवद्व्यक्तंकरोति देवदत्तवन्नजायतइत्यजइति आद्यउपजीव्यइति व्यक्तीकरणं उपजीव्यत्वमेवाह सर्वं यच्छतीति तेरवतारैः देवादिस्वजनपालिहयग्रीवादिदैत्यान्संयच्छति चशब्दउक्तार्थसमुच्चयव्यासाद्यवतारांतरसूचनंचवर्ननं तथाच व्यासाद्यवतारैर्मोहमदादितामसजनवचननतिरोहितस्वरूपंशास्त्रप्रवर्तननप्रकाशयतीतिज्ञायते तथाचोक्तं स्वयमवस्वरूपाणिमत्स्यकूर्मादिका न्यजः स्वात्मन्येवेच्छयासृष्ट्वातैर्दैत्यादीन्प्रपात्यसावित्यादि ॥ ३८ ॥

शास्त्रतःकीदृशंप्रकाशितमत्राह विशुद्धमिति विशुद्धंनिर्दोषत्वात् केवलमद्वितीयं ज्ञानंविषयनिरपेक्षसंविद्रूपं प्रत्यक्सर्वेषामंतरमभिमु खत्वेनस्थितं स्वतः शुद्धस्यापिपरतोदोषित्वंस्यादित्यतः सम्यगवस्थितंदुःखांशरहितत्वात् सत्यंनिर्दुःखमित्यानिरतिशयानंदानुभवरूपं पूर्णं देशतः कालतोगुणतश्चापरिच्छिन्नं अनाद्यंतमादिविनाशवर्जितं निर्गुणंसत्त्वादिगुणरहितं अतएवनित्यंपरिणामस्वभाववर्जितं अद्वयंस्वगत भेदवर्जितम् ॥ ३९ ॥

स्वतोविकाराभावेऽपिनिमित्तेनस्यादित्यतः ऋतंशब्ददेकप्रकारं तदुक्तं ऋतंतदात्मनाज्ञसेः सत्त्वंसाधुत्वतः परमित्यादि एतज्ज्ञानस्यमो- क्षैकफलहेतुत्वादिदमेवशास्त्रेणप्रकाशितंनान्यदित्याशयेनाह विदंतीति प्रकर्षेणशांता मंगलीभूतात्मामनः श्रोत्रादींद्रियाण्याशयोबुद्धिर्येषां तेतथोक्ताः यदाभगवदर्कानिष्ठयानिर्मलीभूतमनआदींद्रियप्रवृत्तयोमुनयः सर्वज्ञाब्रह्मादयएवंविधगुणोपेतंब्रह्मापरोक्षीकृत्यविदंतिस्वानंदंलभ ते तदैवासत्तर्कैर्विमतोमिथ्याद्दश्यत्वादिकैर्विप्लुतमुपहतमन्यथाभूतंवाज्ञानः करणसंभारबीजभूतंतिरोधीयतदग्धबीजवद्भवतीत्यन्वयः अ- नेनावतारकर्मकीर्तनश्रवणादिनाकिंफलमितिचोद्यमपिनिरस्तंकिंचमूलरूपस्ययादृशंरूपंयादृशंकर्मयादृशागुणास्तत्सर्वमवताराणामस्तीति अतस्तत्स्वरूपत्वंयुक्तमितिच ज्ञापितं यद्वाअसत्तर्कैर्यदिगुणवांस्तर्हिदोषवान्यदिकर्तातर्हिभ्रांतःस्यात् देवदत्तादीदृष्टत्वात् इत्यादिरूपैस्त राहितंविरुद्धत्वादिलक्षणंरूपंव्यासादिप्रणीतशास्त्रनिशितयाबुद्धचायदासम्यग्विंदंतिमुनयस्तदैवदोषित्वादिरूपंतिरोधीयेत तत्तद्विषयाबु- द्धिर्निवर्ततइति कदावतारप्रसंगइत्यतोवाह सएषइति यदायोज्ञायमसत्तर्कैर्विप्लुतंधर्मशास्त्रंतिरोधीयेत अधर्मशास्त्रमुज्जृंभतेचतदात्मानं सृजतीत्यन्वयः कीदृशमात्मानमित्यतउक्तं विशुद्धमित्यादि तत्रकिंप्रमाणमत्राह विदंतीति मत्स्याद्यवताराविष्णोः स्वरूपांशाइत्यत्रतेषांप्रत्य क्षप्रमाणमवतारप्रसंगेचेत्यर्थः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तत्र सदैन्यमाह नाहमिति ऋतां गतिं श्रीवैकुण्ठम् । न विदुर्न विद्मः । आस्तां सा । तन्मायया विनिर्म्मितमिदं विश्वमपि नात्मोचित मेव विचक्ष्महे । तत्र हेतुः तन्माययैव मोहितबुद्धय इति ॥ ३७ ॥

किञ्च न यमिति । तत्त्वेन शक्तिस्वरूपाभ्यां याथार्थ्येन ॥ ३८ ॥

तत्र सर्व्वविलक्षणां शक्तिं यत्किञ्चिल्लक्षयति स एष [एव] इति ॥ ३९ ॥

[पुनश्च प्रकारान्तरेण तामेव तथा लक्षयितुं तस्यैकस्यैव युगपत्कर्तृत्वादिकं योजयन्] स्वरूपमपि तथैव सर्व्ववैलक्षण्येन लक्षयति विशुद्धमिति युग्मकम् । तत्र ज्ञानंविशेष्यम् । तच्च सुखस्वरूपमेव, विज्ञानमानन्दं ब्रह्मेति श्रुतेः । तस्य जीवस्वरूपविलक्षणतोज्ञापकानि विशेषणान्याह । विशुद्धं केवलं, विशेषेण शुद्धमेव, न त्वविद्याविद्धमित्यर्थः । अयमात्मापहतपाप्मेति श्रुतेः । यतः प्रत्यक् सर्व्वेषाम- ऽप्यन्तरम् । यः पृथिव्यां तिष्ठन्नित्यारभ्य य आत्मनि तिष्ठन् आत्मानमन्तरो यमयतीति श्रुतेः । अतः सम्यक् अक्षुभिततयैव अवसमन्तात् व्याप्य स्थितं, न त्वावृतविक्षिप्तं, न वाऽणुपरिमाणमित्यर्थः । एको देव इत्यादिश्रुतेः किञ्च । सत्यं सर्व्वसत्ताप्रदस्वरूपत्वात्

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

एतदर्थानां मुख्यं न तु तादितरादित्यर्थः । सत्यश्चामृतश्च सत्यसत्यमेवाभवदितिश्रुतेः । पूर्णं भगवत्तया सम्भृतं, न तु तयाहीनमित्य र्थः । अतएव,अनाद्यन्तस्वरूपवैभवम् । निर्गता गुणेभ्यः सत्त्वादिभ्योगुणा ऐश्वर्यादयः षट् यस्य नतस्य कार्य्यंकरणञ्च विद्यते इत्यादिश्रुतेः अनेन तादृशरूपवत्त्वञ्चायातम् । न सन्दृशेतिष्ठति रूपमस्य, यमेवैष वृणुते तेनलभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् इति श्रुतेः । सर्व्वं स्वप्रकाशस्वरूपत्वात् नित्यमेवाद्वय पृथग्वस्तुरहितत्वाद्द्वयरहितश्चेत्यर्थः । एकमेवाद्वितीयं ब्रह्म द्वितीयात् (द्वैतात्) वैभयंभवतीति श्रुतेः। तदेवं सर्व्वेषां तन्मूलत्वेऽप्यस्ति भिन्नस्वरूपवैलक्षण्यम् । अन्यथा न यंविदन्ति तत्त्वेनेति विशेषोक्तिर्व्यर्थास्यात् ॥ ४० ॥

श्रीमद्वल्लभाचार्य्य कृत सुबोधिनी ।

एवं ज्ञानमार्गस्य दुर्ज्ञेयत्वमुक्त्वा भक्तिमार्गस्याप्यशक्यतामाह यस्यावतारकर्माणीति साक्षाद्भक्तिर्नास्त्येव परंपराभक्तिः कथमपि केन चित्कर्त्तव्या तत्रपरंपराभक्तिमध्ये गुणकीर्त्तनमुत्तममिति अस्मदादयः अवतारकर्माणि गायंति अवतारपदेन तस्य कर्माण्यपि नजानंतीति सूचितं कर्मपदेन गुणास्तु नज्ञायंत एव गुणा उत्कर्षाधायकाः के वाभगवतो धर्मा भगवतः सर्वोत्तमत्वं अन्यं वा उत्कर्षं साधयंतीति ज्ञानं दुर्लभं अवतारपदेन चशरीरमा आकृत्यावागूढो भगवानिति कार्यज्ञानवद्भक्ति रपि सोपाधिका निरूपिता तर्हिकिमर्थं कथयंतीत्याशंक्याह गायंतीति गानेन सुखं जायत इति इतरगानापेक्षया भगवद्गुणगानं सुखाभिव्यक्तिहेतुत्वात्तदेव कुर्वंतीत्यर्थः हिशब्दस्तु इममेवार्थमाह तत्व मिदमित्थमेतं रूप तथापि ज्ञानाज्ञानाभ्यां उपलक्षितो भगवान् कश्चिदस्तीति विनिश्चित्य मार्गत्रयेऽपि तत्र कर्त्तव्यांतराभावात् नमनमेवकर्त्त व्यमित्याह तस्मादिति यद्यपि सर्वप्रमाणातीतस्तथापि सर्वत्र प्रसिद्धः तत्र नमनमेव कर्त्तव्यं नान्यदिति नमनं चयादृशोऽसिहरेकृष्णात्मा हशायनमोनम इति ॥ ३७ ॥

एवं भगवतो माहात्म्यं निरूप्य पूर्वोक्तां प्रतिज्ञामुपसंहरन् तत्त्वमुपसंहरति स एष इति योऽस्माभिर्न ज्ञायते स एव एष इदानीमस्मद्बुद्धौ स्थित्वा सर्वं करोतीति तस्यैवसर्वत्र हेतुः आद्य इति पुरुष इतिसाधनं कल्पेकल्प इति सकृत्सृष्टिर्निवारिता अज इति स्वस्य सदैकरूपत्वं उपादानत्वं कारणत्वं कर्तृत्वं स्वस्यैवत्याह आत्मा स्वयमेवकर्त्ता आत्मनिस्वस्मिन्नेवाधिकरणे आत्मना स्वेनैव करणेन आत्मानं विश्वरूपं स्वयमेव कर्म अनेनान्येऽपि विभक्त्यर्था उक्ताः न केवलमुत्पादयति अपि तु संयच्छति मारयति पाति रक्षति च चकारो नु भिन्नविषयत्वव्यु दासार्थो सर्वापि हरति तदाप्युत्पादयति एव सर्वास्थितलयत्वसंबंधनिरूपणार्थं वा युक्तस्त्वत्र महायोगसिद्धे बाह्यसाधनव्यतिरेकेणैव स्वे च्छया बहुरूपो भवति भगवति तु योगादिकमपि नापेक्षते सर्वसामर्थ्ययुक्तं स्वरूपमेव तथा भूतयतः ॥ ३८ ॥

ननु नायं भगवन्मार्गः सर्वेषां तत्र परमेश्वरा ज्ञानमार्ग एव ब्रह्मात्मस्वरूपभूतः उत्तमः सतिजातुंशक्यत इत्याशंक्य तं पक्षमनूद्य दूषयति विशुद्धमिति द्वाभ्यां प्रथमं द्वादशधर्मा देहात्मनो वैलक्षण्य प्रतिपादकाः तेन्नांतरहममभेत्यसद्भावम देहादौमोहजत्यजदिति फलितिप्रति तत्र देहस्तुअशुद्धे मलिनः मलमूत्रादिपूर्णत्वादशुद्धश्च आत्मा तु विशेषेण शुद्धः नात शुद्धः शुद्धयोरैक्यं अनेन आत्मनः संस्कारकोऽपि नापेक्षते इत्युक्तं भवति देहकृतःसंस्कारो व्यर्थ एव अनेन प्रथमं सर्वसाधनपरि त्यागः सूचितः किञ्च केवलोऽयमात्मा एकः एकासहायः देहस्तु पुत्रादिसहितः आत्मनस्त्वेकत्वे ज्ञाते पुत्रादिचिन्तादूरे गच्छति तेनवैरा ग्य सिद्धं भवति एव परित्यागो नैव च निरूपितं किञ्च अयमात्मा ज्ञानरूपः देहस्तुजडः. अनेन ज्ञानार्थमपि प्रयत्नो निराकृतः नह्यात्मा ज्ञेयो भवति शारीराणि तु तदर्थपरिच्छायकानि तेन आत्मा स्वयं ज्ञाता तत्प्रकाशकः भवति अत स्वयं प्रमाणानि स्वात्मानमेव तत्संबंधा त्प्रमाणानि बोधयंत आत्मनाप्रकाशितत्वमुपचर्यते तस्मादेवं भावे आत्मनो ज्ञाने ज्ञानार्थमपि प्रयत्नस्त्यक्तव्य इत्युक्तं भवति किञ्च अयमात्मा प्रत्यक् प्रत्यक्तेनैव यः देहस्तु पराक् ततः एवंभावे ज्ञाते योगोऽपि व्यर्थः नर्हिस्य वृत्तीनां आत्मस्फूर्तिकृत्वा परास्त्वं संपाद्यत आत्मनः यथा मथनेनाग्नेर्भासत्वं नतु यदा एव क्रियत इति योगोपयोगोक्तीति आह सम्यगिति यथात्मावस्थितं तथैव सम्यक् नतु प्रकटितः देहवै लक्षण्यं च देहस्वास्यक् न हि यादृशोस्ति तादृश एव स्थापनीयः किंतु संस्कारैरुत्तमः कर्त्तव्यः किञ्च अयमात्मा अवस्थितःअचलः तस्मा त्स्थिरीकरणार्थं आत्मापोहापनरूपं मननंकर्त्तव्यं अनवस्थितस्य हि युक्त्या अवस्थापनं देहवैलक्षण्यं च सिद्धमेव देहस्य सर्वथा अनव स्थितत्वात् अनेन नाडीशोधनादिना देहस्थिरक्रिया साऽपि व्यर्थं इत्युक्तं किञ्च अयमात्मा सत्यः सदैकरूपः देहस्तुनतथेति स्पष्टमेव अनेन कालांतरे आत्मनोऽन्यथा भावो भविष्यतीति शंकया योगादिभिः प्रयत्नकरणं निवारितं किञ्च अयमात्मा पूर्णः देहस्तुपरिच्छिन्नः अनेनात्म नो न्यूनतापरिहारार्थमपि यत्नेन कर्त्तव्य इति सूचितं स्वत एव पूर्णत्वात् ननु पूर्णस्यापि सदैकरूपस्याप्याकाशादेः आवरणनिराकरणं न विशालत्वसंपाद्यते तथा आत्मनोऽप्युपाधिनिराकरणार्थं यत्नः कर्त्तव्य इत्याशंक्य निराकरोति अनाद्यंतमिति यस्य हिआद्यंतावुत्पत्तिप्र लयौस्तः स हि सजातीय घटपटादौ अस्तीति तस्योपाधयः संभवंति तदन्तःकरणं शरीरं अन्यद्वाआत्मन आवरकं संभवति अधिकारि त्वात् असंगत्वात् अत्यवधार्यत्वाच्च तस्मात्केनाप्यंशेनउत्पत्तिप्रलययोरभावादुपाधिनिराकरणार्थमपि न यत्नः कर्त्तव्यः देहादयस्तु तत्प्रकाशे न भासंते तत् तदुपाधयः अत आत्मन एवं भावे अपगते देहनिराकरणार्थमपि प्रयत्नो व्यर्थः ननु गुणाः क्षोभसंभवात् एवंभावस्थित्यनुप पत्तेः सदा तथा स्थित्यर्थं गुणक्षोभनिराकरणाय यत्नः कर्त्तव्य इत्याशंक्याह निर्गुणमिति नह्यात्मना गुणाः संति एते हि सत्वादय प्रकृ तिगुणाः नह्यतत्संबंधे असंबद्धेः आत्मनः क्षोभो भवितुमर्हति तस्मात्तदर्थमपि न यत्नः कर्त्तव्यः किञ्च एतादृशस्वभावात्मा सर्वदा नतुकदा चिदित्याह नित्यमिति यावंत आत्मनो धर्मा निरूपिताः परिच्छायकत्वेन तैः सहित आत्मा नित्यः नतु ते तत्रोत्पाद्यंते तस्मात्तादृशत्वसिद्ध्यर्थ मपि न यत्नः किञ्च यद्ययमात्मा अनानंदमयो भवेत् तदाभगवत्सायुज्य ब्रह्मता वा संपादनीया स्यात् किंत्वयमेव ब्रह्म भगवानिति अयमा त्मा ब्रह्म विज्ञानमय इति श्रुतेः अहमात्मा गुडाकेश इति च तस्माद्भगवत्सायुज्यार्थंब्रह्मभावार्थं वा न यत्नः कर्त्तव्य इत्याह अद्वयमिति नह्या त्मा द्वयरूपः पुरोवजयोरत्रतवैलक्षण्यमत्रापि मृत्योःसमृत्युमाप्नोति यइहनानेव पश्यतीति अन्योऽसावन्योऽहमस्मीति निंदाश्रवणात् नहि आत्मनि नानात्वमस्ति वैलक्षण्यं तु दूरे सर्वत्रैवैकरूपः सर्वत्राक्षोभ्यः सर्वत्रोत्पत्तिविनाशधर्मरहितः सर्वत्रपरिच्छेदनरहितः सर्वत्रैकरूपः सर्वत्रनिश्चलः सर्वत्र समीचीनः सर्वत्र प्रत्यक्स्फूर्तिरूपः सर्वत्र ज्ञानरूपः सर्वत्रासंगोदासीनः शुद्धश्चेति परिच्छायकप्रकारेणात्मन्यवगते कृतार्थोभवति न किंचित्कृत्यमस्ति ॥ ३९ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवमात्मज्ञानमार्गे निरूप्य तं पक्षं दूषयति ऋष इति हे ऋषे नारद त्वं हि मंत्रद्रष्टा सर्वसिद्धांतं जानासि किमेतावता आत्मा एतादृशः इति प्रतीयमानस्यानर्थस्य निवृत्तिरपेक्षते यदात्मन्येतादृशेऽपि यदि संसारः स्यात् तदा अनिर्मोक्ष भ्रमात्प्रतीतावपि भ्रमो निवर्त्तनीयः एवंभावज्ञानादेव निवर्त्तनपक्षेऽपि ज्ञानं प्रमाणतः संपादनीयं तत्प्रमाणं वेदो भवितुं नार्हति बहुवादिविप्रतिपन्नत्वात् किंतु प्रमाणसहितं योगयुक्तं मन एव आत्मनस्तथात्वं बोधयति तं पक्षमंगीकृत्य दूषयति मुनयः यदा मननशीलाः प्रशांता आत्मा इंद्रियाणि च येषां शुद्धांतःकरणा जितेंद्रियाः तैर्मननेक्रियमाणे एवात्मा भासते तदैव गुणस्वरूपं असत्तर्कैः कुयुक्तिभि र्विप्लुतं सत्तिरोभूयेत तिरोभावं प्राप्नुयात् सर्वदा एतादृश आत्मानुसंधाने कदाचिदपि संसारस्फूर्तिर्नस्यात् तथात्वे वा संसारस्फूर्तौ अनिर्मोक्षप्रसंग शास्त्रवैफल्यञ्च तस्माद्दृष्टानुपपत्त्या एतदभ्युपगंतव्यं ये मुनयः प्रशांतात्मेंद्रियाशयास्तेषामात्मा तथाविधः स्फुरति तदा न संसारः अन्यान् प्रति न स्फुरति तदा तेषां संसार इत्येवम् परोक्षकथापरोक्षकथायामपि प्रमाणेन वेदादिना सत्तर्कसहितेन तत्स्फुरति असत्तर्कैर्विप्लुतं सत्तिरोभवतीति अतः परमेतन्निश्चयमनार्थं किंचिदंगीकर्त्तव्यं यस्मिन् क्रियमाणे असत्तर्कादिकमप्यभिभूय ज्ञानमुदेतीति प्रशमादयस्तु प्रथमतो न संभवंति तेषां साधनाभावात्साधनाभावेऽपि यदि जायेरन् तदा सर्वदैवस्युः तस्मात्तादृशमेकं साधनं वक्तव्यं यदव्यभिचारि भवति भक्तिश्चेत्कृतसात्मनिरूपणेन भक्तेः स्वातंत्र्येण मार्गप्रदानात् भगवतस्तादृशस्य आत्मतत्त्वाच्च अतो भक्तिरहितः समार्गो न सिध्यति भक्तौ च जातायां किंतेन मार्गेण अतउभयथाप्यप्रयोजक तत् तस्माज्ज्ञानतत्त्वं केवलं आत्मसूत्रसिति नाम तन्माहात्म्यमेतत् विभूतिर्वा तस्माद्बालानां हस्ताग्रे चंद्रबुद्धिवत् आत्मबुद्धिरिति नारदस्य गामांत्रणकार्यैरिति निश्चय परितोष्य अवतारकर्माणि गायत्युक्तत्वात् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

तत्र सर्वेभ्यश्चा ज्ञातार इति आह यस्य । वामदेवो रुद्रः । यस्य ऋतां सत्यां गतिं त्रिपादैश्वर्यादिभूतिम् न विदुर्न जानीमः । तत्र च तन्मायया विनिर्मितास्त एकपादविभूतिरपि न विदन्तु विचक्ष्महे ब्रूमहे । तदप्यात्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नम् ॥ ३७ ॥

तत्कीर्त्तनादिभक्तिस्तु तज्ज्ञानरूपाद्धेऽपि सम्भवतीति दर्शयन्नाह यस्येति । अतस्तस्यावतारांस्तत्कर्म्माणि च गृणेहं त्वं च गृणि इति भावः ॥ ३८ ॥

आद्य पुरुषावतारं तत्कर्म्माणि च संक्षेपेणाह । पुरुषः पुरुषावतारः । कल्पे कल्पे प्रतिमहाकल्पान्तरे । आत्मात्मन्यात्मनात्मानमिति कर्ता अधिकरणं साधनं कर्म्म च स एवेत्यर्थः ॥ ३९ ॥

ननु न ते विदन्ति सर्वेत्र इति यतः स्वरूपावयवं न विदन्ति किन्तु तस्य गुणविशेषरूपं स्वरूपं तद्विदन्ति न वेति जिज्ञासायामाह विशुद्धमिति । तत्र जानामीति निरपेक्ष । तत्र सुखरूपमेव, विज्ञानमानन्दं ब्रह्मेति श्रुतेः । ज्ञानञ्च ज्ञानातः कर्तृकर्मकरणाभावात् केवलम् । अतएव रागद्वेषाभावाद्विशुद्धम् । अतएव सर्वान्तरत्वात् प्रत्यक् । तदपि समन्तादुच्चार्य्येव स्थितत्वात् सम्यगवस्थितम् । व्याप्तिरपि सर्वत्र बाधाभावादिति सत्यम् । आनन्त्याभावात् पूर्णम् । जन्मादिविकाराभावात् अनाद्यन्तम् । सत्त्वादिगुणसंसर्गाभावान्निर्गुणम् । सर्वकालमेकरूपतयैव स्थायित्वान्नित्यम् । द्वितीयाभावात् अद्वयम् ॥ ४०

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अहं ब्रह्मा यस्य भगवतः ऋतां सत्यां गतिमिमां तत्त्वेन वेद्मि वामदेवः शिवः न वेद यूयं मम पुत्राः त्वत्प्रभृतयः न विदुः अपरे सुरास्ते नैव विदुरिति किमुत तत्र हेतुः तदिति तस्य भगवतः मायया प्रकृत्या मोहिता बुद्धिर्येषां वयम् तेन विनिर्मिताः तद्स्वस्वानुरूपं दृहग हार्दिकम् आत्मसमं स्वज्ञानानुरूपमेव विचक्ष्महे ब्रूमः ॥ ३७ ॥

मुमुक्ष्वर्थं तु तदवतारकर्माणि शास्त्रद्वारा गायेत इत्याह अन्येऽपि यस्य परमेश्वरस्य अवताराणां कर्माणि मोक्षसिद्धये अस्मदादयः गायंति तत्त्वेनसाकल्येन तु यं न विदंति न जानंति गुणतः स्वरूपतश्चेयत्ताभावात् तस्मै अनंतगुणस्वरूपाय कार्त्स्न्येन ज्ञातुमशक्याय भगवते निरतिशयैश्वर्यवते केवलं नमः ॥ ३८ ॥

यस्यावतारकर्माणि गायंतीत्युक्तं तत्र तस्य विश्वसृष्ट्यादिलीलां स्वरूपं अवतारादिकं च संक्षिप्य दर्शयति यावदध्यायसमाप्ति स इति स भगवान् एतत्समुद्धृत्य ध्येयतया प्रकाशमानः आद्यः जगत्कारणभूतः पुरुषः प्रकृतिप्रेरकः अजः जन्मशून्यः कल्पे कल्पे सृष्ट्यादावसरे आत्मा कर्ता आत्मनि अधिकरणे आत्मना साधनभूतेन आत्मानं कर्मभूतं सृजतिस्वयमात्मानमकुरुतेति श्रुतेः पाति रक्षां करोति संयच्छति संहरति च ॥ ३९ ॥

जगज्जन्मादिहेतुत्वेऽपि विशुद्धम् वैषम्यनैर्घृण्यादिदोषरहितम् तथाह भगवान् सूत्रकारः वैषम्यनैर्घृण्येन कर्मसापेक्षत्वादिति तत्प्रधानं किंनेत्याह निर्गुणमिति सत्त्वादिगुणरहितम् यतः ज्ञानमिति क्षणिकविज्ञानपक्षं वारयति सत्यमिति ननु पुरुषाधिष्ठितं प्रधानं भवतु ज्ञानशब्दवाच्यमित्यत्राह केवलमिति तर्हि जीवत्वं किंनेत्याह प्रत्यक् सम्यगवस्थितमिति प्रत्यंचि जीवे सम्यगवस्थितम् यो विज्ञाने तिष्ठन् इति श्रुतेः एकस्य सर्वं जीवेषु वासः कथमत्राह पूर्णमिति कालतः पूर्णत्वमाह अनाद्यंतमिति कालत्रयेऽपि तस्य तैः समानाधिकरणत्वमाह नित्यमद्वयमिति ॥ ४० ॥

ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः ।
यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम् ॥ ४१ ॥
आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ।
द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ॥४२ ॥
अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च ।
स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ॥ ४३ ॥
गन्धर्व्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ।
ये वा ऋषीणामृषभाः पितॄणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः ।
अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः ॥ ४४ ॥
यत् किञ्च लोके भगवन्महस्वदोजःसहस्वद्बलवत् क्षमावत् ।
श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपम् ॥ ४५ ॥
प्राधान्यतो यानृष आमनन्ति लीलावतारान् पुरुषस्य भूम्नः ।
आपीयतां कर्णकषाय शोषाननुक्रमिष्ये त इमान् सुपेशान् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वितीयस्कन्धे ब्रह्मनारदसंवादे पुरुषविभूतिवर्णनं नाम
षष्ठोऽध्यायः ॥ ६ ॥

भाषा टीका ।

मैं समाम्नाय मय, (वेदमय) तपोमय और प्रजापतिओं का अभि वंदित पति हूं । मैने समाहित होकर निपुण योगका आस्थान किया पर जिससे मेरा जन्म है उसको न प्राप्तकिया ॥ ३३ ॥

मैं समाम्नाय मय, तपोमय, और प्रजापतिओं का अभि वंदित पति हूं । निपुण योगका आस्थान कर समाहित होकर भी मैंने उसे न पाया जिससे मेरा जन्म है ॥ ३४ ॥

मैं उनके मंगल मय स्वस्त्ययन और शरणागतों के भव बंधके छेदन करनेवाले चरण कमल में प्रणत हूं । जो अपनी माया के वैभव का अंत आप नहीं पाते हैं जैसे आकाश । तब और सब कहां से उस अनन्त का अन्त पायेंगे ॥ ३५ ॥

मैं (ब्रह्मा) तुम (नारद) वामदेव (रुद्र) भी जिनके सकल तत्त्व को नहीं जानते हैं तब और देवता कहां से जानसक्ते हैं । उनकी माया से मोहित हम सब उनके विनिर्मित इस विश्व को अपनी शक्ति समान जानते हैं ॥ ३६ ॥

हम सब जिनको तत्त्व से नहीं जानते हैं केवल उनके अवतार कर्मों को गान करते हैं उन भगवान को नमः है ॥ ३८ ॥

वह आद्य पुरुष आत्माअज भगवान् कल्प कल्प में अपने से अपने को सृजता संयमन [प्रलय] करता है और पालन करताहै ॥३९॥

हे ऋषे ! प्रशान्तात्मेन्द्रिया शय मुनि जन, जिसको केवल विशुद्ध प्रत्यक् [सर्वान्तर] सम्यक् अवस्थित सत्य पूर्ण आद्यन्तरहित निर्गुण नित्य और अद्वय जानते हैं वह परतत्त्व है । यह सर्वत्र स्वतः प्रकाश होकर भी जब असत्तर्कों से विप्लुत होताहै अर्थात् कुतर्क से विचाराजाता है तबही तिरोहित होताहै ॥ ४० ॥ ४१ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

अत्र विद्वदनुभवं प्रमाणयति । हे ऋषे नारद । प्रशान्तात्मेन्द्रियाशयाः प्रसन्नदेहेन्द्रियमनसो यदा भवन्ति तदा विदन्ति । अन्यदा तद ज्ञाने कारणमाह । यदा तु तदेव प्रकाशमानमेव असतां तर्कैर्विप्लुतं स्यात् तदा जीवोधीयतेति ॥ ४१ ॥

(कल्पे कल्पे आत्मानं सृजतीत्युक्तं के ते ऽस्य सृज्यमाना स्तान्) अवतारान् विस्तरेणाह आद्य इत्यादि यावदध्यायसमाप्ति । परस्य भूम्नः, पुरुषः प्रकृतिप्रवर्त्तकः, यस्य सहस्रशीर्षेत्याद्युक्तो लीलाविग्रहः, स आद्योऽवतारः । वक्ष्यति हि—भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् । स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः ॥ यथोक्तम्—विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ द्वितीयन्त्वण्डसंस्थितम् । तृतीयं सर्व्वभूतस्थं तानि ज्ञात्वा विमुच्यते । इति । यद्यपि सर्व्वेषामविशेषेणावतारत्वमुच्यते, तथापि कालश्च स्वभावश्च सदसदिति कार्य्यकारणात्मिका प्रकृतिश्च, एताः शक्तयः, मनआदीनि कार्य्याणि, ब्रह्मादयो गुणावताराः, दक्षादयो विभूतय इति विवेक्तव्यम् । मनो महत्तत्त्वम् । द्रव्यं महाभूतानि । क्रमोऽत्र न विवक्षितः । विकारोऽहङ्कारः गुणाः सत्त्वादिः । विराट् समष्टिशरीरम् स्वराट् जीवः । स्थास्नुस्थावरं, चरिष्णु जङ्गमञ्च व्यष्टिशरीरम् ॥ ४२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अहं ब्रह्मा । भवः श्रीरुद्रः । यज्ञोविष्णुः । दक्षादयो ये इमे प्रजेशाः तललोकपालाः पातालाद्यधिपतयः ॥ ४३ ॥

गन्धर्वादीनामीशाः यक्षादीनां नाथाः । रक्षोरगेति सन्धिरार्षः । ऋषीणां पितृणाञ्च श्रेष्ठाः प्रेतादीनामधीशाः ॥ ४४ ॥

किं बहुना यत् किञ्चिद्भगवदादि तत् सर्वं परमेव तत्त्वमित्यन्वयः । भगवत् ऐश्वर्ययुक्तम् । महस्तेजोयुक्तम् ओजः सहसी इन्द्रियमनःशक्ती तद्युक्तम् बलं दार्ढ्यं (दाक्ष्यं) तद्युक्तम् । श्रीःशोभा, ह्रीरकर्मजुगुप्सा, विभूतिः सम्पत्तिः आत्मा बुद्धिः, तद्युक्तम् अर्णोवशः अद्भुतार्णो आश्चर्य वर्णामित्यर्थः । रूपमेव स्वरूपं, रूपवत् अस्वरूपम् अस्वरूपञ्च यत् तत् सर्वं परं तत्त्वं तद्विभूतिरित्यर्थः ॥ ४५ ॥

शुद्धसत्त्वावतारान् वक्तुमाह प्राधान्यत इति । असत्कथाश्रवणायैकर्णायोः कषायामलास्तान् शोषयन्तीति तथा तान् । सुपेशान् सुपेशल्यान् सुन्दरान् । लकारलोपस्त्वार्षः हे ऋषे । ते तुभ्यम् अनुक्रमिष्ये तदनुक्रमणामृतं त्वया आपीयतां मित्यर्थः यद्वा आपीयतामिति शत्रन्तम्, आपिबतां कर्णकषायशोषानित्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवतभावार्थदीपिकायांद्वितीयस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

श्रीराधारमणदासगोस्वामि विरचित दीपिन्याख्य तट्टिप्पणी ।

विप्लुतं व्याप्तमित्यर्थः ॥ ४१ ॥

भूतैर्यदिति एकादशस्कन्धीयचतुर्थाध्यायस्य तृतीयश्लोकः । विष्णोस्तुत्रीणि रूपाणीनि सात्त्वतन्त्रवचनमिति तृतीयस्कन्धीयपञ्चमाध्यायस्य सप्तविंशश्लोकटीकायां स्वामी ॥ ४२ ॥ ४३ ॥

दैत्येन्द्रः दैत्यानां प्रधानः दानवेन्द्राः दनुतोऽपि दक्षकन्यायां कश्यपाज्जाता एकषष्टि संख्याका असुराः तेषुप्रधाना द्विमूर्द्धादयो ग्राह्या इति । प्रेतपिशाचादयो भूतजातिभेदाः तत् पिशाचेशाः घण्टाकर्णादयः भूतेशाभैरवादयः कूष्माण्डेशाः भृङ्ग्यादयः यादांसिजलजन्तवः तदधीशा स्तिमिङ्गिलादयः ॥ ४४—४६ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

अथ बन्धकास्तत्कर्माणि च विवक्षुरादिममवतारमाह आद्य इति पुरुषः विराट् पुरुषः परस्य विष्णोः राद्योऽवतार इत्यर्थः आद्यत्वमस्य कर्माद्यपेक्षया अस्य विभूतीराह कालइत्यादिभिः कालादयः रूपवतः स्वरूपमित्युत्तरेणान्वयः रूपवत अकर्मकृतरूपस्य स्वरूपं स्वीयं रूप शरीरं कालादयस्तन्नियाम्यं वर्गरूपविभूतिरिति परतत्वं कालादीनां परं याथात्म्यमित्यर्थः स्वभावः प्रकृतिगतपरिणामस्वभावः सदसच्च ततमचेतनं स्थूलं सूक्ष्मं वा द्रव्यं पृथिव्यादि विकारो महदहंकारादिः गुणाः सत्त्वादिः इंद्रियाणिज्ञानकर्मात्मकानि विराडन्तरिक्षं स्वराट् स्वर्गः अयं लोकस्तु वैसम्राडंतरिक्षं विराट्स्मृतं स्वराडसौ स्मृतो लोक इत्युक्तः स्थास्नु स्थावरं चरिष्णु जंगमं भूम्नः भूमवतो भगवतः ॥ ४१ ॥

किं बहुना संक्षेपेण शृणिवत्याह अहमिति अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः यद्यप्ययं विभूति मध्ये पठितः तथापि न विभूतिरर्वान्तराभावात् पालनाधिकृतांवस्तावतारगणपालनातुगुणं यत्सामर्थ्यं तस्य विभूतित्वद्योतनाय यज्ञोपि विभूतिषु पठितः विभूतित्वं नाम नियाम्यत्वं सर्वभूतानां प्रवर्तनरूपं नियमनमात्मतयाऽवस्थानात् आत्मा हिनाम शरीरस्य सर्वात्मनाऽऽधारो नियंता शेषीच भगवतः स्वविभूतिभूतेषु सर्वेष्वात्मतयाऽवस्थानमेव कवित्वच्छन्दसामानाधिकरण्यनिर्देशहेतुः भगवत्यात्मतयाऽवस्थिते हि सर्वे शब्दाः तस्मिन्नेव पर्यवस्यंति यथा देव मनुष्य पक्षिवृक्षादयः शब्दाःशरीराणि प्रतिपादयंतस्तत्तदात्मनि पर्यवस्यंति दक्षादयो ये इमे प्रजेशाः भवदादयो नारद प्रभृतयः सनकादयः स्वर्लोकपालाः पक्षिश्रेष्ठाः तललोकपालाः पातालेश्वरा- ॥ ४२ ॥

गंधर्वादीनामीशाः उरगाःसर्पाः नागा गजाः यक्षादीनां येनाथाः रक्षो रगेति संधिरार्षः ऋषीणां पितृणां ये श्रेष्ठाः दैत्या दितिपुत्राः तेषां इंद्राः ॥ ४३ ॥

अन्ये च ये प्रेतादीनामधीशाः ॥ ४४ ॥

किंबहुना यदिति यत्किंचिद्भगवदादि तत्सर्वं रूपवतः स्वरूपमित्यन्वयः भगवदैश्वर्यवन्महस्वत्तेजस्वदोजस्वदुत्साहवत्सह स्वद्वेगवद्धैर्यवद्बलवत् धारणसामर्थ्यवत् क्षमावत्सहनवत् श्रीः शोभा ह्री लज्जा विभूतिर्नियाम्यवर्गः आत्मा बुद्धिस्तद्युक्तं अद्भुतार्णमद्भुतशब्दवाच्यं एतत्सर्वं रूपवतः प्रशंसायांमतुप् अकर्मकृत स्वेच्छोपात्तदिव्यमंगलास्पदविग्रहस्य भगवतो विराट् पुरुषस्य स्वीया विभूतिरित्यर्थः ॥ ४५ ॥

अवताराणामानन्त्यात्तत्र प्रसिद्धान्वक्ष्यामीत्याह प्राधान्यत इति असत्कथा श्रवणे ये कर्णयोः कषायाः तान्शोषयन्तीति तथा तान्सुपेशान्सुंदरान् हेऋषे वदंति मुनय इतिशेषः ऋषय इति पाठे ऋषयो वदंतीत्यन्वयः तान् ते तुभ्यमनुक्रमिष्ये क्रमेण वर्णयिष्यामि तदनुक्रमणामृतं त्वया आपीयतां यद्वा आपीयतां इति शत्रन्तम आपिबतां कर्णकषायशोषानित्यर्थः ॥ ४६ ॥

इति श्री मद्भागवत महापुराणे द्वितीयस्कंधे वीरराघव कृत टीकायांषष्ठोऽध्यायः

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

तत्रप्रथमावतारः कइत्याशंक्यतमाह आद्यइति परस्यपरायणस्यहरेराद्योऽवतारः पुरुषइतिवदंतीतिशेषः प्रलयोदकेशयानोमहाकृतिर्नराज्ञांमाश्रयत्वेननारायणः शून्यनामाभूत् सिसृक्षोस्तस्यदीपाद्दीपांतरंयथातथाद्वितीयरूपमभूत् तत्सर्वविद्भोजनास्तद्रूपंनाम्नापुरुषइतिसव इत्थं सपुरुषः प्रकृतिनाम्न्यारमायाद्वितीयरूपेणवीर्यमाधत्त तस्माद्वीर्याज्जातोमहानभूत् यंहिरण्यगर्भः पुरुषइतिचसंगिरंते तत्पत्नीश्रद्धेति

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

प्रलयेस्थूलशरीररहितत्वाद्विरिञ्चिश्रीपुरुषादेहंप्राप्यसंयोगीकृत्वा अगदंकुरंमहत्तत्त्वंपुनरुद्भावयतां स्वस्यैवपुत्रतांयातान्महत्तत्त्वादहंतत्त्वम जनदितीतिहासमाचक्षतेय: शेतप्रलयेविष्णु:शून्यनामामहाकृतिरित्यादिवाक्यासिद्धं सन्निधानविशेषाधिष्ठानत्वाद्देशत्वंब्रह्मादीनानसा ध्यादितीममर्थस्पष्टमाह कालइत्यादिना यद्यत्कालाद्युक्ततार्णतं तत्परविशिष्टसर्वधीरायणस्यरूपवत्प्रतिमावदधिष्ठानं तत्प्रीतिहेतुत्वात्स्व तोऽस्वरूपंप्राकृतत्वात्पुरुषाद्याहरेरूपंब्रह्माद्यास्ततिप्रया:स्मृता: प्रधानत्वेनसर्वस्मान्मत्स्यकूर्मादयोहरे: अवतारा:श्रुतौख्याता:सएवैतेतत:स्मृ तादित्यादे: काल:परमाणवादिपरमहदंत: स्वभावोवस्तुभाव: सत्प्राण: असतसूक्ष्मत्वान्मूलप्रकृति: मनोमनस्तत्त्वं कालोवस्तुस्वभावश्चप्र कृति: प्राणएवचेत्यादे: सविदितिप्राणइतिश्रुतेश्च द्रव्यंपंचभूतानि विकारोऽहंगुणा:सत्त्वादि: विराड्गरुड: स्वराडिंद्र: द्रव्यंतुपंचभूतानिवि कारोऽहमुदाहृतं विराजंगरुडंप्राहु:स्वराडिंद्रउदाहृतइतिच स्थास्नुचरिष्णुस्थावरंजंगमंच भूम्नइत्यनेनस्थावरादिव्याप्तित्वंयुक्तमि त्याह ॥ ४१ ॥

अहमिति अहंचतुर्मुख: भव:शर्व: यज्ञोयज्ञाभिमानीरुद्रस्त्रिकन्न: यज्ञशब्दादितौद्यौतुदेवोलोकपुरस्कृताविस्यादे: भवदादय: परमहंसा: स्वर्लो कपाला इंद्रादय: स्वगलोकपालागरुडादय: नृलोकपाला:प्रियव्रतादय: तललोकपालाअनंतवलयादय: ॥ ४२ ॥

गंधर्वेशाविश्वावस्वादय:चारणेशा:पुष्पदंतादय: यक्षनायका:कुबेरादय: रक्षोमाधानिर्ऋत्यादय:उरगनाथावासुक्यादय:नागनाथाअनंतादय: पुर्नाक्तोऽनंतएकर्कुंडल: ऋषीणामृषभार्वासष्ठादय: पितृणामृषभोयम: दैत्येंद्रा:प्रह्लादादय: सिद्धेशा:सनकादय: दानवेंद्रावृषपर्वा दय: ॥ ४३ ॥

प्रेतेशोपियम: रूपांतरविवक्षयापुनर्वचनंव्यासवासुदेववत् पिशाचेशाघंटाकर्णादय: भूतेशाभैरवादय: कुष्मांडेशाभृंगीरकमादय: यादसामीशास्तिमिंगिलादय: मृगाणामीशा:सिंहादय: पशूनामीशानंदिकेश्वरादय: भगवद्यशोज्ञानादिमत् महस्वत्स्वत: महस्ववत् ओज स्वत्अवष्टंभवत् सहस्वत्महनगुणवत् बलवत् इच्छाकरणशक्तिमत् क्षमावत्क्रोधामसमुत्थितिगत् ह्रीमत्योग्यलज्जावत् श्रीमत्लक्ष्मणा चाहविभूतिमत्विशेषप्राप्तिशक्तिताविभूर्तिर्लक्ष्मणोज्ञाहलक्ष्मीशब्देनभण्यतइति आत्मवत् धृतिमत् मनोजवचक्षा अद्भुतार्णामाश्चर्यसमृद्ध स्वेच्छयैषांविशिष्टत्वंकुर्वतेनत्तथास्मृतमित्यतोमिथ्याविभूतित्वंप्रत्युक्तम् ॥ ४४ ॥

पुरुषनामकण्वस्वरूपांशावतारोनान्यइतिशंकांपरिहरंस्तत्रवतदवतारानुक्रमणंप्रतिजानीते प्राधान्यतइति ऋषयोब्रह्मादिज्ञानिनोभूम्नआ नंदादिगुणपूर्णस्यपुरुषस्ययान्लीलावतारानामनंतिपठंति अभ्यासेनोपासतेच तांस्तेतवप्राधान्यतोऽनुक्रमिष्येगणयिष्यामीत्यन्वय: भवता तदनुक्रमणस्य:कर्णपुटेनापीयतामभिगम्यतां यद्वापीयतांगायतांध्यायतांपश्यतांपिबतांजनानांकर्मकषायंविहारंभहेतु: कर्मांशुरसस्तस्यशो षयस्तेतथोक्तास्तान् पयत्वेगुणमाह सुपेशलानितिमधुरंश्रोप्यानिमधुरानिमानितिस्वमनासिप्रकाशितत्वेनकालक्षेपांक्षिपति ॥ ४५ ॥

इतिश्रीभागवतेद्वितीयस्कंधेविजयध्वजकृतटीकायांषष्ठोऽध्याय: ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ: ।

अन्यपक्षपातितानामेवात्वे हेतुमाह । प्रशांता भगवत्प्रिया आत्मादयोयेषां त एव तद्विदन्ति । असत्तर्कै: यो नादतो नरकभागभिर- मत प्रसङ्गतिवक्ष्यमाणतृतीयोक्तादशा तादृशतद्रूपाविषु कुतर्कैस्तु विप्लुतं मत् यत् तिरोधीयेत इति । तदेवमनेन पद्यचतुष्केण तादृशस्वरूप एव भगवांस्तादृशस्वरूपशक्त्यातत्तद्रूप: सन् अवतारादिकं करोति, तत्र तत्तदज्ञास्तत्तद्गायन्तोऽपि न सुखं प्राप्नुवन्ति, यत- स्तत्तद्विज्ञानं चाधिकृत्य परिनिष्ठितोऽपि नैर्गुण्य इत्यादिकं बहुतरं गीयते, इति व्याञ्जितम् ॥ ४१ ॥

पूर्वार्थमेव स्पष्टयति आद्योऽवतार इत्यादिभि: । परस्य भूम्न: स्वरूपेण शक्त्या च सर्वातिशायिन: । अवतार: प्राकृतवैभवे स्वेच्छा- विर्भाव: । कालादयश्च परस्यैव तत्त्वानि सार्द्धश्लोकैरन्वय: । यज्ञस्य विष्णो: साक्षादवतारत्वेन, ब्रह्मभवयोरावेशावतारत्वेन, अन्येषां शक्तितत्कार्यरूपत्वेन, तदनन्यत्वमित्यर्थ: ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

किं बहुना एतदर्थमेवास्य महापुराणस्याविर्भाव इति भवतानुदितप्रायंयशो भगवतोऽमलमित्यादौ समाधिनाऽनुस्मर तद्विचेष्टितमि- त्यादौ च वर्णितम् । सा च भगवतो लीला द्विविधा । सृष्ट्यादिरूपा लीलावतारविनोदरूपा च । तयोरुत्तरा तु प्रशस्ततरेत्याशयेनाह । प्राधान्यतो यानृष इति । यद्यपि पूर्वम् आद्योऽवतार: पुरुष: परस्येत्यादिग्रन्थेन पुरुषं कालादितच्छक्ति मन-आदि-तत्कार्यं ब्रह्मादि तम गुणावतारान् दक्षादिन् विभूतीश्चोक्तवानस्मि तेन च सृष्ट्यादिलीला: तथापि यान् हे ऋषे पुरुषस्य भूम्नो लीलावतारान् प्राधान्येनामन- न्ति तानेव इमान् मम हृदयाधिरूढान् कर्णकषायशोषान् तदितरश्रवणरागहर्तॄन् किञ्च सुपेशान् परममनोहरान् अनुक्रमिष्ये तदनुक्रमणं सम्यक् पीयताम् ॥ ४६ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृतक्रमसन्दर्भे षष्ठोऽध्याय: ॥ ६ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

के ते अवतारा इत्यपेक्षायामाह आद्योऽवतार इति परस्य ब्रह्मण: पुरुषोत्तमस्य आद्योऽवतार पुरुष: प्रकृतिभर्ता द्वितीय: काल: तृतीय: स्वभाव: सदसत्कर्म प्रकृतिर्वा मनश्च इदं मन: आधिदैविकं यत् कल्पद्वाराकामजनकं यत: सृष्टि: तदनंतरमन्येऽप्यवतारा इत्याह द्रव्यं पंचमहाभूतानि विकार: अहंकार: गुणास्त्रय: पंचवातन्मात्रा: इंद्रियाणि दश विराट् ब्रह्मांडदेह: स्वराट्तदभिमानी स्थाणुस्थविरं चरिष्णु जङ्गमं । एतत्सर्वं भूम्न: अतिसमर्थस्य सर्वे अवतारा: अवतारो नाम अवतरणं मूलस्थानादिहागमनं तत्परमार्थ तो विदु: । प्रथं एव [illegible] स्थित सर्वरूपेण इहागत इति सर्वमेवावताररूपम् ॥ ४१ ॥

तारत्वमुच्यते, [illegible] भगवत: सजातीयस्य उत्कर्षलक्षण गुणवत्त्वं चेतत्तदाहइमे अग्रे वक्ष्यमाणा इति तान् गणयति अहमिति स्वहीनेभ्य: [illegible] तारा:, दक्षादयो विं, व[illegible] ति ते:सर्वेभगवदवतारा:तत्रप्रथमं अहं ब्रह्माभवो महादेव:यज्ञो य: यज्ञनारायण: इमे प्रजेशा मरीच्यादय पुरुष[illegible] [illegible] समष्टि[illegible] [illegible]ादय: भवानादिर्येषां ते भवदादय: भक्ता: चकारात्सनकादय एवं स्वभावत उत्कृष्टानुत्कृष्टा अधिकारे भ्य: उत्कर्षा[illegible] [illegible]तां

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

गोरक्षणमाह भूर्लोकपाला इति पाठांतरे भूर्लोकपालाः तदा भूरित्यादयस्त्रयः भूर्लोकपालाः पृथिवीलोकपालाः भुवर्लोकपाला अंतरिक्षलोकपाः स्वर्लोकपाला उपरितनलोकपालाः तललोकपाला अधस्तनलोकपालाः ॥ ४२ ॥

गंधर्वादीनां ये ईशा यक्षादीनां येनाथा रक्षोरगेति संधिरार्षः गंधर्वादयो राजसा यक्षादयस्तामसा ऋषीणामृषभा सात्विकाः पितृणा सन्निपाताः एवं सपूर्वत्रापि दैत्येंद्रादयः राजससात्विकतामसा इदानीं तमोमिश्रतामसानाह प्रेतपिशाचेति एतेषां स्वरूपं तृतीयस्कन्धे वक्ष्यते प्रेतादीनां ये अधीशाः ॥ ४३ ॥

किंच यःकश्चनउत्कृष्टधर्मः भगादिः भाग्यमैश्वर्यादि वा तद्युक्तं यत्किंचिद्वस्तु मात्र प्राणिमात्रं वा महस्तेजः ओजइंद्रियशक्तिः ओजसास हित महः मनसश्चेंद्रियाणां च अन्योन्योपकारात् तच्छक्तिद्वयमेकत्वेनोक्तं ओजः सहस्वदिति बलं देहशक्तिः क्षमासहिष्णुता एते भगादयः पदार्था उत्कृष्टा एवात्र विवक्षिताः श्रीः शोभा ह्री लज्जा विभूति लक्ष्मीः आत्मा बुद्धिः श्रियाद्यात्मपर्यंतं चतुष्टयं यत्रास्ति सतद्योक्तः किंच अद्भुतार्णा अद्भुतवर्णारूपं विचित्ररूपं गयादिक वा किं बहुना यत्किंचिद्रूपवत् मूर्त प्रकाशमानमिति यावत् सर्वं परमेवतत्त्वं यदप्यस्वरूपं अमूर्तमाकाशादि तदपितत्त्वमित्यर्थ. अस्वरूपत्वेनरूपत्वेन च तस्यापि प्रसिद्धेः ॥ ४४ ॥

एवमुत्कृष्टधामवत्त्वेन यद्यत्किंचिल्लोके प्रसिद्धं तदेव भगवद्वतार रूपमित्युक्त्वा यत्साक्षात्सच्चिदानंदरूपमैश्वर्यादिसर्वगुणसहितं तन्मुख्यं भगवद्वताररूपं ते कथयिष्यामीत्याह प्राधान्येन इति ऋषे इति संबोधनेतादृशश्रवणे अधिकारद्योतकं यद्यपि भगवत्सृष्टं सर्वमेवावता रूपमिति मुख्यः पक्षः तथापि तादृशस्यावतारत्वेन लोकप्रसिद्ध्यभावाल्लोके यानवतारान्प्राधान्येन मुख्यतया वदंति तेषां लीलावतारेति नाम ते च पुनरवतारा:कस्येत्यपेक्षायां यस्तु भूमापुरुषःब्रह्मणोऽप्यधिकोऽतर्यामिरूपाद्वितीयध्यानउक्तः तस्यावतारा:सच्चिदानंदरूपाद्विदेहजी वान्तर्यामिणः तत्र क्रमेण देहजीवरूपा उक्ता इदानीं मंतर्यामिरूपा उच्यंत इति आपीयतां ते हि न वहिस्थापनयोग्या नापि मध्ये किंतु सर्वांतरा कर्तव्या इत्यामनंतात्पीयतामित्यर्थः तेषां श्रवणस्य विशेषफलमाह कर्णकषायशोषानिति यद्यपि सर्वं चरित्रं भगवतस्तथापि लौकिकदोषेण कर्णायादुष्टत्वाद्भगवच्चरित्रे न रुचिरुत्पद्यते तत्रैतद्विशेषचरित्रं कर्णमलनिवारकमित्यस्मिन् श्रुते सर्वत्र रुचिरुत्पत्स्यत इत्य र्थः अत एवानुक्रमिष्ये आनुपूर्व्येण कथयिष्यामि ते तुभ्य विशेषेण त्वमेवाधिकारीति इमान् बुद्धिस्थितान् महता आडंबरेण कथने हेतुः सुपेशानिति अति सुंदरान् मनोहरान् कथनप्रतिज्ञाभिन्नप्रक्रमेण कथनेहेतुः ॥ ४५ ॥

इतिश्री मद्भागवत सुबोधिन्यां श्रीमल्लक्ष्मण भट्टात्मज श्रीवल्लभदीक्षित विरचितायां द्वितीय स्कंधे षष्ठाध्याय विवरणम् ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

ऋषे हे नारद मुनयो मननशीलाः यदा प्रशान्तात्मेन्द्रियाशया भवन्ति तदा तद्विदन्ति । अन्यथा असत्तर्कैर्विप्लुतं तदेव वस्तु तिरोधीयेत । एतेन तस्य निर्विशेषं स्वरूप यद्ब्रह्म तत् कथञ्चिदपि ज्ञातु शक्यं, न तु सविशेषस्वरूपमित्युक्तम् । एवमेव विदाङ्कु महत्य-मलान्तरात्मभिरित्यादिना दशमस्कन्धेऽपि वक्ष्यते ॥ ४१ ॥

स एष आद्यः पुरुष इत्यनेन श्लोकेनोक्तं पुरुषावतारं तत्कर्म च विवृणोति सार्द्धैश्चतुर्भिः । परस्य परव्योमाधिनाथस्य भगवत आद्यः प्रथमोऽवतारःपुरुषःप्रकृतीक्षणकर्त्ता कारणार्णवशायी । जगृहे पौरुषं रूपं भगवानिति प्रथमोक्तेः । कालस्वभावादयश्च तस्य कर्म्मा ण्येव कल्पेकल्पे सृजत्यजः आत्मात्मन्यात्मनात्मानमित्युक्तः । स एकोऽपि मायाशक्त्या नाना भवेदित्यर्थः । सदसत् कार्य्यकारणात्मकं सर्व्वं विश्वमेव । तदेव विवृणोति मनइत्यादि । क्रमोऽत्र न विवक्षितः । द्रव्यं महाभूतानि । विकारोऽहङ्कारः । गुणाः सत्त्वादिः । विराट् समष्टिशरीरं पातालादि स्वराट् सम्राट्प्रजीवो हिरण्यगर्भः स्थास्नु स्थावरं चरिष्णु जङ्गमं व्यष्टिशरीरम् भूम्नः परमेश्वरस्य स्वरूपं ।४२।

तथा अहं ब्रह्मा तदादयस्त्रयो गुणावताराः । ये भुवर्लोकस्वर्लोकलोकपालाः । तललोकपालाः पातालाधिपतयः ॥ ४३ ॥

रक्षोरगेति सन्धिरार्षः ॥ ४४ ॥

कि बहुना यत् किञ्चिद्भगवदादि । भगं श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्त्तिष्वित्यमरः । महस्वत् तेजोयुक्तम् । ओजःसहोबलानि इन्द्रि-यमनःशरीरपाटवानि । ह्रीः अकर्म्मजुगुप्सा । विभूतिः सम्पत्तिः । आत्मा बुद्धिः । अद्भुतार्णम् आश्चर्य्यवर्णम् तत् सर्व्वं तत्त्वं रूपवत् साकारम् अस्मदादिकं परम् अरूपवत् निराकारं कालादिकं चेति द्विविधं भगवद्रूपमपि अस्वरूपं, न भगवतः स्वरूपं, तस्यस्वरूपशक्ति-विलासत्वाभावादित्यर्थः । एवञ्च कालादीनां पुरुषावतारस्य कर्म्मरूपत्वेऽपि ते शक्तयो ब्रह्मादयो गुणावताराः प्रजापत्यादयो विभूतयो ऽन्ये केचिद्ज्ञानिनो योगिनः कर्म्मिणो मूढाश्च स्थावरजङ्गमाश्च सर्व्वे पुरुषावतारस्य सृष्ट्यादिलीलापरिकराः ज्ञेयाः ॥ ४५ ॥

एवं मायाशक्तिप्राधान्येन पुरुषावतारमुक्त्वा चिच्छक्तिमयान् लीलावतारान् वराहयज्ञादीन् वक्तुमाह । प्राधान्येन आमनन्तीत्युपास्यत्वेन अंशेन इति व्यञ्जयति । कर्णयोः कषायान् वार्त्तान्तरश्रवणवासनाः शोषयन्तीति तान् हे ऋषे ते तुभ्यम् अनुक्रमिष्ये क्रमेण कथयिष्ये । तत् कथामृतं त्वया पीयताम् ॥ ४६ ॥

इति भावार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठोऽध्यायो द्वितीयेऽस्मिन् सङ्गतः सङ्गतः सताम् ॥ ६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

हे ऋषे देवर्षे तदेव उक्तलक्षणं भगवत्स्वरूपम् प्रशांता यथोक्तसाधनभाविताः आत्मेंद्रियाशयाः देहेंद्रियांतः करणानियेषां ते मुनयः वेदांतार्थमननशीलाः विदंति जानंति असतां तर्कैर्यदा तु विप्लुतमाच्छन्नं स्यात्तदा तिरोधीयेन आविदितं भवेत् ॥ ३९ ॥

पुरस्परं भूम्नः परमपुरुषस्यविभोःपुरुषःप्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्युक्तोलीलाविग्रहः सभाद्योऽवतारः सएवसमष्टिशरीरग्रहणात नरैवराजःपुरुषइत्युच्यते भूतैर्यदा पंचभिरात्मसृष्टैःपुरंविराजं विरचय्य तस्मिन्स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेव इति वक्ष्यमाणात् पुरुषादीनां तत्वं परमित्यनमान्वयः कालः भगवच्चेष्टीभूतः अचेतनपदार्थविशेषः स्वभावः भगवतशक्तिभूतायाः प्रकृतः

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

परिणामित्वलक्षणो धर्मः सदसत्कारणात्मिका प्रकृतिः गुणाः सत्वादिः इन्द्रियाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च विराट् समष्टिशरीरम् स्वराट् वैराजः पुरुषः स्वावतारः स्थास्नु स्थावरम् चरिष्णु जंगम चेतिव्यष्टि शरीरम् ॥ ४० ॥

सृष्टौ अहं ब्रह्मा संहारे भवो रुद्रश्च गुणावतारः पालने यज्ञो विष्णुः स्वावतारः दक्षादयो ये इमे प्रजेशाः रजोगुणविशिष्टविभूतिभूता भवदादयो नारदादयः अवतारविशेषाः स्वर्लोकपाला इन्द्रादयः सत्वगुणाविशिष्टाविभूति भूताः यत्मस्थतः सुरगणाः रजसः प्रजेशा इति वक्ष्यमाणात् खगलोकपालाः खचरलोकाधीशाः नृलोकपालाः नृपतयः तललोकपालाः पातालपतयः ॥ ४१ ॥

यगंधर्वादीनामीशाः ये च यक्षादीनां नाथाः उरगनागो सर्पभेदौ रक्षारगेति साधराषेः ये चऋषीणां पितृणां च ऋषभाः श्रेष्ठाः दैत्येन्द्राः सिद्धेश्वराः दानवेन्द्राश्च ॥ ४२ ॥

ये चान्ये प्रेतादीनामधीशाः ॥ ४३ ॥

लोके यत्किंचित् इति सर्वत्र योजनीयम् भगवत् ऐश्वर्ययुक्तम् महस्वत् तेजोयुक्तम् ओजः सहसोइंद्रियमनः शक्तियुक्तम् बलवत् दाक्ष्यसंयुक्तम् क्षमावत्परापसहनशीलम् श्रीर्ह्रीविभूत्यात्मवत् आयुक्तम् ह्रीयुक्तम् विभूतिः सर्पात्सत्ययुक्तम् आत्मबुद्धिस्तद्युक्तम् अद्भुता णामाश्चर्यवर्णाम् किंबहुना रूपवतरूपयुक्तम् अस्वरूपम् नीरूपम् सर्वं परतत्वमेव सर्वं खल्विदं ब्रह्म तज्जलानितीति श्रुतेः तत्र पुरुषादीनां स्वरूपताऽभेदः अन्येषां चेतनाचेतनपदार्थानां भगवतः सकाशात्तत्तत्स्वरूपभेदेन भिन्नत्वेऽपि तत्पृथक्स्थितिप्रवृत्त्याद्यभावात्तज्जत्वादिना चा भेद इति विवेकः ॥ ४४ ॥

यदुक्तमाद्योऽवतारः पुरुषस्येति तत्र यथासंपेक्षया स आद्यः तान् किंच भवदादयश्चेत्यत्रादिशब्देनोद्दिष्टांस्तान्सर्वान्गृहीत्याकांक्षाया मवतारान्वक्तुमाह प्राधान्यत इति हे ऋषे नारद पुरुषस्य भूम्नः आपीयतामिति शत्र तमपि वतामि भक्तानां कर्णयोः असत्कथा श्रवणा ये कषायाः तान् शोषयतीत्येव भूतान् सुपेशलान् सुदरान् यान् लीलावतारान् अनंतानां साकल्येन निरूपणासंभवात् प्राधान्यतः आमनंति मुनय इति शेषः तान् तेतुभ्यम अनुक्रमेण वर्णयिष्यामीत्यन्वयः ॥ ४५ ॥

इतिश्रीमद्भागवत सिद्धान्तप्रदीपे द्वितीयस्कंधीये षष्ठाध्यायार्थ प्रकाशः ॥ ६ ॥

भाषाटीका

पर भगवान् का आद्य अवतार पुरुष है । और काल स्वभाव सद सद्रूप प्रकृति मन द्रव्य [महाभूत] विकार [अहंकार] गुण [सत्वरजस्तम] इन्द्रिय विराट् [समष्टि शरीर,] स्वराट् [वैराज पुरुष] स्थास्नु [स्थावर] चरिस्नु [जंगम] मे [ब्रह्मा] भव [शिव] यज्ञ [विष्णु] ये सब प्रजेश दक्षादिक त्वदादिक महर्षिजन स्वर्गलोक पालक खग लोकपालक मनुष्य लोक पालक पातालादि लोक पालक गंधर्व विद्याधर चारणों के ईश, यक्ष राक्षस उरगों के नाथ ऋषिओं के ऋषभ पितृओं के श्रेष्ठ दैत्येन्द्र सिद्धेश्वर दानव और जो प्रेत पिशाच भूत कूष्मांड यादोगण मृग पक्षियों के अधीश और जो कुछ इस लोक में भगवत् [ऐश्वर्यवाला] महस्वत् [तेजवाला] ओजस्वत् सहस्वत [इन्द्रियशक्ति मनः शक्तिवाला] बलवत् [बलवाला] क्षमावत [क्षमावाला, श्रीह्रीविभूति और बुद्धि वाला और जो अद्भुत वर्णवाला है एवं जो रूपवत् अस्वरूप है वह सब पर तत्त्व ही है ॥ ४२—४५ ॥

हे ऋषे ! प्राधान्य से जिनको अवतार कहते हैं, भूमा पुरुष के इन लीलावतारों को मैं अनुक्रमण करूंगा । जो बड़े मनोहर और सुनने वालों के कर्ण कषाय [मल] को शोषण करते हैं ॥ ४६ ॥

इति द्वितीयस्कन्ध का छठा अध्याय ॥ ६ ॥

सप्तमोऽध्यायः ।

ब्रह्मोवाच ।

यत्रोद्यतः क्षितितलोद्धरणाय विभ्रत् क्रौड़ीं तनुं सकलयज्ञमयीमनन्तः ।
अन्तर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥ १ ॥
जातो रुचेरजनयत् सुयमान् सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायाम् ।
लोकत्रयस्य महतीमहरद्यदार्त्तिं स्वायम्भुवेन मनुना हरिरित्यनूक्तः ॥ २ ॥
जज्ञे च कर्द्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ।
ऊचे ययात्मशमलं गुणसङ्गपङ्कमस्मिन् विधूय कपिलस्य गतिं प्रपेदे ॥ ३ ॥
अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान् स दत्तः ।
यत्पादपङ्कजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः ।
नारदाय तु तत्कर्म्मप्रयोजनगुणैः सह ॥ ० ॥

यत्र यदा क्षितितलोद्धरणार्थं वाराहीं तनुं विभ्रत् सन् उद्यतोऽनन्तः तदा तं सुप्रसिद्धं हिरण्याक्षं दंष्ट्रया ददार ॥ १ ॥

यज्ञावतारमाह । रुचेः प्रजापतेः सकाशात् तद्भार्य्याया आकूतेः सूनुः सुयज्ञो नाम जातः । स च स्वभार्य्यायां दक्षिणायां सुयमाख्यान् देवान् अजनयत् । स एव इन्द्रः सन् यदा आर्त्तिमहरत् तदा पूर्व्वं सुयज्ञ इत्युक्तोऽपि अनु पश्चात् मनुना मातामहेन हरिरित्युक्तः अनेन देवोत्पादनं लोकत्रयार्त्तिहरणञ्चेतस्य कर्म्म दर्शितम् । एवं सर्व्वत्रावतारस्तत्कर्म्म च ज्ञेयम् ॥ २ ॥

कपिलावतारमाह । कर्द्दमस्य प्रजापतेर्गृहे च तद्भार्य्यायां देवहूत्यां जज्ञे । नवभिः स्त्रीभिः भगिनीभिः सह । स च स्वमात्रे आत्मगतिं ब्रह्मविद्याम् उक्तवान् । यया आत्मगत्या सा आत्मनः शमलं मलिनीकरणं गुणसङ्गरूपं पङ्कम् अस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप्तवती ॥ ३ ॥

दत्तात्रेयावतारमाह । मया अहमेव तुभ्यं दत्त इति यत् यत आह अतः सनाम्ना दत्तो जातः । स्वभक्तेभ्यो योगैश्वर्य्यदानं तच्चरितं दर्शयति । यस्य पादपङ्कजयोर्यः परागस्तेन पवित्रा देहा येषां ते उभयीम् ऐहिकीमामुष्मिकीञ्च भुक्तिमुक्तिरूपां वा ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचितदीपिनाख्यतट्टिप्पणी ।

[यत्रोद्यत इति । पाद्मकल्पोपाख्यानमेतत् । एतन्मते पद्ममन्वन्तर एव पृथिव्युद्धारे हिरण्याक्षवधः । वराहकल्पे तु वराहद्वयं वराहप्रादुर्भावः पृथिव्युद्धारश्च । एतत् तृतीयस्कन्धे त्रयोदशाध्याये सप्रमाणं दर्शितमिति व्याख्यालेशः ॥] उद्यत इति । समुद्रं निमज्ज्य रसातलगतां महीम् ऊद्धृत्य दंष्ट्राग्रे निधाय ऊर्द्ध्वगत इत्यर्थः । इति केचित् ॥ १—४ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

एवं प्रतिज्ञयावतारास्तत्कर्म्माणि तत्तत्प्रयोजनानि तद्गुणाँश्चाह ब्रह्मा यत्रेत्यादिना यत्र यदाकाले क्षितितलोद्धरणार्थं समस्त यज्ञात्मिकां क्रौडीं वाराहीं तनुं बिभ्रत्सन्नुद्यतोऽनन्तो परिच्छिन्नस्वरूपभावो भगवान् दंष्ट्रया तं महार्णवे समुद्रस्यान्तः उपागतं समागतं हिरण्याक्ष इति प्रसिद्धमादिदैत्यं दितेः प्रथमं पुत्रं ददार विदारितवान् तत्र दृष्टान्तः वज्रधर इन्द्रः अद्रिमिवेत्यर्थः ॥ १ ॥

सुयज्ञावतारमाह जात इति रुचेः प्रजापतेः सकाशात्तद्भार्य्याया आकूतेः सूनुः सुयज्ञो नामजातः सचस्वभार्य्यायां दक्षिणायां यमाख्यगुणायुक्ताभ्यामान्देवानित्यर्थः यज्ञस्य दक्षिणायां तुषिता द्वादश जज्ञिरे यामा इति समाख्याता इति वचनात् स एवेन्द्रः सन्नार्त्तिंयदा अहरत्तदा पूर्वं सुयज्ञ इत्युक्तोऽप्यनुपश्चान्मातामहेन मनुना हरिरित्युक्तः अनेन देवोत्पादनं लोकत्रयार्त्तिहरणं च कर्मदर्शितं एवं सर्वत्रावतारस्तत्कर्म च ज्ञेयम् ॥ २ ॥

कपिलावतारमाह जज्ञ इति कर्दमप्रजापतेर्गृहे तद्भार्य्यायां देवहूत्यां हेद्विज नारद नवभिः स्त्रीभिर्भगिनीभिः सह जज्ञे जातः सच स्वमात्रे आत्मगतिमात्मज्ञानं मोक्षमार्गं चाउक्तवान् यया आत्मगत्या साद्देवहूतिरात्मशमलं आत्मनो मलिनीकरणमस्मिन्देहे जातं गुणसंगपंकं गुणत्रयसंग एव पंक स्तंविधूय कपिलस्य गतिं कपिलोक्तगतिं प्राप्तवती ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

दत्तात्रेयावतारमाहअत्रेरिति अपत्यं पुत्रमभिकांक्षतोभिकांक्षमाणादत्रेः तुष्टः मया ऽहमेव तुभ्यं दत्त इति यद्यत आह ततः स भगवान्दत्ता दत्त इति जातः स्वभक्तेभ्यो योगैश्वर्यदातृत्वं तच्चरितं दर्शयति यस्य पादपंकजयोः परागस्तेन पवित्रिताः देहा येषां ते हैहयाद्याः सह कार्तवीर्यार्जुनप्रभृतयः यद्यतः दत्तात्रेयादुभयीमैहिकामुष्मिकीं योगर्द्धिं योगैश्वर्यमणिमाद्यष्टैश्वर्यरूपामैहिकीं मुक्तिरूपामामुष्मिकीं च योगर्द्धिमापुःप्रापुः उ प्रसिद्धौ यद्वा यदुर्ययातिपुत्र इति ॥ ४ ॥

———

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

अस्मिन्नध्यायेप्रतिज्ञातान्परमपुरुषस्यावतारांस्तच्चरितानिचवक्ति तत्रप्रथमतोवराहकल्पमनुसृत्यवराहावतारंतत्कर्मचाह यत्रेति अत्र दंष्ट्राशब्देनसुदर्शनगदाद्युपलक्ष्यतेसकलयज्ञमयीं स्रुक्स्रुवादिसर्वयज्ञोपकरणजननीं तदाधारां क्रोडीं क्रोडस्यवराहस्यविद्यमानांतनुंबिभ्रत्ब्रह्मादिभिःस्तुतोऽनन्तोयत्रयदाक्षितितलोद्धरणायउद्यतःसमुद्रेनिमज्जयरसातलगतांमहामुखस्थदंष्ट्राग्रेनिधायोर्ध्वंगतांमवाति तदांतर्महार्णवेतदुपायोपागततमादिदैत्यंहिरण्याक्षवज्रधरइन्द्रोवज्रेणाद्रिंयथातथादंष्ट्र्यादददारगदयाविददारेत्यागाग्रमुष्टिभिः कर्णमूलेहत्वागतासुमकरोदित्यर्थः दाविदारणार्थधातोः येनांतर्महार्णवेभूर्नीतातामिनिवा ॥ १ ॥

सुपूज्योयशोयस्यससुयशाः उत्तमश्लोकाशिवामणिः स्वार्पणबुद्ध्याक्रियमाणाःशोभमानोयज्ञोयस्यससुयज्ञःक्रियाभिमानीयज्ञनामेन्द्रसूनुःशोभनोयस्मात्सइतिवा सनातयशोरुचेःप्रजापतेःसकाशात्यज्ञइतिनाम्नाऽऽकूत्यांरुचिपत्न्यांजातोऽभूत् अथेन्द्रपदस्थआकूतिसूनुर्यज्ञोदक्षिणायांरमावतारायांस्वपत्न्यांस्वायंभुवमन्वंतरेतुषिताख्यानमरानजीजनत् योगाश्रमैरसंप्राप्तेनस्वायंभुवेनमनुनासंसारक्लेशसंहरणाद्धरिरितिज्ञात्वाईशावास्यमित्यादिनाऽनूक्तोवेदवचनेनस्तुतः अयाश्रुतिर्नित्यवाक्यंवेदोऽनुवचनंतथेत्याभिधानं किंचगन्धासुरजनात्कृतपरालोकत्रयस्यमहतीमार्तिमहरदितियस्मात्तस्माद्धरिरितिज्ञात्वाऽनूक्तइतिवा क्रियाभिमानाद्यज्ञोऽसाविन्द्रसूनुःप्रकीर्तितः यज्ञेशत्वात्सर्वयज्ञविष्णुर्यज्ञोहरिःसुतःस्मृतइत्यादिरयंयज्ञोहरिरेवेति ॥ २ ॥

चशब्दआनंतर्यार्थे हेद्विज ! अगस्त्यविष्णुःकर्दमप्रजापतिपत्न्यांनाम्नादेवहूत्यांनवभिर्मरीच्यादिपत्नीभिःसमंसहकपिलनामाजज्ञइत्यन्वयः तच्चरितमाह आत्मगतिमिति यःकपिलःस्वमात्रेआत्मगतितत्त्वसंख्यानरूपामात्मविद्यामूचे सकपिलोऽस्मिन्सात्त्विकप्रकृतिचेतसगतोविद्यमानंगुणसंगपंकंशब्दादिगुणानांसंगात् निरन्तरनिषेवणादुत्पन्नम् विद्याकामकर्माख्यंपंकमात्मशमलंमनःकलमषसांख्यशास्त्रश्रवणजातज्ञानवारिणाविधूयप्रक्षाल्यस्वगतिदत्त्वास्वलोकंपपेदेइत्यन्वयः ॥ ३ ॥

हरिणास्वयमपत्यमभिकांक्षत इच्छतोऽत्रेर्मुनेस्तपसातुष्टोभगवांस्तपसाप्रसन्नेनमयाऽहंतवपुत्रत्वेनदत्तइत्याहेतियस्मात्सहरिरत्रेरनसूयायामवतीर्णोनाम्नादत्तइतिप्रसिद्धोऽभूत् यस्यदत्तस्यपादपंकजपरागनिषेवयापवित्रदेहा यदु कार्तवीर्यस्यपूर्वजः हैहयःकार्तवीर्यार्जुनःतौआद्यौयेषांतेतथा अमर्त्यविष्णुप्रधानांयोगर्द्धिमणिमादियोगसिद्धिमापुरित्यन्वयःअहमितिप्रयोगेनिश्रुतेः मयत्रोऽपिप्राधान्येप्रयोगदर्शनात् उभयीमितिपाठेइहलोकपरलोकविषयां सगुणनिर्गुणविषयांचेतिव्याख्यानंचनाम्नायज्ञानामितिज्ञातव्यम् ॥ ४ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

करेण कर्णमूलेऽहन्निति वक्ष्यमाणात् प्रथमं करेणाहन् पश्चाद्दंष्ट्रया च ददारेति ज्ञेयम् ॥ १ ॥ १ ॥

जज्ञे चेति । आत्मनो भगवद्रूपस्य गतिं ज्ञानम् । कपिलस्य गतिं तदीयं नित्यावासवैकुण्ठांशविशेषम् ॥ ३ ॥ ४ ॥

———

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

एवमात्मातिरिक्तानामुत्पत्त्यानिर्णयः कृतः आत्मनोऽपि हरेस्तत्र निर्णयो विनिरूप्यते सूक्ष्मध्यानपूर्वमुक्तं तस्यात्र विवृतिः स्फुटा ॥ सप्तमे क्रियते येन तद्धर्मावसक्तता मता: उपासनायां सर्वस्य हरेर्धर्मस्य निर्णयः स्वरूपगुणभेदेन बोधनार्थमिहोच्यते मुख्यस्य फलं त्वत्र निर्णीतं विनिरूप्यते माहात्म्यादत्तदर्गत्र विशिष्टतेनसिद्ध्यति एवंजडजीवयोरुत्पत्त्या निर्णयमुक्त्वाअन्तर्यामिणोऽपि सर्वधर्मसहितस्य सदृश उत्पत्तिरुच्यते तथा सत्यकैकस्य धर्मस्य तादृशमाहात्म्याभगतोविशिष्टस्य परममाहात्म्य सत्त्वात अन्तर्यामिस्वरूपं प्रादेशमात्रं पुरुषं वसन्तमित्यादिपदैर्यन्निरूपितं भगवत्स्वरूपं तस्यात्रपदशोऽवताराउच्यंते तत्र प्रथमं प्रादेशमात्रत्वधर्मस्योत्पत्त्या यद्रूपं तत्प्रथममाह यत्रोद्यत इति ब्रह्मणोहि भूम्युद्धारे काचिच्चिंतोत्पन्ना कथमेतां समुद्धरेयम् इति तदा भगवद्ध्यानादन्तर्यामी भगवान् यः प्रादेशमात्रः स आविर्भूतः स प्रादेशमात्रोऽपिनासापुटनिर्गमनार्थमंगुष्ठशिरोमात्रोभूत्वा पश्चात् स्थूलोजात इति प्रादेशमात्रत्वं स्थानमापेक्ष्यं नतु स्वाभाविकमिति व्याख्यातं यत्रैव स्थितो भगवाननन्तो देशकालाद्यपरिच्छिन्नः क्षितितलोद्धरणायोद्यतः यदेवभगवानिति विचारितवान् भूमिमुद्धरिष्यामीति तदैवरूपं बिभ्रत् नहि तस्य रूपग्रहणे देशकालावस्थाद्यपेक्षायतोऽतःकरणं एवब्रह्मणः स्थित्वा भूम्युद्धारे स्वयैवतत्रैवरूपेगृहीतवान् अतोऽन्तर्यामिणो रूपग्रहणेनकाद्यपेक्षेति सूचनार्थं प्रथममेव वराहावतार उक्तः यत्रैवोद्यत स्तत्रैव बिभ्रत् धृतवान् इति यावत्क्षितितलस्योद्धरणं तत्पदेन कृत्रिमा भूमिरुक्ता सत्या च पूर्वहि ब्रह्मपुष्करपर्णस्थितो वराहरूपं कृत्वा कांस्मृत्तिकां तत उद्धृत्य पुष्करपर्णे प्रथनं कृतवान् सापृथिवीपुनर्निमग्ना तदा तदुद्धारार्थमुद्यतस्तदेवरूपंधृतवान् सोऽपश्यत्पुष्करपर्णं तिष्ठत्सोऽमन्यत अस्ति वैतत् यस्मिन्निदम् अधितिष्ठतीति वराहोरूपं कृत्वापन्यमज्जत्सपृथिवीमध आर्छत् तस्या उपहत्योदमज्जत्तत्पुष्करपर्णेऽप्रथयत् तत्पृथिव्यैपृथिवीत्वमिति श्रुतेः अतोभगवतापि क्रोडसंबंधिनी वराहसंबंधिनी तनुः कृता जलात्पदार्थोद्धरणे तस्यैव सामर्थ्यात् किंच सकलयज्ञमयीमिति यज्ञो हि मृगः स वनगोचरः स्रुगादिपदार्थानां तदंगरूपतुल्यत्वात् मृगत्वेपि वराहत्वं मन्युशब्दवाच्यत्वाच्च यतः शतमन्युरिन्द्रः अत्रापि यज्ञो वा एष मन्युः यद्वराह इति श्रुतेः वराहस्य मन्युत्वात्सकलयज्ञमयीतनुः सा भवति यथेयं तनुः सकलयज्ञमयी तथाऽत्र वक्ष्यते अत्ररूपग्रहणेनैव तत्कार्यस्योक्तत्वात् कार्यान्तरमस्तीति तस्य निरूपकमाह यत्रेति त्रयीद्विषोऽहंतव्याः भूमिश्च तैरेवतत्रनीता असुरा वा इदमग्रे पृथिवी पर्यात्तिकीषन्निति श्रुतेः अतस्तद्वधे कर्तव्ये मुख्ये कार्यसंप्रत्यय इतिन्यायेनादौ दैत्यवधं प्राप्तं मादिदैत्यं तं प्रसिद्धं ददार विदीर्णं

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

कृतवान् तस्य विदारणो हेतुरूपो दृष्टांतः अद्रिमिव वज्रधर इति यथापर्वताः पक्षैरुड्डीयमानाः सर्वामेव पृथिवीं नाशयंति तत्प्रतिपक्षतयेंद्रेण तेऽच्छिन्नपक्षाः कृताः तथा भगवता हिरण्याक्षोपि भूम्य निष्कर्त्ता हत इत्यर्थः तस्य च हननं समुद्र एव तदाह अंतर्महार्णव इति आगत मात्रत्वं वाच्यत्ययेति तस्य न मुक्तिः यमस्याइंष्ट्रायाः यद्यप्रं करेण हतवानित्यादि ॥ १ ॥

जातोरुचेरिति भगवतो हि यज्ञस्य ध्यान रूपकर्माधिष्ठानमेकत्र नामचैकत्र तत्ररूपं वराहे नामयज्ञवराहनारायणो स हि पुरुषरूप भगवान् पुरुषरूपाणि स्वरुच्या कृतवानिति रुचिनाम्नो ब्रह्मपुत्राज्जातस्तस्य भगवद्वतारत्वं नियामकं रूपमाह अजनयत् सुयमानिति अस्यां हि जातः कियताकालेनभार्ययासंबद्धः पुत्रान्जनयामसहिदक्षिणायाभार्यया सहित एवजातःसुयमान् देवां स्तन्मन्वंतराधिकारिणःअजनयत् सुयज्ञ इति नामयस्य शोभनायज्ञा यस्मात् वराहो हि यज्ञरूपः अयं देवतारूपः आकूतिरिति मनोर्ज्येष्ठकन्या आकूतिर्वाह्यःप्रयत्नः यज्ञो हि तान्यवाभिव्यजंते अमरानथदक्षिणायामिति पूर्वयज्ञभुजोदेवान् सृष्ट्वा पुनरधिकारिणोपि देवान्सृष्टवानित्यर्थः शब्दाद्गम्यते अमरान् देवान् सृष्टवान् स्वत एव अथदक्षिणायां बाह्यान् देवानित्यर्थः अवतारस्य प्रयोजनमाह लोकत्रयस्येति महती आर्तिः वृष्टियज्ञकर्माभावेन तन्नियसंपादनेन अहरत् दैत्यापद्रवेण चातद्धननेन तस्मिन्मन्वंतरे इंद्राधिकारिणोन्यस्याभावात् स्वयमेव इंद्रो जात इत्याह स्वायंभुवेनेति स हि स्वायंभुवमनोः पुत्रिका पुत्रः एको हि ब्राह्मणरूपः क्षत्रियरूपोऽपि जातः नाहिभगवद्वतारव्यतिरेकेण द्वयं नभवतिकश्चित् अतएव स्वायंभुवेन ब्रह्मपुत्रेणतस्मातामहेन मनुना पूर्वं यज्ञ इत्युक्तोऽप्यनुपश्चाद्धरिरितीन्द्र इत्युक्तः नह्येकोऽधिकारद्वयं कर्तुंशक्तः तस्माच्च शब्दप्रयोगाद्धरिशब्दप्रयोगाच्च पुरुषद्वयरूपो भगवान्निरूपितः अलौकिको हियज्ञः सर्वलोकात्मको हरिरिति ॥ २ ॥

वसंतामिति भगवद्ध्याने भगवांद्वशेषणामुक्तं तस्य स्वरूपं निर्द्धार्यते केवलवासलक्षणो नहिकश्चिदपिकिंचिदप्यकृत्वा कश्चिदपि स्थातुं शक्नोति नहि कश्चित्क्षणमपीति वाक्यात् अतः केवलस्थित्यर्थं स्वयं तथा स्थितः अन्यान् शिक्षयितुं एकं सांख्यलक्षणं शास्त्रं कृतवांस्तदाह जज्ञेच कर्दमगृह इति केवलस्थितिनिरूपणार्थमाविर्भूतो जातोऽपि यथासर्वंकुर्वन्नपि न करोतीति बोधयिष्यति तथा सर्वत्र जातोऽपि न जात इति ज्ञापनार्थं जज्ञे चेत्युक्तं कर्दमस्य गृहे छायायाःकर्दमोजज्ञ इति ब्रह्मणः छाया तः उत्पन्नोप्यनुत्पन्नप्रायइति तद्गृहे जातस्तथा प्रदर्शनार्थं किंचकर्दमस्य गृहे जलं भवतीत्यपि शुद्धे उत्पत्तिरुक्ता पुष्करपलाशवन्निर्लेपत्वज्ञापनार्थंवा कृधातोः कर्मण्यविच्प्रत्यये कृते गुणे लोपे च कृते करोति भवति कृतिकर्ता भूत्वा यो दमरूपः दमस्त्विंद्रिय संयमः तेन करोति नकरोति चेति तस्य स्वरूपमेवतादृशो जातःसांख्यप्रवर्तको भवति द्विजेति संबोधनं तथात्वाभावाभावदस्याधिक्षेपबोधकं देवहूत्यां मनोर्द्वितीयकन्यायां देवानांहूतिर्यस्यामिति सर्वदेवतामयी सा निरूपिता अनेनातिसौंदर्यं तस्या निरूपितं स्त्रीभिः समंनवभिरिति प्रकृतेर्गुणत्रयाभिमानिन्यो देवताः कर्तृनिमित्तं सहैवानीताः स्वयमकर्ता सांकर्यं इति तासां भगवदन्यस्य च व्याप नाप्तापत्रयंसंबध्यते,स एव कर्त्ता ननु सर्वथा असंबद्ध इति सांख्यसिद्धांत नियमोद्योतितः अवतारस्य प्रयोजनमाह आत्मगति मित्यादिना यस्य हृदयात्सांख्यशास्त्रमुत्पद्यते स एव हि तत्र मुख्योऽधिकारी स्वोप्पादकत्वबुद्धिनिवृत्त्याचात्मतत्त्वरूपं सांख्यं मात्रेउक्तवान् आसुरिरपि सांख्यंपठितवान् तथापि तस्य प्रचारकत्वेनोपयोगान्नमुख्याधिकारित्वं इयंतुमुख्याधिकारिणी यतस्तदैव आत्मशमलं गुणसंगपंकलक्षणं तस्मिन्नेव लक्षणे विधूय यथाकपिलस्तथैव जाता अतर्ज्ञोजातिम धेऽपि मातृत्वेऽप्यात्मोपदेशःआत्मनोगतिर्ज्ञानंस्वमात्रइति उपदेशावश्यकता भगवदवतारत्वाच्चजगुरुत्व उपदेशोदोषाय इदंहि ज्ञानमित्यासिद्धं किंत्वंतःकरणदोषान्नभासते अतः अन्तःकरणस्य शमलंमोहजनकपापमस्मिन्नेवोपदेशे वाकपिलस्य गतिसांख्यसिद्धान्तासिद्धानुभवंप्रपेदप्राप्तवती ॥ ३ ॥

एवं भगवतो निश्चलस्थितिरूपं कपिलं निरूप्य चतुर्भुजत्वं भगवतो निरूपयति अत्रेरिति नविद्यते त्रयो यस्य पुत्रत्रयमपत्यभावयंतदभावाद्भगवत्प्रार्थना अथवा भार्या स्वयं च पुत्राभावादत्रित्वं तस्य हि पुत्रत्रयसहितेस्त्रीस्मिन्संपन्ने चतुर्भुजत्वं भवति चतस्रःक्रियाशक्तयो भवंति उत्पत्तिस्थितिप्रलयास्तपश्चेति योगस्तपश्चवंशश्चभगवद्भक्तिरेव च एताःक्रियाःचतस्रो हि भगवद्बाहुषुस्थिताः अथवा दातृदेयत्वमात्मनोबोधयत्यसौ अतः आत्मप्रदः कृष्णश्चतुर्भुज इतीरितः तदाह अपत्यमभिकांक्षतः अपगतिस्याजयति इति अपत्यदुर्गति निवारकं तत्र पुत्रां तेषां चापितृलोकप्रापणे परमार्थतो दुर्गतिरेव भवति अतो भगवानेवं विचारितवान् अयमपत्यं वांछति तस्यापत्य ये मत्सदृशमहमात्मा नाव दास्यामिनात्यगाऽप्यत्यसिंद्धः अभितः कांक्षणं एकेनैवाभ्युदयनिः श्रेयसोभयजनाय अत एव स्वयमेवाह अत्रेस्तुष्टः सन् भगवतो दत्तोमिनिरुक्तिः भवत्पुत्रत्वेन किंत्वात्मप्रदत्वेनेति तदाह दत्तोमयाहमिति मया अहमेवदत्तः एकस्य कर्मकर्तृभावो न भगवद्व्यतिरिक्तस्य भवति धर्मशास्त्रे अदेयत्वे नात्मादयो गणिताः धर्मदासां ज्येष्ठपुत्रो भार्यास्वात्मानथैवच सर्वस्वं गुरुवर्गश्चनैवदेयमितिस्थितिरितिवाक्यात् अतः कथंभगवानात्मानंदत्तवानित्याशंक्याह यद्भगवानिति यस्मादयं भगवान् जीवधर्माएवते भगवान् स्वात्मप्रद अन्यथा भजनीय एव न स्यात् अत एव सदत्तः दत्तनामा जातः दत्तात्रेयमिति पितृनाम्ना सहनाम अवतारप्रयोजनमाह यत्पादपंकजेति पूर्वोक्तपादपंकजपरागसंस्कृतानि भगवदीयदेहजनकानि भूतानि तैः शुद्धो देहो येषां अत एवोभयीं योगर्द्धिं आपुः सद्यो मुक्तिक्रममुक्तिसुखं अणिमादयस्तुकममुक्तावेव ज्ञानभक्तिरूपं वायवगुरुत्वधूतोऽयं हैहयःसहस्रार्जुनः स हि यादवः तेनलौकिकी सिद्धिः सहस्रबाहुरूपा प्राप्ता मोक्षश्च एतेषां पुष्टिमार्गनिष्टत्वाच्चमर्यादाविरोधो दोषाय आदिशब्देन प्रह्लादादयः अतो भगवद्बाहूनां संख्यायामेवं रूपत्वमित्युक्तम् ॥ ४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

अवताराः सप्तमेऽस्मिन् क्रीडायाःसह कर्मभिः ।
विभूतयश्च भक्ताश्च निरूप्यन्ते समासतः ॥ ० ॥

वराहावतारमाह । यत्र क्षितितलस्य भूतलस्य उद्धरणाय उद्यतः गत्वा उद्यमं चक्रे तत्रैवान्तर्महार्णवे उपागतं हिरण्याक्षं दंष्ट्रया करेण कर्णमूलेऽहागिति वक्ष्यमाणात् प्रथमं करेण ततो दंष्ट्रया च ददारेति ज्ञेयम् ॥ १ ॥

तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात् स्वतपसः स चतुःसनोऽभूत् ।
प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ॥ ५ ॥
धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः ।
दृष्ट्वाऽऽत्मनो भगवतो नियमावलोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ॥ ६ ॥
कामं दहन्ति कृतिनो ननु रोषदृष्ट्या रोषं दहन्तमुत ते न दहन्त्यसह्यम् ।
सोऽयं यदन्तरमलं प्रविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ॥ ७ ॥
विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो बालोऽपि सन्नुपगतस्तपसे वनानि ।
तस्मा अदाद्ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवन्ति मुनयो यदुपर्य्यधस्तात् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

यज्ञावतारमाह । रुचेः प्रजापतेः सकाशाज्जातः सन् सुयमान् देवान् अजनयत् । नाम्ना सुयज्ञः आकूतेः स्वायम्भुवपुत्र्याः सूनुः दक्षिणायां स्वभार्य्यायाम् । स एवेन्द्रः सन् यदा आर्त्तिं पीड़ाम् अहरत् तदा पूर्वं सुयज्ञ इत्युक्तोऽपि अनुपश्चात् मातामहेन मनुना हरिरित्युक्तः । एवमग्रेऽपि सर्वत्र जन्मकर्म्मणिभ्यां स्वस्य च नाम यथायोग्यं ज्ञेयम् ॥ २ ॥

कपिलावतारमाह । जज्ञे जातः द्विज हे नारद ! नवभिः स्त्रीभिर्भगिनीभिःसमं सह । यया आत्मगत्या आत्मनः शमलं मलिनीकरणं गुणसङ्गरूपं पङ्कं विधूय अस्मिन् जगति वर्त्तमानो जनः कपिलस्य गतिं त्रिपाद्विभूतिस्थं कपिलवैकुण्ठं प्रपेदे प्राप्तवान् ॥ ३ ॥

दत्तात्रेयावतारमाह । अत्रेरिति चतुर्थ्यर्थे षष्ठी । मया अहमेव तुभ्यं दत्त इति यदाह ततः स नाम्ना दत्तो जातः । योगर्द्धिं योगसम्पत्तिम् । उभयीम् ऐहिकीम् आमुष्मिकीञ्च भुक्तिमुक्तिरूपां वा । तेषाञ्च मध्ये हैहयन्तु प्राप्तयोगर्द्धिकमपि महदपराधत एव हेतोः कुप्यन् श्रीपरशुरामो जघानेति ज्ञेयम् ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

पूर्वाध्यायान्ते लीलावतारान् तुभ्यं वर्णयिष्यामीत्युक्तं तानेवावतारान् तेषां गुणाः कर्माणि प्रयोजनानि चाह श्रीब्रह्मा श्रीनारदंप्रति यत्रेत्यादिना यत्र यस्मिन्काले दंष्ट्रया क्षितितलोद्धरणाय सकलयज्ञमयीं समस्ताध्वराकाराम् क्रौडीं वाराहीं तनुं बिभ्रत्सदनंतोऽपरिमित गुणस्वरूपोभगवान् उद्यतः तदा अंतर्महार्णवे महार्णवमध्ये उपागतं प्राप्तम् तं प्रसिद्धम् आदिदैत्यं हिरण्याख्यम् ददार दारितवान् तत्र दृष्टांतः वज्रधरः अद्रिमिव वराहावतारस्यादिदैत्यं ददारेति कर्मदर्शितं क्षितितलोद्धरणायेति प्रयोजनमुक्तमुपकर्तृत्वलक्षणगुणोऽर्थादुक्तः एवमग्रेऽपि यथा संभवं ज्ञेयम् ॥ १ ॥

यज्ञावतारमाह जात इति रुचेः प्रजापतेः सकाशात् आकूतिसूनुः रुचेर्भार्याया आकूतेः सुतः जातः अथानंतरं स सुयज्ञः स्वपत्न्यां दाक्षिणायाम् सुयमान् अमरान् अजनयत् स एवेंद्रः सन् यदा लोकत्रस्य महती मन्येर्दुर्निवार्यामार्तिमहरत् तदा पूर्वसुयज्ञ इत्युक्तोपि अनुपश्चान्मातामहेन मनुना हरिरित्युक्तः ॥ २ ॥

कपिलावतारमाह जज्ञे इति हेद्विज नारद ! कर्दमस्य प्रजापतेर्गृहे तत्पत्न्यां देवहूत्यां नवभिः स्त्रीभि भगिनीभिः समं सहजज्ञे जातः सचस्वमात्रे आत्मगतिं आत्मनः स्वस्य भगवतः विद्याम् ऊचे उक्तवान् ययात्मगत्या तन्माता आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकम् अस्मिन्नेव जन्मनि विधूय कपिलस्य भगवतो गतिं तद्धामप्राप्तिं प्रपेदे प्राप्तवती ॥ ३ ॥

दत्तात्रेयावतारमाह अत्रेरिति यतस्तदाराधनेन तुष्टः सन्मयाऽहमेवतुभ्यं दत्त इत्याह तस्माद्धेतोः अपत्यमभिकांक्षतः अभिकांक्षमाणात् अत्रेः सकाशात्सभगवान्श्रीदत्त इति जातः स्वचरणार्चितकेभ्यो भुक्तिमुक्तिदानं तच्चरित्रं दर्शयति यस्यपादपंकजयोः परागेण पवित्राः पवित्रिता देहा येषां तेयदुकार्तवीर्यप्रभृतयः योगर्द्धिं ध्यानसिद्धिम् उभयीमैहिकीमामुष्मिकीं च भुक्ति मुक्ति रूपामापुः ॥ ४ ॥

भाषा टीका ।

जब अनन्त भगवान सकल यज्ञ मयी क्रोड तनु (वाराह मूर्ती) को धारण करते जब पृथ्वी तल के उद्धार करने को उद्यत हुए, तब महा समुद्र के मध्य में आगत आदि दैत्य (हिरण्याक्ष) को दंष्ट्रा से विदारण किया । जैसा वज्र धर (इन्द्र) पर्वत को विदीर्ण करता है ॥ १ ॥

रुचि प्रजापति से आकूती में प्रकट सुयज्ञ भगवान नें दक्षिणा (अपनी पत्नी) में सुयम नामक देवगण को उत्पन्न किया । और त्रिलोकी की बड़ी आर्ति को हरा । इसी से स्वायम्भुव मनु नें हरिनाम धरा ॥ २ ॥

हेद्विज! कर्दमजी के गृहमें नौ कन्याओं के साथ देवहूती में उत्पन्न हुए और अपनी माताको आत्मगतिका उपदेश किया जिसमें वह गुण संगके पङ्क समान आत्मशमल को इसी जन्म में दूरकर कपिल की गतिको प्राप्त हुई ॥ ३ ॥

अपत्य की आकांक्षा करते अत्रि ऋषि पर तुष्ट होकर जो भगवान् ने कहा कि "मैंने आत्मा तुमको दिया" इसी से दत्त भगवान का नाम हुआ । जिन दत्तात्रेय के चरण कमल के पराग से पवित्र देह होकर यदु और हैहयादिक राजा उभय लोक की योग सिद्धि को प्राप्त हुए ॥ ४ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

कुमारावतारमाह । मे मया आदौ यत् तपस्तप्तं तस्मात् स्वतपसः मत्तपसो हेतोः स हरिः चतुःसनोऽभूत् । सनत्कुमारः सनकः सनन्दनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य सः । कथम्भूतात् स्वतपसः सनात् अखण्डितात् । यद्वा स्वतपसः सनात् दानात् समर्पणादित्यर्थः । षणु दाने । स च पूर्वकल्पस्य संप्लवे प्रलये विनष्टम् उच्छिन्नसम्प्रदायम् आत्मतत्त्वम् इह अस्मिन् कल्पे सम्यक् जगाद उक्तवान् । सम्यक्त्वं दर्शयति यत् गदितमात्रमेव मुनय आत्मन् आत्मनि मनसि अचक्षत साक्षादपश्यन् ॥ ५ ॥

नरनारायणावतारमाह द्वयेन । धर्म्मस्य पत्न्यां दक्षदुहितरि मूर्त्तिसंज्ञायांनारायणो नर इति मूर्तिद्वयेन जातः । कथम्भूतः स्वः असाधारणः तपःप्रभावोयस्य । तदेवाह अनङ्गस्य पृतना देव्योऽप्सरसः भगवतः सकाशात् आत्मनः स्वप्रतिरूपा उर्वश्याद्याः स्त्रीः दृष्ट्वा तस्य नियमावलोपं व्रतभङ्गं घटितुं घटयितुं साधयितुं न शेकुः । यद्वा आत्मनः स्वस्य यो नियमः तपोनाशनरूपस्तस्य अवलोपं तत्र दृष्ट्वा भगवतः तं घटयितुं न शेकुरिति । एतच्चाख्यानमेकादशेभविष्यति ॥ ६ ॥

यत्र कामविजयी क्रोधोऽपि बिभेति तत्र वराकः कामो न प्रभवतीति किं वक्तव्यमित्याह काममिति । कृतिनः श्रीरुद्रप्रमुखा रोषयुक्तया दृष्ट्या कामं दहन्ति । रोषं स्वात्मानं दहन्तमपि तेऽपि न दहन्ति क्रोधेनाभिभूयन्ते इत्यर्थः ! ननु अहो सोऽयं रोषः यदन्तरं यन्मध्यं प्रविशन्नलं बिभेति । यद्वा यस्यान्तर्मनः । कथम्भूतम् अमलं निर्म्मलं शुद्धसत्त्वात्मकं प्रविशन्निति ॥ ७ ॥

चरित्रेणैव कमप्यवतारं सूचयति । मातुः सपत्न्याः सुरुच्याः उदितानि उक्तानि वाक्यान्येव पत्रिणो बाणाः तैर्विद्धो ध्रुवः राज्ञः उत्तानपदः अन्तिसमीपे । तपसे तपस्तप्तुम् । ध्रुवगतिं ध्रुवपदम् । यत् यां उपरिस्थिताम् अधस्तात् स्थिता दिवि भवा दिव्याः सप्तर्षयः स्तुवन्ति यद्वा उपरि भृग्वादयः अधस्तात् सप्तर्षय इति ॥ ८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपिनाख्यटिप्पणी ।

सनात् अखण्डितादिति । अत्र सनात् इत्यव्ययम् ॥ ५—७ ॥

कमप्यवतारमिति । यो ध्रुवाय प्रसन्नः सन् ध्रुवपदम् अदात् तम् अवतारमित्यर्थः । ध्रुवप्रियोऽयं वासुदेवावतारः पृश्निगर्भ इति ज्ञेयम् यदुक्तं श्रीमद्रूपगोस्वामिचरणैः श्रीभागवतामृते—स्वायंभुवेऽवतारोक्तेर्नाम्नश्चाकथनादिह । यज्ञादीनाञ्च तत्रोक्त्या पारिशेष्यप्रमाणतः । प्रसिद्ध्या पृश्निगर्भेति तदाख्याऽस्य निगद्यते ॥ इति ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

कुमारावतारमाह तप्तमिति नानाविधलोकान् स्रष्टुमिच्छया मे मया यत्तपस्तप्तं तस्मात्सुतपसः महत्तपसो हेतोः स हरिरादौ सनात् दीर्घ आर्षः सनन्नामकः कथं भूतः चतु सनः चतुर्थः सनः सनको यस्य स चतुः सनः अभूत्सनातनसनंदनौ द्वितीयतृतीयौ अभूतामित्यभिप्रायः चतुः सनः चत्वारः सनशब्दानामसु यस्य स चतुः सनः अस्मिन्पक्षे आदौ कल्पादौ सनादिति तपोविशेषणमखंडितादित्यर्थः यद्वा तपस इति पष्ठ्यंतं तपसः सनात्समर्पणादित्यर्थः षणुदाने स च जातो हरिः पूर्वकल्पसंप्लवे प्रलये विनष्टं विच्छिन्नसंप्रदायं आत्मतत्वं इहास्मिन्कल्पे सम्यग्जगाद उक्तवान् सम्यक्त्वं दर्शयति यद्गदितमात्रमेव मुनयः आत्मन्यात्मानं मनसि साक्षादपश्यन् यद्वा यद्गदितमेवात्मनि तत्वं मुनयः अचक्षत अन्येभ्योऽप्युक्तवंत इत्यर्थः॥ ५ ॥

नरनारायणावतारमाह धर्मस्येति धर्मस्य पत्न्यां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन सहरिरभवज्जातः कथंभूतः स्व असाधारणस्तपः प्रभावो यस्य सः यद्वा स्वविषयकं यत्तपस्तस्यप्रभावो यस्य स उपायांतराभावात् प्रभावमेवाह अनंगपृतना मन्मथसेना देव्यः अप्सरसः आत्मनः परमात्मनो भगवतः अनियमावलोपं नियमालोपाभावं दृष्ट्वा घटितुं स्ववशीकर्तुं नशक्नुवंत्यः ॥ ६ ॥

किंच काममिति रोषदृष्ट्याकामं दहंति ते रोषं स्वात्मानं दहन्तमसह्यं सोढुमशक्यं नदहंति नाभिभवंति किंतु तेनैवाभिभूयंते इत्यर्थः सोयं रोषः यदंतरं यस्य भगवतो मनः प्रतिप्रविशन्नलं बिभेति प्रवेष्टुमधिकं बिभेतीत्यर्थः अस्य मनः कामः मन्मथः कथं नुश्रयेत न कथमपीत्यर्थः कामजेत्राप्यजेयं रोषं जितवतो मनः कामः कथं श्रयेदित्यर्थः ॥ ७ ॥

चरित्रेणैव कमप्यवतारं सूचयति विद्ध इति राज्ञ उत्तानपद अंतिअंतिके मातुः सपत्न्याः सुरुचेः उदितान्येव वाक्यान्येव पत्रिणो बाणास्तैर्विद्धः ताडितः बालोऽपि सन् तपसे तपश्चर्तुं वनानि यो ध्रुवो गतः तस्मै गतवते ध्रुवाय गृणते स्तुवते प्रसन्नो हरिः ध्रुवगतिं स्थायिपदम् अदात् सोऽप्येक अवतार इत्यर्थः ध्रुवगतिं विशिनष्टि यदुपरि यद्ध्रुवगतेरुपरि अधः अधस्ताच्च दिव्या मुनयः सप्तर्षिप्रभृतयः स्तुवंति ध्रुवगतिप्रभावं प्रशंसंतीत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

आदाविस्युभयत्रसंबध्यते अत्रादौमयाविविधलोकासिसृक्षयातपस्तप्तंकृतं तदाममतपतःतपःकुर्वतः * सुतपसःसर्वपूज्यतपसःसनादादौसद्योत्पत्तेःपूर्वनोऽस्माकमर्थेसविष्णुनामाभूदित्यन्वयः अवतीर्यचयत्तत्त्वंमुनय आत्मन्नात्मानिहृदयपद्मकर्णिकायामचक्षत प्राक्कल्पस्यसंप्लवेजलीभावेनप्रलयेनइहजगतिविनष्टंतिरोहितमात्मतत्त्वंसम्यग्जगादममोपदिदेशेत्यन्वयः ब्रह्मणस्तपतः पूर्वविष्णुर्जातउरुक्रमइत्यादिवाक्यंचेममर्थमनुवदति सनात्संभाजनात्समाराधनलक्षणात्सुतपसःसाधनात्ज्ञानभक्तिरूपात्कारणादितियावत्सआराधितोदेवः चतुःसनोऽभूत् सनकःसनंदनःसनातनःसनत्कुमारइतिचतुर्मूर्तिरभवदित्यादिपूर्वोक्तंतु * तर्यमिति अस्याऽवतारस्यस्यप्रयोजनंजगद्रक्षणप्रातमतत्वयचनंप्रासंगिकमितिज्ञातव्यं तदभिप्रायेणोक्तमाचार्यैःसर्वज्ञैः यच्चपातिसदालोकानाजतोजयतांवरइत्यादः ॥ ५ ॥

धर्मस्यसकाशात् दक्षदुहितरिदक्षपु * त्र्यांस्वमूर्त्यासविदानंदलक्षणास्वदेहेननारायणोनरइतिनाम्ना * ऽजनि कीदृशःस्वतपसःस्वज्ञानस्यप्रभावोमाहात्म्यंयस्मिन्सस्वतपःप्रभावः प्रतापमाहात्म्ययोःप्रभावःस्यादित्यतोलोकशिक्षार्थंस्वतपसःप्रभावःप्रतापस्तानुया अत्रेदतात्पर्य

---

१ सतः २ नाम्नायज्ञानामिति ३ इदमुपलक्षणहरिःकृष्णइतिच ।. तथाचचत्वाराधर्मतनयाइत्यर्थः ४ मूर्तिसंज्ञायाम

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

नारायणो हरिः कृष्ण इति त्रयो विष्णोः साक्षादवतारा नरनामा ऽयं तर्यामितया नरनामाऽवतीर्ण इति तत्र लोकशिक्षार्थं तपः कुर्वाणो बदर्यां वसंतौ सहैवातिष्ठतामिति । नारायणो नर इत्येताधेवोक्तावितिज्ञातव्यं नरो नारायणश्चैव हरिः कृष्णस्तथैव चेत्यादि वचनात् । स्वतपःप्रभावमित्युक्तं विवृणोति दृष्टात्मन इति दृष्टात्मनो नित्यमपरोक्षीभूत निजस्वरूपस्य नरनारायणात्मनो भगवतो नियमाविलोपं तपसा व्रतभंगं अनंगस्य पृतनाः सेनास्थानीया देवस्त्रियो घटितुं कर्तुं न शेकुरित्यन्वयः किंच स्वतोऽप्यधिकसौंदर्यमंदिराणां भगवता तत्क्षणसृष्टानां स्त्रीणां दर्शनाल्लज्जितास्ततो न्यवर्ततेत्यस्मिन्नर्थे तुशब्दः यद्यप्यनंगपृतनास्तथापीत्यस्मिन्नर्थे वा ॥ ६ ॥

क्रोधवत एवमनसि कामः पदं लभते हरेस्तु स एव पदं न प्राप्नोति नितरां कामो न स्तत्साधनं न कार्यक्षमम भूदित्याह कामामिति कृतिनो महात्मानो शंकरादयो रोषाविष्टदृष्ट्या कामं दहंति न न तु र्धामसह्योऽयमर्थः उतशब्दोऽप्यर्थे तेऽपि दहंतं रोषं न दहंति तत्र हेतुगर्भविशेषणमाह असह्यमिति सोऽयं रोषो मधुसूदने अंतः मनो निविशन्निविष्टुमिच्छन् अलं विभेति अत्र हेतुरमलमिति वा क्रोधनिवेशनसहकारिरागद्वेषलक्षणमलविधुरत्वादित्यर्थः कामोऽस्य हरेर्मनः कथं नु श्रयेत न कथमपि सहकारिणः क्रोधस्य प्रवेशसंदेहादित्यर्थः कंचनावसरमासाद्यापीत्यस्मिन्नर्थे पुनरिति ॥ ७ ॥

यद्युत्तानपादनाम्नो राज्ञो तिकेसुनीत्याः सपत्न्या उदितपात्रैर्भर्वाग्वाणैर्विद्धः सन्बालोऽपि पुरादुपगतो निर्गतस्तपसे वनाया ऽगमदिति शेषः तत्र नारदोपदिष्टविधिना तपश्चरते प्रत्यक्षं दृष्टः गृणतेस्तुवते तस्मै ध्रुवाय तपसा प्रसन्नो हरिर्वासुदेवनामा विग्रहविशेषं गृहीत्वा ध्रुवगतिं नित्यस्थानमदादित्यन्वयः वैकुंठाद्यन्यतममदादिति किमित्याशंक्य तद्विशिनष्टि दिव्या इति यदुपर्यधस्तात् यस्या ध्रुवगतेरुपर्यधस्तात्स्थिता अंबरचारिणो मुनयो यां स्तुवंति तामिति शेषः अवतारो महाविष्णोर्वासुदेव इतीरित इत्यादेः किंनामायमवतार इति शंका निरस्तेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

सनादिति तन्नामा भगवानित्यर्थः, सनात् सनातनतम इति सहस्रनामस्तोत्रात् ॥ ५ ॥ ६ ॥ ७ ॥

विद्ध इति । श्रीवासुदेव एवायं ध्रुवार्थमवतीर्णः यः खलु ध्रुवलोकाधिष्ठातेति गम्यते । तस्य द्वादशाक्षरविद्योपासकत्वात् तल्लोकप्राप्तेश्च ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

कंजरथांगशंखगदापद्ममित्युक्तं तस्यार्थशेषणस्य स्वरूपमाह तत्तमिति एते हि सनकादयश्चत्वारः भगवदायुधरूपास्ते हि यद्यपि तत्स्वरूपाः मुख्यत्वं गदा अपां तत्त्वं शंखः तेजस्तत्त्वं सुदर्शनं कार्यं तत्त्वं पद्ममिति तेजोवन्नानि प्राणाश्चेत्युक्तं भवति तेषां स्वरूपेणैव तत्त्वता कार्यत्वेन यद्रूपं तद्विहोच्यते न केवलं तत्त्वमात्रेण कार्यावेशराहितेन आयुधभावः तं हि येन भावः संपद्यते तं हि येन तथा भवंति तदुच्यते तपो मे हृदयं साक्षादिति वाक्यात् भगवतः साधनं ततं एवं तद्धि क्रियया व्याप्तमिति हस्तैः पद्मादिधारणात्तपसोऽपि वैलक्षण्यमाह मया पूर्वं चतुर्विधभूतनिकायसृष्ट्यर्थं तप्तं तपः आदौ सृष्टेः पूर्वं ततोऽपि न किंचिदुक्तं य दात दात तपो भगवते दत्तं समर्पितं तस्य तपसः सनात् दानात् षणु दाने अतो दानहेतो भगवानेव चतुः सनोजातः सनकः सनंदनः सनातनः सनत्कुमाररूपेण आवेशपक्षेऽप्येतदुपपद्यते मूर्तिचतुष्टयं एक एव भगवानाविष्ट इति अवतारप्रयोजनमाह प्राक्कल्पसंप्लवविनष्टमिति यत्र सांख्यं च योगश्च ज्ञानं त्वत्र निरूप्यते पूर्वकल्पे आत्मज्ञानस्य संप्लवः नाशो जातः तत्पुनरिह अस्मिन्कल्पे सम्यग्जगाद अनुभवपर्यंतं यथा भवति येनैव सनकाद्युक्तेन मुनयः मननशीलाः श्रौतप्रकारेण मननमपि कुर्वाणाः न तेन मार्गेण आत्मानं दृष्टवंतः किंतु सनकोक्तमार्गेण यस्मादात्मानमेवाचक्षत दृष्टवंतः आत्मन्निति द्वितीयाया लोपः सप्तम्या वा तदा स्वात्मनि दृष्टवंत इत्यर्थः साधारणाः रक्तिमार्गाधिकारिणः ये ये हता चक्रधरेण राजन्निति न्यायेन अनेन मार्गेण मुक्ता भवंतीत्युक्तं भवति ते हि पूर्वमपि भगवद्वैकुंठस्थितियोग्याः तस्मात्प्रच्युता इति पुनस्तत्र गमनं अनेन स्मरणार्थोऽपि कथितः ॥ ५ ॥

प्रसन्नवक्त्रमिति भगवद्धर्मं उत्पत्त्या निरूपयति धर्मस्येति द्वाभ्यां प्रसादवक्तृधर्मभेदात् कीदृशो हि भगवत्प्रसादः कीदृशं वक्त्रमिति तदुभयमत्र ज्ञातं भविष्यति भगवतः प्रसादो मुखं च धर्म एव प्रकटीभवति तत्रापि पितुरंशः प्रसादः यशोंशो मुखं तदाह धर्मस्य दक्षदुहितरि मूर्तिनाम्न्यां अवतीर्ण इति दक्षो हि यज्ञे तत्र क्रिया क्रिया शक्तिः अद्भ्योऽतिरिक्ताः साक्षान्मूर्तिभूता सा मूर्तिः तत्र तस्य रूपद्वयमाह नारायणो नर इति आपो नारा इति व्युत्पत्त्या भगवन्मुखं जले प्रतिष्ठितं नर इति सूत्रात्मा जीवः जनयिता एकस्यैव नामद्वयं जलाधारत्वेन जलजनकत्वेन च मुखं च तद्विधे अतो जलाधारत्वेन सर्वरसग्रहणं सूत्रत्वेन च वाग्व्यवहारः एवमुभयात्मकं वक्त्रं नरनारायणेन प्रकटं जातं वक्त्रस्यैवं प्रकटने यो गुणस्तमाह स्वतपः प्रभाव इति तपो हि वक्त्रस्यैव तप इति "तपो नानशनात्पर"मिति श्रुतेः अतोऽवयवांतरेण कृतं तपः नोत्कृष्टं भवति वाक्कृतं अनशन कृतं तपः तस्य वक्त्रस्य अनुभवो यत्र एको गुणस्तपः द्वितीयस्तत् संसर्गी अनुभावः सच सहजदोषाभाव उक्तः तपसो हि सहभावी औत्पत्तिको दोषः क्रोधः तस्यात्यन्ताभावसाहित्यं तपसोऽनुभावः सकामत्वं वाह्यदोषः तदभावस्तु गुण एव न त्वनुभावः तत्र हि प्रसादः दोषकर्तृषु वरदानं तदेकादशस्कंधे विस्तरेण वक्ष्यते इह दोषाभावमात्रमाह तः प्रथमं वाह्यदोषाभावं दर्शयति दृष्टात्मन इति अयं हि भगवानात्मान हि स्वस्य स्वदर्शने कामो भवति अतः आत्मन एव भगवतः सकाशात नियमस्य स्वसहजधर्मस्य अवलोपं दृष्ट्वा विपरीततया नाशो वलोपः आत्मनः सकाशादेव सहजबंधकान्यपि कर्माणि मोक्षप्रदानि भवंति तथाप्येताप्सरसो भगवत्सान्निध्या तत्स्वात्मन्येव च विदोषाः सात्त्विकाः कुब्जाश्च जाताः अत एनेषां संकल्पो नष्टः तत्त्वेन अप्रयोजकाः किंतु देव्ये तद्देवतारूपा अपि एता व्रतत्यागिनो जाताः दूरे एतासाऽमुयासनव्रतसिद्धः एतासां क्रियाशक्तिमाह अनंगपृतना इति तुशब्देन स्त्रियो बलात्प्रयोजका इति तादृशा अपि संबंधमात्रमपि प्रातुं न शेकुः स्त्रीकृता भगवति न कापि क्षोभो जात इत्यर्थः ॥ ६ ॥

एवं वाह्यदोषं परिहृत्य आंतरिकं दोषं कैमुतिकन्यायेन निराकरोति कामं दहंतीति एतास्त्रियो देहं पातयामः कार्यं वा साधयाम इति समागता आद्ये अनंगपृतनात्वं संत्स्यति द्वितीये प्रतिनात्वमिति तदुभयमपि न जातं तत्राश्चर्ये जाते ब्रह्मा स्वयं समाधत्ते मया एवं श्रायते कामादीनां जेतारः ततोऽन्ये किमु कामादय एव तत्र यथा यथा तेषु कनिष्ठाः तथा तथा पूर्वजेतारः अत एव स्वं कामं दहंति तेरोषदृष्ट्या दहंतिरोषेणैव तु कामो दह्यते ननु तैः कृतिन इति साभिप्रायं वचनं कामस्य स्थानमदत्वा क्रोधस्य हि स्थानं दत्तवंतः न त्विति संकोचनं

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

संमत्युर्थ रोषसहितया दृष्ट्या कामस्तु हृदयं व्याप्नोति क्रोधस्तु ज्ञानं अतो ज्ञाननाशे महान् क्षतिरिति तेषां कृतिश्च उभयोः परं नाशकत्वे तुल्येऽपि क्रोधस्त्वात्मानं दहति अतः दाहकं न दहति अदाहकं दहतीति अतिभ्रान्तास्तेदाहोऽपि न स्वल्पः सकामाद्विजयो क्रोधो यस्य अंतरं निविशन् बिभेति अहमपि कामवद्दग्धशरीरो भविष्यामीति तत्रकामः कथं तस्य हृदयं श्रयते क्रोधस्तु मलयुक्ते प्रविशति भगवतस्त्वंतरमलं अत एव निविशन् बिभेति सहिमलक्षयामपि मलं नाशयिष्यतीति अनेन कामक्रोधवन्तःपदार्थाः न भगवन्मुखं प्रविशन्ति तत्प्रसादहेतवो भवन्तीति निरूपितं किंबहुना यावानर्थो नरनारायणयोः तावान्मुखप्रसादयोरिति ज्ञातव्यम् ॥ ७ ॥

एवं प्रसन्नवक्त्रं विनिरूप्य नलिनायतेक्षणं निरूपयति विद्धइति नलिनवदायतं ईक्षणं यस्येति दृष्टांतदीर्घत्वं नेत्रे च निरूपणीये तत्र वैकुंठस्थितो भगवान् नेत्रं तस्य दीर्घताज्योतिश्चक्रं सहि तत्र स्थितः सर्वान् पश्यति तस्य हि नलिनवदायतत्वं विचारणीयं तद्धिविकसितमेवावृतं भवति तत्र विकासस्तपस इव तथा जलस्थितमेव कमलं सूर्येण विकाशमेति तथा समाधिकारिणा यत्नेन स्थितं भगवन्नेत्रं विकाशयति तदा हि सपश्यतीत्यर्थः तत्रापि भगवदिच्छया तथाभूतं सकाममेव बहिःपश्यति कामोपि क्लेशकृतश्चेत् तथापि जगत्प्रकाशकं चेत्तदैवं रूपतेति ध्रुवकथानिरूप्यते विद्धः सपत्न्युदितपत्रिभिरिति असह्य वेदनानिरूपिता मातुः सपत्नीतया राज्ञः समीपे वाग्लक्षणाबाणाः प्रयुक्ताः नवत्सनृपतेर्धिष्ण्यमासितुमर्हसीत्यादयः तैश्चायंविषमर्मभेदिनो हि बाणाविध्यंति यद्विपराश्च अप्रतीकाराः वदीयविध्यंतीति बोधितं अनेन विवेकादिना तस्य अप्रतीकाराभाव उक्तः वाह्योपाया भावमाह राज्ञः अंतीति अतः परंराजापिनवक्तव्यः बंधस्यते नैव धृष्टत्वात् अनेन दीनत्वमुक्तं इदं हि भगवद्दर्शने बीजं द्वितीयं बीजमाह बाल इति तपसे तपः करणार्थंवनान्युपगतं इत्यधिकारः वनानीति बहुवचनं फलसिद्ध्यर्थं सर्वेष्वेववनेषु तपः करिष्यामीति दृढप्रीतिज्ञापनार्थं तस्माभदादिति हृष्टिविकाशः ध्रुवगतिमितिफलस्य निश्चलता गृणाते प्रसन्न इति करणानामंतः प्रवेशनं सहि तपसा न संतुष्टः किंतु बालःस्तोत्रं करोतीति अन्यथा निवर्तयिष्यप्रतिया स्वधर्मेति वचनमनुपपन्नं स्यात् नहि भगवानन्यथा निवर्त्तयितुं न शक्नोतीति किंतु शक्त इव स्तोत्रेण संतुष्टः बालायध्रुवगतिं दत्तवान् ननु स्तोत्रस्य ध्रुवगतेश्च कः संबंधः तपस्तुभोगफलत्वात् तथा भवितुमप्यर्हतीत्याशंक्याह दिव्यास्तुवंतीति स हि निंदावचनेन खिन्नः तथाकृतवानिति सर्वदा स्तोत्रस्थानं दत्तवान् यत्स्थानं दिव्याः सप्तर्षयोपि उपरिस्थितं अधस्थिता संस्तुवंति यदिदं स्थानं प्रसादेन न प्राप्तंस्यात् तपसा निर्बंधेन वा प्राप्तं स्यात् तदा भगवदीयैस्तोत्रं न क्रियेत तत्रापि मुनयः स्तुवंति तत्राप्युपरिस्थितं स्वयंचावस्थिताः ईर्ष्यामेव कुर्युर्योग्यप्रसादकारण एव ध्रुवस्य पश्चात्तपोपि एवं नलिनायतेक्षणं निरूप्य कदंबकिंजल्कपिशंगवाससं निरूपयति अत्रहि पीतांबरं कदंबतुल्यता च निरूपणीया कदंबस्य वर्षाकाले हि किंजल्का भवंति वर्षा च भूमिसंताप यथा संतप्ते वृष्टिर्भवति यथावृष्टिः सर्वसंतापहारिका एवं पृथुकृतो देहः सर्वसंतापहारकः पृथुश्छंदो मयः सर्ववेदार्थप्रतिपादकः पीतांबररूपः राजाहि स्वभावतः भूमेराच्छादको भवति तदाज्ञया भूमिर्गुप्ता तिष्ठति किंत्वयं यथास्थितभूमिगोप्ता न भवतीति भूमेर्विच्छायकरणात्पतित्वं रक्षणं हि प्राप्ते दुःखे ॥ ८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

कुमारावतारमाह । मे मया आदौ यत् तपस्तप्तं तस्मात् स्वतपसो हेतोः सहरिः चतुःसनोऽभूत् । सनकसनन्दनसनातनसनत्कुमारा इति चत्वारः सनशब्दा नाम्नि यस्य सः । अतएव सनादिति च नाम, सनं सनशब्दम् अतति व्याप्नोतीति सः, सनात् सनातनतम इति सहस्रनामस्तोत्रात् इह अस्मिन् कल्पे आत्मतत्त्वं सम्यक् जगाद यत् गदितमात्रमेव मुनयः आत्मन् स्वमनसि अचक्षत साक्षादपश्यन् । ५ ।

नरनारायणावतारमाह । धर्म्मस्य पत्न्यां मूर्त्यां नारायणो नर इति स्वरूपद्वयेन जातः । स्वः असाधारणः तपःप्रभावो यस्य सः । अनङ्गस्य पृतना देव्यः अप्सरसः तपोभङ्गार्थमागता आत्मन इति जात्येकत्वम् आत्मभ्यो हेतुभ्यो नियमावलोपं तपोभङ्गाभावं दृष्ट्वा घटितुं न शेकुः शापभयस्तब्धाबभूवुरित्यर्थः भागुरिमतं अवेत्यस्याकारलोपे नञा अवलोप इति सिद्धम् । यद्वा भगवतः सकाशात् आत्मनः स्वप्रतिरूपा उर्व्वश्याद्या स्त्रीर्नियमावलोपं व्रतभङ्गाभावञ्च दृष्ट्वा घटितुं न शेकुर्विस्मयेन स्तब्धा बभूवुरित्यर्थः ॥ ६ ॥

भगवतः कामविजयोऽयं नाद्भुतः यतस्तत्र क्रोधमकुर्व्वाणः क्रोधजयमप्यन्यैर्दुष्करं कृतवानित्याह काममिति । कृतिनः श्रीरुद्र प्रमुखा रोषयुक्तया दृष्ट्या कामं दहन्ति रोषं त्वात्मानं दहन्तमपि न दहन्ति रोषेणाभिभूयन्ते इत्यर्थः । ननु अहो सोऽयं रोषः यदन्तरं यन्मध्यं प्रविशन्नलं बिभेति । यद्वा यस्यान्तः मनः । कथम्भूतम् अमलम् ॥ ७ ॥

पृश्निगर्भावतारमाह विद्ध इति । मातुः सपत्न्या सुरुचेः उदितानि वाक्यान्येव पत्रिणो बाणास्तैर्विद्धो ध्रुवः राज्ञः उत्तानपदोऽन्ति समीपे । तपसे तपस्तप्तुम् । गृणते स्तुवते । ध्रुवपदं नित्यस्थलविशेषमित्यर्थः । यत् याम् उपरिस्थिताम् अधस्तात् स्थिता दिवि भवाः दिव्याः सप्तर्षयः स्तुवन्ति । यद्वा उपरिस्थिता भृग्वादयः अधस्तात् सप्तर्षयः । वासुदेवावतारोऽयं पृश्निगर्भोऽज्ञेयः । त्वमेव पूर्व्वसर्गेऽभूः पृश्निः स्वायम्भुवे सति । तदायं सुतपा नामप्रजापतिरकल्मषः अहं सुतो वामभवं पृश्निगर्भ इति स्मृतः । इति दशमे कर्म्माश्रवणात् अत्र तुजन्माश्रवणात् जन्मकर्म्मणोः परस्परसापेक्षत्वादेकत्र सङ्गतेरौचित्यात् । यदुक्तं श्रीभागवतामृते—अस्यात्र चरितानुक्त्या नामानुक्त्या च तत्र वै । परस्परमपेक्षित्वाद्युक्ता चैकत्र सङ्गतिः । इति । न चात्र ध्रुवार्थे वैकुण्ठान्नारायण एवागतः तेन पृथगेवायं ध्रुवप्रियोऽवतार इति वाच्यम् । यदुक्तं तत्रैव—तत्रागमनमात्रेण यदि स्यादवतारता । अन्यत्रापि प्रसज्जेत यथेष्टं तत्प्रकल्पना इति ॥ ८ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

चतुःसनावतारमाह तप्तमिति विविधलोकसिसृक्षयामे मया यत्तपस्तप्तम् तस्य स्वतपसः सनात् षणुदानेभगवतिदानात्समर्पणात्तुष्टः सभगवानेव आदौचतुः सनः सनत्कुमारः सनकः सनंदनः सनातन इति चत्वारः सनशब्दानाम्नि यस्य स अभूत् नानालोकाचार्येभ्यः प्राक्तपोऽर्पणतुष्टोभगवानेव मोक्षशास्त्राचार्यतयाजात इत्यर्थः मोक्षधर्मे मरीचिरंगिराश्चात्रिःपुलस्त्यः पुलहः क्रतुःवसिष्ठ इति सप्तैते मान

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतन्तम् ।
त्रात्वार्थितो जगति पुत्रपदश्च लेभे दुग्धा वसूनि वसुधा सकलानि येन ॥ ९ ॥
नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्जड़योगचर्य्याम् ।
यत् पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥ १० ॥
सत्रे ममास भगवान् हयशीरषाथो साक्षात् स यज्ञपुरुषस्तपनीयवर्णः ।
छन्दोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥ ११ ॥
मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

त्वा निर्मिता हि ते एते वेदविदो मुख्या लोकाचार्याश्च कल्पिता इति प्रवृत्तिमार्गाचार्यानभिधाय सनः सनत्सुजातश्च सनकः सनन्दनः सनत्कुमारः कपिलः सप्तम श्चसनातनः सप्तैते मानसाः प्रोक्ता ऋषयो ब्रह्मणः सुताः स्वयमागतविज्ञानानिवृत्ति धर्ममास्थिताः एते योगविदो मुख्याः सांख्यज्ञानविशारदाःआचार्या मोक्षशास्त्रेषु मोक्षधर्मप्रवर्त्तका इति मोक्षधर्मप्रवर्तका आचार्या दर्शिताःयद्यपि ते स्वयमागतविज्ञानास्तथापि स्वसंप्रदायस्यपरमाभ्यर्हितत्वासिद्धये भगवतःपुरुषोत्तमस्य एतावान् योगआदिष्टोमच्छिष्यैः सनकादिभिरित्यादिवचनात्शिष्या भूत्वा छांदोग्यादिप्रसिद्धदेवर्ष्यादिशिष्यद्वारा ज्ञानभक्तिप्रधानं निवृत्तिधर्मसंप्रदायं प्रवर्तयामासुःएतदेवसंप्रदायप्रवर्तनरूपंतत्कर्मदर्शयति प्रागिति स चतुः सनः भगवान् प्राक्कल्पस्यसंप्लवे प्रलये विनष्टमुच्छिन्नसंप्रदायम् इह अस्मिन्कल्पे आत्मनो भगवतः तत्वं गुणस्वरूपयाथात्म्य सम्यक् जगाद स्वशिष्येभ्य उक्तवान् तेपिमुनयः श्रुतं ह्यवभवतदृशेभ्य स्तरति शोकमात्मविदिति सोहं भगवः शोचामितंमांभगवान् शोकस्य पारंतारयतु इत्यादि श्रुति प्रसिद्धा तच्छिष्याः श्रीनारदादयः यत्प्रदितमात्रमेव आत्मन् आत्मनि मनसि अचक्षत साक्षादपश्यन् ॥ ५ ॥

नरनारायणावतारमाह धर्मस्येतिधर्मस्य दुहितरि मूर्त्याम् स भगवान् नारायणो नर इति युगलस्वरूपोऽजनिष्ट प्रादुरभूत् कीदृशः स्वतपः प्रभावः स्वकीययजनतपसि प्रकृष्टोभावस्तपआचरणाऽभिप्रायोयस्य सः स्वकीयान् एवं तपः कर्तव्यमिति बोधयितुं तपोनिष्ठमूर्तिद्वयमाविः कृतवानित्यर्थः स्वकीयजनशिक्षार्थं तस्य तपोनिष्ठां दर्शयति अनंगस्य कामस्य, पृतनाः सेना देव्यो ऽप्सरसः आत्मनो नियमस्य तपोनाशनरूपस्यावलोपं दृष्ट्वा भगवतः नियमावलोपंव्रतभंगं घटितुं नशेकुः न शक्ता बभूवुः तच्चैकादशे स्कंधे स्फुटी भविष्यति ॥ ६ ॥

कामविनाशकस्य क्रोधस्यापि यत्र स्पर्शलेशोनास्ति तत्रकामस्य लेशस्य काकथेत्याह काममिति कृतिनः कामस्तुवासुदेवांशो दग्धः प्राप्रुद्रमन्युनेतिवक्ष्यमाणात् रुद्रप्रमुखाः रोषदृष्ट्याकामं दहंति असह्यं सोढुमशक्यं रोषं त्वात्मानं दहंतमपि न दहंति ननु अहो सोऽयं कामजयिनामपिविजेता रोषः यस्य भगवतः अंतरं मनः प्रतिप्रविशन्नलमधिकं बिभेति बिभ्यति अस्यभगवतो मनः कामः पुनः कथं नु श्रयेत प्रवेष्टुं शक्नुयान्नकथमपीत्यर्थः ॥ ७ ॥

ध्रुववरदावतारमाह राज्ञः स्वपितुः अति समीपे एव तत्रापि वाल एवेति स्त्रीणां खेलानां च दौरात्म्यद्योतनेन मुमुक्षुभिस्तत्संगो हेय एवेति सूचयति मातुः सपत्न्याः सुरुच्या उदिता नि वाक्यान्येव पत्रिणो वाणाः तैर्विद्धः ताडितः बालोऽपि सन्ध्रुवः तपसे तपश्चरितुं वनानि उपगतः तस्मै गृणते स्तुवते प्रसन्नः भगवान् ध्रुवगतिं स्थायिपदमं अदात् यत् यां दिव्याः दिविभवाः उपरिस्थिताः भृग्वादयः अधःस्थिताः सप्तर्षयः स्तुवंति ॥ ८ ॥

भाषा टीका ।

सृष्टि की आदिमें मैंने विविध लोकों की सृष्टि करने की इच्छा कर तप किया और यह तप भगवान को (दान) करने से भगवान् चतुस्सन रूपसे अवतीर्ण हुए । पूर्व कल्प की प्रलय में विनष्ट हुए आत्म तत्व को उपदेश किया । जिसको मुनियों ने अपने आत्मा में देखा ॥ ५ ॥

दक्ष कन्या धर्म्म पत्नी मूर्ति में स्वतपः प्रभाव नर नारायण ऋषि अवतीर्ण हुए । कामदेवकी सेना रूप इन्द्र की भेजी अप्सराएँ अपने से भी उत्तम उर्वशी आदिक देवाङ्गनाओं को उनकी सेवा करते देखकर उनके तप भङ्ग करने में समर्थ नहुई ॥ ६ ॥

रुद्र प्रमुख सुकृति जन रोष की दृष्टि से काम को दहन करदेते हैं । परन्तु असह्य क्रोधको दहन नहीं करसक्ते हैं। वह क्रोध जिनके भीतर प्रवेश करते भय करता है उनके हृदय में काम कैसे प्रवेश करसक्ता है ॥ ७ ॥

राजा उत्तानपाद के निकट अपनी माताकी सपत्नी के वाक्यवाणों से विद्धबालक भी ध्रुव तप करने को बनको चलेगये। स्तुति करते ध्रुवपर प्रसन्न होकर भगवान ने उनको ध्रुव गति दी जिसको ऊपर और नीचे स्थित मुनिगण स्तुति करते हैं ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

पृथ्ववतारमाह । यत् यदा ऋषिभिरर्थितः (अवतरितुं प्रार्थितः) तदा (वेणदेहादवतीर्णः) वेणं त्रात्वा अन्वर्थं तत्पुत्र इति पदं नाम लेभे । पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवेति हि पुत्रपदव्युत्पत्तिः । कथम्भूतं द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं [निष्प्लुष्टं] दग्धं पौरुषं भगमैश्वर्यञ्च यस्य तम् । चरित्रान्तरमाह । येन च जगति जगदर्थं वसूनि अन्नादिद्रव्याणि दुग्धा ॥ ९ ॥

ऋषभावतारमाह । असौ हरिर्नाभेराग्नीध्रपुत्रात् सुदेव्याः सूनुरास नाभेर्भार्य्यायामेरुदेव्या एव सुदेवीत्यपि संज्ञा । जड़वत् योगेन नित्यसमाधिना चर्य्याम् । यत् याम् तत्र हेतुः समदृक् । तत्रापि हेतुः स्वस्थः स्वस्वरूपे स्थितः । यतः प्रशान्तेन्द्रियः । तत् कुतः यतः परितो मुक्तसङ्गः ॥ १० ॥

हयग्रीवावतारमाह सत्रे इति । अथो इत्यर्थान्तरे । स एव साक्षात् भगवान् मम ब्रह्मणः सत्रे यज्ञे हयशीर्षा आस । तपनीयं सुवर्णं तद्वत् वर्णो यस्य । छन्दोमयः वेदमयः । तद्विधेया ये मखाः तन्मयः अमृतमय इति वा पाठः । मखैर्यजनीया ये अखिला देवास्तदात्मा च । अस्य श्वसतः श्वासं मुञ्चतः नस्तः नासापुटतः उशतीः उशत्यः कमनीया वेदलक्षणा वाचो बभूवुः ॥ ११ ॥

मत्स्यावतारमाह । मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः । क्षोणीमयः पृथ्वीमयः पृथिवीप्रधानः तदाश्रय इत्यर्थः । अतएव निखिलजीवनिकायानामाश्रयः । ये मुखात् विस्रंसितान् अधःपतितान् [गलितान्] वेदमार्गान् वेदानादाय तत्र युगान्तसलिले विजहार । ह हर्षेण ॥ १२ ॥

श्रीराधारमणदासगोस्वामि विरचित दीपन्याख्य तट्टिप्पणी ।

अन्वर्थमिति । अन्वर्थम् अनुगतावयवार्थं यौगिकार्थमिति यावत् ॥ ९ ॥

यामिति । यां जड़योगचर्यामित्यर्थः ॥ १० ॥ ११ ॥

पृथिवीप्रधान इति आश्रितानां मध्ये पृथिवी प्रधानं यत्र स इत्यर्थः । वृक्षमयो ग्राम इतिवत् ॥ १२—१६

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

पृथ्ववतारमाह य इति यः पृथुः ऋषिभिरर्थितः वेनं त्रात्वा जगति पुत्रपदं लेभे सोऽप्येकोऽवतार इत्यर्थः पुत्रपदं पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मा त्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति व्युत्पत्तिस्मरणात् पुदाख्यान्नरकात्पितरं वेनं संरक्ष्य पुत्रपदवाच्यतां प्राप्तवानित्यर्थः कथं भूतं वेनं निरये नरके पतंतं तत्कुतः द्विजानां मुनीनां शापवाक्यमेव वज्रं तेन विप्लुष्टं विशेषेणादग्धं पौरुषं भगमैश्वर्यं च यस्य तं द्विजशापः कुत इत्यत आह उत्पथगतमसन्मार्गवर्तिनं एतदाख्यानं चतुर्थे स्फुटं एतस्यैव चरित्रांतरमाह वेनं पृथुना वसुधा भूमिः सर्वाणि वसून्यन्नादिद्रव्याणि दुग्धाऽदुह्यत दुहधातुर्द्विकर्मकः ॥ ९ ॥

ऋषभावतारमाह नाभेरिति यद्ब्रह्मपारमहंस्यं परमहंसप्राप्यं पदं स्वरूपं ऋषयो वेदा आमनंति तदसौ हरिः कपिलादिवत्स्वांशेन ऋषभाख्यो राजा नाभेराग्नीध्रपुत्रात्सुदेव्याः सूनुरास मेरुदेव्या एव सुदेवीत्यपि संज्ञा योजातो ऋषभःजडवद्योगचर्यां चचार तत्र हेतुः समदृक् सर्वस्यापि स्वात्मकत्वेन समदर्शनः तस्यान्यात्मकत्वं व्यावर्तयति स्वस्थः "स्वेमहिम्नि प्रतिष्ठित" इति श्रुतेः स्वस्मिन्नेव स्थितः नत्वात्मांतराधार्यः जडयोगचर्या चरणहेत्वंतरमाह प्रशांतकरणः प्रशांतेन्द्रियः तत्कुतः परिमुक्तसंगः परितः शब्दादिषु मुक्तस्त्यक्तः संग आसंगो येन सः ॥ १० ॥

हयग्रीवावतारमाह सत्र इति स एव साक्षाद्भगवान्मम ब्रह्मणः सत्रेहयशीर्ष आस कथं भूतः तपनीयं सुवर्णं तद्वद्वर्णो यस्य छंदोमयःवेदमयःवेदोत्पादकत्वेन तत्प्रचुर इत्यर्थः मखमयःयज्ञाराध्यः अखिलदेवतानामात्मा "सआत्माअंगान्यन्यादेवता" इति श्रुतेः श्वसतःनिःश्वसतः अस्य हयग्रीवस्य नस्तः नासिकातः उशतीः शुद्धाः वाचः वेदवाचः बभूवुः "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्य दृग्वेद" इति श्रुतेः वेदानां तद्विहितानां कर्मणां तदाराध्यदेवतानां तत्प्रवर्तकत्वतदाराध्यत्वतदात्मकत्वान्युक्तानि इति ॥ ११

मत्स्यावतारमाह मत्स्य इति मत्स्यो भाविना वैवस्वतेन मनुनोपलब्धः दृष्टः क्षोणीमयः आगामिसृष्ट्युपयोगिपार्थिवद्रव्यपार्थिवद्रव्याश्रयइत्यर्थः अतएव निखिलजीवनिकायानां समस्तजीवसमूहानां निकेतःनिलयः मेमम मुखाद्विस्रंसितान्वेदमार्गान्वैदिकप्रमाणान्यादाय समर्प्य मह्यमिति शेषः वेदरूप प्रमाणप्रदानमेवास्यावतारस्य कृत्यं तत्र उरुभये प्रतिभयं करे युगांतसलिले विजहार विहृतवान् हेति हर्षे एतदाख्यानमष्टमेस्पष्टम् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

अथोत्पथगतंमामेवयजध्वंमत्तोन्यदैवंनास्तीत्यद्वैतमार्गवर्तिनमतएवद्विजवाक्यवज्रेणनिष्पिष्टपौरुषभगंविनाशितपुरुषाकारभागधेयंमृत्वा निरयेपतंतंवेनंत्रात्वापरमर्षिभिर्जगत्पालनायार्थितोजगतिभूलोकेपुत्रपदंमथितवेनदक्षिणभुजोत्पन्नपृथ्वाख्यमहाराजस्थानंलेभइत्यन्वयः स्वयंवपृथुनामातत्रविष्णुरित्यर्थंचशब्देनानुवदति । पृथुर्नाममहाराजस्तत्रविष्णुःस्वयंविभुरित्यादेः तत्कर्माह । दुग्धेति येनपृथ्वाविष्टेनपृथुनाम्ना हरिणावसुधाभूमिः सकलानिवसूनिअमृतादिद्रव्याणिचदुग्धेत्यन्वयः ॥ ९ ॥

असौनारायणोनाभेराज्ञः सकाशात्सुदेविसूनुरासेत्यन्वयः मेरुदेव्याःसुदेवीतिनामांतरंराजकृतं तदवतारप्रयोजनमाह योवाइति ऋषभनामायोवैहरिः समदृक्सर्वांतर्हृदिस्थितंसमंब्रह्मपश्यतीतिनित्यापरोक्षीकृतस्वरूपइत्यर्थः योगचर्यांपरमहंसधर्मंचचार ऋषयोयद्ब्रह्मपारमहंस्यंपरमहंसप्राप्यमामनंति यश्चस्वस्थःस्वाधारःप्रशांतकरणःप्रकृष्टसुखात्मकदेहेंद्रियः अतएवपरिमुक्तसंगोबाह्यसुखानपेक्षः विधिनिषेधविमुक्तस्ययोगचर्याकरणं किमर्थमित्याशंकावाद्इत्यनेननिरस्ता लोकसंग्रहार्थत्वेनतदाचरणप्रसिद्धेरिति स्वस्थइत्यादिविशेषणबाहुल्याच्च प्राप्यप्रयोजनांतरंनास्ति ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

...साक्षात्सूर्यः एषयज्ञपुरुषो ममसत्रेयज्ञेनाप्नाहयशीर्ष आसेत्यन्वयः तिर्यग्योनित्वेऽप्यैश्वर्यादिगुणसाम्यमीमांसित्याह भगवानिति तपनी ...यमहेस्त्रोरित्यभिधानान्मूलावताररूपापेक्षयोभयवर्णत्वंयुक्तं अनेनसाक्षान्नारायणएवेतिनिरणायि "हिरण्यश्मश्रु" रित्यादिश्रुतेः इतोऽन्य येनारायणएवेत्याह छंदोमयइति छंदआदीनामाधारत्वातद्विषयत्वाद्देयत्वादंतर्यामित्वात्तन्मयत्वं तत्कर्मेत्याह वाचइति अस्यहय-ग्रीवस्यश्वसतःश्वासंकुर्वतः ...नासिकाया उशतीर्भगवद्गुणप्रतिपादकत्वेनशुभाः श्वासरूपावाचोवेदादिलक्षणाबभूवुरित्यन्वयः छंदांसियन्मयानि ... ...लीकाश्रसर्वेशइत्यादिना * मयटोविकारार्थत्वंप्रयुक्तम् ॥ ११ ॥

मेमुखाद्विस्रंसितान्निर्गतान्वेदमार्गान्हयग्रीवदैत्येनापहृतानुद्दृष्ट्वामत्स्योऽवतीर्यतंहत्वातान्समादायस्थितः पुन * युगांतसमयेमन्वंतरप्र लयेमत्स्यर्षिभिःसहस्नुवतावैवस्वतमनुनोपलब्धोऽदृष्टः क्षोणीमयः क्षोणीमयनावाश्रयत्वादतएवनिखिलजीवनिकायानांकेतआश्रयःतस्मिन् ...समयेमहाभयंकरसलिलप्रलयसमुद्रजलेविजहारेत्यन्वयः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

निरयं पतन्त्यस्मिन्निति पुनः पुनः पतनाय सज्जमानं त्रात्वा पुत्रपदञ्च लेभे इति न केवलं त्रातवान् अपि तु पुत्रपदं पुत्रत्वमपि लेभे इत्यर्थ व्यक्त्या तत्रोद्यतेषुमुनिषु कारणविशेषव्यक्तिः । क्त्वाप्रत्ययस्तु त्राणावश्यकताविवक्षया भाविनि भूतवन्निर्देशात् । किन्तु सप्तमस्कन्धे भगवन्निन्दया वेणो द्विजैस्तमसि पातित इत्यनुसारेण एकदा श्रीपृथुराजेन (?) श्रीनारदात् स्वपितुर्नरकभोगानन्तरं कुष्ठिम्लेच्छत्वप्राप्तिं श्रुत्वा तमानीय पृथूदकाख्यकुरुक्षेत्रतीर्थे स्नपनादिनाक्रमेण तदपरिच्छेद्ययातनाभोगादुद्धारेति वामनपुराणादूविशेषो ज्ञेयः ॥९॥१०॥११॥

मत्स्य इति । मनुना वैवस्वतमनुतया भाविना सत्यव्रतेनेत्यर्थः । अत्र सन्यासुरवधस्त्वति प्रसिद्धत्वान्नोक्तः ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

तदर्थमस्यपितुर्दुःखप्राप्तिमाह यद्वेनमुत्पथगतं अन्यायिनां मार्गे प्रवृत्तं अत एव ब्राह्मणानामपकारकारित्वात् तद्वाक्यवज्रेण निहतं प्लुष्टं पौरुषं भाग्यं यस्य अतो भाग्येन पौरुषेण वा निस्तारः न वा पालनरक्षणधर्मेण उत्पथगतत्वात् तस्मादूगुणाभावात् दोषस्य च विद्यमानत्वात् नरके पतति तस्मिन्समये तस्य करान्मथनेन निर्गतः तं पालितवान् तैरेव ब्राह्मणै रभ्यर्थितः अत एव पुत्रो जातः अवतार चरित्रमाह दुग्धा वसूनि सर्ववस्तूनि वसुधा पृथिवी अनेन वस्तूनि वसुधा दुग्धा यद्यपि अन्यानि वस्तूनि अन्यैरेव दुग्धानि तथाप्येतन्मूलकत्वात् सकलानि येनेत्युक्तं अनेन वेदरूपस्यपीतांवरस्य एवं सर्वकामपूरकत्वं नरकात्पालकत्वं च निरूपितंनाभे रसावितिपीतत्वेन च सर्वदुःखनिवृत्तिं प्रासंगिकम् ॥ ९ ॥

प्रजानांनगोपकं किंतु स्वभावादेवतस्यरेखाकारत्वं सर्वगुणसद्भावात् एवं पीतांवरत्वंनिरूप्य लसन्महारत्नहिरण्मयांगदत्वं निरूपयति नाभेरसाविति नाभिः ब्राह्मणान् प्रार्थयित्वा यज्ञे आविर्भूतं भगवंतंप्रार्थयित्वा भगवंतं पुत्रत्वेन प्रार्थितवान् नाभेर्भार्यासुदेविसंज्ञा तस्याः सूनुः असाविति वुद्धिस्थः ऋषभ इति नाम अवतारस्य प्रयोजनं यो वै चचारेति जडानांसर्वाधर्मा योगचर्या लोके प्रदर्शिता समदृगि ति ब्रह्मदृष्टिः तस्याजडयोगचर्यायाः सद्ग्राह्यं रूपमाह यत्पारमहंस्यं पदमामनंति तस्य मार्गस्य निर्वाहकावश्यकसाधनानि उपदिशन् स्वयंतादृशो जात इत्याह प्रथमं परिमुक्तसंगः सर्वसंगपरित्यागं कृतवान् तेन प्रशांतानि करणानि इंद्रियाणि यस्य तेन स्वस्थः स्वरूपे-स्थितः इति दोषनिवृत्तिः कथिता गुणास्तुसमदृगिति सर्वत्र गुणदोषदृक् रहितः सर्वभूतेषु वासुदेव दृष्टिर्वा देवता क्रियामध्येहि अंगदनि-वेदनं तत्रापि देवताभागे अयं च ब्रह्मवित्कर्माणि त्यक्तवान् हिरण्मयत्वं नाभिपुत्रत्वात् महारत्नानि तु तत्पुत्राः सहि जातकर्ममध्ये स्थितः अतोऽगत्वं स्वस्थाद्योरत्नानि समदृक सुवर्णं जडयोगचर्या आकृतिः इदं हि परमहंसानां पदं रत्नानि तु ते अतऋषभस्य यत्किंचित्कार्यं तदेवांगदस्येति ज्ञातव्यं अध्यायत्रयेण चरित्रं वक्ष्यते तत्र शोभा प्रथमाध्यायार्थः महारत्नानि तद्वाक्यानि द्वितीयाध्यायार्थः हिरण्मयत्वं ब्रह्मभावस्तृतीयाध्यायार्थः ॥ १० ॥

एवं भगवंतं निरूप्य स्फुरन्महारत्नकिरीटकुंडले निरूपयति सत्रेसमासेति हयग्रीवो हि किरीटकुंडलात्मकःसद्य भयात्मको भवति ब्रह्म विद्याप्रवर्त्तकत्वात् किरीटंहयशिरः कुंडले देहः प्रवृत्तिनिवृत्तिरूपसांख्ययोगयो राधारभूतो देहः स हि कर्मणिप्रादुर्भूतः अग्निसाध्येकुं डलादिकर्मापि तथा तदेवाह छंदोमयो मखमय इति अखिलदेवतात्मा मुकुट अखिलानन्दना येदेवा ब्रह्मादयस्ते भगवन्मस्तके पारमेष्ठ्येस्थि ता यद्यज्ञविषेण क्रियते तत्सर्वं कुंडलमुकुटकार्यं तस्य स्वरूपं ब्रह्मा निरूपयति ममसत्रे याग आसआविर्भूतः स प्रसिद्धः हयग्रीवः भग-वानेव दैत्यहयग्रीवनिराकरणार्थं भगवानिति किं पुरुषादिरूपव्युदासार्थं च नह्यन्यदीय सत्रे आविर्भावमर्हति यतः हयशीर्ष एव साक्षा द्यज्ञपुरुषः सर्वयज्ञाभिमानीदेवता: यतस्तपनीयवर्णः तपनीयवर्णो यस्य तपनीयं सुवर्णं यज्ञोऽप्यग्निसाध्य इति तपनीयः वर्णो यस्य छंदोमयो वेदात्मकः मखमयो यज्ञात्मकः अखिलदेवतात्मा प्रमाणमयेन साधनः फलभूत इत्यर्थः अखिलदेवतासाधनं आत्माफलमिति अव तारप्रयोजनमाह वाचोबभूवुरिति उशतीवाचः वेदलक्षणाः अस्यनस्तोनासिकातः श्वसतः निश्वासं विमुंचतः अस्य भगवतो जाताः स्फु-रन्महारत्नान्येव उशतीवाचः ॥ ११ ॥

---

* सर्वेविष्णौस्थितायस्मादतःसर्वमयोह्यसौइतिमहासंहितायाम् ॥

‡ अनेनमत्स्यावतारोद्विवारमितिज्ञायते ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

ध्वंमुकुटकुंडले निरूप्य उभिन्नहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं रूपं निरूपयति मत्स्य इति मत्स्योहि पल्लवरूपः सत्यव्रतादीनां शिष्यत्वात् गुरोस्तस्य भगवतः पादपल्लवंज्ञानात्मकं हृदये स्थापितमेव युगांतसमये प्रलये मनुना सत्यव्रतेन द्रविडेश्वरेण मनुमेति भाविनी संज्ञातत्कृपयैव मनुत्वस्य भावित्वात्तेन लब्धः प्रथमं तदंजलिजलं प्रादुर्भूतः तस्य मत्स्यस्य उत्पत्तेरनिरूपितत्वात् दृष्ट इत्युक्तं तस्य पादस्पर्शमाह क्षोणिमय इति स हि पृथ्वमियः अत एव आध्यात्मिकीं पृथ्वीं वदंति नौकारूपा पृथिवी तारिका अत एव चरणपोतः किंचभगवच्चरणो हि सर्वेषां भक्तानामाश्रयः तदाह सकलजीवनिकायकेत इति निखिला ये जीवाः संपूर्णाजीवाः मध्विपर्यैः खंडिता तेषां निकायः समूहस्तस्य केतस्थानं सर्वाणि हि जीवानि ऋषयश्च तदा नौकायां स्थिता इति एतदेव हि रूपं चरणस्य अत एव संसारसमुद्रतरणे पोतः तस्यावतार चरित्रमाह उरुभये विस्रंसितान् ब्रह्मणो भयात् मुखाद्विगलितान् वेदान् हयग्रीवो नामदानवेन्द्रः अंतिके अहरत् तं हत्वा तत आदाय तत्रजलेविजहार ह वेदमार्गादिति अन्येऽपि ज्ञानभक्तिप्रतिपादक वेदास्तत एवोद्धृताः इति प्रसिद्धं आश्चर्यं वा अत एव शिष्याद्यां वेदमार्गैः कृत्वा विकसितानि भवंति यज्ञोपयोगि वेदाः हयग्रीवेनोद्धृताः सर्वोपयोगिनस्तु मत्स्येनेति विशेषः ॥ १२ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

पृथ्ववतारमाह । यत् यदा ऋषिभिरर्थितस्तदा वेणं त्रात्वा अन्वर्थं तत् पुत्र इति पदं नाम लेभे । पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवेति पुत्रपदव्युत्पत्तेः । कथम्भूतं द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं (निष्प्लुष्टं) दग्धं पौरुषं भगमैश्वर्य्यञ्च यस्य तम् । श्रीपृथुराजेन (?) श्रीनारदात् स्वपितुर्नरकभोगानन्तरं कुष्ठिम्लेच्छत्वप्राप्तिं श्रुत्वा तमानीय पृथूदकाख्ये कुरुक्षेत्रतीर्थे स्नपनादिना तदपरिच्छेद्ययातनाभोगादुद्धारेति वामनपुराणकथा ज्ञेया । चरित्रान्तरमाह । येन च वसूनि अन्नादिद्रव्याणि वसुधा पृथ्वी दुग्धा ॥ ९ ॥

ऋषभावतारमाह । नाभेः सकाशात् आस अभूत् । सुदेव्या मेरुदेव्याः सूनुः । जडवद्योगचर्य्याम् यस्य पारमहंस्यं पदं चिह्नम् ऋषय आमनन्ति अभ्यस्यन्ति । ऋषभः कीदृशः । स्वस्मिन्नेव तिष्ठतीति स्वस्थ इत्यादि अत्र समाप्तपुनराक्तनादोषश्चेदेवं व्याख्येयम् यस्य पारमहंस्यम् ऋषय आमनन्ति तेषु ऋषिषु परिमुक्तसङ्गः इमे मत्पारमहंस्यं न जानन्त्विति तेषु प्रीतिरहितः । अतएव ते भ्रष्टा बभूवुरिति तत्र कथा द्रष्टव्या ॥ १० ॥

हयग्रीवावतारमाह । सत्रे यज्ञे आस आविर्बभूव अस्य हयशीर्ष्णः श्वसतो निश्वसतः नस्तः नासापुटात् उशतीः कमनीया वेदलक्षणा वाचो बभूवुरुदपद्यन्त । अत्र छन्द इति विशेषणत्रयेण कर्म्मकाण्डज्ञानकाण्डदेवताकाण्डसम्बन्धिन्यः श्रुतय इति गम्यते । अमृतमय इत्यत्र मखमय इत्यपि पाठः क्वचित् ॥ ११ ॥

मत्स्यावतारमाह । मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः । क्षोणीमयः पृथ्वीप्रधानः तदाश्रय इत्यर्थः । निखिलानां चतुर्विधानामेव जीववर्गानां केत आश्रयः । उरुभये प्रलयसलिले ये मुखाद्विस्रंसितान् विगलितान् वेदमार्गानादाय विजहार ॥ १२ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

पृथ्ववतारमाह यदिति यदा ऋषिभिः प्रार्थितस्तदा उत्पथगतमसन्मार्गवर्तिनम् असन्मार्गवर्तित्वादेव द्विजानां मुनीनां शापवाक्यमेव वज्रं तेनविप्लुष्टं विशेषेणादग्धं पौरुषं भगमैश्वर्यं च यस्य तमत एव निरये नरके पतंतं वेणं त्रात्वा अन्वर्थं तत्पुत्र इतिपदं नाम लेभे पुन्नाम्नो नरकाद्यस्तु पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवे ति व्युत्पत्तिस्मरणात् चरित्रांतरमाह येन पृथुना जगति जगदर्थं वसुधासकलानि द्रव्याणि दुग्धाऽदुह्यत ॥ ९ ॥

ऋषभावतारमाह नाभेरिति असौ भगवान् नाभेः सकाशात् सुदेव्याः मेरुदेव्यपरपर्यायायाः सूनुर्नामतः ऋषभः आस यः ऋषभः जडवद्योगेन नित्यसमाधिना चर्यांचचार यत्यां जडयोगचर्याम् ऋषभः पारमहंस्यं पदं भगवत्प्राप्ति मार्गमामनंति यत्पारमहंस्येन पथाऽधिगम्यत इत्यादिनाऽग्रे निरूप्यमाणः सच पारहंस्यमार्गः नित्यध्यानादिवशादलब्धाश्रमकृत्यावसरस्यश्रेष्ठाधिकारिणः ब्रह्मचारिप्रभृतिष्वेकतमस्यैव ब्रह्मचारिगृहस्थश्चवानप्रस्थस्तथाऽऽश्रमी परिव्राट्चचतुर्थोऽत्र पंचमो नोपपद्यते वर्णाश्रमाचारवता पुरुषेण परःपुमान् विष्णुराराध्यते पंथा नान्यत्तत्तोषकारणमिति वैष्णवे चतुर्णामेवाश्रमाणां स्वीकारात् नित्यध्यानादीन स्पष्टं श्रेष्ठयमपि तत्रैवोक्तं न चलति भगवत्पदारविंदात्पलनिमेषार्द्धमपि सवैष्णवाग्र्य इत्यादिना जडयोगचर्याचरणहेतुः समदृकसर्वस्य भगवदात्मकत्वात्समदर्शनः मतएवस्वस्थःस्वस्मिन्‌रूपे सर्वात्मभूते स्वावतारिणि वासुदेवे स्थितः अंतएवप्रशांतकरणः अविचलेन्द्रियः अत एव परिमुक्तसंगः ॥ १० ॥

हयग्रीवावतारमाह सत्र इति अथोइत्यर्थान्तरे साक्षाद्भगवान् ममसत्रेयज्ञेहयशीर्षा आस कीदृशः तपनीयंसुवर्णंतद्वद्वर्णोयस्यसः छंदोमयः वेदमयःमखमयःअध्वराकारःतदाराध्योवा अखिलानांदेवतानामात्मा“सआत्माअंगाम्यन्यादेवता”इतिश्रुतेः अस्यहयग्रीवस्यश्वसतः निश्वसतः नस्तः नासापुटात् उशतीः उशत्यः कमनीयाः वाचः वेदरूपाः बभूवुः ॥ ११ ॥

मत्स्यावतारमाह मत्स्य इति मनुनावैवस्वतेनपूर्वजन्मनियुगांतसमयेसत्यव्रताख्येनराज्ञामत्स्यउपलब्धः दृष्टः कीदृशः क्षोणीप्रधानः आगामिसृष्ट्युपयोगिपार्थिवद्रव्याश्रय इति यावत् अतएवनिखिलजीवानांयोनिकायः समूहस्तस्यकेतोनिलयः सत्रमेममुखाद्विस्रंसितान् विगलितान् वेदमार्गान् वेदोक्तधर्मान् यद्वावेदरूपान् मार्गान्सर्वपुरुषार्थोपायान् आदायउरुभयेयुगांतकालेहृतिहर्षेणविजहारविहृतवान् ॥ १२ ॥

———

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः ।
पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोऽद्रिपरिवर्त्तकषाणकण्डूः ॥ १३ ॥
त्रैपिष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम् ।
दैत्येन्द्रमाशु गदयाभिपतन्तमारादूरौ निपात्य विददार नखैः स्फुरन्तम् ॥ १४ ॥
अन्तःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरम्बुजहस्त आर्त्तः ।
आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमङ्गलनामधेय ॥ १५ ॥
श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ।
चक्रेण नक्रवदनं विनिपाटय तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार ॥ १६ ॥
ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां लोकान् विचक्रम इमान् यदथाधियज्ञः ।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः ॥ १७ ॥
नार्थो बलेरयमुरुक्रमपादशौचमापः शिखा धृतवतो विबुधाधिपत्यम् ।
यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमङ्ग शिरसा हरयेऽभिमेने ॥ १८ ॥

भाषा टीका ॥

उत्पथ गत द्विज वाक्य वज्र से विप्लुष्ट होगया पौरुष और भग जिसका अतएव नरक में गिरते वेणुको रक्षाकर जगत् में पुत्र पदको प्राप्त हुए । प्रजा से प्रार्थित हो बसुधा पृथ्वीको दुहा ॥ ९ ॥

सुदेविके पुत्र भगवान नाभिराजा से ऋषभ रूप धरकैर उत्पन्न हुए । जिन्होंने समदृष्टि होकर जड योगचर्य्याकी । स्वस्थ प्रशान्त कर्ण और परिमुक्त संगहुए । जिसको ऋषिगण पारमहंस्य धर्म्म कहते हैं ॥ १० ॥

मेरे सत्र में यज्ञ पुरुष छन्दो मय मख मय अखिल देवतात्मा भगवान सुवर्ण वर्ण हय शिरा रूपसे साक्षात् अवतीर्ण हुए । श्वासलेते जिनकी नासिका से वेदवाणी उत्पन्न हुई ॥ ११ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

कूर्मावतारमाह । क्षीरोदधौ कच्छपवपुः सन् गोत्रं मन्थनार्थं मन्दरगिरिं पृष्ठेन विधृतवान् । कदा अमृतलब्धये क्षीराब्धिम् उन्मथ्नतां सताम् । निद्रायाः क्षणः अवसरः उत्सवो वा यस्य सः । कुतस्तत्राह । अद्रेः परिवर्त्तः परिभ्रमः स एव कषाणः कषन् घर्षणसुखप्रदो यस्यां सा कण्डूर्यस्य सः । यद्वा अद्रिपरिवर्त्त एव कषः कषणं तेन अणति अपयातीति कषाणा सा कण्डूर्यस्य ॥ १३ ॥

श्रीनृसिंहावतारमाह । त्रैपिष्टपा देवाः तेषामुरुभयं हन्तीति तथा स भगवान् । (यद्वा त्रैपिष्टपा देवास्तेषामप्युरुभयं यस्मात् तादृशो हासो यस्य तत् नृसिंहरूपम् । अथवा हिरण्यकशिपोः राज्यकाले त्रैपिष्टपा दैत्यास्तेषामुरुभयजनको हासो यस्मिंस्तत् त्रैपिष्टपोरुभय-हासं तच्च तत् नृसिंहरूपं कृत्वा ।) कथम्भूतं रूपं भ्रमन्त्यो भ्रुकुट्यो दंष्ट्राश्च यस्मिन् तत् तत् करालं वक्त्रं यस्मिन् तत् दैत्येन्द्रं स्फुरन्तम् आरात् समीप एव गदया उपलक्षितम् अभिपतन्तं नखैर्विददार ॥ १४ ॥

हरिसंज्ञकावतारमाह अन्तरिति युगलेन । गजयूथस्य पतिः । तीर्थरूपं श्रवो यशो यस्य स तीर्थश्रवाः हे तीर्थश्रवः । श्रवणमेव मङ्गलं नामधेयं यस्य ॥ १५ ॥

तद्वचनं श्रुत्वा शरणार्थिनं तं हस्ते शुण्डायां प्रगृह्य । किं कृत्वा नक्रस्य ग्राहस्य वदनं विनिपाट्य विदार्य्य । तस्मात् उदजहार ॥ १६ ॥

वामनावतारमाह । अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैर्ज्यायान् ज्येष्ठः । गुणानेवाह । यत् यतः इमान् लोकान् विचक्रमे पादन्यासैराक्रान्तवान् अथ प्रतिश्रुतानन्तरमेव । तत्र हेतुः बलेः क्ष्मां वामनरूपेण जगृहे नन्वीश्वरः स्वयं किमिति दुर्बलवत् तथा चक्रे तत्राह । याच्ञां विना धर्ममार्गे वर्त्तमानो न चाल्यः ऐश्वर्य्येण प्रशंसनीय इति ॥ १७ ॥

ननु तर्हि याच्ञयापि चालनमनुचितमेवेत्याशङ्क्य ततोऽप्यधिकं स्वसालोक्यादि दास्यामीत्याशयेन हृतवानित्याह नार्थ इति । यत् विबुधाधिपत्यम् इदानीं बलात् प्राप्तम् अग्रे दीयमानञ्च अयं बलेः पुरुषार्थो न भवति । कुत इत्यत आह आप इति । आ अप इति च्छेदः उरुक्रमस्य पादशौचं चरणक्षालनरूपा अपः आ सर्वतो धृतवतः । क शिखा शिखायां मूर्द्धीत्यर्थः । किञ्च शुक्रेण वारितोऽपि शप्तोऽपि अङ्ग हे नारद यः प्रतिश्रुतं विना अन्यत् न चिकीर्षत् कर्तुं नैच्छत् । अङ्गागमाभावस्त्वार्षः यः तृतीयपादपूरणार्थं हरये आत्मानं देहमपि अभिमेने अङ्गीकृतवान् एवं सदेहं त्रैलोक्यं श्रद्धया दत्तवतो विबुधाधिपत्यम् अर्थो न भवतीत्यर्थः ॥ १८ ॥

श्रीराधारमणदास गोस्वामि विरचित दीपिनाख्यतट्टिप्पणी।

तत्र हेतुरिति। तत्र आक्रमणे हेतुरित्यर्थः॥ १७—२५॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका।

कूर्मावतारमाह क्षीरोदधाविति क्षीरसमुद्रे ऽमृतलब्धये ऽमृतलाभार्थममरदानवयूथपानां सुरासुरश्रेष्ठानां उन्मथ्नतां मथनं कुर्वतां सतामादिदेवो भगवान्कच्छपवपुः धृतकूर्मतनुः पृष्ठेन पृष्ठभागेन गोत्रं मंदरपर्वतं विदधार विधृतवान् कथंभूतो विदधार निद्राक्षणा निद्रायाः क्षणः अवसर उत्सवो यस्य स अद्रिपरिवर्तकषणकंडूरद्रे मंदरस्य परिवर्त्तः परिभ्रम एव कषणं कषणं यस्यां साऽद्रिपरिवर्तकषणा तथा विधा कंडूति र्यस्य स तथोक्तः कषाण इति दीर्घ आर्षः मंदरभ्रमण संघर्षितकंडूरित्यर्थः॥ १३॥

नृसिंहावतारमाह त्रैविष्टपेतिसः त्रिविष्टपे स्वर्गे भवास्त्रैविष्टपा देवा स्तेषामुरुभयं तद्धन्तीति त्रैविष्टपोरुभयहं तथा विधं नृसिंहरूपं कृत्वा धृत्वा कथं भूतं भ्रमंत्यो भ्रुकुट्यो दंष्ट्राश्च यस्मिँ स्तथा भूतं करालं भयंकरं वक्त्रं यस्मिँस्तथाविधं तदारात्समीपे आशु शीघ्रं गदया उपलक्षितं अभिमुखमापततं तंदैत्येंद्रं हिरण्यकशिपुं स्वोरौस्वस्योरौ निपात्य पातयित्वा नखैर्विददार विदारितवान् स्फुरंतं परितो गच्छंतं भयहासनृसिंहरूपमिति पाठे हासेनैव सर्वभयनिवर्तकमित्यर्थः॥ १४॥

हरिसंज्ञकावतारमाह अंतरिति ग्राह्यां यूथपतिः गजयूथस्य पतिः गजेंद्रः अंतः सरसिसरोमध्ये उरुबलेनाधिकबलेन ग्राहेण मकरेण पदे गृहीतः अत एवार्तः दुःखितअंबुजं हस्ते यस्य स धृताम्बुजोचिह्नितहस्तःसन्निवमाह किमित्यत आह हे आदिपुरुषकारणपुरुष हेतीर्थश्रवः तीर्थं विशुद्धं श्रवः कीर्तिर्यस्य सः तस्य संबुद्धौ हे तीर्थश्रवः हेश्रवणमंगलनामधेय श्रवणेनैव मंगलं कल्याणसंपादकं नामधेयं यस्य स ईदृशस्त्वंरक्षिता भवेत्याहेत्यर्थः॥ १५॥

तच्छ्रुत्वा गजेंद्रस्य वचः श्रुत्वाऽरणार्थिनं शरणार्थिनं हस्ते शुंडायां प्रगृह्य भगवान्कृपया तस्माद्ग्राहादुज्जहार उद्धृतवान् किं कृत्वा चक्रेण सुदर्शनेन नक्रस्य ग्राहस्य वदनं विनिपाट्य विदार्य कथं भूतो भगवान्पतगानां पक्षिणां राजा गरुडः तस्य भुजयोरधिरूढः आरूढः चक्रायुधधरः अप्रमेयः अपरिच्छिन्नस्वरूपस्वभावः॥ १६॥

वामनावतारमाह ज्यायानिति अदितेः सुतानां द्वादशादित्यानां मध्येऽधियज्ञः यज्ञाधिपति र्भगवानवरजः कनीयानपि गुणैर्ज्यायान् श्रेष्ठः गुणानेवाह यतः इमान् लोकान्विचक्रमे पादविन्यासैः क्रांतवान् अथ प्रतिश्रुतानंतरमेव तत्र हेतुः बलेश्चक्रवर्तिनः सकाशाद्भूमिं क्ष्मां वामनेन रूपेणेति शेषः वामनेन रूपेणजगृहे गृहीतवान् नन्वीश्वरः स्वयं दुर्बलयतिकिमिति तथा चक्रे तत्राह याञ्चामृते याञ्चां विना पथि चरन् धर्ममार्गे प्रवर्तमानः प्रभुभिस्समर्थैरपि न चाल्यः ऐश्वर्यान्नभ्रंशनीय इत्यर्थः॥ १७॥

ननु तर्हि याञ्चयापि चालनमनुचितमेवेत्याशंक्य प्रभुत्वस्यबलेर्लौकिकस्वीयैश्वर्यभ्रंशइष्ट एवेत्याशयेनाह नार्थ इति उरुक्रमस्यविसृतपादविन्यासस्य हरेः पादक्षालनं प्रत्युपयुक्ता आपः आ अप इति च्छेदः आसमंतात् शिखायां मूर्ध्नि धृतवतः सुप्सुपेतिसमासः यद्वा सप्तम्या आर्षो लुक् विबुधाधिपत्यं नार्थः न सदृशंप्रयोजनमित्यर्थः एतदेवोपपादयति योबलिः प्रतिश्रुतमृते प्रतिज्ञातार्थं विनाऽन्यत्र चिकीर्षत्कर्तुं नैच्छदडभाव आर्षः किंतु स्वात्मानं अंग हेनारद हरये शिरसाऽभिमेने भगवच्छेषभूतमात्मानं हरये समर्पितवान् शुक्रेण वारितः शप्तोऽपि अन्यथाकर्तुं नैच्छत्किंतु तृतीयपादपूरणार्थमात्मानमपि शिरसा समर्पितवानित्यर्थः॥ १८॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

अमृतलब्धयेऽमरदानवयूथपानांक्षीरसमुद्रमुन्मथ्नतांसतामतिभारेणक्षीरोदधौमज्जंतंगोत्रंपर्वतं स आदिदेवःकच्छपवपुर्भूत्वापृष्ठेनविदधारेत्यन्वयः उपर्यधोमेत्रगोत्रयोरित्यर्थद्योतकोवीत्युपसर्गः तज्जातिस्वभावमाह निद्रेक्षणइति निद्रेषन्मीलितनेत्रः निद्राहेतुमाह अद्रीति मंदराद्रेःपरिवर्तःपरिभ्रमणंतेनकषाणांविलेखनंतेनजातःकंडूःकंडूयनंयस्यसतथा॥ १३॥

त्रिविष्टपानांदेवानांदैत्याद्यदुरुभयंतद्धारितद्धननशीलं भ्रमंत्यास्फुरंत्याभ्रुकुट्यादंष्ट्राभ्यांचकरालंभयंकरंचवक्त्रंयस्यतत्तथा नृसिंहयोर्नरस्यसिंहस्यचरूपमिवरूपंकृत्वासहरिरारात्दूरादागदयाभिपततंस्फुरंतंदैत्येंद्रंहिरण्यकशिपुंवेगेनोरौनिपात्यनखैर्विददारेत्यन्वयः इविदारणइतिधातोः॥ १४॥

• • वदायूथपतिर्गजेंद्रःसरस्युरुग्राहेणपदेगृहीतआर्तःसन्नंबुजहस्तःहेआदिपुरुष अखिललोकनाथ तीर्थश्रवःपावनकीर्ते श्रवणमात्रेणमंगलप्रदनारायणाद्यभिधान त्वमस्माद्रक्षइतीदमाह॥ १५॥

तदातापसोनामभगवानरणार्थिनंशरणार्थिनंसमृत्वात्रागत्यकृपयातंहस्तेप्रगृह्योज्जहार भगवच्छब्दवाच्यत्वमृष्यादीनामप्यस्तीतितत्तांव्यावर्तयति अप्रमेयइत्यादिनाअप्रमेयइयत्तारहितः एतदाकाशस्याप्यस्तीत्यतश्चक्रायुधइति नन्वनेनयांद्याप्युच्यतइतितत्राह पतगेति पतगराजोगरुडस्तस्यभुजमधिरूढः भुजस्कंधयोरतिसामीप्यादेवमुक्तं किंकृत्वाचक्रेणसुदर्शनेननक्रस्यग्राहस्यवदनंविनिपाट्यच्छित्वा हरिस्तापसनामाऽसौजातस्तपसिवैमनुरित्यादेः कोऽयमवतारोनामेतिशंकानिरस्ता॥ १६॥

वामनत्रिविक्रमावतारौतत्कर्मचाह ज्यायानित्यादिश्लोकद्वयेन अत्रयत्तच्छब्दावध्याहार्यौ तथाहि योऽधियज्ञोभगवान्गुणैर्ज्यायानप्यदितेःसुतानामवरजोऽभूत्तेनभगवतादैत्यानांगर्वंवामयतिउद्गारयतीतिवामनः तेनवामनरूपेणत्रिपदच्छलेनक्ष्मांजगृहेइतियत्तदर्थातस्मात्सएववामनइमांल्लोकौलोकान्त्रिभिःपदैर्विचक्रमे तस्मात्त्रिविक्रमश्चाभूदितिवाक्यशेषइत्यर्थः किमर्थमेवंहरणकृतमत्राह याञ्चामिति मार्गवर्तीपुमान्प्रभुभिरप्युपायैर्विनाचाल्यइतिन्यायदर्शनार्थमेवंकृतमितिभावः यद्वा अधियज्ञःक्ष्मायामुर्व्यांवामनेनह्रस्वतरेणरूपेणअगृहेत्रिलोकीमिति शेष• कथंत्रिपदच्छलेनइमांल्लोकान्विचक्रमइतियत्तस्मादितेःसुतानांजन्मनाऽवरजोऽपिगुणैर्ज्यायान्। सममन्वयत्॥ १७॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

त्रिपदस्थलेन त्रैलोक्यं दत्तवतो बलेर्दानफलमिन्द्रपदाद्यासिरितिसंगिरंते केचित्तन्न किंतु हरितोषणाद्वारा मुक्ताबानंदोद्रेकतापत्र पैन्द्रं पदं नांतरीयं फलं तु हरितोषणमित्यादरित्याशयेनाह नार्थदति अंगनारद प्रतिश्रुतं पदत्रयमृतंतपिधात्मग्यं ब्रह्मसंधोधशीर्षमार्गशीर्षोंब्ध्यमानेमनसामम: पूर्वकं हरयेऽस्मिमेनेसमर्पयामास तस्यास्योरुक्रमपादशौचमंभःशिर्षोशिरसाधृतवतां बलेर्येंद्रित्रुधाधिपत्यलक्षणंफलमयमर्थोन साक्षात्फलंन भवति तन्नांतरीयकमेवेत्यन्वयः वाइत्यनेनास्यार्थस्यानन्यथात्वंवक्ति ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अद्रेः परिवर्त्तः परिभ्रमः स एव कषाणः कषन् हिंसको यस्यां सा कण्डूर्यस्य सः ॥ १३ ॥ १४ ॥

आहेदमिति । अस्य वाक्यस्य नारायणाखिलगुरो भगवन्नमस्ते इत्यष्टमस्कन्धवाक्येन समाप्तिर्ज्ञेया ॥ १५ ॥

भुजा भुजयोर्मध्यभागः पृष्ठमित्यर्थः ॥ १६ ॥

लोकान् विचक्रमे इति गुणज्यायस्त्वे हेतुः । सर्व्वातिक्रमिगुणो हि सर्व्वमाक्रमितुं शक्नोति । क्ष्मामिति तदुपलक्षितं त्रैलोक्यमित्यर्थः ॥ १७ ॥ १८ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

श्रीलक्ष्मीं निरूपयति क्षीरोदधाविति कूर्मेण हि सुधया सह लक्ष्मीर्निष्पादिता यावत्कार्यं कूर्मस्य तावच्छ्रीवत्सस्य यथा ब्राह्मणस्य पादस्पर्शः तथामंदरस्य यथा सर्वेब्राह्मणैर्विचार्य स निरूपितः तथासर्वैर्देवतादानवैर्मंदरः कूर्मे निरूपितः यथाघर्षणं तथा शास्त्रार्थनिर्णयः क्षीरोदधौ ये अमरदानवानां यूथपाः मथनं कुर्वंति तेषामुन्मथ्नतां अमृतप्राप्त्यर्थं आदिदेवः आधिदैविकोदेवः देव पक्षपाती कच्छपवपुः कूर्मावतारो भगवान्पृष्ठेन गोत्रं मंदरं दधार नतु किमिति मंदरस्थलं भाररूपं धृतवान् तत्राह निद्राक्षणः निद्रायां क्षणो यस्य निद्रार्थं धृतवानित्यर्थः ननु विपरीतमिदमुच्यते निद्रालुर्हि सर्वमेव भारं दूरीकरोति तत्राह अद्रिपरिवर्त्तकषाणकंडूरिति अद्रेः परिवर्त्तनेन कषाणेनघर्षितः कंडूर्यस्य अतोघर्षणार्थमद्रिंधृतवानित्यर्थः घर्षणेहि सुखे जाते निद्रा भवति यथापर्वतधारणं सर्वेषां श्रांतानां प्राणिनां सर्व पुरुषार्थसिद्ध्यर्थं परीक्षकब्राह्मचरणधारणं कौस्तुभरत्नकंधरं निरूपयति ॥ १३ ॥

त्रैविष्टपोरुभयहेति नृसिंहः कौस्तुभरत्नकंधरो भवति यथा कौस्तुभस्य कंठे स्थापितस्य रश्मयः स्कंधे निर्गताः केसरप्राया भवंति एवमेव नृसिंहः भगवत्कौस्तुभरूपं कौस्तुभंयद्भगवान्कंठे बिभर्त्ति तद्दैत्यानां वधार्थं भक्तजनोद्धारार्थं सर्वे हि भगवदीया जीवाः कौस्तुभरूपं चैतस्य तत्वममलं मणिमस्य कंठ इति वाक्यात् अतो भगवांस्तांश्चेद्हृदयेन स्थापयेत् तदामृत्युसाधनैः कर्मभिर्ग्रस्ता एव भवेयुः अतो मृत्युगर्जनिवारको नृसिंहवपुः प्रल्हादरक्षकः तत्प्रतिपक्षहिरण्यकशिपुघाती त्रैविष्टपा देवाः तेषां यदुरुभयं तं हंतीति तथा भगवान् नृसिंहरूपं कृतवान् ग्रामारण्यवासिनो हि द्विविधा भक्ताः उभयेषामुद्धरणार्थं उभयरूपं कौस्तुभोऽपि तथा भ्रमयुक्ते येभ्रुकुटी तत्सहिता दंष्ट्राभिः करालं वक्रं यस्य भ्रुकुटीपरिभ्रमणं ग्रासार्थमागतस्य कालस्य चक्री करणं तत्सहिता यदिदंष्ट्रा यमोऽपि पराभूतः अत एव करालं वक्रं अनेन ये के चिद्भक्तप्रतिपक्षाः स्ते ततो इशं मुखं दृष्ट्वा सर्वथानस्वकार्यं करिष्यंतीति सूचितं अत एव भक्ति प्रतिपक्षा दैत्ये द्रं आशु शीघ्रं अन्यस्यसमाधानताभावाय आभिमुख्येन पतंतं गदया प्रहारसमर्थया आरात् दूरादेव ऊरौ निपात्य स्फुरंतं तं नखैर्विददार नखैर्विदारणं मुक्त्यभावाय ऊरौनिपातनं कामोद्भवाय एवमेव हि कौस्तुभं भक्तप्रतिपक्षं संसारे कामे वा योजयति ॥ १४ ॥

स्फुरंतमितस्ततः सर्पंतं अम्लानलक्ष्म्या वनमालयांचितं निरूपयति अंतः सरस्युरुबलेनेति द्वाभ्यां यो हरिः सवनमाली भक्ता हि गजेंद्रमोक्षणमोक्षरूपां भगवत्कीर्त्तिं श्रुत्वा सर्वथा प्रवर्त्तंते वनमाला च कीर्तिमयी अम्लानादितस्य कांतिः न तत्र देवादीनां सहायः यतो वागजेंद्रो केवलभगवतैव मोचितः तदादेवानां प्रार्थना नवातस्य लौकिका गुणाः भगवत्प्रीतियोग्याः तस्मात्केवलकृपयैव मोचित इति अम्लानत्वं विलंबाभावसिद्ध्यर्थाय विशेषणानि अंतः सरसि सरोमध्ये उरुबलेन देवलाशपेन तादृशरूपस्य देवलकृपयैवमहाबलत्वं पदे गृहीत इति क्रियाशक्तिकुंठितग्राहबलेन च अनिवार्यं प्रतिबंधकत्वं यूथपतिरिति तस्मिन्मृते सर्वएवमरिष्यंतीति अन्येषाम समर्थता वा अंबुजहस्त इति पूर्वकृतरूपो निवारितः भगवदाभिमुख्यार्थं च भगवत्पूजार्थं च अंबुजग्रहणं आर्त्तत्वेन सर्वसाधनाभावः महान्यास्तादृशो कृपां कुर्वंति इदंचाह हेआदिपुरुष अनेन तव अधश्यपालनीयोऽहं मूलपुरुषत्वात् अन्योवा न वक्तव्यः अखिललोकनाथेति स वैलोकपालने त्वमेवाधिकृतः अतोनान्यो वक्तव्योऽपि ननु तव दुःखानुभवहेतुप्रत्यग्रपापस्य विद्यमानत्वान्मया किं कर्तव्यमित्याशंकायामाह हे तीर्थश्रवः तीर्थरूपं श्रवः कीर्तिर्यस्य तव कीर्तिस्मरणेनैव वयंधौतपापाः नतुकेवलमोचनेन कश्चित्पुरुषार्थः किंतु वैकुंठयोग्योदेहः संपादनीयः तदर्थं च शुभादृष्टाभावात्किं मया विधेयमित्याशंक्याह हे श्रवणमंगलनामधेयेति श्रवणमात्रेणैव मंगलं सर्वशुभदायिनामधेयं यस्य अनेन त्वन्नाममात्रेणैवसर्वशुभहेतुभाग्यं सिद्धम् ॥ १५ ॥

एवं पदचतुष्टयं निरूपिते वैकुंठस्थितो भगवान् श्रुत्वा दूरादेव तं शरणार्थिनं ज्ञात्वा केनापि न ज्ञातः अयं गजेंद्रोद्धारार्थं गच्छतीति तथा सति कश्चिद्देवोऽन्योवास्वप्रतिष्ठार्थं हस्ते तं धृत्वा बहिःक्षिपेत् अत आह अप्रमेय इति चक्रायुध इति मुक्तिदानार्थं पतगराजभुजावधिरूढः उत्तीर्णःअनेन तस्य कालग्रासानंतरं मुक्तिदानेनिवारितंनाहि गजेंद्रोदेहत्यागं ज्ञातवान् कालात्मकं सोऽध्यसुपर्ण इतिवाक्याद्गरुडस्य कालत्वं आगतस्य कृत्यकालमाह चक्रेण नक्रमिति प्रतिबंधकाभावं कृत्वेत्यर्थः ननु तेन महोद्धरणं तस्माच्छंकटात् हस्ते शुंडादंडे प्रकर्षेण गृहीत्वा स्पर्शमात्रेणैव चतुर्भुजं रूपं संपाद्य गृहीत्वेत्यर्थः भगवता उद्धृतत्वात् ब्राह्मणशापलक्षणः प्रतिबंधकः अकिंचित्करः कृपयोज्जहारेति जीवस्यसाधनाभावो निरूपितःपरदुःखप्रहाणेच्छा कृपा एवं हि भगवत्कीर्त्तिर्भक्तानुद्धरातिइदमेवचरित्रमुत्तरत्रभक्तिहेतुत्वेनविचारयिष्यते प्रल्हादवाक्येपुततःकीर्त्यैवप्रेमेति सिद्धं एवं वनमालानिरूप्यते नअंचितत्वं च प्रेमजनकत्वेन सूचयित्वा विभूषितंमेखलयेतिनिरूपयति ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

ज्यायान् गुणैरिति द्वाभ्यां वामनो हि भगवतो साधनभावो निरूपितः मेखलारूपः मेखला हि कटिस्थानबंधको भवति "सजघनादसुरानसृजते"ति श्रुतेः जघने आत्ममुख्यामिति वाक्यात् दैत्यबंधकत्वेन मायामप्यंतःपातयित्वा शोभां जनयतीति आकुंचनप्रसारणधर्मवत्वाच्च वामनः कटिसूत्रमेव अत एव गुणप्राधान्येनानिरूपणं अदितेः सुतानां मध्ये अवरजोऽपि आदितिर्हि भूमिरूपा यद्यपि सर्वरूपत्वेन निरूप्यते तथापि तस्यास्तुतिपरत्वात् इयं वा अदितिरित्येव मुख्या तस्या सुताः तत्कीर्ति रक्षां वा जनयंति अतोरक्षाकीर्तिरूपं पीतांबरं भवति तच्च दृढं करोति मेखलाः गुणैर्ज्यायान् पुष्टः स्थूलो महानित्यर्थः तस्य गुणानेवाह गुणा हि उत्कर्षाधायकाः भगवतो जगत्कर्तुः सर्वप्रेरकस्य सर्वनियंतुः कालचेष्टारूपस्य केवलधर्माः उत्कर्षं आदधतीत्याशंक्य वामनस्य गुणास्तथा भवंतीति मेखलागुणप्रस्तावे तां निरूपयति लोकान्विचक्रम इति भगवतो हि ब्रह्मरूपस्य उरः कंठादिरूपेण उपरितनलोकानां निरूपणात् तत्रत्वेनैव क्रमणं नयुक्तिसहितां बुद्धिमारोढुमर्हति अतो भगवतोऽन्ये धर्माः बुद्ध्यापरिकलितुं शक्यंते सर्वरूपेणैव भगवतः स्वाक्रमणं न बुद्धिगम्यमिति गुणत्वं बलिं प्रतिपादस्याग्रे नयन प्रदर्शनं ममेच्छयैव भगवतः स्वर्गादिलोकभोक्तारो जाताः वस्तुतस्तुचरणावयवलोकाभोक्तारः तेषामुपर्याक्रमणं न नित्यं मेखला हि उभयपरिच्छेदकर्त्री "ऊर्ध्वं वै पुरुषस्य नाभ्यैमध्यमवाचीनममेध्यं यन्मध्यतः संनह्यति मध्यं चैवास्यामेध्यं च व्यावर्तयती"ति श्रुतेःमेखलायास्तदुभयपरिच्छेदकत्वं ततो दैत्यानां स्वर्गाक्रमणं नयुक्तमिति व्यावर्त्तकेन व्यावृत्तिः क्रियते अतो युक्तापरमार्थतश्च अपाक्रमणं नसंभावितं किंच विशेषेण चक्रमणं सुतरामसंभावितं विशेषो हि विक्रमणेन पततां लोकानां तेनैव स्तंभनं याति कैव क्रिया यातयति पालयतीत्याश्चर्यं किंच अतः परमन्योविशेष उच्यते भिन्नक्रमेणेत्याह अयेति लोकपरमार्थाभ्यां पूर्वमलौकिकं निरूपितं अधुना स्वयं यज्ञरूपः यज्ञस्थापनां कुर्वन् यज्ञविघ्नं करोतीति वेदेऽप्यलौकिकं तदाह यदथाधियज्ञ इति यस्मादयमधियज्ञःएवं सर्वप्रकारेण बुद्ध्यगोचरत्वं विनिरूप्य रूपस्वभावविरुद्धं करोतीत्याह क्ष्मांवामनेन जगृहे त्रिपदच्छलेनेति वामनोहि स्वल्पामपि भूमिं देहेनापिनाक्रामति तेन सर्वभूमिग्रहणं सुतरां नयुक्तं नमनेनैव हि मेखलया कटिराक्रम्यते किंच त्रिपदच्छलेनेति नहि भगवतः पदत्रयमस्ति छलं हि भ्रमजनकं मानं हि यत्र व्याप्तमेव तद्गृह्णाति नहि भगवान् बुद्ध्या मानमुक्तवान् चरणस्तुनिष्काशितो न मानं भवति अतो भगवता तृतीयः पादकल्पनीय इति ज्ञातव्यं वामनवाक्यानुसंधानेन तन्नामकपदैः लोके अन्यथा प्रतीति जनकैर्भूमियाचनं छलो भवति मायेत्यसुरा इति तेषां मायारूपेणैव भगवान् भवतीति भगवता सत्यतया निरूपितमपिच्छलत्वेन पर्यवसितमिति तथोच्यते एवं भगवतो महद्गुणान्विनिरूप्य तत्र जातंदोषं याचनलक्षणं निराकरोति याञ्चा मृत इति याञ्चा हि द्विविधा सेवक कर्तृका प्रभुकर्तृका चतत्रसेवककर्तृकाप्रभोर्दोषायहानप्रभुकर्तृका वस्तुतस्तु इयं याञ्चा प्रभुकर्तृका वस्तुतः प्रभोरपि धनं अन्येषु स्थापितं नीतिमार्गेण तस्य याचनमेव उचितं स्वेनैव तत्र स्थापितत्वात् पथि चरणं अनंगीकार एव हि बलाद्ग्रहणं न चाल्य इति स्थानान्ननिष्काशनीयः याञ्चां कृत्वा निष्काशनीयस्तदंगीकारे क्ष्मामिति भूमिमेव गृहीतवान् याञ्चयाऽपि दैत्यानां हि तत्रोत्पन्नानां तत्स्वामित्वादेव अतो हि बंधनमन्यथा पातालादिषु क्वचिदपि तत्स्वामित्वे ग्रहणं स्यात् अवश्यश्च स्वाम्यं सर्वथा करिष्यत्येवेति बंधनं अनेनापि च्छलःसमर्थितो भवति एकस्यांशस्य याचनं अंशद्वयस्य त्याजनं त्रयाणां तुयाचनं छलः सन्नियोगशिष्टत्वाच्चत्रयाणां याचनं अथाशेषाभ्यनुज्ञास्यात् क्रियाद्वयं वा आपद्येत तस्मान्मेखलाया भूमिग्रहणमुचितमेव ॥ १७ ॥

ननु भगवान् भक्तिमार्गविरुद्धं कथं कृतवान् गुणाहि भक्तिजनकाः भक्तेरेव ग्राह्या आदरणीयाश्च नच भगवान् भक्तिविरुद्धमपि करोतीति शास्त्रार्थो भवति तस्मादस्यचारित्रस्य गुणत्वेपि नप्रकृतोपयोगि गुणत्वमित्याशंक्याह नार्थो बलेरयमिति भक्तिविरोधस्तदापतति यदि भक्तस्यानभिप्रेतं स्यात् नहि मेखलया कटिबंधनं कटितटस्याभिप्रेतं भवति नहि भक्तस्य धनं भगवता उपभुज्यमानं तस्य दुःखाय भवति तदीयस्य सर्वस्यापि तदर्थत्वात् लोकप्रतीत्या तु यो विरोधः सगुण एव भक्तैश्चेद्विरोधो मतः स्यात् तदापि परिहरणीयः अभिमानवतां भक्तानां अनभिप्रेत त्याजनं सुखकरमेव तदाह अस्य भक्तस्य बलेः भगवत्पूजारूपस्य विबुधाधिपत्यं अर्थफलं पुरुषार्थो वा न भवति पूजा हि असंबद्धा भगवत्प्रीतिं जनयतीति दैत्यानां संबंधि निराकरणार्थं मंत्रैस्तत्परिच्छेदकरणार्थं युक्तमेव अयं च लोकत्रयात्मको विषयः बलेर्नार्थः तर्हि कथं पूर्वं तेन गृहीतमित्याशंक्याह उरुक्रमपादशौचमिति सहि भगवच्चरणारविंदे समर्पणार्थं पूर्वं गृहीतवान् अधुनाचरणप्रक्षालनं कृत्वा तत्तस्मिन्निवेद्य तच्चरणारविंदोदकं शिखायां धृतवतः भगवदीयत्वं प्राप्तः तादृशशरीरादौ प्राप्तिर्योग्यतां वाप्राप्तः कक्षात्रयमुपरिगतेः तादृशस्य प्रथमकक्षानपुरुषार्थाय नहि भगवतायलादयं कक्षात्रये नीतः नह्ययं प्रत्याक्रमेच्छुः भगवांस्तु बलिस्थाने स्थितः श्रुत्यर्थपरिपालनाय "सर्वैर्विष्णुक्रमाक्रमेतयस्मात् लोकात् भ्रातृव्यस्य संविज्ज्य पुनरिमं लोकं प्रत्यवरोहेति श्रुते" ये यथा मांप्रपद्यंत इति वाक्यात् दानस्य साफल्याच्च अनंतगुणं हि पात्रे दत्तं भवति अतोऽनंतब्रह्मांडाधारो भगवान् भ्रातृव्यस्य सविज्यतस्य सिद्धेःअतः पूर्वस्वीकृतत्रैलोक्यं नार्थःकिंच पूर्वं महादेवाय त्रैलोक्यं दत्तवानेव पश्चाच्चरणोदकं मस्तके स्थापयित्वा ऐश्वर्यादौ विरक्तःसन् पुनश्चरणमेव ध्यायति अयं च तथा उरुक्रमस्यैव पादशौचं चरणारविंदोदकं महादेवस्यास्यापि तुल्यं विबुधाधिपत्यं च अस्य नार्थः यथामहादेवस्य दास्यार्थं ह्येवं कृतवानिति ज्ञापनार्थं चरणारविंदोदकधारणमेव हि तुल्यत्वेनोक्तं न तु दानादेः अन्य शेषत्वात् किंचयोवैं प्रतिश्रुतमेव चिकीर्षदन्य इति यस्तु स्वसंकल्पनिर्वाहार्थं बहुविचारितवान् पश्चात् तृतीयपादार्थं स्वशिरो दत्तवान् नह्येतादृश पूर्वदत्तं कामयते भगवत्सेवाकरणं दैत्यत्वत्याजनार्थं देवेषु सत्यं दैत्येषु अनृतं प्रतिष्ठितं तदशक्यमपि इति श्रुति मतेनसत्यं चेत्कृतं तदा सत्यं प्रतिष्ठितः भगवद्धर्ममेव प्राप्तवान् अन्यदिति रूपभेदोपि निवारितःआत्मानमेवं अंगेति स्नेहसंबोधनं तस्मिन् भगवत एवकार्यं न वामनस्य अन्येषामिति स्नेहसूचनार्थं शिरसेति प्रधानेन सह आत्मसमर्पणं ब्रह्मज्ञानेन सहितं कृतमिति सूचितं भवति अयमात्मा शिरसा सह हरये अभितो मेने अनेन शरीरेण भगवत एकंकार्यं न वामन अन्येषा मिति अभिशब्दार्थः यथाहि तस्य मनोरथः यथैव च सिद्धिः यथा भगवते दत्तं वस्तु तदर्थं बहिरवस्थाप्यते तथा बलिस्थापित इति न भक्तिविरोधः अतः एतेषां गुणत्वात्तस्य महती भक्तिर्जाता अन्यथा मात्सर्यादिकमुत्पद्यते जयविजयवत् तस्मादेतेषां गुणत्वाद्वामनो मेखला तेनच विभूषितत्वं सर्वत्र भक्तावुपयोगात् माहात्म्यज्ञाने स्नेहे च फलैवैतै रंगुलीयकै र्विभूषितत्वमाह ॥ १८

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

कूर्मावतारमाह क्षीरोदधाविति । अमृतलब्धये क्षीराब्धिमुन्मथ्नतां या अमृतलब्धिस्तस्यै गोत्रं मन्दरगिरिं दधार । निद्रायां क्षणः अवसर उत्सवो वा यस्य सः । तत्र हेतुः अद्रेः परिवर्त्तेन परिभ्रमणेन कषाया कष्यमाणा दूरीक्रियमाणा कण्डूर्यस्य सः । कष हिंसायां यगमाव आर्षः ॥ १३ ॥

श्रीनृसिंहावतारमाह । त्रैपिष्टपानां देवानाम् उरुभयं हन्तीति तथा स प्रसिद्धो भगवान् । भ्रमन्त्यौ भ्रुकुट्यौ दंष्ट्राश्च यत्र तथाभूतं करालं भीषणं वक्त्रं यत्र तत् । दैत्येन्द्रं हिरण्यकशिपुम् आरात् समीपत एव गदया सह अभिपतन्तम् ॥ १४ ॥

हरिसंज्ञकावतारमाह अन्तारिति द्वाभ्याम् । इदं नामचतुष्टयम् आह । तत्रादिपुरुषेति त्वमादित एव पुरुषाकार एव अहन्तु जीवत्वात् पुरुषोऽपि सम्प्रति पापात् गजाकार एवेति भावः । अखिललोकानां नाथेति ममापि नाथस्त्वं भवितुमर्हस्येवेति भावः । तीर्थं पावनं श्रवो यशो यस्येति दुःखोत्थारम्भकात् पापात् मामपि पवित्रीकर्त्तुमर्हस्येवेति भावः श्रवणमङ्गलेति श्रीगुरुमुखात् त्वन्नाम मया श्रुतमेव तदन्ये-तदमङ्गलं कथमिति भावः ॥ १५ ॥

अरणार्थिनं शरणार्थिनम् ॥ १६ ॥

वामनावतारमाह अदितेः सुतानां द्वादशादित्यानाम् अवरजोऽपि गुणैर्ज्यायान् अधियज्ञः यज्ञाधिष्ठाता विष्णुः । वामनेन वामनरूपेण नन्वीश्वरः किमिति तथा छलेन याचते तत्राह याञ्चां विना धर्ममार्गे वर्त्तमानः प्रकारान्तरेण न चालयितुमर्हः ॥ १७ ॥

ननु तर्हि याञ्चयापि चालनमनुचितमेवेत्याशङ्क्य ततोऽधिकं स्वसालोक्यादि दास्यामीत्याशयेन हृतवानित्याह नार्थ इति यद्विबुधाधिपत्यम् इदानीं बलात् प्राप्तम् अग्रे दास्यमानञ्च अयं बलेः पुरुषार्थो न भवति । कुत इत्यत आह । आ अप इति छेदः उरुक्रमस्य पादशौचं चरणक्षालनरूपा अपः आसम्यक्प्रकारेण धृतवतः । क शिखा शिखासु मूर्द्धीत्यर्थः । किञ्च शुक्रेण वारितः शप्तोऽपि अङ्ग हे नारद प्रतिश्रुतं विना अन्यत् न चिकीर्षत् कर्त्तुं नैच्छत् । अडागमाभाव आर्षः । यस्तृतीयचरणपूरणार्थं हरये आत्मानम् अहन्तास्पदं देहमप्यभिमेने अभिमतीकृत्य ददावित्यर्थः ॥ १८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

कूर्मावतारमाह क्षीरोदधाविति आदिदेवः भगवान् कच्छपवपुः सन् क्षीरोदधौ क्षीरार्णवे अमृतलब्धये अमरदानवयूथपानाम् उन्मथ्नताम् मथनं कुर्वतां सताम् पृष्ठे न गोत्रं मंदरगिरिं विदधार, विधृतवान् कथंभूतो निद्राक्षणः निद्राया क्षणः अवसरः उत्सवो वा यस्य स तथोक्तः तत्रहेतुगर्भं विशेषणम् अद्रिपरिवर्तकषाणकंडूरिति अद्रेः परिवर्तः परिभ्रमः स एव कषः कषणं तेन अणिति अपयातीति अद्रि-परिवर्तकषाणा एवं विधा कंडू र्यस्य स तथोक्तः ॥ १३ ॥

नृसिंहावतारमाह त्रैविष्टपोरुभयहेति स एव भगवान् त्रिविष्टपे स्वर्गे भवास्त्रैविष्टपा सुराः तेषामुरुभयमपहंतीति तथा भ्रमंत्यौ भ्रुकुट्यौ दंष्ट्राश्च यस्मिन् तत् करालं वक्त्रं यस्मिन् तत् तथाविधं नृसिंहरूपं कृत्वा स्फुरंतं क्रोधवशात्कंपमानम् आरादंतिके गदयोपलक्षितम् अभिपतंतमभिमुखमापतंतम् दैत्येंद्रं हिरण्यकशिपुम् ऊरौ स्वोरौ निपात्य नखै विददार ॥ १४ ॥

हरिसंज्ञकावतारमाह अंतरितिद्वाभ्याम् अंतः सरसि सरोमध्ये उरुबलेनबहुबलेन ग्राहेण पदे गृहीतः अतएव आर्तः यूथपति गजयूथनाथः अंबुजमुपायनभूतं हस्ते यस्य सगृहीतांबुजःसन् इदमाह हे आदिपुरुषसर्वजनक हे अखिललोकनाथ सर्वप्राणियाच्यतीर्थरूपाणि श्रवांसि यशांसि यस्य स तीर्थश्रवाः तस्य संबोधने हे तीर्थश्रव इति श्रवणमात्रेणापि मंगलानि मंगलावहानि नामध्येयानि यस्य सतथा तस्य संबोधने हे श्रवणमंगलनामधेय ॥ १५ ॥

हरिः स्वानन्यभक्तक्लेशहरणस्वभावः तद्वचनं श्रुत्वा तमरणार्थिनं हस्ते शुंडायांप्रगृह्य चक्रेण श्रीसुदर्शनेन नक्रस्य वदनं विनिपाट्य विदार्य तस्मान्नक्रवदनात् कृपया उज्जहार उद्धृतवान् ॥ १६ ॥

वामनावतारमाह ज्यायानिति अदितेः सुतानां मध्ये अधियज्ञ यज्ञाधिष्ठता भगवदवतारः अवरजोऽपि पश्चाज्जातोपि द्वादशानामदिति पुत्राणां मध्ये कनिष्ठभ्राताऽपीत्यर्थः गुणैस्तुदातृप्रतिगृहीत्रोर्बलिवामनयो यशोवहैःआदित्यानां सुखावहैश्चज्यायानेव ज्येष्ठ एव तान् दर्शयति यत् यतः इमान् लोकान् विचक्रमे क्रांतवान् अथ प्रतिश्रुतानंतरमेव तत्रहेतुः बलेः क्ष्मांत्रिपदच्छलेन त्रिपदप्रमितभूमियाञ्चामिषेण वामनेन रूपेण जगृहे गृहीतवान् याञ्चामिषेण क्ष्मादाने हेतुमाह पथि चरन् धर्मवर्त्मनि वर्तमानः प्रभुभिरीश्वरैरपि याञ्चांविना न चाल्य न च्योत्ह्-जनीयइत्यर्थः ॥ १७ ॥

एवं स्वभक्तानां देवानामैश्वर्यसाधकेन भक्तवत्सलेन भगवता बलेः स्वभक्तस्य याञ्चाक्ष्मापहारेण यशोमात्रमेव स्थापितं यद्यपि तथापि तस्य विबुधाधिपत्यापहारेणानुपकार एव कृत इत्याशंकां निवारयितुमाह नार्थ इति यद्विबुधाधिपत्यम् अयं बलेः पुरुषार्थो न भवति कुत इत्यत आह उरुक्रमपादशौचमापः शिखाधृतवतइति आअप इति च्छेदः शिखा इत्यत्र सप्तम्या आर्षो लुक् उरुक्रमस्य विपुलचरणविन्यासस्य भगवतः पादशौचम् चरणक्षालनरूपाआपः आसर्वतः शिखायां मूर्द्धि धृतवतः किंच अंग हे नारद भार्गवेण सर्वस्वं विष्णवेऽर्पयत्वा मूढवर्त्तिष्यते कथमित्यादिना वारितोऽपि प्रतिश्रुतमृते अन्यत्र चिकीर्षत् कर्त्तुं नैच्छत् अडभाव आर्षः किंतु यःतृतीयपादपूर्त्यर्थं हरये आत्मनमप्यभिमेने समर्पितवान् एवं चरणशौचेन मूर्द्ध्न्यधिकृतेन आत्मसमर्पणेन स सकृतार्थ आसीदित्यर्थः ॥ १८ ॥

भाषा टीका

युगान्त समय में मनु ने मत्स्य भगवान का दर्शन पाया जो पृथ्वीमय अर्थात् पृथिवी के आश्रय होने के कारण समस्त जीव निकाय के आश्रय हैं जिन्होंने मेरे मुख से विगलित वेदों को ग्रहण कर उस उरु भय प्रलय जलमें विहार किया ॥ १२ ॥

तुभ्यञ्च नारद भृशं भगवान् विवृद्धभावेन साधु परितुष्ट उवाच योगम् ।
ज्ञानञ्च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव ॥ १९ ॥
चक्रञ्च दिक्ष्वविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्त्ति ।
दुष्टेषु राजसु दमं व्यदधात् स्वकीर्त्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥ २० ॥
धन्वन्तरिश्च भगवान् स्वयमेव कीर्त्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हन्ति ।
यज्ञे च भागममृतायुरवावरुन्द्धे आयुश्च वेदमनुशास्त्यवतीर्य्य लोके ॥ २१ ॥
क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्त्तिलिप्सु ।
उद्धन्त्यसाववनिकण्टकमुग्रवीर्य्यंस्त्रिःसप्तकृत्व उरुधारपरश्वधेन ॥ २२ ॥
अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य्य गुरोर्निदेशे ।
तिष्ठन् वनं सदयितानुज आविवेश यस्मिन् विरुध्य दशकन्धर आर्त्तिमार्च्छत् ॥ २३ ॥
यस्मा अदादुदधिरूढभयाङ्गवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः ।
दूरेसुहृन्मथितरोषसुशोणदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः ॥ २४ ॥

भाषा टीका ।

अमृत प्राप्ति के अर्थ क्षीर समुद्रको देवदानव यूथ पति मन्थन करने लगे और मन्दराचल पर्वत डूबा जाताथा तब समुद्र में कच्छप रूप धारण कर पर्वत को अपने पृष्ठपर किया । उस पर्वत के परिवर्त्त से कण्डूका निवारण होने लगा और उसी सुख से आपको निद्रा का अवसर हुआ ॥ १३ ॥

देवगण के उरुभय हारी भगवान ने भयानक भ्रमत भृकुटी और दंष्ट्राओं से कराल वदन नृसिंह रूप धर कर गदा लिये अपने ऊपर टूटते दैत्येन्द्र (हिरण्य कशिपु) को शीघ्रही अपने ऊरुओं पर गेर कर वज्र नखों से विदारण किया ॥ १४ ॥

सरोवर में बलवान ग्राह ने यूथ पति गजेंद्र को पैर में पकड़ लिया । वह बिचारा आर्त्त सूंड में कमल का पुष्प लेकर बोला । हे ! आदि पुरुष हे अखिल लोकनाथ ! हे तीर्थश्रव ! हे श्रवणमंगल नामधेय ! (मेरी रक्षा करो) ॥ १५ ॥

यह सुन कर उस शरणार्थी को अप्रमेय चक्रायुध भगवान ने गरुड़ के भुज पर आरूढ हो रक्षा की । चक्र से नक्र का वदन विपाटन कर उसकी सूंड पकड़ कर कृपा कर उद्धार किया ॥ १६ ॥

अदिति के पुत्रों में छोटे होकर भी गुणों में सब से बड़े हुए अर्थात् भगवान ने इन सब लोकों को विक्रमण किया । वामन रूप से तीन पांव का छल कर बलि राजा से समस्त पृथिवी को ग्रहण कर लिया । छल यों किया कि धर्म्म पथ पर चलते पुरुष को बिना याञ्चा के आप प्रभू होकर भी चाल न करना चाहिये ॥ १७ ॥

उरुक्रम भगवान के पादशौच जल को शिखा पर धरने वाले बलि राजा का यह प्रयोजन नहीं था कि वह देवताओं का राजा हो । जिसने अपनी प्रतिज्ञा पालन करने के भिन्न और कुछ इच्छा नहीं की । और अपने आत्मा को भी शिर से हरि को अर्पण किया ॥ १८ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

हंसावतारमाह तुभ्यमिति । भृशं विवृद्धेन भावेन अभ्युद्रिक्तया भक्त्या परितुष्टः सन् भक्तियोगं साधु यथा भवति तथा उवाच । ज्ञानञ्चेति । ज्ञानं ज्ञानसाधनम् । किं तत् भागवतं नाम । कथम्भूतं तत्त्वमेव सतत्त्वम् आत्मतत्त्वदीपकम् । विवृद्धभावेनेति विशेषणस्य फलमाह यद्विति ॥ १९ ॥

तत्तन्मन्वन्तरावतारमाह । चक्रमिति । स्वतेजः निजप्रभावमेव चक्रं सुदर्शनं बिभर्त्ति चक्रवत् अप्रतिहतं प्रभावं बिभर्त्तीत्यर्थः तदेवाह मनुवंशपालकः सन् त्रयाणां महर्जनतपोलोकानां पृष्ठे उपरि स्थिते सत्यलोकेऽपि कमनीयां स्वकीर्त्तिं विस्तारयन् (दुष्टेषु) राजसु दण्डं विधत्ते ॥ २० ॥

धन्वन्तर्य्यवतारमाह । लोके अवतीर्य्य धन्वन्तरिः सन् पुरुरुजां महारोगिणां लोकानां स्वनाम्नैव रुजो रोगान् हन्ति । स्वयमेव कीर्त्तिरिति कीर्त्यतिशयोक्तिः । अमृतं मरणशून्यम् आयुर्यस्मात् सः । अव अवसन्नं पूर्व्वं दैत्यैः प्रतिरुद्धं, यज्ञे भागञ्च अवरुन्धे लभते । अवापरुद्धमिति पाठेऽप्ययमेवार्थः । आयुर्विषयं वेदञ्चानुशास्ति प्रवर्त्तयति ॥ २१ ॥

परशुरामावतारमाह । जगतः क्षयाय विधिना दैवेन उपभृतं संवर्द्धितं मृत्यवे समर्पितमिति वा । ब्राह्मणेभ्योऽपि द्रुह्यतीति तथा । अत उज्झितः पन्था वेदमार्गो येन । अतएव नरकार्त्तिं लिप्सतीव । एवम्भूतम् अवनेः कण्टकतुल्यं क्षत्रम् असौ महात्मा हरिः उद्धन्ति उत्पाटयति तीक्ष्णधारेण परशुना ॥ २२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

श्रीरामावतारमाह त्रिभिः । अस्माकं ब्रह्मादीनां प्रसादे सुमुखः, कलया भरतादिरूपया सह, कला माया तस्या ईशः गुरोर्दशरथस्य आज्ञायां तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवेश । यस्मिन् विरोधं कृत्वा रावणो नाशं प्राप्तः ॥ २३ ॥

यस्मै रामाय उदधिर्मार्गं ददौ । सपदि शीघ्रम् हरो यथा त्रिपुरं दिधक्षुस्तद्वत् अरिपुरं लङ्कां दग्धुमिच्छोः षष्ठी चतुर्थ्यर्थे कथम्भूत उदधिः ऊढं प्राप्तं यत् भयं तेनाङ्गेषु वेपः कम्पो यस्य यद्वा पञ्चमीयम् दिधक्षोः रामादूढभयं प्राप्तं तेनाङ्गेषु कम्पो यस्येति अत्र हेतुः दूरे वर्त्तमाना सुहृत् सीता तया निमित्तभूतया मथितः क्षुभितः रोषस्तेन सुशोणा अत्यरुणा दृष्टिः तया अत्यन्तं तप्यमानं मकराणामुरगाणां नक्राणाञ्च चक्रं यस्मिन् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

हंसावतारमाह तुभ्यमिति भृशंविवृद्धस्नेहेन त्वया परिपृष्टः साकल्येन पृष्टो भगवान्हंसरूपेणोतिशेषः योगमनभिसंहितफलकर्म योगं ज्ञानंभागवतं साधनसप्तकानुगृहीतभगवदुपासनात्मकं ज्ञानम् प्रकृतिविविक्तात्मनःसुतत्वं याथात्म्यं तस्य दीपवत्प्रकाशकं ज्ञान योगं च साधुयथा तथातुभ्यमुवाच एतदाख्यानमेकादशे स्फुटं यदेवहंसोक्तयोगादिकं वासुदेवशरणाबहूनां जन्मनामंत इत्युक्तरीत्या उपायत्वेन वासुदेवं शरणं गताः अंजसा सुखेन विदुःहंसोक्तमेवज्ञात्वाऽनु तिष्ठंतीत्यर्थः ॥ १९ ॥

तत्तन्मन्वंतरावतारमाह चक्रमिति मनुवंशधरः मनुवंशपालकः सन्मन्वंतरेषु दशसु दिक्षवप्रतिहतमनभिभाव्यं स्वतेजः स्वप्रतापो पबृंहितं चक्रमाज्ञारूपं चक्रं विभर्षि किंच दृप्तेषु गर्वितेषु राजसु दमंदंडं व्यदधाद्व्यधत्त कथंभूतः सन् त्रिपृष्ठे तृतीयस्यां दिवि सत्ये सत्य लोके स्वचरित्रैः उशतीं कमनीयां कीर्तिं प्रथयन्विस्तारयन्स व्यदधादित्यर्थः ॥ २० ॥

धन्वंतर्यवतारमाह धन्वन्तरिरिति भगवान् लोके धन्वंतरिरूपेणावतीर्य पुरुरुजां भूरिदुःखानां महारोगिणां नृणां स्वनाम्नैव रुजः रोगा न् हंति कथंभूतः स्वयमेव कीर्तिरिति कीर्त्यतिशयोक्तिः अमृतं मरणशून्यमायुर्यस्मात्संरुद्धं पूर्वदैत्यैः प्रतिषिद्धं यज्ञ भागमवाप लेभे आयु र्विषयं वेदं चानुशास्ति प्रवर्तयति ॥ २१ ॥

परशुरामावतारमाह क्षत्रमिति विधिनादैवेन क्षयाय मृत्यवे उपभृतं समर्पितं ब्रह्मध्रुग्ब्राह्मणेभ्यो द्रुह्यतीति तथा अतः उज्झितसत्पथः पंथा वेदमार्गो येन अत एव नरकार्त्ति नारकं दुःखं लिप्सु लब्धु मिच्छु एवं भूतमपनः कंटकं कंटकतुल्यं क्षत्रं क्षत्रियकुलमसौ महात्मा भार्गवरामरूपो हरिरुरुधारपरश्वधेन दीर्घतीक्ष्णधारेण परशुनात्रिःसप्तकृत्व एकविंशतिवारं उग्रवीर्यः असह्यवीर्यः समुद्धंति उत्पाटयति ॥ २२ ॥

रामावतारमाह अस्मदिति त्रिभिः अस्मदनुग्रहे सुमुखअस्मद्दत्तवराविरोधेनावतीर्णो इति भावः कलेशः प्रकृति पुरुषयोरधिपतिः कलया भरतादिरूपयासहत्रिभिःइक्ष्वाकुकुलेऽवतीर्यगुरोर्दशरथस्य पितुर्निर्देशे आज्ञायां तिष्ठन्नाज्ञांपालयन्नित्यर्थःसदयितानुजःसीतालक्ष्मणाभ्यां सहितः वनं दंडकारण्यं योविवेशयस्मिन् रामेविरुध्य विरोधं कृत्वा दशकंधरो रावणः आर्तिं नाशमार्छत्प्राप्तः ॥ २३ ॥

यस्मै श्रीरामाय उदधिः समुद्रः मार्गं मदाद्दत्तवान् कथंभूतोऽ दात्सपदि शीघ्रहरो रुद्रः यथा त्रिपुरंदिधक्षु र्दग्धुमिच्छुस्तद्वदरिपुरं लंकां दिधक्षोस्तस्माच्छ्रीरामाद्धेतोरूढभयांगवेपः ऊढंप्राप्तं यद्भयं तेनागेवेपः कंपो यस्य सः हरिः वर्त्तमाना सुहृत्सीता तया निमित्तभूतया मथितःक्षुभितःयो रोषस्तेन सुशोणा दृष्टिः श्रीरामसंबंधिनी तया तातप्यमानं मकराणां नक्राणां उरगाणां च चक्रं समूहो यस्मिन्स एवं भूतोऽब्धिः मार्गमदादित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

महिदासनाम्नोहरेरवतारस्यचरित्रमाह तुभ्यमिति विवृद्धभावेनसमुद्रिक्तभक्त्याभागसुपरितुष्टोनाम्नामहिदासोभगवांस्तुभ्यमस्मदादिभ्यश्चभगवद्विषयकर्मयोगंज्ञानयोगंचोवाचेत्यन्वयःआत्मेत्यनेनभागवतंधर्मस्पष्टयतिअत्रप्रमाणमाह यदितियत्ज्ञानंवासुदेवशरणाब्रह्मादयःअत्रै णायनितिभार्थएवशब्दः तदुक्तं ऐतरेयोहरिःप्राहनारदायस्वकांतनुं यत्प्रापुर्येणायानान्येनहेतुनसुखंपरमिति ॥ १९ ॥

राजराजेश्वरावतारंतच्चरितंचाह चक्रंचेति राजराजेश्वरइतिनाम्नाऽवतीर्णोहरिः स्वायम्भुवादिमनुवंशधरःसन्दुष्टेषुराजसुदमंविदधत् सत्यधर्मसत्यसंधानव्रतानिविष्टउशतींकमनीयांस्वकीर्तिंचरित्रैः प्रथयन्प्रख्यापयन्मन्वंतरेषुभगवान्प्रियव्रतादिचक्रवर्तिरूपेणास्थितोदशसुदिक्षुअविहतमप्रतिहतंतेजःस्वरूपभूतप्रभावंचक्रत्राणलक्षणंबिभर्तीत्यन्वयः मन्वंतरेषुभगवांश्चक्रवर्तिषुसंस्थितइत्यादिकमत्रमानम् ॥ २० ॥

दयोभगवान्स्वयमेवविशेषविशमंतरेणधन्वंतरिश्चामाअवतीर्णोश्च पुरुरुजांबहुरोगाणांरुजोरोगान्नाम्नोच्चारितेनहंति सएवामृतायुर्नि त्यमुक्तःसन्वद्धा यज्ञभागंचावापआयुर्वेदंचवा * दृष्टशास्त्रंचानुशास्तिकृत्वालोकेप्रवर्तयति ॥ २१ ॥

भार्गवरामावतारंतत्कर्मचसंक्षिप्याह क्षत्रमिति उरुद्रंग्रमतीतिउग्रंवीर्यंयस्यसउग्रवीर्यःआत्मभ्यःपुरुषेभ्योमहान्पुरुषोत्तमोऽसौ उर्वीधारानिशिताग्रंयस्यसउरुधारःसचासौपरश्वधःपरशुःतेनावनिकंटकमतएवनरकार्तिलिप्सुर्नरकदुःखलब्धुकामंउज्झितपथंमुत्यक्तसन्मार्गंब्रह्मध्रुक्ब्राह्मणाद्रोहि अतएवविधिनादैवेनक्षयायोपहृतंसमर्पितं क्षत्रंक्षत्रियकुलं उद्धंत्युन्मूलयतीत्यन्वयः त्रिःसप्तकृत्वएकविंशतिवारम् ॥ २२ ॥

रामावतारंतद्विक्रमंचश्लोकत्रयेणाहकृत्स्नप्रसादेति दशकंधरोरावणोयस्मिन्विरुद्ध्यार्तिमरणलक्षणामार्च्छत्प्राप सःकलेशःप्राणःश्रद्धावायुरित्यादिषु * त्युक्तानांकलानांस्वकार्यशक्तिप्रदः कृत्स्नःपूर्णःप्रसादआनंदोयस्यसतथा कार्येणाकारणोपलक्षणं सुसुंदरमुखंयस्यसतथा कृत्स्नप्रसादश्चासौसुमुखश्चेतिसमासः इक्ष्वाकुवंशकलयास्वरूपांशेनावतीर्यगुरोर्दशरथस्यनिदेशेनियोगेतिष्ठन्सदयितानुजःसीतालक्ष्मणाभ्यांसहितोरामोयममाविवेशेत्यन्वयः ॥ २३ ॥

---

१ तन्नामकंवैद्यशास्त्रम् २ षष्ठीचतुर्थ्यर्थे ३ षट्प्रश्नोक्तश्रुतिरित्यर्थः

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

पूर्वस्यतामुद्धृतसीतायस्यसः तस्यरामस्योज्ज्वलितोरोपप्रसुशोषोऽग्निःतेनयुक्तयादृष्ट्या अग्निःस्पर्शोयःकक्षस्तस्तिमिरारिर्हिरंदहति मकराश्चउरगाश्चनक्राश्चमकरोरगनक्राः तातप्यमानानांपुनःपुनःपच्यमानानांमकरोरगनक्राणांचक्राणियस्मिन्सतथा, ऊढभयंयं नसतथा अंगेषेपः कंपोयस्यमतथाऊढभयश्चप्रवंविधउदधिर्भिन्नपुरंहरवदरिपुरंलंकादिधक्षोदंग्धुकामायतस्मैरामायसपदिमार्गमदादित्यन्वयः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तुभ्यश्चेति । विष्णुधर्म्मोत्तरे हंसरूपेण तस्मै तत्कथनात् ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

तुभ्यं च नारदेति अंगुलीयकानि दशविंशतिर्वा भवंति तावंतिहि भगवद्रूपाणि यावंति नारदेन दृष्टानि अन्यैरपि नारदं प्रति भगवदवतारात् दर्शनं याचेतसीति वाक्यादनंता एव अंगुलयश्चतुर्भुजविंशतिर्भवति अनंतभुजे त्वनंताः नारदेन तत्सदृशैरन्यैश्च परिदृश्यमाना मूर्त्तयो भगवतोऽनंता अत एव तुभ्यं चेति चकारः तेषामंगुलीयकं अवयवांतोपयोगात् ते हि भक्ताः संसारांते भवंति अनेन सर्वात्मकस्य भगवतः भक्ताः अंगुलीय इति निरूपितं ते हि सर्वशरीर कारिणः सर्वक्रियाहेतवः महाधनैरिति विशेषणात् तेषु बहुधनमस्तीति ज्ञापितं तानि धनान्यन्ते वक्ष्यामः तुभ्यं नारदाय त्वदुपयोगार्थं च को योगमुवाचेति संबंधः तत्र साधुपरितुष्ट इति हेतुः तस्य योगस्य मूलरूपत्वात् नहि केनाप्यंशे नापरितुष्टः स्वमूल्यं वदति चतस्रो ह्यंगुलयः एकश्चांगुष्ठः सचमसवर्द्धीयो भवति नाभिः सा हि भक्तिः अंगुष्ठमूलं भवति तेन परितुष्टो वा भगवान् योगो ज्ञानं परिचर्या शरीरस्था स्वांगुलीयस्थानीयाः चतुर्भिरपि भक्तसहितो भगवान् प्राप्यते भक्त्या च तदाह भृशमत्यर्थं प्रवृद्धभावेन निरंतरश्रवणादिना तत्तन्मार्गे उत्पन्ना प्रीतिः सर्वहृदयं पूर्णं विधाय यदोच्छलिता भवति यदा वहिस्पष्टतया प्रेमानुभूयते सप्रवृद्धो भावः तेनैव भगवान् परितुष्यति गुणानां भगवतश्च अवगाहनयोग्यत्वात् अत एव साधु परितुष्टः परितोषानंतरमपि भक्तिपूरस्य विद्यमानत्वात् परितो यस्य साधुत्वं अपरितोषासह भावः स्वनिष्ठांच परितस्त्वं तु तदीयानाम त्युद्धारकत्वेन तदा हि योगमाह तथा उपायमुक्तवान् यत्रोपायेन भगवान् दृश्यत एव वहिर्दर्शने भक्तिरेव हेतुः अंतर्दर्शने योगः विद्यमानस्य दर्शने द्वयं भगवतो ज्ञात्वा जीव सामान्यतत्व प्रदर्शने च चकाराद्ब्रह्मज्ञानं च ब्रह्मस्वरूपज्ञानं ब्रह्ममीमांसायां निरूपितं निर्धर्मकः सर्वधर्मादिरूपेण स्वयमेवाविर्भवतीति चकारात्क्रियायोगं सभागवतं पुरुषोत्तमज्ञानं आत्मनो जीवस्य तत्वं शुद्धचैतन्यं रूपं तत्प्रकाशावृत्तिफलनेन स्वतो वा आविर्भावेन तद्ज्ञानं दीपः तेन सहितं आत्मसतत्त्वदीपं ब्रह्मात्मतत्वज्ञानं वा चकारात् क्रियायोगः तस्य फलं भक्तिरित्यग्रे वक्ष्यते ननुयोगज्ञानादीनां पूर्वमेव सिद्धत्वात् बहुभिश्च प्रकाशितत्वात् तदर्थं किं भगवदवतारेणोत्यत आह यद्वासुदेवशरणा इति यस्मान्नारदार्थं प्रोक्तपंचरात्रादेः वासुदेवशरणाः मोक्षदातुः सत्वाधिष्ठातृदेवतारूपस्य शरणागमनमंत्रेणैव तप आदीनामभावे पीच्छासामान्येनैव सममार्गेणैव विदुः ज्ञातवंत आश्रयमार्गेणैव सुगमतया परिज्ञातं पुनः कथने हेतुः अथवा भगवद्भक्ताः ब्रह्मपराः कर्म वा योगं वा ज्ञानानि वा तमत्यंत एवेति तदर्थं भगवता एतन्मुक्ता अतः परं परं भगवद्भक्ता परमश्रद्धया तेषु प्रवर्त्ततोमार्गगताश्च भवंति कृतार्थाश्च अन्यथा उत्पथा उन्मादाश्च भवेयुः भक्तेर्मोदकत्वात् एतदर्थं भगवान् भक्तिसाधकान्युक्तवानित्यर्थः नूपुरकंकणादिभिर्विभूषितं निरूपयति अत्रादिशब्देन द्वादशांगोपयोगिआभरणान्युच्यंते तत्र पादादयोहस्तानां च नूपुरकंकणाद्विभिर्ध्येयत्वं एवं कंठाभरणानि मुकुटादीनि च सर्वांगयेतानि द्वादशांगविभागेन द्वादशविधानि तानि मन्वंतरावतारत्वेनोच्यंते यद्यपि मेखलायाः वनमालायाश्च एतन्मध्य एव वचनमुचितं तथा सति चतुर्दशत्वं मन्वंतरावतारसंख्या चोपपद्यते तथापि तयोर्विशेषप्रयोजनस्य विद्यमानत्वात् पृथङ्निरूपणमुक्तं एतेषामपि विशेषणं महाधनानीति सर्वमन्वंतरेषु भगवान्योगा दिक मुपदिशतीति सूचितं तदाह ॥ १९ ॥

चक्रमिति मन्वंतरेषु भगवान्स्वतेजोविभर्ति पालनसामर्थ्यं विभर्ति सर्वमेव मन्वंतरं सांगं परिपालयतीत्यर्थः ननु मनुवंश्यानां विद्यमानत्वात् सर्वांशेन भगवत्परिपालनं किमर्थमित्याह मनुवंशधर इति मनोर्वंशं अयमेव विभर्ति मन्वंतरं एकसप्ततियुगात्मकं तत्र कलौ सर्वेषां नाशः धर्माद्यभावात् अतो भवतैव परिपाल्यंते तथा देवाअपि मनूत्रतुऋष्यादीनां विद्यमानत्वात् तेषां नाशशंकाभावात् किं भगवता तदंश कार्यं कर्त्तव्यं तत्राह चक्रमिति ते हि चतुर्विधाः मनुऋषिदेवतेंद्ररूपा तेस्वरूपतो विद्यमाना अपि आज्ञारूपेण नवर्त्तते तदर्थमाह चक्रं विभर्तीतितानेव ऋषीन् आज्ञारूपान् कृत्वाविभर्त्तीत्यर्थः सर्वे पुरुषशासना इति वाक्यात् चकारात्स्वतंत्रतया आज्ञां सेनां च विभर्त्तीति नियमनार्थं सहायं च तेषामाज्ञाकरणहेतुः दिक्ष्ववहितमिति दशसु दिक्षु अवहितं स्थापितं सावतं वा यथा यो यत्रस्थापनीयः तं तथा स्थापयतीत्यर्थः विशेषकार्यमाह दुष्टेषु राजसु दमं व्यदधात् पालकानां दुष्टत्वे तद्दंडकरणं विशेषकार्यं अनेन लोकरक्षानिरूपिता एवं देवलोकरक्षां निरूप्य भक्तिरक्षां निरूपयति स्वकीर्तिसत्ये त्रिपृष्ठे प्रथयन्निति यथा पातालादुद्धृत्य भूमिः पुष्करेण प्रथिता एवं त्रैलोक्ये स्थितां कीर्तित्रयाणां लोकानां पृष्ठभूतसत्यलोकं स्थापितवान् इतउद्धरणेन तत्र स्थापने हेतुः उशतीमिति कमनीयां अत्र हि प्राकृतधर्मैः प्राकृतबुद्धिभिश्च संबंधाज्जले मग्ने व कीर्तिः सा हि वस्तुतः श्रद्धा भवति तां सत्यलोके प्रथितवान् सत्यलोकस्थानामुपकारजननात् ज्ञानभक्त्यर्थं भगवच्चरित्राणि तत्र गीयंते ततः तत्र स्थिताः सर्वं एव भगवंतंजानंतीति सर्वलोकविख्यातो भगवान् तत्सदावयवभूत इत्यर्थः आदिशब्दत्वात् परिच्छिन्नत्वात् मन्वंतरेषु वहून्यवांतरावताराण सूचयति स्निग्धामलैः कुंचितनीलकुंतलैः विरोचमानाननहासपेशलं भगवंतं निरूपयति ॥ २० ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

— धन्वंतरिरित्यादिपंचभिः कुंतलानां धर्मः कुंतलैश्च विरोचमानमाननं तादृशे आनने हासेन पेशलो भवति भगवान् तत्र हासपेशलो रघुनाथः हास्यरूपो भवति सर्वमोहनरूपः परमसुंदरः तस्य कार्यं गूढमित्यग्रे वक्ष्यते कुंचितनीलकुंचनरूपः परशुरामः बहुधा चरित्रकारणा दिनैकरूपत्वं तस्य तद्गतधर्मस्निग्धामूलरूपः धन्वंतरि स्तेन हि अमृतेन शास्त्रेण च सर्वे स्निग्धा अमलाश्च कृता देवा हि रूक्षा अमृतेन भगवति स्निग्धा कृताः वैद्यशास्त्रेण च अमला भवंतीत्यविवादं उभयोःकार्यं भूमौ विद्यमान एव रघुनाथोऽवतीर्ण इति तादृशे मुखारविंदे हास्यरूपत्वं भगवान् यद्भगवद्धास्येन कार्यं तद्रघुनाथेन कार्यमिति तत्र आननं भगवतः धर्माधारब्राह्मणाःतत्रआरोग्ये धर्मसिद्धिःस्याद्रक्षा च धनुषा भवेत् अतोधर्मसिद्ध्यर्थं धन्वंतरिरवतीर्ण इति तच्चरित्रमाह धन्वंतरिश्चेति इष्टोपकारत्वात्स स्वयमेव कीर्तिभूतः चकारात् स्त्रीः रूपं च उभयमपि भगवान् तस्य धर्मः कीर्तिर्भवत्येव तथापि कीर्तिरूपताप्युच्यते तत्रहेतुः नाम्नैव पुरुरुजो महारोगग्रस्तानां रुजमाशु हंति धन्वंतरिनामस्मरणेनैव सर्वाणि रोगाणि गच्छंतीत्यर्थः नृणामिति रोगसंभवतयोक्तं नामोच्चारणापितृत्वाद्यावस्तुतस्तुशास्त्रद्वारास र्वेषामेव रोगान् हंति नाम च तस्य शास्त्रं सर्वेषामुपकारिणां यज्ञे भागानिरूपितावाश्वादीनां तथा अनेनापि आरोग्यलक्षणधर्मं विधाय यज्ञे भागं च प्राप्तवान् बर्हिरेतु प्रहरतीति वाचि स्वाहेति मंत्रेण समिष्टयज्ञोपबर्हिशोऽनुप्रहरणं बर्हिःक्रियते तत्र वाचं देवतात्वं शांत्या इतिफलात् न संभवतीति सर्वशांतिकरा याचाऽक धन्वंतरिप्रोक्ता साभागमर्हतीति यज्ञेधन्वंतरिभागः रुद्धमिति पूर्वं बर्हिशोनुप्रहरणाभावः प्रायेण सूचितः "न बर्हिरनुप्रहरे"दिति अग्निहोत्रे तस्य निषधात् संस्थानामेव बर्हिषो ऽनुप्रहरणं सम्यक् स्थितिश्च आरोग्यं कार्यमिति बर्हिरेव तस्याभागः अन्यद्वाविंशतिशाखांतरीये वास्पष्टं किंच आयुर्वेदं च कृतवान् पूर्वं मथने प्रादुर्भूतः तत्रैव तिरोहितः पुनश्चकाशिराजगृहे अवतीर्य धन्वंतरिर्देव्यमत इति वाक्यात् आयुर्वेदं प्रवर्त्तितवान् चकारादन्योऽपि अस्यावतारस्यधर्मरूपत्वमेव न धर्मिरूपत्वं तेनऋषभादि द्वारापरं परोपयोगः कुंतलानां स्वरूपमाह क्षत्रमिति कुंचितनीलत्वं धर्मः कुंचितत्वं कुटिलतानीलत्वंच साम्यताक्षत्रियहंतृत्वात्कुटिलितभूमिकंटकोद्धारकत्वात्समतेति अथवा चतुर्भिर्विशेषणैः सहितानि कुंतलानि धन्वंतरिः अमृतोद्गमत्वात्स्त्रीत्वात् यज्ञभागभुक्तान् अवतीर्णत्वाच्च तत्रश्यामत्वं मथनान्निर्गतस्य कुटिलत्वं स्त्रीरूपस्य अमलत्वं यज्ञभुजः आयुर्वेदकरणात्सर्वस्निग्धत्वं स्वस्यावतारवाहुल्यायबहुत्वचनं मुख्यत्वं परशुरामस्य स हि वैश्वानरस्यावतारः अत एव सर्वक्षत्रियभक्षकः विशेषणरोचमानत्वं धर्मरक्षाकरणात् ॥ २१ ॥

क्षत्रं क्षत्रिया क्षयायैव विधिना उपभृतं वृद्धं उपसमीपे धृतं वा यथापशुर्ध्रियते भवाय नाशायेति वाक्यात् वधे हेतुः ब्रह्मध्रुगिति ननु नक्षत्रस्य ब्रह्मद्रोहजनकत्वं तत्राह उद्धृतपथमिति उद्धृतःपंथा येन सन्मार्गपरित्यागात् ब्रह्मद्रोहमिति तर्हि सन्मार्गबोधनेन कथं न व्यावर्त्तते तत्राह नरकार्त्तिलिप्स्विति नरकलक्षणामेवार्त्तिंवांछति परलोकदुःखमंगीकृत्य उत्पथेन वृतं अतो न बोधनेन निवर्त्तते अत एव उद्धृति उद्धमुत्कृष्य तान् दूरीकरोति अनेन यदेवास्याअवध्यं तदपहंतीति सूचितं माहात्म्येति अल्पद्रोहः प्रयोजनार्थं क्रियमाणा तत्तत्कृदर्थं बाधते भूद्वा एव हि वृष्णु प्रतया महात्मानस्तु पर्यवसानबुद्धयः असाविति यज्ञकर्त्ता उद्धननं हितेनैव क्रियते किंचएतत्कृतं मारणायैव अवनिकंटकत्वात् भूमिर्हि भगवतः पादौ सर्वोहि स्वपादकंटकोद्धारंकरोति यद्यपि सर्वात्मत्वात् तस्य व्यथाभवति तथाप्युग्रवीर्यः नहि कौर्यादर्क व्यतिरकेण कंटकोद्धारो भवति अनेन नैर्घृण्यमपि निवारितं त्रिःसप्तकृत्व इति सप्तधाहननेन एकवारं भूमेर्निःकंटकता जातापुनर्ब्राह्मणादुत्पन्ना सप्तधा हता पुनरेवमिति त्रिः उरुधारपरस्वधेनेति शस्त्रेण हननंपरलोकार्थं परश्वधः परशुभि उरुधारकत्वात् बहुधाहननेऽपि नकुंठता अनेन वधोक्तशाभावो निरूपितः ॥ २२ ॥

हास्यपेशलत्वं निरूपयति अस्मत्प्रसादसुमुख इति हासो हि त्रिविधः इतरगर्वनिवारकः इतरव्यामोहकः प्रसादहेतुश्च तत्र प्रथमं प्रसादहेतुमाह यद्यपि रघुनाथचरित्रस्यानंतत्वं तथापि हासत्वमात्रोपयोगात् गुणत्रयकार्यचरित्रत्रयमेवोपलक्षणत्वेन निरूप्यते तत्र प्रथमं सात्विक चरित्रमाह अस्मत्प्रसादसुमुखः ब्रह्मादीनां प्रसादार्थं सुमुखंप्रसन्नवदनं अनेन ब्रह्मप्रार्थनया भगवानवतीर्ण इत्युक्तं कलया परमकांत्या सीतया वाकलया वाकलेशः यस्तु सर्वफलनिधिः वैकुंठवासी विष्णुः स यस्य कलया हासो हि कार्यस्य अल्पत्वं भवति तस्माद्भ्रा अल्पं कार्यं तदर्थं भगवतःकाचित्कला या वैकुंठे स्थिता पालयति अनेन भगवान् पूर्णएव रघुनाथोऽवतीर्णो इति सूचितं कलावाश्रुष्यादयः अतस्तेषां संकटे तत्पतित्वादनेनैव निस्तारः कर्त्तव्य इति सूचितं कलानां वा संकर्षणादीनां ईशो वासुदेवः सर्वकलानिपुणो वा लक्ष्म्यासहावतीर्णः तदैवपेशलो भवति स भगवान् इक्ष्वाकुवंशेऽवतीर्य इक्ष्वाकुभक्त इति नृसिंहपुराणे प्रसिद्धिःयदर्थं श्रीरंगब्रह्मसदनात्समानीतः तस्योद्धारार्थं तद्वंशे अवतीर्णःदेवहितकार्यं कर्त्तृत्वं धर्मज्ञानादिसाहित्यं स्वावतरणे भक्तोद्धारः गुर्वाज्ञाकरणावनवासः एतावत्सात्विककार्यं अनुभावस्तु विरोधेन दशकंधरार्त्तिः सत्वविरोधे तमसो लयोयुक्तिर्वागुरोर्दशरथस्याज्ञा तस्यां स्थितः व्रतमिव तत्परि पालनं कृतवानित्यर्थः वनमाविवेश ननुवने तस्य किंचित्कार्यं अपि तु वनवास एव कार्यमिति वनस्य कर्मतादयिता सीता अनुजो लक्ष्मणः ताभ्यां सहितः अनेन कलया कलेश इति यावानागतः तावान् गत इति सूचितं इतरसहायो भावार्थं वा आसमंतात्प्रवेशो बहुकालस्थित्यर्थं अत एव रघुनाथो विरोधनिमित्तत्वमेव भगवतः ननुविरोधहेतुत्वं विरुध्य विरोधं कृत्वा दशकंधरो रावणः अनेन महत्वं बाहुत्वं बानानिस्तारहेतुरिति सूचितं आर्त्तिं पीडां चिंताशोकादिकं त्रयाणां वनवासः आत्मदेवानकामनया तथा संकल्पः कृतः तत्र भार्यया सह स्थितस्य न मुख्यो वनवासो भवति न भर्त्तृसहिताया स्त्रियः अत उभयोर्वियोगेन वनवासः प्रदर्शितः वियोगजननादिरूपमेव विरोधः प्रथमादिस्तु खरादिमारणेन ॥ २३ ॥

एवंसात्विकचारित्रंभगवतःउक्त्वाराजसमाहयस्माअदादितिउदधिःसमुद्रःयस्मैमार्गमदात्कुंठभयांगवेपःकुंठंभयंयेनसमुद्रशरीरस्यभयंभार्येव हृदयानिविष्टताद्दशांगस्यअंगंचवेपःकंपो यस्यअथवाऊढंयद्भयंमृत्युरूपंतस्यअंगानिशोषणादीनि तेषां वेगोयस्य मृतप्रायोजात इत्यर्थःसपदित क्षणमेव अरि पुरं लंकां हरवत् हरस्येव महादेवसहितं वापुरंदिधक्षोः दग्धुमिच्छो दूरेसुहृद्भार्यो यस्य भ्राता वा भरतः अन्ये वासुहृदः मथितो योरोषः तेन सुशोणा या दृष्टिः तातप्यमाना अतिशयेन तप्यमाना मकरादयः तेषां चक्रं यस्मिन् एवं हि आख्यायिका रावणेन सीतायां हृतायां दशकंधरवधार्थं प्रवृत्तस्य रघुनाथस्य मध्ये अंतरायभूतःसमुद्रःस्थितःस्वकीयैःपुरुषैःकृत इति तत्पादाक्रमणमकरवं प्रायोपवेशनं कृतवान् नहि अस्मदीयवंशे अवतीर्णः अस्मदवतारेणाप्युपायं जानाति स कथं रक्षांसि हन्यादिति परममत्रैवेयुति स्थिति मार्गं नदत्तवान् तदा भगवान् स्वर्णाग्रं संधितवान् तदा तस्य नेत्रयोरारक्तिमाऽऽस्रा तातेन समुद्रस्य क्षोभो जात इति मार्गदानेन प्रीत्येति भगव-

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

न्माहात्म्यज्ञापनार्थं भयाद्वयस्तस्मिन्प्रविष्टः तदामार्गं दत्तवानिति यदि महादेवः सहायमपि कुर्यात् स्वभक्तस्य स्वयं वा पुरं जिघृक्षेत् तदा तेन सह पुरं ज्वालनीयमिति रावणवधस्त्वल्पः पुरमेवज्वालनीयमितीच्छा यस्मिन्पुरे दुःखिता सीता तिष्ठतीति भगवतो दूरस्थितानां सुहृदां दुःखहेतुः अमथिते हि दधनि क्वचिद्दृढक्वचिज्जातक्वचिन्मध्यभावो भवति मथिते तु एकरूपता तथापरीक्षार्थं हितार्थं परमार्थता वा चिह्नकृते पूर्वं बहुधा विचारितत्वात्स्मीतोद्धारस्य अवश्यं कर्त्तव्यत्वात् मरोपाक्विबंधको विवेकादिर्जात इति सूचनार्थं मथितपदं सृष्टिमात्रेणैव समुद्रमाहात्म्यं ताप इति राजमचरित्रत्वाद्रोपकथा ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

हंसावतारमाह तुभ्यमिति । विवृद्धभावेन प्रेम्णा । योगं भक्तियोगं ज्ञानञ्च । तच्च ज्ञानं भक्तिविषयस्य भक्ताश्रयस्येति द्विविधं विशेषणद्वयेनाह । भागवतं भगवत्सौन्दर्य्यसौरभ्यसौश्वर्य्यसौकुमार्य्यमाधुर्य्यसादृगुणयाद्यनुभवरूपं प्रेमगम्यमित्यर्थः । तथा आत्मनो भक्ताश्रयस्य जीवस्य यत् सतत्त्वं तस्यमेव ज्ञानानंदादिकं तस्य दीपम् अविद्यावरणनिवर्त्तकत्वात् प्रदीपं प्रकाशकमित्यर्थः । यत्इदं द्विविधं ज्ञानं वासुदेवशरणा ऐकान्तिकभक्ता अञ्जसा सुखेनैव विदुः। सर्व्वत्रैव शास्त्रेषु ज्ञानादिशब्दा विशेषणविशेष्यभावाविनाभूतत्वेन प्रयुक्ता ब्रह्मज्ञानादिष्वेव रूढाः यथा पङ्कजादिशब्दाः पद्मादिषु । अन्यथा तु यथायथायोगमेव वर्त्तन्त इति यौगिका एव यथा—ज्ञानं परं मन्महिमावभासं यत् सूरयो भागवतं वदन्तीति ज्ञानञ्च यदहेतुकमिति यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनमिति । यथाच पङ्कजं वर्त्म दुर्गममिति, मण्डपं भोजयेज्जनमित्यादि अत्र विष्णुधर्म्मोत्तरे नारदाय हंसरूपेण भक्तियोग एव उक्तः । यत्त यथा त्वं सनकादिभ्यो येन रूपेण केशवः । योगमादिष्टवानेतद्रूपमिच्छामि वेदितुमिति सनकादिभ्यो ज्ञानोपदेष्टा हंसो वक्ष्यते स त्वन्यो हंसो ज्ञेयः । अत्र तुभ्यञ्चेति चकारेण तुभ्यमवतारायापि भक्तियोगमुवाचेत्युक्तिभङ्ग्यैवनारदावतारोऽप्युक्तः ॥ १९ ॥

तत्तन्मन्वन्तरमाह । दशासु दिक्षु अविहतं तेजो विभर्त्ति चक्रञ्च सुदर्शनं चक्रमिवेत्यर्थः मनुवंशधरो मनुवंशपालकः । तत एव दुष्टेषु दमं दण्डम् । कीदृशः त्रयाणां लोकानां पृष्ठे उपरि स्थिते सत्यलोकेऽपि उशतीं कमनीयां कीर्त्तिं विस्तारयन् ॥ २० ॥

धन्वन्तर्य्यवतारमाह । कीर्त्तिः कीर्त्तिस्वरूप एव साक्षादिति कीर्त्यतिशय उक्तः । नाम्नैव धन्वन्तरिरिति शब्देनैव । भागं पूर्व्वं दैत्यरुद्धम् अवाप । अमृतमिवायुर्लोके प्राकट्यं यस्य सःसर्व्वलोकनैरुज्ज्यदानादिति भावः । अवावरुन्ध इति पाठे अव अवसन्नं भागम् अवरुन्धे लभते स्म । आयुर्विषयं वेदम् अनुशास्ति प्रवर्त्तयति ॥ २१ ॥

परशुरामावतारमाह । क्षत्रियं हन्ति । कीदृशं क्षयाय नाशार्थं विधिनैव उपभृतम् उपढौकितम् रौद्ररसमयाय यस्मै उपायनत्वेन समर्पितमित्यर्थः । क्षत्रं कीदृशं ब्रह्मध्रुगित्यादि । स च हनने हेतुरुक्तः ॥ २२ ॥

श्रीरामावतारमाह त्रिभिः अस्मासु ब्रह्मादिस्तम्बपर्य्यन्तेषु यः प्रसादस्तेन सुमुख इत्यवतारस्यास्य कृपातिशयो द्योतितः । कलया लक्ष्मणादिरूपया सह । स्वयन्तु कलानामीशः पूर्ण इत्यर्थः चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हराविति श्रुतेः । नृसिंहरामकृष्णेषु षाड्गुण्यं परिपूरितमिति स्मृतेश्च आर्त्तिम् आर्च्छत् नाशं प्राप्तः ॥ २३ ॥

ऊढो भयेनाङ्गवेपः कम्पो येन सः उदधिर्यस्मै मार्गं ददौ । त्रिपुरं दिधक्षोर्हरस्येव अरिपुरं लङ्कां दिधक्षोः । चतुर्थ्यर्थे षष्ठी । कीदृशः दूरे वर्त्तमाना सुहृत् सीता तया निमित्तभूतया मथितः क्षुभितो रोषस्तेन सुशोणा अत्यरुणा दृष्टिस्तया अत्यन्तं तप्यमानं मकराणाम् उरगाणां नक्राणाञ्च चक्रं यस्मिन् सः ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

हंसावतारमाह तुभ्यमिति हे नारद स भगवान् आत्मआत्मा सर्वांतरात्मा दीर्घोभाव आर्पः भृशं विवृद्धभावेन प्रीतिप्रेम्णा परितुष्टः तुभ्यंचतवपूर्वेभ्यः सनत्कुमारेभ्यः योगं भक्तियोगं ज्ञानम् आत्मपरमात्मगुणस्वरूपयाथात्म्यम् चकारात्तत्साधनं कर्मयोगम् तत्वदीपमुक्तानुक्तानां भक्तभजनीयज्ञानज्ञेयादीनां सर्वेषां तत्वानां दीपवत्प्रकाशकं भागवतं च साधु यथा तथोवाच यदेव श्रीहंसोक्तं योगादिकं वासुदेवशरणा अंजसा सुखेन विदुः ॥ १९ ॥

मन्वंतरेषु येऽवतारास्तानाह चक्रमिति स एव भगवान् मनुवंशधरःमनुवंशपालकःसन् दशासुदिक्षु अविहतमप्रतिहतंस्वतेजःनिजंप्रभावमेव चक्रमाज्ञारूपं विभर्ति किंच त्रिपृष्ठे त्रयाणां लोकानामुपरि स्थिते सत्यलोकेऽपि उशतीं कमनीयां कीर्त्तिं प्रथयन् विस्तारयन् दुष्टेषु दुर्वृत्तेषु राजसु दमं दंडं व्यदधात्व्यधत्त ॥ २० ॥

धन्वंतर्य्यवतारमाह धन्वंतरिरिति भगवान् लोकेऽवतीर्य धन्वंतरिः सन् पुरुरुजां भूरिरोगाणांरुजःरोगान् नाम्नैव आशु हंति कथं भूतः स्वयमेव कीर्तिः स्वरूपेणैव कीर्तिभूतः अमृतायुः अमृतं मरणविपरीतमायुर्यस्मात्सः रुद्धं पूर्वं दैत्यैः प्रतिरुद्धं यज्ञे भागं च अवाप लेभे यद्वा समुद्रजेन धन्वंतरिणा यज्ञे भागो नलब्धः स तं रुद्धं भागं विष्णुवरेण सोमवंशेऽवतीर्यवंद्यघर्षप्राप्याद्यापीति हरिवंशे स्थितम् आयुश्च वेदंआयुर्वेदं अनुशास्ति प्रवर्त्तयति ॥ २१ ॥

वक्षःस्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विडम्बितककुब्जुष ऊढहासम् ।
सद्योऽसुभिः सह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष उच्चरतोऽधिसैन्ये ॥ २५ ॥
भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः ।
जातः करिष्यति जनानुपलक्ष्यमार्गः कर्म्माणि चात्ममहिमोपनिबन्धनानि ॥ २६ ॥
तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः ।
यद्रिङ्गतान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथाऽर्जुनयोर्न भाव्यम् ॥ २७ ॥
यद् वै व्रजे व्रजपशून् विषतोयपीतान् पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या ।
तच्छुद्धयेऽतिविषवीर्य्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन् ह्रदिन्याम् ॥ २८ ॥
तत् कर्म्म दिव्यमिव यन्निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने ।
उन्नेष्यति व्रजमतोऽवसितान्तकालं नेत्रे पिधाय्य सबलोऽनधिगम्यवीर्य्यः ॥ २९ ॥
गृह्णीत यद्यदुपबन्धममुष्य माता शुल्बं सुतस्य न तु तत्तदमुष्य माति ।
यज्जृम्भतोऽस्य वदने भुवनानि गोपी संवीक्ष्य शङ्कितमनाः प्रतिबोधिताऽऽसीत् ॥ ३० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

परशुरामावतारमाह क्षत्रमिति क्षयाय मृत्यवे विधिना दैवेन उपभृतं समर्पितम् ब्राह्मणेभ्यो द्रुह्यतीति ब्रह्मध्रुक् उज्झितः पंथा वेदमार्गो येनेत्युज्झितपथम् अत एव नरकार्त्तिलिप्सु नरकदुःखं लब्धुमिच्छुः ईदृग्विधम् अवनेःकंटकं पीडाकरम् क्षत्रमक्षत्रियकुलम् असौ मुहारमाहारिः उग्रवीर्यः असहार्यार्यः सन् उरुधारपरस्वधेन बहुतीक्ष्णाग्रपरशुना उद्धंति उत्पाटयति ॥ २२ ॥

श्रीरामावतारमाह अस्मादिति त्रिभिः अस्माकं ब्रह्मादीनां प्रसादेऽनुग्रहेसुमुखः कलानां प्रकृतिपुरुषकालादीनामीशः"एष सर्वेश्वर"इति श्रुतेः कलया भरतादिरूपया सह इक्ष्वाकुवंशे अवतीर्य गुरोः पितुः श्रीदशरथस्य निदेशे आज्ञायां तिष्ठन् सदयितानुजः सीतालक्ष्मणाभ्यां सहितः वनं दंडकारण्यमाविवेश यस्मिन् रामे दशकंधरो रावणः विरुद्ध्य विरोधं कृत्वा आर्तिं मरणांतं दुःखमार्छत्प्राप्तः ॥ २३ ॥

तस्मै श्रीरामाय उदधि र्मार्गं ददौ कथंभूतः सपदि शीघ्रं हरो यथा त्रिपुरं दिधक्षुः तद्वद्दूरे रावणस्य पुरं लंकाम् दग्धुमिच्छोः श्रीरामस्य दूरसुहृन्मथितरोषसुशोणदृष्ट्याउरुभयांगवेपः परोक्षभूतेन सीतारूपेण सुहृदा निमित्तभूतेन मथितो विकृतो यो रोषस्तेन सुशोणात्यरुणा-दृष्टिस्तया ऊढ प्राप्तं यद्भयं तेनांगेषु वेपः कंपो यस्य सः पुनः कथंभूतः श्रीरामस्योक्तप्रकारया दृष्ट्या तातप्यमानानि मकराणामुरगाणां नक्राणां च चक्राणि समूहाः यस्मिन्सः ॥ २४ ॥

भाषा टीका

नारद ! तुम्हारे विशुद्धभावसे परितुष्ट भगवान् ने तुमको योग उपदेश किया । और आत्मतत्व का प्रकाशक भागवत ज्ञानभी कहा, जिसको वासुदेव शरणजन अनायास ही जानतेहैं ॥ १९ ॥

प्रत्येक मन्वन्तर में मनुवंशकी रक्षा करने वाले भगवान् दसों दिसाओंमें स्वतेजरूप चक्र (सुदर्शन) को धारण करते हैं । और दुष्ट राजाओं का दमन विधान करते हैं और त्रिलोकी के पृष्ठ (ऊपर) रूप सत्यलोक पर्यन्त अपने चरित्रों से कमनीय कीर्तिको विस्तार करते हैं ॥ २० ॥

धन्वन्तरि भगवान् स्वयंकीर्ति रूपहीहैं नाम मात्रसे बड़े बड़े रोगियोंके रोग विनाश करतेहैं । जिनके स्मरण से मरणशून्य आयुष्य होतीहैं उन्हीं धन्वन्तरि ने यज्ञमें भाग पाया है । और लोकमें अवतीर्णहो आयुर्वेद का शासन करते हैं ॥ २१ ॥

विधिने क्षयही के लिये वर्द्धन किये " ब्रह्मद्रोही " वेद पथ त्यागी " नर कार्ति चाहने वाले " और पृथिवीके कंटक रूप क्षत्र कुल को वह उग्र वीर्य्य भगवान परशुराम तीक्ष्ण धार फरसा से विनाश करतेहैं ॥ २२ ॥

कलेश भगवान् अपनी कला सहित हम लोगोंके प्रसाद सुमुख हो इक्ष्वाकु वंश में अवतीर्ण होकर गुरू की आज्ञा मान अपनी प्रिया और अनुज सहित वन में प्रविष्ट हुये । जिनसे विरोध कर दशकन्धर (रावण) आर्त्ति को प्राप्त हुआ ॥ २३ ॥

दूरस्थित अपनी प्रिया के वियोग से क्रोध अरुण दृष्टि से सन्तप्त मकर " उरग " नक्र " चक्र " समुद्र ने हर के समान अरिपुर को दग्ध करने की इच्छा वाले जिन रामचन्द्रजी को भय कम्पित हो मार्ग दिया ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

किञ्च युद्धे रावणस्य वक्षःस्थलस्पर्शेन रुग्णा भग्ना ये महेन्द्रवाहस्य ऐरावतस्य दन्तास्तैर्विडम्बिताः स्वधवलिम्ना धवलीकृताः, तत्तद्दिक्षु पतितैः प्रकाशिता इत्यर्थः, या एवम्भूताः ककुभो दिशः ता जुषते सेवते पालयतीति वा तथा तस्य, दारहर्त्तुः रावणस्य अहो मत्समः कोऽन्योऽस्तीति महागर्व्वेण ऊर्द्ध प्राप्ते हासम् असुभिः प्राणैः सह सद्यः शीघ्रं विनेष्यति अपनेष्यति । कैर्धनुषो विस्फूर्ज्जितैः टङ्कारघोषैरेव । कथम्भूतस्य अधिसैन्ये स्वपरसैन्यमध्ये उच्चरतः उत्कर्षेण विचरतः । ककुब्जयरूढहासमितिपाठे दन्तैरुज्ज्वलितानां ककुभां जयेन यो रूढो हासः सञ्जातो गर्व्वस्तमपनेष्यतीत्यर्थः ॥ २५ ॥

श्रीकृष्णावतारमाह भूमेरिति दशभिः । सुरेतरा असुरांशभूताः (असुरांशसम्भूताः) राजानः तेषां वरूथैः सैन्यैर्विमर्द्दितायाः भारेण पीड़ितायाः । कलया रामेण सह जातः सन् । ननु कोऽसौ जातः सितकृष्णौ केशौ यस्य भगवतः स एव साक्षात् । सितकृष्णकेशत्वं शोभैव ननु वयःपरिणामकृतम् अविकारित्वात् । यत्तूक्तं विष्णुपुराणे—उज्जहारात्मनः केशौ सितकृष्णौ महामुने । इति, यच्च भारते—स चापि केशौ हरिरुद्बवर्ह (हरिरुच्चजह) शुक्लमेकमपरञ्चापि कृष्णम् । तौ चापि केशावाविशतां यदूनां कुले स्त्रियौ रोहिणीं देवकीञ्च ॥ तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः । कृष्णो द्वितीयः केशवः संबभूव केशो योऽसौ वर्णतः कृष्ण उक्तः ॥ इति तत्तु न केशमात्रावताराभिप्रायं, किन्तु भूभारावतरणरूपं कार्य्यं कियदेतत् मत्केशावेवैतत् कर्त्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्ण-सूचनार्थञ्च केशोद्धरणमिति गम्यते । अन्यथा तत्रैव पूर्व्वापरविरोधापत्तेः । कृष्णस्तु भगवान् स्वयमित्येतद्विरोधाच्च । कथम्भूतः पर-मेश्वरतया जनैरनुपलक्ष्यो मार्गो यस्य । तर्हीश्वरत्वे किं प्रमाणम् अतिमानुषकर्म्मोभिर्यथानुपपत्तिरेवेत्याह । आत्मनो महिमा उपनिबध्यते अभिव्यज्यते येषु तानि ॥ २६ ॥

एतदेव प्रपञ्चयति तोकेनेत्यादिना । बालेन पूतनाया जीवहरणं यत् । रिङ्गता जानुभ्यां गच्छता अन्तरगतेन मध्यं प्राप्तेन । दिविस्पृ-शोः अत्युच्चयोः । इतरथा अनीश्वरत्वे तन्न भवितव्यम् ॥ २७ ॥

विषतोयपीथान् विषमयतोयस्य पीथं पानं येषां तान् पालान् गोपांश्चकृष्णदृष्टिसुधावृष्ट्या जीवयिष्यतीति । यमुनायां क्रीड़न् उरगं कालियम् उच्चाटयिष्यत् उच्चाटयिष्यति । तच्छुद्धये तस्या ह्रदिन्या निर्विषत्वाय । अतिविषवीर्य्येण विलोलाऽतिचञ्चला जिह्वा यस्य ॥ २८ ॥

दिव्यमलौकिकम् इवेति लोकोक्तिः । उन्नेष्यति उद्धरिष्यति शुचिः ग्रीष्मः तत्सम्बन्धिनि वने शुष्के इत्यर्थः । अतो दावाग्नेर्हेतोरव सितो निश्चितोऽन्तकालो यस्य तम् । सबलः सरामः अनधिगम्यं दुर्ज्ञेयं वीर्यं यस्य सः । तत्र निशि निःशयानमिति कालियदमने रात्र्यां यमुनातीरे, नेत्रे पिधाप्यपिहिते कारयित्वा इति मुञ्जाटव्यामिति ज्ञेयम् ॥ २९ ॥

उपबध्यतेऽनेनेति उपबन्धः तत्साधनं शुल्वं दाम अमुष्य माता यशोदा गृह्णाति तत्तदमुष्य न माति बन्धनसम्मितं न भवति न पूर्यते इत्यर्थः । गोपीयशोदा संवीक्ष्य दृष्ट्वा प्रतिबोधिता निजैश्वर्य्यं ज्ञापिता आसीदिति तत् तच्चकर्म्म दिव्यमिवेति सर्व्वत्र पूर्व्वेण वान्वयः ॥ ३० ॥

श्रीराधारमणदास गोस्वामि विरचित दीपिनाख्यतट्टिप्पणी ।

कृष्णस्त्विति प्रथमस्कन्धीयतृतीयाध्यायस्य २८ श्लोकैकदेशः ॥ २६—२८ ॥

मुञ्जेति । मुञ्जाटव्याम् ईषिकाटव्यां दशमस्कन्धीयोनविंशाध्यायोक्तायामिति यावत् ॥ २६—३१ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

किंच युद्धे रावणस्य वक्षस्थलस्पर्शेन रुग्णाः भग्ना ये महेन्द्रवाहस्यैरावतस्य दंतास्तैर्विडंबिताः स्वधवलिम्ना धवलीकृताः तत्तद्दि-क्षु पतितैः वक्षस्सञ्चूर्णितसुरगजदंतचूर्णैः प्रकाशिता इत्यर्थः एवं भूतायाः ककुभः दिशस्तासां यो जयस्तेन रूढः उत्पन्नः यो हासः अहो मत्समः कोऽन्योऽस्तीति गर्वेण प्राप्तहासस्तंसैन्यमध्ये उत्कर्षेण चरतोदारहर्तू रावणस्यासुभिः प्राणैः सह सद्यः शीघ्रं विनेष्यति अपने-ष्यति कैर्धनुर्षोविस्फूर्जितैर्विशेषेण स्फूर्जितैः स्फुरितैः शरैरित्यर्थः ॥ २५ ॥

कृष्णावतारमाह भूमेरिति सुरेतरा आसुरसंपत्त्या जाता राजानस्तेषां वरूथैः सैन्यैर्विमर्दिताया भारेण पीड़िताया भूमेः क्लेशव्ययाय भरापहारायेत्यर्थः सितकृष्णकेशः भगवान्कलयाबलभद्रेण साकं जातः अवतीर्णः सितकृष्णौकेशौ यस्य सःशोभार्थहिभगवतासितकृष्णा केशौ धृतौ अविकारित्वेनवयःपरिणामासंभवात् यत्तु विष्णुपुराणे उज्जहारात्मनःकेशौ सितकृष्णौ तथा मुने इति भारतेऽपि सचापि केशौ हरिरुच्चजहे शुक्लं चैकमपरं चापि कृष्णं तौ चापिकेशौ विशतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं च तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः कृष्णो द्वितीयः केशवः संबभूव केशो योऽसौ वर्णतः कृष्णउक्त इति तत्तु न केशमात्रावताराभिप्रायं किंतु भूभा रावतरणरूपं कार्यं कियदेतन्मत्केशावपि कर्तुं शक्ताविति द्योतनार्थं रामकेशवयोर्वर्णस्तवनार्थं च केशोद्धरणमिति गम्यते ऽन्यथा तत्रैव पूर्वापर विरोधापत्तेः कृष्णस्तु भगवान्स्वयमित्येतद्विरोधाच्च आतश्च भगवान् जनैरनुपलक्ष्यः मार्गो गतिर्यस्य सः तथाभूतः आत्मनः स्वस्य महिमा उपनिबध्यते ऽभिव्यज्यते येषु तानि स्वमाहात्म्यप्रकाशकानीत्यर्थः कार्याणि चेष्टितानि कारिष्यत इति ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका।

कर्मणां परमेश्वरत्वप्रकाशकत्वमेव प्रपंचयति नवभिः तोकेनेत्यादिना तोकेन बालेन सता उलूकिकायाः पूतनायाः जीवहरणं यत् पूतना उलूकरूपेणागतेति पुराणांतरप्रसिद्धिः त्रैमासिकस्य त्रिमासवयस्कस्य पदापाद्वेन शकटरूपेणागतस्यासुरस्य उपवृत्तिः विपरिवर्त्तनं यत् रिङ्गता उलूखलमाकर्षता दिविस्पृशोरत्युच्चयोः अर्जुनयोः अर्जुनाख्यवृक्षयोः अन्तरगतेन मध्यंप्राप्तेनतयोरुन्मूलनमुत्पाटनं यत् तदितरथा न भाव्येन भवितव्यमनीश्वरत्वे तत्सर्वमनुपपन्नमित्यर्थः ॥ २७ ॥

किंच व्रजे वसन् विषतोयपीतान् विषजलस्य पीतं पानं येषां तान्व्रज पशून्पालाँश्चानुग्रहदृष्टिः कृपा दृष्टिः तस्याः दृष्ट्याः सुधावर्षेणाजीवयादिति यत् हृदिन्यां यमुनायां विहरन् तच्छुद्धये हृदिन्यानिर्विषय त्वायाति विषवीर्येण विलोला चंचला जिह्वा यस्य तं उरगं कालियाख्यं सर्पमुच्चाटयिष्यत् पलाययिष्यादिति यत् ॥ २८ ॥

तदपि कर्मदिव्यमिवामानुषमिवेति लौकिकोक्तिः किंच दावाग्निना शुचिवने शुष्कवने परिदह्यमाने सति अतो दावाग्नेर्हेतो रवसितो निश्चितोऽन्तकालो यस्य तंनिशि रात्रौ निःशयानं नितरां स्वपंतं व्रजं नेत्रापिधाय्यपिहितकारयित्वा अनेन व्रजस्य पश्चाज्जागरणं सूचितं बलभद्रेण सहितः अनधिगम्यवीर्यः अनधिगम्यं दुर्विज्ञेयं वीर्यंयस्य तथाभूतः अग्निं पीत्वा व्रजमुद्धरिष्यतीत्यर्थः ॥ २९ ॥

किंच गृहीतेति अमुष्य श्रीकृष्णस्य माता यशोदा यद्यदुपबंधं बंधनसाधनं शुल्वं मुंजादिनिर्मितरज्जुं गृह्णीत ग्रहीष्यति तत्तत् शुल्वममुष्य श्रीकृष्णस्योदरे नमाति नव्याप्नोति नपर्याप्त मित्यर्थः किंच जृंभतोऽस्य भगवतो वदने मुखे भुवनानि चतुर्दशभुवनानि सवीक्ष्य दृष्ट्वा गोपी यशोदा शंकितमना किमिदमिति शंकितचित्ता सती पश्चात्प्रतिबोधिताज्ञापितैश्वर्याऽऽसीदिति यत्तत्कर्म दिव्यं इवेति पूर्वेणान्वयः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

वक्षस्थलस्पर्शेनरुग्णाभग्नामहेंद्रवाहस्यैरावतस्यदंतावक्षस्थलस्पर्शरुग्णामहेंद्रवाहदंतास्तैर्विलंबितः ककुभांजयः विलंबितककुञ्जयस्तेन रूढ उत्पन्नोहासोऽट्टहासोयस्यसतथा सैन्येनसहितोरावणस्तस्यदा रहर्तुः दारान्सीतामाहर्तुकामस्यरामस्य धनुषउच्चारितैर्निर्गतैर्विस्फूर्जितैरसुभिःसहविनेष्यति विनयंमदविनाशमेष्यति पुनःसद्यस्तत्क्षणएवराममुक्तैःशरैर्विनंक्ष्यतिविनाशंप्राप्नोतीत्यन्वयः धनुर्विस्फूर्जितेनरावणःपूर्वंमृततु पुनःशरैराममुक्तैःसानुबंधोविनेष्यतीत्यनेनधनुर्विस्फूर्जितैर्विनाशःकथमभूदितीयमाशंकानिरस्तेति ससैन्यइत्यस्याविवरणंसानुबंधइति ॥ २५ ॥

कृष्णावतारमनन्यसाध्यंतत्कर्मचसंगृह्यकथयति भूमेरित्यादिश्लोकदशकेन सहरिःसितकृष्णकेशइतिनामकलयाजातःकर्माणिकरिष्यतीत्यन्वयः कर्मणातत्त्वज्ञानंकस्माज्जायतइत्यतउक्तं जनेति प्राकृताज्ञेयमार्गत्वादित्यर्थः अवतारप्रयोजनमाह सुरेतरेषामसुराणांवरूथेनसमूहेनमनगावाविमर्दितायाःपीडितायाभूमेःक्लेशव्ययायेति कीदृशानिकर्माणिआत्ममहिमोपनिबंधनानिस्वमहिमनिमित्तानिपूतनावधादीनिहरेःकर्माणिपरकर्मनिबंधनानिनभवंति अन्येषांकर्माणितन्महिमनिबंधनानीतिचार्थः तदुक्तं विष्णोर्नान्येनकर्माणिपरपातंत्र्यबंधनमिति अत्रानंतांशरोहिणेयरामशुक्लकेशात्मकरामाभिधानेनहरिरस्तिष्ठन्जगद्रक्षयतीत्येतद्रामएकोह्यनंतांशस्तत्ररामाभिधोहरिरित्यादिनोक्तम् अतएवग्राह्यमितिभावः ॥ २६ ॥

तोकेनेत्यणुनाबालेनानिर्देशेनेत्यर्थः शरीरोत्थानादिप्रवृत्तिहेतुत्वाज्जीवःप्राणास्तान्लुंपतीत्युलूपिकातस्याःस्तनपानेनजीवहरणंयत्कर्म त्रैमासिकस्यत्रयोमासावयोलक्षणानिवृत्तायस्यसतथातस्यकृष्णस्योत्क्षिप्तेनपादेनशकटोऽपवृत्तः व्यत्यस्याक्षेणशकटेनशकटाख्योहतइति यच्च उलूखलबद्धेनरिंगतार्कोडतोंतरंगतेनमध्यगतेनबालेनादिविस्पृशोःसहस्रधनुर्मात्रोर्ध्वदेशस्पृशतोःतावदुच्छ्रययोरित्यर्थः यमलार्जुनयोरुन्मूलनंचयत्सर्वंकर्मइतरथाविष्णोर्नचेत्स्वमहिमोपनिबंधनत्वेनसहस्रधनुषस्तूर्ध्वंस्पृशब्देनोपभण्यतइतिच ॥ २७ ॥

विषतोयपीतान्विषमिश्रजलंपीतवतःजीवयत्अजीवयत् अनुग्रहलक्षणादृष्टिवृष्ट्या तच्छुद्धयेयमुनाहृदजलशुद्धयेह्लादिन्यांयमुनानद्यांविहरन्कालीयनागमुच्चाटयिष्यन्उच्चाटितंकरिष्यतिच विषजलेविहरणंदुर्गस्थानहृदादुच्चाटनंचनान्यसाध्यंतदनेनकृतमितरथाभाव्यमित्यर्थः ॥ २८ ॥

आशुआशुनाविष्वग्व्यापिनादावाग्निनाविपिनेवदह्यमानेसति निशिसर्वात्मज्ञाने यत्तुसर्वात्मनाज्ञानंनिशासापरिकीर्तितेतिवचनात् निःशयानंनितरांशयानंकर्तव्यमूढं तर्हिअचेतनंकिंनेत्याह अवसितांतकालंनिश्चितमरणकालंव्रजंतथानेत्रापिधाय्यपिहितकारयित्वा इतोदावाग्रेरुष्यतीतियत्कर्मतदन्येषांदिव्यमेवस्तुत्यमेव कुतइतितत्राह अनधिगम्येति नित्यसमाहितैर्ब्रह्मादिभिरप्यविज्ञेयमाहात्म्यत्वादित्यर्थःसबल इत्यनेनबलस्याप्येतादृशीशक्तिर्नास्तीतिलक्ष्यते ॥ २९ ॥

अमुष्यकृष्णस्यमातासुतमुपबद्धुंयच्छुल्वंदामगृह्णीतगृह्णातितत्सुदामामुष्यसुतस्यनमातिनपूर्यते इत्यमेयलक्षणंमाहात्म्यं यच्चगोपी प्रतिबोधितस्यनिद्रायाउत्थितस्यजृंभतोमुखंव्यादायालस्यंपरिहरतोऽस्यकृष्णस्यवदनेचतुर्दशभुवनानिसम्यग्वीक्ष्यशंकितमना भीतमना अभवदितियच्चतदपि ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

भूमेरिति । सुरेतरा असुरभावमया ये राजानः तेषां वरूथैः सैन्यैः निपीड़िताया भुवः क्लेशमपहर्त्तुं परमात्मनोऽपि परत्वात् जनैरस्मदादिभिरनुपलक्ष्यमाणोऽपि प्रादुर्भूतः सन् कर्म्माणि च करिष्यति । कोऽसौ कलया अंशेन सितकृष्णकेशो यः, यत्र सितकृष्णकेशौ देवैर्दृष्टाविति शास्त्रान्तरप्रसिद्धिः, सोऽपि यस्यांशेन स एव भगवान् स्वयमित्यर्थः । तदविनाभावित्वात् श्रीबलदेवस्यापि ग्रहणं द्योतितम् । ननु पुरुषादपि परोऽसौ भगवान् कथं भूभारावतारणमात्रार्थं स्वयमवतरिष्यतीत्याशङ्क्याह । आत्मनो महिमानः परममाधुरीसम्पदः उपनिबध्यन्ते निजभक्तैरधिकं वर्ण्यन्ते येषु तानि कर्म्माणि च करिष्यति । यद्यपि निजांशेनैव वा निजेच्छाभासेनैव वा भूभारहरणमीषत्करं तथापि निजचरणारविन्दजीवातुवृन्दमानन्दयन्नेव लीलाकादम्बिनीनिजमाधुरीवर्षणाय वितरिष्यमाणोऽवतरिष्यतीत्यर्थः । (विष्णुपुराणादिवचनं तु तत्र पूर्व्वमेव व्याख्यातमस्ति ॥ २६ ॥

एतदेव व्यक्तीकृतं तोकेन जीवहरणमित्यादौ । इतरथा स्वमाधुरीसम्पत्प्रकाशनेच्छामन्तरेण मधुरतरं लोकादिभावं दधता तेन पूतनादीनां जीवहरणादिकं कर्म्म न भाव्यं न सम्भावनीयम् । तदंशतदिच्छाभासान्यतमात्रेणैव तत्सिद्धेरिति वाक्यार्थः । तथाच तथायञ्चावतारस्ते भुवो भारेत्यादौ तैरेव व्याख्यातम्—किं भूभारहरणं मदिच्छामात्रेण न भवति तत्राह, स्वानामिति । जयति जननिवास इत्यत्र च—इच्छामात्रेण निरसनसमर्थोऽपि क्रीड़ार्थं दोर्भिरधर्म्मम् अस्यन्निति । तदेवमादिभिः श्रीकृष्णस्यैवसर्व्वाद्भुततावर्णनाभिनिवेशप्रपञ्चो ग्रन्थानां स्पष्ट एव । अस्तु तावत् तद्भूरिभाग्यमिहजन्म किमप्यटव्याम इत्यादि । (सितकृष्णकेश इत्यत्र तात्पर्य्यं श्रीस्वामिभिरेव विवृतम् । इदमप्यत्र तात्पर्य्यं सम्भवति । ननु देवाः किमर्थं मामेवावतारार्थितुं भवद्भिरागृह्यते । अनिरुद्धाख्यपुरुषप्रकाशविशेषस्य क्षीरोदश्वेतद्वीपधाम्नो मम यौ केशाविव स्वशिरोधार्य्यभूतौ तावेव श्रीवासुदेवसङ्कर्षणौ स्वयमेवावतरिष्यतः । ततश्च भूभारहरणं ताभ्यामीषत् करमेवेति । अथ उज्जहारात्मनः केशावित्यस्यैवशब्दार्थोऽपि मुक्ताफलटीकायाम्—केशौ सुखस्वामिनौ । सितो रामः । आत्मनः सकाशात् उज्जहार उद्धृतवानित्यादि । यैस्तु यथाश्रुतमेवेदं व्याख्यातं ते न सम्यक् परामृष्टवन्तः । यतः सुरमात्रस्यापि निर्ज्जरत्वप्रसिद्धिः, अकालकलिते भगवति जरानुदयेन केशशौक्ल्यानुपपत्तिः । नचास्य केशस्य नैसर्गिकसितकृष्णतेति प्रमाणमस्ति । अतएव नृसिंहपुराणे श्रीकृष्णावतारप्रसङ्गे शक्तिशब्द एव प्रयुज्यते, न तु केशशब्दः । तथाहि—वसुदेवाच्च देवक्यामवतीर्य्य यदोः कुले । सितकृष्णे च मच्छक्ती कंसाद्यान् घातयिष्यत इत्यादिना । अस्तु तर्हि अंशोपलक्षणः केशशब्दः, न, अविप्लुतसर्व्वशक्तित्वेन साक्षादादिपुरुषत्वस्यैव निश्चेतुं शक्यत्वात् । कृष्णविष्ण्वादिशब्दानामविशेषतः पर्य्यायप्रतीतेः । नैवमवतारान्तरस्य कस्य वाऽन्यस्य जन्मदिनं जयन्त्याख्ययाऽतिप्रसिद्धम्

अतएवोक्तम् भारते—भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः । शाश्वतं ब्रह्म परमं योगिध्येयं निरञ्जनम् इतीति । तस्याऽकालकलितत्वम्—योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुरित्यादौ श्रीदेवकीदेवीवाक्ये, नताः स्म ते नाथ सदाङ्घ्रि पंकजं विरिञ्चवैरिञ्च्यसुरेन्द्रवन्दितम् । परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत् परप्रभुः ॥ इत्यादौ श्रीद्वारकावासिवाक्ये च प्रसिद्धम् । तस्माच्च केशावतारत्वेऽपि तात्पर्य्यम् । अतो वैष्णवादिपद्यानां शब्दोत्थमर्थमेवं पश्यामः—अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तमेति सहस्रनामभाष्योत्थापितभारतवचनात् केशशब्देनांशुरुच्यते । तत्र च सर्व्वत्र केशेतरशब्दाप्रयोगात् नानावर्णांशूनां श्रीनारददृष्टतया मोक्षधर्म्मप्रसिद्धेश्च तथा चांशुत्वे लब्धे तौ चांशू वासुदेवसंकर्षणावतारसूचकतया निर्द्दिष्टाविति तयोरेव स्यातामिति गम्यते । तदीययोरपि तयोरनिरुद्धेऽभिव्यक्तिश्च युज्यत एव, अवतारितेजोऽन्तर्भूतत्वात् अवतारस्य । ततश्चोज्जहारेत्यस्यायमर्थः—आत्मनः सकाशात् श्रीवासुदेवसंकर्षणांशभूतौ केशावंशू उज्जहार उद्धृतवान्, प्रकटीकृत्य दर्शितवानित्यर्थः ॥ अत्रायं सुमेरोरिवैकदेशदर्शनेनैवाखण्डसुमेरुनिर्द्देशवत् तदंशांशुदर्शनेनैव पूर्णस्यैवाविर्भावनिर्द्देशो ज्ञेयः । अथ स चापि केशावित्यादिकव्याख्या—उद्बर्हे योगबलेनात्मनः सकाशाद्विच्छिद्य दर्शयामास ॥ स चापीति चशब्दः पूर्व्वमुक्तं देवकर्त्तृकं निवेदनरूपमर्थ समुच्चिनोति । अपिशब्दस्तदुद्धरणे श्रीभगवत्संकर्षणयोरपि हेतुकर्तृकत्वं सूचयति ॥ तौ चापीति चशब्दोऽनुक्तसमुच्चयार्थत्वेन भगवत्संकर्षणौ स्वयमाविविशतुः पश्चात्तौ च तत्तादात्म्येनाविविशतुरिति बोधयति ॥ अपिशब्दो यत्रानुस्यूतत्वम् सोऽपि तदंशांशावपीति गमयति । तयोरेको बलभद्रो बभूवेत्यादिकन्तु नरो नारायणो भवेत् हरिरेव भवेन्नर इत्यादिवत् तदैक्याव्याप्त्यपेक्षया ॥ केशवः श्रीमथुरायां केशवस्थानाख्यमहायोगपीठाधिपत्वेन प्रसिद्धः स एव कृष्ण इति ॥ श्रीनृसिंहपुराणे तु सितकृष्णे च मच्छक्ती इति तद्वर्णनिर्द्देशेनांशुवाचक एव शक्तिशब्द इति ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

तमसमाह वक्षस्थलस्पर्शेति भगवान् रघुनाथः तस्य रावणस्य असुभिः प्राणैः सह हासं गर्वं विनेष्यति दूरीकरिष्यति दूरीकरणे हेतुर्दोरहर्त्तुरिति प्राणहरणेऽप्येतदेव हेतुः आततायित्वात् नहि तन्मारणार्थं बाणा अपि क्षिप्यन्ते किंतु धनुषो विस्फूर्ज्जितैरेवधनुषो विशेषणं अधिसैन्ये उच्चरत इति ऊर्द्ध्वं चरतः बाणरूपं मलं वा त्यजतः अनेन तस्य गतिर्निवारिता धनुषो माहात्म्यार्थं हासं विशिनष्टि वक्षस्थलस्पर्शेन भग्ना ये महेन्द्रवाहस्य ऐरावतस्य दंता तैर्विडंबितोयःककुब्जयः दिग्जयः तेनरूढो यो हासः तस्य हि सामर्थ्यं द्रूपं रावणस्य शरीरं शत्रुजयकृतं तत्र शरीरे सामर्थ्येन शत्रुजयः उपहस्यते यतस्तस्य वक्षस्थलस्पर्शमात्रेणैव ऐरावतदंता भग्ना तादृशस्य दिग्विजयः नोत्कर्षहेतुः तेन दिग्विजयिनां सामर्थ्यादपि अस्य महत्सामर्थ्यमिति महान् गर्वः स गर्वो गच्छन्महाभिमानिनः प्राणैः सहगतः नहि भगवतो हासस्याग्रे अन्योहसति तस्मात्तदपगमनमुचितमेवेति भावः एवंरघुनाथचरित्रं उपलक्षणविधया निरूप्य हासत्वं समर्थितम् ॥ २५ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

एवंहासपेशलंनिरूप्यअदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहंनिरूपयतिभूमेःसुरेतरेतिदशभिःयद्यप्येकैकस्मिन्नवतारेअपरिमितान्येवचरित्राणिसंति तथापि विमर्शयेषा मुपयोगःतानिनिरूप्यंते तथाकृष्णावतारेप्यपरिमितानिचरित्राणिसंति तथा विमर्शोपयोगित्वेन दशधर्मा निरूप्यंते यत षड्शे दशैवपदार्था निरूपिता अदीनत्वंलीलात्वंहसितत्वंऊल्लसत्वं भ्रूत्वं भंगत्वं संसूचितत्वंभूरित्वमनुग्रहत्वं चेति अनेन दशविधा अपि लीला अस्मिन्नवतारे संति यावान्वा अयमात्मा तावानयमिति सूचितं अनेन दशविधलीलानां एकमुखत्वेन एकार्थत्वं च सूचितं तदुपपत्त्या निरूपणं उद्देशतो निरूपयिष्यति तत्रादीनत्वं सर्गः दीनो हिवस्त्वभावात् यथासुखं वस्तुरूपेण स्वयमेव प्रादुर्भावात् अदीनत्वं अभिलषितवस्तुप्राप्तौ दीनत्वं गच्छति न विद्यते दीना यस्मादिति पदार्थस्पृहया चापिजीवानां दीनत्वंगच्छति सृष्टावेव विसर्गो हि लीलास्पष्टा हसितं स्थानं स हि भगवानाद्य इव प्रहसनरूपेण तत्तन्मर्यादयातांस्तान् स्थापयति स्वस्य हासार्थमेव अन्यथा परमार्थे भगवत्स्वरूपे का मर्यादा ईक्षणं पुष्टिः भगवदीक्षिता एव हि पुष्टा भवंति भ्रूरूपा ऊति यथांतःकरणे वासना तथा भ्रुवश्चलनं भंगो हि सद्धर्मः सहि सर्वान् स्वस्थानाद्भंजयति तदग्रे विस्तारयिष्यामः उल्लसत्वमीशानुकथासाहि वंशभगवदुल्लासो भवति यथा क्रमो वा तदा ऊति रुल्लासः यथाप्रह्लादो धर्मश्च प्रमेयप्रमाणो उल्लासौ तदा सद्धर्मो भ्रूरूपो भवति भंगश्च वंशः आत्मा हि तत्र भग्नो भवति संसूचनं निरोधः तदग्रे उपपादयिष्यामः भूरित्वं मुक्तिः एको हि भगवानेव मुक्तः अन्येपि तथा भवंतीति अनुग्रहः आश्रयः नहि सर्वथा अनुग्रहीता स्वस्मिन्कमपि स्थापयति इयं च दशविधलीला कृष्णस्यैवेति अवतारोऽप्ययं भगवानवतारी अतः सर्गरूपमदीनत्वं प्रथमतो निरूपयति सर्गोह्यशरीरस्य शरीरस्वीकारः तत्र न दीनो यस्मादिति द्वितीयोऽर्थोहेतुत्वेन प्रविशति तत्र त्रिविधा भक्ता दीना भगवदवतारे हेतवः तदाह भूमेः पृथिव्याः सुरेतरा दैत्या दानवा राक्षसाश्च सुरेतरत्वेनैव धर्मप्रतिपक्षाः क्रोडीकृता तैर्विमर्दिता प्रकटपरमानंदो यदा भूमेस्तदैव हि मर्दनक्लेशहानिःस्यादित्यानंदः समागतः तस्याःक्लेशव्ययाय कलया बलभद्रेण सहसितकृष्णौ केशौ यस्य स वैकुंठस्थित एव समागत इति कश्चित् वस्तुतस्तु यः सितकृष्णकेशः स गोविंदरसकलया संकर्षणरूपत्वात् संहाररूपतामसशक्त्यासितकृष्णरूपस्य संकर्षणस्य कलया कृष्णकेशरूपेणापीति वक्ष्यते इदमप्येकं प्रयोजकं कृष्णः केशो यथा भवतीति ननु तावन्मात्रं मर्दनक्लेशदूरीकरणासमर्थत्वात् नाविमौ वैभगवतो हरेरंशाविहागताविति वाक्यविरोधात् तदा वां परितुष्टोऽहममुनावपुषेति वाक्यविरोधश्च तस्मान्मर्दनक्लेशाभावार्थं साक्षादानंदमयः पुत्रत्वेन वंशजननार्थं प्रद्युम्नधर्मरक्षार्थमनिरुद्धो नारायणांशः भूमिभारनिराकरणार्थं सितकृष्णकेशांशः जनानुपलक्ष्य मार्ग इति प्रद्युम्नोवंशकृत् कर्माणि करिष्यतीत्यनिरुद्धः चतुर्णामपि कार्यचतुष्टयं भारव्ययायेति चकारेण सूचितं तेनैकरूपेणैव चतुर्मूर्तेरपि चरित्रं निरूप्यते एकमेव चरित्रं मोक्षभक्ती निरूप्य तंनिरूपयति भूमिभारहरणं वासुदेवदेवकीकामनापूरणं धर्मरक्षाचेति विस्तरे तु प्रकरणभेदेन वक्ष्यति एवं चतुर्मूर्तिर्भगवान् जातः अनेन निर्णयेय वाक्यानि यथा श्रुतं समर्थितानि अन्यथा प्रत्येकवाक्यानि तयोरेको बलभद्रोवभूवेत्यादीनि विरुद्धानि भवेयु जन्म कर्म च स्वस्य संपादयिष्यति त्रिविधदुःखदूरीकरणाय भूमिर्भीता तथा चान्ये दुःखभाजो हरिप्रियाः कंसादेःकालतो ज्ञानात् त्रिधा दुःखं च तद्गतमिति वक्ष्यते भूमिस्तु कार्यरूपापि भवतीति विचारे सैवोक्ता अदितिर्यातेति तस्या भूमित्वं स्पष्टमेव अन्येऽपि भूमिसंबंधादेवदुःखिता जनैरनुपलक्ष्यो मार्गोयस्य जनाः साधारणाभगवन्मार्गस्य उपलक्षणमपि न जानंति मार्गः एवं प्रकारेण भगवदागमनंकर्माणिच करिष्यतीति चकाराद्ज्ञानं भक्तिं च कथयिष्यति कर्माणयति रुचिरचरित्रत्वाय विशिनष्टिआत्ममहिम्न उपनिबंधनं येषु आत्मत्वाद्ज्ञानजनकत्वं महिमा पदापद्भक्तिः उप समीपे नितरां बंधनाद्धर्मः त्रिभिस्त्रिविधं दुःखं गच्छति एवं भगवच्चरित्रं भगवन्माहात्म्यमेव सूचयति एतावता सर्वे अदीना भवंति लीलां निरूपयन् ॥ २६ ॥

पूर्वोक्तस्यहेतुमपि निरूपयति विमर्शमध्यपातात् तोकेन जीवहरणमिति यद्ययं भगवान् चतुर्मूर्तिर्न भवेत् तदैव तच्चरित्रचतुष्टयं नगच्छेत् पूतनासु पयः पानेन तन्मोक्षः शकटोपमर्दे यमलार्जुनमध्यगमनं तदुन्मूलनं च नहि वासुदेवादन्यो मोक्षं दातुं शक्तः नहि संकर्षणादन्यः स्पर्शमात्रेण नाशकः नह्यनिरुद्धादन्यः नारदशापमोक्षार्थं सांनिध्य निरूपणेन वृक्षयोरंतरागच्छति नहि प्रद्युम्नादन्यः शापजन्ममूलोच्छेदपूर्वकं पूर्वस्थितदेवताजन्मसंपादयति भगवत्वं च एतैरेव स्थाप्यते यतः तोकेन बालकेन उलूलिकायाः पूतनाया जीवहरणं यत्र हि कार्यं तत्रहि कार्यं तत्रसाधनमवश्यं भावि यत्र पुनः साधनव्यतिरेकेणैव साध्यमुत्पद्यते तत्परब्रह्मस्वरूपमित्येवावगंतव्यं सर्वभवनसमर्थरूपत्वात्तस्य किंच उलूकस्य भार्या उलूकिका उलूकदुहिता वा उलूकरूपैव वा साहि दिवा भीतरूपा भवति सन्मार्गविमुखा प्रतिपक्षा च अनेन प्रमाणवलं तस्यामुक्तौ निवारितं तस्या जीवानां हरणं स्वस्मिन् लयप्रापणं कृतं हिस्वस्मिन्नानीयते इहैव समवनीयते प्राणा इति मुक्तिश्चेषा तस्मात्प्रमेयबलेन सामुक्तेति मंतव्यं प्रमेयं च शुद्धं परब्रह्मनकेनाप्यंशेन न्यूनंतथा सति तादृशस्य मुक्तिदानसमर्थत्वं नसंभवति अतः साधनव्यतिरेकेणैव साध्यकरणात् मुक्तिदानाच्च साक्षात्पुरुषोत्तमः कृष्णः किंच त्रैमासिकस्येति मासत्रयपरिमितः कालोवय बालवय एव भगवतः परिच्छेदकाइव जाता ते हि स्वभावतः असमर्था मूर्तिभेदं संपादयंति तेन शकटं निर्माय शकटं विहृत्य शकटं नाशितवानिति त्रिमूर्तिरुक्तो भवति त्रयाणामपि नाशने हंतृत्वव्युदासाय एवेत्युक्तं संकर्षणायोग्यत्वात् उपवृतां विरुद्धतया पतनं भंजन महाबलनिरूपणेनपूर्णाक्रिया शक्तिरुक्ता प्रवालमृदङ्घ्रिहतमिति वाक्यात् साधनभावः सूचितः पूर्ववत्परब्रह्मत्वं पूर्णक्रियाशक्तिं च सूचयति एवं ज्ञानक्रियाशक्तिप्रतिपाद्य भक्तिमार्गसमर्थनायाचिंत्य सामर्थ्यं प्रतिपादयति यद्रिंगतांतरगतेनेति यदेतत्त्रयं इतरथा न संभाव्यमित्यर्थः रिंगताहस्तपादैश्चलतातयोरंतरगतेन तयोरुन्मूलत्वेन परब्रह्मबोधकत्वं पूतनायां सुखसंबंधेऽपि स्थितः शकटेपादाग्रमात्रं अर्जुनयोस्तदपि न किंतु परम्परया दूरसंबंधः उलूखलेन वृक्षयोःसंबंधः रज्ज्वाचोलूखलस्य भगवता च रज्ज्वा यदि बलेन कृतं स्यात् रज्जुत्रोटनं प्रथमं भवेत् अल्पबलत्वात् उलूखलस्य वा भगवत्संबंधी विचारितं सर्वेषां वा तत्राप्युन्मूलनं नसंभावितं तिर्यग्गमनस्य इदभूमौ मध्यभंगहेतुत्वात् इदमपि पूर्ववत् परब्रह्मसाधकं इच्छाशक्तिसाधकं च एषाहि भगवतो लीला ज्ञानक्रिया इच्छाच इतरथा न भाव्यमिति सर्वाग्निमश्लोकेषु किंचियोजयंति वस्तुतस्त्वत्रैव अग्रे संबंधबोधकपदाभावात् ॥ २७ ॥

एवं लीलां विनिरूप्य हसितं विनिरूपयति यद्व्रजेपशूनिति यद्यस्मात्कारणाद्व्रजे गोष्ठे व्रजपशून् व्रजरूपान्बालकान् पशूंश्च स्वकीयत्वान्विषतोयपीथान् विषतोयस्य पीथं पानं येषां यथा सोमपीथेन मृत्युग्रस्ता अमरा भवंति तथा विषतोयपीथा मध्यजीवय इ पशू-

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

ज्वालांश्चाजीवयदित्येकः पक्षः अनुग्रहदृष्टिवृष्ट्येति साधनं तस्या यमुनायाः शुद्धये अतिविषवीर्येण विलोला जिह्वा यस्य तं विहरन्नेवोच्चाटयिष्यन् अत्रइकारलोपः छांदसः उच्चाटयिष्यतीत्यर्थः नुमभावो वा विहरन् उच्चाटयन् जीवयदिति संबंधः अत्र पशुपालजीवनं अनुग्रहदृष्टिवृष्ट्या साधनेन कार्यं निरूपितं इदंचास्य लौकिकं विहरणं गरुडादिभिरपि सिद्धं भवति योगिनोऽपि हि दृष्ट्या जीवयंति उपसर्गोनिपातसहिता वटधातोर्वा आटयिष्यति लृङ्क्रियातिपत्तौ यदातं दूरीकरिष्यति तदा अजीवयत् अन्यथा जीवितस्य मध्यजीवितमेव हास्यार्थमिदं चरित्रं भवति वयं कृष्णं पालयिष्याम इत्येषां बुद्धिः तदद्दतस्यदृष्टमेव तान् पालयित्वा स्वयं तत्र प्रविष्टः कथमेते पालयिष्यंतीति पश्चात्तान किंचित्करान् दृष्ट्वा हसतीति अथवा पशून्पालाविति ये पशुरूपा पाला आधिदैविका तानजीवयत् तेषामपराधिनः कालेन हता भगवद्भक्तानां विषपालनहेतुत्वात् विषतोयस्य पीथं पानं येभ्य इति कालस्तानेव प्रसति ननु भगवदीयाश्चिरपराधिनः मंडूकादयो मृतप्राया वृष्ट्या उद्गच्छंतीति दृष्टदृष्टित्वं तेष्वनुग्रहो ब्रह्मत्वबोधकं नह्यन्यआधिदैविकेष्वनुग्रहकरणसमर्थः यदेतत्श्रभाव्यमितीयसंयोजना संगच्छते लौकिकसाधनेषु मंत्रादिना विषं दूरीकृत्य पश्चाज्जीवनं प्रसिद्धं अत्रसर्वविषाणामेव जीवनं भगवत्कार्यमिति ॥ २८ ॥

कश्चित् हास्यमात्रत्वेन काचिच्चिंता हसितंनिरूप्य ईक्षणं निरूपयति तत्कर्मदिव्यमिवेति तस्य भगवतः कर्मदिव्यमिव दिवि भवं दिव्यं अलौकिकं इवेति इंद्रादीनामप्यशक्यं यद्दावाग्निनाग्रीष्मसंबंधिनि वने परिदह्यमाने सति तन्मध्ये निशि निःशयानं व्रजमुमोक्ष्यति ततोऽन्यत्र स्थापयिष्यति इतः अस्मात् स्थानात् इतो हेतोर्वा अवसितः अंतकालो येन अस्माकमयमंतकाल इति व्रजस्थैर्विचारितं इदं हि चरित्रं दावाग्निविमोचकं वारद्वयं निष्पन्नं कालियहृदे समीपेमुंजाटव्यां च तत्रैकत्रनेत्रपिधाप्य मुंजाटव्यां त्याजयित्वासमानीता अन्यत्रतु निशि निःशयानमिति अन्यानिसाधारणानि पदान्युभयत्र ईक्षणमपि द्विरूपं नेत्रद्वयेन जग्धते तस्मात्संकटान्मोक्ष्यतीत्युभयत्र साधारणं उन्नयनं हि देवार्थं पृथक्करणं तथैते स्वार्थे रक्षिता अग्निपानं ब्रह्मधर्मः अन्यत्र नयनं च यदत्राग्निपानं न निर्दिष्टं पुनः प्रश्नव्यावृत्त्यर्थं अन्यथा कथमग्निपीतवानिति प्रश्नः स्यात् अत एव दिव्यमिवेत्युक्तत्वात् ननु स्वरूपं देवगुह्यं चैतत् ॥ २९ ॥

एवमीक्षणं विनिरूप्य उल्लसत्वं निरूपयति गृह्णीतेति इदं हि चरित्रं भगवतो ब्रह्मत्वबोधकं अन्यत्तुयोगमंत्रमन्वादिभिरपि सिध्यति नैकांतिकं भगवत्त्वसाधकं यथैतच्चरित्रं भगवत्वं साधयति तथा भाष्ये निरूपितमधिकरणद्वयेन नहियः सर्वात्मको न भवतियेन रूपेण सहितेन बंधनं नार्हतीति युक्तं यदेव बंधनार्थं उपबंधनं रज्जुं गृह्णीतगृह्णाति तत्तदेव अमुष्य बंधने न माति भगवतः एवं आद्यन्तयोश्चाविद्यमानत्वात् बहवोऽपि योजिता या एकमेव भवंति तस्य च परिदृश्यमानसुंदरं सर्ववस्तुषु स्वरूपमेव आद्यंतयोश्चाविद्यमानंतस्मादमानं युक्तं किंच यस्य भगवतो जृम्भमाणस्य मुखे भुवनानि संवीक्ष्य शंकितमनाःप्रतिबोधिताप्यासीत् इदंहिचरित्रद्वयं विश्वाधारत्वं अनुभवमोहकत्वं च यः सर्वेषु भूतेषु तिष्ठन् सर्वाणि भूतान्यंतरयतीत्यांतरः स हि गोकुले तिष्ठन् गोकुलमंतःस्थापयति नच तन्मायिकत्वंश्रुतिसिद्धत्वात् यशोदायाश्च तत्राप्यनुभगवान् विचारेणापि अथोऽमुष्यैवममार्भकस्येतिवाक्यात् ब्रह्मधर्म एवायं अस्तु वा तत् तदानीमेव शंकिता प्रतिबोधिताप्यासीत् पुत्रएवायं ममेति ज्ञातवती नह्यनु भवस्य स्मृतिं संस्कारजनकत्वं भगवन्माया व्यतिरेकेण संभवति अयमेव भगवत उल्लासः शंकाचभगवत्तैवर्जानतामुखविकासहेत्वर्थे अतः मुखविकासेऽपि निमित्तांतरेऽपि मुखप्रकाशे जगत्प्रदर्शनं तदैवाहि प्रतिबोधनं प्रथमप्रदर्शने तु सुस्मितेत्येवाध्यायसमाप्तिः वैष्णवीं व्यतनोन्मायामिति तत्रैवोक्तत्वात् एवंचतुर्भिःश्लोकैः चतुर्मूर्त्तिभगवतः संकर्षणानिरुद्धप्रद्युम्नवासुदेवनिर्णाय मुक्त्वा सर्वं वा सर्वत्र एव मुल्लासंनिरूप्य भ्रुवं निरूपयति भ्रुवा शब्देन हि भगवत्कृतं फलमुच्यतेतद्भ्रूविजृंभः परमेष्ठिधिष्ण्यमिति वाक्यात्तत्फलं दुःखाभावसुखरूपं दुःखस्य परमासीमा नरकादिः सुखस्य परमा सीमा वैकुंठाख्यं तदुभयं भगवत्साधनरहितेभ्यः करोतीति विचारेण भगवत्वम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

किंच युद्धे रावणस्य वक्षःस्थलस्पर्शेन रुग्णा भग्ना ये महेन्द्रवाहस्य ऐरावतस्य दन्ताः तैर्विडम्बिताः स्वधवलिम्ना धवलीकृताः, तत्तद्दिक्षु पतितैस्तैः प्रकाशिता इत्यर्थः, या एवम्भूताः ककुभो दिशस्ता जुषते सेवते पालयतीति तथा तस्य, दारहकृः रावणस्य ऊढं प्राप्तं हासम् अहो मत्समः कोऽप्यन्यो नास्तीति गर्व्वम् असुभिः प्राणैः सह सद्यो विनेष्यति अपनेष्यति । कैर्धनुषो विस्फूर्जितैः टङ्कारघोषैरेव । कथम्भूतस्य तस्य अधिसैन्ये स्वपरसैन्यमध्ये उत्कर्षेण चरतः । ककुब्जयरूढहासमिति पाठे तथाभूतानां ककुभां जयेन रूढं गर्व्वम् ॥ २५ ॥

श्रीकृष्णावतारमाह, भूमेरिति दशभिः । सुरेतरा असुरस्वरूपा ये राजानस्तेषां वरूथैः सैन्यैर्विमर्द्दिताया भुवः पृथिव्याः क्लेशव्ययाय भारापनोदनाय भूतलस्थानां संसारदुःखक्षयाय च तत्रैव केषाञ्चित् सोत्कण्ठभक्तानां स्वायोगदुःखोपशमाय च जातः कर्म्माणि करिष्यति । ननु कोऽसौ जातस्तत्राह जनैरस्मदादिभिरप्यनुपलक्ष्य उपलक्षयितुमशक्यो मार्गो वर्त्मापि यस्य सः । नन्वविदिततत्त्वोऽपि पदार्थो लोके स्वबुद्ध्यनुसारेण नामरूपे कल्पयित्वा अयमयमिति निर्द्धार्यते, यथा कौस्तुभोऽपि पद्मराग एवायमिति पद्मरागोऽपि प्रवालमणिरेवायमिति, तथाऽयमवतारोऽविज्ञातस्वरूपोऽपि पुराणादिषु कीदृशतया पठ्यत इत्यत आह कलयेति । सितकृष्णौ केशौ यस्य स एवातिपुरातनः पुरुषः यस्य कलया जात इति । यत्तु विष्णुपुराणे—उज्जहारात्मनः केशौ सितकृष्णौ महामुने इति यच्च भारते—स चापि केशौ हरिरुच्चकर्त्त एकं शुक्लमपरञ्चापि कृष्णम् । तौ चापि केशावाविशेतां यदूनां कुले स्त्रियौ रोहिणीं देवकीञ्च ॥ तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः । कृष्णो द्वितीयः केशवः संबभूव केशो योऽसौ वर्णतः कृष्ण उक्तः ॥ इति ...

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

ऽर्थे विचार्य्यमाणे वाधैव लभ्यते, न तु कापि सङ्गतिः । तथाहि त्रिगुणातीतस्याविकारिणः चिदानन्दघनवपुषो नारायणस्यापि वयः परिणामकृतं शुक्लकृष्णकेशत्वम्, अथच सन्तं वयसि कैशोरे इति नित्यकिशोरत्वञ्च, तथा कृष्णस्तु भगवान् स्वयमिति कृष्णावतारस्य स्वयंभगवत्त्वं चेति, अतस्तत्र विद्वांसो व्याचक्षते यथा—सितकृष्णकेशत्वं शोभैव, न तु वयःपरिणामकृतं, भारावतारणरूपं कार्य्यं कियदेतत् मत्केशावेव कर्त्तुं समर्थाविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थञ्च केशोद्धरणमिति गम्यते । अन्यथा तत्रैव विरोधापत्तेः कृष्णस्तु भगवान् स्वयमित्येतद्विरोधाच्च । कलया रामेण सह स्वयं सितकृष्णकेशो भगवानेव जात इति स्वामिचरणाः । कलया शिल्पनैपुण्यविशेषविधिना सिताः वद्धाः कृष्णा अतिश्यामाः केशा येनेति विग्रहः । स एवेत्यस्य वैदग्धीविशेषात् कृष्ण ईरितः ॥ किंवा यः कलयांशेन स्यात् सितश्यामकेशकः । इति भागवतामृते श्रीरूपगोस्वामिचरणाः अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिता इति स्मृतेर्मौच्छरोधार्य्यौ सितकृष्णकिरणौ द्वौ प्रभू अवतरिष्यत इति सूचनार्थं केशद्वयोद्धरणमिति सन्दर्भे श्रीजीवगोस्वामिचरणाः किञ्चात्र विष्णुपुराणे भारते च सर्व्वत्र केशशब्दस्यैव प्रयोगात् चिकुरकुन्तलाद्यप्रयोगात्, परोक्षवादा ऋषयः परोक्षञ्च मम प्रियमिति भगवत्सम्मतौ स्थितानां शास्त्राणामृषीणां साकूतमेव तत्तद्वचनमिति गम्यते । तत्र उज्जहारेति ॥ आत्मनः स्वान्तःकरणात् सकाशात् केशौ सुखरूपावीश्वरौ सितकृष्णौ उज्जहार बहुस्तुतिभिः प्रसाद्य बहिरपि उद्गमयायास । हे महामुने मननेनैवास्यार्थोऽवगम्यतामिति भावः । सुखशीर्षजलेषु कमिति नानार्थवर्गात् । एवमेव भारतीयं पद्यद्वयमपि व्याख्येयम् । तथैव कलया एकांशेन भुवः क्लेशव्ययाय सितेन सह कृष्णः केशः सुखरूपः ईशः माधुर्य्यैश्वर्य्यमयः, बलदेवेन सह कृष्णो जात इत्यर्थः । श्लेषेण सितो रुद्रः कृष्णो विष्णुः को ब्रह्मा तेषामपीश्वरः । स यावदुर्व्व्यां भरमीश्वरेश्वर इत्यग्रिमोक्तेः । कर्म्माणि कीदृशानि आत्मनो महिमा महैश्वर्य्यं तस्यापि उप आधिक्येन निवन्धनम् आवृतीकरणं येषु तानि, यत्कर्म्मसु माधुर्य्येणावृतमेव महैश्वर्य्यं तिष्ठतीत्यर्थः । यद्वा आत्मनः स्वस्य महिम्नि उप आधिक्येन नितरां वन्धनं येभ्यस्तानि, यत्कर्म्माणि स्वमाधुर्य्येण सर्व्वलोकमनांसि बध्नन्तीत्यर्थः । तत्र जनानुपलक्ष्यमार्ग इति पदेन रहस्या रागानुगा भक्तिरपि द्योतिता ॥ २६ ॥

एतदेव प्रपञ्चयति । उलूकिकायाः पूतनाया यज्जीवहरणं तोकेनैव वालकेनैव रूपेण, न त्वतिविकटाकाराया अतिविस्तृतशरीराया अतिवलिष्ठायास्तस्या वधोपयोगिनी तादृशैश्वर्य्यमयी वामनावतारस्य त्रिविक्रममूर्त्तिरिव काचिन्मूर्त्तिराविष्कृतेति भावः । त्रैमासिकस्यैव पदा अतिसुकोमलेनैवेत्यर्थः यत् अपवृत्तः विपर्य्यस्ततया पातितः, न तु हिरण्यकशिपुविदारणार्थो नृसिंहमूर्त्तिरिव पदस्य विकटकठोरता काप्याविष्कृतेति भावः । रिङ्गता जानुभ्यां गच्छतैव अन्तरं तेन तयोर्मध्यं गतेनैव उलूखलनिवद्धेनैव अर्ज्जुनयोर्द्वयोर्यदुन्मूलनं, न तु पृथिव्युद्धरणोपयोगिना वराहरूपेणैव कोऽपि प्रयत्नः कृत इति भावः । तत् सर्व्वम् आत्ममहिमोपनिवन्धनमेव निजवाल्यमहामाधुर्य्येण स्वमहैश्वर्य्यस्य आवृतीकरणमेवेति पूर्व्वेणानुषङ्गः । इतरथा अन्यथा न भाव्यम्, एतन्निकेण ईदृशेन न भवितव्यं नाभविष्यदित्यर्थः ॥२७॥

विषमयतोयस्य पीतं पानं येषां तान् पालान् गोपांश्च कृपादृष्टिसुधावृष्ट्या अजीवयत् जीवयिष्यतीति यत् तदपि आत्ममहिमोपनिवन्धनमेवेति पूर्व्वेणानुषङ्गः । ह्रदिन्यां यमुनायां विहरन् विहर्त्तुं तच्छुद्धये तस्या निर्विषत्वाय उरगं कालियम् उच्चाटयिष्यति ॥ २८ ॥

दिव्यमिवेति लोकोक्तिरीत्यैवोक्तिः । वस्तुतस्तु सर्व्वं कर्म्म तस्याप्राकृतमेव. जन्म कर्म्म च मे दिव्यमिति भगवदुक्तेः । निशि कालियदमनरात्रौ शुचिर्ग्रीष्मस्तत्सम्वन्धिनि वने । उन्नेष्यति उद्धरिष्यति । अवसितो निश्चितोऽन्तकालो येन तम् । तथा मुञ्जाटव्यां नेत्रे पिधाप्य पिहिते कारयित्वा ॥ २९ ॥

उपवध्यतेऽनेनेत्युपवन्धं शुल्वं दाम अमुष्य माता श्रीयशोदा यत्यत् गृह्णीत गृह्णाति तत् अमुष्य न माति वन्धने सम्मितं न भवति न पूर्य्यत इत्यर्थः । गोपी यशोदा आदौ, किं स्वप्न एतद्वुत देवमायेत्यादिनाविस्मितमनास्ततो वोधिता, अथो अमुष्यैव ममार्भकस्य यः कश्च नौत्पत्तिक आत्मयोग इति निजैश्वर्य्यं ज्ञापिता अमुना कृष्णेनैवत्यर्थः । तदनन्तरं प्रतिवोधिता ऐश्वर्य्यज्ञान प्रतिरूपं पुत्रस्नेहमाधुर्य्यमेव वोधिता, प्रणतास्मितत्पदं स एव नारायणो मत्पुत्रस्यारिष्टं नाशयत्विति तत्र द्योतनात् ॥ ३० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

सचन्द्रवणार्थिर्युद्धे रावणस्य वक्षस्थलस्पर्शेन दग्राभग्राये महेन्द्रवाहस्य ऐरावतस्य दंताः तैर्विडंविताः स्वधवलिम्ना धवलीकृताः याः ककुभः दिशः ताः जुषते सेवते पालयतीति तथा तस्य दारहर्तुः रावणस्य अधिसैन्यं स्वपरसैन्यमध्ये उच्चरत उत्कर्षेण विचरतः अहो मत्समः कोऽन्योऽस्तीति गर्वेण दृढमुत्पन्नं हासम् असुभिः प्राणैः सह धनुषो विस्फूर्जितैः टङ्कारघोषैरेव सद्यः शीघ्रं विनेष्यति ॥ २५ ॥

श्रीकृष्णावतारमाह भूमेरिति दशभिः सिताःशुभाचाराः ब्रह्मादयः कृष्णकाः अशुभकर्माणः असुराः तेषामीशः उत्पत्तिस्थित्यादिहेतुः तथाच महाभारते ऋषयऊचुः पिनाकिन्भगनेत्रघ्न सर्वलोकनमस्कृतम् माहात्म्यं वासुदेवस्य श्रोतुमिच्छाम शंकर शिव उवाच पितामहादपि वरः शाश्वतः पुरुषोहरिः हिरण्यकेशः श्रीकृष्णः व्यभ्रे सूर्य इवोदितः श्रीवत्सांको हृषीकेशः सर्वदेवतपूजितः ब्रह्मा तस्योदरभवस्तथाहं च ललाटजः शिरोरुहेभ्यो ज्योतींषि रोमभ्यश्चसुरासुराः ऋषयो देहसंभूतास्तथालोकाश्च शाश्वताः पितामहगृहं साक्षात् सर्वदेवगृहं च सः सोऽस्याः पृथिव्याः कृत्स्नायाः स्रष्टात्रिभुवनेश्वरः संहर्ता सर्वभूतानां स्थावरस्यचरस्य च स देवरिपुजित्साक्षाद्देवनाथः परंतपः सर्वज्ञः सर्वसंश्लिष्टः सर्वगः सर्वतो मुखः परमात्मा हृषीकेशः सर्वव्यापी महेश्वरः न तस्मात्परमं भूतं वदे लोके च किंचनेत्यादि यद्वा सिता हिरण्यकेश इति श्रुतिप्रोक्ताः प्रकाशरूपाः कृष्णाः केशा यस्य सः साक्षाद्भगवान् सुरेतरवरूथैः राजन्यरूपासुरसैन्यैः विमर्दितायाः भूमेः क्लेशव्ययाय भारापनयनाय कलयासंकलया संकर्षणेन सहजातः सन् कर्माणि करिष्यति अनेन ताव

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

शकेशोपलक्षितस्वासाधारणश्रीविग्रहवानाविर्भूत इति सूचितम् यद्वा सितकृष्णा गौरश्यामौ कानां सहस्रसंख्याकशिरसामीशः संकर्षणश्च कस्य ब्रह्मणः ईशः ब्रह्मोपलक्षितसर्वजगज्जनकश्च केशौ संकर्षणपरवासुदेवाख्यमूर्तिभेदौ यस्य सः सकया स्वसंकल्पेन जात इत्यर्थः अनेन सचापिकेशौ हरिरुद्ववर्हशुक्लमेकमपरं चापि कृष्णं तौ चापिकेशौ निर्विशेतां यदूनां कुले स्त्रियौ देवकीं रोहिणीं चेति महाभारतस्थं जनव्यामोहकरं कूटवाक्यं व्याख्यातम् हरिः केशौ उक्तव्युत्पत्त्या संकर्षणब्रह्मोपलक्षितसर्वजगत्कारणात्मकमूर्तिभेदौ उद्ववर्हआविश्चकार स संकर्षण आविर्भावयितुमुद्यतइतिफलितोर्थः अन्यत्स्वपरमिति कूटवाक्यार्थः तस्य सर्वाविषयत्वं सूचयन् तद्विशिनष्टि अमानुपलक्ष्यमार्ग इति स्वानन्यभक्तविशेयत्वं सूचयन् तत्कर्माणिविशिनष्टि आत्ममहिमोपनिवंधनानीति आत्मनः भगवतः महिमा गुण स्वरूपादि याथात्म्यम् उपनिबध्यतेव्यक्तीक्रियते येषु तानि ॥ २६ ॥

ननु भूमिक्लेशव्ययमन्यः कश्चित्करिष्यति किंभगवत्प्रादुर्भावेनेति शंकांनिवारयन् तत्कर्मणां तन्महिमोपनिवंधनत्वं प्रपंचयति तोके नेत्यादिना तोकेन वालेन उलूकिकायाः पूतनायाः जीवहरणं यत् त्रैमासिकस्य त्रिमासावस्थस्य च पदापादेन यत् शकटः उपवृत्तः यच्च दिविस्पृशोरत्युच्चयोरर्जुनयोः वृक्षविशेषयोः रिंगताजानुभ्यां गच्छता अंतर्गमेन मध्यंप्राप्तेन भगवता उन्मूलमुत्पाटनं इतरथाभगवदवतारं विनातत्सर्वं नभाव्यं नभवितव्यम् ॥ २७ ॥

किंच यद्व्रजे विषतोयस्य पीतं येषां तान् व्रजपशून्पालांश्च अनुग्रहदृष्टेः कृपादृष्टेः वृष्ट्या सुधावृष्ट्या अजीवयत् यच्च कालिन्द्यां श्रीय मुनायाम् विहरन् तच्छुद्धये हृदिमीनिर्विषत्वाय अतिविषवीर्येण विलोला चपला जिह्वा यस्य तमुरगं कालियसंज्ञं सर्पम् उच्चाटयिष्यत् तदपीतरथा नभाव्यमित्यन्वयः ॥ २८ ॥

किंच अनधिगम्यं कार्त्स्न्येन दुर्ज्ञेयं वीर्यंयस्य सः सबलःसरामः शुचिवने ग्रीष्मकालिके वनेशुष्के वने दावाग्निना परिदह्यमाने सति अतो दावाग्नेर्हेतोः अवसितो निश्चितः अंतकालो यस्य तंनिशि निः शयानामिति कालियदमने रात्र्यां यमुनातीरे नेत्रेपिधाय्यपिहिते कारयित्वेति मुंजाटव्याः व्रजमुन्नेष्यति उद्धरिष्यतीति यत् तदपि कर्म दिव्यममानुषं भगवन्माहात्म्यद्योतकमित्यर्थः इवेति पादपूरणार्थकमव्ययम् ॥ २९ ॥

किंच अमुष्य भगवतः माता श्रीयशोदा यद्यदुपवध्यते अनेनेति उपवंधं शुल्वं दामगृहीतगृहीष्यति तत्तत् अमुष्य भगवतः नमाति वंधसंमितं न भवति नपूर्यते इत्यर्थः किंच गोपी श्रीयशोदा अस्य भगवतः जृंभतः वदने मुखे भुवनानि चतुर्दशलोकान् सम्यक् वीक्ष्य दृष्ट्वा शंकितमनाः सती प्रतिवोधिताऽऽसीत् निजैश्वर्यं ज्ञापिता आसीत् इति यत् तदपि कर्मदिव्यमिति सर्वत्र पूर्वेणान्वयः ॥ ३० ॥

भाषा टीका

जिसने अपने वक्षस्थल के स्पर्श से महेन्द्र वाह ऐरावत के दांतों को तोड़ कर और उन्हीं दांतों को चारों दिशाओं में फेंक कर अपने दिग्विजय का दर्प बढाया है उस पत्नी हर्ता सेना में विचरते हुए रावण के गर्व को प्राण सहित विनाश करेंगे ॥ २५ ॥

दैत्यों की सेना से विमर्दित पृथ्वी के क्लेश के नाशार्थ वलदेव सहित सपेद काले केश जिनके ऐसे कृष्ण उत्पन्न होकर मनुष्यों को अज्ञात हैं मार्ग जिनका अपनी महिमा के प्रकट करने वाले कर्मों को करेंगे ॥ २६ ॥

वालक से पूतना का नाश तीन मास के चरण से शकट को गिराना और स्वर्ग का स्पर्श करने वाले यमलार्जुन के मध्य में आकर उखाड़ना ये सब काम विना ईश्वर के नहीं हो सके हैं ॥ २७ ॥

और जो व्रज में व्रज के पशु और वालक विष युक्त जल पीने से मृत होगये उनको कृपा दृष्टि से जिवाया और यमुना में विहार करते हुये उसकी शुद्धि के लिये कालिय सर्प को निकाल देवेंगे ॥ २८ ॥

उन श्रीकृष्ण का कर्म दिव्य की तरह है जो रात्रि को वन के अग्नि से जलते हुये वन में मृत प्राय व्रजवासियों को नेत्र मुंदाय कर अग्नि से वचावेंगे ॥ २९ ॥

और इनकी माता यशोदा इनके वन्धन के लिये जौन जौन रस्सी लावेगी दो अंगुल छोटी होगी और जिनके जृम्भा लेने में मुख में सव लोकों को देख कर शङ्कित मन होकर भगवत्तत्त्व जानैगी ॥ ३० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

वरुणस्य पाशात् यद्वयं तस्मान्मोचयिष्यति । मयसुतुना व्योमेन । अह्नि दिवसे आपूतं निशि शयानामिति च वैकुण्ठ प्राप्तिसाधना-नुष्ठानप्रभावो दर्शितः । उपनेष्यति प्रापयिष्यति । गोकुलवासिनं जनम् । स्मेत्याश्चर्ये ॥ ३१ ॥

देवे इन्द्रे । पशून् रिरक्षुः रिरक्षिषुरित्यर्थः । अनघे भ्रमरहिते एकस्मिन्नेव करे सलीलं यथा स्यात् तथा महीध्रं गोवर्द्धनं धर्त्ता धारयिष्यति । उच्छिलीन्ध्रम् उच्छ्रितं छत्राकमिव । सप्त वर्षाणि वयो यस्य सः ॥ ३२ ॥

नन्दञ्च मोक्ष्यति भयाद्वरुणस्य पाशाद्गोपान् विलेषु पिहितान् मयसूनुना च ।
अन्ह्यापृतं निशि शयानमतिश्रमेण लोके विकुण्ठ उपनेष्यति गोकुलं स्म ॥ ३१ ॥
गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून् कृपया रिरक्षुः ।
धर्त्तोच्छिलीन्ध्रमिव सप्त दिनानि सप्तवर्षो महीध्रमनघैककरे सलीलम् ॥ ३२ ॥
क्रीडन् वने निशि निशाकररश्मिगौर्य्यां रासोन्मुखः कलपदायतमूर्च्छितेन ।
उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्त्तुर्हरिष्यति शिरो धनदानुगस्य ॥ ३३ ॥
ये च प्रलम्बखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः ।
अन्येऽपि साल्वकपिवल्वलदन्तवक्त्रसप्तोक्षशम्बरविदूरथरुक्मिमुख्याः ॥ ३४ ॥
ये वा मृधे समितिशालिन आत्तचापाः काम्बोजमत्स्यकुरुकैकयसृञ्जयाद्याः ।
यास्यन्त्यदर्शनमलं वलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयम् ॥ ३५ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

निशि रात्रौ निशाकररश्मिभिः गौर्य्यां धवलायाम् । वने क्रीडन् कलानि मञ्जुलानि पदानि यस्मिन् तच्च तत् आयतं दीर्घं मूर्च्छितञ्च आलापविशेषयुक्तं यद्गीतं तेन उद्दीपितः स्मर एव रुक् (रोगो) यासां तासां गोपीनां हर्त्तुः शङ्खचूडस्य शिरो हरिष्यति ॥ ३३ ॥

ये च प्रलम्बादयस्ते सर्व्वे हरिणा हेतुभूतेन तदीयं निलयं वैकुण्ठम् अदर्शनं दर्शनायोग्यमपि अलं यास्यन्तीत्युत्तरेणान्वयः । खरो धेनुकः । दर्दुरइव दर्दुरो वकः । इभः कुवलयापीड़ः कुजो नरकः । कपिर्द्विविदः ॥ ३४ ॥

ये च मृधे आत्तचापाः । समितौ संग्रामे शालन्ते श्लाघन्ते ते समितिशालिनः । ननु प्रलम्बखरकपिवल्वलरुक्मिप्रमुखा वलभद्रेण निहताः, काम्बोजादयश्च भीमार्ज्जुनादिभिः, शम्बरः प्रद्युम्नेन यवनो मुचुकुन्देन, न तु हरिणा तत्राह । वलपार्थभीमेत्यादयः व्याजाह्वयाः कपटनामानि यस्य स तेन । सप्तोक्षाणस्तु तेन दमिताः कालान्तरे यास्यन्तीत्यर्थः । एतच्च सर्व्वमपि कर्म्म दिव्यमिव तथ्वितरथा न भाव्यमिति पूर्व्वेणैव सम्बन्धः ॥ ३५ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिनाख्यतट्टिप्पणी ।

[रासोन्मुख इति रासो नाम बहुनर्त्तकीयुक्तो नृत्यविशेष इति दशमस्कन्धीयत्रयस्त्रिंशाध्यायस्य द्वितीयश्लोकटीकायां स्वामिनः तत् क्रीडोन्मुख इत्यर्थः व्रजभृद्वधूनामिति । व्रजभृत गोष्ठपालकस्तेषां वधूनामित्यर्थः ।] शङ्खचूडस्येति । शङ्खचूडवधो दशमे । चतुस्त्रिंशाध्याये वर्णितः ॥ ३३ ॥

दर्दुर इति । दर्दुरो वकः जलवाससाम्यात् । [अरिष्टेत्यादि । अरिष्टो वृषभासुरः । मल्लाश्चाणूरादयः । यवनः कालयवनः ॥ पौण्ड्रकः मिथ्यावासुदेवः । आदिपदेन काशिराजादयः ॥ शम्बरेत्यादि । शम्वरो दैत्यः विदूरथः दन्तवक्रभ्राता रुक्मी श्यालको मुख्यो येषां विन्दानुविन्दादीनां ते च ।] ॥ ३४ ॥

सप्तोक्षाण इति । सप्त वृषभा इत्यर्थः । कालन्तरे इति मरणानन्तरमित्यर्थः । यद्यप्येते कालान्तरे मृतास्तथापि तत्सम्बन्धप्रभावादेव मरणानन्तरं वैकुण्ठं यास्यन्तीति भावः ३५ ॥ ३६ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

अपि च वरुणस्य पाशाद्भयं तस्मान्नन्दं स्वपितरं मोचयिष्यति मयसूनुना व्योमासुरेण विलेषु पिहितान् तिरोधापितान् गोपांश्च मोक्ष्यतीत्यर्थः किञ्चाह्निदिवसेऽतिश्रमेणापृतं व्यापारग्रस्तं निशिशयानंगोकुलंगोकुलवासिजनं दृष्ट्वा तेषु स्वानुवृत्तिजनितकृपया विकुण्ठंनित्यं लोकं निरतिशयानंदलोकं उपनेष्यति प्रापयिष्यतीत्यर्थः स्मेत्याश्चर्ये ॥ ३१ ॥

मखे इन्द्रयागे प्रतिहते सति मखविप्लवाय गोवर्द्धन पर्वतयागनाशार्थं देवे इन्द्रेऽभिवर्षति सति पशून्कृपयारिरक्षुः रक्षितुमिच्छुःसप्तवर्षः सप्तवर्षाणि वयो यस्य तथा भूतः अनघैककरेऽनघेऽघराहते एकस्मिन्नेव करे अनघेति नारदसंबोधनंवा सलीलं यथा तथा महीध्रं गोवर्द्धनाख्यमद्रिं सप्तदिनानि उच्छिलीन्ध्रमिवधर्त्ता धारिष्यति उच्छिलीन्ध्रं छत्रकमिवेत्यर्थः ॥ ३२ ॥

निशाकरश्चंद्रः तस्य रश्मिभिर्गौर्य्यांधवलायांरात्रौ वने क्रीडन् विहरन् कलानि मधुराणि पदानि यस्मिंस्तदायतं दीर्घं मूर्छितमालापविशेषयुक्तं गीतंतेन उद्दीपितः स्मरः काम एवरुक्रोगोयासां तासांव्रजं विभ्रतीति व्रजभृतः गोपाः तेषां वधूनां गोपीनां हर्त्तुश्चोरयतो धनदानुगस्य कुवेर भृत्यस्य शंखचूडाख्यस्य शिरोहरिष्यति ॥ ३३ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

येऽन्ये प्रलंबादयः ते सर्वे हरिणाहेतुभूतेन तदीयं हरिसंबंधिभवदर्शनं प्राकृतेंद्रियाविषयं वैकुंठनिलयं लोकं यास्यंति अलंतद्दर्शनेन तद्वेष्टितानामनंतत्वान्नतद्दर्शने ममसामर्थ्यमस्तीति भावः खरो धेनुकः दर्दुरो बकः इभः कुवलयापीडः कुजो नरकः कपिर्द्विविदः सप्तोक्षाणः बलीवर्दाः ॥ ३४ ॥

मृधे युद्धेये २ बाणास्सचापाः भृतधन्वानो राजानः समिति शालिनः समितौ संग्रामे शालंतेश्लाघंते इति समिति शालिनः कांबोजा दिदेशाधिपतयः ननु प्रलंबादयो बलभद्रेण हताः कांबोजादयो भीमार्जुनादिभिश्च शंबरः प्रद्युम्नेन यवनो मुचुकुंदेन नतु हरिणा तत्राह बलभीमपार्थ इति व्याजाः कपटाआह्वयाः नामानि यस्य तेन बलभीमादि रूपेण च स एव हरिः सर्वसंहर्तेत्यर्थः सप्तोक्षाणस्तु तेन दमिताः कालांतरे यास्यंतीति भावः एतच्च सर्वमपि कर्म दिव्य मिव तच्चान्यथा नभाव्यमिति पूर्वेणान्वयः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

पाशाद्भयाभिद्ययाविधायांशयानंजल्प्या अन्यथाज्ञानहेतुवाचावृतं अन्यथाज्ञानहेतुर्यावाक्सजल्पिः प्रकीर्तितेतिच अतएवातिभ्रमणसंसारक्लेशेनपीडितंगोकुलं विकुंठलोके उपधास्यतीतियत्तदपि ॥ ३१ ॥

मखेभात्मांद्देऽयज्ञ देवेंद्रेमजविप्लवायजलौघेनगोघ्ननाशाय । गोघ्नाध्वनिवहान्व्रजाहतिरिरक्षुः रक्षितुकामः महीध्रंगोवर्धनगिरिं । सलीलंधृतोधारयिष्यतीति उच्छिलींध्रंछत्राकम् ॥ ३२ ॥

निशाकरस्यरश्मिभिर्गौर्यांधवलत्वंप्राप्तायांनिशिरात्रौ । रासक्रीडाभिमुखश्रीकृष्णःवनेक्रीडन्सन्कलपदंचायंतचमूर्च्छितंचतेनसप्तरसमाहारवतागानेन सप्तस्वरसमाहारोमूर्च्छितेतिप्रकीर्तितेति उद्दीपित उज्ज्वालितः स्मराख्योरुग्रोगोयासांताउद्दीपितस्मररुजस्तासांव्रजसदांव्रजनिलयानांवधूनांस्त्रीणांहर्तुर्नेतुः धनदानुगस्यशंखचूडाख्यस्यशिरोहरिष्यतीतिइदमपिविष्णुत्वंघटतेनान्यथेति ॥ ३३ ॥

येप्रलंबादयः कृष्णाख्येनहरिणाऽदर्शनमिताः येचान्येमैंदादयस्तथाजरासंधादयः येचकुरुपांडवसेनागताः कांबोजादयः बलपार्थभीमद्रोणद्रोणयादिव्याजाह्वयेनहरिणामरणंप्रापितास्तेसर्वेतदीयंनिलयंयांतीत्यन्वयः द्विषणउदासीनाभक्ताइतित्रिविधाजीवास्तत्रद्विषणोनितरांलीयतेसुखंयस्मिंस्तदंधंतमोयांति उदासीनानिरयंनरकं भक्तानिष्कामस्याभीष्टानंदस्यप्राप्तिर्यस्मिंस्तंवैकुंठादिकंयांतीत्यर्थः सर्वेचास्थानं हरेर्विद्यमानं तदुक्तं विद्वेषिणोप्युदासीनाभक्ताअपिनसंशयः हरेर्हिसदनंयांतिव्यक्तंभक्तैस्तुगम्यते आरभ्यतमआमुक्तेः कृष्णस्यसदनंयतः अव्यक्तहरिलोकत्वादन्येषामन्यलोकतेतिरामभीमादिनामानिहरेरेवमुख्यानि रमणशक्त्यभयवर्णादीनांशक्तिवृत्तिहेतूनांहरेर्मुख्यत्वादन्यत्रामुख्यत्वात् व्यवहारार्थेसंकेतितत्वाद्व्याजानि तदप्युक्तं रामभीमार्जुनादीनिविष्णोर्नामानिसर्वशः रमणाभयवर्णाद्याः शब्दवृत्तेर्हिहेतवइत्यादि ॥ रयगताविितिधातोः रलयोरभेदः न्यक्भावंनिरयंनीचगतिंतमइतिवा निर्न्यग्भावनिकामयोरिति ॥ ३४ ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

वरुणस्य पाशात् यद्भयं तस्मादिति साक्षात् (भयं) पाशसंबन्धो न विवक्षितः । अन्हापूतं निशि शयानमिति ते तु ब्रह्महृदं नीता इत्यत्राक्रूरतीर्थत्वपक्षे नित्यमेव श्रीकृष्णप्रेमात्मकचेष्टत्वं तदर्थनानाप्रयासानन्तरं तदेकसमाधिकृतत्वञ्च ज्ञेयम् । यच्चामार्थसुहृत् प्रियात्मतनयप्राणाशयास्त्वत्कृते इति श्रीब्रह्मवाक्यात् । इति नन्दादयो गोपाः कृष्णरामकथां मुदा । कुर्वन्तो रममाणाश्च नाविन्दन् भववेदनामिति श्रीशुकवाक्याच्च । टीकाया एव मतान्तरेण ब्रह्मसमाधिपक्षे श्रीमन्नन्दान्वेषणार्थ एव तद्दिने व्यापारस्तत्क्रमेण निशि निद्रा निद्रायामेव तद्दर्शनमिति विशेषो ज्ञेयः । एवं भक्तेच्छादायित्वं दर्शितम् । अत्र सर्व्वान्ते यत् गोलोकप्रापणं तदप्यनेनैव सूचितं दावाग्निपानलीलावत् ॥ ३१ ॥ ३२ ॥

पूर्व्ववदत्र रासलीलया सह होरिकालीलामेकीकृत्य वर्णनम् ॥ ३३ ॥

ये चेति युग्मकम् । बलपार्थेति दैत्यमोक्षदायित्वलक्षणया सर्व्वासाधारणशक्त्या तेष्वावेशात् । इदन्तु यत्र द्विविदादिवधे तस्यासाक्षात्वं तत्रैव ज्ञेयम् । साक्षाद्भावे तु तन्निरीक्षणमेव मुख्यं कारणम् । यथोक्तं श्रीभीष्मेण यमिह निरीक्ष्यहता गताः स्वरूपमिति केचिदलमदर्शनं ब्रह्मलयं, केचित्तु तदीयनिलयमिति भेदम् ॥ ३४ ॥ ३५ ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

तत्र दुःखाभावाद्द्वयमाह नंदं च मोक्ष्यतीति भयात्सर्परूपाद्वरुणस्य पाशादुभयत्रापि नंदो रक्षितः व्रजयात्रायां प्रवृत्तः अनेनान्ये धर्मा अस्वधर्मा भगवद्धर्मा एव स्वधर्मा अतोभगवानात्मा तस्मात्परब्रह्मत्वमविवादं नंदंचेति चकारः यशोदाया उद्धारं कृत्वा नंदस्यापि समुद्धारं कृतवानित्युक्तसमत्वार्थः नंदएव वा वारद्वयं मोचित इति वरुणस्य पाशाद्भयं तस्मात् अन्येषामपि दुःखदूरीकरणमाह गोपान्बिलेषु पिहितान्मयसूनुनाचेति मयसूनुर्व्योमासुरः सहि गोपरूपः समागतः बालकान् मेषायितान्नीत्वा गुहायां स्थापितवान् तत्रचेत्यनेनैव मार्गेण पातालगमने विलानि संतिअतउक्तं विलेषु पिहितानिति सपावय स्तत्र वानिहितान्प्रेषुरिति विलपदं चकारादन्येऽप्युपद्रवाः अनुक्ताः स्वयमूह्याः एवंदुःखाभाव मुक्त्वा परमसुखमाह अन्हापूतमिति अह्नि दिवसे आपूतंलौकिकक्रियया व्याप्तं निशिशयानमतिश्रमेणेति निर्भरनिद्रया रात्रौ व्याप्तं एवमहोरात्रं परलोकसाधनरहितं स्वमेववैकुंठं उपसमीप एव नेष्यति स्वनिकटएव माया जवनिकां दूरीकृत तत्रैव वैकुंठे नीतवान् इदं चरित्रं नयोगस्य नमायायाः नकालस्य नमर्त्यादीनां अतो ब्रह्मचरित्रमेवैतत् नयने हेतुः स्वमिति आत्मत्वेन भगवान् तत्परिगृहीतवान् ॥ ३१ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

एवं सुखं निरूप्य भंगं निरूपयति गोपैर्मखेप्रतिहत इति पूर्वसिद्धफलस्य भंगो निरूप्यते मखेन रक्षा मख भंगेन क्रुद्धः देवताप्रीतिश्च मम्मफलं नियतफलत्वं च तस्य निरूप्य तत्प्रतिपश्चात् उच्यते गोपाः! सर्वदा मखं कुर्वंति तैरेव कृत्वा भगवान् तं मखं दूरीकृतवान् तस्मिन्मखे प्रतिहते रक्षकत्वाभावे देवे अभिवर्षति व्रजनाशआरब्धः अनेनदेवताप्रीतियागफलमिति निश्चितं समर्थावलंबन एव मर्यादा त्यक्तव्येति सूचितं तदा कृपयारिरक्षुर्भगवान् जातः तदासप्तवर्षः सप्तदिनानि महीध्रं गोवर्द्धनं एककरे सलीलं धृतवान् अनयेति संबोधनंउक्त विश्वासाय धर्त्ताधरिष्यति उच्छिलीन्ध्रमिवेतिभावाभावाय वर्षाकालेहि उच्छिलींध्रोद्गम अलौकिकवर्षत्वात् अलौकिकोच्छिलीन्ध्रइतीन्द्रो बाधितःसप्तदिनानीति सप्ततंतुर्यज्ञो बाधितः सप्तदिनानि दुःखंप्रयच्छतीति यत्रैव धर्मावाधो दृश्यते तत्रैव सप्तदिनान्युच्यंते निवर्त्यंचेत्दुःखं तदा सप्तदिनानि निरंतरं दुःखं भवति अग्रेनिवर्त्तते अनिवर्त्यंचेत् सप्तमे एव दिने भवति स्वयमपि सप्तवर्षः सप्तधापरिच्छिन्नं कालमतिक्रांतवान् अतएव सप्ततंतुमखभंगःअन्यथाफलं च मर्यादाहि सांगेन वेदेन जन्यते अंगानि षट्आत्माचैक अयं च संवत्सरः प्रजापतिः स सांगवेदप्रवृत्तित इति तमतिक्रम्य पश्चात्सप्ततंतुमतिक्रांतवान् कालस्य भगवद्वच्छेकत्वाभावात् सप्तवर्षवेष्टनमेव सप्तवर्षत्वं अयं च सप्तसप्तमः भंगात्मकः एककर इति एकां क्रियाशक्तिं स्थापितवान् तैरयं साध्यतां मखइति वचनात् अन्यथा तथैव गोवर्द्धनं स्थापयेत् हस्तस्तुकेवलशास्त्रार्थत्वाय प्रदर्शितः तथापि निरोधो पदासेदुःखावश्यकत्वं मत्वा तन्निराकरणाय लीलांकृतवान् सा हि वेणुवादरूपा भवति सप्तरंध्रैरमृतपूरकः तथा सति प्राणा भ्युदयनिः श्रेयसफलसिद्धिः अतो निरोधदुःखं वा नजातमित्यर्थः ॥ ३२ ॥

एवं भंगं विनिरूप्य संसूचनं निरूपयति क्रीडद्वने निशीति भगवतो हीदंसंसूचनं स्वरूपफलार्थं सम्यकृत्वं च अनिष्टनिवृत्तिमपि करोतीति गोप्यो हि तत्र निदर्शनं ता एवाहि भगवंतं प्राप्तवत्यः तत्संबंधिचरित्रमेव भगवन्मार्गे फलसूचकं वनेवृंदावनेनिशि राज्यां लौकिकवैदिकक्रियायां निवृत्तायां लोकेऽपि विनिवृत्ते तदाक्रीडति तदाह क्रीडन्वने निशीति तन्निर्वर्त्तिका भक्तिरेव अत एवनिशाकरः! तस्य स्मयः भक्तिप्रकाश! मनोरूपत्वादस्य चंद्रस्य तदिच्छाविशेषाः तैःरश्मिभिः गौरा रंजिता सर्वानिवृत्तिःतादृश्येव निवृत्तिर्भगवत्क्रीडाहेतुः अत एव भगवान्रासोत्सुकः रासोनामरसेन पूर्णः पदार्थः अन्यसंबंधरहितः सहि विचार्यमाणो प्रियावहुस्त्रीकर्तृकः नृत्यविशेषो भवति तत्र भोगो वाकेवलं शृंगाररसाभिनिविष्टः यथा भक्तिगुणसौंदर्याभिनिविष्टः तदा अंतरसेन पूर्णः तद्रसाविर्भावार्थं कलपदायतमूर्छनां कृतवान् सा हि मूर्छना अन्येषां हृदये रसार्थं विवरं करोति तस्मिंश्चविवरे भगवत्संबंधाभावेन रसपूरणा भावात् तदर्थं भगवत्स्मरणात्मकः स्मरः प्रविष्टः सहि विषया भावाद्रोगत्वेन पर्यवसितः सांमुख्योधिकारो निवारितः भगवद्विषयकस्य कामस्य भगवद्धर्मप्रवेशा भावात् अत एव तादृशीनां भगवत्संबंधः प्रतिबंधकः कामाधिष्ठातृदेवतारूपः अर्थाधिष्ठातृदेवतायाः धनदरूपाया भ्राता अनुकत्वात्सोऽपिनादृशः स तासां प्रतिबंधको जातः एवमपि सति भगवान् स्वेच्छया प्रवृत्त इति व्रजभृद्वधूनां हर्तुःशंखचूडस्य शिरोहरिष्यति गुणत्रयविशिष्टाना मेव तादृशरोगरूपकामसद्भावे तत्प्रतिबंधो भवति ननु गुणातीत आसक्तानां भतस्तस्य शिरो हृतवान् कलाअव्यक्तमधुराअनभिव्यक्तपरमानंदप्रतिपादका शब्दब्रह्मरूपा स्वराः तेषां पदस्थानं गीतादि तथा भूतानि वा पदानि वाक्यार्थस्य तत्राप्रयोजकत्वात् पदानामेवतत्र स्वातंत्र्यं आयतमूर्छनं दीर्घस्वराणां मूर्छना हि संगीते प्रसिद्धा स्वराणां तस्य आयतत्वं सर्वचित्तप्रवेशयोग्यरूपता मूर्छितशब्दाच्च सानंतरं विवेकादिकं चनोत्पत्स्यत् इति सूचितं उद्दीपितो यथाग्निर्दहति तथा स्मरणा तास्तथा भूता इव जाता अत एवास्यरोगत्वं व्रजमेव ग्रिभ्रतीति नतद्भर्तृणां रक्षकत्वं वधूत्वात्तासामेव अतिस्त्रीभावेन प्रतिबंधनिवृत्तिभावः सूचितः अत एव संहर्त्ता जातः एवं भगवान्मुख्याधिकाराभावेपि स्वलक्षणं फलं प्रयच्छतीति गोपिकासंबंधिचरित्रं सूचितं भवति ॥ ३३ ॥

एवं सूचनं निरूप्य भूरिभावं निरूपयति भूर्यनुग्रह वाद्याश्यां ये च प्रलंबेति एते सर्वे दैत्या दैत्यांशराजानश्च भगवताहृताः तदीयं निलयं वैकुंठं गताऊहुःपुनः प्रलंबादयो वलभद्रादिभिर्हताः तत्रापिये भगवन्मुखारविंदं पश्यंतः प्राणानूजहुः पार्थास्त्रपूताः धर्मयुद्धेन हताः तेपिवैकुंठमेव गताः अन्ये ये प्रलंबादयः ते अदर्शनं गता अव्यक्त प्रकृतौ लीना इत्यर्थः खरो धेनुकः दर्दुरः कश्चित्कल्पः यथावक स्तथा सोऽपि तस्याव्यापकात्वाद्भूरित्व द्वितीयोक्ता भगवति गता इति अथवा उभये एते आवेशिताः प्रकृतिं गता अभिमानिनस्तु तदीयं निलयं गता इत्यर्थः खरोधेनुकः दर्दुरः कश्चिदल्पः यथावल स्तथा सोपि वक एवव्राजलवासात् वकदर्दुरेति पाठे अघासुरो वा दर्दुर इति कश्चित् अरिष्टो वृषभासुरः मल्लाश्चाणूरादय इभः कुवलयापीडः यवनः कालयवनः यवना वा मुचुकुंदात्समागत्य ये मथुरायां हता कुजो नरकासुरः पौंड्रकः मिथ्यावासुदेवः आदिशब्देन काशिराजप्रभृतयः एते स्वभावत एव हता ननुदेवांतरवरपुष्टा अतो वरपुष्टत्वविशेषणेन अन्येत्वंतं च शाल्वादयः कपिर्द्विविदः स रघुनाथभक्तोपि तद्भक्तसंग्यपि दुःसंगाद्धतः शंवरस्तु मायाशतावित् अत्रैव वा वल्वलः सोपि यज्ञविघ्नकर्तृत्वादृषीणामप्यशक्यत्वाद्रामेण इति ज्ञातव्यं सप्तोक्षा वलीवर्देषु प्रविष्टा दैत्याः ते हि भगवतास्पर्शमात्रेण हता अत एव तदर्थं सप्तरूपाणि कृतवान् ते हि त्रिपुरवदेकक्षणे वध्या मृत्पथात्वं वध्या इति वलीवर्दा एव पश्चाद्यामृता इति अन्ये वा सप्तवलीवर्दाः विदूरथः दंतवक्र. तस्यभ्रातारुक्मीश्यालकःस मुख्यो येषां विंदानुविंदादीनां एतेह्येकैकशो भगवता संयुद्धेतद्भ्रातृषुतैःसहितः ॥ ३४ ॥

अतःपरं निमित्तांतरेण भगवत्सारथ्ये युद्धे हतानाह एतेषां भगवतैव सहयुध्यमानत्वात्तद्दर्शनाभावाच्च मुक्तामुक्तापि अन्ये तु निमित्तांतरेण हता इति वेत्य नारदःसमितिशालिन युद्धे पराक्रमवंतः सप्तम्याअलुक् अत एव मृधे संग्रामे आत्तचापा धर्मनिष्ठायांसूचिताः कांबोजादयः आर्णोता तत्तद्देशक्षत्रिया दशार्णा अर्णा सृंजया पांचाला सृंजयाद्या इति पाठे धृष्टद्युम्नप्रभृतयः ये एकैकश उभयपक्षेऽपि हता अन्यथा पांडवानामर्थं मृतानां मुक्तिर्नस्यात् प्रथमतश्चादर्शनं गता यावद्भगवदभिमुखास्थितः तावद्दृष्टा भूत्वात्रैव स्थित्वा भगवतासह गता इत्यर्थः अत्र प्रलंबः वलभद्रेण हतः खरश्च मल्लयवना यथा यथं शंबरः प्रद्युम्नेन रुक्मी च वलभद्रेण कंबोजादयो भीमादिभिःअत्र सर्वत्र वलपार्थभीमा इति तेष्वाविष्टस्य भगवत एव नामपरं व्याजेन वलपार्थभीमेति व्याजाह्वयानि यस्य एतद्धननं नभगवच्चरित्रं आत्मत्वात् अत एव हतनादिकमनुक्ते व तदगृहगमनं निरूपिता जाता कंस वधार्थाग्रे त्यादितु दृश्यमाना भिप्रायं कल्पांतराभिप्रायम् ॥ ३५ ॥

——

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

वरुणस्य पाशान्नन्दं निविड़तमबन्धाभिनेमां बद्धाः पाशैर्बद्धा स्वलोक एव स्थापयिष्यतीति नन्दकर्त्तृकं यद्भयं तस्मात् । वस्तुतस्तु नन्दस्तेन न बद्धः कृष्णदर्शनार्थिना क्षणमात्रमेव स्वलोक एव स्थापित इत्येवं तत्त्वम् । मयसूनुना व्योमेन अह्नि आपूतं तद्दिने श्रीमन्नन्द-कृष्णयोर्विच्छेददुःखेन तदन्वेषणार्थं नानाव्यापारेण च युक्तं निशि तत्रामी तच्छ्रमेण शयानम् । विकुण्ठं वैकुण्ठम् ॥ ३१ ॥

देवे इन्द्रे । रिरक्षुः रिरक्षिषुः । धर्त्ता धरिष्यति उच्छिलीन्ध्रम् उद्गतछत्राकमिव । अनघे भ्रमरहिते एकस्मिन्नेव करे ॥ ३२ ॥

निशि कथम्भूतायां निशाकररश्मिभिः गौर्य्यां धवलायाम् रासोन्मुखः क्रीडन् भविष्यति दिनान्तरभवं शंखचूड़वधमपि रासस्यान्नि-ध्यात् तत्साहित्येनैवाह कलेति कलपदस्य मधुरास्फुटगीतस्यायतं मूर्च्छितं मूर्च्छना तेन । व्रजभृतो गोपास्तेषां वधूनां हर्त्तुः शङ्खचूड़स्य शिरो हरिष्यति यद्वा तस्यामेव रात्रौ शङ्खचूडवधानन्तरमवशेषे रासञ्च करिष्यति रासोन्मुख इत्युक्तेः ॥ ३३ ॥

एवमतिमाधुर्य्याधिक्यात्स्वनामाख्यानीयलीलाः किञ्चिद्व्यासेन प्रोच्य अन्याः असुरवधलीलाः समासेनैवोद्दिशति द्वाभ्याम् । ये च प्रल-म्बादयस्ते सर्व्वे हरिणा हेतुभूतेन केचिद्दलमत्यर्थमदर्शनं सायुज्यं केचिच्च तदीयं निलयं वैकुण्ठं यास्यन्तीत्युत्तरेणान्वयः । खरो धेनुकः, दर्दुरो दर्दुरसंज्ञको बकः इभः कुवलयापीड़ः । कुजो नरकः कपिर्द्विविदः ॥ ३४ ॥

समितौ संग्रामे शालन्ते श्लाघन्ते इति समितिशालिनः ननु प्रलम्बखरकपिबल्वलरुक्मिप्रमुखा बलभद्रेण निहताः काम्बोजादयश्च भीमार्ज्जुनादिभिः शम्बरः प्रद्युम्नेन यवनो मुचुकुन्देन, न तु हरिणा तत्राह । बलपार्थभीमादयो व्याजेनैवाह्वया नामानि यस्य तेन । सन्तो-क्षाणास्तु तेन दमिताः कालान्तरे यास्यंतीति भावः अत्र प्रलम्बखरादयः सायुज्यं पौण्ड्रकदन्तवक्रादयो वैकुण्ठं यास्यन्तीति विवेचनीयम् अग्रे व्याख्यास्यमानयुक्तेः ॥ ३५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

किञ्च वरुणस्य पाशात् यद्भयं तस्मात्पितरं नन्दं मोक्ष्यति मोचयिष्यति मयस्य सूनुना व्योमाख्येन बिलेषु पिहितान् गोपांश्च मोक्ष्यति किञ्चाह्नि दिवसे आपूतं व्यापारयुक्तम् श्रमेण निशि शयानं गोकुलम् स्वानन्यशरणं गोकुलवासिनं जनम् विकुंठं निजलोकमु पनेष्यति प्रापयिष्यति स्मेत्याश्चर्यं ॥ ३१ ॥

हे अनघ नारद गोपैः मखे इंद्रयज्ञे प्रतिहते निवारिते सति व्रजविप्लवाय देवेंद्रे ऽभिवर्षति सति पशून् कृपया रिरक्षुः रक्षितुमि च्छुः सप्तवर्षाणि वयो यस्य सः एककरे एकस्मिन्नेवकरे सलीलं यथा तथा उच्छिलींध्रमिवोद्धृतं छत्राकमिव महीध्रं गोवर्द्धनाख्यं गिरिं धर्त्ता धरिष्यति मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षतीत्यनेन सकामानां कौर्य्यम् अनघेत्यनेन निष्कामानां महतां निष्पापत्वम् एक स्मिन्नित्यनेन यस्मिन्करेगिरिर्धृतस्तस्य श्रमराहित्यम् सप्तदिनानि सप्तवर्षे इत्यनेन भगवतःसर्वत्र कालानभिभूतैश्वर्यवत्वं च दर्शि तम् ॥ ३२ ॥

किञ्च निशाकरस्य चंद्रस्य रश्मिभि गौर्य्यां धवलायां निशि रात्रौ वने रासोन्मुखः रासोत्सवंकर्त्तुं प्रवृत्तः सन् कलानि मधुराणि पदा नि यस्मिन् तच्च आयतं दीर्घं मूर्छितमालापविशेषयुक्तं गीतं तेन उद्दीपितः स्मरो मन्मथ एव रुक् रोग इव क्षोभकः यासां व्रजभृद्वधूनां गोपांगनानां हर्त्तुः शंखचूडस्य शिरः क्रीडनेव हरिष्यति ॥ ३३ ॥

किञ्च हरिणा हेतुभूतेन ये च प्रलंबादयस्ते अदर्शनं प्राकृतेंद्रियाविषयं तदीयं हरिसंबंधिनिलयं स्थानं वैकुंठं यास्यंतीत्युत्तरेणा न्वयः खरो धेनुकः दर्दुरश्च दर्दुरो बकः अरिष्टो वृषभासुरः इभः कुवलयापीडः कुजः भौमासुरः कपिर्द्विविदः सप्तोक्षाणः सप्तवृषाः॥ ३४ ॥

ये चान्ये च मृधे युद्धे समितौ संग्रामे शालंते श्लाघंते इति समितिशालिनः आत्तचापाः धृतकार्मुकाः ननु प्रलंबखरकपिप्रमुखा बलेन कांबोजादयश्च भीमादिभिर्निहताः शंबरः प्रद्युम्नेन यवनश्च मुचुकुंदेन निहतः ननु हरिणा तत्राह बलभीमपार्थव्याजाह्वयेनेति बलो भीमः पार्थ इत्यादयः व्याजाह्वयाः निमित्तनामानि यस्य तेन सप्तोक्षाणास्तु हरिणा न निहताः किंतु तद्दर्शनाविकलाभेन स्वमृत्युकाले प्राणांस्त्यक्त्वा तदीयं निलयं यास्यंतीति भावः अलमिति श्रीकृष्णचरित्रवर्णनेनालमेतावतैव कृतार्थोऽस्मीति साकल्येन वर्णनासंभवादिति भावः एतच्च सर्वमपि दिव्यमेव तच्चेतरथा न भाव्यमिति पूर्वेणैवान्वयः ॥ ३५ ॥

भाषा टीका ।

और वरुण के पाशसे नन्द को छुड़ावैंगे और व्योमासुर से कन्दरा में आच्छादितगोपों को छुड़ावैंगे और दिन विहार करिके रात्रि को शोतेहुए गोकुल को वैकुण्ठ में प्राप्त करैंगे ॥ ३१ ॥

और जब गोपों ने इन्द्र याग को लुप्त किया तब व्रज के नाशार्थ इन्द्र कृत वर्षा से गोपों के रक्षार्थ कृपासे शिलीन्ध्र की तरह गोवर्द्धन को सात वर्ष के सात दिन धारण करैं गे लिलासे ॥ ३२ ॥

चन्द्र किरणों से और रात्रिमें क्रीड़ाकरते हुये सुन्दर विस्तृत मूर्छित से उद्दीपित काम पीड़ावाली गोपियों को हरने वाले शंखचूड के शिरको रासोन्मुख भगवान् हरण करैंगे ॥ ३३ ॥

कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो वत दूरपारः ।
आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ॥ ३६ ॥
देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोह-मतिप्रलोभं वेषं विधाय वहु भाष्यत औपधर्म्म्यम् ॥ ३७ ॥
यर्ह्यालयेष्वपि सतां न कथा हरेः स्युः पाखण्डिनो द्विजजना वृषला नृदेवाः ।
स्वाहा स्वधा वषड़िति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान् युगान्ते ॥ ३८ ॥
सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्थानेऽथ धर्म्ममखमन्वमरावनीशाः ।
अन्ते त्वधर्म्महरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः ॥ ३९ ॥
विष्णोर्नु वीर्य्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि ।
चस्कम्भ यः श्वरंहसास्खलता त्रिपृष्ठं यस्मात् त्रिसाम्यसदनादुरु कम्पयानम् ॥ ४० ॥

भाषाटीका ।

और प्रलंबधेनुक केशी अरिष्टचाणूरादि मल्ल इभ कुवलयापीड कंस यवन भौमासुर पौण्ड्रकादिक और शाल्वद्विविद शाल्य दन्त वक्र सात बैल शम्बर विदूरथ रुक्मी इत्या दिक ये कोई वीर काम्बो जमत्स्य कुरुके कय सृञ्जयादिक धनुष को ग्रहण करिके वलपार्थादि व्याज से हरि से अदर्शन को प्राप्त हुये वे सब वैकुण्ठ को जाँयगे ॥ ३५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

व्यासावतारमाह । अनुयुगं मीलिता संकुचिता धीर्य्येषां स्तोकमल्पमायुर्येषां तेषां स्वनिगमः स्वकृतो वेदराशिः वत अहो दूरे पारं यस्येति दुर्गम इत्यवमृश्य सत्यवत्यामाविर्भूतः सन् स एव हरिः विटपशः शाखाभेदेन ॥ ३६ ॥

बुद्धावतारमाह । देवद्विषां दैत्यानाम् । निगमवर्त्मनि निष्ठितानां वेदमार्गे नितरां स्थितानाम् तद्बलेन च पूर्भिः पुरीभिः अदृश्यतूर्भिः अलक्ष्यवेगाभिः मतेर्विमोहः योग्यतात्यागो यस्मात् मतेः प्रलोभश्च अयुक्तस्वीकारो यस्मात् तं पाषण्डवेषं विधाय तेन औपधर्म्यं पाषण्ड-धर्म्मं स्वार्थे ष्यञ् वहु भाषिष्यते इत्यर्थः ॥ ३७ ॥

कल्क्यवतारमाह । यर्हि यदा सतामप्यालयेषु गृहेषु हरेः कथा न स्युः, त्रैवर्णिका पाषण्डिनः स्युः, शूद्राश्च राजानः स्युः, तदा कल्कि रूपेण कलेः शास्ता भविष्यति । अत्र च ब्रह्मनारदसंवादात् प्रागभाविनो वराहादयः । मन्वन्तराश्च भूता भाविनश्च धन्वन्तरिपरशुरा मौ तदा वर्त्तेते श्रीरामादयस्तु भाविनः तत्र तु कचिद्भूतादिनिर्द्देशस्तु छान्दस इति द्रष्टव्यम् ॥ ३८ ॥

सृष्ट्यादिकार्य्यभेदेन मायागुणावतारविभूतीराह सर्ग इति स्थाने स्थितौ मखो विष्णुः धर्म्मश्च मखश्च मनवश्च अमराश्च अवनीशाश्च अन्ते संहारे । हरो रुद्रः मन्युवशा सर्पा वहुशक्तिधारिणो भगवत इमा विभूतयः ॥ ३९ ॥

इदं मया संक्षेपेणोक्तं विस्तरेण वक्तुं हि न कोऽपि समर्थ इत्याह विष्णोरिति । पृथिव्याः परमाणूनपि यो विममे विगणितवान् तादृशोऽपि कोऽपि नु विष्णोर्वीर्य्यगणनां कर्त्तुमर्हति । कथम्भूतस्ययोविष्णुः त्रिपृष्ठं सत्यलोकं चस्कम्भ धृतवान् तस्य । किमिति चस्कम्भ यस्मात् त्रैविक्रमे अस्खलता प्रतिघातशून्येन स्वरंहसा स्वपादवेगेन त्रिसाम्यरूपं सदनमधिष्ठानं प्रधानं तस्मादारभ्य उरु अधिकं कम्पयानं कम्पमानं कम्पेन यानं यस्येति वा अतः कारणाच्चस्कम्भ । आत्रिपृष्ठमिति वा छेदः । सत्यलोकमभिव्याप्य यः सर्व्वं धृतवा-नित्यर्थः तथा च मन्त्रः—विष्णोर्नु कं वीर्य्याणि प्रवोचं यः पार्थिवानि विममे रजांसि योऽस्कम्भायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगाय इति । अस्यार्थः—विष्णोर्नु वीर्य्याणि कं प्रवोचं कः प्रावोचदित्यर्थः । यः पार्थिवानि रजांस्यपि विममे सोऽपि । यो विष्णुस्त्रेधा विचक्र-माणः त्रिविक्रमं कुर्व्वन् उत्तरं लोकम् अस्कम्भायत् अवष्टब्धवान् । कथम्भूतं सधस्थं सहस्य सधादेशः तिष्ठन्तीति स्थाः तत्रस्थैर्देवैः सह वर्त्तमानमिति ॥ ४० ॥

श्रीराधारमणदासगोस्वामि विरचित दीपिन्याख्य तट्टिप्पणी ।

स्वार्थे ष्यञ इति । चतुर्वर्णादीनां स्वार्थ उपसंख्यानम् पा ५ । १ । १२४ वा इत्यनेन ॥ ३७ ॥

पाषण्डिन इति । वेदमार्गविरोधिन येषां करणमगच्छपि । ते हि पाषण्डिनो ज्ञेया वेदार्थस्य विनिन्दका इत्युक्तलक्षणाः ॥ (वृषला इति । वृषं धर्मं लान्तीति वृषला म्लेच्छाः ॥ स्वाहेत्यादि । स्वाहावषट्पदाभ्यां देवदेयं हविरुच्यते तदुपलक्षितो यागयज्ञादिः । स्वधापदेन

श्रीराधारमणदासगोस्वामिविरचित दीपिन्याख्यतट्टिप्पणी।

स्वधेति मन्त्रसंस्कृतं पितृदेवं कर्म्म तदुपलक्षितः पितृयज्ञश्राद्धादिरित्येते यदा न स्युरित्यर्थः। इति व्याख्यालेशः। स्वाहेति वषडिति च दैवे कर्म्मणि स्वधेति पित्र्ये कर्म्मणि प्रयुज्यते यदा उभयविधकर्म्माभावात् ता गिरो न श्रूयन्ते। इति बालप्रबोधिनी।) ॥ ३८ ॥

[असुराद्या इति। आद्यपदेन भूतप्रेतपिशाचादयः क्रूरस्वभावाश्च ॥ ३९ ॥

त्रैविक्रमे इति। त्रिपादविक्षेपणे इत्यर्थः ॥ त्वरंहसा इति। अत्र छन्दोभङ्ग आर्षः ॥ त्रिसाम्यरूपमिति त्रिगुणसाम्यलक्षणमधिष्ठान स्वरूपं प्रकृतिरित्यर्थः। अधिष्ठानमिति। आवरणतया सर्व्वाधिष्ठानमित्यर्थः ॥ यानमिति। यानं पतनमिति व्याख्यालेशः। यस्येतिषा इति। यस्य सत्यलोकस्येत्यर्थः ॥ उरुगाय इति। यः उरुगायः विपुलकीर्तिः अस्कम्भायत् तस्य विष्णोरित्यन्वयः ॥ उत्तरं लोकमिति। सत्यलोकमिति सत्यलोकमित्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका।

व्यासावतारमाह कालेनेति कालेन मीलितधियां संकुचितबुद्धीनां स्तोकमल्पमायुर्येषां तेषां नृणां स्वनिगमः स्वकृतो वेदः यतोऽहो दूरपार दूरःपारोयस्य दूरपारः दुर्गम इत्यवमृश्य विचार्य सत्यवत्यामाविर्हितः आविर्भूतः स हरिरनुयुगं युगानुरूपं वेदद्रुमं विटपशः शाखाभेदेन विभजिष्यति विभक्तं करिष्यति ॥ ३६ ॥

बुद्धावतारमाह देवद्विषामिति निगमवर्त्मनि वैदिकमार्गे निष्ठितानां नितरां स्थितानां लोकान् मयेन रचिताभिः कल्पिताभिरदृश्यतूर्भि रलक्ष्यवेगाभिः पूर्भिः पुरीभिर्घ्नतां नाशयतां देवद्विषां दैत्यानां मतेर्विमोहो मतिविमोहमतिप्रलोभं मतेः प्रलोभो यस्मात्तन्मतिप्रलोभं मतिवि मोहं च तन्मतिप्रलोभं मतिविमोहकं मतिप्रलोभकं चेत्यर्थः एवं भूतं वेषं पाषंडवेषं विधाय विरचय्य औपधर्म्यं धर्माभासं पाषण्डधर्मं स्वार्थे ष्यञ् बहु अधिकं भाष्यते भाषिष्यते ॥ ३७ ॥

कल्क्यवतारमाह यर्हीति सतामप्यालयेषु गृहेषु यर्हि यदा हरेः कथा नस्युः द्विजजनाः त्रैवर्णिकाः पाषंडिनः स्युः नृदेवाः राजानः वृषलाः शूद्राः स्युः तथा यत्र त्रैवर्णिकालयेषु स्वाहा स्वधा वषडिति गिरश्च न स्युः स्वाहा वषडित्यनेन दैवं कर्मोपलक्ष्यते स्वधेति पित्र्यं तदा युगांते कलियुगांते भगवान् कलेः शास्ता भविष्यतीत्यर्थः कल्क्यवतारोऽयमिति शेषः ॥ ३८ ॥

अत्र च ब्रह्मनारदसंवादात्प्राचो वराहादयोऽवताराः मन्वंतरावताराश्च भूतभाविनः धन्वंतरिपरशुरामौ तात्कालिकौ श्रीरामादयस्तु भाविनः तत्र तुकचिद्भूतादिनिर्देशः आर्ष इति द्रष्टव्यं अत्रेदं तत्त्वं भगवतोऽवताराद्विविधाः अनुप्रवेशावताराः स्वेनरूपेणावताराश्चेति अकर्म हेतुत्वाविशेषादुभयत्रावतारशब्दप्रयोगः तथा तस्य रूपमपि द्विविधं प्रकृतिप्राकृतवस्तुजातमेकं शुद्धसत्त्वमयमपरं चेति तत्र षोड शकलमहदहंकारसूक्ष्म भूतेन्द्रियाभिमानिदेवताश्रयं पौरुषं रूपं तदनिरुद्धरूपं तदेव सहस्रशीर्षेत्याद्युक्तआद्योऽवतारः पुरुषः परस्मै त्यादिषूच्यते अनुप्रवेशावतारो नाम जीवेषु स्वस्यानुप्रवेशेन स्वीयज्ञानशक्त्यादीनामन्यतमाभिव्यंजनं स एवांशावतार इति कथ्यते स च गौणः शाक्त आवेशश्चेत्यनेकधा उक्तेष्वेवावतारेषु श्रीवराहनारायणध्रुवानुग्राहकहयग्रीवमत्स्यकूर्मनृसिंहहरिवामन हंसवैकुण्ठाजित रामकृष्णकल्क्यवताराः स्वेन रूपेणावताराः इतरेत्वनुप्रवेशावतारा इति ज्ञातव्यं किंच सृष्ट्यादिकार्यभेदेन भगवतो विभूतीराह सर्ग इति तपः पूर्वजगत्पर्यालोचनं अहं ब्रह्मा प्रजेशाः प्रजापतयो नव ऋषयः मरीच्यादयः मायाविभूतयः विस्मयनीयाः भगवन्नियाम्य वर्गाः स्थाने पालने धर्मश्च मखश्च विष्णुः विष्णोरनन्यत्वात्तद्गतपालनानुरूपं सामर्थ्यं मखशब्देन विवक्षितं मनवश्चामराश्चेन्द्रादयः अव नीशाश्च भूपा एते स्थाने भगवन्नियाम्यवर्गाः अंते संहारे अधर्मश्च हरश्च रुद्रः मन्युवशाश्च सर्पा असुराद्याश्च पुरुशक्तिभाजः अपरिमि ताश्चर्यशक्तिधारिणो भगवतो इमाः मायाविभूतयः आश्चर्यविभूतय इत्यर्थः ॥ ३९ ॥

भगवदवतारास्तच्चेष्टितानि च साकल्येनाभिधातुं न कोऽप्यलमित्याह विष्णोरिति यः कविर्बुद्धिमान्पुरुषःपार्थिवानि पृथिवीसंबंधीनि रजांसि विममे गणितवांस्तादृशोपि कोनु विष्णोर्वीर्यगणनां कर्तुमर्हति नार्हतीत्यर्थः यो भगवान्यस्मादस्खलता प्रतिहतशून्येन त्वर भसा स्वपादविन्यासवेगेन हेतुनाऽऊर्ध्वाधिकं कंपमानात्सदनात्तत्स्वनिवासस्थाना त्स्खलितः प्राणिनो निशाम्य दृष्ट्वेत्यर्थः त्रिपृष्ठं सत्यलोकं चस्कंभस्तंभयामास श्रुतावपि विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसियो अस्कभायदुत्तरं सधस्थं विचक्र माणस्त्रेधोरुगाय इत्यस्यायमर्थः त्रेधात्रिप्रकारेण विचक्रमाणः पादविन्यासं कुर्वाणः यउरुगायो भगवान् तिष्ठंतीतिस्थाः देवाः सहस्थ सधादेशः देवैः सहितमुत्तरं सत्यलोकं अस्कभाय दधद्धवानित्यर्थः कंकः प्रवोचं प्रवोचेदित्यर्थः एवं विधसर्वशक्तेरपरिच्छिन्न स्वरूपस्वभावस्य वीर्याणि साकल्येन वर्णयितुं कः प्रभवेदित्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

कालबलेनमीलितदृशामुत्सन्नज्ञानानांस्तोकायुषांअल्पायुषांनृणांस्वनिगमः स्वविषयोवेदोदूरपारइत्यवमृश्यसत्यवत्यांसत्यवत्या माविर्हितोऽवतीर्णोवेदद्रुमंविटपशःशाखोपशाखाभेदेनविभजिष्यतीत्यन्वयः कस्मिन्युगइत्यतउक्तं अनुयुगमिति एतदुक्तंभवति तृतीयसप्त मेषोडशेपंचविंशेअष्टाविंशेचद्वापरेपूर्वेषुचान्येर्व्यासनामभिर्विभजिष्यतीति अष्टाविंशेस्वयमेवविभजिष्यतीति तृतीयसप्तमेत्यवषोडशेत्यादि वचनंचविशेषणाचिनातुशब्देनगृहीतंकृष्णावताराद्युपरिव्यासावतारकथनंतदुपरितनमन्वंतरेष्वपिव्यासावतारसद्भावार्थमितिज्ञातव्यमित्यभिप्राय र्थश्चिराश्च पुराणप्रसिद्धेरिति ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

देवद्विषामितिविमोहबुद्धिमोहजनकमतिप्रलोभमतिवंचकंबालवेषंविधाययदोपधर्म्यमुपधर्माणांपाषंडधर्माणांप्रतिपादकंशास्त्रंतद्भाषते- त्यन्वयः नारायणइतिशेषः एतेऽसुराःकेइत्याशंक्यपूर्वजन्मकर्मपूर्वकंतान्विशिनष्टि निगमेत्यादिना प्राग्जन्मनिमयेनविहिताभिस्तिसृभिः पूर्भिःपुरीभिः लोकान्धनतांनाशयतांरुद्रेणहताःपुनर्विप्रजन्मलब्ध्वानिगमेनविहिताभिःक्रियाभिःनिगमवर्त्मनिविष्ठितानांवेदमार्गेप्रतिष्ठाय यथाविधिविशिष्टकर्मानुष्ठानेस्थिराणामदृश्यामूर्तिर्यस्यसतथा दैत्यैरज्ञेयस्वरूपइत्यनेनततोवेदमार्गाच्चलनायदेवैःप्रत्यक्षीकृत्यप्रार्थितइति ज्ञातव्यं बुद्धोक्तशास्त्रस्यवेदबाह्यधर्मप्रतिपादकत्वमज्ञजनदृष्ट्यावेदोप्रमाणमित्यादिरूपस्यतस्यैवविष्णोःप्रमाणमित्यादिवेदप्रतिपाद्यार्थत्वेन देवेभ्यःप्रशांतसहितायांहरिणोक्तत्वादितिद्योतनायाभापतेत्युक्तं स्वसूत्राणांभाष्यंचकृतवानित्यर्थः ॥ ३७ ॥

यर्हियस्मिन्युगेसतामालयेष्वपिहरेःकथानस्युः द्विजजनाश्चपाषंडिनःपाषंडवर्तिनःस्युर्नृदेवाःवृषलाधर्मविनाशकाः । यत्रयस्मिंश्चयुगेस्वाहादिगिरोनसंतिस्मवचनाभावेस्मरणमपिनास्ति इतिशब्दआद्यर्थे तदातस्यकलेर्युगस्यांतेऽवसानेभगवान्शास्ताभविष्यतिदुष्टानामितिशेष इत्यन्वयः इतिशब्दःस्वरूपावतारकथनसमाप्तिवचनोवेति ॥ ३८ ॥

मायाविभूतीराह सर्गइति योऽहंचतुर्मुखःयेचकर्दमाख्याऋषयःयेचमरीच्याद्यानवप्रजापतयः तेसर्वे । सर्गेसृष्टिसमयेप्राप्ते । पुरुशक्ति- भाजःपूर्णशक्तिभाजोहरेर्मायाविभूतयः । अथयोधर्मः येमखाः येचतुर्दशमनवोयेचामरेशाश्चतुर्दशेंद्राः येचावनीशाः प्रियव्रतादयःतेसर्वे स्थानेस्थितिकालेप्राप्तेपालनायविष्णोर्मायाविभूतयः ॥ योऽधर्मोयश्चहरोरुद्रोयेचमन्युवशासुराद्याःक्रोधवशासुरपुरःसरास्तेसर्वेअंतेतुसंहारकालेचप्राप्तेसंहारायहरेर्मायाविभूतयइत्यन्वयः सृष्टिपालनसंहारकालेषुमाययास्वेच्छयाविविधोभूत्वाऽस्मदादिषुस्थित्वासृष्टिपालनसंहारान्करोति यद्वा माययाभगवदिच्छयाऽस्मदादीनांसदाविभूतयोभवंतीत्यतोऽस्मदादयोहरेर्मायाविभूतयोनतुस्वस्वरूपविभूत्यइत्ययंविशेषस्तुशब्दसूचितया हरीच्छयाविभूतिर्यद्ब्रह्मादीनांसदाभवेत् इच्छयाचाबहुविधस्तेषुविष्णुःस्वयंस्थितः अतोमायाविभूतिस्त्वंतेषांमत्स्यादयः स्वयमितिस्मृत्यागृहीतइति ॥ ३९ ॥

ननुस्वरूपमाययाविभूतीनामेतावत्त्वंचेदिदंसर्वंसुलभंज्ञानमित्याशंक्यानंतागुणापिविभूतीनांगणनंनसुशकमित्याह विष्णोर्न्विति यस्त्रि- पृष्ठस्यसदनाद्विशरणात्त्राशादुरुकंपमानंमांनिशाम्यस्वरभसात्त्रिविक्रमक्रमणवेगेनस्खलितंचलितमाश्वपतनंत्रिपृष्ठं सत्यलोकंचस्कंभस्तंभितवांस्तस्यविष्णोर्वीर्यगणानांविभूतिलक्षणमाहात्म्यप्रसंख्यानंप्रतिकवीनांकतमोऽर्हति नकोऽपीत्यन्वयःआदिकविरपिनसमर्थइत्याह पार्थिवानीति यःकविःप्रतिभाविशेषसंपन्नोऽपिब्रह्मापार्थिवानिरजांसिभूमिपरमाणून्विममेगणितवान् सोऽपिनशक्नोतीतिशेषान्वयः यदितिहेत्वर्थे अनंतानियद्यस्मादितिति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

कलिविशेषे अवतारं श्रीबुद्धमाह । देवद्विषामिति । अस्मिन् कलौ देवद्विषां तादृशत्वाभवणात् ॥ ३७ ॥

सतां चातुर्वर्ण्याचारवताम् आलयेषु आश्रमेषुयदा हरिकथाः न स्युः । अतएव तेषु त्रैवर्णिकाः पाषण्डिनः स्युः । शूद्राश्च म्लेच्छ पर्य्यन्ता राजानः स्युरित्यर्थः ॥ ३८ ॥

सर्ग इति । विष्णोरप्यत्र पाठः उपाधिमात्रदृष्ट्या । सृजामि तन्नियुक्तोऽहमित्यादेः ॥ ३९ ॥

अथ पूर्व्वपक्षं विष्णोरपि मायाविभूतित्वेनान्यैः साम्यमाशङ्क्य तन्निरस्याह विष्णोर्न्विति प्रकृतिपर्य्यन्तकल्पनात् तस्य तुतद्‌तिरिक्ता नन्तपरमैश्वर्य्यमस्त्येवेतिभावः ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवं भूयनुग्रहं निरूप्य चिंतामयं निरूपयति कालेनेति भगवतो हि चिंता व्यासरूपा व्यासो हि चिंतया सरूप सर्ववेदार्थं विनिश्चित्य भगवत्स्वरूपं लोकेऽथ उपदिशति कालेन द्वापरादिना मीलिता आच्छादिता दृष्टिर्येषां तादृशनृणां स्वनिगमो दुरपारः आकलयितुमशक्य इति स्वयमाविर्भूतः अनुयुगमिति वेदद्रुमं विटपशो विभजिष्यतीत्यनेन संबध्यते प्रतिद्वापरांतं वेदविभागः अनुपुराणान्यपि एकस्य चतुर्युगस्य व्यवस्थां कथयंतीति सूचितं विटपश इति वेदानां विभागे भ्रांतिशंकानिवृत्त्यर्थं शाखास्वरूपं तु निबंधे निरूपितं एकस्याभगवन्मूर्त्तेः स्वरूपप्रतिपादको वेदराशिः शाखेतिवेदस्य द्रुमत्वमपि पूर्वंनिरूपितं स्मेति प्रसिद्धे तस्मादत्र बहुनवक्तव्यमितिभावः ॥ ३६ ॥

इदानीमेतं निरूपयति देवद्विषामिति एषो बुद्धः सांप्रतविद्यमानत्वात् तस्य स्वरूपमिदमेव यदिदानीं वर्त्तते अनेन प्रकारेणापि निरूपणा समयः कालिरेवेति वेदमार्गाविरोधेन येषां करणमयत्वेपि ते हि पाषंडिनो ज्ञेयाः वेदार्थस्य विनिंदका देवद्विषां दैत्यानां ते हि देवान् द्विषते अनेन देवप्रार्थनया दैत्यमोहनार्थं महव उपाया निरूपिता स्तथापि सामान्यत एव वेदवैमुख्यार्थमयमवतारः धिष्ठिता अधिष्ठाय स्थिता वय- मेव वेद प्रवर्त्तका इति लोकानां व्यामोहार्थं आत्मानं वैदिकत्वेन ज्ञापयित्वा समागतान् व्यामोहयंतीत्यर्थः पूर्भिः त्रिपुररूपाभिः अदृश्यामूर्त्तिः मूर्मायो अत एव स्त्रियां क्तिन्निति मूर्त्तिरिति भवति मायाकार्यं किंचिदित्यर्थः अदृश्यामूर्या युता अदृश्यमुरः ताभिः त्रिपुरैः ता एव हि मयेन विहिताः कृताः प्रेरिता वा अनेन मार्गद्वयमपि ते नाशयंतीति सूचितं वैदिकं लौकिकं च अनेन सर्वथा तन्नाशः कर्त्तव्य भगवदवतार-

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

हेतुर्निरूपितः किंच न केवलं लोकहननमेव देवद्रोहाचरणं यज्ञाकरणबोधनेन आत्मन एववैदिकत्वेन देवत्वसंपादकत्वं च तथा चायथा-सृष्टिर्निरूपिता भवति तयोः स्वरूपतोनाशे पुनस्तथैव भवंति बुद्धिव्यामोह एव कर्त्तव्य अतःकिमिति विमोहं कृतवान् अत्यंतं प्रलोभो अल्पेनैव साधनेन बहुफलनिरूपकशास्त्रं कृतवान् येषंबुद्धबेषं अहं सर्वज्ञ इति आत्मानं ख्यापयित्वातेषां हृदयवार्त्तामुक्त्वा विश्व-उत्पाद्यविपरीतोपदेशनं मतिविमोहनं मतिविमोहेन सहितःमतिप्रलोभो वा तथा सति विद्यमानाया संत विमोह अन्यथा करणं अविद्य-मानायाश्च अमार्गभूताया उत्पादनमिति औपधर्म्यं पाषण्डधर्मम् ॥ ३७ ॥

एवमेतन्निरूप्य ईश्वरं निरूपयति यह्यलोके च प्रीतिः बहिःसर्वत्र भगवत्कथा युगांतरेषु स्थिता ततोद्वापरादिषु सतामालयेषु कलिप्राप्तु यें सतामप्यालये हरेः कथा न भविष्यंति तदा शास्ता कल्कि रूपो भविष्यतीति कलियुगयुगस्यारंभ एव परीक्षिति भगवानाविष्टः कलिनिग्रहं कृतवान् तथापि तथा न गृहीतः कलिः भगवद्धर्माणां प्रवर्त्तमानत्वात् ते हि कलिमलसंहतिकलना नकेवलभगवद्धर्मा भावएव किंतु वैदिकोपि धर्मः गत इति निरूपयति धर्मो हि जायते ब्राह्मणैः पाल्यते राजभिस्ते उभये नष्टा पाखंडिनो द्विजजना जाता पाषंडधर्मा-नेव कुर्वंति बोधयंति च नृदेवा राजानश्च शूद्रा एव जाता तत्रापि वृषमेव लाति आदत्त इति वृषला म्लेच्छा इति यावत् धर्ममेव स्वयं गृह्णाति नाशनार्थं कुर्वंति वा प्रमाणा नाशनाय तेहि तृणएवेवा पूज्या अनेन पाल्या पालका उभये दुष्टा इति ज्ञापितं किंच धर्माभासोपि गतः सर्वत्र विधिश्छलरूपेणानुकरणेन धर्माभासेन कुर्वंति तत्र देवानां सांनिध्याभावात् यागाभावेपि स्वाहादिशब्दाः श्रूयंते तेऽपि यदा न श्रूयंते तदा भगवानवतीर्णः इत्याह स्वाहास्वधेति स्वाहेति होमः स्वधेति श्राद्धानि वषडिति यागः राजसतामससात्विका एतेस्मीति प्रसिद्धा गिर इत्यर्थाभावः यत्रगृहेषु देशे वा एवं कल्क्यवतारे हेतुत्रयं भक्त्यभावः धर्माभावः आभासधर्माभावः वेदाभावो वा अनेन सत्ययुगे त्रयं प्रवर्त्तयिष्यतीति ज्ञापितं युगांते चतुर्युगसमाप्तौ भगवानिति तस्मिन्नवतारे सर्वभगवद्धर्माविर्भाव एवं सर्वमेवांतर्यामिणं सर्वधर्मसहितं उत्पत्त्याविचार्य यावन्मनोधारणाया च तिष्ठत इत्यंशंविचारयिष्यति ॥ ३८ ॥

भगवतो माहात्म्यमाह सर्गे तपोहमिति त्रिभिः एतादृशं भगवद्ध्यानेन मनसः अवस्थाने हेतु भगवन्माहात्म्यं महिमामहान्बहुकालं तिष्ठति अव्यवस्थितमनसा वा महान् चेतनीयो भवति सम्यक्स्फुरणाभावेनापराधप्रसंगात् महतश्च धारणात्वैक्लव्यं भवतीति प्रकारत्रयेण निरूपणं तत्र प्रथमे महान्सर्वदानतिष्ठतीत्यत्र को हेतुरित्याकांक्षायां सहिनसर्वदा एकरूपः स्वगुणैः कालभेदेन नानाविधो भवतीति सर्वदातस्यनैकरूपेणावस्थानं तदाह सर्गेसृष्टिनिमित्तं भगवानेतावंति रूपाणि करोतीत्याह तपः अहं ब्रह्मा नव मरीच्यादयः ऋषयोथ प्रजेशाः प्रजोत्पादने हेतुसमर्था गुणत्रयेण सृष्टिरिति त्रयो निरूपिता ऋषय इति वेदा वा तथा सति चतुर्मूर्त्तिःसृष्टिं करोतीति तत्र तपो वासुदेवः यस्य ज्ञानमयं तप इति प्रजेशा संकर्षणरूपा ऐश्वर्यं हि तत्र प्रतिष्ठितमिति सृष्ट्यपेक्षया स्थाने वहुकार्यमिति तत्रपंचरूपाणि निरूपयति स्थाने मर्यादापालनार्थं अथेति भिन्नक्रमे धर्मः प्रथमः अनिरुद्धः मखो यज्ञः धर्मो ह्यत्राचाररूपः प्रमाणशब्दश्रवणानंतरभाविनी प्रवृत्तिः मखस्तु प्रयत्नसाध्यं भगवद्रूपोनंतमूर्त्तिःउत्पन्नौ योवेदो गृहीतःतदर्थोत्र सांगो गृहीतःमनुःधर्मप्रवर्तकः तदनंतरस्य धर्मत्वात् अमरादेवाः ते स्वर्गपरिपालका अवनीशा राजानो भूमिपरिपालकाः संहारेततोप्यधिकापेक्षायामपि अनादरेण निरूपयति अंत इति संहारार्थमधर्मः हरः यतिप्रतिपक्षः मन्युवशा सर्पादयः मनुप्रतिपक्षा असद्रूपा असुरा देवप्रतिपक्षा आदिशब्देन भूमौ नाशकाश्चौरव्याघ्रादयः तेषामसुरपक्षपा-तित्वात्तदादित्वं ननु कथमनेकरूपत्वं भगवतस्तत्राह मायाविभूतयइति मायायै विभूतयः मायायां मायाया मायाया वा हि पूर्वं निरूपिता इयं हिजगत्कारणभूता साहिजगद्रूपेण भवति भगवतोवा निमित्तत्वमापद्यते तथाकृतिसमर्पणाय भगवतो वा सेवार्थं उत्कृष्टानि साधनानि संपादयति भगवत्कर्तृके वा जगति करणत्वमापद्यते तदातन्निमित्तं एतावंति रूपाणि भगवान्करोति अन्यथा तस्या करणत्वादयो नोप-पद्येरन्ननन्वेतेषु तस्याः कार्यं नोपपद्यते तत्राह पुरुशक्तिभाज इति सर्वभवनसामर्थ्याय एकस्मिन्नपि कार्ये सर्वसामग्र्यविद्यमानत्वात्सर्वकार्यमेकदैव स्यात् विलंबे कारणाभावात् भगवदिच्छाया निमित्तत्वेपि तस्या अदृष्टरूपाया नियामकान्येतानि रूपाणि बोधकानि वा एतेषां नियतसामर्थ्यान्नपूर्वोक्तदोषः एवं भगवतः प्रतिक्षणं नानारूपत्वादेकविधा धारणानतिष्ठतीति यावदित्युक्त एवं महान् बहुकालं न तिष्ठतीति निरूपितम् ॥ ३९ ॥

इदानीमव्यवस्थितमनसा वा महानचिंतनीयो भवतीमं पक्षं विशदयति विष्णोर्नुवीर्यगणनामिति सर्वेषामेव व्यवस्थितमानसत्वात् को वा अर्हतीत्युक्तं मानस एव तत्र सामर्थ्यार्थोयोग्यतापि नास्तीत्युक्तं जीवस्य तपोयोगादिभिः सामर्थ्ये वृद्धावपि मनसो वा सहायबाहुल्ये स्वाभाविकधर्मस्यानिवृत्तत्वात् अत्यंतंब्रह्मापि न समर्थ इति तमपि स्वयःजगदाद्यर्थे सामर्थ्यं वर्त्तमानेपि अत्र भगवतः सर्वांशधारणेन सामर्थ्यमित्याह यः पार्थिवानीति कार्यसृष्टौसमर्थजीवानां गणनायां यः सृष्ट्यभिमानी इवेति नन्वेत्रं रूपेण मननज्ञाननामनिश्चितपदार्थबोधकत्वेन तत्रापि सामर्थ्यं भविष्यतीत्याशंक्याह नु इति एतदपि वितर्केणोच्यते ननु निश्चितं असामर्थ्यं हेतुमाह यः पार्थिवानीति कार्यसृष्टौ समर्थजीवानां गणनायां यः सृष्ट्यभिमानी ब्रह्मा यत्र सहायतामाप्नोति तत्वानि ब्रह्मांडं जनयति सरजांगुणाधिष्ठाता कतमः तेन हि पूर्वंअस्मिन्ब्रह्मांडे जीवाउत्पद्यंते तेषां भेदोऽदृष्टेन संस्कृतान्परमाणून् महाराशेरुद्धृत्य ब्रह्मांडोपादानापरोक्षज्ञानेन भगवदिच्छयैव तादृशस्य सामर्थ्येन ब्रह्मांडमुत्पाद्यत इति परमाणुगणसामर्थ्यात् [illegible] तं तथात्वेनाशंक्यनिराकरोति विवेचनार्थं कविपदं रजांसीति दुर्लक्ष्यंसूक्तत्वात् तादृशस्याप्यसामर्थ्यहेतुःयस्कंभेतिइयत्तापरिमाणवंतो हि गुणा गणयितुं शक्यंतेविवेचयितुं वा भगवतस्त्वेकोपि गुणा इयत्तारहितः मनसोपि स्थूलत्वात् निरवयवत्वाच्च असंगित्वाच्च तदाह आत्रिपृष्ठं ब्रह्मलोकमभिव्याप्य असवलतास्वरंहसाधारणवेगेन सर्वागम्येन वा उरुकंपोयानेषु यस्मिन् तादृशे त्रिपृष्ठे सर्वस्थलतः त्रिसाम्य सदनाच्च ऊर्ध्वत्रयसाम्यावस्थसत्यलोकात् सर्धमित्यर्थोंरुकंपमानं वायस्कंभउपर्येव स्तंभितवान् तस्मात्पातकेन गुणेन रक्षणमशक्यमिति मनसोप्याकलनाभावात् इयत्ता भावः संख्यापरिच्छेदाभावस्त्वग्रे वक्ष्यते एवं महद्गुणाः अव्यवस्थितमनसा आकलयितुमत्र इति कया इति धारणयेत्युक्तं धारणा हि यया कथं चिन्मनसा परिकल्प्य कियत इति महतश्चधारणाद्वैकल्यं भवतीति ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

[illegible] मीलिता संकुचिता धीर्येषां तत्रापिस्तोकायुषाम् अल्पायुषां खनिगमः खकृतो वेदसमुद्रो दूरेपारं यस्य [illegible] अनुयुगं कल्पे कल्पे । युगशब्दोऽयं कल्पवाची (कालवाची) ज्ञेयः । सत्यवत्यामाविर्भूतः सन् स एव हरिर्विटपशः शाखाभेदेन ॥ ३६ ॥

बुद्धावतारमाह । देवद्विषां दैत्यानाम् निष्ठितानां नितरां स्थितानाम् । पूर्भिः पुरीभिः । अदृश्यतूर्भिः सपत्नैरलक्ष्यवेगाभिः । लोकान् घ्नतां तेषां मतेर्विमोहोमतेः प्रलोभश्च यस्मात् तं पाषण्डवेषं विधाय तेन औपधर्म्यं पाषण्डधर्म्यम् । स्वार्थंष्यम् । बहुभाषिष्यते इत्यर्थः ॥ ३७ ॥

कल्क्यवतारमाह । वृषलाः शूद्रा नृदेवा राजानः । कलेर्युगस्यान्ते एकदेशान्वयः सोढव्यः । अत्रब्रह्मनारदसंवादात् प्रागभाविनो वराहादयः । मन्वन्तरावताराश्च भूताभाविनश्च । धन्वन्तरिपशुरामौ तदा वर्त्तेते । श्रीरामादयस्तु भाविनः । तत्रभूतादिनिर्देशश्छान्दस इति द्रष्टव्यम् ॥ ३८ ॥

सृष्ट्यादिकार्य्यभेदेन मायागुणावतारविभूतीराह सर्गे इति । स्थाने स्थितौ । धर्मश्च मखाश्च ननवश्च अमराश्च अवनीशाश्च । अन्ते संहारे । मन्युवशाः सर्पाद्याः ॥ ३९ ॥

हरेरवतारलीलाः सामस्त्येन वक्तुं न कोऽपि समर्थ इत्याह । विष्णोरिति । गणानां कर्तुमितिशेषः । यो विष्णुः स्वरंहसा त्रैविक्रमे स्वचरणांगेन अस्खलता त्रिपृष्ठं त्रयाणां लोकानां पृष्ठमण्डकटाहं चस्कम्भ दधारधृत्वा स्थिरीचकारेत्यर्थः । त्रिपृष्ठं कीदृशम् । यस्मादेव स्वरंहसो हेतोस्त्रिसाम्यसदनात् प्रकृत्यावरणमारभ्य उरुकम्पयानम् । तथाच मन्त्रः--विष्णोर्नु वीर्य्याणि कं प्रवोच यः पार्थिवानि विममे रजांसि योऽस्कम्भायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगाय इति । अस्यार्थः विष्णोर्नु वीर्य्याणि कं प्रवोचं कः प्राबोचदित्यर्थः यः पार्थिवान्यपि रजांसि विममेसोऽपि । यो विष्णुस्त्रेधा विचक्रममाणः त्रिविक्रमं कुर्वन् उत्तरलोकमस्कम्भायत् अवष्टब्धवान् । कथम्भूतम् । सधस्थं तिष्ठन्तीति स्था देवास्तैः सह वर्त्तमानं सहस्य सभादेशः ॥ ४० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

श्रीव्यासावतारमाह कालेनेति कालेन मीलिता कुंठिता धीर्येषां तोकमल्पमायुर्येषां तेषां नृणां त्रैवर्णिकानां स्वनिगमः स्वकीयो वेदः यत इति खेदं दूरे पारं यस्येति दुरपारः बुद्ध्यगोचरः इत्यवमृश्य विचार्य स भगवान् सत्यवत्यां पराशराद्विहितः आविर्भूतः सन् अनुयुगम् युगानुरूपम् वेदद्रुमं विटपशः शाखाभेदेन विभजिष्यति विभक्तं करिष्यति ॥ ३६ ॥

बुद्धावतारमाह देवद्विषामिति निगमवर्त्मनि वेदोक्तमार्गे निष्ठितानां नितरां स्थितानाम् मयेन विहिताभिः रचिताभिः अदृश्यतूर्भिः रलक्ष्यवेगाभिः पूर्भिः पुरीभिः लोकान् घ्नतां देवद्विषामसुराणाम् मतेर्विमोहो युक्तस्यागो यस्मात्तं मतेः प्रलोभो ऽयुक्तस्वीकारो यस्मात्तं पाषण्डवेषं विधाय औपधर्म्यं स्वार्थं ष्यञ् उपधर्मं पाषण्डधर्मं बहु अधिकं भाषिष्यत इत्यर्थः ॥ ३७ ॥

कल्क्यवतारमाह यर्हीति यर्हि यदा सतामप्यालयेषु हरेः कथाः न स्युः [illegible] द्विजजनाः त्रैवर्णिकाः पाषंडिनः स्युः वृषलाः शूद्राः नृदेवा राजानः स्युः यत्रस्वाहास्वधावषडितिगिरो नस्युः तदायुग[illegible] कलेः शास्ताभविष्यति अत्र च ब्रह्मनारदसंवादात्प्रांचो वराहादयोऽवताराः मन्वंतरावतारास्तु भूताः भाविन श्च [illegible]मौ तदानीं तमौ श्रीरामादयस्तु भाविनः तत्रतुकाचित् भूतादि निर्देशः छांदस इति द्रष्टव्यम् ॥ ३८ ॥

किंच पुरुशक्तिभाजः बहुशक्तिधारिणः भगवतः [illegible] मायया [illegible]डले विभूतयः तत्रसर्गे सृष्टौ तपआद्याः स्थाने स्थितौ च धर्माद्याः मखोऽवताररूपो विष्णुः अंते संहारे च अधर्मा[illegible] मन्युवशाः सर्पाश्च असुराश्च ते आद्या येषां ते ॥ ३९ ॥

भगवच्चरितं यथा संक्षेपतोऽभिहितं विस्तरतस्त्वां[illegible] शक्त इत्याह विष्णोरिति यः कविः क्रांतदर्शी पार्थिवानि पृथिवी संबंधीनि रजांसि विममे गणितवान् सोपि इह का[illegible] विष्णोर्वीर्यगणानां कर्तुमर्हति न कतमोप्यर्हतीत्यर्थः यो विष्णुः अस्खलता प्रतिघातशून्येन स्वरंहसा स्वचरणे[illegible] त्रिसाम्यरूपात्सदनात्सकलचक्रजीवनिकेतनभूतात्प्रधानादारभ्य त्रिपृष्ठंसत्यलोकं उर्वधिकं यस्मात्कंपयानं तस्मात् चर[illegible] मंत्रः "विष्णोर्नुकं वीर्याणि प्रावोचं यः पार्थिवानि विममे रजांसि यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रे[illegible] स्तु यः पार्थिवानि रजांस्यपि विममे गणितवान्सोऽपि विष्णो र्वीर्याणि कंप्रावोचम कःप्रवोचत् य उरुगायो विष्णु [illegible] विचक्रमाणः चरणविन्यासं कुर्वाणः सधस्थ सहस्य सभा देशः तिष्ठंतीति स्थाः देवास्तैः सहवर्तमानम् उत्तरम् [illegible] अवष्टब्धवानिति ॥ ४० ॥

भाषा टीका

काल से जन्म बुद्धि अल्पायु जनों को देख [illegible]मीर और [illegible] देखकर सत्यवती में प्रकट होकर वेद [illegible] को शाखा से विभाग करेंगे ॥ ३६ ॥

नान्तं विदाम्यहममी मुनयोऽग्रजास्ते मायाबलस्य पुरुषस्य कुतोऽपरे ये ।
गायन् गुणान् दशशतानन आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम् ॥ ४१ ॥
येषां स एव भगवान् दययेदनन्तः सर्व्वात्मनाश्रितपदो यदि निर्व्यलीकम् ।
ते दुस्तरामतितरन्ति च देवमायां नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ॥ ४२ ॥
वेदाहमङ्ग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्य्यः ।
पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिर्ऋभुरङ्ग उत ध्रुवश्च ॥ ४३ ॥
इक्ष्वाकुरैलमुचुकुन्दविदेहगाधिरघ्वम्बरीषसगरा गयनाहुषाद्याः ।
मान्धात्रलर्कशतधन्वनुरन्तिदेवाः देवव्रतो बलिरमूर्त्तरयोदिलीपः ॥ ४४ ॥
सौभर्य्युतङ्कशिबिदेवलपिप्पलादसारस्वतोद्धवपराशरभूरिषेणाः ।
येऽन्ये विभीषणहनूमदुपेन्द्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्य्याः ॥ ४५ ॥

भाषाटीका ।

वेद मार्ग में स्थित मय से विहित पुरों से लोकों को शासन करने वाले असुरों के मोहनार्थ बौद्धा वतार धारण करिके पाखण्ड धर्म कहैं गे ॥ ३७ ॥

और जब साधु लोगों के स्थानों में भगवत्कथा न होंगीं तब ब्राह्मण पाखण्डी और शूद्र ब्राह्मणवत् होंगे और स्वाहा स्वधा वषट् इत्यादि शब्द न सुन पड़ें गे तब कलियुग के अन्त में कल्की अवतार धारण करशासन करैं गे ॥ ३८ ॥

और सृष्टि समयमें तप में ब्रह्मा नवमरीच्यादिक पालन समय मे धर्म यज्ञ मनु देवता वा ब्राह्मण प्रलय समय में अधर्म रुद्रदे त्यादिकबहुशक्ति परमात्मा की माया बिभूति हैं ॥ ३९ ॥

और विष्णु के वीर्य की गणना कौन करने के योग्य हैं पार्थिव रजके कणों की सायत संख्या करले परन्तु भगवान के गुणों की कौन संख्या कर सका है जो हरि अपने वेग से अत्यन्त कम्पित सत्य लोक को धारण किया ॥ ४० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एतत् प्रपञ्चयति नान्तमिति । पुरुषस्य यन्मायाबलं तस्य अन्तं न विदामि न वेद्मि दशशतान्याननानि यस्य स शेषोऽपि अस्य गुणान् गायन्नधुनाऽपि पारं न समवस्यति न प्राप्नोति ॥ ४१ ॥

यदि न केऽपि विदन्ति तर्हि कथं मुच्येरन् तत्कृपयैवेत्याह येषामिति । दययेत् दयां कुर्य्यात् । ते च यदि निष्कपटमाश्रितचरणा भवन्ति । ते दुस्तराम् अपि देवमायाम् अतितरन्ति । चकारान्मायावैभवं विदन्ति च । अयेति वा पाठः । प्रत्यक्षमेव तेषां मायातितरण-मित्याह नैषामिति । श्वशृगालानां भक्ष्ये देहे ॥ ४२ ॥

अन्तर्ज्ञानाभावेऽपि मायेयमिति ज्ञानं तत्कृपया बहूनामस्तीत्याह वेदाहमिति त्रिभिः । यूयमिति सनकादीन् अन्तर्भाव्य बहुत्वम् । दैत्यवर्य्यः प्रह्लादः । मनुः स्वायम्भुवः । तस्य पत्नी शतरूपा च । तदात्मजाः पुत्रौ कन्याश्च । प्राचीनबर्हिषो विसर्गलोपश्छान्दसः । अङ्गो वेणपिता ॥ ४३ ॥

शतधनुश्च अनुश्च सन्धिरार्षः । रन्तिदेवा इति पाठः सुगमः । एकपद्ये एतैः सहितो देवव्रत इत्यर्थः ॥ ४४ ॥

उपेन्द्रदत्तः शुकः । विभीषणादयो वर्य्या मुख्या येषां तेऽपि विदन्तीत्यर्थः ॥ ४५ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिनाख्यतट्टिप्पणी ।

मायाबलम् इति । मायामहत्त्वमित्यर्थः । इति व्याख्यालेशः ॥ ४१ ॥ ४२ ॥

पुत्राविति । प्रियव्रतोत्तानपादाविति द्वौ । कन्याश्चेति । आकूतिर्देवहूतिः प्रसूतिरिति तिस्रः ॥ ४३ ॥

[ऐलः पुरूरवाः । नाहुषो ययातिः । आद्यशब्देन यदुप्रभृतयः ॥] सार्व्वभौरिति । शतधनुरित्यत्र विसर्गलोपेन सन्धिरार्षः । अत्र बाल-प्रबोधिनीकारस्तु शतधन्वा अनुश्चात्राकारलोप आर्ष इत्याह । एकपद्ये इति रन्तिदेवदेवव्रत इत्याकारके पाठे ॥ ४४ ॥

[सारस्वतेति । सारस्वतो दधीचिः ॥ ४५ ॥ ४६ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

[illegible]मुक्तमर्थं अनभ्युत्का नाहं न यूयमिति पूर्वप्रस्तुतमुपसंहरति नेति मायाबलस्याद्भुतबलस्य बलं सेना प्रकृत्याख्यपरिकर इति वा पुरुषस्यपरमपुरुषस्यांत स्वरूपस्वभावयो रवधिमहं चतुर्मुखः नविदामि तेऽग्रजाः सनकादयः नाविदंस्त्यन्ये कुतो जानीयुः किंच द्विना दशशतान्याननानि यस्य स दशशताननः सहस्रमुखः आदिदेवःशेषः द्विसहस्रजिह्वश्चानंतगुणान् गायन्नधुनापि अस्य भगवतः पारं न समवस्यति नाध्यवस्यति ॥ ४१ ॥

ननु कैरप्यविज्ञातस्वरूपस्वभावावधित्वे कथं तद्भजनेन मुच्येरन्नित्याशंक्यापरिच्छिन्नस्य वस्तुनो ऽपरिच्छिन्नत्वेनैव ज्ञानं मुक्तिसाधनं न तु परिच्छिन्नत्वेनतस्यान्यथा ज्ञानरूपत्वादतः परमात्मस्वरूपमपरिच्छिन्नत्वेन जानंतो भजमाना मुच्यंते एवेत्याह येषामिति निर्व्यलीकं निरपराधं यथा तथा येषां सर्वात्मना उपायोपेयत्वबुद्ध्या आश्रितपदः संश्रितपदो यदि भवेत्स एव भगवांस्तान् दययेत् भगवद् या विषयाः दुस्तरां तर्त्तुमशक्यां देवस्य विष्णोर्माया मतितरंति निःशेषं तरिष्यंति चकारात्तत्स्वरूपस्वभावादिकमपियथावस्थितत्वेन जानंति एवं सर्वात्मना भगवत्प्रपन्नानामात्मसमं विषक्ष्महे इत्युक्तदेहात्मभ्रमोऽपि निवर्त्तत इत्याह नैषामिति एषां सर्वात्मना भगवंतमाश्रितानां श्वसृगालानां भक्षणायोग्ये कलेवरे ममाहमिति धीः अनात्मन्यात्मबुद्धिर्या मत्स्वे स्वमिति यामतिरिति स्थानोक्तधीः नास्तीत्यर्थः ४२

किमेवं विधाभगवत्प्रपन्ना अपि संतीत्यत आह वेदेति अंग हे नारद अहं वेद जानामि भगवंतामिति शेषः परमस्य भगवतो योगमायां दैवी ह्येषा गुणमयीत्युक्तप्रकारां स्वदेहेंद्रियादिरूपेण संयुज्यमानां विचित्र सर्गकरीं प्रकृतिं तरिष्यामीति शेषः यूयमित्यादीनां विदंत्यातितरंति चेत्युपरितनेनान्वयः यूयमिति सनकाद्यभिप्रायेण बहुवचननिर्देशः भवो रुद्रः भगवानिति रुद्रविशेषणं दैत्यवर्यः प्रल्हादः मनोः पत्नीशतरूपा सच स्वायंभुवो मनुश्च ॥ ४३ ॥

ऐलः पुरुरवाः नाहुषो ययातिः देवव्रतो भीष्मः ॥ ४४ ॥

विभीषणादयश्च वर्या मुख्या येषांते ॥ ४५ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

अनंतत्वमुपपादयति नांतमिति विदामीतिधिकरणव्युत्पत्ययेनचतुर्मुखाद्ब्रह्मणः शेषस्यसहस्रमुखस्यकथमातत्स्ज्ञानाधिकमस्तीत्यत्रकांकानिवारयति नसमवस्यतिनाश्चिनोति माल्याक्षतादिदानेकोशिषइतिवैजयंतीकोशात् अक्षताद्याशीर्वचनवान्शेषःकश्चित्पुमानितिसंशयंनिरस्यति दशशताननइत्यनेन अयमपिनागेष्वन्यतमःकश्चिदित्यतआह आदिदेवइति अपरेऽर्वाचीनाः अनेनश्लोकद्वयेनविष्णोर्नुकंवीर्याणिप्रवोचं नतेविष्णोजायमानइत्यृगर्थमुदाहरति ॥ ४१ ॥

नन्वेवंचेन्नकस्यापिज्ञानाभावेनपुरुषार्थप्राप्तिरित्याशंक्यतत्प्रसादेनसर्वंसुलभमित्याह येषामिति सोऽनंतोभगवान्स्वयमेवयेषांदयांकरोति तेदेवरूपमायांस्वरूपशक्तिविदंति संसारहेतुंशैवलींमायांतरंतितत्साधनमंतरेणादययैवतस्यवैषम्यनैर्घृण्येचस्यातामित्यत्राह सर्वात्मनेति तत्रेत्थंभावमाह नैषामिति येषांसेवकानांश्वसृगालभक्षणायोग्ये देहेममाहमितिधीर्नास्ति देहाद्यभिमानशून्यत्वेनभाव्यमिति भावः तत्तद्योग्यतानुसारेणतत्प्रसादोपिबहुविधइत्यस्मिन्नर्थेचशब्दः ॥ ४२ ॥

ननुतर्हितत्प्रसादयोग्याःकेइतितानाह वेदाहमिति "ऋतस्यतंतुंविततंनिवृत्त्यतदपश्यदभवत्प्रजासु"इतिश्रुतिद्योतकोहिशब्दः प्रथमप्रकांतत्वाच्चतुर्मुखःसर्वस्मादधिकंवेत्ति तदन्येयथायोग्यतयावेत्तारइत्यर्थस्मारकोवा भगवानितिविशेषणान्नवस्यनारदादेर्ज्ञानातिशयोऽस्तीतिसूचयति अथेत्यनेनदैत्येषुप्रल्हादस्यज्ञानंनैर्मल्यंसूचयति अंगोवेनस्यपिता ॥ ४३ ॥

ऐलइलायाःपुत्रःपुरूरवाःनाहुषोययातिः ॥ ४४ ॥

हरेःस्वरूपांशानामुपेंद्रदत्तादीनांनित्यवद्गुणेषुसहयो[illegible] ॥ ४५ ॥

श्रीम[illegible]सन्दर्भः ।

तत्र मायिकामायिकत्वेनोभयविधानमपि वीर्य्याणामा[illegible]स्याम: ॥ ४१ ॥

तर्हि तत्तद्व्यानां मायिकवीर्य्याणां तरणसाधनानां च[illegible]त्यन्तिकज्ञानाभावे कथं लोका निस्तरेयुरित्याशङ्क्याह येषामिति । यद्वा तस्मात्तज्ज्ञानेनाग्रहं परित्यज्य शुद्धभावेन भ[illegible]येषामि[illegible]ति चकाराद्‌नन्तत्वेनैव जानन्ति च ॥ ४२ ॥

ननु मायिकवीर्य्याणामप्यनन्तत्वात्तरणं कथं स[illegible] [illegible]कृपयैव । तत्रावस्तुत्वज्ञानेनाध्यासपरित्यागादिति सिद्धान्तयंस्तत्राधिकारिण उदाहरति वेदाहमित्यादित्रिकेण । य[illegible]गम यामैश्वर्य्यं तदयातारतम्येन स्वाधिकारानुरूपमहमन्येऽपि विद्म इत्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

अवतिष्ठत इति यदुक्तं तदर्थं महत्त्वं निरूपयति नांतंविदामीति अहं ब्रह्मासर्ववेदाभगवद्गुणानामभिव्यंजकजगत्कर्ता यावज्जन्मकार्याणि कुर्वन्नपि पुत्रद्वाराकारयन्नपि स्वतिरोभावे स्वस्य वा रम्यस्य वा वनियोगाद्वंतं नविदामीत्यर्थः मुनयोपि तथायोगोपि मदं तमेव फलं साधयतीति सुतरां त्वदग्रजामत्पुत्राः सनकादयो मरीच्यादयो वा तिहि मदंशभूताः सदपेक्षया अल्पमेव विपर्याकुर्वंतीति तेषांगणनेच्छा निवृत्तौ हेतुमाह मायाबलस्येति क्षणमात्रेण ब्रह्मांडकोटिजनन समर्थायामायाया अपि बलं यस्मात् किंच पुरुषस्य माया भर्त्तुः भगवदा-हितमंवाहितेज साजनयतीति कुतः परेकालादयः तेषामपि भगवच्चेष्टारूपत्वात् अस्मदादयो वा पुरुषापेक्षया अपरत्वे कालादयः स्वा-पेक्षयात्वस्मदादयः अस्मदादीनां प्रथमत एव अंतत्वाज्ञानात् निवृत्तावपि शेषोदेवाभिमानिनी देवता सहस्रवदनः सहस्रप्रकारेणैकं पदार्थं वक्तुं शक्त अत एव आदिदेवः तत्प्रतिपाद्यएव हि सर्वे देवाः यावान् भगवान् तद्व्यतिरिक्तसर्वरूपः शेषसृष्टेरनादित्वात्तत आरभ्य गणनायामपि अद्यापि नांतं समवस्यति एतावंतोऽग्रेगणनीया इति अनंतत्वात्सृष्टेः अग्रेपि अत आह नास्य पारमिति अस्य गुणस्य भगवतो वा बहून् गुणानूगणयितुं प्रवृत्तः एकस्यापि पारं नगतवानिति वा एवं सर्वथा भगवतो महत्वं निरूप्य धारणाया अशक्यत्वात् बाधविति निरूपितं ॥ ४१ ॥

नन्वेतादृशत्वे भगवतः क्षणमात्रमपि धारणानस्यादित्याशंक्याह येषामिति सर्वमार्गप्रवर्त्तकत्वाद्भगवतः मोक्षदातुः अवश्यंधारणीया प्रवर्त्तनीयेति यान् पुरुषविशेषानात्मीयत्वेन गृह्णाति तेषां धारणा योग्यंतत्याह ययेदिति तेषामपि नसाधनत्वेन तथात्वसंपादनं किंतु दययैव स एव भगवानिति यः सर्वमार्ग प्रवर्त्तकः ननुगुर्वादीना मपिक्रियाभगवदिच्छया तथा करणं अनियमेन करणप्राप्तौ अतिदुःखि-त्वेन दीनत्वं दययातानेव योजयतीति दयायाः कारणत्वं सर्वेषु च दयाभावः अनंतत्वात् तथान्येषां गुणानां उपमर्दात्सर्वमुक्त्या सृष्टेरंतवत्वे भगवतोऽनंतत्वंभज्यते ननुतथा विधानं किं धारणामात्रेण स्वयमेव तथा फलं प्रयच्छतीत्याशंक्य साधनेनैव सर्वं भगव-त्करोतीति साधनमुपदिशति सर्वात्मनाश्रितपद इति भगवद्दयाया ज्ञापकं धारणं तस्मिन्नसति भगवदिच्छानुगुणादीनि साधनानि सिद्धिं प्राप्स्यन्तीति सर्वभावेन भगवत्प्रतिपत्तिः कर्त्तव्या तदाह सर्वात्मना आश्रितपादो यैः व्यलीकं कापट्यं फलं वा संबंधो वा सर्वात्म-त्वेन फलार्थस्यापि भजनस्य प्राप्तत्वान्निर्व्यलीकमिति तन्निषेधः तेषां सिद्धिफलमाहतेदुस्तरामिति अथाश्रयणानंतरं पूर्वमेव दुस्तरत्वात् अथ शब्दो मध्ये निरूपितः अथवातद्दुस्तरां मोहिकां मायांतरंतितदा भगवद्भक्तिज्ञाने सिद्धिर्भवति अथ तदनंतरं देवमायां देवरूपां देवस्य भगवतोद्योतनात्कारणाद्वाक्रीडार्थं वा या माया तामात्माधिदैविकीं येतरंति भगवति सायुज्यं प्राप्नुवंतीत्यर्थः तेषां तरणं अभिज्ञानमिदानीमाह नैषामिति एषो श्वसृगालभक्ष्येण ममेति इदमभिज्ञानं तरणे स एव तरिष्यतीति ज्ञातव्ये अहं ममेति दौर्जन्यं न यस्य देहादौ सर्वत्रैव हि महत्कार्ये अभिज्ञानमेव प्रवृत्ति अन्हां विधान्यामित्यतोक्तं श्वसृगालं भक्ष्य इति पर्यवसानेनान्यदीयत्वनिश्च-यार्थं मुक्तं तत्तस्य पर्यवसितं फलं मन्यानित्ववांतरफलानि तथा देहस्य स्वोपयोगः अवांतरफलमेव तस्मात्स्वयोगोपि देहादेनमुख्यं फलं अतः फलार्थं यत्नो न कर्त्तव्य इति हेतुरपि सूचितं श्वसृगालेति ग्रामारण्ययोः भक्षका उपलक्ष्यतां तेन यत्रायं देहस्तिष्ठति तदाश्रयाः सर्वे एव गृह्णन्तीति नमत्स्यादीनामपि परिग्रहः अथवा तादृशस्य नापमृत्युसंभावनेति ग्रामारण्यभेदवतावेव भक्षकौ ताभ्यामुपराधान्नसनका दीनां वेशः बहुधाविनियोगसंभवादुपलक्षणमेवेति निश्चयः एवं मनोधारणायावतिष्ठत इति सुनिरूपितं ॥ ४२ ॥

एकैकशोंगानि धिया धारयेदिति निरूपयति वेदाहमंगेति चतुर्भिः तत्र त्रिविधाभक्ताः श्लोकत्रयेण संगृहीताः अक्तभक्तास्त्वेकेन एते हि भगवदंशधारकाः एतादृशत्वे एकांशधारणा सिद्धिः पूर्वाधिकारे संपन्ने उत्तराधिकारार्थे प्रयत्नः कर्त्तव्यः इति प्रथमे ब्रह्मा अंतिमः शुकः पक्षी तत्र प्रथमं शुकाधिकारे संपन्ने तदनंतरं क्रमेण ब्रह्मपर्यंतं मदधिकारा भवंति इद मेव पादावित्वेनोच्यते अथवा चरण सेवा ब्रह्मणा एव सिद्धा सएव हितच्चरणक्षालनां पूजांविधाय गंगा मुत्पादितवान् सितं शुकादयः भगवतश्चित्ररूपाः तत्र प्रथमंपरमसा-त्विका निरूपिताः तदनुराजसास्तामसाश्च भगवदूज्ञाने भक्तिमार्गस्य मुख्यत्वात् भक्ताएव गणयंत तत्र आपातत: किंचित्स्वरूपमहं वेद: परमस्य पुरुषोत्तमस्य योगमायां जगज्जननार्थमाज्ञापितां मायां साहिप्रथमतो ह्याज्ञाकारिणी तस्या स्वरूपे ज्ञाने भगवान् ज्ञातो भवति तद्वारैव हि लोके भगवदाविर्भावात् ब्रह्मा जानातीत्यत्र गुणानां सृष्टिहेतुत्वात्सर्वगुणप्रसिद्धये ब्रह्मासर्वं करोतीति हेतुः हि शब्देन सूचितः मायायाः अधिदैविकत्वज्ञापनार्थं योगपदं अध्यात्ममिति कोपि यूयं नारदेन सहिताः मरीच्यादयः भवश्च महादेवः एतेत्रयः सनकादयः भवस्य भगवत्वं भक्तिविरुद्धाचारस्य अभक्तत्वबोधनथ्यर्थं ज्ञाननिष्ठान्सनकादीन् गणयति एकरूपेण अथदैत्यवर्गेति अनेन दैत्यवर्यः सनकादिरेवेति विचारितं अन्यथा राजसेषु गणनीयस्यात् दैत्यवर्यः प्रह्लाद अथेतिभिन्नक्रमं प्राप्तः भक्तमुख्यत्वात् मताः यत्नातेशरूपा निरूपिता कायमित्यत्र स्त्रीलिंगस्य प्रथमनिर्देशात् सर्वेप्रकारास्तदीयानां संग्राहकाः तदात्मजाः प्रियव्रतोत्तानपादौ आकूतिदेवहूति प्रभृतयः क्रतुर्विष्णुः पुराणे प्रसिद्ध अंगो वेनपिता उत्तेति ध्रुवसिद्धिः स्पष्टेति ॥ ४३ ॥

इक्ष्वाकुप्रभृतयोराजसाः नाहुशोययातिः यदुप्रभृतयः आदिशब्देनोच्यते मांधात्रादिरतेदवांतैः सहितोदेवव्रतो भीष्मः एकवज्ञावो नान-पुंसकश्च ॥ ४४ ॥

सौभर्यादयः स्तदनंतरभाविनः मत्स्यसंगादिना तथा त्वं उतंगो भारते प्रसिद्धः पिप्पलादः काश्चिरसारस्वत दधाचि उपद्रष्टः प-रीक्षितःपार्थोऽर्जुनः अग्रे च यथायथं प्रसिद्धाः ॥ ४५ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

[illegible] नाभिमिति । पुरुषस्य यन्मायाशक्तेर्बलं तस्याप्यन्तं न वेद्मि किमुत विच्छक्तेरिति भावः । तस्य पुरुषस्य गुणान् प्राकृतान् अप्राकृतांश्च गायन् न समवस्यति न प्राप्नोति ॥ ४१ ॥

ननु यदि युष्मदादयोऽपि तं न विदन्ति तर्हि तदनुभवो निराश्रय एवाभूदिति चेत्तत्राह । येषां स दययेत् दयेत अधीगर्थेत्यादिना षष्ठी मामेते जानन्त्विति सकरुणामङ्गीकुर्य्यादित्यर्थः । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् । इति श्रुतेः । केन लक्षणेन तस्य दया ज्ञातव्येत्यत आह । सर्व्वात्मा ज्ञानकर्म्मादिनिरपेक्षतया निर्व्यलीकं निष्कपटं निष्काममिति यावत् श्रितपदः आश्रितभगवच्चरणा यदि भवन्ति । तस्य दयाशक्तेरेव मुख्या वृत्तिः शुद्धभक्तिः, सा च तद्भक्तद्वारैव जनेषु प्रवर्त्तते इति भावः । चकारात् तं विदन्ति च । केन लक्षणेन मायातरणतद्वेदने ज्ञातव्य इत्यत आह । श्वशृगालभक्ष्ये पुत्रादिदेहे स्वदेहे च एषां ममाहमिति धीर्न स्यात् ॥ ४२ ॥

ननु त एव निरहंममत्वाश्च येषु भगवतो दयालक्षणं दृष्टं द्रष्टव्यश्चेति तान् गणयति वेदाहमङ्गेति । मयि भगवतो दयास्तीति जानामीति तदभिज्ञभक्तजनसंमत्यैव वच्मि स्वानुभवस्तु नान्तं विदाम्यहमिति मया पूर्व्वमेव प्रकाशित इति भावः । दैत्यवर्य्यः प्रह्लादः । पत्नी शतरूपा । मनुः स्वायम्भुवः । तदात्मजाः प्रियव्रतोत्तानपाददेवहूत्यादयः । प्राचीनबर्हिषो विसर्गलोपश्छान्दसः ॥ ४३ ॥

शतधन्वा च अनुश्चेति आकारलोप आर्षः । मान्धात्रादिभिः सहितो देवव्रतो भीष्मः । रन्तिदेवा इति च पाठः ॥ ४४ ॥

उपेन्द्रदत्तः शुकः ॥ ४५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तत्रैकमुत्यन्यायेनाह माया प्रकृतिः शक्तिभूता सृष्ट्याद्युपयोगित्वेन बलं यस्य यद्वा मायायाः प्रकृतेः बलं सामर्थ्यं यस्मात्तस्य पुरुषस्य भगवतः अंतगुणस्वरूपादीनामेतावत्वम् अहं चतुर्मुखः नविद्यामि नवेद्मि ते तव अग्रजाः सनकादयः न विदंति अपरे अन्ये कुतो जानीयुः दशशताननः सहस्रवदनः शेष अस्य हरेः गुणान् गायन् अधुनापि पारमंतं नसमवस्यति नाध्यवस्यति ॥ ४१ ॥

ननु ज्ञानाभावे कथंमुक्तिः स्यादित्यत्राह येषामिति अनंतः इयत्तानवच्छिन्नः स एव भगवान् यदि येषां दययेत् दयां कुर्यात् तया ते निर्व्यलीकं निरपराधं यथा तथा सर्वात्मना आश्रितपदः भवंति प्रेमविशेषलक्षणां भक्तिं प्राप्नुवंति तथाह भगवान्पूर्वाचार्यः कृपास्यदैन्यादियुजि प्रजापते यया भवेत्प्रेमविशेषलक्षणा भक्तिर्ह्यनन्याधिपते महानः साचोत्तमा साधनरूपिका परेति तदुस्तरां देवस्यविष्णोःमायां कार्यकारणस्वरूपिणीं प्रकृतिं तरंति चकारादेवं प्राप्नुवंति तच्चरणैकशरणानां लक्षणमाह एषां श्वशृगालभक्ष्ये देहे ममाहमिति धीर्नभवति भगवत्संकल्पाधीनभूतायाः कार्यभूतं शरीरं मायात्मकतया येषांतं तेषां मदीयमिदं शरीरं शरीररूपोहमिति च बुद्धिर्नभवतीत्यर्थः ॥ ४२ ॥

ननु मायाकार्ये शरीरे येषां ममाहमिति धीर्न भवति मायामर्थात्परसंबंधिनीमात्मविलक्षणां विदंति तां तरंति च ते के इत्यत्राह वेदेति चतुर्भिः हे अंग नारद परमस्य परामाया यस्य तस्य माधवस्य योगमायां योगः संकल्पः तदधीनां मायां प्रकृतिं हि शब्दंन परमं, च वेदजानामि यूयं मम पुत्राः यूयमित्यादीनां विदंति तरंति च देवमायामिति चतुर्थेनान्वयः दैत्यवर्यः प्रह्लादः मनोः स्वायंभुवस्य पत्नी शतरूपा सच मनुश्च तदात्मजाः पुत्रौ कन्याश्च प्राचीनबर्हिषो विसर्गलोपश्छांदसः ॥ ४३ ॥

नाहुषः ययातिः शतधनुश्च अनुश्च संधिरार्षः ॥ ४४ ॥

उपेन्द्रदः शुकः विभीषणादयो वर्याः मुख्या येषां ते ॥ ४५ ॥

भाषाटीका ।

मैं और मुनि और तुम्हारे अग्रज भी परमेश्वर की माया का [illegible] नहीं जानते हैं फिर दूसरों को क्या कहना है और सहस्र मुख वाले आदि देवशेषजी भी इनके गुणों को गाते हुये अंत को [illegible] प्राप्त होते हैं ॥ ४१ ॥

जिनके ऊपर भगवान् दयाकरैं और वे निष्कपट होकर उन[illegible] चरणों मे आश्रित हों तो वे दुस्तर देव माया को उतर जावैं गे श्वा और श्रृगालों के खाने योग्य इस देह मे मम अहं यह बुद्धि न[illegible] ॥ ४२ ॥

परमेश्वर की योगमाया को हम और आप लोग और म[illegible] जी और प्रलहाद जी मनु की पत्नी और मनुजी और उनकी कन्या और प्राचीनवर्हि और ध्रुव जानते हैं ॥ ४३ ॥

और इक्ष्वाकु और ऐल और मुचु कुंद और अम्बरीष [illegible] पृथा दिके और मां धाता और अलर्क और शत धनु और रंति देव और भीष्म जी वलि और दिलीप जानते हैं ॥ ४४ ॥

और सौभरि उतंक शिवि देवल पिप्पलाद सारस्वत [illegible] [illegible]रिषेण और जे विभीषण हनूमान् उपेन्द्रदत्त पार्थ आर्ष्टिषेण विदुर ये जानते हैं ॥ ४५ ॥

ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशवरा अपि पापजीवाः ।
यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्य्यग्जना अपि किमु श्रुतधारणा ये ॥ ४६ ॥
शश्वत् प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वम् ।
शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ॥ ४७ ॥
तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकम् ।
सध्र्यङ्नियम्य यतयो यमकर्त्तहेतिं जह्युः स्वराडिव निपानखनित्रमिन्द्रः ॥ ४८ ॥
स श्रेयसामपि विभुर्भगवान् यतोऽस्य भावस्वभावविहितस्य सतः प्रसिद्धिः ।
देहे स्वधातुविगमेऽनुविशीर्य्यमाणे व्योमेव तत्र पुरुषो न विशीर्य्यतेऽजः ॥ ४९ ॥
सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः ।
समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत् ॥ ५० ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

किं बहुना सत्सङ्गेन सर्व्वेऽपि विदन्ति इत्याह ते वा इति । अद्भुताः क्रमाः पादन्यासा यस्य हरेस्तत्परायणास्तद्भक्तास्तेषां शीले शिक्षा येषां ते तथा यदि भवन्ति तर्हि ये स्त्रीशूद्रादयः पापजीवाः तेऽपि विदन्तीत्यर्थः । तत्र श्रुते भगवतो रूपे धारणा मनोनियमनं येषां ते विदन्तीति किमुवक्तव्यम् ॥ ४६ ॥

किं तद्भगवतः स्वरूपं यस्मिन् मनोधारणां विधाय मायां तरन्तीत्यपेक्षायामाह शश्वदिति सार्द्धेन । यद्ब्रह्मेति विदुर्मुनयस्तद्वै भगवतः पदं स्वरूपम् । किं तद्ब्रह्म तदाह । अजस्रं नित्यञ्च तत् सुखञ्च विशोकञ्चेति । अजस्रसुखत्वे हेतुः शश्वत् सदा प्रशान्तम् अतो नित्यसुखस्वरूपम् । विशोकत्वे हेतुः अभयम् । कुतः यतः समं भेदशून्यम् अतोऽभयं द्वितीयाद्वै भयं भवतीति श्रुतेः तत् कुतः यतः प्रतिबोधमात्रं ज्ञानैकरसम् । ननु ज्ञानस्यापि नीलपीताद्याकारेण चक्षुरादिकरणभेदेन च भेदो दृश्यते । न । शुद्धं निर्म्मलम् । ननु दर्शितो विषयकरणोपरागरूपो मल इत्यत आह, सदसतः परं विषयकरणसङ्गशून्यम् । वृत्तेरेव तदुपरागो न ज्ञानस्येति भावः । ननु तथापि ज्ञात्रा सह भेदः स्यात् । न । आत्मतत्त्वम् आत्मनो ज्ञातुः स्वरूपमेव, तत् तु न ततो भिन्नम् । ननु च तन्त्वौपनिषदं पुरुषं पृच्छामीति शब्दबोध्यत्वप्रतीतेः कुतो बोधरूपत्वं तत्राह शब्दो न यत्रेति । आरोपितभ्रमनिवृत्तिकृतकमस्य व्यापारो ननु तद्बोध इत्यर्थः ननु च भवतु नामनिरस्तभेदज्ञानरूपत्वात् विशोकत्वं सुखत्वन्तु नानाकारकसाध्यक्रियाफलत्वात् कथमजस्रसुखत्वं तस्येत्यत आह, यत्र बहुकारकसाध्यः क्रियार्थः उत्पत्त्यादि चतुर्व्विधं क्रियाफलञ्च नास्ति । इन्द्रियैर्ज्ञानांशस्याभिव्यक्तिरिव क्रियाभिरानन्दांशस्याभिव्यक्तिमात्रं क्रियते नोत्पत्त्यादिकमिति भावः । नन्वुत्पत्त्याद्यभावेऽपि मायामलापाकरणेन विकार्य्यत्वं स्यादेव व्रीहीणामिव तुषापाकरणेन इत्याशङ्क्याह माया । अभिमुखे स्थातुं विलज्जमानेव यस्मात् परैति दूरतोऽपसरति ॥ ४७ ॥

तस्मादेवम्भूते भगवति नियमितमनसां कृतार्थानां किमपि कृत्यमस्तीत्याह सध्र्यङ् नियम्येति । सह अञ्चतीति सध्र्यङ् सहचरं मनो यं प्रति नियम्य यस्मिन् स्थिरीकृत्य यतयः यत्नशीलाः कर्त्तो भेदः तन्निरासोऽकर्त्तः तत्र हेतिं साधनं जह्युः त्यजेयुः अनुपयोगात्सन्न्यस्त इत्यर्थः । उपयोगाभावेन साधनानादरे दृष्टान्तः । निपीयतेऽस्मिन्निति निपानं कूपः तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्ज्जन्यरूपेण विराजमान इन्द्रो नाद्रियते तद्वत् इति । यद्वा स्वेनैव राजते इति स्वराट् दरिद्रः स यथा इन्द्रः समृद्धः सन् कर्म्मकारदशायां गृहीतं निपानखनित्रं जहाति तद्वदित्यर्थः ॥ ४८ ॥

एवं तावदजस्रसुखं विशोकं ब्रह्मैव भगवतः स्वरूपम् । तत्प्राप्तानां न प्राप्यं कृत्यं वा किञ्चिदस्तीत्युक्तम् । इदानीं ततः प्राक् सएव सर्व्वफलदाता सर्व्वकर्म्म प्रवर्त्तकश्चेत्याह । स एव श्रेयसां फलानां विभुः दातापि । तत्र हेतुः भावानां ब्राह्मणादीनां स्वभावैः समदमादिभिर्व्विशेषणैर्व्विहितस्य सतः शुभस्य कर्म्मणः यतः प्रवर्त्तकात् प्रसिद्धिः । यद्वा भावानां महदादीनां स्वभावेन परिणामेन विहितस्य सतः कार्य्यस्य प्रसिद्धिः । स एव स्वर्गादीनां दातेत्यर्थः ननु कर्मकर्त्तुर्देहस्य कथं स्वर्गादिफलं स्यात्तत्राह । स्वारम्भकधातूनां भूतानां विगमे वियोगे सति अनुविशीर्य्यमाणेऽपि देहे तत्रस्थं व्योम इव न विशीर्य्यते । यतः अजस्तेन सह न जातः तस्य पुरुषस्य श्रेयसां प्रभुरित्यर्थः ॥ ४९ ॥

अध्यायत्रयस्यार्थमुपसंहरति । सोऽयं ते समासेन संक्षेपेणाभिहितः । तमेवाह सदसत् कार्य्यं कारणञ्च हरेरन्यन्न भवति । ननु हरेस्तदव्यतिरेके तद्गतविकारप्रसङ्गः स्यात् । न । अन्यस्मात् । कारणभूतो हरिः कार्य्याद्व्यतिरिक्त इत्यर्थः ॥ ५० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिन्याख्यतट्टिप्पणी ।

प्रशान्तमिति । क्षुत्पिपासाजरामरणादिषड्भिरहितमित्यर्थः । ननु दर्शितो विषयकरणोपरागरूपो मल इत्यत आहेति । निर्म्मलस्फटिकस्य लोहितपुष्पादिसन्निधानेन लौहित्यादिप्रतीतिस्तद्वदत्रापीति चेत् तर्हि स विषयकरणसङ्गो भवेदित्यर्थः । विषयो रूपादिर्ग्राहकरणं साधनं चक्षुरादि । उपरागः ग्राह्यत्वेन स्वीकारः । तदुक्तम्—

श्रीराधारमणदासगोस्वामिविरचितदीपिन्याख्यटिप्पणी ।

[illegible] इति । वृत्तेश्चक्षुरादिवृत्तेर्दर्शनश्रवणादेर्व्यवहारिकज्ञानस्य उपराग उपरता आरक्तत्वम् । तत्तु [illegible] । उत्पत्त्यादीति । आदिना प्राप्ति विकृति संस्कार्याणां ग्रहणम् । चतुर्विधं क्रियाफलमिति । उत्पाद्यम् आप्यं विकार्यं संस्कार्यञ्चेति क्रियाफलं चतुर्विधम् । तत्र घटं करोति कुलाल इत्यत्र उत्पाद्यं क्रियाफलम् । चक्षुषा रूपं पश्यति इत्यत्र आप्यं क्रियाफलम् । सोमं सुनोति सोमपा इत्यत्र विकार्यं क्रियाफलम् । संस्कारश्च त्रिविधः । तत्र प्राक्तनपुण्यातिशयजन्यः सुखविशेष आद्यः । द्वितीयो मलापाकरणरूपः । तृतीयो गुणाधानरूपः । राज्यं प्राप्नोति धर्मिष्ठ इत्याद्यं संस्कार्यम् । रजको वस्त्रं क्षालयतीति द्वितीयं संस्कार्यम् । रजको वस्त्रं रञ्जयतीति तृतीयं संस्कार्यम् ॥ क्रियाफलञ्च नास्तीति । क्रियाफलत्वाभावे कुतः कारकसाध्यत्वमिति भावः ॥ ४७ ॥ ४८ ॥

स्वारम्भकधातूनां भूतानामिति । स्वारम्भकाणां धातूनां मांसादिकरूपेण परिणतानां पृथिव्यादिमहाभूतानामित्यर्थः ॥ ४९ ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

भवदादयो ये ते सर्वविदोति परमात्मानं देवमायां देवस्य विष्णोर्नियाम्यामतितरंति च किं बहुना भागवतसंगेनतिर्यगपितरिष्यन्तीत्याह अद्भुताः क्रमाः पादविन्यासा यस्य स अद्भुतक्रमो भगवांस्त्रिविक्रमः स एव परायणं उत्कृष्टं प्राप्यं प्रापकमाधारश्च येषां तेषां भागवतानां शीलं शिक्षा वासना येषां ते तथा भूता यदि भवेयुस्तर्हि तिर्यग्जना अपि तरंतीत्यनुषंगः श्रुतेर्थे धारणा येषान्ते मनुष्या ब्राह्मणादयः तिरश्चां श्रुतार्थधारणापि नास्तीति ज्ञापनार्थमिदं ब्राह्मणादयस्तरंतीति तत्र किमुवक्तव्यमित्यर्थः ॥ ४६ ॥

ननुकीदृशंतत्स्वरूपं यद्भवदादयो जानंतीत्यपेक्षायां तत्स्वरूपंचिदचिद्विलक्षणत्वेन विशोध्य तत्स्वरूपानुचिन्तनपराणां स्वर्गाद्यनुष्ठानोपकरणत्याग आर्थिक इत्याह श्लोकत्रयेण शश्व दिति विशोकं दुःखासंभिन्नमजस्रसुखं नित्यानंदमयं यद्ब्रह्मेति विदुः सत्यंज्ञानमनंतं विज्ञानमानंदं विशोको विजर इत्यादयो वेदांता आमनंतितदेवपरमस्य पुंसः परमपुरुषस्य भगवतः पदंस्वरूपं इत्यर्थः ननुकिंविशेषणा वेदांतवेद्यत्वं उच्यते नप्रमाणांतरविषयत्वमित्यत आह जडात्मिका मायाऽभिमुखेऽवस्थातुं इति शेषः विलज्जमाना सती परैति निरोधके मायाकार्याणि मनआदीन्द्रियाणि तत्स्वरूपमवगंतुमसमर्थानीत्यभिप्रायः नकेवलं लौकिक प्रमाणाविषयत्वमेव लौकिकप्रमाणभूतवेदैकदेशपूर्वभागाविषयत्वमपीत्याहशब्दइति पुरुकारकःसाध्यसाधनाद्यनेककारकान्वितः क्रियार्थं क्रियाप्रतिपादकः शब्दः वेदपूर्वभागोपियत्र स्वरूपेनसाक्षाद्बोधकइत्यर्थः सर्ववेदायत्पदमामनंतीति तु सर्वकर्माराध्यंब्रह्मस्वरूप मपर्यवसानवृत्त्याआमनंतीत्येवतात्पर्यंकतपांसि सर्वाणि च यद्वदंती त्युक्तं तपांसि तपः प्रधानां उपनिषद्भागा वदंति साक्षाद्बोधयंतीत्यर्थः ननुजीवस्यापि स्वरूपमजस्रसुखमेवेत्यत आह परमात्मतत्त्वमिति सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्मेतिवाक्यप्रत्यभिज्ञानेन अजस्रसुखस्यानंतत्वेनविशेषितत्वादपरिच्छिन्नदुःखासंभिन्ननित्यसुखस्वरूपत्वं परमात्मन एव स्वरूपमित्यर्थः ननुजीववदस्यापिकर्माधीनसुखदुःखसंबंधः स्यादिति शंकांवारयति शुद्धमिति अकर्मवश्यमित्यर्थः अत एव सदसतो [illegible] परं विलक्षणं अकर्मवश्यता कुत इत्यत आह समं इत्येकरूपमित्यर्थः चिदचिदंतर्यामित्वेनावस्थितस्यापि तत्तद्वस्तुगतदोष[illegible]शादकर्मवश्यतोपपन्नेतिभावः नन्वाम्रादिफलानां ततत्प्रदेशभेदेनाम्लमधुरादिरसवत्सुखापरपर्यायानुकूलज्ञानस्वरूपस्य ब्रह्मणः प्रदेशभेदेन जडरूपता स्यादित्याशंकां वारयति प्रतिबोधमात्रमिति प्रतिबोध एव प्रतिबोधमात्रं मात्रचाक्वापि जडत्वव्यावर्त्ति विज्ञानघन एव ब्रह्म [illegible] ति श्रुतिः मोक्षप्रदत्वमप्यस्यासाधारणो धर्म इत्याह अभयं न विद्यते भयं यस्मात्तदभयं संसारनिवर्तकं इत्यर्थः तत्कुतः शश्वत्प्रशांतं शश्वत्सदाप्रशांतमशनापिपासाद्यूर्मिषट्करहितमतस्तदुपासकानामपि शांतिसंपादकमिति भावः परमं साम्यमुपैति मम साधर्म्यमागता इति श्रुतिस्मृती ॥ ४ ७ ॥

किंच यतः एवं भूतभगवत्स्वरूपचिंतने प्रयतमाना सध्र्यङ् [illegible] सध्र्यङ् सहस्य सध्र्यादेशः जीवसहचरं मनः नियम्य यद्यत्र उक्तस्वरूपेनियतं कृत्वाऽकर्तहेति कृत्यंते छिद्यंते ऽनेन संशया इति [illegible] छिद्यंते सर्व संशया इति श्रुतेः कर्ता छेदने तादितरदकर्तस्वर्गादिफलसाधनं कर्मेत्यर्थः तस्य हेतिं उपाकरणं जहत्यु[illegible] [illegible] स्वराट् वर्षप्रदः इंद्रः निपानखनित्रमिवनितरां पिबन्तियस्मिन्निति निपानं कूपः तस्य खनित्रं खननसाधनमिव स्वर्गाद्यर्थानुष्ठानोपकरणं [illegible] त्यजंतीत्यर्थः ॥ ४८ ॥

ननु स्वर्गादिफलेप्सूनां तत्साधनोपकरणोपादानं [illegible] आह स इति भावस्वभावविहितस्य भावाः ब्राह्मणादिवर्णाश्रमादयः तेषां स्वभावेनानु गुणेन विहितस्य सत्कर्मणो [illegible] फल प्रसिद्धियेनः स भगवान् श्रेयसां स्वर्गादि फलानामपि विभुः प्रभुः तत्फलप्रदातेत्यर्थः अंतरात्मतया ऽवस्थितस्य [illegible] स्वर्गाद्यर्थं कर्मस्वपि प्रवर्तकत्वात्तदाराध्यत्वात्तत्फलदत्वाच्च तद्भजनेनैवाप्स्यतस्वर्गादिफलस्यापि सिद्धे कर्मभिरपि [illegible] इत्यर्थः भगवतः सर्वांतर्यामित्वे शरीरभूतचेतनाचेतनगतदोषस्पर्शमाशंक्याह देहइति स्वधातुविगमे स्वधातूनां स्वदेहारंभकभूतानां [illegible] वियोगे सत्यनुपश्चाद्विशीर्यमाणे देहे तत्रस्थः पुरुषः परमपुरुषः गगनमिव न शीर्यते कुत अजः कर्माधीनोत्पत्त्यादि शून्यः [illegible] [illegible]तनस्यापि प्रदर्शनार्थः चिदचिद्गतदोषास्पृष्ट इत्यर्थः अस्योत्तरार्द्धस्य जीवपरत्ववर्णनं त्वशोभनं कृत्स्नस्यास्य प्रकरणस्य [illegible] मपरत्वेन मध्ये जीवप्रसक्त्याभावाज्जीवस्यापि शरीरद्वारोत्पत्ति विनाशयोर्विज्ञानघन एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति [illegible] भिधानाच्च ॥ ४९ ॥

अध्यायत्रयार्थमुपसंहरति सोयं इति हेनात नारद [illegible] दता कारः विश्वकारणभूतः भगवान् ज्ञानशक्तिबलैश्वर्यादिसंपन्नो वासुदेवः समासेन संग्रहेणतेतुभ्यमभिहितः [illegible] संग्रहमेवाह यत्सदसच्चिदात्मकं वस्त्वन्यदतदात्मकं स्वनिष्ठमिवभाति तद्धरेर्नान्यत्तदात्मकमेवेत्यर्थः हरेर्नान्यदन्यस्तत्[illegible] इति पाठे नान्यदन्यस्मात्सदसच्च यदिति पाठे त्वन्यस्मात्सदसत्त्वलक्षणादपि हरेः सदसदात्मकं नान्यत्किंतु तदात्मकमेवेत्यर्थः ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

अयुकैमुत्यन्यायमाह तेइतियेस्त्रीशूद्रहूणशबराः पापजीवास्तेपिदेवस्यमायांविदंतिसंसारमातितरंतिच किमुताऽस्मदादयइत्यन्वयः तर्हिकिमितिसर्वेनिस्तीर्णाःसंसाराब्धिमूर्वाजातितत्राहयदीति अद्भुतक्रमोविष्णुःसएवपरायणंतस्यशीलंतस्यशिक्षायेषांतेतथोक्ताः अद्भुतं जगत्क्रमतीत्यद्भुतक्रमः अत्रापिकैमुत्यन्यायमाहतिर्यगिति वृंदावनगताः पशुपक्ष्यादयस्तिर्यग्जनाअपिदेवमायांविदंतितरंतिच ये श्रुतधारणास्तेविदंतीतिकिमुवक्तव्यमित्यन्वयः ॥ ४६ ॥ अद्भुतक्रमः किंलक्षणकइति तत्राह शश्वदिति यतशश्वत्सदैकप्रकारं प्रशांतमकृष्टपूर्णं सुखमद्वितीयत्वादभयं अद्वितीयाद्वैभयंभवतीतिश्रुतेः यच्चप्रतिबोधमात्रंनिर्दोषज्ञानस्वरूपं मात्रशब्दोऽवधारणार्थः प्रतिशब्दोमुख्यार्थः अतएवशुद्धंरागादिदोषरहितं यच्चसमंपरत्वादिपरममहत्त्वंतेषुपदार्थेषुनार्तरकेणगुणाविधुरं वैषम्यादि रहितंवा सदसतःपरंऽव्यक्ताव्यक्तजगतोविलक्षणमात्मतत्त्वमव्यक्तादिसर्वप्रपंचाहंभावरहितं पुरांणबहूनिकारकपदानिकर्तृकर्म क्रियावाचीनियस्मिन्संतिमतथा अग्निष्टोमाद्यनेकक्रियार्थः शब्दोवाक्यलक्षणानंतवेदाख्योयत्रयस्मिन्साकल्येनवाचकत्वेननवर्तते तदुक्तं अव्यक्तायमहंमामादात्मतत्त्वं हरिःस्मृतः अशब्दश्चाप्रसिद्धत्वाच्छांतःपूर्णसुखत्वतइति हरिःस्वयंयामाधीनश्चेत्तदुपासकाःकथंतांतरंतीति तत्राह मायेति मायासंसारकारणंप्रकृतिर्यस्याभिमुखेस्थातुंविलज्जमानायस्मादुपासकंऽयश्चपरत्यैपसरतितद्दृष्टिमार्गविहायवर्ततइति ॥ ४७ ॥

यच्चसर्वगुणपूर्णत्वात्ब्रह्मात्यजस्रसुखंनिरंतरसुखमितिविदुरतीतानागतवर्तमानाःब्रह्मादयः श्रवणादिभिर्यतमानत्वाद्यतयःसाधनपरिपाकेनयत्सम्यग्ज्ञानेशाम्य इंद्रःसुधांप्राप्यनिपानखनित्रंकूपखननसाधनकुद्दालादीच यमेनाधिकृतोलोकोनरकाख्यस्तस्यहेतुंसंसारंजहास्यतीति परमस्यपुंसोनारायणस्यपदंस्वरूपंतद्वैतादृग्लक्षणंहीत्यन्वयः इंद्रईश्वरोधनवान्सुधाममृतंजलंप्राप्येतिवा ॥ ४८ ॥

इदानीमेवंविधभगवज्ज्ञानाधिकारीसत्पुरुषइत्याह सईति नकेवलंधर्मादिसर्वश्रेयसांविभुः अपितुफलदाताच अधर्मादिसर्वाश्रेयसामपीतिवाभगवाननादिकालमारभ्यहरिप्रमादेनपरिवृद्धेनभावस्वभावेनभक्तिस्वभावेनविहितस्यानिर्मितस्यास्यमतोजीवराशेःप्रसिद्धः करतलामलकवत्प्रत्यक्षः स्यादितियतोतोऽस्मात्विकप्रकृतिजीवराशिस्तादृशोज्ञानाधिकारी एतेनोक्तार्थज्ञानिप्रत्यक्षंप्रमाणमुक्तंभवति भावोभक्तिःप्रमाणंच्चप्रावण्यमपिचादरइतितत्राह देहइति स्वारंभकाणांपृथिव्याधिधातूनांविगमंविनाशलक्षणंविश्लेषसतिदेहतुविशीर्यमाणेस्वकारणेषुविलीयमानेसतितत्रदेहस्थःपुरुषःस्वकर्माद्यनुसारेणपुराणिमरनूस्वतोऽजोजननविधुरोपिकेवलंदेहाभिमानेनजायमानोयथोदहस्थितव्योमनशीर्यते तथाजीवोनविशीर्यते अतोदेहस्यैवोत्पत्तिमरणधर्मवत्त्वाच्चतनस्यानित्यत्वादुर्विचतस्यस्यप्रसिद्धः परमइति अनेनपरमात्मापिव्याख्यातः तत्रजीववदभिमाननिमित्तजन्माविमानापिनभवतीतिविशेषः अतएवदष्टांतनहरेःशश्वत्प्रतिबोधादिरूपत्वंनविघटनीयमितिभावः ॥ ४९ ॥

देवदेवनमस्तुभ्यमित्यारभ्यप्रश्नप्रतिवचनाभ्यामुक्तमर्थमुपसंहरति सोयमिति समासेनसंक्षेपेण एतावज्ज्ञानंसर्वथानविस्मर्तव्यमितिभावेनाह•हरेरिति चशब्दएवार्थ यत्सदसत्कार्यकारणात्मकंजगत्सर्वमस्मादन्यस्माद्विलक्षणाद्धरेर्नान्यद्भिन्नं एतदुक्तंभवति स्वतोहंगर्भिमभविन्नवते स्वतंत्र्याभावेनाभिन्नमिवोच्यते नस्वतोभेदाभावात्तस्मात्सहरिः स्वतंत्रोऽन्यदस्मदादिकंसर्वंतदधीनमितिविजानीहीति तदधीनसत्तादिमत्त्वात्तदित्युच्यतेतत्रकिंमानमित्येतच्चोद्यं सत्तादियत्स्वतोविष्णोस्तस्मादन्यः ससर्वतइत्यादिनापरिहर्तव्यं ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ श्रीभगवत्स्वरूपं विशेष्याकारेणोद्दिशति शश्वदिति सार्द्धेन । अयमर्थः—सर्वतो बृहत्तमत्वाद्ब्रह्मेति यद्विदुः, तत् खलु परमस्य पुंसो भगवतः पदमेव, निर्विकल्पतया साक्षात्कृतेः प्राथमिकत्वात्, ब्रह्मणश्च भगवत एव निर्विकल्पसत्तारूपत्वात्, विचित्ररूपादिविकल्पविशेषविशिष्टस्य भगवतस्तु साक्षात्कृतेस्तदनन्तरजत्वात्, तदीयस्वरूपभूतं तद्ब्रह्म तत्साक्षात्कारास्पदं भवतीत्यर्थः । निर्विकल्पब्रह्मणस्तस्य स्वरूपलक्षणमाह प्रतिबोधमात्रमिति अजस्रसुखमिति च जडस्य दुःखस्य च प्रतियोगितया प्रतीयते यद्वस्तु यच्च नित्यं तदेकरूपं तद्रूपमित्यर्थः । यतः आत्मतत्वं सर्व्वेषाम् आत्मनां मूलं, आत्मा हि स्वप्रकाशरूपतया निरुपाधिपरमप्रेमास्पदतया च तत्तद्रूपेण प्रतीयत इति । अथ तस्य सुखरूपस्याजस्रत्वे हेतुमाह । शश्वत् प्रशान्तं नित्यमेव क्षोभरहितं तद्वदभयं भयशून्यं विशोकं शोकरहितञ्चेति । न च सुखरूपत्वे तस्य पुण्यजन्यत्वं स्यादित्याह शब्दो न यत्रेति । यत्र क्रियार्थो यज्ञाद्यर्थः पुरुकारकवान् शब्दो न प्रवर्त्तत इत्यर्थः । किन्त्वौपनिषदं पुरुषम् इत्यादिरीत्या केवलमुपनिषदेव प्रकाशिका भवतीत्यर्थः । पुनः सुखरूपत्वेऽपीन्द्रियजन्यत्वं व्यावर्त्तयति शुद्धमित्यादिना । तत्र शुद्धं दोषरहितम् । समम् उच्चावचताशून्यम् । सदसतः परं कारणकार्य्यवर्गादुपरि स्थितम् । किं बहुनेत्याह माया च यस्याभिमुखे यदुन्मुखतया स्थिते जीवन्मुक्तगणे विलज्जमाना परैति पलायते ततो दूरं गच्छतीत्यर्थः । अत्र च शुद्धमित्यादिना यथा वैलक्षण्यं दर्शितं तथैव ज्ञेयम् । जीवस्वरूपस्य ह्यविद्यास्पर्शनात् क्षोभभयशोका भवन्ति सुखचिद्रूपत्वञ्चाच्छाद्यते ततः शुद्धत्वं साम्यञ्च गच्छति कर्म्मकाण्डविषयत्वञ्च जायते । यत् पुनर्बृहत्त्वात् बृंहणत्वाच्च ब्रह्मत्वं सर्व्वतः परत्वं परमार्थत्वञ्च तत्तस्य स्वत एव नास्ति । तादृशशक्त्यभावान्मायाभिभावकत्वं च नास्त्येव प्रत्युत तदभिभाव्यत्वमेव स्यादिति ॥ ४७ ॥

तदेवं केवलं विशेष्याकारं दुर्गमत्वेनोद्दिश्य तदादिसर्व्वसुगमताकृन्मयेन स्वरूपशक्तिविशिष्टाकारेण सुगमत्वेन तदुद्दिशति सध्र्यगित्येकेन । यं प्रति यस्मिन् सध्र्यक् मनो नियम्य स्थिरीकृत्य यतयः पूर्वं सन्न्यासमार्गे कृततादृशज्ञानयत्ना अपि अकर्त्तहेतिम् अभेदज्ञानरूपं मोक्षसाधनं जहाति तत्कृपाप्राप्ततादृशज्ञानाद्यनन्तगुणाभयतञ्चापि सम्पन्नाः । आत्मारामाश्च मुनय इत्यादेर्महागुणत्वादिति भावः तदेव दृष्टान्तेन दर्शयति स्वराडिवेति ॥ ४८ ॥

स एव हि भगवान् श्रेयसां पञ्चविधमुक्तीनामन्येषाञ्च पुरुषार्थानां विभुः प्रदाता । यतो भगवतः सकाशात् अस्य भक्तजीवस्य भक्तिस्वभावयोग्यो यो योऽर्थस्तस्य सतस्तत्स्वरूपवैभवे विद्यमानस्यैव प्रसिद्धिः प्रति प्राकट्यं भवतीत्यर्थः । ननु तस्य जीवस्य मायावैभवोपाधिस्तदा किं नश्येत् नाशोऽपि वा जीवत्वं किं तिष्ठेत तत्राह देह इत्यर्द्धेकेन देहः स्थूलसूक्ष्मात्मकः । भ्रियन्त इति धातवस्तत्त्वानि । तस्मिन् देहद्वये तेषां कारणरूपतत्त्वानां विगमो नाशो यस्य तथाभूते सत्यपि पुरुषो जीवः न विशीर्य्यते न नश्यति । अनाशे हेतुः अज इति । अथवा शश्वत् प्रशान्तमित्यादिकं वैकुण्ठवैभवस्यैव प्रतिपादकम् । भगवतः परमपदमिति तत्रैव मुख्यार्थत्वात्, भगवत्सन्दर्भे तस्य तादृशत्वेन दर्शितत्वात् तस्मै स्वलोकमित्यादौ दर्शयिष्यमाणत्वाच्च ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

[illegible] सोऽयं [illegible] अभिहितः । कथम् । तटस्थलक्षणेनैवेत्याह । सत् कार्यं स्थूलम् असत् अशुद्धजीवजगदाख्यं चेतनाचे- [illegible] शुद्धजीवप्रधानेत्यं चिदचिद्वस्तु च यत्, तत् सर्वं हरेरन्यन्न भवति सूक्ष्मस्य तच्छक्तिरूपत्वात्, स्थूल- [illegible] इति भावः । जगतस्तदनन्यत्वेऽपि शुद्धस्य तस्य तद्दोषसाङ्कर्यं नास्तीत्याह अन्यस्मादिति ॥ ५१ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

तेषां फलमाह तेवैविदंत्यतितरंति चेति तां मायां ज्ञात्वा तामेवतरंतीति अस्मदादीनामपि तरणोपायमाह स्त्रीशूद्रहूणशबरा अपीति तामसेषु स्त्रियः सात्विका शूद्रो राजसः हूणास्तामसः शबरादयस्ततोऽप्यधमाः पापेनैव जीवंतीति पापजीवाः एतेविदंति तरंति च यदि अद्भुतक्रमस्य भगवतः परायणाः सेवकाः तेषां यदि शीलेन शिक्षिता भवेयुः अद्भुतक्रमः पादविक्षेपः क्रियाशक्तिर्यस्येति भगवतो मायेत्यतः परायणास्य यस्य कस्य चित्सुलभंतस्य परायणास्तु क्षणमात्रमपि अन्यचित्ता न भवंति अन्यथा अद्भुतक्रमत्वाद्भगवान- न्यत्र गच्छेत् तेषामपि वचनमात्रेण शिक्षकं प्रयोजकं किंतु शीलेन सह यथा ते भगवत्परां तथाचेत्तदाज्ञया तेऽपि भवंति किंच क्रिया- दिषु न संभावना कर्त्तव्या यतस्तिर्यग्जना अपि मुक्ता भवंति यथा नामादि पाठेनन शुकादयः श्रुतधारणाः श्रुतार्थो लोचनसमर्थाः तस्मादंशतो ज्ञाने सर्व एवाधिकारिणः सर्वथा ज्ञानेन केऽपि भगवद्भक्तसंगाभावेपि तुर्नकिंचिज्जानंति एवमेकैकशो धारणास्य स्वरूप मुत्पत्त्याविनिरूप्य जितं जितं ॥ ४६ ॥

स्थानमपोह्य धारयेदिस्वस्यार्थं उत्पत्त्या विचारयति शश्वदिति द्वाभ्यां स एव भगवदंशो स्वाधीनो भवति यस्त्वात्मत्वेन स्वयमेव स्फुरति अन्यथा बुद्ध्या व्यवस्थापितः तदपगमे अपगच्छेत् पदार्थानां स्वरूपं एतदेव तत्र प्रथमं पादस्वरूपे विचारिते अन्यत्स्वयमेव ज्ञास्य तीति लक्षणेन प्रथमं पादस्वरूपं निरूपयति ॥ ४७ ॥

तद्वैपदं भगवतः परमस्य पुंस इति दशधर्मा भगवतश्चरणारविंदे निरूपिताः दशलीलारूपाः तथा सति प्रत्येकावयवे दशलीला उक्ता भवंति तत्र भगवतश्चरणारविंदं कीदृशमित्यपेक्षायां यत्सर्वदातच्चरणारविंदं यत्तु कदाचित्तत्र अनेन कालेन भगवत्स्वरूपं निर्द्धारितं कालापरिच्छिन्नं तदिति यत्कालेन परिच्छिन्नं तत्प्रशांतं गुणत्रयक्षोभरहितं सत्वस्यापि दयादिना क्षोभात् तदाभावायप्रशब्दः एवं प्रमेय प्रक्रियोः अपरिच्छेदो निरूपितः इदानीं सर्वपरिच्छेदकस्य कालस्य अत्रापरिच्छेदकत्वमाह अभयमिति भयरहितं एवं संसारधर्माभावनि रूपणे दोषाभावमुक्त्वा स्वरूपमाह प्रतिबोधमात्रं शुद्धं सममिति प्रतिबोधमात्रं अनुभवरूपं मात्रशब्देन प्रमातृप्रमाणप्रमेयसंबंधो निवारितः त्रितयसंबंधरहिता या प्रमा तद्भगवत्पदमित्यर्थः मात्रपदेनैव शुद्धताया उक्तत्वात् शुद्धमानंदरूपं समं सद्रूपं एवं सच्चिदानंदरूपमित्युक्तं भवति अस्यपदस्य सर्वव्यवहारातीतत्वं वदति चतुर्भिर्विशेषणैः व्यवहारो हि [illegible] भवति प्रपंचत्वेन आत्मीयत्वेन शब्दत्वेन शब्दार्थत्वेन च तत्र व्यवहारातीतत्वमाह सदसतः परमिति कार्यकारणभावापरं [illegible] आत्मीयो न भवतीति आत्मव्यवहारोपि नास्तीत्याह आत्मनः सत्वं परमार्थस्वरूपं व्यवहारस्तत्कृतः तदन्यस्मिन् भवति आत्मनः [illegible] व्यवहारः शाब्दिकं व्यवहारं निराकरोति शब्दोनयत्रेति भगवत्पदं कर्मत्वाद्यभावात् नकारफलत्वं अक्रियारूपत्वात् [illegible] अनुभयरूपत्वात्प्रत्ययार्थत्वं अनेनशब्दे प्रधानरूपत्वा- भावेनामाख्यातार्थत्वाभावात् उपसर्गनिपातार्थत्वं दूरादेव निवारितं [illegible] क्रियार्थ इति नामाख्यातयोः संबंधकथनाद्वाक्यार्थोपि नभवतीत्युक्तं भगवदाज्ञायामायाव्यवहारत्वं जीवानामिव [illegible] व्यवहार्यत्वं स्यात् तदपि नास्तीत्याह मायापरेति दूरा- देवागच्छति तस्यागमने हेतुः विलज्जमानेति इयं च हि [illegible] भगवत इयंमोहिका अत एव तस्याजनव्यामोहकत्वं भगवान् जानातीति ये वा अभिमुखा चकारादनुचराश्च [illegible] सर्वैव विलज्जमाना विशेषतो लज्जांशतोपि कार्याकरणं द्योतयति एवं दशभिर्विशेषणैः भगवत्पदं लक्षयित्वा तस्य [illegible] यद्विदुरिति यद्भगवत्पदं सर्ववेदांतविचारका ब्रह्मेति विदुः तस्मिन्नेव ब्रह्मणि ईश्वरत्वेन कश्चिद्वदेच्चेत्तदा स भगवान् [illegible] स एव नियामको भवेत् स परमः तत्पदं स एव चेद्ब्रह्मोक्ता तदा पुमान् एवं विचारेण ब्रह्मविपदपि ब्रह्मेति तद्वदंति एवं [illegible] तस्य सहजं फलमाह अजस्रसुखं विशोकमिति परमानंदो दुःखाभावश्च फलं तदुभयरूपं तदित्यर्थः तत्रसाधनान्याह [illegible] संम्यगंचतीति सनः तदात्मानं संसारं अंचति तादृशं मनो नियम्य तद्भावं तस्य दूरीकृत्येत्यर्थः इदमांतरं साधनं [illegible] तदा यतय इति एवं दोषाभावप्रभृतिफलपर्यंतपदंनिरू- प्याविजितार्थो विचारितः जितं जितं स्थानमपोह्येति [illegible] जितानां स्वाधीनीकृतानां पादानां न परित्यागः यथासति पूर्व प्रयास वैयर्थ्यापत्तेः किंतु जितं स्थानं भगवच्चरणारविं[illegible]समुदायं अपोह्यदूरीकृत्येत्याह स साधनस्य पदस्य जितत्वा त्तत्पदं स्थापनीयं साधनं त्यक्तव्यमित्यर्थः नन्वस्य [illegible] तत्राह धारयेत्पर परमिति अग्निमावयवस्वाधीनीकरणार्थं उत्तरोत्तरसंबंधिनां धारणामिति दृष्टांतेन स्पष्टमिति [illegible]मिति यथा स्वराट् स्वर्गाधिपतिः मेघादीनां स्वामी निपानख- नित्रं कूपखननसाधनकुद्दालादित्यजति एवं भगवत्पद[illegible]पि साधनानि पदमाहात्म्यात् महाफलत्वेन पदे संपन्ने पूर्वं मज्ञानात् क्षुद्रपदार्थसाधकानि सर्वाणि संगृहीतानि [illegible] स्वराट् साधकानि गृह्णात्येव एवमुत्तरत्र सर्वांशफले, इन्द्रोभूत्वा परमैश्वर्यं प्राप्य सर्वमेव सृजतीति भावः ॥ ४८ । [illegible] निरूपितस्य भगवत्स्वरूपस्य उत्पत्त्या विचारमुक्तासाधनाध्याये अकामः सर्वकामोवेति वाक्ये तदेवस्वरूपं [illegible] साधनत्वेनोक्तं तमेवमत्रोत्पत्त्या विचारयति सश्रेयसामपि विभुरिति सवस्तुतः स्वतः परमपुरुषार्थरूपः [illegible] कश्चित्कामयते स्वर्गादिकमपि तदपि प्रयच्छेत यतः सर्वेषामपि श्रेयसां फलानां अयमेव विभुः समर्थउत्पादयितुं दातुं च [illegible] परमानंदरूपोपि षड्गुणान्बिभर्ति अतः तत्रहेतुमाह यतः अस्य जगतः भावस्वभावाविहितस्य सतो भगवतः [illegible] आदिः उत्पत्तिः सर्वमेव हि जगत्द्विरूपं एकं भावविहितं अन्यत्स्व भावविहितं भावो धात्वर्थः क्रियातदभिव्यंग्येष तेन [illegible] जगत् सामान्यक्रिया भावः यथोत्पत्तिः तथादेहनाशेपि न तस्य नाशः तदा च यदा कदाचित्तस्य फलं फलमेव दे[illegible] जायेते तस्योत्पादकाये धातवः संस्कृतभूतावयवाः अस्मादयस्तु तदु- पष्टंभकाः तेहिधातवः स्वसमेतं फलं जनयित्वा कृतार्थाः [illegible] तदा तैः सहजातो निवर्तते तथा यस्मात्मादेहेनसह जातः यथा देही धातुभिः तस्मात्फलेन काप्यनुपपत्तिरिति उ[illegible] ॥ ४९ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

सोऽयमितेऽभिहित इति मया एतावता कालेन भगवानेव निरूपितः दशविधलीलायुक्तः भगवत्त्वेन षड्गुणाः विश्वभावकत्वेन चत्वारः उत्पत्त्या मोक्षश्च धर्मादयो यतैरेव विहितविश्वं भाव्यते एवं विश्वभावनो भगवद्रूपतात्रता प्रबंधेन निरूपितः अवशंकत्व संपादितं मिति भावः विस्तरेण निरूप्य संक्षेपेण निरूपयति बुद्धिसौकर्यार्थं समासेनेति यावानर्थो मयाविस्तरेण निरूपितः तस्यार्थं समासः संक्षेपः भगवानेव सर्वः भगवत एव सर्वमिति उपचारव्यावृत्त्या निरूप्य संक्षेपेण निरूपयामित्यर्थः निषेधमुखेनाह हरेः नान्यत् हरिरेव सर्वं हरेरन्य[illegible] सर्वं नत्वन्यस्मात् सदसद्रूपमपरं च चकारात्कालादिकमपि यदिति प्रसिद्धं ॥ ५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

न केवलमेते महान्त एव अपि तु दीनहीना अपीत्याह ते वै इति । अद्भुत उत्तमाधमविवेचनशून्यः क्रमः पादन्यासः कृपासम्बन्धी यस्य तस्य भगवतः परायणा ये भक्तास्तेषां शीलशिक्षाः तच्छिष्या भूत्वा शीलं शिक्षन्ते ये ते । तिर्यग्जना हंसगजशुकशारिकादयः । गुरुमुखात् श्रुतं नामरूपादिकं शीघ्रं ये धारयन्ति मनुष्यास्ते पुनः किमुत ॥ ४६ ॥

ननु ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति अधिकारिविशेषेषु परमेश्वरस्त्रिरूपतया भातीति । तत्र आपीयतां कर्णकषायशोषा नित्यादिना शास्ता भविष्यति कलेर्भगवान् युगान्ते इत्यनेन भगवान्शेषविशेषतया उक्तः, तदुपासकाश्च येषां स एव दययेदित्यादिनाकि-ञ्च श्रुतधारणा ये इत्यन्तेनोक्ताः । सम्प्रति परमात्मा ब्रह्म चोच्यतामित्याकांक्षायामाह शश्वदिति । सदसतः उत्तमाधमस्य ब्रह्मादिस्तम्ब-पर्य्यन्तस्य जीववृन्दस्य परमात्मतत्त्वं सममेकरसमेव । तथा शश्वत् सदा प्रकर्षेण शान्तं, तस्य गुणावशात् शान्तघोरमूढस्यापीत्यर्थः । शश्वत् प्रशब्दाभ्यां सत्त्वगुणकार्य्यः शमो व्यावृत्तः । तथा अभयं, तस्य सभयस्यापि । प्रतिबोधमात्रं, तस्याज्ञानस्य ज्ञानवतोऽपि प्रतिमा त्रशब्दाभ्यां सत्त्वगुणकार्यो बोधो व्यावृत्तः शुद्धं तस्या शुद्धस्यापि एवं परमात्मानमुक्त्वा ब्रह्मा ह यत्र नानाकारकधानपि तथा क्रियया सह अर्था वाच्यलक्ष्यव्यङ्ग्या यत्र नादृशोऽपि शब्दो न प्रभवति तद्ब्रह्म ननु ब्रह्मशब्देनैव तद्रूपं अथच शब्दो न यत्रेति निषेध्यासि च तत्राह मायेति । यस्याभिमुखं माया विलज्जमाना सती परैति पृष्ठदेशमुपैति तस्य भगवतः पदं अप्राकृत विचित्ररूपगुणादि विविधविशेषवतोऽपि तस्य प्राथमिकस्फूर्त्तिलक्षणविषयो निर्विशेषं स्वरूपम् । मदीयं महिमानंच परब्रह्मेति शब्दितमिति भगवदुक्तेस्तदीयं व्यापकत्वलक्षणं बृह-त्वमेव विशिष्टं ब्रह्म । अयं भावः—शब्दस्याकाशगुणत्वेन मायिकत्वान्मायावत् अपि तदभिमुखे स्थातुमशक्तेरमायिकरूपगुणादिमन्तं भगवन्तमपि शब्दोऽभिधातुं यद्यपि न प्रभवति, तदपि मेघश्यामः कनकपरिधिः पङ्कजाक्षोऽयमात्मेत्यादयः शब्दाः मेघकनकादिप्राकृतवस्तु सादृश्यारोपेणैव लोकचित्तं यथाकथञ्चित् तत्र प्रवेशयन्ति लोकश्च चित्तेकाग्र्येणापि वस्तुतोऽस्पृष्टरूपतद्रूपाभासोऽपि भगवन्तं प्रभुमहं ध्यायामीत्यभिमन्यमानो हृष्यति, भगवानप्यपारकृपातरङ्गवशादेवानेन भक्तेनाहं ध्यात एवेत्यभिमन्यते अभिमत्य च तं भक्तं स्वचरणा-न्तिकं सेवार्थमानयतीति भगवत्स्वरूपस्य शब्दगम्यत्वं तत्कृपयैव सिद्धं, ब्रह्मस्वरूपस्य तु प्राकृताप्राकृतविशेषराहित्यात् कथं शब्दगम्य-त्वमस्त्विति शब्दो न यत्रेत्युक्तम् । प्रवृत्तिनिमित्तस्य वस्तुधर्मस्य जात्यादेरभावात् यत्र क्रियाकारकवान् शब्दो न प्रभवति तद्ब्रह्मेति ब्रह्मशब्दस्य पृथक् सङ्केत एवायं कृतः । अतः शब्दगम्यत्वाभावेऽपि शब्दगम्यस्य भगवतो निर्विशेषं स्वरूपं तद्ब्रह्मेति भगवत्सम्बन्धित्वे-नैवोक्ते सति तत्र लोकचित्तप्रवेशः नान्यथेति भङ्ग्या ब्रह्मणोऽपि शब्दगम्यत्वमुक्तम् । इत्थमेव श्रुत्यध्यायादौ व्याख्यास्यत इति । तथा सजस्रमेव सुखं यस्मात्, विगतो भवति शोको यस्मात् तदिति तस्य सुखरूपत्वे विशोकत्वे च कैमुत्यमानीतम् ॥ ४७ ॥

परमात्मनो ब्रह्मणश्च उपासकान् सामान्याकारेणाह । सह अध्रुवीते सध्र्यक् सहचरं मनः यं परमात्मानं यत् ब्रह्म च प्रति नियम्य यस्मिन् स्थिरीकृत्य, शर्मेति पुंस्त्वमार्षं, यतयो यत्नशीला योगिनः संन्यासिनः च कर्त्ता भेदस्तदभावोऽकर्त्तः तत्र हेतिं साधनं जह्युरुस्य जेयुः अनुपयोगात्त्याज्ञिरयन्त इत्यर्थः । उपयोगाभावेन साधनानादरे दृष्टान्तः । निपीयतेऽस्मिन्निति निपानं कूपस्तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्जन्यरूपेण राजमान इन्द्रो नादत्ते तद्वत् । यद्वा स्वेनैव राजत इति स्वराट् दरिद्रः यथा इन्द्रः समृद्धः सन् कर्म्म-कारदशायां गृहीतं निपानखनित्रं जहाति तद्वदित्यर्थः । भगवद्भक्तास्तु स्वव्यप्रासौ साधने द्विगुणितादरा भवन्तीति तेऽत्र व्याख्यायां न प्रवेशनीयाः ॥ ४८ ॥

किञ्च परमात्मोपासकानां ब्रह्मोपासकानामन्येषाञ्च भगवन्तं विना न फलसिद्धिरित्याह । स भगवानेव श्रेयसां मोक्षस्वर्गादीनां विभु-र्दाता च अतो योगिज्ञानिकर्म्मिभिः प्रतिस्वफलसिद्ध्यर्थं भगवद्भक्तिः कर्त्तव्या । किञ्चास्य भक्तजीवस्य भावा दास्यसख्यादयस्तत्स्वभा-वेन विहितस्य सतः उत्तमसाधनस्य समुचितश्रवणकीर्त्तनादेर्यतो भगवत एव सकाशान्न तु परमात्मनो नापि ब्रह्मतः प्रकृष्टा सिद्धिरिति । भगवद्भक्तैस्तु स्वप्रेमफलसिद्ध्यर्थं योगज्ञानादिकं न कर्त्तव्यमिति भावः । भक्तियोगज्ञानादिकं साधनंप्रतिस्वसाध्यवस्तूत्पादने याव-दसमर्थं तन्मध्य एव देहभङ्गे सति कीदृशं स्यात्तत्राह । स्वधातुविगमे स्वारम्भकधातूनां भूतानां विगमे वियोगे सति अनु अनन्तरं विशी-र्य्यमाणेऽपि देहे पुरुषो जीवः व्योमेव देहस्याकाशमिव न विशीर्य्यते । यतोऽजस्तेन देहेन सह वस्तुतो न जात इत्यर्थः । तेन च भक्ति-ज्ञानादिवासनायाः समुचितस्थाने पुनरपि समुचितं देहं धृत्वा कृतैः साधनैः सिद्ध्यति । यदुक्तम्—यतते च ततो भूयः संसिद्धौ कुरुनन्द नेत्यादि ॥ ४९ ॥

अध्यायत्रयस्यार्थमुपसंहरति सोऽयमिति । संक्षेपेण भगवानेवोक्तः । [illegible] प्रकारैर्वर्णित आह । सत् कार्यं समष्टिव्यष्ट्यात्मकं जगत्, असत् कारणं जीवा माया च, तत् सर्वं हरेरन्यन्न भवति, जीवमाययोः शक्तित्वाच्छक्तिशक्तिमतोरभेदात् । शक्तिकार्यस्य शक्त्यनन्यत्वा-दिति भावः । हरेः कथम्भूतात् सदसद्भ्यामन्यस्मात् । तयोः शक्तोरुत्वदस्य [illegible] अभावात्सम्बन्धाभावमिति भावः भागवते द्वैतमेवाद्वैतमिति सर्वत्राग्रेऽपि द्रष्टव्यम् ॥ ५० ॥

इदं भागवतं नाम यन्मे भगवतोदितम् ।
संग्रहोऽयं विभूतीनां त्वमेतद्विपुलीकुरु ॥ ५१ ॥
यथा हरौ भगवति नृणां भक्तिर्भविष्यति ।
सर्वात्मन्याखिलाधारे इति संकल्प्य वर्णय ॥ ५२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

ते सर्वे देवस्य विष्णोर्मायां विदंति अतितरंति च चकारेण देवं विदंति ये तु विष्णोर्मायां शरीरपर्यंतां न विदंति तेषां श्वसृगालभक्ष्ये ममाहमिति धीनभवतीति भावः किंच भागवतसंगेन सर्वे पि विदंति तरंति चेत्याह स्त्रीत्यादिनास्त्र्यादयः तिर्यंञ्च अ अद्भुताः क्रमाः पादविन्यासा यस्य भगवतस्तत्परायणा भागवताः तच्छीले शिक्षा येषांते तथा यदि भवंति तर्हि तेपि विदंत्यतितरंति चेत्यर्थः ये श्रुत धारणाः श्रीगुरुमुखात् श्रुते परमात्मतत्वे धारणाचित्तैकाग्र्यं येषां ते तथा भूताः विदंति तरंति चेति किमुत वक्तव्यम् ॥ ४६ ॥

ननु ते वै विदंतीत्यादिशब्दै रुक्ताः क्षेत्रज्ञाः अहं प्रत्ययेन भोक्तृत्वादिना च वेदितव्याः देवमायाच भोग्यत्वादिनोपलभ्यते देवादिशब्दै रुदाहृते परमात्मतत्वे किंप्रमाणं कीदृशं च तादित्यतः परमात्मनि प्रमाणंचिदचिद्विलक्षणं परमात्मस्वरूपं च वदन् प्रधानकारणवादं अम्नायस्य क्रियार्थत्वमिति जैमिनिमतं च निराकरोति शश्वदिति द्वयेन यत्राभिमुखे पृथक् स्थातुं विलज्जमाना माया प्रकृतिः परेति पराङ्मुखी भवतिशक्तेस्तद्वतः पृथक्स्थित्यभावात् प्रकृतेर्जगत्कारणत्वस्य तु काकथेति भावः यत्र यस्मिन्प्रतिपाद्ये सति पुरुकारकवान् क्रियांगभूतवद्युयजमानाविकारकवाचकोपि शब्दः वेदः क्रियार्थो न भवति विवित्सोपयोगितया परमात्मपरत्वात् तदा कारकगंधस्पर्श वर्जितः उपनिषद्रूपः शब्दः क्रिया र्थो न इति किंपुनर्वक्तव्यम् तस्य साक्षात्परमात्मा गुणस्वरूपपरत्वात् सर्वे वेदा यत्पदमामनंति तंत्वौपनिषदं पुरुषं पृच्छामि वेदैश्च सर्वैरहमेव वेद्यः तत्तुसमन्वयात् इत्यादिश्रुतिस्मृतिसूत्रेभ्यः तद्वेदप्रमाणकं मात्मतत्वम् आत्मा वा अरे द्रष्टव्य इत्यादिश्रुतिप्रोक्तं परमात्मतत्वम् सर्ववेदवेद्यत्वे हेतुमाह सममिति सर्वात्मभूतमित्यर्थः सदसतः स्थूलसूक्ष्मरूपाद्चेतनवर्गात्परमुत्कृष्टम् बोध्यम् तत्रहेतुमाह प्रतिबोधमात्रमिति प्रतिबोधः ज्ञानं मात्रा गुणो यस्मिन् तद्ज्ञानगुणकमित्यर्थः स्वरूपतोपि ज्ञानं सत्यं ज्ञानमनंतंब्रह्मेति श्रुतेः अचिद्विलक्षणयमुक्त्वा काचिद्विलक्ष्यण्यं तस्याह न विद्यते संसारभयं यस्मात्तदभयं मुक्तोपसृप्यमित्यर्थः शुद्धं प्राकृतदोषास्पृष्टम् यतः शश्वत्सदा प्रशांतम् स्वानंदैकराशिभूतम् ॥ ४७ ॥

कथंभूतम् अजस्रसुखं नित्यसुखम् विशोकम् विशोको [illegible] तेः इत्येवं भूतमात्मतत्वम् बृहति बृंहयति तस्मादुच्यते परं ब्रह्मेत्याद्याः श्रुतयः ब्रह्मेति यद्विदुस्तद्वैनिश्चयेन परमस्य [illegible] स्य भगवतः षडैश्वर्यसंपन्नस्य पदं स्वरूपम् यतयः आवृत्तिरसकृदुपदेशादिति सूत्रकाराज्ञया मोक्षसाधनावृत्तियत्रपरा [illegible] सहांचतीति सध्र्यङ्सहस्य सध्र्यादेशः जीवसहचरं मनःनियम्य परमानंदलक्षणभगवत्साक्षात्कारहेतुभूतां ध्याननिष्ठां प्रा[illegible] कृत्यंतेछिद्यंते सुखानि अनेनेति कर्तः क्लेश प्रतिच्छेदने तद्विपरीतः स्वर्गादिसुखलेशः अकर्तः तत्रहेतिं साधनं कर्मेत्यजेयुरि[illegible] र्याधिकारे प्राप्ते सति पदार्थलेशसाधनाभावे दृष्टांतः स्वराट् स्वयमेवराजमानोतिदरिद्रः इंद्रः सन् निपीयतेऽस्मिन्नि[illegible] य खनित्रं खननसाधनमिव ॥ ४८ ॥

परमानंदसाधनं क्षुद्रानंदसाधनं कर्मेत्युक्तं तदुभयं [illegible] भगवानेवेति वदन् पुनर्जीवाद्भगवतो वैलक्षण्यमाह स इत्यर्द्धेन स एवोक्तप्रकारः भगवान् श्रेयसां मुक्तिं भुक्तिल[illegible] णापि यतः भगवतः सकाशादेवांभावानांमुमुक्षूणां बुभुक्षूणां च स्वभावेन निवृत्तिलक्षणेन प्रवृत्तिलक्षणेन च विहितस्या[illegible] कर्मणश्चसतः प्रसिद्धिः ननु ध्यातुः कर्मकर्तुश्च मृतस्य कथं परमानंदलाभः स्वर्गादिलाभश्च स्यादत आह देहे इति [illegible] न्मादिरहितो जीवः देहे स्वधातूनां स्वकारणरूपाणां पृथिव्यादिभूतानां विगमे वियोगे सति विशीर्यमाणेपि तत्रस्थ[illegible] विनश्यति ॥ ४९ ॥

अध्यायत्रयस्यार्थमुपसंहरति स इति हे तात नारद [illegible] न संक्षेपेण सोयं विश्व भावनो विश्वहेतुः भगवान् ज्ञानशक्त्यादिसंपन्नः वासुदेवः अभिहितः प्रतिपादितः यत् यस्मा[illegible] दसत्स्थूलसूक्ष्मरूपं विश्वं अन्यत् भिन्नं न भवति कथंभूतादन्यस्मात्स्वरूपतोभिन्नादपि यस्मात्सर्वं सदसद्भिन्नाभिन्न[illegible] त्वाहिकुंडलवदिदि सूत्रात् ॥ ५० ॥

[illegible] टीका

अद्भुत हैं पादन्यास जिन्हों के ऐसे भक्तन मे परा[illegible] तिन के शील में है शिक्षा जिन्हों की ऐसे नीच जन स्त्रीशूद्र हूण शबर भी ईश्वर की देव माया से पार हो जाते हैं फिर [illegible] का क्या कहना है ॥ ४६ ॥

मुनि लोग भगवान् के स्वरूप को ऐसा जानते हैं [illegible] प्रति बोध स्वरूप शुद्ध सम परम आत्मतत्व जहां पर बहु कारकसाध्य चार प्रकार का क्रिया फल नहीं है और मा[illegible] लज्जित होकर दूर भगती है ॥ ४७ ॥

पर पुरुष का पद ऐसा है कि निरन्तर सुख स्व[illegible] सन्यासी लोग जहां पर अकर्त हेति को त्याग करते हैं ॥ ४८ ॥

वही भगवान श्रेयसों के भी स्वामी हैं जिनसे स[illegible] जहां पर आरम्भ के धात भूतों के नाश होने पर भी नेत्र नहीं विशीर्यमाण होता है ॥ ४९ ॥

[नृजन्मनि न तुष्येत कृतेन भगवान् यदि ।
धर्म्मार्थकामैः किं तर्हि कार्य्यं सिध्यति नश्वरैः ॥ ५२ । १ ॥
कृष्णे न चोत्तमश्लोके चेद्भक्तिरनपायिनी ।
किं स्याद्वर्णाश्रमाचारदानहोमादिभिः कृतैः ॥ ५२ । २ ॥]
मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः ।
शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वितीयस्कन्धे ब्रह्मनारदसंवादो नाम
सप्तमोऽध्यायः ॥ ७ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अथवा विभूतीनां संग्रह उदितः ॥ ५१ ॥

यथा वर्णितेन नृणां भक्तिर्भविष्यतीत्येवं संकल्प्य सश्रिम्य तथा हरिलीलाप्राधान्येन श्रीभागवतं वर्णय न तु भक्तिरसविघातेन केवलं तत्त्वमित्यर्थः ॥ ५२ ॥

ननु लीला मायाभया किं तद्वर्णनेन इत्यत आह मायामिति ॥ ५३ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे सप्तमोऽध्याय. ॥ ७ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिन्याख्यतट्टिप्पणी ।

[नृजन्मनीत्यादि ॥ अत्र श्लोकद्वयं बहुषु पुस्तकेषु नास्ति कश्चिदेवास्ति । तच्च वीरराघवेण व्याख्यातम् । भगवन्माहात्म्यप्रतिपादकत्वात् विरोधाभावाच्च व्याख्यायते—ननु त्रिवर्गो यथा भवेत् तथा वर्णयति किं नोच्यत इत्याशंक्याह नृजन्मनीति । मनुष्यजन्मनि कृतेन साधनकलापेन यदि भगवान् न तुष्येत तर्हि नश्वरैः धर्म्मादिभिः किं कार्य्यं किं प्रयोजनं सिध्यति न किमपीत्यर्थः ॥ ५२ । १ ॥]

[धर्म्मस्य ह्यापवर्ग्यस्येति पूर्वोक्तरीत्या परम्परया भगवत्तुष्ट्यामुपयुज्यमानानामेव साफल्यं तदुपयोगरहितानान्तु वैफल्यमेवेति अन्वयव्यतिरेकेणाह कृष्णे इति । उत्तमश्लोके अविद्यानिवर्तकयशसि श्रीकृष्णे चेत् यदि च कृतैः स्वनुष्ठितैर्वर्णाश्रमाचारादिभिरनपायिनी अव्यभिचारिणी भक्तिर्न स्यात् तर्हि तैः किमन्यत् फलं स्यात् न किमपि । अन्यफलस्य नश्वरत्वात् तत् जातमप्यजातप्रायमेवेति भावः ॥ ५२ । २ ॥ इति बालप्रबोधिनी ।] ॥ ५३ ॥

इति श्रीमद्भागवत महापुराणे द्वितीयस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

स्वोक्तसंग्रहस्य प्रामाणिकत्वं कथयन् त्वमप्येतत्प्रवर्त्तयेत्याह इदं इति भगवद्विभूतानामयं संग्रह इति यदिदं भागवतं भगवद्विषयत्वाद्भगवता प्रोक्तत्वाद्भागवतनामकं मे मह्यं भगवतोदितं एतदिदं मा त्वं विपुली कुरु ॥ ५१ ॥

वैपुल्यप्रकारमाह यथेति सर्वात्मनि सर्वान्तरात्मन्यत एव सर्वाधारे भगवति नृणां भक्तिर्यथा भविष्यति यादृश वर्णनेन भविष्यति तथा संकल्प्य वर्णयेत्यर्थः ॥ ५२ ॥

ननु त्रिवर्गो यथा भवेत्तथा वर्णयति किं नोच्यते आह नृजन्मनीति मनुष्यजन्मनि कृतेन साधनकलापेन भगवान्न तुष्येत यदि तर्हि नश्वरैर्धर्मादिभिः किं कार्यं किं प्रयोजनं न किमपीत्यर्थः ॥ ५३ ॥

धर्मस्य ह्यापवर्गस्येति पूर्वोक्तरीत्या परस्पर भगवद्भक्त्युपयुज्यमानानामेव साफल्यं केवलानां तु वैफल्यमन्वयव्यतिरेकाभ्यामाह कृष्णे इति किंस्यादिग्रंथः पूर्वोत्तरार्द्धाभ्यां संबध्यते अनपायिन्यव्यभिचारिणी समस्तदुरितनिवर्त्तक उत्तमः श्लोकः स्तवः यस्य तस्मिन्नुत्तमश्लोके ऽधोक्षजे भक्तिर्नचेद्वर्णाश्रमाचारादिभिः किंस्यान्न किमपीत्यर्थः ॥ ५४ ॥

भगवद्विभूतिवर्णनादीनां फलमाह मायामिति अमुष्येश्वरस्य मायां प्रकृतिं जगत्सृष्ट्यादि प्रकार इत्यर्थः वर्णयत गद्गुमोदतः आत्मांतःकरणं मायया मायागुणस्तम आदिभिर्नमुह्यतीत्यर्थः ॥ ५५ ॥

इति श्री मद्भागवत द्वितीयस्कन्धे वीरराघव कृत टीकायां सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

भगवन्मूर्तिसंग्रहरूपमिदं भागवतं पुराणं नृलोके प्रवर्तनाय त्वया व्यासाय विज्ञापनीयमित्यभिप्रायवानाह इदमिति सर्गादीयद्भगवता मममोदितं नाद्दं भागवतं नाम प्रकाश्योपदिशेति शेषः कस्माद्भागवतमिति प्रकाश्यमितित्राह संग्रह इति यत्रोद्यत इत्युक्त विभूतीनां सर्गे तुयोहमित्यात्मकमायाविभूतीनां च संग्रहः कोऽधीकार इति हेतुगर्भः संक्षिप्योक्तमिति तत्रश्चेदर्यमिति तत्राह तदेतदिति तदेतन्नृलोके ज्ञानप्रदानाय वर्तिशाऽव्यासरूपनारायणार्थावज्ञाप्यात्मवपुलीकुरु एतद्वर्णविस्ताररूपं भागवतं पुराणं कुर्विति विज्ञापयेत्यर्थः नामप्रकाश्यसंभाव्य क्रोधापगमकृत्सनेहति ॥ ५१ ॥

एतदेवाविशदयति यथेति यथासात्विकप्रकृतीनां नृणां सर्वात्मनि सर्वस्वामिनि अत एवाखिलाधारे भगवति सर्वोत्तमत्वज्ञानपूर्वकप्रेमलक्षणा भक्तिर्भविष्यति इत्येवं हेतुपूर्वकं संकल्प्य समर्थ्य समाधभापयासम्यक्कृत्वा शुकादिशिष्येभ्यो वर्णयेति विज्ञापयेत्यन्वयः ॥ ५२ ॥

इतोपि हरिभक्तजनकपुराणरचनमेवतथावतारप्रयोजनं नान्यदित्यभिप्रेत्याह नृजन्मनीति भक्तिविषयोन्यस्तत्फलदोन्य इत्यत उक्तं अपवर्गेशेति कृष्णपूर्णबलप्राणात्मनि हरौ यद्यनपायिनी नित्या भक्तिर्न चेन्न जायते चेन्नृजन्मापुमान्यमनश्वरेयमादंतकाम्राशंगच्छति नृजन्म निन्तुष्यंत अलंपुरुषार्थसाधनां बुद्धिं नाप्नुयात् धर्मादिफलमस्तीत्यत्राह किंफलामिति धर्मादेरनित्यस्वर्गादिफलं किं नैवफलमल्पफलत्वादित्यर्थः तस्मात्कृष्णभक्तेरेव नृजन्मफलत्वात्तत्प्रतिपादकपुराणकरणे विज्ञापनं युक्तमिति भावः ॥ ५३ ॥

किंफलामित्युक्तं विवृणोति किंस्यादिति किंस्यादित्याक्षेपः तदुक्तं आक्षिप्यते किमित्येतद्यत्राल्पफलताभवेदिति प्रश्नेक्षेपे विकल्पे किमितियादवः ॥ ५४ ॥

भागवतपुराणोक्तप्रकारेण भगवति भक्तिं कुर्वतः पुंसः पुत्रकलत्रादिलक्षणामायासंसारहेतुर्न स्यादत एतत्पुराणकरणं विज्ञापनीयमिति भावेनाह मायामिति अमुष्येश्वरस्य जगत्स्रष्टृत्वादिलक्षणां मायां माहात्म्यं सद्गुरुमुखाच्छ्रुत्वा मननपूर्वकं साक्षिध्येभ्यो वर्णयतः तथा तां मायां श्रद्धयानुमोदतोऽनुमोदमानस्य तथाऽव्याख्यानाद्यशक्तेन याशृण्वतायावज्जीवं श्रवणैकपरायणस्य पुंस आत्मा मनो मायया बंधकशक्त्या नमुह्यति अहंकारममकाराभ्यां नभ्रमतीत्यतः सर्वसज्जनपुरुषार्थकारणं भागवत करणविज्ञापनमिति भावः अमुष्येश्वरस्येति संध्यकरणेनीस्य भागवतस्यैवदसाम्यं सूचयति यद्वा ईश्वरशब्देनाशिवो [illegible] तात्पर्यशीलर्ई लक्ष्मीस्तस्या ईश्वरो नारायण इति द्योतयति अत्र सर्वार्थप्रेत्यमनुसन्धेयमिति ॥ ५५ ॥

इति श्री भागवते [illegible] टीकायां सप्तमोध्यायः

श्रीम[illegible]क्रमसन्दर्भः ।

इदं चतुःश्लोकीरूपमित्यर्थः अनेन तदप्युपदिष्टमिति [illegible]

तद्भक्त्यर्थं च स्वरूपशक्तिमयलीलावर्णनं श्रेष्ठम् । [illegible]नुसार इत्यादेः ॥ ५२ ॥

तदीयरुचिभाग्याभावे चित्तशोधनार्थं मायामयतद्वैभवं [illegible] वर्णयेत्याह मायामिति । शुद्धभक्तिरुच्यभावे कर्मार्पणवदिति भावः ॥ ५३ ॥

इति श्रीमद्भागवतद्वितीयस्कन्ध[illegible]भिकृतक्रमसन्दर्भे सप्तमोऽध्यायः ॥ ७ ॥

श्रीम[illegible] सुबोधिनी ।

एवं संक्षेपविस्ताराभ्यां निरूप्य शास्त्रमुपसंहारति इदमिति [illegible]यानिरूपितं तद्भागवतं भगवताप्रोक्तं भगवत्फलकं भागवतं नाम तत्र तृतीयार्थमाह यन्मे भगवतोदितमिति यन्मे मह्यं [illegible] इति अस्माद्धेतोः इदं भागवतं नाम ननु भगवता हि स्वरूपं सर्वमेवोपवर्णितः तत्कथमेतावदेवेत्याशंक्याह संग्रहो [illegible] विभूतीनां संग्रहः संकोचः संक्षेपविस्तारो हि अधिकारानुसारेण निरूप्यते तत्र त्वमुत्तमाधिकारी अतः तुभ्यं संक्षेपेण [illegible] अन्येषामर्थे एतद्विपुलीकुरुविस्तरेण वर्णयविस्तारकथने हेतुः ॥ ५१ ॥

यथा हरौ भगवतीति माहात्म्यज्ञानपूर्वकसुदृढः [illegible] माहात्म्यज्ञानव्यतिरेकेण तस्या अनुदयात् माहात्म्यज्ञाने विस्तारकथनस्य हेतुत्वात् माहात्म्यज्ञापनेन भक्तिजननार्थं [illegible] किंबहुनायथैव भक्तिर्भविष्यति तथैव वक्तव्यः अनेनाधिकारानुसारेण पदार्थावक्तव्या इत्युक्तं ननु निरूपितेपि माहात्म्ये [illegible] कथं भक्ति र्भविष्यति आत्मनस्तु सर्वं प्रियं भवतीति श्रुतेः आत्मैव परमप्रेमास्पदः अन्यत्र तु तदुपाधिकं प्रेम तद्भगवति [illegible]त्याशंक्याह सर्वात्मनीति अयं भगवान् सर्वेषामात्मा यथा सर्वात्मत्वं तदुपपादितं एवमात्मत्वेन अंतर्यामित्वं प्रतिपाद्य [illegible]प्रतिपादनार्थं भगवत्कृतमुपकारं दर्शयति अखिलाधारे इति सर्वाधारभूतो भगवान् सर्वप्रकारेण ततस्तस्मिन्नुचि[illegible]भ्यो भगवद्गुणा विस्तार्य वक्तव्य तदा फलांतरं मोहरूपं किंतु भगवद्भक्तिरेव सर्वेषां भविष्यतीति मनसि निश्चित्य [illegible] इत्याह इति संकल्प्येति वर्णय एकैकं पदार्थं बहुभिः प्रकारैः कथयेत्यर्थः ॥ ५२ ॥

श्रीमद्वल्लभाचार्य कृत सुबोधिनी ।

ननु विस्तारकथने ते भवति भक्तिः मम किं स्यात्तत्राह मायां वर्णयत इति यथा हि भगवतो माया सर्वसामर्थ्यानामेव वर्णनीयत्वात् तथाविधलीलानां भगवच्छक्तित्वात् मायां वर्णयतः आत्मानमुह्यतीतिसंबंधः ननु मायावर्णने अंतःकरणस्य दोषो भवेत् तत्वमोहइति तत्राह अमुष्य ईश्वरस्य मायामिति अन्येन वर्णयमानां वा अनुमोदतः सम्यक् निरूप्य इतिस्तुवतः शृण्वतोपीति यद्यपि मुख्यफलं भवति तदभावो अंतःकरणस्य मायया मोहस्तु सर्वथा भवति तस्माल्लोकोपकारार्थं स्वार्थं च श्रवणादिकं कर्त्तव्यमितिसिद्धं ॥ ५३ ॥

इतिश्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षित विरचितायां द्वितीयस्कंधे सप्तमाध्यायविवरणम ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

नन्विदमश्रुतचरमद्भुतं मतं ब्रूषे सत्यमिदं न केवलमहं ब्रुवे किन्तु मह्यं भगवता उदितं भागवतं नाम पुराणम । न केवलमिदं शास्त्रत्वेनैव मन्तव्यं किन्तु विभूतीनां संग्रहः श्रीभगवद्गीतादिषु विभूतिशब्देनांशकलावताराणामप्युक्तेः साक्षाद्भगवानेवायं शास्त्रस्वरूपेण विराजतीत्यर्थः । अतस्त्वमेतद्विपुलीकुरु सर्वत्र विस्तारय तदेवास्यं सेवेति भावः ॥ ५१ ॥

किन्त्वत्रान्तरे गुरोर्ममाग्रे त्वमेकं नियमं गृहाणेत्याह यथेति । नृणां कलिकाले जनिष्यमाणानामित्यर्थः । भवेदित्यनुक्त्वा भविष्यतीति निर्देशात् कलौ नष्टदृशामेष पुराणार्क इत्युक्तेश्च । हरौ प्रेम्णा मनो हरति संसारञ्च हरतीति प्रयोजनत्रयमुक्तम । भगवतीति सुखाराध्यत्वम । सर्व्वात्मनि सर्व्वस्वरूपे इति तद्भक्त्यैव सर्व्वार्थलाभसिद्धिः । अखिलाधारेति तद्भक्त्यैव सकामानामपि सर्व्वकामप्राप्तिः संकल्प्येति प्रथममध्यारभ्य भगवद्भक्तिमेव वर्णयिष्ये इति संकल्पवाक्यमुच्चार्यैवारभेथामित्यर्थः ॥ ५२ ॥

ननु भक्तिश्च श्रवणकीर्त्तनादिलक्षणा । सा च भगवन्नामलीलादिविषयिणी । लीला च लीलावताराणां कृष्णरामादीनां गोवर्द्धनोद्धारणाद्या चिदानन्दमय्येव । मायाशक्तिप्रधानस्य पुरुषावतारस्य पुरुषवीक्षितायाः प्रकृतेर्महान् महतोऽहंकार इत्येवं सृष्ट्यादिलीला मायासम्बन्धिनीति मायावर्णनीया न वेत्याकांक्षायामाह मायामिति । तत्र वर्णयत इति अनुमोदत इति शृण्वत इति कीर्त्तनस्मरणश्रवणभक्त्युपकरणत्वेन मायावर्णनमपि भक्तिरेव अतः श्रद्धयेति । सापि भगवतो मायाशक्तिः परमभक्तैव तत्सन्ततयो महत्तत्वादयोऽपि भक्ता एवेति तृतीये तेषां स्तुतौ व्यक्तीभविष्यतीति गुणमय्यपि तयावृतया माया महत्तत्वादयश्च श्रोतव्या एवेति तत्फलमाह । मायया आत्मा जीवो न मुह्यतीति । (मायासम्बन्धिन्यपि लीला नैव मायिकी किन्तु मन्निकेतनन्तु निर्गुणम इत्यादि भगवदुक्तेः ॥ ५३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम ।
द्वितीये सप्तमोऽध्यायः सङ्गतः संगतः सताम ॥ ७ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

यत् यस्मिन् विभूतीनां संग्रहः संक्षेपतो निर्देशः तदिदं भागवतं मे मह्यं भगवतोदितम एतत्त्वमपि विपुलीकुरु विस्तरतः प्रवर्त्तय ॥ ५१ ॥

विपुलीकरणप्रकारमाह यथेति सर्वात्मनि सर्वस्य विश्वस्य अंतर्यामिणि अखिलस्याधारे भगवति हरौ यथा नृणां भक्तिर्भविष्यति इतिसंकल्प्यसंचिंत्य भागवतं वर्णय ॥ ५२ ॥

भगवद्गुणस्वरूपादिबोधकभागवतवर्णनफलंकैमुत्यन्यायेनाह मायामिति अमुष्य भागवतविषयभूतस्यानंतगुणशक्त्याद्याश्रयस्य भगवतः शक्तिभूतां सृष्ट्यादावुपयोगिनीं मायां प्रकृतिमपि वर्णयतः अनुमोदतश्च श्रद्धया नित्यं शृण्वमश्च आत्मा मनः मायया न मुह्यति किमुतामुमेव वर्णयत आत्मा न मुह्यतीति वक्तव्यम ॥ ५३ ॥

इतिश्रीमद्भागवतसिद्धांतप्रदीपेद्वितीयस्कन्धीयेसप्तमाध्यायार्थप्रकाशः ॥ ७ ॥

भाषाटीका ।

हे तात उन भगवान विश्वभावन को आप से कहा परमेश्वर से सत् और असत् कुछ नहीं है ॥ ५० ॥

जो मैंने यह भागवत कही यह विभूतियों का संग्रह भूत है इसको तुम विपुल करो ॥ ५१ ॥

जिस तरह से भगवानमे भक्ति होय इस तरह से वर्णन करो ॥ ५२ ॥

इन भगवान की माया को जो वर्णन करै वह माया से निर्मुक्त होकर परमेश्वर की गति को प्राप्त होता है ॥ ५३ ॥

इति द्वितीयस्कन्ध का सातवां अध्याय ॥ ७ ॥

अष्टमोऽध्यायः ।

राजोवाच ।

ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च ।
यस्मै यस्मै यथा प्राह नारदो देवदर्शनः ।
एतद्वेदितुमिच्छामि तत्त्वं तत्त्वविदांवर ॥ १ ॥
हरेरद्भुतवीर्य्यस्य कथा लोकसुमङ्गलाः ।
कथयस्व महाभाग यथाहमखिलात्मनि ।
कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम् ॥ २ ॥
शृण्वतः श्रद्धया [illegible] गृणतश्च स्वचेष्टितम् ।
नातिदीर्घेण [illegible] भगवान् विशते हृदि ॥ ३ ॥
प्रविष्टः कर्णरन्ध्रेण [illegible] भावसरोरुहम् ।
धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमे देहसम्बन्ध[illegible]राजीवयोः ।
बहून् परीक्षिता पृष्टान् [illegible]र्थान् बुभुत्सितान् ॥ ० ॥

एवमेतद्विपुलीकुर्व्वित्युक्तम् । तदेव विपुलीकरणं [illegible]ति त्रिभिः । अगुणस्य गुणातीतस्यापि । देववत् दर्शनं यस्य ॥ १ ॥

निःसंगं मनः श्रीकृष्णे निवेश्येति स्वप्रयत्नो दर्शितः ॥ २ ॥

सोऽपि श्रद्धया शृण्वतो नावश्यक इत्याह शृण्वत इति । [illegible] विना भगवान् स्वयमेव हृदि विशति ॥ ३ ॥

भावसरोरुहं हृदयकमलं प्रविष्टश्च तद्गतं सर्व्वं मलं धुनोति । [illegible]र्णेति । द्रव्यान्तरव्यामिश्रणादिना कुम्भस्थे जले शोधिते तदेव केवलं शुद्ध्यति न तु नदीतडागादिगतम् । स एव मलः [illegible] न तु सर्व्वथा विलीयते । अतएव किञ्चित्कालेन पुनः क्षुभ्यति च । एवं तपोदानादि प्रायश्चित्तं न सर्व्वथा सर्व्वेषां सर्व्वं पापं [illegible] किन्तु सावशेषम् । तच्च कस्यचिदेव किञ्चिदेव । हृदि प्रविष्टमात्रस्तु श्रीकृष्णः सर्व्वेषां सर्व्वपापं निःशेषं हरतीत्यनेन [illegible] सलिलस्य मलं यथा शरदिति ॥ ४ ॥

श्रीराधारमणदासगोस्वामि[illegible]कृत दीपिनाख्यतट्टिप्पणी ।

॥ १—७ ॥

श्रीमद्वीरराघवाचार्य्य[illegible] भागवतचन्द्रिका ।

एवमेतद्विपुलीकुर्वित्युक्तं विपुलकरणं राजा पृच्छति [illegible] शुक देवदर्शनः परमात्मदर्शी नारदः ब्रह्मणा चतुर्मुखेनागुणस्य सत्त्वादिप्राकृतगुणरहितस्य भगवतः गुणाख्याने [illegible] चोदितः प्रवर्तितः यस्मै यस्मै प्रश्नायेति शेषः यद्वा पृच्छते इति यथा प्राह यादृशमित्यर्थः ॥ १ ॥

एतच्चाद्य विस्तरेण वर्णितं वेदितुमहमिच्छामीति तत्त्व[illegible] तत्त्वविदांवरस्य मद्भुतवीर्यस्य हरेः लोकसुमंगलकराः कथाः कथयस्व ॥ २

हे महाभाग बुद्धिमत्सर्वान्तरात्मनि कृष्णे निःसंगं मनो [illegible] कलेवरं त्यक्ष्ये भगवत्कथाः शृण्वन् तमेवावसाने स्मरन् देहं त्यक्ष्याम्यतः कथयस्वेत्यर्थः ॥ ३ ॥

अल्पकालकथाश्रवणेन कथमवसाने स्मृतिः [illegible] शृण्वत इति भगवान् स्वचेष्टितं नित्यं श्रद्धया शृण्वतो गृणतः कथयतश्च पुंसः हृदयं नातिदीर्घेणाल्पेन कालेन विशति [illegible] गृणतश्च चिरं तत्स्मरणप्रवणमेव भगवतीत्यर्थः ॥ ४ ॥

भगवतो हृदयप्रवेशफलमाह प्रविष्ट इति कर्णरन्ध्रेण [illegible] स्वानां भक्तानां भावसरोरुहं हृदयकमलं प्रविष्टः श्रीकृष्णः हृदयगतं शमलं रागादिरूपं मलं धुनोति निरस्यति यथा [illegible] सलिलस्य शमलं धुनोति तद्वदित्यर्थः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

अस्मिन्नध्यायेपरीक्षित् भागवतपुराणप्रतिपाद्यंशुकंपृच्छति तत्रप्रथमंनारदेनविरिंचाज्ञापालनं कथमकारीतिभावेनपृच्छति ब्रह्मणेति अगुणस्यनित्यनिर्मुक्तसत्त्वादिगुणस्यसर्वप्रधानस्येतिवा गुणाख्यान इति तादर्थ्येसप्तमीव्यासादन्यस्मै यस्मै ॥ १ ॥

नारदव्याससंवादानंतरं व्यासमुखविगलितभागवतोक्तहरिकथाश्रवणमेवमदभीष्टमितीदमेव तत्त्ववेदितुमिच्छामीत्युक्तमिति भावेनाह हरेरिति ॥ २ ॥

यथाग्रथितश्रुतगुणोपसंहार पूर्वकनिः संगमनः कृष्णेनिवेश्याहमिदंकलेवरंत्यक्ष्येतथाप्रथयस्वेत्यन्वयः ॥ ३ ॥

श्रवणादिनेदंफलंस्यादित्याह शृण्वतइति ॥ ४ ॥

ततः किंतत्राह प्रविष्टइति ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

ब्रह्मणेति सार्द्धकम् । अगुणस्य गुणाख्यान इति तद्गुणानां प्राकृतविलक्षणत्वं दर्शितम् । यस्मै यस्मै यथा, प्राह इत्यस्योत्तराण्य-ग्रतः स्कन्धेषु श्रीनारदवक्तृप्रकरणे ज्ञेयानि ॥ १ ॥

हरेरिति सार्द्धकम् । हरेः कथायामपि विशेषं वाञ्छति यथाहमिति ॥ २ ॥

श्रवणस्य प्रभावमाह शृण्वत इति । तत्प्रभावादेव गृणतश्च ॥ ३ ॥

प्रवेशे सति तु मद्भक्तियुक्तो भुवनं पुनातीति न्यायेन तत्सम्बन्धपरम्परया जगदपि पुनाति स भगवानित्याह प्रविष्ट इति । स्वानां प्रवेशेन स्वीकृतानाम् । अतएव भावविशेषधारिणो हृदयस्य तत्सुखदोपादेयस्थानत्वात् भावसरोरुहमित्युक्तम् । सलिलशरद्दृष्टान्तस्तु सर्वपावनमात्रांशे ॥ ४ ॥

श्रीमद्वल्लभाचार्य्य कृत सुबोधिनी ।

एवं निर्द्धारभजनं उत्पत्त्याचविमर्शनं इदंसिद्धंविराट्ब्रह्मरूपयोस्तत्त्वनिश्चये ॥ उपपत्त्याविमर्शस्तुत्रिभिर्निरूप्यते । आक्षेप सिद्धांत फलैः सोपपत्तिस्त्रिधा यतः अष्टमेसंदिहानस्यप्रश्नआक्षेपगर्भितः राज्ञोनिरूप्यते प्रश्नास्तन्मूलाअपरंपिचानुक्तप्रकारस्थूलसूक्ष्मरूपाक्षेपे सर्वानुपपत्तिर्भविष्यतीत्याशंक्यां वक्तृंकथयाप्रोत्साहयतिषड्भिः ब्रह्मणानोदितइति पूर्वाध्यायांतेत्वमेतद्विपुलीकुर्वित्युक्तं तत्संक्षेपश्रवणेने वयदामहतीभक्तिरुत्पद्यते तदाविस्तरेकिंभविष्यतीति परमादरेणपृच्छति ब्रह्मन्नितिसर्वज्ञत्वायसंबोधनं ब्रह्मणाप्रेरितोनारदः भगवद्गुण कथनार्थंयस्मै यस्मैयथाप्राह तत्कथयेत्यग्रेणसंबंधः अगुणस्यचगुणाख्याने सूक्ष्मरूपंचगुणं चकारात्स्थूलरूपंच तस्यगुणानांउत्कर्षबोधक धर्माणां आख्यानेकथने कथनार्थंब्रह्मणाचोदितः नानाधिकारेणवर्णनीयत्वात् यस्मै यस्मै यथाप्राहेत्युक्तं अन्यथाकस्मैप्राहेत्येवब्रूयात् तस्यतथाकथनेसामर्थ्यमाहदेवदर्शनइति ॥ १ ॥

तत्स्वनेनभवतः कोपयोगः तत्राह एतद्वेदितुमिच्छामीति इदंहितत्त्वंमीदृशे अधिकारेकीदृशं वक्तव्यमिति ज्ञातव्यंचेत् स्वाधिकारार्थं परबोधनार्थंच नन्वेतन्मया कथं ज्ञातव्यं मयातु स्वाधिकारेण ज्ञातव्यमित्याशंक्याह वेदविदांवरेतिवेदेहि स्वाधिकारे नान्याधिकारेण च पदार्थानिरूप्यंते ते च सर्वे ब्राह्मणोब्राह्मणोर्यंतेवसंताद्यः कालाः चर्व्याध्यानमंत्राः अश्वमेधादयः क्रतवःपुनस्तोमादयश्च नैमित्तिकाः तथैतदपिशास्त्रं सर्वाधिकारेण प्रवृत्तं तत्तदधिकारभेदेन पदार्थाभिदधाति वेदानुसारेण च तत्तदधिकारानुसारेण व्यवस्थातत्सर्वं वेद विद्भिर्ज्ञायत इति संबोधनं एवं पूर्वोक्तार्थसंबंधप्रश्नं उक्त्वा स्वाधिकृते प्रश्नांतरमाह हरेरद्भुतवीर्यस्येति नहि भगवच्चरित्रं सुगमं अन्यथा करणे त्वन्यथा च संपद्यते तस्मात्स्वरूपतः पर्यवसानभ्रनानात्वात् भगवद्गुणा विविच्य ज्ञातव्या किंच भगवत्कथालोकसु-मंगलाः किंचिद्वस्तुपुरुषमात्रसुमंगलं भवति यथा रक्षाबंधनं अलंकारं वा किंचिद्गृहमंगलं यथा गृहालंकाराः किंचिद्वंशस्य यथा पुत्र जन्मकिंचिद्ग्रामदेशानां यथारक्षावृष्ट्यादिर्वा कथास्तुसर्वलोकसुमंगलाः प्राणिनां भुवनानां च परमकल्याणं कुर्वंति ॥ २ ॥

महाभागेति संबोधनं तवैवेतादृशार्थकथनेऽधिकारः मत्वन्यस्य अतुमगवतातुच्छफले अधिकृताः त्वंतुमहाफल इति संबोधनं पूर्वं यथाधिकारेण वक्तव्यमित्युक्तत्वान्ममैतादृशोधिकारोस्ति तत्र यदुचितं तद्वक्तव्यमित्यभिप्रायेण स्वाधिकारं अवस्थाभिप्रेतयुक्तं नि-रूपयति यथाहमखिलात्मनीति मममनोरथ एतावत् यदैहिकामुष्मिकसर्वविषयेभ्यो मन आकृष्य एकत्र भगवत्येव निवेश्य पश्चात्प्रा-णांस्त्यक्षामीति एतस्मिन् जन्मन्येतावत्कर्तव्यं एवं कृते यद्भविष्यति तदग्रे निरूपयिष्यति मत्वेतत्सुलभं नात्रशास्त्रमपेक्षते इष्ट एव प्रश्नःमनश्च महतां स्वाधीनं मनः कृष्णेनिवेश्यतां किंचिद्विलंबनेत्याशंक्याह अखिलात्मनीति कृष्णोऽस्माभिर्ज्ञातोप्यज्ञातोस्ति परिच्छिन्नो वा ज्ञातः सहि सर्वात्मना सर्वात्मत्वेन ज्ञातव्यः तत्तु न पूर्वं वृत्तं तं यथा यथोपास इति श्रुतौ उपासनानुसारेण फलस्योक्तत्वात्सर्वफलं तदैव भवति यदिसर्वत्वेनैवोपास्यते अन्यथात्वकृच्छ्रो भवेत् तद्वेतान् भूत्वाऽवतीति च सर्वतो रक्षा च सिध्यति न केवलं साधारणं मनो भगवति निवेशनीयं तथा सत्यशुद्धमनसअशुद्धमेव फलं भवेत् तस्मादयं मनो निःसंगं भवति यथा वा संभावना विपरीत भावनाभ्युदा-सेन सर्वात्मकत्वं हृदये स्फुरति तथोपायो वक्तव्य इत्यर्थः ॥ ३ ॥

मनसोति शोषणं अग्रिमकार्यं स्वयमेवसेत्स्यतीत्याह शृण्वतः श्रद्धयेति यदा यस्मिन् यस्य मनो भवति कामात्प्रेरणया वा तदा तं शृणोतिकीर्तियति च श्रद्धया च तत्रोत्पद्यते अतः श्रवणादिभिर्बाह्यके मनो निवेशनं श्रद्धा हि श्रवणकीर्तनयोरंगं दीर्घकालादरने रंतर्येण क्रियमाणस्यैव श्रवणादेः फलसाधकत्वात् तत्र दीर्घकालोनैरंतर्यं च नित्यपदेनोच्यते गृणतश्चेति चकारात्स्मरणादिकमपि संगृहीतं धर्मव्यतिरेकेण धर्मप्रवेशाभावात् स्वगुणैः सह भगवान् शीघ्रमेव प्रविशति हृदयमिति स्वानां यतोयं भगवान् भगवतैक शास्त्रत्वप्रकृतत्वात् ॥ ४ ॥

धौतात्मा पुरुषः कृष्णपादमूलं न मुञ्चति ।
मुक्तसर्व्वपरिक्लेशः पान्थः स्वशरणं यथा ॥ ५ ॥
यदधातुमतो ब्रह्मन् देहारम्भोऽस्य धातुभिः ।
यदृच्छया हेतुना वा भवन्तो जानते यथा ॥ ६ ॥
आसीद्यदुदरात् पद्मं लोकसंस्थानलक्षणम् ।
यावानयं वै पुरुष इयत्तावयवैः पृथक् ।
तावानसाविति प्रोक्तः संस्थावयववानिव ॥ ७ ॥
अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ।
ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

राजा कृष्णकथौत्सुक्यमाविष्कृत्याष्टमे स्फुटम् ।
अपृच्छद्विविधानर्थान् श्रीशुकं संशयच्छिदम् ॥ ० ॥

अगुणस्य मायिकगुणरहितस्य । देवस्य कृष्णस्येव दर्शनं यस्य सः ॥ १ ॥

कृष्ण इति ममतास्पदानि राज्यादीनि त्यक्तान्येव यदवशिष्टमहन्तास्पदं कलेवरमस्ति तत्रापि निःसंगं मनः कृष्णे निवेशयेति कृष्णस्मरणे स्वप्रयत्नो दर्शितः ॥ २ ॥

सोऽपि स्मरणप्रयत्नः श्रवणकीर्त्तनवतो भक्तस्य नावश्यक इत्याह शृण्वत इति । स्वप्रयत्नं विनापि भगवान् स्वयमेव हृदये प्रविशतीति श्रवणकीर्त्तनाधीनमेव स्मरणमिति ज्ञापितम् ॥ ३ ॥

प्रविष्ट इति कथारूपेण भगवानेव प्रविष्टः सन् । भावसरोरुहं [illegible]मिति तत्रान्तर्यामी सदा स्थितोऽप्युदासीन एव कर्णप्रविष्ट कृष्ण एव जीवं स्वस्मिन्नासञ्जयतीति ध्वनितम् । भावो [illegible]रूपमेव कमलमिति वा । शमलं कामक्रोधादि धुनोति । नः नात्यद्भुतमिदं यतो ज्ञानयोगाद्योऽप्येतत् कर्त्तुं प्रभवन्तीत्यत [illegible]लस्येति । द्रव्यान्तरव्यामिश्रणादिना कुम्भस्थे जले शोधि तदेव केवलं शुध्यति न तु नदीतडागादिगतम् । स च मलो [illegible] सुप्तत्येव न तु सर्व्वथा विलीयते । अतएव किञ्चिच्चलने पुनर्लुभ्यति च । एवमेव ज्ञानयोगतप-आदयो न सर्व्वेषां, किन्तु [illegible]स्यापि न सर्व्वथा, किन्तु किञ्चिदेव, न तु सावशेषं, कथञ्चिदेव हृदयमालिन्यं धुन्वन्ति । यदुक्तम्—यमादिभिर्योगपथैः [illegible] मुहुः । मुकुन्दसेवया यद्वत्तथाद्धात्मा न शाम्यति इति । इति प्रविष्टमात्रस्तु कृष्णः सर्व्वेषामपि सर्व्वमपि निःशेषमेवेति [illegible] ॥ ५ ॥

श्रीमत्[illegible] सिद्धांतप्रदीपः

अष्टमेऽध्याये राज्ञा बहवः प्रश्नाः कृतास्तत्रतावत्स्वमेनां विपुलीकृ[illegible]पूर्वाध्यायांते नारदं प्रति ब्रह्मणोक्तं तदेवचविपुलीकरणं पृच्छति ब्रह्मणेति त्रिभिः हेब्रह्मन् शुक अगुणस्य प्राकृतगुणरहितस्य [illegible]गुणनिधेः गुणाख्यानं तद्गुणप्रधानभागवतार्थविपुलीकरणे ब्रह्मणा नोदितः प्रवर्त्तितः देवदर्शनः श्रीनारदः यस्मै यस्मै यथा आह [illegible] वेदितु मिच्छामीति द्वितीयेनान्वयः ॥ १ ॥

वेदविदां मध्ये वर श्रेष्ठ यथा अखिलात्मनि कृष्णे निःसंगं [illegible]मेवस्य कलेवरं त्यक्ष्ये तथा तत्ताःहरेः कथाः नारदप्रोक्ताः त्वं कथयस्वेति द्वयोरन्वयः ॥ २ ॥ ॥ ३ ॥

कृष्णेनिवेदय निःसंगंमन इति स्वप्रयत्नो दर्शित [illegible]पि [illegible]त्तितश्रवणादिपरस्य नावश्यक इत्याह शृण्वत इति भगवान् [illegible]ष्टितं नित्यं श्रद्धया शृण्वतः गृणतः कथयतश्च स्व[illegible] ह्रदि [illegible] तिर्वा[illegible] स्वल्पेनैव कालेन विशते ॥ ४ ॥

[illegible]टीका ।

भगवान के गुणानुवाद में ब्रह्माजी कर के प्रेरित नारदजी [illegible] के लिये कहा है ॥१॥

यही तत्व मेरी जानने की इच्छा है हे वेद विदांवर अद्भुत[illegible] जिनके ऐसे भगवान की लोक को मंगल करने वाली कथाओं को कहो ॥२॥

जिस तरह हम अखिलात्मा भगवान मे निःसंग मन लगा [illegible] देह छोड दें ॥३॥

प्रति दिन भगवान की कथा को सुनने वाले [illegible] को गाने वाले पुरुष के कुछ एक दिन में भगवान हृदय में प्रवेश करते हैं ॥४॥

कर्णरंध्र से आत्मीयों के हृदय रूपी कमल में प्रविष्ट हो [illegible] भगवान पाप को दूर कर देते हैं जिस तरह शरद ऋतु वर्षा काल के बिगडे हुए जल को दूर कर देती है ॥५॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ततश्च कृतार्थो भवतीत्याह । धौतात्मा निष्पापः । मुक्ताः सर्व्वे रागद्वेषादयः परिक्लेशा येन । पान्थः प्रवासादागतः स्वशरणं गृहं यथा न मुञ्चति तद्वत् ॥ ५ ॥

तदेवं श्रवणौत्सुक्यमाविष्कृत्य सन्दिग्धानर्थान् पृच्छति । अधातुमतो धातवो भूतानि तत्सम्बन्धशून्यस्य अस्याभौतिकस्यात्मनः धातुभिः देहारम्भ इति यत् एतत् किं यदृच्छया निर्निमित्तं हेतुना वा कर्म्मादिना भवन्तो यथावत् जानते अतः कथयन्त्विति शेषः ॥ ६ ॥

यश्चासावीश्वरः सोऽप्येतत्तुल्यदेहवान् प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदिति सार्द्धेन । लोकानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य तत् पद्मं यस्योदरादासीत् असावीश्वरः इयत्तायुक्तैः स्वपरिमितैः अवयवैरयं लौकिकः पुरुषो यावान् यत्संख्यकावयवयुक्तः तावान् संस्थावान् प्रोक्तः अवयववान् इव च प्रोक्तः । अतः को विशेषस्तस्येति ॥ ७ ॥

अवश्यञ्च विशेषो वाच्य इत्याह अजो ब्रह्मा भूतानां व्यष्ट्युपाधीनामात्मा नियन्ता समष्ट्युपाधित्वात् । येन च अनुगृह्णता तस्य स्वरूपं ददर्श दृष्टवान् । एतच्च तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः । सृष्टं सृजामि सृष्टोऽहमीक्षयैवाभिचोदित इत्यादिना उक्तमनू द्यते । अग्रे तु स्पष्टं भविष्यति ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचितदीपिन्याख्यतट्टिप्पणी ।

अज इति । अत्राजशब्दो ब्रह्मणि रूढः मेदिनीकोषप्रमाणात् अस्मदादिवत् प्रकृतिपुरुषसंयोगेन जन्माभावात् यौगिको वेति ॥ तस्यापीति एतत्स्कन्धीयपञ्चमाध्यायस्य सप्तदशश्लोकः ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

ततश्च कृतार्थो भवतीत्याह धौतात्मेति धौतात्मा शुद्धमनाः पुरुषः कृष्णस्य पादमूलं नमुंचति तदेव स्मरतीतिभावः कथंभूतो न मुञ्चति मुक्तसर्वपरिक्लेशः मुक्ता सर्वेरागद्वेषादयः परिक्लेशायेनस यथा पांथः प्रवासादागतः स्वशरणंस्वगृहंनमुंचतितथेत्यर्थः ॥६॥

एवं श्रवणौत्सुक्यमाविःकृत्याज्ञातानर्थान् पृष्टव्यान् क्रमेण वक्ष्यमाणांस्तत्संदिग्धानर्थान्पृच्छति यदिति हेब्रह्मन्नधातुमतः स्वरूपतो भौतिकदोषहीनस्यअस्य जीवस्य देहारंभश्च धातुभिरेवस्यादि तु ज्ञातमित्यर्थः हेतुसंशय विषयमित्याह सच देहारंभः किंयदृच्छयाऽहेतुकः हेतुनावा सहेतुको वेत्यर्थः एतद्भवंतोयथावज्ज्ञानते ऽतः कथयंत्विति शेषः ॥६॥

योऽसावीश्वरः सोपि जीवदेहतुल्यदेहवान्प्रोक्तः अतस्तस्य को विशेषः यतस्तज्जनात्पदे पदे मोक्षइत्युच्यते इत्याशयेन पृच्छति आसीदिति सार्द्धेन लोकानां संस्थानं विन्यासो यस्मिंस्तत्र देव लक्षणं स्वरूपं यस्य तज्जगदाकार पद्ममित्यर्थः त्रिलोक्यात्मकं पद्मं यस्यो दरादासीत्पृथग्विभक्तैः इयत्तावयवैरयं पुरुषः लौकिकः पुरुषः यावान्यत्प्रमाणस्तावत्परिमाण एवासावीश्वरः प्रोक्तःस्यात्पर्यवच्छिन्नत्वे न प्रोक्त इतिभावः स्वसंस्थायययानिव तज्जलानीतिवदयं निर्देशः स्वसंस्थानभूतैरवयवैरनजीवन्संसारी परिच्छिन्नस्तद्वदित्यर्थः ।अतोजीवप रयोर्विशेषः कथनीय इत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

तत्फलमाह धौतात्मेति पांथःपथिकःस्वशरणंस्वगृहं शरणंगृहरक्षित्रोरित्यभिधानं ॥ ६ ॥

इत्थंभागवतार्थकथनश्रवणादेःपुरुषार्थहेतुत्वमुक्त्वास्वतत्त्वप्रतिपत्तिहेतुभूतसंदेहहेतुंपृच्छति यदिति अधातुमतःस्वतःप्रकृत्यादिधातुसं बंधरहितस्यनित्यस्यजीवस्यास्यधातुभिःप्रकृत्यादिभिरुपादानकारणैर्देहारंभोऽस्तीतियत्तत्किंयदृच्छयाकेवलेश्वरेच्छया निमित्तभूतयोतान्ये नहेतुनाकर्मणाप्रहरीच्छैवहेतुस्तांविनाहेत्वंतरमप्यस्तीतिप्रश्नतात्पर्यं भवंतस्तत्तद्यथायथावज्ज्ञानतेतदस्माकंवदंत्विति शेषः धातुभिर्नित्यो योनास्तीत्यधातुमतइत्युक्तं धातुर्वातादिशब्दादिगैरिकादिस्वर्गादिषु महाभूतेष्विन्द्रियेषुशब्दयोनिस्वभावयोरित्यभिधानं ॥ ७ ॥

पुराणाधिकारिलब्धयेजीवानांबंधहेतुंपृष्ट्वाभुतार्थमनुवदति आसीदिति आदौमहाप्रलयेऽसिहायतयाशयानस्यतस्यनारायणस्यासिसृ क्षोःपरमपुरुषतयायतयितत्त्वसृष्टिपूर्वकमंडंसृष्ट्वातैस्तत्वैःसहांडोदरं प्रविष्टस्यांडोदरपिशेषपर्यंकेशयानस्यतस्योदराल्लकसंस्थालक्षणंचतुर्दश भुवनसन्निवेशरूपंपद्ममासीत् सरत्नांडांतर्वैराजाख्योऽवतीर्णो इतियावत् यःपुरुषोंडकोशःपुरुषाकारभगवद्रूपेणाधिष्ठितत्वात्पुरुषइत्युच्यते पातालादिभिरियत्तावयवैरियत्तावच्छिन्नावयवैर्योवान्याव त्परिमाणः असावपिवैराजोविष्णवाख्यस्तावांस्तावत्परिमाणइतिप्रोक्तस्तथावय ववानिवतदंतःस्थितत्वात्सान्निध्यत्वोपितथाताहशावयववानिवक्तइत्यन्वयः इत्यनेनप्रोक्तार्थस्यप्रमाणप्रसिद्धिं अयमाध्यात्मिकःशिरःपादया दिमानस्मदादिदेहःपृथगियत्तावयवैर्यावत्परिमाणोऽसावधिदैवकोविराट्पुरुषोपि तावत्परिमाणइत्यपव्याख्यानस्यपापहेतुत्वंचसूचयति समुच्चयेवैवपापेवाक्यारंभप्रसिद्धयोरिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

धौतात्मेति तत्सम्बन्धेन शुद्धान्तःकरणोऽन्योऽपीत्यर्थः । एवं न कर्म्मज्ञानादिवत् स्वकार्य्यसिद्धौ तत्त्यागः, किन्तु स्वतः परमसुखत्वमपि तस्येत्युक्तम् ॥ ५ ॥

तदेवं तत्कथाश्रवणौत्सुक्यं स्वनिष्ठांचाविष्कृत्य अन्यानप्यर्थान् अत्र भगवत्प्रधानतया प्रोच्यमानान् अन्येषां तदुपयोगितया तद्बोधसौकर्य्याय स्यादिति पृच्छति यदित्यादिभिः । अत्र श्रीभगवद्विग्रहस्य जीवेभ्यो नित्यत्वादिज्ञापनाय प्रश्नार्थे दृष्टान्तयन् जीवविग्रहमपि पृच्छति यदिति ॥ ६ ॥

आसीदिति सार्द्धकम् । अत्रेशजीवदेहयोः कारणकार्य्यात्मत्वं दर्शितमेव [illegible] तयो तु न प्रश्नः किन्तु स्वरूपांश एवेति विवेचनीयम् ॥ ७ ॥

येनानुगृह्णता हेतुना ददर्श ददर्श । अतस्तद्दर्शने तदनुग्रहमात्रस्य हेतुत्वात् [illegible] मस्येवेति भावः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्य कृत सुबोधिनी ।

[illegible] मितवदाह प्रविष्ट इति कीर्तनेऽपि श्रवणस्य विद्यमानत्वात् मुखस्य गुणाविगुणानिर्गमनः हेतुत्वात्कर्णरंध्रेत्युक्तं रंध्रेणान्वस्य प्रवेशाइत्यर्थः एकवचनमतिसावधानश्रवणार्थं यतो लोके सावधानश्रवणे एकैवकर्णाच्छ्रकसीव्याप्रियते तदिन्द्रियमेकमुखमेवभवति स्वानामिति कृतात्मनि वेदिनां न केवलं हृदयमात्रं प्रविशति किंतु भावसरोरुहं भावारतिरिति केचित् धातुसामान्यार्थः सत्तारूपो भगवानित्यपरं कारणरूपस्त्वविनाशी भावः सनिरन्तरश्रवणेन हृदयरूपो जात इति ऽसश्चेत्पुनः भक्त्याविकाशं प्राप्तः सरोवररूपो भवति साधनरूपभक्तिश्रवणसंपुटः यदि तस्मिन् बीजतामापद्यते प्रेम्णा च हृदयं पूरितमेव तिष्ठति तद्विहर्बीजवृद्धौ श्रवणादिना कमलं भवति तदेवहि भगवदासनं गृहं च भगवतः तदा तत्र प्रविष्टो भगवान् शमलं सर्वमेव धुनोति यद्यपि पापक्षयः सर्वोपि पूर्वमेव जातः तथापि शमलं तिष्ठति शं अलं यस्मादिति शमलं ऐहिकामुष्मिक फलानि शंशब्देनोच्यते शमादयः केवलपुण्येन च भोगाभावात् तत्र नांतरीयकतया सहितमेव पुण्यं भोगसाधनमिति तस्मिन्मूलभूते पापे विद्यमाने वैराग्यंकदापि न भवतीति तदा तद्भगवान् दूरीकरोति ननु समाधिसाधकस्यापि गतत्वात् ज्ञानाभावे कथमग्रिमकार्यसिद्धिरिति सदानंदरूपो भगवान् स्वयमेव पुरुषार्थरूपः नज्ञानादिसाधनमपेक्षत इत्यर्थः तत्र दृष्टांतेन स्पष्टयति सलिलस्य यथा शरदिरिति सरः शब्देन स्वच्छसलिलं तदप्रोच्यते यथा शरदित्येव दृष्टांतः यथालौकिकं जलं शरदा निर्मलं क्रियते ननु वर्षासु कथमपि निर्मलं भवति तथा प्रेमरसयज्जलं तदपि भगवता निर्मलं भवतीत्यर्थः तदा अंतःकरणं सर्वदोषरहितं भवति तदानिरोगः पुरुषः कृष्णपादमूलं न मुंचति नहि कश्चिन्निरोगः सदानंदं त्यजति तस्य ग्राहक आत्मैव निरोगः यथाबुभुक्षाग्रस्य अतः एवं भगवान् अंतःकरणेऽपि आत्मन्येव नाम धृतवान् अतः स तद्ग्राहकः दोषवशादन्यान् गृह्णाति यथा चक्षुः तदा भक्तिमार्गानुसारेणैव मनः पदार्थान् गृह्णातीति कृष्णपादमूलेति एवं मूलपदेन च अयं सर्वोपि विलासस्तन्मूलक इति ज्ञापयति ततो व्यापिवैकुंठे श्रीकृष्णचरणारविंदे तद्रसा[illegible]तृप्तः सुखेन तिष्ठतीति फलितंपरावृत्ति शंका नु नास्तिमुक्तसर्वपरिक्लेशत्वात् अविद्यादिवशादेव अहरहर्ब्रह्मलोकगता अपि निवर्त्तंते परशब्देन तत्रापि क्लेशशंका निवारिता सर्वपदेन स्वाभीष्टसर्वासिद्धं नांतरीयकोपिक्लेशो निवारितः भगवदधीनत्वेन क्लेश इति शंका दृष्टांतेन निवार्यते एवं स्वार्थे मनोनिवेशनोपायंपृष्ट्वा संदिग्धान्साधारणानन्यान् पृच्छति असंभावनादिव्युदासार्थं यद्धातुमत इत्यादिभिः अत्र पूर्वं पदार्थत्रयं निरूपितं भगवतो रूपद्वयं फलार्थं जीवश्च तत्र जीवे एकः प्रश्नः सूक्ष्मे भगवति निःसंदिग्धं पदार्थानां निरूपितत्वात् [illegible] गोचरत्वाच्च शंकैवनोदिति स्थूलरूपे तु सर्वे प्रश्नाः तद्यथात्म ज्ञापकाः तस्मात्प्रश्नद्वयं अत एवोत्तरे अध्यायद्वयमेव त[illegible]च्छति ॥ ५ ॥ ६ ॥

यद्धातुमत इति अयंजीवः अयं जीवस्तुनः अधातुमान् [illegible]ताः धातवः पूर्वे देहाः संपादकानिरूपिताः ते ह्यासत्य् नादृष्टद्वारकः संबंधः प्रथम सृष्टौ तदभावात् अनादित्वे भग[illegible] किंच असंगश्रुत्या नायं वस्तुतः संबध्यते भगवदिच्छापक्षे हिताकरणादिदोषः तस्मात्केनाप्युपायेन धातुसंबंधनिरूपण[illegible]ः ब्रह्मन्निति संबोधनं तदुपानोच्छेदकपरिज्ञानार्थं अस्य जीवस्य देहारंभः यदृच्छया भगवदिच्छया अकस्मात्पक्षेण अन्य[illegible]दिना वा अत्र निर्णयो वक्तव्य इत्यर्थः परमार्थे बहुवादिविप्रतिपत्तिर्यात्भवतो यथा जानते तथा वक्तव्य मित्यर्थः जीव[illegible]मिति प्रश्नार्थे ईश्वरस्यापि देहसंबंधः किमर्थं इति इच्छयादेह ग्रहणं तु संभवति परं किमर्थमिति ॥ ७ ॥

इमं प्रयोजनप्रश्नं वक्तुं देहसंबंधस्यस्थिरीकरणे [illegible]प्रमाणत्वेन निरूपयति आसीद्यदुदरात्पद्ममिति प्रतिष्ठामात्रत्वं त्वस्य नास्तीत्याह लोकानां संस्थानमेव लक्षणं चिन्हं यस्य [illegible] पद्मोत्पत्तिः अनेनलोकस्थितिलक्षणस्य कार्यस्य विद्यमानत्वात् तदाधारपद्मकारणत्वेन शरीरसिद्धिः नच तत्सा[illegible]र्भूतं इति मंतव्य इति शंकां वारयतियावानवयवैः पुरुष इति अयं प्राकृतः पुरुषो यावान् करचरणाद्यवयवैः यावत्परि[illegible]नसावपिर्यदितस्याविर्भाव तदा अस्यापि संघातस्य तथात्वे सति तस्य तिरोभावफलापपत्तिस्तदवस्था इयत्तापन्न[illegible]यमित्यादि प्रथक् देहान् अन्योन्यं ब्रह्मणो वा तथापि भगवतो देहः तावान् तावत्प्रमाणकस्त्वयानिरूपितः कथं [illegible]आह ब्रह्मेति यद्यपि बाह्वादीनां सहस्रत्वं निरूपितं तथापि बहु नातिरिच्यत इति प्राकृततुल्यता किंच नायं देहरूपः [illegible]ब्रह्मणः प्रसादहेतुत्वात् ॥ ८ ॥

श्रीम[illegible]त सारार्थदर्शिनी ।

धौतात्मा शुद्धचित्तः । धौतात्मत्वे लिङ्गमाह कृष्णेति । [illegible]पि चित्तवडिशं शनकैर्वियुज्यत इति कपिलदेवोक्तेः कृष्णपादमूलत्यागी योगी धौतात्ममान्येव न तु धौतात्मेति [illegible] । पान्थः [illegible]सादागत्य स्वशरणं स्वगृहं यथा न मुञ्चति । ननु तस्यापि कियद्दिवसानन्तरं धनाद्युपार्जनार्थं स्वगृहात् प्रवासग[illegible] [illegible]पन्थो विद्यमहि मुक्तस्त्यक्तः सर्व्वो धनाद्युपार्जनलक्षणः क्लेशो येन सः ॥ ५ ॥

एवं स्वाभिमतायाः शुद्धायाः भक्तेः प्रथमाङ्गभूत [illegible]श्रवण औत्सुक्यमाविष्कृत्य निर्गुणायाः सगुणायाश्च भक्तेर्यावद्वक्ष्यमाणेषु व्याप्तिः सम्भवति तावतोऽप्यर्थानुतत्तत्प्रस्तावाधिकारिणा जि[illegible]सितार्थसिद्ध्यर्थं पृच्छतियद्धातुमत इत्यादिना यावदध्यायसमाप्ति । एवञ्च यत्र यत्र भक्तेर्गन्धो ऽपिसम्भवति तत्र तत्र निरू[illegible]तव्यमन्यथा श्रीमत्या भक्तिदेव्या अप्रसाद इति प्रसाद्य भक्तेरभ्युदयार्थं शुद्धभक्तेरपि स्वाभिमतमधुरश्रवण कीर्त्तना[illegible] तानि तानि भक्तेरुदाहरणानि प्रत्युदाहरणानिच जिज्ञासनीयानीत्यभिव्यञ्जयतिच । अधातुमतो धातवो भूतानि तत्स[illegible] जीवस्य धातुभिर्देहारम्भ इतियत् एतद्यथानिर्निमित्तमेव केनापि हेतुना वा भवन्तो यथा जानते तथा कथयन्त्विति [illegible] (त[illegible]न्ये) एतन्न जानन्तीतिते कथं मया प्रष्टव्या इति भावः ॥६॥

स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः ।
मुक्त्वात्ममायां मायेशः शेते सर्व्वगुहाशयः ॥ ९ ॥
पुरुषावयवैर्लोकाः सपालाः पूर्व्वकल्पिताः ।
लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ॥ १० ॥
यावान् कल्पो विकल्पो वा यथा कालोऽनुमीयते ।
भूतभव्यभवच्छब्द आयुर्मानञ्च यत् सतः ॥ ११ ॥
कालस्यानुगतिर्या तु लक्ष्यतेऽण्वी बृहत्यपि ।
यावत्यः कर्म्मगतयो यादृशीर्द्विजसत्तम ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

किञ्च यश्चासावीश्वरः सोऽप्येतत्तुल्यदेहवान् प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदितिसार्द्धेन । लोकानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य एतत् पद्मं यस्योदरादासीत् । इयत्तायुक्तैः स्वपरिमितैःरवयवैरयं लौकिकः पुरुषो यावान् यादृशावयवयुक्तस्ततः पृथगपि असावीश्वरः तावानयंप्रोक्तः । संस्था यथोचितस्थौल्यकार्श्यदैर्घ्यादिविन्यासविशेषः अवयवास्तद्वन्तः करचरणादयः तद्वानिवेति । यद्यपीश्वरस्य करचरणादयो जीवस्यैव स्वतो भिन्ना न भवन्ति तथापि तानिव चोक्तः अतःकोऽ विशेषस्तस्येति भावः ॥७॥

अवश्यञ्च विशेषो(अवयवविशेषो)वाच्य इत्याह । अजो ब्रह्मा भूतानां इन्द्रियगुणोपाधीनाम् आत्मा नियन्तासमष्ट्युपाधित्वात् । सोऽपि नाभिपद्मसमुद्भवः सन्यदनुग्रहात्भूतानि सृजतीत्यन्वयः । ननु स निराकार एव वाच्यो यतःअजेन तद्रूपं ददृशे । सच अजोऽपि यन्नाभिपद्मोद्भवः। अतःस ब्रह्मणोऽपीश्वरो मायिकपुरुषतुल्याकारः किं मायिकाकारोऽन्यविधस्येतदपि वाच्यमिति भावः ॥ ८॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

हृदि प्रविश्य किं करोतीत्यपेक्षायामाह प्रविष्ट इति श्रीकृष्णः कर्णरंध्रेण स्वचेष्टितश्रवणद्वारास्वानां भावसरोरुहं हृदयकमलं प्रविष्टः शमलं बंधहेतुभूतरागादिरूपं मलम् धुनोति सलिलस्य यथा शरदिति दृष्टांतः शरद्व्यतिरिक्तानां जलमलनाशकानामोषधीनामिव कृष्णासंबंधहीनानां तपोव्रतदानध्यानादीनां मलनाशकाभासत्वं सूचयति ॥ ५॥

श्रीकृष्णनिर्मूलितशमलस्य श्रीकृष्णभक्तस्य कृतार्थतामाह धौतात्मेति धौतात्मा श्रीकृष्णशोधितमनाः श्रीकृष्णपादमूलंधेयं न मुंचति मुक्ताः सर्वरागद्वेषादयः परिक्लेशाः येन सः पांथः प्रवासादागतः यथा स्वशरणं गृहं न मुंचति तथा ॥ ६ ॥

एवं श्रवणौत्सुक्यमाविःकृत्य संदिग्धानर्थान्पृच्छति यदित्यादिना देहे स्वधातुविगमेऽनुविशीर्यमाणो व्योमेव तत्र पुरुषो न विशीर्यते इत्यत्र अधातुमतः धातवो भूतानि तद्विलक्षणस्याजस्य जीवात्मनः यत् यः धातुभिर्देहारंभः सूचितः सःकिं यदृच्छयानिर्हेतुकतया हेतुना वास्ति एतद्भवंतः यथावज्जानंति अतः कथयंत्विति शेषः ॥ ७ ॥

यदप्युक्तं सर्वेषामपि विभुरिति भगवतोभुक्तिमुक्तिप्रदत्वं तदपि जीवदेहसदृशदेहवतो दुर्घटमिवाभातीत्याशयेन पृच्छति आसीदिति सार्द्धेन यस्योदरात् लोकानां संस्थानं विन्यासो यत्र तत्पद्ममासीत् असौ परमात्मा पृथक् इयत्ता युक्तैः स्वपरिमितैरवयवैरयं लौकिकः पुरुषो यावान् यत्संख्याकावयववान् तावान्प्रोक्तः इतिशब्दः हेतुवाचकः अतो हेतोः सोपि संस्थावयववान इव लौकिक पुरुष इव अतो जीवात्परमेश्वरस्य वैलक्षण्ये विस्तरतः कथनीयमिति भावः ॥ ८ ॥

भाषाटीका ।

जब मनुष्य निष्पाप हो गया तब भगवान के चरणों को कभी नहीं छोडता है जिस तरह पथिक की जब थकावट दूर हो जाती है तब वह अपने घरको नहीं छोडता॥ ६ ॥

अधातु नाम, इस आत्मा का धातु ओं से जो देह का आरंभ है यह क्या है और जिस कारण से है यह सब आप जानते हैं सो कहिये ॥ ७ ॥

जिस्से लोक उत्पन्न होते हैं ऐसा कमल भगवान के उदर से हुआ और जितना प्रमाण पुरुष का है उतना आपने कहा ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

[illegible] आपीति । [illegible] शेते येन रूपेणावतिष्ठते । विश्वस्य स्थित्यादयो यस्मात् । [illegible]प्रश्नानां तत्त्वतोऽर्हस्युदाहर्तुमिति[illegible]क्रियाया: सम्बन्धः ॥९॥

प्रश्नान्तरमाह पुरुषस्यावयवैः पूर्वं कल्पिताः यस्येहावयवैर्लोकान् कल्पयन्तीत्यादौ लोकाश्च अमुष्यावयवा इति पातालमेतस्य हि पादमूलमित्यादौ त्वन्मुखादेव श्रुतवन्तो वयम् ॥१०॥

एवं सन्देहविपर्ययाभ्यां पृष्टम् इदानीमज्ञातान् बहूनर्थान् पृच्छति यावानित्यादिना । कल्पो महान् । विकल्पोऽवान्तरः । भूतादिशब्दो यस्मात् यस्य वाचक इति वा । सतः स्थूलदेहाभिमानिनो मनुष्यपितृदेवादेः आयुषः प्रमाणम् ॥११॥

अनुमानप्रकारः पृष्टः विशेषप्रकारं पृच्छति कालस्येति । अनुगतिः प्रवृत्तिः । कर्म्मगतयः कर्म्मप्राप्यानि स्थानानि । यादृशीः यादृशयः ॥१२॥

श्रीराधारमणदासगोस्वामिविरचित दीपिनीदीपनाख्यतट्टिप्पणी ।

तस्थ्वत इति अत्राध्याये त्रयोविंशश्लोकः ॥९॥

यस्येतिपद्मतृस्कन्धीयपञ्चमाध्यायस्य षट्त्रिंशच्छ्लोकः ॥ पातालमितिपद्मतृस्कन्धीय प्रथमाध्यायस्य षड्विंशश्लोकः॥१०॥

[यावानिति । अत्रकल्पविकल्पपदाभ्यामुत्पत्तिप्रलययोर्मध्यकालस्यैवटीकोक्तमहदवान्तरभेदेन ग्राह्यत्वं सम्प्लवः सर्व्वभूतानामिति परोक्तविंशश्लोकेन सृष्टिस्थितिप्रलयानामुक्तत्वादिति ॥११-१२॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

अन्यदपिपृच्छति अज इति भूतात्मा भूतानां व्यष्टिभू[illegible]नियन्ता यद्वा स्वयंभूतारब्धदेहः नाभियज्ञसमुद्भवः अजो ब्रह्मा यदनुग्रहाद्यस्यानिरुद्धस्यानुग्रहाद्भूतानि व्यष्टिभूतानि सृजति यत्र [illegible]रूपंतदनिरुद्धरूपं दृष्टं ॥९॥

स भगवान्विश्वस्थित्युद्भवाप्ययः विश्वस्य स्थित्युद्भवाप्यय[illegible]याभूतः मायाया नियंता आत्ममायां मुक्त्वा प्रकृतिमतीत्य जगद्व्यापारादुपरतः सर्वगुणाश्रयः पूर्णषाड्गुण्यः यत्र शेते [illegible]यस्येत्यन्वयः ॥ १० ॥

यस्येहावयवैर्लोकान्कल्पयन्ति पातालमेतस्य हि पादमूलमि[illegible]श्रवणात्तस्य कल्पभेदेनोपपत्तिं मन्वानः आशंकते पुरुषेत्यादिना पुरुषावयवैरनिरुद्धःउत्पन्नचतुर्मुखाख्यपुरुषावयवैः सपाला[illegible]: पूर्वकल्पिताः पूर्वस्मिन्कल्पेकल्पिताः इदानींस्थितरथंति शुश्रुम, इत्याह सपालैरितिसपालैर्लोकैरमुष्यपुरुषस्यावयवाः कल्पि[illegible] एवं च धाता यथा पूर्वमकल्पयदिति श्रुतिविरोधः इत्यभिप्रायः ॥११

यथाज्ञातानर्थान्बहून्पृच्छति यावानित्यादिना कल्पो महाकल्प[illegible]यावत्परिमाणकः विकल्प अवांतरकल्पः कालभागः यावान्भूतभव्यभवदादिशब्दवाच्यः कालः यथाऽनुमीयते ग्रहसंचारादिभिरिति [illegible]सतः कार्यस्य देवपितृमनुष्यादेरायुर्मानमायुः परिमाणं वयस्तदप्युदाहर्तुमर्हसीत्यन्वयः ॥१२॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

आसीद्यदुदरादित्युक्तभगवद्रूपदर्शनप्रकारंतदर्शयितुमि[illegible]ति अजइति भूतात्मास्वसृष्टतत्तत्कार्यव्यापीसर्वविलक्षणाद्विष्णोर्जातत्वादजोब्रह्मा भूतान्यहंकारादिजीवांस्तदभिमन्यमाना[illegible]ति सृष्टिरपिनस्यातंऽथावित्युक्तं यदनुग्रहादितिपाद्मकल्पेचनाभिपद्मभवोविरिञ्चःस्वंकारणंपद्मनाभंदिदृक्षुर्येनप्रकारेणात[illegible]रत्राम्वयः॥ ९ ॥

विश्वस्यस्थित्युद्भवाप्ययाःयस्मात्सतथोक्तः ल[illegible]दिसर्वगुणानामाश्रयः सृष्ट्यादौगुणभूतानांब्रह्मादीनामाश्रयोवा पुरुषःपुरुषाकारवान्पद्मनाभः आत्ममायां स्वेच्छाधी[illegible]प्रवर्तकत्वंविरम्यमुक्तप्रवर्तकत्वेनयत्रयास्मिन्लोकेशेते ॥ १० ॥

अधुनापुनरपिश्रुतार्थमनुवदति पुरुषेतिअंडा[illegible]यस्यपुरुषस्यहरेर्भिजावयवैःसपालाइंद्रादिलोकपालैःसहिताःपातालादयो लोकाः पूर्वंकल्पिताःप्रथमंसृष्टाःपातालादिलोकैरमु[illegible]वयवाःकल्पिताः प्रतिमात्मकब्रह्मांडावयवैःकल्पताइत्यन्वयः सपालैर्लोकैरमुष्यावयवाःप्रतिमावत्संकल्पिताइतिवा ॥ ११ ॥

श्रुतार्थमनूद्याधुनाप्रस्तुतपुराणार्थंपृच्छतियावा[illegible]कल्पोब्रह्मकल्पःद्विपरार्धाख्यःब्रह्मणोदिनंयावान्यावत्परिमितः । विकल्पोमन्वादिकालोवाराहादिर्वा भूतोभव्योभवन्[illegible]क्तः अतीतानागतवर्तमानाख्यइत्यर्थः यथायथार्थतयाऽनुमीयतेज्ञायते । कथंवाऽऽयुषोमानंप्रमाणंचयेनकालेनकृतंसकालः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तादृशमहत्त्वस्य कैमुत्यापादनाय स चापीति । यत्र स्थाने । मूलकारणमायायामपि तस्य स्थानस्यासम्बन्धित्वमभिप्रेतम् । शेते प्रकृतिं प्रति दृष्टिं निमील्य तिष्ठति । सर्व्वेषामपि गुहायां पुर्य्येयस्थाने शेते वसतीति सः ॥ ९ ॥

सम्बोहेतु बीजमाह पुरुषेति ॥ १० ॥

प्रलयस्य वक्ष्यमाणत्वात् कल्पशब्दे सृष्टिप्रलयमध्यकाल एव वाच्यः भूतादिशब्दो यस्मात् कालात् प्रवर्त्तेत इति शेषः ॥ ११ ॥ १२

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

यद्यपि बालहार्दिनां सहसत्वं निरूपितं तथापि बाहुत्वाज्जातिरिच्यतइति प्राकृततुल्यता किंच नायंदेहरूपः किंतु देहाद्व्यतिरिक्तः ब्रह्मणः प्रसादहेतुत्वात् तदाह अजो ब्रह्मायदनुग्रहः यस्यानुग्रहयुक्तः अनुग्रहादेवभूतात्मत्वं व्यष्टिरात्मात्मा भूतानिव्यष्टिरूपाणि सृजति अस्यसामर्थ्यस्यक्षतःशंकांवारयति ददृशेयेनेतितेऽस्यस्वकारणं आतस्यनारायणस्यरूपंयतः प्रसादेनददृशे । प्रसादादेवनाभिपद्मसमुद्भवोयस्य ॥ ९ ॥

एवं ब्रह्मणउत्पत्ति मीक्षती भगवदनुग्रहेणैवेति निरूप्यतस्य शयनमपितस्मिन्नेवरूपइति प्रतिदिनंउद्गमनतिरोभावाभ्यां तदनुग्रह तस्मिन्स्थितइति ब्रह्मणः शयनं निरूपयति । सचापि ब्रह्मापि यत्र शेते । तत्र तस्यब्रह्मणो माहात्म्यमाह । विश्वस्य स्थित्युद्भवाप्यया यस्मात् । पूर्वं भूतानां सृष्टिरेवोक्ता इदानीं प्रलयांताः सर्वेभावविकारास्तत एवेति विशेषः आत्मनोमाया सर्वकारणसामर्थ्यं निशायां त्यक्त्वा शेते निशापुनस्तस्यागादेवभवति तथाकरणेहेतुः मायेशइति मायायानियंता तस्यानियममार्यमेव तांत्यजतीत्यर्थः यदि क्तपत्वंवा ईशत्वं तथा सति कार्यावस्थां तांत्यक्त्वातयासह क्रीडार्थंशेत इत्यर्थः मायात्यागसामर्थ्यं बोध्यते मायेश इति नियामकस्त्वंतर्याम्येवेति कथमस्य मायेशत्वं तत्राह सर्वगुहाशय इति सर्वेषां गुहासुहृदःतेषु आशयः स्थानं यस्य अंतःकरणं वा तस्मात्सर्वांतर्यामित्वान्मायेशत्वं तस्मात्तस्यदेहसम्बन्धः किमर्थं इति प्रश्नः सचापीति वा नारायण एवोच्यते यत्र प्रलयजले शेते प्राकृतवत्तस्याप्यवस्थायां विद्यमानत्वात् तस्य देहत्वं ॥ १० ॥

एवं जीवब्रह्मणोर्देहमिमित्तं पृष्ट्वाशुकब्रह्मवाक्ययोः अवांतरवैलक्षण्यं दूरीकर्तुं पृच्छति पुरुषावयवैरिति भूर्लोकः कल्पितः पद्भ्यामिति वाक्यात् पुरुषावयवैर्लोककल्पनानिरूपिता त्वयापुनः पातालमेतस्य हि पादमूलं इति वाक्यात्लोकैरमुष्यावयवा निरूपिताः तत्र निर्णयो वक्तव्य इत्यर्थः यद्यपि भवतां ब्रह्मणश्च एकवाक्यतैव तथास्माभिः श्रुतमिति ससंदेहो निवारणीय इत्युक्तं शुश्रुम इति ॥ ११ ॥

अतःपरं तदनुगुणा एव पदार्थाः पृच्छ्यन्ते यावान्कल्पइति कल्पः प्राकृतः विकल्पोवैकृतः यस्मिन्कल्पेब्रह्माउत्पद्यते यत्र च प्रति बुध्यते तेषां प्रमाणं स्वरूपं च वक्तव्य मित्यर्थः कालानुमानज्ञानं घटिकापरिज्ञानं यथावक्ष्यति द्वादशार्द्धपलोन्मानं इति यावान्यथेति यथायोग्यं सर्वत्रैवानुषज्यते तेन भूतभव्यभवच्छब्दइति भूतं भव्यं भवत् एतेशब्दायस्मात्सकालः कथमनुमीयतइति पूर्वेणैवसंबंधः भूतादि पदानां प्रयोगनिमित्तं स्वरूपं च पृच्छत इति वा आयुषः परिमाणं यत्वक्तव्य मित्यग्रेण संबंधः सतां देवतिर्यङ्मनुष्यादीनां सत इति पदं विद्यमानत्व धर्मं सूचयति तेन आविर्भूतः कः कियत्कालंविष्ठतीति प्रश्नः संगच्छते अन्यथावैनाशिक प्रक्रिया या अनंगीकारात् सर्वएव कालः सर्वस्यायुर्भवेत् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

प्रश्नान्तरमाह । सचापि पुरुषः प्रकृतीक्षणकर्त्तायत्रशेते तत् स्थानं कथयेत्यर्थः । मायेशोऽपि मायाभर्त्तापि मायां त्यक्त्वा तस्याः (तस्य) बहिरङ्गशक्तित्वात् तामस्पृष्ट्वेत्यर्थः ॥ ९ ॥

प्रश्नान्तरमाह । पुरुषस्यावयवैःपूर्वं कल्पिताःयस्येहावयवैर्लोकान् कल्पयन्तीत्यादौ । तथा लोकैरमुष्यावयवा कल्पिताः पातालमेतस्य हि पादमूलमित्यादौ शुश्रुम त्वन्मुखात् श्रुतवन्तो । वयम् । अत्रान्यो विशेषश्चेदस्ति तमपि कथयेति भावः । अथयद्धातुमत इतीशितव्यं जीवं पृच्छामि । आसीद्यदुदरादिना ईश्वरं द्वितीयम् मण्डसंस्थितं पुरुषं पृच्छामि । स चापि यत्र पुरुष इति प्रथमं महतस्स्रष्टारं पुरुषं पृच्छामि । शेते सर्वगुहाशय इति तृतीयं सर्वभूतस्थञ्च पुरुषं पृच्छामि । विष्णोस्तुत्रीणि । रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥ इति स्मृतेः । पुरुषावयवैरिति समष्टिजीवञ्च पृच्छामीति प्रश्नपञ्चकं शान्तप्रीतिभक्तौ पर्य्यवसाति जीवादिविशेषं भगवद्रूपं ब्रह्मणा दृष्टं कथयेति व्यज्यमानः प्रश्नोऽपि प्रीतिभक्तौ पर्य्यवसाति ॥ १०

कल्पो महान् विकल्पोऽवान्तरः । भूतः अतीतः भव्यो भावी भवन् वर्त्तमानः इति शब्दो यस्मात् स कालः । सतः स्थूलदेहाभिमानिनो मनुष्यपितृदेवतादेरायुषो यत् प्रमाणं तत् कथय ॥ ११ ॥

अनुगतिरनुप्रवृत्तिः । अणवी परमाणवादिरूपा । बृहती वर्षादिरूपा । कर्म्मगतयो भद्राभद्रकर्म्मप्राप्यानि स्थानानि । यादृशीयांदृशः । इति कर्म्म प्राप्यानि स्थानानि सर्व्वाण्येव कालैः सूक्ष्मस्थूलविकल्पकल्पैरेव धीयन्त इति कर्म्मनिर्वेदार्थं प्रश्नद्वयं शुद्धभक्तावपि पर्य्यवसाति । यदुक्तं श्रीभगवता जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्म्मसु ॥ १३ ॥

यस्मिन् कर्म्मसमावायो यथा येनोपगृह्यते
गुणानां गुणिनाञ्चैव परिणाममभीप्सताम् ॥ १३ ॥
भूपातालककुव्व्योमग्रहनक्षत्रभूभृताम् ।
सरित्समुद्रद्वीपानां सम्भवश्चैतदोकसाम् ॥ १४ ॥
प्रमाणमण्डकोशस्यवाह्याभ्यन्तरभेदतः ।
महताञ्चानुचरितं वर्णाश्रमविनिश्चयः ॥ १५ ॥
युगानि युगमानञ्च धर्म्मो यश्च युगे युगे ।
अवतारानुचरितं यदाश्चर्य्यतमं हरेः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

जीवात्परमात्मनो विशेषाभावे सृजामि तत्प्रियुक्तोहमित्यादिपूर्वोक्तंच न घटेतअतोऽवश्यं विशेषो वाच्य इत्याह अज इति भूतानां व्यष्टिभूतानामात्माश्रयः अजो ब्रह्मा यस्य भगवतोऽनुग्रहात् भूतानि व्यष्टिभूतानि सृजति येन च भगवतानुग्रहकृतानाभिपद्मसमुद्भवः ब्रह्मा तस्य भगवतो रूप ददृशे दृष्टवान् ॥ ९ ॥

सचेति प्रश्नांतरम् विश्वस्य स्थित्युद्भवाप्ययायस्मात्समायेशः प्रकृतिनियंता मायांजगदाकारेण स्थितां मुक्त्वा प्राकृतं विहायेत्यर्थः यत्रलोके शेते वसति तत्तत्वतोऽर्हस्युदाहर्तुमिति वक्ष्यमाणेन [illegible] ॥ १० ॥

यस्येहावयवैर्लोकान् कल्पयंतीत्यादिपाताळमेत[illegible]त्यादि च श्रुत्वाशंक्यते पुरुषावयवैरिति सपालाः लोकपालैः सहिताः पुरुषावयवैः पूर्वं कल्पिताः इति सपालैर्लोकैरमुष्य पु[illegible] कल्पिताः इतिचशुश्रुमः श्रुतवंतो वयम् तद्विरोधं तत्वतोऽर्हस्युदाहर्तुम् किंच पुरुषमुखादि रूपेण जनलोकादिरूपामिदं [illegible] पूर्वकल्पितं तदुदाहर्तुमर्हसीत्यपि पृष्टमित्यग्रे स्फुटी भविष्यति ॥ ११ ॥

अथाज्ञातान् बहूनर्थान्पृच्छति यावानित्यादिना या[illegible]णकः कल्पो महाकल्पः विकल्पोऽवांतरः कल्पः भूतादिशब्दा यस्य सतथाकार्यस्यदेवपितृमनुष्यादेः आयुषःपरिमाणमेतं [illegible]मनुमीयते एतदर्हस्युदाहर्तुम् ॥ १२ ॥

[illegible]टीका ।

नाभि कमल से है जन्म जिनका ऐसे ब्रह्मा जी जि[illegible] प्राणियों को रचते हैं और जब वही कृपा करते हैं तब उन को रूप देखते हैं ॥ ९॥

संसार का पलन जन्म नाश है जिससे ऐसे भगवा[illegible] को छोडकर जहां पर सोते हैं यह सब कहिये ॥ १० ॥

पुरुष के अवयवों से लोकपालोंके सहित लोक [illegible] और लोकों से इस के अवयव रचे गए हैं यह हम लोग सुनते हैं ११।

जिस परमेश्वर का कल्प विकल्प काल आयु [illegible] अनुमान किया जाता है ॥ १२ ॥

[illegible]त भावार्थदीपिका ।

गुणानां सत्वादीनां परिणामं देवादिरूपमिच्छतां गु[illegible] जीवानां मध्ये । यस्मिन् परिणामे । कर्म्मणां पुण्यपापानां समावायः समुदायः । केन कर्म्मसमुदायेन कथं कृतेन कोऽधिकारी [illegible] प्राप्नोतीत्यर्थः ॥ १३ ॥

भूतादीनां सम्भवः । एतानि ओकांसि येषां प्राणिनां तेषा[illegible] सम्भवो यथेति सर्वत्रानुषङ्गः ॥ १४ ॥

वर्णानामाश्रमाणाञ्च विनिश्चयः तत्तत्स्वभावैर्निर्धारणम् [illegible] ॥

युगे युगे प्रतियुगं यो धर्म्मः । यच्च हरेरवतार[illegible] ॥ १६ ॥

[illegible] कृत भागवत चन्द्रिका

कालस्य वा अवधी सूक्ष्मानिमेषादिरूपा बृहता[illegible] याऽनुगतिः प्रवृत्तिर्लक्ष्यते सापि कथनीयेत्यर्थः कर्मगतयः कर्मणः प्राप्यानि फलानि यावंत्यः यावत्संख्याकाः यादृश[illegible]सत्तम ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रिका

यस्मिन्देहे कर्मसमावायः कर्मणां फलनिष्पादनं येन देवादिभूतेन यथा उपगृह्यते यादृशंकर्मफलं प्राप्यते तत्सर्वमपेत्यर्थः गुणानां सत्वादीनां गुणिनां च परिणामं परिणामहेहेतुं गुणानां परिणामं देवादिशरीरपरिग्रहेहेतुं सविस्तरं वक्तुमर्हसीति ॥ १४ ॥

ककुभः दिशः भूभृतः पर्वताः भूपातालादीनां संभवः एतानिभ्वादीनि ओकांसि येषां तेषां प्राणिनां च संभवः यथेति सर्वत्रानुषंगः ॥ १५ ॥

अंडकोशस्य तद्बाह्याभ्यंतरवस्तुनश्च प्रमाणमंडाद्बाह्यवस्त्वावरणमहतांभागवतानामनुचरितंचरित्रं वर्णानामाश्रमाणांच विनिश्चयस्तु-तत्स्वरूपस्वभावेननिर्धारः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

अणवीपरमणुलक्षणा। महतीपरममहत्परिमिताकालस्यगतिः सापिकथंलक्ष्यते कर्मगतयः कर्मफलानियावतिः कतिसंख्यानियादृशोः कीदृशानि ॥ १३ ॥

यस्मिन्कस्मिन्जीवेकिंकर्मसमवायः यथाकथंयेनकेनसकर्मसमवायउपगृह्यते कर्मसमवायकर्ताकः सत्त्वादिगुणानांपरिमाणंगुणिनां-महदादिजीवानांसामर्थ्यपरिमाणं गुणानांशब्दादीनांगुणिनामाकाशादीनामात व्याख्याननयुक्त परिमाणानुक्तेः देवासुरेभ्योमघवानित्या-दिनांकेश्चाम्यत्र ॥ १४ ॥

भूपातालादीनांचपरिमाणं एतानिभूम्यादीनि ओकांसियेषांतेनथातेषांसंभवस्वरूपात्तच ॥ १५ ॥

बाह्याभ्यंतरेचवर्तमानस्यवस्तुनोहरेः परमाणवादिपरममहदंतानांरूपाणांचपरिमाणं सतपंचत्यादिनावक्ष्यमाणत्वात् महतांमरीचिकर्द-मादीनामनुचरितंवर्णानामाश्रमाणांविशेषतोनिर्णयं ॥१६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

गुणानां परिणाममभीप्सतां सुप्तत्तद्वासनानां गुणिनां जीवानां मध्ये येन जीवेन यस्मिन् परिणामनिमित्ते यथा येन प्रकारेण यः कर्मसमवायो गृह्यत इत्यन्वयः। स कथ्यतामिति शेषः ॥ १३ ॥ १४ ॥ १५ ॥

हरेः श्रीकृष्णस्यावताराणामनुचरितम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

प्रश्नांतरमाह। कालस्यानुगतिरिति। कालस्यअणवीअनुगतिः महतीच अणुःकालोमहान् कालश्चकथंतायतइत्यर्थः। स्वभावतः कालोनज्ञायते किंतुकार्यद्वारा इदमिदानीमितिकार्यद्वारा सैवकालस्यानुगतिः यत्कार्येगच्छतितदनुवर्तनं। तत्रस्थूलसूक्ष्मकार्याणांनि-त्यत्वात्अर्थांतराणामनियतकालत्वात्कालस्यानुगतिर्यांत्वांकथयेत्यर्थः। सूर्यगत्यातां कथयति। ननुकालस्यनेदापवनसंततात्याशंक्याह यातुलक्षतइति। सर्वत्रइदानीमितिप्रतीतेः पदार्थानुवृत्तिः कालस्यलक्षणे। अन्यथाआकाशादिवत्तस्याप्यनिलापोनस्यात्। तथाअणवी-वृहत्यपि क्षणमात्रेणगतोमहताकालेनगतइति। तथाचकालानुगतिस्तिपरंतत्रनियामकंवक्तव्यमितिप्रश्नः कर्मणांनानाविधानांगतयः प्रवृत्तिप्रकारः नानाविषयोभिसंपादनेनसुखदुःखप्रदानेनचयावत्यः। यादृशीरितिपरिमाणप्रकारौ प्रश्नविषयो। द्विजसत्तमेतिसंबोधनं महत्याकर्मगत्येति वक्तुमावश्यकत्वंसूचयति ॥ १३ ॥

यस्मिन्कर्मसमावायइतिप्रश्नांतरं। गुणानांसत्वादीनांपरिणामंदेवर्षिपुंकमनुष्यादिरूपं अभीप्सतांगुणिनांकार्याणांगुणसमुदायरूपाणां मध्येयस्मिन्कर्मसमावायः। कर्मणांशुक्लोहितकृष्णानांसमवायो मेलनमित्येकः प्रश्नः शुक्लंकर्मदेवेष्वेव। शल्पंपातालवासिनां अंतरिक्ष-स्थानांवा समवायोमनुष्येष्वितिवक्ष्यते। किंच॥ यथाकर्मसमवायः त्रिगुणानांसदृशोमेलितं। न्यूनाधिकाभावेनवा। किंच येनकर्मसम-वायः केनवांकर्माणियोजयंति उपगृह्यति स्वीकियंति। जीवेनभगवताकालादिनावा गुणिनामपिपरिणाममभीप्सतामिति कथनार्थगुणगुणि-नोःसहनिरूपणं यथादेवावतारइंद्रावतारइति ॥ १४ ॥

भूपातालादीनांतदौकसांचसंभवः यथायावानितिप्रश्नः ॥ १५ ॥

अंडकोशस्यप्रमाणं ब्रह्मांडंकियत्परिमाणमिति कोशशब्देनपञ्चाशत्कोटिकाशामावात्पत्रस्थानीयलोकपरिणाममपिलोकानामुपर्यधो-भावोपिनिरूपणीयइतिसूचितं बाह्यतःकियत्। आंतरतः कियत् यथांतरप्रमाणंवक्ष्यति सूर्याण्डगोलयोर्मध्येकोटयःस्युः पंचविंशतिरितितथा बाह्यवर्णोत्तरैरिति महतांसतां तेषांमनुचरितंभक्तिः चकाराद्ज्ञानिनामपिपरिगणना वर्णानामाश्रमाणांचविनिश्चयः आचारतः स्वरूपतश्च अ-वताराणामनुचरितं ॥ १६ ॥

नृणां साधारणो धर्म्मः सविशेषश्च यादृशः ।
श्रेणीनां राजर्षीणाञ्च धर्म्मः कृच्छ्रेषु जीवताम् ॥ १७ ॥
तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणम् ।
पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च ॥ १८ ॥
योगेश्वरैश्वर्य्यगतिर्लिङ्गभङ्गस्तु योगिनाम् ।
वेदोपवेदधर्म्माणामितिहासपुराणयोः ॥ १९ ॥
संप्लवः सर्व्वभूतानां विक्रमः प्रतिसंक्रमः ।
इष्टापूर्त्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

गुणानां सत्त्वादीनां परिणामं देवादिरूपमभीप्सतां गुणिनां जीवानां यस्मिन् परिणामे कर्म्मणां सुकृतदुष्कृतयोगज्ञानभक्तीनां समवायः समुदायः सम्भवति तं कथय । स च परिणामो मानुष्यदेह एव ज्ञेयः । तस्मिन्नपि परिणामे येन जीवेन यथा यत् कर्म्म उपगृह्यते तत् कथय । मानुष्ये च कर्म्मज्ञानादिषु कः कोऽधिकारी कथं किं किं कृत्वा किं किं साध्यं प्राप्नोतीत्यर्थः । प्रश्नोऽयं कर्म्ममिश्र-ज्ञानमिश्रयोगमिश्रशुद्धभक्तिषु पर्य्याप्नोति ॥ १३ ॥

भूरादीनां सम्भवः । एतानि ओकांसि येषां तेषां [illegible] यथेति सर्व्वत्रानुषङ्गः । भूरादीनां बहुविधभक्तास्पदत्वात् तदोकसाञ्च मायोऽधिकृतादिभक्तत्वात् प्रश्नोऽयं भक्तेः पर्य्या[illegible] ॥ १४ ॥

प्रमाणमण्डकोशस्येत्यैश्वर्य्यप्रधानायां भक्तौ [illegible]नि भगवत्कुक्षौ सन्तीति जिज्ञासायां, वर्णाश्रमेति, वर्णाश्रमधर्म्मा भक्तिमिश्रतयैव सिद्ध्यन्ति तदन्यथा वेति जिज्ञासायां [illegible]विधायाञ्च भक्तौ प्रश्नोऽयं पर्य्याप्नोति ॥ १५ ॥

युगानीति युगावताराणां तत्प्रवर्त्तितभक्तौ [illegible]सायाम् ॥ १६ ॥

[illegible]कृत सिद्धान्तप्रदीपः ।

कालस्य याऽणवी परमाणुरूपा बृहती सं[illegible]रूपा [illegible]तिः प्रवृत्तिर्लक्ष्यते तामुदाहर्त्तुमर्हसि कर्मणा गम्यते इति गतयः फलभूमयः यावत्यः यावत्संख्याकाः यादृशाश्चादृश[illegible] [illegible]दाहर्त्तुमर्हसि ॥ १३ ॥

गुणानां सत्त्वरजस्तमसां परिणामं देवमनु[illegible]मीप्सतामिच्छतां गुणिनां सत्त्वादिगुणपरियुक्तानां जीवानां मध्ये येन गुणिना यस्मिन् देवादिभावे कर्मणांसमावायः फ[illegible]ह्यते तथा हे ब्रह्मन्नुदाहर्त्तुमर्हसि ॥ १४ ॥

भूरादीनामेतदोकसां प्राणिनां चयः संभ[illegible]च्छब्दः सर्वत्र संयोज्यते ॥ १५ ॥

बाह्याभ्यन्तरभेदतोऽण्डकोशस्य यत्परिमाणं [illegible]तानाम् यदनुचरितं तच्चवर्णानामाश्रमाणां च यो विनिश्चयो निर्णयस्तं चोदाहर्त्तुमर्हसि ॥ १६ ॥

[illegible]षाटीका ।

काल की अनुगति जिस तरह लक्षित है [illegible] और जि[illegible] कर्म की गति हैं और जिस तरह की हैं ॥ १३ ॥
जिसमें कर्म का समवाय जिसतरह ग्रहण [illegible] ॥ १४ ॥
पृथिवी पाताल दिशा ग्रह नक्षत्र पर्वत न[illegible] [illegible]की जहां से उत्पत्ति है ॥ १५ ॥
अंड कोशका बाहर भीतर के भेद से प्रमा[illegible] और महा[illegible]ओं के चरित्र और वर्ण आश्रमका निश्चय ॥ १६ ॥

[illegible]कृत भावार्थदीपिका ।

सविशेषः वर्णाश्रमनिबन्धनः । श्रेणीनां त[illegible]जीविनां व्यवहारनियमलक्षणो धर्म्मः । राजर्षीणां प्रजापालनादिकादिणाम् कृच्छ्रेषु आपत्सु जीवतां सर्व्वेषाम् ॥ १७ ॥

तत्त्वानां प्रकृत्यादीनां परिसंख्यानं संख्या, [illegible]तो लक्षणं तत्तत्कार्यहेतुत्वेन च लक्षणमित्यर्थः । पुरुषाराधनस्य विधिः देवपूजायाः प्रकारः । अष्टांगयोगस्य च विधिः ॥ [illegible]

श्रीधरस्वामिकृत भावार्थदीपिका ।

योगिश्वराणामैश्वर्यमणिमादिर्गतिः अर्चिरादिपद्धतिः । लिङ्गशरीरस्य भंगः क्षयः । वेदा ऋग्वेदादयः, उपवेदा आयुर्वेदादयः धर्मा धर्मशास्त्राणि, तेषाम्, इतिहासपुराणयोश्च गतिः ॥ १९ ॥

संप्लवः अवान्तरप्रलयः, यद्वा सम्यक् प्लवनम्, प्रतिसंक्रमो महाप्रलयः, इष्टं वैदिकं कर्म्म । पूर्त्तं स्मार्त्तम् । वापीकूपतडागादिदेवतायतनानि च अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते ॥ इति । तत्र च काम्यानाम् अग्निहोत्रादीनां विधिः त्रिवर्गस्य धर्म्मार्थकामानां विधिः अविरोधप्रकारः ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिनाख्यतट्टिप्पणी ।

० ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

हरेराश्चर्यतममवतारानुचरितं च यत्तदपि युगानि युगस्वरूपं युगपरिमाणं युगे युगे प्रतियुगं ॥ १७ ॥

योधर्मः साधारणः मनुष्यमात्रसाधारणः सविशेषः वर्णाश्रमविशेषनियतधर्मरूपविशेषयुक्तः श्रेणीनां तत्तद्व्यवहारोपजीविनां धर्मः व्यवहारनिर्णयलक्षणः धर्मः राजर्षीणां प्रजापालनाधिकारिणां कृच्छ्रेष्वापत्सु जीविनां यो धर्मः ॥ १८ ॥

तत्वानां महदादीनांपरिसंख्यानं संख्यालक्षणं स्वरूपं हेतुलक्षणं तत्प्रकारं लक्षणं पुरुषाराधनविधिः परमपुरुषाराधन प्रकारः आध्यात्मिकस्य प्रकृतिविविक्तात्मस्वरूपविषयस्य योगस्य ज्ञानयोगस्य प्रकारः ॥ १९ ॥

योगेश्वराणामैश्वर्याणामणिमादीनि तेषां गतिः स्वरूपं योगिनां लिंगभंगः शरीरपातः वेदा ऋग्वेदादयः तदुक्तधर्माश्च तेषामितिहासपुराणयोश्च गतिः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

यदाश्चर्यतममन्येषामितिशेषः हरेरवतारानुचरितं तच्च कानियुगानि युगमानंवर्षैरियत्तया परिच्छेदः अनुयुगं योयोधर्मस्तं तंच ॥ १७ ॥

साधारणोधर्मोजातिमात्रप्रयुक्तः अहिंसादिलक्षणोयोधर्मोविशेषसहितः यावद्यः कीदृशः श्रेणीनामंगरक्षकाणां धर्मोयुद्धेपूच्यते राजर्षीणांप्रियव्रतादीनांकृच्छ्रेष्वापत्सुजीवतां ॥ १८ ॥

तत्वानां महदादीनां परिसंख्यानं सामान्यविशेषसंख्या तेषां लक्षणं व्यावर्तकोधर्मः हेतोःकारणस्य ब्रह्मणोलक्षणं स्वरूपं पुरुषस्य विष्णोः आध्यात्मिकस्यपरमात्मसंबंधिनोयमादियोगस्यभक्तियोगस्य विधिः तंच ॥ १९ ॥

योगेश्वरैश्वर्यगतिर्योगेश्वराणामणिमाद्यष्टैश्वर्यप्राप्तिं तेषांस्वरूपंच योगिनांयमनियोगाभ्याससिद्धानां वेदांतादिशास्त्राभ्याससिद्धानां च योगतोलिंगभंगंसूक्ष्मशरीरनाशकप्रकारं स्थिरंसुखमेत्यादिनोक्तोपायेनलेखकवासुधायाहरत्यादिपश्चात् । ऋगादिवेदानामायुर्वेदाद्युपवेदानांवेदादिविहितवर्णाश्रमधर्माणांचयः संभवउद्धारादिस्तंच इतिहासपुराणयोःसंभवउत्पत्तिः॥ २० ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

तत्रापियदाश्चर्यतमं कालियदमनगोवर्द्धनोद्धरणादि । युगानिकानीतिकथयेतीति । युगमानंसंवत्सरभेदेन ॥ १७ ॥

नृणांसाधारणोधर्मः सत्यवचनादिः सविशेषः यागादिसहितः । श्रेणीनामेकशिल्पोपजीविनां राजर्षीणां राजानोभूत्वायेऋषयः यथा मन्वादयः तेषांसाधारणो धर्मोविशेषधर्मश्चकथनीयः धर्मःकृच्छ्रेषुधर्मसंकटेषुआपत्स्विस्वयः जीविनांकेवलजीवतां धर्मकरणासमर्थानां को धर्मइतिप्रश्नः ॥ १८ ॥

तत्वानांप्रकृत्यादीनांपरिसंख्यानंगणना सांख्यमितियावत् तेषामेवलक्षणं व्यावर्त्तकोधर्मः तेषामेवहेतुपूर्वकंचलक्षणं । तथात्वंतस्य इति पुरुषाराधनविधिः भगवत्परिचर्याप्रकारः तथायोगास्यविधिः योगविशेषस्याध्यात्मिकस्यचविधि ॥ योगश्चाष्टांगः साधारणः । आध्यात्मिक श्रवणमननिदिध्यासनैराधिकः चकाराद्राजयोगादीनां लक्षणंकथयेतिप्रश्नः ॥ १९ ॥

योगेश्वराणामैश्वर्यगतिं । यथाकर्दमस्य लिंगभंगसुयोगिनां । लिंगशरीरस्यभंगः यथानवेदंसुधेगतं । वेदंतुतत्त्वमस्थितमुषितंवेति वेदाश्चत्वार ॥ उपवेदाश्चत्वारः आयुर्वेदादयः । धर्माणिधर्मशास्त्राणि । इतिहासोभारतादिः पुराणंब्राह्मादिएतेषांलक्षणंपरिमाणंचवक्तव्यमिति प्रश्नः ॥ २० ॥

...आनुशायिनां सर्गः पाषण्डस्य च सम्भवः ।
आत्मनो बन्धमोक्षौ च व्यवस्थानं स्वरूपतः ॥ २१ ॥
यथात्मतन्त्रो भगवान् विक्रीडत्यात्ममायया ।
विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः ॥ २२ ॥
सर्व्वमेतच्च भगवन् पृच्छते मेऽनुपूर्व्वशः ।
तत्त्वतोऽर्हस्युदाहर्त्तुं प्रपन्नाय महामुने ॥ २३ ॥
अत्र प्रमाणं हि भवान् परमेष्ठी यथात्मभूः ।
परेचेहानुतिष्ठन्ति पूर्व्वेषां पूर्व्वजैः कृतम् ॥ २४ ॥
न मेऽसवः परायन्ति ब्रह्मन्ननशनादमी ।
पिवतोऽच्युतपीयूषमन्यत्र कुपितात् द्विजात् ॥ २५ ॥

श्रीमद्विश्वनाथ[illegible]कृत सारार्थदर्शिनी ।

नृणामन्त्यजपर्य्यन्तानामपि साधारणो धर्मः [illegible] विशेषधर्मस्तुतत्तज्जातिधर्म्म इति तद्धर्म्मवत्त्वेऽपि ते भक्ता भवन्ति । किरातहूणान्ध्रपुलिन्दपुक्कशा इत्यादेः । एवं [illegible]व्यवसायोपजीविनां राजर्षीणाञ्चेति तेष्वपि भक्तिमत्सु निरपराधतयैव स्थातव्यमिति विवक्षायां, कृच्छ्रेषु जीवतां धर्म्मं [illegible] सर्व्वविधभक्तौ पर्य्याप्नोति ॥ १७ ॥

तत्त्वानां प्रकृत्यादीनां परिसंख्यानं गमनं लक्षणं [illegible] तत्तत्कार्य्यहेतुत्वेन लक्षणमिति पुरुषावतारलीलायाम् । योगस्येति योगमिश्रायाम् ॥ १८ ॥

योगेश्वराणां शम्भुप्रभृतीनां महानुभावभक्तानां [illegible] या गतिः । लिंगभंग इति शान्तभक्तौ । वेदादीनां तात्पर्य्यमिति शेषः । तच्च भक्तिरेवेति भक्तौ ॥ १९ ॥

सम्यक् प्लवः संसारसिन्धोस्तरणसाधनं किं, [illegible] किं, प्रतिसंक्रमस्तत्र नाशः क इति भक्तेरनुकूलवस्तुजिज्ञासायाम् यद्वा संप्लवविक्रमप्रतिसंक्रमाः सृष्टिस्थितिसंहाराः [illegible] पूर्त्तं स्मार्त्तम् । वापीकूपतडागादिदेवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते ॥ इति । काम्यानि [illegible] त्रिवर्गस्य धर्मार्थकामस्य विधिरविरोधप्रकार इति कर्म्ममिश्रायां भक्तौ ॥ २० ॥

[illegible]सिद्धान्तप्रदीपः

युगानि युगमानं च युगे युगे प्रतियुगं यो धर्मः [illegible] महेश्वरस्यावतारानुचरितं तच्चोदाहर्त्तुमर्हसि ॥ १७ ॥

यः नृणां सर्वेषां साधारणः धर्मस्तं यादृशः [illegible] निबंधनो धर्मस्तादृशं च श्रेणीनां तत्तद्व्यवसायोपजीविनां व्यवहारनियमलक्षणो यो धर्मस्तं राजर्षीणां प्रजापालन[illegible] धर्मस्तं च कृच्छ्रेषु आपत्सु जीवतां सर्वेषां यो धर्मस्तं चोदाहर्त्तुमर्हसि ॥ १८ ॥

तत्त्वानां प्रकृत्यादीनां यत्परिसंख्यानं तत् [illegible] हेतुलक्षणं तत्तत्कारणलक्षणम् यश्च पुरुषस्य परमात्मनः आराधनप्रकारस्तम् आध्यात्मिकयोगस्य अध्यात्मविद्यायाः यो विधिस्तं [illegible]दाहर्त्तुमर्हसि ॥ १९ ॥

योगेश्वराणां ज्ञानभक्त्यादिरूपैश्वर्यस्य यां[illegible] योगिनां लिंगशरीरस्य भंगः कारणो यो लयस्तम् ऋगादिवेदानामुपवेदानामायुर्वेदादीनां धर्मस्य धर्मशास्त्रस्य इतिहास[illegible] स्वरूपं तदुदाहर्त्तुमर्हसि ॥ २० ॥

[illegible]भाषाटीका ।

भगवान के अवतार का चारित्र और युग का प्रमाण और युग युग में धर्म ॥१७॥
और मनुष्यों का साधारण धर्म और विशेष [illegible] और [illegible] और राजर्षि और आपत्ति मे जो जीते हैं ॥१८॥
और तत्त्वों की संख्या और लक्षण और पुरुष [illegible] और योग और आध्यात्मिक की विधि ॥१९॥
और योगेश्वरों की अणिमादि सिद्धि और [illegible] इतिहास पुराण इनका स्वरूप ॥२०॥

श्रीधरस्वामिकृत भावार्थदीपिका।

अनुशायिनां लीनोपाधीनां जीवानाम्। आत्मनो जीवस्य व्यवस्थानं बन्धमोक्षातिरिक्तस्वरूपेणावस्थानम् ॥ २१ ॥
उदास्ते प्रलये ॥ २२ ॥
यच्चान्यदपृष्टमपि ॥ २३ ॥
प्रमाणं सम्यक् ज्ञाता। यतस्तव ब्रह्मनारदव्यासक्रमेण सम्प्रदायोऽस्तीति सामान्यन्यायेनाह परेचेति। यद्वात्वदन्येप्रायशो गतानुगतिका एव न तत्त्वविदइत्याह परेचेति ॥ २४ ॥
ननु तवानशनाद्विजकोपाभ्यां व्याकुलचित्तस्यकुतः श्रवणं तत्राह नेति। न परायन्ति नापगच्छन्ति न व्याकुलीभवन्तीत्यर्थः अच्युतकीर्तिपीयूषंपिबतः ॥ २५ ॥

श्रीराधारमणदासगोस्वामिविरचितदीपिन्याख्यतट्टिप्पणी।
(साधारण इति। साधारणोजातिमात्रनिबन्धनः अहिंसादिलक्षः ॥ १७—२४ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका।

सर्वभूतानां संप्लवः अवांतर प्रलयः उत्पत्तिर्वा विविधः क्रमः विक्रमः स्थितिः प्रतिसंक्रमः संहारः महाप्रलयः इष्टं वैदिकं कर्म पूर्तं त्रिवर्गस्य धर्मार्थकामानांविधिः प्रकारः ॥ २१ ॥
अनुशायिनां भुक्तशेषकर्मणा सह परलोकभ्रष्टानां सर्गः उत्पत्तिः प्रकारः पाखंडस्य पाखंडधर्मस्य संभवः उत्पत्तिः आत्मनो जीवस्य बंधमोक्षप्रकारः स्वरूपतो व्यवस्थानं मुक्तिदशायामवस्थानं तत्प्रकार इत्यर्थः ॥ २२ ॥
आत्मतंत्रः स्वतंत्रः विभुः सर्वांतरोभगवान् आत्ममयया स्वनियाम्यमायया यथा विक्रीडति पुनश्च मायां विसृज्य यथा येन प्रकारेण साक्षिवत्साक्षाद्दृष्टवदुदास्ते प्रलये उदासीन आस्ते ॥ २३ ॥
एतत्सर्वं चकारादपृष्टमपि गुह्यं यत् तत्र पृच्छते प्रयताय च मेमह्यं हेभगवन् हे महामते तत्त्वत उदाहर्तुं उत्तरं वक्तुं त्वमर्हसि अर्हता योतकमिदं विशेषणद्वयं भगवन्महामते इति च उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्तिविद्यामविद्यांच सवाच्यो भगवानिति हि स्मर्यते गुह्यमातिरेव त्रैकालिकवस्तु याथात्म्यज्ञानवत्त्वं ॥ २४ ॥
योग्यतामेवोपपादयति अत्रेति अत्र पृष्टेष्वर्थेषु भवान्प्रमाणं सम्यग्ज्ञाता तत्रहेतुः आत्मनः परमात्मनः भूःजातः परमेष्ठी ब्रह्मा यथा प्रमाणं तद्वत् ब्रह्मनारदव्यासक्रमेण संप्रदायोऽप्यस्तीत्याह पूर्वेषामपि पूर्वजैः कृतं परेऽर्वाचअनुतिष्ठंति ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

विक्रमोविविधचरित्रलक्षणःप्रतिसंक्रमः संहारः इष्टस्ययोगादेः पूर्तस्यवापीकूपादेः काम्यानांकार्यादीनां त्रिवर्गस्यधर्मार्थकामलक्षणस्य ॥ २१ ॥
प्रकृतावनुशयनादनुशायिनःसंसारिणस्तेषांसर्गादेःपरिभ्रष्टानांस्वर्गादेर्वा आत्मनोजीवस्यमोक्षंविशिनष्टि व्यवस्थानमिति यद्वातारतम्येनावस्थानं ॥ २२ ॥
आत्मतंत्रोभगवानात्ममाययास्वेच्छयाचिरप्रकृत्याचजगत्सृष्ट्यादिना यथायेनप्रकारेणविक्रीडति द्विविधात्ममायास्ति स्वरूपभूतातद्वशाचेतितत्रतद्वशयाजीवंसंसारयन् स्वरूपभूतयामत्स्यादिसाधनसंपन्नंसंसाराद्विमोचयन्सुखेनरमयन्पुनस्तद्वशबंधकशक्तिविसृज्यसाक्षिरूपचुरुपचान्निर्लेपोयंयोदास्तेप्रकृतिमुक्तवातिष्ठतिद्विधाचात्ममायातद्रूपातद्वशाचेतितद्वशयासंसारयतिस्वरूपयाविमोचयत्युदास्तेइत्यादिश्रुतेर्नामिवाच्यामायात्रोच्यते ॥ २३ ॥
प्रश्नराशिमुपसंहरति सर्वमिति चशब्दादन्यदपृष्टंच यदनुपूर्वशःपूर्वंवक्तव्यमितिप्रतीयतेनेतत्क्रमेणउदाहर्तुमर्हसीति प्रपन्नायेत्यनेन आनुकूल्यस्यसंकल्पःप्रातिकूल्यस्यवर्जनं रक्षिष्यतीतिविश्वासोगोप्तृत्ववरणंतथा आत्मनिक्षेपकार्पण्येषड्विधाशरणागतिरित्युक्तमर्थमात्मनः सूचयति महामुनेरित्यनेनगुरुस्वप्रतिवचनसामर्थ्यसद्भावंसूचयति ॥ २४ ॥
सर्वज्ञस्यापिकेनचिन्निमित्तेनान्यथावचनंसंभाव्यतइतिमंदमत्याशंकांपरिहरति अत्रेति यथात्मभूः परमात्मनउत्पन्नः परमेष्ठीसर्वजीवोत्तमोब्रह्मासर्वजनानांसर्वशास्त्रेषुप्रमाणंसम्यक्वक्तव्यत्वेनाप्ततमस्तथाव्यासपुत्रोभवानप्यत्रास्मदर्थेप्रमाणं हियस्मात्तस्मादुक्तं युक्तमिति एतदेवोपपादयति अपरइति अपरेऽन्येपूर्वेषांमरीच्यादीनामपिपूर्वजैर्ब्रह्मभवादिभिःकृतंशास्त्रार्थमनुतिष्ठंति हिप्रसिद्धं यद्यदाचरति श्रेष्ठइत्यादौ अनेनापरेऽनुतिष्ठंतीतियस्मात्तस्मात्परमेष्ठीप्रमाणमेतोभवानप्यत्रप्रमाणमितिवाक्यार्थउक्तोभवतीति ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

अत्रेति। आत्मभूः श्रीनारायणाद्भूतस्तस्मात् तत् प्रकाशित ज्ञान इत्यर्थः नन्वहं गुरुपरम्परयापिप्राप्तज्ञान इति चेत्तत्राह परे चेति। तादृशत्वं त्वय्येवामपि वर्त्तत इत्यर्थः। (न त्वं गुरुपरम्परयाप्राप्तज्ञान इति भावः।) ॥ २४ ॥
यदन्यत् पृष्टं तदपि हरेःकथां विना न कथयितव्यमित्यभिप्रेत्याह न मेऽसव इति। हे ब्रह्मन् अनशनात् तथा कुपितात् द्विजादपि न मेऽसवः परायन्ति। तत्र हेतुः पिबतोऽच्युतपीयूषमिति। अन्यत्र अन्यदा तुतस्मात्तस्मादपि परायन्तीत्यर्थः ॥ २५ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी

[illegible] धान्यथेतिप्रश्नः सर्वभूतानांमहतां भौतिकानांच विक्रमःपराक्रमः कार्यकारणं भूतानामेव प्रतिसंक्रमः कारणेमनुप्रवेशः पूर्ववत् इष्टंयोगादि कर्मरूपेणाक्रियमाणं पूर्तखातादि तयोरेकफलत्वात्सहप्रयोगः कामानां अन्येषांकाम्यकर्मणां अथवा कामानां विषयाणां योभोगप्रकारःसविधिः केविषयाभोक्तव्याः केनेति त्रिवर्गस्यधर्मार्थकामाख्यस्य स्वतंत्रपुरुषार्थपक्षेन त्रिवर्गानिरूपणात्तनपनिरुक्तं एतेषांस्वरूपमुत्तरत्रवक्ष्यति विधिःप्रकारः नित्यनैमित्तिकादिविधयोवा ॥ २१ ॥

यश्चानुशायिनांसर्गः अनुशायिनोजीवविशेषाः येभगवच्छयनमनुशेरते त्रैलोक्यकर्मानुवर्त्तिनः देवाःज्ञानिनश्च तदनुवर्तिनश्चानुशायिनः अन्येजीवा अनुशायिनः अनुशायिनांयःसर्गः सयावान्यादृशइति प्रश्नः पाखंडस्यवेदमार्गविरोधिनः चकाराद्द्विविध धर्मादेः संभव उत्पत्तिः यादृशइतिप्रश्नः आत्मनोजीवस्य अनुशायिव्यतिरिक्तस्य बंधमोक्षौज्ञानिनांमोक्षोदेवानांबंधः उभयमुभयेषामितिवाप्रश्नः व्यवस्थानंस्वरूपतः बंधमोक्षव्यतिरेकेण आत्माकथंतिष्ठति कीदृग्रूपमितिप्रश्नः अस्यांत्तरमशरीरंवावसंतमितिनभविष्यति ॥ २२ ॥

भगवान्वाअत्रब्रह्मांडेअवतीर्णः स्वतंत्रोपियथाआत्ममाययाक्रीडति अवतीर्यभगवान्कथं क्रीडतीत्यर्थः अथवा वैकुंठेऽप्यत्रवाकथंक्रीडतीति मायासंबंधेकीदृशं भगवच्चरित्रमित्यर्थः मायांविसृज्यवायथा भगवानुदास्ते साक्षिरूपंहिसर्वंपश्यति उदासीनं सांख्यसिद्धांतगम्यं तदेकंभगवतोरूपं तद्वन्मूलरूपमपि अहोस्विन्नेतिप्रश्नः उभयकरणासमर्थत्वात्संदेह इति विभुरित्यनेनोक्तं ॥ २३ ॥

एवमत्यन्तोपयोगिनःप्रश्नान्निरूप्यसामान्यतोन्या[illegible]संहरति सर्वमेतच्चेति एतत्पूर्वोक्तंचकारादपृष्टमपि भगवान् भवान् पृच्छतो मेममकार्यार्थं अनुपूर्वशः प्रश्नानुसारेण यथा [illegible] कृताः क्रमेणोत्तरे तथा तथा चित्तसमाहितं भवतीति आनुपूर्व्येणैववक्तव्यमित्युक्तं अस्मदधिकारानुसारेण अन्याधिकारानुसारेण [illegible]व्यं किन्तुतत्वतः अनेनमतांतराण्यपिव्युदस्तानि यद्यपिममाधिकारोनास्तिश्रवणे तथापित्वमुदाहर्त्तुमर्हसि श्रोतु[illegible]त्वाह प्रपन्नायेति प्रपन्नायाहिसर्ववक्तव्यं नचैतदुपचारवचनं तद्भवानेवजानातीत्याह महामुनिरिति मुनिरंतः[illegible]जानाति महामुनिस्तुभाव्यमपीति ममयत्तत्वज्ञानं भाव्यंममयाचाप्रपत्तिः तदुभयंभवान्जानातीति संबोधनं ॥ २४ ॥

ननुसर्वेमुनयः सर्वेचसर्वज्ञाः तेचनानाविधवक्तारः [illegible]प्रामाण्यं तथाममापिभविष्यतीति नशंकनीयं तदाह अत्र प्रमाणं भगवानिति प्रमाणशब्दोअबाधितज्ञाने वर्त्तते बाधशोभ[illegible]रिक्तेवा तत्संबंधीयः प्रमाता प्रमाकरणंवा प्रमाविषयोवा तत्सर्वंप्रमाणमित्युच्यते केचित्प्रमाणशब्दंनानार्थमाहुः तत्रयंशब्दमर्[illegible]चरतीति उत्पत्तिप्रभृत्यामरणांतेप्रमाणशब्देनोच्यते यथास्मिन्नर्थेतद्व्यतिरिक्तेप्रमेयेयथा आत्मभूतः प्रमाणं यथात्र[illegible] निरोधःनतथाकस्यचिदपि ब्रह्मवाक्येतस्यपरमप्रामाण्येहेतुः आत्मभूरिति परमेष्ठीति परमेतिष्ठतीति उत्पत्यास्थित्याचा[illegible]ति तत्प्रामाण्यं एवंभवानपि प्रमाणमित्यर्थः ननुकेवलं भवद्वचनेनकथंप्रामाण्यंभविष्यति जायमानंचाकथं सर्वजनीनंभविष्यती[illegible]चेदानुतिष्ठंतीति परेचमत्तापियेमहांतः अधिगतपरमार्थाः तेपितुकथं विश्वासंकुर्वंति अनुतिष्ठतिचतंपदार्थं इहअस्मि[illegible]तेषामपिपूर्वेषां पूर्वजैः कृतं त्वदुक्तोर्थः सर्वैरेवानुष्ठितः सर्वैरेवक्रियतेअतस्त्वद्वाक्यंसर्वत्रप्रमाणं अथवा अस्माकंसाक्षा[illegible] परेअन्येतुत्वपूर्वेषामपियेपूर्वजाः तैर्यत्कृतंतदेवानुतिष्ठन्ति तत्वार्थं ॥ २५ ॥

श्रीमद्विश्व[illegible]कृत सारार्थदर्शिनी ।

अनुशायिनां महाप्रलये ईश्वरे लीनोपाधीनां जीवानां [illegible]कामानां साधनसिद्धिजिज्ञासायाम् । पाषण्डस्येति भक्त्यसम्भवजिज्ञासायाम् । आत्मनो मायास्पृष्टजीवस्य बन्धमोक्षावि[illegible]ज्ञानमिभायां भक्तौ वा । स्वरूपतो व्यवस्थानमिति आदित एव सदा मायास्पर्शशून्यस्य विष्वक्सेनादेर्जीवस्यनित्यमुक्तस्य [illegible] ॥ २१ ॥

विविधं क्रीडति सृष्ट्यादिसमये विसृज्य महाप्रलये त्य[illegible] भगवान् श्रीकृष्ण एव अन्येषामवताराणामवतारिणश्चात्मतन्त्रत्वेऽपि विप्रबालकहरणादौ कृष्णांकपारतन्त्र्य[illegible]त्ममायया योगमायया पूतनावधादौ क्रीडति । यथा वा विसृज्य विशेषेण सृष्ट्वा मौपलादौ उदास्ते सांक्षिवत् नतु साक्षी ॥ २२ ॥

चकारादपृष्टमपि ॥ २३ ॥

नन्वन्येभ्य ऋषिभ्यः सकाशात् त्वं पूर्वमेवावगतैतत्सर्वार्थ एव भवसि तदपि किं मां पुनः पृच्छसीत्यत आह अत्रेति । अत्र तेषां सर्वेषामपि ऋषीणां मध्ये हि निश्चितमेव भवान् प्रमाणम् । अतस्तत्तदर्थाभिज्ञोऽप्यहं भवन्मुखपद्मात् कीदृगुत्तरमाविर्भवतीत्याकांक्षायां पृच्छामि यथा परमेष्ठी आत्मभूर्भगवत्प्रसादात् स्वतःसिद्धवेदार्थ ज्ञानस्तथा भवानपि । परेऽन्ये तु पूर्वेषां पूर्वजैर्विद्वद्भिरेव यद्यत् कृतं तत्तत् सर्वं दृष्ट्वा तेभ्योऽधीत्याधीत्य अनुतिष्ठन्ति ॥ २४ ॥

न चात्रमत्कष्टे दृष्टिः कार्य्येत्याह नेति । न परायन्ति न व्याकुलीभवन्ति । तत्र हेतुः अच्युतकथापीयूषं पिबतः । किन्तु कुपितद्विजात् सप्तमदिवसे तक्षकरूपो द्विज आयास्यति तस्मादन्यत्रेति तदागमने सति असवः परायस्यन्त्येव ततश्च अच्युतपीयूषपानं नाहं प्राप्स्यामीत्यतो भवता कृष्णकथायां न विलम्बनीयमितिभावः ॥ २५ ॥

सूत उवाच ।

स उपामन्त्रितो राज्ञा कथायामिति सत्पतेः ।
ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥ २६ ॥
प्राह भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥ २७ ॥
यद्यत् परीक्षिदृषभः पाण्डूनामनुपृच्छति ।
आनुपूर्व्येण तत् सर्व्वमाख्यातुमुपचक्रमे ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां द्वितीयस्कन्धे परीक्षित्प्रश्नो नाम
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

सर्वभूतानां यः संप्लवः सम्यक्प्लवनमुत्पत्तिः विक्रमः स्थितिः प्रतिसंक्रमः संहारः इष्टस्यवैदिकस्य कर्मणः पूर्तस्य स्मार्तस्य वापीकूपादिनिर्माणस्य च तमुदाहर्तुमर्हसि तत्र च काम्यानामग्निहोत्रादीनां त्रिवर्गस्य च धर्मार्थकामानां यो विधिस्तमुदाहर्तुमर्हसि॥२१॥

अनुशायिनां कर्मफलभोगाय स्वर्गेलीनानां यश्च सर्गः भुक्तशेषेण कर्मणा पुनरिहोद्भवस्तं यश्चपाषंडस्य संभवस्तं आत्मनो जीवस्य बंधमोक्षौ यौतौ स्वरूपतः भुक्तौ यद्यवस्थाने तच्चोदाहर्तुमर्हसि ॥ २२ ॥

आत्मतंत्रः स्वाधीनः विभुः सर्वगः भगवान् यथा सृष्टौ आत्ममायया स्वशक्तिभूतया विक्रीडति यथा वाप्रलये मायां विसृज्य साक्षिवदुदास्ते उदासीन आस्ते ॥ २३ ॥

एतत्सर्वं पृष्टं चकारादपृष्टमपि पृच्छते प्रपन्नायमे मह्यं तत्त्वतः उदाहर्तुमुत्तरं वक्तुं त्वमर्हसि अर्हत्वद्योतकं संबोधनद्वयम् ॥ २४ ॥

अर्हत्वमेवोपपादयति अत्रेति अत्र पृष्टेष्वर्थेषु भगवान् यथा आत्मभूः परमात्मपुत्रः परमेष्ठी ब्रह्मा तथाप्रमाणं सम्यक् ज्ञापकः यतः पूर्वेषां व्यासनारदादीनां पूर्वजे ब्रह्मादिभिः कृतमाचरितं परे आर्वाञ्चः भवदादयः अनुतिष्ठंति स्वेच्छकमतोमादृशैः भवद्विधाः सदनुशिष्टाप्रष्टव्य इति फलितोर्थः ॥ २५ ॥

भाषाटीका

सब प्राणियों का अवान्तरप्रलय स्थिति प्रति संक्रम महाप्रलय वैदिककर्म स्मार्त अग्निहोत्रादि की विधि ॥ २१ ॥

अनुशायि जीवोंकी सृष्टि और पाखण्डकी उत्पत्ति और आत्माका बंध और मोक्ष ॥ २२ ॥

जिस तरह भगवान अपनी माया से क्रीडा करते हैं और जिस तरह माया को छोड कर उदासीनसाक्षी की तरह से स्थित होते हैं ॥ २३ ॥

हे भगवान यह सब तत्त्व से कहने के योग्य हैं आप मेरे लिये ॥ १४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

उपामन्त्रितः पृष्टः । संश्रासौ पतिश्चेति ॥ २६ ॥

ब्रह्मकल्पे सृष्ट्युपक्रमे । भागवताख्यानेनैव प्रश्नानामुत्तरं दातुमुपक्रान्तवान् इत्यर्थः ॥ २७ ॥

पाण्डूनामृषभः श्रेष्ठः । आनुपूर्व्येणेति प्रस्तावक्रमोऽत्र विवक्षितः, न तु प्रश्नक्रमः ॥ २८ ॥

इति श्रीमद्भागवत भावार्थदीपिकायां द्वितीयस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवत चन्द्रिका

ननु तवानशनद्विजसर्पाभ्यां व्याकुलस्य कुतः श्रवणं तत्राह नम इति अत्र स्वासन्निधौ अच्युतपीयूषमच्युतकीर्तनरूपममृतं पिबतो मे ऽसवः प्राणाः कुपितात् द्विजाद्नशनादपि हेतोः नपरायंति नापगच्छंति नव्याकुली भवंतीत्यर्थः ॥ २९ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

[illegible] पतेर्भगवतः कथायां राज्ञा विष्णुरातेन विष्णुना रक्षितेन परीक्षिता उपामंत्रितः प्रहर्षितो [illegible] ब्रह्मरातः श्रीशुकः सभायां ॥ २७ ॥

भागवतं नाम पुराणं प्राह कथं भूतं ब्रह्मसंमितं वेद तुल्यं परब्रह्मप्रापकं वा ब्रह्मकल्पे सृष्ट्युपक्रमे उपागते प्राप्ते सति ब्रह्मणे चतुर्मुखाय भगवता प्रोक्तं चेत्यर्थः ॥ २८ ॥

पांडूनां ऋषभः श्रेष्ठः परीक्षिद्यद्यदनुपृच्छति अन्वपृच्छत्तत्सर्वमनुपृष्टं सर्वमानुपूर्व्येण प्रस्तावक्रमेण प्रश्नक्रमेणाख्यातुं भागवताख्यानमेव प्रश्नानामन्तरं वक्तुमुपचक्रमे उपक्रान्तवान् ॥ २९ ॥

इति श्रीमद्भागवतेमहापुराणे द्वितीयस्कंधे वीरराघवकृत टीकायाम् अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

अनश्नतस्तवमनआदीन्द्रियदौर्बल्याद्भगवत्कथाधारणाशक्तेरस्यरोदनवद्वृथार्थमापद्यतइतितत्राह नमइति नपरायंति नमृतप्रायाभवंति अशनादप्यतिबलहेतुरसायनपानाद्विताह पिबतइति अच्युतकथापीयूषं ॥ २६ ॥

स्मनस्त्वाम्मुनिसंसदिपृष्टःराज्ञा शुकः किमाह [illegible] मुनीनांमानसीं शंकांपरिहरति सइति मुनिसंसदि विष्णुरातेनविष्णुदत्तेनपरीक्षितासतांब्रह्मादीनांपत्युर्हरेः कथायाम् [illegible] ख्यातुंव्यापारितोऽतएवभृशंप्रीतोब्रह्मरातः शुकोभागवतंनामपुराणं तत्प्रश्नोत्तरत्वेनाहेत्यन्वयः बालोपिसगुरु [illegible] दत्तोऽतोब्रह्मरातेतिनामवैयासकेरभूत् इतिवचनाच्छुकस्यब्रह्मरातस्तं नाम्यस्येति ॥ २७ ॥

आप्तिमूलत्वमाह ब्रह्मणइति अतीत [illegible] ब्रह्मांतरोत्पत्तिनिमित्तेप्राप्तेसतिस्वपुत्रायब्रह्मणेभगवतानारायणेनप्रोक्तमाहेतिशेषः ॥ २८ ॥

परीक्षित्प्रश्नप्रतिवचनतयाशुकेनोक्तमुतान्य [illegible] परिहर्तुमाह यद्यदिति ॥ २९ ॥

इतिश्रीभागवते [illegible] ऽष्टमोध्यायः

श्री [illegible] कृत क्रमसन्दर्भः

ब्रह्मणा श्रीकृष्णेन रात इति ब्रह्मवैवर्त्तादनुसन्धेयं [illegible] ॥ २६ ॥

ब्रह्मकल्पे ब्रह्मणो जन्मोपलक्षिते कल्पे भगवता स [illegible] ॥ २७ ॥

आनुपूर्व्येणेति । भगवत्कथाया यथानुगतया प्राप्तेन [illegible] प्रश्नवत् व्युत्क्रमेणेत्यर्थः ॥ २८ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य [illegible] स्वामीकृतक्रमसन्दर्भे अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्भ [illegible] सुबोधिनी ।

ननुप्रमाणंकिंचिद्विचारयंति अस्माकंतुत्वदुक्तेन देहइत्यर्थः किं [illegible] मेवजीवामि अन्यथामरणमेवस्यात् तक्षकाच्चमहाभयस्तत्प्रस्तवात् तदाह नमेसव इति येअसव इत्यादि प्राणाः अनशनात् [illegible] च्छंतिब्रह्मत्रितिसंबाधमंतदूत्तानाय अनशनंहिप्राणानिवारकं अमीरतिप्राधितप्राणानांदर्शनं राजत्वादकैनैवोपवासेनक्लिष्टः [illegible] मतुमाहि पिबतोऽच्युतपीयूषमिति अच्युतस्यसंबंधिकथारूपंपीयूषं अच्युतएववापीयूषं अनेनस्वस्यात्ममाधिकारोद्योतितः ननुयथेदममृतंक्षुधांनिवारयति तथाशापमपिनिवारयिष्यतीत्याशंक्याह अन्यत्रकुपिताद्विजादिति ॥ २६ ॥

अनेन कथामृतेनमर्त्यस्यप्राणोपघातकानिवर्तते परंयःकुपितादृद्विजोत्तक्षकाख्यःयःप्राणोपघातकःसननिवर्त्तते अन्यथासक्षोपस्तमेवद्विजंनाशयेत् मृत्युनाक्रांतःकोपपरकं सर्वथानाशयति तत्रब्राह्मणमरणापेक्षयास्वमरणमेववरमिति अस्मत्कामनयासर्वनिवारकमपीदममृतंतंनिवारयिष्यतीत्यर्थः एवमाप्ततःप्रश्नार्थोनिरूपितः अस्वाध्यस्यविमर्शमध्यपातार्तावमर्शोयं योगीकश्चनपदार्थोवक्तव्यः तत्रापि पत्तिविमर्शस्योपक्रांतत्वात् उपपत्तेर्निरूपत्वात् आक्षेपसिद्धांतफलेपुप्रथममाक्षेपोवक्तव्यः ससर्वापेक्षकश्चेतश्रोतुरधिकारंप्रत्यापयेदितिसप्त माध्यायांयत्प्रमेयंनिरूपितं तत्रसंमतस्यपर्यवसानपर्यंतस्ववोधोनिरूप्यत्रैवपर्यवसानज्ञानेतद्यथाश्रुतमाक्षिपतीति पूर्वपक्षाध्यायोयमितिमंतव्यं अन्यथापूर्वाध्यायानांस्वस्यवावैयर्थ्यमापादयेत् प्रश्नैतावत्वंचासंगतंस्यात् अनंताएवप्रश्नाः कर्त्तव्याः स्युः तेआक्षिप्यंते अन्येवपर्यवसितार्थकथनेनस्वबोधोविषयाजाताइति बाध्यंते अन्यथाश्रुणवतइत्यादिश्लोकेःनिरूपितंप्रमेयं शुकेनापिनिरूपितमिति अप्रमाणिकंस्यात् गुरोर्बोधं कामुत्पादयेत् तस्मात्समाध्यायेवात्रपूर्वपक्षेणा [illegible] तत्रश्रोतव्यादीनीतिश्लोकत्रयेणासाधारणाधिकारंनिवार्यअभयमिच्छतांच उपायः कथितःसोनुपपन्नः ब्रह्मणानानाधिकारेणाप्रमे [illegible] त्वात् तदाह ब्रह्मणानोदितइति इदमेवहितत्वंअधिकारभेदेनसर्वनिरूपणीयमिति अतःकथंतदधिकारः केषांचित् [illegible] ति सर्वाधिकारिणांअत्रविष्णुभक्तौ यथानुयेतिवाक्यविरोधश्चअतएव

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

तद्वेदितुमिच्छामीतिवचनं यदप्युक्तंकेवलंभगवान्श्रोतव्यइति तदप्यनुपपन्नं अद्भुतवीर्यस्यैवश्रोतव्यत्वात् अन्यथेदंवक्ष्यमाणंफलंअनुप-
पन्नंस्यात् चरित्रमात्रत्वेभगवान् स्वभावतएवप्रविष्टइतिकस्यापिसंसारोनस्यात् शास्त्रवैफल्यंच तदाह हरेरद्भुतवीर्यस्येति अद्भुतवीर्य
स्यकथाःअद्भुतवीर्यरूपाः तथासतिश्रवणादीनांदृष्टमेवद्वारंस्यात् अन्यथात्वदृष्टकल्पनाप्रसज्येत दोषाणांप्रतिबंधकत्वाच्चतत्फलं गुणानुव-
र्णव्यसनायअंतोरितिवाक्यविरोधश्च तदाह यथाहमखिलात्मनीतिश्रवणादिनाभगवतिमनोनिवेशे अस्मिन्जन्मन्येतावदेवफलं
जन्मान्तरेत्वन्यत् यदुक्तंअल्पेनैवकालेनकार्यसिद्ध्यतीति तदप्यसंगतं दृष्टोपायेभगवतो बहुकर्तव्यत्वात् तदाह भृण्वतइति
कार्यबुद्धिमनोनिवेशनमेव अतएवनिर्धार्यवदति त्यक्ष्येकलेवरमिति ततोभगवान्मनसागृहीतइति जन्मांतरभगवत्सेवोपयिकंशरीरंनिष्पाद-
यति तदास्थानामितिभविष्यतिभावसरोरुहत्वंच बहिःस्थितस्यैवांतः प्रवेशनेकार्यसिद्धिःअंतःस्थितेनकार्यं यथादावाग्निना तदाह विशत
इति अन्यथाप्रक्रियांतरेरागाभावेजन्मशतेनापिनस्यात् शरीरेंद्रियाणांगुणकार्यत्वात् अस्यांप्रक्रियायांतुप्रकर्षेणआग्राहेणानिप्रविष्टः शम-
लंधुनोति तदाचशिथिलावयवत्वेमूलबंधनात्प्रच्यावेगुणैरवाप्रिमकार्यस्यात् अतोधुनोतीत्येवोक्तं तदाद्वितीयंभयंभवति नभयंयस्मादिति
अभयरूपंभगवान्मनसाप्राप्तः अतोमृत्युगृहीतशरीराद्यभावात्नविद्यतेभयंयस्यतिद्वितीयंफलमिति सिद्धांतफलैः अप्रमदशभस्कंधार्थेअवगते
नभयंयस्मादितिभयनाशकएवस्वयंभविष्यति तद्वक्ष्यति मृत्यवोनैवभक्ष्यन्तिमृत्यूनांमृत्युमीश्वरमिति अन्यथाप्रथमपक्षएवपर्यवसाने गुरो-
रप्रयोजकतास्यात् तस्मादेतस्यैवत्रयंभवति यदप्युक्तंजीवानांस्वभावाक्रिययाअनर्थोभवतीति तदप्यसंगतं जीवानांकिंस्वभावतएवदेहादि
संबंधः ईश्वरेच्छयावेति आद्येसर्वेषामेवअनिर्मोक्षप्रसंगः द्वितीयेनतेपर्यनुयोगमर्हति भगवतैवतथासंपाद्यमानत्वात् एतदभिप्रेत्याह यद्धा
तुमतइति यदप्युक्तंश्रोतव्यभगवद्विशेषणचतुष्टयंसर्वात्माभगवान्हरिरीश्वरइति तदप्यसंगतं तदाह आसीद्यदुदरात्पद्ममिति सर्वात्मा
भगवान्श्रोतव्यत्वेननिरूपितः तस्योदराच्चपद्मजननंनिरूपितं पद्माधरत्वेनतस्यपद्माभिन्नत्वात्जगतश्च पद्माधारत्वात् सर्वात्मत्वंनोपपद्यते
उपचारिकप्रयोगस्तुनफलजनकइति सिद्धं किंच भगवत्त्वंचनोपपद्यते तदाह यावानयंवैपुरुषइति प्राकृततुल्यत्वादित्यर्थः हरित्वंचनोप-
पद्यते अतः मृजतीति भगवदनुग्रहमपिप्राप्ययतोयमजः सर्वमेवभूतजातंसृजति महतिकर्मणिव्यापृतोतिखिन्नः भूतात्माचजायते तत्स-
स्वभावंप्राप्नोति एतदेवाग्रेवक्ष्यति शयानोवहुचिंतयेति ईश्वरत्वंचनोपपद्यतेतदाह सचापियत्रपुरुषइति अस्यापिप्राकृततुल्यत्वंजगत्का
र्येव्यापृतत्वं मायाग्रहणपरित्यागः क्लेशः शयनं गूढस्थानस्थितिरिति यदप्युक्तं पातालमेतस्येत्यादितदप्यसंगतं तदाह पुरुषावयवैरिति
अन्योन्यविरोधादुभयमप्यसंगतमितिभावः यदप्युक्तं इंद्रादयोबाहवआहुरिति तदप्यसंगतं कल्पभेदानांविद्यमानत्वात् प्रतिकल्पमिन्द्रा-
दीनांनानात्वात्बहुनामनियतत्वापत्तिः अधिकारशब्देपिअधिकृतानांभेदात्सदोषस्तदवस्थ इंद्रत्वधर्मस्याबाहुत्वात्यदत्याहुरित्यु
क्तप्रमाणं तदप्यसंगतं विकल्पानांविद्यमानत्वात् विकल्पायुगभेदाः—
कल्पकल्पांतरकल्पा वा उभयेषामपि प्रतिकल्पंभिन्नत्वात्नबाहुप्रमाणयोर्व्यवस्थाकिंच यदप्युक्तं कर्णौदिशइति दिशामव्यवस्थितत्वात्क-
र्णत्वंनोपपद्यते दिशस्तुसूर्येणक्रियंते सूर्येणविभज्यंतेदिशइतिवाक्यात् यतोदेतिसाप्राचीत्यादि अतःकालानुमापकेसूर्येविचार्यमाणेदिशो-
नसंत्येव कुतस्तासांकर्णत्वंव्यवहारमुक्तप्रचारिकैरपिभवतिपदार्थानर्णवेपुनेवंविधिःयदप्युक्तंश्रोत्रममुष्यशब्दइति तदपिनोपपद्यतेकालभेदेन
शब्दानांप्रवृत्तत्वात् तदाह भूतभव्यभवच्छब्दइति एतेषांकदाचित्सर्वेतइतिश्रोत्रंनियतंनस्यात् शब्दविशेषस्यश्रोत्रत्वेतुसर्वरूपत्वंउपसं
गतंस्यात् यदप्युक्तंनासत्यदस्रौपरमस्यनासेइति अश्विनीकुमारयोःआयुर्वेदप्रवर्तकत्वंचव्यक्तं तदाआयुषः स्वरूपंविचारणीयं किंभगवद्-
क्षमायुःप्राणिनांनियतंवेतिउभयथापिनासत्ययोःअप्रयोजकत्वं अतःकृतःआयुर्मानेविचार्यमाणेअश्विनयोरेवातिरूप्यत्वात्नासिकात्वंहरे ।
एवंघ्राणोस्यगंधोमुखमग्निरिद्धइतिगंधश्चाग्निश्चाग्निश्चपादावस्थायीति अतःकालस्यानुगतिःस्थूलावासूक्ष्मावार्यदिवविचार्यते तदागंधाग्नीद्यो-
र्नसंगच्छेतेइत्यर्थःकिंच चक्षुरभूत्पतंगःपक्ष्मणीविष्णोरहनीउभेचेति पूर्ववत् यतःकर्मगतिर्नविचार्यमाणेपुकेनचित्कर्मणासूर्यस्यपरावृत्तौ-
सूर्यानंतरंचयदिनरात्रिव्यवस्थायाः सूर्यगतिकृतत्वात्तस्याश्चकर्मस्वभावात्भगवच्चक्षुरेवनोपपद्यते नवापक्ष्माणि यादृशीरितितस्या-
वांतरभेदः किंच यदुक्तंतद्भ्रूविजृंभःपरमेष्ठिधिष्ण्यमिति तदपिकर्मसाध्यमेव तदाह यस्मिन्कर्मसमावायेइति अयंब्रह्मगुणानांगुणिनांचक-
र्मसमावाययुक्तः तत्रकाभगवद्भ्रूविजृंभापतेनवआपोस्यतालुरसएवजिह्वेत्याक्षिप्तमेवअननयानिर्कानगोलकत्वेनिरूपितानिइंद्रियत्वंचैतानि-
सर्वाणिआक्षिप्तानिवेदितव्यानि किंच आपोस्यताकूइत्यारभ्यअसुरानीकवर्यइत्यंतेनोक्ताःपदार्थाःविशेषसामान्यविचारेणगतार्थाभविष्यंती-
तिविशेषपदार्थान्आधाराधेयभावापन्नान्वदपदार्थान्निरूपयति भूपातालेति एतेषांदशपदार्थानांभूकार्यसहितानांविचारक्रियमाणेसामा-
न्यतोब्रह्मांडविचार्यमाणेब्रह्मांडमेवायातिनभगवान्भगवद्वचनवानकेनापिप्रकारेणसंगच्छते तस्मात्सर्वंब्रह्मांडंदूरीकृत्यपुरुषत्वकल्पना-
र्थेतिभावः असुरानीकवर्यइत्याक्षिपतिमहतांचानुचरितामिति ब्रह्माननमित्यादिवर्णाश्रमविनिर्णयेन यदुक्तंनानाभिधानिगसोपपन्नमित्य-
नयोयज्ञोनिरूपितः भगवत्कर्मत्वेनतस्याप्राकृतत्वाभित्यत्वाच्चपूर्वोक्तादोषसंबंधाभावात्तदेकमुपपद्यतइत्याशंक्यनचपदार्थविचारेणतदपि-
प्रत्युक्तंनभविष्यतीतितत्पदार्थान्पृच्छति अवतारानुचरितमितिद्वाभ्यां यागोहदेवतोद्देशेनद्रव्यत्यागात्मकः तत्रदेवता द्रव्यंक्रियाचेतित्रयं
देवादयःषडंगाः एवंनच तत्रदेवताभगवदवतारेणविचारिताभवंति सचावतारालोकइतिलौकिकः युगानितुविचारणीयानितेषुविचारि-
तेषुद्रव्यमपिनिराकृतंभविष्यति यथायथास्तुभ्योध्यंतेपश्यनपुरोडाशंकूर्मभूतसर्पतामिति एतत्कर्मकवा युगेयुगा युगेभ्योभिन्नकालेवा
युगविशेषयत् पूर्वंद्रव्याभावाद्यागोनस्यात् एवमन्यत्रापियुगमानेचविचार्यमाणेयागानामन्यथात्वात्क्रियैवनसंगच्छते यथाश्रेतामुखेयज्ञो-
त्पत्तिः किंचयुगधर्मःकालः नृणांसाधारणोधर्मइतिदेशः सविशेषोयावृद्धाइतिद्रव्याणिगुणभेदभिन्नानिअभिधानिरूपितानि श्रेणीनामितिक-
र्तारः राजर्षीणामितिमंत्रःधर्मकृष्टोप्वातिकर्माणि अतएवएषप्रयोगोगत्वव्यापनाय यदप्युक्तंइयानसावीश्वरविग्रहस्येतितदपितत्वविचारेण
स्त्यैवस्थातंभविष्यतितत्त्वानामकर्दशेनब्रह्मांडनिर्माणं तत्रतत्ततास्मकंचिदिविलक्षणंअनुपपन्नंस्यात् अतःपरंद्वितीयाध्यायारंभः तथादाव-
यदुक्तं एवंपुराधारणयेति तदसंगतं ॥ तत्त्वानांलक्षणविचारेण लक्षणांतेषांसृष्टिकरणसामर्थ्यं तस्यैवासाधारणधर्मत्वात्तस्मिन्ज्ञाते-
तदंशैरेवब्रह्मणिप्रविष्टैःकार्यसिद्धेःतस्यज्ञानादीनांवैयर्थ्यापत्तिः यदपिशब्दस्याहिब्रह्मणएवपंथेत्यादिभिःवैराग्यपुरःसरंस्वचित्तस्थितंभगवंत-
चिंतयेदिति तत्त्वानां हेतुपूर्वकलक्षणे विचार्यमाणे पूर्ववत् भविष्यति तत्र चित्तस्य महत्तत्व रूपत्वात् महतिविद्यमान एव भगवान्
तत्रअवतीति अविवेकः सिद्धः स्वात्मनश्चसिद्धिस्तत्रदूरापास्ता चित्तं तन्मात्रात्मकामिति हेतुलक्षणं यदप्युक्तं कचित्स्वदेहांतहृदा

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

सकाशादिति तदपि पुरुष पूजायां विचार्यमाणायां मनोमयी मणिमयीतिवाक्यात् मानसीमूर्तिः सासकथं भगवान् भवेदिति स्थूलसूक्ष्म धारणा सिद्धयर्थं योगद्वयं निरूपितं तदपि योगस्वरूपे विचार्यमाणे चित्तवृत्तिनिरोधत्वादसंगतमेव भविष्यति यदप्युक्तं स्थिरं सुखे चासनमास्थितोयतिरिति तदप्यसंगतं जीवतएव योगिनः सर्वलोकगमनसंभवात् किं मरणेन यथाकर्दमस्य ऐश्वर्यं आदिपर्वेन च अर्जुनादयोप्यनेनैवदेहेनस्वर्गंगताः परिगृहीताः यदप्युक्तं आनंदमानंदमयोऽवसानइति तदपि योगिनो लिंगभंगे विचार्यमाणे असंगतं भवति यदप्युक्तं भगवान् ब्रह्मकास्र्न्येनेति तदपि वेदविचारक्रियमाणे असंगतं भवति यदिभगवानात्मा सिद्धमेवप्रेमतस्मिन् उपदेशो अव्यर्थः नास्तिचेत्प्रेमतदानसआत्मा अज्ञानादात्मापि आत्मत्वेन न ज्ञात इति चेत् परमात्मवत् तदाप्यात्मत्वमेवोपदेष्टव्यं नचप्रेमार्थे यत्नःकर्तव्यः यदपि कामना भेदेन देवतांतरभजनमुक्तं तदपि वेदविचारे असंगतमिति तृतीयादिः वेदोहितदर्थमन्यदेवसाधनं निरूपित मिति भक्त्यर्थनिरूपणं तु भक्तिनिराकरणेनैव निराकृतं तदप्युत्पत्त्याविमर्शनमुक्तं तदपि संप्लवादिविचारेण निराकृतं भविष्यति यदि दंजगत्प्रलयं यास्यति प्रवृद्धं वा भविष्यति कारणेवालीनं भविष्यति तदा किं भगवतः सकाशादुत्पत्त्या स्वतएवोत्पद्यतां अन्यथा वा विशेषाभावात् यदपिज्ञानादीनांस्वरूपनिर्वाहार्थंभगवदत्र यवकल्पनानिरूपिता सापिइष्टापूर्तादिविचारेणनिवारिताभवति लौकिकैरलौ किकैर्वापदार्थैर्यागनिष्पन्ने भूतसंस्कारेआत्मसंस्कारेवा भगवत्संस्कारेवाफलतोवानकश्चिद्विशेषः भगवदीयत्वादेस्त्वन्यथैवसिद्धेः यदप्युक्तं मात्मानंसृजतीति तदप्यनुशायिनांसर्गेविचार्यमाणेनिराकृतंभविष्यति यतस्तेभगवद्भिलक्षणावक्तव्याः यदप्युक्तं तत्त्वंपररूपयदस्वरूप मिति तदपिपाखंडधर्मेविचार्यमाणेनिराकृतंभविष्यति दैत्यानांव्यामोहनार्थेपाषंडोत्पत्तिः दैत्याश्चकेभगवानन्योवा भगवांश्चेत् सापिभगवल्ली लेतिपाषंडत्वमेवनस्यात् भक्तिरपिनिराकृताभवति पाषं[illegible]पादिष्वपिभूतेदैत्यानांभगवत्वं यदप्युक्तंकर्मकषायशोषानिति तदप्यसंगतं विदात्मनोबंधमोक्षौविचार्येते बंधोभगवदिच्छ[illegible]कर्मकषायशोषणं न भिन्नतयावावस्थानेनिरूपितं सर्वमेवसाधनंव्यर्थंस्यात् भगवद्रूपत्वात्तस्य अवतारवर्णनंचव्यर्थं भग[illegible]कीडनमेवतादृशमिति सर्वमेवजगदवतारोभवति किंविशेषेणमायापरित्यागेवा अवतारलीलामपि परित्यजेत यदप्युक्तं स्वमे[illegible] तदपिनवक्तव्यं यथाभवान्भक्तिरसेनवदति तर्हिकस्यचित्प्रेरणया प्रामा ण्यंचत्वद्वचसिद्ध्यत्तदाह अत्रप्रमाणमिति यदप्यु[illegible]आत्मानमुद्धतीति तदप्यल्पंअसंगतंच यतोममप्रायेणापिप्राणानगच्छंति श्रूयमाणमपितृष्णकोभक्षयिष्यति एवंपूर्वपक्षेकृतेभग[illegible]तेशुकस्यसंतोषएवजातोनक्रोधइत्याह मयुपामंत्रितइति सशुकःउ-पामंत्रितः प्रार्थितः उपामंत्रणेनराज्येनपितरोय[illegible]निर्धारात् एवंप्रकारकथायांयुक्तिपूर्वंभगवद्गुणानिरूपणीयाइति तथा सतिभगवतोमहत्सुखंभवति सत्पतित्वात् तथासतिस[illegible]भगवल्लीलाप्रत्ययोभवतीति भगवत्तोषहेतुरयंप्रश्नइतिभावः तत्राप्य यंत्रप्रातः ब्रह्मणावेदेनरक्षितः अहमद्यैगुक्तिमयं[illegible] अतएवभूर्गपतिः ममजन्मसाफल्यंजातमिति राजाचविष्णुरातः विष्णु नाएतदर्थमेवायंरक्षितः यदयंक्षोदपूर्वकैनिःसंदिग्धंमा[illegible]अतएवस्वजन्मसाफल्यार्थंसभायामेवपृष्टवान् ॥ २७ ॥

एवंयुक्तिपूर्वकं भगवत्कथायां वक्तव्यायां लौकिकी युक्ति[illegible]कृतिउपपत्ति रूपं भागवतमेवोक्तवानित्याह । प्राह भागवतं नामेति पुराणमिति प्रमाणं । ब्रह्मसम्मितमिति युक्ति सहितं[illegible]ननुकति भागवतानिसंति बहुषुस्थलेषुभिन्नप्रकारेणभागवत कथना शंका तत्राह ब्रह्मणे भगवताप्रोक्तमिति । विषयात्मकं तुभाग[illegible]विमर्शात्मकंद्वेधा । तत्रोत्पत्तिप्रकारेणानिरूपितं ब्रह्मणा नारदायोक्तं । उपपत्ति प्रकारेण तुब्रह्मणेभगवता प्रोक्तमिति अत्र स्थले भागवते [illegible] प्रकारा उपनिबध्यंते भागवत प्रवृत्तेरनेकधात्व ज्ञापनाय तत्राप्य स्यपदार्थस्य ब्रह्मणा स्वयमेवज्ञातत्वात् उपपत्तिः पदं[illegible]ब्रह्मकल्प उपागतइत्युक्तं । ब्रह्मकल्पे समागते । तत्रहिशब्द ब्रह्मणा एवोत्पत्तिः याउपपत्ति भागवते वर्तते तती[illegible]प्रश्न इति भागवता त्पृथगेवायं परिहृत्यपक्षा द्भागवतोप पत्ति वक्ष्यतीत्याह । यदाहपरीक्षिदिति । पांडुना मृगभः मकानां[illegible]पृच्छयति पूर्वोक्त हेतुप्रश्नादिरूपं आनुपूर्व्येणैवतत्सर्वंवक्तुं उपक्रमं ज्ञातवान् । यथा कांक्षं उत्तराणि दत्तवानित्यर्थः [illegible]युक्तिमुक्तवानिति भावः ॥ २८ ॥

इति श्री भागवत सुबोधिन्यां श्री लक्ष्मण भट्टात्मज श्रीवल्लभ[illegible] विरचितायां द्वितीयस्कंधाष्टमाध्याय विवरणं ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

सत्पतेः कृष्णस्य कथायामिति तत्तत्प्रश्नोत्तराणां कृष्णकथात्वे इदं सूतवाक्यमेव प्रमाणं ज्ञेयम् । ब्रह्मरातःशुकः ॥ २६ ॥

भागवतमिति भागवताख्यानेनैव प्रश्नानामुत्तरं दातुमुपक्रान्तवानित्यर्थः ब्रह्मकल्पे सर्व्वा बिमे कल्पे ॥ २७ ॥

आनुपूर्व्येणेति प्रस्तावक्रमोऽत्रविवक्षितः, नतु प्रश्नक्रमः ॥ २८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वितीयेऽष्टमोऽध्यायःसङ्गतःसङ्गतःसताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कंठ्यानेऽभल्याभावहेतौ सत्यपि भगवत्कथाश्रवणे तस्यैश्वर्यं दर्शयति नम इतिहे ब्रह्मन् अच्युतपीयूषं भगवत्कथामृतं पिबतो मे अमी असवः प्राणाः तमुत्क्रामंतं सर्वे प्राणाः उत्क्रामंतीति भुत्युक्तानींद्रियलक्षणानि करणानि अच्युतपीयूषव्यतिरिक्ते विषये अनशनाद्धेतोः भोजनादौ कुपिताद्विजाद्धेतोः मरणप्रतीकारधनकलत्रादौ चनपरायंति मगच्छंति अच्युतकथामृतपाने निश्चलाः भवंतीति भावः ॥ २६ ॥

सतांपतेः श्रीभगवतः कथायां विष्णुना भगवतारातेन रक्षितेन राज्ञा उपामंत्रितः प्रवर्तितः ब्रह्मभगवंतं राति ददातीति ब्रह्मरातः स श्रीशुकः भृशमत्यर्थं प्रीतः सन् भागवतं नाम पुराणमाहेति द्वितीयेनान्वयः ॥ २७ ॥

भागवतमाह भागवताख्यानेनैव प्रश्नानामुत्तरं दातुमुपक्रांतवानित्यर्थः कथंभूतम् ब्रह्मसंमितं वेदतुल्यम् परब्रह्मगुणस्वरूपादिर्वो धर्मं-वाब्रह्मसम्यक् मीयते यस्मिन्निति व्युत्पतेः ब्रह्मकल्पे सृष्ट्युपक्रमकल्पे उपागते प्राप्ते सति ब्रह्मणे स्वयंभुवे भगवता प्रोक्तम् ॥ २८ ॥

पांडूनां ऋषभः श्रेष्ठः परीक्षित् यत् अनुपृच्छत् तत्सर्वं शुकः आनुपूर्व्येण व्याख्यातुमुपक्रमे आनुपूर्व्येणेति प्रस्तावक्रमोऽत्रविवक्षितो नतुप्रश्नक्रमः ॥ २९ ॥

इति श्री मद्भागवत सिद्धांतप्रदीपे द्वितीयस्कंधीये अष्टमाध्यायार्थ प्रकाशः ॥ ८ ॥

भाषाटीका ।

हे ब्रह्मण अनशनसे मेरे प्राण नहीं जाते हैं क्योंकि अच्युतरूपी अमृत पीरहे ह कुपित द्विजसें अन्यत्र ॥ २६ ॥

राजाकरके पूजित हुए भगवानकी कथा में—और परीक्षितकरके सभामें शुकदेवजी प्रसन्न कियेगए ॥ २७ ॥

भगवानकरके ब्रह्माजीके वास्ते कही गई भागवत नाम पुराण कही ॥ २८ ॥

इति द्वितीयस्कन्ध का आठवां अध्यायः ॥ ८ ॥

नवमो ऽध्यायः ।

आत्ममायामृते राजन् परस्यानुभवात्मनः ।
न घटेतार्थसम्बन्धःस्वप्नद्रष्टुरिवाञ्जसा ॥ १ ॥
बहुरूप इवाभाति मायया बहुरूपया ।
रममाणो गुणेष्वस्या ममाहमितिमन्यते ॥ २ ॥
यर्हि वाव महिम्नि स्वे परस्मिन् कालमाययोः ।
रमेत गतसम्मोहस्त्यक्तोदास्ते तदोभयम् ॥ ३ ॥
आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम् ।
ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

राजप्रश्नोत्तरं वक्तुं ब्रह्मणे हरिणोदितम् ।
कथयत्यत्र नवमे शुको भागवतं पुनः ॥ ० ॥

तत्र यत्तावदुक्तं यद्धातुमत इत्यनेन जीवस्य कथं देहसम्बन्ध इति तत्रोत्तरमाह, आत्मनो हरेर्मायामन्तरेण अनुभवरूपस्यात्मनः अर्थेन दृश्येन देहादिना सम्बन्धः अञ्जसा तत्त्वतो न घटेत । तत्र हेतुः परस्येति । स्वप्नद्रष्टुर्यथा स्वप्नदेहादिना सम्बन्धो न घटेत तद्वत् ॥ १ ॥

संसारोऽपि माययैवेत्याह । बहुरूपः बालयुवादिरूपः [illegible] आभाति । गुणेषु देहादिषु ॥ २ ॥

अतएव भक्तियोगेन तन्निरासे सति मोक्षोऽपि घटत इत्याह यर्हीति । वावशब्द एवार्थे । स्वे एव महिम्नि यदा रमेत । तदेवाह कालमाययोः पुरुषप्रकृत्योः परस्मिन् । तदा उभयम् [illegible] त्यक्त्वा उदास्ते परिपूर्णस्वरूपेणावतिष्ठते । तदुक्तम्—यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम् । परोऽपि मनुतेऽनर्थं तत्कृतञ्चाभिपद्यते ॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे । लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥ इति ॥ ३ ॥

यच्चोक्तं परमेश्वरस्यापि देहसम्बन्धाविशेषात् कथं तद्भजनान्मोक्षः स्यादिति आसीत् यदुदरात् पद्ममित्यादिना तत्राह । आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं तत्त्वज्ञानार्थं तद्भवत्येव । किं तु यत् [illegible] आदितो स्वभजनं भगवान् ब्रह्मणे आह । कुर्वन् ऋतं सत्यं चिद्घनं रूपं दर्शयन् । दर्शनेहेतुः अव्यलीकेन व्रतेन तपसा आदृतः [illegible] सन् । अयं भावः—जीवस्याविद्यया मिथ्यारूपदेहसम्बन्धः ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव इति महान् विशेषः । अतस्तद्भजनान्मोक्षोपपत्तिरिति ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिन्याख्यतट्टिप्पणी ।

यद्धातुमत इति पूर्वाध्यायस्य षष्ठश्लोकः ॥ १ ॥ २ ॥
यया सम्मोहित इत्यादि प्रथमस्कन्धीयसप्तमोध्यायस्य पञ्चपष्ठश्लोकः ॥ ६ ४
आसीदिति पूर्वोध्यायस्य सप्तमश्लोकः ॥ ४ ॥ ५ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचंद्रिका

अथराज्ञः प्रश्नानामुत्तरं वक्तुं भागवतमाख्यानमारप्स्यमाणोमुनिना तावज्जीवस्य देहारंभः सहेतुकोनिर्हेतुको वेति प्रश्नस्यजीवदेहतुल्यपरिमाणावयवत्वेन जीवतुल्यत्वप्रयुक्ता भजनीयत्वामोक्षप्रदत्वप्रश्नस्यमुक्त्वात्ममायां शेते तं च देशकथयस्वेति प्रश्नस्य चोत्तरं नवमेध्याये नोच्यते तत्र सहेतुकत्वनिर्हेतुकत्वप्रश्नस्योत्तरं वदन् त्रिपाद्विभूतिर्विशिष्टस्य भगवतः कालमायाद्वयत्वाभावं वक्तुं संसारेवर्तमानां कालमाया-न्यत्वमाह आत्मेति अनुभवात्मनः अनुभवो ज्ञानं तदात्मा स्वरूपं यस्य तस्यातएव परस्य देहादिभ्यो विलक्षणस्यजीवस्यार्थसंबंधः शब्दादिविषयेषु भोक्तृतया संबंधः आत्ममाया परमात्म नियाम्यां मायां प्रकृतिमृते विना अंजसा सामीचीन्येन न घटत सर्वंगच्छेत द्रष्टुरिवेति यथा स्वप्नद्रष्टुः [illegible] नो भवति अथ रथान् रथयोगान् पथः सृजते कामं कामं पुरुषो निर्मि-

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

माया इति श्रुत्युक्त रथादिपदार्थसंबन्धस्तदर्थं भगवन्मायामतेनोपपद्यते तद्यदित्यर्थः प्रकृतिः तिरोहितस्वपररूपत्वात्प्रकृतेषु मायु बुद्धिरि-ति भवति यद्वच प्रकृत्यातिरोहितस्वपररूपत्वमेव देहारंभे हेतुरित्यहेतुकत्वनिरस्तं भवति ॥ १ ॥

उक्तं विवृणोति यदिहेति बहुरूपया विचित्र परिणामिन्या भगवन्मायया तिरोहितज्ञानानंदस्वरूपो जीवः देवमनुष्याद्याकारमात्म न्यारोप्य बहुरूप इव भातीत्यर्थः अस्यामायायागुणेषु सत्त्वादिगुणकार्येष्वु शब्दादिषु रममाणः शब्दादीन् भुंजानो ममाहमिति मन्यते अहंकारममकाराभ्यां युक्तो भवतीत्यर्थः ॥ २ ॥

जीवप्रस्तावाद्यवस्थानं स्वरूपत इति जीवविषयप्रश्नान्तरस्योत्तरं वदन्मन्स्वरूपसाक्षात्कारे सति शब्दादिप्रावण्यनिवृत्तिरित्याह यर्हीति यर्हि यदा मुक्तावित्यर्थः स्वेस्वाभाविके कालमाययोः परस्मिन्कालमायाकार्यासंस्पृष्टे महिम्नि अपहतपाप्मत्वादिसत्यसंकल्प त्वपर्यंत गुणाष्टकलक्षणे परमात्मशेषनैकरसस्य स्वात्मनो महिम्नि यद्वा काल माययोः परस्मिन्नियंतरि महिम्नि उक्तविधपरमात्मम हिम्नि महिम्नो नियंतृत्वं महिम्नद्वाररमेत गतसंमोहः निवृत्ताहंकारममकारः तदोभयं प्रकृतिकालवद्यत्वं त्यक्त्वा हित्वा उदास्ते शब्दादिषु योग्यासिद्धाद्यप्रवृत्तिशून्यो भवतीत्यर्थः अनेनाविर्भूत गुणाष्टकाविशिष्टत्वेनावस्थिति रेव स्वरूपतोऽयवस्थानं तादृशस्वरूपस्यापि स्वा त्मतस्वात्मभूत निरतिशयानंद परब्रह्मानुभवः परब्रह्मशरीरभूतत्वेन स्वात्मानुभवो वा शब्दादिप्रावण्यनिवर्तकइतिचोक्तं भवति ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

चतुर्मुखस्य भगवदनुग्रहेण तल्लोकदर्शनं तेन विनाभूतं तत्स्वरूपदर्शनं प्रकृतिजीवयोस्तदधीनत्वमित्यादिमाहात्म्यवर्णनेन हरेः हृदयं ग्रन्थीमाज हेतुर्भक्तिरेवेत्यतः साहरोकर्तव्येनास्मिन्नध्याये प्रतिपाद्यते तत्रादौ यदधातुमतइत्यस्योत्तरं वक्ति आत्ममायामिति परस्य धातुशब्दवाच्या र्थेभ्यः प्रकृत्यादिभ्योऽव्यतिरिक्तस्यानुभवात्मनोज्ञानात्मनोऽतएवस्वतोऽशरीरस्य जीवस्यात्ममायां हरेरिच्छां तदधीनां सत्त्वादिगुणरूपां प्रकृतिं चाकृतेविना अर्थसंबंधो देहादिसंबंधो न घटेत तथास्वप्नेकरितुरगादिपदार्थानां द्रष्टुर्जीवस्य भगवदिच्छानियतैर्वासनोद्बोधकैः रजस्तमोभावैश्च तैस्स्वाप्नपदार्थसंबंधः करितुरगादिदर्शनं न युज्यते तस्मादिहस्यजीवस्य देहसंबंधे भगवदिच्छाप्रथमहेतुः द्वितीयास्वगुणैः सहप्रकृतिरित्युत्तर मंजसेत्यनेन अशरीरस्य जीवस्य शरीरोत्पत्तिकारणं । ईश्वरेच्छाप्राथमिकीतां विनामहिः किंचनेत्यादिप्रमाणं सूचयति । यद्वांजसेदमेवतत्त्वं । स्वप्नस्यार्थक्रियाकारित्वेन सत्यत्वात् सत्यस्यतदयोगात् अघटितघटनापटीयस्त्वात् निर्वाच्यलक्षणामायोच्यते किंत्वीश्वरेच्छैवसूचकश्च हि- श्रुतेराचक्षते च तद्विदइतिसूत्राच्चेति अंजसात्वरितेतत्त्वादितियादवः ॥ १ ॥

नन्वशरीरस्य जीवस्य भगवदिच्छानियतैः प्रकृतेर्गुणैर्देहारंभः कथमत्राइवबहुरूपइति ईशेच्छयानादितएवास्याः प्रकृतेर्गुणेषु मृद्घटइति- वत्गुणकार्येषु देहेंद्रियेषु चरममाणः सत्त्वादिगुणात्मकलिंगशरीरवद्धतयावर्तमानः सृष्टिकालेमहदहंकारादिपंचभूतोपादानकत्वेन मानुषदे- वासुरशरीरादिबहुरूपत्वनबहुरूपतया विकृतनयाप्रकृत्या स इस्वयमविकृतोऽपितदभिमानाद्विकृतत्वेनात्मानंचमन्यमानोबहुरूपइवमानुषादि- रूपइवाभाति अहंमनुष्योऽहंदेवइत्यात्मानंमन्यते देहदैहिकेषु त्रिगुणसंघातजयाऽहंमत्याहंममेतिमन्यतेचेत्यर्थः तदुक्तं तेषांसंघातजोभावो- ममाहमितियामीरित तस्मात्प्रकृत्यैवपुमान्मानुषादावविकार्या नु मानुष्यादिरिवभातीनित्यं चैतन्य रूपवानितिचतस्मादीशेच्छया नियतत्रिगुणात्मकलिंगशरीरेऽहंमानात्तन्मूलतयाधातुभिर्देहारंभोयुक्तइतिभावः ॥ २ ॥

एवंबंधप्रकारमुक्त्वाततोऽधुनाजीवस्य मुक्तिप्रकारमाह यर्हीति चशब्दएवार्थे यर्हियदायंजीवोवैराग्यादिसाधनसामग्र्यासमुत्पन्नभगव- ज्ज्ञानेनापरोक्षितनिजस्वरूपः कालमाययोः कालप्रकृत्योः परस्मिन्विलक्षणेतच्छक्तिसंसर्गरहितेस्वेमहित्वेसच्चिदानंदलक्षणस्वरूपेरमते- वाऽव्ययधानेगरमत्येव ॥ स्वस्वरूपेतदागतसंमोहोनिरस्तापियातत्कार्ये । उभयंबाधकयाद्यापादकांमायांदेहारंभहेतुभूतांचतन्मूलंसंसारं- त्यक्त्वेतियावत् उदास्तेउत्कृष्टेवर्तते नीचत्वापादकात्संसारान्मुक्तोभवतीत्यर्थः तदुक्तं यदास्वरूपंजानातिकालप्रकृतिवर्जितं वासुदेवप्रसा- देनतदामुक्तोभवत्यसावितिं अनेनसागुण्यंत्यक्त्वानैर्गुण्यमाप्नोतीत्यपव्याख्यानमपास्तं तत्रप्रमाणाभावादिति ॥ ३ ॥

अत्रापिकिंप्रमाणमित्याशंक्य भगवदुक्तं भागवतमेवैतादृशमोक्षप्रमाणमित्याह आत्मेति आत्मनः परमात्मनोजीवस्यवायत्तत्त्वमनारोपि- तंसच्चिदानंदःलक्षणरूपंतस्यविशुद्धयथार्थानदोषत्वेनानंदयथार्थमनुभवार्थं याश्यासोभवान् यद्भागवतंपुराणमाह तदृतंयथोक्तं मुक्तिसाधनंज्ञान- साधनंशास्त्रम् । नव्यामोहकमतोभगवदुक्तत्वेनोक्तमुक्तौप्रमाणत्वात् त्वत्प्रश्नानामुत्तरत्वेनवादव्यामातिशेषइत्यर्थः प्रपन्नतावत्पापकल्पं- धिवक्षुर्वद्वंधेनतद्रूपमितिप्रश्नप्रतिवक्ति ब्रह्मणइति अव्यलीकेन प्रियत्वेन प्रसन्नताहेतुनामतेन भक्तिलक्षणेनादृतोऽर्जितः सहरिः स्वनाभिप- द्मादुत्पन्नाय ब्रह्मणेचतुर्मुखाय रूपमदर्शयन्निजमितिशेषइत्यन्वयः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनुभवरूपस्यापि जीवस्य यथा संमोहितो जीव आत्मानमित्याद्यनुसारेण मोहाद्यनुपपत्तेः स्वरूप शक्त्या अनुभवित्वमपि लभ्यत इत्यभिप्रेत्य सिद्धान्तयति । आत्ममायामिति । केवलानुभवत्वे मायासम्बन्धो न स्यात्, स्वप्नद्रष्टृदृष्टान्तश्च न घटत इत्यपि ज्ञेयम् ॥ १ ॥ २

स्वे महिम्नि स्वस्य महिमहेतावित्यर्थः कालमाययोरपि परस्मिन् तत्सदाविसर्ज्याभयत्वे इत्यर्थः मामेवयेप्रपद्यन्ते मायामेतां तर- न्ति ते इति श्रीगीतातः । प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् इति श्री ऋषभदेववाक्याच्च । उभय मायां देहादिरूप- मर्थश्च ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

यदेव च स्वे महिम्नि रमणम् ब्रह्म परमब्रह्मलक्षणं रूपं श्रीविग्रहाकारं तत्त्वं यथावत् साक्षात्कारयन्नेव ब्रह्मणो ब्रह्मणं भत्या चतुःश्लोक्योपदिष्टवान् शब्देनानुभवेन च यत् प्रकाशितवानित्यर्थः किमर्थम् आत्मनो जीवस्य तत्त्वनिर्णयार्थम् तद्द्वारा जीवान्तरमपि बोधयितुमित्यर्थः । यद्वा आत्मनः स्वस्य श्री भगवतो यत् तत्त्वं याथार्थ्यं तस्य निर्णयार्थमिति । तस्य तादृशप्रसादे हेतुमाह अव्यलीकेति एतेन भगवद्विग्रहगतः प्रश्नश्चोत्तरयति ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

नवमेनृत्तरंप्राहजीवब्रह्मस्वरूपयोः संदेहवारकंपूर्वकथनस्यापिवस्तुतो पारंपर्यकथाचास्यभक्ताधिक्येवगम्यते नान्यथेत्यस्यसंदेहो नाशनार्थनिरूपिताम् अन्येषांसंदेहादीनांजीवब्रह्मसंदेहंवारयति आत्ममायामृतइतित्रिभिः यत्तेनोक्तं यदधात्मतेब्रह्मन्निति अस्यजीवस्य देहसंबंधः कथमितिजीवत्वंवा कथमितिअन्यशब्देनप्राप्तं तत्रजीवत्वेसतिबहवोहेतवोभविष्यंति देहसंबंधइति प्रथमंजीवत्वमुपपादयति आत्ममायामृते तत्रसदानंदरूपोभगवानेककोटिनिविष्टः चिद्रूपश्चापर' तस्यमायाद्विविधेतिपूर्वनिरूपितं तत्रचिद्रूपस्ययामायासाआद्या मोहिका सास्वपुरुषंव्यामोहयित्वाजीवतामापादयति जीवतीतिजीवः केवलंप्राणधारणप्रयत्नवान् सहिमाययाव्यामोहितः व्याकुलःसन्स दानंदकृतमृणीय:सूत्रात्मकआसन्यःदशविधप्राणरूपः तमवलंब्य तिष्ठति तदाजीवइत्युच्यते जीवप्राणधारणइतिधातोकर्तरिअच्प्रत्ययः बोधरूपोपिआनन्दरूपस्यापृथकभूतत्वात् आनन्दार्थतयाव्यामोहितः तत्संबंधादानंदोभविष्यतीति मुख्यतयासंबध्यते अयंचविभागः बहुस्यां प्रजायेयेतीच्छया इच्छापि सर्व भवनसमर्थरूपमेव धर्म रूपेणभवति इच्छारूपेणापिभवति । तत्र सदंशस्याक्रिया रूपा शक्तिः चिदंशस्यव्यामोहिकामाया । आनंदरूपस्य जगत्कारणभूता । एतात्रितयरूपाशक्तिः सच्चिदानंदरूपस्य भावः त्वतलादिवाच्यः तथा भगवतोभावस्वरूपादवर्निमित्तत्वात् नचसर्वदाभवतीतिशंकनीयं आपादकहेतुभूतस्यकालस्याभावात् जातेपुनःकालेतस्यैवनियाम कत्वात्नसर्वदाभविष्यतीति पूर्वमेवजातत्वात् तत्संगेइच्छादीनामपिजातत्वादिच्छादयःस्वदंशभूताः तान्सदेकरूपान्स्थापयंति तथाच तस्याअंशंप्रतिगृह्णातिभगवानिच्छारूपः सएवकामः सोकामयतेतिश्रुत्युक्तः तयाकृत्वाभेदरूपयासच्चिदानंदाधर्माः स्वर्याबध्यमानाः स्वाश्रय मपिनिबंधंति तदासभगवान्सर्वतः पाणिपादांतोभवति साकारतांचापद्यते भिन्नोपितयामिलितः अभिन्नइवाखंडोभवति 'तदपेक्षयाकार्य रूपस्यालपत्वात्तानिनीण्यपिरूपाणि पूर्वशब्देनोच्यंते अतएवसद्रूपस्यकार्यप्रत्येवपर्यवसायित्वं प्रजायेयेतीच्छयाउत्कर्षरूपेणआ ताः तत्रआनन्दउत्कृष्टः तदेतौतंसंबमानौजातौ ततश्चतयोर्धर्मौज्ञानक्रियेभगवच्छक्तिरूपेजाते तदासआनन्दःज्ञानक्रियाशक्तिमान्जातः तदाचिदंशस्यशक्तिःआनन्देगतत्वात्ज्ञानधर्मस्यतंव्यामोहयति तदातस्यजीवत्वं मदंशस्तुक्रियाशक्तेर्गतत्वात्अव्यक्ततामापद्यते तस्मान्मूल सभूतक्रियांशाभिः क्रियाभिःयथायथमतिव्यज्यते पश्चात्तस्यांतत्कृतधर्मेवातिरोभूतेस्वयमपितिरोभवति तदातस्यांस्वेच्छयाजातःशब्दःअभि व्यक्तएवतिष्ठति जीवभगवद्बुद्धिर्जीवेभगवतिवाएवंचिद्रूपोविज्ञानशक्त्यंशभूतैर्ज्ञानैःअभिव्यज्यतेतिरोभवतिच प्रभूयत्नस्तुतस्यापराधीइति जीवग्रहणार्थंसर्वदातिष्ठति सचेद्भगवान्तस्मैतांपूर्णांज्ञानशक्तिंप्रयच्छेत् तदातांमोहिकांमायांत्यजतिप्रयत्नंचत्यजति स्वरूपंचिद्रूपंचावतिष्ठ। ति अपराधीनश्चभवति जगत्कर्तव्यंतुभवति तस्याः सामायाशक्तिर्भवति उत्कर्षोपिनभवति आनन्दस्यैवोक्तेष्टत्वात् हीनतात्वापाततां वर्त्तेआनन्देनसहामिलितःसन् आनंदोपिभवपि सचेत्स्वधर्मेणगृह्णीयात् इयंप्रक्रियासर्वश्रुतिवाक्यानुरोधेनश्रुतार्थायात्तिसिद्धिसर्वत्रैवोपद्रा- याः सर्वतागमाभावात्मूलभगवन्माययाज्ञत्वात्साशीघ्रंतिरोभूताभवति तदासजागर्ति । एवं स्वप्न दृष्टांतेन तस्य व्यामोहंनिरूप्यदार्ष्टांति के विशेष माह अजसेति सामस्त्येन स्वप्नकोटयोत्रमध्ये भवंति इदंत्वेकमेवजन्मकोटिष्वनुवर्त्तते ॥ १ ॥

एवंतस्याःसंबंधमात्रंनिरूप्यकार्यंनिरूपयति बहुरूपइयतिसाह्याभासमूलमायारूपाबहुरूपाभवति तयासंबंधोयमपिसोयमपिबहुरूपोभवति इयंतिवचनंतस्याःसम्यक्स्वरूपसमर्पकाभावात् तदाआनंदार्थतस्यागुणेषुरममाणाःतस्यागुणान्गृहीतुमिच्छुःममाहमितिममेतिगुणेषुअहमि- तिमायायां संबंधप्रतिपादकावेतौशब्दौतस्यस्वरूपेअर्थसमर्पयतः ॥ २ ॥

एवंतस्याःकार्यमुक्त्वातत्परित्यागोपायमाहयर्हिवावेति'यर्हिकदाचिन्मूलभूतस्यइच्छावशात् वावेतिनिश्चयेनस्वेमहिम्निस्वमहिमारूपे भगवतिआनंदगुणक्षोभककालस्य मोहिकाया जगत्कर्तृकायामायायाःमियंतरितयोःकार्यस्वेच्छयादूरीकृत्यप्रसन्नतयास्थितेयदिरमेत तत्रा- पिभगवानेनंप्रतिसर्वथास्वमाहात्म्यंनबाधयतीतितस्यस्वामित्वेयदिसंदेहंनकुर्यात् तदागतसंदेहःउभयंत्यजतिव्यामोहिकांमायांगुणान् त्य- क्त्वायंदेहादिकंवाममाहमितिभावंवात्यक्त्वाउदास्तेतस्यामासक्तिंनकरोति तदानिस्तारइतिभावः ॥ ३ ॥

एवंजीवसंदेहंपरिहृत्यब्रह्मसंदेहंनिवारयति आत्मतत्त्वविशुद्ध्यर्थमित्यारभ्यनविमुह्यतिकर्हिचिदित्यंतेन अत्रापियुक्तिरस्माभिःप्रक्रियया- निरूपितस्वरूपमेवात्रनिरूप्यते तत्रप्रथमंब्रह्मणोपदेहसंबंधेतुजीवतुल्यइतियद्दूषणंमवात्मकत्वानुपपत्तिर्वातदत्रनिराक्रियते आत्मनस्तत्त्वंय- थार्थरूपंतस्यायशुद्ध्यर्थंलौकिकानांज्ञानेनलौकिकभावेनअन्यथाप्रतिभावनलक्षणांशुद्धिंदूरीकृत्यविशेषशुद्धिंसम्यग्बोधनलक्षणांजनयितुंयदाह केवलंवचनं किंतुज्ञानंमत्यंस्वस्यानंदरूपंब्रह्मणोप्रदर्शयन्यदाहेतिसंबंधः प्रदर्शनेकथनेचहेतुः अव्यलीकव्रतादृतइति निःकपटव्रतेनादृतःसे- वितःसंतुष्टोवा एवंभगवद्वचनंवक्तव्यत्वेनोपक्षिप्यसंतोषार्थंअव्यलीकव्रतंब्रह्मणोनिरूपयति सइति नियमविशेषेव्रतशब्दःप्रवर्त्तते सत्वब्रह्मसर्वे- न्द्रियाणांप्राणस्यचसर्वविषयपरित्यागेननिरोधात्मकः सचेत्स्वरूपतःफलतश्चएकविषयोभवतितदानिर्व्यलीकः अयंचब्रह्माभगवदर्थंसृष्टिं- करिष्यामीतिसंकल्प्यपश्चात्साधनान्यालोचयितुंप्रवृत्तः तानिसाधनानिभगवदात्मकानिभगवदिच्छानुसारेणैवकार्यंकुर्वंतीतियादृशमयंचि कीर्षतितादृशंभगवतोनाभिप्रेतमितितेपदार्थानस्फुरिताः ॥ तदासंनिकर्षाभावात्तद्विषयकःसाक्षात्कारोनजातइत्याह सब्रह्म यतोयमेव- विद्वः तस्मात्प्रसिद्धस्यात्यस्याभावात्नततःसंदेहनिवृत्तिः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी।

प्रश्नस्य प्रथमस्योक्त्वा द्वितीयस्योत्तरं वदन्। चतुःश्लोकी भागवतप्रवृत्तिं नवमेऽतनोत् ॥ ० ॥

यत् पृष्टं यद्धातुमत इत्यनेन जीवस्य देहसम्बन्धो निर्हेतुकः सहेतुको वा तत्रोत्तरमाह। आत्मनो हरेर्माया अनाद्यविद्याशक्तिम् अन्तरेण अर्थे देहेन्द्रियादिभिः सम्बन्धो जीवस्य न घटेत यथा स्वप्नद्रष्टुरज्ञानमृते स्वाप्निकदेहसम्बन्धो न घटेत यतोऽनुभवात्मनः ज्ञानमयस्य तथा देहादिभ्यः परस्य। मायया त्वचिन्त्यशक्त्या दुर्घटघटनापटीयस्या देहसम्बन्धो घटत इत्यर्थः ॥ १ ॥

एवञ्च यादृच्छिकया अविद्या शक्त्यैव देहसम्बन्धे सति जीवः कीदृशः स्यादित्यपेक्षायामाह। बहुरूपः बालयुवादिरूपो देवनरादिरूपश्च इवेति जीवस्य चित्कणरूपत्वाच्च तत्त्वत इत्यर्थः बहुरूपया जीवस्य बहुरूपत्व हेतुत्वात् बहुवृत्तिकया। यदुक्तम् यया। क्षेत्रज्ञशक्तिः सातारतम्येन वर्त्तते इति ॥ २ ॥

एवञ्च यादृच्छिक्या माययैव जीवस्य संसारो यथा तथैव यादृच्छिक्या भक्त्यैव जातप्रेमणो जीवस्य संसारान्निस्तार इत्याह यहींति। चाशब्द एवार्थे। यर्ह्येव स्वे स्वीये महिम्नि रमेत इति। वस्तुतः खलु स्वीये देहादिके ममतास्पदे रमणं त्यक्त्वा यथार्थत एव स्वीये ममतास्पदे वस्तुनीत्यर्थः। महिम्नि महिमातिशयवत्त्वात् महिमरूपे एवेत्यर्थः। कालमाययोः परस्मिन् कालकृतविकाररहिते मायाकृतमहदादि तत्त्वरहिते च स्वरूपे रमेत आसज्जेत। तच्च न यत्र काल इति न यत्र मायेत्यादिवक्ष्यमाणवाक्यदृष्ट्या भगवतो धाम श्रीविग्रहपार्षदादिकं ज्ञेयम्। रमणस्य भक्त्यविनाभावित्वात् यदृच्छया प्राप्तया भक्त्येति लक्ष्यते तदा उभयं कालं मायाञ्च कालकृतं अविकारं मायाकृतं लिङ्गञ्च त्यक्त्वा तत्र (ततः) उदास्ते अनासक्तो भवति। यदुक्तम्-यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम्। परोऽपि मनुतेऽनर्थं तत्कृतञ्चाभिपद्यते॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो व्यासश्चक्रे सात्वतसंहिताम् इति ॥ ३ ॥

ननु कालमाययोः तत्परतं वा कर्यं तत्र रमेत तत्राह आत्मतत्त्वस्य स्वीयतत्त्वस्य विशुद्धिदर्शनं तदर्थं दशमस्य विशुद्ध्यर्थमितिवत् यद्वा आत्मनो जीवस्य तत्त्वानां चित्तादीनां विशुद्ध्यर्थं, यत् ऋतं सत्यं चिद्घनं रूपं दर्शयन् आह चतुःश्लोकी भागवतमुद्दिदेश तत्र हेतुः अव्यलीकेनव्रतेन निष्कपटया भक्त्या आदृतः यच्छब्दस्योत्तरवाक्यगतत्वाच्च तत्पदापेक्षा। अयं भावः जीवस्याविद्यया आविद्यकदेहसम्बन्धः ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भावे इति महान् विशेष उक्त इति श्री स्वामिचरणाः। एवञ्च आसीद्यदुदराद् पद्ममित्यादिना जीवदेहादीश्वरदेहस्य कोऽपि विशेष इति द्वितीयप्रश्नस्योत्तरमुक्तम् ॥ ४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

अधुना राजप्रश्नोत्तरं श्रीमद्भागवताख्यानेनैव वक्तुं तन्मूलभूतं ब्रह्मणे भगवत्प्रोक्तं सूक्ष्मं भागवतं विवक्षुरादौ, यद्धातुमतो ब्रह्मन्देहारम्भोऽस्य धातुभिः यदृच्छया हेतुना वेत्यस्य आत्मनो बंधमोक्षौ चैतस्य व्यवस्थानं स्वरूपत इत्यस्य परमेश्वरस्यापि बद्धजीवदेहसंबंधाविशेषाद्भुक्तिमुक्तिप्रदत्वं दुर्घटमिवेत्यस्य सचापि पुरुषः यस्मिन् लोके शेते तं लोकमुदाहर्तुमर्हसीत्यस्य च प्रश्नस्योत्तरमाह आत्ममायेत्यादिना तत्र जीवस्य देहारंभो यदृच्छया नास्ति किंतु सहेतुकइत्याह अनुभवात्मनः ज्ञानरूपस्य परस्य देहेन्द्रियमनोबुद्धिप्राणादिभ्यो विलक्षणस्य जीवस्य अर्थसंबंधः देहादिना संबंधः संयोगः आत्मनः परमात्मनः मायां प्रकृतिमृतेऽजसा न घटेत न संगच्छेत भगवन्माययैव देहादिसंयोगः न निर्हेतुकः सर्वत्र संबंधप्रसंगादसंभवाच्च तत्र दृष्टांतः स्वप्नद्रष्टुरिवेति यथा स्वप्नद्रष्टुः देहसंबंधः परमात्मनः मायामृते न घटेत तद्वत् स्वप्नद्रष्टुः शुभमशुभं वा देहादिकं स्वशक्तिभूतया मायया परमात्मैव करोति नतु स्वप्नपदार्थो निर्हेतुकः सर्वत्र सर्वोत्पत्ति प्रसंगात् नच तत्कर्ता तद्द्रष्टा अनिष्टदेहादिसंबंधदर्शनात् विस्तरस्तु वेदांतकौस्तुभे द्रष्टव्यः ॥ १ ॥

बंधं दर्शयति बहुरूप इवेति देवमनुष्यादिदेहेन्द्रियमनोबुद्ध्यादिभेदनानेकप्रकारया मायया हेतुभूतया संदेहादिभ्यो विलक्षणोपि ज्ञानस्वरूपोऽपि बहुरूप इव आभाति देवोहं मनुष्योहं बालोहं स्थविरोहमित्येवं नानारूप इव प्रतीयते अस्याः मायायाः गुणेषु रममाणः ममाहमिति मन्यते देहे अहंबुद्ध्या तदनुबंधिषु ममीयबुद्ध्या च बद्धो भवति ॥ २ ॥

मोक्षमाह यर्हीति यर्हि यदाश्रोत्रियस्य ब्रह्मनिष्ठस्य गुरोः चरणोपासने न गतसंमोहः आत्मानात्मपरमात्मस्वरूपाविविवेकवान् कालमाययोः कालप्रकृत्योः परस्मिन् स्वे महिम्नि ब्रह्मणि भगवति जगत्कारणे रमेत ध्यानादिनाक्रीडेत तदोभयम् अहंममेति च त्यक्त्वा अर्चिरादिमार्गेण परं पदं प्राप्य उदास्ते आविर्भूतापहतपाप्मत्वादिधर्मित्वेन अवतिष्ठते अनेनैव स्वरूपतो मुक्ताऽवस्थानमप्युक्तम् ॥ ३ ॥

अथ परमेश्वरस्यापि बद्धजीवदेहसंबंधाविशेषाद्भुक्तिमुक्तिप्रदत्वं दुर्घटमिवेत्यस्योत्तरं बद्धजीवस्य प्राकृतमनित्यं शरीरं परमेश्वरस्य त्वप्राकृतं नित्यं वपुरिति दर्शनात् तप आदिमगवद्भजनमेव मुक्तिसाधनमित्याह आत्मतत्त्वविशुद्ध्यर्थमिति अव्यलीकेन तप आदिभजनेन आदृतः आराधितःसन् ब्रह्मणे चतुर्मुखाय ऋतं सत्यं रूपं दर्शयन् यत्तप आदिभजनमाह आत्मनः मुमुक्षो जीवस्य तत्त्वविशुद्ध्यर्थम् आविर्भूतापहतपाप्मत्वाद्यर्थम् मुक्त्यर्थमित्यर्थः ॥ ४ ॥

भाषा टीका

भगवान की माया के बिना अनुभव रूप जो आत्मा है तिसका अर्थो से संबंध नही घटता है जिस तरह स्वप्न में देह संबध नही घटता है ॥ १ ॥

स आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ।
तां नाध्यगच्छद्दृशमत्र सम्मतां प्रपञ्चनिर्म्माणविधिर्यया भवेत् ॥ ५ ॥
स चिन्तयन् द्वयक्षरमेकदाम्भस्युपाशृणोद्द्विर्गदितं वचो विभुः ।
स्पर्शेषु यत् षोडशमेकविंशं निष्किञ्चनानां नृप यद्धनं विदुः ॥ ६ ॥
निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः ।
स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः ॥ ७ ॥
दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः ।
अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ॥ ८ ॥

भाषाटीका ।

बहु रूपा माया से बहु रूप ऐसे मालुम पडते हैं और इसके गुण मे रममाण पुरुष अहं मम यह मान लेता है ॥ २ ॥

पुरुष और प्रकृति से पर अपनी महिमा मे जब रमण करते हैं तब अहं और मम यह अभिमान छोड पूर्ण रूप से स्थित होते हैं ॥ ३ ॥

आत्म तत्व की विशुद्धि के लिये भगवान् ने जो कहा ब्रह्मा जी के वास्ते रूप देखा कर ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

भगवद्भजनादेव तत्त्वज्ञानमित्येतत् प्रपञ्चयिष्यन् ब्रह्मणोऽपि तत्त्वज्ञानं तत्प्रसादादेवेति दर्शयितुमितिहासमाह स इत्यादिना । परो गुरुर्भक्तिरहस्योपदेष्टा स्वधिष्ण्यं पद्मम् अधिष्ठाय । तस्याधिष्ठानान्वेषणाय पूर्वं जले निमग्नः पश्चात् परावृत्य स्वाधिशये स्थितवेत्यर्थः ऐक्षततत् कथं सृजेयमित्यालोचितवान् । तां दृशं प्रज्ञाम् । अत्रसृष्टिविषये । सम्मताम् अव्यभिचारिणीम् । यया दृशा विधिः प्रकारः ॥ ५ ॥

स्रष्टुं चिन्तयन् कदाचित् द्व्यक्षरं वचः अम्भसि उपाशृणोत् उप समीपे श्रुतवान् । ते अक्षरे दर्शयति कादयो मावसानाः स्पर्शाः तेषु यत् षोडशं तकारः यच्चैकविंशं पकारः । वचसो निर्देशार्थं तदर्थ माह हे नृप निष्किञ्चनानां त्यक्तधनानां धनं यद्विदुः येन तपोधना इति प्रसिद्धाः । तच्च द्विर्गदितं तप तपेति लोटो मध्यमपुरुषैकवचनं तस्य वीप्सां सादरविधिरूपामृष्टणादित्यर्थः ॥ ६ ॥

एवं निशम्य तस्य वचसो वक्तुर्दिदृक्षया ततः प्रचलितः सन् दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केनाचित् प्रत्यक्षं नियुक्त इव तच्चात्मनो हितं विमृश्य तपसि मनो धृतवानित्यर्थः ॥ ७ ॥

ततः सः अखिलानां लोकानां तापनं प्रकाशकं तप अतप्यत कृतवान् । तप तपेत्यस्य वचसो ऽर्थे अमोघंदर्शनं यस्य । जितः अनिलः आत्मा मनश्चयेन । विजितान्युभयेन्द्रियाणि ज्ञानकर्मात्मकानि येन । तपतां तपश्चरतां मध्ये तपीयान् अतिशयेन तपस्वी ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिनाख्यतट्टिप्पणी ।

निर्देशार्थमिति । स्पष्टनिर्देशार्थ मित्यर्थः ॥ ६-१५ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

यद्वोक्तं भगवतोपि जीववद्देहसंबंधाविशेषात्कथं तद्भजने न मुक्तिरिति तत्रोत्तरं कालमायावश्यजीवस्य कर्माधीनः प्राकृतो देह ईश्वरस्य त्वप्राकृतस्वेच्छोपात्तादिव्यविग्रहवत्त्वामित्येवं वक्ष्यन्कालमायावश्यजीव विलक्षणभगवत्स्वरूपविशोधने कथं ज्ञायत इत्यत्राह आत्मतत्त्वेति अव्यलीकव्रतादृतः निर्दिष्टव्रतेन आदृतः आराधितः भगवान् ब्रह्मणो चतुर्मुखाय रूपमप्राकृतं स्वीयरूपं दर्शयन्नात्मतत्त्वविशुद्ध्यर्थं जीवविलक्षणपरमात्मयाथात्म्यविशोधनार्थं ऋतं सत्यं यद्वचनमाहतद्वक्ष्यामीति शेषः अदर्शयद्रूपमिति पाठे यथादर्शयत्तथाहेत्यर्थः ॥ ४ ॥

आत्मतत्त्वविशोधकं भगवदुक्तमेवोपपादयितुमितिहासमाह स इति जगतां व्यष्टिभूतानां परः प्रभुः गुरुर्धर्मोपदेष्टा आदिदेवः चतुर्मुखः स्वधिष्ण्यं भगवन्नाभिपद्मरूपं स्थानमास्थायाधिष्ठानस्यान्वेषणाय पूर्वं जलेनिमग्नः पश्चात्परावृत्य स्वाधिष्ण्यं स्थितवेत्यर्थः सिसृक्षया सृष्टुमिच्छया ऐक्षत कथं सृजेयमित्यालोचितवान् एवमीक्षमाणो ब्रह्मा यया दृशप्रपंचनिर्माणविधिः जगत्सर्जनप्रकारः भवेत्तज्ज्ञानं भवेत् अत्र सृष्टिविषये संमतां तां दृशं प्रज्ञां नाध्यगच्छन्नप्राप्तवान् ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

प्रजाप्रास्युपायं चिंतयतेकदा कदाचित् द्विर्गदितं द्विरुक्तं द्व्यक्षरं वचः अंभसि जले उपाभ्याशोपसमीपे शुश्राव ते अक्षरे दर्शयति कादयो मावसानाः स्पर्शाः तेषु यत्षोडशः तकारः यदेकविंशः पकारः वचसो निर्देशार्थं तदर्थमाह येनतपो धना इति प्रसिद्धः तच्च द्विर्गदितं तपतपेति लोटमध्यमपुरुषैकवचनं तस्य वीप्सायां सादरविधिरूपामगृह्णीदित्यर्थः ॥ ६ ॥

तपतपेति वचो निशम्य श्रुत्वा तस्य वचसो यो वक्ता तस्य दिदृक्षया द्रष्टुमिच्छया तातः प्रचलितः स न दिशो विलोक्य तत्र दिक्ष्वन्यद्वस्त्वंतरमपश्यमानः पुनः स्वधिष्ण्यमास्थाय उपादिष्टइवकेनचित्प्रत्यक्षमनियुक्त इवतथात्मनो हितं विमृश्य तपसि मनः चित्तमादधे धृतवान् ॥ ७ ॥

तत स स ब्रह्माखिललोकानां तापनं प्रकाशनं यस्मात्तथाभूतं तपः दिव्यं सहस्राब्दं देवमानेन सहस्रवर्षपर्यंतमतप्यत तपतां तपश्चरतां मध्ये तपीयानत्यंततपः संयुक्तः अमोघदृष्टिः स्वचरितव्येतपस्यव्यर्था दृष्टिः संकल्परूपज्ञानंयस्यसः जित अनिलः प्राणवायुरात्माच मनश्च येन सः विजितान्युभयेन्द्रियाणि ज्ञानकर्मात्मकानि येन सः एवं भूतोऽतप्यतेत्यर्थः स्मेति प्रसिद्धौ ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

एतदेवविवृणोति सइति भजतांसनकादीनां स्वधिष्ण्यंनाभिकर्णिकास्थानमैक्षताचिंतयत् ययाहशास्त्रप्रपंचनिर्माणो ॥ ५ ॥

ततःकिमत्राह संचिंतयन्निति कथंनुसृष्टिविषयादृष्टिःस्यादितिसंचिंतयन्विभुर्ब्रह्माद्वेअक्षरेयस्मिंस्तत्द्व्यक्षरंवचः अक्षरयोःस्वरूपंलक्षयति स्पर्शेष्वितिककारादिमकारान्तेषुस्पर्शेषुयत्षोडशमक्षरंतकारः एकविंशंपकारस्तद्रूपंवचइतियावत् तद्वाच्यंस्पष्टंलक्षयति निष्किंचनानामिति निष्किंचमानांपरमहंसानांयद्धनंविदुस्तद्वाच्यंवचनंतपोलक्षणमित्यर्थः कादयोमावसानाःस्पर्शाः ॥ ६ ॥

किमनेननिरूपणीयमित्यत्राह निशम्येति ब्रह्मातद्वचोनिशम्यश्रुत्वायेनैतद्वचउक्तं तद्वक्तृदिदृक्षयादशदिशोविलोक्यतत्रतासुदिक्षुअन्यदपश्यमानः पद्मनालनाडीभिराविश्यान्विष्यदृष्ट्वास्वधिष्ण्यंपद्ममेवास्थायाध्यास्यतद्वचस्तच्छ्रुतंवचः आत्मनोहितंहितसाधनंविमृश्याहंमज्जमकेनप्रपंचनिर्माणोपायेतवतपोनपूर्वंततस्मात्पुनस्तथयातपःकर्तव्यं तपेतिवा तद्वस्युपादिष्टमाज्ञप्तोस्मीतिचालोच्य तपसीवतपस्येवमनआदधइत्यन्वयः ॥ ७ ॥

विमर्शफलमाह दिव्यमिति अखिललोकतापनमखिललोकप्रकाशनंतपोज्ञानरूपंब्रह्मातप्यतालोचयामास दध्याविति यावत् तपोरूपंपरंब्रह्मचिंतयदंजसेति जितमनस्कत्वादिसर्वसमाधारणमित्यतोविशिनष्टि तपीयानिति तपतांतपीयानत्युत्तमोत्तमः द्विवचनविभज्योपपदेतरबीयसुनावित्युत्तमार्थत्वंईयसुन् किंप्रमाणमित्यतउक्तं स्मेति स्मृतौवृत्तौनिषेधेस्मेतिअभिधानात् ॥ अनेनमहान्महीयसामादिश्रुयादत्युत्तमोत्तमित्येतत्सूचयति विजितोभयेन्द्रियत्वाद्यपिनपक्षद्वयइतरेभ्यआधिक्यसूचनायोक्तव्यमितिज्ञातव्यं यत्राधिकंवदंतिकिंचिततयोर्यस्तत्रचाधिकइतिवचनात् अन्यथातपोऽतप्यतेत्यनेनाथवेवालं अतउभयेन्द्रियजयोऽपिब्रह्मणऔत्पत्तिकोगुणः परांचखानिव्यतृणात्स्वयंभूरितिस्मृतेः हरिमंतरेणामोघदर्शनत्वंचास्यैवाधिकं प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरितावभूवेतिश्रुतेः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तदेवविवरितुं तद्दर्शनप्रकारमाह स इत्यादिभिः ॥ ५ ॥

स चिन्तयन्निति च कामः कृष्णायेत्यादिना श्रीकृष्णाष्टादशाक्षरमुपदिश्य तप त्वं तप एतेन तव सिद्धिर्भविष्यतीत्यनेन वाक्येन ब्रह्मसंहितायामेतदभिसन्धिश्च दर्शितः निष्किञ्चनानां निष्कामभक्तानां यत् तदाराधनलक्षणं तप एव धनं विदुः ॥ ६ ॥

निशम्येति तद्वक्त इति सम्बन्धोक्तिपाठे तत वचो निर्गतं यद्वक्त्रात् तस्य दिदृक्षया इति ॥ ७ ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी

आदिदेवइति देवतांतरोपासनापिनिवारितागुरुरप्यन्योनास्तियतस्तदुपदेशेनवाकार्यंसिध्यति यतःअयमेवसर्वस्यापिगुरुःतीर्थाद्याश्रयणमपिनास्तीत्याह स्वधिष्ण्यमास्थायेति अथवासर्वैरेतैर्विशेषणैःअहमेवमहान्किममान्येनसाधनेनेतिमंगलादिकमप्यकृत्वाकेवलंसिसृक्षयासृष्टुमिच्छयासाधनान्यैक्षत तदापूर्वोक्तन्यायेनसाधनोपस्थित्यभावात्तादृशंनाध्यगच्छत् आलोचनादिकंतु अनुमानतर्कादिरूपंप्रकृतोपयोगि न भवति उपादानपरे गोचरा परोक्षज्ञानस्यैव साधनत्वात्तदाह प्रपंचनिर्माणविधिर्यया भवेदिति यथाहशाप्रपंचस्य निर्माणमुत्पादनं तत्र विधिः प्रकारः यथा भवति तांनप्राप्तवानित्यर्थः प्रकारः सर्वोपि ज्ञानेनैव संपाद्यते तदातमेवार्थं चिंतयामास यथा भगवान् तथा भगवान्प्रत्यक्षो भवति तथा साधनचिंतया साधनान्यपि प्रत्यक्षाणि न भविष्यंतीति अनेन यः साधनमेव चिंतयति मनु साधनसाधनं स कृतो भवतीति ज्ञापितं तदा भगवान्मर्यादामिमं प्रयासंकरोतीति तस्मैसाधनमुपदिष्टवान् तद्भगवन्मुखनिर्गतं वाक्यं मंत्ररूपमिति ॥ ५ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

मंत्रोच्चारप्रकारेण तन्निरूपयति सचिन्तयन्निति पूर्वोक्तप्रकारेण स ब्रह्मा चिन्तयन् अंभसि जलमध्ये लीनो यथा वदति तद्वाक्यमिव द्व्यक्षरमुपाशृणोत् द्वे अक्षरे यस्मिन् पदे तादृशमेकं अशृणोत् तदपि द्विर्गदितं वारद्वयमुच्चारितं अनेन पदभेदो विचारितः पदमित्यना च निरूपिता तदान्निरुक्तपदवाक्यरूपं ज्ञातमिति वचनमित्युक्तं ननु व्याकुलचिंताकुलितश्च कथं जले उत्पन्नं शब्दं अर्थाद्विपुरस्सरेण निर्धारितवान् तत्राह विभुरिति अक्षरद्वयस्योच्चारमाह स्पर्शेषु यत्षोडशमेकविंशतिस्वराणां द्विरूपता स्वतंत्रता इतरप्रधानांगता च तत्र अक्षरद्वयस्य स्वतंत्रस्य तथा निरूपणात् सांगमेवस्पर्शद्वयंभवति तत्रापि प्रथमातिक्रमेकारणाभावात् अकारसहितमेवाति तत्र कादयोमाव सानाः स्पर्शाः पंचविंशति पंचवर्गात्मकः तत्र चतुर्थपंचमयोः आदिवर्णौषोडशैकविंशरूपौ भवतः तकारपकारावित्युक्त भवतीति साधकस्यैवार्थसमर्पकत्वात् निर्णयार्थं तदर्थमाह किंच नानार्मिति अदृष्टजनकतापस्यकृच्छ्रादेस्तपधात्वर्थात् तद्ज्ञापकत्वात् प्रत्ययाभावेपि धातुमात्रं लक्षणार्थपरमित्यभिप्रेत्याह न विद्यते किंचन यत्किंचित्तु तापस्य निवारकं अतः स्वरक्षितपदार्थस्य प्रतिबंधकं निवृत्तेरावश्यकत्वात् तपः कर्त्तारो निष्किंचना एव भवंतिमदाह निष्किंचनानां धनमिति नृपेति संबोधनं तस्य धनस्य माहात्म्य दर्शितत्वात् यद्विति प्रसिद्धेसर्वप्रकारेण तद्रक्षणीयमिति धनं धनकार्यकर्तृत्वाद्वा तत्र प्रमाणमाह विदुरिति यतो लोकं तपोधना इति प्रसिद्धाःतद्विपदवम स्पर्शवर्णात्मकाविति नवायुजल संबधादुत्पद्यते किंतु वक्त्रात्केनाचिदुक्तामिति निश्चित्य ॥ ६ ॥

तद्वक्त्रदिदृक्षया दिशोलोक्य तत्रान्यदपश्यमानः स्वयं तु नोक्तवानिति ज्ञात्वा अन्यं चापश्यन्तादृशरूपाभावात् लोट्परस्मैपदमध्यमपुरुषैकवचनं द्विरुक्तमिति निश्चित्य लोडर्थं विचारयन् तदन्वेषणार्थस्थलांतरेपि गत्वा परितो वा भ्रमणं विधाय पुनः स्वधिष्ण्यमास्थाय चक्रचितांपारित्यज्य पदं विचारितवान् तत्र पदचतुष्टयमध्ये आख्यातमेव तद्भवतीति निश्चित्य अन्यस्वतादृशरूपाभावात् लोट्परस्मैपदमध्यमपुरुषैकवचनं द्विरुक्तिमिति निश्चित्य पदं विचारितवान् लोडर्थविचारे विध्यादिष्वर्थेषु प्रथमातिक्रमे कारणाभावात् विध्यर्थ एवाय मिति निश्चित्य आज्ञैव विध्यर्थ इति परोक्षापरोक्षभेदेन क्रियाया लिङ्लोटोर्विधानात्प्रेर्यपरोक्षापरोक्षभेदेन च प्रथमपुरुषमध्यमपुरुषयोर्विधानात् भवच्छब्देपि आज्ञापरोक्षत्वबोधनात् प्रत्यक्षतया प्रत्यक्षेमां पश्यन् यदग्रे तपः कुर्विति तपस्युपादिष्ट इव तपसि मनः आदधे तदा तपः कृतवानिति ॥ ७ ॥

दिव्यं सहस्राब्दामिति संतापजनका तृतियोगज्ञानप्राणाः तस्य त्रयमपि संपन्नमिति वक्तुं द्वयं विशेषणतया निरूपयति अमोघदर्शनः इतिज्ञानंअव्यवायस्तेन पदार्थनिर्धारः कृतः स तस्य सत्य इति वा निरूप्यते जितानिलात्मेति योगजनितः तपः शुद्धिर्वार्विजितोभयेंद्रिय इत्यपि जितः अनिल आत्मान्तःकरणेन विशेषेण जितानि ज्ञानकर्मेंद्रियाणि येन अतप्यतआहारपरित्यागेन प्राणनिरोधेन आत्मानं संतप्तंकृतवान् तदा तस्मिन्विद्यमाना लोका अपि सन्तप्ताजाताः दयाधर्मेण बस्त्रशोषणे जातं गच्छति तदा लोकानां तदाह अखिललोकतापनमितिअखिललोकस्य तापनं यस्मात् तपसि सहजा ये दोषा क्रोधग्लान्युद्वेगादयः ते तस्य न जाता इति तदर्थं विशेषणं तपतां मध्ये अति तपीयानिति समाहित इति सावधानः फलं यथा पंचके रसनिष्पत्तिं ज्ञात्वा पश्चात्तपति तदर्थं च दृष्टदृष्टिर्भवति तथायमपीत्यर्थः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

न केवलं भगवद्रूपमेव कालमायातीतम् अपि तु तल्लोकं तद्भक्ताश्च कालमायातीता इति दर्शयितुं चतुःश्लोकीं भागवतकथां प्रस्तौति स आदौति । परो गुरुर्भक्तिरहस्योपदेष्टा स्वधिष्ण्यं पद्मम् आस्थाय अधिष्ठाय तस्याधिष्ठानान्वेषणाय पूर्वं जले निमग्नः पश्चात् परावृत्य स्वधिष्ण्ये स्थित्वेत्यर्थः । ऐक्षत तत् कथं स्रक्ष्यामीत्यालोचितवान् तां दृशं प्रज्ञाम् । अत्र सृष्टिविषये । विधिः प्रकारः ॥ ५ ॥

सृष्टिं विचिन्तयन् कदाचिद्द्व्यक्षरं वचः द्विर्गदितं द्विरुक्तम् अम्भसि उपसमीपे श्रुतवान् मन्त्रमिव तद्द्व्यक्षरमुच्चरति । स्पर्शेषु कादयो मावसानाः स्पर्शाः तेषु यत् षोडशं तकारः यदेकविंशं पकारः तेन तपेति लोटमध्यमपुरुषैकवचनं तच्च द्विरुक्तं तप तपेति । धनमिति-य एव ब्राह्मणास्तपोधना उच्यन्ते ॥ ६ ॥

केनचित्तपसि प्रत्यक्षमहमादिष्टः प्रत्यक्षमिव नियुक्त इति तदेव हितं मत्वा तस्मिंस्तपस्येव मन आदधे ॥ ७ ॥

अखिलानां लोकानां तापनं प्रकाशकम् आविर्भावकारणमित्यर्थः । तपतां मध्ये तपीयानतितपस्वी ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

एतदेवप्रपंचयितुं यस्मिन् लोके भगवान् शेते तंलोकंच दर्शयितुमितिहासमाह स इत्यादिना जगतां व्यष्टिरूपाणां प्राणिनाम् आदिदेवः परो गुरुर्भक्तिरहस्योपदेष्टा च स ब्रह्मा स्वधिष्ण्यं पद्ममास्थायाधिष्ठाय जगतां सिसृक्षया स्रष्टुमिच्छया ऐक्षत सृष्टिप्रकारमजानन् कया बुद्ध्या सृष्टिं करिष्यामीत्यालोचितवान् एवमीक्षमाणोपि ययाप्रपंचनिर्माणविधिःजगद्रचनाप्रकारोभवेत तामत्र जगन्निर्माणे संमतां बुद्धिं नाध्यगच्छत् ॥ ५ ॥

विभुः समष्टिशरीराभिमानी स ब्रह्मा सृष्टिं चिंतयन् एकदा द्व्यक्षरं वचः अंभसि उपाशृणोत् उपसमीपे श्रुतवान् तेअक्षरे दर्शयति स्पर्शेषु कादिमांतेषु यत्षोडशमक्षरं तकारः यदेकविंशमक्षरं पकारः वचसोनिर्देशार्थं तदर्थमाह हेनृप निःकिंचनानां नास्तिकिंचन येषां

तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयामास परं न यत्परम् ।
व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ॥ ९ ॥
प्रवर्त्तते यत्र रजस्तमस्तयोः सत्त्वञ्च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्च्चिताः ॥ १० ॥
श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्व्वे चतुर्ब्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्च्चसः ॥
प्रवालवैदूर्य्यमृणालवर्च्चसः परिस्फुरत्कुण्डलमौलिमालिनः ॥ ११ ॥
भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनाम् ।
विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः

तेषां त्यागिनां यदेव धनं विदुः तद्व द्विर्गदितं तप तपेति लोट्मध्यमपुरुषस्यैकवचनम् तस्य द्विरुक्ति सादरविधिरूपामश्रृणो-दित्यर्थः ॥ ६ ॥

सः तपतपेति वचो निशम्य श्रुत्वा तद्वक्तृदिदृक्षया तस्य वचसो यो वक्ता तद्दष्टुमिच्छया ततः प्रचलितः सन् दिशोविलोक्य तत्र विश्वमन्यत् पुरुषांतरमपश्यमानः पुनः स्वधिष्ण्यमास्थाय तपस्युपाविष्ट इव स्वबंधुना केनचित्साक्षादाज्ञप्त इव तद्व स्वहितं विमृश्य तपसि मनः आदधे धृतवान् ॥ ७ ॥

तदनंतरं सः अमोघदर्शनः अनुष्ठीयमानेतपसि अमोघं सफलं दर्शनं संकल्पात्मकं ज्ञानं यस्य सः तत्रहेतुगर्भाणि विशेषणानि जितानिलात्माजितः अनिलः प्राणः आत्मा मनश्च येन सः विजितानि उभये न्द्रियाणि ज्ञानकर्मात्मकानि येन सः तपतां तपश्चरतां मध्ये तपीयान् अतिशयेन तपस्वी इत्थं समाहितो दिव्यं सहस्राब्दम् दिव्यमानेन सहस्रवर्षपर्यंतम् तप अतप्यत कृतवान् स्मेति प्रांजलो कथंभूत तपः अखिललोकानां तापनं प्रकाशकम् ॥ ८ ॥

भाषाटीका।

आदिदेव ब्रह्माजी कमलें मे स्थित होकर रचने की जब इच्छा की तब रचने वाली बुद्धिको न प्राप्त हुए जिससे प्रपंच रचाजाय ५

ब्रह्माजी चिन्तना करते हुए एक समय जल में दो अक्षर सुने दो बार कहे हुए स्पर्श संज्ञक वर्णों में सोलवा अक्षर तकार है और इक्कीसवां जो पकार है यही दो अक्षर सुने जिनको निष्किंचन पुरुषों का धन कहते हैं ॥ ६ ॥

तिसको सुनकर मुख के देखने की इच्छा से दिशाओं के तरफ देखकर और कुछ नहीं देखा तब अपने कमल में स्थित होकर तप करने मे मन लगाया ॥ ७ ॥

श्रीधरस्वामिकृत भावार्थदीपिका।

तस्मै ब्रह्मणे स्वलोकं वैकुण्ठाख्यम् । परं श्रेष्ठम् । न यत्परं यतः परमुत्कृष्टम् अन्यन्नास्ति। तमेव लोकमनुवर्णयति पञ्चभिः व्यपेताः संक्लेशादयो यस्मात् । स्वदृष्टवद्भिः । यद्वा स्वस्य दृष्टं दर्शनमस्ति येषां तैः आत्मविद्भिरित्यर्थः ॥ ९ ॥

तयोस्ताभ्यां मिश्रं सत्त्वञ्च न प्रवर्त्तते किन्तु शुद्धमेव सत्त्वम् । कालविक्रमो नाशः । अपरे रागलोभादयः न सन्तीति किमुत वक्तव्यम् । अनुव्रताः पार्षदाः ॥ १० ॥

श्यामाश्च ते अवदाताः उज्वलाश्च । पद्मनेत्राः । पीताम्बराः । सुरुचः अतिकमनीयाः । सुपेशसः अतिसुकुमाराः । उन्मिषन्त इव प्रभावन्तो मणिप्रवेकाः मणयुत्तमा येषु तानि निष्काणि पदकान्याभरणानि येषां ते सुवर्चसः अतितेजस्विनः । प्रवालादिवत् वर्चो वर्णो येषां ते परिस्फुरन्ति कुण्डलानि मौलयो मालाश्च सन्ति येषां ते ॥ ११ ॥

पार्षदाननुवर्ण्य पुनरपि लोकमनुवर्णयति भ्राजिष्णुभिर्देदीप्यमानाभिः प्रमदोत्तमानां द्युभिः कांतयः ताभिर्विद्योतमानः सह विद्युद्भिर्वर्तमानाः सविद्युतस्ताभिरभ्रावलिभिः । तत्र विद्युत इव स्त्रियः अभ्रपङ्क्तय इव विमानानि नभ इव लोकः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

समाजितस्तपसा सम्यगाराधितो भगवान् परमन्यद्यस्मात्परमुत्कृष्टं नास्ति तथा भूतं लोकं तस्मै चतुर्मुखाय संदर्शयामास तमेव लोकं वर्णयाति पंचभिः व्यपेत संक्लेशविमोहसाध्वसं क्लेशाअविद्यादयः साध्वसं भयं व्यपेताः संक्लेशादयो यस्मात् स्वस्वरूपाविः स्वशरीरक परमात्मानमनुभवद्भिः विबुधैर्विशेषेण बुध्यते इति विबुधा ज्ञानाधिका नित्यमुक्ताश्चतैरभिष्टुतं ॥ ९ ॥

क्लेशमोहाद्यभावहेतुमाह प्रवर्तत इति रजस्तमसीतयोस्ताभ्यां मिश्रं सत्वं च यत्रवैकुंठाख्यं लोके नप्रवर्तते अविद्यास्मिता रागद्वेषाभिनिवेशाः पंचक्लेशाः रजस्तमोविरहाद्रागद्वेषादिकं मोहनं च नास्ति तन्मिश्रसत्वाभवात्कदाचित्प्रकाशश्च नास्ति तस्माच्छुद्धसत्वमयइत्यर्थः कालविक्रमः कालस्य यो विक्रमः परिणामहेतुत्वं तच्च नेत्यर्थः माया सत्वरजस्तमआश्रया प्रकृतिः यत्रन अप्राकृत इत्यर्थः अनेन लोकस्य माया कल्पितत्वशंका निरस्ता यत्र लोके सुरासुरै रर्चिता हरेरनुव्रता उपासका दृश्यंते इति शेषः ॥ १० ॥

कथंभूता दृश्यंत इत्यपेक्षायां सारूप्यमाह श्यामेत्यादिना श्यामाश्चते ऽवदाता उज्ज्वलाश्च श्यामावदाता शतपत्रलोचनाः पद्मदलायते क्षणाः पिशङ्गवस्त्राः पीतांबरधराः सुरुचः दीप्तिमंतः सुपेशसः अतिसुकुमारा उन्मिषंतः देदीप्यमानाः मणयो येषु तानि प्रवेकाणि श्रेष्ठानि निष्काणि कनकमयानि आभरणानि येषांते सुवर्चसः अतिलावण्यवंतः प्रवालादिवद्वर्णो वर्णो येषां परिस्फुरंति कुंडलानि मौलयः मुकुटानि मालाश्च येषां संतीति तथा भूताः आर्षं इनिः अतइनिरिति तपरकरणात् ॥ ११ ॥

भ्राजिष्णुभिर्देदीप्यमानाभिर्महात्मनां नित्यमुक्तानां प्रकाशमानविमानपंक्तिभिर्यः लोकः परितो विराजते यत्र प्रमदोत्तमानां स्त्रियः कांतयस्ताभिर्विद्योतमानस्तं दर्शयामासेति पूर्वेणान्वयः तत्र ददर्शेत्युत्तरेण वान्वयः तत्र दृष्टांतः विद्युद्भिः तडिद्भिः सहवर्तमानाः सविद्युतः अभ्राणां मेघानामावलयः पंक्तयः ताभिर्नभो यथा विराजते तद्वदित्यर्थः विद्युत इव स्त्रियः अभ्रपंक्तय इव विमानानि नभ इव लोकः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

इदानीमस्यापियत्रपुरुषइति प्रश्नंपरिहरति तस्माइति प्रीतिजनकतपसासभाजितः पूजितः यद्यतोलोका*त्परमधिकंपदंस्थानं न तस्मात्संदर्शयद्भिः सम्यगपरोक्षज्ञानवद्भिर्विबुधैरभिष्टुतमभितोमुख्यत्वेनस्तुतं अविद्यास्मितरागद्वेषादिनिवेशाःसंक्लेशा मोहर्यविमोहःव्या-कुलत्वंसाध्वसं व्यपेताःसंक्लेशादयोयस्मात्सतथातं ॥ ९ ॥

संक्लेशाद्यभावेकारणमाह नेतितयोरजस्तमसोर्मिश्रंसत्त्वं सत्त्वरजसोर्मिश्रंतमः सत्त्वतमसोर्मिश्रंरजःकेवलंचित्प्रकृतिमयएवकालविक्र-मः कालकृतोत्पत्तिनाशवृद्धिक्षयादिलक्षणः सत्त्वाद्यभावेकारणमाह नेति मायात्रिगुणात्मिकाजडप्रकृतिः अपरेमायाविकाराः तस्यलोक-स्यमायातीतत्वात् तर्ह्ययंशून्यागारतुल्यइतितत्राह हरेरिति असमादसुर्हरिस्तास्मिन्नरमंतइत्यसुराः असुरत्वगुणोपेतैःसुरैरर्चितामहदेवा नामसुरत्वमेकमितिश्रुतेः तंलोकमित्यन्वयः ॥ १० ॥

श्यामवर्णाश्चवदातानिर्मलाश्चावदाताःसितेगौरेशुद्धइतियादवः अतस्तेइंद्रनीलवन्निर्मलाः दशदोषविनिर्मुक्तःश्यामइंद्रमणिःस्मृतइतिवा शतपत्रंपद्मं सुष्ठुरुक्प्रभायेषांतेसुरुचः सुष्ठुपेशःसौंदर्ययेषांतेसुपेशसः मृदुपिंडश्चपेशःस्यादितिवचनात् सुकुमारतरशरीराइतिवा उन्मिषं तश्चभुष्मंतः मणिप्रवेका रत्नश्रेष्ठा येषुतेतथा तेचनिष्कहेमनिर्मिताववक्षोलंकारायेषांतेतथा निष्कोस्त्रीहेम्निदीनारेसाष्टकर्षशतेपले वक्षोधि भूषणेकर्षइति सुवर्चसः सुतेजसः । अनेनसारूप्यादिभाजोमुक्ताअपिसंतीत्युक्तंभवति ॥ ११ ॥

पुनरपितंलोकंविशिनष्टि । प्रवालेतियोलोकोमहात्मनां भ्राजिष्णुभिर्लसद्विमानावलिभिः सर्वतोविराजइत्यन्वयः प्रवालवत्वैदूर्यव-न्मृणालवद्वर्चः प्रभायेषांतेतथा परिस्फुरंतःकुण्डलमौलयःकुण्डलानिमौलयश्चकुण्डलमौलयस्तेषांमालाःपंक्तयोयेषांसंतीतिपरिस्फुरत्कुण्डल मौलिमालिनः तेषां परिस्फुरंतिकुण्डलानिमौलयःकिरीटानिमालास्रजश्चयेषांसंतीतितेतथातेषामितिवा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

भगवदाविर्भावमाह सार्द्धदशभिः । तस्मै इत्यादि भगवदाज्ञापुरस्कारेण श्रीनारायणाख्यपुरुषनाभिपंकजे स्थित्वैव कृतोपचीर्णतपो भिर्भजते ब्रह्मणा सभाजितस्तेन भजनेन वशीकृतः सन् स्वलोकं वैकुण्ठभुवनोत्तमं भगवान् सम्यग्दर्शयामास । यत् यतो वैकुण्ठात् परम् अन्यत् वैकुण्ठ परं श्रेष्ठं न विद्यते परमभगवद्वैकुण्ठत्वात् । (अत्र परं न यत्परम् इत्यत्र अथ हैनं गार्गी वाचक्नवी पप्रच्छेत्यादिरूप निषदुदाहार्य्या । अत्र ह्यन्तरिक्षलोकादिप्रजापतिलोकपर्य्यन्तप्रश्नानामुत्तराणि गार्ग्यै याज्ञवल्क्यो दत्वा ब्रह्मलोकाख्यभगवल्लोकादप्युपरि पृष्टवत्यै तस्यै मातिप्राक्षीरित्यादिना शापं दातुमुद्यतः सा च तत् श्रुत्वा ज्ञानविशेषवत्त्वादुपररामेति) यद्वा यत् यतो वैकुण्ठात् परं ब्रह्मा-ख्यं तत्त्वं परं भिन्नं न भवति । स्वरूपशक्तिविशेषाविष्कारेण मायानावृतं तदेव तद्रूपमित्यर्थः । अग्रे त्विदं व्यक्तीकरिष्यते । तादृशत्वे हेतुः व्यपेतेति स्वदृशेति च । अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः विमोहस्तैर्वैचित्यं साध्वसं भयं व्यपेतानि संक्लेशादीनि यत्र तम् । स्वस्य दृष्टं दर्शनं तद्विद्यते येषां तैरात्मविद्भिरपि अभितः सर्व्वांशेनैव स्तुतं श्लाघितम् अथ ते मुनयो दृष्ट्वा नयनानन्दभाजमम । वैकुण्ठं तदधिष्ठानं विकुण्ठञ्च स्वयंप्रभम् । भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य च । प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम् । इति तृतीयात् ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

गुणस्ताहशास्त्वमेव व्यक्तिं प्रवर्तते इति । यत्र वैकुण्ठे रजस्तमश्च न प्रवर्तते । तयोर्मिश्रं सहचारे अर्द्धं यतः सत्त्वं तदपि न किन्तु अन्यदेव । यत् सुष्ठु (स्थापयिष्यमाणा वा मायातः परा: भगवत्स्वरूपशक्तिस्तस्य । वृत्तित्वेन चिद्रूपं शुद्धसत्त्वाख्यं सत्त्वमिति तदीयप्रकरण एव) स्थापयिष्यते । तदेव च यत्र प्रवर्तत इत्यर्थः । तथा च नारदपञ्चरात्रे जितन्ते स्तोत्रे-लोकं वैकुण्ठनामानं दिव्यषड्गुणसंयुतम् । अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् । इति । पाद्मोत्तरखण्डे तु वैकुण्ठनिरूपणे तस्य सत्त्वस्याप्राकृतत्वं स्फुटमेव दर्शितम् । यत उक्तं प्रकृतिविभूतिवर्णनानन्तरम्-एवं प्राकृतरूपाया विभूते रूपमुत्तमम् । त्रिपाद्विभूतिरूपं तं शृणु भूधरनन्दिनी ॥ प्रधानपरमव्योम्नोरन्तरे विरजा नदी । वेदाङ्गस्वेदजनिततोयैः प्रस्राविता शुभा ॥ तस्याः पारे परव्योम्नि त्रिपाद्भूतं सनातनम् । अमृतं शाश्वतं नित्यमनन्तं परमं पदम् । शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् ॥ इत्यादि । प्राकृतगुणानां परस्पराव्यभिचारित्वं तूक्तं सांख्यकौमुद्याम् अन्योन्यमिथुनवृत्तय इति । तट्टीकायाञ्च—अन्योन्यसहचरा अविनाभाववृत्तय इति यावत् । भवति चात्रागमः—अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः । रजसो मिथुनं सत्त्वमित्याद्युपक्रम्य नैषामादिश्च संयोगो वियोगो वोपलभ्यते । इतीति । तस्मादत्र रजसोऽसद्भावादमृज्यत्वं तमसोऽसद्भावादनाव्यत्वं प्राकृतसत्त्वाभावाच्च सच्चिदानन्दरूपत्वं तस्य दर्शितम् । तत्र हेतुः न च कालविक्रम इति । कालविक्रमेण हि प्रकृतिक्षोभात् सत्त्वादयः पृथक् क्रियन्ते । तस्मात् यत्रासौ षड्भावविकारहेतुः कालविक्रम एव न प्रवर्तते तत्र तेषामभावः सुतरामेवेति भावः । किञ्च तेषां मूलत एव कुठार इत्याह न यत्र मायेति । मायात्र जगत्सृष्ट्यादिहेतुर्भगवच्छक्तिः न तु कापट्यमात्रं रज-आदिनिषेधेनैव तद्व्युदासात् । अथवा यत्र तयोः सम्बन्धि सत्त्वं प्राकृतं सत्त्वं यत् तदपि न प्रवर्तते । मिश्रमपृथग्भूतगुणत्रयं प्रधानं च । अतएवेशितव्याभावात् कालमाये अपि न स्तः इति । अग्रे मायाप्रधानयोर्भेदो विवेचनीयः । कैमुत्येनोक्तमेवार्थं द्रढयति किमुतापरे इति । तयोर्मिश्रं किञ्चिद्रजस्तमोमिश्रं सत्त्वञ्च नेति व्याख्या तु पिष्टपेषणमेव । सामान्यतो रजस्तमोनिषेधेनैव तत्प्रतिपत्तेः । ननु गुणाद्यभावाद्विर्विशेष एवासौ लोक इत्याशङ्क्य तत्र विशेषस्तस्याः शुद्धसत्त्वात्मिकायाः स्वरूपातिरिक्तशक्तेरेव विलासरूप इति द्योतयंस्तमेव विशेषं दर्शयति हरेरिति । सुराः सत्त्वप्रभवाः असुरा रजस्तमप्रभवाः तैरर्चिताः तद्योग्याऽर्हत्तमा इत्यर्थः । गुणातीतत्वादेवेति भावः ॥ १० ॥

तानेव वर्णयति श्यामावदाता इति । श्यामाश्च अवदाता उज्ज्वलाश्च ते पीतवस्त्राः सुपेशसोऽतिसुकुमाराः । उन्मिषन्त इव प्रभावन्तो मणिप्रवेका मणयुत्तमा येषु तानि निष्काणि पदकान्याभरणानि येषां ते । सुवर्चसः तेजस्विनः । प्रवालेति । केऽपि तेभ्यः श्रीभगवत्सारूप्यं लब्धवन्तोऽन्ये प्रवालादिसवर्णाः ॥ ११ ॥

पुनरपि लोकं वर्णयति भ्राजिष्णुभिरिति ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

एवं क्रियमाणे फलं जातमित्याह तस्मै स्वलोकमिति माहि भगवदय मृष्टि कर्तुं विचारयति भगवांस्त्वेताहशो लोके तिष्ठति महोता दशः ब्रह्मणावरं अनस्तस्य गर्वपरिहारार्थं स्वलोकं प्रदर्शितवान् अन्यथा आत्मानमेव प्रदर्शयेत् कृत्रिमवैकुंठस्य लक्ष्म्या अधिकृतत्वात् भगवानिति स्वलोकमिति पदेन व्यापिवैकुंठमेवोच्यते यद्यपित्वमेव प्रदर्शयति तथा तत्प्रदर्शनं न भगवतः किंचित्कार्यं जनयति किं तु तस्यैव भक्तिजनकं अत आह तस्मा इति भगवानिति प्रार्थनसामर्थ्यार्थमुक्तं अन्यथा ताहशं कथं दृश्यं भवेत् समाहित इति स्वदृष्टं तद्दृष्टो योजयित्वा लोकं प्रदर्शयन्नप्यप्रसन्नदृष्टेः पृथक् करणार्थं यथा यथा तद्दृष्टिकथनप्राप्तेतितदर्थं सावधानइत्यर्थः लोकस्यवातिरोभावस्वभावात्तद्दृष्टिस्पर्शोऽपि यथा न तिरोहितं भवेत् तदर्थं वा सावधानः परंकृत्रिमवैकुंठात् अक्षररूपं वा प्रभुत्वेन हरेः स्फूर्तौ लोकत्वेन तदुत्तम इति अक्षररूपं वा नयत्परमिति न विद्यते यत्परं उत्कृष्टमन्यत् अक्षरस्याप्यनेकधा प्रदर्शने संभावनयाप्येतदुक्तं तस्य गुणातीतत्वकथनार्थं गुणान् साधारणधर्मान्निवारयति व्यपेतेति विशेषेण अपेताः मध्यक्लेशादयो यस्मात् मध्यक्लेशा अविद्यादयस्तमो विशेषेण मोहो रजसः साध्वसंसत्त्वस्य साधुरस्यते छिद्यते अनेनेति साध्वसं सर्वसादवाकार्यात् साधुत्वेन भयेन पृथक् क्रियत इति व्यवहारेणापितस्य सगुणत्वं निवारयति स्वदृष्टवांश्चागात स्वस्यैव दर्शनमप्यज्ञानं तद्वद्भिः ब्रह्मवद्भिरेव तत्रापि स्तोत्रेण बुधैरभिष्टुतं अभितः स्तुतिः सर्वोऽपि परिकरस्ताहश इति एवं गुणकार्यं निवार्य गुणानपि निवारयति प्रवर्तते यत्रेति यत्र लोके रजस्तमश्च न प्रवर्तते सत्वं च ताभ्यां मिश्रं अनेन शुद्धं सत्वं तत्र प्रवर्तत इति ज्ञापितं तदपि ब्रह्मत्वबाधकमानन्देत वासुदेववत् अक्षरस्याप्युक्तं शुद्धसत्वस्याधारत्वेनापिज्ञातत्वात् अन्यथा निराकारे साकारता न संपद्यते तावतापि न तस्मिन्संबंधः आकारसमर्पणार्थमेव तत्संबंधात् यथा प्रतिकृतिसंबंधः पित्तलादीनां तथाहि प्रतिमादौ तदाकृतिव्यतिरेकेण तत्रान्योधर्मोऽस्ति न च तत्रातिवाहःपित्तलव्यतिरेकेण मान्यः पदार्थोविद्यते तस्माद्ब्रह्मत्वमविरुद्धं संबंधस्तु भगवदिच्छयेति मतद्वतो दोषः अक्षरस्य रूपं च निवर्त्योऽपि किं बहुना गुणास्तत्रैव भवंति यत्र तत्क्षोभकः कालो भवति अन्यथानर्था स्थितिरेव स्यात् कार्यार्थमेव हि ते अंगीक्रियेत इत्यभिप्रायेणाह न च कालविक्रम इति कालस्यापि तत्र विक्रमो नास्ति कालस्तु वर्तते सत्ववत् अन्यथा कदाचिदेव कथमपि व्यज्येत ज्ञानं चाविरोभावः सत्वमात्रेण तत्र हीति निरूपणात् चिद्रूपं तावदुक्तं भवति गणितश्चानंदः तत्रोपपद्यते ॥ ९ ॥

अतो मोहिका माया तत्र संभविष्यतीत्यत आह न यत्र मायेति मायाज्ञानदार्थे परिगृह्यते अक्षरस्य सामर्थ्यं न भगवतापूर्वं एतद्वाक्षरस्य प्रशासने गार्गीत्यादिश्रुतेः ते ये शतं प्रजापतेरानंदाः स एको ब्रह्मण आनंद इति च तस्मादस्य सालोक्यं एवं ब्रह्मभावः अतस्तस्य तत्रत्यानां मायाकार्याभावात् न तत्र व्यामोहिका माया यत्र मायैव नास्ति तत्र किमुतापरे यथा जीवा मनुष्याणां भवबंधकानां परापराधीनत्वादिभिरबंधभावात्कथ्यते निषिध्यन्त इत्येतदाह हरेरनुमताः येऽतिहरेरनुपभावात् यथा भगवान् तत्

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

[illegible]र्थं तथा तेपि लोकेश्वरी भक्त्युपदेशार्थं स्थापिता न भक्तिजननार्थं चाविर्भवंति किंच तत्र वैकुंठे ते विगतमलाः सुरासुरार्चिता भवंति स्तत्वरजः परिणामाद्योतेतमसः तत्रसंभावनैवनास्तियदि तेराजसास्तामसावाभवेयुःतदातावदेवचिंताभवेयुःतदुत्कर्षाभावे समानैरेवतं सेव भवतिअसुरा अपि आविर्भूतेन भगवता सह युद्धार्थमागताः कियत्काले भगवत्संबंधे परमंसुखमनुभूय पश्चात्पराजिता अपि कदापि तादृशसुखस्याननुभावात् तत्र नित्यसंबंधात् स्तुवंति धन्या एत इति साक्षादपि पूजनं प्रह्लादादिभिः असुरैरसुरत्वेन पूज्यत एवं तेषां भगवत्तुल्यं रूपं निरूपयितुं अनुवर्णयति श्यामावदाता इति भगवतः षोडशगुणाः प्रसिद्धाः सच्चिदानंदानां प्रत्येकं पंचगुणाः समुदायस्यैक इति तत्र भगवत्सेवकानांदशगुणाः अक्षरस्य सच्चिद्रूपत्वात् तान् दशगुणान्निरूपयतिश्यामावदाता इति लोकत्वेन तदुद्गमात् तत्रश्यामादीनामुपपत्तिर्वक्तव्या श्यामाश्चते अवदाताश्च इंद्रनीलमणिवत् मध्यंदिनसवितृमंडलमध्यवत् यदा पीतांबरेणोज्ज्वलैः नीलोत्पलप्रकाशाभिः तद्वदेवं गुणरूपतानिरूपिता सौंदर्यं निरूपयति शतपत्रलोचना इति कमलनयना एवं स्वरूपतस्तुल्यत्वमुक्त्वा सामान्यापि तुल्यतामाह पिशंगवस्त्रा इति सर्वे पीतांबराः सूर्यमंडलस्यापि श्यामावदातत्वात् तस्य यथा अशीतलारुक् तद्वन्न भवंति न वा चंद्रस्येवाल्परुक् किंतु सुरुचः शोभना रुचः येषां नच तद्दर्शने घटादिवत् विषयसंस्कारकं तेजोपेक्षितं सुपेशसः अतिकोमलाः रूपगंधश्च शब्दश्च रसश्च स्पर्श एव च सत्वस्यैते पंच गुणाः सर्वोत्कृष्टानिरूपिताः ॥ १० ॥

विद्वंशस्यापरपक्षसर्वोत्कृष्टं भुजादयः सर्वे चतुर्बाहवः धर्मार्थकाममोक्षास्तेषां हस्तप्राप्ता इति निरूपणार्थं चतुर्भुजत्वं उन्मिषंतो मणिप्रवेकाः मणयुक्ताः निष्कादिपदकाद्याभरणायुः यद्यपि गृहाद्यलंकारा भवंति तथापि पदकादयश्चेतनानामेव सुवर्चसः वर्चश्चेतनाकांतिः यथामहापुरुषाणां दिव्यस्त्रीणां वा तदेव वर्चः शब्देनोच्यते सुष्ठुवर्चो येषां सर्वोत्तमा कांतयः सर्वेषामेकरूपत्वं प्राप्तं विशेषणा निवारयति प्रवालवैडूर्यमृणालवर्चस इति यथा प्रवालेभ्यः अतः स्निग्धागौरकांतिर्निर्गच्छति तथातेभ्योपि[illegible] गौररूपाकांतिर्निर्गच्छति तेबहुभिर्विधैः भगवद्भक्तिकर्तारः तथात्वंबोधयितुं तत्र तादृशकांतिमंतोभवंतिएवंवैडूर्यस्य स्निग्धार्थेतिश्यामच्छाधिकांति भगवतोशादिभिः सेवया च ये पूर्वं भक्ता येज्ञानेन भक्तामृणालवर्चसः एकमत्र रूपत्वेपि पूर्वं कृतभक्ति प्रकारभेदात् अनेकरूपास्त इति निरूपितं परमात्माहयुक्तास्त इति तेषामंतष्करणधर्मानिरूपणार्थविशेषणान्तरमाह परिस्फुरिताः कुंडलानांमौलीनांचयामालास्ताभिर्यंतेयेषुकुंडलपरभ्रामणंमुकुटपरिभ्रामणन च संतस्ताह भगवत्परिचर्या कर्तार इति भजनानंदस्तेषु निरूपितः ॥ ११ ॥

एवं तत्रत्यानाम् भगवत्सेवकानां निर्दोषत्वमुक्त्वा लोकत्वाय वैकुंठस्य गुणानाह भ्राजिष्णुभिरिति द्वाभ्यां सेवकानां भगवत्सेवकत्वे गाविषयानंदोनिरूप्यते तत्रापि भगवान्प्रथमंसेवकानेव सानंदान्करोतीति तेषामत्र विषयानंदरूपिणां विषयेषु नावद्यला इति तद्व्यापारेषु विमानमिति स्वस्य च परिज्ञानं भवति ईश्वरकृतभयाभाव इति चतुर्भिर्गुणैः विषयोत्कर्षः अन्नादीनां दोषाभावे प्रवेशः रसादीनां त्वंतरंगत्वं तदाह भ्राजिष्णुभिः कांतिमद्भिः विमानावलिभिः । विमानपंक्तिभिः यो लोकः परितो विराजते वैकुंठशोभाधायकानि विमानानि भगवदीयानिरूपितानीति न तत्रकापिशंका लसंतीति सर्वोत्कृष्टानि महात्मनामिति सर्वज्ञानां परिच्छेदं परित्यज्य पूर्णानंदे व्यापारितानां किंच प्रमदोत्तमाद्युभिः प्रमदोत्तमास्तेषां भोगहेतवः अन्यथा भोगे रागो न भवेत् किंतु विषयकृतरागेनैव रागवत्त्वमिति भगवदिच्छयैव तथात्वमिति निरूपितं तासां कांतिभिः अलं लोको विद्योतमानः लोकापेक्षयापि तासामतिकांतित्वं निरूपितं भोगार्थमेव तासामपिकांतिः पुरुषसहितानामेव न केवलानामिति दृष्टांतेनाह यथा विद्युत्सहिताभिः अभ्रावलिभिः मेघपंक्तिभिर्नभः आकाशं सर्वतो व्याप्तंतद्वदित्यर्थः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

स्वलोकं महावैकुण्ठम् । यत्परं यतोऽन्यत् परं श्रेष्ठं नास्ति । विशेषेणैव अपेताः संक्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च अविद्यावृत्तयः तथा विशिष्टो मोहो वैचित्त्यं स चेह भगवत् स्फूर्त्यभाव एव साध्वसं तत्सेवापराधभयं तदप्यपेतं यत्र तम् । विबुधैरिन्द्रादिदिक्पालैः । स्वहृष्टवद्भिरितिनित्ययोगे मतुपा प्राकृतेन्द्रादिव्यावृत्तिः ॥ ९ ॥

यत्र वैकुण्ठे रजस्तमश्च न प्रवर्त्तते । तेन रजसः प्रवृत्त्यभावादसृज्यत्वं तमसः प्रवृत्त्यभावादनाश्यत्वञ्च तस्योक्तम् तथा तयोर्मिश्रं अर्द्धं यत् सत्त्वं तदपि नेति सत्त्वस्यापि प्रवृत्त्यभावात् नश्वरस्वर्गादेः पाल्यत्वमिव न पाल्यत्वं किंतु शुद्धं सत्त्वं यांचद्रूपं स्वरूपशक्तिसम्बन्धि तन्मयमित्यर्थः । तथाच नारदपञ्चरात्रे जितन्ते स्तोत्रे—लोकं वैकुण्ठनामानं दिव्यषड्गुणसंयुतम् । अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥ इति । पाद्मोत्तरखण्डे च पादविभूतयन्तर्गतान्तरम् त्रिपाद्विभूतिरूपन्तं शृणु भूधरनन्दिनि ॥ प्रधानपरमव्योम्नोरन्तरे विरजा नदी । वेदाङ्गस्वेदजनितत्तोयैः प्रस्राविता शुभा ॥ तस्याः पारे परव्योम्नि त्रिपाद्भूतं सनातनम् । अमृतं शाश्वतं नित्यमनन्तं परमं पदम् ॥ शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् । सर्वंवेदमयं शुभ्रं सर्वप्रलयवर्जितम् असंख्यमजरं सत्यं जाग्रत्स्वप्नादिवर्जितम् । न तद्भासयते सूर्यो न शशाङ्को न पावकः ॥ यद्गत्वा न निवर्त्तन्ते तद्धाम परमं हरेः । नानाजनपदाकीर्णं वैकुण्ठं तद्धरेः पदम् ॥ इत्यादि । अतएव यत्र कालविक्रमः षड्भावविकारहेतुर्न प्रवर्त्तते तस्य गुणोष्वेव नियतत्वात् । किमन्यद्वाच्यं यत्र गुणानां मूलत एव कुठार इत्यत आह न यत्र मायेति । मायाच जगत्सृष्ट्यादिहेतुर्मम[illegible]शक्तिर्न तु कापट्यमात्रं रज-आदिनिषेधेनैव तद्व्युदासात् । किमुत अपरे मायासन्ततयो मदादयो न सन्तीति तत्रस्थानां शरीराणि न तैरारब्धानीति ज्ञापितम् । एवं वैकुण्ठमनुवर्ण्य तत्रस्थान् भगवतो भक्ताननुवर्णयति, अनु-[illegible] मे पार्षदा यत्र नित्यं भगवन्तमनुवर्त्तते इत्यर्थः । तेन परस्मिन् कालमाययोरिति पूर्वमुक्तो भगवानिव भगव-[illegible] इति प्रतिपादितम् । सुरैरसुरैश्च भक्तैरर्चिताः ॥ १० ॥

श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ।
प्रेङ्खं श्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म्म गायती ॥ १३ ॥
ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम् ।
सुनन्दनन्दप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिषेवितं विभुम् ॥ १४ ॥

श्री मद्विश्वनाथचक्रवर्ती कृत सारार्थ दर्शनी

इयामाश्च ते अवदाता उज्ज्वलाश्च ते तथा सुपेशसः अतिसुकुमाराः । उन्मिषन्त इव प्रभावन्तो मणिप्रवेका मणयुत्तमा येषु तानि निष्काणि पदकान्याभरणानि येषां ते । सुवर्चसोऽतितेजस्विनः । प्रवालादिवत् वर्णो वर्णो येषाम् । तत्र केऽपि तेभ्यः श्रीभगवत्सारूप्यं लब्धवद्भ्योऽन्ये प्रवालादिसवर्णाः रक्तपीतादिवर्णाः सन्तीति सन्दर्भः । हरेरनुव्रता यत्र श्यामाश्शाहरितस्मिताः । तत्तद्वर्णामुपास्येशं तत्सारूप्यमुपागताः ॥ इति भागवतामृतम् ॥ ११ ॥

पार्षदाननुवर्ण्य पुनरपि लोकं वर्णयति । भ्राजिष्णुभिः देदीप्यमानाभिः प्रमदोत्तमानां दिवः कान्तयस्ताभिः सविद्युद्भिरिति विद्युत इव स्त्रियः अभ्रपङ्क्तय इव विमानानि नभ इव लोकः ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

भगवानपि सभाजितः तपआदिभिः आराधितः तस्मै ब्रह्मणा स्वलोकम् स्वस्य सर्वेश्वरस्य विश्वसृष्ट्यादिहेतोः लोकं सृष्टिसंहारवर्जितं निवासस्थानम् संदर्शयामास सम्यक्तज्ज्ञानविषयं कारयामास कथंभूतम् सर्वेभ्यो लोकेभ्यः उपरिस्थितम् नयत्परम् यतः परमन्यदुपरिस्थितम् लोकांतरं नास्ति प्रकृतिमंडलाद्बहिःस्थितमित्यर्थः दर्शयामास लोकं स्वगोपानां तमसः परमिति वक्ष्यमाणात् आदित्यवर्णं परस्तादिति श्रुतेश्च तमेवाप्राकृतं लोकं वर्णयति पञ्चभिः व्यपेताः स्वभावत एवापास्ताः संक्लेशादयो यस्मात्तम् स्वस्य आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य इत्यादिश्रुतिप्रतिपादितस्य भगवता दृष्टं साक्षात्कारलक्षणं दर्शनं विद्यते येषां ते तथा तैःप्रकृतिबंधविनिर्मुक्तैः निरंजनः परमं साम्यमुपैतीत्यादिश्रुतिप्रोक्तैः विशेषेण बुध्यंते ये ते विबुधाः नित्यमुक्तास्तैश्च सदापश्यंति सूरय इत्यादिश्रुतिप्रोक्तैः अभिष्टुतम् यत्र रजस्तमश्च तयोर्मिश्रं सत्वं च कालविक्रमः सृष्ट्यादिनिमित्तस्य विक्रमः प्रभावश्च न प्रवर्तते ॥ ९ ॥

माया पूर्वोक्तगुणत्रयवती प्रकृतिश्च यत्र न प्रवर्तते अपरं अन्यलोभादयश्च न प्रवर्तते इति किमुत वक्तव्यम् पूर्वोक्तान् मुक्तान् नित्यमुक्तांश्च गुणसामान्येन निरूपयति यत्र यस्मिन् लोके हरेः अनुव्रता उपासकाः सुरासुरार्चिताः सर्वलोकैः पूज्या संति कथंभूताः श्यामाश्च अवदाताः शतपत्रलोचनाः पद्मदलेक्षणाः पिशंगवस्त्राः पीतपटाः सुरुचः सुकांतयः सुपेशसः अतिसुकुमाराः ॥ १० ॥

उन्मिषंतः दीप्तिमंतः मणिप्रवेकाः मणिश्रेष्ठाः येषु तानि निष्कानि।पदकान्याभरणानि येषां ते सुवर्चसः अतितेजस्विनः प्रवालादिवत् वर्णो वर्णो येषां ते परिस्फुरंति कुंडलानि मौलयो मुकुटानि मालाश्च संति येषां ते ॥ ११ ॥

यः लोकः भ्राजिष्णुभिः देदीप्यमानाभिः प्रमदोत्तमाद्यभिः विमानस्थानां प्रमदोत्तमानां दिवःकांतयस्ताभिः विद्योतमानःसन् महात्मनां नित्यमुक्तादीनां लसद्विमानावलिभिः शोभमानाभिः विमानपंक्तिभिः परितः अभ्राणां मेघानामवलिभिः पंक्तिभिः नभो यथा परितो विराजेत तद्वदित्यर्थः तं लोकं दर्शयामासेति पूर्वेणान्वयः ॥ १२ ॥

भाषाटीका

सत्य है दर्शन जिनका और शीतली है अति लात्मा जिन्हों ने और शीतली हैं दोनो इंद्रिय जिन्हो ने ऐसे ब्रह्माजी के देवताओं की हजार वर्ष सब मनुष्यों को संताप कराने वाला तप किया ॥ ८ ॥

इन ब्रह्मा जी वास्ते भगवान अपना लोक दिख लाया वह लोक है कैसा कि जिसमें क्लेश मोह भय कुछ नहीं है और देवता ओं करके स्तुति को प्राप्ति है ॥ ९ ॥

और जहां पर रजोगुण तमो गुण के साथ सत्व गुण नही प्रवृत्त होता है किन्तु शुद्ध सत्व गुण प्रवृत्त होता है और माया भी नही है और फिर देवता और दैत्यों करके पूजित अन्य लोगों को क्या कहना है ॥ १० ॥

शुद्ध श्याम है वर्ण जिन्हों का और कमल की तरह हैं । नेत्र जिनके और पीत वस्त्र हैं और चार भुजा धारण किये हैं और प्रकाशमणि वैडूर्य मणि की तरह कान्ति है ॥ ११ ॥

और दीप्तिमान शोभित विमानों से युक्त हैं और उत्तम स्त्रियों से शोभा को प्राप्त हैं जिस तरह बिजली और मेघों की पंक्तिसे आकाशकी शोभा होय ॥ ११ ॥

भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननम् ।
किरीटिनं कुण्डलिनं चतुर्भुजं पीतांशुकं वक्षसि लक्षितं श्रिया ॥ १५ ॥
अध्यर्हणीयासनमास्थितं परं वृतं चतुःषोडशपञ्चशक्तिभिः ।
युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणमीश्वरम् ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

श्रीः सम्पत् रूपिणी मूर्तिमती मानं पूजाम् विभूतिभिर्नानाविभवैः प्रेङ्खम् आन्दोलनं श्रिता कुसुमाकरो वसन्तः तस्यानुगा भ्रमरास्तैर्विविधं गीयमाना स्वयन्तु प्रियस्य हरेः कर्म गायन्ती भवति ॥ १३ ॥

य एवंभूतो लोकः तत्र तस्मिन् ॥ १४ ॥

भृत्यानां प्रसादेऽभिमुखम् दृगेव आसव इव द्रष्टॄणां हर्षकरी यस्य तम् प्रसन्नहासमरुणलोचनञ्च आननं यस्य वक्षसि स्थितया च श्रियालक्षितम् अलङ्कृतम् ॥ १५ ॥

अध्यर्हणीयं वरिष्ठं सिंहासनम् चतस्रः प्रकृतिपुरुषमहदहङ्काररूपाः षोडश एकादशेन्द्रियपञ्चमहाभूताख्याः पञ्च तन्मात्ररूपाश्च याः शक्तयः ताभिर्वृतम् स्वैर्भगैः स्वाभाविकैरैश्वर्यादिभिः इतरत्र योगिषु अध्रुवैः आगन्तुकैः असाधारणैरित्यर्थः एवं सत्यपि स्व एव धामन् स्वस्वरूप एव रममाणम् अतएव ईश्वरम् ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिनाख्यटिप्पणी ।

आगन्तुकैरिति अनित्यैर्नश्वरैरित्यर्थः । साधनवशेन प्राप्तैरिति वा । असाधारणैरिति । असाधारणैः स्वैर्भगैरित्यन्वयः ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

श्रीर्महालक्ष्मीर्यत्र लोके रूपिणी प्रशस्तमूर्तिमती उरुगायस्य भगवतः पादयोः मानं पूजां विभूतिभिः भूलीलादिभिः सह करोति कथं भूता करोति या श्रीः प्रेङ्खं दोलां श्रिता कुसुमाकरानुगैः शुककोकिलभृङ्गादिभिः विविधं गीयमाना स्वयं तु प्रियस्य भगवतः कर्म गायती भवति सा श्रीर्मानं करोतीत्यर्थः ॥ १३ ॥

एवं भूते लोकस्तत्र श्रियःपतिं ददर्शेत्यन्वयः कथं भूतं यज्ञपतिं तप आदियज्ञानां प्रवर्तकमाराध्यं फलप्रदं वा जगत्पतिं चिदचिदात्मकजगतः शेषिणं अखिलानां सात्वतां सत्वधर्मनिष्ठानां पतिं स्वलोकप्रापणेन रक्षकं सात्वतं पंचरात्रे सुनंदादिभिः स्वपार्षदमुख्यैः परिवृतः सेवितं विभुं सर्वान्तरं ॥ १४ ॥

भृत्येषु यः प्रसादो ऽनुग्रहस्तस्मिन्नभिमुखं दृगासवं दृशि चक्षुष्यासवो ऽमृतं यस्य तं यद्वा दृगासवमिव यस्यामृतकल्पकटाक्षं इत्यर्थः प्रसन्नहासमरुणलोचनमाननं च यस्य तं वक्षसि स्थितया श्रिया लक्षितं अलंकृतमित्यर्थः ॥ १५ ॥

अध्यर्हणीयमाराधनीयंपरमुत्कृष्टमासनं अधिष्ठितं चतुःषोडशपंचशक्तिभिः पंचविंशतितत्वाधिष्ठातृशक्तिभिः अङ्गभूषणाख्यायोक्तप्रकारस्मारितैः भगैरैश्वर्यवीर्ययशः श्रीज्ञानवैराग्याभिष्ठातृदेवतादिविशेषैः स्वैः स्वाभाविकैः शेषभूतैरित्यर्थः इतरत्र संसारिषु कर्मतारतम्याऽनुगुणमध्रुवैः संसारिष्वैश्वर्याद्यभिष्ठातृणामधिष्ठयतारा ऽध्रुवैस्त्वं धाम्यं एवंभूतैर्भगैर्युक्तं धामन् धामनि स्वे स्वकीये स्वस्मिन्नेव रममाणमन एवेश्वरं नियन्तारं ददर्शेत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

तत्रदर्शनमाह सविस्मृदिति ॥ १३ ॥

प्रेङ्खांस्थितायारत्नदोलामास्थितायाविभूतयस्ताभिर्विभूतिभिःसह । कुसुमाकरोवसन्तस्तस्यानुगाभृंगकोकिलादयस्तदाकारवितानमयास्तैर्विगीयमानाप्रियस्यभर्तुः कर्माणिगायतीति प्रवाजञ्जुष्टदर्शनविनालोकमात्रदर्शनेनकिमस्य प्रयोजनमत्राह ददर्शेति तत्रैवविधे श्वेतद्वीपाभिधलोकेमुक्तसभामध्येमुक्तैः सेव्यमानमात्मनोबंधकर्शोकप्रवर्तनीवरम्यमुक्तप्रवर्तकत्वेनशयानंलक्ष्मीकांतंददर्शेत्यन्वयः अनेन मुक्तस्यात्मस्थामित्यस्यपरिहारोप्युक्तोभवति मुक्तैःपार्षदैःपूर्वैर्नन्दादिभिश्चसंयुतं ब्रह्मादददर्शतपसामगवतेहरिंप्रभुमित्यनेनब्रह्मासपुत्रानपश्यद्ददर्शेत्येताञ्जरस्तं सतः शोभनस्यभावःसत्वंतेनयुक्ताःसात्वतास्तेषांसात्वतांपतिंतदुक्तं सत्वंतुशोभनत्वंस्यात्तद्युक्ताःसात्वतामताइति ॥१४

विभुंसर्वगतामिति अनेनपरिच्छिन्नरूपमत्रोऽयतइतिनिरस्तं विभुःसर्वगतेपरयोर्ब्रह्मरविकुबेरयोरिति दृगासवैःनेत्राभ्यांवाग्निर्द्धीमानि दाम्येवामृतानिते दृक्दृग्भ्यांसाइयांनेयुक्तोनेत्रेद्रष्टरिचाग्निरितिप्रसन्नमहासनाक्ष्याभ्यांसहितमाननंयस्यसतथातं ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

किरीटिनं कुण्डलिनमित्यस्य दरब्रह्मस्थमनुवादित्वाद् वाभिविशेषयोगार्थः भूमर्नित्यानन्दामुनित्ययोमेतिद्यायने संसर्गोक्तिविवक्षायां भवतिम नुवादपदतिवचनात् वक्षसिस्थितयालक्षितमित्येतल्लक्षणं हरेरेवेत्यभिप्रायेणोक्तं नारायणात्वनिर्णयायलक्षणांतरमाह वृतमिति चतुःषोड शपंचशक्तिभिर्वृतं इच्छाज्ञानक्रियाबलाख्याभिः प्रह्वीसत्येशानानुग्रहाख्याभिः आत्मांतरात्मापरमात्माज्ञानात्माख्याभिरितिचतुःशक्तिभि र्वृतं मोचिकासूक्ष्मासूक्ष्मामृताज्ञानामृताप्यायिनीव्यापिनीव्योमरूपिण्यनंताणिमामहिमालघिमाप्राप्तिप्रकाशेशित्वप्रकाम्याख्याभिः षोडश शक्तिभिश्चवृतं वासुदेवादिवामोदरांताभिः षोडशशक्तिभिश्च तथापंचांगाभिधाभिर्विमलोत्कर्षिणीज्ञानाक्रियायोगवशित्वाख्याभिः पंचशक्ति भिश्चपरिवृतं मोचिकाचैवसूक्ष्माचतथासूक्ष्मापरावृता ज्ञानामृताप्यायिनीचव्यापिनीव्योमरूपिणी अनंताचैवसंप्रोक्तामोचिकाद्याश्चशक्तय इतिवायुप्रोक्तेः इच्छाद्यामोचिकाद्याश्चअणिमाद्याश्चशक्तयइत्यादेः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीर्यत्रेति । श्रीः स्वरूपशक्तिः रूपिणी तत्प्रेयसीरूपा । मानं पूजाम् । विभूतिभिः स्वसखीरूपाभिः प्रेङ्खम् आन्दोलनं श्रिता विला- सेन । कुसुमाकरो वसन्तः तदनुगाः भ्रमरास्तैर्विविधं गीयमाना । स्वयं प्रियस्य हरेः कर्म्म गायन्ती भवति ॥ १३ ॥

ददर्शेति त्रिकम् । तत्र लोके इति प्राक्तनानां यच्छब्दानां विशेष्यम् ॥ १४ ॥

भृत्यप्रसादेति । दृगेवासव इव तृष्णूणां मदकरी यस्य तम् । श्रियावक्षोवामभागे स्वर्णरेखाकारया ॥ १५ ॥

अध्यर्हणायेति । चतस्रः शक्तयो धर्म्माद्याः, पाद्मोत्तरखण्डे योगपीठे त एव कथिताः, न वहिरंगा अधर्म्माद्या इति । तथाहि— धर्म्मज्ञानतथैश्वर्य्यवैराग्यैः पादविग्रहैः । ऋग्यजुःसामाथर्व्वाणरूपैर्नित्यं वृतं क्रमात् ॥ इति । समस्तान्तस्तथाशब्दप्रयोगस्त्वार्षः । षोडश शक्तयश्चण्डाद्याः तथाच तत्रैव चण्डादिद्वारपालैस्तु कुमाद्यैः सुरक्षिता इति । नगरीति पूर्व्वेणान्वयः । तच्चचण्डप्रचण्डौ प्राग्द्वारे याम्ये भद्रसुभद्रौ । वारुण्यां जयविजयौ सौम्ये धातृविधातरौ ॥ कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः शंकुकर्णः सर्व्वनेत्रः सुमुखः सुप्रतिष्ठितः । एते दिक्पतयः प्रोक्ताः पुर्य्यामत्र शुभानने ॥ इति कुमुदादयस्तु द्वौ द्वौ आग्नेयादिदिक्पतय इति शेषः । पञ्च शक्तयः कूर्म्माद्याः तथाच तत्रैव कूर्म्मश्च नागराजश्च वैनतेयस्त्रयीश्वरः । छन्दांसि सर्व्वमन्त्राश्च पीठरूपत्वमास्थिताः ॥ इति त्रयीश्वर इति वैनतेय विशेषणं तस्य छन्दोमयत्वात् । स्वैः स्वरूपभूतैरैश्वर्य्यादिभिर्युक्तम् इतरत्र योगिषु अध्रुवैः आगन्तुकैःनश्वरैः तत्प्रमादादेव कदाचित् तदाभासरूपतयैव प्राप्तेरित्यर्थः स्वस्वरूप एव धामनि श्रीवैकुण्ठे रममाणम् अतएवेश्वरं कथमपि पराधीनसिद्धित्वाभावात् ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवं सेवकानां महाभोगमुपपाद्य तत्र भगवतोमहाभोगोपपादनार्थं लक्ष्मीमनुवर्णयति यदा भगवान् स्वशक्तिरूपेणाविर्भूतः तदा सापि भोग्यत्वेनाविर्भूता भार्येव तदाह रूपाणीति सापि सच्चिद्रूपा स्वार्थं तस्याः शरीरं तु ब्रह्मानंदरूपं अत एव उरुगायपादयोः विभूतिभिर्मानं करोतीति साह्यक्षरस्यानंदरूपा ऽअक्षररूपौ च पादौ अतः स्वात्मना चरणावेदानादरूपा युक्तं करोति इदमेव हि सन्मानन उरुगायेति उरुभिर्मन्त्रैर्गीयत इति तद्विष्णोः परमंपदं विष्णोर्नुकंवीर्याणीत्यादित्रेधा उरुगायेत्यादिभिः सर्वं श्रुत्यर्थः उरुगायः पुरुषोत्तमः तस्य तु चरणावक्षरभिन्तिनिरूपितं वहुधेति पंचभिरेव गुणैः भक्त्या च एवं तस्या भगवदर्थमानंदरूपायाः प्रयोजनमुक्त्वा स्वार्थं चिद्रूपायाः प्रयोजनमाह प्रेंखंश्रितेति या लक्ष्मी प्रेंखं हिंडोलांश्रिता तत्रोपिविद्ययसर्वथा चिन्तानिवृत्त्यर्थं कुसुमाकरानुगैः वसंतसेकानुगै र्भ्रमरैः स्वयं गीयमानापि सर्वावयवस्थितपुष्पाद्यामोदार्थं समागतः भ्रमरा वहुकालं निकटास्थित्यर्थं तां वस्तुतां गायंति स्वयं तु भगवत्क र्माणि गायति अन्यथा अक्षरलीला स्यात् अत एव साक्षात्संवंधाभावायप्रेंखंश्रिता तस्यालयव्यावृत्त्यर्थमेव गुणानुगायेति तत्रत्य कुसुमा करः फलपूर्वावस्थारूपः परमनिर्वृत्यात्मा तस्याधिष्ठाऽयो देवताः एतामानंदरूपां कुर्वंति स्वस्यापि फलत्वात् अनेनाक्षरकृतं भयं व्यावृत्तं यतस्तदीया मन्यंत इति यदामानावसरो वा नास्ति तदा स्वरक्षार्थं प्रियकर्माणि गायति एकवचनं तु स्वोच्चाराभिप्रायं ॥ १३ ॥

एवं भोग्यरूपां तां निरूप्य तस्य भोक्तारं भगवंतं निरूपयति ददर्शतत्रेति पूर्वोक्तमपिसर्वं ब्रह्मा दृष्टवान् लोकस्य प्रदर्शितत्वात् तत्र स्थितं भगवंतं सर्वसामग्रीसहितं अनुवर्णयति तत्रसच्चिदानंदरूपो भगवान्यदाविर्भूतः तद्ब्रह्मणो तत्तत्प्रयोजनपरिज्ञानार्थमेव तत्र प्रथमं सर्वे ये सात्वताः भगवत्सेवकाः देवाःधर्मपराः सात्विकाः त्रयाणामपि पतिः अनेन यदा कदाचिद्भगवानवतरति तदा एतेषामेव कार्या र्थं अवतरतीति ज्ञापितं किंच श्रियः पतिं लक्ष्म्यापतिं यदाभगवत्संभोगार्थं जगत्करोति तदा सर्वंलक्ष्मीरूपमेव करोतीति वोधितं अनेना वतारेषु भोग्याः लक्ष्मीरूपा एवेति स्वरूपतः किंच यज्ञानां पतिर्भगवान् यदा भगवान्वेदान्करोति तदास्वस्य यज्ञभोगार्थं करोति अनेन सर्वेषांभगवदर्थो एवेति किंच जगतः पतिः भगवान्जगत्करोति तदाऽक्रीडार्थमेव करोति तस्यैव पतित्वात् वैकुंठे पुनरस्मे मूर्तिरूपाः सच्चिद्रूपा इति ज्ञातपदार्थाः अखिलसात्वताः लक्ष्मीः यज्ञोजगच्चेति चत्वारः एते भगवद्भोग्याः एतदनुप्रवेशः एवंभगवति संबंध इति सर्वत्र ज्ञेयं अतएव जगत् यज्ञलक्ष्मीरूपाः पूर्वलीलासमसंख्याभिः अध्यायाः संतः भगवद्भोगायोपयुक्ता निरूपिताः ते चत्वारोमूर्ति रूपाः भगवतापरिग्रहीताः ब्रह्मणो प्रदर्शिताः किंच सुनंदनंदादयः भगवद्भक्तिरूपाः तेसखेनसहिताः अष्टविधाः श्रवणाद्यधिष्ठातारंपार्षदा सर्वेतदधिष्ठिता श्रवणादयः तत्र चत्वारो नामतो गणिताः लोकोत्तरएवप्रभविष्यतीति तत्र सुनंदनंदप्रबलाः कीर्तेः श्रवणः स्मरणात्मकाः श्रवणादयो वा विपर्ययेन चतुर्थस्तु अर्हणारूपः नामसाम्यात् स एव गृह्यतेआदिशब्देन चान्ये एतेषु पुनर्वैकुंठगतानां इतरसिद्धिर्ज्ञापिता

श्रीमद्वल्लभाचार्यकृत सुबोधिनी

विभुं प्रभुरूपं एवं सर्वचेष्टितो भृत्येभ्य एव प्रसादं दातुं अभिमुखः सर्वापेक्षया भृत्या एवं प्रिया इति अनेन सहज प्रसादो भृत्येषु अन्येषु तु धर्मार्थकाममोक्षेषु चतुर्षु क्रमेण प्रसादः तत्र धर्मो यज्ञः अर्थोजगत्ः कामो लक्ष्मीः मोक्षः संत इति भृत्या भक्तिरिति पंच पदार्था निरूपिताः ॥ १४ ॥

पंचसुभोगो नियामकत्वं विशेषस्तु भृत्यप्रसादाभिमुखत्वं किंच अन्येषु चतुर्षु सर्वेषु तारुणासवं दृगेव आसवो मादको यस्य भगवता दृग्ः आत्मानं न स्मरंति अनेन ज्ञानस्य यद्रूपं प्रपंचविस्मारकत्वं तद्भगवद्दृष्टिरूपस्यैव नान्यस्येति सूचितं एतेपदार्था ब्रह्मणो बोधार्थं निरूप्यंते मूलोपपत्तिरेतादृशीति अथवा भक्तेषु प्रसादः कामिषुमाद इति किंच प्रसन्नहासारुणचारुलोचनं प्रसन्नो यो हासस्तद्युक्तं अरुणावर्णंचारु मनोहरं लोचनं यस्य भगवति हासप्रसन्नः हासोहिजनोन्मादकारी माया निरूपिता इयमागंतुकत्वात्किरच्यैव सा हिप्रसन्ना स्वकार्यकरणेअतिसमर्था तेनभगवन्माययासुतरामुन्मत्ताः सतः ब्रह्मणःकायतामापत्स्यंत इति सूचितं अरुणइत्यादिरक्तिमा अल्पप्रकाशःतदेवचारु मनोहरं जगाद्वि आपाततोज्ञातं सुखकरंभवति नतुसर्वथाज्ञातंअज्ञातंवा ज्ञातोत्तमत्वेपुनःग्रन्तेत्रनिष्ठेऽकालवशादेवज्ञातःसमीचीनस्यभवतीतिज्ञापितंनतुसर्वथाज्ञातः कश्चित्समीचीनोवाभवतीतिसूचितं किंच भगवानाधारः आधेयश्च तत्रपंचानामाधारः अन्ये षामाधेय इति तत्रआधाररूपाणिपंचगणयति किरीटिनं कुण्डलिनं चतुर्भुजं पीतांबरं वक्षसिलक्षितांश्रियेति किरीटं शिरसिद्ध्यार्थं कुंडलेकर्णाधार्थे ततोधस्ताच्चत्वारोभुजाःततोऽप्यधस्तात्पीतांबरं एवंयेनभगवदवयवभूतालोकाःतेचतुर्मूर्तिभगवतआश्रिता इति तावतासर्वमेवकार्यंभगवदाश्रितमितिज्ञापितं एतावताविराड्भगवानितिब्रह्माबोधितः ॥ १५ ॥

आधेयं निरूपयति अभ्यर्हणीयासनमास्थितं अधिकं अधिकं अर्हणीयं सर्वैरेवधर्मादिभिः पूजितं तत्संबंधेन वा पूज्यं तादृशमासनमास्थायास्थितं तदधिष्ठातृदेवता व्युदासायाह परमिति तेनउत्तमं नियंतारं वा मुख्यं तदक्षरात्मकं अक्षरं हि लोकात्मकं आसनात्मकं चरणात्मकं चेति आदिभौतिकः आध्यात्मिकमाधिदैविकमिति तस्य अंशाः पंचविंशति तत्वानि तान्यग्रे निरूपयिष्यंते पीठांशत्वेन च तदाह वृतंचतुःषोडश पंचशक्तिभिरिति तत्र चत्वारः प्रकृतिपुरुषमहदहंकाराः प्रथमावरणरूपाः चतुर्दलकमलवत् ततः षोडश एकादशेंद्रियाणि पंच तन्मात्राश्चेति द्वितीयावरणं षोडशदलकमलवत् ततः पंचभिर्महाभूतैः वृतं एवमावरणत्रयं निरूपितं तानतिक्रम्य योभगवत्समीपं गच्छति स गच्छति एवं सर्वतत्वसहितं अक्षरमासनमिति निरूपितं किंच जुष्टं भगैः स्वैः ऐश्वर्यादयः षड्गुणाः मूर्तिमंतो भगवंतमावृत्य तिष्ठंति तेचैश्वर्यादयः भगवदेकनिष्ठाः नान्यत्राविष्टाभवंति इतरत्रच पार्षदादिषु अध्रुवैः चकारात् इंद्रादिष्वपि एतावता भगवच्छब्दप्रयोगः सर्वत्र तथापि ध्रुवाः ऐश्वर्यादयः भगवत्येव अध्रुवास्त्वन्यत्रानेन तरतमभावेनैव त्वं च अनेनं ब्रह्मवदब्रह्मैव भवति योयद्भक्तः स एवसः स आत्मानं यच्छतीति सर्वे पदार्था व्याख्याता अतः असाधारणानि भगवत्येवमुक्तापेक्षयापि भगवान् महानिति ज्ञापितं नहि तदानीं कृपया जाताः ऐश्वर्यादयः नित्या भवंति एवं सर्वसामग्र्यां विद्यमानायामपि स्वस्मिन्नेव रमते आनंदमयत्वात् ननु शुद्धानुभव फलं स्वस्यत्वानंदत्वेपि अनुभवाभावात्कथं भोगस्तत्राह धामन्निति तेजोरूपे प्रकाशे स्वस्मिन्अप्रकाशे हि ज्ञानं प्रकाशकमपेक्षते ननु सुप्रकाशे अनेन जीवानां भगवान् भोग्य इति पक्षोऽप्युदस्तः एवमपि ईश्वरं नियंतारं यदापि स्वस्य कापिरमणापेक्षा नास्ति तथापि सर्वनियन्ता ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

तत्र तत्प्रेयसीमनुवर्णयति । श्रीरन्तरङ्गा भगवतः स्वरूपशक्तिः रूपिणी सौन्दर्यवती । मानं पूजाम् । विभूतिभिः स्वसखीरूपाभिः । प्रेङ्खम् आन्दोलनं विलासेन श्रिता । कुसुमाकरो वसन्तस्तदनुगा भ्रमरास्तैर्विविधं गीयमाना । स्वयन्तु प्रियस्य हरेः कर्म्म गायन्ती भवति ॥ १३ ॥

तत्प्रेयसीमनुवर्ण्य तं प्रभुं भगवन्तमनुवर्णयति ददर्शेति ॥ १४ ॥

दृगेव आसव इव द्रष्टृणां हर्षकरी यस्य तम् । पीताम्बरत्वेन श्यामवर्णत्वं लक्ष्यते । श्रिया वक्षोवामभागे स्वर्णरेखाकारया ॥ १५ ॥

चतस्रः शक्तयो धर्म्माद्याः । पाद्मे वैकुण्ठीययोगपीठवर्णने ता एवोक्ताः । यथा धर्म्मज्ञानबलैश्वर्यवैराग्यैः पादविग्रहैः ऋग्यजुःसामाथर्व्वाणरूपैर्नित्यं वृतं क्रमात् ॥ इति षोडश शक्तयश्चण्डाद्याः । यथा तत्रैव चण्डादिद्वारपालैश्च कुमुदाद्यैश्च रक्षिता । नगरीति पूर्व्वेणान्वयः । ते च चण्डप्रचण्डौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ । वारुण्यां जयविजयौ सौम्ये धातृविधातरौ ॥ कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः । शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः । एते दिक्पतयः प्रोक्ताः पुर्य्यामत्र सुशोभने ॥ इति । पञ्च शक्तयः कूर्म्माद्याः यथा तत्रैव कूर्म्मश्च नागराजश्च वैनतेयस्त्रयीश्वरः छन्दांसि सर्व्वमन्त्राश्च पीठरूपत्वमाश्रिताः ॥ इति । त्रयीश्वर इति वैनतेयविशेषणम् चतस्रः प्रकृतिपुरुषमहदहंकाररूपाः, षोडश एकादशेन्द्रियमहाभूतात्मिकाः पञ्चतन्मात्ररूपाः शक्तयो यास्ताभिर्वृतमिति स्वामिचरणानां व्याख्या च नासङ्गता मायापि तत्र महदादिभिः सह भक्तिं कुर्व्वाणा तिष्ठत्येव त्रिपाद्विभूतेः स्वरूपशक्तिमय्यास्तस्याः सर्व्वशक्त्याश्रयत्वात् । न यत्र माया किमुतापरे हरेरित्यत्र मायामहदादिविक्रमो जीवमोहनरूपस्तत्र नास्तीति कालविक्रमपदसाहचर्य्याद्व्याख्येयम् । अतएव पश्यते मंजुमहिमदर्शने चतुर्विंशतिभिस्तत्त्वैः परीता महदादिभिरिति । स्वैर्भगैः स्वाभाविकैरैश्वर्य्यादिभिः इतरत्र ब्रह्मादिषु अध्रुवैरागन्तुकैर्नश्वरैः स्वे स्वरूप एव धामनि वैकुण्ठे ॥ १६ ॥

तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः ।
ननाम पादाम्बुजमस्य विश्वसृग्यत् पारमहंस्येन पथाधिगम्यते ॥ १७ ॥
तं प्रीयमाणं समुपस्थितं तदा प्रजाविसर्गे निजशासनार्हणम् ।
बभाष ईषत् स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥
[कृताञ्जलिं प्रश्रयनम्रकन्धरं विलोकयन् प्रेमदृशा समेधयन्] ॥ १८ ॥

श्रीभगवानुवाच ।

त्वयाहं तोषितः सम्यग्वेदगर्भ सिसृक्षया ।
चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम् ॥ १९ ॥
वरं वरय भद्रं ते वरेशं माभिवाञ्छितम् ।
ब्रह्मन् श्रेयःपरिश्रामः पुंसां मद्दर्शनावधिः ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः

यत्र लोके श्रीःभगवत्प्रियारूपिणी रूपवती विभूतिभिः विविधाभूतयः ऐश्वर्याणि यासां ताभिः भूलीलादिभिः भगवत्प्रियाभिः सह उरुगाय पादयोः बहुमानं पूजां करोति याचप्रेंखं आंदोलं संश्रिता कुसुमाकरानुगैः भ्रमरकोकिलादिभिः विविधं गीयमाना प्रियस्य उरुगायस्य कर्मगायती भवतीति तं लोकं दर्शयामासेति पूर्वेणान्वयः ॥ १३ ॥
तत्रोक्तप्रकारे लोके ईश्वरं ददर्शेत्यन्वयः सर्वेषां सात्वतां भागवतानां पतिं स्वामिनम् श्रियः पतिं श्रियो भर्तारम् यज्ञपतिं यज्ञानां भोक्तारं तेषां प्रवर्त्तनावा फलं प्रदाने च समर्थम् अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति श्रीमुखवचनाच्च चिदचित्स्वशक्तिमयस्य जगतः पतिं परमांशित्वेन स्वामिनम् सुनंदादिभिः स्वपार्षदश्रेष्ठैः परितः सर्वतः सेवितं विभुं व्यापकम् ॥ १४ ॥
भृत्यप्रसादाभिमुखम् स्वानन्यजनविषयकानुग्रहेऽनुकूलम् दृगासवमिव यस्य दृशि आसवो ऽमृतं यस्य वातम् प्रसन्नहासमदशालोचनं च आनने यस्य तम् वक्षसि तद्दक्षिणभागे रोमराज्यात्मलक्ष्मभूतया श्रिया लक्षितमलंकृतम् ॥ १५ ॥
श्रीनमोभगवतेवासुदेवायनअध्यर्हणीयमभ्यर्चनीयमासनं सिंहासनमास्थितमधिष्ठितम् परं पूर्णम् सकालचतुर्विंशतिप्राकृतनत्त्वाधिष्ठातृशक्तिभिर्वृतम् स्वैः स्वासाधारणैः ध्रुवैर्भगैरैश्वर्यादिभिर्युक्तम् कथंभूतैः इतरत्रभगवदितरेष्वध्रुवैः अस्थिरैः स्वस्वैकप्रधाने धामन्धा त्रिलोकेरममाणम् ॥ १६ ॥

भाषाटीका ।

जहां लक्ष्मीजी अपनी विभूतियों के साथ भगवान के चरणों मे सदा पूजा करती हैं और अपने आन्दोल मे चढी हुई भगवान के प्रियकर्म गातीहैं ॥ १३ ॥
तहां सबभक्तों के स्वामी लक्ष्मी पति जगत्पति अपने पार्षदो मे मुख्य जो सुनंद नन्दादिक हैं उन्हों से सेवित भगवानको देखा ॥ १४ ॥
भृत्यों के प्रसाद मे अभिमुख और प्रसन्न है हास जिनका किरीट कुण्डल धारण किये चारभुजा धारण किये हैं पीतहैं वस्त्र जिनके लक्ष्मी से वक्ष स्थल मे शोभा को प्राप्त है ॥ १५ ॥
पूजनीय है आसन जिनका और प्रकृति पुरुष महत्तत्व अहंकार और एकादश इन्द्रिय और पृथिवी अपतेज वायु आकाश इन कर के युक्त हैं ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तस्य दर्शनेन य आह्लादस्तेन परिप्लुतं व्याप्तम् अंतरमन्तःकरणं यस्य हृष्यन्ती रोमाञ्चितातनुर्यस्य प्रेमभरेणाश्रूणि लोचनेषु यस्य विश्वसृक् ब्रह्मापारमहंस्येन यथा ज्ञानमार्गेण ॥ १७ ॥
तं ब्रह्माणं श्री भगवान बभाषे प्रजाविसर्गे कार्य्ये निजशासनार्हणं स्वनियोगार्हंप्रजाविसर्गेसमुपस्थितामिति चान्वयः ईषत्स्मितेन-शोचिर्दीप्तिः शोभा यस्याः तयागिरा ॥ १८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

वेदगर्भेति सम्बोधयन् वेदान् संचारयति सिसृक्षया हेतुना चिरं संभृतेन तपसाऽहं सम्यक्तोषितः दुस्तोषःस्तोषयितुमशक्यः १९॥
मा इतिमाम् अभिवांछितं वरं वरयप्रार्थय श्रेयसांफलानां परिश्रामः साधनप्रयासः ममदर्शनमवधिर्यस्य स तथा ततोधिकं श्रमफलं नास्तीत्यर्थः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

तस्य भगवतो दर्शनेन य आल्हादः तेन परिस्नुतं समंततो व्याप्तमंतरं हृदयं यस्यसः हृष्यत्तनुः पुलकिततनुः प्रेम्णो यो भरः पूरस्तेनाश्रूणि लोचनेषु यस्य स आनंदाश्रुनयनः ॥ विश्वसृट् ब्रह्मा पारमहंस्येन परमहंसैरनुष्ठेयेन यथा भक्तिमार्गेण यत्पदांबुजमधिगम्यते प्राप्यते तत्अस्य भगवतः पदांबुजं ननामनमस्कृतवान् ॥ १७ ॥

प्रजाविसर्गे प्रजासृष्टिरूपे कार्ये समुपस्थितं समुद्यतं निजशासनार्हणं स्वनियोगार्हं प्रीयमाणं स्वस्मिन्निरतिशयप्रीतिमन्तंतंकविं ब्रह्माणं करे हस्ते स्पृशन्करं गृहीत्वेत्यर्थः प्रीतमनाः तस्मिन्निरतिशयप्रीतियुक्तान्तःकरणः प्रियो निरतिशयप्रीति विषयो भगवानीषत्स्मितेन मंदहासेनशोचिर्दीप्तिः शोभायस्यास्तया गिरा प्रियं यथा तथा बभाषे भाषितवान् ॥ १८ ॥

त्वयेति हेवेदगर्भ सिसृक्षया हेतुना चिरंभृतेनचीर्णेन तपसा साधनभूतेन त्वया कर्त्राहंसध्यक् सम्यक्तोषितः कूटयोगिनो दांभिकयोगिनां दुस्तोष स्तोषयितुमशक्योहं ॥ १९ ॥

वरेशं वरप्रदं मां प्रत्यभिवांछितमभीष्टं वरं वरयते तुभ्यं भद्रंमंगलमस्त्विति शेषः हेब्रह्म पुंसांश्रेयः परिश्रामः श्रेयसो फलानां परिश्रामः साधनप्रयासः मद्दर्शनावधिर्मद्दर्शनमवधिर्यस्य सः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

युक्तमित्यनेनस्वरूपभूतानभवंतीतिनाशंकनीयं योगशब्दस्यसंग्रहनेवृत्तेः तत्स्वरूपाश्चशक्यइतिच ॥ इतरत्रपुरुषांतरेष्वश्रुतैरनित्यैः स्वैःस्वरूपैर्भगैरैश्वर्यादिभिश्चयुक्तं स्वएवधामनत्स्वरूपानंद एवरममाणानाम्यश्रेत्येवशब्दार्थः अहमेवंविधमीश्वरंददर्शेतिपूर्वेणान्वयः तस्यहरेर्दर्शनाद्युद्भूतेनाह्लादेनपरिप्लुतमार्द्रीभूतमांतरंयस्यसतथा हृष्यंतोरोमांचंकुर्वतीतनुर्यस्यसतथा प्रेमभरेणाश्रुपूर्णेलोचनेयस्यसतथा ॥ १७ ॥
यत्पादांबुजंपारमहंस्येनपरमहंससंबंधिनापथाज्ञानमार्गेणाहिंसादिधर्मजन्येनाधिगम्यतेज्ञायते ॥ १८ ॥

प्रीयमाणांहृष्यंतंकविंब्रह्माणं आदिकवयइत्युक्तेः कवियःपुत्रःसइमाचिकेतेतिश्रुतेश्च ईषद्भासेत्यनेनशब्दतोऽल्पत्वमर्थतोगुरुत्वंचोभ्यनैप्रकृत्यामितभाषिणाइतिवचनात् करेस्पृशन्नित्यनेनप्रीतमानस्कत्वंप्रकाशयति । मनसिप्रसन्नेतदितरेंद्रियाणांप्रसन्नत्वंकिमुवक्तव्यमित्यर्थः ॥१९॥

आंतरीअंतःकरणप्रीतिर्वाचोद्गलयति त्वयेति किंधनादिनेत्यतउक्तं तपसेति किमर्थेनेत्यतउक्तंसिसृक्षयेति अनुपचितांगोपांगेनइत्यत उक्तं चिरमिति अहंनतपोमात्रेणतुष्यामि किंतुत्वादृशानामधिकारिणामेवेतिभावेनाह दुस्तोषइति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तद्दर्शनेनेति । आह्लादेन हृष्यत्तनुः प्रेमभरेणास्त्वश्रुलोचन इति विवेकः । यत्पादाम्बुजं पारमहंस्येन पथाधिगम्यते इति सच्चिदानन्दत्वं तस्य व्यनक्ति । पारमहंस्यमत्र भागवतपारमहंसत्वमेवं, भागवतपरमहंसदयितकथामिति पञ्चमोक्तेः ॥ १७ ॥

तंप्रीयमाणामिति । तं ब्रह्माणं भगवान् बभाषे । प्रजाविसर्गे कार्ये निजस्य स्वांश भूतस्य पुरुषस्य शासनेऽर्हणं योग्यम् अयमसौ पुरुष एव तमनुगृह्णातु भगवतस्तु परावस्थत्वात्तेन प्राकृतसृष्टिकर्त्रा सम्बन्धोऽपिन सम्बन्ध इत्याशंक्य तस्य भक्तवात्सल्यातिशयमित्याह, प्रियं तस्मिन् प्रेमवन्तं । यतःसोऽपि प्रियः प्रेमवशः । तत्रापि प्रीयमाणामिति प्रीतमना इति च विशेषणं तदानीं प्रेमोल्लासातिशयद्योतकम्। तस्मिन् स्वविषयकप्रीतिचिह्नदर्शनेन तस्यापि तत्र प्रीत्यतिशयं व्यञ्जयति ईषत् स्मितशोचिषेति । गिरेतिकरे स्पृशन्निति च ॥ १८ ॥

त्वयाहमिति सिसृक्षयोपलक्षितेन ,न तुविशिष्टेन, मद्भक्तिप्रभावेन तद्वासनायागुणीभूतत्वात् । अतएव चिरं भूतेनेति । यतःकूटयोगिनामिति अप्रोज्झितकैतवानामहंदुस्तोष इति ॥ १९ ॥

मद्दर्शनावधिरिति । मद्दर्शनस्यान्तर्भूतसर्वफलत्वादिति भावः ॥ २० ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी।

एवं सर्वं संदेहनिवर्तकं भगवत्स्वरूपं स्फुटतद्दर्शनेन यः आस्वादः आनंदानुभवेन यः संतोषः तेन परिप्लुतमंतरं यस्य तादृशो भूत्वा ननामेत्यग्रेण संबंधः नयोर्हि किंचित्कामनार्थं करोति तथा च कामनया हृदयसाकांक्षमपूरितं तिष्ठति तद्दानंदानुभवेन फलरूपेण कामेच्छा पेक्षयाप्यधिकफलत्वादंतःकरणं परिप्लुतं यथा महापूरे सर्वमेवगर्त्तजातं पूर्णं सततउत्थितं भवति तथा ब्रह्मणोचित्तं जातमित्यर्थः अत एव तस्याग्रेवचनसामर्थ्यं किंच अंतःपूर्णानंदः बहिरप्युद्गत इत्याह हृष्यत्तनुरिति तदा ज्ञानशक्तिरपि आनंदे निमग्ना न फलांतरं बोधय तीति ज्ञापयितुं प्रेमभराश्रुलोचन इत्युक्तं प्रेमभरेण जातानि याम्यश्रूणि तानि लोचनयोर्यस्येति पूर्वं भगवति प्रेमस्थितं तत् आधारे परि प्लुते तत्तोनिर्गतंसत्वेत्रयोः ज्ञानजनकत्वातत्परिचर्यामेव प्राप्य तद्द्वाराजलरूपेण निर्गतामिति भरो भारः भाराक्रांते स्वेदो भवत्येव तदाह प्रेमभरेण अश्रूणीति स्वभवनेषु स्ववर्तीति अश्रुत्वं तदा कर्त्तव्यांतराभावाज्जनामपद्मांबुजामिति भक्तिप्रकारेण अस्येति पूर्वोक्तरूपस्य अपे क्षामेव बोधयति विश्वसृगिति विश्वं सृजतीति नत्वेवं दर्शनेन ममैव कुतः कृतवान् सायुज्यं कुतो न प्राप्तवानिति इयमपि शंकानिवारिता यतोऽयं विश्वकृत् अधिकारित्वान्नप्राप्तवानिति भावः ननुचरणारविंदस्य तुल्यत्वात् समर्थत्वाच्च अधिकारे कुतोवासायुज्यमत आह यत्पा रमहंस्येन पथाधिगम्यत इति परमहंसमार्गेणैव दृष्टं चेत् तदैव पादांबुजं प्राप्यते ननु प्रकारांतरेण दृष्टं सायुज्यहेतुर्भवति ॥ १७ ॥

एवं नमनं कृत्वा ब्रह्मणि तूष्णीं भूते किंचिदपि वक्तुमसमर्थे स्वयमेव भगवान् तदभीप्सितमुक्तवानित्याह तं प्रीयमाणमिति यच्च साधनमभीप्सितं फलं च तत्र प्रकारांतरव्यावृत्यर्थं प्रारब्धफलासिद्ध्यर्थमेव तस्य प्रोत्साहनं अन्यथात्वेतु भगवतः तूष्णीं भावः प्रसन्न त्वाद्याभिलषितदानं अत्र तु साधनमपि स्वोपदिष्टामिति तस्य वरयाचनप्रेरणा अन्यथा स्वाभिलषितमात्रत्वे निर्बंधेन कारणोपदार्थत्रा नेपि अन्यथा करणमापद्येत अतः स्वयं स्वेच्छासमानविषयां तदिच्छामुत्पाद्य तद्द्वारेणैव स्वाभिलषितं करिष्यामीति भगवदिच्छयांब्रह्मणस्तू ष्णीं भावः भगवत्पादविभूतेस्तुमाहात्म्यात्संबंधाद्वा अभिलषितार्थसिद्धिहेतुत्वाद्वाभगवद्दर्शनेन प्रीयमाणः परमप्रीतियुक्तो ब्रह्मासम्यक् चावस्थितः ननुतपसा क्लिष्टः अत एव तदैव प्रजानिर्माणार्थे निजाज्ञाकरणसमर्थः ब्रह्माणं ज्ञात्वा स्वरूपयोग्यता भगवत्पदस्य सहकारि योग्यतां संपादयति यभाषे उक्तवान् भाषणमेव प्रयोजनं न भवतीति वाच्यः करणतामाह गिरेति भगवद्रूपे दृष्टे उत्तमेचाधिकारे संपन्ने भगवद्वाक्यात् तत्वज्ञानमेव भाविष्यतीत्याशंक्याह ईषत्स्मितरोचिषेति सर्ववस्तुषुवस्तुस्वरूपं यत् तदज्ञानार्थं मोह इति ईषत्पदेनोक्तं यद्यपि तदेव महत् तथापि ब्रह्मणा इच्छामात्रेणैवतन्नविष्यतीति तत्कार्यस्याल्पत्वं स्मितोपि मंदहासः तस्यापि ज्ञानपरं न फलपर्यवसायं भवस्य वस्तुस्वरूपज्ञानं तथापि यत्तस्य फलं तदिदानीमाभवत्विति स्मितं फलेपि मोक्षलक्षणमेव फलं भवतु सर्वज्ञत्वं अलौकिकतेजस्त्वंभवति शोचिषेत्युक्तं स्मितमेवशोचिर्यस्य इति स्मितमेव वा पदासाधारणं स्वकर्त्तव्यं तदन्येन न कर्त्तव्यमित्याशंक्याप्रियेणातदपि कर्त्तव्यमिति प्रियमित्युक्तं तस्य प्रियत्वं भगवतः संबंधात् स्वभावतो वा यदि स्यात् तदाशास्त्रो विरुद्ध्यतेति ब्रह्मगतं स्नेहं त्वात्मदेहे हेतुत्वेन निरू पयति 'प्रिय इति ये यथा मां प्रपद्यंत इत्ययमर्थः सूचितः भगवद्वाक्येनभगवन्मनः उत्पादकमिति तस्या प्रसादेनगणस्यप्रसक्तत्वात् तथा च उतत्वः पद्यपदर्शवाचमितिवत् ब्रह्मणो वाक्यार्थप्रतीतिर्न स्यात् अत आह प्रीतिमना इति प्रीतं मनो यस्य स्वकार्ये ब्रह्मणो जन्यत इति करेलपृशामिति क्रियाशक्त्या धर्मेज्ञानशक्तिस्तु वाक्यात् एवमुभयसंपन्नः ॥ १८ ॥

अभीष्टं करिष्यतीति मनसोबहिरस्वातंत्र्यात् वाचमाह त्वयाहंतोषित इति सृष्ट्यर्थे तप करणं भगवतो वरदानं कुतोपयुज्यत इत्या शंक्यते न तपसा अहमेव प्रीत इत्याह अयमेवास्मिन् शास्त्रे मुख्यः सिद्धांत योभगवत्कार्यं करोतीति महता प्रयत्नेन समुख्यः यस्तु भगवत्सेवां करोति स मध्यमः यस्तु स्वार्थे भगवंतं सेवते सोम इति ब्रह्मणात्वाद्यः पक्षः कृत इति भगवानतितुष्टः तदाह सम्यगतिऽक- र्थं ब्रह्मणायमर्थो ज्ञात इति तत्राह वेदगर्भेति वेदा गर्भे यस्य वेदानामिदमेव तात्पर्यं यद्भगवत्कार्यं कर्त्तव्यमिति अत एव सर्वत्र प्रजापति रकामयत प्रजायेयेति कृतश्चैवं प्रजाकामाः प्रजां नाविंदंतते कामयंत प्रजासृजेमहि प्रजामवरुंधीमहि प्रजांविंदेमहि प्रजावंतःस्यामिति अग्निहोत्रं जुहोति यदेव किंञ्च यजमानस्य स्वंतस्यैव तदेतत्सिच्यति प्रजनन इति अन्यथा लौकिकार्थे परत्वे वेदानामनुवादकत्वेनाप्रामाण्यं स्यात् अत् एव आपाततो येवेदज्ञाः तेन तमर्थं जानंतीति तद्व्यावृत्यर्थं गर्भपद प्रयोगः तत्र हि वेदाः स्थिराः बुद्धौ तु भिक्षणावस्थायिन इति सिसृक्षयैवाहं तोषितः तत्रापि तदर्थं महाक्लेशः कृत इति सुतरामेवाहं तुष्ट इति हेत्वंतरमाह चिरंभृतेन तपसेति यद्यपिसिसृक्षा संबंधव्यतिरेकेणकेवलतपसा तोषो न भवति तथा सति सिसृक्षा तत्रैवांगं भवति तथासत्यपि मुख्यासेति पृथक् हेतुत्वं तपस्तु संता पात्मकं सकृदेवोत्पद्यते तदेव यदि प्रयत्नेन तिरोभावमप्रापयन् ध्रियते तदोत्कर्षो भवतिविरम्य प्रारम्भस्तु प्रथमतुल्य एव अभ्यासेन संस्कारः परं वर्द्धते ननु फलं अतस्तद्व्यावृत्यर्थमाह चिरंभृतेनेतिएकमेव तपः मध्ये प्रयत्नांतर रहितः शाक्यप्ररोचनार्थमेव भगवान्वदतीति ब्रह्मणो बुद्धिपरिहर्तुमाह दुस्तोष इति तपोधारकत्वेन योगोपेक्ष्यते तपस्वरूपं चाग्रे वक्ष्यते अतोये भगवत्कार्यं न कुर्वंति ते तपस्विनो भ वंति तेषां योगे तपः अभावात् शून्य एव स योगः तपः सहित इति भ्रमात्क्लासते अतस्ते कूटयोगिन इत्युक्तं तेषां दुस्तोषः दुःखेन तोषे यस्य योगस्य निर्बंधात्मकत्वात् ते स्वात्मानं पीडयंतीति तद्दयानिर्बंधेन संतोषः यथाप्रायोपवेशिनः ॥ १९ ॥

एवं संतोषमुत्पाद्य परार्थे प्रेरयति वरंवरयेति अन्यकामनयैव कार्यं कर्त्तव्यं इति भगवदिच्छावरस्तु स्वकामितपदार्थः काम नया च नाद्य इतिनशंकनीयमित्याह भद्रंत इति वृतेपिवरेमदर्थमेवोपयोगात् तव नकापिचिंता अतस्तत्र मद्रे एव वरेशामिति वरस्तु भ- गवत्स्वरूपावधिः तत्राग्न्यस्यासामर्थ्यं अतोहमेव वरेशः अन्ये तु वराभासेशाः कूटयोगवत् तत उक्तं अभितो वांछितमिति सर्वथा वरेण प्रतिपन्न ननु पूर्वकृततपसा भवानप्रसन्नः एवं पुनस्तपसा अभीप्सितार्थसिद्धिर्भविष्यति किंवरेण तत्राह ब्रह्मन् श्रेयः परिश्राम इति भवाब्धिति संबोधनं उक्तार्थे संबोधाय श्रेयोनिमित्तं यः परिश्रमः स तु मद्दर्शनमेव अवधिर्यस्य तथोक्तः पुंसामित्यन्येषामिति मच्छब्देन च पुरुषोत्तमोभिप्रतः मत्स्यवतारः तेन तृतीयस्कंधे भूयस्त्वं तप आदिष्टेति वचनं न विरुद्धं तस्य पुरुषावतारत्वात् एवमन्यत्रापि ॥ २० ॥

मनीषितानुभावोऽयं मम लोकावलोकनम् ॥ २१ ॥
यदुपश्रुत्य रहसि चकर्थ परमन्तपः ।
प्रत्यादिष्टं मया तत्र त्वयि कर्म्मविमोहिते ॥ २२ ॥
तपो मे हृदयं साक्षादात्माहं तपसोऽनघ ।
सृजामि तपसैवेदं ग्रसामि तपसा पुनः ।
बिभर्म्मि तपसा विश्वं वीर्यं मे दुश्चरं तप ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

परमहंसा भक्ताः प्रियाः परमहंसानामित्यत्र तथा व्याख्यानात् भागवत परमहंसदयितकथामिति पंचमोक्तेश्चतेषां भावः पारमहंस्यं भक्तियोगस्तेन यथा भक्त्याहमेकया ग्राह्य इति भगवदुक्तेः ॥ १७ ॥

प्रजाविसर्गे कार्ये निजशासनमर्हतीति तम् ईषत्स्मितेन शोचिर्दीप्तिर्यस्यास्तथागिरा ॥ १८ ॥

वेदगर्भेति सम्बोधयन् वेदान् संचारयति सिसृक्षयाहेतुना चिरंभृतेन तपसा दुस्तोषस्तोषयितुमशक्यः सध्यक्सम्यक् ॥ १९ ॥

मा मां वरं वांछितं वस्तु वरयवृणुयाचस्वेतियावत् श्रेयः परिश्रामः फलार्थकः प्रयासो मद्दर्शनावधिरेव मद्दर्शनादन्यस्य फलस्य मद्भक्तैरग्राह्यत्वादितिभावः ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

ततश्चतस्यभगवतोदर्शनेनयआह्लादस्तेनपरिप्लुतंसमंततोव्याप्तमंतरमतष्करणंयस्यसः हृष्यंतीजातहर्षातनुर्यस्यसः प्रेम्णायोभरः पूरस्तेनाश्रुणीलोचनेषुयस्यसः विश्वसृक्ऽयष्टिजगत्स्रष्टाचतुर्मुखः यत्पारमहंस्येनपरमहंसैः भगवद्ध्यानप्रधानैरनुष्ठितेनयथाभगवद्भक्तिमार्गेणाधिगम्यतेप्राप्यतेतदस्यभगवतः पदांबुजं ननाम ॥ १७ ॥

ततश्च तपश्चाविभाराधनेन प्रीतमनाः तस्मिन्प्रीतियुक्तमानसः भगवान् प्रीयमाणां भगवद्दर्शनेन भगवति अतिशयप्रीतिमंतं प्रजाविसर्गे कार्ये समुपस्थितं समुद्यतं निजशासनार्हणां निजनियोगयोग्यं तं चतुर्मुखम् करे हस्ते स्पृशन् ईषत्स्मितेन मंदहासेन रोचिर्भिः शोभा यस्याः तया गिरा प्रियं यथा वभाषे भाषितवान् ॥ १८ ॥

आपणामेवाह त्वयेति अहं कूटयोगिनांकपटयोगिनां दुस्तोषः स्तोषयितुमशक्योपि हेवेदगर्भ त्वया सिसृक्षया प्रजाविसर्गेच्छया हेतुना चिरंभृतेन बहुकालं चीर्णेन तपसासम्यक् तोषितोस्मि ॥ १९ ॥

हेब्रह्मन् तेभद्रं मंगलं भवतु वरेश वरद मा मां अभिवांछितमभीष्टं वरं वरय पुंसां साधकानां श्रेयसां फलानां परिश्रामः परिश्रमः साधनप्रयासः मद्दर्शनावधिः मम दर्शनमवधिर्यस्य सः ॥ २० ॥

भाषाटीका ।

भगवान के दर्शन के आनन्दसे परिप्लुतहै अंतः करण जिनका और आनन्द को प्राप्त है शरीर जिनका और प्रेम के भारसे नेत्रों में अश्रु आगये हैं ऐसे ब्रह्माजी भगवान का प्रणाम किया ॥ १७ ॥

प्रसन्न होकर हाथ स्पर्श करके प्रजाके रचने मे योग्य प्रसन्न ब्रह्माजी से भगवान बोले ॥ १८ ॥

स्टष्टि के कारण बहुकाल आपने हमको प्रसन्न किया यह बात हम जानते हैं ॥ १९ ॥

हे ब्रह्मन् वरदेनेवालों मे श्रेष्ठ जो मैहूं तिनसे वरदानमागो और आपकाकल्याणहो और मनुष्यका साधन प्रयास तबतिकहै जब तक हमारा दर्शन नही है ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एतच्च मत्कृपयैव त्वया प्राप्तमित्याह । मनीषितमिच्छा तुभ्यमिदं दातव्यम् इति या ममेच्छा तस्या अनुभावोऽयम् । कोऽसौ तमाह न लोकस्यावलोकनं यत् ॥ २१ ॥

न चेदं ममैव तपोबलेन प्राप्तमिति स्वातन्त्र्यं मन्यस्व तत्प्रवृत्तेरपि मत्कृतत्वादित्याह । रहसि तप तपेति यद्वच उपश्रुत्य परमं तपश्चर्यं कृतवानसि तदपि त्वां प्रति मयैवादिष्टम् । कदा तत्र तदा सृष्ट्यारम्भे त्वयि कर्म्मणि कार्य्यार्थे विमोहिते सति ॥ २२ ॥

किञ्च तपो नाम ममैव शक्तिरित्याह । तपो मे हृदयम् अन्तरङ्गा शक्तिः । आत्मा स्वरूपं यस्य ज्ञानमय तप इति श्रुतेः । प्रसामि हरामि । बिभर्मि पालयामि । वीर्यं शक्तिः ॥ २३ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचंद्रिका

मल्लोकदर्शनं मत्प्रसादादेवाभूदित्याह मनीषितेति लोकस्य वैकुंठलोकस्यावलोकनमित्ययं ममैव मनीषितानुभावः मत्संकल्पानुभाव त्वर्थः अनुभावः प्रभावः ममैवतपोबलेन प्राप्तं लोकावलोकनं इत्याशंकायां तवप्रवृत्तेरेव मत्कृतत्वात्तपसः स्वातंत्र्यमित्याह रहसि तुपश्रुत्य तपतपेति वच उपश्रुत्य परमं श्रेष्ठं तपश्चकर्थ ॥ २१ ॥

तदपि त्वयि कर्मणि जगत्सर्गकर्मणि विमोहिते सति मयैव प्रत्यादिष्टं त्वां प्रत्याभिमुख्येन उपदिष्टमतो ममैवानुभाव इति भावः तप शंति तपो मे इत्यादिना ॥ २२ ॥

तपसैव सो तप्यत यस्य ज्ञानमयं तप इत्यादि श्रुत्युक्तपूर्वजगदाकारपर्यालोचनरूपतपसैवेदं जगत्सृजामीति तेनैव तपसा प्रसामि संहरामि बिभर्मि पालयामि विश्वं तपः मेवीर्यं प्रभावः ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

स्वतुष्टिफलमाह वरमिति पुंसांसर्वश्रेयः परिश्रामः तपआदिसर्वकल्याणानांपरिश्रामः परिपाको मद्दर्शनावधिर्मेविषयावलोकपर्यवावधि पर्यवसानंयस्यसतथा मद्दर्शनमेवसर्वश्रेयसांफलमितियतोऽतोमद्दर्शनाख्य सर्वश्रेयःफलवांस्त्वमिष्टमामपादानीकृत्यवांछितंवरंवरयेत्यन्वयः तुभ्यंभद्रमस्त्विति वरेशमित्यनेनयाचितंदातुंसमर्थइतिद्योतयति ॥ २१ ॥

तपसःकर्तव्यत्वंश्रावयति मनीषितेति यत्त्वयक्षरंतपइतिवचउपश्रुत्यरहसिमद्गुणालोचनरूपंपरमंतपस्त्वंचकर्थकृतवान् यन्ममलोकावलोकनंममावलोकनंचायंममनीषितस्याभिप्रेतस्यतपसोनुभावोमहिमेत्यन्वयः ॥ २२ ॥

तपसःस्वमनीषितत्वंकथयति प्रत्यादिष्टमिति तत्रतदात्वयिकर्मविमोहितेकिंकर्तव्यमित्यजानतिसतिमयातपः कुर्वितिप्रत्यादिष्टंत्वामुद्दिश्योक्तं तस्मान्मनीषितंतपइत्यन्वयः त्वत्प्रसादजनकंतपएवेतिकुतोऽस्यार्तिकनस्यादितितत्राह तपइति हृदयंप्रियं प्रियंहृदयमुद्दिश्यकांतामित्यभिधीयतइति तदुपपादयति साक्षादिति अहंसाक्षात्तपस आत्माज्ञानात्मेतियस्मात् ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

मनीषितेत्यर्थकम् ॥ २१ ॥ २२ ॥

तपो मे इति । तपस्तावद्भक्त्यात्मकमेवात्र गृह्यते । तत्तु हृदयं तदावेशित्वेन तदालम्बनत्वात् तद्रूपमेव । आत्मा आश्रयः तस्य मेव शक्तित्वात् । तपसैवेति । भक्तेच्छयैव मम सर्वत्र प्रवृत्तेः । अतो यत्किञ्चिन्मम वीर्य्यं शक्तिः तपस्तप एवेति ॥ २३ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

नन्वर्थे सिद्धे ईश्वर प्रार्थना न क्रियते लोके हि कष्टेनापि पदार्थाः साध्यंत इत्याशंक्य न प्रकारांतरेणायमर्थः सेत्स्यतीति वक्तुं पूर्वं ज्ञाता अपि पदार्थाः न केवलं तपसा जाताः किंतु मदिच्छयेत्याह मनीषितानुभावोयमिति मनीषितस्य अनुभावः ममैवेच्छादियुक्तं वैकुंठ दर्शितवाति अन्यथा अक्षरात्मकस्य चक्षुषा दर्शनमुपायसहस्रेणापि न भवति पराञ्चिखानिव्यतृणत्स्वयंभूरिति श्रुतेश्चाहिःस्थितापि पदार्थो योग्य एव गृह्यते नायोग्यः नहि योगिनोपि चक्षुषा आकाशं पश्यंति समर्थ्यार्थमव्यवधानमपि अर्वाक् पदार्थेषु त्वक्षरेपि वाऽ न मनीषितेपि कथमेवं तप स इच्छायाश्च भगवच्छक्तित्वेन तुल्यत्वात् तत्राह अनुभावोयमिति न केवलं मनोवदशक्तितुल्यत्वादिदं काय

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी

किंतु तस्या अनुभावः सर्वासां शक्तीनांमध्येऽपि इच्छाशक्तिरुत्कृष्टा सर्वमूलत्वात् अन्यास्तु तदाश्रयाः अतस्तस्यापवादमनुभावः लोकस्य वैकुण्ठस्य अवलोकनं दर्शनं नत्वेवं सति तपोव्यर्थं स्यात् तथा सति पूर्वमेव कथं तद्दर्शनं लोकस्य अतः इच्छोत्पादकत्वेन साक्षाद्दर्शनहेतुत्वेन वा तपोऽवश्यंवक्तव्यमित्याशंक्याह यदुपश्रुत्येति तपो हि मयैवोपदिष्टं यतस्तपतपेति तद्वाक्यं श्रुत्वा रहसि एकांते उभयमेतद्विशेषणं परमं तपश्चकर्थ पूर्वत्र विशेषणस्वे एकान्तवचनत्वात् तत्कथनं विश्वासाय उत्तरत्र तु गुप्ततयैव तपः करणं कीर्तनेन क्षरणाशंकाभावाय परमामिति स्वरूपतः फलतश्चोत्कृष्टं इदमपि मनीषतानुभावरूपं ॥ २१ ॥

नत्वेवं सति मनीषा अप्रयोजिका तपसः कृतत्वादित्याशंक्याह प्रत्यादिष्टमिति कर्मणाविमोहितः कर्मविमोहितः सृष्टीच्छया व्यावृत्तो ब्रह्मप्रयोजनसंदेहेन विमोहितः किं स्वार्थं परार्थं वा तप आदिष्टं कर्तव्यमिति तदाकर्मजनित मोहव्यावृत्त्यर्थं तप उपदिष्टं नतु कार्याकार्यविलम्बस्तुमोहाभावार्थः एवं प्रयोजनमुक्त्वा तपःस्वरूपमाह तपोमेहृदयमिति यथा भगवान् षड्गुणः तथा तपोपि षड्गुणः तथा सति तस्य षड्गुणत्वे ज्ञाते तपसैव कार्यं भविष्यति किं भगवतेत्याशंका निवृत्ता भविष्यति तपसः षड्गुणानाह तपः मे हृदयमंतरंगा व्यक्तिः हृदयमेवधासाक्षादिति उपचारनिवृत्तिः यस्य ज्ञानमयं तप इति श्रुतेः ज्ञानात्मकं हृदयस्यैव मे हृदयत्वं तस्यैश्वर्यं किंच अहमेव तस्य आत्मा सदात्मकं तस्य वीर्यं यद्यपि भगवान्सर्वस्यात्मा तथापि न स्वरूपात्मत्वमत्र विवक्षितं किंतु कार्यात्मत्वं ततश्च यत्किंचित्कर्तुं शक्तः तत्सर्वं तपसापि भवति अतो अवतारवद्रूपांतरं तप इत्यर्थः ॥ २२ ॥

ननु तथापि भगवत्तुल्यतातपसः जगत्कर्तृत्वादिदित्याशंक्य उत्पत्तिस्थिति प्रलयकर्तृत्वं तस्याहं सृजामीति विभर्मि तपसा विश्वमिति तेन यद्यपि करणत्वं सृष्ट्यादौ तथापि स्वव्यापारे हि कर्तृत्वं सर्वत्रैवास्ति करकारकरतिन्यायेनकर्तृत्वमपि एवं स्वरूपं कार्याणि तस्य निरूपितानि तथासति भगवतस्तत्त्वयवावैयर्थ्यमाशंक्याह वीर्यमिति तपस्तु मम पराक्रमः धर्मरूपः नहि कार्यसाधकधर्मेण धर्मीधर्मो वा अन्यथा सिद्धो भवति आश्रयस्य प्रयोजकस्य वा आवश्यमपेक्षणात् अतस्तपसो यद्रूपत्वात् पूर्वमपि मया स्वस्वरूपमेवोपदिष्टं परमेतावान्विशेषः किंचिन्ममस्वरूपं क्रिययाभिव्यज्यते किंचिद्ज्ञानेनेति तपस्तु क्रियया तस्माद्यस्तुपसी जायते मदुपदिष्टेन तस्मयैव ज्ञायत इति वैलक्षण्यार्थं नातिवाग्रहः कर्तव्यः ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

मनीषिणो भावो मनीषिता पाण्डित्यं तस्या अयमनुभावः व्यञ्जकः । मम लोकावलोक एव पाण्डित्यं व्यनक्ति न तु बहुशास्त्राध्ययनाध्यापनादिरित्यर्थः ॥ २१ ॥

न केवलमधुनैव त्वयि मम प्रीतिः अपि तु तपसः पूर्वमपीत्याह, रहसि तप तपेतियद् वच उपश्रुत्य परमं तपश्चकर्थ कृतवानसि तदपि त्वां प्रति मयैवादिष्टम् । कदा, तत्रतदा सृष्ट्यारम्भे त्वयि कर्म्माणि । कर्त्तव्ये अर्थे विमोहिति सति ॥ २२ ॥

किञ्च तपो नाम ममैव विद्याशक्ति र्मूर्त्तिरित्याह तपो मेहृदयमिति । जीवस्य विषयभोगत्याग एव भक्तिःऽनुकूलत्वात् ममेप्सितमित्यर्थः । अतएव प्रसिद्धं मम वचनम् — यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः । इति । तच्च तपो यदिमत्प्राप्त्यर्थकं स्यात्तदेव नान्यथेत्याह तपस्मोऽहमात्मेतिमां विना तपोनिरात्मकं मृतकमिव कामिनां स्वर्गादिति । यद्यपिसिस्टक्षोस्तवापि तपस्तादृशमेव तथापि सिसृक्षायां मयैव प्रवर्त्तितत्वात् तत्र तपसश्च मयानुमोदितत्वात् तदिदं तपो निष्कामकल्पमेवेत्यहं स्वलोकञ्चत्वामदर्शयम । मम तुह्लादिनीक्षिप्तेर्वैषयिकभोगत्यागः स्वाभाविक इत्यहं सदैव तपस्वीत्याह सृजामीत्यादि तेन तपसः सृष्ट्यादिसामर्थ्यं ममैव किञ्चिद्भवत्विति ध्वनितम् ॥ २३ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

मम लोकस्य दर्शनं त्वया मम प्रसादादेव कृत मित्याह मनीषितेति मम लोकस्यावलोकनमित्ययं मनीषितानुभावः ममेच्छाया प्रभावः ननु ममैव तपोबलेनैतन्मया प्राप्तमित्यत्र तपसि मयैव भवान्प्रवर्तितोऽत तथापि तव स्वातंत्र्यमित्याह यदिति यत्तपतपेति वचः रहसि उपश्रुत्य परमं तपश्चकर्थ कृतवान् ॥ २१ ॥

तदपि तत्र भवांतरसृष्ट्यारंभे त्वयि कर्माणि कार्ये विमोहिते सति प्रत्यादिष्टं मयैव त्वां प्रत्युपदिष्टम् तपो ममातिप्रियमित्याह तप इति हृदयम् अतिप्रियमित्यर्थः हे अनघ तपसः अहं साक्षादात्मा आश्रयः स्थितिप्रभृत्यादिहेतुरित्यर्थः ॥ २२ ॥

इदं विश्वं तपसैवालोचनात्मकेन सृजामि, ग्रसामि संहरामि विभर्मि पालयामि च तच्च तपः मे दुस्तरं दुर्लंघ्यं वीर्यम् आलोचनात्मिका शक्तिः यस्य ज्ञानमयं तप इति श्रुतेः ॥ २३ ॥

ब्रह्मोवाच ।

भगवन् सर्व्वभूतानामध्यक्षोऽवस्थितो गुहाम् ।
वेद ह्य प्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् ॥ २४ ॥
तथापि नाथमानस्य नाथ नाथय नाथितम् ।
परावरे यथा रूपे जानीयां ते त्वरूपिणः ॥ २५ ॥
यथात्ममायायोगेन नानाशक्त्युपबृंहितम् ।
विलुम्पन् विसृजन् गृह्णान् बिभ्रदात्मानमात्मना ॥ २६ ॥
क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते ।
तथा तद्विषयां धेहि मनीषां मयिमाधव ॥ २७ ॥

भाषाटीका ।

हमारे लोक को जो आपने देखा यह हमारीही कृपा है जिसको सुनकर परमतप आपने किया यह भी हमारी ही कृपा है ॥ २१ ॥

अब तुम सृष्टिरूपकार्य में मोहित हुए तब हमीने तुमको उपदेशदिया तपकरने का और तप हमारा साक्षात् हृदय है आत्म स्वरूप है ॥ २२ ॥

तपही से संसार को रचता हूं और तपही से प्रलयकरता हूं और तप ही से पालन करता हूं ॥ २३ ॥

सब प्राणियों के अध्यक्ष आप बुद्धिरूपी गुहामे स्थित हो और अपनी ज्ञानरूपी से दृष्टि से सबचिकीर्षित जानते हो ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अध्यक्षः अधिष्ठाता । गुहां गुहायां बुद्धाववस्थितः । यद्यपि वेद तथापीति उत्तरेणान्वयः ॥ २४ ॥

नाथमानस्य याचमानस्य उपतप्यमानस्येति वा । हे नाथ नाथय आशंसय प्रयच्छ । नाथितं याचितम् । नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु । नाथितमेवाह परावरे इति । परंसूक्ष्मम् अवरं स्थूलञ्च ते रूपं यथा जानीयाम ॥ २५ ॥

यथा च त्वंक्रीडसि तथा तद्विषयां मनीषां ममधेहीत्युत्तरेणान्वयः नानाशक्त्युपबृंहितं विश्वं विलुम्पन्संहरन् विविधं सृजन् बिभ्रत् पालयन् आत्मना स्वयमेवात्मानंब्रह्मादिरूपं गृह्णन् (अनुगृह्णन्) क्रीडसि ऊर्णुते तन्तुभिरात्मानमाच्छादयति ॥ २६ ॥ २७ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

एवं भगवतानुगृहीतो ब्रह्मास्वबुभुत्सितमर्थद्वयं तस्मै निवेदयति भगवन्निति हे भगवन्सर्वभूतानां गुहां हृदयकुहरमवस्थितोऽधिष्ठितः अतएवाध्यक्षः सर्वेन्द्रियवृत्तिद्रष्टा अत एवाप्रतिरुद्धेन प्रतिहतिशून्येन प्रज्ञानेन चिकीर्षितं साक्षादस्मदादिपरंपरयावाकर्तुमिष्टं यदपि वेदजानीहि हीति प्रसिद्धौ ॥ २४ ॥

तथापि नाथमानस्य याचमानस्य हेनाथ नाथितं प्रार्थितं नाथय पूरय नाथितमेवाह परावर इति परं दिव्यात्मस्वरूपमवरं रूपं चिदचिदात्मकमरूपिणः कर्मायत्तप्राकृतरूपरहितस्य ते तव परावरे रूपे यथाजानीयां तथामनीषां बुद्धिंदेहीत्यन्वयः ॥ २५ ॥

द्वितीयं नाथितमाह यथेति नानाशक्त्युपबृंहितः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाचेति श्रुत्युक्तज्ञानबलादिभिरुपबृंहितः युक्तः द्वितीयांतपाठे नानाशक्तिभिः पंचविंशतितत्वात्मकशक्तिभिः उपबृंहितमभिव्यंजितं विश्वमात्ममायायोगेन आत्मनः आश्चर्यशक्तियोगेन आत्मनानिमित्तभूतेनात्मना आत्मानं सूक्ष्मचिदचिद्विशिष्टं उपादानं तदात्मान ० ० स्वयमकुरुतेति श्रुत्या आत्मानमित्युपादानत्वस्याकुरुतेति निमित्तत्वस्यचाविधानात् विलुंपन्निति सृष्टेः पूर्वसंहारः गृह्णन्निति पाश्चात्यसंहारः विसृजन्नस्मदादिरूपेण बिभ्रत्पुष्णन् ॥ २६ ॥

अमोघसंकल्पः सत्यसंकल्पस्त्वं ऊर्णनाभिर्यथातंतून्णुते आच्छादयति सृजति इति यावत् तथया क्रीडसि तथा तद्विषया सृष्टिविषयां मनीषां बुद्धिं हेमाधव लक्ष्मीनाथ मयि धेहि देह्यर्पयेत्यर्थः ॥ २७ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

तस्मादिदं तपस्यैव सृजामि । पदार्थविषयाशेषविशेषज्ञानाभावे तदनुपपत्तेः उपसंहरति वीर्यमिति वीर्यं महात्म्यं अज्ञोपचितज्ञानज्ञात्सुतरामितरेषां । इदंतु नताद्दशमतोदुस्तरमित्यर्थः कायक्लेशसाध्येन तपसा सृष्ट्यादिकं चेद्धरेर्गपि क्लेशित्वमापद्यत इत्याशंका तपःप्रियं सदाविष्णोस्तपसैवाप्यते हरिरित्यादिना परिहृतेति ज्ञातव्यं साक्षादात्मार्थार्यमिति कथनाच्च नहि पूर्णानंदस्य हरेः क्लेशात्मकत्वं युज्यते तस्मात्तपः शब्देन ज्ञानमेवोच्यत इत्यर्थः ॥ २४ ॥

वरमादास्यतो ब्रह्मणो हरिं प्रतिविज्ञापन प्रकारमाह भगवन्निति भगवन्नावरं वरयंतिमां प्रति यद्यादिष्टं तद्विडंबनं मन्ये तथाहि सर्वभूतानां हृदयगुहामध्यक्षोऽवस्थितो भगवानप्रतिरुद्धेनाप्रतिहतेनानेन सर्वेषां चिकीर्षितं वेद हियस्मात्तस्मान्ममाभिचिकीर्षितमपि वेत्स्येव ॥ २५ ॥

तथापि वरं वरयं तिनदाज्ञाकर्तव्यतया वरं याच इति विज्ञापयति अथापीति नाथमानाययाचमानाय नाथितं याचितं तं वरं नाथ्य समर्थय नाथृनाथृयाच्ञोपतापैश्वर्याशीःष्विति धातुः कोसौ चिन्तीकृतो वरइति तत्राह परावरेति अरूपिणः प्राकृतरूपरहितस्यतवचिदानंदाद्यात्मकवैराजाख्यं परं रूपं सनत्वावरणाद्याख्यमवरं अपररूपामिति द्विपरावरे रूपे यथा येन प्रकारेण जानीयां तथा तद्विषयां मनीषां मह्यं धेहि आधेहीत्यन्वयः तुशब्देन तेच रूपे सत्ये इत्यवधारयति द्वैवात्र ब्रह्मणोरूपइति श्रुतिसिद्धत्वात् । अनेन कार्यकारणरूपे व्यावर्तयति ॥ २६ ॥

किंच यथोर्णनाभिर्लुताकीट ऊर्णामूर्णुते सृजते बिभर्तिच ऊर्णामंडलमध्ये क्रीडति अथचात्मन्येव लुंपति तथात्ममायायोगेन स्वरूपेच्छायोगेनाविर्योगन्याश्रियाच जगन्सृजन्नात्मनास्वभावेनात्मानमवतारं गृह्णन् बिभ्रत् पालयन् विलुपन् क्रीडांसच यथा तथाच तद्विषयां मनीषां धेहीति ॥ नानाशक्त्युपबृंहितोऽमोघसंकल्प इत्याह्यामूर्णनाभिर्हरेर्बीशिष्ट्यं दर्शयति ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

वेदेति वेत्थेत्यर्थः ॥ २४ ॥

अरूपिणः अप्राकृतरूपिणस्तव परं यदप्राकृतं रूपम् अवरं यच्च प्राकृतं ते रूपे ॥ २५ ॥

यथेति युग्मकम् ॥ २६ ॥

ऊर्णुते सन्तुसन्तानादिकं करोतीत्यर्थः । तद्यथा यथोर्णनाभिर्हृदयादूर्णां सन्तत्य वक्त्रतः । तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वर ॥ इति । तत्र पररूपाजज्ञामायामुत्तरज्ञानमित्यादिभिः अपररूपजिज्ञासायामुत्तरं तत्रैव ऋतेऽर्थमित्यादिना मायायामाविकयोरैकात्मकत्वात् यथात्ममायेत्यस्य समाधानं यद्रूप गुणकर्मक इत्यनेन भविष्यति ॥ २७ ॥

श्रीमद्वल्लभाचार्य कृत सुबोधिनी ।

एवं सोपपत्तिकवरप्रार्थनायां आज्ञप्तो ब्रह्मा आज्ञाते अतीतं दोषपरिहृत्यवरं प्रार्थयते भगवान्सर्वभूतानामित्यादिभिः पंचभिः चत्वारोर्थाः प्रार्थनीयाः दोषपरिहारार्थं चाद्यतमाह हे भगवन् पूर्वं सहसा भगवद्दर्शनेन आगतसाध्वसो समर्थो जातः इदानीं भगवद्वाक्येन स्पर्शेन सान्त्वनः सोपपत्तिकं वदति भगवन्निति संबोधनं स्वरूपपरिज्ञापकं त्वंहि सर्वान्तरात्मा सर्वेषां हृदयं जानासियतोयंममाभिप्रेतं तत्त्वज्ञातमेवं तथाच ज्ञातृज्ञापकं विरुद्धः तथाचयाचितमेव देयमिति यदि अथवा न ज्ञायते अस्य तत्त्वं किमित्येवमाह भगवानिति तस्मिन्नपि पक्षे भगवदाज्ञाकर्तव्येति प्रार्थनमावश्यकं तद्भवतीति सर्वभूतानां अध्यक्षः सर्वकार्येषु प्रेरकः नियामको यथा लोके कर्माध्यक्षः तथाभगवान्सर्वाध्यक्षः अनेन भगवदाज्ञा व्यतिरेकेण न कस्यापि कोपि धर्मः अंतर्बहिर्वा उत्पद्यते अतः कामनाप्युत्पन्ना त्वयैवोत्पादितेति तत्पूरणमपि त्वयैव कर्तव्यमिति मम भावः स्वपुत्रान् हि सर्व एव पुष्णाति किंच गुहास्थितः हृदयाकाशमधिष्ठाय स्थितः अतः सर्वं तत्र नीहितं किंच चिकीर्षितमपि भवान्वेद यतः अप्रतिरुद्धकालादिभिः प्रतिरोधो यस्य ज्ञानस्य नास्ति कार्याबोधने उत्पत्तौ वा प्रत्यासत्त्यर्थं वाक्येनादर्शनेन प्रतिरोधो नास्ति ततो ज्ञातत्वात् ज्ञानोत्पत्तिस्थान एव विद्यमानत्वात् इच्छायाश्चोत्पादकत्वात् ॥ २४ ॥

भगवता नप्रष्टव्यं तथा वक्तव्यं तथापि तदाज्ञापरिपालनार्थं करिष्यामीत्याह तथापीति परमेकमेव प्रार्थ्यते याचितं देयं चायुक्तं प्रयुक्तं चेति विचारणीयं तदाह नाथितं नाथयेति नाथृयाच्ञायां अतो नाथितं याचितं नाथय प्रयच्छ अवश्यदाने हेतुः हेनाथेति स्वामिन् सेवकेभ्यः प्रयच्छेत् स अनन्यगतिकत्वात्तेषां एवं प्रार्थयित्वा प्रथमं द्वयं प्रार्थयते परावरे यथारूपे इति ममायं महान्सत्संदेहः कस्त्वं परः कः पर इति पुरुषोत्तमरूपं किंवेदं परिदृश्यमानं इति एते परावरे रूपे पुरुषोत्तमाक्षररूपेऽअविर्भूताविर्भूतरूपे अवताराऽवताररूपे वा यथा जानीयां तथवरो देयः नत्वेतानि रूपाणि वेद एव प्रसिद्धानि वेदानुसंधानात् एवं ज्ञातव्यानि किमिति वरत्वेन प्रार्थ्यते तत्राह तेत्वरूपिण इति तु शब्दः पक्षं व्यावर्तयति नतद्रूपमस्तीश्वरे वेदे श्रुतमस्तीति एकस्येश्वरस्य सर्वाणि रूपाणि वेदे प्रतिपाद्यंते अन्ये वीर्यादयः पंचः भगवांश्चान्तरक्त एव तिष्ठति तस्मादेतानि षडपि न पृच्छते सांप्रतं किंतु मूलरूपस्य सर्वाकारेणापि अजातस्य परं रूपं यद्वा सर्वरूपेण जातस्य पश्चाज्जायमानं अवरं रूपांते ज्ञानप्रार्थयामीत्यर्थं अनेनाद्यंतरूपपरिज्ञाने प्रवृत्ति [illegible] ज्ञानं कर्मांगमिति प्रसिद्धं ॥ २५ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

एवमात्म तव रूपज्ञानं प्रार्थयित्वा मध्यस्थानि सर्वाण्येव रूपाणि ज्ञातुं प्रार्थयते तथा सति तत्तदुपयोगार्थं सृष्टिकरणं सुगमं स्यात् सृष्टि-ज्ञानं तु पूर्वमेव वर्तत इति न तत्प्रार्थयते शिक्षायां वा प्रार्थयिष्यते अंशभेदेन यथा आत्मनः पुरुषोत्तमस्य मायाकार्यकारणरूपिणी अनंतातहथाः सर्वतो योगेन तस्यास्त्रिगुणात्वात्तत्संबंधेन नानाभावमुत्पत्त्यादिरूपं शक्त्यादिरूपं च तेनोपबृंहितंतथात्मानं विसृजन् विशेषेण कुर्वन् गृह्णन् बिभ्रत् आत्मानमेव गृह्णन् उत्पन्नमात्मसात्कुर्वन् बिभ्रत् आत्मानमेव उत्पन्नं ...रूपं स्वयमेव धारयन् यदाभारं वोढुं नेच्छति तदा विशेषेण लुंपन् स्वयमेव कर्तृकरणरूपः क्रीडसि तथा क्रीडाज्ञानं समारस्त्वतिप्रार्थना तथा सति कृतिः सुगमा भवति ॥ २६ ॥

ननु भगवानेव यदि सर्वं करोति तदा ब्रह्मणः किंकर्तव्यमित्याशंक्याह अमोघसंकल्प इति अमोघः संकल्पो यस्य संकल्पमात्रेणैव भगवान्करोति कृत्या तु मया कारयतीत्यर्थः नन्वेक एव कथमनेकानि रूपाणिकरोत्यतो ब्रह्मादिरूपाणि संकरोति मंतव्यमित्याशंक्याह दृष्टांतेन ऊर्णनाभिरिति यथोर्णनाभिः साधनांतरनिरपेक्षः स्वरूपभूतयैवोर्णया क्रीडति ऊर्णामेवोत्पादयति स्थापयति भक्षयति च तथा भगवानिति आत्मानं करोति कृतिमात्रे दृष्टांतः स्वरूपं त्वज्ञानमेव दृष्टांते तु ऊर्णामेव सृज्यादिभावंप्राप्नोति नतूर्णनाभिः आश्रयंचापेक्षते दुग्धं चोत्पादितस्य भवति अतस्तस्य रूपं ज्ञातव्यं अन्यानि अपेक्षामात्रे दृष्टांतः नापितस्य सर्वानपेक्षता देशादिनामपेक्षितत्वात् तत्र दृष्टांतमात्रेण न ज्ञान भवतीति भगवानेव तत्संपादयत्विति प्रार्थयते तथा तद्विषयं धेहीति भगवान्करोतीत्यविवादं श्रुतिरपि कृतिमेवाह नतुस्वरूपं अतस्त्वमेव तांमनीषां बुद्धिर्दाढर्मयिस्थापय नतूपदेशेन तद्धिरिति भावः यदुक्तं पित्रा भगवता कर्तव्यमनेति संबोधयति साधयेति यथा लक्ष्मीपतिः भार्योक्तं करोति तथा पुत्रोक्तं कर्तव्यमिति एवंज्ञाने वरद्वयं प्रार्थितं निरूप्य ॥ २७ ॥

श्री मद्विश्वनाथचक्रवर्ति कृत सारार्थ दर्शनी

गुहायां बुद्धावित्यर्थः । वेदवेत्थ ॥ २४ ॥

नाथमानस्य याचमानस्य उपतप्यमानस्येतिवा । हे नाथ नाथय आशंसय । नाथितं याचितम् नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु । नाथित मेवाह अरूपिणः प्राकृत नित्ययोगित्वेन न यस्यास्ति तस्य, नित्ययोगे इति : । परं यदप्राकृतं रूपम् अवरञ्च यत् प्राकृतं तं रूपे ॥ २५ ॥

आत्मनो माया च योगा योगमाया च तयोर्द्वन्द्वैक्यं तेन । तत्र मायया बहिरङ्गशक्त्या । नानाशक्त्युपबृंहितं द्रव्यज्ञानक्रियाशक्तिसमेतं विश्वं विलुम्पन् संहरन् विसृजन् विविधं सृजन् बिभ्रत् पालयन् आत्मना स्वयमेव आत्मानं गृह्णन् स्वस्वरूपं प्रकटयन् क्रीडसि ऊर्णुते तन्तुसन्तानं करोति । योगमायापक्षे मायिकप्रपञ्चान्तर्वर्तिलोके तत्रैव नाना शक्त्युपबृंहितं ह्लादिन्यादिशक्तिगणपरिपूरितम् आत्मानं स्वं स्वीयञ्च वास्तव वस्तु अनन्यसिद्धत्वादात्मनैव गृह्णन् योगमायया अन्तरंगशक्त्या तञ्च किञ्चिदविलुम्पन् कमपि भक्तं प्रति आवृण्वन् किञ्चिदविसृजन् विविधं प्रकाशयन् किञ्चिद्बिभ्रत् कमपि कालं पुष्यन् क्रीडसि । ऊर्णनाभिदृष्टान्तस्तु स्थूलत उभयत्रात्मैकारणत्वमात्रांशेन ज्ञेय । मयि धेहि अहं माया योगमायाञ्च तत्तत्प्रकाशितं वस्तु च जानीयामित्यर्थः ॥ २६ ॥ २७ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

अध्यक्षः सर्वकरणाधिष्ठाता गुहां हृदयाकाशमवस्थितः सन् अप्रतिरुद्धेन अनर्गलेन प्रज्ञानेन चिकीर्षितं कर्तुमिष्टं हि निश्चयेन भवान् यदस्मि वेदयोर्त्त ॥ २४ ॥

तथापि हेनाथ हेयाच्य नाथमानस्य याचमानस्य नाथितं याचितं नाथय प्रयच्छ याचितमेवाह परावरे इति ते नवाप्राकृतनित्यामेवाप्राकृतविग्रहविशिष्टस्य ममाग्रेस्थितस्य अरूपिणः कर्मजन्यरूपरहितस्य परावरविश्वस्य निर्गमप्रदेशस्थानभूते रूपे यथाजानीयां तथा मयि मनीषां धेहीत्यनेनान्वयः ॥ २५ ॥

यथा च परास्यशक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाचेति श्रुतिप्रोक्त नानाशक्त्युपबृंहितमात्मानमुपादानरूपम् आत्मना निमित्तरूपेण तदात्मानं स्वयमकुरुतेति श्रुत्यैव आत्मानमित्युपादानत्वस्य कुरुतेति निमित्तत्वस्य च दर्शितत्वात् आत्ममायायोगेन स्वशक्तिविशेषत्रिगुणात्मकप्रकृतियोगेन प्रकृतिमहदहंकारादिकमयोगेनेत्यर्थः ॥ अर्थान्मायामपि गृहीति प्रभः विसृजन् विविधं कुर्वन् चिदचिच्छक्तिमंतमात्मानं विश्वाकारं कुर्वन्नित्यर्थः बिभ्रत् पालयन् यथोपयोगं नानाविधानि रूपाणि गृह्णन् विलुंपन् संहारं कुर्वन् यथा च क्रीडसि तथा तद्विषयां मयि धेहीत्यनेनान्वयः ॥ २६ ॥

यथोर्णनाभिः ऊर्णुते तंतून् आच्छादयति सृजति स्वसृष्टैस्तंतुभिर्गृहंनिर्माय क्रीडतीति यावत् तद्वत् अमोघसंकल्पः सत्यसंकल्पस्त्वं क्रीडसि तथा तद्विषयं मद्गुणस्वरूपसृष्ट्यादिलीलाविषयां बुद्धिं ज्ञानं मयि धेहि अर्पय ॥ २७ ॥

भगवच्छिक्षितमहं करवाणि ह्यतन्द्रितः ।
नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥ २८ ॥
यावत् सखा सख्युरिवेश ते कृतः प्रजाविसर्गेविभजामिभोजनम् ।
अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोऽजमानिनः ॥ २९ ॥

श्रीभगवानुवाच

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गञ्च गृहाण गदितं मया ॥ ३० ॥

भाषाटीका ।

ब्रह्मो वाच हे भगवान् आप सर्व भूतों के अध्यक्ष हैं । और सब की गुहा (अन्तः करण में) अव स्थित हैं । आप अपने अप्रति रुद्ध ज्ञान से सबका चिकी र्षित जान ते हैं ॥ २४ ॥

हे नाथ । तथापि मैं याचना करता हूं मेरा नाथित पूर्ण कीजिये कि जिससे मैं अरूपी आपके पर अवर रूपजानलूं ॥ २५ ॥

हे माधव ! अमोघ संकल्प आप अपनी माया के योग, नानाशक्त्युपबृंहित इस जगत् को विलोप करते सृष्टि करते पालन करते अपने आप उर्णा नाभि (कमरी) के समान क्रीडा करते हैं। उस विषय की बुद्धि मुझ दीजिये ॥ २६ ॥ २७ ॥

भगवत् शिक्षित को मैं अतंद्रित (अनलस) होकर करता, प्रजा सर्ग की चेष्टा करता, तुम्हरी अनुग्रह से बद्धनहोऊं ॥ २८ ॥

हे ईश ! आपने मुझे अपने सखा के समान प्रीति की है अतः यह प्रार्थना है कि जब तक मै उत्तम मध्यम भेद से जगत्सृष्टि का सृजन करूं आप के परि कर्म मे स्थित अपने को स्वतंत्र अज मान कर समुन्नद्ध मदनहो ॥ २९ ॥

श्री भगवानुवाच जो मेरा परम गुह्य विज्ञान सहित ज्ञान है रहस्य और उसके अंग है, उन को ग्रहण कर मै कहता हूं ॥ ३० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तत्वज्ञानेन तत्राह, यस्मादेवम्भूतात् यथानुग्रहात् प्रजासर्गमीहमानः कुर्वन्नपि अहंकारादिभिर्बद्धो न भवेयमिति ॥ २८ ॥

अवश्यञ्च मदो भविता स तु कश्चित् कालं मा भूदिति प्रार्थयते यावदिति । भो ईश ते त्वया लौकिकस्य सख्युः सखेवाहं कृतः करस्पर्शादिना समत्वेन सम्मानितः सन् प्रजासर्गरूपे तव परिकर्मणि सेवायां स्थितोऽविक्लवोऽव्याकुल एव यावज्जनं विभजामि उत्तम मध्यमादिभेदेन सृजामि तावत् त्वत्सन्मानदानादहमव्ययः स्वतन्त्र इति मानिनो म समुन्नद्ध उत्कटो मदो मा भूत् । यद्वा मदो मा समुन्नद्ध मा समुन्नह्यताम् उद्रिक्तो न भवेदित्यर्थः ॥ २९ ॥

ज्ञानं शास्त्रोत्थम् विज्ञानअनुभवः । रहस्यं भक्तिः सुगोप्यमपि वक्ष्यामीत्यादिनिर्देशात् । तस्याङ्गं साधनम् ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

अन्यदपि प्रार्थयते भगवच्छिति हेभगवन् शिक्षितं त्वया प्रदर्शित प्रकारं प्रजासर्गमतंद्रितः अनलसः सन्करवाणि एवमीहमानः कुर्वाणः यदनुग्रहाद्यस्य भगवतोनुग्रहाद्यध्येयं बद्धो नभवेयं तथानुगृह्णीष्वेत्यर्थः ॥ २८ ॥

अवश्यं प्रजाः सृजतो मे मदोभविता समाभूदिति प्रार्थयते यावदिति भोहे भगवन् ते त्वया लौकिकस्य सख्युः सखेवाहं कृतः करस्पर्शादिना संमानितः प्रजाविसर्गे प्रजासर्गरूपे परिकर्मणि परिचर्यायां अविक्लवः धीरः अव्याकुलः एव यावज्जनं विभजामि उत्तम मध्यमादिभेदेन सृजामि तावत्त्वत्परिचर्यावधि अजमानिनः जगत्स्रष्टारं मामभ्यमानस्य मे मम समुन्नद्धमदः प्रभूतमदः त्वत्प्रसादान्मा भूदित्यर्थः ॥ २९ ॥

एवं प्रार्थितो भगवान् तमनुग्रहन्परावररूपप्रकाशकं चतुःश्लोक्यात्मकं भागवतमाह ज्ञानमिति ज्ञानं प्राधान्येन ज्ञातव्यं भगवत्स्व रूपविषयकं ज्ञानं तदंगमप्रधानतया ज्ञातव्यचिदचित्स्वरूपविषयकंचज्ञानंमयागदितं तत् मे मत्तः गृहाण कथं भूतं ज्ञानं परमगुह्य-मति गोप्यं विज्ञानसमन्वितं विज्ञायतेऽनेनेति विज्ञानं शास्त्रं योगश्च ताभ्यांसहितं सरहस्यं समन्त्रकं ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

तादृशमनीषाप्रयोजनमाह भगवच्छिक्षितमिति यदनुग्रहाद्यस्यामनीषाया आनुकूल्येनमहद्यावदंतं स्थितोऽहंभगवताशिक्षितंकरवाणिय एक यपदनुग्रहाच्चप्रजासर्गमाहमानः कुर्वाणोनबध्येयं तादृशींमनीषां यस्यभगवतोऽनुग्रहाच्चनबध्येयंतेनभगवताशिक्षितमेवंकरवाणीतिवरांतर प्रार्थनंवा ॥ २९ ॥

इदानींबंधमूलाहंकारनाशंप्रार्थयतेइत्याह यावदिति ईश्वरोयथासखाराजादिःस्वोककार्यैः सख्यर्जनपदाद्यधिकारंददाति तथातेस्वया प्रजाविसर्गेकृतोऽधिकृतोऽविकलवस्त्वत्प्रसादाद्दैन्यहीनस्तेतवपरिकर्मणिजगत्सृष्ट्यादिशुश्रूषाकर्मणिस्थितो ऽहंयावद्रुद्रादिप्रजानांस्वहस्त खातवेवंपदंतवायंभागइत्यादिरूपंभोजनंविभजामिविभज्याविभज्यददामि तावन्मच्छतायुःपर्यन्तमजमानिनः आत्मसर्वाधलक्षणात्वज्जातोऽहं इत्याभिमानवतोमेसमुन्नद्धमदः समुत्पन्नोहंकारोजगतः स्रष्टाहमित्यादिलक्षणोमाभूदित्यन्वयः ओदर्वामिन्यथासख्युर्व्यापारेऽधिकृतः सखातात्पर्यात्सत्कार्यंकरोति तथाहमपित्वत्प्रजासर्गेऽधिकृतोयावज्जन्यतइतिजनोजन्यपदार्थस्तंविभजामि सुरनरतिर्यगादिरूपेणोत्पादयामि तावत्समुन्नद्धमदोमाभूदितिवा ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

भगवच्छिक्षितमित्यत्रोपदेश एतन्मतं समातिष्ठेत्यादिना भविष्यति ॥ २८ ॥

यावदिति स्रष्टृत्वावस्थानानन्तरं तु यावदधिकारिकाणामिति न्यायेन मुक्तिरेव मम भविष्यतीति भावः ॥ २९ ॥

अथ तत्र परमभागवताय ब्रह्मणे श्रीमद्भागवताख्यं निजं शास्त्रम् उपदेष्टुं तत्प्रतिपाद्यतमंवस्तुचतुष्टयं प्रतिजानीते ज्ञानमित्यादि षट्कम् मे मम भगवतो ज्ञानं शब्दद्वारा याथार्थ्यनिर्द्धारणं मया गदितंमत्तृगृहाण इत्यन्यो न जानामीति भावः यतः परमगुह्यं ब्रह्मज्ञा नादपि रहस्यतमं, मुक्तानामपि सिद्धानामित्यादेः तच्च विज्ञानेन मदनुभवेनापि युक्तं गृहाण न चैतावदेव किञ्च सरहस्यं तत्रापि रह- स्यं यत् किमप्यस्ति तेनापि सहितम् तच्च प्रेमभक्तिरूपमित्यग्रेव्यञ्जयिष्यते तथा तदङ्गञ्च गृहाण तच्च स्वतित्वपराधाणये विघ्ने न क्षुभितिविज्ञानरहस्ये प्रकटयेत् तस्मात्तस्य ज्ञानस्य सहायञ्च गृहाणेत्यर्थः तच्च श्रवणादिभक्ति रूपमित्यग्रेव्यञ्जयिष्यते यद्वा सरहस्य मिति तदङ्गस्यैव विशेषणं द्वयं सुहृदोरिव मिथः संवर्द्धकयोरेकत्रावस्थानात् ॥ ३० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी

क्रीडायामपि वरद्वयं प्रार्थयतःशिक्षां गर्वाभावं च तत्र प्रथमं शिक्षामाह भगवच्छिक्षितामिति भगवता अहंशिक्षणीयः एवं प्रकारेण सृष्टिं कुर्विति शिक्षानामबोधिका क्रिया विषयांतरव्युदासेन अभीष्टविषयपरा तस्याः कर्त्ताशिक्षकः शिक्षतस्तदाश्रयः तत्र क्रियाया गुणभूताया अपिकर्मत्वं विवक्षितायां कर्मभावं परित्यज्य आश्रयभावमेवावलंबते स्वक्रिया तस्यास्त्वाश्रयः कर्मभावमवलंबते पचने शिक्षितो देवदत्तोलिखनेशिक्षित इति प्रकृते तु क्रियायाः कर्मत्वेनैव विवक्षितत्वात् तादृग्ध्य एव आश्रयतां प्राप्तः नतु तदाश्रयो ब्रह्मा मम विषयो भगवत्रूपः तथा सति तस्मिन् अर्गतयथाशिक्षाउचिता तथा कुर्वित्यर्थः पश्चात्तथा शिक्षां प्राप्य यथोचितं मया कर्त्तव्यं यथा फलकादौ प्रतिबालकशिक्षायां गुर्वादिरेव प्रथमतोऽक्षराणि लिखति तदुपर्येव बालकः तथा कुलिखालनं करोति हस्ते धृत्वा अंगुलीचालनं गुरौ प्रयासाधिक्यजनकं भवति फलकेतु सुगमं संस्कारेण हृदये तदुल्लेखापेक्षय क्रियामपि तत्र संपादयिष्यामि जगत्येव तदुल्लेखनं सुगमं ममापि हितकरं अद्यापि मानेन पदार्थकर्त्तारो न बध्यन्ते तथाऽहमपि भगवदीयेन प्रकारेण निष्पादितं जगत्तेनैव प्रकारेण स्वक्रियामपि तत्र संपादयिष्यामि अग्रेशिक्षार्थं नत्वेवं करणे आलस्यं भवति ज्ञात्वा करणेनालस्यमत आहअनंन्दित इति तन्द्रामप्राप्त एवाहं करिष्यामि युक्तोयमर्थः भगवताशीक्षितेन कस्यचित्तन्द्रा भवति ननु किमित्येवं प्रार्थ्यते तत्राहमीहमान इति प्रजासर्गे ईहमानः निष्पादनाप्रवृत्तः यस्य समीक्षणास्य भगवतो वा अनुग्रहान्नबध्येयं अन्यथाकरणादेवबंधः वैषम्यनैर्घृण्ये प्रजासर्गे भवतः ततो बंधः शिक्षायां तु नास्य वैषम्यं नैर्घृण्यम् ॥ २८ ॥

एवं क्रियायाःक्रियांप्रार्थयित्वातथाकरणे यो दोषः तदभावं प्रार्थयते यावत्सखेति सखा सख्युर्यांवत्करोति तदा भगवान्मांकृतवान् ममपुरस्कारंवाकिमतो यद्येवं तत्राह प्रजाविसर्गे विभजामि भोजनं इति यदा सख्युः स्वसाम्य मापादयति सखायं स्वसमानं करोति वस्तुतश्चिदानंदतया समानता तत्र भगवानृतदा ब्रह्माचिद्रूपं इत्येवं वस्तुतः सत्यपि क्रियाज्ञानशक्ती भगवत्येव सिद्धे इति इदानीं भगवान् क्रियाज्ञानादिभिः समानं कृतवान् तदा सर्वशक्तिसंपन्नः विविधसर्गे प्रजाः विभजामि सत्वरजस्तमो गुणभेदेन ऐश्वर्यादिधर्मेषु उच्चावच भेदेन धर्मादिपुरुषार्थोपयोगिभेदेन च प्रजाविभजामि तेषां भोजनं भोग्यवस्तूंश्च विभजामि प्रजासृष्टिसमयं एव तेषांभोजनं विभजामि यद्यप्यत्र तथा ते त्वया कृतं इति नास्ति तथापि अर्थात् यावत्सखा सख्युरित्युक्ते करोतीति प्राप्यते तथा इवेति पदेनापि तावत्प्राप्यते ततोमन्यूनता कोचित्तुयावद्विभजामीति योजयंति तावन्मदः मासमुन्नद्ध इति संबंधं च वारयति तत्रापि तावदित्यध्याहारस्तुल्यः कालावच्छे- देन च महाभावप्रार्थनायुक्ता ततोपि किमत आह ते परिकर्मणि अविक्लवश्च स्थितः तत्सेवारूपे आज्ञारूपे वा कर्मणि स्थितः तमेते अयः

श्रीमद्वल्लभाचार्यकृत सुबोधिनी

…र्थाः सख्येन यथाकिलामः प्रजाविविभागसामर्थ्यं तव सेवायां चाविक्लवः सर्वेषु एतद्वयं यद्यपि गुणभूतं तथापि सद्गुणस्य तु फलवाद्दोषरूपं भवति अत त्रिभिर्दोषैः अजमानिनः अहं न कस्माकात्‌ः अत एवाहमिति भगवत्प्रसादात्‌ माता एते गुणाः दूरं भगवतः सकाशात्स्वस्य जन्मापि न मन्यते तादृशस्य सम्यगुणको मदो भवति समेमाभवत्विति प्रार्थना एवं परावरज्ञानं क्रीडाज्ञानं शिक्षापणं भावश्चेति चत्वारः प्रार्थिताः तत्र क्रमाद्वचानद्वये श्लोकद्वयं शिक्षायां चतुश्लोकी अनेन गर्वाभाव इ र्थितम इ ोकः ॥ २९ ॥

एवं सप्तभिः श्लोकैः चतुर्णामुत्तरं भवति तत्र प्रथमं ज्ञानद्वये उत्तरमाह ज्ञानमिति मे पुरुषोत्तमस्य यद्वज्ञानं तत्परमं गुह्यं वक्तव्यं न भवति यादृशं मां पश्यसि तादृश एवाहं पुरुषोत्तम इदमेव मायादिरूपं अंतिमं रूपं च इदमन्यः कोपि न जानाति अतो मयैव गदितं सामान्यतो निरूपितं त्वं गृहाण भगवद्बुद्धेसिद्धं भगवद्गुणज्ञानावतारकरूपं भगवद्वरं गृहाणेत्यर्थः भगवतो हि ज्ञानं गदितमपि कृपाव्य-तिरेकेण न प्राप्यत इति सिद्धवत्कारेण यदभाह गृहाणेति उपदेशपूर्वकं भगवानेव ब्रह्मणे ज्ञानं दत्तवानित्यर्थः तस्य ज्ञानस्य परिकरमाह सविज्ञानसमन्वितमिति विविधं ज्ञानं विज्ञानं अस्यानुभवस्य ज्ञातत्वात्‌ अस्यैव ज्ञानरूपत्वात्‌ विज्ञानं नानुभवः किंतु अखिलसात्वतांपति मित्यादि यत चतुष्टयज्ञानं विज्ञानं तेन समन्वित ज्ञानं तस्य रहस्यं सुनंदनंदादिवेष्टितत्वं भगवद्भक्तिकारीति यावत्‌ तस्यांगंभूत्यप्रसादाभि मुख्यं इत्यादिभिः निरूपितानि प्रसादादीनि चकारस्त्वनुक्तसर्वसमुच्चयार्थः किंबहुना यत्किंचित्त्वया वैकुंठे दृष्टं तस्य सर्वस्य ज्ञानं तव-भवत्वित्यर्थः ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

किञ्च भगवता शिक्षितं करवाणीति कामपि स्वभजनशिक्षां गुरुः शिष्यायेव मह्यं देहीति भावः । यतस्त्वदनुग्रहात्‌ प्रजासृष्टिम्‌ ईह-मानः कुर्वन्नपि अहंकारादिभिर्न बध्येयं बद्धो न भवेयम्‌ ॥ २८ ॥

मनोवाञ्छितमभिव्यञ्जयन्‌ प्रार्थयते यावदिति । हे ईश ते त्वया सख्युः सखेव दासाभासोऽप्यहं कृतः करस्पर्शादिना व्यवहृतः अतः सख्यभक्तिमेवाहं प्राप्नुयामिति । किञ्च यावदधिकारमवस्थितिराधिकारिकाणामिति न्यायेन स्वायुःपर्यन्तं यावत्‌ प्रजानां विसर्गे विवि धसृष्टौ भाः परमेश्वर जनं विभजामि उत्तमाधममध्यमभेदेन विभक्तं करोमि । कीदृशः ते तव परिकर्मणि परिचर्यायाम्‌ अविक्लवोऽव्या-कुलः सावधानतया स्थितः सन्नित्यर्थः तावत्‌ समुन्नद्ध उत्कटो मदो मे मम माभूत्‌ ॥ २९ ॥

अत्र परावरं यथा रूपं जानीयामित्यनेन तव अप्राकृतं रूपं प्राकृतञ्च रूपं कीदृशमिति, यथात्ममायायोगेनेत्यनेन तव माया योगमाया च कीदृशीति, यथा क्रीडसीति मायाधिकृतेषु योगमायाधिकृतेषु च लोकेषु तव केन प्रकारेण क्रीडेति, भगवच्छिक्षितमहं करवाणि ह्यत-न्द्रितः इत्यनेन मदभीष्टसिद्ध्यर्थं त्वच्छिक्षितं किं मम कर्तव्यमिति ब्रह्मणा क्रमेण पृष्टस्य वस्तुचतुष्टयस्य चतुःश्लोकया क्रमेणैवोत्तरं दातुं भगवान्‌ प्रतिजानीते ज्ञानमिति एतदेव भगवद्वक्तोत्तरचतुष्टयात्मकमेव श्रीभागवतं शास्त्रं श्रीभगवत्प्रोक्तत्वेन प्रसिद्धमित्याहुः । न केवलं मद्रूपस्य ज्ञानमेव तुभ्यं ददामि अपि तु विज्ञानेनानुभवेन समन्वितं यत्‌ तदपि । किञ्च परमगुह्यं निर्विशेषब्रह्मज्ञानादपि अतिरहस्या-र्विान भावः । किञ्च रहस्यं प्रेमभक्तिञ्च स प्रसिद्धस्त्वं गृहाण सुगोप्यमपि वक्ष्यामीत्यादिनिर्देशात्‌ तस्य रहस्यत्वं ज्ञेयम्‌ तस्य रहस्य-स्यांगं साधनभक्तियोगस्तच्चेति त्वया अपृष्टमपि एतद्द्वयं कृपयैव वक्ष्यामि किंवा भगवच्छिक्षितमहं करवाणीत्यनेनैवैतत्त्रिकमपि त्वया पृष्टमेवेति चतुर्थश्लोक एव रहस्यत्वाद्बहिरंगलोकागम्यत्वयैव वक्ष्यामि अत्र रहस्यतदंगयोरेतयोर्नामाग्रहणं प्रथमोक्तात्‌ परमगुह्यतज्ज्ञा-नादप्यतिगोप्यत्वम्‌ उत्कृष्टत्वञ्च बोधयतीति ज्ञेयम्‌ मया गदितं गृहाणेत्यवधानमपि ब्रह्मणो विशेषतोऽवधापयति ॥ ३० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

भगवता त्वया शिक्षितमुपदिष्टं प्रजासर्गमतन्द्रितो ऽनलसोऽहं करवाणि करिष्यामि भगवच्छिक्षानुरूपमीहमानः प्रजासर्गे चेष्टां कुर्वाणः यस्मात्त्वदनुग्रहात्‌ हा हेतौ तत्र जनिष्यमानेनाहंकारादिना न बध्येयं बद्धो न भवेयम्‌ तमनुग्रहं कुर्विति शेषः ॥ २८ ॥

प्रजासर्गकर्तृत्वरूपं मदो भविता स कोपि कालं माभूदिति प्रार्थयते यावदिति भो ईश ते त्वया लौकिकस्य सख्युः सखेवाहं कृतः मत्पाणिग्रहणेन कृतः प्रजासर्गरूपे तव परिकर्मणि परिचर्यायां स्थितः अविक्लवः अव्याकुलः यावज्जनं विभजामि उत्तममध्यमादिभेदेन सृजामि तावत्‌ त्वत्परि चर्यावधित्वात्संमानादहमप्यजः स्वाधीन इति मानिनो मे समुन्नद्धः उत्कटो मदो माभूत्‌ ॥ २९ ॥

एवं ब्रह्मणा प्रार्थितः आह भगवान्‌ ज्ञानमिति यत्‌ परमगुह्यं परमगोप्यं सरहस्यं रहस्येन भक्तियोगेन सहितं यस्मिन्‌ जाते भक्ति योगो दृढो भवेदेवं भूतमित्यर्थः सविज्ञानं विज्ञानेन विविधगुणशक्तिविषयकेणावांतरज्ञानेन सहितम्‌ एवं भूतमस्माद्विषयकं ज्ञानं तदंगं तत्प्रतिपादकचतुःश्लोक्यात्मकं शास्त्रं यद्वा तस्यागमुपायं च मया गदितं मे मत्तः गृहाण ॥ ३० ॥

यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ ३१ ॥
अहमेवासमेवाग्रे नान्यद्यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥ ३२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ननु त्वद्दर्शनेऽप्यसमर्थोऽहं कथं ज्ञानाधिकारी स्यां तत्राह । यावान् स्वरूपतः । यथाभावः यादृक् सत्तावान् यानि रूपाणि गुणाः कर्माणि च यस्य ॥ ३१ ॥

एतदेव सम्यगुपदिशन् यावानित्यस्यार्थं स्फुटयतिअहमेवाग्रे सृष्टेः पूर्वम् आसं स्थितः । नान्यत् किञ्चितयत् सत् स्थूलम् असत् सूक्ष्मं, परं तयोः कारणं प्रधानं, तस्याप्यन्तर्मुखतया तदा मय्येव लीनत्वात् । अहञ्च तदा आसमेव केवलं न त्वान्यदकरवम् । पश्चात् सृष्टेरनन्तरमप्यहमेवास्मि, यदेतद्विश्वं तदप्यहमेवास्मि । प्रलये योऽवशिष्येत सोऽप्यहमेव । अनेन चानाद्यनन्तत्वात् अद्वितीयत्वाच्च परिपूर्णोऽहमित्युक्तं भवति ॥ ३२ ॥

श्री राधारमणदासगोस्वामिविरचित दीपिन्याख्यतट्टिप्पणी ।

यानि रूपाणीत्यादि यादृग्रूपो यादृग्गुणो यादृक्कर्मा चेत्यर्थः ॥ ३१ ॥

अहमेवासमित्यादि चतुःश्लोकीभागवतम् पश्चात् सृष्टेरनन्तरमप्यहमेवास्मीति न त्वङ्कुरे जाते बीजवदनुपलम्भः कारणातया पृथगवस्थानात् पूर्णप्रच्युतस्वरूपत्वम् उक्तम् यदेतद्विश्वं तदप्यहमेवास्मीति अनेन प्रपञ्चस्य वागालम्बनमात्रत्वमुक्तं वस्तुतः सर्वं ब्रह्मतन्मात्रमित्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका

कार्त्स्न्येन त्वदुदितग्रहणे नाहं प्रभुरित्याशंकमानं प्रत्याह यावानिति अहं सत्यं ज्ञानं यः सर्वज्ञः इत्यादिश्रुत्युक्तज्ञानस्वरूपज्ञानगुणकोऽहं यावान् यत्परिमाणकः अपरिच्छिन्नः यथा भावः यादृक्स्वभावः स्वाभाविकी ज्ञानबलक्रियाचेत्युक्त सर्वज्ञत्वादि गुणकः यद्रूपगुणकर्मकः रूपं चिदचिद्वस्तु गुणास्तदीयगुणाः सच सद्वारको भगवद्गुणः काठिन्यवान् यो बिभर्तीतिवत् कर्म जगद्व्यापारः यानि रूपगुणकर्माणि यस्य स बहुव्रीहिः तथैव तत्त्वविज्ञानं मत्स्वरूपरूपगुणविभूति याथात्म्यविज्ञानं मदनुग्रहान्मत्प्रसादात्तेतास्तेतवास्तु भवतु ॥ ३१ ॥

यावानित्यस्यार्थमेव स्फुटयन्प्राधान्यतया ज्ञातव्यपरशब्दोक्तं भगवत्स्वरूपमाह अहमिति मद्सत्परं चेतनाचेतनविलक्षणं यद्वस्तु तदहमेवासमभवम् अन्यत्रचिदचिद्विलक्षणं न भवति अन्यत्सर्वं चिदचिदन्तर्गतं अहमेव तद्विलक्षण इत्यर्थः अग्रे सृष्टेः प्राक् यद्वस्तु पश्चात्सृष्टिकाले जातं सर्वमेतत्कार्यजातं चतदप्यहं कारणावस्थचिद्रूपः कार्यं चिदचिद्रूपश्चाहमित्यर्थः पुनः संहारकाले योऽवशिष्येत सहि सोऽप्यहमेवेत्यर्थः प्रकृतिपुरुषविलक्षणस्तच्छरीरकश्चाहमेक एव य एव सर्वज्ञः सर्वशक्तिः सर्वेश्वरः सृष्टेः प्रागविभक्तनामरूपसूक्ष्मप्रकृति पुरुषशरीरकः सृष्टिकाले विभक्तनामरूपप्रकृतिपुरुषशरीरकः सपर्यन्तनामरूप आसंसंहारविषयोऽप्यहमेवेत्यर्थः एवं कारणावस्थायांविभक्तनामरूपप्रकृतिशरीरकत्वेन कार्यावस्थायां विभक्तनामरूपप्रकृतिपुरुषशरीरकत्वेनावस्थितस्यापि परमात्मनः स्वशरीरभूतचेतनाचेतनगताज्ञत्वदुःखित्वकर्मवशत्वपरिणामित्वजडत्वादिभिर्विकारैः जीवात्मनस्तच्छरीरगतबालत्वयुवत्वस्थविरत्वादिभिरिवास्पर्शात् चेतनाचेतनवैलक्षण्यमविहितमेवावतिष्ठते कार्यत्वं कारणत्वं च स्वशरीरभूतप्रकृतिपुरुषद्वारकमुपपन्नमित्यत्र भाष्यादिषु विस्तरोद्रष्टव्यः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

यत्किञ्चित्पृष्टंयःकश्चित्परिहारस्त्वतः परावरेहतिप्रार्थितवरदानप्रकारं वक्ति ज्ञानमिति नियतमुक्तिप्रापकेणास्वविषयेणविज्ञानेन समन्वितमेव रूपविषयं सरहस्यमुपनिषत्संवादसहितं यज्ज्ञानंतस्यज्ञानस्ययदंगंचतन्मयागदितंगृहाणेत्यन्वयः उपनिषदोवाक्यार्थरूपं बोद्धव्यमुपासनेयस्यादित्यतउक्तं परमेति ज्ञानंशास्त्रार्थविषयं विज्ञानंस्वानुभवरहस्यवक्ष्यमाणयानंगादितामित्यनेनसूचितयायेनयेनयथाज्ञात्वाविमुक्तिराप्यते तद्विज्ञानमितिप्रोक्तं ज्ञानंसाधारणंस्मृतमितिस्मृत्यानिरस्तम् ॥ ३१ ॥

यथात्ममायायोगेनेति यावच्चितवरप्रदानप्रकारमाह यावानिति देशकालव्याप्त्या यावाननन्तपरिमाणोपेतोऽहं यथाभावो यादृशसत्ताकः निरुपाधिकसत्तोपेतः यद्रूपगुणकर्मकः यावदवतारः यावद्गुणः यादृक्कर्मा चाहं मदनुग्रहात्तथैव तत्त्वविज्ञानमस्त्वित्यन्वयः अनेन सोपाधिकरूपं व्यावर्तयति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र साध्ययोर्विज्ञानरहस्ययोराविर्भावार्थमाशिषं ददाति यावानहमिति यावान् स्वरूपतो यत्परिमाणकोऽहम् यथा भावः सत्ता वस्त्वेति यल्लक्षणोऽहमित्यर्थः । यानि स्वरूपान्तरङ्गाणि रूपाणि श्यामचतुर्भुजत्वादीनि गुणा भक्तवात्सल्याद्याः कर्म्माणि तत्तल्लीलाः यस्य सः यद्रूपगुणकर्म्मकोऽहम् तथैव तेन तेन प्रकारेणैव तत्त्वविज्ञानं याथार्थ्यानुभवो मदनुग्रहात्ते तवास्तु भवतादिति एतेन चतुःश्लोकार्थस्य निर्विशेषपरत्वं स्वयमेव परास्तम् । वक्ष्यते च चतुःश्लोकीमेवोद्दिशता श्रीभगवता स्वयमुद्धवं प्रति पुरा मयेत्यादौ ज्ञानं परं मन्महिमावभासमिति । तत्त्वविज्ञानपदेन रूपादीनामपि स्वरूपभूतत्वं व्यक्तम् । अत्र विज्ञानार्थाः स्पष्टा रहस्यार्थाश्च परमानन्दात्मकतत्तद्याथार्थ्यानुभवेनावश्यप्रेमोदयात् ॥ ३१ ॥

तदेवाभिधेयादिचतुष्टयं चतुःश्लोक्या निरूपयन् प्रथमं ज्ञानार्थं स्वलक्षणं प्रतिपादयति अहमेवासमिति । अत्राहंशब्देन तद्वक्ता मूर्त्त एवोच्यते । न तु निर्विशेषं ब्रह्म तदविषयत्वात् आत्मज्ञानतात्पर्यकत्वे तु तत्त्वमसीतिवत् त्वमेवासीरित्येव वक्तुमुपयुक्तत्वात् ततश्चायमर्थः—सम्प्रति भवन्तं प्रति प्रादुर्भवन्नसौ परममनोहरश्रीविग्रहोऽहमेवाग्रे महाप्रलयकालेऽप्यासमेव । वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शंकरः एको नारायण आसीन्न ब्रह्मा नेशान इत्यादिश्रुतिभ्यः । भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुरित्यादि तृतीयात् । अतो वैकुण्ठतत्पार्षदादीनामपि तदुपाङ्गत्वादहंपदेनैव ग्रहणम् । राजासौ प्रयातीतिवत् । ततस्तथाश्च तद्वदेव स्थितिर्बोध्यते तथाच राजप्रश्नः स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः मुक्त्वाऽऽत्ममायां मायेशः शेते सर्वगुहाशयः ॥ इति श्रीविदुरप्रश्नश्च तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः । तत्रेमं क उपासीरन् क उस्विदनुशेरते ॥ इति काशीखण्डेऽप्युक्तं श्रीध्रुवचरिते न च्यवन्तेऽपि यद्भक्ता महत्यां प्रलयापदि । अतोऽच्युतोऽखिले लोके स एकः सर्वगोऽव्यय इति अहमेवेत्येवकारेण कर्त्रन्तरस्याकर्तृत्वादिकस्य च व्यावृत्तिः आसमेवेति तत्रासम्भावनाया निवृत्तिः तदुक्तमयद्रूप गुणकर्म्मक इति अतएव यद्वा आसमेवेति ब्रह्मादिबहिर्जनज्ञानगोचरसृष्ट्यादिलक्षणक्रियान्तरस्यैव व्यावृत्तिः न तु स्वान्तरङ्गलीलाया अपि । यथाऽधुनाऽसौ राजा कार्यं नाकाश्चित् करोतीत्युक्ते राजसम्बन्धि कार्यमेव निषिध्यते न तु शयनभोजनादिकमपीति तद्वत् । यद्वा असगतिर्दोष्यादानोऽविद्यस्मात् आसं साम्प्रतं भवता दृश्यमाने विशेषैरेभिरप्यपि विराजमान एवातिष्ठामिति निराकारत्वादिकस्यैव विशेषतो व्यावृत्तिः । तदुक्तमनेन श्लोकेन साकार निराकारविष्णुलक्षणाकारैर्यामुक्ताफलटीकायामपि—नापि साकारैर्ब्रह्मादिभिः तेषामाकारा तिरोहितत्वादिति । एतदेकश्रुतिश्च—आत्मैवेदमग्र आसीत् पुरुषविध इति । एतेन प्रकृतीक्षणतोऽपि प्रागभावात् पुरुषादप्युत्तमत्वेन भगवज्ज्ञानमेव कथितम् । ननु कांश्चिच्छ्रुतिर्विशेषमेव ब्रह्मासीदिति श्रूयते, तत्राह, सत् कार्य्यम् असत् कारणं तयोः परं यत् ब्रह्म तच्च मत्तोऽन्यत् । काश्चिदधिकारिणः शास्त्रं वा स्वरूपभूतविशेषव्युत्पत्त्यासमर्थं सोऽयमहमेव निर्विशेषतया प्रतिभामीत्यर्थः । यद्वा तदानीं प्रपञ्चे विशेषाभावात् निर्विशेष चिन्मात्राकारेण वैकुण्ठे तु सविशेषभगवद्रूपेणेति शास्त्रद्वय व्यवस्था । एतेन च ब्रह्मणो हि प्रतिष्ठाऽहमित्यत्रोक्तं भगवज्ज्ञानमेव प्रतिपादितम् । अतएवास्य ज्ञानस्य परमगुह्यत्वमुक्तम् । ननु सृष्टेरनन्तरं जगति (जगदिति) नोपलभ्यसे, तत्राह पश्चात् सृष्टेरनन्तरमप्यहमेवासमेव, वैकुण्ठे तु भगवदाद्याकारेण प्रपञ्चे त्वन्तर्याम्याद्याकारेणेति शेषः । एतेन, सृष्टिस्थितिप्रलयहेतुरहेतुरस्येत्यादिप्रतिपादितं भगवज्ज्ञानमेवोपदिष्टम्। ननु सर्व्वत्र घटपटाद्याकारा ये दृश्यन्ते ते तु त्वद्रूपाणि न भवन्तीति तत्रापूर्णत्वप्रसक्तिःस्यादित्याशंक्याह । यदेतत् विश्वं तदप्यहमेव मदनन्यत्वान्मदात्मकमेवेत्यर्थः । अनेन, सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः । समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत् ॥ इत्याद्युक्तं भगवज्ज्ञानमेवोपदिष्टम् । तथा प्रलये योऽवशिष्येत सोऽहमेवास्म्येव । एतेन, भवानेकः शिष्यते शेषसंज्ञ इत्याद्युक्तं भगवज्ज्ञानमेवोपदिष्टम् ॥ तथा पूर्वम् स्वानुग्रह प्रकाश्यत्वेन प्रतिज्ञातं यावत्त्वं सर्व्वकालदेशापरिच्छेद्यत्वज्ञापनयोपदिष्टम् ॥ एवं नान्यद्यत् सदसत् परमित्यनेन ब्रह्मणो हि प्रतिष्ठाहमिति ज्ञापनया यथाभावत्वं सर्व्वाकारावयविभगवदाकारनिर्देशेन विलक्षणानन्तरूपत्व ज्ञापनया यद्रूपत्वं, सर्व्वाश्रयतानिर्देशेन विलक्षणानन्तगुणत्वज्ञापनया यद्गुणत्वं, सृष्टिस्थितिप्रलयोपलक्षितविविध क्रियाश्रयत्वकथनेनालौकिकानन्तकर्मत्वज्ञापनया यत्कर्मत्वञ्च ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

द्वितीयज्ञानमाह यावानहमिति प्रमाणतो यावानहं परिमाणतोऽपि यथाभावः यादृशो ममकारणभूतो भावः सर्वकार्यकरणाय सर्वशक्तिरूपं यावंति रूपाणि गुणाः कर्माणि च यस्य यानि वा गुणादीनि एतदपि एवंवत् तदाह तथैव ते मदनुग्रहात्तत्त्वविज्ञानम् अस्तु तत्त्वतो विशेषेण ज्ञानं सर्वेषां याथार्थ्यं तव स्फुरत्वित्यर्थः एवं ज्ञानद्वयनिरूपणमित्युक्तवाक्यद्वयनिरूपणे वा ब्रह्मणो हृदये तदनुग्रहात्सम्पाद ॥ ३१ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

स्वयमेव दत्वा शिक्षार्थं चतुःश्लोकीमाह अहमेवासमेवाग्र इति यादृक्‌रूपं भगवान् जगत्करोति तच्छिक्षयाप्रार्थितं तत्राह अहमेव तद्रूपो जातः नान्यदिति अन्यथा साधनं च मम्मायमपि जडदेहादौ मध्ये जीवप्रतीतिर्घटादावाकाशप्रतीतिवत् आधाराधेयभावो बाह्याभ्यन्तरभेदहेतुश्च अयमेवेति स्वरूपतो मूलभूतं जगत्प्रतीतितो मायारूपं अनुप्रवेशको जीव इति सर्वं जगत्सर्वप्रकारेणाह सैवेति ज्ञात्वा स्वस्वरूपमपि तथा ज्ञातव्यं इयमेवशिक्षा एवं मद्रूपं वस्तुजगत् करोति तदागर्भो न भवतीति तद्धेतुभूतो मोहोऽपि न भवति इति पंचश्लोकानामर्थः तत्र सर्वं जगत् कथं भगवानित्याकाङ्क्षायां तज्ज्ञानार्थं तद्धेतुं विस्तरेण वदति सृष्टेः पूर्वं अहमेव एको नारायण आसीन्न ब्रह्मा न च शंकरः वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शंकर इति श्रुतेः सृष्टेः पूर्वमहमेव किं च मत्तोऽपि पूर्वमपि नाशंकनीयं यथा जगतः पूर्वमहं मत्तोऽपि पूर्वमन्यदिति तदेवं भवेत् यदिकदाचिदप्यहं नासं तत्तु मम न संभवति सद्रूपेणैव निरूपणात् सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतेरामनेन नाग्रे सृष्टेः असद्वा इदमग्र आसीत्ततो वै सदजायतेत्यादीनां पश्चात्प्रतीयमानजगतः पूर्वमेव तादृशरूपेणानवस्थितत्वप्रतिपादकत्वात् अन्यथा असतः सत्ताबोधकत्वे विरोधः नासतो विद्यते भाव इति वाक्यात् नासदासीन्नो सदासीत्तदानीमित्यादि स्तु स्थूलसूक्ष्मकार्यपरत्वं यथा वा इदमग्रे सलिलमासीदिति तु अवान्तरकल्पाभिप्रायेण आपो नाना विधानि जलानि इदं तत्कार्यं च जगत्सर्वं सलिलं प्रलयोदकरूपमेवासीदित्यर्थः अव्यक्तादीनि भूतानीति तु अव्यक्तरूपं ब्रह्मैवालीनत्वकल्पकस्य पश्चादेव सिद्धे पश्चादेव पूर्वलीनत्वं सिध्यति न पूर्वं अनेन प्रकृतिं पुरुषं चेत्यपि निरस्तं मतान्तरत्वात् आसीदिदं ज्ञानमयोऽयं इति वाक्यविरोधाच्च तमसादिति तमोऽपि ब्रह्मैव सर्वतः सुप्तत्वेन साम्यात् न प्रकृतिः सक्रियावरीयः उदकस्पर्शमात्रिति कार्याश्रयप्रयोजकाभावात् तस्याः कार्यैकाश्रयरूपाया अभावात् अगमनजात्युत्तियाद्युत अतस्त्वपि एवमन्यान्यपि वाक्यानि तत्तद्भावप्रकारेण बोधयन्ति पूर्वमेकरूपं भगवति न बाधकानि भवंति अत एव श्रुतिसिद्धत्वादन्यानि तत्काले निषेधति नान्यदिति सदसतोः श्रुतौ पूर्वसिद्धत्वेपि न तदन्यत्वं तदाह यदसदिति सच्छब्देन असच्छब्देन च ब्रह्मैवोच्यत इत्यर्थः योऽस्मात्परस्मात्पर इति परशब्देनापि न कालादिरुच्यते किंत्वहमेव तस्मात्पूर्वमहमेवेति सिद्धम् अभावस्त्वस्मन्मते तिरोभावातिरिक्तो न भवतीति तस्य च भगवच्छक्तित्वात् पूर्ववदिति न्यायेन शक्तिधर्माणामपि तद्रूपत्वाभावेन कालस्यापि निरूपणासमय एव तथा च वचनात् प्रकृति तुल्यत्वेन भगवानेकएव सिद्ध इत्यविवादं किंच पश्चादहं सर्वभवनसमर्थोऽस्मिरूपादेवच्चेष्टावत्प्रादुर्भावः कालस्य पश्चाद्गुणरूपेण शक्तिरूपेण च पश्चात्कालरूपेण स आत्मानं स्वयमकुरुतेति श्रुतेः असतः सत्त्वांगीकाराच्च यदेतदिति परिदृश्यमानं सर्वं चकाराद्परिदृश्यमानमप्रसिद्धं च अनेन जीवा अपि संगृहीताः त्वमेव तदसीति पाठे जीवजडात्मकं सर्वमहमेवेत्यर्थः अयं मुख्यो ब्रह्मवादः ननु पदार्थविरोधे शब्दो न प्रमाणम् भगवांश्च सर्वदोषरहितः विकारादयश्च दोषाः सर्वात्मकत्वे संकोचाभावात् उपदेश्याभावः शास्त्रोच्छेदश्च प्रयोजनाभावात् हिताकरणादिदोषप्रसक्तिः पुरुषान्तरत्वाभावाच्च तस्मादनेकदोषदुष्टत्वात् ब्रह्मवादोऽनुपपन्न इति चेत् मैवं प्रत्यक्षादृष्टविषये पदार्थाः श्रुतिबोधितः परस्परं विरुद्धास्तेनैकदोषं भजन्ति हि उभयोर्वैदिकत्वेन कस्याप्यनियामकः विचारकाणां युक्तिस्तु सोपपत्तिकयाश्रुतेःसदा क्रियाविधायकत्वेतु विकल्पो नैकवाक्यता तुल्याश्रूयते एवं विकल्पाश्च्युतेर्बलात्सर्वैव भगवद्रूपं यथाहस्तादयः पृथक् यथा सर्वविरोधः स्यात् तथैवार्थविचारत्वं सर्वरूपसमर्थत्वं अतो ब्रह्मणि श्रूयते अन्यथा प्रतिभानं यत् उच्चनीचादिभेदेन तथानंतश्च कर्मान्यमेव तथाविधः यत्किंचिद्दूषणं त्वत्रदूष्यं चापि हरिः स्वयं विरुद्धपदः सर्वोपि सर्वमत्रैव शोभते योऽवशिष्येत सोऽस्म्यहमिति उक्तत्वस्य सर्वस्य तिरोभाव प्रापणं यत्तिरोहितं न भवति तिरोभावः तदाश्रयोंशांशभेदेन वा तदप्यहं अस्मीत्यनेन सर्वापत्र क्रिया तद्विषयश्चाहं इति ज्ञायते इति ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

किंच ज्ञानं शब्दद्वारा याथार्थ्यनिर्द्धारणं परोक्षं तच्च किंचित् शुद्धचित्तानामाचिन्तरात्त समभवेदपि । विज्ञानस्वपरीक्षानुभवः मत्स्वरूपस्य याथार्थ्येन साक्षात्कारः स च रहस्यतदङ्गशब्दाभ्यां मत्प्रेमभक्तिसाधनभक्तिभ्यां विना नैव भवतीति बोधयंस्तत्क्रम-मासिपं ददाति यावान् यत्प्रमाणाकारः । यादृशस्थौल्यकार्श्यदैर्घ्यतुङ्गत्वतारोचित्यमर्गान्निवेशविशिष्टावयव इत्यर्थः । यथाभावो यादृशाभिप्रायः । यानि रूपाणि श्यामत्वचतुर्भुजत्वद्विभुजत्वकृष्णत्वरामत्वनृसिंहत्वादीनि गुणा भक्तवात्सल्याद्याः कर्म्माणि लक्ष्मीपरिग्रहगोवर्द्धनोद्धरणादीनि यस्य सः । तथैवेति । येन येन प्रकारेण ममपरिमाणाभिप्रायरूपगुणकर्म्मणयाविर्भवन्ति तेन तेनैव प्रकारेण तत्त्वविज्ञानं तेषां याथार्थ्यानुभवोऽस्तु । तत्राशीर्वादैनैवानुग्रहे व्याख्यातेऽपि पुनर्मदनुग्रहपदोपादानं परमान्तरङ्गमत्कृपाशक्तिवृत्तिविशेषसाधनभक्तिप्रेमभक्त्योः वृद्धितारतम्येनैव मद्रूपगुणादिमाधुर्यानुभवतारतम्यं समुत्पत्स्यमानेऽप्येतस्मादपि मत्स्वरूपाधिकतममाधुर्यं परमदुर्लभं कृष्णस्वरूपं मां व्रजभूमौ त्वं साक्षादनुभविष्यसीति सूचयति । एतेन चतुः श्लोक्या निर्विशेषस्वरूपमात्र-परत्वेनान्यव्याख्यानं स्वयमेव परास्तम् ॥ ३१ ॥

एवं श्लोकाभ्यां देयत्वेन ज्ञानादिकं प्रतिश्रुत्य तत्प्राप्तावाशिषैव योग्यतामापाद्य च प्रथमं ज्ञानमुपदिशन्नेव परावरे यथारूपे जानीयामिति प्रश्नस्योत्तरमाह अहमेवाग्रे सृष्टेः पूर्वमासमिति तर्जन्या स्ववक्षः स्पृशति एवकारेणान्ययोगव्यवच्छेदकेन मद्विजातीयं प्राकृतं वस्तुकिमपि नासीदिति लक्ष्यते अयमर्थः— सम्प्रति भवन्तं प्रति प्रादुर्भवन्नसौ परममनोहराकारो रूपगुणमाधुरीमहोदधिरहमेवाग्रे महाप्रलयकालेऽप्यासमेव वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्कर इति आत्मैवेदमग्र आसीत् पुरुषविध इति पुरुषो ह वै नारायण इति एकोह वै नारायण आसीदिति पुरुषो ह वै नारायणोऽकामयत अथ नारायणादजोऽजायत यतःसर्वाणि भूतानि नारायणः परं ब्रह्म तत्वं नारायणः परम् ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलमिति एको नारायण आसीन्न ब्रह्मा नेशान इत्यादि श्रुतिभ्यः भगवानेक आसीदित्यादि स्मृतेश्च अत्र वैकुण्ठतत्पार्षदादीनामपि तदुपाङ्गत्वादहं पदेनैवग्रहणं, राजाऽसौ प्रयातीतिवत् अतस्तेषाञ्च तदैवावस्थितिर्बोध्यते तथाच राजप्रश्नः स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः मुक्त्वाऽऽत्ममायां मायेशः शेते सर्वगुहाशयः इति ॥ विदुरप्रश्नश्च—तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः । तत्रेमं क उपासीरन् क उस्विदनुशेरते ॥ इति । श्रीस्वामिचरणानां व्याख्या च तत्र प्रलये इमं परमेश्वरं शयानं राजानमिव चामरग्राहिणः के उपासीरन् के वाऽनुशेरते शयानमनुस्वपन्तीत्येषा। काशीखण्डेऽप्युक्तम्

ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥ ३३ ॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥ ३४ ॥

श्री मद्विश्वनाथचक्रवर्ति कृत सारार्थ दर्शिनी

न च्यवन्तेऽपि यद्भक्ता महत्यां प्रलयापदि अतोऽच्युतोऽखिले लोके स एकः सर्वगोऽव्ययः ॥ इति । आसमेवेत्ययोगव्यवच्छेदः असेः सत्त्वार्थकत्वात् तदानीं मद्विधमानताया अभावः सर्वथा नाभूदित्येवार्थप्रतीतेः । अहमेवासमेव न किमप्यकरवमिति क्रियान्तरव्यावृत्तिस्तु वस्तुतो न घटते असतेः सर्वधात्वर्थेष्वेवानुस्यूतत्वात् । पूर्वस्मिन् वर्षे तत्र ग्रामे चैत्र आसीदेवेत्युक्ते चैत्रस्य शयनासनभोजनादिक्रिया नैव व्यावर्त्यन्ते कित्वभाव एवेति । किन्तूक्तिपरिपाट्या घटते च । यथा सन्दर्भे—आसमेवेति ब्रह्मादिबहिर्जनज्ञानगोचरसृष्ट्यादि लक्षणा-क्रियान्तरस्यैव व्यावृत्तिर्न तु स्वांतरंगलीलाया अपि । यथा अधुनाऽसौ राजा न किञ्चिदपि करोतीत्युक्ते राजसम्बन्धि कार्यमेव निषिध्यते न तु शयनभोजनादिकमपीति तद्वदिति दृष्टम् ननु कचिन्निर्विशेषमेव ब्रह्मासीदिति श्रूयते तत्राह । सत् कार्यम् असत् कारणं ताभ्यां परं यद्ब्रह्म तत्र मत्तोऽन्यत् कचिदधिकारिणि शास्त्रे वा स्वरूपभूतनानाविशेषव्युत्पत्त्यसमर्थे सोऽयमहमेव निर्विशेषब्रह्मतया प्रतिभामीत्यर्थः त्वन्तु पूर्वश्लोकोक्तमदाशीर्वादानुग्रहाभ्यां रूपगुणादिविशिष्टमेव मां जानीहीति भावः ननु सृष्टेरनन्तरं जगदेव न तु त्वमुपलभ्यसे तत्रा पश्चात् सृष्टेरनन्तरमप्यहमेवास्म्येवेति वैकुण्ठेषु भगवदाद्याकारेण प्रपञ्चेष्वन्तर्यामिरूपेण यथासमयं मत्स्याद्यवताररूपेण च ननु तर्हि पृथिव्यादिकं देवतिर्यगादिकञ्च त्वं न भवसीति तवापूर्णत्वप्रसक्तिस्तत्राह यदेतच्च व्यष्टिसमष्टिविराणमयं विश्वं तदप्यहमेव मच्छक्ति-जन्यत्वान्ममैव प्राकृतं रूपम् परावरे यथा रूपे जानीयामिति त्वया यदवरं रूपं पृष्टं तदेवेदं त्वं जानीहीत्यर्थः । तथा योऽवशिष्येत भवानेक शिष्यते शेषसंज्ञः इत्याद्युक्तेः परमेश्वरः सोऽहमस्मि । तत्राहमित्यस्य त्रिरावृत्त्या निर्धारणस्य सूचितत्वात् एतद्रूपगुणादिविशिष्टस्य मम त्रैकालिकनित्यस्थित्या पररूपत्वं सृष्टिसंहारयोर्मध्य एव दृश्यमिदं मायिकप्रपञ्चजातमवरं रूपमिति परावररूपयोर्ज्ञानमुक्तम् । विज्ञानन्तु पररूपस्य प्रथमस्यैव तच्च तदेव स्यात् यदा श्रवणकीर्त्तनादिजन्यप्रेमभक्त्या तद्रूपगुणादिमाधुर्यमास्वाद्यमानं स्यादिति चतुर्थश्लोके व्यक्तं भावि ॥ ३२ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

भक्ति योग समन्वितस्य ज्ञानस्य मुख्योपायः ममानुग्रह एवेत्याह यावानिति अहं यावान् यत्परिमाणकः यथा भावः यादृक् सत्ता-वान् यानि रूपाणिगुणाः कर्माणि च यस्य स यद्रूपगुणकर्मकः तथैव तत्तत्त्वविज्ञानं मदनुग्रहात्तेऽस्तु ॥ ३१

अथ संक्षेपतस्तदेव ज्ञानं ज्ञेयवस्तूपदेशद्वारोपादिशन् परावरेरूपे दर्शयति अहमिति सदसतोः स्थूलसूक्ष्मयोः परंबीजभूतं कारणं यदग्रे स्टष्टेः पूर्वं वस्तु तदहमेवासम् नान्यत्किञ्चिदासीत् यच्चपश्चादवशिष्येत सोऽप्यहमस्मि एवं परावररूपो जगदाद्यन्तरूपोऽहमेवा-स्मीत्यर्थः यदेतच्चिदचिदात्मकं विश्वं तदप्यहमेवास्मि विश्वभिन्नाभिन्नस्वरूपोऽस्मीत्यर्थः अनेन परिमाणतोऽपरिच्छिन्नः त्रैकालिकसत्ता वान् जगद्भिन्नाभिन्नस्वरूपः विश्वस्टष्ट्याद्यनुरूपसर्वज्ञत्वादिगुणवान् विश्वकर्माचाहमस्मि तद्विषयकज्ञानवान् ममानुग्रहात् भूत्वा दृढ-विश्वासेन मां भजेत्युपदिष्टम् ॥ ३२ ॥

———

भाषाटीका ।

मैं यावान् (जितना) हूं यथा भाव (जैसी शक्ति वाला हूं, यद्रूप, गुण, कर्म जैसा रूप, जैसे गुण, जैसे कर्म वाला) हूं वह सब तत्व ज्ञान तुझे मेरे अनुग्रह से हो ॥ ३१ ॥

आगे (सृष्टि के पूर्व में) मैंही था, और था ही, यह सत् (स्थूल) असत् (सूक्ष्म) और इन दोनो से पर इनका कारण प्रधा न यह कुछ नहीं था । सृष्टि के पश्चात् भयो जो यह विश्व है मैं ही हूं । प्रलय मे जो अव शेष रहैगा वह भी मैंही हूं ॥ ३२ ॥

———

श्रीधरस्वामिकृत भावार्थदीपिका ।

यथात्ममायायोगेनेत्यनेन मायाया अपि पृष्टत्वात् वक्ष्यमाणोपयोगित्वाच्च मायां निरूपयति ऋतेऽर्थं विनापि वास्तवमर्थं यत् यतः किमप्यनिरुक्तम् आत्मन्यधिष्ठाने प्रतीयेत सदपि च न प्रतीयेत तत् आत्मनो मम मायां विद्यात् यथा आभासोद्विचन्द्रादिरिति अर्थं विना प्रतीतौ दृष्टान्तः यथा तमः इति सतोऽप्रतीतौ ॥ ३३ ॥

यथा भाव इत्येतत् स्पष्टयति यथा महाभूतानि भौतिकेषु अनुस्टष्टेरनन्तरं प्रविष्टानि तेषु उपलभ्यमानत्वात् अप्रविष्टानि च प्रागेव कारणतयातेष्वविद्यमानत्वात् तथा तेषु भूतभौतिकेष्वहं न च तेष्वहं एवम्भूता मम सत्तेत्यर्थः ॥ ३४ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिन्याख्य तट्टिप्पणी ।

ऋतेऽर्थमित्यादि किमपि देहादेरित्यर्थः अयम्भावः असत्त्वपि मिथ्याभूतोऽपि देहादिर्वास्तवं परमार्थं विनैव आत्मत्वेन प्रतीयते सत्यपि नित्यप्रकाशमानोऽपि आत्मा न प्रतीयते न ज्ञायते देहादिभिन्न आत्मा नास्तीति बोधो यया भवति तामात्मनः परमेश्वरस्य मायां विद्यात् अयम्भावः मायाया आवरणविक्षेपरूपे द्वे शक्ती तत्रावरणशक्त्या स्वरूपाज्ञानं विक्षेपशक्त्या देहे आत्माभिमानः तत्रासतः प्रतीतौ दृष्टांतः यथाभास इति चन्द्रादेर्द्वित्वाभावेऽपि बुद्धिविपर्यासात् दृष्टिदोषाद्वा यथा चन्द्रद्वयं कदाचित् प्रतीयते इति सतोऽप्यप्रतीतौ दृष्टान्तः यथा तम इति गाढान्धकारावृतगेहोदरे सन्तोऽपि घटादयो न प्रतीयन्ते किन्तु तम एव प्रतीयते एवं नात्मा किन्तु देहादिरिति यद्वातमोराहुः यथा ग्रहमण्डले स्थितोऽपि न प्रतीयते इत्यर्थः इति बालप्रबोधिनी ॥ ३३ ॥ ३४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

एवं चिदचिद्विलक्षणस्य परमात्मनः स्वरूपमुक्तं अथावरशब्दोक्तमंगतया ज्ञातव्यं चिद्रूपमाह ऋतेऽर्थमिति अर्थं निरतिशयपुरुषार्थभूते चित्तस्वमृते विनायद्वस्तुप्रतीयेत प्रकृत्यनुसंधानवेलायामात्मस्वरूपं न यथावत्प्रकाशत इत्यर्थः आत्मनि चेतनस्वरूपे प्रतीयमाने सा निशा पश्यतो मुनेरिति न्यायेन यदचेतनं न प्रतीयेत तदात्मनः परमात्मनः मायां विद्यादित्यर्थः अन्यतरस्य प्रकाशने नान्यतरस्य प्रकाशनं विरुद्धाकारत्वादित्यभिप्रेत्य तत्र दृष्टांतमाह यथा भासो भासनं भासुशब्दो बहुवचनांतो वा नहि तेजांसि तमो भाति नच तमांसि तेजो भाति तद्वदित्यर्थः स्थूलत्वसूक्ष्मत्वानित्यत्वजडत्वादिविरुद्धाकारयोगोऽभिप्रेतः ॥ ३३ ॥

एवं परस्पर विलक्षणं चिदचित्स्वरूपमुक्तं अथैतयोः स्वस्यानुप्रवेशेन तत्प्रशासनरूपं पालनं तद्गत दोषास्पर्शं चाह यथेति महांति भूतान्याकाशवायुतेजांसि यथोच्चावचेषु नानाविधेषु भूतेषु भौतिकेषु घटादिषु प्रविष्टान्यप्रविष्टान्येव घटादिगतभेदच्छेदनाद्यस्पृष्टत्वात् तथाहमपि तेषु चेतनाचेतनेष्वात्मतयानुप्रविष्टोऽपितेषु नप्रविष्टः नतद्गतदोषैः स्पृष्टइत्यर्थः यद्वापरिच्छिन्नचेतनाचेतनवस्त्वनुप्रवेशेऽपि स्वस्यापरिच्छिन्नत्वं सदृष्टांतमाह यथेति अप्रविष्टानि बहिरपि संतितथांतर्बहिश्च तत्सर्वं व्याप्येति प्रकारेण तेषु प्रविष्टोऽहं नतेष्वेव बहिरपि व्याप्त इत्यर्थः एवमपरिच्छिन्नत्वप्रतिपादनेन यावानहमित्येतत्स्पष्टीकृतं अहमेवासमित्यत्र जगत्कारणत्वतदर्हत्वक्षमचेतनाचेतनविलक्षणयावद्गुणसार्वज्ञ्यसर्वशक्तित्वादिप्रतिपादनेन यथा भाव इत्येतत्स्पष्टीकृतं ऋतेऽर्थमित्यादिना परमात्मशरीरभूतस्य परस्परविलक्षणचेतनाचेतनस्वरूपप्रतिपादनेन यद्रूप इति स्पष्टीकृतं तथातेष्वित्यनेन चेतनाचेतनयोः परमात्मशरीरत्वप्रतिपादनाच्छरीरगता धर्मा जीवात्मनस्तच्छरीरगतबालत्वयुवत्वादय इव मच्छरीरभूत चेतनाचेतनद्वारा ममैव धर्मा इति प्रतीति यद्गुण इत्यभिव्यंजितं अहमेवासमित्यनेन स्रष्टृत्वपालकत्वसंहर्तृत्वं रूपजगद्व्यापाररूपकर्मप्रतिपादनेन यत्कर्मक इत्यभिव्यक्तीकृतम् ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

ज्ञानोपदेशप्रकारमाह अहमिति अग्रेसृष्टेःप्रागहमेवासं चशब्दात्सदसदासीत्कालप्रकृत्यादिकमभूत्तथापिप्रलयेयत्कालकर्मादिकमस्यत्हरेर्भिन्नमभूत्तत्परंस्वतंत्रंनासं किंच मायावृतत्वेनमदधीनमेवाभूत् पश्चात्सृष्ट्यनंतरंस्थितिकालेत्वमहमेतज्जगद्व्यापारसमासीत् फलितमाह यदति स्थितिकालेभोक्ताऽहंकर्ताऽहं इति स्वातंत्र्यप्रतीतेः सृष्टेःप्राक्प्रलयानंतरंचास्यजगतः स्वातंत्र्यंस्यादितिचेन्नतत्प्रतीतेः बुद्धिमोहमूलत्वात् तदुक्तं विष्णोरधीनंप्राक्सृष्टेस्तथैवप्रलयादनु अस्यसत्त्वप्रवृत्त्यादिविशेषेणाधिगम्यते स्वातंत्र्यंस्थितिकालेतुकथंचिद्बुद्धिमोहतः प्रतीयमानमपितुतस्मान्नैवेतिगम्यतामित्यादि अनेनकालत्रयेऽपिस्वतंत्रोऽहं वदादिकंसर्वंयदधीनमेवेत्युक्तंभवति ॥ ३३ ॥

अस्वतन्त्रस्यप्रकृत्यादेः स्वरूपमुपदिशतीत्याहऋतेऽर्थमिति यद्वस्त्वस्तिकामस्यममार्थंप्रयोजनमृतेसर्वंप्रवदादिषुप्रतीयेत यच्चात्मनिमायिबाधकंनप्रतीयेत नहीश्वरस्यजीवप्रकृतिभ्यामर्थोबाधश्चस्तः तत्प्रकृत्यादिवस्तुआत्मनः परमात्मनोमायांविद्यादित्यन्वयः मायेतिनेन्द्रजालमुच्यते किंतुजीवप्रकृतीएवेत्याहयथेति यथायथार्थत्वेनैवसत्यत्वेनैवप्रतीयमानआभासोमम्प्रतिबिंबभूतोजीवोयथायथार्थत्वेनैवतमोग्लानिहेतुर्मूलप्रकृतिश्चमायेत्युच्यते मुख्यतोविष्णुशक्तिर्हिमायाशब्देनभण्यते उपचारतस्तुप्रकृतिर्जीवश्चैवहिभण्यत इति वचनात् एतदुक्तं भवति यथाच्छत्रधराधारस्थाअपिरथिनोनोच्यंतेतथाजीवप्रकृतिकर्मकालाःसदामयिवर्तमानाअपिजीवनंजीवनाभावात्प्रकृत्यादेर्बाधाभावात्कर्मणःफलाभावात्कालतः परिणामाभावाच्चमयिस्थिता इति नोच्यन्ते सर्वेपरोस्थितमापन्नेवतप्रतिभण्यतइत्यादाविति ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

अथ तादृशरूपादिविशिष्टस्यात्मनो व्यतिरेकमुखेन विज्ञापनार्थं मायालक्षणमाह ऋतेऽर्थमित्यादि अर्थं परमार्थभूतं मां विना यत् प्रतीयेत मत्प्रतीतौ तत्प्रतीत्यभावात् मत्तो बहिरेव यस्य प्रतीतिरित्यर्थः यच्चात्मनि न प्रतीयेत यस्य च यदाश्रयत्वं विना स्वतः प्रतीतिर्नोस्तीत्यर्थः तथालक्षणं वस्तु आत्मनो मम परमेश्वरस्य मायां जीवमायागुणमायेति द्वयात्मिकां मायाख्यशक्तिं विद्यात् अत्र शुद्धजीवस्यापि चिद्रूपत्वाविशेषेण तदीयरश्मिस्थानीयत्वेन च स्वान्तःपात एव विवक्षितः तत्रास्या द्वयात्मकत्वेनाभिधानं दृष्टान्तद्वैधेन लभ्यते। तत्र जीवमायाख्यस्य प्रथमांशस्य तादृशत्वं दृष्टान्तेन स्पष्टयन्नसम्भावनां निरस्यति यथाभास इति । आभासो ज्योतिर्बिम्बस्य स्वीयप्रकाशात् व्यवहित प्रदेशे कथञ्चिदुच्छलितप्रतिच्छविविशेषः स यथा तस्माद्बहिरेव प्रतीयते न च तं विना तस्य प्रतीतिस्तथा सापीत्यर्थः अनेन प्रतिच्छवि पर्य्यायाभासधर्म्मत्वेन तस्यामाभासाख्यत्वमपि ध्वनितम् । अतस्तत्कार्य्यस्याप्याभासाख्यत्वं क्वचित् आभासश्च निरोधश्चेत्यादौ अत्र स यथा कश्चिदत्यन्तोद्भटात्मा स्वचाकचिक्यच्छटापतितनेत्राणां नेत्रप्रकाशमावृणोति तमावृत्य च स्वेनात्यन्तोद्भटतेजस्त्वेनैव द्रष्टृनेत्रं व्याकुलयन् स्वोपकण्ठे वर्णशावल्यमुद्गिरति कदाचित्तदेव पृथग्भावेन नानाकारतया परिणमयति तथेयमपि जीवज्ञानमावृणोति सत्त्वादिगुणसाम्यरूपां गुणमायाख्यां जडां प्रकृतिमुद्गिरति कदाचित् पृथग्भूतान् सत्त्वादिगुणान् नानाकारतया परिणमयति चेत्याद्यपि ज्ञेयम् । तदुक्तम्—एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा परस्य ब्रह्मणो माया तथेदमखिलं जगत् ॥ तथा चायुर्वेदविदः जगद्योनेरनिच्छस्य चिदानन्दैकरूपिणः पुंसोऽस्ति प्रकृतिर्नित्या प्रतिच्छायेव भास्वतः ॥ अचेतनापि चैतन्ययोगेन परमात्मनः ।

करोतु विश्वमखिलमनित्यं मातृकाकृतिम् ॥ इति । तदेवं निमित्तांशो जीवमाया उपादानांशो गुणमायेत्यत्रापि विवेचनीयम् । अथैतं सिद्धं गुणमायाख्यं द्वितीयमप्यंशं दृष्टान्तेन स्पष्टयति यथा तम इति । तमःशब्देनात्र पूर्व्वप्रोक्तं तमःप्रायं वर्णाद्याख्यमुच्यते । तद्रूपस्य सम्मूलज्योतिष्यसदपि तदाश्रयत्वं विना न सम्भवति तद्वद्वियमपीति । अथवा मायामात्रनिरूपणा एव पृथग्दृष्टान्तद्वयम् । तत्राभासदृष्टान्तो व्याख्यातः तमोदृष्टान्तश्च यथान्धकारो ज्योतिषोऽन्यत्रैव प्रतीयते ज्योतिर्विना च न प्रतीयते ज्योतिरात्मा चक्षुषैव तत्प्रतीतेर्न पृष्ठाद्विनेति, तथेयमपीति द्वयम् । ततश्चांशद्वयं प्रवृत्तिभेदेनैवोक्तं न तु दृष्टान्तभेदेन । प्राक्तनदृष्टान्तद्वैधाभिप्रायेण तु पूर्व्वस्या आभासपर्य्यायच्छायाशब्देन क्वचित् प्रयोगः उत्तरस्यास्तमःशब्देनैव चेति यथा—ससर्जच्छाययाविद्यां पञ्चपर्व्वाणमग्रतः इत्यत्र यथा च-काहं तमोमहदहमित्यादौ । पूर्व्वस्याविद्याख्यनिमित्तशक्तिवृत्तिकत्वाज्जीवविषयकत्वेन जीवमायात्वम् । उत्तरत्र स्वीयतद्गुणमयमहदाद्युपादानशक्तिवृत्तिकत्वाद्गुणमायात्वम् । तथा ससर्ज्जेत्यादौ छायाशक्तिं मायामवलम्ब्य सृष्ट्यारम्भे ब्रह्मा स्वयमविद्यामाविर्भावितवानित्यर्थः विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् बन्धमोक्षकरी आद्ये मायया मे विनिर्म्मिते ॥ इत्युक्तत्वात् । अनयोराविर्भावभेदश्च श्रूयते । तत्र पूर्व्वस्याः पाद्मे श्रीकृष्णसत्यभामासंवादीयकार्त्तिकमाहात्म्ये देवगणकृतमायास्तुतौ इति स्तुवन्तस्ते देवास्तेजोमण्डलसंस्थितम् । ददृशुर्गगने तत्र तेजो व्याप्तदिगन्तरम् ॥ तन्मध्याद्भारतीं सर्व्वे शुश्रुवुर्व्योमचारिणीम् । अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः इत्यादि उत्तरस्याः पाद्मोत्तरखण्डे असंख्यं प्रकृतिस्थानं निविडध्वान्तमव्ययम् । इति । विद्यादिति प्रथमपुरुषनिर्द्देशस्यायं भावः अन्यान् प्रत्येव खल्वयमुपदेशः त्वन्तु मत्तत्त्वशक्त्या साक्षाद्देवानुभवन्नसीति । एवं मायिकसृष्टिदृष्टिमतीत्यैव रूपादिविशिष्टं मामनुभवेदिति व्यतिरेकमुखेनानुभावनस्यायं भावः शब्देन निर्द्धारितस्यापि मत्स्वरूपादेर्मायाकार्य्यावेशेनैवानुभवो न भवति ततस्तदर्थं मायात्याजनमेव कर्त्तव्यमिति एतेन तदविनाभावात् प्रेमाप्यनुभावित इति गम्यते ॥ ३३ ॥

अथ तस्यैव प्रेमणो रहस्यत्वं बोधयति यथा महान्तीति । यथा महान्ति भूतानि भूतेष्वप्रविष्टानि बहिःस्थितान्यप्यनुप्रविष्टानि भान्ति तथा लोकातीतवैकुण्ठस्थितत्वेनाप्रविष्टोऽप्यहं तेषु तत्तद्गुणविख्यातेषु प्रवेशाप्रवेशौ तस्य तु प्रकाशभेदेनेति भेदेऽपि प्रवेशाप्रवेशमात्रसाम्येन दृष्टान्तः । तदेव तेषां तादृगात्मवशकारिणी प्रेमभक्तिर्नाम रहस्यमिति सूचितम् । तथाच ब्रह्मसंहितायाम् आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि ॥ प्रेमाञ्जनच्छुरितभक्तिविलोचनेन सन्तः सदैव हृदयेऽपि विलोकयन्ति । तं श्यामसुन्दरमचिन्त्यगुणस्वरूपं गोविन्दमादिपुरुषं तमहं भजामि ॥ इति । अचिन्त्यगुणस्वरूपमपि प्रेमाख्यं यदञ्जनच्छुरितवद्गुणैः प्रकाशमानं भक्तिरूपं विलोचनं तेनेत्यर्थः । यद्वा तेषु यथा तानि बहिःस्थितानि चान्तःस्थितानि च भान्ति तथा भक्तेष्वप्यहमन्तर्मनोवृत्तिषु बहिरिन्द्रियवृत्तिषु च विस्फुरामीति भक्तेः सर्व्वथाऽनन्यवृत्तिताहेतुर्नाम किमपि स्वप्रकाशं प्रेमाख्यमानन्दात्मकं वस्तु मम रहस्यमिति व्यञ्जितम् । तथैव श्रीब्रह्मणोक्तम् न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः । न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठ्यवता धृतो हरिः ॥ इति । यद्यपि व्याख्यान्तरानुसारेणायमर्थोऽपलपनीयः स्यात्तथाप्यस्मिन्नेवार्थे तात्पर्य्यं प्रतिज्ञाचतुष्टयसाधनायोपक्रान्तत्वात् तदनुक्रमगतत्वाच्च । किञ्च तस्मिन्नर्थे न तेष्विति च्छिन्नपदमपि व्यर्थं स्यात् । दृष्टान्तस्यैव क्रियाभ्यामन्वयोपपत्तेः । अपिच रहस्यं नाम ह्येतदेव यत् परमदुर्लभं वस्तु दुष्टोदासीनजनदृष्टिनिवारणार्थं साधारणवस्त्वन्तरेणाच्छाद्यते यथा चिन्तामणिः सम्पुटादिना । अतएव परोक्षवादा ऋषयः परोक्षञ्च मम प्रियम् । इति श्रीभगवद्वाक्यम् तदेव च परोक्ष क्रियते यदेव विरलप्रचारं महद्वस्तु भवति । अस्येयादेयत्वं विरलप्रचारत्वं महत्त्वञ्च मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगमित्यादौ मुक्तानामपि सिद्धानामित्यादौ भक्तिः सिद्धेर्गरीयसीत्यादौ च सर्व्वत्र व्यक्तम् । स्वयञ्चैतदेव श्रीभगवता परमभक्ताभ्यामर्ज्जुनोद्धवाभ्यां कण्ठोक्त्यैव कथितम् सर्व्वगुह्यतमं भूयः शृणु मे परमं वच इत्यादिना सुगोप्यमपि वक्ष्यामीत्यादिना च । इदमेव रहस्यं श्रीनारदाय स्वयं श्रीब्रह्मणैव प्रकटीकृतम् इदं भागवतं नाम यन्मे भगवतोदितम् । संग्रहोऽयं विभूतीनां त्वमेतत् विपुलीकुरु ॥ यथा हरौ भगवति नृणां भक्तिर्भविष्यति । सर्व्वात्मन्यखिलाधार इति संकल्प्य वर्णय ॥ इति । तस्मात् साधु व्याख्यातं स्वामिचरणैरपि रहस्यं भक्तिरिति ॥ ३४ ॥

श्रीमद्बलदेवाचार्य्यकृत सुबोधिनी ।

एवं तज्ज्ञानसिद्धेतुं विविच्ये सर्व्वमात्मैवेति प्रमेयं विनिश्चित्य प्रमाणवैयर्थ्यमाशंक्य प्रवृत्तिसंकोचपरत्वात् गुणदोष विषयत्वात् सत्येकाभगवल्लीलेति मायानिरूपयति ऋतेऽर्थमिति यद्वस्तुस्वरूपे अन्यथा प्रतिभासते तदात्मनो जीवानां व्यामोहिका माया पूर्व्वनिरूपिता तस्याःकार्य्यत्वा हि जीवं व्यामोहयित्वा तत्सम्बन्धिनं अंतःकरणबुद्ध्यादिकमपि व्यामोहयति तथा व्यामोहिता बुद्धिः पदार्थानन्यथा मन्यते ननु पदार्थां अन्यथा भवंति गुणधर्मेण हि प्रमाणानिसाधनानि च कानि चिद्गुणदोषनिवर्त्तकानि कानिचिद्गुणाधायकानि मायाच द्विधा अनंजनयानि विद्यमानं न प्रकाशयति अविद्यमानं च प्रकाशयति देशकालव्यत्यासेन तदाह अर्थमृते यत्प्रतीयेत प्रतीयेत च अर्थादर्थः अर्थो न प्रतीयते अर्थमृतेयत्प्रतीयत इति तस्मात्पदार्थानां याथात्म्यज्ञापनार्थं प्रमाणमित्युक्तं भवति ननु वस्त्वेव कुतोन तथास्तु कैश्चिद्विवाद्वि जगतो मायिकत्वस्वीकारादिति चेत् भवत्वेतदेवं यदि विचारे पर्य्यवस्यति प्रमाणभूतो वेदः सर्व्वंखल्विदं ब्रह्मेत्याह ब्रह्मविदां प्रतीतिरपि तथाग्रांतप्रतीतिस्तु नार्थनियामकत्वं अन्यथा भ्रमदीपगृहीतंजगत् भ्रमदृष्टिर्निर्विषयास्यात् अतोन्यत्रैव सिद्धभूमिः मायया पुरस्थिते विषये समानीयते दृष्टानुरोधित्वात्तस्या अतो यथाधिकारं जीवदृष्टिं पुरस्कृत्यव्यामोहिकया मायया व्यत्यासेन पदार्थाः संपाद्यंते एवं सर्व्वत्र जगति सा बुद्धिं भ्रमं जनयति अन्यत्रत्वविषयतां संपादयति विषयतामायाजन्या विषयो भगवान् मायायामेव विषयतारूपं भगवतः स्वरूपं प्रकाशयति तदपि न निःस्वभावं आत्मशक्तित्वान्मायापि न निःस्वभावा चिद्विलासत्वाद्बुद्धेः परं तामेव व्यामोहयति यावदज्ञभावः सा हि भगवदीयैः सर्व्वं देवपदार्थैर्विरुध्यते ते हि भगवद्विषयकं ज्ञानं जनयंति अतोविषयताजनितज्ञानं भ्रमं विषयजनितं प्रमेति एवं यथा जगति आत्मन्यपि तथेत्याह चात्मनीति आत्मनि च विद्यमानं प्रकाशयति अविद्यमानं प्रकाशयति ननु सर्व्वजनिप्रतीत्यनुरोधेन जगद्रूपोऽयं विषयः ब्रह्मणोभिन्न एव कुतो नांगी क्रियते तत्राह

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

तद्विषयास्मनो माया मिति यस्मात्कारणात् अविद्यमानमेव बोधयति विद्यमानं नबोधयति तस्मात्कारणात् तां मायामेव विद्यात्माहि विषयप्रसुर्वा अहं नियतस्वभावं अन्यथा प्रतीतिहेतुर्भवति तत्र दृष्टांतमाह यथाऽऽभासो यथा तम इति यथा चंद्राद्याभासः मायवैव भान्यते ननु प्रतीत्यनुरोधेन चंद्रद्वयं कल्प्यते एवं विषयतापि मायया भान्यते बुद्धिस्तु विधिलास इति ममायाजनिता अन्यथा प्रमाणविरोधेऽपि बुद्धिः तथा स्यात् ततश्च सर्वविप्लवः सा च विषयता द्विधा आच्छादिकैका अन्यथा प्रतीतिहेतुश्चापरा सा उभयविधापि मायवैव भान्यते यथाऽऽभासः ननु मायायाः कथमेवं पदार्थजनकत्वं व्यामोहजनकत्वमेव तस्याः नच विषयातिरिक्ता विषयता काचिदुप युक्तेत्याशंक्याह यथातम इति यथान्धकारः पदार्थः तेजोभावे भान्यते यत्रैव तेजोऽभावः तत्रैवान्धकारं जनयति माया इदमेव व्यामोहिका अतएव दिवाभीतां प्रति नान्धकारं जनयति तेतु तेजोऽभाव मेव गृह्णन्ति तेषां दृष्टेः कोमलत्वाद्बलिष्ठं तेजः दृष्टिप्रतिबंधकं भवति तदभावे सुखेन विषयान् गृह्णाति तेषां अस्मदादीनामपि तेजो न विषयसंस्कारकं न वा चक्षुषः किंतु तेजोऽभावे मायया तमोजननात् सैव तद्रूपाविषयी क्रियते मनुविषयः अतस्तमोनिवृत्त्य धर्मेव तेजः तथैव लोकप्रतीतिः साच विषयता चक्षुषा गृह्यतेपि यथाऽक्षिमतया स्वात्मसात् क्रियते परिभ्रमणे तथासिद्धे यथाहि भानोदयात् अचक्षुषामिति वाक्ये चक्षुषः संबंधिन एवतमसो नावारकत्वं एवं च किंचित्तमः अन्यथा स्पर्शेनापि ज्ञाते तत्प्रतिबंधकं स्यात् स्पर्शेन घातगृह्येत तम इति च उपलक्षणं आदर्शेच मुखं जनयति नच परावृत्तं चक्षुर्मुखमेव गृह्णातीति मंतव्यं तथा सति दर्प्पणांतरे सा भासप्रतीति र्न स्यात् नचेदमेव मुखं उभयत्र प्रतिबिम्बित मिति वाच्यं असम्मुखादिकानामपि प्रतिबिंबदर्शनात् अयमेव वा आभासः तस्मादर्पणे मुखजननवत् तेजोऽभावे अंधकारजननवत् मायामोहित पुरुषबुद्धावपि विषयता द्वयं जनयतीत्यर्थः तत्रैका ब्रह्मरूपतां न प्रकाशयति एका तु जगद्रूपाविषयता तदुभयव्यावृत्त्यर्थं सर्वोपि प्रमाणा नीति भावः ॥ ३३ ॥

एवं प्रमेय प्रमाणे च निरूप्य विषयं निरूपयति तथामहांति भूतानीति वेदे न हि प्रकारद्वयेन पदार्थानिरूप्यंते साकारो निराकारः सावयवो निरवयवः पूर्णः परिच्छिन्न इत्यादिप्रकारेण तदुभयमपि यथा विषयो भवति तदर्थमिदमारभ्यते अन्यथैकपक्षेविषयता स्यात् तथा सति वेदानामंशतोऽप्रामाण्यं भवेत् अतः सर्ववेदप्रामाण्यसिद्ध्यर्थं ब्रह्म उभयविधोविषयो निरूप्यते यथामहांति भूतानि आकाशादीनि भूतेषु घटादिषु उच्चावचेषु अनेकरूपेषु स्थूलसूक्ष्मदीर्घह्रस्वचतुरस्रादिभिन्नेषु कारणत्वेन प्रविष्टानि पुनरनुप्रविष्टानि भवंति ततोऽप्यप्र विष्टानि भवंति तथाहं सर्वत्रकारणभूतः सर्वत्रानुप्रविष्टो पि नकारणभूतो नतु प्रविष्ट इत्यर्थः तेष्विति पुनर्वचनं वाक्यद्वयबोधार्थं अन्यथा नकारः पूर्ववाक्य एवं संबध्यते कारणंहि कार्ये अनुप्रविशतिकार्यं चकारणे समवेतमुत्पद्यते अन्यथा पटस्य निराधारतयोत्पत्तिः स्यात् तथा सति नोत्पद्यते उत्पद्यमानं वा सर्वत्रोत्पद्येत यथात्मदो भगवान् यथा शब्दः कुंभकारकृत्या प्राकृत एव घट उत्पद्यते विषयता वत् नतु भगवद्रूपः सिद्धत्वात् शब्दोपि ताल्वोष्ठ पुटव्यापारेणोत्पद्यमानः सर्वत्रैव श्रोत्रेपूत्पद्यते एवं निराधारः पटोपि भवेत् तथा सति तस्याधारतया उत्पन्ने पटे यदि तंतवो न प्रविशेयुः तदापटे तंतुप्रतीतिर्न स्यात् जायमाना वा भ्रांता स्यात् अबाधितत्वाच्च न भ्रांता शुष्का तु युक्तिः क्वापि पदमलभमाना स्वयमेव भ्रांता भवति अत एकस्यैव आधारत्वमाधेयत्वं च कारणकाले कार्यकाले च व्यवह्रियते भवति एवं महा भूतेषु द्वयं आधारत्वं आधेयत्वं विशेषत आधेयत्वमिति तदाह प्रविष्टान्यप्रविष्टानीति अथवा महाभूतेषु पंचधाकारणत्वेन पूर्वमेव तत्र विद्यमानत्वेन महाभूतत्वेन चेति अप्रवेश स्वेधाऽकारणप्रवेशवत् प्रवेशत्वेन पृथक् प्रवेशत्वेन प्रवेशोद्वेधा तथा तेष्विति पंचधापि नतेष्विति पुनः पंचधा ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

किञ्च जीवस्य परमात्मज्ञानविज्ञाने प्रति माया स्वदंशेनानुकूला च भवति । विज्ञाते च परमात्मनि मयि योगमायैवाधिकरोति सा स्वलनुकूलैवेति ते द्वे अवश्यनिरूपणीये इति ज्ञापयन् यथात्ममायायोगेनेत्यनेन व्यञ्जितस्य तव माया योगमाया च कीदृशीति प्रश्नो- त्तरं तन्त्रेणैव क्रमेणाह, ऋतेऽर्थमिति । यत् यतः अर्थं सत्यं वस्तु विना न प्रतीयते, किन्त्वर्थः सत्यं वस्त्वेव प्रतीयेत इत्यर्थः । तथा यतः अर्थं विना प्रतीयेत, अर्थो न प्रतीयेत, किन्त्वनर्थः प्रतीयेतेत्यर्थः । तत्ताम् आत्मनि स्वस्मिन् मुक्तो बद्धश्च जीव आत्मनो मम मायां क्रमेण विद्या अविद्येति वृत्तिद्वयां मायाख्यां शक्तिं विद्यात् जानीयात् । विद्याया दृष्टान्तः—यथाभासो दीपादिप्रकाशः, दीपादिप्रकाशा- द्यर्था गृहे विद्यमानो घटपटादिरर्थ एव प्रतीयते, न तु दीपानयनात् पूर्वं सम्भावितो घटपटाद्यभावस्तथा सर्पवृश्चिकादिरागन्तुकश्च भयकारणमनर्थः प्रतीयते । एवमेव विद्याया हेतोर्मुक्तेन जीवेन स्वस्मिन्नित्यसम्बन्धं ज्ञानानन्दादिकमेव प्रतीयते न त्वविद्यादशायामिव तदभावः, नापि स्वस्मिन्नसम्बन्धो देहदैहिकशोकमोहादिकश्च प्रतीयते । अविद्याया दृष्टान्तः—यथा तमोऽन्धकारः, अन्धकारादयथा स्वगृहे विद्यमानो घटपटादिरर्थो न प्रतीयते, किन्त्वविद्यमानोऽपि सम्भाव्यमानः सर्पचौरादिको भयकारणमनर्थः प्रतीयते । एवमेवा विद्याया हेतोरेव बद्धेन जीवेन स्वस्मिन् नित्यसम्बन्धितया वर्तमानमपि ज्ञानानन्दादिकं न प्रतीयते किन्तु स्वस्मिन्नसदपि स्वसम्बन्धि त्वेन वर्तमानो देहदैहिकशोकमोहादिरेव प्रतीयते । तेन कुसुमशृंगादीनां सत्यत्वेऽपि आकाश शशादीनां तत्सम्बन्धाभावादेव आकाश- कुसुममलीकं शशशृंगमलीकमिति यथोच्यते तथैव देहानां तद्धर्माणां शोकमोहसुखदुःखादीनाञ्च प्राधानिकत्वात् सत्यत्वेऽपि जीवस्य तत्सम्बन्धाभावादेव जीवस्य देहादयो मिथ्याभूता इति शास्त्रेषूच्यते । जीवस्य मिथ्याभूतोऽपि देहसम्बन्धः स्वलविद्यया कल्प्यते वि- द्यया लुप्यते इति विद्याविद्ययोर्दृष्टान्तावाभासतमसी इत्यत्र छायातपौ यत्र न गृध्रपक्षावित्यष्टमस्कन्ध एव प्रमाणं ज्ञेयम् । केचित्तु तमो- दृष्टान्तोऽयमावरणांश एव आवरणविक्षेपयोस्तु दृष्टान्ताः सर्पव्याघ्रभूतावेशाद्या ज्ञेया इत्याहुस्तेऽपि तामसत्वात्तमःशब्देनैव ग्राह्या इत्यपरे एवं जीवे सार्वदिकविद्यमानवस्त्वप्रत्यायनमविद्यमानवस्तुप्रत्यायनं चेत्यविद्याया धर्मावावरणविक्षेपशब्दाभ्यामुच्येते ॥ यथार्थशब्दस्य धनवाचित्वात् भाग्येन भाग्यप्राप्तस्वीयधनो धनीनिव विद्यालब्धज्ञानानन्दो मुक्तः सम्पन्नत्वेन रूप्यते तथा अभाग्यानधिगतस्वीयधनो दरिद्रमिवाविद्यावृतज्ञानानन्दो बद्धजीवो दरिद्रत्वेनेति ज्ञेयम् । एवं विद्यया त्वम्पदार्थस्य जीवात्मनोऽनुभवो भवति न तु तत्पदार्थस्य परमात्मनः तस्य निर्गुणत्वात्त्रिगुणया भक्त्यैवापरोक्षानुभवः सम्भवेत् भक्त्याहमेकया ग्राह्य इति भगवदुक्तेः । किञ्च कैवल्यं सात्त्विकं ज्ञान-

इति भगवदुक्तेर्देहादिव्यतिरिक्तात्मज्ञानरूपा येयं विद्या सत्त्वः सत्त्वगुणात्वादनया गुणातीतस्य परमात्मनो नैवानुभवः प्रत्युतास्या अप्यपाय एव । यदुक्तं भगवता—द्रव्यं देशः फलं कालो ज्ञानं कर्म्म च कारकः । श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ॥ येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः । भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥ इति ननु तर्हि मुक्तजीवेन परमात्मनो परोक्षानुभवार्थं भक्तिः कुतो लभ्यताम् उच्यते ज्ञानाधिकारिणः सांख्ययोगतपआदिभिर्भक्तिमिश्रैरेव जनितया विद्यया अविद्यानिवर्त्तिकया प्रथमं त्वम्पदार्थानुभवः ततस्तस्याविद्यातो वियुक्तस्य निरिन्धनाग्निन्यायेन विद्यया अप्युपरमतारतम्येन पूर्व्वसिद्धभक्तिचन्द्रकलायास्तदुपराणविद्युतायास्तत उद्गमतारतम्यम् तयैव भक्त्या पुनः पुनरभ्यस्तया तत्पदार्थस्य परमात्मनोऽनुभवतारतम्यम् यदुक्तं भगवता गीतासु ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ इति परां पौर्व्वकालिकगुणीभावराहित्यात् श्रेष्ठां केवलां वा ततश्च भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः । इत्युक्तेर्ज्ञातिप्रमाणाभ्यामल्पीयस्या तया भक्त्या निर्विशेषब्रह्मणः एवानुभवः न त्वनन्तचिद्विशेषब्रह्मणो भगवतः । यथा अल्पतेजस्विचक्षुष्कया जनेन मणिमयी मूर्त्तिः सामान्यतस्तेजोमयेव दृश्यते न तु मुखनासिकानेत्रकर्णादिविशेषमयी ततश्च विद्याया सामस्त्येनैवोपरमे सत्यद्भुतनैर्गुण्यस्य तस्य तयैव भक्त्या ब्रह्मानुभवस्यापि पूर्णत्वम् एतदेव निर्व्वाणशब्दवाच्यं जीवब्रह्मैक्यम् । यदुक्तं तत्रैव ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् । इति या तु चिच्छक्तिवृत्तीनां सारभूता कृपाविलासरूपा परमोत्तमा शुद्धा भक्तिर्ज्ञातिप्रमाणाभ्यामत्यधिका सा प्रबला परमस्वतन्त्रा गुणदोषादिकमप्यगणयन्ती बद्धेऽपि जीवे राक्षसपुलिन्दपुक्कशादौ दुराचारेऽपि यदृच्छयैवोदयते विप्रे सन्न्यासिनि मुक्तेऽपि नोदयते । तयैवाविद्यापर्यन्तसमस्तक्लेशध्वंसः यदुक्तम् जरयत्याशु या कोशं निगीर्णमनलो यथा ॥ इति । तयैवानन्तचिद्विशेषस्य भगवतोऽप्यपरोक्षानुभवो भवेत् । यथा बहुतरतेजस्विचक्षुष्केण जनेन सामान्यतस्तेजोमयी विशेषतश्च मुखनासिकानेत्रकर्णादिसौन्दर्यमयी च मूर्त्तिर्भेदेनैव दृश्यत इति । तदेवं भक्तिर्द्विधा निर्गुणा गुणमयी च तत्राद्यया पाकदशायां प्रेमभक्तिसंज्ञया भगवद्दर्शीकारः सच्चिदानन्दमयभगवद्रूपगुणलीलामाधुर्य्यानुभवश्च द्वितीयया सात्त्विक्या सत्त्वगुणादविच्युतयैव निर्विशेषब्रह्मसुखानुभवमात्रमिति । तस्मात् ब्रह्मसुखानुभवदशातः पूर्व्वास्वेव दशासु जीवेषु मायाया अधिकार इति सिद्धम् । सत्यमेव प्रतीतं स्याद्यतोऽसत्यं तथा यतः । तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥ इत्यनुक्तेरित्यन्यस्मिन्नर्थेऽप्याशय ईक्ष्यते । ऋतेऽर्थशब्दौ परिवृत्त्यसहावर्पितौ यतः ॥ स चार्थो यथा ब्रह्मानुभववत्स्वपि जनेषु नानाविधेषु या स्पष्टमधिकरोति भगवदिच्छावशात् तदीयस्वरूपरूपगुणलीलाप्रकाशनावरणधुरन्धरा स्वरूपभूता शक्तिस्तस्या योगमायाया अपि लक्षणं तन्त्रयैवाह ऋते इति । आत्मनि परमात्मनि मयि ऋते ज्ञाते सति अर्त्तेर्गत्यर्थत्वेन ज्ञानार्थत्वात् साक्षादनुभूते सतीत्यर्थः । यदिति इण गतौ शत्रन्तम् तत्पदमेव यत्पदस्याक्षेपात् यतः अर्थं यत् प्रयोजनं प्राप्नुवत् वस्तु अप्राकृतं प्राकृतञ्च प्रतीयेत यया प्रकाशितं सत् सप्रयोजनं वस्तु परमात्मसाक्षात्कारवता जनेन साक्षादनुभूयतेइत्यर्थः । यतः सकाशात् न प्रतीयते च यया आवृतं तदैव वा समयान्तरे वा न प्रतीयेतेत्यर्थः । ताम् आत्मनो भगवतो मम मायां योगमायाख्यामन्तरङ्गां शक्तिं विद्यात् जानीयात् । मायया प्रयोजनं विनैवाव्रियते योगमायया तु प्रयोजनमुद्दिश्यैवेति विवेचनीयम् । यथाभासो यथा तम इति । आभासेन दीपादिना प्रकाशितं घटपटादिकं यया प्रतीयेत तमसा आवृतं तन्नानुभूयेत च तथैव सा मदिच्छावशादाभासतमोधर्मवती योगमायेत्यर्थः । उदाहरणन्तु यथा ऐश्वर्यदर्शनेऽपि प्रेमसंकोचाभावज्ञापनार्थं भगवत्कुक्षौ यया प्रकाशितं प्राकृतं विश्वमप्राकृतं गोकुलयशोदाकृष्णादिस्वरूपञ्च यया मोहिता श्रीयशोदा साक्षादनुभूय क्षणान्तरे च यया आवरणान्नानुबभूव च । यथा चैश्वर्यानुभूत्या प्रेमसंकोचज्ञापनार्थं यया प्रकाशितं विश्वरूपं परमात्मस्वरूपञ्चार्जुनः साक्षादनुबभूव, तत्रैव वर्त्तमानमपि कृष्णस्वरूपं यया, आवरणान्नानुबभूव, समयान्तरे च ययाच्छादितं विश्वरूपादिकं नानुबभूव, द्विभुजं श्रीकृष्णमेवानुबभूव । अत्रैकदैव एकस्य स्वरूपस्य प्रकाशनमन्यस्यावरणमिति पूर्वतो विशेषः । यथा च मञ्जुमहिमदर्शनया ब्रह्मण ईश्वरत्वाभिमाननिवर्त्तनार्थं यया, आवरणप्रकाशनाभ्यां लीलापरिकरवत्सवालाद्यदर्शन—कृष्णस्वरूपभूतवत्सबालादिदर्शन—तददर्शन—चतुर्भुजादिदर्शन—तददर्शन--श्रीकृष्णस्वरूपदर्शनानि प्राप यया मोहितः परमेष्ठी । अत्रैकस्मिन्नेव परमेष्ठिनि विविधस्वरूपावरणप्रकाशनयोः पौनः पुन्यमिति विशेषः यथा च भगवद्वपुः स्वरूपत एव परिच्छिन्नमपरिच्छिन्नं चातर्क्यमिति ज्ञापनार्थं तथा केवलभजनश्रमस्तज्जन्या भगवत् कृपा चेत्युभाभ्यामेव भगवद्वशीकार इति ज्ञापनार्थञ्च दामबन्धनलीलायां युगपदेव यशोदाकृष्णयोरभीप्सिते बन्धनाबन्धने विभुत्वस्य युगपदेवावरणप्रकाशनाभ्यां घटयन्त्या किङ्किणयाद्व्यङ्गुलन्यूनदाम्ना चावेष्टयता सूचितं दर्शयन्त्यापि वस्तुतः कृष्णस्यैवाभीप्सितसम्पादयन्त्या यया मोहिता व्रजेश्वरी विस्मयरसं क्षणमनुबभूव, पश्चात्तस्या अप्यभीप्सितं कृष्णस्य श्रमयासाधयितुं विभुत्वं यया खल्वान्तर्भावयतः सा कृष्णं बबन्धैव । अत्रैकदैवैकस्यैवविभुत्वस्यावरणप्रकाशने इति पूर्व्वं पूर्व्वतो विशेषः ।

यथा च प्रतिस्वनिमन्त्रणादिसिद्ध्यर्थं श्रुतदेवबहुलाश्वरुक्मिणीसत्यभामादिगृहस्थितस्य तस्य तत्तत्स्वरूपस्य यथैव युगपदेवावरणप्रकाशनाभ्यां तत्र तत्र लीलासिद्धिर्व्याख्यास्यते अत्रश्रुतदेवबहुलाश्वादिव्यक्तिभेदमपेक्ष्यैवावरणप्रकाशनयोर्यौगपद्यं,पूर्वत्रैकस्यां यशोदायामेवेति—विशेषः सा खलु योगमायैव, न तु माया, तयामोहितानामपि तेषां परमात्मसाक्षात्कारदर्शनात् । सच परमात्मसाक्षात्कारो भक्तिमिश्रज्ञानवतामविद्याविद्ययोरुपरामे सति, तथैवावतारसमयं कृष्णं प्रीत्या पश्यतां तत्कृपाविषयीभूतत्वादप्रेमवतामपि । अन्यदा तु प्रेमवतामेव कृष्णरामादिसाक्षात्कारो भागवतमतेनोच्यते । तेषु योगमायैवाधिकरोति न तु माया । कृष्णं तदिच्छया पश्यतामपि कंसादीनां केवलक्षणान्तःकरणदोषादेव न परमात्मसाक्षात्कारः, यथा मत्स्यण्डिकां भुञ्जानानामपि पित्तदूषितरसनानां न मत्स्यण्डिकास्वादानुभवः । तेषु मायैवाधिकरोति न तु योगमाया । मायाशक्तिश्च योगमायोरयास्तस्या विभूति रेव यदुक्तं नारदपञ्चरात्रे श्रुतिविद्यासंवादे अस्या आवरिका शक्तिर्महामायाऽखिलेश्वरी । यया मुग्धं जगत् सर्वं सर्वदेहाभिमानिनः ॥ इति ॥ भगवतास्वस्वरूपत्वेनाभिमन्यमाना योगमायाशक्तिरपिरेव मेवांशेन स्वेच्छ वशात् स्वस्वरूपत्वेनानभिमन्यमानात् स्वस्वरूपात् पृथग्भूता सती मायाशक्तिरुदेव । यथा सर्पस्य स्वरूपभूताऽपि स्वकृतेन त्यक्ता चेत् ततः पृथग् भूता कञ्चुकं जडं स्यात् । तथा चोक्तं श्रुतिभिः—त्वमुत्तजहासि तामहिरिव त्वचमात्तभगं । इति सा च माया द्विविधा--प्रधानमविद्या च । प्रधानस्य लक्षणं आद्यन्तेयंपाख्याने वक्ष्यते । प्रधानेनापाश्रयः सृज्यन्ते ते च सत्या एव, अविद्यया जीवेषु तद्ध्यासः सृष्टः स मृषात्व,एव विद्यया तदध्यासध्वंस इति निष्कृष्टो गोकीर्त्ति कार्य्यतिसम्मर्त जगदिदमंशेन सत्यमुद्दीना

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा ॥ ३५ ॥
एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

सत्यं, तथा जीवानां नित्यत्वात् भगवन्निकेतनादिभक्त्युपकरणानां निर्गुणत्वाच्चांशेन नित्यत्वमपि वादिभिर्यत्सत्त्वमतं नानारूपतया निरूपितम । कार्य्यप्राधानिकं सत्यं कार्य्यमाविद्यकं मृषा । नित्यं तद्भक्तिसम्बन्धामिदं तद्बितयात्मकम ॥ १ ॥ प्राधानिकाः स्युर्देहास्तद्धर्म्मे, आविद्यकः पुनः । जीवेषु तत्तत्सम्बन्धो भक्तिश्चे निर्गुणाश्चते ॥ २ ॥ चिज्जीवमायानित्याः स्युस्तिस्रः कृष्णस्य शक्तयः । तद्वृत्तयश्चताभिः स भास्येकः परमेश्वरः ॥ ३ ॥ कार्य्यकारणयोरैक्याच्छक्तिशक्तिमतोरपि । एकमेवाद्वयं ब्रह्मनेह नानास्ति किञ्चन ॥ ४ ॥ भक्तानामेवसि द्धान्तश्चतुः श्लोकीयमीरिता । शीलिता भगवद्भक्तैस्तैरेव न किलापरैः ॥ इति ॥ ३३ ॥

एवञ्च मायां योगमायाञ्च तन्त्रेणैव लक्षयित्वा ताभ्यामधिकृतेषु सगुणनिर्गुणलोकेषु ब्रह्मणा पृष्टं स्वस्त्रक्रीडाप्रकारं तन्त्रेणैवाह यथेति । यथा महाभूतान्याकाशादीनि भूतेषु देवमनुष्यतिर्य्यगादिषु अनुप्रविष्टानि तेषूपलभ्यमानत्वात् अप्रविष्टानि च पृथगविद्यमानत्वात् तथा तेषु भूतभौतिकेष्वहं प्रविष्टः सन्नपि पृथक् शुद्धसत्त्वात्मकस्वधामनि वर्त्तमानत्वादप्रविष्टश्चास्मि । किन्तु महाभूतानामचेतनत्वादेव भूतेषु प्रवेश आसक्तिरहितः ममतु चेतनत्वेऽपि आकाशवद्गर्भस्वगृहेऽवस्थित एव वसतमतिवत् तेषु सर्वेषु प्रवेशनियमनपालनादीन्यासंग रहितानीत्येवम्भूता भूतेषु मायिकेष्वासंगरहितैव क्रीडेति भावः । तथा तेषु प्रसिद्धेषुनतेषु प्रणतभक्तजनेषु प्रविष्टोऽन्तः करणेषु दर्शनं दातुं तथा अप्रविष्टः बाहःस्थितश्च तेषां नयनेषु स्वसौन्दर्य्यमर्पयितुं नासासु स्वसौरभ्यं प्रवेशयितुं तैः सहोक्तिप्रत्युक्ती कुर्वन् तेषां कर्णेषु स्वसौस्वर्य्यामृतं पूरयितुं स्पर्शनालिङ्गनादिदानैस्तेषामङ्गेषु स्वीयसौकुमार्यमाधुर्य्यादिकं चानुभावयितुमिति तेषु गुणातीतभक्तेष्व प्रवर्त्तोऽहमेयात्यन्तमहासक्त्येष्वासक्तिसहितैव मम क्रीडेति भावः ॥ ३४ ॥

———

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

मायां माह ऋतेऽर्थमिति यद्वस्तु आत्मनि ज्ञानस्वरूपे ज्ञातरि सति ज्ञेयतया प्रतीयेत अर्थं ज्ञातृपदार्थमृते तु नप्रतीयेत तदचेतनं द्रव्यम आत्मनः परमात्मनः मम मायां विद्यात् अचेतनस्य चेतनज्ञेयतया स्वरूपनिश्चये दृष्टांतः यथा आभासः प्रकाशः यथा वा तमो ऽप्रकाशः ज्ञातरि सत्येव प्रतीयते नतु तदभावे तद्वदित्यर्थः ॥ ३३ ॥

यया आत्ममायायोगेन विश्वं विसृजन् विलुंपन् भगवान् क्रीडति तद्विषया मनीषा संक्षेपतः चतुराननं अर्पिता माया चदर्शिता अथ विश्वसृष्ट्यादिहेतोरात्मनो विश्वगतदोषाऽस्पृष्टत्वं परिच्छिन्नेष्वनुप्रविष्टस्याप्यपरिच्छिन्नत्वं चाह यथेति यथा महांति भूतानि खवातादीनि उच्चावचेषु भौतिकेषु घटपटादिषु भेदेंकुराद्यहेषु परिच्छिन्नेषु अनुसृष्टेरनंतरं प्रविष्टान्यपि अप्रविष्टानि घटपटादिवद्भेदक्लेददोषास्पृष्टत्वात घटपटादिभिरनावृतत्वाच्च तथा तेषु महाभूतेषु ब्रह्माण्डरूपेण स्थितेषु तत्सृष्ट्वा तदेवानुप्राविशदितिश्रुत्युक्तरीत्याऽनुप्रविष्टोऽस्मि तद्गतदोषास्पृष्टत्वात्तैरनावृतत्वाच्च एवं चिदचिदात्मकं जगत्कारणं मां ज्ञात्वा ज्ञानविज्ञानवान् भवति ज्ञाने जाते परममंगलगुणशक्त्याद्याश्रये ज्ञेये भक्तियोगे कृतार्थो भवतीति सूक्ष्मभागवतसिद्धान्तः ॥ ३४ ॥

———

भाषाटीका

अर्थ के बिना भी जो प्रतीत हो और अपने स्वरूप मे हो कर भी जो प्रतीत नहो उसको आत्मा की (मेरी) माया जानो । जैसा आभास और तम । आभास आंख पर उंगली रखकर । देखने से जो दीपक वा चन्द्रमा वा और कोई वस्तु दो दीखती हैं उसे कहते हैं यह न हो कर भी प्रतीत होने का दृष्टान्त है । तम राहु का नाम है यह राहु और ग्रहों के समान गगन मंडल में घूमता है पर दीखता नहीं है । यह स्वरूप में हो कर नदीखने का दृष्टान्त है । ॥ ३३ ॥

जैसे छोटे बडे भूत प्राणी अर्थात् घट पट मनुष्य पशु आदिकों में पृथिव्यादिक महा भूत अप्रविष्ट हो कर भी प्रविष्ट से दिखलाई पड़ते हैं ऐसे ही उच्च और अवच भूतों में मैं हूं और नहीं हूं । ॥ ३४ ॥

———

श्रीधरस्वामिकृत भावार्थदीपिका ।

साधनमाह । आत्मनस्तत्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्य्यम. तदेवाह । अन्वयः कार्य्येषु कारणत्वेनानुवृत्तिः कारणावस्थायाञ्च तेभ्योऽव्यतिरेकः तथा जाग्रदाद्यवस्थासु तत्तत्साक्षितयाऽन्वयः व्यतिरेकश्च समाध्यादौ एवम् अन्वयव्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा च तदेवात्मेति ॥ ३५ ॥

यत् प्रार्थितं नेहमानः प्रजासर्गमिति तत् प्रसादीकरोति एतन्मतं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण कल्पेषु ये विकल्पा विविधाः सृष्टयः तेषु निर्मोहं कर्तृत्वाभिमानं न यास्यसीति ॥ ३६ ॥

———

श्री राधारमणदासगोस्वामिविरचित दीपिकादीपनटिप्पणी ।

एतावदेवेत्यादि स्पष्टम् अन्वयः कार्येषु कारणत्वेनानुवृत्तिरिति यदा कार्याणि जायन्ते तदा उपादानतया ईश्वरस्य सर्व्वत्रैवानुवृत्तिः कुण्डलादिषु सुवर्णवत् यदा अविकृतः कारणरूपेणावर्त्तते तदा कार्याणामभावात् तेभ्यो व्यतिरेकः अविकृतसुवर्णवत् एतेन जगत्कारणं यत् किमपि नित्य सिद्धं स्वप्रकाशरूपं तदेव तत्त्वं अयस्कामैरन्वेषणीयमिति इति चतुःश्लोकीभागवतम् ॥ नन्वनेन श्लोकचतुष्टयेन कथं दशलक्षणलक्षितसमस्तभागवतार्थ संग्रहोभवतु अत्रोच्यते अहमेवासमेवाग्रे इत्यनेन सर्वकारणकारणं भागवत प्रतिपाद्यम् आश्रय उक्तः अनेन द्वादशस्कन्धार्थस्याप्युपसंग्रहः पश्चादहमित्यनेन पुरुष प्रधानादि सर्व्वं उक्तः अनेन द्वितीय तृतीयस्कन्धार्थस्योपसंग्रहः यदेतच्चेत्यनेन विसर्गः स्थानम् ऊतिः मन्वन्तरेशानुकथा चोक्ता यत् एतत्कार्य भूतं जगत् तदप्यहमेवेत्यर्थः अनेन चतुर्थ पञ्चम सप्तमाष्टम नवमस्कन्धपर्यन्तार्थः संकलितः योऽवशिष्येत सोऽस्म्यहमित्यनेन निरोधउक्तः अनेन दशमस्कन्धार्थ स्योपसंग्रहः ऋतेऽर्थमिति मायाकथनेन मायाया जगत्सृष्ट्यादिर्जीवस्य संसारो जीवेश्वरविभागश्चउक्तः तत्तु समग्रग्रन्थे तत्तदवसरे तत्तदुपाख्याने न ज्ञेयम् अनेन प्रथमस्कन्धार्थस्याप्युपसंग्रहः यथा महान्तीत्यनेन पोषणमुक्तम् अनेन षष्ठस्कन्धार्थस्योपसंग्रहः एतदेवेति साधन कथनेर्मुक्तिर्दर्शिता अनेन एकादशस्कन्धार्थस्योपसंग्रहः एतत् सर्गादिविशेषः श्रीश्रीधरस्वाम्युक्त प्रतिस्कन्धोपक्रमश्लोकैर्द्रष्टव्यः किंच स्वामिदर्शितसर्ग प्रतिपादकतृतीयस्कन्धान्तर्गतविसर्गादिकथनवत् यद्यपि विसर्गादिप्रतिपादकेषु चतुर्थादिष्वन्येषु स्कन्धेषु स्वाम्युक्तराणि अन्यानि लक्षणानिकचित् सन्ति, तथापि बाहुल्योक्तेः प्राधान्यात्स्वाम्युक्तलक्षण प्रतिपादकत्वमेव सर्वेषां स्कन्धानां युक्तमिति ज्ञेयम् बहुविद्वत्सम्मतेयं चतुश्लोकीटिप्पणीति ॥ ३५ ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रिका

पुनश्च प्रकृतिपुरुषविलक्षणेश्वरस्वरूपं संग्रहेण वदन् तस्यैव जिज्ञास्यत्वमाह एतावदिति आत्मनः परमात्मनः तत्त्वं स्वरूपं जिज्ञासुना ज्ञातुमिच्छुना एतावदेव परस्परविविक्तस्वभावचिदचिदन्तरात्मभूत भगवत्स्वरूप मेवान्वयव्यतिरेकाभ्यामयोगान्ययोगव्यवच्छेदाभ्यां जिज्ञास्यं इत्यर्थः एवं जिज्ञास्यमेवेत्यन्वयः नान्यज्जिज्ञास्यमिति व्यतिरेकः यद्वाऽन्वयात्सद्भावाच्चिदचिच्छरीरकपरमात्मन एवकार्यात्मनाकारणात्मना च सद्भावाद्व्यतिरेकाच्चिदचिच्छरीरकपरमात्मातिरिक्तवस्त्वंतराभावादेवंभूतपरमात्मविज्ञानेन सर्वविज्ञानादुक्तात्वस्त्वंतराभावादेतावदेवजिज्ञास्यमित्यर्थः प्राधान्येन ज्ञेयं भगवत्स्वरूपं चेतनमचेतनं च तद्विभूतिभूतमिति तदज्ञानस्य भगवद्ज्ञानेऽन्तर्भावादात्मनस्तत्त्व इत्युक्तं संग्रहेण प्रकृतिपुरुषवैलक्षण्यमाह यत्स्यादिति यदात्मनस्तत्वं मत्स्वरूपं सर्वदास्यादित्यविच्छिन्नावृत्तिः अचिदपि प्रतिक्षणपरिणामित्वेन पिण्डत्वघटत्वकपालत्व चूर्णत्वरजस्त्वाणुत्वाद्यवस्थासु पूर्वपूर्वावस्थानां सद्व्यस्योत्तरोत्तरावस्था प्राप्त्यभावात्सर्वदाऽस्तित्वाभावात् सर्वत्रानुवृत्त्यभावात् तस्याविकृतत्वेन सर्वदास्यादिति वक्तुं शक्यत्वेपि वालाग्रशतभागस्येत्याद्युक्तप्रकारेण जीवस्वरूपस्याणुपरिमाणत्वेनसर्वत्र स्यादिति वक्तुमशक्यत्वात् एवमविकारित्वानंतत्वकथनेन सत्यं ज्ञानमनंतं ब्रह्मेत्युक्तब्रह्मस्वरूपलक्षणमाभिहितं भवति ॥ ३५ ॥

एवं परावरे यथा रूपे जानीयां ते इत्यस्योत्तरमुक्तं नेहमानः प्रजासर्गं बध्येयमित्यस्योत्तरमाह एतदिति परमेण समाधिना चित्तैकाग्र्येण एतन्मतं सम्यगनुतिष्ठ भवानिति संहाराद्यधिकर्तृरुद्रादेरप्युपलक्षणं कल्पविकल्पेषु सृष्टिसंहारेषु कल्पः कल्पनं सृष्टिः विकल्पो विपरीतकल्पनं संहारः कर्हिचित्कदाचिदपि नमुह्यति अस्मदधीनत्वमनुसंधाय समुन्नद्धमदापहतो न भविष्यसीत्यर्थः अनेनैव तद्विषयां धेहि मनीषां इत्यस्याप्युत्तरमुक्तं भवति ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

भगवान्स्वव्याप्तिसोदाहरणामुपदिशतीत्याह यथामहांतीति यथामहांतिपंचभूतानिउच्चावचेषुभूतेषुस्वकार्यशरीरेषुप्रविष्टानिवर्तंते ततोऽप्यधिकव्याप्तिसद्भावात्तेष्वप्रविष्टानिच तथाहमप्यनंतदेशकालव्यापीतेषुभूतेषुप्रविष्टस्तेभ्योबहिरपिस्थितत्वात्पुनरप्रविष्टश्च यथामहांतिभूतानिशरीरेषुबहिस्तथेत्यादेः ॥ ३५ ॥

उक्तव्याप्तिस्फुटीकरणपूर्वकमुपदेशमुपसंहरति एतावदिति यद्वस्तुसर्वत्रसर्वदेशेसर्वदासर्वस्मिन्कालेस्यान्वयव्यतिरेकाभ्यामवस्त्वन्वितानन्वितदेशकालस्वरूपाभ्यांव्याप्तंस्यादेतावदेवमत्स्वरूपमात्मनःपरमात्मनस्तत्त्वजिज्ञासुनात्वयाजिज्ञास्यंविचार्यंस्यादित्यन्वयः अनेनवस्त्वंतरसद्भावासद्भावरूपाभ्यामन्वयव्यतिरेकाभ्यांसर्वदेशकालयोरेकप्रकारेणगुणक्रियाभिर्व्याप्तमितिविचार्यमित्युक्तंभवति ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अथ क्रमप्राप्तरहस्यपर्य्यन्तसाधकत्वात् रहस्यत्वेनैवतदङ्गमुपदिशति एतावदेवेति आत्मनो मम भगवतस्तत्त्वजिज्ञासुनायाथार्थ्यमनुभवितुमिच्छुना एतावदेव जिज्ञास्यं श्रीगुरुचरणेभ्यः शिक्षणीयम् किं तत् यदेकमेव वस्तु अन्वयव्यतिरेकाभ्यां विधिनिषेधाभ्यां सदा सर्वत्रस्यात् उपपद्यते तत्रान्वयेन यथा एतावानेव लोकेऽस्मिन्नित्यादि, ईश्वरः सर्व्वभूतानामित्यादि, मन्मना भव मद्भक्त इत्यादि च व्यतिरेकेण यथा मुखबाहूरुपादेभ्य इत्यादि ऋषयोऽपि देव युष्मत्प्रसंगविमुखा इह संसरन्तीत्यादि न मां दुष्कृतिनो मूढा इत्यादि, यावज्जनो भवति नो भुवि विष्णुभक्त इत्यादि च कुत्रकुत्रोपपद्यते सर्व्वत्र शास्त्रकर्तृदेशकरण द्रव्यक्रियाकार्य्ये फलेषु समस्तेष्वेव तत्र समस्तशास्त्रेषु यथा स्कान्दे ब्रह्मनारदसंवादे-संसारेऽस्मिन् महाघोरे जन्ममृत्यु समाकुले पूजनं वासुदेवस्य तारकंवादिभिः स्मृतम् इति तत्राप्यन्वयेन यथा भगवान् ब्रह्मकार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत् कूटस्थोरतिरात्मन् यतो भवेत् इति तथा पाद्मेस्कान्दे लैङ्गे च आलोड्य सर्वशास्त्राणि विचार्य्य च पुनः पुनः इदमेकं सुनिष्पन्नंध्येयो नारायणः सदा इति व्यतिरेकोदाहरणम्—पारंगतोऽपि वेदानां सर्वशास्त्रार्थ विद्यदि यो न सर्व्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् इत्यादिकं सर्व्वत्रावगन्तव्यम् तथान्ते दर्शयिष्यते एकादशे शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि श्रमस्तस्य श्रमफलोह्यधेनुमिव रक्षत इति सर्व्वकर्तृषु यथा—ते वै विदन्त्यतितरन्ति च

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः। यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्य्यग्जना अपि किमु श्रुतधारणा ये इति गारुडे च कीटपक्षिमृगाणाञ्च हरौ सन्न्यस्तचेतसाम् ऊर्द्ध्वामेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम् इति तत्रैव सदाचारे दुराचारे ज्ञानिन्यज्ञानिनि विरक्ते रागिणि, मुमुक्षौ मुक्ते भक्त्यसिद्धे भक्तिसिद्धे तस्मिन् पार्षदतां प्राप्ते तस्मिन्नित्यपार्षदे च सामान्येन दर्शनादपि सार्व्वत्रिकता तत्र सदाचारे दुराचारे च यथा—अपि चेत् सुदुराचारो भजते मामनन्यभाक् साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः इति। सदाचारस्तु किं वक्तव्य इत्यपेरर्थः। ज्ञानिन्यज्ञानिनि च ज्ञात्वाज्ञात्वाऽथ ये वै मामित्यादि। हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः इति। विरक्ते रागिणि च—बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः। प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥ इति। अबाध्यमानस्तु सुतरां नाभिभूयते इत्यपेरर्थः। मुमुक्षौ मुक्ते च मुमुक्षवो घोररूपानित्यादि आत्मारामाश्च मुनय इत्यादि। भक्त्यसिद्धे भक्तिसिद्धे च केचित् केवलया भक्त्या वासुदेवपरायणाः। इत्यादि न चलति भगवत्पदारविन्दाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः। इति च भगवत्पार्षदतां प्राप्ते मत्सेवया प्रतीतं ते इत्यादि नित्यपार्षदे वापीषु विद्रुमतटास्वमलामृताप्स्वित्यादि। सर्वेषु वर्षेषु भुवनेषु ब्रह्माण्डेषु तेषां बहिश्च तैस्तैः श्रीभगवदुपासनायाः क्रियमाणायाः श्रीभागवतादिषु प्रसिद्धिः। सिद्धैरेभिः सर्वदेशोदाहरणं ज्ञेयम्। सर्वेषु करणेषु यथा मानसेनोपचारेण परिचर्य हरिं मुदा। परं वाङ्मनसागम्यं तं साक्षात् प्रतिपेदिरे ॥ इति। एवम्भूतवचनं हि अस्तु तावद्बहिरिन्द्रियेण मनसा वचसापि तत्सिद्धिरिति प्रसिद्धिः। सर्व्वद्रव्येषु यथा पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। इत्यादि। सर्वक्रियासु यथा श्रुतोऽनुपठितो ध्यात आदृतो वाऽनुमोदितः। सद्यः पुनाति सद्धर्म्मो देवविश्वद्रुहोऽपि हि ॥ इति। यत् करोषि यदश्नासि इत्यादि। एवं भक्त्याभासेषु भक्त्याभासापराधेष्वपि अजामिलमूषिकादयो दृष्टान्ता गम्याः सर्वेषु कार्येषु यथा यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं सम्पूर्णतामेति सद्यो वन्दे तमच्युतम् ॥ इति। सर्वफलेषु यथा अकामः सर्वकामो वा इत्यादि तथा यथा तरोर्मूलनिषेचनेन इत्यादिवाक्ये न हरिपरिचर्य्यायां क्रियमाणायां सर्वेषामन्येषामपि देवादीनामुपासना स्वत एव भवतीत्यतोऽपि सार्वत्रिकतापि यथोक्तं स्कान्दे श्रीब्रह्मनारदसंवादे अर्च्चिते देवदेवेशे शङ्खचक्रगदाधरे अर्च्चिताः सर्वदेवाः स्युर्यतः सर्व्वगतो हरिः इति। एवं यो भक्तिं करोति यद्द्रव्यादिकं भगवते दीयते येन द्वारभूतेन भक्तिः क्रियते यस्मै श्रीभगवत्प्रीणनार्थं दीयते यस्माद्गवादिकात् पयआदिकमादाय भगवते निवेद्यते यस्मिन् देशादौ कुले वा कश्चिद्भक्तिमनुतिष्ठति तेषामपि कृतार्थत्वं पुराणेषु दृश्यत इति कारकगतापि। एवं सार्व्वत्रिकत्वं साधितम्। सदातनत्वमप्याह सर्वदेति। तत्र सर्गादौ यथा कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता इत्यादि सर्गमध्ये तु बहुत्रैव चतुर्विधप्रलयेष्वपि तत्रेमं क उपासीरन्निति विदुरप्रश्ने सर्वेषु युगेषु कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः। द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनादिति।

किम्बहुना—सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः। यन्मुहूर्त्तं क्षणं वापि वासुदेवो न चिन्त्यते ॥ इत्यपि वैष्णवे। सर्वावस्थास्वपि—गर्भे श्रीनारदकारितश्रवणेन श्रीप्रह्लादे प्रसिद्धम् बाल्ये श्रीध्रुवादिषु यौवने श्रीमदम्बरीषादिषु। वार्द्धक्ये धृतराष्ट्रादिषु। मरणे अजामिलादिषु स्वर्गितायां श्रीचित्रकेत्वादिषु। नारकितायामपि—यथा यथा हरेर्नाम कीर्त्तयन्ति स्म नारकाः तथा तथा हरौ भक्तिमुद्वहन्तो दिवं ययुः ॥ इति नृसिंहपुराणे अत एवोक्तं दुर्व्वाससा—मुच्येत यन्नाम्न्युदिते नारकोऽपीति। तथा एतन्निर्विद्यमानानामित्यादावपि सर्व्वावस्थोदाहृतिः। अथ तत्र तत्र व्यतिरेकोदाहरणानि च कियन्ति दृश्यन्ते—पारंगतोऽपि वेदानां सर्व्वशास्त्रार्थवेद्यपि। यो न सर्व्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् ॥ इति। किं वेदैः किमु शास्त्रैर्वा किंवा तीर्थनिषेवणैः विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः इति किं तस्य बहुभिः शास्त्रैः किं तपोभिः किमध्वरैः वाजपेयसहस्रैर्वा भक्तिर्यस्य जनार्द्दने ॥ इति गारुडबृहन्नारदीयपाद्मवचनानि। तथा—तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमंगलाः। क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥

न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न जातु सेव्यताम् यथा च मानस्य किरीटकोटिभिरित्यादि सालोक्यसार्ष्टिसारूप्यसामीप्येत्यादि न दानं न तपो नेज्या इत्यादि नैष्कर्म्यमप्यच्युतभाववर्ज्जित मित्यादि नात्यन्तिकं विगणयन्त्यपि ते प्रसादमित्यादयः अथ सर्वत्र सर्वदा यदुपपद्यत इति योजनिकायां युगपद् यथा—तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदेत्यादि अन्वयव्यतिरेकाभ्यां सर्व्वत्र सर्वदा यदुपपद्यत इत्यत्र यथा—स्मर्त्तव्यः सततं विष्णुरित्यादि स्कान्देऽपि यथा—न ह्यतोऽन्यः शिवः पन्था इत्युपक्रम्य तदुपसंहारे तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान् नृणाम् इति नृणां जीवानामिति नृणामिति विविच्य कवय इतिवत् एतदुक्तं भवति यत् कर्म्म तत् सन्न्यास भोग शरीरप्राप्त्यवधि योगः सिद्ध्यवधि सांख्यमात्मज्ञानावधि ज्ञानं मोक्षावधि तथा तत्तद्योग्यतादिकानि च सर्वाणि एवम्भूतेषु कर्म्मादिषु शास्त्रादिव्यभिचारिता च ज्ञेया हरिभक्तेस्तु अन्वयव्यतिरेकाभ्यां सदा सर्वत्र तत्तन्महिमभिरुपपन्नत्वात्, तथाभूतस्य रहस्यस्याङ्गत्वं युक्तम्। अतो रहस्यांगत्वेन च ज्ञानरूपार्थान्तराच्छन्नतयैवेदमुक्तमिति तत्राप्यात्मविषयैवान्यार्थसंगोपनादसौ साधनभक्तिरपि कश्चिज्ज्ञानं ब्रह्मज्ञानादिसाधनं स्यादिति गम्यते। तत्रेयं प्रक्रिया-साधनभक्तेः सार्वत्रिकत्वात् सदातनत्वाच्च प्रथमं सा गुरोः प्राप्ता। ततस्तदनुष्ठानाद्ब्रह्मसाधनं वैराग्यपुरःसरतां शीलमात्मज्ञान विज्ञाने चेति आनुषङ्गिकं भवति ततो भूयश्च तथाभूतत्वाद्भक्तिरनुवर्त्तित एव ब्रह्मभूतः प्रसन्नात्मा इत्यादिभ्यः, आत्मारामाश्च मुनयः इत्यादिभिश्च तदेव भगवज्ज्ञानविज्ञाने चेति। तस्मात् ज्ञानविज्ञानरहस्यतदङ्गानामुपदेशेन चतुःश्लोक्या अपि स्वयं भगवानेवोपदिष्टः। अत्र, तस्मै स्वलोकं भगवान् सभाजित इति भगवच्छब्देन, ददर्श तत्राखिलसात्वतां पतिमित्यत्र, तपसा न्ते सोऽबुध्यत गोपवेशो मे पुरस्तादाविर्बभूव इति तापनीश्रुत्याद्यनुकूलेन श्रीकृष्णत्वलिंगेन चास्य वक्तुं श्रीभगवत्त्वमेव स्पष्टम् न जातु तदंशभूतनारायणस्य गर्भोदशायिपुरुषस्य। अत एवास्य महापुराणस्यापि श्रीभागवतमित्येवाख्या तथैवोक्तम्-कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरेत्यादौ पुराणाब्देन भगवत्कर्तृत्वमेवोक्तम्। आद्योऽवतारः पुरुषः परस्येति द्वितीयेऽभिधानात् अतः इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे स्थिताय भवभीताय कारुण्यात् संप्रकाशितम् ॥ इत्यत्रापि भगवच्छब्दः प्रयुक्तः श्रीनारायणनाभिपंकजे स्थितं ब्रह्माणं प्रति स्वयं भगवता तत्रैव व्यापिमहावैकुण्ठलोकं प्रकाश्येदं पुराणं प्रकाशितमित्यर्थः अनुगतं चैतत् द्वितीयस्कन्धेतिहासस्येति जीयादसौ भगवतः प्रतिज्ञा चातुरर्थिकी व्याख्या च स्वामिपादानां या याऽभूत् मम जीविका ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

(तदेवं श्रीभागवतं संक्षेपेणोपदेश्यन्त श्रीनारदं श्रीब्रह्मापि तद्विस्तारं कारितवान्, यथा हरौ भगवति नृणां भक्तिर्भविष्यति इत्यादि श्रीनारदेनापि तन्महापुराणाविर्भावार्थं तथैवोपदिष्टम् अथो महाभाग भवानित्यादिना) ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्य कृत सुबोधिनी ।

एवं भगवति दशधा भवति तथा सति सर्वत्र जगति भगवान् त्रिष्वप्युपपत्तिं वदति एतावदेव जिज्ञास्यमिति निरूपणं तु जिज्ञासानुरोधेन जिज्ञासा तु विश्ववत् तत्त्वशास्त्रवत् षोडशधा तस्यात्मोपयोगाभावात् आत्मार्थमेव हि जिज्ञासा तदाह तत्त्वजिज्ञासुनात्मन इति प्रमेय ज्ञानं प्रमाणं वैराग्यं विषयो दशविधा लीलाभक्तिः आत्मनस्त्वेतावदेवोपयुज्यते अन्यत्तु देहार्थं एवं निरूप्या न्यतरं निराकृत्य त्रिष्वप्युपपत्तिमाह अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदेति अन्वयव्यतिरेकाभ्यामित्युपपत्तिः यादित्यादि त्रयमुद्देश्यं तत्र सर्वं भगवान् कथमित्याकांक्षायां अन्वयव्यतिरेकाभ्यामिति सर्वत्र भगवतः सत्तास्ति घटः सन् पटः सन् भासत इति प्रियमिति च सर्वत्रैवैकस्य च य अन्यथा एक शब्दानुवृत्तिः प्रतीत्यनुपपत्तिर्वान स्यात् विशेषेण अतिरिच्यत इति घटादिभ्यः किमतिरिच्यते घटस्तु घटात्नातिरिच्यते तथा पटः पटात् किंतु मृद्घटादप्यतिरिच्यते पटादपि एवं सर्वत्र यत्सर्वं तत्सत् सर्वस्मादतिरिच्यते तद्ब्रह्मैव नन्वेकमेव ब्रह्मत्व साधकमस्तु किं द्वाभ्यामिति केवल अन्वयेन ब्रह्मत्वं न सिध्यति जगति जगतोऽप्यन्वयात् यद्यपि घटादेर्व्यतिरिच्यते जगत् तथापि जगतो नव्यतिरिच्यते खपुष्पादिकं तु जगतो व्यतिरिच्यतेपरं नान्वेति सत् जगतो व्यतिरिच्यते भगवतोऽपि सत्वात् कारणस्यापि सत्वात् अतो यस्यान्वयव्यतिरेकौ तदेव सर्वं किंच यत्सर्वस्यात् यद्वा सर्वदा देशकालौ यस्य परिच्छेदकौ न भवतः तत्रान्वयव्यतिरेकाभ्यां मायात्वेनैव परिच्छिद्यते न हि माया विषये आभासे सदसत्वयोस्ति नच आभासः सतो नव्यतिरिच्यते स्वस्यै वाभावात् भगवांस्तु मायाया मप्यस्तिअतिरिक्तोपि एवं कालेपि विषये घटे स्वकारणं सत्कार्ये सदाधारः सत्वेप्यतिरिक्तता नहि मृदेवघटः तदामृदेवच्छायामपि घटप्रतीतिःस्यात् घटशब्दप्रयोगश्च एवं कार्यं सर्वदा पंचधा भगवानन्वेति पंचधा च व्यतिरिच्यते घटो र्हि घटादिभ्यो व्यतिरिच्यते कारणादपि व्यतिरिच्यते घटांतरादपि व्यतिरिच्यते घटस्य ह्याविर्भावस्तिरोभावश्च अत एव कस्मिन् घटे आविर्भावतिरोभावाभ्यां व्यतिरिच्यते तिरोभावाभ्यां दशधा भगवानस्ति एवं सर्वत्र दशलीलायुक्तो भगवान् अनेनस्वरूपंभगवानदेशप्रतीतिस्तु मायिकी कालप्रतीतिस्तु लीलाया एवं देशकालतत्त्वपरिच्छिन्नं देशकाल वस्तुरूपं च ब्रह्ममेवेति एतावदेव जिज्ञास्यं इदमेवोपपत्त्याविचारितं उत्पत्त्या च पुरुष एवेदं सर्वं वितस्तिमधिनिप्रतीति उद्देशं च न यतोस्तिकिंचित् प्रादेशमात्रं पुरुषं वसंतमिति च एवं भगवता ब्रह्मणः शिक्षानिरूपिता ब्रह्मरूपं जगद्ज्ञातव्यं जगतो व्यतिरिच्यन्त इति न तत्रासक्तिःकर्त्तव्या एकस्मिन्नपि पदार्थे स्वलीलासहितो भगवान स्तीति चदेशकालवस्तुरूपं सद्देशकालवस्तुतो व्यतिरिच्यत इति ॥ ३५ ॥

एवं शिक्षांनिरूप्य गर्वाभावे एतदनुसंधानमेव कारणमित्याह एतन्मतामिति सर्वं भगवान् अन्यथा प्रतीति मायया सर्वत्र भगवान् सर्वलीला सहितः सर्वदोषविवर्जित इति एतन्मतं मम भगवतः इदं हि भगवच्छास्त्रं मम आतिष्ठ यथा तत्तन्मतानुसारिणः तत्र तत्र प्रतिष्ठिताः तथा भवानपि अस्मिन्मते प्रतिष्ठितो भवतु अथ कुतर्का बहव उत्पत्स्यंते ते सर्वे अनुभवेनैव दूरीकर्त्तव्याः तदाह परमेण समाधिनेति समाधिश्चित्तैकाग्र्यं सूक्ष्मदृष्टौ तद्ज्ञातव्यं आपाततो दृष्ट्या विचारेण वा नैतन्मतं ज्ञातं भविष्यति ज्ञातेऽत्वस्मिन् महाकल्प अवान्तरकल्पेषु च सृष्टि प्रलययोर्न मुह्यति किंच कर्हिचिदपि नमुह्यति कदाचिदपि मायातंनव्यामोहयति अस्य मतस्य मायायाश्च विरोधात् तत्रैव मायायत्रैतन्मतं नास्तीत्यर्थः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

अथ भगवच्छिक्षितमहं करवाणि ह्यतन्द्रित इति ब्रह्मणा प्रार्थितं स्वप्राप्तिसाधनम् अतिरहस्यत्वात् बहिरंगजनागम्यतयैवाह एतावदेवेति । अत्र बहुतरशास्त्रानुसन्धानमपि नापेक्षितव्यमिति भावः । तत्त्वजिज्ञासुनाऽऽत्मनः स्वस्य श्रेयः साधनतत्त्वं ज्ञातुमिच्छुना जनेन जिज्ञास्यं श्रीगुरुचरणेभ्यः शिक्षणीयमित्यर्थः । त्वया तु मदनुग्रहादवगम्यत एवेति भावः । किं तत् यत् श्रेयःसाधनेषु कर्म्मज्ञानयोगभक्त्यादिषु मध्ये अन्वयव्यतिरेकाभ्यां स्यात् सिध्यति स्थिरीभवतीत्यर्थः । तत्र तावत् स्वर्गापवर्गादेः कर्म्मज्ञानयोगादिभिः केवलैरसिद्धेस्तैर्विनापि सिद्धेः कर्म्मज्ञानयोगादयोऽन्वयव्यतिरेकाभ्यां नैव साधनानि स्युः । तथाहि को वार्थं आप्तोऽभजतां स्वधर्म्मत इति । क्लिश्यन्ति ये केवलबोधलब्धये इति । पुरेह भूमन् बहवोऽपि योगिन इति । यत् कर्म्मभिर्यत् तपसेत्यादौ कर्मादिभिर्विनापि सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति इति । या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति नरो नारायणाश्रयः ॥ इति मोक्षधर्मीयवचनञ्च । भक्त्या तु केवलयैव सर्व्वाणि श्रेयांसि सिध्यन्ति तया विना तु नैव सिध्यन्तीति अन्वयव्यतिरेकाभ्यां भक्तिरेव सर्वश्रेयःसाधनत्वेन स्थिरीभवति । तथाहि अन्वयेन यथा अकामः सर्वकामो वा मोक्षकाम उदारधीः तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ इति ।

भक्तियोगस्य केवलस्यैव तीव्रत्वं निरसुसूर्यस्येवेति ज्ञेयम् यथा वा-यत् कर्म्मभिर्यत्तपसेत्यादि व्यतिरेकेण यथा-मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः ॥ इति यथा वा-तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमंगलाः क्षेमं न विन्दन्ति विनायदर्पणं तस्मैसुभद्रश्रवसे नमोनमः ॥ इति तत्र देशकाल विशेषाभावमाह, सर्व्वत्र सर्वदेशेषु सर्व्वाधिकारिषु च सर्वदा सर्व्वेष्वेव कालेषु यत् स्यात् तथाहि शुचावेव देशे शुचितत्काले जीवो कर्म्मकुर्य्यात् शुद्धान्तः करण एव ज्ञानं लभेत शुचौदेशे प्रतिष्ठाप्य सुखमासनमात्मनः योगीयोगं प्रयुञ्जीत, इति कर्म्मज्ञानादीनां न सार्व्वत्रिकता तथा यत् कर्म्म तत् सन्यासभोमप्राप्त्यवधि, योगः सिद्ध्यवधि, सांख्यमात्मज्ञानावधि, ज्ञानं मोक्षावधीति

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

नापि सार्व्वत्रिकता भक्तेस्तु सार्व्वत्रिकतासार्व्वदिकते श्रुतिप्रसिद्धे यथा न देशनियमस्तत्र न कालनियमस्तथा नोच्छिष्टादौ निषेधोऽस्ति श्रीहरेर्नाम्नि लुब्धक ॥ इति तस्मात् सर्व्वात्मना राजन् हरिः सर्व्वत्र सर्व्वदा। श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान् नृणाम् इति कर्म्मज्ञानि प्रभृतिषु सर्व्वेष्वेवाधिकारिषु भक्तेर्व्यतिरेकैव किरातहूणान्ध्रपुलिन्दपुक्कशास्त्वादिना जातिचाण्डालकर्मचाण्डालादिष्वपि दृष्टा तथा सर्व्वास्वस्थास्वपि गर्भे प्रह्लादादेः बाल्ये ध्रुवादेः, यौवने अम्बरीषादेः, वार्द्धक्ये ययात्यादेः, मरणे अजामिलादेः नारकितायामपि—मुच्येत यन्नाम्न्युदिते नारकोऽपरियुक्तेः यथा यथा हरेर्नाम कीर्त्तयन्ति च नारकाः तथातथा हरौ भक्तिमुद्वहन्तो दिवं ययुः ॥ इति नृसिंहपुराणोक्तेश्चेतिभक्तेरेव साधकत्वं निर्द्धारितम्।

अथ प्रेमभक्तिरूपं रहस्यमपि तन्त्रेणैवाह एतावदिति। तत्त्वजिज्ञासुना पुंसा एतावदेव श्रेयःसु स्वर्गापवर्गप्रेमसु मध्ये जिज्ञास्यम्। किन्तत् यत् श्रेयः आत्मनः स्वस्यैव अन्वयव्यतिरेकाभ्यां सर्व्वत्र सर्व्वदा स्यात्। तत्र न तावत् स्वर्गापवर्गौ स्वान्वयव्यतिरेकाभ्यां सिध्यतः प्रेमा तु स्वस्यैवान्वयव्यतिरेकाभ्यां सिध्यति। प्रेम्णोऽपि भक्तिशब्दवाच्यत्वात् साधनभक्त्यैव साध्यभक्तेः प्रेम्णः सिद्धिदर्शनात् प्रेम्णः स्वेनैव सिद्धिः। यदुक्तम् भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥ इति। अतो रहस्यतदङ्गशब्दाभ्यामुच्यमाने प्रेमभक्तिसाधनभक्ती तन्त्रेणैवोक्ते ततश्च प्रेमभक्तिसाधनत्वेनैव भक्तिः कर्त्तव्या न तु स्वर्गापवर्गादिसाधनत्वेनेति भगवतः शिक्षा व्यञ्जिता भगवच्छिक्षितमहं करवाणि इति ब्रह्मणा प्रार्थितत्वात्। शुद्धसाधनभक्तिसिद्धया प्रेमभक्त्यैव यद्रूपगुणादिमाधुर्यरसानुभवस्तस्य प्रेमभक्त्यनुभावरूपत्वादिति विज्ञानं स्वत एव लब्धम् अतो रहस्यतदङ्गविज्ञानानि श्लोकेनानेनैवोक्तानि। किञ्च रसो वै स इत्यनन्तरं सैषाऽऽनन्दस्य मीमांसा भवतीति श्रुतेः सर्वश्रेयोऽवधिरूपो रस एव मूर्त्त एव रंगभूमौ मल्लानामशनिरित्याद्याकार एव दर्शितस्तस्य च विज्ञानमत्रैव श्लोके तन्त्रेणोक्तम्। यथा—जिज्ञास्येषु मध्ये एतावदेव जिज्ञास्यमनुबुभूषणीयम्। किं तत्। अन्वयव्यतिरेकाभ्यां योगायोगाभ्यां संयोगविप्रलम्भाभ्यां यत् स्यात्। सर्वत्र सर्वब्रह्माण्डवर्त्तिनि श्रीवृन्दावनादौ दाससखिगुरुप्रेयसीषु सर्वदा नित्यमेव महाप्रलयसमयेऽपीति दास्यसख्यवात्सल्यशृंगाररसानाम् आस्वादनं व्यञ्जितम्। एवमतिरहस्यप्रेमभक्तिरसव्यञ्जकः श्लोकोऽयं ज्ञानरूपार्थान्तरेण भगवतैवाच्छादितश्चिन्तामणिरिव कनकसम्पुटेन बहिरङ्गजनाशक्योद्घाटनेन। तथाच श्रुतिः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥ इति। तच्च ज्ञानरूपमर्थान्तरं यथा आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यम् किं तत् यदन्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा स्यात् तदेवात्मा। तथा ह्यात्मनः कारणत्वेन जगत्यन्वयः जगतस्त्वात्मनि व्यतिरेकः तथाच जाग्रदाद्यवस्थासु तत्साक्षितया आत्मनोऽन्वयः आत्मनि तु जाग्रदाद्यवस्थाव्यतिरेक इति ॥ ३५ ॥

नन्वतिगम्भीरार्थं चतुःश्लोकीभागवतमिदं कथं मया अवगन्तुं शक्यं विवदमानानां मतवैविध्यादित्यत आह। एतन्मतं मदीयं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण विमृशेत्यर्थः। कल्पविकल्पेषु महाकल्पानुकल्पेषु ॥ * ॥ इति चतुःश्लोकीभागवतविवृतिः सम्पूर्णा ॥ ० ॥ इयं विश्वजनीनातिरम्या सारार्थदर्शिनी। भक्तिशास्त्रमधीयानैर्जनैर्दृश्या न चापरैः ॥ ३६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

अथ स्वानुग्रहसाध्यमुपायमाह एतावदेवेति सर्वकार्योपादानतयाऽन्वयोऽनुवृत्तिः आधारत्वकर्तृत्वादिनानिमित्तकारणतया व्यतिरेकोऽननुवृत्तिः एवं विधाभ्यां तदात्मानं स्वयमकुरुतेति श्रुतिप्रोक्ताभ्यामन्वयव्यतिरेकाभ्यां सत्सर्वत्र सदा च स्यात् एतावदेवात्मनः परमात्मनः मम तत्त्वं तत्त्वजिज्ञासुना मम तत्त्वं ज्ञातुमिच्छुना जिज्ञास्यं मम ज्ञानार्थं विचार्यमित्यर्थः अन्यस्य स्वातन्त्र्येण जिज्ञास्यत्वाभावाद्यद्विज्ञानेन सर्वं विज्ञातं भवतीति श्रुतेः ॥ ३५ ॥

अथेहमानः नवध्येयमिति यत्प्रार्थितं तत्राह एतन्मतमिति परमेण समाधिना चित्तैकाग्र्येण एतन्मतं सम्यगातिष्ठ अनेनैव बलेन भवान् कल्पेषु तेषु ये विकल्पाः विविधाः सृष्टयः तेषु च कर्हिचिन्न विमुह्यति कर्तृत्वाभिनिवेशं नयास्यति ॥ ३६ ॥

भाषाटीका।

आत्मा के तत्व जिज्ञासु को इतना ही जानना चाहिये कि जो अन्वय और व्यतिरेक से सर्वदा और सर्वत्र है वह आत्मा है। संसार में जो वस्तु है वह आत्मा की सत्ता से है इसका नाम अन्वय है। और जिस में आत्मा की सत्ता नहीं है वह नहीं है इसका नाम व्यतिरेक है ॥ ३२ ॥

तुम इस मत को परम समाधि से अनुष्ठान करो, तुम कल्प विकल्प मे कभी मोह न प्राप्त होओगे ॥ ३३ ॥

शुक उवाच ।

संप्रदिश्यैवमजनो जनानां परमेष्ठिनम् ।
पश्यतस्तस्य तद्रूपमात्मनो न्यरुणाद्धरिः ॥ ३७ ॥
अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः ।
सर्व्वभूतमयो विश्वं ससर्जेदं स पूर्व्ववत् ॥ ३८ ॥
प्रजापतिर्धर्म्मपतिरेकदा नियमान् यमान् ।
भद्रं प्रजानामन्विच्छन्नातिष्ठत् स्वार्थकाम्यया ॥ ३९ ॥
तं नारदः प्रियतमो रिक्थादानामनुव्रतः ।
शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥ ४० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एवं संप्रदिश्य उपदिश्य जनानां परमेष्ठिनं परमे आधिपत्ये स्थितं ब्रह्माणम् । आत्मनस्तद्रूपं न्यरुणात् अन्तर्हितवान् ॥ ३७ ॥

अन्तर्हित इन्द्रियार्थः प्रत्यक्षंरूपं येन तस्मै यद्वाञ्जलिः सन् ॥ ३८ ॥

तदनन्तरं पूर्व्वोक्तो ब्रह्मनारदसंवादः प्रवृत्तइत्याह प्रजापतिरिति पञ्चभिः प्रजानां भद्रमन्विच्छन् विमृशन्सैव स्वार्थकाम्या स्वप्रयोजनेच्छा तया यमनियमानातिष्ठत् ॥ ३९ ॥

रिक्थादानां पुत्राणां मध्ये प्रियतमः । तं पितरं सर्वभावः शीलादिनापरितोषयामास किमिच्छन् विष्णोर्मायां विविदिषन् ॥ ४० ॥ ४१

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

अजनः कर्मायत्तोत्पत्तिशून्यः हरिर्भगवान् जनानां व्यष्टिभूतानां परमे आधिपत्येस्थितं प्रति एवमुक्तप्रकारेण संप्रदिश्य तस्य परमेष्ठिनः पश्यतः सतः तच्चतुर्मुखायप्रदर्शितमात्मनः संबंधिरूपं न्यरुणात्तिरोभावयामास ॥ ३७ ॥

अंतर्हितास्तिरोधापित इंद्रियार्थः चक्षुरिंद्रियविषयः प्रत्यक्षरूपं येन तस्मै हरये विहितः रचितःअंजलिर्येन सःसर्वभूतमयः सर्वभूतप्रचुरः स्रक्ष्यमाणदेवादिभूतानि बुद्धिस्थत्वेनभूतविषयकज्ञानप्रचुर इत्यर्थः स ब्रह्मा इदं विश्वं पूर्ववत्पूर्वकल्पवत् ससर्ज ॥ ३८ ॥

तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवृत्त इत्याह प्रजापतिरिति पंचभिः धर्मपतिर्भागवतधर्माणां प्रवर्त्तनेन गोप्ता प्रजापतिः ब्रह्मा-प्रजानां भद्रं मंगलमन्विच्छन् विमृशन् सैव स्वार्थे काम्यास्वप्रयोजनेच्छातया कदाचिद्यमान्नियमांश्चान्वतिष्ठदनुष्ठितवान् इत्यर्थः ॥ ३९ ॥

तमनुतिष्ठंतं पितरं रिक्थादानां मरीच्यादिपुत्राणां मध्ये प्रियतमो नारदः शीलादिभिः पर्यतोषयदित्युत्तरेणान्वयः प्रियतमत्वमेवाह अनुव्रतः पितरं सेवमानः शुश्रूषमाणः श्रोतुकामः शीलेन स्वस्वभावेन प्रश्रयरूपेण विनयेन दमेन बाह्येंद्रियदमनेन च चकाराच्छमेनांतरिंद्रियनिग्रहेण च ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

नेहमानइति प्रार्थितवरंददानित्याह एतन्मतामिति ॥ ३७ ॥

तिरोधानान्निरोधानेअपिस्वेच्छाधीने इति ज्ञापयन्हरिःस्वस्वरूपंतिरोधत्तइत्याशयेनाह संप्रदश्येति अजनोजननरहितोजनविरुद्धलक्षणोवा हरिर्जनानांरुद्रादीनांसकाशात्परमेष्ठिनउत्तमस्यहिरण्यगर्भस्तद्रूपंप्रादर्शयदात्मनस्तद्रूपं तस्यविरिंचस्यपश्यतःसतोन्यरुणादित्यन्वयः ॥ ३८ ॥

भगवनींद्रियविषयाइंतर्हितेसातिविरिंचेनांकिकृतमञ्जाह्यांतर्हितइति इंद्रियार्थइंद्रियविषयस्तस्माइंतर्हितायबाह्येंद्रियग्राह्यरूपराहितायेत्यर्थः सर्वभूतमयःसर्वभूतप्रधानः सर्वस्यापिप्रधानत्वात्सर्वमयईर्यतइति ॥ ३९ ॥

सदास्वेष्टदेवतांसेवमानोऽपिपुमान्विशेषप्रयोजनप्राप्तौविशेषतस्तदुपास्तिंकुर्यादितिन्यायंदर्शयितुंविरिंचस्यविशेषोपास्तिमाहप्रजापतिरिति धर्मपतिः संपदिविपदिप्राप्तत्तद्विशेषकार्यप्राप्तौविशेषतस्तद्योग्यानुष्ठानंकर्तव्यमितिधर्मस्यपालकः प्रजानांभद्रान्वेषणंनस्वार्थइत्यतउक्तं स्वार्थेति तदपिस्वप्रयोजनमितिममीषयामुक्तौसुखोद्रेकार्थत्वादित्यर्थः अहिंसासत्यमस्तेयंब्रह्मचर्यंदयाऽऽर्जवं क्षमाधृतिर्मिताहारःशौचंचैतेयमाःस्मृताः तपःसंतोषआस्तिक्यंदानमीश्वरपूजनं सिद्धांतश्रवणंचैवह्रीर्मतिश्चजपोव्रतं एतेतुनियमाःप्रोक्तास्तान्सर्वाश्चपृथक्पृथगितिस्वाद्वितीयशास्त्रे ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसंदर्भः ।

आत्मनो रूपं न्यरुणदित्यनेन वैकुण्ठादिकमपि स्वरूपत्वेनैवाङ्गीकृतम् । एवमेव हि व्याख्यातम् अहमेवासमेवाग्र इत्यत्रापि अत ऋते ऽर्थमित्यत्रापि अर्थशब्दस्याप्यर्थः सान्तरङ्गवैभव एव भगवान् गम्यते ॥ ३७ ॥

अन्तर्हिते इति । अन्तर्हित इन्द्रियाणां चक्षुरादीनाम् अर्थः परमपुरुषार्थस्वरूपःस्वस्य प्रकाशो येन तस्मै इति व्याख्येयम् ॥ ३८ ॥

प्रजापतिरिति । स्वार्थस्य स्वस्वरूपत्वस्य वांछया नियमान् यमानातिष्ठत् तत्र च किं कुर्वन्, प्रजानां भद्रं, मात्रार्थञ्च भवार्थञ्च आत्मने ऽकल्पनाय चेत्युक्तलक्षणामिति ॥ ३९ ॥

तमिति युग्मकम् ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एव मुपदिश्य यत् कृतवान् तदाह संप्रदिश्यैवमिति एव सम्यक् प्रकारेण अनुभवारूढपर्यंतं स्वमतमुपदिश्य स्वयं तिरोदधे बाह्यतः ननु सर्वरूपो भगवान् सर्वप्रकृतिषु भवेत् तत्कथं न स्थापितवान् तथा सति सृष्टिः सुगमा भवति तत्राह अजन इति नजनः अजनः जनाद्व्यतिरिक्तः इदं हि विश्वं न विश्वरूपं किंतु तस्माद्व्यतिरिक्तं तस्याधिदैविकं अतएवप्रातरेव कार्यं नत्वेतद्दृष्टाकर्त्तव्यं अप्रतिकृति रूपत्वात् जनस्तु जनस्य प्रतिकृतिः नत्वजनः तर्हि कथमयं जनसृष्टिं ज्ञास्यति तत्राह जनानां परमात्मनामिति जायन्ते जनाः तेषां परमोनियामकः तत्सामर्थ्ये पश्यत एव तस्य तद्रूपं न्यरुणत् आवृतवान् ननु परमकृपालुः किमिति नतद्रूपमावृतवान् तत्राह हरिरिति ब्रह्मणो जनानां च सर्वदुःखहर्त्ता अतो निर्बंधनिवृत्त्यर्थं उपसंहृतवानित्यर्थः ॥ ३७ ॥

ततो यद्वृत्तातं तदाह अंतर्हितेंद्रियार्थायेति इंद्रियाणामर्थः इंद्रियार्थः अंतर्हितश्चासाविंद्रियार्थश्च भगवान्सर्वेन्द्रियातीतोऽपि सेवया भक्तेंद्रियाणामर्थरूपो जातः सर्वेषामेव भगवानर्थ इति सुतरांभक्ताश्रयाणामिंद्रियाणां चेतनसृष्टि पक्षे तेषामेव मुक्त्यर्थं जडपक्षे तद-धिष्ठातॄणां कृतार्थत्वाय भगवानर्थो भवति एवं सति ब्रह्मणः सर्माप्तत्वात् तैस्य तद्दशानां व्यष्टीनां च निरिंद्रियत्वं स्यात् अतस्तेषां दुःख निवृत्तये पूर्वमिन्द्रियार्थोपि सन् इदानीमंतर्हिते इंद्रियाविषयो जातः एवं भवतं ब्रह्मणःसृष्टत्वात् उपकारायेति ज्ञापयति हरय इति अत एव विहिता अंजलिर्येन विशेषेण हितः अंजलिर्वायस्य भगवांश्चजीवेभ्यः उपकरोति तदाजीवैः स उपकारोऽञ्जलिनाप्राह्यः अयमेव जीवानां विहितः नत्वन्यः कश्चन उपकारः सेवा या भगवतः कर्त्तुं शक्या भगवत्स्वरूपस्यदृष्टत्वात् इदमेव तेषां वहुयद्भगवता क्रियमाणान निर्धेति शास्त्रतो विहितोऽपि ब्रह्मणा स्वयमप्यनुष्ठित इति विहितः कृत इत्यर्थः ततो भगवदुक्तार्थानुसंधानेन स्वयं सर्व भूतमयो, जातः आत्मनोपि तथा भावस्वविहितत्वात् भूतशब्देन प्रादुर्भूतमात्रमुच्यते भगवदाज्ञयायावत् प्रादुर्भूतं तत्सर्वं ब्रह्मणो प्रविष्टमिति वा तदनंतरं विश्वं सृष्टवान् तदा आत्मसृष्टेर्वैषम्यं न भवति अत एव ब्रह्मा पूर्ववदेव जातः जगच्च पूर्ववदेव कृतवान् यथा भगवता सृष्टं यथा वास्वेनैव सृष्टमिति ॥ ३८ ॥

एवं उपदेशं कार्यावसायिनं निरूप्य तस्योपदेशस्य प्रचारमाह प्रजापतिरिति यथा स्वयं भगवदुपदेशेन कृतार्थः एवं सर्वेकृतार्था भवंत्विति प्रजानां भद्रमन्विच्छन् तेषामधिकाराभावमाशंक्य अधिकारसंपादने अशक्तिमप्याशंक्य पित्रा कृतं पुत्राणामर्थं भवतीति य-स्मिन् जात एतामिष्टिंनिपर्वतीविभुतौ तथा सिद्धत्वास्तदर्थं नियमान्यमांश्च आतिष्ठत् कृतवान् तत्र विहित एव धर्मः पुत्राणामर्थं भवतीति प्रकारांतरमाह प्रजापतिरिति यथापतिकृतं भार्यायै भवति तथा प्रजानामपि भविष्यतीति नत्वेदतदपि स्त्रीपरमेव न त्वन्यप-रमित्याशंक्य धर्मनियामकत्वेन यथा धर्मं प्रेरयेत् तथा तत्रगच्छेदिति स्वयं प्रजाभ्योदत्तवानिति ज्ञापयितु माह धर्मपतिरिति एकदेति उभयथापि पदार्थेन कोपि विशेषः बुद्धि गम्यवमानमिति प्रष्टुं शक्यते व्यवहारस्तु केवले ईश्वरे अयुक्तः अशक्यश्च अतो विष्णोऽर्या एकश्च स्यात्रितयपरिच्छेद रहितस्य मायांत्रितयरूपां सर्वत्र करणरूपां स्वांशमाययामोहितं तादृशप्रकारहेतुभूतं च तदाह मायेशस्येति मायां नियमयतीति मायायाः करणता महामुनिरिति अत्यंतं मननशीलः सहिद्वितीयां मायां जानाति अतस्तामपि निर्वर्त्तयितुं योग्यो भवतीति तथोक्तं पुनरेव सहितं जानाति महामुनिस्तु परहितं किंच महाभागवत इति दशविधलीलाश्रवणाधिकारी अत्रराजन्निति संबोधनं भवानपितादृशइति ज्ञापनार्थं पितरामिति विश्वासाय परितस्तोषणं फलपर्यवसायि ततः किमत आह तुष्टंनिशाम्येति निशाम्य ज्ञात्वा ज्ञानस्य ज्ञानपरत्व मुक्तं तस्योत्कृष्टत्वं सम्यग्ज्ञाने भवति प्रश्नयोग्यतार्थमाह पितरामिति न केवलं स्वार्थे किंतुसर्वार्थमित्याह लोकानां प्रपितामह इति अनुशिष्टेन हि मान्यंपितुः पुत्रेण अतः पिता मां चेच्छिक्षयेत् मया पुत्र प्रायाः लोकाःशिक्षणीया इति वक्ष्यतीत्यपिज्ञान वान् देवर्षित्वात् देवानामप्युपास्यं मंत्रं यः पश्यति स ब्रह्मणो हृदयं जानातीत्यविवादं परितः प्रश्नः ससाधनः यथा त्वया पूर्वं पक्षेन पृष्टं तथा तेनापि पृष्टमित्याह भवान्यन्मानुपृच्छति तदातस्यार्थमेवेति शास्त्रतो विहितोपि ब्रह्मणास्वयमप्यनुष्ठितं इति विहितः कृत इत्यर्थः ततो भगवदुक्तार्थानुसंधानेन स्वयं सर्वभूतमयो जातः आत्मनोपि तथा भावस्य विहितत्वात् भूतशब्देन प्रादुर्भूतमात्रमु च्यते भगवदाज्ञया यावत् प्रादुर्भूतं तत्सर्वंब्रह्मणि प्रविष्टमिति वा तदनंतारंविश्वं सृष्टवान् तदा आत्मसृष्टेर्वैषम्यं न भवति अत एव ब्रह्मपूर्ववदेव जातः जगच्च पूर्ववदेव कृतवान् यथा भगवता सृष्टं यथा वा स्वेनैव सृष्टमिति उपदेशकार्यै वसायिनं निरूप्य तस्योपदेश स्य प्रचारमाह प्रजापतिरिति यथास्वयं भगवदुपदेशेन कृतार्थः एवं सर्वेकृतार्था भवंत्विति प्रजानां भद्रमन्विच्छन् तेषामधिकारा भाव-माशंक्य अधिकार संपादने अशक्तिमप्याशंक्यापित्रा कृतं पुत्राणामर्थं भवतीति यस्मिन् जात एतामिष्टिंतिपर्वती विभुतौ तथा सिद्धि-त्वास्तदर्थं तदर्थं नियमान्यमांश्च आतिष्ठत् कृतवान् तत्र विहित एव धर्मः पुत्राणामर्थं भवतीति प्रकारांतरमाह प्रजापतिरिति यथा पति कृतं भार्या प्राप्नोति यथा प्रजानामपि भविष्यतीति नत्वेतदपि स्त्रीपरमेव नत्वन्यपर मित्याशंक्य धर्मनियामकत्वेन यथा धर्मंप्रेरयेत् तथा तत्र गच्छेदिति स्वयं प्रजाभ्यो दत्तवानिति ज्ञापयितुमाह

धर्मपतिरिति एकदेति निश्चिततादृशार्या भाव्यर्थज्ञाने प्रचरणकाले वानियमा अभक्ष्यादयः यमा अहिंसादयः इन्द्रियांतःकरणनियमन मेव यमनियमात्मकं यथेन्द्रियाणि लौकिक क्रियायां प्रवृत्तानि ततो नियम्य वैदिकक्रियापराणि क्रियन्ते एवमंतःकरणमपि लौकिक-

मायां विविदिषन् विष्णोर्मायेशस्य महामुनिः ।
महाभागवतो राजन् पितरं पर्यतोषयत् ॥ ४१ ॥
तुष्टं निशाम्य पितरं लोकानां प्रपितामहम् ।
देवर्षिः परिपप्रच्छ भवान् यन्मानुपृच्छति ॥ ४२ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

ज्ञानाश्रियस्य वैदिके ज्ञाने योज्यते तदुभयमपि ब्रह्मा प्रजानामर्थे कृतवानित्यर्थः ब्रह्मणोनिर्बंधे को हेतुः तत्राह स्वार्थकाम्ययेति स्वस्य अर्थः प्रयोजनमिति यावत् एतन्मतं समातिष्ठेति भगवदाज्ञमते स्थितिः कर्त्तव्याः सा च प्रचरणादेव भवति अतः प्रचरणार्थं तथा कृतवान् किंच नपातिश्च सस्यादिति वाक्यात् प्रजानांकृतार्थत्वाभावे स्वस्य तत्पातित्वमेवनस्यादिति स्वार्थमेव तथाकृतवानित्यर्थः ॥३९॥

तस्य यथांतःकरणं फलपर्यवसायिजातमित्याह तस्मारद इति तं पूर्वोक्तवंतं नारं द्यति खंडयतीति नारदः नारं ददातीति वा नराणां जीवानां समूहो नारं नारदो हि सर्वेषां जीवानां जीवभावं दूरीकरोतीति नारदः नारायणस्याधारभूतं हृदयं वासंपादयति अतो नारदो ऽधिकारी किंच प्रियाय पुत्राय चैतद्दयमिति नारदः रिक्थादानां पुत्राणां मध्ये प्रियतमो भवति रिक्थं धनमाददत इति रिक्थादाः रिक्तं हि बहुधा तत्रेदं मनाख्यं त्रयं पूर्वमेवज्ञातमिति सर्वदेहमिति वा एकं तृतीयमेवोक्तवान् तदाह दशलक्षणमिति दशलक्षणान्यन्यानि पुराणांतरे भवंति तानिलोकप्रसिद्धानि तद्व्यावृत्त्यर्थमाह भागवतमिति भगवता प्रोक्तं भागवतमिति स्वरूपप्रतिपाद्यमिति एवं अनेन प्रथम सिद्धांतोपि कथितः पुराणमिति लोकप्रतीति सिद्धांत द्वितीयोपि इदमिति स्वप्रतीति सिद्धं अंगुल्यानिर्दिशति अनेन चतुर्थोऽपि कथितः अनेनचतुःश्लोकोक्तं सिद्धांतचतुष्टयमपि कथितवान् प्रामाण्यार्थपरंपरा माह प्रोक्तंभगवतेतिनत्वेतद्रूढं परमसमाधिगम्यंकथमुक्तवानतआह ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

परमेष्ठिनं सन्दर्शय आत्मनोरूपमिति वैकुण्ठादिकमपि तस्यैव रूपमिति ज्ञापितम । न्यरुणत् अन्तर्द्धापयामास ॥ ३७ ॥

अन्तर्हित इन्द्रियाणां स्वभक्तचक्षुरादीनाम् अर्थः परमपुरुषार्थः स्वसौन्दर्य्यमैश्वर्य्यसौरभ्यादिको येन तस्मै पूर्ववत् पूर्वपूर्वस्मिन् अतीते कल्प इवेत्यर्थः तेन ब्रह्मणः स्वकर्म्याभिगमरूपो मोहः पूर्वकल्पे तत्रैवाभूत् नतु चतुःश्लोकीभागवतोपदेशानन्तरमपि भवान् कल्पविकल्पेषु न विमुह्यतीति भगवदुक्तेः यत्तु कृष्णावतारे ब्रह्ममोहनं, तत्तु भगवत्कृपाविलसितमेव ज्ञेयम ॥ ३८ ॥

तदनन्तरञ्च पूर्वोक्तब्रह्मनारदसंवादः प्रवृत्तइत्याह पञ्चभिः प्रजानां भद्रमान्वच्छन् यमानियमानातिष्ठत् स्वाचरणेन शिक्षयन् मत्प्रजा यमनियमानातिष्ठन्त्वित्यर्थः स्वार्थकाम्यातया ॥ ३९ ॥

रिक्थं धनं पैतृकं दायप्राप्तत्वेनाददते इति रिक्थादाः पुत्रास्तेषां मध्ये प्रियतमम इति कर्म्मयोगज्ञानयोगभक्तियोगानां पैतृकधनानां मध्ये दक्षादयः कर्म्मयोगं प्रापुः सनकादयो ज्ञानं नारदो भक्तिंप्रापेति नारदस्योत्कर्षात् अनुव्रतः पितृभक्तः मायां बहिरंगशक्तिं कृपां वा तस्या वैचित्रीं ज्ञातुमिच्छन्नित्यर्थः मायेशस्य मायाभर्त्तुः मायया कृपया ईष्टे तस्येति वा ॥ ४० ॥ ४१ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

अजनो नित्यशरीरी जनानां हरिः नानावतारैः क्लेशहरणस्वभावः परमेष्ठिनंप्रजानांप्रतिएवमुक्तरीत्या संदिश्योपदिश्य तस्य परमेष्ठिनः पश्यतः यत्परमेष्ठिने दर्शितं तत् आत्मनः रूपं न्यरुणत् अंतर्हितवान् ॥ ३७ ॥

सर्वभूतमयः विराट्देहाभिमानी सः परमेष्ठिनः अंतर्हितः इंद्रियार्थः इंद्रियसर्वस्वभूतं रूपं येन तस्मै हरये विहितांजलिः सन् इदं व्यष्टिरूपं जगत्पूर्ववत्ससर्ज सूर्याचंद्रमसौधाता यथापूर्वमकल्पयादिति श्रुतेः ॥ ३८ ॥

ततः पश्चात्पूर्वोदाहृतो ब्रह्मनारदसंवादो जात इत्याह प्रजापतिरिति पंचभिः प्रवृत्तिनिवृत्तिभेदेनोभयविधस्य धर्मस्य पतिः यतः उभयविधायाः प्रजायाः पतिः परमेष्ठिनः प्रजानामुभयविधानां भद्रं कल्याणमन्विच्छन् स्वार्थकाम्याप्रयोजनेच्छातया उभयप्रकारानेव यमान्नियमांश्चान्वतिष्ठत् अनुष्ठितवान् ॥ ३९ ॥

रिक्थादानां दायभाजां मरीच्यादीनां पुत्राणां मध्ये प्रियतमः नारदः तमनुतिष्ठंतं पितरं परमेष्ठिनं शुश्रूषमाणः सेवमानः विष्णोर्मायां प्रकृत्याख्यां शक्तिं यद्वा माया च वयुनं ज्ञानमिति कोशान्मायां ज्ञानं चेष्टां विविदिषन् शीलादिभिः पर्यतोषयत् परितोषयामासेति द्वयोरन्वयः ॥ ४०

भाषाटीका

शुकउवाच — अजन भगवान् जनों के परमेष्ठी को यों उपदेश कर, उसके देखते देखते हरि ने अपना वह रूप अन्तर ध्यान कर लिया ॥ ३७ ॥

इन्द्रियों से अन्तर्हित हरि को अंजली विधानकर सर्व भूत मय ब्रह्माने इस जगत को पूर्व वत् सृजा ॥ ३८ ॥

प्रजा पति धर्म पति ब्रह्मा एक समय रचनार्थ कामना से प्रजाओं के मंगल की इच्छा कर यम नियम अनुष्ठान करने लगे । ॥ ३९ ॥

तस्मा इदं भागवतं पुराणं दशलक्षणम् ।
प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥ ४३ ॥
नारदः प्राह मुनये सरस्वत्यास्तटे नृप ।
ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥ ४४ ॥
यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदम् ।
यथाऽऽसीत् तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वितीयस्कन्धे श्रीभागवतप्रवृत्तिर्नाम
नवमोऽध्यायः ॥ ९ ॥

श्रीधरस्वामि कृत भावार्थ दीपिका ।

निशाम्य दृष्ट्वा ज्ञात्वेत्यर्थः मा माम् ॥ ४२ ॥

भगवता चतुःश्लोक्या संक्षेपेण प्रोक्तं विस्तरेण प्राह । दश लक्षणानि लक्षणीया अर्था विद्यन्ते यस्मिन् तत् ॥ ४३ ॥

तत्सम्प्रदायतो भागवतं मया ज्ञातमित्याशयेनाह नारद इति ॥ ४४ ॥

भागवतव्याख्यानेनैव त्वत्प्रश्नानामुत्तरं दास्यामीत्याह यदुतेति । पुरुषावयवैर्लोकाः सपालाः पूर्व्वकल्पिता इत्यादिना वैराजात् पुरुषादिदं विश्वं कथमासीदिति यदहं त्वया पृष्टः तद्यथावदुपाख्यास्यामि शृणुष्वेति ॥ ४५ ॥

इति श्रीमद्भागवतभावार्थदीपिकायां द्वितीयस्कन्धे नवमोऽध्यायः ॥ ९ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिन्याख्य तट्टिप्पणी ।

पुरुषावयवैरिति पूर्वाध्यायस्य दशमश्लोकः ॥ ४५ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

किमिच्छन्मायाधिपस्य विष्णोर्मायां तत्रियाम्याश्चर्यशक्तिं विविदिषन्वेदितुमिच्छन् ॥ ४१ ॥

लोकानां प्रपितामहं स्वस्य पितरं ब्रह्माणं तुष्टं स्वपरिचर्यायां संतुष्टं निशाम्य ज्ञात्वा देवर्षिर्नारदः भवान्मां प्रतियदनुपृच्छति यनुपृष्टवांस्तदेव परिपप्रच्छ ॥ ४२ ॥

तस्मै पृष्टवते नारदाय इदं भागवतं भगवता चतुःश्लोक्यात्मना संक्षेपेण उक्तं दशलक्षणं उपरितनाध्यायोक्तैर्दशभिरर्थैश्चिन्हितं पुराणं चतुःश्लोक्यामपि सर्गादयो दशार्थाः संग्रहेण सूचिताः तथाहि अहमेवासमिति श्लोकेन भगवतः सृष्टिस्थितिसंहारकारणत्वोक्त्या आश्रयसर्गपोषणनिरोधानामुक्तिः अनेनैव सर्वकारणत्वरूपसर्वातिशायित्वोक्त्या वैकुंठविजयरूपस्थितिरप्युक्ता पश्चादहं यदेतच्चेत्यनेन कार्यचिदचिद्रूपव्यष्टिसर्गस्यापि चतुर्मुखशरीरकस्वकारणकत्वोक्त्या विसर्गोऽपि संगृहीतः परस्परविविक्तत्वेन प्रकृतिपुरुषस्वरूपशोधकेऽऋतेऽर्थमिति श्लोके आत्मस्वरूपाप्रतीति दशायांमायास्वरूपप्रतीतिकथनादात्मस्वरूपाप्रतीतिमायाप्रतीत्योरनादिकर्मवासनायत्तत्वप्रतीते कर्मवासनारूपाऊतयोऽपि सूचिताः यथा महांति भूतानीति श्लोके सर्वांतरात्मतया प्रशासितृत्वरूपपालकत्वेनैव पालनाधिकृतभगवदवतारकथानांभगवदनुवर्तिमन्वादिकथानामपि सूचितत्वेन मन्वंतरेशानुकथे अपि सूचिते परमपुरुषशरीरप्रकृतिविलक्षणजीवस्वरूपशोधनेनैव प्रकृति विनिर्मुक्ताविभूति गुणाष्टकपरमात्मकस्वरूपेणावस्थितिरूपा मुक्तिरित्यपि सूचितं एवं दशार्थाः संग्रहेण चतुःश्लोक्यामपि सूचिता अतएवैतद्विवरणरूपे द्वादशस्कंधात्मके पुराणे दशार्थानां प्रतिपादनमुपपद्यते भूतकृद्ब्रह्मा प्रीतःप्राह ॥ ४३ ॥

स च नारदः सरस्वत्या नद्या स्तटे परमं ब्रह्मध्यायते ध्यानं कुर्वते ऽपरिमिततेजसे मुनये वेदशास्त्रार्थतत्वावगन्त्रे व्यासायप्राह प्रोक्तवान् व्यासस्तु मह्यं प्रोक्तवानित्येतत्तु अधीतवान् द्वापरादौ पितुर्द्वैपायनादहमिति पूर्वमेवोक्तम् ॥ ४४ ॥

एवं सत्संप्रदायागत श्रीभागवताख्यानेनैव त्वत्कृत प्रश्नानामुत्तरमभिधास्यामीत्याह यदुतेति इदं विश्वं वैराजात् वैराजाख्यादनिरुद्धसृष्टाच्चतुर्मुखाद्यथा आसीदिति यत्त्वयाऽहं पृष्टः अतः सृजति भूतानि भूतात्मायदनुग्रहादित्यादिना तदुपाख्यास्ये भागवताख्यानेनोत्तरयाम्यन्यांश्चप्रश्नान्कर्तृत्वेनोपाख्यास्येइत्यर्थः एवं यत्रशेते इत्यस्योत्तरमुक्तं भवति परमव्योमकथनादप्राकृतशुद्धसत्वमयलोकस्य परिग्रहकथनेनेश्वरस्य जीववद्धातुभिर्देहारंभ प्रश्नः प्रत्युक्तः अन्यत्र व्याप्तिकथनात्परिच्छिन्नत्वमपि परिहृतम् ॥ ४५ ॥

इति श्रीमद्भागवतमहापुराणेद्वितीयस्कन्धेवीरराघवकृतभागवतचन्द्रिकाटीकायांनवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

विकर्पविदर्यंधनमादयनहानिरिक्ष्यात्मा: पुत्रास्तेषामध्येनारदोऽतिशयेनाप्रियः ॥ ४१ ॥

मायांजगत्स्रष्टृत्वादिमाहात्म्यांवावावपुर्बानुकामः । मायेशस्यान्यंथामाहात्म्यानपितः मुक्ततोविष्णुमाहात्म्यंमायाशब्दोदितमवेहि प्रधानत्वात्तमात्सृत्वान्मेयत्वंचनस्यहीनि ॥ ४२ ॥

पितृतोवशाप्रयोजनमाह तुष्टमिति ॥ ४३ ॥

भगवतास्वस्यप्राक्भूतस्तत्वावस्त्वंजगत्कर्तामीतिभूतकृत ॥ ४४ ॥

नारदस्यतिसंकल्पवशोयेतिस्वपिनाशांपालनप्रकारमाह नारदइति मुनयइत्यादिविशेषणेभ्योऽव्यासस्यसार्वज्ञ्यादिप्रतीतिर्नारदादिभ्यःअवगामोहनार्थामतिज्ञातव्यं तदुक्तं हारेऽयसिनादरूपेणसर्वज्ञोऽपिस्वयंप्रभुरित्या*दि ॥ ४४ ॥

अधुनापरीक्षित्प्रश्नपरिहारायश्रीभागवतव्याख्यानपृथक्पृथक्प्रश्नप्रतिवचनंचप्रतिजानीते यदुतेति यत्पुराणापरि ज्ञानंव्यासकृतंभागवतपुराणवेपाख्यस्यं तत्पुराणंव्याकुर्वन्प्रगमतः सर्वशत्वाद्विराडाख्यामिरिंचस्थंतत्वाद्विराजपुरुषाख्यहरेरिदंविश्वंयथाभातथोपाख्यास्येप्रत्यहंत्वयापृष्टस्तउताऽयं त्वात्प्रश्नोऽत्प्रकृतशांडेगाव्यास्येइत्यन्वयः श्रीभागवतप्रथमकथानारायणोऽनुभविराड्विरिंचस्थहरेरधिदेवादिसर्वजगत्सृष्टिरतापीतिया उताप्यर्थविकल्पयोरित्याभिधानम् ॥ ४६ ॥

इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेविजयध्वजतीर्थकृतटीकायांनवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

मायां कृपां विविदिषन् तस्या वैचित्र्यं ज्ञातुमिच्छन्नित्यर्थः मायेशस्य मायया कृपया ईष्टे सर्वं वशीकरोतीति तस्य ॥ ४१ ॥

तुष्टमिति भवान् यम्मानुपृच्छतीत्यादिक तत्र तत्र तत्तत्सर्वस्य समावेशयितुं शक्यत्वात् ॥ ४२ ॥

तस्मा इति दशलक्षणामिति जन्माद्यस्येतिवत् चतुःश्लोक्यामपि तत्तदन्तर्भावयितुं शक्यत्वात् न च पूर्णमुपदिदेशेति व्याख्येयम् त्वमेतद् विपुलीकुर्विति ब्रह्मणः प्रागुक्तविरोधात् ॥ ४३ ॥

नारदः प्राहेति च समाधिनानुस्मरतद्विचेष्टितमित्यनेनैनोपदिदेशेत्यर्थः, तेन ब्रह्मादेरेतिवत् ब्रह्म परमं निर्विशेषरूपं ध्यायते इति ततोऽप्युपर्य्यंततद्यातितम् ॥ ४४ ॥ ४५ ॥

इति श्रीमद्भागवतद्वितीयस्कन्धस्य श्रीजीवगोस्वामिकृत क्रमसन्दर्भे नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

निशाम्य दृष्ट्वा मा माम् ॥ ४२ ॥

भगवता चतुःश्लोक्या संक्षेपेण प्रोक्तं विस्तरेण दशलक्षणं ब्रह्माताह । चतुःश्लोक्या संक्षेपेण प्रोक्तं दशलक्षणं द्वादश स्कंधात्मकं संपूर्णमेव भगवता प्रोक्तमिति च केचिदाहुः ४३ ॥

एवं नारायणो ब्रह्मणेप्राह ब्रह्मानारदायनारदो व्यासाय व्यासो मह्यम् अहंतु तुभ्य माख्यास्य इति भागवतीया कथा परं संवादिया प्रसिद्धाः ॥ ४४ ॥

श्रीभागवताख्यानेनैव त्वत् प्रश्नानामुत्तरं दास्यामीत्याह यदुतेति । पृष्ट इति । पुरुषा वयवैर्लोकाः सपालाः पूर्वं कल्पिताः । शुश्रुमेति वदता त्वया तद्विशेषशुश्रुतया अहं व्यञ्जनया पृष्टएवेत्यर्थः यथा यथावत् ॥ ४५ ॥

इति सारार्थ दर्शिन्यां हर्षिण्यां भक्त चेतसाम् ।
द्वितीये नवमोऽध्यायः संगतः संगतः सताम् ॥ ९ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

देवर्षिर्नारदः पितरं तुष्टं स्वपरिचर्ययासंतुष्टं निशाम्य ज्ञात्वा यद्भवान्मामां प्रति अनुपृच्छति पूर्वं पृष्टवान् तत्परिपप्रच्छ ॥ २१ ॥

तदनंतरम् भूतकृत व्यष्टिभूतस्रष्टा प्रीतः सन् तस्मै पृच्छते पुत्राय नारदाय संप्रति चतुःश्लोक्यात्मना प्रोक्तं दशलक्षणानि प्रतिपाद्या अर्था यस्मिंस्तत्पुराणं किंचिद्विस्तरेणाह ॥ ४३ ॥

स च नारदः सरस्वत्यास्तटे परं ब्रह्मश्रीकृष्णं ध्यायते व्यासाय प्राह ॥ ४४ ॥

स च मह्यं प्रोक्तवान् अहमपि भागवतव्याख्याद्वारैव त्वत्प्रश्नानामुत्तरं दास्यामीत्याह यदुतेति पुरुषावयवैर्लोका सपालाः पूर्वकल्पिता इत्यादिना वैराजात्पुरुषादिदं कथमासीदिति यदहं त्वयापृष्टः तद्विराजात्पुरुषादिदं जलमुखादिरूपेणावर्तमानंविश्वम् यथाऽऽसीत्तथा क्रमतः उपाख्यास्ये भवविधान् प्रश्नांश्चोपाख्यास्ये ॥ ४५ ॥

इति श्रीमद्भागवतेमहापुराणेसिद्धांतप्रदीपे द्वितीयस्कन्धे नवमोऽध्यायार्थप्रकाशः ॥ ९ ॥

---

* शृणोतिनारदादिभ्योमोहायैषांप्रसिद्धयेइतिद्योपतापर्यम् ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

प्रीत इति पुत्रत्वादावश्यकमपि ननु मायाज्ञानार्थं स प्रवृत्तः मायिकी भगवल्लीलां तस्मानुक्त्वा किमिति सिद्धांतं कथयति तत्राह: पुत्रायेति अमार्गेणापि पुत्रो गच्छन् निवार्यते मार्गप्रश्नोपदिश्यत इति किंच सर्वार्थमत्र भूतान्यनुकरोति अत: सर्वार्थं एतद्ब्रह्मणा प्रकाशितवा नित्याह भूतकादिति ब्रह्मणोऽभिप्रेतमेव कृतवानित्याह नारद:प्राहेति व्यासस्य तादृशश्रवणयोग्यतार्थं यच्चत्वारि विशेषणानि तत्र प्रथमं चतुर्थं योग्यतामुनिर्हि स्वस्वरूप भगवत्स्वन ध्यायति दशलीलापरिज्ञानार्थं परब्रह्मेति ध्यायन्नमिति यतस्तु पुरुषोत्तमध्यायति हि तस्य दशविधां लीलां ज्ञातु शक्नोति व्यासायेति वेदविस्तारकर्तृत्वेन सर्वबुद्ध्यनुरोधित्वात् व्यामोहिका मायाज्ञातुंशक्त:अलौकिकं हि तेज: ब्रह्मज्ञाने प्रयोजकं भवति ब्रह्मज्ञानसाध्य हि तत् तथा भूतमत्रभगवद्ज्ञाने उपयुज्यते एवं परंपरामुक्त्वा सामान्यत: सर्वदूषणानि परिहृत्य प्रश्नत्वेन प्रधानार्थानिरूपयितुमाह यदुताहमिति उक्तातिदूषणाव्यतिरेकेण केवलं प्रश्न: रूपेणापि पृष्टं तदपि पृष्टं मया वक्ष्यामीति तदुपाख्यानस्य तत्र प्रश्न सामान्यविशेषभेदेन रूपद्वय तत्र सामान्यरूपं वैराजात्पुरुषात्कथमेतज्जातमिति विशेषस्तु तत्तद्भेदेन तदाह प्रश्नानन्यांश्चेति अन्यानित्यनेन तदुपयोगिनापि ये अन्ये पृष्टा: सर्वमेतच्चेति चकारेणानेऽप्युच्यंते चकारेण ततोऽप्यन्ये अन्यैरपि कृता: कृत्स्नश: इति एकैकप्रश्न: बहुधानिरूप्यत इत्युक्तम् ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

इति श्रीमद्भागवतेमहापुराणेद्वितीयस्कन्धे श्रीलक्ष्मणभट्टात्मजविरचितायांसुबोधिन्यां नवमोऽध्याय: ॥ ९ ॥

भाषाटीका ।

विकृयादों (पुत्र) में अनु व्रत और परम प्रिय नारद ने प्रश्रय दम और शील से सुश्रूषा कर हे राजन् महा भागवत महा मुनि में मायेश विष्णु भगवान की माया जानने की इच्छा से अपने पिता को प्रसन्न किया ॥ ४० ॥ ४१ ॥

लोकों के प्रपितामह अपने पिता ब्रह्मा को संतुष्ट देखकर देवर्षि नारद ने यही पूछा था जो तुम मुझ से पूछते हो । ॥ ४२ ॥

प्रीत हुए ब्रह्माने प्रसन्न होकर पुत्र नारद से यही दश लक्षण भगवत् प्रोक्त भागवत पुराण कहा ॥ ४३ ॥

सरस्वती के तट पर परम ब्रह्म का ध्यान करते अमित तेजा व्यास मुनि से वह ब्रह्मा जी से सुना श्री भागवत पुराण नारदजी ने कहा ॥ ४४ ॥

तुमने जो मुझ से पूछा कि वैराज पुरुष से यह सृष्टि कैसे उत्पन्न हुई है यह और तुमारे अन्य समस्त प्रश्नों का उत्तर में व्याख्यान करूंगा तुम सुनो ॥ ४५ ॥

द्वितीयस्कंध का नवम अध्याय समाप्त ।

दशमोऽध्यायः ।



बादरायणिरुवाच ।

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १ ॥
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥ २ ॥
भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ।
ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ॥ ३ ॥
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ।
मन्वन्तराणि सद्धर्म ऊतयः कर्म्मवासनाः ॥ ४ ॥
अवतारानुचरितं हरेश्चास्यानुवर्त्तिनाम् ।
पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ॥ ५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ततो भागवतव्याख्याद्वारैव दशमस्फुटम् ।
राजप्रश्नोत्तरं वक्तुमारेभे बादरायणिः ॥ ० ॥

दशलक्षणं पुराणं प्राहेत्युक्तम् । तानि दश लक्षणानि दर्शयति अत्रेति । मन्वन्तराणि च ईशानुकथाश्चेति द्वन्द्वः । सर्गादयोऽत्र दशार्था लक्ष्यन्ते ॥ १ ॥

नन्वेवमर्थभेदात् शास्त्रभेदः स्यात् तत्राह दशमस्याश्रयस्य विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपम् । एकस्यैव प्राधान्यात्मायं दोष इत्यर्थः । नन्वत्र नैवं प्रतीयते अत आह श्रुतेन श्रुत्यैव स्तुत्यादिस्थानेषु अञ्जसा साक्षात् वर्णयन्ति अर्थेन तात्पर्यवृत्त्या च तत्तदाख्यानेषु ॥ २ ॥

सर्गादीनां प्रत्येकं लक्षणमाह । भूतानि आकाशादीनि मात्राणि च शब्दादीनि, इन्द्रियाणि च धीशब्देन महदहंकारौ । गुणानां वैषम्यात् परिणामात् ब्रह्मणः परमेश्वरात् कर्त्तुः भूतादीनां यद्विराड्रूपेण स्वरूपतश्च जन्म स सर्गः । विसर्गमाह पुरुषो वैराजः (ब्रह्मा) तत्कृतः पौरुषः चराचरसर्गो विसर्ग इत्यर्थः ॥ ३ ॥

वैकुण्ठस्य भगवतो विजयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानम् । ततः स्थितेषु स्वभक्तेषु तस्यानुग्रहः पोषणम् । तदनुगृहीतानां सतां मन्वन्तराधिपतीनां धर्म्मः सद्धर्म्मः । कर्म्मणां वासनाः वेञ् तन्तुसन्ताने ऊयन्ते कर्म्मभिः संतन्यन्ते इत्यूतयः धञ वृद्धयर्थात् संश्लेषार्थाद्वा वयतेर्धातोरिदं रूपम् ऊयन्ते कर्मभिर्बध्यन्ते संश्लिष्यन्त इति वा ऊतय इत्यर्थः ॥ ४ ॥

हरेरवतारानुचरितं अस्यानुवर्त्तिनाञ्च सतां कथा ईशानुकथाः प्रोक्ता इत्यर्थः ॥ ५ ॥

श्री राधारमणदासगोस्वामिविरचित दीपिन्याख्यतट्टिप्पणी ।

॥ ० ॥ १ ॥
एकस्यैवेति । दशमस्याश्रयस्यैवेत्यर्थः ॥ २ ॥
ब्रह्मणः परमेश्वरादिति । कारणसृष्टिः पारमेश्वरी कर्मसृष्टिस्तु वैरञ्चीत्यर्थः ॥ ३ ॥
सद्धर्म इति । अत्र मन्वन्तराणीति प्रोक्त इति शेषः ॥ ४—६ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका

अथ वैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्ये इति प्रतिज्ञातसमष्टिपुरुष चतुर्मुखावयवैर्देवा दिक्लृप्तीरभिधास्य स्तावत्पुराणं दशलक्षणं प्रोक्तं भगवतेति प्रस्तुतान्दशार्थानाह अत्रेति अत्र अस्मिन् पुराणे सर्गादय आश्रयान्ता दशार्थाः प्रतिपाद्या इत्यर्थः मन्वन्तरेशानुकथा मन्वन्तरकथनं ईश्वरचेष्टाकथनं चेत्यर्थः ॥ १ ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

ननु एवं प्रतिपाद्यानां बहुत्वात्प्रतिपाद्य भेदाच्छास्त्रभेदः स्यादित्याशंक्याह दशमस्येति इह पुराणे दशमस्याश्रयस्य परब्रह्मणो विशुद्ध्यर्थं शोधनार्थं सम्यक् प्रतिपत्त्यर्थं नवानां सर्गादीनां लक्षणमंजसा सुखेन महात्मानः परापरयाथात्म्यज्ञाः श्रुतेनार्थेन ,यथा श्रुतं वर्णयंति एवं च दशमस्यैव प्राधान्यात्तदर्थत्वेनेतरेषां प्रतिपादनाच्च शास्त्रभेद इत्यर्थः ॥ २ ॥

प्रत्येकं दशानां लक्षणमाह भूतेति भूतान्याकाशादीनि मात्रास्तन्मात्राणि शब्दादीनि इंद्रियाणि ज्ञानकर्मोभयेंद्रियाणि धी शब्दोऽन्तः करणभूतबुद्धिशब्दवाच्या महत्तत्त्वपरः महदादिपृथिव्यन्तानामित्यर्थः एतेषां तत्त्वानां यज्जन्म उत्पत्तिः तत्सर्ग इत्युदाहृतः ब्रह्मणः परस्माद्ब्रह्मणः प्रयोजकात्कर्त्तुः गुणानां सत्वरजस्तमसां वैषम्याद्धेतोः पौरुषश्चतुर्मुखसंबंधी प्रयोज्य चतुर्मुखकर्तृक इत्यर्थः एवं भूतः सर्गो विसर्गःस्मृतः ॥ ३ ॥

वैकुण्ठविजयः वैकुंठस्य हरेः सर्वोत्कर्षः शत्रुविजयादिरूपा स्थितिः तस्यैव वैकुंठस्य योऽनुग्रहः जगद्रक्षणरूपः सपोषणमित्यर्थः सद्धर्मः सतां वैकुंठानु गृहीतानां मन्वंतराधिपतीनां यो धर्मः स मन्वंतरानुकथनं कर्मवासनाः कर्मणः वासनाः संसाराः ऊतय उच्यंते अत्र स्त्वविवक्षितः ॥ ४ ॥

ईशानुकथां विवृणोति अवतारेति हरेरवतारानुचरितं तदनुवर्तिनो हर्यनुवर्तिनां पुंसां च नानाख्यानोपबृंहिताः विचित्र कथाभियुक्ताः सत्कथाश्चेशानुकथा इत्यर्थ. ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

अस्मिन्नध्यायेवैराजाख्यहरेः सकलजगत्सृष्टिःप्रपंच्यते तत्रादौभागवतपुराणंदशलक्षणमित्युक्तं दशलक्षणानिकथयतीत्याह अत्रेति अत्र श्रीभागवतेसर्गादिदशलक्षणानिप्रतिपाद्यंतइतिशेषः ॥ १ ॥

मुक्तामुक्तप्रपंचाधारस्यदशमस्यहरेर्माहात्म्यवर्णनस्यावश्यापेक्षितत्वात्सर्गादिनवानांवर्णनंकोपयुज्यतइतितत्राह दशमस्येति महात्मानोब्रह्मादयइहपुराणेदशमस्याश्रयस्यविशुद्ध्यर्थंसर्गादिनवानांलक्षणंवर्णयंतीत्यन्वयः अनेनार्थात्ब्रह्मज्ञानलब्ध्यर्थत्वमुक्तंभवति अत्रकिंप्रमाणमत्राह श्रुतेनेति अंजसामुख्ययावृत्यानंतवेदार्थसंवादेनेत्यर्थः ब्रह्मणः सर्वगुणपूर्णत्वसर्वोत्तमत्वादिज्ञानार्थत्वेनतदुपयोगात्सल्लक्षणकथनंयुक्तमितिभावः ॥ २ ॥

तत्रप्रथमंसर्गलक्षयति भूतेति सृष्टिकालेपरब्रह्मणःसकाशाज्जाताद्गुणवैषम्यात्तत्रामकान्महत्तत्वाद्दहंकारद्वाराभूतमात्रेंद्रियधियां खमहाभूतानांशब्दादितन्मात्राणांश्रोत्रादिदशेंद्रियाणांधियांबुद्धेश्चाण्डपर्यन्तं यज्जन्म सः सर्ग उदाहृत इत्यन्वयः विसर्गं लक्षयति विसर्ग इति पौरुषोविसर्गः स्मृतइत्यन्वयः अंडांतर्गतपुरुषनाम्नोहरेर्भूतानांयद्द्विविधंजन्मसविसर्गःस्मृतःशास्त्रांतरोक्तइतिशेषः तदुक्तं महादाद्यंडपर्यंतःसर्गोब्रह्मणस्तुयः अनुसर्गइतिप्रोक्तः पौरुषश्चेतिकथ्यते किंचपंचभूतसमूहेनजातःपुरुषोजीवः तद्विषयसर्गः पौरुषः सर्गइत्युच्यते अत्राप्युक्तंचस्मृतिः प्रमाणं पंचभूतसमूहेनजातः पुरुषउच्यते अंडांतर्हिजातानांनानाजीवानां सात्विकादिस्वभावानांव्यक्तिस्तपुर्जीवपुतेजसात्प्यादिकार्यापेक्षयाभूतानांबहुत्वात्भूयस्त्वात्तथाचभूतानांकाठिन्यादिस्वभावव्यंजकत्वेनकृतार्थत्वाज्जीवतत्त्वमेकस्मात्भूतसमूहाज्जातत्वादेकजमित्युच्यते बहुत्वात्तत्रभूतानांतावत्त्वात्तत्त्वमेकजमितिच ॥ ३ ॥

स्थानंलक्षयति स्थितिरिति वैकुण्ठस्यहरेर्दुष्टशिक्षणमहानुग्रहलक्षणोविजयः स्थितिरित्युच्यतइत्यन्वयः तस्यवैकुण्ठस्यानुग्रहोऽनुकंपिताप्रसादविशेषः पोषणमित्युच्यते तच्चस्थित्येकविषयत्वात्पूर्वस्माद्विशेषः मन्वंतरंलक्षयति मन्वंतराणीति सद्धर्मोमन्वंतरेषुसतांधारकाधर्मोमन्वंतराणीत्युच्यंते ऊतीराह ऊतयइति नानाजीवानामनादिकर्मार्जितसंस्काराश्चनानासृष्टिहेतुभूताऊतयइत्युच्यते ॥ ४ ॥

ईशानुकथामाह अवतारेति हरेर्मत्स्याद्यवताराणामनुचरितमस्यहरेरनुवर्तिनांब्रह्मादीनांपुंसामनुचरितंचनानाख्यानोपबृंहिताविविधेतिहासपूर्णाईशकथेत्युच्यते ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तदेवाश्रयसंज्ञकं महापुराणलक्षणरूपैः सर्गादिभिरर्थैः समष्टिनिर्देशद्वारापि लक्ष्यते इत्यत्राह द्वाभ्याम् अत्र सर्गो विसर्गश्चेति मन्वन्तराणि च ईशानुकथाश्च मन्वन्तरेशानुकथाः अत्र सर्गादयोदशार्था लक्ष्यन्त इत्यर्थः ॥ १ ॥

तत्र च दशमस्याश्रयस्य-विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपं वर्णयन्ति (नन्वत्रनैवं प्रतीयते अतआह) श्रुतेन श्रुत्या कण्ठोक्त्यैव स्तुत्यादिस्थानेषु अञ्जसा साक्षाद्वर्णयन्ति अर्थेन तात्पर्य्यवृत्त्या च तत्तदाख्यानेषु ॥ २ ॥

तदेवंदशमं विस्पष्टयितुं तेषां दशानां व्युत्पादिकां सप्तश्लोकी माह भूतमात्रेति भूतानि खादीनि मात्राणि च शब्दादीनि, इन्द्रियाणि च धीशब्देन महदहङ्कारौ गुणानां वैषम्यात् परिणामात् ब्रह्मणः परमेश्वरात् कर्त्तृभूतादीनां जन्मसर्गः पुरुषो वैराजो ब्रह्मा तत्कृतः पौरुषः चराचरसर्गो विसर्ग इत्यर्थः ॥ ३ ॥

स्थितिरिति । वैकुण्ठस्य भगवतो विजयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानम् उत्कर्षस्थित्योरभेद उपचारात् । तत स्थितेषु स्वभक्तेषु तस्यानुग्रहः पोषणम् मन्वन्तराणि तत्तन्मन्वन्तरस्थितानां मन्वादीनां तदनुगृहीतानां सतां चरितानि तान्येव धर्मः तदुपासनाख्यः सद्धर्म्मः तत्रैव स्थितौ नानाकर्म्मवासना ऊतयः ॥ ४ ॥

अवेति स्थितावेव हरेरवतारानुचरितम् अस्यानुवर्त्तिनाञ्च कथा ईशानुकथा प्रोक्ता इत्यर्थः ॥ ५ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवमाक्षेपसमाधाने निरूप्य हरिजीवयोः उपपत्त्यातयोरेव रूपदेहाविहाहितौ दशधाभाषते रूपं हरिरस्यविभ्रमतं आध्यात्मिकादिभेदेन गुणतः कर्मतोपि हि एवं पूर्वाध्याये उपदेशे पदार्थचतुष्टयं निरूप्य तृतीयव्यतिरिक्तानां पदानां भूत्वादिप्रसिद्धत्वात् तद्विस्तारमनुक्त्वा कस्मिन्नपदार्थे दशलीला अलौकिका इति ताः स्वरूपतो लक्षणतश्च निरूपयति यद्यपि ते लौकिका दशपदार्था बहिर्मुखातया

श्रीमद्वल्लभाचार्य कृत सुबोधिनी।

पुराणांतरेषु सिद्धाः तथाप्यत्र भागवते तेन भवंति किंवत इत्याह अत्रेति अत्र भागवते आश्रयांताः सर्गादयो दशपदार्था निरूप्यंते अत्रसिद्धांते वा एतेषांदशानामर्थः तत्ततत्स्कंधे विस्तरेण कथयिष्यते तत्रापि शरीरस्य विष्णोः पुरुषशरीरत्वेनाकारः सर्गः पुरुषोत्पत्त्या-दीनामुत्पत्तिः विसर्गः उत्पन्नानां तन्मर्यादया पालनं स्थानं स्थितानामभिवृद्धिः पोषणं पुष्टानामाचारः ऊतिः तत्रापि सदाचारेष्वन्तं-तरं तत्रापि विष्णुभक्ती ईशानुकथा भक्तानां प्रपंचाभावो निरोधः निष्प्रपंचानां स्वरूपलाभो मुक्तिः मुक्तानां ब्रह्मस्वरूपेणावस्थानमा-श्रय इति प्रत्यक्षपदार्थतुसर्गः कारणत्वेन तत्र भगवत्स्थितिः विसर्गः कार्यत्वे पूर्वमेव तत्र विद्यमानत्वं पटे तंतु प्रसिद्धे हि तंतवः पटे प्रतीयंते सर्ववस्तु स्वरूपेण च मूलरूपेण ततन्मर्यादादि रूपं पुष्टिः कार्यसिद्ध्यर्थं सर्वसमर्थस्य तत्र प्रवेशः ब्रह्मवादिनः प्रतीति सिद्ध्यर्थं तत्र तादृशलीलाप्रदर्शनभूतिः एवं पंचधा भगवदत्र एवं सर्व वस्तुषु भगवल्लीलाव्यतिरेकोपि पंचधा तत्र कारणाद्भिन्नरूपेण घटरूप-धर्मभावेन सतां धर्महेतुः प्रापंचिकोपि विधिविषयो भवतीति स्वरूपाद्यतिरिक्तो मन्वंतराणि स एव पुनः भक्तिविषयेन भगवत्सेवकरू-पेण धर्मेण लौकिकवैदिकव्यतिरिक्ततामापद्यतइति ईशानुकथारूपो भवति स एव पुनर्लौकिकवैदिकभक्तानांस्वरूपेच्छूनां परित्यागरूपेच्छ पूर्वोक्त न्यरुणादितिनिरोधरूपोभवति तादृशोपि सन् आत्मानं त्याजयित्वा तामपि तादृशस्वस्मात् परित्याजनरूपो भवतीति मुक्ति रूपो भवतीति घटादिषु वा भगवत संगानदासीनरूपता मुक्तिः आश्रयस्तु नव प्रकाराणामपि स्वरूपाणां आधारो भवतीति ॥ १ ॥

तदज्ञानेसर्वाण्येवशास्त्राणि व्याकुलानिभवंति अतो भागवतशास्त्रं सर्वोद्धारकं सर्वनिर्वाहकंचनन्वन्येदशपदार्थाःकथंनिरूप्यंते शास्त्रभेदे प्रसंगात् एकस्मिन्शास्त्रे ह्येकं प्रतिपाद्यंनतु समप्रधानतया बहूनि प्रतिपाद्यानि भवंतीत्याह दशमस्य विशुद्ध्यर्थमिति दशमोऽत्राश्रयः तस्य विशेषेण शुद्धिः सर्वत्रैव हि पदार्थे दशधर्माः संति भगवद्रूपाः तत्रैको ग्राह्यः अन्येतु त्याज्याः तत्र ते यदि निरूपिता भवंति ग्राह्यत्याज्याविवेको भवति अतो यावद्दूरे गुणसंबंधः स त्याज्यः भगवदाश्रये व्यभिचारापत्तेः अन्योन्याश्रयभंगश्च तत उत्तरोत्तरा एते धर्मा भवंतीति यत्पर्यवसाने अवतिष्ठति स ग्राह्य इति तुषादिवत् आश्रयावरकत्वेनैते धर्माः प्रतिपाद्यन्ते अतएतैर्निरूपितैः आश्रयः पदार्थो परास्पृष्टः शुद्धो निरूपितो भवति अत एतेषामपि च रूपज्ञानार्थं लक्षणानि निरूपणीयानि तदाह लक्षणमिति यथा गोःसास्ना अ-साधारणो धर्मः तेषां सर्गादीनां लक्षणमत्रोच्यते नतु स्वरूपास्वरूपं त्वग्रे वक्ष्यामः अग्रिमस्कंधे तेषां लक्षणमेतदित्यत्र प्रमाणमाह वर्णयंतीति तेषां भगवत्त्वाल्लक्षणमल्पेन वक्तुमशक्यमित्यत आह महात्मान इति महानात्मा अंतःकरणं येषां अंतःकरणे भगवच्चरणा रविंद विक्रमो यदा तदा महत्वं तदैव हि भगवत्स्वरूपाणि ज्ञातानि भवंति नतु भगवत्प्रमेयं तत्सामर्थ्येन ज्ञातं प्रमेयबलमेव भवति नतु प्रमाणद्वयमत आह श्रुतेनार्थेनेति यः सर्वत्र वेदादौपदार्थः श्रुतः स सर्वोपि भगवदीय इति सर्वे वेदा यत्पदमामनंतीति वाक्यात् ज्ञातं शुकाणि यत्रैकं भवंति सर्वे वेदायत्रैकं भवति सर्वे होतारोयत्रैकं भवंतीति श्रुतेः अनुग्राहक प्रमेयो प्रमेयानां एकपर्यवसानविधा नात् यत्र त्रयोऽप्येते पर्यवस्यंति स आश्रयः एवं त्रयोऽन्योन्या वावेशात् नवसर्गादीनां लक्षणरूपा भवंति तत्रसर्गादिषु प्रमेयं लक्षणं कारणप्राधान्यात्पुष्ट्यादिषु प्रमाणं ईशानुकथादिषु ज्योतिषीति भर्थादेते उत्पत्तिस्थिति प्रलयात्मको भवंति उत्पत्तिर्हिकारणात् कार्यतः आश्रयतश्च स्थितिरविपरीतो। विलुप्तो धर्मतश्चाप्रलयोपि अहंताममतारूपश्च ईशानुकथा लक्षणं संघातस्य प्रलयो निरोधेन मुक्तजीवानां ब्रह्मणिप्रवेशलक्षणोयातस्मात्कृते नैवार्थे न चकारात्तत्साधनयुक्त्या च वर्णयंतीत्यर्थः ॥ २ ॥

तत्राप्यंजसा सामस्त्येन नतु क्लिष्टकल्पनया किंच जीवेनैव तानि लक्षणान्याह भूतमात्रेंद्रियधियामिति भूतानि महाभूतानि पंचत-न्मात्राणि च शब्दादीनि पंचइंद्रियाणि दशधीर्बुद्धिः अंतःकरणात्मिका चतुर्धा एवं चतुर्विंशतितत्त्वान्युक्तानि भवंति तेषामधिकारत्वेन त्रयोगुणा तेषां वैषम्यात् गुणत्वेनाविर्भावात् तेषामपि कारणं ब्रह्म अतः परंपरया अष्टाविंशति भेदा भवंति तेषां जन्मसर्गः सर्गोपि-द्विविधः प्रत्येकं समुदायेन चावैषम्यं च चतुर्विधं भवति तेहि प्रत्येकं विषमा समुदायेनापि त्रिषमा भवंति त्रिविध एवं वा एव सर्गत्र-यस्त्रिंशच्चतुस्त्रिंशद्भेदभिन्नो वा भवति विसर्गस्य लक्षणमाह विसर्गः पौरुषःस्मृत इति पुरुषाद्येजातास्ते विसर्गशब्देनोच्यंते तत्र प्रमाणं स्मृति महतां पुरुषलोकव्ययभेदेन तद्भेदा एकत्रिंशद्भवंति अष्टौ वसव एकादश रुद्रा द्वादशा दित्या इति ॥ ३ ॥

स्थितिं लक्षयति वैकुंठस्य विजिष्णो जयो यत्रेति प्राकृतेषु चतुर्विंशतिधा जीवब्रह्मभेदेन आत्मानिद्वेधेति षड्विंशति भेद भिन्नाः पुष्टिं लक्षयति तदनुग्रह इति तस्य वैकुंठस्य जितेषु स्वाधीनेषु योयमनुग्रह तेषुमर्यादार्थंसम्पृथक्कृत्य शिष्टेष्वनुग्रह महाभूतेष्वात्मद्वये च सोऽनुग्रहः तत्र मर्यादेव ऊतिसद्धर्मयोर्वासना धर्मरूपत्वात् धर्मजनितो वासनेति विपरीततया लक्षयति मन्वंतराणि सद्धर्म इति सतां धर्मस्त्रिविधो भवति कायवाङ्मनोभिः कृतः कायिको दशधा वाचनिकश्च दशधाइंद्रियोपलक्षितत्वात् मानसश्चतुर्धा अंतः करणोपलक्षकत्वात् द्रष्टुं चिंतयति दृष्टमावापोद्वापाभ्यां विचारयति इष्टमाशंसते द्रष्टुं कार्ष्ण्याभीत्यध्यवस्यति एवमंतः करणे चतुर्धा-सद्धर्मः सर्वेंद्रियैश्च सद्धर्मकरणं रेतः पातानिरोधेन धर्महेतुत्वं तयोः आश्रया नत्वतिजननं जाड्यतापत्तिर्वधदूरीकरणैः शब्दादीनां दाने नव सद्धर्मः शरीरे दशधा एवं चतुर्विंशति भेदो भवति ॥ ४ ॥

ऊतीर्लक्षयति अवतारानुचरितमिति ईशानुकथा द्विविधा ईशस्य तदनुवर्तिनां च कथा तदुभयं लक्षयति करणानां अंतः पंचदशधा भवंति ईशानुकथां लक्षयतीत्युक्तं कर्मवासना इति कर्मजनितावासनाः कर्मवासना तत्र शरीरस्य कर्मेंद्रियाणां च संबंधिनः सद्धर्माः वासनात्मकाः नतु ज्ञानेंद्रियांतः करणानां अतः पंचदशधा भवंति ईशानुकथा लक्षणमित्युक्तं तत्र ईशकथामाह अवतारानुचरितमिति सर्वभूतदुःखदूरीकरणार्थं माविर्भूतस्य भगवतः चरित्रमीशानुकथा अस्यानुवर्तिनामिति द्वितीयस्य लक्षणं यथाभगवान्सर्वदुःखनिवा-रकाः ते तदनुशब्देनोच्यंते तत्र दशमस्य हरेरितिविशेषणात् दुःखदूरीकरणं सुखप्रापणं चेति अतो दुःखनिवारणे गुणभेदेन तदनुवर्तिनो त्रिधा भवंति ईशस्यापि चरित्रं कर्मज्ञानमतिभेदैः त्रिविधान वति तथानु वर्तिना पि अविद्यालक्षणदुःखदूरीकर्तारः ज्ञानिन एकविधा भवंति एवं दुःखदूरीकरणे त्रयोदशभेदाः सुखप्रापणे दशधा सर्वेंद्रियसुखप्रापका इतदनुवर्तिनः एकश्च भगवानिति एवमेकादश उभये चतुर्विंशतिः तेषां प्रत्येकनिरूपणार्थं नानास्थानेपबृंहित इत्युक्तम ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

अत्र सर्गविसर्गादिदशार्थाः सुष्ठु लक्षिताः ।
अध्यात्मादिविभागश्च दशमे सम्यगीरितः ॥ ० ॥

पूर्वाध्यायान्ते दशलक्षणं पुराणं प्राहेत्युक्तम् । तानि दश लक्षणानि दर्शयति अत्रेति । मन्वन्तराणि च ईशानुकथाश्चेति द्वन्द्वः ॥१॥

ननु किमर्थभेदाच्छास्त्रभेदः स्यात्तत्राह । दशमस्याश्रयस्य विशुद्धिर्विवेकस्तत्त्वतोऽन्यस्मादिति तदर्थं तत्त्वज्ञानार्थमित्यर्थः । वस्तुतस्त्वत्र सर्गादिनवकं परमेश्वरहेतुकं जीवगतमेव जीवस्यैव सृष्ट्युत्पत्तिसंहारमत्वदर्शनात् । अतो एकस्याश्रयस्यैव शास्त्रविषयत्वाच्चार्य बोध इत्यर्थः । श्रुतेन क्वचित् स्तुत्यादिषु तद्वाचकशब्देनैव साक्षाद्वर्णयन्ति अर्थेन च तात्पर्यवृत्त्या तत्तदाख्यानेषु महात्मानो विदुरमैत्रेयादयः ॥ २ ॥

सर्गादीनां प्रत्येकं लक्षणमाह । ब्रह्मणः परमेश्वरात् सकाशात् गुणवैषम्यं ततो हेतोर्भूतादीनां स्वरूपतो विराड्रूपेण च जन्म सर्गः धीशब्देन महदहंकारौ । पुरुषो ब्रह्मा तत्कृतः चराचरसर्गो विसर्ग इति जीवानां यथायोगं भक्तिमुक्तिभुक्तिसाधन बुद्धीन्द्रियादि प्राप्तिरूपा सृष्टिरुक्ता ॥ ३ ॥

स्थानमित्यस्य लक्षणं स्थितिः पालनम् । यतो वैकुण्ठस्य भगवतो विजयः सृष्टिकर्त्तुर्ब्रह्मणः संहारकर्त्तुः शम्भोश्च सकाशादुत्कर्षः यद्वा वैकुण्ठो हरिस्तत्कर्त्तृको जीवदुःखाभिभवःजयतेरभिभवार्थकत्वात् एवं सृष्ट्यनन्तरं जीवानां स्थितिरुक्ता स्थितावेव केषुचित् जीवेषु साधकभक्तेषु दैवाद्विकर्म्मपरेष्वपि तस्यानुग्रहः पोषणम् । सतां मन्वन्तराधिपतीनां धर्मः तत्र तत्र उद्धरिते व्यक्त इति स्थितावेव केषांचित् कर्मिणां सात्विकजीवानामाचरणीयो धर्म उक्तः । ऊयन्ते कर्मभिः संतन्यन्ते इत्यूतयः कर्मवासनाः प्राकृताप्राकृतकर्मोत्थावासनाः शुभाशुभाश्च भाविनां सुकृतदुष्कृतानां कारणभूता इति स्थितावेवोत्कृष्टापकृष्टजीवानां स्वभाव उक्तः ॥ ४ ॥

हरेरवतारानुचरितं तथा अस्यानुवर्त्तिनाम् अवतारपरिकरूपाणां भक्तानाञ्च अवतारानुचरितम् ईशकथा इति तासां श्रवणकीर्त्तनीयत्वादिभ्यः स्थितावेव केषाञ्चित् साधकभक्तानां श्रवणकीर्त्तनादीनि भक्त्यङ्गान्युक्तानि ॥ ५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

नन्वर्थभेदाच्छास्त्रभेदः स्यादत्राह दशमस्येति इह श्रीमद्भागवते दशमस्य आश्रयस्य परब्रह्मणो भगवतः विशुद्ध्यर्थं निःसंशयतया सम्यक्प्रतिपत्त्यर्थम् नवानां सर्गादीनांलक्षणं स्वरूपं महात्मानस्तत्तत्प्रकरणे श्रुतेन श्रुत्यैव अनेन सर्गादिना इत्थंभगवान्बोद्धव्यः इत्येवं निरपेक्षत्वेनैव अंजसा साक्षादेव वर्णयंति क्वचित्क्वचिच्च अर्थेनानेन सर्गादिनाऽर्थाद भगवद्ग्रहणं भविष्यतीति तात्पर्येण च वर्णयंति अत एकस्यैवाश्रयस्य प्राधान्याच्छास्त्राभेदः ॥ २ ॥

प्रत्येकं तल्लक्षणमाह भूतेति भूतान्याकाशादीनि तन्मात्राणि एकादशेन्द्रियाणि च धीशब्देन महदहंकारौ च एतेषामर्थानां गुणवैषम्यात् वाऽक्षगुणपरिणामाद ब्रह्मणः परब्रह्मणः सकाशात् स्वरूपतो विराड्रूपेण च जन्मतःसर्गउदाहृतःपुरुषो वैराजः विराट्शरीर उपास्यः प्रयोजककर्ता तच्छरीराभिमानी चतुर्मुखश्च प्रयोज्य कर्ता तत्कृतः पौरुषः चराचरसर्गः विसर्गः ॥ ३ ॥

वैकुंठस्य हरेः असाधूनां निग्रहेण जगत्पालनार्थो विजयः उत्कर्षः स्थितिः स्थानम् तस्य वैकुंठस्य साधुषु अनुग्रहः पोषणम् सतां वैकुंठानुगृहीतानां मन्वतराधिपतीनां रक्षणीयो धर्मः मन्वंतराणि कर्मणां वासना ऊयन्ते कर्मभिर्बध्यन्ते संश्लिष्यंते इति वा ऊतयः वृञ्तन्तुसंतानेऽर्थात्संश्लेषार्थाद्वावयतं धातोरिदं रूपम् कमस्तत्वविवक्षितः ॥ ४ ॥

हरेः अवतारानुचरितम् अस्य हरेः अनुवर्तिनांपुंसां चचरितम् ईशानुकथाः प्रोक्ताः कथंभूताः नानाख्यानोपबृंहिताः ॥ ५ ॥

भाषाटीका ।

इसमें (श्री भागवत पुराणमें) सर्ग विसर्ग स्थान पोषण ऊती मन्वन्तर ईशानुकथा निरोध मुक्ति आश्रय (ये दश लक्षण वर्णित हैं) ॥ १ ॥

इनदश लक्षणों में दशम (आश्रय) की शुद्धि के अर्थ और नौ पदार्थों का लक्षण महात्मा जन इस (पुराण] में वर्णन करते हैं । कहीं श्रुतसे साक्षात् वर्णनसे कहीं अर्थ से तात्पर्यसे अंजसा वर्णित है ॥ २ ॥

भूत मात्रा इन्द्रिय और धी (महत् अहंकार) का जन्म सर्ग है । गुण वैषम्यहेतुसे विराट्पुरुष कृत सृष्टि का नाम विसर्ग है ॥ ३ ॥

वैकुंठ भगवान का विजय स्थिति है । भगवान का भक्तों पर अनुग्रह करना पोषण है सद्धर्म मन्वन्तर है । कर्म वासना ऊति हैं ॥ ४ ॥

हरिके अवतारों को चरित्र और हरि के अनुवर्त्ती पुरुषों का चरित ईशानु कथा है । जिस में नाना उपाख्यान हैं ॥ ५ ॥

निरोधोऽस्यानु शयनमात्मनः सह शक्तिभिः ।
मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥
आभासश्च निरोधश्च यत श्चाध्यवसीयते ।
स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ ७ ॥
योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः ।
यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः ॥ ८ ॥
एकमेकतराभावे यदा नोपलभामहे ।
त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ ९ ॥
पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः ।
आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥ १० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

निरोधमाह । अस्यात्मनो जीवस्य हरेर्योगनिद्रामनु पश्चात् शक्तिभिः स्वोपाधिभिः सह शयनं लयः निरोधः । अन्यथारूपम् अविद्ययाध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ॥ ६ ॥

आभासः सृष्टिः निरोधो लयश्च यतो भवति अध्यवसीयते प्रकाशते च, स परं ब्रह्मेति परमात्मेति प्रसिद्ध आश्रयः कथ्यते ॥ ७ ॥

आश्रयस्वरूपमपरोक्षानुभवेन स्पष्टं दर्शयितुमध्यात्मादिविभागमाह । योऽयमाध्यात्मिकः पुरुषश्चक्षुरादिकरणाभिमानी द्रष्टा जीवः, स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः । तत्रैकस्मिन्नेव उभयः द्विरूपो विच्छेदो यस्मात् सः आधिभौतिकश्चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति पुरुषस्य जीवस्योपाधिः, स वा एष पुरुषोऽन्नरसमय इति श्रुतेः ॥ ८ ॥

एकमेकतराभावे इति एषाम् अन्योन्यसापेक्षसिद्धित्वेन अनात्मत्वं दर्शयति । तथाहि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिद्ध्यति, नापि द्रष्टा, न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः, न च तं विना करणं प्रवर्त्तते, न च तद्विना दृश्यमित्येवमेकतरस्याभावे एकं नोपलभामहे । तत्र तदा तत्त्रितयम् आलोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति, स परमात्मा आश्रयः । तेषामपि परस्परमाश्रयत्वमस्त्येवेति तद्व्यवच्छेदार्थं विशेषणं स्वाश्रयः अनन्याश्रयः स चासावन्येषामाश्रयश्चेति । तथाच भगवान् वक्ष्यति-दृग्रूपमार्कं वपुरत्र रन्ध्रे परस्परं सिद्ध्यति यः स्वतः खे । आत्मा यदेषामपरो य आद्यः स्वयाऽनुभूत्याखिलसिद्धसिद्धिः ॥ इति । एतेनैव व्यभिचारित्वात् तेषां मायामयत्वमप्युक्तम् । अतएव पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः । लोकैरमुष्यावयवाः सपालैरित्यनेनोक्तो विरोधोऽपि परिहृतः ॥ ९ ॥

उक्तमेवाध्यात्मादिविभागं प्रपञ्चयन्, यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदम् । यथासीत्तदुपाख्यास्ये इति यत् प्रतिज्ञातं तत् उत्पत्तिप्रकारमाह पुरुष इत्यादिना । पुरुषो वैराजः अण्डं विनिर्भिद्य पृथक्कृत्य विनिर्गतः पृथक् स्थित इत्यर्थः । अयनं स्थानमन्विच्छन् विमृशन् । यतः शुचिः स्वयम् अतः शुचीः शुद्धा अपः गर्भोदकसंज्ञाः अस्राक्षीत् ससर्ज ॥ १० ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिन्याख्य तट्टिप्पणी ।

यत इति हेतौ पञ्चमी ॥ ७ ॥

विच्छेद इति । भेद इत्यर्थः ॥ ८ ॥

एषामित्यादि । आध्यात्मिकादीनां त्रयाणां मिथः सापेक्षत्वेन सिद्धेस्तेषामाश्रयत्वं नास्तीति व्याचष्टे इत्यर्थः ॥ तत्प्रतीत्यनुमेयमिति । दृश्यप्रतीत्यनुमेयमित्यर्थः ॥ तद्विना करणेति । तद्विना करणं विनेत्यर्थः ॥ तं विनेति । अधिष्ठातारं सूर्यादिं विना ॥ तत्त्रितयमिति । आध्यात्मिकादित्रयमित्यर्थः दृग्रूपमार्कमिति एकादशस्कन्धीयद्वाविंशाध्यायस्य एकत्रिंशश्लोकः ॥ पुरुषावयवैरिति एतत्स्कन्धीयाध्यायस्य दशमश्लोकः ॥ तेनोक्तो विरोधः परिहृत इति । विरोधो यथा—पुरुषावयवैर्लोकाः सपालाः सपालैर्लोकैरमुष्यावयवा इत्यन्योन्याश्रयत्वात् एकतरोपादाने च सिद्धत्वात् । परिहारस्तूभयोरेव मायामयत्वादिति व्याख्यालेशः ॥ ९ ॥

यदुताहमिति पूर्वाध्यायस्य चरमश्लोकः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

निरोधलक्षणमाह निरोध इति अस्य जीवात्मनः सह शक्तिभिः कर्मशक्तिभिः सहानुशयनं सूक्ष्मावस्थप्रकृत्यवस्थितिर्निरोध इत्यर्थः मुक्तिलक्षणमाह मुक्तिरिति अन्यथा भावं देवादिरूपं हित्वा स्वरूपेणाविर्भूतापहतपाप्मत्वादि गुणाष्टकविशिष्टेन रूपेणावस्थानमेव मुक्तिरित्यर्थः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका।

आश्रयलक्षणमाह आभास इति आसमन्ताद्भासनमाभासः जगत आविर्भावः निरोधः प्रलयश्च ॥ यतः यस्मादध्यवसीयते ज्ञायते प्रमाणेनावगम्यते आविर्भावतिरोभावजन्मनाशाविकल्पवदित्युक्तेः ॥ ब्रह्मपरमात्मादिशब्दैः शब्द्यते ऽध्यवसीयते स आश्रय इत्यर्थः ॥ ७ ॥

अथाश्रयस्य परमात्मनः कारणत्वोपयुक्तसर्वज्ञतां वक्तुं ज्ञातृज्ञेयज्ञानकरणानां भगवदात्मकत्वमाह य इति आत्मनि जीवे ज्ञातरि नियन्तृतया वर्तमान आध्यात्मिको यः पुरुषः सो ऽसावेवाधिदैविकः ॥ देवेषु ज्ञानकरणचक्षुरादीन्द्रियाभिमानिष्वादित्यादिषु वर्तमानश्च स एव उभयविच्छेदः उभयविधो विच्छेदो भेदो यस्य स उभयविच्छेदः ज्ञातृज्ञानकरणविलक्षणो ज्ञेयः शब्दादिराकाशादिभूतेषु वर्तमानः तत्र यः शब्दादिष्वन्तरात्मतयावर्तमानो यःस आधिभौतिकः स्मृत इत्यर्थः ज्ञातृज्ञानकरणं शब्दादिविषयं च भगवदात्मकमित्यर्थः ॥ ८ ॥

एवं त्रयाणां भगवदात्मकत्वमभिधाय तस्य सर्वज्ञतां वक्तुं जीवानामसर्वज्ञतामाह एकमिति यथा एकतराभावे चक्षुरादिकरणाभावे एकं विषयं नोपालभामहे न साक्षात्कुर्महे चक्षुरादिकरणाभावे सन्निहितमपि विषयं न पश्यामः क्षेत्रज्ञास्त्रिविधसन्निकर्षवत्सु पदार्थेषु करणाधीनज्ञाना नतु सूक्ष्मव्यवहितादिज्ञानवन्तो नच करणानपेक्षज्ञानाश्चेत्यर्थः परमात्मा तु कोटित्रयसाक्षात्कर्तेत्याह त्रितयमिति तत्र ज्ञातृज्ञेयकरणानां त्रितयं ज्ञातृकरणज्ञेयानां त्रयं यो वेद साक्षात्कुर्यात्सस्वात्माश्रयाश्रयः अविद्याश्रयः जीवस्याप्याश्रयः यथारथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राःप्रज्ञामात्रास्वर्पिताःप्रज्ञामात्रा प्राणेऽर्पिता इति श्रुतेः स्वाश्रयाश्रय इति पाठस्वस्याप्याश्रयः अन्येषाम् आश्रय इत्यर्थः ॥ ९ ॥

एवमाश्रयपर्यंतानर्थानभिधाय यथासीत्तदुपाख्यास्य इति प्रतिज्ञाते चातुर्मुखसृष्टिप्रकारं वक्तुमारभते पुरुष इति पुरुषश्चतुर्मुखरूपी असौ परमात्मा आत्मनः स्वस्यायनं स्थानमन्विच्छन्विमृशन् यतः स्वयं शुचिरत एव शुचीः शुद्धा अपः जलान्यस्राक्षीत्सृष्टवान् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

निरोधलक्षयति निरोधइति आत्मनइतिजातावेकवचनं अस्यात्मनोजीवसमुदायस्यानभिव्यक्तस्वरूपेच्छादिशक्तिभिः सहश्रीविष्णुमनुप्रविश्यानुशयनंस्वापोनिरोधइत्युच्यते अनुप्रविश्यपरमंजीवस्यशयनंतुयत् सहैवशक्तिभिःस्वीयैरिच्छाद्यैरप्रकाशितैरित्यादेः मुक्तिलक्षयति मुक्तिरिति अन्यथारूपंप्राकृतवैकृतसूक्ष्मस्थूलेन्द्रियादिकंहित्वा केवलचिदानंदात्मकेनस्वरूपेणाऽव्यवस्थितिर्विशेषेणावस्थानंमुक्तिरित्युच्यते ॥ ६ ॥

आश्रयरूपंलक्षयति आभासइति यतोयस्माज्जगतआभासोमुख्यगौणभूत्यासृष्टिश्चशब्दात्स्थितिर्निरोधश्चभवति तत्त्रयमपि यदाधारतयाईर्यतेचवाविदुज्ञायतेसआश्रयइत्युच्यते किंनामधेयोऽयमितितत्राह परंब्रह्मेति मुक्तिव्यावृत्त्यर्थंपरमात्मेति सृष्टिस्थित्यप्ययाभासाय प्रकाशत्रचस्थिताइत्यादिनाव्यक्तइत्यर्थः ॥ ७ ॥

प्रकारांतरेणाश्रयंलक्षयिष्यन्नाध्यात्मिकादिभगवद्रूपैक्यकथनपूर्वकंजीवानामीशानेत्रतामाह आध्यात्मिकइति आध्यात्मिकःशरीरसंस्थितेषुचक्षुरादिषुतत्प्रेरकत्वेनास्थितःपुरुषोविष्णुः सोऽसावेवाधिदैविकआधिदैवेष्वादित्यादिषुस्थितः यस्तत्राधिभूतेषुघटादिपदार्थेषुस्थितः तयोरुभयोराध्यात्मिकाधिदैविकयोश्चक्षुःप्रकाशयोर्विच्छेदः सम्यक्निश्चायकोविष्णुराधिभौतिकोहिस्मृतइत्यन्वयः ॥ ८ ॥

हेत्वर्थेवाचिनाहिशब्देनसूचितहेतुंव्यनक्ति एतदिति एतेषांत्रयाणांमध्येएकतमाभावे चक्षुराद्यभावे प्रकाशाभावेवा तद्विषयघटादिकार्याभावेवानोपलभामहेघटादिविषयामुपलब्धिज्ञानंनाप्नुमइतियद्यस्मात्तस्मात्ज्ञानस्वातंत्र्याभावात् सर्वेवयमस्वतंत्रा इत्यर्थःननुकोऽसौज्ञानेस्वतंत्रइतितत्राह त्रितयमिति तत्रतेषामस्वतंत्राणांजीवानांमध्येयोऽध्यात्मादित्रितयंवेदसआत्माविष्णुराश्रयइत्यन्वयः नन्वन्यदेवंवधंज्ञानमस्तुनसुषुप्त्यादावित्यस्येदमेवोत्तरं तत्रसुषुप्त्यादावपींद्रियप्रकाशविषयाननपेक्ष्यैवयोजीवानांस्वैस्वरूपज्ञानेनैववेत्ति सआत्माश्रयइति ननुप्राणस्याप्येतत्त्रयापेक्षाभावेज्ञानसंभवात् प्राणावाएवैतस्मिन्पुरेजाग्रतीतिश्रुतेः श्रियोऽपिनित्यमुक्तत्वान्मुक्तानांनिर्देहकत्वाच्च कथमेतल्लक्षणंलक्ष्यंव्यावर्तयतीतितत्राह स्वाश्रयाश्रयइति मुक्ताश्रयाणांरमामुख्यप्राणादीनांस्वाश्रयाणामाश्रय आधारोऽनेनस्वातंत्र्येणाप्रीयमानंसर्वज्ञत्वंलक्षयन्लक्ष्याविष्योलक्ष्यंव्यावर्तयतीत्युक्तंभवति सुप्त्यादावीश्वरस्यसर्वज्ञत्वंच स्वप्नेनशारीरमभिप्रहत्यासुप्तःसुप्तानभिचाकशीतीतिश्रुतिसिद्धम् ॥ ९ ॥

एवंपुराणलक्षणमभिधायाधुनाविराडाख्यविरिंचोत्पत्तिंवक्ष्यन्प्रथमतस्तत्स्रष्टृपद्मनाभहरेरवतारकथनपूर्वकमस्यसृष्टिमाह पुरुषइति यदासपुरुषःसृष्टैस्तत्त्वैःसहाण्डंप्रविश्यविनिर्भिद्यविभज्याविनिर्गतः प्रकाशितः पुरुषाभिधएवप्रादुर्भूतस्तदात्मनएवर्द्धापाद्वीपीतरवत्रूपानंतरशेषपर्यंकेशयनायायनमाश्रयमन्विच्छन्नित्यशुचिः सभवानात्मनोऽयनभूताः शुचीः स्वपूजासाधनयोग्याअपोऽस्राक्षीदित्यन्वयः अंडंप्रविष्टोयोविष्णुःसोऽब्जेभस्वाप्रकाशितइत्यादेः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

निरोध इति। स्थित्यनन्तरञ्च आत्मनो जीवस्य शक्तिभिः स्वोपाधिभिः सह, अस्य हरेरनुशयनं हरिशयनानुगतत्वेन शयनं निरोध इत्यर्थः तत्र हरेः शयनं प्रपञ्चं प्रति दृष्टिनिमीलनं, जीवादीनां शयनं तत्रलय इति ज्ञेयम् तत्रैव निरोधे अन्यथारूपमविद्याऽध्यस्तमज्ञत्वादिकं हित्वा स्वरूपेण व्यवस्थितिर्नाम स्वरूपसाक्षात्कार उच्यते तदवस्थानमात्रस्य संसारदशायामपि स्थितत्वात्, अन्यथारूपत्वस्य चाज्ञानमात्रार्थत्वेन तज्ज्ञानात्तज्ज्ञानपर्यवसानात् स्वरूपञ्चात्र मुख्यपरमात्मलक्षणमेव रश्मिपरमाणूनां सूर्य इव स एव हि जीवानां परमं स्वरूपम् यथोक्तं श्रीब्रह्माणं प्रति श्रीगर्भोदशायिना-यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति इति, उपेतं युक्तमित्येवाक्लिष्टोऽर्थः रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीतिश्रुतेः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

आभासश्चेति आभासः सृष्टिः निरोधो लयश्च यतो भवति अध्यवसीयते उपलभ्यते जीवानां ज्ञानेन्द्रियेषु प्रकाशते च स ब्रह्मेति पर-मात्मेति प्रसिद्धः आश्रयः कथ्यते इति शब्दः प्रकारार्थः (आश्रयगतप्रकारवाची) तेन भगवानिति च अस्य विवृत्तिरत्र विधेया तथाहि अत्र दशार्थाः प्रथमस्कन्धानुक्रमेण निरूप्यन्ते यथा—सामान्यतो लक्षितस्याप्याश्रयत्वस्य श्रीकृष्ण एव तु वैशिष्ट्यं तदर्थमेव श्रीमच्छ्री भागवत प्रकाशः तत्र प्रथमस्कन्धे श्रीशौनकसूतयोः प्रश्नोत्तरे तत्त्वेनैव प्रतिपादिते तदनुगतावेव प्रथमद्वितीयाध्यायौ तृतीयाध्यायस्तु स्फुट एव पुनर्विशेषतस्तत्प्रस्तावाय चतुर्थाद्यध्यायाः तत्र तदेकपरयोः श्रीशुकपरीक्षितोः संवादघटना अतो द्वितीयस्कन्धश्च सामान्य भगवत्तत्त्वं प्रशंसन्नपि तत्रैव तात्पर्यं वहति यत्र ब्रह्मणश्चतुः श्लोकीवक्तृश्रीभगवतश्च तात्पर्यं च तत्रैव दर्शितं पाद्मकल्पकथारंभश्च तदर्थ एव तृतीये पाद्मकल्पकथा च गतस्य पूर्वपरार्द्धस्याद्यन्तवर्णने मध्यमानामपि कल्पानां तदनुसारेण ज्ञाने सति दशमैकादशयोःप्रस्ता व्यायास्तत्कथायाः सम्यगवगमात् । एवमेव गते स्वायम्भुवचाक्षुषमन्वन्तरे अपि तृतीयचतुर्थपञ्चमषष्ठसप्तमेषु । निरूपिते । अष्टमे प्राचीनमिश्रवैवस्वतम् नवमस्तु तत्प्रादुर्भावास्पदकेवलवैवस्वतान्वय एव द्वादशः खलु समाधिमुद्रामयः तत्र तत्रतत्तदन्यकथा तु तत्पोषिकैव विशेषतस्तु तत्तदवतारकथेति तस्मात् सर्गादीनां मध्ये कश्चिदेकद्वारा कश्चिदनेकद्वारा च आश्रयो निरूप्यते, सतु दशमीं द्वादशानुकथाप्रधानतत्तद्द्वारासर्वेत उत्कृष्य श्रीकृष्णरूपो निरूप्यते इति स्थितम् ॥ ७ ॥

अथ स्वयंभगवल्लक्षणपरमरूपं तदेवाश्रयं स्तोतुं स्थितौ (च तत्राश्रयस्वरूपमपरोक्षानुभवेन व्यष्टिद्वारापि स्पष्टं दर्शयितुं) तदंशभूतस्य पुरुषस्यवैभवंतादृशत्वेन दर्शयन् अध्यात्मादिविभागमाह योऽध्यात्मिकोऽयमिति द्वाभ्याम् । योऽयमाध्यात्मिकः पुरुषः चक्षुरादिकरणा भिमानी द्रष्टा जीवः. स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः देहसृष्टः पूर्व्वकरणानामधिष्ठानाभावेनाक्षमतया करणप्रकाश कर्तृ-त्वाभिमानि तत्सहाययोरुभयोरापितयोर्वृत्तिभेदानुदयेन जीवत्वमात्रावशेषात् ततश्चोभयःकरणाभिमानितदधिष्ठातृदेवतारूपां द्विरूपो-विच्छेदो यस्मात् स आधिभौतिकः चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति पुरुषस्य जीवस्योपाधिः स वा एष पुरुषोऽन्नरसमय इत्यादि श्रुतेः ॥ ८ ॥

एकमेकतराभावे इति एषामन्योन्यसापेक्षसिद्धित्वेन अनात्मत्वं दर्शयति । तथाहि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति नापि द्रष्टा, न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः न च तं विना करणं प्रवर्त्तते न च तद्विना दृश्यमित्येकतरस्याभावे एकं नोपलभामहे । तत्र यदा तत्त्रितयम् आलोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मा आश्रयः । तेषामपि परस्पर-माश्रयत्वमस्तीति तद्व्यवच्छेदार्थं विशेषणं स्वाश्रयः अनन्याश्रयः स चासावन्येषामाश्रयश्चेति । तत्रांशांशिनोः शुद्धजीवपरमात्मनोरभेदां शस्वीकारेणैवाश्रय उक्तः अतः परोऽपि मनुतेऽनर्थमिति जाग्रत् स्वप्नः सुषुप्तश्च गुणतो बुद्धिवृत्तयः । तासां विलक्षणो जीवः साक्षित्वेन विवक्षितः ॥ इति शुद्धो विचष्टे ह्यविशुद्धकर्त्तुरित्याद्युक्तस्य साक्षिसंज्ञिनः शुद्धजीवस्याश्रयत्वं न शंकनीयम् । अथवा नन्वाध्यात्मिकादी-नामप्याश्रयत्वमस्त्येव । सत्यम् । तथापि परस्पराश्रयत्वान्न तत्र आश्रयताकैवल्यमिति ते स्वाश्रयशब्देन मुख्यतया नोच्यन्ते इत्याह एक-मिति । तर्हि साक्षिण एवास्तामाश्रयत्वं तत्राह त्रितयमिति । स आत्मा साक्षी जीवश्च यः स्वाश्रयोऽनन्याश्रयः परमात्मा स एवाश्रयो यस्य तथाभूत इति । वक्ष्यते च—सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥ इति । तस्मादाभासश्चेत्यादिनोक्तः परमात्मैवाश्रय इति ॥ ९ ॥

अथ स्वयंभगवल्लक्षणपरमरूपं तदेवाश्रयं स्तोतुं तदंशभूतस्य पुरुषस्य वैभवं तादृशत्वेन दर्शयति पुरुष इति यदासौ विनिर्गतः आद्यो ऽवतारः पुरुषः परस्येत्याद्युक्तरीत्या श्रीभगवत आविर्भूतः तदा व्यष्ट्यण्डम् आत्मनि लीने तत्समूहं विनिर्भिद्य आत्मनः पृथक् कर्त्तुमारब्धे-त्यर्थः अथवा यदा अण्डं निजाविर्भावस्थानं श्रीभगवन्तं विनिर्भिद्य तत पृथग्भूत्वा विनिर्गतः तदा अपस्तत्पर्यन्तानि तत्त्वानीत्यर्थः पृथिव्यपि तदन्तर्भूतत्वेन ज्ञेया ॥ १० ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

निरोधं लक्षयति अस्यानुशयनमिति अस्य भगवतः अनुशयनं शक्तिः स्वपयित्वा तस्य भोगार्थं स्वस्य शयनं अस्येति पुरोवर्त्ती आत्मत्वेन प्रकाशमानः अंगुल्यानिर्दिश्यते आत्मनो देहस्य सहोपुभयप्रदेहशक्तयो ज्ञानप्रतिभेदाः नाडीरूपाः स्वस्य श्रियादयो द्वादश शयनं च विविधं जाग्रत्स्वप्नसुषुप्तिभेदेन अतः सप्ताशीति भेदा भवंति मुक्तिं लक्षयति मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यव-स्थितिरिति अन्यथा रूपं तत्स्वरूपं तस्य परित्यागः स्वरूपमेकं अवस्थाद्विविधा सामान्यविशेषभेदेनउभयमत्रलक्षणं मिलितं तत्रापि पूर्व नत्वपरित्यागः तत्वान्यथाविंशतिः एवमेकाविंशद्भेदा भवंति आश्रयलक्षणमिति आभासश्चेति आश्रयो द्विविधः शास्त्रमार्गेणाश्रीयत इति प्रपत्त्यामायुज्येन वा उत्पत्तिस्थितिप्रलयैर्वा क्रियया आश्रयणं पंचधा ज्ञाने नामंयणा अष्टधा मनसो द्विःस्वभावत्वात् तस्योभयत्र संबंधः अंतःकरणानां मध्ये अहं कारेणाश्रयहेतुत्वं एवं त्रयोदशधा भवंति एवमपि राशिद्वयात्मको भवति क्रियाज्ञानभेदेन ॥ ६ ॥

अत्रप्रथमतःक्रियया आश्रयप्रतिपादयति आभासश्च आभास उत्पत्तिश्चकारात्तमश्च आभासशब्देनचउत्पत्त्यादयः सर्वेवस्तुतोमायिकानामेव न स्वस्येति विषयतायाआश्रयत्वंबोधयतिविरोधस्तयोरेवद्वयमाश्रयत्वंकर्तृत्वेनतदेवक्रियायाआश्रयत्वंभवतिआभासविरोधावुत्पत्तिःप्रलयौअन्ये विकाराद्यातदंतर्भाविनः पूर्वरूपपरित्यागो द्वितीयस्याविर्भावस्तथा उभा वेकीकृतौ लोके वृद्ध्यादिभिरुदीरितादिभिः अध्यवसीयत इति यतं भगवतः सकाशात्केवलमेते विकारा जायंते किंतु प्रकाश्यंते च भगवता च चकारात्तेषु स्वभावोपि संपाद्यते अतोऽस्ति भाति प्रिय मिति त्रयं भगवत्कार्यं तत्कारणत्वेनाश्रयः एतदेवतस्याधिष्ठानत्वं तदाह आश्रयः इति भगवानाश्रय इत्यर्थः यतः सच्चिदानंदरूपत्वात् पूर्वे,काधर्माभवंति अयमेवभगवान् शास्त्रांतरेनामांतरैर्व्यपदिश्यत इति सर्वसमन्वयार्थं नामांतरमाह परंब्रह्मेति वेदे परमात्मेति स्मृतौ कृष्ण एव शब्दमात्रेभिधते अर्थस्त्वेकएव वेदचतुर्मुखवर्णाद्युदासार्थपर शब्दः जीवव्युदासार्थं द्वितीयः ॥ ७ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

एवं क्रियाश्रयं निरूप्य ज्ञानाश्रयं निरूपयति योऽध्यात्मिकोऽयमिति द्वाभ्यां ज्ञानमग्रे निरूपयितुं ज्ञेयमग्रे निरूपयति ज्ञेयं त्रिविधं अध्या-त्मिकादिभेदेन आत्मानमधिअध्यात्मं आत्मा देहः तमधिष्ठाय यतिष्ठति इन्द्रियाणि करणानि प्राणाश्च तेऽध्यात्मानः तानधिष्ठापयति शारीरआत्मासः आध्यात्मिकः स अयमेव पुरुषः यः श्रोतृवक्तृत्वेन व्यवह्रियते यश्चैतदन्तर्यामी स आधिदैविकः अधिदेवानीन्द्रियाणि अधिष्ठातृदेवानां नियामकत्वेन तानधिष्ठायास्थितः स आधिदैविकः सोऽप्ययमेव इन्द्रियाणि इन्द्रियाधिष्ठातृदेवाश्चाधि तिष्ठत शब्दद्वयेनोच्यते अत एव देवाधिष्ठानसामर्थ्यं अंतर्यामिणा इति स एतस्यापि पृथक्त्वेन निरूप्यते एकस्यैव उभयविधविच्छेदकर्त्ता शब्दद्वयप्रवृत्तिनिमित्तभूतः आधिभौतिकः भूतान्यधिष्ठापयति येषु तिष्ठति रूपादयः ते अधिभूताः तत्समुदायोऽवयवी आधिभौतिको देहः देहे विद्यमान एव इन्द्रियाभिमानित्व मिन्द्रियप्रेरकत्वं चानोचितकर्तात्मा अहंयोभयविच्छेदकत्वमहतोस्मृतिः स्मरणं तदाहभुतहाति एवं ज्ञेयं निरूप्य तद्विषयकज्ञानाधारत्वेन आश्रयं निरूपयति एकमेकतराभावादिति त्रितयं तत्र योवेद स आश्रय इति ॥ ८ ॥

ननु जीवोऽपि तत्त्रितयं वेद अंतर्याम्यपि अत आश्रयलक्षणमाति व्यापकमित्याशंक्याह एकं त्रयाणां मध्ये एकतरस्य व्यातिरिक्तस्य अभावाद्धेतोः एकं नोपलभामहे किंतु भावेनैवोपलभामहे एकमप्यन्ययोर्भावेन उपलभ्यते अतः भावेन तच्चसापेक्षमसमर्थं भवतीति नतेषामन्यतरस्त्रितयं ज्ञातुं शक्तः अंतर्याम्यपि स्वव्यापारे व्यापृतः त्रितयमध्ये प्रविष्टः न त्रितयं जानाति यथा देहजीवयोः त्रितयाज्ञानं सर्वजनीनं तथान्तर्यामिणोऽपि ज्ञेयं एवमपि यस्तत्त्रितयं वेद स आश्रयः तस्य नामांतरमप्याह आत्मेति अतति व्याप्नोतीति आत्मा अतएवास्य लीलार्थत्वात् आत्माविर्भूतत्वेन गणितः अहमात्मा गुडाकेशेति इदमेकं भगवतो रूपं भगवानेव वा ज्ञानाश्रयत्वेन आत्मत्वेन निरूपितः ननु तस्यापि स्वज्ञानाभावात् अधिष्ठातृज्ञानाभावाच्च तस्याप्यन्यः आश्रयः स्यात् अत आह स्वाश्रय इति सतु स्वात्मानमेवात्मानमेवाश्रये तिष्ठति न तस्याश्रयणे अपेक्षा अनेन स्वप्रकाशः स इत्युक्तं भवति ॥ ९ ॥

एवं दशलक्षणानि निरूप्य त्रितयनिरूपणार्थं पूर्वोक्ताविरामं उपपत्त्या सह निरूपयति पुरुषोऽण्डमिति यावानयं वै पुरुष इत्यत्र नामरूपे तस्याक्षिप्यते जीवतुल्यतया तत्र जीववैलक्षण्यं निरूपयितुं स्वेच्छयैव तस्य नाम इन्द्रियाणि चेति जीवसाम्यं निराकरोति तत्र प्रथमं नाम निरुक्तिमाह पुरुषोऽण्डमिति द्वाभ्यां पुरुषो विराट् ब्रह्माण्डं विनिर्भिद्य कटाहात्पृथक्कृत्य नारिकेलगोलकवत् यदा विनिर्गतस्तस्य सर्गकार्यसमर्थो जातः अथवा अण्डमेव वा भित्वा निर्गतः तदा अण्डेन जलाद्यावरणव्यवस्था पुराणांतरानुरोधेन परमेष्ठिस्थित इति व्याख्यायते वस्तुतस्तु कटाहं विनिर्भिद्य निर्गतः अत एवात्मनः आश्रयापेक्षा पूर्वमण्डमेवाश्रयत्वेन स्थिते तस्मिन्नग्रे आश्रयांतरमन्विच्छन् अपोऽस्राक्षीत् स्वयं-शुद्धो ज्ञानपूर्णः भगवदवतारः स्वाश्रयं शुद्धमेव सृष्टवान् सर्वस्यापि शुद्धिर्जलेनेति जलं सृष्टवान् अपामपि शुद्धिः फेनतरंगादिरा हित्येन ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

आत्मनो जीवस्य हरेर्योगनिद्राम् अनु पश्चात् शक्तिभिः स्वोपाधिभिः सह शयनं निरोध इति स्थित्यनन्तरं महा प्रलये जीवानां परमेश्वरे लय उक्तः । अन्यथारूपं मायिकं स्थूलसूक्ष्मरूपद्वयं हित्वा स्वरूपेण शुद्धजीवस्वरूपेण केषाञ्चिद्भगवत्पार्षदरूपेण च व्यवस्थिति-र्मुक्तिः । इति सर्गादयो जीवविषया नवार्था उक्ताः ॥ ६ ॥

सर्गादीनां नवानां लक्षणैरेव तद्विषयीभूतान् सर्वान् जीवान् लक्षयित्वा एकस्याश्रयस्य लक्षणेन परमेश्वरं लक्षयति । आभास: सर्गः चकारात् स्थितिपोषणादयः निरोधश्चेति चशब्दान्मुक्तिश्च यत एवाध्यवसीयते निश्चीयते स आश्रयो भगवान्नारायण एव तस्मादेव सृष्ट्यादिदर्शनात् । तस्यैवोपासकभेदेन संज्ञान्तरमाह परमिति ॥ ७ ॥

अथ, विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् । इत्युक्तेः प्रतिदेहमेवान्तर्यामिरूपेण स्थितं तदेवाश्रयरूपमध्यात्मादिभ्यो विभागेन स्पष्टं दर्शयितुमाह द्वाभ्याम् । योऽध्यात्मिकोऽयमिति सर्वत्र विनयादित्वात् स्वार्थे ठकः । योऽयमाध्यात्मिकः पुरुषः यदिदमध्यात्मं चक्षुरादिकरणमित्यर्थः स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः इन्द्रियतदधिष्ठात्रोरुभयोरेव सूर्यांशत्वेनैकरूप्यादित्यर्थः । तत्र तत्वेषु मध्ये उभय अध्यात्माधिदैवरूपो विच्छेदो विभागो यस्मिन् सः आधिभौतिकः चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः । यद्वा उभयः गोलकरूपः शब्दस्पर्शादिरूपश्च विच्छेदो भेदो यस्य सः । पुरुषस्य जीवस्योपाधित्वात् सर्वत्र पुरुषपदप्रयोगः । स वा एष पुरुषोऽन्नरसमय इत्यादि श्रुतेः ॥ ८ ॥

एकमेकतराभावे इति एतेषामन्योन्यसापेक्षसिद्धित्वेन अनात्मत्वं दर्शयति । तथाहि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति, नापि द्रष्टा न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः न च तं विना करणं प्रवर्त्तते न च तद्विना दृश्यमित्येवमेकतरस्याभावे यदा एकं नोपलभामहे तत्र तदा तत्त्रितयं यो वेद स तन्निरपेक्षसिद्धिरात्मा जीवः । यदुक्तम्—देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यश्च परं विदुर्यत् । सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥ इति सर्वमेतत्त्रितयं पुमान् जीवो वेदेति तत्रार्थः । तथैव—जाग्रत् स्वप्नः सुषुप्तञ्च गुणतो बुद्धिवृत्तयः । तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥ इति । स कीदृशः स्वमेवाश्रयो यस्य सः परमात्मा एव आश्रयो यस्य सः । अयमर्थः—अध्यात्मादीनां परस्पराश्रयाणां जीव आश्रयः जीवस्य परमात्मा आश्रयः परमात्मनः परमात्मैवाश्रय इत्याश्रयतत्त्वं परमात्मैव । तथा विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थित इत्युक्तेः स्वं कृष्ण एवाश्रयो यस्य स परमात्मेति व्याख्याने श्रीकृष्णस्य मुख्यमाश्रयत्वं तदंशत्वात् परमात्मनश्च निर्विशेषस्वरूपत्वात् ब्रह्मणश्च इत्येकं आश्रयतत्त्वमुपासकभेदात् त्रिधा भासते इति ॥ ९ ॥

तास्ववात्सीत् स्वसृष्टासु सहस्रपरिवत्सरान् ।
तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥ ११ ॥
द्रव्यं कर्म्म च कालश्च स्वभावो जीव एव च ।
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ॥ १२ ॥
एको नानात्वमन्विच्छन् योगतल्पात् समुत्थितः ।
वीर्य्यं हिरण्मयं देवो मायया व्यसृजत् त्रिधा ॥ १३ ॥
अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः ।
अथैकं पौरुषं वीर्य्यं त्रिधाऽभिद्यत तच्छृणु ॥ १४ ॥
अन्तःशरीर आकाशात् पुरुषस्य विचेष्टतः ।
ओजः सहोवलं जज्ञे ततः प्राणो महानसुः ॥ १५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

अस्य देहगतस्य आत्मनः जीवस्य अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते इति वाक्योक्ताभिः कर्मसंज्ञाभिः शक्तिभिः सहअनुशयनं लयो निरोधः अन्यथा रूपमात्मत्वेन गृहीतं देहादिरूपं कार्यकारणरूपप्रकृतिसंबंधं हित्वा भगवद्भावापन्नेन स्वरूपेण व्यवस्थितिर्मुक्तिः ॥ ६ ॥

आभासः आसमंताद्भासनमाविर्भवनमुत्पत्तिः निरोधो लयः चकारात्स्थित्यादिसंग्रहः यतः अध्यवसीयते शास्त्रद्वारा ज्ञायते स आश्रयः ननु तस्मिन्नाश्रये किंप्रमाणमित्यत आह परमिति सर्वोत्कृष्टत्वेन ब्रह्मेति बृहद्गुणशक्त्याद्याश्रयत्वेन परमात्मेति सर्वात्मत्वेन च शब्द्यते अनादिसिद्धेन शब्देन वेदेन प्रतिपाद्यते इत्यर्थः ॥ ७ ॥

देहाद्यात्मत्वस्य देहादिविलक्षणात्मस्वरूपप्रतिपादनेनान्यथा रूपत्वं दर्शयन् स्वरूपेणाश्रये व्यवस्थितिं दर्शयति य इति द्वाभ्याम् योऽयमात्मनि देहे प्रसिद्धः चक्षुरादिकरणसमूहः स आध्यात्मिकः यश्चासौ चक्षुराद्यधिष्ठातृभूतः सूर्यादिसमूहः स एव आधिदैविकः यश्चोभयविच्छेदः उभयभिन्नः देहः स आधिभौतिकः पुरुषः स्मृतः ॥ ८ ॥

नह्याधिभौतिकं विना प्रतीत्यनुमेय आध्यात्मिकः चक्षुरादिकरणसमूहः सिद्ध्यति नापि तं विना तत्प्रवृत्त्यनुमेयस्तदधिष्ठातृसमूहः नापि तं विना करणवर्गः प्रवर्तते नापि करणवर्गं विना देहादिरूपाद्युपलब्धिः एवं यदा एकमेकतराभावेनोपलभामहे न साक्षात्कुर्महे तत्र तदात्रितयं यो वेद स आत्मा देहेन्द्रियादिद्रष्टा जीवः तस्य स्वातंत्र्यं वारयितुं हर्यधीनतामाह स्वाश्रयाश्रय इति स्वाश्रयो भगवान् आश्रयो यस्य सः ॥ ९ ॥

एवं सर्गाद्यर्थान् जीवस्य देहादिविलक्षणत्वं भगवतः आश्रयस्य स्वाश्रयत्वं जीवस्य हर्यधीनत्वं चाभिधायेदानीं युक्ताहं त्वया पृष्टो वैराजात्पुरुषादिदं यथा सीत्तदुपाख्यास्य इति यदुक्तं तदुत्पत्तिप्रकारमाह पुरुष इति असौ पुरुषो वैराजः अण्डं विनिर्भिद्य पृथक् कृत्य विनिर्गतः पृथक् स्थित इत्यर्थः आत्मनोऽयनं स्थानम् अन्विच्छन् विमृशन् यतः स्वयं शुचिरतः शुचीः शुद्धाः अपः गर्भोदकसंज्ञाः अस्राक्षीत् सृष्टवान् ॥ १० ॥

भाषाटीका

अपनी और शक्ति सहित भगवान का अनुशयन निरोध है । अन्यथा रूप छोड कर स्वरूप में अवस्थान का नाम मुक्ति है ॥ ६ ॥

आभास (सृष्टि) और निरोध (प्रलय) जिससे प्रकाश होते हैं वह पर ब्रह्म आश्रय कहलाता है ॥ ७ ॥

जो चक्षुरादि इन्द्रियों का अभिमानी जीव है वह आध्यात्मिक है । वही पुरुष (जीव] आधिदैविक अर्थात् चक्षु आदि इन्द्रियों के अधिष्ठाता सूर्यादि देवता रूप है । इन आध्यात्मिक । आधिदैविक पुरुषों में जिस से दोनों का विच्छेद होता है, वह चक्षु गोलिकादि रूप पुरुष आदि भौतिक है ॥ ८ ॥

इन आध्यात्मिक, आधि दैविक, और आधि भौतिक पुरुषोंमें एक के अभाव में अब एक को नहीं उपलब्ध करते हैं उस में जो तीनों को जानता है वह स्वापमें आत्मा है ॥ ९ ॥

जब वह विराट् पुरुष ब्रह्मांड से पृथक् होकर निर्गत हुआ, तब अपना स्थान की इच्छा कर उस पवित्र पुरुष ने पवित्र जल स्रजा ॥ १० ॥

उन निज स्रष्ट जलों में सहस्त्र परि वत्सर पर्यन्त पुरुष ने निवास किया । उसी से भगवान का नाम नारायण है, नरसे उत्पन्न जल नार हैं, नार में अयन होने से नारायण हैं ॥ ११ ॥

श्रीधरस्वामि कृत भावार्थ दीपिका।

अप्सु वासं नारायणनामनिरुक्त्या दर्शयति। तेन अप्सु वासेन। नरः पुरुषस्तस्मात् पुरुषो नरः तस्मादुद्भवो यासां ताः नाराआपो अयन-मस्येति नारायण इत्यर्थः। तदुक्तम् आपो नारा इति प्रोक्ता आपोवै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥ इति ११॥

तस्य प्रभावमाह द्रव्यम् उपादानं, कर्म्मादीनि निमित्तानि, जीवो भोक्ता, यस्यानुग्रहात् सन्ति कार्यक्षमा भवन्तीत्यर्थः॥ १२॥

योग एव तल्पं शय्या तस्मात् वीर्य्यं गर्भरूपं देहं हिरण्मयमिव प्रकाशबहुलम्॥ १३॥

तस्यैव प्रपञ्चः अथेत्यादिना॥ १४॥

अन्तःशरीरे यः आकाशस्तस्मात् क्रियाशक्त्या तत्र विविधं चेष्टमानस्य सतः। ओजः इन्द्रियशक्तिः सहो मनःशक्तिः बलंदेहशक्तिः ततः एकरूपात्मकात् सूक्ष्मात् रूपात् प्राणः सूत्राख्यः महान्मुख्यः असुः प्राणः सर्वेषाम्॥ १५॥

श्रीराधारमणदासगोस्वामि विरचित दीपिन्याख्यतट्टिप्पणी।

निरुक्त्या प्रकथनेन, व्युत्पत्त्या इति यावत्॥ ११॥ १२॥

गर्भरूपो देहमिति चतुर्दशभुवनात्मकं समष्टिदेहम् अप एव ससर्ज्जादौ तासु बीजमवासृजत् तदण्डमभवद्धैमं सहस्रार्कसमद्युतीति मनुवचनात्॥ १३॥ २२॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका।

स्वसृष्टासु तास्वप्सु सहस्रं परिवत्सरान् बहून्संवत्सरानवात्सीत् उवास एतदेवनारायणशब्दप्रवृत्तिनिमित्तमित्याह तेनेति यद्यस्मा त्पुरुषोद्भवाः पुरुषात्परमपुरुषादुद्भवा उत्पन्नाः पुरुषादुद्भवो यासां इति वा नारा आपः अयनं यस्येति शेषः तेनेदशव्युत्पत्तिलभ्येनाव-यववत्त्वेन नारायणो नारायणशब्दवाच्योऽभूदित्यर्थः नामेतिस्मृत्यंतरप्रसिद्धिं द्योतयति तथाहि स्मर्यते आपोनारा इति प्रोक्ता आपोवै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति॥ ११॥

अस्यैव प्रभावमाह द्रव्यमिति द्रव्यादयः यदनुग्रहतः संति स नारायणः इत्यन्वयः द्रव्यं महदादिपृथिव्यंतभूतवर्गः कर्मजीवादृष्टं कालः गुणवैषम्यहेतुः स्वभावः प्रकृतेः परिणामस्वभावः यदनुग्रहतः यस्यानुग्रहतः संति यस्य उपेक्षया न संति द्रव्यादयो यत्संक-ल्पानुविधायिसत्तास्थिति प्रवृत्तिका इत्यर्थः॥ १२॥

एवंभूतो नारायण एकः अविभक्तनामरूपसूक्ष्मचिदचिच्छरीरकत्वेनैकः नानात्वं देवमनुष्यादिरूपेण भवितुमिच्छन् योगः स्वात्मा नुभवरूपो योगः स एव तल्पं शय्या तस्मात्समुत्थितः देहं स्वशरीरभूतं हिरण्मयं रमणीयं वीर्यंचिदचिदात्मकं कारणद्रव्यं मायया चतुर्मुखरूपेण त्रिधाकरणज्ञातृत्रयरूपेण व्यसृजत् मायाशब्दस्तद्गुणरजः प्रचुर चतुर्मुखपरः संकल्पपरो वा संकल्पेन चतुर्मुखरूपी भूत्वाव्याप्यसृजदित्यर्थः॥ १३॥

त्रैविध्यं विवृणोति अधिदैवमिति अधिदैवं दिगादिदेवताधिपः एकादशेंद्रियरूपकरणवर्गः अध्यात्मं ज्ञातृवर्गः अधिभूतमिति पृथि-व्यादिभूतस्थगंधादिविषयवर्गः उक्त इति त्रिधा प्रभुर्व्यसृजदित्यर्थः ज्ञातृसृष्टिर्नामजीवानां तत्तद्देवादिदेहयोगसंपादनमेव तथाहि तोयम जीवान् विससर्जभूम्यामिति तोयशब्दोपलक्षितभूतसंघपरिणामदेवादिशरीरविशिष्टत्वेनाकारेण विससर्ज इत्यर्थः अथ संग्रहेणोक्त देवादिव्यष्टिशरीरस्थानां प्राणेन्द्रियादीनां चतुर्मुखशरीरस्थप्राणेंद्रियादिसमष्टिः उत्पत्तिप्रकारं प्रतिपादयितुं प्रतिजानीते यथेति पौरुषं समष्टिपुरुषचतुर्मुखदेहगतं पुरुषाधिष्ठितं वा एकंसमष्टिरूपेणोक्तं वीर्यं व्यष्टिकारणं द्रव्यं त्रिधाकरणभोक्तृविषयरूपेण देवादिव्यष्टीनां यथा निरभिद्यत उदपद्यत तच्छृणुवित्यर्थः मत इति शेषः॥ १४॥

एवं प्रतिज्ञाय व्यष्टींद्रियसृष्टिविभागं वक्तुं इंद्रियाश्रयप्राणव्यष्टिसृष्टिमाह अंतरिति पुरुषस्य चतुर्मुखस्य विचेष्टतः प्राणव्यापार कुर्वतः चतुर्मुखे प्राणव्यापारं कुर्वति सतीत्यर्थः अंतः शरीरे तच्छरीरांतः स्थिताद्दाकाशादाकाशकार्यवायुविशेषात्प्राणादोजः सहोबलं जज्ञे ओजः प्रवृत्तिसामर्थ्यंसहः मनसामर्थ्यं बलं धारणसामर्थ्यं एते धर्मा अभवन्नित्यर्थः ततश्चतुर्मुखशरीरगतोजःसहोबलधर्मि प्राणात्प्राणाख्यः महान्मुख्यः असुःप्राणनहेतुः जज्ञे इतरेषां शरीरांतर्वर्तिप्राणा अभवन्नित्यर्थः प्राण इत्येकवचनमार्षंजात्यभिप्रायं वा॥१५॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

ततः किमत आह तास्विति स्वसृष्टासुतास्वप्सुसहस्रपरिवत्सरानवात्सीदितियत्तेननारायणोनामाभूदित्यन्वयः ननुअनेनायनमप्स्वासेति अवयनइतिवाजलायनइतिवांतरेणनारायणइतिनामकथमत आह यदिति अनाशात्पुरुषोनरस्तदुद्भवापोनाराइतियदस्मात्तानाराअयनंयस्यस नारायणइति सोऽपोसृजत्तानारानरोऽनाशात्परोयतइतिच॥ ११॥

हरेरियंसृष्टिःस्वाधीनसाधनांतरसहकृतेत्याशयेनाहद्रव्यमिति द्रव्यंपृथिव्यादि॥ १२॥

ब्रह्मांडस्यांतर्वैविध्यमपि श्रीनारायणेनैवकृतमित्याह एकइति जलेशेषपर्यंकेशयानएकोनारायणएवस्वसृष्टतत्त्वस्तुनियामकतयांतर्या मिरूपेणनानात्वंबहुत्वसंख्यागोचरत्वमाप्तुमाप्तुमिच्छन् योगतल्पात्समुत्थितोदेवोलीलालोकेहिरण्मयंस्ववीर्यंमंडमायया स्वेच्छयांतस्त्रिधाव्य-धात् तत्तन्नियामकत्वेनबहुत्वंप्राप्तुमीश्वरइत्यादेः किंबहिरण्मयंपूर्णसुखंशतानंदवीर्यंस्वरतोरूपंत्रिधाव्यसृजदित्यन्वयः अंतःस्थितहरेःका मादेवप्रजातमांजनिरित्यादेः॥ १३॥

अंडांतस्त्रैविध्यप्रकारंकथयति अधिदैवमिति प्रभुरितित्रिधाव्यसृजदितिशेषः हरिवीर्यरूपस्यविराजोऽपित्रैविध्यमस्तीतिकथयति पुन रिति पुनर्यथात्सपौरुषपुरुषाख्यस्यहरेर्वीर्यविराडनामब्रह्मारमंजातंत्रिधाभिद्यतइतिमेविधममवत् तथाशृणुविक्त्यन्वयः॥ १४॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

तत्रोद्यमं विवृणोति अंतरिति विराडाख्यब्रह्मशरीरांतराकाशाद्विचेष्टतः पुरुषस्य सहोजः सहो बलं पराभिभवसहनलक्षणाकारसूक्ष्माकारं गिरे ततस्तेभ्य ओज आदिभ्यो महाप्राणो मुख्यप्राणो जज्ञ इत्यन्वयः प्राणतत्त्वाभिमानी ओजःसहोबलानुविद्धहिरण्यगर्भोजः सहोबलेभ्य सर्वेन्द्रियनायकओजः सहोबलात्मको मुख्यप्राणो जात इत्युक्तं भवति एतेन च पूर्वप्रकृताध्यात्माधिभूताधिदैवानां ब्रह्मस्थनारायणब्रह्मप्राणेभ्य सृष्टिरितिज्ञातव्यं प्राणेनक्षिपतेत्यादिवक्ष्यमाणत्वात् ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसंदर्भः ।

तदेवं ब्रह्माण्डं कर्तुमारभ्यापि शयनलीलार्थं कञ्चित् कालं स्थागितवांश्च आसीदित्याह तास्ववात्सीदिति ॥ ११ ॥

ततश्च सर्वं तद्द्वयमेवासीदित्याह द्रव्यमिति ॥ ॥ १२ ॥

एक इति सार्द्धम् । तत्र महासमष्टिसमष्टिव्यष्टिजीवानां त्रयाणां तदुपाधीनाञ्च सृष्टिप्रक्रियामभेदप्रायतया विवरीतुमाह एक इति एकः प्रलये स्वांशान् जीवान् आत्मनि विलाप्यैकत्वेन स्थितः सम्प्रति तु तत्तत्स्वांशानाविर्भाव्य नानात्वमन्विच्छन् योगनिद्रात उत्थाय समुत्थितः । ततश्च वीर्यं ब्रह्माण्डसमष्ट्युत्पादनार्थमंशतो विभक्तीकृतं तत्रसमुदायरूपं ब्रह्माण्डसमूहबीजम् ॥ १३ ॥

अथेत्यर्द्धकम् ॥ १४ ॥

अथ त्रिधात्वं विवरीतुं प्रथमं प्राणं विवृणोति अन्तरिति द्वाभ्याम् । अन्तः शरीरे तस्यैव गर्भीभूतस्य महासमष्टिरूपस्य पुरुषस्याभ्यन्तरे य आकाशस्तस्मात् प्राणो जज्ञे स्पष्टो बभूव । ततो विचेष्टमानस्य सतः ओजः सहो बलञ्च जज्ञे इत्यन्वयः ॥ १५ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

ततस्तास्वेवाप्सु स्वसृष्टासु अवात्सीत् नान्यः एवमपः सृष्ट्वा तत्र स्थातुं शक्नोति स्वसृष्टास्वित्यनेन अपां महत्त्वेन स्वमहत्त्वं बोधयन् जीवाधीनताभावेन च तत्कृतभयं अशुद्धं च निवारयति तत्र च स तूष्णींभावेन सहस्र परिवत्सरानिति स नारायणावतारः ब्रह्ममात्रं ते सहस्रपरिवत्सरमात्रं तिष्ठतीति शयनं स्वपनार्थं वा सहस्रपरिवत्सरं शयनं तत्पश्चात् सृष्टिं करोति एतावत्काले संदेहनिष्पाद्यमाना सर्वेषां जीवानां सर्वनिर्वाहार्थं एव सति तस्य नारायणेति नामजातमित्याह तेन नारायणो नारा इति नारमयनं यस्येति नारायणः नत्वस्य जलमयनं तत्कथं नारायणइति तत्राह यदापः पुरुषोद्भवा इति यद्यस्मादापः पुरुषशब्दवाच्यात्तस्माद्वोत्पन्नाः पूर्वं हि पुरुषः स एव नारायणः पूर्वभावित्वात् नर इत्युच्यते भगवदावेशात् तस्माज्जाता आपः तेन नारा ता अयनं भवन्तीति भवत्ययं नारायणः ॥ १० ॥

एवं स्वान्तर्गतत्वेव कार्येण स्वस्य नामानि भवंतीति न प्राकृततुल्यता किञ्च अस्मादपि हेतोर्न प्राकृततुल्यतेत्याह द्रव्यं कर्म कालश्चेति द्रव्यमधिभूतं महाभूतादि कर्म अध्यात्मं अदृष्टादि काल आधिदैविकः नियंता सर्वानिमित्तीभूतस्वभावः परिणामहेतु जीवो भोक्ता उपादानं निमित्तं च दोषभक्ते हत्वेव च भोक्ताचेति समस्तार्थं समर्थाः कृपया हरेः तदाह यदनुग्रहत इति एवकारेण जीवानामविशेषकारणं भगवत्कृपाधीनत्व बोधितं चकारादन्यान्यपि साधनानि दैवादीनि भगवत्कृपयैव संति आविर्भूतानि तिष्ठन्ति कार्यक्षमाणि च भवंति अन्यथा मतानपकर्षति यथा व्याघ्रः पशुं तदाह न संतीति तत्रभगवतः कांक्षीणापेक्षतेकिंतु उपेक्षामात्रेण अव्यक्तस्तानुपसंहरति अनेन यावत्कल इत्यादिषु ये कालादय आक्षिप्तास्ते सर्वे समाहिता ज्ञेयाः ॥ ११ ॥

किञ्च भगवानतः कथं सृष्ट्यादिकरोतीति न शंकनीयं यत इतस्य सृष्टिप्रकारमेवमित्याह एको नानात्वमन्विच्छन्नित्याह त्रिभिः भगवानेक एव जलेशयानः अनेकरूपो भविष्यामीतीच्छां कृतवान् ततः शयानस्तल्पादुत्थितः यथा पुरुषः शय्यात उत्तिष्ठति तत स्तस्य स्वात्मनो बहुभेव छायायां तस्य वासुदेवस्य मायारूपा या भार्या तया हेतुभूतया तस्याः संनिधिमात्रेणैव स्वस्मिन्नेव विद्यमानं जीवात्मकं वीर्यं सच्चिदानंदरूपं त्रिधा सद्रूपं चिद्रूपं आनंदरूपभेदेन त्रिधाऽसृजत् भेदत्रयमपि गणयति प्रथमतः आधिदैवं आनंदांशभूतं अथ तदनंतरं अध्यात्म चिद्रूपं कृतवानित्यपेक्षायामाह प्रभुरिति सर्वसमर्थः इति शब्दः प्रकारे यथैतत्त्रितयंनिर्मितं तथाऽन्येऽपिप्रकारा निर्मिता इति अनेन सर्वे त्रिविधा उक्ताः ॥ १२ ॥

प्रकारविशेषेणापि त्रैविध्यं जातं निरूपयति यथैकमिति प्रकारव्यतिरेकेणोच्छयैव त्रैविध्यं भवति तथापि प्रकारेणापि निरूप्यते यथा एकमभिन्नं अखंडस्य यथाभेदं स्तत्पाश्रुणिवत्त्वर्थः ॥ १३ ॥

तदेवाह अंतःशरीर इति शरीरमध्ये हृदयस्थाने य आकाशः तस्मादाकाशाचेतो पुरुषश्चेष्टां कृतवान् निर्विकाशश्चेष्टितुं सुसमर्थ इति अधिकारणोऽप्याकाशस्य हेतुत्वं पुरुषस्य नारायणस्य विचेष्टतः शरीरमध्य एव चेष्टां कुर्वतः इदं तु तस्यैव शक्ये तदा तस्य चेष्टात इंद्रियाणांतःकरणादेहानां सामर्थ्यानि जातानीत्याह ओजः सहोबलं जज्ञ इति ततः तदनंतरं प्राणो जातः तस्य प्राणस्य वायुत्वं निराकरोति महत्तत्त्वांशभूतः तत्राऽम्मा ननु भौतिको वायुः अन्येऽपि प्राणाः संतीति विशेषणमाह असुरिति असुरित्येतेनुकरणशब्दः श्वासुवायुः स भवतीत्यसुः भौतिकादतिरिक्त इतियावत् भगवच्चेष्टामात्रेणैव इंद्रियादिशक्तयः प्राणश्चजातः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

एवं दशभिर्महापुराणलक्षणैर्जीवेश्वरविभागं निरूप्य जीवानामीश्वरभक्त्यैव निस्तारमभिव्यञ्ज्य यदुक्तं त्वया पृष्टो वैराजात् पुरुषादिदं यथासीत्तदुपाख्यास्ये इति प्रतिज्ञातमर्थं वक्तुं कथां प्रस्तौति पुरुषोऽण्डमित्यादि । ननु कथं मुहुरपि वैराजस्याध्यात्मादिकथैव प्रपंच्यते भगवतोऽतिमधुरलीलावतार-रूपगुणादिकथाः किमल्पीयस्यो दत्ताः । सत्यम् । ताः कथा आस्वादनीयत्वेन केषु जनूपदेष्टव्याः ये तत्कृतिसिद्धा नित्यसिद्धा वा महानुभावास्ते तत्सौन्दर्यामृतलीलामृतसिन्धौ स्वत एवाविरामं खेलन्त्येव ये पुनरन्ये विषयानन्दतल्पे निद्राणिता ये च कुकर्मफल-दुःखतरङ्गे मूर्च्छन्ति ते ततः प्रबोधयितुमेवाशक्याः कथं भगवल्लीला उपदेष्टव्याः यदुपदेशादेव ते साधकभक्ता भविष्यन्तीति महाकारुणिकः पुराणचूडामणिरयं तांस्ततः प्रबोधयितुं भंग्या किमपि मुहुरपि यतते स्म । तत्र यथा वहिना सप्तमञ्ज वहिरेव

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

शाम्यति यथा च भूताविष्टो भूतमन्त्रेणैव प्रबुध्यते तथैव जीवानां मायानिद्रावेशो मायाकथयैवापयाति यदुक्तम्—मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति ॥ इति । किञ्च यद्यपि भागवतकृपालब्धभगवल्लीलामृतवृष्ट्यैव मायासुखनिद्रायाोऽपि कर्मदुःखमूर्च्छितोऽपि जागर्ति स्तिम्यति जीवति नृत्यति आनन्देन माद्यति च तदपि तादृशमहत्कृपा यैरेव लभ्यते तैरेव कृतार्थीभूयते न तु सर्वैरेव अतोऽध्यात्मकथया मुहुः श्रुतया लब्धसंसारतितीर्षाणां गुरुपादाश्रयणे प्रोद्धृतयत्नानां निकृष्टजीवानामपि निस्तारो भवत्वित्येतदर्थमेवाध्यात्मकथापौनःपुन्यं भगवद्भक्तानामास्तिक्यवतान्तु सर्वमेव श्रीभागवतममृतमिवास्वाद्यमेव । अपि च शास्त्रस्यास्य न केवलं भगवन्तमेवाधिकृत्यप्रवृत्तिः अपि तु तन्निर्विशेषस्वरूप-तदंशभूतौब्रह्मपरमात्मानावपि । यदुक्तं शास्त्रारम्भ एव-ब्रह्मेति परमात्मेति भगवानिति शब्द्यते । इति ब्रह्मपरमात्मोपासकानामध्यात्मादिकथाभ्यास उपयुक्त एव । किञ्च शास्त्रस्यास्य महिम्ना ब्रह्मपरमात्मोपासकानामपि भक्तिप्रवर्त्तितत्वात् तत्फलदशायामपि आत्मारामाश्च मुनय इत्यादेः प्रायो भक्तिरेव वरीवर्त्तीति ते तत्साधनं तत्फलञ्च शुद्धभक्तैरपि न कटाक्षणीयम् अपि तु अनुमोदनीयमेव । तस्माद्यथा ब्रह्मत्व-परमात्मत्व-मत्स्यकूर्माद्यनेकावतारत्व-धर्मज्ञानवैराग्यबलैश्वर्यरूपगुणलीलामाधुर्यपरिपूर्णः श्रीकृष्णः सर्वविधभक्तैरेव परिचर्यते एवमेव ब्रह्म-परमात्म-मत्स्यकूर्माद्यवताराद्यतारि तत्तत्सर्वमूलभूतश्रीकृष्णतदीयरूपगुणलीलामाधुर्यैश्वर्य तत्प्राप्तिसाधन-भक्ति-प्रेम-धर्म-ज्ञान-योग-वैराग्याद्यखिलतत्त्वप्रदर्शको ग्रन्थोऽयमपि तत्स्वरूपभूत इति सर्वं समञ्जसम् । पुरुषः प्रकृतीक्षणकर्त्ता अण्डं सृष्ट्वा यदा विनिर्भिद्य स्वरूपभूतादात्मनः सकाशात् पृथक्कृत्य विनिर्गतो बहिः स्थितः तदा आत्मनः स्वस्य अयनं शयनस्थानं तस्मिन्नेव ब्रह्माण्डे अन्विच्छन् अपो गर्भोदसंज्ञा अस्राक्षीत् । शुचिः स्वयम्, अतः शुचीः शुद्धाः न तु क्षारोदादितुल्या इत्यर्थः ॥ १० ॥

अप्सु वासं नारायणनामनिरुक्त्या स्पष्टयति । तेन अप्सु वासेन नारायण इति नाम अभूत् । कुतः यत्यस्मादापः पुरुषादुद्भवन्तीति ता इति नरः पुरुषः तस्माज्जाता नारा आपोऽयनं यस्य स नारायण इति नाम । तदुक्तम्—आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ इति ॥ ११ ॥

तस्य समष्टिविराडन्तर्यामिणः प्रभावमाह । द्रव्यमुपादानं पृथिव्यादिकं कर्मादीनि निमित्तानि जीवो हिरण्यगर्भो भोक्ता यस्यानुग्रहात् यदन्वयात् । न हि परमात्मना विना जीवो देहो वा तिष्ठेत् स्वकार्यक्षमो वा भवेत् ॥ १२ ॥

समष्टिविराडेव कथमभूदित्याकांक्षायामाह । एकः प्रलये स्वांशान् जीवान् आत्मनि विलाप्य एकत्वेनास्थितः अनु अनन्तरं सृष्टिकाले नानात्वमिच्छन् तानेव जीवानात्मनः सकाशाद्विभक्तान् कुर्वन् योग एवतल्पं शय्या तस्मादिति महाप्रलये रात्रिस्थानीये शयित्वा सृष्टिकाले प्रातरुत्थितः सन् देवो दिव्यन् पुरुषः मायया स्वशक्त्या महत्तत्त्वादीनि कारणानि सृष्ट्वा तैः कार्यभूतं वीर्यं हिरण्मयं कनकवर्णं प्रकाशबहुलं ब्रह्माण्डं सावरणमसृजदिति महासमष्टिसृष्टिः । ततश्च तेषामेव महत्तत्त्वादीनां किञ्चित् किञ्चिदंशैर्भगवच्छक्त्यैव परस्परामिलितैः समष्टिविराट् पञ्चाशत्कोटियोजनशतकोटिपरिमिताण्डकटाहमध्यगः सृष्टोऽभूत् तदैवादिपुरुषस्तदेवाण्डकटाहं प्रविश्यतदर्द्धं स्वसृष्टजलेनापूर्य तत्रस्थं समष्टिविराजं तं स्वजठरमध्यगतं कृत्वा सहस्रवर्षाणि तस्मिन् गर्भोद एव सुष्वाप तदन्ते योगतल्पात् समुत्थितः सन् हिरण्मयं वीर्यं समष्टिविराजं त्रिधा व्यसृजत् । त्रिधैव किं तत्राह अधिदैवमित्यादि । एष एव समष्टिस्तस्य नाभिद्वारात् कमलनालात्मको भविष्यति । स एव पुनश्चतुर्दशलोकात्मको वैराजसंज्ञः स्थूलो भावी सूक्ष्मस्तु हिरण्यगर्भः समष्टिजीवः वैराज एव विसर्गाद्यर्थं चतुर्मुखो भावीति ब्रह्माण्डविध्यम् ॥ १३ ॥

अथ प्रकृतमनुसरामः अथेति । अधिदैवादिकादुक्तात् त्रिविधादन्यदिदं त्रिविधमित्यर्थः ॥ १४ ॥

अन्तःशरीरे य आकाशस्तस्मात् क्रियाशक्त्या तत्र विविधं चेष्टमानस्य पुरुषस्य समष्टिविराजः । ओज इन्द्रियशक्तिः सहो मनःशक्तिः बलं देहशक्तिः । ततः त्रिविधशक्त्यात्मकात् सूक्ष्मात् रूपात् प्राणः सूत्राख्यः महान् श्रेष्ठः असुर्जीवनव्यञ्जकः ॥ १५ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

तासु स्वसृष्टासु अप्सु सहस्रं परिवत्सरान् अवात्सीत् उवास तेनाप्सुवासेन नामेति प्रसिद्धो नारायणशब्दवाच्योऽभूत् यद्यस्मादापः पुरुषाद्भवाः पुरुषोनरः स्वयं भगवान् तदुद्भवा नयतीति नरः प्रोक्तः परमात्मा सनातन इति श्रीव्यासवचनात् ताः नाराः आपोऽयनं यस्य स तथोक्तः आपोनारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति स्मृतेश्च ॥ ११ ॥

तत्प्रभावमाह द्रव्यमिति द्रव्यं महदादिकर्मजीवादृष्टं कालः गुणवैषम्यहेतुः स्वभावः प्रधानस्य परिणामित्वम् जीवश्चेतनः यस्य भगवतः अनुग्रहतः संति कार्यकारिणो भवंति यदुपेक्षया तु न संति किमपि कर्तुं नोत्सहंते यदैते संहता भावाः भूतेंद्रियमनोगुणाः यदायतननिर्माणे नशेकुर्ब्रह्मवित्तम तदा संहत्यचान्योन्यं भगवच्छक्तिचोदिताः सदसत्वमुपादाय चोभयं ससृजुर्ह्यद इति पूर्वोक्तेश्च ॥ १२ ॥

देवो दीप्तिमान् प्रभुः समर्थः एकः अविभक्तशरीरावयवः नानात्वमाधिदैवादिविभागमन्विच्छन् योगः स्वात्मानुभवरूप एव तल्पः तस्मादुत्थितः वीर्यं वक्ष्यमाणसृज्यपदार्थमूलभूतं हिरण्मयं प्रकाशबहुलं अविभक्तावयवशरीरं मायया यदुनेन संकल्पमात्रेण आधिदैवमध्यात्ममधिभूतमिति त्रिधाव्यसृजदिति सार्द्धश्लोको वाक्यम् ॥ १३ ॥

अस्यैव प्रपंचः अथेत्यादि पौरुषं पुरुषाधिष्ठितं ॥ एकं समष्टिरूपं वीर्यं व्यष्टिकारणम् ॥ त्रिधाभिद्यत निरभिद्यत उदपद्यत तच्छृणु ॥ १४ ॥

पुरुषस्य विचेष्टतः प्राणचेष्टां कुर्वतः अंतःशरीरे यः आकाशः तस्मात् ओजः इंद्रियशक्तिः सहः मनः शक्तिः बलं देहशक्तिः प्राणजशक्तित्रययुक्तः समष्टिप्राणोऽभवदित्यर्थः ॥ ततोमहान्मुख्यः असुः सर्वेषां प्राणः जज्ञे जातावेकवचनम् ॥ १५ ॥

अनु प्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु ।
अपानन्तमपानन्ति नरदेवमिवानुगाः ॥ १६ ॥
प्राणेन क्षिपता क्षुत्तृडन्तरा जायते प्रभोः ।
पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत ॥ १७ ॥
मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते ।
ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते ॥ १८ ॥
विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः ।
जले वै तस्य सुचिरं निरोधः समजायत ॥ १९ ॥
नासिके निरभिद्येतां दोधूयति नभस्वति ।
तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

महत्त्वं दर्शयति अन्विति । प्राणा इन्द्रियाणि यं प्राणन्तं चेष्टां कुर्वन्तम् अनु पश्चात् प्राणन्ति चेष्टां कुर्वन्ति । अपानन्तं चेष्टां त्यजन्तम् अनु अपानन्ति चेष्टां त्यजन्ति । राजानमनु भृत्या इव ॥ १६ ॥

क्षिपता चालयता निमित्तेन । क्षुत्तृडादिकं प्रभोरिति विराड्जीवाभेदेनोपासनार्थमुक्तम् । आजायते स्म । ततो जक्षतः भक्षयितुमिच्छतः इत्यर्थः । प्राक् प्रथमं निरभिद्यत विभक्तमभूत् ॥ १७ ॥

तालु अधिष्ठानं जिह्वा इन्द्रियं, नानारसो विषयः वरुणश्च देवता ज्ञातव्या । एवं सर्वत्र अधिष्ठानमिन्द्रियं देवता विषय इत्येतच्चतुष्टयमनुक्तमप्यूह्यम् ॥ १८ ॥

विवक्षोर्वक्तुमिच्छोः मुखत एव वह्निर्देवता वाक् इन्द्रियं व्याहृतं भाषणम् । तयोरिति इन्द्रियदेवताधीनत्वं कर्मणो दर्शयति ॥ १९ ॥

नभस्वति प्राणवायौ दोधूयति दोधूयमानेऽत्यन्तं प्रचलति सति । तत्र नसि नासिकायाम् । वायुर्देवता । गन्धं वहतीति तथा, अनेन गन्धो विषयो दर्शितः घ्राणमिन्द्रियम् जिघृक्षतः गन्धं ग्रहीतुमिच्छतः ॥ २० ॥

श्रीमद्वीरराघवाचार्य्य कृत भागवतचन्द्रिका ।

तस्य महत्त्वमेवाह अनुप्राणंतीति प्राणा इंद्रियाणि सर्वजंतुषुयंप्राणंतं चेष्टांकुर्वंतमनुपश्चात्प्राणन्ति चेष्टांकुर्वंति अपानंतं चेष्टांत्यजंतं प्राणमनुपश्चात्सर्वे प्राणाःअपानंति चेष्टांत्यजंतिनरदेवं राजानमनुभृत्याइव सर्वाण्यपीन्द्रियाणि प्राणाधीनवृत्तीनीत्यर्थः यद्वाव्यष्टिप्राणानांकारणस्वभावानुवर्तित्वमाह अन्विति यं चतुर्मुखशरीरस्थं समष्टिप्राणमनुअनुसृत्य तत्स्वभावानुवर्तिनः ओजआदिसामर्थ्ययुक्ता एव व्यष्टिप्राणाः प्राणापानादिव्यापारं कुर्वन्तीत्यर्थः ॥ १६ ॥

अथ साधिष्ठानस्य सदेव तस्य सविषयस्य जिव्हेंद्रियस्योत्पत्तेर्मुखप्राणोत्पत्तिहेतुकत्वं सूचयन्नाह प्राणेनेति क्षिपता व्याप्रियमाणेन प्राणेन विभोश्चतुर्मुखस्यान्तरा जाठराग्नौदीपिते क्षुत्तृट् च जायतेत्यर्थः ततः पिपासतः पातुमिच्छतःजक्षतः अत्तुमिच्छतश्च नटस्य शृणोतीतिवत् पंचम्यर्थे षष्ठी बोध्या प्राक्प्रथमं मुखं निरभिद्यत विभक्तमभूत्चतुर्मुखमुखाद्व्यष्टि शरीरमुखान्युत्पन्नानीत्यर्थः ॥ १७ ॥

तालवधिष्ठानंजिह्वेन्द्रियंनानारसोविषयः वरुणश्चदेवताज्ञातव्या एवंसर्वत्राधिष्ठानं इंद्रियंदेवताविषयइत्येतच्चतुष्टयमनुक्तमप्यूह्यंमुखाद्यवयवैर्विना जिव्हयाउत्पत्त्ययोगान्मुखोत्पत्तिरुक्ता नत्वधिष्ठानतया अधिष्ठानं तु तालवेव अनेन ज्ञातृसृष्टिरप्यर्थादुक्ताभवति वागादीन्द्रियाश्रयमुखाद्यवयवसंघातात्मकदेवादिदेहयोगकरणमेव हिज्ञातसृष्टिः ॥ तालुजिह्वामूलं निर्भिन्नं व्यष्टिशरीरतालूत्पन्नमित्यर्थः ॥ तत्र तालुनिजिह्वा उपजायते उपाजायतेत्यर्थः नानारसः कट्वम्लमधुरतिक्तादिरसः जज्ञे जिह्वया यः नानारसः अधिगम्यते ज्ञायत इत्यर्थः ॥ १८ ॥

वाग्व्यष्ट्युत्पत्तिमाह विवक्षोरिति ॥ विवक्षोर्वक्तुमिच्छोर्भूम्नो भूमवतः मुखतः मुखाद्वन्हिः वागभिमानिनीदेवता वागिन्द्रियं तयोरिंद्रियतदभिमानिदेवतयोर्व्यापाररूपं व्याहृतमुक्तिश्चाभूदित्यर्थः एवं सर्वत्र ब्रह्मशरीरात्समष्टिभूताद्व्यष्टयवयवविशेष विभाग उच्यते ॥ मुखाद्यवैरित्यस्यमुखमादिर्येषांकपोलादीनांतैरङ्गैर्विनेत्यर्थः मुखकपोलहन्वादिसमुदायंविनातदन्तर्वर्तिजिह्वायाउत्पत्त्ययोगादित्यभिप्रायः ॥ नचैवं चतुर्मुखस्यैवेंद्रियोत्पत्तिरिति वक्तुंयुक्तं उपरिहस्तौ रुरुहतुरिति हस्तद्वयोत्पत्ति कथनेन चतुर्मुखस्य द्विबाहुत्वाभावात् देवादिशरीरस्य हस्तादिव्यष्टियुग्मविभागस्य सूचितत्वात् घ्राणेंद्रियद्व्यष्ट्युत्पत्तिमाह गले इति एतस्य ब्रह्मणः गलेकंठे सुचिरंकालमित्यर्थः वायोरिति शेषः वायोर्निरोधः समजायतेत्यर्थः जले इति पाठे नभस्वतीत्यन्वयः ॥ १९ ॥

निरोधान्नभस्वति वायौ दोधूयति अत्यंतं प्रचलति सति नासिके नासापुटे निरभिद्येतां वायुव्यापारं कुर्वतो ब्रह्मणः शरीरे वायुपूरिते नासिकेनिरभिद्येतां ब्रह्मशरीरेवायोः स्तैमित्याभासाव्यष्टयोऽभवन्नित्यर्थःजिघृक्षतो गन्धमाघ्रातुमिच्छतो ब्रह्मणःतत्र नसिनासायां गन्धवहः गन्धप्रापकोवायुः घ्राणाधिष्ठाता घ्राण इन्द्रियं च निरभिद्यतेत्यन्वयः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

प्राणस्यसर्वेन्द्रियप्रभुत्वंस्पष्टयति अनुप्राणंतीति पिंगलयानाड्याअपानंतमधश्चेष्टमानम् ॥ १६ ॥

इडापिंगलयोःप्राणापानचेष्टाफलमाह प्राणेनेति प्राणेनापानेनच ॥ विभोर्विरिंचस्य ॥ चतुर्मुखावयवोत्पत्तिकथनपूर्वकंतेभ्योऽध्यात्मादीनामुत्पत्तिप्रकारंप्रपंचयति पिपासतइति प्रागादौमुखंनिरभिद्यतव्यक्तमभवत् ॥ १७ ॥

मुखतोमुखे तत्रतालुनिरभिनताजिह्वयाजिह्वेंद्रियेण ॥ १८ ॥

वाक्वागिंद्रियं तयोर्वह्निवाचोरनंतरंव्याहृतमभिवादनं शरीरांतस्थेनभस्त्रातिवायोर्दोधूयति पुनःपुनर्धुन्वतिकंपमानेसति जलेऽडोदके वर्तमानस्यविरिंचस्यवायुर्निर्गमद्वाराभावेननिरोधः क्लेशविशेषोऽभूत् ॥ १९ ॥

तदनंतरंनासिकेश्वासोच्छ्वासरूपवायुनिर्गमागमद्वारेव्यक्ते वायुरित्यनेनापिनिरोधोऽनुभवसिद्धइत्याह जिघृक्षतोघ्रातुमिच्छतोधातुस्तत्रनसिनासिकायांयो नासिक्यः प्राणः सगंधग्राहीवायुर्घ्राणेंद्रियंतद्विषयोगंधश्चजातइतिशेषः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अन्विति । प्राणा व्यष्टिगता वायवः । मुख्यप्राणशक्त्यैव व्यष्टिप्राणशक्तिरित्येवात्र विवक्षितम् । अविवक्षितवाच्यार्थध्वनित्वात् ॥१६॥

पिपासतो यक्षतश्चेत्यनेन सुप्ततत्तद्वासनामात्रमुच्यते यदेव स्वभावरूपं सत् तत्तत् कार्यं सम्पादयतीति । एवमुत्तरत्रापि ज्ञेयम् । मुखमिति व्यष्टिमुखमेव तन्मुखत्वेनोपदिश्यते तत्समुदायकारणमात्ररूपत्वात् तन्मुखस्य । एवमुत्तरत्रापि । एकत्वमत्र समूहापेक्षया एकोपलक्षणत्वेन वा ज्ञेयम् ॥ १७ ॥

त्रिधात्वं विवृण्वंस्तदुपलक्ष्य चतुर्धात्वमपि दर्शयति मुखत इति । ततो नानारसो जज्ञे इति तु समष्टेरेव धर्मः ॥ १८ ॥

विवक्षोरित्यर्द्धकम् ॥ १९ ॥

जले वा इति सार्द्धकम् ॥ २० ॥ २१ ॥

श्रीमद्वल्लभाचार्य्य कृत सुबोधिनी ।

तस्य प्राणस्यमाहात्म्यमाह अनुप्राणंतीति पूर्वं राजसाहंकारात्प्राणादीनामुत्पत्तिरुक्ता ते आधिदैविकभूताः एतेत्वाध्यात्मिकरूपाः यं प्राणमनुप्राणंति कार्यं कुर्वंति प्राणा इंद्रियाणि अत्रापि न स्वरूपस्थमनुकिंतु प्राणंतमनुक्रियया अपि क्रियापेक्षा सूचिता तदा तस्य सर्वत्रैव तथात्वं जातमित्याह । सर्वजंतुष्विति आब्रह्मतृणस्तंबेषु अपानंतमपगच्छंतमनुइंद्रियाण्यपगच्छंति तस्योपलक्षकत्वं निवारयति दृष्टांतेन नरदेव मिवानुगा इति राजानमनुसेवका इव ॥ १६ ॥

एवं माहात्म्यमुक्त्वा ततोऽग्रे सृष्टिमाह प्राणेन क्षिपताक्षुत्तृडिति प्राणा करणं क्षिपता स्वोपयुक्तेन अंतःस्थितानिवस्तूनि मलादीनि क्षिपतावृत्तोविक्षिपतात्तृट् अग्निविशेषादित्येकेमृत्युरित्यपरेऊष्मविशेषइत्येकेभगवानेववैश्वानररूपः क्षुत्तृडितिद्वयात्मकः अन्तरा उदरमध्ये ततस्तद्वशात् पिपासा जिघृक्षा जातेति बहिःस्थितपदार्थान् जलान्नरूपान् पिपासतः अक्षतश्च पातुमिच्छोर्भोक्तुमिच्छोश्च प्राक पूर्वभागेपुरुषेणैवहि विभज्यंते दिशः मुखविवरात्मकं निरभिद्यत भिन्नं जातम् ॥ १७ ॥

तथापि नस्फुटितमिव किंतु द्वारमिव तत्रैव मुखे विवरात्मके तस्मादेवमुखाद्धेतुभूतात् तालुनि जिह्वेति प्रसिद्धं तन्मध्ये निर्मितं उपयेधो वा अंशात एकीभूताः पदार्था दानार्था तानूरूपेण निर्गत इत्यर्थः तत्र जिह्वा इंद्रियं उपजायते आविर्भूतमित्यर्थः तत इंद्रियात निमित्तभूतात्तदनंतरं वानानारसो जज्ञे मधुरादि सर्वोपि विषयस्तत्र जायते कारणत्वतः बहिःस्थितो वा तस्येच्छा वशात् जायते रसः अन्नाद्यादीनामपि एवैव व्यवस्था ज्ञापिता अंतःस्थितपक्षेपि तालुव्यापारेणैव तालुद्वाराक्षुत्तृड्क्षामकं भवतीति मुखनिर्माणं उदकादिगर्तादिवत् बाह्यविषय पक्षेपि न संदेहः रसाः शृङ्गारादयोपि भवंतीति तद्व्यावृत्त्यर्थमाह जिह्वाः पायोभिगम्यत इति अधिगम्यते ज्ञायते विषयतया स्वीक्रियत इति वा ॥ १८ ॥

ततस्तस्मिन्नेवस्थाने इंद्रियांतरं जातमित्याह विवक्षोरिति वेदरूपां वाणीं वक्तुमिच्छोः मुखतः रूपस्य मुखतस्य विशेषणं आकाश एव यतः शब्दो भवति यथा तालुरूपे जिह्वा तिष्ठति तथा मुखमध्ये च आकाशस्तस्मिन्वागिंद्रियं तिष्ठतीत्यर्थः तत्र प्रथमं वह्निदेवतावाक् स्त्रीरूपा न भर्तारं विना निर्गच्छतीति ततोऽत्रदेवता प्रथमं निरूपिता ततोवाक् इंद्रियं ततोन्यत्रापि प्रथमं देवतापश्चादिन्द्रियमिति ज्ञापनं व्याकृतं तयोरिति तयोः संबंधिव्याकृतं वाग्व्यापारः देवताधिष्ठितेंद्रियसाध्यः ॥ १९ ॥

एवमन्यत्रापि ततश्चालनेन अंतर्वायुरुद्गतः सचांतः पूर्णक्षोभं जनयतीति तद्व्यावृत्त्यर्थं नासिके नासापुटे निरभिद्येतां तस्य बहिः पदार्थग्रहणवशकत्वविद्यमाद्धेतुभूता भूम्नोव्यापकस्य आकाशविद्यात्मकाद्धेतुभूतात् भावेपि अंतःस्थितवायोरयनिमित्तत्वमाह दोधूयति नभस्वतीति नभस्वान्वायुः तस्मिन्नत्यंतं कंपमाने सति अथवा तस्मिन्नासिनासिकायां चलनात्मकोवायुरेव गोलकरूपंतत्र वायुर्देवतागंधवहतीति गंधवाहो वायुः घ्राणो वा उभयोर्मध्ये विशेषणं गंधस्य विषयत्वबोधकं घ्राणइंद्रियं नासि जिघृक्षत इति नासिकागोलकस्थानीया गोलकाधाररूपावा गंधं जिघ्रतः आघ्रातुमिच्छतो भगवतः निरभिद्यत उद्गतं जातं गृहीतमिति यथायोग्यं क्रियानुसंधेयाः ॥ २० ॥

एवं मुखनासिके उपपाद्य अक्षिणी निरूपयितुमाह यदात्मनि निरालोक इति आसीदित्यर्थः आत्मा देहः तत्र कीदृशोहमिति यदा न ज्ञातवान् कादशेवस्थाने तिष्ठति अन्यच्च स्वसंबंधिनी जिघृक्षतः अक्षिणि निर्भिन्ने चक्षुरादीनामालोकापेक्षा नास्तीति पूर्वमेवोक्त तस्य तु मोहो नास्तीति न मायाकृतप्रतिबंधः निरालोकास्तु अदर्शनकृत तत्र देवताज्योतिः सूर्य इति यावत् सूर्यस्य ज्योतिरूपं आधिदैविकं आध्यात्मिकं तु मंडलं सूर्यशब्दवाच्यं किरणास्त्वाधिभौतिकाः अतोत्र आधिदैविकमेवेति ज्योतिःशब्दप्रयोगः चक्षुरिंद्रियं गुणोरूपं पंचानां मध्ये रूपस्यैव प्रसिद्धत्वात्देवतेंद्रियाभ्यां गुणज्ञानं भवतीत्यर्थः ॥ २० ॥

यदात्मनि निरालोकमात्मानञ्च दिदृक्षतः ।
निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः ॥ २१ ॥
बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः ।
कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः २२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

जीवनव्यञ्जकत्वेन महत्त्वं दर्शयति अन्विति । प्राणा इन्द्रियाणि । यं प्राणन्तं चेष्टां कुर्वन्तं तमनु पश्चात् प्राणन्ति चेष्टां कुर्वन्ति अपानन्तं चेष्टां त्यजन्तम् मनु अपानन्ति राजानमनु भृत्या इव ॥ १६ ॥

क्षिपता चालयता निमित्तेन क्षुत्तृडादिकं जायते स्म । प्रभोरित्युपासनार्थं तत्र समष्टौ परमेश्वरत्वारोपः । ततो जक्षतः भक्षयितुमिच्छत इत्यर्थः । प्राक् प्रथमं निरभिद्यत विभक्तमभूत् ॥ १७ ॥

पूर्ववमुपक्रान्तमधिदैवादित्रैविध्यं विवृणोति । मुखतः मुखोत्पत्त्यनन्तरमित्यर्थः । तालु अधिष्ठानं जिह्वा इन्द्रियं नानारसो विषय वरुणश्च देवता ज्ञातव्या । तत्राधिष्ठानविषयावाधिभूतम् इन्द्रियमध्यात्मं देवता अधिदैवमिति सर्वत्र चानुर्विध्येऽपि त्रैविध्यमेव द्रष्टव्यम् ॥ १८ ॥

मुखतो मुखेऽधिष्ठाने वह्निर्देवता वाक् इन्द्रियं व्याहृतं भाषणं विषयः । तयोरिन्द्रियदेवतयोरधीनमित्यर्थः ॥ १९ ॥

यदा जले विराजो निरोधोऽजायत तदा श्वासचलनं विना न निर्वाह इति श्वासमार्गभूते नासिके अधिष्ठानं तत्र नभस्वति प्राणाख्ये दोधूयमाने अत्यन्तं चलति सति वायुर्देवता गन्धं वहतीति तथा अनेन गन्धो विषयो दर्शितः । प्राणा इन्द्रियं जिघृक्षतः गन्धं गृहीतुमिच्छतः ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तस्य मुख्यतां दर्शयति नरदेवं राजानमनुअनुगा इव सर्वजंतुषु यं मुख्यं प्राणं प्राणं तं चेष्टां कुर्वंतम् अनुपश्चात्प्राणाः इंद्रियाणि प्राणंति चेष्टां कुर्वंति अपानंतं चेष्टांत्यजन्तमन्वपानंति चेष्टां त्यजंति ॥ १६ ॥

क्षिपताऽव्याप्रियमाणेन प्राणेन निमित्तेन विभोः अंतरा देहमध्ये क्षुत् तृट्जायतेस्म ततः पिपासतःपातुमिच्छतः जक्षतःभक्षयितुमिच्छत प्राक् प्रथमं मुखं निरभिद्यत विभक्तमभूत् पुरुषस्योत्पन्नैर्मुखादिभिरवयवैर्जनादिकान् जनादिभ्यश्च पुरुषस्य मुखाद्यवयवान् धिजामीहीति अष्टमे पृष्टोऽधिरोधप्रकारोऽपि सूचितः ॥ १७ ॥

मुखतः मुखेतालुमधिष्ठानं निर्भिन्नं विभक्तं तत्र तालुनि जिह्वा इंद्रियमुपजायते स्म ततः नानाकटुम्लमधुरादिभेदवान् रसोविषय वरुणश्च देवताज्ञेया एवं सर्वत्राधिष्ठानमिंद्रियं देवता विषयः ॥ इत्येतच्चतुष्टयमनुक्तमप्यूह्यम् ॥ १८ ॥

भूम्नो विवक्षार्वक्तुमिच्छोर्मुखतो मुखादवह्निः वागभिमानिनी देवता वागिन्द्रियं तयोर्वाग्वह्न्योः व्यापाररूपं व्याहृतं भाषणं चाभूदित्यर्थः तस्यव्याहृतस्य जले निरोधः समजायत ॥ १९ ॥

नभस्वति प्राणेदोधूयति अत्यंतं स्वव्यापारं कुर्वति सति नासिके नासापुटे निरभिद्येताम् तत्र नसि नासिकायां वायुर्देवता गंधं वहतीति गंधवहः अनेन गंधोविषयो दर्शितः जिघृक्षतः गंधं ग्रहीतु मिच्छतः घ्राणइंद्रियमभूत् ॥ २० ॥

भाषाटीका ।

द्रव्य, कर्म, काल, स्वभाव और जीव जिसके अनुग्रहसे होते हैं । और उपेक्षा से नहीं होते हैं ॥ १२ ॥

एक भगवान की करते योग तल्प से उठे और उन्हीं देवते एक हिरण्मय वीर्य्य को अपनी मायासे तीन रूपका सजा ॥ १३ ॥

अधिदेव अध्यात्म और अधिभूत । एक ही पौरुष वीर्य्य जैसे तीन प्रकार का हुआ है वह तुम सुनो--चेष्टा करते पुरुष के शरीर के भीतर अवान अस्तु और प्राण उत्पन्न हुए जो ओर इन्द्रिय शक्ति) सह (मनश्शक्ति) वल शरीरशक्ति रूप हैं ॥ १४ ॥ १५ ॥

सब जन्तुओंमें जिस प्राणको अनुप्राणनकरने में और सब प्राण अर्थात् इन्द्रिय प्राणित होती हैं और जब वह अपानित होता है (चेष्टा नहीं करताहै) तब सब अपानित होती है जैसे राजा के भृत्य राजा के अनुगतहैं ॥ १६ ॥

विराट रूप प्रभुके अन्तर में जब प्राणने चालन किया तब क्षुधा और तृषा उत्पन्नहुई । क्षुधा और पान की इच्छा से मुख फूटा ॥१७

मुखमें तालू फूटा तालू में जिह्वा हुई जिह्वा से अनेक रूप उत्पन्नहुए कि जो जिह्वाहीसे जाने जाते हैं ॥ १८ ॥

भूमा पुरुष की जब बोलने की इच्छा हुई तब मुखसे वह्निदेवता वाक् इन्द्रिय और व्याहृत विषय उत्पन्नहुआ । और बहुत काल तक जल में इनका निरोध रहा ॥ १९ ॥

जब वायु कम्पित हुई तब दो नासिका फूटी नासिका में सूंघने की इच्छा से घ्राण इन्द्रिय और गन्धके वहन करनेवाला वायु देवता हुआ ॥ २० ॥

वस्तुनो मृदुकाठिन्यलघुगुर्व्वौष्णशीतताम् ।
जिघृक्षतस्त्वङ्निर्भिन्ना तस्यां रोममहीरुहाः ।
तत्र चान्तर्बहिर्वातस्त्वचा लब्धगुणो वृतः ॥ २३ ॥
हस्तौ रुरुहतुस्तस्य नानाकर्म्मचिकीर्षया ।
तयोस्तु बलवानिन्द्र आदानमुभयाश्रयम् ॥ २४ ॥
गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम् ।
पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः ॥ २५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

निरालोकं प्रकाशशून्यत्वम् आसीदिति शेषः । निर्मक्षिकमितिवत् अव्ययीभावः । तदा आत्मानं देहं चकारादन्यच्च वस्तु दिदृक्षतः । अक्षिणी स्थानम् । ज्योतिरादित्यो देवता । चक्षुरिन्द्रियम् । ततः गुणस्य रूपस्य ग्रहः ग्रहणम् । अनेन रूपं विषयो दर्शितः ॥ २१ ॥

ऋषिभिर्वेदैर्बोध्यमानस्य । तत् आत्मनः प्रबोधनं ग्रहीतुमिच्छतः । ततो गुणग्रहः शब्दग्रहणम् ॥ २२ ॥

मृदुत्वञ्च काठिन्यञ्च लघुत्वञ्च (गुरुत्वञ्च आउष्णं औष्णं औष्णत्वं ईषदुष्णत्वञ्च शीततां चेत्यर्थः । यद्यप्यत्युष्णत्वमपि इन्द्रियविषय एव तथापि तस्य जिघृक्षाभावात् उष्णमित्युक्तम् । गुर्व्वौष्णेतिपाठे यणादेशश्छान्दसः वस्तुनएतान् धर्मान् जिघृक्षतस्त्वक् निर्भिन्ना त्वगिन्द्रियाधिष्ठानं चर्म जातमित्यर्थः । तस्यां रोमाणि इन्द्रियं महीरुहाश्च देवता जाताः वस्तुनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानात् तयोरपि त्वगिन्द्रियविषयत्वमिति पौराणिकाः । तत्र त्वचि अन्तर्बहिश्च वातो वायुर्वृतः आवृत्य स्थितः । कर्त्तरि निष्ठा । कथम्भूतः त्वचा लब्धो गुणः स्पर्शो येन । अयमर्थः—त्वगिन्द्रियमेव बहिः कण्डूतिसहितं स्पर्शं गृह्णत् रोमशब्देनोच्यते । तत्र महीरुहाणां देवतात्वम् । अन्तर्बहिश्च स्पर्शं गृह्णत् तदेव त्वक्शब्देनोच्यते । तत्र वातो देवता । तथाच तृतीये वक्ष्यति त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यते ॥ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् । प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते इति अत्र चर्माणीति चर्म्मोपलक्षिता त्वगित्यर्थः । प्राणेनांशेनेति प्राणवायुव्याप्तेन त्वगिन्द्रियेणेत्यर्थः । बह्वृचश्रुतौ त्वेक एवांशो निर्दिष्टः त्वक् निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतय इति ॥ २३ ॥

रुरुहतुः निर्भिन्नौ । बलमिन्द्रियम् । इन्द्रो देवता । तदुभयाश्रयम् आदानं कर्म ॥ २४ ॥

अभिकामिकाम् अभीष्टां विहितामित्यर्थः पद्भ्यां सह यज्ञो विष्णुरेव स्वयं तदधिष्ठातृरूपेण स्थितः । कर्मभिरिति गत्यैव कर्मशक्तिरिन्द्रियमुक्तम् हव्यं क्रियते इति गतिप्राप्यं यज्ञार्थं द्रव्यं विषय इत्युक्तम् । नृभिरिति व्यष्टिजीवेष्वपि इयमेव रीतिरिति दर्शयन् महाधिकारित्वं यज्ञादीनां दर्शयति ॥ २५ ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिन्याख्य तट्टिप्पणी ।

त्वचमस्येति तृतीयस्कन्धीयषष्ठाध्यायस्याष्टादशश्लोकः निर्भिन्नान्यस्येति तृतीयस्कन्धीयषष्ठाध्यायस्य षोडशश्लोकः बह्वृचश्रुतौ ऋग्वेदीयैतरेयोपनिषदीत्यर्थः ॥ २३ २८ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचंद्रिका

चक्षुर्व्यष्टिसृष्टिमाह यदेति यदा आत्मनि देहे निरालोकं अर्थाभावेऽव्ययीभावः आलोकाभावः आसीदिति शेषः तदा आत्मानं देहं चकारादन्यच्च वस्तु दिदृक्षतस्तस्य ब्रह्मणोऽक्षिणी अधिष्ठाने निर्भिन्नौ चक्षुरिन्द्रियस्य व्यष्टियुग्मान्युत्पन्नानीत्यर्थः चक्षुश्चक्षुरिन्द्रियगुणग्रहो रूपगुणग्राहकं ज्योतिरादित्यश्चेत्यर्थः स हि चक्षुरभिमानी आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशदिति श्रुतेः ॥ २१ ॥

श्रोत्रव्यष्टिसृष्टिमाह बोध्यमानस्येति ऋषिभिर्वेदैः बोध्यमानस्य प्रबोध्यमानस्य तत्प्रबोधं ग्रहीतुमिच्छतः आत्मनो ब्रह्मणः कर्णावधिष्ठानं दिशः श्रोत्राभिमानिदेवतागुणग्रहः शब्दग्रहणहेतुः श्रोत्रमिन्द्रियं निरभिद्यत इत्यर्थः श्रोत्रेन्द्रियव्यष्टियुग्मान्यभवन्निति भावः ॥ २२ ॥

त्वगिन्द्रियव्यष्ट्युत्पत्तिमाह वस्तुन इति वस्तुनः द्रव्यस्य मृदुत्वं काठिन्यं च लघुत्वं च गुरुत्वं च आउष्णं ईषदुष्णत्वं चानुष्णत्वस्य ग्रहणायोग्यत्वादौष्ण्यं इत्युक्तं गुर्व्वौष्णेति पाठे यणादेशश्छांदसः शीततां च एतान् गुणान् जिघृक्षतः ग्रहीतुमिच्छतः त्वगिन्द्रियव्यष्टिरुत्पन्ना इत्यर्थः वस्तुनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानयोरपि त्वगिन्द्रियविषयत्वमिति ज्ञेयं अत्रेदं बोद्धव्यं त्वगिन्द्रियस्य सूक्ष्मस्थूलरूपवाह्याभ्यन्तरचर्मणी द्वे स्थाने स्थानभेदाच्च कंडूः स्पर्शश्चेति विषयभेदः विषयभेदाच्च महीरुहाः वायुश्चेति देवताद्वयं त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः अंशेन लोमभिः कंडूं यैरसौ प्रतिपद्यते निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते इति तृतीये स्पष्टमभिधास्यमानत्वात् एवं चैकमेव त्वगिन्द्रियं बाह्यचर्मगतं लोमसुव्याप्तमोषधिदेवताकं कंडूग्राहकं एतदेवांतर्बहिः स्पर्शग्रहणाद्वायुदेवतमिति एतदेव संग्रहेणाह तस्यामिति तस्यां त्वचि त्वगिन्द्रिये विभिन्ने तदधिष्ठानं रोमाणि अधिष्ठातृदेवतामहीरुहा ओषध्य इत्यर्थः अथस्पर्शं गृह्णतस्तस्यैव त्वगिन्द्रियस्य वाय्वधिष्ठितत्वमाह तत्र चेति तत्र च तत्रैव त्वगिन्द्रिये वातो वायुर्वृतः आधिष्ठितवान् कथंभूतः त्वचा त्वाधिष्ठेयत्वगिन्द्रियेण साधनेनांतर्बहिश्च लब्धगुणः लब्धः स्पर्शः गुणो येन सः अंतर्बहिश्च स्पर्शसंपादक इत्यर्थः ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

[illegible] हस्तावपीति नानाकर्मआदानादिकर्मचिकीर्षतः लब्धस्पर्शं कर्तुमिच्छतः तस्य ब्रह्मणः हस्तौ रुरुहतुः ब्रह्मगतहस्त [illegible] द्वयोऽभूवन्नित्यर्थः अत्रस्थानेद्रियाधिष्ठातृकर्माण्याह बलिस्तृतीये स्पष्टा तयोरिति तयोर्हस्तयोः स्थानभूतयोः बलना [illegible] पर्यायबलसहितः इंद्रः अधिष्ठातेत्यर्थः उभयाश्रयं हस्तद्वयाश्रय मादानं कर्म विषयस्तु इंद्रियस्य हस्तद्वय- [illegible] याश्रयमित्यर्थः ॥ २४ ॥

[illegible] गतिमिति अभिकामिकामिच्छानुसारां गतिंजिघृक्षतः ब्रह्मणः पादौ रुरुहाते निर्भिन्नावित्यर्थः अत्र स्थानेद्रियादीन्याह पद्भ्यामिति यज्ञो विष्णुः यज्ञो वै विष्णुरिति श्रुतेः यज्ञः स्वयमेव पद्भ्यां इंद्रियेण इंद्रियस्य पादद्वयस्थत्वात्पद्भ्यामिति द्विवचन निर्देशः पद्भ्यांगति सामर्थ्यापादकपादेन्द्रियेण सहपादयोरधिष्ठितवानित्यर्थः नृभिः कर्मभिः गमनागमनादिभिः कर्मभिः हव्यं हविरूपं द्रव्यं क्रियते संपाद्यत इत्यर्थः गमनादिकं कर्महव्यं विषय इत्युक्तम् ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

यदासविरिंचमात्मनिनिरालोकोनिष्प्रकाशस्तदात्मानंस्वशरीरमन्यच्चदिदृक्षुतस्तस्याऽक्षिणीगोलकेव्यक्तेततोज्योतिः सूर्योरूपगुणग्रहश्चक्षुरिंद्रियं तद्ग्राह्यंरूपंचोत्पन्नमितिशेषः ॥ २१ ॥

ऋषिभिर्ज्ञानसाधनैर्वेदादिभिरग्न्यादिभिर्वाबोध्यमानस्यवेदाभिबोधेतिविज्ञाप्यमानस्यतस्यविरिंचस्यात्मनस्तद्विज्ञापनंजिघृक्षतोग्रहीतुकामस्यकर्णौजातौ तयोर्दिशोदिग्देवतागुणग्रहःश्रोत्रेंद्रियंचतद्विषयश्चशब्दः ॥ २२ ॥

वस्तुनोघटादिपदार्थस्यमृदुत्वादिगुणान्जिघृक्षतोज्ञातुमिच्छतस्तस्यविधेस्त्वगिंद्रियं तस्यांत्वचिरोममहीरुहास्तत्रत्वचिचांतर्बहिश्चयोऽपित्वचात्वगिन्द्रियेणस्पर्शलब्धेनज्ञानेनस्पर्शगुणोनावृतोवातः स्पर्शवायुःस्पर्शश्चाभवदित्यन्वयः गुर्वुष्णातिछांदसः ॥ २३ ॥

उभौइंद्रियेंद्रियाभिमानिनावाश्रयौयस्यतत्तथोक्तं आदानमुपादानदानादिकर्मच ॥ २४ ॥

गतिगमनलक्षणांकर्म यज्ञइन्द्रपुत्रः स्वयं तदभिमानी गतिश्चपद्भ्यामभूत् तथानृभिर्यज्ञद्रव्यंहविः संबंधिहवनादिकर्मक्रियते वस्तु-हेययसउपेन्द्रोभगवान्यज्ञांतर्यामितयाऽभिव्यक्तइतिशेषः ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

बोध्येति [illegible] बोध्यमानताज्ञानमन्तः सामान्याकारेण स्फुरणाअपरापश्यन्तीमध्यमाख्यवेदद्वारा परमात्मनैवेति ज्ञेयम् ॥ २२ ॥ २३

आदानमा[illegible]भिमानं वस्तु विषय इत्यर्थः ॥ २४ ॥

गतिमिति [illegible] जिगीषतोयशीकर्तुमिच्छतः अतःपद्भ्यामिति पूर्ववत् यज्ञस्येव यज्ञोविष्णुशक्त्याविष्टरूपा काचिद्देवतास्त्रयमिति तथापि सर्वत्र [illegible] प्राधान्य विवक्षया यत्र च सति नृभिःकर्तृभिःकर्मभिःकृत्वा हव्यं क्रियते कर्मभिरिति बहुत्वं तद्वृत्तिभेदापेक्षया हव्यमिति मुख्यत्वेनोक्तं सर्वमप्याहरणीयम् (आहवनीयं) तु ज्ञेयम् तदर्थमेव तत्र तत्र गमनात् ॥ २५ ॥

श्रीमद्वल्लभाचार्यकृत सुबोधिनी ।

तदर्मतं [illegible] भगवंतं तं महापुरुषं ऋषयो मंत्रास्तोतुमारब्धवंतः तदा ऋषिभिस्तूयमानस्य साक्षात् परब्रह्मेति बोध्यमानस्य आत्मनः पूर्णकस्य देहक[illegible]ज्याकृत्यर्थं वा तच्छिसृक्षतः तैरुच्यमानं स्वरूपं ग्रहीतुमिच्छतः कर्णौनिरभिद्येतां गोलकरूपौ दिशो देवताः श्रोत्रमिंद्रियं गुणग्रहः [illegible]ग्रहणं शब्दस्य पूर्वसिद्धत्वात् ॥ २२ ॥

एवं [illegible]न्द्रियाणां द्विगोलकानि निरूपितानि व्यापकमिन्द्रियमाह वस्तुन इति वस्तुनो घटपटादेर्लघ्वादीनि जिघृक्षतः त्वक्निर्भिन्ना तस्यां लो[illegible] इंद्रियं महीरुहादेवा लघुसूक्ष्मं लघुशब्दो धर्मवाची धर्मिणामपि प्रचुरप्रयोगाद्बोधयति तदभिप्रायेण लाघवादिशब्दा अत एव चातुर्वर्ण्ये लाघवशब्दः अत्र लघुशब्दः स्पर्शविशेषवाची यथा सूक्ष्मवायुस्पर्शः मृदुपटुत्वं घटस्पर्शेणावगम्यते सर्वत्र स्पर्शविधाने लघुस्पर्शएवविधीयते काठिन्यं कठिनस्पर्शःपाषाणादिषु मृदुलघुकोमलः पिच्छलतापि तस्यैव भेदः पट्टवस्त्रादिषु गुरुत्वमपि स्पर्शः यद्यपि शास्त्रांतरे भिन्नो धर्मः उत्तंजनादिना अवगम्यते तथापि सोऽस्मिन् शास्त्रे स्पर्श एव स्पर्शसहितेनैव लोलमादिना अवगमात् स्पर्शरहितं लोलत्वमनुपलभ्यमानं अन्यथा कार्ये गुरुत्वस्यासंभवात् कार्यं कथं भवेत् बहुत्वं तु महत्ववाचकमेव न गुरुत्ववाचकं केचित्तुशिथिलावयवयोगेन लघुत्वंश्लिष्टावयवयोगेन गुरुत्वमाहुःतदप्यसंगतं तस्यातिरिक्तस्यानिरूपयितुमशक्यत्वात् सूक्ष्मेवसंयुक्तमुच्यतेलोकेऽन्यथा

स्पर्शातिरेकेण चंडालादिसंयोगे प्रायश्चित्तमन्यत्स्यात् तस्मात्प्रशिथिलावयवसंयोग निरूपणेऽपि लघुत्वं स्पर्श एव ज्ञेयस्तु विभाग भाव एव अनेनापि संयोगोनातिरिच्यते संयुक्तावप्यंगुलयः चलत्वो भवंति सम्श्लेषे नूनं तथा यथा मिलितांगुलैः तस्मात्स्पर्शातिरिक्तः संयोगः नचगुरुत्वादयः भाउष्णांद्रवत्वुष्णस्पर्शयोगात् त्वचोदहासंभवात् शीतता शीतस्पर्शः अथवा लघुकाठिन्ये लघुकाठिन्ययोर्भावः लाघवं काठिन्यं [illegible] मृद्वाद्यंतेतत्प्रत्ययः सर्वत्रैव सम्बध्यते द्वंद्वांते श्रूयमाणत्वात् ततोमृदुत्वं गुरुत्वमुष्णत्वं शीतलत्वमिति यः शब्दो यत्धर्मपुरःसरे धर्मिणि प्रवर्तते तस्य भावः स एवधर्मः अतः शब्दप्रवृत्तिनिमित्तमेव वा भवति इतिकेचित् सर्वत्रानुस्यूतः सत्तापर-पर्यायः तदेवसर्वैः शब्दैरुच्यत इति सर्वशब्दवाच्यो भाव इति शास्त्रार्थः अभावशब्देऽपि निषेधपूर्वको भावः प्रतीयते अत्र त्वगिंद्रिये भेदद्वयमस्ति कंडूस्पर्शश्च तयोर्विशेषः बहिः स्पर्श एव कंडूः अतस्तु स्पर्शोपि सच लोमशब्दवाच्यः कंडूग्राहकः तत्र महीरुहा देवाः अधिष्ठानं तयोरेकं द्वितीयमाह [illegible] लोमव्यतिरिक्तस्थानमप्यस्ति अंतरिति सूचितं तत्रवायुर्देवता अंतर्बहिरिति पूर्वदेवताया अ[illegible] इति त्वगिंद्रियेण स्पर्शग्रहणं अत्र देवतायाः प्राधान्यं अन्यथा यो वायुग्रहणेन गृहीतो न स्यात् [illegible]युर्देवतेत्युक्तम् ॥ २३ ॥

श्रीमद्वल्लभाचार्य्यकृत सुबोधिनी ।

एवं त्वचं निरूप्य ज्ञानेन्द्रियाणि समाप्य कर्मेन्द्रियाणि निरूपयति हस्तौ रुरुहतु रिति नानाकर्माणि कर्तव्यानीतीच्छया अत्र प्ररोहात्मकार्येतायिति शाखारूपत्वं सूचितं एतयां रुभयोर्गोलकद्वयं तयोस्तु बलयानिन्द्रः तयोर्हस्तयोर्बलमिन्द्रियं इन्द्रो देवताआदानं कर्म उभयाश्रयं पूर्ववन्नदेवतायां प्राधान्यं अभिकामिकांगतिंजिगीषतः पादौ रुरुहाते पद्भ्यामितीन्द्रियं यज्ञो देवतास्वयमिति विष्णुः अभिकामिका अभीष्टा नाना देशगमनेच्छाविषया तादृशस्य पादौ हस्तौ इव शाखारूपेण रुरुहाते अपदानामपि गतिरस्ति चतुष्पदामपि तथापद्विपदां यथा सर्वत्र गमनं तथान्येषामिति पादद्वयकामना ननु विराट् पुरुषअस्थिरत्वात् किं पद्भ्यां कार्यं अस्थिरत्वे वा लोकेपुख्याकोवः स्यात् रूपांतरकल्पनायां च फलसाधकत्वं वक्तव्यं यतः कारणान्नृभिः कर्मभिस्तद्द्रव्यंक्रियते तदापुरोडाशादिक देवतोद्देशेनाग्नौ प्रक्षिप्तः स भगवत्त्वं निरूपयति स्वयं हव्यमिति तथा सति तस्मादस्यरूपांतरकल्पनायां च प्रक्रमविरोध इत्याशंक्याह स्वयं हव्यं कर्मभिः क्रियते नृभि रिति हव्यस्य पुरोडाशादेर्भगवत्त्वं निरूप्यते स्वयं हव्यमिति तथासति तस्यावश्यफलसाधकत्वं वक्तव्यं यतः कारणान्नृभिः कर्मभिस्तद्द्रव्यं क्रियते तदेव पुरोडाशादिकं देवतोद्देशेनाग्नौ प्रक्षिप्तं सत् यागरूपता मापद्य जीवं गृहीत्वा लोकांतरे गच्छति तत्रावश्यं गत्यर्थे पादावपेक्षते अन्यथा जीवगतां कर्मरूपतया वा गमनसाधकत्वं यत्र क्वचिद्गमनं स्यात् नच तद्रूपांतरं अग्नस्यैव तत्राविष्टत्वात् नवापत्वधिष्ठातृदेवता तस्या अभावात् भावेवातस्याप्येतदेकार्निष्ठत्वात् यज्ञस्यैव हि स्वर्गबोधकत्वात् मृतीविचक्रो विष्णुगिरि वाक्याच्च किंच भूमावेव यागः हविश्च क्रियते पादौ चेन्न भवेतां तद्रूपा भूमिरेव न भवेत् स्वर्गादिगतिश्च अतःस्वयमेव यज्ञः स्वयमेव हव्यं चेति कर्मीणगतिसिद्ध्यर्थं पशुपुत्रस्वर्गादिभावार्थं पादावपेक्षेते किंचयज्ञो हिपादयोरधिष्ठातृदेवतातदभावेऽपि न भवेत् स्वर्गादिगति श्च अतः स्वयमेव यज्ञः सचलोके प्रसिद्धः तथालौकिकत्वेऽपि तदर्थं पुरोडाशादेः प्रत्यक्षसिद्धस्य अपलोपाशक्तेः अतो लोके भूमिद्रव्यात्मकयागकरणात् तदन्यथानुपपत्त्या भगवतः पादौ वर्णितौ इति सिद्धम् ॥ २४ ॥

आदौ वाक्लक्षणमेक कर्मेन्द्रियनिरूपितमपितं हस्तपादावेदानीं निरूपितौ अवशिष्टं निरूपयति निरभिद्यतेति प्राक्शिश्नं शिश्नो गोलकं तस्य रूपांतराभावात् तदभावमाशंक्यवेदति निश्चयमाह कारणे चे न स्यात् तदीजे कार्ये पुरुषादिषु तत्कथं भवेत् अतस्तत्संबंधोन कर्तव्य इत्यर्थः प्रजारूपो य आनंदः संभोगजसुखं प्रजानकं वा प्रजाआनंदित्येति अमृतं च वा प्रजामनुप्रजायतवृत्पन्नममृत इति श्रुतेः अमृतं मोक्षो वा ऋणत्रयापाकरणसाध्यः नापुत्रस्य लोकोऽस्तीति च अष्टाशीति सहस्राणि त्यादिवाक्यानि ऊर्ध्वरेतसांपुंसां प्रशंसा पराणि त्रैविधवृद्धानां तुर्वेद एव प्रमाणं अतोमोक्षएवामृतं त्रितयमीप्सोःइंद्रियं साध्यं निर्गतमित्यर्थः उपस्थ इंद्रियं कामानां सुखेदाप्रियं स्त्रीसंभोगानांसर्वभिरुत्सुखं तदुभयाश्रयं देवतेन्द्रियाश्रयं अथवा कामना यस्या पूर्वोक्तमासीदित्यर्थः प्रजापतिर्देवता तत्रप्रेमात्मक इत्येके कामएवदेवतेति मुख्यसिद्धांत ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

यदा आत्मनि स्वस्मिन् निरालोकं निर्मक्षिकमितिवदव्ययीभावः आलोकाभाव आसीदित्यर्थः आत्मानं स्वमन्यवद्द्रष्टुमिच्छतः अक्षिणी अधिष्ठानं, ज्योतिरादित्योदेवता, चक्षुरिन्द्रियम् ततो गुणस्य रूपस्य ग्रहणम् अनेन रूपं विषयो दर्शितः ॥ २१ ॥

ऋषिभिर्वेदैर्बोध्यमानस्य आत्मनः तत् प्रबोधनं ग्रहीतुमिच्छतः । ततो गुणग्रहः शब्दग्रहणम् ॥ २२ ॥

मृदुत्वं काठिन्यं लघुत्वं गुरुत्वम् औष्ण्यम् ईषदुष्णत्वं शीततां गृहीतुमिच्छतः । यद्यप्युष्णत्वमपीन्द्रियविषय एव तथापि तस्य जिघृक्षाभावादोष्ण्यमित्युक्तम् । गुर्वुष्णेति पाठ यथादेश आर्षः । वस्तुत एतान् धर्मान् जिघृक्षतस्त्वचो निर्भिन्नाः त्वगिन्द्रियाधिष्ठानं चर्म जातम् । वस्तुनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानात् तयोरपि त्वगिन्द्रियविषयत्वमिति पौराणिकाः त्वगधिष्ठानं तत्र त्वचि अन्तर्बहिर्युत आवृत्य स्थितो वातो देवता । कीदृशः त्वचा त्वगिन्द्रियेण लब्धो गुणः स्पर्शो येन सः । तथा तस्यां त्वचि अधिष्ठाने रोम इन्द्रियं महीरुहा देवताः कण्डूस्तयो र्विषयाश्च ज्ञेयाः इति त्वचि इन्द्रियद्वयं तिष्ठति । अयमर्थः त्वगिन्द्रियमेव बहिःकण्डूतिसहितस्पर्शं गृह्णत् रोमशब्देनोच्यते तत्र महीरुहाणां देवतात्वं अन्तर्बहिश्च स्पर्शं गृह्णत् तदेव त्वक्शब्देनोच्यते । तत्र वातो देवता । तथाच वक्ष्यति तृतीये त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः । अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यते । निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ॥ इति । तत्र चर्माणीति चर्मोपलक्षिता त्वगित्यर्थः । प्राणेनांशेन प्राणवायव्याप्तेन त्वगिन्द्रियेणेत्यर्थः । वज्रसूचश्रुतौ त्वक एवांशो निर्दिष्टः त्वङ् निरभिद्यत त्वचो लोमानि लोमभ्य ओषधयो वनस्पतय इति ॥ २३ ॥

तयोर्हस्तयोर्बलमिन्द्रियं तद्युक्त इन्द्रो देवता । उभयाश्रयम् इन्द्रियदेवताधीनम् आदानं विषयः ॥ २४ ॥

गतिं गमनं जिगीषत इति धात्वर्थस्याविवक्षितत्वादिच्छत इत्यर्थः । अभिकामिकाम् अभीष्टाम् । यज्ञो विष्णुशब्दवाच्यो देवता । पद्भ्यां पदोः तदधिष्ठातृरूपेण स्थित इत्यर्थः । कर्मभिरिति गत्याख्या कर्मशक्तिरिन्द्रियमुक्तम् । कर्मभिरिन्द्रियेण हव्यं क्रियते हवनीयं द्रव्यं देशान्तरस्थं गतिप्राप्यं क्रियते इति विषय उक्तः । नृभिरिति व्यष्टिजीवेषु इयमेव रीतिः । सर्वत्र तथा सर्व एव निर्णयाः शास्त्रविहिता एव ग्राह्या इति बोधितम् ॥ २५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

यदा आत्मनि देहे निरालोकमालोकाभाव आसीत् अर्थाभावेऽव्ययीभावः तदात्मानं देहं दिदृक्षतः पुरुषस्य अक्षिणी अधिष्ठानभूते निर्भिन्ने तत्र ज्योतिरादित्यो देवताच चक्षुरिन्द्रियमभूत् गुणग्रहः रूपग्रहणहेतुः अनेन रूपं विषयो दर्शितः ॥ २१ ॥

ऋषिभिर्वेदैर्बोध्यमानस्य तत् आत्मनः प्रबोधनं ग्रहीतुमिच्छतः कर्णौ अधिष्ठानभूते निरभिद्येताम् दिशः देवता गुणग्रहः शब्दग्रहणहेतुः श्रोत्रमिन्द्रियं निरभिद्यत ॥ २२ ॥

निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिनः ।
उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयम् ॥ २६ ॥
उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम्।
ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥ २७ ॥
आसिसृप्सोः पुरः पुर्या नाभिद्वारमपानतः ।
तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम् ॥ २८ ॥
आदित्सोरन्नपानानामासन् कुक्ष्यन्त्रनाडयः ।
नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये ॥ २९ ॥
निदिध्यासोरात्ममायां हृदयं निरभिद्यत ।
ततो मनस्ततश्चन्द्रः सङ्कल्पः कामएवच ॥ ३० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

[illegible] मृदुत्वं काठिन्यं च लघुत्वं गुरुत्वं औष्ण्यमपिदुष्णत्वं च शीतत्वंचेत्येतान् धर्मान् जिघृक्षतः गृहीतु मिच्छतः [illegible] निर्भिन्ना [illegible] त्वचि त्वगिन्द्रिये निर्भिन्ने तदधिष्ठानभूतानि रोमाणि कार्यकारणयोरभेदविवक्षया चर्माणि तत्र बहिः कंडूति [illegible] गृह्यमाणे सहायभूताः देवताः महीरुहाश्चोत्पन्नाः अंतर्बहिश्च स्पर्शग्रहणे वा तद्देवतामाह तत्रेति तत्र तेषु [illegible] बहिश्च वातः आवृत्यास्थितः कर्तरि निष्ठा कथंभूतः त्वचा लब्धो गुणः स्पर्शो येन स तथोक्तः त्वचमस्य विनि [illegible] पर्वाः अंशेन लोमभिः कंडूयैरसौ प्रतिपद्यते निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते [illegible] वक्ष्यमाणाश्च वक्ष्यन्ते त्वक पर्वांशो निर्दिष्टः त्वङ्निरभिद्यत त्वचोलोमानि लोमभ्य ओषधिवनस्पतयः [illegible] ॥ २३ ॥

[illegible] नाना कर्मचिकीर्षयाहस्ते स्थानभूतौ रुरुहतुर्भिन्नौ तयोर्हस्तयोः बलवानादानहेतुः पाणिसंज्ञकमिन्द्रियमित्यर्थः इंद्रः [illegible] कर्म ॥ २४ ॥

[illegible] गुरूपां गतिं जिगीषतः पुरुषस्य पादौ रुरुहाते निर्भिन्नौ यज्ञो वैविष्णुरिति श्रुतेः यज्ञो विष्णुः स्वयमधिष्ठाता पद्भ्यां पादेन्द्रियेण [illegible] पद्भ्यामिति द्विवचनं पादेंद्रियस्य पादद्वयगतत्वात् व्याप्टजीवेष्वपीयमेव गतिरिति दर्शयति नृभिर्व्यष्टिजीवैः [illegible] हव्यार्थं यज्ञार्थं द्रव्यं क्रियते ॥ २५ ॥

[illegible] प्रजायै सदपत्याय आनंदो रतिः तेनामृतत्वमयत्वहेतुफलोकादितदर्थिनः शिश्न अधिष्ठानं निरभिद्यत उपस्थ इन्द्रियम [illegible] चार्सादित्यनुक्तमप्यूह्यम कामानां स्त्रीसंभोगानां संबंधि यत् प्रियं सुखम तत् उभयाश्रयम उपस्थप्रजापत्यो [illegible] ॥ २६ ॥

भाषाटीका

[illegible] निरालोक था और अपने में अपने को और अन्यको देखने की इच्छा हुई तबउसके आंखें भई उनमे ज्योति, सूर्य देवता चक्षु इन्द्रिय [illegible] रूप गुण का ग्रहणहुआ ॥ २१ ॥

[illegible] से बोध्यमान उस बोध के ग्रहण की इच्छा हुई तब कान हुए उनमें दिशा देवता श्रोत्र इन्द्रिय और शब्द गुण [illegible] ॥ २२ ॥

ज [illegible] कठोरता लघुता गुरुता और उष्ण शीत के जानने की इच्छा हुई तब त्वचा हुई उसमें लोमइन्द्रिय और महीरु [illegible] के गुण स्पर्श को लेकर पवन उसमें (त्वचा में) अन्तर बहि र्व्याप्तहुआ ॥ २३ ॥

[illegible] की इच्छासे हस्त उत्पन्न हुए। उन में बल वान् इन्द्र अर्थात् बल इन्द्रिय और इन्द्रदेवताहुआ । आदान ग्रहण [illegible] श्रय है ॥ २४ ॥

[illegible] पर जाने की इच्छासे पाद उत्पन्नहुए जिन में स्वयं विष्णु देवता हुए। जिन पदों से मनुष्य कर्म के द्वारा हव्य करते हैं ॥ २५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

प्रजा अपत्यम् आनन्दो रतिः अमृतं स्वर्गादि तदर्थिनः शिश्नोऽधिष्ठानं उपस्थ इन्द्रियम् प्रजापतिश्चासीदिति ज्ञेयम् तदुभयाश्रयम् इन्द्रियदेवताश्रयं कामानां स्त्रीसम्भोगानां सम्बन्धि प्रियं सुखम् ॥ २६ ॥

धातुमलं भुक्तान्नादीनामसारांशं त्यक्तुमिच्छोः गुदपायुर्मित्रोत्सर्गो अधिष्ठानेन्द्रियदेवता विषयाः उभयाश्रयः पायुमित्राश्रय २७ ॥

पुर्य्याः देहात् पुरः देहांतराणि आसिसृप्सोः सर्वतोगन्तुमिच्छोः नाभिद्वारं निरभिद्यतत्यनुषंगः अपानतः अपगच्छतः पृथक्करणं मरणम् नाभ्यादीन्यधिष्ठानादीनि नाभ्यां हि प्राणापानयोर्बन्धविश्लेषे मृत्युरिति प्रसिद्धम् ॥ २८ ॥

अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षिश्च अन्त्राणि च नाड्यश्चासन् अत्र कुक्षिरधिष्ठानम् । अन्त्राणि अन्नसंग्रह करणेन्द्रिय स्थानीयम् नाड्यस्तु पान संग्रहे । तयोर्नाड्यन्त्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तुष्टिरुदरभरणम् । पुष्टिस्तु रसपरिणतः स्थौल्यम् । तदाश्रये तदुभयनिमित्ते तत्रान्नसंग्रहेच्छोः कुक्ष्यन्त्र समुद्रतुष्टय इति चतुष्टयम् पयसंग्रहेच्छोः कुक्षिनाडीनदीपुष्टय इति विवेकः २९

निदिध्यासोः नितरां चिन्तयितु मिच्छोः कामोऽभिलाषः । हृदयं मनश्चन्द्रः संकल्पा अधिष्ठानादयः ॥ ३० ॥

श्रीराधारमणदासगोस्वामि विरचित दीपिन्याख्य तट्टिप्पणी ॥

तदाश्रये तदुभयनिमित्तेइति । अन्त्रसमुद्राश्रया तुष्टिः । नाडीनद्याश्रया पुष्टिरित्यर्थः ॥ २९ ॥ ३० ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रिका ।

उपस्थव्यष्टिनिर्गममाहानिरभिद्यतेति प्रजानंदामृतार्थिनःप्रजाः अपत्यमात्रं रतिः ॥ आनंदहेतुत्वात्तस्याः ताभ्यां यदमृतम् तत्तुल्यं सुखं तदर्थं यतः यद्वा प्रजां रत्यानंदरूपममृतं चार्थयतः ब्रह्मणः समष्ट्युपस्थतः शिश्नः व्यष्ट्युपस्थस्थानं निरभिद्यताभूदित्यर्थः । शिश्नग्रहणं योनिलिंगस्याप्युपलक्षणं शिश्नः अधिष्ठानं उपस्थ इंद्रियं प्रजापतिरधिष्ठातारतिः कर्म आनंदो विषयश्चासीदित्यनुक्तमप्यूह्यम् कामानां स्त्रीसंभोगादीनां प्रियं सुखं उभयाश्रयं इंद्रियदेवताश्रयमित्यर्थः ॥ यद्वा उभयाश्रयं स्त्रीपुंलिंगाश्रयं इत्यर्थः इंद्रियतत्स्थानाश्रयं इति वा ॥ २६ ॥

पायुव्यष्ट्युत्पत्तिमाह उत्सिसृक्षोरिति धातुमलं भुक्तानामन्नादीनामसारांशं त्यक्तुमिच्छोर्गुदं पायिन्द्रियस्थानं निरभिद्यत ततो गुदतः पायुरिंद्रियं मित्रोऽधिष्ठाताचाऽभूत् उत्सर्गस्त्यागः उभयाश्रयः इंद्रियतत्स्थानाश्रयो धातुमलत्याग इत्यर्थः ॥ २७ ॥

एवं ज्ञानकर्मेन्द्रियव्यष्टिसृष्टिमभिधायान्यासामपि नाड्यादिव्यष्टिसृष्टिमाह आसिसृप्सोरिति पर्याः शरीरात् पुरः शरीरान्तराणि आसिसृप्सोः आसर्पतो गन्तुमिच्छोर्ब्रह्मणो नाभिद्वारस्थानं निरभिद्यत तन्नाभिद्वारे अपानो वायुरिन्द्रियस्थानं ततोऽपानतो मृत्युरधिष्ठाता पृथक्त्वं शरीरत्याग उभयाश्रयं प्राणापानाश्रयं प्राणापानवायुवियोगमरणस्य पुरान्तरप्राप्तिहेतुः ॥ २८ ॥

व्यष्टिकुक्ष्यन्त्रनाडीनां सृष्टिमाह आदित्सोरिति अन्नपानानामादित्सोः संग्रहेच्छोः कुक्ष्यन्त्रनाड्यः आसन् भूवन् कुक्षिरधिष्ठानमन्त्राण्यन्नसंग्रहे करणेन्द्रियस्थानीयानि नाड्यस्तु पानसंग्रहे तयोर्नाड्यन्त्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तुष्टिरलं बुद्धिः देहपोषस्तदाश्रये नदीसमुद्राश्रयं सस्यादिहेतुत्वात् ॥ २९ ॥

मनोव्यष्टिसृष्टिमाह निदिध्यासोरिति आत्ममायां स्वरूपतिरोधायकप्रकृतिंनिदिध्यासोर्निरूपयितुमिच्छतः हृदयं कमलाकारमधिष्ठानं ततो मन इंद्रियं चंद्र अभिमानी संकल्पः मनोव्यापारश्चाभूदित्यर्थः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

प्रजासंततिस्तन्निमित्तायारतिस्तस्यांजातआनन्दःसएवामृतंतत्प्रेप्सितुंशीलमस्येतिप्रजानन्दामृतार्थिनस्तस्यविधेःशिश्नमिन्द्रियस्थानं तस्मिन् शिश्नेकामानांप्रियंपरतःप्राप्यसुखसाधनं तादृशमुपस्थेन्द्रियं तदुभयाश्रयंशिश्नोपस्थाश्रयंरतिःसुखंचासीत् कामानांभोगसाधनमितिवा ॥ २६ ॥

धातुमलंपुरीषसंज्ञमुत्सिसृक्षोस्त्यक्तुकामस्यगुदमपानद्वारंततस्तस्मिन् गुदेवायुनामेन्द्रियं ततइंद्रियानन्तरंमित्रनामादेवः उभयाश्रयःपायुमित्राश्रयोवाइत्यनेन मलादिकंकदाचित्तुब्रह्मालोकाभिपत्तये आ नोनिर्ममेकामात्सर्वेषामभवत्ततइत्यादिवाक्यंस्मारयति ॥ २७ ॥

परकायप्रवेशप्रकारमाह आसिसृक्षोरितिपुरःस्वाधिष्ठिताद्देहात् पुर्यामन्यस्मिन्देहपुरितस्मिन्नाडीविशेषमासिसृप्सोःप्रवेष्टुमस्य विरिंचस्येत्युक्तलक्षणयोगिनां नाभिद्वारमपावृतंविवृतं ततोनाभिद्वाराद्यानवायुस्तस्मान्मृत्युस्तदुभयाश्रयंपृथक्त्वंदेहांतरप्राप्तिलक्षणं अत्रमृत्युर्मरणान्तप्रापकश्चापानः इदंब्रह्मणोनकिंतुदेहिनामित्यनुसंधेयम् ॥ २८ ॥

अन्नपानानामन्नपानानिआदित्सोरादातुकामस्यविरिंचस्यकुक्षिरन्नाधारभूतं असृजोरुधिरस्यस्थानंकुक्षिरन्त्रस्थानंनाड्यःसप्ततिभेदभिन्ना तयोः कुक्षिनाड्योःसमुद्रानद्यश्चासन् तृप्तिःपुष्टिश्चतदाश्रयेतृप्तिःकुक्ष्याश्रयापुष्टिर्नाड्याश्रया ॥ २९ ॥

आत्ममायांविष्णुसृष्ट्यादिमहिमानंनिदिध्यासोर्ध्यातुकामस्यहृदयंमनोनिवासस्थानमभूत् ततोहृदयान्मनोमनसश्चन्द्रोदेवता संकल्पः कामश्चमनोवृत्तिविशेषावभूतां इतिशब्दोनिरुक्तग्रहणार्थः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

प्रजानन्दामृतानि विषयः । तत्रानन्दशब्देन तद्धेतवः स्त्रिय एव उच्यन्ते तत्र च स्त्रीणां स्त्रियत्वं साक्षात्तेन भोग्यत्वात् अन्ययोस्तु तदुत्पाद्यतया भोगहेतुत्वात् । स्वर्गादिकं च गार्हस्थ्यधर्म्ममयप्रजादिपरिकरेणैवोत्पाद्यं भवति ॥ २६ ॥

उत्सर्गः उत्सृज्यमानं मलम् ॥ २७ ॥

आसिसृप्सोरपानत इति विशेषणद्वयं क्रियेच्छाक्रियेर्याभेदेन । पृथक्त्वमिति इन्द्रियमुभयाश्रयं मरणमिति शेषः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

...रिति। अन्नपानानि विषयाः पानानि पानीयानि। तुष्टिपुष्टी द्वयोरपि प्रत्येकं क्रिये ज्ञेये ॥ २९ ॥

...। मनोजन्मनः पूर्वमपीच्छा मनसः कारणावस्थामवलम्ब्य जायते। आत्ममायाम् आत्मविषयिकां सकार्थ्यमाय ... कामसङ्कल्पौ त्विच्छाक्रिये ॥ ३० ॥

श्रीमद्वल्लभाचार्य ... सुबोधिनी।

... लिन्द्रियेण सुखजननं प्रत्यक्षसिद्धं अवसितमाह ... नां सर्वधातवो हि त्वगादयः मज्जांताः ते कालादिन ... अन्नादीनां तु तत्पोषकत्वं अतस्तत्पोषणे अन्नादि ... तत्र प्रवेशे यो सारो भागः अवशिष्यते तन्मल ... कार्यकरणात् अतो धातोरेव मलं गुदमिति पायुः ... स रोगादिना निर्गतः प्रत्यक्षो भवति तदनन्तरं पायुस्त ... नहि सर्वमित्रव्यतिरेकेण तादृशो कश्चिद्देवो ... उभयाश्रयः पूर्ववत् एवं नवद्वाराणि निरूपिता ... त्रयाणां नव द्वाराणि उभयं त्वेकत्र त्रयाणां ... ॥ २७ ॥

... द्वाराणां च नवमसंख्या अतो द्वारांतर ... आसिस्टक्षोरिति मलं द्विविधं प्रत्यहं जाय ... जायमानं च तत्र प्रत्यहं जायमानस्य मलस्य ... पायुः संपूर्णे जन्मनि जायमानस्य देहरूपस्य मलस्यपरि ... शरीराणि पुर्याः शरीरात् ऊत्सिसृक्षोः ... अथामरणं धातवोऽनुवर्त्तन्ते तस्य पोषकमन्न ... बहुस्यामिति भगवदिच्छामारभ्य भगवत्प्रवेश ... शरीरस्य जीवस्य एकमेवशरीरमनुवर्त्तते तस्य पोष ... अन्नवत् अन्नमयानितानि भोजनवत् ... मरणोत्पत्स्यंते प्राणोहमुत्पादकः अपानो मा ... नादुत्पन्नं तत्रापानः इंद्रियं मृत्युर्देवता ... विक्षेपः मरणात्मकः तदुभयाश्रयमिति पूर्ववत् नाभिद्वारे ... तस्य नाभिद्वारेण वायुयत्नेन मल ... एवं शरीरं बहुकालं तिष्ठति तस्य पोषकादिकं जनयातित ... तथान्नपानादिकमपि कियत्काले ... अन्नपानानामादित्सुः स्थापनेच्छुः भगवानजातः तत ... आसन् तत्र कुक्षिर्गोलकं उदराभ्यंतराकाशः ... स्थापनार्थमिन्द्रियाणि नाडीपानार्थं नद्यः समुद्राश्चत ... अंत्राणामुदरस्य च समुद्राः अत ... नाडीनद्योर्लोहितेनेति वाक्यात् क्षुत्तृड्भ्यामुदरं सिंधुरिति ... देहवृद्धिरस्यतुष्टिपुष्टीतदाश्रये इंद्रिय ... जगत्कर्त्तृत्वं कीदृशेणाकथमहमेतत्प्रतिकृतिरूपो भविष्या ... दिध्यासनं तदाउभयं गोलकं निरभिद्यत ... देवता संकल्पः ज्ञानरूपः मनस्तूभयात्मकमिति उभयं ... कार्यं काम इति तु ज्ञानस्य क्रिया ... एवेत्यवधारणे चकारेण इंद्रियारोधः एवंसर्वस्यत्रैविध्यं ... आधिभौतिकत्वं इंद्रियाणामाध्यात्मिकत्वं ... त्वमिति ॥ २८ ॥ २९ ॥ ३० ॥

... त्रिरूपत्वं स्वर्गादीनां केवलान्नमयत्वेन ... त्रैविध्यमाह। त्वक्चर्ममांसेति त्वगुपरितनश्चर्मस्थूलं ... मांसाभावत्वात् प्रथमतोमांसनिरूपणं ... मज्जास्थ्यंतर्गताश्चिय प्रसिद्धान्तरस्नायु अप्रसिद्धत ... तदवस्थावरणरूपं एते सप्त ... भूम्यप्तेजो मया इति भूमिरवस्थानीया पांचभौतिकत्वेपि ... त्रिरूपा एवं वा प्राणस्यत्रैविध्यमाह ... इति सर्वदेहव्यापकत्वेन आप्यायकत्वेन वायुरूपत्वेन प्राणोऽपि ... ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

... आनन्दो रतिः अमृतं स्वर्गादि तद्भिनां ... उपस्थ इन्द्रियं, प्रजापतिर्देवता ज्ञेया। कामानां स्त्रीसम्भो ... सुखं विषयः। तदुभयाश्रयम् ... ॥

... सारांशं त्यक्तुमिच्छोर्गुदमभिष्ठानं, पायु ... मित्रोदेवता, उत्सर्गो विषयः ॥ २७ ॥

... देहान्तराणि आसिसृप्सोः सर्वतो ... पानतः अपानमार्गेण, उपलक्षणमिदं प्राणमार्गेण च, प्राणा ... रिति प्रसिद्धः नाभिद्वारमधिष्ठानम् ... मृत्युर्देवता, पृथक्त्वं मरणं विषयः ॥ २८ ॥

... आदित्सोःसंग्रहेच्छोः कुक्षिश्च अन्त्राणि ... तत्र कुक्षिरधिष्ठानम् अन्त्राण्यन्नसंग्रहे, नाड्यस्तु पानसंग्रहे, ... वर्गयोः। क्रमेण नद्यः समुद्राश्च ... भरणं, पुष्टिश्च रसपरिणामतः स्थौल्यं, क्रमेणैतौ विषयौ। ... तुष्टिपुष्टी ॥ २९ ॥

... मायां ... वस्तु निदिध्यासो ... मधिष्ठानं मन इन्द्रियं चन्द्रोदेवता सङ्कल्पाभिलाषाद्या विषयाः ... विष्णुमहङ्कार ... रुद्रब्रह्माणौ देवतास्तृतीयस्कन्धात ज्ञेयाः। तदेवमष्टादशेन्द्रि- ... ज्ञेयानि ॥ ३० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

... मलम् ... सारांश ... गुदमभिष्ठानं निरभिद्यत ततो गुदतः पायु इंद्रियम् मित्रोऽधिष्ठाता उत्सर्गः ... ॥

पुर्याः शरीरात् शरीरांतराणि ... मिच्छोः नाभिद्वारं निरभिद्यत तत्र अपानात् अपसर्पतः प्राणस्य ... मृत्युः ... शरीराच्छरीरिणःपृथक्त्वम् तदेवमृत्युरित्युच्यतेनाभ्यादीन्य धिष्ठानानि ॥

त्वक्चर्ममांसरुधिरमेदोमज्जास्थि धातवः ।
भूम्यप्तेजोमया सप्त प्राणो व्योमाम्बुवायुभिः ॥ ३१ ॥
गुणात्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः ।
मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥ ३२ ॥
एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया ।
मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम् ॥ ३३ ॥
अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम् ।
अनादिमध्यनिधनं नित्यं वाङ्मनसः परम् ॥ ३४ ॥
अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते ।
उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्नाद्यादित्सोः संग्रहेच्छोः कुक्ष्याद्यासन् अभूवन् तत्र कुक्षिरधिष्ठानम् अन्त्राणि अन्नसंग्रहे करणमिन्द्रियस्थानीयम् अन्नस्तुपानसंग्रहे तयोर्नाड्यन्त्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तृप्तिरुदरभरणमन्त्रमलं पुष्टिः पुष्टिस्तु रसपरिणामतः स्थौल्यम् तदुभये नदीसमुद्राश्रये तत्रायं विवेकः अन्नादित्सोः कुक्ष्यन्त्रसमुद्रपुष्टयः स्थानकरणाधिष्ठातृविषयाः पानादित्सोः कुक्षिनाडीनदीतुष्टयः स्थानकरणाधिष्ठातृविषयाः ॥ २९ ॥

आत्ममायां प्रकृतिशरीरादिरूपेण भोग्यां निदिध्यासोः चिन्तयितुमिच्छोः हृदयमधिष्ठानं निरभिद्यत ततो मनः इन्द्रियम् चन्द्रो देवता संकल्पो विषयः कामोऽभिलाषः ॥ ३० ॥

भाषाटीका

प्रजा आनंद और अमृतकी जब अर्थनाहुई तब शिश्ण उत्पन्न हुआ उसमें उपस्थ इन्द्रिय और उभयाश्रय कामोकी प्रीति हुई । प्रजापति देवताहुआ ॥ २६ ॥

धातुओं के मल छोडने की इच्छा से गुदा उत्पन्न हुई उसमे पायु इन्द्रिय और मित्र देवता उत्पन्न हुआ । और उत्सर्ग ही का आश्रय विषय है ॥ २७ ॥

एक शरीर से दूसरे शरीर में जाने की इच्छा से नाभिद्वार उत्पन्न हुआ । उसमें अपान और मृत्युदेवता का आश्रम हुआ कि शरीर से जीव का पृथक्होना अर्थात् मरना जिनदोनों के आश्रय है ॥ २८

अन्न और पान के आदान करने की इच्छा से कुक्षि अन्त्र और नाडियें उत्पन्न हुई नदी और समुद्र उनके देवता हुए । जीव की तुष्टि और शरीर की पुष्टि जिनदोनों के आश्रय है ॥ २९ ॥

आत्मा ईश्वर की माया जानने की इच्छा से हृदय उत्पन्न हुआ जिसमें मन इन्द्रिय और चन्द्रमा देवताहुआ कि जिनसे संकल्प और काम होता है ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवमधिदैवादिभेदं विभज्योक्तानद्दंशभूतानां धात्वादीनाह त्वगिति द्वाभ्याम् त्वकस्थूलं चर्म तदुपरिस्थितं सूक्ष्मम् । त्वगादयोऽस्थ्यन्ताः द्वन्द्वैकवद्भावेननिर्दिष्टाः सप्तैवधातवः ते भूम्यप्तेजोमयाः तेषां च पाञ्चभौतिकत्वेऽपि वाय्वाकाशयोराद्यरूपेण संवर्द्धकत्वाभावादेवमुक्तम् ॥ ३१ ॥

गुणात्मकानि गुणेषुशब्दादिषु आत्मा येषां विषयाभिमुखस्वभावानीत्यर्थः गुणाःशब्दादयो भूतादिरहंकारः ततः प्रभवो भवन्तीति तथा अहंकारकल्पित शोभनत्वभावाः नतुवस्तुतः तथेति तात्पर्यम् अत एव यतो मन एव सर्वविकाराणाम् आत्मास्वम् बुद्धिस्तु तथाभूतार्थविज्ञानरूपिणी न तु परमार्थग्राहिणीति वैराग्यार्थमुक्तम् अत एव बुद्धिमनसोरीस्वरूप प्रोक्तम् ॥ ३२ ॥

उपसंहरति एतदिति । प्रकृत्या सहाष्टभिः ॥ ३३ ॥

स्थूलमुक्त्वा सूक्ष्मं समष्टिलिङ्गशरीरमाह अतः परम् अस्य कारणभूतम् सूक्ष्मम् अतीन्द्रियम् । यतोऽव्यक्तम् । ततः यतो निर्विशेषणम् । तत कुतः अनादिमध्यनिधनम् उत्पत्तिस्थितिलयशून्यम् । नित्यमेकरूपम् अपक्षयादिशून्यमित्यर्थः । अत वाक् च मन श्चेति द्वन्द्वैक्यं तस्मात् परम् ॥ ३४ ॥

उपासनार्थं भगवत्यारोपितं रूपद्वयमपवदति अमुनीइति । न गृह्णन्ति न स्तुवोऽङ्गीकुर्वन्ति यतो मायासृष्टे ॥ ३५

श्रीगधारमणदासगोस्वामि विरिचित दीपिन्याख्यतट्टिप्पणी ।

[illegible] । उपरिस्थितं सूक्ष्मं चर्म्म त्वक् । तदन्तः स्थूलचर्म्म इत्यर्थः ॥ एवमुक्तामिति । भूम्यादित्रितयकार्यत्वमुक्त- [illegible] ॥ ३१ ॥

[illegible]मिति । कामक्रोधलोभमोहशोकादीनामित्यर्थः ॥ ३२ ॥ ३३ ॥

[illegible]नीति । नैं चक्षुरादिभिर्व्यज्यत इति तथा ॥ ३४ ॥ ३५ ॥

श्रीमद्वीरराघवाचार्य कृत [illegible]चन्द्रिका

एवं [illegible]रात्समष्टिव्यष्टयवयवविशेषविभागमभिधाय [illegible] तत्तद्भूतांशभूयस्त्वनिबंधनं तदात्मकत्वमाह त्वगिति [illegible]चर्मत्वक् । तदुपरिस्थितं सूक्ष्मं चर्मत्वक् त्वगादयो [illegible] निर्दिष्टा एते सप्तधातवः भूम्यप् तेजो मयाः प्राणास्तु [illegible] इति शेषः ॥ ३१ ॥

[illegible] इन्द्रियाणि गुणात्मकानि शब्दादिगुणाग्रहण[illegible] यदात्मकास्ते के इत्यत आह भूतादिरिति भूतादिः अहंकारः [illegible] गुणाः इंद्रियाण्यपि तत्प्रभवत्वात्तदात्मका [illegible] सर्वविकाराणां कामसंकल्पादीनामात्मा आश्रयः ॥ [illegible] विज्ञानं महत्तत्वं तद्रूपिणी बुद्धिः [illegible] वचनात् ॥ ३२ ॥

[illegible]दिति एतच्चेतनाचेतनात्मकं देवादिव्यष्टि[illegible] अण्डकटाहपरः पृथिव्यप्तेजोवाय्वाकाशाहंकारमहदव्यक्त [illegible]हिरावृतं भगवतः स्थूलं रूपं तत्पूर्व्यं [illegible]हितम् ॥ ३३ ॥

ततो [illegible]तिरमस्तीत्याह अत इति अयं [illegible]कत्वादन्यथा सम्मसंख्यानुपपत्तेः ॥ अतः स्थूलरूपात्परं [illegible] वालाग्रशतभागस्येति श्रुत्युक्त [illegible]भगवतोऽस्तीति शेषः सूक्ष्मतरत्वं कुतः अव्यक्तं [illegible] इत्यव्यक्तं चक्षुराद्यग्राह्यं तत्कुतः [illegible]रूपादिगुणाभावाच्छब्दादिविशेषवदेव चक्षुरादिग्राह्य मिति [illegible] कुतः वाङ्मनसः परं [illegible] तदपि कुतः अनादिमध्यनिधनमादिरुत्पत्तिः निधनं [illegible]निधमयोरंतरालावस्था एतदवस्था[illegible] कुतः नित्यं कालापरिच्छिन्नं कालपरिच्छिन्नमवावस्था [illegible] ॥ ३४ ॥

एवं [illegible] मुक्तात्मस्वरूपं विशोध्य [illegible]प्रत्याविद्यावेष्टितत्वान्मुक्तस्वरूपस्य निष्पन्नयोगिध्येयतया [illegible] शुभाश्रयत्वं प्रतिषेधति अमुनी [illegible]वर्णीति भगवत अमूर्तस्थूलसूक्ष्मे रूपे नगृह्णंति नोपा- सते उपासका [illegible] इति शेषः ॥ उपासका उपास्यशुभाश्रयत्वेन [illegible] विपश्चितः सर्वज्ञस्य ब्रह्मणो मायासृष्टे संकल्पसृष्टे [illegible]मोक्षयोरित्यर्थः ॥ मूर्तस्य संसृष्ट[illegible]शुद्धत्वान्मुक्तस्वरूपस्य स्वतः शुद्धिविरहाच्च नोपासना विषय[illegible] इत्यादि वेदांतसिद्धं परमात्म[illegible]र्थः ॥ तथा च शौनकेन चतुर्मुखसनकादीनां जगदंतर्व [illegible]मुक्तत्वावज्ञाना[illegible] स्वस्वरूपापन्नानां च स्वतः शुद्धिविरहाच्छुभाश्रयताप्र- तिषेध [illegible] जगदंतर्व्यवस्थिताः [illegible]संसारवशवर्तिनः यतस्ततो नेनध्यानेध्यानिनामुपकारकाः [illegible] सर्वेतेहिसारगोचराः पश्चाद्युद्भूतबोधा[illegible] नैसर्गिका न वै बाधस्तेषामप्यन्यतो यतः तस्मात्तदमलं [illegible]बोधर्यादित्यादिना प्राधान्येनोपास्यत्व[illegible] ॥ [illegible]नोपासनंतिषिद्धमेव ॥ ३५ ॥

श्री[illegible]रत्नावली ।

[illegible]धातवः शरीरस्थितिहेतुभूताजाताइति[illegible]मिति मुख्यप्राणाभिमन्यमानजडरूपप्राणोपादानकारणमाह प्राणादि[illegible] मन्यमानजडप्राणोव्योमांबु[illegible] ॥ ३१ ॥

[illegible]माह गुणाति गुणाःसत्त्वादय[illegible]रति विज्ञानरूपिणीनिश्चयज्ञानरूपिणी ॥ ३२ ॥

[illegible]तत्त्वप्रकृत्याख्यावरणावृतमेतत्स्थूलंविराडाख्यंब्रह्मशरीरं- [illegible]रूपंतेतवमयाव्याहृतमित्यन्वयः [illegible]रूपंब्रह्मदेहउदाहृतं तत्तत्रत्वार्थेति ॥ ३३ ॥

[illegible]रामत्राह अतइति [illegible]स्थूलंकिंचित्याह सूक्ष्मतममिति सूक्ष्माणामप्यतिशये- [illegible] महदपरिमाणा[illegible]उपासनाव्यर्थेत्यतउक्तं अव्यक्तमिति महत्परिमाणावस्त्वेऽपि स्वप्रह[illegible] सूक्ष्मंशंखचक्रगदाधरमितिच अन्यस्यक- [illegible]तिविशेषणमतिशयलक्षणायस्मात्तथोक्तं अव्यक्ताव्यस्य- [illegible] अनादीति आदिमध्यं [illegible] चाक्षुषत्वभावाभावेऽपिवागादिविषयत्वंस्यादृतउक्तं [illegible]

[illegible]सूक्ष्मेअमुनीभगवद्रूपेमयातेतवानुवर्णिते मायासृष्टेभगवदिच्छया प्र[illegible]विपश्चितः [illegible] नजानंतीत्यन्वयः ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

त्वगिति स्थूलं चर्म खलु चर्मोच्यते तदुपरिस्थितं सूक्ष्मं त्वगुच्यते प्राणस्तु व्योमादिमय इत्यर्थः ॥ ३१ ॥

प्रसङ्गादिन्द्रियाणां लक्षणमाह गुणात्मकानीति गुणेषु विषयेषु आत्मा स्वभाव औत्पत्तिकः सम्बन्धो येषाम् । विकारा इत्येषु विज्ञानं विवेकशक्तिः, बुद्धीन्द्रियमनः प्राणानित्याद्युक्तः पारमार्थिक्यपि सा भवतीति ज्ञेयम् ॥ ३२ ॥ ३३ ॥

अतः परमिति । निर्विशेषणं वर्णाकारादिशून्यम् यद्वा द्व्यादिषु स्थूलेन सहोत्पत्त्यादियुक्तं न भवतीत्याह अनादीति । अत नित्यमपि निर्विशेषणत्वादेव वाङ्मनसः परम् । अतएव सूक्ष्मतमम् । अतएव चाव्यक्तम् ॥ ३४ ॥

अमुनी अमू ॥ ३५ ॥

श्रीमद्वल्लभाचार्य्य कृत सुबोधिनी ।

इन्द्रियाणामपि त्रैविध्यमाह गुणात्मकानीन्द्रियाणीति त्रिगुणात्मकानीन्द्रियाणि सर्वाण्येव प्रवृत्ति धर्मे भक्तिज्ञाने च स्थापि त्रैविध्यमाह भूतादिप्रभवा गुणा इति भूतादिरहंकारः भूतानां प्रभावो यत्र भूतादेः प्रभावो येषां अहंकारस्य व भूताद्यभेदात् भूतादिशब्देनाहंकार एव वा तस्माद्गुणत्रयोत्पत्ति स्तेनैव तेन गुणजनकत्वेन त्रिगुणत्वं स्पष्टं मनसोऽपि सर्वविकारात्मेति सर्वेहि विकारास्त्रिविधाः तन्मयत्वान्मनसोऽपि त्रैविध्यम् । बुद्धिरपि त्रिविधेत्याह बुद्धिर्विज्ञानरू त्रिविधमिति तद्रूपिणी बुद्धिरपि त्रिधेत्याह बुद्धिर्विज्ञानरूपिणीति त्रिविधविज्ञानं त्रिविधमिति तद्रूपिणी बुद्धिरपि ति

एवं सर्वस्य त्रैविध्यमुपपाद्य उपसंहरति एतद्भगवतो रूपमिति एतत्पूर्वनिर्दिष्टं सर्वमेव त्रिविधं भगवतोरूपं स्वदर्थं मयाऽप्याहृतमित्यर्थः एवं तस्य त्रिगुणात्वेन चास्त्रिरूपत्वं तु स्वत्वाधिकारेण निरूपितं भगवतो हि रूपं सर्वं सर्वरूपत्वेन भासते तं तथा यथोपास इतिश्रुतेः ॥ ३३ ॥

एवं राज्ञो त्रैविध्यं निरूप्य सूक्ष्मरूपं ततोऽप्युत्तमाधिकारार्थं अव्यक्तरूपं निरूपयति अतः परमिति ॥ ॥ म तात्स्थूलरूपात्परंऽयतिरिक्तमुत्कृष्टमेतन्नियामकं सूक्ष्मतमं आकाशापेक्षयापिअतिसूक्ष्मं तस्य रूपविशेषनिरूपणं न कं केनापि धर्मेण नप्रकटं ततः तस्य विशेषाः प्रकटाभविष्यंतीत्याशंक्याह निर्विशेषणमिति सर्वविशेषणरहितं सर्व मित्यर्थः तस्योत्पत्त्यादिकं नास्तीत्याह अनादिमध्यनिधनमिति आदिमध्यावसानरहितं नित्यं सदैकरूपं वाङ्मन हारातीतम् ॥ ३४ ॥

एवं स्थूलविसदृशं सर्वप्रकारेण सूक्ष्ममिति निरूपितं उभयमप्युपसंहरति अमुनी भगवद्रूपे इति मयाते त्वदर्थमेव अस्माकं तु नानेनोपयोगः तदाह उभे अपि नगृह्णन्तीति तत्रहेतुः मायामृष्टे इति मायायाः कार्यकारणरूपायाः संबंधे यतस्ते विपश्चितः साक्षात्स्वरूपज्ञातारः ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

अधिदैवादिभेदं विभज्योक्त्वा तद्दशाभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्याम् । त्वक्चर्मणोः स्थौल्यसूक्ष्मत्वा त्वगादयोऽस्थ्यन्ता ये सप्तधातवस्ते भूम्यप्तेजोमयाः तेषाञ्च पाञ्चभौतिकत्वेऽपि वाय्वाकाशयोरुहारादिरूपेण संयोगक्रम । प्राणा इति व्योमाम्बुभ्यां पुष्टा वायव एव प्राणा इत्यर्थः । तृतीयाबहुवचनमार्षम् ॥ ३१ ॥

गुणात्मकानि गुणेषु शब्दादिष्वात्मा प्रवृत्तिस्वभावो येषां तानि । गुणाः शब्दादयो भूतादिरहंकारः ततः प्रकर्षेण, मन सर्वविकाराणामात्मा सर्वान् विकारान् मन एव संजीवयतीत्यर्थः । विज्ञानं विवेकशक्तिस्तद्रूपिणी ॥ ३२ ॥

स्थूलं समष्टिसंज्ञम् । महादिभिरिति महासमष्टिसंज्ञं महास्थूलम् ॥ ३३ ॥

स्थूलमुक्त्वा सूक्ष्ममाह, अत इति । सूक्ष्मतममित्यनेनैव सूक्ष्मसूक्ष्मसूक्ष्मञ्चेति त्रितयं लभ्यते । अत्र सूक्ष्मं लिङ्गशरीरम् अति रूपं निर्विशेषणमित्यादिभिश्चतुर्भिर्विशेषणैरुक्तम् ॥ ३४ ॥

उपासनार्थं भगवत्यारोपितं रूपद्वयमपवदति । अमुनी इति द्विवचनं स्थूलयोः समष्टिमहासमष्ट्योरैक्यात् । न गृह्णन्ति स्वीकुर्वन्ति किन्तु उपासनार्थं प्रथमदशायामेव । यतो मायासृष्टे । तृतीयमतिसूक्ष्मं यत् तत्र कारणं मायैव । किञ्च विपश्चितः भक्ताः प्रथमदशायामपि नैव गृह्णन्ति किन्तु रामकृष्णनारायणनृसिंहादिरूपं शुद्धसत्त्वमेव साधनसाध्यदशयोर्गृह्णन्ति ॥ ३५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

एवं समष्टिशरीरावयवहृदयस्थानेन्द्रियादिभेदं विज्ञाय्य तदंशभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्याम् तदुपरिसूक्ष्मम् त्वगादयोऽस्थ्यंताः द्वंद्वैकवद्भावेन निर्दिष्टाः ते सप्तधातवः कथंभूताः भूम्यप्तेजोमयाः तेषां पाञ्चभौतिकत्वेऽपि भूम्यस्थोपलब्धेर्वाय्वाकाशयोराहारादिरूपेण सवर्द्धकत्वाभावाच्च प्राणाः व्योमाम्बुवायुभिः संपन्नो वायोरवस्था विशेषः देहेऽवस्थाप्नेस्यातुमक्षमइति भावः ॥ ३१ ॥

गुणात्मकानि गुणेषु आत्मा येषां तानि गुणात्मकानि गुणाभिमुखानि उत्पद्यन्तेतु राजसाहंकारादेवं भूतानि शब्दादिगुणाभिमुखानि ज्ञानेन्द्रियाणि संति तथापि कर्मेन्द्रियाणामपि गमनस्फूर्तिरूपाद्विषयेषु गमनादिक्रियायां स्वम् गुणाः शब्दादय भूतादिस्तामसाहंकारस्ततः प्रकर्षेण भवतीति तथा मनः वैकारिकं भिन्नं सर्वविकारात्मा बंधमोक्षहेतुनामात्मा कारणम् मन एव मनुष्याणां कारणं बंधमोक्षयोः बंधाय विषयासक्तं मुक्त्यै पुंसि वा रतामिति रूपिणी विज्ञायतेऽनेनेति विज्ञानं ज्ञानवान्मांप्रपद्यते इति श्रीमुखोक्तेः तद्रूपिणी तदेकभूतेत्यर्थः ॥ ३२ ॥

सवाच्यवाचकतया भगवान् ब्रह्मरूपधृक् ।
नामरूपक्रिया धत्ते सकर्म्माकर्म्मकः परः ॥ ३६ ॥
प्रजापतीन् मनून् देवानृषीन् पितृगणान् पृथक् ।
सिद्धचारणगन्ध[illegible] गुह्यकान् ॥ ३७ ॥
किन्नराप्सरसो नागान् [illegible] किंपुरुषान्नरान् ।
मातृरक्षःपिशाचांश्च प्रेत[illegible]कान् ॥ ३८ ॥
कूष्माण्डोन्माद वेताला[illegible]न् ग्रहानपि ।
खगान् मृगान् पशून् वृक्षा[illegible] नृप सरीसृपान् ॥ ३९ ॥
द्विविधाश्चतुर्विधा ये[illegible]नभौकसः ।
कुशलाकुशला मिश्रा[illegible]तयस्त्विमाः ॥ ४० ॥

श्रीमच्छु[illegible] प्रदीपः ।

[illegible] उपसहरति एतादिति एतत्पूर्वोक्तम् [illegible] पृथिव्यप्तेजोवायुव्योमाहंकारमहत्प्रकृतिमयैरष्टभिरावरणैर्वे[illegible] तुभ्यं मया व्याहृतम् अयमर्थः पुरु[illegible]कस्य भगवत एवंद शरीरं तत्र प्राणानक्षिपता चतुर्दंत-[illegible]धर्माः तदाभिमानि च तुर्मुख विष[illegible] अनुप्राणंति यं प्राणाः प्राणंतं सर्वजंतुषु । इत्यादिषु [illegible]हेतुरित्यादिव्याष्टिदेहावयवस्मरणं [illegible]यमेव गतिरिति सूचनार्थमित्यलं विस्तरेण ॥ ३३ ॥

[illegible]मुक्त्वा सूक्ष्मंसमष्टिशरीरमाह अतः [illegible]मतमं रूपमस्ति यतानिर्विशेषणं महदादिपृथिव्यंताविशेषण [illegible]निधनम् अवस्थात्रयशून्यम् वर्ता[illegible]ः परम् तयोः कारणम् अव्यक्तं भगवच्छक्तिरूपप्रधा-

[illegible]ययेषु देवमनुष्यादिषु मोक्ष[illegible]वृत्तयेरूपद्वयविलक्षणस्वरूपनिर्विष्टोपपादनाय च अमुनी [illegible] ते तुभ्यं मयानुवर्णिते प्र[illegible]वपाश्चतः मायामयरूपद्वयविलक्षणे भगवति निष्ठावंतः न [illegible]कुर्वंति मायासृष्टे प्रकृतिमूले [illegible]ऽस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः तावत्स्थवीयः पुरुषस्य [illegible]समर्दर्शितस्थूलरूपध्यानस्य त[illegible] ॥ ३५ ॥

है [illegible] धिर, मेद, मज्जा, और अस्थि[illegible] पृथिवी जल और तेजोमय हैं । प्राण आकाश वायु और जलसे

वि[illegible] गुणात्मक हैं अर्थात् शब्द[illegible] करती हैं और गुण सब अहंकार से उत्पन्न हुए हैं । मनसर्व [illegible]ान रूपिणी है ॥ ३२ ॥

प्रह[illegible] रूप स्थूल रूप है जो [illegible] पृथिवी जल तेज वायु आकाश अहंकार महत्तत्व और [illegible] से आवृत है ॥ ३[illegible]

[illegible] निधन नित्य [illegible] अव्यक्त एक और सूक्ष्मतम रूप है ॥ ३४ ॥

रूप है ॥ ३५ [illegible] तुमसे [illegible] किये । [illegible] जन नहीं ग्रहण करते हैं क्योंकि यह दोनोंही माया

[illegible]दीपिका ।

प्राक्[illegible] कं भगवत [illegible]दिरूपाणि तत्कर्माणि चाह स इत्यादिना इत्थम्भावेनेत्यत: माय[illegible] ब्रह्मरूपधृक् [illegible]या नामानि वाच्यतया रूपाणि क्रियाश्च धत्ते सृजतीत्यर्थः ।

[illegible]

तत्त[illegible]तमान्वयः । तत्र प्रजापत्यादीनि नामानि तत्तद्वाच्यानि रूपाणि

श्रीधरस्वामिकृत भावार्थदीपिका ।

गिरीनित्यस्यानन्तरं नृपेति सम्बोधनम् । द्विविधाः स्थावरजङ्गमरूपेण । चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जरूपेण । जलस्थलनभांसि ओकांसि येषाम् । तानपि धत्ते इति पूर्वेणैव सम्बन्धः ॥ ३९ ॥

यच्च राज्ञा पृष्टं यावत्यः कर्मगतयो यादृशीर्द्विजसत्तमेति तस्यापि प्रसङ्गात् अनेनैवोत्तरमाह । कुशला उत्तमाः अकुशला नीचाः मिश्रा इति पदान्तरं मिश्रा मध्यमाः । कर्मणां पुण्यापुण्यमिश्राणां गतयः फलानि ॥ ४० ॥

श्रीराधारमणदासगोस्वामिविरचित दीपिन्यारूय टिप्पणी ।

यद्रूपेति पूर्वाध्यायस्यैकत्रिंशश्लोकः ॥ ३६ ॥

प्रजापतीन् मरीचिप्रमुखानित्यर्थः ॥ ३७—४० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रिका ।

स्थूलत्वं भगवद्रूपत्वमेवोपपादयितुं भगवत एव ब्रह्मादिरूपेण [illegible]कृत्यादिकमाह सइति भगवान् वाच्यवाचकतयाऽवस्थितःजगत्कारि त्वाद्वाच्यतयाऽवस्थितः आकाशशरीरकत्वाच्च वाचकाकाशगुण[illegible]रूपेणावस्थितः ब्रह्मरूपभृन्नामरूपक्रियाधत्ते ब्रह्मरूपभृगित्यनेन [illegible]गुक्तव्यष्टिश्चतुर्मुखशरीरकाविस्यवगम्यते नाम देवादिनामरूपं देवा[illegible]रूपं क्रियास्तेषां कृत्यानि धत्तस्वपर्यन्तनामकिवाः ताकरोदित्यर्थः यथा [illegible]मरूपं च भूतानां कृत्यानां च प्रपंचनं वेदशब्देभ्य एवादौ देवादीनां चकार स इति कथं भूतोविधत्तेऽकर्मकः अकर्तृइयः सकर्मोऽस्य [illegible]रमात्रव्यापारकः ॥ ३६ ॥

नामरूपक्रियाधानमेव प्रपंचयति प्रजापतीनित्यादिना द्वितीयां[illegible] धत्ते इत्यनेनान्वयः तत्रप्रजापत्यादिनामानि द्रष्टव्यानि रूपाणि [illegible]कर्माणि च ज्ञेयानि पृथक्सद्वांतरभेदेन गिरीनित्यस्यानंतरं नृप[illegible] संबोधनम् ॥ ३७ ॥ ३८ ॥ ३९ ॥

चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जरूपेण सा चतुर्विधा पुमा[illegible] देवो न नरो न पशुर्न च पादपःचतुर्विधो विभेदोऽ इत्युक्तदेवादिरूपे [illegible]वाचतुर्विधाः जलस्थलनभांस्योकांसि येषां तान् धत्ते इति पूर्वेणा[illegible]न्वयः नामादिरूपेणैव किन धत्त इत्यत आह कुशलेत्यादिना कर्मणां [illegible]श्रपुण्यापुण्यरूपाणांकर्मणां परा प्राप्यागतयः फलानि कुशला [illegible]त्तमाः अकुशलाःनीचाः मिश्राः मध्यमाः कर्मणांविचित्रत्वात्तत्फ[illegible]नामपिवैचित्र्यमिति भावः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

मायामयेजगतिविपश्चितउभकार्यकारणरूपेणगृह्णंतिनांगीकुर्वंति[illegible]यैतद्पव्याख्यानंप्रत्याह सवाच्येति नामधवाचकत्वनामरूपक्रिया [illegible]पि वाच्यत्वेनहरिर्देवानियामयतिचैकराट् कर्तृत्वात्सुनकर्मासौ [illegible]फलत्वादकर्मकइत्यनेनव्याख्यातोऽयंश्लोकः निष्फलत्कर्मफलानपे- [illegible]त्वात् नन्वेकस्यनानानामरूपक्रियाकारकत्वंमायामंतरेणकथंसंज[illegible]टीत्यतउक्तं ब्रह्मेति अंतर्बहिर्व्याप्त यद्ब्रह्मशब्दवाच्यंतस्यधारक [illegible]वाद्भुतइत्यर्थः ब्रह्मवेदतपस्सर्वामत्यनोवेदादिशब्दराशिधृत[illegible] अनेनप्रपंचस्यवेदादिसिद्धत्वेनसत्यत्वात्तस्यमायात्वेवेदादेरप्र [illegible]माणत्वेन तदुक्तदैक्यस्यापितथात्वेनविश्वस्यैवसत्यत्वंन्यायप्राप्त[illegible]क्तंभवति ॥ ३६ ॥

उक्तमेवांवशदयति प्रजापतीरित्यादिना सर्वनामरूपक्रियाधत्त[illegible]पत्यादिनामरूपक्रियाश्चधत्तइतिपूर्वेणान्वयः ॥ ३७ ॥

मातरोऽदित्यादयोब्रह्मराक्षसावापिशाचाघंटाकर्णादयः भूताभूमि[illegible]द्रानुगाः विनायकाविघ्नादयः ॥ ३८ ॥

कूष्मांडारुक्मांड्वादय. । उन्मादाःकालकर्णादयः । यातुधाना[illegible]विशेषाभृगुकुम्भादयः । ग्रहाअष्टादशनवग्रहावा हेतुप [illegible]प्रियव्रता [illegible]योवासरीसृपाःसहस्रपादादयः ॥ ३९ ॥

संख्यातुमशक्यत्वात्सामान्यतोनिर्दिशति द्विविधाइति व्योमश[illegible]माकाशनभःशब्दगुणोऽम्बरं पुष्करंगगनंविष्णोःपदंद्योरन्तरिक्षमित्य [illegible]भिधानान्नभःशब्दउभयलिंगः । तेषामुत्तमादित्वेकारणमाह कुशले[illegible] उत्कृष्टाजातयःकुशलादिकर्मणांगतयःफलानि ॥ ४० ॥

श्रीमज्जीवगोस्वामि[illegible] क्रमसन्दर्भः ।

अत एतत्सम्बन्धि सर्वमपि भगवद्रूपत्वेनैव कल्पितमित्याह [illegible]च्येति। यद्रूपगुणाकर्मक इत्यत्र तु अप्राकृतानि चतुःश्लोक्यां श्री- [illegible]भगवता प्रतिज्ञातानि स्वयमेव दर्शितानीति व्याख्यातमेव ॥ ३६ ॥

[illegible]प्रसवंपुत्रपौत्रादिभिर्विस्तारम् १२

श्रीराधारमणदासगोस्वामिविरचित

दीपन्याख्यादीपिकाटिप्पणी ॥

[illegible]! अवतारत्वेंद्रत्व लक्षण द्वैविध्येन ॥ नप्तारोऽत्रप्रपौत्रा [illegible]: चशेरि त्याकांक्षा वशादध्याहृतम् ॥ ९ ॥

[illegible] मत्तः ॥ १० ॥

[illegible]तः यया प्रसूत्या कृतः ॥ ११ ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रिका ॥

प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ तयोः पुत्र पौत्रनप्तृणां [illegible]रनुवृत्तं व्याप्तं पालितं च तन्मन्वंतरमित्यर्थः ॥ ९ ॥

एवमाकूतिसंततिः कथिता अथ देवहूतिदुहितृसंततिं कथयि-ष्यन् [illegible]हूति चरित्रं तु विस्तरशो तृतीये त्वया श्रुतमित्याह देवहूति-मिति तत्संबंधिचरितं गदतो मम मत्तः भवता श्रुतप्रायं बाहुल्येन श्रुतत्वादितिभावः ॥ १० ॥

प्रसूतिसंततिस्तु तत्प्रसंगेन महता प्रबंधेन कथनीयेति सापि पश्चाद्वक्ष्यते इति अभिप्रायेणात्रसंगृह्णाति दक्षायेति यत्कृतः दक्षप्र[illegible]तिभ्यां कृतः सर्गः त्रिलोक्यां महान् विततः आकल्पाविसंतत्यपेक्ष

* क्षत्तरितिवीरराघवः

पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा।
कश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥ १३ ॥
पूर्णिमाऽसूत विरजं विश्वगं१ च परन्तप !।
देवकुल्यां हरेः पादशौचाद्याऽभूत्सरिद्दिवः ॥ १४ ॥
अत्रेःपत्न्यनसूया त्रीन् जज्ञे सुयशसः सुतान्।
दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् ॥ १५ ॥

॥ विदुरउवाच ॥

अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यन्तहेतवः।
किञ्चिच्चिकीर्षवोजाता एतदाख्याहि मेगुरो ! ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

या प्रसूतिसंततेर्वैपुल्यमनेन कथितम ॥ ११ ॥

अथ देवहूतिदुहितॄनमतिरुच्यते इत्याह याइति हे क्षत्तः कर्दमस्यसुताः कलादयो मरीच्यादीनां पत्नयः पत्न्यः याः उक्ताः तृतीये तासां कर्दमसुतानां प्रसूतेः प्रभवं पुत्रपौत्रादिसंतानविस्तरं मे मया प्रोच्यमानं कथ्यमानं निबोध ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली।

स्वायंभुवमन्वंतरंकैरनुवृत्तमिति तत्राह प्रियव्रतेति नप्तारः पौत्रपुत्राः ॥ ९ ॥

देवहूतिकथामनुवदति देवहूतिमिति तत्संबंधिचरितं श्रुतप्रायं प्राचुर्येण श्रुतं किंचिदवशिष्टमस्तीत्यर्थः ॥ १० ॥

प्रसूतिं नाममात्रादात्तेति तत्राह दक्षायेति ॥ ११ ॥

एवमनुवक्तव्यांशमाह याः कर्दमेति पत्नयः पत्न्यः प्रसूतिप्रसरं प्रसूतिप्रपंचम ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी।

नवब्रह्मर्षि च सर्वब्रह्मर्षीति पाठद्वयम। प्रसूतिप्रसवं पुत्रपौत्रादिविस्तारम ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ तद्वंशे यत्र एव विष्णवतारः इन्द्रश्चेति षड्विधत्वं बोध्यम तयोः पुत्रपौत्रनप्तॄणां वंशैः तदंतरं तन्मन्वंतरमनुवृत्तं व्याप्तं पालितमित्यर्थः ॥ ९ ॥

हेतात विदुर ! तत्संबंधि देवहूत्याः संबंधि विवाहापत्योदयादि मम गदतः कथयतः श्रुतप्रायं बाहुल्येन श्रुतम तत्कन्यावंशो न श्रुत इति प्रायग्रहणाभिप्रायः ॥ १० ॥

यत् याभ्यां दंपतीभ्यां महान् विपुलः सर्गः कृतः त्रिलोक्यां विततोऽभूत् ॥ ११ ॥

याः कलाद्याः ब्रह्मर्षीणां मरीच्यादीनां पत्नयः पत्न्यः तृतीये प्रोक्तास्तासां प्रसूतिप्रसवं पुत्रपौत्रादिविस्तारं मे मया प्रोच्यमानं निबोध शृणु ॥ ॥ १२ ॥

भाषाटीका।

मनुजी के पुत्र प्रियव्रत और उत्तान पाद महापराक्रम वाले भये यह मन्वंतर उन्हीं के पुत्र पौत्रादि कों से व्याप्त रहा ॥ ९ ॥

मनु महाराज ने देवहूती कर्दम को दीनी उसका वंश वर्णन प्रायः करके प्रथम ही आपने हमसे सुना है ॥ १० ॥

मनुजी प्रसूति को ब्रह्मा के पुत्र दक्षप्रजापति को देते भये जिनकी सृष्टि तीनों लोकों में विस्तृत भई ॥ ११ ॥

जो कर्दम की पुत्री ब्रह्मर्षियों की पत्नी भई उनके वंश के विस्तार को हम से श्रवण करो ॥ १२ ॥

श्रीधरस्वामि कृत भावार्थदीपिका।

ययोर्वंशेनापूरितम ॥ १३ ॥

कश्यपस्यवंशोऽग्रेवक्ष्यति द्वितीयस्यवंशमाह पूर्णिमेति देवकुल्यांनामकन्यांच हरेःपादप्रक्षालनाज्जन्मांतरेयादिवःसरिद्गङ्गाऽभूत् ॥ १४ ॥

आत्मेशब्रह्मसंभवान्विष्णुरुद्रब्रह्मणामंशैः संभूतान् ॥ १५ ॥

किंचिदितिकिंस्वित् किंकर्तुमिच्छवइत्यर्थः ॥ १६ ॥

श्रीराधारमणदास गोस्वामिविरचित।
दीपन्याख्यादीपिका टिप्पणी।

कश्यपं पूर्णिमानं चेति पुत्रद्वयसंज्ञा न च पूर्णिमानमिति समासाशंकयम अणिमानमिति वत् इमनिच्प्रत्ययेन सिद्धत्वात् ॥ १३ ॥

अतएव द्वितीयस्य पुत्रस्य पूर्णिम्नः ॥ १४ ॥

ऐरावतं दृश्यात्मशब्दात् १ । १ इति न्यायेनात्मशब्दस्य विष्णुपरत्वात् ... साक्षात्त्रयाणामवतार इति व्यञ्जितम ॥ १५ ॥

एतत्त्रयाणामवतार प्रयोजनम ॥ १६ ॥

विश्वग इतिविजयध्वजपाठः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

तदेवाह पत्नीति कर्दम सुता मरीचेः पत्नी कला कलानाम्नी कश्यपं पूर्णिमानं च द्वौ पुत्रौ सुषुवे तौ विशिनष्टि ययोः कश्यप पूर्णिमतो [illegible] तजैर्जगदापूरितं व्याप्तम ॥ १३ ॥

हे परन्तप ! पूर्णिमा [illegible] विरजं विश्वगं चापि पुत्रं देवकुल्यां कन्यां च [illegible] देवकुल्यां विशिनष्टि हरेर्भगवतः पादशौच [illegible] प्रक्षालनाद्यदिवः सरिद्गङ्गाऽभूत्सैवेयं देवकुल्या दिवः [illegible] निर्गता इत्यर्थः ॥ १४ ॥

अत्रेः [illegible] मर्यादितीया दुहिता सा सुयशसः निर्मल कीर्तिमतः [illegible] सुतान् अजं नानाह दत्तमित्यादिना तान् विशिनष्टि आत्मेशब्रह्मसंभवान् । आत्मा परमात्मा विष्णुः ईशो रुद्रः ब्रह्मा चतुर्मुखः [illegible] तदंशभूतानित्यर्थः यद्वा आत्मेशब्रह्मणां संभवा [illegible] तान् अत्रात्म शब्देन तदात्मत्वामामभेत्यादिनाऽभि [illegible] परमात्मत्वमहत्तरयोर्जीवत्वेन सूच्यते ननु परमात्मनः सर्वान्तर्यामिणो वैकुण्ठाज्ञानशक्त्याद्यनन्तगुणाविर्भाव कलांशावतारत्वं युक्तं कथं पुनःपरमात्मांशभूतयोरनयोस्तद्रूपयोर्जीवविशेषयोःब्रह्मरुद्रयोः पुनर्जीवान्तरानुप्रवेशरूपांशावतारत्वम् [illegible] "अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते यथा क्षेत्रज्ञ शक्तिः [illegible] वेष्टिता नृप सर्वगा संसारतापानखिलानवाप्नोत्यतिसंततान् [illegible] तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता सर्वभूतेषु भूपालतारतम्येन वर्तते.,इत्युक्तरीत्या जीवस्य यद्धर्मभूतं ज्ञानं तदविद्या कर्मणा तिरोहितं संसारतरूयतापानिमृतं तत्र परमात्मप्रसादादविद्याख्यावरणस्य निवृत्तावसंकोचेन प्रसृतं भवति अत एवमुक्तौ निरंजनः परमं साम्यमुपैति" इति ज्ञानस्य तत्रैवोक्ते अत एव मुक्तौ निरतिशयमावस्यौषधेः मोक्तो "मत्वानिन्त्याय कल्पते., इतिधर्मभूतज्ञानस्यासंकोचितप्रसरणाद्यर्थं तथा जीवस्य भूतं सृष्टिं च"प्रदीपवदावेशस्तथा हि दर्शयति,,॥अ०४. ४.१५॥ इतिसूत्रोक्तरीत्यात्मन एकदेहस्थितस्याप्यसंकुचितधर्मभूतज्ञानस्य स्वरूपपरिमाणस्य दीपस्य स्वधर्मभूतप्रभाद्रव्यद्वारेणानेकदेहादिप्रकाशकत्ववदनेकशरीरपरिग्रह इति सूत्रार्थः । एवं च ब्रह्मरुद्रयोःपरम पुरुषप्रसादाज्ञानावरणनिवृत्तिरस्मदादापेक्षयाज्ञानप्रसरबाहुल्यसिद्धधर्मभूतज्ञानस्य दुर्वाससोमयोरनुप्रवेशात्तदंशावतारत्वं तयोरुपपन्नम् एवमन्यत्रापि यत्र क्वचिज्जीवस्य जीवांतरांशत्वमुच्यते तत्राप्येवमेव न्यायो वेदितव्यः ॥ १५ ॥

[illegible] दत्ता [illegible] मात्माद्यंशावतारत्वमुक्तं तत्रांतरंगा [illegible] [illegible] कारणं पृच्छति विदुरः अत्रेरिति हि [illegible] सुरश्रेष्ठाः आत्माद्यःमत्रेर्गृहे किंस्वित्चिकीर्षवः [illegible] [illegible] एतज्जन्मप्रयोजनं हे गुरो ! [illegible]

[illegible] विजयध्वजतीर्थ कृत पदरत्नावली ।

[illegible] अत्रेः कर्दमात्मजेति ययोः संततया ॥ १३ ॥

[illegible] विशिनष्टि देवकुल्येति दिवः सरित्स्वर्गनदी देवकुल्या देवकु [illegible] ॥ १४

जज्ञे [illegible] आत्मा विष्णुरीशो रुद्रः ब्रह्माचतुर्मुखः ब्रह्मा [illegible] सोम [illegible] तत्पृथग्जननम् ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली

विदुरःभूतवदावाद्यावतारविशेषजिज्ञासया पृच्छतीत्याह अत्रेरिति गृहे भार्यायां स्थित्युत्पत्तिसंहृतयः पालनसंहारसृष्टीनां कारणभूताः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अत्रेरिति आत्मशब्देन विष्णोः स्वातन्त्र्यमन्ययोस्तत्पारतन्त्र्यं च दर्शितं । तदुक्तं । सृजामि तन्नियुक्तोऽहमित्यादि । अतएव च तत्र तत्रात्मशब्देन हरिरेव व्याख्यातः तदेव मंत्रस्तथा संकल्पानतिक्रान्तादेव भावीति बोधितं । तथैव शरणमित्यादिकस्तद्दृष्टो मन्त्रः ॥ १५—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

ययोर्वंशेन ॥ १३ ॥

कश्यपस्य वंशं षष्ठे वक्ष्यति । देवकुल्यां नाम कन्यां [illegible] । हरेः [illegible] सुकृताया दिवः सरिद्गङ्गा जन्मान्तरऽभूत् ॥१४॥

[illegible] आत्मा विष्णुस्तदाद्यंशभूतान् ॥ १५ ॥

[illegible] किंस्वित् ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

कलानाम्नी कर्दमात्मजा मरीचेः पत्नी कश्यपं पूर्णिमानं च सुषुवे [illegible] ययोः कश्यपपूर्णिम्नोः जगत् [illegible] व्याप्तमभूत् ॥ १३ ॥

तत्र कश्यपवंशं षष्ठे वक्ष्यति [illegible] पूर्णिमोति परन्तप ! पूर्णिमा विरजं विश्वगं च पुत्रं देवकुल्यां [illegible] सुषुवे यो हरेः पादशौचात् दिवः सरित् गंगा अभूत् ॥ १४ ॥

[illegible] सुयशसः शोभनकीर्तिमतः आत्मेशब्रह्मसंभवान् हरिहरविरञ्च्यंशान् अजं अजनयत ॥ १५ ॥

[illegible] गृहे किंचिच्चिकीर्षवः किंचित् अन्येष्वसंभावितं कार्यं [illegible] सिसृक्षवः जाता एतत् आख्याहि वद ॥ १६ ॥

भाषाटीका ।

कर्दमकी पुत्री मरीचि की भार्या कला कश्यप तथा पूर्णिमा पुत्रों को पैदा करती हुई जिन दोनों से जगत् पूर्ण होगया ॥१३॥

हे परंतप विदुर ! पूर्णिमाने विरज विश्वग तथा देवकुल्या को [illegible] किया जो देव कुल्या श्रीहरि के पाद प्रक्षालन से स्वर्ग की [illegible] गई ॥ १४ ॥

अत्रि मुनि की भार्या अनुसूया ने ब्रह्मा विष्णु महेश के अंशों [illegible] सुन्दरयश वाले सोम दत्तात्रेय दुर्वासा इन तीन पुत्रों को पैदा किया ॥ १५ ॥

विदुरजी बोले सब देवों के देव तीनों देवता सृष्टि पालन संहार के कारण जो हैं सो अत्रि मुनि के भार्या में किस कार्य करने को पैदा हुये ॥ १६ ॥

॥ मैत्रेयउवाच ॥

ब्रह्मणा नोदितः सृष्टावत्रिर्ब्रह्मविदांवरः ।
सहपत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः ॥ १७ ॥
तस्मिन्प्रसूनस्तबकपलाशाशोककानने ।
वार्भिःस्रवद्भिरुद्घुष्टे निर्विन्ध्यायाः समंततः ॥ १८ ॥
प्राणायामेन संयम्य मनोवर्षशतं मुनिः ।
अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः ॥ १९ ॥
शरणं तं प्रपद्येऽहं य एव जगदीश्वरः ।
प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन् ॥ २० ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

ऋक्षंनामकुलाद्रिम तपसिस्थितः सन् १७

तस्मिन्कुलाद्रौ प्रसूनानांस्तबकायेषुपलाशाशोकेषुतेषांकानने निर्विन्ध्यानामनदीतस्याःस्रवद्भिर्वार्भिरुद्घुष्टेनादिते १८ १९ २०

श्रीराधारमणदास गोस्वामिविरचित ।
दीपन्याख्या टिप्पणी ।

स्थित उद्यतःसन्निति उद्यमयानयोरनयम कालीनस्य विद्यमाना र्थत्वे तु मार्ग एव तपः प्रसक्तिःस्यात् आद्ययात्रार्थफलयम क्रियमाण तयोऽस्मसंगतिरिन्त्येयवधेयम ॥ १७ ॥

तस्मिन्निति त्रिकम कुलाद्रौ यत्काननमिति व्यधिकरणेस स्य अत्रेयंसंगतिः प्राणायामस्तूपविश्य पूर्वमेव कृतः पश्चादुप सना विशेषस्य सामान्यतो जगदीश धारणा रूपस्य कृत एकपा दोर्ध्वस्थितिः क्त्वाप्रत्ययस्य पूर्वकालाश्रयत्वंहि सार्वजनीनम् स्न त्वापत्यादुदाहरण समान कालाश्रयत्व बोधकन्तु मुख्य थोऽसंभव एव अंगीकृतंभाषा वृत्तौ तिष्ठतःप्राणायामाऽभिधानात् ॥ १८ ॥ १९ ॥ २० ॥

श्रीमद्वीरराघवाचार्य कृत भागवतचंद्रचंद्रिका ।

तत्र निमित्तं कथयन्नाह ब्रह्मणेति ब्रह्मणा चतुर्मुखेन सृष्टौ नि मित्तभूतायां सृष्ट्यर्थमित्यर्थः चोदित आदिष्टः ब्रह्मविदग्रेसरोऽत्रिः पत्न्या अनुरूपया सह ऋक्षाख्यंकुलाचलं तपसे तपश्चर्तुं स्थित आस्थितः ॥ १७ ॥

स च मुनिस्तस्मिन्कुलाद्रौ प्रसूनानां स्तबका येषु पलाशाशोके षु तेषां कानने निर्विन्ध्याख्याया नद्याः स्रवद्भिर्वार्भिः समतादुद्घुष्टे नादिते ॥ १८ ॥

प्राणायामेन मनो नियम्य शीतोष्णादिसहः वायुभक्षःसंवत्सर शतमेकपादेन भुवमवष्टभ्य तप आतिष्ठत् ॥ १९ ॥

तस्यात्रेरभिसंधिविशेषमाह शरणमिति य एव "यतो वा इमा नि भूतानि जायंते, इत्यादिश्रुतिप्रसिद्ध एव जगदीश्वरः जगत्सृष्टि स्थितिप्रलयप्रवर्त्तकः तं शरणमहं प्रपद्ये मह्यमात्मसमां स्वतुल्यां प्रजां प्रयच्छत्विति चिंतयन् अतिष्ठदिति पूर्वेणान्वयः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

परमभागवतस्यात्रेः प्रियव्रतकीर्त्यैव प्रथमं प्रयोजनं द्वितीयं यो- गप्रवर्तनायावतार इतिभावेन मैत्रेयः प्रश्नं वर्क्तुमाह ब्रह्मणेति ऋ- क्ष ऋक्षनामानं किमर्थं यातइति तत्राह तपसीति गत्वा तपसि स्थि- तोऽभूदित्यन्वयः॥ १७ ॥

तस्मिन् ऋक्षनाम्नि प्रसूनानां स्तबकाः येषां ते प्रसूनस्तबका स्तेषां पलाशाशोकानां काननं यस्मिन्स तथा तस्मिन्नाम्ना निर्वि न्ध्याया नद्याः स्रवद्भिः स्यंदमानैर्वार्भि र्जलैः समंततोऽप्युद्घुष्टे गर्जिते ॥ १८ ॥

वर्षशतमिति । द्वितीयपर्कास्मिन्क्षणेऽपि पादद्वयेन नातिष्ठदिति द्योतयति * ॥ १९ ॥

तपोविषयमाह शरणमिति किं मनोगतं तत्र इतितत्राह प्रजा- मिति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तस्मिन्निति त्रिकम प्राणायामेनेत्यादावियं संगतिः । पूर्वमुप- विश्य प्राणायामः पश्चादुपासनाविशेषार्थमेकपादेनोर्ध्वस्थितिः । क्त्वाप्रत्ययस्य पूर्वकालाश्रयत्वात् ऊर्ध्वस्थितावेव तत्प्रत्यया[illegible] शतृप्रत्ययस्य समानकालाश्रयत्वात् तथापि तस्या प्राक[illegible] [illegible] त्वेन स्वदेहत्यागाय माग्निधारणा प्राणायामः तदर्थं पुन[illegible] श्रेयः औचित्यात् ततस्तस्य विश्वस्य च दाहारंभे तेषां तेन सहसा प्राकट्य ततश्च ते बहिः प्रकटा इति मनस्येव स्फुरिते [illegible] दिकामिति ॥ १८ ॥ १९ ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

ऋक्षं ऋक्षनामानम् ॥ १७ ॥

प्रसूनानां स्तबका येषु तेषां पलाशाशोकानां कानने उद्घुष्टे नादिते ॥ १८ ॥ १९ ॥ २० ॥

* १ कालाध्वनोरत्यंतसंयोगे द्वितीयेति सूत्रेति

तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना ।
निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः ॥ २१ ॥
अप्सरोमुनिगन्धर्वसिद्धविद्याधरोरगैः ।
वितायमानयशसस्तदाऽऽश्रमपदं ययुः ॥ २२ ॥
तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः ।
उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् ॥ २३ ॥
प्रणम्य दण्डवद्भूमावुपतस्थेऽर्हणाञ्जलिः ।
वृषहंससुपर्णस्थान् स्वैः स्वैश्चिह्नैश्च चिह्नितान् ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

ब्रह्मणा सृष्टौ प्रजोत्पादने चोदितः प्रेरितः ऋक्षनाम कुलाद्रिं गिरिम ययौ तत्र तपसि स्थितोऽभूत् ॥ १७ ॥

तस्मिन् प्रसूनानां पुष्पाणांस्तबका गुच्छा येषु पलाशाशोकेषु तेषां कानने निर्विन्ध्याया नाभिजलैः समन्ततः उद्घुष्ट उत्कृष्टघोष वति एकपादेनातिष्ठदित्युत्तरेणान्वयः ॥ १८ ॥

प्राणो वायुरेव भोजनमाधारो यस्य ॥ १९ ॥

यो जगदीश्वरः चिदचिदात्मकस्य जगतः ईश्वरो नियंता तं शरणं प्रपद्ये स मह्यमात्मसमां प्रजां प्रयच्छत्विति चिंतयन् एकपादेनातिष्ठदिति पूर्वेणान्वयः ॥ २० ॥

भाषाटीका ॥

मैत्रेयजी बोले ब्रह्माजी ने जब सृष्टि करने के वास्ते अत्रि मुनि को आज्ञा दिया तब मुनिजी भार्या के सहित तपस्या करने के वास्ते ऋक्ष नामक कुलाचल पर्वत को चले गये ॥ १७ ॥

उस पर्वत में निर्विन्ध्या नदी के तटपर जहां कि फूलोंकेगुच्छा वाले [illegible] अशोकके वन लगे हैं तथा झिरनाओं में से जल के [illegible] शब्द होता है चारों ओर से तहांगये ॥ १८ ॥

[illegible] महामुनीजी प्राणायामोंसे सौ वर्ष पर्यंत मनको रोक [illegible] आहारादिक छोडकर पवन मात्र के भोजन करके एकपाद [illegible] खडे हे ॥ १९ ॥

[illegible] विचारते थे कि इस जगत् में जो जगदीश्वर हो [illegible] शरण प्राप्तहूं वह जगदीश्वर मेरे को अपनेही समान [illegible] देवे ॥ २० ॥

[illegible]धरस्वामिकृत भावार्थदीपिका

[illegible] प्रभुः सर्वाएकोयस्यतेनमुनेर्मूर्ध्नोनिर्गतेनाग्निना [illegible] आश्रमपदंययुरित्युत्तरेणान्वयः ॥ २१ ॥

अप्सर[illegible] [illegible]यमानंविस्तार्यमाणंयशोयेषांते ॥ २२ ॥

[illegible] प्राकट्यंतस्यसंयोगः संनिधिस्तेनोविद्योतितंनमो यस्य [illegible] तिष्ठन् ॥ २३ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अर्हणांपुष्पादिकमंजलौयस्य उपतस्थेपूजयामास वृषाद्यारूढान् [illegible] स्वैरसाधारणैश्चिह्नैस्त्रिशूलकमंडलुचक्रादिभिः ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचित
दीपन्याख्यादीपिकाटिप्पणी

तप्यमानमिति युग्मकम् अग्नेर्मूर्द्धतो निर्गतत्वं भगवतः प्राकट्यार्थं निर्वेदेन देहत्यागार्थं वा धारणा प्रायासत्वात् किन्त्वाविर्भावेन तदर्शं पुनरुपवेशो ज्ञेयः ॥ २१ ॥ २२ ॥ २३ ॥

प्रणम्येति सार्द्धकम ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रचन्द्रिका ।

प्राणायाम एव एधः दारुनिचयो यस्य तेन मुनेरत्रेर्मूर्ध्नः शीर्षकपालाद्विनिर्गतेनाग्निनातपोऽग्निनासंतप्यमानं त्रैलोक्यं समीक्ष्य त्रयः [illegible] आत्मेशब्रह्माणः ॥ २१ ॥

अप्सरो मुनिप्रभृतिभिः प्रस्तूयमानकीर्तयस्तदाश्रमस्थानं ययुः अत्र य एव जगदीश्वरस्तं शरणं प्रपद्य इतिसृष्टिस्थितिप्रलयप्रवर्त्तकत्वेनाकारेण परमात्मन उपासितत्वात्तस्य ब्रह्मरुद्रांतर्यामितया तादृश्येण सृष्टिसंहारकारणत्वात्तयोर्ब्रह्मरुद्रयोरपि तत्रागमनमुपपन्नमिति वेदितव्यम ॥ २२ ॥

तेषामात्मेशब्रह्मणामाविर्भावः प्राकट्यं तस्य संयोगः सान्निध्यं तेन विद्योतितं मनो यस्य स मुनिरत्रिरेकपादेनोत्तिष्ठन् विबुधश्रेष्ठानात्मेशब्रह्मणो ददर्श ॥ २३ ॥

ततो भूमौ दंडवत्प्रणम्य अर्ह्यते पूज्यते अनेनेत्यर्हणं पुष्पादिकं अंजलौ यस्यसः उपतस्थे समीपे स्थित्वा तुष्टाव एतदेव प्रपंचयति गरुडवृषाद्यारूढान्स्वैः स्वैश्चिह्नैः शंखचक्रत्रिशूलकमंडल्वादिभिश्चिह्नितान् ॥ २४ ॥

कृपावलोकेन हसद्वदने नोपलम्भितान् ॥
तद्रोचिषा प्रतिहते निमील्य पुनरक्षिणी २५
चेतस्तत्प्रवणंयुंजन्नस्तावीत्संहताञ्जलिः ॥
श्लक्ष्णयासूक्तयावाचासर्वलोकगरीयसः ॥ २६ ॥

अत्रिरुवाच ।

विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः ।
ते ब्रह्मविष्णुगिरिशाः प्रणतो स्म्यहं वस्तेभ्यः क एव भवतांमइहोपहूतः।२७।
एकोमयेह भगवान्विविधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयम् ।
अत्रागतास्तनुभृतां मनसोऽपि दूरा ब्रूत प्रसीदत महानिहविस्मयोमे । २८ ।

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

अत्रेस्तपोमाहात्म्यं तेन प्रसन्नानां त्रयाणां देवानां तदाश्रमगमनं वक्ति तप्यमानमिति ॥ २१ ॥

अप्सरआदिभिर्धितार्यमाणं प्रपंचीक्रियमाणं यशो येषां ते तथा ॥ २२ ॥

तत्प्रादुर्भावस्तेषां प्रकाशस्तस्य संबंधस्तेन विद्योतितमतिप्रकाशितं मनो यस्य स तथा ॥ २३ ॥

अर्हणमर्घ्यादिसाधनमंजलिश्च यस्य स तथा मूलकमंडलुचक्रादिभिश्चिह्नितानंकितान् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ॥

तप्यमानमिति युग्मकम् । प्राणायामेनेति चित्सुखः ॥ २१-२३ ।
प्रणम्येति सार्द्धकम् ॥ २४ ।

विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी

मुनेर्मूर्द्धः सकाशान्निर्गतेनाग्निना तपोमयेन तप्यमानं वीक्ष्य प्राणायाम एध: काष्ठं यस्य तेन । अत्र तिष्ठन्नेव प्राणायामांश्चकारेति ज्ञेयम् । प्राणायामेन संयम्य मनोऽतिष्ठदिति क्त्वाप्रत्ययो भयात्-कृत्य पतति संनिमील्य हसतीत्यादिवत्तुल्यकाल एव ज्ञेयः ॥ २१ ॥

तेषां प्रादुर्भावेन हेतुना यः संयोगो मिलनं तेन विद्योतितमनास्तान् प्रत्यभ्युत्थानार्थं तिष्ठन्नेव उत्कर्षेण तिष्ठन् ॥ २३ ॥

अर्हणं पुष्पादिकमञ्जलौ यस्य सः ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

मुनेर्मूर्द्धः सकाशान्निर्गतेन प्राणायाम एव एधः इंधनं यस्य तेनाग्निना त्रिभुवनं तप्यमानं समीक्ष्य तदाश्रमपदं त्रयः प्रभवो ययुरित्यन्वयः य एव जगदीश्वरस्तं शरणं प्रपद्ये इत्यनेन जगदीश्वरः श्रीवासुदेवः शरणत्वेन वांछितः स एव परमः प्रभुः स्वस्य जगदीश्वरत्वविज्ञापनाय " सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः " इत्येवं पूर्वोक्ताभ्यां प्रभुभ्यां सहितः । तदाश्रमपदं प्राप्तोभूदित्यर्थः ॥ २१ ॥

अप्सरःप्रमुखैर्वितायमानं विस्तीर्यमाणं यशो येषां ते तदाश्रमपदं तस्य आश्रमस्थानम् ॥ २२ ॥

तेषां प्रादुर्भावस्य संयोगेन संसर्गेण विद्योतितं मनो यस्य सः

श्रीमच्छुकदेव कृत सिद्धांतप्रदीपः !

एकपादेनोत्तिष्ठन्नेव ददर्श ॥ २३ ॥

तदा भूमौ दंडवत्प्रणम्य अर्च्यते पूज्यते अनेनेत्यर्हणं पुष्पादि कमंजलौ यस्य सः स्वैः स्वैश्चिह्नैः कण्ठगतनीलिमा भृगुलता चतुर्मुखादिरूपैश्चिह्नितान् उपतस्थे पूजयामास ॥ २४ ॥

भाषाटीका

अत्रीजीके मस्तक से निकले हुये प्राणायाम रूपी काष्ठों के अग्नि से जलते हुये तीनों भुवनों को तीनों देवताओं ने देखा ॥ २१ ॥

तब तो अप्सरा मुनि गंधर्व सिद्ध विद्याधर उरग इनों को साथ लेकर बडे विस्तीर्ण यशवाले मुनी के उस आश्रम कुतीनों गये ॥ २२ ॥

तब एकही पाद से खडे हुये मुनि ने तीनों देवों के प्रगट होने के सान्निधान से मन में अत्यन्त शोभित होकर आगे में तीनों देवों का दर्शन किया ॥ २३ ॥

फिर वृषभ हंस गरुड इनों पर बैठे डमरू कुश चक्रादि चिन्हों से युक्त तीनों देवों को पृथिवी में दंडवत्प्रणाम करके हाथ जोड कर स्तुति करने लगे ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

कृपयाऽवलोको यस्मिन् हसच्च तद्वदनं च तेनोपलंभितान्प्रसन्नत्वेन ज्ञापितान् तेषां रोचिषा दीप्त्या ॥ २५ ॥

श्लक्ष्णया मधुरया सूक्तया गंभीरार्थया ॥ २६ ॥

अनुयुगं कल्पे कल्पे विभज्य गृहीता देहा यैस्ते प्रसिद्धा ब्रह्मविष्णुगिरिशा यूयम् वो युष्मान्प्रणतोऽस्मि तेभ्यः सकाशादेकएवमेमया आहूतः शरणं तं प्रपद्य इत्येकस्यैव निर्दिष्टत्वात् स च युष्मासु कतमः इति युष्माभिरेव कथ्यतामित्यर्थः ॥ २७ ॥

अस्यप्रपंचः एकइति विविधैः प्रधानैरुपचारैः विबुधप्रधानैरिति वा पाठः प्रजननाय पुत्रोत्पत्त्यै चित्तीकृतश्चिन्तितः एवं चिन्तितः मनसोऽपिदूराः अगोचराः संतः कथंनु त्रयोऽप्यत्र आऽऽगताः ॥ २८ । २६ ॥

तत्वयायथाकृतः संकल्पस्तेन तथैवभाव्यं नान्यथा यतः सत्यसंकल्पस्यैतत्संकल्पः तर्हि कथमेकस्मिन्ध्यायमाने त्रयः प्रादुर्भूताः अत्र आहुः यदेकं जगदीश्वराख्यं तत्त्वं भवान्ध्यायति तदेतत् वयम् ... अपि तदेवैकतत्त्वं नास्माकं भेदोऽस्तीति भावः ॥ ३० ॥

मैत्रेयउवाच ॥
इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः ॥
प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो ॥ २९ ॥
देवाऊचुः ॥
यथा कृतस्ते संकल्पोभाव्यं तनैव नान्यथा ॥
सत्संकल्पस्य तेब्रह्मन् ! यद्वैध्यायति ते वयम् ॥ ३० ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपन्याख्यादीपिका टिप्पणी ॥

तच्छोचिषेति सार्द्धकम् ॥ २५ ॥ २६ ॥

तेभ्यः सकाशाद्य एक एवोपहूतः सत्त्वेति यत्तदोर्गम्यमानत्वम् युष्माभिरेवेत्यादरार्थिकार्थत्वादित्यर्थोक्तिः ॥ २७ ॥

पुनरुक्ति वारणार्थमाहास्यैवपद्यस्य प्रपंचइति तथाच पूर्वं संग्रहवाक्यमिदंच विवरण वाक्यमिति नपौनरुक्त्यमएवमन्यत्रापि उपचारैः पाद्यादि षोडशभिः चित्तनैक्यंनीतः भुवानुस्मृति विषयीकृतः मया भजनं त्रयाणां न कृतम् तथापि मम मदाश्रमे यूयमागता इति स्पष्टस्य निमित्तस्याभावात्तन्निमित्तं ब्रूतेत्यर्थः ॥ २८ ॥

सरलोयं ग्राह्मणः अस्मत्तत्त्वाऽज्ञानादितिप्रहस्य ॥ २९ ॥

यथा सृष्ट्याद्युपयुक्त गुणशक्त्युपाधिभत्ताप्रकारेण तेन संकल्पेन तथैव भाव्यमिति भावसाधनम् यद्यपि सर्वकर्तृत्वेन महत्स्रष्टाऽऽविभंवेत्तथापि तस्य कारणतत्त्वोत्पादकत्वादंशिता च जगदीश्वर इतिविसर्गोत्पादकत्वमात्रोपाधिकस्यात्त्मनाकृतत्वाद्विशेषतत्त्वम् किज्ञानाभावात् सामान्यरूपस्यच विशेषमंतरज्ञाभावात्त्रयोऽपि प्रतीताः किन्तुन स्वेन तु त्रयाणामप्यैक्यात्रविस्मयो विधेय इत्यर्थः ॥ ३० ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रिका

[illegible]पया भवलोको यस्मिन् हसश्च तद्वदनं च तेन उपलं भिताम् [illegible] पितान् तेषां शोचिषा दीप्त्या प्रतिहते अक्षिणी नेत्रनि[illegible] ॥ २६ ॥

[illegible] तत्प्रपणां विबुधर्षभासक्तं कृत्वावसांजलिः सन् [illegible] वाचा सर्व लोकेभ्यः श्रेष्ठान् विबुधर्षभास्तान्नी[illegible] ॥ २६ ॥

स्तुतिमियाह विश्वेति ग्राभ्यां विश्वस्योद्भवादिषु निमित्तभूतेषु [illegible]मित्यर्थः अनुयुगं प्रतिकल्पं विभज्यमानैर्मायागुणैरज[illegible]भिरुपलालिता गृहीता देहा यैस्ते यूयं ब्रह्मविष्णुगिरीशाः [illegible] मभ्यं प्रणतोऽस्मि युष्माकं मध्ये एक एव भगवान् [illegible] शरणं तं प्रपद्य इत्येकस्यैं निर्दिष्टत्वात्स एव [illegible] युष्माभिरेव कथनीयमित्यर्थः ॥ २७ ॥

[illegible] यातिएक इति प्रधानः सर्वोत्कृष्टएकएवभगवान् [illegible]रुपचारैर्मयाप्रजननायसर्वेश्वरतुल्यपुत्रलाभाय [illegible] विषयीकृतः उपासित इति यावत्प्रतन्नुतनुभृतां [illegible] दूराः मनसापि प्रहीतुमशक्या यूयं त्रयोऽपि [illegible]कारणं ब्रूतकथयत । प्रसीदत मह्यं प्रसन्ना भवत [illegible] मम महान् विस्मयो वर्त्तते ॥ २८ ॥

[illegible] वचः श्रुत्वा त्रयो ब्रह्मविष्णुशिवाः प्रहस्य

श्रीमद्वीरराघवाचार्यकृत भागवतचान्द्रिका ।

श्लक्ष्णया गंभीरया वाचा हे प्रभो ! वशेंद्रिय ! विदुर ! तमृषिमत्रि प्रत्याहुः ॥ २९ ॥

उक्तिमेवाह ते त्वया यथाकृतः संकल्पस्तेनैव तथा भाव्यं नान्यथा सत्यः सत्संकल्पस्य ते संकल्पः कथमेकास्मिन् ध्याते त्रय आगतास्तत्राहुः हे ब्रह्मन् ! त्वं यदेकं जगदीश्वराख्यं तत्त्वं ध्यायसि तत्त्रय तदेव तत्त्वं सन्नाग्रकमन्नाक च त्रिमूर्तिरूपेणावस्थितमित्यर्थः मूर्तिविशेषानिर्धारणमन्तरेण जगत्सृष्टिस्थितिलयहेतुरीश्वर इतीह त्वत्संकल्पः अतो वयमागता इत्यभिप्रायः ननु यन्ते ध्यायसि ते वयमित्यनेन त्रिमूर्त्यैक्य प्रतीयते सत्यमैक्यमस्त्येव ततः किं ब्रह्मशिवयोर्भगवत्पारतंत्र्यमस्मिन्पुराणे पूर्वापरग्रंथेषु श्रूयमाणं विरुध्यत इति चेत्तन्न "सर्वगत्वादनंतस्य सएवाहमवस्थितः मत्तः सर्वमहं सर्वं मयि सर्वं सनातन,, इति वद्ब्रह्मात्मकत्वेपन्नया चतुर्मुख शिवयोरभेदव्यवहारोपपत्तेः तथा हि तयोर्ब्रह्मात्मकत्वं स्फुटमुच्यते महाभारते "तवांतरात्मा मम च ये चान्ये देहिसंज्ञिताः सर्वेषां साक्षिभूताऽसौ न ग्राह्यः केनचित्कचिदिति म[illegible]रकत्वावस्थितं तद्ब्रह्मैव वयमित्यर्थः अत्रेदमवधेयं यद्यपि काश्चित्काचित् "ब्रह्माच नारायणः शिवश्चनारायणः ब्रह्मा नारायणः स्योसौ कल्पादौ भगवान्यथा प्रजाःससर्जभगवान्ब्रह्मानारायणात्मकः ततः स भगवान्विष्णुरुद्ररूपधरोऽव्ययः ततःकालाग्निरुद्रोसौ भूत्वा सर्वहरोहरः सर्गस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकां सज्ञां स्याति भगवानेकएव जनार्दनइत्यादिषु त्रिमूर्त्यैक्यं प्रतीयते तथापि "नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते नारायणाद्द्वादशादित्यारुद्रा वसवः सर्वाणिछंदांसि एको ह वै नारायणआसीन्नब्रह्मा नेशानः। यन्नाभिपद्मादभवन्महात्मा प्रजापतिः तत्रब्रह्मा चतुर्मुखोऽजायत सोग्रे भूतानां मृत्युमसृजत्त्र्यक्षं त्रिशिरस्कं त्रिपाद खंडपरशुं ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः विभूतयो हरेरेता जगतः सृष्टिहेतव,, इत्यादिषु भगवतस्तयोश्चभेदावगमात्सामानाधिकरण्यस्यच "सृष्टिंततःकरिष्यामि त्वामाविश्य प्रजापते । हरो हरति तद्वश,इत्याद्यनुगुणयेनांतर्यामित्वेनाप्युपपत्तरभेदो न युक्तः । नन्वेवमपि ब्रह्मविष्णुरुद्रेंद्रास्ते सर्वे संप्रसूयंते इतिब्रह्माद्यविशेषण विष्णोरप्युत्पत्तिश्रवणात्त्रिमूर्त्यन्तर्गतं तत्त्वांतरमेष्टव्यं तदेवेत्रिमूर्त्याकारेणावस्थितमिति नैव सदेवेत्यादिवाक्येषु कंठोक्त्या सर्वं वाक्यं सावधारणमिति न्यायात्सावधारणेषु प्रत्येकमेकैकस्यस्वव्यतिरिक्त कारणत्वोपास्यत्वबोधक वाक्यस्थितसामान्यशब्दानांविशेषवाचिपदेस्वतितत्पर्य्यवसानस्यपक्षागपशुन्यायासिद्धत्वादन्वितःसर्वकारणत्वानुपपत्तेरीक्षणाद्यर्थविरोधाच्चविशेष्यव्यवस्थापकत्वानुपपत्तेर्दकसमस्तकारणत्वबोधनात्समुच्चित्यकारणत्वानुपपत्तेः त्रिविशेषासाधारणब्रह्मरुद्रेंद्रवैश्वानरादिपदवाच्यानां पुरोवादप्रसिद्धेंद्रादीनां

श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रचन्द्रिका ।

चर्चितत्वकर्मवश्यत्वयोः । श्रुत्यैवप्रतिपन्नत्वात्तद्वाचिनां तेषां विशेष्यवश्यस्थापकत्वानुपपत्तेः श्रीपतेरसाधारणपुरुषनारायणादिपदवाच्यस्य कुत्रापि कर्मवश्यत्वाश्रवणात् तद्रूपस्तेश्च अजायमानो बहुधा विजायत इति अवतारत्वस्य श्रवणं कर्मकृतत्वस्यापोदितत्वादित रोत्पत्तेस्तदपवादाभावात् तस्यसर्वकारणत्वोपपत्तेस्तस्य सकल जगत्कारणत्ववोधकश्रुत्यैकार्थ्यान्नारायणस्यैव सर्वोत्कृष्टत्वमेष्टव्यमित्यन्यत्र विस्तरः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

कृपया प्रयुक्तेनावलोकितेन स्वसता वदनेनोपलंभितानुपलब्धतान् तच्छोचिषा तेषां वपुस्तेजसा । प्रतिहतं प्रतिबद्धदर्शनशक्तिनी ॥ २५ ॥

तत्प्रवणं तेष मम्रं संहतांजलिं बद्धांजलिः श्लक्ष्णया मधुरया। सूक्तया वैदिक्या ॥ २६ ॥

कान् गुणानुपसंहृत्य तुष्टावेति तत्राह विश्वेति विश्वस्योद्भवस्थितिलयेषु विभज्यमानैः पृथक् पृथक् क्रियमाणैर्मायायाः प्रकृते र्गुणैः रजः सत्त्वतमः संज्ञैरनुगुणं कार्यानुकूलं सृष्टये रजोगुणप्रवर्तकत्वेन, रक्षणाय सत्त्वगुणप्रवर्तकत्वेन, संहाराय तमोगुणप्रवर्तकत्वेन, प्रगृहीता देहा यैस्ते प्रगृहीतदेहाः स्वीकृतावतारा हे ब्रह्मविष्णुगिरिशा ? अहं वः "प्रणतोऽस्मि प्रजापते नत्वदेतान्यन्यो विश्वाजातानि परिता बभूव आस्यजानतो नाम चिद्विवक्तनमहस्ते विष्णो सुमतिं भजामहे इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाम्ने" इत्यादिसूक्तोक्ताय यूयं तेभ्यो वो युष्मभ्यं भूयो भूयः प्रणतो स्मीत्यन्वयः भक्तिरोमाश्लिष्टमनाः*ब्रह्मस्थो रुद्रस्थः पृथक् स्थितः स्वयमपि विष्णुस्त्रिपुरुषसमाः प्रजाः प्रयच्छतियोति यः पूर्वसंकल्पस्तं विस्मर्तास्मि वा त्रिंशुष्टमोहनार्थं विज्ञापयति कएवेति भवतां मध्ये मया कएवाह्वत कोनूपहूत इत्यन्वयः ॥ २७ ॥

एतदेव विवृणोति एको मयेति इहवने तपः कुर्वता मया विबुधप्रधानः सर्वदेवोत्तमो ब्रह्मस्थो रुद्रस्थः स्वयं विष्णुरेको भगवान् च प्रजननाय पुत्रत्वोत्पत्तये त्रिपुरुषसमानान् पुत्रान् मह्यं ददातीति निश्चित्ताकृतो ध्यातस्त्वेवंस्थिते तनुभृतां देहिनां मनसापि दूरविषया यूयं कथं त्वत्रागतास्तदब्रूत संभाषणेन प्रसीदत मे इहास्मिन्नर्थे एकस्मिन् ध्यातेत्रयाणामागमनलक्षणो महान् विस्मय इति "ब्रह्मस्थश्चैव रुद्रस्थः स्वयं चापि हरिः प्रभुः । प्रजां त्रिपूरुषसमां यच्छात्वत्यत्रिरच्छत । तस्मात्सब्रह्मरुद्राभ्यां सह विष्णुर्जगत्पतिः आगत्य तु त्रिमूर्त्यंशान् प्रादात्पुत्रान् जनार्दनः भा१वित्वार्थैवकार्यस्य लोकानां मोहनाय च" इति वचनात् लोकमोहनार्थमत्रिणा विकल्पितं न तु नास्त्वार्थरेवेन ॥ २८ ॥

तस्वं त्विदं कार्यस्य भावित्वात् संकल्पोपेतत्वात् यथा संकल्पस्तथाकार्यमपि भविष्यति ।सकल्पस्त्वेक एव तस्माज्झटिति प्रत्यवमर्शनेन तं त्रिलोकमोहनार्थमुक्तविकल्पाभिप्रायं जानन्तस्तत्त्वगूहनं विज्ञाय प्रहसंतस्त्रयोदेवा आहुरित्याह इतीति ॥ २९ ॥

कर्माप्रतीतेः किमाहुरिति तत्राह यथेति तपश्चरता त्वया यथासंकल्पकृतस्तेन सकल्पेन तथैव भाव्यं कर्तुमकर्तुमन्यथाकर्तुंसमर्थानांभवतांमनीषितंमम दुरवगाहमितितत्राह नान्यथेति सत्वामोसंकल्पस्ततस्तकदपस्तत्संकल्पस्यान्यथाभावो नैवस्वत्संकल्पानुसारेणास्मत्संकल्पेऽपि

* अत्रिरित्यनेनान्वयः

श्रीमद्विजयध्वज तीर्थ कृत पदरत्नावली ।

ध्यातव्यात इति भावेनाहुः यद्वा इति ब्रह्मस्थो रुद्रस्थस्तथा विष्णुः स्वयं च त्रिपुरुषसमानान पुत्रान् प्रयच्छतियोति यत्संकल्पं ध्यायसि ते वय ब्रह्माविष्णुरुद्रा इति त्रयस्तुभ्यं पुत्रान् दास्याम इति सकल्पयाआगता इति शेषः निपातद्वयेन प्रमाणांतरप्रसिद्धिद्योतयति ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ॥

विजृम्भितानिति चितसुखः तच्छोचिषेति सार्द्धकम् । २५।२६॥

विश्वेति । अत्र च श्रीविष्णोरपि मायागुणगृहीतदेहत्वं नेतिज्ञानादेव कल्पितं तथैवाह । यो मे मया उपहूतः स तेभ्यः पृथक् पृथक् तत्तच्छक्ति विग्रहाद् विभागेभ्यो हेतुभ्यः भवतां मध्ये कएव स्यात् । इतरद्वय निरासेन को भवेत् । तस्याविभक्तत्वान्न कोऽपीति संभावयामीत्यर्थः ॥ २७ ॥

नच त्रयोऽपि यूयमुपासिताः यत एक इति । मया तु तत्तच्छक्तित्वेनैक एव चिन्ताकृतः । ततः स एव चित्तस्थः सन् मदिदं सम्पादयेत् कथं नु यूयमेतावता प्रयासेनागता अतो महानेव संकोचो वा मम जात इति भावः तथैवाह मनसोऽपीति प्रभानोरिति सम्बन्धोक्तिपाठान्तरं तद्वाने दृष्ट्वा प्रहस्य ॥ २८ ॥२६ ॥

उत्तरमाहुर्यथेति । अयं भावः । भवता य एव जगदीश्वर इति पूर्णषड्गुणैश्वर्यो भगवान् न तावद्विवक्षितः नत्र महत् स्रष्टृत्वादिविश्वशक्तिकः पुरुषः विसर्गादिशमात्रमित्रकामनया तावन्मात्रोपाधितयोपासनाप्रवृत्तेः । यदि च तत्तदुपास्यमामकारणस्तदा तत्तद्रूप सएवाविरभविष्यत् एवं विश्वस्यादिपदेऽप्युक्तवादि शब्दा विसर्गगत तन्मात्रपरा एव । अतो जगदीश्वरशब्देनापि विसर्गादिमात्र शक्तिको विवक्षितः सचैकत्वेनोपासितोऽपि सृजामि तानियुक्तोऽहमित्यादिन्यायेन सर्व तत्तच्छक्त्याश्रयत्वात् श्रीविष्णुःप्राप्तोऽपि तद्रूपतया न विवक्षितः तात्पर्यादिनिष्ठत्वाभावात् अथ त्रयाणामभेदोऽपि न विवक्षितः तेषां क एकस्यादिविरोधात् । किन्तु सामान्यतयैव विवक्षितः सामान्यञ्च विशेषान् विना नोपलभ्यते इत्यत स्त्रयाणामप्याविर्भावोयोग्य एवेति तथैवाहुः यद् इति ॥३०॥

श्रीविश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

स्मैः क्षौमधर्माक्षसूत्रकमण्डलुचक्रादिभिस्तदपि कृपावलोकैरेव उपलंभितान् । एते ईश्वरा एवैतादृशकृपावलोकान्यथानुपपत्तेरिति ज्ञापितान् । कीदृशेन हसत् प्रसीदद्वदनं यतस्तेन ॥ २५ ॥

श्लक्ष्णया मधुरया ॥ २६ ॥

अनुयुग प्रतिकल्पं विभज्यमानै मायागुणैर्ये विश्वस्य उद्भवाद्यस्तेषु प्रवृत्तास्ते प्रसिद्धा एव ब्रह्मादयो यूयं विगृहीतदेहा भवथेति जानामीति भावः । यद्वा मायागुणैरेव विगृहीतदेहा इति विष्णोरपि प्रकृतिसत्त्वमयदेहत्वं ईश्वरस्वस्यैव निर्द्धारा अथवा भगवत्तत्त्वज्ञानाभावादेव तेनोक्तमिति ज्ञेयं तेभ्यो वो युष्मभ्यं प्रणतोऽस्मि प्रणति ददद्स्मीति कृपया मत्सन्देह उच्छिद्यतामिति भाव. भवतां मध्ये मया इह मदभीष्टसाधने क उपहूतः शरणं तं प्रपद्ये, इत्येकस्यैव निर्दिष्टत्वात् सच जगदीश्वरो भवतां मध्ये क इति भवद्भिरेव कृपया कथ्यतामिति भावः ॥ २७ ॥

तृष्णीस्थितांस्तान् पुनः स्पष्टीकृत्याह । एक एव मया विविधः

अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः ॥
भवितारोऽङ्ग ! भद्रं ते विस्रप्स्यन्तिच ते यशः ॥ ३१ ॥
एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः ॥
सभाजितास्तयोः सम्यग्दम्पत्यो र्मिषतोस्ततः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

प्रधानैरुपचारैः विबुधप्रधान इति वा पाठः प्रजननाय पुत्रोत्पत्त्यै चित्तीकृतः चित्तस्थीकृतः यूयं वयः कथमत्रागताः ॥ २८ ॥ २९ ॥

यत् यं जगदीश्वरं भवान् ध्यायति ते जगदीश्वरा वयं सत्संकल्पस्य तथाभीष्टप्रदातारो भवामेत्यर्थः अयं भावः जगदीश्वरतुल्य एकः पुत्रो मे भूयादिति संकल्पे कतमो जगदीश्वरः स्यादिति संदेहेन त्रय एव वयं ध्याताः पुनश्च ध्यातेषु त्रिषु मध्ये जगदीश्वर एक आयात्विति पुनरेकस्य चित्तस्थीकृतत्वेऽपि त्रयाणामेवास्माकं जगत्यस्मिन्नैश्वर्यात्त्रय एवागता अस्माकं त्रित्वेऽप्यैक्यात् वयमेक एव नापि त्वया य एव परमेश्वर इति परमेश्वरशब्दः प्रयुक्तोऽस्त्यग्रहाभो विश्वर्ऽस्वेत्यादौ संकल्पादपि साधनस्य प्राबल्यदर्शनात् साधनानुरूपं संकल्पानुरूपञ्च तव फलं भविष्यतीति ॥ ३० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

कृपयावलोको यस्मिन् हसच्चतद्वनं च तेनोपलंभितान् उपलक्षितान् प्रसन्नतया सूचितान् । तद्रोचिषा तेषां दीप्त्या प्रतिहते चक्षुमशक्ते निमील्य ॥ २५ ॥

चेतास्तत्प्रवणं युंजन् । तदाशक्तं कुर्वन् श्लक्ष्णया मधुरया शोभनार्थया ऽस्ताषीत् स्तुतवान् ॥ २६ ॥

तत्र विश्वसृष्ट्यादिहेतुत्वात्त्रिगुणवर्णनरूपां स्तुतिं कुर्वन् । एको जगदीश्वरः मयोपहूतः स युष्मासु कतरोऽति पृच्छति विश्वेति ब्रा-[illegible] विश्वोद्भवादिषु निमित्तभूतेषु . अनुयुगं कल्पे कल्पेविभज्यमानै [illegible] र्गृहीता सृज्यत्वाविना विशेषणेः गृहीता अस्मदादिदेहा [illegible] प्रभावा ब्रह्माविष्णुगिरीशा यूयम् अतो वो युष्मान् प्रण[illegible] सकाशान्मे मया शरणं तं प्रपद्येहं य एवजगदीश्वर, [illegible]पहूतः स भवतां भवत्सु कः । कतम इति युष्माभिरेव [illegible] इत्यर्थः ॥ २७ ॥

[illegible] प्रपंच एक इति । प्रजननाय पुत्रोत्पत्त्यै विबुधप्रधानः [illegible]कृतो ध्यातः इह तु तनुभृतां मनसोऽपि दूराः अगोच[illegible]रोऽपि कथमागता । अत्र त्रयाणामागमने मम महान्विस्मयः [illegible] प्रसीदत कारणं चब्रूत ॥ २८ ॥

[illegible] तात्पर्यमहरणे समर्थ ! ॥ २९ ॥

[illegible] ! त्वया यथा संकल्पः कृतस्तेन तथैव भाव्यम् [illegible] संकल्पो ऽन्यथा न भवति । यदेकं जगदीश्वरं [illegible] । ते एते वयं त्रयोऽपि तदेकं ब्रह्म नास्माकम-[illegible] सृजामि तन्नियुक्तोहं हरो हरति तद्वशः,, इति [illegible] यस्य वशे महात्मनः . स्थिता संकुता इव [illegible] वचनाच्च वासुदेवस्य नियंतृत्वं ब्रह्माशिवयोर्नि[illegible] नियम्यभूतयोर्ब्रह्माशिवयोः स्वरूपतो भिन्न[illegible] [illegible] नियंतुर्वासुदेवात् . अभिन्नत्वम् . यथा[illegible] नामर्पी द्रियाणां प्राणायत्ततयाप्राण

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

भिन्नत्वं श्रूयते नचे वाचो नचक्षुंषि नमन इत्याचक्षतेप्राण इत्येवाचक्षते किंचसर्ववेदेतिहासादिसारभूतस्मिन् "वासुदेवात्परो ब्रह्मन् चान्योऽर्थोऽस्तितत्त्वत" इत्याद्युक्तत्वात् ."अहोभाग्यमहोभाग्यं नंदगोपव्रजौकसां यन्मित्रं परमानंद पूर्णब्रह्मसनातनम्" इत्यादि वक्ष्यमाणाच्च वासुदेवाख्यं परं ब्रह्मवर्णितम् । तस्मात्सर्वस्य विश्वस्य स्वरूपतोभिन्नस्यापि तज्जत्वादिना । तदभिन्नत्वमाह भगवति "सर्वंखल्विदं ब्रह्म तज्जलानिती" ति । ब्रह्मशिवादीनां च वासुदेवजन्यत्वं श्रूयते "नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रावदशादित्या रुद्रा वसवः सर्वाणि छंदांसि एको ह वै नारायण आसीन्न ब्रह्मानेशान, इति 'अहं सर्वस्य प्रभवो मत्तः । सर्वं प्रवर्तते,, इति श्रीमुखवचनाच्च ॥ ३० ॥

भाषाटीका ॥

देवों की कृपा दृष्टि से परिपूर्ण देखा उनकी कांती से शोभित होने से मुनि ने दो नेत्र बंद कर लिये ॥ २५ ॥

फिर उनमें लगे हुये चित्त को भली भांति से युक्त करते हुये हाथ जोडकर सुंदर कोमल वाणी से सब लोकों के ईश्वरों की स्तुति करने लगे ॥ २६ ॥

अत्रीजी बोले संसार के उत्पत्ति स्थिति संहारादि कार्यों में सत्वादि रूप से विभाग किये हुये गुणों से सब युगों में देहों को धारण करने वाले हे ब्रह्मा विष्णु शिवजी मैं आपको प्रणाम करता हूं आप कृपा करके कहिये कि आप तीनों के मध्य में मैने किसे यहां बुलाया है ॥ २७ ॥

मैनेतो यहांपर एक भगवान् को पुत्रोत्पत्ती के निमित्त मन में धारण किया था फिर आपतो प्राणियों के मन से भी दूर रहने वाले तीनों मूर्ति यहां किस प्रकार से आगये इस बात कुं आप कृपाकर मेरे से कहो मेरे को इस में बडा विस्मय हो रहा है॥२८॥

मैत्रेय जी बोले हे विदुर ! इस प्रकार उन अत्रि मुनि के वचन को श्रवण करके वे तीनो देवेश्वर हस करके मधुर वचन से उन अत्रि मुनि को उत्तर देते भये ॥ २९ ॥

तीनों देव बोले हे ब्रह्मन् ! आप तो सत्संकल्प हो आपने जो संकल्प किया था वह वैसा ही होना चाहिये अन्य था नहि होगा तब तो आप जिन को ध्यान करते थे वे ही देव हम लोग आये हैं ॥ ३० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

विस्रप्स्यंतिविस्तारयिष्यंति अंतर्भूतणिजर्थस्यसृप्लृगतावित्यस्यरूपम् ॥ ३१ ॥

ताभ्यांसम्यक्सभाजिताः पूजिताः संतः ततःस्थानात्प्रतिजग्मुः ॥ ३२ ॥

सोमोऽभूद्ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित् ।
दुर्वासाः शङ्करस्यांशो निबोधाङ्गिरसः प्रजाः ॥ ३३
श्रद्धात्वङ्गिरसः पत्नी चतस्रोऽसूतकन्यकाः ।
सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ॥ ३४ ॥
तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेऽन्तरे ।
उतथ्यो भगवान्साक्षाद्ब्रह्मिष्ठश्च बृहस्पतिः ॥ ३५ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

अंगिरसोब्रह्मणस्तृतीयपुत्रस्य निबोध बुध्यस्व ॥ ३३ ॥
ताःकन्यानिर्दिशति सिनीवालीति ॥ ३४ । ३५ ॥

श्रीराधारमणदास गोस्वामिविरचिता ।
दीपन्याख्यादीपिका टिप्पणी ।

अथातो हतोःअंशेन शक्तिविशेषेण भूताःप्राप्ता आविष्टा इत्यर्थः
मूलश्लोकेष्वित्यस्मात् ॥ ३१ ॥ ३४ ॥
तत्पुत्रावंगिरसः पुत्रौ ॥ ३५ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रचंद्रिका

अथ हे मुने ! अस्मदंशेन संभूताः सुता लोकविश्रुता भविष्यंति ते तव वंशः विस्रप्स्यंति विस्तृतं करिष्यंतिते भद्रमस्तु ३१

एवंमभीष्टं वरं दत्वा तयोर्दंपत्योः अत्र्यनसूययोःसम्यङ्मिषतोः पश्यतोः सतोः सम्यक्पूजिताः सुरेश्वराः प्रतिजग्मुः ३२

ततो ब्रह्मणः चतुर्मुखस्यांशेन सोमो विष्णोरंशेन दत्तात्रेयःशंभोरंशेन दुर्वासाश्च जाता अथांगिरसः अंगिरस उत्पन्नाः प्रजा मया कथ्यमानाः शृणु ३३

अंगिरसः पत्नीश्रद्धाख्या कर्दमस्य तृतीया दुहिता चतस्रःकन्यकाः प्रसूतवती कन्याः निर्दिशतिसिनीति ३४

अपरावपि तत्पुत्रौ अंगिरस पुत्रौ उतथ्यः बृहस्पतिरिति ख्यातौ प्रसिद्धौ स्वारोचिषे मन्वंतरे आस्तां भगवान् ब्रह्मिष्ठ इतिपुत्रद्वयविशेषणम् ॥ ३५

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली

तर्हि प्रसन्नाश्चेत्प्रजा(?)दत इत्यत्रेर्जिह्वाग्रसंचलनावकाशमदत्वा आहुः अथास्मांश्चेति अथ ब्रह्मरुद्रस्थो विष्णुः स्वयमित्येतत्वयामि त्युक्तानंतरं व्यवहारांतरं विरम्यते तवात्मजा भवितारो भविष्यंतीति वरं ददुरित्यर्थः यद्वा यतएवं चसंकल्पोऽथतस्मादितिलोकेतेयशो विस्तृत्यतुभ्यं भद्रंकल्याणं सुखं वितरिष्यंतीत्यन्वयः ॥ ३१ ॥

किमन्यद्ददुरिति तत्राह एव मिति कामवरं कामितपुत्रवरं नान्यमिति शेषः मिषतोः पश्यतोः सतोः ततोऽत्रेराश्रमात् ॥ ३२ ॥

अंशेनेति तृतीयया सोमः साक्षाद्ब्रह्मणोऽंशो न भवति किंतु तेन विशेषेण सन्निहित एव । तथात्वे विष्णोरंशो दत्तः शंकरस्यांशो दुर्वासा इतीव प्रयोगः स्यात् "ब्रह्मणो नावतारोऽस्ति सन्निधानं तु केवलं क्वते विष्णोरात्मनस्तु तदंशोक्तिः प्रवेशतः,, इतिवचनात् आत्मनो जीवस्य तदंशोक्तिर्विष्णुवंशवचनं प्रवेशतः,, इति श्रेयमित्यर्थः कथं तर्हि ब्रह्मसंभवानिति प्रत्यक्षोक्तिरितिचेन्न सृष्टिविशेषान्मानां तत्पंचितृत्वदुक्तेः तथाचोक्तं "सृष्टिभेदाद्विरूपं तु कथापंचोत्तरंशतं

वैरूप्यमप्याह्निवेवं तात्पर्यान्मोहनाय चेति। अत्र ग्रंथे कथा पंचोत्तरं शतं सृष्टिभेदाद्विरूपं विपरीतमिव प्रतीयत इति शेषः अन्यद्विरूप्यं तात्पर्याज्ञानान्मोहनायोक्तमिति ज्ञेयमित्यर्थः कल्पादिभेदादपि कथा भेदो भवतीत्यतोऽपि विरोधो नास्ति" कृते तु पांडवकर्म काण्वयं रामायणं तथा विष्णोर्ब्रह्मादितां चैव क्रमाद्व्यत्यस्तशक्तितां एवदापा दर्शं च्यग्यत्वं कल्पादिभवनः कथाभेदस्तु विज्ञेयो मोहार्थेतेषु भिन्नतादिनि" वचनात् विद्विकृतावित्ति धातोर्योगवित् योगशास्त्रकृत् अणिमादियोगज्ञो वा वोधतेः शब्दविकरणे पठितत्वात् परस्मैपदम् । प्रजाः संततीः ॥ ३३ ॥

कन्यकानामान्याह सिनीवालीति कृष्णचतुर्दश्यभिमानिनी सिनीवाली तत्पंचदश्यभिमानिनी कुहूः शुक्लचतुर्दश्यभिमानिनी अनुमतिः तत्पंचदश्यभिमानिनी राका ॥ ३४ ॥

तत्पुत्रौ तस्याः श्रद्धायाः पुत्रौ स्वारोचिषनाम मनोः पुत्रयोर्नामाह उतथ्यइति उचितुं स्थापयितुमस्येत्युतथ्यः । साक्षाद्भगवान्सर्वपूज्यः बृहत्याः वाचः पालकत्वात्स्वामित्वाद्वा बृहस्पतिः" तद्बृहतोः करपस्योद्रचोरदेवतयोः सुट् तलोपश्चेति सूत्रात्ककारलोपः सुडागमश्चेति ब्रह्मिष्ठो वैदिकतमः बृहस्पतेर्नपरःसाम्नोविदुरितिश्रुतेः ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

फलञ्च तथैव भवेदित्याहुः अथेति अतो हतोः 'अस्माकमंशः' न शक्तिविशेषेण भूता प्राप्ता आविष्टा इत्यर्थः ॥ ३१—३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

अथेति विष्णोः परमेश्वरत्वख्यापनार्थं विष्णुंशोदत्त एवावतारोऽभूत्तत्रो विस्रप्स्यन्ति विस्तारयिष्यन्ति अन्तर्भूतणिजर्थस्य सृप्लृगतावित्यस्य रूपम् ॥ ३१ ॥

सभाजिताः पूजिताः मिषतोः पश्यतोः ॥ ३२ ॥ ३५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

अंग हे मुने! भवितारः भविष्यंति ते तवयशः विस्रप्स्यंति विस्तृतं करिष्यंति ॥ ३१ ॥

सभाजिताः पूजिताः मिषतोःपश्यतोः तत आश्रमपदात् प्रतिजग्मुः॥ ३२ ॥

योगविदध्यात्मवित् निबोध बुध्यस्व ॥ ३३ ॥ ३४ ॥ ३५ ॥

पुलस्त्योजनयत्पत्न्यामगस्त्यं च हविर्भुवि ॥
सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः ॥ ३६ ॥
तस्य यक्षपतिर्देवः कुवेरस्त्विड्विडासुतः ॥
रावणः कुंभकर्णश्च तथान्यस्यां विभीषणः ॥ ३७ ॥
पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान् ॥
कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते ॥ ३८ ॥
क्रतोरपि क्रिया भार्या वालखिल्यानसूयत ॥
ऋषीन्षष्टिसहस्राणि ज्वलतोब्रह्मतेजसा ॥ ३९ ॥
ऊर्जायांजज्ञिरे पुत्रा वसिष्ठस्यपरन्तप ! ॥
चित्रकेतुप्रधानास्ते सप्तब्रह्मर्षयोऽमलाः ॥ ४० ॥
चित्रकेतुः सुरोचिश्च विरजा मित्र एव च
उल्बणोवसुभृद्यानोद्युमान् शक्त्यादयोऽपरे ॥ ४१ ॥
चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतम् ॥
दध्यंश्चमश्वशिरसं भृगोर्वंशं निबोध मे ॥ ४२ ॥
भृगुःख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत्
धातारं च विधातारं श्रियं च भगवत्पराम् ॥ ४३ ॥
आयतिं नियतिं चैव सुते मेरुस्तयोरदात् ।
ताभ्यां तयोरभवतां मृकंडःप्राण एव च ॥ ४४ ॥
मार्कंडेयोमृकंडस्यप्राणाद्वेदशिरा मुनिः
कविश्च भार्गवो यस्य भगवानुशनासुतः ॥ ४५ ॥

भाषाटीका ।

अब हम लोगों के अंशरूप लोक विख्यात तुम्हारे पुत्र होंगे [illegible] मंगल होवे तुम्हारा यश का विस्तार करेंगे ॥ ३१ ॥

इस प्रकार यथेष्ट वरदान देकर इन दोनों दंपती के देखते २ [illegible] सुरेश्वर चले गये ॥ ३२ ॥

[illegible] ब्रह्माके अंशसे चन्द्रमा विष्णुके अंश से योगवेत्ता [illegible] और शंकरके अंश से दुर्वासा हुये ॥ इसके पीछे अंगिरा [illegible] सुनो ॥ ३३ ॥

[illegible] पत्नी श्रद्धाने चार कन्या पैदा करीं सिनीवाली, कुहू [illegible] अनुमति ॥ ३४ ॥

[illegible] विख्यात दो पुत्र और भी हुये जो कि स्वारोचिष [illegible] एक उतथ्य दूसरे साक्षात् बृहस्पतिजी हैं ॥ ३५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

पुलस्त्योहविर्भुविपत्न्यामित्यन्वयः सोऽगस्त्यः दह्राग्निर्जाठराग्नि विश्रवाश्चपुलस्त्यस्यसुतइतिशेषः ॥ ३६ ॥

तस्यविश्रवसइडविडायांजातः सुतःकुबेरःअन्यस्यांभार्यायांकेशिन्यांरावणादयस्त्रयःसुताः ॥ ३७ ॥ ३८ ॥

ज्वलतःप्रकाशमानान् ॥ ३९ ॥

चित्रकेतुप्रमुखाजज्ञिरेतेचसप्तर्षयोजाताः ॥ ४० ॥

तानेवाह चित्रकेतुरिति वसुभृद्यानोनामैकः शक्त्यादयोऽपरेऽन्यस्याःपुत्राः ॥ ४१ ॥ ४२ ॥

ख्यात्यांपत्न्याम् पुत्रान्पुत्रीपुत्रींच तानेवाह धातारमिति ॥ ४३ ॥
तयोर्धातृविधात्रोः ॥ ४४ ॥

कविश्चभार्गवोभृगोःपुत्रः यस्यकवेःसुतउशना ॥ ४५ ॥ ४६ ॥

श्रीराधारमणदास गोस्वामिविरचित ।
दीपन्याख्यादीपिकाटिप्पणी ।

इति चकारान्वयः ॥ ३६ ॥

रावणादयस्त्रयो विश्रवसः सुताः ॥ ३७ ॥ ३८ ॥

क्रिया तच्छक्त्यधिष्ठात्री ॥ ३९ ॥

ते च सप्तर्षयो जाता इति पृथक्वाक्यमन्यथा तच्छब्दस्यान-न्वयित्वं स्यात्तेषां सप्तर्षयोऽमला इत्यपि पाठष्टीकासम्मतः ब्रह्मर्षय-इति पाठे ब्रह्मणश्चनेत्रऋषयश्चेत्यर्थस्तथैव ॥ ४० ॥ ४१ ॥

धृतव्रतनामानं दध्यंचञ्च ॥ ४२ ॥

पुत्री च पुत्री च पुत्रास्तान् ॥ ४३ ॥

ताभ्यां धातृविधातृभ्यां सकाशात्तयो रायतिनियत्योः ॥ ४४ ॥

यस्य कवेः भगवान्सर्वज्ञ उशना शुक्रः ॥ ४५ ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

पुलस्त्यः पत्न्यां स्वभार्यायां हविर्भुवाख्यायां कर्दमस्य चतुर्थ्यां दुहितरि अगस्त्यमजनयत् ॥ अगस्त्यं विशिनष्टि योऽगस्त्यः अन्यजन्मनि दह्राग्निः जाठराग्निरभूत्तथा महातपाः विश्रवाश्च पुलस्त्यसुत इत्यर्थः ॥ ३६ ॥

तस्य विश्रवस इति इलविलासुतः इलविलायां जातः यक्षाणां पतिः प्रभुर्देवः कुवेरः तथा अन्यस्यां भार्यायां कैकस्यां रावणादयस्त्रयः पुत्रा विश्रवस एव जाताः ॥ ३७ ॥

पुलहस्य भार्या गत्याख्या कर्दमस्य पंचमी दुहिता सती पतिव्रता त्रीन्सुतानसूत प्रसूतवती तान्निर्दिशति कर्मश्रेष्ठमिति हे महामते ! ॥ ३८ ॥

क्रतोरपि भार्या क्रियाख्या कर्दमस्य षष्ठी सुता ब्रह्मतेजसा ज्वलतः प्रकाशमानान्षष्टिसहस्राणि वालखिल्यान् वानप्रस्थानृषीनसूयत ॥ ३९ ॥

तथा वसिष्ठस्य भार्यायामूर्जायां कर्दमस्य नवम्यां सुतायां हे परंतप ! चित्रकेतुप्रभृतयः सप्तमहर्षयः निर्मलाचाराः जज्ञिरे अरुंधत्या एव नामांतरमूर्जेति वेदितव्यम् ॥ ४० ॥

पुत्रान्निर्दिशति चित्रकेतुरिति द्युमान् तेजस्वीत्यर्थः शक्त्यादयः अपरे अन्यस्यां भार्यायां जाता इत्यर्थः ॥ ४१ ॥

अथर्वणः पत्नी कर्दमस्याष्टमी सुता शांताख्या चित्तिरिति पाठांतरं, तदात्तस्या एव नामांतरं धृतव्रतं दध्यंचमश्वशिरसंचपुत्रं लेभेलब्धवती अथ मे मत्तः भृगोर्वंशं निबोधश्रृणु ॥ ४२॥

हे महाभाग ! ख्यात्यां ख्यातिनाम्न्यां कर्दमस्य सप्तम्यां दुहितरि भृगुर्धातृविधातारौ पुत्रौ पुत्रानित्यार्षं बहुवचनं भगवत्परां भगवानाश्रयो यस्यास्तां श्रियं लक्ष्म्यंशभूतां कन्यां चाजीजनत् ॥ ४३ ॥

मेरुः स्वस्य सुते आयतिं नियतिं च तयोर्धातृविधात्रोर्ददात्तवान्ताभ्यां धातृविधातृभ्यां तयोर्मेरुदुहित्रोरायतिनियत्योर्यथा क्रमं मृकंडुः प्राणश्चाभवत् ॥ ४४ ॥

ततः मृकंडोर्मार्कंडेय; प्राणाद्वेदशिरा मुनिरभवत् उशना शुक्र यस्य वेदशिरसः सुतः स कविः शुक्रश्चभार्गवः भृगुवंशसंभूत इत्यर्थः ॥ ४५ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

स्यक्त्वागाद्गस्त्यः स्त्यैष्टैशब्दसंघात इत्यतः शब्दादिविषय जातं प्रति गतो न भवतीति वा सोऽगस्त्यान्यजन्मनि अग्निषु दह्रो नामाग्निः दह्रोऽग्निरल्पाग्निरित्यर्थोऽन्यजन्मनीति विशेषणं व्यर्थम भत्र-पूर्णाः पूर्वमग्निमाल्पाग्निरिति विवक्षतु गवेषणीय इति ॥ ३६ ॥

तस्यां विश्रवसः कोऽयं यक्षपतिरित्यत उक्तं देवः कुबेर इति कुवि आच्छादने इति धातोर्धनदानेन दारिद्र्यं कुत्सितं आच्छादयतीति कुबेरः अयमर्थः कस्मिंश्चित्स्थलेऽप्यतिव्याप्तः स्यादित्यत उक्तमिडविलासुत इति अन्यस्यां पत्न्याम् ॥ ३७ ॥ ॥ ३८ ॥

वालखिल्या अल्पा येषां ते तथा संततिविधुराः ऊर्ध्वरेतस इत्यर्थः तान् ब्रह्मतेजसा ब्रह्मनिमित्ततेजसा ॥ ३९ ॥ ४० ॥

अन्येषां सामान्यप्रतिपन्नत्वात् किमिति नोक्तानीति शंकामाभूदित्याह चित्रकेतुरिति अपरे सप्तभ्योऽन्ये ते के शक्त्यादयः शक्ति मुनिप्रमुखाः ॥४१॥—॥ ४३ ॥

तयोरायतिनियत्योः ॥ ४४ ॥

यस्य कवेः ॥ ४५ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

दह्राग्निरितिसम्बन्धोक्तिः वेदाग्निरिति चित्सुखः ॥३६॥—॥३८॥

तेजस इति चित्सुखः ॥ ३९ ॥

सप्तब्रह्मर्षय इति पाठश्चित्सुखसंमतः । सप्तर्षय इतिक्वचित् । टीकानुमतया लमति ॥ ४०–४५ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

हविर्भुवि पत्न्यां सोऽगस्त्यः दह्राग्निर्जाठरः विश्रवाश्च पुलस्त्यस्य पुत्र इति शेषः ॥ ३६ ॥

तस्य विश्रवसः इडविडायां जातः सुतः कुवेरः अन्यस्यां केशिन्याम् ॥ ३०—३२ ॥

शक्त्यादयोऽपरेऽन्यस्याः पुत्राः ॥ ३७ ॥ ४२ ॥

पुत्रौच पुत्रीञ्च पुत्रास्तान् पुत्रान् ॥ ४३ ॥

तयोस्ताभ्यां धातृविधातृभ्याम ॥ ४४ ॥

कविश्च भार्गवो भृगोः पुत्रः ॥ ४५ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

पुलस्त्यो हविर्भुवि पत्न्यामगस्त्यं जनयामास सोऽगस्त्यः अन्य-जन्मनि दह्रो जाठरोऽग्निरभूत् । विश्रवाश्च पुलस्त्यस्य सुत इति शेषः ॥ ३६ ॥

तस्य विश्रवसः । अन्यस्यां केशिन्यां रावणादयः ॥ ३७ ॥ ३८ ॥

ज्वलतः प्रकाशमानान् ॥ ३९ ॥

चित्रकेतुप्रधानाः चित्रकेतुप्रमुखाः ॥ ४० ॥

तानेवाह चित्रकेतुरिति वसुभृद्यानो नामैकः शक्त्यादयोऽपरे अन्यस्यांजाताः ॥ ४१ ॥

चित्तिः शांतिः ॥ ४२ ॥

पुत्रान् पुत्रौ पुत्रींच ॥ ४३ ॥ ४४ ॥

कविश्च भार्गवः अभावयन् अवर्धयन् ॥ ४५ ॥ ४६ ॥

———

त एतेमुनयः क्षत्तर्लोकान्सर्गैरभावयन् ॥
एषकर्दमदौहित्रसंतानः कथितस्तव ॥ ४६ ॥
शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः ॥
प्रसूतिं मानवीं दक्ष उपयेमेह्यजात्मजः ॥ ४७ ॥
तस्यांससर्जदुहितॄःषोडशामललोचनाः ॥
त्रयोदशादाद्धर्माय तथैकामग्नयेविभुः ॥ ४८ ॥
पितृभ्यएकां युक्तेभ्यो भवायैकां भवच्छिदे ॥
श्रद्धा मैत्री दया शांतिस्तुष्टिः पुष्टिः क्रियोन्नतिः ॥ ४६ ॥
बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ॥
श्रद्धाऽसूत शुभं मैत्रीप्रसादमभयं दया ॥ ५० ॥

भाषाटीका ॥

पुलस्त्यने हविर्भू पत्नी में अगस्त्य को पैदा किये जो और जन्म में जाठराग्नि हुये और एक बड़े तपस्वी विश्रवा को भी जनमा ॥ ३६ ॥

उनके इडविड़ा में यक्षोंके पति कुबेर हुये और दूसरी पत्नी में रावण कुंभकर्ण और विभीषण हुये ॥ ३७ ॥

पुलहकी गति भार्या ने तीन पुत्र पैदा किये कर्मश्रेष्ठ वरीयान् और सहिष्णु ॥ ३८ ॥

क्रतु की भार्या क्रिया ने ब्रह्म तेज से जाज्वल्यमान साठ हजार बालखिल्य ऋषि पैदा किये ॥ ३९ ॥

वसिष्ठजी के ऊर्जा नामक अरुंधती भार्यामें चित्र केतु प्रभृति अमल पुत्र हुये वोही सप्त ऋषि हुये ॥ ४० ॥

चित्रकेतु, सरोचि, विरज, मित्र, उल्बण, वसुभृद्यान, द्युमान, ये सात पुत्र हैं अन्य स्त्री में शक्त्यादि इतर पुत्र उत्पन्न होते भये ॥ ४१ ॥

अथर्वण ऋषी की पत्नी चित्ति नाम्नी, दध्यंच नामक, व्रत को धारण करने वारो अश्वशिरा ऐसे पुत्र को प्राप्त होती भई. अब भृगुके वंश को श्रवण करो ॥ ४२ ॥

महाभाग्यवान् भृगु ऋषि, ख्याति नामक पत्नी में धाता विधाता यह दो पुत्र, और भगवत्परायण श्रीनाम्नी पुत्री उत्पन्न करते भये ॥ ४३ ॥

मेरुने, आयति, नियति, यह, दोनों पुत्रियोंको धाता विधाता के अर्थ प्रदान कियो. उनसूं वे दोनों स्त्रियोंके मृकंड प्राण यह दोनों पुत्र होते भये ॥ ४४ ॥

मृकंड के पुत्र-मार्कंडेय प्राण के पुत्र वेदशिरा, और कवि भृगु के पुत्र [illegible] कवि के पुत्र उशना नामक शुक्र होते भये ॥ ४५ ॥

श्रीधरस्वामि कृत भावार्थदीपिका।

अजः ब्रह्मणः पुत्रः नतुप्राचेतसः ॥ ४७ ॥ ४८ ॥
युक्तेभ्यः [illegible]भ्योमिलितेभ्योवा ॥ ४९ ॥ ५० ॥ ५१ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपन्याख्यादीपिका टिप्पणी।

सर्गैरित्यत्रैकम् लोकानामाविर्भावात् अभावयन्नुत्पादित-वन्तः ॥ ४६ ॥

सात्त्विकशक्त्यधिष्ठातृत्वात्पापहरः ॥ ४७ ॥

तस्यां प्रसूत्याम् ॥ ४८ ॥

संयतेभ्यः शुद्धान्तःकरणेभ्यः। मिलितेभ्य एकाचित्तेभ्य इति एकभार्यत्वेपिदोषः परिहृतः ४९।

श्रद्धा शास्त्रार्थविश्वासशक्त्यऽधिष्ठात्री देवी शुभं। सत्सङ्गाद्यधिष्ठातारं मैत्री हिताचरणशक्त्यधिष्ठात्री दया नि-र्हेतुकपरदुःखप्रहाणेच्छाशक्त्यधिष्ठात्री ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रचंद्रिका।

देवहूतिदुहितृसंततिमुपसंहरति नवेति हे क्षत्तः! एते नवमरीच्यादयः सर्गे स्ववंशैर्लोकानभावयन् उत्पादयामासुः कर्दमदुहितृसंततिश्रवणफलमाह एष इति कर्दमदौहित्रः कर्दमदुहितृसंबंधी-संतानो मया कथितः श्रद्धापूर्वकं शृण्वतः पापनिवर्तकः ॥ ४६ ॥

एवं देवहूतिसंततिमभिधायाथमनोस्तृतीयायाः दुहितुः प्रसूतेः संतानमाह प्रसूतिमिति अजात्मजो ब्रह्मपुत्रो दक्षः मानवीं स्वायंभुवमनुदुहितरं प्रसूतिमुपयेमे उवोढ तस्यां प्रसूत्यां अमललोचनाः सौं-दर्यशालिनीः षोडशदुहितॄः ससर्ज ॥ ४७ ॥

तत्र त्रयोदश दुहितॄः विभुस्तत्तदभिप्रायविज्ञानसमर्थो दक्षः धर्माय ददौ एकां दुहितरमग्नये एकां युक्तेभ्यो मिलितेभ्यः पितृभ्य एकां भवच्छिदे भवाय रुद्राय अदात् ज्ञानप्रदत्वाद्रुद्रस्य भवच्छित्त्वं विवक्षितम् ॥ ४८

तत्र धर्मपत्नीस्त्रयोदश दुहितॄ निर्दिशति श्रद्धेति ॥ ४९ ॥

तासां प्रत्येकं संततिमाह श्रद्धेति आसां श्रद्धादिनामत्वं तदपत्यानां शुभादिनामत्वं च श्रद्धादिधर्मयुक्तत्वेनश्रद्धादिकार्यशुभादि धर्मयुक्तत्वेन च बोध्यंनाम्ना मन्वर्थत्वात् यद्वा श्रद्धा शुभाद्यभि मानिदेवतात्वात्तासां तेषां च तन्नामत्वम् ॥ ५० ॥

शांतिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ।
योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत ॥ ५१ ॥
मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम् ।
मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी ॥ ५२ ॥ *
ययोर्जन्मन्यदोविश्वमभ्यनंदत्सुनिर्वृतम् ।
मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः ॥ ५३ ॥
दिव्यवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः ।
मुनयस्तुष्टुवुस्तुष्टा जगुर्गंधर्वकिन्नराः ॥ ५४ ॥
नृत्य तिस्मस्त्रियो देव्य आसीत्परममंगलम् ।
देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः ॥ ५५ ॥

देवाऊचु ॥

यो मायया विरचितं निजयाऽऽत्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय ॥
एतेन धर्मसदने ऋषिमूर्तिनाऽद्य प्रादुश्चकार पुरुषाय नमः परस्मै ५६
सोऽयं स्थितिव्यतिकरोपशमाय सृष्टान्सत्त्वेन नः सुरगणाननुमेयतत्त्वः ।
दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपताऽरविंदम् ५७

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

अभावयन् अवर्धयन् ॥ ४६ ॥
कर्दमदौहित्रकथाश्रवणफलमाह शृण्वत इति अजात्मजो द
क्षः ॥ ४७ ॥ ४८ ॥
युक्तेभ्यो योगेभ्यो हरौ मनोयोगसहितेभ्य इति या भवच्छिदे
ज्ञानोपदेशेन संसारनिर्मूलनाय ॥ ४९ ॥
तासांसततिस्वनामानुगुणमाह श्रद्धेत्यादिना ॥ ५० ॥ ५१ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

एष कर्दमेति । एतास्तद्दुहितरः स्व स्व नाम निरुक्तसात्विकश
क्तीनामधिष्ठात्र्यः तत्पुत्राश्च तदनुरूपाः एवं दक्षदुहितरश्च तथा
॥ ४६—४९ ॥
श्रद्धाऽसूत शुभमित्यत्र ऋतमिति क्वचित् । एष चित्सुखसंमतः
॥ ५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

लोकान् नानाविधजनान् उद्पादयन्तः ॥ ४६ —४८ ॥
युक्तेभ्यो मिलितेभ्यः ॥ ४९ ॥
श्रद्धाद्याः स्वस्वनामनिरुक्त्या सात्विकशक्तीनामधिष्ठात्र्यः ।
तद्वंशाश्च तदनुरूपाः ॥ ५० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

मानवीं मनोः कन्याम् अजात्मजः ब्रह्मपुत्रः ॥ ४७-४८ ॥
युक्तेभ्यो मिलितेभ्यः ॥ ४९-५१ ॥

भाषाटीका ।

हे विदुर जी ये मुनि लोग सृष्टि करके लोकों की वृद्धि करते हुये । ये हमने कर्दम की पुत्रियों का संतान आपसे कहा । इसे जो श्रद्धा करके सुने उसके पाप जल्दी दूर होते हैं ॥ मनुजी की प्रसूती नाम की पुत्री का ब्रह्मा के पुत्र दक्ष के साथ विवाह हुआ ॥ ४६ ॥ ४७ ॥

दक्षने प्रसूती में सुन्दर नेत्र वाली सोलह कन्या उत्पन्न करीं । उनमें से तेरह धर्म को और एक अग्नि को प्रदान करीं ॥ ४८ ॥

आपुस में मिले हुये पितृ लोगों को एक और एक संसार को दूर करने वाले श्री महादेव जी को दी ॥ श्रद्धा, मैत्री, दया, शांति, तुष्टि, पुष्टि, क्रिया, उन्नति, बुद्धि, मेधा, तितिक्षा, ह्री, मूर्ति, ये तेरह धर्म की पत्नी हैं श्रद्धाने शुभको पैदा किया ऐसे ही मैत्रीने प्रसाद को, दयाने अभय को, शांतिने सुख, तुष्टिने मुद पुष्टिने स्मय, क्रियाने योग उन्नतिने दर्प, बुद्धिने अर्थ, मेधाने स्मृति, तितिक्षाने क्षेम, ह्रीने प्रश्रय, को पैदा किया, तथा सर्वगुणों की खान मूर्त्ति देवीने श्रीनरनाराय-ण भगवान को पैदा किये ॥ ४९-५० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

सर्वेषांगुणानामुत्पत्तिर्यस्यांसा ॥ ५२ ॥ ५३ ॥ ५४ ॥
उपतस्थुर्भेजुः ॥ ५५ ॥
निजयामायययास्मिन्नात्मनिखे गगने रूपभेदं गंधर्वन-
गरं तथा विश्वंविरचितम् तस्याऽऽत्मनःप्रतिचक्षणाय प्रकाशनाय आत्मा-
यत्पुरुषायनमः केन ॥ ५६ ॥
योऽद्यप्रादुश्चकारप्रकटितवांस्तस्मैपुरुषायनमः केन ॥ ५६ ॥
प्रकार ऋषिमूर्तिनाकारोयस्मिस्तेनरूपेण ॥ ५६ ॥ ॥ ५८ ॥
सोऽयमोऽस्मान्सुरगणाननल्पकरुणायुक्तेनविलो-

* सर्वगुणोत्पत्ती इति वीरराघवीयपाठः ॥

एवं सुरगणैस्तात भगवंतावभिष्टुतौ ॥
लब्धावलोकैर्ययतुरर्चितौ गन्धमादनम् ॥ ५८ ॥
ताविमौ वै भगवतो हरेरंशाविहागतौ ।
भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥ ५६ ॥
स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् ।
पावकं पवमानं च शुचिं च हुतभोजनम् ॥ ६० ॥

श्रीधरस्वामिकृत भावार्थदीपिका

नेत्रेणहृदयात्पश्यतु कथंभूतेन यच्छ्रीनिकेतममलमरविंदंतत्क्षिपताति रस्कुर्वता कथंभूतः अनुमेयंशास्त्रतोविचार्यंतत्त्वमस्माकमपरोक्षंतत्त्वं यस्य कथंभूतानस्मान् स्थितेर्जगन्मर्यादाया व्यतिकरोऽन्यथात्वंतस्यो पशमायसत्त्वेनगुणेनसृष्टान् ॥ ५७ ॥

लब्धोऽवलोकोयैः सुरगणैस्तैरभिष्टुतावर्चितौसंतौययतुः ॥ ५८॥

भुवोभारस्यव्ययायनाशाय चकारएकवाक्यत्वार्थः तौचसां-प्रतमिहागतावित्यर्थः तदुक्तंतंत्रे "अर्जुनेतुनरावेशः कृष्णोनारायणः स्वयमिति,, यदूद्वहः श्रीकृष्णः कुरूद्वहोऽर्जुनः उभावपिकृष्णनामानौ ॥ ५६ ॥

अग्न्यभिमानिनोदेवान् स्वाहानामतस्यभार्या हुतभोजनमितित्र याणांविशेषणम् ॥ ६० ॥

श्रीराधारमणदास गोस्वामिविरचिता ।
दीपन्याख्यादीपिका टिप्पणी ।

शान्तिरन्तःकरणनिरोधशक्त्यधिष्ठात्री । तुष्टिः संतोषशक्त्य-धिष्ठात्री, सात्त्विकशक्तीनां प्रकरणात्स्मयोऽत्रधर्मोत्साहः,एवंदर्पोऽपि, तपो योगादिसामर्थ्यख्यापनम ॥ ५१ ॥

मेधा भरणावतीर्णाः, सच्चिदानंदमूर्तेः प्रकाशकत्वेन मूर्तिसंज्ञ-त्वम ॥ ५२ ॥

ययोरिति त्रिकम सुनिर्वृतं परमानन्दाविशिष्टं सत् अभ्यनन्द-तसमृद्धमासीत् दुग्धादि समृद्धा वित्यस्मात् अभिष्टवैस्स्तुतिवाक्यैः ॥ ५३-५५ ॥

यस्मिन्नात्मनि विरचितं तस्यात्मन इति संबन्धः गंधर्वनगरमि वेति नश्वरत्वे नतु मिथ्यात्वे "वैधर्म्याच्च न स्वप्नादिवद्,,इतिन्याय-विरोधात् वैराग्यार्थम्वा मिथ्यात्व एव तथापि परार्थत्वेन न तत्र-तात्पर्यम ॥ ५६ ॥

सोयं सर्वाधारसर्वस्रष्टृत्वेन प्रसिद्धः ॥ ५७ ॥ ५८ ॥

तौ त्विति नरनारायणौ हरेरंशौ कर्तृ भूतौ इह जगति भुवो भाराप नयनाय यदुकुरूद्वहौ कृष्णौ कृष्णार्जुनौ प्रतिआगतौ प्रविष्टौ इति ज्ञातव्यतयोरागतत्वं सात्वततंत्रेप्रोक्तम् तत्र अर्जुनस्य श्री-कृष्णत्वेन नरांशित्वेऽपि अर्जुने अंशिनि नरस्य तदंशस्यावेशः अम्भसा समुद्रे नद्याः। कृष्णो नारायणस्स्वयमित्यंशांशिनोरभे दुक्तेः ॥ ५६ ॥ ६० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रचंद्रिका ।

त्रयोदशानां मध्ये मूर्त्याख्या धर्मपत्नी सर्वेषां गुणानां कल्याण गुणानामुत्पत्तिरभिव्यक्तिर्ययास्तावृषी नरनारायणौ भगवदवतार-भूतौ असूत ॥ ५२ ॥

ययोर्नरनारायणयोर्जन्मनि जन्मकाले अदः एतद्विश्वं सुखितं सद-भ्यनंदत्सर्वेषां मनांसि दिशः सरितः समुद्रा वाताश्च प्रसन्ना अभू-वन् ॥ ५३ ॥

तूर्याणि वाद्यानि देवैर्वादितेन ध्वनितानि ॥ ५४ ॥

देव्यः देवानां संबन्धिन्यः स्त्रियः अवतीर्णौ नरनारायणौ द्रष्टुं सर्वे ब्रह्मादयो देवा अभिष्टवरूपतस्थु आगत्य समीपे अभितः स्थि-त्वा स्तोत्रैस्तुष्टुवुरित्यर्थः ॥ ५५ ॥

स्तुतिमेवाहद्वाभ्यां य इति निजयात्मीयया मायया संकल्पेन स्वात्मन्येवाधारभूते खेआकाशेरूपभेदं सितनीलादिरूपभेदमिवविर चितं यदिदंविश्वंरचितं तत्राकाशदृष्टांतेन स्वस्यास्पृष्टसृज्यवस्तुदो षत्वमुच्यते यथा स्वस्मिन्नात्मनि जीवे आकाशे रूपभेदमिव इदं देवतिर्य गादिरूपभेदं विरचितं तत्राकाशदृष्टांतेन सितनीलादिरूपभेदो मेघा-दिकृतो वस्तुतस्तु आकाशादतिरिक्तोऽपि भ्रांतिदर्शनामाकाशाभि-न्नत्वेन प्रतीतस्तद्वद्देवादिरूपभेदाद्विलक्षणे ह्यात्मस्वरूपे तदभिन्न-त्वेनैव भ्रांतदर्शानां प्रतीयमानदेवादिरूपभेद इति विवक्षितं यथो-क्तं । सितनीलादिभेदेन यथैवं दृश्यते नभः । भ्रांतिदर्शिभिरात्मापि-तथैकः सन्पृथक् पृथगिति अस्मिन् पक्षे यो मायया आत्मनि रचि तमित्युक्त्या भगवत्संकल्पादेव जीवस्य बंध इत्युक्तं भवति तत प्रतिचक्षणाय तस्य देवादिरूप संसृष्टस्यात्मनः प्रतिचक्षणाय प्रति-बोधनाय देवादिरूपभेदाद्विलक्षणब्रह्मात्मकप्रत्यगात्मस्वरूप बोधनाय तद्वारासंसारमोचनायेत्यभिप्रायः एतेन देवमनुष्यादिसजातीयेन स्वसंकल्पोपात्तेन अप्राकृताकर्मवश्येन ऋष्याकारेण धर्मस्य गृहे यो भगवान्प्रादुश्चकार प्रादुर्भूतः तस्मै परमपुरुषाय ते नमः ॥ ५६ ॥

सोयं स्वसंकल्पकृतजगद्बंधमोक्षो भगवान् अनुमेयतत्त्वः शास्त्रै कवेद्योविविधाविचित्रशक्तिमत्स्वरूपः स्थितिव्यतिकरोपशमायस्थि-तिःपालनं व्यतिकरः सृष्टिः उपशमः संहारः तेषां समाहारे द्वंद्वः तस्मै जगत्पालनाद्यर्थंपालनाधिकृतभगवदंशभूतद्वाद्यभिप्रायेण स्थितिपदं प्रयुक्त सत्त्वेनेतिगुणत्रयोपलक्षणं स्थित्याद्यनुगुणस-त्त्वादिगुणविशिष्टत्वेन सृष्टानस्मान्सुरगणान् सदभ्रकरुणेन अन-ल्पदयायुक्तेन विलोकनेन दृश्यात् आशीर्लिङ्गमाहंधातुकत्वात्पश्या देशाभावःदृश्यानिति द्वितीयां तथाठे तु पश्यत्विति क्रियापदमध्याहर्त्तव्यंदृश्यात्कृपावलोकनविषयत्वयोग्यानस्मान्पश्यत्वित्यर्थः कथंभूते नविलोकनेन यच्छ्रियो लक्ष्म्या निकेतं स्थानमरविंदं कमलं तत्क्षि-पता तिरस्कुर्वता ॥ ५७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

हे तात ! एवं लब्धः कृपावलोको यैस्ते सुरगणैरभिष्टुतौ भगवन्तौ नरनारायणौ गन्धमादनाख्यपर्वतं प्रतिययतुः गतवन्तौ ॥ ५८ ॥

तावेव हरेरंशतयावतीर्णौ इमौ नरनारायणौ भुवः भारव्ययायभारक्षपणाय यदुकुरुकुलश्रेष्ठौ इमौ कृष्णार्जुनावहागतानावेव कृष्णार्जुनरूपेणावतीर्णावित्यर्थः ॥ ५९ ॥

एवं धर्मपत्नीनां दक्षदुहितृणां त्रयोदशानां संततिः कथिता अथ चतुर्दश्या दक्षदुहितुः सन्तानमाह स्वाहेति अभिमानिनः स्वाहां भार्यां स्वस्यात्यंतमनुकूलां मन्यमानादग्नेस्तद्भार्या स्वाहा स्वाहाख्या त्रीन् पुत्रान् प्रसूतवती अभिमानिन इत्यात्मजाविशेषणं वा त्रेताग्न्यभिमानिनो देवानित्यर्थः तानाह पावकमिति हुतभोजनमिति त्रयाणां विशेषणं हुतं देवतोद्देशेन त्यक्तं चरुपुरोडाशादिकं भुङ्क्त इति हुतभोजनस्तम् ॥ ६० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

शमदमादिसर्वगुणानामुत्पत्तिर्ययोस्तौ तथा ॥ ५२—५३ ॥

अभिष्टवैः स्तोत्रैः ॥ ५५ ॥ ॥

यो विष्णुर्निजमायया स्वेच्छया । खे रूपभेदमिव यथाकाशे वाय्वादिरूपभेद आकाशाधारतया प्रतीयते तथात्मनि स्वाधार तया विरचितमिदं विश्वं । तत्प्रतिचक्षणाय तस्य जगतः स्वस्य चाधाराधेयभावज्ञापनायात्र धर्मसदने मूर्त्याख्यधर्मभार्यायां एतेन स्मदादृग्गोचरेण ऋषिमूर्तिना ऋषिवेषधारिणी मूर्तिर्यस्य तत्तथा तेन रूपेण । प्रादुश्चकार तस्मै परस्मै पुरुषाय नम इत्यन्वयः 'यथाकाशस्थितो नित्यवायुः सर्वत्रगो महान्, 'यथाकाशे विमानादिरूपभेदः प्रतीयते । तथा हरौ जगदिदं तत्सामर्थ्यात्प्रतीयते, इत्यादेः ॥ ५६ ॥

किमिदानीं विशेषाभीष्टमित्यतस्तत्प्रार्थयते सोयमिति । यो भगवान् भक्ताभीष्टकचिन्तामणिः सोयमवलोकनेन कटाक्षनिरीक्षणेन सुरगणान्नो इश्यादवलोकयत्वित्यन्वयः द्रष्टव्यत्वे स्वगुणान् लक्षयंति । स्थितीति स्थितिव्यतिकरोपशमाय स्थितिविघ्नपरिहाराय सत्त्वेन गुणेन सृष्टान् । अस्माभिरपि न साकल्येन ज्ञातुं शक्यत इति भावेनाहुः अनुमेयतत्त्व इति प्रत्यक्षागमानुगृहीतव्याप्तिकेन लिंगज्ञानेन ज्ञेयं तत्त्वमनारोपितज्ञानस्वरूपं यस्य स तथा । अवलोकनस्य स्वविषयजने गुणापेक्षगुणोऽस्तिचेत्प्रार्थनीयतामर्हति तत्कथमत्राहुः अदभ्रेति अदभ्रा अनल्पा पूर्णा करुणा यस्य तत्तथा तेन न केवलमनुग्रहगुणः किन्तु कांतिगुणोप्यस्तीत्याहुः त्रिपतेति अरविंदं क्षिपता । स्वकांतिगुणेन । पद्मकांति निरस्यतइत्यर्थः पद्मस्य कायं माहात्म्यातिशय इति तत्राहुः यच्छ्रीनिकेतमिति यदरविंदं श्रियो निकेतं निवासस्थानं । श्रियो निवासस्थानीयत्व केनचिद्गुणेन भाव्यं स क इति तत्राहुः अमलमिति ॥ ५७ ॥

ततः किंभगवंतावकार्ष्टामिति तत्राह एवमिति ॥ ५८ ॥

तौ करतलामलकवत् ज्ञापयति ताविमाविति यदूद्वहो यादवेश्वरः कृष्णः । कुरूद्वहोऽर्जुनः अस्मिन्नरस्याविशेषावेशाद्धरेरंशत्वं न तु साक्षात् तदुक्तं । नरे विष्णुः समाविष्टः स्वयं नारायणो हरिः अर्जुने च नरावेशः कृष्णो नारायणः स्वयमिति ॥ ५९ ॥

अग्न्यभिमानिनो देवान् अग्नेः स्वाहा नाम्नी हुतभोजनमिति त्रयाणां विशेषणम् ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

योगामिति ग्याक्रमम ॥ ५१ ॥

मूर्त्तिरिति सर्वगुणाकर भगवत उत्पत्तिः प्रकाशो यस्याः सा अस्य स्थापनात् तावमूर्तीति पूर्वेणैवान्वयः भगवदाख्यायाः सच्चिदानन्दमूर्त्तेः प्रकाशहेतुत्वान्मूर्त्तिरित्यर्थः ॥५२॥

ययोरिति त्रिकम ॥ ५३–५५ ॥

य इति । खं रूपं सौरचान्द्रकिरणा धूल्यादिमयं मेघश्च तत्कृतः स्पर्शोऽव्यक्तं तदस्पर्शित्वात् तदाच्छादकत्वाच्च तदिव सम्प्रति तत्रैव तस्यात्मनः प्रतिचक्षणायप्रकाशनायेत्यादियोऽयम ॥५७–५८॥

ताविति । आगताविति कर्त्तरि निष्ठा । कृष्णाविति कर्म्मणि द्वितीया कृष्णौ कृष्णार्जुनौ प्रति ताविमौ प्रविष्टवन्तावित्यर्थः कृष्णौ कथम्भूतौ भुवो भारव्ययाय यदुकुरूद्वहौ । यदुकुरुवंश अवतीर्णावित्यर्थः । चकारोऽत्रान्वाचये मुख्यत्वेन तत्तद्भक्तानां तत्तद्धाच्छादनार्थमित्यर्थः ॥ ५९—६६ ॥

इति श्रीमद्भागवतमहापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भे
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

स्वयं धर्मपुत्रमाहमन्वयं तपोयोगादिषु सामर्थ्यप्रख्यापनं । अश्यैरमयदर्पावभम्र्मंत्रशो ज्ञेयो ॥ ५१ ॥

सर्वगुणस्य निखिलकल्याणगुणार्णवस्य भगवत उत्पत्तिर्यतः सेति शुद्धसत्त्वस्वरूपा भगवत्प्रकाशिका शक्तिरियं ज्ञेया॥५२–५५॥

यस्मिन्नात्मन्यधिष्ठाने निजया मायया कर्त्र्या इदं विराड्रूपं नभसि रूपभेदं मेघवृन्दमिव विरचितं तस्यात्मनः स्वस्य प्रतिचक्षणाय प्रकाशनाय एतेन ऋषिमूर्त्तिना यः प्रादुः प्रादुर्भावं चकार । ऋषिमूर्त्तिनेति प्रकृत्यादित्वात्तृतीया तस्मै पुरुषाय नमः अत्र रूपभेदमिति एतेनेति ऋषिमूर्त्तिनेति पदत्रयस्य क्लीवत्वमार्षम् ॥५६॥

स्थितेः जगन्मर्यादाया व्यतिकरोऽन्यथात्वं तस्योपशमाय विलोकनेन नेत्रेण कीदृशेन यत् श्रीनिकेतममलमरविन्दं तत् त्रिपता तिरस्कुर्वता ॥ ५७ ॥

लब्धोऽवलोकः कृपा माया यैस्तैरर्चितौ ॥ ५८ ॥

ताविमौ नरनारायणौ हरेः कृष्णस्यांशौ कर्त्तारौ इह द्वापरान्ते यदूद्वहकुरूद्वहौ कृष्णौ कृष्णार्जुनौ कर्मभूतौ आगतौ प्राप्तौ कृष्णार्जुनयोः स्वांशिनोस्तावंशौ प्रविष्टावित्यर्थः । तथैव भागवतामृतोक्ता कारिका यथा । कर्त्तारौ तौ हरेरंशौ नरनारायणावृषी । द्वापरान्ते कर्मभूतावायातौ कृष्णफाल्गुनाविति ॥ ५९ ॥

अग्नेर्भार्या स्वाहा अग्न्यभिमानिनस्त्रीनात्मजान् हुतभोजनमिति त्रयाणां विशेषणम् ॥ ६० ॥

श्रीमच्छुकदेव कृत सिद्धांतप्रदीपः !

सर्वेषां गुणानामुत्पत्तिर्यस्याम सुनिवृतं सुष्ठु सुखितं मत अभ्यनंदत् ॥ ५२ ॥

प्रेसेदुः प्रसन्ना अभूवन् तूर्याणि अवाद्यंत दैवैरिति शेषः ॥ ५३–५४ ॥

अभिष्टवैः स्तोत्रैः उपतस्थुर्भेजुः ॥ ५५ ॥

खे इव निर्मले यस्मिन् आत्मनि रूपभेदमिदं विश्वं निजमायया प्रकृत्या विरचितम् ॥ तस्यात्मनः प्रतिचक्षणाय प्रकाशनाय आत्मानं य ऋषिमूर्तिना अयप्रादुश्चकार तस्मै नम इत्यन्वयः ॥ ५६ ॥

तेभ्योऽग्नयः समभवं श्चत्वारिंशच्च पंच च ॥
तएवैकोनपंचाशत्साकं पितृपितामहैः ॥६१॥
वैतानिके कर्माणि यन्नामभिर्ब्रह्मवादिभिः ।
आग्नेय्य इष्टयो यज्ञे निरूप्यंतेऽग्नयस्तु ते ॥६२॥
अग्निष्वाता बर्हिषदः सौम्याः पितर आज्यपा ॥
साग्नयोऽनग्नयस्तेषां पत्नीदाक्षायणी स्वधा ॥६३॥
तेभ्यो दधार कन्ये द्वे वयुनांधारिणी स्वधा । *
उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ॥६४॥
भवस्य पत्नी तु सती भवं देवमनुव्रता ॥
आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥६५॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

अनुमेयं शास्त्रतो विचारणीयं तत्वं यस्य तथाभूतः सोयम् स्थितिः पालनं, उत्पत्तिकर सृष्टिः, उपशमः संहार, एतेषां समाहारे एकवचन तस्मै स्थित्याद्यर्थं सृष्टान् नोऽस्मान् सत्वेन शांतेन अत एवा दभ्रकरुणेनाऽनल्पदयेन यदमल श्रीनिकेतमरविंददक्षिपत्र स्वकांत्या तिरस्कुर्वेनाऽवलोकनेन दृश्यात् पश्यतु ॥ ५७ ॥

लब्धावलोकैरर्चितौ पूजितौ ॥ ५८ ॥

तौ इमौ नरनारायणौ हरेर्नारायणस्यांशौ कर्मभूतौ भुवोभारस्य व्ययाय नाशाय ... कुरूद्वहो कृष्णौ कर्मभूतौ इह आगतौ प्रविष्टा वित्यर्थः ... कृष्णमर्जुनं गतः नारायणश्च यदूद्वह मा- ... नारायणो गतः ... नारायणः श्रीकृष्णः । एवं भगवान् साक्षा- ... नारायणः ... मोहयन् मायायालोकं गूढश्चरति वृष्णिषु इ- त्युक्तत्वात् ॥ ... ॥ आदिनारायणः स्वयं भगवान् श्रीकृष्णः ... कृष्णस्तु भगवान्स्वयमित्युक्तत्वात् द्वितीयोना नारायण ... रूपं भगवानित्युक्तत्वात् । तस्य नारा यणस्यांश ... तृतीयो नारायणः । एतन्नामावताराणां निधानं बीजमित्युक्तत्वात् ॥ ५९ ॥

स्वाहा तु अभजत् ... अग्न्यभिमानिनो देवान् । पावकादीन् त्रीनात्मजानजीजनत् । हुत ... नामितित्रयाणांविशेषणाम ॥६०-६१॥

भाषाटीका

तिनों को जन्म होते ही ... अति आनंदित हुआ सबों के मन प्रसन्न होगये तैसेही दिशा; पवन, नदियें, और पर्वत, ये भी प्रसन्न होगये ५३

स्वर्ग में बाजे बजने लगे आकाश से फूलोंकी वर्षा होने लगी संतुष्ट मुनिजन स्तुति करने लगे गन्धर्व किन्नर गान करने लगे देवां गना नृत्य करने लगी इस प्रकार उस समें परम मंगल हुआ और ब्रह्मादिक देवताभी स्तुतियों से उपस्थान देने लगे ५४-५५

भाषाटीका

देवता बोले । जिस पुरुष ने अपनी माया से आप में " आकाश में गंधर्व नगर के सदृश " इस जगत को रचा अपना प्रकाश करने को धर्म के गृह में इस ऋषि मूर्त्ति से प्रकट हुये ऐसे पर पुरुष को नमस्कार हो ॥ ५६॥

सोये शास्त्रैकवेद्य भगवान जगत की मर्यादा में विघ्नोंकी शांति को बनाये हुए हम सब देवन को, लक्ष्मी का गृह अमल कमल की शोभाकोभी तिरस्कार करने वाली,अपनी करुणा पूर्ण दृष्टि से देखें ५७

हे विदुर! इस तरह देवगणों ने स्तुतिकर पूजा करी नरनारा- यण ऋषि इन पर कृपा दृष्टि कर गंधमादन पर्वत को चले गये ५८

वोही नरनारायण आनस्वयं भूभार उतारने को यदुवंश कुरु- वंश में श्रीकृष्ण अर्जुन रूप से इस भूतल में अवतार लिये हैं ५९

अग्न्याभिमानी देवता से स्वाहा नाम की भार्या में 'हवन किये हुए को भोजन करने वाले पावक पवमान और शुचि ये तीन पुत्र पैदा हुये ॥ ६० ॥

श्रीधरस्वामिकृत भावार्थदीपिका

पितरस्त्रयः पितामहप्रपितामहस्तैःसाकंसह ॥ ६१ ॥

वैतानिकेर्वैदिककर्मणियेषांयेषां नामभिरग्निदेवताका इष्टयोनि रूप्यंते क्रियंते त एतेऽग्नयो नलौकिकाः अतो बहूनां नचैयर्थ्यमिति भावः॥ ६२ ॥

सौम्याः सोमपाः येषामग्नौकरणमस्तितेसाग्नयः तद्रहितास्त्वनग्नयः ॥ ६३ ॥

तयोस्तुमंततिर्नाभावज्जीवन्मुक्तत्वादित्याह उभेतइति ॥ ६४ ॥
गुणशीलतआत्मनः सदृशंदेवमनुव्रताऽपिसतीपुत्रंनलेभे॥ ६५ ॥

पा० * मेधांधतरणीं स्वधा इति वीरराघवीयपाठः ॥

पितर्यप्रतिरूपे स्वे भवायानागसे रुषा ।
अप्रौढैवात्मनात्मानमजहाद्योगसंयुता ॥ ६६ ॥

इतिश्रीभागवतेमहापुराणेचतुर्थस्कन्धे
विदुरमैत्रेयसम्वादोनाम
प्रथमोऽध्यायः १

———○:○:○———

श्रीधरस्वामिकृत भावार्थदीपिका ॥

तत्र हेतुः स्वपितरि दक्षेऽप्रतिरूपेऽसदृशे प्रतिकूलसतीत्यर्थः आत्मनात्मनैवाऽऽत्मानं देहमजहात्यक्तवती योगसंयुता योगमाश्रित्येति ॥ ६६ ॥

इतिश्रीमद्भागवते महापुराणेचतुर्थस्कन्धे
श्रीधरस्वामिकृत भावार्थदीपिका
टीकायां प्रथमोऽध्यायः ॥ १ ॥

———

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्यादीपिकाटिप्पणी

तेभ्यः पावकादिभ्यः पितरस्त्रयः पावकादयस्त्रयः पितामहोऽन्यभिमानिदेवः ॥ ६१ ॥

तदेवत्येयत्कारकथावर्त्यमाह न लौकिका इति अतः पृथक् पृथग्विधसाधनत्वात् ॥ ६२ ॥

पत्रपुटके जलं भृत्वाऽग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति धारकयं जलेहोमो ऽग्नौ करणं कर्मविशेषः तदस्तियेषां ते साग्नयः ॥ ६३ ॥

तेभ्यः पितृभ्यः सकाशात स्वधा नाम्नी तद्भार्या द्वेकन्ये गर्भे दधार ज्ञानं शास्त्रीयं परोक्षं विज्ञानमनुभवः ॥ ६४ ॥ ६५ ॥

तत्र पुत्राऽलाभे कश्चिदलाहृश्यं अग्निजलयोरिवेत्यभिप्रेत्य प्रतिकूल इत्यार्थिकार्थः ॥ ६६ ॥

इतिश्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
दीपिन्याख्यायां दीपिका टिप्पण्याम्
प्रथमोऽध्यायः ॥ १ ॥

———

श्रीमद्वीरराघवाचार्य कृत भागवतचंद्रचंद्रिका ।

तेभ्यः पावकादिभ्यः पंचचत्वारिंशदग्नय समभवन् त एव पंचचत्वारिंशदग्नयः पितृपितामहैः साकं सह एकोनपंचाशत् तत्र पितरस्त्रयः पितामह एकः ॥ ६१ ॥

पञ्चचत्वारिंशदग्नीनां शिशनाष्टि वैतानिक इति यज्ञनामभिर्येषामग्नीनां नामभिः वैतानिके वैदिके कर्मणि तथा यज्ञे यज्ञरूपे वैतानिके कर्मणि आग्नेय्य अग्निदेवताका इष्टयो यागाः ब्रह्मवादिभिर्वैदिकैर्निरूप्यंते त एतेऽग्नय इत्यर्थः ॥ ६२ ॥

अथ पंचदश्या दक्षदुहितुः संततिं वदन् तत्पतीन्पितॄन् विभजति अग्निष्वात्ता इति अग्निष्वात्ता अयज्वानस्ते ऽग्नयः येषामग्नौ करणं नास्ति तेऽनग्नयः ते चाऽन्यथा ये च बर्हिषदो यज्वानस्ते साग्नयः अग्नौ करणवन्त सोमपा सोमपाश्च तथाच श्रुतिः एवं यज्वानस्ते वै पितरो बर्हिषदः ये वा अयज्वानो गृहमेधिनस्ते पित-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेऽग्निष्वात्ता इति तेषामुभयविधानां पितॄणां पत्नी दाक्षायणी दक्षदुहिता स्वधाख्या ॥ ६३ ॥

तेभ्यः पितृभ्यः सेधां वतरणाख्ये द्वे कन्ये दधार गर्भे धृतवती प्रसूतवतीत्यर्थः तयोः संततिर्नास्तीत्याह उभइति ते उभे अप्यावितरणयो ब्रह्मचारिण्यो ब्रह्मपदश्रूयो ज्ञानं शास्त्रजन्यं विज्ञानं विवेकादिजन्यं तयोः पारं अन गतवत्यो सनकादिवदूर्ध्वरेतस्के ते इति भावः ॥ ६४ ॥

भवस्य रुद्रस्य या पत्नी सती नाम्नी सापि गुणशीलादिभिरात्मनः स्वस्याः सदृशं देवं भवं सेवमानापि पुत्रं नलेभे ॥ ६५ ॥

तत्र हेतुः स्वे पितरि दक्षे अनागसे निरपराधिने भवाय रुद्राय रुषा क्रोधेनाप्रतिरूपे असदृशे प्रतिकूले सति आत्मना स्वयमेव आत्मानं देहं अप्रौढैव बालैव सती योगसंयुता अजहात् तत्याज योगाग्निना देहं ददाहेत्यर्थः ॥ ६६ ॥

इति श्रीमद्भागवतमहापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृत भागवतचंद्रचंद्रिकाख्यायां टीकायां
प्रथमोऽध्यायः ॥ १ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

तेभ्यस्त्रिभ्यः पितरः पावकादयः पितामहः स्वाहापतिरग्निः ॥ ६१ ॥

वैतानिके कर्मणि यज्ञकर्मणि ब्रह्मवादिभिर्येषामग्नीनां नामभिराग्नेय्य अग्निदेवत्या इष्टयो निरूप्यन्ते तेऽग्नय एतादृशमहिमान इत्यर्थः ॥ ६२ ॥

तेषां जातिनामान्याह अग्निष्वात्ता इति येषामग्नीनां ॥ ६३ ॥

ब्रह्मवादिन्यो वेदविचारधिचक्षणे ॥ ६४ ॥

भवपत्न्याः सत्याः कथ्यपत्याभावाशंकां परिहरतिभवस्येति ॥ ६५ ॥

आत्मसमाऽपत्याऽलाभात तथा सती किमकारीति तत्राह पितरीति पितरि दक्षे अनागसे भवायाप्रतिरूपेऽननुकूलोविरोधिनि सति अप्रौढैवाऽस्वीकृतेव योगसंयुता प्राणायामगर्भितमित्तयोगानिरताऽऽत्मनामस्माऽऽत्मानं हरिं ध्यायन्त्यात्मानं देहमजहादत्याक्षीदित्यन्वयः ॥ ६६ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कंधे
श्रीविजयध्वजविरचितायांपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी

पितरस्त्रयः पितामह एकः तैः साकं सह ॥ ६१ ॥

वैतानिके वैदिके कर्मणि यज्ञे येषां नामगिराग्निदेवताका इष्टयो निरूप्यन्ते क्रियन्ते त एवैतेऽग्रयो न लौकिका अतो न बहूनां वैयर्थ्यमिति भावः ॥ ६२ ॥

सौम्याः सोमपा येषामग्नौ करणमस्ति ते साग्नयः तद्रहितास्त्वनग्नयः ॥ ६३ ॥

तेभ्यः पितृभ्यः सकाशात् स्वधा द्वे कन्ये दधार गर्भे इति शेषः ॥ ६४ – ६५ ॥

पुत्रं न लेभे इत्यत्र हेतुः अनागसे भवाय रुषा कोपेन हेतुना स्वे पितरि अप्रतिरूपे असदृशे प्रतिकूले सतीत्यर्थः ॥ ६६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

वैतानिके वैदिके कर्मणि यज्ञे येषां नामभिः अग्निदेवत्यः इष्टयो निरूप्यन्ते ते एकोनपञ्चाशत् अग्नयः वैदिका इति शेषः ॥ ६२ ॥

सौम्याः सोमपाः साग्नय अग्नौ करणवतः तद्रहिताः अनग्नयः तेषां सर्वेषामेकैव दक्षकन्या स्वधा पत्नी ॥ ६३ ॥ ६४ ॥

... आत्मनः सदृशं भवमनुवृत्तापि पुत्रं नालभे ॥ ६५ ॥

... हेतुमाह पितरीति स्वेपितरि दक्षे । अनागसे निरपराधिने भवाय अप्रतिरूपे प्रतिकूले सति योगमाश्रित्य आत्मना स्वयमेव आगाद् देहं अप्रौढैव रुषा । अजहात् त्यक्तवती ॥ ६६ ॥

इति श्री... सिद्धान्तप्रदीपे चतुर्थ स्कंधे प्रथमाध्यायार्थप्रकाशः

भाषाटीका ।

उन तीनों से पैतालिस अग्नि उत्पन्न हुए यह पिता और पिता मह सहित सर्व उनचास भये ॥६१॥

यज्ञादि वैदिक कर्म में ब्रह्मवादि लोग जिनके नाम से (आग्नेयी इष्टि) अर्थात् अग्निदेवताक यज्ञनिरूपण करते हैं ये वह वैदिक अग्नि हैं ६२

अग्निष्वात्त बर्हिषद सोमप आज्यप जो पितर हैं वे साग्नि और अनग्नि ऐसे दो प्रकार के हैं उनकी पत्नी दक्षकी पुत्री स्वधा है ६३

स्वधाके उन पितृनसे वयुना और धारणी दो कन्या हुईं वे दोनो ब्रह्मवादिनी और ज्ञान विज्ञान के पारंगत होती भई ६४

और महादेव की पत्नी सती सदा अपने गुण शील सदृशपति-श्रीशिव के अनुवर्त्तन में रही तो भी उनको पुत्र प्राप्त न हुआ ॥६५॥

कारण यह कि निरपराधी श्रीशिवजी पर पिता को प्रतिकूल देख मारे क्रोध के अपरिपक्व अवस्थाही में अपने आप योगबल से से देह को त्याग दिया ६६

श्रीमद्भागवत महापुराण चतुर्थस्कन्धमें प्रथम अध्यायकी भाषा टीका समाप्त भई ।

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ।

विदुरउवाच ॥

भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः ।
विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीम् ॥ १ ॥
कस्तं चराचरगुरुं निर्वैरं शांतविग्रहम् ।
आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् ॥ २ ॥
एतदाख्याहि मे ब्रह्मन् जामातुः श्वशुरस्य च ।
विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान्सती ॥ ३ ॥

मैत्रेयउवाच ।

पुरा विश्वसृजां सत्रे समेताः परमर्षयः ।
तथाऽमरगणाः सर्वे सानुगाः मुनयोऽग्नयः ॥ ४ ॥
तत्र प्रविष्टमृषयो दृष्ट्वार्कमिव रोचिषा ।
भ्राजमानं वितिमिरं कुर्वंतं तन्महत्सदः ॥ ५ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

द्वितीये प्रथमाध्यायोपक्षिप्तभवदक्षयोः ।
विद्वेषं वर्णयंस्तद्धेतुर्विश्वसृड्यज्ञसंभवः ॥ १ ॥

सतीं सतीनाम्नीम् ॥ १ ॥

न चासौ कस्यचिद्द्वेष्यो भवितुमर्हतीत्याह क इति चराचरगुरुं जगतां दैवतं च तं को द्विष्यात्कथं च निर्वैरं द्विष्यात् निर्वैरत्वे हेतुः शांतविग्रहः शांतिरेव विग्रहो यस्य कुतः आत्मन्येवाऽऽरामो रतिर्यस्य तम् यद्वा कः प्रजापति र्दक्षः कथं द्वेष्टि एवंभूते तस्मिन्द्वेषोऽयुक्तोऽशक्यश्चेत्यर्थः ॥ २ ॥

यतो हेतोर्विद्वेषः यतो विद्वेषात्प्राणांस्तत्याज एतदाख्याहि ॥ ३ ॥

तदेवाख्यातुमितिहासं प्रस्तौति पुरेति समेता आसन् ॥ ४ ॥

प्रविष्टं दक्षमिति शेषः महत्सदो महतीं सभाम् ॥ ५ ॥

श्रीराधारमणदासगोस्वामि विरचित दीपिन्याख्या दीपिकाटिप्पणी ।

उपक्षिप्ते आरब्धे विश्वसृजां यज्ञे संभवो यस्याभ्युत्थानादेः विद्वेषानर्हत्वे हेतुः शीलवतां श्रेष्ठ इति ॥ १ ॥

को द्वेष्टीति द्वेष्टुरपि जगद्गतत्वात् निष्ठाशांतिपरायणइत्यत्र भाष्ये तथा व्याख्यानाच्छान्तिरत्र क्षांतिः । पूर्वार्थे दक्षस्य व्यक्तमर्यादया प्राप्तिरिति साक्षात्प्रकृतार्थमाह यद्वेति ॥ २ ॥

तुश्चार्थे जामातुःश्वशुरस्य च यतो हेतोर्विद्वेषः यतश्च विद्वेषात्प्राणांस्तत्याज एतदुभयहेतुमाख्याहीत्यन्वयः ॥ ३ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिन्याख्या दीपिका टिप्पणी ॥

तदेव विद्वेषहेत्वादिकमेव समेता मिलिता आसन्निति शेषः ॥ ४ ॥

तत्रेति युग्मकम् तत्र सत्रे महाग्नयइति कुंडेभ्योऽग्नयोऽभ्युत्थानं चक्रुः ॥ ५ ॥

श्रीमद्वीरराघवाचार्य कृत भागवत चंद्रचंद्रिका ॥

भवाय पितर्यप्रतिरूपे सत्यात्मानं तत्याजेति संग्रहेणोक्तं देहत्यागं चाश्रुत्य तद्विस्तरबुभुत्सया पृच्छति विदुरः भव इति त्रिभिः शीलवतां निर्वैरत्वसमदर्शनत्वादिरूपस्वभाववतांम श्रेष्ठे भवे रुद्रे दुहितृषु च वत्सलो दक्षः सती नाम्नीमात्मजामनादृत्य कस्माद्धेतोर्विद्वेषमकरोत् नच दुहितृजामातरौ विद्वेषार्हाविति भावः ॥ १ ॥

इतश्च न भवो विद्वेषार्ह इत्याह क इति को ब्रह्मा दक्षः चराचराणां गुरुं ज्ञानोपदेष्टारं अचराणामपि ज्ञानसंपादन समर्थं किमुत चराणामिति कैमुत्यन्याय द्योतनायाचरपदं प्रयुक्तं जगतः जिज्ञासोर्लोकस्य महद्दैवतं आराध्यं रुद्रस्तारकं ब्रह्म व्याचष्टे ॥ २ ॥

शंकराद्ज्ञानमन्विच्छेदिति श्रुतिस्मृतिभ्यां ज्ञानार्थं जिज्ञासुभिराराध्यमिति भावः निर्वैरंभवं कथं द्वेष्टि अद्वेषादित्यर्थः निर्वैरत्वे हेतुः शांतविग्रहं शांतिरेव विग्रहो यस्य शांति प्रचुरमित्यर्थः आत्मनि सर्वभूतांतरात्मनि परमपुरुषे आरामो रतिर्यस्य तं सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेति श्रुत्युक्तरीत्या शमदमादिभिः

उदतिष्ठन्सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः ॥
ऋते विरिञ्चं शर्वं च तद्भासाक्षिप्तचेतसः ॥ ६ ॥
सदसस्पतिभिर्दक्षो भगवान्साधु सत्कृतः ॥
अजं लोकगुरुं नत्वा निषसाद तदाज्ञया ॥ ७ ॥

श्रीवीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

...शीलवतामित्यर्थः ॥ २ ॥

...श्वशुरस्य दक्षस्य यतो हेतोर्विद्वेषोऽभवत् यत ...पादस्य दुहिता सती प्राणान् तत्याज एतन्मह्यं हे ब्रह्मन् ! ...आहि कथय ॥ ३ ॥

...निमित्तं तन्निमित्तं सती देह... कथां प्रस्तौति पुरेति ... मत्र बहुयजमानकर्तृको यागः सत्रं ... तथा सभृत्या इन्द्रादयः सुरगणाः अग्नयोऽन्य-... समेताः सर्वभूता आसन् ॥ ४ ॥

...दक्षमिति शेषः दृष्ट्वा चतुर्मुखं शिवं च ... दक्षस्य भासा आक्षिप्तमभिभूतं तेजः येषां ते महा-... सदस्याः सदसि संस्थिताः स्वा-... उत्थितवन्त दक्षं कथं भूतं शोचिषा देहकान्त्या ... मानं महत्सदः महतीं सभां वितिमिरं यथा तथा ... ॥

श्रीविजयध्वजतीर्थकृत पदरत्नावली

...तन्माहात्म्यातिशयज्ञा-पनाय ... दक्षाध्वरध्वंसलक्षणं रुद्रस्य माहात्म्यं ... विदुरः सत्यात्मानमजहादिति श्रुतसती देहत्याग... पृच्छति भवे शीलवतामिति विद्वे-षाकरणं ... ज्ञापनायोक्ताः ॥ १ ॥

स्वस्य ... निर्विकल्पमिति भाविनाह काश्चमिति आ-त्मनि परमा... तथा तम ॥ २ ॥

तथा च ... एतदिति विद्वेषो विद्वेषकारणं ॥ ३ ॥

विद्वेषमिति ... स्तयति पुरेति न केवलं महर्षय एव किं तु मुनिमात्र... मुनय इति पुनर्वचनं ॥ ४ ॥

किमनेन प्रकृत ... प्रविष्टं दक्षमिति शेषः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

सती यथार्थ नाम्नी ... ॥ १—३ ॥

तत्रैव युगपत् ... कुर्वाणमिति कश्चित् ॥ ५—७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

द्वितीये वर्ण्यते ... दक्षेण तथा ।
युयुधाते ... मुहुः ॥ ०॥

शीलिनि ... तत्त्वभावेऽपि दुहि-तृवात्सल्यात् भवेऽपि न ... ॥ १ ॥

भगवस्य भवे ... प्रजापतिः चरा-चरगुरु निर्वैर मित्यादि ... देहोऽपि च हृदेऽपवि-

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

जगदगुरुत्वेऽपि न देवाहे इति ध्वनिः अन्ये गुणा मा विवीर्यन्तां नाम भवस्य जगद्गुरुत्वे जगदिष्टदेवत्वेच दक्षस्य तु जगन्मध्यवर्तित्वे द्वेषसम्भावनापि कथं स्यादित्यनुध्वनिः ॥ २ ॥

यतः कारणाद्विद्वेषः एतदाख्याहि यतो विद्वेषाच्च प्राणांस्त-त्याज ॥ ३ ॥

सभेता आसन् ॥ ४ ॥

प्रविष्टं दक्षमिति शेषः ॥ ५-७ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

दक्षस्य भवप्रातिकूल्य कारणं वर्णयन् द्वितीयेनाध्यायेन भव इति ॥ १ ॥

शान्तः तपोनिष्ठः विग्रहो देहो यस्य तम् आत्मा परमात्मा वासुदेव आरामो रमणस्थानं यस्य तं कथं केन हेतुना द्विष्टः यद्वा को दक्षः कथं द्विष्ट ॥ २ ॥

यतो विद्वेषः यतो विद्वेषात्प्राणान् तत्याज एतदाख्याहि ॥ ३ ॥

तदेवाख्यातुमितिहासं प्रस्तौति पुरेति सत्रेति सत्रलक्षणं "कर्तारो बहवो यत्र हूयन्ते बहवस्तथा बहुभ्यो दीयते यत्र तत्सत्र मभिधीयते" इति अग्नयस्तदभिमानिदेवाः समेता बभूवुः ॥ ४ ॥

तत्र सत्रस्थले प्रविष्टं दक्षमिति शेषः रोचिषा तेजसा अर्कमिव भ्राजमानं महत्सदः महतीं सभां वितिमिरं यथा तथा कुर्वाणं दृष्ट्वा ॥ ५ ॥

भाषाटीका ॥

विदुर ने पूछा शीलवंतों में श्रेष्ठ श्रीशिवजी से दक्षने अपनी परम वत्सला पुत्री का भी अनादर कर के क्यों द्वेष करा ॥ १

चरा चर के गुरु निर्वैर शांतविग्रह आत्माराम जगत के बड़े देव ऐसे शिवजी से दक्षने द्वेष कैसे किया ॥ २ ॥

हे मैत्रेयजी यह श्वशुर जमाई का वैर हमसे कहो जिसके कारण सतीने दुस्त्यज प्राणोंकोभी त्यागदिया ॥ ३ ॥

मैत्रेयजी बोले पहले विश्वस्रष्टाओं के यज्ञमें बडे २ ऋषि मुनि देवता अग्नि सब अपने २ अनुचरों सहित इकट्ठे हुयेथे ॥ ४ ॥

उनकी सभामें दक्षप्रजापतिने जब प्रवेशकिया तब दक्षकी सूर्य सदृश कांति से सभा जगमगायउठी ॥ ५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

स्वधिष्ण्येभ्यः स्वीयासनेभ्यः ॥ ६ ॥ ७ ॥

प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः ॥
उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ॥ ८ ॥
श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः ।
साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात् ॥ ९ ॥
अयं तु लोकपालानां यशोघ्नो निरपत्रपः ।
सद्भिराचरितः पन्था येन स्तब्धेन दूषितः ॥ १० ॥

श्रीधरस्वामिकृत भावार्थदीपिका

प्राक्स्वोपवेशनात्पूर्वमेव निषण्णमुपविष्टं मृडं शिवं दृष्ट्वा तदनादृतस्तेनाभ्युत्थानादिभिरकृतादरः नामृष्यत्नासहत् वामं वक्रं यथा भवति तथाऽभिवीक्ष्य ॥ ८ ॥

मे वचनं श्रूयताम् अज्ञानान्मत्सराद्वा न ब्रुवतः ॥ ९ ॥

स्तब्धेनोचितक्रियाशून्येन ध्वस्तेनेति पाठे भ्रष्टेन ॥ १० ॥

श्रीराधारमणदास गोस्वामिविरचिता ।
दीपन्याख्या दीपिका टिप्पणी ।

भगवानसृष्टिनस्थश्च ॥ ६ ॥ ७ ॥

स्वोपवेशनादित्यस्योपवेशनात् तेन शिवेन ॥ ८ ॥ ९ ॥

सरस्वतीपक्षे तु यशोघ्नः परमतेजस्वित्वात् तद्यशसामाच्छादकः निर्गता अपत्रपस्त्राणं रक्षणं येषां तानपत्रान् रक्षकहीनान् पातीति तथा स्तब्धेन वेदावमन्त्रापापरिगड्जनेन कर्त्रा दूषितो वेदमार्गो येनैव हेतुना सद्भिराचरितोऽनुष्ठितः ध्वस्तेनेति पाठे भावे निष्ठा तथा च केन प्रकारेण रक्षकः सद्भिराचरितः पन्था येन पापण्डैर्दूषितस्तस्य ध्वस्तेन ध्वसन प्रकारेणेति ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

ततः स भगवान् दक्षः सदस्यैस्तैरभिः साधु यथा तथा सत्कृत पूजितः लोकगुरुमजं ब्रह्माणं प्रणम्य तस्याज्ञया निषसाद उपविष्टवान् ॥ ७ ॥

प्राक् स्वोपवेशात् पूर्वमेवागत्य निषण्णमुपविष्टं मृडं शिवं दृष्ट्वा तेन मृडेनानादृतः प्रत्युत्थानादिभिरसत्कृतो दक्षः नामृष्यत् न सेहे वामं वक्रं यथा तथा दहन्निव चक्षुर्भ्यामभिवीक्ष्य उवाच ॥ ८ ॥

उक्तिमेवाह श्रूयतामित्यादिना यज्ञभागं न लभतामित्यन्तेन हे सहाग्नयो महर्षयः! साधूनां वृत्तमाचारं ब्रुवतः कथयतो मेमम वाक्यं वक्ष्यमाणं श्रूयतां युष्माभिरिति शेषः इदं वक्ष्यमाणं वचः अज्ञानान्मत्सराद्वा न कथ्यत इत्याह अज्ञानादिति अज्ञानान्मत्सराद्वा न कथयिष्यामीत्यर्थः ॥ ९ ॥

अयं रुद्रः स्वस्नापिनिर्देष्टुमसहमानोऽयमिति सर्वनाम्ना निर्दिष्टवान् एवमुत्तरत्रापि लोकपालानां यशो नाशकः निरपत्रपः लज्जारहितः स्तब्धेन विहितधर्मपरित्यागिना मूर्खेण वा येन रुद्रेण सद्भिराचरितः अनुष्ठितः पन्था वैदिकाचारः दूषितः दोषं प्रापितः विनाशित इति यावत् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

अप्रपुत्रस्याद्रुहस्य श्वशुरस्यागमे नायं प्राकृतः पुरुष इति भावेनास्मिन्सभाबहुमान वाक्यउदानिर्माणान तस्य दक्षस्य भासा ॥ ६ ॥

सर्वोत्थानलक्षणासत्काराभावादतो निर्गमनामिह रजनहमानेनोपवेशन च समाधितमनयादृष्ट्या किमकारीति तत्र ह सदसस्पतिभिरिति ॥ ७ ॥

उपविष्टश्चेद्दुविषयकोपोऽप्युपविष्टः किं तत्राह प्राङ् निषण्णमिति सोऽमृष्यादत्यस्य किं लिङ्गं तत्राह उवाचेति ॥ ८ ॥

वृत्तं सदाचारम ॥ ९ ॥

किमिदानीं वृत्तं वक्तुं प्राप्तमत्राह अयंत्विति ॥ १० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

साधूनां वृत्तं ब्रुवतः किन्त्वज्ञानान्मत्सराद्वा न ब्रुवतः इत्यर्थः ॥ ९ ॥

क्रोधान्धतया साधूनां वृत्तानुवादमपि त्यक्त्वा साक्षान्निन्दामाह अयन्त्विति ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

प्राक् स्वोपवेशात् पूर्वमेव निषण्णमुपविष्टं तदनादृतः तेन मृडेनाभ्युत्थानादिभिरकृतादरः वामं वक्रं यथा स्यात्तथा ॥ ८ ॥

मे वचनमिति शेषः साधूनां वृत्तं चरित्रं ब्रुवतः वक्तुं प्रवृत्तस्य ममसाधूनां निन्दा स्यादेव तत्र भवद्भिरामर्षेण त्वं न प्राप्यतामिति ध्वनिः शालिनत्रायाणां यशसामपमानाभाव इव साधूनामप्यसाधुत्वाभावे दुःखं स्यात् अहंकृतजनस्य तद् साधुत्वपराधोऽपि स्यादित्यनुध्वनिः ननु शिवस्यासाधुत्वमज्ञानादेव त्वयोच्यते इति चेत्तत्र ममाज्ञानमणवपि नास्ति मत्सरस्तु मया जन्मारभ्य न परिचीयत इत्याह नाज्ञानादिति ॥ ९ ॥

अस्यासाधुत्वमेकाग्रमनसः शृणुतेत्याह लोकपालानां यशोघ्न इति । तुल्यजातीनां सतामेकस्याप्रतिष्ठा सर्वेषामेव दुर्यशो लोके उद्घुष्यत इति भावः । वस्तुतस्तु तत्र सरस्वती शिवं स्तौति यथा यशोघ्नः स्वयशसा तेषां यशांसि तिरस्कर्ता निर्गता अपत्रा त्राणं येषां तान् अशरणान् पातीति सः । केन प्रकारेणेत्यत आह येन असुरादिना सद्भिराचरितः पन्था दूषितस्तस्य ध्वस्तेन ध्वंसनेन स्तब्धेनेति पाठे स्तब्धानां गर्वितानां हन्ता येषां स्तब्धेन दूषितः पन्था येन हन्त्रैव सद्भिराचरितः ॥ १० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

स्वधिष्ण्येभ्यः स्वासनेभ्यः उदतिष्ठन् उत्थिता बभूवुः ॥ ६ ॥

एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् ॥
पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् ॥ ११ ॥
गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः ॥
प्रत्युत्थानाभिवादार्हे वाचाऽप्यकृत नोचितम् ॥ १२ ॥
लुप्तक्रियायाऽशुचये मानिने भिन्नसेतवे ॥
अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरम् ॥ १३ ॥
प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः ॥
अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन्रुदन् ॥ १४ ॥
चिताभस्मकृतस्नानः प्रेतस्रङ्न्रस्थिभूषणः ।
शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः ।
पतिः प्रमथभूतानां तमोमात्रात्मकात्मनाम् ॥ १५ ॥
तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे ।
दत्ता बत मया साध्वी चोदिते परमेष्ठिना ॥ १६ ॥

मैत्रेय उवाच ।

विनिन्द्यैवं स गिरिशमप्रतीपमवस्थितम् ।
दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे ॥ १७ ॥
अयं तु देवयजन इन्द्रोपेन्द्रादिभिर्भवः ।
सह भागं न लभतां देवैर्देवगणाऽधमः ॥ १८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

[illegible]भिः सभासदैः साधु यथा तथा सत्कृतः अजं मह[illegible]

[illegible]त्वागमुपविष्टं मृडं भवं दृष्ट्वा तेनानुत्थानादनादृतोः तामू[illegible] वामं वक्रं यथा स्यात्तथा चक्षुर्भ्यां दहन्निव अभिवीक्ष्य[illegible] ॥ ९ ॥

एतच्छ्रे[illegible] ॥ १० ॥

भाषाटीका

दक्ष के कांति से [illegible] तेज सभास्थ अग्निके सह वर्तमान, ब्रह्मा और शिव इनको [illegible] सर्व लोक अपने २ आसनों से उठते भये ॥ ६ ॥

सभा पतियों से उ[illegible] प्रकार से सत्कृत श्रीमान् दक्ष प्रजापति त्रीलोक गुरु अजको नमस्कार करके उन्हीं के आज्ञा सूं स्थित होते भये ॥ ७ ॥

अपने आगमन के पूर्वही [illegible] ऐसे श्री शिवजी को देख के परकृत अनादर को न सहते [illegible] तांई देख बडे कठिनता से बोलते भये ॥ ८ ॥

अग्नि और देव के [illegible] हे [illegible] हे साधून के बीच में अज्ञान वांदर को छोड [illegible] ॥ ९ ॥

ये लोक पालों के यश को नाश [illegible] लज्जा रहित सज्जनो ने आचरित मार्ग किया गुरु [illegible] शिवजी [illegible] दूषित कर दिया ॥ १० ॥

श्रीधरस्वामिकृत भावार्थदीपिका

तदेवाह एष इति यद्यस्माद्विप्राग्निसमक्षं सावित्रीतुल्यायामे दुहितुः पाणिमग्रहीत् ॥ ११ ॥

मृगशावस्य हरिणबालस्याक्षिणी वाक्षिणी यस्याः प्रत्युत्थानाभिवादार्हे मह्युचितं मन्मानं वाचाऽपिनाकरोत् ॥ १२ ॥

अनर्हाय कन्यादत्तेत्यनुतप्यमान आह लुप्तक्रियायेति सार्धैश्चतुर्भिः उशतीं वेदलक्षणां गिरम् ॥ १३ ॥

प्रेतावासेषु श्मशानेषु व्युप्ता विकीर्णाः केशा यस्य ॥ १४ ॥

चिताभस्मना कृतं स्नानं येन प्रेतानां स्रजो माल्यानि यस्य प्रेतस्रक नृणामस्थीनि भूषणानि यस्य शिव इत्यपदेशो नाममात्रं यस्य तमोमात्रात्मकाः केवलतमोरूप आत्मा स्वभावो येषाम् ॥ १५ ॥

उन्मादाभूता विशेषास्तेषां नाथाय दुर्हृदे दुष्टचित्ताय बतेति खेदे वास्तवस्त्वयमर्थः लुप्ताः क्रिया यस्मिन् परब्रह्मरूपत्वात् अतएवनाऽस्त्यशुचिर्यस्मात् अमानिने अभिन्नसेतवे इति च च्छेदः तस्य परमेश्वरस्य मदीया मानुषी कन्या कथं योग्या स्यादिति लज्जा [illegible] मानिच्छन्नपि तत्संबन्धलोभेन दत्तवान् शूद्रायेत्यनर्हत्वमात्रे दृष्टान्तो नहि सत्यं पूर्वापरस्ववचनविरोधापत्तेः एतदुक्तं भवात यथा कश्चिच्छूद्राय वेदमर्थलोभेन ददाति तद्वदिति प्रेतावासेष्वित्यादि सर्वं विडंवनमात्रमितीत्यमेवाह उन्मत्तवदिति अन्यथोन्मत्त इत्येव वक्ष्यत् अशिवो नास्त्यशिवो यस्मात् अमत्तोऽमत्तजनप्रिय इतिच्छेदः पतिः प्रमथभूतानामिति मकवात्सल्यमाह तामसानामपि द्रोपमशेषमपनीय पातीति नष्टा नामपि शौचे शुचिर्यस्मात् दुष्टेष्वपि येन सुमनसाऽनुकंप्या इति हृन्मनो यस्य स दुर्हृत्तस्मै बतेति हर्षे ब्रह्मणो वाक्याल्लज्जाभयादि कंपरित्यज्य दत्तेत्यर्थः ॥ १६ ॥

अप्रतीपमप्रतिकूलं यथा भवत्येवमवस्थितमविकारिणमित्यर्थः ॥ १७ ॥

देवानां यजनसमये देवैः सह भागं न लभतां किंतु तेभ्यः पूर्वमेव लभताम् अग्रभोजित्वात् यद्वा तद्भुक्तवत्सु लभताम् सर्वपोषकत्वात् तत्र हेतुः देवगणोऽधमो यस्मात्सः ॥ १८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्यदीपिकाटिप्पणी

एवमेऽशिष्यतां शिष्यलक्षणां स्नाकांक्षं पूर्वमेव प्रापः अतएवा-
न् सर्वज्ञत्वात् अतएव प्रत्युत्थानादिकं न चकारेत्यर्थः तथापि साधु-
वत्साधुतुल्यस्य मे दुहितुः पाणिग्रहीदितियत् सावित्र्या इव
तस्या गुणानदर्शेति शेषः ॥ ११ ॥

मे दुहितुः पाणिं गृहीत्वा कृपया मर्कट तुल्यचक्षुषमितोऽपि मे लो-
चकः संबंधेन द्रष्टा बभूवेति शेषः तथापि यन्मल्लक्षणां जनस्यापि
वाचा प्युक्तिं नाकरोत्तन्मां भिंगत्यर्थः ॥ १२ ॥

लुप्तक्रियायत्वाद्दातां वाहत यथं भ्रश्येव मिभिः कृतपंचीतमनि-
च्छमपि त्यदुष्णनशादेरेत्यर्थः ॥ १३ ॥ १४ ॥

चितातिपार्श्वकम अत्र च स्वार्थे प्रापमितिर्दर्शी केषांचिद्देवा-
नां तथान्महदपि पुराणान्तरप्रसिद्धा श्रेयः तत्र च हेतुस्तद्भक्तः
गोपनमेवेति ज्ञेयम् ॥ १५ ॥

हीनत्वाऽभावे हेतुः पूर्वत्रापरत्र स्तुत्यर्थेनैव व्याख्यातानि यानि
दूषणवचना न तैरपि इत्यत्रान्तस्य विरोधापत्ते हीनत्वेनायं दर्शनद्
स्यर्थः एतदुक्तं भवति दर्शनस्याय निष्कृत्यर्थः विडंबनम च देहस्य
कुत्सितत्वाद् भावार्थं भक्तानां पतार्थमनुकरणमात्रं न तु व्याख्याप्र-
तीता हेतुः इति स्वयमेवाहेति अन्यथा विडंबनाभावे ॥ अनुगृहीतुः
पितुश्च भगाः ॥ १६ ॥

अथ शीघ्रमेव ॥ १७ ॥

अप्रभंगात्वं पित्रादिकरणानाम प्रतिक्रमिति नैर्गुण्यव्युदासार्थं
बहेति नत्र पावकत्वे ॥ अत्र उच्छिष्टभागा वै रुद्र इति श्रुति रनुस-
न्धेया ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

स्तब्धतामेव प्रपंचयति एव इति द्वाभ्याम् एष रुद्रः यत् यस्मात् मेमम
शिष्यताम् उपगतः मे दुहितुः सत्याः पाणिं विप्राग्निसाक्षिकं साधुव-
दग्रहीत् साधुवदितिवतिप्रत्ययेन वस्तुतोऽसाधुरिति व्यंजितम् ११

मर्कटस्येव लोचने यस्य सोऽयं रुद्रः मृगशावस्य हरिणबालकस्य
अक्षिणी इव अक्षिणी यस्याः तस्याः सत्याः पाणिं गृहीत्वा ऊढ्वा प्रत्यु-
त्थानाभिवादनादियोग्यमपि वाङ्मात्रेणापि उचितं सत्कारं नाकृत
न कृतवान् ॥ १२ ॥

अनर्हाय कन्यां दत्तवानहमित्यनुतप्यमान आह लुप्तक्रियायेतिसार्धै
चतुर्भिः लुप्तक्रियाय लुप्तः क्रियासदाचारो येन अतएवाशुचयमानिनं
दुरहंकारिणं भिन्नसेतवे भिन्नः भ्रंशितः सेतुर्धर्ममर्यादा येन तस्मै
अनिच्छन्नपि दातुमिति शेषः अहं बालां कन्यामदां दत्तवान् यथा
शूद्राय उशतीं निर्दुष्टां वेदलक्षणां गिरं तथेत्यर्थः ॥ १३ ॥

प्रेतावासेषु श्मशानेषु घोरैर्विकृतैर्भूतगणैश्चावृतः वेष्टितः नग्नः
विवसनः व्युप्तकेशः विकीर्णकेशः उन्मत्त इव हसन्रुदंश्च अटं-
ति पर्यटति ॥ १४ ॥

चिता भस्मना दग्धनभस्मना कृतं स्नानं येन प्रेतानां स्रजो मा-
ल्यानि यस्य सः अस्थिभूषणः नृणामस्थीनि भूषणानि यस्य सः
अयं शिवोऽमंगलो नाम व्यपदेशः शिव इति व्यवहारमात्रं यस्य
स्वयं मत्तो मत्तानां जनानां प्रियश्च तमोमात्रात्मकः केवलतमोरूपः
आत्मा स्वभावो येषां तेषां प्रमथभूतानां प्रमथाख्यभूतविशेषाणां
पतिः ॥ १५ ॥

तस्मै उन्मादानां भूतविशेषाणां नाथाय दुर्हृदे दुष्टचित्ताय नष्ट

श्रीमद्वीरराघवाचार्य कृत भागवतचन्द्रचन्द्रिका ।

शौचाय आत्मारहिताय साध्वीं सतीं कन्या मया दत्ता परमेष्ठिना
चोदित आदिष्टोऽहं दत्तवानित्यध्याहारः चोदित इत्यादिना अत्रयेन
तु तद्विपरीतार्थं प्रगमया वा वर्णितमिदं ॥ केचित्तत्र लुप्तक्रियायाशुचये इत्यादि
प्रतं रुद्रान्तरपरं यथा श्रुतं व्याख्याय वा हनवस्त्वयमर्थ इत्युपक्रम्य
“लुप्तक्रियायास्मिन् परब्रह्मरूपत्वात् अतएव न शुचिर्यस्मात् अमानिनं
आभिमानमेव इति च्छेदः तस्य परमेश्वरस्य मर्यादा मानुषी कन्या
कथं योग्या स्यादिति लज्जया दातुमनिच्छन्नपि तत्संबंधलोभेन दत्तवा-
न् शूद्रायेत्यत्राहं स्वमात्र दृष्टान्तः न दानस्य पूर्वापरस्वप्नं विरोधापत्तेः
एतदुक्तं भवति यथा कश्चिच्छूद्राय वेद सर्वलोभेन ददाति तद्वदिति
प्रेतावासेष्वित्यादि सर्वं विडंबनमात्रमिति स्वयमेवाह उन्मत्तव
दिति अन्यथा उन्मत्त इत्येवाचक्षत आशयः नास्ति शिवो यस्मात्
अमत्तोऽमत्तजनप्रियः इति च्छेदः पतिः प्रमथभूतानामतिभक्तवात्स
ल्यमाह तामस्मानपि देवमशोभमपनीय पालितवानाम दुर्हृदे
स्मात् दुष्टेष्वप्येतेषु मया नुकंप्या इति हृन्मनो यस्य स दुष्टसंमतेति
सर्वे इति रुद्रस्य प्रशंसापरत्व व्याचक्षते तत्रायं वास्तवोऽर्थः किंच
स्याभिप्रेत उक्तत्वरागात्कर्तुः उक्तान्यरुपत्वाद्दशस्य कश्चित् साधुः
साधूनांधृयतो श्रुतं नाज्ञानात्म च मत्सरादिति वाक्तानिरुप्य मुपक्रम्य
तं कपालानां यशोघ्नो निरपत्रपः येन स्तब्धेन दूषितः पूर्वे शिष्यतां
प्राप इत्यादिनानिन्दितमभिप्रेतत्वात् अभवात् निन्दायामेवं यत्तात्पर्य
तिशयावगमात् अतएवाह दत्ता गिरित्राय विसृज्य गार्थे स्मारितिः
कस्यचित् क्रममस्य जंगामति निन्दापूर्व स्थापकरुणाभिर्विधिपूर्व कोऽस्माधि
निष्क्रमण इयं वक्ष्यमाणा उपपन्ना तच्छीलयः वेदान्तार्थोपबृंहणरूप-
त्वादस्य पुराणस्य वेदान्तेषु च अनपहतपाप्मा वा अहम् अस्मि, नारा-
यणाद्रुद्रो जायते, इत्यादिषु कर्मवश्यत्वकार्यत्वादिश्रवणात् तद्विरुद्धा
र्थानामत्र निबद्धुमयुक्तत्वेनतत्पुराणकर्त्रभिप्रेतत्वाभावा इत एव
ह सद्योजायत तन्मन्युः कुमारो नीललोहितः स वै रुद्र देवानां
पूर्वजो भगवान्भव न मानि कृच्छ्रपातः! कथानानि च जगत्पत इति
वेदान्तार्थानुसारेण कार्यत्वकर्मवश्यत्वचतुर्मुखकुलनामकथनादि
मत्त्वमुपबृंहितं कश्चिद्भ्रमलक्ष्यादिकं प्रतीयमानं १८ न्याय एतान्यथा
व्युपपन्नमिति पूर्वमेव प्रतिपादित ततृतीयः अथ समूलकस्मात् नि-
दापरप्रशंसार्थे यथाकथंचिद्दर्शितार्थपर्यवसानं करणं सर्वत्रापे-
क्षमेव स्यादिति स्तुतिनिंदयोर्व्यवस्थानुपपत्तेः यदप्युक्तं लुप्तक्रिया
यस्मिन् परब्रह्मरूपत्वादिति तदयुक्त परब्रह्मत्वेऽपि रामकृष्णाद्यवतारेषु
लुप्तक्रियात्वादर्शनेन हेतोर्व्यभिचारात् अमानिनं अभिमानमेव इति
पदच्छेद इत्यप्ययुक्तं साद्भिराचरितः परायेन स्तब्धेन दूषित
इति यन्मभागेनलमतोर्दैवप्रगणाधम इति पूर्वोत्तर व्याघातात्
तस्य परमेश्वरस्य मर्यादा मानुषी कन्येत्यप्ययुक्तं भव-
तत्त्वयोरुभयोरपि चतुर्मुखात्प्रसूतः न दत्तकन्याया मानुषी-
त्वासंभवात् मनोर्जातावन्यतो दुक्षेति हि मानुषशब्दो व्युत्पादितः
तामस्मानपि देवमपनीय पालित्याद्यपि मेवं तानहं क्षिपतः क्रूरान्संसा
रेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु आसुरीं योनि-
मापन्ना मूढा जन्मनि जन्मनि मामप्राप्यैव कौन्तेय ततो यान्त्यधमां
गतिमिति तामस्मानां निग्रहापकरणाना तत्स्मात्यथोक्त एवार्थः ॥ १६ ॥

स दक्षः अप्रतीपं अप्रतिक्रियमुदासीनमवस्थितमासीनं गिरि-
शमेवमुक्तविधया विनिंद्य अप उपस्पृश्य आचम्येत्यर्थः क्रुद्धः
शप्तुं प्रचक्रमे उपक्रान्तवान् ॥ १७ ॥

अयं भवो रुद्रः तु हेतोः यतः देवगणाधमः सर्वेभ्यो देवेभ्योऽधमः

श्रीमद्वीर[illegible]राघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

अतः इन्द्रादिभिर्देवैः सह देवयजने दर्शादिदेवयागे यज्ञभागं न लभतां मे शप्तत्वात् ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

[illegible] शिवस्य दृश्यमानविपरीतत्वं कथमत्राह पत [illegible] एवं बृहद्व्यवहार इति धातोः पाणिं ग्राहयित्वामुत्था-[illegible] पूर्वमेवाश्यवत् ॥ ११ ॥

मृगशावाक्ष्या मृगपोतः मर्कटस्येव इव लोचनं यस्य स तथा के-[illegible] ॥ १२ ॥

[illegible] लौकिकमर्यादाय उशतीं गिरं पौरुषेयत्वाविशेषराह-[illegible] ॥ १३ ॥

[illegible] कारणादशुचित्वमुक्तं न तु [illegible] दित्याह प्रेतावास-[illegible] मुक्तकेशः ॥ १४ ॥

[illegible] श्मशानभस्मना कृतं स्नानं येन स तथा प्रेताना-[illegible] नरकपालास्ता एव भूषणानि यस्य स तथा [illegible] नाम यस्य स तथा स्वयमपि अशिवोऽशुद्धो [illegible]

[illegible] केवलं तमोगुणस्वरूपं मनो येषां ते तथा [illegible] ॥ १६ ॥

[illegible] गणिताः किं तु स्वानर्थहेतुः शापो-[illegible] मिति अप्रतीपमप्रतिपक्षम् ॥ १७ ॥

[illegible] भिर्देवैः सह देवयजने यज्ञभागं न लभतामित्यन्वयः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ॥

शिष्यत्व[illegible] ॥ ११ ॥ १२ ॥

यथा शूद्रो [illegible] कश्चिदनिच्छन् परवश्यः सन्नेव ददाति तथाहमप्यनिच्छ[illegible] ममहतं बालामदां । का[illegible] किन्तु इच्छ[illegible] त्यर्थः [illegible] ॥

[illegible] भगवत्प्रेमोन्मादमयं ज्ञेयम ॥ १४ ॥

चितेति सार्धकम् [illegible] दिकञ्च प्रार्थमिश्रवैष्णवानामेवोत पुराणान्तरप्रसिद्धम् ॥ [illegible] ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

एव इति निन्दा [illegible] अशिष्यतां अशिष्यत्वं एता वद्विमपर्यन्त गुणानपि [illegible] त्वात् प्रथममेवागतत्वान् मया प्रत्युत्थानादिकं न कृतं [illegible] । तदपि यद्यहितुः पाणिमग्रहीत् तत् सावित्र्या इव [illegible] गुणामालक्ष्येति भावः मम कीदृशस्य साधुवत् [illegible] साधोः ॥ ११ ॥

प्रत्युत्थानाभिवादार्हे [illegible] उचितं सन्मानं न अकृत नाकरोत् । स्तुतिपक्षे मर्कटे न मर्कटतुल्यान् कामिनोऽपि । कृपया लोचते तत् कामान् [illegible] । इत्थम् प्रत्युत्थानाभि-वादार्हे महत्तमो जनः [illegible] तेति धिक्कमामिति भावः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी

उशतीं वेदलक्षणां गिरं स्तुतिपक्षे तु लुप्तः क्रिया शास्मकः पर-ब्रह्मरूपत्वात् नास्ति शुचिर्यस्मात् अमानिन अभिन्नमेतव इतिच्छेदः स्वयोग्यता वध्वा दातुमनिच्छन्नपि अदां यथा शूद्रा एव उशतीं वेदलक्षणां गिरं वदति अध्यापयन्ति च लोपस्याभावो वैकल्पिकत्वात् ॥ १३ ॥

प्रेतावासेष्वित्यादिकं सर्वं भगवत्प्रेमोन्मादमयं लीलामात्र--मिति स्वयमेवाह उन्मत्तवदिति अन्यथा उन्मत्त इत्येवावक्ष्यत् ॥१४॥

स्तुतिपक्षे चितेत्यादिकं प्रार्थमिश्रवैष्णवानामेवेति पुराणान्तर प्रसिद्धं अपदेशा कपकृपा देशा अपि शिवा मंगला यतः स न वि-द्यते शिवं मंगलं यतः सः तमोमात्रात्मकः तमोमात्र स्वरूपा आत्मनो येषां स्तुतिपक्षे स्वेच्छया लीलेयं शम्भार्यस्तामसानपि कृपया स्वीकरोतीति ॥ १५ ॥

परमेष्ठिना ब्रह्मणा चोदिते प्रेरिते सतीति ममेच्छा नासीत् ब्रह्माज्ञापालनमेव मद्दुःखदमभूदिति ब्रह्माप्यनभिज्ञ इति ध्वनिः मत्-पित्रेत्यनुक्तेः परमेष्ठिनेति नामोच्चारणेन च सोऽपि मत्पितृत्वायोग्य एवेत्यनुध्वनिः । स्तुति पक्षे कृपयाउन्मादानां गणानामपि नाथाय नष्टानामपि शौचं यतः । दुष्टेष्वपि दूत कृपामयं मनो यस्य तस्मै ब्रह्मणा वाक्यादयोग्येनापि मयादत्तेत्यर्थः ॥ १६ ॥

अप्रतीपमजातशत्रुम् ॥ १७ ॥

अयाम्यात । स्तुतिपक्षे देवयजने यज्ञे देवैः सह भागं न लभतां तत्र हेतुः देवगणा अधमा यस्मात् सः । तदधमैः सह भोजनमनुचितं अतः सर्वपावकत्वात् तान् भोजयित्वा भागं लभतामिति भावः ॥ १८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

यद्यतो मे सावित्री तुल्या या दुहितुःपाणिमग्रहीदतो मे शिष्यतो प्राप्तः ॥ ११ ॥

मृगशावस्याक्षिणी इवाक्षिणी यस्यास्तस्याः उचितं सत्कारं वाचापि नाकृत न कृतवान् ॥ १२ ॥

साधुवदित्यनेनायमसाधुरिति सूचितं भवस्यासाधुत्वं दर्शयन् असाधवे साध्वी दत्तेत्याह सार्धैश्चतुर्भिः लुप्तेति अनिच्छन्नपि बालामदाम दत्तवान् उशतीं वेदलक्षणाम ॥ १३ ॥

व्युप्तकेशः विकीर्णकेशः प्रेतावासेषु श्मशानेषु उन्मत्तवत् हसन् रुदन् नग्नः अटति भ्रमति ॥ १४ ॥

प्रेतसृक् प्रेतानां सृजो यस्य सः नास्थिभूषणः नृणामस्थीनि भूषणानि यस्य सः शिव इत्यपदेशो नाम मात्रं यस्य सः तमोमात्रात्मकः केवलतमो रूप आत्मा स्वभावो येषां तेषां पतिः तेषु मुख्य इति भावः ॥ १५ ॥

य उक्तप्रकारस्तस्मै उन्मादनाथाय अत्युन्मत्ताय परमेष्ठिना चोदिते सति साध्वी सर्वथा तद्विपरीतस्वभावेति यावत् दत्ता ॥ १६ ॥

स अयं श्वसुरत्वादिना गुरुः अयं जामातृत्वादिना शिष्य इति लोकव्यवहारात्मकः गिरिशो नावशलोकव्यवहारातीतम अप्रतीप-मप्रतिकूलं यथा स्यात्तथाऽवस्थितमप्येवं विनिंदाय उपस्पृश्या-चम्य शप्तुं प्रचक्रमे ॥ १७ ॥

निषिध्यमानः स सदस्यमुख्यै र्दक्षो गिरित्राय विसृज्य शापम् ।
तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनम् ॥ १९ ॥
विज्ञाय शापं गिरिशानुगाऽग्रणीर्नंदीश्वरो रोषकषायदूषितः । *
दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः ॥ २० ॥
य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ।
द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ॥ २१ ॥
गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया ।
कर्मतंत्रं वितनुतां वेदवादविपन्नधीः ॥ २२ ॥
बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः ।
स्त्रीकामः सोऽस्त्वतितरां दक्षो बस्तमुखोऽचिरात् ॥ २३ ॥
विद्याबुद्धिरविद्यायां कर्ममय्यामसौ जडः ।
संसरंत्विह ये चामुमनु शर्वावमानिनम् ॥ २४ ॥
गिरः श्रुतायाः पुष्पिण्या मधुगन्धेन भूरिणा ।
मथ्ना चोन्मथितात्मानः संमुह्यंतु हरद्विषः ॥ २५ ॥
सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः ।
वित्तदेहेंद्रियारामा याचका विचरंत्विह ॥ २६ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

देवयजनं देवोद्देश्ययज्ञकर्पणं ॥ १८ ॥

भाषाटीका ।

ये मेरे शिष्य भावको प्राप्त है ब्राह्मण अग्नि के सामने इसने गायत्री तुल्य मेरी बेटी का साधु कि नाई पाणि ग्रहण किया ॥११॥

इस बांनर समान दृष्टि वाले ने मृग बालक समान नत्र वाली मेरी सुताका पाणि ग्रहण किया उठ के नमस्कार तो दूर रहा मेरा वाणी से भी उचित सत्कार नहीं किया ॥ १२ ॥

सर्व क्रिया हीन अपवित्र मानी सेतु तोडने वारे, को इच्छा नथी तौ भी मैने कन्या दी जैसे शूद्र को वेद वाणी दे दे ॥ १३ ॥

घोर मर्घट मे रहने वारे प्रेत भूत गण साथ रखने वारे उन्मत के नाई नंग बार खोले हंसते रोवते चिता के भस्म में सदा स्नान करे है प्रेतनकी मुडमाला हाडों के भूषण पहिने हैं नाम के तो शिव हैं परंतु अशिव हैं मत्त है इन को मत्त जन प्रिय है तमोमय प्रमथादि भूतन का ये पति है ॥ १४ ॥ १५ ॥

भूतों का नाथ शौच त्यागी दुष्ट हृदय इसको विरंचि के कहने से मेने साध्वी बेटी दी ॥ १६ ॥

मैत्रेयजी बोले ॥ अपने अप्रतिकूल बैठे श्री शिवजी को ऐसी निंदा कर क्रोधी दक्ष आचमन कर शाप देते भये ॥१७॥

ये शिव देव यज्ञ में इंद्रादिकन के साथभागन लेने पावे ये देव गण में अधम है ॥ १८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

सदस्यैस्तस्मात्स्थानाद्विनिष्क्रम्य जगाम हे कौरव्य ! ॥ १९ ॥

गिरिशस्यानुगानामग्रणीर्मुख्यः रोषएव कषायस्तेन दूषितः आरक्तनेत्र इत्यर्थः तस्य गिरिशस्य वाच्यतां वचनानर्हतां निंद्यतामित्यर्थः तेभ्योऽपि शापं विससर्ज ॥ २० ॥

दक्षं शपति सार्द्धैस्त्रिभिः एतन्मर्त्यं देहधारीमुद्दिश्य श्रेष्ठं मत्वा अप्रतिद्रुहि प्रतिद्रोहमकुर्वति पृथग्दृष्टिर्भेददर्शी तत्त्वतः परमार्थात् २१

अज्ञत्वमेवाह गृहेष्विति कर्मतंत्रं कर्मपरिकरं वेदे येवादा अर्थवादा अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादयस्तैर्विपन्ना विनष्टा धीर्यस्य ॥ २२ ॥

परो देहादिस्तमेवाऽऽत्मत्वेनाभितोध्यातुं शीलं यस्यास्तया बुद्ध्या विस्मृताऽऽत्मनो गतिस्तत्त्वं येन अतः पशुतुल्यः अतितरां स्त्रीकामोऽस्त्विति द्वितीयः शापः बस्तस्य मुखमेव मुखं यस्येति तृतीयः शापः ॥ २३ ॥

अयं च शापोऽस्यानुरूप एवेत्याह विद्याबुद्धिः इयमेव तत्त्वमिति बुद्धिर्यस्य अतोऽसौ जड एव द्विजान् शपति संसरंत्विति अमुं दक्षं शर्वमवमन्यत इति तथा तममुं दक्षमनु ये चाहुस्ते ते संसरंतु जन्ममरणाद्यनुभवंत्वित्येकः शापः ॥ २४ ॥

श्रुतायां वेदरूपायाः पुष्पिण्याः पुष्पाणीवार्थवादा मनः क्षोभकत्वात् अर्थवादबहुलाया इत्यर्थः मधुगंधतुल्येन प्ररोचनेन मथ्ना मनः क्षोभकेनोन्मथितमात्मा मनो येषां ते संमुह्यंतु कर्मस्वासक्ता भवंत्विति द्वितीयः शाप ॥ २५ ॥

सर्वभक्षा भक्ष्याभक्ष्यविचारशून्याः वृत्त्यै देहादिपोषणाय धृतानि विद्यातपोव्रतानि यैः वित्तादिष्वेवाऽऽरामो रतिर्येषां ते याचकाः संतो विचरंत्विति शापचतुष्टयम् ॥ २६ ॥

पा० * रूषित इति वीरराघवीय पाठः ॥

[illegible]धारमणदासगोस्वामि विरचिता
[illegible]गोविन्याख्यार्थदीपिका टिप्पणी ॥

[illegible] प्रदर्शनार्थं हेकोरव्यंति संबोधनम् ॥ १९ ॥

[illegible] रक्तवर्णत्वात्तत्वेन रूपणे व्यङ्ग्यार्थमाह मा-
[illegible] ॥ [illegible]

[illegible] न भवतीति भेददर्शी २१

[illegible] दवदकर्मफलासक्तत्वात् अर्थवादानां प्रशंसामात्रपर-
[illegible] त्वाभावात् ॥ २२ ॥

[illegible] सार्थकम् ॥ २३ ॥

[illegible] दुःखप्रापकः अतः विपरीतबुद्धित्वात् अतएव
[illegible] कम् अनुवर्तते अनुकूलतया मिंदति ॥ २४ ॥

[illegible] फलत्वादिति साधर्म्यंच्छाः प्ररोचनेन स्वर्गजनकेन
[illegible] अप्सरोभिस्सह विहरिष्याम इत्यादिना उन्मथितः
[illegible] ति द्वितीयःशापः ॥ २५ ॥

[illegible] विचारभूष्या इति तृतीयः वृत्त्यै भृतविद्येत्यादिविशेष-
[illegible] तः विचरंतु इह शूद्रादीनां गृहे गृहं इति विशिष्टश्च-
[illegible] २६ ॥

[illegible]राघवाचार्यकृत भागवतचंद्रचंद्रिका ॥

[illegible] र! स दक्षः सदस्यमुख्यैः सभ्यश्रेष्ठैर्निषिध्यमानः
निवार्यमाणः [illegible] मन्युः क्रोधो यस्य सः गिरित्राय रुद्राय
शापं [illegible] भागीनां गरूवं विसृज्य तस्मात्सत्रदेशात् बहिर्निगत्य
स्वीयं [illegible] गृहं प्रति जगाम ॥ १९ ॥

गिरि[illegible] नुगामी [illegible] पार्षदानां अग्रणीर्मुख्यः नन्दीश्वरः दक्षविसृष्टं
शापं [illegible] रोष [illegible] कषायस्तेन रूषितः आरक्तनेत्र इत्यर्थः दक्षाय
दारुणं [illegible] विससर्ज तथा तस्य रुद्रस्यावाच्यतां वचनानर्हतां विनि-
ध तां ये [illegible] द्विजा अन्वमोदन् अभ्यमन्वन् तेभ्यश्च शापं वि-
ससर्जेत्यर्थः [illegible] ॥

तत्र [illegible] लोकैस्त्रिभिः यो दक्षः अज्ञः देहादिविलक्ष-
णात्मज्ञानरहित [illegible] पृथग्दर्शिब्रह्मात्मकस्वतंत्रवस्तुदर्शी अप्र-
तिद्रुहि प्रति [illegible] भगवदंशावताररूपे भवे मर्त्य
मुद्दिश्य मरणा[illegible] नाशमुद्दिश्य केवलनिकृष्टमज्ञात्वेत्यर्थः द्रुह्यति
अपकरोति एतत् [illegible] त्स्यात् एतामिति पाठे एतं भवं मर्त्य-
त्वेन ज्ञात्वेत्यर्थं स [illegible] प्रकृतिपुरुषेश्वरयाथात्म्यात् विमु-
खः पराङ्मुखः भवे[illegible] ज्ञानरहितो भवेदित्यर्थः अयं प्रथमः
शापः ॥ २१ ॥

एवं तत्वज्ञैमुख्य[illegible] विसृज्य तत्कार्यरूपमतात्विकलोक
कर्माभिरुचिरूपं शापं [illegible] ति कूटधर्मेषु अविचाल्या-
नि कर्माणि येषु प्राकृतजनाः [illegible] वादार्थकर्मस्विति यावत् गृहेषु
ग्राम्यसुखेच्छया सांसारिक [illegible] सुखेच्छया सक्तः अत एव
वेदवादैः अल्पास्थिर [illegible] कर्माणि अनंतस्थिरफलसाधन
त्वेन प्रोचयद्भिः "अ[illegible] सोमम् [illegible] भूम" "अक्षय्यं ह वै चातुर्मा
स्ययाजिनः सुकृतं भवति" इत्यादि[illegible] वादैर्विपन्ना विनष्टा धीर्बुद्धि-
र्यस्य सः कर्मतंत्रं कर्मक [illegible] अल्पास्थिरफलसाधनकर्माणि
कुर्यादित्यर्थः अयं द्वितीय [illegible] ॥ २० ॥

परोक्षेत्यादि: तमवात्म[illegible] आत्मस्यास्तया बुद्ध्या वि-
स्मृता आत्मगतिः जीवात्म[illegible] गतिर्येन अत एव पशुः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

पशुतुल्यः अत एवातितरां नितरां स्त्रीकामः स दक्षः आचिरादीशु ब-
स्तमुखः बस्तस्य मेषस्य मुखमिव मुखं यस्य सः अस्तु भवेत् ॥ २३ ॥

तथा कर्ममय्यां कर्मात्मिकायां आविद्यायामियमेव विद्येति तत्र
विद्येति बुद्धिर्येषां अत एवासौ दक्षः अजः अजतुल्यः पशुप्रायः
अस्तु स्यादिति तृतीयःशापः अथ रुद्रावमानिनो दक्षानुकूलान् द्विजान्
शपति संसरंत्विति सार्द्धद्वयेन शर्वं रुद्रं अवमन्यत इति शर्वावमा
नी तममुं दक्षमनुसृत्य ये बहवस्तद्गतशापाभिनंदिन इत्यर्थः ते इह
लोके संसरंतु जन्ममरणादिभाजो भवंतु अयं प्रथमः शापः ॥ २४ ॥

ये हरद्विषः ते पुष्पितया पुष्पमात्रफलया आपातरमणीयायाइत्य-
र्थः यद्वा पुष्पवन्मनः शोभकत्वादर्थवादा पुष्पशब्देन विवक्षिताः
पुष्पितयाइत्यत्र तुलाया इत्यर्थः अथवा पुष्पगंधवत्तदाभासोपभो-
ग्यस्वर्गादिसुखप्रकाशिकायाः श्रुतायाः वेदपूर्वभागरूपाया इत्यर्थः
यामिमां पुष्पितां वाचमित्यादिवत् मध्वा मनःक्षोभकेन भूरिणा
मधुगंधेन मधुगन्धतुल्येन स्वर्गादिसुखप्रकाशनेन उन्मथितं क्षोभि-
तं आत्मा मनः येषां ते हरद्विषस्तत्सं मुह्यंतु मोहं प्राप्नुवंतु नित्यानि
त्यधर्माधर्मादिषु सर्वत्र विपरीतज्ञाना भवंत्विति द्वितीयः शापः
॥ २५ ॥

सर्वभक्षाः सर्वं अविहितमप्रतिषिद्धनिषिद्धम् भक्ष्यं येषां ते
हर द्विषो द्विजा वृत्त्यै केवलशरीरापत्यकलत्रादिपोषणायैव धृतानि
विद्यातपोव्रतानि यैस्ते वित्तदेहादिष्वेवारामो रतिर्येषां ते याचकाः
संतो विचरंत्विति तृतीयः शापः ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

ततः किमकारि दक्षेणेति तत्राह निषिध्यमान इति ॥ १९ ॥

एवं दक्षेण शापे शिवाय दीयमाने सति कोपि शिवभक्तस्तम-
सहमानोभूत्किं तत्राह विज्ञायेति रोषनाम्ना कषायेण वह्निना दूषि-
तः तस्य शिवस्यावाच्यतां दोषलक्षणाम् ॥ २० ॥

कोयं शापो दत्त इति तत्राह य एतदिति एतत् मर्त्यं शारीरमध्र
ध्वो वा नश्वरमुद्दिश्य अप्रतिद्रुहि द्रोग्धारं प्रत्यद्रोहकर्तरि भगवति
भक्त्यादिसौभाग्यवति द्रुह्यति वचनादिनेति शेषः तत्त्वतो यथार्थ-
ज्ञानाद्विमुखो बहिर्मुखो भूयादित्यन्वयः ॥ २१ ॥

न केवलं बहिष्कृततत्त्वज्ञानः किंतु श्रीमायया अविवक्षकर्म-
व्यापारेषु मग्नश्च स्यादित्याह गृहेष्विति वेदवादेन स्वर्गादिषु पुष्प-
वादिर्वेदवाक्येन विपन्ना नष्टा धीर्यस्य स तथा अत्र तत्त्वज्ञानविष-
यः शापस्तात्कालिक एव न तु चिरकालीनः विष्णुवाक्यस्यैव चि-
रकालीनत्वात् तदुक्तं ये ज्ञानविषयाः शापा मुक्तिगाश्चाधिकारिणां
कादाचित्कास्ते भवंति नैवते सार्वकालिकाः । तेषां ज्ञानस्य मुक्तेश्च
तारतम्यस्य चैव हि भगवन्नियतत्वात् शापादिर्नात्र कारण-
मिति ॥ २२ ॥

इतोपि तात्कालिक एव शाप इति भावेन दक्षस्य शापविशेषं
मुञ्चति बुद्ध्येति परामिध्यायिन्या निरंतरशब्दादिविषयचिंतका
तरया बुद्ध्या विस्मृतात्मगतिर्विस्मृतपरमात्मगतिः विस्मृतपरमात्म
ज्ञानः पशुर्विवेकशून्यः अतितरां स्त्रीकामः स दक्षोऽचिरात् बस्तमु
खोऽस्त्वित्यन्वयः ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

इतीपतिरंबाह विद्या बुद्धिरिति अजो दक्षः अविद्यायां विद्या बुद्धिरस्त्विति शेषः शंकरद्वेषिणां च शापविशेषमाह संसरंत्विति ॥ २४ ॥

संसारे कारणमाह गिरेरिति पुष्पितया: स्वर्गादिपुष्पप्रतिपादिकाया: गर्भीकृतमुक्तिफलाया: कालकूटनिगिरणात् दैत्याख्यपापनिगिरणाच्च गिरिर्मुख्यप्राणस्तेन शिष्यप्रशिष्यादिषु प्रणीतत्वेन व्याख्यातत्वेन च तस्य सुताया वेदवाचो भूरिणा बहुलेन मधुगंधेन विषय सुखलक्षणमकरंदपरिमलेन मध्वा काममान्मथिता विलोडित आत्मा मनो येषां ते तथोक्तास्ते हरद्विषः संमुह्यतु । मोक्षफलप्रतिपादकवेदतात्पर्यापरिज्ञानेनात्मनः स्वर्गादिरेव परमश्रेयोऽस्त्विति विपरीतज्ञानं गच्छंत्वित्यन्वयः मुहवैचित्य इति धातोर्वैचित्यं विपरीतज्ञानं "गिरिःप्राणःसमुद्दिष्टस्तत्सुतावेदवाक्स्मृता । पुष्पं स्वर्गादयः प्रोक्ताः फलं मोक्ष उदाहृत,, इतिवचनात् उक्त पदार्थानामयइति अमंगो मन्मथोमन्था: कामोगज्ञ उदाहृतइत्यभिधानात् ॥ २५ ॥

दुर्लिङ्गषां शापान्तरमपि विसृजति सर्वभक्षा इति पञ्चांङ्गादिसर्वभक्षाहस्यै जीवनाय । अधर्मायेति शेषः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तद्वचतामिति चितसुखः ॥ २० ॥

पृथग्दृष्टिः भगवानयं न भवतीति नीचदृष्टिः ॥ २१ ॥

वितनुतां वदत्यत्र वितनुताद्वदति कश्चित् ॥ २२ ॥

बुद्धचेति साङ्कम ॥ २३ ॥

असावज इति कश्चित् संसरन्त्विवत्यङ्कम ॥ २४—२७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

अत्र मदग्ये युक्तवादिनः केऽपि न दृश्यन्ते । तदस्यामधार्मिकप्रकुलायां सभायां न स्थातुमुचितमिति कोपेन ततो निर्ययावित्याह निषिध्यमानः माकुध्य मागच्छेत्याद्युच्यमानः ॥ १६ ॥

रोष एव कषायस्तेन दूषितः, अतिरक्तनेत्र इत्यर्थः । येच तस्य गिरिशस्य अवाच्यतां निन्दां अन्वमोदंस्तेभ्योऽपि ॥ २० ॥

दक्षं शपति सार्द्धैस्त्रिभिः य इति एतद्दक्षशरीरं मर्त्यं मरणधर्मकं उद्दिश्य एतदेवाहमित्यभिमानास्पदीकृत्य द्रुह्यति असौऽज्ञो भवेत् । अज्ञत्वमेव प्रपञ्चयति पृथग्दृष्टिः स्वतः पृथग्भूतेषु देहापत्यकलत्रादिष्वेव दृष्टिर्यस्य सः तस्मात्तत्त्वतो भगवतः सकाशात् विमुखो भवेत् इति प्रथमः शापः ॥ २१ ॥

वेदेषु ये वादा अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादयस्तैर्विपन्ना धीर्यस्य सः ॥ २२ ॥

परो देहादिस्तमेवात्मत्वेनाभिनो ध्यातुं शीलं यस्यास्तया बुद्ध्या पशुः पशुतुल्यः स्त्रीकामोऽस्त्विति द्वितीयः शापः । वस्तस्य छागस्य मुखमिव मुखं यस्येति तृतीयः शापः ॥ २३ ॥

शापत्रयमिदमस्मै समुचितमेव यतो विद्याबुद्धिरित्यादिरतो जडः । अज इति पाठे छागतुल्यः द्विजानपि शपति सार्द्धद्वाभ्यां । अमुं दक्षं ये चानुवर्त्तन्ते ते संसरन्तु इत्येकः शापः ॥ २४ ॥

श्रुताया वेदरूपायाः पुष्पितयाः पुष्पतुल्यार्थवादबहुलाया मधुगन्धतुल्येन प्ररोचनेन मध्वा मनःक्षोभकेण च उन्मथितः आत्मा मनो येषां ते समुह्यन्तु कर्मस्वासक्ता भवन्त्विति द्वितीयः ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

सर्वभक्षाः भक्ष्याभक्ष्यविचारशून्या इति तृतीयः । वृत्त्यै जीविकार्थमेव नतु धर्मार्थमिति चतुर्थः । विचरंत पञ्चमः । याचकाः इति षष्ठः ॥ २६—२८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तस्मात्स्थानात् ॥ १९ ॥

रोष एव कषायः विकारहेतुस्तेन दूषितो विकृतः । द्विजाःतस्य शिवस्याऽवाच्यतां निन्दामन्वमोदन्तेभ्यश्च ॥ २० ॥

तत्र दक्षं प्रतिशापमाह य इतिसार्द्धैस्त्रिभिः मर्त्यं देहं पृथगनात्मनि देहे दृष्टिः आत्मबुद्धिर्यस्य सः अप्रतिद्रुहि प्रति द्रोहरहिते भगवति द्रुह्यति योदक्षः सतत्त्वतो विमुखो भवेत् तत्त्वज्ञानरहितो भवेत् ॥ २१ ॥

कूटधर्मेषु कूटाः वंचनावहुलाः धर्मायेषु तेषु गृहेषु कर्मतंत्रमैहिकामुष्मिकफलकं कर्मपरिकरं ननुतां विस्तारयतु वेदवादैः रोचनार्थाभिः फलश्रुतिभिः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिभिः विपन्ना इष्टार्थाद्भ्रष्टा धीर्यस्य सः ॥ २२ ॥

परं देहादिकमेवात्मत्वाभिनाऽभिनो ध्यातुं शीलं यस्यास्तया विस्मृताऽऽत्मनोरुपास्योपासकस्वरूपयोर्गतिर्येनसवस्तमुखश्छाग वदनः ॥ २३ ॥

द्विजान्प्रति शापमाह संसरंत्विति सार्द्धद्वाभ्याम यः भवमन्यत इति शर्वावमानी तममुं दक्षं ये अनु अनुवर्तिनः इत्यो शापाभिनंदिनः तेपि संसरंतु जन्ममरणाद्यनुभवंतु ॥ २४ ॥

श्रुतायां श्रुतिरूपायाः पुष्पितयाः पुष्पवलताबद्रुचिरमकायाः गिरो मधुगंधेन मधुगंधवन्मनोहरेण प्ररोचनेन मध्वा मनःक्षोभकेन उन्मथितः आत्मा मनो येषां ते संमुह्यंतु हेयोपादेयविवेकहीना भवंतु ॥ २५ ॥

वृत्त्यै जीविकायै धृतानि विद्यादीनि येस्ते वित्तदेहदारारामो रतिर्येषां ते ॥ २६ ॥

भाषाटीका ।

हे (कौरव्य) हे परीक्षित! सभा के लोगों ने निषेध भी किया तो भी दक्ष शिवजी को शाप देकर वहां से निकल के बडे क्रोध से भरा अपने घर को चलागया ॥ १९ ॥

शाप दिया जान के शिवजी के पार्षदाग्रणी नंदिकेश्वर रोष से आरक्त नेत्र होकर दक्षको कठिन शाप देते भये, जो ब्राह्मण शिव संबंधि अवाच्यताको अनुमोदन करते रहे उनको भी शाप देते भये ॥ २० ॥

जो कोई दक्षको श्रेष्ठ माने है अद्रोही भगवान शिवजी से द्रोह करेगा वो अज्ञानी भेद दृष्टि से तत्त्वज्ञान से विमुख होवे ॥ २१ ॥

कुधर्म गृहो में ग्राम्य सुख की इच्छा कर के जो आसक्त हो वो वेदवादो में नष्टबुद्धि हो कर कर्मतंत्र को मुख्यमाने है ॥ २२ ॥

देहादिकों को ईश्वर मानने वाली बुद्धि से पशुवत् ईश्वर की गति भूल स्त्रीकामी दक्ष थोरे काल में बकरा मुख होवे ॥ २३ ॥

तस्यैवं ददतः शापं श्रुत्वा द्विजकुलाय वै ।
भृगुः प्रत्यसृजच्छापं ब्रह्मदंडं दुरत्ययम् ॥ २७ ॥
भवव्रतधरा येच येच तान्समनुव्रताः ।
पाषण्डिनस्ते भवंतु सच्छास्त्रपरिपंथिनः ॥ २८ ॥
नष्टशौचा मूढधियोजटाभस्मास्थिधारिणः ।
विशंतु शिवदीक्षायां यत्र दैवंसुरासवम् ॥ २९ ॥
ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ ।
सेतुं * विधारणं पुंसामतः पाषंडमाश्रिताः ॥ ३० ॥
एष एव हि लोकानां शिवः पंथाः सनातनः ।
यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः ॥ ३१ ॥
तद्ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम् ।
विगर्ह्य यात पाषंडं दैवं वोयत्र भूतराट् ॥ ३२ ॥

मैत्रेयउवाच ।

तस्यैवं ददतः शापं भृगोः सभगवन्भवः ।
निश्चक्राम ततः किंचिद्विमना इव सानुगः ॥ ३३ ॥
तेऽपि विश्वसृजः सत्रं सहस्रपरिवत्सरान् ।
संविधाय महेष्वास ! यत्रेज्यऋषभो हरिः ॥ ३४ ॥
आप्लुत्यावभृथं यत्र गंगा यमुनयाऽन्विता ।
विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां दक्षशापोनाम
द्वितीयोऽध्यायः ॥ २ ॥

भाषाटीका

बिया बुद्धि [illegible] अर्थों में ये जड़होय जिनोंने शिवजी को अपमान कीनो [illegible] आज्ञा को प्राप्त हो ॥ २४ ॥

पुष्प के समान [illegible] वाली [illegible] मनमोहक अर्थ वाद्वाक्यों से मूढहुवे शिवजी [illegible] माया में ही आसक्त रहें ॥ २५ ॥

ब्राह्मण, [illegible] विद्या तप व्रत करेंगे भक्ष्याभक्ष्य विचार शून्य होवेंगी, [illegible] सुखको या जग में मांगते डोलेंगे ॥ २६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

प्रत्यसृजत्प्रत्यद [illegible] शापरूपंब्रह्म [illegible] ॥ २७ ॥
सच्छास्त्रपरिपंथिन प्रतिकूलाः ॥ २८ ॥
सुरासवं [illegible] मादयीच [illegible] दिसंभवंमद्यम् [illegible] क्यात्वं [illegible] दैवं [illegible] धनावदान [illegible] ॥ २९ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ब्रह्मवेदम कथंभूतम सेतुंमर्यादारूपम तदेवाह पुंसांवर्णाश्रमाचारवर्णविभागधारकम ॥ ३० ॥

सेतुत्वप्रपंचयति द्वाभ्याम एषवेदलक्षणएवशिवः पंथाः यंपूर्वे ऋषयोऽनुसंतस्थुराश्रितवंतः यस्मिन्जनार्दनःप्रमाणंमूलम् ३१।

भूतराड्भूतानांतामस्मानांपतिः ॥ ३२ ॥

अन्योन्यशापेनोभयोर्नाशाद्विमनाइवेति तथाऽपिभगवदनुग्रहेतानांनाशांनस्यादितिभावः ॥ ३३ ॥

ऋषभः सर्वश्रेष्ठोहरिर्यत्रईज्यः पूज्यः तत्सत्रंसम्यग्विधाय हेमहेष्वास ! विदुर ! यत्रप्रयागेऽन्विताततत्रावभृथस्नानंकृत्वाततःस्थानाययुः ॥ ३४ ॥ ३५ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृत भावार्थदीपिकायां
द्वितीयोऽध्यायः ॥ २ ॥

पा० * विभर्मीति श्रीवीरराघवाचार्याः ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्यादीपिका टिप्पणी ।

द्विजकुलाय द्विजकुलमुद्दिश्य ॥ २७ ॥

भवव्रतं चेदं वेदविहितं पूर्वमेवासीत् इदानीं शापात्तत्र पाषण्डित्वं विधीयते अन्यथा पूर्वत एव पाषण्डित्वे पुनस्तत्र द्विधानासम्भवः ॥ २८ ॥

धारकं नियामकं ॥ ३० ॥

जनार्दनः प्रमाणं मूलमित्युक्त्वा जनार्दनं मूलममन्वाऽस्वतन्त्रोपासमानां भृगुशापो दुरत्ययः वैष्णवानां यथा श्रीसुरित्यादिवचनबलेन तस्य वैष्णवत्वमत्वा सद्गताचरणस्य भगवत्तोषहेतुत्वे शापोऽप्यकिंचित्कर एव स्यात् यत्प्रमाणं जनार्दन इति तेनोक्तेत्यादिति-ध्येयम् यतः शिवनिंदायां तु नरक एव श्रूयते यो मां भजति सर्वत्र एकांतं भावमाश्रितः विनिंदन् देवमीशानं सयातिनरकं ध्रुवमिति ३१

यत्र पाषण्डे ॥३२॥

शापं ददतस्स्वतः ततो यज्ञसमाप्तः नाशो न स्यादतः उभयोः अपाभ्यां कर्मशैवमार्गौ परिहृतौ श्रीवैष्णवमार्गस्तु ध्रुवत्वेन स्थापित एवेति ॥ ३३

तेऽपीति युष्मकम् अवभृथस्नानं यज्ञान्तस्नानम ॥ ३४ ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थ स्कंधे दीपिका दीपिन्याख्यायांटिप्पण्याम् द्वितीयोऽध्यायः ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

एवं शपंतं नंदीश्वरमालक्ष्य भृगुः प्रत्यशपदित्याह मैत्रेयः तस्य नंदीश्वरस्य ब्रह्मकुलायैवमुक्तरीत्या शापं ब्रुवतः सतस्तं शापं श्रुत्वा भृगुर्दुरत्ययं दुरतिक्रमं ब्रह्मदण्डं ब्रह्मदंडकल्पं शापं प्रत्यसृजत् प्रत्यवदत् ॥ २७ ॥

तमेवाह भवेति भवस्य रुद्रस्य व्रतं पिशाचचर्यादिकं तद् धरंति ये च भवव्रतधरानन्नु व्रताः अनुसरंतः ते सर्वे पाषंडिनो वेदविरुद्धकर्मानिष्ठाः सच्छास्त्राणां भगवच्छास्त्राणां पंचरात्रादीनां परिपंथिनः प्रतिकूला भवेयुः ॥ २८ ॥

पाषंडित्वमेव विशदयति नष्टशौचा इति नष्टशौचा दुराचाराः मूढधियः परा ब्रतत्वज्ञानरहिताः जटादिधारिणः शिवदीक्षायां "मुद्रिकाषट्कतत्वज्ञः परमुद्राविशारदः भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति" इत्याद्युक्त विधाशिवदीक्षायां प्रविशन्तो यत्रदीक्षायां सुरा पैष्टी आसवंतालादिसंभवं मद्यं इष्टैकयात् क्लीवत्वं तद्दैवं देवमिव पूज्यं सुरा कुंभस्थापनतत्स्थदेवपूजादेः शैवागमादिश्वामीधानादेव मुक्तम् ॥ २९ ॥

एतामयं शापोनुरूप एवेति वदन् तमेव प्रथयति ब्रह्म चेति यतो यूयं पाषंडधर्ममाश्रिता यत् यस्माच्च पुंसां वर्णाश्रमवतां सेतुं स्वर्गापवर्गसाधनयज्ञोपासनादिप्रकाशनेन पुरुषार्थप्रापकं मर्यादारूपं वा विधरणं माता पितृसहस्रवद्धितोपदेशादिना विधेयधारकं प्रवर्तकमिति यावत् एवं भूतं ब्रह्मवेदं ब्राह्मणांश्च परिनिंदथ रिनिंदितवंतः ततो विगर्ह्यपाषंडं यातेत्युत्तरत्रान्वयः ॥ ३० ॥

वेदस्य सेतुत्वविधरणत्वे प्रपंचयति एष इति एष एव वेद एव लोकानां वर्णाश्रमवतां शिवः सुखकरः पंथा स्वप्रकाद्ययज्ञोपासनाद्वाराऽऽस्वर्गापवर्गोपायः सनातनः अनादिनिधनः अनादिनिधना ह्यथा वागुत्सृष्टा स्वायंभुवेत्युक्तवत् यं वेदं तदुक्तयज्ञोपासनादि

रूपधर्ममित्यर्थः पूर्वे च सात्विका ऋषयः चकारादपरेऽपि अनुमंतस्थुः अनुष्ठितवंतः अनेन शिष्टपरिग्रहकथनेन शैवागमानां तदपरिग्रहत्वमावेदितं जनार्दनो भगवान् यदेन वेदानां प्रमाणमाह यस्य सः प्रमाणत्वात् क्लीवत्वं वेदाः प्रमाणमिति यद्विधेयप्रमाणकत्वेयथा अनेन ब्रह्मणोऽपि शास्त्रयोनित्वकथनेन सर्वोऽपि श्रेयःसंपादकत्वमित्युक्तं ॥ यद्वा यस्मिन् वेदे जनार्दनः प्रमाणं मूलं कारणमिति यावत् तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत श्रुतेः अनेनापौरुषेयत्वकथनेन पौरुषेयत्वप्रयुक्तभ्रमविप्रलंभादिदोषराहित्यसिद्धिः शैवागमानां पौरुषेयत्व तत्प्रयुक्तदोषवत्वं च चिंत्यम ॥ ३१ ॥

ततस्तस्मात् परमं निरतिशयश्रेयः साधनप्रकाशकत्वेन सर्वोत्कृष्टंशुद्धमपौरुषेयं सनातनंसतां वर्त्म ब्रह्म वेदं विगर्ह्य विगर्ह्यातिगोचरेत्यर्थः पाषंडं पाषण्डधर्मं यात प्राप्नुत पाषंडधर्मं एव निष्ठावंतो भवतेत्यर्थः यत्र यस्मिन् पाषंडे वः युष्माकं भूतानांतामतानां पतिः रुद्रोदैवम ॥ ३२ ॥

अथ शापप्रतिशापौ निगमयन् अनंतरवृत्तं प्रस्तौति मैत्रेयः हे साधो ! तस्य भृगोः एवं वदतः सतः भगवान् भवो रुद्रः सानुगः सभृत्यः किंचिद्विमना इव इवशब्देन वस्तुतः समदर्शित्वात् वैमनस्याभावः सूच्यते ततः यज्ञभूमेर्निश्चक्राम निष्क्रान्तवान् ॥ ३३ ॥

हे महेष्वास ! विदुर ! यत्र यस्मिन् सत्रे ऋषभः पुरुषो श्रीहरिरीज्यः आराधनीयः तद्विश्वसृजां सत्रं सहस्र परिवत्सरपर्यंतं अनुष्ठेयं संविधाय अनुष्ठाय तेपि भृग्वादयः ॥ ३४ ॥

यत्र प्रदेशे गंगा यमुनया सहान्विता युक्ता तत्रावभृथ स्नानं आप्लुत्य कृत्वा ततः स्वं स्वं धाम स्थानं ययुः प्रापुः ॥ ३५ ॥

इति श्रीमद्वीरराघवाचार्यकृतायां श्रीभागवतचंद्रचंद्रिकायां चतुर्थस्कन्धे द्वितीयोध्यायः ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

ब्राह्मणकुलाय दीयमानं शापं श्रुत्वापि भृगोः कश्चित्प्रतिशापदानसमर्थो नाभूदिति तत्राह तस्यैवमिति ब्राह्मणानामिदमेवायुधमन्यदिति द्योतनाय ब्रह्मदंडमित्युक्तम ॥ २७ । २८ ॥

शिवदीक्षायां चांडालादिजन्मनां विप्रत्वकारणलक्षणायां सुरापासूनां तर्पणं यस्मिंस्तयोक्तं यद्वासुरा नाम नारिकेलादिपुष्पसंभवं मधूकपुष्पादिसंभवमासवमथवा ॥ २९ ॥

तीव्रशापप्रदाने निमित्तं वक्ति ब्रह्मेति विशेषेण धारयत्यात्मिनानिति विधारणम ॥ ३० ॥

सेतुं विशिनष्टि एष इति यस्य प्रमाणं सम्यक् वक्ता । प्रमाणं चाधनेऽत्वंतमर्यादाशास्त्रहेतुषु सम्यक्कारि वायः स्यात्प्रमाणं मरणं गताविति यादवः ॥ ३१ ॥

ब्रह्म वेदं भूतराट् भैरवः ॥ ३२ ॥

स्वाऽपमानं श्रुत्वापि महतां महत्त्वविरोधिविकारो न युक्त इति भावेन तस्य हरस्य सत्रान्निर्गमनं च वक्ति तस्यैवमिति ॥ ३३ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

...पि सत्रस्यांतरायो नाभूदित्याह तेपीति अंतरायानु- त्पाद ...ह यत्रेति ॥ ३४ ॥

... भागीरथी यमुनयान्विता संगता तत्र प्रयाग इति ... संगात्स्वाभीष्टफलप्राप्तिहेतुत्वादिदं समाप्य न कर्मा ... तः किंतु स्वगृहगमनमेवानुष्ठितमित्याह विरजेनेति ... अंतःकरणेन युक्ता इति शेषः ॥ ३५ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कंधे श्रीविजयध्वज तीर्थकृत पदरत्नावल्याम् द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

...। वेदविहितमेवात्र भवभ्रमनमूद्यते अन्य विहितत्वे ... पाषण्डत्वं ... स्यात् पूर्वत एव पापाण्डत्वं सिद्धमेव ... न्यादिना पाषण्डमाश्रिता इत्यन्तेन ॥ २८-॥ ३० ... वेदोपासनायामयं दोषो यतश्च जनार्दनस्यैव ... इह एव इति न एव वेदलक्षणः यत प्रमाणं यत्र मूल- ... पासनायां तत्प्राप्तिः श्रीगीतोपनिषत्स्वेव निषिद्धा ... यांतामका इत्यादिभिः अन्यदेवान्वश्च भिषिद्धा यथा ... गोपाल पूजयेद्यस्तु निन्दयेदन्यदेवतां अस्तु तावत् परो ... मां विनंश्यति, हयशीर्षो मां पांच वेदहेयनादिति श्रीनारा ... तत्रापि प्रायश्चित्तं श्रीशिवाचचनादौ तु नन्दीश्वरशापश्च ... देत्यादि दर्शयिष्यते च चित्रकेतुचरिते ॥३१ ३२॥

... नन्दीश्वरस्य कोधावेशं दृष्ट्वा कदाचित् श्रीजनार्दनं सतु ... प्रलयमुपेदिति शंकमानः श्रीशिवः सानुग एव नि- ष्कांत ... मिति । विमना इवेति ननु विमना इत्यर्थ आ- त्माराम ... द्वयोः शापाभ्यां कर्मं शैवमार्गौ परिहृत्यश्री वैष्णव ... त्वेन स्थापितः । प्रकरणेऽस्मिन् विशेषजिज्ञा- साया ... ॥ ३३ ॥

... ॥ ३४ ॥ ३५ ॥

... द्भागवतेमहापुराणे चतुर्थस्कन्धे ... जीवगोस्वामिकृत क्रमसन्दर्भे द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

सुरा गौडी ... । आसवस्तालादिसम्भवं यद्यं तयो- ... क्यात् ... देयं देवताबदादरणीयम ॥ २८ ॥

ब्रह्म वेदं ... कीदृशं सन्मार्गं चलतां पुंसां विधरणं ...॥

वेदनिन्दका यूयं ... त्याह एव वेदलक्षण: । यत् यत्र प्रमाणमिति ... प्रेक्ष्य इति भावः ॥ ३१ ॥

विगर्ह्यति वेदनिन्दायाः फल ... प्राप्तव्यमेव मदभि- शापस्तु पिष्टपेष इवेति भावः । भूते ... भूतानां राजा भूत एवेति निन्दा । भूतेषु सर्वप्राणिषु राजन ... स्तुतिः ॥ ३२ ॥

यत्प्रमाणं जनार्दन इति श्रुत्वा ... जनार्दनं तद्भक्तांश्च प्रति किमप्यपचारं क्रोधावेश नन्दीश्वरो ... । शंकमानो भवस्ततो निष्क्रान्त इत्याह तस्यैवमिति विमना इवे ... वस्तुतस्त्वात्मारामत्वा

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

... विमनाः ... द्वयोः नन्दीश्वरभृग्वोः शापप्रस्तान् कर्ममार्गान् शैवांश्च परिहृत्य वैष्णवा एव सुधीभिराश्रयणीया इति प्रकरणाभि ... ग्यदस्तु ज्ञेयम ॥ ३३ ॥

तेऽपि रुद्रदक्षौ सगणौ विनैव सत्रं संविधाय ययुः । ननु तर्हि राजन्यः कोऽपि विघ्नो बभूवेत्याह यत्र हरिरेव इज्यानां ऋषभ इति रुद्रादि यजनं विनापि यज्ञपूर्त्यभावो नाभूदिति भावः ॥ ३४ ॥ ३५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थेऽस्मिन् द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

द्विजकुलाय शापं ददतः श्रुत्वा वचनमिति शेषः शापं शाप रूपं ब्रह्मदंडं प्रत्ययुञ्जत् प्रत्यदात् ॥ २७ ॥

सच्छास्त्रस्य विधिनिषेधरूपस्य परिपंथिनः प्रतिकूलाः संतः पाषंडिनः स्वच्छाचारिणो भवंतु ॥ २८ ॥

च यस्यां पाशुपताद्यागमप्रसिद्धायां शिवदीक्षायाम् सुरा गौडी पैष्टी माध्वी च आसवस्तालादिरसस्तयोर्द्वैक्यात् चंदनम् देववदादरणीयं तस्यां विशंतु ॥ २९ ॥

अहं त्वत्र निमितमात्रमित्याह ब्रह्मेति यद्यस्मात् सेतुं पुरुषार्थ चतुष्टयप्रतिपादनावधिभूतम् अतएवपुंसां तत्तदधिकारिणां विधा रणं तत्तदनुरूपपुरुषार्थबोधकत्वेन धारकम् ब्रह्म वेदम् ब्राह्मणान् तद्भक्तांश्च परिनिंदथ निंदितवंतः अतः स्वयमेव पाषंडमा- श्रितः ॥ ३० ॥

अतोऽहमप्यनुमोदयामि केवलं न तु शापं ददामीत्याशयेनाह एष इति द्वाभ्याम् यं पूर्वे ब्रह्मादयः अनुसंतस्थुः आश्रितवंतः यद्य- स्मिन् जनार्दनः सर्वजननियमनकर्ता वासुदेवः प्रमाणं मूलम् स एव एव वेदलक्षणः शिवः सुखरूपः सनातनः अनादिसिद्धः पंथा पुरुषार्थदर्शनमार्गः ॥ ३१ ॥

तद्ब्रह्म वेदं सतां वर्त्म विगर्ह्य स्वयमेव पाषंडं स्वेच्छाचार लक्षणं कुपथं यात वो युष्माकं पाषंडिनां यत्र पाषंडे दैवमुपास्यं भूतराट् ॥ ३२ ॥

ऋषभः सर्वेश्वरः यत्रेज्यः पूज्यः तत्सत्रं यागं सहस्रपरिवत्स रान् तावत्कालपर्यंतं संविधायानुष्ठाय ॥ ३४ ॥

यत्र गंगा यमुनया अन्विता तत्र प्रयागे अवभृथस्नानमाप्लुत्य कृत्वा ततः प्रयागात् ॥ ३५ ॥

इतीश्रीमद्भागवते महापुराणेचतुर्थस्कंधे
सिद्धांतप्रदीपेद्वितीयाध्यायार्थप्रकाशः ॥ २ ॥

भाषाटीका ॥

ब्राह्मण कुल को ऐसा शाप सुनकर भृगुजी महाकठोर ब्रह्मदंड रूप शाप प्रत्यर्पण करते भये ॥ २७ ॥

जो शिवको व्रत धारण करें औ उनों के अनुवर्ती होवें वे पाखं- डी होंय सतशास्त्र से भ्रष्ट होवेंगे ॥ २८ ॥

भाषाटीका॥

यह शौची मूढबुद्धि जटा भस्मास्थिधारी शिवदीक्षा में प्रवेश करें जिस में मद्य मांस पूज्य है॥ २९॥

पुरुषों की मर्यादा धारण करवेवालो जो वेद और ब्राह्मण उनकी जो तुम निंदा करते हो इसे तुम पाखंडका आश्रय करो हो ॥ ३०॥

लोगन को सनातन कल्याण मार्ग यही है, जामें पूर्वलोक स्थितभये जिसमें प्रमाण जनार्दन है॥ ३१॥

सो योपरम शुद्ध सनातन, संतोंका मार्ग है, तुह्मारो देव भूतपति है निंदा करके पाखंडको जावोगे॥ ३२॥

मैत्रेयजी बोले। भृगुदक्ष दोनोंका शापसुन के शिवजी विमनहोकेअनुचरो के सहित वहां से जाते भये॥ ३३॥

भाषाटीका॥

(हे महेष्वास) हे विदुर, विश्व के उत्पादक, हरि को यज्ञ कर के पूज्य, श्रेष्ठ, हरिका पूजन करते भये॥ ३४

जहां गंगाजी यमुना से संयुक्त, वहां श्रीप्रयागराज अवभृथ स्नान कर के शुद्धांतःकरण से अपने अपने स्थान को प्राप्त होतेभये ॥३५॥

इतिश्रीमद्भागवतमहापुराण में चतुर्थस्कंध के द्वितीय अध्याय की भाषाटीका समाप्त हुई॥ २॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

———○:०:○———

मैत्रेयउवाच ।

सदा विद्विषतोरेवंकालो वै ध्रियमाणयोः ।
जामातुः श्वसुरस्यापि सुमहानतिचक्रमे ॥ १ ॥
यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना ।
प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभवत् ॥ २ ॥
इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च ।
बृहस्पतिसवं नाम समारेभे क्रतूत्तमम् ॥ ३ ॥
तस्मिन् ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः ।
आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ॥ ४ ॥
तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम् ।
सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवम् ॥ ५ ॥
व्रजंतीः सर्वतोदिग्भ्य उपदेववरस्त्रियः ।
विमानयानाः सप्रेष्ठा निष्ककंठीःसुवाससः ॥ ६ ॥
दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुंडलाः ।
पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत ॥ ७ ॥

[illegible]धरस्वामि[illegible] भावार्थदीपिका ॥

तृती[illegible] [illegible]तात[illegible]त्सवदिदृक्षया ।
गमि[illegible] [illegible]तानीतिहेतुभिः ॥ १ ॥

ध्रियमाणयो[illegible] [illegible] [illegible]भूढ़ अवस्थान इत्यस्मात् ॥ १ ॥

यद्यपिरुद्रविद्वे[illegible] [illegible]तथाऽपि दक्षस्यरुद्रपरित्यगोद्धे-[illegible] [illegible] यदातुप्रजापतीनामाधिपत्येऽभि[illegible]कस्तदातस्यस्मयो[illegible] ऽभवत् ॥ २ ॥

[illegible]देवब्रह्मिष्ठान्[illegible] [illegible] [illegible]रस्कृत्य "वाजपेयेनेष्ट्वाबृहस्पतिसवेनयजेत,, इतिश्रुते[illegible] [illegible]मारेभे ॥ ३ ॥

कृतस्वस्त्ययनाः कृत[illegible] [illegible]काइतिदक्षिणादिभिः प्रथम-[illegible]तानामधिपत्य[illegible]मुकम ॥ ४ ॥

[illegible]खेचराणांप्र[illegible]यज्ञमहोत्सवं श्रुत्वातत्रव्रजं[illegible]रुपदेवानांगंधर्वादीनां [illegible] [illegible]निलयस्याभ्याशेसमीपेद्द-[illegible]त्सुक्यात्पतिमभ्यभाष[illegible] [illegible] ॥ ५ ॥

कथंभूता[illegible] [illegible] [illegible]ताः प्रेष्ठैःसहिताः निष्काणिपदका[illegible]कंठेषुयासाम[illegible] [illegible]वासांसियासाम ॥६॥

लोलानिचञ्चला[illegible]यासाम मृष्टान्युज्ज्वलानिकुंडलानियासां[illegible] ॥ ७ ॥

———

श्रीराधारमणदासगोस्वामि विरचित
दीपिन्याख्या दीपिकाटिप्पणी ।

नीतिहेतुभिःनीत्यायुक्तिभिश्च शिवस्य तुच्छ तस्मिन्द्वेषाऽभावेपि दक्षस्य तथा प्रतीति विचार्य तथोक्तमिति तदज्ञान एव द्वेषकल्पना ॥ १ ॥

तत्र द्वेषगर्वयोर्मध्ये द्वेषे हेतुरनभ्युत्थानादिम गर्वे हेतु माधिपत्यम ॥ २ ॥ ३ ॥

तस्मिन् बृहस्पतिसवे कृतमंगला कृतं मंगलं प्रशस्ताचरणं यैस्तदनंतरं दक्षिणार्हिताबभूवुरितिभावः पौनरुक्त्यव्युदासार्थं व्याचष्टे दक्षिणादिभिरिति ॥ ४-६ ॥

तदुपश्रुत्येति त्रिकम उत्सवाश्चर्यदर्शनादक्ष्णां लोलत्वम ॥ ७ ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

दक्षो दुहितृवत्सलः विद्वेषमकरोत् कस्मादिति पृष्टं विद्वेषनिमित्तमुक्तं अथ यतः प्राणान्तत्याज दुस्त्यजान्सतीति पृष्टं प्राणत्यागनिमित्तं तत्प्रकारश्चोच्यते तत्रप्राणत्यागनिमित्तमरोच्यक भगा-

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

स्मयः स च गर्वात् गर्वश्च प्राजापत्यादधिकारादिति वक्ष्यन् तावद् उभयोर्विद्विषतोः सतोर्महान्कालोऽतीत इत्याह सदेति एवं मुक्तरीत्या सदा विद्विषतोर्मिथो द्वेषं कुर्वतोर्जामातृश्वशुरयोर्दक्षस्य च ध्रियमाणयोः स्वतिष्ठमानयोः सतोः सुमहान् भूयान्कालः प्रति चक्रमे व्यतीतः ॥ १ ॥

गर्वनिमित्तमाह यदेति परमेष्ठिना चतुर्मुखेन ब्रह्मणा यदा सर्वेषां प्रजापतीनामाधिपत्ये दक्षोऽभिषिक्तस्तदा तस्य स्मयो गर्वः अभवत् उपपद्यते स्म ॥ २ ॥

स्मयाच्च रौद्रकर्मयागमारेभ इत्याह इष्ट्वेति सदस्यं ब्रह्मिष्ठान् ब्रह्मात्मकान्सर्वेषां ब्रह्मात्मकत्वेऽपि रुद्रादेर्ब्रह्मणा आवेशावतारत्वादतिशयेन ब्रह्मत्वमिष्ठन्प्रत्ययनविवक्षितं रुद्रानुचरतदाराधकाभिप्रायेण बहुवचनं प्रतिभूय पराभाव्य तेभ्यो यज्ञभागं न दास्यामीत्येवं संकल्पेत्यर्थः वाजपेयेनेष्ट्वा वाजपेयाख्यं यागं कृत्वा बृहस्पति सवं नाम बृहस्पतिसवाख्यं क्रतूत्तममारेभे आरब्धवान् वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति श्रुतेः ॥ ३ ॥

तस्मिन् बृहस्पतिसवे समारब्धे सर्वे महर्षयः तथा देवर्षयः पितरो देवाश्च तथा तेषां पत्न्यश्च कृतस्वस्त्ययनाः कृतमंगलाः सर्वालंकारभूषिताः सभर्तृकाश्चासन् तत्रागत्योपविविशुरित्यर्थः सभर्तृका इत्यनेन भर्तृसान्निध्यादानंदातिशयः सूच्यते ॥ ४ ॥

तत्सदा नभसि खेचराणां प्रजल्पतां पितृयज्ञमहोत्सवं श्रुत्वा दाक्षायणी सती तत्र सर्वाभ्यो दिग्भ्यो व्रजन्तीरुपदेवानां गंधर्वाणां वरस्त्रियः वरस्त्रीर्वामसनार्स्तितीयकु स्वनिलयाभ्यासे स्वगृहसमीपे दृष्ट्वा औत्सुक्यात् पतिमभ्यभाषतेति त्रयाणामन्वयः कथं भूताः स्त्रियः दृष्ट्वा विमानानि यानानि गमनसाधनानि यासां ताः, सप्रेष्ठाः प्रियैः सहिताः, निष्कानि पदकानि कंठे यासां, शोभनानि वासांसि यासां लोलानि चंचलान्यक्षीणि यासां, मृष्टानि उज्वलानि कुंडलानि यासां, ताः ॥ ५—७ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

अत्र शंकरदक्षयोर्विवादकथनव्याजेन शंकरस्य वासुदेवचरणारविंदस्मरणकथनेनहरेरामनमाहात्म्यमेवप्रकाश्यतेऽस्मिन्नध्यायेतत्रादावस्य वैरस्य दीर्घकालीनत्वं दक्षस्य गर्वाधिक्यं च वक्ति सदा विद्विषतोरिति ॥ १ ॥

यदा दक्षः परमेष्ठिना ब्रह्मणा सर्वेषां प्रजापतीनामाधिपत्येऽभिषिक्तस्तदा तस्य स्मयो मदविशेषोऽभूदित्यन्वयः ॥ २ ॥

अरुद्रभागयज्ञकरणाद्दक्षस्य स्मयो लक्ष्यत इत्याशयेनाह इष्ट्वेति स दक्षो नाम्ना वाजपेयेन यज्ञेन हरिमिष्ट्वा ब्रह्मिष्ठः कर्मप्रतिपादकवेदनिष्णातोऽभूदित्यन्वयः एतच्च कुतोज्ञानमत्राह भूय इति यज्ञांतरकरणात्सिद्धमित्यर्थः ॥ ३ ॥

तस्मिन् यज्ञे त्रिलोकस्थाः संमेलनेन दक्षस्य स्मयातिशयो लक्ष्यत इत्याशयेनाह तस्मिन्निति ॥ ४ ॥

ननु किमनेन प्रकृत इति तत्राह तदुपश्रुत्येति दाक्षायणी सती देवी । मिथः प्रजल्पतां खेचराणां यत् पितृयज्ञविषयवचनं तदुपश्रुत्यांतःपुरान्निर्गत्य स्वनिलयसमीपे उपदेववरस्त्रियो दृष्ट्वांतःपुरं प्रविश्य पतिमभ्यभाषतेत्यन्वयः ॥ ५ ॥ ६ ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

सदेति । शिवस्य तु द्वेषस्तदज्ञान एव नतु स्मेन बाले पितरिव ॥ १—४ ॥

तदुपश्रुत्येति त्रिकम् ॥ ५—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

तृतीये स्वपितुर्यज्ञं दिदृक्षुर्यास्यती सती ।
निवारिता नीतिवाक्यैरदृशा हरेण सा ॥

ध्रियमाणयोः अवतिष्ठमानयोः समापरामाश्च ॥ ...तवतो-रित्यर्थः । धृङ् अवस्थाने इत्यस्मात् ॥ १ ॥

यदाभिषिक्त इति शिवद्वेषिणो दक्षस्य सम्पत्तिरपराजस्यव राधफलमेव पुनरप्यपराधवृद्धयर्थमेव भवत्येवाह स्मय इति ॥ २ ॥

गर्वादेव ब्रह्मिष्ठानभिभूय बृहस्पतिसवमिति वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति श्रुतेः ॥ ३ ॥

कृतस्वस्त्ययनाः कृतार्हणाः सभर्तृका इति तेषां पत्न्यर्हणाः पुनरप्यर्हणमुक्तम् ॥ ४ ॥

तत्सदा खेचराणां प्रजल्पतां मुखात् पितुर्यज्ञमहोत्सवमुपश्रुत्य व्रजन्तीरुपदेववरस्त्रियो दृष्ट्वा पतिमभ्यभाषत ॥ ५—७ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

पितृयज्ञमहोत्सवं श्रुत्वा तत्र गंतुमुत्सुका सती हरेण हेतुभिर्वारिते त्युच्यते सदा विद्विषतोरिति तृतीयेनाध्यायेन॥ध्रियमाणयोस्तिष्ठमानयोः सतोः धृङ् अवस्थाने धातुः सुमहान् बहुतरः कालः तिचक्रमे गतवान् ॥ १ ॥

यदाभिषिक्तस्तदा स्मयो गर्वोऽभवत् ॥ २ ॥

सगर्वाविष्टोदक्षः ब्रह्मिष्ठान् परब्रह्मनिष्ठान् शिवादीन् अभिभूय अनादृत्येत्यर्थः वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेदिति श्रुतेः वाजपेयेनेष्ट्वा वाजपेयं यागं कृत्वा बृहस्पतिसवं नाम क्रतूत्तमं समारेभे आरब्धवान् ॥ ३ ॥

तस्मिन् क्रतूत्तमे ब्रह्मर्ष्यादयः कृतं स्वस्त्ययनं हेमादिविभिः संपूजिता आसन्नित्यर्थः सभर्तृका इति प्रथममर्हितानामपि पत्न्यर्हणं पुनरर्हणं पुनरर्हणमुक्तम् ॥ ४ ॥

तत्सदा सती खेचराणां प्रजल्पतां वदतां ॥ पितृयज्ञमहोत्सवं श्रुत्वा तत्र सर्वाभ्यो दिग्भ्यो व्रजंती रुपदेववरस्त्रियश्च दृष्ट्वौत्सुक्यात्पतिं मभ्यभाषतेति त्रयाणामन्वयः ॥ ५ ॥

विमानैर्यानं यासां, प्रेष्ठैः सहिताः, निष्कानि पदकानि कंठेषु यासां, शोभनानि वासांसि यासां ताः ॥ ६ ॥

स्वनिलयस्याभ्यासे समीपे ॥ लोलानि चपलान्यक्षीणि यासां ॥ मृष्टान्युज्वलानि कुंडलानि यासां ताः ॥ ७ ॥

भाषाटीका ॥

मैत्रेयजी बोले कि, सदा विरोध करते जमाता श्वशुर को महान् काल व्यतीत होतो भयो ॥ १ ॥

जब परमेष्ठी ब्रह्मा ने, सर्व प्रजा पति के आधिपत्य में, अभिषेक कीनो तब गर्व भयो ॥ २ ॥

सत्युवाच ।

प्रजापतेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञमहोत्सवः किल ।
वयं च तत्राभिसराम वाम ते यद्यर्थिताऽमी विबुधा व्रजंति हि ॥ ८ ॥
तस्मिन् भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः ।
अहं च तस्मिन् भवताऽभिकामये सहोपनीतं परिबर्हमर्हितुम् ॥ ९ ॥
तत्र स्वसॄर्मे ननु भर्तृसंमिता मातृष्वसॄः क्लिन्नधियं च मातरम् ।
द्रक्ष्ये चिरोत्कंठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजम् ॥ १० ॥
त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकम् ।
तथाप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिम् ॥ ११ ॥
पश्य प्रयांतीरभवान्ययोषितोऽप्यलंकृताः कांतसखा वरूथशः ।
यासां व्रजद्भिः शितिकंठ ! मंडितं नभो विमानैः कलहंसपांडुभिः ॥ १२ ॥
कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेंगते ।
अनाहुता अप्यभियंति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनम् ॥ १३ ॥
तन्मे प्रसीदेदममर्त्य वांछितं कर्तुं भवान्कारुणिको बताऽर्हति ।
त्वयाऽऽत्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपिता माऽनुगृहाण याचितः ॥ १४ ॥

भाषाटीका ॥

... वाजपेय यज्ञ कर, ब्राह्मणों का तिरस्कार कर, यज्ञों ... उत्त ... बृहस्पति सव नामक यज्ञ को आरंभ करता भयो ॥ ३ ॥

उस में ... र्षि, पितृ देवता, और अलंकार भूषित उनों की स्त्रियें भी प्राप्त ... भई ॥ ४ ॥

सती ... ... आकाश में बातों करते हारे देवताओं से, पिता के ... को सुन कर ॥ ५ ॥

सर्व दिशाओं ... की स्त्रियां विमानों रूढ, प्रिय से सहित, कंठ भूषण सुंदर ... किये, जारही है ॥ ६ ॥

अपने स्थान समीप ... चल कुंडल, चंचल नेत्र वारी को देख कर, औ, सुकय ... भूतपति सों, बोलती भई ॥ ७ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

निर्यापितः प्रवर्तितः ... वाम ! ... यद्यर्थिताऽभ्यर्थिताऽहि वयं च तत्राभिसराम गच्छामः ... विबुधा व्रजंति ॥ ८ ॥

औत्सुक्यं प्रकटयंत्याह तस्मिन्निति ... पितृभ्यामुपनीतं वस्त्रं परिबर्हमलंकारादि द्रव्यं भवता सहाहं ... कर्तुमभिकामये अर्हित-मितिपाठे तत्कृतं परिबर्हमिच्छामीति ॥ ९ ॥

स्वसृभगिन्यः भर्तृभिः संमिताः ... क्लिन्नधियं स्नेहार्द्रचित्ताम् ।

श्रीधरस्वामिकृत भावार्थदीपिका ॥

चिरमुत्कंठमुत्सुकं मनो यस्याः साऽहं द्रक्ष्यामि हे मृड ! उन्नीयमानं वर्त्यमानमध्वरं तद्ध्वजमिव दृश्यश्रेष्ठमध्वरम् यद्वाऽर्घ्यमाणं यज्ञं कर्तुं गच्छ वा ॥ १० ॥

अहो किं तवाश्चर्यं येनैतदौत्सुक्यामिति चेत्तत आह त्वयीति । अज ! एतद्विश्वमाश्चर्यरूपं त्वय्येव त्वन्मायया गाचतो विभात्यतोऽयथापि तवाश्चर्यं ... तथाऽप्यहं योषिदुत्सुकस्वभावात्वत्तत्त्वेनजानाम्यतो-दीना कृपणा सती हे भव ! भवक्षितिं जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि ११

दिदृक्षामेवकमुत्पन्नायनयनाकि पश्यानइत्याश्यम हेअभवेति सुहृद्भयोगतः ... अन्य यावित सर्वधर-हिताअपप्रयांतीः पश्य कांतसखा भर्तृसहिता वरूथशः संघशः कथंभूताः यासां विमानैर्नभो मंडितं हाशितिकंठ ! नीलकंठ तत्परा ... यत्वयाविपमापिभात्तर्हि तामिति सूचयति ॥ १२ ॥

तदा हे सुर ... ! पितृगेहात्सवं निशम्य सुतायाः देहः कथं नेंगते न प्रचलति तथाऽप्यनाहुताः सत कथं गच्छामस्तत्राह सौहृदं सुहृत्सर्व-स्थिकेतनं गृहं तथा भर्त्रादीनां च गृहमनाहुता अप्यभियांति सतः हे सुरव-र्यम् ॥ १३ ॥

हे अमर्त्य ! तस्मात्प्रसीदेदं मे वांछितं कर्तुं भवानर्हति कारुणिक त्वमत्राह अदभ्रचक्षुषाऽनल्पज्ञानेनापन्नयाऽऽत्मनोऽर्धेऽहमिति निरूपिताधुना यतोऽर्धनारीश्वरः अतिस्त्रातोऽतस्यतोमामनुगृहाण याचितः सन् ॥ १४ ॥

ऋषिरुवाच ।

एवं गिरित्रः प्रिययाऽभिभाषितः प्रत्यभ्यधत्त प्रहसन्सुहृत्प्रियः ।
संस्मारितो मर्मभिदः कुवागिषून्यानाह को विश्वसृजां समक्षतः ॥ १५ ॥

श्रीभगवानुवाच ॥

त्वयोदितं शोभनमेव शोभने ! अनाहुता अप्यभियन्ति बन्धुषु ।
ते यद्यनुत्पादितदोषदृष्टयो बलीयसाऽनात्म्यमदेन मन्युना ॥ १६ ॥
विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः ।
स्मृतौ हतायां भृतमानदुर्दृशस्तब्धा न पश्यन्ति हि धाम भूयसाम् ॥ १७ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

अभिभाषितो याचितः कादत्तायानाह मर्मभिद इति येतान्कुवागिषून्दुरुक्तिबाणान्संस्मारितः सन् ॥ १५ ॥

अनाहुता अपीति त्वया यदुदितमुक्तं तच्छोभनमेव किंत्वनात्म्यं देहाद्यहंकारस्तत्कृतेन मदेन मन्युना च नेयं यद्येयद्यनुत्पादितदोषदृष्टयो भवन्ति तर्हि न उत्पादितमारोपितं दोषदर्शनं येषां ते ॥ १६ ॥

ननु विद्यादिगुणयुक्तो दक्षस्त्वाद्दृशे प्रभुमहत्सु कथं द्वेषं करोति तत्राह विद्यादिभिरेव स्मृतौ हतायां विवेके नष्टे सति भूयसां महत्तमानां धाम तेजो न पश्यन्ति हि ननु गुणाः कथं विवेकनाशकास्तत्राह सतां गुणैर्विवेकहेतुभिरप्यसत्तमानां मत्तरैर्दोषभूतैरतएवतैर्भृतो भृतःपुष्टो वाऽहं-कारो हतापसहत्यादिर्मानो गर्वस्तेन दुर्दृशो दुष्टा दृष्टिर्येषां ते ॥ १७ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपन्याख्या दीपिका टिप्पणी ॥

प्रयान्ति तः ऋषिभिरिति शेषः तत्र यज्ञमहोत्सवे ॥ ८ ॥
भीतिमक्ष्यं कालयापनायामशक्तत्वं तस्मिन् यज्ञमहोत्सवे ॥ ९ ॥
पूर्वार्धे विशेष्याध्वराऽध्याहारार्थमेतेति ॥ १० ॥
तत्र यज्ञे येनाश्चर्येण अतः आश्चर्यविश्वाधिष्ठानत्वात् ॥ ११-१२
तदाह कैमुत्यमाह ॥ १३ १४ ॥
मर्मभिद इति तदुक्ताभिप्रायेण शिवस्य निरहंकारत्वात् यान् कुवागिषून् यद्यपि इषूनां कथनमनुपपन्नं किंतु वाचामेव तथापि परिणामालङ्कारत्वाद्दुर्गा करोतु दुरितं गौरीचरणपंकजमिति वद्वाचामेव प्राधान्यमिति ज्ञेयम् ॥ १५ ॥
यदुक्तं तच्छोभनमेव योग्यमेवेति यस्तदोषागम्यमानत्वमेव सद्भावे हि दोषस्य तद्दृष्टित्वं न दोषः किन्तु तदभावेपि आरोपितो परभावेन कल्पिते ॥ १६ ॥ १७ ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

हे वाम ! हे शंभो ! तेतव श्वशुरस्य प्रजापतेर्दक्षस्य कर्तृकाध्वरः षष्ठीयस्वरूपो महोत्सवः संप्रति निर्वर्तितः प्रवर्तितः तत्र च विबुधाः व्रजन्तीत्यपारोक्ष्यं द्योत्यते यद्यर्थिता अर्थिनो भाव अर्थिता यदीच्छा वर्तत इत्यर्थः तर्हि तत्र वयमपि अभिसराम गच्छामः ॥ ८ ॥

स्वाभिप्रायं प्रकटयन्त्याह पद्भिः तस्मिन् यज्ञे महोत्सवे मम भगिन्यः स्वस्वभर्तृभिःसह सुहृदिदृक्षवः भगिनी माता पित्रादीन् द्रष्टुमिच्छवः आगमिष्यन्तीति ध्रुवं निश्चयः आयान्तु कितव तत्राह अहमपि तस्मिन्नुत्सवे भवतामाकं उपनीतं स्मात्पित्रादिसमर्पितं परिबर्ह वस्त्राभरणाद्युपायनं प्रतीतुं कामये इच्छामि ॥ ९ ॥

किंच हे मृड ! चिरोत्कण्ठमना बहुकालमौत्सुक्याविष्टमना अहं मम भर्तृभिः समानीताः स्वस्था भगिनीः भर्तृसहिता इत्यनेन स्वस्या अपि भर्त्रा अनुग्राह्यत्वं सूच्यते तथा मातृस्वसृः मातृभगिनीः क्लिन्नाधियं मद्दर्शनान्नाभिन क्लिन्नाधियं स्निग्धचित्तां मातरं वा मातरं महर्षिभिरुन्नीयमानं मूर्ध्वं क्रियमाणं अध्वरध्वजं यूपं चद्रक्ष्ये ॥ १० ॥

अहो किं तत्राध्वरं आश्चर्यं येन त्वं दिदृक्षसीत्यत्राह त्वय्यपि अजात्ममायया अजस्य कर्माधीनजन्मादिरहितस्यात्मनः परमात्मनः विष्णोर्मायया सकलेन विनिर्मितं गुणत्रयात्मं सत्त्वादि गुणत्रयात्मक प्रकृतिपरिणामात्मकमतद्विविध विचित्रसन्निवेशं जगत्त्वाय आश्चर्यं भाति विविध विचित्रसन्निवेशजगद्दर्शनमेव जानीनि त्वय्याश्चर्यं बुद्धिजनकं न तत्राश्चर्यकरं किंचित्तवास्तीत्यर्थः अनेनाहं विचित्रं जगदा आश्चर्यं प्राप्नुवन्तीति भावः अत्राजात्मनस्तव माययात्वयेति निर्मितं जगदाश्चर्यं भातीत्यन्वयोऽसंगतः अव्यक्तात्माकाशशब्दादिशब्दान छागपशुन्यायेन एको ह वै नारायण आसीन्न ब्रह्मा नेशानः इति नारायणरूपविशेषपर्यवसानात्तस्यैव कारणत्वेन गतस्तन्माययाभिनिर्मितत्वात् युक्तं चैतत् अनपहतपाप्मा वा अहमस्मीति नारायणाद्रुद्रो जायत इति च कार्यत्वकर्मवश्यत्वादिश्रुतेः रुद्रस्य कारणत्वासंभवात् अन्यथा पूर्वापरविरोधात् तथापि तवाश्चर्यकरस्याप्यस्याभावेऽप्यहं यौषित्वात्तुल्यस्वभावा अतस्त्वविदित परावरतत्त्वमजानती अनेन विशेषण अथेन स्थिरचित्तानां तत्त्ववेदां च भगवद्विभूतित्वेन जगदवलोकनमनाश्चर्यजनकमिति सूचितमिति यद्यप्येवं तथाप्यर्थःसाधीयान् अतो दीना कृपणामतो हे भव ! मे मयाक्षानि जन्मभूमिं दिदृक्षुरहमिच्छामि ॥ ११ ॥

स्थितामिव कैमुत्यन्यायेन अनक्ति पश्येति द्वाभ्यां हे अभव अन्या अपि मातृपितृसंबंधरहिता अपि योषितः यूथशः संघशः प्रयान्ति ताः पश्य कथंभूताः स्निग्धकान्ताः प्रि स एव सखा यासां ताः हे शितिकण्ठ ! यासां योषितां अन्यैःकलहंसवत्पाण्डुरैः शुभ्रैर्विमानैर्नभस्थलं मण्डितं भूषितम् ॥ १२ ॥

हे सुरवर्य ! सुरश्रेष्ठ पितृगेहकौतुकमुत्सवं निशम्य सुताया देहः कथं नेच्छेत् द्रष्टुं न प्रचलेत् अथाप्यनाहुताः संतः कथं वा गमिष्याम

श्री[illegible]चार्यकृत भागवतचन्द्रचन्द्रिका ॥

तत्राह मी[illegible] निकेतनं तथा भर्त्रादीनां गृहान्प्रत्यनाहुता अपि [illegible] ति मंतः ह्रस्वत्वमार्षम् ॥ १३ ॥

उप[illegible]दिति हे अमर्त्य ! देव ! तत्तस्मात् प्रसीद इद मे वांछितं [illegible] भवान् कर्तुमर्हति कारुणिकत्वमेवाह अदभ्रचक्षुषा अनल्प[illegible] त्वया आत्मनो देहस्यार्द्धे ममेशे अहं निरूपिता भृता य[illegible] ईश्वर इति प्रख्यातोऽसि अतो मया याचितस्त्वं मामनु[illegible]

[illegible]वः प्रत्यभाषतेत्याह मैत्रेयः एवमिति गिरित्रं गिरिं [illegible] इति गिरित्रः भवः एवमुक्तरीत्या प्रियया सत्या अभिभा[illegible] प्रियः सुहृदपि मर्मच्छिदः दक्षस्य मनसि कुवा णिपून्[illegible]परा वाच एवंविधस्तान् प्रति संस्मारितः स्मरणं प्र[illegible]रणात्स्मरतेर्वाणिजंतात्कर्त्तरि क्तः संस्मरन्नि त्यर्थः [illegible]व प्रत्यभ्यधत्तप्रत्यभाषत कं ते कुवागिषवःयान् स्मरन्[illegible]माह कः दक्षः विश्वसृजां प्रजापतीनां समस्ताऽपरा[illegible] अयं हि लोकपालानां यशोऽनो निरपत्रप इ या त्रिना[illegible] संस्मरन्नित्यर्थः ॥ १५ ॥

[illegible] प्रत्युत्तरयति भवः त्वयोदितमिति यावदध्यायसमाप्ति[illegible]त्वयोदितमुक्तं अनाहुता अपि बंधुषु अभियंतीति तद[illegible] किंतु बलीयसा अनात्म्यं देहाभिमानस्तत्कृता[illegible] मन्युना कोपेन च ते बंधवो यदि अनुत्पादितवोच्छूय [illegible] गुणेषु सत्स्वपि दोषेष्वेव दृष्टि दर्शनं येस्तं भवंति [illegible]भियंतीति शोभनमित्यर्थः ॥ १६ ॥

[illegible] दक्षस्तादृशं त्वयि कथमुत्पादितनष्टोपदृष्टिः स्या[illegible]ते सतां साधूनां गुणैर्विद्या तप आदिभिः षड्भिः अम[illegible]रूपैः प्राप्तैर्विद्याश्रय एवाश्रयभेदेन गुणा दोषाश्च स्यु[illegible] हतायां विवेकज्ञानेनष्टेसति भूतमानदुर्दशः [illegible] अहं विद्वानहं तापस इत्यादिगर्वेणतेन दुष्टा दृष्टिर्येषां ते[illegible]महत्तमानां तेजः तथा यथावस्थितं न पश्यंति हीति असत्[illegible] पालयति ॥ १७ ॥

श्रीम[illegible]ध्वजतीर्थकृत पदरत्नावली ।

किमभाषतेति त[illegible] प्रजापतेरिति निर्यापितः प्रवर्तितः किलकि वदंती हे वाम[illegible] याचिक्यार्थितास्ति तत्र तर्हि गमनेहेतुमाह अमी इति हि यस्मात्[illegible] ॥ ८ ॥

गमने निमित्तांतरम[illegible]ह अस्मिन्निति मयि गतायां तस्मात् जनात्पूजाविशेषोऽपि भवि[illegible] अहं चेति परिवर्हं च वरवध्वा दीयमानं ॥ ९ ॥

न केवलमुक्तमेव[illegible]मप्यस्तीत्याह तत्रेति अध्वरध्वजं यज्ञध्वजं द्रष्टुं इत्यन्वयः [illegible]शोफमिकत्वं च श्रेष्ठं चेत्यो ह्यतनुमे इत्यभिधानं [illegible] इति अकद्विवर्ह्रेऽतिको रसोरिति उरस्तु वक्षसि [illegible] ॥ १० ॥

एवं बहुविधालापैरप[illegible] दक्षात्तन्माहात्म्यविज्ञापनपूर्वकं स्वाभिप्रायं [illegible]रीति [illegible] ! रुद्र ! अजाविष्णुहरच्छाणा इति यादवः आत्मन[illegible] धिनिर्मितंगुणत्रयात्मकं रजआदिगुणत्रयोपादानक[illegible] इत्थं [illegible]वैचित्र्योपेतमेतद्विश्वं त्वयि भाति नित्यापरोक्षितांतर[illegible]स्वरूपत्वात्तत्प्रसादेन करतलामलकवदेतद्विश्वं तव [illegible] अथापि तव द्रष्टव्यां

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

शाभावेपि हे भव ! मंगल ! हर ! अहं मे भवत्तिर्ति जन्मभूमिं दिदृक्षे इत्यन्वयः अत्र हेतुगर्भविशेषणंयोषिदिति । युषशब्दादिसेवायां शब्दादिविषयसेवाशीलत्वादित्यर्थः अतएव ते तव ॥ अतस्त्ववित् यथास्थितवस्तुस्वरूपाज्ञानित्वात् दीना भीता ज्ञानदुर्बला ॥ ११ ॥

इतोपि गतव्यमिति भावेनाह पश्येति अन्यस्त्रियोपि प्रयांति किमेतत्तो गतव्यमित्यर्थः शितिकंठ ! कलहंसवत्पांडुभिर्धवलै ॥१२॥

युक्त्यापि गतव्यत्वंवक्ति कथमिति नेंगते न चलतिआह्वानाभावे कथं गमनं स्यादित्याशंक्याऽनाहूतेनप्येवं गृहगमनमुचितं भवतीत्याह अनाहुता इति देहकृतः पितुः ॥ १३ ॥

उपसंहरति तन्मे इति यत एवं गेतव्ये बहवो हेतवः संति तत्तस्मात् भवान् पूज्यस्त्वं मम प्रसीद हेअमर्त्य ! देव । इदंवाञ्छितं कर्तुं मर्हसीत्यस्मिन्नर्थे बत कृपा कर्तव्या कारुणिकत्वादित्यर्थः त्वमेव कारुणिको नान्य इत्याशयेनाह त्वयेति अदभ्रचक्षुषा सर्वज्ञेन त्वया सहायं धर्मः पूर्णः गरीयान् निरूपित इति यद्वतः कारुणिकत्वात्प्रार्थितस्त्वमनुगृहाण वांछितमिति शेष इत्यर्थः ॥ १४ ॥

तथापि प्रियया प्रार्थितः शंकरः किमुत्तरमभ्यधादिति विदुरस्य मानसीं शंकां परिहर्तुमाह एवमिति गिरित्रो गिरिशः । कुत्सिता वाच एव इषवः शराः कुवागिषवस्तान् । को दक्षः ॥ १५ ॥

किंवा बहुनाप्रलापेनाऽनाहूता अप्यभियांतीति यदुक्तं तस्योत्तरं श्रावयति भावेनाह त्वयोदितमिति किं तदुदितमित्यत उक्तं अनाहुता इति तन्निरभियाने किं कारणमत्राह यदीति ते बांधवा । अनात्ममदेन देहाभिमाननिमित्तदर्पेण जातेन मन्युनाक्रोधेन ॥ १६ ॥

असतां विद्यादिकमपि मदविषयजनकत्वेनाप्रयोजकमहोपयः पानमिवेति भावेनाह विद्या तप इति असतामा विद्यादिभिः षड्भिः सतां योग्यैर्गुणैरुत्पन्नैर्मदैः । स्मृतौ हतायां शास्त्रश्रवणोत्पन्नज्ञाने नष्टे । भूयसां महात्मनां । धाम प्रभावं । न पश्यंति हि यस्मात्तस्मादित्यन्वयःअदर्शनकारणमाहअभिमानदर्पदृष्टा इति विद्यामदो धनमदस्तृतीयोऽभिजनो मदः इति ॥ मदलक्षणकामादिशत्रु दुष्टेंद्रियत्वादित्यर्थः अतएव तमा अतरि विशेषः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तस्मिन्निति सार्द्धकम् ॥ ९—१३ ॥

अर्हसीति चित्सुखः ॥ १४ ॥

अभिभाषित इत्यत्र नोचित इति क्वचित् मर्म्मभिदस्तत्कृता-नाम ॥ १५ ॥ १६ ॥

भूतमानेत्यत्र ह्यभिमानेनेति क्वचित् स्तब्धा इति चित्सुखस्यापि सम्मतः पाठः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

निर्यापितः प्रवर्त्तितः ते प्रसिद्धा यत्अमी विबुधा व्रजन्ति हि अतएव हेतोः वयमपि तत्र अभिसराम हे वाम ! अर्थिरवम इयं मम प्रार्थनेत्यर्थः ॥ ८ ॥

तत्र तव मम वा किं प्रयोजनमत आह तस्मिन् भगिन्य इति । तासां सभर्तृकाणामर्हणामिव ममापि सभर्तृकाया अर्हणा भवत्विति कामये इत्याह । अहञ्चेत्यादि । पितृभ्यामुपनीतं दत्तं परिवर्हं वस्त्रालंकारादिद्रव्यं भवता सह अर्हितुं अर्हणीयं स्वीकर्त्तुमिति यावत् कामये इच्छामि ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तीकृत सारार्थदर्शिनी ॥

किं परिबर्हार्थिनी यियासतीति तत्राह तत्रेति । क्लिन्नधियं स्नेहार्द्रचित्ता उन्नीयमानं प्रवर्त्यमानं अध्वरेषु मध्ये ध्वजमिव श्रेष्ठं । यज्ञा । उत्क्षिप्यमाणा यज्ञकेतुम ॥ १० ॥

अत्याश्चर्यमिदं यत्त्वयापि प्राकृतलोकस्येव बन्धुस्नेहात्मोहस्तत्राह त्वयीति । हे अज ! एतन्मोहादिकं तवात्मारामत्वात् त्वय्येवाश्चर्यं भाति अस्माकन्तु स्वाभाविक एवायं धर्म इति भावः । यतो गुणत्रयात्मकमिदं विश्वमात्ममायया विनिर्मितमतो मुह्यत्येवेति भावः तथाप्येतद्विश्वमध्येऽपि अहं योषित् । तत्रापि अतत्त्वविच्च ते तव तत्त्वमजानती अतएव दीना भवाम्यतो जन्मभूमिं दिदृक्षे हे भव ! ॥ ११ ॥

न केवलमहमेकैवेतादृशीत्याह पश्यंति हे अभवेति सुहृद्वियोग दुःखं त्वया नानुभूतमिति भावः अन्या योषितः सम्बन्धरहिता अपि कान्तसखा भर्तृसहिताः वरूथशः संघशः यासां विमानैर्व्रजद्भिर्नभो मण्डितं हे शितिकण्ठेति परानुग्रहाय त्वया विषमपि भक्षितमत आज्ञां देहीति भावः ॥ १२ ॥

अहन्तु तस्य कन्या भूत्वा कथं धैर्यं धास्यामीत्याह कथमिति मेऽङ्ग ते न द्रष्टुं प्रचलति ननु तद्प्यनाहूताः कथं गच्छामस्तत्राह अनाहुता अपि सौहृदं सुहृदः केतनं गृहं गुरोः श्वसुरस्य देहकृतः पितुश्च ॥ १३ ॥

यदि ते नास्ति जिगमिषा तदपि मदनुरोधेन कृपया गच्छेत्याह तन्म इति हे अमर्त्य ! हे देव ! त्वया अकर्त्तव्यमपि कृतमित्याह अदभ्रचक्षुषा अनल्पज्ञानेनात्मारामेण आत्मनो देहस्यार्द्धे अहं निरूपिता भूता यतोऽर्द्धनारीश्वर इति ख्यातोऽस्यतो मामाम ॥ १४ ॥

को वक्ता यानाह तान् मर्मभिदः कटुवाक्शरान् प्रियया स्मारितः । ननु दक्षप्रयुक्ताः कटुवागिषवः श्रीशिवस्यात्मारामस्य मर्म कथं भिन्दन्ति । उच्यते शिवस्य परमेश्वरत्वादात्मारामत्वमस्त्येव तमोगुणयुक्तत्वाच्च कदाचित् पारमेश्वर्याननुसन्धाने सति शोकमोहरागद्वेषादयोऽपि भवन्ति । तथैव कृष्णस्य सदैवात्मारामत्वेऽपि श्रीयशोदादि श्रीवलदेवादि श्रीगोपिकादि विशिष्टत्वे प्रेमवत्त्वादेव स्वीयपारमैश्वर्याननुसन्धानात् शोकमोहरागद्वेषादयः किन्तु शिवस्य तमोगुणोद्भूतास्ते दुःखाभासानुभवमयाः कृष्णस्य प्रेमोद्भूतास्ते आनन्दपरमकाष्ठानुभवमयाः । प्रेम्णश्चिच्छक्तिसारवृत्तित्वात्मारामत्वस्याप्यसंकोचकाः । असुरादिहिंसादयस्तु सत्त्वगुणकार्या एव गुणानां परस्परोपमर्दित्वात् यथा प्रकाशोऽन्धकारं हन्ति तथैव सत्त्वगुणस्तमोरजसी हन्ति । तथैव कृष्णोऽसुरादींश्च हंतीति शुद्धसत्त्वरूपे तस्मिन् प्राकृतसत्त्वकार्यास्ते वर्त्तमाना अपि नापकारकाइतिप्रथमस्कन्धव्याख्यानं सप्तमारम्भे च वक्ष्यते ॥ १५ ॥

अनात्मस्वं देहादावहंकारस्ततकृतेन मदेन मन्युना च ते बंधवो यद्गुणोत्पादितदोषदृष्टयो भवंति ॥ १६ ॥

ननु विदुषां मतपितुर्मूढानामिव दोषदृष्टिः कथं सम्भवेत् तत्रा सतां विद्याद्य एवानर्थहेतव इत्याह विद्यादिभिरेव षड्भिर्गुणैः स्मृतौ विवेचनायां हतायां सत्यां भूतास्तैरेव पुरुः अहं विद्वांस्तापस इत्यादिमानो गर्वस्तेन दुर्दृशोऽन्धा भूयसां महत्तमानां धाम तेजो न पश्यन्ति । ननु तैर्गुणैः कथं स्मृतिभ्रंशस्तत्राह सतां गुणैरसत्तमानांतु इतरैर्दोषैर्दुग्धममृतमपि सर्पमुखे प्रविष्टं विषमेव भवेदतः स्थानमेव गुणा गुणायंत इति भावः ॥ १७ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

हे वाम ! शिव ! ते श्वसुरस्य यज्ञमहोत्सवः सांप्रतमिदानीं निर्मापितः प्रवर्त्तितः यतोऽमी विबुधाः व्रजंति ॥ यदि तेऽपि इच्छा तर्हि वयंच तत्राभिसरामगच्छामः ॥ ८ ॥

पित्रादिभिरुपनीतंदत्तं परिबर्हमलंकारादिकं भव ! सह अर्हितु गृहीतुं कामये ॥ ९ ॥

हे मृड ! चिरमुत्कंठमुत्सुकं मनोयस्याः साहम् तत्र स्थाने भर्तृभिः संमिताः तुल्याः सहिता इति यावत् ॥ मे स्वसृः भगिनीः क्लिन्नस्नेहार्द्रार्भार्यस्याः स्तां मातरं च मातृष्वसॄश्च महर्षिभिरुन्नीयमानं प्रवर्त्यमानमध्वरध्वजं क्रतुश्रेष्ठं तत् यूपं वा द्रक्ष्ये ॥ १० ॥

प्रिये किं तत्राश्चर्यं यतस्तवौत्सुक्यमत आह हे अज ! एतद्गुणत्रयात्मकं विश्वम् । अजात्ममायया अजस्य विष्णोः आत्ममायया स्वासाधारणेन वयुनेन संकल्पेन विनिर्मितं त्वयि योगेश्वरे भाति एवंभूतस्य तव आश्चर्याय ममाश्चर्योत्तरं नापेक्षितं तथापि अहं योषित अतत्त्वविच्च अतोदीना अतो मे भवद्दिति जन्मभूमिं दिदृक्षे दृष्टुमिच्छामि ॥ ११ ॥

हे अभव ! भवोपलक्षितजन्मादिषडूर्मिवर्जित ! अथवा अकारो वासुदेवः तस्माद्भवो जन्म यस्य स तथा हे विष्णुजात “ब्रह्मणा रुद्रा जायते नारायणाद्रुद्रो जायते,, इति श्रुतेः” क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनां भावौ तवांगसंभूतौ तस्मात्केशवनामवान् , इति स्मृतेश्च ॥ कांतः एव सखा यासांताः वरूथशःसंघशः ॥ १२ ॥

पितृगेहेकौतुकमुत्सवम । सौहृदं सुहृद्गृहम् अभियंती यत्र दृष्ट्वात्मार्थम ॥ १३ ॥

हे अमर्त्य ! देव ! अदभ्रचक्षुषा अनल्पया दृष्ट्या आत्मनो देहस्यार्द्धे त्वयाहंनिरूपिता नियोजिता नत्ततः प्रसीद प्रसन्नो भव प्रसन्नः । सन् भवान् इदं कर्तुमर्हति ॥ यतश्च कारुणिकोऽतो मया याचितः सन् ॥ अनुगृहाण ॥ १४ ॥

एवमुक्तप्रकारेणाभिभाषितो याचितः गिरित्र इति गिरित्रः को दक्षो विश्वसृजां समक्षम संमुखे मर्म भिंदंति तान् कुवाणिन् “ कर्णिनालीकनाराचानुद्धरंति शरीरतः वाक्शायको न निर्हर्तुं शक्यो हृदिशयो हिसः । वाक्शायका वदनान्निष्पंतति यैराहतः शोचति रात्र्यहानि परस्यनो मर्मसुते पतंति तान्पंडितोनावसृजेत्परे पुष्टयुक्तदोषान् दुरुक्तिवाणान् संस्मारितः सन् प्रत्यभ्यभक्त प्रत्युत्तर मुक्तवान् ॥ १५ ॥

तंदयाह त्वयो दितमित्यादिना यावदध्यायसमाप्ति हे शोभने ! सुहृदादिगृहमनाहुताः अपि अभियंति न त्वया यदुदितं तदशोभनमेव किंतु ते सुहृदादयो बलीयसा दृढतरेण अनात्म्यमदेन देहाद्यात्माभिमानेन मन्युना च अनुत्पादितदोषदृष्टयो भवंति तर्हि ॥ १६ ॥

ननु भवद्भिरपि महत्सु विद्यादि संपन्नो दक्षः कुतो दोषदृष्टिः स्यादत्राह विद्येति विद्यादिभिः सतां शिष्टानां गुणैः असत्तमानामितरैर्दोषरूपैः स्मृतौ कार्याकार्य विवेकरूपायां हतायां भूतेन भूतेन अहं मानेन दुर्दृशः कुदृष्टयः तएव हतदृशः अनम्रा भूयसां महतां धाम तेजो न पश्यंति ॥ १७ ॥

नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनाम् ॥
येऽभ्यागतान्वक्रधियाऽभिचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः ॥ १८ ॥
तथाऽरिभिर्नव्यथतेशिलीमुखैः शेतेऽर्दितांगोहृदयेन दूयता ॥
स्वानां यथावक्रधियां दुरुक्तिभिर्दिवानिशंतप्यति मर्मताडितः ॥ १९ ॥
व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि सुभ्रु ! संमता ॥
अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥ २० ॥
पापच्यमानेन हृदातुरेंद्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणाम् ।
अकल्प एषामधिरोढुमंजसा पदं परं द्वेष्टि यथाऽसुरा हरिम् ॥ २१ ॥

भाषाटीका ॥

[illegible] हे वाम (शिव) आपने, श्वसुर के यहां, सांप्रत [illegible] प्रवृत्त है, हम भी वहां जायगीं, बुलाये हुवे देवता [illegible] ॥

[illegible] पति सहित मेरी बहिने, सुहृदेख वे की इच्छा [illegible] से जांयगी मे भी वहां आपके सहित पिता [illegible] आदि ग्रहण कर वेताई इच्छा करुंहुं ॥ ९ ॥

[illegible] बहिने और समर्तृक मातृ बहिनो को और और [illegible] को, देखो गी, बहोत मन उत्कंठित है; हेमृड ! और [illegible] करके करो भयो यज्ञ ध्वज को देखूंगी ॥ १० ॥

यद्यपि ये आश्चर्य मय माया मे निर्मित त्रि गुणात्मक जगत, [illegible] है, तथापि हे अज, मे स्त्री दीन तुम्हारे तत्व की [illegible] अपनी जन्म भूमि देखों गीं ॥ ११ ॥

हे सं[illegible] ! हे शिति कंठ ! और भी पति सखा वारी अलंकृत [illegible] देखो प्रह्लावत् श्वेत विमानो पर बैठ के जाती है [illegible] से आकाश शोभित है ॥ १२ ॥

हे सुरवर्य [illegible] के कौतुक सुन बेटी को देह कैसे चंचल न होय [illegible] पति के गुरु के पिता के मित्र संबंधि गृह पर बिना बुलाये [illegible] ॥

हे मरण [illegible] ऊपर प्रसन्न हो ओ, मेरी मनो वांछा को पुरी कर [illegible] हो, आपने मोको अपने अर्धांग मे धारण करी है ता[illegible] प्रार्थना करुंहुं अनुग्रह करो ॥ १४ ॥

श्री शुकाचार्य [illegible] कि, ऐसे शिवजी सि प्रियाजी बोली तदा सु ह्रत्प्रिय शिवजी [illegible], औ विश्व रचवे वार के सामने मर्म भेदी कुटि[illegible] रूपी बाण दक्षके कहता को स्मरण करते भये ॥ १५ ॥

श्री महादेव जी बोले कि [illegible] ! तुम्हारी कहनी ठीक है, विना बुलाये हुवे भी [illegible] के जानो, जो वे यली अपने मद के क्रोध से दोष [illegible] ॥ १६ ॥

विद्या तप धन शरीर [illegible] संतों के गुण असतम करके प्रेरित होय है, तब [illegible] पर गर्वी लोग बडों के धाम को नहि देखे है ॥ १७

श्रीधरस्वामि कृत भावार्थदीपिका ।

स्वजनव्यपेक्षयाबंधुदृष्टया गृहाणप्रतीयान्नावलोकयेतअनवस्थित चित्तत्वमेवाह येवक्रधियाकुटिलयाबुद्ध्यापश्यंति आरोपिताउत्तंभिताभ्रूर्येषुतान्यारोपितभ्रूणितैःअमर्षणैःसक्रोधैरक्षिभिः आरोपिता भिर्भ्रूभिरितिपा ॥ १८ ॥

ननुस्वजनानांगृहंसुहृद्भिर्गंतव्यंतेषांदुष्प्रेक्षितंचसोढव्यम् नतस्य-दुःसहत्वादित्याह तथेति अरिभिःशिलीमुखैर्बाणैरर्दितांगः खंडित-गात्रोऽपितथानव्यथते यतःशेते स्वपिति स्वानांदुरुक्तिभिर्मर्मसुताडि तोयथादूयताव्यथमानेनहृदा दिवानिशं तप्यति ॥ १९ ॥

मयितत्रगतायांनैवंशंकितिचत्त्राह व्यक्तमिति त्वमुत्कृष्टागतिः स्थितिर्यस्यतस्यात्मजानांकन्यानांमध्येप्रियेतिमेसंमताऽस्यथापि-पितुःसकाशान्मानंनलप्स्यसे मदाश्रयान्मत्संबंधात् ॥ २० ॥

ननुभगवंस्त्वयाकिमितिदक्षस्तिरस्कृतोयतोऽसौत्वांद्वेष्टयत्राह पापच्यमानेनालंदह्यमानेनहृदामनसादुःखितेंद्रियः काभिः पुरुषोजी वस्तस्यबुद्धिश्चित्तंतस्यसाक्षिणांनिरहंकाराणामित्यर्थः समृद्धिभिः पु-ण्यकीर्त्यादिभिः एषांपदंस्थानमैश्वर्यप्राप्तुमकल्पोऽशक्तःसन्परंद्वेष्टि असुरायथाहरिंकेवलंद्विषंति ॥ २१ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी

द्वितीयार्थे आरोपिताभिरुर्ज्जंभिताभिर्भ्रूभिरुपलक्षितैरमर्षणैर-क्षिभिः तत्र वक्रधियेति हेतौ तृतीया ॥ १८ ॥

तस्य दुःप्रेक्षितस्य स्वपिति कदाचिन्निद्रात्यपीत्यर्थः ॥ १९-२०

अहंकारो हि चित्ते भवति तत्साक्षित्वं तत्रोदासीनत्वमेव तथा च निरहंकाराणामिति फलितोर्थः ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

तस्मादेतादृशानामनवस्थितचित्तानां गृहान् स्वजनव्यपेक्षया स्वजन इति बुद्ध्या न प्रतीयात् न गच्छेत् अनवस्थितात्मत्वमेवाह येवक्रा कुटिला तया दृष्ट्या वक्रधियेति पाठे कुटिलबुद्ध्येत्यर्थः आरोपिता उत्तंभिता भ्रूर्येषां तैरमर्षणैः साक्रोशैरक्षिभिः गृहान् प्रत्यभ्यागतान् पश्यंति ॥ १८ ॥

पश्यंत्वेवमथापि सोढुंगंतव्यमेव बंधुभिस्तत्राह तथेति अ-रिभिः शत्रुभिः शिलीमुखैः बाणैरर्दितांगः भिन्नगात्रोपि तथा न व्यथते यतः शेते स्वपिति यथा स्वानां वक्रधियां दुरुक्तिभिः मर्मसु-ताडितः दूयता व्यथमानेन हृदयेन दिवानिशं तप्यति दुरुक्तीनां सो ढुमशक्यत्वात्तद्गृहान्प्रति गंतव्यमित्यर्थः ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

मास्तु त्वद्गमनमहमेका प्रजिष्यामीति चेन्मामनाहत्य गताया स्त्वपि पितृकृतः पराभवः प्राप्तविपत्तये स्यादित्याह व्यक्तमिति यावन्त्म मापि हे सुभ्रु! यद्यपि त्वमुत्कृष्टगतेः उत्कृष्टा गतिः प्राजापत्याधिका रूपा गतिर्यस्य तस्य प्रजापतेर्दक्षस्यात्मजानां दुहितॄणां मध्ये प्रिया प्रीतिविषयासीति मे मता ज्ञाता व्यक्तं स्फुटं तथापि मदाश्रयात् मदाश्रयणात् मत्संबंधात्वतोस्त्वं पितुः सकाशान्मानं संमानं न लप्स्यसे यतः मत्संबंधात्कोपवृत्तः परि तप्यते क्लिश्यति ॥ २० ॥

ननु कुतस्तथा दक्षदिनरस्कृतः यतोसौ त्वां द्वेष्टि तत्राह पाप च्यमानेनेति पुरुष बुद्धिसाक्षिणां पुरुषो जीवः बुद्धिर्महान् ते साक्षात्पश्यंतीति तथा तेषां ब्रह्मात्मकत्वेन प्रकृतिपुरुषयथात्म्यविदां ब्रह्मविदामिति यावत् तेषां समृद्धिभिः पुण्यकीर्त्यादिभिः तेषां पुरुषबुद्धिसाक्षिणां पदं स्थानमैश्वर्यमधिकारमधिरोढुं प्राप्तुमसमर्थः अत एव पापच्यमानेन भृशं तप्यमानेन हृदयेन आतुरेन्द्रियः दुःखितेंद्रियः तान् परं केवलं द्वेष्टि स्वयं मूर्खोऽज्ञो दुर्भगश्च महद्भिः साम्यमलभमानस्तान् केवलं द्वेष्टि यथा असुरां हरिं द्विषंति ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

कमनहीतित्राहनैतादृशानामिति आरोपितभ्रूमिरितिहस्वत्वा भावश्छांदसः उन्नमितभ्रूभंगैरमर्षणाक्षिभिरसहमानलक्षणोपेतनेत्रैः ॥ १८ ॥

दक्षाध्वराधमने कारणांतरं चाह तथारिभिरिति प्रधने युद्धे शिलीमुखैः शरैः ॥ १९ ॥

किं बहुनानुलप्यत्वं दक्षस्य प्रियपुत्रीत्वेपि मदाश्रयत्वेन तप्यमानात्पितुः पूजां न प्राप्नोषीत्याह व्यक्तमिति उत्कृष्टगतेः प्राप्तसर्वाधिपत्यस्य ॥ २० ॥

मत्पितुर्ज्ञानाधिकारित्वेकत्वेन सत्वात् कुतो भवति द्वेष इति माशंकयसाम्राज्यमहलक्षणासुराधेशान्मत्पदाधिपत्यं नप्राप्तमतोद्वेष इति भावेनाह तापच्यमानेनेति पुरुषबुद्धिसाक्षिणां पुरूषेंद्रियप्रेरकाणामस्मत्सदृशानांसमृद्धिभिः एषां पुरुषबुद्धिसाक्षिणां परं पदमंजसा तत्वेनाधिरोढुमकल्पोऽसमर्थो यतो यस्मात्ततो द्वेष्टि इदमसुरलक्षणमिति भावेनोक्तं यथेति ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

वक्रधिया हेतुना रोपितभ्रूभिरुपलक्षितैरमर्षणाक्षिभिः यैरभिचक्षते ॥ १८ ॥

शेत कदाचिन्निद्रात्यपीत्यर्थः ॥ १९—२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी।

ननु ईदृशाः पित्रादयोऽप्युपेक्ष्या एवेत्याह नैतेति स्वजना इति [illegible] विशिष्टा अपेक्षा तथा न गच्छेद्वेति यदि गच्छेत्तदा वरं शत्रुबुद्धैव गच्छेदिति भावः ननु दुरात्मनोऽपि स्वापत्य जामात्रादिषु स्निह्यत्येवेति तत्राह अनवस्थितात्मनां नायमपि तेषां निश्चय इति भावः ये आरोपिताभिर्भ्रूभिस्तथा अमर्षणाक्षिभिः क्रोधनेत्रैरभिचक्षते पश्यन्ति ॥ १८ ॥

तादृशा बन्धवः शत्रुभ्योऽप्यधिका इत्याह अरिभिः प्रयुक्तैः शिलीमुखैर्बाणैःतथा न व्यथते यतः शेते कदाचित् स्वापिति दूयता दूयमानेनेत्युत्तरेणान्वयः ॥ १९ ॥

मयि तत्र गतायां नेयं शंकेति चेत्तत्राह व्यक्तं निश्चितमेव उत्

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

कृष्टगतेरिति विपरीत लक्षणाया प्रजापतेर्दक्षस्य आत्मजानां मध्ये त्वं प्रिया प्रतिस्नेहपात्री भवसि। तथापि तदपि पितुः सकाशात् मानं न प्रतिपत्तस्यसे न प्राप्स्यसि यतो मदाश्रयात् मत्संबंधात् ॥ २० ॥

ननु भगवंस्तदा त्वया या दक्ष प्रति मनसा विचित इदं तत्र नहि नहीति शपथं कुर्वन् दक्षो मत्सर्गी सदैवा[illegible]दीन् द्वेष्टि सम्प्रति मदपराधं कल्पयित्वा इयं प्रकटयामासेत्याह पापच्येति। एषामस्मदादीनां समृद्धिभिर्योगैश्वर्यादिभिर्हेतुभिः पापच्यमानेन आज्वल्यमानेन हृदा आतुरेन्द्रियो द्वेष्टि यथा असुरा हरिं। कीदृशा एषां परं सर्वातकृष्टं पदमधिरोढुं अकल्पः असमर्थो अस्माकन्तु दक्षे त्वत् पितरि द्वेषलेशोऽपि नास्तीति सशपथं वदन् विशिनष्टि पुरुषः परमेश्वर एव बुद्धेर्भद्राया अभद्राया वा साक्षी येषां तेषामिति हे दाक्षायणि! यदि त्वं न प्रत्येषि तदा क्षणं समाधिना परमेश्वरं साक्षात्कृत्य महोषगुणां स एव प्रष्टव्य इति भावः ॥ २० ॥

ननु सत्यं त्वमद्वेष्टैवेति प्रत्येमि तदपि श्वशुरे तस्मिन् प्रत्युत्थानविनयादिकमुचितमेवेत्यत आह। प्रत्युद्गमनाभिवन्दनप्रत्यभिवादनादिकं मिथो जनैर्यद्विधीयते तत्प्राज्ञैः परस्मै पुरुषाय गुहाशयायैव चेतसा अत्र मत्श्वशुरे मज्जामातरि च परमेश्वरो वसते तस्मै नम इति भावनयैव विधीयते नत देहमानिने अप्राज्ञैस्तु परमेश्वरस्मरणाभावाद्देहमानिने एव विधीयते न तत् सम्यगतो दक्षागमन समये श्रीभगवच्चरणसमाहितचेतस्त्वात् यद्यपि दक्षो [illegible] स्तदपि भगवत्सम्मानेन दक्षसम्मानोऽभूदेव दक्षस्त्वामी वृथा कुप्यतीति भावः ॥ २१ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः।

ये वक्रधिया कुटिलाया बुध्या आरोपिताभिर्भ्रूमिः अमर्षणाक्षिभिः सक्रोधैर्नेत्रैः अभ्यागतान् अभिमुखे आगतान् वन्धून् पश्यंति एतादृशानाम अनवस्थितात्मनामस्थिरचित्तानां गृहान् स्वजनबंधुत्वया स्वकीयबुद्ध्या नेयात नगच्छेत् ॥ १८ ॥

अरिभिः कर्तृभिः शिलीमुखैः करणैः अर्दितांगोऽपि तथा न व्यथते किं तु स्वल्पकाले तप्यति पुनः व्रणनिवृतौ सुखी भवति अत्यंतनोऽर्दितांगः शेते वीरशये स्वपिति मृतो भवति न तु दिवानिशं तप्यति यथा स्वनांदुरुक्तिभिर्मर्मताडितो दिवानिशं तप्यति ॥ १९ ॥

यद्यपि उत्कृष्टगतिः श्रेष्ठा स्थितिर्यस्य तस्य प्रजापतेः आत्मजानां मध्ये त्वं प्रिया सम्मता चासि इति व्यक्तं निश्चितम् तथापि हे सुभ्रु पितुः सकाशात् मानं न प्रपत्स्यते न प्राप्स्यसे यतो मदाश्रयात् मत्संबंधात्को दक्षः परितप्यते ॥ २० ॥

पुरुषाणां बुद्धेः साक्षिणो ये सर्वज्ञः तेषां समृद्धिभिः पापच्यमानेनात्यर्थं संतप्यमानेन हृदा आतुरेन्द्रियः एषां अयं पदवीम् अधिरोढुमधिगंतुम् अकल्पोऽशक्तः सन् तान् केवलं द्वेष्टि यथा हरिमसुरा द्विषंति ॥ २१ ॥

भाषाटीका।

असावधान आत्मारोंको ऐसे जन समझकर उनके घरकी ओर गवन न करें वे घरआए लोगोंको टेढी बुद्धि, भृकुटी चढी क्रोध दृष्टी से देखें हैं ॥ १८ ॥

तैसो शत्रुकर के मारे बाणों से पीडितांग दुःखीहो सोयो भयो व्यथा को नहीं प्राप्तहोवै, जैसो अपने कुटुंबीन की टेढी बुद्धियों

प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे ।
प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने ॥ २२ ॥
सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ।
सत्त्वे च तस्मिन्भगवान्वासुदेवो ह्यधोऽक्षजो मे नमसा विधीयते ॥ २३ ॥
तत्ते निरीक्ष्यो न पितापि देहकृद्दक्षो मम द्विट् तदनुव्रताश्च ये ।
यो विश्वसृग्यज्ञगतं वरोरु ! मामनागसं दुर्वचसाऽकरोत्तिरः ॥ २४ ॥
यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति ।
संभावितस्य स्वजनात्पराभवो यदा स सद्योमरणाय कल्पते ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम् उमारुद्र सम्वादे
तृतीयोऽध्यायः ॥ ३ ॥

भाषाटीका ।

[illegible] मनं आदिन अहोरात्र तपे हैं ॥ १९ ॥

[illegible] हे स्पष्ट है दक्ष की बेटीन में तुम तुमध्यारी हो तथा पिता [illegible] नहीं प्राप्त होगा, मोधि दक्षप्रजापति दुःख माने है ॥ २० ॥

[illegible] विशुद्धजनों की निर्मलसमृद्धि से दह्यमान आसुरचित्त- [illegible] अधिकार पर पहुंच नहीं सके, केवल द्वेषक्रिया [illegible] धीहरि से वैर करते हैं

श्रीधरस्वामिकृत भावार्थदीपिका

ननु [illegible] प्रत्युत्थानविनयादकरणादवज्ञातएवास्मीतत्राह हे सु- [illegible] मिथो जनैर्यद्विधीयते तत्प्राज्ञैः साधु विधीयते साधु त्वमेव [illegible] वासुदेवाय गुहाशयायान्तर्यामिण एव तच्चेतसा [illegible] कव्यापारायोगात् अतोऽन्तर्यामिदृष्ट्या मनसा सर्वकृत [illegible] २ ॥

किञ्च [illegible] गतेष्वेव वासुदेवदृष्ट्या नमनं क्रियते किंतु नि- त्यमेव मनसा वासुदेवा [illegible] यत इत्याह विशुद्धं सत्त्वमन्तःकरणं सत्त्वगु णो वा वसुदेवशब्दितं [illegible] शब्देनोक्तम् कुतः यद्यस्मात्तत्र सत्त्वे- पुमान्वासुदेवः [illegible] प्रकाशते अपगतमावृतमावरणं यस्मात्सः अयम- र्थः वासुदेव [illegible] वासुदेवः परमेश्वरः प्रसिद्धः सच्च विशुद्धं सत्त्वं प्रतीयते [illegible] प्रत्ययार्थ प्रसिद्धेन प्रकृत्यर्थो निर्धार्येत त- [illegible] स्मिन्निवसति वासुः देवो दीव्य- [illegible] प्रकाशत इति वा वसुदेवशब्द- वाच्यं शुद्धं सत्त्वम् [illegible] सत्त्वे च तस्मिन्नमयानमसा नम- स्कारेणानुविधीयते [illegible] मनसेति पाठ मनसा विशेषेण भ्री- यते धार्यते नित्यम् [illegible] त्याह हतेष्वक्षेषु जायते प्रकाश ते इन्द्रियागोचर इत्यर्थः

तत्तस्मात्त्वया [illegible] पोषकत्वादिभिरुपचारि [illegible] ोरु ! यो दक्षो विश्वसृजां [illegible] ॥ २४ ॥

विपक्षे दोषमाह यदीति [illegible] तिष्ठस्य यतः संभावित

श्रीधरस्वामिकृत भावार्थदीपिका ।

स्यसुप्रतिष्ठितस्य यदा पराभवो भवति तदा स पराभवस्तस्य मरणाय क ल्पते ॥ २५ ॥

श्रीराधारमणदास गोस्वामिविरचिता ।
दीपन्याख्यार्दीपिका टिप्पणी ।

जनैरस्मैः प्राज्ञैः विद्वद्भिः तत्र प्रत्युद्गमादि ॥ २२ ॥

तत्रान्तःकरणस्य विशुद्धत्वं भक्त्येकवासितत्वं सत्त्वगुणस्य च तत् अप्राकृतत्वेन जाड्यांशराहित्यम् अगोचरस्य गोचरत्वे हेतुर्हि सत्त्वं विशुद्धं च तत्र सत्वतावसुदेवतावा कुतस्तत्राह यद्यस्मादिति वासुदेवप्रकाशाश्रयत्वात्सत्वता वसुदेवशब्दवाच्यत्वे हेतुं व्याचष्टे अयमर्थ इति प्रतीयते प्रकाशते स च वासुदेवः अतः विशुद्धसत्त्वमन्तरान्यत्र तत्प्रतीतिविरहात् प्रत्ययोऽत्राण् तस्यार्थो हि भवार्थस्तेन प्रसिद्धेन प्रकृतिरत्र वसुदेवशब्दस्तस्यार्थस्तावद्विशुद्ध सत्वमेवेति निर्णीयते ततश्च प्रत्ययार्थप्रसिद्ध्या प्रकृत्यर्थनिर्धारणा मेति उक्तपोषणार्थं यौगिकनिरुक्तीरपि प्रदर्शयति वासयतीत्यादिना ततः अन्तःकरणस्य वसुदेवशब्दवाच्यत्वे सति किं प्रकृते समायातमत आह सत्त्वेचेत्यादि सिपूर्वकदधातेः करोत्यर्थत्वात्तत्रा नु योगे अनुकरणमेवार्थः नमस्कारेणानुकरणं च सेवनमेवेत्यार्थि कार्थत्वादित्यर्थ इत्युक्तम् किंतु न्वधोक्षज इत्येव पाठः मनसेति पाठे इत्यत्र ह्यधोक्षज इति च पाठ इति पूर्वगणीयम तत्रानुशब्दस्यव्या ख्यानात् प्रत्युत यत इति हि शब्दस्यैवार्थ इति विवेचनीयम् ॥ २३ ॥

तत्तस्माद्दिरपराधे मयि वृथा द्वेषकर्तृत्वात् जनिता चोपने ता च यस्तु विद्यां प्रयच्छति अन्नदाता भयत्राता पञ्चैते पितरस्मृ ताः अन्नदाता पोषक इत्योपचारिकापितरः तदेव प्राकृतस्य कृन्दासि व्यर्वाहताश्चेति तिरोऽकरोदिति योजितम् ॥ २४ ॥

विपक्षे गत्वा निरादरणं तस्य सुप्रतिष्ठस्य कल्पते योग्यो भवति ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थ स्कन्धे
दीपिका दीपिन्याख्यायां टिप्पण्याम्
तृतीयोऽध्यायः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

ननु गुरुभूतो दक्षस्त्वया प्रणामादिभिरसत्कृतस्त्वां द्वेष्टि तत्राह प्रत्युद्गमेति हे सुमध्यमे ! प्राज्ञैर्देहमानिभिर्मिथः परस्परं प्रत्युद्गमप्रश्रयणाभिवादनं प्रत्युत्थानप्रणामाभिवादनं विधीयते मनोवाक्कायैरिति शेषः प्राज्ञानां सन्निपाते तु प्राज्ञैर्गुहाशयाय अंतर्यामिणे परस्मै पुरुषायैव चेतसैव विधीयते न तु देहाभिमानिने करणत्रयेणेत्यर्थः "प्राज्ञैः परस्परं मनसैव विधीयते परिपूर्णो तस्मिन् कायिकव्यापारायोगात्" इत्यर्थवर्णनं तु अशोभनं प्राज्ञैरपि मिथस्तस्य करणत्रयेण "वैष्णवो वैष्णवं दृष्ट्वा दण्डवत्प्रणमेद्भुवि,, इत्यादिभिर्विहितत्वात् अंतर्याम्युद्देशेन मानसिकं प्रत्युद्गमनादिकमस्मै देहाभिमानिने दक्षाय विहितमेव मयेति भावः ॥२२ ॥

ननु किं विशेषेण चेतसैव प्रणतिर्विधीयते इत्युच्यते ! न तु मनोवाक्कायानामन्यतमेनेत्यत्र कारणमाह सत्त्वमिति विशुद्धं रजस्तमोभ्यामनभिभूतं सत्त्वं सत्त्वप्रधानं चित्तं वसुदेवशब्दितं वसुदेवशब्देनोच्यत इत्यर्थः तत्र विशुद्धे सत्त्वे वसुदेवशब्दप्रवृत्तौ निमित्तमाह यदिति यद्यस्मात्तत्र सत्त्वे पुमान् वासुदेवः अपावृतः अप गत मायावरणो यस्मात्सः ईयते प्रतीयते प्रकाश्यते इति यावत् तत्र सत्त्वं निर्मलत्वात्प्रकाशकमि त्युक्तरीत्या वासुदेवस्वरूपरूपादिप्रकाशकसत्त्वप्रधानत्वाच्चित्तस्य द्योतमानत्वाद्देवत्वं भगवतो धामभूतत्वाच्च वसुत्वमिति वसुदेवशब्दितं सत्त्वमित्यर्थः तस्मिंश्च सत्त्वाख्ये चित्ते अधोक्षजोऽधःकृतेषु अक्षेषु इंद्रियेषु जायते आविर्भवतीत्यधोक्षजः इंद्रियांतराणगोचरः केवलपरिशुद्धचेतसैवग्राह्यः भगवान् वासुदेवः मे मया नमसा विधीयते नमस्क्रियत इत्यर्थः अतश्चेतसैव भगवान् प्रणम्यत इति भावः ॥ २३ ॥

तस्मात्त्वया पितापि देहकृदपि पालक पितृत्वादि व्यावृत्त्यर्थं देहकृदित्युक्तं मम द्विड्मद्द्वेषी दृष्टो न निरीक्ष्यः निरीक्षितुमयोग्यः तथा तं दक्षं ये ऽनुव्रतास्तेऽपि न निरीक्ष्याः हे वरोरु ! यो दक्षः विश्वसृड्यज्ञगतं विश्वसृजां सत्रगतम् अनागसं निरपराधिनं मां दुर्वचसा दुरुक्त्या तिरोऽकरोत् तिरस्कृतवान् ॥ २४ ॥

यदि मद्वचोऽतिहायाऽतिक्रम्य व्रजिष्यसि तर्हि भवत्यास्तव भद्रं संमानं न भविष्यति प्रत्युत पराभव एव स्यादिति भावः बंधुकृतः पराभवो न दुःखाय भवेदिति चेत्तत्राह संभावितस्य सत्रसंमानितस्य स्वजनाद्यः पराभवः स सद्यो मरणाय कल्पते भवति ॥२५॥

इतिश्रीमद्भागवतेमहापुराणे चतुर्थस्कंधे
श्रीमद्वीरराघवाचार्यकृतभागवत चंद्रचंद्रिकायां
तृतीयोऽध्यायः ॥ ३ ॥

———

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

अभ्युत्थानाभिवादार्हो भवता न संमानितोऽतो द्वेष इति किं न [illegible]इति तत्राह प्रत्युद्गमेति प्राज्ञैस्तत्त्ववेदिभिः पुरुषैर्वैष्णवैस्त्वागक्षैस्तु मिथः प्रत्युद्गमादिकं चेतसा गुहाशयाय हृदयेस्थिताय परस्मै पुरुषायैव विधीयते क्रियते देहाभिमानिने जीवाय न क्रियते इदं तूभयोः समत्वे । बंधुता गुरुत्वानामत्तेन गुरुत्वेनोक्तमतो दक्षायाऽज्ञाय ज्ञानाभावात्तन्निमित्तद्वेषो न संभाव्यत इति ॥ २२ ॥

किं च मया प्रत्युत्थानादिना मुख्यतः पूज्यस्तु ब्रह्मादिशरीरांतःस्थितो हरिरित्याह सत्त्वमिति विशुद्ध सत्त्वं ब्रह्मादिशरीरं । वसुदेवशब्दितं पृथिव्यादिपदार्थेषु स्थित्वा विद्योतते तत्कृतमललेपासावादात् तच्छब्देन शब्दितमित्यर्थः तच्छब्दवाच्यत्वे निमित्तमाह यदिति यत इति व्याप्तिकाष्ठादिगुणाकरः पुमान्नारायणोपावृतो माया

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

लक्षणावरणरहित ईयते ज्ञायत इति यद्यस्मात्तस्मा[illegible]मितरत्वाह सत्त्वंचेति तत्सत्त्वं च यस्मिन्हरौ यदधीनतया वर्तते तत्सत्त्वं चात्तच्छब्दवाच्य मित्यर्थः एवं वसुदेवशब्दनिवासलक्षणसंबंधाद्वासुदेवः सोऽधोक्षजोऽतीन्द्रियज्ञानी भगवान्मम मनसा विशेषेण धीमता चिन्त्यते त दुक्तं "मद्रूपं धीयते विष्णुर्धिष्ण्योऽर्ध्येयोनकश्चन,,इतिश्रुतिपुराणस्थम चतुर्मुखब्रह्माणि प्रकाशमानश्रीविष्णुगुणगणोपसंहारलक्षणोपासनैकाग्रचित्तत्वेन स्थितेन मया कार्यान्तरप्रारम्भस्यानुचितत्वात् दक्षस्य हार्दस्मरणसत्कारण तत्सत्कारोपि कृत इति द्वेषकारणं न पश्यामीत्युक्तं भवति यद्वा यद्विशुद्धं तमआदिगुणानुपस्पृष्टं सत्त्वं तद्वसुदेवशब्दितं च शब्द पदार्थं तत्सत्त्वं गुणो यस्मिन्नस्त्येवास्ति पुमान् श्रीहरिस्तत्र तस्मिन्नेव पुंस्यपावृत ईयत इति यः स्मात्तस्मात्स वासुदेवः सात्त्विकप्रियोऽधोक्षजो भगवान्मे मनसा प्रत्युत्थानादिना विशेषेण चिन्त्यत इत्यतो नास्मद्गुरुरित्यभिमानमनु[illegible] रजोगुणाभिभूतचित्तत्वेन चात्र हरेर्विशेषेण सन्निधानाभावात् पिता न सत्कारयोग्य इति कृत्वा प्रत्युत्थानादिना न मानित इति अनेन तमआदिगुणाभिभूतत्वेन तत्त्वाज्ञानात् द्वेषोद्रेक इत्युक्तं भवति ॥२३॥

मम त्वत्पूज्यत्वान्मम द्वेषि जनकोपि त्वया द्रष्टुमेवायोग्यो गुरुत्वभ्रुकुटदर्शने दोषोक्तेरित्याह त्वयेति देहकृदपि ॥ न केवलं मातरं द्वेष्योपि तु याह्यापीति भावेनाह तदनुव्रता इति स्थानं नि[illegible]ति य इति ॥ २४ ॥

बाधकं चाह यदीति मरणं नाम देहवियोगलक्षणं [illegible]स्वकीर्ति लक्षणम ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे
श्रीमद्विजयध्वजतीर्थ कृतपदरत्नावल्याम्
तृतीयोऽध्यायः ॥३॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

प्रत्युद्गमेति । अवैष्णवविषयमेवेदं वाक्यम् अ[illegible] भागवता यूयं प्रियाःस्थ भगवान् यथेति पुरतस्तदुक्तेः मद्भक्त पूजाभ्यधिकेति भगवदुक्तेश्च अतएव न देहमानिने बहिर्मुखायेत्युक्तम् ॥ २२ ॥

सत्त्वमिति प्रथमार्थः विशुद्धं स्वरूपशक्तित्वात् मायांशेनापि रहितमिति विशेषेण शुद्धसत्त्वं यत् तदेव वसुदेवशब्देनोक्तम कुतस्तस्य सत्त्वता वसुदेवता वा तत्राह यत् यस्मात् तत्र तस्मिन् पुमान् वासुदेव ईयते प्रकाशते सत्त्वं विशुद्ध मित्यादिकं द्वितीयसन्दर्भे अष्टादशाधिकशततमवाक्यव्याख्यातं विशुद्धसत्त्वमित्यादिना व्याख्यातमस्ति किन्त्वत्र परस्य वासुदेवशब्दस्य पूर्वव्याख्यानमयः आद्य तावद्गोचरस्य गोचरता हेतुत्वेन लोकप्रसिद्धत्वसाम्यात् सत्त्वता व्यक्ता द्वितीयेत्वयमर्थः वसुरेव भवति प्रतीयत इति वासुदेवः परमेश्वरः प्रसिद्धः सच विशुद्धसत्त्वे प्रतीयते अतः प्रत्ययार्थेन प्रसिद्धेन प्रकृत्यर्थो निर्णीयते तत्र वासयति [illegible] व्युत्पत्त्या वा वसत्यस्मिन्निति वा वसुः तथा दीव्यति द्योतत इति देवः स चासौ स चेति वासुदेवः वसुभिर्भगवद्धर्मलक्षणैः पुण्यैः प्रकाशत इति वा वसुदेवः तस्माद्वसुदेवशब्दितं विशुद्धसत्त्वम् इत्थं स्वयं प्रकाशत्वे[illegible]विग्रह भगवज्ज्ञानहेतुत्वेन कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं तु यत् प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतमित्यादौ अत्र गुणातीतावस्थायामेव भगवज्ज्ञानश्रवणेन च सिद्धमत[illegible]शुद्धपदावगत स्वरूपशक्तिमूर्त्तिभूत

[illegible]वगोस्वामिकृत क्रमसन्दर्भः ॥

स्वप्रकाश[illegible]मणार्थं तस्य व्यक्तं तनश्च सत्त्वे प्रतीयत इत्यत्र करण[illegible]रणोपिवक्ता स्वरूपशक्तिवृत्तित्वमेव विशदयति मया[illegible]स्य: सन् प्रकाशते प्राकृतं सत्त्वं चेत्तर्हि तत्र प्रतिकू[illegible]मते तनश्च दर्पणो मुखस्येव तदन्तर्गततया तस्य तत्राह [illegible]स्यादितिभाव: फलितार्थमाह एवम्भूते सत्त्वे [illegible] नित्यमेव प्रकाशमाने भगवान् मे मया मनसा विशे-षेण [illegible] चिन्तयन इत्यर्थ: तत् सत्त्वतादात्म्यापत्तेनैव मन[illegible]क्यते इति पर्यवसितं ननु केवलेन मनसैव चिन्[illegible]त्वेन तत्राह हि यस्मादधोक्षज: अधःकृतमति कान्[illegible] ज्ञानं येन स: नमसेति पाठे हिशब्दस्थाने ऽन्य[illegible]तश्च विशुद्धसत्त्वाख्यया स्वप्रकाशता शक्त्यैव प्रक[illegible]मस्कारादिना केवलमनु विधीयते सेव्यते ननु केनापि [illegible]गत इत्यर्थ: तदेवमदृश्यत्वेनैव स्फुरत्तासावदृश्येनैव नमस्कारा[illegible] अस्माभि: सेव्यत इति तत्प्रकरणासंगतिश्च गम्यते अथ [illegible]वद्विग्रहप्रकाशकविशुद्धसत्त्वस्य मूर्तित्वं वसुदेवत्वं

[illegible] एव तत्प्रादुर्भावविशेषे धर्मपत्न्यां मूर्तित्वं प्रसिद्धं । श्रीम[illegible]न्तु भी च वसुदेवत्वमिति विवेचनीयं अत्र श्रद्धा पु-[illegible]भूत भगवच्छक्त्यंशरूपस्य भगिनीतया पाठसाह-[illegible]स्तत्तच्छक्त्यंशप्रादुर्भावत्वमुपलभ्यते तुर्ये धर्मक-[illegible]पी इत्यत्र कलाशब्देन च शक्तिरेवाभिधीयते [illegible]गायां तस्यां च नरनारायणाख्यभगवत्प्रकाशफल-[illegible] सुदेवाख्य शुद्धसत्त्वरूपत्वमेवावसीयते तदेवमेव तस्या [illegible]प्युक्ता तथाच श्रद्धाद्या विशदार्थतया विमुच्य सैव [illegible] तुर्ये । मूर्त्ति: सर्वगुणोत्पत्तिर्नरनारायणाकृषी इति । [illegible] भगवत उत्पत्ति: प्रकाशो यस्या: सा तावमूतेति पूर्व-[illegible] । भगवदाख्याया: सच्चिदानन्दमूर्त्ते: प्रकाशहेतुत्वात् मूर्त्ति[illegible] । तथैव तत्प्रकाशफलत्वदर्शनेन च नामैक्येन च श्री मदान[illegible]पि शुद्धसत्त्वाविर्भावत्वं ज्ञेयं । तथोक्तं नवमे । वसु-देवं हरे: स्था[illegible]दुन्दुभिमिति । अन्यथा हरे: स्थानमिति विशेषणा[illegible] नकरत्वं स्यादिति । तदेवं ह्लादिन्याद्येकतमांशवि-शेषप्रधानेन विशु[illegible] यथायथं श्रीप्रभृतीनामपि प्रादुर्भावा विवेक्तव्य: । तत्र [illegible] भगवति सम्पद्रूपत्वं तदनुग्राह्ये सम्पत् सम्पादकरूपत्वं [illegible] शक्तित्वं चेत्यादि त्रिरूपत्वं ज्ञेयं । तत्र च तासां केवलश[illegible]नां भगवद्विग्रहाद्यैक्यात्म्येन स्थि-तिस्तदधिष्ठात्रीरूपत्वेन मूर्तीनां तु तदावरणतयेति द्विरूपत्वमपि ज्ञेयमिति दिक् ॥ २३ ॥

तत इत्यत्र त्वयेति [illegible] ॥ २४ ॥ २५ ॥

इति श्रीमद्भाग[illegible]पुराणे चतुर्थस्कन्धे
श्रीमज्जीवगो[illegible]कृत क्रमसन्दर्भे
तृतीयो[illegible]ध्याय: ॥ ३ ॥

श्रीमद्विश्वन[illegible]कृत सारार्थदर्शिनी ॥

त्वया तदानीं कथं [illegible] इति तु नोपालम्भमीयमिव यतो भगवत्समाधिं म[illegible]पीन एवाहमतो भगवत्-स्फूर्तिम नेव ममर्यानियम [illegible] ति विशुद्धं सत्त्वमप्राकृ-तमन्त: करणं वसुदेवशब्दि[illegible]क्तं भवति । यद्वा वि-शुद्धं चित्स्फूर्तिवृत्तमयमप्राकृ[illegible] भगवज्जनक उच्य ते । कुत: यदस्मात्तत्र अपावृत[illegible] पुमान् ईयते प्रका-

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

शते सत्त्व वासुदेव एव । वसुदेव भवति आविर्भवतीति तद्धाद्-स्यार्थ: । विशुद्धेऽन्त:करणे च तस्याविर्भावो दृश्यते । अतो विशु-द्धस्यान्त: करणस्य मदीयस्य वासुदेवेति नामेत्यवगतं । ततश्च वसत्यस्मिन् परमेश्वर इति वसुश्चाप्राकृतत्वाद्देवश्चेति वसुदेव इति तद्व्युत्पत्तिश्च गम्यते । अतस्तस्मिन् सत्त्वेऽन्त:करणे भगवान-धोक्षज: प्राकृतेन्द्रियागोचर: स्फुरन् नमसा नमस्कारोपलक्षितया बहुविधसपर्यया अनुविधीयते परिचर्यते विशेषेण धीयते धार्यते इति वा । मनसेति पाठे मनसैव सेव्यते अतस्तदानीं पूजा सेव्यमानो भगवानासीदिति अतस्तत्परिचर्यायामवकाशाभावादेव न मे बहिरनुसन्धानमभूदत: कथय को मे दोष इति भाव: ॥ २३ ॥

तत्तस्मादिति यदि त्वं पतिव्रता भवसीति भाव: । देहकृदपि पितेति पोषकादिरूपस्तु पिता किमुतेति भाव: ऋषेण वेहं हन्स्तीति भावी देहपातश्च सूचित: । मां तिरोऽकरोत् तिरश्चकार २४

विपदे दोषमाह यदीति अपहाय अतिक्रम्य । सम्भावितस्य सुप्रतिष्ठितस्य यदा पराभवो भवति तदा स पराभव: तस्य मर-णाय कल्पते ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थस्य तृतीयोऽयं सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीप: ।

ननु त्वया प्रयुत्थानादिना स न सत्कृतोऽद्वेशीत्यत्राह प्रत्युद्गमेति "चक्षुर्दद्यान्मनोदद्याद्वाचं दद्यात्सुसूनृताम् उत्थाय चासनं दद्यात्स यज्ञ: पंच दक्षिणा" इत्यादिशास्त्रत: प्रत्युद्गमादिक मिथोजनैर्यद्विधीयते प्रत्युद्गम: कायव्यापार: प्रश्रयो विनयो मनोव्यापार: अभिवादनं वाग्व्यापार: तेषां समाहारद्वन्द्वैक्यम् तत्प्राज्ञै: सर्वात्मभूतवासुदेव विज्ञि: साधु यथा भवति तथा परस्मै पुरुषाय सर्वात्मने वासुदेवाय गुहाशयायांतर्यामिणे एव चेतसा विधीयते क्रियते तदर्चनेनैव सर्वार्चनासिद्धे: यथातरोर्मूलनिषेचनेन तृप्यंति तत् स्कंधभुजोपशाखा: प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्येति वक्ष्यमाणमप्यत्रानुसंधेयम न तु देहमानिने देहात्मवादिने यत्रस्थानिने जीवविशेषाय मूलस्थानि वासुदेवार्चनेन सर्वस्यार्चितत्वादिति भाव: ॥ २२ ॥

ननु तर्हि त्वयापि तथै व दक्ष: कुतो न सत्कृत इत्यत्र प्रत्याहृत वाह्येन्द्रिय स्त्वमसि बहुधा वासुदेवं नमस्कारादिना भजाम्यतो मनसैव प्रत्युद्गमादिदक्षांतरात्मने कृतमित्याशयेनाह सत्त्वमिति विशुद्धं विशेषत: शुद्धम् यतो वस्माभि: पुरुषैर्दीव्यतीति वसुदेवशब्दिते वसुदेवशब्दवाच्यं सत्त्वमंत:करणं यत् तत्र अपावृतस्तत्कृतावरणरहित: जीवोयस्मिन् करणेनावृतोस्ति तद्विपरीत इत्यर्थ: भगवान् वासुदेव ईयते प्रतीयते अतस्तस्मिन्सत्त्वे मया नमसा नमस्कारेण विधीयते सेव्यते अतो दक्षोपि मया सत्कृत इति भाव: ननु चक्षुषा दृष्ट्वा कुतो नकायव्यापारेणादृतो दक्ष इत्यत्राह अ-धोक्षज इति स अधोभूतेषु प्रत्याहृतेषु अक्षेषु चक्षुरादिषु जायते प्रकाशते मनसि अतश्चक्षुरादिनिरोध: कृत इत्यर्थ: अत: प्रिये मया तत्र किमपि नापकृतं वृथैव वाग्बाणैस्ताडित इति भाव: ॥ २३ ॥

तदेवाह तादिति हेवरोरु ! यतो मम द्विद् तत्तस्मात् ते देहकृत

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः

मुख्योऽपि पितापि दक्षो न निरीक्ष्यो विश्वसृजां यज्ञगतमनागसं निरप राधमं मां वचसा तिरः अकरोत् तिरस्कृतवान् किंबहुना ये तदनुवृताश्तेपि न निरीक्ष्याः ॥ २४ ॥

विपक्षे दोषमाह यदीति यदि मद्वचोऽतिहायोल्लंघ्य गमिष्यसि ततो हतो भवत्या भद्रं न भविष्यति यतः संभावितस्य ॥ सुप्रतिष्ठितस्य यदा स्वजनात् पराभवो भवति तदा स पराभवः सद्यामरणाय कल्प्यते । नाशहेतुर्भवति २५ ॥

इति श्रीमद्भागवते सिद्धान्तप्रदीपे चतुर्थस्कंधे तृतीयाध्यायार्थप्रकाशः

भाषाटीका ।

हे सुमध्यमे ! खड़े होतो नमस्कार करनोये आपसमे करे हैं वे परमपुरुषगुहाशय ईश्वरको मान कियाकरते हैं देहमानीको नहिं२२ विशुद्ध सत्वअंतः करणको नाम है, ऐसे अंतः करणसे भगवानकी स्पष्ट प्रतीति होवे है ऐसे अंतःकरणमें इन्द्रियोंसे अगोचर भगवान वासुदेवकोमें नमस्कारद्वारा सेवन करूंहूं ॥ २३ ॥

हे वरोरु ! तुमारे देहकर्ता पिता मेरा द्रोही हैं, तुमको देखवे योग्य नहीं है, ताके अनुचर भी मोसे द्रोह करे हैं, जो दक्ष विश्व रचवेवारों के यज्ञमें निरपराधीयोंको दुर्वचनसे तिरस्कार कतोभयो॥२४

जो मेरे वचन को उलंघन कर तुम जाओ गी तो तुमारो कल्याण न होय गो, क्योंकि अति प्रशंसित को स्वजनों से तिरस्कार सदा मरण के बरा बर होय है ॥ २५ ॥

इतिश्रीमद्भागवतमहापुराण में चतुर्थस्कन्ध
तृतीयऽध्याय की भाषाटीका समाप्त हुई ॥ ३ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ।

—:*:—

मैत्रेयउवाच

एतावदुक्त्वा विरराम शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन् ।
सुहृद्दिदृक्षुः परिशंकिताभवान्निष्क्रामती निर्विशती द्विधाऽऽसता ॥ १ ॥
सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलाऽतिविह्वला ।
भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः ॥ २ ॥
ततोविनिश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा ।
पित्रोरगात्स्त्रैणविमूढधीर्गृहान्प्रेम्णात्मनोयोऽर्धमदात्सतां प्रियः ॥ ३ ॥
तामन्वगच्छन् द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः ।
सपार्षदयक्षा मणिमन्मदादयः पुरोवृषेंद्रास्तरसा गतव्यथाः ॥ ४ ॥
तां सारिकाकंदुकदर्पणांबुजश्वेतातपत्रव्यजनस्रगादिभिः ।
गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य विटंकिताययुः ॥ ५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

चतुर्थे पतिं हित्वागता पित्राऽवमानिता ॥
रुषा निजाग्नौ तं यज्ञे जहौ देहमितीर्यते ॥ १ ॥

उभयत्रगमनागमनयोर्बलाबलविचारणाच्च सुहृद्दिदृक्षुर्निष्क्रामंती भवात्परिशंकिता पुनर्निर्विशंती तदा सा सती द्विधा आसन्नभूत न गता नचापि स्थिता ...॥ १ ॥

सुहृद्दिदृक्षायाः प्रतिघातेन दुर्मनाः अश्रुणां कलाभिर्लेशैरतिविह्वलाऽथवा ... अप्रतिपूरुषं स्वसमानपुरुषांतररहितम प्रधक्ष्यतीवभस्मीकरिष्यन्तीव ... जातो वेपथुः कंपो यस्याः ॥ २ ॥

ततस्तां ... गृहानगात् कथंभूतम् यः प्रीत्या तस्यै आत्मनो देहस्यार्धमदात् ... स्त्रीस्वभावस्तेन विमूढा धीर्यस्य ॥३॥

द्रुतविक्रमां शीघ्रगामिनीम सहपार्षदैर्यक्षैश्च वर्तमानाः मणिमान्मदश्चादिर्येषां । पुरतो वृषेंद्रो येषां ते गतव्यथा निर्भयाः रुद्रातिक्रमेणागमनाद्वा ... ॥ ४ ॥

तां वृषेंद्रमारोप्य सारिका ... भिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्चमहाराजविभूतिभिः ... विटंकिताः शोभितायय्युः सारिकापठनानि रूपितान्यालापिनीर्गीत ... ॥ ५ ॥

श्रीरा ... स्वामि विरचिता
दीपिन्य ... दिटिप्पणी ।

तं पित ... ॥ १ ॥

अगत्वाऽमानं वा भस्मी क ... ईश्वरे तच्छक्ते ... अभावात् ॥ २ ॥

ततस्मादशक्रोधानन्तरं तं ... विरहजन्येन शोकेन

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्यादीपिका टिप्पणी ।

शिवविषयकेन रोषेण च दूयता दुःखितेन प्रहाः पुंसि च भूम्न्येवेति नियमाद्गृहानिति वहुत्वं मायाया अपिविमूढधी त्वं भगवन्मायेति ज्ञेयम ॥ ३ ॥ ४ ॥ ५ ॥

—

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

भवोक्तमर्थेनोपसंहरन्भवान्याः स्वाभिप्रेतार्थलाभनिमित्तशोकं तन्निमित्तं भर्तरि क्रोधं भर्त्तारमनादृत्याध्वरे गमनं तत्र पितृकृतपराभवं तन्निमित्तं देहत्यागप्रकारं चाहएतावदिति शंकरःएतावभिधाय उभयत्र पत्न्यास्तत्रगमनेऽगमनेच अनुज्ञादानेवलात्रिवारणे च तच्छरीरनाशं चिंतयन् विरराम तूष्णींमास ततःसासती सुहृद्दिदृक्षुः मातापित्रादीन् द्रष्टुमिच्छंतीनिष्क्रामती गृहाद्बहिर्निर्गच्छंती पुनः भवात् शंकरात्परिशंकिता भर्त्तृवचोऽतिहाय गमने का वा हानिः स्यादिति परिशंकिता च तदा द्विधा आस वभूव ॥ १ ॥

सुहृदां दिदृक्षायाः द्रष्टुमिच्छायाः प्रतिघातः निरोधस्तेनदुर्मनाः दुःखितांतःकरणा बंधुषुस्नेहाद्रुदंती अश्रुणांकलाभिर्लेशैरतिविह्वलाव्याकुला सा भवानी सती अप्रतिपुरुषं समदर्शित्वेन प्रतिपक्षरहितं भवं रुद्रं रुषा जातवेपथुः उत्पन्नशरीरकंपा प्रधक्ष्यती भस्मीकुर्वतीव ऐक्षत अपश्यत् ॥ २ ॥

तदा ततः सती विनिश्वस्य दीर्घं निश्वासं विधाय सतां जिज्ञासूनां प्रियोयश्च प्रेम्णा आत्मनो देहस्यार्धमदात्तमपि अनेनत्यागानर्हत्वमुक्तं तंरुद्रं विहायस्त्रैणं स्त्रीस्वभावस्तेनविमूढधीः नष्टमतिःशोकेन बंधुदर्शनसंभावनानिमित्तशोकेन रोषेण दिदृक्षाप्रतिघातनिमित्तक्रोधेन पुनर्दूयता भर्तृवचोऽतिक्रमनिमित्तानर्थसंभावना-

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

परित्यज्य द्रुता पित्रोर्गृहात् प्रत्यगात् ॥ ३ ॥

द्रुतविक्रमां शीघ्रं पादविक्षेपान्कुर्वतीं एकामसहायां तामनीं त्रिनेत्रानुचराः सहस्रशोऽनुययुः एतदेव प्रपंचयति सार्द्धेन पार्षदैर्यक्षैश्च सहिता मणिमान्मदश्चादिर्येषां ते पुरः पुरतः वृषेन्द्रं येषांते तरसा बलेन गतव्यथा निर्भयाः यद्वा आगतव्यथाः इतिच्छेदः रुद्रगमनाभावादागतव्यथा सभयाः तरसा बलात् ॥ ४ ॥

तां सतीं वृषेन्द्रमारोप्य नंदीश्वरं उपवेश्य शारिकादिभिः क्रीडोपकरणैः शारिका पठननिपुणाः पक्षिविशेषः श्वेतातपत्रादिभिः राजचिन्हैश्च विटंकिता अलंकृता ययुः ॥ ५ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

हरौ भक्तिविधानार्थं गुर्वादावपि भक्तिरवश्यंकर्तव्येत्यभिप्रेयनेऽस्मिन्नध्याये तत्र देवी भवं बाधकं ब्रुवन् शंकरः किं चकारेति तत्राह एतावदिति शं सुखं करं यस्य सः शंकरोतीति वा शंकरः उभयत्र प्रस्थापने निवारणे च पत्न्या अंगनाशं शरीरनाशं हि यस्मात्तस्माद्विरराम ततस्तु देवी किमकरोदिति तत्राह सुहृद्दिदृक्षुरिति सा देवी सुहृद्दिदृक्षुः स्वधाम्नो निष्क्रामती भवात्परिशंकिता स्वधामनिर्विशती चा भूदित्यन्वयः ॥ १ ॥

भर्तुः करणानुकृतिभेदात् द्विधा प्रवृत्तिमती भवानी किमकृतेत्याशंक्य तस्या भर्तुः कामजनकमंत्रौषधैः स्त्रीस्वभावं वक्ति सुहृद्दिदृक्षेति सुहृद्दिदृक्षायाः प्रतिघातो भंगस्तेन दुर्मना दुःखितमना अप्रतिपूरुषं प्रतिपक्षपुरुषरहितं अनेन कोपरोदनाभ्यां वशीकरणमंत्रौषध्यौ वा शिवोऽभिमतानुमतिप्रदः स्यादिति भावो दर्शितः ॥ २ ॥

ध्रुवेनापि भावेनस्तिमितसमुद्रवत् स्थितं शिवं दृष्ट्वा तद्गमनप्रकारं वक्ति तत इति दुयता तापवता सर्वेश्वर्यो एवंभावः कथमित्यत उक्तं स्त्रैणेति स्त्रीणां स्वभावः स्त्रैणं तेन विमूढाधीर्यस्याः सा तथा अज्ञस्त्रियाः स्वभाव एवायं न तु देवस्त्रिया इति भावेनाह प्रेम्णेति आत्मन इति पदं द्विरावर्तनीयं स्वस्य शरीरस्यार्द्धमरासत अदत्त रास दान इति धातुः ॥ ३ ॥

स्वशरीरार्धदो हरस्तस्या एकस्या गमनं कथमसहतेत्याशंक्य तद्भावविदीमनुचराणां गमनप्रकारं वक्ति तामन्विति द्रुतं विक्रमः पादविक्षेपो यस्याः सा तथा तां के चनानुचरा अन्वगच्छन् न तु मुख्या इत्यत उक्तं मणिमन्मदादय इति पार्षदेषु मुख्यैः सह वर्तमानाः स्वपार्षदमुख्या आगतव्यथाः स्वस्तिस्यादस्वस्तिवेति प्राप्तमनोदुःखाः ॥ ४ ॥

शीघ्रतरं गच्छंत्या रुद्राण्याः पाशाकृष्टैरिवागच्छद्भिरनुचरैः किमभूदित्याशंक्य राज्ञीगमनवदन्वितयात्राभूदित्याह तां सारिकेति सारिका क्रीडाशुकी मेडुकं जलक्रीडावाद्यं विलंबिना यथा यथा संभूय गमनं स्यात्तथा शनैश्चरंतः विटंकिता इति पाठे शृंगारिता इत्यर्थः ॥ ५ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ॥

परिशंकिनीति चित्सुखः ॥ १ ॥

प्रधक्ष्यतीव भस्मीकरिष्यतीव आत्मानमिति शेषः । विवोढ्महेशेतिवद्दाहगोचरी भविष्यतीवेति वा ॥ २ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तत इति । स्त्रैणयेति मायापि सा भगवन्मायया मोहिताभूदिति भावः स्त्रैणयेति सम्बन्धोक्तिः ॥ ३ ॥ ४ ॥

सारिकामिति चित्सुखः पाठान्तरं गच्छन्तीमित्यर्थः । अम्बुजेति चित्सुखः ॥ ५ ॥ ६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी

उभयत्रानुज्ञायां बलान्निवारणे च सुहृद्दिदृक्षुः सा बलान्निष्क्रामन्ती आस्ते भवात् परिशंकिता च पुनर्विशतीवेति [illegible] सैका सती द्विविधा अभूत् । औत्सुक्यशंकयोर्द्वयोः संग्रामे तुल्यबलत्वादिति भावः ॥ १ ॥

अश्रूणि कलयतीति सा । न विद्यते प्रतिपुरुषस्तुल्यो यस्य तं भवं मां गन्तुं नानुजानीते इति प्रधक्ष्यतीव कटाक्षैर्भस्मीकरिष्यतीवैक्षत ॥ २ ॥

ततश्चौत्सुक्यशंकयोर्द्वयोरायत्यामौत्सुक्यस्य प्राबल्ये शंकायाः पराभवे च तं भवं विहाय दूयता उपतप्यमानेन पित्रोर्गृहान् अगात् कथम्भूतं यः प्रेम्णा आत्मनो देहस्यार्द्धमदात् तं । त्यागे हेतुः स्त्रैण्या स्त्रीस्वभावस्तेन मूढा धीर्यस्याः सा ॥ ३ ॥

द्रुतविक्रमां निवारयिष्यतीति शंकया पद्भ्यामेव द्रुतं गच्छन्तीं पार्षदैर्यक्षैश्च सह वर्तमानाः अहो एकाकिन्येवास्मात् पर्वतादेवी चलतीत्यागता व्यथा येषां ते रुद्रानुचरा इति रुद्रस्यैवाप्रायमनगम्येति भावः ॥ ४ ॥

सारिकेत्यादिभिः खेलनोपकरणैस्तस्याः खेलनव्यसनित्वं गीतायनैर्दुन्दुभ्यादिभिर्गायनी लासिकादिभिश्च तस्याः गीतव्यसनित्वमवधार्येति भावः । श्वेतातपत्रादिभिर्महाराजाविभूतिभिः सहविटंकिताः शोभिता वा ययुः ॥ ५ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

भर्त्रा वार्यमाणापि औत्सुक्यातिशयात्पितृगेहं गता तेनाऽनाहता सती देहं जहाविति वर्णयत्येतावदुक्त्वेति दुर्मनाध्यायेन विरराम निवारणादुपरतोऽभूत् उभयत्र बलात् आरणे अनिवारणे च सा तु सुहृदः पित्रादीन्द्रष्टुमिच्छन्ती निष्क्रामती अवलंबिताज्ञः किं करिष्यतीति भवात्परिशंकिता पुनर्निविशतीत्येवं द्विधेवाऽऽसमभूत ॥ १ ॥

सुहृदादिदृक्षया प्रतिघातेनावरोधेन दुर्मनाः परिम्लानचित्ता अश्रुकलाभिरतिविह्वला रुदा जातवेपथुः कंपमाना रुदती अप्रतिपूरुषं प्रतिपुरुषरहितं भवस्तस्मिन् कार्ये भवान्यनुकूलं कुर्यादिति पुरुषेणारहितं प्रधक्ष्यतीवेक्षतापश्यत् ॥ २ ॥

स्त्रैणयेन स्त्रीस्वभावेन विमूढा कार्याकार्यविवेकरहिता धीर्यस्याः सा च आत्मनो देहस्यार्द्धं प्रेम्णा सतीकर्तृकया भक्त्याऽऽददात्तं विहाय पित्रो गृहान् अगात् अहो सा सारिकागमस्य महदनर्थहेतुत्वमिति भावः ॥ ३ ॥

द्रुतविक्रमां शीघ्रगतिम पार्षदैर्यक्षैश्चसहिताः मणिमान् मदश्च आदिर्येषां ते पुरोऽग्रे वृषेन्द्रं येषां ते गतव्यथाः तदानीं तेषां तत्सहगमनस्यैव न्याय्यत्वात् । ॥

आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः ।
मृद्दार्वयःकांचनदर्भचर्मभिर्निसृष्ट भांडं यजनं समाविशत् ॥ ६ ॥
तामागतां तत्र नकश्चनाऽऽद्रिय-द्विमानितां यज्ञकृतो भयाज्जनः ।
ऋतेस्वसॄर्वै जननीं च सादराः प्रेमाश्रुकंठ्यः परिषस्वजुर्मुदा ॥ ७ ॥
सौदर्यसंप्रश्नसमर्थवार्तया मात्रा च मातृष्वसृभिश्चसादरम् ।
दत्तां सपर्यां वरमासनं च सा नादत्त पित्राऽप्रतिनंदितासती ॥ ८ ॥
अरुद्रभागं तमवेक्ष्यचाध्वरं पित्राचदेवे कृतहेलनं विभौ ।
अनादृता यज्ञसदस्यधीश्वरी चुकोप लोकानिव धक्ष्यतीरुषा ॥ ९ ॥
जगर्ह साऽमर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयम् ।
स्वतेजसा भूतगणान् समुत्थितान् निगृह्य देवी जगतो ऽभिसृण्वतः ॥ १० ॥

श्रीदेव्युवाच ।

नयस्यलोके ऽस्त्यतिशायनः प्रियस्तथाऽप्रियोदेह भृतां प्रियात्मनः ।
तस्मिन्समस्तात्मनिमुक्तवैरके ऋते भवतं कतमः प्रतीपयेत् ॥ ११ ॥
दोषान्परेषां हिगुणेषु साधवो गृह्णंतिके चिन्नभवादृशा द्विज ! ।

श्री० शुकदेव कृत सिद्धांतप्रदीपः

सा [illegible] वृषेन्द्रारोप्यसारिका शिचिता पांचणी तदादिभिः गीतायनैर्गौमाधारैर्दुंदुभ्यादिभिश्च सह विटंकिता शोभिता ययुः ॥ ५ ॥

———

भाषाटीका ।

श्रीरुक्मिणी रमणोजयति ॥ मैत्रेयजी बोले ॥ शंकरने दोनो तरह से सतीजी को देख इतना कहकर चुप होगये सतीजी को भी इधर [illegible] की इच्छा इधर महादेवजी से भी शंका इस लिये [illegible] कभी बाहर आवे इस प्रकार सतीजी हिंडोले की [illegible] होती हुई ॥ १ ॥

सती को [illegible] की इच्छा में विघ्न होते देख मन में बड़ा दुःख भया [illegible] आंशुन के मारे व्याकुल होकर कांपती हुई लोक में [illegible] पुरुष श्रीशिवजी को इस तरह देख ने लगी जैसे मानों भस्म कर देगी ॥ २ ॥

पश्चात् जिम सज्जनों के प्यारे ने अपना अर्द्धांग समर्पण किया था उन शिवजी को छोड शोक और [illegible] के मारे दुखित हृदय से ऊंचे २ स्वास लेती हुई स्त्री स्वभाव से मोहित होकर मा बाप के घर को गई ॥ ३ ॥

वेग वेग से अकेली जाती हुई सती [illegible] देख त्रिनेत्र श्रीशिवजी के मणि मान मद [illegible] आदि लेकर पार्षद यक्षों के सहित हजारों अनुचर वृषभ को आगे लेकर [illegible] पीछे गये ॥ ४ ॥

सतीजी को वृषभ पर बैठा [illegible] [illegible], गेंद, लीलाकमल, दर्पण, इत्यादिक क्रीडा की सा[illegible] [illegible] चामर इत्यादि महा राज विभूति तथा गीत का उपर[illegible] [illegible] शंख वेणु इत्यादिकों से शोभा करके गये ॥ ५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

आसमंताद्योवेदघोषस्तेनोर्जितंशोभमानयज्ञसंबं धिपशुविशसनं यस्मिन् । यद्वा तेनोर्जितमतिशायितंयज्ञवैशसंपरस्परंस्पर्धायास्मिन् तं-यजनंयज्ञस्थानंसमाविशद्देवी विबुधैश्चजुष्टममृदादि भिर्निसृष्टानि-निर्मितानिभांडानिपात्राणियस्मिन् ॥ ६ ॥

कश्चननाद्रियत्नाद्दृतवान् यज्ञकृतोदक्षाद्भयंतस्मात तत्रहेतुः तेनविमानितां स्वसॄर्जननींचवर्जयित्वा तास्तुसादराः परिषस्वजुरा लिंगितवत्यः प्रेमाश्रुभिर्निरुद्धः कंठोयासाम ॥ ७ ॥

अप्रतिनंदिताऽसत्कृतासतीमात्रदत्तनगृहीतवती कथम सौदर्येण- सोदरत्वेनभगिनीनांयः संप्रश्नस्तत्रसमर्थायोग्यायावार्तातयासह- तांचमात्रदत्तामातृणांचेत्यर्थः ॥ ८ ॥

नाविद्यतेरुद्रस्यभागोयास्मिंस्तं देवेरुद्रेकृतं हेलनमवज्ञामाह्वाना द्यकरणात् ॥ ९ ॥

जगर्हनिंदितवतीअमर्षेणकोपेनविपन्नाऽव्यक्तागीस्तयाशिवंद्वेष्टी तिशिवद्विट्तम धूमपथः कर्ममार्गस्तत्रश्रमोऽभ्यासस्तेनस्मयोगर्वोय स्य दक्षवधायसमुत्थितान्स्वाज्ञयानिगृह्यनिवार्य ॥ १० ॥

निंदामेवाह नयस्येतित्रयोदशभिः मुक्तवैरकेत्यक्तविरोधेतस्मि- न्नाशिवभवंतमृतेविनाकतमःप्रतीपयेत्प्रतिकूलमाचरेत् वैराभावेहेतुः यस्यलोकेअतिशायनोऽतिशयितोनास्ति तथाप्रियश्चाप्रियश्चनास्ति समासपाठेऽतिशयनोप्रयोनास्तिदेहभृतांप्रियोऽयमात्मातस्य समस्त स्याऽऽत्मनिकारणभूतेसमस्तरूपइतिवा ॥ ११ ॥

तस्यचप्रतिकूलकरणंद्वेधा महत्तमद्रोहेणासाधारणद्रोहेणच तत्र पुरुषाणांचातुर्विध्यंवदंतोमहत्तमद्रोहमाह दोषानितिद्वाभ्याम द्विज इत्यभिक्षेपः भवादृशास्त्वद्विधाअसूयकाः परेषांगुणेष्वदोषानेवगृह्णं तिमतुगुणान् केचिन्मध्यस्थागुणेषु दोषानगृह्णंतिकिंतुयथास्थिता- न्गुणदोषान्विवेकेनगृह्णंतितेतुमहांतउच्यंते साधवस्तुकेवलंगुणान्-

गुणांश्च फल्गून्बहुली करिष्णवो महत्तमास्तेष्वविदद्भवानघम् ॥ १२
नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिंदा कुणपात्मवादिषु ।
सेर्ष्यं महापूरुषपादपांसुभि-र्निरस्ततेजःसु तदेव शोभनम् ॥ १३ ॥
यद्द्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति तत् ।
पवित्रकीर्तिं तमलंघ्यशासनं भवानहोद्वेष्टिशिवं शिवेतरः ॥ १४ ॥
यत्पादपद्मं महतांमनोऽलिभि-र्निषेवितं ब्रह्मरसासवार्थिभिः ।
लोकस्य यद्वर्षति चाशिषोऽर्थिन-स्तस्मै भवान्द्रुह्यति विश्वबंधवे ॥ १५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

वगृह्णंतिनदोषांस्तेनमहत्तराउच्यंते महत्तमास्तुदोषानगृह्णंत्येवनेत्र-प्रत्युतफल्गुस्तुच्छानपिगुणान्बहुलीकुर्वंतीतिकरिष्णवोभवंति तेषुभवानघमविददिविदितवान् कल्पितवानित्यर्थः तत्त्वर्ण्याम्नानभिभूयेत्य-नेनसूचितम् ॥ १२ ॥

एतच्च तुर्जनेष्वयुक्तमेवेत्याह नेति कुणपंजडंशरीरंते ते· वदंतियेतेषु ईर्ष्याअसूयेति: सेर्ष्यंयथाभवत्येवंमहतां ।५.।२८.।तयदेत दाश्चर्यंनभवति सेर्ष्यानिरस्तंतेजः प्रभावोयेषामितिवा यद्यपिमहापुरुषाः स्वनिंदांनहंतेतथापितत्पादरेणवस्तत्तसमहमानास्तेषांतेजोनिरस्यंति अतोऽस्मत्केषुमहन्निंदनमेवोचितमित्यर्थः ॥ १३ ॥

तदेवमहत्तमद्रोहमुक्त्वातस्मिन्नेवकृतं द्रोहमाह यदिति द्वाभ्याम यदक्षरद्वयमात्रंशिवइतिनामप्रसंगेनामनृणांसर्वेषामाश्वघंसर्वंहंति केवलं गिरेरितमुच्चारितंनतुमनः पूर्वकम् ततुसकृदपिप्रसंगादपि तंशिवंद्वेषि नलंघ्यंशासनमाज्ञायस्य अहोशिवेतरोऽमंगलरूपः ॥ १४ ॥

पापहरत्वमुक्त्वामुक्तिमुक्तिप्रदत्वेनाशिवंवर्णयंत्याह यस्यपादपद्मं मनांस्येवाऽऽलयस्तैः ब्रह्मरसंब्रह्मानंदः सएवाऽऽसवोमकरंदस्तदर्थिभिः यच्चार्थिनः सकामस्यलोकस्यताकृताआशिषोवर्षति ॥ १५ ॥

———

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्यादीपिकाटिप्पणी

पूर्वार्थे वेदघोषेण हिंसाशोभाया अश्लीलत्वाद्यद्वेति स्पष्टंया यद्वत् विशेति न्यायेन वेदघोषे तस्या औचित्यमेव स्वारस्यम् अयःपात्रं सुरार्थकम् ॥ ६ ॥

तत्र यत्र तत्र दक्षाद्रूयं ॥ ७ ॥

वार्त्ताया नीरूपत्वेन ग्रहणासंभवात्प्रतियोगिप्रमितिं विना तन्निषेधानुपपत्तेः श्रवणे लाक्षणिकत्वादित्यर्थ इत्युक्तम् ॥ ८ ॥

लोकद्राहस्यासंकल्पादित्युक्तम् ॥ ९ ॥ १० ॥

अतिशायितोधिकः समासपाठे स्वार्थेऽणसमस्तकारणत्वादि तत्र भगवद्भेदरूप्या ॥ ११ ॥

चातुर्विध्यं असूयकेषु पुरुषत्वाभावात्तान्विहाय पुरुषाणामध्यस्थमहन्महत्तरमहत्तमरूपंचतुर्विधत्वंवदंतीतिअमहत्तमद्रोहसाचाद्रोहगोमध्यंमहत्तमद्रोहमाह अभिक्षेपः महत्तमद्रोहोपमाहोस्विद्दुजत्व मितिसाऽयसूर्यानन्दादेःपानेर्वीतसर्वेवाक्यसावधारणमितिन्यायात् एवकाराध्याहृतःतमप्प्रत्ययस्वारस्यान्महाम्नउच्यन्तइत्यादिव्याख्या तम अथ दोषं वेदमस्य मिथ्यात्वं वक्तुं कल्पितवानिति अहदजहल्लक्षणया व्याख्यानादित्यर्थं इत्युक्तम् तत्र दोषकल्पनम् ॥ १२ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

पूर्वार्धे सेर्ष्यपदस्याऽस्थानपतितत्वमित्यस्वारस्यात्तरम् पादपांशुशब्देनात्र प्रभावलेशो लक्षणीयः तत्रापीर्ष्या उत्प्रेक्षितेतिश्लेयम् अतो महन्निन्दयैव तेषां तेजोनिरासात् ॥ १३ ॥

नृणामित्युपलक्षणं सर्वेषाम् ॥ १४ ॥

नामकीर्त्तनेन पापहरत्वं तच्च पादपद्म उत्तमाङ्गत्वात्स्वेन यच्छब्दस्य तच्छब्दाऽनपेक्षत्वं तास्तास्तत्तदपेक्षिता पूर्वादि रूपाः ॥ १५ ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

आसमंताद्ब्रह्मघोषेण ऊर्जितं श्यामं यज्ञसंबंधि वैशसं विशसनं यस्मिन् तद्ब्रह्मघोषोर्जितं च तद्यज्ञवैशसं चेति कर्मधारयःविप्रर्षिभिः ब्रह्मर्षिभिर्जुष्टं सेवितं तथा विबुधैर्देवैश्च सर्वतो जुष्टं मृदादिभिर्निर्मितानि निर्मितानि भांडानि पात्राणि यस्मिन् तद्यजन यागस्थानं समाविशत् ॥ ६ ॥

तत्रागतां तांसतीं जननीं स्वसृश्च ऋते विना कश्चन कोपिनाद्रियत् नाद्रियत् कुतः यज्ञकर्तो दक्षात् यद्भयं तस्मात् तत्र हेतुः ननवि मानितां अवमानितां मातस्तुमांवराः प्रेमाश्रुभिर्निरुद्ध कंठा यासां तथा भूतास्तां मुदा परिषस्वजुः आलिंगितवत्यः ॥ ७ ॥

मात्रा मातृष्वसृभिः मातृभगिनीभिश्च सौदर्यं प्रश्नसमस्त वार्तया सोदराणां भगिनीनां च सर्वाणायःकुशलप्रश्नादिस्तत्पृच्छया समस्तवार्तया सकलवृत्तांतेन सह समर्थवार्तयेति पाठेसोदर्येण सोदरत्वेन भगिनीनांयःसंप्रश्नः तत्र समर्थायोग्यायावार्त्तया सादरं आदरेण सहितं यथा तथा सपर्या पूजामुत्कृष्टमासनं सती नाददत्तन स्वीकृतवती तत्र हेतुः पित्रा दक्षेण अप्रतिनंदिता अनादृता ॥ ८ ॥

अरुद्रभागं न विद्यते रुद्रस्य भागो यस्मिन् तमध्वरं यागं विभौ देवे रुद्रे पित्रा दक्षेण कृत हेलन अपराधं चावेक्ष्य आह्वानाद्यकरणात् तथा स्वयं यज्ञसदसि पित्रा अनादृता च रुषा लोकान् धक्ष्यती भस्मी कुर्वाणेव चुकोप क्रुद्धवती ॥ ९ ॥

सा सती देवी अमर्षाघ्रमया अमर्षेण क्रोधेन विपन्नया अव्यक्तागिरा वाचा रुद्रावहेलनविनाससमुत्थितान् दक्षं हंतुमुद्यतान् भूतगणान् मणिमन्मदादीन् स्वतेजसा स्वबलेन निगृह्य निवार्य धूमपथश्रमस्मयं धूमपथेषु धूमादिमार्गप्रवर्त्तकर्मसु परिश्रमोत्थगर्वं शिवं द्वेष्टीति शिवद्विट् तं दक्षं जगर्ह निनिन्द सती निंदावाक्यान्युक्तवतीत्यर्थः ॥ १० ॥

[illegible]यशाचार्यकृत भागवतचंद्रचंद्रिका ॥

नास्येति [illegible] इति त्रयोदशभिः प्रियात्मनः प्रियः निरति शयप्रीतिविषयः [illegible] आत्मा परमपुरुषः यस्य प्रियो हि ज्ञानिनोऽत्यर्थ महात्मा [illegible] यस्य रुद्रस्य लोके भुवने देहभृतां मध्ये प्रतिशा यन [illegible] प्रियः प्रीतिविषयः तथाऽप्रियो वा नास्ति सर्वान्तरं [illegible] परमात्मानमेव निरतिशयप्रीतिरूपापन्नया भक्त्या [illegible] सर्वं ब्रह्मात्मकत्वेनानुसंदधतः प्रियाप्रियादिव-भागो [illegible] तस्मिन्मुक्तवैरके सर्वभूतसुहृदि सम-स्तात्मनि [illegible] आत्मा आत्मावाऽप्रियः तस्मिन् यद्वा समस्त आत्मा [illegible] चित्तं यस्य तस्मिन् तदुक्तं तत्पदद्वयस्यापि [illegible] मनुरभवं सूर्यश्चकक्षीवानृषिर्विप्रश्चेत्यादि श्रुत्यु-क्तविधया [illegible] ब्रह्मसर्वात्मकत्वेन तस्मिन्साक्षात्कुर्वतीतिभावः यो [illegible] एवमस्यादिशरीरकरोति श्रुत्यर्थः यद्वा ब्रह्मणा [illegible] ब्रह्मदृष्ट्यैवमुक्तं सर्वात्मनीति अस्मिन्पक्षे [illegible] एवं विधरुद्रं भवंतीविनाकतमः कोवाप्रतीपये-त्तथापि [illegible] ॥ ११ ॥

एवं [illegible] प्रसरस्य रुद्रस्यप्रतीपाविषयत्वमुक्तमथतस्मिन्साधौ [illegible] दुर्जनस्येव उत्पन्नमिदं शरीरंत्यक्ष्यामीति [illegible] साधवसाधुलोकौ विभजति दोषानिति हे द्विज-[illegible] नाऽसंबंधनं तदाधत्तपापभवादृशाः कोचित्वादृशाः दुर्जे-ना [illegible] पेक्षया अन्येषांगुणेषु सत्स्वपिदोषानेव गृह्णंतितान-[illegible] न तु गुणांस्तेऽसाधवइत्यर्थः येपुनः रुद्रादयः दोषान्न गृह्णन्ति [illegible] फल्गूनल्पानपि गुणानेववहुली करिष्णवः वितनोतु-मिच्छवो [illegible] ते महत्तमाः गुणगृसाधवइति पाठेपसाधवःफल्गू-नपिगुणान् बहुली करिष्णवस्ते महत्तमा इत्यन्वयः तेषु चमहत्तमेषु भवानघम्-परास्मु [illegible] दूजभवान् कृतवानित्यर्थः ॥ १२ ॥

असतामस्मादृशामिदं महत्स्वपचरणं युक्तमेवत्याह नाश्चर्यमिति कुणपात्मवादिषु कुणपंशवप्रायं शरीरमेवात्मेति ये वदंति तेषु भवादृशेष्व [illegible] ईर्ष्या अक्षमा सर्वं यथा भवति तथा महाद्विनिंदा [illegible] निंदाति यदेतत्तवाश्चर्यं न भवति प्रत्युतम-हापुरुषपादपांसुभिः महापुरुषा महत्तमास्तेषामंघ्रिरजोभिः निरस्तं तेजः [illegible] त्वादृशेषु तदेवमहद्भिर्निंदनमेव शोभनं उचितं यद्यपि [illegible] निंदां सहंते तथापि तत्पादरेणवस्तदसह मानास्तेषां तेजो [illegible] ऽसत्पुरुषनिंदनमेवोचितमित्यर्थः १३

कोसावपचारो [illegible] कृतइत्यत्राह यदितिद्वाभ्यांयस्यरुद्रस्यद्व्य-क्षरमिदं इत्युक्तरूप [illegible] नामधेयप्रसंगाद्वापसकृद्वाशारीरिगीर्द्व-यंगिरमुच्चारितं नृणामघं पापमाशु द्राक्हंति निवर्तयति सता-मपि नामोच्चारणादेर्भगवन्नामवद्घनिवर्तकत्वादितिभावः अलंघ्यम नतिक्रमणीयं शासनमाज्ञा यस्य तं शिवमशिवोऽमंगलो भवान् द्वेष्टि अहोकष्टम् अमंगलो द्वेष्टीत्यनेनतद्वेषाद्भवतोऽमंगलमनंतरभावीति भावः ॥ १४ ॥

किंच ब्रह्मरसासवार्थिभिः ब्रह्मरसो ब्रह्मानंदः सएवासवो म-करंदस्तदर्थिभिः ब्रह्मानंदानुभवमधुलिप्सुभिः महतां मनांस्येवालयो भृंगास्तैर्यस्यरुद्रस्यपादपद्मं निषे[illegible]ज्ञानिमस्वच्छंदितिज्ञान प्रदत्वादिति भावः कीदृशं तत्पाद[illegible]षितं तत्राह यत्पाद-पद्मम् अर्थिनो लोकस्य याचमानस्य [illegible] शिषोऽभीष्टानि वर्षति ददाति तस्मै विश्वबंधवे विश्वानुग्र[illegible] द्रुह्यति अपकरोति कुध्रुहेति चतुर्थी ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

एवं भर्तृप्रेषितानुचरसूचितस्नेहात् शांतमनस्कत्वेन पश्चान्नग-ता किं तु पुरत एव गत्वा सा यज्ञवाटमाविशदित्याह ब्रह्मेति ब्रह्मसमंताद्ब्रह्मघोषेण वेदध्वनिना ब्रह्मलोकपर्यंतगामिना ध्वनिना घोर्जितं संकुलं यज्ञार्थं वैशसं पशुसंज्ञपनं पशुहिंसनं यस्मिन् तस्त-था मृच्च दारु च अयश्च कांचनं च दर्भाश्च चर्माणि च तैर्निसृष्टानि निर्मितानि भांडानि यस्मिंस्तथा ॥ ६ ॥

तस्या अवज्ञाकरणप्रकारमाह तामागतामिति यज्ञकृतो दक्षस्य कथंतत्यस्य व्यावृत्तिमाह ऋते इति स्वसारः स्वसृः तत्स्नेहः कुतो ऽवगत इति तत्राह सादराः सानुरागा इति ॥ ७ ॥

सती प्रत्यालिंगनादिकं किं कृतवती नेति भावेनाह सौदर्येति प्रधानावज्ञादुःसंहति भावेनाह पित्रेति अप्रतिनंदिता असत्कृतमनःसं-तापा ॥ ८ ॥

ततः किमकरोदिति तत्राह अरुद्रभागमिति न रुद्रस्य भागो यस्मिन्स तथा तं कृतहेलनं कृतावज्ञम् ॥ ९ ॥

अधीश्वर्या कुपितमित्यत्र किं लिङ्गं तत्राह जगर्हेति । अमर्षेण [illegible] त्रयागद्रुद्भावं प्रासया धूमपंथाः कर्ममार्गः तद्विषये श्रमः शि-[illegible] र्वो यस्य स तथा तं कर्ममार्गेऽतिश्रमिष्णोत्तामित्यर्थः स्वते-जसा [illegible] निगृह्य निवार्य ॥ १०ं॥

पित्रेति पिप्रियरुद्र

स्त्रीत्वेऽपि प्रमाणाधयुक्त्या निर्दिशत्याह न यस्येति लोके भुवने विद्यमानानां देहभृतां शरीरिणां प्रियात्मनो मतो भोग्यरूपस्य यस्य रुद्रस्य योग्यतातिरेकेणातिशायनः प्रियोऽतिप्रियस्तथाऽप्रियो द्वेष्य श्चनास्ति । तस्मिन् रुद्रे भवतमृते पुरुषाणां कतमः पुरुषः प्रती-पको न कोपीत्यर्थः प्रतीपाकरणे हेत्वंतरं चाह समस्तात्मनीति विष्णवादीन् पद् ऋते इंद्रादिसमस्तस्वामिनि नाहिकाश्चाद्विरोध्य तिष्ठति स्वाम्यपि वैरकृत्तस्मिन्द्वेषः संभावित इत्यत उक्तमेव हेतुं स्मारयति मुक्तवैरक इति वैरत्युपलक्षणं प्रेमापि विमुक्तप्रिय इत्यर्थः ॥ ११ ॥

तस्यतोपि भवानपि भवद्विधं कर्तुं न योग्य इत्याह दोषानिति के-चिदसाधवो दुर्जनाः परेषामुत्तमानां गुणेषु दोषानेव गृह्णंति न गुणा न् तदुक्तं "दोषान्वेषको यदि गुणगणो तत्र मुक्त्वा गुणौघान् दोषग्रा-ही भवति हि खलः मल्लिकातुल्यधर्म., इति भवादृशा महत्तमाः द्वि-जाः फल्गून् गुणान् बहुली करिष्णवो न दोषान्गृह्णंति किं तु गु-णानेव "दोषान्मुक्त्वा गुणमनुभवन् स्वल्पमप्येति तृप्तिं साधुर्लोके सलिलमिलितक्षीरपायीव हंस., इति तत्रैव शास्त्रे स्थिते महत्तमेषु गणितो भवान् भवद्विधादघमाविरलभवान् हि अहो कष्टमिति शेषः द्विजा इत्यनेन दक्षस्य शास्त्रविचारयोग्यतातिशयं सूचयति ॥ १२ ॥

असतां योग्यो महत्तमेष्वेकस्य तव शिवद्वेषो ममाश्चर्यबुद्धिं जनयतीति भावेनाह नाश्चर्यमिति * कुणो कर्मफलं पिबतीति कुण पो देहः स एवात्मेति वादिनस्तेषु असत्सु ईर्ष्यया सह वर्तमाना महतां विनिंदास्तीति यदेतदाश्चर्यं किंतु तदेव महद्भिर्निंदनमेव शो-भनमित्यन्वयः कुणपात्मवादित्वं च विद्वज्जनानिषेवाया अभावादि-त्याह महापुरुषेति कश्चिद्विद्वज्जनसेवया आप्तशास्त्रज्ञानेन हि तत्त्व-ज्ञानं स्यात्तद्वेषाभावात्यतो युक्तं कुणपात्मवादित्वे न महद्भिर्निंदनं भवादृशोऽतोममाश्चर्यबुद्धिरिति ॥ १३ ॥

महाज्ञानदं मया सकृदिति वक्तुं न शक्यत इत्याह यत् द्व्य-क्षरामिति शिव इति द्वे अक्षरे यस्मिंस्तत् द्व्यक्षरं यस्य भगवतो यत

* कुत्सितं णां सुखं कर्मफलं ।

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

अयशं नाम तत् सकृत्कथाप्रसंगात् गिरा वागिन्द्रियेणेरितमुच्चारितं नृणामिषं अन्येन हंतुमशक्यं दुःखम आशु हंति नाशयति भवांस्तु शिवं द्वेष्टयहो लुप्तक्रियायाशुच्यर्थे मानिने भिन्नसेतव इत्यतो भवान्शिवेतरो लुप्तक्रियोऽशुचिः शिवस्यशुचीनां पुंसां शांभहेतुर्दुःखनाशनामित्यं शुचिरिति भावेनाह पवित्रेति शिवनामकीर्तनादेकदा नष्टं दुःखं पुनर्नरोहतीति भावेनाह अलंघ्यति न लंघ्यमन्यथा कर्तुं शक्यं तन्नामकीर्तनादुत्पन्नं शुभ प्रनष्टमशुभं चेति शासनं शास्त्रं यस्य स तथा तम् ॥ १४ ॥

प्रेतावासेषु यो घोरैश्चिताभस्मकृतस्नानइत्यादेः श्लोकद्वयेनोत्तरं ध्वनयति यत्पादपद्ममिति ब्रह्मरसः * ब्रह्मज्ञानजन्य आनंदः स एवास्रव इंद्रियतृप्तिकरं मधु तस्यार्थनाशीलं येषां ते तथोक्ताः तैर्महतां सनकादीनां मनांस्येवालयः भृंगास्तैर्यस्य पादपद्मं नितरां सेवितं यद्देव दत्तपादवश्निष्फलं नेत्याह लोकस्येति आशिष अभ्युदयलक्षणाः अनेन गुरुद्रोहित्वं तव प्राप्तमित्युक्तं भवति "सनकादयो रुद्रशिष्यास्तेषामन्ये तु योगिनः ब्रह्मशिष्यस्तथा रुद्रो ब्रह्मा नारायणस्य च,, इति विशेषवचनान्महतामित्यनेन सनकादयो गृह्यंते ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

विमानित इति चित्सुखः । प्रेम्णेति सम्बन्धोक्तिः ॥ ७—१० ॥

प्रतीयत इति चित्सुखः ॥ ११ ॥

केचिदसाधवश्च साधवो गुणेष्वेव दोषान् गृह्णन्ति प्रकारविशेषेण गुणान्तःपातितयैवं मन्यन्ते । अतः साधारणास्तु ते गुणान् दोषांश्च यथावदेव मन्यन्त इत्यर्थः । तदेवं साधवो महान्तस्तेष्वसाधारणास्तु महत्तराः महत्तमाः पुनस्तुच्छानपि गुणान् बहुलीकरिष्णवो भवन्ति स्वभावत प्रचुरतया मन्यन्ते चकाराद्दोषानपि गुणान् मन्यन्त एवेत्यर्थः । भवादृशास्तु तथा न किन्तु तत्तद्विपरीतभावाः गुणदोषयो यथावदमननात् । गुणानां दोषतया ग्रहणात् । तुच्छस्यापि दोषस्य प्राचुर्यमननात् । पूर्वस्माच्च । अतस्ते क्रमेणाऽसन्तोऽसत्तराः असत्तमाश्च ज्ञेयाः अत्रासत्तमेषु गुणानां दोषतया ग्रहणमपि पूर्वस्माच्चेत्युक्तं त एते भवादृशा भवदुपमेयाः साधारणा गुणिजन विरोधित्वात् । भवांस्तु महत्तमेष्वपि तथा मननात् सर्वाधम एव किमुत साक्षात् श्रीशिवेऽपीत्यर्थः ॥ १२ ॥

एतच्च नाश्चर्यं अनाश्चर्यत्वे हेतुः कुणपेति । एषां शुद्धमात्मानं त्यजतामशुद्धे तस्मिन्नुपादेयबुद्धीनां किमाश्चर्यमिति भावः । सोपहासमाह । तेजोऽन्तररहितेषु मृतकेषु भीषणान्यामिव तदेव तेजस्त्वस्थापनात् शोभनं गौरवापादकं नान्यत् किमप्यस्तीति तैः किमन्यत् कर्तव्यमिति भावः पादपांशुशब्देनात्र प्रभावलेशो लक्ष्यते लक्षणा चेयं तेषामतितुच्छत्वव्यञ्जनार्थासेष्यां इति चितसुखः ॥ १३—१५

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

यजनं यज्ञस्थानं कीदृशं आसमन्ताद्यो वेदघोषस्तेनोर्जितं शोभितं यज्ञसम्बन्धिपशुविशसनं यत्र तत् । यद्वा यज्ञे विदुषां शास्त्रविचारस्पर्द्धया परस्परपराभूयैव वैशसं विबुधैश्च जुष्टं मृदादिभिर्निसृष्टानि निर्मितानि भाण्डानि यत्र तत् ॥ ६ ॥

स्वसृर्जननीश्च ऋते विना तं तत्र कश्चनापि नाद्रियत् तत्र हेतुः यज्ञकृतो दक्षाद्भयत्रयं तस्मात् । ततश्च विमानितां [illegible]रनादृतामपि तां स्वसृर्जनन्यः सादराः दक्षाद्विभ्यत्यः परिषस्वजुः ॥ ७ ॥

सौदर्याणां भगिनीगणानां संप्रश्नैः कुशलप्रश्नैः [illegible]मर्था योग्या या वार्त्ता तया सह दत्तां सपर्यां नादत्त न गृहीतवती कुशलप्रश्नं न प्रत्युवाच आसनादिकञ्च न पस्पर्शेत्यर्थः । तत्र हेतुः पितुनादृता अनादृता ॥ ८ ॥

आहुतिमन्त्रान् गृणतीं रुद्रभागहीनमध्वरमवेक्ष्य [illegible] श्रीरुद्रस्यावहेलनात् कृतहेलनं ज्ञात्वा चुकोप ॥ ६ ॥

अमर्षेण कोपेन विपन्नया सगद्गदया धूमपथे कर्ममार्गे अमेणाऽभ्यासेन स्मयो गर्वो यस्य तं दक्षवधाय समुत्थित [illegible] स्वाज्ञया निगृह्य निवार्य ॥ १० ॥

गर्हामेवाह अयोदशभिः । न यस्येति अतिशायन यस्मादधिको नास्ति ईश्वरत्वात् । प्रियश्चाप्रियश्च नास्त्यात्मारामत्वात् निर्विसर्ग पाठे अतिशायनश्च प्रियश्चेतानेतरयोगेऽपि सर्वो द्वन्द्वो विभाषयैकवद्भवतीत्यकत्वं । ऊकालोऽज् ह्रस्वदीर्घप्लुत इतिवत् । अथच देहधारिणां प्रियात्मनः प्रियात्मस्वरूपस्य तस्मिन् समस्तात्मनि सर्वजगत्कारणे भगवन्तं विनेति भवानेव प्रतीपयेत् प्रतीपं प्रतिकूलं कुर्यात् । यद्वा ऋतं सत्यरूपे तस्मिन् मुक्तवैरके सति भगवंतं कः प्रतीपयेत् समुचिताचरणेन प्रतिकूलं कुर्यात् । एते याज्ञिक सदस्यादयस्तु त्वद्वत्सरक्षैः कुक्षिम्भरा एव किन्तु स रुद्र एव वा तदीयो वा कश्चिदेव प्रतीपयेदिति भावः ॥ ११ ॥

असाधोस्तव सभायामेते खल्वसाधव एवेति वक्तुं साधूनसाधूंश्च लक्षयति दोषानिति । परेषां दोषानपि गुणेषु प्रकारविशेषेण गुणान्तःपातितयैव ये गृह्णन्ति यथा कटोभाषित्वं यद्यप्यस्य दोषस्तदपि हितकारित्वादयं रोगनिवर्त्तको निम्बरस इव गुण एवेत्येवं ते साधवो महान्त एव केचिद्भवंति हे द्विजेत्यधिक्षेपे तत्र न भवादृशा इति भवादृशास्तु गुणानपि दोषान्तःपातितयैव गृह्णन्ति यथास्य यत्परोपकारित्वं तत् परद्रव्य जिघृक्षयैवेति दोष एवायमित्येवं ते खल्वसाधव एव येतु दोषान् अपश्यन्तो गुणान् [illegible] गृह्णंति यथा वणिगयमातिथेयो निस्तीर्ण इत्येवं ते महत्तराः [illegible]तथैव ये दोषानेव गृह्णन्ति ननु गुणान् यथा भिक्षुरयमुदरपूर्ति स्निग्धान्नं यदत्ति तदयं कामी भ्रष्टो मन्तव्य इत्येवं ते असाधुतराः । येतु फल्गून् तुच्छानपि गुणान् बहुलीकरिष्णवः बहुलीकरणशीलाः किमुत फल्गून् दोषांस्तु नैव पश्यन्ति यथा शीतार्तत्वादेव मदीयवस्त्रमपहरन्नपि शस्त्रपाणित्वेऽपि दयालुत्वादेव न हिनस्ति तदयं धन्य इत्येवं ते महत्तमास्तथैव ये तुच्छानपि दोषान् बहुलीकरिष्णवो गुणांश्चैव गृह्णन्ति यथा विरक्तोऽयं वनमपहाय यद्गृहस्थगृहेषु वसति तत् प्रचुरधनं चोरयितुकाम इत्येवं ते असाधुतमाः ये तु गुणाभावेऽपि परेषां गुणानेव पश्यन्ति । यथा जगत्यस्मिन् केऽपि शिष्टा न सन्ति सर्व एव दुष्टा इति ते अत्यसाधुतमा इत्येवं सत्त्वतारतम्येन साधव इति साधूनां द्वैविध्येऽप्युक्ते तमप् प्रत्ययेन युक्तिसम्भवेन च महतां चातुर्विध्यमायातं । तथैव तमस्तारतम्येन भवादृशा इति अविद्ववानधर्माभ्याम् असाधूनामपि द्वैविध्येऽपि युक्त्या चातुर्विध्यं । शुद्धसत्त्वकल्याणगुणमयभक्तियोगतारतम्येन पुनरप्येव साधूनामपराधतारतम्येनासाधूनाञ्चातुर्विध्य ज्ञेय एवञ्च देहभृतां प्रियात्मनस्तस्मिन् [illegible] स्तात्मनि मुक्तवैरक इत्यादिना

* ब्रह्मशब्दस्य ज्ञानेवक्षणा ततोमध्यमपदलोपेनाह ।

[illegible]नाथचक्रवर्तीकृत सारार्थदर्शिनी ॥

[illegible] प्रीतिमत्त्वेन सर्वत्रादोषदृष्ट्या च अतिमहत्त्व-[illegible]नधर्मित्वेनेन तस्मिन् श्री [illegible] दोषमात्र दर्श-[illegible]मत्वात् सर्वजगत्येव दोषदृष्टिप्राप्त्या चादिते [illegible]गर्याप दोषदृष्ट्या अभिद्रोहानभिभूय चेति महत्-[illegible]श्रस्याप्यसत्त्वमत्वं ध्वनितम् ॥ १२ ॥

[illegible] दुर्जनेषु उचितमेवेत्याह तेति । कुणपं जडं श-[illegible]दन्ति ये तेषु असत्सु या सर्वदापि महन्निन्दा [illegible] पांशुभिः कर्तृभिः सेर्ष्यं यथास्यात्तथा निग-[illegible] येषां तेषु यद्यपि महान्तः स्वनिंदां सहंते तथापि तत् पादरेणवः असहमाना स्तेषां तेजो निरस्यन्तीत्यर्थः । अतो-ऽसत्सु महन्निन्दनमेव समुचितं फलदायकत्वात् शोभनम् ॥१३॥

[illegible] पि मध्ये श्रीशिवतुल्यः कोऽप्यन्योऽस्तीत्याह यस्य [illegible] तत् प्रसिद्धं नाम केवलं गिरैव ईरितं ननु मन-सा ध्यातं । तच्च सकृदपि प्रसंगादपि पवित्रकीर्तिमिति माधुर्यं अलंघ्य शासनमित्यैश्वर्यं । शिवेतरोऽमङ्गलः ॥ १४ ॥

पापहरत्वमुक्तं मुक्तिप्रदत्वमाह यदिति ब्रह्मरसोब्रह्मानन्दप्रदा सवो मकरन्दस्तदर्थिभिः भोगप्रदत्वमाह लोकस्येति ॥ १५ ॥

———

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

आब्रह्मघोषेण सर्वतो वेदध्वनिना ऊर्जितमतिशयितम् यज्ञवैश-सं मिथो[illegible]भवार्थवादो यस्मिन् तत् सर्वशः विप्रर्षिभिर्जुष्टं सेवि-तम् विबुधैश्च जुष्टम् मृदादिभिर्निर्मितानि निर्मितानि भांडानि यस्मि न् तत् यजनं यागस्थानं समाविशत् सतीति शेषः ॥ ६ ॥

तत्र यागस्थान मागतां तां सतीं स्वसृजननीं च ऋते यज्ञकृतो दक्षाद्भयं तस्मात् कश्चन जनो नाद्रियत नाहतवान् तत्र हेतुगर्भं विशेषणं विमानितां यज्ञकृतेति विभक्तिव्यत्ययेनान्वयः ताः स्तु प्रेमाश्रुभिरुद्धं कंठं यासां ताः सादराः परिषस्वजुः आलिंगि-तवत्यः ॥ ७ ॥

सा [illegible] सती मात्रा मातृस्वसृभिर्भगिनीभिश्च सादरं यथा [illegible] सपर्यां पूजामुत्कृष्टमासनं च नादत्त न स्वी-कृतवती किं [illegible] सोदरत्वेन भगिनीनां यः संप्रश्नः कुशलप्रश्न स्तत्र या समस्य [illegible] वार्ता तया सह तांचापि नादत्त नाऽऽद्रिया दित्यर्थः ॥ ८ ॥

यज्ञमदसि [illegible] विभौ विपुलज्ञाने पित्रा कृतं हे-लनमवेक्ष्यतं वर्तमा [illegible] चारुद्रभागं न विद्यते रुद्रभागो यत्र तथा भूतमवेक्ष्य तस्मिन्नध्वरेपित्रा स्वयमनादृता अधीश्वरी चुकोप-त्यन्वयः ॥ ९ ॥

सा देवी भूतगणान्समुत्थितान् स्वतेजसा निगृह्य निवार्य अ-मर्षेण क्रोधेन विपन्नया क्षुब्धया गिरा धूमपथे कर्ममार्गेयः श्रमोऽ [illegible] गर्हितं जगर्हेगर्हयामास ॥ १० ॥

[illegible] न यस्यति त्रयोदशभिः यस्य लोके अतिशयनः प्रतिर्गोपितः प्रियोऽप्रियश्च ना[illegible] देहभृताम् प्रियः आत्मा स्वभावो यस्य तस्य तस्मिन् गु[illegible] पूर्णो वासुदेव आत्मा [illegible] यस्य तस्मिन् [illegible] भिप्रायेण वासुदेवाव-तारताभिप्रायेण च महात्मनि [illegible]त्मा समस्ता-त्मेति प्रयोगो युक्तस्तस्मिन् सर्वत[illegible] प्रतीपयेत् प्रतिकू-लमाचरेत् ॥ ११ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

साधुर्निंदकत उत्पन्नमिदं तथापि विषये इति वक्तुं साध्वसाधुल-क्षणकथनपूर्वकं दक्षदोषान् शिवगुणानाह दोषानित्यादिना हेहि-जेत्यभिक्षेपः ये परेषां गुणेषु सत्सु दोषानेव गृह्णंति ते भवादृशाः साधुप्रतियोगिनः असाधव इत्यर्थः बहुवचनं तेष्वपि तारतम्यं द्यो तयति केचित् गुणेषु दोषान्केवलान् न गृह्णंति किं तु दोषान् गु-णांश्च विवेकेन गृह्णंति तथोक्तं महाभारते शत्रोरपि गुणावाच्याः दोषावाच्यागुरोरपीति अत्र गुरुः पित्रादिः ते लोकमर्यादास्थापकाः महांतः केचिच्च गुणानेव गृह्णंति किंतु फल्गून् तुच्छानपि गुणान् बहुलीकारिष्णवो भवंति ते महत्तमाः एते साधवः तेषु भवान् अध मपराधमविदत् लब्धवान् अकल्पयदित्यर्थः अभिद्रोहानभिभूयचेत्युक्त त्वाच्च ॥ १२ ॥

कुणपं शरीरं तदेवात्मेति तेषु भवादृशेष्वसाधुषु ईर्ष्या अन्तर्गतेति सेर्ष्यं यथा भवति तथा महन्निनिंदेति यदेतदाश्चर्यं न भवति किं तु तदेव महन्निनिंदनमेव शोभनमुचितं भवति साधवो यद्यपि स्वनिंदां सहंते तथापि तदंघ्रिरेणवस्तेषां तेजोनिरस्यंतीत्या शयेन तान् विशिनष्टि महापूरुषपादरेणुभिर्निरस्ततेजः स्थिति ॥ १३ ॥

यद्यस्य द्व्यक्षरं शिव इति नाम नृणामाशु अघं हंति कथं प्रसंगाद्वृपचारात् तत्रापि सकृदेकवारमेव गिरेरितं सत् ॥ १४ ॥

यस्य पादपद्मं महतां मनांस्येवाळयस्तैः ब्रह्मरसो भगवदानंदः स एवासवो मकरंदस्तदर्थिभिः निषेवितम् यच्च अर्थिनः आशिषः विद्यादिसंपदो वर्षति ॥ १५ ॥

———

भाषाटीका ।

यहां जाकर देखें तो ब्रह्मघोष से पूरित और यज्ञका पशु दि-या जाय जहां उस यज्ञ स्थान में सतीजी ने प्रवेश किया कि जहां पर देवता और ब्रह्मर्षि बैठे हुये हैं और चारो तरफ मृत्तिका, काष्ठ, लोहा, कंचन, दर्भ और चर्म इनके बने हुये पात्र धरे हैं ॥ ६ ॥

सतीजी के वहां जाने पर मारे दक्ष के डर से किसीने भी इन का आदर नहीं किया केवल मा और बहिनों ने अश्रुपातों से गला भरकर बड़े हर्ष और आदर से इनके साथ भेट मिलाप किया ७

तो भी सहोदरी बहिनों के प्रश्न की बात भी नहीं सुनी तथा माता और मासी अर्थात् माकी बहनों ने जो सतीजी को आसन और भेट पूजा दी सतीजीने कुछ भी ग्रहण न करी क्योंकि पिताने तो बात भी नहीं पूंछी ॥ ८ ॥

सतीने एक तो यज्ञमें महादेवजी का भाग न देखा दूसरे पिता ने शिवजी को निमंत्रण भी न दिया तो भी उतनी चिंता नहीं पर यज्ञ सभा में इतनी बड़ी अधीश्वरी का अनादर किया तब सती जी को बड़ा क्रोध भया जैसे मानों रोष के मारे लोगों को जला देवेंगी ॥ ९ ॥

इतने में दक्षके मारने को उद्यत हुये भूतगणों को सतीजी ने अपनी आज्ञासे रोककर क्रोधभरी हुई दुःखित वाणी से शिवद्रो-ही कर्ममार्ग के श्रम से गर्वीले, अपने पिता की सबों के सुनते २ बहुत निन्दाकी ॥ १० ॥

श्रीसतीजी बोली । न लोक में देहधारियों के मध्य में जिनका कोई अतिप्रिय न कोई अप्रिय केवल प्रिय है आत्मा श्रीहरि जिन

किं वाशिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने ।
तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्द्धभिर्दधति तच्चरणावसृष्टम् ॥ १६ ॥
कर्णौ पिधाय निरयाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने ।
छिंद्यात्प्रसह्य रुशतीमसतीं प्रभुश्चे-ज्जिह्वामसूनपि ततो विसृजेत्स धर्मः ॥ १७ ॥
अतस्तवोत्पन्नमिदं कलेवरं नधारयिष्ये शितिकंठ गर्हिणः ।
जग्धस्य मोहाद्धिविशुद्धिमंधसोजुगुप्सितस्योद्धरणं प्रचक्षते ॥ १८ ॥
न वेदवादाननुवर्तते मतिः स्वएव लोके रमतोमहामुनेः ।
यथागतिर्देवमनुष्ययोः पृथक् स्व एवधर्मेनपरं क्षिपेत् स्थितः ॥ १९ ॥
कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिंगमाश्रितम् ।
विरोधितद्यौगपदैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्च्छति ॥ २० ॥
मावः पदव्यः पितरस्मदास्थिता या यज्ञशालासु न धूमवर्त्मभिः ।
तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिंगा अवधूतसेविताः ॥ २१ ॥

भाषाटीका ।

को ऐसे सबों को आत्माके नाईं प्यारे वैर को दूर छोड़ने वाले ऐसे शिवजी से पिताजी ! तुमको छोड़ कौन वैर करेगा ॥ ११ ॥

हे द्विज ! (अर्थात् तुम पिता कहने योग्य नहीं हो) तुमारे स दृश मनुष्य और लोगों के गुणों मे भी दोषों को देखते हैं औरशि वजी सदृश साधुजन गुणों मे दोष देखना तो दूर रहा थोड़े भी गुण होय तो उसको बहुत करके जानते हैं ऐसे महत्तम पुरुषों मे तुमने दोष समझा है ॥ १२ ॥

तुमारे सदृश, देहाभिमानी खोटे मनुष्यों को ईर्षा पूर्वक महज्जनों की निंदा करना ये कुछ आश्चर्य नहीं हैं क्योंकि महापुरुषन के चरण रज से नष्ट तेज वाले तुमारे सदृशों को निंदा करनाही शोभा है (यद्यपि महापुरुषों के चरण रज से तेज बढ़ना चाहिये परंच अधिकारी नहोनेसेनष्ट होजाता है जैसे कमोदनी को सूर्य काप्रकाश) ॥ १३ ॥

जिन का दो अक्षर का (शिव ऐसा) नाम भी मनुष्यों की वाणी से एक बार भी निकले तो भी पापों को नाश कर देवे ऐसे पवित्रयश वारे जिनकी आज्ञा को जगत में कोई उलंघन न कर सकेऐसे शिवजी से अमंगलरूप तुम वैर करते हो अहो ! बड़ा आश्चर्य है ॥ १४ ॥

जिनका चरणारविन्द ब्रह्म रसरूप मकरंद को पान करने वाले महात्माओं के मनरूप मधुपों से सेवित होरहा है और जिनका चरणारविंद याचकों की कामनाओं को पूर्ण करता है ऐसे विश्वभर के बंधुरूप श्रीशिवजी से तुम द्रोह करते हो ॥ १५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

यदुक्तंशिवापदेशोह्यशिवइति यच्चोक्तंप्रतापासेच्यित्यादिनदाक्षपत्याह किंवेति योजटाअवकीर्यश्मशानेऽवसत्सर्पतिस्म तस्यश्मशानस्यमध्यानिभस्मानिनृकपालानिचभूषणत्वेनसंतियस्य तस्यत्तो-

श्रीधरस्वामि कृत भावार्थदीपिका ।

ऽन्येनविदुः किं विदुरेवेतिचेत्त तथासतितपांतद्दास्यानुपपत्तेरित्याह तच्चरणादवसृष्टंगलितंनिर्माल्यंमूर्द्धभिर्धारयंति ॥ १६

इदानींदेहत्यक्तुकामाधर्मतत्त्वमाह कर्णाविच्छाद्यनिर्गच्छेत् यद्यदिमर्षमारयितुंवा कल्पोनभवति कदा धर्माविततरिधर्मरक्षकेईशेस्वामिन्यसृणिभिर्निरंकुशैर्नृभिरस्यमानेऽभिक्षिप्यमाणे प्रभुः शक्तश्चेत् रुशतीमकल्याणवादिनीम प्रसह्यबलाच्छिंद्यात् ततोऽपिस्वयंप्राणान्विसृजेदितियत्सधर्मः ॥ १७ ॥

तवत्वत्त उत्पन्नम शितिकंठोनीलकंठस्तन्निंदकात् प्रमादादापन्नस्यापवित्रस्यत्यागेयिनानशुद्धिरितिदृष्टांतेनाह जग्धस्यभक्षितस्यान्नस्योद्धरणंवमनमेवपुंसोविशुद्धिप्रचक्षते ॥ १८ ॥

यदुक्तंत्वमाक्रियायागुत्वयइतितत्प्रत्याह नेति वेदवादान्विधिनिषेधरूपान्स्वएवलोकेस्वात्मन्येवरममाणस्यमहतोमुनेःस्वयगा धिरक्तस्यमतिर्नानुवर्तते निवृत्ताधिकारत्वात् अधिकारभेदेदृष्टांतः यथादेवानांगतिराकाशएवमनुष्याणांपृथिव्यामेव अतः स्वएवधर्मप्रवृत्तिलक्षणोनिवृत्तिलक्षणोवास्थितः सन्परमन्यंधर्मपुरुषंवानक्षिपन्निंदेत व्यवस्थिताधिकारत्वेनोभयोः सत्यत्वात् नक्षिपेदेवेतिवाऽन्वयः ॥ १९ ॥

एतदेवापपादयंत्याह प्रवृत्तमग्निहोत्रादिनिवृत्तंशमदमादिकमृतंसत्यमेवयतोवेदेशोऽश्रतोविहित नच्चाविविच्यव्यवस्थयाश्रितंनत्व-विशेषेण व्यवस्थामेवाऽऽहउभयंरागवैराग्यलक्षणंलिंगंचिह्नमधिकारिविशेषणंयस्मिन्स्तत् ननुयावज्जीवमग्निहोत्रंजुहोति शांतोदांत इत्यादिपुनर्नव्यवस्थाप्रतीयतेसत्यम तथाऽप्युभयोरेकाधिकारविरोधात्तथापर्यवस्यतीत्याह युगपद्भावोयौगपद्यंयौग पदेनैकस्मिन्कर्त्तरितत्कर्मद्वयंविरोधि ननुतर्हिनिवृत्तंकर्मापिशिवेनापिकर्तव्यमेवनेत्याह ब्रह्मणिमदाशिवेकिंचिदपिकर्मनऋच्छतिनप्राप्नोति अतोयथाप्रवृत्तनिवृत्तयोःपरस्परधर्माकरणेनदोषस्तथैवरएनतुभयधर्माकरणेऽपीति भावः ॥ २० ॥

चिताभस्मकृत[illegible]धारिणाममोगाद्यभावउक्तस्तत्राह हेपितः अस्माभिराश्रित[illegible]ऐश्वर्याऽणिमादिसमृद्धयोव-

नैतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना ।
व्रीडा ममाभूत् कुजनप्रसंगतस्तज्जन्म धिग्यो महतामवद्यकृत् ॥ २२ ॥
गोत्रं त्वदीयं भगवान् वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः ।
व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदंगजम् ॥ २३ ॥

मैत्रेय उवाच ।

इत्यध्वरे दक्षमनूद्य शत्रुहन्क्षितावुदीचीं निषसाद शांतवाक् ।
स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समाविशत् ॥ २४ ॥
कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः ।
शनैर्हृदि स्थाप्य धियोरसि स्थितं कंठाद्भ्रुवोर्मध्यमनिंदिताऽनयत् ॥ २५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

युष्माकं मा नसंतीत्यर्थः यतो वः पदव्यो यज्ञशालास्वेव भवंति नान्नतदन्नेन यज्ञगतेनान्नेन तृप्तैः केवलमीडिता धूमवर्त्मभिर्भुज्यंते अस्मत्पदव्यस्तास्तु नैवंभूताः किंत्वव्यक्तलिंगा नव्यक्तलिंगहेतुर्यासाम् इच्छामात्रप्रभवत्वात् अवधूतैर्ब्रह्मर्षिभिः सेविताः अतोऽहमाद्याऽस्मीति दरिद्रवदिति गर्वं माकृथा इति भावः ॥ २१ ॥

किंबहुनोक्तेनमं देहंत्यक्ष्याम्येवेत्याह द्वाभ्याम् एतेनेनालंनपूर्यतेकिम् अपितुअलमेव कथंभूतेन कुजन्मना तदेवाह हरेकृतापराधस्य तवदेहादुद्भूतेनोत्पन्नेन ननु अश्लाघ्योऽयंदेहः कथंत्याज्यस्तत्राह कुजनस्य तवप्रसंगतः संबंधान्ममलज्जाऽभूत् यतोयो महतामप्रियकर्तातस्माद्यज्जन्मतद्धिक् त्वत्संबंधात्श्लाघ्यमित्यर्थः ॥ २२ ॥

किंच परिहासादिषुवचनेनापि दाक्षायणीतिसंबोधयंस्त्वदीयं त्वत्संबंधवाचकं गोत्रंनामयदावृषध्वजआह गृह्णातितदाहंव्यपेतनर्म-स्मितं यथाभवत्येवंसुदुर्मनाअति दुःखितचित्ताभवामि ततस्माद्धिनि-श्चितमेतत्कुणपप्रायंव्युत्स्रक्ष्येत्यक्ष्यामि ॥ २३ ॥

दक्षं प्रत्यनुवादंकृत्वा शत्रुहन् क्रोधादीनिपुघातिन उदीचीम् उदीच्यांदिशि पाठांतरउदङ्मुखी शांतवाक् गृहीतमौना जलंस्पृष्ट्वाऽऽचम्य इत्यर्थः ॥ २४ ॥

योगमार्गमेवाऽऽह कृत्वेति अनिलौप्राणापानावूर्ध्वाधोवृत्तिकरौ निरोधेनसमानावेकरूपौ नाभिचक्र कृत्वा ततउदानमुत्थाप्य धियासह हृदिस्थापयित्वा कंठमार्गेण भ्रुवोर्मध्यमनयत् ॥ २५ ॥

———

श्रीराधारमणदास गोस्वामिविरचिता ।
दीपन्याख्यादीपिका टिप्पणी ।

आक्षिपन्तौ सिद्धांतेन तिरस्कुर्वन्तौ त्वत्तोऽन्ये ब्रह्मादयोऽशिवत्वेन किं कुतो न विदुः तथा सति । भागवत्वेन ज्ञाते सति ॥ १६ ॥

धर्मतत्त्वं धर्मस्य यथावत्स्वरूपं "तत्त्वं याथार्थ्येभेदे स्यात्स्वरूपे परमात्मनीति विश्वः ॥ ततोपि जिह्वाछेदे कृतेपि यद्यपि तथाहं समर्था तथाप्यहमाशिवः किंचित् कर्तुमशक्तत्वात् स्वकर्णाद्वारावरोधयामितथान इति स्वस्वामिकर्णौ द्वयं न स्वादिति भावः ॥ १७ ॥

किन्तु देहत्याग तु कारिष्यामीत्याह अत इति ॥ १८ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी

तस्मिन्वाक्यं प्रत्याचष्टे एवकारं स्वधर्मसमभिव्याहारेण व्याख्याय निदाऽत्यंतायोगं वक्तुं क्रियासमभिव्याहारेण व्याचष्टे व्यवस्थितेति आत्मज्ञानशून्यैः विधिविषयार्थं प्रवृत्त धर्म एवानुष्ठेयः तत्सहितैस्तु शमादिनिवृत्तधर्म एवेति व्यवस्थितो नियमितो धिकारी यदा प्रवृत्तनिवृत्तधर्मयोस्तत्वेन (ह)मा नोत्पद्येत अत्यंतायोगव्यवच्छेदः ॥ १९ ॥

एतदेव व्यवस्थिताधिकारत्वेन सत्यमेव तत्र विहितयोर्विधिद्वयं स्वकस्वव्याख्या सम्यक् व्यवस्थयेति तत्तदधिकारिनियमेनेत्यर्थः अधिशेषेण सामान्यतया यथास्वाराज्यकामो राजा राजसूयेन यजेतेत्यधिकारविधिस्तत्र यथा स्वाराज्यकामना सर्वेषामेव तथापि राज्ञ इत्यस्याधिकारिविशेषणत्वाद्राज्ञ एव स्वाराज्यकामस्य राजसूयेऽधिकारो नान्यस्य तथात्र रागवतैव प्रवृत्तं कर्मानुष्ठेयं न तु विरक्तेन वैराग्यवतैव निवृत्तं कर्मानुष्ठेयं न तु रागवतेति यथा संस्थ उभयमधिकारिविशेषणं यत्र प्रवृत्ते च कर्मणि तत् तत्र शङ्कते नन्विति एवं व्यवस्था अधिकारिविशेषणरूपा न प्रतीयते अग्निहोत्रं रागवान् जुहोति वैराग्यवान् शांतो दान्त इत्यश्रवणात् तथापि अधिकारिविशेषणाऽश्रवणेपि उभयोः प्रवृत्तनिवृत्तकर्मणोः एकस्मिन्नधिकारिणि विरोधेन न हि अग्निहोत्रादिकर्मव्यग्रेण शमादि कर्तुं शक्यते न च शमादिमता विरक्तेन तादृशं कर्मकर्तुं शक्यते इति विरोधादुभयमपि कर्म तथा तत्तदधिकारिविशेषणरूपया व्यवस्थया पर्यवस्यति अन्यथाऽनुपपत्त्या पर्यवसानं प्राप्नोतीत्यर्थः पुनः शङ्कते नन्विति जीवानामेवोभयविधे कर्मणि अधिकारो न त्वीश्वरस्येत्यतः ॥ २० ॥

अत्र संतीति क्रियाध्याहारादित्यर्थोक्तिः तादृशपदव्यभावे हेतुमाह यतो हेतोः पदव्यः यज्ञानुष्ठानेन कीर्त्यादिसमृद्धयः धूममार्गस्याधिकारो भोक्तुर्यजमानस्यैव नतु ऋत्विगादीनामिति धूमवर्त्मभिरित्यस्य तदन्नतृप्तानां विशेषणत्वायोगात्पृथक्क्रियाध्याहारेण व्याचष्टे धूमवर्त्मभिश्चेति नैवं भूतास्तदन्नतृप्तैरीडितत्वादिविशिष्टा न भवतीति नकारो योजितः अतः श्रीशिवस्यावधूतसेवितपदवीकत्वात् ॥ २१ - २२—२३ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्यादीपिकाटिप्पणी

अनुवादं कृत्वा अनुवादमुखेन तद्वाक्यं प्रत्याख्यायेत्यर्थः। उन्नीयमाने सत्यर्थे द्वितीया पाठान्तरं इति तत्राद्यौचित्याभावात् पाठांतरं तस्यैवाद्दक्रमुख्योति व्याख्यान चक्रवर्तौ उदक्रमेति मिश्राः उदाख्या इति वय पृथक् लक्षणगौरवात् ॥ पीतिदुकूलसंवृतेति सधवानां तदाचारात् ॥ २४ ॥

नाभिचक्रे मणिपूरके ॥ हृदि अनाहतचक्रे कंठमार्गेण विशुद्धि चक्रद्वारेत्यर्थः भ्रुवोर्मध्यम् आज्ञाचक्रम् ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

नन्वमंगलचारत्वात्तन्नामैव न स्मर्तव्यं तत्राह किंवेति यो रुद्रः श्मशाने जटाः अवकीर्य विक्षिप्य तन्मालयभस्मनृकपाली श्मशानमाल्यभस्मनरकपालवान् पिशाचैः सह अवसत्तमेवमशिवममंगलाचारं रुद्रं तच्चरणावसृष्टं रज इत्यध्याहारः ये ब्रह्मादयो मूर्द्धभिः शिरोभिर्दधति धारयंति न त्वदन्ये ब्रह्मादयः मरीच्यादिनवब्रह्मप्रभृतयः यद्वा मतद्गुणासंविज्ञानो बहुव्रीहिः अन्यथा अज लोकगुरुं नत्वेत्यादिपूर्वापराविरोधात् शिवाख्यं शिव इति आख्या नाम यस्य तथाभूतं न त्वद्गुः किं विदुरेवेत्यर्थः अमंगलाचारस्त्वनुकरणमात्रमिति भावः नन्वस्य परस्य ब्रह्मणः विष्णोः सर्वात्मत्वजगत्कारणत्वोपास्यत्वमोक्षप्रदत्वादिप्रतिपादकवेदांतार्थोपबृंहणपरेऽस्मिन्पुराणे मध्ये तत्र तत्र रुद्रादिजीवविशेषस्य कार्यत्वकर्मवश्यत्वादीन्प्रतिपाद्य पुनः स्वस्मिन्नात्मनि मुक्ताविरके ब्रह्मादयो यमूर्द्धभिर्दधति तच्चरणावसृष्टं नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वं विदुः प्रमाणं बलवीर्ययोर्वा त्वमेव भगवन्ननंताच्छिन्नशक्त्योः स्वरूपयोः। विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा। अहं ब्रह्मा च शर्वश्च जगतः कारणं परं। त्रयाणामेकभावानां यो न पश्यति वै भिदां सर्वभूतात्मनां ब्रह्मन् स शांतिमधिगच्छतीत्यादिषु भवानी ब्रह्मविष्णवादिवचनेषु सर्वात्मत्वजगत्कारणत्वोपास्यत्वादीन् विरुद्धान् प्रतिपादयन् भगवान्पाराशर्यः कथं विश्वसनीय इति चेन्न अत्र पुराणे परस्पराविरुद्धार्थकथन न कापि अस्ति कचित्प्रतीयमानमपि देवतांतरस्यात्मत्वकारणत्वोपास्यत्वादिकं प्रतर्दनाधिकरणन्यायेन रुद्रादिशरीरकपरमात्माभिप्रायकं रुद्रादेर्भगवदावेशावतारत्वाद्वा भगवद्रूपत्वोपपन्नमेतत् अथ वा यथावस्थितभूतपूर्ववृत्तांतस्य चास्मिन्पुराणे कथनात् तत्र तत्र कथासु भवानीप्रभृतिभिर्यानि वाक्यान्यभिहितानि तेषामिवात्र निबद्धत्वात् भवान्यादिवाक्यानां पतिपारम्येब्रह्मात्मकत्वप्रशंसात्मकत्वादितात्पर्यविशेषप्रवृत्तत्वाच्च पाराशर्येणाविरुद्धमभिहितं नन्वेवमपि ब्रह्मात्मकत्वेनापि रुद्राद्युपासनमपि कर्तव्यमिति यद्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति पवित्रकीर्त्तिं ये मूर्द्धभिर्दधति तच्चरणावसृष्टमित्यादिवचनेभ्यः प्रतीयते कचित् कांचन्माविकतंत्रे नान्यं देवं नमस्कुर्यान्नान्यं देवं निरीक्षयेत् नान्यं प्रसादमारोहेदन्यदायतनं विशेदित्यादिभिर्देवतांतरवंदनादिप्रतिषेधः तथा तद्भक्तैः सहदर्शनसमानासनसंस्पर्शसंभाषणाद्वाद्भुक्त्यादयःप्रतिषिद्धाः प्रत्युत देवतांतरतद्भक्तादयस्तत्र तत्र निंद्यंते अतःसात्वतैतत्पुराणयोर्विरोधः नैवं ब्रह्मोपासनं हि द्विविधं सद्वारक मद्वारकं चेति तत्र सद्वारकोपासनं नाम रजस्तमः प्रकृतिब्रह्मरुद्रादिजीवशरीरक परमात्मोपासनम् अद्वारकं तु शुद्धसत्त्वमयस्वेच्छोपात्तदिव्यमंगलविग्रहविशिष्टस्य निरस्तनिखिलदोषस्यानंतकल्याणगुणाकरस्याश्रयः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

पत्युर्नारायणस्योपासक रुद्रस्यानुसरणं वसकर्षणारामकृष्णादिव्यूहविभवादिभेदेनोपासन तत्र प्रथमं तत्तत्फलाभिलिप्सुभिः कार्यं द्वितीयं तु मुमुक्षुभिः कामभिश्च यत्स्वतं भगवता गीताचार्येणाप्यभिहितम् यो यो यां यां तनुं श्रद्धयार्चितुमिच्छतीत्यादिना अनन्याश्चिंतयंतो मां इत्यादिना दवान् देवयजो यांतीत्यादिना च अत्राप्युपक्रमे स्कंधेऽभिहितं रजस्तमःप्रकृतयः समशीलान् भजंति वै पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः । अथास्मितश्रवणादु सत्वतनौ इत्यादिना तथा द्वितीये अकामः सर्वकामो वा मोक्षकाम उदारधीः तीव्रेण भक्तियोगेन यजेत पुरुषं परमिति अद्यतं च अकाममोक्षाणां यदुक्तं द्वयात्मनः एकमेव हरेस्तस्य कारणमेवनान्यमिति एवं स्थितं द्विविधयाप्युपासनया अव्यभिचारिण्यैव तव्यमिति मुमुक्षणाभजनीयो पास्याद्देवतांतरवैभवादिदर्शनेऽपि स्वकारणदेवताराधनवस्वेदवगाभक्तिव्यभिचरितास्यादिति सर्वं मुमुक्षूणां देवतांतर भजनं निषिध्यते सर्वदेवतानां ब्रह्मात्मकानुसंधानं स्वाधिकारमेवेति न सात्वतैतत्पुराणयोर्विरोधः देवतांतरद्वेषादिनिंदा तु महिनिंदा निर्धनिंदितुं प्रवृत्ताकिंतु निधारस्तोतुमितिन्यायेनोपपन्नंस्य धा च गंतव्यम् ॥ १६ ॥

भवतु बहुधा भावे मयाऽभिहितथापि किं भवत्या भवितव्यमित्यत्राह कर्णाविति द्विजेश्वरौ धर्मरक्षके ईशे ईश्वरौ शभृते महत्तमे असृणाभिर्निरंकुशनिवारितैर्नृभिर्दुर्जनैरस्य माने आक्षिप्यमाणे सति यद्यपि भृगुवत् सृजतः अकल्पः विनिरङ्कदुर्जनशिक्षायामसमर्थः कर्णौ श्रोत्रे आच्छाद्य ततो निरयाद्विर्गच्छेत् यदि प्रभुः समर्थः दुशतीं दुष्टां जिह्वां प्रसह्य बलात् छिंद्यात् ततः स्वयमप्यसून् प्राणान्विसृजेदिति एतत्सधर्मः ॥ १७ ॥

अतः शितिकंठगर्हिणः सर्वस्मृतिमस्तव अपाद्रानस्येव-शेषस्य विवक्षया यत् उत्पन्नं मदीयं कलेवरं नधारयिष्ये प्रमादात् प्रसक्तस्याऽपवित्रस्य त्यागं निवृत्ति शुद्धिरिति दृष्टांतेनाह मोहाज्जग्धस्य भक्षितस्य जुगुप्सितस्य गृहसुरापानोऽन्नस्य उद्विरणं वमनमेव पुनः विशुद्धिम प्रचक्षते कथेत ॥ १८ ॥

ननु तथा किमेव माप्रहर्षामि यस्मादमंगलो मद्वो वैदिकं पंथानमुल्लंघ्य वर्तते अतो मया वैदिक मार्गानुवर्तिनाधिक्षेपणार्थमिति इत्याह न त्विति स्वामिनिलोके लोकयते रागक्षमनसा दृश्यत इति लोकः प्रमतास्मिन् स्वमार्गस्थस्य महामुनेरन्यस्य मतिर्वेद वादान् । मत्तश्चाहं से चातुर्मास्य याजिनः सुकृतं भवति अपाममसोममृता अभूमेत्यादीन् कर्मप्रशंसकानर्थवादान्नानुवर्तते तेषु नासक्तो भवति निवृत्ति मार्गनिष्ठस्य न प्रवृत्ति मार्गाचिरूपपद्यत इति न तस्य वैदिकपथाऽननुवर्तनमिति भावः अनयोः प्रवृत्ति निवृत्तिधर्मनिष्ठयोराचारःपृथगेव दृश्यते यथा देव मनुष्य गतिः पृथगेव देवानां गतिराकाशएव मनुष्याणां गतिः पृथिव्यामेवतद्वत् तथापि भवानिव अस्तुततथाप्युत्कृष्टः स्वकीये धर्मे स्थितो तेमानः परं निकृष्टं नाक्षिपे आक्षिप्तोपार्जित यत् स एव धर्मः ॥ १९ ॥

प्रवृत्ति धर्ममपि वैदिकत्वाविशेषात्किमिति नानुवर्तते अत इत्याह कर्मेति प्रवृत्तं स्वर्गादिफलाभ्युद्देशेन प्रवृत्तं कर्म तथा निवृत्तं फलकामनातो निवृत्तं च कर्म उभयो लिंगं फलाभिसंधिरहितत्वसहितत्वा [illegible] यथा भवति तथा वेदविचितस्य साधितं स्वर्गकामे [illegible] उपपत्तस्त्वेमतंवेदानुवचनेन ब्राह्मणा

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

या विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन धर्मेण पापमपनुद-न्तीत्याद्युक्तेः अस्मांकर्मणा यद्यालं तथापि तद्वयं प्रवृत्ति निवृत्तिभे-देनाद्विविधं कर्म तयोरेकैकस्मिन्नधिकारिणो भिन्नाः परस्पर विरुद्धा निवृत्तधर्मा ब्रह्मज्ञानेक निवृत्तं चाभयं कर्मनिष्ठानतप्राप्ते निर्माणमितिशेषः केवलं कर्मैव ज्ञानयोगानुगुणं न तूभयमि त्यर्थः निवृत्तकर्मानुष्ठानेनापीति भावः ॥ २० ॥

यतएवोभयविधकर्मादिभिः अन्यत्रावस्थितमतएवास्मदनुष्ठित निवृत्तधर्मसाध्यप्राप्तिमादयः ये प्रवृत्तिधर्मपरायणास्तेभ्य एतां नमनीत्याह हे पितः अस्मदादिभिः अस्माभिराश्रित : परिग्रहीताइ-त्यर्थः पदव्य मार्गमादयः सिद्धाः युष्माकं मा नमन्तीत्यर्थः तथा स्माकं मिश्रयोः रुद्रस्य न सन्तीत्याह ॥ याभयज्ञाया स्वर्गादिप-दवस्तामनुभवत्मभि भूमा प्रवृत्तिकर्मानुयायिभिस्तद् प्रवृत्तैर्यज्ञादिनकुत्सितान्नेन पुरोडाशादिःप्राणिभिर्यज्ञशालास्वेर्गन्धिताः स्तुत अस्मदादिभिः स्तुपदव्यः कलिंगादुरत्रगमचिन्हादुर्विभा व्य अवधूतनिरस्तनिखिलजगदादिसांसारिकधर्मैः सचिताःपरि प्रहीताः अतःफलतोऽनुष्ठानतश्च स्वेलक्षण्यं प्रवृत्तनिवृत्तधर्म-योरिति महत्समानां प्रवृत्तधर्मस्पृहा न इति भावः ॥ २१ ॥

किंबहुना केनसर्वथास्वदेहस्यैवेत्याह नैतदाभ्यां हरेरुद्रेकृ तागसः कृतापराधस्य न वदेहाद्वा देहादुत्पन्नस्नापत्यापत्यस्य रिपिसमासः नित्यसापेक्षत्वाद्याष्ठनन्तस्मनामदीयनकुत्सितेनदेहनननप्र योजनंकितस्सलमलननुअन्यथा ममदेहत्यक्षणमत आह कुजनस्यतव प्रसंगात्संबंधात् ममश्रीडालज्ञानमतामहता सहृशक्रियप्रियकर्त्ता देहः तस्मादुज्जन्मताद्गकान्तित्तत्र बंधादस्याध्यामित्यर्थः ॥ २२ ॥

किंचवृषभध्वजो रुद्रः परिहासमानमांकिरमांदास्ताग्गातिमत्वा धयन्तस्त्वसंबंधधनोधकैनाश्रना नगदस्य गृहात्तादिनदाहंऽयंतनमस्म तंऽयपतं अपगतनर्मपरिहासः किंप्रयथाभवत्यैवंसुदुर्मनाः अतिदु र्मनाचिताभवामतत्तस्मादिद्विनिष्ठ्यतत्कुणपप्रायंत्वदंगाज्जाताम देकलवरंव्युत्सृक्ष्ये त्यक्ष्यामि ॥ २३ ॥

हे शत्रुहन् ! हे विदुर ! उक्तप्रकारेणअध्वरे यज्ञेदक्ष मनुत्यव्युत्कामादेरिवोमुत्तरविजंवायोंतिशेषः शांतवाक्गृहीतमौना निरमादउपविष्टवती तत्रजलस्पृष्ट्वाचमनस्येत्यर्थः पीतदुकूलवस्त्रेणा संवृताप्राभृताहक्र दशमार्पत्यात् योगायाःसुकान्तिर्मीलययोगपथं-योगिनांदेहत्यागप्रकारं समाविशत्प्राश्रमवर्तीत्यर्थः ॥ २४ ॥

योगपथाश्रयणमेवाह कृत्वेति जितमासनंगयासाक्रागरहिता अनिर्दितानिर्दृष्टासनो अनिलौप्राणापानौ ऊर्ध्वाधोवृत्तिनिरोधेनसम मानौसमानवृत्तिनाभिचक्रकृत्वाततानवायुमुत्थाप्यबुद्ध्यासहशनैः हृदयस्थाप्यस्थःपयित्वापयित्वाउरःस्थानमुदानवायुंकंठात्कंठमार्गे णभ्रुवोर्मध्यमनयत् ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

त्वदंगे प्रभा आदि पिता येषां तेब्रह्मादयः ब्रह्मपुत्राः सनकादयः ये। रुद्रस्तन्माल्यभस्मनृकपाली तुहिमन् श्मशाने विद्यमानप्रेतालं कारमाल्यादिभिर्यथस्मनरकपालकिरान् जटा अवकीर्य प्रसार्य पि शाचैः सहश्मशानेऽवस्थानादिति नं दिवाक्स्थमशिवं विदुः किं न विदु रेव नित्यगुरु इत्येव विदुः कुत इति तत्राह ये मूर्धभिरिति ये सन-कादयः तच्चरणावसृष्टरजआदिकं मूर्ध्नाभिर्दधति अनेन शिवस्या-शिवत्वे ज्ञानपूर्वकं तच्चरणरजोधारणं तत्कारणमस्तीति नित्यं

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

शुद्ध इति तर्कः स्याच्चतः मूर्धभिर्दधतीत्यनेन पुरुषार्थापेक्षयापाद पांसुधारणं न त्वन्यथेति ध्वनयति तदुक्तं सुपर्णाशेषगरुडोशिवा-ष्णून् श्रियं गिरत्नृते नमति नो रुद्रं क एव पुरुषार्थमार्गीति ॥ १६ ॥

सभायां धर्मसंकटे प्राप्ते सभ्यैः कर्तव्यं धर्ममाह कर्णाविति । धर्मस्य पितरि ईशे स्वामिनि । अप्रामाणिकैर्याशुगुणरहितैर्नृभिरस्य मानसाधाश्रयमानेस ते सभ्या यद्यसमर्थः स्यात्तर्हि कर्णौ पि-धाय निरियात्तस्माद्देशादपगच्छेत् प्रभुश्चेदसतीं दुशीलां परुष भाषिणां जिह्वां प्रसह्य छिन्द्यात् तथा प्रभुस्ताऽसमर्थोऽसूनपि विसृजे त्स धर्म इत्यन्वयः ॥ १७ ॥

अपि शब्देनदमेव संभावितमिति ध्वनितं स्पष्टयति अतस्तवेति तत्र वीर्यादुत्पन्नं शितिकंठगर्हिणो नीलकंठद्वेषिणः अस्मिन्नर्थे स्या यमाह जग्धस्येति जग्धस्य भुक्तस्यान्धसोऽन्नस्योद्धरणं वमनं प्रश-स्तं वदति विद्वांस इति शेषः ॥ १८ ॥

ननु ममापराधमेव वदसि मातुलत्वेन गुरुं मां दृष्ट्वाऽभ्युत्थाना-दिकमकुर्वतस्तस्यापराधं किं न स्मरसीति तत्राह न वेदवादानिति ज्ञानत्वेन स्वेच्छावृत्त्यावधर्महामुनः सर्वज्ञ नमस्य शिवस्य स्व एव लोके स्वात्मिनिभूते प्रकाशमाने हरौ रमतो रममाणस्य तद्दर्शनसुखापा नेन नित्यतृप्तस्य मतिर्वेदवादान् वर्णाश्रमप्रयुक्तानभ्युत्थानादिवेद-विधीननुवर्तनेनानुसरति लौकिकविलक्षणत्वात् तत्रदृष्टान्तमाह यथेति यथा देवमनुष्ययोर्गतिमार्गाः पृथक्भिन्नाः तस्मात्स्व एव धर्मे स्वविहिते धर्मे स्थितः परमन्यं न क्षिपेत् न दूषयेत अतस्तवे-वानर्गलापराध इति भावः ॥ १९ ॥

ननु ज्ञानिनः प्रवृत्तिकर्मासंभवेपि निवृत्तिकर्म सं-भवतीति तत्राह कर्मेति वेदे प्रवृत्तं निवृत्तमित्युभयलिंग-मुभयविधलक्षणं कर्म विविच्याश्रितं प्रतिपादितं । स्वर्गाद्यर्थं प्रवृत्तं स्यान्निवृत्तं मुक्त्यै तु यदिति विवेकं कृत्वा कथितमित्यर्थः ततः किं तत्राह विरोधीति तद्द्वयं यौगपद्येनैककालमेककर्तरि विरोधि प्रकाशतमसोरेकत्रावस्थानैवासहकृदं स्यादित्यर्थः ततश्च प्रकृते किं तत्राह तथेति द्वयमित्यनुवर्तते यथा द्वयमेकस्मिन्कर्तरि घटत्वा-दुपरतं तथाऽऽब्रह्मणि सम्यक् ज्ञानिनि जीवन्मुक्तेऽपि द्वयं कर्म सन्के ति न प्राप्नोति "आब्रह्मस्थितर्धीर्जीवन्मुक्तश्चेत्यभिधीयते यस्तस्य न निवृत्तं च प्रवृत्तं कर्म चेष्यते„ इति वचनात् ब्रह्मगर्यद्वितीये सद्विती यकर्माश्रयं धर्मं न घटत इत्यंगस्यानुपपत्तेस्तु एवार्थः नन्वप्र न्युक्तं पशुमित्यादिश्रुतेर्नानामापि कर्मप्रतीते रुद्रस्यापि देवांतर्भा-वात्तस्य कथं तद्वत्तकर्मयुक्त इति चेदुच्यतेनास्माभिर्देवस्य कर्म-मात्राभाव उच्यते किं तु विष्णोराज्ञया नियताधिकारिकं नियमना-मकं कर्मास्त्येव मुक्तौ सुप्तोद्दिष्टकांहत्वात्तदुक्तं "यस्य देवाः प्रकुर्वंति स महानियमः स्मृतः । स महानियमो नाम कर्मयत्त्वाधिकारिकं ॥ महतो नियमाद्विष्णोः प्रीत्यामुक्तौ सुखावाप्तिः केचित्तु (*) वृत्तमि-त्याहुर्महानियममप्यैन„ इति एतदपि उत वेद विविच्यैवेति ध्वनितं त स्मान्महानियमाख्यकर्मांगीकृतस्य स्थितप्रज्ञस्य त्वभिज्ञया गुणहीन त्वं नाशंकनीयं यदि "दयाश्च ऋत्वाया निश्चेत यत्र कुत्रचित्

(*) अन्यत्र प्रमेयं कर्म द्विविधं प्रवृत्तं निवृत्तं चेति स्वर्गादी-च्छया क्रियमाणं प्रवृत्तं निवृत्तमपि द्विविधं मोक्षोद्देश्येन क्रियमाणं तदनुद्देश्येनकेवलमीश्वरप्रीत्यर्थमितिपनेद्वाधिकारिकमुच्यतेतत्रार्ह देवानां नास्त्येव द्वितीयं महानियमसंज्ञकं तेषामस्तीति याः ।

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

महतावता गुणोर्हीना स्थितप्रज्ञा हि ते मता यथा (२)योग्यं तु तात्पर्यं निर्णीतमन्यदेव तु,, इति वचनात् ॥२०॥

अनेनतरातीतप्रश्नेन रुद्रदक्षयोः पृथङ्मार्गत्वं ध्वनितं कण्ठोक्ती करोति माव इति हे पितः अस्मदाश्रिता अस्माभिराश्रिताः अवधूतसेविता सनकादियोगीन्द्रैरभ्यस्ता अव्यक्तलिङ्गा अन्यैरज्ञातलक्षणा अर्चिरादिमार्गलक्षणा या पदव्यस्ता धीः युष्माकं सा नैव भवति यज्ञशालायामासनेन दीक्षालक्षणेन धूमवर्त्म धूमादिमार्गो, येषां ते तथोक्ता तेषां युष्माकं कदन्नतृप्त पशुमांसलक्षणेनान्नेन अलं वृद्धिंगतैरसुहाद्भिःपशुप्राणहारिभिः पुरुषैरीडिता या धूमादिलक्षणापदव्यस्था अस्माकं नैवास्ति यदतः पृथङ् मार्गत्वात् त्वयि अदयाम रुद्रस्य गुणहीनत्वं अतो न तस्य दुषणामुच्चतामिति भावः ॥ २१ ॥

किं बहुनोक्तेनेति स्ववैराग्यमाभावयति एतेनेति हरे रुद्रे कृतागसः कृतापराधस्य तव देहोद्भवेन देहाज्जातेनात एव कुजन्मना लोकनिन्दितोत्पत्तिना कस्मादीदृशं वैराग्यं तवेत्यत आह व्रीडेति कुत्सितधीः अधमो जनः कुतनो भवादृशस्य प्रसंगतो जन्यजनकसंबंधरूपात्सम्बन्धा-त्तस्मात् कारणांतरं चाह तज्जन्मेति यन्महतामवद्यकृत्मनो विप्रियकारितज्जन्म धिक् निन्दितमित्यर्थः ॥ २२ ॥

ततः किं फलितं तत्राह गोत्रमिति वृषध्वजो भगवान् दाक्षायणीत्युपश्रीति त्वदीयं गोत्र त्वन्नाम्नोपेतं नाम विशेष यदा याचत्कुर्मनाक्त्वन्नामस्मरणमात्रेण सुतरां विमनामना अत एव व्यपेतनर्मस्मितामिति क्रियाविशेषणं अपगतनर्मवचनयुक्तमंदहासो यथा भवति तथा मां प्रत्याह वक्ष्यति हे तात तावत्ततः पूर्वमेव त्वदङ्गजं तव शरीरादुत्पन्नं कुणपं कुत्सितशरीरमुत्सृक्ष्य इत्यन्वयः वृषध्वजः स्नेहवशाद्यदा दाक्षायणीति त्वदीयं गोत्रमाह । तावत्तदा आशु त्वदीय दुष्कर्मणाद्व्यपेतनर्मस्मित स दुर्मना भवत्यत इतः परं तथा मा भूदिति कुणपमुत्सृक्ष्य इति वा मम देहत्यागस्तृणत्यागतुल्य इति द्योतनायात्मनेपदप्रयोगः ॥ २३ ॥

एवं देहत्यागस्यायत्नसाध्यत्वेऽपीतिकर्तव्यतायाः फलाधिक्यं स्यादिति सूचनाय योगिजनशिक्षणाय च देहत्याग इति कर्तव्यतां दर्शयत्यस्मिन्नध्याये इतीत उदीच्यां दिशमुद्दिश्य क्षितौ निषसादेत्यन्वयः धूमादयर्चनि रमयतीत्यध्वरस्तस्मिन्नध्वरे स्पृष्टान्यम्भ पीतं च तत् दुकूलं च तेन संवृताङ्ग्या दृक् दृशौ निमील्य निमीलितचक्षुरेषा योगपथ देहोत्क्रमणयोगमार्गं ॥ २४ ॥

कृत विवरणमिति कुर्वाति जितासना प्राणादिसंचारे सति देहसंचलनरहिताऽऽसनं निश्चलाऽऽकुलिनता सा सती प्रथमं रेचकपूरककुम्भकैर्निर्जितौ प्राणापानौ समानौ ऊर्ध्वाधोगतिरहितौ कृत्वा [illegible] गतीविधाय मूलाधारादुत्क्रमणकर्तारं सुपुम्ना सञ्चारिणमुदानं तथा प्योर्ध्वमस्तं कृत्वा नाभिचक्रानीय ततो नाभिचक्राद्धियां निश्चलया बुद्ध्या शनैरुद्गं विना हृदि स्थाप्य उरसि स्थितं वायुं कंठं नीत्वा कंठाद्भुवोर्मध्यमनयादित्यन्वयः यद्वा सर्वसंधिसञ्चारिणं वायुं*व्यानमूर्ध्वाधोगतिनिमित्तौ प्राणापानौ समानवायुनैकीकृत्य तं समानं वायुं सोदानमुदानगत्या सहितमुदानेनैकीकृत्यापर्युपरिस्थानं अविन

(२) उत्तमकृतमवनिन्दनं शिक्षारूपं, अधमकृतमसुरावेशादिमित्तमिति यथायोग्यमित्यर्थः ।

* व्यानाद्यर्थं

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नाव[illegible] ॥

सहायमर्याद्रिति अथद्रव्यनयनशक्तिमता वायुना जीवस्य द्रव्यनयः न तु तन्मात्रं तस्य योगिनो नित्याभ्यस्तत्वात् ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

किं वेति वा शब्दः कटाक्षे । किं निर्मिति न छिद्यतेति इतजिह्वास्य तस्यामूयामात्रात्मता निष्पत्ताय यदि च कामाति शिरश्छेदने तथापि सोपहासतया चेदनाभाव एव तात्पर्यं सोपहासत्वेनैव विशुद्धं हतमाह य तथ इति ॥१६॥

कर्णाविति । अतिसामर्थ्ये अधिक्षेपकजिह्वाच्छेदस्वप्राणत्यागौ । ततोन्यूनत्वे तच्छेद तत्याग स्वकर्णापिधान निर्गमौ श्रेयः १७

यस्मात् श्रीशिवांहिसङ्कोचतः तच्छेदे समर्था नाह । अतस्तस्यत्यादि जुगुप्सितस्य अपथ्यस्य विशुद्धि रोगशांतिम ॥ १८ – २१॥

अलं शब्दोऽत्र निवारणा अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः निवारणं च प्रयोजनाभावः यथा अलमतिविस्तरेण स्यादेते । तस्य च वीप्सा अतिशये नञ् चात्र शिरश्छेदने । ततश्चायमर्थः एतेन देहेन मम व्रीडा नाभूत किं अपितु भूरेव । तस्मादेतेनात्यर्थमेव प्रयोजनं नास्तीति । यद्वा । एतेनालं प्रयोजनाभावो न भवति तु प्रयोजनाभाव एव तस्मादेतेनालमेवेत्यर्थः ॥ २२—२५ ॥

पीतदुकूलेत्यपि ताद्दृशाम्बरवत्तृष्णायामाचारतया कथं सतीमिपूर्वेणान्वयः ॥ २४—२६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी

यदुक्तं शिवापदेशोह्यशिव इति यच्चोक्तं प्रेतावासेष्वित्यादि तदत्तिपक्ष्याह । यो जटा अवकीर्य श्मशानेऽवसन् तस्य श्मशानस्य माल्यानि भस्मानि नृकपालानि च भूषणात्वेन सन्ति यस्य तं शिवाख्यम अशिवं त्वत्तोऽन्ये ब्रह्मादयो न विदुः किं विदन्त्येवेति चेत न । तथा सति तेषां तद्दास्यानुपपत्तेरित्याह तच्चरणादवसृष्टं गलितं निर्माल्यं ये मूर्द्धभिर्धारयन्ति ॥ १६ ॥

ननु त्वं साधून लक्षयन्ती परेषु दोषदर्शनं निषिद्धासि अथच मां विप्र प्रजापतिपतित्वेन जगत्पूज्यं पितरमपि निन्दसीति त्वमत्यसाधुरसीति तत्र सम्प्रति निन्दायाः का वार्त्ता शिवद्विषं त्वां यदहं न हन्मि एव मे महापराध इत्यत्र धर्मतत्त्वं शृणु इत्याह कर्णाविति धर्मोऽविता धर्मरक्षक मदत्तम ईशे स्वामिनि अशृणोमि निरंकुशैः कैश्चिदस्यमाने अधिक्षिप्यमाणो सति कर्णौ पिधाय निर्यायादिति । यत यदि अकल्पः हन्तुं मर्तुं वा यदि न समर्थः स्यात् प्रभुश्चेदिति समर्थस्स्यादित्यर्थः तदा असतो निन्दकस्य जिह्वां प्रसह्य बलेन च छित्त्वा स्वतोऽपि निन्दाश्रवणप्रायश्चित्तं कुर्वन् स्वयं प्राणान् विसृजेत । यद्वा जिह्वाच्छेदनाशक्तिस निन्दकः प्राणान विसृजेत् तदा धर्मः तस्यानन्तरकालीन प्रमनासङ्गच लक्षणोऽवर्णो न भवतीत्यर्थः तत्रेयं व्यवस्था क्षत्रियस्य देहेऽधिकारात स एव निन्दकजिह्वां छिन्द्यात् अपरेषामन्यदप्यनधिकृतां अपायानां मध्ये देहत्यागं तत्त्यागरूपं स्वदण्डमेव कुर्वीतां ब्राह्मणस्य शरीरदण्डानौचित्यात् सतु कर्णौ पिधाय विष्णुस्मरणां गच्छेदिति ॥ १७ ॥

अहन्तु सर्वैश्वर्यात् सर्वसामर्थ्याच त्वां स्वश्च ब्रह्माण्डकोटीरपि हन्तुं शक्तत्वात्[illegible] द्वारा शिव एव दत्तं जघानेति शिवयशोहानि भीत्या [illegible] स्वप्रायश्चित्तन्तु करिष्याम्येवेति

श्रीविश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

परेणानन्तु स्वयमप्यशौचं पश्यन्त्याह अत इति । नन्वस्मत्: प्रमादादगृहीतस्याऽस्याऽत्रानुसन्धानेन विना न शुद्धिरित्यर्थान्तरन्यासेनाह । जग्धस्य भुक्तस्य … अस्य उद्धरणं वमनम् ॥ १८ ॥

नेहं त्यजाम्यत: … त्वया शास्त्रार्थमविदुषा भगवति श्रीरुद्रे निर्वैरेऽप्यारोपितं दुष्क्रियायाशुभम् इत्यादिदोषकदम्बकमुत्सृज्यैवेत्याह नेति स्वएव लोके स्वात्मन्येव रममाणस्य महामुनेर्मतिर्वेदवादान् विधिनिषेधरूपान् अनुलक्षयीकृत्य न वर्तते तत्रानधिकारादेवेति भावः । यदुक्तं "कुशलाचरितेनैषामिह स्वार्थो न विद्यते । विपर्ययेण चानर्थ„ इति "स्वैरं चरन्तिमुनयोऽपि न मह्यमाना„ इति । अतो मुक्तानां बद्धानाञ्च मिथः पृथगेव गतिरित्यत्र दृष्टान्तः । यथेति अतएव स्वे स्वीये धर्मे स्थितः परं न क्षिपेदिति विधिः ॥ १९ ॥

ननु प्रवृत्तं कर्म शिवो मा करोतु निवृत्तं कथं न करोतीत्यत आह कर्म प्रवृत्तमग्निहोत्रादि । निवृत्तं शमदमादि श्रुतं सत्यमेव । यत: वेदे आम्नेन विहितं तच्च विविच्य अधिकारव्यवस्थयैव नान्यथेनेत्यव्यवस्थामेवाह उभयं रागो वैराग्यञ्च चिह्नं यत्र तत् रागे सत्यग्निहोत्रादि वैराग्ये सति शमदमादीनि विविच्याधिकारिद्वये व्यवस्थितमित्यर्थः तत् कर्मद्वयं यौगपद्येन यौगपद्येनैकस्मिन्कर्त्तरि विरोधि रागवति निवृत्तं विरोधि वैराग्यवति प्रवृत्तं विरोधि अविवाहमित्यर्थः । तथैव ब्रह्मणि तत्द्वयं प्रवृत्तं निवृत्तञ्चेत्युभयमपि न ऋच्छति नाप्नोति । यथा प्रवृत्तनिवृत्तयोः परस्परधर्मेऽकरणे न प्रत्यवायस्तथैवेश्वरस्य तदुभयकर्माऽकरणेऽपीति भावः ॥ २० ॥

हन्त पुत्रिके ममैवैतद्भाग्यं यत् परमाद्भुतमस्य सदाचारस्य मम कन्या त्वं भिक्षुककदाचारगृहे पतितासि । तदपि सर्वगुणाशीलनिधिस्त्वं स्वभर्तुरपकर्षं यन्न सहसे तत्तव पतिव्रताचूडामणिरुचितमेवेति तत्र सभर्त्सनमाह मेति हे पितः ! अस्माभिरास्थिता आश्रिताः पदव्यः अणिमादिसिद्ध्यैश्वर्यवैराग्यज्ञानप्रेमादिसम्पत्त्यः वो युष्माकं मा । जन्मकोटिभिरपि न भविष्यन्तीत्यर्थः । ननु कुत एवं ब्रूषे नाः सिद्धयोऽप्यस्माकं सन्त्येव नेत्याह याः पदव्यो यज्ञशालासु न सम्भवन्ति तदन्नतृप्तैरसुरभिः काकतुल्यैर्धूमवर्त्मभिः कर्मिभिर्न स्तुताः किन्त्वव्यक्तलिङ्गास्ताश्शौरलक्ष्यप्रभावा अवधूतैः सनकादि नारदाद्यैः सेव्यन्ते । वर्त्तमाने क्तः ॥ २१ ॥

एवं दक्षं विनिन्द्य तत्सम्बन्धात् स्वदेहं निन्दति नैतेनेति एतेन मम देहेन न अलम् अपितु अलमलमेव कुतः हरे शिवे कृतागसस्तव देहात् कुतेन यो महतामवद्यकृत् अकापराधं एतत् जन्म धिक् २२॥

किञ्च । परिहासादिषु त्वदीयं त्वत्सम्बन्धज्ञापकं गोत्रं नाम त्वं दाक्षायणी भवसि तव मत्सम्बन्धोपनिन्दाव्यञ्जकं स्तधर्म एवेति यदा वृषध्वज आह तदाहं विगतनर्मास्मितं यथा स्यात्तथैवं सुदुर्मना भवामि तत्तस्मात् हि निश्चितम् एतत् कुणपप्रायं व्युत्स्रक्ष्ये त्यक्ष्यामि ॥ २३ ॥

अनूद्य दक्षं लक्ष्यीकृत्य उक्त्वा हे शत्रुहन्! अदेहत्यागामिषेणात्र त्वं शत्रुं मा अघानीरिति भावः । उदीची उदङ्मुखी । उदीचीमिति पाठे उदीच्यां दिशि इत्यर्थः पीतदुकूलेति मर्तुकामानां कुसुम्भरक्तवसनधारणमुचित्यम् ॥ २४ ॥

योगमार्गमेवाह । अनिलौ प्राणापानौ ऊर्ध्वाधोवर्त्तिनौ निरोधेन समानौ एकरूपौ नाभिचक्रे कृत्वा तत उदानं प्रति उत्थाप्य धिया सह हृदि स्थापयित्वा ॥ २५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

यदुक्तं शिवापदेशो ह्यशिव इति प्रेतावासेष्वित्यादि च तदाक्षिपत्याह किं वेति यः श्मशाने जटा अवकीर्य विक्षिप्य तस्य श्मशानस्य माल्यानि भस्मानि नृकपालानि च भूषणतया सितः यस्त्वसत्तथाभूतपिशाचैः सहाऽवसत् एवं भूतं तं शिवाख्यमशिवं "इत्यादिभिः सगुरुणा भगवान्नीललोहित" इत्यादुक्तरीत्याऽशिवस्यापूज्या ब्रह्मादयो न विदुः त्वदन्ये ये ब्रह्मपुत्राः तस्य शिवस्य चरणावसृष्टं रजो मूर्द्धभिर्दधति ते च किं न विदुरित्यन्वयः ॥ १६ ॥

धर्मस्य अवितरि रक्षके जने भागवते ईशे भगवति वा असद्भिर्निरंकुशैर्नृभिरस्यमाने आक्षिप्यमाने सति यद्यकल्पस्तर्हि कर्णौ पिधाय ततः निगात् निर्गच्छेत् प्रभुः कल्पश्चेत् रुशतीं रुक्षवाक्ष्विनीमसतां तेषां जिह्वां प्रसह्य बलात् अपिशब्दाद्यदि स्वदेहादीन् भगवद्भागवतानिन्दकसंबंधो भवेत्तदा असूनपि विसृजेदिति यत्सधर्मः ॥ १७ ॥

एतदेवाह अत इति शितिकंठगर्हिणः नीलकंठनिंदकस्य तव अपादानस्य शेषत्व विवक्षया षष्ठी उत्पन्नमिदं कलवरं नधारयिष्ये यतो मोहाज्जग्धस्य भक्षितस्य जुगुप्सितस्य विषादिदूषितस्यान्नस्य सोऽन्नस्योद्धरणं वमनमत्र विशुद्धिं प्रचक्षते कथयंति ॥ १८ ॥

ननु वेदोक्तकर्मत्यागिनः कुतो धर्माऽवतृत्वमित्यत्राह नेति स्वे स्वकीये उपास्ये लोके लोकयन्त वेदांतैरिति लोको भगवान् वासुदेवस्तस्मिन् रमतः महतो मुनेः मननशीलस्य भगवद्ध्याननिष्ठस्य वेदवादान् वेदेषु वारोपेषांतान् प्रवृत्तिधर्मान् मतिर्नानुवर्तते तत्रास्थानभवति यथादेवमनुष्ययोः भुवि स्वेऽपि च पृथग्गतिरस्ति तथा प्रवृत्तनिवृत्त जनयोर्गतिः पृथगेवेत्यर्थः ॥ १९ ॥

एतदेव विविच्य दर्शयत्याह कर्मेति वेदे प्रवृत्तं निवृत्तं चेति विविच्य श्रुतं सत्यमेव कर्माम्नातमभिहितम् उभयं बंधमोक्षलक्षणचिन्हं फलं यस्य तत् "प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् । आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतम„ इति सप्तमस्कंधात् यथा द्वयम् ब्रह्मणि न ऋच्छति न प्राप्नोति तथा युगपद्भावो यौगपद्यं नैक कर्त्ता यौगपद्येककर्त्ता तस्मिन् विरोधिसंसाराऽधिकारिणि निवृत्तं न प्राप्नोति ब्रह्माधिकारिणि प्रवृत्तं च न प्राप्नोतीत्यर्थः भवंतः संसारिणः प्रवृत्तकर्मनिष्ठाः वयं ब्रह्माधिकारिणो निवृत्तकर्मनिष्ठा इति भावः ॥२०

एतदेवाह मावइति हे पितः या यज्ञशालासु तदन्नतृप्तैरसुभृद्भिर्धूम्रमार्गाभिधूमवर्त्मभिः धूममार्गोऽधिकारिभिर्गादिता संस्तुतास्ताः पदव्यः प्रवृत्तकर्मरूपाः अस्मदाश्रिताः न भवंति याश्चास्मदाश्रिताः अव्यक्तलिंगाः ध्यानादिरूपास्ता वो युष्माकं मा न संतीत्यन्वयः॥२१॥

योजनो महतामवद्यकृत् तस्मात् जन्मतो धिक् अतो हरे कृतागसस्तव देहादुत्पन्नेन कुजन्मना कुत्सितजन्मना एतेन नास्ति प्रयोजनम् किंत्वलमलम् कुजनस्य तव प्रसंगतो मम व्रीडाभूत् ॥ २२ ॥

किंच भगवान् वृषभध्वजः यदा दाक्षायणीति त्वदीयं त्वत्संबंधवाचकं गोत्रनामाह तदा अहं व्यपेतनर्मास्मितं यथा स्यात्तथैवं सुदुर्मनाः अतिदुःखिताभवामि तस्मादेतत्कुणपं शवप्रायं त्वदंगजं त्वद्देहजं शरीरं व्युत्स्रक्ष्ये त्यक्ष्यामि ॥ २३ ॥

हे शत्रुहन् ! कामादिरिपुघातिन् ! अध्वरे इत्युक्तप्रकारेण दक्षं प्रत्यनुव्याहृत्य वादं कृत्वा शांतवाक् उपरतवाक् उदीची उत्तराभिमुखी क्षितौ निषसाद उपविष्टा सती जलं स्पृष्ट्वा आचम्य पीतेन दुकूलेन वस्त्रेण संवृता दृक् दर्शनं निमील्य योगपथं योगिनो शरीरत्याग मार्गं समयगाविशत् ॥ २४ ॥

एवं स्वदेहं महतां महीयसा मुहुःसमारोपितमंकमादरात् ।
जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणाम् ॥ २६ ॥
ततः स्वभर्तुश्चरणांबुजासवं जगद्गुरोश्चिंतयती नचापरम् ।
ददर्श देहोहतकल्मषा सती सद्यः प्रजज्वाल समाधिनाग्निना ॥ २७ ॥
तत्पश्यतां खे भुविचाद्भुतं महद्धाहेति वादः सुमहानजायत ।
हंत प्रिया दैवतमस्य देवी जहावसून् केन सती प्रकोपिता ॥ २८ ॥
अहो अनात्म्यं महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः ।
जहाऽवसून्यद्विमतात्मजा सती मनस्विनी मानमभीक्ष्णमर्हति ॥ २९ ॥
सोयं दुर्मर्षहृदयो ब्रह्मधुक्च लोकेऽपकीर्तिम् महतीमवाप्स्यति ।
यदंगजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृतयेऽपराधतः ॥ ३० ॥

श्रीमच्छुकदेव कृत सिद्धांतप्रदीपः

सा सती अनिंदिता पतिविमुखजनसंसर्गादिदोषरहिता जिता-सना अनिलौ प्राणापानौ समानौ कृत्वा नाभिचक्र एकरूपे संस्था-प्य पुनर्नाभिचक्रतः उदानमुत्थाप्यधिया सह हृदि अनाहतचक्रे स्थाप्य तत उरसि विशुद्धचक्रे स्थितं कृत्वा ततः कंठाद्भ्रूमार्गसम बात् शनैर्भ्रुवोर्मध्यमनयत् ॥ २५ ॥

भाषाटीका ।

क्या तुमसे व्यतिरिक्त और ब्रह्मादिक उन शिव नाम वाले अ-शिव को नहीं जानते हैं जो श्मशान में जटा खोलकर श्मशान की माला, भस्म, मनुष्यों के मुर्दो, को धारण करके पिशाचों के साथ वास करने वाले का भी चरणों में समर्पित निर्माल्य को बड़े आदर पूर्वक मस्तक में धारण करते हैं ? ॥ १६ ॥

जो धर्म की रक्षा करने वाले ईश्वर अपने स्वामी की कोई निरं-कुश मनुष्य निंदा करने लगे तो यदि आप असमर्थ होय तो कान मूंद कर वहां से अलग चला जाय और जो मरने मारने को समर्थ होय तो निंदा करने वाली खोटी जिह्वा को उखाड़ लेय और आप भी मरजाय यही धर्म है ॥ १७ ॥

इस लिये तेरे शिव निन्दकसे उत्पन्न हुये इस शरीर को मैं न धारण करूंगी मोह से दूषित अन्न खाने वाले की वमन करने ही से शुद्धि होती है ॥ १८ ॥

महामुनि आत्मारामों की मति विधिनिषेधरूप वेद वाक्यों को नहीं अनुवर्त्तन करती है जैसे कि देवताओं की गति आकाश मार्ग में और मनुष्यों की गति भूमि में इस लिये अपने धर्म में स्थित हो कर दूसरे की निंदा न करे ॥ १६ ॥

कर्म दो प्रकार के एक प्रवृत्तिरूप एक निवृत्तिरूप ये दोनों वेद में सत्य कहे हैं पर ये दोनों राग और वैराग्य दोनों लक्षण वाले धर्म अधिकारि भेद से भिन्न हैं यदि उन दोनों कर्मों को एक अधिकारि करने लगे तो विरुद्ध पडता है (जैसे संन्यासी को अग्नि होत्रादि गृहस्थ को दंड धारणादि) तैसेही ब्रह्मभूत शिव को कर्म न करने से दोष नहीं ॥ २० ॥

हे पिता ! हमारे लोगों की समृद्धि तुमको नहीं है तुमारी समृ-द्धि की स्तुति करने वाले यहां हैं जो यज्ञ के अन्न से प्राण पोषण करने वाले हैं और भोगने वाले भी धूम मार्गी हैं इच्छा मात्र से होने वाली हमारी संपदों को ब्रह्मज्ञानी अवधूत लोग सेवन करते हैं ॥ २१ ॥

शिवके अपराध करने वाले तेरे देह से उत्पन्न हुआ यह शरीर इस से मैंने भरपाया कुजन्म के संबंध से मुझे बहुत लज्जा हुई धिक्कार उस जन्म को जो महत् पुरुषों का अपराध करे ॥ २२ ॥

भगवान् वृषभध्वज श्री शिव जब कभी मुझको दक्षकी बेटी ऐसा तेरा नाम लेकर बुलाते तब मेरी हर्ष मुस्क्यान सब दूर चली जाती और मैं अपने मनमें बड़ी लज्जा करके दुःख पाती इस लिये इस तेरे अंगसे पैदा हुवे देह को अब तज देतीहूं ॥ २३ ॥

मैत्रेय जी बोले ॥ हे शत्रुहन् ! हे क्रोधादि को जीतने वाले विदुरजी ! इस प्रकार यज्ञमें सती जी दक्षके आगे बातें सुनाकर मौन होकर उत्तर की तरफ मुख करके पृथिवी में बैठ गई पीत वस्त्र पहिने हुये आचमन कर नेत्र मूंदकर योग मार्ग में प्रवेश करती हुई ॥ २४ ॥

आसन को जीत प्राण अपान वायु को नाभि चक्र पर समान करके । वहां से उदान को उठाके बुद्धिके साथ हृदय में लेजा कर उरस्थल, कंठ, मार्ग से भृकुटि के मध्य में लेगई ॥ २५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

महतापूज्यतमेन श्रीरुद्रेण ॥ २६ ॥

चरणांबुजे आसवंभजनानंदम् भर्तुरपरंनददर्श देहश्चसद्यः प्र-ज्वलितोऽभूत् समाधिनायोऽग्निस्तेन ॥ २७ ॥

खेभुविचहाहेत्यादिवादः तमेवाह हंतेतिविषादे दैवतमस्यपूज्य तमस्यप्रियाकेनदक्षेणप्रकोपितासती ॥ २८ ॥

महदनात्म्यंदौर्जन्यम् अस्यमर्वेप्रजोहएवन्याय्यस्याहुःयस्येति येनविमताऽवज्ञाता ॥ २९ ॥

दुर्मर्षमत्यसहनंहृदयंयस्य लोकेजनमध्ये शब्दादश्रकर्कश यद्यतः स्वीयामंगजांसुतामपरा[illegible]मृतयेमरणायोद्यतां ननिवारि तवान् पुरुषद्विट्शिवद्वे[illegible] ३० ॥

वदत्येवं जने सत्या दृष्ट्वाऽसुत्यागमद्भुतम् ।
दक्षं तत्पार्षदा हंतुमुदतिष्ठन्नुदायुधाः ॥ ३१ ॥
तेषामापततां वेगं निशाम्य भगवान्भृगुः ।
यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह ॥ ३२ ॥
अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा ।
ऋभवोनामतपसा सोमं प्राप्ताः सहस्रशः ॥ ३३ ॥
तैरलातायुधैः सर्वे प्रमथाः सहगुह्यकाः ।
हन्यमाना दिशोभेजुरुशद्भिर्ब्रह्मतेजसा ॥ ३४ ॥

श्री मद्भागवते महापुराणे चतुर्थस्कंधे
पारमहंस्यां संहितायां वैयासिक्यां
सतीदेहोत्सर्गश्चतुर्थोऽध्यायः ॥ ४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अद्भुतं दृष्ट्वाच ॥ ३१ ॥

यज्ञघ्नान्हंतीतियज्ञघ्नघ्नंतेनापहतंरक्षइत्यादिना ॥ ३२ ॥

अध्वर्युणाभृगुणा येतपसासोमंप्राप्तास्तेऋभवोनामदेवाउ--त्थिताः ॥ ३३ ॥

ब्रह्मतेजसोशद्भिर्देदीप्यमानैः ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे
श्रीधरस्वामी कृत भावार्थदीपिकायाम
चतुर्थोऽध्यायः

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

अनलेति वायुयुक्ताग्निधारणाम ॥ २६ ॥

भर्त्तुरपरम् अन्यं नदद्दर्शेति प्रेम्णा सर्वत्र तत्स्फूर्त्तिर्जातेत्यर्थः प्रज्वलितो दीप्तोऽभूत् यथा विद्युत्प्रदीप्यांतर्हिता भवति तथांतर्हिताऽभूदित्यर्थः मायिकवस्तूनामेवाऽनित्यत्वं न तु मायायास्तथा च योगबलेन तद्देहोऽणुर्भूत्वा मेनागर्भे प्रविष्टोबभूवेति ज्ञेयम ॥ २७ ॥

अत एवाद्भुतं तत्प्रज्वलनं तत्र महत्वं चांतर्धानाविवक्षया तमेव वादमाह ॥ २८ ॥

अस्य दक्षस्य न्याय्य उचितः ॥ २६ ॥

लोके च कीर्त्तिमित्येव पाठः चशब्दानरकं चेति व्याख्यानाद-मर्तामित्यनेन दुष्कीर्त्तिलब्धौ अप् उपसर्गस्य वैयर्थ्यापत्तेश्च ॥३०॥

अद्भुतश्चेति चकाराध्याहृतः अद्भुतत्वं तु देहस्यांतर्धानलक्षणमेव ॥ ३१ ॥

अपहतं रक्षः एकत्वं जात्यपेक्षया ॥ ३२ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपन्याख्यायां दीपिका टिप्पणी ॥

ओजसा मंत्रहोमादिसामर्थ्यबलेन सोमं तत्संज्ञके यागे भोक्तृत्वं प्राप्ताः ॥ ३३ ॥ ३४ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
दीपिन्याख्या दीपिकाटिप्पण्यां
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

महतामपिमध्येमहीयसामहत्तमंमहरुद्रंणावरान् मुहुः पुनः पुनरं कमुत्संगंप्रत्यारोपितंस्वदेहमेवंदक्षेक्रोधेन जिहासतीत्यक्तुमिच्छन्तीमन स्विनी स्वतंत्रास्वच्छन्दमरणेत्यर्थः सतीभवानीगात्रेषुअंगेषुअनिलाग्नि धारणांदधार अनिलाग्निधारणाख्यां धारणांचकारेत्यर्थः तयाहि-धारणया अनिलाग्नेयाकृत्पातिः ॥ २६ ॥

ततःजगद्गुरोः जगतांजन्तूनांगुरोः स्वभर्तुःरुद्रस्य चरणांबुजा सवं चरणांबुजे आसवमानेद्दंचितयंतीअनुभवंती अतएवहतकल्म षापापरहिताभर्त्तु रपरंसामवदर्शनचिंतितवतीदेहअसद्यसमाधिना यांऽग्निस्तेन प्रजज्वाल प्रज्वलितोभूत् ॥ २७ ॥

तदद्भुतमाश्च र्यंपश्यतांभुविखेआकाशेचसुमहान्हाहेतिवादः घोष अभूत्तदेवाहदेवतमस्यदेवश्रेष्ठस्यरुद्रस्यदेवी प्रियासतीकेनद-क्षेणाप्रकोपिताप्रकोपंप्रापिता असून्प्राणान्जहौअत्यजत् ॥ २८ ॥

अहोप्रजापतेर्दक्षस्यमहदनात्म्यंदौर्जन्यमद्यपश्यतचराचरं विश्व यस्य रुद्रस्य प्रजाः प्रजावत्प्रीति विषयंविश्वसुहृत् इत्यर्थःतस्य रुद्रस्य सती भार्या यद्वा यस्य दक्षस्य चराचरंप्रजाप्रजावत्स्नेहविषयम सर्वत्रस्नेहएवाऽस्यन्याय्यइतिभावःतेनदक्षेण विमताविमानिताअ-सून्जहौअस्यपंचिमावयोग्येत्याहुःआत्मजातथा पिअनर्हाअपीअस्याः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

मनस्कागुणवतीत्यर्थः अतएवाभीक्ष्णंपुनः पुनः मानसन्मानं प्रत्यहीत्॥ २६ ॥

कुमर्षमत्यंतामसहमानंहृदयंयस्यसोयंब्रह्मबंधुः ब्राह्मणापदेशोदक्षः अंकेमसतीकुकीर्तिमपकीर्तिमवाप्स्यतिचकारान्नरकंचयद्यतःभार्याभंगजापमराधतः स्वावज्ञयामृतयेमरणायउद्यतामुद्युक्तांपुरुषद्विट् शिवद्वेषीदक्षः तत्पुरुषायेतिश्रुतेमहादेवायप्रतियोगात् यद्वारुद्रस्य भगवद्वात्मकत्वात्रुद्रद्वेषिणोपिभगवत्द्वेषीत्यर्थःनप्रत्यवैक्षत नत्पवार बत ॥ ३० ॥

भवान् दाक्षायण्या अद्भुतमसुत्यागंप्राणत्यागंदृष्ट्वाजने एवंवदति सतिरुद्रपारिषदादक्षंहन्तुमुद्यताव्यायुधानियेसेउदतिष्ठन् इत्यिनवंतः ॥ ३१ ॥

तेषामपतनामापमंतादागच्छतांपारिषदानांवेगंनिशाम्यदृष्ट्वाभगवान्भृगुःयज्ञघ्नान्हंतीतियज्ञघ्नंतेनयजुषा"अपहता असुरारक्षांसिपिशाचा„इतिमंत्रेणदक्षिणाग्नौजुहाव हंतिविस्मये ॥ ३२ ॥

अध्वर्युणाभृगुणाहूयमानेमतिये तपनासोमं प्राप्तास्ते ऋभवो नामदेवाः सहस्रशः उत्पेतुरुत्थिताः ॥ ३३ ॥

ब्रह्मतेजसाउशद्भिर्दीप्यमानैः अलातान्येवायुधानियेषांतैःऋभुभिर्हन्यमानाः प्रमथाः रुद्रपारिषदाः दिशोभेजुः पलायितवंत इत्यर्थः ॥ ३४ ॥

इतिश्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिकायाम्
चतुर्थोऽध्यायः ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

एवं भ्रुवोर्मध्यमनिलमानीय स्वयमपि भ्रुवोर्मध्ये स्थिता किं चकारेति तत्राह एवमिति एवमुक्तप्रकारेण वायुं भ्रूमध्यं नीत्वा स्वयं च तत्रस्थिता मनस्विनी वशीकृतमना महतामिन्द्रादीनां महीयसा महत्त्वेन रुद्रेणादरान्मुहुः शश्वदंकमारोपितं स्वदेहं जिहासतीत्यक्तुमिच्छन्ती; सोमाणांगेषु करचरणाद्यवयवेषु अनिलाग्निधारणं देहभस्मीकरणाय वाय्वग्न्युत्पत्तिम् (*) शुचां ध्यानं दधार चकार अनेकार्थत्वाद्धातूनां दक्षरुषेत्यनेनात्महत्या दोषं मार्ष्टि ॥२६॥

ननु वाय्वग्निध्यानं देहत्यागानंतरं चेदुत्क्रांतस्य वायोरनावृत्तेरग्निसंयोगाभावेनाभीष्टकार्यानुत्पत्तिः पूर्वं चेदात्मनोपि नाशप्रसंगात्तदनुपपन्नमेतन्नस्य नित्यत्वेनानाशादित्याशंक्य सम समत्वे मोपपत्तेरिति भावेनाह तत इति ततो वाय्वग्निधारणानंतरं सा सती आत्मोपदेष्टृत्वेन जगतां गुरोराचार्यस्य स्वभर्तुः शिवस्य चरणायोर्ध्यानेनोत्पन्नानंदलक्षणमासवं मधु चिंतयत्यास्वादयती अपरं तस्मादन्यं न चिंतयती च शब्दात्परं विष्णवादिकं चिंतयती स्वदेहे विष्णवादिकं ददर्श देहं च तत्याजेति वाक्यशेषः ॥

* लक्ष्यते फलत्वेनानेनेतिलक्षणं तत्फलकमित्यर्थः

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

देहत्यागस्यान्यथानुपपत्त्यासिद्धत्वादध्याहृत्यान्वयेन इत्यदोषः रुद्र च ब्रह्मणाय चाविष्णुं चैवा श्रियं गिरं उमा ।चनंयती देहं तत्प्रजान्यं न चास्मरदिति वचनाद्वाक्याहारः प्रामाणिक इति प्रतीयते तत इत्यनुवर्तते ततो देहत्यागानंतरं सद्यस्तत्क्षणमेव पावाग्निकमेव समाधिजाता प्राप्तादेह: प्रजज्वाल अनेन मृतदेहसंस्कारोपि न पित्राविना कार्य इति धर्ममर्यादि हतकल्मषत्वेनेन विष्णवादिदर्शनार्थं तदापि तु कोपचिन्हेनाकिल्बिषापि नदर्मिन सूचयति यद्वा दर्शनस्यान्यथात्वंचोत्पते दोषाद्न्यथा प्राणं आयतं न चास्याः सोस्तीत्यर्थः ॥ २७ ॥

एवं जगत्संभरदेहत्यागे कस्यात्वंतः करणे खेदो नाभूत्किं तत्राह तत्पश्यतामिति ॥ २८ ॥

किमनेन सिद्धानुवादेन एकत्रदोषाऽसमारोपणेनेति तत्राह अहो इति अनात्म्यं मूर्खकर्म अहो त्वनार्यमिति पाठे अन्यार्यमित्यर्थः चराचराः प्रजाः यस्य वशे यस्य संततिं प्रसूता इति वा ॥ २९ ॥

ननु कथमेतदनार्यमभूदित्याशंक्य तस्य लोकविशिष्टफलदर्शनाविद्याह सोयमिति य एतादृशमनार्यमकार्षीत्सोऽयं दुर्मर्षहृदयो दुःसहहृदयः अत एव ब्रह्मबंधुर्हीनाधमो ब्राह्मणानां मृदुहृदयत्वात् अथो अयप्रभृति । तस्मादिति हन्वर्थो वा यद्यस्मादित्यनेन संबध्यते पुरुषं शिवं द्वेष्टीति पुरुषद्विट् तत्पुरुषायेति श्रुतेः अनेन विष्णुद्वेषमपि ध्वनयति पुरुषं विष्णुरुच्यते इति श्रुतेः मृतये मरणायोद्यतां प्रयतमानाम् ॥ ३० ॥

(*) शिवद्वेषग्रहग्रस्तो दक्षो पुत्रीमरणं दृष्ट्वा किमकरोदिति तत्राह दक्षस्त्विति ॥ ३० ॥ (क)

(:०:) निर्गुणं शमादिगुणहीनं । मृतकं देहं महीयासि महादेवे । एनोऽपराधमकार्यमित्यन्वयः ॥ ३० ॥ (ख)

सहमरणायोग्या भूतगणास्तदा किमकार्षुरिति तत्राह भवानीति अजं दक्षे । सत्या देव्याः असुत्यागं प्राणवियोगलक्षणम् ॥ ३१ ॥

दक्षादपिभृगोः शिवे हरौ महानिति भावनभूतगणशक्तिहासोपायं होमं वक्ति तेषामिति यज्ञघ्नो ये यज्ञविनाशकास्तान् हंतीति यज्ञघ्नघ्नस्तेन यजुषा येनोऽग्निदुस्तरितासौ हूयमानाना अन्तर्गतः तपः तपः तपः सुप्रत्यक्षिपा जातवेदशुष्कं नवृक्षमुत संदहृक्षत्यादियजुर्मन्त्रेण ॥ ३२ ॥

ततः किमभूत्तत्राह अध्वर्युणेति सोमं सोमं भागं ॥ ३३ ॥

अत्र ब्राह्मणशक्तेरेव बलीयस्त्वमिति ध्वनयन्नेतैर्देवभूतगणानां पराभवं वक्ति तैरिति अलातान्युल्मुकान्यवायुधानि येषां ते तथोक्तास्तैः । ब्रह्मतेजसा भृगुमन्त्रप्रभावेन । उशद्भिर्भृगोः संकल्पं कर्तुमिच्छद्भिरित्यर्थः ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृत पदरत्नावल्याम्
चतुर्थोऽध्यायः ॥ ४ ॥

(*)दक्षस्तुदृष्ट्वा दुहितुःस्वांनामित्तंविनाशनम् ।
बहुतत्पतघोरेण मयाऽसाधुकृतं बत ॥ ३० ॥ (क)

(:०:)पिङ्गमामविजितात्मानं निर्गुणं निरपत्रपम् ॥
योऽहं स्वीकृत्यमृतकं ब्यर्थमेनोमहीयासि ॥ ३० ॥ (ख)

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

देहे हतकल्मषेति सम्बधोक्तेः तथा च व्याख्या देहे तदुपलक्षिते हर्षीति ॥ २७ २८ ॥

ब्रह्मधृग्भुरिति क्वचित् । लोके च कीर्तिमसतीमित्येव पाठः । बहुत्र सदपि पाठान्तरं नांगीकृतं । चशब्दाभरकश्चेति व्याख्यानात् ॥ ३०—३४ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भे
चतुर्थोऽध्यायः ॥ ४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

महतां महीयसा श्रीरुद्रेण ॥ २६ ॥

चरणाम्बुजस्यासवं मकरंद माधुर्यमित्यर्थः चिन्तयन्ती सती न अपरं किमपि ददर्श । ततश्च समाधिजेनाऽग्निना हतं दक्षकन्यात्वाभिमानलक्षणं कल्मषं यस्तथाभूतो देहः प्रजज्वाल दिदीपे । ज्वल दीप्तौ । सद्यस्ततक्षण एव न तदुत्तर क्षण इति विद्युदिव प्रदीप्यान्तर्धादित्यर्थः । तस्या मायाशक्तित्वात् मायायाश्च साकाक्षाया अपि नित्यत्वात् मायिकवस्तुनामेवानित्यत्वव्यवस्थापनास्त देहनाशो न व्याख्येयः ॥ २७ ॥

दैवत स्य पूज्यतमस्य प्रिया केन दक्षेण प्रकोपिता सती असून् जहाविति लोकप्रतीतिः ॥ २८ ॥

अनात्म्यं जीवन्मृतत्वं अस्य दक्षस्य न विद्यते आत्मा यस्य स मृतकस्तस्य भावः अनात्म्यं संपूर्णकार्यविधित्वेनानित्यत्वात्तुच्छभावः । यस्यति सर्वैरेव स्नेह उचितः अथच स्वकन्यायामपि जीवन्मृतत्वमेवेति भावः । आत्मजा तत्रापि सती तथापि मनस्विनीति धिक् वस्तुमिति भावः ॥ २९ ॥

दुर्मर्षहृदयः असहनसहिष्णुमनाः पुरुषद्विट् शिवद्वेषी अपराधतः स्वाऽवज्ञया मृतये मरणाय उद्यतां न निवारितवान् ॥ ३० ॥ ३१ ॥

यज्ञघ्नान् हन्तीति । "तनाऽपहतं रक्ष,, इत्यादिना ॥ ३२ ॥ ३३ ॥

ब्रह्मतेजसा ज्वलद्भिर्दीप्यमानैः ॥ ३४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थस्य चतुर्थोऽयं सगतः संगतः सताम् ॥ ४ ॥

———

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

महतां मध्ये महीयसामहत्तमेन आदरान्मुहः अंकमारोपिते स्व देह दक्षरुषा दक्षविषयकक्रोधेन जिहासती त्यक्तुमिच्छन्ती गात्रेषु देहावयवेषु अनिलाग्निधारणां दधार ॥ २६ ॥

ततः सती स्वभर्तुः चरणांबुजे आसवं तद्ध्यानानंदं चिंतयती–अपरं न ददर्श देहश्चसमाधिजाग्निना सद्यः प्रजज्वाल प्रज्वालितोऽभूत् ॥ २७ ॥

तदद्भुतं देहत्यागं पश्यताम् खे भुवि च हा हेत्यादिवादोऽजायत तदेवाह हेत्यादिना केन दक्षेण प्रकोपिता दैवतमस्याऽसून् जहौ ॥ २८ ॥

श्री शुकदेवकृत सिद्धान्तप्रदीपः ।

अहो यस्य चराचरप्रजाः तस्य प्रजापतेर्दक्षस्य महदनात्म्यं नु पश्यत । या अभीक्ष्णं पुनः पुनर्मानमेवार्हति सा सती पद्विमता येन प्रजापतिना । अवज्ञाता । असून् । जहौ ॥ २९ ॥

सोयं दक्षः दुर्मर्षमसहमानं हृदयं यस्य पुरुषद्विट् शिवद्वेषी अत एव ब्रह्मणा वासुदेव द्रुह्यतीति ब्रह्मध्रुक् भगवद्भक्तद्वेषी एवं भगवद्द्वेषीत्यर्थः यस्तश्च स्वीयामंगजामपराधतः स्वकृताच्छिवावज्ञादिदोषतो मृतये मरणायोद्यतां न प्रत्यषेधत् न न्यवारयत् अतश्च लोके ॥ महती मपकीर्तिमवाप्स्यति ॥ ३० ॥

सत्याः अद्भुतम् असुत्यागं दृष्ट्वा एवं प्रागुक्तरीत्या जने वदति सति तस्य शिवस्य पार्षदा दक्षं हन्तुमुदतिष्ठन् ॥ ३१ ॥

आपततां सर्वतो बलादागच्छतां । वेगं निशाम्य दृष्ट्वा । "अपहता असुरा रक्षांसि पिशाचा" इत्यनेन यज्ञघ्नान्हंतीति यज्ञघ्नमंत्रेण यजुषाजुहाव ह स्फुटम् ॥ ३२ ॥

तदा अध्वर्युणा हूयमाने सति ये तपसा सोमं प्राप्ता ऋभवो नाम देवास्ते सहस्रशः उत्पेतुः ॥ ३३ ॥

तैर्ब्रह्मतेजसा ज्वलद्भिर्दीप्यमानैः अलातानि सोल्मुकाग्न्यैवायुधानि येषांतैः हन्यमानाः दिशो भेजुः प्राद्रवन् ॥ ३४ ॥

इति श्रीमद्भागवतसिद्धांतप्रदीपे चतुर्थस्कंधीये
चतुर्थाध्यायार्थप्रकाशः ॥ ४ ॥

———

भाषाटीका ।

इस प्रकार महत्पुरुषों के पूजनीय श्री शिव ने आदरसे बारंबार अपने गोद में जिसका लालन किया सती ने उस देहको दक्ष के ऊपर क्रोध से छोडने के लिये वायु और अग्निकी धारणा को धारणकी ॥ २६ ॥

तब तो जगत के गुरु और अपने पति एसे श्री शिवजी के चरणांबुज के ध्यानानंद के सिवाय सती जी और कुछ नहीं देखती हुई सब कल्मषनाश होने से सती का देह समाधि के अग्नि से तत्काल जलने लगा ॥ २७ ॥

इस अद्भुत आश्चर्य का देखने वालों का पृथिवी और आकाश में बडा हाहाकार होता भया बड़े खेदकी बात है देवों में श्रेष्ठ श्री शिवजी की प्रिया ने दक्ष से कुपित होकर प्राणत्याग दिये ॥ २८ ॥

अहो ! दक्षकी बड़ी दुर्जनता है देखो जिसको सब चराचर अपनी संतान के सदृश पालनीय है सोतो रहा पर जिसकी अवज्ञा से साक्षात्पुत्री सतीने प्राण छोडदिये यतो विचारी सदा सन्मान ही के योग्यथी ॥ २९ ॥

इस असहन शील हृदय वाले, ब्रह्मद्रोही तथा शिवद्रोही की लोक में बड़ी अपकीर्त्ति होगी जो कि इसके अपराधसे मरने को त्यार हुई आपकी साक्षात्पुत्री कोभी इसने मरने से नहीं निषेध किया ॥ ३० ॥

सती का इस प्रकार अद्भुत देह त्याग को देख लोग एसा कहते थे इतने में सती के साथ आनेवाले पार्षदगण आयुधों के लेकर दक्ष के मारने को खड़े हुये ॥ ३१ ॥

आते हुवे इनों का वेग देखकर भृगुने यज्ञ नाश करने वालोंका नाशक यजुर्वेद के मंत्र से दक्षिणाग्नि में हवन किया ॥ ३२ ॥

बस भृगु अध्वर्यु के हवन करतेही जोकि तपसे सोमको प्राप्त

भाषाटीका ॥

हुवेहैं ऐसे हजारों ऋभुनाम के देव उठ खड़े हुये ॥ ३३ ॥

ब्रह्मतेज से दीप्यमान उन ऋभुदेवताओं से (अजात) अधजली अर्काडियों के आयुधों से ताड़ित हुये गुह्यक और भूतप्रमथगण सब दिशों में भाग गये ॥ ३४ ॥

भाषाटीका ।

इति श्रीमद्भागवतमहापुराण चतुर्थस्कन्ध में श्रीसती देहत्याग नामवाले चौथे अध्यायकी भाषाटीका समाप्त हुई ॥ ४ ॥

श्रीरुक्मिणीरमणोजयति

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥



पञ्चमोऽध्यायः।

मैत्रेय उवाच।

भवोभवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात्।
स्वपार्षदसैन्यं च (१) तदध्वरर्भुभि--र्विद्रावितंक्रोधमपारमादधे ॥ १ ॥
क्रुद्धः सुदष्टौष्ठपुटः सधूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषम्।
उत्कृत्य रुद्रः सहसोत्थितोहसन्गंभीरनादोविससर्ज तां भुवि ॥ २ ॥
ततोऽतिकायस्तनुवा स्पृशन्दिवं सहस्रबाहुर्घन(२)रुक् त्रिसूर्यदृक्।
करालदंष्ट्रोज्वलदग्निमूर्द्धजः कपालमालीविविधोद्यतायुधः ॥ ३ ॥
तं किंकरोमीति गृणंतमाह बद्धाञ्जलिं भगवान्भूतनाथः।
दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणीरुद्र (३) भटांशको मे ॥ ४ ॥
आज्ञप्त एवं कुपितेन मन्युना सदेवदेवं परिचक्रमे विभुम्।
मेने तदात्मानमसंगरंहसा (४) महीयसां तात! सहः सहिष्णुम् ॥ ५ ॥
अन्वीयमानः सतु रुद्रपार्षदैर्भृशं नदद्भिर्व्यनदत्सुभैरवम्।
उद्यम्य शूलं जगदंतकांतकं स प्राद्रवद् घोषणभूषणाङ्घ्रिः ॥ ६ ॥
अथर्त्विजोयजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्यरेणुम्।
तमः किमेतत्कुत एतद्रजोऽभूदिति द्विजाद्विजपत्न्यश्चदध्युः ॥ ७ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

पंचमेतुसतीदेहत्यागमाकर्ण्यशंकरः।
वीरभद्रंरुषोत्पाद्यतेनदक्षमघातयत् ॥ १ ॥

प्रजापतेर्हेतोर्निधनम् कुतः तेनासत्कृतायाः तस्याध्वरेऋभवोदेवास्तैः ॥ १ ॥

सधूर्जटिःरुद्रोघोरः सन्जटामुत्कृत्योत्पाट्योत्थितः संस्तांभुवि विससर्ज सुदष्टओष्ठपुटोयेन तडितांवह्नीनांचसटाज्वालास्तद्वदुग्रंरोचिर्यस्यास्ताम ॥ २ ॥

ततोजटायाः सकाशादतिकायोवीरभद्रोजातइतिशेषः तनुवातन्वादेहेनदिवंस्पृशन् स्पृशन्नित्यर्थः घनरुक्कृष्णवर्णः त्रयः सूर्याइवदृशोयस्य करालास्तुंगादंष्ट्रायस्य ज्वलदग्निरिवमूर्धजायस्य कपालमालायुक्तः विविधान्युद्यतान्यायुधानियस्य ॥ ३ ॥

हेरुद्र! हेभट! युद्धकुशल! मद्भटानांत्वमग्रणीःसन्सयज्ञंदक्षंजहि ब्रह्मतेजोदुर्जयमितिमामंस्थाः यतस्त्वंमेंऽशकः ॥ ४ ॥

मन्युनारुद्रेणापरिचक्रमंप्रदक्षिणीचकार असंगमप्रतिघातंयद्रंहोवेगस्तेन भो तात! महीयसांबलीयसामपिसहः सहिष्णुबलंसोढुंक्षमंममेने ॥ ५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

जगदंतकोमृत्युस्तस्याप्यंतकंशूलम् घोषयंतिशब्दंकुर्वंतीति घोषणानिनूपुरादीनिभूषणानियस्यांघ्रीयस्यसः ॥ ६ ॥

ककुभिदिशितमोनभवतिकिंतुरजइतिज्ञात्वाऽऽहुः रजएतत्कुतोऽभूत् दध्युश्चिंतयामासुः ॥ ७ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी।

तेनवीरभद्रेण हतोरिति हेतुत्वं चक्रोधोत्पादने निमित्तत्वम् ॥ १ ॥
कुद्धत्वाद्घोरो भयानकस्सन् ॥ २—३—४ ॥
तदा आज्ञाकालं असङ्गरंहसा लिङ्गेन ॥ ५—६ ॥
तमः किमिति काकुः तथा च तमो न भवतीत्यादि व्याख्या ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

एवंसत्याः प्राणत्यागनिमित्तं त्यागप्रकारश्चसप्रपंचमुक्तः अथ तत्प्रसंगात्प्रसक्तं दक्षाध्वर विनाशं पुनस्तत्संधानंच स प्रपंच माह

पा० (१) तदध्वरंशीरिति तदध्वरर्भुभिरितिवा विजयध्वजपाठः (२) रक्तसूर्यदृग् इति विजयध्वजः
(३) रुद्रजटांशक इति वि० (४) सहीयसामिति वि० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

त्रिभिरध्यायैः तत्राद्येनाध्वरविनाशप्रकारमाह मैत्रेयः भव इति प्रजापतेर्हेतुस्य कर्त्तरि षष्ठी तेनाऽसत्कृतायाः भवान्याः सत्याः निधनं तथा दक्षस्याध्वरे ये ऋभवो देवास्तै विद्रावितं पलायितं स्वपार्षदानां सैन्यं च नारदान्मुनेरवगम्य श्रुत्वा अपारं क्रोधमादधेकृतवानित्यर्थः ॥ १ ॥

ततः स धूर्जटिः रुद्रः घोरः सन् क्रुद्धः सन् सुष्टुदष्टः ओष्ठपुटो येनसः तडितां वह्नीनां च सटा ज्वालाः तद्वदुग्रं रोचिर्यस्यास्तां जटां उत्कृत्य उत्पाट्य उत्थितः गंभीरो नादो यस्य सः हसन् तां जटां भुवि विससर्ज अपातयत् ॥ २ ॥

ततो जटायाः सकाशात् अतिकायः वीरभद्रः आतइति शेषः तमेविशिनष्टि तन्वा देहेन दिवं स्पृशन् त्रयः सूर्या इत्यर्थः घनरुक् कृष्णवर्णाः तिस्रः सूर्यमद्दशाद्दशो यस्य करालाः उग्रा दंष्ट्रा यस्य ज्वलन्त्यग्निरिवमूर्धजा यस्य कपालानां मालाऽस्यसंतीतितथा विविधानि उद्यतान्यायुधानि यस्य सः ॥ ३ ॥

किं करोमि किं करवाणीति गृणंतंभाषंतं बद्धांजलिं तं वीरभद्रं भूतनाथो भगवान् रुद्रः माह उवाच हे रुद्र ! हे भट ! युद्धकुशल ! मद्भटानां त्वमग्रणीर्नायकः मे अंशभूतः मयदक्षं जहि विनाशय ॥ ४ ॥

कुपितेन मन्युना रुद्रेणैवमाज्ञप्तो देवदेवं विभुं रुद्रं परिचक्रमे प्रदक्षिणीचकार तदाऽसद्यरंहसा प्रतिघातरहितवेगेन महीयसां बलीयसामपि महःतेजोबलं तत्सहिष्णुं पारिषदैः सोढुंक्षमम आत्मानंमने अमन्यत ॥ ५ ॥

सतु वीरभद्रः भृशंनर्दद्भिः स्वनद्भिः रुद्रपारिषदैः रन्वीयमानः परिवेष्टितः सुभैरवम् अतिभयंकरं यथा भवति तथा व्यनदत् ननाद ततः स वीरभद्रो जगदंतकोमृत्युस्तस्याप्यंतकोऽपमं शूलमुद्यम्य घोषणानि ध्वनंति भूषणानि नूपुरादीनि ययोस्तावंघ्री यस्य सः प्राद्रवत् दक्षाध्वरं प्रत्यगात् ॥ ६ ॥

अंग ततः ऋत्विजां दक्षाध्वरे ऋत्विजः यजमानः दक्षः तथा सदस्याः सभ्या द्विजास्तत्पत्न्यश्च उदीच्यां ककुभि दिशि रेणुं परागं शर्मीक्ष्यतमोनुभवति किंतु रज इति ज्ञात्वाऽऽहुः रजएतत्कुतोऽभूदिति वध्युक्तितथामामनुः ॥ ७ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

विष्णुद्वेषवत्तद्भक्तद्वेषस्याप्यनर्थहेतुत्वान्मुमुक्षुणा स न कर्तव्य इति ज्ञाप्यतेऽस्मिन्नध्याये तत्रादौ नारदश्रुतभवानीमरणाद्रुद्रवार्ति वीरभद्रोत्पत्तिं वक्तुमाह भव इति प्रजापतेरवमानेनाऽसत्कृतायाधिक्कृतायास्तस्य दक्षस्याध्वरस्येशात इति तदध्वरेशा भृग्वादयस्तैः ॥ तदध्वरं यजंत इति तदध्वरेजः तैस्तदध्वरेड्भिरिति वा पाठः क्विप् संप्रसारणं च ॥ १ ॥

क्रोधफलमाह क्रुद्ध इति सुदष्टे ओष्ठपुटे यस्य स तथा धूता जटा अस्य संतीति धूर्जटिः मत्वर्थे क्विप् प्रत्ययः तडिद्वह्निसटा वैद्युताग्निज्वाला तद्वदुग्रं रोचिर्यस्याः सा तथा तां रौद्रो मध्याह्नातप इव तीक्ष्णः 'आतपः कथ्यते रौद्र, इति हलायुधः ॥ २ ॥

सा जटा किमभूदिति तत्राह तत इति ततो जटायाः कश्चित्पुरुषोऽभूदिति शेषः तनुवा तन्वा शरीरेण । घनरुक्‌ः सान्द्रारुक्‌ः सूर्यसहस्रकान्तिको यस्य स तथा कपालानां मालासमूहोऽस्यास्तीति कपालमाली ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

पदर्थमसावुत्पन्नस्तत्कृत्यमाह तं किमिति हे रुद्र ! मद्भटानामग्रणीत्वे हेतुर्मे जटांशक इति अनेन जटाया आत्मत्वं सूचयति ॥ ४ ॥

'नमस्ते रुद्रमन्यव, इति श्रुतेर्मन्युना महादेवेन युयुत्सूनां योधानां वीरस्वभावं वक्ति मेन इति यद्वा सोऽन्यासाध्यकर्मसाधनार्थमुपदिष्टस्तदात्मानं स्वमसंगरंहसं काप्यसक्तवेगं महीयसां महनशक्तिमत्तराणां सहः सहनशक्तिस्तां सहिष्णुं सहनशीलं मेन इत्यन्वयः ॥ ५ ॥

यथाप्राथिक्रम एव लोकस्योद्वेगजनकः किमुत तद्युद्धिक्रम इति भावेन तथाप्रभावं वक्ति अन्वीयमान इति यथा सुष्ठु भैरवं भयं करं भवति तथा व्यनदत् जगदंतको जगन्मृत्युस्तस्याप्यंतकं संहर्तृघोषणं शब्दनशीलं भूषणं नूपुरलक्षणमंघ्रौ यस्य सतथा ॥ ६ ।

असौ वीरभद्रो यज्ञवाटनिकटमायात इति वार्ता पुरोगामिप्रमथसेनाधूलिरेव व्यनक्तीति भावेन ऋत्विगादीनां धूलिदर्शनेन जिज्ञासाप्रकारं वक्ति अथेति उदीच्यां ककुभि दिशि । ऋत्विजो यज्ञप्रवर्तकाः यजमानो यज्ञे दीक्षितः । सभास्थाने स्थित्वा मन्त्रतंत्रकर्म दुर्विदैवताप्रसंबंधं विवेचयंतः सदस्याः ॥ ७ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तदध्वरादित्विग्विद्राचित मिति चित्सुखः ॥ १—६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

पञ्चमे भूतवृत्तांतः कुप्यन् दक्षमघातयत् ।
उत्कृत्य स्वजटोत्थेन वीरभद्रेण धूर्जटिः ॥ १ ॥

प्रजापतेर्हेतोर्निधनं । कुतः तेनासत्कृतायाः तस्याध्वरे ये ऋभवो देवास्तैः ॥ १ ॥

सटा ज्वालाः रुद्रो घोरः सन् ॥ २ ॥

ततो जटायाः तन्वा दिवं स्पृशन् त्रयः सूर्या इव दृशो यस्य स अभवत् ॥ ३ ॥

हे रुद्र ! हे भट ! युद्धकुशल ! त्वं मे अंशक इति अतस्तेजो दुर्जयमिति मा मंस्था इति भावः ॥ ४ ॥

मन्युना रुद्रेण परिचक्रमे प्रदक्षिणी चकार । असंगं केनापि सह गन्तुमशक्यं यद्रंहो वेगस्तेन । यद्वा असङ्गस्यात्मारामस्य रुद्रस्य रंहसा महीयसां बलीयसामपि सहः सहिष्णुं बलं सोढुं क्षमं मेने ॥ ५ ॥

जगदन्तकस्याप्यन्तकतुल्यं । घोषणानि शब्दायमानानि भूषणानि ययोस्तावङ्घ्री यस्य सः ॥ ६ ॥

प्रथमं तम इति ततस्तम एतन्नभवति किन्तु रज इति ज्ञात्वाऽऽहुः रज एतत् कुतोऽभूदिति ॥ ७ ॥

———

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः ।

चतुर्थे शिवो वीरभद्रेण यज्ञमघातयदित्याह भवइति प्रजापतेरसत्कृतायाः भवान्या निधनम् तस्याऽध्वरे ये ऋभवस्तैः स्वपार्षदसैन्यं विद्रावितंच अवगम्य अपारंक्रोधमादधे कृतवान् ॥ १ ॥

तदासधूर्जटिः रुद्र सुष्ठुदष्ट ओष्ठपुटो येनसः क्रुद्धः सन् तडितां वह्नेश्चसटाज्वालास्तद्वदुग्र[illegible]रोचिर्यस्यास्तामुत्कृत्योत्पाट्योत्थाय गंभीर नादोहसन् । भुवि विससर्ज [illegible] कृतवान् ॥ २ ॥

वाता न वांति नहि संति दस्यवः प्राचीनबर्हिर्जीवति होग्रदंडः ।
गावो न कालंत इदं कुतो रजो लोकोऽधुनाकिंप्रलयायकल्पते ॥ ८ ॥
प्रसूतिमिश्राः स्त्रिय उद्विग्नचित्ता ऊचुर्विपाकोवृजिनस्यैव तस्य ।
यत्पश्यंतीनां दुहितॄणां प्रजेशः सुतां सतीमवदध्यावनागाम् ॥ ९ ॥
यस्त्वंतकाले व्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेन्द्रः ।
वितत्य नृत्यत्युदितास्त्रदोर्ध्वजा--नुच्चाट्टहासस्तनयित्नुभिन्नदिक् ॥ १० ॥
अमर्षयित्वातमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या ।
करालदंष्ट्राभिरुदस्तभागणं स्यात्स्वस्ति किं कोपयतो विधातुः ॥ ११ ॥
बह्वेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मुहुर्महात्मनः ।
उत्पेतुरुत्पाततमाः सहस्रशो भयावहा दिवि भूमौचपर्यक् ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

ततोऽनंतरः प्रतिकायां बृहच्छरीरो वीरभद्रोऽभूदितिशेषः तनुवेत्या धेम तन्वादिवंस्पृशन् मन्युर्मंदहृदयत्यर्थः घनइवरुक्कांतिर्यस्यत्रयः सूर्याइवदृशोयस्यकराला उग्रादंष्ट्रायस्यज्वलदग्निरिवमूर्द्धजाः के-शायस्यकपालानांमालाअस्यसंतीतिसतथाविविधान्युद्यतान्यायुधा-नियस्यसः ॥ ३ ॥

तंबद्धांजलिंकिंकरोमीतिगृणंतंभाषंतमभूतनाथआह हेरुद्र ! शत्रु-भयवर्धन!हेभद्र!युद्धकोविद! त्वंहितुःत्वंममअंशकः अतएवमेभटानाम अग्रणीः अतएवमखं दक्षं अहिविनाशय ॥ ४ ॥

एवं कुपितेनमन्युनारुद्रेणाज्ञप्तः सवीरभद्रः विभुंविपुलस्वभा-वंपरिचक्रमप्रदक्षिणीचकारतदाभीतअसंगेनप्रतिघातेन रंहसावेगेन आत्मानंमहीयसांमहदूबलवतामपिमहः सहिष्णुंसहसोबलस्यसहि-ष्णुं सोढुं क्षमंमेने ॥ ५ ॥

सभैरवंसुभयंकरंयथातथाऽयनदत् तदनंतरंजगदंतकोमृत्युरस्त-स्यापयंतकमिवशूलमुद्यम्यघोषणानिध्वनिर्वीतिभूषणानिनूपुरादीनि ययोस्तावंध्रीयस्यसः संप्राद्रवत् ॥ ६ ॥

अथानंतरम् उदीच्यांककुभिउत्तरस्यांदिशिरेणुंप्रसमीक्ष्यएतत् तमोभवतिकिम् रजइतिब्रुवाणाहुः एतद्रजः कुतोभूदितिवध्वः चिंतयामासुः ॥ ७ ॥

भाषाटीका

धीरुक्मिणीरमणो जयति ॥ मैत्रेयजी बोले । महादेवजी भी दक्षप्रजापति केअसत्कार से सतीजी के मरणको और उस यज्ञ के ऋभुदेवों से अपनी पार्षदों की सेना के भागने का नारद के मुखसे सुनकर बड़ा भारी क्रोध करते हुये ॥ १ ॥

और क्रोधके (धूर्जटि) घोर रुद्रने अपने दांतों से होठ काटकर बिजली और अग्निकी ज्वाला है मानो इस तरहकी अपनी जटा शिरसे उखाड कर एकाएकी उठकर बड़े गंभीर शब्दसे हसके २ इस जटाको धरती में पटकदी ॥ २ ॥

तबतो एक बड़ा भारी काले रंग का हजार भुजा वाला बड़ा ऊंचा अपने शरीर से आकाश को छूने वाला बड़ी विकराल डाढें सूर्य सदृश तीक्ष्ण तीन नेत्र अग्नि की ज्वाला सदृश शिरपर बाल मुंडोंकी माला पहिने नानातरह के आयुधों को लिये ऐसा एक वीरभद्रनामक गण पैदा होकर खड़ा होगया ॥ ३ ॥

भाषाटीका

वह हाथ जोड महादेवजी से बोला कि मैं क्याकरूं तब महादेव बोले कि हे रुद्र दक्षको मारकर दक्षके यज्ञको विध्वंस करो तुमहमारे गणों में अग्रगण्य हो क्योंकि हमारा अंश ही तुमहो ॥ ४ ॥

हे विदुर ! साक्षात् भगवान का क्रोध रूप ऐसे रुद्रकी आज्ञा पायकर उस गण ने महादेवजी की परिक्रमादी और उस समय पर आप अपने को बड़े २ बलवानों के बलको सहन करने वाला मानता हुआ ॥ ५ ॥

चलते समय पीछे बड़ा भयानक नाद करने वाले रुद्र के गण उन सब के अगाड़ी कालको भी भय करने वाला एक त्रिशूल लेकर पैरों में घड़ घड़ शब्द करने वाले नूपुर पहिनके शब्द करता हुआ दौड़ा ॥ ६ ॥

अब उहां यज्ञ में ऋत्विग लोग यजमान और सभावाले उत्तर दिशाकी तरफ से उड़ती हुई धूर को देख ब्राह्मण और ब्राह्मणों की स्त्रियां भी यों विचार करने लगे कि ये अंधकार है क्या, ये रज कहां से उडती आती है ॥ ७ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

हेत्वंतराभावेनोत्पातिकंकल्पयंति वाताइति दस्यूनामभावेहेतुः प्राचीनबर्हिस्तदानीतनोराजाजीवतीति नकाल्यंतेनशीघ्रंनीयंते ॥८॥

प्रसूतिर्दक्षपत्नीसाभिश्रामुख्याथासाम् विपाकः फलम् पश्यंतीनामितितस्यादुःखाभिव्यंहेतुः अवदध्याववज्ञातवान् अनागामनाग सम् ॥ ९ ॥

नचेदंमुनाऽवज्ञामात्रंकिंतुरुद्रावज्ञानंचातोनाऽस्यभद्रंभविष्यती-त्याहुः यस्त्विति अंतकाले व्युप्तविकीर्णोजटाकलापोयस्य स्वशूलस्यसूच्यामग्रेऽर्पिताःप्रोतादिग्गजेंद्रायेनउदितान्युद्गमितान्यस्त्राणियेस्तेदोषोबाहवएवध्वजास्तान्वितत्यहर्षेणनृत्यति उच्चोऽट्टहासः कठोरोहासएवस्तनयित्नुर्गर्जितंतेनभिन्नाविदीर्णादिशोयेनसः १०

अमर्षयित्वाऽसहनयुक्तंकृत्वा मन्युप्लुतंक्रोधव्याप्तम उदस्तावि क्षिप्ताभगणानक्षत्रसंघायेन पुनश्चतंकोपयतोविधातुरपिकिंस्वस्ति स्यात्अस्यात्मेव काऽन्यस्यकथा ॥ ११ ॥

उद्विग्नाप्रचलिताहग्यस्यतेनजनेनबहुयथाभवत्येवमुच्यमानेसत्युत्पाततमा महोत्पाताउत्थिताः पर्यक्समंततश्च कथंभूताः महात्मनोऽपिदक्षस्यभयावहाः ॥ १२ ॥

तावत्सरुद्रानुचरैर्मखो महान्नानायुधैर्वामनकैरुदायुधैः ।
पिंगैः पिशंगैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्यत ॥ १३ ॥
केचिद्बभंजुः प्राग्वंशं पत्नीशालां तथा परे ।
सदआग्नीध्रशालां च तद्विहारं महानसम् ॥ १४ ॥
रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन् ।
कुंडेष्वमूत्रयन्केचिद्बिभिदुर्वेदिमेखलाः ॥ १५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

नानाऽऽयुधानि येषां वामनकैर्ह्रस्वैः उद्यतायुधैः पिंगैः कपिलैः पिशंगैः पीतैः मकरस्येवोदरमाननं च येषां तैः परितो धावद्भिरवरुद्धः ॥ १३ ॥ यज्ञशालायाः पूर्वपश्चिमस्तम्भयोरुपरि पूर्वपश्चिमायतं विलम्बितं काष्ठं प्राग्वंशस्तम् यज्ञशालायाः पश्चिमतः पत्नीशालां यज्ञशालायाः पुरतः स्थितं सदोमंडपम् सदसः पुरो हविर्धानं तस्योत्तरत आग्नीध्रशालाम् तद्विहारं यजमानगृहम् महानसं पाकभोजनशालाम् ॥ १४ ॥

रुरुजुर्बभंजुः उत्तरवेद्या मेखलाः सीमासूत्राणि आज्ञागुरूणां हितविचारणीयं इति हेतोर्न तेदोषभागिन इति भावः ॥ १५ ॥

श्रीराधारमणदासगोस्वामिविरचिता
• दीपन्याख्या दीपिका टिप्पणी ॥

औत्पातिकत्वं उत्पातजन्यत्वं ॥ ८ ॥

एव अकस्मात् रज आगमनरूपः अवज्ञातवानिति यत् तस्य वृजिनस्येति योज्यम् ॥ ९ ॥

यस्त्विति युग्मकम् असहनयुक्तं कृत्वा इत्यसहनस्य कारणत्वं कोपस्य कार्यत्वमिति भेदः यः स्वत एव प्रलयं ईदृशः पुनश्च तं कोपयत इति योज्यम् ॥ १० ॥

प्रजापतित्वेन महात्मनः श्रेष्ठजीवस्यापि ॥ ११ ॥

आ सर्वत इति कल्पिता टीका पठित इत्यनेनैव तदर्थोपपत्तेः आ सम्यक् वेगेनेत्यर्थः ॥ १२ ॥

हविर्धानं होमद्रव्यस्थलमिति प्रकरणात्सन्निवेशार्थं रिक्तपूरणम् आग्नीध्रशालां होमकुण्डस्थलीम् ॥ १३ ॥

उत्तरे हविर्धानोत्तरदेशे या वेदी तस्याः सीमा सूत्राणि अवधिपरिधीः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

हेत्वंतरामंतरोत्पातिकं कलयंतस्त्वाहुः वाता इति वाताश्चंडवायवः नवांति न प्रसरंति दस्यवश्चोरादयः नसंति तत्र हेतुः हि यस्मात् उग्रदंडा दमनं प्रशासनं यस्य सः प्राचीनबर्हिः तदानींतनो राजा जीवति• तस्मिन् जीवति तदस्यवः हेत्वाकस्मिकत्वद्योतकं गावोऽलकाल्यंते न शीघ्रं नीयंते अत इदं रजः कुत उत्थितम् अधुना लोकः प्रलयायनाशाय कल्पते संभाव्यत इत्यर्थः ॥ ८ ॥

प्रसूतिर्दक्षस्य पत्नी तन्मिश्राः तत्सहिताः स्त्रियः उद्विग्नचित्ता उद्विग्नं भीतं चित्तं यासां ता ऊचुः तस्य दक्षस्य यद् वृजिनं यत्पापं तस्यैवायं विपाकः फलं यत् यस्मात् प्रजेशो दक्षः दुहितॄणां पश्यंतीनां सतीनाम् अनेन तस्याः दुःखाधिक्यं सूचितम् अनागसं निरपराधां सुतां सतीं भवानीमवदध्यौ अवज्ञातवान् ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

असह्यपराक्रमं रुद्रं कोपयतो दक्षस्याऽमंगलमवश्यं भावीत्याहुः द्वाभ्यां यस्त्विति यो रुद्रोंतकाले प्रलयकाले व्युप्ताविकीर्णाः जटाकलापो यस्य स्वशूलस्य सूच्यग्रेण अर्पिताः प्रोता दिग्गजेंद्रा यैस्तानि उद्धृतानि उत्थापितानि अस्त्राणि यैस्ते दोषः बाहव एव ध्वजास्तान् वितत्य प्रसार्य उच्चोऽट्टहासः स एव स्तनयित्नुर्गर्जितं तेन भिन्ना विदीर्णा दिशो येन सः हर्षेण नृत्यति ॥ १० ॥

तमेवं भूतमसह्यमप्रतिघातं तेजो यस्य तं रुद्रममर्षयित्वा असहनयुक्तं कृत्वा मन्युना क्रोधेन प्लुतं व्याप्तं अतएव दुर्निरीक्ष्यं द्रष्टुमशक्यं भ्रुकुट्या उग्रदंष्ट्राभिश्च उदस्त उत्क्षिप्तो भागणो नक्षत्रसंघो येन तं कोपयतो विधातुरपि किं स्वस्ति स्यात् विधातुरप्येवमन्यस्य का कथेत्यर्थः ॥ ११ ॥

उद्विग्ना प्रचलिता दृग्यस्य तेन जनेन बहुशएवाभवत्स्येवमुच्यमाने सति सहस्रशः उत्पाततमा महोत्पाता महात्मनः स्थिरचित्तस्यापि दक्षस्य भयावहा दिवि भूमौ च पर्यकपरितः उत्थिताः ॥ १२ ॥

तावत्तु आशु रुद्रानुचरैर्महान् मखो यागः हे विदुर ! अन्वरुध्यत प्रत्यवध्यत विनाशित इति यावत् रुद्रानुचरैः कथंभूतैः नाना विचित्राणि आयुधानि येषां तैः वामनकैः ह्रस्वैः उद्यतायुधैः पिशंगैः पीतैः मकरस्येवोदरमाननं च येषां तैः परितो धावद्भिः ॥ १३ ॥

मखानुरोधमेवप्रपंचयति केचिद्रुद्रपार्षदाः प्राचीनवंशं बभंजुः त्रुटितवंतः तथा केचिदपरे पत्नीशालां बभंजुरित्यनुषंगः प्राचीनं पूर्वपश्चिमस्तंभार्पितपूर्वपश्चिमायतं तिर्यक्काष्ठं प्राग्वंशः तथैके सदः यज्ञशालायाः पूर्वतः स्थितं मंडपं सदः सदसः पुरतो हविर्धानं तस्योत्तरत आग्नीध्रशालां तद्विहारं यजमानगृहं महानसं पाकभोजनशालाम् ॥ १४ ॥

रुरुजुः बभंजुः अमूत्रयन् मूत्रं कृतवंतः तथोत्तरवेद्या मेखला सीमासूत्राणि बिभिदुः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

न केवलं दध्युरभिदध्युश्चेत्याह वाता इति चोराणामभावे निमित्तमाह प्राचीनबर्हिरिति उग्रो दंडो यस्य । उग्रेषु दंडो यस्येति वा स उग्रदंडः प्राचीनबर्हिर्नाम तत्कालभवो राजा । जीवति सप्राणो वर्तत इत्यन्वयः हेत्यनेन तज्जीवनं सर्वेषां सिद्धमिति व्यनक्ति ॥ ८ ॥

तत्र केचिद्दक्षभयात्कारणं जानंतोपि तूष्णीमासंस्तद्व्यहीनाः प्रसूतिमुख्याः कारणमूचुश्चेत्याह प्रसूतिमिश्रा इति मिश्रशब्दो मुख्यार्थे वर्तते प्रजेशो दक्षो दुहितॄणां प्रपश्यंतीनां सतीनामनागसमनपराधां नाम्ना सतीं सुतामवदध्यौ अवज्ञातवानिति यद्यस्मात्तस्माद्वृजिनस्य पापस्य विपाकः फलमेवेत्यन्वयः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

सत्यवज्ञानोत्पन्नपरमेश्वरकोपादियमनर्थयोनिर्मा भूतिरिति भावेन सदाशिवमाहात्म्यं वदन्तीत्याह यास्त्वेति ध्युमजटाकलापः प्रसारितजटासमूहः वितत्य विस्तृत्यपाहुनिति शेषः उदितान्यस्त्राणि धनुरादीनि येषु ते उदितास्त्रा दोषो भुजा एव ध्वजा दोर्ध्वजा यस्य स तथोक्तः रुद्राट्टहासः कठोरसिंहनादः स एव स्तनयित्नुः प्रलयकालीनमेघनादस्तेन भिन्ना विद्राविता दिशो यस्य स तथोक्तः भिन्नदिग्गजेति पाठे स्तनयित्नुवन्मेघवद्भिन्ना त्यक्ता दग्गजा सतथेत्यर्थः ॥ १०॥

अनेन प्रकृते किं तत्राह अमर्षयित्वेति एवं विधं तं शिवममर्षयित्वा। विधातु र्दक्षस्य स्वस्ति स्यात्किं। न स्यादेवेत्यन्वयः दंष्ट्राप्रभाभिरुदस्तो निरस्तो भागणो नक्षत्रगणो यस्य स तथोक्तस्तम् ११

न केवलं तर्कतो दक्षस्यैश्वर्यदोषं ज्ञायते किंतु दुर्निमित्तैरपीत्याह बह्वेवमिति किं बहुना पर्यक् सर्वतो दिक्षु ॥ १२ ॥

उत्पातानां क्षिप्रं प्रत्यक्षफलमभूदित्याह तावदिति यावदुत्पाता उत्पन्नास्तावदन्वरुध्यत इत्यन्वयः नानाविधत्वमेव स्पष्टी क्रियते वामनकैरित्यादिनानावरकालक्षेपमंतरेणसमहान्मखोरुद्रानुचरैर्वामनकैहूस्वैर्ह्रस्वशिरोभिश्च पिंगैः कपिलैः पिशंगैर्हरिद्रावर्णैर्मकरवद्दुदरमाननंच येषां ते तथोक्तास्तैः पर्यास्त्रुद्धिरितस्ततः उत्पतद्भिः ॥१३॥

तत्र तत्र स्वस्वानुकूलं रोधं चक्रुरित्युक्तं विशिनष्टि केचिदिति प्राग्वंशमग्निहोत्रस्थानं। यज्ञशालायाः पूर्वपश्चिमस्तंभयोरुपर्यर्पितवंशावलंबनं पूर्वपश्चिमायतं दारु वा प्राग्वंशस्तं यज्ञशालायाः पश्चिमतः पत्नीशाला। यज्ञशालायाः पुरतो मंडपः सदः। मंडपतः पुरतो हविर्धानं। तस्योत्तरतः शालाग्नीध्रशाला। पशुविशसनस्थानं। तस्याग्नीध्रस्याग्निस्थानं विहारः। महानसः पचनस्थानम् ॥ १४ ॥

रुरुजुः रुजोभंग इति धातुः वेदिमेखला उत्तरवेदिसीमा सूत्राणि ॥ १५ ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

यस्त्वन्तकाल इति युग्मकम् ॥ १० ॥

अमर्षोऽसहनं कोपस्तु तत्कार्यभूतः ॥ ११—१८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

पुनरपि विविधं संशेरते वाता इति। प्राचीनवर्हि स्तदानीन्तनो राजा ह स्फुटम् ॥ ८ ॥

प्रसूति र्दक्षपत्नी सा मिश्रा मुख्या यासां ता स्तस्य वृजिनस्यापराधस्य एव विपाकः फलं। पश्यन्तीनामपि तस्या दुःखाधिक्यं हेतुः। अवदध्यौ अवज्ञातवान् अनागां निरपराधां ॥ ९ ॥

नाचास्य प्रजापतेस्तेजस्वित्वं श्रीरुद्रे प्रभवतीत्याहुः यस्त्विति द्वाभ्यां। ध्युतजटाकलापः विकीर्णजटापुञ्जः। उदितान्युद्यमितानि अस्त्राणि येषु ते दोषो बाहव एव ध्वजा स्तान् वितत्य नृत्यति। स्तनयित्नुर्गर्जितं तेन भिन्ना विदीर्णा दिशो येन तम् ॥ १० ॥

अमर्षयित्वा कोपयित्वा उदस्त उत्क्षिप्तो भागणो वह्निसूर्यादीनामपि ज्योतिर्गणो येन तं। पुनरपि प्रयत्नयत्नमानेन कोपयतो विधातुः प्रजापतेः पितु र्ब्रह्मणोऽपि किं स्वस्ति स्यात् काम्यस्य क-

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

र्येति दक्षस्य दौरात्म्येन सर्व एव महाविपदि निमंक्ष्याम इति भावः ॥ ११ ॥

हे मातरः! सत्यमेव मूर्धन्त्येवं अनेन तत्रत्यलोकसमूहेनाभिन्द्युऽ उच्यमाने महात्मनोऽपि दक्षस्य। यद्वा विपरीतलक्षणया दुरात्मन इत्यर्थः ॥ १२ ॥

वामनकैर्ह्रस्वदेहैः अन्वरुध्यत आव्रियत ॥ १३ ॥

यज्ञशालायाः पूर्वपश्चिमस्तम्भयोरर्पितं पूर्वपश्चिमायतं काष्ठं प्राग्वंशः। यज्ञशालायाः पश्चिमतः पत्नीशाला। यज्ञशालायाः पुरतः सदोमण्डपः सदसः पुरतो हविर्धानं तस्योत्तरत आग्नीध्रशाला तन्निहारो यजमानगृहं महानसं पाकभोजनशाला ॥ १४ ॥

रुरुजुर्बभंजुः ॥ १५ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

तच्चिन्तामेवाह वाता इति दस्यवोनसंतियतउग्रदंडः प्राचीनवर्हिर्नृपोर्जीवतिगावोनकाल्येतेनशीघ्रं चाल्यंतेरजोहेतुमनुपलभ्यहेतुकल्पयंतिलोकोऽधुनाकिंप्रलयायकल्पतेइति ॥ ८ ॥

प्रसूतिमिश्राः सतीमातृसहिताः तस्यप्रजापतिकर्तृकस्यवृजिनस्यपापस्यएवविपाकः फलम् यत्यस्मात्प्रजेशः दुहितृणांपश्यंतीनाम् अनागांनिष्पापाम् म् यदध्यौअवज्ञातवान् ॥ ९ ॥

योरुद्रः उग्रः उदारः अट्टः कठोरश्चयोहासः सएवस्तनयित्नुर्गर्जितंतेनविदीर्णाःदिशोयेनअंतकालेप्रलयावसरे ध्युतोविकीर्णोजटाकलापोयस्य शूलस्यसूच्यामग्रभागे अर्पिताप्रोताविग्गजेंद्रायेनउदितानिउत्क्षिप्तानि अस्त्राणियेषुतेदोषः बाहवएवध्वजाः केतवस्तान् वितत्यनृत्यति ॥ १० ॥

असहांदुः सहंतेजोयस्यतंमन्युनाक्रोधेनप्लुतं भ्रुकुट्याभ्रूविषहंद्रष्टुमशक्यंकरालाभिर्दंष्ट्राभिः उदस्तोविक्षिप्तोभागणोनक्षत्रसमूहोयेनैवंभूततममर्षयित्वाप्रातिकूल्यंनीत्वाकोपयतोविधातुरपिकिंस्वस्ति कुशलंस्यात् ॥ ११ ॥

उद्विग्नाभयव्याप्तास्तस्यतेनजनेन एवंबहुरुच्यमानेसति दस्युस्वदिविभुविपर्यक् सर्वतोदिक्षुसहस्रशोभयावहाः उत्पाततमाः अत्युत्पाताः उत्पेतुः ॥ १२ ॥

वामनकैर्ह्रस्वैः पिंगैः कपिलैः पिशंगैः पीतैः मकरवदुदरमाननंचयेषांतैः अन्वरुद्धः व्याप्तोऽभूदित्यर्थः ॥ १३ ॥

प्राग्वंशंयज्ञशालागतपूर्वपश्चिमस्तंभोपरिनिहितंकाष्ठम् सदः सभाम् विहारंयजमानगृहम् ॥ १४ ॥

रुरुजुः बभंजुः अमूत्रयन् मूत्रंकृतवंतः ॥ १५ ॥

———

भाषाटीका।

देखो कुछ पवन भी नहीं चलता है न कोई चोरों का उपद्रव है क्योंकि भारी दंड देने वाले प्राचीन बर्हिका राज्य है गायों को भी कोई नहीं दौड़ाता है फिर ये इतनी भारी धूर कहां से आई क्या लोक का प्रलय होना है इस समय ॥ ८ ॥

उद्विग्न चित्तवाली प्रसूति प्रभृति स्त्रियां कहने लगी कि यह उस पाप का फल है जोकि प्रजापति ने और लड़कियों के देखते २ निरपराधनी विचारी सती का तिरस्कारकिया ॥ ९ ॥

अबाधंत मुनीनन्यएके पत्नीरतर्जयन् ।
अपरे जगृहुर्देवान्प्रत्यासन्नान्पलायितान् ॥ १६ ॥
भृगुं बबंध मणिमान्वीरभद्रः प्रजापतिम् ।
चंडीशः पूषणं देवं भगं नंदीश्वरोऽग्रहीत् ॥ १७ ॥
सर्वएवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः ।
तैरर्द्यमानाःसुभृशंग्रावभिर्नैकधाऽद्रवन् ॥ १८ ॥
जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान्भवः ।
भृगोर्लुलुंचे सदसि योऽहसत् श्मश्रुदर्शयन् ॥ १९ ॥
भगस्य नेत्रेभगवान्पातितस्य रुषाभुवि ।
उज्जहार सदःस्थोऽक्ष्णायः शपंतमसूसुचत् ॥ २० ॥
पूष्णश्चापातयद्दंतान्कालिंगस्य यथा बलः ।
शप्यमाने गरिमणियोऽहसद्दर्शयन्दतः ॥ २१ ॥
आक्रम्योरसि दक्षस्य शितधारेण हेतिना ।
छिंदन्नपितदुद्धर्तुं नाशक्नोत्त्र्यंबकस्तदा ॥ २२ ॥
शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः ।
विस्मयं परमापन्नोदध्यौपशुपतिश्चिरम् ॥ २३ ॥
दृष्ट्वासंज्ञपनं योगं पशूनां सपतिर्मखे ।
यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥ २४ ॥

भाषाटीका ।

जोकि प्रलय काल में जटाओं को खोलकर त्रिशूल में दिग्गजों को नाथ के शस्त्रवाली भुजा रूप ध्वजाओं को ऊपर फैलाकर नृत्य करते हैं जिनके नृत्य समय के ऊंचे अट्टहास की गर्जना से दिशायें विदीर्ण होजाती हैं ॥ १० ॥

जिस्की भृकुटि न सहन हो जिसकी कराल डाढों के मारे तारागणों की कांति फीकी पड जाय क्रोध से व्याप्त ऐसे असह तेज वाले को क्रोध करान वाले क्या विधाता का भी कुशल हो सक्ता है ॥ ११ ॥

सब लोग आपुस मे ऐसे बात करते रहे इतने में महात्मा दक्ष को पृथिवी आकाश और चारों तरफ बहुत से भयंकर उत्पात होने लगे ॥ १२ ॥

हे विदुरजी ! इतनें मे रुद्रके गणोंने उस यज्ञस्थानको चारो तरफ से घेर लिया वे रुद्र के गण कैसे हैं कि देखने में छोटे२ और नाना प्रकार के आयुधों को लिये पीले और कपिल रंग वाले, घड़ियाल याने मगर मुख और पेट जिनका और चारो ओर से दौड़ते हुवे आ रहे हैं ॥ १३ ॥

तब किसीन तो यज्ञशाला के मंडप का आधार जो बांस था उसे तोड़ दिया ऐसे ही किसीने पत्नीशाला कितनोंई ने सभामंडप कितनोंईने अग्निध्रशाला औरन ने यजमान का निवास घर अन्य लोगोंने रसोईघर विध्वंस कर डाला ॥ १४ ॥

कितनेही गणों ने यज्ञ के पात्र फोड़ डाले कोई अग्नि बुझाने लगे कोई वेदी के कुंडोंमे मूत्रकरने लगे किसी ने वेदी की मेड़ तोड़दी १५

श्रीधरस्वामिकृत भावार्थदीपिका ॥

प्रत्यासन्नान्पलायितान्समीपस्थान्पलायितानपिजगृहुः ॥ १६ ॥

॥ १७ ॥

ग्रावभिरर्द्यमानाः नैकधानेकधाद्रुद्रुवुः ॥ १८ ॥

स्रुवोहस्तेयस्य भवोवीरभद्रः लुलुंचेउत्पाटितवान् ॥ १९ ॥

उज्जहारोद्धृतवान् यः सदस्थः सभायांस्थितः सन्शपंतंशिवनिंदांकुर्वंतंदक्षमक्ष्णाऽक्षिनिकोचनाग्रसुचत्प्रेरितवान् ॥ २० ॥

कालिंगदेशराजस्यानिरुद्धोद्वाहेयलभद्रोयथाद्यूतेदंतान्पातितवान् गरिमणिगुरुतरेरुद्रेनिंद्यमानेदंतान्दर्शयन्योजहास पूष्णोरितिपाठेद्विवचनमेंद्रापौष्णाश्चरुरभंवतीत्यन्यसहितस्यापिपूष्णोदंतपातप्राप्त्यर्थं सूचितवान् तथाहि पूषाप्रपिष्टभागोऽदंतकोहितदेवाप्रु‍षभिरितिविहितस्यपेषणस्यादिदेवत्याभावात्तत्रतस्यदंताः संतीति चक्रवंस्याचैतसंगच्छतइत्याशंक्यतत्रापितस्यदंतपातोऽवस्थामेदप्रवृत्तिनातद्वचनेनतक्षाव्यतेअतएवपूष्णोऽनुग्रहंदेधाभवष्यति पूषातुयजमानस्यदद्भिर्जक्षितुपिष्टभुगिति केवलश्चेतापिष्टभुग्भविष्यति अन्यसहितश्चयजमानस्यदद्भिर्भक्षयिष्यतीत्यर्थः ॥ २१ ॥

छिंदन्नपीत्यत्राशिरस्युपरिव्यक्तीभविष्यति त्र्यंबकोवीरभद्रः २२

अस्त्रान्वितैर्मंत्रसहितैः अनिर्भिन्नात्वग्यस्यतथाभूतंदृष्ट्वेतिशेषः २३

सपशूनांपतिर्मखेसंज्ञपनंयोगंकंठनिष्पीडनादिरूपंमारणोपायंदृष्ट्वातेनोपायेनाहरत् ॥ २४ ॥

साधुवादस्तदातेषां कर्म तत्तस्य शंसताम् ।
भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥ २५ ॥
जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः ।
तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयम् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे
पारमहंस्यां संहितायां वैयासिक्यां दक्षयज्ञविध्वंसोनाम
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

अन्येषांग्रामणादीनांतद्विपर्ययोऽसाधुवादः अभूदितिशेषः २५॥
गुह्यकालयंकैलासम् ॥ २६ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृत भावार्थदीपिकायां
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी

ग्रावभिः प्रस्तरैः ॥ १८ ॥ १९ ॥ २० ॥

तत्सहितस्यापि इन्द्रसाहित्यावस्थावतोपि पूष्णः दंतपातप्रासंगर्थं अवस्थानिमित्तं भेदमाश्रित्य मैत्रेयः छिन्नत्वं सूचितवान् तथा हि अवस्थात्रयेपि दंतपातं दर्शयति पूषेति प्रपिष्टेन चरुणा भागोयागो यस्य तथाभूतः पूषा प्रपिष्टचरुणा पूषाणं यजेतेत्यर्थः तत्र इंद्रसहितावस्थायां तस्य पूष्णः पतत् अवस्थाभेदेन दंतानां सत्त्वमसत्त्वं च परस्परविरोधान्न संगच्छते इत्याशंक्य विचार्य्य चरोर्द्विदैवत्यात तत्रापि इंद्रसहितावस्थायामपि तस्य पूष्णः अवस्थाभेदं इंद्रसाहित्यावस्थायां केवलावस्थायां च अत एवावस्थाद्वयेपि दंतपातनिर्णयादेव अन्येनेन्द्रेण सहितः प्रपिष्टभाग इति इदं पेषणं न यज्ञाङ्गं प्रकरणाभावात् वाक्ये पूषमात्रश्रवणाच्च किन्तु पूषस्वरूपप्रयुक्तं स च पूषाद्विदैवत्येपि चरौ विद्यते इति इंद्रसाहित्येपि चरौ पेषणं स्यात् इति प्राप्ते तृतीयाध्याये तृतीयपादे सूत्रं यथाएकास्मिन्नेकसंयोगादिति एकस्मिन् श्रूयमाणं प्रपिष्टभाग एकस्यैव पूष्णः संयोगाद्द्विदैवत्ये चरौ न पेषणमित्यर्थः तदुक्तं भट्टैः॥देवतानिष्फलानैव पेषणस्य प्रयोजिका उपादानश्च यागस्य भागशब्देन विद्यते मुख्यार्थोऽसंभवात्त्यागलिलक्ष्यपिपात्र हि श्रूयते भागशब्दोयं नानुपादानमस्यत ॥ इति ननु स च भागशब्दलक्ष्यो यागो द्विदैवत्यः ऐन्द्रापौष्णश्चरुर्भवतीति यागांगद्रव्ये चरौ द्वयोः प्राप्तत्वेनैकेन पूष्णाऽपदेष्टुमशक्यत्वात्सत्यं यद्यपि भागशब्दलक्ष्यस्य यागस्यापि तदङ्गचरौ द्विदैवत्यश्रुतिसामर्थ्यात् द्विदैवत्यं तथापि पूषाप्रपिष्ट भाग इत्यत्र पूर्णाः...स्यान्यस्याभावादेकदैवत्ये प्रविष्टचरौ पेषणं न द्विदैवत्ये चरौ इति इंद्रसाहित्येपि दंताभावात्पूष्णा न भोक्तुं चरुः शक्यः अतएवानुग्रहे सति यजमानस्य दर्वीभक्षणं व्याख्यानमितिनिष्कर्षः ॥ २१ ॥

उपरि व्यक्तौ सविपर्यास्येत्यतस्तच्छब्देन शिरः परामृश्यते २२

पशुपतिस्तत्र मख इत्यादि शब्दास्तदंशवीरभद्रे गौणाः ॥ २३ ॥

संज्ञपनशब्दः यज्ञीयपशुहिंसाप्रकारपरः । २४ ।

तच्छिरो हरणालक्षणा प्रशंसतां अभूदिति साध्यक्रियाऽध्याहारः ॥ २५ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

परस्वहस्तरूपम ॥ २६ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
दीपिन्याख्यायां दीपिका टिप्पण्याम
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

अतर्जयन् अभर्त्सयन् अपरेपलायिता न्पुनरनुधावनेन प्रत्यासन्नान्देवान जगृहुर्गृहीतवंतः ॥१६॥ मणिमान् रुद्रानुचराग्र्यः भृगुंबबन्ध वीरभद्रः प्रजापतिं दक्ष चंडीशः पूषणाख्यं देवं भगाख्यं नंदीश्वरः अगृहात ॥ १७ ॥

सर्वेर्दिवौकोभिः देवैः सहिताः सदस्याः सभ्याः ऋत्विजः रुद्रानुचरैर्बध्यमानान भृग्वादीन् दृष्ट्वाभृशं ग्रावभिःशिलाभिर्हन्यमाना अनेकधाताड्य माना दुद्रुवुः ॥ १८ ॥

स्रुवंहोमसाधनं हस्तेयस्य तस्यजुह्वत. होमंकुर्वतो भृगोः श्मश्रूणिभगवान् भवो वीरभद्रः लुलुंचे उत्पाटितवान् किं विशेषेण श्मश्रुणयेवोत्पाटितवान् तत्राह यो भृगुः श्मश्रुदर्शयन्महसत् रुद्रंपरिहसितवान् अतः श्मश्रुणयेवलुंलुंचइत्यर्थः एवमुत्तरत्रापि ॥ १९ ॥

भगवान् वीरभद्रः रुषाक्रोधेन भूमौपातितस्य भगस्यनेत्रे उज्जहार उद्धृतवान् योभगः सदसि सभायां स्थितःसन् शपंतं शिवनिंदां कुर्वंतं दक्षमक्ष्णानेत्रेणाऽसूसुचत् सूचितवान् प्रेरितवानित्यर्थः॥२०॥

कालिंगस्य कलिंगदेशराजस्यबलः बलभद्रः यथा तथाः पूष्णः दंतान् अपातयत् पातितवान् यःपूषागरिमणि गुरुतरेरुद्रेशप्यमाने सति दतःदंतान् दर्शयन् अहसत् पूष्णोदितिद्विवचनपाठेतु तदिंद्रापौष्णश्चरुर्भवतीत्यत्रान्यसहितस्यापि पौष्णोदंतपातनप्राप्त्यर्थम२१॥

त्र्यंबको वीरभद्रः दक्षस्योरसि । आक्रम्यपादं सितधारेण निशितधारेण हेतिना खड्गेन छिंदन्नपि तदा तच्छिरः इत्यपकृष्यतं उद्धर्तुंतदानाशक्नोत् असमर्थोऽभवत् ॥ २२ ॥

अस्त्रान्वितैर्मंत्रसहितैः शस्त्रैर्निर्भिन्नात्वग्यस्य तथाभूतमेनं दक्षंदृष्ट्वातिशयः पशुपतिर्हरो वीरभद्रः परंविस्मयमापन्नः प्राप्तः चिरंदध्यौ शिरस उद्धरणोपायंचिंतितवान् ॥ २३ ॥

पशूनांपतिः सवीरभद्रः मखे अध्वरेसंज्ञपनं मारणं योगमुपायं दृष्ट्वा यागीयपशुवदयं हन्तव्य इति दृष्ट्वा निश्चित्यतस्ययजमानो दक्षः स एव पशुस्तस्य यद्वा यजमानस्ययः पशुः दयतोदेवान यज्ञमानेनत्यक्ष्यमाणः पशुस्तस्य संज्ञपनं मारणं योगमुपायं निश्चित्यतेनैवयोगेनतस्य दक्षस्यकायाच्छिरः आहरत् उद्धृतवान् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

तच्छिरश्छेदनरूपं कर्म शंसतांस्तुवतां भूतादीनां साधुवादः(१) अभवत् अन्येषांब्राह्मणादीनांतद्विपर्ययःअसाधुवादः(२)अभवदित्यर्थः ॥ २५ ॥

एतस्य दक्षस्याशिरः तस्मिन् तदध्वरसंबंधिनिदक्षिणाग्नौ अमर्षितः क्रुद्धः जुहावतस्य दक्षस्य देवयजनमेवं दग्ध्वानाशयित्वा गुह्यकालयं कैलासं प्रातिष्ठत प्रययौ ॥ २६ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृत भागवत चंद्रचंद्रिकायां
पंचमोऽध्यायः ॥ ५ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

मणिमान कश्चिद्गणनाथः प्रजापतिं दक्षं । चंडीशश्चंडेश्वरः ॥ १७ ॥

सर्वेष्वेवमेव निगृहीताः किं नेत्याह सर्व एवेति ॥ १८ ॥

भवो वीरभद्रः लुलुंचे उत्पाटयामास ॥ लुञ्च छेदन इति धातुः अनेन कोऽपराधः कृत इति तत्राह सदसीति विश्वसृजां सदसि ॥ १९ ॥

भव वीरभद्रः स्वापराधानुकूलं दंडं करोति सर्वेषामित्याह भगस्येति ॥ २० ॥

कश्चिगस्य दंतवक्रस्य द्यूते बलो बलभद्रः भृगुणा । गरिम्णिा ज्ञानोपदेष्टृत्वेन गुरुतमे शिवे शप्यमाने सति यः पूषा दतः दंतान् दर्शयन्नहसत्तस्य ॥ २१ ॥

वीरभद्रो दक्षं बद्ध्वा किमकरोदिति तत्राह आक्रम्येति शितधारेण तीक्ष्णाग्रेण श्रीणि भंयकानि नेत्राणि यस्य ॥ २२ ॥ २३ ॥

शीनफलमाह दृष्ट्वेति मखे पशूनां संज्ञपने हिंसने योगं मंत्रपूर्वकोपायं यजमान एव पशुस्तस्य तेन योगेन ॥ २४ ॥

अयं हि विक्रम उभयेषामुभयथातः करणाद्युक्तिमकार्षीदित्याह साधुवाद इति अन्येषां दक्षपक्षिणाम ॥ २५ ॥

मंत्रादिशक्त्येतच्छिरः संधानमपि नकार्यमिति भावेन शिरश्छेदोत्तरक्रियां वक्ति जुहावेति ततः परं किमकार्षीति तत्राह तद्देवयजनमिति देवयजनं यज्ञं दग्ध्वा विनाश्य गुह्यकालयं कैलासं प्रातिष्ठत्प्रायादिति अत्र त्र्यंबको हरः पशुपतिरिति विशेषनामनिर्देशाद्विवचनतात्पर्यमस्तीति ध्वनयति ॥ पूर्वं वीरभद्रेण स्वेन रूपेण गत्वा यज्ञशालादिकं भंक्त्वा पश्चान्मूलरूपेण गत्वा दक्षमवधीत् तत्राप्युपेंद्रेण हरिणा धर्मपुत्रेण हरिणा च जितः शिवोऽन्यांस्तत्र स्थितान् जित्वा कैलासमगमदिति तदुक्तं वीरभद्राख्यरूपेण स्वेन पूर्वं ययौ हरः मूलरूपेण पश्चात्तु गत्वादक्षमथावधीत् तत्रोपेंद्रेण हरिणा जितो धर्मात्मजेन च अन्यान् जिगाय प्रययौ कैलासं स्वं निकेतनमिति ॥ २६ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृत पदरत्नावलियाम
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

पूष्णोरिति पाठे टीकायां तत्सहितस्यापीति । इन्द्रसहितो यः पूषा तस्यापि दन्तपातमकरोदिति प्राप्त्यर्थमित्यर्थः । तत्र तस्य दन्तीति तद्रहितस्येति वक्तव्यं स्यात् । इतीति किं, तत्राह दन्ती सन् पूषा दन्तवानित्यर्थः । तस्य दन्ताः सन्तीति वा पाठः माशंक्य विचार्य । तत्रापि इन्द्रसहितस्येति । पूष्ण इत्यादि पूर्वार्द्धे । शप्यमान इत्यादि परार्द्धे अनयोः पूर्वार्द्धयोर्विपर्ययेण पाठस्तु न स्वामिचित्सुखयोः सम्मतः ॥ २१—२६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भे
पञ्चमोऽध्यायः ॥ ५ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

तिष्ठत भवतीः सम्प्रति विधवाः कुर्महे इति मश्रीलवलनैर्धा पत्नीरभञ्जयत् ॥ १६ ॥ १७

आर्यमिर्यमानाः नैकधा दुद्रुवुः ॥ १८ ॥

भवो वीरभद्रः । लुलुञ्चे उत्पाटयामास ॥ १९ ॥

शपन्तं दक्षं अक्षिनिकोचेन अमूमुचत प्रेरितवान् ॥ २० ॥

कालिङ्गदेशराजस्याभिमुखोऽसौ बलभद्रो यथा दन्तान् द्यूते पातितवान् गरिम्णेति गरिमवतीति श्रेष्ठे । दतो दन्तान पूष्णोरिति पाठे द्विवचनमिन्द्रापेक्षया तस्यैवतीयन्द्रसहितस्यान्यस्यापि पूष्णो दन्तपातनं प्राप्त्यर्थं ज्ञेयम् ॥ २१ ॥

हेतिना खड्गेन तन्मस्तकं त्र्यम्बको वीरभद्रः ॥ २२ ॥

शस्त्रैः खड्गादिभिः अस्त्रान्वितैः शर त्रिशूलाद् सहितैरच्छिन्नत्वचं दृष्ट्वा शेषः ॥ २३ ॥

संज्ञपने योगं कण्ठनिष्पीडनेन घोटनं । तेनोपायेनाहरत् ॥ २४ ॥

अन्येषां विप्रादीनां तद्विपर्ययोऽसाधुवादः ॥ २५ ॥

गुह्यकालयं कैलासम् ॥ २६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थे पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अतर्जयन् अभर्त्सयन् प्रयासमध्यान् योद्धुमागतान् ॥ १६—१७

नैकधा आद्रवन् अनेकधा दुद्रुवुः ॥ १८ ॥

भगवान्वीरभद्रः भृगोर्मस्तकस्यतस्यश्मश्रूणि लुलुञ्चेउत्पाटितवान् ॥ १९ ॥

शपंतंशापदातुंप्रवृत्तंदक्षम अक्ष्णाऽमूमुचत् अक्षिसंकोचनप्रेरितवान् ॥ २० ॥

गरिम्णागुरुतरे ॥ २१ ॥

त्र्यम्बकोवीरभद्रः ॥ २२ ॥

अस्त्रान्वितैः मंत्रान्वितैः नानिर्भिन्नात्वग्यस्यतंतथाभूतंशाम्येति-शेषः चिरंदध्यौचिंतांकृतवान् ॥ २३ ॥

(१) जयजयेत्यादिशब्दः (२) हाहन्ते त्यादिशब्दः ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

मन्त्रसंज्ञपनयोगकंठनिष्पीडनादिमारणोपायंदृष्ट्वातेनोपायेनयजमानरूपस्यपशोः शिरः आहरत् उद्धृतवान् ॥ २४ ॥

अन्येषांदक्षपक्षीयानांविपर्ययः हाहेत्यादिविषादोऽभूदितिशेषः२५ ॥

एतच्छिरः एतस्यदक्षस्यशिरः गुह्यकालयंकैलासम् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धीये

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपे

पञ्चमोऽध्यायार्थप्रकाशः ॥

भाषाटीका

कोई मुनि लोगों को बाधा करने लगे कोई स्त्रियों को डराने लगे कितने एक भागते हुवे देवतावों को पकड़ने लगे ॥ १६ ॥

भृगु को मणिमान ने बांध लिया दक्ष प्रजापति को वीरभद्र- ने एसेही पूषा का चंडीशने भग नामकदेव को नंदीश्वर ने पकड़ा ॥ १७ ॥

सब ऋत्विज लोग और सभा के लोग और देवता लोग भी मारे पत्थरों की वर्षा के मारे इस दुर्दशा को देख अपने२ प्राण लेकर अनेक तरह से भागे ॥ १८ ॥

जोकि स्रुवा को हाथ मे लेकर होम करते थे उन भृगु को वीरभद्र ने पकड़ कर भृगु की डाढ़ी नोच डाली ॥ १९ ॥

जिसने सभामें भृगुको शाप देते समय आंखसे सूचना करी थी वीरभद्र ने उस भग को मारे क्रोध के धरती में पटक कर दोनों नेत्र उखाड़ लिये ॥ २० ॥

भाषाटीका ।

दक्षको श्रीरुद्रकी निन्दा करते समय जो दांत दिखाकर हंसा था वीरभद्र ने उस पूषाके दांत गिरा दिये जैसे श्रीनरुद्रके विवाह में जुआ के प्रसंग में कलिंग देश के राजा दंतवक्र के दांत श्रीबल देवजी ने तोड़ दिये थे ॥ २१ ॥

दक्ष के छाती पै चढ़कर बड़े तीक्ष्णधार के चक्र से दक्ष का शिर काटने को बहुत उपाय किया तब भी नहीं कटा । तब (अस्त्र अर्थात्) मंत्र सहित शास्त्रों को गले पर चलाया तब भी दक्षके गले की ऊपर की त्वचा भी नहीं कटी तब वीरभद्र बड़े विस्मय में होकर विचार करने लगे । इतनेमें वहीं पर यज्ञमें जहां पशुका (संज्ञपन)अर्थात् आलंभनयाने बलिदान किया जाता है उसी पशु मारने के उपाय को देखकर (यजमान पशु) दक्ष का शिर उसी प्रकार काटकर दूर किया ॥ २२—२४ ॥

उस समय वीरभद्र के उस कर्म को देखकर प्रसन्न होकर बड़ाई करने वाले भूत प्रेत पिशाचों का जै जै कार और दक्ष केपक्ष वालों का पश्चात्ताप हाहाकार का शब्द होता भया ॥ २५ ॥

वीर भद्रने तो दक्ष का शिर मारे क्रोध के कुंड में दक्षिणाऽग्निमें होम कर दिया इस प्रकार उस यज्ञ को जलाकर विध्वंस कर के कैलास का प्रस्थान किया ॥ २६ ॥

इतिश्री मद्भागवत महापुराण चतुर्थस्कंध में पंचमो अध्याय की भाषाटीका समाप्त हुई ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे

पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ।

—:*:—

मैत्रेय उवाच ॥

अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः ।
शूलपट्टिश निस्त्रिंशगदापरिघ मुद्गरैः ॥ १ ॥
संछिन्नभिन्नसर्वांगाः सर्त्विक्सभ्या (५) भयाकुलाः ।
स्वयंभुवे नमस्कृत्य कार्त्स्न्येनैतन्न्यवेदयन् ॥ २ ॥
उपलभ्य पुरैवैतद्भगवानब्जसंभवः ।
नारायणश्च विश्वात्मा नकस्याध्वरमीयतुः ॥ ३ ॥
तदाकर्ण्य विभुः प्राह तेजीयसि (१)(६) कृतागसि ।
क्षेमाय तत्र साभूयान्न प्रायेण बुभूषताम् ॥ ४ ॥
अथापि यूयं कृतकिल्बिषा (२) भवे य बर्हिषोभागभाजं परादुः ।
प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीतांघ्रिपद्मम् ॥ ५ ॥
आशासाना जीवितमध्वरस्य लोकः सपालः कुपिते न यस्मिन् ।
तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः ॥ ६॥
नाहं न यज्ञो नच यूयमन्ये ये देहभाजो मुनयश्च तत्त्वम् ॥
विदुः प्रमाणं बलवीर्ययोर्वा (३)(८)यस्यात्मतंत्रस्य क(७)उपायं विधित्सेत् ॥७॥
स इत्थमादिश्य सुरानजस्तैःसमन्वितः पितृभिः सप्रजेशैः ॥
ययौ स्वधिष्ण्यान्निलयं (४) पुर्गद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः ॥ ८॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

षष्ठेतुदेवसंघेनसहगत्वाभवंविधिः ।
सांत्वयामास दक्षादिजीवितार्थमादरात् १
अथदेवगणाः स्वयंभुवेन्यवेदयन्निति द्वितीयेनान्वयः ॥ १ ॥
शूलादिभिः संछिन्नानिभिन्नानिभग्नानिविदीर्णान्यंगानियेषाम सहऋत्विग्भिः सभ्यैश्चवर्तमानाः ॥ २ ॥
कस्यदक्षस्य यज्ञंब्रह्माविष्णुश्चनेयतुर्नजग्मतुः यत्रारुद्रकोपोयज्ञस्त त्रनारायणविरिंचावपिनागतौ ॥ ३ ॥
विभुर्ब्रह्मा तेजीयस्यतिजजस्विनिपुरुषेकृतागसिसत्यपिस्वयंतत्र कृतागसांबुभूषतामपराधंकर्तुमिच्छतांसातथाबुभूषतांक्षेमायनभूयात् प्रायेणतिलोकोक्तिः नभवेदेवेत्यर्थः ॥ ४ ॥
अथापिप्रसादयध्वंक्षमापयत येभवंतोबर्हिषोयज्ञस्यभागभाजंपरादुर्दूरादेवखंडितवंतः प्रगृहीतांघ्रिपद्मं पादौप्रगृह्येत्यर्थः ॥ ५ ॥
अध्वरस्यजीवितं पुनःसंधानंप्रार्थयमानाः संतः यस्मिन्कुपितेसतिसपालोलोकोनभवेन्नश्येदित्यर्थः ॥ ६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

वयंतुतत्रगंतुंबिभीमस्तथेमनकोऽपिउपायंविधत्स्वेतिचेदत आह-नेति यज्ञस्तदानीतनइंद्रः यस्यतत्त्वंबलवीर्ययोः प्रमाणमियत्तांचन-विदुः वीर्यपराक्रमः पापमितिपाठेऽपराधम् ॥ ७ ॥ ८ ॥

———

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी

अथेति युग्मकम् ॥ १ ॥ २ ॥
एतत् शिवद्वेषफलं यज्ञादिविध्वंसनम् ॥ ३ ॥
तन्निवेदनम् बुभूषतां भवितुमिच्छतां कीदृशत्वेनेत्याकांक्षायां कृतागसामित्यध्याहृतं आकांक्षाविरहेऽध्याहारायात् तथा बुभूषा कृतागस्त्वेन भवितुमिच्छा ॥ ४ ॥
यद्यपि क्षेमाय न स्यात्तथापि प्रगृहीतांघ्रिपद्ममिति क्रियाविशेषणं विधेयतया कथंचिच्छिवस्यैव वा विशेषणम् ॥ ५ ॥
हृदि विद्धमिति बहिरङ्गदृष्ट्यैवोक्तम् ॥ ६ ॥

पा० (१) कृतागसाम् (२) भवम् (३) तस्यात्मनः (४) पुरारेः॥ इमे श्री वीरराघवाचार्य्य सम्मताः पाठाः ॥ (५) समाकुलाः (६) कृतागसाम् (७) उद्विधित्सेत् इत्येवं श्रीविजयध्वजीयपाठाः ॥ (८) तस्यात्मनः कः पापं विधित्सेदिति सिद्धांतप्रदीपसम्मतःपाठः॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

तत्त्वं परमार्थरूपं यद्यपि श्रीविष्णोरावेशावतारोऽयं यज्ञः स्वायंभुवीयमन्वन्तरेन्द्रस्तथापि प्राचीनबर्हिराज्ये षष्ठमन्वन्तरेऽपि यज्ञाधिष्ठातृत्वेन तस्य स्थितत्वात्तदानीन्तन इत्युक्तम् ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

एवं दक्षाध्वरविनाश उक्तः अथ पुनस्तत्संधानप्रकारं विवक्षुस्तदुपोद्घातरूपं देवकृतरुद्रप्रसादनं वक्ष्यन् तावद्देवानां रुद्रपार्षदताडितानां स्वयंभुवे विज्ञापनं वदन् तेन सह रुद्रसन्निधिगमनमित्याह मैत्रेयः अथेति अथ दक्षयज्ञविनाशानन्तरं सर्त्विक्सभ्या ऋत्विग्भिः सभ्यैश्च सहिताः सर्वे देवगणाः रुद्रानीकैः रुद्रसैन्यैः कर्तृभिः शूलादिभिः साधनैः संछिन्नानि विदीर्णानि सर्वाणि अङ्गानि येषां ते अतएव पराजिताः भयाकुलाः सन्तः स्वयंभुवे चतुर्मुखाय नमस्कृत्य एतद्वृत्तं कार्त्स्न्येन न्यवेदयन् विज्ञापितवन्तः ॥ १—२ ॥

किं स्वयंभुवे विज्ञापितवन्त इत्युच्यते ब्रह्मापि दक्षाध्वरे आगतस्तद्वृत्तं जानात्येवेत्याह उपलभ्येति अब्जसंभवो भगवान् ब्रह्मा सर्वान्तरात्मा नारायणश्च पूर्वमेवैतद्भावि दक्षाध्वरविनाशनमुपलभ्य ज्ञात्वा भगवान् विश्वात्मेति विशेषणाभ्यां तयोः सर्वज्ञत्वं सूचितं तस्य दक्षस्याध्वरं प्रति नेयतुः न गतवन्तौ ॥ ३ ॥

विभुर्ब्रह्मा तद्देवैर्निवेदितमाकर्ण्य श्रुत्वा हऽऽउवाच उक्तिमेवाह तेजीयसामित्यादिना तेजीयसि तेजिष्ठे रुद्रे कृतागसः अपराधा येस्तेषां बुभूषतां भवितुमिच्छतां श्रेयस्कामानामिति यावत् भूयसे क्षेमाय श्रेयसे प्रायेण बाहुल्येन न भूयात् तेजीयसीति विभक्तिविपरिणामेनानुषज्यते असत्कृतस्तेजीयान् पश्चात् प्रसाद्यमानोऽपि क्षेमकृन्नस्यादित्यर्थः प्रायेणेति लोकोक्तिः ॥ ४ ॥

यद्यप्येवमथापि ये भवन्तो बर्हिषः यज्ञस्य भागभाजो भागं भजन्ति प्राप्नुवन्तीति तथा तानपराद् बहिष्कृतवन्तः ते यूयं परिशुद्धचेतसा निष्कपटचित्तेन प्रगृहीताङ्घ्रिपद्मं पादावुपसंगृह्येत्यर्थः भवं रुद्रं प्रसादयध्वं कथं तदोपसंग्रहमात्रेण प्रसन्नो भवेत्तत्राह क्षिप्रप्रसादं पादग्रहणस्यानतिक्रमणीयतामालोच्य आश्वनुग्रहकारिणमिति भावः ॥ ५ ॥

अध्वरस्य यज्ञस्य जीवितं पुनःसंधानं आशासानाः प्रार्थयमानाः यूयं यस्मिन् रुद्रे कुपिते सति सपालः दिक्पालसहितो लोको नश्येदित्यर्थः तं दुरुक्तैः दक्षादीनां दुर्वाक्यैः हृदि विद्धं ताडितमधुना प्रियया भार्यया च विहीनं देवमाशु क्षमापयध्वं प्रसादयध्वम् ॥ ६ ॥

वयं तत्र गन्तुं बिभीमस्त्वमेव कंचिदुपायं चिन्तयेत्यत्र रुद्रप्रस्तीति नाहमिति यस्य रुद्रस्य तत्त्वं याथात्म्यं बलवीर्ययोः प्रमाणमियत्तां च अहं नापि यज्ञ इन्द्रः नचैव विद्यात् यूयं नचैव विद्यात् तथा मुनयो येऽन्ये च देहधारिणोऽतीन्द्रियार्थदर्शिनो न विदुः ब्रह्मइत्यदमुक्तं तस्यात्मनः परमात्मावेशावतारभूतस्य उपायं क्षमापणाय को विधित्सेत न कोऽपि विधातुमिच्छेदित्यर्थः भवद्भिः पादोपसंग्रहणमन्तरेणान्यः कः कर्मोपायं विधित्सेदिति भावः ॥ ७ ॥

सोऽजः ब्रह्मा सुरान्प्रत्येवमादिश्य आज्ञाप्य तैर्देवैः सप्रजापतिभिः पितृभिश्च सह स्वधिष्ण्यात् स्वस्थानात् पुरः प्रभोः रुद्रस्य प्रियं निलयं स्थानभूतं अद्रिश्रेष्ठं कैलासं प्रतिययौ ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

भगवद्रूपरोचीकरणाय तत्प्रसादवत्प्रस्तावात्तमभक्त्युत्कर्षतारतम्येन तत्तदनुग्रहप्राप्य इत्यभिप्रायो वर्ण्यतेऽस्मिन्नध्याये तत्र सर्वभक्तोत्तममहादेवप्रसादापादनाय देवानां ब्रह्माणं प्राप्य स्वसंकटाद्युपायप्रकारः कथ्यते अथ देवगणा इत्यादिना रुद्रस्यानीकैः सैन्यैः पार्षदैरित्यर्थः ॥ १ ॥

एतद्व्यक्तम् ॥ २ ॥

ननु विष्णुब्रह्मणोर्यज्ञागतेरावश्यकत्वेन तत्स्थितौ यज्ञविनाशो ब्रह्माणं गत्वा देवविज्ञापनं च कथं युक्तम् अग्नावैष्णवपुरोडाशं निर्वपति प्रजापते न त्वदेतान्यन्य इत्यादिश्रुतेरित्यत आह उपलभ्येति एतद्भावि कार्यं पूर्वमुपलभ्य ज्ञात्वाऽब्जसंभवो ब्रह्मा विश्वात्मा विश्वान्तर्यामी त्रिमूर्तिगेन रूपेण नारायणश्च कस्य दक्षस्याध्वरं नयतुर्न जग्मतुरित्यन्वयः अतो विष्णुब्रह्मणोस्तत्रानवस्थानाद्यज्ञविनाशो देवानां ब्रह्माणं गत्वा विज्ञापनं च युज्यत इति भावः ॥ ३ ॥

विज्ञापितं सकष्टं श्रुत्वा ब्रह्मणा शिक्षाकरं वाक्यमवादीत्याह तदेति तेजीयसि बलिष्ठे पुंसि विष्णुवायुभिन्ना इत्यतः प्रायेणेत्युक्तम् ॥ ४ ॥

तर्हि तूष्णीं भवतोऽस्माकं किमुपायान्तरं वा ज्ञापयसीति तत्राह अथापीति बर्हिषो यज्ञस्य भागं स्वाधिकृतांशं भजन्तीति भागभाक् तं पराकृत्यान्यस्मा अकुर्वित्यर्थः अथापि कृतापराधानामपि युष्माकं शिवप्रसादनमेवोपाय इत्युक्तं भवति प्रसादने किं साधनमित्यत उक्तं परिशुद्धेति गङ्गाप्रस्तचन्द्रमण्डलवद्धेतस्य एकस्मिन्नर्थे विकल्पमपत्तं तस्मादिति परीत्युक्तं न केवलं चेतो नैर्मल्यमलं किन्तु कर्म चापेक्षितमित्याह प्रगृहीतेति प्रगृहीताङ्घ्रिपद्मं यैस्ते तथोक्ताः ॥ ५ ॥

न केवलं कालान्तरभाविनः श्रेयसः साधनं तत्प्रसादनं किन्तु अद्यतनस्यापीति भावेनाह आशासाना इति अध्वरस्य जीवितं पुनरनुसंधानलक्षणं जीवनमाशासाना आकांक्षमाणा यूयं दक्षकृतं वचनमेव न कारणमीश्वरस्य कोपस्य कारणान्तरमप्यस्तीति भावेनोक्तं प्रिययेति न तत्कोपेन परमेश्वरस्य विनाशोऽपि तु सपालस्य लोकस्यापीत्यस्तद्वारणात्तु प्रसादनेन शान्तो भवति क्षिप्रप्रसादमिति तत्स्वभावादिति भावेनोक्तं लोक इति ॥ ६ ॥

बुभुक्षुणा विष्णुद्वेषवतस्य हरेर्मनोनुसारितया वर्तमानस्य श्रीकण्ठस्य रूपः कर्तुं न योग्य इत्याशयेनाह नाहमिति अहं ब्रह्मा शम्भोर्यस्य विष्णोस्तत्त्वं बलवीर्ययोरित्युपलक्षणं ज्ञानादिगुणानां च प्रमाणं न वेद्मि तथा यज्ञ इन्द्रोऽपि न वेत्ति तथा यूयं न वित्थ तथान्ये प्रजापत्यादयो ये च देहभाजः शरीरिणो मुनयः सनकादयश्च न विदुरित्यन्वयः तस्य विष्णोरात्मतो मनसस्तत्रस्य यशस्य रुद्रस्य कः पुमान् पराक्रमुपचिकित्सेत् कर्तुमिच्छेत् न कोऽपि बुभूषुरित्यर्थः यज्ञो यज्ञपत्यादयश्च न विदुरित्यन्वयः यज्ञो यज्ञपतिस्त्विन्द्रः पुरुहूतः पुरुष्टुत इत्यभिधानादिन्द्र एवात्र यज्ञशब्दार्थः नाह नेन्द्रो न चैवान्ये यस्तत्त्वं न विदुः परं तस्य विष्णोर्वेदो रुद्रो मम वायोरधोऽपि वा नान्यस्य कस्यचित्पुंसस्तत्त्वं यतथं च. कुतः कृतामिति वचनात् स्मृतिसमाख्यानाच्च न यज्ञो विष्णुर्मम वायोरथापि चेत्यनेनात्मनो ब्रह्मणो वायोश्च तत्रस्थेत्ययमर्थोऽपि ध्वनित इति ज्ञायते उदित्यनेन संसारनदीमुत्तर्तुकामैः शिवद्वेषो न कर्तव्य इति सूचयति मोक्षस्य शिवाद्यपादिष्टज्ञानापेक्षितत्वात् तदुक्तं मुमुक्षुणा ब्रह्मणाश्च शिव इन्द्रादिभिस्तथा श्रुत्वा ज्ञानं परं गुह्यं मुच्यते ब्रह्मणा सहेति ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

मया सह गतं चेद्देवानां देवानामेव शिवः क्षिप्रप्रसादो भविष्यतीति महादयालो ब्रह्मणः कैलास प्रतियात्रां वक्ति स इत्थमिति अजो ब्रह्मा पुरोहितः प्रियं कैलासो गिरिशो मृड इत्यभिधानात् तस्य निवास इति विग्रहे यथा विहिताण प्रत्ययेन कैलास इति रूपं सिध्यति ॥ ६ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अथेति युग्मकम् ॥ १ ॥ २ ॥

समष्टिजीवत्वात् ब्रह्मा परमात्मत्वान्नारायणो विश्वात्मा कस्य नैयतुरध्वरमिति चित्सुखः ॥ ३ ॥

तदाकर्ण्येति । बुभूषतां प्राप्तुमिच्छतां कृतागस्त्वमिति शेषः । कृतागसामिति चित्सुखपुण्यारण्यौमतः । कृतापराधेऽभवितुमिच्छतामित्यर्थः । यद्वा तेजीयसि तत्र शिवे बुभूषतां सम्बन्धमिच्छतां मध्ये कृतागसि तत्र दक्षे सा सती प्रायेण प्राचुर्येण क्षेमाय न भूयात् न भवेदित्यर्थः ॥ ४–५ ॥

इदि विधर्मिति बहिरंगदृष्ट्येवोक्तम् ॥ ६ ॥

यज्ञः स्वायम्भुवमन्वन्तरेन्द्रः श्रीविष्णोरावेशावतारः यज्ञाधिष्ठातृत्वेन तस्य प्राचीनबर्हि राज्ये षष्ठमन्वन्तरेऽपि स्थितस्तथोक्तं स इत्थमित्यादि चतुर्दशकम् ॥ ७–९ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

कैलासवर्णनं षष्ठे तत्रत्य वटमूलगम् ।
शिवं सह सुरैर्गत्वा स्तुत्वा प्रासादयद्विधिः ॥

स्वयम्भुवं स्वयम्भुवम् ॥ १ ॥ २ ॥

उपलभ्य सर्वज्ञतया ज्ञात्वा कस्य दक्षस्य नेयतः न जग्मतुः ॥३॥

विभुर्ब्रह्मा तेजीयसि महात्मनि जने कृतागसि कृतम आगोऽपराधो यस्य तथाभूते सति । क्षेमाय स्वकल्याणाय बुभूषतां जिजीविषतां तत्र क्षेमे विषये सा बुभूषा जिजीविषा मा भूयात् न भवतु श्रीरुद्रे महातेजीयस्यपराधविषयीभूते सति अपराधिनां दक्षादीनां मृत म्रियमाण मरिष्यतां स्वक्षेमाय विषयभोगार्थं जिजीविषतां मा जिजीविषा मा भवत्वित्यर्थः । दक्षादयोऽपराधिनो म्रियन्तां नाम मा जीवन्तु जीवित्वा पुनरप्यपराधं करिष्यतां तेषां जीवनेनालं मरणमेव वरमिति भावः । भवतः सत्तार्थत्वात् सत्तायाश्च जीवनरूपत्वात् बुभूषा जिजीविषयोस्तुल्यार्थता ज्ञेया । प्रायग्रहणं तेषामेव मध्ये केषाञ्चिज्जीवित्वा अपराधमकरिष्यतां जिजीविषा जीवनञ्च भूयादित्यर्थं अभाय ॥ ४ ॥

अथापि यदि बुभूषथेत्यर्थः । कृतकिल्बिषा यूयं भवं प्रसादयथ ये भवन्तो बर्हिषो यज्ञस्य भागभाजं भवं परादुः दूरादेव व्यगिरितवन्तः । नच तत्प्रसादो दुष्कर इति वाच्यं प्रगृहीतेति अङ्घ्रिपद्मग्रहणमात्रेणैव स प्रसीदत्येवेति तदन्तःकरणमहं जानाम्येवेति भावः ॥ ५ ॥

यस्मिन् कुपिते सति सपाल एव लोको न भवेत् तं क्षमापयध्वं । यूयमध्वरस्य जीवितं प्रार्थयमानाः ॥ ६॥

ननु त्वामेव वयं प्रपन्ना अतस्त्वमेव कमप्युपायं विधत्स्वेति तत्राह । नाहं ब्रह्मापि न यज्ञः इदानीन्तन इन्द्रोऽपि नच यूयं याज्ञिका वेदविदोऽपि यस्य तत्त्वं बलवीर्ययोः प्रमाणमियत्ताञ्च न विदुः ॥ ७ ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

षष्ठे शिवं ब्रह्मणा सान्त्वयामासेत्युच्यते अथेति देवगणाः स्वयम्भुवेन्युवेव यत्रितिद्वितीयेनान्वयः ॥ १ ॥

शूलादिभिः सम्यक्कृत्तानि भ्रष्टितानि विदीर्णानि भिन्नानि विदीर्णानि अंगानि येषांते ऋत्विग्भिः सदस्यैश्च सहिताः एततवृत्तान्तं स्वयं विज्ञापितवन्तः ॥ २ ॥

विश्वात्मा सर्वात्मा नारायणः अब्जसंभवस्तत्पुत्रश्च एतद् वृत्तं स्वयं विज्ञं पुरैवोपलभ्य ज्ञात्वा कस्य दक्षस्याध्वरं नेयतुः नाजग्मतुः ॥ ३ ॥

विभुः विपुलबोधो ब्रह्मा तैर्देवैर्निवेदितम आकर्ण्य श्रुत्वा तेजीयसि अतितेजस्विनि जने कृतागसि कृतापराधे सति तत्र तेजीयसि बुभूषताम पराभवं कर्तुमिच्छतां सा बुभूषा प्रायेण क्षेमाय मंगलाय न भूयात् किंतु अमंगलं कुर्यादित्यर्थः ॥ ४ ॥

येभवंतो भवं बर्हिषो यज्ञस्य भागभाजं परादुः भागाद्बहिश्चक्रुः एवं कृतकिल्बिषाः यद्यपि यूयमथापि परिशुद्धचेतसा प्रगृहीताङ्घ्रिपद्मपादौ गृहीत्वा क्षिप्रप्रसादमाशु अनुग्रहकारिणं प्रसादयध्वम ॥ ५ ॥

यस्मिन्रुद्रे कुपिते सति सपाला लोकपालास्युः तं सपाललोकक्षेमकामाः अध्वरस्य जीवितं पुनः संधानमाशासानाः प्रार्थयमानाश्च आसुक्षमापयध्वम ॥ ६ ॥

यस्य बलवीर्ययोस्तत्त्वं मूलं प्रमाणमियत्तां वाअहं नवेद यज्ञं इन्द्रोन वेत्ति नयूयं वित्थ मुनयोन्ये च देहभाजो न वित्थ तस्य पापमपराधं कोवाविधित्सेत विधातुमिच्छेत ॥ ७ ॥

सुराग्प्रतीत्थमादिश्याऽऽज्ञाप्य ॥ ८ ॥

भाषाटीका

श्री विदर्भराज तनया समेत श्रीवासुदेव पर ब्रह्मणे नमः ॥ मैत्रेयजी बोले ॥ तिसके पीछे सब देव गण रुद्रकी सेना से हार पाकर त्रिशूल पट्टा इत्यादि आयुधों से घायल होकर ऋत्विज और सभा सदों सहित भयभीत होकर ब्रह्मदेव के पास जाकर नमस्कार पूर्वक सब समाचार सुनाते हुवे ॥ १ ॥ २ ॥

इस उपद्रव को भगवान कमल योनि श्री ब्रह्माजी तथा विश्वात्मा श्री नारायण पहिले ही जान चुके थे अतएव दक्ष के यज्ञ में नहीं गये थे ॥ ३ ॥

इस देवतावों की बातको ब्रह्माजी सुनकर बोले कि प्राय कर के तेजस्वी महत्पुरुष का अपराध करके आप सुखकी इच्छा करे एसा नहीं हो सक्ता ॥ ४ ॥

यद्यपि तुम लोगो ने महादेव जी का यज्ञसे भाग उठा दिया इसी से तुम लोग शिव के अपराधी हो तो भी उनके चरण कमल को पकड कर निष्कपट चित्त से यज्ञ को पुनः संधान की प्रार्थना करते हुवे शिव जी को प्रसन्न करो वो बड़ी जल्दी प्रसन्न हो जाते हैं ॥ जिस के जरा कोप करने से लोकपालों सहित लोक तत्काल नष्ट हो जांय एसे महादेव तिस पर भी अपनी प्रियासे विहीन, दक्ष के कुवाक्यों से दुखित उनको जल्दी क्षमापन की प्रार्थना, करो ॥ ५ ॥ ६ ॥

भला जिस के बल पराक्रम के प्रमाण को न हम न इन्द्र न तुम लोग न और कोई मुनिलोग भी जान सक्ते हैं एसे स्वतंत्र का कौन अपराध करेगा ॥ ७ ॥

ब्रह्माजी ने देवतों को इस तरह शिक्षा देकर उन देवता और पितृ और प्रजेश सबको साथ लेकर अपने स्थान से महादेवजी का प्रिय निवास पर्वतों में श्रेष्ठ एसे कैलास को गये ॥ ८ ॥

जन्मौषधितपो (३) मंत्रयोगसिद्धैर्नरेतरैः ॥
जुष्टं किन्नरगंधर्वैरप्सरोभिर्वृतं सदा ॥ ९ ॥
नानामणिमयैः श्रृंगैर्नानाधातुविचित्रितैः ॥
नानाद्रुमलतागुल्मैर्नानामृग (४) गणावृतैः ॥ १० ॥
नानाऽमलप्रस्रवणैर्नानाकंदरसानुभिः ॥
रमणं विहरंतीनां रमणैःसिद्धयोषिताम् ॥ ११ ॥
मयूरकेकाभिरुतं मदान्धालिविमूर्च्छितम् ॥
प्लावितैरक्तकंठानां कूजितैश्च पतत्रिणाम् ॥ १२ ॥
आह्वयन्तमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः ॥
व्रजंतमिव मातंगैर्गृणंतमिव निर्झरैः ॥ १३ ॥
मंदारैःपारिजातैश्च सरलैश्चोपशोभितम् ॥
तमालैःशालतालैश्च कोविदारासनार्जुनैः ॥ १४ ॥
चूतैःकदंबैर्नीपैश्च नागपुन्नागचंपकैः ॥
पाटलाशोकवकुलैः कुंदैः कुरबकैरपि ॥ १५ ॥
स्वर्णार्णशतपत्रैश्च वररेणुक (१) जातिभिः ॥
(५) कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मंडितम् ॥ १६ ॥
पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः ॥
भूर्जैरोषधिभिःपूगैराजपूगैश्च जंबुभिः ॥ १७ ॥
खर्जूराम्रातकाम्राद्यैः प्रियालमधुकेंगुदैः ॥
(६) द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः ॥ १८ ॥
कुमुदोत्पलकल्हारशतपत्रवनर्द्धिभिः ॥
नलिनीषु कलं कूजत्खगवृंदोपशोभितम् ॥ १९ ॥
मृगैः शाखामृगैः क्रोडैर्मृगेंद्रैर्ऋक्षशल्यकैः ॥
गवयैः शरभैर्व्याघ्रैरुरुभिर्महिषादिभिः ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

कैलासं वर्णयति जन्मौषधीत्यादिचतुर्दशभिः नरेतरैर्देवैर्जुष्टम् ९ शृंगैरसमंतात्प्रदीप्तमित्युत्तरेणान्वयः कथंभूतैर्नानाधातुभिर्विचित्रितैः नानाद्रुमलतागुल्माढ्यचयेषु ॥ १० ॥

नानाऽमलानि प्रस्रवणानि येषु नानाकंदराः सानवश्चयेषु रमणैः सह क्रीडंतीनाम् ॥ ११ ॥

मयूराणां केकाभिः स्वनैर्नादितम् मदांधैरलिभिर्विमूर्छितं मूर्छना रागगतिविशेषस्तद्व्याप्तं कृतम् रक्तकंठानां कोकिलानां प्लावितैः प्लुतत्वं नीतैः स्वरैः अन्येषां च पतत्रिणां कूजितैः ॥ १२ ॥

उच्चस्तैरुन्नतशाखैर्द्रुमैर्द्विजान्पक्षिणः आह्वयंतमिव लोके हि हस्तमुत्क्षिप्योच्चैःस्वरेणाऽऽह्वानमर्थिनां कुर्वंति अद्रिरयं तूत्क्षिप्तहस्ताकारैर्द्रुमैस्तत्रत्यपक्षिस्वनैश्च तथा लक्ष्यत इत्यर्थः व्रजद्भिर्मातंगैर्व्रजंतमिव निर्झरध्वनिभिर्गृणंतं भाषमाणमिव ॥ १३ ॥ १४ ॥

चूताम्रयोर्नीपकदंबयोरवांतरजातिभेदः वेणुकीचकयोश्च नीरंध्रसरंध्रत्वेन भेदः ॥ १५ ॥

स्वर्णार्णाः स्वर्णवर्णाः शतपत्रैर्मंडितम् रेणुकजातिभिरित्यत्र रेणुका एला जातिर्मालती ॥ १६ ॥

हिंगुभिर्गुग्गुलवृक्षैः ॥ १७ ॥

द्रुमजातिभिरित्यत्र जातिरवांतरभेदसामान्यम् ॥ १८ ॥

पा० (१) वेणुकेत्यपि क्वचित् (२) नाभिभिर्व्याघ्रैर्निर्जुष्टं महिषादिभिरित्यपि पुस्तकान्तरं ॥ (३) योगमन्त्र ॥ (४) गणान्वितैः (५) कुटजैः (६) द्रुमजातिभिरन्याभिः ॥ तृतीयाङ्कमारभ्य श्रीवीरराघवीयपाठः ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

कुमुदादिसमृद्धिभिर्हेतुभिर्नलिनीषुसरःसु कलंमधुरंयथाभवत्येवं कूजंतियानिपक्षिवृंदानितैरुपशोभितम् ॥ १९ ॥

मृगादिभिर्निर्जुष्टैर्निषेवितम् पूर्वंमृगगणाः शृंगविशेषणत्वेनोक्ता इदानींस्वातंत्र्येणेत्यपौनरुक्त्यम् ॥ २० ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

स इत्थमित्यादि चतुर्दशकम् मध्ये ह्यविंदुमस्तकाङ्का टीका कमस्याधाधराचितारतिश्चयम (१) (२) *

नाना मणिमयैरित्यर्थांतरयुग्मकम् ॥ ८—१० ॥

सानुः शिखरं (३) ॥११॥

गति विशेषः स्वराणामारोहावरोहलक्षणः (४) ॥ १२ ॥

उत्क्षिप्तहस्ताकारैर्द्रुमैरिति द्रुमाणां हस्तस्थानीयत्वं उन्नतशाखैरित्यत्र शाखानामंगुलिस्थानीयत्वं ज्ञेय किंतुउत्क्षिप्तहस्ताकारैरिति उद्धस्तैरित्यस्य व्याख्या तथा चोन्नतशाखैरिति चिन्त्यम् (५) ॥ १३ ॥

मंदारपारिजातौ देवतरुविशेषौ कोविदारःकचनारेति ख्यातः असनो विजयसारः (६) ॥ १४ ॥

नीपो धूलिकदंबः बकुलोत्र मौरसलीति ख्यातः कुरबकस्तिलकवृक्षः ॥ १५ ॥

स्वर्णः स्वर्णजुही अर्णः अरणीति ख्यातः द्रुमेषु वृक्षत्वसामान्य स्यैकस्वावृक्षद्युवचनमनुपपन्नमित्यर्थांतरसामान्यंव्याख्यातम(७)॥१६॥

पनसादयः प्रसिद्धाः (८) ॥ १७ ॥ १८ ॥

कुमुदादिवन समृद्धिभिर्हेतुभिः (९) (१०) ॥ १९—२१ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

कैलासं वर्णयति जन्मौषधीत्यादिभिश्चतुर्दशभिः जन्मना औषध्यादिभिश्चयेसिद्धास्तै र्नरेतरैर्देवयोनिभिः तत्रजन्मतःसिद्धाऔषध्याद्यनपेक्षमेव सृष्टिवेलायामेवदेवत्वेनसृष्टाः औषध्यादिभिस्तु देवत्वसंपादकौषध्याद्युपायैर्देवत्वेनासिद्धाः योगः रुद्रोपासनारूपयोगः मंत्रः यावज्जीवं शिवपंचाक्षर्यादि मंत्रावृत्तिः जपसेवितं तथाचगीतं भगवता देवान् देवयजोयांतीति तथाप्सरोभिः किन्नरादिभिश्चसदावृतम् ॥ ९ ॥

शृंगैः शिखरैः रमणैः प्रियैः सहविहरंतीनां स्त्रीणां या योषित्तस्तासांरमणंरतिप्रदं शृंगैः कथंभूतैः नानाधातुभिर्गैरिकादिभिः विचित्रितैः नानाद्रुमाः लतागुल्मानिच येषुतैः ॥ १० ॥

नीना अमलानि स्वच्छानि प्रस्रवणानि स्रोतांसि येषु नाना कंदराः सानूनि च येषुतैः ॥ ११ ॥

तथामयूराणां केकास्वनैः अभितः सर्वतः रुतं नादितं मदनमकरंदपान जनितमदेन अंधैरलिभिर्भृंगैः विमूर्छितंमूर्छनाख्य रागगीतिविशेषेण स्यामं रक्तकंठानां कोकिलानांप्लुष्टैः त्रिमात्रशब्दैस्तथान्येषां पतत्त्रिणांच कूजितैः ॥ १२ ॥

उद्धस्तैः उन्नतशाखैः कामदुघैर्द्रुमैश्च द्विजान् पक्षिणआह्वयंतमिवस्थितं लोकेहि हस्तमुत्क्षिप्य उद्धैः स्वरेणाह्वानमर्थिनां कामधुक् आद्रिश्च उत्क्षिप्तहस्ताकारैर्द्रुमैः पक्षिणांस्वनैश्चतथालक्ष्यतइत्यर्थः मत्तद्विर्मातंगैर्जैर्वजतामिव निर्झराणां ध्वानिभिर्गृणांतं भावमणामि-

* अत्राङ्कमस्तकबिन्दु प्रतिनिधित्वेन अङ्कोभयपार्श्वयोर्द्वेद्वे () एवं कार्मुकाकारे रेखेस्थापिते इति ज्ञेयम ।

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

वस्थितम् ॥ १३ ॥

मंदारादिभिर्वृक्षविशेषैरुपशोभितम् ॥ १४ ॥

चूतैराम्रविशेषैः ॥ १५ ॥

स्वर्णार्णशतपत्रैः सुवर्णवर्णैः कुशेशयैः कुंदादिभिर्लताविशेषैश्च मंडितं रेणुका एला जातिर्मालती ॥ १६ ॥

पनसादिभिर्द्रुमैः ॥ १७ ॥

तथान्यैश्चद्रुमजातिभिः द्रुमसामान्यैर्वेणुकीचकैश्चराजितंमंडितं नीरंध्रमध्यत्वेन वेणुकीचयोर्भेदः द्रुमजातिभिरित्यत्रजातिरवांतरभेदसामान्यम् ॥ १८ ॥

कुमुदादिसमृद्धिभिः शतपत्राणांस्वर्णवर्णानांचनानांऋद्धिभिराजितंनलिनीषुसरस्सुकलंमधुरंयथाभवतितथाकूजद्भिः खगवृंदैः पक्षिसंघैरुपशोभितम् ॥ १९ ॥

मृगादिभिर्निर्जुष्टैर्निषेवितम् ॥ २० ॥

———

श्रीमद्विजयध्वज तीर्थकृतपदरत्नावली

कंटकगुल्मखंडैरप्रवेशस्य गंडशैलादिपाषाणैरनारोहस्याचलस्य किं माहात्म्यादुद्रप्रियत्वमित्यतस्तं पर्वतं चतुर्दशभिः श्लोकैर्वर्णयति जन्मेत्यादिना नरेतरैर्नरत्वजातिरहितैर्जन्मना विशिष्टकुलोत्पत्त्या कृष्णाजिनप्रकाशौषधेन कृच्छ्रचांद्रायणादितपसाऽष्टांगलक्षणयोगेन मृत्युं जयादिमंत्रेण एतैः सिद्धैरमरत्वादिसिद्धिं गतैर्जुष्टमित्यनेन सुखसाधनत्वं ध्वनयति नरेतरैः किन्नरगंधर्वैरप्सरोभिर्वृतमितिवा ॥ ९ ॥

मनःशिलादिनानाविधधातुभिर्विचित्रैश्चित्राकारैर्गमितैरिति शृंगविशेषणं नानामृगगणावृत्तैः नानाद्रुमादिभिश्चवृतम् ॥ १० ॥

निर्झरः प्रस्रवोभस्सोमीति हलः जलस्य नानात्वं मरकतादिस्थलसंपर्कात्कर्दमराहित्येनामलत्वं । न तु शौक्लयेन । तथात्वे नानात्वविरुद्धं कंदरागुहाः । सानूनि तटाकानि । रमणैः सह विहरंतीनां सिद्धयोषितां रमणं रति प्रदम् ॥ ११ ॥

मयूरकेकाभिरुतं शब्दितं विमूर्छितं विविधं गीतं रक्तकंठानां कोकिलानां प्लावितैः तारस्वरितैरन्येषां पतत्त्रिणां कूजितैरुतैः ॥ १२ ॥

किं च पक्षिमाह्वकैः पुष्पफलस्तैरुद्धस्तैर्द्विजैः करणैः कामं दुहद्भिर्द्रुमैराह्वयंतमिव स्थितम् ॥ १३ ॥

पारिजातैः पारिभद्रकैः सरलैर्देवदारुभिः मालतालैः सर्जतृणराजैः कोविदारैः कांचनारकैः असनैः पिशंगपुष्पैः अर्जुनैः ककुभैः॥१४

नागैर्नागकेशरैः पुन्नागैः सुरवल्लभैः कुरवकैस्तिलकैः ॥ १५ ॥

सुवर्णः कृतमालः वीरः करवीरं रेणुक केतकी कुब्जकैः कुंकुमतरुभिः माधवी वासंती अत्र संस्कृताधिकारित्वात्पर्यायांतरमेव लिख्यते नानात्वेनापभ्रंशानां तद्बोधनं न शक्यते ॥ १६ ॥

हिंगुरामठः भूर्जैर्भूर्जपत्रैः ओषधीभिर्जनवृक्षैः ॥ १७ ॥

काश्मरी कृष्णवृन्तिकः आम्रातको विट्ठलः आम्रो जिह्वारमकरः प्रियालो लवगः धनुर्वा मधुको मधुकरसः इंगुदः किंगुदकः तापसतरुर्वा ॥ १८—१९ ॥

शाखामृगैर्वानरैः क्रोडैर्वराहैः ऋक्षैर्भल्लुकैः शल्यकः कंटकवराहः गवया वनगावः शरभोऽष्टापदः रुरुर्हरिणेषु महान् ॥ २० ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

शृङ्गाणां पूर्वापरं विशेषणत्रयं नानाद्रुमलतास्य नानामृगेति वि-
शेषणम् ॥ १० ॥

नानामलेत्यादि त्रयं तु पृथक् पृथगेव ॥ ११ ॥

स्वर्णार्णेति । अर्णा वर्णाः हिगुरुत्र करञ्जतुल्यो वृक्षविशेषः
॥ १६ ॥ १९ ॥

नानामृगेत्यस्यैव विवरणं मृगैरिति मृगेन्द्रैर्ऋक्षशल्यकैः । गवयैः
शरभैर्व्याघ्रैरुरुभिर्महिषादिभिः । कर्णान्त्रैकपदाश्वास्यैर्निर्जुष्टं मृग
नाभिभिरिति क्वचित् पाठः । तत्र कर्णान्त्रादयो मनुष्याकारा मृग-
ग्रामाः ॥ २० ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

कैलासं वर्णयति जन्मौषधीत्यादि चतुर्दशभिः । नरेतरैर्देवैः
॥ ९ ॥ १० ॥

रमणाः कान्तैः सह विहरन्तीनां सिद्धयोषितां रमणं रतिप्रदम्
॥ ११ ॥

मयूराणां केका एव अभितो रुतानि गृहस्थानामिवोक्तिप्रत्यु-
क्तिकोलाहला यत्र तं मदान्धानामलीनां गायकानामिव मूर्च्छितानि
राग स्वरालाप मूर्च्छना यत्र तं रक्तकण्ठानां कोकिलानां पतत्त्रिणा
मन्येषाञ्च पक्षिणां प्लावितः प्लुतत्वं नीतैः कूजितैः तथा उच्छ्रस्तै-
रुद्गतैर्हस्तैरिव कामदुघैर्द्रुमैर्द्विजान् पक्षिणोऽतिथीन् ब्राह्मणानिव
आह्वयन्तम् ॥ १२ ॥

व्रजद्भिर्मातङ्गैर्व्रजन्तमिव गृणद्भिर्निर्झरैर्गृणन्तमिव मधुरं भा-
षमाणमिव मन्दारादिभिर्मण्डितम् ॥ १३ ॥ १४ ॥

चूताम्रयोर्नीपकदम्बयोरप्यवान्तर जातिभेदः वेणुकीचकयोश्च
नीरन्ध्र सरन्ध्रत्वेन । रेणुकजातिभिरिति रेणुकापलाजातिर्मालती
॥ १५—१८ ॥

नलिनीषु सरःसु ॥ १९ ॥

नाभिः कस्तूरीमृगः ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

अद्रिप्रवरं वर्णयति अध्युक्तं तदद्रिप्रवरं विशेषयति जन्मेति चतुर्द-
शभिः सिद्धैर्नरेतरैर्देवादिभिर्जुष्टं सेवितम् ॥ ९ ॥

रमणाः भर्तृभिः सह विहरन्तीनां शृङ्गैः शिखरैः रमणं रतिप्रदमिति
द्वयोरन्वयः कथंभूतैः शृङ्गैः नानामणिमयैः अनेकजातिमणिमयैः
अमकधातुविचित्रितैः अनेकजातिद्रुमलतागुल्माद्युपेतैः ॥ १० ॥

नानाविधानि अमलानि प्रस्रवणानि तैर्युक्तैः नानाविधाः कंदराः
सानवश्च तैर्युतैः ॥ ११ ॥

मयूराणां केकाभिः स्वनैः अभिरुतैः स्वनैर्नादितम् मदान्धैरलिभि
र्भ्रमरैर्विमूर्च्छितम् मूर्च्छनाभिः रागगतिभिर्व्याप्तमित्यर्थः रक्तक-
ण्ठानां कोकिलानां प्लावितैः स्वरैः अन्येषां पक्षिणां कूजितैश्च आह्वयन्तमिव उन्न-
तशाखान्वयः ॥ १२ ॥

कामदुघैर्द्रुमैः उच्छ्रस्तैः उन्नतशाखैः द्विजान् पक्षिणो मुनींश्चाह्वय-
न्तमिव मत्तैर्व्रजद्भिर्मातङ्गैर्व्रजन्तमिव गजरूपैः कृत्वा गच्छन्तमिव निर्झरैर्गृ-
णन्तं भाषमाणमिव ॥ १३ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

मंदारादिभिरुपशोभितम् ॥ १४ ॥

चूतादिभिर्मण्डितमिति द्वितीयेनाऽन्वयः चूतैराम्रविशेषैः कदम्बैः
पैरितिकदंबनीपैश्च कदंबविशेषैः ॥ १५ ॥

वरवेणुकजातिभिः वरवेणुकैः अम्बरलापरपर्यायैः जातिभिः मा-
लतीभिः ॥ १६—१७ ॥

वेणुकीचकैः नीरन्ध्रैः सरन्ध्रैः श्चोभयविधैर्वेणुभिः ॥ १८ ॥

कुमुदादिभिः नलिनीषुकमलाकरेषु कलंमधुरंयथास्यात्तथाकूज
द्भिः खगानांवृंदैः समृद्धैश्चोपशोभितम् ॥ १९ ॥

निर्जुष्टंनितरांसेवितम् ॥ २० ॥

भाषाटीका ॥

वह कैलास कैसा है कि औषधि तप मंत्र और योग इन कार-
णों से और जन्म से सिद्ध देवताओं से सेवित है और सदा काल
किन्नर गन्धर्व और अप्सराओं से युक्त है ॥ ९ ॥

और नाना तरह के मणियों के खान वाले, नाना प्रकार के गे-
रिकादि धातुओं से विचित्र, नाना प्रकार के वृक्ष लता वल्ली वाले,
नाना प्रकार के मृगों से व्याप्त शिखरों से शोभित हो रहा है ॥ १०

नाना प्रकार के निर्मल जलों के प्रस्राव और नाना तरह
की कंदरा और शिखरों से विहार करने वाली सिद्धों की अंगना-
ओं को बहुत रमणीय है ॥ ११ ॥

जहां पर मयूरों की वाणी प्यारी सुनाई दे रही है मत्त मधुपों
की गुंजार से रागों की गति विशिष्ट हो रहा है ॥ कोकिलों की
ऊंची कुहुँकन से और पक्षियों के गुंजने से तथा उंचे वृक्ष रूप
हस्तों से जैसे पक्षियों को बुलावता होय ऐसा मालूम पड़ता है
चलते हुये हाथियों से कैलास भी चलता सा शब्द करते हुवे झि
रनों से कैलास शब्द करता सा मालूम होता है ॥ १२ ॥ १३ ॥

तथा मंदार, पारिजात, सरल, तमाल, ताल, कचनार, विजय-
सार, अर्जुन, आम्रजाति, कदंब धूलिकदंब, नाग, पुन्नाग, चम्पा,
पाटल, अशोक, बकुल, कुंद, महदी, इत्यादिक से शोभितहै १४ १५

तथा सुवर्ण वर्ण वाले कमलोंसे इलाइची मालती एवं कुटुज
माधवी इत्यादि कों से मंडित होरहाहै ॥ १६ ॥

कटहर गूलर पीपर पाकरवट और हींग के वृक्षों से तथा
भोजपत्र के वृक्ष सुपारी राजपूग जामुन इनसे शोभितहै ॥ १७ ॥

खजूर आम्रातक आम्र इत्यादि और प्रयाल मधूक इंगुदी और
बहुतसी द्रुमजातियों से शोभित तथा वेणु और कीचक दोनों वंसों
की जातियों से सुशोभित हो रहाहै ॥ १८ ।

कुमुद उत्पल कह्लार शतपत्र इत्यादि कमलकी जातियों से, वन
की समृद्धि से, छोटी २ तलाईयों में मधुर कूंजने वाले पक्षिवृन्दोंसे,
शोभित हो रहा है मृग वानर शूकर सिंह ऋक्ष शल्यक वनगाय
शरभ व्याघ्र छोटे मृग महिष इत्यादि जंतुओं से शोभित हो रहा
है ॥ १९ ॥ २० ॥

---

(१) कर्णांत्रैक पदाश्वास्यैर्निर्जुष्टं (२) वृकनाभिभिः ।
कदलीषंडसंरुद्धनलिनीपुलिनश्रियम् ॥ २१ ॥
(३) पयस्तं नंदया सत्याः स्नानपुण्य (४) तरोदया ।
विलोक्यभूतेशगिरिं विबुधा विस्मयं ययुः ॥ २२ ॥
ददृशुस्तत्र रम्यामलकां नाम वै पुरीम् ।
वनं सौगंधिकं चापि यत्र तन्नाम पंकजम् ॥२३ ॥
नंदा चालकनंदा च सरितौ बाह्यतः पुरः ।
तीर्थपादपदांभोज-रजसाऽतीवपावने ॥ २४ ॥
ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिष्ण्यतः ।
क्रीडंति पुंसः सिंचंत्योविगाह्य रतिकर्शिताः ॥ २५ ॥
ययोस्तत्स्नान विभ्रष्टनवकुंकुमपिंजरम्
वितृषोऽपि पिबंत्यंभः पाययंतोगजागजीः ॥ २६ ॥
तारहेममहारत्न-विमानशतसंकुलाम्
जुष्टा पुण्यजन स्त्रीभिर्यथा खं सतडिद्घनम् ॥ २७ ॥
हित्वा यक्षेश्वर पुरीं वनं सौगंधिकं च तत्
द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः ॥ २८ ॥
रक्तकंठखगानीकस्वरमंडितषट्पदम्
कलहंसकुलप्रेष्ठं खरदंडजलाशयम् ॥ २९ ॥
वनकुंजरसंघृष्टहरिचंदनवायुना
अधिपुण्यजनस्त्रीणांमुहुरुन्मथयन्मनः ॥ ३० ॥
वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः ।
प्राप्तं किं परुषैर्दृष्ट्वा त आराद्ददृशुर्वटम् ॥ ३१ ॥
स योजनशतोत्सेधः पादोनविटपायतः ।
पर्यक्कृताऽचलच्छायो(५)निर्नीडस्तापवर्जितः ॥ ३२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

मृगादिभिर्निर्जुष्टं निषेवितं नाभिः कस्तूरीमृगः पूर्वं मृगगणाः शृङ्गविशेषणत्वेनोक्ताः इदानीं स्वातन्त्र्येणेत्यपौनरुक्त्यम् कदलीखण्डैः संरुद्धानि आवृतानि नलिनीनां पुलिनानि तैः श्रीः शोभा यस्मिन् ॥ २१ ॥

नन्दया गंगया पर्यंतं परिवेष्टितं सत्या भवान्या स्नानेन पुण्यतरमतिसुगन्धमुदकं यस्यास्तया ॥ २२ ॥

अत्र गिरौ वनञ्च ददृशुः यत्र वने तन्नाम सौगन्धिकं नाम पंकजं भवति जातावेकवचनम् ॥ २३ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

पुरीं वर्णयति नन्दाचेति चतुर्भिः सरितौ पुराद्बाह्यतो भवतः तीर्थपादस्य हरेः पदाम्भोजस्य रजसा ॥ २४ ॥

ययोर्विगाह्य प्रविश्यक्रीडन्ति ॥ २५ ॥

ययोरम्भो विगततृषोऽपि गजा पिबन्ति तत्र हेतुः तासां सुरस्त्रीणां स्नानेन विभ्रष्टं गलितं यन्नवं कुङ्कुमं तेन पिंजरं पीतवर्णां गर्जाः करिणाः ॥ २६ ॥

तारं रूप्यं तारादिमयविमानानां शतैः शङ्कुलां व्याप्तां तडिद्भिः स्त्रीणां घनैर्विमानानां खेन पुर्याः सादृश्यम् ॥ २७ ॥

पा० (१) कर्णांत्रैक (२) मृगनाभिभिः इति विजयध्वज वीरराघवौ (३) पर्यन्तम् इति चक्रवर्त्ती ॥ परीतन्नन्दयासत्यास्नान पुण्यकरोदया इति श्री वीरराघवाचार्याः (४) तमोदया (५) पर्यग्गतामलच्छाया इति श्री विजयध्वजः ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

यक्षेश्वरपुरीं हित्वा अतिक्रम्य तद्वनञ्च दृष्ट्वा ते आराद्दूराद्वटं ददृशुरिति चतुर्थेनान्वयः कथम्भूतं वनं चित्राणि माल्यानि फलानि छदाश्च पत्राणि येषु तैर्द्रुमैर्हृद्यं सुखकरम् ॥ २८ ॥

रक्तकण्ठखगानामनीकस्य स्वरैर्मण्डिताः षट्पदाः यस्मिन् कलहंसानां कुलस्य प्रेष्ठानि खरदण्डानि पद्मानि तैर्युक्ता जलाशया यस्मिन् ॥ २९ ॥

वनकुंजरैः संघृष्टा ये हरिचन्दनद्रुमाः तत्सम्बन्धिना वायुना पुण्यजनस्त्रीणां मन अपि अधिकमुन्मथयत् ॥ ३० ॥

यत्र च उत्पलमालिन्यो वाप्यः तत्र किम्पुरुषैः प्राप्तं वनं दृष्ट्वा प्राप्ता इति पाठान्तरे किम्पुरुषैः प्राप्ता वापीश्च दृष्ट्वेत्यर्थः ॥ ३१ ॥

योजनशतमुत्सेध उच्छ्रायो यस्य पादोनैः सर्वतः पंचसप्ततियोजनप्रमाणैर्विटपैः शाखाभिरायतो विस्तृतः पर्यक् सर्वतः कृताऽचला छायायेन निर्गतं नीडं यस्मात् ॥ ३२ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी

पुण्यन्तु चारु पवित्राणि कोशात् अतिसुगंधमिति व्याख्यातम् गंगायास्स्वतः परमपुण्यत्वात् तस्मान्मन्वंतरेऽपि गंगाऽऽगमनं प्रकारान्तरेण श्रयम मध्यस्तद्दर्शनं च (११) विलोकयेत्यर्द्धकम ॥ २२—२६ ॥

तारेति पद्यकम यत्र च वने प्राप्ता इति पाठान्तरम् ॥२७—३१॥

ताप आतपः आधिदैविकादिश्च तेन वर्जितः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

कर्णैर्गोकर्णाख्यैः ऊर्णामृगैः एकपदैः अश्वमुखैश्च मृगनाभिभिःकस्तूरी मृगैश्च नितरां जुष्टं कदलीषण्डैः संरुद्धान्यावृतानि नलिनीनां कमलाकराणां पुलिनानि तैः श्रीःशोभा यस्मिन् तम ॥ २१ ॥

स्नानेन पुण्य करं पुण्य संपादकम् उदकं यस्यां तया मत्या निर्मलया नंदया गंगया परिवेष्टितम् भूतेशस्य रुद्रस्य गिरिं कैलासं विलोक्य देवाः विस्मयं ययुःप्रापुः ॥ २९ ॥

ते देवा तत्रागरोतस्य रुद्रस्यालकां नाम अलिकेति प्रसिद्धां रमणीयां पुरीं सौगंधिकाख्यं वनंचापि ददृशुः सौगंधिकनाम्नोऽन्वर्थतामाह यत्र वने सौगंधिकं नाम पंकजं भवति जातावेक वचनम् २३

पुरीं वर्णयति नंदाचेति चतुर्भिः पुरः पुरात् बाह्यतः बाह्ये नंदा अलक नंदा चेतिद्वे सरितौ भवतः सरितौ विशिनष्टि सार्द्धद्वये नतीर्थपादस्य हरेःपदांभोजरजसा अतीवास्यंत पावने भगवत्पदाम्भोजरजोयुक्तत्वादत्यंतपावित्र्यकरे इत्यर्थः ॥ २४ ॥

हे क्षत्तः ! सुरस्त्रियः स्वधिष्ण्यतः स्वविमानेभ्यः ॥ अवरुह्य च रतिकर्शिताः विहारश्रान्ताः सत्यः ययोः सरितोर्विगाह्य स्वपुंसः स्वप्रियान सिंचंत्यः क्रीडंति जलक्रीडां कुर्वंति ॥ २५ ॥

ययोः सरितोरंभः वितृषो पि विगततृष्णा अपि गजाः गजीःकारिणीः अंभःपाययंत्यःपानं कारयंत्यः पिबंति तत्रहेतुः तासां सुरस्त्रीणां स्नानेन विभ्रष्टगलितं यद्गलनं कुंकुमं तेन पिंजरं पीतवर्णम् ॥२६॥

पुनः पुरीं विशिनष्टि तारेति तारं रूप्यंताराद् मयविमानानां

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

शतैः संकुलां पुण्यजनैः यातुधानैस्तेषांस्त्रीभिश्च जुष्टां तत्रदृष्टांतः तडिद्भिर्मेघैः सहितं खमाकाशं यथेति तत्र विमानानि खमिव पुण्यजनामेघा इव तत्स्त्रियः तडिदिव ॥ २७ ॥

एवं भूतां यक्षेश्वरस्य कुबेरस्य पुरीमलकां हित्वा अति क्रम्य तत्सौगंधिकाख्यं वनंच दृष्ट्वा तेदेवा आरात् वटं ददृशुरिति चतुर्थेनान्वयः कथंभूतं वनं चित्राणि माल्यानि मालायोग्यानि पुष्पाणि किसलयादीनि परिच्छदानि क्रीडोपकरणानि येषु तैः कामान् वर्षद्भि र्द्रुमैर्हृद्यं मनोहरम् ॥ २८ ॥

रक्तकंठखगानां कोकिलपक्षिणाम् अनीकस्य समूहस्य स्वरैर्मण्डिताः षट्पदा यस्मिन् कलहंसानां कुलस्य प्रेष्ठं खरदंडानि पद्मानि तैर्युक्ताः जलाशया यस्मिन् ॥ २९ ॥

वनगजैः संघृष्टाः हरिचंदन द्रुमास्तत्संबंधिना वायुना पुण्यजनस्त्रीणां मनः अध्याधिकं मुहुरुन्मदयत्परवशी कुर्वत् ॥ ३० ॥

वैदूर्यमणिभिः कृतानि कल्पितानि सोपानानि यासु उत्पलानांमालाः पंक्तयो यासु ताः आर्षत्वा व्यत्ययेन द्वितीया वाप्यः किंपुरुषैर्व्याप्ताः यस्मिन् वनंसंति तद्वनं दृष्ट्वा यद्वावाप्य इति व्यत्ययः त्प्रथमावनंवापीश्च दृष्ट्वा आरात् समीपे वटं ते देवा ददृशुः ॥ ३१ ॥

वटं विशिनष्टि सद्दति सवटः योजनशतमुत्सेधः उच्छ्रयो यस्यपादोनैः सर्वतः पंचसप्तति योजन प्रमाणैर्विटपैः शाखाभिश्चायतो विस्तृतः पर्यक्परितः कृता अचलानिश्चला छाया येन निर्गतं नीडं कुलायं यस्मात् तापेन सूर्याद्यातपेन रहितः ॥ ३२ ॥

श्रीमद्विजयध्वज तीर्थकृतपदरत्नावली

कर्णौ गोकर्णः कर्णविहीनो वा ॥ कर्णः कर्णविहिन स्याद्ह्रस्तुच्छिन्नपुच्छक इति यादवः कर्णाश्च ओर्णाश्च एकपादाश्चाश्वास्याश्च कर्णोर्णैकपदाश्वास्यास्तैः ओर्णादयोपि मृगविशेषाः मृगनाभिभिः कस्तूरिकामृगैः कदलीखंडेन संरुद्धस्य संवृतस्य नलिनीपुलिनस्य पद्माकरसिकतामयोच्चस्थलस्य श्रीर्यस्मिन्स तथा तम् ॥ २१ ॥

नंदया गंगा शाखया नद्या पर्यस्तं परिवृतम् भूतेशगिरिं श्रीकैलासम् ॥ २२ ॥

तत्र कैलासे पुनः किं चित्रमपश्यन्निति तत्राह ददृशुरिति तन्नामसौगंधिकं नाम ॥ २३ ॥

अलकाया बाह्यतो बहिर्भागे तीर्थपादः श्रीनारायणस्तत्पादपद्मरजसा मिश्रितत्वादतीव पावने शुभे ॥ २४ ॥

स्वधिष्ण्यतः स्वविमानात् ॥ २५ ॥

तासां स्नाने न विभ्रष्टं संक्रांतं कुचकुंकुमं तेन पिंजरं पीतरक्तम् ॥ २६ ॥

तारैः रजतैर्मौक्तिकैर्वा हेमभिः सुवर्णैर्महारत्नैर्माणिक्यादिभिरलंकृतानां विमानानां शतैःसंकुलां निविडां कथमिव स्थितां तडित्घनेन च सह वर्तमानं खमाकाशं यथा तथा ॥ २७ ॥

अलकांतःप्रवेशे तद्वैचित्र्यदर्शनेन तत्स्थजनसंलापेन कालक्षेपेण च्छिन्नवृत्तदेहन यज्ञानुसंधानं दुष्करं स्यादिति धिया तां पुरीं तद्वनं च दृष्ट्वा हित्वाबहिरेवगच्छतस्तेदेवा आराद्वटं ददृशुरित्यन्वयः

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

यक्षेश्वरपुरीं हित्वा तत्सौगन्धिकं च वनं दृष्ट्वा समीपे वटं ददृशुरिति वा तद्वनं विशिनष्टि द्रुमैरित्यादिना चित्राणि माल्यानि पुष्पाणि फलानि च्छदाः पत्राणि येषु ते तथा तैः ॥ २८ ॥

खरो दंडो येषां तानि तथा कलहंसकुलस्य प्रेष्ठानि प्रियतमानि खरदंडानि पद्मानि येषु ते तथोक्ताः ते च जलाशया जलाधाराः कासारा यस्मिंस्त तथोक्तम् ॥ २९ ॥

वनकुंजरैर्वनगजैः कंडूतिनिरासार्थं संघृष्टानां निष्पिष्टानां हरिचंदनानां द्रुजोगंधमिश्रवायुनाऽधिकं पुण्यजनस्त्रीणां मनो मुहुर्मथयद्विलोलयत् ॥ ३० ॥

उत्पलानां माला यासु विद्यंते इत्युत्पलमालिनीरुत्पलमालिन्यः वैदूर्यैः कृतानि सोपानानि कृत्रिमावतारस्थलानि यासु तास्तथा एवंविधा वाप्यो यत्र संतीति शेषः तत्किंपुरुषैर्विलासार्थं व्याप्तम ॥ ३१ ॥

वटं विशिनष्टि सयोजनेति स वटो योजनानां शतमुत्सेधउन्नतिर्यस्य स तथोक्तः चतुर्द्धाविभक्तशतस्य पादश्चतुर्थांशः पंचविंशतिसंख्या तयोना रहिता संख्या पंचसप्तति तावद्भिर्विटपैरायतो विस्तृतः पर्यक् परितो गता कृता पूर्णा अमला छाया यस्य स तथा निर्गतानि नीडानि पक्षिमंदिराणि यस्मात्स तथा तापवर्जितः शीतोष्णारहितः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

पुण्यन्तु चार्थपील्यमरः । चारुत्वं तत्र सौगन्धिकप्रायमेवेति तथा तैर्व्याख्यातम् अतो मन्वन्तरान्तरेऽपि गंगाया आगमनं प्रकारान्तरेण ज्ञेयं मध्यपदलोपश्च ज्ञेयः। विलोकयेति सार्द्धकम ॥२२--२६॥

तारहेमेति पञ्चकम ॥ २७ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

कदलीसमूहैः संरुद्धानि आवृतानि नलिनीनां पुलिनानि तैः श्रीः शोभा यत्र तम् ॥ २१ ॥

नन्दया गंगया पर्यंतं परिवेष्टितं सत्या रुद्राण्याः स्नानेन पुण्यतरमुदकं यस्याः तया ॥ २२ ॥

तन्नाम सौगन्धिकं नाम्न पंकजं भवति। जातावेकवचनम् २३

पुरः पुराद्बाह्यतः सरितौ भवतः ॥ २४ ॥

ययोर्विगाह्य ॥ २५ ॥

ययोरम्भो गजा विगततृषोऽपि पिबन्ति। तत्र हेतुः । तासां सुरस्त्रीणां स्नानेन विभ्रष्टैर्नवकुङ्कुमैः पिञ्जरं पीतवर्णं सुगन्धञ्च २६

तारो मुक्ता तडिद्भिः स्त्रीणां घनैर्विमानानां स्वेन पुर्या सादृश्यम ॥ २७ ॥

यक्षेश्वरपुरीं वनञ्च हित्वा अतिक्रम्य ते देवा आराद्दूराद्वटं ददृशुरित्यन्वयः ॥ २८ ॥

रक्तकण्ठखगानामनीकस्य स्वनैर्मण्डिताः षट्पदाः षट्पदस्वरा यस्मिन् कलहंसकुलप्रेष्ठानि खरदण्डानि पद्मानि येषु ते जलाशया यस्मिंस्तत् ॥ २९ ॥

अधिकं मन उन्मथयत् कामोद्दीपकत्वादिति भावः ॥३०॥

वाप्यः वापीश्च दृष्ट्वा किम्पुरुषैः प्राप्ता प्राप्तमिति पाठे वनविशेषेणम् ३१

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

योजनशतमुत्सेध उच्छ्रायो यस्य सः। पादोनैः सर्वतः पञ्चसप्तति योजनप्रमाणैर्विटपैः शाखाभिरायतो विस्तृतःपादोनैःपर्यक् सर्वतःकृता अचला छाया येन सः। निर्नीडः पक्षियोसर्रहितत्वादनुपद्रवः ॥ ३२ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः।

कदलीनांषंडैः समूहैः संरुद्धान्यावृतानियानिनलिनीपुलिनानितैःश्रीःशोभायस्मिन्स्नानेपुण्यतरोदयंयस्यांतयापर्यस्तंपरिवेष्टितम ॥ २१—२२ ॥

तन्नगिरेःपुरींददृशुः यत्रवनेतन्नामसौगंधिकंपंकजंजातावेकवचनं तद्वनंचददृशुः ॥ २३ ॥

पुरीघ्नायति नंदेतिचतुभिः सरितौपुरः पुरात्बाह्यतोऽन्तः॥२३॥

रतिकर्शिताः क्रीडाश्रांताः स्वांघ्रयपायतः स्वविमानेभ्योऽवरुह्ययोर्नन्दालकनन्दयोर्विगाह्यप्रविश्य पुंसः पतीन्सिंचंत्यः क्रीडंति ॥ २५ ॥

ययोरंभः गजाः गजीः करिण्यः पाययंतो वितृषोऽपिपिबंतितत्रहेतुर्भविशेषणम् तासांसुरस्त्रीणांस्नानेनविभ्रष्टैर्विगलितंयन्नवंकुंकुमंतेनपिंजरंपीतम् रुचिविशेषकरमित्यर्थः ॥ २६ ॥

तारैरजतंतद्दादिमयविमानानांशतैःशंकुलांव्याप्ताम पुण्यजनस्त्रीभिर्जुष्टाम् तत्रदृष्टांतमाह यथाखंसतडिद्घनमिति ॥ २७ ॥

यत्राग्रामीश्वरस्यकुवेरस्यपुरींहित्वा ॥ अतिक्रम्यचित्राणिमाल्यानिपुष्पाणिफलानि छदाः पत्रानिचयेषुतैर्द्रुमैर्दृष्टं मनोज्ञं वनं वापीश्चदृष्ट्वातेवटंददृशुरितिचतुर्थेनान्वयः ॥ २८ ॥

कथंभूतंवनंरक्तकंठानांखगानामनीकस्यसमूहस्यस्वनैः । वाद्यध्वनितुल्यैर्मंडिताः शोभिताः षट्पदाः गायकतुल्याः भ्रमरायस्मिन्नत कलहंसानांकुलस्यप्रेष्ठम् खरदण्डैः पंकजैर्युक्ताजलाशयाः यस्मिन्नतत् ॥ २९ ॥

वनकुञ्जरैः संघृष्टानांहरिचंदनानांवायुनापुण्यजनस्त्रीणांमनः मुहुः अध्यधिकंरुन्मथयत् क्षुभितंकुर्वत् ॥ ३० ॥

वैदूर्यकृतसोपानवाप्यः वार्पाः किंपुरुषैं प्राप्तंसर्वतः सेवितम् वटस्तेददृशुः ॥ ३१ ॥

सवटः योजनशतमुत्सेधः उच्छ्रायोयस्यसः पादोनैः पञ्चसप्तति योजनैर्विटपैरायतोविस्तृतः पर्यक्परितः कृताऽचलाछायायेनसः निर्गतानिनीडानियस्मात् तापवर्जितः त्रिविधतापरहितइत्यर्थः ॥ ३२ ॥

भाषाटीका

तथा कर्णान्त्र एकपद अश्वास्य वृक कस्तूरी मृग इनसे सेवित है। और कदली वृक्षों के समूहों से तलइयों के तीर घिर रहे हैं जिसमें ॥ २१ ॥

और सतीजी के स्नान से सुगंधित जल वाली अलकनन्दा से परिवेष्टित अर्थात घिरा हुआ पर्व (भूतेशगिरि) कैलास को देखकर देवता लोग विस्मय को प्राप्तहुये ॥ २२ ॥

और उसी जगह देवताओं ने परमरमणीय अलकानाम कुवेरकी पुरी को देखा और वनकोभी देखा कि जिसमें सौगंधिक नाम वाले कमल हैं ॥ २३ ॥

तस्मिन्महायोगमये मुमुक्षुशरणे सुराः ।
ददृशुः शिवमासीनं त्यक्तामर्षमिवांतकम् ॥ ३३ ॥
(१) सनंदनाद्यैर्महासिद्धैः शांतैः संशांतविग्रहम् ।
उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसाम् ॥ ३४ ॥
विद्यातपोयोगपथमास्थितं तमधीश्वरम् ।
चरंतं विश्वसुहृदं वात्सल्याल्लोकमंगलम् ॥ ३५ ॥
लिंगं च तापसाभीष्टं भस्मदंडजटाजिनम् ।
अंगेन संध्याभ्ररुचा चंद्रलेखां च बिभ्रतम् ॥ ३६ ॥
उपविष्टं दर्भमय्यां बृस्यां ब्रह्मसनातनम् ।
नारदाय प्रवोचंतं पृच्छते शृण्वतां सताम् ॥ ३७ ॥
कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि ।
बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया ॥ ३८ ॥
तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं योगकक्षाम् ।
सलोकपालामुनयोमनूनामाद्यं मनुं प्रांजलयः प्रणेमुः ॥ ३९ ॥
स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभि (१) वंदितांघ्रिः ।
उत्थाय चक्रे शिरसाऽभिवंदनमर्हत्तमः कस्य यथैव विष्णुः ॥ ४०॥
तथाऽपरे सिद्धगणा महर्षिभिर्ये वै समंतदानुनीललोहितम् ।
नमस्कृतः प्राहशशांकशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ॥ ४१

भाषाटीका

पुरके वाहर नंदा और अलकनन्दाये दोनों सरिताओं को देखा जोकि तीर्थपाद श्रीगोविन्द के चरण कमल के रजसे अत्यन्त पावन है ॥ २४ ॥

हे विदुर ! जिनके बीच अपने महलों से उतर कर रतिसे खिन्नदेवांगना प्रवेशकर पुरुषोंको सींचती हुई क्रीडा करतीहैं ॥ २५ ॥

जिन सरितों के जल को देवस्त्रियों के स्नान से छूटा जो नवीन कुंकुम तिससे वासित होने से विना प्यास के भी हाथी अपन हथिनियों को पान करावते हुवे आपभी पीते हैं ॥ २६ ॥

चांदी सोना और रत्नों से जटित एसे सैकडों सदनों से व्याप्त होरही है यक्षों की स्त्रियों से एसे शोभित होरही है जैसे विद्युलियोंसे मेघ ॥ २७ ॥

इस प्रकारकी यक्षेश्वरकी पुरी अलका को अतिक्रमण कर चित्र विचित्र माला फूलपत्र धारे कामनावों पूर्ण करने वाले वृक्षों से रमणीय एसे सौगन्धिक नाम वनको भी लंघन करा ॥२८॥

जिस वनमें रक्तकंठ पक्षियों के स्वर से भ्रमरों का स्वरमंडित हो रहा है और जिसमें कलहंसों के समूहोंको प्रिय एसा कमलों से व्याप्त जलाशय हैं ॥ २९ ॥

फिर वह वन जंगली हस्तियों से संघृष्ट हरिचन्दन की वायु द्वारा यक्षों की स्त्रियों के मन वारंवार मथन करता है ॥ ३० ॥

भाषाटीका

जिसमें वैदुर्य्य मणि की सोपान वाली कमलों से भरी हुई वापीं हैं किंपुरुष लोगों से प्राप्त एसे वनको देख देख कर आगे चलके देखतो एक वट देख पडा ॥ ३१ ॥

वह वट कैसा है कि सौयोजन का तो ऊंचा है और पचहत्तर योजनकी विस्तार वाली शाखावों फैलाहुआ है चारों तरफ अचल जिसकी छाया है और ऊपर कोई घोंसला नहीं है और ताप से वर्जित है ॥ ३२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

मुमुक्षूणांशरणे आश्रये त्यक्तामर्षोऽतकस्तत्तुल्यम् ॥ ३३ ॥

तांविशिनष्टि सनंदनाद्यैरितिपंचभिः सख्याकुबेरेणोपास्यमानम् ॥ ३४ ॥

विद्याउपासनातपश्चित्तैकाग्र्यंयोगः समाधिस्तेषांपंथानंप्रवर्त्तन द्वारालोकस्यमंगलंहितंतथावात्सल्यात्स्नेहाद्वाचरंतम् ॥ ३५ ॥

संध्याऽभ्ररुचारक्तवर्णेनांगेनभस्मादिलिंगंचंद्रलेखांचबिभ्रतम् ॥ ३६ ॥

ब्रंतनामासनंबृसीतस्याम् ब्रह्मप्रवोचंतम् ॥ ३७ ॥

पा० (१) सनन्दाद्यैरिति श्रीधर० ॥ (२) वन्दितांघ्रिमिति श्रीवीरराघवाचार्यराधारमणदासगोस्वामिनोःसंमतःपाठः ।

श्रीधरस्वामिकृत भावार्थदीपिका

सव्यंपादपद्मंदक्षिणे ऊरौ कृत्वा विन्यस्य जानुनि च सव्यबाहुं कृत्वा दक्षिणबाहुं प्रकोष्ठमणिबंधस्थाने अक्षमालां च कृत्वा दक्षिणहस्तकृतया तर्कमुद्रयोपलक्षितमासीनमित्यर्थः तदुक्तं योगशास्त्रे "एकपादमथैकस्मिन्विन्यस्योरुं संस्थितम्। इतरस्मिंस्तथा बाहुं वीरासनमिदं स्मृतं तर्कमुद्रा चोक्ता तर्जन्यंगुष्ठयोरग्रे मिथः संयोज्य चांगुलीः। प्रसार्य बंधनं प्राहुस्तर्कमुद्रेति मांत्रिका,, इति ॥ ३८ ॥

ब्रह्मनिर्वाणंब्रह्मानंदस्तत्र समाधिरैकाग्र्यं तमाश्रितम् योगकक्षां योगपट्टं च वामजानुदृढीकरणार्थं विशेषेणोपाश्रितवंतम् मननशीलानां तेषामाद्यमुख्यम् ॥ ३९ ॥

महत्तमो विष्णुर्वामनमूर्तिर्यथा कस्य कश्यपस्य ॥ ४० ॥

महर्षिभिः सहितायेनीललोहितमनुवर्तंतेऽपि तस्मै वंदनचक्रुः एवं सर्वैर्नमस्कृतःप्राह कृतःप्रणामो देवैर्यस्मै तम् ॥ ४१ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी

तस्मिन्निति षट्कम् (१) महायोगमये समाधिप्राचुर्यस्थाने ॥३३॥

शांतैः शान्तिरतिर्मन्त्रिः ॥ सख्यं शांतः शमादिनिष्ठो विग्रहो यस्य तम् उपरतविरोधमिति वा (२) ॥ ३४ ॥

तेषां विद्यादीनां पंथानं मार्गमास्थितं प्रवर्तनद्वाराऽऽश्रितं शिक्षामंतराऽऽत्मारामस्य तदनुष्ठाने प्रयोजनाऽभावात् तदेवाह लोकस्य मंगल मित्यादि चरन्तं कुर्वन्तम् (३) ॥३५ ॥

तापसाः शैवास्तेषामभीष्टम् (४) ॥ ३६ ॥

अथ बृंहति बृंहयति तद्ब्रह्मेति श्रुतेः स्वरूपेण गुणैश्चातिशयं ब्रह्म भगवत्तत्त्वम् (५) ॥ ३७ ॥

तर्कमुद्रायास्सार्थविकत्वाऽभावादुपलक्षणे तृतीया अत इत्यर्थं इत्युक्तम् (६) ॥ ३८ ॥

योगपट्टं योगाङ्गसाधनासनोपयोगिपट्टवस्त्रम् ॥ ३९ ॥

स त्विति सार्द्धकम् अभिवंदितांघ्रिरित्यत्राऽभिवन्दितांघ्रिमिसेव पाठः ॥ ४० ॥

नमस्कृत इत्यर्द्धकम् भयस्यातिसद्भावात्तत्प्रसरत्यर्थं प्रहसन्निवेत्युक्तम् ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

महायोगमये महायोगोभगवदुपासनायोगस्तत्प्रचुरे महायोगनिष्ठपुरुषप्राचुर्यात् तत्स्थानस्य महायोगमयत्वं मुमुक्षवः ॥ अज्ञानान्मोक्तुमिच्छवः जिज्ञासव इतियावत् ॥ तेषां शरणमाश्रयं तस्मिन् वटमूले आसीनमुपविष्टं त्यक्तामर्षो योऽतकस्तत्तुल्यं शिवं सुरा ददृशुः ॥ ३३ ॥

शिवंविशिनष्टि सनंदाद्यैरितिपंचभिः महासिद्धैः शान्तैः सनंदाद्यैर्गुह्यकराजस्यापिप्रभुणासख्याश्रवणेन च उपास्यमानं सख्यमानं संशांतविग्रहंनिर्वैरंकृतापराधेष्वपिदेवेष्वपिकृपालुमित्यर्थः ॥ ३४ ॥

विद्याज्ञानयोगः तपः कर्मयोगः ताभ्यांयुक्तोयोगपथः भगवद्भक्तिमार्गः तमास्थितंज्ञानकर्मानुगृहीतभगवद्भक्तियोगनिष्ठमित्यर्थःअधीश्वरैजितेंद्रियम् विश्वसुहृदंचराचराणांसर्वाणिभूतानिभगवद्वपुः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

अतस्तदानुकूल्यंमेस्यादित्युक्तरीत्याविश्वानुकूलम् अतएववात्सल्याल्लोकानांमंगलंक्षेममेव चरंतं कुर्वंतम् ॥ ३५ ॥

संध्याभ्ररुचारक्तवर्णेनअंगेनतापसाभीष्टंभस्मादिलिंगंचंद्ररेखांचबिभ्रतम् ॥ ३६ ॥

दर्भमय्यांवृस्यांबृवंतोऽस्यांसीदंतीतिवृशीपृषोदरादित्वात्साधुः आस्तरणविशेषस्तस्यामुपविष्टंपृच्छतेनारदायसतामन्येषांसनंदनादीनां शृण्वतांसतांसनातनंब्रह्मपरमात्मानंप्रणवंवाप्रवोचंतम् ॥ ३७ ॥

सव्यंपादंदक्षिणेऊरौकृत्वा विन्यस्यजानुनिसव्येसव्यबाहुंकृत्वा दक्षिणेप्रकोष्ठेमणिबंधस्थाने अक्षमालांकृत्वादक्षिणहस्तकृतयातर्कमुद्रयोपलक्षितमासीनमित्यर्थः तदुक्तंयोगशास्त्रेएकंपादमथैकस्मिन्विन्यस्योरुसंस्थितम्॥इतरस्मिंस्तथाबाहुं वीरासनमिदंस्मृतं तर्कमुद्राचोक्तातर्जन्यंगुष्ठयोर्मध्येमिथः संयुज्यचांगुलीःप्रसार्यबंधनंप्राहुस्तर्कमुद्रेतिमांत्रिकाइति ॥ ३८ ॥

तं ब्रह्मनिर्वाणसमाधिम आनंदरूपब्रह्मविषयसमाधिमाश्रितं योगकक्ष्यां योगपथं व्यपाश्रितं विशेषेणापाश्रितं मुनीनामाद्यं मुख्यं मुनिं गिरीशं लोकपालसहिता मुनयः बद्धांजलयः प्रणमुर्नमस्कृतवंतः ॥ ३९ ॥

स तु गिरिशः सुरासुरेशैरभिवंदितौ अंघ्री यस्य समागतमात्मयोनिं ब्रह्माणमुपलभ्य ज्ञात्वा तस्मै ब्रह्मणे उत्थायेति पाठांतरं तदा आसनादुत्थाय शिरसा अभिवंदनं प्रणामं चक्रे महत्तमो विष्णुर्वामनरूपः यथा कस्य कश्यपस्य प्रजापतेः यद्वा कस्य चतुर्मुखस्याभिवंदनं चक्रे कस्यरुद्राभिवंद्यत्वं सदृष्टांतमाह महत्तम इति विष्णुर्यथा रुद्रस्य महत्तमः पूज्यः तथा कोऽपीत्यर्थः ॥ ४० ॥

नीललोहितं रुद्रं येपरेसिद्धगणा अनुवर्तंत तैर्महर्षिभिः सह नमस्कृतः आत्मभूः ब्रह्मा कृतप्रणामं कृतः चतुर्मुखविषयः प्रणामोयेन तं शशांकशेखरं कृतप्रणाम इति प्रथमांतपाठेरुद्रेणकृतप्रणामः प्राह ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

सुरा महायोगमये अणैश्वर्यस्वरूपे मुमुक्षूणां शरणे निवासभूते तस्मिन्वटमूले आसीनं शिवं ददृशुरित्यन्वयः ॥ ३३ ॥

सख्या वैश्रवणेन ॥ ३४ ॥

विद्या च तपश्च योगश्च ते तथा तेषां पंथा मार्गस्तमास्थितमनुतिष्ठंतं तदधीश्वरं तेषां विद्यादीनामधीश्वरं विषयमुपदेष्टारं स्वामिनं च लोकं मंगलयतीति लोकमंगलं विश्वस्य सुहृदमनिमित्तबंधुं श्रीनारायणं वात्सल्याद्भक्त्युद्रेकाद्ध्यायंतम् ॥ ३५ ॥

संध्याभ्ररुचा गौर्यालिंगनेन संक्रांततत्कुचकुंकुमेन रक्तत्वात् स्वतो धवलत्वात्संध्याकालभवमेघवर्णेनांगेन तापसाभीष्टं भस्म च दंडश्च जटाचाऽजिनं च यस्मिंस्तथा तल्लिंगं वेषं लिंगं शेफासि वेषे च चिह्न बुद्ध्यादिसंहताविति यादवः चंद्रस्य लेखां कलां च बिभ्रतं भस्मोद्धूलनेन नेत्राद्यवयवानां रक्तत्वाद्वा संध्याभ्ररुचेति ॥ ३६ ॥

वृस्यां यतियोग्यासने । यतीनामासनं वृसीति हलः । सनातनं नित्यं ब्रह्म वेदतत्त्वम् ॥ ३७ ॥

दक्षिणे ऊरौ सव्यं पादपद्मं कृत्वा सव्ये जानुनि च सव्यबाहुं दक्षिणे जानुनि च दक्षिणबाहुं कृत्वा प्रकोष्ठे कराग्रेऽक्षमाला यस्य स तथा तं तर्कमुद्रया ज्ञानमुद्रयाऽऽसीनम् ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

एवं विधं शिवं दृष्ट्वा किं चक्रुरिति तत्राह तं ब्रह्मेति मनूनां मननशीलानामुपासकानामाद्यं मनुं ब्रह्मावयवे योनिर्वाणसमाधिः शरीराभिमानत्यागलक्षणाच्चित्तैकाग्रता तादृशीमवस्थामाश्रितं योगकक्ष्यां योगपट्टिकाम् ॥ ३९ ॥

सर्वेषु प्रणमन्तु सत्सु ब्रह्मा किमकार्षीदित्याशंक्य पितृत्वाद्ब्रह्मज्येष्ठत्वाद्गुरुत्वाच्छर्वः प्रभुत्वाच्चोत्थाय शिवशर्मात्मर्माभिवादयामीत्यभिवाद्य शिवो ब्रह्माणमस्तौषीदित्याह स तूपलभ्येति शिरसंत्येनैनाप्रांगविशिष्टां नतिं ध्वनयति नतिं विदिताप्नि यथेति यथाविष्णोरप्रांगविशिष्टत्वेन नमनं करोति तथेत्यर्थः सर्वथ्यसूर्यादपि तेजिष्ठेन रुद्रेण प्रणतस्य विरिञ्चस्य माहात्म्यातिशयोऽस्तीति किं वक्तव्यमिति भावेन शिवं विदितानपि महत्तम इति अर्कस्य सकाशादपि महत्तमस्तेजस्वितम इत्यर्थः गुणगुणिनोरभेदाभिप्रायेणायं प्रयोगः "तेजोऽर्थे उत्तमार्थे च पूज्यार्थे च प्रयुज्यते महच्छब्दो महःशब्दो मान्यशब्दस्तथैव च,, वचनात्तेजोऽर्थो महच्छब्द इति सिद्धम् ॥ ४० ॥

तत्र ब्रह्मा स्वगुरुत्वमभिनयन् भवं वक्तीत्याह तथेति तथा रुद्रस्य समन्तात्स्थिता अपरे ये सिद्धगणास्तैर्महर्षिभिः सह नीललोहितम् अनु नमस्कृतः प्रहसन्निवात्मभूर्ब्रह्माऽऽत्मनं कृतप्रणामं शशांकशेखरं प्राहेत्यन्वयः ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तस्मिन्निति षट्कम् ॥ ३३ ॥

सनन्दनाद्यैरित्यत्र सनकाद्यैरिति सम्बन्धोक्तिः ॥ ३४—३५ ॥

तापसाः शैवाः तेषामभीष्टम्। अंगेनेत्यत्र कक्षेणेति चित्सुखः कक्षया योगपट्टेन ॥ ३६ ॥

ब्रह्म श्रीभगवत्तत्त्वं। प्रवोचन्तमित्युपदिशन्तमित्यर्थः ॥३७॥

बाहुं करम् ॥ ३८—३९ ॥

स तूपलभ्येति सार्द्धकं ब्रह्मणः प्रकटेन वन्दनेन सत्त्वं विशुद्धमित्यस्य तथा व्याख्यानं प्रकटीकृतम् ॥ नमस्कृतइत्यर्द्धकम् ॥ ४० ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

सन्तप्तमिवेति तस्मिन् कृतस्यापराधस्य स्मृत्या त्यक्तामर्षमिवेति तदपि स्वेषु क्रोधराहित्यमिव ॥ ३३ ॥

सिद्धैरुपास्यमानं सख्या कुबेरेण च ॥ ३४ ॥

विद्यातपोयोगानां पन्थानं प्रवर्त्तनद्वारा आस्थितमाश्रितं लोकमंगलं तदाचरंतम् ॥ ३५ ॥

तापसानां शैवानां सन्ध्याभ्ररुचा रक्तवर्णेनांगेन ॥ ३६ ॥

उन्नितनामासनं बृसी तस्यामुपविष्टं ब्रह्म वेदं शृण्वतां सनन्दनाद्यैरिति पूर्वोक्तैः पठ्यमानत्वात्तेष्वपि नारदस्य श्रेष्ठत्वं तस्य भक्तत्वात् तत्प्रश्नस्य वेदस्यापि प्रायो भक्तिप्रतिपादकत्वं ज्ञेयम् ॥ ३७ ॥

सव्यं पादपद्मं दक्षिणे ऊरौ कृत्वा जानुनि च सव्ये सव्यं बाहुं कृत्वा दक्षिणबाहुप्रकोष्ठे मणिबन्धस्थाने अक्षमालां कृत्वा दक्षिणपाणिकृतया तर्कमुद्रया उपलक्षितमासीनमित्यर्थः तदुक्तं योगशास्त्रे एकंपादमथैकस्मिन् विन्यस्योरुणिसंस्थितम्। इतरस्मिंस्तथा बाहुं वीरासनमिदं स्मृतं तर्कमुद्रा चोक्ता तर्जन्यंगुष्ठयोरग्रे मिथः संयोज्य चांगुलीः। प्रसार्य तत्परं प्राहुस्तर्कमुद्रेति मान्त्रिका इति ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

ब्रह्मनिर्वाणं ब्रह्मानन्दम्। "भवोत्तुजालस्थमिहाशुभात्मभूःशरीरिणः संसृतिचक्रशातनं तद्ब्रह्मनिर्वाणसुखं विदुर्बुधा" इति प्रह्लादोक्तेः मोक्षजालस्थनं वा तत्र समाधिं चित्तैकाग्र्यमाश्रितं। योगकक्षां वामजानुदृढीकरणार्थं योगपट्टञ्च विशेषेणापाश्रितं। मनूनां मननशीलानामाद्यं मुख्यम् ॥ ३९ ॥

अभिवन्दनमर्थात्तस्यात्मयोनेश्चक्रे अर्हत्तमः यद्यपि स्वतः पूज्यस्तदपि तस्य पितृत्वादिति भावः यथा विष्णुर्वामनः कस्य कश्यप प्रजापतेः ॥ महर्षिभिः सहिताः ये नारदादयो नीललोहितमनुवर्त्तन्ते स्म तेऽपि तस्य वन्दनं चक्रुः एवं नमस्कृतो ब्रह्माकृतःप्रणामो दर्पवर्षस्मैतं शिवमित्यनेनातिभयाद्बहिरेवमुखप्रसादः प्रकाशित इत्युक्तम् ॥ ४० ॥ ४१ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

महायोगोभगवद्भजनयोगस्तन्मयं भगवद्रूपं मुमुक्षूणांशरणेगृहे त्यक्तोऽमर्षो येन एवंभूतमन्तकमिवासीनम् ॥ ३३ ॥

त्यक्तामर्षान्तकतुल्यतायांहेतुंदर्शयन् शिवं विशिनष्टिसनंदनाद्यैरितिपञ्चभिः सनंदनाद्यैः स्वज्येष्ठभ्रातृभिः संशान्तविग्रहंदक्षविषयकक्रोधाग्निवारितमित्यर्थः सख्या धनदेनोपास्यमानंच ॥ ३४ ॥

अधीश्वरंलोकनाथम् अतएववात्सल्यात् लोकानांमंगलंहितंचरंतं विद्याभगवदुपासनातपआदितत्साधनंसत्साधनंभगवदुपासनामार्गमास्थितम् सर्वलोकाविरोधेनसांगोभगवदुपासनांकुर्वाणमित्यर्थः ३५

तत्स्वभावानुरूपं तपआहलिंगंचेति सन्ध्याभ्ररुचा किञ्चिद्रक्तवर्णेनांगेन देहेन तापसानामभीष्टं भस्मादिलिंगं तपश्चिह्नं चन्द्रलेखाञ्च लोकमङ्गलार्थं बिभ्राणम् ॥ ३६ ॥

भगवदुपासनानिष्ठांदर्शयति दर्भमय्यां कुशनिर्मितायां बृस्यां व्रतिनामासने उपविष्टम् नारदाय कनिष्ठभ्रात्रे सनातनं ब्रह्म "अहोभाग्यमहोभाग्यं नन्दगोपव्रजौकसां। यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातन"मिति वक्ष्यमाणं भगवंतं प्रवोचन्तं वर्णयन्तम् ॥ ३७ ॥

किञ्च सव्यं पादपद्मं दक्षिणे ऊरौ कृत्वा वामजानुनि वामबाहुं च कृत्वा दक्षिणबाहुप्रकोष्ठे मणिबन्धस्थाने अक्षमालां कृत्वा वादिहस्तकृतया तर्कमुद्रयोपलक्षितमासीनं तादृशासनमुद्रयोर्लक्षणे उक्ते तन्त्रे "एकं पादमथैकस्मिन् विन्यस्योरुणि संस्थितम्। इतरस्मिंस्तथा बाहुं वीरासनमिदं स्मृतम्। तर्जन्यंगुष्ठयोरग्रे मिथः संयोज्य चांगुलीः। प्रसार्य यत्परं प्राहुस्तर्कमुद्रेति मान्त्रिकाः ॥ ३८ ॥

ब्रह्मणि वासुदेवे निर्वाणसमाधिमखण्डं चित्तैकाग्र्यमाश्रितं योगकक्षां योगपट्टं च वामजानुदृढीकरणार्थं व्युपाश्रितम् मनूनां मननशीलानामाद्यं मुख्यमनुम लोकपालैःसहितामुनयःप्रणेमुः ॥ ३९ ॥

कस्य कश्यपस्य विष्णुर्वामनः ॥ ४० ॥

महर्षिभिः सह ये अपरे सिद्धगणाः नीललोहितम् समन्तत आसन् तेऽपि अनुअनन्तरमेव तथा तस्मै अभिवन्दनं चक्रुः एवं सर्वैर्नमस्कृतः कृतःप्रणामो येन तं शशाङ्कशेखरं प्रतिप्रहसन्निव अहं वीरभद्रोत्पत्तिदक्षादिसंहारहेतुरित्यभिप्रायेण मर्माणि मारुढोऽसि किमित्येवमुपहसन्निव श्रीशिवस्यापि सखेव वर्तास्मन् भगवान् वासुदेवोऽधोक्षजोऽमे नमसा विधीयते इत्याद्युक्तेः श्रीवासुदेवानन्यभक्तत्वेनेश्वरत्वाभावादिवशब्दः सर्वोपास्यं सर्वशक्तिम् सर्वकारणकारणं परब्रह्मादिपदवाच्यम् भगवन्तं शिवसान्त्वनार्थेतत्प्रेरकं तदन्तर्यामिणं श्रीवासुदेवं प्रत्याह वक्ष्यमाणैश्चतुर्भिः श्लोकैः ॥ ४१ ॥

ब्रह्मोवाच ॥

जाने त्वामीशं विश्वस्य जगतोयोनिबीजयोः ।
शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरन्तरम् ॥ ४२ ॥
त्वमेव भगवन्नेताञ्छिवशक्त्योः सरूपयोः ।
विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटोयथा ॥ ४३ ॥
त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथाध्वरम् ।
त्वयैव लोकेऽवसिताश्च सेतवोयान् ब्राह्मणाः श्रद्दधते धृतव्रताः ॥ ४४ ॥
त्वं कर्मणां मङ्गल मङ्गलानां कर्तुः स्म लोके तनुषे स्वः परं वा ।
अमङ्गलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्य चित् ॥ ४५ ॥
न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव ।
भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोऽभिभवेद्यथा पशुम् ॥ ४६ ॥
पृथग्धियः कर्मदृशोदुराशयाः परोदयेनार्पितहृद्रुजोऽनिशम् ॥
परान् दुरुक्तैर्वितुदन्त्यरुन्तुदास्तान् मावधीर्दैववधान् भवद्विधः ॥ ४७ ॥

भाषाटीका

महायोगी सिद्धि देनेवाले मुमुक्षुजनोंके रक्षा करने वाले उस वट वृक्ष के नीचे बैठे हुये क्रोधको त्यागकरने वाले कालके सदृश श्री महादेवजी का देवताओं ने दर्शन किया ॥ ३३ ॥

पांच श्लोकों से उनका वर्णन करते हैं कैसे हैं कि शांत चित्त वाले सनंदनादि महा सिद्धों से तथा गुह्यकों के अधिपति कुबेर जीसे सेवित हैं स्वयं भी शांत स्वरूप हैं॥ ३४ ॥

स्वयं आप ईश्वर हैं विद्या योग तप इनके मार्ग में स्थित हैं संसार के मित्र हैं कृपासे लोगों के मङ्गल कारक अनुष्ठान को कर रहे हैं ॥ ३५ ॥

सायंकाल के मेघ तुल्य शरीर से भस्म जटा मृगचर्म दंड इत्यादि तपस्या के चिह्नों को धारण किये हैं तथा अर्धचन्द्र को धारण किये हैं ॥ ३६ ॥

कुशासन पर बैठकर सब श्रोताओं के सुनते २ पूछने वाले नारदजी को सनातन तत्त्वको उपदेश कर रहे हैं ॥ ३७ ॥

दाहिनी ऊरुके ऊँपर वाम पाद पद्म को रखकर तथा वामजानु पर वाम हस्त को रखकर दाहिने हाथ के पँहुचा में रुद्राक्ष की माला को धारण करके इस प्रकार वीरासनसे बैठ हस्त से तर्क मुद्रा करके विराजमान हैं ॥ ३८ ॥

योग पट्टिका के आश्रय से ब्रह्मानंद के सुखसे समाधिमें स्थित सब मुनिनके आदि मुनि श्रीमहादेवजी को इंद्रादि लोकपालों के सहित सब मुनि गणोंने हाथ जोडकर प्रणाम किया ॥ ३९ ॥

तब देव दैत्यों से वंदित चरण कमल वे श्रीमहादेवजी आते हुये ब्रह्माजी को देखकर आसन से उठके जैसे स्वयं पूज्य वामन मूर्ति श्रीविष्णु ने कश्यपको वन्दन कियाथा तैसे शिवजीने भी मस्तक से अपने पिता ब्रह्मा को प्रणाम किया ॥ ४० ॥

तैसेही शिवजी के समीप जो सिद्धगण महर्षि थे उनोंने भी ब्रह्मा को प्रणाम किया ऐसे नमस्कार करने पर देवों से नमस्कृत हुये चन्द्रशेखरसे किंचित् हसते हुये ब्रह्माजी बोले ॥ ४१ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

यद्यपित्थं नीचधर्म्मा नमस्करोषि तथापि तवैश्वर्यमहं वेद्मीत्याह जाने इतित्रिभिः विश्वस्येशं जाने तत्र हेतुः जगतो योनिर्या शक्तिः प्रकृतिः बीजश्च यः शिवः पुरुषः तयोः कारणं तथापि निरन्तरं निर्भेदं यद्ब्रह्म निर्विकारं तदेव त्वमिति जाने ॥ ४२ ॥

ननु विरुद्धमेतत्तत्राह त्वमेव सरूपयोरविभक्तयोः शिवशक्त्योः क्रीडन् विश्वसृष्ट्यादि करोषि ऊर्णनाभिरिव । स्वरूपयोरिति पाठे स्वांशयोः कर्ता न विरोधः ॥ ४३ ॥

धर्ममर्थश्च दोग्धि या त्रयी तस्या अभिपत्तये रक्षणाय अध्वरं सृष्टवानसि । यद्वा हे धर्मार्थदुघ ! धर्माद्यभिपत्तये तत्प्रासये दक्षेण सूत्रेण निमित्तेन सेतवो वर्णाश्रममर्यादाश्चावसिताः निबद्धाः निर्णीता इति वा । श्रद्दधते श्रद्धया अनुतिष्ठन्ति ॥ ४४ ॥

सर्वकर्मफलदातापि त्वमेवेत्याह । हे मङ्गल ! मङ्गलानां शुभानां कर्मणां कर्तुः स्वः स्वर्गं परं मोक्षं वा तनुषे । अमङ्गलानामशुभानां कर्मणां कर्तुश्च तमिस्रं नरकं तनुषे । तत्र केन हेतुना तदेव तस्मिन्नेव कर्मणि कस्यचित विपर्ययो भवति ॥ ४५ ॥

त्वत्कोपोऽत्र हेतुरित्यसम्भावितमिति कैमुत्यन्यायेनाह न वै सतां सतः रोषोऽभिभवेत् तव त्वां द्वितीयार्थे षष्ठ्यौ पशुमज्ञं यथाऽभिभवति न तद्वत्स्वधर्म्ये दृष्टान्तः ॥ ४६ ॥

अतो ये पृथग्धियो भेददृशः अतः कर्मण्येव दृष्टिर्येषां दुष्ट आशयो येषां परेषामुदयेन सम्पत्त्या अर्पिता हृदि रुग् येषां अरुन्तुदा मर्मभेत्तारो दैवेनैव वधो येषां तान् भवद्विधो निरुपमः साधुर्गोवधीत् न हन्यात् ॥ ४७ ॥

यस्मिन् यदा पुष्करनाभमायया दुरन्तया स्पृष्टधियः पृथग्दृशः ॥
कुर्वन्ति तत्र ह्यनुकम्पया कृपां न साधवो दैवबलात्कृते क्रमम् ॥ ४८ ॥
भवांस्तु पुंसः परमस्य मायया दुरन्तयाऽस्पृष्टमतिः समस्तदृक् ॥
तया हतात्मस्वनुकर्मचेतः स्वनुग्रहं कर्तुमिहार्हसि प्रभो ! ॥ ४९ ॥
कुर्वध्वरस्योद्धरणं हतस्य भोस्त्वयाऽसमाप्तस्य मनो ! प्रजापतेः ॥
(१)न यत्र भागं तव भागिनो ददुः कुयाज्विनो येन मखो निनीयते ॥ ५० ॥
जीवताद्यजमानोऽयं प्रपद्येताक्षिणी भगः ॥
भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश्च पूर्ववत् ॥ ५१ ॥
देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः ॥
भवताऽनुगृहीतानामाशु मन्योस्त्वनातुरम् ॥ ५२ ॥
एष ते रुद्र ! भागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै ॥
यज्ञस्ते रुद्र ! भागेन कल्पतामद्य यज्ञहन् ! ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां
श्रीरुद्रसांत्वनं नाम षष्ठोऽध्यायः ॥ ६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

प्रत्युत साधूनां कृतमालोक्यानुग्रहमेव कर्तुमर्हसीत्याह द्वाभ्यां । यस्मिन् देशे यदा काले स्पृष्टधियो मोहिताश्चित्ताः । पृथग्दृशो भवन्ति तत्रापराधे साधवो हि अनुकम्पया ऽनन्तरमेव परदुःखासहिष्णुतया चित्तप्रकम्पनेन कृपां कुर्वन्ति न तु क्रमं पराक्रमं कुतः दैवबलात्कृतेऽर्थे ममैव दैवमेव भूतं कोऽत्रापराधस्तेषामिति मत्वा तद्धननं न कुर्वत इत्यर्थः ॥ ४८ ॥

भवांस्तु अस्पृष्टमतिः । अतः समस्तदृक् सर्वज्ञः । तया मायया हत आत्मा येषां तेषु अतएव कर्मानुगतचित्तेषु इहापराधेऽनुग्रहं कर्त्तुमर्हसि ॥ ४९ ॥

एवं सामान्येनोक्त्वा प्रस्तुतमाह कुर्विति त्रिभिः । त्वया हतस्य अतएवासमाप्तस्य प्रजापतेरध्वरस्य हे मनो ! यत्राध्वरे कुयाज्ञिका भागिनोऽपि तव भागं न ददुः भागार्हत्वमाह येन त्वया मखो निनीयते फलं प्राप्यते ॥ ५० ॥

हे मन्यो ! अनातुरमारोग्यमस्तु ॥ ५१ ॥

भागश्चतवास्त्वित्याह एष इति । हे रुद्र ! यावदिस्यर्थे यदित्यव्ययं यज्ञे कृते यावानुच्छिष्टः अवशिष्टोऽर्थः । तावानेव ते तव भागोऽस्तु हे रुद्र ! ते भागेनाद्य यज्ञः कल्पतां सम्पद्यताम ॥ ५२ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृत भावार्थदीपिकायाम
षष्ठोऽध्यायः ॥ ६ ॥

(१) ननीयतइति श्रीवीरराघवाचार्याः ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

ऐश्वर्य्ये तत्प्रतिपाद्यं शैवोपास्यं तत्र ईशत्वे शिवः पुरुषः प्रकृतिनियन्ता जीवाश्च शैवानां हि मते सर्वाशिवः परमकारणं भगवत्प्रकृतिपुरुषाहि तदात्मका एवेति सिद्धान्तः तथापि कारणत्वेऽपि ॥ ४२ ॥

शङ्कते नन्विति एतत् कारणत्वं निर्विकारत्वं च परस्परविरुद्धं विकारव्याप्यत्वात्कारणत्वस्य शिवशक्त्योर्द्वारभूतयोस्सतोः कोऽडन् तथा चचिन्तामणिर्यथाशक्तिद्वारातत्तत्पदार्थप्रसवे उपादानं तथा सद्वारकोपादानत्वात्कारणत्वेऽपि निर्विकारत्वमित्यर्थः नच कारणसद्वारकं न श्रूयते इतिवाच्यम् व्रीहिभिर्यजेत इति व्रीहीणां करणत्वे श्रुतिसिद्धेऽपि पुरोडाशप्रकृतितया तदुपगमात् अविभक्तयोः तमायःपिण्डवाह्निवक्ततयाऽ ज्ञातयोः पाठान्तरे स्वांशयोः प्रकृतेः शक्तित्वात्पुरुषस्य च चिदंशत्वात्स्वांशत्वम् अतः प्रकृतिपुरुषद्वाराकारणत्वात्स्वतश्चाकरणत्वात्कारणत्वनिर्विकारत्वयोर्न विरोध इत्यर्थः ॥ ४३ ॥

पूर्वार्थे विशेष्यभूतायास्त्रय्या अध्याहारावश्यकेति प्रत्यासत्त्या धर्माद्यभिपत्तये इति तु समीचीनमेवेति स्वारस्यम सूत्रेण तंतुना निमित्तेन करणेन विप्राः निर्मिता इत्यत्र तु सूत्रेण स्वल्पाक्षरमसंदिग्धमित्यादिलक्षणकेन शास्त्रेणेति ज्ञेयं किन्तु सन्निहितत्वात् वक्ष्यमाणा तंतुनाऽऽध्वरकूपं पटं तन्तुवाय इव त्वंससर्जिथेत्यपि

श्रीराधारमणदास गोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी

व्याख्येयम् ॥ ४४ ॥

तत्र तयोः शुभाशुभकर्मणोर्मध्ये तदेवेत्यव्ययम तस्मिन्नेव कर्मणि कस्यचित्फलविपर्ययो भवति शुभेऽप्यशुभफलम अशुभेऽपि शुभफलं केन हेतुना भवति वस्तुतस्तु महदपराधतदनुग्रहयोरेव हेतुत्वमभिप्रेतम ॥ ४५ ॥

अत्र फलवैपरीत्ये प्रायेणेति लोकोक्तिः नाभिभवेदेवेत्यर्थः ॥४६॥

अतस्त्वत्कोपस्य हेतुत्वासंभवात् पुनरतः भेददर्शित्वात् ॥४७॥

पृथगदृशः साधुषु सापराधा भवंति ममैव दैवमिति साधारणासाधु पक्षे भवपक्षेतु तेषां पृथग्दृष्टीनामेव दैवबलात्कृतेऽपराधे सति दैवपारवश्यात्तेषां को दोष इति मत्वा हननं न कुर्वत इति व्याख्येयम ॥४८॥

अतः माययाऽस्पृष्टमतित्वात् समस्तदृक भवतीति पृथग्वाक्यम भवांस्तु तुशब्दः साधारणासाधुभ्यो वैशिष्ट्यं बोधयति अर्हसि त्वमिति शेषः॥ ४९ ॥

प्रस्तुतं प्रकृतं प्रकरणप्राप्तमिति यावत् हे मनो ! मननशील ! येन त्वया मखो निर्नीयते तस्य तव भागं न ददुर्यत्र यज्ञे तस्योद्धरणं कुर्वित्यन्वयः ॥ ५० ॥ ५१ ॥

हे मन्यो ! क्रोधस्वरूप ! भवन्तमंतरा न कस्याऽप्यत्र सामर्थ्यमितिभावः ॥ ५२ ॥

संपद्यतां सिद्ध्यतु ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
दीपिन्याख्यायां दीपिका टिप्पण्याम
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

रुद्रस्य भगवदात्मकत्वात्तदावेशावतारत्वाच्च रुद्रं ब्रह्मणः सामानाधिकरण्येन निर्दिशन् यत्त्रिवृत्स्य ब्रह्मणोऽसाधारणं प्रकृति पुरुषशरीरकत्वजगत्कारणत्वधर्ममर्यादास्थापकत्वानुग्रहीतृत्वनिग्रहीतृत्वादि तत्सर्वं रुद्रप्रमेशायै रुद्ररूपेणाऽवस्थितस्य ब्रह्मण आह जाने त्वामित्यादिभिश्चतुर्भिः हे ईश ! रुद्र ! विश्वस्य कृत्स्नस्य चिदचिदात्मकस्य जगतः योनिबीजभूतयोः क्षेत्रेबीजवत्प्रकृतौ पुरुषस्य मिलितत्वात् तयोर्योनिबीजशब्दाभ्यां निर्देशः शक्तेर्ब्रह्मणः अपृथक्सिद्धविशेषणभूतायास्त्रिगुणात्मिकायाः प्रकृतेः तथाशिवस्य निर्गुणमयमेवायमात्मेत्यादिश्रुत्याप्रत्यगात्मनः सुखरूपत्वाभिधानाज्जीवस्य शिवशब्देन निर्देशः तस्य च यत्परं विलक्षणं "तस्य परमार्थहितं"मिति निर्देशाच्चपरशब्देन योगे अन्यारादितरर्तेदिक्छब्देत्यादिना पंचमी प्रकृतिपुरुषाभ्यां स्वरूपतः स्वभावतश्च विलक्षणमित्यर्थः तद्ब्रह्मनिरंतरं निर्भेदं तत्प्रकृतिपुरुषांतरात्मतयावस्थितमपि निरस्तनिखिलहेयत्वेन समस्तकल्याणगुणात्मकत्वेन चैकरूपमित्यर्थः यद्वा निरंतरम अंतरं विच्छेदः तस्मान्निर्गतं सर्वानुस्यूतं सर्वान्तरात्मतयाऽवस्थितमिति यावत् अथवा कार्त्स्न्येन ज्ञानस्वरूपं न तु प्रदेशभेदेन जडमित्यर्थः तद्ब्रह्मत्वां जाने इदञ्च सामानाधिकरण्यं शरीरात्मभावनिबन्धनमावेशावतारत्वनिबन्धनं च न तु तादात्म्यनिबन्धनम् 'एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधसम्भवौ । मयादर्शितपन्थानौ सृष्टिसंहारकारकौ,, सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते !

श्रीमद्वीरराघवाचार्य कृत भागवतचन्द्रचन्द्रिका ॥

नारायणाद्रुद्रो जायते अनपहतपाप्मा वा अहमस्मीत्यादिभिः कार्यत्वकर्मवश्यत्वाद्यभिधानेन रुद्रादेर्जीवत्वनिश्चयात् तादात्म्यासंभवात् अत एव भवांस्तु पुंसः परमस्य मायया दुरंतयाऽस्पृष्टमतिः समस्तदृगिति व्यतिरेकेण निर्देक्ष्यति ॥ ४२ ॥

एवं ब्रह्मसामानाधिकरण्येन रुद्रं निर्दिश्य ब्रह्मरूपातस्य चिदचिच्छरीरकत्वं सृष्ट्यादिकर्तृत्वं चाह

त्वमिति हे भगवन् ! त्वांशयोः स्वस्य तव अंशयोः शिवशक्त्योः प्रकृति पुरुषयोः अत्र विशिष्टवस्त्वेकदेशत्वरूपमंशत्वं विवक्षितं नतु विशेष्यवस्त्वेकदेशत्वं प्रकृति पुरुषयोर्विकाररूपमतज्जगत्त्वमेव सर्वं खल्विदं ब्रह्मेति यत्सामानाधिकरण्यमिदं शरीरात्मभावनिबन्धनमेव कथं रुद्राख्यजीवविशेषस्य कृत्स्नं प्रपञ्चं प्रति आत्मत्वं जगतश्च शरीरत्वं कथं चिच्छरीरात्मभाव संभवेऽपि शरीर वाचिपदस्य शरीरिवाचकेन सामानाधिकरण्यमिति चेदुच्यते नह्यत्र रुद्राख्यजीवविशेषस्यात्मत्वं जगतस्तच्छरीरत्वं चोच्यते किंतु ब्रह्मविदामहं त्वमादिशब्दामहंत्वमादिबुद्धयश्च ब्रह्मपर्यन्ताः तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च कक्षीवानृषिश्च विप्रश्चास्मि त्वं वा अहमस्मि भगवो देवते अहंवैत्वमसि भगवो देवते तद्योऽहं योऽसौसोऽहम अहं हरिः सर्वमिदं जनार्दन इत्यादि श्रुतिस्मृतिभिस्तथाप्रतीतेः एवं चात्र प्रस्तुतश्चतुर्मुखस्य ब्रह्मविदग्रेसरत्वेन तत्प्रयुक्ता अहं त्वमादिशब्दास्तद्बुद्धयश्च ब्रह्मपर्यन्ता इति रुद्रस्य भगवदात्मकत्वेनतत्पर्यन्तत्वमवगम्य ब्रह्मसामानाधिकरण्येन स निर्दिष्टइति विशेष्यभूतस्यब्रह्मणः कृत्स्नचिदचिदंतरात्मत्वंतयोःशरीरत्वंचयुक्तमेव एवमपि कथमात्मवाचिना शरीर वाचिशब्दस्य सामानाधिकरण्यमिति चेत् गवादिशब्दानां जातिगुणादिमात्रपरतया व्युत्पन्नानां शुक्लो गौरित्यादिषु व्यक्ति गुणादिपर्यंतत्वमंतरेणाऽपर्यवसन्नानां यथा व्यक्त्यादिपर्यंतत्वेन सामानाधिकरण्यम एवं जाति गुणादिवत् शरीरस्याऽपृथक् सिद्धविशेषणत्वात्तन्मात्रवाचिमात्रपरतया लोकव्युत्पन्नशरीरिपर्यन्तमभ्यस्तं आत्मादेर्घोजातः इतिवत् तस्यात्मवाचिना सामानाधिकरण्यमुपपन्नमेव न च व्यक्त्याक्षेपात्लक्षणया वा गौः शुक्ल इत्यादि प्रयोगोपपत्तिः अपृथक्सिद्धविशेषणवाचिशब्दस्वस्यलक्षणादि प्रतिबन्धकत्वादन्यथा जात्याकृतिगोत्वगुणादिशब्दानामपि लक्षणादिना गोत्वं शुक्लमित्यादिप्रयोगापत्तेः नन्वेवं जात्यादिशब्दानामप्यपृथक् सिद्धविशेषणवाचिनां व्यक्त्यादिपर्यन्तपर्यवसानेन सामानाधिकरण्यापत्तिरितिचेन्न नियतनिष्कर्षवाचिनां कदाचिदपि विशेष्यपर्यन्तत्वाभावस्य भाष्यादिप्रसिद्धत्वात् अतएव शरीरदेहादिशब्दानां कदाचिदपि नात्मवाचिना सामानाधिकरण्यमितिभाष्यादिषु विस्तरः कृत्स्नचिदचिदात्मकप्रपञ्चशरीरकस्त्वं क्रीडन्निव विश्वं सृजसि पासि रक्षसि अत्सि संहरसि क्रीडन्नित्यनेन जगद्व्यापारो भगवतो लीलेत्युक्तम ऊर्णपट ऊर्णनाभिर्यथेति दृष्टान्तः "यथोर्णनाभिः सृजते गृह्णते चे"ति श्रुति प्रसिद्धः ॥ ४३ ॥

एवं परब्रह्म दृष्ट्याचिदचिच्छरीरकत्वं सृष्ट्यादि कारणत्वमभिधाय पुनस्तद्दृष्ट्या प्रकृताध्वरसंधित्सोत्पादनाय पुरुषार्थविबोधि शास्त्रप्रवर्तकत्वं धर्ममर्यादापालकत्वं चाह त्वमेवेति ॥ धर्मार्थदुघ धर्मार्थौ दोग्धीति धर्मार्थदुक् धर्मादिपुरुषकस्त्वमेव आभिपत्त्वं पुरुषार्थोऽवाप्तये दक्षेणमर्थेन सूत्रेण सूचितेन शास्त्रेण अध्वरं ससर्जिथ सृष्टवानसि पुरुषार्थसाधनभूतधर्मार्थं संपादनोपायाऽध्वरविधिशास्त्रप्रवर्तकस्त्वमेवेत्यर्थः सेतवो वर्णाश्रमधर्ममर्यादाश्च त्वया

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

एवाऽनवसिता निबद्धाः कतसंतवः येऽवसिता इत्यत्राह यान् सेतून् धृत व्रता व्रतनिष्ठाः सन्तो ब्राह्मणाः श्रद्दधते श्रद्धापूर्वकमनुतिष्ठंति ॥ ४४ ॥

पुनर्ब्रह्मरूपेणैव सर्वकर्मकारयिता तत्तत्फलप्रदश्च त्वमेवेत्याह त्वमिति हे मंगल ! शिव ! लोके मंगलानां कुशलानां कर्मणां कर्तुः कर्त्रे इत्यर्थः स्वः स्वर्गं परं मोक्षं वा तनुषे प्रददासि अभिसंहित फलकर्मणां कर्तुः स्वर्गमनभिसंहितफलकर्मणां कर्तुस्तु मोक्षं तनुष इत्यर्थः अमंगलानामकुशलानां कर्मणां कर्तुरुल्बणं तमिस्रं निरयं तनुषे विपर्ययः अमंगलानां कर्मणां कर्तुः कस्य चिदपि स्वर्ग मोक्षप्राप्तिरूपः विपर्ययः केन केन हेतुना भवेत् न केनापीत्यर्थः अतस्तदेव तत्कृतं फलमेव भवति नतद्विपर्यय इत्यर्थः ॥ ४५ ॥

एवं ब्रह्मरूपेण रुद्रंप्रस्तुत्य तस्य प्रसादोत्पिपादयिषया सतां रोषेणायुक्त इतिकमुत्यनयेनाह नचा इति त्वच्चरणे अर्पितम् आत्मा चित्तं येषां सर्वेषु भूतेषु तव द्वितीयार्थे षष्ठी त्वामित्यर्थः अत्र त्वां त्वामिति पदद्वयं ब्रह्मपर्यंतं भगवच्चरणारविंदसमर्पितचित्तानां सर्वाणि भूतानि भगवदात्मतया पश्यतामित्यर्थः भूतानि चात्मानि परमात्मनि अपृथक् सिद्धानि विदन्तां द्रष्टुमिच्छतां पश्यतामित्यर्थः सर्वभूतानां भगवच्छरीरतया तदपृथक्सिद्धत्वेन पश्यतामित्यर्थः एवं भूतानां सताम् अत्रापि द्वितीयार्थे षष्ठी सतः वै अनर्थकारित्वेन प्रसिद्धः रोषः नाभिभवेत् अभिभूतान्न कुर्यात् यथा पशुं मूर्खमाभिभवेत् अतस्तत्र रोषेण युक्त इति किमुवक्तव्यमिति भावः ॥ ४६ ॥

कृतापराधेष्वपि महांतः कृपावंतोभवंति अतः कृतापराधमपि दक्षम् अनुग्रहीतुमर्हसीत्याह त्रिभिः पृथग्दृशः अब्रह्मात्मकत्वतंत्रवस्तुदर्शिनः देवमनुष्यदेहात्माभिमानभिन्नधियोवा कर्मग्रंथबद्धधियां दुष्टआशयोऽन्तःकरणं येषाम् अनिशं परेषामुदयेन संपदा अर्पिता हृदि रुक् व्यथा येषाम् अरुन्तुदा मर्मच्छेत्तारः दुरुक्तैः परान् तुदन्ति व्यथयन्ति तानेवंभूतान् दैवेनैव वधोयेषां तान् भवाद्विधोनिरुपम करुणः मावधीत् माहन्यात् ॥४७॥

प्रत्युत साधूनां वृत्तमालोच्यानुग्रहमेवकर्तुमर्हसीत्याह यस्मिन् देशे यदाकाले दुर्लंघ्यया पुष्करनाभस्य पद्मनाभस्य मायया मुष्टधियः मोहितचित्ताः पृथग्दृशोभवन्ति ज्ञानैकाकारतया एकरूपेप्यात्मनि देवमनुष्यादिभेददर्शिनः तथाऽब्रह्मात्मकत्वदर्शिनश्च भवन्तीत्यर्थः तत्रापराधिषुसाधवोह्यनुकम्पयाअन्तरमेवपरदुःखासहिष्णुतया चित्तप्रकम्पेन कृपां कुर्वन्ति नत्वक्रमम् अप्रियं कुतः दैवबलात्कृतेयं मम दैवमेवं भूतं कोऽत्रापराधस्तेषामिति मत्वा कृपामेव कुर्वन्तीत्यर्थः ॥ ४८ ॥

अतोभवान् परमस्य पुंसः परमपुरुषस्य दुरन्तया मायया अस्पृष्टमतिः भगवत्प्रपन्नत्वेन अमोहितबुद्धिः अतएव समस्तदृक् सर्वार्थदर्शी तया मायया हतात्मसु मोहितचित्तेषु अतएव अनुकर्मे चेतस्सु कर्मानुगुणचित्तवृत्तिषु सापराधजनेषु अनुग्रहङ्कर्तुमर्हसि हे प्रभो ! समर्थ ! ॥ ४९ ॥

एवं सामान्येनोक्त्वाप्रस्तुतमाह कुर्विति त्रिभिः हे मनो ! रुद्र! त्वया हतस्य अत एवासमाप्तस्य प्रजापतेर्दक्षस्य अध्वरस्योद्धरणं पुनरुद्धारं कुरु कुर्याः कस्य कुयाजिकस्य दक्षस्य यत्राध्वरे भागिनः भागार्हस्य तव भागं न ददुः येन त्वया हेतुना मखो न नीयते न समाप्यते निनीयते इति पाठांतरं तदा किमर्थमध्वरोद्धरणमपेक्षं प्रार्थयसे इत्यत्राह मखोयेन त्वयाहेतुनानिनीयेत समाप्यते यदपचारान्न सोविनष्टःपुनस्तस्यैव भवतोऽनुग्रहान्मखः समापनीय इतिभावः ॥५०॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

अयं यजमानोदक्षः जीवतात् जीवतु भगः अक्षिणी प्रपद्येत प्राप्नुयात् ॥ ५१ ॥

आयुर्भिरध्वर्भिस्रभग्नगात्राणामृत्विजां देवानां च पुनर्भवता अनुगृहीतानाम् हे मन्यो ! अनातुरम् आरोग्यमाशु अस्तु ॥ ५२ ॥

भागश्च तवास्त्वित्याह एष इति हे रुद्र ! यावदित्यर्थे यदित्यव्ययम् अध्वरस्ययदुच्छिष्टः यज्ञे कृते यावानवशिष्टार्थस्तावानेष तव भागोऽस्तु हे रुद्र ! यज्ञहन् ! अद्य अधुना तेनैव भागेन यज्ञः कल्प्यतां संकल्प्यताम् ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिकायां
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

भक्तद्वेषमसहमानेन शिवांतर्यामिणा दक्षयज्ञविनाशनमकारीति ध्वनयंस्तद्यज्ञसंधिकामस्तस्मिंस्तुष्टे शिवोऽपि तुष्टः स्यात्तस्य भक्तलक्षणस्याच्छिद्रस्यासंभाव्यैर्गुणैः शिवांतर्यामिणं नरसिंहं स्तौति जाने त्वामिति हे ईश ! अखंडैश्वर्य ! विश्वस्याखिलस्य जगतो योनिबीजयोर्मातृस्थानीयायाः शक्तेः प्रकृतेरुमायाः पितृस्थानीयस्य पुरुषशब्दवाच्यस्य शिवस्य च सकाशाद्यत्परमुत्तमं निरंतरं जगतभेदरहितं शिवशक्त्योः स्थित्वा मातृत्वपितृत्वलक्षणशब्दप्रवृत्तिनिमित्तापादकं त्वां जाने इत्यन्वयः ॥ ४२ ॥

शिवशक्त्योर्योनिबीजत्वमोपचारिकं मुख्यं तु तदंतर्यामिणो हरेरेवेत्यभिप्रेत्याह त्वमेवेति क्रीडन्नूर्णापटऊर्णनाभिर्यथोर्णां सृजति तन्मध्ये क्रीडते च तां हरति तथा त्वं प्रतिमावत् स्वरूपयोः साक्षाद्रूपयोः शिवशक्त्योः स्थित्वा ताभ्यां करणभूताभ्यां भगवंस्त्वमेवैतद्विश्वं सृजसि पासि रक्षस्यत्सि संहरसीत्यन्वयः प्रसिद्धं परित्यज्याप्रसिद्धांतर्यामिकल्पनायां किं कारणमित्यत उक्तं शक्तेः शिवस्य च परमिति नहि शिवशक्त्योः परः शिव इति वक्तुं युक्तं प्रतीतिविरोधात् तर्हि त्वामित्यादिप्रयोगप्रतीतेः कागतिरिति चेन्न अन्तर्याम्यपेक्षया चरितार्थत्वात् तदुक्तं "क्रियन्ते स्तुतयोऽन्यत्र तदंतर्याम्यपेक्षया । न जीवेषु गुणाः पूर्णा यथायोग्या हि तद्गताः" इति "तद्वशत्वात्स्वरूपं तु विष्णोः सर्वमुदीर्यते स्वरूपं सच सर्वस्य बिम्बत्वादेव तूच्यते । साक्षात्स्वरूपम् मत्स्याद्या विष्णोर्नान्ये कथंचन । तस्मादन्यगतादोषा न तस्मिन्पुरुषोत्तमे" इति वचनात् शिवादीनामस्वरूपत्वं मत्स्यादीनां साक्षात्स्वरूपत्वं च सिद्धम् नापलपनीयमिति भावः ॥ ४३ ॥

दक्षयज्ञविनाशनं तदन्तर्यामिणा हरिणा कृतमिति प्रमाणेन ध्वनितं स्फुटयति त्वमेवेति त्वमेव नान्यो धर्मार्थौ दोग्धीति धर्मार्थधुक् तेन धर्मार्थदुघा सूत्रेण प्रत्युत्थानाद्यकरणनिमित्त दोषसूचकेन दक्षेण हेतुना विसर्जिताध्वरः विनाशितयज्ञो भैवसीति शेषः सोऽपि गुणः एवाभूदित्याशयेनाह अभिपत्तय इति तस्यदोषस्याभिपत्तये प्रतीकाराय परिहाराय पाणि मर्कटलोचन इत्यादिदोषसूचकेन दक्षेण यो यज्ञ उपक्रांतस्तं त्वद्भक्तस्वेऽपि स्वद्भक्तद्रोहीवाक्यदोषपरिहाराय भक्तवत्सलस्त्वमेव नाशितवानित्यर्थः दक्षोऽपि त्वद्भक्तश्चेत्तद्यागविनाशं किमकार्षीरित्यत आह त्वय्येवेति तत्तत्कर्मसु यानि यानि व्रतानि त्वया विहितानि तानि धारयन्तो ये ब्राह्मणा वेदशास्त्रपारगास्ते यान् सेतून् श्रद्दधते मन्त्रकोऽपि

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

स्वोत्तममुमुक्षुकद्वेषादिकं न कुर्यादित्यादिलक्षणधर्मस्तेतवोलोके वेदे च स्वयैवाऽवसिता निश्चित्य निर्णीता इत्यर्थः ॥ ४४ ॥

एवकारेण मन्वादिषु स्थित्वा वर्णाश्रमादिसंहिताम् विधत्स इति ध्वनितं स्पष्टयति कर्मणामिति "मंगरलच्" अगिवगिमगिरगिलगिगत्यर्थाः मगेरलच् प्रत्ययो भवति संज्ञाविषये नुमागमश्चकारः स्वरार्थस्तेन मंगलमिति रूपं तस्य सम्बुद्धिर्हेमङ्गलेति हे मङ्गल ! विष्णो ! त्वञ्जीवलोके स्थित्वा मङ्गलानाम् पुण्यानाममङ्गलाना मशुभानां च कर्मणां कर्त्तासि स्वयमन्यानपेक्षस्तेषामुभयेषां कर्मणाम् फलं स्वर्गादिकमुत्यणान्तामिस्रनरकादिकं च तनुषे स्वस्वयोग्यतानुसारेण विस्तृत्यवदासीत्यन्वयः ननु नायं नियमो द्रढीयान् विपर्ययदर्शनादित्यत आह विपर्यय इति केनचिद्भक्तद्वेषादिहेतुना कस्य चिद्वेदधर्मादेः फलविपर्ययः न तु सर्वस्येत्यज्ञानां धर्मसूक्ष्मज्ञानं दुर्लभमिति भावः ॥ ४५ ॥

नन्वेवं तर्हि ब्रह्मणा हरौ रोषलक्षणा दोषारोपः कृत इत्यागत मित्याशंक्य त्वद्भक्तानामप्यनुचितो रोषो नास्ति किमुतत्वेति भावेनाह न वा इति त्वच्चरणार्पितात्मनां सर्वेषु भूतेष्वपि स्थितं तव त्वाम् पश्यतामात्मन्याधारतया भूतानि च पश्यतामेवापृथक् दिदृक्षताम् यथार्थज्ञानेच्छूनाम् सताम् प्रायेणतथा रोषानाभिभवेद्यथा पशोरज्ञानिनोऽभिभवेदित्यन्वयः अनेन रोषविषयेषु रोषः कर्तव्यो मान्यत्रातो न हरौ दोषारोपो ब्रह्मणा कृत इत्युक्तम् भवति चतुर्षु षष्ठीति सूत्रात् द्वितीयादिचतुर्षु षष्ठीवर्तत इति विधानात्तवेत्यस्य द्वितीयार्थेषु युज्यते "विष्णवधीनाजगत्सत्ता प्रतीतिश्चेष्टितं गतिः । इति यन्निश्चितं ज्ञानमपृथग् दर्शनं स्मृतम् ॥ मिथ्या ज्ञानम् पृथग्ज्ञानमिति वेदविदोविदुः । यथैवार्थस्तथा ज्ञानमपृथग् दर्शिरुच्यत„ इति वचनात् अपृथग्दर्शनं नाभेदज्ञानं किन्तुयथावस्तु विज्ञानमिति ज्ञायते ॥ ४६ ॥

हननयोग्यापराध पुरुषविषये यो रोषः स कथं महतोऽपि नाभि भवेदित्याशंक्य सत्यं स्वदोषेण हन्यमानानावधीरिति प्रार्थयामह इति ज्ञापयति पृथगदृश इति ये पृथग्दृक्त्वाविदोषाकराः दुरुक्तैः पराभिवनृद्धन्ति हे देव ! भवांस्तान्मावधीदित्यन्वयः पृथग्विधान् भिन्नप्रकारान् ज्ञानिलोकविलक्षणानित्यर्थः ॥ ४७ ॥

यद्यपि ब्रह्मविज्ञापनेन प्रसन्नस्य रुद्रान्तर्यामिणो हरेः शान्त्या रुद्रोऽपि शान्तो भवति तथापि रुद्रोऽपि पृथगवाच्य इति धियाऽधुना दक्षाद्यु कोपो न कर्तव्य इति रुद्रं वक्ति येऽस्मिन्निति अस्मिन्लोके ये वस्तुविभाजना दुर्लङ्घ्यया पुष्करनाभस्य मायया बन्धकशक्त्या स्पृष्टधियो यथेव पृथगदृशोऽस्मिन्जने द्वेषादिकम् कुर्वन्तीति यदा यस्मात्तस्मात्तत्र तेषु जनेषु भवादृशाः साधवोऽनुकम्पया हृदयद्रवीभावेन कृपां क्षमालक्षणोपकारम् कर्तुमिच्छा कथं न कुर्वन्तीत्यन्वयः "हृदयस्य द्रवीभावस्त्वनुकम्पेति कथ्यते । उपकारम् कर्तुमिच्छा कृपेत्याहुर्मनीषिणः" तेऽपि साधुष्वेव केचित्कुत एवं कुर्वन्तीति तत्राह दैवेति तादृग्विधपूर्वकर्मप्रबोधकस्य देवस्य हरेर्बन्धकशक्तिबलात्तथाकृता इति हेतुगर्भविशेषणं हिशब्देन योग्यता विशेषं कथयति ॥ ४८ ॥

"विष्णुमाया हरेरिच्छा बंधशक्तिश्च तद्वशा । सर्वत्रगा हरेरिच्छा बन्धशक्तिश्र्वर्जिता" इति वचनात् भवान् सर्वज्ञत्वेन बंधशक्तिस्पर्शाभावात्तेष्वेको न स्यात् अतोऽस्मिन्नज्ञानिजनेऽनुग्रहं कर्तुमर्हतीत्याह भवान्हीति हि शब्दो हेत्वर्थः तया बन्धकशक्त्या हतात्मसु

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

नष्टबुद्धिगुणेषु अत एवानुकम्पचेतःसु हिंसालक्षणकर्मानुष्ठायिषु दक्षादिष्विति शेषः अनुपृष्टमतिः ॥ ४९ ॥

सर्वान्तर्यामिहरिप्रसादेन च प्रसादाभिमुखं रुद्रम् प्रत्येतादृशोऽनुग्रहः कार्य इति वक्ति कुर्वध्वरस्येति हतस्य त्वया कृतान्तरायणेति शेषः अत एवासमाप्तस्याकृताऽवभृथस्नानादिनेति शेषः मनोर्दक्षस्य कोऽयमध्वर इति तत्राह न यत्रेति येन त्वया मखो निन्यग्भावेन नीचत्वेन नीयते तस्य भागिनो यज्ञभागार्हस्य तव कुत्सिता स्पर्धा एषामस्तीति कुस्पर्धिन ऋत्विजो देवा यत्र यज्ञे भागं विहितहविर्भागं न ददुस्तस्याध्वरस्य । यद्वा येन यज्ञभागयोग्येन त्वयामखो निकामं नीयते तस्य भागिनो देवा भागम् यत्र न ददुस्तस्येति "निन्यग्भावनिकामयो"रिति यादवः ॥ ५० ॥

यजमानसद्भावे यागोद्धारः सम्भवति तस्य मया हतत्वात् कथं नष्टाक्षाद्यवयवादीनाम् स्वभागनिरीक्षणाम् कथं चायुर्भास्मभिर्भग्नगात्राणामृत्विजाम् होमाङ्गत्वमित्याशंक्य त्वदनुग्रहसुधासमुद्रमग्नाः सर्वसम्पन्ना भवन्त्वित्याह जीवतादित्यादिना ५१

भूनातुरस्यारोग्यम् ॥ ५२ ॥

सर्वनिरवद्यम् स्यात् यदि मम भागोऽस्ति चेदित्याशंक्य तवायमनुशोको माभूदित्याह एष त इति उच्छिष्टः स्विष्टकृद्भागः यदग्नये स्विष्टकृते समवद्यति भागधेयेनैव तद्रुद्रं समर्धयति सकृत्सकृदवद्यति सकृदिव हि रुद्र उत्तरार्धादवद्यत्येषा वै रुद्रस्य दिक् स्वायामेव दिशि रुद्रं निरवद्यते इति श्रुतेः ॥ ५३ ॥

इति श्री भागवते महापुराणे चतुर्थस्कन्धे
श्रीविजयध्वजतीर्थ कृत पदरत्नावल्यां
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

तत्र शैवमतमाश्रित्य सर्वपरत्वेन स्तौति जाने इति । शैवाः खलु भगवत्प्रकृतिपुरुषान् सदाशिवरूपत्वेन मन्यन्ते ततश्चायमर्थः । त्वां विश्वस्य प्राकृताऽप्राकृतलक्षणस्य सर्वस्येशं सदाशिवरूपं जाने । यतो जगतः प्राकृतप्रपञ्चस्य योनिबीजयोः परं जाने । योनि बीजे एव क्रमेण व्यनक्ति शक्तेः शिवस्य चेति तत्र केचिन्निर्भेदं ब्रह्म परमकारणत्वेन यन्मन्यन्ते तच्च त्वामेव जाने इत्याह यत्तदिति ॥ ४२ ॥

शिवशक्त्योरिति शिवशक्ती निमित्तीकृत्येत्यर्थः ॥ ४३ ॥

त्वमित्यस्य टीकायां नियद्धा इत्यत्र सूत्रेण तन्तुना निर्णीता इति सूत्रेण शास्त्रविशेषरूपेणेति ज्ञेयम् ॥ ४४ ॥

विपर्ययः केनेत्यत्र महापराधमहदुपासनस्वभावेनेति तत्त्वं ज्ञेयं वक्ष्यते च कुर्वध्वरस्येत्यादिना तदेवन्यत्र तु देवेति पुण्यारण्यपाठान्तरम् ॥ ४५ ॥

न वै इति । आत्मनि परमात्मनि त्वयि अनन्यत्वेन पश्यताम् ॥४६॥

भवद्विधो भवानिति विशेषः ततो निरुपम इत्येवार्थः । यद्वा भवद्विधोऽपि किमुत भवानित्यर्थः ॥ ४७ ॥

ननु पुष्करनाभ एवेश्वरः अहं तु तद्भक्त एव तत्राह यस्मिन्निति द्वाभ्यां साधारणा अपि, साधवः भगवत्पक्षे तेषां पृथग् दृशामेव दैववशादिति ज्ञेयम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तु शब्दस्तेभ्यो वैशिष्ट्यबोधकः अर्हसि त्वमिति शेषः ॥४६॥
कुर्याज्जत इति क्वचित् कुरुपाद्विन इति चित्सुखः ॥५०—५३॥
इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भे
षष्ठोऽध्यायः ॥ ६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

यद्यपि त्वं मां प्रणमसि तदपि परमेश्वरत्वैश्वर्यमधिकमिति शैवमतमाश्रित्याह जाने इति शैवाः खलु भगवत्प्रकृति पुरुषान् सदाशिवरूपत्वेन मन्यन्ते ततश्चायमर्थः त्वां विश्वस्य प्राकृताऽप्राकृतलक्षणस्य सर्वस्येशं सदाशिवरूपं जाने यतो जगतः प्राकृतप्रपञ्चस्य योनिबीजयोः परं जाने योनिबीजे एव क्रमेण व्यनक्ति शक्तेः शिवस्य चेति यत्तत्प्रसिद्धं निरन्तरं निर्भेदं ब्रह्म तदपि त्वामेव जाने ॥ ४२ ॥

शिवशक्त्योः पुरुषप्रकृत्योः स्वरूपयोः स्वांशयोरिति पाठे शिवस्य स्वांशत्वात् शक्तेस्तच्छायारूपत्वात् तत्समानरूपयोः तृतीयार्थे षष्ठी ताभ्यां विश्वं सृजसि ॥ ४३ ॥

हे धर्मार्थदुघ ! अभिपत्तये धर्मरूपार्थस्य प्रवर्त्तनाय दक्षेण दक्षरूपसूत्रेण अध्वररूपं वस्त्रं तन्तुवाय इव त्वं ससर्जिथ तथा लोके सेतवो वर्णाश्रमधर्ममर्यादाश्च त्वयैवावसिता निर्णीता अतो दक्षवधे सति सम्प्रति धर्मप्रवर्त्तकस्याभावात् धर्मस्य लोपे लोकस्य दुर्गतिः स्यादिति भावः ॥ ४४ ॥

कर्मफलदातापि त्वमेवेत्याह त्वमिति हे मंगल ! मंगलानां पुण्यानां कर्त्तुः स्वः स्वर्गलोकं तनुषे परं मोक्षं वा अमंगलानां पापानां कर्त्तुस्तामिस्रं नरकं तदेव तथैव केन हेतुना कस्यचिद्विपर्ययो भवेत् पुण्यकर्त्तुरपि दक्षादेस्तामिस्रं पापकर्त्तुरप्यजामिलादेरपवर्ग इति त्वं पृच्छ्यसे इति भावः ॥ ४५ ॥

मम रोषप्रसादावेव तत्र हेतू इति चेन्मैवं तव प्रसाद एव स भवतु रोष इति कैमुत्यन्यायेनाह न वा इति तव त्वां आत्मनि परमात्मनि त्वयि अपृथग् अनन्यत्वेन यद्वा आत्मनि स्वस्मिन्नपृथग् अभेदेन स्वस्मिन् सुखदुःखे इव भूतान्यपि सुखदुःखवन्ति दिदृक्षतां द्रष्टुमिच्छतामेव किमुत पश्यतां सतां सतः रोषोऽभिभवेत् यथा पशुम् अभिभवेदिति पशव एव रोषवन्तो भवन्ति नतु सन्तःप्रायेणेति जयविजयविषयकरोषवतां सनकादीनामिव दक्षविषयस्तव रोष आत्मारामस्याप्यभूदिति सूचयति ॥ ४६ ॥

नन्वसन्तम् रोषहेतुकसमुचितशास्तिप्रदानेन विना कृतानामागसां फलाऽप्राप्त्या सर्वं एवासन्तोभवेयुस्तत्राह पृथग्धिय इति परं दृष्टेन परसम्पदृष्ट्या अरुन्तुदा मर्मभेत्तारः दैवेनैव वधो येषामिति स्वापराधेनैव ते दक्षादयो मरिष्यन्ति तन्मादृशैरिति युष्मत्कोपविपर्यासभूतत्वे तेषां कदाप्युद्धारो न भावीति भावः ॥ ४७ ॥

सर्वसहनशीला अपि साधवः परदुःखासहिष्णवः स्फुरतस्ते स्वापराधिनोऽपि दयन्त एवेत्याह यस्मिन् देशे यदा वा काले स्पृष्टधियः अभिभूतबुद्धयः कुर्वीत दुष्कृतानीति शेषः तत्र तेषु अनुकम्पया कृपालुत्वस्वभावेन कृपामेव कुर्वीत नतु तेषु दैवेनैव बलात्कृते दुःखदानार्थं बलात्कारे कृते सति क्रमं पराक्रमम ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

भवतु साधुचूडामणेः कोपो नैव सम्भवेदित्याह भवांस्त्विति अस्पृष्टमतिः अतः समस्तदक्ष तेषामपराधफलं महादुःखं पर्य्यस्येवेति भावः तेष्वनुग्रहप्रकारमाह तया हतात्मस्विति अनुकर्मचेतःस्विति तस्मिन्निति एते खलु मायया हतबुद्धयः कथं विवेकं लभन्तां नानाकर्म प्रसक्तमनसः कथं वा साधून् पश्यंतित्यत एतेषु मम दयैवोचितेति ॥ ४९ ॥

तर्हि सम्प्रति किं कर्त्तव्यं तद्ब्रूहीत्यत आह कुर्विति त्वया हतस्य अतएवासमाप्तस्य प्रजापतेरध्वरस्य हे मनो ! यत्राध्वरे भागिनोऽपि तव भागं न ददुः येन फलदात्रा त्वया मखो निर्नीयते फलं प्राप्यते ॥ ५० ॥ ५१ ॥

हे मन्यो ! अनातुरमारोग्यमस्तु ॥ ५२ ॥

एष ते भागोऽस्तु यत् उच्छिष्टः उत्कृष्टः शिष्टोऽवशिष्टोऽर्थः तेन ते भागेन यज्ञः कल्पतां सम्पद्यताम् ॥ ५३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठोऽध्यायश्चतुर्थस्य सङ्गतः सङ्गतः सताम् ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

जाने इति विश्वस्येशं त्वामहं जाने वेद्मि ननु विश्वस्रष्टारमात्मानं किं तथा जानासि नेत्याह परं मत्तोऽन्यं किं शिवं नेत्याह शक्तेः शिवस्य च परम् किं प्रकृतिप्रेरकम् इत्यत्राह जगतः सर्वप्रपंचस्य योनिबीजयोः प्रकृतितत्प्रेरकयोः परं मूलमित्यर्थः प्रकृतिस्तत्प्रेरकः पुरुषश्च तयोर्मूलभूतो भगवांश्च त्वम् तः पुमान् समभिगम्ययत्रास्य वीर्यं धत्ते महान्तमित्यादौ प्रसिद्धः कस्तर्हि स ईश्वर इत्यत्राह यद्ब्रह्म सर्ववेदैकवेद्यं तत् सर्वे वेदा यत्पदमामनन्ति सर्वे वेदा यत्रैकी भवन्ति। वेदैश्च सर्वैरहमेव वेद्य इत्यादिशास्त्रप्रसिद्धम् निरन्तरमिति यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति। सर्वस्य चाहं हृदि सन्निविष्टः। इत्यादिश्रीमुखवचनात् सर्वगम् ॥ ४२ ॥

ननु सत्या स्वपितृयज्ञे देहत्यागः कृतस्ततः क्रुद्धेन शिवेन दक्षयज्ञनाशः कृतस्तं शिवं विहाय किं मां स्तौषीत्यत्रत्वमेव सर्वविश्वसृष्टिसंहारादिहेतुः शिवशक्तिद्वारा दक्षयज्ञविनाशादिहेतुः दक्षद्वारा यज्ञप्रवृत्तिहेतुः भुक्तिमुक्तिहेतुश्चेत्याह त्वमेवेति त्रिभिः श्लोकैः हे भगवन् ! त्वमेव विश्वं सृजसि पासि अत्सि यथा ऊर्णापटः ऊर्णनाभिः "यथोर्णनाभिः सृजते गृह्णते च,, इति श्रुतेः एवं सति स्वरूपयोः स्वस्मात्सर्वकारणकारणादृपं ययोस्तयोः स्वांशयोः शिवशक्त्योः भवभवान्योः संबोध एतत् प्रस्तुतं दक्षयज्ञविनाशादि त्वमेव करोषीति शेषः अतः स्वांशभूतशिवद्वारा यज्ञस्योद्धरणं कुरु इति भावः ॥४३॥

धर्मार्थदोग्ध्रीति धर्मार्थदुघा त्रयी तस्या अभिपत्तये रक्षार्थे दक्षेण सूत्रेण निमित्तेन अध्वरं ससर्जिथ सृष्टवानसि अतस्त्वमेव शिवद्वारा दक्षशिरः संयोजनं दक्षेण अध्वरोद्धारं च कुर्विति भावः किंच वर्णाश्रमधर्ममर्य्यादारूपाः सेतवस्त्वयैवाऽवसिताः निर्धारिताः यान् ब्राह्मणाः श्रद्दधतेऽनुतिष्ठंति अतः शिवद्वारा श्मश्रुयोजनादिना भृग्वादिब्राह्मणस्वास्थ्यं कुर्विति भावः ॥ ४४ ॥

किंच दक्षेण महति पुरुषे शिवे कन्यादानमात्रेण शिष्यबुद्धिकृता भवान्या पत्याश्चालापः कृतः भवेन प्रवृत्तिकर्मपरेषु प्रविश्यापि लोकसंग्रहार्थं प्रत्युत्थानादिना श्वशुरः पितातुल्यो नादृतः अतः शिरश्छेद देहत्यागप्रियावियोगादिततत्कर्मफलदस्त्वमित्याशयेन स्वौति त्वमिति के परं ब्रह्मणि सर्वकर्मफलदे त्वयि सति कोऽब्रह्मण्य

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

समीरात्मयमदवेषु भास्करे,, इति कोशात् कस्य चिदपि कर्तुर्विपर्ययो नैवभवति शुभाशुभकर्मवैपरीत्यं नैव भवति"अवश्यमेव भोक्तव्यं कृतं कर्मशुभाशुभ"मिति वाक्यात् यत्तु"तत्र केन हेतुना तदेव तस्मिन्नेवकस्य चिद्विपर्ययो भवति,, इति व्याख्यानंतदयुक्तम् उक्तवाक्यविरोधात् "नहिकल्याणकृत कश्चिद्दुर्गतिं तात गच्छति,, इति श्रीमुखवचनविरोधाच्च कश्चिदपि शुभकारिणः शुभफललाभः केनापि शुभकर्मणैव प्रसिद्धशुभकारिणः अशुभफललाभः केनाप्यशुभकर्मणैवेति विद्भिः सिद्धान्तित त्वाच्च तत्तस्मात् हे मंगल ! मंगलानां शुभानां कर्तुः सकामस्य निष्कामस्य वा स्वः स्वर्गं परं मोक्षं वा तनुषे यथासंख्यालंकारः तथा अमंगलानामशुभानां कर्मणां कर्तुरुल्वणं घोरं शिरश्छेददेहत्यागादिरूपं फलम् अत्यंतामंगलकर्तुश्च तामिस्रं पुनः पुनर्जन्ममरणलक्षणं तमिस्रं संसारं तनुष इत्यन्वयः ॥४५॥

एवं शिवान्तर्यामिणं नियोजकं भगवन्तं स्तुत्वाऽथ यज्ञस्योद्धरणं कुर्वित्यादि वक्तुं नियोज्यभूतं शिवं स्तौति नवैमत्तामिति चतुर्भिः। भूतेषु अभिपश्यतामात्मानामिति शेषः भूतानि च आत्मनि अगस्कारणभूते जिज्ञास्ये "आत्मा वा अरे द्रष्टव्य,, इत्यादि श्रुतिभिरुक्ते विचक्षतां कथं दिदृक्षताम् अपृथक्कारणानन्यतया कार्यकारणयोर्भेदभेदसंबन्धादेवं भूतानां त्वच्चरणार्पितात्मनां क्रोधानाभिभवत् यदा तदा तव नाभिभवोऽस्तीति किं पुनर्वक्तव्यम् द्वितीयार्थे षष्ठी एवं सर्वस्य कारणानन्यत्वदर्शित्वेन त्वदीयान् त्वां च क्रोधानाभिभवेत् तमोगुणाधिष्ठातृत्वेन प्रयोजनार्थं क्रोधाभिभूतत्वविडम्बनमपि युक्तमेवेति सूच्यते प्रायःशब्देन यथा पशुं सर्वस्य कारणानन्यत्वमजानन्तं केवलभेददर्शिनामित्यर्थः ॥ ४६ ॥

अतएव तत्त्वज्ञः अतत्त्वज्ञान् पशून् प्रतिक्रोधं माकुर्य्यादित्याह पृथग्धियइति। कर्मसु हाष्टर्येषाम् दुष्ट आशयो येषाम् अनिशं निरन्तरं परेषामुदयेनोत्कर्षेणार्पिता हृदि रुग्येषाम् तान् अरुन्तुदः मर्मच्छेत्तॄन् दैवेनैव वधार्येषां तान् पृथग्दृशः अतत्त्वज्ञान् दक्षादिभान् भवद्विधस्तत्त्वज्ञः मावधीत् मा हन्यात् ॥ ४७ ॥ •

पुष्करनाभस्य विष्णोर्मायया हि स्पृष्टधियः दूषितबुद्धयः यस्मिन् काले यदा यस्मिन् देशे पृथग्दृशोभवन्ति साधुषु इतरबुद्ध्याऽपराधं कुर्वन्तीत्यर्थः तत्र तस्मिन्नेव काले तस्मिन्नेव देशे साधवः अस्मद्दैवबलात्तैः कृतेऽपराधे तेषां को दोषइति मत्वानुकंपया कृपां कुर्वन्ति न तु क्रमं पराक्रमम् ॥ ४८ ॥

परमस्य विष्णोर्मायया भवांस्तु अस्पृष्टमतिः अदूषितबुद्धिः अतएव सर्वस्तरक अकुंठितदृष्टिः तया मायया हतात्मसु नष्टमतिषु अतएव अनुकर्मबन्धसु कर्मानुगताचित्तेषु इहापराधे अनुग्रहमेव कर्तुमर्हसि ॥ ४९ ॥

हेमनो ! तव भागिनः भागार्हस्यापि कुयाज्ञिकः अदीर्घदर्शिनो याज्ञिकाः यत्राध्वरे भागं न ददुः तेनैवापराधेन त्वया हतस्यातएवासमाप्तस्याध्वरस्योद्धरणं कुरु येनोद्धरणेन सत्रोतिर्नीयते सफली क्रियते ॥ ५० ॥

पूर्ववत् भवतु ॥ ५१ ॥

आयुर्भेः अश्माभिश्च भगगाचणां हे मन्यो ! अनातुरं स्वास्थ्यम् ॥ ५२ ॥

हेरुद्र ! एष ते भागोऽस्तु कःयावदर्थं यदिदं यष्टव्ययम अध्वरस्य यदुच्छिष्टः अध्वरे कृते यावानवशिष्टोऽर्थस्तावान् हे यज्ञहन् ! ते भागेन अद्य भुवः यज्ञः कल्पतां संपाद्यताम् ॥ ५३ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

इति श्री मद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपे
षष्ठाध्यायार्थप्रकाशः ॥६॥

भाषाटीका ।

ब्रह्मोवाच आपको मैं जगत् का ईश्वर जानता हूं तथा जगत् के माता पिता रूप प्रकृति पुरुष से परे जो वह निरंतर ब्रह्म स्वरूप हो तिन आपको मैं जानता हूं ॥ ४२ ॥

हे भगवन् ! आपही समान रूप वाले प्रकृति पुरुष के भीतर स्थित होकर इस जगत् को मकरी कीट के माफक क्रीडा करते हुये उत्पन्न करते हो रक्षा करते हो संहार करते हो ॥ ४३ ॥

आपही ने धर्म प्रवर्तक वेदों के रक्षा के लिये दक्षको निमित्त करके यज्ञ की प्रवृत्ति की आपही ने जगत् मे धर्म के सेतुबांधे हैं जिनकी श्रद्धा व्रतधारी ब्राह्मण लोग करते हैं ॥ ४४ ॥

हे मंगल मूर्ते ! आपही मंगल कर्म करने वाले पुरुषों को स्वर्ग अथवा परम पद देतेहो अमंगल कर्म करने वालों को घोर नरक देतेहो उसी कर्म में किसी किसी को विपरीत फल भी होजाता है जैसे दक्ष को यज्ञ से दुःखहुआ ॥ ४५ ॥

आपके चरणों मे चित्त लगाने वाले तथा सब भूतों मे आपके स्वरूप को देखने वाले तथा सब भूतों को अपने आत्मा से अभेद दृष्टि से देखने वाले सत्पुरुषों को पशुओं के तुल्य क्रोध नहीं वश करता है ॥ ४६ ॥

पृथक् बुद्धिवाले दुष्ट अंतः करण वाले पराई संपत्ति से निरंतर दुःख पाने वाले पुरुष दूसरे पुरुषों को परुष वचनों से मर्म मे भेदन करते हैं वे स्वयं हि दैव के मारे हैं उनको आप सरीखे महात्मा नहीं मारते हैं ॥ ४७ ॥

जिस काल मे जिस देश में श्री नारायण की दुस्तरमाया के संबंध होनेसे भेद बुद्धिवाले पुरुष महात्मा ओं का अपराध करते है तब तहाँ पर महात्मा जन कृपा करकेपरमेश्वर की माया समझ कर समर्थ होने पर भी उनके उपर पराक्रम नहीं करते है ॥ ४८ ॥

हे प्रभो ! आपतो परमेश्वर की दुस्तर माया से रहित चित्तहो इसी से सम दृष्टिहो तब उस माया से मोहित कर्म दृष्टि वाले स्वयं मृत दक्षादि कों पर कृपाही करने को योग्य हो ॥ ४९ ॥

हे प्रभो ? जिस यज्ञ मे यज्ञ के फल दाता आपके भाग को खोटे यज्ञकर्ताओं ने नहीं दिया है नाश होने से असमाप्त उस दक्षके यज्ञ का आप उद्धार कीजिये ॥ ५० ॥

यह यज्ञ का यजमान दक्षप्रजापति जीवै, भग देवता नेत्रों को प्राप्त होवै, भृगु के मोंछ डाढी ऊगैं, पूषा देवता के पहिले से दांत हो जावें ॥ ५१ ॥

भाषाटीका

हे क्रोध मूर्ते ! रुद्रानुचरों के आयुध तथा शिला प्रहारों से भग्नगात्र देवताओं का ऋत्विजों का आपके अनुग्रह होने से जल्दी कल्याण होवे ॥ ५२ ॥

हे यज्ञ नाशक रुद्रजी ! यज्ञ का उच्छिष्ट यह आपका भाग होवे, आपके भाग देने से यह यज्ञ पूर्णता को प्राप्त होवे ॥ ५३ ॥

भाषाटीका

इति श्री भागवत चतुर्थ स्कंधका षष्ठ अध्याय समाप्त हुआ ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे

षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ।

———*———

मैत्रेय उवाच ।

इत्यजेनाऽनुनीतेन भवेन परितुष्यता ।
अभ्यधायि महाबाहो ! प्रहस्य श्रूयतामिति ॥ १ ॥

श्रीमहादेव उवाच ।

नाघं प्रजेश ! (१) बालानां वर्णये नाऽनुचिन्तये ।
देवमायाभिभूतानां दण्डस्तत्र धृतो मया ॥ २ ॥
प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः ।
मित्रस्य चक्षुषेक्षेत (२) भागं स्वं बर्हिषो भगः ॥ ३ ॥
पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् ।
देवाः प्रकृतसर्वाङ्गा ये म उच्छेषणं ददुः ॥ ४ ॥
बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृतबाहवः ।
भवन्त्वध्वर्यवश्चाऽन्ये वस्तश्मश्रुर्भृगुर्भवेत् ॥ ५ ॥

मैत्रेय उवाच ।

तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितम् ।
परितुष्टात्मभिस्तात ! साधु साध्वित्यथाऽब्रुवन् ॥ ६ ॥
ततो मीढ्वांसमामन्त्र्य शुनासीराः सहर्षिभिः ।
भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः ॥ ७ ॥
विधाय कार्त्स्न्येन च तद्यदाह (३) भगवान् भवः ।
सन्दधुः कस्य कायेन सवनीयपशोः शिरः ॥ ८ ॥
सन्धीयमाने शिरसि दक्षो रुद्राऽभिवीक्षितः ।
सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडम् ॥ ९ ॥
तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः ।
शिवावलोकादभवच्छरह्रद इवाऽमलः ॥ १० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

सप्तमे विष्णुरुद्भूतः स्तुतो दक्षभवादिभिः ।
यज्ञं प्रवर्त्तयामास दक्षायेति निरूप्यते ॥ १ ॥

अजेन योऽनुनीतः प्रार्थितो भवस्तेनाभिहितम् हे महाबाहो ! विदुर ! ॥ १ ॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

अघमपराधम् स्वापराधमपहृत्याऽनुगृह्णाति दग्धं शीर्षं यस्य तस्य प्रजापतेरजस्य मुखं यस्मिंस्तत्तथा भूतं शिरोऽस्तु बर्हिषः सम्बन्धिनं भागम् मित्रनाम्नो देवस्य ॥ ३ ॥

प्रकर्षेण कृतानि सम्प्राप्तान्यंगानि येषां ते भवन्तु उच्छेषणं यज्ञाऽवशिष्टम् ॥ ४ ॥

पा० (१) परेश (२) चक्षुषेक्षेत (३) तद्यथाह इति श्री वीर० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

येषां स्वांगानि नष्टानि तेऽश्विनोर्बाहुभ्यां कृतबाहवः पूष्णो हस्ताभ्यां कृतहस्ताश्च भवन्तु अध्वर्यवः अन्ये च ऋत्विजः बस्तस्य श्मश्रूणि यस्य ॥ ५ ॥

मीढुष्टमः शिवस्तेनोक्तम् परितुष्टैश्चित्तैः ॥ ६ ॥

मीढ्वांसं शिवं त्वयागत्य सर्वं कार्यमित्यामन्त्र्य संप्रार्थ्य शुनासीरा देवा सह मीढुषा वेधसा च वर्तमानाः समीद्धृषभसः ॥ ७ ॥

कार्त्स्न्येन चक्रहस्तबाह्वादिसाधारण्यं विधाय ॥ ८—९ ॥

पूर्वं वृषध्वजद्वेषेण कलिलः कलुषीकृत आत्मा यस्य सः तदा शरत्कालीनो ह्रद इवाऽमलोऽभवत् ॥ १० ॥ ११ ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्यार्थदीपिका टिप्पणी ।

इत्येवा ऽनेना अहो बालानां वृथैव दण्डः कृत इति प्रहस्य श्रूयतामित्यभिहितम ॥ १ ॥

पूर्वं श्रूयतामित्युक्तेऽपि महादेव उवाचेति सार्वत्रिकः पाठः दयको हितार्थं शिक्षा ॥ २ ॥ ३ ॥

केवलं सौत्यपत्रभुग् अन्यसहितश्च यजमानस्य दद्भिर्जक्षत्विरित्यनुषङ्गः ॥ ४ ॥

ये म उच्छेषणां ददुः मामनादृत्य स्वयं प्रथमं भुक्तवान् ये छिन्नाङ्गा बभूवुस्ते संलग्नांगा भवन्त्वित्यर्थः ॥ ५ ॥

परितुष्टैश्चित्तैरुपलक्षिताः ॥ ६ ॥

मीढ्वांसं वरसंस्कारम ॥ ७ ॥

हस्तबाह्वादिसाधारण्यं यत्र हस्तादियुक्ततया सर्वेषां तुल्यत्वं सवनीयपशोः छागस्य कायेन कबन्धेन सह संदधुः संयोजितवन्तः ॥ ८ ॥

अभिवीक्षितः अभितः कृपादृष्टिविषयीकृतः ॥ ९ ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

एवं ब्रह्मणा प्रसादितोऽभवोऽदेवाननुगृह्णन् तच्छिक्षापितमङ्गीचकारेत्याह मैत्रेय इतीति । अजेन ब्रह्मणा अनुनीतेन प्रार्थितेन अतएव परितुष्यता भवन हे महाबाहो ! विदुर ! प्रहस्य श्रूयतामित्यामंत्र्य अभ्यभाषि अभ्यभाषि ॥ १ ॥

तदेवाह नाघमिति । हे परेश ! परेषामस्मदादीनामीश प्रभो ! भगवन्मायामोहितानां बालानां मूर्खाणाम अघमपराधम अधुना न वर्णये एवमेवमपचरितमिति न कथयामीत्यर्थः नाभिचिन्तये न स्मरामि च किन्त्वपराधाऽऽचरणदशायां मयादण्डः कृतः शिक्षामात्रं कृतमित्यर्थः ॥ २ ॥

तदनुग्रहप्रकारमेवाह प्रजापतेरित्यादिभिस्त्रिभिः दग्धशीर्ष्णः दक्षिणाग्नौ दग्धं शिरो यस्य तस्य प्रजापतेर्दक्षस्य अजमुखं कंठादुपरि एव अजस्य मुखं यस्मिन्तादृक्शिरो भवतु मित्रस्यतद्भागोदेवस्य चक्षुषी नेत्रे भवेतां चक्षुर्भ्यां स्वेनस्यभागस्त्वादीक्षितृदृष्टिचर्नापति प्रगृहीतवाभागः मित्रस्यचक्षुर्भगः पूर्वं कृत इत्यर्थसिद्धं चक्षुर्नान्ते तृतीया स्वभागं पश्यतु तदा मित्रस्य चाजमुखं शिरो भवतु अस्मिन् पक्षे मित्रस्य शिरोभङ्गः पूर्वमर्थसिद्धो भयःभगोभगाख्योदेवः बर्हिषोयज्ञस्य स्वीयं भागं चक्षुषा ईक्षेत पश्यतु भगस्य नेत्रे उत्पद्येयातामित्यर्थः अयमेवार्थः साधु भगस्य नेत्रे भगवान् पातितस्य दर्शनात् पूर्वं भगस्यैव नेत्रभंगाभिधानात् ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

पूषा देवः यजमानसंबन्धि पिष्टं भुञ्जानितथा दन्तैर्दंतैर्जक्षतु भक्षयतु पूष्णोऽदन्ता उत्पद्येरन्नित्यर्थः ये देवा मेमखमुच्छेषणं यज्ञावशिष्टं ददुः दत्तवन्तः ते सर्वे प्रकर्षेण कृतानि सम्यक्कृतानि सर्वाण्यंगानि येषां ते भवेयुरित्यर्थः निकृत्तसर्वांगा इति पाठे ये देवानितरांभिन्नसर्वावयवा ये च मह्यमुच्छेषणं ददुः दातुं मतिं कृतवन्त इत्यर्थः अनुग्रहात्पूर्वं उच्छेषणदानाभावात् तत्सर्वे ॥ ४ ॥

अध्वर्यवश्च ऋत्विजश्च अश्विनोर्बाहुभ्यां कृतबाहवः उत्पादितबाहवः पूष्णो हस्ताभ्यां कृतहस्ताश्च भवन्त्विति स्यम्बयः भृगुः बस्तश्मश्रुः बस्तस्य मेषस्य श्मश्रूणीव श्मश्रूणि यस्य ॥ ५ ॥

एवं रुद्रेणानुगृहीता देवाः किमकुर्वतेत्यत्राह मैत्रेयः तदेति मीढुष्टमोदितं मीढुष्टमः शिवतमो रुद्रस्तेनोदितं गदितं श्रुत्वा सर्वाणि भूतानि परितुष्टात्मभिः परितुष्टचित्तैः हे तात ! विदुर ! साधुसाध्विस्यूचुः ॥ ६ ॥

ततः मीढ्वांसं रुद्रं त्वया आगत्य सर्वं कार्यमित्यामन्त्र्य संप्रार्थ्य शुनासीरा इन्द्रोपलक्षिता देवाः ऋभुभिः भृगुणाऽऽहूयमानदक्षिणाग्निप्रभवैः ऋभ्वाख्यैर्देवैः सहसमीद्धृषभसः मीढुषा रुद्रेण वेधसा ब्रह्मणा च सहिताः भूयः पुनस्तद्देवयजनं देवा ईज्यन्तेऽस्मिन्निति देवयजनं यागदेशं ययुः अगमन् ॥ ७ ॥

भगवान् सर्वो रुद्रः यथाह प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखंशिर इत्यादिना तथा कार्त्स्न्येन विधाय हस्तबाह्वादिकं विधाय सवनीयपशोश्छागस्य सवनीयशिरः कस्य दक्षस्य कायेन शरीरेण संदधुः ॥ ८ ॥

सवनीयपशोः शिरसि संधीयमाने सति रुद्रेणाऽभिवीक्षितो दक्षः सुप्तदेवोत्थितस्य इवोदतिष्ठत् अग्रतः पुरतोऽवस्थितं मृडं रुद्रं ददर्श च ॥ ९ ॥

पूर्वं वृषध्वजे रुद्रे द्वेषेण कलिलः कलुषीकृतः आत्मा यस्य स प्रजापतिर्दक्षः शिवावलोकात् शरत्कालीनह्रद इवामलोऽभवत् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

अत्र भगवज्ज्ञानोपचितं कर्म हरेः साक्षात्कारसाधनं भवतीति तात्पर्यतो निरूप्यते तत्र ब्रह्मोक्तमाकर्ण्य तुष्टेन रुद्रेणोच्यमानप्रतिवचनप्रकारं वक्ति इतीति । धर्मपरिपन्थिनो बाधत इति बाहुः मुहांश्चासौ बाहुश्चेत्येव स तथा तस्य सम्बोधनं महाबाहो ! "अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुक्धुग्दीर्घहकाराश्च,, अर्जि अर्जने दृशिर् प्रेक्षणे कमु कान्तौ अम रोगे पशि नाशने बाधृ लोडने एभ्यो धातुभ्यः कुप्रत्ययो भवति एषां धातूनां यथा संख्यं तृजि पशि तुक् धुक् दीर्घ हकारश्चेत्येते आगमादेशाश्च भवन्ति ऋजुरवक्रः अव्युत्पन्नो वा पङ्गुर्मत्रहीनश्चतुष्पाद कमेस्तुगागमः कन्तुः कन्दर्पः अमेधुगागमः अन्धु जलं पंसि पंसेर्दीर्घः पांसु रजः बाधेर्हकारादेशः बाहुः प्राचुर्यगम ॥ १ ॥

किमभ्यभाषीति तत्राह नाघमिति । हे प्रभो ! सर्वजीवराज्युत्तम ! अघमपराधं न वर्णये अनेकत्वादप्राप्तकालत्वादिति शेषः तर्हि पश्चात्तापोऽस्ति किं नेत्याह नानुचिन्तय इति पश्चात्तापं न करोमीत्यर्थः पश्चात्तापाऽकरणे कारणमाह दण्ड इति । अपराधानुसारिदण्डकरणे अनुतापः स्यात्तदनुसारित्वाभावान्न कृतेत्यर्थः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

पुनरुक्तानादिभिर्गुरुवाक्यं सबहुमानं मान्यमिति भावं दर्शयन् वक्ति प्रजापतेरिति अजस्य छागस्य मुखं यस्य तत्तथोक्तं पूर्वशिरोऽनुसन्धानाकरणे कारणं दग्धशीर्ष्णा इति स्वपीरूपजयस्तंभस्थापनायाज्ञजनाशिक्षणाय च भगादीनामप्यन्यावयवैरेव स्वनिर्वाहः स्यादिति भावेनाह मित्रस्येत्यादिना बर्हिषो यज्ञस्य ॥ ३ ॥

दद्भिर्दन्तैःतत्र देवानां विशेषानुग्रहं करोति देवा इति प्रकृतसर्वाङ्गाः पूर्वावस्थाप्राप्तसर्वावयवाः"उच्छेषणभागो वै रुद्र,, इति श्रुतेः ये म उच्छेषणं ददुरिति विशेषानुग्रहे हेतुः ॥ ४ ॥

ऋत्विजां तेषामित्याह बाहुभ्यामित्यादि । अध्वर्यव ऋत्विजस्तेषां मध्ये केचिच्छिन्नबाहवः केचिच्छिन्नहस्तास्तेषु छिन्नबाहवोऽश्विनोर्बाहुभ्यां कृतबाहवः पूर्ववबाहुप्रयोजना भवन्तु अन्येचपूष्णो हस्ताभ्यां कृतहस्ता भवन्तु कूर्परस्योपरिदेशो बाहुस्तदधो हस्तः देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिति श्रुतेः हस्तदानात् तयोरिति भ तुः बस्तस्य श्मश्रूणि यस्य स बस्तश्मश्रुः ॥ ५ ॥

कोऽस्मादुत्तरकथाप्रसंग इति तत्राह तदेति । मिह सेचन इति धातोः प्रयातजनस्याभीष्टं वर्षन्तो मीढ्वांसस्तेषामतिशयेन मीढ्वान् मीढुष्टमस्तेन कथितम् अनेन तदानीं तन्नामोपलब्धमिति रहस्यं ज्ञायते ॥६॥

शुनाशीरा देवाः सहिता मीढुष्टमाभ्यां रुद्रब्रह्मभ्यां ये तथोक्ताः ॥ ७ ॥

कस्य दक्षस्य सवनीयपशोर्यज्ञीयपशोः ॥ ८ ॥

शीर्ष्णा शिरसि ॥ ९ ॥

शिवस्याऽवनतपुंस्यनुग्रहसामर्थ्यं व्यनक्ति तदेति "अभ्रं सलिलदे व्योम्नि शक्रं कोदण्ड आयुधे" इति यादवः शरन्मेघवत् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

महादेव उवाचेति न सार्थात्मकं दण्डः किन्तु तेषामेव हितार्थाय शिक्षा इत्यर्थः ॥ १—३ ॥

ये म उच्छेषणं यज्ञावशिष्टं ददुरिति मामनादृत्य स्वयं प्रथमं भुक्तत्वात् ये छिन्नाङ्गा बभूवुस्ते प्रकृतसर्वाङ्गा भवन्त्वित्यर्थः ॥४-१८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

शम्भुं स्तुतवता विष्णुराविर्भूतः स तुष्टव ।

दक्षेण ऋत्विगाद्यैश्च यज्ञपूर्त्तिश्च सप्तमे ॥

अजेनाऽनुनीतो यो भवस्तेन ॥ १ ॥

हे प्रजेश ! परेशेति च पाठः बालानामज्ञानां दण्डस्तेषां हितार्थं शिक्षारूपः ॥ २ ॥

अजमुखमिति तस्य तत्तुल्यवाग्बुद्धित्वादिति भावः मित्रस्य चक्षुषेति स्वनेत्रसूत्रकत्वलक्षणदोषदुष्टत्वादिति भावः भागं स्वामिति तद्विभजन् चक्षुषः स्वभोज्यवस्तुमात्रदर्शनतात्पर्य्यकत्वेन पारमार्थिकत्वाभावाद्वैयर्थ्यादिति भावः ॥ ३ ॥

पूषा केवलश्चेत् पिष्टभुग्भवतु । अन्यसहितश्चेत् यजमानस्य दद्भिरिति तस्य दन्तान् प्रकाश्य साधून् हसतः सर्वथैव दन्तधारणाऽनौचित्यादिति भावः उच्छेषणं उत्कृष्टं शेषं शिवभागं ये न ददुस्ते देवा अस्मद्द्वेषिणः दक्षस्य यज्ञे भुक्तभागत्वात् छिन्नाङ्गा अभूवन् सम्प्रति प्रकृतसर्वाङ्गा भवन्तु मन्निन्दनसमये दक्षपक्षस्याग्रहणादिति भावः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

तन्मध्ये ये केचिदध्वर्यवो दक्षपक्षपातिनस्तत्समये बाहुहस्तचालनं चक्रुस्ते भग्नबाहुहस्ता अश्विनोर्बाहुभ्यां कृतबाहवः पूष्णो हस्ताभ्यां कृतहस्ता भवन्तु किञ्च भृगोः श्मश्रुगुल्फलुञ्चितानि मेषु दक्षस्य मुख्य एवाऽसाम्योऽतो बस्तमुखस्य तस्य श्मश्रूणि प्राप्नोत्वित्यभिप्रेत्याह बस्तश्मश्रुरिति ॥ ५ ॥

अतिशयेन मीढ्वान् कामवर्षी मीढुष्टमः शिवस्तस्योदितं वचनम् ॥ ६ ॥

मीढ्वांसं शिवमामन्त्र्य त्वया तत्रागत्य यज्ञः सम्पादनीय इति सम्प्रार्थ्य शुनासीरा देवाः मीढुषा वेधसा च सह वर्त्तमानाः ॥७॥

यदाह तद्विभागेति मित्रादयो भगादिभ्यश्चक्षुरादीनि दत्त्वेत्यर्थः कस्य दक्षस्य ॥ ८ ॥

कलिलात्मा कलुषीकृतात्मापि ॥ ९ ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

एवं पूर्वाध्यायोक्तप्रकारेण ब्रह्मणा शिवप्रेरकोभगवान् शिवश्च संस्तुतोयत्कृतवान् तद्वर्णयति सप्तमेनाध्यायेन इत्यजेनेति हे महाबाहो ! विदुर ! इत्येवमजेनानुनीतोयोभवस्तेन प्रहस्य इतिवक्ष्यमाणं यदभ्यधायि अभिहितं तच्छ्रूयताम् ॥ १ ॥

हे प्रजेश ! बालानामतत्त्वज्ञानाम् अघमपराधम् ॥ २ ॥

दग्धं शीर्षं दक्षिणाग्नौ शिरोयस्य तस्य प्रजापतेर्दक्षस्य अजस्य मुखं यस्मिन् तच्छिरोभवतु भगश्च बर्हिषःसंबन्धिनं स्वंभागं मित्रस्य मित्रनाम्नो देवस्य चक्षुषा ईक्षेत ॥ ३ ॥

पिष्टभुक् पूषा तु यजमानस्य यज्ञकर्त्तुर्दद्भिर्दन्तैः जक्षतु अद्यात् ये म उच्छेषणं यज्ञावशिष्टं ददुः ते देवाः प्रकृतानि पूर्ववत् वर्तमानानि सर्वाण्यङ्गानि येषां तथाभूता भवन्तु॥ ४ ॥

अन्येऽध्वर्य्यवोविनष्टबाहुहस्ताः अश्विनोर्बाहुभ्यां कृतबाहवः पूष्णोहस्ताभ्यां कृतहस्ताभवन्तु बस्तस्य मेषस्य श्मश्रुरयेव श्मश्रूणि यस्य तथा भूतोभृगुर्भवेत् ॥ ५ ॥

मीढुष्टमेन शिवेनोदितम परितुष्टैः आत्मभिश्चित्तैः ॥ ६ ॥

महर्षिभिः सह शुनासीरा देवाःमीढ्वांसं शिवम् भवताऽऽगत्य सर्वं समर्थनीयमित्यामन्त्र्य समीढुष्टमः शिवब्रह्मसहिताः ॥ ७ ॥

सवनीयस्य पशोरजस्य शिरः कस्य दक्षस्य कायेन सन्दधुरयोजयन् ॥ ८ ॥

मृडं रुद्रम् प्रजापतिर्दक्षः पूर्वं वृषध्वजद्वेषात्कलिलात्मा मलिनचित्तोऽपि तदा शरत्कालिकह्रद इवामलोऽभवत् ॥ ९ ॥ १० ॥

भाषाटीका

मैत्रेय जी बोले इस प्रकार से ब्रह्मदेव के स्तुति करने से महादेवजी प्रसन्न होके हँस कर बोले कि हे महा बाहु ब्रह्मा सुनो ॥ १

श्री महादेव जी बोले हे ब्रह्माजी ! परमात्मा की माया से मोहित बालबुद्धि वाले देवादिकों के अपराध को मैं कहता भी नहीं हूं स्मरण भी नहीं करता हूं केवल शिक्षा के अर्थ दण्ड मात्र मैंने उनको दिया है ॥ २ ॥

भवस्तवाय कृतधीर्नाऽशक्नोदनुरागतः ॥
औत्कण्ठ्याद्बाष्पकलया सम्परेतां सुतां स्मरन् ॥ ११ ॥
कृच्छ्रात्संस्तभ्य च मनः प्रेमविह्वलितः सुधीः ॥
शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः ॥ १२ ॥

॥ दक्ष उवाच ॥

भूयाऽननुग्रह अहो भवता कृतो मे दण्डस्त्वया मयि भृतो यदपि प्रलब्धः ॥
न ब्रह्मबन्धुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु ॥ १३ ॥
विद्यातपोव्रतधरान्मुखतः स्म विप्रान् ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक् ॥
तद्ब्राह्मणान्परम! सर्वविपत्सु पासि पालः पशूनिव विभो! प्रगृहीतदण्डः ॥ १४ ॥
योऽसौ मयाऽविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैरगणय्य(१)तन्माम् ॥
अर्वाक् पतन्तमर्हत्तम! निन्दयाऽपाद् दृष्ट्याऽऽर्द्रया स भगवान्स्वकृतेन तुष्येत् ॥ १५ ॥

मैत्रेय उवाच ॥

क्षमाप्यैवं समीढ्वांसं ब्रह्मणा चाऽनुमन्त्रितः ॥
कर्म सन्तानयामास(२) सोपाध्यायर्त्विगाग्निभिः ॥ १६ ॥
वैष्णवं यज्ञसन्तत्यै त्रिकपालं द्विजोत्तमाः ॥
पुरोडाशं निरवपन्वीरसंसर्गशुद्धये ॥ १७ ॥

भाषाटीका

जैसे मस्तक वाले दक्ष प्रजापति का बकरे का मुख हो जायगा भगदेवता भी मित्र नामक देवता के नेत्र से अपने यज्ञ भाग को देखेगा ॥ ३ ॥

पूषा देवता दूसरे के साथ रहे तो यजमान के दांतों से भोजन करेगा अकेला होगा तो सत्तु इत्यादि पिठी का भोजन करेगा जिन देवतों ने मेरा भाग देना स्वीकार किया उनके सब अङ्ग पर्ववत् हो जायंगे ॥ ४ ॥

जिन के भुजा कटे हैं उनके काम अश्विनी कुमार के भुजों से होंगे जिनके हाथ कटे हैं उन के काम पूषा के हाथों से होंगे इस प्रकार सब ऋत्विजों का कार्य होगा भृगु बकरे की डाढी मूछ वाला होगा ॥ ५ ॥

मैत्रेय जी बोले कि हे तात विदुर! तब तोषदातों में श्रेष्ठ महादेव जी के वचन को सुनकर सब प्राणि मात्र संतुष्ट हृदय से सुन्दर है ऐसे सराहना करने लगे ॥ ६ ॥

तदनन्तर सब देवता महादेव जी से चलने की प्रार्थना करके ब्रह्मा महादेव ऋषि इन्हों के सहित फिर भी उसी देवयाग स्थान को गये ॥ ७ ॥

फिर महादेव जी ने जो कहा था सो सब और कार्य करके याज्ञिक पशु के मस्तक को दक्ष के शरीर में जोड दिया ॥ ८ ॥

मस्तक के जुडते मात्र श्री शिव जी के दृष्टि पडने से शीघ्र ही सोते से उठा सरीखा उठकर दक्षप्रजापति ने आगे में महादेव जी का दर्शन किया ॥ ९ ॥

भाषाटीका ॥

तब महादेव जी के द्वेष से अशुद्ध चित्त वाला भी प्रजापति दक्ष शिव जी के कृपा दृष्टि से शरत्काल के जलह्रद के तुल्य निर्मल हो गया ॥ १० ॥

————

श्रीधरस्वामिकृत भावार्थदीपिका

यदपि यद्यपि प्रलब्धः पराभूतो मया भवांस्तथापि त्वया दण्डो भृतः शिक्षा कृता ननु परिक्षिप्तोऽस्मि युक्तमेवैतदित्याह ब्रह्मबन्धुषु च ब्राह्मणाऽऽभासेष्वपि तुभ्यं तव हरेश्चेति वां युवयोरवज्ञोपेक्षा नास्ति ॥ १३ ॥

तत्र हेतुमाह विद्येति। ब्रह्मा भूत्वा त्वमस्राक्स्राक्षीः किमर्थम् आत्मतत्त्वमवितुं यद्वा ब्रह्मवेदमात्मतत्त्वं चाऽवितुं सम्प्रदायप्रवर्त्तनेन व्यापयितुमित्यर्थः तत्तस्मात् हे परम! उत्कृष्ट! ॥ १४ ॥

अत्र च प्रत्युपकारो नास्तीत्याह योऽसाविति। अविदिततत्त्वदृशा अप्राप्ततत्त्वज्ञानेन तदगणय्य विस्मृत्य अर्हत्तम निन्दयाऽवागधःपतन्तं मामपाद्रक्षितवान् स्वकृतेनैव परानुग्रहेणैव तुष्येत् न मया तत्प्रतिकर्त्तुं शक्यमित्यर्थः ॥ १५ ॥

अनुमन्त्रितोऽनुज्ञातः उपाध्यायसहितैर्ऋत्विगादिभिः अनुवर्त्तयामास ॥ १६ ॥

वीराणां प्रमथादीनां संसर्गकृतदोषस्य शुद्धयेनिवृत्त्यर्थम् ॥ १७ ॥

पा० (१) विशिखैर्विगणय्य (२) कर्मानुवर्त्तयामास इति श्री धार० ॥

अध्वर्युणाऽऽत्तहविषा यजमानो विशाम्पते ! ॥
धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः ॥ १८ ॥
तदा स्वप्रभया तेषां द्योतयन्त्या दिशो दश ॥
मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्रवाजिना ॥ १९ ॥
श्यामो हिरण्यरशनोऽर्ककिरीटजुष्टो नीलालकभ्रमरमण्डितकुण्डलास्यः ॥
कम्ब्वब्जचक्रशरचापगदाऽसिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

उपात्तहविषाऽध्वर्युणा सह विशुद्धया बुद्ध्या दध्यौ हे विशाम्पते ! विदुर ! ॥ १८ ॥

स्वया प्रभया तेषां तेजांसि मुष्णन् तिरस्कुर्वन् उपानीतः समीपं प्रापितः स्तोत्रं बृहद्रथन्तरं वाजौ पक्षौ यस्य तेन "बृहद्रथन्तरे पक्षौ" इति श्रुतेः ॥ १९ ॥

तमेवाऽनुवर्णयति श्याम इति द्वाभ्याम्। हिरण्मयी रशना यस्येति वक्षो लक्ष्यते अर्कतुल्येन किरीटेन जुष्टः नीलालका एव भ्रमरास्तैर्मण्डितं कुण्डलयुक्तमास्यं यस्य कम्ब्वादिभिरायुधैः भृत्यरक्षार्थं व्यग्रैर्हिरण्मयैर्भुजैः पुष्पितः कर्णिकार इव शोभमानः भुजानां हिरण्मयत्वं केयूरकङ्कणमुद्रिकाद्यलङ्कारैः ॥ २० ॥

श्रीराधारमणदास गोस्वामि विरचिता दीपिन्याख्या दीपिका टिप्पणी

स्तोतुं नाशक्नोत् ॥ ११ ॥

इदानीं भयमाशिध्याशिर्व्यलीकेन किन्तु परत्र सत्यलीकत्वं व्यक्तौ भविष्यतीति ज्ञेयम् ॥ १२ ॥

शिक्षैव कृता न तु शिक्षा इति भूयाननुग्रहः कृत इति योज्यम् एतत् उपेक्षणीयत्वं युक्तमेव ॥ १३ ॥

तत्र ब्राह्मणाभासेष्वप्युपेक्षाऽभावे पूर्वोक्ते भूत्वेत्यध्याहारेऽपि ब्रह्मणोऽप्रकृतत्वाद्यदीति तत्तस्माद्धेतोरादिप्रवर्त्तनेच्छया स्वयमेव सृष्टत्वात् ॥ १४ ॥

अत्र च अपराधेऽपि त्वत्कृतोपकारे योऽसौ परमदयालुत्वेन प्रसिद्धो भवान् अव्यवधानेन यच्छब्दस्माभिधेये तच्छब्दस्य प्रासङ्गिकवाचकतया काव्यप्रकाशे निर्णीतत्वादिति परत्रापि ज्ञेयम् तत् तिरस्करणम् तत् अपराधिनोऽपि रक्षणम् आभासार्थं सङ्ग्रहीतुमित्यर्थ इत्युक्तम् ॥ १५ ॥ १६ ॥

यज्ञसन्तत्यै यज्ञाऽविच्छेदाय त्रिकपालं कपालत्रयसंस्कृतं वैष्णवं विष्णुदैवत्यं पुरोडाशं जुहुवुः ॥ १७ ॥

यथा हरिं दध्यौ तथा प्रादुरभूत् ॥ १८ ॥

तदेति त्रिकम्। बृहद्रथन्तरे तन्नामकसामभागौ रशनाया हिरण्मयत्वनाहिरण्मयस्य हृदयाऽसंभवान्मुख्यार्थबाधात् आधाराधेयसम्बन्धात् वक्षो लक्ष्यते पीतत्वातिशयः प्रयोजनम् अलकानां भ्रमररूपकेण मुखस्याब्जत्वं कुण्डलयोश्च तत्प्रफुल्लत्वाय सूर्यत्वमारोप्यते कनकमयैरष्टभिर्भुजैरष्टदलस्थानीयैः पुष्पितः कर्णिकारः कचनार इति ख्यातः स इव शोभमानः कर्णिकाः कर्णिकां राति ददातीति व्युत्पत्त्या एवं व्याख्येऽ तद्भिन्नत्वम् रूढिर्योगमपहरतीति न्यायात् ॥ १९ ॥ ॥ २० — २३ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

भवस्तवाय रुद्रस्तुतये कृतधीः कृतमनाः सरघेनाम परलोकं गतां सतीम् अनुरागतः स्मरन् तस्यामौत्कण्ठ्याद्वाष्पकलानेत्रजललेशस्तेन न ऽशक्नोत्स्तोतुं न समर्थोऽभूत ॥ ११ ॥

प्रेम्णा विह्वलितः विह्वलचित्तत्वात् कृच्छ्रात् प्रयासेन मनः संस्तभ्य स्ववशं कृत्वा सुधीः स्तुतिसमर्थबुद्धिमान् प्रजापतिर्दक्षः ईशं रुद्रं निर्व्यलीकेन प्रीतियुक्तेन भावेन अभिप्रायविशेषेण शशंस तुष्टाव ॥ १२ ॥

यद्यपि यद्यपि प्रलब्धोमया परिभूतो भवान् तथापि त्वया दण्डो धृतः शिक्षा कृता न तूपेक्षितोऽस्मि युक्तमेवैतदित्याह ब्रह्मबन्धुषु ब्राह्मणाभासेष्वपि तुभ्यं तव हरेर्विष्णोश्चेति वा ययोः अवज्ञा उपेक्षा नास्ति धृतव्रतेषु स्ववर्णाऽऽश्रमधर्मविशिष्टेषु ब्राह्मणेषु कुत एवाऽवज्ञा स्यात् न कुतः स्यादित्यर्थः हे भगवन् ! ॥ १३ ॥

तत्र हेतुं वदन् "शास्त्रदृष्ट्या तूपदेशो वामदेववत्,, इति न्यायेन परमात्मदृष्ट्यास्तौमि विधेति ब्रह्मा त्वं चतुर्मुखरूपी त्वं प्रथमं कल्पादौ आत्मतत्त्वं जीवपरयाथात्म्यं स्वानुभवोपदेशाभ्याम् अवितुं रक्षितुं विद्याशास्त्रजन्यं ज्ञानं तपः शमदमादिकृच्छ्रचान्द्रायणादिव्रतं स्ववर्णाश्रमोचितधर्मः एतान् बिभ्रतीति तान् विप्रान् मुखतः अस्राक्षः सृष्टवानसि तत्तस्मात् हे परम ! सर्वविपत्सु सर्वाऽऽपत्सु ब्राह्मणान् पशून् पालः पशुपालक इव प्रगृहीतदण्डः सापराधेषु कृतशिक्षः पासि रक्षसि ॥ १४ ॥

स्वस्याकिञ्चन्यं निवेदयन् क्षमापयति योऽसाविति अविदिततत्त्वदृशा अप्राप्ततत्त्वज्ञानेन मया विगणय्य तृणीकृत्य सभायां दुरुक्तय एव विशिखाः बाणाः तैः क्षिप्तस्ताडितो योऽसौ भवान् अर्हत्तमस्य पूज्यस्य तव निन्दया अर्वाक्पतन्तम् अधोलोकान् गच्छन्तं मां दयाद्रया दृष्ट्या अपात् विगणय्य विस्मृत्य स्वकृतपराभवम् अपात् अरक्षदिति यावत् स भगवान् भवान् स्वकृतेनोपकारेण तुष्येत् न मया तत्प्रतिकर्त्तुं शक्यमित्यर्थः अनेन स्वस्याऽकिञ्चन्यं निवेदितम् ॥ १५ ॥

स दक्षः मीढुषं रुद्रमेवं क्षमाप्य प्रसाद्य ब्रह्मणा चतुर्मुखेन चकाराद्रुद्रेण चानुमन्त्रितः अनुज्ञात उपाध्याय ऋत्विग्भिः ऋत्विगादिभिः कर्म अध्वरमनुवर्त्तयामास समप्रवर्त्तयामास सन्तारयामासेति पाठे सन्तारयामास समापयामास ॥ १६ ॥

कथं कृत्वा सन्तारितवानित्यत्राह वैष्णवमिति यज्ञसन्तत्यै यज्ञविच्छेदपरिहाराय वीरभद्रसंसर्गशुद्धये च वीराणां प्रमथानां संसर्गकृतदोषशुद्धये वीरभद्रसंसर्गशुद्धये वा वैष्णवं विष्णुदेवताकं त्रिकपालं त्रिषु कपालेषु संस्कृतं पुरोडाशं द्विजोत्तमा ऋत्विजः निरवपन् ॥ १७ ॥

हे विशांपते ! विदुर ! आत्तहविषा उपात्तहविषा अध्वर्युणा सह यजमानो दक्षः विशुद्धया निर्मलया बुद्ध्या दध्यौ ध्यातवान् तदा तदैव हरिः प्रादुरभूत् आविर्बभूव तथेति पाठे यथा येन प्रकारेण दध्यौ

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिका ॥

तथा तं प्रकारमनतिक्रम्य प्रादुर्बभूवेत्यर्थः ॥ १८ ॥

दश दिशः द्योतयन्त्या आत्मनः प्रभया तेषां सदस्यानां तेजः मुष्णान् तिरस्कुर्वन् हरिः स्तोत्रं बृहद्रथन्तरे वाजौ पक्षौ यस्य तेन "बृहद्रथन्तरे पक्षा,,विति श्रुतेः स्तोत्ररूपेण वा तार्क्ष्येण गरुडेन उपनीतः समीपं प्रापितः ॥ १९ ॥

आविर्भूतं भगवन्तं वर्णयति श्याम इति द्वाभ्याम् । हिरण्मयश्च रशना यस्येति चकारं लक्ष्यते अर्कतुल्येन किरीटेन जुष्टं नीलालकाएव भ्रमरास्तैर्मण्डितकुण्डलमास्यं यस्य कम्बुः शङ्खः अब्जं कमलं चापः शार्ङ्गम् असिः खड्गः चर्म्मादिः कम्बु प्रभृतिभिरायुधैः भृत्यरक्षणार्थं ध्युतैः सत्वरैः हिरण्मयैः भुजैः केयूरादि भूषितैः भुजानां हिरण्मयत्वं केयूरादिभिर्भूषितत्वादवगन्तव्यं पुष्पितैः शाखाविशेषैः कर्णिकारइव शोभमानः ॥ २० ॥

— —

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

याज्ञस्वरूपत्वमेव तस्य न त्वान्तरम् तत्र प्रमाणाभावादिति तत्राह भवन्तवायेति । औत्कंठ्यादुत्पन्नबाष्पकलया आन्तरनैर्मल्याभावे तद्रूस्तव एव न युक्तः स चानेन कर्तुं प्रयस्यते तस्मादान्तरी शुद्धिरप्यनुमीयत इति ॥ ११ ॥

कायिक एव प्रयत्नो न तु वाचिक इति शङ्का माभूदित्याह कुकुछ्रादिति भावेन स्नेहेन ॥ १२ ॥

दक्षस्य शिवे त्वान्तरो द्वेषो नास्तीति ज्ञापयितुं तदनुगुणगणैः स्तुतिं करोति भूयादिति त्वया प्रसहाऽपि मदपराधानुगुणो दण्डोधृत इति यद्यस्मात्तस्मात्कृपानुग्रहः कृतः अहो मे महतां पुंसामनुकम्पा शिरश्छेदादिलक्षणोऽनुग्रहो न स्यात्किन्तु प्रत्युतापकार एवायमामरणमेव लोके कोपदर्शनादतो नयुक्त इत्याशङ्क्याऽपराधाधिक्ये नायं नियम इति भावेनाह न ब्रह्मेति । ब्रह्मबन्धुषु ब्राह्मणजातिमात्रेषु तुभ्यम तव हरेश्च वां युष्योरवज्ञा नास्ति धृतव्रतेषु दीक्षितेषु कुत एताऽवज्ञाऽतः कृताऽवज्ञत्वान्मयि दण्डकरणं युक्त मन्यथा युष्मद्यज्ञानेनाऽनुत्थानतमः प्राप्तिः स्यादिति ॥ १३ ॥

अवज्ञाभावे निमित्तमाह विद्यातप इति ब्रह्मात्मनाम् वेदरक्षकनाम ब्रह्मणः पर्णगुणस्य हरेरात्मनां विशेषसन्निधानदेहतां वा प्रथयितुं प्रख्यापयितुम् अग्राक् अस्राक्षीः स्म यस्मात्तस्मात्त्वत्सन्निधानपात्रभूतान् ब्राह्मणानित्यपत्स्व पासीत्यन्वयः ॥ १४ ॥

भवान् कृपासमुद्रोऽहं निर्गुणो वृण इत्यत्र विवक्षयुक्तिमाह योऽस्माभिरिति! न विदिता तत्त्वद्वृष्टस्य स तथा तेनाऽलब्धतत्त्वज्ञानेन दुरद्राक्षीत् नास्माकं पुण्यायुषा शतेन त्वत्कृतप्रतिनिधिकरणं शक्यतेऽतः स्वकर्मणा स्वयमेव च तुष्टो भवेत्याह सभगवानिति ॥ १५ ॥

प्रकृतमनुसरति क्षमाप्येति । सन्तानयामास अनु संहितं चकार ॥ १६ ॥

दुष्टस्य यज्ञस्य प्रायश्चित्तमन्तरेण कथमनुसन्धानं घटत इति तत्राह वैष्णवमिति । वैष्णवं विष्णुर्देवत्यं त्रीणि कपालान्यासनानि यस्य सत्रिकपालकं वीरो वीरभद्रस्तस्य संसर्गे उपद्रवस्तस्य शुद्ध्यै परिहाराय निर्वापणं समन्त्रपत्ननम् ॥ १७ ॥

अध्वर्योः प्रतिपत्तिं फलमाह अध्वर्युणेति । यजुःपतिर्मन्त्रदेवता ॥ १९ ॥

तदा प्रत्यक्षस्य हरेः कर्मविशेषं स्वरूपविशेषं चाह तदेति । तार्क्ष्येण गरुडेन स्तोत्रेण सामरूपेण निर्जितोंशीकृतः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

हिरण्मयारशना काञ्ची यस्य स तथा हिरण्मयपीतमम्बरं यस्य स तथेति वा अर्कवत् ज्वलता किरीटेन जुष्टः नीलाश्चते अलकाश्चनीलालकाः त एव भ्रमराश्च कुण्डले च नीलालकभ्रमरकुण्डलानि एतैर्मण्डितमास्यं यस्य स तथा कम्ब्वादिभिरष्टभिर्विशैः शिक्ताभ्यामष्टभिःकेयूराङ्गदादि भूषणान्वितत्वाद्धिरण्मयैरिवस्थितैर्भुजैर्लसितः पुष्पितः कर्णिकारो वृक्षविशेषः ॥ २० ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

तदेति त्रिकम् ॥ १९ ॥

कम्बुवज्रादिभिर्विशिष्टानि अग्राणि येषां तैः ॥ २०—२४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

यद्यपि विप्रलब्धस्तिरस्कृतः तदपि मयि दण्डोधृतः भूत आत्मीयत्व बुद्ध्या शिक्षा कृता नतूपेक्षितोऽस्मि युक्तमेवैतदित्याह ब्रह्मबन्धुषु च ब्राह्मणाभासेष्वपि तुभ्यं तव हरेश्चेति वाम् अवज्ञा नास्ति ॥ १३ ॥

तत्र हेतुः विद्येति । त्वमेव ब्रह्मा भूत्वा अग्राक् अस्राक्षीः । यद्वा ब्रह्म वेदमात्मनस्तत्त्वं च रक्षितुं तत्तस्मात् हे परम ! पशूनित्यस्माकं पशुत्वं तव पशुपतित्वम् ॥ १४ ॥

एतत् प्रत्युपकर्त्तुं न शक्नोमीत्याह । योऽसौ भवान् अविदिततत्त्वज्ञानेन तत्तिरस्करणं विगणय्य वस्तु बुद्ध्या न गणयित्वा अर्वागधः पतन्तं कृपामृतेनार्द्रया दृष्ट्या अपात् । अन्यथा मम नरकादुद्धारो नाऽभविष्यदिति भावः । स्वकृतेन परानुग्रहेणैव तुष्येत् न तु तत्प्रत्युपकारेण किमपि मय्यस्तीति भावः ॥ १५ ॥

सोपाध्यायैः ऋत्विगादिभिरनुवर्त्तयामास ॥ १७ ॥

वैष्णवं विष्णुर्देवताकं निरवपत् जुहुवुः । वीराणां प्रमथादीनां संसर्गकृतदोषशुद्ध्यर्थम् ॥ १७ ॥

आत्तहविषा अध्वर्युणा सह हे विशाम्पते ! विदुर ! तथा दध्यौ यथा प्रादुरभूदिति ॥ १८ ॥

तेषां ब्रह्मादीनां तेजो मुष्णान् हरिः उपानीतः समीपं प्रापितः स्तोत्रे बृहद्रथन्तरे वाजौ पक्षौ तद्वता "बृहद्रथन्तरे पक्षा,,विति श्रुतेः ॥ १९ ॥

तमेवानुवर्णयति श्याम इति द्वाभ्याम् । हिरण्यरशानः कनककिङ्किणिकः । पीताम्बरस्यार्थतः प्राप्तत्वादनुक्तिः रशनाशब्देन वस्त्रं वा लक्षयितव्यम् अर्कतुल्योज्ज्वलकिरीटयुक्तः नीलालका एव भ्रमरास्तैर्मण्डितं कुण्डलयुक्तमास्यं यस्येति भ्रमरपदेनाऽऽस्यस्य पद्मत्वं ततश्च कुण्डलयोस्तत्प्रफुल्लीकरणार्थमागतयोः सूर्यत्वं कम्ब्वादिभिरायुधैर्भृत्यरक्षार्थं ध्युतैर्हिरण्मयैः कनककेयूरकङ्कण मुद्रिकादिमत्त्वेन कनकमयैर्भुजैः पुष्पितः कर्णिकार इव शोभमानः । यद्वा कम्ब्वादीनि हस्ताग्रस्थितत्वाच्छिशिराण्यग्राणि येषु तथा भूता हिरण्मया भुजा एव प्रथमातिशयोक्त्या अग्रेण दलानि तैः शोभमानः कर्णिकारः कमलराज इव मत्वर्थीयाशीविहाऽचावा कर्णिकां राति ददातीति व्युत्पत्त्या वा कर्णिकार शब्देनात्र पद्माभिधानम् ॥२०॥

———

वक्षस्यधिश्रितवधूर्वनमाल्युदारहासाऽवलोककलया रमयंश्च विश्वम् ।
पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरिरज्यमानः ॥ २१ ॥
तमुपागतमालक्ष्य सर्व्वे सुरगणादयः ।
प्रणेमुः सहयोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः ॥ २२ ॥

श्रीमच्छुकदेवकृत सिद्धांतप्रदीपः।

अनुरागतः सुतां स्मरन् औत्कण्ठ्याद्बाष्पकलयानाऽशक्नोत्॥११॥ मनः संस्तभ्य सुताविनाशस्मरणशोकान्निवार्य शशंस तुष्टाव ॥ १२ ॥

यद्यपि प्रलब्धः मयाभिभूतः तथापि भवता योमयिदण्डोभृतः स तु भूयान् अनुग्रहः कृतः त्वया शिक्षारूपेण दण्डेनाऽऽहतोऽस्मीति भावः तुभ्यं तव हरेश्च वां युवयोः अतत्रधुषु ब्राह्मणाभासेष्वपि अवज्ञा नास्ति धृतव्रतेषु सा कुतो न कुतोऽपीत्यर्थः ॥ १३ ॥

आत्मतत्त्वं वेदरूपं स्वकीयं तत्त्वम् आत्मपरमात्मयाथात्म्यं वा अवितुं ब्रह्मा मुखतः प्राधान्येन ब्राह्मणान् प्रथमम् असृजत् आत्ताक्षीत् तस्मात् ब्राह्मणान् हेपरम ! सर्वविपत्सु त्वं पासीत्यन्वयः ॥ १४ ॥

योऽसौ मया न विदितं तत्त्वं यस्य तया दृशा सभायां दुरुक्तिविशिखैः दुर्वाक्शरैः क्षितोऽपि तदपराधमविगणय्य अर्हत्तमनिन्दया अर्वाग् अधस्तमसि पतन्तं माम् अपात् सः स्वकृतेनैव तुष्येत् नाहं प्रतिकर्त्तुं क्षम इति भावः ॥ १५ ॥

स दक्षः ब्रह्मणा अनुमन्त्रितः अनुज्ञातः उपाध्यायसहितैःऋत्विगादिभिः कर्मसन्तानयामास ॥ १६ ॥

ते द्विजोत्तमाः यज्ञसन्तत्यै वीराणां प्रमथादीनां संसर्गकृतदोषस्य शुद्धये वैष्णवं विष्णुदेवताकं त्रिकपालं त्रिषु कपालेषु संस्कृतं पुरोडाशं निरवपन् ॥ १७ ॥

हे विशांपते ! विदुर ! आत्तहविषा अध्वर्युणा सह यजमानोदक्षः विशुद्धया भक्तिपूतया धिया दध्यौ हरिं ध्यातवान् तथा ध्यानानुसारेण हरिः प्रादुरभूत् ॥ १८ ॥

तदा दश दिशोविद्योतयन्त्या स्वप्रभया तेषां तेजोमुष्णन् बृहद्रथन्तरे पक्षाविति श्रुति प्रसिद्धौ स्तोत्रे बृहद्रथन्तरे नाजाऽपरपर्य्यायौपक्षौ तद्वता तार्क्ष्येण गरुडेन उपानीतः समीपं प्रापितः ॥ १९ ॥

कथंभूत इत्याकांक्षायां हरिं वर्णयति श्यामइति द्वाभ्याम । श्यामः नीलमणिमयगिरिवर्णः हिरण्यवद्रशना वस्त्रं यस्य सः अर्कनिभेन किरीटेन जुष्टःनीलालकरूपैर्भ्रमरैर्मण्डितं मकरकुण्डलयुक्तमास्यं मुखपद्मं यस्य सः कम्ब्वादिभिरष्टभिरायुधैर्विराजितान्यग्राणि येषां तैर्हिरण्मयै ज्योतिर्मयैर्भुजैः पुष्पितः कर्णिकार इव ॥ २० ॥

भाषाटीका

तब दक्ष प्रजापति ने महादेवजी की स्तुति करने की इच्छा की परंतु मेरी हुई पुत्री के स्मरण होने से अनुराग के मारे अश्रुधारा के बहने से भारी उत्कंठा होने से बोल नहीं सके ॥ ११ ॥

फिर प्रजापति बड़े कष्ट से मन को रोककर शुद्ध बुद्धि होकर प्रेम के मारे विह्वल होकर निष्कपट भाव से महादेवजी की स्तुति करने लगे ॥ १२ ॥

दक्षजी बोले हे भगवन् ! यद्यपि मैने आपकी अवज्ञा की तथापि आपने मेरे को जो दंड दिया सो मेरे पर बड़ी ही कृपा की

भाषाटीका

क्योंकि श्रीहरि तथा आप इन दोनों का तो कुत्सित ब्राह्मणों पर भी उपेक्षा बुद्धि नहीं है तो हमसरी के व्रत धारियों पर क्यों उपेक्षा होगी ॥ १३ ॥

आपने सृष्टि काल में वेद तथा आत्म तत्त्व की रक्षा के निमित्त विद्या तप व्रत धारण करने वाले ब्राह्मणों को मुख से उत्पन्न किया हे परम पूज्य ! तिसी हेतु से हे विभो ! जैसे पशुको चराने वाला दंड हाथ में लेकर पशुओं की रक्षा करता है तैसे ही आप भी सब विपत्तियों में दंड देकर भी ब्राह्मणों की रक्षा करते हो ॥ १४ ॥

जिस भगवान् आपके तत्त्व के नहीं जानने वाले मैने खोटे वचन रूपी बाणों से सभा के मध्य में जिन आपका तिरस्कार किया तौ भी मेरे उस अपराध को न गिनकर महा पुरुष की निंदा से नरक में गिरते हुये मेरे को कृपा दृष्टि से रक्षित किया सो भगवान् अपने कृपा ही से संतुष्ट होवें हम असमर्थ हैं ॥ १५ ॥

मैत्रेयजी बोले इस प्रकार महादेवजी को क्षमापन करा कर ब्रह्मा की भी आज्ञा पाकर उपाध्याय ऋत्विज अग्नियों के सहित दक्षने यज्ञ को प्रवृत्त किया ॥ १६ ॥

ब्राह्मणों ने रुद्रगणों के संसर्ग की अशुद्धि को दूर करने के लिये यज्ञकी सांग सिद्धि के अर्थ विष्णु देवता के नाम से त्रिकपाल नामक चरू का होम किया ॥ १७ ॥

हे विदुर ! हविग्रहण किये अध्वर्यु के सहितयजमान दक्ष ने शुद्ध चित्त से ध्यान किया तब श्रीनारायण उस यज्ञ में प्रगट भये ॥ १८ ॥

तब तो बृहद्रथन्तर नाम स्तोत्र दोनो पक्ष हैं जिन के ऐसे गरुड़ जी ने अपने स्कंध पर विराजमान करके श्री भगवान्को उपस्थित किया तिस समय पर नारायण की प्रभा से दशों दिशों में प्रकाश होगया ब्रह्मादिकों के तेज सब नष्ट होगये ॥ १९ ॥

उनका स्वरूप वर्णन दो श्लोकों से करते हैं कि श्यामल उन की मूर्ति है सुवर्ण के तुल्य पीत वस्त्र हैं सूर्यवत् प्रकाशमान किरीट से वे युक्त हैं भ्रमरोंके तुल्य नील वर्ण केशों से तथा कुंडलों से उनका मुख सुशोभित है शंख चक्र गदा पद्म बाण धनुष ढाल तरवार इन आठ आयुधों से युक्त तथा सुवर्ण से भूषित अष्टभुजों से खिले हुये कचनार कर्णिकार वृक्ष के तुल्य शोभा को प्राप्त होरहे हैं॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

वक्षस्यधिश्रिता वधूर्लक्ष्मीर्यस्य सः उदारोहासोऽवलोकश्च तयोः कलया लेशेन पार्श्वे उभयतो भ्रमती व्यजनचामरे एव राजहंसौ यस्मिन्सः रज्यमानः शोभातिशयं नीयमानः ॥ २१ ॥

ब्रह्मेन्द्रत्र्यक्षा नायका मुख्या येषां ते ॥ २२ ॥

तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः ।
मूर्ध्ना कृताञ्जलिपुटा उपतस्थुरधोक्षजम् ॥ २३ ॥
अप्यर्वाग्वृत्तयो यस्य महि त्वात्मभुवादयः ।
यथामति गृणन्ति स्म कृताऽनुग्रहविग्रहम् ॥ २४ ॥
दक्षोगृहीत्वार्हणसादनोत्तमं (१) यज्ञेश्वरं विश्वसृजां परं गुरुम् ।
सुनन्द नन्दाद्यनुगैर्वृतं मुदा गृणन् प्रपेदे प्रयतः कृताञ्जलिः ॥ २५ ॥

दक्ष उवाच ।

शुद्धं स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायाम् ।
तिष्ठंस्तयैव पुरुषत्वमुपेत्य तस्यामास्ते भवानपरिशुद्ध इवात्मतन्त्रः ॥ २६ ॥

ऋत्विज ऊचुः ।

तत्त्वं न ते वयमनञ्जन ! रुद्रशापात् कर्मण्यवग्रहधियो भगवन् ! विदामः ।
धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदो व्यवस्थाः ॥ २७ ॥

सदस्या ऊचुः ।

उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽन्तकोग्रव्यालान्विष्टे विषयमृगतृष्णात्मगेहोरुभारः ।
द्वन्द्वश्वभ्रे खलमृगभये शोकदावेऽज्ञसार्थः पादौ कस्ते शरणद ! कदा याति कामोपसृष्टः २८

रुद्र उवाच ।

तव वरद ! वराङ्घ्रावाशिषेहाऽखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये ।
यदि रचितधियं माविद्यलोकोऽपविद्धं जपति न गणये तत्त्वत्परानुग्रहेण ॥ २९ ॥

भृगुरुवाच ।

यन्मायया गहनयाऽपहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपन्तः ।
नात्मन् ! श्रितं तव विदन्त्यधुनापि तत्त्वं सोऽयं प्रसीदतु भवान् प्रणतात्मबन्धुः ॥३०॥

श्रीधरस्वामि कृत भावार्थदीपिका ।

हतरुचस्तिरस्कृतप्रभाः सन्नजिह्वा गद्गदवाचः ससाध्वसास्तन्महिम्नाऽभिभूतचित्ताः उपतस्थुस्तुष्टुवुः ॥ २३ ॥

यस्य महिमानं प्रति तु अर्वागेव वृत्तिर्येषां तेऽपि यथामति गृणन्ति स्माऽस्तुवन् कृतः प्रकटीकृतोऽनुग्रहार्थं विग्रहो येन तं यद्वा तेषामर्वाग्वृत्तित्वे हेतुः ते तु यस्य महि महिम्नो विभूतिमात्ररूपा इत्यर्थः ॥ २४ ॥

तत्र तावद्दक्षस्तुतिप्रकारमाह दक्ष इति । गृहीतमर्हणसादनोत्तमं येन तम् उत्तमे पात्रे आसाद्यार्हणेषु समर्पितेषु प्रीत्या स्वार्हणपात्रं स्वयमेव येन गृहीतमित्यर्थः यद्वा कथं प्रपेदे गृहीतमर्हणसाधनोत्तमं यथा भवति तद्गृहीत्वा प्रपेद इत्यर्थः गृहीत्वेति पाठस्तु सुगमः गृणन्स्तुवन्प्रपेदे शरणं जगाम " दक्षर्त्विक्सदस्येशभृगुवह्नीन्द्रयोगिनः ॥ ऋषयश्च तथा सिद्धा यजमानी च लोकपः । योगिब्रह्मादिदेवाश्च स्तुवन्ति जगदीश्वरम् तथा गन्धर्वविद्याधरब्राह्मणाश्च पृथक्क्रमतः ,, ॥ २५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

ननु साक्षात्परमेश्वर एव रुद्रस्तस्य ब्रह्मपुत्रत्वेन जीवत्वमनुकारमात्रं हन्त किमिति त्वयाभिद्रुह्यताऽस्मादवज्ञात इति मां भगवानाक्षेप्स्यतीत्याशङ्क्याप्रच्युतस्वरूपस्य जीवधर्मनाट्यम् तवैव सङ्गच्छते नान्यस्येत्याह शुद्धमिति । स्वधाम्नि स्वस्वरूपे तिष्ठन्भवान् शुद्धम् चिन्मात्रं चैतन्यघनः शुद्धत्वेहेतुः उपरतानित्यनिवृत्ताऽखिलाबुद्ध्यवस्था यस्मात् अतः एकं भेदशून्यम् अतएवाभयं द्वितीयाद्वै भयं भवतीति श्रुतेः जीवस्यापि वस्तुत एवंभूतत्वात्तद्वैलक्षण्यार्थमुक्तम् मायां प्रतिषिध्याऽभिभूय स्वतन्त्र एव संस्तयैव मायया पुरुषत्वं मनुष्यनाट्यमुपेत्य तस्यां मायायां तिष्ठन्नपरिशुद्ध इव रागादिमानिवास्ते रामकृष्णाद्यवतारैः तथाप्रतीयते भवानित्यर्थः अन्ये त्वविद्योपाधयोमायाऽभिभूताः संसरन्ति अतस्त्वमेवेश्वरो न रुद्रादय इति भावः अतएवेमां दृष्टिं भगवान्धारयिष्यति अहं ब्रह्मा च शर्वश्च जगतः कारणं परमित्यादिना ॥ २६ ॥

(१) साधनोत्तममिति वीरराघवः ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

ऋत्विजोऽपि स्वस्याऽपराधम् परिहरन्तः स्तुवन्ति भो अनञ्जन ! उपाधिमलशून्य ! यद्यपि त्वमेव रुद्रादिदेवतारूपस्तथाऽपि नन्दीश्वरशापात्कर्मण्येव दुराग्रहधियः सन्तस्तव तत्त्वं न विद्मः किन्तु धर्मस्योपलक्षणभूतं त्रिवृत् त्रयीप्रतिपाद्यमध्वराख्यं तव रूपमस्माभिर्ज्ञातं कीदृशं यदर्थं यस्य सिद्धयेऽधिदैवं देवताऽधिकारेणाऽदोव्यवस्थाः असमृद्ध्यवस्थाः अत्रायमेव देवता नान्यस्त्वेवं भूतेन यमा इत्यर्थः यद्वा व्यवस्था इत्याख्यातम् अडागमाद्यभाव आर्षः यदर्थं मद इदमिन्द्राद्यधिदैवं रूपं विशेषणास्थितवानसीत्यर्थः ॥ २७ ॥

सदस्यास्तु निराश्रयेऽपि दत्ताऽध्वरे धनलाभेन स्वप्रवृत्तिमनुचिन्त्याऽनुतप्ताश्चिरक्तिमाशासानाः स्तुवन्ति हे शरणद ! आश्रयप्रद ! उत्पत्त्यध्वनि संसारमार्गे वर्तमानेऽज्ञानां सार्थः समूहस्ते पार्श्वकस्त्वत्पदरूपनिवासं कदा यास्यति कथंभूते संसारमार्गे अशरणे विश्रामस्थानशून्ये उरुक्लेशा एव दुर्गमस्थानानि यस्मिन् अन्तकपदयाभ्रेव्याल स्तेनाभिवष्टे लक्ष्यीकृते विषयरूपा मृगतृष्णमृगतृष्णिका यस्मिन् आत्माऽहङ्कारास्पदं शरीरं ममत्वास्पदं गेहं च सपत्नोरुभारोऽयस्य सः द्वन्द्वानि सुखदुःखादीन्येव श्वभ्राणि गर्ता यस्मिन् खला एव मृगा व्याघ्रादयस्तेभ्योऽभयं यस्मिन् शोक एव दावाग्निर्यस्मिन् कामेना पमृष्टः पीडितः ॥ २८ ॥

श्रीरुद्रस्तु पूर्वममनिन्दादुःसहाऽऽसीदिदानीं तु तां न गणयामीत्याह नवेति । आशिषा कामेनाऽसक्तैर्निष्कामैरर्चितोऽभयमभिनिवेशितचित्तम् मा मया विद्योविद्याहीनो लोको यद्यपविद्धम जपत्याचार-भ्रष्टं जल्पति तज्जल्पनमहं न गणये तत्र हेतुः तव यः परोऽनुग्रह--स्तेन त्वत्पराणां वा योऽनुग्रहस्तेन ॥ २६ ॥

भृगुस्तु स्वभावतस्तत्त्वज्ञानहीना जीवा अतोऽज्ञानकृतं मम दुश्चेष्टितं क्षमस्वेत्याह यन्मायवेति । आत्मस्वात्मनि श्रितमनुगतं तव तत्त्वं तु विन्दन्ति प्रणतानामात्मा बन्धुश्च ॥ ३० ॥

———

श्रीराधारमणदासगोस्वामिविरचिता

दीपिन्याख्यादीपिका टिप्पणी ।

पूर्वार्धे प्रतीत्यध्याहाराद् अर्वाग्वृत्तित्वे हेत्वनभिधानाच्च यत्रेति ॥ २४ ॥

तत्र ब्रह्मादिमध्ये तावदादौ आमाद्य धृत्वा पूर्वार्धे पात्रग्रहणे नाहेणाग्रहणमर्थात्तमात्रमित्यरुचेर्यत्रेति क्रियाविशेषणे वृत्तिगौरवा दूहान्तिवति पाठस्तु सुगमः ॥ २५ ॥

दक्षेत्यादि संग्रहश्लोकौ स्वरूपे तिष्ठन् भवान् शुद्धं मायाऽशवलितं चिन्मात्रं ब्रह्मेति मुख्यमेव सामानाधिकरण्यं न तु लाक्षणिकम् अत एव चैतन्यघन इति व्याख्यातम् ब्रह्मणः शुद्धत्वे हेतुः उपरतेत्यादि न च ब्रह्मणो निर्विशेषत्वाल्लक्षणां विना कथं सामानाधिकरण्यमिति वाच्यम् प्राकृतविशेषाऽभावेऽपि स्वरूपात्मकविशेषस्य श्रीशङ्कराचार्यैस्सूत्रभाष्ये स्वीकृतत्वात् तथा हि असत्यपि कर्मणि सवितुः सविता प्रकाशते इति कर्तृत्वव्यपदेशदर्शनाद सत्यपि ज्ञानकर्मणि ब्रह्मणस्तदैक्षतेति कर्तृत्वव्यपदेशोपपत्तेर्न दृष्टान्तवैषम्यमिति तस्य ब्रह्मण आनन्दरूपत्वेऽपि यदि स्वरूपभूतेन शक्तिशब्दवाच्येन ज्ञानेन स्वानन्दानुभवो न स्यात्तदा जडत्वमेव स्यादिति तादृशपुरुषार्थसाधने प्रवृत्तिरपि न स्यात् अत एव जीववैलक्षण्यार्थमुक्तं मायां प्रतिपिश्येति मायाऽभिभवेऽपि स्वरूप-शक्तिमन्तरा न स्यात् तथैवोक्तं श्रीमदर्जुनेन "मय्यां व्युत्थस्य चिच्छक्त्या कैवल्ये स्थित आत्मनी,,ति तया चिच्छक्त्याभिभूतया मायया जीवविपर्ययगया मनुष्यनाट्यं प्राकृतमनुष्यानुकरणमुपेत्य अवतारसमये मायायां तत्कार्ये प्रपञ्चे सर्वदा तु तस्यामेव नियन्तृतया तिष्ठन् अविद्योपाधीनां जीवानां प्राकृतमनुष्यवदिवपर्य रागादिमानिव प्रतीयते अतः स्वरूपशक्त्या मायाभिभवकर्तृत्वात् त्वमेवेश्वरो न रुद्रादय इति अन्येषां तथात्वेऽपि वैष्णवगुरौ शिवेऽपि तथा कटाक्षस्तु अपराधसद्भावादेव शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिव इत्यादिभिस्तस्य तत्तुल्यत्वाङ्गीकारादू अत एव तादृशा-स्वपाभिप्रायादेव ॥ २६ ॥

तत्त्वं निर्विकारस्यैव सर्वात्मकत्वम् अपूर्वस्य कालान्तरफलोत्पादककर्मशक्तेः पूर्वार्धे एकत्वं बहुवचने अत्र कर्माणि इयमेवेत्यादि कल्पनागौरवमतो यत्रेति व्यवस्थितेति वक्तव्ये त्वं व्यवस्था इत्यत्राडागमाभाव आर्षः आदिना आत्मनेपदञ्चार्षम् अत एव इत्यर्थ इत्युक्तम् ॥ २७ ॥

उत्पत्त्यध्वनीत्यस्यैव विशेषणं विषयमृगतृष्णेति किन्तु विषय-मृगतृष्णे इति वक्तव्ये सुपां सुपः सुलोपश्चेत्यनेन डेर्लोपः ॥ २८ ॥

कामेन विषयेच्छया भोगेन वा सङ्कल्पहितैस्तथा च निष्कामैरिति व्याख्यातम् ॥ २६ ॥

तर्मसि अज्ञानं अधुनापीत्यपिनाऽज्ञानस्यानादित्वं सूचितम् अनुगतं विस्फुलिङ्ग वहिमिव व्याम तत्त्वं स्वरूपं "तत्त्वं यावत्प्रभेदं स्यात्स्वरूपं परमात्मनो,,ति विश्वः आत्मा आत्मत्वेन प्रकाशमानः ॥ ३० ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

वक्षस्यधिश्रितावधूर्लक्ष्मीर्यस्य वनमाला अस्यास्तीति वनमाली उदारहासयुक्तोऽवलोकः तस्य कलया अपाङ्गेन विश्वं रमयन् पार्श्वयोरुभयोर्भ्रमन्तौ व्यजने चामरे एव राजहंसौ यस्य सः शुभ्रातपत्रमेव शशी तेनोपरिरज्यमानः शोभाऽतिशयं नीयमानः ॥ २१ ॥

उपागतं समीपे प्राप्तं तं भगवन्तमालक्ष्य दृष्ट्वा ब्रह्मेन्द्रत्र्यक्षनायका मुख्या येषां ते सर्वे सुरगणादयः सहसा त्वरयोत्थाय प्रणेमुः नमश्चक्रुः ॥

तस्य भगवतस्तेजसा हतरुचस्तिरस्कृतप्रभाः सन्नजिह्वाः गद्गदवाचः ससाध्वसाः तन्महिम्नाऽऽक्षिप्तचित्ताः मूर्ध्नि धृतानि अञ्जलिपुटानि येषां ते मूर्धसु धृताञ्जलिपुटा इत्यर्थः अधोक्षजमुपतस्थुः तुष्टुवुः ॥ २३ ॥

यस्य भगवतो महिमानं प्रत्यर्वाग्वृत्तयोऽधस्तादेव वृत्तयो येषां ते कात्स्न्र्येन तन्महिमानमवगन्तुमनर्हमनोवृत्तयोऽपि भवादयः शर्वादयः कृतोऽनुग्रहविग्रहं कृतः प्रकटीकृत अनुग्रहार्थं विग्रहो येन तं यद्वा कृतो ऽनुग्रह एव विग्रहायेन तं भक्तानुग्रहैकप्रधानमूर्तिमित्यर्थः यथा मति गृणन्ति स्म स्मेति विस्मये वाङ्मनसाऽगोचरमहिमानं वाङ्मनस वृत्तिभिस्तुष्टुवुरित्याश्चर्यम् ॥ २४ ॥

तत्र तावद्दक्षस्तुतिप्रकारमाह दक्ष इति । गृहीताऽर्हणसाधनोत्तमम अर्हते पूज्यते अनेनेत्यर्हणम् अर्हणसाधन गन्धपुष्पादिकं गृहीतमर्हणायेन स चासौ साधनोत्तमस्तं साधनेषूत्तमः साधनोत्तमः तम पुरुषार्थ-प्रापकानां मध्ये उत्तममित्यर्थः तथा च वक्ष्यति धर्मार्थकाममोक्षाख्यं

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

यु इत्युक्तेरित्यादि अनेन सर्वाहितफलसाधनप्रक्रान्ताध्वरापेक्षया सुमेन पुरुषार्थप्रापकत्वादुत्तमोपायभूतमित्युक्तं भवति यद्वा प्रगृहीतं कर्तृत्वेनोपात्त प्रक्रान्तमित्यावद् अर्हणां भगवदाराधनभूतयागरूपं पूजनं तस्य यानि साधनानि निर्वर्त्तकानि प्रयाजादीनि तस्य उत्तमं यागनिवर्त्तकमित्यर्थः "इष्टाऽऽपूर्तं बहुधाजातं जायमानं विश्वं बिभर्ति भुवनस्य नाभि"रिति श्रुतेः बिभर्ति पोषयति-निर्वर्त्तयतीति यावद् अतएव हि पूर्वं सत्रागमनाभावाद्यागानिवृत्तिः नकेवल यागादिनिवर्त्तकएवाऽपि तु तत्फलप्रदो भोक्ता चेत्याह यज्ञेश्वरं यज्ञानां भोक्तारं तत्फलदं चेत्यर्थः तथा च गीतम् "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चे"ति अत्रेश्वरशब्दाभिप्रेत भोक्तृत्वं रक्षकत्वं च ईश्वरोऽहं स्वभुक्रकरत्वाति च न केवल यज्ञस्यैव रक्षकः अपितु यज्ञकर्तुर्यजमानस्य रक्षस्यापीत्याह विश्वसृजां मरीच्यादीनां पतिं पालयितारं अपि त्वस्याप्युपलक्षणमिदं पतित्वमपि हितोपदेशेनेत्याह गुरुं हितोपदेष्टारं सुनन्दप्रभृतिभिः भृत्यैरनुगः सेवितः परिचरितम् अनेन नित्यभृत्याधिपतित्वमुक्तम् एवंभूतं भगवन्तं कृताञ्जलिर्बद्धाञ्जलिः सन् गृणन् स्तुवन् प्रयतः समाहितचित्तः प्रणेदे शरणागतः ॥ २५ ॥

तत्र प्रकृतिपुरुषविलक्षणं परमात्मस्वरूपं सर्वशक्तिमत्त्वं शुद्धमनन्यस्थानः प्रपद्यते तत्त्वः ॥

शुद्धमिति । शुद्धमपापविद्धं कर्मरूपोपाधिरहितमकर्मवश्यमिति यावद् अतएव स्वधाम्नि स्वस्वरूपे मायां प्रतिपिध्य निरस्य स्वेन रूपेण असृष्टप्रकृतिजन्यदोषमित्यर्थः शुद्धत्वे हेतुः उपरताखिलबुद्ध्यवस्थम् उपरताः शश्वन्निवृत्ता अखिलाः सर्वा बुद्ध्यवस्था मनोवृत्तयो यस्य तत् नित्यनिवृत्तप्रकृतिपरिणामरूपान्तःकरणेन्द्रियसर्ववृत्तित्वात्दोषविद्धमितिभावः यद्वा स्वधाम्नि उपरता प्रशान्ताऽखिलाद्बुद्ध्यवस्था यस्य तत् स्वस्वरूपानुभवेनैव नित्यनिवृत्तसर्वेन्द्रियमनोवृत्तिरित्यर्थः तत्कुतः एकं समाभ्यधिकरहितं स्वस्वरूपस्य तिःसमाभ्यधिकानस्वरूपत्वात्तदेकाऽनुभवेनानित्यनिवृत्तसर्वेन्द्रियवृत्तित्वाच्छुद्धमित्यर्थः किमेवंविधस्वरूपं जडं नेत्याह चिन्मात्रं ज्ञानैकरसं कचिदप्यजडं नकेवलं स्वयमेव शुद्धमपि त्वस्यैरपामपि शुद्धत्वापादकमित्याह अभयम् । नाविद्यते भयं यस्मात्तदभयं यदुपासनादशुद्धत्वापारकभयाख्यसंसारनिवृत्तिस्तदभयमित्युच्यते तथा च श्रुतिः "यदाह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथसोऽभयं गतो भवती"ति एवं रूपं स्वरूपं प्रतिनिधुन अजहदित्यर्थः नैव मायया पृथक्त्वं पुरुषाकारतामुपेत्य मायां देवादिशरीररूपेण परिणमय्य तस्मिन् जीवान्तरात्मतयाऽवस्थितेत्यर्थः स्वयमात्मतन्त्रः स्वतन्त्रो भवन् तस्यां मायायाम् अपरिशुद्धः कर्म वश्य इवास्ते महामहादिदं सर्वशक्तित्वमिति भावः ॥ २६ ॥

अथ ऋत्विजः परमात्मतत्त्वाऽनभिज्ञतामात्मीयामावेदयन्तस्तं सर्वज्ञाराध्यत्वेन स्तुवन्ति तत्त्वमिति हे अनञ्जन ! निरञ्जन ! पुण्यापुण्यरूपमलरहितेत्यर्थः वयं नन्दिकेश्वरस्य शापात् कर्मगयैव अवग्रहधियः दुराग्रहचित्तास्ते तव तत्त्वं याथात्म्यं नाविदामः नविजानीमः किन्तु हे भगवन् ! पूर्णाद्भुतगुणमूर्ते ! त्रिवृत त्रयाणां सत्त्वादीनां गुणानां वृत् भावे क्विप् वर्तनं यस्मिन् तत् त्रिभिर्गुणैर्वर्तत इति त्रैगुण्य विषया वेदा इत्युक्तरीत्या तत्तद्गुणानुसारेण हाध्वरादि कर्म विहितं धर्मोपलक्षणं धर्मस्य क्रियाजन्यस्यापूर्वस्य देवताप्रसादरूपस्य वा उपलक्षणम् उपलक्ष्यतेऽनेनेत्युपलक्षणं ज्ञापकम् उत्पादकमित्यर्थः तृप्त एवैनामिन्द्रः प्रजया पशुभिस्तर्पयतीति देवताप्रसादादेर्ज्ञापकत्वे

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

हि चोदितम् इदमध्वराख्यं कर्मज्ञातम् अस्माभिरिति शेषः कीदृशं तत्कर्म तत्राह यदर्थं यत्प्रयोजनाय यत्कर्मफलप्रदानाय युष्कर्माराध्यत्वाय चेत्यर्थः अदः एतद्दैवम् इन्द्रादिदैवतम् अभिव्यवस्था विशेषणा अभिप्राय स्थितवानित्यर्थः व्यवस्था इत्यत्राङागमाभाव आर्षः अनेन इन्द्रादिरूपेण सर्वयज्ञाराध्यस्तत्फलदश्च त्वमेवेत्युक्तं भवति ॥२७॥

अथ मदस्यास्तापत्रयाऽभिघातार्ताः जननपदव्याहेयतामाविष्कुर्वन्तो भगवच्चरणारविन्दशरणागतिं प्रार्थयन्त आहुः उत्पथ्यध्वनीति हे शरणद ! उपायनिर्वर्तकशरणप्रद ! शरणयेति यावत् उत्पथ्यध्वनि संसारमार्गे वर्तमानअज्ञानां सार्थः समूहः कामेनोपसृष्टः पीडितः ते तव पादौकःपादावेव ओकः विश्रान्ति स्थानं कल्पतरुमूलवद्विश्रान्ति जनकस्थाममित्यर्थः कदा यानि शरणं गच्छति कथं भूते उत्पथ्यध्वनि अशरणे विश्रमस्थान शून्ये उरुक्लेशा एव दुर्गमस्थानानि यस्मिन् अन्तकएवो ग्रो व्याधः तेनाभिघ्रष्टे लक्ष्यीकृते विषयमृगतृष्णात्मगेहोरुभारे- विषयरूपा मृगतृष्णिका आत्माभिमानास्पदं च शरीरं गेहं ममतास्पदं गृहं तान्येवोरुभारो यस्मिन्प्रथमान्तपाठे अज्ञसार्थस्य विशेषणा विषयमृगतृष्णादय एव उरुभारो यस्य स इति द्वन्द्वानि सुखदुःखादीन्येव श्वभ्राणि गर्ता यस्मिन् खला दुर्जना एव मृगा व्याघ्रादय स्तेभ्यो भयं यस्मिन् शोक एव दावाग्निर्यस्मिन् ॥ २८ ॥

रुद्रस्तु मम निन्दा दुःसहासीत् पूर्वमिदानीन्तु तां न गणयामीत्याह तवेति । हे वरद ! इहास्मिन् लोके आशिषा कामेन अखिलैरज्ञैः आराधनीये तथाअसक्तैर्मुमुक्षुभिश्चादरेणार्हणीये तव वराङ्घ्रौ निरतिशयसुकुमारत्वसुगन्धत्वादियुक्ते चरणारविन्दे रचितधियं न्यस्तचित्तं माम् अविद्यलोकोऽज्ञलोकः यदि यद्यपि अपविद्धम् आचारहीनं जपति जल्पति तथापि तज्जल्पनं न गणये न गणयामि निन्दकांश्च निगृह्णामीत्यर्थः कुतः त्वत्परानुग्रहेण तव यः परानुग्रहः परेषु अनुग्रहः तेन हेतुना तव परानुग्रहकोऽनरतत्वात्त्वच्चरणारविन्दासक्तचित्तानामस्माकमपि परानुग्रहः पर्याचितः इतिभावः ॥ २९ ॥

भृगुस्त्वविद्यातिरोहितस्वरूपत्वेन देहपरवशत्वात्सर्वे ब्रह्मादयो जीवा अपराधैकपरास्त्वं तु अपराधसहनकशीलोऽसि अतःप्रकृतोऽपराधस्त्वया क्षन्तव्य इत्याह यन्माययेति । ब्रह्मादयः सर्वे तनुभृतो देहिनः जीवा इति यावत् गहनया दुरत्यया यस्य तव मायया अपहृतः तिरोहित आत्मनोबोधः धर्मभूतं ज्ञानं येषां ते अतएव तमसि तमःशब्दवाच्यसूक्ष्मप्रकृतिपरिणामरूपे शरीरे स्वपन्तः शयाना वर्तमाना यद्वा तमःकार्ये जन्मजरामरणादिरूपे संसारे शयानाः आत्मन् आत्मनि श्रितम् आश्रितं जीवान्तरात्मतयाधिष्ठितं तव तत्त्वं स्वरूपयाथात्म्यम् अधुनापि न विदन्ति न जानन्ति सोऽयम्प्रपन्नानां शरणागतानाम् आत्मबन्धुः आत्मवन्निरतिशयप्रीतिविषयः प्रीतिमांश्च बन्धुः यद्वा प्रपन्नानामात्मनाबन्धुः प्रसीदतु अस्माननुगृह्णातु ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

वत्तस्यर्षिश्रितावधूर्भार्या यस्य स तथा पुत्रभार्यावत्प्रेमास्पदत्वद्योतनायार्षिश्रितरम इति वक्तव्य वधूरित्युक्तं वहेश्च वहेरुतोरूप्रत्ययो भवति पुत्रभार्यायां गम्यमानायां वकारात्कमीयोश्चात्मभार्यायां धकारश्चान्तादेशः स्वभार्या च वधूः सापि सेवार्थमभ्यवसति

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

मत्वालिङ्गनादिसुखावाप्त्यर्थमनः श्रिनेनि उदारहासावलोकयोः कलया चन्द्रकलावद्धाहारिकया पार्श्वे भ्रमद्भ्यजनचामरराजहंसाभ्यामुपरिशुभ्रातपत्रशशिना लक्ष्यमाणो दृश्यमानः एवं विधस्तावैत्तणोपानीत इति पूर्वेणान्वयः ॥ २१ ॥

ब्रह्मरुद्रौ विष्णुसमानाविति लोकप्रवादं परिहरंस्तत्पूर्वं देवतानां श्रीनारायणप्रणामं वक्ति तमुपागतामिति ब्रह्मा चतुर्मुख इन्द्रो वायुस्त्र्यक्षो रुद्र एते नायका येषान्ते तथोक्ताः ॥ २२ ॥

ननु प्रणाममात्रमुत्तमत्वादिनिश्चायात्मकं समानानामपि मिथोदर्शनादिति तत्राह तत्तेजसेति सप्तजिह्वाः जिह्वाशक्तिरहिताः गद्गद्वाच इत्यर्थः अत्र निमित्तं ससाध्वसा इति ननु सप्तजिह्वत्वेन किं पश्चाज्जग्मुरिति तत्राह मूर्ध्नीति ॥ २३ ॥

स्तुतिलक्षणवागीन्द्रियादिव्यापाराभावेन केवलोपस्थाने किं प्रजोजनमत्राह अप्यर्वागिति यस्य महित्वे माहात्म्यविषयेऽनन्तत्वादर्वाग्वृत्तयोऽपि अप्राप्तवाङ्मनसव्यापारा अपि स्वभूर्ब्रह्मा तदादयः कृतानुग्रहविग्रहं भक्तानुग्रहार्थं कृतोविग्रहोयेन स तथा तं श्रीनारायणं यथामति गृणन्तिस्मेत्यन्वयः ॥ २४ ॥

स्तुतिप्रबन्धकथने ग्रन्थाधिक्यं स्यादिति मत्वा यदर्थं हरेराविर्भावस्तस्य दक्षस्य भगवत्प्रतिपत्तिप्रकारं वक्ति दक्ष इति ॥ २५

प्रतिपत्तिर्नाम निर्गुणत्वेन निराकारत्वेन चेत् प्रतिपद्यमानविषयानुसारिणी स्यात् "केवलोनिर्गुणश्चाकाशं ब्रह्म अनादिर्वायमाकाशः शून्यो लौकिक, इति श्रुतेरन्यथा प्रतिपत्तिर्दोषणाऽनर्थापत्तिः स्यादिति तत्राह शुद्धमिति यद्रूपं शुद्धं निर्दोषत्वेन शोधितं। कथं शोधितमत्राह स्वधाम्नीति। स्वधाम्नि स्वस्वरूपे उपरतानित्यनिवृत्ता अखिलाबुद्धेरवस्था जाग्रदादिलीयावस्था यस्य तत्तथा तर्हि तन्निराकारं किमेत्याह चिन्मात्रमिति। केवलं ज्ञानात्मकं जीवस्याप्येतादृक्त्वात् किं विशिष्योच्यत इति तत्राह एकमिति। एकं प्रधानं सर्वोत्तमम् महीदृशमन्यद्वस्तीत्याह अभयमिति। "द्वितीयाद्वै भयंभवती,,ति श्रुतेः एतादृशस्यान्यस्याभावात् कालत्रयेऽपि निरस्तभयं कुत एतत् सर्वमित्यत आह प्रतिषिध्येति। मायां जडात्मिकां प्रतिषिध्य दूरीकृत्य तिष्ठंस्तादृग्रूपो भवांस्तया माययोपादानत्वेन महदादि सृष्ट्वा महदाद्युपादानत्वेनाण्डं सृष्ट्वा तदन्तस्त्रिवृदहङ्कारविकृताकाशाद्युपादानत्वेन पुरुषशब्दवाच्यशरीराणि सृष्ट्वा तदन्तः स्थितिमत्तया पुरुषत्वं पुरुषशब्दवाच्यत्वमुपेत्य तदन्तर्यामिरूपेणाव्यक्तोभूत्वा तस्यां कार्यकारणलक्षणायां प्रकृतावास्ते। "तुच्छ्येनाभ्वपिहित,,मितिश्रुतेः। तत्रात्मा मायावादिनोऽपरिशुद्धमुपहितं जीवमिवामनन्ति तस्मै तुभ्यं नम इति वाक्यशेषः व्यक्तिलक्षणमेव पुरुषत्वं नतु जीवलक्षणमित्यस्मिन्नर्थे इव शब्दः। "उत्पत्तिर्हरिरूपाणां व्यक्तिरेव न संशयः उत्पत्तिरेव जीवानां देहोत्पत्तिरुदीर्यत,, इति वचनात् "जडमाया न तस्यास्ति शरीरत्वेन कुत्रचित् सृष्ट्वा तथा शरीराणि तत्स्थितेः पुरुषः स्मृतः। मायायामशरीरायामपि विष्णुः स्वयं स्थितः। तस्मात्प्राकृत इत्येव जीववत्तं वदन्ति हि। असृष्टत्वेऽपि तद्धर्मैस्तद्वत्त्वादेव कारणाद्,, इति वचनात् नेन्द्रजाललक्षणा मायात्रोच्यते किन्तु जडा जगदुपादानभूता प्रकृतिरेव ॥ २६ ॥

ऋत्विगादिधिविक्तैः श्रीनारायण एव स्तुत्योवन्द्यश्चेति भावेन तत्प्रतिपत्तिप्रकारं वक्ति तत्त्वं नत इति। अनङ्ग! पुण्यपापलेपरहित! ऋत्विजो वयं ते तव तत्त्वं न विद्मः कस्मात्

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

अत्रान्तमत्राहुः (१) रुद्रशापादिति यज्ञादिकर्मण्ययमग्रहधियोदुराग्रहबुद्धित्वादित्यर्थः नन्वेवं तर्हि एतस्मिन् कर्मणि भवत आविर्भावः कथं घटत इति शङ्कामाभूदित्याह धर्मेति सदाशिवस्य प्रसन्नदृष्ट्यवलोकनोत्फुल्लनेत्रज्ञानैरस्माभिः क्रियमाणमिदमध्वराख्यं कर्म ज्ञातं त्वत्पूजात्वेनेति शेषः कथमेतदवगतमित्यत उक्तं धर्मेति भक्त्यादि धर्माणामुपलक्षकत्वादित्यर्थः किमत्र प्रमाणमित्यतस्तद्ध्वनयन्ति त्रिवृदिति त्रीन्प्रत्यक्षानुमानागमानावृणोतीति तदानीन्तनैः पुरुषैर्दृश्यमानत्वात् प्रत्यक्षं प्रथमप्रमाणं द्वितीयं हरेराविर्भावलिङ्गं"तृतीयमपमेसर्वधर्माणां धर्मोऽधिकतमोमतः। यद्भक्त्यापुण्डरीकाक्षं स्तवैरर्चेन्नरः सदे"त्यागमं, प्रत्यक्षस्यतु लोकविडम्बनार्थत्वोपपत्तेर्लिङ्गस्य चविनोददर्शनायसंभवादागमस्य च स्तुतिरूपत्वेनार्थवादत्वोपपत्तेः अतोनिर्णायकाभावात्सिकतावनिगृहनिर्माणवत्सर्वं शिथिलमभूदिति तत्राह यदर्थमिति त्वं यस्याध्वरस्य भागस्वीकारार्थमदोऽधिदैव(२)मुत्तमदैवं ब्रह्मादिदेवताशरीरे आस्था इति यदेत इदं निर्णायकं प्रमाणमित्यर्थः"भुङ्क्ते यज्ञभुजोदेवानाविश्य पुरुषोत्तम,, इति वचनं चास्मिन्नर्थे मानं यद्वा कुतो न विद्म इति तत्राह धर्मेति धर्ममस्यमुपलक्षयतीति तथोक्तं ज्ञानिभिरिदमध्वराख्यं कर्म यदर्थं यस्त्वमर्थो विषयोयस्य तत्तथा ज्ञातं कुतः कर्मणस्त्वद्विषयत्वमत्राह अधिदैवमिति सत्त्वमधिदैवमास्था अहं हि सर्वयज्ञानां भोक्तेति यदतस्त्वद्विषयोयज्ञ इति तद्यजनमस्माभिरिन्द्रादिविषयत्वेन ज्ञातमतोन विद्म इति ॥ २७ ॥

हे शरणद! मोक्षलक्षणगृहप्रद! अशरणो रक्षितृपुरुषरहिते उरुघोरदवः"अविद्यास्मितारागद्वेषाऽभिनिवेशाःपञ्चक्लेशाः,,तैर्दुर्गैरन्तकाख्येनोग्रेण व्यालेनाऽजगरेण सर्पेणाऽकृष्टे द्वन्द्वानि सुखदुःखान्येव श्वभ्राणि गर्तान्यस्मिन्स्स तथा तस्मिन्। खलाः पिशुनास्त एव मृगास्तैर्भयं यस्मिंस्तथा तस्मिन्। शोको मनःपीडा स एव दवदाहो यस्मिन्नेवंविधे। उरुपत्यध्वनि जननमरणादिमार्गे। अज्ञसार्थः अज्ञानिपरिषत्तवशरणौ पादौ कदा याति न कदापीति मन्यामहे कुत इति तत्राह कामेति कामेनोपहृतत्वात् कामोपहृतत्वं स्फुटयति विषयेति विषयमृगतृष्णा शब्दादिविषयाख्यमरीचिकाजलम् उद्दिश्यात्मयत्नः गेहं गृहम् एतद्द्वयमुरुभारोयस्य स तथा "आत्मा देहे धृतोजीवे स्वभावे परमात्मनि यत्नेऽर्केऽग्नौ मतो वात,, इति यादवः यद्वा विषयमृगतृष्णैवात्मगेहं स्वनिवासस्थानं तदेवोरुभारो यस्य स तथा ॥ २८ ॥

रुद्रस्तुत्या सर्वलोकस्य हरेः सर्वोत्तमत्वे संशयमुन्मूलयति तवेति हे वरद! तवाशिषा कारणेनानभिध्येऽभिध्यानाविषये आशीरर्थध्यानमयोग्ये। अस्मकैर्निःसंगैर्मुनिभिर्ब्रह्मादिज्ञानिभिरप्यादरेणार्हणीये पूज्ये वराङ्घ्रौ वरणीयगुणे श्रीपादे यदि रक्षितधियं कृतबुद्धिं मां विद्धि मां जानासि लडर्थे लोट् कथंभूतं मां लोकापविद्धं लोकबाह्यम् अनेन रुद्रस्य ज्ञान्युत्तमत्वं द्योतयति तर्हि जगति

---

(१) तद्धृत्यनन्दिशापात् ॥

(२) अधिकाश्चतेदेवाश्चाधिदेवाः ब्रह्मादयः तेषामिदंशरीरमधिदैवम। यद्वा देवानांब्रह्मादीनामिदंशरीरंदैवम् अधिकंचतत्दैवंचेतिविग्रहःएतेनादेवानामिदमाधिदैवमितिस्यात् कथमाधिदैवमिति शङ्कापरास्ता ॥ इतिदीपिका।

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

त्वत्परानुग्रहेण न गण्यं यद्भक्तजन पुरुषं न प्रार्थय इत्यर्थः फलेच्छया ध्यानाभावेऽपि निष्कामत्वेन ध्यानादन्याशिषोऽपि भवन्तीत्यस्मिन्नर्थे च शब्दः हिशब्देन गतिमयर्यो प्रयुङ्क्त इति वाक्यं सूचयति ॥ २६ ॥

ब्रह्मादीनामपि श्रीनारायणतत्त्वज्ञानं दुर्लभं किमुतास्माकं ततो रुद्रे द्वेपस्तत्तत्त्वाज्ञानहेतुक इतिभावं ध्वनयन् भृगुस्तं भगवन्तं स्तौति यन्माययेति श्लोकद्वयेन गहनया गम्भीरया यस्य तव माययाऽप हृत आत्मयाथः स्वरूपज्ञानम् येषां ते तथा अतएव तमस्यविद्यायां स्वपन्तः शयाना ब्रह्मा आदिर्येषां देवानां ते ब्रह्मादयस्तनुभृतः शरीरिणः अनेन देहवत्त्वएव ज्ञानग्रहणायोग्यतां सूचयति आत्मसु जीवेषु प्रेरकत्वेनाश्रितं स्थितं तव तत्त्वमधुनापीत्यनेनोत्पाद्य दीर्घ कालगतिं सूचयति न विदन्ति सोऽयं प्रणतानामात्मनां जीवानां बन्धुर्भवान्प्रसीदत्वित्यन्वयः यद्वा ब्रह्मादिः कारणं येषां ते ब्रह्मादयस्तनुभृतो जीवा आत्मानं हृदयमाश्रित मन्यत् समम्॥ ३० ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

अर्वाग्वृत्तित्वमेव सर्वेषां दर्शयति वच इत्यादिना ॥ २५ ॥

गुणसंसर्गिणामस्माकं तदावेशोनाद्भुतः यतः सृजामि तन्नियुक्तोऽहमित्यादिन्यायेनास्वतन्त्रतया ब्रह्म रुद्रावपि कदाचित्तदाविष्टौ भवतः किन्तु भवानेव तत्संसर्गेऽपि तदनाविष्ट इति स्वदोषमार्जनार्थमाह शुद्धमिति । शुद्धमित्यादिलक्षणं यत्तत्त्वं तद्रूपो भवान् श्रीभगवद्रूपं स्वधाम्नि स्वरूपशक्तिवैभवे परमवैकुण्ठे तिष्ठन् शुद्धसत्त्वादौ हेतुः मायां प्रतिषिध्य न यत्र मायेत्युक्तत्वात् स्वरूपशक्त्याविष्कारेण तत्सम्बन्धं परिहृत्येति तदेवं तिष्ठन्नवात्मतन्त्रः सन्नंशेन तथैव मायया पुरुषत्वं तद्द्रष्टृत्वमुपेत्य तस्यामेव मायायां स्वकार्यायां तत्तन्नियमादिना अपरिशुद्ध इवास्ते । तथा प्रतीयते मात्रमित्यर्थः ॥ २६ ॥

व्यवस्थेति । चित्सुखपाठान्तरम् ॥ २७ ॥

सदस्यास्तु कर्ममार्गैर्नानादुःखं विचार्य तदुपरतिसदनं तच्चरणोपसरणमेव प्रार्थयन्ते । उत्पत्तीति । व्यालाकृष्टेति चित्सुखः ॥ २८ ॥

श्रीरुद्रस्तु अन्यैर्दुरूहं स्वरहस्यं भक्त्यावेशेन प्रकटयन्नेव स्तौति तन्वीति । आशिषा कामनाया हेतुना अखिलार्थे तद्दातरीत्यर्थः।आशिषमाशयाङ्क्ष्य इति चित्सुखः । माविधेत्यादौ मां विद्धि लोकानपि स्वानाजनेति चित्सुखः ॥ २९ ॥

नात्माश्रितमिति पुण्यारण्यः ॥ ३० ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

वधूलक्ष्मीः । उदारयोर्महामाधुर्यरत्नवर्षिणोर्हास्यावलोकयोः कलया वैदग्ध्या विश्वमेव रमयन् किं पुनर्भक्तान् पार्श्वयोर्भ्रमन्तौ व्यजनचामरे एव राजहंसौ यस्मिन् सः । श्वेतातपत्रमेव शशी तेन उपरिस्थितेनेति । सर्वोपरि शशी तत्तले किरीटरूपोऽर्कः तत्तले आस्यरूपं कमलं तत्पार्श्वद्वये नृत्यत् कुण्डलरूपं पुनरर्कद्वयं तत्पार्श्वद्वये चामररूपे हंसद्वयं । मुखकमलतले लक्ष्मीरूपा विद्युत् सर्वसमुदितं पुनरष्टदलमेकं कमलमेव चन्द्रार्कविद्युद्भ्रमरहंस शङ्खचक्रगदापद्मचापशरचर्मासियुक्तमत्यद्भुतं स विष्णुरदृश्यत इत्यर्थः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

ब्रह्मेन्द्रत्र्यक्षा नायका येषान्ते ॥ २२ ॥

सन्नजिह्वाः सगद्गदवाचः ससाध्वसाः ससम्भ्रमं क्षुभितचित्ताः मूर्द्ध्ना मूर्द्ध्नि ॥ २३ ॥

महितु महिमानं प्रतितु अर्वागेव वृत्तिर्येषां तेऽपि ॥ २४ ॥

गृहीतमर्हणासादनं पात्रं यत्र तद्यथा स्यात्तथा सादरं पात्रं गृहीत्वेति च पाठः ॥ २५ ॥

शुद्धं चिन्मात्रमेव भवान्मायां प्रतिषिध्य स्वधाम्नि स्वरूपे तिष्ठन्नेव भवान् तथैव मायया पुरुषत्वं मनुष्यनाट्यमुपेत्य तस्यां मायायां रामकृष्णाद्यवतारेषु अपरिशुद्ध इव रागादिमानिवास्ते अतस्त मेवश्वरो विद्योपाधिरन्यत्वविद्योपाधयो रुद्राद्यास्तद्दृष्टया मनुष्यनाट्यं कुर्वन्तोऽभिनेतुं न जानन्ति । श्वशुरे मयि सभायामात्मारामत्वं प्रकाशितवन्तः । त्वन्तु श्वसुरं सत्राजितं मृतं श्रुत्वा "अहो नः परमं कष्टमित्यस्रासौ विलेपतुः„इति सत्यभामासन्निधौ सराम एवारोदीरिति तेन किं तवात्मारामत्वं प्रच्युतमिति भगवानेवाऽखिलकलाविचक्षण इति पुनरपि श्रीरुद्रे कटाक्षः श्रीरुद्राऽपराधशेषेणैव भगवद्विग्रहे मायिकत्वबुद्धिरपीति ज्ञेयम । किञ्च । स्वधाम्नि वैकुण्ठे तिष्ठन्नेव तथैव मायया सहितः पुरुषत्वं महत्स्रष्टृरूपमुपेत्य तस्यां मायायां मायिकेषु समष्टिव्यष्टिषु च आस्ते अन्तर्यामिरूपेण वसति यदुक्तं "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । एकन्तु महतः स्रष्टृ द्वितीयन्त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत„इति । अपरिशुद्ध इव वस्तुपरिशुद्धः मायायां स्थितोऽपि तत्सम्बन्धाभावादिति भावः । इति तु वास्तवार्थो ज्ञेयः ॥२६॥

हे अनञ्जन! मायोपाधिरहित! नन्दीश्वरशापात् कर्मणि दुराग्रहधियो वयमपि न विद्मो दक्षः कथं ज्ञास्यतीति दक्षे कटाक्षः । तर्हि किं जानीथेति तत्राहुः । धर्म उपलक्ष्यतेऽनेनेति तत् त्रिवृत् त्रयीप्रतिपाद्यम् अध्वराख्यं तव स्वरूपमेव ज्ञातमस्माभिः । यदर्थं तस्य सिद्धये अधिदैवं देवाधिकरणं अदो व्यवस्था इमम देवतस्यैवममूर्व्यवस्था भवन्ति ॥ २७ ॥

उत्पत्त्यध्वनि संसारमार्गे अशरणे विश्रामशून्ये द्वन्द्वानि सुखदुःखादीन्येव श्वभ्राणि गर्त्ता यस्मिन् खला एव मृगाः व्याघ्रादयस्तेभ्योभयं यस्मिन् शोक एव दावाग्नि र्यत्र तस्मिन् । अज्ञानां समूहः ते पादौ कदा याति यास्यति नैव प्राप्स्यति ते चाज्ञाः सम्प्रति दक्षस्तदीया ऋत्विगादय एवैते दृश्यन्त इति दक्षादिषु कटाक्षः हे शरणद ! हे आश्रयप्रदेति त्वां यदि स नैवाश्रयते तदा त्वया किं कर्तव्यमिति भावः । कीदृशः विषयरूपा मृगतृष्णा यस्मिन् तथाभूत आत्मा देहोऽहन्तास्पदं गेहञ्च उरुभारो यस्य सः । कामेनोपसृष्टः कामपीडितः ॥ २८ ॥

आशिषा कामेन हेतुना अखिलार्थे अखिलार्थदातर्यपि असत्कैर्निष्कामैः अर्हणीये सेवितुमर्हे अङ्घ्रौ रचितनियमावेशितबुद्धिमा मां न विद्यते विद्या ज्ञानं यस्य तथाभूतो लोको दक्षादिर्यदि अपविद्धमाचारभ्रष्टं जपति जल्पति तदपि तज्जल्पनं तव यः परोऽनुग्रहस्त्वत्पराणां वानुग्रहस्तेन न गण्ये ॥ २९ ॥

ब्रह्मादय इति श्रीरुद्रे कटाक्षः । तमसि स्वपन्त इति तेऽप्यविद्याग्रस्ता एव आत्मन् श्रितं स्वप्रकाशं तव तत्त्वम् अधुनापि न विदन्ति जानीम इत्यभिमानग्रस्ता अन्यानेवाज्ञानिनो वदन्तीति भावः । प्रसीदत्विति अहन्त्वपराधी यथार्थवादित्वाद्भवाम्येवेति भावः ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

भवांस्तु न ब्रह्मादीनां नापि मादृशानां किन्तु प्रणतानां नम्रस्वभावानामकिञ्चनानां बन्धुः। तदपि प्रसीदतु मदपराधमिमं क्षाम्यतु ॥ ३० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

वक्षस्यधिश्रितावधूः श्रीर्यस्य सः वनमालाऽस्यास्तीति वनमाली उदारहाससहितस्यावलोकस्य कलया विश्वं रमयन् पार्श्वे उभयतोभ्रमन्तौ व्यजनचामररूपौ राजहंसौ यस्मिन् स श्वेतातपत्रमेव शशी तेनोपरि रज्यमानः शोभमानः ॥ २१ ॥

ब्रह्मादयो नायकाः नेतारो येषां ते ॥ २२ ॥

तस्य तेजसा प्रभया हतरुचोऽभिभूतप्रभाः ससाध्वसाः ससंभ्रमाः सन्नजिह्वास्त्यक्ताल्पवाचः उपतस्थुः तुष्टुवुः ॥ २३ ॥

यस्य भगवतः महि तु महिमानं प्रति तु अर्वागेव पारं गन्तुमनर्हाः एव वृत्तयो येषां तेऽपि यथामति मतिमनतिक्रम्य कृत आविष्कृतोऽनुग्रहेण विग्रहो येन तं गृणन्तिस्म अस्तुवन् ॥ २४ ॥

तत्र तावद्दक्षः गृहीतार्हणासादनोत्तमं कृपया दक्षहस्ताद्गृहीतमर्हणासादनोत्तमम् अर्हणायुक्तपात्रोत्तमं येन तं गृणन् स्तुवन् प्रपेदे शरणं जगाम ॥ २५ ॥

"भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुष स्त्वन्यः परमात्मेत्युदाहृत„ इत्यादि श्रुतिस्मृतिप्रसिद्धानि त्रीणि तत्त्वानि तत्र मायाकार्येषु भोग्यपदार्थेषु प्रविष्टः स्वस्वकर्मवशाद्ब्रह्मादिपिपीलिकान्तभेदभिन्न ईशानीशादिनामभाक् नानाभिमानवान् कर्मफलभोक्ता मायावृतज्ञानो जीवःअशुद्धः भवांस्तु चिदचिदनन्तशक्तिः कल्याणगुणगणसिन्धुः स्वभावतोऽपास्तसमस्तदोषः नित्यधामस्थः परमानन्दस्वरूपः "विष्णोस्तुत्रीणि रूपाणि पुरुषाख्यान्यथोविदुः। आद्यन्तु महतः स्रष्टृद्वितीयं त्वण्डसंस्थितं। तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते" इति शास्त्रोक्तानि जगद्धिताय रूपाण्याविःकरोति इत्याह भगवदनुग्रहाल्लब्धतत्त्वज्ञानः श्रीदक्षः शुद्धमिति। 'योऽस्याध्यक्षः सपरमे व्योमन् ब्रह्मणः सदनाद् मूर्त्तेर्विष्णोः परमं पदं शुद्धं सनातनं ज्योतिः परं ब्रह्मेति यद्विदु„रित्यादिश्रुतिस्मृतिप्रसिद्धेः "दर्शयामास लोकं स्वं गोपानां तमसः पर„मिति वक्ष्यमाणे स्वधाम्नि तिष्ठन् मायां प्रकृतिं जीवमोहिनीं स्वशक्तिं प्रतिपिध्य स्वधाम्ना विधूय अभिभूय देहेन्द्रियादिरूपां स्वभोगार्थमनारोप्येत्यर्थः मायामयं देहादिकं विनैव स्वासाधारणेन रूपेणेत्यर्थः

तस्यैव मायया निमित्तभूतया अध्ययनेन वसतीति चतुर्थीया तां महदादिरूपां कर्त्तुमित्यर्थः पुरुषत्वं महत्स्रष्टृपुरुषत्वमुपेत्य कथं भूतं शुद्धम् मायिकदोषवर्जितम् यतश्छिन्नभ्रमम् मायाकृतजाड्यवर्जितम् अतएव उपरतोऽखिलबुद्ध्यवस्थम् उपरता नित्यनिवृत्ताः अखिलाः सङ्कल्पादिरूपा जागरादिरूपाश्च बुद्ध्यवस्था यस्मात् तम् एकं निःसमानाधिकम् अभयम् नास्तिभयं यस्मात्तं "यदाह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतोभवती"तिश्रुतेः तस्यां मायायाम् अपरिशुद्ध इव बद्धजीव इव यथा जीवः सुपर्णस्तथा तत्सखः सुपर्णः भवानास्ते "द्वासुपर्णासयुजा सखाया„ इति श्रुतेः तत्र च समष्टिजीवसखो भगवानण्डस्थपुरुषरूपः व्यष्टिजीवसखः सर्वभूतस्थपुरुष रूपइति विवेकः ननु तर्हि तत्र जीववन्ममापि देहादिपारतन्त्र्यं किमित्यत आह आत्मस्थम् इति एवं भूतं त्वां शरणं गतोऽस्मीति शेषः ॥ २६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

ऋत्विजस्तु दक्षः त्वत्तत्त्वज्ञः वयं तु त्वत्तत्त्वानभिज्ञाः केवलवेदत्रयीरूपं यज्ञरूपं च त्वां विजानीम इत्याहुः तत्त्वमिति। हे अनञ्जन ! हे निर्दोष ! रुद्रस्य नन्दीश्वरस्य शापात् ते तत्त्वं स्वरूपगुणादियाथात्म्यं न विदामः किन्तु कर्मण्येव अवग्रहा आग्रहवती बुद्धिर्येषान्ते धर्मस्योपलक्ष्यते ज्ञाप्यतेऽनेनेत्युपलक्षणं ज्ञापकं त्रिवृत् ऋगादिरूपं ब्रह्म अध्वराख्यं च ते रूपं ज्ञातमस्माभिः यदर्थम् अध्वराख्यरूपार्थम् अद इदमिन्द्राद्यधिदेवरूपं व्यवस्थाः अङ्गागमाद्याभाव आर्षैः विशेषेणाऽऽस्थितवानसीत्यर्थः ॥ २७ ॥

सदस्यास्तु अतत्त्वज्ञस्तत्त्वज्ञो वा त्वत्कृपां विना त्वत्पादौ नैव प्राप्नोतीत्यतः त्वत्पादप्राप्त्यसाधारणकारणं कृपां कुर्वित्याशयेन स्तुवन्ति उत्पत्त्यध्वनीति। हे शरणद! आश्रयप्रद ! त्वमेव कृपां कुर्यास्तदा त्वत्पादपद्मप्राप्तिर्भवेदिति संबोधनाऽभिप्रायः अन्यथा तु उत्पत्त्यध्वनि उत्पत्त्युपलक्षिते संसारमार्गे वर्त्तमानः विषयमृगतृष्णात्मगेहोरुभारः विषयाख्या मृगतृष्णा च आत्मा आत्मत्वेन गृहीतः देहश्च गेहं गृहं च तान्येवोरुभारोयस्य नतु तपोवृन्तवेदान्ताभ्यासादयः सः अतएव कामैर्वासनाभिरुपसृष्टो व्याप्तः एवं भूतः तत्त्वज्ञानहीनइत्यर्थः जनार्थः एकस्य त्वत्कृपावर्जितस्य तु काकया ज्ञाना तत्त्वज्ञानां सार्थः समूह इत्यर्थः ते पादौकः कदा याति यास्यति न कोऽपि कदापि यास्यतीत्यर्थः कथंभूते उत्पत्त्यध्वनि अशरणे सुखविश्रामरहिते उरुक्लेशदुर्गे अन्तकरूपेण उग्रेण दुर्निवारणेन व्यालेन दुष्टगजेन दुष्टसर्पेण वा अभिविष्टे उपरुद्धे "व्यालो दुष्टगजेसर्पे„ इति मेदिनी कोशात् द्वन्द्वानि रागद्वेषशीतोष्णादीन्येव श्वभ्राणि गर्त्तायस्मिन् खला एव मृगाः सिंहास्तेषां भयं यस्मिन् शोकएव दावोवनाग्निर्यस्मिन् ॥ २८ ॥

श्रीरुद्रस्तु पूर्वं निन्दामसहमानेन मयाऽध्वरनाशः कृतः इदानीन्तु त्वत्कृपया विद्यधानासक्तस्तां न गणयामीत्याह तवेति हे वरद ! आशिषां कामेन असकृत्कामैर्मुनिभिरर्हणीये त्वत्परानुग्रहेण त्वदीयया परया कृपया रचितधियं ध्यानासक्तम् अविद्वः त्वद्ध्यानरूपविद्याऽनभिज्ञोलोकः यदि अपविद्धमाचारविभ्रष्टं मा मां जगति वदति तर्हि तद्वचनं न गणये ॥ २९ ॥

भृगुस्तु भगवन्माया मोहिताः ब्रह्मादयोभगवत्प्रसादं विना आत्मानमपि न जानन्ति कुतो भगवन्तं परमात्मानमिति वदन् भगवत्प्रसादं प्रार्थयते यन्माययेति यस्य तव गहनया दुरुहया मायया अपहृत आत्मबोधोयेषां ते आत्मन् आत्मनि जीवे श्रितं विद्यमानमपि तव तत्त्वं न विदन्ति सोऽयंप्रसीदतु प्रसादं करोतु प्रणत आत्मा मनो येषां तेषां बन्धुः ॥ ३० ॥

भाषाटीका

वक्षस्थल में जिनके लक्ष्मी जी विराजमान हैं और वनमाला को धारण किये हैं सुन्दर मनोहर मन्दहास से जगत्को आनन्द दे रहे हैं दोनो तरफ से राजहंसों के तुल्य चामर दुररहे हैं मस्तक के ऊपर चन्द्रमा के तुल्य श्वेतछत्र से अत्यन्त शोभित हैं ॥ २१ ॥

उन परमात्मा को आये देखकर देवता आदिक ब्रह्मा महादेव गन्धर्वादिक शीघ्र उठकर साष्टाङ्ग प्रणाम करतेभये ॥ २२ ॥

उन नारायण के तेजके मारे सबकी कांति नष्ट होगई सबके वचन बन्द होगये सबही भययुक्त होगये मस्तकों पर हाथ जोड़ कर अधोक्षज नारायण की स्तुति करने लगे ॥ २३ ॥

ब्रह्मोवाच ।

नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत् ।
ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्यतिरिक्तो यतस्त्वम् ॥ ३१ ॥

इन्द्र उवाच

इदमप्यच्युत ! विश्वभावनं वपुरानन्दकरं मनोदृशाम् ।
सुरविद्विट्क्षपणैरुदायुधैर्भुजदण्डैरुपपन्नमष्टभिः ॥ ३२ ॥

पत्न्य ऊचुः

यज्ञोऽयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाऽद्य दक्षकोपात् ।
तं नस्त्वं शवशयनाभशान्तमेधं यज्ञात्मन् ! नलिनरुचा दृशा पुनीहि ॥ ३३ ॥

॥ ऋषय ऊचुः ॥

अनन्वितं ते भगवन् ! विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे ।
विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्त्ततीं भवान् ॥ ३४ ॥

भाषाटीका

यद्यपि उनकी महिमा जानने को ब्रह्मादि देवों की मनोवृत्ति असमर्थथी तथापि कृपा से धारण की भगवान की मूर्ति को देख कर यथा शक्ति सबही स्तुति करने लगे ॥ २४ ॥

जब भगवान ने सबकी पूजन सामग्री को अङ्गीकार करलिया तब, सब यज्ञोंके ईश्वर सब प्रजापतियों के परमगुरु सन्द सुनन्दादिकों से संसेवित भगवान् को हाथजोड कर सावधान होकर परमआनन्द से दक्षप्रजापति स्तुति करने लगे ॥ २५ ॥

दक्षजी कहने लगे हे प्रभो ! आप सम्पूर्ण बुद्धियों की अवस्थाओं से निवृत्त हो चैतन्य मात्र हो भय रहित हो मायाको दूरकर के विराजो हो फिर उसी ज्ञान शक्तिरूप मायाको स्वीकार करके पुरुष रूपको धारण करके स्वतन्त्र होकरभी रागादियुक्त के तुल्य रहतेहो ॥ २६ ॥

ऋत्विज लोग बोले हे उपाधि रहित परमात्मन् ! नन्दीश्वरजी के शाप से हमारी बुद्धि कर्मों मे आग्रह करने वाली होगई है तिससे हम आपके तत्त्वस्वरूप को नहीं जान सक्ते हैं अब हमने इस वेदत्रयी प्रतिपाद्य धर्म जनक यज्ञ के स्वरूप को जाना है कि जिसवास्ते आपने अपने आराधनकेही लिये इन्द्रादि देवतों का पूजन इसमें बतायाहै ॥ २७ ॥

सदस्य लोग बोले हे शरणागत रक्षक ! इस जन्ममरणादि के मार्ग में पडाहुआ रक्षक से रहित रागद्वेषादिक महाक्लेशों के किले में बन्द हुआ है जिसमें उग्रकालरूपी सर्प का भय है और विषयरूपी मृगतृष्णा में मोहित है शरीर देहादि कों का जिसके बडा भार है खलपुरुषरूपी व्याघ्रादिकों के भय वाले रागद्वेषादिकों के तथा शोकरूपी अग्निके गढ़में पडाहुआ अज्ञानी तथा काममें युक्त जीवों का समूह एसा कौन है कि जो कभी आपके शरणमें आवे अर्थात् आपकी कृपा विनानहीं आसके ॥ २८ ॥

श्रीमहादेवजी कहनेलगे हेवरद ! जगतसे विरक्त सब मुनियों के आदर से पूजने योग्य तथा सकल मनोरथों के देने वाले सर्वोत्तम आपके चरण कमल में मनलगाने से, न जान कर यदि यह संसारि जन मेरेकूं आचार भ्रष्ट कहता है तो कहै मैंतो आपके परमअनुग्रह से उस बातको कुछनही गिनताहूं ॥ २९ ॥

भृगुजी बोले हे प्रभो ! जिन आपकी दुस्तरमायासे ज्ञानहरण होजाने से ब्रह्मादिक देहधारी सब अज्ञान अन्धकार में सोते हुये अभी तकभी अपने हृदय में स्थितभी आपके स्वरूपके तत्त्वको नहीं जानते हैं सोही आप प्रणत जनों के बन्धु हमारे ऊपर प्रसन्न हो जावैं ॥ ३० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ब्रह्मादयो न विदुन्तीतिभृगुणोक्ते तदसहमानो ब्रह्मा तत्त्वज्ञानमाविष्कुर्वन्निवाह नैतदिति । पदार्थभेदग्राहकैरिन्द्रियैर्गुणस्येन्द्रियस्य । यद्वा ज्ञानार्थयोः कारणस्य सत्त्वादेः ॥ ३१ ॥

इन्द्रस्तु इन्द्रियविषयः सर्वोऽपि मिथ्येति ब्रह्मणोक्तमसहमान आह । इदं तव वपुरपि उपपन्नमेव ननु प्रपञ्चवदानिर्वचनीयतया अनुपपन्नम । सुराणां विद्विषः क्षपयन्तीति तथा तैर्भुजदण्डैरुपलक्षितम ॥ ३२ ॥

ऋत्विजां पत्न्यः स्तुवन्ति । यज्ञोऽयं तव यजनाय त्वां यष्टुं केन ब्रह्मणा पूर्वं सृष्टः । हे यज्ञात्मन् ! त्वं नो यज्ञं नलिनकान्त्या दृशा नेत्रेण पुनीहि पवित्रं कुरु । कथम्भूतं यज्ञं शवाः शेरते यस्मिन्निति शवशयनं श्मशानं तद्वदाभा प्रतीतिर्यस्य सचासौ शान्तमेधश्च उपरतोत्सवः मेधशब्देन पशुहिंसाद्युत्सवो लक्ष्यते । शवमुत्र्कं तत्र शेते इति तथा पशुं तन्नाभेति संबोधनं वा ॥ ३३ ॥

ऋषयस्तु कर्माण्यनुतिष्ठन्तस्तत्पुण्येन तत्फलेन च युज्यन्ते भगवति तु तदभावमालक्ष्य विस्मिताः स्तुवन्ति अनन्वितमघटमानं यद्यस्मादात्मना स्वयं कर्माऽऽचरस्यनुतिष्ठसि नत्वज्यसे न लिप्यसे यतश्चान्ये विभूतये संपदे ईश्वरीं लक्ष्मीमुपसेदुर्भेजुः यद्वा यत इति सार्वविभक्तिकस्तसिः यामित्यर्थः भवांस्तु स्वयमेवाऽनुवर्तमानां तां

॥ सिद्धा ऊचुः ॥

अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः।
तृषार्त्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसम्पन्नवन्नः॥ ३५॥

॥ यजमान्युवाच ॥

स्वागतं ते प्रसीदेश ! तुभ्यं नमः श्रीनिवास ! श्रिया कान्तया त्राहि नः।
त्वामृतेऽधीश ! नाङ्गैर्मखः शोभते शीर्षहीनः कबन्धो यथा पूरुषः॥ ३६॥

लोकपाला ऊचुः

दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यम्।
माया ह्येषा भवदीया हि भूमन् ! यस्त्वं षष्ठः पञ्चभिर्भासि भूतैः॥ ३७॥

योगेश्वरा ऊचुः

प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो ! विश्वात्मनीक्षेन्न पृथग्य आत्मनः
अथाऽपि भक्त्येश ! तयोपधावतामनन्यवृत्त्याऽनुगृहाण वत्सल ! ॥ ३८॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

न मन्यते नाद्रियते ॥ ३४॥

सिद्धास्तु तत्कथासुखमभिनन्दन्तः स्तुवन्ति अयं नो मनोगजस्त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्मयी या नदी तस्यामवगाढः प्रविष्टो दावाग्नितुल्यं संसारतापं न संस्मरति स्म नच ततो निर्गच्छति ब्रह्मसम्पन्नवद्ब्रह्मैक्यं प्राप्त इव ॥ ३५॥

यैजमानी दक्षपत्नी स्तौति ते स्वागतं भद्रमागमनं जातं हे अधीश ! यथा शिरसा हीनः कबन्धमात्रः पुरुषोऽङ्गैः करचरणाद्यवयवैः शोभमानैरपि न शोभते तथा त्वां विना केवलं प्रयाजाद्यङ्गैर्मखो न शोभतेऽतो नः श्रिया सह त्रायस्व त्वद्भक्तान्कुर्वित्यर्थः॥ ३६॥

लोकपालास्त्वीश्वरत्वाभिमानारूढा भगवतस्तत्त्वमपश्यन्त ऊचुः दृष्टः किं न दृष्ट इत्यर्थः कुतः असद्ग्रहैः पुंस्त्वमाविर्णलिङ्गत्वात् असत्प्रकाशरूपाभिर्दृग्भिरिन्द्रियैः अयंभावः शुद्धचित्तानां त्वं शुद्धसत्त्वमूर्तिर्भासि अस्माकं तु बहिर्मुखेन्द्रियाणां पञ्चभूतोपलक्षितो जीवविशेष इवाऽवभासि अतस्त्वमस्मदिन्द्रियगोचरो न भवसि धिगस्म जीवितमिति ॥ ३७॥

योगेश्वरास्तदभेदेन भजतामनुग्रहभाक्त्वं मन्यमानाः स्वामिभृत्यभावेन भजतामप्यनुग्रहं प्रार्थयमानाः स्तुवन्ति द्वाभ्याम् प्रेयानिति विश्वात्मनि परब्रह्मणि त्वयि य आत्मनः पृथक्त्वं नेक्षेत अमुतोऽमुष्मादन्यस्ते प्रेष्ठो नास्ति आत्मनो जीवान्पृथङ्नेक्षेतेति वा हे वत्सल ! भक्तजनप्रिय ! अनन्यवृत्त्याऽव्यभिचारिण्या भक्त्या भजतोऽनुगृहाणेत्यर्थः॥ ३८॥

श्रीराधारमणदास गोस्वामि विरचिता
दीपिन्याख्या दीपिकाटिप्पणी

यावद्वस्तु इन्द्रियैरीक्षेत जानाति तावति प्राकृते वस्तुनि एतत् श्रीविग्रहात्मकं ते स्वरूपं नैव किन्त्वप्राकृतं ब्रह्मात्मकमेव तदुक्तं "अप्रतर्क्ये देहदेहिभिदा चात्र नेश्वरे विद्यते क्वचित्। न विष्णोर्न च मुक्तानां क्वापि भिन्नो गुणो मत" इति तत्र हेतुः यतस्त्वम् इन्द्रियजन्य-

श्रीराधारमणदास गोस्वामिविरचिता
दीपिन्याख्या दीपिका टिप्पणी

ज्ञानस्य गुणस्येन्द्रियस्य अर्थस्य च ज्ञानविषयघटादेराश्रयः प्रकाशकः अद्वयवादिमते तत्तत्प्रतीतेरधिष्ठानं न हि प्रकाशः प्रकाशविषयो भवति न चाऽधिष्ठानमध्यस्तज्ञानविषयं भवतीति उभयत्र तात्पर्यम् तत्रैव हेत्वन्तरं मायामयादूरु हरङ्गशक्तिकार्यात्स्वरूपात्मकविग्रहस्त्वं व्यतिरिक्तः परमते तु अज्ञानकार्यादधिष्ठानस्वरूपस्त्वं व्यतिरिक्तः किन्तु विवर्त्तवादेऽपि गले गृहीतन्यायेनाऽधिष्ठानेऽपि स्वरूपभूता शक्तिस्तैरवश्यं मन्तव्यैव किञ्चित्करत्वमेव शक्तिस्तथा च यथा शुक्तावेव रजतभ्रान्तिर्नत्वङ्गारादौ तथा ब्रह्मण्येव जगद्भ्रान्तिर्नान्यत्रेति नियमात्मा शक्तिरस्त्येव अन्यथाऽज्ञानेनैव विवर्त्तनां किं तदतिरिक्तब्रह्मस्वीकारेण तदुक्तं श्रीशङ्कराचार्य्यचरणैस्स्वभाष्ये शक्तिश्च कारणकार्यनियमात्मा कल्प्यमाना नान्याऽसती कार्यं नियच्छेत् असत्त्वाऽविशेषात् अन्यथाऽविशेषाच्च तस्मात्कारणस्यात्मभूताशक्तिः शक्तेश्चात्मभूतं कार्यमिति अलमति प्रसङ्गेन प्रकृतमनुसरामः पूर्वार्थे गुणशब्दस्य गुणकार्ये लक्षणेत्यरुचौ यद्वेति ॥३१॥

उपपन्नमेव सत्यत्वेन सिद्धमेव यदि भवत्कृपयाऽस्मदिन्द्रियगोचरं न स्यात्तदाऽऽनन्दोऽपि न स्यात् तस्मादिन्द्रियैर्नेत्सर्वदेति अक्षोक्तिरसङ्गतेति कटाक्षः॥ ३२॥

दशा पुनीहीति त्वत्सांनिध्यमन्तरा न किमपि सिद्ध्यतीति भावः॥ ३३॥

अघटमानत्वे हेत्वन्तरं यतश्चेति पूर्वार्थे चकाराध्याहारः यत इत्यधिकञ्च यद्यस्मादित्यनेनैवोभयवाक्यस्यैव हेतुत्वोपपत्तेरित्यरुचौ यद्वेति ईश्वरीं जगल्लक्ष्मीम् ॥ ३४॥

सिद्धा आत्मारामाः ततः पीयूषनद्यास्सकाशान्न निस्सरति ब्रह्मसम्पन्नवदिति निर्गमनाभावमात्रे दृष्टान्तः न त्वानन्दसाम्ये "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् सा ब्रह्मणि स्वमहिमन्यपि नाथ ! माभूद्" इत्यादिनाऽऽनन्दतारतम्यप्रतिपादनात् ॥ ३५॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

स्तौति सर्वैर्देवैश्चाक्षेपपूर्वकमिति शेषः प्रयाजाद्यङ्गानि समिधो यजति इडां यजति बर्हिर्यजति तनूनपातं यजति स्वाहाकारं यजतीति पञ्च विधानि प्रयाजसंज्ञकान्यङ्गानि आदिना श्रीशादिपरिग्रहः दर्शपौर्णमासयोः स्वर्गजननं प्रति कथम्भावाकाङ्क्षायां समिदादीनां कथंभावाकाङ्क्षोपशमकत्वेनान्वयात्तेषामङ्गत्वेन विनियोगः प्रकरणाज्ज्ञेयः अतस्त्वां विनाऽङ्गानामशोभाकरत्वात् श्रिया सह त्रायस्वेति यदि संसारान्मुक्तीच्छामात्रं त्राणं स्यात्तदा श्रीसाहित्यमपुष्टार्थं स्यात् तस्माद्दास्यभावेच्छैव गम्यते इत्यभिप्रेत्य त्वद्भक्तान् कुर्विति फलितोऽर्थः ॥ ३६ ॥

भगवत्तत्त्वमपश्यन्तः किन्तु विशेष्यमात्रं निर्विशेषत्वमेव परत्वेन मन्यन्त इति पूर्णायम् भगवत्कृपया भगवतः प्रत्यक्षेऽपि तद्-मननात् वपुः पञ्चभूतातिरिक्तसच्चिदानन्ददेह इत्यर्थः पञ्चभिर्भूतैरुपलक्षितो भौतिकदेह इव यत्प्रतीयसे एषा भवदीया माया प्रतारणाशक्तिर्भवति "नाहं प्रकाशः सर्वस्य योगमायासमावृत,, इति श्रीगीतोक्तेः भावार्थे पञ्चभूतोपलक्षित इति जहदजहल्लक्षणामाश्रित्यांऽक्रमतो भगस्मर्ज्ञाविर्तामित्युक्त्वा भगवद्विग्रहे लक्षणाश्रितत्वमिति(?) विकृता इति गम्यते तदुक्तं पाद्मे "यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः । स सर्वस्माद्बहिष्कार्यः श्रौतस्मार्तादिकर्मणः ॥ मुखं तस्याऽवलोक्यापि सचैलः स्नानमाचरेद्,, इति ॥ ३७ ॥

अनुग्रहभाक्त्व कृपापात्रत्वं मन्यमाना आत्मनः स्वस्य पृथक्त्वं स्वतन्त्रसत्ताकत्वं किन्त्वत्र व्याजस्तुत्या यद्यपि ज्ञानिनः श्रेष्ठास्तथाप्यस्माकन्तु स्वामिभृत्यभावेन भजन एवाऽभिरुचिरित्युक्त्वा दासा एव तवातिप्रिया इति ज्ञानिष्वाक्षेपो व्यज्यते तत्र हेतुः हे वत्सल ! सर्वत्र भक्तवत्सल इत्येव नाम न तु ज्ञानिवत्सलेति "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय,, इत्यादौ ज्ञानिवत्सलत्वं यच्छ्रूयते तच्च तुर्विधा भजन्ते इत्यत्र भजनश्रवणाद्भगवज्ज्ञानी एव प्रस्तूयते न तु शुष्कज्ञानी "श्रेयःसृतिं भक्तिमुदस्य ते प्रभो क्लिश्यन्ति ये केवलबोधलब्धय,, इत्यादौ तस्य निन्दाश्रवणात् ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

अथ ब्रह्मा नात्मन् श्रितं तवविदन्त्यधुनापि तत्त्वमिति भगवत्तत्त्वस्य वेद्यत्वं यद्गुणोक्तं तदेव प्रपञ्चयन्नाह नैतादिति । भवत एतद्वाङ्मनसागोचरं स्वरूपं पुरुषो जीवः पदार्थानां भेदं स्वाऽसाधारणधर्मं गृह्णन्तीति पदार्थभेदग्रहाः पदार्थभेदो गृह्यत एभिरिति वा पदार्थभेदग्रहाः रूपस्पर्शादिग्राहकैश्चक्षुरादिभिरिन्द्रियैरित्यर्थः नेक्षेत् नसाक्षात्कुर्यात् कुतः यावत् यावता यत इत्यर्थः असौ पुरुषः ज्ञानस्य ज्ञायते अनेनेति ज्ञानं करणे ल्युट् तस्य इन्द्रियवर्गस्य अर्थस्य शब्दादेर्विषयस्य गुणस्य च ज्ञानार्थयोः कारणस्य सत्त्वादिगुणस्य च आश्रयः त्वन्तु मायामयात् मायापरिणामरूपात् असतो देहादेः तत्संसृष्टाच्च जीवात् व्यतिरिक्तोऽत्यन्तविलक्षणः प्राकृतं हि चक्षुरादीन्द्रियं प्राकृतमेव गृह्णीयात्त्वप्राकृतं त्वत्स्वरूपमितिभावः ॥ ३१ ॥

इन्द्रस्तु भगवदवतारस्य धर्मसंस्थापनार्थत्वमनुसन्दधन्नाह इदमिति । हे अच्युत ! इदं तव वपुः शरीरं विश्वभावनं विश्वं भावयति सुखिनं करोतीति विश्वभावनम् अतएव मनोदृशां मनसां दृशाञ्च आनन्दं करोतीत्यानन्दकरम् अस्य रूपस्य धर्मसंस्थापनार्थत्वात् तस्य चाधर्मविरतिपूर्वकत्वादधार्मिकविरत्युपयुक्तत्वं विग्रहस्याह । सुरविद्विषः सुराणां विद्विषः असुरास्तान्क्षपयन्तीति तैः उद्धृतान्यायुधानि यैस्तैरष्टभिर्भुजदण्डैः दण्डवद्दीर्घैर्भुजैरुपपन्नं युक्तम् ॥ ३२ ॥

ऋत्विक्पत्न्यस्तु भवदाराधनत्वेनोपक्रान्तं विच्छिन्नमध्वरं कृपादृष्ट्या पवित्रीकुर्वित्याहुः यज्ञ इति । अयं यज्ञस्तव यजनाय आराधनाय केन ब्रह्मणा दक्षेण वा पूर्वं सृष्टः आरब्धः सचेदानीं पशुपतिना रुद्रेण दक्षकोपात् विध्वस्तः हे यज्ञात्मन् ! यज्ञ आत्मा मूर्तिर्यस्य तस्य संबुद्धिः नोऽस्माकं यज्ञं नलिनकान्त्या दृशा नेत्रेण पुनीहि पवित्रं कुरु कथं भूतं यज्ञं शवाः शेरते यस्मिन्निति शवशयनं श्मशानं तद्वदाभा प्रतीतिर्यस्य सः मेधशब्देन पशुहिंसाद्युत्सवो लक्ष्यते शान्तः मेधो यस्य सः उपरतोत्सवः शवशयनाभश्चासौ शान्तमेधश्चेति कर्मधारयः ॥ ३३ ॥

ऋषयस्तु यत्परमात्मनोऽस्माधारणमपहतपाप्मत्वं देवमनुष्यादिपुण्यापुण्यसजातीय चेष्टितत्वेऽपि तत्फलानामननुभवितृत्वरूपं तदनुसन्दधानाः परिपूर्णत्वेन स्तुवन्ति अनन्वितमिति हे भगवन् ! ते तव विचेष्टितमिदमनन्वितमघटमानं विस्मयनीयमित्यर्थः किं तत्राह आत्मना स्वयं कर्म पुण्यापुण्यसजातीयं कर्म चरसि अनुतिष्ठसि नाऽज्यसे तत्कृतेन फलेन नलिप्यसे इत्यर्थः इदमप्यन्यदनन्वितमित्याहुः यत इति चतुर्थ्यर्थे तसिः तस्य सार्वविभक्तिकत्वात् यस्यै विभूतये यद्विभूत्यर्थम् ईश्वरीं लक्ष्मीम् उपसेदुः भेजुः ब्रह्मादय इति शेषः द्वितीयार्थे वा तसिः विभूतये सम्पदे यामीश्वरीम् भेजुस्तां स्वयमनुवर्तिनीं स्वयमेवानुवर्तमानां भवान्न मन्यते नाद्रियते उपेक्षत इत्यर्थः अनेन परिपूर्णत्वमुक्तम् ॥ ३४ ॥

सिद्धास्तु तत्कथामृतमभिनन्दन्तः स्तुवन्ति अयमिति । अयं नोऽस्माकं मनोवारणः मनोगजः क्लेशा आध्यात्मिकाद्यस्त एव दावाग्नयस्तैर्दग्धः अतएव तृषा शब्दादिविषयेषाऽसक्त्याऽऽर्तः पीडितः ते तव त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्मयी या नदी तस्याम् अवगाढः प्रविष्टः दावं दावाग्नितुल्यसांसारिकाध्यात्मिकादि तापं न सस्मार न स्मरति नच ततो निर्गच्छति ब्रह्मसम्पन्नवत् मुक्तवत् सुस्थित एवाऽवतिष्ठत इत्यर्थः ॥ ३५ ॥

दक्षपत्नी यजमानी स्तौति स्वागतमिति हे ईश ! ते तव स्वागतं सद्गमागमनं जातं हे श्रीनिवास ! प्रसीद प्रसन्नोभव अस्माकमिति शेषः ते तुभ्यं नमः हे अधीश ! यथा शिरसा हीनः कबन्धमात्रः पुरुषः अङ्गैः करचरणाद्यवयवैः शोभनैरपि न शोभते तथा त्वां विना केवलं प्रयाजाद्यङ्गैर्मखो न शोभते अतो नः श्रिया कान्त्या सह आयस्व पालयेत्यर्थः ॥ ३६ ॥

लोकपालास्तु भगवतः सौलभ्यं तन्मायावैभवम् अनुसन्दधानाः स्तुवन्ति दृष्ट इति त्वं वाङ्मनसागोचरस्वरूपस्वभावस्त्वं नः अस्माकं दृग्भिः मांसचक्षुर्भिः किं दृष्टः कथं दृष्ट इत्यर्थः स्वयं वाङ्मनसाऽवेद्यस्वरूपस्वभावत्वे सति अखिलजननयनविषयतागतस्वरूपसौलभ्यनैवदृष्ट इत्यर्थः नो इति निपातोवा नञ्पर्यायः दृग्भिर्नोदृष्टः किं दृष्ट एवेत्यर्थः सौलभ्यमेवात्रकारणमितिभावः यद्वा एषाऽदृग्विषयोऽपि दृग्विषयोजात इत्येषा भवदीया माया भवदीयो विचित्रः सङ्कल्प इत्यर्थः मायाशब्दस्य विचित्र सर्गकारि शक्तिविशेष परत्वे पूर्वोक्त एवान्वयः साधुः इदमपि तव माया कार्यमेवेत्याह असद्ग्रहैः । असतिदेहे तदनुबन्धिनि च ग्रहः आग्रहः अहं ममताऽभिमानः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ॥

येषां तैर्देहात्माभिमानिभिरित्यर्थः दृश्यं शरीरं येन कारणेन प्रत्यग्दृष्ट्या दृश्यते प्रत्यक्त्वेन दृश्यते आत्मतत्त्वेनाऽभिमन्यत इत्यर्थः एवं दृश्यस्य प्रत्यक्त्वेन दृष्टिः भवदीया माया विचित्रा शक्तिरित्यर्थः तत्कारणभूता भवदीया मायेति भावः हिशब्दः श्रौतीं स्मार्तीं च प्रसिद्धिं द्योतयति "अस्मान् मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः। नासदासीन्नोसदासीत्तदानीं तम आसीत् तमसा गूढमग्रे प्रकेतं" "दैवी ह्येषा गुणमयी मम माया दुरत्यया" इत्यादि श्रुतिस्मृतिभ्यामनुसन्धेया एतेन देहात्मभ्रमो भगवन्मायामूल एवेत्युक्तं भवति एवं जीवेशैक्य भ्रमोऽपि त्वन्मायामूल एवेत्याहुः हे भूमन्! अनेन जीववैलक्षण्यं सूचितं जीवस्याणुस्वरूपत्वात् यस्त्वं प्रकृति पुरुषविलक्षणस्त्वं पञ्चभिर्भूतैः पृथिव्यादिभिः सहित इति शेषः अत्र पञ्चभिः भूतैरित्यनेन तत्परिणामरूपं शरीरं लक्ष्यते तद्विशिष्टः षष्ठोऽचिद्विलक्षणो जीवः पञ्चभूतप्रस्तावात् षष्ठ इत्युक्तिः भासि जीवत्वेन प्रतीयसे एवापि प्रतीतिस्त्वन्माययैव मायाकार्यभूतैवेत्यर्थः हिशब्दः स्वतन्त्रात्मभ्रम तत्पुरुषेषु प्रसिद्धिद्योतकः ॥ ३७ ॥

लोकपाला भगवतोरूपसौलभ्यानुसन्धानपूर्वकं मायावैभवरूपजीवेशैक्यप्रतीतिभ्रमत्वं चोक्ते योगीश्वराः परमपुरुषात्स्वतन्त्रभेदं स्वारयन्तस्तद्धेतुस्य पारतन्त्र्यं तस्य च शरीरशरीरिभावशेषशेषिभावादिनिबन्धनत्वञ्चाविष्कुर्वन्तो वात्सल्यगुणविशिष्टत्वेन स्तुवन्ति प्रपद्यानीति। हे प्रभो! विश्वात्मनि विश्वस्य चिदचिदात्मप्रपञ्चस्यान्तः प्रविश्य स्वयमपरित्यक्तस्वरूपस्वभावत्वेन प्रशासनेन धारके अनेन विश्वहेय शरीरत्वमुक्तमिति जीवानां परतन्त्रभेदोऽभ्युपगत इति वेदितव्यं विश्वात्मनि त्वयि विश्वस्माद्विलक्षणे त्वयि यः पुमान् आत्मनः स्वस्य पृथक्त्वम् पृथक्सिद्धत्वं स्वस्याब्रह्मात्मकत्वमित्यर्थः नेक्षेत न पश्येत् स्वात्मानं परमात्मशरीरत्वेनाऽपृथक्सिद्धत्वेन ब्रह्मात्मकत्वेनाऽनुपश्येदित्यर्थः अमुनः अमुष्मात् तत्त्वदर्शिनः अन्यस्ते नैव प्रेयान् प्रीतिविषयो नास्ति तथैव हि भगवता "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इति गीतमिति भावः अत्र पृथक्त्वं नेक्षेदित्यनेन तादात्म्येन दर्शनं विहितमित्यर्थवर्णनं त्वयुक्तं विश्वात्मनि भृत्येशतयेति पूर्वोक्तव्याघातात् विश्वतादात्म्यन्तु सर्वसमयविरुद्धं जडाजडयोरत्यैक्यप्रसङ्गात् अतो विश्वात्मनीति व्यतिरेकनिर्देश एव अत आत्मनः पृथक्सिद्धत्वेनैव दर्शनं प्रतिषिध्यते अनेन परतन्त्र भेद उक्तः शरीरात्मभाव वचनेन तदन्तर्भूताः शेषशेषिभावादयोऽप्यर्थादुक्ताः एवं शरीरत्वेन शेषत्वेन चात्मानमनुसन्दधानां मत्प्रिय इति त्वयैवोक्तमिति यस्त्वयानुगृह्यत इति सिद्धमेव किन्तु योऽसौ शास्त्रसिद्धशरीरात्मभावादिज्ञानशून्यः केवल स्वस्वामिभावज्ञानवान् सोऽपि वात्सल्यवता त्वयानुग्राह्य एवेत्याहुः तथापीति यद्यप्यात्मनोऽपृथक्त्वं न पश्यति लोकसिद्धं स्वामिभृत्यभावमेव पश्यति तथापि भृत्येशतया भृत्यस्वामिभावेन उपधावतां समीपगति प्रक्रान्तानाम् अनिष्पन्नज्ञानानामित्यर्थः अनन्यवृत्त्या अनुग्रहैकदृष्ट्या अनुगृहाण प्रसीद हे वत्सल! दोषेऽपि गुणबुद्धिर्वात्सल्यं यथा मातुः पुत्रे वत्सलस्य तवाज्ञानुग्रह उचित इति भावः यद्वा अनन्यवृत्त्या अव्यभिचारिण्या भक्त्या उपधावताम् अनुगृहाणेत्यन्वयः ॥ ३८ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

सर्वस्य हरेस्तत्त्वविषयाज्ञानभुक्तेदानीं तत्सत्त्वप्रमाणाभावेन

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

शून्यप्रायं तत्स्यादित्यतोऽव्यक्तादिविशेषज्ञानिप्रत्यक्षं प्रमाणमिति भावेनाह नैतदिति। एतदव्यक्तादि भवतः स्वरूपं सच्चिदानन्दात्मकं न भवति इह जगति ये वैराग्यभक्त्यादिसाधनसामग्रीमन्तः सर्वपदार्थभेदग्रहाऽव्यक्तादिपदार्थविशेषज्ञानी ब्रह्माद्यन्यतमः पुरुषो यावत्पदार्थजातं तावत् पृथगीक्षेत् पश्यतीति यस्मात्तस्मादित्यर्थः भेदोऽन्तरं विशेषश्च सूक्ष्मश्चयं चाभिधीयत" इति वचनात् अत्र भेदो विशेषः नन्वव्यक्तादेर्व्यतिरिक्तं चेत्तत्तद्दर्शनं प्रमाणं स्यात्तदेव कुत इति तत्राह ज्ञानस्येति ज्ञानस्येत्युपलक्षणं जातिवचनम् ज्ञानेन्द्रियाणां कर्मेन्द्रियगणमर्थस्य शब्दादितन्मात्राणां चाकाशादिभूतानां च गुणस्य सत्त्वादेश्च च शब्दात्तत्कार्ययोर्महदहंकारयोश्चाश्रयान्मायामयात् प्रकृतिविकारात् प्रपञ्चाद्व्यतिरिक्तोऽत्यन्तविलक्षणः केवलचिदानन्दात्मकोनित्यदेहस्त्वमिति यतोऽत इति तदुक्तं "अव्यक्तादिपदार्थानां विशेषज्ञानिनापि तु। नेदृग्विष्णोर्वेक्षय आनन्दः प्राकृतोनहीति" अव्यक्तादिपदार्थानां विशेष ज्ञानिना विष्णोर्देहो व्यक्तादिपदार्थानां सम्बन्धेन निर्मितोनेक्षेयः तत्र हेतुमाह आनन्दइति यद्वाऽसौ पदार्थभेदग्रहः पुरुषो यावदीक्षेत् तावदेतदव्यक्तादि भवतः स्वरूपं न भवतीति प्रत्येति ज्ञानिदर्शनस्य यथार्थत्व नियमात् अनेनाज्ञानिपक्ष एवाऽव्यक्तादि स्वरूपं न ज्ञानिपक्ष इत्युक्तम् अन्यत्समम् असत इति पाठे अमाङ्गल्यादित्यर्थः ॥ ३१ ॥

अनन्तरातीते श्लोके प्रत्यक्षमेतत् भवतः स्वरूपं न भवतीत्यन्यथा प्रतीतिमिन्द्रस्तुतिव्याजेन निरस्यति इदमिति अच्युत! हेयोपादेयरहित! हरे! इदं दृश्यमानं तव वपुर्विश्वभावनं जगदुत्पादकं ब्रह्मेत्यन्वयः वपुःशब्दस्यार्थान्तरमाह आनन्दकरमिति शुभाकारं तनोवपुरित्यभिधानं यावद्गुणानुपसंहृत्योपास्ते तदनुसारिफलं च स्वस्यापि स्यादित्याशयेनाह सुरविद्विडिति सुरविद्विषोऽसुरास्तान् क्षपयन्तीति सुरविद्विट्क्षपणास्तैः ॥ ३२ ॥

अन्तरायितस्य कर्मणः पूर्णफलत्वसिद्धिः श्रीनारायणकटाक्षेणेत्यभिप्रायेण पत्न्यः स्तुवन्तीत्याह यज्ञोऽयमिति शव जलं तस्मिन् शेत इति शवशयः अधिकरणे शेतेरिति कर्त्तर्यच्प्रत्ययः कमलं नाभौ यस्य स तथोक्तः तस्य सम्बुद्धिः शवशयनाभ! कमलनाभ! शान्तमथमुपरतं यज्ञं एकपदपक्षे शवाः प्रेताः शेरतेऽस्मिन्निति शवशयः पुंसि संज्ञायां घः प्रायेणेत्यधिकरणे घः प्रत्ययः। श्मशानं तस्य आभेव आभा यस्य सः श्मशानकान्तिश्चासावुपरतश्चासावध्वरश्चेति स तथोक्तस्तं पुनीहि शुद्धं कृत्वा पूर्णफलं कुर्वित्यर्थः ॥ ३३ ॥

इतोऽपीदं रूपमुपनिषदेकवेद्यं न मायामयमिति भावेन ऋषयः स्तुवन्तीत्याह अनान्वितमिति भगवंस्तव विचेष्टितमनन्वितं लोककर्मविलक्षणं कुतस्त्वमात्मनाऽन्यसहायमन्तरेण यत्कर्म चरसि करोषि तेन कर्मणा नाज्यसे नालिप्यसे हि यस्मात्तस्मात् "स यत्तत्रकिञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गोह्ययं पुरुष" इति श्रुतेः असङ्गित्वं तवैवोचितमित्याहुः विभूतय इति। यतो यस्याः श्रियः प्रसादाद्विभूतयः ईश्वरान् ब्रह्मादीनुपसेदुः प्रापुस्तां श्रियं स्वयमनुवर्तिनीं स्वतएव निषेवमाणां भवानमन्यत मनज्ञान इति धातोः अप्राप्तफलार्थं सेवते इति न जानाति किन्तु ऋतुधर्मवज्जलस्यन्दनवत् भक्तिकरणमस्याः स्वभाव इत्येव जानातीत्यर्थः ॥ ३४ ॥

ते तव कथा मृष्टपीयूषनद्यामवगाढो मग्नोऽयं मनोवारणः संसाराख्यं दावं न सस्मार स्मरणाभावे निमित्तमाह ब्रह्मेति ब्रह्मसम्पन्नस्यापि निर्गमनं स्मृतिः संभवतीत्यत उक्तं न निष्क्रमिनाति

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

कथानवगाहे हेतुमाह कलेशत्यादिना अनेनाप्यस्य रूपस्य अप्रत्यं निरूणार्थीति ज्ञायते ॥ ३५ ॥

पूर्वत्र यजमानेन यथातत्त्वं स्तुतम् अत्र लोकसंस्कारपूर्वकमौत्सुक्याच्च स्वाभीष्टसिद्धये यजमान्या प्रसूत्या स्तूयते।स्वागतमित्यादिना श्रिया कान्तयासह त्राहि रत्न कबन्ध इत्यनेन शिरोराहित्ये सिद्धेऽपि स्पष्टत्वाय शीर्षहीन इत्युक्तम् अङ्गैरङ्घ्रिविगादिभिरन्यत्र करचरणादिभिस्सहितोऽप्यनेन सर्वोत्तमत्वं हरेर्द्योतितम् ॥ ३६ ॥

लोकपालस्तुत्यापि हरेरिदं रूपमनारोपितमितिज्ञायत इति आह दृष्टः किमिति । येन त्वया विश्वं सर्वं दृश्यते ज्ञातं भवति स प्रत्यग्दृष्ट्या ज्ञानदृष्ट्या च दृश्यस्त्वं । नोऽस्माकं असद्ग्रहैः शब्दाद्यमङ्गलविषयग्राहिभिर्दृग्भिः किं प्रयोजनमुद्दिश्य दृष्टोऽनुग्रहमन्तरेणेति शेषः पश्चः पञ्चभूतव्यतिरिक्तशरीरस्त्वं पञ्चभिर्भूतैर्निर्मितशरीरवद्भिर्दृष्टोभासीति यदेषाभवदीया माया हि भवत्सामर्थ्यमेव नहामांसदृष्टिगोचरस्वभावस्य तद्गोचरत्वं सामर्थ्यं विना युज्यते भगवन्महिमैवासौ यद्दृश्योभगवान् स्वयमितिवाक्यं हिशब्दगृहीतं भूमन्नित्यनेन पूर्णस्यायं स्वभाव इति दर्शयति यद्वा प्रत्यग्दृष्ट्या दृष्टस्त्वमस्माकं दृग्भिर्दृष्टः किमहोऽस्मद्भाग्यं दिव्यदृष्टिगोचरस्यान्यदृष्टिगोचरत्वमिति यत्पञ्चभिर्भूतैः सह पश्चो भासीति यच्च सेयं भवदीया माया हीति ॥ ३७ ॥

योगेश्वरस्तुत्या प्रतीतं पञ्चभूतात्मकत्वं निवारयति प्रेयानिति। अमृतप्रिय मुक्तप्रिय प्रभो!समर्थ!विष्णो!यो जीवो विश्वात्मनि जगदन्तर्यामिणि त्वयि पृथक्त्वमन्यथात्वं नेक्षमपश्येत् सुरनरतिर्यगादिषु जीवराशिषु प्रेरकत्वेन स्थितानां तव रूपाणां गुणादीनां चाणुमात्रं भेदं न पश्यतीत्यर्थः तस्मादात्मनो जीवादन्यः प्रेयांस्तव नास्ति हेभृत्येश! भृत्यानां दासानामस्माकमीश! भक्तवत्सलया"भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन,,इति प्रसिद्धतयाऽनन्यवृत्त्या उपधावतां सेवमानानामस्माकमनुग्रहोऽस्त्येव अथापि पुनरनुगृहाणेत्यन्वयः "यथार्थज्ञानिनो नान्यः प्रियो विष्णोस्तु कश्चन। तथाप्यधिक सन्तुष्ट्यै प्रसीदेत्यर्थनं पुनः,, इतिवचनादुपपन्ना प्रार्थनेति अत्राभेदज्ञानिनो हरेरधिकप्रियत्वमुच्यत इत्ययमर्थः"पृथक् ज्ञानं तादित्याहुर्योक्तिश्चिक्रीडयतेऽन्यथा । ज्ञानं क्रियाऽविरोधेन त्वपृथग्वस्तुतोहशिः ॥ कांचिद्वदंषिमिन्दन्ति ह्यासुरज्ञानवृत्तय: । निराकुर्वन्त्यथामन्दा भेदस्य परमार्थताम् येतु तत्त्वविदांमुख्या भेदं ब्रह्मान्यवस्तुनोः। परमार्थमिति ज्ञात्वा नित्यं विष्णुमुपासते,, इत्यादिप्रमाणाविरुद्ध इति ज्ञातव्यम् आचार्येणापि नपृथग्यआत्मनः अन्यथा यो न पश्यतीति पृथगित्येतदन्यथेति व्याख्यातं न भेदमिति ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

श्रीब्रह्मापि भृगुवाक्यमनुमोदमान एवाह नैतदिति । इन्द्रियैः करणभूतैः पुरुषो यावद्वस्तु जानाति तावति वस्तुनि भवत एतत् श्रीविग्रहात्मकं स्वरूपं न स्यात् किन्तु तावदतिक्रम्यैव स्यादित्यर्थः तर्हि किं लक्षणं तत्राह । ज्ञानस्येति । तदेव तद्विग्रहलक्षणस्त्वमेवाश्रयः नातः परं परम यद्भवतः स्वरूपमित्यादेः तस्मात् कृपया स्वयमेव प्रकाशत इति भावः । व्यतिरिक्तामितमत्त्वमिति चित्सुखपाठान्तरं । व्यतिरिक्तश्चासौ अङ्कारश्चेति ॥ ३१ ॥

प्रायोऽसौ चतुर्भुज एवाविर्भवति सम्प्रति त्वष्टभुज इति साश्चर्यमिन्द्र उवाच । इदमपीति । न केवलमानन्दकरं भुजबाहुल्येना-

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ॥

सुरसृपणाऽतिशयाद्युक्तश्च ॥ ३२ ॥

यज्ञपत्न्यस्तु तत्कृपादृष्ट्यार्द्रितचित्ताः दुःखं निवेदयन्ति यज्ञ इति ॥ ३३ ॥

ईश्वरीं जगल्लक्ष्मीम् अनुवर्त्तनीमिति चित्सुखः ॥ ३४ ॥

सिद्धा अत्र आत्मारामाः ते इति चित्सुखः ॥ ३५ ॥

यजमाना इति चित्सुखः ॥ ३६ ॥

लोकपालास्तु तच्छ्रीविग्रहस्य दृश्यत्वं भौतिकत्वं च निवारयन्ति । दृष्टं किं न इति । किन्तु स्वयमेव प्रकाशस इत्यर्थः । तत्र हेतुः पश्चः पञ्चभूतातिरिक्तो यस्त्वं सपञ्चभिर्भूतैः स्वोपाधिभिरेव भासि नात्मनेति यत् सैषा त्वदीया मायैव । मायाभिभूतानामेव तथा विवेको भवतीत्यर्थः । प्रत्यग्दृष्ट्या इति चित्सुखः ॥ ३७ ॥

प्रेयानिति अयमर्थः यस्त्वयि विश्वात्मनि आत्मनो जीवान् ईक्षेत स्वच्छक्तित्वात्तदनन्यत्वेनैव जानाति नतु पृथक् स्वतन्त्रत्वेनेक्षेत अमुतः अमुष्मात् यद्यपि ते प्रेयान्नास्ति वत्सल ! हे भृत्यप्रिय ! भृत्येशभावेन ये भजन्ति तेषां या अनन्यावृत्तिः अव्यभिचारिणी निजभक्तिस्तयैवानुगृहाण प्रस्तुतत्वेनास्मान् ज्ञानिभक्तानिति लभ्यत इति ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

पदार्थभेदग्रहैर्विषयग्राहकैरिन्द्रियैस्तव एतत्स्वरूपं श्रीमूर्त्तिं यावन्न पश्येत् तावदेव ज्ञानस्याऽधिदैवस्यार्थस्याऽधिभूतस्य गुणस्याऽध्यात्मस्य चाश्रयः स्यात्।तत्स्वरूपं साक्षाद्दृष्टे सति नज्ञानादेराश्रयः किन्त्वप्राकृत एव स्यात् यतस्त्वं मायामयादसतोऽधिदैवादेर्व्यतिरिक्तश्चिद्रूपो न तैर्गृह्यसे इत्येतावत्तत्त्वन्तु वयं जानीमोऽत एते प्राकृतेन्द्रियाः पश्याम इत्यभिमानवन्तोऽपि तत्स्वरूपं नैव पश्यन्तीति भृग्वादिषु कटाक्षः ॥ ३१ ॥

इदं तव वपुर्विश्वमपि कृपया भाववन्तं करोतीति तत् । सुरविद्विड्क्षपणोद्दण्डसंहारकारित्यष्टभुजमिदं ते वपुरस्माभिः प्राकृतेन्द्रियैरप्यनिर्वाच्यया त्वत्कृपया दृष्टमेव आनन्दकरमित्यस्मदाद्यानन्दान्यथानुपपत्तिरेवात्र प्रमाणमिति ब्रह्मणि कटाक्षः ॥ ३२ ॥

केन ध्वमणा । शव शब्दस्योदकवाचित्वात् शवशयनं कमठं तन्नाम शान्तमेधमुपरतपशुहिंसोत्सवं दशा पुनीहीति त्वत्सन्निधानं विना वर्त्तमानैः सप्रयत्नैरप्येतैः किमपि न सिध्यतीत्यवगतमिति सर्वेष्वेव कटाक्षः ॥ ३३ ॥

अनन्वितमघटमानं यद्यस्मादात्मना स्वयं कर्माचरसि अनुतिष्ठसि अथच नाज्यसे न लिप्यसे । कर्मकारिणस्त्वन्ये सर्वे लिप्यन्ते एवेति ब्रह्मादिषु कटाक्षः । यतश्च अन्ये विभूतये सम्पदे ईश्वरीं लक्ष्मीम् उपसेदुः । भेजुः यद्वा यत इति सार्वविभक्तिकस्तासिः यामित्यर्थः । भवांस्तु स्वयमेवानुवर्त्तमानां तां न मनुते नाद्रियते ॥ ३४ ॥

सिद्धा इति केवलया भक्त्यैव प्रेमसिद्धिं प्राप्ता इत्यर्थः त्वत्कथैव मृष्टपीयूषनदी शुद्धामृतनदी तस्याम् अवगाढः निमग्नः दावं संसारज्वालां विस्मृतवान् । अतस्ततो न निष्क्रामति ब्रह्मसम्पन्नवत् ब्रह्मैक्यं प्राप्त इवेति किं कर्म करणाकरणलेपालेपविचारेण भगवतो लीलाकथामृते निमज्जामेति ऋषिषु कटाक्षः ॥ ३५ ॥

यजमानी दक्षपत्नी प्रसूतिः । श्रिया कान्तयेति मयि त्वदुदासस्वायम्भुवमनोः पुत्र्यां देवहूताविव तव महती कृपास्तीत्यवगतम् ।

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

यतः स्वकान्तां श्रियं मद्गृहमनैषीस्ततोऽस्मान् रुद्रापराधविध्वस्तान् प्रीहि । त्वामृते इति ब्रह्मादिसर्वदेवेषु कटाक्षः ॥ ३६ ॥

असद्ग्रहैर्विषयग्राहिभिरिन्द्रियैस्त्वं किं नो दृष्टः अपि तु दृष्ट इत्यर्थः । असद्ग्रहैरिति पुंस्त्वमजहल्लिङ्गत्वात् प्रत्यगपि द्रष्टापि त्वं त्वत्कृपयैव दृश्यः स्या इत्यर्थः । यतस्त्वं पञ्चः पञ्चभूतातिरिक्तोऽपि पञ्चभिर्भूतैर्भौतिकशरीरो भासीत्येषा भवदीया मायैवेति त्वदीयश्रीविग्रहस्य भौतिकत्वं ये मन्यन्ते तैर्जरासन्धादिभिरिव दृष्टोऽपि त्वं माधुर्यानुपलम्भात् नैव दृष्ट इति शुष्कज्ञानिषु ऋषिषु देवेषु च कटाक्षः ॥ ३७ ॥

त्वयि विश्वात्मनि आत्मनो जीवान् यः पृथङ्नेक्षेत त्वच्छक्तित्वात्त्वदनन्यत्वेनैव जानाति अमुतः अमुष्माद् यद्यपि ते प्रेयानन्यो नास्ति "प्रियो हि ज्ञानिनोऽत्यर्थमहं सच्च मम प्रिय,, इति त्वदुक्तेः । तथापि तदपि भृत्यांशतया अहं ते भृत्यस्त्वं मे ईश इति भेदेन दासप्रभुभावेन उपधावतां सेवमानानां या अनन्यवृत्तिः अनन्यभक्त्या अनुवृत्तिस्तयैव तद्दानेनैवास्माननुगृहाण वयं निष्कृष्टास्त्वदभेदमार्थं प्राप्तुं कथं शक्नुम इति द्योतितया व्याजस्तुत्या दासा एव तवातिप्रिया इति ज्ञानिषु कटाक्षः । यदुक्तं त्वयैव "न तथा मे प्रियतम आत्मयोनिर्नशङ्करः । न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान्,,इति । नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विनेति । तत्र लिङ्गं हे वत्सलेति त्वं भक्तवत्सल इति सर्वत्र श्रूयसे ननु ज्ञानि वत्सल इति ॥ ३८ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

ब्रह्मा त्वज्ज्ञानावधिमाह नैतदिति असौ पुरुषो जीवः यावत् ज्ञानस्य श्रोत्रादि ज्ञानेन्द्रियवर्गस्य गुणस्य गुणकार्यस्य आश्रयः देहेन्द्रियात्माभिमानवान् अर्थस्य गृहादेराश्रयास्तत्र ममेदमित्यभिमानवान् तावत्परार्थभेदग्रहैः मात्रामयपदार्थभेदमात्रग्राहकैर्बाह्यवृत्तिभिरिन्द्रियैः भवतः एतत्स्वरूपं न ईक्षेत यतस्त्वं मायामयात् बाह्यवृत्तीन्द्रियग्राह्यात् मायिकपदार्थात् व्यतिरिक्तः ॥ ३१ ॥

इन्द्रस्तु अनात्मज्ञो बहिर्वृत्तिभिरिन्द्रियैर्भगवतो रूपं पितामहोक्तं नेक्षते तन्महताऽऽदरेण स्तौति इदमिति । सुरविद्विषामसुराणां सपत्नस्तत्क्षपणार्थमेनोदायुधैरष्टभिर्भुजदण्डैरुपलक्षितं तवेदं वपुरुपपन्नं सुनिष्पन्नं श्रुतिनिर्णीतमित्यर्थः हे अच्युत ! यथा त्वमच्युतस्तथा तवानुरूपं तव वपुरिति सम्बोधनाभिप्रायः कथं भूतं विश्वम् भावयत्युत्पादयतीति तत् विश्वपूर्ववर्ति विश्वविलक्षणम् नित्यमप्राकृतमित्यर्थः ॥ ३२ ॥

ऋत्विजां पत्न्यस्तु प्रस्तुतं यज्ञं प्रसङ्गादस्मांश्च कृपाऽवलोकनेन पुनीहि इति प्रार्थयन्ते यज्ञ इति । नव यजनाय केन ब्रह्मणा प्रथममयं यज्ञः सृष्टः स चेदानीं पशुपतिना विध्वस्तः हे यज्ञात्मन् ! हे यज्ञमूर्ते ! तं यज्ञं नोऽस्मांश्च दृशा नेत्रेण पुनीहि नलिनरुचेत्यनेन स्वविषये तत्कृपावलोकने औत्सुक्यं सूचयन्ति कीदृशं यज्ञं शवाः शेरते यत्र तच्छवशयनं श्मशानं तद्वदाभा यस्य सचासौ शान्तमेधः उपरतोत्सवस्तम् ॥ ३३ ॥

ऋषयस्तु सर्वं परायत्तं कर्मवश्यमपर्णौ च ज्ञात्वा स्वायत्तत्वेन कर्मावश्यत्वेन च भगवन्तं स्तुवन्ति अनन्वितमिति । हे भगवन् ! यद्यस्मात् आत्मना स्वेच्छानुसारेणैव ननु परायत्ततया कर्म च यसि अनुतिष्ठसि नश्वज्यसे न लिप्यसे यस्माच्च यत इत्यत्र सार्व-

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

विभक्तिकस्तसिः यामीश्वरीं लक्ष्मीं विभूतये सम्पदे ब्रह्मादयः उपसेदुः भेजुः तां स्वयमनुवर्तिनीमनुवर्तमानामपि भवान्न मन्यसे स्वविभूतिदात्रीं न मन्यसे स्वतः सिद्धसर्वविभूतिमत्त्वात् तस्मात्ते विचेष्टितं तव वृत्तम् अनन्वितं त्वदन्यस्यासंभावितं त्वय्येव सुसङ्गतमित्यर्थः ॥ ३४ ॥

सिद्धास्तु विषयानन्दवासनां निर्नाशयिषवः ब्रह्मानन्दप्राप्तिकामाः शास्त्रानन्दमभिनन्दन्तः स्तुवन्ति अयमिति । अयं नोऽस्माकं मन एव वारणो गजः क्लेशा आध्यात्मिकादयस्तापा एव दावाग्नयस्तैर्दग्धः सन्तप्तः तृषा विषयवासनया आर्त्तः त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्मयी या नदी तस्यामवगाढो निमग्नः दावं संसाराख्यवनभवं आध्यात्मिकादिक्लेशरूपमग्निं न सस्मार ब्रह्मसम्पन्नवत्ततो न निष्क्रामति त्वत्कथा श्रवणं न त्यजतीत्यर्थः ॥ ३५ ॥

त्वामङ्गिनं विनाङ्गभूतैरन्यैर्देवैस्त्वदाराधनार्थो यज्ञो न शोभतेऽतस्तवागमनं शोभनमित्येवं दक्षपत्नी स्तौति स्वागतमिति । ते स्वागतं शोभनमागमनं जातम् श्रिया लक्ष्म्या सह नोऽस्मान् त्राहि त्वदेकशरणान् कुरु इदमेव यज्ञफलमिति भावः ॥ ३६ ॥

लोकपालास्तु भगवदनुग्राह्यैरिन्द्रियैरेव भगवान् गृह्यते ननु बाह्यवृत्तिभिरिन्द्रियैरित्याहुः असद्ग्रहैः असति अनित्ये संसारे ग्रहोऽभिनिवेशो येषां तैरिन्द्रियैः दृग्भिर्मनोबुद्ध्यादिवृत्तिभिश्च प्रत्यग्द्रष्टा प्रत्यक्षोऽतीन्द्रियस्यापि द्रष्टा त्वं नोऽस्माभिर्दृष्टः किं निर्भ्रमत्वेन निश्चितः किं नेत्यर्थः "नसन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चिदेनं नच क्षुषा गृह्यते नापि वाचा,,इत्यादि श्रुतिभ्यः असद्ग्रहैरित्यनेन त्वदनुगृहीतैः सद्ग्रहैस्तु त्वां त्वदनन्याः पश्यन्तीति द्योत्यते "मनसैवानुद्रष्टव्यः दृश्यते सूक्ष्मया बुद्ध्या दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्" इत्यादि शास्त्रात् अतएव यस्त्वं पञ्चः पञ्चभूतकारणभूतः पञ्चभिर्भूतैः विश्वाकारेण स्थितैर्भासि विश्वरूपेणाभासि सोऽपि नो दृष्टः किं नेत्यर्थः कारणविज्ञानेन कार्यविज्ञानप्रतिज्ञानात् येन त्वया विज्ञातेन नु दृश्यं सर्वं दर्शनार्हं दृश्यते तथा च श्रुतिः "यद्विज्ञानेन सर्वं विज्ञातं भवती,,ति ननु लोकपालानां भवतामप्येवं विभेऽज्ञाने कोहेतुरित्याहुः मायेति । हे भूमन् ! एषाऽस्मज्ज्ञानावरणकर्त्री भवदीया माया प्रकृत्याख्या त्वदीया शक्तिः "मम माया दुरत्यया "माययापहृतज्ञाना,, इत्यादि श्रीमुखोक्तेः ॥ ३७ ॥

योगेश्वरास्तु "तत्त्वमसि "क्षेत्रज्ञं चापि मां विद्धि "अंशो नानाव्यपदेशादन्यथा चापि दासकितवादित्वमधीयत एके,, इत्यादि श्रुतिस्मृतिसूत्रसिद्धान्तभूतैः द्वैताद्वैतात्मकजीवब्रह्मसम्बन्धविज्ञानी भक्तस्तवातिप्रियोऽपि तथापि केवल भेदबुद्ध्या लोकप्रसिद्धेन स्वस्वामिभावेन त्वां भजन्तो जना भक्तवत्सलेन त्वयाऽनुग्राह्या इति प्रार्थयमानाः स्तुवन्ति प्रेयानिति हे प्रभो ! आत्मनः जीवान् त्वदंशभूतान् परस्परं त्वत्तश्च भिन्नस्वरूपानपि विश्वात्मनि सर्वात्मनि अंशिनि त्वयि पृथक् भिन्नान् यो नेक्षेत न पश्येत अमुतः अमुष्मात् अन्यस्ते प्रेयान् प्रेष्ठो नास्ति "ज्ञानी त्वात्मैव मे मतमिति,, श्रीमुखोक्तेश्च अथापि ईशतया नृपत्यादिवत् केवलनियन्तृतया अव्यभिचारिण्या भक्त्या उपधावताम् हे वत्सल ! हे भक्तवत्सल ! अनुगृहाण प्रसीद ॥ ३८ ॥

———

भाषाटीका

ब्रह्माजी बोले हे प्रभो ! यह पुरुष भेदों की ग्रहण करने वाली इन इन्द्रियों से जितनी वस्तु देखता है सो आपका रूप नहीं है

जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयाऽऽत्ममायया।
रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः॥ ३९॥

ब्रह्मोवाच।

नमस्ते श्रितसत्त्वाय धर्मादीनां च सूतये।
निर्गुणाय च यत्काष्ठां नाहं वेदाऽपरेऽपि च॥ ४०॥

अग्निरुवाच।

यत्तेजसाऽहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तम्।
तं यज्ञियं पञ्चविधञ्च पञ्चभिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञम्॥ ४१॥

देवा ऊचुः।

पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन्सलिल उरगेन्द्राधिशयने।
पुमाञ्छेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः॥ ४२॥

भाषाटीका

क्योंकि आपतो ज्ञान विषय इन्द्रिय इन तीनों के आश्रय होने से सब मायिक पदार्थ से भिन्नहो॥ ३१॥

इन्द्र बोले हे अच्युत! जगत् की रक्षा करने वाला मनदृष्टि को आनन्द देने वाला दैत्यों के नाश करने वाले तथा उद्यत आयुधों से युक्त आठ भुजदण्डों से युक्त जो यह भी आपका स्वरूप है सोभी दिव्यही है किन्तु कल्पित नहीं है॥ ३२॥

यज्ञ पत्नी बोलीं हे यज्ञ स्वरूप! आपके आराधन के इस यज्ञकुं दक्षने आरम्भ किया दक्षपर कुपित रुद्रने इनका ध्वंसकिया तब आज यह यज्ञ पशुमेधादि कर्म न होने से श्मशान तुल्य दीखताहै इसको आप अपनी कमलकी कान्ति के तुल्य नेत्र दृष्टि से पवित्र करो॥ ३३॥

ऋषि लोग बोले हे भगवन्! आपकी लीला बड़ी अद्भुत है, क्योंकि अपने शरीर से सब कर्म करते हो और पाप पुण्य से लिप्त नहीं होते हो और जिस ईश्वरी लक्ष्मीकुं सब ब्रह्मादिक विभूति के लिये पूजते हैं वही लक्ष्मी आपकी सेवा करती है तोभी आप उस लक्ष्मी को नहीं चाहते हो॥ ३४॥

सिद्ध लोग बोले हे भगवन्! हमारा यह मन रूप हस्ती संसारके क्लेशरूपी दावानल से जलता हुआ तथा तृषित हुआ आपकी कथारूपी शुद्ध अमृत नदी में प्रवेश होकर ब्रह्मानन्द में मग्नसा होकर उस दावाग्नि को नहीं स्मरण करता है और उसमें से नहीं निकलता है॥ ३५॥

दक्षकी पत्नी बोली हे ईश! हे अधीश! आपका सुन्दर आगमनहुआ आप के अर्थ नमस्कार है आप प्रसन्नहोवो जैसे और अङ्गोंके रहने परभी मस्तकके न रहने से कबन्ध पुरुष नहीं शोभित होता है तैसे आप के बिना यह यज्ञ शोभित नहीं होता है तिस से हे श्रीनिवास! अपनी प्रिया लक्ष्मी के सहित आप हमारी रक्षा करो॥ ३६॥

लोकपाल बोले हे भूमन! आप सबके अन्तःकरणोंमें रह कर सबके जानने वाले हो आप के ही अनुग्रह से सब चेतनों को इन्द्रियों के द्वारा पदार्थ ज्ञान होता है तब तिन आपको हमलोग क्या इन असत् पदार्थ ग्राही इन्द्रियों से देख सके हैं किन्तु नहीं जो आप पांच भूतों से भिन्न छठे होकर के भी पांच भूतों के साथ रहे से मालूम पड़ते हो यह केवल आपकी मायाहै॥ ३७॥

योगेश्वर बोले हे प्रभो! हे ईश! हे भक्तवत्सल! जोपुरुष सब जीवों के अन्तर्यामी होने से उन जीवों को आपसे पृथक् नहीं देखता है उस पुरुष से दूसरा आपको प्रिय नहीं है तोभी अनन्य वृत्ति वाली भक्ति से शास्त्रोक्त विधिसे भजनेवाले हम लोगों पर आप अनुग्रहकरो॥ ३८॥

श्रीधरस्वामिकृतभावार्थदीपिका

अव्यभिचारिणी भक्तिः कथं स्याद्भजनीयानां बहुत्वादित्याशङ्क्याहुः जगदुद्भवादिषु निमित्तेषु दैवतो जीवादृष्टाद् बहुधाभिद्यमाना गुणा यस्यास्तया स्वमाययाऽऽत्मनि स्वरूपे रचिता ब्रह्मादिभेदमतिर्येन तस्मै स्वसंस्थया केवलस्वरूपावस्थानेन च विनिवर्तितो भेदभ्रमो गुणाश्च तत्कार्याणि च आत्मनि येन तस्मै॥ ३९॥

शब्दब्रह्म स्तौति नमस्त इति श्रितं स्वीकृतं सत्त्वं येनातो धर्मादिफलप्रसवित्रे ननु सत्त्वगुणात्वं निर्गुणत्वं चैकस्य कथमित्याशङ्क्याह यस्य काष्ठां तत्त्वं नाहं वेद्मि अपरे रुद्रादयश्च न विदुस्तस्मै॥४०॥

अग्निस्तु यज्ञमूर्त्तिम् प्रणमति। यस्य तेजसा सुष्ठु समिद्धं प्रदीप्तं तेजो यस्य सोऽहं प्रशस्तेऽध्वरे हविर्वहामि तं यज्ञियं यज्ञाय हितं पालकम् यज्ञं यज्ञमूर्त्तिम् पञ्चविधत्वमैतरेयके उक्तं "स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोम,, इति पञ्चभिर्यजुर्भिर्यज्ञमन्त्रैः स्विष्टं सुपूजितम् तथाच श्रुतिः "आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहइति पञ्चाक्षरं द्व्यक्षरो वषट्कारः,, स्मृतिश्च चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच। हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदत्वि" ति॥ ४१॥

देवास्तु सत्यं वयमपि देवास्तथापि जगदाद्यन्तयोस्त्वमेव नान्यः कश्चिदित्याहुः पुरेति। कल्पापाये प्रलये विकृतं कार्यजातमुदरीकृत्य संहृत्य त्वमेवाद्यः पुमानुरगेन्द्र एवाधिकं शयनं शय्या

गन्धर्वा ऊचुः

अंशांशास्ते देवमरीच्याद्य एते ब्रह्मेन्द्राद्या देवगणा रुद्रपुरोगाः ।
क्रीडाभाण्डं विश्वमिदं यस्य विभूमंस्तस्मै नित्यं नाथ ! नमस्ते करवाम ॥ ४३ ॥

विद्याधरा ऊचुः

त्वन्मायया ऽर्थमभिपद्य कलेवरेऽस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः ।
क्षिप्तोऽप्यसद्विषयलालस आत्ममोहं युष्मत्कथाऽमृतनिषेवक उद्व्युदस्येत् ॥ ४४ ॥

ब्राह्मणा ऊचुः

त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मन्त्रः समिद्दर्भपात्राणि च ।
त्वं सदस्यर्त्विजो दम्पती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥ ४५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

तस्मिन् शेषे शयनं करोषि सिद्धैर्जनलोकादिवासिभिर्विमृशिता विचिन्तिताऽध्यात्मपदवी ज्ञानमार्गो यस्य स एव त्वं य इदानीमक्ष्णोः पथि चरसि प्रत्यक्षोऽसि अवसि रक्षसि ॥ ४२ ॥

गन्धर्वाप्सरसस्तु वयं भिया केवलं सर्वानपि परमेश्वरत्वेनोपश्लोकयामस्त्वमेव तु परमेश्वरोऽन्ये तु त्वदंशा एवेत्याहुः अंशांशा इति । हे विभूमन्! महत्तम ! क्रीडाभाण्डं क्रीडोपकरणं विश्वं ब्रह्माण्डं यस्य तस्मै ते नमनं कुर्मः ॥ ४३ ॥

विद्याधरास्तु केवलं विद्याभिः सम्पदः प्राप्यन्ते अहङ्कारादिव्यामोहानवृत्तिस्तु त्वत्कथाश्रवणं विना नास्तीत्याहुः अर्थं पुरुषार्थसाधनं कलेवरमभिपद्य प्राप्य त्वन्माययाऽस्मिन्ममेत्यहमिति चाभिमानं कृत्वैममात्ममोहं युष्मत्कथाऽमृतनिषेवक उद्व्युदस्येत् परित्यजेत्सम्यक्। ननु पुत्रादिभिरभिक्षिप्तो दुःखितः सन्परित्यजेदेव नेत्याहुः क्षिप्तोऽपि दुर्मतिः असत्सु विषयेष्वेव लालसा तृष्णा यस्य सः ॥ ४४ ॥

ब्राह्मणाः स्तुवन्ति त्वमिति त्रिभिः । सदस्याश्च ऋत्विजश्च ४५॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

स्वस्वरूपे भानुस्थानीये रचिता प्रकटिता रश्मिस्थानीयानां ब्रह्मादीनां भेदमतिर्नानात्वज्ञानं येन तद्रूपा या भेदमतिर्येन तथा च भजनीयास्ते ब्रह्मादयो न स्वतन्त्रा इति तान्विहायाऽर्थमिच्चारिणी भक्तिरस्मभवत्येवेत्यर्थः तस्य स्वतन्त्रत्वे हेतुमाह स्वसंस्थयेति केवलेति मायाशावल्यव्युदासः भेदभ्रमो हि मायावशीकृते जीव एव सम्भवति न तु मायानियन्तरि भगवति तद्वत्तत्र भ्रमजनकाः गुणा अपि तत्रैव प्रभवन्ति गुणा जीवस्यैव मे इत्युक्तत्वात् ॥ ३९ ॥

स्वीकृतं स्वसात्कृतम्येनोपकृतम् अतः आत्मारामत्वात् धर्मादीत्यादिना ज्ञानवैराग्यादिपरिग्रहः तत्त्वं नाहं वेदोऽपि वेदेति एकस्य सत्त्वगुणत्वात्रिगुणात्वमव्यमाकारत्वविभुत्वादीनामचिन्त्यशक्तिमयत्वं वेदेनैव व्यवस्थापितम् ॥ ४० ॥

अग्निहोत्रम् "अग्निहोत्रं जुहोति स्वर्गकाम,, इति श्रुतेः अग्निहोत्रशब्दश्चात्र तत्प्रख्यन्यायेन कर्मनामधेयपरः अग्निहोत्राख्यहोमेनेष्टं भावयेदिति वाक्यार्थः दर्शपौर्णमासौ "दर्शपौर्णमासाभ्यां यजेत,, इति श्रुतेः दर्शपौर्णमाससंज्ञकेन यागेनेष्टं भावयेदिति वाक्यार्थः चातुर्मास्यानि "चातुर्मास्यैर्यजेत,, इति श्रुतेः चातुर्मास्यसंज्ञकेन यागेनेष्टं भावयेदिति वाक्यार्थः पशुः "पशुना यजेते,,ति श्रुतेः पशुना यागं भावयेदिति वाक्यार्थः सोमः "सोमेन यजेते,,ति श्रुतेः अत्र गुणकर्मणोर्मानान्तरेणाऽप्राप्तत्वान्मत्वर्थलक्षणया विशिष्टविधानं न चोभयविधाने सोमेन यागं भावयेत् यागेनेष्टं भावयेदिति वाक्यभेदः विशिष्टस्यैकस्य विधानात् तथा च सोमवता यागेनेष्टं भावयेदिति वाक्यार्थः यज्ञमन्त्रैरिति प्रयोगसमवेतार्थस्मारका मन्त्राः प्रयोगकाले व्याप्रियन्ते प्रयोगविधौ मन्त्रैरेव स्मर्त्तव्यमिति नियमविध्याश्रयणाद् स्मृतौ श्रुत्युक्तमन्त्रा एवानुस्मृताः शिष्टं स्पष्टम् ४१

वेधाः पूज्याः यः प्रत्यक्षोऽसि अवसि च स त्वं य आद्यन्तयोर्वर्त्तमानः पुरुषः स एवासि ॥ ४२ ॥ ४३ ॥

अन्यः भक्तिरहितो विद्यावानपि ॥ ४४ ॥ ॥ ४५ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

ननु भगवतो विश्वात्मकत्वे विश्वगतदोषाणां परमात्मन्यापत्तिस्तत्र सुखदुःखाद्यनुभवश्च जीववत्तत्राहुः जगदिति जगतउत्पत्तिस्थितिलयेषु निमित्तभूतेषु जगदुद्भवाद्यर्थमित्यर्थः देवतो देवात् देवो भगवान् तत्सम्बन्धिसङ्कल्पो दैवस्तस्मात् बहुभिद्यमानगुणया बहुधाभिद्यमाना गुणाः ब्रह्मरुद्रादिदेहरूपेणपरिणम्यमानाः सत्त्वादिगुणाः यस्यास्तयात्ममायया रचितात्मभेदमतये रचितः आत्मनि योभेदः देवत्वमनुष्यत्वादिरूपः तद्विषया मतिर्बुद्धिर्यस्य तस्मै देहात्माभिमानान्वितचेतनशरीरायेत्यर्थः यद्वा बहुभिद्यमानगुणया बहुभिद्यमानाः देवमनुष्यपशुपादपादिरूपेण परिणम्यमानाः सत्त्वादिगुणा यस्याः तया आत्मनः परमात्मनो मायया तच्छरीरभूतया माययेत्यर्थः "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयन्तीं सरूपाः गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजा" इत्यादिक्रमश्चानुसन्धेयम् एवम्भूतया मायया दैवात् भगवत्सङ्कल्पात् जगदुद्भवस्थितिलयेषु सत्सु अत्रात्ममाययेत्यनेन आत्मसम्बन्धित्वावगमात् तत्सम्बन्धसामान्यस्य विशेषपर्यवसानजिज्ञासायां "यस्यात्मा शरीरं यस्याव्यक्तं शरीर,,मिति श्रुतिव्यवस्थापितशरीरशरीरिभावरूपसम्बन्धविशेषे पर्यवसानात् ब्रह्मात्मिकाया मायाया जगदुपादानत्वमवगन्तव्यं जगदुपादानभूतया मायया जगदुत्पत्त्यादिषु सत्सु स्वसंस्थया स्वस्य संस्था सम्यगवस्थितिः

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिका ।

तयोरचिदात्मभेदमतयं रचिता आत्मभेदा आत्मगता देवत्वमनुष्यत्वादयो भेदास्तादृशया मतिर्यस्य "तस्मै तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि नामरूपं व्याकरो"दित्यादि श्रुत्युक्तरीत्या स्वस्य चिदचिदन्तरात्मतयाऽनुप्रवेशेन चिदचिद्गतनामरूपभेदस्य स्वपर्यन्तत्वव्याचिकीर्षेव इत्यर्थ चिदचिद्गतनामरूपभेदस्य चिदचिद्द्वारा स्वपर्यन्तत्वानुदृष्ट इत्यर्थः एवंभूतायपि विनिवर्त्तितभ्रमगुणात्मने विशेषेण निवर्तिता विनिवर्तिता नित्यनिवर्त्तिता भ्रमः अन्यथा ज्ञानविपरीतज्ञानादिरूपाः गुणाः तत्त्वतो रजस्तम आदिगुणाः आत्मनि येन तस्मै स्वेनैव प्रकाशेन नित्यनिवर्तितहेयायेत्यर्थः अनेन विश्वगतदोषापत्तिः परिहृता एवं भूताय ते नमः केवलं नमस्कुर्मो नतु त्वद्गुणान् वर्णयितुं शक्नुम इतिभावः॥ ३९ ॥

योगीश्वरैः निरस्तनिखिलहेयत्वेन स्तुते भगवति स भगवान् किं निर्गुण इत्याशङ्कायां निरस्तनिखिलहेयः समस्तकल्याणगुणश्चेति स्तुवन्नमस्करोति शब्दब्रह्म नम इति अत्र शब्दब्रह्मशब्देन वेदाविर्वाचिताः निर्गुणाय निर्गताः सत्त्वरजस्तम आदयो हेयगुणा यस्मात् तस्मै निरस्तनिखिलदोषायेत्यर्थः कल्याणगुणवत्त्वमाह धर्मादीनां धर्माधर्मादीनां प्रसूतय प्रकृष्टा सूतिर्यस्मात् स प्रसूतिः तस्मै प्रसवित्र इत्यर्थः धर्मप्रसवितृत्वं धर्मादिप्रकाशकवेदोत्सर्जनद्वारा तथा च श्रुतिः "तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद । इति यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै,, इति । स्मृतिश्च "अनादिनिधना ह्येषा वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रसूतय" इति अनेन मन्त्रेण सर्वकारणत्वतदुपयुक्तसर्वज्ञत्वसर्वशक्तित्वहितोपदेष्टृत्वप्रात्मत्वादिकल्याणगुणजातं विवक्षितं तर्हि कति कल्याणगुणा इत्यत्र तेषामानन्त्यमाह तत्कार्ष्ण्यं तेषां तत्स्वरूपरूपगुणविभूतीनां कार्त्स्न्यं अ यचिमहं शब्दब्रह्म न वेद न जानामि अपरे ब्रह्मादयो न विदुः अहमेव न जानामि कुतोऽपरे मदायत्तसूक्ष्मदर्शिनो जानीयुरिति कैमुत्यनयोऽत्र विवक्षितः अत्र ज्ञेयत्वनिषेधो न स्वरूपगुणादिविषयः किन्तु तदियत्ताविषयः तथा च श्रूयते "यस्यामतं तस्य मतं मतं यस्य न वेद स । यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् अविज्ञातं विजानतां विज्ञातमविजानताम्" इति परिच्छिन्नत्वेन जानतोऽमतम् अपरिच्छिन्नत्वेन जानतस्तुमतमित्यर्थः॥४० ॥

एवं शब्दब्रह्मणि निरस्तनिखिलहेयत्वेन समस्तकल्याणविशिष्टत्वेन भगवन्तं स्तुतवति तद् भगवत्याग्निः सर्वतेजसामाच्छादकत्वसर्वतेजः प्रकाशाऽऽपादकत्वादिकल्याणगुणान्तरविशिष्टत्वेन स्तुवन्नमस्करोति यत्तेजसेति यस्य भगवतस्तेजसा प्रकाशेन सुसुसमिद्धं प्रदीप्तं तेजो यस्य सोऽहम् अनेन स्वस्य तत्प्रकाशेन सुसमिद्धतेजस्त्वकथनेन तत्तेजसा विना स्वस्यासुसमिद्धतेजस्त्वमुक्तम् एतदेव हि सर्वतेजसामाच्छादकत्वं यत्स्वायत्तं सर्वतेजसां प्रकाशनमिति अहमिति सूर्यादीनामुपलक्षणं तथा च श्रूयते "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति स्वदाहितशक्तीनामेवास्माकं स्वस्वकार्यक्षमत्वमित्याह यत्तेजसा सुसमिद्धतेजाः अहमध्वरे आज्यसिक्तं हविर्वहामि उद्देश्यामिन्द्रादिदेवतां प्रति नयामीत्यर्थः तं यज्ञियं यज्ञाय हितं यज्ञादेर्येन्द्रादिदेवतामूर्तिमित्यर्थः पञ्चविधं त्रेताग्न्यावसथ्यरूपेण पञ्चविधाग्निशरीरिणां पञ्चभिर्यजुर्भिः आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहइति पञ्चाक्षरं द्व्यक्षरो वषट्कारइति श्रुत्युक्तैः पञ्चभिर्यजुर्भिः

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिका ।

स्विष्टं सुष्टुपूजितं तथा चोक्तं "चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ॥ हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु" इति नित्यम् प्रणतोऽस्मि नमस्कृतवानस्मि ॥ ४१ ॥

अग्नाविन्द्रादिदेवतात्मकत्वेन सर्वयज्ञमूर्तित्वेन च भगवन्तं स्तुतवजगत्कारणस्य तवेदं सर्वमपपन्नमिति मन्वाना देवाः सौलभ्यादिति कल्याणगुणान्तरविशिष्टत्वेन स्तुवन्ति पुरेति॥आद्यः सर्वोपादानभूतः पुमान् पुरा अग्रे सृष्टेः प्रागित्यर्थः कल्पापाये प्राक्तनकल्पान्ते स्वकृतं स्वसृष्टं विकृतं कार्यवर्गमुदरीकृत्य उदरे निक्षिप्य संहृत्येति यावत् उरगेन्द्रः शेषः स एवाधिशयनं शय्या यस्मिन् तस्मिन् सलिले शये शयितवानसि सिद्धजनलोकवासिभिः हृदि विमृशिता अध्यात्मपदवी स्वात्मतत्त्वज्ञानमार्गो यस्य स योगपरिशुद्धमनोग्राह्य इत्यर्थः एवं भूतोऽपि त्वमेवाद्य अधुना भक्तानां पथिचरासि प्रत्यक्षोऽसि वाङ्मनसागोचरस्त्वं सौलभ्यातिरेकात्प्रत्यक्षोऽसीत्यर्थः भृत्यान्नः अस्मान् अवसि पालयसि अनेन भृत्यानुग्रहकातरत्वमुक्तम् ॥ ४२ ॥

देवेषु सर्वकारणत्वसौलभ्यादिगुणविशिष्टत्वेन स्तुतवत्सु गन्धर्वाप्सरसस्त्वत्कार्यभूतमिदं कृत्स्नं जगत्त्वल्लीलोपकरणमिति स्तुवन्तो नमस्कुर्वन्ति अंशांशा इति हे भूमन् ! कृत्स्नं जगदन्तर्बहिश्च व्याप्य वर्तमान ! हे देव ! द्योतमान ! मरीचिप्रमुखा मुख्या येषां तथा ब्रह्मेन्द्रौ आद्यौ मुख्यौ येषां रुद्रः पुरोगो मुख्यो येषाम् एते देवगणास्ते तव अंशांशा अत्र देवगणानां मरीचिब्रह्मेन्द्ररुद्रमुख्यत्वकथनं सृष्टिस्थित्याद्यधिकाराधिकृतदेवताबहुत्वाभिप्रायेण तत्र व्यष्टिस्रष्टॄणां मध्ये चतुर्मुखस्य मरीच्यादीनां च प्रधानत्वात् ब्रह्माद्यौ मरीच्यादय इति चोक्तं तत्रापि प्राधान्याप्राधान्याभिप्रायेण ब्रह्माद्यौ मरीच्यादय इति च कौटिल्ययेनोक्तिः इन्द्रपुरोगत्वकथनं पालनाधिकारिदिगीशान्तराभिप्रायेण रुद्रपुरोगत्वकथनं तु संहाराधिकार्यभिप्रायेण एवं सर्वेषांभगवदंशांशत्वं ज्ञानशक्तिबलादिभगवद्गुणलेशाऽभिव्यक्तिकृतमिति वेदितव्यं विशिष्टवस्त्वेकदेशरूपांशत्वन्तु सर्वजीवसाधारणमिति तद्विशिष्य न वक्तव्यं क्रीडाभाण्डं क्रीडापरिकरः इदं विश्वं ब्रह्माण्डं यस्य तस्मै ते तुभ्यं नमः हे नाथ ! ते करवाम कैङ्कर्यमिति शेषः ॥ ४३ ॥

एवं दक्षादिषु गन्धर्वाप्सरोऽन्तेषु तत्तत्कल्याणगुणविशिष्टं भगवन्तं स्तुतवत्सु तावदास्तां फल्याणगुणवर्णनमसङ्ख्येयत्वात्तेषाम् इदमत्यद्भुतमाहात्म्यं त्वत्कथामृतमित्याहुः विद्याधराः त्वन्माययेति त्वन्मायया त्वत्सङ्कल्पेन अर्थं सर्वपुरुषार्थसाधनं नृदेहमभिपद्य अस्मिन् कलेवरेतदनुबन्धिनि च ममाहमितिदुर्मतिं दुर्बुद्धिं कुर्वीपि दुर्मतिरिति प्रथमान्तपाठेऽहमिति शेषः अहं ममाभिमानं कुर्वन्नित्यर्थः अतएव दुर्मतिः वैषयिकसुखलाभे दुःखितचित्तोऽपि उत्पथैः लोकवेदमर्यादोल्लङ्घिभिः स्वैः पुत्रादिभिः क्षिप्तोऽपि तिरस्कृतोऽपिअसत्सु विषयेषु प्रकृतिपरिणामरूपशब्दादिविषयेष्वासक्तोऽपियदियुष्मत्कथामृतनिषेवकः युष्मत्कथैवामृतं तन्नितरां सेवतइति युष्मत्कथामृतनिषेवकः सेवनमत्र श्रवणश्रावणादिरूपं विवक्षितं तर्हि आत्ममोहम् अहङ्कारममकाररूपं मोहम् उदव्युदस्येत् उच्चैर्व्युदस्येत् परित्यजेत् मुक्तो भवेदितिभावः अहममभिमानप्रसक्तस्यासद्विषयप्रवणस्याऽऽत्ममोहनिवर्त्तनद्वारा मुक्तिसाधनं त्वत्कथामृतमेव नान्य उपायोऽस्तीति इदं त्वत्कथामृतमाहात्म्यमत्यद्भुतमितिभावः॥ ४४ ॥

ब्राह्मणास्तु तावदास्तां कथामृतमाहात्म्यमिदं त्वद्भुतमं त्वन्नाममाहात्म्यमिति कथयिष्यन्तः प्रकृतयज्ञनिर्वृत्याचिकाङ्क्षया यज्ञयज्ञसाधनमूर्तित्वेन स्तुवन्तस्तत्प्रसादं प्रार्थयन्ते त्वमिति त्रिभिः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका।

त्वं क्रतुर्यज्ञः हविः पुरोडाशादिः स्वधास्याश्च ऋत्विजश्च ते त्वमेव हुताशश्चेतारूपः देवता इन्द्रादयः अग्निहोत्रम् अग्निहोत्राख्यकर्मविशेषः क्रतुरित्यनेन यागात्मकत्वमुक्तम् अग्निहोत्रमिति होमात्मकत्वं देवतोद्देशेन द्रव्यत्यागात्मको यागः स एव प्रक्षेपादिको होमः सर्वत्र सामानाधिकरण्यं शरीरात्मभावनिबन्धनम् ॥ ४५ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली।

विश्वान्तर्यामित्वं तत्स्वामित्वं च हरेरेव मुख्यमित्याशयेनाहुः जगदिति जगदुद्भवस्थितिलयेषु जगदुत्पत्तिस्थितिसंहारेषु लीलया प्रविभज्यमानगुणाया सृष्टौ रजः स्थितौ सत्त्वं संहारे तम इति प्रकारेण विभज्यमानाः पृथक्क्रियमाणाः सत्त्वादिगुणा यस्याः सा तयात्माधीनया मायया प्रकृत्या जडया मिथ्याज्ञानं जनयतीश्वरः तस्य भ्रमश्च। सत्त्वाद्या न सन्ति परमेशितुरितिवचनात् प्रकृत्या रचिता कृताऽऽत्मनां जीवानां भेदमतिर्मिथ्याज्ञानं येन स तथा तस्मै स्वसंस्थया पदार्थे हि शब्दः स्वरूपस्थित्यैव महिमलक्षणया प्रतिवर्तिता निरस्ता भ्रमो गुणाश्च सत्त्वाद्या यस्मात्स तथा स चासौ आत्मा चेत्यतिवर्तितभ्रमगुणात्मा तस्मै हे प्रतिवर्तितभ्रम ज्ञानानन्दादिगुणात्मन इति भिन्नं वा पदं हि शब्दो ज्ञानानन्दात्मनो हरेरुपाधिना भ्रमयोग्यत्वं निवारयति ३९

हे अमित! अनन्त! ते तुभ्यं नमः तत्त्वावाऽङ्गयज्ञाय अमिताऽऽरोपितरूपायेति वा धर्मादीनामस्माकं च भूतय उत्पत्तिकारणाय चशब्देनास्मत्कारणत्वं निवारयति कारणस्य रजआदिगुणसंसर्गो नास्तीत्याह निर्गुणायेति सृष्टौ प्रवर्तमानस्य तद्गुणाऽस्पर्शो माहात्म्यातिशयान्युज्यत इतीममर्थं च शब्देन वक्ति अत्रप्रवृत्तिः सम्यक् स्वरूपज्ञानाऽभावेऽपि सामान्यज्ञानेन घटत इति भावेनाह यत्काष्ठामिति "काष्ठोत्कर्षे सीम्नि दिशी„ति यादवः अपरे मद्विधाः कुतो विदुर्न कुतोऽपीत्यर्थः अनेनाऽस्य परमात्मत्वे न कोऽपि सन्देह इति दर्शितम् ॥ ४० ॥

अनेनापि महाशङ्कामुन्मूलयति यत्तेजसेति यस्य हरेस्तेजसा "यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामक„मिति वचनात् सुसमिद्धतेजाः पूज्यत्वेन सम्यक् प्रवृद्धं तेजो बलं यस्य स तथा अहं जातवेदा अध्वरं यज्ञे आज्यसिक्तमाज्येन युतं हव्यं वहामि देवान्प्राप्य विभज्यार्पयामीत्यर्थः ओश्रावय अस्तु श्रौषट् यज ये यजामहे वौषडिति यजुर्वेदगतैर्यजुर्भिः पञ्चमन्त्रैः स्विष्टं सुष्ठु पूजितं तं पञ्चविधं पञ्चधा विभक्तविग्रहं यज्ञं यज्ञपुरुषं यज्ञेशं यज्ञभावनं यज्ञभुजमित्येवं विधं भगवन्तं प्रणतोऽस्मीत्यन्वयः यज्ञं यज्ञेशमित्यादिपञ्चविधमिति वा योज्यम् उक्तं च। "यज्ञो यज्ञपुमांश्चैव यज्ञेशो यज्ञभावनः। यज्ञभुक् चेति पञ्चात्मा यज्ञेष्विज्यो हरिः स्वय„मिति ओश्रावयास्तु श्रौषड्यजाद्यो ये यजामहे वषट्कारान्तकैर्नित्यं यजुर्भिः पञ्चभिर्विभु„रिति ॥ ४१ ॥

कल्पापाये प्रलये स्वेन कृतं विकृतं कार्यरूपं जगदुदरीकृत्य उदरे निधाय यज्जलं सृष्टिकाले त्वया पीतं तस्मिन्सलिले उरगेन्द्र एवाधिकं शयनम् उरगेन्द्राधिशयनं तस्मिन्नाद्यः पुमांस्त्वं शेषे अत्र प्रमाणं चाहुः सिद्धैर्मुक्तैर्वैर्वा विमृशिता विचारिता अध्यात्मनः परमात्मनः पदवी यस्य स विमृशिताध्यात्मपदविः य एवंविधः श्रीनारायणः स एव नान्यः अद्य नोऽक्ष्णोः पथि चक्षुर्विषये चरसि भृत्यानस्मानवसि च शब्देन भृत्यरक्षणमेव प्रयोजनं नान्यदित्यर्थं निर्द्धारयति नैतत्स्वरूपं भवत इत्यादिना यदुक्तं तन्निर्धारितमनेनेति ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

हे देव! आशासानाः फलमाकाङ्क्षमाणा य एते मरीच्यादयो ऋषयः एते महेन्द्राद्या देवगणा य एते रुद्रपुरोगा भूतगणा इतीदं विश्वं विभूतयो यस्य तव क्रीडाभाण्डं क्रीडोपकरणं वर्तत इत्यन्वयः हे नाथ! तस्मै ते तुभ्यं नित्यं नमः करवाम इत्यनेनापि सर्वशङ्कोन्मूलिता ॥ ४३ ॥

अव्यक्तादेस्त्वद्रूपकल्पनायास्त्वदिच्छाधीनत्वात्त्वत्प्रसादेनैव निरासः स्यादित्याशयेन विद्याधराः स्तुवन्तीत्याह त्वन्माययेति त्वन्मायया त्वदिच्छया त्वदधीनया प्रकृत्या च रचितमर्थं देहकलत्रादिलक्षणमभिपद्य दुर्मतिर्दुःखितमतिः अस्मिन्कलेवरे ममाहमिति मतिं कृत्वा ऽतएव उत्पथैर्दुर्मार्गवर्तिभिः स्वैरिन्द्रियैः क्षिप्तोऽसत्स्वमङ्गलेषु विषयेषु लालस उत्कण्ठावानपि पुमान्युष्मत्कथारसनिषेवक आत्मा मुह्यत्यनेनेत्यात्ममोहः संसारस्तमुदूह्युदस्येन्निरस्यतीत्यन्वयः ॥ ४४ ॥

ब्राह्मणास्स्तुतिव्याजेन हरेः सर्वस्वातन्त्र्यं द्रढयन्ति त्वं क्रतुरित्याद्यभेदोक्तिरन्तर्यामिविषयेति ज्ञातव्यम्। तदुक्तम् सर्वशब्दाभिधेयत्वं सर्वान्तर्यामिकत्वतः। न तु सर्वस्वरूपत्वात्सर्वभिन्नो यतो हरिरिति अपभ्रष्टचेतनैक्याभावेऽपि ब्रह्मरुद्रादिविशिष्टचेतनैक्यं किं न स्यादिति चेत्तन्न प्रमाणविरुद्धत्वात् तदुक्तम् "अन्तर्यामिस्वरूपेण ब्रह्मरुद्राद्यभिन्नता। नतु जीवस्वरूपेण जीवा भिन्ना यतो हरेः। विशेषाभेदवचनं सन्निधानविशेषतः। सन्निधानं तु तत्प्रोक्तं सामर्थ्यव्यञ्जनं हरे„रिति ॥ ४५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

ननु योगेश्वरत्वाद्यभिमाने सति भृत्यत्वाद्यभिमानः कुतः स्यादुच्यते। सर्वोऽप्यन्योऽभिमानस्त्वन्मायागुणभेदभ्रमेणैव जीवेषु रचितः ततः स्वस्फूर्त्यां तस्मिन्निवर्तिते त्वत्प्रसादात् सोऽपि स्यादित्याहुः जगदिति। आत्मनां जीवानां भेदमतिर्नानाऽभिमानः ॥३८॥

शब्द ब्रह्मोवाचेति अत्रायं विरिञ्चिः पूर्वत्र तु यज्ञाधिकारीति वा। पत्ते चात्र पूर्वे ब्रह्माऽपेक्षया यदिन्द्रस्य ज्ञानाधिक्यं स्वामिभिर्दर्शितं तदपि युक्तमेव मन्तव्यम् ॥ ४०—४९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

ननु परब्रह्मणो मम मायाशावल्य एव साकारत्वं तस्मिंश्च सति भृत्येश भावस्तत्र च सति भक्तवात्सल्यमिति केचिद्व्याचक्षते। सत्यं ते भ्रान्ता एवेत्याहुः। जगदिति। देवता जीवाऽदृष्टात् बहुधा भिद्यमाना गुणा यस्यास्तया स्वमायया रचिता आत्मनि स्वस्वरूपे सृष्ट्याद्यर्थं ब्रह्मादिभेदमतिर्येन तस्मै स्वसंस्थया स्वरूपावस्थानेन तु विनिवर्त्तितो भ्रमरूपो गुणात्मा गुणबुद्धिर्येन तस्मै। आत्मा यत्नो धृतिर्बुद्धिरित्यमरः ॥ ३९ ॥

ब्रह्मोवाचेति तत्रत्योपयोगी कर्मप्रतिपादको वेदः वेदस्तत्वं तपो ब्रह्मेत्यमरः। श्रितं सत्त्वं सत्त्वगुणोऽयं धर्मज्ञानवैराग्यैश्वर्याणां भूतये उत्पत्त्यै काष्ठां तत्त्वम् अपरेऽपि ज्ञानप्रतिपादका वेदाश्च न विदुः किमुतैते इति कर्मिषु ज्ञानिषु च कटाक्षः ॥ ४० ॥

यज्ञकुण्डस्थोऽग्निराह, यत्तेजसेति स्वध्वरे प्रशस्त यज्ञे हव्यं हविर्वहामि केवलं नतु तव तत्त्वं जानामीति ज्ञानाभिमानियाज्ञिकेषु कटाक्षः। तं यज्ञियं यज्ञाय हितं पञ्चविधत्वमैतरेयक उक्तं। स एव यज्ञः। पञ्चविधोऽग्निहोत्रं दर्शपौर्णमासश्चातुर्मास्यानि पशुः सोम इति पञ्चभिर्यजुर्भिर्मन्त्रैः स्विष्टं। तथाच श्रुतिः। आश्रावयेति चतुरक्षरम् अस्तु श्रौषडिति चतुरक्षरं यजेति द्वाभ्यां ये यजामहे

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

इति पञ्चाक्षरं द्व्यक्षरं वषट्कार इति स्मृतिश्च चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च॥ हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदत्विति यज्ञं यज्ञमूर्त्तिम् ॥ ४१ ॥

स्वकृतं स्वसृष्टं विकृतं कार्यजातम् उदरीकृत्य उदरस्थीकृत्य विमृशिता अध्यात्मपद्वी ज्ञानमार्गो यस्य सः। भृत्यान् अवसि पालयसीति पथि चरसीत्याभ्यां द्वाभ्यां स्वतृपालितैर्भृत्यैरेव त्वं दृश्यसे ज्ञायसे नान्यैरिति याज्ञिककर्म्मिषु ज्ञानिषु च कटाक्षः ॥ ४२ ॥

तुभ्यमेव नित्यं नमः करवामेति वयं यस्य सभां प्रविशामस्तमेव परमेश्वरत्वेन स्तुयाना अपि तेषां त्वदंशांशत्वात्त्वामेव वस्तुतः स्तुवामेति ते खल्वीश्वराभिमानिन एव नत्वीश्वरा इति ब्रह्मादिषु कटाक्षः ॥ ४३ ॥

अथ विषयमभिपद्य प्राप्य ममाहमित्यभिमानञ्च कृत्वा दुर्मतिः खैः पुत्रादिभिः खिन्नोऽप्यसद्विषयलालस एव इममात्ममोहं युष्मत्कथामृतनिषेवकः सन् उच्चैर्युदस्येत् परित्यजेन्नान्यः इति शुष्कज्ञानिषु कटाक्षः ॥ ४४ ॥

सदस्याश्च ऋत्विजश्च ते ॥ ४५ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

ननु सर्वे आत्मानः परमात्मनः स्वांशभूतास्तत्र,य आत्म परमात्मसम्बन्धवित् सर्मात्मयो भवतु परन्तु अन्येष्वत्यन्तभेदमतयः कुतआगताः तस्यात्यन्तभेदबुद्धिश्च केनापनीतेत्यत्र कारणं वदन्तो भगवन्तं प्रणमन्ति जगदिति जगतः उद्भवादिषु निमित्तेषु बहुभिद्यमानगुणया आत्ममायया स्वमायया दैवाद्नादिभूताज्जीवकर्मप्रवाहात् निनिमित्ताद् रचिता अनादिसिद्धा एव अवाभिताः आत्मसु जीवेषु भेदमतयः परमात्मनः सकशादत्यन्तभेदबुद्धयो येन त्वया परमात्मना तस्मै स्वसंस्थया कस्य चिन्मानार्हस्य शास्त्राचार्यानुग्रहतः हृदि या स्वस्य तत्र संस्था संस्थितिस्तया विनिवर्त्तितोऽपनीतो भ्रमोऽत्यन्त भेदभ्रमो गुणा भ्रमहेतवश्च आत्मना ज्ञानार्हस्य जीवस्य तस्मै नमः ॥ ३९ ॥

शब्दब्रह्म तु परं ब्रह्म प्राकृतगुणरहितत्वेन स्वाभाविकमङ्गलगुणाकरत्वेनेयत्तानवच्छिन्नत्वेन च स्तुवन्नमस्करोति ते निर्गुणाय निर्गता नित्यं निवृत्ताः प्राकृता गुणा यस्मात्तस्मै "अरूपमस्पर्शमगन्धमित्यादिश्रुतेः श्रितं स्वीकृतं सत्त्वमप्राकृतं शरीरं येन तस्मै आप्रणखात्सुवर्ण इत्यादि श्रुतेः धर्मादीनां सूतये पुरुषार्थचतुष्टयदात्रेऽथवा धर्मोऽत्र धर्मप्रवर्तकं शब्दब्रह्म आदिना ब्रह्मादयस्तेषां वेदब्रह्मादीनां सूतिर्यस्मात्तस्मै शास्त्राचार्यं प्रवर्तकाय "अस्य महतो भूतस्य निश्वसितमेतद्य ऋग्वेदो यजुर्वेदो यो ब्रह्माणं विदधाति पूर्वं"मित्यादि श्रुतेः यस्य काष्ठामियत्ताम् अहं न वेद न वेद्मि अपरे ब्रह्मादयश्च न विदुस्तस्मै नमः "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहे"त्यादि श्रुतेः ॥ ४० ॥

सर्वप्रकाशकनानायज्ञमूर्त्तित्वादिगुणैरग्निर्भगवन्तं स्तौति यदिति यद्यस्य तेजसा प्रकाशेन सुष्ठु समिद्धं प्रदीप्तं तेजो यस्य सः अग्न्युपलक्षितं सर्वं यत्तेजमेव विभाति "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"त्यादिश्रुतेः एवम्भूतोऽहम स्वध्वरे प्रशस्ते यज्ञे हविर्वहामि उद्दिश्यां देवतां प्रतिनयामि आज्यसिक्तमिति विशेषणं भगवत्तेजोयोगं विनाऽग्नेर्विनाशं सूचयति मरुत्तयज्ञे बह्वाज्यसिक्तहविर्भक्षणेनाग्निर्मृतकल्पोऽभूत् पुनः स्वाप इन्धं दत्वा साऽर्जुनेन भगवतैवरक्षित इति महाभारतेस्थितं यज्ञियं यज्ञाय हितं यज्ञपालकं यज्ञं यज्ञमूर्त्तिम् प्रणतोऽस्मि कथं भूतं पञ्चविधम् पञ्चविधत्वम्

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

ऐतरेयकेदर्शितम् सएषयज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमइति आश्वावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेदिति द्व्यक्षरो वषट्कारइति श्रुतिसिद्धैः पञ्चभिर्यजुभिर्यजुर्मन्त्रैः श्लिष्टं सुपूजितम् च ॥ ४१ ॥

देवास्तु सर्वकारणत्वादिगुणवत्त्वेन भगवन्तं स्तुवन्ति पुरेति पुरा वर्तमानकल्पात्प्राक् यः कल्पः तस्याऽपायेऽन्ते यः स्वकृतं विकृतं कार्यमुदरीकृत्य तस्मिन् प्रसिद्धे ब्रह्माण्डमध्यगे सलिले उरगेन्द्रप्रवाधिकं शयनं शय्या तत्र शेषे शयनं करोषि कथं भूतः सिद्धैर्जनलोकादिवासिभिः विमृशिता विचिन्तिता ऽध्यात्मपदवी तत्त्वज्ञानमार्गो यस्य सएव आद्यः पुमान् अधइदानीम् अक्ष्णोः पथि चरसि सोऽस्मान् भृत्यान् अवसि धन्या वयमिति भावः ॥ ४२ ॥

गन्धर्वास्तु वयं त्वदंशभूतानां ब्रह्मादीनां त्वत्तोंऽशिनः पृथक् स्थितिप्रवृत्त्याद्यभावेन त्वदात्मकत्वात्तानपि परमेश्वरत्वेनैवोपश्लोकयाम ब्रह्मादयः स्वकर्मानुरूपाऽत्यल्प त्वद्दत्तदेहगेहादिस्वामिनस्त्वन्तु सर्वचेतनाचेतनात्मकविश्वस्वामीत्याहुः अंशांशास्ते इति ॥ ४३ ॥

विद्याधरास्तु "अजोह्येकोजुषमाणोऽनुशेते जहात्येनांभुक्तभोगामजोऽन्य" इति श्रुत्युक्तं नित्यबद्धं मुमुक्षुं च जीवविशेषं वर्णयन्तो भगवन्तं स्तुवन्ति त्वदिति दुर्मतिर्नित्यबद्धोजीवः अथ कर्मफलमभिपद्य प्राप्य त्वन्मायया अनादितो जीवविमोहिन्या कलेवरे अहमिति अस्मिन् प्रसिद्धे गृहादौ ममेति च कृत्वा उत्पथैर्मुक्तिमार्गबहिष्कृतिभिः स्वैरिन्द्रियैः खिन्नोऽपि पुनः पुनर्जन्ममरणप्रवाहे प्राप्तोऽपि असद्विषयलालसो भवति नतु कदापि विरज्यत इत्यर्थः युष्मत्कथामृतनिषेवको मुमुक्षुस्तु आत्ममोहं देहे अहमिति गेहममेति विषयप्रावण्यरूपं च आत्मनः मनसः मोहम् उद्यद्स्येत् वारयेत् ॥ ४४ ॥

ब्राह्मणास्तु क्रियाक्रियावतोर्गुणगुणिनोः अवयवावयविनोः कार्यकारणयोः शक्तिशक्तिमतोश्च सर्वत्र भेदाभेद सम्बन्धं पश्यन्तश्चिदचिदात्मकस्य सर्वस्य भगवच्छक्तिरूपत्वात्कर्म्मत्वेऽपि तदभिन्नत्वमिति मुमुक्षूणां भगवदुपासनविरोधित्वपक्षो सूयादिनिवृत्त्यर्थं वदन्तो वराहाद्यवतारैः कृतमुपकारं संस्मरन्तो भगवन्तं प्रार्थयन्ते त्वमिति त्रिभिः हुताशोऽग्निः सदस्याश्च ऋत्विजश्च देवता इन्द्राद्याः अग्निहोत्रं होमः कर्मविशेषः सर्वं त्वमेव "सर्वं खल्विदं ब्रह्मे"ति श्रुतेः अत्र सर्वस्य भगवच्छक्तिमयस्य भगवदधीनस्थित्यादिमत्त्वेन भगवदभिन्नत्वं बोध्यम् स्वरूपेणाऽचेतनपदार्थस्य बन्धमोक्षार्हस्य चेतनपदार्थस्य च बन्धमोक्षप्रदेन नित्यमुक्तपाप्येन भगवता सहाभेदासम्भवात् परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिसम्पद्यत इति मुक्तौ स्वरूपभेदश्रवणाच्च आरोपापवादवादिपक्षस्तु अध्यासगिरिवज्रप्रभृतिषु ग्रन्थेषु पूर्वैर्निर्मूलीकृता इत्यत्रोपरम्यते ॥ ४५ ॥

———

भाषाटीका

जगत्के उत्पत्तिस्थिति संहार में प्राणियों के अदृष्टसे बहुत प्रकार के भेदोंको प्राप्त भयेहैं गुण जिसके ऐसी मायाके द्वारा रचा है सब जीवों में भेदबुद्धि जिनने अपने स्वरूपानंद में स्थितहोने से दूरकर दियेहैं भ्रमऔर गुणों को आत्मा में से जिनने तिनें आपके अर्थ नमस्कारहै ॥ ३९ ॥

वेदस्तुति करतेहैं किशुद्ध सत्व गुणके धारण करनेवाले तथा प्राकृतगुणोंसेरहित तथा धर्मादिकों के उत्पादक आपहो आपके तत्व को हमतथा अन्य देवताभी नहीं जानते हैं॥ ४० ॥

त्वं पुरा गां रसाया महाशूकरो दंष्ट्रया पद्मिनीं वारणेन्द्रो यथा।
स्तूयमानो नदँल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र! यज्ञक्रतुः॥ ४६॥
स प्रसीद त्वमस्माकमाकाङ्क्षतां दर्शनं ते परिभ्रष्टसत्कर्मणाम्।
कीर्त्यमाने नृभिर्नाम्नि यज्ञेश! ते यज्ञविघ्नाः क्षयं यान्ति तस्मै नमः॥ ४७॥

मैत्रेय उवाच॥

इति दक्षः कविर्यज्ञं भद्र! रुद्राऽभिमर्शितम्।
कीर्त्यमाने हृषीकेशे सन्निन्ये यज्ञभावने॥ ४८॥
भगवान् स्वेन भागेन सर्वात्मा सर्वभागभुक्।
दक्षं बभाष आभाष्य प्रीयमाण इवानघ!॥ ४९॥

श्रीभगवानुवाच॥

अहं ब्रह्मा च शर्वश्च जगतः कारणं परम्।
आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषणः॥ ५०॥

भाषाटीका।

अग्नि देवताने कहा कि हे भगवन्! जिन आपके तेज से मैं बड़ा तेज वाला होकर सुन्दर यज्ञों में घृत संयुक्त हविको ग्रहण करता हूं सोई आप पांच प्रकार के होकर यजुर्वेद के पांच मंत्रों से पूजित होकर यज्ञ की पालना करते हो यज्ञ स्वरूप हो तिन आपको मैं प्रणाम करता हूं॥ ४१॥

देवता बोले पहिले कल्प के नाश होने पर संपूर्ण विकार रूप जगत् को आपने अपने पेट में स्थापन कर लिया फिर आद्य मूर्ति एक आपही पुरुष रूपसे उस जलके ऊपर शेष शय्या में सोते थे सनकादिक सिद्ध लोग आपके ज्ञान मार्ग को हृदय में विचार करते थे सोई आप जो हमारे नेत्र के आगे घूमते हो सो हम दास लोगों की रक्षा करते हो॥ ४२॥

गंधर्व बोले हे देव! ये सब रुद्रादिक मरीच्यादि मुनि गण ब्रह्मादि देवगण आपके अंशों के अंश हैं हे व्यापकरूप! यह सब संसार आपके खेल का सामग्री है हे नाथ! आपको हम नित्यही नमस्कार करते हैं॥ ४३॥

विद्याधर बोले हे प्रभो! पुरुषार्थ का साधन शरीर को प्राप्त होकर भी मनुष्य आपकी माया से दुर्मति होने से इस शरीर में अहंता ममता करके खोटे भोगादि पदार्थों से दुखित होकर भी असत् विषयों में लालसा करता ही रहता है जो आपकी कथा रूपी अमृत का सेवन करता है सो तो संसार के मोह को छोड़ ही देता है॥ ४४॥

ब्राह्मण बोले हे प्रभो! आप यज्ञ स्वरूप हो आपही घृतादिक हविहो आपही अग्नि हो आपही स्वयं वेद मंत्र हो आपही समिध होम काष्ठ हो आपही कुशा हो आपही यज्ञपात्र हो आपही यज्ञ के सभा वाले ऋत्विक् यजमान यजमानी इन्द्रादि देवता अग्नि होम स्वधा मंत्र सोमलता घृत पशु सब आपही हो॥ ४५॥

श्रीधरस्वामिकृत भावार्थदीपिका

गां पृथ्वीं रसाया रसातलाद्दंष्ट्रया व्युज्जहर्थ विशेषेणोद्धृतवानसि योगिभिस्तूयमानः हे त्रयीगात्रवेदमूर्ते! यज्ञो यागः सयूपस्तद्विशेषः क्रतुस्तद्रूपी यज्ञसङ्कल्पकरूप इति वा यज्ञः क्रतुः कर्म यस्येति वा॥ ४६॥

स त्वमस्माकं त्वद्दर्शनमाकाङ्क्षतां प्रसीद मस्मद्यज्ञमभ्युद्धरेत्यर्थः तथाशक्यं तवैतत् यतस्तव नाम्नि कीर्त्यमाण एव यज्ञविघ्नाः क्षयं यान्ति एवं प्रभावो यस्तस्मै नमः॥ ४७॥

इत्थमेव प्रकारेण सर्वैः हे भद्र! विदुर! सन्निन्ये प्रवर्त्तयामास॥ ४८॥

सर्वात्मतया सर्वभागभोक्ताऽपि स्वेन भागेन त्रिकपालपुरोडाशेन प्रीयमाणइव दक्षमाभाष्य सम्बोध्य बभाषे॥ ४९॥

योऽहं जगतः कारणम् आत्माचेश्वरश्च उपद्रष्टा साक्षीच स्वयंप्रकाशश्च निरुपाधिश्च स एव ब्रह्मा शर्वश्चेत्यन्वयः॥ ५०॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी।

यागो यूप तस्यैव विशेषः सयूपः क्रतुः॥ ४६॥

एतद्यज्ञोद्धरणम्॥ ४७॥

यज्ञभावने यज्ञपालके॥ ४८॥

दक्षस्य शिवे ओत्पाऽनिवृत्तेस्सम्यक् प्रसत्यभावादिवेत्युक्तम्॥ ४९॥

आत्मा मूलस्वरूपः॥ ५०॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका।

यज्ञानुष्ठानोपयुक्तपृथिव्युद्धर्ता यज्ञाऽत्रबोधिविध्यर्थवादादिरूपेणावस्थितवेदमूर्तिश्च त्वमेवेत्याहुः त्वमिति। पुरा कल्पादौ महाशूकरः श्वेतवाराहरूपस्त्वं वारणेन्द्रो गजश्रेष्ठः पद्मिनीं यथा सरसीमिव अमृतोपमेयं नाहिवारणेन्द्रेण पद्मिन्युद्धरणं

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

कश्चिदूढ्वं रसाया रसातलात् गामपृथिवीं दंष्ट्रया उत्पाटयन् योगिभिः स्तूयमानः ऽयुज्जहर्थ विशेषेणोद्धृतवानसि हेत्रयीगात्र ! वेदमूर्ते ! अतस्त्वमेव यज्ञक्रतुः यज्ञो यागः क्रतुराराधनरूपं कर्म यस्य सः यद्वा हे यज्ञ ! विष्णो ! यज्ञो वै विष्णुः । यज्ञायाचरतः कर्मेति श्रुतिस्मृतिभ्याम् क्रतुः क्रतुमूर्तिरित्यर्थः ॥ ४६ ॥

स एवं भूतस्त्वं परिभ्रष्टं सत्कर्मवैदिकं त्वदाराधनरूपं यागाख्यं कर्म येषाम् अतएव तद्भ्रंशपरिहाराय त्वत्सन्दर्शनमाकाङ्क्षताम् कामयमानानाम् अस्माकं प्रसीद प्रसन्नोभव हे यज्ञेश ! यस्य ते तव नाम्नि नृभिः नरैः कीर्त्यमाने सति यज्ञस्य विघ्नाः क्षयं नाशं यान्ति तस्मै ते नमः ॥ ४७ ॥

दक्षादीनां स्तुतिमुपसंहरन् तैःस्तुतो भगवान्ताननुगृह्णन् आबभाष इत्याह मैत्रेय इतीति द्वाभ्याम् हे भद्र ! विदुर ! इत्यनेन प्रकारेण सर्वविश्वभावने विश्वकारणे हृषीकेशे कीर्त्यमाने सति कविः कर्मसु कुशलो दक्षः रुद्राऽभिमर्शितं रुद्रेण विहतं यज्ञं सन्निन्ये प्रवर्तयामास रुद्रेण संस्पृष्टमिति वा पूर्वं रौद्रभागाभावात् रुद्रानभिमर्शितमिदानीं तु तद्भागप्रदानात् तदभिमर्शितमित्यवगन्तव्यम् ॥ ४८ ॥

सर्वात्मा सर्वस्यात्मा सर्वात्मतया सर्वभागभोक्तापि भगवान् स्वेन भागेन त्रिकपाल पुरोडाशेन प्रीयमाणः एव दक्षमाभाष्याभिमुखीकृत्य बभाषे ॥ ४९ ॥

तत्र हितोपदेष्टा भगवान् कार्य कारण रूपेणावस्थितः प्रकृतिपुरुषशरीरकोऽहमेक एव मच्छरीरभूतब्रह्मरुद्राख्यजीवाऽनुप्रवेशेन जगत्सृजामि संहरामि स्वावताररूपेण पालयामि अतो मत्तः मच्छरीरभूताच्च व्यतिरिक्तं वस्त्वस्तीति ब्रह्मात्मकस्वतन्त्रवस्तुदृष्टिः देहात्मभ्रान्तिस्वतन्त्रात्मभ्रान्तिमूला नतु तात्त्विकी सर्वस्य ब्रह्मात्मकत्वदृष्टिस्तु तात्त्विकी मुक्त्युपायभूतेत्याह अहमिति । पञ्चभिः अहं निरस्तनिखिलहेयत्वेन समस्तकल्याणगुणात्मकत्वेन च भवद्भिः स्तुतः समाभ्यधिकरहितोऽहं ब्रह्मा च शर्वश्च मदनुप्रविष्टत्वेन मत्सृज्यत्वेन मदायत्तसृष्ट्याद्युपयुक्तज्ञानवत्त्वेन च प्रसिद्धौ मत्प्रयोज्यौ ब्रह्मरुद्रौ च जगतः परं कारणं स्थित्युद्भवलयकारणं "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि । यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधसम्भवौ । मदादर्शितपन्थानौ सृष्टिसंहारकारकौ । सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते,, इत्यादि श्रुतिस्मृत्यनुसन्धानयसमर्थोलभ्यते ननु प्रतिनियतसृष्ट्याद्यधिकारभेदेन पृथक् त्रयाणां कारणत्वेऽभिहिते कथं कृत्स्नस्य जगतः ब्रह्मैककारणत्वमुच्यते अत एव हि तत्र तत्र "ब्राह्मणो वै सर्वा देवता नश्चिरिन्द्रस्त्वमुत्तरः अग्निः सर्वा देवता एको एव रुद्रः सोमः पवते जनिता मतीनां जनिता पृथिव्या जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः आपो वा इदं सर्वं,,मित्यादिभिः ब्राह्मणाग्नीन्द्रादीनामपि समाभ्यधिकराहित्यप्रतीतेरर्थवत्त्वमव्याकुलम् ॥ अत्रोच्यते सर्वेषां पृथक्कारणत्वेसमाभ्यधिकराहित्ये च प्रतीतेऽपि तद्बाधितम् अन्यपरतयाधिगतं चेत्यनादरणीयम अतएव तत्त्वप्रधानेषु सृष्टिप्रलयप्रकरणेषु यदेव स्वरूपेणगुणैश्च निरतिशयबृहदुक्तं तदेकमेव ब्रह्म जन्मस्थितिप्रलयसमुदायरूपेण जिज्ञास्यलक्षणेन लक्षितं सूत्रकारेण "जन्माद्यस्य यत" इति तत्र हि कारणभूतवस्तुपरामर्शिना यतइत्यनेन कारण-
[illegible] सा-
माम्नानां नारायणादिविशेषपर्यवसायित्वावश्यम्भावात्सर्वश्रुतीनां नारायण एव पर्यवसानभूमिरिति यतोवा इमानीत्यादि श्रुतेरैदंपर्यमिति सूत्रकाराभिप्रायो ज्ञायते अतः सृष्ट्यादिभिर्लक्ष्यं कारणमेकमेव नतु नानाभूतम् अहं ब्रह्मा च शर्वश्चेत्यादिभिः प्रतिनियतस्थित्यादिकारणत्वकीर्तनं तु प्रयोज्य प्रयोजक भावेन ॥ नन्वेवमपि सृष्ट्यादीनां प्रत्येकं लक्षणत्वात्तल्लक्ष्यमपि कारणं वस्तु नानाभूतमिति चेन्न समुदायस्यैव लक्षणत्वात् सृष्टिस्थितिप्रलयानां समुदायो हि लक्षणं नत्वेकैकं समुदायस्य लक्षणत्वं हि श्रुतिस्वारस्यादवसीयते यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्यत्र न प्रतिवाक्यं तद्ब्रह्मेत्युक्तम् अन्यथैकतरलक्षणावैयर्थ्यञ्च स्यात् ननु समुदितं न लक्षणं व्यावर्त्याऽभावात् नहि जगदुत्पत्तौ निमित्तोपादानभूतस्थित्यादिकारणत्वव्यवच्छेद्यं किमपि वस्त्वस्तीति चेत् सत्यं । व्यवच्छेद्यं नेष्यते तथापि श्रुत्यनुरोधात् सूत्रकारेण जन्मादीत्येकवचनान्तेन समुदायवाचिना समुदायस्य लक्षणत्वमुक्तं श्रुतिश्च तद्विजिज्ञासस्वेति विधित्सितोपासनोपयोगिनिरतिशयबृहत्त्वविपरीतबृहत्त्वशङ्काव्यवच्छेदार्थं समुदायमाह शङ्कित व्यवच्छेदेनापि हि सप्रयोजनत्वं स्यात् लक्ष्याकारविपरीताकारशङ्कानिराकरणेन विना लक्ष्याकारनिश्चयाऽयोगात् नच जन्मादिष्वेकैककारणत्वं लक्ष्याकारविपरीतशङ्कानिराकरणक्षमं तथा हि उत्पत्तिकारणत्वेऽभिहितेऽपि स्थित्यादिकारणत्वं न चेत् तदनुगुणज्ञानशक्तिविरहात् स्थितिप्रलयकारणभूत वस्त्वन्तरसद्भावाच्च जन्ममात्रकारणस्य निरतिशयबृहत्त्वं नस्यात् मुक्तेर्लयान्तर्भावान्मोक्षप्रदत्वाभावाच्च मोक्षप्रदत्वप्राप्यत्वानुगुणैश्च बृहत्त्वं सिद्धमिति अतोजन्मकारणत्वमात्रस्य समस्तवस्तुव्यवच्छेदसमर्थेऽपि जन्मादिसमुदायकारणत्वस्यैव निरतिशयबृहत्त्वौपयिकसृष्टिस्थितिप्रलयसमुदायकारणत्वं लक्षणमिति ज्ञापितम् अतः समुदायस्यैव लक्षणत्वादपि तल्लक्ष्यं वस्त्वेकमेव साक्षाद्ब्रह्मादीन्प्रतिप्रयोजकत्वेन च कारणमिति सुस्थं नन्वेकस्यैव तव संहारकतयाऽसंहारकतया च कारणत्वेऽपि सृष्टेः प्राक् कथमवस्थितः कथं स्रक्ष्यसि कथं तर्हि ब्रह्मरुद्रादीनां सज्ञानां त्वयि पर्यवसानमित्यत्राह साद्धेन आत्मेश्वर इति आत्मनः स्वस्य ईश्वरः आत्मेश्वरः । पतिं विश्वस्यात्मेश्वरमिति श्रुतेः अनेन स्वस्य प्रयोजकान्तराप्रयोज्यत्वमुक्तम् आत्मनां स्वस्मिन् लीनानां जीवानामीश्वरः अन्तः प्रविश्य नियन्तृत्वेनावस्थित इति वा उपद्रष्टा उपद्रष्टृदेवमनुष्यादिनामरूपाभावात् केवलं द्रष्टृत्वेनावस्थित इत्यर्थः अनेन पदद्वयेन नामरूपविभागानर्हसूक्ष्मप्रकृतिपुरुषशरीरकत्वम् फलितं । यस्याक्षरं शरीरं यस्याव्यक्तम् शरीरम् असद्वा इदमग्र आसीत् । तद्धेदन्तर्ह्यव्याकृतमासीदिति च श्रवणात् एवञ्च नामरूपविभागानर्हसूक्ष्मचिदचिद्विशिष्टत्वेनैव कारणवस्तुस्थितिरित्युक्तम् भवति कारणत्वोपयुक्तकल्याणगुणत्वमाह स्वयंदृगिति । नित्याविर्भूतासङ्कुचितज्ञान इत्यर्थः स्वयम् आत्मना पश्यतीति स्वयंदृगिति व्युत्पत्तेः अनेन निमित्तत्वोपयुक्तनिरुपाधिकसर्वज्ञत्वमुक्तं स्वयन्दृगिति उपादानत्वोपयुक्तसर्वशक्तित्वादेरप्युपलक्षणं हेयगुणराहित्यमाह अविशेषणः विशेषणानि प्रकृतिपुरुषगतजडत्वपरिणामित्वाऽसर्वज्ञत्वदुःखित्वादयो व्यावर्तकाकाराः तद्रहित इत्यर्थः अविशेषण इति न सर्वगुणनिषेधः स्वयन्दृगिति कल्याणगुणविधानात् कारणत्वोपयुक्तगुणकथनसापेक्षितत्वान्निषेधस्य विहितेतरविषयत्वाच्च ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

रसायाः रसातलात् योगिभिः सनकादिभिः यज्ञक्रतुर्यज्ञसंकल्पः ॥ ४६ ॥

सामगीः सामगायनध्वनिः तया परिभ्रष्टानि विध्वस्तानि सत्कर्माणि येषां ते तथोक्तास्तेषां यज्ञविघ्ना राक्षसाः ॥ ४७ ॥

भद्ररुद्रो वीरभद्रः उन्निन्ये ऊर्ध्वं नीतवान् समाप्तं कृतवानित्यर्थः ॥ ४८ ॥

सर्वात्मेति हेतुगर्भविशेषणम् सर्वभूतान्तर्यामित्वेन सर्वभागभुक् स्वेन भागेन हेतुना सर्वभागं भुङ्क्त इति सर्वभागभुक् पूर्वं प्रीयमाण इदानीं प्रीयमाण इत्युभयार्थाभिप्रायेणेव शब्दः इवोभये च सादृश्य इत्यभिधानात् यथा प्रीयमाणः प्रियं वक्ति तथेति वा॥४९

ननु भगवान् स्वागतं बभाष इति न युक्तम् दक्षस्य प्रागेव तत्र स्थितत्वात् अन्यथोक्तत्वं न प्रतीयत इत्याशङ्क्य स्वात्मानं दक्षायोपदिशतीत्याह अहमिति । आत्मेश्वरः आत्मनां जीवानामीश्वर ईशनशीलः उपद्रष्टा सर्वस्मादधिकोद्रष्टा स्वयंदृक् स्वयंप्रकाशः अविशेषणः सर्वोत्तमोऽहं विष्णुर्जगतः परं पृपालनपूरणयोरिति धातुः पालकं कारणं ब्रह्मा ब्रह्मसंज्ञोऽहं परं सृष्ट्यापूरकं कारणं शर्वः शर्वसंज्ञोऽहं जगतः परमुत्कृष्टं कारणं विक्षेपकं संहारकं कृविक्षेप इति मामेवं विधं जानीहीति शेषः ॥ ५० ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

स्वावतारत्वोपदेशेन ब्रह्मशिवावप्यावरयति । अहमिति ॥५०-५१॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

त्रयीगात्र हे वेदमूर्त्ते ! यज्ञः सयूपः क्रतुर्निर्यूपः ॥ ४६ ॥

नाम्नि कीर्त्यमान एव किं पुनः कीर्त्तिते किन्तरां तत् साक्षात् सन्निधौ यज्ञविघ्ना रुद्रानुचरा इति तेषु कटाक्षः । अत्र स्तावकानामन्यत्र कटाक्षं भगवतो भक्तेश्च प्राय उत्कर्षपोषाय दोष आख्येयः ॥ ४७ ॥

हे भद्र । यज्ञ भद्ररुद्रेण वीरभद्रेण अभिमर्षितं विदूषितं संनिन्ये प्रवर्त्तयामास ॥ ४८ ॥

भगवत्त्वेनानन्दपूर्णोऽपि सर्वात्मत्वेन सर्वभागभुगपि स्वेन भागेन प्रीयमाण इवेति रुद्रापराधित्वान्न वस्तुतः प्रीतः । हे अनघेति निरपराधिन्येव भगवान् प्रीणातीत्यत्र त्वमेव प्रमाणमिति भावः ॥ ४९ ॥

मा पुनरपराधं कार्षीरिति हितमुपदिशति अहमिति । स्वयं दृक् स्वप्रकाशः अविशेषणः त्रयाणामस्माकं नास्ति विशेष इत्यर्थः ५०।

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

हे त्रयीगात्र ! वेदमूर्ते । हे यज्ञ यज्ञो वै विष्णुरितिश्रुतेः महाशूकरः क्रतुः अध्वररूपी त्वमेव पुरा योगिभिः स्तूयमानः नदन् सन् यथा वारणेन्द्रः पद्मिनीं पद्मलतां दंष्ट्रया उद्धरति तद्वत् । गां पृथ्वीं दंष्ट्रया रसायाः रसातलात् लीलयैव उज्जहर्थोद्धृतवान् ॥ ४६ ॥

हे यज्ञेश ! तस्मै उक्तप्रभावाय ते तुभ्यं नमः ते नाम्नि कीर्त्यमाने यज्ञविघ्नाः क्षयं यान्ति अतस्ते दर्शनमाकाङ्क्षमाणानां परिभ्रष्टं सत्कर्म येषां तेषां नोऽस्माकं सद्यं प्रसीद अत्रेदं बोध्यं दक्षादीनां आब्रह्मापर्यन्तानां लब्धभगवद्दर्शनानां भगवज्ज्ञानभक्तिमतां मुक्तिः प्रारब्धकर्मक्षये ज्ञेया अतएव दक्षस्य पुनर्जन्म एवं सर्वत्रोह्यम् ॥ ४७ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

हे भद्र विदुर ! इत्येवं सर्वैः यज्ञभावने हृषीकेशे कीर्त्यमाने रुद्रेण अवमर्षितमवज्ञातं यज्ञं संनिन्ये प्रवर्त्तयामास ॥ ४८ ॥

हे अनघ ! भगवान् स्वानन्दतृप्तोऽपि सर्वात्मा अतएव सर्वभागभुगपि भक्तिनिवेदितप्रियतया स्वेन भागेन त्रिकपालपुरोडाशेन प्रियमाण इव दक्षमाभाष्य हे प्रजापते! इत्यादि सम्बोध्य बभाषे॥४९॥

अथ सर्वशक्तिः सर्वात्मा सर्वाभिन्नाभिन्नः समानातिशयशून्यः स्वाश्रयः स्वप्रकाशः सर्वकारणभूतोऽहमेव मुमुक्षुभिर्ध्येयः कारणं तु ध्येयमिति स्वनिगमोक्तसिद्धान्तं सर्वेभ्य उपदिशन् स्वात्मके ब्रह्मणि शिवे च दक्षभृग्वादीनां स्पर्द्धासूयादिदोषं जगति च चेतनाचेतनरूपे स्वात्मके ब्रह्मशिवयोः स्पर्द्धासूयादिदोषं निवारयितुं "सर्वं खल्विदं ब्रह्म । ऐतदात्म्यमिदं सर्वं । सर्वं विष्णुमयं जगत् । वासुदेवः सर्वमिति समहात्मा सुदुर्लभः । सर्वमिदमहं च वासुदेवः । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव । अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते । बीजं चापि मां विद्धि अहं क्रतुरहं यज्ञः । स्वधाहमहमौषधं । मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतं । पिताहमस्य जगतो माता धाता पितामहः । वेद्यं पवित्रमोंकार ऋक् साम यजुरेव च । गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् । प्रभवः प्रलयस्थानं निधानं बीजमव्ययं । तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च । अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन" तदनन्यत्वमारम्भणशब्दादिभ्यः आत्मत्वेनावगच्छन्ति ग्राहयन्ति च,, । इत्यादि श्रुतिस्मृतिसूत्रसिद्धं सर्वस्य स्वात्मकत्वं दर्शयति भगवान् अहमिति पञ्चभिः । अविशेषणः समानस्य अधिकस्य च अभावात् तदपेक्षया यद्विशेषणं तद्रहितः स्वयंदृक् स्वप्रकाशः आत्मेश्वरः स्वानन्येश्वरः ईश्वरान्तररहितः "न यस्य कश्चिज्जनितानचाधिपः,, इत्यादि श्रुतेः जगतः ब्रह्मशिवादिसहितस्य सर्वस्य चेतनाचेतनस्य कारणम् उपादानं निमित्तं च तदात्मानं स्वयमकुरुतेतिश्रुतेः कथं भूतं कारणं परं प्रकृतिकालादीनां जगदुत्पत्तौ निमित्तभूतानामपि परम् ब्रह्मशिवयोरपि परमपुरुषजन्यत्वं श्रूयते "योब्रह्माणं विदधाति पूर्वम् एतस्य ध्यानान्तस्थस्य ललाटात्त्र्यक्षः शूलपाणिः पुरुषोऽजायतेति स्मर्यते च कहति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् आवान्तवांगसम्भूतौ तस्मात्केशवनामवान् । इति उपद्रष्टा साक्षी च ब्रह्मा शिवश्च चकारात्सर्वं वस्तुजातम् अहमेवेत्यन्वयः अत्रैव ब्रह्मशिवादिसहितस्य सर्वस्य वासुदेवात्मकत्वं प्रपञ्चितं द्वितीयस्कन्धे अहमेव इत्यादिना ॥ ५० ॥

भाषाटीका ।

हे वेदत्रयमूर्त्ते ! आपही पूर्वकाल में महावराह होकर जैसे हस्ती कमल के लताको लावै तैसे दांतसे रसातल में से अनायास से पृथिवीको लेआये उस समयपर यज्ञक्रतुरूपी आपकी गर्जना को सुनकर सनकादि योगिजन आपकी स्तुति करतेथे ॥ ४६ ॥

हे प्रभो ! सत्कर्म से परिभ्रष्ट हुये हमलोग आपके दर्शन की इच्छा करतेहैं आप प्रसन्न हूजिये हे यज्ञेश ! आपके नामके कीर्त्तन करने से मनुष्यों के सब यज्ञके विघ्नक्षय होजाते हैं आपके अर्थ हमारा नमस्कार है ॥ ४७ ॥

मैत्रेयजी बोले इस प्रकारसे यज्ञ रक्षक हृषीकेश की स्तुति होनेपर शुद्ध चित्त वाले दक्षने रुद्रानुचर वीरभद्र का नाश किया जो यज्ञ तिसको फिर प्रवृत्त किया ॥ ४८ ॥

हे अनघ ! विदुरजी ! सर्वयज्ञों के भाग के भोक्तासर्वान्तर्यामी भगवान् अपने यज्ञ भाग के प्राप्त होने से प्रसन्न हुये सरीके दक्षको सम्बोधन करके बोलने लगे ॥ ४९ ॥

आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज! ।
सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम् ॥ ५१ ॥
तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि ।
ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ॥५२ ॥
यथा पुमान्न स्वाङ्गेषु शिरःपाण्यादिषु क्वचित् ॥
पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः ॥ ५३ ॥
त्रयाणामेकभावानां यो न पश्यति वैभिदाम् ॥
सर्वभूतात्मनां ब्रह्मन् । स शान्तिमधिगच्छति ॥ ५४ ॥

मैत्रेय उवाच ।

एवं भगवतादिष्टः प्रजापतिपतिर्हरिम् ॥
अर्चित्वा क्रतुना स्वेन देवानुभयतोऽयजत् ॥ ५५ ॥
रुद्रं च स्वेन भागेन ह्युपाधावत्समाहितः ॥
कर्मणोदवसानेन सोमपानितरानपि ॥
उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः ॥ ५६ ॥
तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे ।
धर्म एव मतिं दत्वा त्रिदशास्ते दिवं ययुः ॥ ५७ ॥
एवं दाक्षायणी हित्वा सती पूर्वकलेवरम् ।
जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ॥ ५८ ॥
तमेव दयितं भूय आवृङ्क्ते पतिमम्बिका ॥
अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषम् ॥ ५९ ॥
एतद्भगवतः शम्भोः कर्म दक्षाध्वरद्रुहः ॥
श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः ६० ॥
इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणम् ॥
योनित्यदाकर्ण्य नरोऽनुकीर्त्तयेद्धुनोत्यघं कौरव ! भक्तिभावतः ॥ ६१ ॥

इतिश्रीभागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायाम् वैयाशिक्याम्
दक्षयज्ञसंधानं नाम सप्तमोऽध्यायः ॥ ७ ॥

भाषाटीका

श्रीभगवान् बोले हम जो उपाधि रहित साक्षी स्वयंप्रकाशक हैं सबके आत्मा हैं ईश्वर हैं सोई हम ब्रह्मा रुद्र रूपभीहैं ॥५०॥

श्रीधरस्वामिकृत भावार्थदीपिका

कुत इत्यत आह । अहमेवाऽऽत्ममायामधिष्ठाय जगत्सृष्ट्यादि कुर्वन् सर्व संचक्षन् सर्व शक्तिः क्रियोचितां संज्ञां धारयामि ॥ ५१ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥

तस्मिन् केवलेऽद्वितीये समानासमानजातीयभेदरहिते ब्रह्मणि मयि ब्रह्मरुद्रौ भूतानि च भेदेनाऽज्ञः पश्यतीत्यर्थः ॥ ५२ ॥

विद्वांस्तु भेदं न पश्यतीति सदृष्टान्तमाह यथेति ॥ ५३ ॥

तस्मादेवमैक्यं पश्यन् कृतार्थो भवतीत्याह । त्रयाणामेकोभावः स्वरूपं येषाम् ॥ ५४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ॥
स्वेन क्रतुना त्रिकपालेष्टया उभयतोऽङ्गैः प्रधानेन च ॥ ५५ ॥
स्वेन भागेन यज्ञावशिष्टेन उदवस्यते समाप्यतेऽनेनेत्युदवसानं .तेन कर्मणा सोमपानितरामभ्युपाधावदित्यनुषङ्गः तनश्चोदवस्य कर्मसमाप्त्यावभृथरूपं यथा भवति तथा स्नातवान् ॥ ५६ ॥
स्वेनैवानुभावेनाप्तराधसे प्राप्तसिद्धये तस्मा अपि ॥ ५७ ५८ ॥
आवृक्ते भजते स्म अनन्यभावानामेकैवगतिर्यस्तम् प्रलयकाले सुप्ता शक्तिरीश्वरमिव ॥ ५९ ॥
बृहस्पतेः शिष्यान्मेमया श्रुतम् ॥ ६० ॥
परं पवित्रं य आकर्ण्य तथानुकीर्तयेत् । स आत्मनः परस्यापि अघं संसारव्यसनं सर्वदा धुनोति ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृत भावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।
तवैव ब्रह्मशिवत्वं कुतः सोऽहं कारणावस्थरूपः सर्वशक्तिः सृष्टयादिसामर्थ्यं तया याः सृष्टयादिक्रियास्तद्युक्तिताम् ॥ ५१ ॥
अस्थानस्थचकारस्योचितस्थाने आकर्षणमित्यर्थोक्तिः भेदेन दर्शने एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधादत्र एव भेदेन पश्यति ॥ ५२ ॥
अङ्गानां न शरीरेणाङ्गिना सजातीयविजातीयभेदो किन्तु स्वगतभेद एव तथाभावाजीवयोस्तच्छक्तित्वेन तद्भेदात् सजातीयविजातीयभेदो किन्तु स्वगत एवेति सर्वत्र सिद्धान्तः ॥ ५३ ॥
तस्माद्विदुषां भेददर्शनाभावात् सर्वभूतात्मनां सर्वभूतमात्रस्य तत्तत्कार्येषु प्रवर्त्तकत्वेनात्मनां तथा च पार्थिवाद्दारुणोधूम इति न्यायेन तत्तत्तारतम्यन्त्ववर्जनीयमेवेति भेदादर्शनञ्च तयोर्विष्णुतस्वातन्त्र्याभावादेव विष्णोस्तु परमस्वान्तन्त्र्यमेव यथोक्तं श्रीब्रह्मणैव "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः। विश्वं पुरुषरूपेण परिपाति त्रिशक्ति धृक् इति सर्वथा साम्यदर्शने तु दोषोऽपि श्रूयते यथा पाद्मे,, यस्तु नारायणं देवं ब्रह्म रुद्रादि दैवतैः । समत्वेनैव वीक्षेत स पाषण्डी भवेद्ध्रुवम् इति ॥ ५४ ॥
अङ्गैः प्रयाजादिभिः प्रधानेन दर्शपौर्णमासादिना ॥ ५५ ॥
तेन कर्मणा समाप्तीष्टया अनुषङ्गः अन्वितस्य क्रियापदस्य पुनस्सम्बन्धः ॥ ५६ ॥
ततश्च सर्वयजनानन्तरम् उदवस्येत्यर्थकम् ॥ ५७—५८ ॥
एकैवगतिर्गम्यः यथा प्रलये मायाशक्तिः पुरुष एव निलीय तिष्ठति सृष्टौ अपि तमेव भजते इति सत्या निजशक्तित्वं व्यञ्जितम् ॥ ५९ ॥
एतत्कर्म चरितम् ॥ ६० ॥
तथाऽऽकर्णनानुसारेण भक्तिभावितः श्रीवैष्णवगुरोः भक्त्या भावितः बोधितः सन् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीराधारमणदासगोस्वामि विरचितायां
दीपिन्याख्यायां दीपिका टिप्पण्याम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।
सोऽहं सूक्ष्मप्रकृतिपुरुषशरीरकोनिरस्तनिखिलहेयः समस्तकल्याणगुणात्मकोऽहं हे द्विज! त्वम् गुणमयीं त्रिगुणात्मिकाम् आत्ममायां आत्मीयां, प्रकृतिं समाविश्य जीवद्वारात्मकरूपकपञ्चानेनानुप्रविश्य जगत सृजन् ब्रह्मद्वारा सृजन् रक्षन् मद्द्वारा पालयन् हरन् रुद्ररूपेण संहरन् क्रियोचितां सद्धारकाद्वारकसर्गादिक्रियोचितां संज्ञां ब्रह्मविष्णुशिवात्मिकां संज्ञां दधे बिभर्मि अतः कुत्रचिदचिदात्मकप्रपञ्चरूपकार्यरूपेण सूक्ष्मावस्थप्रकृतिपुरुषशरीरकत्वेन कारणरूपेणावस्थितोऽहमेकएवेति न मद्व्यतिरिक्तं वस्त्वस्तीति भावः तथाच श्रूयते "नामरूपे व्याकरवाणि तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत्" नन्वनुप्रविश्य नामरूपं व्याकरवाणीत्यनुप्रवेशपूर्वकत्वं सृष्टेः प्रतीयते तत्सृष्ट्वा तदेवानु प्राविशदित्यनुप्रवेशस्य सृष्टिपूर्वकत्वं प्रतीयते कथमेतद्विप्रतिषिद्धमुपपद्यते उच्यते अत्र ह्यनुप्रवेशसृष्ट्योः समान कर्तृत्वमात्रमेवविवक्षितं नतु पौर्वापर्यमपीति ज्ञापनाय विप्रतिषिद्धनिर्देशः अतएव हि तस्य स्वष्टावित्यत्रपमेतीत्यनुप्रवेशसृष्टयो र्यौगपद्यमप्यत्र स्फुटम् तत्सृष्ट्वा तदेवानुप्राविशदिति स्थित्यर्थानुप्रवेशो वा वेदितव्यः ॥ ५१ ॥
एवं हि सर्वस्य मदात्मकत्वान्मद्व्यतिरिक्तस्वतन्त्रवस्त्वभावादमदात्मकस्वतन्त्रवस्तुदृष्टिर्देहात्मभ्रान्तिमूलेत्याह तस्मिन्निति । तस्मिन् कार्यावस्थकारणावस्थप्रकृतिपुरुषेश्वरे किं नियन्तृत्वं राजादिवदित्याह परमात्मनि प्रकृतिपुरुषयोरन्तःप्रविश्य तद्गतैर्दोषैरस्पृष्टे प्रशासनेन भर्त्तरि एवमेव हि परमात्मशब्दार्थोगीताचार्येणोक्तः "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । योलोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः" इति अत्रलोकत्रयमित्यनेन प्रकृतिपुरुषावुक्तौ तदात्मकत्वाल्लोकत्रयस्य आविश्येत्यत्रान्तःप्रविष्टःशास्तेति श्रुत्युक्तोधा रन्तः प्रविश्येत्यर्थः अव्यय इत्यनेनाविकारित्वमाचिना प्रकृति पुरुषगतदोषास्पर्शित्वमुक्तम् ईश्वरइत्यनेन नियन्तृत्वमभिहितं बिभर्तीत्यनेन धारकत्वं फलितं किमेवं भूतस्त्वदन्यः कश्चिदस्ति नेत्याह। अद्वितीये स्वसमानाद्वितीयवस्त्वन्तररहितइत्यर्थः "यथाचोलनृपःसम्राडद्वितीयोऽस्ति भूतलइतिवत् केवले स्वाधिकवस्त्वन्तररहिते तथा च श्रूयते "नतत्समश्चाभ्यधिकश्च दृश्यते स्मर्यते च,,न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य इति यद्विद्वयादद्वितीय इति स्वसमानवस्तुनिषेधादेव तदधिकवस्तुनिषेधः कैमुत्यन्यायसिद्ध इति तर्हि केवले निरस्तानिखिलहेये ब्रह्मणि स्वरूपेण गुणैश्च निरतिशयबृहति अनन्तकल्याणगुणात्मकस्वरूप इत्यर्थः एवंभूते मयि भूतानि मदन्तरात्मकतया मदायत्तसत्तास्थितीनि मच्छरीरतया मदपृथक्सिद्धत्वेन स्थितानि ब्रह्मरुद्रादिभूतानि भेदे न पृथक्सिद्धत्वेन स्वतन्त्राणि अज्ञः ब्रह्मात्मकत्वज्ञानरहितः देहात्मबुद्धिश्च विपश्यति अनेन देहात्मभ्रान्तिः स्वतन्त्रात्मभ्रान्तिश्च भेददर्शनमूलमित्युक्तम् ॥ ५२ ॥
सर्वस्य मदात्मकत्वज्ञानिनस्तु न भूतानि भेदेन पश्यन्तीति सदृष्टान्तमाह यथेति । पुमान् देहात्मभ्रान्तिमानपि पुरुषः स्वाङ्गेषु स्वपृथक्स्थित्यनर्हेषु शिरःपाण्याद्यवयवेषु मध्ये कश्चित्कस्मिंश्चदप्यवयवे पारक्यबुद्धिं परस्येदं परकं तस्य भावः पारक्यन्तेन पृथक्सिद्ध्यनर्हत्वं लक्ष्यते परकीयं ह्यङ्गं स्वस्मात् पृथक्स्थित्यर्हं तद्बुद्धिं न कुरुते एवं मत्परः मदासक्तचित्तः सर्वस्य ब्रह्मात्मकत्वज्ञानसम्पन्न इत्यर्थः भूतेषु मत्पृथक्स्थित्यनर्हत्वबुद्धिं कुरुत इत्यर्थः ॥ ५३ ॥
एवं कृत्स्नस्य जगतः स्वात्मकत्वेन स्वपृथक्स्थित्यनर्हविशेषणप्रकारतामुपपाद्य पृथगीश्वरत्वेन शङ्कितयोर्ब्रह्मरुद्रयोरपि मदा

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

पृथक्सत्तादिमत्त्वेन मत्प्रकारत्वज्ञानं मनः प्रशान्तिद्वारा मुक्तिसाधनमित्याह त्रयाणामिति। हे ब्रह्मन् दक्ष! एकभावानां एको भावः सत्ताद्येषां भाव इति स्थित्यादीनामप्युपलक्षणम् एकविधसत्तादिमतां मदायत्तसत्तादिमतामित्यर्थः एकस्मिन् भावो येषामिति व्यधिकरणबहुव्रीहिर्वा त्रयाणां ब्रह्मविष्णुरुद्राणां तत्र ब्रह्मरुद्रयोः परमात्मायत्तसत्तादिमत्त्वकथनेन तयोः परमात्मानं प्रति अपृथक्सिद्धप्रकारतोक्ता विष्णोस्तु विष्ण्वायत्तसत्तादिमत्त्वकथनेनानन्याधीनसत्तादिमत्त्वं फलितं तथा च श्रूयते "स्वेमहिम्नि प्रतिष्ठितः पतिं विश्वस्यात्मेश्वर„मिति एकशब्देन मूर्तित्रयातिरिक्तं परं वस्तूपलक्ष्यत्रयाणां तदायत्तभावादिमत्त्वकथनं त्वसङ्गतं परत्वस्य जगत्कारणानिष्ठत्वात्कारणत्वस्यात्मेश्वरेउपद्रष्टत्यादिना विष्णोरेव प्रतिपादितत्वात्तदतिरिक्तोत्कृष्टवस्त्वन्तराभावात्तस्मिन् ब्रह्मणयद्वितीये केवले परमात्मनीति विष्णोः परत्वस्यैवोक्तत्वाच्च एकभावानां एकरूपाणामिति त्रयाणां तादात्म्यवर्णनन्त्वयुक्तम् ब्रह्मरुद्रयोः कर्मवश्यत्वमृज्यत्वपाल्यत्वनियाम्यत्वादेः "अनपहतपाप्मा वा अहमस्मि नारायणाद्रुद्रो जायते„ इत्यादिषु श्रुतत्वाज्जीवत्वनिश्चयात् यद्यपि"ब्रह्मा नारायणः शिवश्च नारायणः ब्रह्मा नारायणाख्योऽसौ कल्पादौ भगवान् यथा। प्रजाः ससर्ज भगवान्ब्रह्मा नारायणात्मकः।ततःस भगवान् विष्णुः रुद्ररूपधरोऽव्ययः। ततः कालाग्निरुद्रोऽसौ भूत्वा सर्वहरो हरिः । सर्गस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् स संज्ञां याति भगवानेक एव जनार्दन„ इत्यादि प्रमाणात् त्रिमूर्त्यैक्यं मङ्गीकार्यं तथापि 'नारायणाद्रुद्रो जायते नारायणात् द्वादशादित्या रुद्रा वसवः सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते एको ह वै नारायण आसीन्न ब्रह्मा नेशान एको ह वै नारायण आसीन्न ब्रह्मा न च शङ्करः समुनिर्भूत्वा समचिन्तयत् तत एते व्यजायन्त विश्वे हिरण्यगर्भोऽग्निर्यमवरुणरुद्रेन्द्राः यत्राभिपद्मादभवत् स महात्मा प्रजापतिः तत्र ब्रह्मा चतुर्मुखोऽजायत सोऽग्रे भूतानां मृत्युमप्यसृजत् त्र्यक्षं त्रिशिरस्कं त्रिपादं खण्डपरशुं ब्रह्मणः पुत्राय ज्येष्ठाय ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः । विभूतयो हरेरेता जगतः सृष्टिहेतवः। रुद्रः कालान्तकाद्याश्च समस्ताश्चैव जन्तवः„इत्यादिषु भगवतस्तयोश्च परस्परभेदावगमात् सामानाधिकरण्यस्य "सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते ! हरो हरति तद्वश„इत्याद्यानुगुण्येनान्तर्यामित्वेनाप्युपपत्तेः भेदनिर्देशस्य स्वाभाविकभेदाभ्युपगमेन विनानुपपत्तेश्च न त्रिमूर्त्यैक्यमुपपन्नं तस्माद्यथोक्त एवार्थः सर्वभूतात्मनां तत्र विष्णोः सर्वभूतात्मत्वम् "एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा ममान्तरात्मा तव च ये चान्ये देहिसंज्ञिता„ इत्यादि श्रुतिस्मृत्युक्तसर्वभूतान्तरात्मस्वरूपमितरयोस्त्वणोश्चेतनस्य चेतनान्तरव्याप्यत्वासम्भवेन सर्वभूतानां ब्रह्मरुद्राख्यजीवव्याप्यत्वासम्भवात् नान्तरात्मत्वरूपं सर्वभूतात्मत्वम् अपि तु "तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च कक्षीवान्नृषिर्विप्रः त्वं वाहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते तथोऽहं योऽसौ सोऽहम् अहं हरिः सर्वमिदं जनार्दनः आत्मेति तूपगच्छन्ति ग्राहयन्ति च इत्यादि श्रुतिस्मृतिसूत्रोक्तविधया सर्वभूतान्तरात्मत्वेन प्रत्यक्षतपरमात्मस्वरूपं कथनमेकस्य सकृदुपात्तस्य सर्वभूतात्मशब्दस्यार्थद्वयपरत्वमुच्यते एकस्यापि सर्वभूतात्मवाचकस्य कृतैकशेषस्य बहुवचनान्तस्य निर्देशात् भिन्नार्थकानामपि शब्दानां सरूपाणामेकशेषविधानात्

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

यथोक्तार्थपरत्वोपपत्तिः अनेन ब्रह्मरुद्रयोः सर्वभूतान्तरात्मत्वेन प्रत्यक्षतमत्स्वरूपत्वेन प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ज्ञानीत्वात्मैव मे मतमिति मदुक्तरीत्या निरतिशयमत्प्रीतिविषयत्वान्मदङ्गत्वाच्च तद्विषये कृतोऽपराधो मय्येव पर्यवस्यतीत्यभिप्रेतम् एवं च ब्रह्मरुद्रपरौ सर्वभूतात्मशब्दौ सर्वभूतेष्वात्मा परमात्मा ययोस्तावितिव्यधिकरणबहुव्रीहिविवक्षितव्यौ एवं भूतानां त्रयाणां यः पुमान् भिदां न पश्यति ईश्वरात्मत्वं इति न पश्यति अपितु एक एव ब्रह्मरुद्ररूपेण स्वावताररूपेण च स्थित इति पश्यतीत्यर्थः पूर्वापरानुगुण्यात्प्रमाणान्तरानुरोधाच्च हे ब्रह्मन् ! स सर्वात्मकब्रह्मदर्शनशान्तिं मनः प्रशान्तिम् अधिगच्छति शान्त्यधिगमद्वारा मुक्तो भवेदित्यर्थः ॥ ५४ ॥

दक्षाध्वर प्रसंगमुपसंहरति मैत्रेय एवमिति । भगवतैवमादिष्टः प्रजापतीनां पतिः प्रजापतिः ब्रह्मा पतिर्यस्य इति वा दक्षः स्वेन स्वकर्तृकेन क्रतुना हरिमार्चित्वा स्वेन त्रिकपालवैष्णवयागेन हरिमर्चित्वेति वा उभयतो देवान्दिविष्ठान्भूमिष्ठांश्च अयजत् स्वस्वभागाद्दिभिर्यथा योग्यमाराधितवानित्यर्थः ॥ ५५ ॥

तथा समाहितांशः रुद्रं च स्वेन भागेन उच्छेषणरूपेण भागेन उपाधावत् अन्ववर्तत अयजदित्यर्थः उदवस्यते समाप्यते अनेनेत्युदवसानं तेन कर्मणा सभामकर्मणा सोमपानितरानसोमपांश्च देवान् उपाधावदित्यनुषङ्गः ॥ ५६ ॥

ऋत्विग्भिः सहोदवस्य कर्म समाप्य अवभृथरूपं यथा भवति तथा सस्नौ स्नातवान् स्वेनैवानुभावेनावाप्तराधसे प्राप्तसिद्धये तस्मै दक्षायापि धर्मे विषये एव बुद्धिं दत्वा अस्यमतिर्धर्मासक्तास्यादित्यनुगृह्येत्यर्थः ते विबुधा देवा दिवं ययुः ॥ २७ ॥

प्रकृतं परमप्रकृतेन संगमयति एवमिति एवमुक्तरीत्या दाक्षायणी सती पूर्वशरीरं हित्वा हिमवतः क्षेत्रभूतायां मेनायां जज्ञे इत्यभूदिति श्रुश्रुम पराशरादिभ्य इति शेषः अनेन श्लोकैः प्रामाण्यं सूचितम् ॥ ५८ ॥

भूयो द्वितीये जन्मनि अम्बिका पार्वती अनन्यभावा पतिपराधीनाऽन्यवर्ता एकगतिम् एका अम्बिकैवगतिः प्रवृत्त्युपायो यस्य तं तमेव चिन्तयन्तमत एव दयितं प्रीतिविषयं तमेव पतिमावृङ्क्ते भजति स्म यथा प्रलयकाले पुरुषं सुप्ता लीना शक्तिः यथा विष्वक्शक्तिः प्रलये लीने पुनः सृष्टिदशायां तत्प्रकारैक्यभावे तदधीने तथा आवृङ्क्ते स्मेति भावः ॥ ५९ ॥

उक्तायाः कथायाः सम्प्रदायिकतामाह एतदिति । दक्षाध्वरद्रुहः दक्षाध्वरविनाशिनः भगवतः शंभोरेतच्चरितं बृहस्पतेः शिष्याद्भागवतादुद्धवान्मे मया श्रुतम् ॥ ६० ॥

उक्तायाः कथायाः श्रवणादिफलमाह इदमिति परमेशचेष्टितं परो मा न यस्मात्सपरमो भगवान् स एवेशो यस्य तस्य रुद्रस्य चेष्टितं परमेशयोश्चेष्टितमितिवा यशस्यं यशस्करमायुष्यं पवित्रमत एव अघौघमर्षणं पापनिचयनिवर्तकं यः पुमानाकर्णये तथा यथा श्रुतमनुकीर्तयेत् भावयेत् सर्वदा भक्तिभावनः भक्तिमावयतीति भक्तिभावनः भगवद्भक्तिनिष्ठः द्वितीयान्तपाठे चेष्टितविशेषणं हे कौरव ! अघं धुनाति क्षिपति नाशयतीत्यर्थः ॥ ६१ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्र चन्द्रिकायां
सप्तमोऽध्यायः ॥७॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

एतदेव स्पष्टयति स इति। हे द्विज दक्ष! योऽहमेवं त्रिरूपः स एवाहं सत्त्वादिगुणमयीमात्ममायां मदधीनजडप्रकृतिमाविश्य रजोगुणोपादानत्वेन ब्रह्माणं सृष्ट्वा ब्रह्माख्यमद्रूपेण तं प्रविश्य जगत्सृजन्। सत्त्वगुणप्रवर्तकत्वेन विष्णुरूपेण विश्वं रक्षन् तमोगुणोपादानत्वेन शिवं सृष्ट्वा शिवाख्यमद्रूपेण तं प्रविश्य विश्वं हरन् संहरन् तत्तत्क्रियोचिताः संज्ञा अभिवृद्धिहेतुत्वाद्ब्रह्मनाम। सविलासस्थापितहेतुत्वाद्विष्णुनाम। संहारहेतुत्वाद्रुद्रनामेति दध्र इत्यन्वयः। अनेन ब्रह्मरुद्रस्थमद्रूपाभ्यां विष्णुरूपेण चाहमेव जगत्सृष्ट्यादित्रयकृदित्यतो ब्रह्मशिवयोः प्रसिद्धयोः सृष्टिसंहारकर्तृत्ववचनं भ्रान्तिमूलमित्युक्तं भवति ॥ ५१ ॥

एतदेव स्पष्टयति तस्मिन्निति। योऽहं विश्वस्य मुख्यकारणं तस्मिन्नपि केवले प्रकृतिसम्बन्धरहिते। ब्रह्मणि गुणपूर्णेऽद्वितीये समाधिकरहिते। परमात्मनि स्थिते सति देहात्मबुद्धिर्देहोऽहमिति बुद्धिर्यस्य स तथा जीवो भूतानि ब्रह्मादीनि। भेदेन स्वातन्त्र्येण। एवमेव सृष्ट्यादिप्रवृत्तिमन्ति न केनचिन्नियतानीत्यनुपश्यतीत्यन्वयः अज्ञ इति हेतुगर्भविशेषणम् यद्वा भेदेन स्थितानि ब्रह्मादिभूतानि परमात्मन्यनुपश्यतीत्यभेदेनेति शेषः॥५२॥

अज्ञानदर्शनमुक्त्वा ज्ञानिदर्शनप्रकारमाह यथेति। पुमान् जीवः शिरःपाण्यादिषु स्वाङ्गेषु कदाचिदपि पारक्यबुद्धिं यथा न कुरुते किन्तु स्वकीयबुद्धिमेव करोति एवं मत्परो ब्रह्मादिभूतेषु मामकत्वबुद्धिं करोति न स्वातन्त्र्यबुद्धिम् ॥ ५३ ॥

अतः फलितमाह त्रयाणामिति हे ब्रह्मन्! एवमुक्तप्रकारेण ममैव स्वातन्त्र्यादन्येषामस्वातन्त्र्यात् ब्रह्मशिवस्थत्वेन ब्रह्मशिवाख्ययोर्मद्रूपयोः पृथक्स्थितस्य विष्णवाख्यस्य मद्रूपस्य चेति त्रयाणां त्रित्वसंख्योपेतानामेकभावानामेकरूपाणामेकैश्वर्याणां सर्वभूतात्मनां सर्वभूतान्तर्यामित्वेन यो जीवो भिदां न पश्यति स शान्तिं मोक्षं गच्छतीत्यन्वयः यद्वा त्रयाणां ब्रह्मविष्णुशिवाख्यानां सर्वभूतस्वामिनामेकचित्तानां भिदां मिथो विरोधबुद्धिविषयत्वं न पश्यति स शान्तिं स्वस्थबुद्धितया भगवन्निष्ठामाप्नोति ब्रह्मादिजीवानां हरिणा भेदवचनस्य का गतिरिति चेन्न तद्वशत्वनित्यप्रियत्वदृष्टिविषयत्वात् तदुक्तम् "हरेर्वशत्वदृष्टिस्तु भूतानामपृथग्दृशिः। प्रियत्वदृष्टिरथवा ब्रह्मादीनां विशेषतः,, इति ॥ ५४ ॥

शान्तिमधिगच्छतीत्यनेन हरेः स्वात्मोपदेशश्रवणसमाप्तः परं दक्षेण किमकारीति तत्राह एवमिति। आदिष्ट उपदिष्टः प्रजापतिः दक्षः स्वेन क्रतुना स्वयज्ञेन स्वेच्छया वा भागवतः भगवद्भक्तः स्वांशवतो वा देवानयजत् पूजयामास उभयत इति पाठे कथमुभयतः सोमतोऽग्नितरादिभिश्च कथं [१] मुभयतः सोमतोऽहवि-

[१] अयं पक्षस्तात्पर्योक्तः ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

र्भ्येति वा ॥ ५५ ॥

उपाधावदुपास्त ततो निरपराधत्वेन शुद्धोऽभूत् धावुगतिशुद्ध्योरिति धातुः उदवसानेन समाप्तौ इष्टिलक्षणेन कर्मणा आग्नेयं पञ्चकपालमुदवसानीयं निर्वपेदिति श्रुतेः सोमपानिति पाणिनेरपि सर्वज्ञेन व्यासेन प्रयुक्तत्वाद्विङ्प्रत्ययः प्रायिक इति ज्ञातव्यम्। इतरानसोमपानित्यर्थः। उदवस्य समाप्तौ कृत्वा स्वेनानुभावेन भगवन्महिम्नैवावाप्तराधसं प्राप्तयज्ञसिद्धयं ॥ ५६ ॥ ५७ ॥

ननु दक्षकोपेन योगमुक्तदेहया दक्षपुत्र्या सत्या देव्या निवृत्तिलक्षणामुक्तिरवापीति न युज्यते भर्तुः शिवस्यामुक्तदेहत्वात्सतीनामङ्गनानां भर्तृभिः सह मुक्तिश्रवणात् अतोऽनया किमकारीत्याशङ्कां इदानीं परिहरति एवमिति क्षेत्रे भार्यायाम् ॥ ५८ ॥

अत्र निमित्तमाह अनन्यभावेति। एकः शंकरो गतिर्यस्याः सा तथा अनन्यभावत्वात् अन्यभक्तिरहितत्वात् अस्मिन्नर्थे दृष्टान्तमाह शक्तिरिति प्रलये सुप्ता हरावेव रता। सृष्टिव्यापारं विना स्थिता। शक्तिर्भार्या लक्ष्मीः पुरुषमिव यथा भजति तथेत्यर्थः तदुक्तम् "शक्तित्वाद्विष्णुशक्तिस्तु शक्तिशब्देन चोच्यते। शक्यत्वात्प्रकृतिश्चापि स्वापः सृष्टिं विना हरौ। रतिस्तस्यास्तु कथितो ह्यन्यः स्वापद्गत,, इति ॥ ५९ ॥

भवतेदं कस्मात्कृतमिति तत्राह एतादिति। बृहस्पतेः शिष्याद्वृततारात् दक्षस्याध्वरं यज्ञं द्रोहितवान् हिंसितवान्नाशितवानिति दक्षाध्वरध्रुक् तस्य ॥ ६० ॥

संप्रदायवचनमुक्त्वा तच्छ्रवणादिफलमाह इतीति ॥ ६१ ॥

शंकरः स्वां सतीमवाप्य किमकार्षीदिति तत्राह सतीमिति शतमित्युपलक्षणं बह्वीः समा इत्यर्थः ॥ ६२ ॥

अनेन रेतउत्सर्जनावधिः सूचितः तत्र कुत्रेदमुत्ससर्ज। सत्यां देव्यामुतान्यत्र। न प्रथमः प्राप्तपरित्यागे कारणाभावात् न द्वितीयस्तत्रानुपपत्तेरिति तत्राह स्ववीर्येति। अकल्पामसमर्थाम् अनेनान्या मध्यंकारणमुक्तं भवति इत्यमेवोपपत्तिः आकाशस्य नीरूपत्वेन तद्धारणायोगात् अग्नौ पतत्तद्रेत आकाशनदी गङ्गा जग्राहेत्याह गङ्गेति ॥ ६३ ॥

गङ्गाया अप्यशक्तिं निरीक्ष्य वह्निस्तत्पीत्वा स्वान्तर्जीर्णं स्वाहाद्वारेण नदीतीरे शरकानने चच्छर्देत्याह पीत्वेति। स्वाहाद्वारेणेति कस्मात् कल्प्यत इत्यत आचार्यैर्भारतोक्तेरित्युक्तेः भारतस्य निर्णायकग्रन्थत्वात् अमोघरेतसो हरस्य वीर्यं निष्फलं भवितुं नार्हति अत्र तृपगमादिनिष्फलमिव प्रतीयते इति तत्राह कुमार इति। ततोरेतसः मातृरहितस्य कुमारस्य स्तनपानं कथमत्राह तस्मादिति ॥ ६४ ॥

सतीं मेनात्मजान्तात ! प्राप्य जायाम्भवः पुनः।
तया मैथुनमारभ्य रेमे देवः समाः शतम् ॥ ६२ ॥
स्ववीर्यधारणेऽकल्पां ज्ञात्वा जायां स धूर्जटिः।
उत्ससर्जाम्बरे रेतो गङ्गा जग्राह तन्नदी॥ ६३ ॥
पीत्वान्तरजरं वह्निश्चच्छर्द शरकानने।
कुमारोऽभूत्ततस्तस्मै स्तनं षट्कृत्तिका ददुः॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

एकेन मुखेन षट्कृत्तिकास्तनपानं कथं घटत इति तत्राह षड्भिरिति । किमधिकारः कुमार इति तत्राह ततइति । सुरा इतिशेषः सर्वासुराणां भयं भीतिं स्वस्थानच्युतिं च करोतीति ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृत पदरत्नावल्यां
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

स्वस्य तदुभयेश्वरत्वेऽपि तदादरार्थं तदनन्यत्वन्यायेनाभेदमुपपादयति भूतानीति । कैमुत्येन दृष्टान्तः ॥ ५२ ॥

प्रकाशश्च निरुपाधिश्च स एव ब्रह्मा च शर्वश्चेत्यन्वयः शर्वस्य महात्मकत्वान्मत्परस्तु भूतेष्वपि स्वाङ्गेष्विव ममतामेव करोतीत्याह यथेति ॥ ५३ ॥

त्रिदेवेषु पृथगीश्वरत्वमपश्यन्नेव कृतार्थो भवतीत्याह । त्रयाणामेकः पुरुषस्यैव भावः "पार्थिवाद्दारुणो धूम" इति न्यायेन यथायथं प्राकट्यं येषु तेषां सर्वभूतस्य आत्मनां तत्तत्कार्ये प्रवर्त्तकानाम् ॥ ५४—५६ ॥

उद्वसस्येत्यर्द्धकम् ॥ ५७—६० ॥

भावन इति चित्सुखपाठान्तरम् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

ननु परमेश्वरः खल्वेक एव स च भवानेव शास्त्रेषूच्यत इति तत्राह अहमिति । समाविद्याधिष्ठाय स प्रसिद्धो गुणातीत एक एवाहं क्रियाः सृष्टिस्थितिसंहृतयस्तासु समुचितां संज्ञां धत्त इति पालक इति संहर्त्तेत्याख्याम् ॥ ५१ ॥

ननु ब्रह्मणो हिरण्यगर्भत्वेन जीवत्वात् रुद्रस्येश्वरत्वेऽपि गुणस्पर्शात् कथं तयोस्त्वदभेदस्तत्र कैमुत्यन्यायेनाह ब्रह्मरुद्रौ चेति भूतानि जीवानपि अज्ञ एव भेदेन पश्यति नतु विज्ञः किमुत ब्रह्मरुद्रौ भूतानां मदीयतटस्थशक्तित्वात् ब्रह्मरुद्रयोर्गुणावतारत्वान्मदभेद इत्यर्थः ॥ ५२ ॥

भूतानितु मद्भक्तोऽपि स्वाभेदेन पश्येदित्याह स्वशिरःपाण्यादिषु सुखदुःखे यथा तथैव सर्वभूतेष्वपि सुखदुःखे पश्येदित्येव भक्तानामभेददर्शनमित्यर्थः ॥ ५३ ॥

अभेददर्शनस्य फलमाह त्रयाणामिति ॥ ५४ ॥

प्रजापतिपतिर्दक्षः उभयतः अङ्गैः प्रधानेनच ॥ ५५ ॥

उद्वस्यते समाप्यतेऽनेनेत्युद्वसानं तेन ॥

उद्वस्य समाप्य अवभृथस्नानं चकारेत्यर्थः ॥ ५६ ॥

तस्मै दक्षाय अवाप्तराधसे प्राप्तसिद्धये ॥ ५७ ॥

मेनायां मेनकायाम् ॥ ५८ ॥

आवृङ्क्ते भजते स्म न विद्यतेऽन्यस्मिन् भावो यस्याः सा । एकं नतिरूपं प्रलयकाले सुप्ता शक्तिः पुरुषमीश्वरमसुप्तमिव ॥ ५९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतकृत सारार्थदर्शिनी ।

बृहस्पतेः शिष्यादुद्धवात् सकाशात् ॥ ६० ॥ ६१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थे सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ * ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

स्वस्य स्वरूपतो निर्विकारत्वं शक्तितोऽविकारित्वं च दर्शयन् सर्वकारणत्वमाह अहमात्मेति । समाविश्य अधिष्ठाय सृजन् ब्रह्मेति स्वांशविशेषद्वारा हरन् हर इति स्वांशविशेषद्वारा रक्षन् विष्णुरिति स्वावतारद्वारा च क्रियोचितां संज्ञाम् अहमेव दधे धारयामि ॥ ५१ ॥

तस्मिन् सर्वकारणे परमात्मनि सर्वेषामात्मनामात्मनि ब्रह्मणि बृहत्स्वरूपगुणशक्तिमति केवले अन्यनिरपेक्षस्थितिप्रवृत्त्यादिके अत एवाद्वितीये समानाधिकशून्ये मयि भेदेन स्वतन्त्रसत्तया ब्रह्मरुद्रौ भूतानि चराचराणि सर्वाणि वस्तूनि च अज्ञः पश्यति ॥ ५२ ॥

एतदेव दृष्टान्तेन स्पष्टयति यथेति । एवं मत्परो मदुपासकः भूतेषु चेतनाचेतनमच्छक्तिमयेषु ब्रह्मादिस्तम्बपर्यन्तेषु पारक्यबुद्धिं न कुर्यात् ॥ ५३ ॥

एकः स्थितिप्रवृत्तिमूलभूतो भावः आश्रयः परः वासुदेवाख्यो येषां तेषां त्रयाणां ब्रह्मविष्णुशिवानाम् उपलक्षणमेतत्सर्वधस्तूनाम् "सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः । तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम्,, इति वक्ष्यमाणात् ॥ ५४ ॥

प्रजानां जगतां पतिर्भगवान् पतिर्यस्य सः दक्षः भगवता आदिष्टः मत्परः सर्वं ब्रह्मशिवादिकं मदभिन्नं पश्येदित्युपदिष्टः स्वेन क्रतुना हरिम् उभयतो भगवदङ्गभूतदेवादिद्वारा साक्षाच्च त्रिकपालपुरोडाशादिना अर्चयित्वा देवान् तदङ्गतया अयजत् ॥ ५५ ॥

रुद्रं च स्वेन भागेन यज्ञावशेषेण उपाधावत्समाराधयत् । उद्वस्यते समाप्यते अनेनेत्युद्वसानं कर्म तेन समाप्य एषः इतरान् सोमपानुपाधावत् ॥

उद्वस्य यज्ञं समाप्य ततः ऋत्विग्भिः अवभृथरूपं यथाभवति तथा सस्नौ स्नातवान् ॥ ५६ ॥

स्वेनैव भगवदुपदेशलब्धेन अनुभावेन अवाप्तराधसे लब्धबोधायापि तस्मै दक्षाय धर्मे मतिं दत्वा दिवं ययुः ॥ ५७ ॥

हिमवतः हिमाचलस्य क्षेत्रे भार्यायाम् ॥ ५८ ॥

अनन्यभावानामनन्यभक्तानामेको गतिर्यस्तम् प्रियं भवं भूयः पतिम् आवृङ्क्ते स्म वृतवतीत्यर्थः यथा प्रलयवेलायां सुप्ता शक्तिः पूरुषं सृष्ट्यर्थमुत्थितं परमेश्वरम् ॥ ५९ ॥

बृहस्पतेः शिष्यात् उद्धवात् मे मया श्रुतम् ॥ ६० ॥

हे कौरव ! विदुर ! इदमीशस्य चरितम् परं पवित्रम् अघौघानां सर्वेषां मार्जनम् यो भक्तिभावितः आकर्ण्य गुरुमुखाच्छ्रुत्वा नित्यदा कीर्तयेत्स अघं धुनोति आत्मनः श्रोतॄणां चेति शेषः ॥ ६१ ॥

इति श्रीभागवते महापुराणे चतुर्थस्कन्धे
सिद्धान्तप्रदीपे सप्तमाध्यायार्थ प्रकाशः ॥ ७ ॥

षड्भिर्मुखैस्स्तनं पीत्वा स बालः षण्मुखोऽभवत् ।
ततश्चक्रुः सैन्यपालं सर्वासुरभयङ्करम् । ६५ ॥ इति विजयध्वज पाठः ॥

भाषाटीका

हे द्विज दक्ष ! सो जो मैं परम कारण हूं सो अपनी त्रिगुण वाली माया को धारण करके संसार के पैदा करने में पालन करने में संहार करने में ब्रह्मा, विष्णु, रुद्र ये तीनों क्रिया के उचित संज्ञाओं को धारण करता हूं ॥ ५१ ॥

सब का अन्तर्यामी जो मैं अद्वितीय केवल परमात्मा परब्रह्म हूं तिस मेरेसे ब्रह्मा रुद्र तथा प्राणि मात्र को जो सर्वथा पृथक् देखता है सो जीव अज्ञानी है ॥ ५२ ॥

जैसे कोई पुरुष अपने अंग मस्तक हस्तादिकों में कहीं भी पराई बुद्धि नहीं करता है तैसेई मेरे व्यापक स्वरूप को जानने वाला पुरुष व्याप्य जीवोंको सर्वांशसे पृथक नहीं देखता है ॥५३॥

हे ब्रह्मन् ! विष्णुके साथ शरीर शरीरी भाव से तथा विशेष्य विशेषण भावसे एकताको प्राप्त भये तथा नारायणके द्वारा सर्वात्म भाव कूं प्राप्त हुये ब्रह्म रुद्रका तथा नारायणका जो भेद नहीं देखता है वही पुरुष शान्ति को प्राप्त होता है ॥ ५४ ॥

इस प्रकार भगवानकी आज्ञाको प्राप्त होकर प्रजापतियों का पति दक्ष, श्रीहरिकूं अपने यज्ञसे पूजन करके अङ्ग प्रधान दोनों रीति से देवताओं का पूजन करते भये अपने भागसे युक्त करके सावधानतासे रुद्रजी की भी स्तुति करते भये ॥ ५५ ॥

यज्ञ कर्मकी समाप्ति में और बाकी देवों कोभी पूजन करके ऋत्विजों के सहित दक्षप्रजापतिने अवभृथ यज्ञांतस्नानकिया ॥ ५६ ॥

भाषाटीका

भगवान् के आराधन रूप यज्ञके करने के प्रभावसे स्वयं ही धर्मकी सिद्धि प्राप्त हुई जिस दक्षको तिसको फिरभी धर्मकोही उपदेश करके देवता गण स्वर्गको गये ॥ ५७ ॥

इस प्रकारसे सती दाक्षायणीजीने पहिले शरीरको छोडकर हिमवानकी भार्या मेनाके यहां जन्म लियाथा ऐसा हमने सुनाहै ॥ ५८ ॥

फिरभी अम्बिका सतीजी, जैसे प्रलयकालमें सोई हुई शक्तियां सृष्टिके आरम्भ में जैसे ईश्वरको भजे तैसे अनन्यभक्ति वालों के एक गतिदायक वही प्रिय शिवजी पतिको वरण करतीहुई ॥५९॥

इस प्रकारसे दक्षके यज्ञके नाश करने वाले भगवान् शम्भुजी के चरित्रकूं साक्षात् बृहस्पति के शिष्य भागवत उद्धवजी से हम ने सुनाहै ॥ ६० ॥

हे कौरव विदुरजी ! यशके आयुके देनेवाले पाप समूहका नाश करने वाले ईश्वरके परम पवित्र चरित्र को जो पुरुष नित्य श्रवण करके भक्ति भावसे कीर्त्तन करै वह पुरुष सब पापोंको नाश करता है ॥ ६१ ॥

इति श्रीभागवत चतुर्थस्कन्ध का सप्तम अध्याय समाप्त ॥७॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ॥ ८ ॥

——(०)——

मैत्रेय उवाच

सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ।
नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः ॥ १ ॥
मृषाऽधर्मस्य भार्यासीद्दम्भं मायां च शत्रुहन् !
असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः ॥ २ ॥
तयोः समभवल्लोभो निकृतिश्च महामते !
ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः ॥ ३ ॥
दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम !
तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ॥ ४ ॥
संग्रहेण मया ख्यातः प्रतिसर्गस्तवानघ !
त्रिः श्रुत्वैतत्पुमान् पुण्यं विधुनोत्यात्मनो मलम् ॥ ५ ॥
अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह !
स्वायम्भुवस्यापि मनोर्हरेरंशांशजन्मनः ॥ ६ ॥
प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ ॥
वासुदेवस्य कलया रक्षायां जगतः स्थितौ ॥ ७ ॥
जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः ॥
सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

दक्षकन्यान्वये प्रासा दक्षयज्ञकथोदिता ।
मनुपुत्रान्वये प्रासा ध्रुवचर्याथ पञ्चभिः ॥ १ ॥
अष्टमे गुरुदारोक्तिरोषमत्सरतः पुरात् ।
निर्गतेन ध्रुवेणाह तपसा तोषणं हरेः ॥ २ ॥

एवं तावन्मनुकन्यान्वयोक्त्यर्थं मरीच्यादीनां ब्रह्मपुत्राणां वंशा वर्णितास्तत्रावशिष्टं किञ्चिदाह सनकाद्या इति । नावसन्ना-श्रिता ऊर्ध्वरेतसो नैष्ठिकाः अतस्तेषां वंशो नास्ति ॥ १ ॥

अधर्मोऽपि ब्रह्मणः पुत्रस्तस्य वंशमाह मृषेति चतुर्भिः । दम्भः पुत्रः मायाख्या कन्या च तयोः सोदरयोरपि दाम्पत्य-मधर्मांशतया एवं तत्पुत्र्यपि अप्रजोऽपुत्रः ॥ २ ॥

निकृतिः शठता यत् याभ्यां कलिश्च तस्य स्वसा दुरुक्तिश्चे-त्यर्थः ॥ ३ ॥

[illegible] तीव्रवेदना ॥ ४ ॥

[illegible]ऽनुसर्ग एव यतः प्रतिसर्गः प्रलयः अधर्मस्य

श्रीधरस्वामिकृत भावार्थदीपिका ।

प्रलयहेतुत्वात्प्रतिसर्गत्वम् एतदन्तमधर्मवंशम् पुण्यमिति वर्जन-द्वारा पुण्यहेतुत्वात् ॥ ५ ॥

मनोः पुत्रवंशम् हरेरंशो ब्रह्मा तस्यांशाद्देहार्धाज्जन्म यस्य ॥ ६ ॥

जगतो रक्षायां स्थितौ ॥ ७ ॥

सुनीतिः सुरुचिश्च जाये तयोर्मध्ये इतरा सुनीतिः ॥ ८ ॥

———

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

अथ दक्षयज्ञकथानन्तरं पञ्चभिरध्यायैर्ध्रुवचरित्रं वर्ण्यत इति शेषः रोषमत्सरतः क्रोधेर्ष्याभ्याम् ध्रुवेण कर्त्रा तपसा करणेन हरेः हरिकर्मकं तोषणं वर्ण्यते मैत्रेयेणेति शेषः तत्र ब्रह्मपुत्रवंश-वर्णने किञ्चित् सनकादीनां नैष्ठिकत्वं अधर्मस्य वंशवर्णनमव-शिष्टमाह अतो नैष्ठिकत्वात् ॥ १ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

उपर्य्यपि अग्रेऽपि निर्ऋतिः नैर्ऋतकोणाधिपती राक्षसविशेषः ॥ २ ॥

तयोर्दम्पत्योर्दम्भमाययोः एतत्कथनं वर्ज्जनार्थं न तु पुण्यमिति विचारय बुद्ध्या इति महामते ! इति सम्बोधितम् ताभ्यां लोभशठताभ्यां दम्पतिभ्यां यत् याभ्यां क्रोधहिंसाभ्यां दम्पतिभ्यां कलिश्च जाता तस्य कलेः तस्येत्यध्याहारादित्यर्थोक्तिः ॥ ३ ॥

भियं कन्यां मृत्युं पुत्रञ्च तयोश्च भीमृत्व्योर्दम्पत्योः तथेति चार्थे ॥ ४ ॥

सङ्ग्रहेण संक्षेपेण अनुसर्गः गौणसर्गः प्रत्याख्यानवत्प्रतिशब्दस्य स्वसमभिव्याहृतविरुद्धार्थ प्रतिपादकत्वादनुसर्गेऽर्थप्रसिद्धेश्च यद्वेति वर्ज्जनद्वारा अकरणद्वारा दम्भादिकं न कुर्यात् चेत्पुण्यं स्यादित्यर्थः ॥ ५ ॥

अथ मरीच्यादिवंशवर्णनानन्तरम् अतः ब्रह्मपुत्रत्वेन तद्वर्णनस्यापि प्रकृतत्वात अपरत्र मरीच्यादिकं समुञ्चिनोति ॥ ६ ॥

कलया अंशेन ॥ ७ ॥

इतरा सुनीतिः ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिका ।

एवं

'प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः ।
तस्यां ससर्ज दुहितॄः षोडशामललोचनाः ॥

इत्यादिना प्रसूतिवंशमुपक्रम्य तत्प्रसक्तानुप्रसक्तमभिहितम् एवं तावन्मनुकन्यान्वयो वर्णितः अथ मनुपुत्रान्वयं विवक्षुरनुसर्गकथनेऽवशिष्टं किञ्चिदाह । सनकाद्या इति । यतिरिति प्रत्येकं सनकादिविशेषणं तन्त्रेणोपात्तं प्रत्येकाभिप्रायेणैकवचनान्तनिर्देशः ऋभुणि विशेषणं वा प्रत्यासत्तेः एते ब्रह्मपुत्राः गृहान् गृहाश्रमान् नावसन् नाश्रिताः तत्र हेतुः ऊर्ध्वरेतसः नैष्ठिकाः अतस्तेषां वंशो नास्तीति ॥ १ ॥

अधर्मोऽपि ब्रह्मपुत्रः तस्य वंशमाह । मृषेति चतुर्भिः । अधर्मस्य भार्या मृषा दम्भः पर प्रतारणं माया तदुचिता चेष्टा एतदुभयात्मकं मिथुनम् असूत प्रसूतवती हे शत्रुहन् ! सोदरयोरपि मायादम्भयोर्दाम्पत्यमधर्मांशतया एतमुपर्य्यपि द्रष्टव्यं तत्र दम्भमायात्मकं मिथुनम् अप्रजोऽपुत्रो निर्ऋतिर्जगृहे गृहीतवान् दम्भे पुत्राभिमानं मायायां स्नुषाभिमानं च कृतवानित्यर्थः ॥ २ ॥

हेमहामते!तयोर्मायादम्भयोर्लोभः निकृतिःशठता च ताभ्यां निकृतिलोभाभ्यां क्रोधोऽमर्षो हिंसा च समभवदित्युनुषङ्गः यत् याभ्यां क्रोधहिंसाभ्यां कलिश्च तस्य स्वसा भगिनी दुरुक्तिश्च समभवत् ३॥

दुरुक्तौ कलिः भियं भीति मृत्युं च आधत्त उत्पादयामास हे सत्तम! ताभ्यां भीतिमृत्युभ्यां यातनाख्यो निरयः पुमान् एतदुभयात्मकं मिथुनं जज्ञे ॥ ४ ॥ *

अधर्मवंशमुपसंहरन् तस्य संसृतिहेतुत्वाद्बुभूषुभिरसेव्यतामाह । एतद्धीति । अधर्मस्य वृत्तस्तस्य वंश्याः वंशोभवाः शाखारूपा इतिभावः हि यस्मात् संसृति हेतवः अतः श्रेयस्कामः स्वर्गापवर्गकामः न सेवेत अधर्मवंश्यानिति शेषः विभक्तिविपरिणामेनानुषङ्गो वा आश्रमोत्तमः उत्तमःआश्रमो यस्य सः चतुर्थाश्रमनिष्ठ इत्यर्थः आहिता ग्न्यादित्वादाश्रमशब्दस्य पूर्वनिपातः।नितरां न सेवेत ॥ ४ ॥

अथाधर्मवंशस्य प्रतिसर्गान्तर्भावं वदंस्तमुपसंहरन् तच्छ्रवण फलमाह । संग्रहेणेति हे अनघ! तव तुभ्यं मयाप्रतिसर्गः संग्रहेण -ख्यातः प्रलयहेतुत्वादधर्मवंशस्य प्रतिसर्गत्वम् एतदधर्मवंशं पुण्यं वर्जनद्वारा पुण्य हेतुत्वात्पुण्यं श्रुत्वा पुमानात्मनः स्वस्य मलं पापं विधुनोति ॥ ५ ॥

एवं कन्यान्वयमभिधायाथ मनुपुत्रान्वयं वक्तमुपक्रमते । अथात इति । हे कुरूद्वह! अथ "मनोस्तु शतरूपायां तिस्रः कन्याः प्रजज्ञिरे,, इत्युपक्रान्तमनुकन्यान्वयकथनानन्तरम् अतउपक्रान्तस्य श्रुतत्वाच्छ्रोतः स्वायम्भुवस्य मनोर्वंशं पुत्रान्वयं कीर्तये कथयामीति सम्बन्धः अत्र मनुकन्यामनुपुत्रवंशकथनयोः पौर्वापर्ये हेतुहेतुमद्भावेऽपसमासव्यासत्वहेतुकस्वेच्छायत्तोपक्रान्तत्वो रुमिणमा - णान्यपेक्षनिबन्धनम् कारयन्त श्रवणादश्रोव्यत्व शङ्कामपनुदन् मनुं विशिनष्टि पुण्यकीर्तेः पुण्या श्रुश्रूवतां पुण्या पवित्रा कीर्तिर्यस्य तत्र हेतुः हरेरंशांशजन्मनः स्मरणमात्रेण आश्रितदुरितहारिणो भगवतः अंशो ब्रह्मा तस्य अंशाच्छरीराज्जन्म यस्य तस्य हर्यंशांशसंभूतत्वाद्धरिभक्तत्वाच्च हरिचरित्रवन्मनपुत्रान्वयकथनश्रवणादिकमपि दुरितविनाशनद्वारापुण्यसंपादकमित्यर्थः ॥ ६ ॥

प्रतिज्ञातमनुवंशंवर्णयति । प्रियव्रतोत्तानपादावित्यादिना आभगोल वर्णनात् प्रियव्रतश्चोत्तानपादश्च तौ इमे अन्वर्थनामनौ प्रियं भगवत्प्रीतिकरं व्रतं यस्य स प्रियव्रतः उत्तानौ उन्नतौ पादौ यस्येति उत्तानपादः शतरूपापतेर्मनोः सुतौ वासुदेवस्य कलयासर्वान्तरात्मभगवद्गुणविशेषाविर्भावेन जगतोरक्षायां स्थितौ ॥ ७ ॥

तयोर्मध्ये योऽग्रज उत्तानपादस्तस्य सुनीतिः सुरुचिश्चेति जायेभार्ये तयोः सुनीतिसुरुच्योर्मध्ये सुरुचिः पत्युरुत्तानपादस्य प्रेयसी नितरां प्रीतिविषया इतरा सुनीतिस्तु न प्रेयसी यत्सुतः यस्या अप्रेयस्याः सुनीतेः सुतः पुत्रो ध्रुवः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

संसारविरक्तस्य पुंसः श्रीनारायणश्रीपादपद्ममूलमेव शरणमिति निरूपयत्यस्मिन्नध्याये तत्र परमभागवतस्य ध्रुवस्य चरित्रमनुवर्णयितुं हेयत्वेनाधर्मवंशानुचरितमाह। सनकाद्या इति। गृहान्नावसन् गृहस्थाश्रमं नाभजन्नित्यर्थः ऊर्ध्वरेतस इत्यनेन संन्यासाश्रमं सूचयति ॥ १ ॥

अप्रजः सन्ततिरहितः ॥ २ ॥ ३ ॥ ४ ॥

अत्र मायादयः स्त्रियोऽन्येपुमांसः संसारहेतवोहि यस्मात्तस्मात् श्रेयस्काम एतान्न सेवेतेत्यन्वयः आश्रमोत्तमी संन्यासी ॥ ४ ॥

मयाख्यात अनुसर्ग इत्यत्र सन्ध्यभावः संग्रहोक्त्याल्पत्वं नज्ञातव्यम् महानयं ग्रन्थबहुलत्वाल्लोके दृश्यमानत्वाच्चेति प्रदर्शनार्थं इतिज्ञातव्यम् अस्यानुसर्गस्य श्रवणफलमाह त्रिः श्रुत्वेति आत्मनो मनसो मलं निधुनोति निरस्यति ॥ ५ ॥

---

* एतद्ध्यधर्मवृत्तस्य वंश्याः संसृति हेतवः ।
श्रेयस्कामो न सेवेत नितरामाश्रमोत्तमः ॥ ४ ॥

इति वीरराघवसम्मतः श्लोकः तैलंगश्रीधरीयेऽपि निर्णीकांकामूलपाठस्तथैव विजयध्वजीयेऽपि मूलंटीका च तथैव

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

उक्तव्यायाः कथायाः समाप्तत्वादतः परं किं वक्तव्यमिति तत्राह। अथात इति। अथशब्देन पूर्वस्मादध्यायाद्यस्यार्थस्य मङ्गलत्वं वाक्ययतोऽयमीदृशं हेयमत उपादेयं कथयामीत्यत इति अपिशब्देन वंशस्यानल्पत्वं श्रुतिस्मृतिभ्यां संभावितत्वमाह हरेरिति। हरेरंशांशेन विशेषांशेन सहितं जन्म यस्य स तथा तस्य

मरीचिप्रमुखा ह्यत्रिर्वा ब्रह्मादक्षौ मनुः पृथुः।
शक्राद्याश्चर्षयश्चैव मत्स्यव्यासादयो हरिः॥

इति ॥ ६ ॥

प्रियव्रतोत्तानपादौ मनुपुत्रत्वेन पूर्वमुक्तयोः पुनरत्रोक्तिर्वंशस्याविच्छेदज्ञापनाय मनुवर्णिता प्रियव्रतेति। वासुदेवस्य राजराजाख्यस्य कलया संनिहितो तदुक्तम्

प्रियव्रतोत्तानपादप्रमुखेषु हरिः स्वयम्।
आविष्टः सर्वभूतेषु ऋषभाद्याः स्वयं हरिः॥

इति ॥ ७ ॥

प्रियव्रतोत्तानपादौ मध्ये प्रियव्रतविक्रमस्य प्रथमं वक्तव्यत्वे सत्युत्तानपादपुत्रस्य ध्रुवस्यातिरमणीयत्वेन विरक्तिभक्तिजनकत्वेन श्रोतुः श्रद्धाजनकत्वेन भगवदुपास्तौ चित्तप्रवृत्तिजनकत्वेनापूर्वबुद्धिजनकत्वेन च प्रथमं तच्चरितं वक्तुमुपक्रमते। जाये इति। यस्याः सुनीतेः सुतः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

एव श्रीकर्दमकन्यारूपाणां सात्त्विकशक्तिदेवीनां विवरणमुक्त्वा तामसशक्तिदेवीनामाह। मृषेति। निर्ऋतिर्नैर्ऋतकोणाधिपतिः॥१-१६

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी।

विमातुर्वाग्विषप्लुष्टो मातुर्वागमृताप्लुतः।
ध्रुवोऽष्टमे मधुवने तपस्तेपे यथोक्तरम् ॥ ० ॥

तदेवं मनोः कन्यावंशोक्त्यैव मरीच्यादीनां ब्रह्मपुत्राणामपि वंशा वर्णिताः। इदानीं तस्य पुत्रवंशे वक्तव्येऽपि लाघवादवशिष्टानां ब्रह्मपुत्राणां वंशजिज्ञासायामाह। सनकाद्या इति ॥ १ ॥

अधर्मोऽपि ब्रह्मपुत्रस्तस्य वंशमाह। मृषेति। हे शत्रुहन्निति अधर्म एव शत्रुस्तं भवान्हन्ति एव हन्तीत्यर्थः। दम्भः परप्रतारणं माया तदुचिता क्रिया। तयोः सोदरयोरपि दाम्पत्यमधर्मांशतया निर्ऋतिर्नैर्ऋतकोणाधिपतिः ॥ २ ॥

निकृतिः शठता यत् याभ्यां कलिश्च तस्य स्वसा दुरुक्तिश्च ॥३॥

एवमत्र शास्त्रे भक्तेरभिधेयत्वेन तस्याश्चानुकूलप्रतिकूलवस्तुजिज्ञासायां वर्जनीयत्वेनाधर्मवंशो नरकान्त उक्तः ॥ ४ ॥

सङ्क्षेपेण संक्षेपेण प्रतिसर्गः प्रलयः प्रलयहेतुत्वात् प्रलयः हे अनघेति अधर्मवंशोऽयं त्वया नानुभूत इति भावः। पुण्यं वर्जनद्वारा पुण्यकरम् ॥ ५ ॥

हरेरंशांशानां कपिलदत्त यज्ञ पृथु ऋषभादीनां जन्म यतस्तस्य ॥६॥

वासुदेवस्य कलया कलारूपेण विष्णुना या जगतो रक्षा तस्यां क्रियायां स्थितौ ॥ ७ ॥

तयोर्जाययोर्मध्ये ॥ ८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

अष्टमे भगवतः षड्भिरुक्तं सतो प्रसंगतः।
ध्रुवाख्यानमुखेनाथ पञ्चभिस्तदिहोच्यते ॥ १ ॥

[illegible] ब्रह्मपुत्रस्य मनोः कन्यान्वयः मरीच्यादीनां ब्रह्मपुत्राणां [illegible] र्णितः इदानीमवशिष्टब्रह्मपुत्रान्वयकथनपूर्वकं मनुपु[illegible] एकोनचत्वारिंशदध्यायैः॥ सनकाद्या इति। एते [illegible]गान् गृहाश्रमान् नाश्रिताः यतः ऊर्ध्वरेतसः नैष्ठिकाः

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः।

अतस्तेषां पुत्रपौत्रादिरूपो वंशो नास्ति शिष्यप्रशिष्यादिरूपस्त्वस्तीति बोध्यम् तथाह श्रीमुखवचनम्।

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः।

इति ॥ १ ॥

ब्रह्मणः पृष्ठतः उत्पन्नस्य अधर्मस्य ब्रह्मपुत्रस्य वंशमाह मृषेति चतुर्भिः। अधर्मस्य भार्या मृषा आसीत् सा दम्भं परप्रतारणार्थं स्वोत्कर्षख्यापनम् मायां तदनुरूपां वञ्चनाञ्च असूत उत्पादयामास तच्च मिथुनम् अप्रजः अपुत्रः निर्ऋतिः जगृहे गृहीतवान् मायादम्भयोः सोदरयोः दम्पतिभावः अधर्मवंश्यत्वादधर्मत्वेऽपि ॥ २ ॥

तयोर्मायादम्भयोः अपत्यम् लोभोऽन्यायेनान्यार्थग्रहणसङ्कल्पः निकृतिः शाठ्यं च समभवत् ताभ्यां निकृतिलोभाभ्याम् क्रोधो हिंसा च समभवत् यद्वाभ्यां क्रोधहिंसाभ्यां कलिः दुरुक्तिः स्वसा च समभवत् ॥ ३ ॥

कलिर्दुरुक्तौ भार्यायां भियं कन्यां मृत्युं सुतं चाभ्यजनयत् तयोर्भीमृत्व्योर्निरयः सुतः यातना तीव्रवेदना कन्या एतन्मिथुनं जज्ञे ॥ ४ ॥

हेऽनघ! प्रतिसर्गः प्रलयः सङ्क्षेपेण संक्षेपेण मया तवाख्यातो वर्णितः सपरिकरोऽधर्मः प्रलयहेतुरतस्तद्वर्णनेन प्रलय एव वर्णित इति भावः एतदेवं प्रतिसर्गम् पुमान् त्रिः श्रुत्वा आत्मनोमलं पापं दुर्गतिहेतुं विधुनोति पुण्यं सुगतिहेतुं प्राप्नोतीति शेषः यथा तस्करादिसङ्कुलं दुर्मार्गं श्रुत्वा तच्छ्रवणमात्रेणैव तत्त्यागी दुःखं विधुनोति सुखं प्राप्नोतीति भावः ॥ ५ ॥

हरेरंशो ब्रह्मा तदंशाद्देहाद्यज्जन्म यस्य तस्य वंशं पुत्रपौत्रादि सन्तानम ॥ ६ ॥

वासुदेवस्य कलया जगतः पालिन्या शक्त्या जगतो रक्षायां स्थितौ शतरूपापतेर्मनोः सुतौ बभूवतुः ॥ ७ ॥

तत्रोत्तानपादस्य जाये भार्ये तयोर्जाययोर्मध्ये सुरुचिः पत्युः प्रेयसी इतरा सुनीतिः यस्या ध्रुवः सुतः सा न ॥ ८ ॥

भाषाटीका

मैत्रेय जी बोले सनकादिक चार मुनि नारद जी ऋभु हंस अरुणि यति इतने ब्रह्मा के पुत्र गृहस्थ नहीं होकर ऊर्ध्वरेता होगये इसी से उनका वंश नहीं है ॥ १ ॥

हे शत्रुहन् विदुर जी! ब्रह्मपुत्र अधर्म भी है उसकी मृषा नामक भार्या ने दम्भ माया इन दोनों को पैदा किया उन दोनों को निर्ऋति राक्षस ने ग्रहण किया क्योंकि वह अपुत्र था ॥ २ ॥

हे महामते! उन दम्भ माया दोनों में से लोभ और निकृति भये उनमें से क्रोध और हिंसा भये उनमें से कलि तथा उसकी बहन दुरुक्ति भई ॥ ३ ॥

हे सत्तम! कलि ने दुरुक्ति में मृत्यु भीति दोनों को पैदा किया उन दोनों में यातना निरयए दो पैदा भये ॥ ४ ॥

हे अनघ विदुर जी! यह प्रतिसर्ग मैंने संक्षेप से आप से कहा है इसको तीन वख़त श्रवण करने से त्याग करने से मनुष्य अपने आत्मा के पाप को दूर कर सकता है ॥ ५ ॥

हे कुरूद्वह विदुर जी! इस के अनन्तर पवित्र कीर्ति वाले स्वायम्भुव मनु के वंश का कीर्त्तन करताहूं जिनकी कि हरि के अंश ब्रह्मा उनका अंश शरीर से उत्पत्ति है॥ ६ ॥

एकदा सुरुचेः पुत्रमङ्कमारोप्य लालयन् ।
उत्तमं नारुरुक्षन्तं ध्रुवं राजाऽभ्यनन्दत ॥ ९ ॥
तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवम् ।
सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता ॥ १० ॥
न वत्स ! नृपतेर्धिष्ण्यं भवानारोढुमर्हति ।
न गृहीतोमया यत्त्वं कुक्षावपि नृपात्मजः ॥ ११ ॥
बालोऽसि बत नात्मानमन्यस्त्रीगर्भसम्भृतम् ।
नूनं वेद भवान यस्य दुर्लभेऽर्थे मनोरथः ॥ १२ ॥
तपसाराध्य पुरुषं तस्यैवानुग्रहेण मे ।
गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनम् ॥ १३ ॥

मैत्रेय उवाच ॥

मातुः सपत्न्याः सुदुरुक्तिविद्धः श्वसन् रुषा दण्डहतो यथाऽहिः ।
हित्वा मिषन्तं पितरं सन्नवाचं जगाम मातुः प्ररुदन सकाशम् ॥ १४ ॥
तं निश्वसन्तं स्फुरिताधरोष्ठं सुनीतिरुत्सङ्ग उदूह्य बालम् ।
निशम्य तत्पौरमुखान्नितान्तं सा विव्यथे यद्गदितं सपत्न्या ॥ १५ ॥

भाषाटीका

शत रूपा के पति जो स्वायम्भुव मनु उनके प्रिय व्रत, उत्तान पाद दो पुत्र थे वे दोनों भगवान की कला से जगत की रक्षा करने के लिये हुये थे ॥ ७ ॥

उत्तानपाद की सुनीति सुरुचि दो भार्या थी उन दोनों के मध्य में सुरुची तो पति को बड़ी प्यारी थी जिसके पुत्र ध्रुव जी हैं वह दूसरी पति की प्यारी नहीं थी ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

तयोः प्रियाप्रियत्वं प्रपञ्चयन्ध्रुवचरित्रमाह पञ्चभिरध्यायैः सुरुचेः पुत्रमुत्तमसंज्ञं लालयन् ॥ ९ ॥

तथा अङ्कारोहणं चिकीर्षमाणम् ॥ १० ॥

गर्वोक्तिमेवाह त्रिभिः नेति नृपतेर्धिष्ण्यमासनं नृपात्मजोऽपि भवान्नारोढुमर्हति ॥ ११---१२ ॥

पुरुषमीश्वरम् ॥ १३ ॥

मिषन्तं पश्यन्तम् सन्नवाचं कुण्ठितवाचम् ॥ १४ ॥

उदूह्याऽऽरोप्य अन्तःपुरजनमुखाच्छ्रुत्वा ॥ १५ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

शृण्वत इत्यनादरे षष्ठी ॥ १० ॥

नृपात्मजोऽसीति नृपेऽप्यनादरो व्यञ्जितः ॥ ११-१२-१३-१४ ॥

तत् गर्ववाक्यम् ॥ १५-१६ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

तत्र सुनीत्या अप्रियत्वमेव प्रपञ्चयन् तत्सुतध्रुवचरित्रमाह । एकदेत्यादिना पञ्चभिरध्यायैः । एकदा कदाचित् राजा उत्तानपादः सुरुचेः पुत्रमुत्तमसंज्ञमारुरुक्षन्तम् अङ्कमारोढुमिच्छन्तम् अङ्कमारोप्य उत्सङ्गे निधाय लालयन् तथा चिकीर्षमाणम् अङ्कारोहणादिकर्तुमिच्छन्तं सपत्न्याः सुनीतेस्तनयं तं ध्रुवं नाभ्यनन्दत यद्वा उत्तममङ्कमारोप्य लालयन् अङ्कमारुरुक्षन्तं ध्रुवं नाभ्यनन्दतेति संबन्धः सुरुचिः राज्ञोऽभिप्रायज्ञा तथा चिकीर्षमाणं तं ध्रुवं प्रति राज्ञः शृण्वतः सत अतिगर्विता सती अतएव सेर्ष्यम् क्षमारहितं यथा भवति तथा आह उवाच ॥ ९ ॥ १० ॥

गर्वोक्तिमेवाह । नवत्सेति त्रिभिः । हे वत्स ! नृपतेर्धिष्ण्यमासनमारोढुं भवान्नार्हति नृपात्मजोऽहमारोढुमर्हत्येव तत्राह त्वं नृपात्मजोऽपि यद्यस्मात् मया कुक्षौ न गृहीतः न धृतः मदात्मज एव नृपासनार्ह इत्यभिप्रायः ॥ ११ ॥

त्वं मया कुक्षौ न गृहीत इत्यहमेव न वेद्मि अपितु भवानपि वेदेत्याह । बालोऽसीति भवान् बालोऽप्यात्मानमन्यस्त्रीगर्भसंभृतं मत्सपत्नीगर्भभृतं न वेद बत न वेद किम् अपितु वेदैवेत्यर्थः नूनमिति निश्चये यद्वा बालो भवान्न जानाति अहं तु वेद्मीत्याह बाल इति । अपि त्वर्थकः भवानित्यनेन संबध्यते बाल इति हेतुगर्भं भवांस्तु बालत्वादात्मानमन्यस्त्रीगर्भसंभृतं न वेद अहं तु वेद्मीत्यभिप्रायः अतो यस्य तव दुर्लभे लब्धुमयोग्ये अर्थे नृपासनारोहणरूपेऽर्थे मनोरथ आसीदित्यर्थः वतेत्याश्चर्ये । १२ ॥

सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला ॥
वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह ॥ १६ ॥
दीर्घं श्वसन्ती वृजिनस्य पारमपश्यती बालकमाह बाला ।
माऽमङ्गलं तात ! परेषु मंस्था भुङ्क्ते जनो यत्परदुःखदस्तत् ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

यदि दुर्लभोऽर्थो मयासाध्य इति तवाग्रहः तर्ह्येवं साधयेत्याह । तपसेति । यदि त्वं नृपासनमिच्छसि तर्हि तपसा पुरुषं परमपुरुषमाराध्य तस्याराधितस्य परमपुरुषस्यानुग्रहेणैव नतूपायान्तरेणेत्यर्थः। मे मम गर्भे आत्मानं साधय आत्मनो मद्गर्भे उत्पत्तिं साधयेत्यर्थः ॥ १३ ॥

एवमुक्तो ध्रुवः किमकरोदित्यत्राह । मैत्रेयः मातुरिति । सपत्न्या मातुः सुरुच्या दुर्वचसा वाक्येन विद्धः ताडितो ध्रुवः दण्डेन हतः सर्पो यथा तथा रुषा श्वसन् श्वासं मुञ्चन् मिषन्तं पश्यन्तं शान्तवाचं संकुचितवाचं पितरं हित्वा प्ररुदन् नितरां सन्धीणां विमुञ्चन् मातुर्जनन्याः सुनीतेः समीपे जगाम ॥ १४ ॥

तं सकाशमागतं निश्वसन्तं स्फुरितः कम्पितः अधरोष्ठो येन तं बालं ध्रुवं सपत्न्या गदितं सा सुनीतिरुत्सङ्गउद्धृत्य अङ्के आरोप्य पौरान्तःपुरजनमुखात् निशम्य श्रुत्वा नितान्तं नितरां विव्यथे व्यथितवती ॥ १५ ॥

———

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

सुनीतिः कथं पत्युः प्रेष्ठानाभूदिति ज्ञायत इति तं प्रकारं वक्ति । एकदेति । नाम्नोत्तमम् आरुरुक्षन्तमङ्कमारोढुकामम् ॥ ९ ॥

तथा चिकीर्षमाणमङ्कमारोढुमिच्छन्तं सपत्न्याः सुनीतेः सेर्ष्यमिति क्रियाविशेषणम् ॥ १० ॥

धिष्ण्यं सिंहासनम् अनर्हत्वे निमित्तमाह । नगृहीतइति ॥ ११ ॥

नेदमाश्चर्यमित्याह । बाल इति । ततः किमिति तत्राह नात्मानमिति । स्वाराज्यमिच्छन्त्यतिष्पर्तीति भावेनाह । यस्येति यस्य तव ॥ १२ ॥

तर्हि त्वत्पुत्रसाधित्वे किङ्कर्तव्यमत्राह । तपसेति । पुरुषं विष्णुम् ॥ १३ ॥

ध्रुवः सपत्न्याः सुरुच्याः वाक्यं श्रुत्वा किमकार्षीदिति तत्राह । मातुरिति । मिषन्तं पश्यन्तं सन्नवाचं तूष्णीभूतं आमिषं हित्वा मातुरिव स्थितस्य निलस्य सकाशमहिरिवेति वा ॥ १४ ॥

अस्यामवस्थायां सुनीत्याकिमकारीति तत्राह तं निःश्वसन्तमिति ॥ १५ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

सुरुचेः पत्रमुत्तमसंज्ञम् ॥ ९—१० ॥

धिष्ण्यमासनं यद्यस्मात् नृपात्मजोऽपि त्वं मया कुक्षौ न गृहीतः । नो बाले ऽस्यत एव नात्मानमित्यादि ॥ ११ ॥ १२ ॥

पुरुषमाराधयेति भक्तश्रमन्येयं राज्ञः सन्निधौ नत् चक्तृतो हरिभक्तेयम् । त्वमात्मानं मम गर्भे साधयेति संप्रत्येव त्रिचतुरैः पञ्चपैः ...मैद्गर्भैप्रापितमात्मनेहरिं संतोष्य त्वं शीघ्रं म्रियस्व । त्वन्मा...रुदती पश्येयमित्येवं तव च मम च सुखं भवत्विति भावः

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

मिषन्तं पश्यन्तं सन्नवाचं स्त्रैणत्वात् कुण्ठितवाचम् । १४ ॥

उद्धृत्य आरोप्य ॥ १५ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

उत्तममङ्कमारोप्य लालयन् ध्रुवन्तु अङ्कं स्वतएव आरुरुक्षन्तमपि नाभ्यनन्दत ॥ ९ ॥

तथा स्वतएव अङ्कारोहणं चिकीर्षमाणं नतूत्तमवदङ्कारूढम् तथापि सेर्ष्यमाह तदपि राज्ञः शृण्वतः यतोऽतिगर्विता ॥ १० ॥

धिष्ण्यमासनम् ॥ ११——१२ ॥

पुरुषं वासुदेवम् आत्मानं साधय उत्पादय ॥ १३ ॥

मिषन्तं तद्वनादरयन्तं सन्नवाचं भार्याप्रतिषेधार्थं ध्रुवशान्त्वनार्थं चाऽब्रुवाणम् । १४ ॥

उत्सङ्गे अङ्के उद्धृत्य आरोप्य यत्सपत्न्यागदितं तन्नितान्तं पौरमुखादन्तः पुरजनमुखात् ॥ १५ ॥

भाषाटीका ।

एक दिन सुरुचिके पुत्र उत्तम को गोद में प्यार करता राजा गोदमें चढनेकी इच्छा करने वाले ध्रुव पर नाराज हुआ ।९।

गोद पर चढने की इच्छा करने वाले ध्रुव सौत के पुत्र को देखकर राजाके सुनतेही गर्व से ईर्षा से सुरुची बोली ॥ १० ॥

हे पुत्र ! यद्यपि तु राजा का पुत्र है तथापि मैंने तेरे को गर्भ में नहीं धारण किया है तिससे तु राजा के आसन में बैठने को योग्य नहीं है ॥ ११ ॥

मैं इस बात को ठीक जानती हूं कि तु बालक है इसी से दूसरी स्त्री के गर्भ से पैदा हुये अपने को नहीं जानता है इसी से दुर्लभ काम में तेरा मनोरथ है ॥ १२ ॥

यदि तु राजा के आसन को चाहता है तो तपस्या करके विष्णु का आराधन कर फिर उनहीं की कृपा से मेरे गर्भ में जन्म ले ॥ १३ ॥

मैत्रयजी बोले सौतिन माता के खोटे वचन से विधे हुये ध्रुव जी जैसे लडकों के मारने से सर्प श्वास लेता है तैसे श्वास लेने लगे चुप रह कर सुनते हुये पिता को छोडकर रोते हुये माता के पास चले गये ॥ १४ ॥

ओठों को कंपा कर श्वास लेते हुये बालक को सुनीति ने गोद में उठा लिया रनवासियों से सब हाल को सुना तब सौतिन की कही बातों से बडी दुखित हुई माता ॥ १५ ।

श्रीधरस्वामिकृत भावार्थदीपिका ॥

शोकएव दावाग्निस्तेन दावाग्निगतलतेव स्थिता सा बाला विलापं चकार ॥ १६ ॥

वृजिनस्य दुःखस्य अमङ्गलमपराधं परेषु मामंस्थाः यद्यतः परेभ्योदुःखं ददाति यः स स्वदत्तमेव दुःखं भुङ्क्ते ॥ १७॥

सत्यं सुरुच्याऽभिहितं भवान् मे यद्दुर्भगाया उदरे गृहीतः ।
स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्माम् ॥ १८ ॥
आतिष्ठ तत्तात ! विमत्सरस्त्वमुक्तं समात्राऽपि यदव्यलीकम् ।
आराधयाधोऽक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो यथा ॥ १९ ॥
यस्याङ्घ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः ।
अजोऽध्यतिष्ठत्खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवन्द्यम् । २० ॥
तथा मनुर्वो भगवान् पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः ।
इष्ट्वाऽभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यम् । २१ ।
तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिम् ।
अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम् । २२ ।
नान्यं ततः पद्मपलाशलोचनाद्दुःखच्छिदं ते मृगयामि कंचन ।
योमृग्यते हस्तगृहीतपद्मया श्रियेतरैरङ्ग ! विमृग्यमाणया ॥ २३ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

दुर्भगया मया उदरे गृहीतस्तस्या एव स्तन्येन वृद्धश्च दुर्भगत्वमेवाह यां मामिडस्पतिर्भूपतिर्भार्येति वोढुं स्वीकर्तुं विलज्जते वा शब्दाद्दासीत्यपि ॥ १८ ॥

पितृभार्यात्वेन मात्रा समा मातुः सपत्नी तयापि यदुक्तं तपसाराध्य पुरुषमित्यादि तदातिष्ठ कुरु अध्यासनं यदीच्छसि ॥ १९

परिचर्य निषेव्य विश्वस्य विभावनाय पालनायात्ता स्वीकृता गुणाभिपत्तिः सत्त्वगुणाधिष्ठानं येन तस्य जित आत्मा मनः श्वसनः प्राणश्च यैस्तैरभिवन्द्यम् ॥ २० ॥

एकमत्या सर्वान्तर्यामिबुद्ध्या ॥ २१ ॥

मृग्या पदाब्जयोः पद्धतिर्मार्गो यस्य तमेवाश्रय शरणं व्रज ततो भजस्व नान्यस्मिन् भावो यस्य तस्मिन् निजधर्मैर्भाविते शोधिते ॥ २२ ॥

तमेवेत्यनेन सूचितं सर्वोत्तमत्वं प्रपञ्चयति। नान्यमिति। हस्तेन गृहीतं दीपवत्पद्मं यया इतरैर्ब्रह्मादिभिः ॥ २३ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

दीर्घं यथा स्यात्तथा ॥ १७ ॥

दुर्भगाया दुर्भगया मया यद्यस्मादुदरे गृहीतः तस्मात्सुरुच्या सत्यमभिहितम् ॥ १८ ॥

समात्रा मात्रा समा तयाप्युक्तं यद्वचस्तत्त्वं कुरु तत्र हेतुः यतोऽव्यलीकं व्यलीकमप्रियं वञ्चकञ्च तद्विरुद्धं प्रियं निष्कपटं च भगवद्भजनस्य सर्वप्रियत्वात् परमहितत्वाच्चातो विमत्सरस्सन्निति द्वेषं परित्यज्येत्यर्थः तेन तव सुखं भवतु मम तु ललाटे विधात्रा रोदनमेव लिखितमिति भावः ॥ १९ ॥

ननु तदाराधने किं तस्या एवोदरे मम प्रवेशो भविष्यतीति चेत्तत्राह। यस्येति। तथा किमेतेन तुच्छेन पैत्रराज्येन तदाराधने ब्रह्मपदमपि न दुर्लभमिति भावः ॥ २० ॥

न केवलं ब्रह्मपदमेव तत्फलं किन्तु "विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिणः,, इत्युक्तो मोक्षोऽपि सुलभ एवेत्याह। तथा मनुरिति अपवर्गोऽत्र पञ्चमस्कन्धगद्योक्तानन्यनिमित्तभक्तिस्तदुत्थं प्रेमसुखमापवर्ग्यम् ॥ २१ ॥

भृत्यवत्सलं मद्विधकोटिमात्रतोऽपि भृत्येषु वात्सल्यवन्तं भावो रतिः अनुपनीतस्य कर्मानधिकारात् निजधर्मैर्भागवतधर्मैः ॥२२॥

विलासाद्गृहीतं पद्मं दीपत्वेनोत्प्रेक्षितं विमृग्यमाणयेति सिद्धपदसान्निध्यात् ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

व्यथामेवाह। सेति। सा सुनीतिर्धैर्यमुत्सृज्य हित्वा विललाप शोक एव दावाग्निस्तेन दावाग्निना दग्धा लतेव स्थिता सा बाला सुनीतिः सपत्न्याः वाक्यं स्मरन्ती सरोजश्रिया सरोजस्येव श्रीः शोभा यस्यास्तया दृशा बाष्पकलाम् अश्रुकणिकामुवाह दधार ॥ १६ ॥

सपत्नीगदितव्यथया दीर्घं यथा तथा श्वासं मुञ्चन्ती वृजिनस्य दुःखस्य पारमवधिमपश्यन्ती अपारदुःखाक्रान्तेत्यर्थः बाला सुनीति र्बालकं ध्रुवमाह हेतात ! अमङ्गलमपराधं परेषु मा भवान् माकार्षी यत् यस्मात् योजनः परदुःखदः परेभ्यो दुःखं ददातीति परदुःखदः सः तद्दुःखमेव भुङ्क्ते अनुभवति ॥ १७ ॥

सुरुच्याभिहितं सोपालम्भमनुवदन्त्यात्मजं तपसे चोदयति। सत्यमिति। सुरुच्या यदभिहितं तत्सत्यमिति संबन्धः किमभिहितं तत्राह दुर्भगायाः भाग्यहीनायाः मे मया उदरे भवान् गृहीतः मदुदरे जात इत्यर्थः न केवलं जात एव मद्गर्भमपितु तस्या एव मम स्तन्येन स्तनयोर्भवं स्तन्यं तेन वृद्धश्च दुर्भगत्वमेवाह इडा भूमिः इलयोरभेदात्पारस्करादित्वात् सुडिडस्पतिः इडस्पतिर्भूपतिर्मां भार्येत्यावां स्वीकर्तुं वाचा वक्तुं वा विलज्जते ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

हेतात! तस्मात्वं विमत्सरः विगतमत्सरः समात्रा समाता मातुः सपत्न्या तयापि यदुक्तं तपसाराध्यपुरुषमित्यादि तदव्यलीकं निर्दोषं यथाभवति तथा आतिष्ठ कुरु समात्रा यदुक्तमिति सामान्येनोक्तं विशेषनिष्ठं करोति उत्तमोयथातथा त्वमप्यध्यासनं नृपासनमिच्छसि तर्हि अधोक्षजपादपद्ममाराधय ॥ १६ ॥

किंकश्चिदधोक्षजपादपद्ममाराध्यनृपासनादिरूपाभिलषितमवापेत्य त्र प्रमाणं मनुच निदर्शयति । यस्येति द्वाभ्याम् । विश्वविभावनाय विश्वस्य पालनाय आत्तगुणाभिपत्तेः गुणानां कल्याणगुणानामभिपत्तिर्येनस्वयमात्ताखीकृता गुणाभिपत्तिः कल्याणगुणाश्रयदिव्यमङ्गलमूर्तिर्येन तस्य यस्याधोक्षजस्य जितः आत्मा मनः श्वसनःप्राणावायुर्यैस्तैरभिवन्द्यम् अङ्घ्रिपद्मं परिचर्य आराध्य अजो ब्रह्मा पारमेष्ठ्यं पदं चतुर्दशभुवनानां मध्ये उत्कृष्टं सर्वोपरि वर्तमानं सत्यलोकरूपं स्थानमध्यतिष्ठदधिष्ठितवान् खलु ॥ २० ॥

तथाच युष्माकं पितामहः पितुः पिता भगवान् मनुरपि एकमत्या अव्यभिचरितभक्त्या पुरुदक्षिणैर्बहुदक्षिणैर्मखैः क्रतुभिः यं भगवन्तमिष्ट्वाराध्य अन्यतः अन्यैर्दुरापं दिव्यं दिवि भवंदिव्यं सुखं स्वर्गं भौमं सुखम् सार्वभौमत्वम् आपवर्ग्यं मोक्षसुखं चाभिपदे अनेनाधोक्षजस्य कर्तृदैवतत्वमुक्तम् अन्यतः एकमतिव्यतिरिक्तोपायान्तरेण दुरवापमिति वा संबन्धः अन्यतःअन्यस्माद्ब्रह्मरुद्रादेः दुरवापं सुखत्रयमितिवा संबन्धः ॥ २१ ॥

भजस्वमपि मां राजत्वेनाद्यसद्गुणदुपेक्षेत तत्राह तमिति । हेवत्स! भक्तवत्सलं भक्तेषु वत्सलस्तत्सत्स्वपिदोषेषु तानतादृत्य भोग्यताबुद्धिमत्वं वात्सल्यं तमेवाश्रय अनेनाश्रयणसौकर्यापादकगुणसंपत्तिरुक्ता आश्रितकार्यापादकगुणसंपत्तिमाह मुमुक्षुभिः संसारबन्धनान्मोक्षमिच्छद्भिर्मृग्या अन्वेषणीया चिन्तनीयेति यावत् पदाब्जयोः पद्मनिर्मार्गो यस्य तं मुक्तिप्रदमिति भावः अनेन नित्यसंसारिणां नित्यसूरिपरिषत्संघटनेपर्यागितखरूपाघटितघटनासामर्थ्यरूपाभिमतकार्योपादकसंपत्तिरुक्ता कथमाश्रयामीत्यत्र स्ववर्णाश्रमधर्मानुगृहीतभक्तियोगेनाश्रयेत्याह अनन्यभावे नास्त्यन्योऽन्यस्मिन्भावोयस्मिन् विजातीयप्रत्ययान्तराव्यवहित इत्यर्थः निजधर्मभाविते निजधर्मैः स्ववर्णाश्रमोचितधर्मैः भाविते निष्पादिते मनसि तैलधारावदविच्छिन्नस्मृतिसंतानरूपमनोव्यापारविजातीयप्रत्ययान्तराव्यवहिततैलधारावदविच्छिन्नस्मृतिसंतानरूपाहिभक्तिः अवस्थाप्य विपर्य कृत्य पुरुषं पुःसंज्ञकशरीरान्तःस्थितदहरकुहरे वसन्तं परमपुरुषं भजस्व ॥ २२ ॥

तमेवेत्यनेन सूचितं सर्वोत्तमत्वं सुखत्रयप्रदत्वं च कथयति । न न्यमिति । ततस्तस्मात् पद्मपलाशलोचनात्पुण्डरीकाक्षादन्यं पुरुषं नेव दुःखच्छिदं दुःखनिवारकं न मृगयामि अन्विष्यापि न पश्यामीतिभावः अनेन तापत्रयनिरसनद्वारा सुखत्रयप्रदो भगवानेवेत्युक्तं भवति सर्वोत्तमत्वमाह । योभगवानितरैर्ब्रह्मादिभिः स्वाभिमतप्राप्तयेविमृग्यमाणया मनःप्रणिधानेन चिन्त्यमानया हस्ते न गृहीतं पद्मं यया तया श्रिया महालक्ष्म्या अंग हेध्रुव! मृग्यते अनेन लक्ष्मीपतित्वमुक्तं तेनच सर्वेश्वरत्वं जगत्कारणत्वंच सामर्थ्याद्युक्तं भवति ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

...नार्थत्वात् कीदृशी त्वया तयाकारीति तत्राह । संस्मृ... विश्लेषस्योदरताडनादिना मतत्वेन तत्पूर्वकं तया परिदेवित-

मित्यर्थः शोकदावाग्निना शोकाख्यवनवह्निना दह्यमानेनेति शेषः दावलता वनवल्ली बाष्पकलां नेत्रजलधाराम् ॥ १६ ॥

वृत्त्या स्वस्यभक्ष्यणाद्यद्दाक्षा कृताज्ञानस्यापरिहार्यत्वाद्दुःखप्राप्तदुःखस्यावसानमचक्षाणा आत्मनो निरुद्यमनस्कत्वं दर्शयन्ती बालं शिक्षयतीत्याह । दीर्घं श्वसन्तीति । परतः स्वदाजनस्तदुःखं स्वयं भुङ्क्ते इति यद्यस्मात्तस्मात्परेष्वमङ्गलं मामंस्थाः न निरूपयेत्यन्वयः ॥ १७ ॥

परेषां द्वेषादुक्तमपि गुणग्राहिणाः स्वात्मनः पथ्यमेव भवतीति भावेनाह । सत्यमिति । चार्थो वा शब्दः इडस्पतिः राजा यां मां भार्येति च वोढुं वक्तुं विलज्जते भवांस्तस्याद्दुर्भगायाः दुःखहेतवदृष्टाया मे उदरे गृहीतोऽतएव स्तन्येनैव वृद्धो ननु पितृवत्सरसायनेनेति, यस्मात्तस्मात्सुरुच्या तपसाराध्येति यदभिहितं तत्सत्यमित्यन्वयः ॥ १८ ॥

एतदेव विवृणोति आतिष्ठेति मत्पुत्र उत्तमोयथा तथा यद्यध्यासनमिच्छसे आत्मनोऽहि तमाकांक्षसि तर्ह्यधोक्षजपादपद्ममाराधयेति यत्समात्रा सुरुच्या कथितं तदव्यलीकं कर्तुमातिष्ठ । तपइति शेषः ॥ १९ ॥

केनचित् श्रीनारायणश्रीचरणपरिचर्याफलं निरुपममवाप्तं चेत्तर्हि श्रोतुस्तत्र क्षिप्रं प्रवृत्तिर्भवतीति तत्राह । यत्पादेति । परिचर्य परिपूज्य विश्वविभावनाय विश्वस्य विविधसृष्ट्यर्थमात्तगुणाभिपत्तेः अङ्गीकृतसार्वज्ञ्यादिगुणप्राप्तिहेतोरजोब्रह्माजितात्मा वशीकृतमनाः श्वसनस्य वायोरपि विभागराहित्येन गन्तुं योग्यं वन्द्यम् ॥ २० ॥

चतुर्मुखस्य भगवत्पुत्रत्वेन तत्प्रसादयोग्यतया तस्य तादृशैश्वर्यावाप्तिर्युक्ताऽस्मत्पूर्वजेन केनाप्तं येन अस्माकमपि तत्र झटिति प्रवृत्तिः स्यात् अतस्तदनुभावयेति तत्राह । तथेति । अन्यतोभक्त्या दिव्यतिरिक्तसाधनेनाऽन्याऽन्यदेवताभ्यो वा भौमं मन्वन्तराधिपत्यं दिव्यं स्वर्गसम्बन्धि आपवर्ग्यं कैवल्यसम्बन्धि अथेत्यनेन देहत्यागानन्तरमेवापवर्गसुखावाप्तिर्नजन्मान्तरं प्राप्येत्याह ॥ २१ ॥

किं बहुनोक्तेन सारं वक्ष्यामीत्याह । तमेवेति । यत्किंचिद्विषयद्रष्टया विमुखोनस्यादित्यत उक्तं भृत्येति । न केवलं विषयलोलैरेवाराध्यं किंतु संसारमोक्षेच्छुभिरपीति भावेनोक्तं मुमुक्षुभिरिति अत्र प्रधानसाधनमिदमिति ध्वनयति अनन्यभाव इति अनन्योभावोविषयो यस्य स तथा तस्मिन् तस्य भक्तिसाधनत्वं ध्वनयति निजधर्मेति यमनियमादयो निजधर्मास्तैर्भाविते कृततत्स्वात्मभावे ॥ २२ ॥

कुतोऽयमेवापेक्षिताशेषपुरुषार्थावाप्ताविति नियमोऽन्यः किं अस्यादिति तत्राह । नान्यं ततइति । वोयुष्माकं कुलदेवता लक्ष्मीकान्तस्ततस्तस्मात्पद्मपलाशलोचनादनेनाकाशवर्णरूपस्योपासनं न संगच्छत इति चोद्यं परिहृतं त्वया नान्विष्योक्तं विचारिते कश्चित्स्यादित्यत उक्तं मृगयामीति लक्ष्मीतत्त्वं स्यादिति तत्राह । यइति । श्रीत्वं भारत्यादावप्यस्तीत्यत उक्तं इतरैरिति इतरैर्ब्रह्मादिभिः सेव्यापि संपलक्षणाश्रीः किं न स्यादित्यत उक्तं हस्तेति । अनेन श्रीः प्रिया मूर्तिमती साक्षाल्लक्ष्मीरिति ज्ञायते मृग्यत इत्यनेन हरेर्गुणतः स्वरूपतश्चोत्तमत्वं ध्वनयति विमृग्यमाणयेत्यनेन श्रीकटाक्षमोक्षस्य दुःसाधनत्वमाह ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ॥

यत्चोढुमिति चिन्तसुख पुण्यारण्यो । बाला ऊढुं वक्तुमित्यर्थः ॥ १८ ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

यस्याङ्घ्रीति । परिचर्यं निषेव्य आत्मा सान्निध्यमात्रेणाप-कृता गुणाभिर्पात्तिर्गुणसाम्यं प्रकृतिर्येन तस्य वन्द्यामित्यत्र पद्यमिति सम्बन्धमस्मतपाठान्तरम ॥ २०—२२ ॥

श्रिया जगदधिष्ठात्र्या हस्तगृहीतपद्मयेति तल्लोचनसाम्येनाधिकतद्रुचः । सर्वसम्पत्तिनिधानेन तेन पद्मेन सेवाभिलाषाद्धा ॥ २३ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ॥

दावलता वनलता ॥ १६ ॥

अमङ्गलं दोषं निमात्र मा देहि प्राचीनस्वकृतदुष्कृतफलमेव त्वमन्वभूरित्याह यदूयतः परेभ्यो दुःखं ददाति यः स स्वदत्तमेव भुङ्क्ते ॥ १७ ॥

गृहीतः धृतः दुर्भगत्वमेवाह । यां मामिडस्पतिर्भूपतिर्भार्येति वोढुमियं मे भार्या भवतीति बुद्ध्या यो मत्प्रचणपालनभारस्तं वोढु लज्जते । स्वस्यानुरूपतामननेनेति भावः । वाशब्दाद्धासीति भावमपि ॥ १८ ॥

मात्रा समा समाता तया विमात्रापि त्वद्बधमभिलषन्त्यापि यदुक्तं तत् आतिष्ठ कुरु । अव्यलीकं तदप्रियं न भवति । नहि हरि भजनं कस्याप्यप्रियमतो विमत्सरस्तस्याः त्वं परित्यज्येत्यर्थः । मम रोदनमाजन्म विधात्रा ललाटे लिखितमेव तव तु सुखं भवित्वाति भावः ॥ १९ ॥

ननु किं हरिमाराध्य तस्याः पापीयस्याः गर्भे प्रवेक्ष्यामीति तत्र सा बराकी खलु का तस्याः किंकरस्त्वतत्पितैव बराको दीनबुद्धिस्त्वं ब्रह्मपदादप्युत्कृष्टं पदं प्राप्तुं पारयिष्यसि तदितः शीघ्र व्रज हरिं भज माविषीदस्याह । यस्येति चतुर्भिः । विश्वस्य विभावनाय पालनाय आत्ता स्वीकृता गुणाभिपत्तिः सत्त्वगुणाधिष्ठानं येन तस्य जितात्मश्वसनैर्विजितमनः प्राणैर्योगिभिरभिवन्द्यम ॥२०॥

एकमत्या एकाप्रबुद्ध्या ॥ २१ ॥

भृत्यवत्सलमिति मद्विधमातृकोटितोऽपि त्वयि भृत्ये तस्य वात्सल्यमुदृष्यन्तो दुःखगन्धमपि न प्राप्स्यसीति भावः । यं त्वमाश्रयिष्यसि तस्य पदाब्जयोः पद्धतिर्मार्ग एव मुमुक्षुभिर्मृग्यते तत् सा तैरपि सुलभा इति भावः । आश्रित्य च न अन्यस्मिन भाव आत्मनिक्षेपस्य तादृशे मनसि पञ्चवार्षिकस्य ते कर्मानभिकाङ्क्षत् निजधर्मैर्भक्तिधर्मैर्भावित शोधिते मनसि पुरुषम् अवस्थाप्य भजस्व ॥ २२ ॥

सुखाराध्यस्यापि देवतान्तरस्य नश्वरफलदायित्वात्त्वद्दुःखं निर्मूलयितुमसमर्थस्य भजनं परिणामदर्शिन्यहं त्वां नोपदिशामीत्याह । नान्यमिति । पद्मपलाशेति तस्य दृष्टिपातेनैव तप्तस्त्वं शीतलो भविष्यसीति भावः । हस्ते गृहीतं दीपवत् पद्मं यया इतरैर्ब्रह्मादिभिः ॥ २३ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

सा बाला भ्रमयमाना सपत्न्या वाक्यं स्मरती शोकरूपेण दवाग्निना दावदग्धलतेव प्रतीयमाना विललाप सरोज इव श्रीर्यस्यास्तयः दशा बाष्पकलां चोवाह ॥ १६ ॥

सा वृजिनस्य दुःखस्य पारमवधिमपश्यन्ती दीर्घं यथा भवति तथा श्वसन्ती बालकमाह हेतात ! परेषु अमंगलमपराधं मामंस्था. एतः यःपरदुःखद सएव तद्दुःखं भुङ्क्ते ॥ १७ ॥

सुरुच्या सत्यमभिहितमुक्तम यद्यस्मात् यां मामिडस्पतिः भूपः भार्येति वा शब्दाद्धासीति वोढुं स्वीकर्तुं विलज्जते तया मया भवान उदरे गृहीतः तस्याः दुर्भगायाः मे मम स्तन्येन दुग्धेन वृद्धश्च ॥ १८ ॥

तत्तस्मात् हेतात ! समात्रापि मातृसपत्न्यापि तपैसाराध्य पुरुषमित्यादि अव्यलीकं सत्यमेव यदुक्तं तत् विमत्सरः सन् तदुक्तस्य आदरं कृत्वा उत्तमवदध्यासनेच्छां च त्यक्त्वा मातिष्ठ कुरु यदि विमत्सरो भवितुं न शक्नोसि मातृसपत्न्याभिहितं न स्वीकरोषि उत्तमवदध्यासनं च यदीच्छसि तदापि अधोक्षज पादपद्ममेवाराधय सुरुच्या उक्तः यः पुरुषः सएव मुक्तिं भुक्तिं चोपासकानां ददातीति फलितोऽर्थः ॥ १९ ॥

ननु मुक्तिदो भुक्तिदः कतोभवत नहि अभयदोभयदो भवतीति प्रसिद्धरित्यत्राधिकार्यनुसारेण मुमुक्षुभिः सेवितो यथा मुक्तिं ददाति तथा बुभुक्षुभिः सेवितो भुक्तिमपि ददातीति मुमुक्षुबुभुक्षु मनोरथपूरकत्वं भगवतो दर्शयन्तो भगवन्तमेव सर्वपुरुषार्थ प्रदमाश्रयेत्याह । यस्येति त्रिभिः । विश्वविभावनाय विश्वगतमुमुक्षुबुभुक्षु जनपालनाय आत्ताआविष्कृता गुणाभिपत्तिः गुणाभिव्यक्तिर्येन तस्य जितः आत्मा मनः श्वसनः प्राणाश्च यैस्तैर्मुमुक्षुभिरभिवन्द्यम अङ्घ्रिपद्मम् अजो ब्रह्मा परिचर्य्य निषेव्य पारमेष्ठ्यं पदम् अध्यतिष्ठत् ॥ २० ॥

एकमत्या "आत्मत्वेनावगच्छन्ति ग्राहयन्ति,,इति सूत्रोक्तेन तादात्म्य सम्बन्धेन भवैरिष्टाभौमं दिव्यं च सुखं भुक्तिसुखम आपवर्ग्यं मुक्तिसुखं च अभिपेदे ॥ २१ ॥

मुमुक्षुभिर्मृग्या अन्वेषणीया पदाब्जयोः पद्धतिर्मार्गआराधन विधिर्वा यस्य तमेव नास्त्यन्यस्मिन्नुपाये उपेयवा भावो यस्य तस्मिन्स्वधर्मेण भावित शोधिते निवेश्य आश्रय उपायोपेयभावेन शरणं व्रज अध्यासनेच्छायां सत्यां विशेषतो भज ॥ २२॥

तदन्यः सर्वपुरुषार्थप्रदो नास्तीत्युपदिशति । नान्यमिति॥२३॥

———

भाषाटीका

वह सुनीति धैर्य को छोड कर जंगल में आग से जैसी लता व्याकुल हो तैसे होकर विलाप करने लगी सौतिन के वचन को स्मरण कर के कमल कीसी शोभावाले नेत्रों से आंसु डारने लगी ॥ १६ ॥

लंबा श्वास लेने लगी दुःख के अन्त को नहीं पाकर अवला सुनीति बालक से बोली कि हे तात ध्रुव ! दूसरे का अमंगल मत विचारो क्योंकि जो मनुष्य दूसरे को दुःख देता है सो उसी दुःख को भोगता है ॥ १७ ॥

सुरुचीने सत्य कहा है कि जो मै दुर्भगाने तेरे को पेट मे धारण किया और दूध से बढाया जिससे कि भार्या मान कर मेरे कार्य के भार को ढोने को राजा लज्जा करता है ॥ १८ ॥

सो हे तात ध्रुव ! अब तेरी सौतन माताने जो कहा है सो ठीक है तू दूसरो से मत्सर छोडकर उसी कामको कर अधोक्षज श्रीनारायणके पाद पद्मका आराधनकर यदि उत्तम पुरुष की नाई राजसिंहासनको चाहता है तो ॥ १९ ॥

मन प्राणको जीतने वाले मुनियों के वन्दना करने योग्य जिस परमात्माके चरण कमलको पूजा करके ब्रह्माने परमेष्ठी को प्राप्त किया है जिस परमात्माने संसार के पालने को सत्त्वादि गुण धारण किये है उसको पूजन कर ॥ २० ॥

मैत्रेय उवाच

एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः ।
संनियम्यात्मनात्मानं निश्चक्राम पितुःपुरात् ॥ २४ ॥
नारदस्तदुपाकर्ण्य ज्ञात्वा तस्य चिकीर्षितम् ।
स्पृष्ट्वा मूर्द्धन्यघघ्नेन पाणिना प्राह विस्मितः ॥ २५ ॥
अहो , तेजः क्षत्रियाणां मानभङ्गममृष्यताम् ।
बालोऽप्ययं हृदा धत्ते यत्समातुरसद्वचः ॥ २६ ॥

नारद उवाच

नाधुनाप्यवमानं ते सं मानं वापि पुत्रक !
लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु ॥ २७ ॥
विकल्पे विद्यमानेऽपि नह्यसंतोषहेतवः ।
पुंसोमोहमृते भिन्ना यल्लोके निजकर्मभिः ॥ २८ ॥
परितुष्येत्ततस्तात ! तावन्मात्रेण पूरुषः ।
दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः ॥ २९ ॥
अथ मात्रोपदिष्टेन योगेनावरुरुत्ससि ।
यत्प्रसादं सवै पुंसां दुराराध्यो मतो मम ॥ ३० ॥

भाषाटीका

तैसे ही तुमारा पितामह भगवान् मनु जिस परमात्मा को एकाग्र भक्ति से बहुत दक्षिणा वाले यज्ञों के द्वारा पूजन करके अन्य देवताओं से नहीं प्राप्त होने लायक स्वर्ग लोक मर्त्य लोक के सुख तथा मोक्ष को प्राप्त हुये ॥ २१ ॥

हे वत्सध्रुव ! जिन परमात्मा के चरण कमल के मार्ग को मुमुक्षुजन ढूंढते हैं उनका आश्रय लेकर भागवत धर्मों से शोधित इतर विषयों से रहित मन मे स्थापन कर के उन नारायण कू भज ॥ २२ ॥

हे ध्रुव ! ब्रह्मादिक जिन की कृपा को ढूंढ रहे हैं ऐसी लक्ष्मीजी हाथ मे कमल लेकर जिन नारायण की सेवा करैं हैं उन कमल लोचन से दूसरे कोइ को मै तेरे दुःख छुडाने वाला ढूंढने पर भी नहीं देखती हूं ॥ २३ ॥

———

श्रीधरस्वामिकृत भावार्थदीपिका

संजल्पितं विलापम् ततोऽर्थस्यागमोयस्मात्तथाभूतं वच आकर्ण्य ॥ २४ ॥ २५ ॥

विस्मित इत्युक्तं तदेवाह । अहो तेजः प्रभावः ।२६।२७॥

विकल्पे मानापमानविवेके सत्यपि भिन्ना न सन्ति किन्तु मोहकल्पिता एवेत्यर्थः कुतः यत्सुखं दुःखं वा तन्निजकर्मभिरेव भवति यतः ॥२८॥

[illegible]समोपदेशान निवर्तयति । परितुष्येदिति षड्भिः । ईश्वरगतिं [illegible] ईश्वरानुकूल्यं विना नोद्यमाः फलहेतव इति ज्ञात्वा परि-

दुष्करश्च तवायमुद्यम इत्याह ! अथेति द्वाभ्याम ! यस्य प्रसादमव रोद्धुं प्राप्तुमिच्छसि ॥ ३० ॥

———

श्रीराधारमणदासगोस्वामि विरचिता

दीपिन्याख्या दीपिका टिप्पणी ।

ततो विलापश्रवणानन्तरम् अर्थस्य पुरुषार्थस्य आत्मना बुद्ध्या आत्मानं मनो निरुद्ध्य ॥ २४ ॥

भक्तसंगतेर्यादृच्छिकत्वाद्यदृच्छयागतो नारदः तत्पुरान्निष्क्रमणं तत्पुरवासिभ्य उपसमीप एव श्रुत्वा अस्य ध्रुवस्य चिकीर्षितं कर्त्तुमभीष्टं हरेराराधनं प्राह स्वगतम् ॥ २५ ॥

तदेव विस्मितत्वमेव यद्यस्मात् हृदा धत्ते एव न तु विस्मरति ॥ २६ ॥

पूर्वोक्तः स्वगतं नारद उवाचेति स्फुटोक्त्याऽवगम्ये अपि: सम्भावनायाम् ॥ २७ ॥

असंतोषहेतव अपमानादयस्तत्कर्त्तारश्च मोहमज्ञानम् ऋते विना न सन्ति कारणं विनाकार्य्याभावात् अत एव किन्तिवत्यादि राथिकोऽर्थः कार्य्यकारणभावेहेतुः यतोमोहादभिन्ना इति प्रकारप्र श्लेषमन्तरा ऋतेभिन्ना इति पौनरुक्त्यमेवस्यात् भिन्ना न सन्तीति अभिप्रायस्यैक्य व्याख्यानं यतो हेतोः तथाचापमानादिकार्य्यसुख-दुःखयोः कर्ममूलकत्वात् किमर्थं परस्मै क्रोधादिकं कर्त्तव्यमिति भावः ॥ २८ ॥

ईश्वरानुकूल्यं विनेत्यादिव्याख्यानात् दैवेन प्राचीनकर्मणा प्रापितं यावत् यत्प्रमाणकं सुखंदुःखं तावन्मात्रेण परितुष्येत् ॥२९॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

योगेन भजस्व पुरुषमित्युक्तः भक्तियोगेन वास्तवार्थे अन्येषां पुंसां दुराराध्यः भक्तेस्सुदुर्लभत्वात् तव तु स्वाराध्यः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

सुनीत्युक्तमुपसंहरन् ध्रुवस्य चेष्टामाह मुनिः । एवमिति । मातुः संजल्पितं विलापनं ततः अर्थागमम् अर्थस्य स्वाभिलषितस्यार्थस्यागमो यस्मात्तथाभूतं वच आकर्ण्य आत्मना स्वेनैवात्मानं मनः संनिरुध्य समाधाय पितुरुत्तानपादस्य पुरात् अभिचक्राम निर्गतः ॥ २४ ॥

तन्निष्क्रमणमुपाकर्ण्य आश्रुत्य त्रैकालज्ञो नारदः अस्य ध्रुवस्य चिकीर्षितं ज्ञात्वा चागत्येति शेषः अघघ्नेन दुरितहारिणा पाणिना शिरसि संस्पृश्य विस्मितः प्राह ॥ २५ ॥

विस्मित इत्युक्तं तदेवाह । अहो इति । मानभङ्गम् अभिमानविहतिम् अमृष्यताम् असहमानानां क्षत्रियाणां तेजः प्रभावः महोविस्मयनीयः यत् यस्मात् अयं ध्रुवः बालोऽपि समातुः मातुः सपत्न्या असदुक्तः दुष्टवाक्यं यत् इदा हृदयेन धत्ते मनसि भावयतीत्यर्थः ॥ २६ ॥ *

नारदोक्तिमेवाह । क्वेति । हे वत्स ! भवान् ऋद्धिमत् समृद्धिमत् स्वगृहं हित्वा एकः असहायः क्व याति गच्छति अङ्ग हे ध्रुव ! त्वां स्वजनादुत्थया उत्पन्नया अवमत्या पराभूत्या संतप्तं नितरां तप्तमालक्षये उत्प्रेक्षये ॥ २६ ॥

अत्र कैश्चित्पुस्तकेषु

> किमेतद्भगवन् ध्यानात् दृष्टं तद्योगराधसा ।
> नोत्सहे सुरुचेर्वाचा समाधातुं मनः क्षतम् ॥

इत्यधिकः श्लोकः पठ्यते तत्रार्थं ध्रुवोक्तत्वेन व्याख्येयः हे भगवन् ! नारद ! एतन्मम स्वजनोत्थपराभवसंतापादिकं योगराधसा योगप्रभावेण यद्ध्यानं सर्ववस्तुसाक्षात्कारापादकं तस्मात् दृष्टं किन्त्वयेति शेषः अहं तु सुरुचेर्वाचा क्षतं व्यथितं मनः समाधातुं नोत्सहे न शक्नोमि । एवमुक्तो नारदः पुनराह । नाधुनाप्यवमानमिति । एतच्छ्लोकाभावे सर्वोऽपि ग्रन्थो नारदोक्तिपरत्वेन व्याख्येयः हे पुत्रक ! कुमारस्य अत एव क्रीडनादिष्वासक्तस्य तव अधुना बाल्यदशायाम् अवमानं सम्मानं वा न पश्यामि बालो हि मानावमानाननादृत्य परं क्रीडासक्तः अतस्तवापि मानावमानौ न स्त इति पश्यामीत्यभिप्रायः ॥ २७ ॥

यदि ब्रूयात् अहं वयसा बालो न बुद्ध्येति तत्राह । विकल्प इति । विकल्पे मानावमानविवेकेसत्यपि विमोहं विना भिन्ना व्यतिरिक्ताः असन्तोषहेतवो न सन्ति किंतु मोह एवासन्तोषहेतुरित्यर्थः कुतः यत्सुखं दुःखं वा लोके तन्निजकर्मभिरेव भवति यथा अहं बालोऽस्मि मानावमानबुद्धिमानिति ब्रूयास्तर्हीयम् असन्तोषमूला बुद्धिर्देहात्मभ्रममूला न तात्त्विकीत्याह । विकल्प इति । सर्वत्र ज्ञानैकाकारतया एकरूपे आत्मनि विकल्पे देवमनुष्यादिभेदे अविद्यमाने इति छेदः असत्यपि देवमनुष्यादिभेदानामात्माकारत्वाभावेऽपीत्यर्थः पुंसां जीवानां मोहमृते देवादिशरीरेष्वात्माभिमानं विना असन्तोषहेतवो न सन्ति देहात्मभ्रम एवासन्तोषहेतुरित्यर्थः विद्यमान इति वा छेदः अपि शब्द उक्तसमुच्चयार्थः विकल्प इत्यनेन संबध्यते विकल्पे देवमनुष्यादिभेदे अपि शब्दात्तत्प्रयुक्तमानावमानविवेके च सति मोहं देहात्माभिमानमृते असन्तोषहेतुरन्योनास्तीत्यर्थः असन्तोषस्य देहात्माभिमानाधीनत्वे हेतुमाह भिन्ना यदिति । अत्र लोका इति प्रथमान्तपाठस्सुगमः लोकाश्चेतनवर्गा निजकर्मभिरेव भिन्नाः कर्मकृतदेवादिदेहाभिन्ना इति यत् अतो देहे सति तत्रात्मभ्रम एवावमानद्वारासन्तोषहेतुः असंतुष्टस्य चेतनस्य देहात्माभिमानित्वादित्यर्थः यद्वा सप्तम्यन्तपाठः भिन्नेति भावे क्तः स्त्रीत्वमार्षं भिदेत्यर्थः देवादिदेहभेदको हेतुस्तत्राह । लोके ज्ञानैकाकारे चेतन वर्ग भिन्ना देवमनुष्यादिभिदा यत् यतः कर्मभिर्भवति अनेन कर्मकृतो देवादिदेहभेदस्तत्कृतो मानावमानमूलो देहात्मभ्रमस्ततोऽसंतोषरूपं दुःखमित्यभिप्रेतम् ॥ २८ ॥

एतद्देशोपशमोपदेशेन निवर्तयति । परितुष्येदिति षड्भिः ततो देहात्मभ्रमस्यैवासंतोषहेतुत्वाद्बुधः देहादिविलक्षणात्मज्ञानी पुरुषः ईश्वरगतिं वीक्ष्य ईश्वरानुकूल्यं विना नोद्यमाः फलहेतवः इति ज्ञात्वा यावत्सुखं दैवेनोपसादितं प्रापितं तावन्मात्रेण परितुष्येत् नाधिकं लिप्सेत् अतोऽधिकसुखार्थं नोद्यमः कार्य इति भावः ॥ २९ ॥

दुष्करश्चायम् उद्यमः इत्याह । अथेति द्वाभ्याम् । अथ नन्वमात्रा पदिष्टेन भक्तियोगेन यस्य भगवतः प्रसादम् अवरोद्धुं प्राप्तुमिच्छसि स वै भगवान् पुंसां दुःखेनाप्याराधयितुमशक्य इति मे मया ज्ञातो मतः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

बालत्वाद्दीपितोपायो क्षणकालीनत्वेनासमत्वान्मातृवचः श्रुत्वापि गृह एवावस्थानं हरिं संनिधाय तत्समर्थनाय ततो निर्गमनं वा युक्तमिति ध्रुवेण द्वयोर्मध्ये किमकारीत्यान्तरीं शङ्कां परिहर्तुमाह । एवमिति । अर्थस्याभिप्रेतस्यागमः प्राप्तिर्यस्मात्तथा तदा आत्मानं मनः आत्मना धैर्यगुणेन ॥ २४ ॥

ध्रुवोनाममहात्मेति द्योतयंस्तस्य स्वार्थाप्तिसिद्धिं ज्ञापयां नारदसंवादं वक्ति नारद इति । उपाकर्ण्येत्यनेन नारदस्य दूरश्रवणशक्तिः योगीन्द्रत्वात् स्वाभाविकीति सूचयति सर्वप्राणिचर्याविषयं ज्ञानं

> * क्यात्येको भवान् वत्स ! हित्वा स्वगृहमृद्धिमत् ॥
> लक्षये त्वावमत्याङ्ग ! सन्तप्तं स्वजनोत्थया ॥
> ध्रुव उवाच ।
> किमेतद्भगवन् ! ध्यानाद्दृष्टं किं योगराधसा ।
> नोत्सहे सुरुचेर्वाचा समाधातुं मनःक्षतम् ॥

इति वीरराघवविजयध्वजयोरधिकः पाठटीकाच ।

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

वा योगसिद्धमिति स्पृष्ट्वेत्याविना गुरुप्रसादं ध्वनयति अघघ्नेन सर्वदुरितविनाशकेनेति पित्रादिद्वेषनिमित्तदोषनाशं सूचयति ॥२५॥

विदित्वा तदित्युक्तमभिनयति। अहो इति। तेजोभेदमेवाह अमृष्यता असहमानानां समातुः समानमातुः सुरुच्याः ॥ २६ ॥

किं प्राहेति तत्राह। क्रयतीति। कथं तज्जानासि त्वया जानामि ॥२६॥

अत्र ध्रुवेण किमुत्तरं दत्तमिति तत्राह। किं न लक्षति। ध्यानेन ज्ञानं लक्षयति कार्यकारणसंबन्धात् ते त्वया ध्यानजातेन योगराजमावाऽष्टांगयोगजनितदूरदर्शनशक्तिलक्षणसामर्थ्येन वा किं न इदं सर्वं दृष्टमेव तथापि वक्ष्यामीति शेषः किं नादीति तत्राह। नात्सह इति ॥ २६ ॥

नारदेनापि किंप्रत्युत्तरमुक्तमत्राह। नाधुनेति ॥ २७ ॥

ननु क्रीडनादिषु सक्तस्य बालस्य न युक्तमन्यस्य विवेकिनः कथमित्याशङ्क्य नितरामीदृशस्य सन्तोषहेतुत्वमिति बोधयति। विकल्प इति। * विकल्पे शत्रुमित्रादि विविधकल्पने विद्यमानेऽपि पुंसां मोहमृते अममन्तरेणाऽसंतोषहेतवो मनःखेदजनका न सन्ति कुतः लोका जना भिन्नाः स्वानुष्ठितैर्निजकर्मभिरुत्तमाधममध्यमभेदेन नानाविधा इति यस्मात् ॥ २८ ॥

ततईश्वरगति बुधोविद्वान्यद्दैवोपसादितं वीक्ष्य तावन्मात्रेण परितुष्येदित्यन्वयः ईश्वरगति वीक्ष्य यावद्दैवोपसादितं तावन्मात्रेणेतिवा अनेन सुरुच्या दुर्वचस्तव संतापकारणं नभवतीत्युक्तं भवति ॥ २९ ॥

हरेः प्रसादजनके तपसि स्थितांबुद्धि दृढा विधातुं बाधकमभिधत्ते। अथेति। अथ यदि मात्रोपदिष्टेन योगेनोपायेन हरेःप्रसादायं हारिमयरुरुत्सासि अनुग्रहोन्मुखी कर्तुमिच्छासि तथापि सहरिर्मम पुंसां दुराराध्योमतः कुतस्तरां फलाप्तिरित्यर्थः बाइत्यनेन स्वानुभवसिद्धमिति दर्शयति ॥ ३० ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

नारदो यदुच्छयैवागतः सर्मिति त्रयम ॥ २५ ॥

अहो इति स्वगतं वाक्यम। उचावेत्यग्रे स्फुटोक्तिव्यापनात्। तेजः परिभवेच्छा ॥ २६ ॥ २७ ॥

विकल्पे विद्यमानेऽपि असन्तोषहेतवो मोहमृते न सन्तीत्येव। यतो ऽमी मोहादभिन्नाः। यत्र सुखं दुःखं कर्मभिरिति लोके श्रूयते तत्र च पक्षे तानि मोहमृते न सन्तीत्यर्थः ॥ २८ ॥

यत्र फलप्रापकं दैवं तत्रैवेश्वरानुकूल्यं भवतीति दैवोपसादितेनैव परितुष्येदिति भावः। दैवमीश्वरं वा ॥ २९—३१ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतकृतसारार्थदर्शिनी।

प्राह स्वगतम ॥ २५——२७ ॥

विकल्पो भेदस्तस्मिन् विद्यमानेऽपीति ज्ञानयोगिनां तावद्विकल्पो नास्त्येवाति कोवाऽसन्तोषः के वा तस्य हेतवः। भक्तियोगिनां कर्मयोगिनां विकल्पो विद्यत एवति विद्यमानेऽपि विकल्पे पुंसां मोहं विना असन्तोषस्य हेतवोऽवमानादयस्तत्कर्तारश्च भिन्ना न सन्ति किन्तु मोह एवेत्यर्थः। यद्वाऽस्माल्लोके सर्वत्र निजकर्मभिरेवाशुभेरसन्तोषहेतवोऽवमानादयः तत्कर्त्तारश्च भवन्तीत्यात्मानं विना कस्मै दोषोदेय इत्यत एव विवेकिनो भक्ताः कार्मिकाश्च [illegible]मत्सरा भवन्तीति भावः ॥ २८ ॥

यस्मादेवं तस्माद्दैवेन प्राचीननिजकर्मणा उपसादितं प्रापितं यावत् यत्प्रमाणकं सुखं दुःखं वा तावन्मात्रेण परितुष्येत् विवेकेन स्वोपार्जितबुद्ध्येति भावः तत्र ईश्वरगतिं वीक्ष्य ईश्वरप्रेरितमेव कर्म फलतीति ज्ञात्वेत्यर्थः ॥ २९ ॥

तव तु प्रारिप्सितोऽयमुद्यमोऽतिकठिन इत्याह अथेति श्रेयः प्राप्तुमिच्छसि ॥ ३०—३१ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

संजल्पितं विलापं ततः अर्थस्य भजनीयस्य आगमः अवधारणं यस्मात्तद्वचः आकर्ण्य आत्मना बुद्ध्या आत्मानं मनः ॥ २४ ॥

नारदो भगवान् सर्वदेशकालज्ञस्तदुपाकर्ण्य अस्य ध्रुवस्य चिकीर्षितं च ज्ञात्वा विस्मितः सन् तन्निकटमागत्य अघघ्नेन पाणिना मूर्ध्नि स्पृष्ट्वा प्राह ॥ २५ ॥

अमृष्यतामसहमानानाम् अहो तेजः प्रभावः यद्यतो बालोऽपि अयं समातुः मातृसपत्न्याः असद्वचः हृदा धत्ते ॥ २६ ॥

क्रीडनम् आदिर्येषां भोजनशयनादीनां तत्र ॥ २७ ॥

विकल्पे सन्मानावमानभेदे सत्यपि पुंसां मोहमृते भिन्नाः मोहव्यतिरिक्तकृताः असन्तोषस्य सन्मानावमानप्राप्तौ रागद्वेषरूपमनोवृत्त्यनुपरामस्य हेतवो न हि सन्ति किंतु मोहः स्वकृतकर्माबोध एव हेतुः यत् यौ सन्मानावमानौ निजकर्मभिर्भवतः ॥ २८ ॥

एवमसंतोषनिवृत्तिप्रकारं प्रदर्श्य सन्तोषरहस्योपदेशेन तन्निवृत्तिप्रकारं दर्शयन्निवर्तयति परितुष्येदित्यादिषड्भिः यस्मात्स्वकर्मजन्यसन्मानावमानभुगयं जीवस्ततः कारणात् हे तात! यावत् दैवेन कर्मफलदेन भगवतोपसादितं तावत्ईश्वरगतिं प्राचीनकर्मद्वारैव तदनुरूपपदार्थदातृत्वं वीक्ष्यबुद्ध्या परितुष्येत् ॥ २९ ॥

मात्रोपदिष्टेन योगेन भक्तियोगेन यस्य प्रसादं त्वमभिकाङ्क्षसि सः पुंसां दुराराध्यो मम मतः ॥ ३० ॥ ३१ ॥

———

भाषाटीका

मैत्रेयजी बोले इस प्रकारसे अपने मनोरथको देने वाले माता के वचनको श्रवण करके बुद्धिसे मनको रोककर पिताके घरमें से ध्रुवजी निकल गये ॥ २४ ॥

नारदजी ने उनका चला जाना तथा मनोरथ जानकर पाप नाश करने वाले अपने हाथ से स्पर्श करके विस्मित होकर बोले ॥ २५ ॥

अहो क्षत्रियों का तेज ऐसा है कि मान भङ्गको नहीं सहसक्ते हैं जो कि बालक होकरभी यह माता के खोटे वचनों को हृदय में रखता है ॥ २६ ॥

नारदजी बोले हे पुत्र ! अभी तो बालक है खेल में लगा हुआ है तेरकुं मान अपमान कुछभी नहीं होना दीखता है ॥ २७ ॥

यद्यपि मानापमान का भेद दीखता है तथापि ये सब असन्तोष के हेतु हैं पुरुष के मोह विना भिन्न कुछ नहीं है सब अपने कर्म्हा से होते हैं ॥ २८ ॥

* विकल्प इत्यस्यान्यथाज्ञानेइति मोहमित्यस्यापि तथैव। [illegible] प्रकृतस्तात्पर्यानुसारेण व्याख्याति शत्रुमित्रादीति तेन विशब्दः विविधत्वार्थ इत्युक्तं भवति मोहमित्यत्यभ्रममिति

मुनयः पदवीं यस्य निःसंगेनोरुजन्मभिः ।
न विदुर्मृगयन्तोऽपि तीव्रयोगसमाधिना ॥ ३१ ॥
अतो निवर्ततामेष निर्बन्धस्तव निष्फलः ।
यतिष्यति भवान् काले श्रेयसां समुपस्थिते ॥ ३२ ॥
यस्य यद्दैवविहितं स तेन सुखदुःखयोः ।
आत्मानं तोषयन्देही तमसः पारमृच्छति ॥ ३३ ॥
गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् ।
मैत्रीं समानादन्विच्छन्न तापैरभिभूयते ॥ ३४ ॥

ध्रुव उवाच ।

सोऽयं शमो भगवता सुखदुःखहतात्मनाम् ।
दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ॥ ३५ ॥
अथापि मेऽविनीतस्य क्षात्रं घोरमुपेयुषः ।
सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि ॥ ३६ ॥
पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे ॥
ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम् ॥ ३७ ॥
नूनं भवान् भगवतोयोऽङ्गजः परमेष्ठिनः ।
वितुदन्नटते वीणां हितार्थं जगतोऽर्कवत् ॥ ३८ ॥

भाषाटीका ।

हे तात ! इसीसे ईश्वरकी स्वतन्त्रगतिको देखकर जितना दैव से मिलै उतनेही से सन्तोष होजाना बुद्धिमान मनुष्य का काम है ॥ २९ ॥

अथवा यदि तुम माता के उपदेश से योग द्वारा जिस विष्णु की कृपा का होना चाहते हो सो विष्णु तो पुरुषों से आराधन के योग्य नहीं हैं ऐसा हमारा विश्वास है ॥ ३० ॥

————

श्रीधरस्वामिकृत भावार्थदीपिका

निःसंगेन तीव्रयोगेन युक्तेन समाधिना मृगयन्तोऽपि यस्य पदवीं मार्गं न विदुः स देवो दुराराध्यः ॥ ३१ ॥

श्रेयसां काले वृद्धत्वे ॥ ३२ ॥

सुखदुःखयोर्मध्ये सुखे सति पुण्यं क्षीयत इति दुःखे सति पापं क्षीयत इत्यात्मानं तोषयस्तमसः पारं मोक्षं प्राप्नोति ॥ ३३ ॥

किञ्च गुणैरधिकात्पुंस इति ल्यब्लोपे पञ्चमी तं दृष्ट्वा प्रीतिं कुर्यात् तन्मूर्यामित्यर्थः अनुक्रोशं कृपां लिप्सेत तु तिरस्कारम समाना- न्मैत्रीं नतु स्पर्धाम् । ३४ ॥ ३५ ।

क्षात्रं स्वभावं प्राप्तस्यातोऽनपत्याविनीतस्य दुर्वाक्यबाणैर्भिन्ने हृदि न श्रयते न तिष्ठति ॥ ३६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अन्यैरनधिष्ठितं त्रिभुवने उत्कृष्टं पदं जेतुमिच्छोर्मे साधु वर्त्म मार्गं ब्रूहि ॥ ३७ ॥

अङ्कज इति पाठे उत्संगाज्जातो यो नारदः स भवान् तत्र विक्रम वीणां वितुदन्वादयन् हितायाटति ॥ ३८—३९ ॥

————

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

समाधिना न विदुः किन्तु भक्तियोगेन तु विदुरेव भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वत इत्याद्युक्तेः ॥ ३१ ॥

वास्तवार्थे यतस्समाधिना तत्प्राप्तिर्नस्यात्किन्तु भक्तियोगेनैव अतः मात्रोपदिष्टयोगे भवाश्रितरां वर्त्तताम् एष अधोक्षजाराधन विषयकस्तव निर्बन्धः हठोनिश्चितं फलं यत्र तादृश एव नवै जातु कथंचनाव्रजेन्मृकुन्दसंश्रयस्यवद्गुरु ! संसृतिर्मिति नेनैवोक्त- त्वात् तस्मात्काले कौमार एवाचरेत्प्राज्ञो धर्मान् भागवतानि हेत्युक्तेर्भजनयोग्य एवास्मिन्नवसरे भवान् यतिष्यति अत एवस मुपस्थिते इत्युक्तम् उपस्थितं परित्यज्यानुपस्थितवार्द्धिक्यविचारं मानाभावात् तस्य च भजनकालस्य श्रेयस्त्वंभगिनेन्यं भूमन् भक्तिमुद्वस्य ते विभो ! इत्यादिप्रामाण्यादेव ॥ ३२ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

सुखदुःखयोर्मध्ये यत्सुखं दुःखं वा यस्य प्राचीनकर्मणा विहितं रचितं स तेन दैवरचितेन सुखेन दुःखेन वात्मानं तोषयन् मासु प्राप्नोतीत्यर्थः तोषप्रकारं व्याचष्टे । सुखे सतीत्यादि ॥ ३३ ॥ ३४ ॥

सोऽयं मुमुक्षुकर्तव्यत्वेन प्रसिद्धः शमश्चित्तनिरोधः ॥३५॥

यद्यपि कृपयैव दर्शितः अथापि घोरं स्वात्रमिति एतदुपशमामृत ब्राह्मणबालकानेव पायय न तु मां परधर्मत्वेनानभिरुच्येरिति भावः ॥३६ ॥

मार्गमात्रं ब्रूहि पुनस्त्वत्कृपया पश्य मे विक्रममिति भावः ॥३७॥

तत्र नारदत्वे लिङ्कं चिन्हं लिङ्कं चिन्हेऽनुमाने चेति विश्वः॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

निःसङ्गेन देहतदनुबन्धिसंगरहितेन तीव्रयोगः विघ्नानुपहतो ज्ञानयोगः कर्मयोगश्च तद्युक्तेन समाधिना यस्य भगवतः पदवीं मार्गं मृगयन्तोऽपि मुनयो बहुजन्मभिरपि नाविदुः स देवोभगवान् दुराराध्यो मम मत इति पूर्वेण संबन्धः ॥ ३१ ॥

अतो देवस्यापि दुराराध्यत्वाद्धेतोः निवर्ततो गृहान् प्रति यातु भवान् तवैव निर्बन्धः निष्फलः अनर्थः प्रयतमानस्य मम कथं श्रेयः प्राप्तिरित्याशङ्कमानं प्रत्याह। यतिष्यतीति दैवात् श्रेयसां काले समुपस्थिते भवान् यतिष्यति यत्नं करिष्यतीति अधुना तूद्यमो निष्फल इति भावः ॥ ३२ ॥

किञ्च यस्य पुंसः यत् सुखं दुःखं वा दैवेनेश्वरेण विहितं स पुमान् दैवविहितयोः सुखदुःखयोर्मध्ये तेन दैवविहितेन सुखेन दुःखेन वा आत्मानं तोषयन् सुखे सति पुण्यं क्षीयते अमुख्यपुण्यमतः पुण्यापुण्यक्षयेन संसृतेर्मोक्षामीत्यात्मानं तोषयन्नित्यर्थः देही देहवान् तमसः पारं प्रकृतिमण्डलातीतं विष्णोः पदमृच्छति याति ॥ ३३ ॥

अपि च यः पुमान् गुणैरधिकः स्वापेक्षयाधिकस्तस्मादियं ल्यब्लोपे पञ्चमी गुणाधिकं दृष्ट्वेत्यर्थः मुदं लिप्सेत् लब्धुमिच्छेत् प्रीतिं कुर्यात् तत्वसूयामित्यर्थः गुणाधमात् गुणाधमं वीक्ष्य अनुक्रोशं कृपां लिप्सेत् न तु तिरस्कारं समानान्मैत्रीं न तु स्पर्द्धां सः तापैराध्यात्मिकादितापैः नाभिभूयते तापत्रयाभिहतो न भवतीत्यर्थः ॥ ३४ ॥

एवं नारदेनोपदिष्टक्रमो ध्रुवः स्वमनीषितेऽविचाल्यमतिस्तद्दर्शितं तदुक्तिं चाभिनन्दन् प्रत्याह। सोऽयमिति चतुर्भिः। भगवता सुखदुःखाङ्गो हतः पराभूत आत्मा मनो येषां तेषां पुंसामस्माकं सोऽयं शमः मनः प्रशान्त्युपायः कृपया दर्शितः ज्ञापितः यो भगवांस्त्वमस्मद्विधैर्मादृशैर्दुर्दर्शः द्रष्टुमशक्यः यद्वा यः शमः अस्मद्विधैर्दुर्दर्शः ज्ञातुमशक्य इति शमप्रशंसा ॥ ३५ ॥

अथापि त्वयोपदिष्टशमस्यापि मम घोरं क्षात्रं स्वभावं उपयुषः प्राप्तवतोऽत एवाविनीतस्य सुरुच्याः दुर्वचांस्येव बाणास्तैर्भिन्ने हृदि न श्रयते शम इत्यनुषंगः शमो न तिष्ठतीत्यर्थः ॥ ३६ ॥

अतो मन्मनीषानुसारेणैव मामनुगृह्य मनीषितोपायप्रकारं [illegible]पदमिति॥ अस्मत् पितृभिस्तेभ्योऽन्यैरप्यनधिष्ठितं त्रिभुव[illegible]दं जेतुमिच्छामि साधुवर्त्म मार्गं ब्रूहि स्वोपदेशोल्लंघ[illegible] [illegible]दित्याशङ्क्य तं प्रसादयति ॥ ३७ ॥

नूनमिति । भवान्परमेष्ठिनो ब्रह्मणः जगद्धितकारिणोऽङ्गजः देहजः अंकज इति पाठे उत्संगाज्जातः वीणां वितुदन् स्वनयन् जगतो हिताय सूर्यवदटति चरति अतो मन्मनीषापादनमेव जगद्धितकारिणस्तवोचितमिति भावः ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

मुनयोऽपि यन्मार्गसमाराध्य नजानन्ति बालकस्त्वं किमुतेत्याह । मुनयइति ॥ ३१ ॥

ततः किं तत्राह । अतइति । तर्हि निःश्रेयसाय प्रयतमानस्य पुंसो जन्मनोनिरर्थकत्वमित्याशङ्क्य नायं कालः किंतु कालान्तर इत्याह यतिष्यतीति काले वार्धके ॥ ३२ ॥

सुखदुःखयोर्मध्ये यत्सुखं दुःखं वा यस्य दैवेन विहितं सदेही तयारेकेन तेनात्मानं तोषयंस्तमसः पारमज्ञानस्यान्तं मोक्षमृच्छति गच्छतीत्यन्वयः ॥ ३३ ॥

मनोदुःखाभावे उपायान्तरमाह । गुणाधिकादिति । शमदमादि गुणाधिकात्पुरुषादिति प्रत्येकं संबध्यते अनुक्रोशं दयां मैत्रीं सौहार्दं तापैर्मनः खेदकरैर्भावैः ॥ ३४ ॥

नारदेनैवं बोधितोऽपि ध्रुवस्तं मार्गं प्रशस्य स्वहार्दं विज्ञापयति सोऽयमिति योऽस्मद्विधैर्दुर्दर्शः शास्त्रदृष्ट्या ज्ञातुमशक्यः सोऽयं शमो भगवन्निष्ठालक्षणोभगवता सुखदुःखाभ्यां हतात्मनां पीडितमनसां पुंसां कृपया दर्शितो यद्यपि ॥ ३५ ॥

अथापि तथापि अविनीतस्य कुतः क्षात्रं घोरं धर्ममुपयुषोगच्छतोमे सुरुच्यादुर्वचोबाणैर्भिन्ने हृदि स शमो न श्रयते स्थितिं न लभत इत्यन्वयः ॥ ३६ ॥

तर्हि तव काङ्क्षायाः कियानवधिरिति तत्राह । पदमिति अनेन राजसिंहासनस्याभित्यत्वेन न तपःसाध्यत्वेनाकांक्ष्यत्वमिति सूचितम्. अस्मत्पितृभिरित्यादिनोत्तमस्य मनोरथनाप्यनवाप्यमित्यसूचि॥ ३७॥

भवान् लोकाहितार्थाटनत्वान्मदभीष्टमुपदिशतीत्याशयेनाह नून-मिति ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

अत इति । वास्तवार्थे । निर्निश्चितं फलं यत्र तथाभूत एव साक्षि वर्त्मनाम । काले प्राप्तावसर एवास्मिन् । यतिष्यतीति वर्तमानसामीप्ये ॥ ३२ ॥

यदृच्छयेति । निष्कामकर्मान्यत्राधिकारी ॥ ३३ ॥ ३४ ॥

अस्मद्विधैर्यो दुर्दर्शः सोऽपि यद्यपि कृपया दर्शितः ॥ ३५ ॥

अथापि तथापि ॥ ३६—३७ ॥

भवान् परमेष्ठिनोऽङ्गजोऽपि अङ्कज इति पाठे उत्सङ्गाज्जातोऽपि यद्वीणां वितुदन्नटति तन्नूनं जगत एव हितायेति अत्र श्रीमैत्रेय उवाचेति कश्चित् इतीति । सनिर्बन्धं स्वास्मिन् विश्वासयुक्तं सर्वोत्कृष्टसाधनसाध्यलिप्सायुक्तञ्च अतएव प्रीतः ॥ ३८–४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

श्रेयसां काले वयसा वृद्धत्वे ॥ ३२ ॥

सुखदुःखयोर्मध्ये तेन सुखेन दुःखेन वा तोषयन् सुखे सति पुण्यं क्षीयते दुःखे सति पापं क्षीयते इति बुद्ध्येत्यर्थः तमसः संसारात् ॥ ३३ ॥

किञ्च गुणाधिकात् गुणाधिकं प्राप्येति ल्यब्लोपे पञ्चमी मुदं

मैत्रेय उवाच

इत्युदाहृतमाकर्ण्य भगवान्नारदस्तदा ।
प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकम्पया ॥ ३९ ॥

नारद उवाच

जनन्याऽभिहितः पन्थाः स वै निःश्रेयसस्य ते ।
भगवान् वासुदेवस्तं भज तत्प्रवणात्मना ॥ ४० ॥
धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः ।
एकमेव हरेस्तत्र कारणं पादसेवनम् ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

लब्धुमिच्छेत् सत्त्वभृताम्। अनुक्रोशं कृपां सत्त्ववर्णां मैत्रीं तत्तुल्यतां विस्मेदिति यदि स्वस्वभावदोषान्न लभेत तदपि लब्धुं कामयतोऽपीत्यभिप्रायः ॥ ३४ ॥

त्वया यद्यप्यनधिकारिणोऽपि मम कृपयेदमुपशमामृतं दत्तं । तथापि क्षात्रं स्वभावं प्राप्तवतो मम हृदि भिन्ने विदीर्णे सुरुचिवाग्बाणैः इव न भवते न तिष्ठतीति व्याजस्तुत्या शौर्यहीनान् दुर्बलान् ब्राह्मणानेवैतदुपशमामृतं पायय । मम तु महाघोरशौर्यवतः क्षत्रियकुमारस्य नात्र हठेनापि पतनीति व्याजस्तुति ॥ ३५ ॥ ३६ ॥

तर्हि त्वं किमिच्छसीत्यत आह । पदमिति । त्रिभुवनोत्कृष्टत्वेऽपि अस्मत् पितृभिरिति यो मामवमन्यते स्म तेन सुरुचेः पत्या उत्तानपादेन मत्पित्रा ब्रह्मणापि अन्यैरपि ब्रह्मणः पुत्रपौत्रादिभिः अनधिष्ठितमप्राप्तं पदं जिगीषोः स्वीचिकीर्षोर्मेऽस्मत्पूर्वैरपि त्वं तावत्सत्पथं मार्गमुपदिश अचिरेणैव तद्विजये किञ्च मम शौर्यं मे पश्येति भावः ॥ ३७ ॥

ममायमेव मनोरथः सेत्स्यत्येवेत्यत्र गृहाण्निष्काम्यतएव भवद्दर्शनमेव लिङ्गमित्याह । नूनमिति । अङ्गात्स्वमङ्गादाविर्भूतो लोकहिताय भगवदवतार एव त्वं न कस्यापि पुत्र इति भावः । अङ्गज इति पाठे भवान् परमेष्ठिनोऽङ्गजोऽपि वीणां विभूवदटति तज्जगतो हितायैव ॥ ३८ ॥ ४१ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

श्रेयसां श्रेयः साधनानां ज्ञानभक्त्यादीनां काले बाल्यनिवृत्त्यनन्तरम् यतिष्यति ज्ञानभक्त्याद्युपायनं करिष्यति ॥ ३२ ॥

तमसः प्रकृतेः पारं विष्णुपदम् ऋच्छति प्राप्नोति आदित्यवर्णं तमसः परस्तादिति श्रुतेः ॥ ३३ ॥

किञ्च यो गुणाधिकात् स्वस्मात्पञ्चमी गुणैरधिकं दृष्ट्वा मुदं लिप्सेत् प्राप्तुमिच्छेत् प्रीतिं कुर्यात् गुणाधमात् गुणाधमं दृष्ट्वा अनुक्रोशं कुर्यात् समानात् स्वसमं दृष्ट्वा मैत्रीमन्विच्छेत्स तापैर्नाभिभूयते ॥ ३४ ॥

सुखदुःखाभ्यां हतोऽभिभूतः आत्मा मनो येषां तेषां पुंसां यः शमः भगवता कृपया दर्शितः सोऽयमस्मद्विधैः पुंभिर्दुर्दर्शः दुर्लभ इत्यर्थः ॥ ३५ ॥

तथापि दुर्लभपदार्थलाभेऽपि मे मम अविनीतस्य भगवद्भक्तस्य मानाहतस्य तत्र हेतुगर्भं विशेषणं घोरं क्षात्रं क्षत्रियस्वभावमुपेयुषः प्राप्तवतो हृदि न भवते न स्थीयते ॥ ३६ ॥

हे ब्रह्मन् ! त्रिभुवनादुत्कृष्टम् अस्मत्पितृभिरन्यैश्चाप्यनधिष्ठितं पदं जिगीषोर्मे साधु वर्त्म मार्गं साधनं ब्रूहि ॥ ३७ ॥

वितुदन् वादयन् ॥ ३८ ॥

भाषाटीका

जिसके मार्गको मुनि लोग कठिन योग समाधि से बहुत जन्मोंतक ढूंढने से भी त्यागके द्वाराभी नहीं प्राप्त हो सकतेहैं॥३१॥

इस हेतुसे इस तुम्हारे निष्फल हठको छोड़ो वृद्ध तपस्या के समयपर आप यत्न करलेना ॥ ३२ ॥

सुखदुःखवालोकेमध्यमे जिसको दैवसे जो विहित होवे उसीसे आत्माको संतोषकरताहुआ पुरुषसंसार के पार को प्राप्त होता है ॥ ३३ ॥

अपने से अधिकगुणवाले पुरुषको देखकर आनंद होवे अपने से छोटेकोदेखकर कृपा करै अपने समान को देखकर मित्रता करै तो वह पुरुषकभी दुखीनहींहोता है ॥ ३४ ॥

हमलोगोंको करने में कठिन ऐसा यह समताका उपदेश, सुखदुःख से जिनके मनतप्त होरहे हैं ऐसे लोगों के लिये कृपाकर के आपने कहा है ॥ ३५ ॥

तो भी मै घोरक्षत्रिय के धर्म को प्राप्त होनेसे सनम्रहों इसी से सुरुची के वचन रूपीबाणोंसे बिधेहुए मेरेहृदयमे यह उपदेश स्थिर नहीं होताहै ॥ ३६ ॥

हे ब्रह्मन् ! अबतो हमारेपूर्वजनथा अन्यलोगों कोभी नहीं प्राप्त और तीनों भुवन में अधिक स्थान को प्राप्त होनेकीइच्छावाला मैहूं मेरेको आप सुंदर उपाय बताओ ॥ ३७ ॥

यह बात ठीक है कि आप परमेष्ठीभगवान् ब्रह्मा के पुत्र हो जगतके हितके वास्ते वीणाको बजाते हुए सूर्य सरीखे संसार में घूमतेहो ॥ ३८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

निःश्रेयसस्याभिप्रेतार्थस्य पन्थाः कोऽसावित्यत आह । वासुदेवोऽतएव तं भज ॥ ४० ॥ ४१ ॥

तत्तात ! गच्छ भद्रं ते यमुनायास्तटं शुचि ।
पुण्यं मधुवनं यत्र सांनिध्यं नित्यदा हरेः ॥ ४२ ॥
स्नात्वाऽनुसवनं तस्मिन् कालिन्द्याः सलिले शिवे ।
कृत्वोचितानि निवसन्नात्मनः कल्पितासनः ॥ ४३ ॥
प्राणायामेन त्रिवृता प्राणेन्द्रियमनोमलम् ।
शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुम् ॥ ४४ ॥
प्रसादाभिमुखं शश्वत्प्रसन्नवदनेक्षणम् ।
सुनासं सुभ्रुवं चारुकपोलं सुरसुन्दरम् ॥ ४५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

मधुवनाख्यं यमुनायास्तटं गच्छ यत्र मधुवने ॥ ४२ ॥

अध्ययनाद्यभावेऽप्यात्मनउचितानि योग्यानि देवतानमस्कारादीनि कृत्वेति यमनियमा उक्ताः आसनकल्पनं च कुशादिभिः स्वस्तिकादिभिश्च ॥ ४३ ॥

प्राणेन्द्रियमनसां मलं चाञ्चल्यं व्युदस्येति प्राणायामप्रत्याहारौ धारणामाह । अभिध्यायेदित्यादिषड्भिः गुरुणा धीरेण मनसा गुरुं श्रीहरिम् ॥ ४४ ॥

सुरेषु सुन्दरम् ॥ ४५ ॥

———

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

अत्र मैत्रेय उवाचेति क्वचित्पाठः उदाहृतं सनिर्वेधत्वेनोत्कृष्टं वचनं यद्यपि वास्तवार्थे पूर्वमासि सद्वाक्यमेव तथाप्यत्र स्फुटार्थं आत्मसद्वाक्यमित्युक्तम् ॥ ३९ ॥

अत एव श्रेयः पथत्वादेव तत्प्रवणात्मना तदेकनिष्ठेन मनसा ॥ ४० ॥

श्रेयः पथत्वमेव दर्शयति । धर्मार्थेति । तत्र धर्मादिश्रेयसि एक एव मुख्यमेव अन्यानि च तदभावादेव विधीयन्त इति भावः सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनमित्युक्तेः ॥ ४१ ॥

तत्तस्मात् पादसेवनस्य मूलकारणत्वात् तातेत्यनुकम्पायां भद्रं ते शीघ्रसिद्ध्यै आशीर्वादः नित्यदा स्वभावत एव हरेस्सांनिध्यं अर्थात्तत्रत्यानामिति शेषः ॥ ४२ ॥

स्नात्वेत्यष्टकम् अत्र बहुवाक्यैकवाक्यत्वाट्टीकाक्रमलाभाय मध्ये बिन्दुमस्तका अङ्काः कर्त्तव्याः अनुसवनं त्रिकालम् (१) ॥ ४३ ॥

त्रिवृता कुम्भकादित्रिविधेन चाञ्चल्यव्युदास एव प्रत्याहारः धारणां सविशेषणाम् अभिसामान्यतो ध्यायेदिति धारणैव व्याख्येया अन्यथा वक्ष्यमाणध्यानेन सांकर्यं स्यादिति ज्ञेयम् आश्रयविशेषे सामान्यतश्चित्तस्थिरीकरणं हि धारणा चेतसस्तु चिन्मात्रशेषतासजातीयप्रत्ययप्रवाहो हि ध्यानम् (२) ॥ ४४ ॥

सुन्दरं श्लाघ्याङ्गसंनिवेशम् (३) ॥ ४५ ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

[illegible] संकल्पस्य ध्रुवस्य वचः आश्रुत्य तदनुगुह्यनारदमाहेत्याह मैत्रेय इति उक्तप्रकारेण उदीरितं गदितमाकर्ण्य भगवान्नारदः दृढसंकल्पदर्शनेन नितरां प्रीतः तं बालकं प्रतिकृपया सद्वाक्यं हितवाक्यमाह ॥ ३९ ॥

उक्तमेवाह । जनन्या इत्यादिना । विरक्तश्चेन्द्रियरतावित्यन्तेन तत्र तावद्भगवानेव भक्त्या प्रसन्नो धर्मादिपुरुषार्थचतुष्टयप्रदस्तस्य भक्तिरेव कार्येति वदन् उपासनोपयुक्तं देशमाचारश्चं स्य भगवतो ध्यानप्रकारं जप्यं मन्त्रं भगवत्सपर्याप्रकारमाहारनियमं च कथयन्नेवमाराधितो भगवानेव त्वत्समीहितमभिनिर्वर्तयतीत्याह । जनन्याभिहितेत्या उक्तः यः पन्था उपायः स वै स एव ते तव निःश्रेयसाय निश्चितं श्रेयः निःश्रेयसं तस्मै भवति जनन्याभिहितोपाय एवत्वदभिप्रेतार्थसाधनमित्यर्थः कोऽसौ जनन्याभिहितः पन्थास्तत्राह भगवान् वासुदेव एव अनन्यप्रवणात्मना भगवत्प्रवणचित्तेन तं भगवन्तं भज ॥ ४० ॥

भगवान् वासुदेव एव इत्येतदेव प्रपञ्चयति । धर्मेत्यादिना । यः पुमान् धर्माद्यन्यतमं श्रेयः आत्मनः स्वस्य इच्छेत् तत्र हरेः पादसेवनमेकमेव कारणमुपायः ॥ ४१ ॥

तत्तस्माद्भगवत्पादसेवनस्यैव धर्मादिसाधनत्वात् हे तात ! यमुनायाः शुचि शुद्धं तटं तीरं गच्छ ते तव भद्रं मङ्गलमस्तु तटं विशिनष्टि । यत्र तटे पुण्यं पुण्यावहं मधुवनमस्ति कथं भूतं मधुवनं सर्वदा हरेर्भगवतः सांनिध्यं सांनिध्यवत् तटशब्दस्य तटस्थमधुवने लक्षणा वा तत्कथं भूतं मधुवनं यत्र मधुवने हरेः सांनिध्यमस्ति ॥ ४२ ॥

कालिन्द्या यमुनायाः शिवे मङ्गले सलिले त्रिषवणं स्नात्वा तत्र वने आत्मनः स्वस्य उचितानि योग्यानि देवतानमस्कारादीनि कृत्वा कुशादिभिः स्वस्तिकादिभिश्च कल्पितमासनं यस्य सः निवसन् उपाविशन् त्रिवृता त्रयाणां रेचकपूरककुम्भकानां वृत्त वर्त्तनं यस्मिन् तेन प्राणायामेन त्रिवृता प्रणवेन प्रणवानुसंधानपूर्वकमिति वार्थः प्राणानामिन्द्रियाणां मनसश्च मलं चाञ्चल्यं शनैर्व्युदस्य अपोह्य गुरुणा श्रेष्ठेन प्राणायामैर्निर्मलेनेत्यर्थः मनसा गुरुं भगवन्तं ध्यायेत् अत्र उचितानि कृत्वेति यमनियमा उक्ताः कल्पितासन इत्यासनं मलं व्युदस्येतिप्राणायामप्रत्याहारौ ध्यायेदिति ध्यानं धारणाप्यनेनैवोक्ता धारणापूर्वकत्वाद्ध्यानस्य एवमष्टाङ्गयुक्तो योग उपदिष्टः ॥ ४३ ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

ध्येयं गुरुं विशिनष्टि । प्रसादेति । शश्वत्सदा प्रसादे अनुग्रहेऽभिमुखं प्रसन्नं वदनमीक्षणे च यस्य तं शोभना नासिका यस्य शोभने भ्रुवौ यस्य चारू सुन्दरौ कपोलौ यस्य सुरसुन्दरं देववरसुन्दरं देवसुरेभ्योऽपि सुन्दरमिति वा ॥ ४५ ॥

— — —

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ॥

यादृच्छिकगतित्वात्तत्क्रमाकर्ण्य स्मित्वा योगित्वेनादृश्यशक्तिमत्त्वात्तूष्णीं गतमुतान्किमप्युक्तमिति तत्राह । इतीति । तद्वाक्यं प्रतिप्रति ॥ ३९ ॥

प्राक् स्वोक्तमवरुद्धोक्तमुक्तमन्यद्वा संभवाद्भयोरिति तत्राह । तत्त्यापि । वा इत्येवार्थः योऽजनन्याऽभिहितः पन्थाः स एव ते निःश्रेयसकर स्यादित्यन्वयः कोऽसाविति तत्राह । भगवानिति । योहरिविग्रहेषु वासुदेवनामा भगवांस्तं प्रवणात्मना भजेत्यन्वयः ॥ ४० ॥

सांकिमन्योऽन्यःकि न स्यादिति तत्राह । धर्मार्थेति । कारणमितरत्यानर्तकं साधनम् ॥ ४१ ॥

अभीष्टसिद्धिसाधनं क्षेत्रं चोपदिशति । तत्तातेति । यस्मादत्रैव प्रधानसाधनस्य तत्तस्मात्मधोः पूर्णानन्दस्य हरेर्वनं भजनं यस्माद्भवति तन्मधुवनं नाम्ना सूचितमर्थं प्रकाशयति । यत्रेति ॥ ४२ ॥

तत्र किं कर्तव्यमिति तत्राह । स्नात्वेति । उचितानि तर्पणादीनि ॥ ४३ ॥

त्रिवृता रेचकादित्रिस्वसंकल्पोपेतेन यद्वा यरवर्णत्रयाक्षरयुक्तेन यद्वा प्रणवयुक्तेन प्राणानामवशान्यमिन्द्रियाणां विषयाभिमुखत्वं मनसोऽन्यचित्तविकारपिति मलश्च गुरूणां गुरुमुपदेष्टारम् ॥ ४४ ॥

पुरुषायुषशतेनाऽप्रमत्तानिगुणावांश्चेन किमनन्तयत्नोऽश्रुतान क्रन्दयति ध्येयस्वरूपमुपदिशति । प्रसादाभिमुखमित्यादिना ॥ ४५ ॥

— — —

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अतिशयकृपया सुखाराध्यत्वोपायमुपदिशति । तत्तातेति तानि त्यनुकम्पायां विघ्नविघाताय शुभाशीर्वाद भद्रं त इति नित्यस्थ स्वभावत एव तत्त्वध्ययनादिसाधनवशात् ॥ ४२ ॥

स्नात्वेत्युपक्रम ॥ ४३ ॥

गुरुणामिति चित्सुखः छन्दश्छान्दसः ॥ ४४—४५ ॥

— — —

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ॥

तव जनन्या यदभिहितं तदेव मदभिहितम् इमत्र विशेषमुपदिशामीत्याह । तत्तातेति । मधुवनमिति सर्वेषु सिद्धक्षेत्रेषु तस्यैव मुख्यत्वात् ॥ ४२ ॥

अध्ययनाद्यभावेऽप्यात्मन उचितानि योग्यानि देवतानमस्कारादीनि ॥ ४३ ॥

त्रिवृता रेचकपूरककुम्भकात्मकेन गुरुणा विशुद्धत्वात् श्रेष्ठेन ॥ ४४ ॥

सुरेभ्योऽपि सुन्दरम् ॥ ४५ ॥

— — —

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

स्मर्ति वासुदेवे साध्ये वाक्यं साधनप्रतिपादकं वाक्यम् ॥ ३९ ॥

योऽजनन्याऽभिहितो भगवान् वासुदेवः स एव निःश्रेयसः पुरुषार्थस्य पन्थाः पुरुषार्थस्य प्रदः तमेव तत्प्रवणात्मना वासुदेवाभिनिविष्टेन चेतसा भज ॥ ४० ॥

पुरुषार्थानां धर्मादीनां मध्ये यो हि जनः आत्मनः प्रियं धर्मादिकमिच्छेत् तत्र धर्मादिकं साध्यं कारणं साधनं एकं हरेः पादसेवनमेव स जनः कुर्यादिति शेषः ॥ ४१ ॥

तत्र मधुवने हरेः सर्वव्यापकस्यापि नित्यं सांनिध्यम् श्रीमथुरामण्डलं नित्यं वैकुण्ठवत् हरिः प्रकटो वर्तत इत्यर्थः तत्र भागवता अपि नित्यं वसन्ते नित्यदा हरिसांनिध्योपपत्तेः अनेन श्रीमथुरामण्डलस्य भगवत्प्रियत्वं सर्वतीर्थेभ्य उत्कृष्टत्वं शीघ्र भगवत्प्रापकत्वं च दर्शितम् ॥ तथा च श्रुतिः "मथुरायां स्थितिर्ब्रह्मन्सर्वदा मे भविष्यती"ति ॥ ४२ ॥

शिवे मङ्गले मनुस्मवने त्रिकालं स्नात्वा उचितानि कृत्यानि कुर्वीत यमनियमाः उक्ताः कुशादिभिः स्वस्तिकादिभिश्च कल्पितं संपादितमासनं येन सः ॥ ४३ ॥

त्रिवृता पूरककुम्भकरेचकरूपेण प्राणादीनां मलं चापल्यं व्युदस्य अपोह्य गुरुणा सह गुरुं हरिमभिध्यायेत् श्रीगुरुध्यानपूर्वकं श्रीहरिध्यानं कुर्यादित्यर्थः ॥ ४४ ॥

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरा"वि"ति श्रुतेरुभयोर्विशेषणानि प्रसादाभिमुखम् अनुग्रहेऽभिमुखं प्रसन्नं वदनमीक्षणं च यस्य शोभने भ्रुवौ यस्य तम् चारुकपोलं सुन्दरगण्डम् सुरेभ्यः सुन्दरम् ॥ ४५ ॥

— — —

भाषाटीका ॥

मैत्रेयजी बोले तबतो भगवान् नारदजी इस कथन को श्रवण कर के प्रसन्न होकर कृपा कर के उस बालक के प्रति सुन्दर वचन बोले ॥ ३९ ॥

नारदजी बोले तुमारी माताका कहाहुआ मार्ग तुमारे कल्याण करने वाला है भगवान् वासुदेवजी हैं उन मे चित्तलगा कर भजो ॥ ४० ॥

जो पुरुष धर्म अर्थ काम मोक्ष इन के मध्य मे अपने किसी कल्याण को चाहे तो उस मे केवल श्री हरिचरण का सेवनहीं कारण है ॥ ४१ ॥

तिसमे हे तात ध्रुव ! पवित्र मधुवन मथुरा मंडल मे जहां श्री हरिका नित्यनिवास है ऐसे पवित्र यमुना किनारे पर चले जाओ ॥ ४२ ॥

तहां पर तीनो काल मे पवित्र यमुना जल मे स्नान कर के उचित ईश्वर नमस्कारादिक कर के निवास करने के स्थान पर आसन बिछाओ ॥ ४३ ॥

फिर ओंकार से प्राणायाम कर के प्राण इंन्द्रिय के मल को धीरे से दूर कर के गुरु सहित श्री हरिका ध्यान करो ॥ ४४ ॥

कृपा से सदा सन्मुख निरंतर प्रसन्न नेत्र मुख वाले सुंदर नासिका वाले सुंदर भौं वाले सुन्दर कपोल वाले देवतन मे भी सुंदर तरुण अवस्था वाले मनोहर शरीर वाले लाल ओष्ठ अधरवाले परमेश्वर का ध्यान करो ॥ ४५ ॥

— — —

तरुणं रमणीयाङ्गमरुणोष्ठेक्षणाधरम् ।
प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवम् ॥ ४६ ॥
श्रीवत्साङ्कं घनश्यामं पुरुषं वनमालिनम् ।
शङ्खचक्रगदापद्मैरभिव्यक्तचतुर्भुजम् ॥ ४७ ॥
किरीटिनं कुण्डलिनं केयूरवलयान्वितम् ।
कौस्तुभाभरणग्रीवं पीतकौशेयवाससम् ॥ ४८ ॥
काञ्चीकलापपर्यस्तं लसत्काञ्चननूपुरम् ।
दर्शनीयतमं शान्तं मनोनयनवर्द्धनम् ॥ ४९ ॥
पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चताम् ।
हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम् ॥ ५० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

रमणीयान्यङ्गानि यस्य ओष्ठश्च ईक्षणे ईक्षणे च ओष्ठेक्षणं अरुणे ओष्ठेक्षणे धारयतीति तथा तम अरुणमोष्ठमीक्षणं चाधारयतीति वा । नृम्णं सुखकरं यद्वा नृम्णं धनं सर्वपुरुषार्थनिधिमित्यर्थः ॥ ४६ ॥

पुरुषं पुरुषलक्षणयुक्तम ॥ ४७ ॥

कौस्तुभस्याभरणं ग्रीवा यस्य ॥ ४८ ॥

काञ्चीकलापेन पर्यस्तं परिवेष्टितं मनोनयनयोर्वर्धनं हर्षकरम ॥ ४९ ॥

हृत्पद्मकर्णिकाया धिष्ण्यं मध्यस्थानं तदाक्रम्य समर्चतामात्मनि मनसि स्थितम ॥ ५० ॥

————

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

रमणीयाङ्गमिति सुन्दरत्वस्यैवोद्देशः इक्ष्यतेऽनेनेतीक्षणं नेत्रं ज्ञानाविकवचनम पूर्वार्थे नेत्रार्थलक्षणैव प्रतीयत इत्यरुचौ अर्थान्तर नृम्णमिति क्लान्तमं पूर्वार्थे नृम्णशब्दस्य सुखकरत्वरूपोऽर्थोऽप्रसिद्ध इत्यरुचौ यद्वेति धनशब्दस्य पुरुषार्थवाचकत्वं लक्षणया अत एवे त्यर्थ इत्युक्तम (४)॥ ४६ ॥

पुरुषलक्षणयुक्तं द्वात्रिंशन्महापुरुषलक्षणविशिष्टम (५) ॥ ४७ ॥

भूषणभूषणाङ्गमित्युक्तेः कौस्तुभस्याभरणमिति व्याख्यानम (६) ॥ ४८ ॥

शान्तं निर्विकारं मनस इन्द्रियाणाञ्चाणुत्वादृद्धिर्न संगच्छते इति मुख्यार्थबाधः वृद्धिहर्षयोः कार्यकारणभावः सम्बन्धः हर्षातिशयः प्रयोजनमित्यभिप्रेत्य हर्षकरमिति व्याख्यानम (७)॥ ४९ ॥

मनसि स्थितं स्फुरन्तम एतत्पर्यन्तं सविशेषणधारणा वर्णनम् ॥ ५० ॥

————

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

[illegible]ल रमणीयान्यङ्गानि यस्यतमधरोष्ठलक्षणाख्याम अध-[illegible]रुणो यस्यतमरुणोष्ठेक्षणाधरमितिपाठान्तरतदा अरुणमोष्ठमीक्षणं चाधारयतीतितंप्रणतैर्भक्तैराश्रयणं साश्रयणीयं नृम्णं सुखरूपं यद्वा नृम्णं धनं सर्वपुरुषार्थनिधिमित्यर्थः शरण्यं समीहितोपायत्वेनाध्यवसनीयं करुणानिधिम ॥ ४६ ॥

श्रीवत्समङ्कं चिन्हं यस्य घनश्यामं नीलाम्बुदश्यामं पुरुषं पुरुषलक्षणयुक्तं वनमाला अस्यास्तीति वनमाली तं शंखादिभिरभिव्यक्ताः शोभमानाश्चत्वारो भुजा यस्य तम ॥ ४७ ॥

किरीटमस्यास्तीति तं कुण्डलेऽस्यस्त इति तं केयूराभ्यां वलयाभ्यां च युक्तं कौस्तुभाख्यमाभरणं ग्रीवायां यस्य तं पीतंकौशेयं वासो वसनं यस्य तम ॥ ४८ ॥

काञ्चीकलापेन पर्यस्तं परिवेष्टितं लसत्काञ्चने नूपुरे यस्य तम अतिशयेन द्रष्टुं योग्यं शान्तम अनुप्रेक्षितॄणां मनसो नयनयोश्च वर्द्धनं हर्षकरम् ॥ ४९ ॥

नखा एव मणयस्तेषां श्रेण्या पङ्क्त्या विलसद्भ्यां युक्तं समर्चतां हृत्पद्मकर्णिकाधिष्ण्यं मध्यस्थानं तदाक्रम्य समर्चतां आत्मनि स्थितम ॥ ५० ॥

————

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

अरुणत्वलक्षणापनाय पुनरीक्षणं कचिद्धरिं पीतवर्णं कचि-त्कृष्णम् ॥ ४६ ॥

कचिद्घनवत् श्यामं नीलं पुरुषलक्षणसामर्थ्यसूचनाय पुरुष-ग्रहणम् ॥ ४७ ॥ ४८ ॥

कलापोभूषणं बर्हइति वचनात् काञ्चीकलापेन पर्यस्तं संवे-ष्टितम ॥ ४९ ॥

नखमणिश्रेण्या विलसद्भ्यां पादाभ्यां समर्चतां भक्तानामात्मनि मध्यवर्ति हृदयपद्मकर्णिकाधिष्ण्यमाक्रम्यावस्थितम् ॥ ५० ॥

————

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

ओष्ठमुपरि अधरस्त्वधस्तात् नृम्णमिति छान्दसम् ॥ ४६ ॥

पुरुषं पुरुषस्य भगवतो लक्षणैरन्वितमित्यर्थः । शङ्खादिभिः सर्वत्र विख्याताश्चत्वारो भुजा यस्य तम् ॥ ४७—४९ ॥

स्मयमानमभिध्यायेत् सानुरागावलोकनम् ।
नियतेनैकभूतेन मनसा वरदर्षभम् ॥ ५१ ॥
एवं भगवतो रूपं सुभद्रं ध्यायतो मनः ।
निर्वृत्या परया तूर्णं सम्पन्नं न निवर्त्तते ॥ ५२ ॥
जप्यश्च परमो गुह्यः श्रूयतां मे नृपात्मज !
यं सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरान् ॥ ५३ ॥
ॐ नमो भगवते वासुदेवाय ।
मन्त्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः ।
सपर्यां विविधैर्द्रव्यैर्देशकालविभागवित् ॥ ५४ ॥
सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः ।
शस्ताङ्कुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुम् ॥ ५५ ॥
लब्ध्वा द्रव्यमयीमर्चां क्षित्यम्ब्वादिषु वार्चयेत् ।
आभृतात्मा मुनिः शान्तो यतवाङ् मितवन्यभुक् ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

कलापैर्विन्यस्तमिति चित्सुखः ॥ ४९ ॥
आत्मन्यवस्थितं मनसि स्फुरन्तम् ॥ ५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

ऊर्ध्वाधः स्थितौ दन्तच्छदावोष्ठाधरावुच्यते प्रणतानां माश्रयणं नृणां तेषां घनरूपम् ॥ ४६—४७ ॥
कौस्तुभस्याभरणं ग्रीवा यस्य ॥ ४८ ॥
काञ्चीकलापेन क्षुद्रघण्टिकासमूहेन । पर्यस्तं परिवेष्टितम् ॥४९॥
समर्चतां भक्तानां धिष्ण्यं स्थानम् । आत्मनि बुद्धौ जीवे च ॥५०॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तरुणं षोडशवार्षिकम् रमणीयान्यङ्गानि यस्य अरुणे ओष्ठ अधरे आदधातीति तम् नृणां घनं चिन्तामणिवदभीष्टप्रदमित्यर्थः ॥ ४६ ॥

श्रीवत्समङ्कं चिह्नं यस्य तम् शङ्खादिभिः अभिव्यक्ता उपलक्षिताश्चत्वारो भुजा यस्य तम् ॥ ४७ ॥

केयूरैः कटकैश्चान्वितम् कौस्तुभरूपमाभरणं ग्रीवायां यस्य तम् ॥ ४८ ॥

काञ्चीकलापेन पर्यस्तं परिवेष्टितम् । मनोनयनयोर्वर्द्धनमुत्साहकरम् ॥ ४९ ॥

पश्यतां समर्चतां हृत्पद्मकर्णिकैव धिष्ण्यमासनमाक्रम्याधिष्ठितम् । आत्मनि जीवे चावस्थितमित्यन्वयः आविर्भवति जीवस्वरूपं आराग्रपरिमाणो जीवनियमनार्थं चतिष्ठति तमिति अन्तः प्रविष्टः शास्ता जनानामिति श्रुतेः ॥ ५० ॥

भाषाटीका

प्रणाम करने वालों को आश्रय करने के योग्य सबके सुखदायक शरणागत के रक्षक करुणानिधि श्रीवत्सका जिनके वक्षस्थलमें चिह्न है मेघके तुल्य श्याम वर्ण है वनमाला धारण किये दिव्य पुरुषरूप है शङ्ख चक्र गदा पद्म से चारों भुजा जिनके प्रकाशमान हैं किरीट कुण्डल बाजूबन्द कङ्कण तथा कण्ठ में कौस्तुभमणि इनको धारण किये हैं पीताम्बर को पहरे हैं कमर में क्षुद्र घण्टिकों को धारण किये हैं सुवर्णकी नूपुरों से शोभित हैं दर्शन करने के अत्यन्त योग्य शान्त विग्रह मन तथा नेत्रके तृप्त करने वाले नखरूपी मणियों की पंक्तिसे शोभायमान, चरणों से पूजन करने वाले भक्तों के हृदयकमलको आक्रमण करके विराजमान हैं ॥ ४६—५० ॥

श्रीधरस्वामिकृत भावार्थदीपिका

ध्यानमाह । स्मयमानमिति । नियतेन प्रागुक्तया धारणया सुस्थिरेण अतएव एकभूतेन एकाग्रेण धारणोक्तानि विशेषणानि ध्यानेऽपि द्रष्टव्यानि । यद्वा यथोक्तमात्रमेव । तदुक्तमेकादशस्कन्धे । नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखमिति ॥ ५१ ॥

समाधिमाह । एवमिति । तूर्णं शीघ्रं सम्पन्नं सत् ॥ ५२ ॥

जप्यो मन्त्रः ॥ ५३ ॥ ५४ ॥

द्रव्याण्येवाह । सलिलैरिति । शस्तैर्दूर्वाङ्कुरैः । वन्यैरेवांशुकैः भूर्जत्वगादिभिः ॥ ५५ ॥

पूजाया अधिष्ठानमाह । लब्ध्वा सम्पाद्य द्रव्यमयीं शिलादिभिर्निर्मिताम् अर्चां प्रतिमां पूजासादगुण्यहेतूनाह मार्कण्... आभृतात्मा धृतचित्तः मितं वन्यं भुङ्क्ते इति तथा ॥ ५६ ॥

स्वेच्छावतारचरितैरचिन्त्यनिजमायया ।
करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगमम् ॥ ५७ ॥
परिचर्या भगवतो यावत्यः पूर्वसेविताः ।
ता मन्त्रहृदयेनैव प्रयुञ्ज्यान्मन्त्रमूर्त्तये ॥ ५८ ॥
एवं कायेन मनसा वचसा च मनोगतम् ।
परिचर्यमाणो भगवान् भक्तिमत्परिचर्यया ॥ ५९ ॥
पुंसाममायिनां सम्यग्भजतां भाववर्द्धनः ।
श्रेयो दिशत्यभिमतं यद्धर्मादिषु देहिनाम् ॥ ६० ॥
विरक्तश्चेन्द्रियरतौ भक्तियोगेन भूयसा ।
तं निरन्तरभावेन भजेताद्धा विमुक्तये ॥ ६१ ॥
इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः ।
ययौ मधुवनं पुण्यं हरेश्चरणचर्चितम् ॥ ६२ ॥
तपोवनं गते तस्मिन् प्रविष्टोऽन्तःपुरं मुनिः ।
अर्हितार्हणको राज्ञा सुखासीन उवाच तम् ॥ ६३ ॥

नारद उवाच ।

राजन् ! किंध्यायसे दीर्घं मुखेन परिशुष्यता ।
किं वा न रिष्यते कामो धर्मोवार्ऽथेन संयुतः ॥ ६४ ॥

राजोवाच ।

सुतो मे बालको ब्रह्मन् ! स्त्रैणेनाकरुणात्मना ।
निर्वासितः पञ्चवर्षः सह मात्रा महान् कविः ॥ ६५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यत् करिष्यतीति तदानीमवतारप्राचुर्याभावात् ॥ ५७ ॥

पूर्वसेविताः सेवनं कारिताः कार्यत्वेन विहिता इत्यर्थः मन्त्रहृदयेन द्वादशाक्षरेण ॥ ५८ ॥

एवमुक्तरीत्या मनोगतं यथा भवति तथा कायादिभिर्भक्तिमत्या परिचर्यया परिचर्यमाणोधर्मार्थकामेषु यदभिमतं तच्छ्रेयो दिशतीति द्वयोरन्वयः ॥ ५९—६० ॥

विरक्तः सन्भजेत् किमर्थम् मुक्तये ॥ ६१ ॥

हरेश्चरणाभ्यां चर्चितं मण्डितम् ॥ ६२ ॥

अर्हितं सत्कृत्य समर्पितमर्हणमर्घ्यादिकं यस्मै ॥ ६३ ॥

किं वा न रिष्यते न नश्यतीति सवितर्कः प्रश्नः ॥ ६४ ॥

मात्रा सह निर्वासित इति तस्याप्यनादृतत्वात् ॥ ६५ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

स्फुरत्वादेव पूर्वार्धे विशेषणसाम्ये धारणाध्यानयो-
र्भेदोऽस्फुट इत्यरुचौ यद्वेति ॥ ५१ ॥

न निवर्त्तेत ध्येयाकारेण परिणमतीत्यर्थः तदुक्तं योगशास्त्रे

मनसो वृत्तिशून्यस्य ब्रह्माकारतयास्थितिः ।
याऽसंप्रज्ञातनामासौ समाधिरभिधीयते

इति ॥ ५२ ॥

प्रपठन् वाचिकमपि जपन् किमुतोपांशु मानसं वा पुमानिति सर्वाधिकारता सूचिता खेचरान् पार्षदान् ॥ ५३ ॥

अथ दक्षिणाकर्णे मन्त्रमुपदिशति ओंमिति । ओंकाररूपाख्याय षड्ऐश्वर्यपूर्णाय श्रीवसुदेवनन्दनाय विशुद्धसत्त्वे प्रकाशमानाय च नम इति सप्रणवानामपि वैष्णवमन्त्राणां द्विजत्वाद्यनपेक्षत्वं सिद्धान्तितम् ध्रुवस्यानुपनीतत्वात् द्रव्यमयीं द्रव्यैकसाध्यां सपर्यां पूजां देशकालविभागविदिति श्रीवृन्दावनादिदेशे वसन्तादिकाले तत्तदुचितसेवां कुर्यादित्यर्थः ॥ ५४ ॥

वन्यैर्गन्धधूपादिभिः अर्चेदिति पाठान्तरम् ॥ ५५ ॥

लब्ध्वेत्यस्यार्थकम अर्चां श्रीमत्प्रतिमां क्षित्यम्बरादिषु वेत्यर्चाविग्रहाणां द्रव्यवर्णनम् ॥ ५६ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

आर्मूतेति सार्द्धकम हृदयं गतं मनोहरं चरितम् ॥ ५७ ॥

पूर्वैः कार्य्यत्वेन विहिताः सदाचारलब्धा इत्यर्थः परिचर्य्याः पूजासामग्र्यः गन्धचन्दनाद्याः छत्रचामराद्याश्च यावत्यः सन्ति ॥ ५८ ॥

एवमिति युग्मकम् मनोगतं मनसि प्रविष्टं यथास्यात्तथा मनो दृश्येत्यर्थः भक्तिमत्या श्रवणकीर्त्तनादियुक्तया परिचर्य्यया परिचर्य्या तु सेवोपकरणादिपरिष्क्रियेति लक्षणाक्रान्तया परिचर्य्यमाणः सेव्यमानः अमायिनां निष्कामानाम् अत एव सम्यग्भजतान्तु आत्मिन्भावं रतिमेव वर्द्धयति ॥ ५९ ॥ ६० ॥

भूयसा निष्कामेन भक्तियोगेन श्रवणकीर्त्तनादिचेष्टारूपया भक्त्या इन्द्रियरतौ विरक्तस्सन् तं भगवन्तं निरन्तरं ज्ञानाद्यनावृतो यो भावः दास्याद्येकतमस्तेन साक्षादेव भजेत सेवेत न तु शिष्यपुत्रादिद्वारा तत्र फलमाह। विमुक्तय इति। विशिष्टा मुक्तिर्हि स प्रेमपार्षदत्वलक्षणा तस्यै तदुक्तं श्रीरसामृतसिन्धौ ॥ धर्नाशिष्यादिभिर्द्वारैर्या भक्तिरुपपाद्यते। विदूरत्वादुत्तमता हान्या तस्याश्च नाङ्गतेति ॥ ६१ ॥

हरेश्चरणार्चितमिति प्रतिकल्पं श्रीकृष्णस्य तत्राविर्भावात् अप्रकटत्वेनापि नित्यं तत्र वर्त्तमानत्वाच्च ॥ ६२ ॥ ६३ ॥ ६४ ॥

तस्या मातुरत्यनादरत्वादिति अनादृतत्वमेव निर्वासितत्वेनो त्प्रेक्षितम् ॥ ६५ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिका।

स्मयमानमीषद्धसन्तम् अनुरागयुक्तोऽवलोको यस्य पुरुषांस्तमं नियतेन विजातीयप्रत्ययरहितेन एकभूतेन एकाग्रेण मनसा अभितः पादादिशिरः प्रभृतिध्यायेत् ॥ ५१ ॥

एवं ध्येयमाकारमभिधायैतदशुभाश्रयध्यानसुखितं मनस्तत स्तूर्णं न निवर्तयेदित्याह। एवमिति। सुभद्रं निरतिशयमङ्गलं गुणाकरं ध्यानविषयं भगवतो रूपमभिध्यायेदिति शेषः परया निर्वृत्या निरतिशयेन सुखेन संपन्नं युक्तं मन इति शेषः तूर्णं न निवर्त्तते यद्वा परया निर्वृत्या संपन्नं मनस्तूर्णं यथा न निवर्त्तते तथा भगवतो रूपं ध्यायेदिति क्रियाविशेषणत्वानुषङ्गाभ्यां योजनीयम् ॥ ५२ ॥

एवमष्टाङ्गयुक्तं भक्तियोगमभिधाय तदनुग्राहिकां द्रव्यमयीं सपर्यामभिधास्यन् तदुपयुक्तं जप्यं मन्त्रं सप्रमाणमाह। जप्यश्चेति हे नृपात्मज! परमो निरतिशयः अत एव गुह्यो गोपनीयः मन्त्रः मे मत्तः श्रूयतां यं मन्त्रं पुमान्सप्तरात्रं प्रपठन् प्रजपन् खेचरान् पश्यति ॥ ५३ ॥

कोऽसौ मनुरित्यत आह। ओमिति। अयं वासुदेवद्वादशाक्षरो मन्त्रः अस्यार्थस्तु संप्रदायतोऽवगन्तव्यः एतन्मन्त्रपूर्वकद्रव्यमयीमर्चामाह। मन्त्रेणेति। देवस्य अनेन मन्त्रेण नाना विधैर्द्रव्यैः द्रव्यमयीं द्रव्यप्रचुरां सपर्यां देशकालयोः सपर्योपयुक्तानुपयुक्तदेशकालयोर्विभागं वेत्तीति देशकालविभागवित्कुर्यात्सपर्योपयुक्तो देशः चण्डालपतितयवनाद्यसेवितः कालस्तु प्रातर्मध्यंदिनसायाह्नादिरूपः तद्वितराव नुपयुक्तौ देशकालौ ॥ ५४ ॥

क्रियामयाह। सलिलैरिति। शुचिभिरिति सलिलादिभिः सर्वैर न्यैर्वा वन्यैः वनेषु भवैः शस्तांकुरांशुकैः प्रशस्तैर्दूर्वांकुरैर्वन्यैरंशुकैः भूर्जत्वगादिभिः प्रियया भगवतः प्रीतिविषयया तुलस्या हरिमर्चयेत् आराधयेत् ॥ ५५ ॥

एवं द्रव्यमयीमर्चां लब्ध्वा संपाद्य शिलामयादिषु वा काञ्चनमण्डलादिभिरलंकृतायां क्षितौ गङ्गाजलादिषु आदित्यादिषु वाग्न्यादिष्वथवा मंडलादिषु च अर्चयेत् पूजासाङ्गुण्यहेतूनाह। सात्त्विकैर्या आत्मनात्मा आहृतचित्तः मुनिः ध्यानानुपयुक्तदशासु शुभाश्रयसंशीलनपरः शान्तः जितेन्द्रियः यतवाक् मितभाषणः मितं यथाभवति तथा वन्यंभुञ्जन् इति तथा ॥ ५६ ॥

स्वेच्छावतारचरितैः स्वेच्छयैवोपात्तानन्तकर्माणो ये अवतारा वराहादयस्तेषां चरितैः व्यापारैः निजमायया आत्मीयसंकल्पेन उत्तमश्लोको भगवान् यत् अचिन्त्यं कर्म वद्यदेवमनुष्यादिसजातीयत्वेन चिन्तयितुमशक्यं साधुपरित्राणदुष्कृतविनाशनादिकं करोति तं हृदयंगमं मनोहरं ध्यायेत् तदानीमवतारप्रादुर्भावाभावात्करिष्यतीति भविष्यन्निर्देशः ॥ ५७ ॥

यावत्यो भगवतः परिचर्याः पूर्वसेविताः सेवनं कारिताः कार्यत्वेन विवक्षितास्ताः सर्वा मन्त्रहृदयेनैव द्वादशाक्षरमन्त्रानुसन्धानयुक्तमनसैव मन्त्रः मूर्तिर्विग्रहो यस्य तस्मै भगवते प्रयुञ्ज्यात् युक्ताः कुर्यात् ॥ ५८ ॥

एवमाराधितो भगवान् आराधकानां समीहितधर्मादिश्रेयो दिशतीत्याह। एवमिति द्वाभ्याम्। अमायिनामवञ्चकानामत एव सम्यक् भजतां कर्मायत्तदेहभृतां पुंसां मानवर्द्धनः सम्मानकारी भगवान् भक्तिमती यापरिचर्या तया परिचर्यमाणः धर्मादिषु यद्याराधकाभिमतन्तच्छ्रेयो दिशतीत्युभयोरन्वयः ॥ ५९—६० ॥

एवं धर्मादिसाधारणयेन तत्साधनभूता भक्तिरभिहिता तत्र मुक्तिसाधनभूतायां भक्त्यां विशेषं वदन्नुपसंहरति। विरक्त इति। इन्द्रियरतौ इन्द्रियसाध्यक्रीडायां विरक्तः निरन्तरभावेन विजातीयप्रत्ययान्तराव्यवहितप्रत्ययेन भूयसा बह्वङ्गोपकृतेनाप्रयाणादनुवर्तमानेन भक्तियोगेन प्रेमात्मकानुध्यानरूपेण "प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते" इति हि स्मृतिः अत्र हि विरक्त इति विमोकोक्त्या साधनसप्तकं विवक्षितं भूयसेत्यनेन ज्ञानयोगशमदमवाल्यपाण्डित्यमौनादयो विवक्षिताः एवंभूतेन भक्तियोगेन विमुक्तये तं भगवन्तमद्धा साक्षाद्भजेत् अद्धेत्यनेन सद्वारकोपासनं व्यावर्त्तितम् ॥ ६१ ॥

एवमुपदिष्टभगवदाराधनप्रकारो ध्रुवो मधुवनं गतवानिति वदन्नन्तरा नारदोत्तानपादयोः सम्वादमाह। इतीत्यादिना। इत्युक्तरीत्या उक्तः नृपार्भको ध्रुवः तं नारदं परिक्रम्य प्रदक्षिणीकृत्य प्रणम्य च हरेर्भगवतश्चरणाभ्यां चर्चितं सञ्चारितमत एव पुण्यं मधुवनं ययौ ॥ ६२ ॥

तस्मिन् ध्रुवे तपोवनं गते सति मुनिर्नारदः अन्तःपुरं प्रविष्टः राज्ञा उत्तानपादेन अभ्यर्हितं सत्कृत्य समर्पितमर्हणमर्घ्यादिकं यस्य सः सुखासीनः सुखावहे आसने यथासुखमासीनो नारद उवाच ॥ ६३ ॥

हे राजन्। परितः शुष्यता मुखेन दीर्घं किं ध्यायसे अर्थेन संयुतः सहितः कामो धर्मश्च च शब्दो वाशब्दार्थः धर्मो वा किं न रिष्यति न नश्यतीति सवितर्कः प्रश्नः ॥ ६४ ॥

एवमुक्तो राजाह। सुत इति। हे ब्रह्मन्! स्त्रैणेन स्त्रीषु भवः स्त्रैणः स्त्रीणामयमिति वा स्त्र्यधीनेन स्त्रीनिर्जितेनेति यावत् अत एवाकरुणात्मना करुणारहितचित्तेन मया मे मम सुतः सुत ... त्यनेन अपरित्याज्यता गम्यते पंचवर्षइत्यनेन नितरां मात्रा सहनिर्वासितः

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

तस्या अत्यन्तासक्तत्वेन निर्वासितप्रायत्वात्मात्रा सहेत्युक्तिः तथा च मातापुत्रयोः परित्याज्यता स्मृता "वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्,, इति ननु त्यजेदेकं कुलस्यार्थे इत्युक्तरीत्योत्पथप्रवृत्तसुतोऽपि त्याज्यएव तत्राह महान् कविः महान् विनयादिगुणसम्पन्नः कविः बुद्धिमान् ॥ ६५ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

मनसैवं विधं भगवतोरूपं ध्यायेदित्यन्वयः किं विशिष्टेन मनसा नियतेन परिणततयाऽभ्यस्ततया प्राप्तपरिपाकत्वेनैकस्मिन्ध्येये वस्तुनि भूतेन बाह्यविषयाभिनिवेशरहितेन ॥ ५१ ॥

निवृत्तोद्रिक्तानन्देन संपन्नं पूर्णं ध्येयादितरत्र न निवर्तते न गच्छति ॥ ५२ ॥

जप्योमन्त्रः ॥ ५३ ॥

द्रव्यमय्यां द्रव्यप्रधानायामर्चापूजा सपर्येत्यादिरभिधानम्॥५४

द्रव्याण्याह । सलिलैरिति वन्यैर्वनभवैः ॥ ५५ ॥

द्रव्यमय्यामर्चा शिलादिप्रतिमायामर्चा तु प्रतिमा प्रोक्ते त्यभिधानं स्मृतेः स्थण्डिलेऽम्बरादिशब्दादादित्यमण्डलेऽग्नौ वा आहृतात्मा विषयेभ्यः आकृष्य वशीकृतमनाः मितं नियतार्थं फलमूलादिवन्यं भुङ्क्ते इति मितवन्यभुक् ॥ ५६ ॥

निजमायया स्वरूपभूतमहिम्ना स्वेच्छया कृतावतारस्तस्य चरितैः कंसवधादिलक्षणैश्चरितं गुणसमूहं हृदयङ्गमान् यान् विभुर्विक्रमान् करिष्यति तान् ध्यायेदित्यन्वयः ॥ ५७ ॥

परिचर्यादि संक्षिप्य तत्करणप्रकारं वक्ति । परिचर्या इति । याज्ञवल्क्यः पूर्वाचार्यैः कल्पितास्ता मन्त्रहृदयेन मन्त्रेण (*) नमःशब्देन च ओं नमोभगवते वासुदेवायेत्यनेन मन्त्रमूर्तये मन्त्रात्मप्रतिपाद्यवासुदेवाय प्रयुञ्ज्यात्कल्पयेदित्यन्वयः ॥ ५८ ॥

एवं विधोपासनाफलमाह । एवमिति । भक्तिमन्तः सन्तस्तेषां परिचर्यया शुश्रूषया देहिनां धर्मादिषु यदभिमतं श्रेयस्तदिशतीत्यन्वयः ॥ ५९—६० ॥

सर्वस्मात्साधनाद्वैराग्यभक्तौ मुक्तिसाधने इत्याशयेनाह । विरक्तश्चेति । तयोरवश्यकर्तव्यत्वं चशब्दः इन्द्रियरतौ विषयभोगविरक्तः ॥ ६१ ॥

उत्तरकथा प्रसङ्गमाह । इत्युक्त इति ॥ ६२ ॥

तस्मात्स्वयं कथा पुनर्नारदः कुत्रायासीदित्याह । तपोवनमिति । अर्हणया पूजासाधनेनार्चितः पूजितः ॥ ६३ ॥

न रिष्यते न हिंस्यते ॥ ६४ ॥

नारदेन पृष्टं राजोत्तरमाह । सुतोमदिति । निर्वासितः निष्कासितः कविरित्यनेन ज्ञानित्वं द्योतयति ॥ ६५ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अभिध्यायेत्तदुद्दिशञ्चेन चिन्तयेदित्यर्थः ॥ ५१ ॥

न निवर्तते ध्येय न त्यजति ॥ ५२ ॥

प्रपठन् वाचिकमपि जपन् किमुतोपांशु मानसं वा स्वराट् पार्षदान्

अथ दक्षिणाकर्णे रह उपदिशति । ओमिति । अनेनानुपनीताय ध्रुवाय सप्रणवमहामन्त्रोपदेशेन वैष्णवमन्त्राणां द्विजस्याद्यवस्थापेक्षा परिहृता ॥ ५३—५४——५५ ॥

लब्ध्वेत्यर्धकम् अर्चा श्रीमतप्रतमाम ॥ ५६ ॥

आभृतेति सार्धकम् । आहृतेति चित्तसुखः शान्तो मितवन्यफलादिभोगीति चित्तसुखः ॥ ५६—५७ ॥

पूर्वसेविता इति सम्पन्नमात्रानुशीलने तत्रात्र श्रवणं ततो विष्णुप्रयोगात् पूर्वं सलिलैरित्यादिना आविता इत्यर्थः । पूर्वैः सेविताः सदाचारलब्धा इति वा ॥ ५८ ॥

एवमिति युग्मकम् । अपवर्गमात्रस्यापि दाने कारणमाह । भावयुक्तेन इति । तत्तदुपकारेण तस्मिन् भक्तिं वर्धयतीति ॥ ५९--६० ॥

अतस्तेभ्यो विरक्तो भजेत् । किमर्थं विशिष्टा मुक्तिर्भक्तिस्तदर्थम् ॥ ६१—६२ ॥

अर्हतः अर्हणायेति चित्तसुखः ॥ ६३—६४--६५ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

नियतेनासक्तेन एकं भूतेन एकाग्रेण ॥ ५१ ॥

न निवर्तते योगिनो मन इव ध्येयं न त्यजति ॥ ५२ ॥

जप्योमन्त्रः श्रुणतां दक्षिणाः सखा आचार्यतामपदिशामीत्यर्थः प्रपठन् वाचिकमपि जपन् किमुतोपांशुमानसं वा । स्वराट् पार्षदान् ओमिति अनेनानुपनीताय सप्रणवमहामन्त्रोपदेशेन वैष्णवमन्त्राणां द्विजत्वाद्यवस्थापेक्षापहृता ॥ ५३--५४ ॥

तत्रैवाशुकैर्मङ्गल्यगार्हस्थ्यैः ॥ ५५ ॥

द्रव्यमयी शिलादिनिर्मितामर्चा प्रतिमा प्राप्य तामर्चयेत पुनः स्थण्डिलादिष्वपि ॥ ५६ ॥

आभृतात्मा सम्यगाहृतचित्तः । यत् करिष्यतीति तदानीमवतारप्राचुर्याभावात् ॥ ५७ ॥

पूर्वसेविताः पूर्वपूर्वभक्तैरनुष्ठितास्ताः परिचर्याः गन्धचन्दन ताम्बूलछत्रचामरादीनां सर्वद्रव्याणां मन्त्रहृदयेनैव मूलमन्त्रोच्चारणेन मनसा प्रकल्पयेदिति सर्वोपचारैरित्यर्थः । विशेषाक्य प्रस्तुततत्तद्वस्त्वभावादिति भावः । मन्त्रमूर्तये मन्त्रेणैव ध्याता मूर्तिर्यस्य तस्मै तं प्रसादयितुं प्रयुञ्ज्यात विदधीत ॥ ५८ ॥

एवमुक्तरीत्या मनोगतं यथा स्यात्तथा कायादिभिर्भक्तिमत्या श्रवणकीर्तनादिभक्तियुक्तया परिचर्यया धर्मादिषु मध्ये यदभिमतं तदाशिषः ददाति ॥ ५९-६० ॥

यस्तु इन्द्रियरमणे त्रिवर्गे विरक्तः चकारात्मोक्षेऽपि स च निरन्तरं ज्ञानकर्मादिव्यवधानशून्यो भावो दास्यादिर्यत्र तेन । विशिष्टमुक्तये प्रसवत् परमेश्वराय ॥ ६१ ॥

हरेः प्रतिकल्पमाविर्भावात् श्रीकृष्णस्य चरणाभ्यां वर्धितम ॥ ६२ ॥

अर्हितं सत्कृत्य समर्पितमर्हणमर्घ्यादि यस्मै ॥ ६३ ॥

न रिष्यति न नश्यति किं वेति स वितर्कः प्रश्नः ॥ ६४ ॥

सह मात्रेति तस्या अत्यन्तासक्तत्वात् ॥ ६५ ॥ ६६ ॥

———

(*) मन्त्रहृदयेनेत्यत्र मन्त्रस्य हृदयेनेत्यन्यथा प्रतीतिवारणाय तात्पर्यानुसारेण व्याख्याति । मन्त्रेण नमःशब्देनेति नमःशब्द इति मन्त्रोद्धारप्रन्थे प्रसिद्धर्नमोनमन्त्रेणेत्युक्तमधीतम् ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

नियतेन विषयेभ्यो निरुद्धेन एकभूतेनैकाग्रेण मनसा स्मयमानं मन्दहासितयुक्तम् अभिध्यायेत् ॥ ५१ ॥

ध्यानोक्ताध्यङ्गान्युक्त्वा समाधिमाह। एवं सुभद्रं भगवतो रूपमभिध्यायतो मनः परमया ध्यानजन्यया निर्वृत्या सुखसंपत्त्या मूर्त्या शीघ्रं संपन्नं सत् ततो न निवर्तते ॥ ५२ ॥

एवमष्टाङ्गं भगवद्भजनयोगमुक्त्वा जप्यं मन्त्रं द्रव्यमयीं सपर्यां चाह। जप्यश्चत्यादिना। जप्यः जपनीयो मन्त्रः ॥ ५३ ॥

सपर्य्यां, पूजाम् ॥ ५४ ॥

द्रव्याण्याह। सलिलैरिति। शस्ताङ्कुरांशुकैः मुखसाध्यैरङ्कुरैः दूर्वाङ्कुरैः अंशुकैः भूर्जत्वगादिरूपैर्वस्त्रैः ॥ ५५ ॥

एवं द्रव्यमयीमर्चां लब्ध्वा संपाद्य क्षित्यम्बादिषु आदिशब्देन गुरुमनोऽग्न्योमादिषु अर्चयेत् आभृतः इतरविषयेभ्यो निवारित आत्मा चित्तं येन सः मुनिर्मन्ता भगवत्तत्त्वावगन्ता शान्तः भगवदाराधनेतरचेष्टाशून्यः शान्त उपासीतेति श्रुतेः मितमल्पं वन्यं फलादिकं भुङ्क्ते इति मित वन्यभुक् ॥ ५६ ॥

स्वानां भक्तानां स्वस्यैव वेच्छया येऽवतारा भविष्या नृहरिवराहपृथिप्रभृतयस्तेषां चरितैःअचिन्त्यया अतर्क्यया निजमायया निज ज्ञानेन स्वसंकल्पेन"माया च वयुनं ज्ञान,,मिति निघण्टुः अचिन्त्या वानिजेषु स्वानन्यभक्तेषु माया कृपा तया वा "माया दम्भे कृपायां च,,ति विश्वः यदुत्तमश्लोकः करिष्यति, तच्चकासिद्धं हृदयंगमं मनोहरं ध्यायेत् ॥ ५७ ॥

भगवतो यावत्यः पूर्वसेविताः प्रथमं वर्णिताः परिचर्य्यास्ताः सर्वा मन्त्रहृदयेन वासुदेवमन्त्रेण मन्त्रमूर्तये मन्त्रो मूर्तिर्यस्य तस्मै प्रयुञ्जयात् ॥ ५८ ॥

एवं भक्तिमत्कर्तृका या परिचर्य्या तया कायादिभिः परिचर्यमाणो भगवान् अमायिनामवञ्चिमनां पुंसां धर्मादिषु धर्मार्थकाममोक्षेषु यदभिमतं श्रेयस्तदेव दिशति तत्रापि सम्यग्भजतां मनोगतम कथनीयं मुक्तेरपि गरिष्ठं पुत्रत्वादिरूपे स्वस्मिन् भावमित्यर्थः यतो भावखर्जनाऽतो दिशतीति द्वयोरन्वयः अनेनैवाभिप्रायेण मुक्ति ददाति कर्हिचित् स्म न भक्तियोगं भक्तिः सिद्धेर्गरीयसीत्यादिवाक्यानि सुसंगतानीति ज्ञेयम ॥ ५९—६० ॥

मुमुक्षोर्मुख्यं कृत्यमाह। इन्द्रियरतौ विरक्तः सन् भूयसा भक्तियोगेन तमभाह। निरन्तरभावेन ध्रुवास्मृतिलक्षणेन विमुक्तये भगवद्भावापत्तये तं भगवन्तमद्धा साक्षादुपासनया भजेदिति ॥ ६१ ॥

चरणाङ्कितम् चरणाभ्यां मण्डितम् ॥ ६२ ॥

अर्हितमर्पितमध्यर्हणमर्घ्यादि यस्मै सः ॥ ६३ ॥

न दिष्ट्यैन महीयते किम् ॥ ६४ ॥

मात्रा सह महान् कविः अनेन पुत्रसहितायाः सुनीतिदेव्या वित्यं शास्त्रभवणं गम्यते आदराभावेन मयैव निर्वासितः ॥ ६५ ॥

भाषाटीका ॥

भक्तों पर अनुराग सहित कृपा कटाक्ष को प्रगट करते हुये मन्दहासयुक्त वर देने वालों मे श्रेष्ठ श्री नारायण का एकाग्र चित्त से ध्यान करे ॥ ५१ ॥

ऐसे परम मङ्गल भगवान के रूप मे ध्यान करने वाले पुरुष का मन परम सुख को शीघ्र ही प्राप्त होकर उहां से निवृत्त नहीं होता है ॥ ५२ ॥

हे राज पुत्र ध्रुव ! अपने योग्य परम गोप्य एक मंत्र है हमारे मुख के आगे अपना दाहिना कान लगाकर सुनो मै तुम को मंत्र का उपदेश करूंगा जिसको कोइ भी पुरुष सात रात तक पाठ मात्रही करै तो आकाश चारी देवतों का दर्शन पाता है ॥ ५३ ॥

ईश्वर प्रकृति पुरुष वाचकओं कारस्वरूप शुद्ध सत्व गुण मय षड्गुण युक्त वासुदेव भगवान् के अर्थ नमस्कार है यह उस मंत्र का अर्थ है विना संस्कार किये हुये ध्रुवजी को ओंकार वाले मंत्र का उपदेश करने से यह बात निश्चत होता है कि प्रणव वाले भी वैष्णव मंत्रों का उपदेश सबही को होना है ॥ ५३ ॥ (क)

नारद् जी बोले देश काल के भेद को अच्छे जानने वाला चतुर साधक वासुदेव भगवान् की मूर्ति का विविध प्रकार के गंधादिक द्रव्यों से पूजा करे ॥ ५४ ॥

प्रभु श्री हरि कुं जलों से पवित्र पुष्पों की मालों से जंगली फल मूलादिकों से सुंदर अंकुरों से हरि की परम प्रिया तुलसी जी से पूजे ॥ ५५ ॥

द्रव्यमयी शिलादिक आठ प्रकार मे किसी प्रकार की प्रतिमा को गुरू से प्राप्त होकर अथवा जलादिक मे पूजन करे चित्त को एकाग्र करके अगाध मौन से शांत होकर रहे भगवान् का मनन करै वन के फलादिकों का थोडा भोजन करै ॥ ५६ ॥

फिर परमात्मा अपनी अचिंत्य निज दिव्य ज्ञान से इच्छा पूर्वक अवतारों से उत्तम श्लोक भगवान् जो कुछ चरित्र करेंगे उस चरित्र उस मनोहर रूप को ध्यान करै ॥ ५७ ॥

पूर्वाचार्यों से पूजित जो भगवान् की मूर्ति हैं तिन के मध्य मे वेद मंत्र मूर्ति वाले भगवान् को द्वादशाक्षर वासुदेव मंत्र से पूजन करे ॥ ५८ ॥

इस प्रकार दृढ संकल्प से मन वचन शरीर तीनों प्रकार से परम भक्ति युक्त पूजा से यदि भगवान् पूजित होवैं तो कपट छोड कर भजने वालों के प्रेम को बढाने वाले भगवान् धर्मार्थ काम मोक्ष मे जो उपासक पुरुष का प्रिय होवे सो फल देते हैं ॥ ५९ ॥ ६० ॥

यदि इन्द्रियों के भोगों मे विरक्त होवै तो अपने संसार मुक्ति के लिये निरंतर प्रेम रख कर दृढ भक्ति योग से स्वयं अपने शरीर से श्री हरि का भजन करै ॥ ६१ ॥

इतना कहने पर राज पुत्र ध्रुवजी नारद् जी को प्रणाम करके परिक्रमा करके श्री कृष्णचंद्र के चरण चिन्हों से भूषित होने से अति पवित्र मधुवन को चले गये ॥ ६२ ॥

ध्रुव जी के उस तपोवन मथुराकेजाने पर नारद् जी उत्तानपाद राजा के रनवास मे प्रविष्ट हुये राजा के अर्घादिपूजा समर्पण करने पर सुन्दर आसन मे बैठ कर राजा से बोले ॥ ६३ ॥

नारद जी बोले हे राजन् ! क्या बडी देर से चिंता कर रहे हो तुमारा मुख क्यों सूख रहा है क्या तुमरा धर्म अर्थ काम मे कोइ पुरुषार्थ नष्ट हो गया है ॥ ६४ ॥

राजा उत्तान पाद बोले हे ब्रह्मन् ! हमारा बालक पुत्र महात्मा ज्ञानी उस को मैने उस की माता का भी अनादर करके उस को वन को निकाल दिया है मै बडा स्त्री लंपट हूं बडा निर्दयी हूं ॥ ६५ ॥

अप्यनाथं वने ब्रह्मन्! मास्मादन्त्यर्भकं वृकाः ।
श्रान्तं शयानं क्षुधितं परिम्लानमुखाम्बुजम् ॥ ६६ ॥
अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय ।
योऽङ्कं प्रेम्णाऽऽरुरुक्षन्तं नाभ्यनन्दमसत्तमः ॥ ६७ ॥

नारद उवाच

मा माशुचः स्वतनयं देवगुप्तं विशांपते! ।
तत्प्रभावमविज्ञाय प्रावृङ्क्ते यद्यशो जगत् ॥ ६८ ॥
सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः ।
एष्यत्यचिरतो राजन्! यशो विपुलयंस्तव ॥ ६९ ॥

मैत्रेय उवाच

इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः ।
राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिन्तयत् ॥ ७० ॥
तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम् ।
समाहितः पर्यचरदृष्यादेशेन पूरुषम् ॥ ७१ ॥
त्रिरात्रान्ते त्रिरात्रान्ते कपित्थबदराशनः ।
आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन्हरिम् ॥ ७२ ॥
द्वितीयं च तथा मासं षष्ठे षष्ठेऽर्भको दिने ।
तृणपर्णादिभिः शीर्णैः कृतान्नोऽभ्यर्चयद्विभुम् ॥ ७३ ॥
तृतीयं चानयन्मासं नवमे नवमेऽहनि ।
अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ॥ ७४ ॥
चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि ।
वायुभक्षो जितश्वासो ध्यायन्देवमधारयत् ॥ ७५ ॥
पञ्चमे मास्यनुप्राप्ते जितश्वासो नृपात्मजः ।
ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥ ७६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

मास्मादन्ति किञ्चिन्न खादन्तीत्यर्थः ॥ ६६-६७ ॥

येन श्रीहरिणा गुप्तमात्मसात्कृत्वा रक्षितम् यस्य यशो जगत्प्रावृङ्क्ते व्याप्नोति ॥ ६८ ॥

विपुलयन्विस्तारयन् ॥ ६९-७० ॥

ध्रुवो मधुवने किमकरोदित्यपेक्षायामाह । तत्रेत्यादिना । अभिषिक्तः स्नातः यस्यां प्राप्तस्ताम् ॥ ७१ ॥

कपित्थानि बदराणि चाशनं यस्य आत्मवृत्तिर्देहवृत्तिस्तद[illegible] ॥ ७२-७३ ॥

[illegible] च आनयन् ईयादिव नवम्युपाधावदित्यन्वयः प्रतिमास[illegible] तपोऽतिरेकं च कृतवानित्यर्थ ॥ ७४-७५-७६ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

किं स्विदिति अपि किं स्म स्विन् मा खादन्ति मास्वादयुरित्यर्थः ॥ ६६ ॥ ६७ ॥

मामेति । हर्षेण सान्त्वने वीप्सा सर्वथा शोकं मा कुरु व्याप्नोतीति व्याप्स्यति वर्त्तमानसामीप्ये वर्त्तमानवद्वा ॥ ६८ ॥

प्रभावमाह । सुदुष्करमिति ॥ ६९ ॥ ७० ॥

तत्र मधुवने कालिन्द्यां स्नातः ऋष्यादेशेन श्रीनारदोपदेशानुसारेण पुरुषं हरिम् ॥ ७१ ॥ ७२ ॥ ७३ ॥

ईयादिवेति तद्ध्यानावेशेन क्लेशाभासस्स्फुरित: [illegible]

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

चतुर्थमपि मासमभिव्याप्य अधारयत् चित्तं स्थापयामास ॥ ७५ ॥

ब्रह्म बृहत्तमत्वाद्भगवद्रूपम् ॥ ७६ ॥ ७७ ॥ ७८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

हे ब्रह्मन् ! वने क्षुधितं श्रान्तमत एव परितः परिम्लानं मुखाम्बुजं यस्य अत एव शयानमर्भकमनाथं रक्षकहीनं वृकाः मास्मादन्त्यपि मास्म खादन्ति किञ्चिदित्यर्थः ॥ ६६ ॥

आत्मानं निन्दति । अहोइति । स्त्रिया जितस्य मे मम दौरात्म्यं अवधारय निश्चिनु अहोपदेन खेदं दौरात्म्यं दर्शयति योऽहममत्तमः अङ्कमारुरुक्षन्तमारोढुमिच्छन्तं सुतं प्रेम्णा नाऽभ्यनन्दं नाभिनन्दितवानस्मि ॥ ६७ ॥

एवमुक्तो नारदस्तमाश्वासयन्नाह । मेति । हे विशाम्पते! मनुजपते देवगुप्तमिति हेतुगर्भं देवेन ईश्वरेण गुप्तत्वात् रक्षितत्वात् तनयं प्रति तस्य तनयस्य प्रभावमविज्ञाय अज्ञात्वा अविज्ञायेत्यत्र क्त्वा ल्यप् वीत्युपसर्गेण समासे क्त्वो ल्यबादेशे च प्राप्ते नञ्समासः अनो नञ् पूर्वे इति तत्प्रतिषेधः मामाशुचः माशुच इत्यर्थः बीप्सा तात्पर्येण माङ्द्विरुक्तस्य प्रयोगः प्रभावमेव विवृणोति। प्रावृङ्क्ते इति सपादेन श्लोकेन यत् यस्य तव पुत्रस्य यशः जगत् प्रावृङ्क्ते व्याप्नोति ॥ ६८ ॥

प्रभुर्जितेन्द्रियो ध्रुवः लोकपालैरिन्द्रादिभिरपि सुदुष्करं कर्तुमशक्यं कर्म तपसा भगवत्तोषणपूर्वकसर्वोत्कृष्टपदसम्पादनरूपं कर्म कृत्वा अत एव च यशो विपुलयन् विस्तारयन् हे राजन् ! अचिरतः आशु एष्यत्यागमिष्यति ॥ ६९ ॥

एवं नारदेनाभाषितो राजा पुत्रमेवानुचिन्तयन्नासीदित्याह मैत्रेयः। इतीति। इत्येवं देवर्षिणा नारदेन प्रोक्तं विमृश्य सविमर्शमाश्रुत्य जगतीपतिरुत्तानपादः राज्यलक्ष्मीमनादृत्य ध्रुवमेवान्वचिन्तयत् ।७०।

ध्रुवोमधुवने किमकरोदित्यत्राह । तत्रेत्यादिना । अभिषिक्तः स्नातः यमुनायामिति शेषः यस्यां प्रयतः तपसे प्रयततवान् तां प्रथमां रात्रिं तत्र मधुवने उपोष्य विभावरीमित्यन्तसंयोगे द्वितीया उपवसतेरभुक्त्यर्थस्य आधारस्तु वनमिति तत्र तत्रैतिस्मन्नर्मा चोप्या समाहितचित्तः दिष्टादेशेन उपदिष्टमार्गेण पुरुषं परमपुरुषं पर्यचरत् परिपूजितवान् ॥ ७१ ॥

त्रिसृणां रात्रीणां समाहारस्त्रिरात्रं तस्यान्ते कपित्थानि बदराणि च फलानि अशनं यस्य सः आत्मनो देहस्य वृत्तिः स्थितिस्तदनुसारेण देहधारणमात्रोपयुक्ताहारेणेत्यर्थः हरिमर्चयन् मासं निन्ये अतिचक्राम ॥ ७२ ॥

अर्भको ध्रुवः षष्ठे षष्ठे दिने जीर्णैस्तृणादिभिः कृतमन्नं यस्य जीर्णतृणाद्यशनः विभुमर्चयन् द्वितीयं मासं निन्य इत्यनुषङ्गः ॥ ७३ ॥

नवमे नवमेऽहनि अब्भक्षोऽप एव भक्षयन् तृतीयं च मासं नयन् उत्तमश्लोकं भगवन्तं समाधिना उपाधावत् आराधितवान् ॥ ७४ ॥

वायुभक्षः वायुमेव भक्षयन् चतुर्थमपि मासं नयन् जितश्वासः जितप्राणः देवं भगवन्तं ध्यायन् आराधयन् धारणां कृतवान् प्रतिमासमाहारसंकोचं तपोतिरेकं च कृतवानित्यर्थः ॥ ७५ ॥

पञ्चमे मासि त्वनुप्राप्ते जितप्राणो राजसुतः ब्रह्मभगवन्तं ध्यायन् एकेन पदा चरणेन स्थाणुरिव निश्चलो भूत्वा तस्थौ स्थितवान् ॥ ७६ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ॥

यतोऽसौ सिंहासनपदादत्युत्तमपदं साधयामीति निरुत्साहाद् गृहाद् विहाय पुरान्निरगमदित्यत्र मनुमिमानोऽपि राजा तद्गतदुःखमुद्गलयति अत्यनाथमिति ॥ ६६ ॥

एवमनुतप्य स्वदौरात्म्यं मुनिमपि सम्बोधयति अहोइति त्वया किमकारीति तत्राह । योऽङ्कमिति ॥ ६७ ॥

प्रवक्ता नारदस्तु मदाज्ञाभिमानस्य गत (१) त्वादस्य हरिरेव रक्षक इति कृत्वा एवं तं मानुलपत्याह । मामेति। ततोऽप्यनुतापो न गच्छतीत्यतः अज्ञानमूलशोकोऽसावित्याह । तत्प्रभावमिति प्रावृङ्क्ते व्याप्नोति ॥ ६८ ॥

अस्मन्निमित्तवैराग्येण गतः पुत्रो न पुनरेष्यतीति खेदो माभूदित्याह । सुदुष्करमिति । तत्कर्म तस्य ध्रुव (२) स्यैव योग्यत्वात् लोकपालानां दुष्करं ननु तेषामशक्यत्वात् "नाशक्यं देवतानां तु यदन्यैः शक्तितं क्वचित् । शक्ता अपि न कुर्वन्ति यदन्यविहितं बुधा,, इति वचनादपि एवंन सूचनात् ॥ ६९ ॥

एवं विश्रब्धस्यापि राज्ञोऽनुतापपरम्परामाह । इतीति । अनेन संसारस्य दुस्तरस्य दुस्तरत्वमसूचि ॥ ७० ॥

ध्रुवो मधुवनं प्राप्य किमकार्षीदित्याह । तत्रेति । आ (३) देशोपदेशेन नारदोक्तमार्गेण कृतया इष्ट्या (४) निरूपणाया पुरुषं वासुदेवं पर्यचरदित्यन्वयः ॥ ७१ ॥

तस्य तपस्यातिदुष्प्रमासस्याशनप्रकारमाह । त्रिरात्रान्तइति । कपित्थबदरयोः फलमशनं यस्य सतथोक्तः फलभुक् अशनमियतिं कथयति । आत्मवृत्तीति । यावतात्मनः शरीरस्य वृत्तिस्तदनुसारेण ॥ ७२ ॥ ७३ ॥

उपाधावत् उपास्त ॥ ७४ ॥

अपारयदतिक्रान्तवान् ॥ ७५ ॥

अचलः स्थिरः ॥ ७६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

मास्मादन्ति अर्भकं किं खादेयुरेवेत्यर्थः । न खादन्तीति चित्सुखः ॥ ६६ – ६९ ॥

विधुत्येत्यत्र विश्रभ्येति चित्सुखः ॥ ७० — ७६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतकृतसारार्थदर्शिनी ।

मा मा सर्वथैव शोकं मा कुरु । तत्प्रभावमविज्ञाय वर्त्तमान इत्यर्थः प्रावृङ्क्ते व्याप्स्यति वर्त्तमानसमीप्ये वर्त्तमानत्वम् । ६८॥६९

---

(१) ध्रुवमनुगत्येति शेषः ।

(२) सुदुष्करमित्यत्रदेवानां ध्रुवकृतकर्मणयशक्तिरितिमातीत्य तदुपपत्तिमाह ॥

(३) दृष्ट्यादेशेनपूरुषमित्यत्रदृष्ट्याचक्षुषाआदेशेनेति असंगतमिवभातीत्यतस्तात्पर्यानुसारेणव्याचष्टे

(४) तेन दृश्यतेनयेतिदृष्टिः निरूपणामया । आसम्यक् दिश्य तेउपदिश्यतइत्यादेशउपदेशस्तेन । ततश्चनारदेनसाधन[illegible]पूर्वकृतोपदेशेनेत्युक्तंभवति ॥ टी०

सर्वतोमन आकृष्य हृदि भूतेन्द्रियाशयम् ।
ध्यायन् भगवतोरूपं नाद्राक्षीत्किंचनापरम् ॥ ७७ ॥
आधारं महदादीनां प्रधानपुरुषेश्वरम् ।
ब्रह्म धारयमाणस्य त्रयोलोकाश्चकम्पिरे ॥ ७८ ॥
यदैकपादेन सपार्थिवार्भकस्तस्थौ तदङ्गुष्ठनिपीडिता मही ।
ननाम तत्रार्धमिभेन्द्राधिष्ठिता तरीव सव्यतरतः पदे पदे ॥ ७९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

विश्रम्य विशश्रंमेति च पाठः ॥ ७० ॥

मधुवने ध्रुवः किमकरोदित्यपेक्षायामाह । तत्रेति । अभिषिक्तः स्नातः । प्रयतः पूतः ॥ ७१ ॥

कपित्थबदरमात्रभोजी आत्मनो वृत्तेर्जीविकाया अनुसारः स्वीकारस्तेन ॥ ७२ ॥ ७६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

मास्मानुश्मित नलादर्शन किम् ॥ ६६ ॥

महात्मापि मादृशः प्रमाद्यतीत्याश्चर्ये अहो इति अत्युत्तमपुत्रवियोगात् वर्तेति खेदे ॥ ६७ ॥

यस्य यशः जगत् प्रावृत्तक व्याप्नोति तं स्वतनयं मामाशुचः तत्र हेतुगर्भं विशेषणां देवगुप्तमिति ॥ ६८ ॥

विपुलयन् वर्द्धयन् ॥ ६९ ॥

अन्वचिन्तयत् तद्ध्यानपरोऽभवत् ॥ ७० ॥

एवं प्रासंगिकमुक्त्वा प्रस्तुतं ध्रुवचेष्टितमाह । तत्रेत्यादिना । तत्र मधुवने प्रयतः वासार्थे कृतप्रयत्नः अभिषिक्तः स्नातः कालिन्द्यामिति शेषः यस्यां तत्र गतस्तां विभावरीं रात्रीमुपोष्य अत्यन्तसंयोगे द्वितीया तस्यामुपवासं कृत्वेत्यर्थः इत्यादेशेन श्रीनारदकर्तृकेन दृष्टः आदेशेन लब्ध्वा द्रव्यमयीमर्चामित्यादिना यादृशैः प्रतिमादिषु भगवद्रूपिस्तदुपदेशेनेत्यर्थः पुरुषं श्रीवासुदेवं समाहितः सावधानः सन् पर्यचरत् ॥ ७१ ॥

आत्मना देहस्य वृत्तिर्वर्तनं जीवनं तस्यानुसारेणानुरोधेन कपित्थादीनि अशनं भोजनं यस्य सः ॥ ७२ ॥ ७३ ॥

नवमे नवमेऽहनि अब्भक्षः जलभोजनः उत्तमश्लोकं समाधिनोपाधावन् सन् तृतीय मासम् अनयत् इत्येवं समापितवानित्यन्वयः प्रतिमासमाहारसंकोचेन भजनानन्दसंतुष्टिः सूच्यते ॥ ७४ ॥

द्वादशे द्वादशेऽहनि प्राणायामविधिना वायुभक्षः अन्यत्र जितश्वासः चतुर्थं मासं नयन् देवं वासुदेवं ध्यायन् हृदि अधारयत् ॥ ७५ ॥ ७६ ॥

भाषाटीका

हे ब्रह्मन् ! न जाने उसका मुख कमल क्षुधा तृषा के मारे सूखा होगा वह कहीं वन मे सो गया होगा उस अनाथ बालक को व्याघ्रादि जन्तु खाय तो नहीं लेंगे ॥ ६६ ॥

... मे स्त्री के वश हूं खोटा हूं सो आप जानो जिस अधम ... से गोद पर चढते पुत्र के उपर नाराजी करी है ॥ ६७ ॥

नारद जी बोले राजन् ! अपने पुत्र का शोच मत करो उस की रक्षा ईश्वर ने की है उसका प्रभाव तुम नहीं जानते हो उस का यश सब जगत मे व्याप्त हो जायगा ॥ ६८ ॥

हे राजन् ! वह ध्रुव इंद्रादिलोक पालों से भी नहीं होने लायक कार्य करके सर्व समर्थ वह तुमारे यश को बढाता हुआ थोडे दिन में आजायगा ॥ ६९ ॥

मैत्रेय जी बोले इस प्रकार से देवर्षि नारद जी के वचन को सुनकर राजा राज्य लक्ष्मी को भी अनादर करके पुत्र ही का चिंता करने लगा ॥ ७० ॥

ध्रुव जी मथुरा मे आकर नियमधारण पूर्वक स्नान करके रात्री मे उपवास किया फिर सावधान होकर नारद जी के आज्ञानुसार परमात्मा का पूजन करने लगे ॥ ७१ ॥

अपनी देह स्थिति के अनुसार से तीन तीन दिन पर कैथ और बेर के फलों को खाकर हरि का पूजन करके एक महिना बिताया ॥ ७२ ॥

बालक ध्रुवजी ने छठे छठे दिन मे सूखे घास पत्तों का भोजन कर हरि का पूजन करके दूसरा महिना बिताया ॥ ७३ ॥

नवमे नवमे दिन मे जल मात्र पीकर के समाधि से उत्तम श्लोक भगवान् की पूजा करके तीसरा मास बिता दिया ॥ ७४ ॥

चतुर्थ महिना को भी बारवां बारवां दिन मे वायु का भक्षण करके श्वास को जीत करके नारायण का ध्यान करके बिता दिया ॥ ७५ ॥

पांचवा महीना जब आया तब राजपुत्र श्वास को जीत कर ब्रह्म का ध्यान करता हुआ एक पैर से खडा होकर अचलता से स्थित होगया ॥ ७६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

भूतानि शब्दादीनि इन्द्रियाणि च आशेरते यस्मिंस्तन्मन आकृष्य ब्रह्म ध्यायन् ॥ ७७ ॥

धारयमाणस्य सतस्तस्य तेजः सोढुमशक्नुवन्तः कम्पिताः ॥ ७८ ॥

तस्याङ्गुष्ठेन निपीडिता आक्रान्ता सती मही तत्र तदा अर्धं न नाम समेऽर्धके अर्धशब्दस्य नपुंसकत्वादंशांशिनोरभेदाविवक्षया सामानाधिकरण्यम इभेन्द्राधिष्ठिता तरी नौर्यथा पदे पदे सव्यतोऽपसव्यतश्च नमति तद्वत् ॥ ७९ ॥

तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुमनन्यया धिया ।
लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् ॥ ८० ॥

देवा ऊचुः ।

नैवं विदामो भगवन् ! प्राणरोधं चराचरस्याखिलसत्त्वधाम्नः ।
विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यम् ॥ ८१ ॥

श्रीभगवानुवाच ।

माभैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम ।
यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥ ८२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम् ध्रुवचरिते
अष्टमोऽध्याय ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अभ्युदयस्याथ प्रभावमाह । तस्मिन् । ध्रुवे विश्वं विश्वात्मकं विष्णुमात्मनः सकाशादनन्यया धिया आत्माभेददृष्ट्याभिध्यायति सति किं कृत्वा असुं प्राणं तद्द्वारं च निरुध्य विश्वमात्मन्येकीकृत्य स्वप्राणनिरोधे कृते विश्वस्य प्राणनिरोधो जात इति भावः ॥ ८० ॥

एवं प्राणनिरोधं कदाचिदपि न विद्मः अखिलसत्त्वधाम्नः सर्वप्राणिशरीरस्य तस्माद्वृजिनात्क्लेशात् ॥ ८१ ॥

यतो बालात् कोऽसौ बालः कथं च तस्मात् प्राणनिरोध इत्यत आह । उत्तानपादस्य पुत्रो मयि विश्वरूपे सङ्गतात्मा ऐक्यं प्राप्त एव इति ॥ ८२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

समेशाके नपुंसकत्वेऽपि महा अर्द्ध ननामेति वक्तव्यमित्याशङ्क्योत्तरमाह । अंशांशिनोरिति । सामानाधिकरण्यं समानविभक्तिकत्वम् यत्तु कालभावाध्वेत्यादिनाऽर्द्धदेशमभिव्याप्येतिव्याख्यानं तद्देशशब्दाध्याहारादिगौरवादुपेक्षणीयम् ॥ ७६ ॥

विश्वात्मकमिति । "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगद्,,ति विष्णुपुराणोक्तेः विश्वस्य तच्छक्तित्वाच्छक्तेश्च शक्तिमदव्यतिरेकाद्विश्वरूपमित्यर्थः परमतेतु अधिष्ठानस्यैवाध्यस्तरूपतया प्रतीतत्वात् अखिलसामानाधिकरण्यम् स्वाभेददृष्ट्येति स्वस्मादभिन्नदृष्ट्या विश्वात्मकोऽहमिति व्यष्टिसमष्ट्योरभेदेनाहंग्रहोपासनया विष्णुं ध्यायति सति तदुपासनसामर्थ्यात् स्वप्राणनिरोधे विश्वस्य प्राणनिरोधो जात इति भावः ॥ ८० ॥ ८१ ॥

ऐक्यमहंग्रहोपासनरूपम् ॥ ८२ ॥

इतिश्रीभागवते महापुराणे चतुर्थस्कन्धे
दीपिन्याख्यदीपिकाटिप्पण्याम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

भूतेन्द्रियाशयं भूतानि भूतसूक्ष्माणि शब्दादीनि तद्ग्राहकाणीन्द्रियाणि श्रोत्रादीनि शब्दादिविषयप्रवणानीन्द्रियाणीत्यर्थः तानि आशेरते यस्मिन् शयनमर्थान्निर्व्यापारः अव्यापारितश्रोत्रादीन्द्रियवन्मनः सर्वतः संकल्पविकल्पाद्व्यावृत्य निरस्य हृदि हृदयपुण्डरीके भगवतो रूपं दिव्यविग्रहं ध्यायन् भगवतो रूपादपरमन्यन्नाद्राक्षीत् नापश्यत् अन्यन्नाद्राक्षीदित्यनेन ध्यानस्य विजातीयप्रत्ययान्तराव्यवहितत्वरूपमनेन ध्यानस्य परिनिष्पत्तिर्नाम फलाव्यवहितपूर्वदशोक्ता ॥ ७७ ॥

तामेव प्रपञ्चयिष्यन् तावत्तत्प्रभावमाह । आधारमिति त्रिभिः । महदादीनां पृथिव्यन्तानां भूतानां तत्संसृष्टानां चेतनानां च आधारं धारकम् अनेन स्थूलचिदचिच्छरीरकत्वमुक्तं सूक्ष्मचिदचिच्छरीरकत्वमाह । प्रधानपुरुषेश्वरं प्रधानं सूक्ष्ममचित्तत्त्वं पुरुषास्तत्संसृष्टचेतनाः तेषामीश्वरम् अन्तः प्रविश्य नियन्तारम् अन्तः प्रविष्टः शास्तेति श्रुतेः अनेन यन्महदादीनां धारकत्वमुक्तं तदप्यन्तः प्रविश्य नियमनेनैवेति विशेषितम् बोध्यम् एवंभूतं भगवन्तं ब्रह्म धारणमाणस्य सतः तस्य तेजः सोढुम् अशक्नुवन्तस्त्रयो लोकाः चकम्पिरे कम्पिताः ॥ ७८ ॥

स पार्थिवार्भको ध्रुवः एकेन पादेन यदा तस्थौ तत्र तदा तस्याङ्गुष्ठेन निर्पीडिता नितरां पीडिता सती मही भूमिरर्धेनधिष्ठिता ननाम प्रह्वी बभूव अर्धशब्दस्यात्र समांशवाचित्वाभावेऽपि [illegible]
न क्रियाविशेषणत्वाभिप्रायेण क्लीबत्वनिर्देशः इभेन्द्रेण गजश्रेष्ठेन

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका।

निपीडिता अधिष्ठिता तरीव नौर्यथा पदेपदं प्रतिपदं सव्येतरतः सव्यतो वामतश्च नमति तद्वत् ॥ ७९ ॥

किञ्च तस्मिन्ध्रुवे आत्मनि स्वस्य विश्वं द्वारं सर्वाण्यिन्द्रियाणि द्वारशब्दः घ्राणादीन्द्रियपरः असुं प्राणं च निरुध्य अनन्यया विषयान्तररहितया धिया ध्यायति सति भगवन्तमिति शेषः। यद्वा विश्वशब्दो भगवत्परः विष्णोर्नामसहस्रमित्युपक्रम्य विश्वं विष्णुरित्युक्तत्वात् विश्वात्मकत्वात् विश्वो विष्णुः लोकाः इन्द्रादिभिः सहिता भृशं नितरां निरुच्छ्वासेन उच्छ्वासाभावेन निपीडिताः हरिं शरणं ययुः प्रापुः ॥ ८० ॥

शरणप्राप्तिमेव प्रपञ्चयति। नैवमिति। हे भगवन्! चराचरस्य एवं विधं प्राणनिरोधं न विद्मः कदाचिदपि न जानीमः अचरग्रहणं दृष्टान्तार्थम् तेषामुच्छ्वासनिरुच्छ्वासयोरभावात् यथा अचरस्य उच्छ्वासादिर्नास्ति तथा चरस्यापि प्राप्त इति नतु तस्मात् अखिलसत्त्वधामन् चिदचिच्छरीरकस्य तव नः संबन्धिनामस्माकं वृजिनात्प्राणनिरोधरूपात् दुःखात् विमोचं विमोचं कुरु वयं शरण्यं समीहितसाधनत्वेनाध्यवसनीयं त्वां शरणमुपायं प्राप्ताः उपायत्वेनाध्यवसयाम इत्यर्थः ॥ ८१ ॥

एवं शरणं गतानाह। शरण्यो भगवान् माभैष्टेति माभैष्ट भयं माकुरुत तपसा दुरत्ययम् अनुल्लङ्घ्यं बालं निवर्तयिष्ये निष्पाद्य विष्यामि समीहितेन संयोजयामीत्यर्थः अतो यूयं स्वधाम स्वस्थानं प्रतियात गच्छत कोऽसौ बालः कथं चैक स्मात् प्राणनिरोधात् विश्वस्य प्राणनिरोध इत्यत आह यतो यदीयप्राणनिरोधाद्भवतोर्वः युष्माकं प्राणनिरोध आसीत् स औत्तानपादिः उत्तानपादस्य पुत्रो बालो ध्रुवोमयि विश्वप्राण प्राणनहेतुभूते मयि "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः योऽपानेनापानिति स त आत्मा सर्वान्तर,,इतिश्रुतेः संगतः आत्मा अन्तःकरणं यस्य सोऽभू त्स्वप्राणनिरोधेनोच्छ्वासनिश्वासयोरप्यक्षममाणस्य विश्वप्राण प्राणनहेतुभूतस्य मम तेन निरुद्धत्वात् सर्वेषां प्राणनिरोधोऽभू दिति भावः ॥ ८२ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिकायाम
अष्टमोऽध्यायः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली।

देवा ध्रुवस्य यशोविस्तृत्यर्थं तत्तपोविघ्नं चक्रुरित्याह। देवाइति। कुष्माण्डमायेन्द्रजालेन कूष्माण्डाः पिशाचविशेषाः तान्प्रा- पदयदित्यनेन ध्रुवस्य देवेभ्योऽप्यधिकशक्तिमत्त्वं नाभिप्रेतं किन्तु परमभागवतत्वेन यशोविस्तृत्यैविघ्नकरणं न तु तत्तपः खण्डनार्थं तदुक्तम् "यत्र देवैः कृते विघ्ने खण्डितोनपुमान्भवेत्। तत्र तद्यशसे विघ्नं कुर्वन्तु विचालने। यत्र खण्डनता तत्र खण्डनायैव केवलम् सत्यकामा यतो देवास्तेभ्योऽन्याभिमानिनः। अतोविमोहनायैव प्राप्नु युते पराजयम्। तेषामशक्तितोकिञ्च विमोहाय सुरद्विषा मिति ॥ ७६ ॥ *

नापश्यदिन्येतद्विवृणोति। सर्वतइति। आकाशादि भूतानांतदु- त्पन्नानां प्राणिनां चेन्द्रियाणामाश्रयं भगवतोरूपं ध्यायन्नपरं अन्तिकत्वात् ......स्वतन्त्रं ब्रह्माद्राक्षीदित्यन्वयः॥७७॥

एकाग्रमनसा तस्य वासुदेवं ध्यायतः सत इदमेकमाश्चर्यमभू- दित्याह। आधारमिति ॥ ७८ ॥

सर्वाधारं ब्रह्म धारयमाणे ध्रुवे स्थिरत्वेन भाव्यं तत्र लोकानां कम्पनं कथमित्याशङ्क्योपपत्तिमाह यदैकपादेनेति। तत्र तस्मिन्भागे तर्यां मध्ये इभेन्द्रेण गजेन गरिम्णाधिष्ठिता तरीव यथा नौर्नता भव- ति तथा तदेव धिष्णिनाणि सव्येतरतइति। सव्येतरयोर्वामदक्षिणयोः पादयोः पदे पदे तुन्ना नता भवति ॥ ७९ ॥

नकेवलं बलनमेव लोकानामभूत्किन्तु श्वासोच्छ्वासयोः प्रवृत्तिस्त- म्भेन मरणाधिकफलेशोऽभूदित्याह। तस्मिन्निति तस्मिन्ध्रुवेऽनन्यया ध्येयैकविषयतां गतया धिया श्वासप्रवृत्तिकारणमसुं प्राणं निरुध्य कु म्भकीकृत्यात्मनो विश्वशरीरत्वस्य देहद्वारं कारणं विश्वं विष्णुमभितः परित इन्द्रियाभिमानिदेवैः सह ध्यायति निरुच्छ्वासेन निरुद्धप्राण- वृत्त्यानिपीडिताः सलोकपाला लोकाहरिं शरणं ययुरित्यन्वयः अत्र भृशमित्यनेन क्षिप्रवाचिना लोकानामेव निरुच्छ्वासो नलोकपालानां देवतानाममन्यप्रवृत्तिहेतुत्वं ...... स्थावरानधीनप्रवृत्तीनां नास्तु लोकश्वासार्थं कृपालयो हरिं शरणं ययुरिति ध्वनयति उक्तं च "ध्यातुर्ध्रुवस्य कीर्त्यर्थं हरिणा सह देवताः। लोकोच्छ्वासनिरुध्याथ श्वासार्थं च हरिं ययुः। अन्यप्रवृत्तयस्तेभ्यो न तेषामन्यतः क्वचित् स्वोत्तमेऽप्यस्तु देवेभ्यस्तेषां स्युश्चप्रवृत्तय" इति ॥ ८० ॥

किमर्थं शरणं गताइति तत्राह। नैवमिति। अखिलानां सत्त्वानां प्राणिनां धाम समूहो यत्र तत्तथोक्तं तस्य "तेजः शक्तिः समूहश्च गृहे धामेतिकथ्यत,,इत्यभिधानात्। वृजिनादुःखात् ॥ ८१ ॥

हरेः शरणं गतानां देवानां भयव्यावर्तकप्रतिवचनप्रकारमाह माभैष्टेति। यतोयस्माद्युष्माकं सकाशात्प्राप्तप्रवृत्तीनां लोकानां प्रा णनिरोध आसीत् तं तपसोनिवर्तयिष्ये इत्यन्वयः कोसाविति त- त्राह। औत्तानपादिरिति। मयि सम्यग्गत आत्मा मनोयस्य स तथा ध्रुव इत्युक्ते कस्य पुत्रः किंजातिरयमिति शङ्कास्यादित्यतऔत्तानपा दिरिति ॥ ८२ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टमोऽध्यायः ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः।

सर्वात्मकत्वेन बृहत्त्वसत्त्वाद्भगवतो रूपमेव ब्रह्म। अतएव आ- धारमपि। ततस्तादृशत्वेन धारणात्तदात्मकता प्राप्त्या यदा आत्म- विशेषेण कम्पते स्म तदा विश्वमपि कम्पते स्म ॥ ७८ ॥

तेन यत्र स्वाङ्गांशेन भारं न्यस्यति स्म तत्रांशे पृथिव्या नम- नमपि युक्तम् ॥ ७९ ॥

लोकगौरवादिति चित्सुखः चक्रिरे इति शेषः ॥ ८० ॥

तस्मादेव लोकनिरुच्छ्वासतापि ॥ ८१——८२ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भे
अष्टमोऽध्यायः ॥ ८ ॥

* देवाश्चक्रुस्तपो विघ्नं त्रासयन्तः स्वमायया। सर्पेभसिंहकूष्माण्डैस्तान्नापश्यत् परन्तपः ॥ ७६ ॥
इति विजयध्वज पाठः ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

भूतानां प्राणिनामिन्द्रियेषु न शेते न विरमीभवन्तीति तथा-भूतं भगीवद्रूपम् यद्वा मा सम्यक् शेते ननु जागर्त्तीति तेषामगम्य मित्यर्थः ॥ ७७ ॥

धारयतः ध्यायतः ध्यायति सतीत्यर्थः ॥ ७८ ॥

तदा तस्याङ्गुष्ठेन निपीडिता मही अर्द्धमर्द्धप्रदेशं व्याप्य ननाम । कालभावेन्याविना कर्मत्वम् इभेन्द्रेणाधिष्ठिता तरी नौर्यथापदे पदे सव्यतो दक्षिणतश्च नमति तद्वत् ॥ ७९ ॥

तस्मिन् ध्रुवे आत्मनो देहस्य विश्वं सर्वमेव द्वारमसुं प्राणञ्च निरुध्य हरिं ध्यायति सति लोका निरुच्छ्वासनिपीडिता इति व्यष्टिसंज्ञक शरीरस्य प्राणेषु निरोधनीयेषु बालत्वात् समष्टेरेव प्राणान् न्यरुन्ध अतएव अतन्यथा भियेति व्यष्टिसमष्ट्योरैक्यबुद्धिरेव तत्र कारणमित्यर्थः ॥ ८० ॥

एवं प्राणनिरोधं कदापि न विद्मः अखिलधाम्नः सर्वप्राणिशरीरस्य ॥ ८१ ॥

बालमिति बालत्वादेव स्वप्राणेषु निरुध्यमानेषु युष्माकमपि प्राणान् न्यरुन्ध अतोऽस्मान् हनिष्यतीति बुद्ध्या तस्मान्न भेतव्य-मित्याह । यतो ध्रुवात् स मयि संगतचित्तः कमपि नैव जिघांसतीत्यर्थः ॥ ८२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थस्याष्टमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

भूतानि इन्द्रियविषयाः इन्द्रियाणि च शेरते यत्र तन्मनः सर्वत आकृष्य भगवतो रूपं ध्यायन् अपरं किंचन नाद्राक्षीत् ॥ ७७ ॥

महदादीनामनित्यानामाधारं धारकम् प्रधानपुरुषयोः प्रकृतिजीवयोः स्वस्य शक्त्यंशयोर्नित्ययोरीश्वरं ब्रह्मबृहत्स्वरूपगुणादियुक्तं वासुदेवं हृदि धारयमाणस्य तेजसा त्रयोलोकाश्चकम्पिरे ॥ ७८ ॥

एवं सर्वाधारणा सर्वेश्वरपरब्रह्माभिपदवाच्ये वासुदेवे स्वानन्यभक्तेन हृदा धृते सति गजचरणेन नौकामिव भूमिमेकतोनम्रामवधार्य ध्रुवे निर्जितश्वासे निरुद्धश्वासत्वमात्मनोऽवधार्य तन्मूलमजानन्तो देवाः हरिंशरणं गता इत्याह ॥ यदेति द्वाभ्याम् ॥ यस्य पादः नृपासनारूसमात्रा निराकृतः स एव तेनैव पादेन यदा हरिध्यानकाले तस्थौ तत्र तदा इभेन्द्रेण धिष्ठिता आक्रान्ता तरी नौर्यथा पदे पदे सव्यंतरतः वामतो दक्षिणतश्च नमति तथा तस्य नृपार्भकस्याङ्गुष्ठनिपीडिता सती मही अर्द्धं ननाम आत्मनोऽर्द्धेन भागेन किंचिन्नता सती तत्पादगौरवं सूचयामासेत्यर्थः ॥ ७९ ।

यो दीर्घं निःश्वासं क्रोधवशात् मातृसपत्नीसमीपे प्रवर्तयित्वापि तेन किमपि प्रयोजनं न कृतवान् तस्मिन्नेव ध्रुवे आत्मनः तमेवासुं निश्वासं तद्द्वारं च निरुध्य विश्वं सर्वात्मानं भगवन्तमभिध्यायति तु लोकाः सलोकपालाः भृशमत्यर्थं निरुच्छ्वासेन पीडिताः सन्तः निःश्वासविमुक्तिमन्यतोऽलभमानाः हरिंशरणं ययुः अहो अच्युतं हरिं प्रपद्यामिति भावः ॥ ८० ॥

अखिलसत्वानां धाम्नः शरीरस्य चराचरस्य जङ्गमस्थावररूपस्य प्राणरोधं कुत इति न विद्मः ततः त्वां शरण्यं सुरगणानरक्षणे कुशलं शरणं रक्षितारं प्राप्ताः नोऽस्मान् जनात् क्लेशाद्विमोक्षं विधेहि ॥ ८१ ॥

यतः औत्तानपादिः उत्तानपादस्य पुत्रः मयि विश्वरूपे सम्यक्-कृतः आत्मा मनो यस्य सः अहं प्राणप्रवर्तकः सर्वरूपस्तेन जितप्राणेन हृदि रुद्धोऽस्मीत्यर्थः ततोऽहि वः प्राणनिरोध आसीत् तथापि यूयं माभैष्ट धाम प्रतियात बालं दुरत्ययात् अन्येन वियोक्तुमशक्यात् तपसो निवारयिष्ये ॥ ८२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपे
अष्टमाध्यायार्थ प्रकाशः ॥ ८ ॥

भाषाटीका

फिर भूत इंद्रियों का आधार मन को सब तरफ से खेंच कर हृदय में भगवान के रूप का ध्यान करता हुआ और किसी वस्तु को दृष्टि पर नहीं लाया ॥ ७७ ॥

महत्तत्वादिकों के आधार प्रकृति पुरुष के ईश्वर ब्रह्म को ध्रुव के धारण करने से तीनों लोक कांपने लगे ॥ ७८ ॥

जिस वक्त वह राजकुमार एक पाद से खड़ा हुआ तिसी वक्त उसके पाद के अंगूठे से दबी हुई पृथ्वी ऐसी डगमगाने लगी कि जैसे हाथी के चलने से कोई छोटी नौका डगडगाती दहिने बाये तरफ नवती हुई दीख ॥ ७९ ॥

उस ध्रुवने जब अपने सब इन्द्रियों के द्वारन को तथा प्राण वायुको रोककर एकाग्र बुद्धिसे विश्वका व्यापक ब्रह्महरि का ध्यान किया तब सब त्रिलोकश्वास के बंद होनेसे अत्यंत पीडित होकर इन्द्रादिलोकपालों के सहित श्रीहरिके शरण गये ॥ ८० ॥

देवता बोले हे भगवन् ! हमलोग नहीं जानते हैं कि चराचर सबजंतुओंके शरीरकापवन क्यों बंद होगया है अब आप हमारे इस कष्टको छुटाइये हमलोग रक्षकजानकर आपके शरण आये हैं ॥ ८१ ॥

श्रीभगवान् बोले देवताहो तुमलोगमत डरो बड़ी भारीतपस्याओंसे बालककोमैं निवृत्त करूंगा तुमलोग अपने स्थानको चलेजाओ जिससे तुमलोगोंका श्वास बंद हुआ है उसउत्तानपादके पुत्र ध्रुवने हमारे मे मनलगा रखा है ॥ ८२ ॥

इतिश्रीभागवतचतुर्थस्कन्धका भाषानुवाद लक्ष्मणाचार्य्यकृत
अष्टम अध्याय समाप्त ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

मैत्रेय उवाच

त एवमुत्सन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपम् ।
सहस्रशीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षया गतः ॥ १ ॥
स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभम् ।
तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदवस्थं ददर्श ॥ २ ॥
तद्दर्शनेनागतसाध्वसः क्षिताववन्दताङ्गं विनमय्य दण्डवत् ।
दृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकश्चुम्बन्निवास्येन भुजैरिवाश्लिषन् ॥ ३ ॥
स तं विवक्षन्तमतद्विदं हरिर्ज्ञात्वास्य सर्वस्य च हृद्यवस्थितः ।
कृताञ्जलिं ब्रह्ममयेन कम्बुना पस्पर्श बालं कृपया कपोले ॥ ४ ॥
स वै तदैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः ।
तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षितिः । ५

श्रीधरस्वामिकृत भावार्थदीपिका ।

नवमे तु हरिं स्तुत्वा लब्ध्वा तस्माद्वरान्ध्रुवः ।
प्रत्यागत्याकरोद्राज्यं पित्रा दत्तमितीर्यते ॥ १ ॥

एवं भगवद्वाक्येन गतभयाः ॥ १ ॥

स वै ध्रुवो योगस्य विपाकेन दार्ढ्येन तीव्रया निश्चलया गरुडाधिरूढं पुरतः स्थितमपि यदान्तर्दृष्टित्वादसौ नापश्यत्तदा भगवतैवास्य स्वं रूपमाकृष्यत इति तिरोहितमुपलक्ष्य व्युत्थितः सन् तदवस्थं बहिरग्रतः स्फुरितं तादृशम् ॥ २ ॥

आगतसाध्वसो जातसंभ्रमः विनमय्य आनतं कृत्वा संभ्रममेवाह दृग्भ्यां प्रपिबन्निव पश्यन्नवन्दत आस्येन चुम्बन्निवावन्दत भुजाभ्यामाश्लिषन्निवावन्दतेत्यर्थः ॥ ३ ॥

विवक्षन्तं तद्गुणान्वक्तुमिच्छन्तम् अतद्विदं स्तुत्यादि कर्तुमजानन्तम् अस्य ध्रुवस्य सर्वस्य च हृद्यवस्थितत्वात् ज्ञात्वा ब्रह्ममयेन वेदात्मकेन शङ्खेन ॥ ४ ॥

भगवता प्रतिपादितां गिरं प्रतिपद्येति शेषः प्रतिपद्यतामिति पाठे तां वेदात्मिकाम् परिज्ञातः परात्मनोरीश्वरजीवयोर्निर्णयो येन सः अतएव भक्त्या भावः प्रेम यस्य असत्वरं स्थैर्येण परितः श्रुतं विख्यातमुरुश्रवः कीर्तिर्यस्य तम् ध्रुवा क्षितिः स्थानं यस्यात भाविनिर्देशः ॥ ५ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

[illegible]मस्य प्रत्यावृत्य ततो देवानां प्रयाणानन्तरं सहस्रशीर्षेति [illegible]धिष्ठातुः पृश्निगर्भस्य तदभेदात् ॥ १ ॥

व्युत्थितः समाधेरुपरतः ॥ २ ॥

भुजैरिति द्विवचनार्थे बहुवचनत्वादित्यर्थ इत्युक्तम् ॥ ३ ॥

वेदात्मकेनेति स्पर्शमणिन्यायेन कपोलस्थितस्यतच्छायया अपि वेदार्थमयत्वं व्यज्यते ॥ ४ ॥

तदैव। स्पर्शनकाल एव दैवीं भगवद्विषयां निर्णयोऽत्र द्वयोश्चिद्रूपत्वेऽपि विभुत्वाणुत्वाश्रयत्वाश्रितत्वप्रतियोगितादिकभेदवन्तावेव द्वौ न तु सर्वथाभेदस्तयोरिति निश्चयः "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेती"ति श्रुतेः गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् । इति न्यायाच्च अत एवैतादृशभेदज्ञानादेव भक्त्या ध्यानदर्शनादिरूपया प्रेमतल्लिङ्गमधुकम्पादिकम् अन्यथा विषयाश्रयालम्बनादिभेदाभावेन प्रेमणः स्वरूपहानिस्स्यादिति अत एव स्थैर्येणेत्युक्तम् ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

एवं भगवतोक्तेषु देवेषु स्वधामगतेषु भगवान् भक्तानुजिघृक्षया ध्रुवेण प्रार्थितस्तेन स्तुतस्तं सन्निहितेन संयोज्य स्वधामागात् तथापि ध्रुवोऽपि संसाधितसन्निहितः स्वधाम जगामेत्याह । नवमेन मुनिः एवं भगवद्वाक्येन उत्सन्नभया गतभया देवा उरुक्रमे भगवति विषये कृतः प्रणामो यैस्ते त्रिविष्टपं सुरलोकं ययुः जग्मुः सहस्रशीर्षा भगवानपि भृत्यदिदृक्षया भृत्यदर्शनेच्छया मधोर्वनं गरुत्मता वाहनभूतेन सह गतः जगाम ॥ १ ॥

स वै ध्रुवः योगविपाकतीव्रया योगस्य ध्यानयोगस्य विपाकः आपरोक्ष्य[illegible]निरूपत्वादविशेषणविशिष्टत्वं तेन तीव्रया विजातीयप्रत्ययान्तराव्यवहितया धिया प्रथमं हृत्पद्मकोशे स्फुरितं साक्षात्कृतं ततः सहसैवप्रभावेव तिरोहितं ततः पुनः बहिःस्थितं तडित्प्रभं

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

अन्तराविर्भूतस्य सहसा तिरोधानेन तडित्साम्यमभिप्रेत्य तडित्प्रभमित्युक्तं तद्रूपस्थैर्याद्गन्तरस्फुरत्ताद्दशमुपलक्ष्य प्रत्यभिज्ञाय ददर्श साक्षात्कृतवान् ॥ २ ॥

तस्य भगवतो दर्शनेन आगतसाध्वसः जातसंभ्रमः अर्भकः ध्रुवः अङ्ग शरीरं क्षितौ भूमौ दण्डवद्भिन्नमस्य नतं कृत्वा अवन्दत नमस्कृतवान्संभ्रममेवाह दृग्भ्यां पिबन्निव प्रपश्यन्निव अवन्दत आस्येनचुम्बन्निव अवन्दत भुजाभ्यामाश्लिष्यन्नालिङ्गन्निवावन्दत भुजैरिति बहुवचनमार्षम् ॥ ३ ॥

तं ध्रुवं विवक्षन्तं गुणानुवक्तुमिच्छन्तं तृष्यन्तमित्यर्थः पुनस्तद्विदं स्तोतुमजानन्तम् अस्य ध्रुवस्य सर्वस्य लोकस्य च हृदि हृदये अवस्थितः हेतुगर्भमिदं हृदि अवस्थितत्वात् ज्ञात्वा स हरिः ब्रह्ममयेन ब्रह्म प्रणवः वेदो वा तत्प्रचुरेण ध्वनेः प्रणवाद्यनुकारित्वाद्ब्रह्ममयेनेत्युक्तम्। कम्बुना शङ्खेन कपोले गण्डे बालं ध्रुवं कृपया पस्पर्श ममार्ज ॥ ४ ॥

स वै ध्रुवः दैवीं देवस्यसंबन्धिनीं देवेन भगवताविर्भाविताम् इत्यर्थः तां वेदार्थप्रचुरां गिरं वाचं तदैव स्पर्शतत्कालमेव प्रतिपद्य लब्ध्वा परिज्ञातः कार्त्स्न्येन विदितःपरात्मनोः परमात्मजीवात्मनोः निर्णयो याथात्म्यं येन सत एव भक्तिभावः भक्त्यात्मको भावोऽभिप्रायो यस्य ध्रुवा स्थिरा शाश्वती स्थितिः स्थानं यस्य अयं भावि निर्देशः अनश्वरः त्वरारहितः परिश्रुतं सर्वतो विख्यातमुरु निरवधिकं श्रवःकीर्तिर्यस्य तं भगवन्तम् अरण्यगुणात् अस्तौषीत् ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

हरेः केवलं मोक्षाख्यपुरुषार्थस्य प्राप्तिरेव न किन्त्वैहिकस्यापीतीममर्थं प्रतिपादयत्यस्मिन्नध्याये । तत्रादौ देवानां स्वलोकगमनं हरेर्मधुवनयात्रां च वक्ति । तएवमिति । सहस्रशीर्षा श्रीवासुदेवः ॥ गरुत्मान् गरुडस्ताक्ष्य..इत्यभिधानम् ॥ १ ॥

ध्रुवस्य हरिदर्शनप्रकारं वक्ति । सवा इति । योगपरिपाकेन ध्यानपरिणत्या तीव्रया स्वतएव भगवदुन्मुख्या । तदवस्थं हृत् पद्मकोशे याऽवस्था तया विशिष्टम् ॥ २ ॥

गुरूक्तगुणानुपसंहृत्य भगवदुपाप्तौ संक्तस्य ध्रुवस्य किं पुनर्वन्दनादादिनिति भावेन तत्प्रावणयप्रकारमाह तद्दर्शनेति। आगतसाध्वसः प्राप्तसंभ्रमः बालस्वभावं दर्शयन्निव भक्त्यतिशयमाह दृग्भ्यामिति ॥ ३ ॥

भक्तानुकम्पित्वं प्रकटयतोहरेस्तवनुग्रहविशेषमाह । सतमिति । विवक्षन्तं स्तुतिरूपां वाचं वक्तुकामं न तद्विज्ञानत्वं चेतीत्यतस्यवित् ब्रह्ममयेन वेदमयेन पाञ्चजन्यापर एव आम्नाय उदितिभुवः कम्बुना पाञ्चजन्याख्यशङ्खेन ॥ ४ ॥

तत्फलमाह । सवाइति । सवै सोऽपि । या गीः पूर्वमज्ञाता तां गिरं दैवीं देव, सर्वेषु देवेषु गुणोत्तमानस्तद्विषयां गिर मुपलब्धफलमाह । परिज्ञातेति । यावत्स्वयोग्यं परिज्ञातः परमात्मतत्त्वनिर्णयोयेन स तथोक्तः तद्भक्त्य भावोरामार्जादिकियाविशेषावस्य स तथोक्तः "भावोर्लीलाक्रियाचे,,ति यादवः अमत्वरमिति क्रियाविशेषणं यथा स्खलितं न भवति अनेन संभ्रमतलुप्तादिवालस्वभावं व्यावर्तयति अत्वरया सह वर्तत इत्यसत्वरस्तमिति भगवद्विशेषणं वा परिश्रुतं व्याप्तमुरु बृहत् श्रवणमङ्गलं श्रवोयशोयस्य स तथा तं ध्रुवा नित्या स्थितिर्वैकुण्ठादिस्थानं यस्य स तथो तं ध्रुवःक्षितिमितिवा पाठ. क्षिनिवासगत्योरितिधातोः क्षिति गतिमित्यर्थः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

सहस्रशीर्षेति ध्रुवलोकाभिष्ठातुस्तदभेदात् ॥ १ ॥

तडित्प्रभं यथास्यात्तथा सहसैव तिरोहितम् ॥ २ ॥

प्रपिबन्निवेत्यादिस्सर्वान्माधेशमात्र तात्पर्यकम्। यद्वा। यथा प्रपश्यन् प्रपिबन्निवेत्यत्र प्रदर्शनमेव प्रपानत्वेनोत्प्रेक्ष्यते । तथा वास्तवार्थेनाश्लेषत्वेन चुम्बनं तथाञ्जलिबन्धार्थं बाहुद्वयघटनयालिङ्गनमपीति ज्ञेयम् । भुजैर्वेति क्वचित् ॥ ३—४ ॥

दैवीं भगवद्विषयां निर्णयामीति । ध्रुवक्षितिमिति क्वचित् ॥ ५—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतकृतसारार्थदर्शिनी ।

हरिस्तुतिर्वरप्राप्तिः स्वानुतापो गृहागमः ।

बन्धुभिर्मेलनं राज्यं ध्रुवस्य नवमेऽभवत् ॥

गर्भोदशायिना अभेदात् शहस्रशीर्षा तदात्मिकतोऽवतारः पृश्निगर्भो भागवतामृताद्यवगन्तव्यः ॥ १ ॥

सच गत्वा योगनिमीलितास्तस्य ध्रुवस्यान्तःकरणं प्रविश्य दर्शनं दत्त्वा तत्रैव पुनरन्तर्धाय बहिस्तदग्रे तस्थावित्याह । स वा इति । ध्यानयोगस्य परिपाकेन तीव्रया धिया हृदि सहसैव स्फुरितं तडित्प्रभं यथा स्यात्तथा तिरोहितञ्च उपलक्ष्य स्वसमीप एव दृष्ट्वा लब्धनष्टधन इव व्याकुलो भग्नसमाधिरुद्घाटितनेत्रस्तदवस्थं स्थितं तं बहिर्ददर्श ॥ २ ॥

आगतसाध्वसो जातानन्दसम्भ्रमः दृग्भ्यां मुखारविन्दमाधुर्यं प्रपिबन्निव प्रपश्यन् आस्येन चरणारविन्दमाधुर्यं चुम्बन्निव अवन्दत भुजाभ्यामाश्लिष्यन्निव चरणाङ्गुलीशिखरान् पस्पर्श । बहुवचनेन भुजयोर्व्यापारबाहुल्यं लक्षयित्वा आनन्दकम्पो ध्वनितः ॥ ३ ॥

विवक्षन्तं तद्गुणान् वक्तुमिच्छन्तम् । अतश्च तमद्विदं व्याकरणाद्यज्ञानात् संस्कृतं प्रयोक्तुमशक्नुवन्तं ज्ञात्वेत्यत्र हेतुः । अस्येत्यादि ब्रह्ममयेन वेदात्मकेन शङ्खेन ॥ ४ ॥

प्रतिपद्य प्राप्य प्रतिपादितामिति पाठे प्राप्येति शेषः। परिज्ञातः परात्मनोरीश्वरजीवयोर्निर्णयो येन सः । भक्तावेव नतु सांख्ययोगादिषु भावोऽभिप्रायः स्वभावो वा यस्य सः । असत्वरं स्थैर्यमालम्ब्य परिश्रुतश्रवसं विख्यातबहुयशसं । ध्रुवा प्रलयेऽप्यनश्वरा स्थितिः स्थानं यस्येति भाविसूचनम् ॥ ५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

नवमे ध्रुवस्य भगवद्दर्शनादिकं वर्णयितुमाह । ते इति । उत्सन्नं निवृत्तं भयं येषां ते कृतः प्रणामो यैस्ते ततस्तद्धमनानन्तरमेव भृत्यादिदृक्षयागत इत्यनेन भगवतोऽपि स्वभृत्यदर्शनार्थोत्सुक्यं सूच्यते मधोर्वनमागत इत्यनेन व्यापकस्यापि भगवतो दूरत्वनिकटत्वगमनाहित्वसर्वज्ञत्वादयोऽचिन्त्या गुणाः द्योतिताः ॥ १ ॥

योगस्य भगवद्ध्यानस्य विपाकेन सौष्ठवेन तीव्रया भगवत्स्वरूपगुणादिग्रहणे कुशलया पूर्वं हृत्पद्मकोशे स्फुरितं पुनः सहसैव तिरोहितमालक्ष्य पुनस्तदवस्थं यथा हृत्पद्मे दृष्टं तथैव बहिः स्थितं ददर्श तडित्प्रभमित्यनेन हृत्पद्मे बहिश्च स्वाविग्रहस्यैव भगवतो व्यापकस्यैव स्वेच्छया विर्भावतिरोभावशक्तिर्द्योत्यते ॥ २ ॥

तस्य भगवतो दर्शनेन आगतसाध्वस उत्पन्नसंभ्रमः अङ्घ्रिविग्रहम् दृग्भ्यां प्रपश्यन् प्रपिबन्निव आस्येन चुम्बन्निव भुजैराश्लिष्यन्निव स्वकीयगात्रं क्षितौ विन्यस्यानन्दतरङ्गाय दृग्भ्यां

ध्रुव उवाच

योऽन्तःप्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥ ६ ॥
एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषम् ।
सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि ॥ ७ ॥
त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ ! भवत्प्रपन्नः ।
तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबन्धो ! ॥ ८ ॥
नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ।
अर्चन्ति कल्पकतरुं कुणपोपभोग्यमिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम् ॥ ९ ॥
या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ ! माभूत्किंत्वन्तकासिलुलितात्पततां विमानात् ॥ १० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

प्रविवक्षिरित्यादिना भगवन्मूर्तेर्मनोनयनादिभ्यः सर्वेभ्योऽप्यत्यन्तानन्दप्रदत्वमुक्तम् ॥ ३ ॥

विवक्षन्तं स्तुतिं कर्तुमिच्छन्तम् ब्रह्ममयेन आत्मानात्मपरमात्मादिस्वरूपगुणादियाथात्म्यबोधकवेदमूर्तिना ॥ ४ ॥

यः श्रीनारदेन भगवद्दर्शने वेदवाणीधारणार्हः कृतः स देवीं ईशस्य विश्वनिःश्वासभूतां वेदरूपां प्रतिपद्य प्राप्य अतोऽह श्रीनारदेन संक्षेपतः प्रबोधितोऽपि वेदलाभानन्तरं परितः सम्यक् तत्त्वे ज्ञातः परस्य परमात्मनः आत्मनो जीवस्य निर्णयो येन सः अत एव भक्त्या भावः प्रेम यस्य सः उभयस्वरूपविज्ञानाभावे भक्त्यभावेन परमात्मभावापत्तिलक्षणमुक्त्यभावः उभयस्वरूपादिनिर्णयविस्तरः श्रीवेदान्तकौस्तुभवेदान्तरत्नमञ्जूषादिषु च द्रष्टव्यः ध्रुवा कर्मकालादिभिरन्यथा कर्तुमशक्या क्षितिर्वैकुण्ठाख्यं स्थानं यस्य सः परितः श्रुतं विख्यातमुपगाधं श्रवः कीर्तिर्यस्य तम् भृत्यगृणात् तुष्टाव द्वादशभिः ॥ ५ ॥

भाषाटीका ॥

मैत्रेयजी बोले वे देवगण इंद्रादिक भगवान् के वचन सुनने से निर्भय होकर उरुक्रम भगवानको प्रणाम करके स्वर्गलोक को गये भगवान् सहस्रशीर्षापुरुषभी तदनंतर गरुड ऊपर विराजकर भक्त के दर्शन के लिये मधुवन, मथुराको पधारे ॥ १ ॥

ध्रुवजी की बुद्धि योग से बड़ी निर्मल होगईथी उसीमें निश्चलथी तबहृदय कमल में प्रकाशमान बिजुलीसे चमकने मूर्तिका अन्तर्धान होजाना देखाफिरनेत्र खोलत मात्र बाहर उसी प्रकार की मूर्तिका देखा ॥ २ ॥

उस मूर्तिके दर्शन से बड़ा संभ्रम को प्राप्त होकर अपने शरीर को झुकाकरके पृथ्वी में साष्टांग दंडवत् प्रणाम किये फिर नेत्र से ऐसे देखने लगा कि मानोंनेत्रोंसे पीजायेंगे मुखसे मानो चूमलेंगे भुजोंसे मानों आलिंगन करेंगे ॥ ३ ॥

सबके हृदय में वास करने वाले हरिने उस की कुछबोलने की इच्छा जानकर का उसके हाथ जोडे हुए देखकर उसके सामर्थ्य देने के लिये वेद मय शंख से छुवाकर के उस के मुख कपोलमें स्पर्श करादिया ॥ ४ ॥

तब तो वह ध्रुवभी सरस्वती वाणी को प्राप्त होकर सब परमात्माके निर्णय को जानगया फिर भक्ति युक्त होकर धीरज से सुना हुआहै विस्तृत यशजिनका ऐसे भगवान् को ध्रुव पद प्राप्त होने वाला ध्रुव स्तुति करने लगा ॥ ५ ॥

श्रीधरस्वामिकृत भावार्थदीपिका

ईशानुग्रहसंप्राप्तवाणीचन्द्रवृत्तिभिः
द्वादशादित्यसंकाशैः श्लोकैरस्तौद्धरिं ध्रुवः ॥ १ ॥

यो मे प्रसुप्तां लीनां वाचमन्यांश्च प्राणानिन्द्रियाणि स्वधाम्ना चिच्छक्त्या संजीवयति यतः अखिलाश्चक्षुरादिज्ञानक्रियाशक्तीर्धारयतीति तथा पुरुषायान्तर्यामिणे ॥ ६ ॥

ननु वागादीन्द्रियशक्तिधरा वह्न्यादयः प्रसिद्धा नाहमित्यत आह एक इति । अनुविश्य पुरुषोऽन्तर्यामी त्वमेक एव तस्या मायाया असत्सु गुणेष्विन्द्रियादिषु स्थितः संस्तत्तद्देवतारूपो नानेव भासि न तु त्वद्व्यतिरेकेण ज्ञानक्रियाशक्तिधरः कश्चिदस्तीत्यर्थः ॥ ७ ॥

अपिच किंवक्तव्यं वह्न्यादयो नामादिशक्तिधरा न भवन्तीति यस्माद्ब्रह्मणोऽपि ज्ञानं त्वदर्थं नमेत्याह । त्वद्दत्तया वयुनया ज्ञानेन भवन्तं शरणं प्रपन्नो ब्रह्मा इदं विश्वमचष्टापश्यत् कथम् सुप्तः पुरुषः प्रबुद्धः सन् यथा पश्यति तद्वत् अत आपवर्ग्या मुक्तास्तेषामपि शरणम् कृतविदा सर्वोन्द्रियजीवनेन त्वत्कृतमुपकारं जानता कथं विस्मर्यते एवं भूतं त्वामभजन्तः कृतघ्ना इत्यर्थः ॥ ८ ॥

ये च मादृशाः कामाद्यर्थं भजन्ति तेऽतिमूढा इत्याह । नूनमिति । भवाप्ययौ जन्ममरणे ताभ्यां विमोक्षणं हेतुं त्वामन्यहेतोः कामाद्यर्थं ये भजन्ति ते नूनं विमुष्टमतयो वञ्चिताश्चित्ताः यतस्ते कल्पतरुं त्वामर्चन्ति ततः कुणपतुल्येन देहेनोपभोग्यं सुखमिच्छन्ति तच्चेच्छायोग्यं नेत्याह । यत्स्पर्शजं विषयसंबन्धजन्यसुखं तन्नरकेऽपि भवति ॥ ९ ॥

ननु स्वर्गादिसुखं सकामैः प्राप्यते निष्कामभजने तन्न स्यादित्यत आह या इति । स्वमहिमनि निजानन्दरूपे ब्रह्मण्यपि मा भूत् न भवतीत्यर्थः अन्तकस्यासिना कालेन लुलितात्खण्डितात्स्वर्गविमानात् पततां सा नास्तीति किमुवक्तव्यम् ॥ १० ॥

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो भूयादनन्त ! महताममलाशयानाम् ।
येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः ॥ ११ ॥
ते न स्मरन्त्यतितरां प्रियमीश ! मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ।
ये त्वब्जनाभ ! भवदीयपदारविन्दसौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः ॥ १२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

भवतः केवलं श्रवणाय सत्संगतिं देहीत्याह । भक्तिं त्वयि प्रवहतां सातत्येन कुर्वताम् ननु मोक्षं किं न याचसे अत आह । येन महत्प्रसंगेनाञ्जसा अप्रयत्नेन उल्बणानि उरूणि व्यसनानि यस्मिंस्तम् नेष्ये पारं गमिष्यामि भवद्गुणकथामृतं तस्य पानेन मत्तः सन् ॥ ११ ॥

कथामृतपानस्य माहात्म्यमाह । तेऽति तरां प्रियमपि मर्त्यं देहं न स्मरन्ति नानुसंदधते ये च सुतादयः अदः मर्त्यमनुसंबद्धास्तानपि के ते न स्मरन्ति ये कृतप्रसङ्गाः केषु भवदीयपदारविन्दसौगन्ध्ये लुब्धं हृदयं येषां तेषु भागवतानामेषां कैवल्ययोगादिनिष्ठानां देहाद्यभिमाननिवृत्तिं दर्शयति ॥ १२ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

वागाद्यन्तर्यामिण । अप्राकृतत्वमप्राकृतत्वमेवातएवमुख्योः कृत्वैव मुख्यार्थेनैव रुचिर हरेः पदमित्युक्तम् । आदित्यसंकाशत्वं भगवदादिसर्वप्रकाशकत्वाभिप्रायकत्वाच्च बहुधाविद्यावेद्यमन्तरा सर्वप्रकाशः मयायाविपर्रासानिर्णयश्च स्यादिति चिच्छक्त्या संजीवयतीत्युक्त्या वागादीनामपि स्पर्शमणिन्यायेन चिदात्मकत्वं व्यज्यते ॥ ६ ॥

तत्तद्देवतानां तत्तद्यशक्त्यात्मकत्वात्तद्व्याप्यत्वात्तन्नियम्यत्वात्तत्तद्देवतारूप इति भाष्यात् “यस्य पृथिवी शरीरम्„ इत्यादिश्रुतेः तत्तद्देवतानामपि तच्छरीरत्वं शरीरवाचकाश्च शब्दाः शरीरिपर्यन्तवाचका एव व्यक्तिपर्यन्तवाचकत्वं यथा जातिवाचकानामिति श्रीरामानुजीयाः तत्तद्देवतानां तस्मिन्नेव कल्पितत्वात् बाधितसामानाधिकरण्यं श्रीस्वामिव्याख्यातु सर्वानुगतेति यथा कथमाज्ञामिति ॥ ७ ॥

ज्ञानदीत्यादिना क्रियाशक्तिपरिग्रहः यस्मात्तेः अतः ब्रह्मादिसर्वज्ञानस्य त्वदधीनत्वात् मुक्ता जीवन्मुक्ताविदेहमुक्ताश्च तेषामपि शरणं रक्षकमाश्रयणीयं च तत्र जीवन्मुक्तानां शरणं “जीवन्मुक्ताः प्रपद्यन्ते पुनः संसारवासनाम् । यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिनः । इति वासनाभाष्योक्तेः तद्भजनमन्तरा तेषां पुनः संसारश्रवणात् विदेहमुक्तानामप्याश्रयणीयं मुक्ता अपि लीलया विग्रहं कृत्वा भजन्त इति भाष्योक्तेश्च ॥ ८ ॥

ततोऽर्चनात् तत् विषयसुखम् ॥ ९ ॥

निजानन्दरूपेऽपि अमाधारणानन्दमात्रे विशेषे असम्यगाविर्भावरूपे ब्रह्मण्यपि न भवतीति लकारव्यत्ययादित्यर्थोक्तिः एवमानन्दतारतम्यस्य यदुपपादनात्तच्छ्रीविग्रहस्य तत्कथादेश्च घनानन्दमयत्वं निरुपाधिकत्वमाभव्यज्यते अत एवैषां पद्यानां सम्यक् तत्त्वनिर्धारकत्वेनावित्यरूपत्वं स्वामिभिरुक्तमिति ज्ञेयम् ॥ १० ॥

अतः ब्रह्मानन्दादपि कथानन्दस्य वैशिष्ट्यात् ननु भवत्स्वानन्दवैशिष्ट्यं संसारान्मुक्तिस्तु न स्यादिति मोक्षं किं न याचसे इति पूर्वपक्षाशङ्काप्रश्नो व्याख्येयः पानमत्त इत्यनेनैतदुक्तं भवति यथा मधुपानमत्तानां तदास्वादनमेव मुख्यं फलं शीतादिनिवृत्तिस्त्वानुषङ्गिकं तथा गुणकथासुधापानरसिकानां निरन्तरं तत्पानमेव मुख्यं फलं मोक्षादिकन्तु नान्तरीयकं स्वत एव सिद्धत्वादिति ॥ ११ ॥

अन्येषां कथामृतविमुखानाम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

तत्र स्वकीयवागीन्द्रियसंजीवयितृत्वेन स्वानुभवसिद्धेन ज्ञानप्रदं चिदचिच्छरीरं निखिलजगदेककारणं निरस्तनिखिलहेयगन्धं मुक्तोपायत्वमुक्तिप्रदत्वाखिलदुरितौघानवर्तकत्वनिरतिशयशः सम्पन्नत्वनिरतिशयानन्दस्वरूपपरिमितोदारगुणसागरत्वेन भगवन्तं पद्भिः प्रस्तुत्य तस्मिन्नात्मनः प्रावण्यमेकेन संप्रार्थ्य तत्पदारविन्दध्यानासक्तचित्तस्य देहतदनुबन्धिहेतुकदुःखानुभूतिमेकेनाभिध्याय ततः साधु परित्राणाय स्वेच्छोपात्ताप्राकृतदिव्यमङ्गलविग्रहं परत्वेन शङ्कितानां विदेवतानामपि कारणभूतं स्वावतारेण साक्षात्कारविषयं भूतं त्रिभिः प्रस्तुत्यैकेन तं शरणमागत्य पुरुषार्थमूर्तिस्तस्य भजनादाशिषां सत्यतां वदन् निरतिशयवात्सल्यमेकेन स्तौति । य इति । द्वादशभिः तत्र वाग्घ्राणादीन्द्रियसंजीवयितृत्वेन स्वस्मै निर्दिशितम् ज्ञानप्रदत्वं निमित्तनमस्करोति । य इति यो भगवान्प्रसुप्तां स्वकार्याक्षमां इमां तु प्रसुप्तां मे स्रोतक मस्थ मम वाचं वागीन्द्रियमन्तः प्रविश्य संकल्परूपज्ञानेनानुप्रवेश उच्यते पूर्वमेव प्रविष्टत्वात् संजीवयतीत्यत्र हेतुः अखिलशक्तिधरः अघटितघटनादिसर्वशक्तेस्तत्तदुपपन्नमिति भावः तथा स्वधाम्नः स्वधामभूतान् स्वशरीरभूतानिति यावत् तृतीयान्तपाठे स्वधाम्ना स्वकीयसंकल्परूपेण ज्ञानेनान्तः प्रविश्येत्यन्वयः हस्तचरणश्रवणत्वगादीन् हस्तचरणग्रहणं पायूपस्थयोः कर्मेन्द्रिययोरुपलक्षणं श्रवणत्वग्ग्रहणमवशिष्टज्ञानेन्द्रियाणाम् आदिशब्देन मनः करणचतुष्टयाधिष्ठातृदेवता संग्रहः अन्यान्प्राणान् इन्द्रियाणि संजीवयति तस्मै भगवन्त पूर्णषाड्गुण्यमूर्तये पुरुषाय पुरुषान्तर्यामिणे अनेन जीवान्तर्यामित्वमुक्तं पूर्वं मच्चिदन्तर्यामित्वकथनात् तुभ्यं नमः कृत्वाचिदचित्स्वरूपात्मत्वेन तत्संजीवयितृत्वेन ज्ञानप्रदत्वं स्वस्येवोपपन्नमिति भावः ॥ ६ ॥

ननु “तत्सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि„ इति जगत्स्रष्टुरेवानुप्रवेशश्रवणात् नाहं चिदचिद्वस्त्वन्तरात्मेत्यत्र जगत्स्रष्टापि त्वमेवेत्याह एक इति । हे भगवन्! इदं परिदृश्यमानं महदादिसमष्टिव्यष्ट्यात्मकमशेषं सर्वं जगत् उरुगुणया विविधपरिणामक्षमसत्त्वादिगुणगणा आत्मशक्त्या मनःस्वरूपसंबन्धिन्या शक्त्या कार्योपयोग्यपृथक्सिद्धविशेषणभूतया मायाख्यया प्रकृत्या सृष्ट्वा सदसद्रूपेषु कार्यकारणभूतेषु सत्त्वादिगुण-

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

सर्वपदार्थेषु पुरुषो जीवशरीरकः अनुविश्य त्वमेक एव सन् दारुषु हुतवहो दीर्घश्रुचकाविर्भेदाभिव्येषु दारुषु विभावसुवदग्निवज्ज्ञानेन बहुधा विभासि अत्र विभावसुदृष्टान्तेन स्वशरीरभूतचिदचिद्गत-गुणास्पर्शो विवक्षितः इव शब्देन वस्तुत एकत्वं देवमनुष्यादि-शरीरसंसृष्टजीवान्तरात्मकत्वकृतं बहुत्वमपि विवक्षितम् ॥ ७ ॥

एवं निखिलजगदेककारणत्वेन कृत्स्नचिदचिदन्तरात्मत्वेनानिर-स्तनिखिलदोषत्वेन वागादीन्द्रियसंजीवयितृत्वात्तस्यैव ज्ञानप्रद-त्वमुक्तं तदेव निदर्शयन् तस्यैव निरतिशयपुरुषार्थसाधनत्वेन भजनीयतामाह। त्वद्दत्तयेति। त्वदीयया "तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं,,मिति वदतात्मना दत्तया वयुनया ज्ञानेन स्मीत्यमपि हे नाथ! भवन्तं प्रपन्नः शरणं गतो ब्रह्मा चतुर्मुखः सुप्तप्रबुद्ध इव पूर्वं सुप्तः पश्चात्प्रबुद्ध इव विश्वमचष्ट अपश्यत् विश्वरचनोपयोगिज्ञानविधुरस्त्वत्प्रपत्त्या त्वद्दत्तज्ञानेनासृजदित्यर्थः नाथभूतार्थे निवृत्तापश्यतीत्यर्थः हे आर्तबन्धो! आर्तानां तापत्रयातुराणां बन्धो अपवर्गशरणं मुक्तपुरुषमापवर्ग्यमिति पाठे स्वार्थे ष्यञ् अपवर्ग एव मापवर्ग्यं सुखं तत्साधनमिति वा तव पादमूलं कृतविदा सर्वे-न्द्रियोपजीवनेन ज्ञानप्रदत्वाद्युपकारज्ञेन कथं विस्मर्यते एवं महो-पकारिणं त्वामभजन्तः कृतघ्ना एवेत्यर्थः ॥ ८ ॥

तथा त्वां भजन्तोऽपि मादृशाः सकामा मन्दभाग्या एवेत्याह। नूनमिति। कल्पकतरुं कल्पकतरुतुल्यम् अभिमताभीष्टार्थप्रदत्वेन कल्पतरुतौल्यं विवक्षितं ततो निरतिशयगुणवत्तामाह भवाप्ययविमो-क्षणं भवो जन्माप्ययो मरणं तयोर्मोक्षणं मोचनं यस्मात्तं यद्वा भवा-प्ययौ विमोक्षयतीति नन्द्यादित्वात्कर्तरि ल्युट् बाहुलकात् मुक्तिप्रद-मित्यर्थः एवं भूतं त्वां ये मादृशा लोकाः अन्यहेतोः अन्यस्य त्रिवर्गस्य हेतोः कारणात् भजन्ति ते जनास्तव मायया मम माया दुरत्ययेत्यु-क्तविधया विमुष्टमतयः अपहृतज्ञानाः नूनमिति निश्चयं कुतस्ते विमुष्टमतय इत्यत आह। यत् यस्मात् स्पर्शजं विषयेन्द्रियसंबन्धजमत एव एतत् वै निरयस्थानामस्य परमात्मन इत्युक्तविधया नर-कस्थायेऽपि संसारे नृणां कुणपोपभोग्यं कुणपेन शवतुल्येन शरीरे-णोपभोग्यं सुखमामानं शवः इच्छन्ति ॥ ९ ॥

ननु स्वर्गस्यापि सुखस्य प्रतिपत्तेः किं तदर्थं भजमानान् निन्दित्वा निष्कामान् प्रशंससीत्याशङ्कायां स्पर्शजस्याल्पत्वास्थिरत्वादिदोषा-त्वाभिप्रेत्य किं वक्तव्यं निष्कामभक्तिसाध्यस्यापवर्गिकसुखस्य निरवधिकत्वात् ततनस्पर्शजस्य सार्थ्यमिति यतस्त्वच्चरणध्यानत्व-द्भक्तजनकथाश्रवणजन्यसुखेनापि न केवलमपि समानमिति कैमु-त्यन्यायेनाहयेति। तनुभृतां देहिनां तव चरणकमलध्यानात् भवज्जना भागवतास्तेषां कथाश्रवणेन वा यानिर्वृतिः सुखं स्यात्सा निर्वृतिः हे नाथ! स्वमहिमन्यपि स्वाभाविकगुणैकरूपमहिम्नि ब्रह्मणि शुद्धा-त्मस्वनुभूयमानेऽपि माभूदास्तामित्यर्थः अन्तकासिलूनात् अन्तकास्य-शस्त्रक्षतात् विमानात्पततां स्वर्गिणां निर्वृतिः स्यादिति नास्त्येवे-त्यर्थः ॥ १० ॥

एवं नित्यनिरतिशयानन्दसाधनभूतं त्वां श्रीविष्णुमतिशयाल्प-सुखसाधनत्वेन भजन्तो मादृशा मन्दभाग्या एवेत्युक्त्वा स्वस्य सत् संगतिकथाश्रवणादिप्रणाड्या भक्तिमहैतुकीं प्रार्थयति भक्तिमिति। हे अनन्त! देशकालवस्तुपरिच्छेदरहित! स्वयं निरस्तनिखिलदोषसार्वज्ञ्य निरतिशयानन्दस्वाधिपरिमितोदारगुणसागरं त्वयि मुहुः पुनःपुनः निर-न्तरमित्यर्थः भक्तिं प्रवहतां कुर्वतामत एवामलः आशयोऽन्तःकरणं येषां महतामक्रोधाद्यात्मगुणयुक्तानां प्रसंगः प्रकृष्टः संगः महतामि-ति संबन्धमात्रे षष्ठी महत्संबन्धिसंगमः महत्सुसंगम इत्यर्थः मे स्यात् येन महत्संगेन हेतुना प्रवृत्ता या भवतो गुणकथा सैव मधु तस्य पानेन मत्तः तृप्तः निरस्ततापत्रय इत्यर्थः उरुव्यसनम् आधिकदुःखं गर्भमत एवोल्बणं दुस्सहं नेष्ये तरामि ॥ ११ ॥

न केवलं सत्संगतेः कथाश्रवणादिप्रणाड्यापवर्गिकसुखसाधनत्व-मेव किंतु जीवद्दशायामपि देहतदनुबन्धिनिमित्तसुख दुःखादिहेतुत्व-मप्यस्त्याह। न इति। हे ईश! मर्त्यं मरणशीलमपि अतितरां प्रियं शरीरं ये च तमनुमर्त्यमनुसृत्य गच्छन्ति वर्तते इत्यनुगाः सुतादयः तांस्तु ते जना न स्मरन्ति नाभि मन्यन्ते इत्यर्थः के त इत्यत आह। हे अब्जनाभ ये जना भवदीयपदारविन्दयोः यत्सौगन्ध्यं तेन तस्मिन् वा लुब्धं हृदयं येषां तेषु भागवतेषु कृतः प्रसंगो यैस्ते इत्यर्थः ॥ १२ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

यदीयं स्तुतिर्वेदप्रसिद्धगुणानुरूपा तर्हि ब्रह्मवैयर्थ्युक्तिः सफला स्यादित्यतस्तत्प्रसिद्धैर्गुणैरभिष्टौति योऽन्तरिति। प्रसुप्तां निद्रिता-मिमां वैखरीं नामवाचं संजीवयति [illegible] संस्कारात्मना बोधयति अन्यान् हस्तादीन् प्राणानिन्द्रियाणि [illegible] स्वविषयाणि करोति तुभ्यं नमः इत्यन्वयः प्रभुः सुमान् [illegible] तीति श्रुतिः [illegible] वा एतानि करणानीति च ॥ ६ ॥

पुरिशयनात्पुरुषस्तत्पुराणां नानात्वाच्छरीरस्यापि नानात्वेनाधिकारी-त्वमभून्मति तत्राह। एकस्त्वमिति। एकस्यापि विभावसुवद् प्रविभज्ञानात्वमविरुद्धमित्यर्थः "तत् सृष्ट्वा तदेवानुप्राविशत् तदनु प्रविश्य सच्च त्यच्चाभवत्,,दिति श्रुतिः तस्या असक्तोऽसङ्गत्वागुणाः सत्त्वादयो येषु महदादिषु ते तथा तेषु अनेन स्वगतभेदराहि-त्यं पुरुषशब्देन प्रवृत्तिनिमित्तं चोक्तं भवति पुरिशयनात्पुरुष इति एकमर्थाकृतीर्यमिति च ॥ ७ ॥

अस्मिन्नर्थे किं प्रमाणमत्राह। त्वद्दत्तयेति। वयुनया ज्ञानेन कृत-ज्ञेन अनेन दातृदेययोर्हि भेदं दातुरेकत्वं विश्वस्य हर्यधीनत्वं च पश्यतो ज्ञानिनः प्रत्यक्षं "प्रमाणमित्युक्तं भवति अचष्टापश्यत् सोऽज्ञानाद्विमुक्तो ज्ञानी भवतीति श्रुतिं सूचयति। सुप्तः प्रबुद्ध इवेत्य-नेनेति ॥ ८ ॥

भगवत्प्रसादादेव भगवद्विषयं ज्ञानं स्यात्तदेव विपत्तेर्बाधकं प्रदर्शने न द्रढयति। नूनमिति। ये अन्यस्य हेतवे नानित्यस्य सु-खस्य हेतोर्भवाप्ययविमोक्षणं जननमरणात्मकसंसारमुक्तिदं कल्पक-तरुमिव भक्ताभीष्टदं त्वामर्चन्ति ते तव मायया विभक्तशक्त्या विमुष्टम-तय इत्यन्वयः विषयसुखं दुर्लभं चेत्कथं निन्द्यं स्यादित्यत उक्तं कु-णपेति निरयेऽपि सुलभमित्यर्थः यच्छब्दो हेत्वर्थः ॥ ९ ॥

भवान् भगवत्प्रसाद एव प्रार्थनीय इति गोचयति तस्मा-त्किं फलं दृष्टमिति तत्राह। यानिर्वृतिरिति। सा निर्वृतिः स्वमहिमनि अनन्याधारलक्षणमाहात्म्ये ब्रह्मणि परब्रह्मणि स्थितस्य जीवस्या-ऽपि माभूत् ध्यानादिकमन्तरेण न स्यात् कुतः "तद्यत्रैतत्सुप्तः सं-प्रसन्नः स्वप्नं न विजानाति एष आत्मेति होवाचैतदमृतम-भयमेतद्ब्रह्मेति,,। महशान्त तद्वदयः प्रवव्राजमहप्राप्येव देवाने तत्र्यं दर्शनाह स्वल्पयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नाविलुलितात्पर्यङ्कस्ताद्विमानात्पततां पुंसां सा निर्वृतिर्न स्यादिति किं मु। एतदुक्तं भवति कर्मसाध्यज्ञानात्स्वर्गादिलक्षणं विमानं प्राप्य इतस्ततो नन्दनादिषु विहारार्थं पततां गच्छतां पुंसां निर्वृतिर्नास्ती-ति किमु वक्तव्यमिति विमानाच्च्यवतामित्यर्थो गोकारे तत्र "दुःख-प्राचुर्यात् सा निर्वृतिर्न स्यादिति वक्तुमयुक्तत्वादुक्त एवार्थः अन्तका-

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

सिद्धिविनश्वरमतिरस्य योगमायाक्रान्तमति ज्ञानघ्नमत्र ध्यानं ज्ञान-स्वनाधस्तरङ्गमाश्रितं कथाश्रवणं तस्माद्भवं श्रुतगुणानां पश्चात्प्र-संहारादपवर्तीति ज्ञानघ्नम । भक्तिकारिणामनन्तरवाक्यसयोग्यता-विशेषादेवमुक्तमिति वा ॥ १० ॥

भवजना भगवद्भक्ताः तेषां मुखनिःसृतायाः भगवत्कथायाः श्रवणलक्षणोपासनेयमुक्तं तत्र भगवज्जनस्य कांचनमणिमुक्ताकथावत् शोभेतीममर्थमभिप्रेत्य भगवज्जनसंगतौ भगवत्कथायाः श्रवणं सुलभं स्यादिति मत्वा तत्संगतिं प्रार्थयते । भक्तिं मुहुरिति । येन प्रसंगेन भवाब्धिं नेष्ये तरिष्यामि । न प्राप्स्यामीति वा इयुगताविति धातुः ॥ ११ ॥

भक्तानां लक्षणमाह । नेत इति । यस्मात् * सुतसुहृद्गृहवित्तदारान् संपदः स्मरन्ति ते अतिनरां प्रियमाप्तमीश त्वां न स्मरन्ति हे अब्जनाभ ! ये भवदीय पदारविन्द सौगन्ध्यलुब्धहृदयेषु भवद्भक्तेषु कृत-प्रसंगाः भवद्भक्तभक्ताहेतस्मात् सुतादीन् मदङ्ग न स्मरन्तीत्यन्वयः अनेन श्रीहरिभक्तिरेव न भवाब्धिसंतारिणी किन्तु तद्भक्तभक्तिर-पीति सूचितम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

यथा केचित् कल्पतरुमाश्रयन्ते । अथच तस्य सकाशादेव भूतकज्ञाता भोगानिच्छन्ति तद्वारा भोगश्च कुरुक्षेत्रादौ श्मशान-वृत्तिकमग्नावन्भृत् तद्वत्तेन भजनादिरूपः प्रसङ्गः ॥ ९ ॥

ये शुद्धभक्तास्ते भवाप्ययमोक्षाविर्भावि ब्रह्मसुखमपि न बहु मन्यन्त इत्याह । यति ॥ १० ॥

अमलात्मनां निष्कामानां येन परमपुरुषार्थतयाभिमतेन अञ्जसा भयस्थाः एव उरुणा व्यसनानि यस्मिन् तस्मिन् गमयिष्या-मि तत्कथानुभवमात्र दूरीकरिष्यामीत्यर्थः ॥ ११—१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

भगवद्दर्शनदर्शितार्थज्ञानस्तुष्टाव यत् ध्रुवः । वेदार्थो हि स एवेति नात्र संशेरते बुधाः । अकस्मादेव स्वीयवागादीन्द्रियाणां भग-वद्गुणगानमालक्ष्य एतामीदृशामप्राकृतत्वं श्रीभगवत्कृतमिति जानन् स्वस्मिन् भगवतो निरुपमां निरुपाधिकां तां कृपामेव साक्षा-दनुभवन्नात विस्मयेन नमति । य इति । स्वेन धाम्ना चिच्छक्त्या इमां मम सुप्तामस्य वाचं त्वत्स्वरूपगुणलीलादिकमेव वर्णयित्रीं प्रसुप्तां मनावतकालपर्यन्तं शयितेव स्थितां मृतामिव सञ्जीवयति यातु स्वीयसुधापानादिप्रकृतभोगवार्त्ता निपर्ण्णा कुर्वतीं जाग्रत्येव वागादीन् तामेव आरभ्य गाययति स्म नाशयात स्मैरेति भावः । न केवलं वागिन्द्रियमेव अपि त्वन्यान् हस्तपादादीनपि त्वत्परि-चर्यादिकं विषयीकरिष्यतः प्राणांश्च त्वदुन्मुखानिति श्रवस्त्वगिन्द्रि-यादीनां चिन्मयत्वेनाप्राकृतत्वं सद्योजातमितिसूचयाम् । अत्र मम-ति इमानीति विशेषाच्चाणां वागादीन्द्रियाणि विशिष्टान्येव उच्यन्ते ॥ ६ ॥

साधारणानि तानि जडानि तु सर्वसाधारणजगतां त्वं माया-शक्त्या सह प्रविश्यान्तर्यामी सन्नुदासीन एव चेतयसीति जामा-स्येवेत्याह । एक इति । मनुप्रविश्य पुरुषोऽन्तर्यामी तथा मायाया अस्यासु गुणेषु इन्द्रियादिषु चेतयितुं स्थितः सन् नानेव भासि येन स्वभक्तानामिन्द्रियाणि त्वत्प्रसादात्स्वामेव विषयी कुर्वन्ति त्वन्मयान्यप्राकृतान्येव भवन्ति अन्येषान्तु तानि मायामेव विषयी कुर्वन्ति मायामयान्येवेति स्वधामेति पदात् पूर्वोक्तो सिद्धान्तो ध्व-नितः ॥ ७ ॥

तत्रैककर्मासक्तिमपरस्त्वदत्तज्ञाना इमनां भक्तानामेव कृतज्ञत्वं त्वं भजनीयो भवसीत्याह । त्वद्दत्तयेति । भवत्प्रपन्नो ब्रह्मादिः सन-कादिर्वा ज्ञानिभक्तः त्वद्दत्तया वयुनया ज्ञानेन इदं विश्वमचष्ट अपश्यत । कथं सुप्तः पुरुषः प्रबुद्धः सन् यथा पश्यति तद्वत् । अतः कृतविदा त्वत्कृतमेवमुपकारं जानता तस्य तव पादमूलं कथं विस्मर्यते कीदृशं आपवर्ग्यस्य अपवर्गो मुक्तिस्तदर्हस्य जिज्ञासु-भक्तस्य शरणमेवभूतं त्वां त्वत्त एव लब्धज्ञाना अपि त्वामभजन्तः कृतघ्ना एवेत्यर्थः । हे आर्त्तभक्तस्य बन्धो ! एवञ्च ज्ञानिभक्तो जिज्ञासुभक्त आर्त्तभक्तश्चेति श्रीगीतोपनिषदुक्तास्त्रयो भक्ता व्याख्याताः ॥ ८ ॥

यश्चतुर्थोऽर्थार्थिभक्तो सोऽपि सर्वतोनिकृष्टो मूढ इत्याह । नूनं निश्चितमेव विमुष्टमतयो वञ्चितबुद्धयस्ते भवन्ति । के ये भवाप्ययौ जन्ममरणे तयोर्विमोचकं त्वां अन्यहेतोस्तुच्छफलार्थं अर्चयन्ति अतस्ते त्वां कल्पतरुमर्चयन्ति अथच कुणपेन मृततुल्यदे-हेन उपभोग्यं सुखमिच्छन्ति न स्वच्छाचारोग्यं तदित्याह यत् स्पर्श-जं विषयसम्बन्धजन्यं सुखं तन्नरकेऽपि शूकरादियोनावपि भवति ॥ ९ ॥

ननु तर्हि भवाप्ययविमोक्षणमित्युक्ता ब्रह्मसायुज्यमेवाश्चर्य-तस्य फलं ब्रूषे तस्यैव कुणपोपभोग्यस्याभावात् तदिच्छन्त एव भव-न्मतेऽभिज्ञास्तत्र नहि मरीत्याह । येति । ध्यानादिभ्युपलक्षणं श्रव-णादेरपि भवगुणानामुपलक्षणं ध्यानादेरपि सा निर्वृतिः स्वस्य महि-मरूपे ब्रह्मणि ब्रह्मानन्देऽपि माभूत् न भवति महतां भावो महिमा त्वं महान् ननु तव महत्त्वं सर्व व्यापकत्वलक्षणमेव एवेति तदपेक्ष्ये यावती निर्वृतिस्तावती तत्र कथं न स्यादिति भावः । मदीयं महिमानञ्च परब्रह्मेति शब्दितमिति मत्स्यादिष्वपि ब्रह्मणो भग-वन्महिमत्वमवगतम । ततश्च अन्तकासिना कालेन लुलितात् विमा-नात् स्वर्गीयात् पततां नास्तीति किमु वक्तव्यं ततश्च स्वर्गापवर्गा-द्याभिधिकस्यान्यस्य कस्यापि फलाश्रवणात् त्वद्भक्तेरेवान्तर्गतं फलं त्वद्भक्तिरेवेति भक्तेः स्वतः फलत्वं भक्तानाञ्च निष्कामत्वमुपपा-दितम ॥ १० ॥

साच श्रवणकीर्त्तनादिमयी भक्तिः सत्सङ्गं विना न सुरसी भवतीति सत्सङ्गं प्रार्थयते । भक्तिं मयि प्रवहतां प्रवाहरूपेणानि-च्छिन्नामेव दधतां । ननु तर्हि संसारदुःखाब्धेर्भगते कथं स्यादित्यत्राह तत्र साटोप सभुजास्फोटमाह येन महत् सङ्गबलेन उल्बणमपि बहुव्यसनयुक्तमपि भवाब्धिं नेष्ये प्रहीष्यामि यावत् स मदभिम-तमनुभवति तदा आगत द्रक्ष्यामि किं मे कर्त्तुं शक्नुयादिति भावः कीदृशः सन् भवद्गुणकथैव अमृतं तत्पानेन मत्त इति स्पर्शजा-द्विकारादयः सांसारिका धर्मा मत्तं न दुःखायितुं शक्नुवन्ति नापि मृत्युरमृतं पिबन्तं स्प्रष्टुमपि शक्नुयादिति भावः । अत्र सत्सङ्ग-स्यैव भक्त्या भगवन्तं साक्षात् कृत्यापि पुनः सत्संगस्य प्रार्थना-ज्ञानकारणमपि भक्तिफलमपि स्वयं भक्तिरपि सत्सङ्ग इति भक्तानां मत व्यञ्जितम ॥ ११ ॥

तेनस्मरन्तीत्यत्र भगवद्भक्तभक्ताः स्वान् संपदो गृहदारानस्मरन्ति तथाऽऽप्यमीशं त्वामितिनरां स्मरन्तीत्यन्वयप्रतीतिरत स्तात्पर्यानुसारेण यो ज्ञेयतीति य इति ॥ टी०

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

ननु तदाप्यहन्तास्पदममतास्पदयोर्विद्यमानत्वे बलवद्भेगोपुर्णार इत्यत आह । ते नातितरां प्रियमपि मर्त्यं देहं न स्मरन्ति नानुसन्दधते ये च अदोमर्त्यमनुलक्ष्यीकृत्य वर्त्तमानाः सुतादयस्तानपि के ते ये भवदीयेत्यादि तुशब्देनान्येषां केवलयोगादिनिष्ठानां देहाभिमानानिवृत्तिं दर्शयतीति स्वामिचरणाः । भक्तानां निष्कामत्वद्योतकः स्वभाव एवायं वस्तुतस्तु कथमनुवर्त्ततां भवभयं तव यद्भ्रुकुटिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयमिति जरयत्याशु या कोषं निगीर्णमनलो यथेत्यादिरनुसंहितं भक्तेः फलं संसारनिवृत्तिरस्त्येव ॥ १२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तत्रादौ यान्तो वाक् चक्षुश्चक्षुरित्यादिश्रुतिमुपबृंहयन् स्तौति । य इति । अखिलाः समस्ताः शक्तयोधारयतीति तथा मम प्रसुप्तां वाचमन्यांश्च हस्तादीन् स्वधाम्ना स्वेनान्तर्यामिरूपेण अन्तः प्रविश्य संजीवयति यः तस्मै भगवते पुरुषाय तुभ्यं नमः ॥ ६ ॥

एवं सर्वशक्तित्वसर्वकरणप्रवर्तकत्वकरणविलक्षणत्वाविनाभूतत्वा विश्वहेतुत्वप्रकृतितद्गुणनियन्तृत्वकार्यकारणप्रकृतिविलक्षणत्वादिना स्तौति । एक इति । त्वमेक एव स्वशक्त्या अशेषं विश्वं सृष्ट्वा तस्याः शक्तिभूतायाः मायायाः असत्काण्यां तद्भिन्नेषु असद्गुणेषु विश्वरूपेण स्थितेषु देहेन्द्रियवाक्प्राणादिषु प्रविश्य तत्तत्प्रवर्तकतया नानेव विभासि ॥ ७ ॥

अथ यो ब्रह्माणं विदधाति तस्मै वेदांश्च प्राहिणोतीत्यादि श्रुतिमुपबृंहयन् स्तौति । त्वद्दत्तयेति । हेनाथ! भवत्प्रपन्नः पद्मोऽपि त्वद्दत्तयैव वयुनया ज्ञानेन सुप्तप्रबुद्ध इव आदौ सुप्तः पश्चात्प्रतिबुद्ध इव विश्वमचष्ट अपश्यत् तस्य तव पादमूलम् आपवर्ग्यं स्वार्थे ष्यञ् अपवर्गरूपं मुक्तौ प्राप्यं च शरणं साधनात्म्यायां सर्वतो रक्षकं च तत्तथा साध्यसाधनरूपमित्यर्थः हे आर्तबन्धो ! कृतविदा कृतज्ञेन कथं विस्मर्येत न कथमपीत्यर्थः ॥ ८ ॥

मोक्षप्रदं प्राकृतभोगार्थं येऽर्चन्ति ते मायामोहिता इत्याह । नूनमिति । नूनं निश्चितं ते जनास्तवमायया विमुष्टमतयः ये त्वां भवाप्ययमोक्षणं जन्ममरणनिवर्तकं मुक्तिदमित्यर्थः कल्पतरुम् अन्यहेतोः प्राकृतपदार्थलाभार्थम् अर्चन्ति ते कुणपापभोग्यं कुणपानां शवतुल्यानां जीवन्मृतानामुपभोग्यं स्पर्शजं दारापत्यादिसंबन्धजं सुखं नरकेऽपि शूकरादियोनावपि नृणां जीवानां भवति तदिच्छन्ति ॥ ९ ॥

चतुर्विधं हि सुखं निरञ्जनः परमं साम्यमुपैति मद्भावायोपपद्यते इति श्रुतिस्मृतिप्रोक्तं परब्रह्मभावापत्तिलक्षणमाद्यं तद्भजनजं द्वितीयम् क्षेत्रज्ञस्वरूपप्राप्तिजं तृतीयम् सांसारिकं चतुर्थम् तत्र निष्कामभक्तानां भगवद्भावापत्तिमोक्षप्रदं तद्भजमानन्देयदानन्दलक्षणं ब्रह्मप्राप्तावपि नास्ति कुतः दारापत्यादिप्राकृतपदार्थसंबन्धेनेत्याह । या निर्वृतिरिति । स्वमहिमानि देहेन्द्रियादिविलक्षणे स्वस्वरूपे ब्रह्मणि अक्षरे जीवात्मनि माभूत् नभवति अन्तकस्य मृत्योः असिः कालस्तेन लुठितात् स्खलितात् विमानात् पततां स्वर्गिणां दारापत्यादिसुखासक्तानामपि सा नास्तीति किमुवक्तव्यम् ॥ १० ॥

एवं सांसारिकसुखं जीवस्वरूपप्राप्तिसुखमनादृत्य भजनसुखमुक्तमथ भजनफलभूतभगवद्भावापत्तिलक्षणमोक्षसिद्ध्यर्थं भगवद्भजननिष्ठानां महतां सङ्गं प्रार्थयते । भक्तिमिति । येन त्वद्भजननिष्ठापादकेन सङ्गेन उरुव्यसनं संसारं बहुदुःखमुल्बणं प्रचण्डं भवाब्धिं नेष्ये पारं गमिष्यामि ॥ ११ ॥

महत्संगिनां संसारतापप्रद देहाद्यासक्तिराहित्यमाह । ते इति । हेईश! हेअब्जनाभ! ये भवदीयपदारविन्दसौगन्ध्ये लुब्धं हृदयं येषां तेषु महत्सु कृतप्रसंगाः ते अन्येषां प्रियमपि मर्त्यं मरणधर्मकं शरीरं नस्मरन्ति येचान्वदः शरीरमनुसुतादयस्तांस्त्वतितरां न स्मरन्ति ॥ १२ ॥

भाषाटीका

ध्रुवजी बोले ओभगवान् हमारे अंतः करणमे प्रवेश होकर हमारी इस सोई हुईवाणीको जगाते हैं जो समस्त शक्तियों को धारण करते हैं अपने तेजसे अन्यभी सबहस्त चरणादि इन्द्रियोंका तथा प्राणों का प्रेरण करते हैं तिन आपभगवान्के अर्थ हमारा नमस्कार है ॥ ६ ॥

हे भगवन् ! आपएकहीमाया नामक अनेक गुणवाली अपनीशक्तीसे महदादिसंसृष्ट इसजगत्को सृजकरके फिर उसमे प्रवेश होकर पुरुष नामधारण करके उसमाया के असत् गुणों मे नानाप्रकार से भान होते हो जैसे कि काष्ठ के आकृति के अनुसार अग्निभान होता है ॥ ७ ॥

हे नाथ हे आर्तबन्धो ! आप के शरण को प्राप्त हुआ जो ब्रह्मा सो आपके दिये हुए ज्ञानमे इस जगत को ऐसाजानगयाकि जैसे सोकर उठा हुआ आदमी पहली बात को जानता है मुक्तों को भी शरण लेने योग्य जो आप का पाद मूल तिसको कृतज्ञ होकर कौन कैसे भूलसक्ता है ॥ ८ ॥

वे लोग अवश्य ही आप की माया से मोहित हैं जो लोग जन्म मरण के नाश करने वाले आप को दूसरे काम के लिये पूजते हैं वे लोग कल्प वृक्ष की सेवा कर के भी मुरदा के तुल्य शरीर से भोगने के योग्य नरक में भी मनुष्यों को मिलने वाले सुखों को चाहते हैं ॥ ९ ॥

हे नाथ ! जो आनंद जीवों को आप के पादपद्म के ध्यान से होता है अथवा आपके भक्तों के साथ कथा श्रवण मे होता है सो आनंद केवलानुभावानन्द ब्रह्मस्वरूप में भी नहीं होता है तो फिर काल रूपी खड्ग से कटकर गिरते हुये विमान से गिरने वाले स्वर्ग वासियों को तो कहां वह आनंद होगा ॥ १० ॥

हे अनंत ! आपमें निरंतर भक्ति करने वाले निर्मल अंतःकरण वाले महात्मों का संग मेरे को मिले जिससे मै उनके साथ मै आपके गुणों के कथा रूप अमृत को पान करके मतवारा होकर के बड़े कठोर दुःख वाले संसार सागर को तर जाऊंगा ॥ ११ ॥

हे ईश हे पद्म नाभ! जो महात्मा आपके चरण कमल के सुगंध के लोभी हृदय वाले भक्तों का सग करते हैं वे लोग इस मनुष्य शरीर कुं तथा उस शरीर के पीछे जो घर मित्र धन नारी आदि को कभी नहीं स्मरण करते हैं ॥ १२ ॥

तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषम् ॥
रूपं स्थविष्ठमज ! ते महदाद्यनेकं नातःपरं परम ! वेद्मि न यत्र वादः ॥ १३ ॥
कल्पान्त एतदखिलं जठरेण गृह्णञ्छेते पुमान् स्वदृगनन्तसखस्तदङ्के ।
यन्नाभिसिन्धुरुहकाञ्चनलोकपद्मगर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै ॥ १४ ॥
त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ।
यद्बुद्ध्यवस्थितिमखण्डितया स्वदृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से ॥ १५ ॥
यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्यात् ।
तद् ब्रह्म विश्वभवमेकमनन्तमाद्यमानन्दमात्रमविकारमहं प्रपद्ये ॥ १६ ॥
सत्याशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः ।
अप्येवमार्य ! भगवान् परिपाति दीनान् वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥ १७ ॥

मैत्रेय उवाच ॥

अथाभिष्टुत एवं वै सत्संकल्पेन धीमता ।
भृत्यानुरक्तो भगवान् प्रतिनन्द्येदमब्रवीत् ॥ १८ ॥

श्रीभगवानुवाच ॥

वेदाहं ते व्यवसितं हृदि राजन्यबालक ! ।
तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ! ॥ १९ ॥
नान्यैरधिष्ठितं भद्र ! यद्भ्राजिष्णु ध्रुवक्षिति ।
यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम् ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

नन्वेवं विद्वानपि त्वं किमित्यभिमानं वहस्यतआह । तिर्यगिति । तिर्यङ्नगादिभिः परिचितं व्याप्तं सन्तोऽसन्तश्च विशेषा यस्य महदादीन्यनेकानि कारणानि यस्य हे परम ! अज ! ते इदं स्थविष्ठं विराड्रूपं केवलं वेद्मि अतः परमीश्वरस्वरूपं न वेद्मि यत्रवादः शब्दव्यापारो नास्ति तद्ब्रह्मरूपं च न वेद्मि अतोऽभिमानो न निवर्त्तत इति भावः ॥ १३ ॥

तदेवं भगवदनुकंपया तद्रूपद्वयं ज्ञात्वेश्वररूपमनुपमगणमस्मस्करोति । कल्पान्तएतदिति । एतत्त्रैलोक्यं यः पुमान् शेते स्वस्मिन्नेव हृत् नबाहिर्यस्य योगनिद्रारूढत्वात् अनन्तसखः शेषसहायः तदङ्के शेषोत्संगे यस्य नाभिरेवसिन्धुः समुद्रस्तस्मिन् रोहतीति तथा तस्मिन् काञ्चनलोकपद्मस्य गर्भे कर्णिकायां द्युमांस्तेजस्वी ब्रह्मा भवति तं प्रणतोऽस्मीत्यर्थः ॥ १४ ॥

ननु ममापि स्वापाद्यवस्थावत्त्वे कोजीवाद्विशेष इत्यत आह । त्वं तु व्यतिरिक्ते जीवविलक्षण आत्मसे तिष्ठसि वैलक्षण्यमेवाह त्वंतु नित्यमुक्तोजीवस्तु त्वत्प्रसादान्मुच्यते । त्वं परिशुद्धः सतु मलिनः त्वं विशुद्धः सर्वज्ञः । सतु अज्ञः त्वं आत्मा सतु जडः त्वं कूटस्थः सतु विकारी त्वमादिपुरुषः सतु आदिमान् त्वंतु भगवान् सतु भगहीनः त्वं मायायां गुणानामधीशः सतु परतन्त्रः । कुत एतद्वैलक्षण्यं यतः बुद्ध्यवस्थितिं बुद्धेरवस्थां जाग्रदादिरूपां अखण्डितया स्वदृष्ट्या चिच्छक्त्या द्रष्टा पश्यसि इतीति तत्प्रत्यात्मम । अतोबुद्ध्यवस्थितमित्यत्र पञ्चमीभावः तथाभूत एव त्वं स्थितौ पालने अधिमखः यज्ञाधिष्ठाता श्रीविष्णुः ॥ १५ ॥

तमेव ब्रह्मरूपेण ज्ञातं नमस्करोति । यस्मिन्निति । पतन्ति अकस्मादुद्भवन्ति विश्वस्य भवो यस्मात् एकमसहायमाद्यमनादि ॥ १६ ॥

सकामभजनादपि मोक्षमाशासान आह हे भगवन् ! पुरुषार्थः परमानन्दः स एव मूर्तिर्यस्य तव पादपद्म आशिषो राज्यादेः सकाशात सत्या आशीः परमार्थफलं हि निश्चितं कस्य तथा तेन प्रकारेण त्वमेव पुरुषार्थ इत्येवं निष्कामतया अनुभजतः यद्यप्येवं तथापि हे अर्य स्वामिन् ! दीनान् सकामानप्यस्मान भगवान् भवान् परिपाति संसारभयाद्रक्षत्येव यतः अनुग्रहे हिताचरणे कातरः परवशः, वाश्रा नवसूताधेनुर्वत्सं क्षीरं पाययति वृकादिभ्यो रक्षति च तद्वत् ॥ १७—१८ ॥

व्यवसितं सङ्कल्पितम ॥ १९ ॥

तत्प्रयच्छामीत्युक्तं किमदित्यपेक्षायामाह । नान्यैरिति सार्द्धश्याम । हे भद्र ! ध्रुवाक्षितिर्निवासो यस्मिन् तस्मिन् [illegible]हितम र्पितम ॥ २० ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

एवं विद्वान् कथामृतादिनाभिप्रायाभिव्यक्तेरानुषङ्गिकत्वं जानन्नपि अतो विरक्तत्वात् तामप्युपेक्ष्य भगवदनुग्रहेणैवानन्दमयत्वं ध्रुवज्ञाने स्वमनिर्विशेषब्रह्मणि शब्दब्यापारोऽभिधादिर्नास्ति तस्य सविशेषत्व विषयत्वात् किन्त्वारोपितामवृत्त्यैव ज्ञापकस्य व्यापारो मतश्री चतारश्री ब्रह्मरूपमपि नवेत्ति चकारोऽप्यर्थे तेन च तज्ज्ञानस्येश्वर-ज्ञानाम्भूतत्वमभिप्रेतम् अतः शास्त्रज्ञानित्वेऽप्यनुभवाभावात् ॥१३॥

अदैव तादृशादैन्याभिव्यासिकाल एवं ईश्वरस्य स्वरूपं गर्भोदशा-यिपद्मनाभत्वं तदुक्तं लघुभागवतामृते गर्भोदकशायः पद्मनाभो यो नारायणः । सोऽयं हिरण्यगर्भस्य प्रद्युम्नत्वे नियामकः,, इति काश्चलोकपद्मस्य प्रकाशावकुलत्वाकात्मककमलस्य भवतीत्यर्था हारात्कर्मणि चतुर्थ्युपगमादित्यर्थ इत्युक्तम ॥ १४ ॥

स्वापावबद्धावत्वे स्वापादीत्यादिना आत्मदात्रिपरिग्रहः स तु जड इति तस्य चिद्रूपत्वेऽपि जडतावाक्यणाध्यासेन जडप्रायत्वात् जड इत्युक्तम अविमन्त्रमापन्नत्वात्सैव अतः तुच्छप्रत्ययान्तत्वाभावात्कि-न्तु तत्प्रत्ययान्तत्वात् भगवति स्वापावस्थास्तुस्वरूपानन्दोल्ला-सलीला एवेति मन्त्रावसायमिति ज्ञेयम ॥ १५ ॥

समेश्वरं कश्मिश्चिदर्थकारिणा असम्यगाविर्भावरूपेण आते यस्मिन् निःशक्तिकत्वेन प्रतीतेऽपि आनुपूर्व्यात्भक्तिमार्गस्य-प्रयुक्तक्रमात अकस्मादिति नियतकारणानियम्यत्वमेवाकस्मिकत्वं तदभिरूपगतयतीति भिन्नामर्न्तस्वशक्तिः ततोऽवरुद्धाऽविद्याभक्त वात्सल्यलीलया "तता वत्सानदृष्ट्वैत्यपुलिनेऽपि च वत्सपान् उभावपि वने कृष्णो विचिकाय समन्ततः,, इतिवत् अननुसंधानरूपामोहाख्याऽ शोकमोहो स्नेहोवाभयंवायेऽन्नसंभवादित्यत्र असंभवा इति विशेषणास्य व्यावर्त्तकत्वात् संभवानां तु तेषां तत्र स्वीकारात् अनिशमित्यनेन शक्तीनां नित्यत्वमभिप्रेतम तत्र भक्तन एकत्वेऽपि त्वयास्मत्पतामिति न्यायेन निर्विकल्पकस्फूर्त्तेः प्राथमिकत्वात्सविकल्पकायाश्च तस्यास्त-दनन्तरजत्वाज्ज्ञानमयत्वोपासनया तदेव तत्त्वमसम्यगावि गयन्ती क्रोधत्य-रूपेत नदवात्र प्रस्तूयते अत एवानन्दमात्रमित्युक्तम ऐश्वर्यज्ञानभ-क्त्यात् परमात्मशुद्धभक्त्यात् भगवानिति इष्टिताऽतस्यादेव तथा-तथास्फूर्तिरितिभिवचनीयम अखण्ड त्रिविधपरिच्छेदशून्यं सजा-तीयादिभिन्निभभेदशून्यमस्ता ॥ १६ ॥

सकामभजनैरपि साधनान्मोक्षः संसारनिवृत्ति मुक्तिः श्रीविग्रहः यद्यपि देहदेहिभावाभावात् अन्यपदार्थबहुव्रीहिने संगच्छते तथापि "उभयव्यपदेशास्त्वहिकुण्डलवत्,, इति न्यायेन राहोः शिर इति वदभे-दविवक्षा यद्वा देवं त्वत्पादपद्मस्यैव परमपुरुषार्थत्वं तथापि माऽस्मभ्यं स-र्वात्मना अन्येस्वामिन् भत्व: स्वामिभृत्ययोरिति निपातान्तस्य वि-रचनायम ॥ १७ ॥

मन्मत्य: जात्कृष्णधामविषयक: संकल्पो यस्य तेन अर्थात् स्तुत्य-नन्तरं प्रतिनन्द्य स्तुतिं सम्भाष्य ॥ १८ ॥

संकल्पितमर्थं संकल्पादपि परमोत्कृष्टपददानेच्छया तेमभूमि-त्याशी: ॥ १९ ॥

नान्यैरिति सार्द्धकम अवान्तरकल्पवासिनो दैनन्दिनप्रलयपर्यन्त स्थायिनामपि परस्तात् लोकप्रयनाश इति त्रिलोकपदं भिन्ना लोकमन्यथा सुदुर्लभं यत्परमं पदं हरेरिति ततो गतासि मत्स्थानमिति भातिध्रुवमनयैव नाक्ष्णो: परमं पदमिति ध्रुवस्य वैकुण्ठपदाभिराहित्यत्वमतिवाक्यानि व्याकुर्वन्तु: ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

भङ्गभाभव्यतेम निरतिशयसीनव्यवहितव्यमङ्गलविग्रहवैशिष्ट्य मुक्तं महदाद्यशेषं सञ्जानुप्रविष्टय पुरुष इत्यनेन प्रकृतिप्राकृत पुरुषशरीरकत्वं च एवं स्थूलसूक्ष्मशरीरद्वयमुक्तम अनन्तेनाऽऽनन्द सत्यज्ञानानन्दलक्षणं दिव्यात्मस्वरूपमेतत्त्रितयमेव यथावद्विवेदयम् शरणं व्रजानि । तिर्यगित्यादिभिश्चतुर्भि: । तत्राद्येन स्थूलरूपं प्रपञ्चयति तिर्यगिति हे परम ! स्थूलसूक्ष्मरूपाभ्याम विलक्षण निःसमाभ्यधिक ! अत एवाज ! स्थूलरूपगतोत्पत्ति विनाशरहित नगा: स्थावराणां एतच्चराणामप्युपलक्षणं, तिर्यञ्च: पशुमृगादय: द्विजा: अण्डजा: एषां तिर्यक्त्वादेव संग्रहे सिद्धे गो-वर्णावर्ज्यायेन पृथग्ग्रहणम् एवं सरीसृपग्रहणं च आदिशब्देन स्वेदजोद्भिज्जसंग्रह: तिर्यगादिभि: परिचितं परितो व्याप्तं सदसत् चिदचिदात्मकं विशेषं विशेष: पृथिवी सोऽस्यास्तीति विशेषम अशो आदेराकृतिगणत्वात्मत्वविशेषपर्यन्तमित्यर्थ: महदादि महान् आदिर्यस्य अनेकं विविधाविचित्रसंनिवेशं स्थविष्ठं स्थूलं ब्रह्माण्डात्मकं ते तव रूपं वेद्मि त्वच्छरीरत्वेन वेद्मीत्यर्थ: अत: स्थूलरूपात्परं विलक्षणं यद्दिव्यमङ्गलविग्रहात्मकं सूक्ष्मं रूपं तदपि न वेद्मीति न किन्तु त्वत्प्रसादादेवेत्यर्थ: परं रूपं विशिनष्टि । यत्र यद्विषये वाद: प्राकृतत्वाप्राकृतत्ववाद: प्रवर्त्तन इत्यर्थ: यद्वा अवेद्मीतिच्छेद: अवेद्मीत्यकारो निपातो नञ्पर्याय: तत्रश्च अत: स्थविष्ठाद्रूपात्परं विलक्षणं "नभूतसंघसंस्थानो देहोऽस्य परमात्मन,, इत्युक्ताप्राकृतदिव्यविग्रहात्मकं रूपं तत: परं दिव्यात्मस्वरूपं सत्यं ज्ञानमनन्तमित्युक्तविधमवेद्मीति न किन्तु त्वत्प्रसादाज्ज्ञानाम्येवेत्यर्थ: रूपं स्वरूपं वर्णयन् विशिनष्टि । यत्र-यावदिति यत्र स्वरूपे च वाद: देवतिर्यङ्मनुष्यादिजातीय वाद: निर्विशेषत्ववादश्च प्रवर्त्तन इत्यर्थ: यत्र वाद: शब्दव्यापारोनास्ति तद्ब्रह्मस्वरूपं च न वेद्मीति व्याख्यानं त्वयुक्तम "सर्वे वेदा यत्पदमामनन्ति शास्त्रयोनित्वात ॥१।१।३। वचसां वाच्यमुत्तमं नतास्म सर्वं वचसां प्रतिष्ठा यत्र शाश्वती वेदैश्च सर्वैरहमेव वेद्य इत्यादिश्रुतिसूत्रस्मृतिभि: शास्त्रैकवेद्यत्वाभिधानात् ॥ १३ ॥

किञ्चय: पुनर्निर्विशेषचिदात्मकं जगत्कल्पान्ते प्रलये जठरे गृह्णन् कुक्षौ निवेश्येत्यर्थ: स्वस्मिन् एक यस्य कथानुभवैक-शील इत्यर्थ: अनन्तसख: शेषसहाय: तदन्त अनन्त भोगशेते योग निद्राकूढोभवति यस्य पुंसोनाभिरेवसिन्धुस्तस्मिन् उद्भूत काञ्चनमयं लोकात्मकं पद्मं तस्य गर्भे कर्णिकायां द्युमान् तेजस्वी ब्रह्मा भवति तस्मै भगवते तुभ्यं प्रणतोऽस्मि ॥ १४ ॥

एवं रूपं विशिष्य पुन: स्वरूपं विशिनष्टि । त्वमिति द्वाभ्याम । ननुजीवस्यापि स्थूलसूक्ष्मशरीरत्वं तत: कोविशेष इत्यत्राह त्वमिति त्वमकर्मवश्यत्वेच्छयोपात्तप्राकृतदिव्यमङ्गलगुणस्पर्शविशिष्टस्वं स्थितो निमित्तभूतायां जगत्पालनार्थमि-त्यर्थ: अधिमख: यज्ञाराध्यो यज्ञफलप्रदश्च व्यतिरिक्त: प्रकृतिपुरुषविलक्षण: अस्मे तिष्ठसि अत्राधिमख इत्यनेन स्थितावित्यनेन च परित्राणाय साधूनामित्युक्तर्गत्या सर्वधर्माराधनत्वाय साधुपरित्राणायत्वज्जन्म ननुजीववत्कर्मवश्यता मत्यवगम्यते अव्यतिरिक्त इति केन प्रकृति पुरुष विलक्षणा एवनाभ्यामपृथक्त्वेनावस्थितइत्यर्थ: सञ्जनेनविविचित्रस्थिरचरात्मकस्य जगत: धारणपोषणभोगाद्यात्मकं पालनं कथमेकेन मया युगपत्कर्तुं शक्यमित्यत्राह । बुद्ध्यवस्थितं बुद्ध्यावस्थितं विषयीभूतं संकल्परूपज्ञान विषयमितियावत् अव्याकृतया असंकुचितया स्वानुरूपा

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

संकल्परूपज्ञानेन द्रष्टा साक्षात्कर्तासि कृत्स्नस्य जगतः सर्वदेशकालावस्थास्वनिष्टनिरसनेष्टप्रापणात्मकपरिपालनोपयोग्यसंकुचितस्वसंकल्परूपज्ञानाश्रयोऽसीत्यर्थः स्थितावधिमजव्यतिरिक्तेत्यपिपाठः तत्र अजः प्रकृतिपुरुषगतस्वरूपान्यथाभाव स्वभावान्यथाभावरूपोत्पत्त्यादिरहितः अतएव व्यतिरिक्तः प्रकृतिपुरुषाभ्यां विलक्षणः स्थितावधि व्ययावधितावधि सत्या वतत्पर्यन्तं वा यत्वं जगत्सर्वमस्खलितज्ञानेन साक्षात्कुर्वन् आस्सेत्यर्थः एवं त्वं नित्यमुक्तः व्याप्यवस्तु गतदोषास्पृष्टः अनेनाचिद्व्यावृत्तिः अचिद्द्रव्यंहि अव्यक्तमहदादिकं स्वकार्येषु पृथिव्यादिषु व्याप्तं तद्गतदोषैः स्पृष्टम एवं जीवव्यावृत्तिश्च जीवोऽपि देवादिशरीरेषु व्याप्तः परमार्थतस्तद्गतदोषैरस्पृष्टोऽप्यहं ममाभिमानाभ्यां क्लिश्यतीति न नित्यमुक्तः त्वंतु नित्यमुक्त इति भावः तत्र हेतुः विशुद्धः अकर्मवश्यः नित्यमुक्तशब्दात्परस्य सुपालोप आर्षः कर्मधारयोवा विशुद्धत्वे हेतुः परिवृद्धः असंकुचितज्ञानः जीवोहिकर्माधीनसंकोचविकासभाग्भाव रूपज्ञानाश्रयो न परिशुद्धः इति भावः तत्र हेतुः कूटस्थः निर्विकारः स्वरूपतः स्वभावतोऽपि निर्विकारस्त्वं जीवस्तु स्वभावतो विकारी ननु नित्यमुक्तत्वपरिवृद्धत्वविशुद्धत्वानि मुक्तेषु नित्यसिद्धेषु चातिव्याप्तानि तत्राह । आत्मा तेष्वन्तःप्रविश्य धारकः नचात्मत्वस्याप्यतिप्रसक्तमतउक्तमादिपुरुषो भगवान् अधीश इति आदिपुरुष इति कर्मधारयः आदिशब्दश्च कारणवाची कारणंहि कार्यस्यादिः जगत्कारणभूतः पुरुष इत्यर्थः जगत्कारणत्वञ्च न मुक्तेषूपपन्नं "जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च भोगमात्रसाम्यलिङ्गाच्चेति,, मुक्तेषु जगद्व्यापाराभावस्य सूत्रितत्वात् भगवच्छब्देन समग्रषाड्गुण्यपरिपूर्णत्वमुच्यते तदप्यनतिप्रसक्तमेव अधीशः त्रयाणां सत्त्वरजस्तमसां तत्परिणामरूपाणां त्रयाणां लोकानां वा अधीशः इदमप्यनतिप्रसक्तमेवेति त्रिविधचेतनव्यावृत्तिः ॥ १५ ॥

ननु कथमचेतनेषु चेतनेषु चावस्थितस्यापि तद्गतदोषास्पर्शः नचाकर्मवश्यत्वादुपपत्तिः पुण्यापुण्यसजातीयचेष्टितानि कुर्वतस्तद्वश्यत्वानुपपत्तेरित्यत्राह । यस्मिन्निति । विरुद्धमतयः विरुद्धामतिर्यासु ताः आश्रयान्तरेषु सामानाधिकरण्यानर्हा विद्यावयो ज्ञानादयः विविधाः शक्तयः आनुपूर्व्या क्रमेण यस्मिन् पतन्त्याविर्भवन्ति शक्तिर्हिकार्योपयोग्यपृथक्सिद्धविशेषणं तत्र सृष्टिस्थित्यन्तः प्रवेशनियमनसंहारादीनां क्रमिकत्वेन पौर्वापर्यान्नुपयुक्तशक्तीनामपि तद्द्वारा पौर्वापर्यमत्रविवक्षितं सर्वदा सर्वशक्तेस्तस्य क्रमेण शक्त्याश्रयत्वायोगात् एवंच सर्वशक्तेस्तस्य सर्वमुक्तमुपपन्नमिति भावः उक्ताकारं ब्रह्म जगत्कारणत्वेन लक्षयन् लक्षयन् संग्रहेण तत्स्वरूपमपि शोधयन् शरणं व्रजति । तदिति । तद्ब्रह्म विश्वभवमेकमित्यनेन "यतोवा इमानि भूतानीति,, वाक्यं स्मारितम् अविकारमानन्दमात्रमनन्तमिति पदत्रयेण "सत्यं ज्ञानमनन्तं ब्रह्मेति,, वाक्यं स्मारितं तत्राह जन्मादिवाक्ये जगत्कारणत्वेनोपलक्षितस्य ब्रह्मणः स्वरूपं सत्यादिवाक्यशोधितम् एकमत्रापि तथाहि विद्यावयोविविधशक्तय इत्यनेन सृष्ट्याद्युपयुक्ताः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाचेत्युक्तशक्तीनामभिधानेन जगज्जन्मादयोऽप्युपस्थापिताः सर्वशक्तिमत्त्वेन प्रसिद्धं ब्रह्म यस्मिन्निति यच्छब्देनानूद्योपस्थितानां जन्मादीनां लक्षणत्वमुच्यते विश्वभवमिति भवत्यस्मादिति भवं विश्वस्य भवं विश्वभवं विश्वोत्पत्तिकारणमित्यर्थः एकशब्देनोपादानत्वंनिमित्तत्वंस्थितिसंहारकारणत्वं चैकस्यैवेति विवक्षितं तद्ब्रह्मेत्यनेन अधीहि भगवो ब्रह्मेत्युपक्रमे पृष्टस्य प्रतिवचनत्वसमर्पकं तद्विजिज्ञासस्व तद्ब्रह्मेति वाक्यं स्मारितम् एवं जगत्कारणत्वेनोपलक्षितं ब्रह्म स्वरूपतोलक्षयति । अविकारमिति । अनेन सत्यपदं स्मारितं तेन हि सततपरिणामिनोऽचेतनात्तत्संसृष्टाच्चेतनाच्च व्यावृत्तमुक्तम् एवमत्राप्यविकारपदेन आनन्दमात्रं मात्रचा कापि जडत्वव्यावृत्तिः अनेन ज्ञानपदं स्मारितम् अनुकूलज्ञानमेवहि आनन्दः श्रौतस्यापि ज्ञानपदस्यानन्दरूपज्ञानपर्यवसानत्वद्योतनायानन्दशब्दः प्रयुक्तः अनेनानन्दपदेन नित्यासंकुचितानुकूलज्ञानाश्रयत्वं विवक्षितं तेन मुक्तचेतनव्यावृत्तिः तेहिबद्धदशायां संकुचितज्ञानत्वेन न नित्यासंकुचितज्ञाना अनन्तपदेन देशकालवस्तुपरिच्छेद राहित्यं विवक्षितं अनेन नित्यासिद्धव्यावृत्तिः तेषां स्वरूपस्याणुपरिमाणत्वेनानन्तत्वाभावात् तत्र देशपरिच्छेदोनाम इदमत्र नभवतीति कालपरिच्छेदोनाम इदानीमिदानीं न भवतीति एवं रूपः एतद्द्वयरहितं वस्तुपरिच्छेदोनाम सर्ववस्तुसामानाधिकरण्यार्हत्वम् एवं भूतं ब्रह्माहं प्रपद्ये शरणं गतोऽस्मि ॥ १६ ॥

एवं ब्रह्मस्वरूपगुणान् विशोध्य तं प्रपद्येतद्भजनस्य फलाविनाभूतत्वमाविष्कुर्वन् वात्सल्यनिधेस्तस्याभिमतार्थादप्यतिशयितपुरुषार्थप्रदत्वमाह । सत्याशिषइति । हेभगवन् ! सत्याशिषः आशिषः सत्याः क्रियन्ते येन स सत्याशीः तस्य पुरुषार्थमूर्तेः स्वयं पुरुषार्थभूतस्वरूपस्य तव पादपद्मं यथा आशीः तथा इच्छानुरूपमित्यर्थः अनुभजतोऽतएव दीनान् त्रिवर्गनिष्ठानप्येवम्भूतानस्मान् अनुग्रहकातरः अनुग्रहैकविवशः भगवान् षाड्गुण्यपरिपूर्णः भवान् वत्सकं स्वार्थैकः वाश्रेव नवप्रसूताधेनुरिव हे आर्य स्वामिन् । परिपाति अभिमतप्रदानेन परिपाति परीत्युपसर्गेण सर्वतः पाति संसारभयाच्च पातीत्ययमर्थोविवक्षितः ॥ १७ ॥

स्तुतिमुपसंहरति । अथेति । सत्संकल्पेन दृढसंकल्पेन धीमता भृत्यगणैरभिष्टुतः स्तुतः अनन्तरं भक्तेष्वनुरक्तोऽनिरतिशयप्रीतिमान् भगवान्प्रति सद्यस्तुतिमितिशेषः इदं वक्ष्यमाणमब्रवीत् ॥ १८ ॥

उक्तमेवाह । वेदेति । हेराजन्यबालक ! ते त्वया हृदि व्यवसितम अभिमतविषयत्वेन निश्चितमहं वेद जानामि ते त्वया व्यवसितमितरैर्दुरापं दुर्लभमपि हे सुव्रत ! ते तुभ्यं प्रयच्छामि ददामि ॥ १९ ॥

व्यवसितमेव प्रपञ्चयति । नान्यैरिति । सार्द्धद्वयेन हेभद्र ! ध्रुव ! ध्रुवा शाश्वती स्थितिर्वासोयस्मिन् भ्राजिष्णु दीप्तिमत् अन्यैरनधिष्ठितं यत्र स्थाने ज्योतिषां ज्योतीरूपाणां ग्रहादीनां चक्रमाहितमर्पितम् ॥ २० ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली

ब्रह्मादीनामपि त्वत्प्रसादात् ऋते त्वद्रूपदर्शनमसुकरं किमुत मादृशानामिति भावेनाह । तिर्यङ्ङिति । हेअज ! अशेषं सर्वावयवोपपन्नं महदादि महत्तत्त्वमादिर्यस्य तत्तथोक्तं सता पृथिव्यादिभूतपञ्चकेनासता वाय्वादिभूतद्वयेन विशेषोयस्य तत्तथोक्तं स्थविष्ठं स्थूलतमं तिर्यगादिभिर्विरचितं ब्रह्माण्डाख्यं रूपं वेद्मि हेपरम ! अतः स्थूलात्परं सूक्ष्मं रूपं न वेद्मि अत्र हेतुगर्भविशेषणमाह । यत्रेति । वाच इत्युपलक्षणं वेदाभिमानिनोलक्ष्म्यादयोयत्र यद्विषयज्ञानवन्तोन भवन्ति किमुक्तं भवति लक्ष्मी ब्रह्माद्या अनुदिनं पश्यन्तोऽपि किंचिदनन्तत्वेन जानन्ति किन्त्वहं तदुक्तम "पश्यमानोऽपि तु हरिं नतु वेत्ति

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

कथंचन । वेत्ति किंचित्प्रभावेन हरेरघगुरोस्तथा ब्रह्मावाग्ब्रह्मणोरूपे • मूर्ते चैवा मूर्ते च यतोवाचोनिवर्तन्तेअप्राप्य मनसा सह इत्यादि श्रुतेः ॥ १३ ॥

सृष्टिसंहारकर्त्रोर्ब्रह्मरुद्रयोर्लोकहद्भूतां विष्णुसमत्वशङ्कां निवर्तयितुमाह । कल्पान्ते इति । अनन्तः सखा यस्य स तथोक्तः स्वदृक् स्वयं प्रकाशः पुमान् कल्पान्ते एतदखिलं जगज्जठरेणोदरेण गृह्णन् संहरंस्तस्यानन्तस्याङ्के शेते यस्य नाभिसिन्धुरुहं नाभिसरोजात तदेव काञ्चनं सुवर्णवर्णं लोकात्मकं पद्मं तस्य गर्भे द्युमानतिद्युतिमान् ब्रह्मा जात इति शेषः अनेन रुद्रस्य संहर्तृत्वं ब्रह्मणः स्रष्टृत्वं च द्वारमात्र मिति ज्ञातव्यम एवं विधमाहात्म्यस्य हरेस्त्वया किमुपक्रियत इति तत्राह । भगवन् इति ॥ १४ ॥

पङ्के प्रवर्तमानस्य पङ्कलेप इव सृष्ट्यादौ प्रयतमानस्य हरेरनित्यत्वं दोषवत्त्वमशुद्धत्वं च स्यादित्याशङ्क्य योगिनोऽपि दुर्भगशरीरस्थस्य तद्गतदुःखाद्यनुभवो नास्ति किमुतनित्यस्य नित्यमुक्तस्य नित्यशुद्धस्यात एवाप्रतिहतवैभवस्येति भावेनाह । त्वंनित्येति । किमेवं भूतः परिच्छिन्न इति नेत्याह । आत्मेति आततत्वाद्वात्मा तर्हि तत्तत्पदार्थसंबन्धेन तत्तद्धर्माः संगच्छन्ते इत्यत उक्तं कूटस्थ इति षड्विकारशून्यः एवंविधः कोऽयमत्राह । आदिपुरुष इति । आदीत्युपलक्षणं जगत आदावन्ते च वर्तमानः पुरुषः पूर्णषड्गुणः श्रीनारायणः पूर्णषड्गुणत्वं स्पष्टमाह । भगवन्निति । ऐश्वर्यस्य समग्रस्येति स्मृतेः कुतोऽस्य समग्रैश्वर्यमवगम्यत इत्यत उक्तं त्र्यधीश इति त्रयाणां लोकानां मुक्तामुक्तसंसारिणां वर्तमानादिकालानां वा जाग्रदाद्यवस्थानामृगादिवेदानां वा इत्यादित्रित्वसंख्यावतामधीशः इन्द्रादिव्यावृत्यर्थमधीश इत्युक्तं तमेव विशिनष्टि इति यद्यस्मात्तस्मादखण्डतया स्वबुद्ध्या स्वरूपज्ञानेन * वधि संसारस्यावधिभूतं बुद्ध्यवस्थितं बुद्धौ स्थितं त्वां दृष्ट्वावस्थिता ये पुरुषास्तैः सहातोऽस्मात्प्रपञ्चाद्भवानतिरिक्तस्त्वमास्स इत्यन्वयः "वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयो,, रिति वचनादल्लोपः प्रामाणिकः ॥ १५ ॥

अघटितघटनशक्तिमत्त्वादयमेवाभीष्टसिद्धये प्रार्थनीय इत्याह । यस्मिन्निति । विरुद्धगतयो लोके विरुद्धधिषया विद्यावद्योर्विविधशक्तयो स्थूलत्वमणुत्वह्रस्वत्वमित्यादयो यस्मिन् हरावनिशं पतन्ति वर्तन्ते तत्र प्रमाणमाह आनुपूर्व्येति "आनुपूर्वी श्रुतिश्चैव त्रयीचाम्नाय उच्यते,, इत्यभिधानात् विचित्रशक्तिः पुरुषः पुराणः अस्थूलमनण्वह्रस्वमित्यादिकया श्रुत्या सिद्धमित्यर्थः अहं तद्ब्रह्म शरणं प्रपद्य इत्यन्वयः जगत्कारणमेव ब्रह्मात्र विवक्षितं न जीव इति भावेनाह । विश्वभवमिति । विश्वस्य भव उत्पत्तिर्यस्मात्तत्तथा नैतल्लक्षणं परमाणुष्वतिव्याप्तमित्याह । एकमिति । परमाणूनामनेकत्वाविदमेव मुख्यकारणमित्यर्थः कारणत्वं मृद्वदित्याह । अविश्वमिति । जगतोऽन्यत् अनन्तमितिपाठे जीवाश्रितं कर्मकारणमस्त्वित्याशङ्क्य कर्मणः क्षणभङ्गुरत्वेनानित्यत्वादचेतनत्वाच्च कारणत्वानुपपत्तिरित्यर्थः विश्वस्याद्यन्तवत्त्वेनानित्यत्वादस्य तदभावः कारण-

* स्थितावधिमित्येकपदभ्रान्तिनिरासायतात्पर्यानुसारेणायोजयति वधिमिति तेनस्थिता वधिमितिपदद्वयंसूचितं । स्थितःइत्यस्यास्थिताइत्यर्थः । वधिमित्यस्यावधिभूतमित्यर्थः । अल्लोपप्रमाणं वष्टीति—टी०

त्वं युक्तमित्याह । आद्यमिति । आद्यमित्युपलक्षणं विश्वस्यादावन्ते च भवतीति अनाद्यनन्तत्वं प्रधानस्यास्तीत्यत उक्तमानन्दमात्रमिति इतोऽपि प्रधानस्य कारणत्वमनुपपन्नमित्याह । अविकारमिति ॥ १६ ॥

इतरदेवतानुग्रहात्स्वानुग्रह एवाभीष्टफलप्राप्तिहेतुरित्याह सत्याशिष इति । पुरुषार्थमूर्तेरानंदानुभवरूपस्य तव पादमूलमनुभजतः पुरुषस्याशिष्ट्यः आचार्याशिष्टाः सत्याशिषोयथार्थशुभफलप्रदा हीन * एवमपि तथापि मार्गपूज्यः अनुग्रहकातरो भवान् दीनानस्मान्निशष्यान्विशिष्ट(२)फलप्राप्तये पुनः वाश्रेव नवप्रसूता गौरिव वत्सं परिपातीत्यन्वयः वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्तीति श्रुतिः ॥ १७ ॥

सत्संकल्पेन सत्सत्येऽभ्यर्हिते श्रेष्ठ साधीयसि भवत्वपीति यादवः ॥ १८ ॥

भूयसां महतां योगिनामपि दुरापमित्यनेनायोग्यानामेव दुष्प्रापं न तु योग्यानां तेषां साधनसामग्र्याः सुलभत्वादित्यर्थः सूच्यत इत्युत्तरग्रंथेन ज्ञायत इति भावेन विशिनष्टि । नान्यैरिति । ध्रुवा नित्या क्षितिर्निवासो यस्मिंस्तत्तथोक्तं महीति तिलपीडोलूखलं कल्पलयेपि लयो नास्तीत्याशयेनाह । स्वामिन्निति । अनेन ध्रुवाक्षितीत्यस्यार्थविशेषो दर्शितः पुरस्तादग्रे धर्मादयो यत्स्थानं प्रदक्षिणं कृत्य चरन्ति तत्तुभ्यं दास्यामीत्यन्वयः वनौकसां वानरस्था ॥ १९-२०-२१ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अथ तथा कस्मादाविर्भूतं श्रीभगवन्तमनुभूय निजपूर्वावस्थामनुशोचति । तिर्यगिति । न वेद्मि वर्तमानसामीप्ये वर्तमानवद्वेति विधानात् एतावन्तं काल नावेदिषमित्यर्थः । येनान्यथासङ्कल्प्य तवाराधनं कुर्यामिति भावः । यथा विराड्रूपे सत्यस्वासत्यत्वविचारमयेवाद्दस्तथा यत्र नास्तीति प्रौढिवचनम् ॥ १३ ॥

तदेतद्दृश्यमान परमस्वरूपमेव सर्वाश्रयत्वेन प्रतिपादयति । कल्पान्त इति ॥ १४ ॥

ननु रूपित्वे सति विराड्व्यष्टि रूपि रूपेभ्यः प्रपञ्चेभ्यो मम को विशेषः येन रूपस्यापि वैलक्षण्यं हेतुत्वेन तर्क्यते तत्राह । त्वं नित्यमुक्तः अविद्याकर्माजनितरूपत्वात् परिशुद्धः शुद्धसत्वात्मकरूपत्वात् विबुद्धः तत एव स्वरूपसिद्धज्ञानस्यानावरणात् प्रत्युतोल्लासात् । आत्मा स्वरूपाभिन्नत्वात् कूटस्थ एक रूपतया कालव्यापी । सदातनः सर्वरूपत्वात् आदिपुरुषः आदित एव पुरुषाकारः स्वभावसिद्धत्वात् । भगवान् पूर्णशक्त्याश्रयः वस्तुलक्षणत्वात् । अधीशः त्रिगुणशक्तेर्नियामकः तदतिरिक्त स्वरूपशक्त्यात्मकरूपत्वात् तस्मात्तव रूपस्य च प्रकृत्यतीत शक्तिमयत्वादेकात्मकत्वेनान्याभ्यां रूपि रूपाभ्यां विशेष एव तदतीत शक्तिमयत्वमेव योजयति । यद्धीति ॥ १५ ॥

तदुभयशक्तियुक्तित्वाच्च तव नायुक्तं । सर्वशक्तित्वात् विरुद्धः शक्तिनिधानमेव हि त्वमित्याह । यस्मिन्निति । आनुपूर्व्यात् स्वस्ववर्गेउत्तममध्यमकनिष्ठभावेन वर्तमाना विविधशक्तयः प्रायः परस्परं विरुद्धगतयोऽपि यस्मिन् यदाश्रित्याऽनिशं पतन्ति प्रवर्तन्ते स्वस्व व्यापारं कुर्वन्तीत्यर्थः ॥ १६ ॥

तस्मात्त्वद्रूपस्य स्वरूपपूर्णपरमानन्दरूपत्वात् परमपुरुषार्थः त्वमेवेति साधूक्तं या निर्वृतिरित्यादिकमित्याह । सत्येति । आशि—

* आचार्याशिषत्वेवास्माकमाशिषोभवन्तितथापीत्यर्थः । टी०
(२) आचार्योपदेशजन्यफलादधिकफलप्राप्तये ।

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

ध्रुवेति चित्सुखः । हे अर्य्येति । अर्य्यः स्वामिवैश्ययोरिति निपातात् ह्रस्वादिरेवायम् ॥ १७ ॥

भद्रन्ते इति पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे इति प्राचीनसङ्कल्पानुरूपापि लभमानस्य ते दुरापं मत्पदप्राप्त्या ततो वैशिष्ट्येन भद्रमेव भविष्यतीति शुभाशीर्वादाभिप्रायः। तत् प्रयच्छामि तथान्यैर्दुरापमपि प्रयच्छामीत्यन्वयः ॥ १८ ॥

नात्यैरिति सार्धकम् ॥ १९ ॥

कल्पवासिनां दैनन्दिनप्रलयपर्यन्तस्थायिनामपि परस्तात् स्थास्नु मेध्यामिति क्वचित् पाठः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वेवं चेज्जानासि तर्हि मत्पित्रादिप्राप्तेभ्योऽप्युत्कृष्टं पदं साधयानीति सङ्कल्प्य किमिति तद्भजनमकार्षीः तत्राह तिर्य्यगादिभिः परिचितं व्याप्तं सन्तोऽसन्तश्च विशेषा यस्य तत् महदादीन्यनेकानि कारणानि यस्य स्थविष्ठं विराड्रूपमेव तवाहं वेद्मि वर्त्तमानसामीप्ये वर्त्तमानवद्वेति एतावन्तं कालमवेदिषमित्यर्थः । अतः स्थविष्ठात् परं यदप्राकृतं चिदानन्दघनं तव स्वरूपं हे परम ! नाविदिषं यत्र वादः शब्दव्यापारो नास्ति तद्ब्रह्मस्वरूपञ्च नाविदिष अतएव बालत्वेनाज्ञत्वात्तथा दुर्भाग्यमामकरणं साम्प्रतन्तु त्वदीयं कम्बुस्पर्शं प्राप्य सर्व्वमेव वेदार्थमज्ञासिषमत एवं श्रीमच्चरणेषु निवेदयामीति भावः ॥ १३ ॥

ननु मां जानासि चेत् त्वामहं परीक्षिष्ये कथय कोऽहमिति तत्राह। कल्पान्त इति त्रिभिः । स्वस्मिन्नेव दृक् नतु बहिर्यस्य योगनिद्रारूढत्वात् तस्यानन्तस्य शेषस्याङ्के उत्सङ्गे शेते । यस्य नाभिसिन्धुरुहे नाभिकमले आगन्तुकं काञ्चनवर्णं लोकात्मकं यत् पद्मं तस्य गर्भे कर्णिकायां द्युमास्तेजस्वी ब्रह्मा भवति तस्मै ते त्वां प्रसादयितुं नतोऽस्मि केवलं नतु परिचरितुं किमपि शक्नोमीति भावः ॥ १४ ॥

ननु ममापि शयनाद्यवस्थावत्त्वे को जीवाद्विशेषस्तत्राह । यद्यतस्त्वं नित्यमुक्तः जीवस्तु त्वत्प्रसादान्मुच्यते त्वं परिशुद्धः सच मलिनः त्वं विबुद्धः सर्वज्ञः सत्वल्पज्ञः त्वमात्मा सतु देहाध्यासी जडः । त्वं कूटस्थो निर्विकारः सतु विकारी । यद्वा । त्वं कूटस्थ एकरूपतया कालव्यापी सतु नानारूपतयैव । त्वमादिः कारणं पुरुषः पुरुषाकारश्च सतु न कारणं स्त्री पुंनपुंसकाकारश्च त्वं भगवान् सतु भगहीनः । त्वं त्र्यधीशः सतु त्रिगुणाधीनः । त्वं बुद्ध्यवस्थेति जीवस्य बुद्धेरवस्थां स्वापादिकमखण्डितया स्वदृष्ट्या चिच्छक्त्या साक्षित्वेन द्रष्टा सतु बुद्ध्यवस्थाभिः खण्डितदृष्टिः त्वं स्थितौ सर्वजगत्पालने कर्म्मण्यारम्भे सतु स्वपालनेऽप्यसमर्थः त्वमधिमखः मखादि कर्माधिष्ठाता सतु मखादिकर्माधीनः अतस्त्वं तस्माद्व्यतिरिक्त एवासि से तव योगनिद्रादिकन्तु चिच्छक्तेर्विलास इति जानाम्येवेति भावः ॥ १५ ॥

सविशेषं भगवत्स्वरूपमुक्त्वा निर्विशेषब्रह्म स्वरूपमाह। यस्मिन्निति । निर्विकारं केवलमानन्दमात्रमेव । नित्यचिदात्मकनानाविशेष ग्रहणा समर्थानां दूरस्थानां केवल शान्तानां भक्तिमिश्रज्ञानदृष्ट्या भातं तद्ब्रह्म त्वन्महिम स्वरूपं प्रपद्ये यस्मिन् निःशक्तिकत्वेन प्रतीतेऽपि विद्यादयो विविधशक्तयोऽनिशं स्थिता आनुपूर्व्यात् पतन्ति प्रतीता भवन्ति । अतएव त्वं भक्तितारतम्येन सामीप्यतारतम्यवतां विशेष तारतम्य ग्रहण समर्थानां भक्तिमिश्रज्ञानिनां किञ्चिदधिकभक्तिमतां प्रथमं विद्याशक्तिमानात्मेति भासि ततोऽप्यधिकभक्तिमतां मायाशक्तिमान् पुरुषो जगत्कारणमिति अतएव विश्वभवमिति विशेषणं ततः सम्पूर्णभक्तिदृष्ट्या ऐश्वर्य्याद्यनन्तशक्तिमान् भगवानिति तत्राप्यतिप्रविष्टधियां लीलाद्यखण्डकलाकुतूहलवैदग्धी महाशक्तिरिति त्वमनुभवगोचरी भवसि । यथा नगरस्थाद्विदूरस्थजना विशेषमनुपलभमाना इदमग्रे स्थितं धन्वमात्रमिति तदेव पश्यन्ति सन्निदूरस्था वृक्षषण्डमिति । समीपस्थास्तु विविधनिष्कुटाट्टपुरगोपुर गृहध्वजपताकादियुक्त नगरमिति तत्र प्रविष्टास्तु विचित्र तडाग रथ्या विपणि शृङ्गाटकाजिरनृत्यगीतवादित्रादिसकलसुखास्पदमित्यनुभवन्ति । यथाहुः प्राञ्चोऽपि चर्यास्त्ववधामित्यवधारितं पुरा ततः शरीरीति विभावितं कृतिम । विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि स इति । शक्तयः कीदृश्यः विरुद्धगतयः इति विद्याविद्ययोः सर्गसंहारयोर्जन्मवत्त्वाजत्वयोरनीहत्व सलीलत्वयोरात्मारामत्वभक्तवात्सल्ययोर्विरोधेऽपि तत्तच्छक्तीनामतर्क्यैव त्वयि नित्या स्थितिरेव ॥ १६ ॥

ननु भो याचक ! सत्यमेव त्वं मत्स्वरूपं जानास्येव किन्तु तव साम्प्रतिकनिष्कामत्वेऽपि यथा पूर्वसंकल्पमेव फलमहं दास्यामि गृहाणेति तत्र स्वस्याज्ञत्वं विवृण्वन् प्रेममाधुर्य्यमाशासान आह सत्येति । हे भगवंस्तव पादपद्ममेव आशिषो राज्यादेः सकाशात् सत्या आशीः परमार्थफलं ! कस्य तथा तेन प्रकारेण त्वमेव पुरुषार्थमूर्त्तिरित्येवं निष्कामतया अन्वनुभजतः एवमपि दीनानस्मान् कृतसकामभजनानपि परिपाति निष्कामप्राप्यपादपद्मकिञ्चिन्माधुर्य्यदानेनेत्यर्थः तत्र हेतुः । अनुग्रहकातरः बालत्वादयमद्यापि मत्प्रभक्तिं न जानाति तदपि तत्फलस्वमाधुर्य्यममास्वादयामीति बुद्ध्येत्यर्थः । वाश्रा धेनुर्यथा वत्समकमलं स्वमगजन्तमपि दुग्धं पाययति वृकादिभ्यो रक्षति च तद्वत्त्वम्मां स्वचरणाभक्तिमाधुर्य्यमास्वादयतु सकामत्वादिभ्यो भक्तिविघ्नेभ्यो रक्षतु चेति भावः ॥१७—१८॥

राजन्यबालकेति तवैश्वर्य्यस्पृहा स्वाभाविक्येवेति तदहं प्रयच्छामीत्युक्तं तर्हि स्वप्रेमाणं न दास्यसीति कातरमुक्तं तमाश्वासयति भद्रन्ते इति मा चिन्तय प्रेमाणमपि प्रयच्छामीत्यपिकारार्थः ॥ १९ ॥

त्वया पूर्वं यथा प्रार्थितं पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे ब्रूहास्मत्पितृपितामहैरन्यैरप्यनधिष्ठितमिति तदिदं स्थानं गृहाणेत्याह। नान्यैरिति ध्रुवा नित्या क्षितिर्निवासो यत्र तत् आहितमर्पितं धान्याक्रमणाय भ्राम्यमाणानां पशूनां बन्धन स्तम्भो मेढी यस्यां बलीवर्दसमूहवत् अवान्तरकल्पवासिनां परस्तान्महाकल्पपर्य्यन्तं स्थास्नु ततो महा प्रलये सति ध्रुवस्य महावैकुण्ठारोहणमिति केचित् ब्रह्माण्ड मध्यवर्त्तित्वेऽपि श्वेतद्वीप मथुरा द्वारकादीनामिव ध्रुवलोकस्यापि सुदुर्लभं यत् परमं पदं हरेरिति ततो गन्तासि मत्स्थानमिति आतिष्ठ जगतां वन्द्यं तद्विष्णोः परमं पदमिति ध्रुवस्य वैकुण्ठपदाधिरोहणमित्यादि प्रमाणेभ्यो भगवल्लोकत्वेन नित्यत्वान्महाकल्पवासिनामपि परस्तादित्यपरे ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

एवं भगवदनुग्रहेण प्राप्तज्ञानो यथाशक्ति स्तुत्वाथ कैमुतिकन्यायेन भगवन्तमियत्तान वच्छिन्नत्वेन स्तौति । तिर्यगिति । हे अज हे परम ! तिर्यगादिभिः परिचितं व्याप्तम् सन्तः स्थूलाः असन्तः सूक्ष्माश्च विशेषा विभागा यस्मिन् तत् महदादिभिरवयवैरनेकं बहुभेदयुक्तम् स्थविष्ठं स्थूलं वैराजं ते रूपमपि यदिकात्स्न्येन नवामि तर्हि यत्र सर्वकारणे सेश्वरनिरीश्वरादीनां वादः "सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्य„इत्यादि श्रुतिस्मृतिभ्यः शास्त्रकवेद्यम् अतः स्थविष्ठात् परं रूपं न वेद्मीति किमुवक्तव्यमित्यर्थः यदुक्तम् अतः परमेश्वरं न वेद्मियत्र वादः शब्दव्यापारो नास्ति तद्ब्रह्मस्वरूपं च न वेद्मीति तत्र जगत्कारणादीश्वरादन्यस्य ब्रह्मणः सूत्रकारेणाप्रतिपादितत्वात् शब्दव्यापारवर्जितवस्त्वभावाच्च ॥ १३ ॥

एवमियत्तानवच्छिन्नत्वेन स्तुत्वाथ लोकत्रयप्रवेशस्थानत्वादिना स्तुवन्नमस्करोति कल्पान्त इति यः पुमान् पुरुषः एतज्जगज्जठरेण गूढन् उदरे निविश्यस्वदृष्टिः अनन्तसखस्तस्यवाङ्कुशेत यस्य च नाभिरेव सिन्धुस्तस्मिन् रोहतीति तथा तस्मिन्नुक्तानवत्युज्वललोकपद्मस्य गर्भे मध्ये पुमान् ब्रह्माभवति तस्मै ॥ १४ ॥

अथ भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् उभय व्यपदेशात्त्वहिकुण्डलवदित्यादि श्रुति सूत्रसिद्धं विश्वभिन्नाभिन्नं भगवन्तं वर्णयन् शरणं प्रजानत्यामीति द्वाभ्यामत्वं श्रुति प्रोक्तेषु त्रिविधेषु पदार्थेषु भोक्त्रादिषु अधीशः प्रेरयितृशब्दार्थः भोक्तृभोग्यविलक्षणस्वरूपस्तदुभयनियन्तेत्यर्थः तदुभयविलक्षणस्वरूपत्वमुपपादयति । नित्य मुक्तः परिशुद्धः विशुद्धः त्वं नित्यमुक्तेभ्योऽपि परिशुद्धोविशुद्धश्च किं पुनर्बद्धेभ्य इति जीवेभ्यो वैलक्षण्यमुक्तम् आत्मेति अनात्मवर्गात्कालादितोवैलक्षण्यमुक्तम् सर्वनियन्तृत्वमुपपादयति सर्वहेतुतया षाड्गुण्यनिधित्वेन च आदिपुरुषः सर्वहेतुः भगवान् षाड्गुण्यनिधिश्च सर्वज्ञत्वेन सर्वपालकत्वेन च सर्वविलक्षणत्वं सर्वनियंतृत्वंचाह बुद्ध्यावस्थानि अखंडितया देश काल वस्तुभिरप्रतिहतया स्वदृष्ट्या द्रष्टासाक्षात्पश्यति स्थितौ सर्वपालने अधिमखः यज्ञाधिष्ठातृतया वर्तसे एवं भूतो भवान् यत् येभ्यश्चेतनाचेतनेभ्यः अव्यतिरिक्तआस्ते तेभ्योभिन्नोऽप्यभिन्नआस्ते इत्यर्थः ॥ १५ ॥

ननु कथं भगवतः सर्वभिन्नाभिन्नत्वमित्यत्र हेतुमाह । यस्मिन्निति । यस्मिन् आधारे आधेय भूताः विरुद्धा आधारस्वरूपात्सर्वाधारत्वस्वायत्तत्वादि गुणयुक्तात् विलक्षणआधेयत्वपरायत्तत्वादिरूपा गतिर्येषां ते विरुद्धगतयो लोकाः अनेककोटि ब्रह्मांडानि आनुपूर्व्यात्सृष्टि संहारक्रमेण अनिशं पतन्ति इत्येवं स्वाधारत्वेन सर्वभिन्नाभिन्नत्वं भगवतोदर्शितम् विद्याश्चेतनरूपाशक्तयः आदिना अचेतनरूपाः शक्तयश्चयस्मिन् पतंति इत्येवं भगवतः सर्वशक्तित्वेन सर्वभिन्नाभिन्नत्वं दर्शितम् विश्वभवं सर्वकारणमित्यनेन सर्वकारणत्वेन भगवतः सर्वभिन्नाभिन्नत्वं दर्शितम् श्रुत्यापि सर्वस्य ब्रह्मजत्वादिनैव ब्रह्माभिन्नत्वमुक्तं ननुस्वरूपैक्येन सर्वं खल्विदं ब्रह्म तज्जलानितीति यत आद्यं सर्वं पूर्व वर्ति सर्वोपादानभूतम् शक्तिपरिणामाभिप्रायेण स्वरूपतोऽविकारित्वमाह । अविकारमिति।सर्वदुःखरहितत्वमाह। आनन्दमात्रमिति।एवं भूतमेकमनेकचेतनाचेतनाश्रयम् ब्रह्म वासुदेवं प्रपद्ये इति संक्षेपार्थः ॥ १६ ॥

हे भगवन् ! पुरुषार्थः मुक्तगम्योयोऽर्थः स एव मूर्तिर्यस्य तस्य तवपादपद्ममेव आशिषस्त्रिवर्गरूपात् इतरफलात् सत्या समीचीना आशीः फलम् कस्य तथाच भगवत्पादपद्ममेव समीचीनं फलमित्येवं कार्येनानुभजतः यद्यप्येवं तथापि दीनान् सकामान् अस्मानपि भगवान् भवान् हे आर्य ! परिपातिपरितः सर्वतः भुक्तिदानेन संसाराद्भयदानेन चरक्षति यथा वत्सकं दुग्धदानेन वृकादिभयाच्च वाश्रा धेनुः परिपाति तद्वत् ॥ १७ ॥ १८ ॥

व्यवसितं वाञ्छितम् ॥ १९ ॥

तदेव वर्णयति । नान्यैर्धिष्ण्याम् नान्यैरिति हेभद्र ! ध्रुवा क्षितिः स्थितिर्यस्मिन् ज्योतिषां चक्रंशिशुमाराख्यं यत्राहितमर्पितम् ॥२०॥

भाषाटीका ॥

हे अज ! हे परम ! तिर्यक् पक्षि सर्पादि देवता दैत्य मनुष्य इन से व्याप्त स्थूल सूक्ष्म तत्त्वों से युक्त महदादि अनेक भेदवाला आप का जो यह विराट्‌रूप है जिसको वेद वचन भी यथार्थ नहीं कह सकते हैं तिस रूपसे परे हम किसी को नहीं जानते हैं ॥ १३ ॥

कल्प के अन्त में इस सब जगत् को उदर में ग्रहण कर के स्वयं प्रकाश अनंत देव के सखापुरुषरूप आप शयन करते हो जिन के नाभिरूपी समुद्र मेंसे पैदा होनेवाला सुवर्ण कमल के मध्ये में तेजस्वी ब्रह्मा उत्पन्न हुआ तिन भगवान् आप के अर्थ नमस्कार है ॥ १४ ॥

आप नित्य मुक्त हो परिशुद्ध हो सर्वज्ञ हो व्यापक हो निर्विकार हो आदि पुरुष हो भगवान् हो तीनों गुणों के तीनों लोकों के ईश्वर हो जो कि बुद्धि के अवस्थों को अखंडित अपनी दृष्टि से देखते हो लोक रक्षा करने में यज्ञों के अधिष्ठाता हो और उन से अलग रहते हो ॥ १५ ॥

जिन आप के विषय में नाना प्रकार की विरुद्ध बुद्धि निरंतर उपस्थित होती रहती हैं जैसे निर्गुण सगुण इत्यादि विद्या अविद्या आदिक शक्ति भी क्रम से जिन में वर्त्तमान हैं सो जगत्के उत्पन्न करने वाले एक अनंत आद्य आनन्द मात्रस्वरूप निर्विकार आप को मैं शरण प्राप्त हूं ॥ १६ ॥

हे भगवन् ! हे आर्य ! पुरुषार्थ मूर्ति आप के पाद पद्म के भजने वाले लोगों को सत्य सब मनोरथ मिलते हैं तथापि आप उनके ऊपर बड़ी कृपा करके जैसे गऊ अपने बछरा की रक्षा करती है तैसे हम सब अति दीनजनों की रक्षा करते हो ॥ १७ ॥

मैत्रेयजी बोले इसप्रकार सुंदर संकल्प वाले बुद्धिमान् ध्रुव के स्तुति करने पर भक्तों पर कृपा करने वाले भगवान् संतुष्ट होकर ये वचन बोले ॥ १८ ॥

श्री भगवान् बोले हे राजपुत्र ! जो तुम्हारे मन में निश्चित है सो हम जानते हैं भो हे सुव्रत जो कष्ट से प्राप्त होने योग्य वस्तु सो भी तुमको हम देंगे तुम्हारा कल्याण होगा चिंता मत करो ॥ १९ ॥

हे । भद्र जो किसी को नहीं प्राप्त हुआ है प्रकाशमान है निरन्तर रहने वाला है जहां पर ग्रह नक्षत्र तारों का चक्र स्थापित है ॥ २० ॥

मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनाम् ।
धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः ।
चरन्ति दक्षिणीकृत्य भ्रमन्तो यत्सतारकाः ॥ २१ ॥
प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः ।
षट्त्रिंशद्वर्षसाहस्रं रक्षिताऽव्याहृतेन्द्रियः ॥ २२ ॥
त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः
अन्वेषन्ती वनं माता दावाग्निं सा प्रवेक्ष्यति ॥ २३ ॥
इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः ।
भुक्त्वा चेहाशिषः सत्या अन्ते मां संस्मरिष्यसि ॥ २४ ॥
ततो गन्तासि मत्स्थानं सर्वलोकनमस्कृतम् ।
उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते गतः ॥ २५ ॥

मैत्रेय उवाच

इत्यर्चितः स भगवानतिदिश्याऽऽत्मनः पदम् ।
बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः ॥ २६ ॥
सोऽपि संकल्पजं विष्णोः पादसेवोपसादितम् ।
प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरम् ॥ २७ ॥

विदुर उवाच

सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितम् ।
लब्ध्वाऽप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित् ॥ २८ ॥

मैत्रेय उवाच

मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान् स्मरन् ।
नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान् ॥ २९ ॥

ध्रुव उवाच

समाधिना नैकभवेन यत्पदं विदुः सनन्दादय ऊर्ध्वरेतसः ।
मासैरहं षड्भिरमुष्य पादयोश्छायामुपेत्यापगतः पृथङ्मतिः ॥ ३० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

धान्याक्रमणाय भ्राम्यमाणानां पशूनां बन्धनस्तम्भो मेढी तस्यां बलीवर्दसमूहवत् अवान्तरकल्पवासिनां परस्तादपि स्थास्नु लोकत्रयनाशेऽप्यनश्वरम् धर्माग्न्यादयो नक्षत्ररूपाः वनौकसः सप्तर्षयो यत्प्रदक्षिणीकृत्य भ्रमन्तश्चरन्ति ॥ २१ ॥

एतच्च राज्यानन्तरं भविष्यतीत्याह । प्रस्थित इति । तुभ्यं पृथ्वीं दत्त्वा वनं प्रस्थिते भावे क्तः वनं प्रति दीर्घगमने कृते सति रक्षिता रक्षिष्यसि ॥ २२ ॥

त्वया असंकल्पितमपि मङ्गलस्य तव द्रोहादेवं भविष्यतीत्याह । त्वद्भ्रातरीति । सा मृगांश्चिन्वती दावाग्निं प्रवेक्ष्यति ॥ २३ ॥

किञ्च इष्ट्वा माम् यज्ञहृदयं प्रिया मूर्तिर्यस्य तम् ॥ २४ ॥

यतः स्थानात् ॥ २५ ॥

अतिदिश्य दत्त्वा ॥ २६ ॥

संकल्पजं मनोरथम् पादसेवया प्रापितम् संकल्पस्य निर्वाणं समाप्तिर्यस्मात् ॥ २७ ॥

मायाविनः सकामस्य यत्सुदुर्लभं हरेः पदं तदेकेनैव जन्मना लब्ध्वाऽपि स्वमात्मानं मनोऽसिद्धार्थमप्राप्तमनोरथमिव कथममन्यत पुरुषार्थविदपि ॥ २८ ॥ २९ ॥

---

(१) यतिरिति क्रमसन्दर्भे विजयध्वजयो पाठः ।

श्रीधरस्वामिकृत भावार्थदीपिका ।

तापमेवाह । समाधिनेति सार्धैः षड्भिः । नैकं अनेके भवा यस्मिन् बहुजन्म अभ्यस्तेनेत्यर्थः प्रणामस्तुत्यादिसमये गरुडाधिरूढस्य हरेः पादच्छायायां स्थितमात्मानं स्मरन्नाह । छायामुपेत्येति । पृथङ्मतिर्देहदृष्टिः सन् हा कष्टमिति भावः ॥ ३० ॥

————

श्रीराधारमणदासगोस्वामि विरचिता

दीपिन्याख्या दीपिका टिप्पणी ॥

यातु श्रीध्रुवस्य नक्षत्ररूपेण स्थितिः सा लोकान्तरार्थं वैकुण्ठस्थस्यैव तस्य प्रतिच्छविरचनमन्तव्या धर्मादयोऽपि पुच्छान्ते स्थित ध्रुवस्य शिशुमारकृतेनैवत्यूहकमप्यवस्था मन्तव्या इति ॥ २१ ॥

पित्रा कर्त्रा प्रस्थिते प्रस्थाने कृते सति प्रस्थाते प्रस्थितमिति भावे क्तः प्रस्थानार्थकप्रस्थितशब्दस्य दीर्घगमतोऽर्थप्रकाकाङ्क्षिः कृतः अनद्यतनमविष्यदर्थे लिङ्क्षिनेति लुट् स चात्र नसंगच्छते तद्राज्याभिषेकस्य बहुदिनानन्तरभाविस्वादत एव रक्षिष्यतीति वकारव्यत्ययेन व्याख्यानम् ॥ २२ ॥

असंकल्पितमपि ममातुर्मरणमेवं मृगयाविप्रकारेण ॥ २३ ॥

सत्याः राज्यस्य मदिच्छया स्वीकाराद्भोगानां च मदर्पितानामेव स्वीकारात् सत्यफलत्वेन सत्याः अन्ते षट्त्रिंशद्वर्षसहस्रान्ते ॥ २४ ॥

ततः स्मरणानन्तरं यतिः भक्त्यात्मकयत्नवान् ॥ २५ ॥

दृष्ट्वा वरत्वेनेति शेषः पश्यत इत्यनादरे षष्ठी स्वभक्तोत्कण्ठावर्धनार्थं पश्यन्तमपि तमुपेक्ष्येत्यर्थः ॥ २६ ॥

मनोरथस्य संकल्पजत्वेऽपि संकल्पातीतफलाधिक्यलाभात्संकल्पनिर्वाणमित्युक्तम् अत एव प्राकृतराजसंकल्पस्य स्वकृतस्यानुतापेन नातिप्रीतइत्युक्तम् तस्य पूर्वोत्तरावस्थात्रयमुक्तं भीरसामृतसिन्धौ सक्षीणतत्तद्भावः स्याच्छुद्धभक्त्यधिकारवान् यथेभः शौनकादिश्च ध्रुवस्स च चतुस्सन इति ॥ २७ ॥

तदेव विदुरप्रश्नेनाभिव्यनक्ति सुदुर्लभमिति पुरुषार्थविदपि सारासारविवेकवानपि इति तस्य किंभगवद्धामव्यर्थानित्यत्व भ्रान्ति र्जातेत्यभिप्रायेण प्रश्नः ॥ २८ ॥

तस्य तुच्छराज्येच्छासंकल्प एवानुतापस्समजनिनतु भाग्नोऽनित्य बुद्धेरनुतरमाह । मातुरिति । मुक्तिं विष्णुवर्ज्ञप्रजाभरूपां यथोक्तं पाद्मे स्वपन्नं विष्णोरनुचरत्वंहि मोक्षमाहुर्मनीषिणइति प्रथमऽपि येनापवर्गाख्यमदभ्रबुद्धिर्लेभे खगेन्द्रध्वजपादपद्मामिति ॥ २९ ॥

यद्यपि देवानां छाया नास्तीति प्रसिद्धिस्तथापि ध्रुवप्रियस्यावतारत्वादवतारस्य च प्रपञ्चावतरणरूपत्वात् प्रपञ्चानुकरणं रामकृष्णाद्यवतारेष्वपि छायायाः प्रसिद्धेरेवेति नान्यथा व्याख्यावमं मेदुरधीः शत्रुमित्रादिविषयज्ञानवान् ॥ ३० ॥

————

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

भान्याक्रमणाय भ्रमणाय भ्रममाणानां पशूनां बन्धनस्तम्भोमेढिः यस्यां गोचक्रवद्ग्रहचक्रं समूहवर्तिग्रहाणामित्यर्थः कल्पवासिनामप्यनेककल्पवासिनां परस्तादपि स्थ स्तु तं क्षयनाशोऽव्ययनश्वरं धर्मान्यादयो नक्षत्ररूपाः धर्माकसोमुनयः सप्तर्षयः यत्प्रदक्षिणीकृत्य भ्रमन्तश्चरन्ति ॥ २१ ॥

तत्स्थानं राज्यादनन्तरं प्राप्स्यसीत्याह । प्रस्थितइति । त्वं गां पृथिवीं दृष्ट्वा पित्रा उत्तानपादेन वनंप्रस्थितेइति भावे क्तः वनंप्रतिगते सति धर्मसंश्रयः वर्णाश्रमधर्माणां पालकः भवान् षट्त्रिंशद्वर्षसाहस्रं वर्षाणां सहस्राणि ततः समाहारे द्विगुः अव्याहतेन्द्रियः अविहतेन्द्रियः रक्षिता रक्षिष्यति गामित्यनुषङ्गः ॥ २२ ॥

त्वया संकल्पितमपि सङ्क्षेपं त्वयि दृग्हादेषं भविष्यतीत्याह केन त्वद्भ्रातरीति उत्तमाख्ये त्वद्भ्रातरि मृगयायां नष्टे सति तास्मन्मुत्तमे सांयस्याः सा माता सुरुचिः वनं प्रविश्य दावाग्निं प्रवेक्ष्यति ॥ २३ ॥

किञ्च यज्ञहृदयं यज्ञस्य हृदयं तात्पर्यभूमिं यज्ञाराध्यमित्यर्थः मां यज्ञानां प्रभुं पुष्कलदक्षिणैराराध्य इहराज्येमत्याः इष्टसंकल्पजाः आशिषः इच्छाविषयान् भुक्त्वा अनुभूय अन्तेभोगानन्तरं मामनुस्मरिष्यसि ॥ २४ ॥

ततः सर्वलोकैः सप्तर्षिपर्यन्तैः नमस्कृतं मत्स्थानं मदनुग्रहाल्लभ्यं स्थानं गन्तासि प्राप्स्यसि स्थानं त्रिशिनाए सप्तर्षिभ्यउपरि प्रतिस्थितं यतिः मनः प्रयतनशीलः गत्वायतः स्थानात्पुनर्नावर्तते मावांमवरोहति प्राप्नोतु तत्वैकुण्ठमवयातीत्यर्थः ॥ २५ ॥

भगवदुक्तिमुपसंहरन् भगवान् तिरोऽदधादित्याह । मुनिः इत्युक्तप्रकारेणार्चितः आराधितोभगवान् आत्मनः पदंस्थानं प्रतिदिश्य दत्त्वा बालस्य ध्रुवस्य पश्यतः सतः गरुडध्वजोगतवान् ॥ तदंकितध्वजश्च भगवानूस्वं धाम वैकुण्ठस्थानमगात्प्रापद्यत ॥ २६ ॥

सोऽपिध्रुवोऽपि विष्णोः पादसेवया उपसादितं प्रापितं संकल्पजं तपश्चर्यारम्भे फलसंकल्पनिर्वाणं संकल्पस्य निर्वाणं समाप्तिर्यस्मिन् कृतकसुखं नतु स्वाभाविकानन्दाविर्भावः प्राप्यापि नातिप्रीतः नितरामहृष्टचित्तःपुरमगात् ॥ २७ ॥

अनतिप्रीतिकारणं पृच्छतिविदुरः सुदुर्लभामिति प्राप्यापि मायाभिपतेःसर्वाभिध्येत्वन दत्तामत्यर्थःइतरैःसुदुर्लभम् अतिदुःखेनाप्यलभ्यं यत्पदं तत्स्थानं भगवच्चरणार्चनेनार्जितं संपादितं तत्स्थानम् एकजन्मना लब्ध्वापि द्वितीये शरीरे असत्यवल्लब्धवेत्यर्थः स्वमात्मानमसिद्धार्थमिव अपरिपूर्णार्थमिव कथममन्यत मुक्त्यर्थं भगवदनाराधनमप्रीतिकारणमिति वदंस्तस्य परितापमाहर्षिः मातुरिति । सपत्न्यामातुः सुरुचेर्वाच एव बाणाः तैर्हृदि विद्धः जातव्यथः तान् वाग्बाणान् स्मरन्मुक्तिप्रदाद्भगवतः मुक्तिं नैच्छत्तत्प्रयुक्तं पश्चात्तापमुपागमत् प्राप्तः ॥ २८ ॥ २९ ॥

पश्चात्तापविषयं ध्रुवोक्तमाह । समाधीति सार्धैः षड्भिः ऊर्ध्वरेतसोजितेन्द्रियाः सुनन्द दयः नैकभवेन नैकेअनेके भवा यस्मिन् बहुजन्मना अभ्यस्तेनेत्यर्थः समाधिना यस्य भगवतः पदं स्वरूपं विदुः साक्षात्कृतवन्तः अमुष्यभगवतः पादयोः छायामहं षड्भिरेवमासैरुपेत्यापि प्रणामस्तुत्यादिसमये गरुडारूढस्य हरेः पादच्छायायां स्थित्वापीत्यर्थः पृथङ्मतिः देहात्माभिमानस्वातन्त्र्याभिमानः अपगतः भगवत्पादच्छायायाः सकाशाद्दूरीकृतः ॥ ३० ॥

————

श्रीमद्विजयध्वजतीर्थ कृत पदरत्नावली ।

सिंहासनाधिपतिरपिभूयादिति भावेनाह । प्रस्थित इति गां भूमिम् ॥ २२ ॥

उत्तमे भ्रातरि सति कथं सिंहासनाप्तिरिति तत्राह । त्वद्भ्रातरीति । तस्मिन्नेव मनो यस्याः सा तन्मनाः वनमन्वेषती मार्गमाणा अनेन तन्मातृमरणमपि प्रत्युक्तमिति ज्ञायते ॥ २३ ॥

पुष्कलदक्षिणैः पुरुषं पुष्कलं पूर्णमिति हलायुधः अनेन यज्ञानामुत्तमकल्पत्वं ध्वनयति मामनुस्मरिष्यसीत्यनेन सर्वदा स्मरन्नपि मरणकाले विशेषतो मत्स्मरणं कुर्विति विधत्ते एष्यन्दृश्येत्वाहुभयारीति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

ततः किमत्राह । तत इति । यतो नावर्तते यतिरित्यनेन ध्रुवस्य मुक्तेर्नित्यत्वं व्यनक्ति ॥ २५ ॥

अतिसृज्य दत्त्वा ॥ २६ ॥

सोऽपि ध्रुवोऽपि संकल्पजं संकल्पाज्जातं विष्णोः पादसेवयोपसादितं प्राप्तं संकल्पनिर्वाणं प्रतिज्ञाफलं प्राप्य ॥ २७ ॥

विदुरो मुक्तेरितरेषु पुरुषार्थेषु विरक्तेन भाव्यमिति जानन्नपि तत्प्रकटनाय पृच्छति सुदुर्लभमिति मायाविनां भक्ताभीष्टफलप्रदानसामर्थ्यवतः असिद्धार्थमसाधितप्रयोजनं सर्वार्थितफलसिद्धावपि प्रयोजनं मन्यते इति ॥ २८ ॥

विदुषोऽपि सांसारिको निर्बन्धो दुस्त्यज इति भावेन तथोक्तं परिहरति मातुरिति ॥ २९ ॥

अनेकभवेनेति भवपदमावृत्य व्याख्येयं तथाहि अनेकेषु भवेषु जन्मसु भवति समुत्पद्यत इति तेनामुष्य हरेः पादयोश्छायां प्राप्य पृथग्मतिर्विषयबुद्धित्वादपहृतास्तिर्यक्काङ्क्षित इवाभूवम् ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

धर्मादयो गोधाकृतेः पुच्छान्तःस्थितध्रुवचिह्नेनैव व्यूहस्यावयवस्थाः तत्र विष्णोरपि हृदयस्थत्वे यद्गमनं कृतं तत्तु तांस्तांश्चक्रलाभ्यन्तरमण्डलस्थस्य तस्य लोकहितार्थं प्रतिच्छविमात्रदर्शनादिति गम्यते ॥ २१—२२ ॥

पूर्वमपि निगूढभक्तिसंस्कारेण मङ्गलस्यैव तव द्वेषात्तयोरेवं स्यादित्यत्र त्वादिति ॥ २३ ॥

सत्या मत् सम्बन्धेनैव भोगादयोऽर्थाः ॥ २४—२७ ॥

सङ्कल्पनिर्वाणमपि तदतीत विष्णुपदरूपत्वात् सङ्कल्पनिर्वाणं तत्र हेतुः विष्णोः पादेति पादसेवाप्रार्थनं विष्णोरेव सङ्कल्पजं तत् सङ्कल्पजिदिति कश्चित् । कृपया प्रापितमिति वा हेत्वन्तरं तथापि स्वसङ्कल्पत्वानुसन्धानेन तादृशत्वाज्ञानान्नातिप्रीतः तादृशत्वाज्ञानस्यापि स्वस्य तुच्छसङ्कल्पमेवाधिकृत्य तिरस्कारात् ॥२७॥

अर्थवित् सारासारविवेकी ॥ २८ ॥

मुक्तिः श्रीभगवद्दास्यम् । विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिण इति पाद्मोत्तरखण्डात् । नैव मुकुन्दस्येत्यादि वक्ष्यमाणमैत्रेयवचनैकवाक्यत्वानुरोधाच्च । अत्र अहो बतेत्यादि वक्ष्यमाणवचने च श्रीध्रुवस्य यद्‍पूर्णमनन्यत्वं तत्तु तत्पदं कामनयैव तत्प्रार्थितवता तेन लब्धमनोरथातीतवरेणापि स्वसङ्कल्पमेव निरस्य कर्तुमुक्तमिति गम्यते । मनोरथातीतत्वं चोक्तं श्रीविदुरेण । सुदुर्लभं यत्परमं पदं हरेरिति स्वयं श्रीध्रुवप्रियेण । ततो गन्तासि मत्स्थानं सर्वलोकनमस्कृतम् । उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते यतिरिति वक्ष्यते पार्षदाभ्यामपि आस्थितु जगतां वन्द्यं तद्विष्णोः परमं पदं मूलेन च ध्रुवस्य वैकुण्ठारोहणमिति । पञ्चमे ज्योतिश्चक्रवर्णने । विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमन्तीति यत्तत् विष्णोः परमं पदमपि वदन्तीति । प्रपञ्चान्तर्गतत्वेऽपि तत्तस्मादितरत्वमुक्तं "विकारान्तर्वर्ति च तथाहि स्थितिमाह„इति न्यायेन । अतोऽस्मिन्लोके प्रापञ्चिकस्य बहिरंशस्यैव प्रलयो ज्ञेयः । तस्य तु तदानीमन्तर्धानमेव एतदालक्ष्यैव हिरण्यकशिपुणोक्तं किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभिरिति अतोऽन्यापि ये तथा वदन्ति ते नतुल्या इति भावः ॥ २९ ॥

तथैवाह । समाधिनेति । छायामाश्रयमित्यर्थः देवानां छायाया अभावात् पृथगुमँगतोऽन्यत्र मतिर्यस्य सः ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

धर्माग्न्यादयो नक्षत्ररूपाः । वनौकसः सप्तर्षयः ॥ २१ ॥

एतच्च राज्यभोगानन्तरं भविष्यतीत्याह । प्रस्थित इति तुभ्यं गां पृथ्वीं दत्त्वा वनं प्रस्थिते इति भावेक्तः । रक्षिता गां रक्षिष्यति ॥ २२ ॥

मङ्गलार्थं त्वयि समातृके अपराधिन्याः सुरुचेर्यद्भविष्यतीति तच्छ्रावयत्याह । त्वद्भ्रातर्येति ॥ २३ ॥

लोके यशश्च तव भविष्यतीत्याह । इष्ट्वेति ॥ २४ ॥

यतो नावर्तते इति नित्यत्वं व्यञ्जितम् ॥ २५ ॥

अतिदिश्य दत्त्वा ॥ २६ ॥

सङ्कल्पस्य निर्वाणं समाप्तिर्यस्मात् तत्पदमिति पूर्वेणैवानुषङ्गः ॥ २७ ॥

नातिप्रीत इति श्रुत्वा पृच्छति सुदुर्लभमिति मायाविनः कृपालोः अर्थविद्विज्ञोऽपि ॥ २८ ॥

मुक्तिर्भक्तिमत्पार्षदत्वं विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिण इति पाद्मोत्तरखण्डात् सायुज्यन्तु न व्याख्येयं यन्निर्वृतिस्तनुभृतामिति वाक्येन तत्र तदरोचकत्वज्ञापनात् ननु नैच्छदिति न सङ्कुच्छते भक्तिं मुहुः प्रवहतामिति तद्वाक्येन भक्तेरेवनावृत्त्यविषयत्वावगतेः । सत्यम् अत्र स्मरन्निति वर्तमाननिर्देशात् मातृसपत्नी वाग्बाणैर्यथास्मरणादशायामेव नैच्छत् अतस्तदैव मधुवनं आगत्यमत्पित्रादिदुर्लभपरमोच्चपदप्राप्तिकामो भगवन्तं भजिष्ये इति सङ्कल्प्य तपश्चकार भगवत् साक्षाद्दर्शनसमये तु योऽन्तःप्रविश्येति तदुक्तेस्तदीय सर्वेन्द्रियाणां भगवदाकारत्वात् कुतः सुरुचेर्वाग्बाणस्मरणं किन्तु यदाहं न्यवसितमिति भगवद्वाक्येन स्मृतपूर्वस्वीयसङ्कल्पो मत्सकामत्वलक्षणं व्यभिचारं प्रभुर्मे जानातीति जातापत्रपोऽन्वतप्यत् हन्त हन्त दुर्बुद्धिरहं कथमेवं सङ्कल्पमकरवं भक्तिं मुहुः प्रवहतामिति साम्प्रतिकीं भक्तिप्रार्थनां न मत्प्रभुर्मत् कपटमेव जानातिस्म अतस्तदनुरूपं किमपि स्पष्टं नावोचत् । किन्तु पूर्वसङ्कल्पानुरूपमेव वरं ददौ स्वच्छातच्छुभमे नष्ट इत्यादिना पुरातनमन्मातृस्मरणमपि मां स्मारयामासेत्येवं तस्य लज्जानुतापदैन्यनिर्वेदास्तदुक्तश्लोकषट्के द्रष्टव्याः ॥ २९ ॥

नैकभवेन बहुजन्माभ्यस्तेन गरुडारूढस्य हरेः पादच्छायायां स्थितमात्मानं स्मरन्नाह छायामुपेत्य अपगतोऽधःपतितः यतस्तस्मात् पृथग्विपये मतिर्यस्य सः अतएव मां स्वसङ्गेन प्रभुः स्वधाम नानैषीदिति भावः ॥ ३० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ॥

कुत्र किम्वत् मेढ्यां धान्यानां निस्तुसारत्वसाधनभूते खले आरोपितायां गोचक्रवत् गोवृषसमूहवत् धर्मादयो नक्षत्ररूपाः वनौकसः सप्तर्षयः सतारकाः कल्पवासिनां परस्तात्तथास्तुस्थिरं यत् प्रदक्षिणी कृत्य भ्रमन्तश्चरन्ति ॥ २१ ॥

तत्स्थानं भूमण्डलरक्षापूर्वकमलङ्करणं कृत्वा गन्तासीत्याह प्रस्थित इति चतुर्भिः गां भूमिं दत्त्वा तुभ्यमिति शेषः पित्रा उत्तानपादेन वनं प्रस्थिते भावेक्तः वनप्रतिगमने कृते सति धर्मसंश्रयः भुवोमण्डलं रक्षिता रक्षिष्यति ॥ २२ ॥

सा सुरुचिः ॥ २३ ॥

यज्ञो हृदयमन्तः करणशुद्धिद्वारा प्रापकं यस्य तम् मुक्तिप्रापकनाह मां संस्मरिष्यसीति ॥ २४ ॥

अहो बत ममानात्म्यं मन्दभाग्यस्य पश्यत ।
भवच्छिदः पादमूलं गत्वाऽयाचे यदन्तवत् ॥ ३१ ॥
मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः ।
योनारदवचस्तथ्यं नाग्राहिषमसत्तमः ॥ ३२ ॥
दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक् ।
तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा ॥ ३३ ॥
मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि ।
प्रसाद्य जगदात्मानं तपसा दुष्प्रसादनम् ।
भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः ॥ ३४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

यतः स्थानात् यतिर्मदुपासकः ॥ २५ ॥

प्रतिदिश्य दत्त्वा अगमत् ॥ २६ ॥

सध्रुवोऽपि संकल्पस्य निर्वाणं समाप्तिर्यस्मात्तत् संकल्पजं स्वमनोरथं राजासनम् विष्णोः पादसेवयोपसादितं प्रापितं प्राप्यापि नाति प्रीतः पुरमभ्यगात् ॥ २७ ॥

मायाविनः प्रकृत्यधिपतेः हरेः परमंपदं यतिवरैः सुदुर्लभं तदेकेनैव जन्मना लब्ध्वापि कथंस्वमात्मानमसिद्धार्थं मिवामन्यत॥२८॥

यद्यपि भगवता भक्तवत्सलेन यतोनावर्त्तते यतिस्मन्मुक्तगम्यं पदं दत्तमपि तथापि सुरुचिवाग्वाणाव्यथितस्तत्प्राप्त्यर्थं भगवन्तं नाराधितवान् किंतु समधिराजासनार्थमाराधितवान् तदपि भगवद्दत्तं तत्परमपदप्राप्त्यंतरायभूतं मन्वानस्तापमुपेयिवानित्याह । मतिरिति ॥ २९ ॥

यत्पदं सनंदादयोविदुःछान्दोग्यप्रसिद्धाःअस्मद्गुरोःश्रीनारदस्य गुरवइत्यर्थः ते एव अनायासेन जानन्ति सनत्सुजातविज्ञानादित्यादि मोक्षधर्मोक्तेःअन्येउर्ध्वरेतसोऽपिनैकबहवोभवाःजन्मानियस्मिन् तेन बहुजन्माऽयस्तेन समाधिना यद्विदुःतत्पदभिन्ने अधिराजासनेमतिर्यस्य सः अतएव अमुष्य भगवतः पादयोः छायां सामीप्यमुपेत्याप्यपगतः वियोगं प्राप्तोऽस्मि ॥ ३० ॥

———

भाषाटीका

जैसे मेढी के खंभ से सब बैल बांधे जाते हैं तैसे जिस के चारों ओर ज्योतिश्चक्र है जो स्थान कल्पवासी जनों के भी आगे तक रहने वाला है धर्म अग्नि कश्यप शुक्र और भी वनवासी मुनिगण तारों के सहित प्रदक्षिणाक्रम से घूमते फिरते हैं सो स्थान तुम को दिया है ॥ २१ ॥

अब तुमारे पितातुमकोपृथिवी देकर जववनको जायगे तब तुम धर्म को आश्रय करके छत्तीस ३६ हजार वर्षपर्यंत पृथिवीमंडल की रक्षा करना ॥ २२ ॥

तुमाराभ्राताउत्तमजववन मे सिकारखेलनेमे मरजायगा तब उसकी माता उसमे मोह करके ढूंडतीहुई दावानल मे प्रवेश कर जायगी ॥ २३ ॥

फिरतुमयज्ञमूर्ति मेरेआधिकदक्षिणा वाले यज्ञोंसेयजन करके इस लोकमे दिव्यभोगोंको भोगकर अंतमे मेरास्मरण करोगे ॥२४॥

तदनंतरसबलोकों के नमस्कार करने योग्य हमारे स्थान को जाओगे जो कि सप्तऋषियों के ऊपरहै जहां का गया लौटता नहीं है ॥ २५ ॥

मैत्रेयजी बोले इस प्रकार से ध्रुव से पूजित हुये भगवान् अपना स्थान ध्रुव को देकर के बालक के देखते देखते गरुड पर आरोहण होकर के बैकुंठ कूं गये ॥ २६ ॥

ध्रुवजी भी विष्णुभगवान् की चरण सेवा से प्राप्त हुई अपने संकल्प की समाप्ति कूं प्राप्त हो कर कुछ अप्रसन्न से हो कर घर को गये ॥ २७ ॥

विदुर जी बोले कि बडा दुर्लभ जो विष्णु लोक स्थान उसको भगवान की चरण सेवा करने से एकही जन्म में प्राप्त होकर बडे बुद्धिमान होकर अकृतार्थ सरीका अपनेको क्यों माना उनने ॥ २८ ॥

मैत्रेयजी बोले सौतिन माता के वाणी रूपी बाणों से बिंधे हुए हृदय में उन बचनों का स्मरण करने से मुक्तिदायक भगवान् से मुक्ति नहीं मागा तिससे उनको चिन्ता होगई ॥ २९ ॥

अपने मन में ध्रुवजी कहने लगे कि जिस परमात्मा के पद को सनंदनादिक योगि जन अनेक जन्मों की समाधि से ऊर्ध्वरेता होकर प्राप्त हुये तिस भगवान् की चरण छाया को के महीना में प्राप्त होकर मैं पृथक् बुद्धि वाला होगया ॥ ३० ॥

———

श्रीधरस्वामिकृत भावार्थदीपिका ।

अमात्म्यमात्मशून्यत्वमज्ञत्वम् भवच्छेत्तुर्यदन्तवत्तदयाचे याचितवानस्मि ॥ ३१ ॥

अज्ञत्वे कारणं संभावयति मतिरिति पतद्भिर्मत्पदेनयाधःप्राप्स्यद्भिरत एवासहनशीलैः नाधुनाप्यसमाप्तं ते इत्यादि सत्यमपि नारदस्य वचोयोन गृहीतवानस्मि तस्य मेमतिर्विदूषिता ॥ ३२ ॥

किंच दैवीमिति प्रसुप्तः स्वमात्मानमपश्यन् द्वितीयेऽसत्यपि भ्रातैव भ्रातृव्यः शत्रुरिति हृद्व्याधिरुजा हृदयशोकेन तप्ये तापमनुभवामि ॥ ३३ ॥

किंच मया प्रसाद्य यत्प्रार्थितं तद्व्यर्थमित्याह भवच्छिदमिति ॥ ३४ ॥

स्वाराज्यं यच्छतोमौढ्यान्मानोमे भिक्षितो बत ।
ईश्वरात्क्षीणपुण्येन फलीकारानिवाधनः ॥ ३५ ॥

मैत्रेय उवाच

नवै मुकुन्दस्य पदारविन्दयोरजोजुषस्तात ! भवादृशा जनाः ।
वाञ्छन्ति तद्दास्यमृतेऽर्थमात्मनोयदृच्छया लब्धमनः समृद्धयः ॥ ३६ ॥
आकर्ण्यात्मजमायान्तं संपरेत्य यथागतम् ।
राजा न श्रद्दधे भद्रमभद्रस्य कुतोमम ॥ ३७ ॥
श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः ।
वार्ताहर्तुरति प्रीतोहारं प्रादान्महाधनम् ॥ ३८ ॥
सदश्वं रथमारुह्य कार्तस्वरपरिष्कृतम् ।
ब्राह्मणैः कुलवृद्धैश्च पर्यस्तोऽमात्यबन्धुभिः ॥ ३९ ॥
शङ्खदुन्दुभिनादेन ब्रह्मघोषेण वेणुभिः ।
निश्चक्राम पुरात्तूर्णमात्मजाभीक्षणोत्सुकः ॥ ४० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एतदेव स्पष्टान्तमाह । स्वाराज्यं निजानन्दं प्रयच्छतः सकाशाद भिमानः क्षीणपुण्येन मयाभिक्षितोयाचितः क्षीणेन पुण्येनेति वा दृष्टान्त एवं संबन्धः यथाऽधनईश्वराच्चक्रवर्तिनः फलीकारान्सतुषत-ण्डुलकणान् याचते तद्वत् ॥ ३५ ॥

एवं निस्पृहत्वं तस्य युक्तमित्याह । तस्य दास्यं विनान्यमर्थमा-त्मनोनैव वाञ्छन्ति यदृच्छयैव लब्धेन मनसः समृद्धिर्येषां ते ॥ ३६ ॥

प्रस्तुतमाह । आकर्णेति । सं परेत्य' मृत्वा गतमाकर्ण्य यथा तथा न श्रद्दधे विश्वासं न चकार अभद्रस्य मम भद्रं कुतइति मत्वा ॥ ३७ ॥

एष्यत्यचिरेण इति देवर्षेर्वाक्यं श्रद्धाय ॥ ३८ ॥

ब्राह्मणादिभिः पर्यस्तः परिवृतः ॥ ३९ ॥ ४० ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

अन्तवत्प्राकृतं राज्यम् ॥ ३१ ॥

मतिर्विदूषितेत्यपि पूर्ववासनानुतापेनैवोक्तम् न तु भगवद्धामनि प्राकृतत्वदृष्ट्या "विकारावार्तिञ्चनथाहि स्थितिमाह,,इति न्यायेन तस्य नित्यत्वप्रतिपादनात् अस्य च श्रीभगवत्साक्षात्कारादिप्रभा-वेन यथार्थज्ञानवत्त्वात् महाप्रलये तु श्रीमधुपुर्यादिवदन्तर्धान-मेव स्यादिति तस्माद्ध्यापि किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णा-वादिभिरिति हिरण्यकशिपुवत्तथा वदन्तोऽसुरा एवेति ज्ञेयम् ३२

दैवीं देवस्य विष्णोर्जीवविषयां व्यामोहनशक्तिमुपाश्रित्य स्वविषयकत्वेन लब्ध्वा द्वितीये राज्यादिप्रपञ्चेऽसत्यपि अपुरुषार्थे ऽपि सति ॥ ३३ ॥

मयेति सार्द्धकं भवं राज्यादिप्रपञ्चं प्रसाद्येति तद्दर्शनात्पूर्व-मिति चैव या निर्वृतिस्तनुभृतामित्यादितद्वाक्यात् ॥ ३४ ॥

अतएव स्वयंप्रार्थनमेव अभिमानस्तत्कृतराज्यप्रपञ्चः ॥ ३५ ॥

यदृच्छयैव याञ्चां विनैव लब्धेन सामीप्यादिमोक्षेन मनस्समृद्धि-दर्शनपरिचर्यादिविषयकोल्लासो येषामिति व्याख्येयम् अन्यलाभेनै-कान्तिनां मनः समृद्धेरभावित्वात् ॥ ३६ ॥

प्रासङ्गिकं तापप्रकारमुक्त्वा प्रस्तुतं वर्णनीयं ध्रुवचरितमाह मृत्वाऽऽगतं यथा कश्चन न श्रद्धाति तथा न श्रद्दध इति योज-नीयम् ॥ ३७ ॥

महाधनं बहुमूल्यम् ॥ ३८ ॥

सदश्वमिति युग्मकम् ॥ ३९ ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

अनात्मा देहः तस्य कर्मस्थानारभ्यं दौर्जन्यमित्यर्थः तत् पश्यत तच्छोच्यमिति अहो बतेति हाकष्टमितिभावः शोककारणं व्यनक्ति यत् यस्मात् भवच्छिदः गर्भजन्मजरामरणाद्यात्मकसंसारभयनिव-र्तकस्य भगवतः पादमूलं गत्वा साक्षात्कृत्य अन्तवत्फलंयाचं या-चितवान् नतु निरतिशयानन्दापहतपाप्मत्वादिगुणाष्टकाविर्भावपूर्व-कब्रह्मानुभवात्मकानन्दमिति भावः ॥ ३१ ॥

स्वस्याल्पास्थिरसांसारिकभोगयाञ्चाकारणं निश्चिनोति । मति-रिति । पतद्भिः स्वस्वभोगान्ते स्वर्गात्पतद्भिः पतनशीलैः अतएवा सहिष्णुभिः मदपेक्षयाधः पदप्राप्तत्वात् परसमृद्धि मसहिष्णुभिर्दे-वैर्मे ममतिः बुद्धिर्विदुषिता सांसारिकभोगलौल्यसंपादनेन दोषंप्रा पिता स्वदौर्जन्यमेव व्यञ्जयन् परितपति योऽहमसत्तमः दुर्जनः अतएव नारदवचः विकल्पे विद्यमानेऽपि नहासन्तोषहेतवइत्यादि नोक्तं वचः तथ्यं नाप्रहीषं न गृहीतवान् ॥ ३२ ॥

प्रसुप्तवदहमपि दैवीं गुणमयीं दुरत्ययां मायामुपाश्रित्य तया अतएव भिन्नदृक् देहात्माभिमानस्वतन्त्रात्माभिमानैः द्वितीये अब्रह्मात्मकस्वतन्त्र वस्तुन्यसत्यपि भ्रातेव भ्रातृव्यः शत्रुरिति याह-गरागस्तया तप्ये तापमनुभवामि ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

किञ्च मया यत्प्रार्थितं तदपार्थमित्याह मयेति । दुःखेनापि प्रसादयितुमशक्यं भवच्छिदं जगदन्तरात्मानं तपसा प्रसाद्य भवं संसारमेव याचे याचितवानस्मि इति खेदे । अतोऽहं भाग्यविवर्जितः दुर्भगः ॥ ३४ ॥

दौर्भाग्यमेव सदृष्टान्तं व्यनक्ति स्वाराज्यं स्वराट् अकर्मवश्यत्वस्य भगवतः स्वाराज्यं "स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवती" त्युक्तं मुक्तैश्वर्यं यच्छतो ददतो भगवतः सकाशात्केवलं मे मया मानः अभिमानः अभिभिक्षितः याचितः निर्धनः क्षीणां च तत्पुण्यं तेन ईश्वरात् सार्वभौमात् फलीकारानिव सतुषतण्डुलकणानिवेति दृष्टान्तः ॥ ३५ ॥

दुर्लभार्थं प्राप्यापि कथमेवं तपतीति त्वया न शङ्क्यमित्याह । मुनिः नवा इति । मुकुन्दस्य मुक्तिप्रदस्य भगवतः पदारविन्दयोर्यद्रजः परागस्तज्जुषः सेवमानाः भवादृशा जनाः अस्य भगवतो दास्यं शेषत्वमृते विना अन्यमर्थमात्मनः स्वस्य न वाञ्छन्ति नेच्छन्ति यतस्ते जनाः यदृच्छया दैवात् लब्धमनसः समृद्ध्यर्थपा ते ॥ ३६ ॥

प्रस्तुतमाह । आकर्ण्येति । राजा उत्तानपादः आत्मजं ध्रुवं आयान्तम् आकर्ण्यापि संपरेत्य मृत्वा यथागतं पुनरागतमिव न श्रद्दधे न विश्वस्तवान् संपरेत्य गतमित्यागमनदौर्लभ्यमुच्यते तत्र भाग्यहीनत्वाभिप्रायेण तमेव व्यनक्ति अभद्रस्य भाग्यहीनस्य मम भद्रं पुत्रप्रत्यागमनरूपं मङ्गलं कुतो हेतोः स्यादित्यभिप्रायेण न श्रद्दध इत्यन्वयः ॥ ३७ ॥

ततोदेवर्षेर्नारदस्य वाक्यं पश्यत्याचिरतो राजन् यशोविपुलयेत्तत्रेति वाक्यं तात्कालिकं वा श्रद्धाय विश्वस्य हर्षवेगेन प्रत्यागमनवार्त्तानिमित्तसन्तोषयोगेन धर्षितः प्रगल्भितः उद्रिक्तानन्द इति यावत् वार्त्ताहर्तुः पुत्रागमनवार्त्ताहर्तुः पुत्रागमनवार्त्ताकथयितुः महाधनमनर्घ्यं हारं मुक्तामणिमयं प्रीत्यादात् ॥ ३८ ॥

अमात्यबान्धवैरिति द्वन्द्वः ब्राह्मणादिभिः ययैस्तैः परिवृतः ।३९।

ब्रह्मघोषेण स्वस्ति वाचनात्मकेन आत्मजाभिवीक्षणोत्सुकः निश्चक्राम निष्क्रान्तवान् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

राजभटादिना ताडितस्येव तस्य पश्चात्तापोद्रेकं वक्ति । अहो बतेति । अनात्म्यं जाड्यम् अन्तर्वर्तित्वेन स्वस्यानित्याधिपत्यं सूचयति तदुक्तम् "आधिपत्यमनित्यं तु ध्रुवलोकस्य यद्ध्रुव" यतो नाश्रयते यतिरित्युक्तिरपि युज्यत इत्याह मत् तत्स्थानगंतॄणां यतीनां स्थितिकरमेति आधिपत्यमनित्यं अतो निवृत्त्या न कदापि तस्य मुक्तिरित्यत आह तस्यापि मुक्तिर्नियतेति तर्हि जानता विष्णुनेदं पदं किमिति दत्तं तत्राह नियतं चापितत्पदं तस्य तत्कुन्तत्वाद्दत्तमित्यर्थः तर्हि ध्रुवेण किमित्थमिन्दीति तत्राह तथापि कामना निन्दा ध्रुवेण सुकृता बतेति मुमुक्षुणा विषयाभिलाषो न कर्तव्य इति शिक्षणार्थमित्यर्थः कामना विषयाभिलाषः । तस्य निन्दा धिक्कारः ॥ ३१ ॥

शास्त्रशीलिनमवृत्तस्तत्र कथं बुद्धिव्यामोहः प्राप्त इति तत्राह । मतिर्विदूषितेति । नाधुनाऽप्यवमानित इत्यादिनारदवचनम् ॥ ३२ ॥

एतदेव विशदयति । दैवीमिति । सर्वत्र निर्मलत्वेन द्योतमानस्य देवस्य हरेर्विद्यमानां मायां बन्धकशक्तिमुपाश्रित्य स्पृष्ट्वा प्रसुप्तो ऽज्ञानि [illegible] यथा भिन्नदृग्यथावस्तु न पश्यति । विपरीतं पश्यति मे तथाहमपि भ्रातायमुत्तमो भ्रातृव्यः शत्रुरिति हृदजा हृदयभेदरोगेण तप्ये स्वतन्त्रस्याऽन्यस्य हरेः द्वितीयस्य दृभावे सन्तापः संभावित इति नेत्याह । द्वितीय इति । द्वितीय स्वतन्त्रस्यास्मिन्नसत्यायमानेऽपि सर्वस्वातन्त्र्येण सर्वैश्वर्येण द्वितीयत्वमीश्वरत्वं च ब्रह्मादीशितव्यस्य भावात्परमेश्वरत्वं हरेरेवयुक्तमिति इममर्थमपि पदेन ध्वनयति तदुक्तम्

द्वितीयस्य स्वतन्त्रस्य स्वभावाद्भयवर्जितः ।
ईश्वरस्येशितव्यस्य भावात्स परमेश्वर

इति ॥ ३३ ॥

ध्रुवलोकस्याधिपत्यस्यानित्यत्वात्सुमतां सिंहासनाधिष्ठानस्य संप्रार्थ्य भिक्षणं व्यर्थमित्याह । मयैतदिति जगतामिति बहुवचनमान्येषामाधिपत्यं श्रथयति तेन द्वितीयस्वातन्त्र्याभावो निश्चीयत इति ज्ञातव्यम् ॥ ३४ ॥

अभीष्टपुरुषार्थदानसामर्थ्याभावान्नभिक्षितमिति न मन्तव्यमित्याह । भवच्छिदमिति । अभीमयैसंचलनयोरीतिधातोर्भयमाभरोहित्यं चेष्टिवाञ्छितं लोकेऽव्यस्तीति किमित्यनुशोक इत्यत उक्तं विशिनष्टि तादात्म्यमिति तादात्म्यं हरिं नियतचित्ततया गृहवद्द्वारप्रवेशलक्षणो मोक्षः तदुक्तम्

हरौ नियतचित्तत्वाद्गृहवत्तत्प्रवेशनात् ।
मोक्षं तादात्म्यमित्याहुर्न तु तद्रूपतः क्वचित्

इति नैकात्मतां मे स्पृहयन्ति केचिदित्यत्र हरिणाकाङ्क्षितकाङ्क्षितत्वमेवैकात्म्यम् न तु तत्स्वरूपत्वम् हरीच्छयेच्छतैकात्म्यं तेनैकस्वरूपतेतिवचनात् कामेन मकाम अगादित्युपाहितसमयेप्रार्थनीकिञ्च मे मनोवतदुःखानुभवयोग्य वस्तुभिर्वञ्चितं क्षीणपुण्येन कारणेन अत्र दृष्टान्तमाह । पुलकानिति । पुलकास्तुच्छधान्यानि कुलित्थादीनि भक्तसिक्थादीव "स्यात्पुलकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके" इति यादवः ॥ ३५ ॥

मैत्रेयो ध्रुवस्यानुशोकितात्पर्यमाह । नवा इति तद्दास्यमित्युक्तेन तादात्म्यमित्येतद्विवृतमर्थतः अन्यपुरुषार्थं कुतो न वाञ्छन्तीति तत्राह । यदृच्छयेति । यदृच्छया भगवदिच्छया आकाङ्क्षामन्तरेणापि मनोभीष्टानां प्राप्तत्वादित्यर्थः ॥ ३६ ॥

एवमस्तु तत्कथाप्रसंगः क इति वैदुरीं शङ्कां परिहरन्निवाहाकर्ण्येति ॥ ३७ ॥

मन्वश्रद्धया राज्ञः प्राकृतो द्वेषोऽनुमीयत अभद्रवचनं चौपचारिकं निश्चायकप्रमाणाभावादिति शङ्कामाभूदित्याह । श्रद्धायेति हर्षवेगेन हर्षोद्रेकेण धर्षितो विवशीकृतः महान्ति धनानि यस्य स तथा ॥ ३८ ॥

सन्तोऽभ्यर्हिता अश्वा यस्य स तथा तं पर्यन्ततः परिवृतः ॥३९॥

इदमपि राज्ञः स्नेहोद्रेकलक्षणमिति भावमाह शङ्खेति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

अहो इत्यादि । अत्र तादृशत्वाज्ञानपक्षः स्पष्टः पश्चात्तरेऽपि मत्तो स्वयं स्वपाददानेन भवच्छिदस्तस्य पादमूलं प्राप्यापि स्वयं त्वहं त्रिभुवनमात्रात्मकपदरूपत्वेनाल्पमेव याचे नापवर्गं न परित्यक्तवानस्मि । अन्येवमयं भगवान् परिपाति दीनान् इत्यादेः । ननु तत्पादसेवां तत्पदमेवेत्यर्थः । अतएव राज्यादिकमपि विघ्नत्वेन लब्धमिति भावः । अत्र प्रकरणे विशेषजिज्ञासा चेद्भगवत्सन्दर्भो दृश्यः ॥ ३१ ॥

नापवर्गत्यागे हेतुमाह । मतिरिति । पदाङ्घ्रिः पतत्पद्यै-- वसाते ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

भिन्नदृक् श्रीभगवतोऽन्यत्र पुरुषार्थबुद्धिर्यस्य सः कश्चित् सति । ततो द्वितीयं असति पुरुषार्थेऽपि सति ॥ ३३ ॥

मयैतदिति सार्द्धकम् ॥ ३४——३५ ॥

यदृच्छया अनायासेनैव लब्धा हस्तगता इवोपसन्ना मनःसमृद्धयः अणिमादिलक्षणाः सार्ष्ट्यादिलक्षणा वा येषां तथाभूता अपि ॥ ३९——४० ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अनात्म्यमात्मशून्यत्वमज्ञत्वम् । भवच्छिदः अप्रार्थितोऽपि यो भक्तस्य भवं छिनत्ति तस्य पादमूलं गत्वा वैष्णव्या दीक्षयैव प्राप्यं यद्वस्तु तत् अहं याचे प्राप्तुं संकल्पमकरवमिति ममैव दोषः । प्रभुस्तु तदपि कृपया अनश्वरमेव पदं ददौ । ततो गन्तास्मि मत् स्थानमिति तदुक्तेरिति भावः ॥ ३१ ॥

स्वस्याज्ञतायां कारणं सम्भावयति । मतिरिति । पतद्भिर्मदपेक्षया अधःपतद्भिः अतएवासहनशीलैर्नारदवचः नाधुनाप्यवमानन्त इत्यादि ॥ ३२ ॥

प्रसुप्तः स्वप्नान् पश्यन् यथा द्वितीये असत्यपि व्याघ्रसर्पादिभ्यः बिभेति तद्वत् । भ्रातैव भ्रातृव्यः शत्रुस्तस्मात् या हृद्रुक् पीडा तयाहं तप्ये वृथैव । यत आत्मदृष्ट्या अहं सच मद्भ्रातेत्युभावपि भगवतो जीवाख्यतटस्थशक्तिवृत्तिरूपौ । देहदृष्ट्याप्युभयोरपि पाञ्चभौतिकत्वान्मायाशक्ति वृत्ति रूपत्वमतो भगवन्माययैव तस्मिन् भ्रातृव्यत्वदृष्ट्या मुह्यामीत्यर्थः ॥ ३३ ॥

भाग्यवस्तुनो भवकारणत्वात् भवम् ॥ ३४ ॥

स्वस्मिन् भक्त्या राजन्ते इति किं वा स्वमेव राट् राजा येषां ते स्वराजो दासास्तेषां भावः स्वाराज्यं दास्यं यच्छतो ददतः सकाशादभिमानः क्षीणपुण्येन क्षीणाचारत्वेन यथा अधनः महाराजचक्रवर्त्तिनः सकशात् फलीकारान् सतुषतण्डुलकणान् भिक्षते तद्वत् । सतु विदग्धः परमोदारो राजा यथा तस्मै तन्ममोरथातीतां सम्पत्तिं ददाति तथैव भगवान् मह्यं स्वधामवासित्वमित्यहो मम निर्बुद्धित्वपरमकाष्ठा भगवतश्च कारुण्यौदार्यसीमेति त्वगां सविस्मयस्मितोऽभूदिति भावः ॥ ३५ ॥

एवं निस्पृहत्वं तस्य युक्तमित्याह नेति । रजोजुषः परागरसास्वादिनः दास्य मूले आत्मनोऽर्थमन्यं न वाञ्छन्ति यदृच्छया लब्धेन वस्तुना मनसः समृद्धिर्येषाम ॥ ३६ ॥

ततो मधुवनात् ध्रुवस्य स्वदेशागमन बन्धुमिलनादिकं वर्णयति आकर्ण्येति ॥ ३७ ॥

एष्यत्यचिरेण इति देवर्षिवाक्यं श्रद्धाय ॥ ३८ ॥

पर्यस्तः परिवृतः ॥ ३९ ॥ ४० ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अनात्मा अल्पबुद्धिस्तस्य भावस्तत्त्वम् अनुदरीति यद्वानप्रोऽर्थः एवं तवदर्नित्यं तद्याचे अन्येषमर्यभगवानित्यादिवार्याथ तथास्मि ॥ ३१ ॥

पतद्भिः पुनरावृत्तलोकस्थैः अतएव ममोत्कर्षमसहिष्णुभिः नारदोक्तेन समोपदेशनायं वैकुण्ठं मागच्छन्त्विति बुद्ध्या मे मतिर्विदूषिता अतएव तथ्यं यथार्थं नारदवचः निर्विघ्नतया वैकुण्ठप्रापकम् मम स्वधाभ्यर्थः वाक्यं नाग्राहिषम् न गृहीतवानस्मि देवैर्वैकुण्ठगमनानिवारितः अनित्यं राज्यसुखाकारे दुःखमतिदृष्णाद्वारापातितोऽस्मीति भावः ॥ ३२ ॥

अथ यथार्थगुरुवाक्याग्रहणादौ अनादिमायाकृतं मोहं हेतु सूचयन् शोचति । दैवीमिति । देवस्य भगवतोमायां विश्वमोहिनीं शक्तिमाश्रित्य असति द्वितीये अब्रह्मात्मकतया अविद्यमानेऽपि संसारे भिन्नदृक् भेदबुद्धिरब्रह्मात्मकोस्मीति मोहवान् भ्रातैव भ्रातृव्यः शत्रुरिति बुद्ध्या हृद्रुजा हृदयशोकेन तप्ये यथा प्रसुप्तः स्वप्नमोहितः स्वकीयं परं मत्वा तप्यते तद्वत् ॥ ३३ ॥

यथा गतायुषि चिकित्सा व्यर्था तद्वन्मयाप्येतदभिराजामम व्यर्थं प्रार्थितम् अहो भवच्छिदं प्रसाद्य भवमयाचे ॥ ३४ ॥

स्वेन रूपेणान्यनिरपेक्षेण राजत इति स्वराट् भगवान् तस्य भावः स्वाराज्यं भगवद्धामप्राप्तिं यच्छतः सकाशात् मे मया मानः अहो भिक्षितः धिग्मामिति भावः फलीकारान् तुषान् ॥ ३५ ॥

यदृच्छालब्धेनैव भोजनाच्छादनेन मनसः समृद्धिः पूर्णता येषां ते ॥ ३६ ॥

अभद्रस्यामङ्गलस्य भद्रं मङ्गलं कुत इतिमत्वा तदागमे विश्वासं न कृतवान् ॥ ३७ ॥

देवर्षिवाक्यम् एष्यत्यचिरात् इति ॥ ३८ ॥

पर्यस्तः परित आवृतः ॥ ३९ ॥

आत्मजस्य आगमनेन ईक्षणे उत्सुकः उत्साहवान् ॥ ४० ॥

———

भाषाटीका ।

अहो देखो मेरा बड़ा अज्ञान है मैं बड़ा मन्दभागी हूं जो कि मैंने मोक्ष देने वाले भगवान के चरण कमल में प्राप्त होकर भी राज्यादि उत्तमपद अनित्य वस्तुको मांगा ॥ ३१ ॥

मेरे से नीचे रहनेकी शङ्कासे देवतोंने नहीं सहकर मेरी बुद्धि को भ्रष्ट कर दिया जो कि मैं भ्रमने समताके उपदेशके नारदजी के सत्य वचनको नहीं ग्रहण किया ॥ ३२ ॥

परमेश्वरकी मायाके वश होकर मैं जैसे सोया हुआ मनुष्य स्वप्नमें व्याघ्रादिक जो दूसरे नहीं हैं उनको भी देखकर दुखीहोता है तैसेही मैंभी अपने भ्रातही को शत्रु मानकर हृदयके ताप रोग से दुखित होताहूं ॥ ३३ ॥

मेरा यह मांगना व्यर्थहै जैसे गतायु पुरुषका औषध करना व्यर्थ है मैं बड़ा भाग्य रहितहूं जोकि प्राप्त होने के नहीं योग्य सब जगत्के अन्तर्यामी संसार के छुटाने वाले परमात्माको तपस्या से प्रसन्न कराके फिरभी मैंने संसार सुखही मांगा ॥ ३४ ॥

जैसे चक्रवर्त्ति राजाको प्रसन्न करके दरिद्र मनुष्य धानके कणिका को मांगै तैसे मैनेभी ब्रह्मानन्द मोक्ष सुख देने वाले नारायणको प्रसन्न करके अपनी मूर्खतासे अभिमान का हेतु राज्यादिक मांगा हाय बड़ी भूल भईहै ॥ ३५ ॥

मैत्रेयजी बोले कि हे तात ! विदुर आप सरीके भगवद्भक्तजन मुकुन्दके चरणकमलके रजकी सेवा करने वाले अयाचक वृत्तिसे हो जिनका मन सन्तुष्ट हैं सो महात्मा भगवान् की दास्य भक्ति के विना और कुछ प्रयोजन को नहीं चाहते हैं ॥ ३६ ॥

अब उत्तानपाद राजाने ध्रुवजी का आने का खबर सुना तौभी जैसे मरेका आना नहीं होता तैसे उनके आनेका विश्वास नहीं किया क्योंकि राजा कहने लगे कि मैंतो भाग्यहीन हूं मोरकुं यह बात कहां से होगीकि जो ध्रुव मिलै ॥ ३७ ॥

सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते।
आरुह्य शिबिकां सार्द्धमुत्तमेनाभिजग्मतुः ॥ ४१ ॥
तं दृष्ट्वोपवनाभ्याश आयान्तं तरसा रथात्।
अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ४२
परिरेभेऽङ्गजं दोर्भ्यां दीर्घोत्कण्ठमनाः श्वसन्।
विष्वक्सेनाङ्घ्रिसंस्पर्शहताशेषाघबन्धनम् ॥ ४३ ॥
अथाजिघ्रन्मुहुर्मूर्ध्नि शीतैर्नयनवारिभिः।
स्नपयामास तनयं जातोद्दाममनोरथः ॥ ४४ ॥
अभिवन्द्य पितुः पादावाशीर्भिश्चाभिमन्त्रितः।
ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ॥ ४५ ॥
सुरुचिस्तं समुत्थाप्य पादावनतमर्भकम्।
परिष्वज्याह जीवेति बाष्पगद्गदया गिरा ॥ ४६ ॥
यस्य प्रसन्नो भगवान्गुणैर्मैत्र्यादिभिर्हरिः।
तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम् ॥ ४७ ॥

भाषाटीका।

फिर नारद जी के पहिले कहे वचन में श्रद्धा करके मनमें बडा प्रौढ होकर हर्षित हुये बडे प्रसन्न होकर सन्देशा कहनेवाले दूत को बडा मूल्यवाला एक हार देदिया ॥ ३८ ॥

फिर सुन्दर घोडोंवाला सुवर्ण से भूषित रथपर बैठकर कुल वृद्ध तथा ब्राह्मणों से दिवान तथा बंधुओं से सहित । ३९ ॥

शंख नगारा के शब्द वेद का ध्वनि बंशी के शब्द से संयुक्त होकर पुत्र को देखने की उत्कण्ठासे पुर से शीघ्र ही राजा निकले ॥ ४० ॥

श्रीधरस्वामिकृत भावार्थदीपिका।

अस्य राज्ञोमहिष्यौ मध्ये उत्तमं निधाय एकामेव शिबिकां नरविमानमारुह्य ॥ ४१ ॥

उपवनस्याभ्याशे समीपे ॥ ४२ ॥

विष्वक्सेनाङ्घ्रिसंस्पर्शेन हतमशेषमघं बन्धनं च यस्य ॥४३॥

जात उद्दामोमहान्मनोरथो यस्य ॥ ४४ ॥

अभिमन्त्रितः पितुराशीर्भिः सह तेन कृतसंभाषणः ॥४५-४६॥

सुरुच्याः प्रीतिर्नाभिसम्भाविवतेत्याह। यस्येति नमन्त्यनुसरन्ति आपोयथा स्वयमेव निम्नं देशमवतरन्ति ॥ ४७ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी।

एकामेव शिबिकामिति तत्प्रभावेन वैषम्यं नष्टमभूदिति सूचितम् ॥ ४१ ॥

तमिति युग्मकम् आसाद्य ध्रुवं प्राप्य ॥ ४२ ॥ ४३ ॥

अथ आलिङ्गनानन्तरं शीतलैः नयनवारिभिरश्रुभिः स्नापयामास ॥ ४४ ॥

अभिमन्त्रितः अभिमन्त्रणं सम्भाषणं तस्य विषयीकृतः तथा च तेन कृतसम्भाषण इति व्याख्यातम् सुरुचेरपि प्रणामे हेतुः सज्जनाग्रणीरिति ॥ ४५ ॥ ४६ ॥

मैत्र्यादिभिर्भक्तयुक्तैरन्यथा प्रसादजननायोगात् ॥ ४७ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिका।

अस्य राज्ञो महिष्यौ भार्ये सुनीतिः सुरुचिश्च उत्तमेन सार्द्धं शिबिकां नरवाहनमारुह्याभिजग्मतुः ॥ ४१ ॥

उपवनाभ्याशे उपवनसमीपे आयान्तं तं ध्रुवं दृष्ट्वा तरसा आशु रथादवरुह्य तूर्णं पुत्रमासाद्य प्रेम्णा विह्वलः परवशः नृपः उत्तानपादः ॥ ४२ ॥

दीर्घोत्कण्ठमनाः अतएव श्वसन् श्वासं मुञ्चन् दोर्भ्यां अङ्गजं पुत्रं परिरेभे अङ्गजं विशिनष्टि विष्वक्सेनस्य भगवतः अङ्घ्रिसंस्पर्शेन हतमशेषमाध्यात्मिकं बन्धनं 'संसृतिकारणं यस्य तम् ॥ ४३ ॥

जातउद्दामोमहान्मनोरथोयस्य सः राजा द्वितीयांतपाठे तनयविशेषणं मूर्ध्निआजिघ्रन् आघ्राणं कुर्वन् शीतैर्नयनवारिभिः अश्रुभिः स्नापयामास ॥ ४४ ॥

पितुरुत्तानपादस्य पादावभिवन्द्य नमस्कृत्यपितुराशीर्भिः अभिमन्त्रितः कृतसंभाषणः सत्कृतः संमानितः सज्जनाग्रणीः सज्जनश्रेष्ठः ध्रुवः शिरसा मातरौ सुरुचि सुनीती ननाम ॥ ४५ ॥ ४६ ॥

उत्तमश्च ध्रुवश्चोभावन्योऽन्यं प्रेमविह्वलौ ।
अङ्गसंगादुत्पुलकावस्रौघं मुहुरूहतुः ॥ ४८ ॥
सुनीतिरस्य जननी प्राणेभ्योऽपि प्रियं सुतम् ।
उपगुह्य जहावाधिं तदङ्गस्पर्शनिर्वृता ॥ ४९ ॥

श्रीमद्वीरराघवाचार्यकृत भागवत चन्द्रचन्द्रिका ।

सुरुचिः, पादयोरवनतमर्भकं ध्रुवमुत्थाप्य परिष्वज्याश्रुकण्ठेन गद्गदस्वरयुक्तया गिरा वाचा चिरं जीवेत्याह ॥ ४६ ॥

सुरुच्याः प्रीतिर्न सम्भावितेत्याह । यस्येति । मैत्र्यादिभिरात्मगुणैः यस्य हरिः प्रसन्नः तस्मिन् सर्वभूतानि नमन्ति प्रह्वीभवन्ति आपो यथा स्वयमेव निम्नं देशं प्रतिप्रवहन्ति ॥ ४७ ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

हरेः शक्तिरचिन्त्येति ध्वनयन् सुनीतिसुरुच्योर्योग्यां चाह सुनीतिरिति रुक्मं हेम शिबिकं आन्दोलिके ॥ ४१ ॥

दूरप्रदेशे दर्शनं सार्वजनीनं न स्यादिति हरिणा पुरनिकट एव घटितमिति भावेन पुरोपवनसमीपे कुमारदर्शनं तदनन्तरं राज्ञामाननक्रियाविशेषं चाह । तं दृष्ट्वेति ॥ ४२ ॥

अङ्गजं पुत्रम् । चिरकालेनादृष्टेति विशेषणात्तालिङ्गनव्याजेन तत्स्वरूपगुणापि पापविदाराः स्यादिति ध्वनयति ॥ ४३ ॥

किमनेन राज्ञिङ्गनमात्रेण । नन्दातिरिक्तलक्षणाप्यकेऽस्यमस्तीति शिष्टि । अथेति । शान्तैः स्पर्शितैः समवलक्षणयास्वान्तस्वर्भेः "अस्तोकमनन्दितमुत्पुत्र सम्यक् मनः .. ति यादवः शर्म तोषं चर्श सुखमित्यहलायुधः आनन्दसाराज्यादिरुक्तमदूरं सूचयति एतमर्थं चपलचक्षुः विशेषण । आतनेति । अथ वा प्राप्तः उद्दाम उत्कृष्टो मनोरथोऽभीष्टत्वादितरुक्तो येन स तथा तम ॥ ४४ ॥

भगवद्भक्तस्यापि भागवत्पादस्पर्शो नास्ति किमुत हरिणेति । मर्थं ध्वनयन् ध्रुवोऽपि पित्रानुचितक्रियामाचरतीत्याह । अभिवन्द्येतिमातरावनुमत्यापूर्वान्तः करणकालुष्यं दूरीकृतमिति व्यनक्ति शीर्ष्णा ननामेत्यनेन पितृमातृगुरुत्वाधिक्यं सूचयति तदुक्तम् "दशाचार्यसमो भ्राता शतभ्रातृसमः पिता । पितृदशशतं माता गौरवेणातिरिच्यते" । इति सुरुच्या गुण्यसानुत्त्वाभावेऽपि सम्भावत्वेन मत्त्वा इतिकृतवान्यो । ताय सज्जनाग्रणीरिति विशेषणम् ॥ ४५ ॥

सुरुचिरपि स्वस्वरूपं विहाय किमभ्ययापीति तत्राह । सुरुचिरिति । अर्भकमिति कुलोपमं अर्भकं प्रज्ञहितशुभमित्यनेन नेहविशेषहेतुः शत्रुत्वेनमाचरेत समुत्थाप्येति आयते ॥ ४६ ॥

ध्रुवस्य सामान्यभाग्यवत्याप्रेरणा सुरुचिः कथं ओजसेति वा ज्ञानवत्स्यादिति तत्राह । यस्येति । मैत्र्यादिभिर्मैत्रीकरुणादिभिर्भवन्ति प्रह्वीभवन्ति ॥ ४७ ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

नमिति पुत्रकाः ॥ ४१ —— ४३ ॥

जातः इत्यत्र स्तातः इति चित्तसुखः । निस्तीर्ण इत्यर्थः ॥ ४४ ॥

पूर्वं पितुः पादौ आशीर्भिरभिवन्द्य मातरौ ननाम ताभ्यामाशीर्भिः सहामितः नन्दनः कृतसम्भाषणः सत्कृतो मानितश्च सुरुच्याऽपि तथा भक्तौ हेतुः सज्जनेति ॥ ४५ —— ५२ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

उत्तमेन बालकेन सह एकां शिबिकामारुह्येति ध्रुवस्य निष्क्रमणदिनत एव राज्ञा बहुतरमनुतप्तेन नारदाश्वासितेन ध्रुवमात्र एव सौभाग्यं दत्तमुत्तम मात्रेतु दौर्भाग्यं । तदपि ध्रुवमाता सुनीतिर्विनयपराशिस्तां सपुत्रां स्वशिबिकायामेवारोहयामासेति तत्त्वम् ॥ ४१—४४ ॥

ननु सुरुचि दुःखदायिनीं कथं शीर्ष्णा ननाम तत्राह सज्जनाग्रणीरिति ॥ ४५ ॥ ४६ ॥

तस्मिन् ध्रुवे सुरुच्याः प्रीतिर्नासम्भावितेत्याह यस्येति ॥ ४७-४८ ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

उत्तमेन सह ॥ ४१ ॥ ४२ ॥

विष्वक्सेनस्य सेना यस्य तस्य भगवतोऽङ्घ्रिस्पर्शेन हतानि भवरूपाणि बन्धनानि यस्य तम ॥ ४३ ॥

जातउद्दामोमहान् मनोरथो यस्य सः ॥ ४४ ॥

सज्जनाग्रणीर्ध्रुवोऽपि पितुः पादावभिवन्द्य तेनाशीर्भिरभिमन्त्रितः मातरौ ननाम ताभ्यां सत्कृतः ॥ ४५ ॥ ४६ ४७ ॥

———

भाषाटीका

उत्तानपाद राजा की पटरानी सुरुचि सुनीति दोनों सुवर्ण के गहनानकुं पहर कर राजपुत्र उत्तम को साथ में लेकर पालकी पर चढ़ कर ध्रुव के पास कूं गई ॥ ४१ ॥

नगर बाहर बगीचा के पास में आते हुये पुत्र को देखकर राजा जल्दी से रथ से उतर कर मिलकर दोनों भुजाओं से आलिंगन किया बहुतदिनसे उत्कण्ठावाले बड़े श्वास लेकर मिलने लगे क्योंकि भगवान् के चरण स्पर्श होने से ध्रुव के सब बन्धन छूटे है जान कर राजा ने बहुत प्रेम किया ॥ ४२ ॥ ४३ ॥

राजा मन में मनोरथ की बड़ी पूर्णता मान कर बारंबार पुत्र को मस्तक को सूंघने लगे और शीतल नेत्रों के आंसुनसे मानो स्नान करादिया ॥ ४४ ॥

सज्जनोंके अग्रगामी ध्रुवजीने पिता के पाद को प्रणाम किया पिताने आशीर्वादसे युक्त किये और सत्कार उनका किया फिर ध्रुवजीने मस्तकसे माता को प्रणाम किया ॥ ४५ ॥

सुरुचिने अपने पैरोंमें पड़े हुए उस बालक को उठाकर आलिंगन करके रुंधेसे कंठ से कहा कि हे पुत्र ! चिरकाल तक जीते रहो ॥ ४६ ॥

मैत्र्यादि सिवधुवके मैत्री आदि गुणोंसे हरि भगवान् प्रसन्न होगये उसको सब प्राणीएसे नमनेलगे कि जैसे जल नीच को नमे है ॥ ४७ ॥

———

श्रीधरस्वामिकृत भावार्थदीपिका ।

ऊहतुर्दधतुः ॥ ४८ ॥ ४९ ॥

———

पयः स्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः ।
तदाभिषिच्यमानाभ्यां वीर!वीरसुवो मुहुः ॥ ५० ॥
तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा ।
प्रतिलब्धश्चिरं नष्टो रक्षिता मण्डलं भुवः ॥ ५१ ॥
अभ्यर्चितस्त्वया नूनं भगवान् प्रणतार्त्तिहा ।
यदनुध्यायिनो धीरा मृत्युं जिग्युः सुदुर्जयम् ॥ ५२ ॥
लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः ।
आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरम् ॥ ५३ ॥
तत्र तत्रोपसंल्कृप्तैर्लसन्मकरतोरणैः ।
सवृन्दैः कदलीस्तम्भैः पूगपोतैश्च तद्विधैः ॥ ५४ ॥
चूतपल्लववासःस्रङ्मुक्तादामविलम्बिभिः ।
उपस्कृतं प्रतिद्वारमपां कुम्भैः सदीपकैः ॥ ५५ ॥
प्राकारैर्गोपुरागारैः शातकुम्भपरिच्छदैः ।
सर्वतोऽलङ्कृतं श्रीमद्विमानशिखरद्युभिः ॥ ५६ ॥
मृष्टचत्वररथ्याट्टमार्गं चन्दनचर्चितम् ।
लाजाक्षतैः पुष्पफलैस्तण्डुलैर्बलिभिर्युतम् ॥ ५७ ॥
ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः ।
सिद्धार्थाक्षतदध्यम्बुदूर्वापुष्पफलानि च ॥ ५८ ॥
उपजह्रुः प्रयुञ्जाना वात्सल्यादाशिषः सतीः ।
शृण्वंस्तद्वल्गुगीतानि प्राविशद्भवनं पितुः ॥ ५९ ॥
महामणिव्रातमये स तस्मिन् भवनोत्तमे
लालितो नितरां पित्रा न्यवसद्दिवि देववत् ॥ ६० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

हे वीर ! वीरसुवो ध्रुवमातुः अभिषिच्यमानाभ्यां पयस्तदा सुस्राव ॥ ५० ॥

चिरं नष्टो दर्शनमप्राप्तः रक्षिता रक्षिष्यति ॥ ५१ ॥ ५२ ॥

एवमिति व्यवहितं पित्रा ह्युपलालनं परामृश्यते ॥ ५३ ॥

पुरं वर्णयति । तत्र तत्रेति चतुर्भिः सवृन्दैः फलमञ्जरीयुक्तैः पूगानां पोतैर्बालवृक्षैस्तद्विधैः सवृन्दैरुपस्कृतं प्रति द्वारमित्युत्तरेणान्वयः ॥ ५४ ॥

चूतपल्लवाश्च वासांसि च स्रजश्च मुक्तादामानि च तेषां विशिष्टं लम्बनमस्ति येषु कुम्भेषु ॥ ५५ ॥

गोपुरैरगारैश्च शातकुम्भाः परिच्छदाः परिकरा येषु विमानानामिव शिखरैर्द्युतिर्येषाम् ॥ ५६ ॥

चत्वरमङ्गणम रथ्या महामार्गः अट्ट उच्चस्योपरि निर्मिता भूमिका मार्गः अवान्तर मृष्टाः सम्मार्जिताश्चत्वरादयो यस्मिन् ५७॥

सिद्धार्थः श्वेतसर्षपः अक्षता यवाः ॥ ५८ ॥

उपजह्रुर्व्यकिरन् सतीः सत्यः ॥ ५९ ॥ ६० ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

तत्रोत्तमस्य प्रेमविह्वलत्वे रज्यन्ति जन्तवस्तत्र स्थावरा जङ्गमा अपि इति भक्तिप्रभाव एव ध्रुवस्यापि निर्मत्सराणां सतामित्युक्तः स एवेति ज्ञेयम ॥ ४८ ॥

सुनीतेस्तु स्वाभाविकमप्यतिशयमाह । सुनीतिरिति ॥ ४९ ॥

तादृशवात्सल्यदर्शनाश्चर्येण सम्बोधनं धीरेति ॥ ५० ॥

अनद्यतनभविष्यत्काले राज सम्पत्तेः भविष्यत्सामान्यतया रक्षिष्यतीति व्याख्यातम ॥ ५१ ॥

नूनमिति सम्भावनायाम यस्यानुध्यायिनो ध्यानपरा यस्याः ५२

लाल्यमानमिति पञ्चकम् तत्र बहुवाक्यैकवाक्यन्यायात्क्रिम-

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

लाभाय छिविन्दुमस्तकाङ्काः कल्पनीयाः ॥ व्यवहितं यस्येत्यादि पद्यद्वन्द्वकृतव्यवधानं हृष्टत्यादिप्रकारकं पित्रादिकर्तृकोपलालनं (१) ॥ ५३ ॥

बालवृक्षैस्तद्विधैस्सवृन्दैः (२) ॥ ५४ ॥

उपस्कृतमलङ्कृतम (३) ॥ ५५ ॥

श्रीमद्भिरिति विमानविशेषणम (४) ॥ ५६ ॥ ५७ ॥

ध्रुवायेति सार्द्धकम सत्य इति पुरस्त्रीणां विशेषणम ॥ ५८ ॥

शृण्वन्नित्यर्धकम ॥ तासां पुरस्त्रीणां वल्गुगीतानि शृण्वन् ॥ ५९ ॥ ६० ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका

उत्तमः ध्रुवश्चोभौ भ्रातरौ प्रेमविह्वलौ अङ्गसंगादालिङ्गनादुत्पुलकौ उद्गतपुलकौ अस्त्रौघं आनन्दाश्रुकणसमूहं मुहुः पुनः पुनरूहतुः मुमुचतुः ॥ ४८ ॥

अस्य ध्रुवस्य जननी सुनीतिः उपगुह्यालिङ्गयतस्य तनयस्यास्पर्शनेन निर्वृताङ्गसुखिता आत्मिमनः पीडां जहौ तत्याज ॥ ४९ ॥

हे वीर ! वीरसुवः वीरस्य ध्रुवस्य जनन्याः सुनीत्याः शिवैः शान्तैर्नेत्रजैः सलिलैरभिषिच्यमानाभ्यां स्तनाभ्यां पयः सुस्राव॥५०॥

उत्तानपादं जनाः प्रशशंसुः प्रशंसामेवाह ! हेराजन् ! आर्तिहादुःखापहर्त्ता पुत्रः चिरं नष्टो दर्शनमप्राप्त इदानीं दिष्ट्या भाग्येन त्वया प्रतिलब्धः प्राप्तः अयंभुवो मण्डलं रक्षिता रक्षिष्यति ॥५१॥

प्रणतार्तिहा भक्तानां दुःखापहर्त्ता भगवान् त्वया नूनं जन्मान्तरेऽभ्यर्चितः यस्यभगवतोऽनुध्यायिनो ध्यातारः सुदुर्जयं मृत्युं संसारं जिग्युः जितवन्तः ॥ ५२ ॥

एवं जनैर्लाल्यमानं राजा सभ्रातरं सोत्तमं ध्रुवं हृष्टः करिणीं हस्तिनमारोप्य जनैः स्तूयमानः पुरमविशत् ॥ ५३ ॥

अन्तःपुरं वर्णयति । यत्रतत्रेति चतुर्भिः उपसर्मापे सस्यकल्पितैर्मकरतोरणैः सवृन्दैः फलमञ्जरीयुक्तैः कदलीस्तम्भैः तद्विधैः सवृन्दैः पूगानां पोतैर्नवावृक्षैः ॥ ५४ ॥

चूतपल्लवाश्च वासांसि च स्रजश्च मुक्तादामानि च तेषां विशिष्टं बन्धनमस्ति येषु तैः सदीपकैः अपांकुम्भैःप्रतिद्वारमुपस्कृतम अलंकृतम ॥ ५५ ॥

गोपुरैरट्टालैश्च कथंभूतैः शातकौम्भाः स्वर्णमयाः परिच्छदाः परिकरा येषां तैः सर्वतः परितः अलंकृतं श्रीमत्सर्वसमृद्धिमत् विमानानामिव शिखरैर्द्युतिर्यस्मिन् ॥ ५६ ॥

रथ्याराजमार्गः अट्टः उच्चस्य प्राकारस्योपरिनिर्मिता भूमिकामार्गोऽवान्तरः मृष्टाः संमार्जिताश्चत्वरादयो यस्मिन् चन्दनचर्चितं चन्दनाम्बुभिः संसिक्तम ॥ ५७ ॥

सिद्धार्थाः श्वेतसर्षपाः उपजन्हुः व्यकिरन् सतीः सत्यः विभक्तिव्यत्ययआर्षः तासां सतीनां वल्गूनि श्राव्याणि गीतानि शृण्वन् पितुर्भवनम गृहं प्राविशत् ॥ ५८ ॥ ५९ ॥

अनर्घ्यमणिसमूहमये भवनश्रेष्ठेपित्रानितरां लालितः दिविदेववत्अवसत् ॥ ६० ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली॥

उत्तमस्य भूतत्वेकत्वेन ध्रुवद्वेषाशङ्का दूरोत्सादितेति तयोः प्रणयोद्रेकनिमित्त क्रियामाह । उत्तमश्चेति । अस्त्रौघं बाष्पप्रवाह म ओघः परंपरायां स्याज्जलस्रोतसि संचय इति यादवः ॥ ४८ ॥

सूचीकटाहन्यायेन ध्रुवं सुरुच्यादिप्रणामक्रियां प्रोच्याधुना सुनीति विषयामाह । सुनीतिरस्येति ॥ ४९ ॥

अस्य जननीति विशेषणं विशिनष्टि । पय इति ॥ औरसपुत्रस्मरणादिना मातृस्तनयोस्तन्यप्रस्रवणेन तज्जनकत्वानुमानं सुलभमित्यर्थः वीरं पुत्रं सुवतीति वीरसूः तस्याः वीरे पत्ने यश्च सं वीरपत्नमस्मिन्निति श्रुतिः ॥ ५० ॥

सुनीति कथापि भ्रातृणां पापप्रणाशिन्यपि भवतीति भावेन तां विशिनष्टि । तां शशंसुरिति दिष्ट्या स्यान्मंगलादिवृष्टिस्त्यभिधानात् दिष्ट्या पुण्येन ॥ ५१ ॥

पुण्यमपि विशिष्यन्तीत्याह । अभ्यर्चित इति । यदि प्रणतार्तिहरोहरिस्त्वया नाभ्यर्चितस्तर्हि चिरं नष्टः पुत्रो न प्रतिलब्धः स्यान्न तथा तस्मादभ्यर्चित इति तर्कः किं विशिष्टो भगवानिति तत्राह । यदनुध्यायिन इति । अनेन तर्कस्याप्रतिपक्षतां दर्शयति ॥ ५२ ॥

ध्रुवस्य जनपालनप्रक्रियां सांक्षिप्त्येव मैत्रेयो राज्ञः पुरप्रवेशमाह । लाल्यमानमिति । कलभश्चैव कन्यानां करिणी बालमङ्गल इति वचनात् करिणीमित्युक्तम ॥ ५३ ॥

संवृन्दैः पुष्पबन्धनसहितैस्तद्विधैः पुष्पबंधन सहितैः ॥ ५४ ॥

विशेषाणि चूतपल्लवादीनि येषु ते तथातैः प्रतिद्वारमुपस्कृतमलं कृतम ॥ ५५ ॥

शातकुम्भपरिच्छदैः सुवर्णालंकारैः श्रीमतां विमानानां शिखराणां द्युतिभिरलङ्कृतं अनेन देवादीनां विमानानामागमनं सूचयति ॥ ५६ ॥

चत्वरश्चतुष्पथः रथ्या रथमार्गः आदिशब्देन तिर्यगाद्यवान्तर मार्गो गृह्यते ॥ ५७ ॥

सिद्धार्थः सितसर्षपः ॥ ५८ ॥

तासां पुरस्त्रीणां वल्गूनि चारूणि गीतानि ॥ ५९ ॥

कशिपूत्तमे मञ्चेशमे भोजनाच्छादनादिना प्रेष्ठया ॥ ६० ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

लाल्यमानमिति पञ्चकम ॥ ५३—५७ ॥

ध्रुवायेति सार्द्धकम ॥ ५८ ॥

शृण्वन्नित्यर्द्धकम ॥ ५९ । ६०॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

सुनीतेः पश्चान्मिलनमानन्दमूर्च्छाभङ्ग सतीति त्रयम ॥४९॥

हे वीर ! त्वामिव भगवन्तमेवीरं ध्रुवं मृते इति तस्याः सुनीतेः ॥ ५० ॥ ५१ ॥

अभ्यर्चित इत्यनपत्य स्वपुत्रस्य मृत्युं त्वमजैषीरिति भाव ॥५२॥

एवं नृपोऽपि दिष्ट्येति पादोनत्रयकद्वयेन जनैः स्तूयमान पुरमविशत ॥ ५३ ॥

पुरं वर्णयति। तत्र तत्रेति त्रिभिः । उपसंक्लृप्तैस्तत्रानीमेवोद्यानादिभ्य आनीयारोपितैः । लसन्मकराणि तोरणानि यत्र तैः । सवृन्तैः फलमञ्जरीयुक्तैः । कदलीस्तम्भैरुपस्कृतप्रतिद्वारमित्यन्वयः ॥ ५४ ॥

चूतेति अपां कुम्भैरित्यस्य विशेषणम ॥ ५५ ॥

गोपुराणि पुरद्वाराणि गोपुरैरगारैश्च विमानशिखराणामिव द्योर्द्युतिर्येषां तैः ॥ ५६ ॥

चत्वरमङ्गणं रथ्या महामार्गः ॥ ५७ ॥

सिद्धार्थाः श्वेतसर्षपाः । अक्षता यवाः । उपजन्हुरकिरन् सतीः सत्यः ॥ ५८- ६१ ॥

पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः ।
आसनानि महार्हाणि यत्र रौक्मा उपस्कराः ॥ ६१ ॥
यत्र स्फटिककुड्येषु महामारकतेषु च ।
मणिप्रदीपा आभान्ति ललना रत्न संयुताः ॥ ६२ ॥
उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः ।
कूजद्विहङ्गमिथुनैर्गायन्मत्तमधुव्रतैः ॥ ६३ ॥
वाप्यो वैदूर्यसोपानाः पद्मोत्पलकुमुद्वतीः ।
हंसकारण्डवकुलैर्जुष्टाश्चक्राह्वसारसैः ॥ ६४ ॥
उत्तानपादो राजर्षिः प्रभावं तनयस्य तम् ।
श्रुत्वा दृष्ट्वाऽद्भुततमं प्रपेदे विस्मयं परम् ॥ ६५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

मुहुः पुनः पुनः ऊढ़ान्तः तस्य ध्रुवस्याङ्गस्पर्शेन निर्वृता सुखिता आधिं मनोव्यथां जहौ तत्याज ॥ ४८ ॥ ४९ ॥

हे वीर विदुर ! तदा वीरसुवः ध्रुवजनन्याः शिवैः शुभैर्नेत्रजैः सलिलैरभिषिच्यमानाभ्यां स्तनाभ्यां पयः सुस्राव ॥ ५० ॥

ते पुत्रः चिरं नष्टं [illegible] प्राप्तः दिष्ट्या भद्रं पुनः प्रतिलब्धः [illegible] रक्षिष्यति इति गिरो [illegible] ॥ ५१ ॥

यस्यानुध्यायिनः [illegible] मृत्युं जन्ममरणप्रवाहं जिग्युर्जितवन्तः ॥ ५२ ॥

[illegible] पुरमविशत ॥ ५३ ॥

[illegible] ॥ ५४ ॥

[illegible] कुम्भैश्चोपस्कृतम् [illegible] ॥ ५५ ॥

[illegible] स्वर्णमयाः परिच्छदाः परिकरा येषां तैः प्राकारैर्गोपुरैः [illegible] ॥ ५६ ॥

[illegible] मार्गोऽयान्तरः चन्दनैः अभिचितं तज्जलैः संसिक्तम् ॥ ५७ ॥

पर्योक्षयः ध्रुवाय सतीः सत्या आशिषः [illegible] उपजह्रुः [illegible] ॥ ५८–६३ ॥

भाषाटीका ।

ध्रुव और उत्तम [illegible] परस्पर आलिंगन करके प्रेमसे मोहित होगये [illegible] से उनके पुलकावली हो गई बारंबार स्नेह के आंसू गिराने लगे ॥ ४८ ॥

सुनीतिने [illegible] में भी अत्यंत प्रियपुत्र को आलिंगन करके उसके शरीर के स्पर्श से सुखित होकर मन के सब तापों को दूर किया ॥ ४९ ॥

हे वीर विदुरजी ! आनंद के मारे निकले जो नेत्रके जलतिनसे भिजे हुये, वीर पुत्र वाली सुनीतीके स्तनों से बारंबार दूध निकलने लगा ॥ ५० ॥

उस रानी से सब मनुष्य कहने लगे कि बड़ा मंगल है तुमारा पुत्र दुःखका नाश करने वाला है खोइ गया मिला है अब ये पृथवी की रक्षा करैगा ॥ ५१ ॥

मालूम होता है कि जिस नारायणके ध्यान करने वाले दुर्जय मृत्यु को जीत गये हैं उस भक्तार्ति नाशक भगवान का तुमने अच्छा पूजन किया है जो तुमारा ऐसा पुत्र हुआ है ॥ ५२ ॥

मनुष्यों के ऐसे आदर करते करते उत्तम भ्राता सहित ध्रुव को आनंदित होकर हथिनी पर बैठाया तब सब मनुष्य स्तुति करते थे राजा ने पुर में प्रवेश किया ॥ ५३ ॥

उस पुरके मार्ग में तहां तहां बनाये हुये मकरके तोरण फल पुष्प मंजरी सहित कदली के स्तंभ ऐसे ही सुपारी के छोटे पेड़ लगे हुये हैं ॥ ५४ ॥

आम के पल्लव वस्त्र माला मुक्ताके हार ये उनमें लटके हैं द्वार द्वार में जलों के कलस रखे हैं और दीपक भी रखे हैं ॥ ५५ ॥

और सुवर्ण के सब पदार्थ हैं जिनमें ऐसे दीवाल गोपुरद्वार श्रीमानों के विमान बड़े प्रकाशमान शिखर वाले हैं जिनसे चारों ओर से शोभित होरहा है ॥ ५६ ॥

गली अटा अटारी सड़क सब सुंदर झाड़ के निर्मल किये हैं चन्दन के जल से सींचे गये हैं लाइ अक्षत पुष्प फल चावल अन्न भेट आदि से युक्त ऐसी पुरकी शोभा है ॥ ५७ ॥

रस्ता में तहां तहां ध्रुव को देखने वाली पुर स्त्री सपेद सर्षों अक्षत दहि जल दूब पुष्प फल इनको भेट देकर आशिर्वाद देती थी ध्रुवजी भी उन स्त्रीनके मनोहर गीतोंको सुनते सुनते पिता के महल में प्रविष्ट हुये ॥ ५८–५९ ॥

महाराजाओं के समूह सेवना उस महल में स्थित हुये फिर पिता के लाड़से स्वर्ग में देवता के तुल्य निवासकरतभये ध्रुवजी ॥ ६० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यत्र भवनोत्तमे ॥ ६१ ॥ ६२ ॥ ६३ ॥
कुमुत कुमदम पद्मादिमत्यो वाप्यः ॥ ६४ ॥ ६५ ॥

वीक्ष्योढवयसं तं च प्रकृतीनां च सम्मतम् ।
अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः पतिम् ॥ ६६ ॥
आत्मानं च प्रवयसमाकलय्य विशां पतिः ।
वनं विरक्तः प्रातिष्ठद्विमृशन्नात्मनो गतिम् ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थे स्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां ध्रुवचरिते
नवमोऽध्यायः ॥ ९ ॥

—○:०:○—

श्रीधरस्वामिकृत भावार्थदीपिका ।

ऊढवयसं प्राप्तयौवनम् अनुरक्ताः प्रजा यस्मिन् ॥ ६६ ॥

प्रवयसं वृद्धम् ॥ ६७ ॥

इतिश्रीभागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृत भावार्थदीपिका टीकायां
नवमोऽध्यायः ॥ ९ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ।

उपस्करास्सामग्र्यः ॥ ६१ ॥

यत्रेति त्रिकम् ॥ ६२ । ६३ ॥ ६४ ॥

तं श्रीभगवत्प्रसादवैभवरूपं "प्रभावस्सर्वजित्स्थितिरि,,तिरसासुधे तल्लक्षणाभावादृशस्थितिलक्षणाम प्रभावं श्रीनारदाद्विश्रुत्य दृष्ट्वा सुरुच्यादिसर्वजनताप्रीतिलिङ्गेन स्वयञ्चानुमाय ॥ ६५ ॥ ६६ ॥

आत्मनस्स्वस्य गतिं प्राप्यं श्रीहरिम् ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
दीपिकादीपनटीकायाम
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

भवनं वर्णयति । यत्र भवने शय्याः दान्ताः क्षीरफेनवन्निर्मलाः शुभ्राश्च रुक्मपरिच्छदाः सुवर्णमयाः परिकराः अनर्घ्याणि आसनानि रौप्या राजता उपस्कराश्च सन्ति ॥ ६१ ॥

यत्र भवने स्फटिकमयकुड्येषु इन्द्रनीलमणिखचितेषु प्रतिफलिता ललनाः स्त्रियः रत्नानि तैः संयुताः मणिप्रदीपाः उपमितसमासः ॥ ६२ ॥

अथातिरम्याण्युद्यानानि च यत्र सन्तीत्यनुषङ्गः तानि विशिनष्टि विचित्रैरमरद्रुमैः संतानपारिजातादिभिर्द्रुमैः कथंभूतैः कूजन्ति विहङ्गानां मिथुनानि येषु गायन्तो मधुपानमत्ता मधुव्रता भृङ्गा येषु तैर्द्रुमैः युक्तानीति शेषः ॥ ६३ ॥

वाप्यश्च यत्र सन्तीत्यन्वयः वापीर्विशिनष्टि । वैडूर्यमणिमयाः सोपाना यासां पद्मानि उत्पलानि कुमुदानि च यासु सन्ति ताः विभक्ति व्यत्ययस्त्वार्षः हंसानां कारण्डवानां च कुलैः संघैश्चक्रवाकैः सारसैश्च युताः शब्दिता विस्मयमाश्चर्यं प्रपेदे ॥ ६४ ॥ ६५ ॥

अथ कतिपयवर्षानन्तरमूढवयसं प्राप्तयौवनं प्रकृतीनां मन्त्रिणां सम्मतमनुरक्ताः अनुरागयुक्ताः प्रजा यस्मिन् तं पुत्रं ध्रुवं वीक्ष्य भुवः पतिं चक्रे राज्याभिषिक्तमकरोत् ॥ ६६ ॥

तत आत्मानं प्रवयसं वृद्धमाकलय्य आलोच्य विशाम्पतिः राजा आत्मनः स्वस्यगतिं मुक्त्युपायं विमर्शयन् अतएव विरक्तः वनं प्रातिष्ठत प्राविशत् ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिकाटीकायां
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

कशिपूत्तम इत्युक्तं प्रपञ्चयति । पयः फेननिभा इति । दान्ता दन्तनिर्मिताः रुक्मपरिच्छदाः सुवर्णपरिच्छदाः उपर्याच्छादनपटा यासां तास्तथा उपस्कराः पात्राणि रौक्माणि सुवर्णनिर्मितानि ॥ ६१ ॥

रत्नं श्रेष्ठ च निर्दिष्टमिति हलायुधः ललनारत्नैः संयुताः शय्यादय आभान्ति तस्मिन्निति ॥ ६२ ॥ ६३ ॥ ६४ ॥

ध्रुवप्रभावो देवादीनामाश्चर्यबुद्धिजनकः किन्चित्तरणमिति भावेनोत्तानपादान्तः करणप्रवृत्तिविशेषं वक्ति । उत्तानपादइति ६५ ॥

विस्मयफलमाह । वीक्ष्येति । ऊढवयसमित्यनेन राज्यपालनशक्तिर्व्यनक्ति ॥ ६६ ॥

तत्र स्वयं किमकारीति तत्राह । आत्मानंचेति आकलय्य ज्ञात्वा आत्मनः स्वस्य हरेश्च गतिं स्थितिं विमृशन्विचारयन्निति ॥ ६७ ॥

इतिश्रीभागवतेमहापुराणेचतुर्थस्कन्धे
विजयध्वजकृतपदरत्नावल्याम
नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

यत्रेति त्रिकम् ॥ ६२--६७ ॥

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भस्य
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यत्र भवनोत्तमे शय्याद्यो वाप्यन्ताः भोगोपस्कराः सन्ति ॥ ६२--६५ ॥

ऊढवयसं प्राप्तयौवनम् ॥ ६६ ॥ ६७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थे नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

पद्मं चोत्पलं च कुमुत् कुमुदं च तानि विद्यन्ते यासां ताः पद्मादिमत्यः विभक्तिव्यत्यय आर्षः ॥ ६४ ॥ ६५ ॥

ऊढवयसं प्रवृत्तयौवनम् प्रकृतीनाममात्यादीनाम् अनुरक्ताः प्रजाः यस्मिन् तम् ॥ ६६ ॥

प्रवयसं वृद्धमाकलय्य संख्याय आत्मनः परमात्मनः गतिं मार्गं विमृशन् विचारयन् वनं निरुपद्रवम् हरिभजनस्थानमित्यर्थः ॥६७॥

इति श्रीमद्भागवते महापुराणे चतुर्थ स्कन्धे ।
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे टीकायाम् ।
नवमोऽध्यायः ॥ ९ ॥

भाषाटीका ।

हस्ति दांत की बनी हुई पलंगें सुवर्ण से भूषित तिनके ऊपर मे दूध के मलाइके तुल्य कोमलवस्त्र बिछे हे विचित्र बड़े मूल्य के आसन हैं सुवर्ण की सामग्री उनमें हैं ॥ ६१ ॥

जहां पर स्फटिकमणि के दिवाल महामरकतमणिके मकान मे रत्न के दीप लगे हैं नाना रत्नों से भूषित सुंदर स्त्री उपस्थित हैं ॥ ६२ ॥

विचित्र देव वृक्षों के सहित मनोहर बागबगीचा हैं जहां पर पक्षियों के जोड़ा शब्द करते हैं भ्रमर जहां गान कर रहे हैं ॥ ६३ ॥

वैदूर्य मणि की सिढी वाली बावड़ी हैं जिनमें पद्म कुमुदिनी के पुष्प खिले हैं हंसकारंडवचक्रवाक सारस पक्षि उनमें शब्द कर रहे हैं ॥ ६४ ॥

कुछ काल मे राजर्षिउत्तानपादजी अपने पुत्रके उस प्रभाव कूं देखकर और सुनकर परम विस्मय कूं प्राप्त हुये ॥ ६५ ॥

फिर राजा ने जब देखा कि ध्रुवजी की यौवन अवस्था होगई है और सब प्रजा उन पर प्रसन्न हैं उनका भी प्रजों मे अनुराग है तब उन ध्रुवजी को पृथिवी का राजा कर दिया ॥ ६६ ॥

तदनंतर अपने आपको वृद्ध जानकर अपने आत्मा की गति देने वाले परमात्मा को स्मरण कर के राजा उत्तानपाद विरक्त होकर बन को चले गये ॥ ६७ ॥

इतिश्री भागवत चतुर्थस्कंध
नवमाध्याय का भाषानुवाद लक्ष्मणा-
चार्यकृत समाप्त ॥ ९ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे नवमोऽध्यायः ॥ ९ ॥

—:o:—

दशमोऽध्यायः ॥

—— ०:——

मैत्रेय उवाच ।

प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः ।
उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ ॥ १ ॥
इलायामपि भार्यायां वायोः पुत्र्यां महाबलः ।
पुत्रमुत्कलनामानं (१) योषिद्रत्नमजीजनत् ॥ २ ॥
उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा ।
हतः पुण्यजनेनाद्रौ तन्माताऽस्य गतिं गता ॥ ३ ॥
ध्रुवो भ्रातृबधं श्रुत्वा कोपामर्षशुचार्पितः ।
जैत्रं स्यन्दनमास्थाय गतः पुण्यजनालयम् ॥ ४ ॥
गत्वोदीचीं दिशं राजा रुद्रानुचरसेविताम् ।
ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसङ्कुलाम् ॥ ५ ॥
दध्मौ शङ्खं बृहद्बाहुः खं दिशश्चानुनादयन् ।
येनोद्विग्नदृशः क्षत्तरुपदेव्योऽत्रसन् भृशम् ॥ ६ ॥
ततो निष्क्रम्य बलिन (२) उपदेवमहाभटाः ।
असहन्तस्तं निनादमभिपेतुरुदायुधाः ॥ ७ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

दशमे भ्रातृहन्तॄणां यक्षाणामकरोद्वधम् ।
एक एवालकां गत्वेत्यस्य विक्रम उच्यते ॥ १ ॥

योषितां रत्नमिवातिमनोहरम् कन्यारत्नंचेतिवा ॥ १ ॥ २ ॥

यक्षेणाद्रौ हिमवति हतः आजाविति पाठे युद्धे अस्य गतिं गता मृतेत्यर्थः ॥ ३ ॥

कोपामर्षशुचां द्वन्द्वैक्यम् तेनार्पितोव्याप्तः जैत्रं जयहेतुम् पुण्यजनालयमलकाम् ॥ ४ ॥

रुद्रानुचरा भूतादयः ॥ ५ ॥

दध्मौ वादितवान् येन शङ्खवादनेन हे क्षत्तः ! उपदेव्यो यक्षस्त्रियः ॥ ६—७ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपन्याख्या दीपिका टिप्पणी ।

उपयेम इति उत्तानपादवनगमनानन्तरमेवेति ज्ञेयम् ॥ १ ॥

इलायां पूर्वं परिणीतायां पूर्वपक्षे योषिद्रत्नमिति पुत्रविशेषणम् परत्र चकारोऽध्याहृतः ॥ २ ॥

त्वद्भ्रातर्युत्तमे नष्ट इति भगवद्वाक्यस्य सत्यतामाह । उत्तमस्त्विति । अद्राविन्यत्राजाविति पाठान्तरम् गतिमवस्थाम् ॥ ३ ॥

कोपश्चामर्षश्चासहनं शुक् च तेषां समाहारः कोपामर्षशुक् तेन ॥ ४ ॥ ५ ॥

येनेति यच्छब्दस्योत्तरवाक्यस्थत्वात्तच्छब्दापेक्षा नास्ति "साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिकं" इतिवत् ॥ ६ ॥

ततोऽलकातः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

अथ दशमेन ध्रुवः कृतोद्वाह उत्पादितपुत्रो जितभ्रातृहन्तृपुण्यजन आसीत्याह मुनिः । प्रजापतेरिति । शिशुमाराख्यस्य प्रजापतेः दुहितरं भ्रमिमुपयेमे उद्वोढ तयोर्ध्रुवभ्रम्योः सुतौ कल्पवत्सराख्यौ ॥ १ ॥

पुनरूढायां वायोर्दुहितरि इलाख्यायां भार्यायां महाबलो ध्रुव उत्कलनामानं पुत्रं कथं भूतं योषितां रत्नमिवातिमनोहरं कन्यारत्नमितिवा पुत्रमजीजनत् उत्पादयामास ॥ २ ॥

उत्तमस्त्वकृतोद्वाह एव कदाचिन्मृगयायां बलीयसा पुण्यजनेन यक्षेण अद्रौ हिमवति हतः तस्योत्तमस्य माता सुरुचिः तस्य पुत्रस्य गतिं गता मरणं प्राप्तेत्यर्थः ॥ ३ ॥

ध्रुवः भ्रातुरुत्तमस्य बधमाकर्ण्य कोपामर्षशुग्भिरिति समाहारद्वन्द्वः तेन अमर्षः अक्षमा अर्पितः व्याप्तः जैत्रं जयशीलस्यन्दनं रथमास्थायाधिरुह्य पुण्यजनालयम् अलकां पुरीं गतः गतवान् ॥ ४ ॥

---

(१) योगेश्वरमिति विजयध्वज पाठः ॥　　(२) उद्गतिभ्रूभिरापि विजयध्वज पाठः ॥

स तानापततो वीर उग्रधन्वा महारथः ।
एकैकं युगपत्सर्वानहन् बाणैस्त्रिभिस्त्रिभिः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

रुद्रानुचरा भूतादयस्तैः संवितां गुह्यकैर्यक्षैः सङ्कुलां व्याप्तां पुरीमलकां हिमवतो द्रोण्यां ददर्श ॥ ५ ॥

महाबाहुः समन्ततोऽस्य दिशः दश दिशश्चानुनादयन् प्रतिध्वनयन् शङ्खं दध्मौ नादितवान् येन शङ्खनिनादेन उद्विग्ना चलिताः दृग् यासां ता उपदेव्यो यक्षस्त्रियः हे क्षत्तः ! भृशं नितरामत्रसन् भीतवत्य ॥६॥

उपदेवाश्च महाभटास्तेबलिनः ततः अलकाया निष्क्रम्य तस्य ध्रुवस्य शङ्खनिनादमसहन्तः उद्यतायुधाः उद्यतान्यशस्त्राः अभितः पेतुः उपर्यागतवन्तः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

अत्र न केवलं मोक्ष एव भगवत्प्रसादाद्भवति किन्तु बाह्याभ्य-न्तरशत्रुजयोऽपीत्यतस्तन्माहात्म्यं वर्ण्यते तत्रादौ ध्रुवविवाहादि-प्रकारः कथ्यते। प्रजापतेरित्यादिना। तत्सुतौ तस्या भ्रमेः सुतौ कल्पो वत्सरश्च ॥ १ ॥

योगेश्वरमणिमाद्यष्टाङ्गयोगानामीश्वरम् अनेन राज्यानिच्छुत्वात् पश्चान्मुक्तिरिति ज्ञायते ॥ २ ॥

राजपुत्र उत्तमः किमभूत् ध्रुवभ्रातृत्वेन तत्कथाया अपि श्रवणार्हत्वात् सापि वक्तव्येति तत्राह। उत्तमस्त्विति। तन्माता तस्योत्तमस्य माता सुरुचिस्तस्योत्तमस्य गतिं मरणास्यलक्षणां गतिं गता ॥ ३॥

अत्र प्राकृतस्वभावेन ध्रुवेण किमकारीति तत्राह । ध्रुवइति ।

कोपामर्षशुचार्पितः भागुरिन्यायेनास्य शब्दस्य टाबन्तत्वं साधु पुण्यजनालयमलकां पुरीम् ॥ ४ ॥

पुरस्त्वकानाह। रुद्रेति। हिमवतो गिरेर्द्रोण्यां निम्नतटे गुह्यका यक्षास्तैः सङ्कुलां निविडां स्तिमिताम् ॥ ५ ॥

उपदेव्यो यक्षस्त्रियः ॥ ६ ॥

उदतिष्ठन्निति वा पाठः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

प्रजेति । अस्मायुद्धादतः पूर्वमेवास्तानपाद्वनगमनमिति गम्यते अग्न्यादावपि पूर्ववद्भगवच्छक्त्यादिरूपत्वं ज्ञेयम् ॥ १ ॥

इलायां पूर्वपरिणीतायाम् ॥ २-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृत सारार्थदर्शिनी ।

ध्रुवो भ्रातृवधं यक्षैःश्रुत्वा गत्वालकां पुरीम् ।
यक्षान् युद्धे जघानेति दशमे कथ्यते कथा ॥ १ ॥

योषिद्रत्नं कन्यारत्नं च ॥ १ ॥ २ ॥

अद्रौ हिमवति । भ्राजाविति पाठे तैः सह युद्धे । अस्य गतिं पुत्रमन्विष्यन्ती दावानलान्मृत्युम् ॥ ३ ॥

अर्पितः व्याप्तः ॥ ४-५ ॥

उपदेव्यो यक्षस्त्रियः ॥ ६-८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीप ।

यदुक्तं भगवता त्वद्भ्रातर्युत्तमेनष्टे मृगयायां तु तन्मना अन्वेषन्ती वनं माता सा दावाग्निप्रवेक्ष्यतीति तदुत्तमविनाशं तत्प्रसंगाद्ध्रुवधार्मिकं चवर्णयति। ध्रुवविवाह तत्पुत्रजन्मकथनपूर्वकम् । प्रजापतेरिति दशमेनाध्यायेन ॥ १ ॥

योषिद्रत्नं कन्याम् ॥ २ ॥

बलीयसा बलवता पुण्यजनेन यक्षेण अद्रौ हिमवति अस्यो-त्तमस्य गतिं गता तदन्वेषणापरा तीव्रदावाग्नौ दग्धा ॥ ३॥

कोऽपोनुपकारिणि पुण्यजने क्रोधः अमर्षः अक्षान्तिः शुक् भ्रातृ-वियोगजाधिः तेषां समाहारद्वन्द्वैक्यं तेनार्पितो व्याप्तः जैत्रं जयप्रदं-पुण्यजनालयमलकाम ॥ ४ ॥

राजा ध्रुवः गुह्यकैर्यक्षैः संकुलां व्याप्ताम ॥ ५ ॥

उपदेव्यो यक्षभार्याः ॥ ६ ॥

अभिपेतुः अभितोजग्मुः ॥ ७ ॥

भाषाटीका ॥

शिशुमार प्रजापति की पुत्री भ्रमिनाम की उससे ध्रुवजी ने विवाह किया उसके कल्प वत्सर दो पुत्र भये ॥ १ ॥

महाबली ध्रुवजी ने वायुकी पुत्री इला नामक भार्या में उत्कल नामक पुत्र और एक मनोहर कन्या को उत्पन्न किये ॥ २ ॥

उत्तम तो विवाह बिना भये ही सिकार खेलने गया था हिमालय पर्वत में बलवान यक्ष ने उसको मार दिया उसकी माता उसके पीछे जाकर मरगई ॥ ३ ॥

ध्रुवजी भ्राता के वधको सुनकर कोप अमर्ष से शोक से युक्त होकर जीतने लायक रथ पर बैठकर यक्षों की अलकापुरी को गये ॥ ४ ॥

ध्रुव महाराज, रुद्रजी के अनुचरों से सेवित उत्तर दिशा-को जाकर हिमवान् पर्वत की कंदरा में गुह्य कों से भरी हुई अल-का नामक पुरी को देखे ॥ ५ ॥

हे विदुरजी ! महावाहु ध्रुवजी ने आकाश तथा दिशों को शब्द से पूरण करते हुये शंख को बजाया जिस शब्द से उद्वेग दृष्टि वाली होकर यक्षों की स्त्री अत्यंत डर गई ॥ ६ ॥

तदनंतर कुबेरजी के महायोधा लोग निकलकर उस शब्दको नहीं सहने से आयुधों को उठाकर दौड़े ॥ ७ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एकैकं त्रिभिस्त्रिभिरित्येवं सर्वास्त्रयोदशायुतानि यक्षान्युगपद हन् जघान ॥ ८ ॥

ते वै ललाटलग्नैस्तैरिषुभिः सर्व एव हि ।
मत्वा निरस्तमात्मानमाशंसन् कर्म तस्य तत् ॥ ९ ॥
तेऽपि चामुममृष्यन्तः पादस्पर्शमिवोरगा ।
शरैरविध्यन् युगपद्द्विगुणं प्रचिकीर्षवः ॥ १० ॥
ततः परिघनिस्त्रिंशैः प्रासशूलपरश्वधैः ।
शक्त्यृष्टिभिर्भुशुण्डीभिश्चित्रवाजैः शरैरपि ॥ ११ ॥
अभ्यवर्षन् प्रकुपिताः सरथं सह सारथिम् ।
इच्छन्तस्तत्प्रतीकर्तुमयुतानि त्रयोदश ॥ १२ ॥
औत्तानपादिः स तदा शस्त्रवर्षेण भूरिणा ।
न उपादृश्यत च्छन्न आसारेण यथा गिरिः ॥ १३ ॥
हाहाकारस्तदैवासीत्सिद्धानां दिवि पश्यताम् ।
हतोऽयं मानवः सूर्यो मग्नः पुण्यजनार्णवे ॥ १४ ॥
नदत्सु यातुधानेषु जयकाशिष्वथो मृधे ।
उदतिष्ठद्रथस्तस्य नीहारादिव भास्करः ॥ १५ ॥
धनुर्विस्फूर्जयद्दिव्यं द्विषतां खेदमुद्वहन् ।
अस्त्रौघं व्यधमद्बाणैर्घनानीकमिवानिलः ॥ १६ ॥
तस्य ते चापनिर्मुक्ता भित्त्वा वर्माणि रक्षसाम् ।
कायानाविविशुस्तिग्मा गिरीनशनयो यथा ॥ १७ ॥
भल्लैः संछिद्यमानानां शिरोभिश्चारुकुण्डलैः ।
ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ॥ १८ ॥
हारकेयूरमुकुटैरुष्णीषैश्च महाधनैः ।
आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः ॥ १९ ॥
हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्यसायकैः ।
प्रायोविवृक्णावयवा विदुद्रुवुर्मृगेन्द्रविक्रीडितयूथपा इव ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

निरस्तं पराजितम् तस्य ध्रुवस्य तत्कर्माशंसन् तुष्टुवुः ॥ ९ ॥

तेऽपि तत्कर्मासहमाना अमुमविध्यन् द्विगुणं यथा भवत्येवं षड्भिः षड्भिः प्रतिकर्तुमिच्छन्तः ॥ १० ॥

चित्रवाजैर्विचित्रपक्षैः ॥ ११ ॥ १२ ॥

धारासम्पातेन छन्नो गिरिरिव नैवादृश्यत ॥ १३ ॥

सूर्यतुल्यः ॥ १४ ॥

यातुधानेषु राक्षसेषु जयकाशिषु जितं जितमिति जयप्रकाशकेषु सत्सु ॥ १५ ॥

व्यधमत् सञ्चूर्णयामास ॥ १६ ॥

वर्माणि कवचानि ॥ १७ ॥

शिरः प्रमुखैरास्तृताः प्रवीणा रेजुरिति त्रयाणामन्वयः ॥ १८ ॥ १९ ॥

प्रायो बाहुल्येन विवृक्णाः संछिन्ना अवयवा येषाम् ॥ २० ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

एकैकं त्रिभिस्त्रिभिरित्युक्ते सर्वानित्यधिकं स्यादिति इत्येम मध्याह्नतम् ॥ ८ ॥

तत् युगपत्त्रिभिस्त्रिभिर्बाणैर्हननलक्षणं कर्म प्राशंसन् ॥ ९-१० ॥

ततः परिघेति युग्मकम् ततः शरघातानन्तरं प्रासः कोपीन ख्यातः शक्तिर्बरछीति ख्यातः ऋष्टिः गुर्जेति ख्यातः भुशुण्डी पालाडीति ख्यातः ॥ ११ ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता ।
दीपिन्याख्या दीपिकाटिप्पणी ।

नेपादहत संछन्न इति स्वामिसंमतः पाठः ॥ १३ ॥

हतः प्रतिबद्धः "मनोहतः प्रतिहतः प्रतिबद्धो हतश्च स,, इत्यमरः ॥ १४ ॥

भास्कर इवेति तत्तत्स्वाभाविकशक्त्यैवावरणव्यावृत्तिर्न तु विक्रमापेक्षेति सूचितम् ॥ १५ ॥

स्वयंगर्जनिलो यथा मेघसमूहं नाशयति ॥ १६ ॥

तस्य ध्रुवस्य ते बाणाः ॥ १७ ॥

भल्लैरिति युग्मकम् महाधनैरनर्घ्यैः ॥ १८ ॥ १९ ॥

विक्रीडितेत्यत्र विद्राविवेति क्वचित् ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

उग्र भीमं धनुर्यस्य महारथो ध्रुवः आपततः सर्वान् वीरान् युगपदेव प्रत्येकं त्रिभिस्त्रिभिर्बाणैरहन्प्रत्येकं त्रिभिस्त्रिभिर्बाणैः सर्वान् त्रयोदशायुतानि युगपन्निजघान ॥ ८ ॥

ते वै उपदेवाः सर्वेललाटलग्नैस्तैस्त्रिभिरिषुभिरात्मानं निरस्तं पराजितं मत्वा तस्य तत्कर्म आशंसन् प्रशशंसुः ॥ ९ ॥

तेऽपि च यक्षा उरगाः सर्पाः पादस्पर्शं पादासक्तिमिव अमुं ध्रुवमभ्युद्यन्तः असहमाना द्विगुणं यथाभवति तथा षड्भिः प्रतिकर्त्तुमिच्छन्तः शरैर्युगपदेवाविध्यन् निजघ्नुः ततः परिघादिभिः शस्त्रविशेषैरविध्यन् तथा चित्रवाजैश्चित्रपक्षैः शरैरपि नितरां कुपिताः अयुतानां त्रयोदश यक्षास्तत्प्रतिकर्त्तुं तत्प्रतिक्रियां कर्त्तुमिच्छन्तः परथं ससारथिमभ्यवर्षन् ॥ १० ॥ ११—१२ ॥

तथा स औत्तानपादिः ध्रुवः भूरिणा शस्त्रवर्षेणाच्छन्न आवृतः आसारेण धारावर्षेण यथा गिरिः पर्वतइवनोपादृश्यत नैवादृश्यत ॥ १३ ॥

तदैव दिवि पश्यतां सिद्धानां महान् हाहाकार आसीत् मनोर्गोत्रापत्यं पुमानयं ध्रुव एवसूर्यः पुण्यजनाएव अर्णवः समुद्रस्तस्मिन् मग्नः हंत हाकष्टमित्येवं रूपहाहाकार आसीत् ॥ १४ ॥

ततोमृधे युद्धे यातुधानेषु राक्षसेषु जयकाशिषु जितं जितं मयेति जयप्रकाशकेषु सत्सु जयशालिष्विति पाठे जयकाशिषु सत्सु नीहाराद्भास्करः सूर्य इव तस्माच्छरवर्षात् रथात् फल्यन्नपि पश्चात् रथं आस्थाय उदतिष्ठत उत्थितः ॥ १५ ॥

तत उग्रधनुः विस्फूर्जयन् ज्याघातं कुर्वन् द्विषतां पुण्यजनानां खेदमुद्वहन् प्रापयन् बाणैरस्त्रौघं द्विषत्प्रयुक्तशस्त्रसमूहमनिलोवायुरिव मेघपङ्क्तिं व्यधमत् चूर्णयामास ॥ १६ ॥

तस्य ध्रुवस्य चापात् धनुषोविनिर्मुक्तास्तिग्मास्तीक्ष्णा बाणाः गिरीन् पर्वतानशनयोयथा रक्षसां वर्माणि कवचानि छित्वा कायान् देहान् आसमन्ताद्विविशुः ॥ १७ ॥

भल्लैः बाणैः संछिद्यमानानां रक्षसां चारूणि सुन्दराणि कुण्डलानियेषु तैः शिरोभिः स्वर्णमयतालवृक्षसदृशैरूरुभिः वलयैः सुन्दरैर्बाहुभिर्महाधनैरनर्घ्यैः हारादिभिश्चास्तृताः छन्नास्ता रणभूमयः वीराणां मनोहरा विरेजुः बभुः ॥ १८ ॥ १९ ॥

हतेभ्योऽवशिष्टा इतरे रक्षोगणाः क्षत्रियवर्यस्य ध्रुवस्य सायकैः बाणैः प्रायः बाहुल्येन विवृक्णाः संछिन्नाः अवयवा येषां रणाजिरात् रणभूमेः सिंहेन विक्रीडितगजा इव दुद्रुवुः पलायितवन्तः ॥ २० ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

अहन् हतवान् ॥ ८ ॥

पत्री रोप इषुर्द्वयोरित्यमरः ध्रुववीरकर्मस्तवेनन गुह्यकानां रणवीरत्वमसूचि ॥ ९ ॥

तत्कर्म प्रशस्य गुह्यकैः किं पृष्ठतः प्रसुप्तमिति तत्राह। तेऽपि चेति युगपत्सम्भूय ध्रुवकृतविक्रमात् द्विगुणं प्रकर्षेण कर्त्तुमिच्छन्त एव नतु कर्तुं समर्थाः ॥ १० ॥

चित्रा नाना वर्णा वाजाः पत्रा येषां ते चित्रवाजास्तैः ॥ ११ ॥

अयुतानां त्रयोदश लक्षाणुपरि त्रिशत्सहस्राणि प्राक्तान्यविवक्षयेत् ॥ १२ ॥

तदा ध्रुवः किमभूदत्राह। औत्तानपादिरिति। आसारेण भगवता वर्षेण सन्ततनिविडवर्षधारयेत्यर्थः ॥ १३ ॥

मानवः मनोः पौत्रः सूर्यः क्षाणिप्रथः सूर्य इव सूर्यो वा ॥१४॥

नन्वत्र मग्नस्य श्वासनिरोधेन मरणं जलं संस्तभ्यावस्थानमधोगमनमन्यत उन्मज्जनमिति पक्षत्रकः सम्भवति अन्यत उन्मज्जने पलायनापरपर्याये जैत्रंस्यन्दनमित्येतदनुपपन्नं स्यादतः किमभूदिति तत्राह। नदत्स्विति। अथ मज्जनानन्तरमेव ध्रुवरथस्तस्मात् समुद्रादुदतिष्ठदित्यन्वयः जलमग्नस्य सूर्यस्यान्यत उन्मज्जनं भवतीति मत्वा यत्र निमज्जनं तद्दृष्टान्तत्वेन नीहारादिति ॥ १५ ॥

द्विषतामस्त्रौघं व्यधमत्सण्डमकरोत् ॥ १६ ॥

एकत्र प्रयोगेण यक्षाणां गात्रधमनं तेषां चर्मभेदनं शरीरच्छेदनं चेति कार्यत्रयमभूदित्याह। तस्य त इति। पविः शतकोटिः शतधारः वज्रं कुलिशं दम्भोलिरिति हलायुधः दम्भोलिरशनिर्द्वयोरित्यमरः ॥ १७ ॥

वीररसमाह। भल्लैरिति। भल्लैरर्धचन्द्राकारैर्वराहशरैर्वा हेमतालाभिः सुवर्णतालसमानैरूरुभिरुत्सर्गैः ॥ १८—१९ ॥

क्वापि सर्वनाशो न दृष्टश्रुतपूर्व इति किम्वदन्तीमनुसरन्नाह। हतेति मृगेन्द्रेण सिंहेन विगतक्रीडोपक्रमा यूथपा गजाः ॥२०॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

ततः परिघेति युग्मकम् ॥११—१३ ॥

पुण्यजनेत्यादिकं दैत्यदानववत् यक्षरक्षसोरभेदनिर्देशात् हतः प्रतिबद्धः । "मनोहतः प्रतिहतः प्रतिबद्धो हतश्च स,, इत्यमरः । हतोऽयमित्यत्र हन्तेति चित्सुखः ॥ १४ ॥

नीहारादिव भास्करइतितत्तच्छक्त्यैवतदतिक्रमो ज्ञेयः ॥१५-१७॥

भल्लैरिति युग्मकम् ॥ १८—१९ ॥

क्रीडिता इत्यत्र द्राविता इति क्वचित् ॥ २०——२१ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

द्विगुणं यथास्यात्तथा षड्भिः षड्भिः प्रतिकर्त्तुमिच्छवः । १०॥

चित्रवाजैर्विचित्रपक्षैः ॥ ११-१२ ॥

आसारेण धारासम्पातेन छन्नो गिरिरिव नैवादृश्यत १३

सूर्यः सूर्यतुल्यः पुण्यजनार्णव इति तेषां सरस्वत्या ध्रुवस्य कोऽपि बाधकारोऽभूदिति व्यज्यते नह्यर्णवे मग्नस्य सूर्यस्य किमपि कष्टं भवेदिति ॥ १४ ॥

जयकाशिषु जितं जितमिति स्वजयप्रकाशकेषु सत्सु ॥ १५ ॥

व्यधमत् संचूर्णयामास ॥ १६ ॥

अपश्यमानः स तदाततायिनं महामृधे कञ्चन मानवोत्तमः ।
पुरीं दिदृक्षन्नपि नाविशद्द्विषां न मायिनां वेद चिकीर्षितं जनः ॥ २१ ॥
इति ब्रुवंश्चित्ररथः स्वसारथिं यत्तः परेषां प्रतियोगशङ्कितः ।
शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोऽन्वदृश्यत ॥ २२ ॥
क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः ।
विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना ॥ २३ ॥
ववृषू रुधिरौघासृक्पूयविण्मूत्रमेदसः ।
निपेतुर्गगनादस्य कबन्धान्यग्रतोऽनघ! ॥ २४ ॥
ततः खे दृश्यत गिरिर्निपेतुः सर्वतो दिशम् ।
गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

गिरिनशनयो यथेति आसारेण यथा गिरिरिति दृष्टान्ताभ्यां यक्षाणां शराः ध्रुवस्याकिञ्चित्कराः प्रत्युतोत्साहवर्द्धका एव यथा धारासम्पातेन गिरयः क्षालितमला उद्दीप्ता एव भवन्ति । ध्रुवस्य शरास्तु यक्षाणां प्राणापहारिण एव यथा अशनिभिर्गिरयो विदीर्यन्त एवेति व्यञ्जितम् ॥ १७ ॥ १८ ॥

आस्तृता आच्छन्नाः ॥ १९ ॥ २० ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

उग्रं धनुर्यस्य सः एकैकं त्रिभिस्त्रिभिरित्येवं सर्वान् त्रयोदशायुतसंख्याकान् युगपद्धन् जघान ॥ ८ ॥

आशंसन् प्रशशंसुः ॥ ९ ॥

तेऽपि उरगाः पादस्पर्शमिव तत्कर्म अमृष्यन्तः असहमानाः द्विगुणं प्रतिचिकीर्षवः प्रतिकर्तुमिच्छवः अमुं शरैर्युगपद्विव्यधुः ॥ १०-११-१२ ॥

आसारेण महावृष्ट्या ॥ १३ ॥

मानवो मनुवंशजः सूर्यः प्रतितेजस्वी ॥ १४ ॥

जयकाशिषु जयं घोषयत्सु यातुधानेषु राक्षसेषु ॥ १५-१६ ॥

प्रायः विवृक्णाः संछिन्ना अवयवा येषां ते मृगेन्द्रेण विक्रीडिताः यूथपा इव विदुद्रुवुः ॥ २० ॥

भाषाटीका

सो उग्रधनुवाले महारथ वीर ध्रुवजी एक एक यक्ष को एक ही साथ में तीन तीन बाणों से प्रहार करते भये ॥ ८ ॥

वे सब गुह्यकललाट में उन शस्त्रों के लगने से सबहि अपने आत्मा को हारे मान कर ध्रुवजी के उस कर्म की प्रसंशा करने लगे ॥ ९ ॥

वे लोग भी जैसे पाद के छूने से सर्प होवे तैसे उस बात को नहीं सहकर द्विगुण कर ने की इच्छासे बाणोंका प्रहार करते भये ॥ १० ॥

तब तो परिघ तरवार गुर्ज त्रिशूल फरसा बर्छी शक्ति भुसंडी नानाप्रकार के बाणों से कुपित हो कर वर्षा कर के सारथीसहित रथ को ढांकदिया उसका बदला लेने को तेरा अयुत बाण चलाये ॥ १२ ॥

तब तो बडे शस्त्रों की वर्षा से ढकगये सो नहीं देख पडे जैसे वर्षा से पर्वत ढकजाता है तैसे ॥ १३ ॥

तब आकाश में देखने वाले सिद्ध लोगों ने हाहाकार किया बोलने लगे कि मानवरूपी सूर्य यक्षरूपी समुद्र में डूबकर रुक गया ॥ १४ ॥

तब तो यक्षलोग जयशब्द कर के गर्जने लगे इतने में कुहरे मे से जैसे सूर्य निकले तैसे उनका रथ निकल पडा ॥ १५ ॥

तब धनुष का टंकार कर के शत्रुन को दुःख बढाते हुए ध्रुवजी ने सब शस्त्र समूह को नाश कर दिया जैसे पवन मेघों उडाता है ॥ १६ ॥

उन के धनुष मेसे निकले बाण रक्षसों के कवचों को भेद न कर के जैसे वज्र पर्वतों मे प्रवेश करते हैं तैसे उन के शरीरों में घुस गये ॥ १७ ॥

भालों से कटे हुए सुन्दर कुंडलों वाले मस्तको से हेमताल सरी के जघों से हार केयूर मुकुट बडे मूल्य की पगडी इनो से बिछीहुई रणभूमि शोभित हुई वीरों के मन हरनेवाली थी ॥ १९ ॥

मरने से बचेहुये बाकी रक्षसगण रणभूमि मे क्षत्रिय श्रेष्ठ ध्रुवजी के बाणों के मारे प्राय कर सब अंग कटे हुये भगगये जैसे सिंह के भय से हाथी भगैं तैसे ॥ २० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

आततायिनं शस्त्रपाणिम् ॥ २१ ॥

इति ब्रुवन्नित्यत्रापि न मायिनामित्यादेरनुषङ्गः चित्ररथो ध्रुवः । यत्तः यत्नवान् । प्रतियोगः पुनरुद्योगः तस्माच्छङ्कितः । नभस्वतो वायोर्हेतोः ॥ २२ ॥

विस्फुरन्त्यस्तडितो यस्मिन् तेन त्रासयन्तः स्तनयित्नवोऽशनयो यस्मिन् ॥ २३ ॥

ववृषुर्निपेतुरित्यर्थः । न सृजति शरीरमित्यसृग्रक्तम् श्लेष्मादि । मेदसः पुंस्त्वमार्षम । मेदांसि अस्याग्रतो निपेतुः ॥ २४ ॥

साश्मवर्षिणः अश्मभिः सहितं यद्वर्षं तद्वन्तः ॥ २५ ॥

अहयोऽशनिनिःश्वासा वमन्तोऽग्निं रुषाक्षिभिः ।
अभ्यधावन्गजा मत्ता सिंहव्याघ्राश्च यूथशः ॥ २६ ॥
समुद्र ऊर्मिभिर्भीमः प्लावयन्सर्वतो भुवम् ।
आससाद महाह्रादः कल्पान्त इव भीषणः ॥ २७ ॥
एवं विधान्यनेकानि त्रासनान्यमनस्विनाम् ।
ससृजुस्तिग्मगतय आसुर्या माययासुराः ॥२८॥
ध्रुवे प्रयुक्तामसुरैस्तां मायामति दुस्तराम् ।
निशाम्य तस्य मुनयः शमाशंसन् समागताः ।२९।

मुनय ऊचुः

औत्तानपाद ! भगवांस्तव सार्ङ्गधन्वा देवः क्षिणोत्ववनतार्तिहरो विपक्षान् ।
यन्नामधेयमभिधाय निशम्य चाद्धा लोकोऽञ्जसा तरति दुस्तरमङ्ग ! मृत्युम् ॥३०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
चतुर्थस्कन्धे ध्रुवचरिते यक्षमायाधानं नाम
दशमोऽध्यायः । १० ।

श्रीधरस्वामिकृत भावार्थदीपिका ।

अशनिवन्निःश्वासो येषाम् ॥ २६ ॥ २७ ॥

त्रासनानि भयङ्कराणि । तिग्मा क्रूरा गतिः प्रवृत्तिर्येषाम् असुरा यक्षमादि शब्दैरवान्तरत्वेन यक्षा एवोच्यन्ते ॥ २८ ॥

तस्य शङ्कल्याणमाशंसन् प्रार्थितवन्तः ॥ २९ ॥

तव विपक्षान् शत्रून् नाशयतु अद्धा साक्षात् अञ्जसा सुखेनैव मृत्युं तरति ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृत भावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी ॥

चिकीर्षितं न वेदेति विचिन्त्य दिदृक्षुरपि नाविशत् ॥ २१ ॥

अत एवेति श्रुतं अस्यापि क्षिपामित्यादेरन्वितस्यापि पुनरन्वयोऽनुषङ्गः ॥ २२ ॥

मारुतादितमित्यत्र छुरितमिति चित्सुखः ॥ २३ ॥

रुधिरस्य सत्वेन पौनरुक्त्या न सृजतीत्यादियोगवृत्त्या व्याख्यानम् श्लेष्मादीत्यादिना चर्ममांसास्थिपरिग्रहः ॥ २४-२६ ॥

कल्पान्ते प्रलये ॥ २७ ॥

अनेकान्यशुभानि ॥ २८-२९ ॥

अद्धा साक्षाज्जन्मान्तरव्यवधानमन्तरैव ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
दीपिन्याख्यायां दीपिका टिप्पण्याम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

तदा मानवश्रेष्ठः सध्रुवः महामृधे महति युद्धे मायिनं शत्रुपाणामपश्यमानः पुरीं दिदृक्षुरपि द्रष्टुकामोऽपि मायिनां द्विषां पुण्यजनानां चिकीर्षितं जनो न वेदत्येवं बुद्ध्वा नाविशत् न प्रविष्टवान् ॥ २१ ॥

सचित्ररथो ध्रुवः सारथिं प्रति इति न मायिनां वेदचिकीर्षितं जन इत्येवं वदन् परेषां द्विषां प्रतियोगं प्रति क्रियां प्रति शाङ्कितः शङ्कमानः अतएव अन्तः यत्नवान् जलदैर्मेघैरीरितं शब्दितं गर्जितमित्यर्थः शब्दं शुश्राव ततः समनन्तरमेव नभस्वता वायुना सह दिक्षु रजः धूलिरदृश्यत दृष्टम् ॥ २२ ॥

व्योमांबरं विस्फुरन्त्यस्ताडितो यस्मिन् त्रासयन्तस्तनयित्नवोऽस्य नयोयस्मिन् तेन मेघसमूहेन सर्वतः छुरितं व्याप्तम् ॥ २३ ॥

रुधिरौघादयः ववृषुः निपेतुरित्यर्थः न सृजतीति शरीरमित्यसृगिह श्लेष्मादिः रुधिरस्य पृथगुपादानात् मेदसः पुंस्त्वमार्षं मेदांसि कबन्धानि शिरोहीनशरीराणि गगनात्तस्य ध्रुवस्याग्रतः निपेतुः ॥ २४ ॥

ततः खे आकाशे गिरिरदृश्यत सर्वतोदिशं सर्वासु दिक्षु साश्म वर्षिणः अश्मसहितं यद्वर्षणं तद्वन्तः गदादयः निपेतुः ॥ २५ ॥

अशनिवन्निःश्वासो येषां ते अहयः सर्पाः अक्षिभिरग्निं वमन्तः उद्गिरन्तः क्रुद्धा गजाः सिंहा व्याघ्राश्च यूथशः संघशः अभ्यधावन् अभिमुखं तूर्णमागतवन्तः ॥ २६ ॥

ऊर्मिभिस्तरङ्गैर्भीमो भयङ्करः समुद्रः समन्तात् भुवं प्लावयन् प्रलय इव महान् ध्वनिर्यस्यासौ एवमतिभीषणः आससाद प्राप्तः ॥ २७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तविधान्यन्यानिच मनस्विनामज्ञानां त्रासकानि भयंकराणि भिन्ना क्रूरा गतिः प्रवृत्तिर्येषां तेऽसुरा मायया ससृजुः असुरैः ध्रुवे प्रयुक्तामतिदुस्तरां तां मायां निशम्य दृष्ट्वा आगताः सर्वे मुनयः तेऽस्य ध्रुवस्य शं सुखं मङ्गलमाशंसन् प्रार्थितवन्तः ॥ २९ ॥

आशंसामेवविवृणोति। औत्तानपाद इति। अङ्गहे औत्तानपादे! ध्रुव! प्रपन्नार्तिहरः भृत्यदुःखापहर्त्ता शार्ङ्गधन्वा भगवान् देवः तव विपक्षान् शत्रून् छिणोतु नाशयतु भगवन्तं विशिनष्टि यस्य भगवतो नामधेयं निशम्य श्रुत्वा अभिधाय उक्त्वा वा लोकः अद्धा साक्षात् अञ्जसा सुखेनैव दुस्तरं मृत्युं तरति ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिकायां दशमोऽध्यायः ॥ १० ॥

———

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

मध्यामवस्थायां पुरीं प्रविश्य तत्सर्वमपहृत्य गमनं तत्रावस्थाने वेत्युभयस्मादेकं प्राप्तं तत्र ध्रुवेण किमकारीत्याशङ्क्योभयमपि न कृतं मायिजनकुचेष्टाशङ्कयेति भावेनाह। अपश्यमान इति। तथाहि जनो मायिनां चिकीर्षितं न वेद न जानाति यतः इति ॥२१॥

इदं चिन्तनमुक्तवाचिकीर्षितं न ज्ञायते इति अतो विविनक्ति । इतिब्रुवन्निति। प्रतियोगेन पुनरुद्यमेन शङ्कितः जलधेरुत्पन्नमिव नभस्वता वायुनेरितम् ॥ २२ ॥

पुनः किं किं शङ्काकरमभूदिति प्रपञ्चयति । क्षणेनेत्यादिना । छादितं छन्नं विस्फुरन्त्यस्तडितो यस्मिंस्तथा तेन स्तनयित्नुना गर्जितेन ॥ २३ ॥

ववृषुर्मेघा इतिशेषः कबन्धानि शिरोरहितशरीराणि ॥ २४ ॥

अश्मवर्षिणो गिरेर्गदादीनि सर्वतो दिशो निपेतुः ॥ २५ ॥

इरम्मदजयोरश्मवेश्मधामप्रवेशयोरित्यभिधानात् अश्मवर्षिणा इत्यहिविशेषणं वा अहयश्च निपेतुरशनिर्मेघवह्निज्वाला तद्वन्निःश्वासो येषां ते तथा ॥ २६ ॥

ह्रादो नादः ॥ २७ ॥

अमनस्विनं मनो बलरहितानां तिग्मगतयस्तीक्ष्णप्रवृत्तय आसुर्या असुरजनप्रियया ॥ २८ ॥

स्वकर्तव्यतया मुनयो भगवत्प्रसादेन सर्वत्राजिताय ध्रुवाय हितमुप दिशन्तीत्याह। ध्रुव इति। शं सुखं "समभवे सगीर्ष्यानसुष्टुपूजा सुखेसु च,,ति यादवः एषां शसाविति प्राच्या इति सूत्राद्रासं सुखमिति ज्ञायते ॥ २९ ॥

यन्नामधेयमभिधायेत्यनेन भगवन्नामस्मृत्वाभिधाय युध्यतस्तव शत्रुजयः स्यादित्युपदिष्टमिति ज्ञातव्यम् ॥ ३० ॥

———

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

चित्ररथस्तन्नामा ध्रुवः अपश्यतेति तु गौडपाठः ॥ २२ ॥

क्षणेन त्वरितमिति चित्सुखः । २३——२८ ॥

ध्रुवे इति समाशंसन्निति चित्सुखः जयमिति शेषः॥२९-३०

इति श्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भस्य दशमोऽध्यायः ॥ १० ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

आततायिनं शस्त्रपाणिम् ॥ २१ ॥

इति न मायिनामिति वाक्यं ब्रुवन् चित्ररथो ध्रुवः । अनु अनन्तरं नभस्वतो हेतोर्दिक्षु रजः ॥ २२ ॥ २३ ॥

न सृजति शरीरमित्यसृक् श्लेष्मादि मेदसः पुंस्त्वमपि मेदांसि ववृषुर्मेघा इति शेषः । अस्य ध्रुवस्याग्रतः ॥ २४ ॥

साश्मवर्षिणः अश्मवर्षिभिः सह वर्त्तमानाः ॥ २५--२७ ॥

अमनस्विनां शौर्यशून्यानाम् असुरा असुरतुल्याः ॥ २८ ॥ २९ ॥

मृत्युं तरति किं यक्षमायां त्वं न तरिष्यसीति नारायणास्त्रं स्मारयामासुः ॥ ३० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थे दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

———

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

कंचन अपि आततायिनं शस्त्रपाणिमपश्यमानो यदा पुरीं दिदृक्षुरपि नाऽऽविशत्तदा चित्ररथो ध्रुवो यत्तः सावधानः परेषां प्रतियोगशङ्कितः स्वसारथिं मायिनां चिकीर्षितं जनो न वेद इति ब्रुवन्नेव शब्दं शुश्राव अथ नभस्वतो वायोर्हेतोः रजोऽप्यदृश्यतेति द्वयोरन्वयः । २१-२२ ॥

विस्फुरन्त्यस्तडितो यस्मिन् तेन त्रासयन्तस्तनयित्नवोऽशनयो यस्मिन् तेन घनानीकेन व्योम क्षणेनाच्छादितम् ॥ २३ ॥

न सृजति न त्यजति देहमित्यसृक् श्लेष्मादिः रुधिरस्योक्तत्वात् मेदस इति पुंस्त्वमार्षम् ॥ २४ ॥

खे गिरिरदृश्यत ततोगिरेः सकाशात् गदादयो निपेतुः कथंभूताः साश्मवर्षिणः अश्मसहितं यद्वर्षं तद्वन्तः ॥ २५ ॥

अशनिर्वन्निश्वासोयेषां ते अहयः गजाश्च अभ्यधावन् ॥ २६ ॥

आसमन्तात् निकटमगात् ॥ २७ ॥

तिग्मगतयः क्रूरप्रवृत्तयः ॥ २८ ॥

शं कल्याणम् ॥ २९-३० ॥

इति श्रीमद्भागवते महापुराणे सिद्धान्तप्रदीपे दशमाध्यायार्थे प्रकाशः ॥ १० ॥

———

भाषाटीका

तब ध्रुवजी ने किसी शस्त्रधारी को नहीं देखा युद्ध के मध्य में तौ भी आप मनुवंश में उत्तम होने से पुरी को देखनेकी इच्छा रहने पर भी पुरी में प्रवेश नहीं किया क्योंकि माया वाले लोगों का कर्तव्य कोई मनुष्य नहीं जान सकता है यक्षमाया वाले हैं२१

इस प्रकार से अपनेसारथि से बातकरते थे विचित्र रथ वाले ध्रुवजी उद्योग की शंका करते साव धान थे उसी तरफ से उत्पन्न हुआ समुद्र के सरीखा शब्द सुना और पवन के मारे धूर भी गगन में छागई ॥ २२ ॥

क्षणमात्र ही में बड़े त्रास देने वाले वज्र शब्दों से चमकी हुई बिजली से संयुक्त मेघ समूह ने सब तरफ से आकाशको ढांक लिया ॥ २३ ॥

भाषाटीका ।

हे अनघ विदुरजी ! इन ध्रुवजी के आगे रक्त समूह श्लेष्मा पीव विष्ठा मूत्र मांस कटे सूंड के मनुष्य ए सब आकाश से गिरने लगे ॥ २४ ॥

तदनन्तर आकाश में पर्वत देख पड़ा चारों तरफ गदा परिघ तरवार मूसल और पत्थरोंकी वर्षा होनेलगी ॥ २५ ॥

क्रोध के मारे आंखों से अग्नि को गिरातेहुये वज्र सरी के कठोर निश्वासवाले सर्प मतवाले हस्ती सिंह व्याघ्र बहुत से दौड़ने लगे ॥ २६ ॥

लहरों से सब पृथिवी को डुबाता हुआ बड़े भारी शब्दवाला प्रलयकाल कासा भयंकर समुद्र आता दीखा ॥ २७ ॥

बड़ी क्रूर चेष्टावाले असुरलोग अपनी आसुरी माया से इस प्रकार के अधीरजवाले पुरुषों को डर देनेवाली अनेक चीजों को बनाने लगे ॥ २८ ॥

ध्रुवजी के विषय में उन असुरों की उस माया को प्रयोग जानकर उसको बड़ा दुस्तर समुझ के मुनिलोग आकर के ध्रुवजी के मंगलाशासन करने लगे ॥ २९ ॥

मुनिजन बोले हे ध्रुवजी ! शरणागतों के कष्ट को नाश करने वाले देव शार्ङ्ग पाणि भगवान् आप के सब शत्रुओं का नाश करें जिन श्रीहरि के नाम मात्र को उच्चारण करने में अथवा सुनने में प्राणि मात्र सहजी से दुस्तर मृत्यु कोभी तर जाते हैं तो और दुःखों के तरने में क्या सन्देह है ॥ ३० ॥

इति श्रीभागवत चतुर्थ स्कन्ध दशमाध्याय का भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ ॥ १० ॥

———

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे दशमोऽध्यायः ॥ १० ॥



एकादशोऽध्यायः ॥

—०:०:०—

मैत्रेय उवाच ।

निशम्य गदतामेवमृषीणां धनुषि ध्रुवः ।
सन्दधेऽस्त्रमुपस्पृश्य यन्नारायणनिर्मितम् ॥ १ ॥
सन्धीयमान एतस्मिन् माया गुह्यकनिर्मिताः ।
क्षिप्रं विनेशुर्विदुर ! क्लेशा ज्ञानोदये यथा ॥ २ ॥
तस्यार्षास्त्रं धनुषि प्रयुञ्जतः सुवर्णपुङ्खाः कलहंसवाससः ।
विनिःसृता आविविशुर्द्विषद्बलं यथा वनं भीमरवाः शिखण्डिनः ॥ ३ ॥
तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः ।
तमभ्यधावन् कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इवाहयः ॥ ४ ॥
स तान्पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान् ।
निनाय लोकं परमर्कमण्डलं व्रजन्ति निर्भिद्य यमूर्ध्वरेतसः ॥ ५ ॥
तान् हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः । (१)
औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः ॥ ६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

एकादशे तु यक्षाणां क्षयं दृष्ट्वा मनुः स्वयम् ॥
आगत्य वारयामास ध्रुवं तत्त्वोपदेशतः ॥ १ ॥

एवं गदतां वचनमुपदेशमिव निशम्य उपस्पृश्याचम्य यन्नारायणनिर्मितं नारायणास्त्रं तत्संदधे ॥ १ ॥

* क्लेशा रागादयो यथा ॥ २ ॥

किञ्च तस्यार्षास्त्रमृषेर्नारायणादुद्भूतमस्त्रं प्रयुञ्जतः सन्दधतः सतः सुवर्णमयाः पुङ्खा मूलप्रान्ता येषाम् कलहंसानां वासांसि पक्षा येषां शरा विनिःसृता इति द्रष्टव्यम् उपरिष्टाच्छिलीमुखग्रहणात् ॥ ३ ॥

प्रधने युद्धे उन्नद्धाः उच्छ्रिताः फणा येषां ते सर्पाः ॥ ४ ॥

पृषत्कैर्बाणैर्निकृत्ता बाह्वादयो येषां तान् परं लोकं निनाय कथं भूतम् ऊर्ध्वरेतसः संन्यासिनोऽर्कमण्डलं निर्भिद्य यं व्रजन्ति तम् ॥ ५ ॥

ताननागसो निरपराधान् ॥ ६ ॥

———

श्रीराधारमणदासगोस्वामि विरचिता दीपिन्याख्या दीपिका टिप्पणी ।

स्वयं साक्षादेव न तु केनापि द्वारा तत्त्वोपदेशेन परमात्मोपदेशं कृत्वा तत्त्वं वाद्यप्रभेदे स्यात्स्वरूपे परमात्मनीति विश्वः ॥ १ ॥

एवं श्रीनारायणप्रार्थनामय मुपदेशमिवेति अत एव नारायणस्मरणपूर्वकं नारायणास्त्रसंधानमिति तथा तथाध्याहृतम् ॥ १ ॥

संधीयमाने धनुषि संयुज्यमाने सति रागादय इत्यादिनाविद्यादिचतुर्णां परिग्रहः ॥ २ ॥

अस्त्रस्य प्रभावान्तरमप्युच्यत इति किञ्चेत्यस्यार्थः शिखण्डिरवस्य शरजशब्दसादृश्यायोगात् भीमरवा इति शिखण्डिनामेव विशेषणम् ॥ ३–४–५ ॥

स्ववाक्यप्रामाण्यदार्ढ्याय महर्षिभिरिति ॥ ६ ॥

———

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिका ।

मुनिभिरेव मार्गोपदेशितो ध्रुवः स्वधनुः प्रयुक्तनारायणास्त्रोपनिमाशितप्रतिपक्षः स्वपितामहानुनीतहृदयः स्वपुरं गत इत्याहैकादशेन मुनिः निशम्येति। एवं वदतामृषीणां निशम्य श्रुत्वा वच इतिशेषः

* अत्र विजयध्वजपाठे अध्याय समाप्तिर्नास्तिपाठस्तु यथान्यत्र तथैव । (१) भूपसेति शुकदेव पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपस्पृश्य अपइतिशेषः आचम्येत्यर्थः यन्नारायणर्षिनिर्मितं तन्ना-रायणास्त्रं संदधे ॥ १ ॥

एतस्मिन्नारायणास्त्रे संधीयमाने प्रयुज्यमाने सति गुह्यकैर्यैः निर्मिता माया हविदुर ! ज्ञानोदये सति यथा क्लेशा रागद्वेषादय इव क्षिप्र माशुविनाशं प्राप्ताः ॥ २ ॥

आर्षम् ऋषिर्नारायणाद्युद्भूतम् अस्त्रं धनुषि तस्य ध्रुवस्य प्रयुञ्जतः संदधतः सतः स्वर्णमयाः पुङ्खाः मूलप्रान्ता येषां ते शरा विनिःसृताः धनुषो विनिर्गता द्विषतां बलमाविविशुः आविष्टवन्तः यथाभीमः भयंकरो रवो ध्वनिर्येषां ते शिखण्डिनः मयूरा यथा वनं विशन्ति पत्त्रं भीमरवा इतिदृष्टान्तिकेऽप्यन्वेतव्यम् ॥ ३ ॥

तैः तिग्मधारैस्तीक्ष्णाग्रैः शिलीमुखैर्बाणैः प्रधने युद्धे उपद्रुताः ताड्यमानाः पुण्यजना इतस्ततः तं ध्रुवं प्रकुपिताश्च ते ऊर्ध्वमुद्धृता-युधाः सन्तः उन्नद्धा उत्क्षिप्ताः फणा येषां ते महयः सर्पा इव सुपर्णं गरुडम् अभ्यधावन् ॥ ४ ॥

मृधे युद्धे अभिमुखं धावतः पृषत्कैर्बाणैर्निकृत्ताः संछिन्ना बाह्वा-दयो येषां तान् पुण्यजनान् परं लोकं निनाय कथंभूतमूर्ध्वरेतसः संन्यासिनः अर्कमण्डलं निर्भिद्य यं व्रजन्ति ॥ ५ ॥

एवमनागसो निरपराधिनः चित्ररथेन ध्रुवेण बहुशः हन्यमा-नान् पीड्यमानान् गुह्यकान् यक्षान् वीक्ष्य ध्रुवस्य पितामहो मनुः स्वायम्भुवः कृपया महर्षिभिः सहोपगतः समीपं प्राप्तः औत्तानपा-दिं जगाद उवाच ॥ ६ ॥

— — —

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

असुरमायाविनाशे समर्थं नारायणास्त्रमिति जानन् ध्रुवो मुनिभिरपि तदस्त्रोपदिष्टमिति निरूप्य तदस्त्रं धनुषि सन्दध इत्याह । निशम्येति ॥ १ ॥

तस्यास्त्रस्य माहात्म्यमचिन्त्यमिति भावेनाह । संधीयमान इति अविद्यास्मितारागद्वेषाभिनिवेशाः ॥ २ ॥

आर्षास्त्रम् ऋषिच्छन्दोदेवतासंहितास्त्रं ज्ञानास्त्रं वा ऋषिज्ञान-इति धातोः सुवर्णालंकृताः पुङ्खा ज्यानुसंधानप्रदेशा येषां ते सुवर्णपुङ्खाः वसआच्छादन इतिधातोः वासः शब्देन पक्षा लक्ष्यन्ते कलहंसानां वासांसि पक्षा इव पक्षा येषां ते कलहंसवा-ससः शिखण्डिनो मयूराः भीमो भयंकरो रवो नादो येषां ते तथा ॥ ३ ॥

पुण्यजनानां धीरत्वमाह । तैरिति । तिग्मधारैस्तीक्ष्णाग्रैः शिलीमुखैः शरैः सुपर्णं गरुडं उन्नद्धफणा उद्धृतफणाः ॥ ४ ॥

अर्कमण्डलं निर्भिद्य यं लोकं व्रजन्ति तं परं लोकं निनायेत्य-न्वयः ॥ ५ ॥

किमेवं ध्रुवः सर्वाननवशिष्टानकरोदित्यस्योपर्यागिकथान्तर-माह । तान्हन्यमानानिति । अनागसो बधयोग्यापराधरहितान् चित्र-रथेन ध्रुवेण ॥ ६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सत्यलोकमनेनवाध्यायेनाहि चतुर्थस्कन्धोक्तविशत्य-ध्यायात्मक इति ॥ १—२ ॥

भीमरवा इति शराणामेव विशेषणम् ॥ ३—४ ॥

परं सत्याख्यं लोकम् ॥ ५—१० ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यक्षाणां क्षयमालक्ष्य मनुरेकादशे ध्रुवम् ।
तद्धाद्वारयामास शाश्वतत्त्वोपदेशतः ॥

ऋषीणां वचः ॥ १ ॥

एतस्मिन्नारायणास्त्रे ॥ २ ॥

आर्षास्त्रम् ऋषेर्नारायणस्यास्त्रं पुङ्खाः मूलप्रान्ता वासांसि पक्षाः विनिःसृताः शरा इति शेषः ॥ ३ ॥ ४ ॥

पृषत्कैर्बाणैर्निकृत्तबाह्वादीन् तान् परं सत्यलोकं निनाय यं लोकमूर्ध्वरेतसः सन्न्यासिनोऽर्कमण्डलं निर्भिद्य व्रजन्तीति भग-वद्भक्तहस्तमृत्युतो विशिष्टस्वर्गिणस्ते बभूवुः । आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन इति श्रीगीतोक्तेरावर्तिष्यन्त एव ते । ननु सन्न्यासिसाहचर्येण तेषां मुक्तिर्व्याख्येया । स्वयं भगवन्तं श्रीकृ-ष्णं विना संग्राममृतानां कालनेम्यादीनामवतारान्तरेष्वपि मोक्षा-दर्शनात् ॥ ५ ॥ ६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एकादशे पुण्यजनहनने प्रवृत्तं ध्रुवं सदुपदेशेन मनुर्निवारये-दिति वर्ण्यते निशम्येति उपस्पृश्याचम्य ॥ १ ॥ २ ॥

आर्षं नारायणर्षिप्रकाशितम् ॥ ३ ॥ ४ ॥

पृषत्कैर्बाणैः ऊर्ध्वरेतसो नैष्ठिकादयः ॥ ५ ॥

भूयसा महाप्रभावेन चित्ररथेन ध्रुवेण ॥ ६ ॥

———

भाषाटीका ।

मैत्रेय जी बोले ऐसे ऋषिनके कहते ही कहते मात्र ध्रुव जी ने आचमन करके नारायणास्त्र को धनुष में धारण किया ॥ १ ॥

उसका संधान करते मात्र गुह्यकों की निर्मित जो माया है सो शीघ्र ही नष्ट होगई जैसे ज्ञान के उदय होने से अविद्यादिक क्लेश नष्ट होते हैं ॥ २ ॥

ध्रुव जी के नारायण अस्त्र के धनुष में प्रयोग करते मात्र स्वर्ण के मूल वाले हंस के पक्ष वाले बाण निकल करके शत्रु के सैन्य में प्रवेश भये जैसे कि वन में मयूर प्रवेश होते हैं ॥ ३ ॥

तीक्ष्ण धार वाले उन बाणों से उपद्रव युक्त होकर जितने यक्ष सब कुपित होकर आयुधों को उठाकर ध्रुवजी के ऊपर दौड़े जैसे गरुड़ के ऊपर फणा उठा कर सर्प दौड़ें ॥ ४ ॥

उनको युद्ध में दौड़े आते हुये देख कर ध्रुवजी ने उनके भुजा जंघ, शिर, अधर, उदर, इनों को काट कर परलोक को पहुंचा दिया जहां कि सूर्य मण्डल को भेदन करके ऊर्ध्व रेता योगी लोग जाते हैं ॥ ५ ॥

बिना अपराध के उन गुह्यकों को बलवान ध्रुव जी से मारे जाते हुये देखकर पितामह मनु महाराज ऋषियों के सहित आकर समीप में खड़े होकर दया के मारे ध्रुव जी से बोलने लगे ॥ ६ ॥

———

मनुरुवाच ॥

अलं वत्सातिरोषेण तमोद्वारेण पाप्मना ।
येन पुण्यजनानेतानवधीस्त्वमनागसः ॥ ७ ॥
नास्मत्कुलोचितं तात ! कर्मैतत्सद्विगर्हितम् ।
वधो यदुपदेवानामारब्धस्ते कृतैनसाम् ॥ ८ ॥
नन्वेकस्यापराधेन प्रसङ्गाद्बहवो हताः ।
भ्रातुर्वधाभितप्तेन त्वयाङ्ग भ्रातृवत्सल ! ॥ ९ ॥
नायं मार्गो हि साधूनां हृषीकेशानुवर्त्तिनाम् ।
यदात्मानं (१) पराग्गृह्य पशुवद्भूतवैशसम् ॥ १० ॥
सर्वभूतात्मभावेन भूतावासं हरिं भवान् ।
आराध्याप दुराराध्यं विष्णोस्तत्परमं पदम् ॥ ११ ॥
सत्वं हरेरनुध्यातस्तत्पुंसामपि सम्मतः ।
कथं त्ववद्यं कृतवाननुशिक्षन् सतां व्रतम् ॥ १२ ॥
तितिक्षया करुणया मैत्र्या चाखिलजन्तुषु ।
समत्वेन च सर्वात्मा भगवान् संप्रसीदति ॥ १३ ॥
सम्प्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः ।
विमुक्तो जीवनिर्मुक्तो ब्रह्मनिर्वाणमृच्छति ॥ १४ ॥
भूतैः पञ्चभिरारब्धैर्योषित्पुरुष एवहि ।
तयोर्व्यवायात्सम्भूतिर्योषित्पुरुषयोरिह ॥ १५ ॥
एवं प्रवर्त्तते सर्गः स्थितिः संयम एव च ।
गुणव्यतिकराद्राजन् ! मायया परमात्मनः ॥ १६ ॥
निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः ।
व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥ १७ ॥
स खल्विदं भगवान् कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः ।
करोत्यकर्त्तैव निहन्त्यहन्ता चेष्टाविभूम्नः खलुदुर्विभाव्या ॥ १८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

नरकस्य द्वारेण येन रोषेण ॥ ७ ॥ ८ ॥

ननु मद्भ्रातृहन्तारः कथमकृतैनसोऽत आह । नन्विति ॥ ९ ॥

सत्यप्यपराधे नचैतदुचितं न भवतीत्याह । नायमिति । पराग्गृह्य पराग्भूतं देहमात्मानं गृहीत्वा पशवो यथा देहाभिमानादन्योऽन्यं घ्नन्ति तथा भूतानां वैशसं हिंसेति यत् ॥ १० ॥

त्वं च बाल्ये साधुः सन्निदानीं कथमन्यथा कृतवानित्याह । सर्वभूतात्मभावेनेति द्वाभ्याम् ॥ ११ ॥

अनुध्यातो हरेर्हृदि स्थितो ध्यातो वा तत्पुंसां हरिदासानामपि साधुत्वेन मतः ॥ १२ ॥

सतां व्रतमेवाह । महत्सु तितिक्षया नीचेषु करुणया समेषु मैत्र्या अखिलेषु जन्तुषु समत्वेन च ॥ १३ ॥

ततः कृतार्थो भवतीत्याह । संप्रसन्ने सति गुणैर्विमुक्तोऽतएव तत्कार्येण जीवेन लिङ्गशरीरेण निर्मुक्तः सन्निर्वाणं सुखात्मकं ब्रह्म प्राप्नोति ॥ १४ ॥

भ्रातृहन्तृत्वमङ्गीकृत्योक्तमिदानीं तु नात्मनो भ्रातृपुत्रादिसम्बन्धो न चान्योऽन्यं हन्तृत्वादिकमपीत्याह । भूतैरिति दशभिः । भूतैः पञ्चभिरारब्धैर्देहाद्याकारेण परिणतैर्योषित्पुरुषश्चेति प्रसिद्धः तयो-

---

(१) असंगृह्येति विजयध्वजः वीरराघवाचार्यस्तु पराग्गृह्येत्यपि मन्यते ।

श्रीधरस्वामिकृत भावार्थदीपिका ।

व्यवायान्मैथुनात्संभूतिरन्ययोर्योषित्पुरुषयोरिह संसारे भवति १५

एवं तावत्सर्गः प्रवर्तते एवं पालककारिणा परिणतैर्भूतैरेव स्थितिः हन्तृदेहाकारपरिणतैः संयमः संहारः स च परमात्मनो मायया गुणानां व्यतिकरात्तु स्वतः ॥ १६ ॥

ननु जडानां देहानां गुणानां वा कथं सर्गादिहेतुत्वं तत्राह । निमित्तमात्रं पुरुषर्षभ ईश्वरः यत्र यस्मिन्निमित्ते सति कार्यकारणात्मकं विश्वं भ्रमति परिवर्त्तते यथाऽयस्कान्ते निमित्ते सति लोह प्रवर्त्तते तद्वत् ॥ १७ ॥

ननु सर्वोऽपि निमित्तं तर्हि तस्याविशेषाद्युगपदेव सर्गादित्रयं भवेदत आह । स खल्विति । कालशक्त्या क्रमेण गुणानां प्रवाहः क्षोभस्तेन विभक्तं सृष्ट्यादिविषयं वीर्यं शक्तिर्यस्य ननु कालोऽपि गुणान् युगपदेव क्षोभयेत् तत्राह चेष्टा कालशक्तिर्बुद्धिभाव्याऽचिन्त्या॥१८॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिकाटिप्पणी ॥

पाप्मना हिंसाजनकेन उत्तरवाक्यस्थत्वाद्यच्छब्दस्य तच्छब्दाध्याहारेणान्वयः ॥ ७ ॥

आरब्ध इति यत् एतत् आरम्भलक्षणं कर्म ॥ ८ ॥

पुण्यजनेत्येकवचनादेकस्यैवापराधः किन्तु तत्संबन्धादिति योजनीयम् ॥ ९ ॥

पराग् बाह्येन्द्रियैः ग्राह्यं दृश्यं देहमेवात्मानं गृहीत्वा मत्वा अयं हिंसालक्षणः ॥ १० ॥

अन्यथा साधुत्वप्रातिकूल्येन सर्वभूतेषु आत्मा परमात्मा एक एवास्ते इति भावेन भावनया ॥ ११ ॥

साधुभिर्निरस्तहृदय इत्युक्त्वाहृदि स्थित इतिव्याख्यातम्॥१२॥

अखिलजन्तोष्वित्युपलक्ष्य महत्स्वित्यादिविषयभेदो व्याख्यातः समत्वेन स्वतुल्यहर्षशोकक्षुत्पिपासादिमत्त्वभावनया ॥ १३ ॥

ततः प्रसादानन्तरं भगवत्प्रसादाविर्भूतगुणव्यावर्त्तनार्थं प्राकृतैरिति गुणविशेषणम् अतएव गुणविमुक्तत्वादेव तत्कार्येण गुणकार्येण ॥ १४ ॥

एवकारो चार्थे हीति प्रसिद्धौ ॥ १५ ॥

एवमित्यस्यावृत्तिं कृत्वा पालककारिणेत्यादि व्याख्यातम् पालककारिणा पितृमात्राद्याकारेण हन्तृदेहाकारेण दस्युसर्पव्याघ्राद्याकारेण मायया निमित्तशक्त्या इच्छाभासरूपया गुणानामुपादानकारणानां न तु स्वत इति निरीश्वरसांख्यमतं निराकृतम् ॥ १६ ॥

तदेव स्फुटी कर्त्तुं शङ्कते । नन्विति । मात्रपदेन मायाद्वारोपादानत्वाद्विकारशङ्का दूरोत्सारिता ॥ १७ ॥

तस्य निमित्तस्याविशेषात्तुल्यत्वात् विभक्तं स्वस्माद्भिन्नीकृतं शक्तिर्जीवशक्तिर्मायाशक्तिश्च तथा च तत्तच्छक्तीनां शक्तिमतोऽभिन्नत्वात्स एवोपादानं निमित्तं चेत्यर्थः ॥ १८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तमेवाह। अलमित्यादिना। हेवत्स! तमोद्वारेण संमोहनात्मकाज्ञानहेतुना "क्रोधाद्भवति संमोहः,, इति स्मरणात् पाप्मना निरयहेतुनारोषेणाऽलं येन रोषेणानागसोऽपि तान् पुण्यजनान् त्वमवधीः हतवानसि ॥ ७ ॥

हेतात! सद्भिर्विगर्हितमतएवैतत्कर्मास्मत्कुलोचितं न भवति अकृतागसां यक्षाणामयं बधस्ते त्वया आरब्धः ॥ ८ ॥

ननु मद्भ्रातृहन्तार एते उपदेवाः कथमनागसस्तत्राह । नन्वित्ति । भ्रातृवत्सल! । भ्रातुरुत्तमस्य यो वधस्तेनाभितप्तेन त्वया एकस्य यक्षस्यापराधेन हेतुना तस्यापराधिनः संगात्संबन्धाद्बहवो हताः घातिताः ॥ ९ ॥

आत्मानं मनः असं गृह्य अनियम्य पराग्दृशेति पाठे पराभवविषयं देहमात्मत्वेन गृहीत्वा पशवो यथा देहाभिमानेनान्योऽन्यं घ्नन्ति तथा भूतानां वैशसं हिंसेति यदयं भगवद्भक्तानां साधूनां मार्गो न भवति ॥ १० ॥

सत्यं भगवद्भक्तानामयं मार्गो न भवतीति ममतूचितमित्यत्राह । सर्वभूतात्मभावेनेति । आवसन्त्यस्मिन्नित्यावासः आवसतीति वा आवासः भूतानामावासं धारकमन्तरात्मानञ्च इतरैरब्रह्मात्मकस्वतन्त्रवस्तुदर्शिभिः दुराराध्यं हरिं सर्वभूतात्मभावेन सर्वभूतान्तरात्मत्वेनाकारेणाराध्य परमं सर्वोत्कृष्टं तत्प्रसिद्धं विष्णोः पदं लोकं आप प्राप्तवानसि इतः पूर्वमप्राप्तमपि भगवता दत्तत्वात्प्राप्तप्रायमिति मत्वा आपेत्युक्तम् ॥ ११ ॥

हरेरनुध्यानाद्धृजनात्स हरिभक्तस्त्वं तत्पुंसां हरिभक्तानामपि संमतः भागवतोत्तमत्वेन संमतः सतां साधूनां व्रतमनुशिक्षन् अनुशिक्षयन् लोकस्येति शेषः कथमवद्यं कुत्सितमेतन्निन्द्यं पापं कृतवान् भगवद्भक्तस्य नितरामेतदनुचितमित्यर्थः ॥ १२ ॥

भूतद्रोहेन भगवद्भक्तैः कोविरोध इत्यत्राह । तितिक्षयेति । तितिक्षया अपराधिषु सहनेन करुणया परदुःखासहिष्णुत्वेन अखिलजन्तुषु तरतमभावेन व्यवस्थितेषु मैत्र्या स्वसाम्यबुद्धिकृतहिताचरणेन समत्वेन देहाकारान् प्रकृतिपरिणामत्वेन जीवान् ज्ञानैकाकारत्वेनपरमात्मानं तु सर्वान्तरात्मत्वेनेत्येवंरूपसमत्वेन वा सर्वात्मा भगवान् संप्रसीदति सर्वात्मेति हेतुगर्भं भगवतः सर्वात्मकत्वात्तत्तत्सर्वान्तरात्मतया देवमनुष्यादिरूपेणावस्थितत्वात्सर्वेषां शरीराणामीश्वरशरीरत्वेन शरीरकृतोद्रोहः शरीरिण्यात्मन्येव भगवति पर्यवस्यतीति भूतद्रुह भगवान्न प्रसीदतीत्यर्थः ॥ १३ ॥

भगवत्प्रसादफलमाह । प्रसन्न इति । पुरुषः सर्वात्मब्रह्मोपासनपरः पुमान् तितिक्षादिभिर्भगवति प्रसन्ने सति प्राकृतैः क्रोधादिभिर्जीवदशायां विमुक्तः अन्ते अजीवात्मकृतैर्नितरां मुक्तः निर्वाणं निरतिशयानन्दरूपं ब्रह्म ऋच्छति प्राप्नोति ॥ १४ ॥

एवं सर्वभूतसुहृत्त्वादीन् भगवत्प्रसादहेतून् प्रसादफलभूतान् ब्रह्मप्राप्तिञ्चाभिधाय तत्त्वोपदेशमन्तरेण भ्रातृमरणदुःखितस्यास्य न मनः प्रशाम्यतीत्यभिप्रेत्य न भ्रातृहननकर्मत्वं नापि यक्षाणां तत्कर्तृत्वं किन्तु दैवमेव कारणमिति वक्तुं ब्रह्मादिशरीराणामुत्पत्तिमरणादिकं यथावद्विवेचयन् तदुपयुक्तमीश्वरस्यानन्तविविधशक्तिमत्त्वमाह भूतैरिति । पञ्चभिर्भूतैः पृथिव्यादिभिरारब्धः देवमनुष्यादिशरीररूपेण परिणतः योषित् पुरुषश्चेत्ययं द्विविधो जनः प्रसिद्धः तयोर्योषित्पुरुषयोरन्योऽन्यव्यवायान्मैथुनात्संभूतिरिह भवति तस्मादुद्भूतं प्राणिजातमित्यर्थः पञ्चभूतपरिणामरूपस्त्रीपुरुषात्मकशरीरद्वयसंबन्धादुद्भूतमपि प्राणिजातं पञ्चभूतात्मकमेवेति भावः ॥ १५ ॥

एवं व्यष्टिसर्ग उक्तः अथ सर्वशरीराणां पञ्चभूतारब्धत्वेऽपि कदा भूतसृष्टिः तैः शरीरारम्भस्थितिकारणं संहारकारणं च किं तच्च द्वयं कदा कदाचा ईश्वरकृतयं च किं रूपमित्यत्राह । एवमिति । एवं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यथा स्त्रीपुंसात्मकोजनः तदुभयवायसंभव एवं परमात्मनः मायायाः परमात्माधिष्ठितायास्तच्छरीरभूतायामायाया गुणानां सत्त्वादीनां व्यतिकरात् तारतम्येन संबन्धात् हे राजन् ध्रुव! सर्ग सृष्टिः स्थितिः संहारश्च प्रवर्त्तते तत्र रजसो वृद्धावितरयोर्ह्रासे सर्गः सत्त्वस्य वृद्धावितरयोर्ह्रासे स्थितिः तमसोवृद्धौतु संयमः त्रयाणां साम्ये त्रितयाभावः ॥ १६ ॥

ननु स्त्रीपुंसात्मकशरीराणां वैषम्येणसंबन्धानां गुणानां वा जडत्वेन प्रवृत्तिशून्यानां ज्ञानिसमग्र्यात्मनांकथं परिणामसामर्थ्यं सामर्थ्येऽपि कथं देवमनुष्यादि वैचित्र्यं सुखदुःखतारतम्यं चेत्यत्राह। निमित्तमात्रमितिनिमित्तमेव निमित्तमात्रं तत्वनिमित्तमित्यर्थः तत्रगुणानां महदाद्याकारेण परिणाम देवादिवैचित्र्यं सुखदुःखयोश्च निर्गुणः सत्वादिगुणरहितः पुरुषर्षभः ईश्वरःनिमित्तमात्रं गुणानां परिणामस्य तेषां तत्स्वाभाव्यानवच्छिन्नत्वाद्देवादिवैचित्र्यस्य सुखदुःखतारतम्यस्य च कर्मनिबन्धनत्वादीश्वरः साधारणकारणं कालाकाशादिवदित्यर्थः निमित्तत्वमेव दृष्टान्तत्वेन विशदयति॥ यत्र परमात्मनि निमित्ते अयस्कान्तसन्निधौ लोहवत् इदं व्यक्ताव्यक्तम व्यक्तं प्रधानं तत्कार्यं महदादि व्यक्तं कार्यकारणात्मकंविश्व भ्रमति प्रवर्त्तते अत्र लोके मृत्कुलालयोर्विभिन्नयोरेव निमित्तोपादानत्वदर्शनादुपादानस्य परमात्मनोजगत्सृष्ट्यादिनिमित्तत्वानुपपत्तिरितिमामाशङ्कीनिराचिकीर्षुणा मात्रपदं प्रयुक्तं तदुपादानिराचिकीर्षया परमात्मनो मायया गुणव्यतिकरादित्युपादानत्वाभिधानात् संबन्धसामान्याभिप्रायेण्या अपिपञ्च्याः यस्या व्यक्तं शरीरमित्यादिश्रुत्यनुसारेण शरीरात्मभावरूपसंबन्धविशेषे पर्यवसानाच्छरीरस्य कार्योपयोग्यपृथक्सिद्धाकारत्वात् श्लक्ष्णतादिविशिष्टमृदादिकार्यभूतघटादिनामिव महदादिकार्याणां प्रकृत्यादिशरीरकपरमात्मकार्यत्वात् अत्र निर्गुण इत्यनेन सत्वादिगुणवश्यत्वायत्तकर्तृत्वसुखदुःखादिभागजीववैलक्षण्यमभिप्रेतम् ॥ १७ ॥

तदेवविशदयति। स इति। भगवान् हेयप्रतिभटपूर्णषाड्गुण्यः कालशक्त्या कालात्मकया स्वापृथक्सिद्धकार्योपयोगिविशेषणभूतया शक्त्या गुणक्षोभहेतुभूतया यो गुणानांसत्वादीनां प्रवाहः तेनविभक्तवीर्यः विभक्तं कर्मायत्तदेवमनुष्यादिवैचित्र्येण सुखदुःखतारतम्येन च व्यवस्थापितं वीर्यं शक्तिः जगदिति यावत् "एकदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणी यथा॥ परस्य ब्रह्मणः शक्तिस्तथेदमखिलंजगत्,, इत्युक्तत्वात् अत्र स्यामित्यध्याह्रियते विभक्तवीर्यः स्यामिति इदंकरोति सृजतीत्यन्वयः गुणक्षोभनिमित्तकालप्रकृतिपुरुषशरीरकोऽहं जगत्सृष्ट्वानन्तविधवैचित्र्यस्थिरत्रसरूपः स्यामितिसंकल्पेनेदं जगत्सृजतीत्यर्थः यद्वा गुणप्रवाहेणेति हेत्वर्थे तृतीया हेतुश्चात्र फलमध्ययनेन वसतीतिवत् ततश्च गुणप्रवाहेण गुणप्रवाहार्थं प्रवाहशब्देन गुणकार्यं सृष्ट्यादित्रयं विवक्षितं सृष्ट्याद्यर्थं विभक्तं वीर्यं सृष्ट्याद्युपयुक्तं सामर्थ्यं येन सः ब्रह्मविष्णुरुद्ररूपीभूत्वेत्यर्थः अकर्तैव देवादिवैचित्र्येसुखदुःखादौ चाकर्तैव देवादिवैचित्र्या देवस्तज्जीवादृष्टायत्तत्वात् इदंजगत्करोति उत्पादयति तथा अहन्तैव स्वयं हननाधनाश्रयएवहन्ति "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः। तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययं। प्रधानकारणीभूता यतोवैसृज्यशक्तयः,, इति स्मृतेः "हंताचेन्मन्यतेहन्तु हतश्चेन्मन्यते हतम् उभौतौनविजानीतो नायं हन्ति नहन्यते,, इति श्रुतेश्च अत्र कर्तृत्वं हन्तृत्वंच प्रयोजकरूपेण अकर्तृत्वंतु प्रयोज्यरूपेणेति विवेकः नन्विदमघटमानं कर्तृत्वं मकर्तृत्वं चैकस्मिन्कथमुपपद्यते तत्राह।विभुम्नः भगवत् "भूमात्वेव विजिज्ञासितव्य,, इति श्रुतेः स्वगुणद्धिमाव्या अप्रतक्यमिदु ॥ १८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आगत्य निःशेषं हतेत्युक्तं किमित्याह। अलमिति। तमोद्वारेण यथार्थज्ञानप्रतिबन्धकत्वेन नरकद्वारेण पाप्मना पापहेतुना ॥ ७ ॥

किंच धर्मशास्त्रानुवर्तिनामस्माकं कुलधर्मो न भवत्ययमित्याह नास्मदिति। अकृतैनसामिति पदम ॥ ८ ॥

अकृतापराधत्वं कथं भ्रातृवधलक्षणापराधकरणादिति तत्राह। नन्विति। नन्वेवार्थे वर्तते अपराधेनेति संबध्यते ॥ ९ ॥

तस्यापराधिनः संगात्तत्परित्यागात्तेऽप्यपराधिन इति सङ्गद्दर्शनं भागवतानां नोपपन्नमित्याह। नायमिति। आत्मानं मनोऽसंगृह्यानियम्य पशुवन्मूढवत् ॥ १० ॥

इतोऽप्येकापराधेन बहूनां वधो न युक्तः सर्वप्राणिनामन्तर्यामित्वेन हरिमुपास्य प्राप्ततत्प्रसादत्वादित्याह। सर्वभूतेति। सर्वभूतानामात्मभावेनान्तर्यामित्वेन भूतेषु प्राणिष्वात्मा यस्य स तथा भूतान्यात्मन्यस्मिन्निति वा तम ॥ ११ ॥

प्राप्तपदत्वाद्धरिणा किमिति मात्रो न तवास्तीत्याह। सन्वमिति। तस्य हरेः पुंसां भक्तानां संमतः ततः किं तत्राह। कथमिति ॥ १२ ॥

किं तत्सतां कृतं तेन किं फलं तत्राह। तितिक्षयेति। शत्रुषु शत्रुत्वदर्शनं सुहृत्सु सुहृत्त्वदर्शनं समत्वम ॥ १३ ॥

तत्प्रसादफलमाह। संप्रसन्नइति।ततः किं तत्राह। जीवेति। जीवत्वाभिमानाच्चिरं मुक्तो भवति तत्फलमाह। ब्रह्मेति। नित्यनिर्मुक्तशरीरं परमानन्दं वा ब्रह्म ऋच्छत्याप्नोतीत्यन्वयः। ब्रह्मनिर्वाणं ब्रह्मणि नाशमृच्छतीत्यङ्गीकारे मुक्तः शून्यभावत्वेन न केनाप्यर्थित्वं स्यात् ॥ १४ ॥

सृष्टिप्रकारज्ञाने ततोविरक्त्या प्रकृतिबन्धहानेच्छा स्यात्तस्तामाह भूतैरिति।पुरुषोयोषिदिति भावःपञ्चभिःपृथिव्यादिभूतैरारब्धःसृष्ट अतः परं कथं प्रारम्भइत्यतआह। तयोरितिइह जीवराशौ तयोर्मातापित्रोः पुत्रपयोर्व्यवायेन मैथुनधर्मेण संभूतिः करचरणादिविभागलक्षणं जन्म भवति समित्यनेन पृथिव्यादिसंयोगेन जन्म सूचयति ॥ १५ ॥

न केवलमादिसर्गः किंतूत्तरत्राप्येवमेवत्याह। एवमिति। स्थितिसंहारयोः सर्गविपरीतत्वात्कथं सर्गवदित्युच्यत इत्यत्राह। गुणव्यतिकरादिति। रजआदिगुणानां विषमसमावस्थाभेदकारणात् परंप्ररणामन्तरेण जडेभ्यो गुणेभ्य एवं प्रवृत्तिः कथमत्राह। मायेति। परमात्मनो मायेच्छया प्रेरितेभ्य इति शेषः इदमत्राकूतम्। रजोगुणकार्यभूतारब्धदेहाश्रिततदधिष्ठितात्सर्गः पालकसत्त्वगुणकार्यभूतारब्धदेहात्स्थितिः तमोगुणकार्यभूतारब्धदेहात्संयम इति च एतत्सर्वमीश्वरेच्छाधीनमिति ॥ १६ ॥

एतदेव विशिनष्टि। निमित्तमात्रमिति ॥ यत्रेश्वरस्येश्वरस्य सन्निधाने व्यक्ताव्यक्तं कार्यकारणात्मकमिदं विश्वं भ्रमति चेष्टते किमिव अयस्कान्तस्य सन्निधाने लोहं यथा यथा तथा सः निर्गुणः सत्त्वादिगुणशक्त्यनुपहतशक्तिरात्मा परमात्मा [illegible] सृष्ट्यादौ निमित्तमात्रं तदुपादानकारणम ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तर्हि मुख्यकर्तृत्वं हरेर्नेत्यत्राह । स खल्विति । खलुशब्दोऽन्य-कारणाशङ्कानिवृत्त्यर्थः । स भगवान्योगशक्त्या गुणप्रवाहेषु सृष्ट्यादिषु तत्तत्क्रियानुसारेण विभक्तवीर्यो विभक्तमाहात्म्यः सन्नकृष्टकर्तृत्वाद् अकर्तैव जगत्करोति अहन्तैव शत्रुभावरहितत्वाद्धि हन्ति संहरति । अनेन हरेः ममत्वभङ्गो निरस्त इति एकस्य विरु-द्धकर्तृत्वं कथमित्यत उक्तं चेष्टेति दुर्विभाव्या ज्ञातुमशक्याऽस्मा-दृशैरिति शेषः कर्तृत्वसामान्यनिषेधे "हरिरक्लिष्टकारित्वादय-स्कान्तवदुच्यते । कामकर्मस्वभावेषु काले चाधिकृतो हरिः । सर्व-कारणभूतः संस्ततस्त्वकर्ताभिधीयते,, इति वाक्यविरुद्धं स्यादिति नायमर्थः शोभनः ॥ १८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत् पुंसामपि संमत इति हर्यनुध्यानत्वेऽपि न प्रौढिवान् किन्तु तद्भक्तजनसम्मतिं गृहीत्वैव सर्वमनुष्ठातेत्यर्थः । यथोक्तम-न्वरीषमुद्दिश्य । स वै मन इत्यादौ यथोत्तमश्लोकजनाश्रया रति-रिति ॥ १२ ॥

त्वं प्रत्यगात्मनि तिरिक्षया हीनेषु करुणया समेषु मैत्र्या । अखिलेषु जन्तुषु समत्वेन सुखदुःखादिष्वात्मसाम्यज्ञानेन ॥ १३ ॥

ब्रह्मणस्तत् सुखस्यापि निर्वाणं लयोऽन्तर्भावो यत्र तत् श्रीभ-गवत्सुखमित्यर्थः । निर्वाणपदस्य विशेषणार्थैयर्थ्यात् ॥१४—१७॥

शक्तीनां क्रमेण प्रवर्त्तनया कर्तृत्वादित्वेऽपि अकर्तृत्वादि-तास्य चेष्टाया दुर्विभाव्यत्वं ज्ञेयम ॥ १८—२० ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

उपदेवानां यक्षाणाम ॥ ८ ॥

ननु निश्चितमेकस्य त्वद्भ्रातुर्हन्तुर्यक्षस्यापराधेन तत्सङ्गात् तत्सङ्गिहतोरित्यर्थः ॥ ६ ॥

व्यावहारिकस्नेहपारवश्यं भक्तानामनुचितं किं पुनस्तेन पर-हिंसेत्यत्राह । नायमिति । यदात्मानं देहं परागगृह्य परागभूतमपि आत्मत्वाभिमानेन गृहीत्वा पशवो यथा देहसम्बन्धेनान्योऽन्यं घ्नन्ति तथा भूतानां वैशसं हिंसेति यत् कृतवानसि तत्योल्यपः । परागृह्येति पाठे परेति निषेधार्थकम । जीवात्मानमगृहीत्वेत्यर्थः ॥ १० ॥

नवत् भक्तेष्वल्पमिथ्यप्रसक्तेनदत्यन्तमनुचितमित्याह । द्वाभ्याम। सर्वेषु भूतेष्वात्मनः स्वस्यैव भावो भावना तेन ॥ ११ ॥

हरेरनुध्यातः अनुनिरन्तरं ध्यातं ध्यानं यस्मिन् सः । वात्स-ल्यादरेणापि स्मर्यमाण इत्यर्थः । तत् पुंसां नारदादीनामपि कृपा पात्रीभूतः ॥ १२ ॥

सतां व्रतमेवाह महत्सु तितिक्षया नीचेषु करुणया समेषु मैत्र्या एवमखिलजन्तुषु समत्वेन स्वतुल्यहर्षशोकक्षुत्पिपासा-दिमत्त्वभावनया । यदुक्तम "आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जु-न । सुखं वा यदि वा दुःखं स योगी परमो मत,, इति । सर्वात्मेति सर्वभूतेषु तुष्यत्सु भगवत्तोषोऽनुमेय इत्यर्थः ॥ १३ ॥

जीवेन लिङ्गशरीरेण निर्मुक्तः । ब्रह्मनिर्वाणं ज्ञानी चेत् सायु-ज्यं भक्तश्चेत् अयोऽश्रजालत्यनकं दास्यम अयोऽत्तजालत्वनमिहत्यत्र तद्ब्रह्म निर्माणसुखं विदुर्बुधा इति प्रह्लादोक्तेस्तदा प्राकृतैर्गुणैर्वि-मुक्तः । अप्राकृतैस्तु विशिष्ट इत्यर्थः ॥ १४ ॥

वस्तुत विचार्यमाणे तु कः कस्य हन्ता वध्यो वेत्याह । एभिः भूतैः पृथिव्यादिभिरारब्धैर्देहैर्योषित् पुरुषश्च तयोरव्यवायादन्ययो-र्योषितपुरुषयोः सम्भूतिरुत्पत्तिर्भवति ॥ १५ ॥

एवं भूतै यथा सर्गः प्रवर्तते तथा तैरेव पितृमात्राद्याकारैः स्थितिः पालनं तैरेव दस्युव्याघ्रसर्पाद्याकारैः संयमो नाशश्च । तत्र किञ्च परमात्मनो मायया गुणव्यतिकरादेव नतु स्वतः रजसा सर्गः सत्त्वेन स्थितिः तमसाहङ्कार इत्यर्थः ॥ १६ ॥

ननु जडानां योषितपुरुषादिदेहानां गुणानां वा चैतन्याधिष्ठानं विना कथं सर्गादिहेतुत्वं तत्राह । निमित्तमात्रं पुरुषर्षभ ईश्वरोऽधि-ष्ठाता यत्र यस्मिन्निमित्ते सति कार्यकारणात्मकं विश्वं भ्रमति जडमपि चेतनीभवत् देवमनुष्यादि रूपेण तथा तथा परिवर्तते । यथा अयस्कान्ते निमित्ते सति लोहं निश्चेष्टमपि सचेष्टं भवति ॥ १७ ॥

ननु सचेन्निमित्तं तर्हि तस्याविशेषात् युगपदेव सर्गादित्रयं भवतु । मैवं रजःसत्त्वतमसां कालशक्त्या क्रमेणैव क्षोभो भवति नतु युगपदतः क्रमेणैव सर्गादि त्रयं भवतीत्याह । स खल्विति । काल शक्त्या क्रमेण गुणानां प्रवाहः क्षोभस्तेन विभक्तमात्मनः सका-शात् विभक्तीकृतं वीर्यं चिदाभासं जीवशक्त्यात्मकं मायाशक्ति प्रविष्टं यस्य सः । करोतीति गुणकालजीवानां शक्तित्वेन तद्भेदा-भावात् सएवोपादानकारणं स एव निमित्तकारणञ्चेत्यर्थः । अक-र्त्तेति तेषां गुणादीनां स्वरूपभूतत्वाभावात् । एवं निहन्ताहन्तेत्यपि ननु विश्वं किमर्थं करोति सदैव वा किं न करोति विषमं वा किं करो तीति । सर्वाक्षेपपरिहारार्थमाह । चेष्टा दुर्विभाव्या अतर्क्या विभूम्नो विभुत्वादिति । एतदेव तस्य विभुत्वमित्यर्थः १८—२०

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

येन गोपेण ॥ ७ ॥

अकृतैनसान्ते त्वया वृथ आरब्धः इतियत्तदेतत्कर्म अस्मत्कुलो चितं न भवति ॥ ८ ॥

अकृतैनस्त्वं तेषामाह । नन्विति ॥ ९ ॥

परागभूतं देहमात्मानं गृह्य गृहीत्वा पशवो यथान्यं घ्नन्ति तद्धद्भूतानां वैशसं हननमितियत् अयं साधूनां भवद्विधानां मार्गो न भवति ॥ १० ॥ ११ ॥

अनुध्यातः अनुध्यानतस्तत्पुंसां संमतः ॥ १२—१३ ॥

जीवन्मुक्तः लिङ्गशरीरेण निर्मुक्तः निर्वाणं निरतिशयम ब्रह्मसुखमृच्छति प्राप्नोति ॥ १४ ॥

एकस्यापराधे सर्वान् हन्तुं प्रवृत्तः लोकरीत्या अलंवत्सातिरोष-णत्यादिना निवारितः अथ जीवकर्मानुसारेण सर्वं भगवानेव करो ति त्वयातु वृथैव गिरिशभ्रातुर्हेलनं कृतमतस्तं प्रसादयेत्याह । याव दध्यायसमाप्ति । भूतैरिति । आरब्धैः पञ्चीकृतैः योषित् पुरुषश्च उत्पद्यते इति शेषः तयोरव्यवायादन्ययोर्योषित्पुरुषयोः सम्भूतिरि ह भवति ॥ १५॥

हे राजन्! एवं परमात्मनः मायया शक्त्या गुणव्यतिकरात् सर्गादि प्रवर्तते ॥ १६ ॥

ननु एकमेवाद्वितीयं ब्रह्मेत्यादि श्रुतयः अत्रापि च सर्वैकिलायं पुरुषः पुरात नोयएकआसीदित्यादिषु जगत्कारणमेकमेवासीदिति निश्चयः तत्र भूतैरित्यनेन व्यक्तं माययेत्यनेनाव्यक्तं जगत्कारणं प्रतीयते परमात्मनइति सम्बन्धमात्रनिर्देशेन ब्रह्मणोऽपि सर्गादि-

सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः।
जनं जनेन जनयन्मारयन्मृत्युनान्तकम् ॥ १९ ॥
न वै स्वपक्षोऽस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः।
तं धावमानमनुधावन्त्यनीशा यथा रजांस्यनिलं भूतसङ्घाः २० ॥
आयुषोपचयं जन्तोस्तथैवोपचयं विभुः।
उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ ॥ २१ ॥
केचित् कामं वदन्त्येनं स्वभावमपरे नृप !
एके कालं परे दैवं पुंसः काममुतापरे ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पूर्वश्लोकैर्निमित्तमात्रमुक्तं तद्विरुद्धमित्यत्राह। निमित्तमात्रमिति। निमित्तमात्रमिदमस्तीति स्वायत्ततायामिशङ्कापः वस्तुतस्तु ब्रह्मायत्तस्थित्यादिमत् तदिदं विश्वं व्यक्ताव्यक्तं कार्यकारणरूपं यत्र चुम्बकमणयनुगृहीतास्वाधीनलोहवत भ्रमति सः पुरुषर्षभः सर्वेषां पुरुषाणां स्वांशानां जीवानामृषभः स्वामी निर्गुणः अनभिव्यक्तशक्तिगुणः गुप्तशक्तिः अखिलैरंशैः शक्तिभिश्च युक्तइत्यर्थः तत्र सर्गादेः पूर्वत्र आसीत् ततएव जगद्भिन्नाभिन्ननिमित्तोपादानकारणात्सर्गादिः प्रवर्तत इति फलितोऽर्थः ॥ १७ ॥

भगवतः सर्गादिहेतुत्वं दुर्ज्ञेयचेष्टत्वं च वदन् जगत्सर्गादेर्नियतकालत्वं दर्शयति। स इति। सर्गविश्वसर्गादिहेतुकालशक्त्या गुणानां प्रवाहः श्रीभक्तत्रसर्गकालेन रजसः स्थितकालेन सत्वस्य संयमकालेन तमसः श्रीभक्तेन विभक्तं सृष्ट्यादिविपर्ययैर्वे शक्तिरस्य सः अकर्तैव अन्येनानुत्पादित एव करोति। अन्येनापालितएव पालयति। अहंता नास्तिहंता यस्य सहन्नन्तरशून्य एव निहन्ति इदं विश्वमित्यर्थः ॥ १८ ॥

भाषाटीका ॥

हे वत्स ! विदुरजी ! नरकका द्वार इस पाप को नहीं करना चाहिये जिससे कि तुमने निरपराध इन गुह्यकों को मारदिया॥७॥

हे तात ! सत्पुरुषों से निंदित यह कार्य हमारे कुलका उचित नहीं है जोकि तुमने निरपराधि उपदेवों का बध आरंभ किया॥८॥

हे भ्रातृवत्सल ध्रुवजी ! तुमने भ्राता के बध से दुःखित हो कर एक के अपराध के प्रसङ्ग से बहुत से गन्धर्वों को मारा ॥९॥

नारायण के अनुवर्ति साधुन का यह मार्ग नहीं है जोकि देह को आत्मा मान कर पशु के तुल्य प्राणियों का हिंसा करना ॥ १० ॥

सर्वभूतों में आत्मतुल्य बुद्धि कर के सर्व भूतों के अन्तर्यामी हरि का आराधन कर के आपने अति दुर्लभ वैष्णव परम पद को प्राप्त किया है ॥ ११ ॥

सो तुम हरि के स्मरण करने योग्य हो हरि भक्त न के मान्य हो सत्पुरुषों के व्रत को शिखानेवाले होकर तुमने ऐसा पाप क्यों किया ॥ १२ ॥

सुख दुःखों के सहने से कृपा करने से सब प्राणियों में मित्रता करने से समता बुद्धि से सर्वात्मा हरि भगवान प्रसन्न होते है ॥ १३ ॥

भगवान् के प्रसन्न होने से जीव प्राकृत गुणों से छूट कर लिंग शरीर रहित हो कर परमानन्द परब्रह्म स्वरूप का अनुभव करता है ॥ १४ ॥

पांच भूतों से बनाहुआ पिण्ड का नाम स्त्रीपुरुष होता है उन्ही दोनों में मैथुन होने से स्त्रीपुरुषकी उत्पत्ति होती है ॥ १५ ॥

हे राजन् ! इसी प्रकार से परमात्मा की माया के गुणों के वैषम्य होने से सबका उत्पत्ति स्थिति संहार होता है ॥ १६ ॥

उस सृष्ट्यादिक कर्म में निर्गुण परमात्मा केवल निमित्त मात्र ही है स्थूल सूक्ष्म रूप इतना जो जगत् है सो केवल जिस की सत्ता से चुंबक के पास लोह जैसा भ्रमता है ॥ १७ ॥

वह भगवान् अपनी कालनामा शक्ति से गुणों के प्रवाह से रज आदि शक्तियों को प्रगट कर के आप अकर्ता होकर सब कार्यों को करता है नहीं मारनेवाला होकर मारता है इस प्रभु की लीला बड़ी विचित्र है ॥ १८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका।

ननु पित्रादिः सृजति पालयति राजादिर्निहन्ति व चोरादिरनेत्वीश्वरस्तत्राह। स इति। जनेन पित्रादिना जनं पुत्रादि जनयन्नादिकृत अन्तकं चोरादिकं तन्मृत्युहेतुना मारयन्नन्तकरः स्वयं त्वनन्तोऽनादिश्च अव्ययोऽक्षीणशक्तिश्च अयं भावः पित्रादयोऽन्यत उत्पत्त्यादिमन्तो न स्वातन्त्र्येण कारणं किं त्वीश्वर एव तन्नियन्ता सर्वकारणमिति ॥ १९ ॥

ननैवं कुर्वतोऽपि वैषम्यप्रसक्तिः पक्षपाताभावादित्याह द्वाभ्याम्। न वा इति। मृत्युरूपस्य समं यथा भवति तथा प्रजाः कर्मभूता विशतः तस्य साम्येऽपि भूतेषु फलवैषम्यं तत्कर्मवशादिति सदृष्टान्तमाह। तं धावन्तमन्वनीशाः कर्माधीना भूतसंघा धावन्ति अनिलं धावन्तमनुरजांसीव तत्र यथा रजसां तमः प्रकाशजलाग्न्यादिप्रवेशेऽपि नानिलस्य वैषम्यमेवमीश्वरस्यापीति ॥ २० ॥

अपचयमकालमृत्युम उपचयं कालमृत्योरपि रक्षाम यद्वा अपचयं मशकादावुपचयं देवादौ स्वस्थत्वादुपचयापचयाभ्यां रहितोऽसौ विभुर्दुःस्थस्य कर्माधीनस्य विदधाति ॥ २१ ॥

एवं भूतश्चेश्वरः सर्ववादिसम्मतो विवादस्तु नाममात्र इत्याह। केचिदिति पुंसः कामं वात्स्यायनादयः श्रुतिश्च "कामोऽकार्षीत्कामः करोति कामः कर्ता कामः कारयितेत्यादि„ ॥ २२ ॥

अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च।
न वै चिकीर्षितं तात! को वेदाथ स्वसम्भवम् ॥ २३ ॥
नचैते पुत्रक! भ्रातुर्हन्तारो धनदानुगाः।
विसर्गादानयोस्तात! पुंसो दैवं हि कारणम् ॥ २४ ॥
स एव विश्वं सृजति स एवावति हन्ति च।
तथापि ह्यनहङ्कारान्नाज्यते गुणकर्मभिः ॥ २५ ॥
एष भूतानि भूतात्मा भूतेशो भूतभावनः।
स्वशक्त्या मायया युक्तः सृजत्यत्ति च पाति च ॥ २६ ॥
तमेव मृत्युममृतं तात! दैवं सर्वात्मनोपेहि जगत्परायणम्।
यस्मै बलिं विश्वसृजो हरन्ति गावो यथा वै नसि दामयन्त्रिताः॥ २७ ॥
यः पञ्चवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा।
वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्ध्नि पदं त्रिलोक्याः ॥ २८ ॥
तमेनमङ्गात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरम्।
आत्मानमन्विच्छ विमुक्तमात्मदृक् यस्मिन्निदं भेदमसत् प्रतीयते ॥ २९ ॥
त्वं प्रत्यगात्मनि तदा भगवत्यनन्त आनन्दमात्र उपपन्नसमस्तशक्तौ।
भक्तिं विधाय परमां शनकैरविद्याग्रन्थिं विभेत्स्यसि ममाहमिति प्ररूढम् ॥ ३० ॥
संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परम्।
श्रुतेन भूयसा राजन्नगदेन यथामयम् ॥३१॥
येनोपसृष्टात् पुरुषाल्लोक उद्विजते भृशम्।
न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः ॥३२॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ननु कर्मादीनां जडत्वादिना स्वरूपतोऽपिभिन्नत्वात्कथमेकमस्यं तत्राह। अव्यक्तस्यातएवाप्रमेयस्य तथापि सत्त्वे हेतुः नानाशक्तीनां महदादीनामुदयो यस्मात् चिकीर्षितमेव तावत्कोऽपि न वेद अथ स्वस्य संभवो यस्मात्तमीश्वरं को वेद न कोऽपि अथेति पाठे साक्षात् अतस्तत्स्वरूपाभावाद्विशेषांश विवाद इत्यर्थः तथा च श्रुति "को अद्धा वेद क इह प्रावोचत्कुत आयाता कुत इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेऽना [illegible] आबभूवेत्यादिः,, ॥२३

ईश्वरवादस्य प्रकृतोपयो[illegible] [illegible]भ्रातुर्हन्तारः उक्तमेव हेतुमनुवदति विसर्गादानयो[illegible] [illegible] विसर्गः सृष्टिः आदानं संहारः दैवमीश्वर एव [illegible] २४ ॥

तथापि निर्लेपतामाह। [illegible]

अनहङ्कारत्वे हेतुमाह। [illegible]

सर्वमीश्वर एव कर्ता [illegible] मया न त्यक्तुं शक्यमिति चेदत आह। तमेवेति [illegible] [illegible]कानां भक्तानां त्वमृतं उपेहि [illegible]शरणं गच्छ तमेव [illegible] यस्मै नसि नासिका यां दामभिर्बद्धा गाव इव [illegible] [illegible]नामभिर्यन्त्रिता बद्धाः सन्तो बलिं हरन्ति तत्कारितं कर्म कुर्वन्तीत्यर्थः ॥ २७

तदाराधनं च तव सुशकमेवेत्याह। पञ्चवर्षः स यः त्वं यमाराध्य त्रिलोक्या मूर्ध्नि पदं स्थानं लेभे लब्धवानसि इदानीं तमेवान्विच्छावलोकयेत्युत्तरेणान्वयः प्रात्यक्षि अक्षाणि यस्मिन् निराचि शेषणं वा ॥ २८ ॥

हरिं ध्यायन्तं प्रत्याह। हे अङ्गध्रुव! मुक्तविरोधे आत्मनि मनसि व्यपाश्रितमवस्थितमात्मदृक् प्रत्यग्दृष्टिः सन् अयं भेदो यस्मिंस्तदिदं भेदमसदेव विश्वं यस्मिन् प्रतीयते ॥ २९ ॥

तदन्वेषणफलमाह। त्वं तदान्वेषणकाल एव ॥ ३०

उपदेशसारमाह। संयच्छेति द्वाभ्याम। प्रतीपं प्रतिकूलम अगदेनौषधेन यथारोगं नियच्छति ॥ ३१ ॥

येन रोषेणोपसृष्टाद्व्याप्तात् ॥ ३२ ॥

श्रीराधारमणदासगोस्वामि विरचिता
दीपिन्याख्या दीपिका टिप्पणी।

कालशक्तेस्तादिच्छावशत्वेनानुयोकव्यत्वाभावादचिन्त्यत्वमि-

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिकाटिप्पणी ॥

अर्थःजस्पस्यादौ पित्रादीनां प्रयोज्यत्वमेव न तु प्रयोजकत्वं परतन्त्रत्वादिति भावं व्याचष्टे । अयं भाव इति ॥ १९ ॥

एवं ज्ञातन्ययेणाऽस्पस्यादिकुर्वतोऽपि तस्य अन्तर्यामिणः तेषां तेषां पुण्यपापादिकर्मणां तथाऽवाहिकत्वम् ॥ २० ॥

अपचयोपचयशब्दयोर्ह्रासवृद्धिवाचकत्वान्मृत्युरक्षयोर्जोवाधिकरणमतो यद्वेति अपचयं ज्ञानादिह्रासमुपचयं ज्ञानादिवृद्धिम् ॥२१॥

एवं सूत; जडकर्मफलप्रदः केचिन्मीमांसकाः देवतां कर्माधीनां मन्यमानाः अपरे लौकायतिकाः स्वभावं संस्कारम् एके कालोपासकाः परे ज्योतिर्विदः दैवं ग्रहादि पुंसः कामं मनसिजं पुत्रादिकमकार्षीत् कर्त्ता करिष्यति कारयिता प्रयोजकः ईश्वरधर्म्मान् कर्तृत्वादीन् भ्रान्त्या कर्मादिष्वेवारोपयन्तीत्यर्थः तस्माज्जगत्कर्त्तरीश्वरे विवादाभावेऽपि स्वरूपानुभवाभावान्नाममात्र एव विवाद इति तथावतारितम् ॥ २२ ॥

कर्मणो जडत्वमादिना स्वभावस्य परिणामहेतुत्वं कालस्य गुणक्षोभकत्वं ग्रहादेस्तत्तत्प्रापकत्वं कामस्य स्वसिद्धहेतुत्वं गृह्यते तेन स्वरूपतोऽपि परस्परं भिन्नत्वात् आपना ईश्वरभेदस्समुचीयते अथ तदा तत्वज्ञानाभावात्स्वरूपस्य याथार्थ्यानुभवाभावात् तथा चेश्वरस्य दुर्ज्ञेयत्वे प्रमाणं श्रुतिः प्रावोचद्यथाधत्कोऽनर्थोवत् कुतः केन इत्थं विविधा सृष्टिः कुत उपादानाद्याता प्राप्ता नव देवैः कृतेति वाच्यम् अस्य देवादिसर्वविश्वस्य विसर्जनेन हेतुना देवा अपि अर्वाक् अर्वाचीना एव अथा अतः सर्वमिदं यतआबभूव तं भगवन्तं को वेदेति श्रुत्यर्थः ॥ २३ ॥

प्रासंगिकस्येश्वरवर्णनस्य प्रकृते यस्यवधनिवृत्तौ उपयोगमुपकारं न वेत्त इति उक्तमेव निमित्तमात्रमित्यादिना वर्णितमेव विसर्गादानशब्दयोर्मृत्युजन्मार्थेऽप्रसिद्धत्वाद्यद्वेति द्वितयतः ॥ २४ ॥

कारणे भ्रमादिविकारलेपदर्शनात् तथापि कारणत्वेऽपि अनहंकारात् लेपहेतुगकृताहंकाराभावात्. गुणैः रजआदिभिः कर्मभिः सुखदुःखादिभिश्च ॥ २५ ॥

मायया युक्त इति मायायाः स्वाश्रयाव्यामोहकत्वात् विषयस्यैव मोहकत्वादनहंकारत्वमिति भावः ॥ २६ ॥

कर्मणयेत्त्वविवाध्यवसानात् इत्यर्थ इत्युक्तम् ॥ २७ ॥

प्रत्यक्च विषयप्रातिकूल्यनाभिमुखगामिनीन्द्रियाणि यस्मिन् तं भगवन्तं क्रियाविशेषणपक्षे निरुद्धेन्द्रियं यथास्यात्तथेति ॥२८॥

प्रत्यग् दृष्टिः असज्ज्ञानात्मकः प्रातिकूल्यमाश्रित प्रकाशते इति प्रत्यक् परमात्मा तस्मिन्नेव दृष्टिर्यस्य तथाभूतस्सन् इदं भेदमित्येकं पदम् अमदंव मिथ्यैव प्रतीयते रज्वां भुजगवदित्यद्वैतवादिनः तत्रायं भेदः शत्रुमित्रादिरूपः वैष्णवानां मते तु यस्मिन्भगवति स्फुरिते सति असत्पुरुषार्थः प्रतीयते चतुर्वर्गं तृणोपममित्युक्तः ॥ २९ ॥

आनन्दमात्र इति विशेष्यं शक्तयो विशेषणानि विशिष्टो भगवान् यद्यपि "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः" इत्यादि प्रामाण्यात् ध्रुवस्य श्रीभगवत्साक्षात्कारात् हृदयग्रन्थिर्नास्त्येव तथापि प्रतीत्यभिप्रायेण तथोक्तं वस्तुतस्तु अभिज्ञावचने लट् इति भूतकाल एव लट् व्यभिन इत्यर्थः यद्यपि स्मृतिवाक्युपपदविरहात् स्मरसि कृष्ण गोकुले वत्स्याम इत्युदाहरणाच्च तथा प्रतिपत्तिस्तथापि च॰ पञ्चवर्षो जननीं विहायेत्यत्र तदेत्यत्र च स्मृतेः प्रतिपादनात् स्मरसीति गम्यमेव परोक्षवादत्वात् ॥ ३० ॥

श्रुतेन मनूपदेशेन ॥ ३१ ॥ ३२ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिका ।

प्रयोजयितृत्वमेव विशदयति । स इति । सः कालः कालशरीरकः परमात्मा अनेनापित्रादिनाप्रयोज्यकर्त्राजनमुत्पत्त्युन्मुखान् पुत्रादीन् जनयन् आविष्कृतन् अन्तकं विनाशोन्मुखं मृत्युना प्रयोज्यकर्त्रा मारयन् स्वयं त्वनादिरुत्पत्तिरहितः अव्ययः नाशरहितः अनन्तः अन्तकरः पित्रादिद्वारा जनकः मृत्य्वादिद्वारा अन्तकरः न तु साक्षात् अतः साक्षात्कर्तृत्वं संहारकर्तृत्वमेकस्मिन् विविधविचित्रानन्तशक्तिमतीश्वर उपपन्नमितिभावः ॥ १९ ॥

ननु प्रयोजयितृत्वमपि कथमीश्वरस्योपपन्नं वैषम्यनैर्घृण्या विप्रसंगादित्याशङ्कायां तत्कर्मानुरूपं प्रयोजयितुः पक्षपाताभावादुपपन्नमेव प्रयोजयितृत्वमित्याह । न वा इति। मृत्योः संसारात् परस्यास्पृष्टसंसारस्येत्यर्थः यद्वा मृत्युशरीरकस्य "योमृत्युमन्तरे सञ्चरन् यस्य मृत्युः शरीरम्" इति श्रुतेः परस्य परमात्मनः समं यथा भवति तथा प्रजाः कर्मभूताः विशतः तत्तत्कर्मानुरूपनियमनार्थमन्तरात्मतया प्रविशतः न स्वपक्षः नापि विपक्षोवास्ति पक्षपाताभावं दृष्टान्तेनोपपादयति । तमिति । यथा रजांसि धावमानमनिलम् अनुदृत्य धावन्ति तथा अनीशा अस्वतन्त्राः कर्मानुरूपनियन्त्या इत्यर्थः भूतसंघास्तत्तत्कर्मानुसारं धावमानं नियन्तारं परमात्मानमनुसृत्य धावन्ति प्रवर्त्तन्ते यथा हर्म्यतलस्थमारुतोऽपि रजांस्यनुमेनुनवा चैवैषम्यमस्यैवं परमात्मन्यपीत्यर्थः ॥ २० ॥

कर्मानुरूपनियमनमेवोपपादयति । आयुष इति । विभुः सर्वान्तरोऽसौ भगवान् जन्तोः कर्मवश्यस्य कर्मायत्तसुखदुःखादिभाजः आयुषः अपचयं ह्रासं तथा उपचयं वृद्धिं च स्वयमुभाभ्यामुपचयापचयाभ्यां रहितः अतएव स्वस्थः स्वेनैव हेयप्रतिभटकल्याणैकतानस्वभावेन स्थितः विदधाति करोति एवमुत्पत्तिमरणयोर्देहादिवैचित्र्यसुखदुःखयोश्चाधारकं कारणं तत्तत्कर्मैवेश्वरस्तु प्रयोजयितृत्वकारणमित्युक्तं भवति ॥ २१ ॥

एवं सर्वभूतान्तरात्मानं स्वसंकल्पकृतं जगदुदयविभवलयं सर्वज्ञत्वसर्वशक्तित्वाद्यपरिमितोदारगुणसागरं तत्तत्कर्मानुरूपं जगन्नियन्तारं सर्वभूतसुहृदं परमात्मानमविज्ञाय एतमेव कालकर्मादिरूपेण विवदन्ते केचिदित्याह । केचिदिति । एवं सुखदुःखादिहेतुं कञ्चित्कर्म पुण्यापुण्यरूपं कर्मेति वदन्ति हे नृप ! अपरे स्वभावं प्रकृतिपुरुषयोः स्वरूपान्यथाभावस्वभावान्यथाभावरूपपरिणामस्वभावं वदन्ति एके कालं सत्त्वादिगुणक्षोभहेतु कालं वदन्ति परे एतद्दैवं विधिम् अपरे उत अपरे पुनः पुंसः परमपुरुषस्य कामं सङ्कल्पं वदन्ति अयमेव पक्षः श्रेयान् पुण्यापुण्यरूपस्य कर्मणस्तज्जन्यादृष्टस्यापि भगवन्निग्रहानुग्रहरूपत्वेन तत्संकल्पानतिरिक्तत्वात् कालस्वभावयोरपि ,तत्संकल्पायत्तत्वात् पुंसोजीवस्य काम इति व्याख्यानं त्वयुक्तं दुःखनिष्पस्यकामानुपपत्तेः अतोयथोक्तार्थएव साधुः॥२२॥

पुंसः काममिति पक्षस्यैव साधुत्वं ज्ञापयन् कामस्य दुर्ज्ञेयत्वमाह। अव्यक्तस्येति हेतात! अव्यक्तस्य व्यक्तैरिन्द्रियैर्नव्यज्यत इत्यव्यक्तः अतएवाप्रमेयस्य देशादिभिरपरिच्छिन्नस्य ऐन्द्रियकोऽहमर्वाक्देशकालादिभिःपरिच्छिन्नगृह्णाते अनेन विशेषणद्वयेन प्रकृतिपुरुषवैलक्षण्यसिद्धिःप्रकृतेर्व्यक्तत्वात्पुरुषस्याणुत्वात उभयवैलक्षण्योपादकं विशेषणान्तरमाह।नानाशक्तीनां विविधशक्तीनां"परास्यशक्तिर्विवि

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिका ।

श्रूयते स्वाभाविकी ज्ञानबलक्रिया च,, इति श्रुतेः उदयः अभिव्यक्ति र्यस्मात् तस्य भगवतः चिकीर्षितं कर्तुमिच्छाविषयं कथंभूतं अस्य भवं अस्य लोकस्य संभवं जगदुत्पत्तिरूपं संभवग्रहणं संहारादीनामप्युपलक्षणम् अङ्ग तत्त्वतः को लोको वेद न कोऽपीत्यर्थः प्रकृतिपुरुषविलक्षणस्यानन्त विविधशक्तेः परमपुरुषस्य कर्तव्यतासंकल्प विषयं जगदुत्पत्तिस्थितिसंहारादिरूपं व्यापारम् एवं बिभर्ति तत्त्वतः कोऽपि नजानातीत्यर्थः तथा च श्रूयते कद्धा वेद यत्र सः कइह प्रावोचत् कुत आयाताकुत इयं विसृष्टिरित्यादिका अत्र भगवत्स्वरूपस्यैवातीन्द्रियत्वात्संकल्पविषययोः सुतरां दुर्विज्ञेयत्वज्ञापना याऽव्यक्तस्येत्युक्तम् ॥ २३ ॥

एवमुपपादितं भगवत एवोत्पत्तिमरणादिनिमित्तत्वं प्रकृते उपसंहरति । नचैतदिति । हेपुत्रक! एते धनदस्य कुबेरस्यानुगा भृत्याः स्वभ्रातृहन्तारो न भवन्ति किंतु पुंसः कर्मबद्धस्य विसर्गादानयोः उत्पत्तिमरणयोर्दैवमीश्वर एव हि कारणम ॥ २४ ॥

नन्वीश्वरस्य उत्पत्त्यादिकारणं तर्हि जीववत्सोऽपि सत्त्वादिगुणविशिष्टत्वात् तत्प्रयुक्त जगद्व्यापारकर्त्ताकर्म भवत्वा च गुणकर्मभिर्बध्येत तत्राह । सईति । यद्यपि स एवेश्वरो विश्वं सृजति अवति रक्षति हन्ति च तथापि अनहंकारात् देहात्मभ्रमेणादात्म्याभिमानोऽहंकारः तदभावात् गुणकर्मभिः गुणानां सत्त्वादीनां कर्मभिः गुणकार्यभूतैः कर्मभिर्नाज्यते नबध्यते यद्यपि जगदुत्पत्त्यादीन् गुणकार्यभूतान व्यापारान् करोतीश्वरः तथापि स्वशरीरभूतप्रकृतिपुरुषात्मकेषु द्रव्यादिपदार्थेषु स्वसंकल्पकृतोत्पत्तिस्थितिलयेषु तादात्म्याभिमानाभावात् स्वयमजहत्स्वभावत्वाच्च न कर्मभिर्बध्यते जीवस्तु कर्मणा संकुचितज्ञानत्वेन जहत्स्वाभाव्याद्देवादिशरीरेषु स्वतादात्म्याभिमानाच्च बध्यत इत्यर्थः ॥ २५ ॥

एवं भ्रात्रादिदारीराणामुत्पत्तिमरणादिनिमित्तं निमित्तस्य चानन्तविविधविचित्रशक्तियोगत्वमत एव नित्यमुक्तत्वं चाभिहितं अथ य एवं भूतो भगवांस्तमेव रागद्वेषादिभिर्विमुक्तस्त्वं सर्वात्मना भजस्वेत्याह । एषइत्यादिना । एषभगवान् भूतात्माभूतानां देवमनुष्यादीनामात्मा साक्षि जीवः नेत्याह । भूतशः "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुनतिष्ठति,, इत्युक्तरीत्याचिदचिदात्मकभूतानामन्तः प्रविश्य तत्तत्कर्मानुरूपं नियन्ता न केवलं भूतेश एव अपितु तत्कारणं चेत्याह । भूतभावनः भूतानि भावयत्युत्पादयतीति भूतभावनः यद्वा भूतानि भावयति सृष्ट्यादिभिः सत्तादिमन्ति करोतीति भूतभावनः तथा भूतानां सत्तास्थितिप्रवृत्तिहेतुरित्यर्थः कारणत्वमपि न निकृष्टस्वरूपेण अपितु विशिष्टविशेषणेत्याह । स्वशक्त्या कार्योपयोगि अपृथक्सिद्धविशेषणभूतयामायया गुणैः गुणमयुक्तं ज्ञानं ज्ञानपर्यायोऽत्यत्र मायाशब्दो जीववाची अनेन निर्विकारत्वश्रुतिविरोधोऽपि परिहृतः विकाराणां पुरुषगतत्वात् [illegible] अति अत्तिसंहरति पाति रक्षति च ॥ २६ ॥

तमुक्तविधं मृत्युमभजतां बंध[illegible] मोचकं देवं स्वतेजसा विद्यमानं जगतां परमयनं [illegible] च सर्वात्मना सर्वप्रकारेण मनोवाक्कायैरित्यर्थ स[illegible]भावेनेति वा यद्वा प्राप्यं प्रापकमाधारश्चेति बुद्ध[illegible] जगत्[illegible]रायणमित्यनेनाभिप्रेतम उपेहि शरणं गच्छ युक्तं [illegible] भगवते विश्वस्रष्टा रक्षतुसुसमर्थाश्चयादयः वलिं पूजा हरन्ति [illegible] विश्वसृजो हरन्ति इत्यनेनच सर्वेश्वरेश्वरत्वमुक्तं [illegible] येषामीश्वरास्तेषामपि पूज्य इति तत्सिद्धिः ननु [illegible] लि तस्यापि गोत्राभ

णादिपूज्यत्वाविद्याशङ्कानिराकर्तुं दृष्टान्तमाह । गावोवलीवर्दा यथानसि नासिकायां दाम्ना सूत्रेण यन्त्रिताः प्रोताः पुरुषस्य कर्म कुर्वन्तस्तथा तद्वशंगता बलिं हरन्ति अनेन सर्ववशित्वं सिद्धं यस्य वशे सर्वं वर्त्तते स सर्ववशीत्युच्यते तथा च श्रूयते "सर्वस्येशानः एष भूतपालः एष सेतुर्विधरणः एषां लोकानामसंभेदाय न तस्य कश्चित्पतिरस्ति लोके नचेशिता नैव च तस्य लिङ्गं स कारणं करणाधिपाधिपो नचास्य कश्चिज्जनिता नचाधिप" इति यो वदर्शनस्तस्य तदनुवर्त्तनं युक्तमितिभावः ॥ २७ ॥

तदेव विशिष्यतद्भजनमेव युक्तमाषाढ्यं तत्रैवाऽन्यदृष्टान्तावित्याह । यइति । यो भवान् पञ्चवर्षीया अस्य पञ्चवर्षः सन् सपत्न्या मातुर्वचसा भिन्नं मर्म हृदयं यस्य सः जननीं सुनीतिं विहाय वनं प्रविष्टस्तत्र तत्र प्रत्यगक्षं प्रत्यग्विमुखानीन्द्रियाणि यस्मिन् कर्मणि यथा तथा प्रत्याहृतेन्द्रियगणमित्यर्थः क्रियाविशेषणमिदं यं भगवन्तमाराध्य त्रिलोक्या मूर्ध्निउपरिष्टात् पदं स्थानं संलब्धवान् ॥ २८ ॥

तमेवात्मानं परमात्मकं तच्छरीरभूतजीवात्मदर्शी अन्विच्छमनुवर्तस्वेत्यन्वयः अन्वेषणप्रकारमेवाह । अङ्गहे ध्रुव ! यस्मिन् जीवात्मनि इदमसत् देवमनुष्यादिरूपं सततपरिणामित्वस्वलक्षणवाच्यं सततपरिणामिनो वस्तुन उत्तरोत्तरावस्थाप्राप्तौ पूर्वपूर्वावस्थात्यागात्सर्वदा सदिति व्यपदेष्टुमनर्हत्वात् तदुक्तं श्रीविष्णुपुराणे मही घटत्वं घटतः कपालः कपालिका चूर्णरजस्ततोऽणुः । जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तुसत् । सद्भावएवं भवतामयोक्तो ज्ञानं यथासत्यमसत्यमन्यत् अनादिपरमार्थश्च प्राज्ञैरभ्युपगम्यते । तत्तु नाशिनसंदेहो नाशिद्रव्योपपादिमिति विश्वं प्रतीयते असत्त्वस्य विशेषणत्वेन अस्मिन् जीवे इदं विश्वमसत्प्रतीयेत अविद्यमानमेव प्रतीयते स्वतो जीवेदेवमनुष्याद्यात्मकं विश्वमविद्यमानमपि पुण्यापुण्यरूपकर्मणा प्रतीयते ननु मिथ्या प्रतीयत इत्यर्थः तस्मिन् मुक्तविग्रह निरवयवे आत्मनि जीवे व्यपाश्रितं व्यवस्थितं निर्गुणं निरस्तहेयगुणमेकं निःसमाभ्यधिकमक्षरं निर्विकारं विमुक्तं नित्यमुक्तमात्मानं एवमुक्तवक्ष्यमाणप्रकारेण अन्विच्छेत्यर्थः ॥ २९ ॥

ननूपासित एवमया भगवान् किमधुना भजस्वेत्युच्यते इत्याशङ्कायां मुनिराह । ममाभिमानेन त्रिवर्गलिप्सुना त्वयोपासितोभगवानत एव प्राकृतस्थानमगा इदानीं निर्हेतुकभक्तिं विधाय मोक्ष्यसीत्याह । त्वमिति । प्रत्यक्जीवस्तस्यात्मनि जीवान्तरात्मनि प्रत्यक्आत्मा शरीरं यस्येति वापूर्णषाड्गुण्ये त्रिविधपरिच्छेदरहिते आनन्दमात्रे आनन्दैकरसे न तु क्वापि जड इत्यर्थः उपपन्नसमस्तशक्तौ उपगताशेषज्ञानबलक्रियादिशक्तौ परमपुरुषे त्वं परमां अहैतुक्यव्यवहितेत्युक्तविधां भक्तिं शनकैः समाहितचित्तः विधाय तदाममाहमभिमानाख्यं रूढमूलमविद्यात्मकं ग्रन्थिं विशेषेण निर्मूलं छेत्स्यसि ॥ ३० ॥

यदर्थं तत्त्वोपदेशस्तमाह । संयच्छेति । श्रेयसां पुरुषार्थानां परं केवलं प्रतीपं प्रतिकूलं रोषं भूयसा श्रुतेन तत्त्वश्रवणेन अगदेन औषधेन आमयं रोगं यथा तथोपसंहरेत्यर्थः ॥ ३१ ॥

रोषस्य श्रेयः प्रतीपत्वमेव प्रपञ्चयति । येन रोषेणोपसृष्टाद्व्याप्तात्पुरुषाल्लोकः भृशं नितरामुद्विजते बिभेति लोकोद्वेजनात् अधर्मात्पुरुषार्थनाश इति भावः आत्मनः स्वस्याभयं निःश्रेयसमिच्छन् बुधो विद्वान् तद्वशं न गच्छेत न प्राप्नुयात् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुर्विभाव्यत्वमाह । सोऽनन्त इति । य एवं विधः सहारिरस्य विश्वस्यान्तकरः स्वयमनन्तः स्वमारकमृत्युरहितः "अन्तोऽस्यच-सित मृत्यौ" इति यादवः । देवदत्तवत्स्वयं दण्डमादाय हन्ति किं नेत्याह । काल इति । आयुरादिफलपाचकत्वात् । पूर्वापरत्वविशेषोऽपि नास्तीत्याह । अनादिरिति । न केवलमन्तकरः किन्त्वादिकृच्च योगवत्संवृतो न करोत्यतोऽव्यय इति । अव्ययोऽसंवृतः निमित्तमात्रत्वं स्पष्टयत्युक्तमेव द्रढयति । जनमिति । जनेन पित्रादिशरीरेण जनं पुत्रादिशरीरं जनयन्नात्मनोऽधीनेन मृत्युना कालरूपेण मारयन् शरीरवियोगं कारयन्वर्तत इत्यन्वयः ॥ १९ ॥

एवं प्रवर्तमानस्य नैर्घृण्यादिदोषापत्तिर्नास्ति समत्वादित्याह । नवा इति । वा इत्यनेनावैषम्यादिसूत्रप्रसिद्धिं दर्शयति समं पुण्यपापानुसारेण । मृत्योः परस्य विलक्षणस्य । रुद्रादीनां मारकत्वाधिकमेतत्कटाक्षोपक्षिप्तमिति भावेनाह । तं धावमानमिति ॥ २० ॥

आयुरादिफलपाचकत्वेनान्तादिकर इत्युक्तं । स्पष्टयति आयुष इति ॥ २१ ॥

बहवः कालकर्मादिकमस्योत्पत्त्यादेः कारणमिति संगिरन्ते । तत्पदार्थतात्पर्यापरिज्ञानादिति संतोष्टव्यं यतस्तत्तद्वस्तुषु स्थित्वा तत्तत्क्रियार्थप्रवर्तकत्वेन तथाम्नायमेवोच्यत इति भावेनाह । केचिदिति । केचिन्मीमांसकाः अपरे चार्वाकादयः एके पौराणिकादयः परे मौहूर्तिकाः अपरे वात्स्यायनकोविदाः कामकर्मस्वभावेष्विति वचनात् अयमेव निर्दिश्यत इति॥२२॥

कामकर्मादिशब्दानां कथं निर्वचनं येन तेषां भगवद्विषयत्वं ज्ञायत इति तत्राह । अव्यक्तस्येति । प्रत्यक्षादिप्रमाणाविषयश्चेत् शून्यकल्पोऽयमित्यत उक्तं नाना शक्तीति कर्मादिनानाशक्तीनामुदयो यस्मात्स तथोक्तस्तस्य अनेन परिशेषप्रमाणसिद्धिं सूचयति चिकीर्षितं कर्तुमिष्टं कर्म अस्य संभवमुत्पत्तिं निरुक्तप्रकारं च को ब्रह्मा वेत्ति चतुर्मुखोऽप्यज्ञो न जानातीत्यर्थः ॥ २३ ॥

एवं सर्वत्र हरेः स्वातन्त्र्यमुपपाद्य फलितमाह । नैवेति । विसर्गादानयोर्निर्गमजन्मनोः विसर्गस्यादानस्याङ्गीकारस्य चेति वा हिशब्दो हेतौ ॥ २४ ॥

किन्तद्देवमित्यतो यज्जगत्कारणं ब्रह्म तदेवात्रोक्तमिति सृष्ट्यादिविशेषणैर्विशिनष्टि स एवेति । कर्तृत्वप्रवृत्तस्यैवदत्तस्य गुणकर्मलेपोऽनास्ति अहं कर्तेत्यभिमानाभावादित्याह । अथापीति ॥ २५ ॥

अनेनापि गुणकर्मलेपः कथमुद्घाटित इति तत्राह । एष इति । स्वशक्त्या स्वाधीनया स्वरूपशक्त्या वा ॥ २६ ॥

कार्यपदप्रयोगाभावाच्चेदमनुष्ठातुं योग्यमित्याशङ्क्यैवं विधं देवमिति गुणान्तरसमर्पणेनोपसंहरति । तमेवेति । अमृतं नित्यमुक्तं नसि नासिकायां यन्त्रबन्धन इति धातुः दाम्ना यन्त्रिता बद्धाः ॥२७

श्रीनारायणप्रसादेनावाप्तसमस्तसंपदस्तत्र तन्नियतभूतद्रोहो न घटत इति भावेनाह । यः पञ्चवर्ष इत्यादिना । सर्वप्राणिनः प्रति प्रतिगतमक्षमिन्द्रियं यस्य स तथा तम् अनेन मया क्रियमाणं कर्म नासौ पश्यतीत्येतत्परिहृतम् ॥ २८ ॥

विमुक्तविग्रहैर्योगिभिर्यदुपाश्रितं निषेवितम् अनेन भूतविग्रहोऽस्य प्रियो न भवतीत्युक्तं निर्गुणमावृत्तिशून्यं कुपितत्वात्पुनः प्रसादाभिमुखमित्यर्थः भूतद्रोह कृतस्यास्य तपसापि पुनः प्रसादापादनं दुष्करं तवेति ध्वनितम् अनेन शब्दाद्यविषयं वा वागादिनापि प्रमादयितुं दुःशकमित्यर्थः कुतः निर्गुणमतीन्द्रियमिन्द्रि-

यविषयत्वाभावादित्यर्थः "गुणस्त्वावृत्तिशब्दादिज्येन्द्रिया मुख्यतन्तुषु" इतियादवः एवं केवलमक्षरं मूलकारणमात्मानं परमात्मानं विशिष्टा मुक्तिर्यस्मात्स तथा तम् एवं गुणविशिष्टं हरिमात्मनि हृद्यन्विष्यालोक्य भजस्वेत्यन्वयः तत्स्वरूपं कीदृशमिति न प्रश्नार्हं इति भावेनोक्तमात्मदृशेति एवमात्मानं द्रष्टवानिति यतस्मात् कथमित्यत उक्तं यस्मिन्निति असदस्वतन्त्रं भिन्नं पञ्चविधभेदोपेतमिदं चेतनाचेतनात्मकं विश्वं यस्मिन् यदाधारतया प्रतीयत इति ॥ २९ ॥

ननु आत्मदर्शिनो मम संसारपाशच्छेदः किमिति नाभवि-त्यतस्तस्माद्दग्गुणानुपसंहृत्य विम्बोपास्त्यभावादतस्तथोपास्तौ स स्यादिति भावेन तदुपास्तिप्रकारं विदधान आह । त्वं प्रत्यगात्मनीति । प्रत्यगात्मनि तदाभिमुखे विम्बरूपे भक्तिमुपास्तिलक्षणां सेवां अन्यत्रानुपपन्ना अत्रोपपन्ना अविरुद्धाः समस्ता अस्थूलानणवादिलक्षणाः शक्तयो यत्र स तथा तस्मिन् ॥ ३० ॥

तत्र प्रथमसाधनमिदमित्याह । संयच्छेति ॥ ३१ ॥

अयमर्थः प्रतिपत्तव्यं कथमत्राह । येनेति । येन रोपेणोपसृष्टाद्-परस्मात् सज्जनानुग्रहस्यापेक्षितत्वाल्लोकोऽज्ञानिजनोऽत्रोच्यते हुक् प्रकाश इति धातोः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनिलदृष्टान्तस्तथापि साम्यमित्यत्रांशे भावयितव्यो यथा रजांस्यनिलो भूतसंघ इति चित्सुखः ॥ २० ॥

स्वस्थः स्वानन्दमग्न एव सन् स्वैरितयैव तत्तत्स्वभावभावितत्येत्यर्थः । अतो वैषम्यनैर्घृण्ये अपि परिहृते ॥ २१ ॥

केचिदेनं कर्मादिकं वदन्तीति । अस्य ये कर्तृत्वादयो धर्मास्तान् कर्मादिष्वेवारोपयन्तीत्यर्थः । देवं ग्रहादि । कामं संकल्पं दृष्टिसृष्ट्यादिनः ॥ २२ ॥

चिकीर्षितमिच्छाशक्तिलेशमपि किं पुनः सर्वशक्त्याश्रयत्व-मित्यर्थः ॥ २३—२५ ॥

कथं सृजतीत्यादौ तत्राह । एष इति । भूतस्यात्मा कारणम् । ईशो नियामकः । भावनस्तत्तद्रूपताप्रापकश्च तत्र हेतुः स्वरूपशक्त्या सत्यया च युक्तः । बहिरङ्गशक्तिमायाकार्ये तद्गाहद्वारत्वञ्च योजितम् ॥ २६—२७ ॥

य इत्यत्र यो लेभे स त्वमुपेहीति पूर्वेणान्वयः ॥ २८ ॥

आत्मानं परमात्मानं यस्मिन् स्फुरति सति । असदपुरुषार्थमिदं नेदमसत् प्रतीक्षते इति चित्सुखः । अनुभवादिदं युक्त्यासहत्वान्नेदमिति ॥ २९-३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अन्यच्च तस्य विभुत्वं पश्येत्याह । स स्वयमनन्तः नाशरहितः । अर्थ चान्येषामन्तकरः नाशकरः केन रूपेणेत्यत आह । कालः [illegible] यमनादिः जन्मशून्यः [illegible] थ चान्येषामादिकृत् । अव्ययः चिन्तामणिरिव सर्वप्रसविता [illegible] व्ययशून्यः । स्वयमेवादिकृदपि जनेन पित्रादिना जनं पुत्रादि[illegible] जनयन् स्वयमेवान्तकृदपि मृत्युना मृत्युहेतुना कालाधिकर्त्रेण [illegible]न्तकं यममपि मारयन् ॥ १९ ॥

नत्वेवं कुर्वतोऽपि वै[illegible]यप्रसक्तिः पक्षपाताभावादित्याह । नवा इति द्वाभ्याम् । मृत्योर्मृ[illegible]रूपस्य समं यथा स्यात्तथा प्रजा विशतः तस्य साम्येऽपि भूते[illegible] वैषम्यं तत्तत्कर्मणस्तथा भावादिति

श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी ।

स्वदृष्टान्तमाह । तं धावन्तमनु अनीशाः कर्माधीना भूतसङ्घा धावन्ति अनिलं धावन्तमनुधावन्ति रजांसीव तत्र रजसां तमः प्रकाशजलाग्न्यादि प्रवेशेऽपि नानिलस्य वैषम्यम् एवमीश्वरस्यापीति भावः ॥ २० ॥

तत्राप्यायुषोऽपचयं मशकादावुपचयं देवादौ दुःस्थस्य कर्माधीनस्य ॥ २१ ॥

ननु तर्हि कर्मैव सुखदुःखजन्ममरणादिकारणमस्तु सत्यमत्रैवं वादिनो विवदन्त इत्याह । केचिदिति । केचिन्मीमांसकाः एनं सुखदुःखप्रदं कर्म अपरे लोकायतिकाः स्वभावं : एके व्यावहारिकाः कालं परे ज्योतिषिका दैवं ग्रहादिरूपां देवताम् अपरे वात्स्यायनादयः कामं श्रुतिश्च कामोऽकार्षीत् कामः करोति कामः कर्ता कामः कामयितेत्यादि ॥ २२ ॥

नन्वेषां विवदमानानां मध्ये को व्यवस्थापकस्तत्र तत्तन्मूलतत्त्ववस्तुनोऽज्ञानाच्च कोऽपीत्याह । अव्यक्तस्य कैरपि बलबुद्ध्यादिभिर्व्यक्ती कर्त्तुमशक्यस्य तत्र हेतुरप्रमेयस्य प्रत्यक्षादिप्रमाणैः प्रमातुमशक्यस्य नानाशक्तीनां कालकर्मस्वभावकामादीनामुदयो यस्मादिति तस्यैकैकां शक्तिमाश्रित्यैव विवदमानानां तेषां शक्तिमति तस्मिन् वस्तुनो नास्त्येव विवाद इति भावः तस्य भगवतश्चिकीर्षितमपि कोऽपि नो वेद स्वस्य सम्भवो यस्मात्तं को वेद । यदुक्तं भीष्मेण "न ह्यस्य कर्हिचिद्राजन्! पुमान् वेद विधित्सितम् यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोऽपि हि,, इति तथाच श्रुतिः कोऽद्धा वेद क इह प्रावोचत् कुत आयाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूवेत्यादि ॥ २३ ॥

फलितमाह । नचैत इति । विसर्गादानयोः सृष्टिसंहारयोर्दैवमीश्वरः ॥ २४ ॥

तथापि तस्य निर्लेपतां पश्येत्याह । स एवेति ॥ २५ ॥

अनहङ्कारत्वे हेतुमाह । एष इति । स्वशक्त्या मायया युक्त इति मायया बहिरङ्गत्वेन स्वरूपशक्तित्वाभावात् तत्कार्येषु तस्य नाहङ्कारो भवतीति भावः ॥ २६ ॥

नन्वेवं त्वया प्रबोधितोऽप्यहङ्कारं त्यक्तुं न प्रभवामीत्यत आह । तमेवेति चतुर्भिः । उपेहि प्रपद्यस्व तत्प्रपत्तिं विना ज्ञानेनाहङ्कारापगमो दुःशक इति भावः ॥ २७ ॥

त्वन्तु तं प्रपन्नो मत्कुलपद्ममेवासीत्याह । य इति । प्रत्यक्षिअक्षाणि योगिनां यस्मिंस्तम् ॥ २८ ॥

तमेव सम्प्रत्यपि अन्विच्छ भजं तत्र व्यावहारिकभद्राभद्रभावनयेति भावः नच तत्रान्येषामिव तव प्रयास इत्याह । आत्मनि त्वन्मनसि मुक्तविग्रहे निर्विरोधे वि[illegible] वात्सल्यात् कृतनिवासं आत्मदृक् प्रत्यगदृष्टिः [illegible] अन्विष्टे सति इमे शत्रुमित्रादयो भेदा यत्र तादृ[illegible] अभद्रमरीचिकमेव प्रतीयते ॥ २९ ॥

तदा पञ्चवर्षवयास्मि [illegible]ः अविद्याग्रन्थिभिनत्स्यसि अभिज्ञावचने ल[illegible] एव लृट् व्यभिन इत्यर्थः ॥ ३० ॥

तदपि व्यावहारिकलोकसमुकुल[illegible]पि भ्रातरि प्रणयं लोके [illegible]यन् बहिरेव गेयं भतसे ममाज्ञया तमपि संगच्छभूतेन मदुपदेशवाक्येन अगदेन औषधेन आमयामिवेति त्वादृशानां भक्तानां लोके प्रतिष्ठा प्रख्यापनमप्ये[illegible] रोग एवेति भावः ॥३१॥

नीतिमाह । येन रोपेण उपसृष्टात् व्याप्तात ॥ ३२ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

स एव कालः कालशक्तः शक्तेः स्वरूपेण भिन्नत्वेऽपि शक्तिमान्निरपेक्षस्थित्याद्यभावादभेदेन निर्देशः तत्तत्कालक्रमेणेत्यर्थः अनेन पित्रादिना जनं पुत्रादिं जनयन् आदिकृत् अन्तकश्चोरादिं मृत्युना राजादिना मारकेन मारयन् अन्तकरः स्वयन्तु अनन्तः मरणरहितः अनादिः जन्मरहितः अव्ययो निर्विकारश्च ॥ १९ ॥

मृत्योः प्राणिकर्मानुसारेण मारकस्य सम्यं यथा भवति तथा प्रजा विशतः परस्य सर्वनियन्तुः अस्य स्वपक्षो विपक्षो वा नैव तमेव धावमानं क्रियां कुर्वन्तं संघाः धावन्ति क्रियां कुर्वन्ति यथानिलं रजांसि तद्वत् ॥ २० ॥

दुःस्थस्य कर्माधीनस्य उपचयं वृद्धिमपचयं ह्रासम् ॥ २१ ॥

एकैकदेशनिष्ठानामल्पज्ञानां मतानि दर्शयन् भगवतः सर्वशक्तित्वेन सर्वरूपत्वं सूचयन् इयत्तानवच्छिन्नत्वमाह । केचिदिति द्वाभ्याम् ॥ २२ ॥ २३ ॥

प्रकृतमाह । नेति । हे पुत्रक ! विसर्गादानयोः सृष्टिसंहारयोः दैवं कर्मफलदः परमेश्वरः ॥ २४ ॥ २५ ॥ २६ ॥

मृत्युं मरणहेतुममृतं जीवहेतुं दैवं कर्मफलदम् उपेहि शरणं व्रज ॥ २७ ॥

यः पञ्चवर्षः भजनानर्होऽपि प्रत्यगक्षं निरुद्धेन्द्रियं यथा स्यात्तथाराध्य त्रिलोक्याः मूर्ध्नि परं स्थानं लेभे लब्धवानसि तमेवान्विच्छेत्युत्तरेण संबन्धः ॥ २८ ॥

तस्मादिति तच्छब्दस्य पूर्वपरामर्शकत्वात् पूर्वत्राग्निशब्दाभावात् अर्थाबाधरूपा वाक्यार्थहेतुर्योग्यता गृहीता तथा तच्छब्देनाग्निर्विवक्षितः यथासिञ्चति तनेत्युक्ते तच्छब्देन जलविवक्षणं तद्वदित्यर्थः ॥ ३६ ॥ ३७ ॥ ३८ ॥

तेन मृत्युमनुसरणेन ॥ ३९ ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे नरदेव ! इह जन्मनि भवतः अल्पमप्यघं नास्त्येव किन्तु प्राक्तनमेकमघमस्ति यदस्मादघादीदृग्गुणाधिकस्त्वमप्रजः प्रजारहितो बभूविथ ॥ ३१ ॥

अतो देवा यथाहर्वींषि गृह्णीयुस्तथात्मानं सप्रजं सपुत्रं साधय कथं साधनीयं तत्राहुः । इष्ट इति । यज्ञभुग् भगवान् पुत्रं कामयमानस्य ते त्वया इष्ट इज्यमानस्तुभ्यं पुत्रं दास्यति ॥३२॥

तथा सति दिवौकसो देवाः स्वभागधेयानि स्वभागान् "भागरूपनामभ्यो धेय,, इति स्वार्थे धेयप्रत्ययः ग्रहीष्यन्ति यतः यज्ञपुरुषो हरिः साक्षादपत्याय पुत्रार्थं वृतः स्यादतस्तेन सह सर्वे देवा आगमिष्यन्तीत्यर्थः ॥ ३३ ॥

तांस्तानिति तुच्छान् कामान् हरिः कथं दद्यात् तत्राहुः । तांस्तानिति । जनो यान् कामान् प्रार्थयते तांस्तान् हरिर्दद्यात् यथा येन प्रकारेण भगवानाराधितो जनैस्तेषां तथा स्वस्वकामानुसारेण फलोदयः फलावाप्तिर्भवति ॥ ३४ ॥

इत्थं व्यवसिता निश्चिन्वाना ऋत्विजः राज्ञोऽङ्गस्य प्रजात्ये प्रजोत्पत्त्यै शिपिविष्टाय शिपिविष्टत्वगुणविशिष्टाय विष्णवे पुरोडाशं निरवपन् शिपिभिः रश्मिभिः विष्टः आविष्टः शिपिविष्टः तस्मै तथा च मन्त्रः "किमित्ते विष्णो परि चक्ष्यं भूत्प्रयद्वववक्षे शिपिविष्टो अस्मी"त्यादि अर्थवादश्च "यशो भूत्वा पृथिवीं व्याश्नुवानो विष्णुः शिपिविष्ट इत्यादिनिरुक्तं च यदुत प्रभूते शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवतीति यद्वा शिपिषु पशुषु यज्ञरूपेण प्रविष्टाय तथा च श्रुतिः "यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति,, इति ॥ ३५ ॥

तस्मात् अग्नेरित्यर्थः [illegible] हेममयानि माल्यानि अम्बराणि च यस्य स [illegible] हिरण्मयपात्रेण सिद्धं सज्जं कृ पक्वं पायसपात्रं गृहीत्वा [illegible] उत्थितवान् ॥ ३६ ॥

उदारधीः स राजा [illegible] विप्रानुमतः विप्रैरभ्यनुज्ञातः अञ्जलिना ओदनं पायसं [illegible] अयमाघ्राय हर्षेण युक्तः पत्न्यै प्रादात् ॥ ३७ ॥

सा राज्ञी राज्ञः [illegible] सुनीथी पुंसवनं पुमांसं सूते अनेनेति पुंसवनं तदोदनं [illegible] भुक्त्वा पत्युः सकाशात् गर्भमाधत्त धृतवती अप्रजाः [illegible] गर्भकाले गर्भधारणकाले उपावृत्ते प्राप्ते सति कुमारं सुषुवे [illegible] ॥

सः पुरुषः कुमा[illegible] एव बाल्यात्प्रभृतीत्यर्थः अधर्मांशोद्भवं मातामहं मृत्युं [illegible] मृत्योर्हि पुत्री सुनीथा अनुव्रतः अनुसृतोऽभूत् तेन मातामहा[illegible]दधार्मिकोऽभवत् ॥ ३९ ॥

अधार्मिकत्वमेव [illegible] इति । स शाङ्गः शरासनं धनुरुद्यम्य धनुष्यारोपितशर[illegible] मृगयुर्लुब्धकः सन् अत एव वनगोचरः असाधुः दीन[illegible] मृगान् हन्ति अवधीत् तं दृष्ट्वा सर्वेऽपि वेनोऽयमागच्छतीति सर्वो [illegible] अरौत् चुक्रोश ॥ ४० ॥

श्रीम[illegible]ध्वजतीर्थकृतपदरत्नावली ।

राज्ञा पृष्टान् यजम[illegible]कर्मगुणदोषाभिविविच्य तत्परिहृत्य कर्मपरतंत्रायामन्त्रिताः सद[illegible] ऋत्विजः किं विशिष्यमवलोक्य प्रोचुरिति तत्राह । नरदेवेति । इ[illegible]स्मिन् जन्मनि ईदृशः दृष्टोऽप्रजोऽनपत्य इति यदतः प्राक्त[illegible]जन्मार्जितमघं बालहत्यादिकमेकमघमस्तीत्यनुमीयते ॥ ३१ ॥

तथा तस्मात्त्वं आत्मानं सप्रजं पुत्रेण सहवर्तमानं साधय कुरु ततो भद्रं भवति तत्र क [illegible] इतितमाहुरित्याह । इष्टइति ॥ ३२ ॥

किं भद्रं स्यादित्यत्राह । यथेति । दिवौकसां हरेरङ्गोत्पन्नत्वेन तदाश्रितत्वेन स्थितेस्तन्मात्रैककारणेन तत्सुष्टानतुष्टः स्वभागाधानादानयोग्यं स्वादित्यत्र विनाभूतत्वाद्धुना तदिष्टत्वात्सर्वे समंजसं भवतीति भावेनाहुरत्वाह । यथाक्रतुरूपइति । अनेनापुत्रस्य लोकोना स्तीति प्रतिकं सद्धर्मंसतोधर्मवललोको भवत्येव हरिकृपया विधिप्रपूर्णोत्पत्त्ये देवैर्हिर्विनोदितम् अङ्गस्यापि बालहत्यादिदोषापनयत्वादिफलप्रतिज्ञायते तदुक्तम् "अनपत्योऽपि सद्धर्मो लोकजित्स्वत्र संशयः । देवैस्तु पृथुजन्मार्थं हविरङ्गस्य नाहृतमिति ॥ ३३ ॥

न केवलं हरिपूजया पुत्रकामस्य पुत्रावाप्तिस्तत्तत्कामेन तत्तदवाप्तिरपि स्यादित्याह । तांस्तानिति । फलाकांक्षानुसारेण पूजापि तादृशीति मानेनाहुः । आराधितइति ॥ ३४ ॥

हितमुक्त्वा ते तूष्णीमभूवन्निक्तेत्याह । इतीति प्रजात्ये संतत्यै शिपिविष्टोनाम पुत्रकामेष्ट्यर्थदेवताहरेरूपान्तरम् अतएव "शिपि

[illegible] डे क्रीडतो बालान् वयस्यानतिदारुणः ।
[illegible] निरनुक्रोशः पशुमारममारयत् ॥ ४१ ॥
[illegible] वक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः ।
[illegible] शासितुं कल्पो भृशमासीत्सुदुर्मनाः ॥ ४२ ॥
[illegible] ाभ्यर्चिता देवा ये अप्रजा गृहमेधिनः ।
[illegible] भृतं दुःखं येन विन्दन्ति दुर्भरम् ॥ ४३ ॥

श्रीमद्विजयध्वज [illegible] वली ।

शिपिस्तु ऋलनो दुश्चर्मोणा म [illegible] तनिवारणाय विष्णव इति ॥ ३५ ॥

तस्मादग्निगतपुरोडाशात [illegible]

अञ्जलिनोदनामिति पाठः [illegible]

पुमांसं सूत इति पुंसवन [illegible] प्राप्ते अप्रजाः पुत्ररहिता ॥ ३८ ॥

बालएव कौमारवया एव [illegible] यस्य स तथा तं मातामहं मातुः पितरं मृत्यु [illegible] नुव्रत इति यस्तेन स पुरुषोऽधार्मिको धर्मविरुद्ध [illegible] विशेषणेन धर्मांशोद्भवो मृत्युरन्योऽस्तीति रह [illegible] क्तं "मृत्युर्देवोयमज्ञाता वेनमातामहोऽसुर,, इति [illegible]

किंनामायं बाल इत्यतस्त [illegible] लोकाभरूढकम्पिलाह । सशरासनमिति । वेनयति [illegible] "पीडां वेनेतिच प्राहुर्वेनोऽसौपीडनादभूत,,इतिच [illegible] ॥ ४० ॥

श्रीमज्जीवगोस्वामि [illegible] ।

नरदेव ! भवतोऽनावद्यं किञ्चि [illegible] मिकं प्राक्तनावद्यमिति क्वचित् पाठः चित्सुखस [illegible] यं जन्मान्तरीणापराध इति व्याख्यानात् ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्ति [illegible] र्शिनी ।

आग्नेयानि भागरूपाणि धे [illegible] र्यायाणि हवींषि ॥ ३३ ॥ ३४ ॥

पुरोडाशं यज्ञियद्रव्यं निरवप [illegible] पशुषु यज्ञरूपेण प्रविष्टाय । तथाच श्रुतिः " [illegible] षु पशवः शिपिर्यज्ञएव पशुषु प्रति तिष्ठतीति,, ॥ ३५ ॥ ३८ ॥

तेनेति । मातृदोषादधार्मिकोऽपि विष्णुयज्ञोद्भूतत्वात् पितुर्वैराग्यकारणीभूतत्वेन पितुरुपकारकः । पृथुजनकत्वेन तद्यशो धर्मजश्च बभूवेति ज्ञेयम ॥ ३९ ॥

तं दूरादेव दृष्ट्वा वेणोऽसौऽवस्मत्प्राणघाती समेतीत्यरौत् चुक्रोश ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स बाल एव । अधर्मांशोद्भवं मातामहं सुनीथापितरं मृत्युं यतोऽनुव्रतस्तेनाधार्मिकोऽभवत् ॥ ३९ ॥

अरौत् भयाच्चुक्रोश ॥ ४० ॥

भाषाटीका ।

सभापति बोले हे नरदेव ! इस जन्ममें आप का पाप कुछ नहीं है एक पूर्वजन्म का पाप है जिस से तुम इस जन्म में निष्पुत्र हुये हो ॥ ३१ ॥

हे नृप ! तुमारा कल्याण होगा तुम तिसविधी से आत्मा की सिद्धकरो जिससे सुन्दर पुत्रवाले होजावो पुत्रकी कामनासे यज्ञ करोगेतो यज्ञ भोक्ता भगवान् पुत्र देंगे ॥ ३२ ॥

तैसेही देवता लोग अपने भागों को लेंगे जब कि साक्षात् यज्ञ पुरुषको तुम पुत्र के होने को वरण करोगे । ३३ ।

भगवान् तिन तिन सब कामनाओं को देते हैं जिनको मनुष्य चाहता है यह भगवान् जैसे पूजित होते हैं तैसा पुरुषों को फल होता है ॥ ३४ ॥

ब्राह्मणों ने मन मे ऐसा निश्चय करके उस राजा के सन्तान के लिये शिपि विष्टि नामक विष्णु के अर्थ पुरोडाश हवि का अर्पण किया ॥ ३५ ॥

उस यज्ञ के अग्नि कुंड मे से एक पुरुष उठकर खड़ा हुआ सो सुवर्ण माला को पहिरा पीताम्बर धारण किया सुवर्ण पात्र मे सिद्ध पायसान्न लाकर निकला ॥ ३६ ॥

उदार बुद्धि वाले ब्राह्मणों कि आज्ञा से राजा ने दोनों हस्तों से उस पायस को ग्रहण करके आनंद से सूंघ करके पत्नी को अर्पण किया ॥ ३७ ॥

उस रानी ने उस पुंसवन चरु को खाकर के पति से गर्भ को धारण किया समय पाकर के विना पुत्र वाली ने भी पुत्र को उत्पन्न किया ॥ ३८ ॥

उस बालक पुरुषने बालकही अवस्था में अधर्मांशसे पैदा होने वाले मातामह मृत्युका संगकिया तिससे अधार्मिक होगया ॥ ३९ ॥

वह धनुष को उठाकर जङ्गल में जाकर व्याधकी वृत्ति को करने लगा दुष्टपनासे गरीब मृगनको मारनेलगा उसके डरसे वेन आया ऐसा सब मनुष्य चिल्लाने लगे ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आक्रीडे क्रीडास्थाने बालान् पशूनिवामारयत् ॥ ४१ ॥

विलक्ष्य दृष्ट्वा । ४२ ।

दुर्मनसस्तस्य कुपुत्रनिन्दावाक्यान्याह । प्रायेणेति त्रिभिः । अप्रजा ये तैरभ्यर्चितः तत्र हेतुः कुत्सितैरपत्यैः सम्भृतं दुर्भरं धारयितुमशक्यं दुःखं येन विन्दति ॥ ४३ ॥

यतः पापीयसी कीर्तिरधर्मश्च महान्नृणाम् ।
यतो विरोधः सर्वेषां यत आधिरनन्तकः ॥ ४४ ॥

कस्तं प्रजापदेशं वै मोहबन्धनमात्मनः ।
पण्डितो बहुमन्येत यदर्थाः क्लेशदा गृहाः ॥ ४५ ॥

कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात् ।
निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ॥ ४६ ॥

एवं स निर्विण्णमना नृपो गृहान् निशीथ उत्थाय महोदयोदयात् ।
अलब्धनिद्रोऽनुपलक्षितो नृभिर्हित्वा गतो वेनसुवं प्रसुप्ताम् ॥ ४७ ॥

विज्ञाय निर्विद्यगतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः ।
विचिक्युरुर्व्यामतिशोककातरा यथा निगूढं पुरुषं कुयोगिनः ॥ ४८ ॥

अलक्षयन्तः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीम् ।
ऋषीन् समेतानभिवन्द्य साश्रवो न्यवेदयन् पौरव भर्तृविप्लवम् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे
पारमहंस्यां संहितायां वैयासिक्यां चतुर्थस्कन्धे अङ्गप्रव्रज्या नाम
त्रयोदशोऽध्यायः ॥ १३ ॥

———○*○———

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वेषां सर्वैः सह आधिर्मानसी व्यथा ॥ ४४ ॥

तं प्रजापदेशं पुत्रनाममात्रमप्यात्मनो मोहने बन्धनं यदर्था यन्निमित्ताः क्लेशदाः गृहाः भवन्ति ॥ ४५ ॥

इदानीं निर्वेदहेतुत्वेन कुत्सितमेवापत्यमभिनन्दति । कदपत्यमिति । शुचां पदाच्छोकानां स्थानात् वरत्वे हेतुः निर्विद्येतेति तत्कुतः यद्यतः कदपत्यात् गृहाः क्लेशनिवहाः भवन्ति ॥ ५६ ॥

महतामुदयानां विभूतीनामुदयो यस्मिंस्तस्माद्गृहाद्गतः वा वेनं सूतेस्म ताम् ॥ ४७ ॥

प्रजाः पुरोहितादयश्च विचिक्युरन्वेषितवन्तः तं तत्रैव सन्तमपि नापश्यन्निति दृष्टान्तेनाह । यथेति ॥ ४८ ॥

साश्रवो रुदन्तः भर्तुर्विप्लवं नाशमदर्शनमित्यर्थः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिकाटिप्पणी ॥

पशुमारमिति क्रियाविशेषणम् ॥ ४१ ॥ ४२ ॥

प्रायेणेति । दुःखोक्तिमात्रम् अप्रजगृहमेधिनां नियमेन तद्दर्शनाभावात् कुपुत्रभावमात्रस्य तत्फलत्वाभावाच्च न विन्दन्ति न लभन्ते ॥ ४३ ॥

यत इति युग्मकम् यतः ममतास्पदत्वेन स्नेहविषयात् ॥ ४४—४५ ॥

अनिष्टाशङ्कीनि बन्धुहृदयानीति न्यायाच्छुचां पदादिति ॥ ४६ ॥

स्वस्य वेशान्तरं कृत्वा गत इति ॥ ४७—४८ ॥

विप्लवशब्दस्य नाशवाचकत्वात् नाशशब्दस्य धात्वर्थपुरस्कृतयोगवृत्त्याऽदर्शनवाचकत्वं क्लेशेनोपलब्धमत इत्यर्थ इत्युक्तम् ॥ ४९ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
दीपिन्याख्यदीपिकाटिप्पण्यां
त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमद्वीरराघवाचार्य[illegible]चन्द्रिका ।

आक्रीडे क्रीडास्थाने व[illegible] क्रूरः अत एव निरनुक्रोशः [illegible] पशुमारममार-येत् पशूनिवामारयत् ॥ ४१ ॥

स नृपः अङ्गः खलं दुरात्म[illegible]ः शासनैः सामा-द्युपायैर्विचक्षयानुशास्येत्यर्थः [illegible] सुदुर्मनाः दुःखि-तमनाः आस ॥ ४२ ॥

तस्य पुत्रनिन्दावाक्यान्याह [illegible]मेधिनो गृहाश्र-मिणः अप्रजा अपुत्रा ये च पु[illegible]तापस्कृतं दुर्भरं धारयितुमशक्यं दुःखं न विन्द[illegible] भगवान् देवः प्रायेणाऽभ्यर्चितः ॥ ४३ ॥

यतः कदपत्यात्पापीयसी [illegible]र्तिर्भिहानधर्मश्च नृणां भवेत् यथा यतः कदपत्य[illegible]ः अनन्तोऽपारः आधिः मानसी व्यथा च जायते [illegible]

तं प्रजापदेशं पुत्रनाममात्र[illegible]हेन बन्धनं कः पण्डितो बहुमन्येत यदर्थो यत्पु[illegible]ः क्लेशसंपादका गृहाः भवन्ति पुत्रापदेशमात्रमपि [illegible]हेतुत्वेनात्मनो-बन्धकत्वात्पण्डितो न बहुमन्येत [illegible]

इदानीं निर्वेदहेतुत्वेन कुत्सित[illegible]दति । कदपत्य-मिति । शुचां पदात् शोकानां स्था[illegible] गृहाः किञ्जन-नद्वारा संसारदुःखहेतुत्वादिति [illegible]त्कदपत्यं वरं श्रेष्ठं मन्ये वरत्वे हेतुः मर्त्यो गृ[illegible]र्वेदं प्राप्नुयात् यतः कदपत्यात् गृहाः शोकावहा[illegible]पत्यं परमिति पाठे तस्य परत्वं वैराग्यहेतुत्वात् [illegible]

एवमुक्तप्रकारेण निर्विण्णमनाः [illegible]तामुदयानां विभूतीनामुदयः समृद्धिर्यस्मिन् त[illegible] उत्थाय अलब्धनिद्रस्त्यक्तनिद्रः प्रसुप्तां वे[illegible]नर्रीं सुनी-थां हित्वा नरैरनुपलक्षितः अदृष्टः ग[illegible] ॥ ४७ ॥

पुरोहितादयः सर्वाः प्रजाः पति[illegible]व्यसनं निर्वेदं प्राप्य गतं विज्ञाय अत एवात्यन्तश[illegible] उर्व्यां पृथिव्यां विचिक्युः अन्वेषणं चक्रुः [illegible]न्तमपि नाप श्यन्निति दृष्टान्तेनाह । यथेति । निरूढं [illegible]मपि तिरो-हितं पुरुषं परमपुरुषं यथा कुयोगिनो[illegible]ति ॥ ४८ ॥

प्रजापतेः राज्ञः पदवीं मार्गमलक्षयन्त[illegible] अत एव हतप्रयत्नाः ते पुरोहितादयः पुरीं प्रत्युप[illegible] हे पौरव ! विदुर ! साश्रवः शोकाश्रुसहिताः समेत[illegible]पीन् प्रणा-म्य भर्तृविप्लवं नाशमदर्शनं न्यवेदयन् वि[illegible] ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायां
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आक्रीडे क्रीडास्थाने पशुमारमितिलुप्तोपमा यथा पशुमारो-गोव्याघ्रव्याधचण्डालस्तथेति ॥ ४१ ॥

स्वशासनमुल्लङ्घ्य वर्तमानं पुत्रमवलोक्य पित्रा किमकारीति तत्राह । तं विलक्ष्येति । दुरशोभनदुःखयोरत्यनेन सुष्ठुदुःखित-मनाः ॥ ४२ ॥

प्रजापात् दुःखं चावगम्यत इत्याह । प्रायेणेति । ये गृहमेधिनो-ऽप्रजा एवंदुर्भरं कदपत्यकृतं दुःखं न विन्दन्ति तैः सर्वैरपि प्रायेण देवो नारायणोऽभ्यर्चित इत्यन्वयः ॥ ४३ ॥

अपकीर्त्यादिदोषहेतुत्वात्पण्डितो नरकप्राप्तिहेतुत्वात्साधुरयं पुत्र इति बहुमानं न करोतीत्याह । यत इति ॥ ४४—४५ ॥

न केवलं दुःखमेव कदपत्यात्किन्तु विवेकिनः प्रयोजनं चास्ती-त्याह । कदपत्यमिति । क्लेशसमूहेनातुरो मर्त्यो स्वगृहान्निर्विद्येतेति यस्मादित्येवमादिशुचां महास्पदपत्यात्कदपत्यं वैराग्यहेतुत्वात्सा-धु मन्ये इत्यन्वयः इवन्ताद्पिटापश्चेति वचनाच्छुचेतिरूपं साधु॥४६॥

नन्वत्र शोकान्मरणं देशान्तरगमनं वा स्यात् तत्र किमनेना-कारीति तत्राह । एवं स इति । महानुदयो महतीविभूतिस्तस्या उद-यादुद्विग्नो यस्मिंस्तत्तथा तस्मात् लक्ष्यदर्शनाद्धनयोरितिवाताऽर-नुपलक्षितोऽदृष्टः ॥ ४७ ॥

जलादौ मृतोदूरं गतोवेति संशये तयोरेकं निश्चित्य किमकार्षु-स्तदीया इति तत्राह । विज्ञायेति । विचिक्युरन्विष्याहष्टवन्तः हृदि गूढं पुरुषं हरिम् ॥ ४८ ॥

अन्विष्याहष्टवन्तः किमकुर्वन्नित्यत आह । अलक्षयन्त इति । पौरव ! विदुर ! साश्रवः बाष्पसहिताः साधीयसो विष्णुयाजिनोऽ-ङ्गस्यैवं दुष्टपुत्रोत्पत्तिस्तन्निमित्तेन विप्लवश्च कथमभूदितीदं चोद्य-न"अनपत्यत्वकर्मासौ बालहत्या कृतः पुरा । अतोदुष्टोऽभवत्पुत्र इष्टो विष्णुरतः पृथुः इति ॥ ४९ ॥

इतिश्रीभागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

प्रायेणेति दुःखोक्तिमात्रम् ॥ ४३ ॥

यत इति युग्मकं गृहाणां दोषमाह । यदिति ॥४४ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पशुमारं पशूनिवामारयत् ॥ ४१॥४२ ॥

ये अप्रजा अनपत्यास्तैः अभ्यर्चितः : तत्र हेतुः कदपत्येन भृतं पूर्णीकृतं दुर्भरं धारयितुमशक्यं दुःखं ये न विन्दन्ति ॥ ४३ ॥ ४४ ॥

प्रजापदेशं नाम्नैव प्रजां वस्तुतस्त्वात्मनो दुःखसमुद्रमित्यर्थः तस्माल्लोकलज्जामनस्तापादिबहुलेभ्यो गृहेभ्यो निःसृत्य क्वचि-दलक्षिते प्रदेशे शाकमूलफलादिवृत्तिरप्येवं यामान् सर्वमन्तं भजन्नवशिष्टमायुरव्यर्थं कुर्वन् कृतार्थो भविष्यामीति निश्चिकाय ।४५।

निश्चित्य च स्वनिर्वेदामृतप्राप्तिकारणं पुत्रमेव स्मृत्वा भगव-तैव परमकृपया विषयभोगान्धं मां स्वचरणान्तिकं बलान्नि नीषुणा पुत्रोऽयं मह्यं दत्त इत्याह । कदपत्यमिति ॥ ४६ ॥

महोदयस्य महासम्पत्तेरुदयो यत्र तस्मात् । वेश्मसूते वेश्म-सूस्तां सुनीथां प्रसुप्तामिति यदैव सा प्रकर्षेण स्वपितिस्म तदैव स्वस्य वेशान्तरं कृत्वेत्यर्थः ॥ ४७ ॥

पुरुषं परमात्मानं निगूढमिति दृष्टान्तेन तस्मिन् दिने तत्रैव स्वपुर्य्यां राजा निगूढ एवासीदिति लभ्यते ॥ ४८ ॥

हे पौरव ! विदुर ! भर्तृविप्लवं नाशमदर्शनमित्यर्थः ॥ ४९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
त्रयोदशश्चतुर्थस्य सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आक्रीडे बालविहारस्थले क्रीडतः बालान् वयस्यान् मित्रत्वेन संगतान् पशुमारं यज्ञे कण्ठपीडनादिना पशूनिव अमारयत् ॥ ४१ ॥ ४२ ॥

कदपत्यभृतं कुत्सितैरपत्यैर्भृतं दुर्भरं धारयितुमशक्यं दुःखं न विन्दन्ति न लभन्ते ॥ ४३ ॥

यतः खलात् पुत्रात् ॥ ४४ ॥

प्रजापदेशं प्रजानाममात्रेणोपस्थितम् आत्मनो मोहन बन्धनम् यदर्थापत्तिमिताः गृहाः क्लेशदाः सन्ति तं पुत्रं कः पण्डितः सन् बहुमन्येत आद्रियेत ॥ ४५ ॥

सारग्राहिगुणवतामात्मन आभिप्राह । कदपत्यमिति । शुचांशोकानां पदान् मूलात् ॥ ४६ ॥

महोदयानां महासंपदामुदयो यस्मिन् तस्मात् वेनं सूते इति वेनसूस्ताम् ॥ ४७ ॥

विचिक्युः अन्वेषणं चक्रुः पुरुषं परमेश्वरम् ॥ ४८ ॥

ते पौराः पुरीं प्रत्युपसृत्य पुनरागत्य भर्तृविप्लवं आभ्यदर्शनम् ॥ ४९ ॥

इति श्रीमद्भागवतचतुर्थस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोदशाध्यायार्थप्रकाशः

भाषाटीका ॥

वह बड़ा क्रूर होने से बराबर बालकों के साथ खेलने में निर्दयी जबर्दस्ती पकड़ कर यज्ञ में पशु की नाईं गला घोंट मारता था ॥ ४१ ॥

राजा ने उस पुत्र को दुष्ट जान कर बहुत प्रकार की शिक्षा से भी जब सिखाने नहीं सका तब मन से बड़ा दुःखित हुआ ॥ ४२ ॥

कहने लगा कि जो लोग बिना सन्तान के हैं उन्होंने पूर्वजन्म में भगवान् की बड़ी पूजा की है क्योंकि उनों को भारी कठिन जो खोटे पुत्रों का दुःख सो नहीं भोगना पड़ता है ॥ ४३ ॥

जिससे बड़ी खोटी कीर्ति होती है और बड़ा अधर्म मनुष्यों को होता है जिससे सब के साथ विरोध होता है तथा मनका बड़ा चिंता होता है ॥ ४४ ॥

जिससे घर भी दुःखदायक हो जाते हैं ऐसा जो आत्मा को मोहबंधनरूपी खोटे पुत्रको पंडित होकर न भला मानेगा ॥ ४५ ॥

मोह के मारे शोकको देने वाले अच्छे पुत्रसे खोटा पुत्रही ठीकमालूम होता है क्योंकि उस के हेतु से मनुष्य घर से विरक्त होजाता है जिससे कि घर क्लेश के देने वाले हैं ॥ ४६ ॥

इस प्रकार से वैराग्य प्राप्त भया वह राजा बड़ी भारी विभूति वाले घर में से निद्रा न होने से सोती हुई वेन की माताको छोड़कर छिप करके अंगराज आधीरात में उठकर चला गया ॥ ४७ ॥

पुरोहित मंत्रि बंधु लोगों ने दुःख पाकर चलाजाना राजा का जानकर जैसे अंतःकरण में स्थित परमात्मा को कुयोगिजन ढूंढते हैं तैसे शोक से अधीर होकर पृथिवी में ढूंढने लगे ॥ ४८ ॥

वे लोग पृथिवी में ढूंढकर उसका पता नहीं मिलने से प्रयत्न निष्फल होजाने से घर में आकर हे विदुरजी ! आंसु गिराते हुये वेन के समीप में जाकर अपने स्वामिका नाश होजाना निवेदन करते भये ॥ ४९ ॥

इति श्रीमद्भागवतचतुर्थ स्कन्धत्रयोदश अध्यायका भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ।

मैत्रेय उवाच

भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः ।
गोप्तर्यसति वै नृणां पश्यन्तः पशुसाम्यताम् ॥ १ ॥
वीरमातरमाहूय सुनीथां ब्रह्मवादिनः ।
प्रकृत्यसंमतं वेनमभ्यषिञ्चन् पतिं भुवः ॥ २ ॥
श्रुत्वा नृपासनगतं वेनमत्युग्रशासनम् ।
निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः ॥ ३ ॥
स आरूढनृपस्थान उन्नद्धोऽष्टविभूतिभिः ।
अवमेने महाभागान् स्तब्धः सम्भावितः स्वतः ॥ ४ ॥
एवं मदान्ध उत्सिक्तो निरङ्कुश इवद्विपः ।
पर्यटन्रथ मास्थाय कम्पयन्निव रोदसी ॥ ५ ॥
न यष्टव्यं न दातव्यं न होतव्यं द्विजाः ! क्वचित् ।
इति न्यवारयद्धर्मं भेरीघोषेण सर्वशः ॥ ६ ॥
वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितम् ।
विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः ॥ ७ ॥
अहो उभयतः प्राप्तं लोकस्य व्यसनं महत् ।
दारुण्युभयतो दीप्ते इव तस्करपालयोः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्दशे तु दुष्पुत्रभयादङ्गे गते द्विजैः ।
अभिषिक्तस्य वेनस्य रोषाद्वधश्च उच्यते ॥ १ ॥

क्षेमदर्शिनः क्षेमचिन्तकाः पशुसमानरूपतां पश्यन्तः ॥१॥

अमात्यादीनां प्रकृतीनामसम्मतं पाठान्तरे प्रकृत्या स्वभावेनासम्मतम् ॥ २ ॥

चौराः सर्वे लीना बभूवुः ॥ ३ ॥

आरूढं नृपस्थानं राजासनं येन अष्टविभूतिभिर्लोकपालैश्वर्यैः ॥ ४ ॥ ५ ॥ ६ ॥

सत्रिणो मिलिताः सन्तः ॥ ७ ॥

मूलतश्चाग्रतश्च दीप्ते ज्वलिते काष्ठे तन्मध्यवर्तिनां पिपीलिकादीनां यथोभयतो व्यसनमेवं तस्करेभ्यः पालकाच्च दुःखं प्राप्तमित्यर्थः ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिकाटिप्पणी ।

तैर्द्विजैः कर्तृभूतैः भृग्वादयः युग्मकम् प्रकृत्यसंमतमिति पाठान्तरम् ॥ १—२ ॥ ३ ॥

लोकपाला इन्द्रादयः तेषामैश्वर्यैरिति सप्तद्वीपाधिपत्वं व्यञ्जितम् "सप्तद्वीपाधिपतयो नृपा वैण्यगयादय" इत्युक्तेः स्वतः स्वेनैव संभावितः शूरोऽहं बुधोऽहमिति कृतात्मश्लाघनः ॥ ४ ॥

एवमिति युग्मकम् सर्वतः सर्वदेशेषु ॥ ५ ॥ ६ ॥

सत्रे हि सर्वमिलनं स्यादिति मिलिता इति व्याख्यातम् ॥ ७ ॥
तन्मध्यवर्तिनामित्याद्यध्याहारादित्यर्थं इत्युक्तम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पुरोहितादिभिर्निर्वेदिता ऋषयः तमेव खलं वेनमभिषिच्य पुनस्तेन पीडिताः स्वतेजसा निहत्य तद्बाहुमथनादवतीर्णं भगवदंशभूतं पृथुं मन्त्रियमभिषिच्य राज्ये प्रतिष्ठापयामासुरित्याह चतुर्दशेन मुनिः । भृग्वादय इति । लोकानां क्षेमदर्शिनः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

क्षेमचिन्तकास्ते विज्ञापिता भृग्वादय ऋषयः नृणां गोप्तरि त्रातर्यसत्येविद्यमाने सति पशुसाम्यतां पशुसमानरूपतां पश्यन्तः पशुसाम्यतामिति पाठे पशुभिः साम्यं येषां ते पशुसाम्यास्तेषां भावः पशुसाम्यता तां पश्यन्तः ॥ १ ॥

ब्रह्मवादिनः वीरस्य वेनस्य मातरं सुनीथामाहूय तस्यै विज्ञाप्येत्यर्थः प्रकृतीनाममात्यादीनामसंमतमपि वेनं भुवः पतिमभ्यषिञ्चन् भुवः पतिं चक्रुरित्यर्थः ॥ २ ॥

श्रुत्युग्रदण्डं वेनं राजासने प्रतिष्ठितं श्रुत्वा दस्यवश्चोरादयः सर्वेभ्यः त्रस्ता भीताः आखवः मूषका इव सद्यः निलिल्युर्लीना बभूवुः ॥ ३ ॥

स वेनः आरूढं नृपस्थानं राजासनं येन सः अष्टविभूतिभिः लोकपालैश्वर्यैः अणिमादिभिर्वा उन्नद्धः गर्वितः अत एव स्तब्धः विवेकशून्यः: स्वतः स्वयं संभावितः महत्तरैरिति भावः आत्मानं महाभागं महाबुद्धिमन्तं महाभाग्यवन्तं वा मेने ॥ ४ ॥

एवं तथा ऐश्वर्यमदेनान्धः मत्तः निरङ्कुशो गज इवोत्सिक्तः उत्थितः रथमास्थाय अभिरुह्य रोदसी द्यावापृथिव्यौ कम्पयन्निव पर्यटन् ॥ ५ ॥

हेद्विजाः! कश्चिदपि यागदानहोमादिकं न कर्तव्यमित्येवं रूपं धर्मं धर्माभासं भेरीध्वानेन न्यवारयत यत एवमतो दुर्मदः ॥ ६ ॥

मुनयो भृग्वादयः सत्रिणः याज्ञिका अपि मिलिताः सन्तः दुर्दमस्य वेनस्य चेष्टितमवेक्ष्य लोकानां व्यसनं दुःखं विमृश्य कृपया ऊचुः ॥ ७ ॥

उक्तमेवाह । अहो इति । मूलतश्चाग्रतश्च प्रदीप्ते ज्वलिते काष्ठे तन्मध्यवर्तिनां यथोभयतो व्यसनमेवं तस्करेभ्यः पालकात् पार्थिवाच्च दुःखं प्राप्तमित्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुरुवाक्यं श्रद्धयानुतिष्ठतामिहामुत्र श्रेयः स्यादकुर्वतामनर्थश्चेत्येतन्निरूप्यतेऽस्मिन्नध्याये । तत्रादौ भृग्वादिभिर्ऋषिभिः क्रियमाणां राज्ये वेनस्याभिषेकं वक्ति । भृग्वादयइति । क्षेमानाप्तत्रायुमिति यादवः पशुसाम्यतां- पशुसाधर्म्यसाङ्कर्यम् ॥ १ ॥

हे वीर! प्रकृत्या स्वभावेनामात्यादिबुद्ध्याराज्यासंमतमनुचितम् २

अस्मिन्नभिषिक्ते सत्येको गुणो राज्यस्य स्यादित्याह। श्रुत्वेति । निलिल्युर्निलीनाः ॥ ३ ॥

पालके राज्ञि बहवो गुणा भवन्ति तत्रैकोगुण इति विशिष्योच्यत इतिचेत् सत्यमस्य सर्वे दोषा एव सन्तीति वक्तुमुपक्रमते। स आरूढेति । आरूढं नृपस्थानं सिंहासनं येन स तथामन्त्र्यामात्यदूतराज्यकोशदुर्गजनपदपुरोहितास्थैर्वाणिमादिभिर्वाष्टविभूतिभिरुन्नद्धः स्तब्धः महत्सूत्थानाद्याचारशून्यः ॥ ४ ॥

अतो लोकस्य किमवद्यमभूदत्राह । एवं मदान्धइति । उत्सिक्त उद्धतः ॥ ५ ॥

हे द्विजाः! ॥ ६ ॥

तत्र निग्रहानुग्रहसमर्थाः मुनयः किमकार्षुरिति तत्राह। वेनस्येति । सत्रिणो यज्वानः ॥ ७ ॥

उभयतस्तस्करपालकयोः । दारुणीति सप्तमी षष्ठ्यर्थे दारुणः उभयतो दीप्तो वह्निः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भृग्वादय इति युग्मकम् ॥ १ ॥ २ ॥ ३ ॥

स्वतः स्वेनैव सम्भावितः शूरोऽहं पण्डितोऽहमित्येवं कृतात्मसम्भावनः आत्मसम्भावित इति चित्सुखः ॥ ४ ॥

एवमिति युग्मकम् ॥ ५ ॥ ६ ॥

सत्रिणः सत्रित्वावस्थायां मिथो मिलनं भवतीति तदा मिलिताः सन्तीत्यर्थः ॥ ७ ॥

उभयत इति वनदुर्गादौ पलायने तस्करेभ्यः राष्ट्रे स्थितो पालकादित्यर्थः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चतुर्दशेऽभिषिक्तस्य वेणस्याधर्मवर्तिनः ।
प्रबोधितहतस्योरुमथनं मुनिभिः पुनः ॥ १ ॥

साम्यतामिति स्वार्थे ष्यञ् पश्यन् मेषादीन् यथा वृगाल वृकादयो नाशयन्ति तथैव नृन् दस्यव इत्यर्थः ॥ १ ॥

प्रकृत्यसंमतं प्रकृत्या सम्मतमिति पाठद्वयं प्रकृतिरमात्यादिः स्वभावश्च तासां तया च असम्मतः ॥ २ ॥ ३ ॥

अष्टविभूतिभिरष्टदिग्वर्तिनीभिः सम्पत्तिभिरिति सप्तद्वीपाधिपत्यं ध्वनितम् । स्तब्धो गर्ववान् स्वतः स्वेनैव सम्भावितः शूरोऽहं पण्डितोऽहमिति कृतात्मकत्थनः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

मूलतश्चाग्रतश्च दीप्ते प्रज्वलितकाष्ठे तन्मध्यवर्तिनां पिपीलिकादीनां यथा उभयतो व्यसनमेवं लोकस्य दुर्गादौ पलायने तस्करात् राष्ट्रे स्थितौ पालकात् राजतोभयमित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पालकाभावात् वेणस्याभिषेकोदुर्वृत्तत्वाद्वधश्च मुनिभिः कृत इति चतुर्दशे वर्ण्यते । भृग्वादयइति ॥ १ ॥

प्रकृत्यसंमतममात्यादीनामसंमतमपि धर्मपालकं वंशजत्वपक्षपातेनाभ्यषिञ्चन् ॥ २ ॥

निलिल्युः अलीना बभूवुः ॥ ३ ॥

आरूढं नृपस्थानं येन सः अष्टविभूतिभिर्लोकपालैश्वर्यैः उन्नद्धः उद्धतः अतएव स्तब्धोऽनम्रः ॥ ४—५ ॥

हेद्विजाः ! त्रैवर्णिकाः कश्चिदपि देशे काले वा यष्टव्यं नेत्यादि वाक्यश्रावणपूर्वकेन भेरीघोषेण सर्वतो धर्मं न्यवारयत् ॥ ६ ॥

सत्रं बहुकर्तृको यागः सोऽस्ति येषां ते ॥ ७ ॥

उभयतो दारुणि काष्ठे निवद्धजन्तोरिव लोकस्योभयतो व्यसनं दुःखं प्राप्तं भवति ॥ ८—९ ॥

अराजकभयादेष कृतो राजा तदर्हणः ।
ततोऽप्यासीद्भयं त्वद्य कथं स्यात् स्वस्ति देहिनाम् ॥ ९ ॥
अहेरिव पयःपोषः पोषकस्याप्यनर्थभृत् ।
वेनः प्रकृत्यैव खलः सुनीथागर्भसंभवः ॥ १० ॥
निरूपितः प्रजापालः स जिघांसति वै प्रजाः ।
तथापि सान्त्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् ॥ ११ ॥
तद्विद्वद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः ।
सान्त्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत् ॥ १२ ॥
लोकधिक्कारसंदग्धं दहिष्यामः स्वतेजसा ।
एवमध्यवसायैनं मुनयो गूढमन्यवः ।
उपव्रज्याब्रुवन् वेनं सान्त्वयित्वा च सामभिः ॥ १३ ॥

मुनय ऊचुः

नृपवर्य ! निबोधैतद्यत्ते विज्ञापयाम भोः ।
आयुः श्रीबलकीर्तीनां तव तात ! विवर्द्धनम् ॥ १४ ॥
धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः ।
लोकान् विशोकान् वितरत्यथानन्त्यमसंगिनाम् ॥ १५ ॥
स ते माविनशेद्वीर ! प्रजानां क्षेमलक्षणः ।
यस्मिन् विनष्टे नृपतिरैश्वर्यादवरोहति ॥ १६ ॥

भाषाटीका।

मैत्रेयजी [illegible] आदिकउहां के सब मुनि लोग संसार के कल्याण [illegible] के न रहनेसे मनुष्यों को पशुके तुल्य होना समझ[illegible]

उन म[illegible] पुत्र वाली सुनीथा से कह कर प्रजों के असंमत [illegible] पति का अभिषेक करदिया ॥ २ ॥

उग्र दंड [illegible] को राजासन पर बैठे सुनकर चौरादिक स[illegible] जैसे सर्प से डरकर मूसा होजाते हैं ॥ ३ ॥

वह राजा आ[illegible] से अभिमानी होकर अष्टैश्वर्यसे गर्वित होने से अप[illegible] करने वाला अनम्रहो महात्मों का अपमान करने लगा [illegible]

निरंकुश हाथ[illegible] मद से अंधा होकर रथ पर बैठकर पृथिवी आकाश कं[illegible] लगा ॥ ५ ॥

हे ब्राह्मणो ! यज्ञ न[illegible] होम नहीं करना इस प्रकार कह कर नगारा ब[illegible] सब देश मे धर्म को बन्द करने लगा ॥ ६ ॥

ऋषि लोगों ने वेन राजा का खोटा आच[illegible] लोगों पर कृपा कर के मंत्रियों के सहित कहने लगे ॥ ७ ॥

अहो दोनो तरफ से मनुष्यों को बडा दुःख होगा जैसे दोनों तरफ से आग लगने से लकडी के बीच के कीडों को दुःख होवे तैसे राजा नहीं रहा तो चोरों का डर था राजा हुआ तो राजाही का डर है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवाहुः । अराजकभयादिति । अतदर्हणो राज्यानर्हः ॥ ९ ॥

अस्माकमप्यनिष्टं जातमित्याहुः अहेर्यथा पयःपोषः क्षीरेण पोषणं पोषकस्याप्यनर्थं बिभर्ति पुष्णाति तदेवाहुः । वेन इति ॥ १० ॥

निरूपितो नियुक्तोऽस्माभिः सान्त्वयेमोपपत्तिभिः प्रार्थयिष्यामः तस्य पातकम् ॥ ११ ॥

स्वस्य तत्पातकस्पर्शो हेतुः तत्पातकित्वं विद्वद्भिः ॥ १२ ॥

गूढो मन्युर्येषाम् सामभिः प्रियोक्तिभिः ॥ १३ ॥ १४ ॥

निष्कामानामानन्त्यं मोक्षमपि ॥ १५ ॥

मा विनशेन्मा विनश्यतु ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिन्याख्या दीपिकाटिप्पणी ॥

तदेवाहुरुभयतोभयमेवाहुः अराजकभयादिति सार्द्धकम यथाऽनर्थं पुष्णाति तथा ततोऽपि राजत्वेन पुष्टादपि भयमासीदिति योजनीयम् ॥ ९ ॥

तदेव भयनिवर्त्तकाद्राजतोऽपि भयमेव ॥ १० ॥

तस्य राज्ञः पातकं प्रजाहिंसालक्षणं स्वस्य मुनिसमूहस्य राजकृतपातकस्पर्शो ॥ ११-१२ ॥

स्वतेजसा तपोबलेन ॥ १३ ॥

मुनय ऊचुरिति बहुत्र नास्ति ॥ १४ ॥

लोकान् भोगान् असंगिनां निष्कामानामानन्त्यं मोक्षमपि ॥ १५—१६—१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाहुः अराजकभयादिति अतदर्हणः राज्यानर्होऽप्येष वेनः अराजकभयाद्राजा कृतः ततो राज्ञोऽप्यद्य भयमासीत् देहिनां कथं स्वस्ति सुखं स्यात् ॥ ९ ॥

अस्माकमप्यनिष्टं जातमित्याहुः अहेः सर्पस्य यथा पयःपोषः क्षीरेण पोषणं पोषकस्याप्यनर्थं करोति तथा तदेवाहुः सुनीथाया अङ्गात्संभूतो वेनः प्रकृत्या स्वभावेनैव खलः दुरात्मा ॥ १० ॥

अस्माभिः प्रजापालो निरूपितः नियुक्तः स एव प्रजाः जिघांसति हन्तुमिच्छति तथापि घातुकत्वेऽप्यमुं वेनं सान्त्वयेम उपपत्तिभिः प्रार्थयिष्यामः ततस्तस्य पातकमस्मान्नस्पृशेत् ॥११॥

विधेयस्य प्रणतिपूर्वकत्वात्तमाहुः तत्तस्य दौरात्म्यं विद्वद्भिर्जानद्भिरप्यस्माभिरसद्वृत्तो वेनः नृपः कृतः अस्माभिर्नृपीकरणहेतोरयं भूतानि द्रुह्यति अतोऽस्माभिः सान्त्वितश्चेन्न भूतद्रोहकृतं पापमस्मान् स्पृशतीत्यर्थः सान्त्वनेनाप्रसन्ने सति कृत्यमाहुः । सान्त्वित इति । सान्त्वितः प्रार्थितः अधर्मकृदयं वेनोऽस्माकं याच्ञां नग्रहीष्यति चेत् तर्हि लोकानां धिक्कारेण निन्दया नितरां दग्धं स्वतेजसा स्वेषामस्माकं तेजसा तपोबलेन दहिष्यामः ॥ १२ ॥

एवमध्यवसाय निश्चित्य गूढा मुनयः वेनमुपव्रज्य समीपमागत्य सामाभिः प्रियोक्तिभिः वेनं सान्त्वयित्वा अब्रुवन् प्रार्थनापूर्वकमब्रुवन्नित्यर्थः ॥ १३ ॥

हे नृपवर्य ! वयं यद्विज्ञापयामहे तन्निबोध सावधानचित्तः आधत्स्व कथंभूतं तत् तव आयुरादीनां विवर्द्धनं विशेषेण वर्द्धकम ॥ १४ ॥

किंतदित्याहुः। धर्म इत्यादिभिरष्टभिः । पुंसां वाङ्मनःकायानां वृत्तिभिर्व्यापारैः धर्मः ईश्वराराधनरूपो धर्मः आचरितोऽनुष्ठितः लोकान् विशोकान् निर्दुःखान् वितरति कुरुते असंगिनां विरक्तानामानन्त्यं मोक्षसुखानन्त्यमपि वितरति ॥ १५ ॥

हे वीर ! सः लोकसुखकरो मोक्षसुखानन्त्यकरश्च मा विनश्येत् न नश्येत् यस्मिन्नुक्तधर्मे विनष्टे सति नृपतिः पार्थिवः ऐश्वर्यादवरोहति भ्रश्यति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दारुणा इव उभयतोऽप्यसने कथमत्राह । अराजक इति । न तस्य राज्यस्यार्हणो योग्यो नभवतीति अतदर्हणः ९ ॥

अयमप्यस्माकमनर्थकर इत्याहुरित्याह । अहेरिवेति ॥ १० ॥

युष्माभिः कथंपोषित इति तत्राह । प्रकृत्येति । सुनीथागर्भसंभवत्वात् अस्माभिः प्रजापालो निरूपितः स सांप्रतं प्रजा जिघांसति वै हन्तुमेवाकांक्षति वै ॥ ११ ॥

तर्हि किं क्रियते इति तत्राह । तथापीति । प्रकृत्याखलत्वादस्मदुक्तं न शृणोति यद्यपि तथापीति । सांत्वने हेतुमाह । मास्मानिति । युष्मत्सांत्वनाग्रहणे किंबाधकं करिष्यन्ति तदशक्तौ तत्सांत्वनं व्यर्थमाह । तद्विद्वद्भिरिति । असद्वृत्त इति । तस्यादौरात्म्यं विद्वद्भिः ॥ १२—१३ ॥

एवं जिज्ञासमानाः कालक्षेपं नाकुर्वन्नित्याह । एवमिति ॥१४॥

आनन्त्यमसंगिनां फलाभिसंधिरहितानाम ॥ १५ ॥

स धर्मोमाविनशेत् नष्टोनस्यात् बाधकमाहुरित्याह । यस्मिन्निति अवरोहति अधोगाति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अराजकेति सार्द्धकम् ॥ ९ ॥

टीकायां पुष्णातीत्यनन्तरं । तथा ततोऽप्यासीद्भयमित्यन्वय इति ज्ञेयम ॥ १०—१३ ॥

मुनय ऊचुरिति बहुत्र नास्ति ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अतदर्हणः राज्यानर्हः देहिनामन्येषां का कथा अस्माभिरेवाय मभिषिक्तः सम्प्रत्ययमस्मानेव,न यच्छत्यमित्याद्यायय (?) आर्त्तात्याहुः अहेरिति ॥ ९—१० ॥

सान्त्वनेन उपपत्तिभिः प्रबोधयाम तथा सति अस्मान् पापं न स्पृशेत् अन्यथातु पापं स्पृशेदेवेत्याहुः तत्पातकं धिग्दन्द्विरिति ॥ ११ ॥ १२ ॥

दहिष्यामः भक्ष्यामः ॥ १३ ॥ १४ ॥

असंगिनां निष्कामानामानन्त्यं मोक्षं ॥ १५ ॥

मा विनशेत् मा विनश्यतु ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यथाहेः पयसा पोषः पोषणं पोषकस्याप्यनर्थभूद्भवति तथा प्रकृत्या स्वभावेनैव खलो वेनः प्रजापालनिरूपितस्तन्निरूपणमस्माकमप्यनर्थभूदित्युत्तरेण योजना ॥ १० ॥

तत्पातकमस्मदभिषिक्तवेनस्य पातकम् ॥ ११-१२-१३-१४ ॥

पुंसां सकामानां विशोकान् स्वर्लोकवर्जितान् बहुकालसुखदानित्यर्थः वितरति ददाति असंगिनां निष्कामानामानन्त्यम अनन्तस्य भगवतः साधर्म्यम वितरति ॥ १५-१६-१७ ॥

राजन्न साध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः ।
रक्षन् यथा बलिं गृह्णन्निह प्रेत्य च मोदते ॥ १७ ॥
यस्य राष्ट्रे पुरे चैव भगवान् यज्ञपूरुषः ।
इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमान्वितैः ॥ १८ ॥
तस्य राज्ञो महाभाग ! भगवान् भूतभावनः ।
परितुष्यति विश्वात्मा तिष्ठतो निजशासने ॥ १९ ॥
तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे ।
लोकाः सपाला ह्येतस्मै हरन्ति बलिमादृताः २०

भाषाटीका ।

राजा नहीं होने बाधक था तो भी अराजक भय से राजा किया तो उस से भी बडा भय होगया तो कैसे मनुष्यों का भला होगा जैसे सर्प के दूध पिलाने से पिला ने वाले को भी दुख दाई है ॥ ९ ॥

क्योंकि वेन तो स्वभाव ही दुष्टी थाके गर्भ से खल रूप पैदा हुआ है ॥ १० ॥

उस को राजा बनाया तो वही प्रजा को मारने चाहता है तो भी हम इस को समझावैंगे तो हम को उस का पाप नहीं लगेगा ॥ ११ ॥

इस बातको नहीं जानकर हमने वेनको राजा बनाया अब वह अधर्मी समझाने से हमारी बातको नहीं मानेगातो लोगोंके धिक्कारसे जलाहुआ है तिसको अपने तेजसे हम जलावैंगे ॥ १२ ॥

इस [illegible] विचार करके मुनि लोगों ने क्रोधको छिपाकर वेन रा[illegible] जाकर मीठे वचनों से समझाया ॥ १३ ॥

मुनि[illegible] हे राजवर्य ! जो हमलोग निवेदन करते हैं सो आप[illegible] बात आपका आयुःलक्ष्मीवल कीर्त्ति की बढाने[illegible]

मनु[illegible] कर्म बुद्धि से आचरण किया जो धर्महै सो दिव्य[illegible] करता है निष्काम पुरुषों को मोक्षफल देताहै ॥ १५ ॥

हेवीर ! [illegible] रूप वह तुम्हारा धर्म मत नष्टहो जिसके नाश [illegible] र्य से नष्ट होजाताहै ॥ १६ ॥

श्री[illegible] वार्थदीपिका ।

असाधवो ये [illegible] था यथा शास्त्रम् ॥ १७ ॥ ॥ १८ ॥ १९ ॥ २० ॥

श्रीराधार[illegible] विरचिता
दीपि[illegible] णी ।

यस्य राष्ट्र इति यु[illegible] र्वात्मा मनो येषां तैः ॥ १८-१९ ॥

एतस्मै परमप्रसिद्धाय ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे राजन् ! असाधवो ये अमात्यास्तेभ्यः चोरादिभ्यः यथा यथा शास्त्रं प्रजाः पालयन् ताभ्यो बलिं पूजां गृह्णन् स्वीकुर्वन् इह लोके प्रेत्य परलोकं प्राप्य च मोदते सुखीभवति ॥ १७ ॥

यस्य राज्ञो राज्ये पुरे च स्थितैश्चातुर्वर्ण्यैश्चातुराश्रम्यरूपतया व्यवस्थितैर्जनैः यज्ञानां भोक्ता प्रभुश्च भगवान् 'स्वधर्मेण पञ्चयज्ञादिरूपेण इज्यते आराध्यते ॥ १८ ॥

हे महाभाग ! तस्य निजशासने निजं स्वकीयं यच्छासनं शास्त्रविहितं प्रजापालनादिरूपं कर्म तस्मिन् तिष्ठतः राज्ञः विश्वात्मा सर्वात्मा भूतभावनः भूतानि भावयत्युत्पादयतीति भूतभावनः जगत्कारणभूतो भगवान् परितुष्यति ॥ १९ ॥

परितुष्यतु भगवान् 'किंतेन तत्राह । तस्मिन्निति । जगतामीश्वरा ब्रह्मादयस्तेषामपीश्वरे तस्मिन् भगवति तुष्टे सति सपालकाः पालकैः सहिताः लोका आदृताः आदरेण युक्ता एतस्मै परितुष्टभगवते राज्ञे बलिं हरन्ति प्रापयन्ति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कोऽसौ धर्मो यो लोकान् दधातीति तत्राहुरित्याह । राजन्निति । असाधवो दुर्जनाः अमात्याः सचिवास्तेभ्यः "साधुस्त्रिषूचिते सौम्यं सज्जने वार्धुषौ पुमान्,,इत्यभिधानम्"यथा सादृश्ययोग्यत्ववीप्सास्वार्थानतिक्रम,, इतिवचनात् यथा योग्यं षष्ठांशं बलिं करम् ॥ ॥ १७ ॥ १८ ॥ ॥ १९ ॥

तत्तुष्टया किं फलं स्यादित्यत्राह । तस्मिन्निति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यस्य राष्ट्र इति युग्मकम् ॥ १८—२१ ॥

तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं वेदमयं तपोमयम् ।
यज्ञैर्विचित्रैर्यजतो भवाय ते राजन्! स्वदेशाननुरोद्धुमर्हसि ॥ २१ ॥
यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः ।
स्विष्टाः सुतुष्टाः प्रदिशन्ति वाञ्छितं तद्धेलनं नार्हसि वीर! चेष्टितुम् ॥ २२ ॥

वेन उवाच

बालिशा बत यूयं वा अधर्मे धर्ममानिनः ।
ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते ॥ २३ ॥
अवजानन्त्यमी मूढा नृपरूपिणमीश्वरम् ।
नानुविन्दन्ति ते भद्रमिह लोके परत्र च ॥ २४ ॥
को * यज्ञ पुरुषो नाम यत्र वो भक्तिरीदृशी ।
भर्तृस्नेहविदूराणां यथा जारे कुयोषिताम् ॥ २५ ॥
विष्णुर्विरिञ्चो गिरिश इन्द्रो वायुर्यमो रविः ।
पर्जन्यो धनदः सोमः क्षितिरग्निरपां पतिः ॥ २६ ॥
एते चान्ये च विबुधाः प्रभवो वरशापयोः ।
देहे भवन्ति नृपतेः सर्वदेवमयो नृपः ॥ २७ ॥
तस्मान्मां कर्मभिर्विप्रा! यजध्वं गतमत्सराः ।
बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक् पुमान् ॥ २८ ॥

मैत्रेय उवाच

इत्थं विपर्ययमतिः पापीयानुत्पथं गतः ।
अनुनीयमानस्तद्याच्ञां न चक्रे भ्रष्टमङ्गलः ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वर्णाश्रमधर्मेषु आत्मा मनो येषां तैः ॥ १८—२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वर्णाश्रमेषु तदनुरूपेषु धर्मेषु आत्मा मनो येषां तैः ॥ १८ ॥
निजशासने स्वकीये प्रजापालनादिधर्मे ॥ १९-२० ॥

भाषाटीका ।

हेराजन्! खोटे मंत्रियों से चोरादिकोंसे प्रजों को रक्षा करके किस्ती लेनेसे इस लोक परलोक में सुख पाता है ॥ १७ ॥

जिसके राज में ग्राम में वर्णा श्रम धर्म युक्त मनुष्यों के द्वारा स्वधर्म से यज्ञपुरुष विष्णु भगवान् पूजित होते हैं ॥ १८ ॥

हे महा भाग! भूतपालक भगवान् विश्वात्मा निजआज्ञामें रहने वाले उस राजा के उपर प्रसन्न होते हैं ॥ १९ ॥

सब जगत्के ईश्वरों के ईश्वर जो हैं लोकपालों के सहित लो जिन को भेंट देतेहैं उनभगवान् के प्रसन्न होने सें फिर कौनसी वस्तु दुर्लभ है ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वान् लोकांश्च तत्पालानमरांश्च तत्प्रापकान्यज्ञांश्च सङ्गृह्णाति नियच्छतीति तथा तं विचित्रैर्यज्ञैर्विभिः भवाय समृद्धये स्वदेशांस्तद्वासिनो जनान् अनुरोद्धुमनुवर्तितुम् ॥२१॥
युष्मद्विषये स्वदेशे हरेः कला अंशाः सुराः तेषां सुराणां हेलनमवज्ञाम् ॥ २२ ॥
बालिशा अज्ञाः वृत्तिदमस्मादिरूपं मां हित्वा ॥ २३ ॥ २४ ॥
भर्तृस्नेहो विदूरो येषाम् ॥ २५ ॥ २६ ॥
देहे भवन्ति नृपतेरतो नृपतिरीश्वरः इतरे तदंशा इति भावः ॥ २७ ॥
बलिं च करादिकम् अग्रभुक् राजा ॥ २८ ॥ २९ ॥

---

* कोतशुकदेवः

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्यदीपिकाटिप्पणी ।

नियच्छत्यधितिष्ठति अनुवर्त्तितुं तत्रैव यजने प्रवर्त्तयितुम् ॥ २१—२२ ॥

अधर्मे आरोपासने वृत्तिदमिति अत्रैव मया फलमुखादिस्फोटने निषिद्धे सद्य एव मरिष्यथ इति भावः ॥ २३—२४—२५ ॥

विष्णुरिति युग्मकम् ॥ २६ ॥ २७ ॥

तस्मादीश्वरत्वात् ॥ २८ ॥

अनुनीयमानस्सामभिः प्रबोध्यमानः ॥ २९ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वान् लोकान् तत्पतींश्चामरानमरत्वप्रापकान् यश्च संगृह्णाति नियच्छतीति तथा त्रयीमयं धर्माधर्मादिबोधकत्रयीप्रचुरं वेदैकप्रमाणकत्वेन तत्प्राचुर्यं विवक्षितं त्रयीभागद्वयात्मकत्वात् किंरूपं पूर्वभागप्राचुर्यं किंरूपं चोपरितनभागप्राचुर्यमित्यत्र तद्विवेचयन् विशिनष्टि । यज्ञमयं तपोमयमिति । यज्ञप्रचुरं पूर्वभागोदितानां तेषामाराधनत्वे तत्प्राचुर्यं विवक्षितम् आराधनप्रकारप्रकाशकत्वेन पूर्वभागस्य तस्मिन् प्रामाण्यमिति भावः अत्र "सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिकमनुसंधेयं तपोमयं तपांसि उपासनानि तत्प्रचुरमाराध्यस्वरूपगुणादिप्रकाशकत्वेनोपरितनभागस्य प्रामाण्यमिति भावः तं विचित्रैर्देवदेवतादिभिर्नानाविधैर्यज्ञैः ते भवाय मुक्तये भवायेति छेदे ते तव समृद्धय इत्यर्थः यजतः यागं कुर्वाणान् स्वदेशान् तद्वासिनो जनान् अनुरोद्धुम् अनुवर्त्तितुं हे राजन् ! अर्हसि ॥ २१ ॥

यस्य राज्ञो देशवासिभिर्जनैर्भगवानिज्यते सोऽपि मुच्यत इत्यभिप्रायेण ते भवायेत्युक्तं तदेव प्रपञ्चयति । यज्ञेरिति । युष्मद्विषये तव देशे द्विजातिभिर्वितायमानेन निरन्तरं क्रियमाणेन यज्ञेन हरेर्भगवतः कलाः शरीरभूताः सुराः इन्द्रादयो देवाः स्विष्टाः यथाशास्त्र[illegible]त एव तुष्टास्तव वाञ्छितं प्रदिशन्ति प्रयच्छन्ति [illegible] तेषां देवानां हेलनम् अवज्ञां चेष्टितुं कर्तुं नवाहसि [illegible]

एवं [illegible] आहेत्याह । वेन इति । यूयं बालिशा अज्ञाः वै नूनं [illegible] अधर्मे धर्ममानिनः धर्मं मन्वानाः तदेव प्रपञ्चयति ये [illegible] वृत्तिदम् अन्नादिप्रदं प्रभुं हित्वा जारं पतिमुपासते [illegible]

ये च मूढा [illegible] समीश्वरमवजानन्ति अवज्ञां कुर्वन्ति ते जना इह पर[illegible] कल्याणं नविन्दन्ति न प्राप्नुवन्ति किन्तु दुःखिता [illegible] २४ ॥

भर्तृस्नेह वि[illegible] सा कुर्योषितां निजस्त्रीणां यथा जारपुरुषे भक्तिः [illegible] वः युष्माकमीदृशीभक्तिः, स यज्ञपुरुषः को नाम [illegible] याम् असम्भावनायां वा॥२५॥

वरशापयोरनुग्र[illegible] प्रभवः समर्थाः विष्ण्वादयोऽन्येच देवा नृपते रा[illegible] वर्तन्ते अतो नृपः सर्वदेवमयः सर्वदेवताप्रचुरः ॥ २६ ॥

तस्मात् नृपस्य [illegible] मामेव हि विप्रा गतमत्सरा यूयं यजध्वं महामेव [illegible] भागादिकं हरत समर्पयत अग्रभुक् आराध्यः [illegible] ॥ २८ ॥

इत्थमेवं विपरीतमतिः पापीयान् उत्पथं कुमार्गं प्राप्तः अनुनीयमानोऽपि प्रार्थ्यमानोऽपि तेषामृषीणां याच्ञां न कृतेयतो ऽयं भ्रष्टमङ्गलः ॥ २९ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि श्रीनारायण एवेज्यत इत्याह । तं सर्वेति । सर्वशब्दः प्रत्येकमभिसंबध्यते सर्वान् लोकानमरान् यज्ञान् सङ्गृह्णातीति सर्वलोकामरयज्ञसंग्रहस्तं अथवा त्रिभिर्वेदैः प्रतिपाद्येषु मुख्यप्रतिपाद्यत्वात्त्रयीमयस्तं सर्वप्रव्याख्यां भगवद्विषयत्वादरिर्द्रव्यमयस्तम् अनेनैव तपोमयमिति व्याख्यातम् ।

सर्वसंग्रहणाद्विष्णुः सर्वसंग्रह उच्यते ।
वेदानां तस्य वक्तृत्वात्प्राधान्यं तु त्रयीमयः ॥
सर्व इन्द्रियपत्वेन मुख्यं सर्वमयस्ततः ।

इतिवाक्यं चात्र प्रमाणं एवं विधं श्रीहरिं विचित्रैर्यज्ञैस्ते तव भवाय भद्राय यजतः स्वदेशान् स्वस्य तव देशा आदेश उपदेशो येभ्यो प्रजिवर्तन्ते स्वदेशाःस्तान् स्वस्य देवोचिसर्जनं दानं येषां ते तथा अभिवार्गित्वमनुरोद्धुमनुकूलीकर्तुमर्हसीत्यर्थः "भवोभद्रेहरे श्रीः" इतियादवः ॥ २१ ॥

इन्द्रादिविषयेण स्वर्गादिफलप्रदेन यज्ञेन हरियजनं कथं संगच्छते प्रत्युत तद्विघातेनानर्थ एवस्यादित्याशङ्क्येन्द्रादयो विष्णोः सन्निधानपात्रत्वेन तदिज्यया तत्प्रीत्या प्रीता अभ्यागताय यपदभीष्टं ददतीत्यन्यथा यजनं तदर्थमेव प्रयच्छन्तीत्या हुरित्याह । यज्ञेनेति । विष्णोः "सन्निहितत्वात्सर्वदेवाहरेः कलाः" इति वचनात्सत्त्वादिकरूपानमयन्तीति ज्ञातव्यं कलबन्धन इति धातोरात्मनि हरेः सन्निधिं बध्नन्तीति कला इत्यर्थः ॥ २२ ॥

ऋषीणां वाक्यामृतं शिरसि वज्रपातोपममिव मन्यमानो गूढार्थपापभिसंधिर्वेनः प्रतिवक्तीत्याह । वेनइति ॥ २३ ॥

स्वबुद्ध्या बालिशत्वमुपपादयति । अवजानन्तीति ॥ २४ ॥

पुनरपि वेनः शापयोग्यापराधमात्मनि कर्तुं वक्ति । को यज्ञइति ॥ २५ ॥

अस्मद्भक्तिविषयो नाम्ना विष्णुः सूर्यादिकारिसास्तदाज्ञानियता गिरिशादयस्तत्परिवारभूता इति भ्रान्तिर्माभूदत एवैते विष्णुप्रभृतयो मयि सन्निहिता अतस्तत्स्वकर्मिमत्वादहमेवा सिद्धोत्तम इज्यतम इत्याह । विष्णुरित्यादिना ॥ २६ ॥

वरशापयोर्दाने प्रभवः सर्वदेवमय इत्युपसंहारः ॥ २७ ॥ २८ ॥

किंफलितं तदाह । इत्थमिति । तेषामृषीणां याच्ञाम ॥ २९ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

विष्णुरिति युग्मकम् ॥ २६—३६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ते भवाय तवैव भूत्यै यजतो यजनकर्तॄन् स्वदेशवर्तिनो जनान् अनुरोद्धुं तत्रैव यजने प्रवर्तयितुम् ॥ २१ ॥

चेष्टितुं कर्तुम् ॥ २२ ॥

इति तेऽसत्कृतास्तेन द्विजाः पण्डितमानिना ।
भग्नायां * भव्य ! याच्ञायां तस्मै विदुर ! चुक्रुधुः ॥ ३० ॥
हन्यतां हन्यतामेष पापः प्रकृतिदारुणः ।
जीवन्जगदसावाशु कुरुते भस्मसाद्ध्रुवम् ॥ ३१ ॥
नायमर्हत्यसद्वृत्तो नरदेववरासनम् ।
योऽधियज्ञपतिं विष्णुं विनिन्दत्यनपत्रपः ॥ ३२ ॥
कोवैनं परिचक्षीत वेनमेकमृतेऽशुभम् ।
प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः ॥ ३३ ॥
इत्थं व्यवसिता हन्तुमृषयो रूढमन्यवः ।
निजघ्नुर्हुंकृतैर्वेनं हतमच्युतनिन्दया ॥ ३४ ॥
ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरम् ।
सुनीथा पालयामास विद्यायोगेन शोचती ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वृत्तिदं पतिमिति अनेन मया फलमूलादिभिरटनं निषिद्धं सद्य एव मरिष्यथेति भावः ॥ २३ ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हेराजन् ! यथा मूले स्कन्धादीनां संग्रहो भवति एवं सर्वेषां लोकानाममराणां तद्वासिनां यज्ञानां तत्प्रापकानां च संग्रहो यस्मिन् सर्वात्मनि तं त्रयीमयं यज्ञबोधकवेदत्रयीरूपं द्रव्यमयं यज्ञियद्रव्यरूपं तपोमयं तप आलोचनं ज्ञानं मोक्षरूपं तत्साधनरूपं विचित्रैः स्वाधिकारप्राप्तैः प्रवृत्तिरूपैर्निवृत्तिरूपैश्च यजतः स्वदेशान् उभयविधान् स्वदेशस्थान् मनुजांश्च तत्तत्कर्मे नियोजयितुं त्वमर्हसि कस्मै प्रयोजनाय ते भवाय ऋद्ध्यै अभवायेति छेदं मोक्षाय एवं कृते तवापि भुक्तिर्मुक्तिश्च भविष्यतीत्यर्थः ॥ २१ ॥

तद्धेलनं तस्य सर्वात्मनो हरेर्हेलनमवज्ञानं चेष्टितुं हेवीर ! नार्हसि ॥ २२ ॥

बालिशा मूढाः वृत्तिदम्पतिं मां हित्वा नार्य इव जारं यज्ञपुरुषमुपासते ॥ २३ ॥ २४ ॥

भर्तुः स्नेहो विदूरे यासां तासां कुयोषितां यथा जारे भक्तिस्तथामत्स्नेहविदूराणां वो युष्माकं यत्र ईदृशी भक्तिः स यज्ञपुरुषः क वर्तते ॥ २५ ॥

पर्जन्यः वृष्ट्यधिष्ठात्री देवता स इन्द्रादभिन्न एव पर्जन्यो भगवानिन्द्र इति वक्ष्यमाणात् ॥ २६—२९ ॥

———

भाषाटीका ॥

सब लोक तथा सब लोकपाल और यज्ञ इन को अपने आधीन रखने वाले वेदत्रय कर्म प्रतिपाद्य वेदोक्त द्रव्य यज्ञस्वरूप तपस्वरूप जो भगवान् तिनके हे राजन् ! विचित्र यजन करने को तुमारे कल्याण के वास्ते सब देशों को आज्ञा देने के अर्थ आप योग्य हो ॥ २१ ॥

हे वीर ! तुमारे राज्य में ब्राह्मणादि कों से विस्तार किये हुये यज्ञ से भगवान् विष्णु के कला इन्द्रादि देवता यज्ञ द्वारा संतुष्ट होने से मनोरथ को देंगे उनकी अवज्ञा नहीं करनी चाहिये॥ २२ ॥

वेनबोला तुम लोग मूर्ख हो अधर्म को धर्म मानने वाले हो तुम से लोग वृत्ति देने वाले पति को छोड़ कर जार पुरुष की सेवा करने वाली स्त्री के तुल्य होते हैं ॥ २३ ॥

जो मूर्ख लोग राजा रूपी ईश्वर का अपमान करते हैं वे लोग इस लोक में तथा परलोक में कल्याण को नहीं प्राप्त होते हैं २४

कौन सा यज्ञ पुरुष है जिस में तुमारी ऐसी भक्ति है पति के स्नेह सो हीन खोटी स्त्रियों की जैसे जार पुरुष मे भक्ति होती है ॥ २५ ॥

विष्णु ब्रह्मा महादेव इन्द्र वायु यम सूर्य पर्जन्य कुबेर चन्द्रमा पृथवी अग्नि समुद्र ॥ २६ ॥

ये तथा और भी वरदान तथा शापके देने वाले सब देवता राजा के शरीर मे रहते हैं तिससे सर्व देवस्वरूप राजा होताहै

तिससे हेब्राह्मणो ! मत्सर छोड़कर वेदोक्त कर्मों से मेरा पूजन करो मेरेको भेट दो मेरेसे दूसरा कौन आगे मागलेने वाला है ॥ २७ ॥ २८॥

मैत्रेयजीबोले इस प्रकार से विपरीत बुद्धि वाला पापी कुमार्ग मे चलने वाला नष्ट मंगल [illegible] उनकी विनती को नहीं सुना ॥ २९ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

तेनासत्कृताः भग्नायां याच्ञायां [illegible] चुक्रुधुः क्रोधं चक्रुः ॥ ३० ॥ ॥ ३१ ॥ ३२ ॥

परिचक्षीत निन्देत अशुभं वेनं [illegible] कृतघ्नतामाह यदनुग्रहविषयः सन्नीदृशमैश्वर्यादि प्राप्तः ॥ ३३ ॥

पूर्वं गूढमन्यवः इदानीं रूढमन्यवः प्रकटकोपाः हुंकृतैर्हुंकारैः ॥ ३४ ॥

स्वाश्रमपदं प्रति ऋषिभिर्गते [illegible] कृते सति विद्यायोगेन मन्त्रसहितया युक्त्या पालयामास [illegible] ॥

* हव्येति विजयध्वजः

एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः ।
हुत्वाग्नीन् सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥ ३६ ॥
वीक्ष्योत्थितान् महोत्पातानाहुर्लोकभयंकरान् ।
अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ॥ ३७ ॥
एवं मृशन्त ऋषयो धावतां सर्वतो दिशम् ।
पांसुः समुत्थितो भूरिश्चोराणामभिलुम्पताम् ॥ ३८ ॥
तदुपद्रवमाज्ञाय लोकस्य वसु लुम्पताम् ।
भर्तर्युपरते तस्मिन्नन्योऽन्यं च जिघांसताम् ॥ ३९ ॥
चोरप्रायं जनपदं हीनसत्त्वमराजकम् ।
लोकान्नावारयन् शक्ता अपि तद्दोषदर्शिनः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुंवद्भाव आर्षः सरस्वत्याः सलिले आप्लुताः कृतस्नानाः विष्णुकथाश्चक्रुः ॥ ३६ ॥

तदा तूत्पातान्वीक्ष्य भुवो भद्रं न भवेत्किमित्याहुश्च ॥ ३७ ॥

एवं मृशन्तस्तर्कयन्त ऋषयः स्थिताः तदा धावतां चोराणां भूरिः पांसुः समुत्थितः ॥ ३८ ॥

ततस्तदा तेषां लोकस्य धनं लुम्पतां जिघांसतां चोपद्रवमाज्ञाय ॥ ३९ ॥

तथा चोरप्रायमराजकं हीनसत्त्वं च जनपदमाज्ञाय शक्ता अप्यवारयन्तो तद्दोषदर्शिनोऽपि जनान् लुम्पतो लोकान्नावारयन्नित्यन्वयः ॥

[illegible]रमणदासगोस्वामिविरचिता [illegible]व्याख्या दीपिकाटिप्पणी ।

म[illegible] ॥ ३० ॥

भुव[illegible]ाम ॥ ३१——३४ ॥

मान्त्रिभिस[illegible]विचारामन्त्रतत्सहितया तैलद्रोण्यां क्षेपणालक्ष[illegible]—३६ ॥

महोत्पा[illegible]पातानित्येव स्वामिसंमतः पाठः ॥ ३७—३८ ॥

तदिति यु[illegible]लुण्ठकेभ्योऽवारणे दोषदर्शिनोऽपि चत्रियाः आत्मन[illegible]स्माकमन्यैरित्युदासीनाः सन्तः जनान् दुर्बलांल्लु[illegible]तो लोकांश्चोरान्नावारयन्नित्यन्वयः ॥ ३९——४० [illegible]

श्रीमद्वीरराघ[illegible]तभागवतचन्द्रचन्द्रिका ।

इतीत्थं पण्डितमा[illegible] तेनासत्कृता अवज्ञातास्ते मुनयः भव्ययाच्ञायां [illegible]कृतायां सत्यां हे विदुर ! तस्मै चुक्रुधुः कुपितवन्त[illegible]

क्रोधमेव प्रपञ्चयति [illegible]कृत्या स्वभावेन दारुणां घातुकः अत एव पापीय[illegible]कोपादुद्धिरांकिः यतोऽसौ जीवन् जगत् भस्मसा[illegible]कुरुते ध्रुवं नूनम् ॥ ३१ ॥

असद्वृत्तोऽयं वेनो राजासनं प्रति नार्हति योग्यो न भवति हि यस्मात् यो वेनः अनपत्रपो निर्लज्जः यज्ञपतिं विष्णुं विनिन्दति ॥ ३२ ॥

अशुभमशुभाचारं वेनमेकमृते विना को वै पुमान् तं विष्णुं परिचक्षीत निन्देत वेनस्य कृतघ्नतामाह । यस्य विष्णोरनुग्रहभाजनः अनुग्रहविषयः सन्नीदृशमैश्वर्यं प्राप्तः ॥ ३३ ॥

इत्थं व्यवसिता निश्चितमना ऋषयः रूढमन्यवः पूर्वं गूढमन्यव इदानीं रूढमन्यवः सन्तः पूर्वमेव भगवन्निन्दया हतप्रायं वेनं हुंकारैर्निजघ्नुः ॥ ३४ ॥

एवं हुंकारैरेव वेनं निहत्य ऋषिभिः स्वाश्रमस्थाने गते प्राप्ते सति शोचती सुनीथा पुत्रस्य कलेवरं विद्यायोगेन मन्त्रसहितया युक्त्या पालयामास ॥ ३५ ॥

पुंवद्भावः आर्षः ते मुनयः एकदा सरस्वत्याः सलिलैराप्लुताः स्नाना अग्निं हुत्वा प्रातरग्निकार्यं कृत्वा सरितस्सरस्वत्यास्तटे उपविष्टाः सन्तः सत्कथां भगवत्कथां चक्रुः कथयामासुः ॥ ३६ ॥

तदा उत्थितान् महोत्पातान् वीक्ष्य उत्पातैर्यल्लोकानां भयं तेनातुरा दुःखिताः अनाथाया भुवः दस्युभ्यश्चोरादिभ्यो भद्रं न भवेत्किमित्याहुः ॥ ३७ ॥

एवम् ऋषिषु मृशत्सु सत्सु सर्वतो दिशं सर्वासु दिक्षु धावतामभितो धनादिकं लुम्पतां हरतां चोराणां भूरिर्बहुलः पांसुः समुत्थितोऽभूत् वसु धनं लुम्पतां चोराणां भर्तरि राज्ञि उपरते नष्टे सति अन्योऽन्यं जिघांसतां हन्तुमिच्छतां लोकानां तथाविधमुपद्रवम् ॥ ३८॥३९ ॥

तथा चोरप्रायमराजकं राजहीनं सत्त्वं च जनपदमाज्ञाय ज्ञात्वा शक्ता अपि वेनमिव हुंकारेणैव चोरान्निहन्तुं शक्ताः अपि ऋषयः तद्दोषदर्शिनः तस्माच्चोरादिहननाख्यो दोषः पापं तं पश्यन्तः घातं न घातका विप्रा इति स्वधर्मं पश्यन्त इति भावः नावारयन् न निवारितवन्तः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

आत्मनि शापसामर्थ्ये समुल्लसति कर्णौ पिधाय निर्याणमनुचितमिति पश्यन्तः शापात्पूर्वंभाविकोपाद्युपमूषय उदाहरन्नित्याह । इतीति । इतिशब्दः प्रकारवचनः इत्थंविषययाच्ञायाम् ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ऊचुरित्याह । हन्यतामिति । अतिरंहा जगद्भस्मसात्क-रोति ॥ ३१ ॥ ३२ ॥

निन्द्यदोषसद्भावाभिन्दतीति किं न स्यादत्राह । कोवेति"निरमिष्टो-निरवद्य,,इतिश्रुतेरशुभोऽयमेव निन्द्यदोषाकर इतिभावः। यस्य हरेर-नुग्रहस्य भाजनं यस्यानुग्रही यस्मिंस्त यदनुग्रहः पुमान् स एव भाजनं वा तदनुग्रहरहितत्वादयं हन्तव्य इत्यर्थः अत्र क्रोधवचनयोः क्रमकरणमेकैकं हुङ्कारमात्रं समापयेदिति बुद्ध्या कृतमिति ज्ञातव्यम् ॥ ३३ ॥

मरेत्युक्तिः श्रोतॄणां श्रोत्रदुःसहेति प्रकारान्तरेण तं जघ्नु-रित्याह । इत्थमिति । एवं मारितो वेनः कं लोकमवाप ऋषीणां तन्मतदूषकत्वात् के तस्यानुष्ठातारस्तन्मतनिरासिनः पृथोश्च चिप्रभावित्वात्तुत्सन्नप्रायमिति च वक्तुं न युक्तं तत्र तत्र दृश्य-मानत्वादिति सर्वम्"अहं * ब्रह्मेति वेनस्तु व्यायतापाधरं तमः। तद्व्याख्यान्तोमहीं व्याप्तो मेयोव्यापयतोऽनिशम् । असुरा राक्षसाश्चैव पिशाचास्तत्पथि स्थिताः । भूमौ तत्पृथुना सर्वं निरस्तं महिमात्मना। पुनः कलियुगे प्राप्ते अष्टाविंशतिमे मनोः । वैवस्वतस्य समये जाता: लोकवशा भुवि । व्यापयन्ति दुरात्मानो मणिमांस्तत्पुरः सर,, इत्य-तोऽत्र तु ग्रन्थबाहुल्याद्व्यत्र विस्तृतत्वाच्च ज्ञातुमनर्थावितत्वाच्च न प्रपञ्चितमिति ज्ञातव्यं तेषां लोकवशानां पुरःसरोऽग्रगन्ता मुख्य-इत्यर्थः ॥ ३४ ॥

वेनस्य पुत्राभावादषीणां क्रोधात् पुरोहितस्य भीतत्वात्प्रेत-कार्यमन्त्रबलक्रभावात्परं कलेवरं किंकृतमत्राह । ऋषिभिरिति । विद्या-योगेन मन्त्रौषधादिविद्योपायेन शोचतीत्येन मातृस्वभावो दर्शितः ॥ ३५ ॥

एकः वेनं घ्नन्त्वा तपोबलादन्यमेकं राजानं चक्रुस्तद्धन्यायाभावा-दूर्ध्वमासुः कलेवरं मुनयः किमकुर्वन्निति परीक्षितः शङ्कां परिहर-न्नुत्तरकथाप्रसंगमाह । एकदेति । सरयूनाम्नो नद्याः सलिले आप्लुताः कृतस्नानाः सतोऽग्न्यर्हितस्य विष्णोः कथां यदा चक्रुः ॥ ३६ ॥

तदा महोत्पातान् वीक्ष्याहुरित्यन्वयः किमाहुरिति तत्राह । अपीति । अपिशब्दस्य भवेदित्यनेनान्वयः प्रजानाया हेतुगर्भविशे-षणादभद्रं संभावितमिति प्राचोचामित्यर्थः ॥ ३७ ॥

वसुलुम्पतां चोराणां सकाशाद्भूमेः पांसुः समुत्थित इत्यन्व-यः ॥ ३८ ॥

ततः किमभूत्त्राह । तदुपद्रवमिति । तत्तदा लोकस्य चोराणा-मुपद्रवमाज्ञायैव निश्चित्य मृतस्य वेनस्य महीपतेरूरुं तरसा ममन्थु-रित्यन्वयः ॥ ३९ ॥

---

*अत्रभगवन्निन्दायाः फलं निजघ्नुरिति प्रसिद्धाहिंसैवेतिभाति नचतद्युक्तं भगवन्निन्दयावेनोद्विजैस्तमसिपातित इतिप्रमाणेतमः प्राप्तिश्चवनां फलमित्युक्तम् । अतोऽसमाख्याप्रमाणेनाभिप्रायमाह ॥ अहंब्रह्मेति ॥ पुनरिति ॥ येपूर्वंगन्धमादनगिरौभीमेन मणिमत्प्र-मुखा निहताः तएवशंकारादिरूपेण जाता इत्यर्थः उक्ताव्यायि-कयाच अहं ब्रह्मास्मीत्युपासनाशाखप्रवृत्तो वेनएवमूलभूतः ॥ तदीयसिद्धान्तानुसारेण मणिमानेव शंकरोभूत्वाद्वैतप्रतिपादक भाष्यमकरोत् । तदनुसारेणचिरसुखादिदुरात्मानोऽपि पञ्चपादि-कादिग्रन्थांश्चक्रुरितिबोध्यम् ॥ तेननिजघ्नुरित्युक्तहननं तमःप्राप्तिरेव हननंहिंसागत्योरितिधातोर्गतिरेव हननम् ॥ सा च गतिस्तमसि स्थिति रूपा , तथाच हिंस्याप्तिस्तमसनियतस्थितिरेवेत्युक्तं भवति ॥ टी०

दुष्यन्तोऽन्येतन्निवारका न सन्ति किमिति तटस्थचोद्यं परिहरन्ती-त्याह । चोरप्रायमिति । सत्यं तद्दोषदर्शिनो यदधर्मकर्तारं नवारय-न्ति संदोषस्तानपि स्पृशेदिति दोषं पश्यन्तः किञ्च शक्तास्तान्निवार णे समर्था अपि लोकाः लुक्प्रकाशन इति धातोः विशिष्टज्ञाना जना हीनसत्त्वं पराक्रमविधुरमराजकं प्रजापालकरहितं जनपदं वीक्ष्य चोरादीन्नावारयन्निति यदत इत्यर्थः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

वीक्ष्येति । तदीतयोतामित्येव स्वामी ॥३७--३८ ॥

तदिति युग्मकम् । चौरेति शक्तानामपि तेषां तदपवारणे हेतुः वरशापाभ्यां तन्निवारणे तपः क्षयरूपदोषदर्शिनः ॥ ३९--४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तेनासत् कृताः ॥ ३० ॥

भस्मसात् कुरुते करिष्यते तस्मादयमेव भस्मीकर्तव्य इति भावः ॥ ३१ ॥ ३२ ॥

एनं विष्णुं कोवा परिचक्षीत निन्देत् । येषां विना यदनुग्रहा-दीदृशमैश्वर्यं प्राप्तोहि अनुग्रहभाजनं भवति तस्मान्निरनुग्रहो-हन्तव्य एवेति भावः ॥ ३३ ॥ ३४ ॥

विद्यायोगेन मन्त्रसहितया तैलादिप्रक्षेपयुक्त्या ॥३५॥

सरस्वादिति पुंवद्भाव आर्षः ॥ ३६ ॥ ३७ ॥

एवं मृशन्तो विचारयन्तः ऋषयो यावत् स्थिता तावदेवेति शेषः ॥ ३८ ॥

तत्तदा तेषां लोकस्य धनं लुम्पतां जिघांसतां [illegible] तथा चौरप्रायं जनपदञ्ज्ञात्वा ये शक्ता अप्यवारणे दोष दर्शिनोऽपि जनाः क्षत्रियलोकाः आत्मन एव रक्षन्तः किम[illegible]रित्यु-दासीना अन्यान् लुम्पतो लोकानावा[illegible] ॥ ३९ ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्त[illegible]ीपः ।

हे भव्य ! ॥ ३० ॥ ३१ ॥

अनपत्रपः निर्लज्जः ॥ ३२ ॥

यदनुग्रहभाजनः अतएव ईदृशमैश्वर्यं प्राप्तः एवं भूतः कः एन मैश्वर्यप्रदं हरिं वेनं कृतप्रभृते परि[illegible]त विनिन्देत् न कोऽपी-त्यर्थः ॥ ३३ ॥

रूढः प्रवृद्धोमन्युर्येषां तैर्हुङ्कृतै[illegible]ः ॥ ३४ ॥

स्वाश्रमपदं स्वाश्रमस्थानं प्रति [illegible]ते गमने कृते विद्यायोगेन पुत्रकलेवरं पालयामास ॥ ३५ ॥

सरस्वत्सलिलाप्लुताः सरस्वत्या[illegible] स्नाताः ॥ ३६ ॥

तदा महोत्पातान् वीक्ष्य [illegible]भूपतिहीनाया इत्युभ्यः अभद्रं न म[illegible] किमित्याहुः ॥ [illegible]

ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः ।
स्रवते ब्रह्म तस्यापि भिन्नभाण्डात्पयो यथा ॥ ४१ ॥
नाङ्गस्य वंशो राजर्षेरेष संस्थातुमर्हति ।
अमोघवीर्या हि नृपा वंशेऽस्मिन् केशवाश्रयाः ॥ ४२ ॥
विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः ।
ममन्थुरूरुं तरसा तत्रासीद्बाहुको नरः ॥ ४३ ॥
काककृष्णोऽति ह्रस्वाङ्गो ह्रस्वबाहुर्महाहनुः ।
ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्द्धजः ॥ ४४ ॥
तं तु तेऽवनतं दीनं किं करोमीति वादिनम् ।
निषीदेत्यब्रुवंस्तात ! स निषादस्ततोऽभवत् ॥ ४५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदेवं मृतान्तो विचारयन्त ऋषयः स्थिताः तदा धावतां चोराणां भूरिः पांसुः समुत्थितः ॥ ३८ ॥

तस्मिन् वेणे भर्तरि भूपतौ उपरते नष्टे सति तस्तेषां चोराणां लोकस्य वसु धनं लुम्पताम् अन्योऽन्यं जिघांसतां च उपद्रवमाज्ञाय ॥ ३९ ॥

अराजकं गोप्तृहीनं दीनमस्त्वं च जनपदं चोरप्रायमाज्ञाय शक्ताः समर्था अपि लोकान् जनवसुलुम्पकान् अन्योऽन्यं जिघांसतः नावारयन् तत्र हेतुम्दर्शयितुं मुनीन् विशिनष्टि । तद्दोषदर्शिन इति । तस्मिन् चोरनिवारणे कर्मणि ते हिंसादिदोषदर्शिन इत्यर्थः तथोक्तं महाभारते "ब्राह्मणानां परोधर्मो वेदानां धारणादपि-अहिंसासत्यवचनं क्षमासन्तोष इत्यपि,, इति ॥ ४० ॥

———

भाषाटीका ।

अप[illegible]मानने वाले उस वेनने जब उन ब्राह्मणों का अप[illegible]व्य! विरजी अपनीयाचना के भंग होनेसे उसपर [illegible] ॥ ३० ॥

बालक[illegible]रो यह स्वभावहीं से दुष्टहै यहजीता रहेगा तो अग[illegible]म करदेगा ॥ ३१ ॥

यह खोटे [illegible] राजा के सिंहासन के योग्य नहिं है जोकि यज्ञके [illegible] भगवान् की निंदा करताहै और निर्लज्ज है ॥ ३[illegible]

जिस ईश्वर [illegible] होनेसे ऐसा ऐश्वर्य को पाया उस को इस अशु[illegible] दूसरा कौन निंदा करेगा ॥ ३३ ॥

इस प्रकार क्रो[illegible]मुनि लोग उस को मारने को उद्यत भये फिर भगव[illegible] से स्वयं मरेहुये॰को हुंकार शब्दों से मार दिया ॥ [illegible]

ऋषि लोग जबअ[illegible] को चलेगये तब सुनीथाने अपने पुत्रके शरीर को विद्या[illegible] रखकर शोच करके उसका पालना किया ॥ ३५ ॥

वेही मुनीलोग एक दिनसरस्वतीजी में स्नान करके उसी किनारे पर होम करके बैठ कर कुछ भगवत्कथा करतेथे ॥ ३६ ॥

आकाश में उठेहुये बडेलोक भयंकर उत्पातों को देखकर बीच मे लगे कदाचित् बिना राजाओंकी पृथवी का कुछ बुरा तो नहीं होने वाला है ॥ ३७ ॥

ऐसे मुनिजन विचार करतेथे इतनेही में लूट मचाकर दौडते हुये चोरोंकी उडाई धूल चारों तरफ से उडती देखपडी ॥ ३८ ॥

पृथवी पति के चलेजानेसे धन चोराने वालों का आपस में मारने वालों का किया हुआ मनुष्यों का उपद्रव भी देखकर ॥ ३९ ॥

सब देशको चोरके बरोबर और निर्बल बिना राजा का देख कर दोषको देखनेवालेहैं समर्थ भी हैं तो भी लोकों को निवारण नहीं किया मुनियोंने ॥ ४० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

शक्तानां क्षत्रियाणामवारणे दोष इति किं वक्तव्यम् समदृगपि शान्तोऽपि ब्राह्मणोऽपि यदि दीनानां समुपेक्षको भवेत्तर्हि तस्यापि ब्रह्म तपः स्रवति ॥ ४१ ॥

अत उपेक्षादोषपरिहाराय नाङ्गस्येत्यादि विनिश्चित्य महीपतेरूरुं तरसा ममन्थुरित्यन्वयः संस्थातुं नाशं गन्तुं यद्वा ऋषय एव लुम्पतो लोकान्नावारयन् कथं भूताः हुंकारेणैव वेनं निवारयितुं शक्ता अपि तत्किं तस्मिन्निवारणे तन्मरणादिदोषदर्शिनः नचोदासत चोरोपद्रुते दीनोपेक्षायां तपोहानिप्रसंगात् नचान्यं तन्निवारकं राजानमकुर्वन् अङ्गवंशोच्छेदस्यानर्हत्वात् अतो वेनस्यैव देहं ममन्थुरिति योज्यम् बाहुको वामनः ॥ ४२-४३ ॥

तमेवाह । काक इव कृष्णः महत्यौ हनू कपोलप्रान्तौ यस्य ह्रस्वौ पादौ यस्य ॥ ४४—४५ ॥

तस्य वंशयास्तु नैषादा गिरिकाननगोचराः ।
येनाहरज्जायमानो वेनकल्मषमुल्बणम् ॥ ४६ ॥
* इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां
चतुर्दशोऽध्यायः ॥ १४ ॥

——○*○——

श्रीधरस्वामिकृतभावार्थदीपिका ।

गिरिः काननं च गोचर आश्रयो न तु पुरादिप्रवेशो येषां तत्र हेतुः येन कारणेनासावहरत्ततस्तस्य वंश्यास्तथा भूताः ॥४६॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
चतुर्दशोऽध्यायः ॥ १४ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिकाटिप्पणी ।

ब्राह्मणा इति युग्मकम् स्रवति नश्यति (१) ॥

अतः क्षत्रियाणां का वार्त्ता ब्राह्मणानामप्युपचारेण दोषश्रवणात् पूर्वार्थे क्षत्रियाणामाचारयत् तेषामेव दोषः समजनि ब्राह्मणास्तु एवं विनिश्चित्य ममन्युरिति वाक्यभेदोऽसंबद्धार्थः प्रतीयतेत्यरुचौ यद्वेति । तर्हि शक्तानामप्युपचारं किमर्थमित्यर्थः तन्मरणादिदोषे तपः क्षयदोषो दर्शितः (२) ॥ ४१ ॥ ४२ ॥

विनिश्चित्येति युग्मकम् द्वितीययोजनायान्तु ब्राह्मणा इति चतुष्कमिति ज्ञेयम् ॥ ४३—४५ ॥

ततः दोषहरणात् तथाभूताः पुरप्रवेशादिभोगहीनाः ॥४६ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
दीपिन्याख्यदीपिकाटिप्पण्यां
चतुर्दशोऽध्यायः ॥ १४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नन्वेवमृषीणामपि शक्तानां चोरोपद्रुतदीनलोकोपेक्षाया तपो नाशप्रसङ्गः स्यादिति ब्राह्मणः समदृगित्यनेनाशङ्कय स्वतपसो नाशाभावार्थं राजान्तरमेव संपाद्य तन्मुखेनैव दीनपरित्राणं कार्यमित्यभिप्रायेण राजान्तरकरणोपायभूतमन्थनादिकं चक्रुरित्याह । नाङ्गस्येति श्लोकाभ्याम् । समदृक् सर्वस्य ब्रह्मात्मकत्वदर्शी तदुपयुक्तशमादिसंपन्नोऽपि ब्राह्मणो यदि दीनानां समुपेक्षकः स्यात् तर्हि तस्य ब्रह्म तप इति यावत् स्रवते गच्छति यथा भिन्नभाण्डस्थं जलं तद्वत् ॥ ४१ ॥

अत उपेक्षारूपदोषपरिहाराय नाङ्गस्येत्यादिविनिश्चित्य महीपतेरूरुं तरसा ममन्थुरित्यन्वयः राजर्षेरङ्गस्यैव वंशः संस्थातुं अवस्थानं प्राप्तुं नार्हति हियतोऽस्मिन्वंशे जाता नृपा अमोघवीर्याः तत्र हेतुः केशवाश्रयाः ॥ ४२ ॥

एवमित्थं विनिश्चित्य ऋषयः विपन्नस्य विपत्तिं प्राप्तस्य मृतस्येत्यर्थः ऊरुंतरसा बलेन ममन्थुः मथितवन्तः तत्र मथिते ऊरौ बाहुकोनाम नर आसीत् उद्बभूव ॥ ४३ ॥

बाहुकमेव विशिनष्टि । काकेति । काक इव कृष्णः अतीवह्रस्वाङ्गः ह्रस्वौ बाहू यस्य महान्तौ हनू कपोलप्रान्तौ यस्य ह्रस्वा पाद् ग्रस्य निम्नं नतं नासिकाग्रं यस्य रक्ते अक्षिणी यस्य ताम्रवर्णाः मूर्द्धजाः केशा यस्य सः ॥ ४४ ॥

तं बाहुकं दीनं किङ्करोमीति दीनवादिनं च राज्यामर्हमभिप्रेत्य निषीदेति उपविशेत्युक्तवन्तः हेतात ! ततः निषीदेति ऋषिवचनात् स बाहुकः निषादोऽभवत् स च निषादजातीयोऽभवदित्यर्थः ॥ ४५ ॥

तस्य बाहुकस्य एव वंश्यास्ते नैषादाः गिरिः काननं गोचरः आश्रयो न तु पुरादिप्रवेशो येषां ते अभवन् तत्र हेतुः येन कारणेनासौ बाहुको जायमानमुल्बणमुत्कटं कल्मषं पापमहरत् स्वीकृतवान् ततस्तस्य वंश्यास्तथा भूता इत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
चतुर्दशोऽध्यायः ॥ १४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सामान्यमुक्त्वा जातिविशेषस्य दोषाधिक्यमुक्तमित्याह । ब्राह्मण इति । ब्रह्मेति भावप्रधानो निर्देशः दुष्टोपद्रवेण दीनानां जनानामुपद्रवं दृष्ट्वा समुपेक्षकस्तूष्णीं भूतः स्यात् इव ब्राह्मणं ब्राह्मण्यं स्रवते नश्यति तन्निदर्शयन्ति । भिन्नेति । [illegible] इदमभिरनुष्ठेयमिति भावः ॥ ४१ ॥

इतोऽपीत्याहुरित्याह । नाङ्गस्येति । [illegible] नाशं प्राप्तुं कुत इत्यतउक्तममोघेति ॥ ४२ ॥

यथामृतमन्थने कालकूटमादावुद्बभूव तथापीति भावेनाह । तत्रेति । तत्र मथ्यमाने सति बाहुको [illegible] "कुब्जाः क्षुद्रदीर्घवंहस्वा वामनबाहुका" इत्यभिधानम् ॥ ४३ ॥

विशिनष्टि । काकेति । महाहनुः [illegible] पृथुकपोलः । निम्ननासाग्रः ऽग्नेनताग्राशिराः ॥ ४४ ॥

ततो निषीदेति वचनात् ॥ ४५ ॥

सकइति तं विशिनष्टि । योऽपाहरदिति । अनेन वेनस्य तुर्याशि भकइति ज्ञायतइति । तथाहि [illegible] राजसः सात्विकस्तामसतामसइति । तत्र तामसांशो [illegible] । राजसांशः स्वर्गस्य गन्ता [illegible] सत्वांशः पृथु । [illegible] तामसांशो वेनः स्वयमन्ध

* अत्र विजयध्वजे अध्यायसमाप्तर्नास्ति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तमोगतः । तदुक्तम् । स्यंशोवेनः समुद्दिष्टः सत्त्वांशः पृथुतामगात् । रजोंऽशश्च दिवं प्राप निषादस्तामसोऽभवत् । इत्ययमवेनश्चतुर्थस्तु महातमसि पातितः। इति रजोंऽशोवेनो दिवङ्गत इति केनाप्युक्त इति बोध्यम्। "पापरूपी पृथग् जातो निषादो वेनदेहतः। यस्मात्तस्मात्पृथोःपुत्राद्रजोवेनो दिवं ययौ,, इत्यनेन परिहृतमिति ग्रन्थान्तरसिद्धत्वादत्र न विस्तृतम् ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तर्ह्युपेक्षन्तामेव तत्राह । ब्राह्मण इति चतुष्कम् ॥ ४१ ॥

तर्हि किं कर्त्तव्यं तत्राह । नाङ्गस्येत्यादि ॥ ४२--४९॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

शक्तानां क्षत्रियाणामयात्रो दोष इति किं वक्तव्यं समदृगपि शान्तोऽपि ब्राह्मणो दीनानां समुपेक्षको भवेत्तर्हि तस्यापि ब्रह्म तपः क्षरति ॥ ४१ ॥

नन्वेवञ्चेत्तर्हि कृष्णादयस्ते मुनयः कथं निश्चिन्ताः स्थिताः सत्यं त एव स्वैर्दस्युवधप्रजापालनाभ्यां तपःक्षयविशेषाधिकमालक्ष्य कोऽप्येको जनो राजा कर्त्तव्य इति व्यवस्थायां परामृश्याहुः । नाङ्गस्येति । संस्थातुं नष्टीभवितुं बाहुको वामन इति प्रथमं तद्देहान्मलांशाः पृथग्भूय प्रकटीबभूवेत्यर्थः ॥ ४२—४४ ॥

निषीदेति । नासौ राजयोग्य इति व्यवसायेत्यर्थः ॥ ४५ ॥

येन कारणेनासौ जायमानो वेनकल्मषमहरत् अग्राह तेन स निषादो [illegible]भवत् । तस्य वंश्यास्तु नैषादा अति नीचा अभूवन् [illegible] ॥

[illegible] दर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
[illegible] र्थस्य सङ्गतः सङ्गतः सताम् ॥

[illegible] देवकृतसिद्धान्तप्रदीपः ।

कि[illegible]कस्य विप्रस्य तपोहानिमङ्गवंशस्य विनाशमर्हतां च विनिश्चित्य दीनरक्षार्थमङ्गवंशप्ररूत्यर्थञ्च वेनस्योरुं ममन्थुरित्याह । ब्राह्मण इतित्रिभिः । समदृगपि शान्तोऽपि ब्राह्मणोऽपि यदि दीनानां समुपेक्षको भवेत्तर्हि तस्यापि ब्रह्मतपः क्षरेत् ॥ ४१ ॥

संस्थातुं नाशं गन्तुम् ॥ ४२ ॥

विपन्नस्य मृतस्य बाहुको ह्रस्वकायः ॥४३॥

महत्यौ हनूकपोलप्रान्तौ यस्य ह्रस्वौ पादौ यस्य सः॥४४-४५॥

येन स जायमानः वेनकल्मषं स्वस्मिन् अहरत् तेन हेतुना तस्य वेनकल्मषरूपिणो वंश्याः पुत्रपौत्रादयः गिरिकाननगोचराः गिरयः काननानि च गोचरा विषया वासस्थानानि येषां ते नतु पुरादिवासा इत्यर्थः ॥४६॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्दशाध्यायार्थप्रकाशः ॥ १४ ॥

भाषाटीका ।

क्योंकि ब्राह्मण समदृष्टि वाला है शान्त है दीनों का उपेक्षा करनेवाला होवे तो उसका तप जैसे फूटे बर्तन मेंसे जल चलाजाता है तैसा चलाजाता है ॥ ४१ ॥

उनने विचार किया कि अंग राजर्षि का वंश नष्ट नहीं होना चाहिये क्योंकि इस वंश में केशव के आश्रय करनेवाले दृढवीर्य पराक्रम वाले राजा होते आयेहैं ॥ ४२ ॥

इस प्रकारसे मुनिलोगोंने विचारकर मरे हुये वेन राजाके अंग को वेग से मर्दन किया तो उसमेंसे एक बामन नामा मनुष्य प्रगट भया ॥ ४३ ॥

कौवा सरीका काला उसका वर्ण था बहुत छोटा अंग भुजा छोटे थे कपोल बड़े थे पाद छोटे थे नासाग्र भाग नीचा था लाल आँखें थीं तांबे सरीके बाल थे ॥ ४४ ॥

हे तात विदुरजी ! वह पुरुष बड़े दीन भावसे नम्रतासे मैं क्याकरों ऐसे बोला तब तिससे मुनियों ने कहाकि (निषीद) बैठो तिसीसे वह निषाद तबसे होगया ॥४५॥

उसके वंशवाले नैषाद जाति के भये वनपर्वतों में रहते हैं जिस निषाद के प्रगट होने से वेनका तीव्र पाप छूटगया ॥४६॥

इतिश्रीभागवतचतुर्थस्कन्धचौदहवां अध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥१४॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः।

---:o:---

मैत्रेय उवाच

अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः।
बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत ॥ १ ॥
तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः।
ऊचुः परमसंहृष्टा विदित्वा भगवत्कलाम् ॥ २ ॥

ऋषय ऊचुः

एष विष्णोर्भगवतः कला भुवनपालनी।
इयं च लक्ष्म्याः संभूतिः पुरुषस्यानपायिनी ॥ ३ ॥
अत्र तु प्रथमो राज्ञां पुमान् प्रथयिता यशः।
पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः ॥ ४ ॥
इयं च सुदती देवी गुणभूषणभूषणा।
अर्चिर्नाम वरारोहा पृथुमेवावरुन्धती ॥ ५ ॥
एष साक्षाद्धरेरंशो जातो लोकरिरक्षया।
इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥ ६

मैत्रेयउवाच

प्रशंसन्ति स्म तं विप्रा गन्धर्वप्रवरा जगुः।
मुमुचुः सुमनोधाराः सिद्धा नृत्यन्ति स्वःस्त्रियः ॥७॥
शङ्खतूर्यमृदङ्गाद्या नेदुर्दुन्दुभयो दिवि।
तत्र सर्व उपाजग्मुर्देवर्षिपितॄणां गणाः ॥ ८ ॥
ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः।
वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिन्हं गदाभृतः ॥ ९ ॥
पादयोररविन्दं च तं वै मेने हरेः कलाम्।
यस्याप्रतिहतं चक्रमंशः स परमेष्ठिनः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ततः पञ्चदशे विप्रैर्मथनाद्वेनबाहुतः ॥
जातस्य तु पृथोरुक्तमभिषेकार्हणादिकम् ॥ १ ॥ १–२ ॥
किमूचुरित्यत आह। एष इति चतुर्भिः। लक्ष्म्याः संभूतिः कला॥३॥
अत्र यः पुमान् स तु महाराजो भविष्यति ॥ ४ ॥

सुदती शोभनदन्तवती गुणा[illegible]भूष[illegible]नां च भूषणरूपा अवरुन्धती भर्तृत्वेन भजन्ती भविष्य[illegible] ॥ ५ ॥
अत्र हेतुः। एष इति। लोकस्य [illegible] रिरक्षिषया ॥ ६ ॥
स्वः स्त्रियः अप्सरसो नृत्यन्ति [illegible] ॥ ७ ॥ ८ ॥
देवैः स[illegible]त्यागत्य वैन्यस्य [illegible]ः चिन्हं रेखात्मकं चक्रम ॥९

श्रीधरस्वामिकृतभावार्थदीपिका ।

अप्रतिहतं रेखान्तरैरभिन्नं चक्रं यस्य चिह्नं स परमेश्वरस्यांशः ॥ १० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिन्याख्या दीपिकाटिप्पणी ।

अथ निपादलक्षणमलापगमानन्तरं तस्य शुक्रस्य ॥ १-२ ॥

ऋषय ऊचुरिति पाठः स्वाम्यसम्मतः किमूचुरिति व्याख्यानेन पौनरुक्त्यप्रत्यायनात् अनपायिनी स्वरूपशक्तित्वाद्भिन्ना ॥ ३ ॥

अत्र यः पुमान् इति व्याख्यानात् अत्र यः प्रथम इत्येव स्वामिसम्मतः पाठः अयमिष्यति पाठे अथमित्यस्य स इत्यर्थकल्पना यच्छब्दस्याध्याहारः अत्रेत्यस्यापीति ज्ञेयम् ॥ ४ ॥

भूषणभूषणमित्येव स्वामिसम्मतः पाठः भूषणारूपेति रूपकतया व्याख्यानात् योगेनतु भूषणेत्यपि संगच्छते ॥ ५ ॥

अत्र पृथोरेव भजने हेतुः ॥ ६-७ ॥

तत्र पृथुगृहे ॥ ८ ॥

ब्रह्मेति सार्द्धकम् ॥ ६ ॥

यस्येत्यर्द्धकम् अभिन्नमसंभिन्नम् ॥ १०—१३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथानन्तरं तस्य अपुत्रस्य महीपतेर्वेनस्य बाहुभ्यां पुनर्विप्रैर्मथ्यमानाभ्यां मिथुनं स्त्रीपुंसात्मकं समपद्यत उदभूत् ॥ १ ॥

ब्रह्मवादिन ऋषयः तज्जातं मिथुनं दृष्ट्वा भगवत्कलां भगवदंशं विदित्वा अत एव परमसंतुष्टा ऊचुः ॥ २ ॥

किमूचुरित्यत आह । एष इति चतुर्भिः । एष पुमान् भगवतो विष्णोर्भुवनपालिनी कला भुवनपालनार्थं कलयावतीर्ण इत्यर्थः इयं स्त्री लक्ष्म्याः संभूतिः संभवः कलेत्यर्थः तत्र हेतुः पुरुषस्यानपायिनी पुरुषमविहाय जातेति भावः "राघवत्वे भवेत्सीता रुक्मिणी [illegible] जन्मनि । अन्येषु चावतारेषु विष्णोरेषानपायिनी,, इतिव[illegible] अनुसंधेयः ॥ ३ ॥

अथ[illegible] यः पुमान् सोऽयं राजा प्रथमः मुख्यः यतोऽयं यशः [illegible] विस्तारयिता अतः पृथुश्रवाः पृथुकीर्तिसम्पन्नः [illegible] भविष्यति नामशब्दः प्रसिद्धौ प्रथयति यशः पृथु[illegible] कीर्त्यां प्रख्यातो महाराजो भविष्यतीत्यर्थः ॥ [illegible]

इयं त[illegible] सुदती शोभनदन्तवती इतरस्या व्युपलक्षणमि[illegible] अतो गुणानां भूषणानां च भूषणा भूषणवदौज्ज्व[illegible] तेत्यर्थः ततोऽर्चिर्नाम अर्चिते उज्ज्वलनीत्यर्चिरिति [illegible] ख्याता पृथुमेवावरुन्धती भविष्यति ॥ ५ ॥

अत्र हेतुः । एष [illegible] रिरक्षा लोकस्य रिरक्षया साक्षाद्धरेरंश एव पृथुः [illegible] रः तत्परा तदनन्याहीं अत एवानपायिनी श्रीः [illegible] स्यंशजातेत्यर्थः ॥ ६ ॥

तं पृथुं विप्राः प्र[illegible] तुष्टुवुः गन्धर्वश्रेष्ठा जगुः गानं कृतवन्तः सिद्धाः सु[illegible] पुष्पवृष्टीर्मुमुचुः अप्सरसः स्वः स्वर्गस्थाः स्त्रियः [illegible] ननृतुः ॥७ ॥

शङ्खतूर्य्यो दुन्दुभयो [illegible] पृथोः समीपे देवादीनां गणाः उपाजग्मुः आ[illegible] पदेश च ब्रह्मा चतुर्मुखः देवैः सहागत्य वैन्यस्य वेनापत्यस्य पृथोर्दक्षिणे हस्ते गदाभृतो भगवतश्चिह्नं रेखात्मकं चक्रादिकं दृष्ट्वा ॥ ८ ॥

तथा पादयोररविन्दं च दृष्ट्वेत्यर्थः हरेः कलामंशं मेने अप्रतिहतं रेखान्तरैरभिन्नं चक्रं सुदर्शनं यस्य चिह्नं तस्य परमेष्ठिनः परमपुरुषस्यांशस्य व्यधिकरणे इमे षष्ठ्यौ परमेष्ठिनेति तृतीयान्तपाठे तु तस्य पृथोः परमेष्ठिना ब्रह्मणा ब्राह्मणैः सहाभिषेकः आरब्ध इत्यन्वयः अंशः सन्निति पाठे अप्रतिहतं रेखान्तरैरसंकीर्णं चक्ररेखात्मकं चक्रम् अंशः सन् सुदर्शनांशः सन् यस्य स्थितमिति शेषः अंशशब्दापेक्षया सन्निति पुल्लिङ्गनिर्देशः ॥ ९ ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ सत्त्वांशात्पृथोरुत्पत्तिं वक्ति । अथेति ॥ १ ॥ २ ॥

एष विष्णोः कलेति लिङ्गव्यत्ययेन मत्स्यादिवत्साक्षादरेरंशतावचः साक्षादंशो नायं किंतु विशेषावेशात्तदंश इति वचनमिति ध्वनयति तदुक्तं "पृथुहैहयाद्यो जीवास्तेष्वाविष्टो हरिः स्वयम् । विशेषावेशतस्तेषु साक्षाद्व्यंशतावचः । किंस्तुध्रुवव्यासऋषभकपिला मत्स्यपूर्वकाः आकूतिजैतरेयौ च धर्मजत्रयमेव च धन्वन्तरिर्हयग्रीवो दत्तात्रेयश्च तापसः।स्वयंनारायणास्त्वेते नाणुमात्रविभेदिनः। बलतो रूपतश्चैव गुणैरपि कथंचन,, इति इयंचलक्ष्मीः संभूतिरिति विशेषणात् पृथुरपि हरेः साक्षादंश इतरथास्य तत्पतित्वायोगादिति बुद्धिव्यामोहो नकर्तव्यः "तत्रसंनिहिता श्रीश्च यत्र सन्निहितो हरिः। नास्याः सन्निधिमात्रेण रमा पत्नीत्वमाव्रजेत् । *साक्षादेवतुसाक्षाच्च हरेः सन्निधितः क्वचित् । गोप्यादिरूपा भवति विपरीतंनतु क्वचित्,, इति निर्णायकवचनात् पुरुषोधातुपुनीपुनात् पुंस्त्वात्मपरमात्मनोरित्यभिधानात् प्रकरणबलाच्च पुरुषं परमात्मानमपहाय नतिष्ठतीत्यभिप्रायेणोक्तं पुरुषस्यानपायिनीति लक्ष्मीविशेषणवती कापि रमणी भर्तृवियोगशून्या जातेति तात्पर्यमिति ॥३॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीनारायणचरणारविन्दमकरन्दानिषेविणां महतांपुरुषाणामिहामुत्रानभिमता अपि भगवदिच्छया सकलाः संपदो भवन्तीति निरूप्यतेऽस्मिन्नध्याये पृथुकथाकथनव्याजेन तत्रादौ विप्राणां पृथुप्रशंसाप्रकारं वक्ति । अथेति । तुशब्देन भेदवादिना पृथोर्हरेश्च महान् भेदोऽस्तीति सूच्यते एतदर्थद्योतकप्रमाणसद्भावात्तथाह्युक्तम्

ब्रह्मण्यनन्ते गरुडे रुद्रे कामे शचीपतौ ।
अनिरुद्धे मनौ चैव पृथौच कृतवीर्यजे ॥
नारदे चैवमाद्येषु विशेषात् सन्निधिर्हरेः ।
सुदर्शनादिष्वस्त्रेषु तथा सन्निहितो हरिः ।
नरलक्ष्मणौ बलश्चैव शेषस्यांशाः प्रकीर्तिताः ॥
तथा भरतशत्रुघ्नौ शङ्खचक्रावुदाहृतौ ।
प्रद्युम्नश्च कुमारश्च स्कन्दः कामांशकाः स्मृताः ।

इति । वैन्ये पृथौ सन्निहितो राजरूपी जनार्दन इति विशेषवचनेनायं वैन्यः पृथुः श्रीनारायणांशः अन्यस्तथा कश्चित् पृथुना

---

*साक्षादेवेति । यत्रहरिः कृष्णादिरूपेणावतीर्णः तत्रसाक्षात्-रुक्मिण्यादिरूपेण लक्ष्मीर्हरेःपत्नीत्वमाव्रजेत् विपरीतमिति हरिरन्यत्रान्यत्रसंनिहितः तत्र रमा साक्षादवतीर्य पत्नी नभवतीत्यर्थः ॥ टी०

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मा तयोरुयत इति शङ्का निर्मूलितेति ज्ञातव्यम् अत्रास्मिन् वर्षे राज्ञां गणान्तसमवे प्रथमः कथं यतो यशः प्रथयिता अतः पृथश्रितृत्वात् पृथुर्नाममहाराजेत्यत्र टच्प्रत्ययाभावस्तेभ्यो वैशिष्ट्य द्योतनार्थः ॥ ४ ॥

सुदती शोभमानदन्ता अर्चिर्नामगुणैरर्चितत्वाद्भूषणैरुज्वलितत्वात् "अर्चिर्मोज्वाला,,इत्यभिधानं वरोवरणीय आरोहो नितम्बोयस्याः सा तथोक्ता अवरुन्धती पतित्वेन स्वीकुर्वाणा भविष्यतीत्यर्थः ॥ ५ ॥

एष पृथुः साक्षात्हरेःश्रीनारायणस्यांशइति समस्तुप्रथमेतिसूत्रादंशस्य सन्निधानस्य मुख्यं पात्रं लोकरिरक्षया जनरक्षणेच्छया यद्वा प्रत्यक्षसदृशोः सान्वादित्यधिधानाद्धरेः साक्षादंशः पृथोर्याजातिस्तज्जातिसदृशजातिरूपेण सन्निहित इत्यर्थः तदुक्तं राजरूपीजनार्दन इति यतोहरेः पृथौ सन्निधानविशेषात्तदंशत्वं तस्माच्छ्रियोऽपि तथा वचनमित्यस्मिन्नर्थे हिशब्दः "हिर्हेतावधारणे,, इतियादवः अवधारणार्थत्वे उक्तस्मृतिविरोधः ॥ ६ ॥

गन्धर्वप्रवरादयस्तत्र द्विजप्रशंसासमये गानादिकं चक्रुरित्यन्वयः ॥ ७ ॥ ८ ॥

तत्र देवान्विशिनष्टि । ब्रह्मेति । तस्मिन् पृथौ सन्निहितां हरेः कलां मेन इत्यन्वयः ॥ ९ ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ऋषय ऊचुरिति बहुत्र किन्तु किमूचुरिति पौनरुक्त्या स्वाम्यसम्मतोऽयम् ॥ १ ॥ २ ॥ ३ ॥

अयं राज्ञां भाविनां प्रथमः तेषां तदनुसारिचेष्टायां यशः प्रथयिता च। अतएव पृथुश्रवाः अत्र च इति पाठस्तु स्वामि सम्मतः॥४॥

भूषणामित्येव स्वाभिमतम् । रूपकत्वेन.निर्देशात् ॥ ५ ॥ ६ ॥
मैत्रेय उवाचेति क्वचिन्नास्ति ॥ ७-८ ॥
ब्रह्मेति सार्द्धकम् ॥ ९—१६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तद्वेण बाहु मथनजन्मनः सार्चिषश्च पृथोः ।
अभिषेकोपायनाद्याहृतिः पञ्चदशोऽभवत् ॥ ० ॥

अथात्र पित्रंशो विष्णुयज्ञप्रभावश्च कीदृश उद्भवेदित्यपेक्षायां मुनिभिर्मथनमाह । अथेति ॥ १—२ ॥

सम्यक् भूतिः सम्पत्तिस्तद्रूपा लक्ष्मीः ॥ ३ ॥

बाहुभ्यामिति क्षात्रं तेजो भगवत्प्रभावश्च क्षत्रियस्य बाह्वोरेव तिष्ठतीत्यभिप्रायेण अत्र यः पुमान् प्रथमः स प्रथयितेति निरुक्त्या पृथुः ॥ ४ ॥

गुणानां भूषणानाञ्च भूषणरूपा अवरुन्धती भक्त्या वशीकुर्वती भविष्यति ॥ ५ ॥

रिरक्षया रिरक्षिषया ॥ ६ ॥

सुमनसां पुष्पाणां धारा इव धारा मुमुचुः ॥ ७ । ८ ॥ ९ ॥

अप्रतिहतं रेखान्तरैरभिन्नं पादतलं इत्यर्थः । परमेष्ठिनः परमेश्वरस्य ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पञ्चदशो श्रीपृथोर्जन्माद्युत्सवमाह । अथेति । समपद्यत प्रादुरभूत् ॥ १ ॥ २ ॥

सम्भूतिः कला ॥ ३ ॥

यतो यशः प्रथयिता अतः पृथुश्रवाः विपुलकीर्तिः पृथुर्नाममहाराजो भविष्यति ॥ ४ ॥

गुणा एवभूषणानि यासां ताः गुणभूषणास्तासामपि भूषणाचूडामणितुल्या पृथु मेवावरुन्धती पतित्वेनाश्रयन्ती सती अर्चिर्नाममहाराज्ञी भविष्यति ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

आसुरपादस्य चिह्नं रेखारूपं चक्रम ॥ ९ ॥

अप्रतिहतं रेखान्तरैरदूषितम् ॥ १० ॥

भाषाटीका ।

मैत्रेयजी बोले इसके अनन्तर अपुत्री उस राजाके दोनों भुजों को जब मुनियों ने फिर मर्दनकिया तब स्त्री पुरुषका जोडा उत्पन्न हुआ ॥ १ ॥

ब्रह्मवादि मुनि पैदा भये जोडा को देख कर भगवान्की कला जानकर बडे सन्तोष से बोले ॥ २ ॥

ऋषि बोले यतो साक्षात् भगवान् विष्णुकी संसार को रक्षा करने वाली कला है और ये दूसरी साक्षात् लक्ष्मी की कलाहै जो सदा विष्णुके साथ रहती है ॥ ३ ॥

इन दोनों में पहिला पुरुष है सब राजों मे प्रथम होगा संसार में यशको फैलावेगा बडे भारी यश वाला पृथु नाम महाराज होगा ॥४॥

यह जो सुंदर दांतो वाली देवी है गुणों की तथा भूषणों की भी भूषण रूप है यह उत्तम रूप वाली अर्चि इसका नाम है यह पृथु महाराज की अनुवर्तन करने वाली होगी ॥५॥

पृथु महाराज साक्षात् हरि के अंश लोककी रक्षाकरने को प्रगट भये हैं एअर्चिः भगवत् परा लक्ष्मी उत्पन्नभई जो सदा साथ रहने वाली है ॥ ६ ॥

मैत्रेयजीबोले ब्राह्मण लोगउनकी प्रशंसा करने लगे श्रेष्ठ गन्धर्वगान करने लगे सिद्धलोग फूलोंकी धारवर्षाने लगे स्वर्ग की अप्सरा नाच करने लगीं ॥ ७ ॥

आकाश मे शंख मृदङ्ग नगारा आदि सब बाजा बजे उहांपर देवगण पितृगण ऋषिगण सभी उपस्थित भये॥८॥

जगद्गुरुब्रह्माजीने इन्द्रादि देवतोंके सहित आकर वेन पुत्र के दहिने हाथ मे भगवान् के सुदर्शन का रेखा रूप चिन्ह को देखा ॥ ९ ॥

दोनों चरणों मे कमल का चिह्न देखकर उनको हरि का अंश समुझा क्योंकि जिसके दूसरी रेखों से नहीं मिला चक्र का रेखाहोवे वह परमात्मा का अंश होता है ॥ १० ॥

तस्याभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः ।
आभिषेचनिकान्यस्मा आजह्रुः सर्वतो जनाः ॥ ११ ॥
सरित्समुद्रा गिरयो नागा गावः खगा मृगाः ।
द्यौः क्षितिः सर्वभूतानि समाजह्रुरुपायनम् ॥ १२ ॥
सोऽभिषिक्तो महाराजः सुवासाः साध्वलंकृतः ।
पत्न्यार्चिषालंकृतया विरेजेऽग्निरिवापरः ॥ १३ ॥
तस्मै जहार धनदो हैमं वीरवरासनम् ।
वरुणः सलिलस्रावमातपत्रं शशिप्रभम् ॥ १४ ॥
वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजम् ।
इन्द्रः किरीटमुत्कृष्टं दण्डं संयमनं यमः ॥ १५ ॥
ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमम् ।
हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियम् ॥ १६ ॥
दशचन्द्रमसिं रुद्रः शतचन्द्रं तथाम्बिका ।
सोमोऽमृतमयानश्वांस्त्वष्टा रूपाश्रयं रथम् ॥ १७ ॥
अग्निराजगवं चापं सूर्यो रश्मिमयानिषून् ।
भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहम् ॥ १८ ॥
नाट्यं सुगीतं वादित्रमन्तर्धानं च खेचराः ।
ऋषयश्चाशिषः सत्याः समुद्रः शङ्खमात्मजम् ॥ १९ ॥
सिन्धवः पर्वता नद्यो रथवीथीर्महात्मनः ।
सूतोऽथ मागधो वन्दी तं स्तोतुमुपतस्थिरे ॥ २० ॥
स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान् ।
मेघनिर्ह्रादया वाचा प्रहसन्निदमब्रवीत् ॥ २१ ॥

श्री[illegible]स्वामिकृतभावार्थदीपिका ।

आभिषे[illegible]षेकसाधनानि ॥ ११-१२-१३ ॥

हे वीर[illegible]रासनम् सलिलस्य स्रावो यस्मात् १४॥

हे वाल[illegible]

ब्रह्ममयं [illegible]र्यं तत्पत्नी श्रीः श्रियं सम्पदम् ॥१६॥

दशचन्द्रा[illegible]नि कोशे यस्य तम् असिं खड्गं शत-
चन्द्रं चर्मरूपा[illegible] ॥ १७ ॥
अजस्य गोश्च [illegible] चापं योगमय्यौ पादस्पर्शमात्रे-
णाभीष्टदेशप्रापि[illegible] ॥

नाट्यादि कौश[illegible]मजं सप्रभवम् ॥ १९ ॥

तं स्तोतुमुपस्थिता[illegible]

स्तावकान् स्तो[illegible]भिप्रेत्य ज्ञात्वा ॥२१॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिकाटिप्पणी ।

तस्मै इति सार्द्धषट्कम् किन्तु बहुवाक्यैरेकवाक्यत्वाग्मध्येऽक्रिया विज्ञेयाः (१) ॥ १४ ॥ १५ ॥

अव्याहतामविच्छिन्नाम् (२) ॥ १६ ॥

चर्मेति ढालेति व्याख्यातम् (३) ॥ १७ ॥ १८ ॥

नाट्यादिदानस्यासम्भवाल्लक्षणयायातत्तत्कौशलं व्याख्यातम् (४) ॥ १९ ॥

सिन्धवस्तत्पर्यङ्कम् रथवीथीरथाश्वादिमार्गान् (५) ॥ २० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका

आभिषेचनिकानि अभिषेकसाधनानि सर्वतो दिग्भ्यो जनाः अस्मै पृथवे आजह्रुः आहृतवन्तः ॥ ११ ॥

सरितः समुद्राश्च गिरयो हिमवदादयः नागाः सर्पाः गावः शकुनयो द्यौरादयश्चेत्येवं सर्वभूतान्युपायनं सान्मानिकं समाजह्रुः ॥ १२ ॥

स महाराजः पृथुरभिषिक्तः सुवासाः कौशेयादिमहार्हवस्त्रः स्रग्वी स्रग्वैजयन्ती अस्यास्तीति स्रग्वी अलंकृतः किरीटाद्याभरणैरिति शेषः तथालंकृतया भार्यया अर्चिषा सह अपरोऽग्निरिव रेजे रराज ॥ १३ ॥

सर्वभूतानि समाजह्रुरुपायनमित्येतत्प्रपञ्चयति । तस्मा इति । हे वीर ! तस्मै पृथवे धनदः हैमं हिरण्मयं श्रेष्ठं सिंहासनं जहार सलिलस्य स्रावो यस्मात्तथा भूतं शशिप्रभमातपत्रं वरुणः आजहारेत्यनुषङ्गः ॥ १४ ॥

वायुर्द्वे वालव्यजने कीर्त्तिमयीं कीर्त्तिप्रचुरां कीर्त्तिसंपादकत्वेन तत्प्राचुर्यमत्र विवक्षितं स्रजं धर्म आजहारेति सर्वत्रानुषङ्गः संयमनं दुष्कृद्विषयसमीचीननियमनसाधनं दण्डम् ॥ १५ ॥

ब्रह्मा चतुर्मुखः ब्रह्ममयं वेदमयं ब्रह्मप्रवचनापादकसामर्थ्यवत्त्वेन ब्रह्मप्राचुर्यमत्र विवक्षितं वर्म कवचं भारती सरस्वती उत्तमं महार्हहारं हरिः उपेन्द्रः सुदर्शनचक्रं यदा पृथौ भगवदंशोऽनुप्रविष्टः तदेदं चक्रमपि सुदर्शनांशेनानुप्रविष्टमिति भावः तत्पत्नी हरिपत्नी श्रीः अव्याहतां श्रियं सम्पदम् ॥ १६ ॥

दशचन्द्राकाराणि बिम्बानि कोशे यस्य तमसिं खड्गं रुद्र आजहार पत्नी अम्बिका शतं चन्द्राकाराणि बिम्बानि यस्मिन् तत् शतचन्द्राख्यं खेटापरपर्य्यायं चर्मेत्यर्थः सोमश्चन्द्रः अमृतमयान् अमृतस्राविल्वेन तत्प्राचुर्य्यमत्र विवक्षितम् अश्वानाजहार रूपाश्रयमतिसुन्दरं रथम् ॥ १७ ॥

अग्निराजगवमजस्य गोश्च शृङ्गाभ्यां निर्मितं चापं सूर्यः रश्मिमयान् रश्मिवत्सर्वत्र प्रवेशसामर्थ्येन तत्प्राचुर्य्यमत्र विवक्षितं भूर्धरणी योगमय्यौ योगवदभीष्टदेशप्रापणसमर्थत्वेन तत्प्राचुर्य्यमत्र विवक्षितम् अन्वहमहरहर्बलिं पूजार्हं पुष्पं द्यौराजहार ॥ १८ ॥

खेचराः सिद्धसाध्यगन्धर्वादयः नाट्यादीन्याजह्रुः अप्सरसः ऋषयः सत्याः आशिषः आजह्रुः कृतवन्त इत्यर्थः समुद्रः आत्मजं स्वस्मादुद्भवं शङ्खमाजहार ॥ १९ ॥

सिन्धवो नद्यः नदाः पर्वताश्च महात्मनः पृथोः रथवीथीः रथमार्गान् आजह्रुः ददुः धातूनामनेकार्थत्वाद्दाने वृत्तिः ततः सूतादयस्तं पृथुं स्तोतुमुपतस्थिरे उप समीपे स्थितवन्तः ॥ २० ॥

तान् सूतादीन् स्तावकान् स्तोतुमुद्युक्तानभिप्रेत्य प्रतापवान् महाप्रभावः वैन्यस्यापत्यं पृथुः मेघनिर्ह्रादया मेघगर्जनवद्गम्भीरया वाचा प्रहसन् स्मितपूर्वमिदं वक्ष्यमाणमब्रवीत् ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं प्रशस्य ब्राह्मणैः किमकारीति तत्राह । तस्येति । अभिषेकसाधनानि स्वयं संपादितानि किं वाऽन्यैरित्यत आह । आभिषेचनिकानीति ॥ ११ ॥

तथोपायनानि च आजह्रुरिति तत्राह । सरित इति ॥ १२ ॥ १३ ॥

न केवलं सरिदादय उपायनमदुः किन्त्वन्येलोकपालादयोऽपीत्याह । तस्मा इति ॥ १४ ॥ १५ ॥

तस्य हरेः पत्नी लक्ष्मीः ॥ १६ ॥

नाम्ना दशचन्द्रं खड्गं त्वष्टा विश्वकर्मा रूपाश्रयं रथम् ॥ १७ ॥

योगमयेऽणिमादियोगसाधने ॥ १८ ॥

अन्तर्धानमदृश्यतामात्मजमात्मनोजातम् ॥ १९ ॥

रथवीथी रथमार्गान् । यथात्मविद्राजा निषेवणीय इति भावेन सूतादीनामुपस्थानप्रकारं वक्ति । सूतोऽथेति ॥ २० ॥

पृथोर्निरहङ्कारत्वप्रकटनाय वक्ति । स्तावकानिति । मेघनिर्ह्रादवत् मेघध्वनिवत् ध्वनिर्यस्याः सा तथा तया ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सूत इत्यर्द्धकम् ॥ २०—२३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ब्रह्ममयं वेदमयं वर्म कवचं । तत्पत्नी लक्ष्मीः श्रियं सम्पत्तिम् ॥ १६ ॥

दशचन्द्राकाराणि बिम्बानि कोशे यस्य तमसिं खड्गम् । शतचन्द्रं चर्म । रूपाश्रयमतिसुन्दरम् ॥ १७ ॥

अजस्य गोश्च शृङ्गाभ्यां निर्मितं चापम् । योगमय्यौ पादस्य क्षेमात्रेणाभीष्टदेशप्रापिके ॥ १८ ॥

आत्मजं स्वभवम् ॥ १९——२१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आभिषेचनिकानि अभिषेकार्हाणि वस्तूनि ॥ ११ ॥ १२ ॥ १३ ॥

क्षीरस्वरासनं महाराजासनम् सलिलस्रावं सलिलस्य पीयूषस्य स्रावो यस्मात्तथाभूतम् ॥ १४ ॥

वालव्यजने चामरद्वयम् ॥ १५ ॥

भारती सरस्वती तस्य हरेः पत्नी श्रीः अव्याहतामक्षयां श्रियं सम्पदम् ॥ १६ ॥

दशचन्द्रा इव चन्द्रा यस्मिन् तथा तमसिं च खड्गं शतचन्द्रं खड्गसाहचर्य्याच्चर्मेत्यध्याहारः ॥ १७ ॥

अजानां गवां च शृङ्गैर्निर्मितमाजगवं योगमय्यौ यथेष्टगतिसाधनभूते ॥ १८ ॥

आत्मजं स्वोद्भवम् ॥ १९ ॥ २० ॥ २१ ॥

भाषाटीका ।

ब्रह्मवादि ब्राह्मणोंने उनके अभिषेकका आरंभ किया अभिषेककी सामग्री को सब लोगोंने [illegible] दिया ॥ ११ ॥

नदी समुद्र पर्वत नाग गऊ पक्षी मृग अंतरिक्ष पृथवी और सब प्राणि ए सब भेटों को लाये ॥ १२ ॥

सो पृथु महाराज अभिषेक [illegible] सुंदर वस्त्र को पहर कर सुंदर अलंकार धारण कर के [illegible] धारण की हुई अर्चित

पृथुरुवाच

भोः सूत ! हे मागध ! सौम्य ! वन्दिँल्लोकेऽधुना स्पष्टगुणस्य मे स्यात् ।
किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन् वितथा गिरो वः ॥ २२ ॥
तस्मात्परोक्षेऽस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः ।
सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयन्ति सभ्याः ॥ २३ ॥
महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोऽपि ।
तेऽस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद ॥ २४ ॥
प्रभवो ह्यात्मनः स्तोत्रं जुगुप्सन्त्यपि विश्रुताः ।
ह्रीमन्तः परमोदाराः पौरुषं वा विगर्हितम् ॥ २५ ॥
वयं त्वविदिता लोके सूताद्यापि वरीमभिः ।
कर्मभिः कथमात्मानं गापयिष्याम बालवत् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां
पञ्चदशोऽध्यायः ॥ १५ ॥

——○*○——

भाषाटीका।

[illegible] हित विराजमान होने से दूसरे अग्नि देवता से [illegible] ॥

[illegible] जी उन को कुवेर जी ने उत्तम आसन दिया व[illegible] जल झरता हुआ चंद्रमा सरी का एक छत्र [illegible] ॥

वायु ने [illegible] का दिये धर्म ने कीर्ति मयी माला दीनी इंद्र ने उ[illegible] या यमराज ने नियमन करने का दंड दिया ॥ [illegible]

ब्रह्माजी [illegible] पहिराया सरस्वतीने उत्तमहार पहिराया उपेंद्र [illegible] न चक्र दिया लक्ष्मीजीने अचल लक्ष्मीदीनी ॥ [illegible]

दशचन्द्रमा [illegible] को महादेवजीने दिया शतच-न्द्रमासरीका ढा[illegible] या चन्द्रमानेअमृतमयघोडादिये विश्वकर्माने सुन्दर र[illegible] ॥

अग्निने अजगव[illegible] किरणमयबाण दिये पृथिवी ने योग मयखडाऊं [illegible] न्तर फूलोंकी वर्षाकरी।१८॥

खेचरोंने नाच गा[illegible] विद्यादी ऋषियोंने सत्य आशीर्वाद दिये समुद्रने [illegible] या ॥ १९, ॥

सिन्धु पर्वत नदी [illegible] ो रथके मार्गदिये फिर सुत मागध बन्दिजन उ[illegible] ो ॥ २० ॥

प्रतापवाले वेण पुत्र प[illegible] ति करते आनकर हँसकरके मेघकीसी गंभीर वाणीसे उनसे बोले ॥ २१ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

लोके स्पष्टगुणस्य सतो मे स्तुतिः स्यात् अधुनातु किमाश्रयो मे स्तवो योज्यताम् अतो वो गिरोऽधुना मयि वितथा माभूवन् यद्वा लोकेऽधुना स्पष्टगुणस्य मे किमाश्रयः स्तवः स्यात् अत एव क्रियमाणः स्तवो मे मदन्यस्य योज्यतां नतु मे वितथाभिधानापत्तेरित्यर्थः ॥ २२ ॥

तस्मात्परोक्षे कालान्तरे स्पष्टेषु गुणेषु सत्स्वस्माकमुपश्रुतानि यशांसि प्रतिस्तोत्रमलमत्यर्थं करिष्यथ हे अपीच्यवाचो । मधुरगिरः सभ्यैः प्रेरिता वयं त्वामेव स्तुम इति चेत्तत्राह । उत्तमश्लोकस्य गुणानुवादे कार्ये सति जुगुप्सितमर्वाचीनं नास्त वयन्ति ॥ २३ ॥

ननु संभावितैरेव गुणैरात्मानं जनः स्तावयतीति चेत्तत्राह । महतां गुणानात्मनि संपादयितुं शक्तोऽप्यसतो गुणान्सम्भावनामात्रेण कः स्तावयते यद्वा आदावेव सतोऽपि कः स्तावयते ख्यात एव प्रख्यातिसिद्धेः अन्यस्तु मिथ्यागुणस्तुतिश्लाघी मन्द इत्याह । न इति । यद्ययं शास्त्राभ्यासादिकमकरिष्यत्तर्ह्यस्य ते विद्यादयो गुणा अभविष्यन्निति क्रियातिपत्त्या विप्रलब्धो जनानामवहासं न वेद ॥ २४ ॥

किञ्च प्रभवोऽपि विश्रुता अपि ह्रीमन्तोऽपि जुगुप्सन्ति वेति दृष्टान्ते यथातिस्तुतौ क्रियमाणायां विगर्हितं शत्रुवधादिपौरुषं निन्दन्ति तथोचितामपि स्तुतिं न सहन्त इत्यर्थः ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वरीमभिरिति । दीर्घत्वमार्षं भावप्रधानोऽयं निर्देशः वरिष्ठैः कर्मभिरधिविदिता इत्यर्थः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिकाटिप्पणी ।

सुनहत्यर्द्धकम् पूर्वार्धेऽधुनेत्यस्योत्तरार्धेऽन्वितत्वेनास्थानपतितत्वं मेऽस्य स्याधिकत्वं वाक्यभेदश्चेत्यस्वरसाद्धेति हेतोरर्थप्रत्यादित्यर्थोक्तिः ॥ २१—२२ ॥

किञ्च परोक्षेचा परपक्षेच तदेव युक्तमित्याह । सतीति ॥ २३ ॥

पूर्वार्धेऽपेरस्थानपतितत्वमकारप्रश्लेषगौरवञ्चातोयद्वेति ॥२४-२५॥

भवति पूर्वं तिष्ठति पश्चाद्विकृतिं गच्छति इति भाविता प्रकृतिस्तत्प्रधानोऽयं वरिमशब्दः अन्यथा वरत्वकर्मणोस्सामानाधिकरण्याऽसम्भवात् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
दीपिन्याख्यदीपिकाटिप्पण्यां
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इदमेवाह हे सूतादयः । लोकेऽधुनास्पष्टगुणस्य सतो मे मम स्तवः युष्माभिः करिष्यमाणाः स्तवः किमाश्रयो योज्यतां लोके प्रख्याताहि गुणाः स्तोत्रविषया अप्रख्यातगुणस्य मे स्तवा विषयामावाद्वितथः स्यात् अतो वोयुष्माकं स्तुतिगिरः मयि वितथा मामूवन् युष्माकं चानिष्टापत्तिः स्यादिति भावः ॥ २२ ॥

तस्मात्परोक्षे कालान्तरे स्पष्टगुणेषु सत्सु अस्मानुपाश्रितानि यशांसि प्रतिस्तोत्रमलमत्यर्थं करिष्यथ इत्यपीत्यवाचः। मधुरवाचः सूतादयः ! अनवसरे समीरितानां मधुरगिरां शोभानोपपद्यत इत्यभिप्रायः सभ्यैः प्रेरिता वयं त्वामेव स्तुम इति चेत्तत्राह उत्तमश्लोकस्य भगवतो गुणानुवादेन कार्ये सति जुगुप्सितमनुत्तमश्लोकगुणानुवादमीदृशं सभ्या न स्तावयन्ति स्तुतिं न कारयन्ति ॥ २३ ॥

ननु गुणानामधुनास्पष्टत्वेऽपि भविष्यद्गुणैरात्मानं जनः स्तावयेदिति चेत्तत्राह । महद्गुणानिति । अधुनाऽसतोऽपि महतो गुणानात्मनि स्वस्मिन् कर्तुं सम्पादयितुमीशः शक्तोऽपि स्तावकैः स्तोतृभिः कः स्तावयते स्तुतिं कारयते न कोऽपीत्यर्थः यदि कश्चिदेते गुणाः अभविष्यन्निति करिष्यमाणाः शत्रुजयादिभिः शौर्यादयो गुणाः स्वस्मिन्नभविष्यन्निति बुद्ध्यात्मानं स्तावयते स कुमतिः विप्रलब्धोऽधिक्षिप्तो जनानामपहासं न वेद ॥ २४ ॥

सुमतयः स्वात्मस्तुतिं निन्दन्तीत्याह । प्रभव इति । परमोदाराः निरतिशयौदार्यादिगुणसंपन्नाः प्रभवोऽपि सद्गुणानात्मनि सम्पादयितुं शक्ता अपि विश्रुताः प्रख्याता अपि ह्रीमन्तो लज्जायुक्ताः सन्तः आत्मनः स्वस्य विगर्हितं पौरुषं तद्विषयं स्तोत्रं वा जुगुप्सितं निन्दन्ति ॥ २५ ॥

हे सूताद्याः ! सूतप्रभृतयः लोके अविदिता अप्रख्याता वयन्तु वरीमभिः नितरां वरिष्ठैः दीर्घ आर्षः सूताद्यापीति पाठे सूतेति जात्यभिप्रायैकवचनं तच्च मागधानामप्युपलक्षणं, हे सूतादयः अद्यापि अधुनापि वरीमभिः वरिष्ठैः कर्मभिर्लोके अविदिता वयमतः कथमहं बालवदात्मानं गापयिष्यामि, शिक्षयामि अतिर्ह्रीह्रीरीत्यादिना पुक् तस्माल्लुङुत्तमैकवचनं स्तावयिष्यामीत्यर्थः ॥ २६ ॥

इतिश्रीमद्भागवतेमहापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे सूताद्याः ! योज्यतां स्तुतिं प्रयुञ्जतां वोयुष्माकमेषस्तवोमे किमाश्रयः कं गुणमाश्रित्य वर्तमानः स्यादित्यन्वयः तव शौर्यादिगुणमाश्रित्य वर्ततामितिचेत्तत्राह । लोकइति । अस्पष्टगुणस्याप्रकाशितपराक्रमादिगुणस्य यद्वा यद्यहं प्रख्यातगुणः स्यां तर्ह्येष वः स्तवो योज्यताम् । नचतथा तस्मात्किमाश्रयो योज्यते यत एवमतो वो मयि प्रयुक्तागिरो वितथा माभूवन्नित्यन्वयः ॥ २२ ॥

किमिदानीं फलितमत्राह । तस्मादिति । यस्मादिदानीमनाविष्कृतगुणा वयं तस्मादीड्यवाचां यूयं परोक्षे कालान्तरे कृतविक्रमानन्तरमस्मदुपाश्रितान्यस्माकं यशांसि कर्मणां प्रार्थ्यालमत्यर्थं स्तोत्रं करिष्यथेत्यन्वयः यद्वा कथं कारं च वितथाः स्युरस्मद्गिर इति तत्राह । तस्मादिति । यतो वयमप्रकाशितगुणास्तत्र प्रवर्तमाना अपि यशांसि सत्यानि तथ्यमालभन्ते तस्मात्तद्दोषपरिहारार्थमस्मद्यशो [illegible] चास्मत्सन्निकटेऽस्मद्दूरदेशे वर्तमानो यो हरिस्तस्येड्यवाचो हरेराश्रितानि चरितान्युद्दिश्य स्तोत्रमलंकारिष्यथ भूषितं कुर्वन्तु अन्यथा दूषितमेव स्यादन्यस्तस्य गुणानां नित्यत्वात्त[illegible]वया युष्मद्गिरः सफलाः स्युः अविद्यमानकथका वन्दिनः परिकीर्तिता इति युष्मद्दोषोऽपिपरिहृतः स्यादिति भाविनो गुणान् [illegible] स्तुमइति तत्राह । सतीति । उत्तमश्लोकगुणानामनुवादे सत्यज्यर्हितेऽपि सभ्या आत्मस्तवनं जुगुप्सितमिति न स्तावयन्ति आत्मप्रशंसा मरणमिति स्मृतेः ॥ २३ ॥

वयं तत्र तत्र तं प्रभुं स्तुत्वा ततः फलं [illegible] मामहे तत्कथमित्याशङ्क्य तन्मूर्खविषयं न विद्वद्विषयमित्या[illegible]माह । महद्गुणानिति । अनभिव्यक्तत्वेन बाल्येऽविद्यमानानपि म[illegible]तो पृथ्व्यादीनां समानभिव्यक्तत्वेन [illegible] दिगुणानात्मनि कर्तुमिच्छन् प्रकाशयन् [illegible] कोविद्वान्स्तावकैर्यादृशैः स्तावयते न कोऽपीत्यन्वयः कथं तर्[illegible]विषयमभूदिति तत्राह। सदाह्निति । यद्वा यदुक्तं हरिविषयं स्तोत्रम[illegible] करिष्यथेति तद्गुणसंभवाद्भवति । [illegible] स्तोत्रं निर्गुणे हरौ कथं संगच्छते [illegible]थाख्ये चास्मद्गिरां वैतथ्यं सुलभं स्यादिति तत्राह । सतीति । उत्त[illegible]श्लोकस्य हरेर्गुणानामनुवादे सति स्तोतृणां पापहरत्वेन प्रशस्ते । [illegible]याः पण्डिताः विगमृत्रपूर्व मद्वुपैति कान्यंनि जुगुप्सितमात्मानं [illegible] स्तावयन्तीत्यन्वयः सभ्यश्लेकोऽपि तथाविधः किं न स्यादिति [illegible]मानो मूर्खएवेति भावेनाह । महद्गुणानिति । आत्मन्यसतोमहतः[illegible]याम्महतोमहीयानिति श्रुतिसिद्धस्य हरेर्गुणानौदार्यादि[illegible] कर्तुमिच्छन् स्तावकैः कोविद्वान् स्तावयते अपितुलोकं [illegible]तामित्यनुवर्तते । किमु[illegible] सदाहृति । २४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

सद्गुणाः प्रभवोऽप्यात्मस्तुतिं जुगुप्सन्ते किमुत वयमितिभावे नाह। प्रभवोऽपीति। विद्यमानगुणसंरब्धस्तोत्रं प्रत्यक्षप्रमितं पारमार्थिकं पौरुषमपि निन्दन्तीत्यर्थः ॥ २५ ॥

वरीमभिर्वरणीयैः श्रेष्ठैरित्यर्थः ॥ २६ ॥

इतिश्रीभागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

तस्मात् परोक्षे काले न व्यवधाने देशे न वा स्पष्टेषु गुणेषु सत्सु अस्माकमुपश्रुतानि यशांसि प्रतिस्तोत्रमक्रमस्त्यर्थं करिष्यथ हे अपीच्यवाचः ! मधुरगिरः अपीच्यमिति चित्सुखः । ईड्याः पूज्या वाचो येषाम् । अथ परोक्षचापरोक्षे चैतदेव युक्तमित्याह । सतीति ॥ २३ ॥

अन्यस्तु सर्वथा तुच्छ इत्याह । महदिति ॥ २४ ॥

अन्येतु प्रभवस्तावयितुं योग्याः स्वस्तोत्रं जुगुप्सन्ति । तथापि विश्रुताः तत्तद्गौरवविख्याताः ते के तत्राह । ह्रीमन्तः परमा महान्तश्चेति ॥ २५ ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

लोके अधुना अस्पष्टगुणस्य मे स्तवोऽयं किमाश्रयः स्यात् के गुणा मे [illegible] स्तुध्वे इत्यर्थः । स्तवं विना स्थातुं न शक्नुम इति चेत् अमे [illegible] कस्याश्चिदयोग्यजनस्य एव क्रियमाणः स्तवो योज्यतां ननु मे । ननु कोऽत्र ते दोषस्त्वं किं बिभेषीति तत्र न मे दोषः किन्तु युष्माकमेव दोषप्रसक्तेर्बिभेमीत्याह । मेति । मयि विषये वो गिरो मा वितथा भवन्तु ॥ २२ ॥

ननु भो [illegible] ! अद्य नो निखिला एवैते गुणाः स्पष्टी भविष्य[illegible] [illegible]त्राह । तस्मादिति । यस्माद्-महद्गुणा [illegible] [illegible]नुपश्रुतानि यशांसि प्रति स्तोत्रमक्रम[illegible] [illegible] तदा के युष्मान्निषेत्स्य-न्तीति भाव [illegible] [illegible] साक्षात् । हे अपीच्यवा-चः! मनोहर[illegible] [illegible]: संमुखएव स्तुत्वा हेप-यितुं युक्तं [illegible] [illegible]: प्रेरिता वयमधुना-ऽप्येव [illegible] [illegible]ह । उत्तमःश्लोकस्य गुणानुवा[illegible] [illegible]ति जुगुप्सितमर्वाचीनं मद्विधं जन[illegible] [illegible]येरिति भावः ॥२३॥

ननु सत्[illegible] [illegible] [illegible]नो मर्गसतो गुणान् आत्मनि [illegible] [illegible] [illegible]: समर्थोऽपि कोऽभि ज्ञः आत्मानं [illegible] [illegible]नामपि किं पुनरवर्त्त मानान् [illegible] [illegible]यत एवेति भावः सच कुर्मतिर्[illegible] [illegible] यथयं हास्यहास्य कथाभ्यासा[illegible] [illegible]ऽप्रमविप्र-

लिप्तिति क्रियातिपत्त्या विप्रलब्धः उपहसितः ॥ २४ ॥

स्वस्तावकाः प्रभवो न केवलाः यतः प्रभवोहीत्यादि । वा शब्द इवार्थे विगर्हितं पौरुषमिव यथार्थं सतां धर्मध्वंस परमसमर्थ इत्यादि स्तोत्रं निन्दन्ति ॥ २५ ॥

वरीमभिरिति । दीर्घत्वमार्षं वरिमभिः श्रेष्ठैर्वैयमविदिता अवि ख्याताः । अतः कथं कर्मभिरात्मानं गापयिष्यामः ॥ २६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चदशश्चतुर्थस्य सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भोःसूत! हेमागध! हेवन्दिन्! सौम्येति सर्वेषां विशेषणम् लोके अस्पष्टगुणस्य मे स्तवः किमाश्रयः स्यात् अतो मयि वो गिरो वितथा मा अभूवन् अधुना एव मे स्तवो मायोज्यतामित्यन्वयः॥२२॥

तस्मात् हेमपीच्यवाचः।मञ्जुवचनाः! परोक्षे कालान्तरे अस्मद्यशः प्रचारकाले अस्मदुपश्रुतानि यशांसि प्रतिस्तोत्रमर्वं लोकभूषणं करिष्यथ सूतादेःस्वस्तवे नियोजकान् प्रत्याह उत्तमकीर्तेर्वासुदेवस्य गुणानुवादे कार्ये सति लोकेऽप्रसिद्धस्य।विना जुगुप्सितम न स्तवयन्ति ॥ २३ ॥

महद्गुणान् आत्मनि कर्तुं संपादयितुमीशः समर्थोऽपि असतोऽविद्य-मानान् तान् स्तावकैः कः स्तावयते वैपरीत्ये तु यद्ययं महद्गणमपि अकरिष्यत् तदाप्यस्य ते महद्गुणाः अभविष्यन्निति क्रियातिपत्त्या विप्रलब्धःकुमतिर्जनावहासं न वेद ॥ २४ ॥

विश्रुता विख्यातगुणा अपि प्रभवः पुनःपुनर्बहून् गुणान् सम्पाद-यितुं शक्ता अपि परमोदारा ह्रीमन्तः आत्मनः स्तोत्रं जुगुप्सन्ति वाशब्द इवार्थे विगर्हितं पौरुषमिव ॥ २५ ॥

हेसूत ! अपि निश्चितम् अद्य अधुना अविदिताः अप्रकाशितगुणा इत्यर्थः वरिमभिर्दीर्घत्वमार्षं कर्मभिः बालवदात्मानं कथं गापयि-ष्यामः ॥ २६ ॥

इतिश्रीमद्भागवते महापुराणेचतुर्थस्कन्धे
सिद्धान्तप्रदीपे
पञ्चदशाध्यायार्थप्रकाशः ॥१५॥

भाषाटीका ।

पृथुमहाराज बोले हे सूत ! हे मागध हे सुन्दरवचनवाले अब जब लोक में हमारे गुण प्रगट होंगे तब स्तुति करोगे अब किस आश्रय से स्तुति होगी ऐसा मत होवे कि जो तुमारी वाणी व्यर्थ होजाय ॥ २२ ॥

हे सुन्दर वचनवाले बंदिजनों हमारे परोक्ष मे हमारे सुने गुणों को तुम कथन करना क्योंकि उत्तम श्लोक भगवान् विष्णु के गुणों के रहते २ निंदित दूसरे मनुष्य की स्तुति सभ्य पुरुष नहीं करवाते हैं ॥ २३ ॥

जो पुरुष अपने में उत्तम गुणों को सम्पादन करने को समर्थ है सो पुरुष दूसरे स्तुति करनेवालों से क्यों स्तुति करावैगा जो गुण न होंगे तो यदि स्तुति करावैगा तो वंचक होगाऐसे

भाषाटीका ॥

दोनों प्रकार से स्तुति कराने में जो जनों का उपहास होता है उसको कुबुद्धि पुरुष नहीं जानते हैं ॥ २४ ॥

जो प्रभु लोग हैं वे प्रसिद्ध हों तोभी स्तुति अपनी होने में प्रसंसा नहीं करते हैं जो लज्जावाले परमउदार हैं वे लोग अपने पौरुषवर्णन कोगर्हित मानते हैं ॥ २५ ॥

हे सूत हमतो अभी उत्तम कर्मोंसे लोक में प्रसिद्ध नहीं हैं हम कैसे मह्त्सरी के अपने चरितको गवावेंगे ॥ २६ ॥

इति श्री भागवत चतुर्थ स्कन्ध पन्द्रहवां अध्याय का भाषानुवाद लक्ष्मणाचार्य कृत समाप्त ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः ।

———:○:———

मैत्रेय उवाच

इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः ।
तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया ॥ १ ॥
नालं वयन्ते महिमानुवर्णने यो देववर्योऽवततार मायया ।
वेनाङ्गजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः ॥ २ ॥
अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः ।
यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्माणि वयं वितन्महि ॥ ३ ॥
एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्त्तयन् ।
गोप्ता च धर्मसेतूनां शास्ता तत्परिपन्थिनाम् ॥ ४ ॥
एष वै लोकपालानां बिभर्त्येकस्तनौ तनूः ।
काले काले यथा भागं लोकयोरुभयोर्हितम् ॥ ५ ॥
वसु काल उपादत्ते काले चायं विमुञ्चति ।
समः सर्वेषु भूतेषु प्रतपन् सूर्यवद्विभुः ॥ ६ ॥
तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि ।
भूतानां करुणः शश्वदार्त्तानां क्षितिवृत्तिमान् ॥ ७ ॥
देवेऽवर्षत्यसौ देवो नरदेववपुर्हरिः ।
कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यञ्जसेन्द्रवत् ॥८ ॥
आप्याययत्यसौ लोकं वदनामृतमूर्तिना
[illegible]ानुरागावलोकेन विशदस्मितचारुणा ॥ ९ ॥
[illegible]व्यक्तवर्त्मैष निगूढकार्यो गम्भीरवेधा उपगुप्तवित्तः ।
[illegible]नन्तमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा ॥ १० ॥

[illegible]पिका ।
षो[illegible] [illegible]ा श्रुतम्
मुनि[illegible] [illegible]ति वर्ण्यते ॥ १ ॥
गायकाः [illegible]
नालं न [illegible] [illegible]पस्याभिकर्ममाहुः
वेनस्याङ्गाज्जा[illegible] [illegible]पट-ब्रह्मादीनाम-
पि धियो बभ्रमु [illegible] [illegible]र्णा भवेम ॥ २ ॥
अथापि य[illegible] [illegible]मृते सादराः
मुनिभिः कृत उ[illegible] [illegible] तदनतिक्रम्य
वितन्महि विस्तार[illegible] [illegible]
तनौ स्वदेहे लो[illegible] [illegible] यथा भागं
पालनपोषणानुरञ्जनादिकार्यानुसारेण यज्ञादिप्रवर्तनेन स्वर्गस्य हितं यथा वृष्ट्यादिना च भूर्लोकस्य हितं भवति तथा ॥ ५ ॥
सूर्यादितनुभागमेवाहार्हाभिः वसु धनं कराक्षनकाले आदत्ते दुर्भिक्षादिकाले विमुञ्चति च अष्टौ मासान् सूर्यो यथा वसु जलमादत्ते वर्षासु विमुञ्चति तद्वत् ॥ ६ ॥
मस्तके पादेनाक्रमतामप्यार्तानां भूतानामतिक्रमं सहिष्यते क्षितेर्वृत्तिः सर्वसहनं सा वृत्तिर्यस्यास्ति स तथा ॥ ७ ॥
देवेऽवर्षति एष कृच्छ्रं गताः प्राणा यासां ताः प्रजाः स्वयं वृष्टिं कृत्वा रक्षिष्यति अत्र हेतुः असौ नरदेववपुर्हरिरिति ॥ ८ ॥
वदनमेवामृतमूर्तिश्चन्द्रस्तेन सानुरागोऽवलोको यस्मिन् विशदं यस्मितं तेन चारुणा अत्र च कश्चिद्गतमानभिर्वेशो मूर्ते-

श्रीधरस्वामिकृतभावार्थदीपिका।

मान्सामीप्ये वर्तमानवद्वेति भूतनिर्देशश्च "आशंसायां भूतवच्च॥ ३।३।१३२॥ इति द्रष्टव्यः॥ ९॥

न व्यक्तं वर्त्म प्रवेशनिर्गममार्गो यस्य। निगूढं निष्पत्तेः पूर्वमविज्ञातं कार्यं यस्य तच्च कार्यं गम्भीरं किमर्थमेतत्कृतमित्यन्यैरज्ञाताभिप्रायं विधत्त इति तथा उपगुप्तं सुरक्षितं वित्तं यस्य अनन्तमाहात्म्यश्चासौ गुणानामेकं धाम विष्णुर्यस्मिन् अनन्तमाहात्म्योपेता गुणा एवैकं धाम स्थानं यस्येति वा संवृतात्मा संवृतमूर्तिः समुद्रचरत्वेन वरुणस्याप्येते गुणा द्रष्टव्याः॥ १०॥

श्रीराधारमणदासगोस्वामिविरचिता

दीपिन्याख्या दीपिकाटिप्पणी।

मुनिप्रयुक्ता मुनिभिर्विनियुक्ताः॥ १॥

आधिक्यमस्य पृथोस्सर्वशक्तिसंपादनप्रयुक्ताद्विराजत्वांशेन ज्ञेयमन्यथाऽऽवेशत्वेन तत्त्वानुपपत्तेः कृष्णस्तु भगवान् स्वयमिति परिभाषाशास्त्रविरोधादितिचकारोऽवधार्थे तद्वर्णने महिमानुवर्णने॥२

आदृताः आदरणमादृतिस्सा विद्यते येषां ते तथाच सादरा इति व्याख्यातम् भावे क्तिन् ततोऽर्शआदिभ्योमत्वर्थीयोऽच्॥३॥

धर्मसेतूनां गोपनं हि त्रेधा भवति स्वयमाचरणेन तच्छ्रवणेन तद्विरोधिशासनेन चेति त्रिविधमपि क्रमेण विशेषणत्रयेण दर्शितमिति धर्मसेतुवर्णनमेव विधेयम्॥ ४॥

मूर्तीः तत्तच्छक्तिरूपाः॥ ५—६—७॥

अत्र वृष्टिं कृत्वा रक्षणे॥ ८॥

अत्र वदनमेवामृतमूर्तिश्चन्द्र इति मयूरव्यंसकादिसमासाश्रयणात्परिणामालङ्कृतिः वदने आरोप्यमाणस्यामृतमूर्तेः आरोपविषयवदनात्मना परिणतिमन्तरा अनुरागावलोकनादिक्रियार्थस्यासंभवात् तथैव च तल्लक्षणं "परिणामः क्रियार्थश्चेद् विषयी विषयात्मना,, इति नात्र पूर्वपदार्थप्रधानउपमितिसमास आशङ्क्यः आप्यायनक्रियायामनुगतत्वेनैव प्रसिद्धेः वदने तादृशक्रियानुगुणत्वासंभवाद्विल्यालङ्कारः भूतनिर्देशश्च लुवृहे आजहारेत्यत्राशंसायां प्रार्थनायां प्रशंसायां वा अर्थे द्योत्ये सति भूतवत्प्रयोगो द्रष्टव्यः॥ ९॥

द्वितीयार्थे अनन्तमहिमयुक्ताः कारुण्यादयो भगवद्गुणा एकमेकं मुख्यं स्थानं संकीर्तनादिना रमणं विषयो यस्य सः॥ १०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवमविकत्थयिता पृथुनात्मस्तुतौ वारिता अपि तुष्टमनसो गायकास्तुष्टुवुरित्याह मुनिः पञ्चदशेन। इतीति। गायकाः सूतादयस्तस्य पृथोर्वागेवामृतं तस्य सेवया तुष्टं मनो येषां मुनिभिर्भगवदंशभूतस्य पृथोरविकत्थयितृत्वादिकल्याणगुणजातमभिज्ञैर्मुनिभिः प्रचोदिता स इत्युक्तप्रकारेण स्तुवन्तमपि न्टपतिं पृथुं तुष्टुवुः॥ १॥

तत्र गायकाः पृथोः कल्याणगुणानुवर्णनात्मकस्तुतावात्मनामसामर्थ्यमापादयन्तः पुनः मुन्यनुगृहीताः सन्तस्तत्सामर्थ्यमाहुः। नालमितिद्वाभ्याम् हे नव महिम्नः अनुवर्णने वयं नालं न समर्थाः कुतः यो भवान् देवदेवः देवानां सद्गुणैर्दीप्यमानानामपि ब्रह्मादीनां देवः निरतिशयानन्तकल्याणगुणजातेन दीप्यमानो भवान् मायया आत्मीयसंकल्परूपज्ञानेन "मायावयुनं ज्ञानम्,, इति मायाशब्दस्य ज्ञानपर्यायत्वात् अवततार अवतीर्णः अनन्तकल्याणगुणाकरो भगवानेव त्वद्रूपेणावतीर्णः अतः कथमनन्तानां गुणानां वर्णने वयं प्रभव इत्यर्थः नतु सत्यमनन्तानां भगवद्गुणानां वर्णने यूयमसमर्था इति अहं तु मानुषस्तत्कथं मद्गुणानुवर्णने यूयमप्रभवस्तत्राहुः देवस्यावतारादिज्ञातस्यावतीर्णस्यापि अजहदनन्तकल्याणगुणजातस्य भगवदंशभूतस्य पौरुषाणि प्रतीति शेषः अप्रतर्क्यतया वाचस्पतीनां ब्रह्मादीनामपि धियो मुह्यन्ति किमु वक्तव्यं वयमसमर्था इति यतो ब्रह्मादय एवमुमुहुरित्यर्थः॥ २॥

यद्यपि त्वन्महिमानुवर्णने वयं नालं तथापि विपुलकीर्तेः हरेरंशावताररूपस्य पृथोः कथामृते आदृताः सादरा वयं मुनिभिरुपदेशो यथा भवति तथा प्रणोदिताः प्रेरिताः सन्तः श्लाघ्यान्यनवद्यानि कर्माणि वितन्महे विस्तारयामः॥ ३॥

विस्तारमेव प्रपञ्चयति। एष इति। एष पृथुः धर्मभृतां वर्णाश्रमानुबन्धिधर्मानुष्ठानपराणां मध्ये श्रेष्ठः "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते,, इत्युक्तरीत्या स्वयं कृतकृत्योऽप्यकृत्स्नविल्लोकसंग्रहार्थं नितरां स्ववर्णाश्रमोचितधर्मानुष्ठानपर इत्यर्थः अत एव लोकमकृत्स्नविल्लोकं धर्मे अनुवर्तयन् अनुवर्तयिता स्वस्ववर्णाश्रमोचितधर्ममनुष्ठापयिता धर्मः सेतुर्येषां तेषां सेतुर्हि तीरान्तरप्रापकस्तम्भकः तद्वच्चौ तस्मात्तेधर्मः स सद्गीहितप्रापको येषां ते धर्मसेतवः धर्मैकशरणा साधव इति यावत् तेषां गोप्ता तत्परिपन्थिनां धर्मविरोधिनामसाधूनां शास्ता यद्वा धर्मा एव सेतवः मर्यादा येषां तेषां गोप्ता केनाकारेणेत्यपेक्षायां लोकं धर्मेण वर्तयन् इत्यपसिद्धप्रकारनिर्देशः॥ ४॥

एष पृथुः स्वयमेक एव लोकपालानां सूर्येन्द्रादीनां तनूः तनुवत्कार्योपयोग्यपृथक्सिद्धविशेषणभूतानितरसाधारणान् गुणान् तनुशब्दस्य शरीरपरत्वेऽपि कार्योपयोग्यपृथक्सिद्धविशेषणत्वमेव प्रवृत्तिनिमित्तं तद्गुणपरत्वेऽपि तुल्यं तनौ स्वदेहे काले काले यथाभागं भागमनतिक्रम्य उभयोर्लोकयोर्हितं यथाभवति तथा बिभर्तीत्यर्थः॥ ५॥

तत्र सूर्यांशिनगुणधारणमेवाहुस्त्रिभिः। वसु धनं काले उपादत्ते स्वीकरोति काले दुर्भिक्षकाले विमुञ्चति अष्टौ मासान् सूर्यो यथा प्रतपन् वसु जलमादत्ते वर्षासु विमुञ्चति तद्वत् अत एव सर्वेषु भूतेषु समः॥ ६॥

वैन्यः नभुरुपरिमस्तके पादादिना आक्रमतामप्यार्तानां भूतानां करुणः करुणावान् अतिक्रमं तितिक्षति सहिष्यते अतः क्षितिवृत्तिमान् भूमेर्या वृत्तिः सहनं तद्वृत्तिर्यस्यास्तीति॥ ७॥

तथा देवे अवर्षति सति कृच्छ्रगताः प्राणा यासां ताः प्रजाः स्वयं वृष्टिं कृत्वा इन्द्रवद्रक्षिष्यति [illegible] हेतुः असौ नरदेववपुर्हरिरिति॥ ८॥

असौ पृथुर्वदनामृतमूर्तिना वदनमेवामृतमूर्तिश्चन्द्रस्तेन लोकमाप्याययति वर्द्धयति वदनामृतमूर्तिना कथं भूतेन अनुराग सहितोऽवलोको यस्मिन् विशदं यत् स्मितं तेन चारु सुन्दरं तेन अत्र क्वचित् क्वचित् वर्तमाननिर्देशः [illegible] वर्तमानसामीप्ये वर्तमानवद्वेति भूतनिर्देश आशंसायां भूत[illegible]ति द्रष्टव्यः॥ ९॥

अव्यक्तं प्रवेशनिर्गमयोरविज्ञातं [illegible]र्म मार्गो यस्य निगूढं निष्पत्तेः प्रागविज्ञातं कार्यं यस्य ग[illegible]रवेदी किमर्थमेवं कृतवानिति परैरज्ञाताभिप्रायः उपगुप्तं सुर[illegible]तं वित्तं धनं यस्य सः अनन्तमाहात्म्याधे[illegible]नामेकं धाम [illegible]मुख्यं प्रचेता इव संवृतात्मा समु[illegible] जल्पाकारादिभिर्वा परिवे[illegible] द्रष्टव्याः॥ १०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पृथुस्तुतिव्याजेन हरौ भक्तावतारार्थे तन्माहात्म्यं निरूप्यते अस्मिन्नध्याये तत्र सूतादयः स्तुतौ पृथुना निवारिता अन्ये के-स्तोतारो येन ततः स्तुत्या हरौ भक्तिरस्त्वनार्यत इत्याशङ्क्य मुनिप्रेरितास्त एव तुष्टुवुरिति तत्स्तुतिप्रकारमुपक्रमते इति सुधायामित्या-दिना ॥ १ ॥

वयं स्तोष्याम इति प्रारम्भ एव श्रेयान्नतु तत्र समर्था इत्याहुरित्याह नालमिति । अलं समर्थाः पृथुसन्निहित श्रीहरिर्महिमसंस्तवम्या हीति भावेनोच्यते । य इति । यो देवदेवः श्रीनारायणो मायया भक्तानुकम्पेच्छया अवततार तस्य वेनाङ्गं वेनस्याङ्गादवयवाज्जन्म ततस्य अतसातत्यगमन इति धातोर्विशेषसन्निहितत्वेन प्राप्तस्य । ते त्वयि स्थितस्य हरेः पौरुषाणि वर्णायितुं वाचस्पतीनां ब्रह्मादीनामपि धियो बभ्रमुरिति यस्मात्तस्माद्वयं न समर्था इति किमुत वर्णनीयं वयमिदः कैमुत्यार्थः अन्यत्र देवो हरिस्तस्य देवो देवनं क्रीडनं यस्मिन् पृथौ स देवदेवः पृथुः मायया भगवदिच्छोद्बोधितमुनीच्छया अवततार प्रकाशितोऽभूत्तस्य तेवेनस्याङ्गादवयवाज्जातस्य पौरुषाणि कथयितुं वाचस्पतीनां कवीनां धियो बभ्रमुरिति यदत इति धीशब्दे न मनोलक्ष्यते मनसावाचमेसङ्कल्पयत्यथ वाचा व्याहरतीति श्रुतेः वाचोऽभ्रमंतीति किमुक्तव्यमित्यर्थः ॥ २ ॥

तर्हि निवर्ततामित्याहुरित्याह । अथापीति । असमर्था अपि कथामृताहतरवाभिवर्तितुं मनोनायातीत्यर्थः तर्हि । किं न कुर्वन्ति किं तत्राहुरित्याह । यथोपदेशामिति । साकल्येन स्तवनाशक्तौ निवर्तनं वरमित्यत उक्तं मुनिभिरिति आज्ञोल्लङ्घनभीरुत्वाच्चितन्महे प्रपञ्चयामः ॥ ३ ॥

किं गुणविशिष्टः प्रपञ्च्य इत्यत्रोच्यते । एषइति । तत्परिपन्थिनां तस्य धर्मसेतोर्विरोधिनाम् ॥ ४ ॥

. एष पृथौ सन्निहितो हरिस्तनौ स्वदेहे तनूः शक्तिलक्षणा मूर्तिः यथा भागं बिभर्ति ॥ ५ ॥

भरणप्रकारं दर्शयति । वस्वित्यादिना । वसुर्द्रोणेऽग्नौ योक्त्रशेवसुतोये महाधन इत्यभिधानात् यथा सम्भवं योज्यं करादानकाले वसु धनमुपादत्ते दुर्भिक्षादौ दानयोगपुरुषागमनकाले विमुञ्चति सूर्योऽपि ग्रीष्मादिकाले वसुजलमुपादत्ते वर्षादौ मुञ्चति समो यथा योग्यं दण्डादिषु प्रतपन् प्रतापं कुर्वन्नन्यत्र यथर्तुप्रतपन् ॥ ६ ॥

उपर्याक्रमतां [illegible] क्रम्य वर्तमानानां सतामक्रममपराधं तितिक्षति [illegible] नां क्षितिवृत्तिमान् भूमिवत्तथा-वृत्तिका [illegible] र्यः ॥ ७ ॥

देवेऽवर्ष [illegible] सत्यानुभुवया कृच्छ्रप्राणाः क्लिष्टेन्द्रि- [illegible] ः प्रजा [illegible] न्वयः ॥ ८ ॥

[illegible] ॥

[illegible] र्यस्य स तथा अव्यक्तानां [illegible] कार्यं कर्तव्यं यस्य । उप. [illegible] "वित्तं यशोधनं वित्तो-विज्ञान् [illegible] माहात्म्य गुणानामेकं धामाश्रय [illegible] एवैकन्धाम यस्य स तथा [illegible] कधर्मा सम्भृत-आत्मा [illegible]

श्रीमच्छ्री [illegible]

वेदान्तिआस्वामी [illegible]

स्वयं धर्मभृतां श्रेष्ठो लोकं च धर्मेऽनुवर्तयंस्तत्परिपन्थिनां शास्तीति । धर्म सेतूनां गोप्तेत्यर्थः ॥ ४ ॥

तनूः शक्तीः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

सम्भृतात्मेतिचित् सुखः परिपूर्णरूप इत्यर्थः ॥ १०–१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मुनिप्रयुक्ताः सूताद्याः षोडशे तुष्टुवुः पृथुम् ।
स्तवश्च पृथ्वीदोहादिभाविवृत्तिसूचकः ॥ ० ॥

नालं न समर्थाः मायया कृपया । यद्वा । स्वशक्त्या अचिन्त्या 'सह ते तव पौरुषाणि प्रति ब्रह्मादीनामपि धियो बभ्रमुः १-२ यथोपदेशं मुनिभिरस्मदन्तःकरणं प्रविश्य' कृतमुपदेशमनतिक्रम्य ॥ ३ ॥ ४ ॥

एक एवैष तनौ स्वमूर्तीरेव लोकपालानां तनूर्मूर्तीर्बिभर्ति काले काले प्रतिसमयं लोकयोरिति यज्ञादिप्रवर्तनेन स्वर्गस्य वृष्ट्यादिना भूलोकस्य च हितं भागं भगसम्बन्धि यथा स्यात्तथा "भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु,, इत्यमरः ॥ ५ ॥

सूर्यादिननुधारणामाहाष्टभिः । वसु धनं करादानकाले आदत्ते दुर्भिक्षादिकाले विमुञ्चति च अष्टौ मासान् सूर्यो यथा वसु जलमादत्ते विमुञ्चति च वर्षासु तद्वत् ॥ ६ ॥

अक्रममनतिक्रमं तितिक्षति सहते क्षितिवृत्तिमान् पृथ्वी स्वभावयुक्तः ॥ ७ ॥

रक्षिष्यति स्वयमेव वृष्टिं दत्वा पालयिष्यति ॥ ८ ॥

वदनेनैवामृतमूर्तिश्चन्द्रस्तेनेति चन्द्रतनूधारणमुक्तम् ॥ ९ ॥

न व्यक्तं वर्त्म अन्तःप्रवेशनिर्गमयोर्मार्गो यस्य सः । निगूढं निष्पत्तेः पूर्वमविज्ञातं कार्यं यस्य सः तथा कार्ये गम्भीरमन्यैरज्ञाताभिप्रायं यथा स्यात्तथा विधत्ते इति ज्ञेयाः । उप आधिक्येन गुप्तं वित्तं धनं ज्ञानञ्च यस्य सः । अनन्तस्य विष्णोरिव माहात्म्यं गुणाश्च एकं मुख्यं धाम प्रभावश्च यस्य सः संवृतात्मा अन्यालक्षितस्वभावः प्रचेताः वरुण इवेति समुद्रवत्त्वेन । वरुणस्याप्येते गुणा द्रष्टव्याः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

षोडशे मुनिचोदितैः सूताद्यैः श्रीपृथुस्तुतिःकृतेति वर्ण्यते । इतीति । मुनिभिस्तत्प्रभावाभिज्ञैश्चोदिता गायकाः सूतादयः तद्वागेवामृतं तत्सेवया तुष्टमनसस्तुष्टुवुः ॥ १ ॥

यो देववर्यः सर्वदेवपूज्यः मायया कृपया अवततार तस्य वेनाङ्गजातस्य ते महिमानुवर्णने वयं नालं न शक्ताः किं बहुना वाचस्पतीनां ब्रह्मादीनामपि धियः तेपौरुषाणि प्रति बभ्रमुः ॥ २ ॥

अथापि कथामृतमादृतं प्रीतिविषयं येषां ते मुनिभिः प्रचोदिता यथोपदेशमुपदेशमनतिक्रम्य पृथोर्हरेः कर्माणि वितन्महि विस्तारयामः ॥ ३—४ ॥

काले काले यथाकालं यथाभागं प्रा[illegible]दिकार्यानुसारेण उभयोरैहिकामुष्मिकयोर्यज्ञादिना वृष्ट्यादिना च यद्धितं भवति तथा-लोकपालानां तनूर्मूर्तीः । एक एवैषः पृथुर्हरिर्बिभर्ति ॥ ५ ॥

एतदेवप्रपञ्चयति । वसुकाल इत्यष्टभिः [illegible] सूर्योजलं ग्रहणकाले उपादत्ते त्यागकाले विमुञ्चति च तथा श्रीपृथुर्हरिः वसु धनम् ॥ ६ ॥

दुरासदो दुर्विषह आसन्नोऽपि विदूरवत् ।
नैवाभिभवितुं शक्यो वेनारण्युत्थितोऽनलः ॥ ११ ॥
अन्तर्बहिश्च भूतानां पश्यन् कर्माणि चारणैः ।
उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम् ॥ १२ ॥
नादण्ड्यं दण्डयत्येष सुतमात्मद्विषामपि ।
दण्डयत्यात्मजमपि दण्ड्यं धर्मपथे स्थितः ॥ १३ ॥
अस्याप्रतिहतं चक्रं पृथोरामानसाचलात् ।
वर्त्तते भगवानर्को यावत्तपति गोगणैः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

क्षितेर्वृत्तिः सर्वसत्त्वापराधसहनरूपास्यास्तीति तथाभूतः । अतिक्रममपराधं तितिक्षति सहिष्यते ॥ ७ ॥

कृच्छ्रे कष्टे प्रामाः प्राणा यासान्ताः मरणाभिमुखाः इन्द्रवत् पर्जन्यरूपी रक्षिष्यति ॥ ८ ॥

अनुरागसहितोऽवलोको यस्मिन् तेन विशदेन स्मितेन चारु सुन्दरं तेन वदनामृतमूर्तिना मुखचन्द्रेण आप्याययति वर्द्धयति अत्र कचिद्वर्त्तमाननिर्देशो "वर्त्तमानसामीप्ये वर्त्तमानवद्वा,, इति भूतनिर्देशश्च "आशंसायां भूतवच्च,, इति सूत्रद्वयः ॥ ९ ॥

एष पृथुर्हरिः अव्यक्तवर्त्मा अलक्षितमार्गः । दुर्ज्ञेयगतिरित्यर्थः इदं करिष्यं इत्येवं शत्रुदमनादिकार्यप्रकाशने शत्रुपलायनादिदोषवारणार्थं निगूढकार्यो गुप्तकर्मा गम्भीरे साहसादिदोषराहित्येन देशकालाद्यनुसारेण विधत्ते इति गम्भीरवेधा उपगुप्तं सुरक्षितं वित्तं यस्य सः अनन्ते हरौ माहात्म्यं महत्त्वं येषां ते गुणाः शान्त्यौदार्यकारुण्यादयः एकन्धाम यस्य सः संयतः आत्मा मनो देहो वा यस्य सः प्रचेता इव ॥ १० ॥

———

भाषाटीका ।

मैत्रेयजी बोले इस प्रकार कहतेहुये पृथुमहाराज के वचनामृत से सन्तुष्ट हुये गायकजन मुनिजनों के प्रेरणासे महाराजकी स्तुति करनेलगे ॥ १ ॥

हे महाराज ! आपकी महिमाके वर्णन करनेमे हमलोग समर्थ नहीं हैं जोआप सब देवों में श्रेष्ठ हो अपनी माया से अवतार लिये हो वेनराजके अंगमे होने वाले आपके पौरुषों के वर्णन में ब्रह्मादि कों कीभी बुद्धि भ्रमित होजाती है ॥ २ ॥

तौ भी उत्तम कीर्तिवाले हरिके कलावतार पृथुमहाराज की कथारूपी अमृतसे सन्तुष्टभये हमलोग मुनिजनों के प्रेरणा से सुने हुये उपदेश के अनुसार प्रशंसनीय आपके गुणों का विस्तार करेंगे ॥ ३ ॥

यह पृथुमहाराज धर्मधारियों में श्रेष्ठ हैं सबलोकों को धर्ममें चलाने वालेहैं धर्म मर्यादा के रक्षक हैं धर्म विरोधियों के शासन करने वालेहैं ॥ ४ ॥

यह महाराज स्वर्ग मर्त्य दोनों लोकके हितकेलिये समय समय पर कार्य करनेको इकलेही अपने शरीर में सबलोक पालों के मूर्तियों को धारण करतेहैं ॥ ५ ॥

यह महाराज समय पर धन को ग्रहण करतेहैं समय पर उस को खर्च करतेहैं सूर्य सरी के प्रताप वाले होकर सब भूतमात्र में समदृष्टि से वर्तते हैं ॥ ६ ॥

अपने मस्तक पर पैर रखने वाला हो यदि दुःखी हो तो उसके अपराध को पृथुमहाराज क्षमा करने वाले हैं सदा प्राणिमात्र पर दया करतेहैं दुखित के अपराध सहने को पृथिवीसे क्षमा वान्हैं ॥ ७ ॥

राजशरीर ये भगवान् इन्द्रके नहीं वर्षते भये मे कष्ट को प्राप्त भई प्रजाको अनायासहीसे इन्द्र के सरीका रक्षा करलेवेंगे ॥ ८ ॥

यह महाराज सब लोकों को अपने मुखचंद्र से तृप्त कर देते हैं जिस बदन में मन्दहास है कृपा पूर्वक देखना है तिस से वह मुख बडा मनोहर है ॥ ९ ॥

इनका मार्ग बड़ा गुप्त है इनके कार्य गुप्त होते हैं गंभीर अभिप्राय से कार्य करने वाले हैं धनको गुप्त से रखने वाले हैं अनन्त माहात्म्यवाले गुणों के आकर श्रीविष्णु के आश्रय हैं इस प्रकार से पृथुमहाराज वरुण के तुल्यगुणों वाले हैं ॥ १० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुरासदः शत्रोर्मनसापि प्राप्तुमशक्यः दुर्विषहः शत्रुभिः सोढुमशक्यः विदूरवर्त्यपरैरभिभवितुमशक्यः वेन एवारणि स्तस्मादुत्थितः ॥ ११ ॥

चारणैर्गुप्तभृत्यैः पश्यन्नपि स्तुतिनिन्दादावुदासीन इव वर्तिष्यते यथा देहिनामध्यक्षोऽपि [illegible] आत्मभूतो वायुः सूत्रात्मा तद्वत् ॥ १२ ॥

आत्मद्विषां सुतमिति सुतमहं [illegible] आत्मजमात्याधर्म धर्मपथे यमस्य वृत्ते स्थितः ॥ १३ ॥

चक्रमाज्ञा सेना वा रथस्य [illegible] मानसाचलमभिव्याप्य प्रवर्तते किम्पर्यन्तमित्यत आह [illegible] रश्मिगणैर्यावत्तपति तावत् ॥ १४ ॥

रञ्जयिष्यति यल्लोकमयमात्मविचेष्टितैः।
अथामुमाहू राजानं मनोरञ्जनकैः प्रजाः॥ १५॥
दृढव्रतः सत्यसन्धो ब्रह्मण्यो वृद्धसेवकः।
शरण्यः सर्वभूतानां मानदो दीनवत्सलः॥ १६॥
मातृभक्तिः परस्त्रीषु पत्न्यामर्ध इवात्मनः।
प्रजासु पितृवत्स्निग्धः किङ्करो ब्रह्मवादिनाम्॥ १७॥
देहिनामात्मवत्प्रेष्ठः सुहृदां नन्दिवर्धनः।
मुक्तसंगप्रसङ्गोऽयं दण्डपाणिरसाधुषु॥ १८॥
"एष दोग्धा महीं वीरो गां सतीमोजसौषधीः।
समां करिष्यते चेमां धनुष्कोटया समन्ततः,,॥*
अयन्तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयावतीर्णः।
यस्मिन्नविद्यारचितं निरर्थकं पश्यन्ति नानात्वमपि प्रतीतम्॥ १९—२०॥

श्रीधरस्वामिकृतभावार्थदीपिका।

यद्यस्माद्रञ्जयिष्यत्यथ तस्मान्मनोरञ्जनैर्हेतुभिरमुं राजानमाहुः मनोरञ्जनकैरिति चेष्टितविशेषणं वा॥ १५—१६॥

मातरीव भक्तिर्भजनं यस्य आत्मनो देहस्यार्धे इव पत्न्यां प्रीतिमान्॥ १७॥

नन्दिं सुखं वर्धयतीति तथा मुक्तसंगेषु प्रकृष्टः संगो यस्य दण्डपाणिरित्यपराधानुपेक्षणमुच्यते नादण्ड्यमित्यत्र पक्षपाताभाव उक्तः॥ १८॥

अर्थरिवाति तुशब्देन निरुपमत्वं दर्शयति कोऽसावात्मा तमाह यस्मिन्प्रतीतमपि नानात्वमर्थशून्यं पश्यन्ति॥ १९—२०॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिन्याख्या दीपिकाटिप्पणी।

विदूरस्थस्य हि पौरुषेणाभिभवो न भवतीति धर्मलुप्ता ज्ञेया॥ ११॥

परस्तुतिनिन्दादौ हि लोक उदासीनो वर्त्तते अयन्तु स्वस्तुतिनिन्दादावपि तथैवेति इव शब्दार्थः अविकृतः अपरोक्षीभूतत्वाद्विकारशून्यः आत्मभूतः समष्टिलिङ्गत्वान्मुख्योपाधिः॥ १२॥

वैरिणामप्यदण्ड्यं दण्डयतीत्येतावतैव चारितार्थ्ये सुतग्रहणं स्वात्मजसाम्यार्थम्॥ १३—१४॥

मनोरञ्जनैर्हेतुभिः मनसः प्रसादनैश्चेष्टितधर्मैर्हेतुभिः द्वितीयेऽर्थे नन्द्यादिविहितो [illegible]

भजनमनुवृत्ति[illegible]

अयंतु साक्षादि[illegible] गां सतीमोजसौषधीः समां [illegible] इति पद्यं कश्चिदधिकं दृश्य[illegible] विगीत मिवभाष्य ननु निरुक्त[illegible] कतिचिण्णा देवमनुष्यादिष्वपि दृश्यन्त एव किमिति आश्चर्यमिव वर्ण्यन्ते तत्र साम्यं परिहरन्नाह। अयं तु साक्षादिति॥ १९—२०॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

दुरासदः शत्रोर्मनसा प्राप्तुमशक्यः शत्रुभिः सोढुमशक्यः आसन्नः सन्निहितोऽपि दूरस्थो पौरुषेणाभिभवितुमशक्यः येन यथा रक्षितस्तस्मादुत्थितोऽनन्तोऽग्निरिवमनन्तपाप्येतद्गुणाद्भुतत्वाः॥ ११॥

चारमार्गभूतपुरुषैः अन्तर्बहिश्च भूतानां कर्माणि पश्यन्नपि स्तुतिनिन्दादावुदासीनो वर्तिष्यते देहिनामध्यक्षो देहधारणे प्रधानहेतुभूतः सूत्रात्मा सूत्ररूपो वायुरिव सूत्रात्मेति इकारार्षः वायुरात्मेव देहिनामिति पाठान्तरं तत्र आत्मा अन्तः प्रविश्य धारको वायुरिवेत्यर्थः उदासीन इवास्त इत्यत्र दृष्टान्तः॥ १२॥

एष पृथु आत्मद्विषां शत्रूणामपि सुतमदण्ड्यं न दण्डयति सुतग्रहणं स्वात्मजसाम्यार्थम् आत्मजमपि दण्ड्यं दण्डयतियतोऽसौ धर्मपथे स्थितः यमस्य वृत्तौ स्थितः॥ १३॥

अस्य प्रभोश्चक्रमाज्ञारथचक्रम् अप्रतिहतं सत् मानसाचलमभिव्याप्य वर्तते किं वक्तव्यमामानसाचलादिति यतोऽसावर्कः सूर्यो यावद्गोगणैः किरणसमूहैस्तपति तावत् वर्तते॥ १४॥

राजशब्दप्रवृत्तिनिमित्तं प्रजारञ्जनरूपमस्मिन्नेव पुष्कलमित्याहुः रञ्जयिष्यतीति अयं पृथुरात्मनः स्वस्य विचेष्टितैर्व्यापारैः यतो लोकं रञ्जयिष्यति अथ ततः मनोरञ्जनहेतुभिरमुं राजानं प्रजाः आहुः॥ १५॥

दृढव्रतः अप्रतिहतसङ्कल्पः सङ्कल्पोऽपि तस्य नासमीचीनविषय इत्याह। सत्यसन्धः सत्यं समीचीनं सन्धत्ते सङ्कल्पत इति सत्यसन्धः ब्रह्मण्यः ब्राह्मणेषु साधुः वृद्धानां ज्ञानवृद्धानां सेवकः सर्वभूतानां शरण्यः रक्षकत्वेन विश्वसनीयः मानदः संमानकरः दीनेषु वत्सलः॥ १६॥

* अयं श्लोक[illegible]ोऽस्यातः श्रीधरस्वामिभिरव्याख्यातत्वेन जीवगोस्वामि चक्रवर्ति राधारमणदास गोस्वामिभिः प्रतीकंधृत्वा [illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

परस्त्रीषु परदारेषु मातरीव भक्तिभजनं यस्य आत्मनो देहस्यार्धे इव पत्न्यां वर्तते प्रजासु पितृवत्स्निग्धः दोषानवेक्ष्यापि प्रीतिपूर्वकमनुवर्तनशीलः ब्रह्मवादिनां ब्रह्मविदां किङ्करो दासः १७

देहिनामात्मवत् निरतिशयप्रीतिविषयः सुहृदां नन्दिमानन्दं सुखं वर्धयतीति तथा मुक्तसङ्गेषु वीतरागिषु प्रकृष्टः सङ्गो यस्य असाधुषु दण्डपाणिरित्यपराधक्षमोऽच्यते नादण्ड्यमित्यत्र पक्षपाताभाव इत्यपौनरुक्त्यम् ॥ १८ ॥

एष महावीरः पृथुः ओजसा बलेन सतीं गां भूमिमोषधीर्दोग्धा भूमेरोषधीर्धोक्ष्यतीत्यर्थः अकथितंचेति दुहेः द्विकर्मकत्वाद्गामिति द्वितीयानिर्देशः तथा इमां भूमिं स्वधनुःकोट्या परितः समां करिष्यते १९

किंबहुनायं सद्गुणानामाश्रय इति यतोऽसावनन्तकल्याणगुणानिधिर्भगवानिहावतीर्ण इत्याहुः अयं त्विति अयंत्वित्यनेन निस्समाभ्यधिकत्वमभिप्रेतं तत्र हेतुः साक्षाद्भगवान् भगवच्छब्दप्रवृत्तिनिमित्तभूतज्ञानादिषाड्गुण्यपूर्णोहेयगुणराहित्यमुच्यते कूटस्थ इति निर्विकार इत्यर्थः ऽधीशः त्रिलोकस्य त्रिविधचेतनानामीश इतिवा एवंभूतो यः परमात्मा स कलया स्वांशेन जीवेनावतीर्ण इत्यर्थः शरीरभूतपृथ्वाख्यजीवोपकल्पितोऽवतीर्णः आवेशावतार इत्यर्थः यद्वा यो भगवान् स आत्मा जीवशरीरकः विशेष्यसंज्ञिनो नवाच्छिशब्दा नाव्यक्तिपर्यन्तास्ववजीववाचिनोऽपि आत्मशब्दस्य शरीरपरमपुरुषपर्यन्तत्वस्याकृतिनयसिद्धत्वात् कलया इत्थंभूतलक्षणे तृतीयेयं स्वापृथक्सिद्धज्ञानादिगुणविशेषेणोपलक्षितोऽवतीर्णः कोऽसावात्मा यच्छरीरकोऽवतीर्ण इत्यत्राह । यस्मिन्निति । यस्मिन् जीवे प्रतीतमपि अविद्यारचितं प्रकृतंपरिणामरूपं नानात्वं देवमनुष्यादिभेदं निर्गतमर्थाद्वस्तुतः निरर्थकम् अवास्तविकं पश्यन्ति तत्त्वदर्शिन इति शेषः परमार्थत आत्मनि अविद्यमानं देहात्माभिमानिनामात्मनि प्रतीतमपि नानात्वं देहविलक्षणात्मदर्शिनस्तत्त्वदर्शिनः प्रकृतिपरिणामरूपत्वेन तद्गतमेव पश्यन्तीत्यर्थः यस्मिन् प्रतीतं नानात्वमित्यनेनात्मनि नानात्वस्य प्रतीतिविषयत्वं नतुप्रमितिविषयत्वमित्युक्तम् अनेन जीवेनानात्वमविद्यासंबन्धकृतं नतु स्वभावतः इत्युक्तं भवति यद्वा ननु जीवशरीरककलयावतीर्णश्चेत् जीवस्याविद्यासंबन्धाविद्यका जैवा दोषाः परस्मिन् पुरुषे प्रसज्येयुस्तत्राह । यस्मिन्निति । भगवति प्रतीतमपि जीवशरीरकत्वादिना हेतुना प्रतीतमपि अविद्याकृतं नानात्वं निरर्थकं पश्यन्ति अर्थात्प्रयोजनान्निर्गतं निरर्थकमकार्यकरं यद्यपि जीवशरीरकत्वादिना प्रतीयते तथापि जीव इव बाधकत्वयुक्त्वादिकं देवादिदेहसम्बन्धात्प्रतीयमानमपि न वास्तविकं किन्तु देवादिदेहगतमेवैवं परस्मिन्नपि पुरुषे जीवसम्बन्धात्प्रतीतमपि जीवगतमेव नतु परमपुरुषगतं नचैवं जीवस्य शरीरत्वाद्वास्तविकेनापि नानात्वेनानर्थप्रसक्तिरिति वाच्यं जीवस्याप्यनर्थप्रसक्तेः सशरीरत्वप्रयुक्तत्वाभावात् प्रकृतिवश्यत्वाद्यायत्तत्वात् परमात्मनस्तु मायां स्ववशीकुर्वतः प्रकृतिवश्यत्वकर्मवश्यत्वाद्यभावेनानर्थाप्रसक्तेः एतदेवाभिप्रेत्य निरर्थकं पश्यन्तीत्युक्तम् २०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अग्नेः शक्तिसन्निधानस्वभावमाह । दुरासद इति ॥ ११ ॥

वायुसन्निधानफलमाह । अन्तर्बहिरिति । अन्तश्चारणैः श्वाससञ्चारैर्बहिश्चारिगूढपुरुषैः प्रेमलम्बनत्वाद्देहिनामात्मा वायुस्तुप्राणरूपेणोदासीनउपरिस्थितोऽधोवर्तमानं सर्वमीक्षते यथा तथायमप्यध्यक्षः सर्वस्मादुपरि वर्तमानावज्ञो यस्यति साध्वेक्षः परितोवर्तमानं जानाति तर्षति वा ॥ १२ ॥

आत्मद्विषामात्मशत्रूणां सुतमप्यदण्ड्यं न दण्डयन्ति दण्ड्यं तमात्मजमपि दण्डयति तत्र निमित्तमाह । धर्मपथ इति अनेन धर्मराजसन्निधानफलमुक्तं भवति ॥ १३ ॥

परमैश्वर्यशसन्निधानफलमाह । अस्येति । आमानसाचलान्मानसपर्वतपर्यन्तकुगणैरश्मिगणैः ॥ १४ ॥

चन्द्रगुणसन्निधानफलमाह । रञ्जयिष्यतीति पद्यस्मादस्मात् ॥ १५ ॥

सन्धोऽवधौ प्रतिज्ञायामिति यादवः ॥ १६ ॥ १७ ॥

आनन्दवर्धनः आनन्दवृद्धिकरः मुक्तसङ्गैः परमहंसैः प्रसङ्गो यस्य स तथा पूर्वं ध्वनितमर्थं स्पष्टयति दण्डपाणिरिति ॥१८–१९॥

उक्तमिदं सर्वं श्रीनारायणसन्निधानफलमित्यभिप्रेत्याह । अयंत्विति । तुशब्द एवार्थे अस्मिन्पृथौ कलयावतीर्णः सन्निहितः साक्षाद्भगवांस्तु ऋष्याद्यन्यतमो न स्यात्किन्तु नारायणएवेत्यति हेतुगर्भविशेषणद्वयमाह । ऽयधीश इति । अयाणामीशा इन्द्रादयस्तेषामप्यधिकत्वेनेशः " स्यादध्यधिक ईश्वर ,, इति यादव चेतनाचेतनकूटे तिष्ठतीति कूटस्थः स्थानदोषत्वेन लेपमस्य नास्तीत्यत उक्तमात्मेति गुणपूर्णत्वादात्मा तर्हि स्थानभेदान्नानात्वमायातमत्रोच्यते । यस्मिन्निति । यल्लोके निरर्थकं तद्वस्मिन् हरौ प्रतीतमविद्यया हरिर्जडरचितकल्पितमानात्वमिव यथा पश्यन्ति एतदुक्तं* भवति यल्लोके अपुष्पादिकमविद्यमानं तन्मत्स्यादिभगवद्रूपेषु प्रतीतं नानात्वं यथामिथ्याभूतं पश्यन्ति योगिनस्तेति २ तदुक्तं यल्लोकेनिरर्थकं तद्भगवद्रूपेषु प्रतीतनानात्वदर्शनेन पश्यन्ति सन्तः मत्स्यरूपादिनानात्वदर्शनमनिरर्थकमितिपाठे एवं धर्मान्पृथक् पश्यन्निति च अनेन तद्धर्माणामपि पृथक्त्वदर्शने नानर्थ इत्युक्तं भवति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

एष दोग्धेति पद्यं पुनरुक्तमिव परम् । अतः पृथङ्नाङ्गीकृतम् । देवमनुजान्तरेष्वपि ते गुणाः सन्तीति न तत्माधर्म्यमित्याह । अयं तु साक्षादिति । यतः स एव कलया शक्त्या सह अवतीर्णोऽस्मिन् प्रविष्टः आत्मा परमात्मा सर्वातिशयगुणत्वमेवाहुः यस्मिन् भगवति साक्षात् सति नानात्वं स्वात्मनि देवमनुष्यत्वादिभेदं निरर्थकं पुरुषार्थशून्यं पश्यन्ति । अविद्या कल्पितत्वेनातितुच्छत्वादिति भावः ॥ १९——२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दुरासदः दुष्टतमैः शत्रुवर्गैरनिकटः दुर्विषहः शत्रुशार्दूलैः सोढुमशक्यः । वर्ण एवार्णवास्तन्मथना दुत्थितः ॥ ११ ॥

चारणैर्भ्रमितैश्चरैश्चपश्यन्उदासीनोऽसक्तः पृथुपक्षे भूत्यामात्यादिष्वासक्तोऽपि तैरुदासीन इव वक्ष्यमाणाः । वायुः सूत्रात्मेव आत्मा अन्तर्यामीव पृथुरध्यक्षः ॥ १२ ॥

धर्मपथे यमस्य वृत्ती ॥ १३ ॥

* अत्रयस्मिन्परब्रह्मणि अविद्यारचितमनिर्वचनीयाविद्याकल्पितं विश्वं प्रतीतं भ्रान्तिप्रतीतिसिद्धं नानात्वमित्यभेदमिव निरर्थकं मिथ्याभूतं पश्यन्तीत्यन्यथा प्रतीतिर्यथावद्भ्यार्थः ॥ टी०

२ तात्प

अयं भुवो मण्डलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः ।
आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः ॥ २१ ॥
अस्मै नृपालाः किल तत्र तत्र बलिं हरिष्यन्ति सलोकपालाः ।
मंस्यन्त एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उद्धरन्त्यः ॥२२॥
अयं महीं गां दुदुहेऽधिराजः प्रजापतिर्वृत्तिकरः प्रजानाम् ।
यो लीलयाद्रीन् स्वशरासकोट्या भिन्दन् समां गामकरोद्यथेन्द्रः ॥२३॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चक्रमाज्ञा सेना वा रथस्य चक्रं वा । मानसोत्तरगिरिमभिव्याप्य वर्त्तेत । किं पर्यन्तमित्यत आह अर्को यावत्तपतीति ॥ १४ ॥

मनोरञ्जनानि कानि सुखानि येभ्यस्तैरात्मचेष्टितैर्गल्लोकं रञ्जयिष्यतीत्यर्थः । अन्यस्तु राजतीति निरुक्त्या अयन्तु रञ्जयति राजतीति निरुक्तिद्वयेनैव राजेति भावः ॥ १५ ॥

सत्यसन्धः सत्यप्रतिज्ञः । व्रतसन्धयोः शास्त्रीयलौकिकत्वाभ्यां भेदो ज्ञेयः ॥ १६ ॥

परस्यामात्मनो देहस्यार्द्धे इव प्रीतिमानिति शेषः ॥ १७ ॥

नन्दि सुखं वर्द्धयतीति सः मुक्तसङ्गेषु विरक्तेष्वेव प्रसङ्गो यस्य सः ॥ १८ ॥

यस्मिन् वर्त्तमाना मुनयोऽविद्यया रचितमेकस्यापि जीवस्य स्थूलसूक्ष्मदेहाध्यासात् नानात्वं स्वप्ने च नानात्वं प्रतीतमपि निरर्थकमवस्त्वेव पश्यन्ति ॥ १९ ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

येन एषोऽरणिस्थवदुत्थितः पृथुरूपोऽनलः । आसन्नः निकटवर्त्योऽपि विदूरवत् अभिभवितुं नैव शक्यः ॥ ११ ॥

अन्तर्गूढस्थाने कृतानि जनानां कर्माणि चारगैः गूढभृत्यैः पश्यन् वायुरिवोदासीनः रागद्वेषरहितोऽपि आत्मेव परमात्मेवाभ्यन्तस्तत्कर्मानुसारेण फलदो भविष्यति ॥ १२ ॥

धर्मपथे धर्ममार्गे स्थितः ॥ १३ ॥

चक्रमाज्ञा रथचक्रं वा ॥ १४ ॥

मनोरञ्जनकैः प्राणिमनोह्लादकरैः आत्मचेष्टितैः यस्माल्लोकं रञ्जयिष्यति । अथ तस्मादमुं राजानमाहुः ॥ १५—१६-१७ ॥

देहिनामात्मवत् प्रेष्ठः अतिप्रियः सुहृदां नन्दि सुखं वर्द्धयतीति तथा । मुक्तसंगेषु त्यक्तदुःसंगेषु प्रकृष्टः । संगो यस्य सः । असाधुषु दण्डपाणिर्धर्मप्राणोऽवहित इत्यर्थः ॥ १८ ॥

महीं गां गोरूपां सतीम् ओजसा औषधीर्दोग्धा इमां महीं समां करिष्यते ॥ १९ ॥

"आत्मा वा अरे द्रष्टव्यः स विजिज्ञासितव्यः" इत्यादिश्रुतिप्रसिद्धो जिज्ञास्यः साक्षाद्भगवान् [illegible] नियन्ता अशक्तिविशेषेण [illegible] कूटस्थो निर्विकारः एवं स्वरू[illegible]विश्वाकार इत्यौपनिषदानां सि[illegible]पनिषदाः मूर्खास्तु "यतो वा इमानि [illegible]त्येतस्का र्यत्वेन प्रसिद्धमपि अयमा[illegible]तमपिना

नात्वं नानाकारभावं यस्मिन्निरर्थं पश्यन्ति नाङ्गीकुर्वन्तीत्यर्थः तेषां वेदान्तविद्याहीनानां बुद्धकापिलकणादादीनां तर्कमूलाः पक्षाः श्रीमद्भगवद्बादरायणचरणैरविरोधाध्याये निराकृताः सोऽयं कलया अर्चीरूपधारिण्या श्रिया सह श्रीपृथुरूपधारी अवतीर्णः २०॥

भाषाटीका ।

अग्नि के समान दुःसह समीप होकर दूर सरीके होने से मेघ रूपी अरणियमें होने वाले पृथु रूपी अग्नि के जीतने को कोई भी नहीं समर्थ है ॥ ११ ॥

बाहर भीतर दूतों के द्वारा सब कर्मों को देखते हुये उदासी न सरीके प्राणी मात्रों के भीतर वायु के तुल्य हो रहे हैं ॥१२॥

दण्ड के योग्य न होता शत्रु के पुत्र को भी नहीं दण्ड देते हैं धर्म मार्ग मे चलने वाले हैं तिसी से दण्ड के योग्य यदि पुत्र भी होता उसको दण्ड देते हैं ॥ १३ ॥

इन पृथुमहाराज की आज्ञा चक्रमानसाचल पर्यन्त है जहां पर्यन्त सूर्य भगवान् अपने किरणों से तपते हैं तहां तक सर्वत्र आज्ञा चलती है ॥ १४ ॥

सबके मन रंज न करनेवाले अपने चरित्रोंसे सब प्रजों को रंजन करेंगे तिस से प्रजा लोग इनको राजा कहेंगे ॥ १५ ॥

दृढ संकल्प वाले हैं सत्य प्रतिज्ञा वाले हैं ब्राह्मणों के रक्षक हैं वृद्धजनों के अनुवर्त्तन करने वाले हैं सब प्राणि मात्र के शरण होने से रक्षा करने वाले हैं दूसरे को मान देने वाले हैं दीन जनों के दयालु हैं ॥ १६ ॥

पर स्त्री को माता की नाईं देखने वाले है पत्नी को अपने अर्धांग मानने वाले हैं प्रजाओं मे पिता सरी के स्नेह करने वाले हैं ब्रह्म वेत्ताओं के सेवक हैं ॥ १७ ॥

सब प्राणी को आत्मा के तुल्य प्रिय हैं मित्र के आनन्द देने वाले हैं विरक्तों के संग करने वाले हैं दुष्टों को तो यमराज के तुल्य हैं ॥ १८ ॥

यह वीर पृथिवी से औषधी दुहकर धनुष के अग्र से पृथिवी को सम करेंगे ॥ १९ ॥

साक्षात् भगवान् तीनों लोक के ईश्वर हैं निर्विकार हैं व्यापक हैं विष्णु के कला से अवतीर्ण हैं जिनमे विषम पुरुष अविद्या से विरचित विपरीत नाना बुद्धि करते हैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आउदयाद्रेस्तत्पर्यन्तं गोप्ता गोपायिष्यति तदर्थं पर्यस्यते पर्यटिष्यति प्रदक्षिणीकरिष्यतीत्यर्थः ॥ २१ ॥

अस्मै तथा प्रदक्षिणं कुर्वते मंस्यन्ते ज्ञास्यन्ति तस्य चक्रायुधस्य उदाहरन्त्यः कीर्तयन्त्यः ॥ २२ ॥

इन्द्र इवाद्रीन्विभिन्दन् ॥ २३ ॥

विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ ।
तदा निलिल्युर्दिशि दिश्यसन्तो लाङ्गूलमुद्यम्य यथा मृगेन्द्रः ॥ २४ ॥
एषोऽश्वमेधाञ्छतमाजहार सरस्वती प्रादुरभावि यत्र ।
अहार्षीद्यस्य हयं पुरन्दरः शतक्रतुश्चरमे वर्तमाने ॥ २५ ॥
एष स्वसद्मोपवने समेत्य सनत्कुमारं भगवन्तमेकम् ।
आराध्य भक्त्या लभतामलं तज्ज्ञानं यतो ब्रह्म परं विदन्ति ॥ २६ ॥
तत्र तत्र गिरस्तास्ता इति विश्रुतविक्रमः ।
श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः ॥ २७ ॥
दिशो विजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः ।
सुरासुरेन्द्रैरुपगीयमानमहानुभावो भविता पतिर्भुवः ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां
षोडशोऽध्यायः ॥ १६ ॥

——○*○——

श्रीधरस्वामिकृतभावार्थदीपिका ।

लाङ्गूलमुद्यम्य यथा मृगेन्द्रश्चरति तथा धनुर्विस्फूर्जयन् यदा क्ष्मामचरत् ॥ २४ ॥

सरस्वती प्रादुरभावि प्रादुरभूत् कर्मकर्तरि चिण् तत्राहार्षीत् हरणं करिष्यतीत्यर्थः ॥ २५ ॥ २६ ॥

विश्रुता विक्रमा यस्य गाथाः प्रबन्धान् आत्माश्रिता विष्ण्वाश्रिताः ॥ २७ ॥

उपगीयमानो महानुभावो यस्य ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
षोडशोऽध्यायः ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अयं नरदेवनाथः प्रभुः आउदयाद्रेः उदयाद्रिपर्यन्तं भुवो मण्डलं गोप्ता रक्षिष्यति रक्षणार्थमेकवीरः स्वसमानाभ्यधिकवीरान्तरशून्यः जैत्रं जयशीलं रथमास्थाय अधिष्ठाय आत्तं धृतः चापो धनुर्येन सः अर्कवत् दक्षिणतः पर्य्यस्यते प्रदक्षिणीकरिष्यतीत्यर्थः ॥ २१ ॥

अस्मै तथा प्रदक्षिणीकुर्वते पृथवे लोकपालैरिन्द्रादिभिः सहिता नृपाला राजानः तत्र तत्र बलिमुपायनं हरिष्यन्ति समर्पयिष्यन्ति तेषां नरलोकपालानां नृणां स्त्रियः तस्य पृथोः यशः उपश्लोकयन्त्यः आदिराजं पृथुं चक्रायुधं भगवन्तं मंस्यन्ते धारयन्ति ॥ २२ ॥

तद्यशः कथनरूपं स्त्रीणां वाक्यमाहुरयमित्यादिभिश्चतुर्भिः अयमित्यादिकं न सूतादिवाक्यम् एष दोग्धा महावीरो गां सतीमित्यनेन पौनरुक्त्यापत्तेः अत एव दुदुहे अकरोत् विलिल्युरिति भूतनिर्देशोपपत्तिः अयमधिराजः पृथुः प्रजापतिः प्रजापालनाधिकृतः प्रजानां जीवनोपायकरः जीवनोपायं चिकीर्षुरित्यर्थे पर्य्यवसानं दोग्ध्रीं गां गोरूपधरां महीं दुदुहे इन्द्र इव स्वशरासनकोट्या शरासनशब्दो धनुःकोट्येति पूर्वमुक्तत्वात् शरासनस्य धनुःअग्रस्य कोट्या अग्रेण लीलया अद्रीनभिन्दन् गां भूमिं समामकरोत् करिष्यतीत्यर्थः ॥ २३ ॥

लाङ्गूलं पुच्छमुद्यम्य उन्नमय्य यथा मृगेन्द्रः सिंहः चरति तथा आजगवं धनुः विस्फूर्जयन् शत्रुभिः सोढुमशक्यो विक्रमो यस्य सः यदा क्ष्मामचरत् तदा असन्तो धर्मविरोधिनो दिशि दिशि निलिल्युः लीना बभूवुः ॥ २४ ॥

एष पृथुः सरस्वती सरस्वत्याख्या महानदी यत्र यस्मिन् ब्रह्मावर्ते प्रादुरभावि प्रादुरभूत् कर्मकर्तरि चिण् तत्र देशे शतमश्वमेधानाजहाराकरोत् यस्य शतक्रतोः क्रतुः शतं संकल्पानुनिष्ठतः पृथोश्चरमे शततमे क्रतौ वर्तमाने प्रवर्तमाने सति पुरन्दरः इन्द्रोऽयमश्वमहार्षीत् हृतवान् ॥ २५ ॥

एषः पृथुः स्वसद्मोपवने स्वगृहस्य उपसमीपे यदुपवनं तस्मिंस्तत्रैकमसहायं भगवन्तं सनत्कुमारं भक्त्या आराध्य तदमलं ज्ञानमलभत किं तत् यतो ज्ञानात् परं ब्रह्म विन्दन्ति ॥ २६ ॥

विश्रुताः विक्रमाः यशांसि यस्य पृथुः पराक्रमः प्रभावो यस्य सः पृथुः आत्माश्रयाः [illegible] गाथाः प्रबन्धरूपाः स्तास्ता गिरः श्रोष्यति ॥ २७ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका

स्वतेजसा स्वबलेन उत्पाटिताः निर्मूलिताः लोकानां शल्य सदृशाः दुरात्मानो येन सः अत एवाप्रतिहतचक्रः अप्रतिहताज्ञः दिशो विजेष्यति सुरासुरश्रेष्ठैरुपगीयमानः महानुभावो यस्य सः भुवः पतिः भविता भविष्यति ॥ २८ ॥

इतिश्रीभागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

राज्याविभिमावुरित्याह । अयमिति । ओदयाद्रेरुदयपर्वतपर्य्यन्तं पर्यस्यते पर्यटिष्यति ॥ २१ ॥

अन्येषु राजसु सत्सु अस्याधिराज्यं कथमित्याशङ्क्य चक्रवर्तित्वात्युज्यतइति उच्यते । तस्मा इति ॥ २२ ॥

कीदृशं यशउच्चरन्त्य इत्यत्राह । अयं महीमिति ॥ २३ ॥

निखिलयुर्मिलिनाः लाङ्गूलं पुच्छम् ॥ २४ ॥

अहार्षीदित्यनेनास्य प्रतिभटः शतमखएवनान्यइति द्योतनाय कथितमितिज्ञातव्यं चरमे अन्त्येऽश्वमेधे वर्तमाने सति ॥ २५ ॥

यतोज्ञानात्परं ब्रह्म प्रत्यक्षं भवति योगिनः ॥ २६ ॥

तद्भविष्यत्कथातीतत्वेन कथं कथ्यत इत्यत्रोच्यते । तत्रेति । आत्माश्रिताः स्वविषया याभिः वद्भिरभूतोपलाक्षिता यशोनिबन्धाः ॥ २७ ॥

अप्रतिरुद्धचक्रोऽप्रतिहताज्ञो भविता भविष्यतीत्युपसंहरते ॥२८

इतिश्रीभागवते महापुराणे चतुर्थस्कन्धे
विजयध्वजकृतटीकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्त्रिय इति । स्त्रियोऽपीत्यर्थः । उच्चरन्त्य इत्येव पाठः स्वामिसम्मतः मध्ये उदाहरन्त्य इति व्याख्यानोपादानात् ॥ २२——२३ ॥

स्वामित्यत्र स्वयमिति क्वचित् ॥ २४ ॥

प्रादुरभावि प्रादुर्भविता पृथुनैव ॥ २५ ॥

विदन्तीत्यत्र कथन्तीति चित्सुखः ॥ २६—२७ ॥

भविता पतिर्भुव इत्यत्र जयतां पृथुर्भवेति चित्सुखः ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ओदयाद्रेरुदयाद्रिमभिव्याप्य दक्षिणतः पर्यस्यते प्रादक्षिण्येन पर्यटिष्यति ॥ २१ ॥

मंस्यन्ते [illegible]स्यन्ति उच्चरन्त्यः कीर्त्तयन्त्यः ॥ २२ ॥

तासां कि[illegible]आकारमेतद्यशः कीर्त्तनमित्याकाङ्क्षायामाहुः । श्लोकचतुष्कं अय[illegible]मिति शरासकोट्या शरासनाग्रेण इन्द्र इवाद्रीनभिनन्दन् ॥ २३ ॥

लाङ्गूलपुच्छम[illegible] यथा [illegible]यन् यदा समाभचरत् ॥ २४ ॥ २५ [illegible]

इति तत्र तत्र देशे तात्त्विकास्तास्ता लोकप्रसिद्धा गिरः । गाथा आत्माश्रिताः स्वीयकथितया वर्णिताः कथाश्च । अतएव दुदुहे इत्यादिवत् भूतकाल प्रयोगस्तदुक्तिकाले तस्य "कर्मणामतीतत्वात् ॥ २७ ॥ २८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षोडशोऽयं चतुर्थस्य सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अयं श्रीपृथुरूपी हरिः आउदयाद्रेर्भूगोलमण्डलं गोप्ता गोपायिष्यति तदर्थं जैत्रं जयावहं रथमास्थाय पर्य्यस्यतं पर्यटिष्यति ॥२१॥

यथा स्त्रियः तद्यशः चक्रायुधकीर्तिमुच्चरन्त्यः कीर्तयन्त्यः आदिराजं चक्रायुधं मंस्यन्ते ज्ञास्यन्ति स्त्रियो मंस्यन्ते यदा तदा तेकुतो न मंस्यन्ते इति प्रभावत्वं श्रीपृथोर्योतितम् ॥ २२ ॥

वज्रेण यथेन्द्रः अद्रीन् तद्वद् गां शरासकोट्या शरासनस्यान्ते छिद्यन्तेऽनेन तत्तथा तस्य [illegible] कोट्या गां भूमि भिन्दन् बाधयन् समामकरोत् [illegible] ॥ २३ ॥

यदां इमां भूमि[illegible]साधवो मिलिल्युः ॥ २४ ॥

यत्र देवं [illegible]कर्मकर्तरि चिण् तत्र यातमश्व[illegible]मानि अनुष्ठीयमाने अश्वमहार्षीत् [illegible]

यतो ज्ञान[illegible]स्यते ॥२६॥

विश्रुता वि[illegible]याः गिरः गाथाः निबन्धरूपाः ॥ २७ [illegible]

अनुगीयमानोऽनुप्रवेश्यमानो [illegible] भुवः पतिर्भविता भविष्यति ॥ २८ ॥

इतिश्रीभागवते महापुराणे [illegible]
सिद्धान्तप्रदीपे
षोडशाध्यायप्रकाशः ॥ १६ ॥

भाषाटीका ।

ये महाराज उदय पर्वत से लेकर सब पृथिवी मण्डल के रक्षा करने वाले हैं एकही धीर हैं राजों के ईश्वर हैं सब को जीतने वाले रथ मे बैठ कर धनुष को धारण करके सब पृथिवी मे घूमेंगे जैसे दक्षिण की तरफ से सूर्य घूमता है ॥२१॥

सर्वत्र देशों में तहां तहां लोकपालों के सहित सब राजा लोग इनको भेट देंगे उन राजों की स्त्रीजन इन आदिराज को इनका यश को गातीहुई इन महाराज को चक्रायुध विष्णु कर के मानेंगे ॥ २१ ॥

ये महाराज पृथिवी का दोहन करेंगे प्रजों के जीविका देनेवाले प्रजापति होंगे जो अनायास से अपने धनुष के अग्र भाग से पर्वतों को भेद न करके इन्द्रकी नांई पृथिवी को बराबर करदेंगे ॥ २२ ॥

भाषाटीका ।

अपने अजग व धनुष का टंकार शब्द करते हुवे पृथ्वी में विचरेंगे तब युद्धमें भी उसके शब्द को नहीं सहकर जैसे पूंछ उठाये हुये सिंह को देखकर मृग भगते हैं तैसे दिशा दिशा में चोरादि दुष्ट सब छिपजांयगे ॥२३॥

जहां पर सरस्वती नदी प्रगट भई है वहां पर येमहाराज सौ-१०० अश्व मेधयज्ञ करेंगे उन्ही के अंत के समय मे इंद्र आकर घोडा को हरण कर ले जायगा ॥२४ ॥

वे महाराज अपने उपवन मे आये हुये एकेले भगवान् सनत्कुमार को प्राप्त होकर उनकी भक्ति पूर्वक आराधना से उस निर्मल ज्ञान को प्राप्त होंगे कि जिस से पर प्रभु को जान कर प्राप्त हो जाते हैं ॥ २५ ॥

देशों मे जहां तहां सर्वत्र इस प्रकार प्रसिद्ध पराक्रम वाले विख्यात कीर्ति वाले ये महाराज महान् विष्णु भगवान् की कथाओं को सुनेंगे ॥ २६ ॥

दिशों को जीत कर निष्कंटक आज्ञा को चला कर अपने प्रभाव से सब संसार के दुखका नाश करके देवता दैत्यों के गान करने लायक यशबढा कर सब पृथिवीके राजा हो रहेंगे ॥२७ २८॥

इति श्री भागवत चतुर्थ स्कंध सोलवां अध्याय का भाषा नुवाद लक्ष्मणाचार्य कृत समाप्त ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे षोडशोऽध्यायः समाप्तः ॥ १६ ॥

सप्तदशोऽध्यायः ।

—:○:—

मैत्रेय उवाच

एवं स भगवान् वैन्यः ख्यापितो गुणकर्मभिः ।
छन्दयामास तान् कामैः प्रतिपूज्याभिनन्द्य च ॥ १ ॥
ब्राह्मणप्रमुखान् वर्णान् भृत्यामात्यपुरोधसः ।
पौरान् जानपदान् श्रेणीः प्रकृतीः समपूजयत् ॥ २ ॥

विदुर उवाच

कस्माद्दधार गोरूपं धरित्री बहुरूपिणी ।
यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किम् ॥ ३ ॥
प्रकृत्या विषमा देवी कृता तेन समा कथम् ।
तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत् ॥ ४ ॥
सनत्कुमाराद्भगवतो ब्रह्मन् ! ब्रह्मविदुत्तमात् ।
लब्ध्वा ज्ञानं स विज्ञानं राजर्षिः कां गतिं [illegible] ॥
यच्चान्यदपि कृष्णस्य भवान् भगवतः प्र[illegible]
श्रवःसुश्रवसःपुण्यं पूर्वदेहकथाश्रयम् ॥ ६ ॥
भक्ताय मेऽनुरक्ताय तव चाधोक्षजस्य च ।
वक्तुमर्हसि योऽदुह्यद्वैन्यरूपेण गामिमाम् ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः सप्तदशे लोकक्षुधाः प्रशमयन्पृथुः
ग्रस्तबीजां महीं हन्तुं यत्तो मीत्या तया स्तुतः ॥ १ ॥

छन्दयामास तोषितवान् ॥ १ ॥

भृत्यानमात्यान्पुरोधसः पुरोहितांश्च श्रेणीस्तैलिकताम्बूलिकादीन्पौरविशेषान् प्रकृतीर्नियोगिनः ॥ २ ॥

दोहनं पात्रम् ॥ ३ ॥

मेध्यं यज्ञार्हम् ॥ ४ ॥

सविज्ञानमपरोक्षज्ञानसहितम् ॥ ५ ॥

पूर्वदेहः पृथ्ववतारस्तत्कथाश्रयम् श्रवो यशः सुष्ठु श्रवो यस्य ॥ ६ ॥

अदुह्यदुग्धवान् ॥ ७ ॥ ८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सूतादिभिः प्रख्यापितोरुगुणगणः पृथुः प्रतिपूजितसूतब्राह्मणभृत्यामात्यगणः क्षुत्पीडितजनैः प्राप्तशरण आत्मनिरुद्धबीजां महीं जिघांसुः पुनस्तया प्रसादितो बभूवेत्याह मुनिः * षोडशेन। एवमिति। भगवान् [illegible]स्मी यैः प्रख्यापितः प्रसिद्ध प्र[illegible]ताविच्छा विषयैर्वस्त्राभरणादिभिः प्रतिपूज्य तेषां स्तु[illegible]य च छन्दयामास तोषितवान् ॥ १ ॥

ब्राह्मणादीन् चतुरो वर्णान् भृत्यामात्यान् पुरोधसः पुरोहितान् श्रेणीः तैलिकताम्बूलिकादीन् पौरान् पुरवासिनः जानपदान् देशवासिनो जनान् प्रकृतीः नियोगिनः सम्यगपूजयत् ॥ २ ॥

एवं सूतादिस्तुतिकथनव्याजेन समासतः श्रावितपृथुचरितं मुनिं पुनस्तच्चरितशुश्रूषया तत्त्वा पृच्छतीत्याह। विदुर इति। बहुरूपिणी कामरूपिणी धरित्री कस्माद्धेतोर्गोरूपं दधार यां पृथुर्दुदोह तत्र वत्सः कः दोहनं दोहनसाधनं पात्रम् ॥ ३ ॥

प्रकृत्या स्वभावेन विषमा पर्वतादिभिर्निम्नोन्नता देवी धरित्री कथं समीकृता पृथोर्मेध्यं यज्ञार्हं हयमश्वं देव इन्द्रः कस्माद्धेतोः अपाहरत् ॥ ४ ॥

हे भगवन् ! मैत्रेय ! ब्रह्मविदांमध्ये उत्तमात् सनत्कुमारात् ब्रह्म विषयं सविज्ञानमुपासनात्मकज्ञानसहितं ज्ञानं शास्त्रजन्यं ज्ञानं लब्ध्वा राजर्षिः पृथुः कां गतिं गतः प्राप्तः ॥ ५ ॥

सुश्रवसः शोभनकीर्तेः प्रभोर्भगवतः कृष्णस्य यः पूर्वदेहः प्रथमोऽवतारः पृथुस्तस्य या कथा तदाश्रयं तत्प्रतिपाद्यं पुण्यं श्रृण्वतां पुण्यसंपादकं श्रवो यशः यच्चान्यदपृष्टमपि तत्सर्वम् ॥ ६ ॥

* अत्र सप्तदशा[illegible]ध्यायटीकाव्याख्योपपादनादाह षोडशेनेति।

सूत उवाच

चोदितो विदुरेणैवं वासुदेवकथां प्रति ।
प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तव प्रधोक्षजस्य च भक्ताय अनुरक्ताय मे मह्यं वक्तुमर्हसि कोऽसावधोक्षजो यस्य भक्तायेत्युक्तं तत्राह । योऽधोऽक्षजो वैवस्वपेण पृथुरूपेणावतीर्णः इमां गां पृथ्वीमदुग्धत दुग्धवान् ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

अस्मिन्नध्याये सूतादिभिः श्रीहरिर्माहिमोपनिबद्धत्वेन पृथोर्महिम्न उत्कर्षात्तन्माहात्म्यमेवोच्यते तत्रादौ सूतादिस्तुतिकरणप्रकारमाह । एवं भगवानित्यादिना छन्दयामास तोषयामास ॥ १ ॥

"राज्ञा समानवयसः श्रेण्यस्त्वकृरक्षका,, इत्यभिधानाच्छ्रेण्योऽकृरक्षकाः ॥ २ ॥

विदुरः सूतादिभिः सूचितक्षोणीदोहनादिपृथुविक्रमं विस्तरतः श्रोतुं लोकोपकाराय पृच्छति । कस्मादिति दोहनं पात्रद्वयम् ३-४-५

पूर्वदेहाः * पुरातनास्तेषां कथाश्रयं तत्कथासम्बन्धं सुश्रवसो हरेः श्रवो यशः ॥ ६ ॥

योऽदुग्धदिति सर्वप्राणिनां तत्तदभिमतत्वात्पुनर्वचनमादौ वक्ष्यार्थम् ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

अथेश्वरमाहात्म्याय भविष्यामीति संजातसुखस्य तस्य वृत्तमाह । एवमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

कां गतिं ब्रह्मरूपां भगवद्रूपाम् ॥ ५ ॥

यथाप्यदितिद्वयेन श्रीविदुरस्य सर्वत्राप्येतदेवहार्दं व्यक्तं भवेदित्यत्र भवानिति कश्चित् चित् सुखसम्मतोऽयम् । देहत्वमावे ह्यावतारत्वं पूर्वत्वं प्राक् प्रकाशापेक्षयैव ॥ ६ ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पृथुः समदशो लोकैः क्षुधार्तैरभ्यर्थितः ।
धरां दुग्धसमस्तानां निघ्नन् भीत्या तया स्तुतः ॥ १ ॥

छन्दयामास तोषितवान् ॥ १ ॥

श्रेणीस्तैलिकताम्बूलिकादीन् प्रकृतीर्नियोगवर्तिनः समपूजयत् यथाऽस्य भोजन्याः हय युष्मानहं साधु पालयामीत्येतदेवमत्कर्तृकं युष्मत्परिचर्यां भूयादिति मधुरमभ्यभाषत ॥ २ ॥ ॥ ३-४-५-६ ॥

अनुग्रहतेत्यार्थमवोचत् ॥ ७ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

समदशो स्तावकादीन्सत्कृत्य लोकवृत्तिसिद्धये प्रवृत्तो भगवान् भूमिं दुग्धवानित्युक्तः स्तावकस्तुत इति वर्णयति । एवमिति । स्थापितः प्रकथितः संस्तुत इत्यर्थः तान् स्तावकान् कामैर्भोगैः प्रतिपूज्य साधुवादिनो यूयमित्यादिमधुरवाक्यैरभिनन्द्य च छन्दयामास यथार्थमो दनपूर्वकेण वरदानेन तोषितवानित्यर्थः ॥ १ ॥

श्रेणीस्तत्तच्छिल्पवतस्तैलिकताम्बूलिकादीन्   प्रकृतीर्नियोगिनः ॥ २ ॥

दोहनं पात्रम् ॥ ३ ॥

देव इन्द्रः मेध्यं यज्ञियम् ॥ ४—५ ॥

सुश्रवसः शोभनयशसः श्रीकृष्णस्य पूर्वदेहः पृथ्ववतारस्तत्कथाश्रयं श्रवो यशः ॥ ६ ॥

यः श्रीकृष्णः अदुग्धत दुग्धवान् ॥ ७ ॥

भाषाटीका ।

मैत्रेय जी बोले इस प्रकार से वह भगवान् वेन पुत्र पृथु महाराज गुण कर्मों से जब कीर्तित भये तब उन सूतादिकों की प्रशंसा करके उनको मनोरथ वर मांगने की आज्ञा दिये ॥ १ ॥

ब्राह्मणादिक सब वर्ण भृत्य मंत्री पुरोहित पुरवासी देशवासी और प्रजा इन सबों का यथा योग्य सन्मान किया ॥ २ ॥

विदुर जी पूछने लगे कि बहुत रूप वाली पृथिवी ने गऊ का रूप क्यों धारण किया जिस को पृथुजी ने दुहा है तिस मे वत्सा कौन है दुहने का पात्र क्या है ॥ ३ ॥

स्वभाव से विषम पृथिवी देवी को उन ने कैसे सम किया उन के यज्ञ के घोडा को इंद्र ने क्यों हरण किया ॥ ४ ॥

हे ब्रह्मन् ! ब्रह्मवेत्ताओं मे श्रेष्ठ सनत्कुमारजी से विज्ञान सहित ज्ञानको प्राप्त होकर वे राजर्षि किस गति को प्राप्त भये ॥ ५ ॥

और भी जो कुछ सुन्दर कीर्तिवाले भगवान् प्रभु श्रीकृष्णचन्द्र का पवित्र पूर्व देह का चरित्र हो तिस को कहिये ॥ ६ ॥

आपका और भगवान् का मैं भक्त अनुरागी हूं मेरे से आप कहिये जिन भगवान् ने पृथुरूप से पृथिवी को दुहा है ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अजातशत्रुवंश्यम् वाक्य इत्यादिभिर्नतो विदुरः तदा निरन्ते क्षितितले सति क्षुधा क्षामा कृशा देहा याका ताः प्रजा यत्र यति पृथुमनुवन् ॥ ९ [illegible]

मैत्रेय उवाच

यदाभिषिक्तः पृथुरङ्ग ! विप्रैरामन्त्रितो जनतायाश्च पालः ।
प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ॥ ९ ॥
वयं राजन् ! जाठरेणाभितप्ता यथाग्निना कोटरस्थेन वृक्षाः ।
त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः ॥ १० ॥
तन्नो भवानीहतु रातवेऽन्नं क्षुधार्दितानां नरदेवदेव !
यावन्न नङ्क्ष्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः ॥ ११ ॥

मैत्रेय उवाच

पृथुः प्रजानां करुणं निशम्य परिदेवितम् ।
दीर्घं दध्यौ कुरुश्रेष्ठ ! निमित्तं सोऽन्वपद्यत ॥ १२ ॥
इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः ।
सन्दधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा ॥ १३ ॥
प्रवेपमाना धरणी निशाम्योदायुधं च तम् ।
गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता [illegible] ॥
तामन्वधावत्तद्वैन्यः कुपितोऽत्यरुणेक्षणः [illegible]
शरं धनुषि सन्धाय यत्र यत्र पलायते [illegible]
सा दिशो विदिशो देवी रोदसी चान्तरं त[illegible]
धावती तत्र तत्रैनं ददर्शानूद्यतायुधम् ॥ १६ ॥
लोके नाविन्दत त्राणं वैन्यान्मृत्योरिव प्रजाः ।
त्रस्ता तदा निववृते हृदयेन विदूयता ॥ १७ ॥
उवाच च महाभागं धर्मज्ञापन्नवत्सल ! ।
त्राहि मामपि भूतानां पालनेऽवस्थितो भवान् ॥ १८ ॥
स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषाम् ।
अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः ॥ १९ ॥
प्रहरन्ति न वै स्त्रीषु कृतागःस्वपि जन्तवः ।
किमुत त्वद्विधा राजन् ! करुणा दीनवत्सलाः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

जाठरेणाग्निनाभितप्ताः यः साधितो विप्रैर्मन्थनेन सम्पादित-स्तं त्वां शरणं याताः ॥ १० ॥

तत्तस्मान्नोऽस्माकमन्नं रातवे दातुं दातुमीहतु ईहतां यत्नं करोतु उज्झितोर्जास्त्यक्ताशाः सत्यः वार्तायाः [illegible]काया: पतिः ॥ ११ ॥

परिदेवितं विलापं निमित्तं [illegible] ॥ १२ ॥

पूर्वं [illegible] ओषधिबीजानि [illegible]स्तन् ॥ १३ ॥

मृगयुना द्रुतानुगता मृगीव ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

यो धर्मज्ञ इति मतः स भवान् योषां मां कथमहनिष्य[illegible]ष्यति ॥ १९ ॥ २० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवमापृष्टो मुनिर्विस्तरेण पृथुचरितं [illegible] सूतः चोदित इति । अस्य शुकवचनत्वं तु न्याय्यं विदुरयो

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वासुदेवस्य पृथोः कथां प्रति चोदितो प्रेमतः प्रीतमनाः सन् तं विदुरं प्रशस्य प्रस्तूय अभाषत ॥ ८ ॥

अङ्ग हे विदुर ! विप्रैर्यदा पृथुरभिषिक्तः जनतया जनसमूहस्य "ग्रामजनबन्धुसहायेभ्यस्तल्" इति समूहार्थे तल्प्रत्ययः पाल इत्यामन्त्रितो नियुक्तश्च तदा क्षितिपृष्ठे भूमण्डले निरन्ने अन्नरहिते सति क्षुधा क्षामाः क्षीणा देहा यासां ताः प्रजा एत्य समीपमागत्य पतिं पृथुमब्रुवन् ॥ ९ ॥

हे राजन् ! यथा कोटरगतेन वह्निना वृक्षा अभितस्तप्ता भवन्ति तथा जाठरेणाग्निना अभितप्ताः सन्तः यो भवान् अस्माकं वृत्तिकरः पतिः विप्रैः साधितः मथनेन सम्पादितस्तं शरण्यं त्वामधुना शरणं याताः गताः ॥ १० ॥

तस्मात् हे नरदेव ! उज्झितोऽन्यत्कामो वयं यावन्न नङ्क्ष्यामहे न नाशं यास्यामस्तावदेव क्षुधार्दितानां नोऽस्माकमन्नं रातवे दातुं भवानीहतु यत्नं करोतु यतस्त्वं वार्त्तायाः जीविकायाः पतिः रक्षिता लोकानां पालकश्च प्रजानां करुणां परिदेवितं विलापं निशम्य श्रुत्वा पृथुः दीर्घं चिरं दध्यौ चिन्तितवान् हे कुरुश्रेष्ठ ! सः पृथुः निमित्तं लोकस्य निरन्नत्वे निमित्तं हेतुमन्वपद्यत ज्ञातवान् ॥ ११—१२ ॥

इतीति । पृथिव्या ओषधिभिर्बीजानि ग्रस्तानीति व्यवसितः निश्चितवान् प्रगृह्णीत शरासनं धनुर्येन सः, यथा त्रिपुरहन्ता रुद्रः तथा सुमेर्दर्वा: क्रुद्धः [illegible] ॥ १३ ॥

उद्यतायुधं शरासने [illegible] धरणी प्रवेपमाना नितरां भयात्कम्पमाना [illegible] गौः सती गोरूपं धृतवती मृगयुना व्याधेन क्रुद्धेन [illegible] भीता मृगीव हरिणीव अपाक्रम्य पलायितवती ॥ [illegible] ॥

तत्र तत्र तामेव [illegible] गोरूपां धरित्रीमनुसृत्य गतवान् ॥ १५ ॥

सा [illegible] धरित्री दिशो विदिशः रोदसी द्यावापृथिव्यौ तयोरन्तरमन्तरिक्षं च धावती सती तत्र दिग्विदिगादिषु एनं पृथुमनुप्रविष्टमुद्यतमुद्धृतमायुधं येन तं ददर्श ॥ १६ ॥

मृत्योर्भीताः प्रजा इव वैन्यात्पृथोस्त्रस्ता सती त्राणं रक्षणोपायं लोके नाविन्दत नालभत किन्तु तदा विद्रुयता नितरामुपतप्तेन हृदयेन निवृत्ते न्यवर्तत ॥ १७ ॥

उवाच च उक्तमेवाह । हे महाभाग ! महाबुद्धिमन् परेङ्गितज्ञेत्यर्थः धर्मज्ञ स्त्रीवधानर्हत्वरूपधर्मज्ञ आपन्नवत्सल आपन्नेषु आपदं प्राप्तेषु वत्सलत्वविशिष्ट भूतानां पालने अवस्थितो भवान् अतो भूतेष्वन्तर्भूतां मामपि पाहि ॥ १८ ॥

स त्वं भूतपालनाधिकृतः त्वम् अकृतकिल्बिषां निरपराधां दीनां मां कथं जिघांससि हन्तुमिच्छसि अनेन स्वस्याबध्यत्वमुक्तं हन्तुस्त्वं नवानुचितमित्याह । अहनिष्यदिति । अतो न यो धर्मज्ञ इति मतः ज्ञातो यो भवान् योषां मां कथं अहनिष्यत् हनिष्यसि ॥ १९ ॥

हे राजन् ! सामान्यजना अपि कृतागःस्वपि कृतापराधास्वपि स्त्रीषु नैव प्रहरन्ति किमुत दीनवत्सलाः करुणास्त्वादृशा न प्रहरन्तीति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र मूकोऽपि कथाप्रसङ्गं सन्धत्तीत्याह । चोदित इति । त्वयाहं यथा चोदित एवं विदुरेणेति ॥ ८ ॥

तत्र पूर्वोत्तरकथाविच्छेदपरिहारायादितएव मैत्रेयोऽवक्तीत्याह । यदेति । क्षितिपृष्ठे भूगोलके निरन्ने भोजनपदार्थरहिते सति ॥ ९ ॥

निरन्न इत्यनेन दुःखनिमित्तमिति ज्ञातं तत्कारणमप्याह । वयमिति । जाठरेण जठरसम्बन्धिनाग्निना कोटरं वृक्षविवरं युष्माकमीदृशाग्निपरिहाराय अन्यशरणप्राप्तिः किन्न स्यादत्राह । यःत्वमधीति । यस्त्वन्नोऽस्माकं वृत्तिकरः पतिर्यस्मात्तस्मान्नोऽस्माकं त्वमनुशिक्षस्वेयं वृत्तिरिति ॥ १० ॥

वृत्तिकर इत्यनेन ज्ञाताभिप्रायस्यापि राज्ञः स्वाभिप्रायमुद्बोधयन्तीत्याह । तन्न इति । रातवे मरणाय उज्झितान्नास्त्यक्ताशाः पूर्वमेवेति शेषः वार्तापतिः जनानामन्नं दत्त्वा वा रक्षक इत्यर्थः ॥ ११ ॥

राज्ञो राजधनमदोऽसिक्तत्वसम्भवेन किमुत्तरं कार्यमभूत्तत्राह पृथुरिति । करुणान्दयाजनकं निमित्तमन्नाभावस्य कारणमन्वपद्यत ज्ञातवान् ॥ १२ ॥

ज्ञात्वाप्यशक्यमितिमत्वा साधयिष्याम इति गुडजिह्विकावार्तामुक्त्वा किङ्कार्योऽस्मरे तेनाचार्यानीति तत्राह । इतीति । विशिखे शरं त्रिपुरहा हरः ॥ १३ ॥

तत्र भूम्या किमकारीति तत्राह । प्रवेपमानेति । वेपृकम्पनेऽहतिधातुः गौः सती गोरूपा मृगयोर्व्याधात् ॥ १४ ॥

अत्र पृथुना पलायमानया स्त्रिया किमिति निवृत्तं किन्नेत्याह । तामेवेति । अन्वव्रजत् पृष्ठतोगतोऽभूत् सारङ्ग इव कार्यसारग्राहित्वात् स्पृष्टतोऽयासीदेव न, धर्मं मुक्त्वाधर्मादित्याशयेनाह । शरमिति ॥ १५ ॥ १६ ॥

राजरूपिणो हरेः सन्निधानविशेषवित्त्वादुत्तरकार्यस्यापि स्वाभिप्रेतस्याविन्द्राद्यन्यतमोऽपि तामत्रायतेत्याह । लोकेनेति । वैन्यात् दृश्यस्माज्जीवत् भक्षाणि पश्यतीति बुद्धेव हरेः सर्वप्राणिप्रेरकत्वेन तच्छक्तिनियतत्वाच्च भूमेराकृतिमाह । त्रस्तेति ॥ १७ ॥

अत्र वचनमेवानुसर्तव्यं नान्यदिति भाववती वक्ति । उवाचेति ॥ १८ ॥

रक्षायां नियुक्तस्य तथापराधमन्तरेणाभिहननं न युक्तमित्याह । स त्वमिति । एवमपि मां हनिष्यसि चेत्तव धर्मज्ञत्वमपहसितं स्यादित्याशयेनाह । अहनिष्यदिति । योऽभवान् धर्मज्ञ इति मतोऽभविष्यत्तर्हि कथं योषां मां हनिष्यदित्यन्वयः ॥ १९ ॥

बालिशा अपि जन्तवः स्त्रीवधन्न कुर्वन्ति किम्पुनर्भवादृशा इत्याह । प्रहरन्तीति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

निमित्तं वक्ष्यमाणानुसारेण पृथिव्या ग्रस्तबीजत्वम् ॥ १२ ॥

इति वक्ष्यमाणतत्कर्तव्यव्यवसितो निश्चितवान् । ममाभिषेके मञ्जानेऽपि बीजानि गोपायतीति क्रुद्धः ॥ १३—१४ ॥

तामिति तत्र तत्रेत्यर्थः तामेवान्वव्रजदिति पाठः क्वचित् ॥ १५-१९ ॥

जन्तवः साधारणा जन्तुतुल्या मूढा अपि मनुष्या इत्यर्थः ॥ २० ॥

र्मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितम् ।
आत्मानं च प्रजाश्चेमाः कथमम्भसि धास्यसि ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

जनतायास्त्वं पाल इत्यामन्त्रितो नियुक्तश्च तदा ॥ ९ ॥

यस्त्वं साधितः विप्रैर्मन्थनेन सम्पादितः ॥ १० ॥

तत्तस्मान्नोऽस्माकमस्मभ्यमन्नं रातवे दातुं दातुमीहतु ईहतां यत्नं करोतु । अत्र माविनङ्क्ष्यतामित्याहुः । यावदिति । उज्झितोर्जास्त्वकाशाः सत्यः । वार्त्तापतिर्जीविकाकर्त्ता ॥ ११ ॥

निमित्तं हेतुं पृथिव्यैव ओषधिबीजानि ग्रस्तानीति अभ्यपद्यत ज्ञातवान् ॥ १२ ॥

समाभिषेके जातेऽपि यदीयं बीजानि गोपायति तदस्यां धनुर्यमुपायमेव करवाणीति व्यवसितं निश्चयो यस्य सः । भूमेर्मूर्भि प्रति ॥ १३ ॥

मृगयुश्चा मृगा अनुगता मृगीव ॥ १४ ॥

तत्तदा ॥ १५ ॥

रोदसी द्यावापृथिव्यौ तयोरन्तरमन्तरिक्षमनु अपृष्ठदेशो यतनायुधमेनं पृथुं ददर्श ॥ १६ ॥

निवृत्ते पृथोरभिमुखी बभूव ॥ १७—१८ ॥

महनिष्यत हनिष्यति ॥ १९—२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रशस्याभिनन्द्य ॥ ८ ॥

हमङ्ग । यदा विप्रैः पृथुरभिषिक्तः जनतायाः जनसमूहस्य त्वं पाल इत्यामन्त्रितो नियुक्तश्च तदा निरन्ने क्षितिपृष्ठे क्षुत्क्षामाः क्षुधा क्षीणाः देहा यासां ताः प्रजा एत्य निकटमागत्य पतिं पृथुम अभ्य वोचन् अब्रुवन् ॥ ९ ॥

जाठरेण औदर्येण यः साधितः अस्मत्पालनाय मुनिभिर्मन्थनेन संपादितः अतस्तस्त्वां शरणं रक्षितारं याताः प्राप्ताः ॥ १० ॥

तत्तस्मात् लोकपालस्त्वं वार्तापतिः जीविकाप्रदः भवान् नोऽस्माकमन्नं रातवे दानाय इह यत्नं करोतु यावद्वयम उज्झितोर्जास्त्वक्षणाः सद्यो न नङ्क्ष्यामहे ॥ ११ ॥

करुणं परिदेवितं विलापं निशम्य श्रुत्वा दीर्घं चिरं परिदध्यौ तदनन्तरं निमित्तं निरन्नत्वे कारणमभ्यपद्यत ज्ञातवान् ॥१२॥

ओषधिबीजानि भूम्या ग्रस्तानीति बुद्ध्वा व्यवसितो निश्चितवान्: यथा त्रिपुरस्य हेतोः कुद्धस्तद्वत भूमेर्हेतोः क्रुद्धः शिखिलं संदधे ॥ १३ ॥

मृगयुद्रुता व्याधानुगता ॥ १४—१५ ॥

सा गोरूपिणी रोदसी द्यावापृथिव्यौ अन्तरमन्तरीक्षम अनु अनुक्रमम ॥ १६—१७ ॥

आपन्नवत्सल ! प्रपन्नपाल [illegible]

अकृतकिल्बिषां तथापि दीनां त्वं कथं जिघांससे किञ्च यो धर्मज्ञ इति मतः स भवान् योषां मां कथमहनिष्यत हनिष्यति ॥ १९—२० ॥

भाषाटीका ।

सूतजी बोले वासुदेव की कथा कहने को विदुरजीने जब प्रेरणा किया तब प्रसन्न होकर मैत्रेयजी भाषण करने लगे ॥ ८ ॥

हे विदुरजी ! जिससमय मे ब्राह्मणोंने नियुक्त करके पृथुमहाराजको पृथिवीका राजा किया तब लोग सब पृथिवीमेअन्न न होनेसे भूख से कृश शरीर वाले होकर राजा से कहने लगे ॥ ९ ॥

हे राजन् ! जैसे अङ्कुर के वृक्ष की आगसे पेड़ जलते हैं तैसे हमलोगभूखकी जठराग्निसे जलते हैं हमलोगअब आपके शरणआये हैं जो आप[illegible]देनेवाले पति हो ॥ १० ॥

सो आप [illegible] लोको अन्नकी चेष्टा करो हे नरदेव ! हम सब लोग [illegible] हैं जब पर्यन्त हम लोग अन्न के बिना न मरजा[illegible] आप यत्न करो आप हमारे लिये लोक पाल [illegible]

मैत्रेयजी [illegible] प्रजों का ऐसा करुणा से रोदन सुनकर [illegible] तो उपाय मालूम पड़ा ॥ १२ ॥

मनमें उपाय को [illegible] में लेकर जैसे त्रिपुरासुर के ऊपर क्रोध [illegible] उठायाथा तैसे पृथिवीपर उठाया ॥ १३ ॥

उनको आयुध उठायो जानकर [illegible] का रूप धारण करके जैसे बहेलिया के [illegible] भये तैसे भगी ॥ १४ ॥

क्रोध से बड़ी लाल आंख कर के पृथुजी उस के पीछे दौड़े धनुष चढ़ा कर जहां वह गई तहां गये ॥ १५ ॥

वह देवी दिशा विदिशा आकाश पाताल बीचमें दौड़ती जहां गई तहां धनुष चढ़ाये इनको देखती भई ॥ १६ ॥

जैसे मृत्यु से प्रजोंका बचना नहीं होता है तैसे लोक में पृथु से पृथिवी को कहीं भी रक्षक नहीं मिला तब तो डरके मारे कांपते हृदय से पृथिवी भगने से बन्द होगई ॥ १७ ॥

फिरमहाभाग पृथुजीसे बोलने लगी हे धर्मज्ञ ! हे भक्तवत्सल आप भूतों के पालन मे स्थित होतो मेरीभीरक्षा करो १८

मैनिरपराधिनीहूं गरीबहूं मेरकूं आप क्यों मारने चाहते होजी आप धर्मज्ञमानि जाते हो सो स्त्री को कैसे मारोगे ॥ १९ ॥

हे राजन् ! सब लोक अपराध करने वाली भी स्त्रियों पर प्रहार नहीं करते हैं और आप सरीखे कृपा वाले दीनवत्सलतो क्यों स्त्री को मारेंगे ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अजरां दृढाम धास्यसि धारयिष्यसि ॥ २१ ॥

पृथुरुवाच

वसुधे ! त्वां वधिष्यामि मच्छासनपराङ्मुखीम् ।
भागं बर्हिषि या वृङ्क्ते न तनोति च नो वसु ॥ २२ ॥
यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः ।
तस्यामेवं हि दुष्टायां दण्डो नात्र न शस्यते ॥ २३ ॥
त्वं खल्वोषधिबीजानि प्राक्सृष्टानि स्वयंभुवा ।
न मुञ्चस्यात्मरुद्धानि मामवज्ञाय मन्दधीः ॥ २४ ॥
अमूषां क्षुत्परीतानामार्त्तानां परिदेवितम् ।
शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा ॥ २५ ॥
पुमान् योषिदुत क्लीब आत्मसम्भावनोऽधमः ।
भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः ॥ २६ ॥
त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥ २७ ॥
एवं मन्युमयीं मूर्तिं कृतान्तमिव बिभ्रतम् ।
प्रणता प्राञ्जलिः प्राह मही सञ्जातवेपथुः ॥ २८ ॥

धरोवाच

नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने ।
नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥ २९ ॥
येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः ।
स एव मां हन्तुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बर्हिषि यज्ञे या भवती देवतारूपेण भागं वृङ्क्ते भजते वसु-धान्यादिकम् ॥ २२ ॥

गोरूपेण तु यवसं तृणं जग्धि अत्सीत्यर्थः पयस्तु नैव दोग्धि दुग्धं न स्रवति अत्रास्मिन्नपराधे ॥ २३ ॥

आत्मनि देहे रुद्धानि ॥ २४ ॥

मद्वधे सर्वथा अन्नं न स्यादिति चेदत आह । अमूषां प्रजा-नाम् मेदसा मांसेन ॥ २५ ॥

यदुक्तं योषां कथं हनिष्यतीति तत्राह । पुमानिति । तस्य वधोऽवध एव ॥ २६ ॥

यच्चोक्तं कथमम्भसि धास्यसीति तत्राह । त्वामिति । तिलशस्तिलप्रमाणानि खण्डानि इत्येवं भूतामवस्थां नीत्वा ॥ २७ ॥

मन्युमयीं मूर्तिं बिभ्रतः कृतान्ततुल्यत्वमुच्यते ननु कृतान्तस्य मन्युमयी मूर्तिरिति ॥ २८ ॥

गुणसत्त्वतनुं देवमकस्मादतिदारुणम् । वीक्षमाणा पृथुं पृथ्वी तुष्टाव करुणोक्तिभिः ॥ मायया विन्यस्ता रचिता नानाप्रकारा विग्रहा तनवो येन गुणात्मने गुणमयत्वेन प्रतीयमानाय वस्तुतस्तु निर्धु-ता निरस्ता द्रव्यक्रियाकारकेष्वधिभूताध्यात्माधिदैवेषु विभ्रमोऽहङ्कारस्तन्निमित्ता ऊर्मयो रागद्वेषादयश्च यस्मिंस्तस्मै ॥ २९ ॥

अहो सर्वजीवाश्रयत्वेन सृष्टां मां कथं हन्तुं प्रवर्तत इत्याह । येन विधात्रात्मनां जीवानामायतनमहं निर्मिता यतो यस्यां मयि गुणसर्गस्य चतुर्विधभूतग्रामस्य संग्रहो धारणम् स्वराट् स्वतन्त्रः ॥ ३० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च यत्र मयि विश्वं जगत्प्रतिष्ठितं तामजरां दृढां नाव-नावरूपां विपाट्य विभिद्य आत्मानमिमाः प्रजाश्चाम्भसि कथं धास्यसि धारयिष्यसि ॥ २१ ॥

एवमुक्तो धरित्र्या पृथुस्तदुक्तीः प्रतिवक्ष्यन्नाह । वसुध इति । यत्त्वयोक्तं त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषामिति तत्रेत्याह । त्रिभिः । हे वसुधे ! मच्छासनपराङ्मुखीं मदाज्ञातिवर्तिनीं त्वां वधिष्यामि राज्ञो ममाज्ञातिक्रममेवाघं भवत्याः प्रथमोऽपराध इति भावः ॥ २२ ॥

किञ्च या भवती बर्हिषि यज्ञे भागं वृङ्क्ते देवतारूपेण भागं-भजते या च त्वं वसु धान्यादिकं न तनोषि न ददासि उपका-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गानभिज्ञायास्तवायं द्वितीयोऽपराध इति भावः ॥ ननु स्वापराधाया अपि गोरूपाया मम वधोऽनुचितस्तत्राह । यवसमिति । या गौरनुदिनं यवसं तृणमेव जग्धि अत्ति अथ पयस्तु नैव संदोग्धि न प्रपूरयति तस्यां दुष्टायां गवि दण्ड एवोचितः अन्यत्रादुष्टायां गवि दण्डो न प्रशस्यते इत्ययं धर्मो दृश्यत इति भावः ॥ २३ ॥

स्वयं भुवा ब्रह्मणा भूतानां जीवनार्थत्वेन प्राक् कल्पादौ सृष्टानि औषधिबीजानि आत्मनि स्वस्यां रुद्धानि आत्मनि ग्रस्तानीत्यर्थः मां भूतपालनाधिकृतमवज्ञाय पराभूय अत एव मन्दधीस्त्वं न मुञ्चसि अतस्त्वद्वध उचित एवेति भावः ॥ २४ ॥

तर्हि किं मद्वधसाध्यं प्रत्युत मद्वधेऽन्नं न स्यादित्यत्राह । अमूषामिति । क्षुत्परीतानां क्षुधा परितो व्याप्तानामत एवार्तानाममूषां प्रजानां परिदेवितं दुःखं मद्बाणैर्भिन्नायास्तव मेदसा मांसेन शमयिष्यामि ॥ २५ ॥

यदप्युक्तमहनिष्यत्कथं योषां धर्मज्ञ इति यो मत इति तत्राह । पुमानिति । पुमान् योषिद्वा क्लीबः नपुंसको वा आत्मसंभावितः आत्मनैव संभावितः नतु परैः अत एवाधर्मः भूतेषु निरनुक्रोशः निष्कृपः स्यात्तर्हि पुमादिविभागमनादृत्य तद्वध एव नृपाणामुचित इत्यर्थः ॥ २६ ॥

यदप्युक्तं मां विपाट्येत्यादिना तत्राह । त्वामिति । मायागां मायया भूतगोरूपां तथा दुर्मदां मदभावे कथमम्भसि प्रजा धारयेः स्वीत्येवं रूपदुर्मदविशिष्टां त्वां शरैर्मद्बाणैस्तिलशः तिलप्रमाणानि खण्डानीत्येवं भूतामवस्थां नीत्वा प्रापय्य आत्मनो मम योगबलेन योगसामर्थ्येनैवाहं प्रजाः आत्मानं च धारयिष्यामि ॥ २७ ॥

एवं मन्युमयीं क्रोधप्रचुरां मूर्तिं विग्रहं बिभ्रतं कृतान्तमिव स्थितं पृथुमित्यर्थः नतु कृतान्तवन्मन्युमयीं मूर्तिं बिभ्रतमिति कृतान्तस्य तदभावात् प्रणता प्रह्वीभूता मही धरित्री संजातकम्पा प्राञ्जलिराह ॥ २८ ॥

पृथुनैवं प्रत्युक्ता पृथ्वी साक्षाद्भगवदवतारभूतोऽयं पृथुः सर्वज्ञः सर्वशक्तिर्न मया वञ्चयितुं शक्य इत्यालोच्य स्वयमेवौषधिबीजनिर्गमोपायं विवक्षन्ती क्रोधावयं स्वोपदिष्टोपायं मात्रं दीत्याशङ्क्य तावत् क्रोधोपशमनाय आत्मनो दैन्यमाकिञ्चन्यं च निवेदयन्ती चिदचिच्छरीरत्वेन जगत्सृष्ट्यादिकारणत्वेन धर्मपरित्राणनिमित्तावतारविशिष्टत्वेन च स्तौति । नमः परस्मा इति । मायया स्वापृथक्सिद्धविशेषणभूतया मायया प्रकृत्या विन्यस्तनानातनवे निष्पादितदेवमनुष्यादिव्यष्टिरूपशरीराय अनेन प्रकृतिपुरुषशरीरकत्वं जगत्कारणत्वं च सहारकमिति चोक्तं भवति सहारकत्वमेव व्यनक्ति गुणात्मने प्रकृतेर्गुणाविशिष्टत्वात्तद्द्वारा सत्वादिगुणस्वभावैःयथाकाठिन्यवान् यो बिभर्ति तस्मै भूतात्मने नम इति भूमिद्वारा काठिन्यवत्वं ननु स्वरूपतो गुणात्मकत्वं निर्गुणश्रुतिविरोधात् प्रकृतिपुरुषशरीरकत्वेऽपितद्वैलक्षण्येन स्थितिमाह । परस्मै प्रकृतिपुरुषविलक्षणाय वैलक्षण्ये हेतुमाह । स्वरूपानुभवेन निर्धूतक्रियाकारकविभ्रमोर्मये स्वरूपानुभवःस्वविषयं यथावस्थितं ज्ञानं स्वरूपशब्देन प्रकृतिपुरुषेश्वरस्वरूपाण्यपि विवक्षितानि स्वरूपाणां प्रकृतिपुरुषेश्वररूपाणामनुभवेन याथात्म्यज्ञानेन निर्धूता निरस्ता द्रव्यक्रियाकारकविभ्रमाः द्रव्यक्रियेति द्वन्द्वः विभ्रमशब्दः प्रत्येकं संबध्यते द्वन्द्वान्ते श्रुतत्वात् तत्र द्रव्यभ्रमो नाम पृथिव्यादिद्रव्यारब्धेषु देहेष्वात्मभ्रमः इच्छामि द्वेक्ष्मीति देहगतक्रियाणामात्मनि भ्रमः क्रियाभ्रमः कारकभ्रमः कर्तृत्वभ्रमः स च"अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् । शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः । न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः,,इत्युक्तरीत्या कर्तृत्वस्याधिष्ठानादिषु पञ्चस्वनुगतत्वेऽप्यात्मगतत्वेनैव प्रतीतिरूपः एते त्रयो भ्रमाः तत्प्रयुक्ताः ऊर्मयःक्षुत्तृषाशनायापिपासाशोकमोहजरामृत्युवाख्याः तस्य सर्वदा युगपत्प्रत्यक्षितसर्ववस्तुविषयप्रमितिरूपसाक्षात्कारनिरस्तदोषमूलभ्रमतत्कार्यत्वाद्वैलक्षण्यमित्यर्थः गुणाभेदाभिप्रायेण नमसो द्विरुक्तिः अत्र जगत्कारणत्वकथनेन तदुपयुक्तसार्वज्ञ्यसर्वशक्तित्वादिमत्त्वस्याप्यभिप्रेतत्वात् सर्वज्ञसर्वशक्तिमत्वात्तत्कार्यजगदन्तर्भूतोहं वञ्चयितुमसमर्थेत्यभि[illegible] अनेन स्वस्या आकिञ्चन्यमप्युक्तम् ॥ २९ ॥

तदेव [illegible]यन्त्याह । येनेति । येन धात्रा दधाति विदधाति सृजतीति [illegible] [illegible]थवा आत्मायतनम् आत्मनां व्यष्टिजीवनामायतनं [illegible] [illegible]निना सृष्टा कथं भूताहं यतः यस्यां मयि गु[illegible] [illegible]प्रकृतिपरिणामात्मकदेवादिप्रपञ्चो वर्तते स [illegible] [illegible]द्यतायुधः उद्धृतायुधः स्वराट् स्वतन्त्रः स्वराडित[illegible] [illegible]रकोऽस्तीति अभिप्रेतं मां स्वसृष्टां भूमिं हन्तुमुपस्थि[illegible] [illegible]ं कं शरणं तत्त्राणोपायमाश्रये न कमपि किन्तु त[illegible] [illegible] ३० ॥

श्रीमद्विजय[illegible] [illegible]पदवली ।

नकेवलमहद्दानिरपि तु [illegible] [illegible]ाह । मां निहत्येति अजरां नूतनामिवस्थितां धार[illegible] [illegible] २१ ॥

लोककारित्वकरणाय पृथुम[illegible] [illegible]चसुच इति। ननु वधयोग्यापराधः क इति तत्राह [illegible] [illegible]च पशुमे[illegible] [illegible] अविघ्नं[illegible] [illegible]हिं स्थमिति किं [illegible] [illegible]ानिति । [illegible] [illegible] । या [illegible] [illegible] यत्र [illegible] [illegible] तां दृष्टे वृणोति [illegible] न तनोति परि[illegible] [illegible]प्रपञ्चयसी त्यन्वयः ॥ २२ ॥

एतदेव विविनक्ति । यवसमिति । हविरादर्थे यवसं पयःशब्दस्य जलेऽपि वृत्तेरित्यत औधसमिति गोरूपत्वादेवमुक्तिः। मत्प्राक्षिताभ्यः प्रजाभ्यः या पयः न दोग्धि तस्यामेवं दुष्टायामत्र मत्स्यां दण्डो न शस्यत इति नहि शस्यत एवेत्यर्थः ॥ २३ ॥

आत्मन्यसत्वान्नमुञ्चामीतिनेत्याह । त्वं खलु इति । त्वदधिकरणत्वेन प्रजाजीवनार्थत्वेन विरिञ्चिसृष्टौषध्यदानेचौर्याख्यदोषोऽपि तव स्यादित्यर्थः आत्मनि सत्वात् न दास्यामीति दुराग्रहबुद्धिरवज्ञेति ॥ २४ ॥

मद्वधस्तव कोपनिवारणावसायी नतु शरणागतप्रजारक्षणोपायसिद्धिरिति तत्राह । अमूषामिति । अमूषां शरणागतानां मेदसा मांसाविशेषेण ॥ २५ ॥

तथापि स्त्रीवधो न शस्त इति तत्राह । पुमानिति । स एवं विभस्त वधः ॥ २६ ॥

यदुक्तं मां निहत्यात्मानमिमाः प्रजाश्चाम्भसि कथं धारयिष्यसीति तत्राह । त्वां स्तब्धामिति । मायागामित्यनेन गोवधदोषोऽपिनास्तीति सूचितम् आत्मयोगबलेनौत्पत्तिकस्वरूपधारणाय शक्ता ॥ २७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र निरुत्तरया धरया किमकारीति तत्राह । एवमिति ॥ २८ ॥

स्वयंद्वैतास्त्रैकत्वेन हरेरन्यस्यैव विभवात्कगानुवयादित्यादिहेतुना ज्ञातत्वात् धरापृष्ठ्यन्तर्यामिणं तदाग्यैर्गुणैरन्यत्रायोग्यैः श्रीनारायणमभिष्टौति । नम इति । मायया प्रकृत्या चित्प्रकृत्या वा चिन्त्यस्तायोग्यतया विरचिता नानातनवो ब्रह्मादिजीवदेहा येन स तथोक्तस्तस्मै "ब्रह्मादिजीवदेहास्तु मायादेहाः प्रकीर्तिता,, इतिवचनात् मायाशब्देन नेन्द्रजालमभिधीयत इति । स्वस्यापि प्राकृतदेहसम्भवेन देवदत्तवत्कर्मणा आप्तत्वेन प्रपञ्चरचनानुपपत्तिरित्यत उक्तमगुणात्मन इति । सत्त्वादिगुणरहितस्वरूपाय यदि हरेः स्वरूपं प्राकृतगुणरहितं तर्हि कीदृशं येन देहित्वेन सृष्ट्यादौ प्रवृत्तिः स्यादित्यस्यापीदमेवोत्तरं । गुणात्मन इति ज्ञानानन्दादिगुणदेहाय "आत्मा जीवे धृतौ देह,, इत्यादेः अस्तु ज्ञानादिगुणदेहत्वं तथापि प्रकृत्या प्रवर्तमानस्य कर्ममार्गेणैव कथितदोषानिस्तार इतितत्राह । स्वरूपेति । स्वरूपानुभवेन "तद्ब्रह्म वेदाहं ब्रह्मास्मि,, इति श्रुतिसिद्धेन स्वरूपापरोक्षेण निर्धूता निरस्ता द्रव्यक्रियाकारकनिमित्तानां विभ्रमाणामूर्मयो येन स तथा द्रव्यादयस्तामसतैजसवैकारिकाहंकारसंज्ञाः । यद्वा द्रव्यं गुणानामाश्रयो देहः क्रियाकर्मेन्द्रियं कारकं ज्ञानेन्द्रियं एतन्निमित्तानां विभ्रमाणां संशयाद्यन्तःकरणधर्माणामूर्मयः परम्परा दूरोत्सारिता "येन विभ्रमः संशये भ्रान्तौ शोभायाञ्च,, इति यादवः तत्र किं कारणमित्यत उक्तं स्वरूपेति । द्रव्यक्रियादिनिमित्तविभ्रमो मेयोऽस्माकमेव न हरेरिति निरणायि ॥ २९ ॥

अतः स्वामित्वेन पितृत्वेन गुरुत्वेन हितकारि शरणं विहाय ममान्यो रक्षकोऽस्तीति [illegible] तत्स्वामित्वादिकं तवैवेति सयुक्तिकमाह । येनेति । येन [illegible] हारिणाहमात्मीयतनुः स्वशरीरत्वेन निर्मिता [illegible] शरीरम्,, इतिश्रुतेः यतो यस्मात् [illegible] स एव पितृभूतः स्वराट् स्वामी उदायुधः [illegible] म्नुमुपाश्रित इत्यन्वयः किमत इति तत्राह अन्यमि [illegible] कुर्मः कस्य वा भूमौ गरदायां स्वमातरि,, इति वाक्यं [illegible] कमितानेन ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वसुधेत्यादि वाक्यमपि विभीषिकामात्रम ॥ २२—२६ ॥

मन्युमयीं मन्युप्रचुरां मूर्तिं बिभ्रतं तन्मयतया सम्पादयन्तमित्यर्थः ॥ २८ ॥

पृथिव्युवाचेत्येव पाठः पुरुषाय भूयसे विन्यस्तमायेति सम्बन्धोक्तिः ॥ २६-३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्रिपाट्य विदार्य अजरां दृढाम् ॥ अम्भसीति मयि मृतायां सत्यां गभीर एव स्थास्यतीत्यर्थः ॥ २१ ॥

बर्हिषि यज्ञे या भवती देवतारूपिणी भागं वृक्ते भजते वसु धनानादिकम् ॥ २२ ॥

गोरूपेण यवसं तृणं जग्धि अत्ति पयस्तु न दोग्धि न पूरयति न ददातीति यावत् कामपूरोऽस्म्यहं नृणामिति यत् तस्यामेवं नृणायां त्वय्यपराधिन्याम ॥ २३--२४ ॥

मेदसा मांसेन ॥ २५ ॥

यदुक्तं प्रजाः कथं हनिष्यसीति तत्राह । पुमानिति । आत्मसम्भावनोमिथ्याहङ्कारमत्तः निरनुक्रोशो निर्दयः तस्य वधोऽवध एव २६॥

ननु गोवधं कथं करिष्यसि गोमांसं वा कथं भोजयिष्यसीति तत्राह । माययैव गां नतु वस्तुतः । यच्चोक्तं कथमम्भसि धास्यसीति तत्राह । तिलशः तिलप्रमाणसहस्रखण्डतामवस्थां नीत्वा ॥ २७ ॥ २८ ॥

विन्यस्ता निर्मिता नाना भूतात्मदाद्यानवो यस्य तस्मै यतो गुणात्मने गुणमयाय । यदुक्तं महीतलं तज्जघनमित्यादि । ननु तर्हि स्वतनुं त्वां किमहं हन्मीति तत्राह । स्वरूपानुभवेनेति । यावत् स्वरूपशक्तेरनुभवो न स्यात्तावदेव मायाशक्तिमतस्तवात्मदाद्यास्तनवः स्वरूपानुभवेन तु विनिर्धूतानि निरस्तानि द्रव्यक्रियाकारकाणि अधिभूताध्यात्माधिदैवानि तैर्विभ्रमोर्मिः संसारतरङ्गश्च यस्मात्तस्मै । यदुक्तं । "यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः । तावत् स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत,, इति अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते । उभे अपि न गृह्णन्ति मायासृष्टे विपश्चित इतिच ॥ २९ ॥

एवञ्चेत्तर्हि त्वद्युक्तिप्रामाण्येनैव त्वयि मम नास्ति ममतेत्यत स्त्वां हन्म्येवेत्यत आह । येनेति । नहि स्वहस्तेनारोपिता वल्ली स्वहस्तेनैव छिद्यते इति भावः तत्राप्युपकारिकास्मीत्याह । आत्मनां जीवानां आयतनं यतो यस्यां मयि गुणसर्गस्य चतुर्विधभूतग्रामस्य संप्रतो धारणं स्वराट् स्वतन्त्रः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अजरां दृढां विपाट्य विदार्य धास्यसि धारयिष्यसि ॥२१॥

अकृतकल्मषां कथं जिघांससे इत्यत्राह । वसुधे इत्यादि या भवती भागं तु वृङ्क्ते भजते सा त्वं वसु धान्यादिकं न तनोषि अतो वधिष्यामि ॥ २२ ॥

या अनुदिनं प्रतिदिनं यवसं तृणं जग्धि अत्ति ऊधस्थं पयो न दोग्धि ऊधोगतं दुग्धं न स्रवति तस्यां दुष्टायाम् अत्र दण्डाकं दण्डो न शस्यते इति न अपि तु शस्यते एव ॥ २३ ॥

त्वं तु मन्दधीः आत्मनि प्रस्तानि न मुञ्चसि ॥ २४ ॥

क्षुत्परीतानां क्षुधा व्याप्तानाम् अमूषां प्रजानामपरिवेदितं विलापं तव मेदसा मांसेन शमयिष्यामि ॥ २५ ॥

योषां कथमाहनिष्यसीत्यत्राह । पुमानिति ॥ २६ ॥

अम्भसि कथं धास्यसीत्यत्राह । त्वामिति । मायया दम्भेन कपटेन गोरूपधारिणीं तिलशः तिलप्रमाणानि खण्डानि इत्थं भूतामवस्थां नीत्वा आत्मयोगबलेन स्वकीययोगप्रभावेण प्रजाः धारयिष्यामि ॥ २७ ॥ २८ ॥

आत्मनो भगवदुत्पादितत्वमभिप्रेतेन श्लोकेन वक्तुं पूर्वं भगवतः सर्वोत्पादकतां वर्णयन्ती नमस्करोति । नम इति । गुणात्मने सर्वकारणत्वसर्वज्ञत्वसर्वैश्वर्यत्वादिगुणाश्रयाय मायया स्वशक्त्या विन्यस्ता नानामहदादिरूपान्ताः तनवो येन तस्मै नमः अप्राकृतगुणाश्रयत्वेन स्तुत्वाथ प्राकृतगुणरहितत्वेन स्तौति । स्वरूपानुभवेन निर्धुताः स्वभावतोऽपास्ताः द्रव्यक्रियाकारकेषु अधिभूताध्यात्माधिदैवेषु विभ्रमाऽहङ्कारस्ततोऽभिमाना ऊर्मयो रागद्वेषादयश्च यस्मात्तस्मै नमः निर्धुतेति द्वन्द्वमार्षम् ॥ २९ ॥

य एतदादावसृजच्चराचरं स्वमाययात्माश्रयया वितर्क्यया ।
तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ॥ ३१ ॥
नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जययाकृतात्मभिः ।
न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्च ईश्वरः ॥ ३२ ॥
सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः ।
तस्मै समुन्नद्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे ॥ ३३ ॥
स वै भवानात्मविनिर्मितं जगद्भूतेन्द्रियान्तःकरणात्मकं विभो ! ।
संस्थापयिष्यन्नज ! मां रसातलादभ्युज्जहाराम्भस आदिसूकरः ॥ ३४ ॥
अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल ।
स वीरमूर्त्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि ॥ ३५ ॥
नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्[redacted]सर्गमायया ।
न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो न[redacted]शस्करेभ्यः ॥ ३६ ॥

इति श्रीभागवते महापुराणे चतुर्थ[redacted]
पृथुविजये धरित्रीनिग्रहोना[redacted]
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

येन धात्रा भगवताहम्भूरात्मनां जीवानामायतनं विनिर्मिता किम्बहुना यतः सर्वहेतोः गुणसर्गसंग्रहः गुणैः सृज्यन्ते इति गुणसर्गाः महदादयस्तेषां संग्रहो ब्रह्माण्डरूपः सर्वोऽपि प्रपञ्चः स एव स्वराट् उदायुधो मां हन्तुमुपस्थितो यदि तर्हि कमन्यं शरणमाश्रये ॥ ३० ॥

भाषाटीका ॥

जिसमे सब संसार है ऐसी दृढ नौका सरीकी मोकुं नाश करोगे तो अपने को और इन प्रजाओं को जल में कैसे रक्खोगे ॥ २१ ॥

पृथुजी बोले हे वसुधे तेरेको मै मारूंगा क्योंकि तू मेरे से बहिर्मुख है यज्ञों में देवता रूपसे तू भाग लेती है और धुन नहीं देती है ॥ २२ ॥

तू गऊ है तो घांस तो सब दिन खाती है और स्तनो का दूध नहीं देती है ऐसी दुष्ट होने पर जरूर दण्ड होना चाहिये ॥ २३ ॥

पूर्व काल में ब्रह्मा के पैदा किये औषधियों के बीजों को अपने भीतर रखकर नहीं छोडती है मंद बुद्धि से मेरी अवज्ञा करती है ॥ २४ ॥

ये सब जो प्रजा क्षुधा से पीडित हैं दुखित हैं इनके शोक को बाणों से काटे हुवे तेरे मांस से मै शांत करूंगा ॥ २५ ॥

पुरुष हो या स्त्री हो या नपुंसक हो जो अपने को ही चाहने वाला अधम है औरपर जिसको दया नही है उसको राजा लोग मारैं तो दोष नही होता है ॥ २६ ॥

तू जो कपट से गऊ बनी है तू अभिमान वाली है मेरे को बाणों से तिलों के बरोबर[redacted]के लोग बल से इन सब प्रजों को हम धारण[redacted]

ऐसे क्रोध मय मूर्ति धा[redacted]री के पृथु महाराज को देख कर कांपती[redacted]र कर के हाथ जोड कर विनती करने ल[redacted]

पृथिवी बोली माया से नाना [redacted]के दिव्य गुणों वाले अपने स्वरूप के अनुभव [redacted] अधिदैव मे अहंकार की ऊर्मी राग द्वेष[redacted] करने वाले परम पुरुष आप के अर्थ नमस्कार[redacted]

जिन आपने मेरेकुं अपना स्थान बनाया आप [redacted] हो जिन आप से यह सब गुणों की सृष्टि होती है सोही आप स्वतंत्र हो करभी आयुध उठाकर मेरे को मारने को तत्पर भये तो मै दूसरे किस के शरण जाऊं ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सृष्टिसंहारकारकोऽहमेवेति चेत्तथापि प्रजापालने प्रवृत्तस्य मद्वधोऽनुचित एवेत्याह । य एतदिति । आत्माश्रयया जीवविषयिण्या ॥ ३१ ॥

अतो दुर्ज्ञेयमीश्वरचेष्टितमित्याह । नूनमिति । अकृतात्मभिर्विक्षिप्तचित्तैः य ईश्वरः स्वतन्त्रः अकरोद्ब्रह्माणम् परत इति तेन ब्रह्मणा चराचरमकारयत् यश्च स्वत एकः परतो मायया नेकः ॥ ३२ ॥

तस्मादचिन्त्यशक्तये केवलं नम इत्याह । सर्गादिजन्मस्थितिभङ्गमस्य जगतोऽनुरुणद्ध्यनुवर्तते करोति द्रव्याणि महाभूतानि क्रिया इन्द्रियाणि कारका देवाः चेतना बुद्धिः आत्माहंकारः तैः स्वशक्तिरूपैः समुन्नद्धाः समुत्कटा निरुद्धाः शक्तयो यस्य ॥ ३३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

प्राणिनां धारणार्थं मां रसातलादुद्धृत्यैवामी प्रजा रक्षणे प्रवृत्तस्य भवतो न युक्त इति सकरुणमाह । द्वाभ्याम । हे अज ! यः सृष्टवान्स एव भवान् स्वनिर्मितं चराचरं जगत्सम्यक् स्थापयितुमादिसूकरः सन् मामभ्युज्जहार ॥ ३४ ॥

स एव धराधरो वराहोऽपामुपस्थे उपरि मयि नावि आधारभूतायामवस्थिताः प्रजा रक्षितुमिच्छुर्वीरमूर्तिः पृथुरूपः समभूत एवं भूतो यः स त्वं पयसि निमित्ते मां जिघांससीति चित्रमित्यर्थः ॥ ३५ ॥

तस्मादीश्वरचेष्टितं दुर्ज्ञेयमिति कैमुत्यन्यायेनोपसंहरति । नूनमिति । तस्येश्वरस्य गुणसर्गरूपया मायया मोहितं चित्तमेव वर्त्म येषाम मोहितानि चित्तवर्त्मानि येषामिति वा तैर्जनैरीश्वराणां हरिभक्तानामेव तावदीहितं न ज्ञायते किं पुनस्तस्य परमेश्वरस्य अत एव परमेश्वरत्वेभ्योऽपि नम एव केवलं वीराणां जितेन्द्रियाणां यशः कुर्वन्ति ये तेभ्यः यथा वीराणां यशो वर्द्धेत तथा चेष्टितां नतु यथेष्टमिति भावः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ननु य एव स्रष्टा स एव हन्ति [illegible] त्वया विधेयं सत्यं वसुदपि द्रव्यरूपधारया एव इतरे [illegible] चिन्तनचिता नरवपितृरूपधारिणस्तवेत्याह । यएतदिति । यो भवानिव एतच्चराचरात्मकं जगत् आत्मा आश्रयो यस्यास्तया [illegible] अवितर्क्यया एवं विधेति चिन्तयितुमशक्यया स्वापृथक्सिद्ध [illegible] विशेषणभूतया प्रकृत्या मायाशब्दः संकल्परूपज्ञानपर्यायः अवितर्क्येण स्वसंकल्पेनासृजत् स एव भवान् तथैव संकल्पेन गोप्तुं चराचरात्मकं जगद्रक्षितुमुद्यतः [illegible] कालाग्निरुद्राद्यवतारेणैव हन्तुं प्रवृत्त इत्यर्थः [illegible] धर्मरूपधर्मप्रवर्तकस्त्वं मां प्रजानां भोग्यभोगोपकरणभोगस्थानरूपां मां कथं नु जिघांससि हन्तुमिच्छसि ॥ ३१ ॥

[illegible] शक्तेस्तव प्रभावमजानन्त्या ममेदं त्वदीयं कृत्यमनुचितमिव प्रतीयते त्वच्चिकीर्षितं तु न विजानीयुरित्याह । नूनमिति । अकृतात्मभिः अवशीकृतचित्तैः त्वामप्रपन्नैरिति यावत् दुर्जयया जेतुमशक्यया स्वमायया स्वात्मीयमायया कारणभूतया ईशस्य तव समीहितं चेष्टितं चिकीर्षितं जनैर्न लक्ष्यते न ज्ञायते इति । यद्वा । दुर्जयया स्वमायया हेतुभूतया अकृतात्मभिः मोहितचिरैर्मोहशैर्जनैरीशस्य तव समीहितं न लक्ष्यत इत्यर्थः कोऽसावीश्वरः यस्य समीहितं न लक्ष्यते तत्राह । यः स्वत एकोऽपि परतः ब्रह्मरुद्रादिक्षेत्रज्ञरूपशरीरभेदादनेकः सन् अकरोत् महदादिपृथिव्यन्तजगत्सृष्टिमकारयत् व्यष्टिसृष्टिमित्यर्थः स ईश्वरस्त्वमेवेति भावः ॥ ३२ ॥

अतोऽचिन्त्यशक्तये तुभ्यं केवलं नम इत्याह । सर्गादीति । यो भवान् अस्य जगतः सर्गादि सृष्ट्यादिकं द्रव्यक्रियाकारकचेतनात्मभिः द्रव्यं प्रधानात्मकमचिद्द्रव्यं क्रिया अदृष्टाख्यं कर्म कारकः करोति गुणक्षोभमिति कारकः कालः चेतनो जीवः एतद्रूपाभिः शक्तिभिः अनुरुणद्धि अनुवर्तते करोतीति यावत् तस्मै समुन्नद्धाः कार्योन्मुखं विरुद्धाः शक्तयो यस्य तस्मै सृष्टिस्थितिसंहाराख्यानां युगपद्विरुद्धत्वात्सद्द्वारा तदुपयुक्तशक्तीनां विरोधः युगपत्सृष्ट्यादीनां मिथो विरोधत्वेऽपि कालभेदादुपपन्नत्वेन सृष्ट्याद्युपयुक्तशक्तिमत्त्वमुपपन्नं वेधसे कारणभूताय परस्मै प्रकृतिपुरुषविलक्षणाय पुरुषाय तुभ्यं नमः ॥ ३३ ॥

तव समुन्नद्धविरुद्धशक्तिमत्त्वं न मानान्तरगम्यमपि स्वपरोक्षं मयैवानुभूतमित्याह । हे विभो ! आत्मनि आत्मना स्वयं विनिर्मितं भूतानि पृथिव्यादीनि इन्द्रियाणि श्रोत्रादीनि अन्तःकरणं चैतदात्मकं जगत्संस्थापयिष्यन् हे अज ! कर्मावसरोत्पत्तिशून्य तथापि आदिसूकरः स्वेच्छोपात्ताप्राकृतविग्रहवराहावतारो भूत्वा भवान्मां स्वविनिर्मितजगदाधारभूतां मामम्भसः अम्भसि प्रविश्य लयवृत्तौ कर्मण्यधिकरणे चेत्यधिकरणे पञ्चमी रसातलात् अभ्युज्जहार उद्धृतवान् ॥ ३४ ॥

स धराधरः आदिवराहः अथ अपामुपस्थे उपरि नावि नौकावदाधारभूतायां मयि अवस्थिताः प्रजा रिरक्षिषुः रक्षितुमिच्छुः भवान् समभूत् भवद्रूपेणावतीर्णः स एव त्वमधुना वीरमूर्तिः पृथुरूप उग्रः तीक्ष्णः शरो यस्य पयसि निमित्ते गां गोरूपां मां जिघांससि हन्तुमिच्छसि किंचैतद्विरुद्धशक्तिमत्त्वं मयैवोपलक्षितमित्यर्थः ॥ ३५ ॥

एवमचिन्त्यविविधशक्तिमत्त्वेन भगवन्तं स्तुत्वा तदेव पुनरनुसन्दधती सर्वानवतारानमस्करोति। नूनमिति । येषामीश्वराणाम् ईश्वरावताराणामीहितं चिकीर्षितं तद्गुणसर्गमायया तस्य ईश्वरस्य सर्गभिन्न्या सत्त्वादिगुणकार्यप्रपञ्चमूलया मायया मोहितं यच्चित्तं तस्य वर्त्मानि वृत्तयो येषां तैर्मोहतोजनैर्न ज्ञायते नूनं निश्चितं तेभ्यः वीराणामन्येषामपि यशस्करेभ्यो हिरण्याक्षादीनां भगवता युद्धे निहता इत्येवं रूपकीर्तिसम्पादकेभ्योऽवतारेभ्यो नमः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तव निर्मातेश्वरोऽन्यस्त्वां जिघांसुः पृथुराजा चापर इति मन्दाशङ्कां परिहरन्निव पूर्वोक्तार्थं विवृणोति। य एतदिति। आत्मैवाश्रया यस्याः सा आत्माश्रया तयातथ्यावितर्क्यया विविधतर्काविषयया- "अजामेकां लोहितशुक्लकृष्णाम" इत्यादिश्रुतिसिद्धयाऽविकृत्या अकवेत्ये*तदद्वैतवादितर्कागोचरयेत्यर्थः एवं विधया स्वमायया स्वप्रकृत्या सृष्टः पालयितुमेकत्वेन तस्य हन्तृत्वं न युक्तमद्यो न भविष्यत्यर्थः "वार्तासंभाव्ययोः किल" इत्यभिधानम् अतः संभावितं न भवतीति यथा स्वस्य तर्काविषयत्वं तथा मायया अपीति सूचितम ॥ ३१ ॥

हरेस्तर्काविषयत्वं स्पष्टयति । नूनं तवेति । विभो । अकृतात्मभिरल्पबुद्धिभिरशिक्षितबुद्धिभिर्वा जनैर्दुर्जयया स्वमायया देहस्यैश्वर्यादिगुणाकरस्य समीहितं समीचीनं चेष्टितं न लक्ष्यते नूनं तर्कयामीत्यन्वयः "तर्कनिश्चितयोर्नूनम्" इति यादवः समीहितं किन्तदित्यत आह । यस्त्विति । अकरोत्कार्यं ब्रह्मणा यस्त्वं जगत्कारणं अनेकः "इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतेः स्वतः एकः "एकमेवाद्वितीयम" इति श्रुतेः एवं विधः स परतः परेषामीश्वरो नास्माकमातानामिति द्योतयन् शेष (२) लक्षणमर्थविशेषं ध्वनयति अर्थान्तरासंभवात् ॥ ३२ ॥

---

* एवञ्चासौ अद्वैतवादितर्कस्यापि विषयः ।

(२) एतेन परतः परात्मा महादीश्वरः किमिति किमपि रक्षणेन बोध्यमित्युक्तं भवति ॥ टी०

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

कर्तृत्वेन कारयितृत्वेन सर्वस्वातन्त्र्यप्रतीतेः पृथिव्यादीनां कर्तृत्वमीश्वरशक्त्यानुस्यूतत्वादित्याह । सर्गादीति । द्रव्याणि पञ्चभूतानि क्रियाः कर्मेन्द्रियाणि कारकाः ज्ञानेन्द्रियाणि चेतनो जीव एतान् व्याप्य तिष्ठन्तीति चेतनात्मनामस्ताभिः शक्तिभिर्योऽस्य जगतः सर्गाद्यनुगुणाश्च तत्तद्योग्यतानुकूल्येन करोति तस्मै नम इत्यन्वयः एकस्य युगपदनेकवैचित्र्योपेतपदार्थस्रष्टृत्वं कथमुपपद्यतइत्यत उक्तं समुन्नद्धेति तदुक्तं "विरुद्धशक्तयो यस्य नित्या युगपदेव तु । तस्मै नमो भगवते विष्णवे सर्वजिष्णव,, इति कर्तृत्वशक्तिः स्वरूपभूतेत्युक्तं वेधस इति कर्तृत्वशक्तिमते । किंनामधेयमस्येत्यत उक्तं परस्मा इति । अनेन पुंशक्तिमत्त्वादस्यैवोक्तमुपपन्नमित्यसूचि ॥ ३३ ॥

पूर्वं त्वयैव भूतधात्रीत्वेन संकल्पितत्वाद्धिरण्याक्षनीतां मामुद्धारितवांस्तत्रात्मयोगबलेनैव धारयिष्यामीत्यङ्गीकारे सङ्कल्पभङ्गः स्यादित्याशयेनाह । सवाइति । सवाइत्यनेन य एतदित्याद्युक्तं परामृश्यते मा माम् ॥ ३४ ॥

भूमेरुद्धर्तान्योऽहमन्यस्तस्मात्सङ्कल्पभङ्गः कथमिति मन्वाशङ्कां परिहरति । अपामुपस्थे इति । जलस्योपरि स्थितां मां जिघांसति स वीरमूर्तिर्भगवानद्य रक्षितुकामो धराधरो भूमेर्भर्ता समसूदित्यन्वयः॥ ३५ ॥

स्त्री त्वमस्मद्विचेष्टितं किंज्ञानासीत्याशङ्क्य सत्यं तथाप्यस्माकं युष्मत्प्रसादनाय नम इत्येतावत्कर्तुमुचितमिति भावेनाह । नूनं जनैरिति । त्वद्गुणसर्गमायया तव सृष्ट्यादौ गुणकर्मभूतया सर्गमायया प्रकृत्या ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

नूनमिति । तच्छब्दनत्युपाधिविशिष्टत्वेन स्वयमेव भगवानेक एवानेकः सन् जगदकरोत् तदसंसर्गित्वेन तु स्वयमेक एव सन् न तद्द्वाराकारयत् न केवलमेतावदेव तदैश्वर्यम् । परतो जगतः परस्मिन् वैकुण्ठेऽपि ईश्वर इति । अतो युक्तमेवालक्ष्यचेष्टितत्वमित्यर्थः स्व ईश्वर इति चित्सम्बन्धे स्वं स्वयम् ॥ ३२ ॥

कारकाः प्रकृति प्रवर्त्तका देवाः ॥ ३३ ॥ ३४ ॥

योमामित्यादौ गोपायसे अग्रसर इति सम्बन्धः ॥ ३५ ॥

ईश्वराणामन्येषामपि । वीरयशस्करेभ्य इति तथापि भद्रमेव ते करिष्यन्तीति भावः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु मयैव जगत् सृज्यते संह्रियते चेति सत्यं तदपि सम्प्रति पालने प्रवृत्तस्य तव मद्वधोऽनुचित इत्याह । य इति ॥ ३१ ॥

ननु तर्हि त्वं मामधर्मिणी ब्रूषे तत्र नहि नहि किन्तु दुर्बोधमेव तवैश्वर्यमित्याह । नूनमिति । अकृतात्मभिरविक्षिप्तचित्तैः । य ईश्वरोऽकरोत् सर्गं अकारयच्च विसर्गम् । स्वत एकः परतो मायया अनेकश्च ॥ ३२ ॥

तस्मादचिन्त्यशक्तये केवलं नम इत्याह । अनुरुणाद्धि भक्तजीवस्यानुरोधेन करोति । द्रव्यक्रियाकारककाणि भूतेन्द्रियदेवताः । चेतना बुद्धिः आत्माहङ्कारस्तैः । समुन्नद्धाः प्रबलाः परस्परविरुद्धाश्च शक्तयो यस्येति पालनसंहारशक्ती उभे अपि प्रबले इत्यतः पालयितुं संहर्त्तुञ्च त्वं प्रभुर्यथेच्छसि तथा कुरु तुभ्यं नम एवेति भावः ॥ ३३ ॥

अस्मिन् कारुण्यमुत्पादयन्ती पूर्ववृत्तं स्मारयति । सवा इति द्वाभ्याम् ॥ ३४ ॥

उपरि उपरिस्थितायां मयि मावि नौकारूपायां सप्रजस्त्वं धराधर आदिशूकरो मत्स्वामी त्वं यो मां स्वभार्यां प्रयासि निर्मिते त्रिधां [illegible] असि । [illegible] इमास्त्वत्प्रजा मदपत्यान्येव मदुत्सङ्गे स्थितानि नित्यम् [illegible] पयः पाययाम्येव साम्प्रतमेतद्दुर्वृत्तमालक्ष्य शीलं शिक्षयन्त [illegible] यदि क्रुद्धा पयो न पाययामीति त्वं गृहपतिर्मां [illegible] सीति [illegible]

कि[illegible] तीति विश्वसत्यप्यहं न विश्वसिमि ईश्वराणां खलु [illegible] पुरूत्वादय इत्याह । नूनमिति । तस्य ईश्वरस्य गुण[illegible] देवमनुष्यतिर्यग्योनिषु सर्गा एतस्तया मायया [illegible] आत्मनि चित्तवत्स्व स्वकर्माणि अमुकं येषां तैरहमिवि [illegible] कृपावीराणां यशः कुर्वन्तीति तेभ्य इति त्वं चेन्मां न र[illegible] णां यश एव [illegible] इति भावः ॥३६॥

इति सारार्थदर्शिन्यां [illegible] म् ।
सप्तदशश्चतुर्थेऽयं सङ्गत[illegible]

श्रीमच्छुकदेवकृतसिद्धान्त[illegible]

स्वमायया स्वकृपया आत्माश्रयया जीवविषय[illegible] रमादावसृजदधुना तयैव गोप्तुमुद्यतः सोऽयं धर्मपर[illegible] रूपधर्मपरः नु अहो मामेव केवलां कथं जिघांसति ॥ [illegible]

अतः नूनं निश्चितम् ईशस्य समीहितं दुर्ज्ञेयम् [illegible] अस्येश्वरस्य मायया गुणमय्या शक्त्या हेतुभूतया अकृतात्मभिः अकृत ईश्वरे न नियोजित आत्मा मनो यैस्तैर्न लक्ष्यते कः यः आत्मानं विश्वाकारमकरोत् "तदैक्षत बहुस्यां स्वयमात्मानमकुरुत स वा अयमभवत्,, इति श्रुतिभ्यः नन्वेवं विकारित्वसंसारित्वादिदोषाः प्रसज्येरन् इत्यत्राह । एक इति । सार्वविभक्तिकस्तसिः पराभ्यो भिन्नस्वरूपाभ्यः प्रधानपुरुषादिरूपाभ्यः शक्तिभ्यो अकारयत् नतु स्वरूपेण विकारी संसारी चेत्यर्थः ननु तर्ह्यनेककारणसिद्धिरत्राह । यएक एवानेक इति । स्वयमेकः सजातीयविजातीयभेदद्वयशून्यः स्वगतानां प्रकृतिपुरुषादीनां स्वशक्तीनामपेक्षयानेकः एवं स्वाभाविकभेदाभेदाश्रय इत्यर्थः तथा च श्रुतयः "एकः सन्बहुधा विचचार एको देवो बहुधा सन्निविष्टः त्वमेकोऽसि बहुधा बहून् प्रविष्टः इत्याद्याः स्मृतयश्च तत्र भगवान्मनुराह । एकत्वे सति नानात्वं नानात्वे सति चैकता । अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति,, इति श्रीमुखवचनं च एकत्वेन पृथक्त्वेन बहुधा विश्वतो मुखम् इति हरिवंशे घण्टाकर्णवाक्यम् । "केचिद्बहुत्वेन वदन्ति देवमेकात्मना केचिदमुं

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पुरातनम्। वेदान्तसंस्थापितसत्त्वयुक्तं द्रष्टुं तमीशं वयमुद्यतास्मह इति श्रुतिरपीश्वराभेदेऽपि "अभेदः केवलोभ्रान्तिस्तथा भेदोऽपि केवलः। तस्मादुचितः कर्तव्यो भेदाऽभेदमयो विधिः,, इति तथैवाह। भगवान्सूत्रकार :। अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके। उभयव्यपदेशात्त्वहिकुण्डलवत्,, इत्यादिपूर्वाचार्यवाक्यमपि। सर्वं हि विज्ञानमतो यथार्थकं श्रुतिस्मृतिभ्यो निखिलस्य वस्तुनः। ब्रह्मात्मकत्वादिति वेदविन्मतं त्रिरूपतापिश्रुतिसूत्रसाधिता,,इति ॥ ३२ ॥

भगवच्छक्तीः स्फुटतया वर्णयन्ती नमस्करोति। सर्गादीति योऽस्य विश्वस्य सर्गादिशक्तिभिः अनुरुणद्धि अनुवर्तते करोतीत्यन्वयः कास्ता इत्याकाङ्क्षायामाह। द्रव्यक्रियाकारकचेतनात्मभिरिति। द्रव्यमचेतनं प्रधानं क्रियाकारकचेतनाशब्दार्थः इन्द्रियदेवतान्तःकरणरूपः आत्मा जीवः उपलक्षणमेतत् कालादीनां ग्रहणम् एतद्रूपाभिः कथम्भूताय समुपरुद्धनिरुद्धशक्तये समुपरुद्धा एकैका अतिप्रबला निरुद्धाशक्तिमदधीनव्यापितप्रवृत्तिकाः शक्तयो यस्य तस्मै ॥ ३३ ॥

यः सृष्टवान्स एवात्मविनिर्मितं जगत् संस्थापयिष्यन् आदिसूकरः सन् रसातलादम्भसो मामुज्जहार ॥ ३४ ॥

यः धराधरः सम्भूत स एव अम्भसां पृष्ठे उपरि नाविव मयि अवस्थिताः प्रजा रिरक्षिषुः वीरमूर्तिः सन् अद्य मां पयसि दुग्धे निमित्ते जिघांससि एतद्भगवच्चेष्टितमतिगह्वरमिति भावः ॥ ३५ ॥

भगवच्चेष्टितस्यातिगह्वरत्वं वदन्ती नमस्करोति। नूनमिति। तस्य भवतो गुणाः शक्तिगुणाः सत्त्वादयस्तेषां सर्गः सृज्यंत इति सर्गः संसारस्तत्र वा मायाऽविद्यात्मिका तया मोहितानि चित्तवर्त्मानि चित्तवृत्तयो येषां तैरस्मादिभिरजनैरीश्वराणां येषां भवतामीहितं चेष्टितं न ज्ञायते तेभ्यो नमः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तदशाध्यायार्थ प्रकाशः ॥ १७ ॥

भाषाटीका।

जिन आपने सृष्टि के पहिले इस स्थावर जंगम को सृजा है अचिन्त्य अपने आश्रय करने वाली माया से सृजकर फिर उसी माया से रक्षा करने को भी उद्यत हो फिर मेरे कुं कैसे मार ने की इच्छा करते हो ॥३१॥

यह बात निश्चित है कि परमेश्वर की दुस्तर माया से मोहित पुरुषों को ईश्वरका कर्तव्यज्ञात नहीं होता है क्योंकि जो ईश्वर एक है फिर अनेकभी है आपने ब्रह्मा को पैदा किया फिर ब्रह्मासे जगत् को पैदा कराया सो जगत् का ईश्वर है ॥३२॥

जो भगवान् पृथिव्यादि महा भूतों से ज्ञानेन्द्रिय कर्मेन्द्रिय इन्द्रादिक देवता बुद्धि अहङ्कार रूप जो अपनी शक्ति है तिन के द्वारा इस जगत् की सृष्टि आदि करें हैं जिन भगवान् की उत्कृष्ट शक्ति हैं उन विधाता परम पुरुष के अर्थ नमस्कार हो ॥ ३३ ॥

सो जिन आपने अपनेसे स्वयंबना था जो पंचभूत इन्द्रिय अंतःकरण रूप जगत् है विभो! हे अज! उस जगत्को स्थापन करने के लिये आदिसूकर अवतार से मेरे को रसातल के जलमें से लाये हो ॥ ३४ ॥

सोई आप जलके ऊपर नाव सरीकी जो मै तिसमेरे ऊपर वर्तमान जो सब प्रजा तिनकी रक्षा करने को जो धराहमूर्ति भये सोइ वीरमूर्ति पृथु भये हो सो अब जलके ऊपर उग्रबाण लेकर मेरे को मारना चाहते हो ॥ ३५ ॥

निश्चित है कि ईश्वर की गुण सृष्टि की माया से मोहित हो रहा है चित्त रूपी मार्ग जिनका ऐसे हमं सरीके मनुष्य ईश्वर के चरित्र को नहीं जान सकते हैं इसी से जितेन्द्रियों के यश करने वाले जो भगवद्भक्त हैं तिन के अर्थ नमस्कार है ईश्वर के गुणों को तो कौन कह सकेगा ॥ ३६ ॥

इति श्रीभागवत चतुर्थस्कन्ध सतरहवां अध्यायका भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥१७॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे सप्तदशोऽध्यायः समाप्तः ॥ १७ ॥

अष्टादशोऽध्यायः ।

———◌*◌———

मैत्रेय उवाच

इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम् ।
पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना ॥ १ ॥
संनियच्छाभि भो ! मन्युं निबोध श्रावितं च मे ।
सर्वतः सारमादत्ते यथा मधुकरो बुधः ॥ २ ॥
अस्मिंल्लोकेऽथवाऽमुष्मिन् मुनिभिस्तत्त्वदर्शिभिः ।
दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये ॥ ३ ॥
तानातिष्ठति यः सम्यगुपायान् पूर्वदर्शितान् ।
अवरः श्रद्धयोपेत उपेयान् विन्दतेऽञ्ज[illegible] ॥ ४ ॥
ताननादृत्य यो विद्वानर्थानारभते स्वयम्[illegible]
तस्य व्यभिचरन्त्यर्था आरब्धाश्च पुन[illegible] ॥ ५ ॥
पुरासृष्टा ह्योषधयो ब्रह्मणा या विशांपते !
भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः ॥ ६[illegible]
अपालितानादृता च भवद्भिर्लोकपालकैः
चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः ॥ ७ ॥
नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा ।
तत्र योगेन दृष्टेन भवानादातुमर्हति ॥ ८ ॥
वत्सं कल्पय मे वीर ! येनाहं वत्सला तव ।
धोक्ष्ये क्षीरमयान् कामाननुरूपं च दोहनम् ॥ ९ ॥
दोग्धारं च महाबाहो ! भूतानां भूतभावन !
अन्नमीप्सितमूर्जस्वद्भगवान् वाञ्छते यदि ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टादशे महीवाक्याद्धत्सपात्रादिभेदतः
पृथ्व्यादिभिस्तु सा दुग्धा स्वं स्वं दुग्धमिनीयते ॥ १ ॥

हेऽभिभो प्रभो ! यद्वा भो देव ! अभि अभयं यथा भवत्येवं मन्युं संनियच्छ श्रावितं विज्ञापितं च मद्वाक्येऽनादरः कर्तव्य इत्याह । बुधो हि सर्वतः सारमादत्ते ॥ २ ॥

मयि जीर्णाश्चौषधीरुपायेन गृहाणेति वक्तुमुपायेन सर्वं सिध्यति नान्यथेत्याह । अस्मिन्निति त्रिभिः । पुंसां श्रेयसः पुरुषार्थस्य प्रसिद्धयेऽस्मिंल्लोके कृष्यादयोऽमुष्मिंश्च लोकेऽग्निहोत्रादयो योगा उपाया दृष्टाः प्रयुक्ता अनुष्ठिताश्च ॥ ३ ॥

पूर्वैर्दर्शितान् अवरोऽर्वाचीनः ॥ ४ ॥

अविद्वानविज्ञानपीतिवा व्यभिचरन्ति न सिध्यन्ति ॥ ५ ॥

सहेतुकमुपायमाह । पुरेति षड्भिः ॥ ६ ॥

भवद्भिरिति राजसामान्याभिप्रायेण वेनादिभिरिति वा अपालिता चोरादिनिवारणात् अनादृता च यज्ञादिप्रवर्तनाभावा[illegible] यज्ञार्थं अग्रसं गिलितवत्यन्यथा धृतव्रतैर्भुक्ता न प्रसोष्यन्ते ततश्च यज्ञादयो न सिद्ध्येरन्निति भावः ॥ ७ ॥

क्षीणा जीर्णाः ॥ ८ ॥

दोहनं दोहपात्रम् दोग्धारं चोपकल्पय धोक्ष्ये प्रपूरयिष्यामि ॥ ९ ॥

भूतानामभीप्सितमन्नम् ऊर्जस्वद्बलप्रदम् ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सर्वकारणत्वेन विचित्रशक्तिमत्त्वेन च पृथुं प्रस्तूय तदभिमतौषधिवीजनिर्गमोपायं विवक्षयन् तत्र तं विश्वासयितुं प्रसादयन्त्याह मैहीत्याह मुनिः । इत्थं पूर्वोक्तप्रकारेण पृथुमभिष्टूय ततोऽप्यनिवृत्तरुषा प्रस्फुरितः नितरां चलितः अधरोष्ठो यस्य तं दृष्ट्वेति शेषः भीता सत्यपि मही आत्मानं मन आत्मना बुद्ध्या संस्तभ्य निर्भयं कृत्वा प्राह ॥ १ ॥

उक्तमेवाह । मांहपृथो ! अभि अभितः कार्त्स्न्येन मन्युं क्रोधं संनियच्छ उपसंहर मे मया भाषितं विज्ञापितं निबोध जानीहि किं तदित्यत्राह । बुधः सारासारविभागज्ञः यथा मधुकरः भृङ्गः तथा सर्वतः सर्वेभ्यो वस्तुभ्यः सारमादत्ते गृह्णाति वस्यमाणरीत्या मत्तः सारभूतक्षीरादानेनैवेष्टसिद्धौ किं वृथा मन्युं कुर्वसीति भावः ॥ २ ॥

मया गीर्णा ओषधीरुपायेन गृहाणेति वक्तुमुपायेन सर्वं सिध्यति नान्यथेत्याह । अस्मिन्निति त्रिभिः । पुंसां कामिनां श्रेयसः पुरुषार्थस्य प्रसिद्ध्ये निष्पत्त्यै तत्त्वदर्शिभिः मुनिभिरस्मिँल्लोके ये उपायाः कृषिगोरक्षवाणिज्यादयः जीवनोपाया दृष्टा विज्ञाता निर्णीता इति यावत् ये चामुष्मिन् परस्मिन् लोके स्वर्गसाधनभूता अग्निहोत्रादयः उपायाः प्रयुक्ता अनुष्ठिताश्चशब्दात् दृष्टाश्च ॥ ३ ॥ ४ ॥

तानेव पूर्वैर्मुनिभिर्दर्शितानुपायान् योऽवरोऽर्वाचीनः सम्यक् श्रद्धया कर्तव्येषु त्वरया उपेतः युक्तः समातिष्ठति स एवाञ्जसा सुखेनोपयानुपायसाध्यान् विन्दते लभते अन्यस्तु न विन्दत इत्याह तानिति । यो विद्वानविद्वान् वा तान् पूर्वदर्शितानुपायाननादृत्य स्वयमर्थान् स्वबुद्ध्या स्वबुद्धिमात्रेण पुरुषार्थसाधनत्वेनावधारणीयार्थान् पुरुषार्थोपायानारभते तस्यार्थास्त उपायाभासाः पुनः पुनः प्रारब्धाश्च अप्यसकृद्विहतौ पुनः पुनरनुष्ठिता अपि व्यभिचरन्ति न फलजनका भवन्तीत्यर्थः ॥ ५ ॥

[illegible]ऽसावोषधिवीजनिर्गमोपायः किमर्थं च तानि त्वमात्मनि [illegible] पुरेति । हे विशाम्पते ! ब्रह्मणा पुरा या ओषधयः स्टष्टा इह जीवनार्थत्वेन यज्ञानुष्ठानद्वारा परत्र लोके स्वर्गाद्यर्थत्वेन स्टष्टास्ता ओषधयः अधृतव्रतैः लोकपालयज्ञानुष्ठानव्रतरहितैरत एवासद्भिः भुज्यमाना मया दृष्टा असद्भिर्भुज्यमाना इमा ओषधयः समूला नश्येयुरित्याशङ्किता इत्यर्थः ॥ ६ ॥

अहं च भवद्भिर्भवादृशैः लोकपालैरपालिता अनादृता च सती लोके सर्वस्मिन् चौरीभूते चौरप्राये सति यज्ञार्थे यज्ञनिमित्त ओषधीरग्रसं गिलितवती असद्भिर्भुज्यमाना न रोक्ष्यन्ति ततश्च यज्ञादयो न सिध्येयुरित्याशङ्क्याग्रसमित्यर्थः ॥ ७ ॥

ता मया गीर्णा वीरुधः ओषधयः भूयसा महता कालेन मयि क्षीणाः जीर्णाः नूनं निश्चये जीर्णानां पुनर्निर्गमने दृष्टेन निश्चितेन [illegible]पायेन आदातुं भर्हीतुमर्हति ॥ ८ ॥

कोऽसौ दृष्टो योगस्तत्राह । वत्समिति त्रिभिः । हे वीर ! महाबाहो ! हे भूतभावन ! यदि भवान् भूतानामूर्जस्वदन्नप्रदमर्थं वाञ्छति तर्हि मे गोरूपाया ममानुरूपं वत्सं दोहनं दुहन्त्यस्मिन्निति दोहनं पात्रं दोग्धारं चोपकल्पय येन वत्सादिसामग्रीसंपादनेन अहं तव वत्सस्नेहाद्विषये वात्सल्यवती क्षीरमयान् क्षीरविकारान् मत्तःक्षीरप्रकृतिकान् कामान् काम्यन्त इति कामा ओषधीरन्नः सोमवीर्योजोबलसंवर्धयस्तान् धोक्ष्ये क्षीररूपेण प्रपूरयिष्यामि ॥ ९—१० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वरूपभूता गुणाहरेरपरोक्षज्ञानादुपजायन्त इत्येतदर्थसंग्रहार्थे भूमेस्तत्तद्वस्तुदोहनं निरूप्यतेऽस्मिन्नध्याये । तत्रादौ पृथोः क्रोधशमनाय पुनर्भूमेस्तत्प्रतिवचनप्रकारम्वक्ति । इत्थमिति ॥१॥

कथं नियच्छामि क्रोधं येन तच्छान्तिहेतुं श्रुणाप्नोम्यतःकरणाभवामीति तत्राह । नियोधेति । पुंसिह सद्धर्म एवाशिक्षणीयो न सल्लिकाधर्म इत्याशयेनाह । सर्वत इति ॥ २ ॥

कीदृशं प्राप्यते यत्प्रकृतोपयोगि स्यादत्राह । अस्मिन्निति । लोके कृष्यादिश्रेयःसिद्धये बीजाद्यार्जनोपाया अमुष्मिन् स्वर्गादौ यागादियोगास्तत्त्वदर्शिभिर्मुनिभिर्दृष्टा प्रयुक्ताश्चेत्यन्वयः ॥ ३ ॥

ततः किमित्यतोऽन्वयव्यतिरेकावाह । तानातिष्ठतीति ॥ ४ ॥

अविद्वानप्युत्पन्नः व्यभिचरन्ति नियमेन न सिध्यन्ति ॥५॥

किमद्भुतकथाकथनेनाद्यौषधीनामनुपलम्भः कस्मात्तन्निमित्तं कथयेति तत्राह । पुरेति । याः पुरा विरिञ्चेन सृष्टास्ता ओषधीरहमग्रसमित्यन्वयः ॥ ६ ॥

असत्पुरुषैर्भुज्यमानत्वं भवादृशेन क्षत्रियेणारक्षितत्वमगोपितत्वं नृलोकस्य चोरप्रायत्वं चावेक्ष्य सत्सुरूपेषु श्रीनारायणपूजाख्ययज्ञप्रयोजनस्यावश्यकत्वादिति ॥ ७ ॥

तर्हि ता देहीति तत्राह । नूनमिति । क्षीणानामापादनं दुःसाध्यमिति तत्राह । तत्रेति । शास्त्रदृष्टेन ननु स्वरूपतो नष्टा उत न्यूनतामापन्ना इति संशयोमाभूत्तत्कार्यसाधनं तच्छास्त्रदृष्टोपायेन सर्वं साध्यम् ॥ ८ ॥

तथापि किरामानुचराणां वानराणां वा रेणुकाया वा भूतसंज्ञाविन्यादिनेत्यत्र प्राप्तमुपायं वक्ति । वत्सामिति । वत्सला वत्सप्रिया अनुरूपं तद्योग्यं दोहनं दोहक्रियाविशेषम ॥ ९ ॥

नैतावता पूर्यत इत्युक्तम दोग्धारं चेति । ओजस्वदन्नमक्षताया धारणाशक्तिप्रदमित्यर्थः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नूनमिति । पूर्वपूर्वकल्पेषु पूर्वपूर्वपृथुभिर्दृष्टेन शास्त्रद्वारा ज्ञानेन योगेनोपायेन ॥ १—८ ॥

वत्समिति युग्मकम ॥ ९ ॥ १० ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अष्टादशेऽवनिं कामधेनुं दुग्ध्वा स्वमीप्सितम ।

वत्सपात्रादिभेदेन दुग्धं सर्वेऽपि लेभिरे ॥ १ ॥

हे अभिभो प्रभो ! सर्वत इति यद्यप्यहं निकृष्टा तदपि ममापि वाक्यं शृणु । मध्यापि सारस्तिष्ठति चेत्तं गृहाण नान्यथेत्यर्थः ॥१॥२॥

गवां दुग्धपूर्णादप्यापीनादुपायेन दोहनेनैव दुग्धं लभ्यते ननु गालिताद्विदारिताद्वा तस्मादित्यतो मयि स्थितान्यन्नानि सर्वाणि त्वमुपायेन गृहाणेति वक्तुमुपायस्य प्रामाण्यं दर्शयति । अस्मिन्निति । योमा उपाया अस्मिन् लोके कृष्यादयः अमुष्मिंश्च लोके अग्निहोत्रादयः दृष्टाः प्रयुक्ता अनुष्ठिताश्च ॥ ३ ॥

अवरोऽर्वाचीनः । उपेयान् साध्यवस्तूनि ॥ ४ ॥ ५ ॥

प्रकृतमाह । पुरेति पञ्चभिः ॥ ६ ॥

समां च कुरु मां राजन् ! देववृष्टं यथा पयः ।
अपर्तावपि भद्रं ते उपावर्तेत मे विभो ! ॥ ११ ॥
इति प्रियं हितं वाक्यं भुव आदाय भूपतिः ।
वत्सं कृत्वा मनुं पाणावदुहत् सकलौषधीः ॥ १२ ॥
तथापरे * च सर्वत्र सारमाददते बुधाः ।
ततोऽन्ये च यथा कामं दुदुहुः पृथुभाविताम् ॥ १३ ॥
ऋषयो दुदुहुर्देवीमिन्द्रियेष्वथ सत्तम ! ।
वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचि ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भवद्भिरिति येषां मनसि कृत्वा तत्पुत्रे पृथावुपालम्भः अपालिता यज्ञादिप्रवर्त्तनाभावात् प्रत्युत विधर्मप्रवर्त्तनादनादृता अथ अनन्तरं चौरीभूते इति वेणो मृते सतीत्यर्थः । अग्रसमिति यदि नाग्रसिष्यं तदाहमथ कथं प्राप्स्य इत्यर्थः । यज्ञार्थे त्वत्प्रवर्त्तिष्यमाणानां यज्ञानां कृते ॥ ७ ॥

क्षीणाः सूक्ष्मतया स्थिताः । इष्टेन योगेन वक्ष्यमाणेनोपायेन ॥ ८ ॥

दोहनं दोहपात्रं धोक्ष्ये प्रपूरयिष्यामि । उर्ज्जस्वत् बलप्रदम् ॥ ९ ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भूमिवाक्यान्तं पृथ्वाद्या दुदुहुरित्यन्ताद्यो वर्ण्यते । इत्थमिति । आत्मानं मनः संस्तभ्य स्थिरं कृत्वा ॥ १ ॥

भोः प्रभो ! मन्युं क्रोधमभिनिः शेषतः संयच्छ उपसंहर मे भाषितं प्रार्थितं निबोध यतो बुधः यथा मधुकरः पुष्पेभ्यः सारं गृह्णाति तथा सर्वतः सर्वेभ्यः सारमादत्ते तथोक्तं महाभारते "अविवादात्प्रवदतोऽपि मूर्खात्प्रजल्पतः । सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पद„ इति ॥ २ ॥

अस्मिन् लोके कृष्यादयः अमुष्मिन् अग्निहोत्रादयः ते एव पुंसां श्रेयःप्रसिद्धये मनोरथलाभाय भवन्ति ॥ ३—४ ॥

अर्थाः उद्योगाः व्यभिचरन्ति निष्फला भवन्ति ॥५ ॥ ६ ॥ ७ ॥

वीरुधः ओषधयः क्षीणाः जीर्णाः तत्र आदाने इष्टेन लोकप्रसिद्धेन आदातुं ग्रहीतुम ॥ ८ ॥

लोकप्रसिद्धं योगमेवाह । वत्समिति । यदि भूतानामीप्सितमूर्ज्जस्वत् बलप्रदमन्नं वाञ्छते तर्हि येनाहं कामेन धोक्ष्ये तादृशं वत्सं दोहनं पात्रं दोग्धारं च प्रकल्पयेति द्वयोरन्वयः ॥ ९—१० ॥

भाषाटीका ॥

मैत्रेयजी बोले क्रोधसे ओठों को कम्पावते हुये पृथु महाराज को इस प्रकार से स्तुति करके अपनी बुद्धि से मन को रोक कर बड़ी भय भीत पृथिवी बोली ॥ १ ॥

हे प्रभो ! क्रोध को रोको मेरे कहे वचन को सुनो पंडितलोग भौंरा की नाईं सब जगे से सार को ग्रहण करते हैं ॥ २ ॥

इस लोक में अथवा उस लोक में तत्त्वदर्शी मुनिलोगोंने जो उपाय [illegible] उन्हीं उपायों के प्रयोग करने से मनुष्यों की सिद्धि [illegible]

[illegible] उपायों को जो आश्रय करता है नूतन पु[illegible] अनायास फल को प्राप्त होता है ॥ ४ ॥

उन उपायों [illegible] पंडित भी होकर कार्यों का आरम्भ करे तो [illegible] आरम्भ किये कार्य नष्ट होजाते हैं ॥ ५ ॥

हे राजन् ! पूर्वकाल में [illegible] को पैदा किये उन ओषधियों को व्रत त्यागी [illegible] मैंने देखा ॥ ६ ॥

लोकपालक आपलोगोंने जब [illegible] अनादर किया सब लोग जब चोर होगये त[illegible] ओषधियों का ग्रास करलिया ॥ ७ ॥

निश्चय से वो लता मेरे में अधिक का[illegible] हो गई उसमें दिखाये हुये उपाय से आप ग्रहण [illegible] ॥

हे वीर ! जिससे मैं तुमारी वत्सला प्यारी हूं [illegible] कोई कल्पना करो लायक पात्र कल्पना करो तब दुग्धरू[illegible] मनोरथों को मैं पूरण करूंगी ॥ ९ ॥

हे महाबाहो ! यदि आप बलकारक अन्नादिक चाहते हो तो कोई प्राणी के मध्य में दुहनेवाला भी कल्पना करो ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपगतेऽपि वर्षर्तौ देववृष्टमुदकं यथा मे मयि सर्वतोवर्तेत ॥ ११ ॥

मनुं स्वायंभुवम् ओषधीर्व्रीह्यादीः ॥ १२ ॥

प्रसंगादर्थान्तरमाह । तथेति । यथा पृथुरेवं सर्वत्र वाक्ये परेऽपि सारमाददते प्रस्तुतमनुवर्तयति । ततोऽन्ये च ऋष्यादयः पञ्चदश दुदुहुः पृथुना भावितां वशीकृताम् ॥ १३ ॥

देवीं पृथ्वीम वाङ्मनःश्रवणैर्वेदग्रहणादिन्द्रियाणां पात्रत्वम् ॥ १४ ॥

* ततोऽपरेइतिविजयध्वजः ।

कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन् ।
हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥ १५ ॥
दैतेया दानवा वत्सं प्रह्लादमसुरर्षभम् ।
विधायादूदुहन् क्षीरमयःपात्रे सुरासवम् ॥ १६ ॥
गन्धर्वाप्सरसोऽधुक्षन् पात्रे पद्ममये पयः ।
वत्सं विश्वावसुं कृत्वा गान्धर्वं मधु सौभगम् ॥ १७ ॥
वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत ।
आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः ॥ १८ ॥
प्रकल्प्य वत्सं कपिलं सिद्धाः सङ्कल्पनामयीम् ।
सिद्धिं नभसि विद्यां च ये च विद्याधरादयः ॥ १९ ॥
अन्ये च मायिनो मायामन्तर्धानाद्भुतात्मनाम् ।
मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सोमममृतम् वीर्यं मनः शक्तिम् ओज इन्द्रियशक्तिम् बलं देहशक्तिं च तदेव पयः ॥ १५ ॥

सुरामासवं च तालादिमद्यम् ॥ १६ ॥

मधु वाङ्माधुर्यं सौभगं सौन्दर्यं तत्संहितम् ॥ १७ ॥

कव्यं पितृणामन्नम् आमपात्रे अपक्व मृण्मये अधुक्षत दुदुहुः ॥ १८ ॥

संकल्पनामयीमणिमादिसिद्धिम् ये च विद्याधरादयस्ते च तमेव वत्सं प्रकल्प्य नभस्येव पात्रे खेचरत्वादिरूपां विद्यां दुदुहुः ॥ १९ ॥

अन्ये च किंपुरुषादयोऽन्तर्धानेनाद्भुतात्मनां संबन्धिनीं मायाम् धारणामयीं संकल्पमात्रप्रभवाम् ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हेवीर! पर्वतादिभिर्निम्नोन्नतां पृथ्वीं समां कुरु किं तत्समीकरणसाध्यं तत्राह । देववृष्टं वर्षासु देवेन पर्जन्येन वृष्टं पयः जलमपर्तावपि वर्षर्त्वपगमेऽपि मे मम यथा उपावर्तेत सर्वतो वर्तेत इत्थं समीकरणाभावे क्वापि जलं न तिष्ठेदतः समाहं कर्तव्येत्यर्थः हेप्रभो ! ते तुभ्यं भद्रं दोहनसमीकरणाभ्यां भद्रं भूयादित्यर्थः ॥ ११ ॥

एवं धरित्र्याभिहितः पृथुस्तथैवाकरोदित्याह मुनिः। इत्युक्तामिति । प्रियं हितं च भूमेर्वाक्यमादाय ओमित्यनुमन्य मनुं स्वायंभुवं वत्सं कृत्वा पाणौ दोहनपात्रे स्वयं दोग्धा भूत्वा सकलौषधीः अदुहत् सकलौषधिप्रकृतिभूते क्षीरमदुहत् क्षीरं प्रदुह्य धरित्र्यां तद्विकारान् ओषधीः प्रादुर्भावयामासेत्यर्थः एवमग्रेऽपि बोध्यम् ॥ १२ ॥

यथा पृथुरेवमपरे च बुधाः सारासारविवेककुशलाः सर्वत्र सर्वेषु पदार्थेषु सारमाददते गोरूपाया धरित्र्याः क्षीरं दुग्ध्वा सर्ववस्तुषु सारं निहितवन्त इत्यर्थः तदेवाह । अन्ये ऋषिप्रभृतयः यथाकामं स्वस्वकामानुरूपं पृथुभाविताम् पृथुवशीकृतां दुदुहुः ॥ १३ ॥

के के किं किमदूदुहंस्तत्राह । ऋषय इति । ऋषयो वसिष्ठादयः बृहस्पतिं वत्सं कृत्वा देवीं अविशीर्णमिन्द्रियेषु पात्रभूतेषु वाङ्मनःश्रवणैर्वेदग्रहणादिन्द्रियाणां पात्रत्वम् हेसत्तम ! विदुर ! शुचि पवित्रं छन्दोमयं छन्दःप्रचुरं छन्दःप्रकृतित्वेन तत्प्राचुर्यमत्र विवक्षितं पयः क्षीरं दुदुहुः दुग्धवन्तः ॥ १४ ॥

तदा सुरगणाः इन्द्रं वत्सं कृत्वा हिरण्मयेन पात्रेण वीर्यं मनःशक्तिः ओज इन्द्रियशक्तिः बलं देहशक्तिः एतत्त्रयसम्पादकं सोमममृतं तदात्मकं पयः अदूदुहन् ॥ १५ ॥

दितेरपत्यानि दानवा दोग्धारः असुरश्रेष्ठं प्रह्लादं वत्सं विधाय कृत्वा अयःपात्रे "गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा,, इति त्रिविधां सुरामासवं च तालादिमद्यं पयः दुदुहुः कार्यकारणयोरभेदोपचारेण सुरासवं पयो दुदुहुरित्यभेदनिर्देशः ॥ १६ ॥

एवमग्रेऽपि गन्धर्वाप्सरसश्च दोग्धारः विश्वावसुं वत्सं कृत्वा पद्ममये पद्मात्मके पात्रे गन्धर्वाणां सम्बन्धिसौन्दर्यं च पयः अधुक्षन् दुदुहुः ॥ १७ ॥

श्राद्धदेवताः पितरः पित्रादिपितृगणाः दोग्धारः अर्यमणाख्येन अर्यमाणं वत्सं कृत्वेत्यर्थः आमपात्रे अपक्वे मृण्मये पात्रे श्रद्धया कव्यं पितृणामन्नं क्षीरमधुक्षत दुदुहुः आर्षत्वात् व्यत्ययेनात्मनेपदम् कव्यस्य विशेषणं श्रद्धया देयत्वज्ञापनाय श्रद्धया अधुक्षतेत्युक्तं यद्यपि श्रद्धया देयं श्राद्धं तस्य देवता इत्यवयवार्थादेव कव्यस्य श्रद्धापूर्वकत्वं प्रतीयते तथापि गच्छतीति गौः गमेर्डोः गौर्गच्छतीत्यत्र प्रकृत्युपात्तगमनस्येव प्रकृत्युपात्तश्रद्धाया अविवक्षणात् श्रद्धयेत्युक्तम् ॥ १८ ॥

सिद्धा दोग्धारः कपिलं मुनिं वत्सं प्रकल्प्य नभसि आकाशे पात्रे सङ्कल्पनामयीं संकल्पप्रचुरामणिमादिः संकल्पानुसारित्वात्संकल्पनामयीमित्युक्तं सिद्धिमणिमादिसिद्धिमधुक्षन् तथा ये च विद्याधरादयस्ते दोग्धारः तेऽपि तमेव वत्सं कापिलं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रकल्प्य नभस्येव पात्रे खेचरत्वादिरूपां विद्यां श्रीरात्मना दुदुहुः ॥ १९ ॥

अथान्ये च मायिनः आश्चर्यरूपधारिणः किंपुरुषादयो योऽन्धारः वत्सस्तं वत्सभावे मयं प्रकल्प्य मयं वत्सं कृत्वेत्यर्थः धारणामयीं धारणाप्रचुरां मनोव्यापारविशेषधारणाख्ययोगानुसारित्वाद्धारणामयीमित्युक्तम् एतच्चैकादशस्कन्धे स्फुटीभविष्यति अन्तर्धानमद्भुतं रूपं चेत्येतदुभयाकारत्वेन तदात्मिकां मायां विचित्ररूपसर्गकारिणीं शक्तिं दुदुहुः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ओषध्युत्पत्तौ प्रधानसाधनं जलन्ताद्भिरमायां मयि देववृष्टं पयो न समं प्रसरति तथापर्त्तावपि अवृष्टकाले समं स्यात्तथा मां मामां कुर्वन्त्ययौवत्यनुत्पादे त्वत्कोपविषया स्यामित्याह । समां चेति ॥ ११ ॥

अत्रापि त्वदुप्रसन्नं त्वयैवोद्गीर्य वातश्गमन्यथा वधिष्यामीति पुनरपि पृथुना किं कुपितं न किन्तु तदुक्तमङ्गीकृतं ।रमांहित्यादिश्याह । इतीति । प्रियहितं श्रोतृसुखं प्रियं पथ्य हृदयंगमं हितं भूपतिः पृथुः ॥ १२ ॥ १३ ॥

ततोऽपरं इत्युक्तं विव्रियते । अथच इत्यादिना । देवीं सरस्वतीं इदमेव विशिनष्टि । छन्दोमयमिति । वेदमयं पयः कुथ वागिन्द्रियेषु ॥ १४ ॥

न केवलं सोमरसमात्रमदुदुहन् किन्तु तदुक्तं गुणा चेत्याह । वीर्यमिति । पराक्रमं माहात्म्यं वा ओजोऽवष्टम्भशक्तिं बलं निराहारत्वेऽपि बेप्राशक्तिमत्र बाह्यानेव गुणानदूदुहन्तत् अरूपभूतान् तदुक्तं "गुणाः स्वरूपभूताश्च बाह्याश्चेति द्विधा मताः । स्वरूपभूताऽयुयन्ते हरेर्बाह्यान्दुदुहुःपय,, इति ॥ १५ ॥

अयःपात्रे अयोमये पात्रे सुराख्यमासवं मधुप्रह्लादस्य प्रतिमन्वन्तरमुत्पन्नप्रायत्वादप्रोक्तं "प्रतिमन्वन्तरं प्रायः प्रह्लादाद्याश्चभूविर,, इतिवचनात् ॥ १६ ॥

गान्धर्वं गानं मधु सौभगं सौभाग्यलक्षणं मधु ॥ १७ ॥

आमपात्रे नवभाण्डे श्राद्धदेवताः श्राद्धकर्मणाम् ॥ १८ ॥

संकल्पनामयीं संकल्पमात्रेणाभीष्टसिद्धिप्रदां सिद्धिं ये विद्याधरादयस्ते च नभसि विद्यां संचरत्वलक्षणां सिद्धिमधुक्षत् स्वयः ॥ १९ ॥

अन्तर्धानगतात्मनाऽदृश्यत्वे प्राप्तमनस्कत्वेन अन्ये मायिनोधारणामयीं चिन्तामात्रसाध्यां मायाम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

सकलौषधीरत्नबीजमयानि पयांसि । ततसेकमात्रेण सर्वौषधिप्रभावात् मनोवेगत्वं सर्वभूभृद्गणमूलत्वात्तत्सम्बन्धेन तत्तस्यास्तदुद्भावनभावोत्पत्तेः एवमुत्तरत्रापि श्रीपृथुपाणेः पात्रत्वं तत्र तत्पालनशक्तिप्रकाशात् तत्प्रभावात् पयसश्चाभृयत्वं ज्ञेयम् ॥ १२—१३ ॥

यथा पृथ्व्या गोरूपत्वं तथा पयसोऽपि साक्षाद्रूपत्वमेव । तस्य छन्दोमयत्वञ्च तदुपलम्भमात्रेण छन्दस्यं सहसा प्रादुर्भावात् । तत् प्रादुर्भावयोग्यानि तु वाङ्मनःश्रवणरूपाणीन्द्रियाणि । तेषां पात्रत्वं तत्तत्संज्ञके सेकेन तत्प्रादुर्भावात् । तत्र आङ्गिरसां बृहस्पतिरिति न्यायेन प्रथमाधिकारी बृहस्पतिरिति स एव वत्सः कृत इत्यादिकं सर्वत्रानुसन्धेयम् ॥ १४ ॥

वीर्यादिहेतुं सोममभृतरूपं पयः ॥ १५ ॥

श्रीमतः प्रह्लादस्य भाविन्वेऽपि पृथिव्युपदेशेन सोऽयं प्रह्लादो दैत्यानां भावनामयो वत्सः अयः पात्र इति वोद्धस्य भिन्नतापेक्षया । पूर्वस्य दोहस्य प्रकृष्टत्वापेक्षया हिरण्मयेत्युक्तम् ॥ १६ ॥

गान्धं सौरभ्यमयं मधु तद्रूपं पयः तत्र ससौभगं सौन्दर्यं सहितम् । तत्र सौभगसौन्दर्याभ्यां तत्तत्प्रकाशोजातः अधुना । गानमाधुर्यमिति ज्ञेयं पद्मस्य पात्रत्वं च तत्त्रयास्पदत्वेनोपोद्बलकत्वात् ॥ १७ ॥

आमपात्रस्य पितृसन्तर्पणाक्षमावत्वात्तदुपयोगः ॥१८—२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अपर्त्तौ अपगतेऽपि वर्षर्त्तौ ॥ ११-१२ ॥

प्रसङ्गादर्थान्तरमाह । तथेति । यथा पृथुः पृथिव्या वाक्यसारं जग्राह गृहीत्वाच स्वकार्यं साधयामास तथा अपरेऽपि बुधाः सर्वत्र सर्वेषामेव सर्ववाक्येषु सारं गृह्णन्तीति नीतिः वेण-राज्येऽराज[illegible] धर्मलोपात् सर्वेषामपि सर्वं हारितं वस्तु [illegible] प्रापुरित्याह । तत इति । अन्येऽच ऋष्यादयः पञ्चवश [illegible] सर्वमहं दास्यामीति वित्तसुतामाववर्ती कु[illegible] रूपम् ॥ १३ ॥

देवीं [illegible]र्यैर्वक्रमहयादिन्द्रियाणां पात्रत्वम् ॥ १४ [illegible]

सोमममृतं [illegible] इन्द्रियशक्तिं वलं शरीरं शक्तिं तदेव पयः [illegible]

सुरैव आसवोमाद[illegible] ॥

मधु माधुर्यं गान्धर्व[illegible] १७ ॥

कव्यं पितृणामन्नम् आम[illegible] १८ ॥

संकल्पनामयीमणिमादिसि[illegible]विद्याञ्च खेचरत्वादिरूपाम् ॥ १९ ॥

अन्येच किम्पुरुषादयः । अन्तर्धाने[illegible]मायावानां सम्बन्धिनीं मायां धारणामयीं स[illegible] २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हेराजन्! अपर्त्तौ अपगतेऽपि प्रावृषि यथा पयो मे मयि उपावर्तेत तथा मां कुरु ततस्ते मद्भुमसमीश्वसिद्धिर्भविष्यतीति शेषः ॥११-१२॥

यथा क्षौद्रं विहाय सारं गृहीतवान् तथा सर्वत्र लोके बुधाः सारमाददते अतो विपश्चिता सारग्राहिणा भवितव्यमिति भावः प्रासङ्गिकमुक्त्वा प्रस्तुतमाह । ततः पृथोरन्ये च ऋष्यादयः पृथुना भावितां यथाकामं यथेष्टं दुदुहुः स्वस्वावसरे दैत्यादीनां तदानीमनुत्पन्नत्वात् ॥ १३ ॥

इन्द्रियेषु वेदस्योच्चारणधारणाकरणेषु वाङ्मनःश्रोत्रेषु छन्दोमयं वेदात्मकम् ॥ १४ ॥

सुरगणा आदित्यादयः सोमं पीयूषं वीर्यौजोबलानि मन इन्द्रियदेहशक्तयः तद्रूपं पयोऽदूदुहन् ॥ १५ ॥

सुरां गौडीमाध्वीं त्रिविधां मदिरामासवं तालादिभवं तयोः समाहारद्वन्द्वैक्यम् अयःपात्रे लोहपात्रे प्रह्लादं वत्सं विधाय दैतेया दानवाः अदूदुहन् ॥ १६ ॥

गन्धर्वा वाद्यं गानं नृत्यं च मधु वाद्यादनुरूपं मधुसौभगम् एतद्रूपं पयः अधुक्षत् दुदुहु ॥ १७ ॥

यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः।
भूतेशवत्सा दुदुहुः कपाले क्षतजासवम् ॥ २१ ॥
तथाऽहयो दन्दशूकाः सर्पा नागाश्च तक्षकम्।
विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः ॥ २२ ॥
पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम्।
अरण्यपात्रे चाधुक्षन्मृगेन्द्रेण च दंष्ट्रिणः ॥ २३ ॥
क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे।
सुपर्णवत्सा विहगाश्चरं चाचरमेव च ॥ २४ ॥
वटवत्सा वनस्पतयः पृथग्रसमयं पयः।
गिरयो हिमवद्वत्सा नानाधातून् स्वसानुषु ॥ २५ ॥
सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक् पयः।
सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम् ॥ २६ ॥
एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः।
दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ! ॥ २७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हे महाभाग ! आमपात्रे अपक्वे मृण्मये कव्यं पितृणामन्नम् अधुक्षत दुदुहुः ॥ १८ ॥

सिद्धाः सङ्कल्पनामयीमणिमादिकां सिद्धिं ये विद्याधरा-दयस्ते च खेचरत्वादिविद्यां कपिलं वत्सं प्रकल्प्य नभसि पात्रे दुदुहुरित्यन्वयः ॥ १९ ॥

[illegible] मायिनः अद्भुतविद्योपजीविनस्ते अन्तर्धानेनाद्भुता-त्मानं [illegible]मीम धारणामयीं सङ्कल्पमात्रप्रभवाम् मायां आश्चर्यप्रकाशिकां विद्यां नभस्येव दुदुहुः ॥ २० ॥

भाषाटीका।

हे राजन् मेरे को बरोबर करो जिससे देवतों का वर्षाया जल बिना वर्षा ऋतुके सर्वत्र रहजाय इसमें आप का जय होवे गा ॥ ११ ॥

इस प्रकार से पृथिवी का हित प्रिय वचन को ग्रहण करके पृथुमहा राजने मनुमहाराज को बछरा बनाकर हस्त को पात्र कल्पना कर सब ओषधियों को दुहा ॥ १२ ॥

तिसी प्रकार और भी जो ज्ञानी हैं वे सार को ग्रहण सर्वत्र करते हैं तदनन्तर और सब भी यथारुचि पृथु की वशकरी हुई पृथिवी को दुहते भये ॥ १३ ॥

हे [illegible] विदुरजी इस के अनन्तर ऋषिलोगों ने इंद्रियों को पात्र बनाकर बृहस्पति को बछरा बनाकर वेदरूपी पवित्र दुग्ध को दुहा ॥ १४ ॥

देवता लोगों ने इन्द्र को बछरा बनाकर सुवर्ण पात्र में अमृत मनःशक्ति इन्द्रिय शक्ति देहशक्ति रूप दुग्ध को दुहा ॥ १५ ॥

दैत्यदानव लोगोंने असुरों मेश्रेष्ठ प्रह्लादजीको बछरा बनाकर लोहे के पात्र में मदिरा रूप दूधको दुहा ॥ १६ ॥

गन्धर्व अप्सरा लोगों ने पद्म के पात्र में विश्वावसु को बछरा बनाकर सुन्दर गन्धर्व गान को दुहा ॥ १७ ॥

श्राद्ध के देवता पितर लोगों ने अर्यमा को वत्सबना कर कच्चे मट्टि के पात्र में कव्यनाम अन्न को दुहा ॥ १८ ॥

सिद्ध लोगोंने कपिल भगवानको वत्सबनाकर आकाशमें सङ्कल्प मयी सिद्धि को दुहा ऐसे विद्या धरादिकों ने भी श्रीकपिलजी को बछरा बनाकर आकाश को पात्र बनाकर खेचर साधन विद्या को दुहा ॥ १९ ॥

और भी जो कि पुरुषादिक हैं मायावाले तिनने मयदानव को बछरा बनाकर यथा रुचि पात्र में अन्तर्धान रूपी अद्भुत धारणा मयी माया को दुहा ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

भूतेशो रुद्रः स एव वत्सो येषाम् क्षतजं रुधिरं तदेवा-सवम् ॥ २१ ॥

अहयो निष्फणाः दन्दशूका वृश्चिकादयः सर्पाः सफणास्त एव कद्रूसन्ततिजा नागाः बिलपात्रे मुखे ॥ २२ ॥

यवसं तृणम्। गोवृषं रुद्रवाहं वृषभम् मृगेन्द्रेणोत्युत्तरेणा-न्वयः ॥ २३ ॥

क्रव्यं मांसम्। चरं कीटादि अचरं फलादि ॥ २४ ॥ २५ ॥

अनुक्तसर्वसंग्रहार्थमाह। सर्वे इति। सर्वे स्वजातौ यो मुख्य-स्तेन वत्सेन ॥ २६ ॥

उपसंहरति। एवमिति। स्वमन्नमभीष्टमन्नम् तमेव। क्षीरभेदं दुदुहुः दोहः पात्रम् ॥ २७ ॥

ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः ।
दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः ॥ २८ ॥
चूर्णयन् स्वधनुष्कोट्या गिरिकूटानि राजराट् ।
भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः ॥ २९ ॥
अथास्मिन् भगवान् वैन्यः प्रजानां वृत्तिदः पिता ।
निवासान् कल्पयांचक्रे तत्र तत्र यथार्हतः ॥ ३० ॥
ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च ।
घोषान् व्रजान् सशिबिरानाकरान् खेटखर्वटान् ॥ ३१ ॥
प्राक् पृथोरिह नैवैषा पुरग्रामादिकल्पना ।
यथा सुखं वसन्तिस्म तत्र तत्राकुतोऽभयाः ॥ ३२ ॥

इति श्रीभागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां पृथुविजयोनाम
अष्टादशोऽध्यायः ॥ १८ ॥

———○*○———

श्रीधरस्वामिकृतभावार्थदीपिका ।

इमां पृथ्वीम् ॥ २८ ॥

धनुषोऽग्रेण गिरिशृङ्गाणि चूर्णयन् राजराट् राज्ञां राजा सर्वेषामाजीविकाबाभात् ॥ २९ ॥ ३० ॥

ग्रामा हट्टादिशून्याः पुरो हट्टादिमत्यः ता एव महत्यः पत्तनानि दुर्गाणि विविधानि । यथाह बृहस्पतिः । "औदकं पार्वतं वार्क्षं ऐरिणं धान्वनं तथा„ इति घोषान् आभीराणां निवासान् व्रजान् गवां निवासान् शिबिरं सेनानिवासस्थानं तत्सहितानाकरान् स्वर्णादिस्थानानि खेटाः कर्षकग्रामाः खर्वटाः पर्वतप्रान्तग्रामास्तांश्च ॥ ३१ ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टादशोऽध्यायः ॥१८॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पिशिताशना मांसभक्षा यक्षादयो दोग्धारः भूतेशो रुद्रो वत्सो येषां भूतेशं वत्सं विधायेत्यर्थः कपाले पात्रे क्षतजं रुधिरं तदेवासवमासवत्मादकत्वादासवमित्युक्तम् दुदुहुः ॥ २१ ॥

अहयो निष्फणा दन्दशूकाः दंशनस्वभावाः सर्पाः सफणाः त एव कद्रूसन्ततिजाता नागा दोग्धारः तक्षकं वत्सं विधाय बिलान्येव पात्राणि तेषु विषं पयः दुदुहुः ॥ २२ ॥

तदा पशवो दोग्धारः गोवृषं गोषु वृषं श्रेष्ठं रुद्रवाहनं वृषभं वत्सं कृत्वा अरण्यमेव पात्रं तस्मिन् यवसं तृणं क्षीरम् अधुक्षन् मृगेन्द्रेणेत्युत्तरेणान्वयः ॥ २३ ॥

क्रव्यादा मांसाशिनः दंष्ट्रिणो व्याघ्रादयः प्राणिनः दोग्धारः मृगेन्द्रेण सिंहेन वत्सेन कलेवरं पात्रे क्रव्यं मांसं दुदुहुः विहगाः पक्षिणः सुपर्णो गरुडः वत्सो येषां ते चरं कीटादिकम्, अचरं फलादिकं च दुदुहुः ॥ २४ ॥

वनस्पतयः वृक्षाः वटो वत्सो येषां तथाभूताः सन्तः पृथक् कटुम्लमधुरादिभिन्नं रसमयं पयः दुदुहुः गिरयः पर्वता दोग्धारः हिमवान् वत्सो येषां तथाभूताः सन्तः स्वसानुषु पात्रभूतेषु नानाधातून् गैरिकादीन् दुदुहुः ॥ २५ ॥

अनुक्तसंग्रहार्थमाह । सर्वे स्वजातौ यो मुख्यस्तेन वत्सेन स्वे स्वे पात्रे सर्वान् स्वापेक्षितान् कामान् दोग्धीति तं सर्वकामदुघां पृथ्वीं पृथक् पृथक् पयः दुदुहुः ॥ २६ ॥

उपसंहरति । एवमिति । एवमन्नादाः अन्नकाङ्क्षिणः पृथ्वादयः आत्मनः स्वस्य स्वकं समीचीनमन्नं स्वाभीष्टमन्नमित्यर्थः तदेव क्षीरभेदं दोहपात्रं दोहादिभेदेन दुदुहुः हे कुरूद्वह ! ॥ २७ ॥

ततो महीपतिः पृथुः प्रीतः सन् सर्वकामदुघामिमां पृथ्वीं प्रेम्णा दुहितृत्वे चकार दुहितरममन्यतेत्यर्थः यतोऽयं दुहितृवत्सलः ॥२८॥

ततो राजराट् राज्ञां राजो विभुः समर्थः वैन्यः पृथुः स्वधनुष्कोट्या स्वधनुषोऽग्रेण गिरिकूटानि गिरिशृङ्गाणि चूर्णयन् भूमण्डलं प्रायशः समं चक्रे प्रायोग्रहणात्केनासमीकृतमपि क्वचित् क्वचित् दृश्यत इत्यभिप्रेतम् ॥ २९ ॥

अथ दोहनसमीकरणानन्तरं प्रजानां वृत्तिदः जीविकाप्रदः पिता पितृवद्रक्षकश्च भगवान् वैन्यः पृथुः यथार्हतः यथायोग्यं तत्र तस्मिन् भूमण्डले प्रजानिवासान् कल्पयाञ्चक्रे ॥ ३० ॥

के ते निवासास्तत्कल्पिता इत्यत्राह । ग्रामानिति । ग्रामान् हट्टादिशून्याः पुरः हट्टादिमत्यः तएवमहत्यः पत्तनानि दुर्गाणि विविधानि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

घोषकपार्वतवार्ष्णेन्द्रिभेदभिन्नानि घोषान् आभीराणां निवासान् व्रजाः गवां निवासस्थानानि शिविरान् सेनानिवासस्थानानि तत्सहितानाकरान् स्वर्णोत्पत्तिस्थानानि खेटान् कृषीवलग्रामान् खर्वटान् पर्वतप्रान्तग्रामान् कल्पयामासेत्यन्वयः ॥ ३१ ॥

किं पृथोः प्राक् ग्रामादयो नाभूवन्नेत्याह । इह भूमण्डले पृथोः प्राक् पूर्वमेषा पुरग्रामादिकल्पना नैव नास्त्येवेत्यर्थः तत्र पृथुकल्पितग्रामादिषु नास्ति कुतोऽपि भयं यासां ताः प्रजाः यथासुखं स्वस्वसुखानुसारेण वसन्तिस्म अवसन्नित्यर्थः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

पिशिताशना मांसभक्षाः भूतेशो भैरवाख्यो रुद्रो वत्सो येषां ते तथोक्ताः क्षतजासवं रुधिराख्यं मद्यम् ॥ २१ ॥

अह्यादीनां विषधरत्वसाम्येऽप्यवान्तरविशेषत्वात्पृथगुक्तिः ।२२।

गोवृषं नन्दिकेश्वरं मृगेन्द्रेण सिंहेन दंष्ट्रिणः ॥ २३ ॥

क्रव्यादाः प्राणिनो हिंस्राः क्रव्यमपक्वमांसं स्वकलेवरे पात्रे दुदुहुरित्यन्वयः चरं जङ्गममचरं तरुफलम् ॥ २४ ॥

वनस्पतयः तिक्तादिभेदेन बहुत्वाद्रसस्य पृथगित्युक्तं नानाधातून् सुवर्णादीन् ॥ २५ ॥

उपसंहरति।सर्वं इति। स्वजातिषु मुख्यःस्वमुख्यःसएववत्सस्तेन सर्वान् कामान् दोग्धीति सर्वकामदुघा ताम् ॥ २६ ॥

एकस्याः पृथ्व्याः क्षीरभेदः कथमभूदत्राह । एवमिति । दोहभेदेन वत्सभेदेनाविशब्दाद्दोग्धृभेदेन च ॥ २७ ॥

राज्ञा किं प्रीतं कुपितमुत तूष्णींभूतमिति संशयावसरो नास्तीत्याह।तत इति। लोकगो[illegible]क्षीरभेददातृत्वादत्र प्रीतेरेव सम्भावितत्वात् ॥ [illegible]

इदानीं भूमेःसमीकरणप्रकारं वक्ति। चूर्णयन्निति।गिरिकूटानि गिरिशृङ्गाणि "कूटोऽस्त्री शृङ्गमायाद्यद्रिकुञ्जेषुभेदयोः,, इति यादवः कचित्कचिद्गिरिकूटादीनां सत्त्वात्प्राय इत्युक्तम् ॥ २९ ॥

भूमेः समीकरणेन सुखपर्यटनात्परं प्रजानां प्रयोजनं किमकारि राज्ञेति । तत्राहाथेति ॥३०॥

उक्तं विशिनष्टि। ग्रामानिति। ग्रामोबहुजनाकीर्णो राजराजाश्रयं पुरम् समुद्रसङ्गतनद्युपकण्ठे यवनजनाश्रयःपत्तनम् जलपर्वतादिना गन्तुमशक्यं स्थानं दुर्गं गवां स्थानं घोषः गोपालानां स्थानं व्रजः "गोष्ठंघोषइति प्रोक्तोव्रजस्तत्पालसंस्थिति,,इत्यभिधानाद्गोप्राध्वनिबहाव्रजा इति सामान्यवचनमिति ज्ञातव्यं सेनानिवेशस्थानं शिबिरं वैश्यानामाश्रयो नगरं मृगयोपजीवनं खेटं । आदित्यादित्रागम्,ईदृश्ययत्र वणिजांयोगास्तत् खर्वटाख्यं स्थानं वस्त्रभाण्डविक्रयस्थानं वा । पाखण्डिनां निवासस्थानं वा ॥ ३१ ॥

इदं पुरादिनिर्माणं पृथोर्माहात्म्याविनाभूतमित्याह । प्राक्पृथोरिति । किमत इति तत्राह। यथेति। अनेनेतः पूर्वं राज्ञां सत्त्वेऽपि सम्बाधया प्रजानां निवाससुखं नास्तीति सूचितम् ॥ ३२ ॥

इति श्रीभागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टादशोऽध्यायः ॥ १८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पश्चादयस्तत्तद्वत्साः ॥ २३ ॥

स्वकलेवरे स्व स्व भक्ष्यकलेवरे इत्यर्थः । सुपर्णोऽयं न वैनतेयः किन्तु श्रीप्रह्लादवद्भावनामयः ॥ २४ ॥ २५ ॥

पृथ्वी मन्वाद्या इति कचित् ॥ २६—३२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
अष्टादशोऽध्यायः ॥ १८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भूतेशो रुद्रः क्षतजं रुधिरं तदेवासवम् ॥ २१ ॥

अहयो निष्फणाः दन्दशूका वृश्चिकादयः । सर्पाः सफणाः तएव कद्रुसन्ततिजा नागा बिलपात्रे मुखे ॥ २२ ॥

यवसं तृणं गोवृषं रुद्रवाहं वृषभं । मृगेन्द्रेण सिंहेन वत्सीकृतेनेत्युत्तरेणान्वयः ॥ २३ ॥

क्रव्यं मांसं सुपर्णो गरुड । चरं कीटादि अचरं फलादि २४-२५ ॥

अनुक्तसर्वसंग्रहार्थमाह । स्वजातौ यो मुख्यस्तेन वत्सेन॥२६॥

उपसंहरति । एवमिति । स्वस्वमभीष्टमन्नं तमेव क्षीरभेदं दुदुहुः दोहः पात्रम् ॥ २७ ॥

इमां पृथ्वीं दुहितृत्वे इति स्वहस्तेनैवास्यामन्नदुग्धादानात् स्वीमात्रस्यानौचित्यं शरहस्तेन स्वेन दण्डकरणान्मातृमात्रस्याप्यनौचित्यमालक्ष्य पारिशेष्यादस्यां वात्सल्योदयाच्च दुहितृत्वमेव रक्षावहमिति ज्ञेयम् ॥ २८—२९—३० ॥

ग्रामा हट्टादिशून्याः पुरो हट्टादिमत्यः । ताश्च महत्यः पत्तनानि दुर्गाणि विविधानि । यथाह बृहस्पतिः "घोषकं पार्वतं वार्क्षमैरिणं धान्वनं तथा,,इति घोषान् आभीराणां स्थानानि व्रजान् गवां शिबिराणि सेनायाः आकराः सुवर्णरूप्याद्युद्भवस्य खेटाः कर्षकाणां खर्वटाः पर्वतप्रान्तवर्तिनाम् ॥ ३१——३२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
चतुर्थेऽष्टादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पिशिताशनाः मांसभोजनाः क्षतजं रुधिरमेवासवं दुदुहुः ॥ २१ ॥

अहिप्रमुखाः भुजङ्गावान्तरभेदाः दन्दशूका इति पदं विषवतां सर्वेषामुपलक्षकम् बिलपात्रे मुखाविच्छिन्नरूपे पात्रे ॥ २२ ॥

यवसं तृणम् गोवृषं नन्दिकेश्वरम् ये दंष्ट्रिणः क्रव्यादास्ते मृगेन्द्रेण वत्सेनेत्युत्तरेणान्वयः ॥ २३ ॥

क्रव्यादा मांसभोजिनः चरं कीटादि अचरं फलादि स्वकलेवरे इत्यत्रापि योज्यम् ॥ २४ ॥

वनस्पतयोऽपि स्वकलेवरे पृथक् रसमयं पयो दुदुहुः । धातूनिति । रत्नादीनामुपलक्षणम् ॥ २५ ॥

सर्वे अन्ये इहानुक्ता अपीत्यर्थः ॥ २६ ॥

एकस्यां क्षीरभेदे हेतुं दर्शयन्नुपसंहरति । दोहवत्सादिभेदेन पात्रवत्सदोग्धृभेदेन क्षीरभेदम् आत्मनः स्वस्य स्वस्य शोभनमन्नं ते इत्यन्नमदनीयमेवमुक्तप्रकारेण दुदुहुरिति शेषः ॥ २७ ॥

दुहितृत्वे चकार एकपत्नीव्रतधरत्वे च भूपतिरिति संज्ञामपि न स्वीकृतवानिति भावः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

धनुष्कोट्या धनुषोऽग्रेण राजराट् राजराजः प्रायः शब्देन नदीनां गमनार्थं कचित् कचित् भूम्यां वैषम्यं कचित् कचित् पाषाणकाष्ठादिसिद्ध्यर्थं गिरीन् अशेषयदिति योज्यते ॥ २९ ॥

उक्तप्रकारेण वृत्तिदो जीविकाप्रदः निवासानपि कल्पयांचक्रे ॥ ३० ॥

निवासानेवाह । ग्रामानिति । ग्रामाः हट्टादिरहिताः पुरो हट्टादिमत्यः ता एव महत्यः पत्तनानि दुर्गाणि शत्रुभिरगम्यानि विविधानि तद्वैविध्यं राजनीतिग्रन्थे दर्शितम् । "जलदुर्गं गिरिदुर्गं वनदुर्गं तथैव च । दुर्गाण्येतान्यदुर्गाणि नरदुर्गं दुर्गमेव हि,, इति । बृहस्पतिरप्याह । औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथेति घोषान् आभीरनिवासान् व्रजान् गोनिवासान् शिबिराणि सेनानिवासस्थानानि तत्सहितान् आकरान् स्वर्णाद्युत्पत्तिस्थानानि खेटान् कर्षकग्रामान् खर्वटान् गिरिग्रामान् ॥३१-३२॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टादशाध्यायार्थप्रकाशः ॥ १८ ॥

भाषाटीका।

यक्ष राक्षस भूत पिशाच मांस खाने वाले इन्होंने महादेवजी को बछरा बनाकर कपाल पात्र में रक्त मद्यको दुहा ॥ २१ ॥

नैसेही सर्प बीछू बिनाफणवाले सांप कद्रु के सन्तान नाग इन्होंने तक्षक को बछरावनाकर बिलको पात्रकर विषरूप दूधको दुहा ॥ २२ ॥

पशुओं ने महादेवजी के वृषभ को बछरावनाकर जंगल पात्र में घास रूप दूध को दुहा ॥ २३ ॥

क्रूरदांतों वाले जंतु मांसखाने वाले प्राणियोंने अपने शरीर को पात्रबनाकर मांसको दुहा पक्षियोंने गरुड को बछराबनाकर कीडाफल आदि दुहे ॥ २४ ॥

वृक्षों ने बट को बछराबना कर अलग अलग रस रूप दूधको दुहा पर्वतोंने हिमवान् को बछराबना कर अपने शिखर रूपी पात्र मे नाना प्रकार के धातु रूप दुग्ध को दुहा ॥ २५ ॥

सबोंने अपने श्रेष्ठ को बछरा बनाकर अपने अनुकूल पात्र में अलग२ दूध सब काम देनेवाली पृथुमहाराज की वश करी हुई पृथिवी से दुहा ॥ २६ ॥

इस प्रकार से पृथुआदिक अपने २ अन्न को क्षीर समुझ वत्स पात्रों के भेद से दुहते भये ॥ २७ ॥

तिस के अनन्तर सब काम देनेवाली पृथिवी के ऊपर पृथुमहाराज प्रसन्न होकर पृथिवी को पुत्री मानकर उसपर बडे दयालु भये ॥ २८ ॥

वैन्यमहाराजने अपने धनुष के अग्रभाग से पर्वतों के शिखरों को चूर्ण करके इस भूमण्डल को प्रायः बरोबर करदिया ॥ २९ ॥

तदनन्तर प्रजों के जीविका देनेवाले भगवान् वैन्यने तहां तहां यथा योग सबके निवास स्थान बनाये ॥ ३० ॥

सहर ग्राम खेड़ा नाना तरह के किला अहीरों के ग्राम गऊ के गोष्ठ सेनाके स्थान खदान खेतीवालों के ग्राम पर्वतों के पास के गाम सब बनाये ॥ ३१ ॥

पृथुमहाराज से पहिले सहर गाम नहीं बनेथे जहां इच्छा तहां प्रजा लोग निर्भय होकर सुखपूर्वक निवास करतेथे ॥ ३२ ॥

इति श्रीभागवत चतुर्थस्कन्ध अठारहवां अध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे अष्टादशोऽध्यायः समाप्तः ॥ १८ ॥

ऊनविंशोऽध्यायः ।

—○:*:○—

मैत्रेय उवाच

अथादीक्षत राजा तु हयमेधशतेन सः ।
ब्रह्मावर्त्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥ १ ॥
तदभिप्रेत्य भगवान् कर्मातिशयमात्मनः ।
शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम् ॥ २ ॥
यत्र यज्ञपतिः साक्षाद्भगवान् हरिरीश्वरः ।
अन्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः ॥ ३ ॥
अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः ।
उपगीयमानो गन्धर्वैर्मुनिभिश्चाप्सरोगणैः ॥ ४ ॥
सिद्धविद्याधरा दैत्या दानवा गुह्यकादयः ।
सुनन्दनन्दप्रमुखाः पार्षदप्रवरा हरेः ॥ ५ ॥
कपिलो नारदो दत्तो योगेशाः सनकादयः ।
तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ॥ ६ ॥
यत्र धर्मदुघा भूमिः सर्वकामदुघा सती ।
दोग्धि स्माभीप्सितानर्थान् यजमानस्य भारत! ॥ ७ ॥
ऊहुः सर्वरसान् नद्यः क्षीरदध्यन्नगोरसान् ।
तरवो भूरिवर्ष्माणः प्रासूयन्त मधुच्युतः ॥ ८ ॥
सिन्धवो रत्ननिकरान् गिरयोऽन्नं चतुर्विधम् ।
उपायनमुपाजह्रुः सर्वे लोकाः सपालकाः ॥ ९ ॥
इति चाधोक्षजेशस्य पृथोस्तु परमोदयम् ।
असूयन् भगवानिन्द्रः प्रतिघातमचीकरत् ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऊनविंशेऽश्वमेधाद्धयापहरणात्पृथोः ।
इन्द्रं हन्तुं प्रवृत्तस्य धात्रा वारणमुच्यते ॥ १ ॥

हयमेधशतेन निमित्तेनादीक्षत दीक्षितोऽभूत् शताश्वमेधसङ्कल्पमकरोदित्यर्थः ब्रह्मावर्त्ते

सरस्वती दृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तन्देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ १ ॥

आत्मनः स्वस्य कर्मातिशेत इत्यतिशयमभिप्रेत्य ज्ञात्वा तदिति तं पृथोर्यज्ञमहोत्सवं न ममृषे न सेहे ॥ २ ॥

अतिशयमेव दर्शयति । यत्रेति सप्तभिः । साक्षादन्वभूयत प्रत्यक्षेणादृश्यत ॥ ३ ॥ ४ ॥

सिद्धादयश्च तं हरिमन्वीयुरित्युत्तरेणान्वयः ॥ ५ ॥ ६ ॥

धर्मदुघा हविर्दोग्ध्री धेनुः सती ॥ ७ ॥

ऊहुर्वहन्तिस्म सर्वरसानिक्षुद्राक्षादिरसान् क्षीरं च दधि च अन्नं च पानकादिगोरसो घृतं तक्रं च तांश्च भूरीणि विस्तृतानि वर्ष्माणि शरीराणि येषां ते फलादि प्रासूयन्त मधुच्युतो मधुस्राविणः सन्तः ॥ ८ ॥

चतुर्विधं भक्ष्यं भोज्यं चोष्यं लेह्यं च ॥ ९ ॥

अधोक्षज ईशो नाथो यस्य परम उदयोऽभिवृद्धिर्यस्मिंस्तत्कर्मासूयन्नसहमानः प्रतिघातं विघ्नं चकारेत्यर्थः ॥ १० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पृथुर्धरित्र्या गोरूपधरायास्तत्संदर्शितोपायदुग्धोषधिबीजः* समीकृतभूमिः कल्पितप्रजानिवासोऽभूदित्युक्तम् अथ सङ्कल्पितशताश्वमेधः स्वनुष्ठितैकोनशताश्वमेधपर्ज्जिघांसितशतक्रतुश्चतुराननिदेशानिवृत्तेन्द्रवधो विरमितचरमक्रतुः कृतशक्रतुसख्यः कृतावभृथस्नानः प्राप्तदेवधरो विप्रगणाशासितोदर्कविग्रहच्छिन्नः पूजितदेवर्षिगणो बभूवेत्याह मुनिरष्टादशेन । अथेति । अथ दोहनसमीकरणप्रजानिवासकरणानन्तरं स राजर्षिः पृथुः हयमेधशतेन निमित्तेनादीक्षत दीक्षितोऽभूत् शताश्वमेधसङ्कल्पमकरोदित्यर्थः कुत्रेत्यत्राह । मनोः स्वायंभुवस्य क्षेत्रे नयुषितक्षेत्रे "सरस्वती दृषद्वत्योर्देवनद्योर्यदन्तरम् । तंदेव निर्मितं देशं ब्रह्मावर्तं प्रचक्षत,, इति प्रसिद्धे ब्रह्मावर्ताख्ये यत्र क्षेत्रे प्राची सरस्वती नदी प्रवहति इति शेषः ॥ १ ॥

भगवान् शतक्रतुरिन्द्रः तदात्मनः स्वस्य कर्मातिशेत इत्यतिशयमभिप्रेत्य ज्ञात्वा आत्मन इति पञ्चमी वा पृथोर्यज्ञमहोत्सवं न ममृषे न सेहे ॥ २ ॥

कर्मातिशयं प्रपञ्चयन् ब्रह्मावर्ते प्रस्तौति । यत्रेति सूक्तामिः । यत्र महोत्सवदेशे ईश्वरः सर्वान्तरात्मा षाड्गुण्यपूर्णः सर्वलोकहितोपदेष्टा प्रभुर्यज्ञाराध्यः तत्फलप्रदश्च हरिः साक्षादपश्यभूयत प्रत्यक्षोऽभूत्तत्राविर्बभूवेति यावत् ॥ ३ ॥

कथम्भूतोऽन्वभूयत तत्राह । ब्रह्मरुद्राभ्यां तथा सङ्कल्पैर्लोकपालैश्च अन्वितो युक्तः गन्धर्वादिभिरुपगीयमानः अन्वभूयत ॥ ४ ॥

सिद्धादयः सुनन्दनन्दौ प्रमुखौ मुख्यौ येषां ते हरेर्भगवतः पार्षदप्रवराश्च ॥ ५ ॥

तथा कपिलादयः ये चान्ये भगवतो भक्तास्तेऽपि तत्सेवने भगवत्सेवने उत्सुकाः आसक्ताः सन्तः तं भगवन्तमन्वीयुः मनुसृत्य गतवन्तः ॥ ६ ॥

हे भारत ! यत्र ब्रह्मावर्ते धर्मदुघा घृतादिहविर्दोग्ध्री भूमिः सर्वकामदुघा तत्तदीप्सितानभीप्सितांश्च कामान् दुहन्ती यजमानस्य पृथोरभीप्सितानर्थान् दोग्धि दुदुहे ॥ ७ ॥

नद्यः सर्वरसान् इक्षुद्राक्षादिरसान् क्षीरं दधि चान्नं पानकादिगोरसं घृतं तक्रं च ऊहुः वहन्तिस्म तरवः भूरीणि विस्तृतानि वर्ष्माणि शरीराणि येषां तथाभूता मधुश्च्युतः मधुस्राविणः सन्तः प्रासुवन्त पुष्पफलादिकामिति शेषः ॥ ८ ॥

सिन्धवः समुद्राः रत्नानां निकरान् समूहान् प्रसवन्त इति योग्यक्रियाध्याहारः यद्वापुष्पकस्य प्रासुवन्त इत्यस्य प्रकृतोपयुक्तार्थपरत्वं गिरयः चतुर्विधं भक्ष्यभोज्यचोष्यलेह्यभेदेन चतुर्विधमन्नं प्रददुः सपालकाः सर्वे जना उपायनं सांमानिकमुपाजन्हुः समर्पितवन्तः ॥ ६ ॥

अधोक्षजो भगवान् ईशो नाथो यस्य तस्य पृथोर्भगवदवतारभूतस्याप्यावेशावतारत्वाज्जीवाभिप्रायेणाधोक्षजेशस्येत्युक्तम् इत्युक्तविधः परमः उदयो वृद्धिर्यस्मिन् तत्कर्म असूयन् असहमानः प्रतिघातं विघ्नमचीकरत् अकरोत् मिथुसम्प्रेषणात्क्रमोणैव ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मार्पितकर्मणा शुद्धान्तःकरणस्य पुंसो हरेरापरोक्ष्यं स्यादिति वेदयितुं पृथोर्यज्ञकरणव्याजेन हरेर्माहात्म्यं निरूप्यतेऽस्मिन्नध्याये "कर्मणा ज्ञानमाप्नोति,, इति श्रुतेः तत्र प्रथमतः पृथोर्यज्ञदीक्षाप्रकारमाह। अथेति। "घोटकेवीथितुरगतुरङ्गाश्वतुरङ्गमाः। वाजिवाहार्वगन्धर्वहयसैन्धवसप्तय,, इत्यमरः नाम्ना ब्रह्मावर्तं "सरस्वतीदृषद्वत्योरन्तरन्देवनिर्मितम । ब्रह्मावर्तं मानवन्तं विदुर्देशं विचक्षणा,, इत्यभिधानं प्राचीमैन्द्रींदिशमुद्दिश्य स्यन्दमाना ॥ १ ॥

अनेन्द्रेण स्वनामाभिभूष्णोर्यज्ञे क्रियमाणे कथं क्षान्तमत्राह तदभिप्रेत्येति ॥ २ ॥

शतक्रतोः कर्मणोऽतिशयमाह। यत्रेति। सर्वात्मा सर्वव्यापी॥३॥

निघण्टुवत् ब्रह्मपतिरित्यादिनाम्नां बहुत्वकथनेन किमेकेनागतेनेत्यतउक्तमन्वितइति । अनेनापि राजैश्वर्यं न द्योतितमित्यतउक्तमुपगीयमान इति ॥ ४ ॥

गायकानां किञ्चिदनुगम्य स्वाभिप्रेतमुपेत्य पश्चादन्यतो गमनसम्भवादित्यतो यावद्गम्यमनुगन्तृनाह । सिद्धेति ॥ ५ ॥

तत्त्वविदामनुगमनमेव तन्माहात्म्यद्योतकमित्यतउक्तं कपिलः नारदादिना नित्यविरोधिनां दैत्यादीनामनुगमनं कथं संगच्छत इत्यत उक्तं भागवताइति । अनेन दैत्यादयो द्विधाः सन्तीति ध्वनितं ये च तस्य सेवनोत्सुकास्तेषामन्वीयुरिति ॥ ६ ॥

धर्मदुघा यज्ञयोग्यपयोदोग्ध्रीति । न केवलमेतावदेव किन्तु सर्वकामदुघा नैतत्स्तुतिमात्रमनुभवसिद्धमित्याह। महीति ।महित्वान्महनीयत्वाच्च मही ॥ ७ ॥

गोपा*कानां रसानां चतुर्विधान्नजनित्वं कथं तत्संभव इत्यत्राह । ऊहुरिति । अनेन नदीनां मूर्तिमत्त्वं लक्षयति जडानां मूर्तिमधार्यमाणानां वोढुमसम्भवात् वर्ष्मदेहप्रमाणयोरित्यभिधानात् स्थूलप्रमाणाः ॥ ८ ॥

भक्ष्यं भोज्यं लेह्यं पेयमिति चतुर्विधं व्ययार्थं न कोशावृद्ध्यर्थं किन्तु सर्वेरामीतमेवान्नं प्रीत्यापि तस्यापि शुद्धत्वादिति भावेनाह । उपायनानीति ॥ ६ ॥

भूमण्डले कोऽप्यजातशत्रुर्नास्ति यतः श्रीनारायणैकदेवस्य पृथोरपि यज्ञविघ्नं शक्रोऽकरोदित्याह । इतीति । इतिशब्दः प्रकारवचनः उक्तप्रकारयज्ञे महोदयं असूयन्नसहमानः स्वार्थे वा यत् प्रत्ययः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पृथोस्तद्दूयज्ञमहोत्सवरूपं कर्म स्वात्मनोऽतिक्रामकं ज्ञात्वा अत्र टीकायां कर्मातिशयमिति समस्ते पदे वक्तव्ये अतिशयमात्रं यदुक्तं तत्रेदं विग्रहवाक्यं किन्त्वर्थदर्शनमात्रं यथा कर्म पर्यन्तं पृथग्योजितमतिशयमिति च पृथगेव निरुक्तम् । कर्मणोऽतिशयमिति तु स्वयसूह्यम् ॥ १ ॥ २ ॥

यत्रेति युग्मकम् ॥ ३—६ ॥

यत्र धर्मेति । धर्मं घृतक्षीरादीति कर्म ॥ ७—८ ॥

टीकायां भक्ष्यं चर्व्यं भोज्यं चर्व्यादिकं विनाऽप्यवहारार्थम् ॥ ६—१३ ॥

---

* गोपाद्यकानामपरसानामिति समस्तं पदम् ॥

चरमेणाश्वमेधेन यजमाने यजुष्पतिम् ।
वैन्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः ॥ ११ ॥
तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा ।
आमुक्तमिव पाखण्डं योऽधर्मे धर्मविभ्रमः ॥ १२ ॥
अत्रिणा चोदितो हन्तुं पृथुपुत्रो महारथः ।
अन्वधावत सङ्क्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ऊनविंशेऽश्वमेधस्य हयहारिहरेर्मुहुः ।
पाखण्डसृष्टिर्त्रेऽत्रिणाभिस्तद्ध्वं को न्यवारयत् ॥ ० ॥

सरस्वती दृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते । तत्र हयमेधशतेन निमित्तेन ॥ १ ॥

आत्मनः सकाशात् ॥ २ ॥

कर्म्मातिशयमेव दर्शयति । यत्रेति सप्तभिः ॥ ३—७ ॥

भूरिवर्ष्माणः बहुप्रमाणाः फलादिकं प्रासूयन्त मधूनां च्युत् क्षरणं येषु ते "वर्ष्म देहप्रमाणयोः,, इत्यमरः ॥ ८-९ ॥

पृथोस्त्विति पृथोस्तदिति पाठद्वयम् ॥ १० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ऊनविंशे पृथुयज्ञमहोत्सवं वर्णयति । अथेति । हयमेधशतेन निमित्तेन अदीक्षत दीक्षितोऽभूत् ॥ १ ॥

शतक्रतुरिन्द्रः आत्मनः अस्मात् पृथोः अतिशयं कर्म अभिप्रेत्य तस्य पृथोर्यज्ञमहोत्सवं न ममृषे न सेहे ॥ २ ॥

कर्मणोऽतिशयमेव दर्शयति । यत्रेति सप्तभिः । साक्षाद्दन्वभूयत प्रत्यक्षोऽदृश्यत ॥ ३ ॥

अत एव ब्रह्मादिभिरन्वितः सन् गन्धर्वादिभिरुपगीयमानोऽभूत् ॥ ४—६ ॥

यत्र कर्मणि भूमिः धर्मदुघा हविर्दोग्ध्री धेनुः सती सर्वकामदुघा सर्वान्कामान् दोग्धीति अभीप्सितानर्थान् दोग्धि स्म पूरयति स्म ॥ ७ ॥

सर्वरसान् इक्षुद्राक्षादिरसान् ऊहुर्वहन्ति स्म भूरीणि वर्ष्माणि शरीराणि येषां ते मधुच्युतः मधुस्राविणः सन्तः प्रासूयन्त फलान्यजनयन् ॥ ८ ॥

सिन्धवः रत्नसमूहान् उपाजह्रुः गिरयो भक्ष्यं भोज्यं चोष्यं लेह्यं चेति चतुर्विधमुपाजह्रुः सर्वे लोकाः पालकैः सहिताः उपायनमुपाजह्रुः ॥ ९ ॥

परमः श्रेष्ठ उदयोऽभिवृद्धिर्यस्मिन् तत्कर्मासूयन् असहमानः प्रतिघातं विघ्नम् अचीकरत् ॥ १० ॥

———

भाषाटीका ॥

मैत्रेयजी बोले इसके अनन्तर मनुका क्षेत्र जो ब्रह्मावर्त है जहां पर प्राची सरस्वती है तहां पर पृथु महाराज ने सौ अश्वमेधकी दीक्षा को धारण किया ॥ १ ॥

इस बात को जानकर भगवान् इन्द्रने अपना अपमान समझकर पृथु महाराज के यज्ञ के महोत्सव को नहीं सहन किया ॥ २ ॥

जिस यज्ञ में साक्षात भगवान् यज्ञपति ईश्वर हरि सर्वात्मा सर्व लोक के गुरु प्रभु दर्शन को प्राप्त भये ॥ ३ ॥

अनुचरों के सहित लोक पाल तथा महादेव जी ब्रह्मा जी इनको साथमें लेकर, मुनियों को साथ लेकर भगवान् उपस्थित भये तब गंधर्व अप्सरागण गान नृत्य करतेथे ॥ ४ ॥

सिद्ध विद्याधर दानव दैत्य गुह्यक सुनंद नंद आदि भगवान् के उत्तम पार्षद् ॥ ५ ॥

कपिलजी नारदजी दत्तात्रेयजी सनकादिक योगेश्वर और जो भगवान् की सेवा के प्रेमी हैं वे सब भागवत भगवान के आने के पीछे आगये ॥ ६ ॥

जहां धर्म की पूर्ण करने वाली भूमी सब कामों को पूर्ण करने वाली है सो यजमान पृथुराज के सब मनोरथों का पूर्ण करती है ॥ ७ ॥

नदियों ने क्षीर दधि अन्न गोरस और सर्व रस इनको धारण किया वृक्ष सब बड़े होकर मधु को चुवान फलने लगे ॥ ८ ॥

समुद्रों ने रत्नों के समूह को धारण किया पर्वतों ने भक्ष्य भोज्य लेह्य चोष्य चार प्रकार के अन्न को धारण किया लोक पालों के सहित सब लोकों ने भेट पहुंचाया ॥ ९ ॥

इस प्रकार से अधोक्षज को नाथ मानने वाले पृथु महाराज का बड़ा भारी उदय को देखकर भगवान् इंद्र ईर्षा करके यज्ञका घात करने को उद्यत भये ॥ १० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

वैन्ये यजुष्पतिं विष्णुं यजमाने सति स्पर्धमान इन्द्रस्तिरोहितः सन्नश्वमपहृतवान् ॥ ११ ॥

त्वरमाणं धावन्तम् "आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् सन्नद्धो वर्मितः सज्ज,, इत्यमरसिंहः । पाखण्डवेषं कवचमिव गृहीतवन्तमित्यर्थः अधर्मे धर्मविभ्रमो धर्मोऽयमिति भ्रान्तिकरो यस्तम् ॥ १२—१३ ॥

तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणम् ।
जटिलं भस्मनाच्छन्नं तस्मै बाणं न मुञ्चति ॥ १४ ॥
बधान्निवृत्तं तं भूयो हन्तवेऽत्रिरचोदयत् ।
जहि यज्ञहनं तात ! महेन्द्रं विबुधाधमम् ॥ १५ ॥
एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा ।
अन्वद्रवदभिक्रुद्धो * रावणं गृध्रराडिव ॥ १६ ॥
सोऽश्वं रूपं च तद्धित्वा तस्मा अन्तर्हितः स्वराट् ।
वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान् ॥ १७ ॥
तत्तस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः ।
नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो ! ॥ १८ ॥
उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः ।
चषालयूपतश्छन्नो हिरण्यरशनं विभुः ॥ १९ ॥
अत्रिः सन्दर्शयामास त्वरमाणं विहायसा ।
कपालखट्वाङ्गधरं वीरो नैनमबाधत ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न मुञ्चतिस्म ॥ १४ ॥
हन्तवे हन्तुम् यज्ञहनं यज्ञं हतवन्तम् ॥ १५ ॥
गृध्रराट् जटायुः ॥ १६ ॥
तस्मै हित्वा तदर्थमुत्सृज्य ॥ १७ ॥
विचक्ष्य दृष्ट्वा ॥ १८ ॥

उपसृज्य सृष्ट्वा तेनच्छन्नः सन् चषालो यूपाग्रे निक्षिप्तः काष्ठकटकस्तद्युक्ताद्यूपात् हिरण्यनिर्मिता रशना यस्य तं रशनायाः स्वत्वेन छेत्तुमशक्त्या रशनासहितमेवोत्सृत्य यूपादानीतवानित्यर्थः विभुः समर्थः ॥ १९—२०—२१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रतिघातकरणमेव प्रपञ्चयति । चरमेणेत्यादिना । यजुष्पतिं भगवतस्त्रयीपतित्वेऽपि प्रकृतस्याश्वमेधस्य यजुर्वेदविहितत्वात् तदधिपतिरित्यभिप्रायेण यजुष्पतिमित्युक्तं यजुष्पतिं भगवन्तं चरमेण शततमेनाश्वमेधेन वैन्ये पृथौ यजमाने आराधयति स्पर्धन् स्पर्धमानः इन्द्रः चक्षिङो ङित्करणेनानुदात्तेत्वलक्षणस्यात्मनेपदस्यानित्यत्वज्ञापनाच्छन्दआदेशः तिरोहितः सन् यज्ञपशुमश्वमपोवाह अपहृतवानित्यर्थः ॥ ११ ॥

तमिन्द्रं विहायसा आकाशे त्वरमाणं धावन्तं भगवानत्रिर्मुनिरैक्षत कथम्भूतमधर्मे धर्मविभ्रमः धर्मभ्रान्तिकरजटिलत्वाद्याकारलक्षणो पाखण्डस्तम् आमुक्तं प्रविष्टं यथा आमुक्तमिव कवचमिवेत्यर्थः कोऽसौ पाखण्डः येनामुक्तस्तत्राह । य इति । पूर्ववदर्थः ॥ १२ ॥

अत्रिणा सूचिते ज्ञापिते पृथोः पुत्रः संक्रुद्धः सन् तं पशुहर्तारमन्वधावत् तिष्ठ तिष्ठेति च अब्रवीत् ॥ १३ ॥

तादृशाकृतिं पाखण्डाकृतिं तमश्वहर्तारं वीक्ष्य जटिलं जटाधारिणं भस्मनाच्छन्नं हेतुगर्भमिदं विशेषणद्वयम् जटिलत्वात् भस्मनाच्छन्नत्वाच्च शरीरिणं मूर्तं धर्मं मेने बुद्धवानित्यर्थः अतस्तस्मै अश्वहर्त्रे अश्वहर्तारं हन्तुं बाणं न मुञ्चति नामुञ्चत् जटिलत्वादिरूपेणाधर्मेऽपि धर्मभ्रमकरणे भ्रान्तस्तस्मै बाणं नामुञ्चदित्यर्थः ॥ १४ ॥

बधादश्वहर्तुर्बधान्निवृत्तं तं पृथुपुत्रं हन्तुम् अत्रिर्भूयः पुनः अचोदयत् प्रेरयामास चोदनामेवाह । हे तात ! यज्ञहनं यज्ञविघ्नकर्तारमत एव विबुधेष्वधमं यज्ञस्य विबुधाराधनरूपस्य हन्तृत्वात् तेष्वधममिति भावः महेन्द्रं जहि संहर ॥ १५ ॥

एवं प्रोक्तो वैन्यसुतः पृथुपुत्रः विहायसा आकाशे त्वरमाणं धावन्तमिन्द्रं रावणं गृध्रराडिव सिंह इवात्यन्तं क्रुद्धः अन्वद्रवत् अनुपृष्ठतः अद्रवत् आधावितः ॥ १६ ॥

स स्वराट् इन्द्रः तत् पाखण्डं रूपम् अश्वं च हित्वा अन्तर्हितस्तिरोहितस्तस्थौ स्थितवान् स वीरः पृथुपुत्रः पशुमश्वमादाय गृहीत्वा पितुः पृथोः यज्ञमुपेयिवान् प्राप्तवान् ॥ १७ ॥

तस्य च पृथुपुत्रस्य तदद्भुतं विस्मयनीयं कर्म इन्द्रगमनेनाश्वाहरणरूपव्यापारं वीक्ष्य दृष्ट्वा परमर्षयोऽत्र्यादयः सर्वे तस्मै पृथुपुत्राय विजिताश्वः विजयेनाहृत अश्वो येन स विजिताश्व इत्यन्वर्थनामधेयं ददुश्चक्रुः ॥ १८ ॥

हे प्रभो ! विजितेन्द्रिय । विदुर प्रभुर्हरिरिन्द्रः तीव्रं निबिडं तम उपसृज्य सृष्ट्वा तेन तमसा छन्नः सन् चषालयूपे चषालाग्रे क्षिप्तः चषालः काष्ठकटकस्तद्युक्तात् यूपादित्यर्थः हिरण्यनिर्मिता रशना यस्य तमश्वं पुनर्जहार अपहृतवान् पूर्ववद्विहायसा त्वरमाणमिन्द्रमत्रिर्मुनिः विजिताश्वाय सन्दर्शयामास ॥ १९ ॥

सन्दर्शितोऽपि वीरो विजिताश्वः एनमिन्द्रं कपालखट्वाङ्गधरं हेतुगर्भमिदं कपालखट्वाङ्गधारित्वात् ना बाधत नहतवान् ॥ २० ॥

* वारणं मृगराडिवेति श्रीवीरराघवः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कीदृशं विभ्रमकरोदित्यत्राह। चरमेणेति। चरमेणाश्वमेधेन शततमेन यज्ञेन यजुष्पतिं यज्ञमूर्त्याभिव्यक्तं हरिं यजमाने सति स्पृधुरूपर्यायामिति भावः। शतक्रतुः प्रयोगेणारम्भः शतक्रतुत्वं तस्य पृथोरेकोनशतक्रतुत्वं तस्य हरेरभिप्रेतमिति स्वमर्यादिन्द्रो हरेः स्वक्रतुं नाकरोदिति ज्ञायते हरेरनभिप्रेतत्वे अश्वापहरणं तस्कटात्ततो न धर्ममिति उत्तमश्लोकविभ्रमहर्तामिति श्रवणमात्रत्वात् ॥११॥

नन्वेवं तर्हि ऋषीणां त्रिकालदर्शित्वव्याप्तिरपहस्तितेति तत्राह। तमत्रिरिति। विहायसा गन्तुं त्वरमाणं पुनः किमाकारमं शीघ्रीदित्यतउक्तमामुक्तमिवेति पाखण्डरूपमामुक्तं गृहीतमिव स्थितं पाखण्डं कवयति। योऽधर्म इति। अनार्णां ज्ञानदुर्बलानामधर्मे धर्मोऽयमिति विभ्रमो बुद्धिभ्रंशो यस्मात्पाखण्डरूपम ॥ १२ ॥

अत्रिणा इदं चेत्प्रकृते किमागतमत्राह। अत्रिणेति ॥ १३ ॥

अनुधावनेन प्रत्यावर्त्य शक्रेण सह युद्धमभूदिति नेत्याह। तमिति। अधर्मशरीरत्वं पापदेहमिदं मेन हत्यन्वयः मुञ्चति मुमोच जटापाणिजटिना सह युद्धं न धर्म इति ॥ १४ ॥

चोरक्रियामनुवर्तमानस्य पुंसो वधो न दोषायेति मुख्यधर्मविदुषा तत्र प्रेर्यमाणेन भवितव्यमिति जानन् अत्रिः पुनश्च तमचोदयदित्याह। पापार्तिहन्तमिति। वैशाखेन पापराजं निवारयति। गुरोर्वचनमौचधर्मितिस्मृतेः। विपुलार्थिपदं चतुर्भुजस्याप्यस्तीत्यत उक्तम् महेन्द्रमिति ॥ १५ ॥

गृध्रराट् जटायुः ॥ १६ ॥

अथेन्द्रोऽसुरजनमोहाय नामनिधिकिम दर्शयन्निवासमादित्याह। सोऽश्वमिति तदुक्तम "देवाः शक्राश्च मोहाय दर्शयेयुरशक्रवत्। ऋषीणां चैवराज्ञां च नहि ते देवतासमाः। आज्ञया वा हरेः कापि कार्यतो वा कचित्कचित्,, इति यत्र कापि तुर्वेषैर्दैत्यादिषु प्रणिपातादिकं क्रियते सोऽपि तत्स्यहरौ मनसा सङ्कल्प्य क्रियत इति ज्ञातव्यं च तदुक्तम् "प्रणिपातादिकं देवैर्दैत्यादिषु जनार्दने। क्रियतेऽतो न तेषां हि तेजोभङ्गः कथञ्चन। अन्तर्यामात्मरे तेजोभङ्गो न विद्यते। यथा नराणां तिर्यक्षु प्रायः सारूप्ये हि-महात्मत,, इति ऋष्यादिषु क्रियते जनार्दने क्रियत इत्यर्थः ॥ १७ ॥

इन्द्रं जितवन्तं पृथोः पुत्रेण लोकसम्मतं किमयस्तंभलक्षणं यशः प्राप्तमत्राह। तस्मैयेति ॥ १८ ॥

पुंसां स्वकार्यसिद्धिपर्यन्तं प्रयत्नवता भाव्यमिति न्यायमनुसन्धाय इन्द्रः पूर्वस्मादधिकयत्नं विधाय दुर्जनमोहाय वेषान्तरं विधायाश्वमपहार्षीदित्याह। उपसृज्येति। हरिरिन्द्रः चषालयूपयोः चषालो छन्नो निखीनः "चषालो यूपकटकः कम्बासु गहनावृतिः,, इत्यभिधानात् हेमनिर्मितयूपे वलयाकारचषालः हिरण्येन रचिता रशना काञ्ची यस्य तम् ॥ १९ ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तं तादृशाकृतिमिति श्रीशिवादिषु दर्शनात् कस्यचिद्धर्मस्यावमपि वेशो भवेत् इति भ्रमादिति भावः ॥ १४—२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यजुःपतिं विष्णुं अपोवाह अपजहार ॥ ११ ॥

अर्चिष्मेषुपिति तदीक्षणमीषत्या त्वरमाणं पलाय्य धावन्तं पाखण्डं पाखण्डवेशं कवचमिव आमुक्तं गृहीतवन्तम "आमुक्तः प्रतिमुक्तश्च पिनद्धश्च,,इत्यमरः। अधर्मोऽपि धर्मो विशिष्टो भ्रमो यतः स एव चः ॥ १२ ॥ १३ ॥

तं तादृशाकृतिमिति श्रीशिवादिषु दर्शनात् कस्यचिद्धर्मस्यावमपि वेशोऽभवेदिति भावनया ॥ १४ ॥

हन्तवे हन्तुम् ॥ १५ ॥

त्वरमाणमिन्द्रं गृध्रराट् जटायुः ॥ १६ ॥

तस्मै तं पृथुपुत्रमनन्तर्धानविद्यां शिक्षयितुमित्यप्रमप्रन्य श्रद्धया व्याख्येयम ॥ १७ ॥ १८ ॥

उपसृज्य तमोऽन्धकारं पाखण्डवेशेन छन्नः सन् चषालो यूपाग्रे निक्षिप्तः काष्ठकटकः। तद्युक्तात् यूपात् हिरण्यरसनामिति रसनया रज्ज्वा ह्रियमाणस्तया रसनासहितमेवोद्धृत्य यूपान्नीतवानित्यर्थः ॥ १९ ॥ २० ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

चरमेणाश्वमेधेन यजुःपतिं विष्णुं यजमाने स्पर्धन इन्द्रस्तिरोहितः सन् यज्ञपशुमश्वमपोवाह, अहरत् ॥ ११ ॥

तमिन्द्रमत्रिर्विहायसा नभोमार्गेण त्वरमाणं धावन्तं पाखण्डवेषमामुक्तं कवचमिव स्वीकृतवन्तमैक्षत अत एव अधर्मे धर्मविभ्रमः धर्मोऽयमिति भ्रान्तिकरो यः ॥ १२ ॥

चोदितः प्रेरितः ॥ १३॥

तादृशाधर्मवत्प्रतीयमाना आकृतिर्यस्य तं वीक्ष्य वाणं न मुमोच तिस्म ॥ १४ ॥

हन्तवे हिंसनाय यज्ञहनम् अश्वहरणेन यज्ञविघ्नकरम्॥१५॥

गृध्रराडिव जटायुरिव ॥ १६ ॥

तस्मै वैन्यसुताय अश्वं रूपं च हित्वा ॥ १७ ॥

विजयस्य दृष्ट्वा विजिताश्व इति नामधेयं संज्ञां दधुः हे प्रभो! धर्मावतार ॥ १८ ॥

हरिरिन्द्रस्तीव्रं गाढं तमः उपसृज्य सृष्ट्वा तेन तमसा छन्नः चषालयूपतः चषालः यूपाग्रे निक्षिप्तः काष्ठकटकस्तद्युक्तायूपात् हिरण्मयी रशना यस्य तम् ॥ १९ ॥ २० ॥ २१ ॥

भाषाटीका।

अंत के अश्वमेध में जब यजमान पृथु महाराज यज्ञपति भगवान् का यजन करने लगे तब ईर्षा करके छिपकर यज्ञ के घोडा को इंद्र हरण करके लेगये ॥ ११ ॥

बडी शीघ्रता से आकाश में भगते हुए उस इंद्र को भगवान् अत्रि मुनिने देखा कि इंद्र ने पाखंड वेष कवच पहरा है जिस रंगे वस्त्रादिकों को देखकर मनुष्यों को अधर्म मेंभी धर्म की भ्रांति होती है ॥ १२ ॥

अत्रिजी के कहने से पृथु महाराज का पुत्र महारथ ने इंद्र को मारने को पीछे दौडा अडारह अडारह ऐसा कहा ॥ १३ ॥

उसकी वैसी आकृती देखकर उसने शरीर धारी धर्म आना जिसके जटा हैं भस्म लगाया है तब तिसके वास्ते बाण नही चलाया ॥ १४ ॥

अत्रिणा चोदितस्तस्मै सन्दधे विशिखं रुषा ।
सोऽश्वं रूपं च तद्धित्वा तस्थावन्तर्हितः स्वराट् ॥ २१ ॥
वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत् ।
तदवद्यं हरेरूपं जगृहुर्ज्ञानदुर्बलाः ॥ २२ ॥
यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया ।
तानि पापस्य खण्डानि लिङ्गं खण्डमिहोच्यते ॥ २३ ॥
एवमिन्द्रे हरत्यश्वं वैन्ययज्ञजिघांसया ।
तद्गृहीतविसृष्टेषु पाखण्डेषु मतिर्नृणाम् ॥ २४ ॥
धर्मइत्युपधर्मेषु नग्नरक्तपटादिषु ।
प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु ॥ २५
तदभिज्ञाय भगवान् पृथुः पृथुपराक्रमः ।
इन्द्राय कुपितो बाणमादत्तोद्यतकार्मुकः ॥ २६ ॥
तमृत्विजः शक्रवधाभिसन्धितं विचक्ष्य दुष्प्रेक्ष्यमसह्यरंहसम् ।
निवारयामासुरहो महामते ! न युज्यतेऽत्रान्यवधः प्रचोदितात् ॥ २७ ॥
वयं मरुत्वन्तमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषम् ।
अयातयामोपहवैरनन्तरं प्रसह्य राजन् ! जुहवाम तेऽहितम् ॥ २८ ॥
इत्यामन्त्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा ।
स्रुग्घस्ताञ्जुह्वतोऽभ्येत्य स्वयंभूः प्रत्यषेधत ॥ २९ ॥
न वध्यो भवतामिन्द्रो यद्यसौ भगवत्तनुः ।
यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ॥ ३० ॥

भाषाटीका।

मारने से निवृत्त होने पर फिर उसको मारने के लिये अत्रिजीने कहा हेतात ! यज्ञ का नाश करने वाला देवतों में अधम इंद्र को मारो ॥ १५ ॥

ऐसा कहने पर पृथु का पुत्र आकाश में भगते हुए उसके पीछे जैसे रावण के पीछे जटायु दौड़े थे तैसे क्रोध कर के दौड़ा ॥ १६ ॥

सो इंद्र उस घोड़ा को उस रूपको भी उस पृथु पुत्र के वास्ते छोड़कर अंतर्धान होगया वीर पृथु पुत्र उस घोड़ा को लेकर पिता के यज्ञ में आये ॥ १७ ॥

हे प्रभो विदुरजी ! पृथु पुत्र के उस अद्भुत कर्म को देख कर बड़े ऋषि लोगों ने उसका विजिताश्व नाम रखा ॥ १८ ॥

बड़ा भारी अंधेरा करके इंद्र ने फिर चषाल यज्ञ स्थंभ के पास छिपकर सोना के शांकल वाले घोड़ा को हरण कर लिया ॥ १९ ॥

आकाश में जल्दी जाते हुये उसको अत्रिजी ने पृथु पुत्र को दिखाया तब कपाल खट्वांग धारण किये इंद्र को देख कर पृथु पुत्र वीर ने नहीं मारा ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अवद्यं निन्दितं रूपं मन्दप्रज्ञा अगृहुः ॥ २२॥

तदेव पाखण्डनामनिरुक्त्या दर्शयति । यानीति । बहुवचनेन चान्यान्यपि गृहीतानीत्युक्तम् ॥ २३॥

तत्प्रभृति पाखण्डमार्गाः प्रवृत्ता इत्याह। एवमिति। तेन गृहीतेषु पुनर्विसृष्टेषु नग्ना जैनाः रक्तपटा बौद्धाः आदिशब्देन कापालिकादयस्तेषूपधर्मेषु धर्मोपमेषु धर्मप्रत्यायमिति मतिः सज्जत इति द्वयोरन्वयः पेशलेषु आपाततोरम्येषु वाग्मिषु हेतुकिचतुरेषु ॥ २४ ॥ २५ ॥ २६ ॥

शक्रवधेऽभिसन्धितं कृताभिप्रायं प्रचोदितात्पशोर्वधादन्यस्य वधस्तव न युज्यते ॥ २७ ॥

तदर्थं तु वयं करिष्याम इत्याहुः । वयमिह यज्ञनाशकं त्वत्की-

मिकृतभावार्थदीपिका ।

त्वैव हतप्रभं माह्वयामहे कैः अयातयामैरगतवीर्यैराह्वानमन्त्रैः अनन्तरं च ते तवाहितं जुहवाम होष्यामः ॥ २८ ॥

अस्य पृथोः शुक् हस्ते येषां तान् ॥ २९ ॥

यमिन्द्रं यज्ञेन जिघांसथ यज्ञेनेष्टाः सर्वे सुरा यस्य तनवः स इन्द्रो भवतां वधार्हो न भवति यद्यस्माद्यज्ञो नामायमिन्द्रो भगवतस्तनुरवतारः "ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत । सयामाद्यैः सुरगणैरपात्स्वायंभुवान्तरम्,, इत्युक्तत्वात् ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अत्रिणा पुनः स एवेन्द्र इति चोदितो विजिताश्वः रुषा तस्मै इन्द्राय विशिखं बाणं संदधे इन्द्रः अश्वं तद्रूपं कपालखट्वाङ्गधरत्वादिरूपं हित्वा अन्तर्हितः सन् तस्थौ ॥ २१ ॥

अथानन्तरं वीरो विजिताश्वः स्वाश्वं सापत्यं यज्ञाङ्गमश्वमुपादाय गृहीत्वा पितुः पृथोर्यज्ञमव्रजत् तत्प्रभृतिपाषण्डमार्गः प्रवृत्त इत्याह । तदवद्यमिति सार्धैस्त्रिभिः । हरेरिन्द्रस्य तदवद्यं निन्दितं रूपं जटिलत्वादिरूपं ज्ञानदुर्बला ज्ञानहीना जगृहुः ॥ २२ ॥

एतदेवोपपादयति । हयस्याश्वस्य जिघृक्षया ग्रहीतुमिच्छया यानि यानि रूपाणि जग्राह तानि तानि रूपाणि पापस्य खण्डानि समूहा इति वर्णलोपेन निरुक्तानि रूपाणि लिङ्गं खण्डचिह्नं पापित्वज्ञापकं खण्डसमूह इत्यन्वर्थनाम्ना इहास्मिल्लोके उच्यत इत्यर्थः ॥ २३ ॥

एवं वैन्यस्य पृथोः यज्ञजिघांसया यज्ञविघ्नकर्तुमिच्छया अश्वमिन्द्रे हरति सति अश्वहरणोपायतया तेन इन्द्रेण गृहीतेषु पुनः पुनः विसृष्टेषु ॥ २४ ॥

उपधर्मेषु धर्माभासेषु अत एव पेशलेषु मृदुलेषु अनुकूलाभासेष्विति यावत् वाग्मिषु मितमिव सम्यगिव वादिषु नग्नरक्तपटादिषु भावप्रधानो निर्देशः नग्नत्वरक्तपटादित्ववत्सु पाषण्डेषु रूपेषु नृणां मतिर्धर्म इतिभ्रान्त्या प्रायेण प्रायशः सञ्जते आसक्ता भवति ॥ २५ ॥

तदिन्द्रकृतं क्रतुविघ्नमभिज्ञाय ज्ञात्वा अपरिमितपराक्रमः पृथुः॰ कुपितः सन् उद्यतं कार्मुकं धनुर्यस्य सः इन्द्राय वाणमादत्त इन्द्रं हन्तुं वाणं गृहीतवानित्यर्थः ॥ २६ ॥

शक्रवधे कृताभिसंधितं कृताभिप्रायमत एव क्रोधेन प्रेक्ष्यमसह्यं परैः सोढुमशक्यं रंहो वलं वेगश्च यस्य तं पृथुमृत्विजः अध्वर्य्वादयः निवारयामासुः निवारणमेवाह । अहो महामते ! प्रचोदितात्विहितात्पशोर्वधात् अन्यस्य वधस्तु न युज्यते ॥ २७ ॥

तद्वधं तु वयं करिष्याम इत्याहुः । वयमिति । इहार्थनाशनं यज्ञनाशकं त्वत्कीर्त्यैव हतप्रभं मरुत्वन्तमिन्द्रं वयमाह्वयामहे कैरयातयामैरगतवीर्यैरुपह्वैराह्वानमन्त्रैरनन्तरं च हेराजन् ! ते तव अहितं शत्रुं तमिन्द्रं प्रसह्य मन्त्रबलेन अग्नये जुहवाम पशुपुरोडाशमिवाग्नौ होष्यामः ॥ २८ ॥

इति तं क्रतुपतिं पृथुमामन्त्र्य विज्ञाप्य हे विदुर ! अस्य पृथोः॰ ऋत्विजः शुक् हस्ते येषां तान् रुषा क्रोधेन जुह्वतः होमं कुर्वाणान् स्वयंभूर्ब्रह्मा तुराननः अभ्येत्य आगत्य प्रत्यषेधत निवारयामास ॥ २९ ॥

प्रतिषेधमेवाह । भवतामार्त्विज्ये कर्मण्यधिकृतानामिन्द्रो वध्यो न भवति कुतः यत् यस्मात् यज्ञः भगवतस्तनुः शरीरं तथा सुराश्च यस्य भगवत इष्टाः निरतिशयप्रीतिविषयाः तनवः तत्कथं यज्ञेन भगवच्छरीरभूतमिन्द्रं जिघांसथ हन्तुमिच्छथ ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वि कायाच्छिरसः पृथग्भावं कुर्वती शिखा यस्य स विशिखः "विनिषेधे पृथग्भाव,, इति यादवः एवं विधं शरं दृष्ट्वा किं पराङ्मुखादिन्द्रो न किन्तु निलीनोऽभूत् रूपान्तरेण यज्ञान्तराय करणायेत्याह । सोऽश्वमिति ॥ २१ ॥

अन्तर्हित इत्यनेन गृहीतरूपं विसृज्य रूपेणान्तर्धानं गम्यते तत्र पूर्वरूपं किमभूदचेतनस्य चेतनसम्बन्ध एव ह्यामार्थक्रिया सामर्थ्यमन्यथोच्छूनतीभूय नष्टं स्यात न तद्युक्तं देवकृतस्यान्यथात्वादर्शनादित्याह। तदवद्यमिति। हरेरिन्द्रस्य ज्ञानदुर्बला अन्यथाज्ञानिन इत्यर्थः ॥ २२ ॥

रूपस्यावद्यत्वमाह । यानीति । खण्डानि चिह्नानि खण्डं समुदायः किमित्यतउक्तम् लिङ्गमिति । खण्डपदस्य समुदायवाचित्वेऽपि इहास्मिन् प्रकरणे खण्डशब्देन लिङ्गमुच्यते । अभ्यर्हितत्वानुभयोः समुदायवाचित्वात् "लिङ्गं शेफसि वृषे च चिह्ने बुधचार्वसंहतौ,, इत्यभिधानात् संहतिः समुदाय इत्यर्थः पापस्य खण्डा अत्यन्तरसाम्यापादकत्वादिति निरुक्तिकारवचनादेकेनापि प्रकारेण विवक्षितार्थसिद्धिः स्फुटेति ॥ २३ ॥

सांप्रतं ये वर्तमानाः पाषण्डा एतन्मूला इत्याह । एवमिति । मतिरभिरुचिरभूदिति शेषः ॥ २४ ॥

कथं धर्म इति निरूप्य स्वयं किं रूपेषूपधर्मेषु स्वतोऽधर्मत्वेऽपि उपमितधर्मेषु यदुक्तम् "धर्मोपमस्त्वधर्मोऽयमुपधर्मः स उच्यत,, इति चक्षुर्विषयं लक्षणमाह। नग्नेति। आदिशब्देन काषायरक्तपालवल्कादिमस्त्रं गृह्यते । तेषामनुसरणमाह । प्रायेणेति। सङ्गनिमित्तमाह । पेशलेष्विति । पेशलेष्वतिचारुरमणीयेषु । एतदपि कुत इत्यत उक्तम् । वाग्मिष्विति । कुतर्कबृंहितशास्त्रवाचालेषु ॥ २५ ॥

एवमस्यामवस्थायां पृथुनाकृतः पराक्रमो न श्रूयत इति तत्राह। तदभिज्ञायेति ॥ २६ ॥

विहितहिंसां विनान्यहिंसोद्यमे तत्त्वविदो निन्दिताः किं तत्राह ऋत्विजइति। कुतो न युक्त इत्यतउक्तम् । अप्रचोदितइति अविहितत्वात् ॥ २७ ॥

कथं तर्हि तन्निग्रहोपायइति तत्रोच्यते। वयमिति। अयातयामोपहवैरन्यत्राप्रयुक्तत्वेनागतसारैर्मन्त्रैः मरुत्वन्तमिन्द्रम् अर्थनाशनं यज्ञाप्रयोजनद्रुहम् आहूय किं कुर्वन्तीति तत्रोच्यते । तमप्रसह्येति ते तवाहितम् ॥२८ ॥

नन्विन्द्रे निधनं गते यज्ञ एव न स्यात् मन्त्राणां तद्विषयत्वात् "मरुत्वन्तंसख्याय हवामहे,,इति श्रुतेः अतोऽयमर्थमरहस्य वेदी कोऽपि माभूदिति सभादोषं परिहरतो ब्रह्मण उक्तिप्रकारं वक्ति । इतीति । क्रतुपतिं पृथुम् । अस्य पृथोः सम्बन्धिनः जुह्वत्स्वेतं हविः अग्नावाप्तेवाति शेषः ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमाकारः प्रतिषेधतीति तत्राह। न वध्य इति। कुतो न वध्य इत्यत उक्तं यष्टुरिति। यद्यस्माद्भगवतो हरेस्तनुर्यज्ञः अनेनेन्द्रस्यावध्यत्वे किमायातमत्राह। यस्येति। सुरा इन्द्राद्या हरेरिष्टास्तनवो विशेषाभिधानयोग्या यस्मात्तस्मात्तस्यैतत्तनुत्वादस्मिन्यज्ञे तमिन्द्रं न जिघांसत इन्द्रजिघांसया हरेरप्रीत्या यज्ञ एव न स्यादित्यर्थः यद्वा यज्ञो भगवान् इन्द्रस्य तनुर्यजत्राः सुराश्च यस्येन्द्रस्य तनवस्तस्मादस्मिन्यज्ञे तं न जिघांसतेति ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ज्ञानदुर्भगा जगृहुरिति प्रथमं तादृशवेशेन यज्ञादिदूषकमतेन च परितः स्वसंप्रदायं रचयित्वा पश्चाच्चौर्यप्रवृत्तेः ॥ २२-२३ ॥

एवमिति युग्मकम्। उपधर्मेष्विति। नग्नादय उपधर्मास्तेष्विति योऽयम् ॥ २४-२५ ॥

तदिति। अश्वमेधादिभागेऽयस्यापीन्द्रस्य वधोद्यमोऽयं श्रीभगवद्भक्तिविशेषस्यैव मूलेन्द्रत्वमननात् ॥ २६—२८ ॥

प्रत्यभाषतेति चितसुक्रः ॥ २९ ॥

यमिन्द्रं यज्ञेन जिघांसथ स इन्द्रो भवतां न वध्यः। कुतः यद्यस्मात् यज्ञो यागो भगवतस्तनुः सुराश्चेन्द्राद्या यस्य इष्टास्तनवः। तस्मादेकां तनुं हत्वा नान्या रक्षितुं युक्ता किन्तु द्वयमपि रक्षितुं युक्तमिति भावः ॥ ३०—३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ज्ञानदुर्बला इति पृथु पुत्रेणाश्वघात् ब्लेषामवध्यत्वमभिमन्यमानाः। यज्ञादिदूषकमतप्रवर्त्तकं स्वसम्प्रदायं रचयित्वा परधर्माक्षेपाद्यान्तर्धानादिक्षुद्रसिद्धिरेव साध्यत्वेन निरदैधुरित्यर्थः ॥२२॥

पाखण्डनाम निर्वक्ति। यानीति। बहुवचनेन बहव एव पाखण्डप्रभेदाः प्रवृत्ता इत्युक्तम् ॥ २३ ॥

तेनेन्द्रेणादौ गृहीतेषु पश्चाद्विसृष्टेषु नग्ना जैनाः रक्तपटा बौद्धा आदिशब्देन कापालिकादयः। उपधर्मेषु धर्मोपमेषु न तु धर्मेषु। पेशलेष्वापाततोरम्येषु वाग्मिषु हेतुक्तिचतुरेषु ॥ २४—२६ ॥

शक्रवधेऽभिसन्धिः सञ्जातो यस्य तं। विवक्ष्य दृष्ट्वा प्रचोदितात् शास्त्रविहितात् पशोर्वधादन्यस्य वधो न युज्यते ॥ २७ ॥

ननु तर्हि कः प्रतीकारस्तत्राहुः। वयमिति। अयातयामैरगतवीर्यैः उपहवैराह्वानमन्त्रैः। अत्र तदानीं तस्येन्द्रस्य भगवदवतारत्वेऽपि विप्राणाञ्च तेषामवहिर्मुखत्वेऽपि तथाभूतोक्त्या कर्ममार्गस्य स्वभाव एव तैर्द्योतितो यत्तत्र प्रवृत्ता निर्विवेकिनोऽप्यन्धा भवन्तीति यथा ब्रह्मणा कामस्य श्रीरुद्रेण क्रोधस्य श्रीविष्णुनापि यज्ञावतारे तस्मिन् मात्सर्यकौटिल्यादिकमीहमानेनेन्द्रत्वस्य स्वभावो द्योतित इति ॥ २८ ॥

मत्स्य पृथोः ॥ २९ ॥

भगवत्तनुरिति नहि भगवद्विग्रहो विप्रैर्हन्तुमध्यवस्यते भवतां तर्हि विप्रत्वमेव कुतः यं यज्ञेन जिघांसथेति, स खलु यज्ञः कथं यज्ञेन वध्यो भवेत् यथा क्षीराब्धिः क्षीरप्रस्थक्षेपेणेति किञ्च यस्य यज्ञस्येन्द्रस्य च तनवः सुरास्तेच यज्ञेन युष्माभिरिष्टा इज्यन्ते स्मेति कथं स मरिष्यतीत्येतमपि विवेकं न कुरुतेति भावः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरेः रूपम् इन्द्रस्य पाखण्डवेषम् अवद्यं निन्द्यम् ज्ञानदुर्बला ज्ञानेनहीनाः ॥ २२ ॥

चिह्नं खण्डमिहोच्यते अन्यत्र षण्डशब्दः समूहवाचकः इह तु चिह्नवाचक इत्यर्थः ॥ २३ ॥

तदारभ्य पाखण्डप्रवृत्तिस्तत्र च विचक्षणानां पाखण्डेषु प्रायेण मतिः सज्जते इत्याह। एवमिति द्वाभ्याम्। पाखण्डेषु पापस्य खण्डेषु ज्ञापकेषु अत्र पेत्येकदेशग्रहणेन पापमुच्यते उपधर्मेषु वेदानुवादेषु धर्मोऽयमिति मतिः प्रायः सज्जते इति द्वयोरन्वयः ॥ २४ ॥

तत्र नग्नाः जैनाः रक्तपटा बौद्धाः आदिपदात्कापालिकादयः पेशलेषु आपाततोरम्येषु वाग्मिषु वाचालेषु ॥ २५ ॥

पृथुपराक्रमः विपुलप्रभावः ॥ २६ ॥

शक्रवधायाभिसन्धितं कृताभिप्रायम् दुष्प्रेक्ष्यं दुःखेनापि प्रेक्षितुमशक्यम् असह्यरंहसं दुःसहवेगम् ऋत्विजो निवारयामासुः अहो महामते! अचोदितात् विहितात् अन्यस्य वधः दीक्षितस्य तव न युज्यते ॥ २७ ॥

वयं मरुत्वन्तमिन्द्रं तव अर्थनाशनं यज्ञनाशकं त्वच्छ्रवसा ते यशसैव हततेजसं नष्टकान्तिम् अयात यामैरगतसारैःउपहवैः आह्वानमन्त्रैरिह ह्वयामहे आह्वयामहे अनन्तरं प्रसह्य ते अहितम् अग्नौ जुहुवाम ॥ २८ ॥

क्रतुपति पृथुम् ॥ २९ ॥

यजतः यज्ञनमाः सुराः यस्य तनवः तनुवद्वशवर्तिनः यज्ञो नामायमिन्द्रो भगवत्तनुरवतारः "ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत। सुयामाद्यैः सुरगणैरपात् स्वायंभुवान्तरम्" इत्युक्तत्वात् अतः यं यूयं जिघांसथ स भवतां वध्यो न भवति ॥ ३० ॥

भाषाटीका ।

अग्निके प्रेरणाकरनेसे पृथुपुत्रने क्रोधकरके फिर अश्वको धारणकिया तब इन्द्र घोड़ा को और उस रूपको छोड़कर वहीं छिपगये ॥ २१ ॥

इसके अनन्तर पृथु पुत्र वीर घोडाको लेकर पिताके यज्ञमें आये इन्द्रके उस निन्दित रूपको ओअज्ञानी हैं तिन्होंने ग्रहणकिया ॥ २२ ॥

घोडाके हरने की इच्छामे जिन रूपोंको इन्द्रने ग्रहणकिया वे सब पाप के खण्ड हैं इहां पर खण्ड करके चिन्हके नाम हैं ॥ २३ ॥

इस प्रकारसे पृथु महाराज के यज्ञके नाश करनेकी इच्छा से घोडाके हरण करनेमें ग्रहणकरके छोडे हुये रूप पाखण्ड है तिन्हों मे मनुष्योंकि रुचि होती है ॥ २४ ॥

नङ्गा होना लाल कपडा पहिरना इत्यादि जो उप धर्म हैं तिनमे प्राय करके भ्रांति से व्यवहार चतुर वाक्चतुरजान करके मनुष्य आसक्त होजाते हैं ॥ २५ ॥

बड़े पराक्रम वाले पृथुभगवानने इस बातको जानकर कुपित होकर धनुष चढाकर इन्द्रपर बाण चलाने का तैयारी किया ॥ २६ ॥

अत्यंत क्रोध वेग वाले होकर इंद्रके वध में उद्यत उन पृथु महाराज को देखकर ऋत्विजों ने निवारण किया कि हे महामते! इस यज्ञ में विहित से अन्य का वध करना यह नहीं है ॥ २७ ॥

तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः ।
इन्द्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ॥ ३१ ॥
पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः ।
अलं ते क्रतुभिः स्विष्टैर्यद्भवान् मोक्षधर्मवित् ॥ ३२ ॥
नैवात्मने (१) महेन्द्राय रोषमाहर्तुमर्हसि ।
उभावपि हि भद्रं त उत्तमश्लोकविग्रहौ ॥ ३३ ॥
मास्मिन् महाराज ! कृथाः स्म चिन्तां निशामयास्मद्वच आदृतात्मा ।
यद्ध्यायतो दैवहतं नु कर्तुं मनोऽतिरुष्टं विशते तमोऽन्धम् ॥ ३४ ॥
क्रतुर्विरमतामेष देवेषु दुरवग्रहः ।
धर्मव्यतिकरो यत्र पाखण्डैरिन्द्रनिर्मितैः ॥ ३५ ॥
एभिरिन्द्रोपसंसृष्टैः पाखण्डैर्हारिभिर्जनम् ।
ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ॥ ३६ ॥
भवान् परित्रातुमिहावतीर्णो धर्मं जनानां समयानुरूपम् ।
वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलासि वैन्य ! ॥ ३७ ॥
स त्वं विमृश्यास्य भवं प्रजापते ! सङ्कल्पनं विश्वसृजां पिपीपृहि ।
ऐन्द्रीं च मायामुपधर्ममातरं प्रचण्डपाखण्डपथं प्रभो ! जहि ॥ ३८ ॥

मैत्रेय उवाच ।

इत्थं स लोकगुरुणा समादिष्टो विशां (२) पतिः ।
तथा च कृत्वा वात्सल्यं मघोनापि च सन्दधे ॥ ३९ ॥

भाषाटीका ॥

आपके अर्थ के नाश करने वाले इंद्र को हम यहां पर बुलाते हैं उसका तेज तो आपके यशसे नष्ट होगया है प्रबल वीर्य वाले मंत्रों से आवाहन करके हे राजन् ! आपके शत्रु का होम करेंगे ॥ २८ ॥

हे विदुरजी ! यज्ञपती को ऐसा कहकर इनके ऋत्विजोंने रोष के मारे जब होम का आरंभ किया तब तुरत आकर ब्रह्माजीने निषेध किया ॥ २९ ॥

ब्रह्माजी बोले जिसको मारना चाहते हो सो इन्द्र तुमारे मारने के योग्य नहीं है क्योंकि यज्ञ में जो देवता पूजे जाते हैं वे सब इन्द्र के शरीर हैं यह इन्द्र भगवान् का शरीर है ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतो बलीयसानेन स्वयमेव कर्तव्यमन्यथा भूयः पाखण्डं प्रवर्तयिष्यतीत्याशङ्क्याह । तदिदमिन्द्रेणानुष्ठितं महद्धर्मव्यतिकरं पश्यत किमन्यद्वक्तव्यमित्याह । धर्मस्य व्यतिकरं विपर्ययं पाखण्डरूपम् ॥ ३१ ॥

तर्हि किमत्र युक्तमित्यत आह । पृथुकीर्तेरिति । एकोनं शतं पूर्णाः क्रतवो यस्य [illegible] क्रतुः क्रतुप्रयोगः पृथोर्भूयात् पृथोरिति पाठे एकोनं शतं क्रतवो यस्य तादृशोऽपि महेन्द्रात्पृथुकीर्तिर्भूयादित्यर्थः तदेवमृत्विजः प्रत्युक्त्वा पृथुं प्रत्येवाह । अलमिति ॥ ३२ ॥

आत्मनैवात्मने महेन्द्राय रोषं कर्तुं नार्हसि तत्र हेतुः उभावपीति ॥ ३३ ॥

तथापि क्रतुसमाप्तिमेव ध्यायन्तं प्रत्याह । अस्मिन् यज्ञविघ्ने चिन्तां मास्मकृथाः यद्यस्माद्दैवहतं कार्यं कर्तुं ध्यायतो मनोऽतिरुष्टं सदन्धन्तमो मोहं विशति न तु शान्तिं लभते ॥ ३४ ॥

अत एव तव क्रतुर्विरमतु नन्विन्द्रः किं न निवार्यतेऽत आह यतो देवेषु दुराग्रहो मर्यादाति यत्र क्रतौ ॥ ३५ ॥

इन्द्रदुराग्रहकृतमनर्थं पश्येत्याह । एभिरिन्द्रेणोपसंसृष्टैरुत्पादितैर्हारिभिर्मनोहरैः य इन्द्रस्तेऽश्वं मुष्णातीति तथा यज्ञाय द्रुह्यति तथा तत्सृष्टैः ॥ ३६ ॥

ततो मम किमिति चेत्तत्राह । भवानिति द्वाभ्याम् । साङ्ख्ययोगादिनानासिद्धान्तानुरूपं धर्मं वेनस्यापचाराल्लुप्तं परित्रातुं तद्देहाद्विष्णोः कलैव त्वमवतीर्णोऽसि ॥ ३७ ॥

हे प्रजापते ! अस्य विश्वस्योद्भवं विचार्य येनोत्पादितोऽसि तेषां विश्वसृजां सङ्कल्पं पिपीपृहि आर्षः प्रयोगः पूरयेत्यर्थः प्रचण्डो यः पाखण्डमार्गः ऐन्द्रीमायोपधर्मजननी तां जहि ॥ ३८ ॥

तथा च कृत्वा यज्ञाग्रहं हित्वा वात्सल्यं स्नेहं कृत्वेन्द्रेण सह सन्धानं च कृतवान् ॥ ३९ ॥

(१) आत्मनेऽपि श्रीजीवगोस्वामिचक्रवर्तिनौ । (२) विशांपतिरिति श्रीवीरराघवः ।

कृतावभृथस्नानाय पृथवे भूरिकर्मणे ।
वरान् ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ॥ ४० ॥
विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः ।
आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः ॥ ४१ ॥
त्वया हूता महाबाहो ! सर्व एव समागताः ।
पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां पृथुविजयोनाम
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृतमवभृथसम्बन्धिस्नानं येन स तस्मै ॥ ४० ॥ ४१ ॥

तुष्टानां वाक्यं । त्वयेति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
ऊनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे द्विजाः ! राज्ञः पृथोरेतद्धर्मरूपं कर्म जिघांसता नाशयितुमिच्छता इन्द्रेणानुष्ठितं धर्मस्य व्यतिकरः यस्मिन् तदिदं पापचरणात्मकं महदन्याय्यं पश्यत ॥ ३१ ॥

तर्हि तथा चेत्पृथुकीर्तेः विपुलकीर्तेः पृथोः एकोनशतं यस्मिन् तादृशक्रतुप्रयोगः एकोनशतक्रतुरपि पृथुः महेन्द्रात् पृथुकीर्तिर्भूयादित्यर्थः पृथुकीर्तिः पृथुरिति पाठे एकोनशतं क्रतवो यस्य तादृशः पृथुर्भूयादित्यर्थः पृथुं सान्त्वयति ते त्वया स्विष्टैः सम्यगनुष्ठितैः एतावद्भिः क्रतुभिरलं यत यस्मात् भवान्मोक्षधर्मवित् मुमुक्षोरागाद्यमपेतमेव कर्मानुष्ठानं युक्तमितिभावः ॥ ३२ ॥

आत्मना मनसा दोषं महेन्द्राय आहर्तुं स्वीकर्तुं त्वं नार्हसि हि यस्मात् त्वं महेन्द्रश्चेत्युभावपि उत्तमश्लोकस्य भगवतो विग्रहौ शरीरभूतौ अतो नान्योऽन्यं विरोधो युक्त इतिभावः ते तुभ्यं भद्रं भूयात् ॥ ३३ ॥

हे महाभाग ! अवहितमना मद्वचो निशामय शृणु अस्मिन् यज्ञविघ्ने चिन्तां मास्मकृथाः यत् यस्मात् दैवहतं कार्यं कर्तुं ध्यायतः पुरुषस्य मनः नु, निश्चितमतिक्रुद्धमन्धन्तमः मोहं विशति न तु शान्तिं लभते ॥ ३४ ॥

अत एव तव क्रतुर्विरमताम् नाविन्द्रः किं न निवार्यते तत्राह । यतो देवेषु दुरवग्रहो भवति यत्र अतो इन्द्रनिर्मितैः पापखण्डैर्धर्मव्यतिकरोऽभवत् ॥ ३५ ॥

इन्द्रपुरा [illegible] कृतमनर्थं पश्येत्याह । यभिरिन्द्रेणापलुप्तैः कल्पितैः पाषण्डैर्हारिभिश्चित्तापकर्षकैः ह्रियमाणां ....शीभ्रियमाणां जनं [illegible] पश्य यस्ते तव यज्ञभुक् यज्ञनाशकः अश्वं मुष्णाति

ततो मम किमिति तत्राह । भवानिति द्वाभ्याम् । नानाकर्मयानुरूपं निविधासिद्धान्तानुरूपं धर्मं वैन्यस्यापचाराद्व्याख्याय वशप्लुतं परित्रातुम् अद्य अधुना तस्य वेनस्य देहतः इह लोकेऽवतीर्णः वैन्यः वेनपुत्रोऽपि त्वं विष्णुकलासि विष्णोरंशभूतोऽसि ॥ ३७ ॥

स विष्णुकलाभूतस्त्वम् अस्य जगतो भवमुत्पत्तिं विमृश्य विचार्य हे प्रजापते ! विश्वसृजां सङ्कल्पनं सङ्कल्पं पिपीपूर्हि पूरय येभ्यो विश्वसृड्भ्योऽस्य जगत उत्पत्तिः तेषां संकल्पं पूरयेत्यर्थः प्रजापालनाधिकृतस्य तवेदं युक्तमित्यभिप्रायेण प्रजापते इति संबोधनं कृतं प्रचण्डो यः पाषण्डमार्गः सैवेन्द्रमाया उपधर्मस्य माता जननी तां जहि प्रभो ! तथा कर्तुं समर्थस्त्वमित्याभिप्रायेण प्रभो इतिसंबोधनम् ॥ ३८ ॥

उपसंहरति । इत्थमिति पञ्चभिः । इत्थमेवं लोकगुरुणा सम्यगादिष्टो दिशाम्पतिः दिक्पतिः स पृथुः मघोना इन्द्रेण, सह तथा च मैत्रीकरीत्या सख्यं कृतं तेनैव च सन्दधे सन्धिं कृतवान् ॥ ३९ ॥

कृतमवभृथसम्बन्धिस्नानं येन तस्मै भूरिकर्मणे विपुलव्यापाराय पृथवे तस्य पृथोर्बर्हिषि यज्ञे ये तर्पितास्ते वरदा देवा वरान् ददुः ॥ ४० ॥

सत्याः फलाविनाभूताः आशिषः आशीर्वादाः येषां ते विप्राः श्रद्धयायथासमर्पिताः अत एव तुष्टाः पुनश्च सत्कृताः हे क्षत्तः ! आदिराजाय पृथवे आशिषः युयुजुः कृतवन्तः ॥ ४१ ॥

हे महाबाहो ! विदुर तथान्ये ये तत्र यज्ञे समागतास्ते सर्वे आहूताः प्रीतिविषयीकृताः यथा योग्यं दानमानाभ्यां पूजिताः पित्रादयः ॥ ४२ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
ऊनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीधरस्त्विव वक्ति । तदिदमिति । इन्द्रेण शतक्रतुत्वहानिवारणाभीत्यैतदनुष्ठितमिति ध्वनयति । इन्द्रेणेति । पृथोराज्ञ एतत्कर्मजिघांसया ॥ ३१ ॥

इदानीं पृथुमभिवदति । पृथुकीर्तिरिति हे पृथो ! त्वमेकोनशतक्रतुरिति पृथुकीर्तिः प्रख्यातकीर्तिर्भूया इत्यन्वयः हितवेदेन त्वमेवैवं-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शतकीर्तिमाप्नुयां इति स्फोटयति शक्रः शतक्रतुर्भूयासमित्यस्य सदा-शया एकोनशतक्रतुर्भूयासमित्येवमभिसन्धिः स्यादित्याह । अजस्य इति । ते शतैकोनक्रतुभिः क्रतुभिरधिकः स्यामिति बुद्धिरासीत्तु "सम्यक्तुभूयया शक्रो यर्याप्तौ विनिवारयन्,, इति यादवः तदैतदेव सूचयामिति भावेनाह । यज्ञवानिति । मोक्षधर्मस्तारतम्याद्विलक्षणत्वं वसीति यद्यस्मात्तस्मात्सर्वधर्मतत्त्वज्ञ इति वा अनेन पृथुजी-वादिन्द्रस्यात्युत्तमत्वं सूचितमिति ज्ञायते ॥ ३२ ॥

कल्पितमीह । नैवात्मनेति । तस्मान्निहितहरविशेषनिवासहेतु-त्वादात्मन इत्युक्तम् एतदेव विशिनष्टि । उभाविति । उत्तमश्लोकस्य हरेर्विशेषस्थितिहेतुर्विग्रहो देहो ययोस्तौ तुभ्यं भद्रमस्तु हरेः सन्निधानविशेषपात्रत्वात् अन्योऽन्यं जयपराजया न वक्तव्याः ॥ ३३ ॥

दोषशमनमेव कर्तुमुचितमन्यथा चिन्तया देहनाशस्तव स्या-दित्याह । मास्मिन्निति । यद्दैवहतं कार्यं तत्कर्तुमुपायं ध्यायतः पुंसो-मनोऽन्धतमसम्यक्तमो विशते तुशब्देन वाक्यद्वयस्यानर्थपरम्परां सूचयति हेत्वर्थो वा तस्मादस्मिन् कार्ये चिन्तां स्मृत्वा माकृथा इत्यन्वयः "स्मृते वृत्ते निषेधेस्म,, इति यादवः अथैतत्कुर्वित्याह । निशा-मयेति । निशामय शृणु ॥ ३४ ॥

किं तदत्राह । क्रतुरिति । न केवलं क्रतोर्विरामेण पूर्यते किन्तु देवेषु दुरवग्रहो विरमताम् देवेषु कुपितेषु स्वराष्ट्रे दुर्भिक्षपातोऽपि स्यादतस्तदुरवग्रहविरामः कर्तव्य इत्यर्थः क्रतुविशेषणं वा कुपितदेवविषयो दुष्टोऽवग्रहो यस्मात् स तथा देवप्रीत्या सुदृष्टयर्थं पुरुषैर्यज्ञोऽनुष्ठीयते तत्र देवप्रतिहते क्रतौ क्रियमाणे तदप्रीत्याऽना-वृष्ट्यां ब्रीह्याद्योषध्यनुत्पत्त्याऽन्नाभावेन प्राणिनां प्राणधारणो-पायाभावेन देहवियोगलक्षणो विनाशः स्यादिति "व्याङ्परिभ्यो-रमः,, इत्यनेन विहितपरस्मैपदप्रयोगं विहाय स्वार्थहानिसूचनाय विरमतामित्यात्मनेपदप्रयोगः इतोऽपि क्रतुर्विरमत्वित्याह । धर्म-व्यतिकर इति । यत्र यस्मिन्नश्वमेधे क्रियमाणे सति इन्द्रानि-र्मितैः पाखण्डैर्धर्मव्यतिकरोऽधर्मे धर्मबुद्ध्या धर्मनाशः स्यात् ॥ ३५ ॥

धर्मव्यतिकरं प्रत्यक्षतोऽपि पश्येत्याह । एभिरिति । हारिभिर्वशी-करणसमर्थैर्हियमाणां संमुह्यमानामेतत्कर्मविनष्टव पश्य कोऽसावि-त्यत्रत्यन आह । यदिति । यो मुष्णातीति यज्ञभुक् अश्वं मुष्णातीति अश्वमुट् स इन्द्र इत्यर्थः ॥ ३६ ॥

धर्मावनार्थमवतीर्णत्वाच्च तस्य नाशप्रयत्ने महानतिक्रम इत्या-शयेनाह । भवानिति । चशब्दो धर्मविरोधिपरिहारार्थमपीति ग्राह्यं नानासमयानुरूपं नानाविधशास्त्रानुसृतं वेनापचाराद्विनाशमापन्ना-यदवलुप्तं नष्टं तस्य वेनस्य देहतः भवतः इति भ्रान्तिर्माभूदित्य-वतारस्वरूपमुपदिशति । विष्णुकलेति । हे वैन्य ! भवान् विष्णोः स-त्त्वेन स्थितिहेतुत्वात्तत्कलाविशिष्टत्वात्तद्धर्मविरुद्धाचरणं न युक्त-मिति सूचयति ॥ ३७ ॥

क्रतोपसंहारमुखेन कर्तव्यं विधत्ते । सत्त्वमिति । यस्माद्धर्मावनार्थ-मवतीर्णोऽसि तस्मात्सत्त्वं प्रजापतेरिन्द्रस्याभिभवत्वाभिकीर्तिं शत-क्रतुत्वं त्रिमृशवमनुष्ठिते धर्मावरोधः स्यादिति मया तत्र कार्यमिति विचार्य विश्वसृजस्त्वन्द्रस्य सङ्कल्पितं पृथुना शतक्रतुत्वं न विजय-मिति निरूपितमतिपीपृहि अत्यन्तं पूरयेत्यन्वयः इन्द्रस्य विरोधा-करणेऽभिनः सर्वतो भद्रं शुभं भवतीति त्रिमृश्य विश्वसृजः प्रजा-पतेर्मम नवैकोनशतक्रतुत्वं सङ्कल्पितमति पीपृहीति वा पृपालनपूर-णयोरिति धातुः प्रचण्डस्य पाखण्डस्य पन्थानमैन्द्रीमिन्द्रनिर्मि-तामुपधर्मस्य मातरमनृतविधीं मायाञ्च जहि विशिष्टधर्माचरणेन विनाशयेत्यन्वयः ॥ ३८ ॥

सात्त्विकप्रधानत्वात्पृथुना चतुर्मुखोक्तं गृहीतमित्याह । इत्थ-मिति । मघवानेन्द्रेण ॥ ३९ ॥

यज्ञान्तोऽवभृथस्तत्प्रभवमावभृथ्यं कृतमावभृथ्यं स्नानं येन स तथोक्तस्तस्मै ॥ ४० ॥

परान्वय विशिनष्टि । विप्रा इति । सत्याशिषोऽभीष्टसाधनसमर्थ-शुभवाक्यप्रभवाः आशीर्वादलक्षणा एव फलाविसंवादाय युयु-जुरित्युक्तम फलमित्यनन्यथात्वं वा ददातेः कालान्तरेऽपि फल-प्राप्तिसंशयहेतुत्वासम्भवात् ॥ ४१ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
ऊनविंशोऽध्यायः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

आत्मनेति । सम्बन्धोक्तिः आत्मना मनसेति व्याख्यानात् । स्वामिव्याख्यायां सन्देह एव । पूर्वन्यायेनैवाह । उभावपीति ॥ ३३-३४ ॥

किञ्च देवेषु दुरवग्रहो विरोधहेतुरयं क्रतुर्विरमतु । ननु तद्विरोधे का क्षतिस्तत्राह । धर्मव्यतिकरो धर्मव्याघातः धर्मो-दूषितः स्यादित्यर्थः ॥ ३५ ॥

पाखण्डानां वलं दर्शयति । एभिरिति ॥ ३६ ॥

तर्हि पाखण्डाभ्युपगमीयाम्येवेत्याह । भवानिति द्वाभ्याम् ॥ ३७-४० ॥

चित्सुखमतेतु अत्रोनविंशोऽध्यायः । तथाच कृतवान् सर्वमि-ति चित्सुखः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
ऊनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च तद्देवेनाधर्म एव वर्द्धिष्यते तस्याधर्मस्य राज्ये मूर्त-मेव प्रवृत्तं पश्यतेत्याह । नविदमिति । धर्मस्य व्यतिकरत्वं पाखण्ड-पथम् ॥ ३१ ॥

तर्हि किं तवाभिप्रेतमित्यत आह । पृथ्विति । एकोनशतक्रतु-रपि पृथुरयं शतक्रतोरिन्द्रादपि पृथुकीर्तिर्विपुलयशा भूया-दिति क्रतुभिर्यश एव साध्यं तच्च मदाशीर्वादादेव भविष्यतीति भावः । पृथुकीर्तेः पृथोरिति षष्ठ्यन्तपाठे एकोनशतमेव क्रतु-भूयादित्येकत्वं जात्यपेक्षया एकोनशतमिति संख्या व्यक्त्यपेक्षया भिन्नं क्रतुशतस्य संकल्पोऽपूर्णोऽपि मदाशीर्वादादेकोनत्वेऽपि पूर्णो भवत्वित्यर्थः । ऋत्विजः प्रत्युक्त्वा पृथुं प्रत्याह । भवानिति ॥ ३२ ॥

आत्मन इत्यत्र हेतुः । उभावपीति द्वयोरपि युवयोर्भगव-दवतारत्वादित्यर्थः ॥ ३३ ॥

तदपि क्रत्वसमाप्ति ध्यायन्तं तं प्रत्याह । मास्मिन्निति । यद्दै-व हतं कर्म तत्कर्तुं ध्यायतः पुंसः नु निश्चितं मनोऽतिक्रुद्धं सत् अन्धंतमो मोहं विशति नतु शान्ति लभते ॥ ३४ ॥

अतएव क्रतुर्विरमतां नन्विन्द्रः किमिति न निवार्यते तत्राह । देवेषु मध्येऽयं दुराग्रहो भवति यत्र क्रतौ ॥ ३५ ॥

इन्द्रदुराग्रहकृतमनर्थं दर्शयति । एभिरिति । हारिभिश्चित्ता-कर्षकैः । य इन्द्रस्ते अश्वं मुष्णातीति तथा यज्ञाय मुष्णातीति तथा तेन सृष्टैः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्वत्तः सकाशात् धर्म एव प्रवर्त्तितुमर्हति सत्यधर्म इत्याह । वैवाक्षिति ॥ ३७ ॥

अस्य विश्वस्य भवं कल्याणं हे प्रजापते ! विश्वसृजां येर्मन्य-मानुलैपाक्षितोऽसि तेषां संकल्पनां संकल्पं पिपीपृहि भावैः प्रयो-गः पूरयेत्यर्थः । उपधर्मस्य मातरं जननीं कौरवीं प्रचण्डस्य पाखण्डस्य पन्थानम् भाविशलिङ्गत्वादयुक्तं पुंस्त्वम् ॥ ३८ ॥

च एवार्थे यथा ब्रह्मणा भाज्ञा तथैव वात्सल्यं कृत्वेति यज्ञस्य वयो वृद्धत्वेऽपि देवेन्द्रत्वेऽपि ब्रह्मणा एवाज्ञया तत्र पृथोर्वात्-सल्यं साम्य तयोर्मित्रत्वमस्तेन तुल्यत्वेऽपि पृथोर्भक्त्युत्कर्षेणा-ऽपर्हितत्वमाज्ञस्यैव कृतेति ज्ञेयं सन्दधे सन्धिं चकार ॥३९-४१॥

नृपाणां वाक्यं । त्वयेति ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
ऊनविंशश्चतुर्थेऽयं सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

राज्ञः पृथोः एतत् यज्ञलक्षणं कर्म जिघांसतेन्द्रेण धर्मव्यति-करो नाशो यस्मात् तत्पाखण्डरूपम् अनुष्ठितं प्रवर्त्तितं हे द्विजाः ! पश्यत अस्तांश्चित इन्द्रः पुनः पाखण्डरूपाणि प्रवर्तयिष्यतीति भावः ॥ ३१ ॥

पृथुकीर्तेः अभावादेव विपुलयशसः पृथोः एकेनोनं शतं यस्मिन् तथाभूतः क्रतुः अश्वमेधो भूयात् पूर्णं भवेदाह । भव-मिति ॥ ३२ ॥ ३३ ॥

दैवादयं यज्ञविघ्न उपस्थितः तत्र चिन्ता पुनर्यज्ञसमापनयत्नश्च न युक्त इत्याह । मैति । अस्मिन् यज्ञविघ्ने ॥ ३४ ॥

यत्र देवेषु इन्द्रादिषु दुराग्रहः दुष्टो निराकरणार्थमा-ग्रहः यत्र चेन्द्रनिर्मितैः पाखण्डैर्धर्मव्यतिकरः स एव क्रतु-र्विरमताम् ॥ ३५ ॥

यज्ञात् वृत्ताणीनि मनःयुक्त अर्थं मुष्णातीति अभ्रमुट् एवं भूतो च इन्द्रस्तेन सृष्टैर्निर्मितैः हारिभिर्मनोहारिभिः ऋषकैः ह्रियमाणां धर्मा-त्मानमुर्व्विन्याकियमाणां विजयस्व ॥ ३६ ॥

हे वैन्य ! वेनस्यापचारात् अयुक्ताचरणात् लुप्तं समयानु-रूपे कालानुगुणं धर्मं परित्रातुं तस्य देहात् विष्णोः कलेवा-वतीर्णोऽसि ॥ ३७ ॥

हे प्रजापते ! अस्य विश्वस्य भवं भद्रं प्रति विश्वसृजां जननकानां मुनीनाम् सङ्कल्पनां भगवानेवावतीर्य विश्वस्य भद्रं-करिष्यतीत्येवं भूतं संकल्पं पिपीपृहि पूरय उपधर्मस्य पाखण्डधर्मस्य मातरं जननीं प्रचण्डमन्यैर्दुर्निवारणां विसृजय पाखण्डपथं च जहि ॥ ३८ ॥

तथा कृत्वा यज्ञसमाप्त्य भई स्यक्त्वा वात्सल्यं स्नेहं च कृत्वा मघोना इन्द्रेण सह संधिं मैत्रीमकरोत् ॥ ३९ ॥

कृतमवभृथमवभृथस्नानं येन तस्मै ये तद्धविषि तर्पिता-स्ते सुराः ददुः ॥ ४० ॥ ४१ ॥

तुष्टिं तद्वाक्येनाह । त्वयेति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकोनविंशाध्यायार्थप्रकाशः ॥ १९ ॥

भाषाटीका ।

हे द्विजो ! यह तुम देखो बड़ा धर्म का विपरीत है जो कि महाराज के यज्ञ के नाश करने की इच्छा से इन्द्र ने पाखण्ड रूप धारण किये हैं ॥ ३१ ॥

बड़ी भारी कीर्तिवाले पृथुमहाराज को एक कम सौ यज्ञ ही रहें तो भी कोई हानि नहीं है सब पूर्ण होजायगा महाराज से बोले हे महाराज ! आप यज्ञों को मत करो आप तो मोक्ष धर्म के ज्ञाता हो ॥ ३२ ॥

महेन्द्र अपने आत्माके अर्थ आप रोष करने की योग्य नहीं हो आपका कल्याण होगा आप दोनों भगवान के शरीर हो ॥ ३३ ॥

हे महाराज ! इस विषय में आप चिंतामत करो श्रद्धा युक्त मन से हमारे वचन को श्रवण करो जिससे कि ईश्वर की इच्छा जिस में न हो उस कार्य के करने को ध्यान करने वाले पुरुष का मन रुष्ट होकर और अज्ञान मोह में प्रविष्ट होजाता है ॥ ३४ ॥

इस यज्ञ की अब निवृत्ति होनी चाहिये जिसमें कि देवतों का आग्रह होगया है तिसी में इंद्र के निर्माण किये पाखंडों से धर्म का विनाश होगया ॥ ३५ ॥

मनुष्यों के मन को हरण करने वाले इन पाखंडों से मोहित मनुष्यों को देखो जो कि पाखंड तुमारे घोड़ा के हरने वाले यज्ञ में विघ्न करने वाले इंद्र ने निर्माण किये हैं ॥ ३६ ॥

आप तो वेनके अपचार से जो लुप्त होगया सबधर्मों का धर्म समयानुरूप तिसके रक्षा करने को वेन के शरीर से अवतार को प्राप्त भये हो साक्षात् विष्णु भगवान् के कला हो ॥ ३७ ॥

सो आप इस संसार की उत्पत्ति को विचार कर और प्रजा पतियों के संकल्प को पूरण करो खोटे धर्म को पैदा करने वाली जो इंद्र की माया सोई पाखंड मार्ग तिसका नाश करो ३८

मैत्रेयजी बोले इस प्रकार से लोक गुरु ब्रह्मा के आज्ञा देने से पृथु महाराज ने प्रेम करके इंद्र के साथ में संधि करके मित्रता मान लिया ॥ ३९ ॥

तब महाराज ने अवभृथ स्नान किया तब यज्ञ में तर्पित जो देवता उन सबों ने एकत्र होकर वरदान दिया ॥ ४० ॥

सत्य आशीर्वाद करने वाले ब्राह्मण संतुष्ट भये जिन्होंने श्रद्धा से दक्षिणा पाई है हे विदुरजी सत्कार युक्त होने से उन्हों ने आदि राज पृथु महाराज को आशीर्वादों के प्रयोग किये ॥४१॥

फिरबोले कि हे महाबाहो ! आपके बुलाने से हम सबलोग एकत्र आये पितर देवर्षि मनुष्य सबका दानमानसे आपने पूजन किया ॥ ४२ ॥

इतिश्रीमद्भागवत चतुर्थस्कन्ध
उन्नीसवां अध्यायका भाषानुवाद लक्ष्मणाचार्यकृत समाप्त॥ १९॥

विंशोऽध्यायः ।

मैत्रेय उवाच ।

भगवानपि वैकुण्ठः साकं मघवता विभुः ।
यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक् तमभाषत ॥ १ ॥

श्रीभगवानुवाच ।

एष ते कारषीद्भङ्गं हयमेधशतस्य ह ।
क्षमापयत आत्मानममुष्य क्षन्तुमर्हसि ॥ २ ॥
सुधियः साधवो लोके नरदेव ! नरोत्तमाः ।
नाभिद्रुह्यन्ति भूतेभ्यो यर्हि नात्मा कलेवरम् ॥ ३ ॥
पुरुषा यदि मुह्यन्ति त्वादृशा देवमायया ।
श्रम एव परं जातो दीर्घया वृद्धसेवया ॥ ४ ॥
अतः कायमिमं विद्वानविद्याकामकर्मभिः ।
आरब्ध इति नैवास्मिन् प्रतिबुद्धोऽनुषज्जते ॥ ५ ॥
असंसक्तः शरीरेऽस्मिन्नमुनोत्पादिते गृहे ।
अपत्ये द्रविणे वापि कः कुर्यान् ममतां बुधः ॥ ६ ॥
एकः शुद्धः स्वयं ज्योतिर्निर्गुणोऽसौ गुणाश्रयः ।
सर्वगोऽनावृतः साक्षी निरात्मात्मात्मनः परः ॥ ७ ॥
"देहाद्युपाधास्तत्कर्मा न स्युस्तद्द्रष्टुरात्मनः ।
कैवल्यं तस्य वैधर्म्यं तत्सुषुप्तं निदर्शनम्," ॥ *
य एवं सन्तमात्मानमात्मस्थं वेद पूरुषः ।
नाज्यते प्रकृतिस्थोऽपि तद्गुणैः स मयि स्थितः ॥ ८ ॥
यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः ।
भजते शनकैस्तस्य मनो राजन् ! प्रसीदति ॥ ९ ॥
परित्यक्तगुणः सम्यग्दर्शनो विशदाशयः ।
शान्तिं मे समवस्थानं ब्रह्म कैवल्यमश्नुते ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विंशे तु विष्णुना साक्षात् पृथोर्यज्ञेऽनुशासनम् ॥
वरदानप्रसङ्गेन प्रीतिस्थान्योऽस्यमीर्यते ॥ १ ॥

मघवता साकमिन्द्रेण सह वर्तमानः ॥ १ ॥

आत्मानं त्वां क्षमां कारयतोऽमुष्य त्वमपि क्षन्तुमर्हसि ॥ २ ॥

यर्हि यस्मात्कलेवरमात्मा न भवत्यतस्तदभिमानेन भूतानि नाभिद्रुह्यन्ति ॥ ३—४ ॥

अविद्याख्यरूपाज्ञानं ततः कामस्ततः कर्म तैरारब्ध इति विद्वान्नत एव प्रतिबुद्ध आत्मज्ञोऽस्मिन्नेवानुषज्जते ॥ ५ ॥

तथापि पुत्रादिममत्वेन भूतद्रोहेण च सक्तो भवेत्तत्राह । असंसक्त इति ॥ ६ ॥

प्रतिलोमक्रमं विवृण्वन्देहेऽनुषक्त्यभावमाह । एक इति द्वाभ्याम् । यस्मादात्मा आत्मनो देहात्परो भिन्नः तत्र नवधा वैधर्म्यवत्त्वेन भेदं साधयति । एक इति नवभिः पदैः । देहो हि बाल्ययुवादिभेदादनेकः मलिनश्च जडश्च सगुणश्च अकारणभूतगुणाभिन्नश्च परिच्छिन्नश्च गृहादिभिरावृतश्च दृश्यश्च सात्मा च आत्मा तु नैवमतो भिन्नः ॥ ७ ॥

* अयं श्लोकष्टीका सहितोऽधिको विजयध्वजवीरराघवयोर्वर्तते ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मस्थं स्वस्मिन् स्थितम् प्रकृतिस्थोऽपि देहस्थोऽपि तद्विकारैर्न लिप्यते यतः स मयि ब्रह्मणि स्थितः ॥ ८ ॥

इयमवस्था कस्योत्पद्यत इत्यपेक्षायामाह । यः स्वधर्मेणेति चतुर्भिः ॥ ९ ॥

भवतु मनः प्रसन्नं ततः किं तत्राह । यर्हि विशदाशयः प्रसन्नमनास्तदा परित्यक्तगुणः सन् सम्यग्दर्शनो भूत्वा शान्तिमश्नुते शान्तिमेवाह । मे मम सम्यगौदासीन्येनावस्थानमेव ब्रह्म तदेव कैवल्यमश्नुते ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं चतुर्मुखादेशानिवृत्तक्रोधः कृतशतक्रतुसख्य आसन्तर्विगद्देवगण आसीदित्युक्तम् अथ भगवता निवेदितेन्द्रक्षमापणः प्रतिबोधिततत्त्वत्रययाथात्म्यस्वधर्मैः परवरणप्रवर्तितः प्रतिनिवृत्तत्रिवर्गलिप्सः प्रपूजितपरमपुरुषः स्वपुरमगादित्याह । मुनिरेकोनविंशेन । भगवानपीति । षाड्गुण्यपूर्णो यज्ञरक्षकः सर्वयज्ञाराध्यो वैकुण्ठः परमपुरुषः पृथ्वनुष्ठितैर्यज्ञैः सम्यगाराधितो मघवता सह इन्द्रेण सह तं पृथुमभाषत जगाद ॥ १ ॥

उक्तमेवाह । एष इति । एष इन्द्रस्ते तव हयमेधशतस्याश्वमेधशतसंकल्पस्य हि यस्मात् भङ्गमकार्षीत् अत आत्मानं त्वां क्षमापयतः क्षमां कारयतः अमुष्य इन्द्रस्य क्षन्तुमर्हसि इन्द्रविषये क्षमां कर्तुमर्हसीत्यर्थः ॥ २ ॥

कथं दुःसहोऽपराधः क्षन्तुं शक्यस्तत्राह । सुधिय इति । हे नरदेव! लोके नरोत्तमाः सुधियः देहात्मयाथात्म्यविदः साधवः परोपकारपराः भूतेभ्य आगस्कृद्भ्योऽपि भूतेभ्यः नाभिद्रुह्यन्ति कुतः यर्हि यस्मात्कलेवरमनात्मा आत्मेतरत् अतस्तदभिमानेन द्रोहं न कुर्वन्तीत्यर्थः सुधिया सोढुं शक्य एवेति भावः ॥ ३ ॥

एवमन्वयमुखेन सुधियां भूतद्रोहाकरणमभिधाय व्यतिरेकमुखेनाह । पुरुषा इति । यदि त्वादृशाः सुधियः पुरुषा ईश्वरमायया यदि मुह्यन्ति देहात्ममोहेन देहप्रयुक्तभूतद्रोहादिकं कुर्वन्ति तर्हि त्वादृशैश्चिरकालकृतया महतां सेवया श्रम एव परं केवलं जातः सम्पादितः ते बुधिय एवेति भावः ॥ ४ ॥

अतः सुधियां देहात्माभिमानप्रयुक्तभूतद्रोहादेरभावात् अन्यथा दुर्धीत्वप्रसङ्गाच्च इमं कायं देहमविद्याकामकर्मभिः अविद्या अज्ञानं तच्च देहात्माभिमानस्वतन्त्रात्माभिमानरूपेण द्विविधं कामः आविद्यामूलकः शब्दादिविषयेष्विच्छाविशेषः कर्म काममूलकं पुण्यापुण्यरूपम् एभिरारब्धः उत्पादित इत्येवमिमं कायं देहं विद्वान् जानन् अत एव प्रतिबुद्धः चिदचिदीशयाथात्म्यज्ञः अस्मिन् देहे नैवानुषज्जते एवकारेण नितरामासक्त्यभावः सूच्यते ॥ ५ ॥

देह एवानासक्तः कथं देहानुबन्धिष्वासक्तः स्यादित्याह । असंसक्त इति । अस्मिन् शरीरे असंसक्तः समित्येकीकारे आत्मना सह देहमेकीकृत्य तस्मिन्नासक्त इत्यर्थः अमुना शरीरेणोत्पादिते सम्पादिते गृहे अपत्ये पुत्रादौ द्रविणे वित्ते च ममतां को वा बुधः कुर्यात् न कोऽपि बुधः कुर्यात् अज्ञस्तु कुर्यादित्यर्थः अतो बुधः देहार्थे देहानुबन्ध्यर्थे वा भूतद्रोहादिकं न कुर्यादिति भावः ॥ ६ ॥

[illegible] इत्यनेन चिदचिदीशयाथात्म्यज्ञानवत्त्वमुपक्षिप्तं तत्की- [illegible] वेक्षायां तत्र एक इति श्लोकाभ्याम् चिदचिदीशस्वरूपं [illegible] च एवमित्येकेन आत्मयाथात्म्यज्ञानयोगस्य भगवद्- [illegible] तत एकेन कर्मयोगस्य तदङ्गत्वमभिधाय तदुभयानुगृहीतभक्तियोगस्य भगवत्प्राप्त्युपायतामभिधायैवंभूतभगवदुपासननिष्ठस्य देहानुबन्धिप्रयुक्तविकारा न स्युरित्याह । एक इत्यादिना । प्रकृतिविविक्तात्मस्वरूपशोधनेन प्रकृतिपरिणामरूपदेहस्य तद्विपरीतधर्मवत्त्वस्यार्थादेव सिद्धेः पृथक् तच्छोधनं नापेक्षितमिति तावदात्मस्वरूपं प्रकृतिविविक्तं शोधयति । एकः ज्ञानैकाकारतया सर्वत्र एकस्वरूपः "एको व्रीहिः सुसंपन्नः सुपुष्टं कुरुते प्रजा,, इति वदयं निर्देशः नानाकारेषु देवमनुष्यादिशरीरेष्ववस्थितोऽपि सर्वत्र ज्ञानैकाकारतया सर्वत्र एकस्वरूप इत्यर्थः देहस्तु देवमनुष्यपशुपादपतद्वान्तरभेदभिन्नः । शुद्धः निर्मलः देहस्तु मलिनः । स्वयं ज्योतिः स्वयं प्रकाशः निर्गुणः रागद्वेषादिरहितः गुणाश्रयः ज्ञानानन्दादिगुणाश्रयः सर्वगः अणुस्वरूपत्वेऽपि धर्मभूतज्ञानेन सर्वव्यापी अनावृतः देह इव गृहादिभिरनावृतः साक्षी देहेन्द्रियादीनामपरोक्षं द्रष्टा देहस्तु परप्रकाश्यः रागद्वेषादिगुणाश्रयः ज्ञानादिगुणानाश्रयः व्याप्यः आवृतः दृश्यश्चेत्यर्थसिद्धं परं केवलमात्मा देहादिष्वन्तः प्रविश्य धारकः देहस्तु धार्यः अत आत्मनः देहात्परः विलक्षणः ॥ ७ ॥

अत एव देहादिभिःउपात्ताः स्वीकृताः आदिशब्दः प्राणेन्द्रियपरः तद्धर्माः तेषां देहादीनां धर्माः बाल्ययौवनाशनायापिपासादयः तच्छब्देन बाल्यादीनां तदेकान्तत्वं सूच्यते तद्गुणास्तस्य देहादेर्गुणास्तस्य जीवस्य न स्युः तस्य आत्मनो यत्कैवल्यं देहगतजात्यादिराहित्यमेव तस्य देहादिधर्मसंयुक्तं देहविलक्षणमात्मस्वरूपं कदा स्फुरतीत्याशङ्कायां सुषुप्त्युत्क्रान्त्योरित्यभिप्रयन् तत्र सुषुप्तेर्जीवदवस्थायामेवाहरहरनुभूयमानत्वेन सुषुप्तिरेव निदर्शनमित्याह तत् तत्र सुषुप्तं सुषुप्तिः भावेक्तः निदर्शनमुदाहरणमित्यर्थः सुषुप्तौ हि देहगतजात्यावाद्याकारो नानुभूयते किन्तु देहादिविलक्षणं स्वस्वरूपं तथा चोक्तं तृतीये भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया । लीनेष्वसति यस्तत्र निर्दिष्टो निरहंक्रिय । इति निरहंक्रिय इत्यनेन देहतद्धर्माणां चात्मप्रतीत्यविषयत्वमुच्यते एवं प्रकृतिपुरुषयोः स्वरूपे निरूपिते बद्धा इदं श्लोकद्वयं प्रधानजीवविलक्षणपरमात्मस्वरूपकथनपरं प्रकृतिपुरुषस्वरूपं त्वर्थाद्विशोधितं भवति प्रकृतिविविक्तात्मस्वरूपविवेचनपरत्वे हि सुषुप्तं तन्निदर्शनमित्यस्वरसं स्यात्सुषुप्तौ देहादेरप्रतीतावपि उक्तविधत्वेनात्मस्वरूपस्याप्रतीतेः तस्मादयमर्थः एकः स्वसमाभ्यधिकः द्वितीयवस्त्वन्तररहितः शुद्धः अपापविद्धः अपहतपाप्मेत्यर्थः स्वयंज्योतिः निरुपाधिकः स्वयंप्रकाशः निर्गुणः प्रकृतिपुरुषगतासत्वदुःखित्वादिहेयगुणरहितः गुणाश्रयः अनन्तकल्याणगुणाश्रयः सर्वगः स्वरूपतः स्वभावतश्च विभुः अनावृतः देहादिष्ववस्थितोऽपि तैरपरिच्छिन्नः साक्षी सर्वं युगपत्साक्षात्कर्ता उदासीनो वा आत्मनः उक्ताकारविपरीताज्जीवात्परः विलक्षणः परमात्मा परो मा यस्मात्स परमः स चासौ आत्मा च स्वसमानाधिकात्मान्तराव्याप्तः स्वव्यतिरिक्तस्य सर्वस्यान्तः प्रविश्य प्रशासनेन धारकः जीवस्तु नैकः किन्तु बहवः समानाकाराः "नित्यो नित्यानां चेतनश्चेतनानां नत्वेवाहं जातु नासम,, इत्यादिकमत्रानुसन्धेयं यद्यपि जीवस्वरूपमपि स्वयं ज्योतिरेव तथापि तत्स्वरूपसत्तास्थितिप्रवृत्त्यादेः परमात्मेच्छायत्तत्वस्य । "द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया,, इति स्मरणात् न निरुपाधिकस्वयंज्योतिष्ट्वं तथा जीवो

श्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

देहाद्यात्तमन्त्रेपादियुक्तः नातिशुद्धः, यद्यपि प्रजापतिवाक्ये जीवस्याप्यपहतपाप्मत्वं "य एष आत्मापहतपाप्मा" इत्यादिना श्रुतं तथापि तत्कर्मणा संकुचितं मुक्तौ तत्परमात्मप्रसादादाविर्भूतमिति न सर्वदा विशुद्धत्वं तथाच श्रुतिः "एवं सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिसम्पद्यत,, इति सूत्रं च "सम्पद्याविर्भावः स्वेन शब्दात्,इति तथा कल्याणगुणाश्रयो न भवति किन्तु दुःखित्वादिहेयगुणाश्रयः अत्र निर्गुणगुणाश्रयशब्दाभ्यां हेयगुणनिषेधकल्याणविधी विवक्षितौ अत्र न हिंस्यात्पशुमालभेतेति च उत्सर्गापवादनयेन दहरविद्यायां य एष आत्मापहतपाप्मेत्यादिना हेयगुणान् प्रतिषिध्य सत्यकाम इत्यादिना कल्याणगुणान् विदधती श्रुतिरेव प्रमाणं तथापि जीवो न सर्वगः अणुत्वात् तथाच श्रुतिः "एषोऽणुरात्मा चेतसा वेदितव्यः आराग्रमात्रो ह्यवरोऽपि दृष्टः,, इति अत एव परिच्छिन्नः नापि साक्षी किन्तु कर्मफलभोक्ता तथाच श्रूयते "तयोरन्यः पिप्पलं स्वाद्वत्ति" इति तथाच स्वस्मादधिकेन परमात्मना व्याप्यः धार्यश्च य आत्मनि तिष्ठन्नित्यादि श्रुतेः एवं जीवस्वरूपमर्थाद्विविक्तं द्रष्टव्यं पूर्वव्याख्योक्तरीत्या प्रकृतिस्वरूपमपि यतएव प्रकृतिपुरुषाभ्यां विलक्षणः परमात्मा अतएव हेतोः देहाद्युपात्तादिशब्देन जीवसंग्रहः देहैर्जीवैश्चोपात्ताः परिणामित्वकिञ्चिज्ज्ञत्वदुःखित्वादयः औपाधिका धर्मा: तद्धर्माः प्रकृतिपुरुषैकान्ताश्रुतत्वाणुत्वादयः स्वाभाविकाश्च तद्द्रष्टुः प्रकृतिपुरुषयोः साक्षात्कर्तुः आत्मनः तयोरन्तर्व्याप्यावस्थितस्य परमपुरुषस्य न स्युः कैवल्यं प्रकृतिपुरुषगतपरात्मत्वाणुत्वादिविपरीतमत्यन्तस्वापरिच्छिन्नत्वादिधर्मवत्त्वमेव कैवल्यं प्रकृतिपुरुषाभ्यां वैलक्षण्यं नामेत्यर्थः तत्तत्र जीवात्परमात्मनो वैधर्म्ये सुषुप्तं सुषुप्तिः निदर्शनमुदाहरणमित्यर्थः सुषुप्तग्रहणमुत्क्रान्तेरप्युपलक्षणं तथाहि सुषुप्त्युत्क्रान्त्योः प्रत्यगात्मनोऽर्थान्तरत्वेन परमात्मनो व्यपदेशो दृश्यते तावद्वाजसनेयके "कतम आत्मा योऽयं विज्ञानमयः प्राणेषु,, इति प्रकृतस्य प्रत्यगात्मनः सुषुप्त्यवस्थायामकिञ्चिज्ज्ञस्य सर्वज्ञेन परमात्मना परिष्वङ्ग आम्नायते "प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्,, इति तथा उत्क्रान्तावपि प्राज्ञेनात्मनान्वारूढ उत्सर्जन् यातीति न च स्वपत उत्क्रामतो वास्य किञ्चिज्ज्ञस्य तदानीमेव स्वेनैव सर्वज्ञेन सता परिष्वङ्गान्वारोहौ संभवतः न च क्षेत्रज्ञान्तरेण। तस्यापि सर्वज्ञत्वासम्भवात् तस्मात्तत्र प्राज्ञेनेति सर्वज्ञः परमात्मा उक्तः न बाह्यं किञ्चन वेद नान्तरमित्यज्ञो जीव उच्यते तस्मादत्र वैधर्म्यं निदर्शितं तथाच सूत्रं "सुषुप्त्युत्क्रान्त्योर्भेदेन,, इति ॥ * ॥

यद्वेति। यः पुमान् एवं परमात्मनो धार्यतया व्याप्यतया आत्मनि परमात्मनि स्थितमात्मानं प्रत्यगात्मानं वेद उपास्ते न तु तदुपासनमात्रपरः किन्तु मयि अन्तर्यामिणि पूर्वोक्तैकत्वादिधर्मिणि स्थितः मदुपासननिष्ठ इति यावत् तिष्ठतेर्धातोरुपासनपरत्वम् "अभयं प्रतिष्ठां विन्दते तन्निष्ठस्य मोक्षोपदेशात्,, इत्यादिश्रुतिसूत्रादिषु प्रयोगादवगम्यते ज्ञानयोगानुगृहीतभक्तियोगनिष्ठ इत्यर्थः प्रकृतिस्थोऽपि उपासनदशायां प्रकृतिविशिष्टोऽप्युपासनानिष्पत्त्यनन्तरं तद्गुणैः प्रकृतिगुणैर्न युज्यते किन्तु मुक्तो भवेदित्यर्थः ॥ ८ ॥

एवं यः पुमान् स्वधर्मेण स्ववर्णाश्रमोचितपञ्चमहायज्ञादिनित्यनैमित्तिकादिधर्मेण निराशीः स्वधर्मसाध्यफलेष्वाशारहितः अनभिसंहितफलकर्तृत्वश्च इत्यर्थः मां सर्वकर्माराध्यमिन्द्राग्निसर्वदेवताशरीरं सर्वकर्मफलप्रदं नित्यं श्रद्धया कर्तव्येषु कर्मसु त्वरया भजते हे राजन्! पृथो! तस्य ज्ञानकर्मयोगाभ्यामनुगृहीतभगवद्भक्तियोगनिष्ठस्य मनः शनकैः प्रसीदति दारादिभिरकलुषितं भवति ॥ ९ ॥

एवं परित्यक्तगुणः कात्स्न्र्येन त्यक्तरागादिगुणः अत एव विशदाशयः निर्मलान्तःकरणः अत एव सम्यग्दर्शनः उक्तविधात्मस्वरूपतद्विलक्षणपरमात्मस्वरूपदर्शी शान्तमशनायाद्यूर्मिषट्करहितं मे मत्संबन्धि समवस्थानं सम्यगावासभूतं मच्छरीरभूतमित्यर्थः ब्रह्म गुणतो बृहत्त्वाद्ब्रह्मशब्दवाच्यं कैवल्यं केवलप्रकृतिवियुक्तमाविर्भूतापहतपाप्मत्वादिगुणकमात्मस्वरूपम् अश्नुते प्राप्नोति ब्रह्मात्मकाविर्भूतगुणाष्टकस्वरूपेण सम्पन्नो भवति मुक्तो भवतीति यावत् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अत्रोत्तमगुरुणा स्वयोग्योपासनाविषयो हरिरुपदेष्टव्य इति बोधयितुं पृथुजीवाय हरिणा स्वात्मोपदिष्टयत इति प्रतिपादयितुमाह। भगवानिति। अपिशब्दस्य ब्रह्ममात्रेण पुनः समुच्चयः कार्यमित्युक्तेन स्वामित्वेन भोक्तृत्वेनाप्येक एवोच्यत इति दर्शनाय वैकुण्ठाभिधानग्रहणं वशब्दनामपूजयेद इति समुच्चिनोति जगदुत्पत्तौ विश्लिष्टानां भूतानां संयोजकत्वाद्वैकुण्ठः तदुक्तम् शान्तिपर्वणि।

> मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना।
> वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मनेति॥
> अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च इति ॥ १ ॥

इयमेधशततमस्येति व्याख्येयम् अन्यथा चरमाश्वमेधासिद्ध्या तदेकभङ्गाभावेन सर्वभङ्गापत्त्या त्वमेकोनशतक्रतुरित्यनुपपन्नं स्यादिममर्थं ग्रन्थान्तरे सिद्धं हेत्यनेन सूचयति किमत्र कार्यं तदाज्ञापयेति तत्राह। क्षमापयत इति। आत्मानं त्वां क्षमापयतोऽमुष्येन्द्रस्य क्षन्तुमर्हसीत्यन्वयः आत्मानं मां क्षमापयत इति वा त्वयि सन्निहितत्वेन तव विरोधाचरणं ममेति तत्तस्मान्मम क्षमापणं प्रार्थनमित्यर्थः ॥ २ ॥

अक्षमा साधुगुणो न स्यादित्याह। सुधिय इति। तत्र निमित्तमाह। यर्हीति। कलेवरमनात्मा जडमत एवानित्यं यर्हि यस्मात्-तस्मात् ॥ ३ ॥

इतोऽपि क्षमाकर्तव्येति व्यतिरेकमुखेनाह। पुरुषा इति ॥ ४ ॥

तत्किन्तत्राह। अतएवेति ॥ ५ ॥

शरीरासङ्गफलमाह। असंसक्त इति। अमुना देहेन पुत्रादिगतममताबुद्धित्यागः फलमित्यर्थः ॥ ६ ॥

शरीराद्यासक्तिरप्येकत्वादिगुणविशिष्टपरमात्मज्ञानिन एव सुदृढा स्यादित्यतस्तत्स्वरूपं निरूपयति। एक इत्यादिना। वेदादिष्वेकत्वादिकमौपचारिकं हरौ तु निरुपचरितमिति बोधनाय वेदान्तसिद्धगुणाननुपदिशति। तथाहि। "एको देव इति न जायते म्रियते वा विपश्चित्" इति जननादिदोषाभावाच्छुद्धः पूर्णः स्वतः शुद्धबुद्धस्वरूपो नित्यचिन्मय इति "अथायं पुरुषः स्वयंज्योतिः परं ज्योतिरुपसम्पद्यते केवलो निर्गुणश्चेति विज्ञानमानन्दं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मेति अन्तर्बहिश्चान्तरसर्वम्„ इति अनावृतः स्वस्यान्येषामावृत एव "अन्येषामावृतां विष्णुः स्वस्यानावृत एव च„ इति साक्षी चेति निर्गत आत्मा स्वामी यस्य स निरात्मा तस्यात्मान्यो न विद्यत इति अनात्मनो गुणराशिरहिताज्जीवराशेः परः उत्तमः पुरुष-स्तस्यन्य इति ॥ ७ ॥

हरेः सर्वगतत्वेन जननादिदेहधर्माः सम्भवन्त्युत कथं देहि-परत्वमत्राह । देहादीति । देहप्रभृतिनश्चर्मा देहधर्मा जननादय-स्तद्द्रष्टुस्तेषां धर्माणां द्रष्टुः "आत्मनः सर्वस्य जगतोऽन्तर्या-मिणो हरेर्नस्पृरित्यन्वयः "आत्मा सर्वस्य जगतस्तस्यात्मान्यो न विद्यत„ इति कीदृशा अपार्थाः पुरुषार्थाख्यप्रयोजनशून्याः हरेर्धर्मः क इति तत्राह । कैवल्यमिति । "अनन्यसदृशत्वाच्च केवलोऽसौ हरिः स्मृत„ इति वचनात् कैवल्यं सामान्यसादृश्य-राहित्यं धर्म इत्यर्थः वा इत्येतत्सत्स्वभावः कैवल्यमिति वाक्यं सूचयति नित्यानिर्दुःखत्वं च तस्य धर्मस्तद्दृष्टान्तारोहयति । सुषुप्तमिति । तस्य धर्मस्य निदर्शनं दृष्टान्तः सुषुप्तं शरीराभि-मानाभावेन हर्यैकस्थितिः सुषुप्तिर्नाम नहि तदा तु क्लेशोऽस्ति "सता सोम्य तदा सम्पन्नो भवति„ इतिश्रुतेः (१) सुषुप्तवच्चानिर्दुःखोजा-नन्द प्रवृत्तिमानिति च आत्मावगम्यत्वं वा तद्धर्मः अत्रापि सुषुप्त-दृष्टान्तं हि मानम (२) तदापि अन्यज्ञानाभावेनाहमिति स्वरूप-ज्ञानवेद्यत्वात्

आत्मनैवावगम्यत्वाच्चास्तीव सुषुप्तवत् ।

केवलत्वेन विज्ञेयो मुक्तस्तद्वद्दुःखतेति च ॥ ० ॥

भगवद्धर्मकथनफलमाह । य एवं सन्तमिति । यः पुरुष एवं सन्तमात्मस्थं जीवान्तर्यामिणमात्मानं वेद स प्रकृतिस्थोऽपि तस्य शरीरगुणैः क्षुत्पिपासादिलक्षणैर्नाज्यते न लिप्यते समवस्थितः मय्यवस्थितचित्तत्वादिति हेतुगर्भविशेषणम् ॥ ८ ॥

मनः प्रसादस्य प्रथमसाधनत्वात्तत्सम्भवः केन स्यादिति तत्राह । य इति ॥ ९ ॥

मनःप्रसादफलमाह । परित्यक्तगुण इति । परितस्त्यक्ता गुणा-विषयवासना येन स तथा समवस्थानं निर्विकारं ब्रह्म कैवल्यं स्वस्व-योग्यतानुरोधेन पूर्णतावलक्षणं कवलाभावं तल्लक्षणा शान्तिमे प्रसा-दान्मुक्तिमश्नुत इत्यन्वयः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एष ते ह्यकरोद्विघ्नमिति क्वचित् पाठः ॥ १ ॥ २ ॥

प्रथमं ज्ञानद्वारा तं सान्त्वयति । सुधिय इत्यादिभिः । कले-वरमत्र स्थूलसूक्ष्मात्मकम् ॥ ३ ॥ ४ ॥

तत्रासंसक्त इत्यादिना देहद्वयविलक्षणं शुद्धं जीवात्मानं किञ्चित् प्रतिबोधाय सूचयित्वा सम्यक्प्रतिबोधाय परमात्मानमुपदिशति । एक इति । असौ जीवादिशब्दगोचर आत्मा परमात्मा स्व आत्मा आत्मनः शुद्धात् जीवात्परः यतोऽसौ एकः जीवस्तु नाना असौ शुद्धः असम्भाव्यदीपसङ्गः सतु अज्ञानवशावच्छिन्नत्वेन शुद्धः भगवद्-भावादसौ मुख्यत्वेन स्वयंज्योतिः सतु रश्मिस्थानीयत्वा-

असौ गुणेभ्यो निर्गतः सर्वथैव सिद्धः स तु अवा-

---

(१) अवस्थापन्नो जीवस्तत्स्वार्थः ।

(२) तदजीवस्यापि ।

नेन तदभिमानसम्बद्धः असौ सूर्यस्थानीयः । असौ गुणाना-माश्रय एव सतु तद्व्याप्यः असौ विभुः सर्वज्ञः असौ देहादिभ्यो ऽन्यमावृतः सत्त्वावृतः असौ स्वव्याप्यव्याप्त्याः साक्षी सतु तद्द्व-ष्टत्वमयशक्तित्वादेव । असावेवास्यान्तररहितः सतु तदा-त्मकः ॥ ५ ॥ ६ ॥ ७ ॥

आत्मस्थं शुद्धजीवान्तर्यामित्वेन स्थितम् । मयि स्थितो मदा-श्रितत्वेनानुसन्धायी ॥ ८ ॥ ९ ॥

मम समवस्थानं शक्त्यादिविशिष्टतयाविर्भावविशेषः तदेव ब्रह्म कैवल्यमश्नुते अनुभवति ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विभो प्रीति सहेन्द्रेण विष्णुना बोधितः पृथुः ।

चकार तुष्टावच्च तं स वस्त्राग्रहादरं प्रभुः ॥ ० ॥

ततश्च भगवानपि प्रादुर्भूय स्वांशमिन्द्रमुपानीय सन्धिं कार-यन् पृथुं प्रबोधयामासेत्याह । भगवानपीति ॥ १ ॥

आत्मानं त्वां क्षमां कारयतोऽमुष्य ॥ २ ॥

यर्हि यतः कलेवरमात्मा न भवति अतस्तत्राभिमानानौचि-त्यात् । कुतो भूतद्रोहः सम्भवेदित्यर्थः ॥ ३ ॥

भगवन्मायया मोहनादेव भवेदिति चेत्तत्राह । पुरुषा इति ॥४॥

अतो वृद्धसेवयैव मायानाशनात् प्रतिबुद्धः प्रतिबोधमेवाह अविद्ययैव कामः कामादेव कर्माणि तैरारब्धोऽयमिति एवं काय विद्वान् जानन् ॥ ५—६ ॥

असंसक्तः कारणमात्मज्ञानमतः परमात्मज्ञानमुपदिशति । एक इति । आत्मा परमात्मा आत्मनो देहात् जीवाच्च परो भिन्नः एकः । देहो जीवश्चानेकः ! परमशुद्धः प्रकाशहीनः अगुणः गुण-जन्यत्वात् गुणाधीनत्वाच्च गुणाश्रित अजत्वादनुरूपत्वाच्चास्वदृक्ः देहेन गृहादिभिश्चावृतः अचेतनत्वात् कलेवरदृष्टत्वाच्चासाक्षी । स जीवत्वात् स परमात्मकत्वाच्च सात्मेति देहजीवाभ्यां सम्यक् वैलक्षण्यं परमात्मन उक्तम् । एतेनैव जीवस्य देहेन सह सम्यक् वैलक्षण्यं च दर्शितमिति ॥ ७ ॥

स प्रकृतिस्थः देहस्थोऽपि देहगुणैर्नाज्यते इति न देहस्थ इत्यर्थः ॥ ८ ॥

अयमुक्तलक्षणः प्रबोधो भक्तिमिश्रेण ज्ञानेन यतमानस्य भव-तीति तत्साधनमाह । य इति ॥ ९ ॥

तत्फलमाह । परीति सायुज्यमाशान्तिम् अश्नुते शान्तिमेवाह मे समवस्थानं मम समं निर्भेदमवस्थानं सामान्यावस्थां आगुरि-मतेऽकारलोपः । तद्ब्रह्म कैवल्यम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवदुपदेशात्सन्तुष्टमनाः पृथुः देवराजं परिष्वज्य विद्वेषं त्यक्तवान् भगवानपि पृथवे वरं दत्त्वा स्वलोकं प्रययावेति वर्ण्यते भगवानपीति विंशेनाध्यायेन आत्मानं त्वां क्षमापयतोऽमुष्य चन्तुमर्हसि ॥ १ ॥ २ ॥

भूतेभ्यः कलेवरप्रतिकूलेभ्योऽपि हृदयर्थोदाविप्यते यर्हि कले-वरमात्मा न भवति अतो नाभिद्रुह्यन्ति ॥ ३ ॥

देवस्य मम मायया प्रकृत्या ॥ ४ ॥

उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनाम् ।
कूटस्थमिममात्मानं यो वेदाप्नोति शोभनम् ॥ ११ ॥
भिन्नस्य लिङ्गस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः ।
दृष्टासु संपत्सु विपत्सु सूरयो न विक्रियन्ते मयि बद्धसौहृदाः ॥ १२ ॥
समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेन्द्रियाशयः ।
मयोपक्लृप्ताखिललोकसंयुतो विधत्स्व वीराखिललोकरक्षणम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु कलेवरद्वारा तत्प्रतिकूलभूतकृतोपद्रव आत्मनि फलति तदा कलेवरस्यानात्मत्वेऽपि कथम्भूतेऽयो न द्रुह्यन्तीत्यत आह । अत इति। अतः वृद्धसेवातः अविद्या अनादितःआत्मानात्मपरमात्मस्वरूपाज्ञानं तन्मूलः कामो विषयाभिलाषस्तन्मूलानि कर्माणि तैः शुभाशुभकर्मफलायतनो देह आरब्धः इत्येवममुं कायं देहं विद्वान् प्रबुद्धः नान्यो द्रोहादिविषयः मम कर्मानुसारेणेश्वरप्रेरितानि सुखदुःखानि भवन्तीति ज्ञानवान् अस्मिन् काये नैव सज्जते इत्यन्वयः एतानि भूतानि मम कायप्रतिकूलानि अतो मम द्रोहविषयाणीति न द्रुह्यतीति भावः ॥ ५ ॥ ६ ॥

नात्मा कलेवरमित्यनेन कलेवरादन्य आत्मेत्युक्तं तच्चात्मनः पुरुषा इत्यनेनानेकत्वमुक्तं यत्तु देवशब्देन मायास्वाम्युक्तः स एक इत्याकाङ्क्षायाम् "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्,, इतिश्रुतिमुपबृंहयन् जीवात्मनः परः स परमात्मेत्याह। एक इति । निर्गुणः प्राकृतगुणरहितः गुणाश्रयः कल्याणगुणाश्रयः निरात्मा निर्गत आत्माश्रयो यस्य स्वाश्रय इत्यर्थः । आत्मा अन्तर्यामी आत्मनः जीवात्परस्तदुपास्यः ॥ ७ ॥

पुरुषा यदि मुह्यन्तीत्यनेन श्लोकेन देवमायामोहितत्वेन बद्धत्वं जीवानामुक्तं ततः केनोपायेन मुक्तिरित्याकाङ्क्षायां मद्विषयकज्ञानमत्स्वाराधनसाधनैर्मुक्तिर्भवतीत्याह । य एवमिति त्रिभिः । आत्मस्थमन्तर्यामिणम् ॥ ८ ॥ ९ ॥

परित्यक्तगुणः गुणातीतः सम्यग्दर्शनः सम्यग्ज्ञानवान् अत एव समवस्थानं महात्मकत्वेनावस्थानमश्नुते अत एव मे शान्ति ध्यानसमाधिनिष्ठामत एव ब्रह्मकैवल्यं ब्रह्मभावापत्तिलक्षणं मोक्षं चाश्नुते ॥ १० ॥

———

भाषाटीका।

मैत्रेयजी बोले वैकुंठ भगवान् श्री प्रभु यज्ञपति यज्ञभोक्ता यज्ञों से सन्तुष्ट होकर इंद्रके सहित उपस्थित होकर पृथु महाराज से बोले ॥ १ ॥

श्रीभगवान् बोले आप के अश्व मेध का भंग इन इंद्रने किया है अब ए अपनी क्षमा कराते हैं सो आप क्षमा करने को योग्य हो ॥ २ ॥

हे नरदेव ! संसार में साधु जो मनुष्य उत्तम हैं सुंदर बुद्धि वाले सो शरीर आत्मा नहीं है इस विचार से शरीर के निमित्त से किसी का द्रोह नहीं करते हैं ॥ ३ ॥

आपसे पुरुष भी यदि परमेश्वर की माया से मोहित होजायं तो दीर्घ काल पर्यंत जो ज्ञान वृद्धों की सेवा करनी है तिसमें केवल परिश्रम ही मात्र हुआ जानना चाहिये ॥ ४ ॥

इसी से ज्ञानी पुरुष इस शरीर को अज्ञान के कामना शुभाशुभ कर्मों से रचित जानकर स्वयं मोक्षार्थी होने से इसमें आसक्त नहीं होते हैं ॥ ५ ॥

यदि शरीर में आसक्ति नहीं होगी तो इसी शरीर के सम्बन्ध से भये पुत्र धनादिकमें पंडित होकर कौन ममता करेगा॥६॥

देह का आत्मा का भेद इन हेतुओं से देखो जैसे देह तो अवस्था के भेद से बदलकर अनेक होजाते हैं आत्मा एकही है देह तो मलिन है आत्मा शुद्ध है देह तो जड़ है आत्मा स्वयं प्रकाश है देह अनेक गुणों वाला है आत्मा उन गुणों से रहित हैं देह गुणों के आश्रयसे बना है आत्मा में तो ज्ञानादिगुण सदा रहते हैं देह तो एक देश में है आत्मा तो सूक्ष्म होने से सर्वत्र प्रविष्ट होने वाला है देह तो घर के भीतर रह जाता है आत्मा किसी के भीतर ही मात्र नहीं रहता है देह तो दृश्य है आत्मा द्रष्टा साक्षीहै देह तो आत्माके आधीन है आत्मा स्वतन्त्र है ॥ ७ ॥

देहादिकों के जो विकारी धर्म सो उनके द्रष्टा आत्माके नहींहैं आत्मा का एक स्वभाव से रहना उनसे भेद है उस में दृष्टांत जैसे सुषुप्ति अवस्था में सब विषयों से अलग आत्मा रहता है ॥ ०॥

जो पुरुष इस प्रकार से शरीर मे स्थित आत्मा को जानता है सो शरीर में स्थित होने से भी प्रकृति के गुणों से लिप्त नहीं होता है क्योंकि वह हमारे आश्रित है ॥ ८ ॥

जो निष्काम होकर श्रद्धासे अपने वर्णाश्रम धर्मों से मेरा सेवन करता है हे राजन्! उसका मन धीरेसे शान्त होजाता है॥९॥

जब शांत प्रसन्न मन होजाता है तब सब गुण छूट जाते हैं निर्मल ज्ञान होजाता है तब हमारे स्वरूप में स्थित होने से शान्ति कैवल्य ब्रह्म को प्राप्त होजाता है ॥ १० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

सम्यग्दर्शनमेवाह । उदासीनमेवात्मानं द्रव्यज्ञानक्रियात्मनः देहज्ञानकर्मेन्द्रियमनसामध्यक्षमिवस्थितमात्मानं यो वेद ॥ ११ ॥

संसारिणः कथं कूटस्थत्वमतआह । भिन्नस्य लिङ्गस्य देहस्यैव गुणप्रवाहः संसारः भिन्नत्वे हेतुः द्रव्याद्यात्मकस्य तत्र चेतना चिदाभासः अतो दृष्टासु प्राप्तासु हर्षशोकादिभिर्न विक्रियन्ते ॥ १२ ॥

त्वं च सूरिरतः सुखे दुःखे च समः सन् समानाउत्तममध्यमाधमा यस्य जितानीन्द्रियाण्याशयश्च येन स त्वमखिललोकरक्षणं विधत्स्व कथमेकेन मया रक्षणं कर्तुं शक्यं तत्राह । मयैवाखिलोपक्लृप्ताः संपादिता येऽखिला लोका अमात्यादयस्तैः संयुतः ॥ १३ ॥

श्रेयः प्रजापालनमेव राज्ञो यत्सांपराये सुकृतात्षष्ठमंशम् ।
हर्ताऽन्यथा हृतपुण्यः प्रजानामरक्षिता करहारोऽघमत्ति ॥ १४ ॥
एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽविताऽस्याः ।
ह्रस्वेन कालेन गृहोपयातान् द्रष्टासि सिद्धाननुरक्तलोकः ॥ १५ ॥
वरं च मत्कंचन मानवेन्द्र ! वृणीष्व तेऽहं गुणशीलयन्त्रितः ।
नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यत्समचित्तवर्ती * ॥१६॥

मैत्रेय उवाच

स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् ।
अनुशासित आदेशं शिरसा जगृहे हरेः ॥१७॥
स्पृशन्तं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा ।
शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥ १८ ॥
भगवानथ विश्वात्मा पृथुनोपहृतार्हणः ।
समुज्जिहानया भक्त्या गृहीतचरणाम्बुजः ॥१९॥
प्रस्थानाभिमुखोऽप्येनमनुग्रहविलम्बितः ।
पश्यन् पद्मपलाशाक्षो न प्रतस्थे सुहृत् सताम् ॥२०॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु रक्षणे दण्डादिसापेक्षमतस्तपोऽन्यद्वा पुण्यं करिष्यामीति चेत्तत्राह । श्रेय इति । यद्यस्मात् सांपराये परलोके प्रजाभिः कृतात्सुकृतात्षष्ठमंशं हर्ता हरति अरक्षणे दोषमाह । अन्यथा प्रजाभिर्हृतं पुण्यं यस्य स प्रजानामघमत्ति पापं भुङ्क्ते अन्यथेत्यस्य विवरणं करहारः सन् न रक्षिता चेत् ॥ १४ ॥

एवञ्च मोक्षोऽप्यनायासेन भविष्यतीत्याह । द्विजाग्र्याणामनुमतश्चासौ अनुवृत्तश्च परम्पराप्राप्तो यो धर्म्मः स एव प्रधानं अर्थकामौ तु प्रासङ्गिकौ यस्य । अन्यतमः अतिशयेनान्यः धर्म्मादिष्वनासक्त इत्यर्थः । एकपद इति पाठे धर्म्मः प्रधानावन्यतमावर्थकामौ यस्य इत्यर्थः । अस्याः पृथिव्या अविता सन् अल्पेन कालेन गृहागतान् सनकादीन् द्रक्ष्यसि अनुरक्तो लोको यस्मिन् सः ॥ १५ ॥

मत् मत्तः सकाशात् किञ्चित् वरं वृणीष्व । गुणाः शमादयः शीलं निर्म्मत्सरत्वादिस्वभावः तैरहं यन्त्रितः वशीकृतः तर्हि हि-तैस्तु मखादिभिर्नाहं सुलभः यतः समं चित्तं येषां तेष्वेव वर्त्तितुं शीलं यस्य सोऽहम् ॥ १६ ॥ १७ ॥

क्षमापयितुं पादयोः स्पृशन्तं स्वेन कर्म्मणा अश्वापहरणेन व्रीडितम् प्रेम्णा परिष्वज्य ॥ १८ ॥

भगवान् प्रस्थानाभिमुखोऽपि अनुग्रहेण विलम्बितः सन्न प्रतस्थे ... न कृतवानिति द्वयोरन्वयः । कथम्भूत उपहृतमर्पितमर्हणं ... समुज्जिहानया समुद्गच्छन्त्या वर्द्धमानया भक्त्या गृहीते ... जे यस्य ॥ १९ ॥

... पलाशवदक्षिणी यस्य तथा भूतः सन् एनं पृथुं ... २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्त्वत्रयविमर्शनपूर्वकं ज्ञानकर्मयोगानुगृहीतभगवद्भक्तियोगस्यामृतत्वप्राप्त्युपायतामभिधायैवं विधस्य पुंसो जीवदवस्थायामवस्थानप्रकारमाह । उदासीनमिति । द्रव्यं पृथिव्यादिभूतानि ज्ञा श्रोत्रादिज्ञानेन्द्रियाणि क्रिया वागादिकर्मेन्द्रियाणि आत्मा मन एषामध्यक्षमधिपं कूटस्थं स्वरूपतो निर्विकारमत एव द्रव्यमयमात्मानं प्रत्यगात्मानमुदासीनमिव स्थितं यो वेद द्रव्याद्यध्यक्षत्वं प्रकृतिसम्बन्धकृतं परमार्थतस्तु कूटस्थ उदासीन इत्येवमात्मानं यो वेद सः शोभनमाप्नोति जीवनदशायामपि सुखमेवाप्नोतीत्यर्थः ॥ ११ ॥

ननु विप्रतिषिद्धमेतदुच्यते द्रव्याद्यध्यक्षत्वं कूटस्थत्वमुदासीनत्वं चेति करणप्रवर्तकत्वमेव हि करणाधिपत्वं तच्च विकारतदभावः कूटस्थत्वमुदासीनत्वं तत्राह । भिन्नस्येति । द्रव्याक्रियाकारकचेतनात्मनः द्रव्यं पृथिव्यादि क्रिया कारकाणि कर्मेन्द्रियाणि चेतना ज्ञानेन्द्रियजातम् एतदात्मकस्येत्यर्थः क्रिया कर्मेन्द्रियाणि कारकाणि ज्ञानकरणानि श्रोत्रादीनि चेतना चित्तमेतदात्मकस्येति वार्थः द्रव्याद्यात्मकस्यात एव भिन्नस्य देवमनुष्यादिभावेन भिन्नस्य लिङ्गस्य शरीरस्य गुणप्रवाहः गुणपरिणामो अवर्तीति अयंभावः यद्यपि द्रव्याद्यध्यक्षत्वरूपविकार आत्मन्यस्ति तथापि स विकारः ज्ञानविकाररूपः स च धर्मभूतज्ञानगतो न स्वरूपगत इति स्वरूपतः कूटस्थत्वमुदासीनत्वं च देवादिरूपेण परिणामस्तु द्रव्यादिसंघातस्यैवेति ननु धर्मतोऽपि सति विकारे न कूटस्थत्वोपपत्तिः कूटस्थता हि निर्विकारता सा च नित्यता परम्परया धर्मतो वा नित्यत्वे कथं नित्यतेति चेत् उच्यते धर्मभूतं ज्ञानद्रव्यं नित्यमेव

* समवृत्तवर्तीति विजयध्वजः ।

श्रीमद्वी[illegible]कृतभागवतचन्द्रचन्द्रिका ।

तदन्न च कर्मणा कदाचित्संकोचः कदाचिद्विकास इत्यवस्था-द्वयमङ्गीक्रियते तत्र संकोचो नाम प्रसराभावः तदभावो विकासः प्रसररूपाभावस्य भावरूपत्वात् अतो धर्मभूतं ज्ञानं द्रव्य-मपि नित्यमेवेति धर्मतोऽपि कूटस्थतोपपत्तिः पृथिव्यादीनां तु स्वरूपतःस्वभावतश्च विकार इति न कूटस्थत्वम् अत आत्मनः सततमेकरूपत्वात् देहस्य प्रतिक्षणपरिणामित्वादपुरुषार्थत्वाद्देह-प्रयुक्तासु दृष्टासु प्राप्तासु सम्पत्सु विपत्सु च सूरयस्तत्त्वत्रयवि-वेचनचतुरा न विक्रियन्ते सम्पदापत्प्रयुक्तहर्षशोकाभ्यां न युज्यन्त इत्यर्थः कथं सति शरीरे तत्प्रयुक्तहर्षशोकासम्बन्धस्तत्राह । मयि निरतिशयप्रीतिविषये बद्धं सौहृदं यैस्ते सौहृदशब्देन सुहृदो धर्मो निरतिशयप्रेमोच्यते तेन प्रीतिरूपमुपासनं लक्ष्यते बद्धशब्देन तस्य विजातीयप्रत्ययान्तराव्यवहितत्वं च तथाच प्रत्ययान्तराव्यवहितमद्विषयनिरतिशयरूपभक्त्या विस्मृतदेहधर्मो हर्षशोकाभ्यां न युज्यन्त इत्यर्थः त्वं च सूरिः ॥ १२ ॥

अतः सुखदुःखे च देहप्रयुक्ते समः सन् साम्यं मम कथं संभवेत्तत्राह विजितेन्द्रियाशयः वशीकृतबाह्येन्द्रियान्तःकरणः जितेन्द्रियस्य तव सुखदुःखयोः साम्यं संभवेदेवेत्यर्थः अत एव समाना उत्तममध्यमाधमाः यस्य स तिर्यङ्मनुजदेवादिषु देहाति-रिक्तसर्वात्मसाम्यानुसन्धानपरस्तेषां च ब्रह्मात्मकत्वेन साम्य-धीः त्वमखिललोकरक्षणं विधत्स्व कथमेकेन मया तत्कर्तुं शक्यं तत्राह । मयेश्वरेण उपलक्षिताः सम्पादिताः अमात्यादयोऽ-खिललोकास्तैः संयुतः ॥ १३ ॥

ननु मम मुमुक्षामनुत्पाद्य किमखिललोकरक्षणं विधत्स्वेत्यु-च्यते तत्राह । श्रेयइति । राज्ञः प्रजापालनमेव श्रेयःसाधनं समीहित-पुरुषार्थसाधनमित्यर्थः कुतःयत् यस्मात् प्रजापालनात् साम्पराये देहवियोगे प्रजाभिर्यत्कृतं सुकृतं तस्य षष्ठमंशं हर्ता हरति अन्यथा लोकरक्षणाभावे प्रजानामरक्षिता प्रत्युत प्रजापीडना-दिना तद्दत्तं करं स्वामिग्राह्यभागं हरतीति हरः तथाभूतः अत एव प्रजाभिरात्तपुण्यस्तासामघमत्ति ॥ १४ ॥

तस्मात् यदि प्रजाःपालयसि धर्मतस्तदा तव मुक्तिरपि सुलभा स्या-दित्याह । एवमिति । द्विजाग्र्याणामनुमतश्चासावनुवृत्तश्च व्यस्तपाठेऽनुवृत्तश्च धर्मप्रधानः अनभिसंहितफलस्ववर्णाश्रमोचितधर्मप्रधानः अन्यतमःप्रजानामध्ये अन्यतम इव स्वस्मिन् स्वातन्त्र्यमनारोप्येत्यर्थः अविता रक्षिता यदि स्याः भवेः तदा ह्रस्वेनाल्पेन कालेन गृहान् प्रत्युपगतान् सिद्धान् सनकादीन् अनुरक्ताः स्वस्मिन् अनुरागयुक्ता लोका यस्य स त्वं द्रष्टासि तैरुपदिष्टतत्त्वोऽमृतत्वं यास्यसीत्यर्थः॥१५॥

किञ्च हे मानवेन्द्र! मत् मत्तः सकाशात् वरं चिद्रूरं वृणीष्व ते-तव गुणाः शमादयः शीलं निर्मत्सरादिस्वभावस्तैर्यन्त्रितः वशी-कृतोऽहं तद्रहितैस्तु मखैर्योगैः तपोभिः कृच्छ्रचान्द्रायणादिभिर्यो-गेन वा नाहं सुलभः कुतःयत् यस्मात्समं चित्तं येषां तेष्वेव वर्तितुं शीलमस्य सोऽहम् ॥ १६ ॥

स विश्वजित् पृथुरेवं लोकगुरुणा विष्वक्सेनेन भगवता अनुशिष्टः हरेरादेशमाज्ञां शिरसा जगृहे अतीवादृतवा-नित्यर्थः ॥ १७ ॥

ततः पादयोः समापयितुं स्पृशन्तं स्वेन स्वीयेन अश्वह-रणादिकर्मणा व्रीडितं लज्जितं शतक्रतुमिन्द्रं प्रेम्णा परिष्व-ज्याश्लिष्य तस्मिन् विद्वेषं विससर्ज अत्याक्षीत् इति विस्मये माद्रीपराधजनितविद्वेषं तदैव विससर्जेति विस्मयतं ॥ १८ ॥

ततो विश्वात्मा सर्वात्मा भगवानपि पृथुनोपहृतं समर्पि-तमर्हणमर्घ्यादिकं यस्य समुज्जिहानया समुद्रिक्तया भक्त्या गृहीतौ चरणौ अम्बुजे इव यस्य प्रस्थानाभिमुखः स्वलोकं प्रति प्रयाणाभिमुखोऽपि अनुग्रहेण विलम्बितः सञ्जातविलम्बः सतां भक्तानां सुहृत् निरतिशयप्रीतिमान् एवं पृथुं पश्यन् पद्मदलवद्विशाले अक्षिणी यस्य सः पद्मपत्रविशालाक्षाभ्यामक्षि-भ्यां पश्यन्निति भावः न प्रतस्थे न ययावित्यर्थः ॥ १९ ॥ २० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सम्यग्दर्शन इत्युक्तं दर्शनप्रकारं दर्शयति । उदासीनमिवेति । द्रव्यज्ञानक्रियात्मनां तामसवैकारिकतैजसरूपाणां पदार्थानाम-ध्यक्षमधिपतिम् । उदासीनमिवाक्लिष्टकारिणमथ कूटस्थं निर्वि-कारमात्मानं हरिं यो वेद स शोभनं दर्शनमवाप्नोतीत्यन्वयः हरिरक्लिष्टकारित्वादुदासीन इतीर्यत इति च ॥ ११ ॥

इदं चावश्यं ज्ञेयमित्याह । भिन्नस्येति । द्रव्यक्रियाकारक-चेतनानि सन्ततं व्याप्य तिष्ठतीति द्रव्याद्यात्मा तस्य जीवा-द्भिन्नस्य । कालादिव्यवधानेन भिन्नं पदार्थजातं गमयतीति ज्ञापयतीति लिङ्गं तस्य मनसो यः सत्त्वादिगुणानां प्रवाहः प्रवर्तनविशे-षस्तं दृष्ट्वा ज्ञात्वा । प्रत्यक्षासु विपत्सु सम्पत्सु च प्राप्तासु न विक्रि-यन्ते जातोऽहं मृतोऽहमित्यादिविकारं न प्राप्नुवन्ति के सूरयः अत्र हेतुगर्भविशेषणमाह । मयीति । मयि बद्धं सौहृदं महत्त्वबुद्धि-लक्षणं प्रेम यैस्ते तथा तस्मादिति शेषः "जीवाद्भिन्नस्य मनसो गुणाः सत्त्वादयो मताः । तज्ज्ञात्वा न विकुर्वीत स्वस्वरूपं मन-स्तथा„ इति वचनात् उक्तपदार्थोनाम्य इत्यर्थः ॥ १२ ॥

इदमपि मुक्तिसाधनमित्याह । सम इति । सुखे च दुःखे च समो निर्विकारःसमानाःस्वस्वयोग्यतानुसारेण उत्तममध्यमाधमाश्च यस्य स तथोक्तः समत्वे कारणमाह। जितेति रक्षायां किम्बल इत्यत उक्तं मयेति मया उपक्लृप्तः अखिलः पूर्णःसत्त्वगुणस्तेन संयुतः॥ १३ ॥

अपवर्गानुपयोगिप्रजापालनेन किमित्याशङ्क्यैतमेव तव श्रेय इत्याह । श्रेय इति । सम्पराये मोक्षे प्रजाकृतसुकृताद्विभज्य षष्ठ-मंशं सुकृतं लभत इति यस्मात्तस्मादिति विपक्षे बाधकमाह । अत इति । अतोऽन्यथेत्यस्य विवरणमरक्षितेति„ दुःखेनाव्यसनं त्वघम„इति यादवः ॥ १४ ॥

गुरूपदिष्टज्ञानस्यैव मुक्तिहेतुत्वात्किं प्रजारक्षणेनेत्याशङ्क्य तेन ज्ञानोपदेष्टृसिद्धज्ञानिप्राप्तिस्ततः संविद्य प्राप्यत इत्याह । एवमिति ॥ १५ ॥

साक्षात्कृतो वैकुण्ठोऽपि कञ्चनवरं नाददादिति लोकापवादं परिहरति । वरञ्चेति । अपवादभीरुर्वरं वृणीष्वेति वाक्ति ननु तद्गुण-लुब्ध इत्यत उक्तं तेऽहमिति मय्यादीनन्तरेण गुणशीलयन्त्रित इति किंविशिष्योच्यत इति तत्राह । नाहमिति । योगेनाष्टाङ्गलक्ष-णेन मम तत्तद्वस्तुयोग्यतानुसृतं वृत्तं वर्तनं येषां ते समवृत्ताः पुरुषास्तेषु वर्तितुं शीलमस्येति समवृत्तवर्ती यद्यस्मात्तस्मा-दहं तव मखादिना सुलभः स्यां किन्तु गुर्वादिषु संवृत्त-भक्त्येत्यर्थः ॥ १६ ॥

पृथुरात्मनि गुणग्राहित्वलक्षणं प्रकटयन् श्रीरमणोऽनुमन्-तादित्याह । स इत्थमिति । विश्वजित समस्तजेता ॥ १७ ॥

विष्वक्सेनेन श्रीहरिणोक्तं गृहीतमिति श्रद्धाधिक्य इव दर्शयतीत्याह । स्पृशन्तमिति । मनसा पृथुसन्निहितराजकपिण्ड

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेः पादयोः स्पृशन् क्रीडितमसुरजनमोहाय वज्रास्वभावं दर्शयन्तमाश्चसनुःखयोडारीन्प्रायशः सुखिनोऽपि नु । नियमादवि भूपेषु मोहायादर्शयन् सुराः । इति वचनात्क्रीडितत्वं तेनेत्यर्थः ॥१८॥

विष्णोः पृथौ प्रसादोद्रेकं दर्शयति । भगवानिति । विश्वात्मा पूर्णात्मा जगत्समस्तं विश्वं च निखिलं पूर्णमुच्यते इत्यभिधानाद्विश्वपदस्य पूर्णार्थत्वमेवाङ्गीकर्तव्यं नतु प्रपञ्चात्मत्वं तस्य बहुप्रमाणविरुद्धत्वात् चन्द्रोदये समुद्रवृद्धिवदनुदिनं समुज्जिहानया भक्त्येत्यनेन "अपक्वमक्तियुक्ताये न तेषां हरिदर्शनम् । प्रायो भवति दुःखस्य स्वभावः प्रायशो भवेत् । इति वचनात्साक्षात्कृतमधोक्षजं प्रत्यक्षं पश्यतः पृथोरपक्वभक्तियुक्तेभ्योऽत्युत्तमत्वं दर्शयन् तत्साक्षात्कारे भक्तेरेव प्रयोजकत्वात्तच्छ्रद्धया कीलितत्वात्मद्बन्धने सैव सम्पादनीयेति सूचयति ॥ १९ ॥

यात्रा प्रयाणं प्रस्थानमित्यभिधानम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

केवलमेव दर्शयति । उदासीनमिति । मध्यस्थमिव स्थितमप्युदासीनं यो वेदेत्यन्वयः अभयं मोक्षमिति सम्बन्धोक्तिः सोऽभयमिति चिरसुखः शोभनमिति गौडीयः पाठः ॥ ११ ॥

अथ भक्तिपक्षेणापि तं सान्त्वयति । भिन्नस्येति ॥ १२ ॥

अथ कर्तव्यमुपदिशति । सम इति श्लोकेऽस्यत्र सत्त्वांति चिरसुखः ॥ १३ ॥ १४ ॥

उत्तरकाले तस्य स्वभक्तिनिष्ठां स्वभक्तेषु विख्यापयितुमिच्छया अन्येषु ज्ञानादिप्रवर्तनेच्छया च तस्य कर्तव्यं सूचयति । एवमिति ॥ १५ ॥

सम्प्रत्यपि पूर्वेच्छयाह । वरञ्चेति । गुणशीले अत्र भक्त्युत्थे एव ज्ञेये । तत्र गुणाः गुरूपसत्तिप्राप्ताः पाण्डित्यादयः । शीलन्तु मृदुस्वभावो विनयादिः समस्वश्च नारायणपराः सर्वे इत्यादिरीत्या तदुत्थमेव नतु योगाद्युत्थानि तानि । न रोधयति मां योग इत्यादेः ॥ १६ ॥

तदेवं श्रीभगवत आदेशत्रयं जातमिन्द्रेण प्रीतिः सिद्धानुगमनं यात्रास्वीकारश्चेति । तदेव त्रयमपि स्वीचकारेत्याह । स इत्थमिति । तत्रादिमद्वयं स्वानुकूलेन प्रकारविशेषेण प्रथमन्तु यथावदेव स्वीचकारेत्याह । स्पृशन्नमिति । प्रेम्णेति । परमं प्रेमास्पदत्वेन श्रीभगवता स्वयं मेलितत्वादिति भावः ॥ १७–२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सम्यग्दर्शनमेवाह । द्रव्यज्ञानक्रियात्मनामधिभूताधिदैवाध्यात्मसाम् मध्यस्थं जीवात्मानमुदासीनमिव तेष्वनासक्तमिव यो वेद । स इमं कूटस्थमात्मानं वेद यः परमात्मानं वेद स अभयं प्राप्नोतीत्यावृत्त्यान्वयः । अनेनैवकारेण सम्यगुदासीनभावेऽपि साधनदशायां ज्ञानासाक्षी सूचयति ॥ ११ ॥

... द्रव्यादीनामध्यक्षत्वेऽपि जीवस्य तेष्वौदासीन्यमात्रमेव ... संसाराभाव इत्यत आह । भिन्नस्य जीवादन्यस्य लिङ्गदेहस्यैव ... संसारः भिन्नत्वे हेतुः द्रव्याद्यात्मकस्य अधिभूताध्यात्मादि स्वरूपस्य अयमर्थः । लिङ्गदेहस्य ... संसारो न त्वौदासीन्येनेति तत्राध्यक्षत्वेऽपि न जीवस्य क्षतिः लिङ्गस्यापि वदेवाविकृतत्वमिति । एवं ... विना भक्तिमित्थेषां ज्ञानेन यतमानानां संसाराभावमुक्त्वा क्वचित् केवलयैव भक्त्या जरयत्याशु या कोशं निगीर्णमनलो यथेति न्यायेन संसारनिवृत्तये यतमानानामपि संसाराभावमाह । इहाशिषीति । आसक्त्यभावात् प्राकृतसम्पद्विपदोर्नविक्रियन्ते आसक्त्यभावे हेतुः । मयि बद्धेति सौहृदवत्वस्तु केवलयैव भक्त्या भवेदित्युपपादितं तृतीयस्कन्धे ॥ १२ ॥

त्वञ्च मयि बद्धसौहृद इत्यतो मन्निदेश एव वर्तस्वेत्याह । सम इति चतुर्भिः । प्राकृतसम्पद्विपदोः समबुद्धिः । समाद्याः सत्त्वादिगुणोत्थसममध्यमाधमा यस्य सः । मयैश्वर्येणोपकल्पिताः सम्पादिता येऽखिललोका अमात्यादयस्तैः संयुतः । ईश्वरदत्तैश्वर्योऽहमीश्वराज्ञापालनरूपं प्रजारक्षणं करोमीति बुद्ध्येत्यर्थः ॥ १३ ॥

अन्यस्यापि राज्ञः प्रजापालनमेव धर्म इत्याह । सांपराये परलोके प्रजानां सुकृतात् हर्ता भर्हीता ॥१४॥

द्विजाग्र्यैः शास्त्राभिज्ञैर्विप्रैरनुमतोऽथवानुवृत्तः परम्पराप्राप्तो धर्म एव प्रधानं यस्य सः । अन्यसमस्तपदानासक्त ऐकपद्यपाठे कर्मधारयः अस्याः पृथिव्याः ॥ १५ ॥

अत्यनुकम्पाविगतगाम्भीर्यं आह । वरञ्चेति । गुणशीलाभ्यां यन्त्रितो वशीकृतः प्राकृताभ्यां ताभ्यां वशीकारासम्भवादप्राकृते ते भक्त्युत्थे एव ज्ञेये गुणो दयाक्षमादिः । शीलं विनयस्नेहादिमयः स्वभावः । नाहमिति । न रोधयति मां योग इत्यादेः यद्यस्मात् समं तुल्यमेव सर्वेषां चित्तवर्ती चित्ताधिष्ठाता सर्वत्रोदासीन एव नतु कस्यापि वश इत्यर्थः ॥ १६ ॥ १७ ॥

स्वेनाश्वापहरणेन ॥ १८ ॥

समुज्जिहानया सम्यगुदयन्त्या प्रतिक्षणं वर्द्धमानयेत्यर्थः । एनम् पृथुम् ॥ १९ ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं भूतद्रोहादिरहितानां मुमुक्षूणां साधनसम्पत्त्या मुक्तिमुक्त्वा अथ साधनकालेऽपि आत्मानात्मविवेकवलाज्जन्ममरणभयरहितत्वं संपद्विपद्योगे हर्षशोकरहितत्वं चाह । उदासीनेति द्वाभ्याम् । द्रव्यज्ञानक्रियात्मनां देहावयवानां पञ्चभूतज्ञानकर्मेन्द्रियमनसामध्यक्षम् तेभ्यो विलक्षणमित्यर्थः उदासीनम् इहामुत्र निर्विषयाम् भजनानन्दतृप्तत्वादनुदासीनमपीति इवशब्दार्थः कूटस्थं निर्विकारमिममात्मानं यो वेद स शोभनं जन्ममरणादिभयाभावम् आप्नोति ॥ ११ ॥

यतो भिन्नस्य जीवादन्यस्य द्रव्याणि क्रिया कर्मेन्द्रियाणि कारकाणि ज्ञानेन्द्रियाणि चेतना बुद्धिः एतदात्मकस्य लिङ्गस्य अत्र जीवोऽस्तीति जीवात्मज्ञापकस्य देहस्य गुणप्रवाहः सत्त्वादिगुणनिर्मितो देवादिजन्ममरणप्रवाहो नतु जीवात्मनः अतः शोभनं प्राप्नोतीत्यन्वयः अत एव संपत्सु च दशासूपस्थितासु मयि बद्धसौहृदाः न विक्रियन्ते हर्षशोकाभ्यां न युज्यन्ते ॥ १२ ॥

अथ विशेषतः श्रीपृथुं प्रत्याह । सम इत्यादि । समाना उत्तमादयो यस्य सः सुखे दुःखे च समः मयोपक्लृप्तैरुपयोजितैरखिलैर्लोकैरमात्यादिभिः संयुतः अखिललोकानां रक्षणं विधत्स्व ॥ १३ ॥

यद्यतो राजा लोकरक्षणात् सांपराये परलोके प्रजाभिः कृतात्सुकृतात् षष्ठमंशं हर्ता हरति अन्यथा विपक्षे करहारः सन् प्रजाभिर्हतपापः प्रजानामघमाशी अतः राज्ञः प्रजापालनमेव श्रेयः ॥१४॥

स आदिराजो रचिताञ्जलिर्हरिं विलोकितुं नाशकदश्रुलोचनः ।
न किंचनोवाच स बाष्पविक्लवो हृदोपगुह्यामुमधादवस्थितः ॥ २१ ॥
अथावमृज्याश्रुकला विलोकयन्न तृप्तदृग्गोचरमाह पूरुषम् ।
पदा स्पृशन्तं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरङ्गविद्विषः ॥ २२ ॥

पृथुरुवाच ॥

वरान् विभो ! त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनाम् ।
ये नारकाणामपि सन्ति देहिनां तानीश ! कैवल्यपते ! वृणे न च ॥ २३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवमस्याः प्रजायाः अविता द्विजाग्र्यानुमतः विप्रसंमतश्चासावनुवृत्तः संप्रदायागतो यो धर्मस्तत्प्रधानावन्यतमावर्थकामौ यस्य अनुरक्ता लोका यस्मिन् सः त्वं गृहोपयातान् सिद्धान् सनत्कुमारान् द्रष्टासि ॥ १५ ॥

हे मानवेन्द्र मन्मत्तः कञ्चन वरं वृणीष्व यतोऽहं ते गुणः समचित्तत्वं शीलं विष्णुप्रावण्यं ताभ्यां गुणशीलाभ्यां यन्त्रितः वशीकृतः यतोऽहं मखादिभिर्न सुलभः किन्तु समचित्तवर्ती समचित्तेषु वर्तनशीलः ॥ १६—१७ ॥

पादयोः स्पृशन्तं क्षमापयितुं चरणस्पर्शं कुर्वन्तं कर्मणाश्वापहरणपाषण्डप्रवर्तनात्मकेन परिष्वज्यालिङ्ग्य विद्वेषं विससर्ज त्यक्तवान् ॥ १८ ॥

उपहृतार्हणः समर्पितपूजार्होपायनः समुज्जिहानया समुद्यया ॥ १९ ॥

अनुग्रहेण विलम्बितः ॥ २० ॥

भाषाटीका ॥

उदासीन होकर के देह ज्ञानेन्द्रिय कर्मेन्द्रिय मन इनका प्रेरक रूप से स्थित निर्विकार स्वरूप जो पुरुष आत्माको जानता है सो कल्याण को प्राप्त होता है ॥ ११ ॥

पृथक् देह को गुणों के हेतु से प्रवाह रूप संसार होता है पृथक् भिन्न क्यों है कि पंचभूत ज्ञानेन्द्रिय कर्मेन्द्रिय देवता बुद्धि इनों से संयुक्त है इसी हेतुसे ज्ञानी पुरुष मेरे मे दृढ भाव होने से संपत्ति या विपत्ति के देखने पर भी विकार को नहीं प्राप्त होते हैं ॥ १२ ॥

तुम सम दृष्टि वाले हो कर उत्तम मध्यम अधम तीनों को समान मान करै सुख दुःख मे भी सम हो कर इंद्रिय तथा अंतःकरण इन को जीत कर मेरे बनाये जो मंत्रि आदि लोक इनों से संयुक्त हो कर हे वीर सब जगत् का रक्षा करो ॥ १३ ॥

राजा का तो प्रजा पालन करना ही धर्म है जिस से कि पर लोक मे प्रजा पालन अच्छे करने से पुण्य मे से छठवां भाग मिलता है यदि ऐसा न करे तो प्रजा की रक्षा न करने से पुण्य नष्ट होजाता है फिरकर लेने वाला राजा पापके फलको भोगता है ॥ १४ ॥

इस प्रकार से ब्राह्मणों के आज्ञा से उन का अनुवर्तन कर के धर्म को प्रधान मान कर सब से श्रेष्ठ हो कर इस भूमी के रक्षक हो कर थोड़े दिनों मे लोगों को प्रसन्न करते रहो तो आप घर ही मे आये हुये सनत्कुमारादि सिद्धों को देखो गे ॥ १५ ॥

हे मानवेंद्र ! हम यज्ञों से वा तपस्या से योग से सुलभ नहीं हैं जिससे कि हम सम चित्त वालों के हृदय में रहते हैं तब तुम्हारे शील गुणों से हम बंधगये हैं तो हम से तुम कोई वर मांगो ॥ १६ ॥

मैत्रेयजी बोले उपदेष्टा विश्वक्सेन भगवान् की जब ऐसी आज्ञा भई तब भगवान् की आज्ञा को महराज ने मस्तक से धारण किया ॥ १७ ॥

प्रेम से चरण स्पर्श करते हुये अपने घोड़ा हरण से लज्जित जो इंद्र उनका आलिंगन करके वैर को छोड दिया ॥ १८ ॥

इसके अनंतर विश्वस्वरूप भगवान्, अत्यंत बढी हुई भक्ति से पूजा समर्पण करके जब पृथु महाराज ने चरण पकड़ लिये तब जाने की तैयारी मे थे तौभी उन के ऊपर अनुग्रह होने से रुक गये आप सत्पुरुषों के विपत् बंधु हैं तिस से कमल से नेत्रों को प्रकाश कर के देखने लगे ॥ १९ ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भगवतस्तत्कृपातिरेकमुक्त्वा तस्य भक्त्युद्रेकमाह । स इति द्वाभ्याम । बाष्पविक्लवत्वेन तूष्णीमवस्थितः सन् अमुं हरिं हृदोपगुह्याधात् धृतवान् ॥ २१ ॥

अतृप्तयोर्दृशोर्गोचरं विषयभूतम् । पदा क्षितिं स्पृशन्तमिति । अयं भावः । न खलु देवाः पदा भुवं स्पृशन्ति अतः कृपापरवशो हरिः नूनमात्मानं विस्मृतवानिवेति अतएव स्खलनपरिहारार्थेव गरुडस्योन्नते स्कन्धे विन्यस्तं हस्ताग्रं येन तम् ॥ २२ ॥

वरं वृणीष्वेति यदुक्तं तदसहमान आह । हे विभो ! वरदेशानां ब्रह्मादीनामीश्वरात् वरप्रदात् त्वत् त्वत्तः सकाशात् बुधः कथं वरान् वृणीते । कीदृशान् । गुणैर्विक्रियत इति गुणविक्रियोऽहङ्कार स एव आत्मा येषां तेषां ब्रह्मादीनां सम्बन्धिनः देहाभिमानिनां भोग्यानिति वा । तथा चेद् बुध एव न भवतीत्यर्थः । जुगुप्सितत्वादपीत्याह । ये इति । बुध एवाहमपि न वृणे इति सूचयन् चकार ॥ २३ ॥

न कामये नाथ ! तदप्यहं क्वचिन्न यत्र युष्मच्चरणाम्बुजासवः ।
महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ॥ २४ ॥
स उत्तमश्लोकमहन्मुखच्युतो भवत्पदाम्भोजसुधाकणानिलः ।
स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः ॥ २५ ॥
यशः शिवं सुश्रव ! आर्यसंगमे यदृच्छया चोपशृणोति ते सकृत् ।
कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥ २६ ॥
अथाभजे त्वाखिलपूरुषोत्तमं गुणालयं पद्मकरेव लालसः ।
अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्चरणैकतानयोः ॥ २७ ॥
* जगज्जनन्यां जगदीश ! वैशसं स्यादेव यत्कर्मणि नः समीहितम् ।
करोति फल्ग्वप्युरुदीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किन्तया ॥ २८ ॥
भजन्त्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयम् ।
भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे ॥ २९ ॥
मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजन्तमात्थ यत् ।
वाचा नु तन्त्या यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कैवल्यपत इति सम्बोधनात् कैवल्यं वरिष्यतीति मा शङ्कीरित्याह । नेति । महत्तमानामन्तर्हृदयान्मुखद्वारेण निर्गतो भवत्पदाम्भोजमकरन्दो यशः श्रवणादिसुखं यत्र नास्ति तादृशं चेत् कैवल्यं तर्हि तत् कश्चित् कदाचिदपि न कामये । तर्हि किं कामयसे तदाह । यशः श्रवणाय कर्णानामयुतं विधत्स्व । ननु कोऽप्येवं न वृतवान् किमन्याविन्तयेत्याह । मम त्वेष एव वर इति ॥ २४ ॥

ननु तर्हि कैवल्याभावे रागद्वेषाद्याकुलानां भक्तिसुखमपि न स्यादित्याशङ्क्याह । स इति । भवत्पदाम्भोजसुधायाः कणो लेशः तत्सम्बन्धी योऽनिलः स एव दूरादपि किञ्चिद्यशःश्रवणमात्रमित्यर्थः । विस्मृतं तत्त्ववर्त्म यैः कुयोगिभिः तेषामपि पुनः स्मृतिमात्मज्ञानं वितरति । अतो न खलु भक्तानां रागादिसम्भवः । अतो नोऽस्माकं सारग्राहिणामन्यैर्वरैरलम् । भक्तावेव मोक्षादिसर्वसुखान्तर्भावादिति भावः ॥ २५ ॥

ननु भक्तिर्मुक्तिफलैवातः फलं विहाय साधने भवतः कोऽयमाग्रह इत्याशङ्क्याह हे सुश्रव ! मङ्गलकीर्तेति शिवं यशः सतां सङ्गमे यः सकृदपि यदृच्छयाप्युपशृणोति गुणज्ञश्चेत्सपशुं विनान्यः कथं विरमेत गुणातिशयं सूचयति । श्रीर्यद्यश एव प्रकर्षेण वृतवती गुणानां सर्वपुरुषार्थानां संग्रहः स्वस्मिन् समाहारस्तदिच्छया ॥ २६ ॥

अतो लक्ष्मीरिवान्यवरत्यागेन त्वामेवाहं भज इत्याह । अथेति । लालस उत्सुकः सन् कर्मणि क्रियमाणे यथेन्द्रेण सह कलिरेवं कदापि किं लक्ष्म्या सह कलिः स्यादिति वितर्कयति एकस्मिन् [illegible] नयोरावयोरपि किं कलिर्नस्यादिति काका वितर्कः [illegible] सेवायां न स्यात् नैवम् कृतस्त्वच्चरणयोरेवैकतानो [illegible] याभ्यां तयोः ॥ २७ ॥

[illegible] कलिस्तथापि भजेयमेवेत्याह । जगज्जनन्यां वैशसं [illegible] स्यादेव तत्र हेतुर्यस्याः कर्मणि नः समीहितमिच्छा भवति तथापीन्द्रविरोधे मत्पक्षपातवदत्रापि तव पक्षपात एव स्यादित्याह फल्गु तुच्छमप्युरु बहु करोषि यतो दीनेषु वत्सलो दयावान् स्वे स्वरूप एव रतस्य तया किं प्रयोजनम् तां नाद्रियस इत्यर्थः ॥ २८ ॥

यतस्त्वं दीनवत्सलोऽतएव साधवो निष्कामा अथ ज्ञानानन्तरमपि त्वां भजन्ति कथंभूतम् मायागुणानां विभ्रमो विलासस्तत्स्योदयः कार्यं स निरस्तो यस्मिंस्तम् ते किमर्थं भजन्ति तत्राह । भवत्पदानुस्मरणाद्विनाऽन्यत्तेषां निमित्तं फलं न विद्मः ॥ २९ ॥

वरैः प्रलोभनञ्च कृपालोस्तवानुचितमित्याशयेनाह । मन्य इति नु अहो ते वाचा तन्त्या यदि जनोऽयमसितोऽबद्धः स्यात्तर्हि पुनः पुनः फलैर्मोहितः सन् कथं कर्म करोति ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भगवतो भक्ते पृथौ कृपातिरेक उक्तः पृथोर्भगवति भक्त्युद्रेकमाह । स इति द्वाभ्याम् । स आदिराजः पृथुः बद्धाञ्जलिः आनन्दाश्रुपूर्णलोचनः अत एव हरिमवलोकितुं नाशकत् न समर्थोऽभूत् बाष्पैर्विक्लवः अधृष्टस्तूष्णीमवस्थितः सन् किञ्चिदपि नोवाच एवं तु अमुं हरिं हृदा उपगुह्य आवृत्य संश्लिष्य आलिङ्ग्येति यावत् अधात् धृतवान् ॥ २१ ॥

अथानन्तरमश्रुकला अश्रुकणान् हस्तेनापमृज्य अतृप्तवो दृशोर्गोचरं विषयभूतं पदा चरणेन क्षितिं भूमिं स्पृशन्तम् अयं भावः न खलु देवाः पदा भुवं स्पृशन्ति अतः कृपापारवश्यान्नूनं हरिरात्मानं विस्मृतवानिति उरुद्विषो वैनतेयस्य उन्नते अंसे स्कन्धे विन्यस्तं हस्ताग्रं येन तं पुरुषं परमपुरुषमाह उवाच ॥ २२ ॥

तत्र यदुक्तं वरं वृणीष्वेति तदसहमान आह । हे विभो ! वरदाणां ब्रह्मादीनामीश्वराद्वरदात्त्वत्तः सकाशात् बुधः अर्थकामा-

* जगज्जगत्यामिति श्रीवी[illegible]राघवविजयध्वजतीर्थौ ॥

[illegible] मद्भागवतचन्द्रचन्द्रिका ।
[illegible] आगत् वरान् वृणीते कीद-
[illegible] सत्त्वादिगुणानुसारेण विक्रिया
[illegible] त्मीन [illegible] भावे स आत्मा स्वभावो येषां नारकाणां संसारिणामपि देहिनां सन्ति तेषामपि भोग्या इत्यर्थः तस्मात् हे कैवल्यपते ! मुक्त्यधिपते मुक्तिप्रदेत्यर्थः हे ईश ! सर्वान्तर तान् क्षुद्रान् न वृणे ॥ २३ ॥

तर्हि कैवल्यमेव वरय तत्राह । नेति । हे नाथ ! महत्तमानां भागवतानामन्तर्हृदयान्मुखद्वारेण निर्गतो भगवत्पदाम्बुजमकरन्दो यशः श्रवणादिसुखं यत्र नास्ति तादृशं चेत् कैवल्यमपि तत्र कामये न वृणे तर्हि किं कामयसे तत्राह । त्वद्गुणश्रवणाय मे मह्यं कर्णायुतं कर्णानामयुतम् अयुतशब्द आनन्त्यपरः गुणानामानन्त्यादनन्तगुणश्रवणार्थमनन्तश्रोत्राणि विधत्स्व देहि एष एव ममाभिमतो वर इत्यर्थः ॥ २४ ॥

किं मद्गुणश्रवणसाध्यं यदर्थं कर्णायुतं प्रार्थयसे तत्राह । स इति । हे उत्तमश्लोक ! महतां त्वद्भक्तानां मुखाच्च्युतः सः भवतः पदाम्भोजयोर्या सुधा तस्या यो लेशः तत्सम्बन्धी योऽनिलो वायुः दूरादपि किञ्चिद्यशःश्रवणमात्रमित्यर्थः विस्मृतं तत्त्वधर्मं तत्त्वमार्गः यैः कुयोगिभिस्तेषामपि नः अस्माकं त्वद्विषयां स्मृतिं भक्तिं वितरति ददाति अतो वरैः पुरुषार्थान्तरसाधनभूतैरलम् ॥ २५ ॥

त्वद्विषयभक्तिवर्धकत्वात्त्वद्गुणश्रवणस्य यदृच्छयापि त्वद्गुणा नेव शृणुयामित्याह । यश इति । हे उरुश्रवः ! शोभनकीर्ते ! सतां सङ्गमे सति सकृदपि यदृच्छयापि ते तव यशः कीर्तिमेव परं शृणोमि सकृदपि यदृच्छयापीत्यनेन असकृदस्यादरेण यशसः श्रोतव्यता सूच्यते तदुपपादयति यः कश्चित् पुमान् गुणज्ञः सारग्राही चेत् पशुं कर्मजडमृते कथं विरमेत्त्वद्गुणानुभवनादिति शेषः अगुणज्ञः पशुश्चेत्त्वद्यशः सकृदाश्रुत्य ततो विरमेदित्यर्थः गुणज्ञस्याविरामं सदृष्टान्तमुपपादयति यत् यस्मात् श्रीर्लक्ष्मीर्गुणानां भवदीयकल्याणगुणानां सङ्ग्रहेच्छया संस्मरणेच्छया प्रवव्रे त्वामिति शेषः यद्वा गुणानां सर्वपुरुषार्थानां संग्रहः अस्मिन्समाहारस्तदिच्छया त्वद्यशः प्रवव्रे नितरां वृतवती ॥ २६ ॥

अतो लक्ष्मीरिवान्यपरित्यागेन त्वामेवाहं भजामीत्याह । अथेति । हे भगवन् ! अखिलपुरुषोत्तममखिलेभ्यो बद्धमुक्तनित्येभ्यः पुरुषेभ्यः उत्तमं "पञ्चमीभयेन„ इत्यत्र पञ्चमीति योगविभागात् समासः अनेन जीवानामभजनीयत्वं विवक्षितमखिलपुरुषोत्तमत्वे हेतुः गुणालयं त्रिविधेष्वपि चेतनेष्वसंभावितनित्यनिरुपाधिकानन्याधीनसर्वज्ञत्वसर्वशक्तित्वसर्वकारणत्वसत्यज्ञानानन्तत्वादिकल्याणगुणाश्रयं त्वामेव पद्मकरेव लक्ष्मीरिव वालसः अभजं भजेयमित्यर्थः ननु द्वयोरपि मां भजमानयोरिन्दिरया सहैव तव कलहः स्यात्तत्राह एकपतिस्पृधोः एकस्मिन् पत्यौ स्पर्धमानयोः एकभर्तृभजनवतोरिति यावत् आवयोः लक्ष्म्या मम च कलिः कलहो न स्यात् असंभावितः असंभवमेवोपपादयति त्वच्चरणैकतानयोः त्वच्चरणयोरेकतानो मनस ऐकाग्र्येण वृत्तिर्ययोस्तयोः आवयोः तत्कलिरित्येतत् क न भवेदेवेत्यर्थः विषयस्यापरिच्छिन्नत्वादिति भावः ॥ २७ ॥

भवतु नाम कलिस्तथापि भजेयमित्याह । हे जगदीश ! जगज्जनन्यां जगन्मातरि लक्ष्म्यां वैशसं विरोधः स्यादेव तत्र हेतुः यस्याः कर्मणि नः समीहितमिच्छा भवति तथापीन्द्रादिरोधेऽपि मत्पक्षपातवत् अत्रापि वः पक्षपातश्च स्यादित्याह । फल्गु तुच्छमपि उरु बहु करोषि यतो दीनेषु वत्सलः स एव धिष्ण्ये स्वस्वरूप एवाभिरतस्य तव तया जगज्जनन्या किं प्रयोजनं तां नाद्रियस इत्यर्थः यद्वा नन्वेतावन्तं कालं कर्म फलासङ्गेनानुष्ठितमधुना फलासङ्गाभावेऽप्यवश्यं मां भजतोऽप्यैहिकं फलं दास्यत्येव तत्राह । जगज्जनन्यामिति । हे जगदीश ! कर्मणि यज्ञादौ जगज्जनन्या प्रकृत्या यन्नः अस्माकं समीहितं फलं तद्वैशसमनर्थरूपं फलं संसाराभिप्रायेण वैशसमित्युक्तं स्यादेव प्राकृतं फलं स्यादेवेत्यर्थः किन्तु फल्गु अपि प्राकृतफलसाधनत्वेन तुच्छमपि यज्ञादिकर्म उरु करोषि तस्मिन् स्वाराधनैकवेषतामापाद्य स्वविषयभक्त्युत्पादनद्वारानन्तस्थिरमुक्तिफलसाधनतासम्पादनेनोरु करोषीत्यर्थः यतो भवान् दीनवत्सलः दोषादर्शी अयम्भावः यद्यप्यनादिप्रकृतिसम्बन्धात् यज्ञादिकर्मणां त्वदाराधनरूपतामजानन्तः पशुपुत्रवृष्टिस्वर्गाद्यैहिकामुष्मिकफलसाधनतामापातश्चोदनाभ्यः प्रतिपन्नामवमुध्य कर्मानुतिष्ठामः तथापि त्वं दीनेषु दासेषु दोषादर्शी फल्गुफलाशां निवर्त्यानन्तस्थिरफलसाधनतामेव निष्पादयसीति जगज्जगत्यामिति पाठे प्राणिपूर्णभुवन इत्यर्थः फल्गुत्वमेवोपपादयति स एव धिष्ण्ये स्वस्वरूप एवाभिरतस्य स्वात्मारामस्येत्यर्थः तया जनन्या किं प्रयोजनं स्वात्मारामस्य प्राकृतं फलं किमपि न भवति अतिक्षुद्रमित्यर्थः स्वात्मारामस्य जगज्जगत्यां फल्गु परलोकप्राप्तिरित्यर्थः ॥ २८ ॥

एवमैश्वर्यान्तरेभ्य आत्मानुभवस्यातिशय उक्तः ततोऽपि भगवदनुभवस्यातिशयत्वं सूचयन् स्वात्मानुभवपूर्वकभक्तियोगस्य कर्तव्यतां सोदाहरणमाह । भजन्तीति । अत एव केवलकर्मणां फल्गुत्वादेव साधवो निष्कामा अथ प्रत्यगात्मतया याथात्म्यज्ञानानन्तरं त्वां भजन्ति कथंभूतं व्युदस्तमायागुणविभ्रमोदयं मायाया ये गुणा रजस्तम आदयः तन्मूलको यो भ्रमः देहात्मभ्रमः स्वतन्त्रात्मभ्रमश्च तस्य य उदयः उद्रेकः व्युदस्तः निरस्तः मायागुणविभ्रमोदयो येन तं संश्रितमायागुणभ्रमनिरासकमित्यर्थः निरतिशयानन्दरूपमात्मानुभवं लब्ध्वापि किमर्थं मां भजन्ते तत्राह । हे भगवन् ! सतां भवत्पदानुस्मरणात् ऋते त्वत्पदाम्बुजस्मरणं विना अन्यन्निमित्तं फलं न विद्महे नित्यनिरतिशयानन्तानन्दरूपे त्वच्चरणस्मरणसमुद्रे विप्रुडिव केवलस्वात्मानुभवोऽप्यतितुच्छ इति भावः ॥ २९ ॥

वरैः प्रलोभनं कृपालोस्तवानुचितमित्याशयेनाह । मन्य इति । त्वां भजन्तं मां वरं वृणीष्वेति यदात्थ अवोचः तां ते तव गिरं जगतां विमोहिनीं मिथमिश्रपयःपानप्रलोभनवाक्यतुल्यां मन्ये त्वद्भजनात्प्राप्तसंसाराणां दैवात्त्वद्भजने अति पुनस्तेषां वरप्रलोभनैः संसारहेतुमेवापादयसि भक्तानुग्रहैकशीलस्य दयालोस्तव तन्निग्रहोऽनुचित इतिभावः नु अहो ते तव तन्त्या दामतुल्यया वन्धकया वाचा "अपामसोममृता अभूम अक्षय्यं ह वै चातुर्मास्य याजिनः सुकृतं भवति„ इत्यादिकया यामिमां पुष्पितां वाचमित्युक्तविधया वेदगिरा जनो लोकः यदि अमितः अबद्धः स्यात् विप्रलम्भने आपाततः प्रतिपन्नफलाशानिर्मुक्तो मुमुक्षुः [illegible] तर्हि कथं पुनः फलैर्मोहितः सन् कर्म प्रवृत्तिधर्मं [illegible] कारोतीत्यर्थः ॥ ३० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न केवलं पृथोर्भक्त्युद्रेक आन्तरः । अपितु बाह्योऽपि दृश्यत इति भावेनाह । स आदिराज इति । अश्रुपूर्णाक्षत्वबहिरोपरमेण पुनः किमकारीति तत्राह । हरेति ॥ २१ ॥

किमनया तूष्णीं व्यवस्थित्या प्रवृत्तस्तन्द्रीहेतुभूतयेति निरूप्य हर्युत्कर्षगोचरं वक्तुमुपक्रमते । अथेति । अश्रुकणानेत्रजलबिन्दून् अतृप्तयोरलंबुद्धिमप्राप्तयोर्हृशोर्गोचरं विषयसुरगोविद्विषः गरुडस्य ॥ २२ ॥

भगवदादिष्टं चेत्पृथुना गृहीतमथ नवुक्तेषु कश्योत्तरत्वेन वक्तव्यमस्यास्तीति न पश्यामोऽन्यवदतः किमाहेति तत्राह । वरानिति । आत्माभिकवचनमिति न्यायेन वरं वृणीष्वेत्युक्तं तत्र श्रेयस्त्वेनाभिमताः किमैहिका उत पारत्रिका आद्य स्रक्चन्दनवनितादयो यदि तर्हि नत्रापि वदामीत्याह । वरानिति । सुखमत्वावरणीया न भवन्तीत्याह । गुणेति । गुणेषु विषयेषु विक्रिया विकारस्तेन युक्त आत्मा मनो येषां ते तथा तेषां नारकाणां नरकस्थानामपिशब्देन नरलोके किं वक्तव्यमिति सूचयति वैभवगात् पुलाकादानवत्कैवल्यपतेस्त्वद्देनादशवरादानं जुगुप्सितमित्यर्थः द्वितीयोऽप्यनेनैव प्रत्युक्तः स्वर्गसारूप्यादिलक्षणामोक्षभेदेन पारत्रिका अपि द्विधा भिद्यन्ते तत्र कैवल्येऽपि न ममाभिरुचिः किमुत स्वर्गादाविति ॥ २३ ॥

एवं तर्हि तव कोऽभिप्राय इत्यत आह । न कामय इति । कश्चिदित्यनेन पुरुषार्थमात्रमाक्षिपति तर्हि मया देयं नास्तीत्यत्राह महत्तमेति । महत्तमानामन्तर्हृदयान्मुखद्वारेण च्युतं निःसृतम् चरणयोरमृतं तच्चरितलक्षणं विभत्स्वेत्यन्वयः अनेन सर्वदेतत्श्रव्यमस्त्विति तत्र त्वदनुग्रहएव कारणमन्यथा न स्यादिति व्यनक्ति अभीष्टं पूरयति एष इति ॥ २४ ॥

हस्तप्राप्तमणित्यागवत्कैवल्यादिपुरुषार्थत्यागेन तव किं फलितमिति तत्राह । स इति । हेउत्तमश्लोक ! महतां मुखद्वारेण च्युतः २५॥

ननु मत्कथा भवता बहुशोऽश्रावि अतोऽस्मादाग्रहाद्विरम्यार्थ्यं वरं वरयेति चेत्तत्राह । यश इति हे सुभद्र ! शोभनकीर्ते आर्याणां स्वतत्त्वज्ञानां सङ्गमे यदृच्छया प्रसङ्गतः प्राप्तं तव यशः कथारूपेण प्रथितं भक्त्या उपश्रृणोति स गुणज्ञः सारज्ञः पुरुषः पशुमन्यमृते कथमस्माद्विरमेदित्यन्वयः तत्र हेतुः श्रीरिति गुणान्तरावृत्तिहतसंग्रहेच्छया त्वद्यशः प्रवणे इति यस्मात्तस्मात् अनेन यशः श्रवणमात्रवृत्त्या क्रियते चेदानन्दाभिवृद्धिः स्यादिति सूच्यते 'गुणान्तरावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु,, इति यादवः ॥ २६ ॥

अथ तस्मादहन्त्वामभजन्भजामि । तथाप्येकमेव पतिं स्पर्धेते इत्येकपतिस्पृधौ तयोस्त्वच्चरणैकतानयोस्त्वत्पदैकनिष्ठयोरावयोः कश्चिः कलहः कुतो न स्यात् अपि किं न स्यादेव ॥ २७ ॥

जन्तुस्वभावमपेक्ष्य कश्चिः स्यादिति शङ्का ननु भगवद्भक्तस्येत्यभिप्रेत्याह । जन्तोरिति । हेजगदीश ! अखण्डेष्ट "जगत्समस्तं विश्वं च निखिलं पूर्णमुच्यते,, इति च जगत्यां राजप्रधानलोके विद्यमान[illegible]स्य जन्तुसमूहस्य मिथो वैशसं हिंसालक्षणः कलहः स्यात् [illegible]स्वभावत्वात् । अत्रास्मद्विषये स न स्यान्निमित्ताभावादित्युक्तं [illegible]ति नोऽस्माकं कर्मणि स्वत्पूजालक्षणे यत्समीहितं शुभ[illegible] तत्फलगु अल्पमपि उरु महत्करोषि । तत्र हेतुगर्भ[illegible] दीनवत्सल इति । तत्राप्यल्पस्यापि शुभस्य फल[illegible]करणं ननु परमाणुपरिमितस्य शुभस्य सुखपर्वती[illegible] सति वैषम्यापातः स्यात् तस्य निर्दोषत्व्या[illegible]व्यम् इतोऽपि कश्चिन्न स्यादित्याह । स्वपदात स्वस्वरूपभूते विष्णवे [illegible]

वोच्यते,, इत्यभिधान[illegible]

वात्सल्यं विना मया भि[illegible]

येन येन भक्त्यतिशयः क्रियते [illegible]

तात्पर्यमवबोद्धव्यम् जगत्यां मूलप्रकृतौ श्रियां जन्तोरजजनस्य वैशसं विषमबुद्धिलक्षणं स्यादेव । ननु पण्डितस्य कुतः यद्यस्मान्नः कर्मणि श्रौतादिविषये वैशसं यत्संपादनलक्षणं तत्समीचीनमीहितं भक्तिपूर्वकत्वात् अल्पपुण्यस्य तव न मद्भक्तियोग्यत्वमत्राह करोषीति । 'यमेवैष वृणुते तेन लभ्य,, इति श्रुतेः भक्तिवत्सत्वद्योतनाः फल्गवप्युरु करोषीत्युक्तमनेन हरौ भक्तिरवश्यं कर्तव्येति ज्ञायते अन्यत्समिति भजनक्रियामपि न शक्नुमः कर्तुं त्वत्प्रसादातिरेकेणेत्याह । जगज्जगत्यामिति । जगता जङ्गमेनोपलक्षणमेतत् स्थावरेणापि युक्तायां जगत्यां लोके । नोऽस्माभिः कर्माणि विषयं यत्समीहितं स्यात् तद्वैशसमेव हिंसारूपमेवात एव फल्गु तुच्छं फलं ततः स्वतश्च तृप्तये नालमित्यर्थः अथ भगवानुरु परिपूर्णं करोति अत्र हेतुगर्भविशेषणं हे दीनवत्सलेति हेत्वन्तरमाह । स एवेति । परिपूर्णानन्दरूपेऽभिरतस्य तया भजनक्रियया किं भृत्यवात्सल्यादुरु करोतीत्यर्थः अथवा अप्येकपतिस्पृधोः कश्चिः स्यादिति सन्देहः कुतः पूर्वमधुना तव मयि पक्षपातात्कलिरित्याह । जगज्जगत्यामिति । जगतो जङ्गमस्थावरलक्षणस्य प्राणिसमूहस्य जगत्याधार भूता मूलप्रकृतिर्लक्ष्मीस्तस्यां वैशसं पीडा स्यादेव हे जगदीश ! कुतः यद्यस्मादस्माकं कर्मणि श्रौतादौ फल्गवप्युरु करोति न तथा तया कृतं हे दीनवत्सल ! अथवा किमिदमाश्चर्यमित्याह । स एवेति । तया श्रिया किं प्रयोजनं कामिनामुपकारियेत्यर्थः जगज्जगत्यामित्येकपदेऽपि लक्ष्म्यामित्यर्थः अथवा जगतो हिंसारूपत्वात्तदन्तःपाती कथमहं त्वां भजामि त्वत्प्रसादं विनेत्याह । जगदिति । हे जगदीश ! जगत्यां लोके यज्जगत्प्राणिसमूहः तद्वैशसमेव हिंसाप्रकृतिरेव । तथापि तदन्तःपातिभिरस्माभिः कर्मणि यत्समीहितं स्यात्तत्फल्गु हिंसारूपमप्युर्वहिंसारूपकमपि करोति भवान् हे दीनवत्सल ! किमर्थमेवं पक्षपातेन करोति न स्वे धिष्ण्येऽभिरतस्य तथा अहिंसया तव किं केवलं मामुद्धर्तुमेवेति भाव इति केचिद्व्याचक्षते तदसत् पदानां विवक्षितार्थावाचकत्वेन पाठसम्प्रदायाभावेन प्रमाणविरोधेन प्रेक्षावद्भिरुपेक्षणीयत्वात्पूर्वापरविरोधाच्च वक्ष्या हरेर्भक्तेषु पक्षपातकथनस्य स्वानुभवविरुद्धत्वाच्च ॥ २८ ॥

अस्मिन्नर्थे साधुसम्मतिमाह । भजन्तीति । (१) अथान्यच्चास्मिन्नर्थे प्रमाणमस्तीति किन्तदिति तदुच्यते अत एव भक्तवात्सल्यादेव साधवः सज्जनास्त्वां भजन्ति कं गुणमुपसंहृत्येति तत्रोक्तं व्युदस्तेति मायागुणानां विभ्रमोदयो विलासोदयो यः स निरस्तो येन स तथा तं संसारोच्छेदोऽपि न अत एवाभिप्रेत्याह । भवत्पदेति । अन्यत्कर्मादिकम् ॥ २९ ॥

विमुक्तिमुख्यनिमित्तमङ्घ्रिस्मरणादन्यन्नास्तीति यद्यस्मात्तस्मात्त्वज्जन्तं प्रतिवरं वृणीष्वेति वाणी जगन्मोहकरीत्याह । मन्ये गिरमिति । तदुपपादयति । वाचेति "तस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्,, इति श्रुतिः विश्वबन्धने यद्यसितो बन्धनरहितस्तर्हि पुनः शश्वत्कथं कर्म करोतीत्यन्वयः ॥ ३० ॥

(१) अत्र अथ शब्दस्यानन्तर्याद्यर्थत्वे असङ्गतिमालोच्य सङ्गतमर्थं दर्शयति । अस्मिन् विषये ज्ञानिसम्मतिरूपमन्यच्च प्रमाणमुच्यतइति पक्षान्तरे अथशब्दः अत इत्यनेन परामृश्य हेतुं दर्शयति वात्सल्यादिति ॥

मिकृतकमलसम्भ्रमैः ।
प्रकारविशेषं दर्शयिष्यते ।
। बरदानां ब्रह्मादीनामपीश्वरात्
इत्यर्थः यो बुधः कथं वृणीते
कारादहमबुधोऽपि न वृणे इत्यर्थः ॥ २३ ॥

न कामय इति । कर्णायुतप्रार्थनमत्यासक्तितत्परम् ॥ २४ ॥

यद्विच्च चमे न तादृशप्रार्थनाधिकारिणः गाढासक्त्यभावात् तथापि तच्छ्रवणमेव स्तादित्याह । स इति । तत्त्वमत्र तत्पदाम्भोजमेव मूलं तेदनुगतत्वेन शुद्धात्मज्ञानञ्च ॥ २५ ॥

यतो यश इति। पशुं विना योऽन्यो गुणज्ञो मनुष्यमात्रः स कथं विरमेत् स मनुष्येष्वपि पशुः यो न विरमेत् स पशुष्वपि परमगुणज्ञ इत्यर्थः । गुणानां त्वदीयानां संग्रहेच्छया आत्मनि प्रतिसंक्रामितुमिच्छया ॥ २६ ॥

अथाभज इत्यादिद्वयं न खल्वस्य तत्कान्तभावाद्यात्मना जाता किन्तु भक्तिवासनैव दृष्टान्तस्त्वत्र तस्या भक्त्यंश एव । तया स्पर्द्धा तु तत्परमकृपोपलब्धत्वेन वीराख्यदास्यतां प्राप्तस्य नायोग्येति । अन्यस्त्वेवं मन्यन्ते तत् खलु तदीयदीनविषयककृपासम्बन्धप्रेमवचनविनोदमात्रं नतु लक्ष्मीस्पर्द्धयाहं करोमीत्यनेन स्वस्मिंस्तुच्छत्वमननात् अथवा अथाभज इति कलहाभाव एव योऽयं तत्र हेतुः त्वच्चरणेति जगज्जनन्यामिति तु कलहे ॥ २७ ॥ २

अतएवेति । दीनवात्सल्यमेव मुख्यमुद्दीपनमित्यर्थः साधवः प्रोज्झितकैतवाः तदेवावधारयति । भवादिति । ऋते इत्युक्तवान्यस्यादित्युक्तिरवधारणार्था ॥ २९—३० ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भगवतः कृपातिरेकमुक्त्वा तस्य पृथोर्भक्त्यतिशयमाह । स इति ॥ २१ ॥

मत्पुत्रयोर्दशोर्गोचरं विषयभूतं पदा क्षितिं स्पृशन्तमित्यत्र भावः श्रीस्वामिचरणैर्व्याख्यातो यथा न खलु देवाः पदा भुवं स्पृशन्ति अतः कृपापरवशो हरिर्नूनमात्मानं विस्मृतवानिव । अतएव स्खलनपरिहाराय गरुडस्योन्नते स्कन्धे भिन्यस्तं हस्ताग्रं येन तामिति ॥ २२ ॥

वरं वृणीष्वेत्यस्योत्तरमाह । वरान् बुधः कथं वृणीते किन्त्वबुध एवेत्यर्थः तत्रापि गुणैर्विक्रिया विकारो यस्य तथा भूत आत्मा मनो येषां कर्म्मिणां सम्बन्धिनः स्वर्गादीनित्यर्थः कैवल्यपते इति । कैवल्यकामोऽपि यान् न वृणीते तानहं कैवल्यनामाप्यसहिष्णुः कथं वृणे इति भावः ॥ २३ ॥

किम्बा कैवल्यपते इति । सम्बोधनात् कैवल्यं दास्यतीति माशङ्किष्ठाः किन्तु कैवल्यमपि येभ्य एव रोचते तेभ्य एव तदीयतामित्यभिप्रायेणैव तु मया तच्छब्देनामन्त्रितोऽसीत्याह । नेति । वरञ्च मत् कञ्चन वृणुष्वेति यदुक्तं तत्र सामान्यतो वरानहं नैव कामये विशेषतोऽपि कञ्चन वरं कैवल्यं तदपि कश्चित् कदाचिदतिदुःखदशायामपि न कामये कुतः यत्र कैवल्ये युष्मच्चरणाम्बुजस्य आसवो मकरन्दस्तदीयगुणकथामाधुर्य्यभावो नास्ति कीदृशः महत्तमानामन्तर्हृदयात् मुखद्वारा च्युतः अन्तर्हृदयेनाखादानन्दोद्रेकात् कीर्त्यमान इत्यर्थः । शुकमुखादमृतद्रवसंयुतमितिवन्महदास्वादने सति तस्यातिमाधुर्य्यमुदयते इति भावः । मधुरमपि जलं क्षारभूमिप्रविष्टं यथा विरसीभवति तथैवावैष्णवमुखान्निर्गतो भगवद्गुणोऽपि नातिरोचक इति व्यतिरेकश्च गम्यः तर्हि किं कामयसे इत्यत आह । विधत्स्वेति। महतां गुणानां कथानां चानन्त्यात् यत्र यत्र ये ये या या गुणकथाः कीर्त्यमानाः स्युस्तासामेकामपि कथामहं त्यक्तुं न शक्नोमीत्यतिलोभात् कर्णानन्त्यस्पृहा तेन कैवल्यकामा येभ्यः श्रोत्रादीन्द्रियेभ्यो प्रियेभ्यो द्रुह्यन्ति तान्येवाहं कामये इति द्योतितम् । ननु कोऽप्येवं न वृणीते सत्यं मम त्वेष एव वरो नान्य इति ॥ २४ ॥

ननु महात्तत्त्वज्ञैरपि दुर्लभं कैवल्यमपि कुतो नेच्छसीति तत्र व्याजस्तुतिमाश्रित्याह । स इति । भवत्पदाम्भोजसुधायाः कणां लेशस्तत्सम्बन्धी तावदनिलोऽपि किमुत तत्कणाः किमुततरां सा सुधा । तद्गुणकथालेशप्रसङ्गोऽपीत्यर्थः स्मृतिं त्वच्चरणस्मरणं वितरति अतएव विस्मृततत्त्वमार्गाणामिति तयोपादिष्टं यत्तथा वैलक्षण्यसालक्षण्याभ्यां परमात्मजीवात्मदेहतत्त्वं तदधुनैव मया विस्मृतमत एव कुयोगिनामिति व्याजस्तुतिः । अस्माकं वरंरलं विस्मृततत्त्ववर्त्मत्वात् कैवल्येन त्वत्कथास्वादैकव्रतत्वादन्तरान्तरेऽप्यस्माकं प्रयोजनं नास्ति । वयं कुयोगिनो निकृष्टाः खलवयस्ततेरेवत्मानः सुयोगिनो भवितुं न प्रभवामइति कथं कैवल्याय स्पृहयाम इति कथं वा कीटविशेषा मधुव्रता इव त्वच्चरणकमलमकरन्दास्वादमात्रैणैव पूर्णा राज्यादिसम्पत्तीः प्राप्तुं शक्नुम इति भङ्ग्या स्वेषामेवोत्कर्षो ध्वनितः ॥ २५ ॥

ननु मत्कथास्वादादपि विरम्य योगीन्द्रस्पृहणीयं कैवल्यमेव गृहाणेति तत्राह। यश इति। हे सुश्रवः! मङ्गलकीर्त्ते! तव यशः यदृच्छया अयत्नतोऽकस्मात् प्राप्तमपि सकृदपि यः शृणोति गुणज्ञश्चेत् स कथं तस्मात् विरमेत् पशुं विनेति यो विरमेत् स मनुष्येषु पशुः यो न विरमेत् स पशुष्वपि मनुष्य इति ध्वनिः । तथापि चित्तबडिशं शनकैर्वियुङ्क्त इत्याद्युक्तलक्षणलक्षितात् युष्मद्यशःपीयूषाद्विरमते योगिने त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः कथायामित्याद्युक्तस्वभावाय कर्म्मिणे च पशवे पिण्याकतुषबुसादिकमिव कैवल्यादिकं देहि ननु मह्यं मनुष्यायेत्यनुध्वनिः । ननु यद्यशःस्वादादपि कैवल्यादिकमधिकं भवेदित्यत्र योगी कर्म्मी च प्रमाणं कैवल्यादिभ्योऽपि यद्यशःस्वादोऽधिक इति भवन्मते कः प्रमाणमिति । तत्राह । श्रीमहालक्ष्मीर्ब्रह्मादिसर्व्वजगत्पूज्या सर्व्वगुणमण्डितापि तद्यशो यत्र गुणानां तदीयरूपरसगन्धशब्दस्पर्शलीलालावण्यकारुण्यानां सम्यक् ग्रहणमास्वादनसामर्थ्यं तदिच्छयेति सैवात्र प्रमाणं तदुपलक्षिता अन्येऽप्यास्वादितचरकैवल्यसुखमपि लघूकारिण्यो यशस्येव रममाणाः शुकादयोऽपि प्रमाणम् । घासबुद्ध्येक्षुपल्लवानि चरन्नप्यन्ततस्तदीयकाण्डस्वरुचिर्घासमेवास्वादयन् वृष इव योगी सहकारपल्लवानि त्यक्त्वा कण्टकमेव स्वादयन्नुष्ट्र इव कर्म्मी किं प्रमाणं भवेदिति भावः । भक्तावेव मोक्षादिसर्व्वसुखान्तर्भावात् गुणानां सर्व्वपुरुषार्थानां संग्रहः । सर्वास्मिन् समाहारस्तदिच्छयेति स्वामिचरणाः ॥ २६ ॥

अतः केवलं भजनमेव वृणे नतु वरानित्याह । अथ आभस्य निष्काम एव केवलमिव भक्तिं कुर्वे । ननु ज्ञानकर्म्मादिमिश्रयापि ज्ञानी कर्म्मीव गुणी भूतामित्यर्थः । तत्रापि न नारदादिरिव किन्तु पद्मकरा लक्ष्मीरिव मार्ज्जनलेपनपादसम्बाहनव्यजनताम्बूलार्पणादिभिरभीक्ष्णमेवेत्यर्थः । यतो लालसः लालसावान् "स महान्

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

बालसाहयो,, इत्यभिधानादत्यधिकं स्पृह इत्यर्थः । न चात्र पृथोरुज्ज्वलभ्रम आशङ्कनीयः । उत्तरश्लोके जगज्जनन्यामित्युक्तेः जगति च स्वस्यान्तःपाताल्लक्ष्म्यां जननीभावेन स्वस्य दास्यभावृत्वस्ते: । अतः पद्मकरवेत्युपमेयं परिचरणांशेनैव भगवच्चरणपरिचर्यायां तस्या एवातिप्रसिद्धेः लक्ष्म्यां परमभक्तिमतोऽपि स्वस्य वीरभक्तत्वं वाचैव द्योतयन्नाह । अपीति कर्मणि क्रियमाणे यथेन्द्रेण सह कलिः एवं भक्तावपि तस्या सह कलिः स्यादिति वितर्कयति एकस्मिन् पत्यौ स्पर्द्धमानयोरपि किं कलिर्न स्यादिति काका वितर्कः ! ननु पर्यायेण सेवायां न स्यात् नैवम् । कृतस्त्वच्चरणयोरेकस्तानोऽवरामो मनोविस्तारो याभ्यां तयोः ॥ २७ ॥

"कृपां तस्य समाश्रित्य प्रौढां नान्यमपेक्षते । अतुलां यो वहन् कृष्णे प्रीतिं वीरः स उच्यते,, इति वीरभक्तोचितं स्वस्वभावं प्रकटयन्नाह । जगज्जनन्यां जगन्मध्यवर्तित्वेन ममापि जनन्यां लक्ष्म्यां वैशसं विरोधः स्यादेव कुतः यस्याः कर्मणि नः समीहितमिच्छा सा खलु युष्मद्वक्षस्यासीना विराजताम् अहं पुत्र एव सर्वत्र युष्मच्चरणपरिचर्यां करवाणि तस्याः कोऽयमाग्रहो यत्परिचरणं विना न जीवतीति भावः ननु त्वमर्वाचीनः सा तु प्राचीना त्वं निकृष्टः सा तु महतीति तया सह किं विरुध्यसे सत्यं तथापि मद्विरोधे मत्पक्षपातवत्त्वात्त्वापि मयि तव पक्षपात एव स्यादित्याह । फल्गु तुच्छमपि त्वमुरु करोषि यतो दीनेषु वत्सलः । ननु त्वं तस्याः कोपान्न विभेषि किं तत्र सत्यं न बिभेमीत्याह । स्व एव धिष्ण्ये स्वसामर्थ्येऽभिरतस्य मम तया किं न किमपीत्यर्थः तत्कृपोद्रेक एव मम सामर्थ्यं यदुक्तं वीरभक्तोदाहरणेषु । "प्रलम्बरिपुरीश्वरो भवतु का क्षतिस्तेन मे कुमारमकरध्वजादपि न किञ्चिदास्ते फलम् । किमन्यदहमुद्धतः प्रभुकृपाकटाक्षश्रिया प्रिया परिषदप्रिमां न गणयामि माषामपि" इति धिष्ण्यः शक्तौ च पारद इति पुंस्काण्डे ऽमरदत्तः ॥ २८ ॥

तदेवं न केवलमहमेव किन्तु सर्व एव त्वद्भक्ता वरं वृणवन्तीत्याह । भजन्त्यथेति । यतस्त्वं दीनवत्सलः अतएव भजन्ति युवस्तो निरस्तो भवति मायागुणानां विभ्रमोदयो विविधवरस्पृहा यतस्तं त्वद्भजनस्यैवायं स्वभावो यद्वरस्पृहा निवर्त्तेत इति ननु तर्हि भजनस्य किं फलं तत्राह । मवदिति । निमित्तं फलं पदानुस्मरणस्यैव सर्वसुखचूडामणेस्तदितरसुखतिरस्कारकत्वादिति भावः ॥ २९ ॥

ननु तर्ह्यहं स्वभक्तं प्रति वरं वृणीष्वेति कथं ब्रवीमि तत्राह । स्व इति । यदि कश्चिद्रूपको भक्तस्तवत्प्रलोभनात् कमपि वरं वृणुते तदैव तस्य भक्तिरसवर्जनात् सर्वनाश इति भावः । स्वकर्मणा पितृलोक इति स्वर्गकामोऽश्वमेधेन यजेतेत्यादि वेदलक्षणापि तव वाग् जगन्मोहिनीत्याह । नु महो ते वाचा तन्त्र्या यदि जनोऽयमीसिबद्धः स्यात्तदा पुनः पुनः फलैर्मोहितः सन् कथं कर्म ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible]तो भक्तवद्यत्वमुक्त्वा तस्य भगवत्प्रापणमाह । सत्त्वा-

विना स आदित्यांशोऽ[illegible]
विलोकितुं नाशकत् यत[illegible]
नासिकाविकारैः विक्लव[illegible]
तूष्णीमवस्थितः अमुं हरि[illegible]
न्वयः ॥ २१ ॥

अथानन्तरम् अश्रुकलामवमृज्य अतृप्तदृग्गोचरं प्राप्तं पुरस्तं विलोकयन् आह यदा स्पृशन्तं क्षितिमित्यनेन देवाः यदा क्षितिं न स्पृशन्ति स तु देवदेवः स्वेच्छया भक्तवात्सल्येन सर्वं करोतीति सूच्यते ॥ २२ ॥

गुणैर्विविधतया क्रियते इति गुणविक्रियः संसारस्तस्मिन्नात्मा मनो येषामबुधानां भवत्पराङ्मुखानां नारकाणामपि ये सन्ति तान् कैवल्यपतेः केवलस्याक्षरस्य भावः कैवल्यं क्षेत्रज्ञस्वरूपमात्रप्राप्तिस्तत्पतेः वरदानां भुक्तिमात्रदातॄणां ब्रह्मादीनामीश्वरात्स्वभावापत्तिमोक्षप्रदादित्यर्थः तत्त्वतो बुधः कथं वृणीते तस्मादहं च न वृणे ॥ २३ ॥

तर्हि कैवल्यं भुक्तिं मुक्तिं वा तवेष्टं वरं वृणीष्वेत्यत्राह । नेति । महत्तमानां वैष्णवानामन्तर्हृदयान्मुखतश्च्युतो नित्यं स्वाभीष्टतया हृदि निहितस्तदधिकारिजनानन्वाय मुखतः प्रवर्तितः भवत्पदाम्भोजयोः कीर्तिरूपो मकरन्दः यत्र नास्ति त्वत्कीर्तिश्रवणमहम्वस्तु न कामये इत्यर्थः किन्तु मे वरः एष कस्तव कीर्तिश्रवणाय कर्णायुतं विधत्स्व ॥ २४ ॥

हे उत्तमश्लोक! उत्तमकीर्ते सभवत्पदाम्भोजयोः सुधायाः कीर्तिरूपायाः कणस्य लेशस्यापि योऽनिलः दूरतोऽपि कीर्तिलेशश्रवणमित्यर्थः विस्मृतं तत्त्ववर्त्म यैस्तेषां कुयोगिनां नो स्मृतिं विरति ॥ २५ ॥

भगवद्यशसः गुणाश्लेष्यत्वं मुक्तिप्रदत्वं किम्बहुना देव्याः सर्वस्वभूतत्वं चाह । यश इति । हे सुश्रवः! शोभनकीर्ते ! शिवं श्रवणकाले सुखदमन्ते मुक्तिदं ते यशः सतां सङ्गमे सकृदपि यः शृणोति स गुणाश्लेषेत् पशुमृते कथं विरमेत् न कथमपीत्यर्थः यशशः गुणसंग्रहेच्छया श्रीः मुक्तलोके मुमुक्षुलोके च भगवत्सहचरी देवी वव्रे ॥ २६ ॥

अहमपि लालसः समुत्सुको मुमुक्षुलोके लीलां कुर्वन्तं मुक्तलोके च विहरन्तं श्रीवत् आभजे आवयोः एकस्मिन्पत्यौ सेवार्थं स्पर्द्धमानयोरपि कलिः कलहो न स्यादेव तत्र हेतुः कृतत्वच्चरणैकतानयोः कृतो नियोजितस्त्वच्चरणयोस्तान श्रीरम्भरम्यासाविस्तारो याभ्यां तयोः तर्हि त्वयि समर्पितात्मनोरावयोर्विरोधो भवति ॥ २७ ॥

हे जगदीश ! यस्याः कर्मणि त्वत्सेवायां नः समीहितम् अस्माकमपीच्छा भवति तस्यां जगज्जनन्यां नो वैशसं विरोधोऽसम्भावितोऽपि यदि स्यादेव तर्हि भवतु यतो दीनवत्सलस्त्वं फल्गु अत्यल्पमपि भक्तकृतमुरु बहु करोषि स्वे धिष्ण्ये स्वकीये वासस्थाने भक्तहृदि स्वमहिम्नि वारमतस्तव स्वामन्यभक्तजनं हित्वा तया किम् "न मे भक्तात्प्रियतमो ह्यात्मयोनिर्न शङ्करः । न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान्" इति वक्ष्यमाणाच्च ॥ २८ ॥

अथ तव फल्गूत्ककारित्वादिगुणगणज्ञानानन्तरम् अतस्तव दीनेषु वत्सलत्वात् निरस्तो मायागुणानां विभ्रमस्य विलासस्योदयः प्रभावो यस्मात् तं त्वाम् [illegible]

त्वन्माययाऽद्धा जन ईश! खण्डितो यदन्यदाशास्त ऋतात्मनो बुधः ।
यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुम् ॥ ३१ ॥

मैत्रेयउवाच ॥

इत्यादिराजेन नुतः स विश्वदृक् तमाह राजन्! मयि भक्तिरस्तु ते ।
दिष्ट्येदृशी धीर्मयि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजाम् ॥ ३२ ॥
तत्त्वं कुरु मयादिष्टमप्रमत्तः प्रजापते !
मदादेशकरो लोकः सर्वत्राप्नोति शोभनम् ॥ ३३ ॥

मैत्रेयउवाच ।

इति वैन्यस्य राजर्षेः प्रतिनन्द्यार्थवद्वचः ।
पूजितोऽनुगृहीत्वैनं गन्तुं चक्रेऽच्युतो मतिम् ॥ ३४ ॥
देवर्षिपितृगन्धर्वसिद्धचारणपन्नगाः ।
किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आह । भवत्पदानुस्मरणादृते अन्यन्निमित्तं प्रयोजनं सतां साधूनां न विद्महे ॥ २९ ॥

भजन्तं वरं वृणीष्वेति त्वं यदात्थ तां ते गिरं जगतां विमोहिनीं मन्ये अन्यथा ते वाचा नु तन्त्या असितः अबद्धः कथं मोहितः कर्म करोति ॥ ३० ॥

———

भाषाटीका।

वे आदि राजा पृथु महाराज हाथ जोड़ कर खड़े रहे आंसुओं के भर आने से दर्शन को भी नहीं समर्थ हो सके कण्ठ मे वाष्प के भर आने से कुछ भी कह नहीं सके इस परमात्मा को हृदय मे ध्यान कर के स्थिर चित्त से स्तुति करने लगे ॥ २१ ॥

तदनन्तर आंसुओं को पोंछ कर नहीं तृप्त भये नेत्रों के आगे स्थित आदि पुरुष भगवान् चरण से पृथिवी को स्पर्श करके खड़े हैं एक हाथ ऊंचे गरुड के कंधे पर रखा है ऐसे देख स्तोत्र कहने लगे ॥ २२ ॥

पृथु महाराज बोले हे विभो हे ईश वर देने वालों में श्रेष्ठ आप से विवेकी हो कर कौन वरों को मांगेगा जो वर के सुख तीनों गुणों के विकार वाले नरक वासि जीवों को सुलभ हैं तिन को मै कैवल्य पति से नहीं मांगूगा ॥ २३ ॥

उस कैवल्य कोभी मैं नही चाहताहूं जिसमें कि आपके भक्त महा पुरुषोंके मुखसे गिरा आपके चरणारविन्द का कथारूपी रस न होवै तिसिसे कथा सुननेको दशहजार कानोंकी शक्ति दीजिये यही मेरा वर मागना है ॥ २४ ॥

हे उत्तम श्लोक! महत्पुरुषों के मुखसे गिरा आपके चरणकमल के मकरंद बूंदका वायु तत्त्वमार्ग को भूलेहुये कुयोगि हमलोगों को फिर स्मृतिकरा देता है तिससे और वर न ही चाहियें ॥ २५ ॥

हे सुन्दर कीर्तिमन्! सत्पुरुषों के सङ्ग में यदि किसी प्रकार से आपके यशको सुनताहै तो पशुके बिना गुणग्राही यदि हो तो आप के गुणों को नहीं छोड़ताहै जिनगुणों को सम्पादन की इच्छा से लक्ष्मीजी ने वरण किया है ॥ २६ ॥

इसी हेतु से संपूर्ण पुरुषों मे उत्तम सब गुणों के स्थान आप को मैं लक्ष्मी जी की नाई भजूंगा यद्यपि आप एक पतिपर हम दोनों की इच्छा रहेगी तौ भी आप के चरण मे एकाग्र बुद्धि रहने से हम दोनों का कोई कलह नहीं होगा ॥ २७ ॥

हे जगदीश अथवा जगन्माता लक्ष्मी जी से विरोध हो भी जायगा क्यों कि उन के करने की सेवा मे हमारी इच्छा है तौ भी चिन्ता नहीं क्यों कि आप तो दीनदयाल हो भक्तों का थोडा किया भी अधिक मानते हो क्यों कि अपने स्वरूप मे आनन्दित आप को लक्ष्मी से क्या प्रयोजन है ॥ २८ ॥

इसी हेतु से महात्मा लोग आप को भजते हैं क्यों कि आपने माया के गुणों के विलास को दूर कर दियाहै हे भगवन् आप के चरण स्मरण के बिना उन महात्मों का दूसरा कुछ निमित्त हम नहीं जानते हैं ॥ २९ ॥

आप की वाणी जगत् को मोहने वाली है ऐसा मैं मानता हूं जोकि आप भजन करने वाले मेरे से भी वर मांगो कहते हो ऐसी आप की वेदलक्षण वाणी मे यदि मनुष्य न बंधा होवै तो फिर मोहितहो कर उन प्रवृत्ति मार्ग के कर्मों को क्यों करे ॥ ३० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्वन्मायया खण्डितस्य त्वया पुनः वञ्चनं न कर्तव्यं किन्तु हितमेवेष्टितव्यमित्याह । त्वन्मायया ऋतादात्मनस्त्वत्तः खण्डितः पृथक्कृतो यद्यतोऽन्यत्सुखादिकमाशास्ते अतः स्वयमविज्ञापित एव हितं चेष्टितुमर्हसि ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

यज्ञेश्वरधिया राज्ञा वाग्वित्ताञ्जलिभक्तितः ।
सभाजिता ययुः सर्वे वैकुण्ठानुगतास्ततः ॥ ३६ ॥
भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः ।
हरन्निव मनोऽमुष्य स्वधाम प्रत्यपद्यत ॥ ३७ ॥
अदृष्टाय नमस्कृत्य नृपः सन्दर्शितात्मने ।
अव्यक्ताय च देवानां देवाय स्वपुरं ययौ ॥ ३८ ॥

इति श्रीभागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां वैयासिक्यां संहितायां पृथुचरिते पृथुस्तवोनाम
विंशोऽध्यायः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वाग्वित्ताञ्जलिभिर्भक्तितः पूजिताः सन्तः वैकुण्ठानुगताः पार्षदाश्च ॥ ३६ ॥

अमुष्य राज्ञः हरन्निवेति लोकोक्तिः वस्तुतस्तस्य मनः सर्वदैव तदधीनमस्त्येव स्वधाम राज्ञो हृदयम् ॥ ३७ ॥

अदृष्टाय लोचनपथमतिक्रान्ताय सन्दर्शित आत्मा येन तस्मै वस्तुतोऽव्यक्ताय ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
विंशोऽध्यायः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वन्मायया मोहितस्य त्वया पुनर्मोहनं नोचितं किन्तु हितमेव चेष्टितव्यमित्याह । त्वन्माययेति । हे ईश ! त्वन्मायया अबुधः आत्मपरमात्मयाथात्म्यज्ञानविधुरः जनः लोकः दैवात्त्वां भजन् ऋतात्मनः सत्यात्मनस्त्वत्तः यदि अन्यत् अर्थकामादिकमाशास्ते तर्हि खण्डितः पृथक्कृतः दूरीकृत एव स्यादित्यर्थः ईशेति हेतुगर्भम् आत्मना ईशेन त्वया आत्मीयमैश्वर्यं दूरीकृतं स्यादितीशत्वमेव विप्लुतं स्यादिति भावः अतः स्वयमविज्ञापित एव बालाहितमपुत्रहितम् पिता यथा चरेत् कुर्यात्तथा नः समीहितं कर्तुमर्हसि ॥ ३१ ॥

एवमुक्तो भगवान् तदुक्तमनुजग्राहेत्याह मुनिः । हेराजन् ! ते त्वया साधु वर्णितं यत् यस्मात् आशिरः ऐहिकपुरुषार्थान्नाशास्से नेच्छसि अतो भवान् मत्परः स्वर्गापवर्गनरकान् समं यथा तथा पश्यति अपवर्गोऽत्र कैवल्यं नरकग्रहणं दृष्टान्तार्थं नरकवत्स्वर्गापवर्गौ हेयौ द्रक्ष्यसीत्यर्थः *

हे महाराज ! ते तुभ्यमहं प्रीतः यस्मात्त्वं मदादेशं श्रद्दधानः विश्वसन् दुस्त्यजमपि रोषमत्यजः तन्मदादेशविश्वसनमेव परमुत्कृष्टमर्हणमाराधनम् ॥ ० ॥

इति पूर्वोक्तरीत्या आदिराजेन पृथुना नुतः स्तुतः स अच्युतभगवान् तमादिराजं प्रत्याह उक्तमेवाह हेराजन् ! मयि ते तव भक्तिरस्तु वर्द्धतां दिष्ट्या दैववशेन ते त्वया मयीदृशी धीर्भक्तिः कृता कथंभूता यया धिया दुस्त्यजामपि मदीयां मायां तरति स्म ॥ ३२—३३ ॥

उपसंहरति । इतीति । वैन्यस्य राजर्षेः प्रभोः अर्थवत् शृण्वतामपि पुरुषार्थसाधनं वचः अभिनन्द्य तेन पूजितः एनं वैन्यमनुगृह्याच्युतो भगवान् गन्तुं मतिं चक्रे ॥ ३४ ॥

तदा देवादयः सर्वे राज्ञा यज्ञेश्वरधिया भगवदात्मकत्वधिया यथायोग्यं वागादिभिः सभाजिताः पूजिताः ततः 'यज्ञभूमेः वैकुण्ठं भगवन्तमनुसृत्य गताः ययुः ॥ ३५ ॥ ३६ ॥

सोपाध्यायस्य राज्ञः पश्यतः सतः अमुष्य राज्ञो मनो हरन्निव भगवान् स्वधाम प्रत्यगात् ॥ ३७ ॥

अदृष्टाय चक्षुर्विषयतामप्राप्ताय सन्दर्शित आत्मा येन तस्मै देवानां ब्रह्मादीनामपि देवाय वासुदेवाय "वसन्ति यत्रभूतानि भूतात्मनि„ इति निरुक्तवासुदेवपदवाच्याय नमस्कृत्य स्वपुरं ययौ ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
विंशोऽध्यायः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि मोहित इत्याह । त्वन्माययेति । अबुधो योजनः ऋतात्मनः सत्यात्मनो हरेः सकाशादन्यत्स्वर्गादिकमाशास्त इति यत्तस्मादेव त्वन्मायया खण्डितस्त्वदुपास्तेर्वियोजित इत्यर्थः अस्यामवस्थायां बहुप्रजल्पेनकिमिदमेव प्रार्थय इत्याह । ययेति ॥३१॥

पृथूक्तं श्रीपतिमनसि संविष्टमिति भावेन हरेस्तदुक्तिप्रशंसाप्रकारमाह । साध्विति । साधूचितं इदमात्यन्तिकभक्तलक्षणमिति भावेनाह । स्वर्गेति । नरकान्नरकान्तरप्राप्तिसमये किञ्चिन्निर्वृत्तिः समत्वम् ॥ ० ॥

मद्भक्तस्य रोषत्याग एव मत्प्रीतिसाधनमित्याह । प्रीत इति ॥ ० ॥

प्रतिवचनं चेत्समाप्तं परं किमकारि हरिणेति तत्राह । इतीति ॥ ३२ ॥ ३३ ॥ ३४ ॥

---

* ते साधुवर्णितंराजन्नाशास्से न यदाशिषः । स्वर्गापवर्गनरकान् समंपश्यतिमत्परः ॥
प्रीतोऽहंते महाराज रोषं दुस्त्यजमत्यजः । मदादेशंश्रद्दधानस्तन्महं परमार्हणम् ॥
इत्यधिकौश्लोकौ श्रीवीरराघवश्रीविजयध्वजतीर्थयोःपाठे ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवादयः किमकुर्वन्नाह । देवेति ॥ ३५ ॥

...श्वरो हरिरवस्थितः तदुक्तं "भूतेषु हरिरित्येव ... सर्वभूतेषु च हरेः पूजा कार्यात्मवेदिभिः,, इति वचनात् इदं सर्वं तदर्पणमस्त्विति धीर्यैश्वर्यधीरतया समाजिताः सभाजिताः ॥ ३६ ॥

गन्तुं मन एव कृतं नतु गतमिति शङ्कामाभूदित्याह । भगवानपीति ॥ ३७ ॥

राज्ञो यज्ञशालातः स्वपुरप्रस्थानप्रकारमाह । अदृष्टायेति । अदृष्टाय चक्षुरगोचरविषयाय स्वस्य संदर्शितात्मने साक्षात्कारितस्वरूपाय ॥ ३८ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
विंशोऽध्यायः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

त्वन्मायया खण्डितस्य त्वया पुनः खण्डनं न कर्तव्यं किन्तु हितं चेष्टितव्यमित्याह । त्वन्मायया ऋतात्मनस्सत्त्वात् खण्डितः पृथक् कृतः यदतोऽन्यत् पुत्रादिकमाशास्ते अतः स्वयमविज्ञापित एव हिते चेष्टितुमर्हसि ॥ ३१ ॥

मैत्रेयउवाच इति कचिन्नास्ति च यथा पृथोः श्रीमद्भगवद्वाक्येकनिष्ठा तथैव तेनान्यथानुपदेशे विश्वासश्च । तथा श्रीभगवतोऽपि तदेकहितस्यैव तथाप्यन्यत्र प्रवर्तनन्तु तन्निष्ठाप्रकटनार्थाधिकारिविशेषे तद्द्वारैव ज्ञानादिप्रचारणार्थञ्चेति स्फुटमेव दर्शयति । इत्यादीति । अन्यथा ज्ञानमस्तु ते इत्येवोक्त्येतेति भावः ततः सुदुस्तरामिति कचित् पाठः ॥ ३२—३४ ॥

देवर्षीति युग्मकम् ॥ ३५ ॥

वैकुण्ठस्यानुगताः सेवायमानाः पार्षदास्तु तेनैव सह गमिष्यन्तीति योग्यत्वात् ॥ ३६—३७—३८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
विंशोऽध्यायः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्मात्त्वं वृणीष्वेति प्रलोभनेन स्वभक्तपरीक्षामपि न कुर्यादित्याह । त्वदिति । जनः सर्व एव यदस्मात् ऋतात्मनः सत्यस्वरूपात् भजनात् वस्तुतः सकाशादन्यदेवाशास्ते नोऽस्माकन्तु त्वन्मते यद्भद्रं भवति तदेव समीहितुं चेष्टितुमर्हसि । यथेति बालस्य हिताहितं पितेव जानाति बालस्तध्ययनखेलनादिकं स्वहिताहितं विपर्ययेण जानातीत्येवं मह्यं वरस्य प्रदानं वा हितं विमृश्य स्वसम्मतमेव भद्रं क्रियतां न पुनर्मम सम्मतिरेव प्रमाणीकर्तव्येति भगवत्येव पृथुना विश्रम्भो व्यञ्जितः ॥३१॥

भगवानपि तथैवाह । मयि भक्तिरित्यतो जीवानां सर्वथा किं हितमिति प्रश्ने सर्वज्ञैरपि वेदवादिभिः प्रत्युक्तं ज्ञानयोगादिकं न विश्वसनीयम् । भगवन्तमपेक्ष्य तेषामप्यज्ञत्वादिति भक्तेरेव हितत्वं मान्यस्येति सिद्धान्तो निर्द्धारितः ॥ ३२—३७ ॥

अन्यैरदृष्टाय सन्दर्शित आत्मा आश्रयो येन तस्मै इति वैकुण्ठगमनपर्यन्तं पृथुस्तु तं ददर्शेत्यर्थः ॥ ३८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
विंशोऽध्यायश्चतुर्थस्य सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ॥

हे ईश ! ऋतः सत्यः आत्मा आश्रयो ऽशी सर्वदा स्थित्यादिप्रदस्त्वमेव "एतदात्म्यमिदं सर्वम्,, इत्यादिश्रुतेः तस्मात्त्वत्तः जनस्त्वन्मायया खण्डितः अप्रज्ञात्मकत्वभ्रान्तिं नीतोऽतोऽबुधः अत एव यस्मात्त्वत्तोऽन्यत् ऐहिकामुष्मिकं सुखमाशास्ते अतो यथा पिता बालस्य हितं चरेत् तथा भद्रः साक्षात्पिता स्वयं त्वमेव नो हितं समीहितुमर्हसि ॥ ३१ ॥

मायां तरतिस्म जन इति शेषः ॥ ३२—३५ ॥

वैकुण्ठानुगता विष्णुपार्षदाः ततः स्थानात् ॥ ३६ ॥ ३७ ॥

पूर्वं सन्दर्शितः आत्मा विग्रहो येन तस्मै पुनरदृष्टाय परोक्षताङ्गतायापि नमस्कृत्य स्वपुरं ययौ ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
विंशाध्यायार्थप्रकाशः ॥ २० ॥

भाषाटीका ।

हे ईश ! निश्चित है कि आप की माया के लगने से सत्य स्वरूप आप से यह संसारी अज्ञानी जन पृथक् हो गया है जिस हेतु से कि यह अन्य पदार्थों को चाहता है और जैसे पिता स्वयं ही बालक का हित करता है तैसे आप ही हमारे हित करने को योग्य हो ॥ ३१ ॥

मैत्रेयजी बोले इस प्रकार से आदि राज ने जब स्तुति किया तब सर्वदर्शी भगवान् उनसे बोले कि हे राजन् ! हमारे विषयमें तुमारा भक्ति होवे यह बड़ी मंगल की बात है कि जो तुमने हमारेमें ऐसी भक्ति की है जिस भक्ति से मनुष्य दुस्त्यज मायाको तर जाते हैं ॥ ३२ ॥

तिससे हे प्रजापते तुम हमारे उपदेश को करो साव-धान हो कर हमारी आज्ञा को करने वाला सर्वत्र शुभ को प्राप्त होता है ॥ ३३ ॥

मैत्रेय जी बोले वेनपुत्र राजर्षि के इस प्रकार यथार्थ वचन की प्रशंसा करके पूजित होकर राजा पर अनुग्रह करके जाने को भगवान् ने विचार किया ॥ ३४ ॥

तब देवर्षि पितर गंधर्वसिद्ध चारण पन्नग किन्नर अप्सरा मनुष्य पक्षि अनेक प्रकार के प्राणी इन सबों को परमेश्वर बुद्धि से राजा ने वचन से धन से हाथ जोड़ कर सन्मान किया फिर ये सब भगवान् के पीछे आये थे सो चले गये ॥ ३५—३६ ॥

अच्युत भगवान् भी उपाध्याय सहित राजर्षिके मन को हरते से अपने वैकुंठ धामको चले गये ॥ ३७ ॥

राजा भी अपने आत्मस्वरूप को दिखाकर अदृष्ट भये देवों के देव भगवान् के अर्थ नमस्कार करके यज्ञ शाला से अपने घर को गये ॥ ३८ ॥

इति श्री भागवतचतुर्थस्कंध बीसवां अध्याय का
भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ २० ॥

एकविंशोऽध्यायः ॥

——○०○——

मैत्रेय उवाच ॥

मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः ।
महासुरभिभिर्धूपैर्मण्डितं तत्र तत्र वै ॥ १ ॥
चन्दनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् ।
पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिभिरर्चितम् ॥ २ ॥
सवृन्दैः कदलीस्तम्भैः पूगपोतैः परिष्कृतम् ।
तरुपल्लवमालाभिः सर्वतः समलंकृतम् ॥ ३ ॥
प्रजास्तं दीपबलिभिः संभृताशेषमङ्गलैः ।
अभीयुर्मृष्टकन्याश्च मृष्टकुण्डलमण्डिताः ॥ ४ ॥
शङ्खदुन्दुभिघोषेण ब्रह्मघोषेण चर्त्विजाम् ।
विवेश भवनं वीरः स्तूयमानो गतस्मयः ॥ ५ ॥
पूजितः पूजयामास तत्र तत्र महायशाः ।
पौरान् जानपदांस्तांस्तान् प्रीतः प्रियवरप्रदः ॥ ६ ॥
स एवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महान् महत्तमः ।
कुर्वन् शशासावनिमण्डलं यशः स्फीतं निधायारुरुहे परं पदम् ॥ ७ ॥

सूत उवाच ॥

तदादिराजस्य यशो विजृम्भितं गुणैरशेषैर्गुणवत्सभाजितम् ।
क्षत्ता महाभागवतः सदस्पते ! कौषारविं प्राह गृणन्तमर्चयन् ॥ ८ ॥

विदुर उवाच ॥

सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः ।
बिभ्रत्स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गाम् ॥ ९ ॥
को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः ।
लोकाः सपाला उपजीवन्ति काममद्यापि तन्मे वद कर्म शुद्धम् ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विंशे तु पृथुना प्रजानामनुशासनम् ।
सुरादीनां महासदसि वर्ण्यते ॥ १ ॥
...भावित्युक्तं तत्पुरमनुवर्णयति । मौक्तिकैरिति त्रिभिः ॥ १ ॥
...नागुरुयुक्तैस्तोयैरार्द्रा रथ्यादयस्तद्युक्तम् तोक्मैर्हरितय-
...दिरितिवा अर्चिभिर्दीपैः ॥ २ ॥

सवृन्दैः पुष्पफलयुक्तैः कदलीस्तम्भैः पूगैर्बालैस्तथाविधैः सर्वतः समलंकृतं शोभितम् ॥ ३ ॥

संभृतान्यशेषाणि मङ्गलानि यैस्तानि तैः सहाभिजग्मुः मृष्टा उज्ज्वलाः कन्याश्च ॥ ४ ॥

गतस्मयो निरहंकारः ॥ ५ ॥

प्रियान्वरान्प्रददातीति तथा ॥ ६ ॥

[illegible] दीपिका।

[illegible] ॥ ७ ॥

[illegible] भाजितं सत्कृतं यशो गृणा- [illegible] सदसस्पते ! शौनक ॥ ८ ॥

लब्धान्यशेषसुराणामर्हणानि येन सः किमकरोदिति शेषः ॥ ९ ॥

अथवौत्सुक्यमाविष्कुर्वन्प्रार्थयते । कोन्विति । यस्य विक्रमः पृथ्वीदोहनं तस्योच्छिष्टतुल्यं कामम् तत्तस्य कर्म वद ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

पुरं यथाविस्युक्तं तत्पुरमनुवर्णयति । मौक्तिकैरिति । मौक्तिकै-र्मुक्तादामभिः चन्दनागरुयुक्तैस्तोयैरार्द्रा रथ्यादयः अस्मिन् सन्तीति तथा तोकमैर्यवाङ्कुरैरर्चिभिर्दीपैश्च ॥ १ ॥ २ ॥

पूगपोतैर्बालपूगैः परिष्कृतमलंकृतं संभृतान्यशेषाणि मङ्गल-द्रव्याणि दध्यादीनि तैः सहाभिजग्मुः राज्ञोऽभिमुखं ययुः मृष्टानि निघर्षितानि कुण्डलानि यासां ताः मृष्टा उज्ज्वलाः कन्याश्च अभीयुः ॥ ३ ॥ ४ ॥

ततः शङ्खादिघोषेण ऋत्विजां वेदघोषेण च सह वन्दिभिः स्तूयमानो विगतस्मयः निरहङ्कारः वीरः पृथुः भवनं विवेश ॥ ५ ॥

तत्र तत्र रथ्यादिषु पौरादिभिः पूजितः महायशाः विपुलकीर्तिः पौरान् पुरवासिनः जानपदान् देशवासिनश्च तदीयप्रजादिभिः प्रीतः तेभ्यो समीहितवरप्रदो भूत्वा यथायोग्यं पूजयामास ॥ ६ ॥

तथा गुणैर्महान् अत एव महत्तमः पूज्यतमः अत एवानवद्य-चेष्टितः निर्दुष्टोत्तरव्यापारः एवमादीनि दोहनादीनि भूयांसि कर्माणि कुर्वन् भूमण्डलं शशास अनुशिष्टवान् ततः स्फीतं विपुलं यशः इह लोके निधाय परं पदं वैकुण्ठमारुरोह अधिरूढवान् ॥ ७ ॥

एवं श्रुतपृथुचरित्रः सूतः एवमादीत्यादिशब्दोपक्षिप्ता-न्यतदुदारचेष्टितशुश्रूषया पुनः प्राहेत्याह सूतः । श्रुत्वेति । अशे-षैर्गुणैर्विजृम्भितमूर्जितं गुणवद्भिः सभाजितं सत्कृतमधिराजस्य पृथोर्यशः श्रुत्वा महाभागवतः क्षत्ता हे सदस्पते ! शौनक गृणन्तं कथयन्तं कौषारविं मैत्रेयमर्चयन् साधुसाध्विति सम्मानयन्प्राह ॥८॥

उक्तमेवाह । स इति द्वाभ्याम् । विप्रैर्ब्रह्मर्षिभिः राज्येऽभिषिक्तः लब्धमशेषाणामखिलानामिन्द्रादीनामर्हणं येन सः वैष्णवं विष्णोः सम्बन्धि तेजः वीर्यं बाह्वोः बिभ्रत् बिभ्राणः याभ्यां वैष्णवतेजःशालिभ्यां गां उद्दोह एवंभूतः किमकरोदिति शेषः ॥ ९ ॥

अथवौत्सुक्यमाविष्कुर्वन् प्रार्थयते । कोन्विति । अस्य पृथोः कीर्तिमभिज्ञश्चेत्कोनु न शृणोति कथम्भूतस्य यस्य विक्रमः पृथ्वीदोहनादिरूपः तस्य यदुच्छिष्टं तुच्छं काममद्यापि अशेषभूपाः लोकपालैः सहिता लोकाश्च उपजीवन्ति तत्कर्म तदीयं शुद्धं निरवद्यं चेष्टितं मे मह्यं वद ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

देवादीन्विना हरेर्ब्राह्मणाः सन्निधानपात्रमित्येतत्प्रतिपाद्यतेऽस्मि-न्नध्याये तत्रानन्तरातीताध्याये पृथुः पुरं यथावित्युक्तं तत्पुरं वर्णयति । मौक्तिकैरित्यादिना ॥ १ ॥

पिष्टचन्दनागुरुमिश्रतोयैरार्द्रा रथ्याचत्वरमार्गा यस्मिंस्तत्त-थोक्तं गोमयतोयैरर्चिभिर्दीपज्वालाभिः ॥ २ ॥

पूगपोतैः क्रमुकपुष्पैः परिष्कृतमलंकृतम् ॥ ३ ॥

सम्भृतानि सम्पादितानि अशेषाणि मङ्गलानि दध्यादीनि तैश्च युक्ताः मृजसंशुद्धावित्ति धातुः ॥ ४ ॥

भूयः पुरप्रवेशानन्तरं गतस्मयो गर्वरहितः ॥ ५ ॥

प्रियानभीष्टान्वरान् प्रददातीति प्रियवरप्रदः ॥ ६ ॥

प्रश्नमङ्कुरयन्नुपसंहरति । स एवमिति । भूयांसि महांति स्फीतं पुष्टं लोके निधाय ॥ ७ ॥

गुणवद्भिः पुरुषैः सभाजितं पूजितम् ॥ ८ ॥

किमाहेति । तत्राह । सोऽभिषिक्त इति स पृथुर्यत्कर्माकरोत्तन्मे वदेत्यन्वयः । लब्धान्यशेषैः सुरैः कृतान्यर्हणानि येन स तथोक्तः ॥ ९ ॥

वक्तव्यत्वे गुणमाह । कोन्वस्येति । "देवेभ्य * ऋषयो भूपाश्चोच्यन्ते शक्तिमत्तया । कचित्कचित्तु मोहार्थं कदाचित्कारणं हेतुत" इति वचनाद्युक्तं सपाला इति ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

मौक्तिकैरिति त्रिकम् । तोकमैरित्यत्र स्तम्बैरिति चित्सुखः ॥१-८॥

बिभ्रच्च वैष्णवमिति । गौणपाठः स इत्यत्र तु पौनरुक्त्यं लक्ष्यते ॥ ९ ॥

यद्विक्रमेति । येन विक्रम्य उपात्तं तत् उच्छिष्टमेवेत्यर्थः ॥१०-१३॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

एकविंशे महासत्रे सर्वसौन्दर्यमण्डितः।
प्रश्रयाब्धिः पृथुर्भक्तिं स्वप्रजाः समशिक्षयत् ॥ १ ॥

पुरं यथाविस्युक्तं तत् पुरमनुवर्णयति । मौक्तिकैरिति त्रिभिः । मौक्तिकादिभिर्यत् यत् पुरं मण्डितं तत्र तत्र ययाविति पूर्वेणा-न्वयः ॥ १ ॥

तोकमैर्हरितयवैः अर्चिभिर्दीपैः ॥ २ ॥

सवृन्तैः फलपुष्पवृन्तसहितैः पूगपोतैर्नूतनगुवाकवृक्षैः ॥ ३ ॥

निर्मज्जनार्थं दीपावलिभिः सम्पूर्णाशेषमङ्गलैर्दध्यादिभिः सहिताः । मृष्टकन्याः मार्ज्जितगात्र्यः कुमारिकाः । मृष्टकुण्डलेति तदुपलक्षितोज्ज्वलवस्त्रालंकारयुक्ताः ॥ ४ ॥

गतस्मयः स्वस्य तादृशमसाधारणमैश्वर्यं वीक्ष्यापि विगतगर्व इत्यर्थः ॥ ५ ॥

पूजितः पौरादिभिः स्वर्णमुद्रानर्घ्यनव्यवस्त्राद्युपायनार्पणे-नेत्यर्थः पूजयामास स उत्तीर्णकञ्चुकोष्णीषादिप्रतिदानेने-त्यर्थः ॥ ६ ॥

महान्महत्तम इति उत्तममध्यमकनिष्ठतया त्रिविधेषु महत्त-मेषु मध्ये उत्तमः महत्तम इत्यर्थः ॥ ७ ॥

गुणवद्भिः सभाजितं सत्कृतं यशो गृणन्तं हे सदस्पते । शौनक ! ॥ ८ ॥

बाह्वोर्बिभ्रदभूत् ॥ ९ ॥

यस्य विक्रमेण उच्छिष्टमिति सर्वेषां कामानां पृथ्वीदोहन-यद्विक्रमकृतत्वादित्यर्थः आरब्धानेवेति मत्वेति शेषः ॥ १० ॥

---

* अस्मिन् श्लोके पृथादेर्देवेभ्योऽप्यतिशयितशक्तिमत्त्वमिति प्रतीयते तत्तदुक्तेरभिप्रायं प्रमाणेनाह ॥ टी०

गङ्गायमुनयोर्नद्योरन्तरा क्षेत्रमावसन् ।
आरब्धानेव बुभुजे भोगान् पुण्यजिहासया ॥ ११ ॥
सर्वत्रास्खलितादेशः सप्तद्वीपैकदण्डधृक् ।
अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः ॥ १२ ॥
एकदासीन्महासत्रदीक्षा तत्र दिवौकसाम् ।
समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ! ॥ १३ ॥
तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः ।
उत्थितः सदसो मध्ये ताराणामुडुराडिव ॥ १४ ॥
प्रांशुः पीनायतभुजो गौरः कञ्जारुणेक्षणः ।
सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीपृथुः स्वप्रजामन्वशासदिति वर्णयत्येकविंशे तत्रादौ पुरं यथाविविति यदुक्तं तत्पुरं वर्णयति । मौक्तिकैरित्यादिना ॥ १ ॥

चन्दनागुरुसंयुक्तैः तोयैरार्द्रा रथ्यादयो विद्यन्ते यस्य तत् पुष्पादिभिः स्तोकमैरङ्कुरैः अर्चिभिर्दीपावलिभिरार्चितमलंकृतम् ॥२॥ सवृन्दैः पत्रफलसहितैः परिष्कृतम् वेष्टितम् ॥ ३ ॥

मृष्टैः प्रज्वलितैः कुण्डलैरलंकृताः ध्वजाः मृष्टाः उज्ज्वलाः कन्याश्च संभृतैः सम्पादितैः अशेषैर्दध्यादिमङ्गलैः सह अभीयुः अभिमुखं जग्मुः ॥ ४ ॥

स्तूयमानोऽपि गतस्मयो निर्गर्वः ॥ ५ ॥

प्रियान्वाञ्छितान्वरान् प्रकर्षेण प्रियोक्तिभिः सह ददातीति तथा ॥ ६ ॥

महान् श्रेष्ठः यतो महत्तमो विष्णववतारः स्फीतं शुभ्रं यशो वितत्य परं पदं विष्णुलोकमारुरुहे ॥ ७ ॥

हे सदस्पते शौनक ! क्षत्ता विदुरः अशेषगुणैर्विजृम्भितमूर्जितं गुणवद्भिः सभाजितं स्तुतं तदादिराजस्य यशोगृणन्तं कौषारविमर्चयन्नाह ॥ ८ ॥

स पृथुः विप्रैरभिषिक्तः स च लब्धान्यशेषसुराणामर्हणानि येन तथा भूतः बाह्वोर्वैष्णवं तेजो बिभ्रत् आसीत् ॥ ९ ॥

यद्यस्य विक्रमोच्छिष्टं भूपादयः कामम् उपजीवन्ति तस्य विशुद्धं कर्म मे मह्यं वद ॥ १० ॥

भाषाटीका ।

मैत्रेयजी बोले महाराज के पुर के जाते समय मे पुरकी ... ऐसी थी कि मोतियों की माला फूलों की माला सुन्दर ... तोरण बड़े सुगंध वाले धूप इन्हों से सब शोभा ... जलों से भीजे हुये चौतरा अङ्गना गली रहें ... फल अङ्कुर खील इन्हों से भूषित है फल फूलों ... केलेखंभा सुपारी के पेड इनसे शोभित है वृक्ष ... अलंकृत है ॥ १—२—३ ॥

... तब सम्पूर्ण मङ्गल पदार्थों को भेट के पदार्थों ... साथ आये उज्वल कुण्डल वाली शरीर से शुद्ध ... उनके साथ चलीं ॥ ४ ॥

शंख के नगारे के शब्द ब्राह्मणों के वेद शब्द होते थे सब के स्तुति करते समय वीर पृथु महाराज निरभिमान होकर पुर में प्रविष्ट भये ॥ ५ ॥

सर्वत्र पूजित होकर पुरवासी देशवासी सब के वर देने को प्रसन्न होकर सब का सत्कार किया ॥ ६ ॥

पवित्र चेष्टा वाले पृथु महाराज इस प्रकार से कर्मन को किये आप महात्मा हैं महात्माओं में श्रेष्ठ हैं तो इन कर्मों को करके पृथिवी का पालना किया जगत में विस्तृत यश को स्थापन करके भगवत्पदको आरोहण किया ॥ ७ ॥

सूत जी बोले हे शौनकजी ! आदि राजा के यश से संयुक्त संपूर्ण गुणों के होने से गुण वाले लोगों से प्रशंसित ऐसे पृथु चरित्र को कहते हुये मैत्रेयजीकी पूजा करके महा भागवत विदुर जी पूछ ने लगे ॥ ८ ॥

विदुर जी बोले देवतों से सब छत्र चामरादि कों को प्राप्त हो कर ब्राह्मणों से अभिषेक किये गये वैष्णव तेज को धारण करते हुये जिन दोनों भुजों से पृथिवी को दुहे उन महाराज के चरित्र को ज्ञानी हो कर कौन नहीं सुनेगा जिन के कि जूठ न भोगों को सब सराहते हैं तथा लोकपालों के सहित लोक अब भी भोगते हैं उन के शुद्ध कर्म को आप मेरे से कहिये ॥ ९-१० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्राचीनकर्मभिः प्रारब्धानेव बुभुजे नतु भोगान्तरार्थं कर्माणि करोति तदपि भोगेन पुण्यक्षपणेच्छया नतु सुखासक्त्यर्थः ॥ ११ ॥

अस्खलितोऽप्रतिहत आदेश आज्ञा यस्य सप्तसु द्वीपेष्वेक एव दण्डं धारयतीति तथा किं सर्वत्र नेत्याह । ब्राह्मणकुलव्यतिरेकेण अच्युतो गोत्रप्रवर्तकतुल्यो येषां वैष्णवानां तद्व्यतिरेकेण च ॥ १२ ॥

एकदा तस्य महासत्रदीक्षा आसीत्तत्र सत्रे देवादीनां समाज आसीदित्यर्थः ॥ १३ ॥

तस्मिन्पूज्येष्वर्चितेषु सत्सु सदसो मध्ये उत्थितः सन् समन्ततः समैक्षतेति षष्ठेनान्वयः ॥ १४ ॥

प्रांशुरुन्नतः पीनावायतौ भुजौ यस्य कञ्जवदरुणे ईक्षणे यस्य शोभना द्विजाः स्मितञ्च यस्य ॥ १५ ॥

...गवद्यश्चन्द्रिका ।

...रित्यादिना । यद्यप्यत्र मुनि-... तथाप्यर्थसिद्धत्वरा... प्रक्षेपशुकवाक्यमर्थसिद्धं ज्ञेयम् गङ्गायमुनयोर्महानद्योरन्तरा मध्ये स्थितं ब्रह्मावर्ताख्यं क्षेत्रं क्षेत्रे आवसन् "उपाम्बध्याक्रवसः" इत्याधारस्य कर्मसंज्ञायां द्वितीया आरब्धानेव प्राचीनकर्मायत्तानेव भोगान्सपूर्वसाधनानुष्ठानारब्धान् तत्र हेतुः पुण्यजिहासया पुण्यस्योपयोगेच्छया मुमुक्षोः पापवत्पुण्यस्यापि स्वफलजननद्वारा मोक्षविरोधित्वेन पुण्यस्यापि जिहासितत्वप्रवृत्तिमनः मोक्षविरोधिभागे साधनत्वेन कर्मानुष्ठानासम्भवादिति भावः बुभुजे अनुभूतवान् ॥ ११ ॥

सर्वत्रास्खलितः अप्रतिहतः आदेश आज्ञा यस्य सप्तद्वीपेषु एक एव दण्डं धारयति तथा स्वसमानराजान्तररहित इत्यर्थः दण्डधारणं किं सर्वत्र न ब्राह्मणकुलादन्यत्रापि किं सर्वत्र न किन्तु अच्युतगोत्रतः अच्युतगोत्रात् अन्यत्र आत्यन्तरेष्वपि भागवतकुलादन्यत्रेत्यर्थः ॥ १२ ॥

एकदा महासत्रदीक्षा आसीत् महासत्रसङ्कल्पं कृत्वा तत्र दीक्षितोऽभूदित्यर्थः तत्र महासत्रे दिवौकसां देवानां ब्रह्मर्षीणां देवर्षीणां च समाजः सभा आसीदित्यर्थः हे सत्तम ! ॥ १३ ॥

तस्मिन् समाजे महत्सु पूज्येषु यथायोग्यं पूजितेषु सत्सु श्लोकेति शेषः सदसः मध्ये उत्थितः सन् समन्ततः समैक्षतेति षष्ठेनान्वयः तं विशिनष्टि । ताराणां मध्ये उडुराडिव चन्द्र इव स्थितः ॥ १४ ॥

प्रांशुरुन्नतः पीनावायतौ दीर्घौ भुजौ यस्य पद्मवदरुणे ईक्षणे यस्य शोभना नासिका यस्य सुन्दरं मुखं यस्य सौम्यः प्रसन्नः पीनांसः स्कन्धौ यस्य शोभना द्विजा दन्ता यस्मिन् तत्स्मितं यस्येति बहुव्रीहिगर्भो बहुव्रीहिः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अव्रावतः श्रोतुं यस्मिन्श्रद्धा विदुषां तदेव वक्तव्यमिति भावकर्मैवैयस्तश्रोतृत्वेन तत्कथामाह । गङ्गेति । यावान्भोगैर्दृढस्थितिः स्यात्तानेव नाधिकानित्येवकारार्थः तानपि पुण्यजिहासया पुण्यक्षयाभिप्रायेण न सुखार्थेन ॥ ११ ॥

सर्वत्रेत्युक्तं सङ्कोचयति । अन्यत्रेति । अच्युतगोत्रतो वैष्णवकुलात् "गोत्रं नाम्नि कुले स्मृतम्" इति यादवः ॥ १२ ॥

ज्ञानिनः प्रारब्धकर्मभोगस्य नियतत्वेन सिद्धत्वात्तैतद्वर्णनमपेक्षितमन्यत्किञ्चिच्छ्लाघ्यमस्ति चेद्वक्तव्यमिति तत्राह । एकदेति "यज्ञभेदे सदादाने सत्रमाच्छादनेवने" इत्यभिधानात् दीक्षेति विशेषणादीक्षायज्ञ इत्यर्थः समाजः सम्मेलनम् ॥ १३ ॥

दानार्थं भोजनार्थं वा मिथो निरीक्षणार्थं चेतस्ततः सङ्कुलन्ते जनाः किमत्र चोद्यमिति तत्राह । तस्मिन्निति । तस्मिन्समाजेऽर्हत्सु मान्यमानेषु "अर्हतौ जिनसम्मान्यौ" इति यादवः उडुराट् चन्द्रः स राजा समन्ततश्चतुर्दिशमुपविष्टानैक्षतेति षष्ठश्लोकेनान्वयो वेदितव्यः ॥ १४ ॥

कथम्भूत इति तल्लक्षणं वक्ति । प्रांशुरित्यादिना । गौरो निर्मलः यथा "गौरोऽरुणे सिते पीते" इति वचनात् गौरत्वमस्यास्तीत्याक्षिप्तवर्णविशेषविशिष्टत्वं वक्ति कलाक्षणोक्षण इत्यादिना सौम्यः सुन्दरः विप्रप्रियो वा सोमयोग्यो वा द्विजा दन्ताः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्मिन्निति सार्द्धषट्कम् ॥ १४—१५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आरब्धानेवेति । मत्वेति शेषः । यद्यपि भगवदवतारत्वेन भक्तत्वेन च न तस्य प्रारब्धं कर्म तदपि भक्तिभूम्नातिदैन्येन प्राकृतजीव एवाऽहं सुखदुःखाभ्यां पुण्यपापे जिहासामीति तदभिमानो ज्ञेयः ॥ ११ ॥

अच्युत एव गोत्रं प्रवर्त्तकतुल्यो येषां तेऽन्यत्रेति वैष्णवानां वर्णाश्रमाभावो व्यञ्जितः । अन्यत्रेति ब्राह्मणानां शास्तृत्वे तत्तद्वेदाचार्यमेव वैष्णवानां तु तत्तन्मन्त्रगुरुमेव शास्तृत्वे व्यवस्थाप्येत्यर्थः । "पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः । इत्थं विमन्युरनुशिष्यात्" इति ऋषभोक्तेः ॥ १२ ॥

एकदा तस्य महासत्रदीक्षा आसीत् । तत्र सत्रे देवानाञ्च समाज आसीत् ॥ १३ ॥

अर्हत्सु पूज्येषु ऋष्यादिषु किञ्चिद्विज्ञापनार्थमुत्थितः सन् समैक्षतेति षष्ठेनान्वयः ॥ १४ ॥

प्रांशुरुन्नतः ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गङ्गायमुनयोरन्तरा मध्ये यत् क्षेत्रं तदावसन् पूर्वकर्मभिः प्रारब्धानेव बुभुजे न तु भोगार्थं करोति लोकसंग्रहार्थं तु पुण्यानि करोत्येव पूर्वकर्मफलभोगोऽपि पुण्यजिहासया पुण्यकर्मस्वपरोपेक्षया नरत्वविग्रहप्रीतये । प्रारब्धानेव बुभुजे भोगान् पुण्यजिहासयेत्युक्तिर्मुमुक्षुरितिद्योतनाय । भगवदवतारस्य कर्मफलभोगासंभवात् । यत्र यत्र भगवद्गुणावेशस्तस्यापि बद्धत्वासंभवेन कर्मफलभोक्तृत्वासंभवादेवमेवं विस्तरेण एवमृषभपरशुरामादिष्वपि बोध्यम् ॥ ११ ॥

सर्वत्र सर्वदेशवर्तिषु जनेषु अस्खलितः आदेशो यस्य सः सप्तद्वीपेषु एक एव दण्डं धृष्णोति प्रगल्भते इति दण्डधृक् । अन्यत्रेत्यनेन तयोः पूज्यत्वेन प्रायः शासनानर्हत्वात् ॥ १२ ॥

एकदा एकस्मिन्काले महासत्रदीक्षा आसीत् पृथोरिति शेषः तत्र तस्मिन्काले देवादीनां समाजः आसीदित्यर्थः ॥ १३ ॥

तस्मिन्समाजे अर्हत्सु पूज्येषु यथार्हतः सपर्चितेषु सत्सु ताराणामुडुराट् चन्द्र इव सदसो मध्ये उत्थितः सन् समन्ततः समैक्षतेति षष्ठेन सम्बन्धः ॥ १४–१५ ॥

भाषाटीका ।

मैत्रेयजी बोले गंगा यमुना दोनों के मध्य में ब्रह्मावर्त क्षेत्र में निवास करते हुये महाराज पुण्यपापकर्मों के नाश करने की इच्छा से प्रारब्ध कर्मों को भोगते रहे ॥ ११ ॥

सर्वत्र उनकी आज्ञा स्वतन्त्रतासे रही सातों द्वीपके निष्कंटक एकही थे परंतु ब्राह्मण वैष्णव इन दोनों कुलोंका शासन नहीं करते थे ॥ १२ ॥

व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गुदलोदरः ।
आवर्त्तनाभिरोजस्वी काञ्चनोरुरुदग्रपात् (१) ॥ १६ ॥
सूक्ष्मवक्रासितस्निग्धमूर्द्धजः कम्बुकन्धरः ।
महाधने दुकूलाग्र्ये परिधायोपवीय च ॥ १७ ॥
व्यञ्जिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः ।
कृष्णाजिनधरः श्रीमान् कुशपाणिः कृतोचितः ॥ १८ ॥
शिशिरस्निग्धताराक्षः समैक्षत समन्ततः ।
ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव ॥ १९ ॥
(२) चारुचित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवम् ।
सर्वेषामुपकारार्थं तदा अनुवदन्निव ॥ २० ॥

॥ राजोवाच ॥

सभ्याः ! शृणुत भद्रं वः साधवो य इहागताः ।
सत्सु जिज्ञासुभिर्धर्ममावेद्यं स्वमनीषितम् ॥ २१ ॥
अहं दण्डधरो राजा प्रजानामिह योजितः ।
रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक् ॥ २२ ॥
तस्य मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः ।
लोकाः स्युः कामसन्दोहा यस्य तुष्यति दिष्टदृक् ॥ २३ ॥
य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन् ।
प्रजानां शमलं भुङ्क्ते भगं (३) च स्वं जहाति सः ॥ २४ ॥
तत्प्रजा ! भर्तृपिण्डार्थं स्वार्थमेवानसूयवः ।
कुरुताधोक्षजधियस्तर्हि मेऽनुग्रहः कृतः ॥२५॥

भाषाटीका ॥

हे सत्तम ! विदुरजी तहाँपर एक समय में महासत्र की दीक्षा महाराज ने धारण करी तब देवता ब्रह्मर्षि राजर्षि इनका बड़ा समाज हुआ था ॥ १३ ॥

तिस समाज में पूजनीय पुरुषों की यथा योग पूजा होने पर सभा के मध्यमें महाराज ऐसे खड़े होकर सोभित भये जैसे तारों के मध्य में चंद्रमा दीखै ॥ १४ ॥

ऊंची जिनकी मूर्ति है पुष्ट विशाल भुजा हैं गौरवर्ण है बाल कमलसे नेत्र हैं सुंदर मुख है सुंदर नासिका है सौम्य स्वरूप है पुष्ट कांधे हैं मंदहास से शोभित सुंदर दांतहैं ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विस्तीर्णं वक्षो यस्य वलिभिस्त्रिभिर्वल्गु सुन्दरं दल-दधोऽग्रमश्वत्थपत्रमिव उपरि विस्तृतमधस्तात्संकुचितमुदरं यस्य आवर्तवन्निम्ना नाभिर्यस्य काञ्चनवदुज्ज्वलावूरू यस्य उदग्रावु-न्नताग्रौ पादौ यस्य ॥ १६ ॥

सूक्ष्माश्च ते वक्राश्चासिताश्च स्निग्धाश्च मूर्द्धजा यस्य कम्बुवत्-त्रिरेखाङ्किता कन्धरा यस्य परिधाय वासित्वा उपवीयोत्तरीयं कृत्वा ॥ १७ ॥

नियमे निमित्ते न्यस्तानि त्यक्तानि भूषणानि येन सः अत एव तैरनावृतत्वाद्व्यञ्जिताशेषगात्रेषु श्रीः स्वाभाविकी शोभा येन कृता-न्युचितानि कर्माणि येन ॥ १८ ॥

शिशिरे सन्तापहरे स्निग्धे च तारे ययोस्ते अक्षिणी यस्य इदं वक्ष्यमाणं वाक्यमुक्तवांश्च ॥ १९ ॥

चारु श्रोत्रप्रियम् चित्राणि पदानि यस्मिन् श्लक्ष्णं प्रशस्तम् मृष्टं शुद्धं गूढं गम्भीरार्थम् अविक्लवमव्याकुलम् उत्प्रेक्षते स्वयमनुभूतमनुवदन्निव ॥ २० ॥

भाषणे हेतुः धर्मं जिज्ञासुभिः पुंभिः सत्सु स्वमनीषितमावेद्यं

(१) उदग्रपादिति श्रीविजयध्वजतीर्थः । (२) वीरराघवविजयध्वजतीर्थयोरिदं द्वयमेकमेव । (३) भागमिति विजयध्वजतीर्थः ।

[illegible] ...भावार्थदीपिका ।

[illegible] ...जिज्ञासैव क्रियते न युष्मान्प्रति

इदानीं प्रजाः शिक्षयिष्यन् प्रजाशिक्षणादिकं ममावश्यकमित्याह । अहमिति त्रिभिः । पृथक् सेतुषु स्थापिता स्थापयिता ॥२२॥

विष्वक् प्राक्कर्मसाक्षीश्वरो यस्य तुष्यति तस्य वेदवादिनो यान् लोकानाहुः प्रजारक्षणाद्यनुष्ठानान्ते लोका मे स्युः कथंभूताः कामानां सम्यक् दोहः प्रपूरणं येषु ॥ २३ ॥

अन्यथा त्वनिष्टं स्यादित्याह । य इति । शमलं पापम् भगमैश्वर्यम् ॥ २४ ॥

तत्तस्मात्प्रजाः ! भर्तुर्मम पिण्डदानवत्परलोकहितार्थं स्वकार्यमेव कुरुत स्वधर्ममेवानुतिष्ठत अधोक्षजे धीर्येषां तादृशाः सन्तः वासुदेवार्पणादृष्टयेत्यर्थः अनुग्रहः कृतो भवेदिति शेषः ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

व्यूढं विस्तीर्णं वक्षः यस्य बृहन्तौ पीनौ श्रोणी नितम्बौ यस्य वलिभिस्तिसृभिः मञ्जु सुन्दरं वलवदश्वत्थपर्णवत् उपरि विस्तृतमधस्तात्संकुचितमुदरं यस्य आवर्तवन्निम्ना नाभिर्यस्य ओजस्वी इन्द्रियशक्तिमान् काञ्चनवदुज्ज्वलावूरू यस्य अग्रौ उन्नतौ पादौ यस्य ॥ १६ ॥

सूक्ष्माश्च वक्राश्च सिताश्च स्निग्धाश्च मूर्धजा यस्य कम्बुवत्त्रिरेखाङ्किता कन्धरा कण्ठः यस्य महाधने अनर्घ्ये दुकूलश्रेष्ठे परिधीय वासित्वा उपवीय उत्तरीयं कृत्वा ॥ १७ ॥

नियमे निमित्ते न्यस्तानि त्यक्तानि अशेषभूषणानि येन अत एव तैरनावृतत्वात् व्यञ्जिताशेषावयवेषु श्रीः स्वाभाविकी शोभा येन श्रीमान् समुदायकान्तिमान् कुशपाणिः पवित्रपाणिः कृतानि उचितानि कर्माणि येन ॥ १८ ॥

शिशिरे सन्तापहरे स्निग्धे च तारे ययोस्ते अक्षिणी यस्य एवंभूत उर्वीशः सदस्यान् सन्तोषयन्निव इदं वक्ष्यमाणं वाक्यम् उक्तवान् वाक्यं विशिनष्टि । चारुचित्रपदं चारूणि चित्राणि पदानि यस्मिन् श्लक्ष्णं प्रसन्नं मृष्टं शुद्धमनपशब्दितं गूढं गम्भीरार्थमविक्लवमव्याकुलम् ॥ १९ ॥ २० ॥

अयमस्मान्प्रति सर्वज्ञ इव धर्मानुपदेष्टुमुत्सहत इति बुद्ध्या सभ्या माकुप्यन्निति मर्मापया स्ववाक्यश्रवणाय सभ्यान् प्रार्थयते । सभ्या इति । हे सभ्याः ! सभायामुपविष्टाः अनुपविष्टान् संबोधयति इह सत्रभूमौ ये आगता भूयाश्चत् मामसूयेरन्नित्यभिप्रायेण विशिनष्टि । साधव इति । नाहं ज्ञः किन्तु जिज्ञासुः जिज्ञासितव्यं विज्ञापयामीत्यभिप्रायेणाह । धर्मं जिज्ञासुभिः स्वमनीषितं ज्ञेयं सत्सु सतां समीपे आवेद्यं विज्ञापनीयं प्रजानुशासनव्याजेन जिज्ञासैव क्रियते न तु युष्मान्प्रति धर्म उपदिश्यत इति भावः ॥ २१ ॥

इदानीं प्रजारक्षणादिकं ममाप्यावश्यकमित्याह । अहमिति त्रिभिः । धात्रा भगवता प्रजानां दण्डधरत्वेनाहं योजितो नियुक्तः न केवलं दण्डधर एव किन्तु रक्षितृत्वेन आजीविकाप्रदत्वेन तेषु स्वस्ववर्णाश्रमोचितेषु सेतुषु धर्ममर्यादासु पृथगसङ्करेण स्थापयितृत्वेन च योजित इत्यर्थः ॥ २२ ॥

किं प्रजारक्षादिसाध्यं फलं तत्राह । तस्येति । ब्रह्मवादिनः वेदार्थतत्त्वस्य स्वानुष्ठानेनोपदेष्टारः प्रजारक्षणादिना दाक्षः यान् पुण्यलोकान् प्राप्यत्वेनाहुः ते लोकाः तस्य प्रजारक्षणादिनिष्ठस्य मे तदनुष्ठानात् प्रजारक्षणाद्यनुष्ठानात् कामसन्दोहा मत्समीहितकामपूरणा भवेयुः स्युरिति सम्भावनायां लिङ् स्वस्य मुमुक्षुत्वेन प्राकृतलोकस्य प्राप्यत्वाभावात् अतो ह्यहमाह यस्येति । यस्य प्रजारक्षणादिनिष्ठस्य विष्वक् प्रजारक्षणादिकर्मसाक्षी ईश्वरः तुष्यति तस्मिन् तुष्टे मुक्तिरपि सुलभेति भावः ॥ २३ ॥

अन्यथा त्वनिष्टं स्यादित्याह । य इति । यो राजा धर्मेषु प्रजा अशिक्षयन् करं स्वामिग्राह्यभागमुद्धरेत् करमात्रं गृह्णीयादित्यर्थः तर्हि प्रजानां सम्बन्धि शमलं पापमेव भुङ्क्ते सः स्वीयं भगं ज्ञानशक्तिबलैश्वर्यादिकं च जहातीत्यर्थः ॥ २४ ॥

तत्तस्मात् हे प्रजाः ! भर्तुर्मम पिण्डार्थं पिण्डदानवत्परलोकहितार्थं स्वार्थं स्वार्थप्रयोजनमेव स्वस्ववर्णाश्रमोचितधर्ममेवासूयारहिताः कुरुत अनुतिष्ठत अधोक्षजधियः भगवद्विषयकबुद्धयः तदर्पणादृष्टयेति यावत् "तत्कुरुष्व मदर्पणम्,, इति स्मृतेः ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

व्यूढवक्षा उन्नतवक्षाः वलीभी रेखाभिः अतिशयेन वल्गु सुन्दरमुदरं यस्य स तथा उदग्रवागुन्नतवाक् ॥ १६ ॥

सूक्ष्माश्च वक्राश्चासिता नीलाश्च स्निग्धाश्च मूर्धजाः केशा यस्य स तथा कम्बुवत्त्रिरेखाङ्कितवृत्तशङ्खवत्कन्धरा यस्य स तथा उपधायोत्तरीकृत्य ॥ १७ ॥

नियमे यज्ञनियमविषये ॥ १८ ॥

किमर्थं निरीक्षणमिति अविदुषां चित्तव्याकुलतां परिहरति । ऊर्जिस्वर्णिति । चित्राणि पदानि यस्मिंस्तत्तथा श्लक्ष्णं मधुरं हृद्यं हृदयप्रियं गूढमर्थतो गम्भीरमविक्लवमकातरमस्खलितमिति यावत् वचनमिति शेषः ॥ १९ ॥ २० ॥

किमनेन चित्तव्याकुलता परिहृतेति तत्राह । सभ्या इति । यो मन्त्रमास्थितत्युक्तं प्रथमं चित्तव्याकुलतापरिहारार्थमिति ज्ञातव्यं धर्मं जिज्ञासुभिर्ज्ञातुकामैः पुरुषैः स्वमनीषितं सत्सु योग्येष्वावेद्यम् ॥ २१ ॥

किमतस्स्वमनीषितमित्यत उक्तम् । अहमिति । "दण्डोऽस्त्री शासने राज्ञां हिंसायां लकुटे गुडे" इत्यभिधानात् तत्तद्योग्येषु तं तं दण्डं धारयतीति दण्डधरः धात्रा हरिणा धातृशब्दार्थं लक्षयति । रक्षितेत्यादिना । स्थापिता स्थापयिता ॥ २२ ॥

तस्य मे कामान् सन्दुहन्तीति कामसन्दोहाः कर्मण्यण्प्रत्ययः कामानां सन्दोहा यस्मिन्निति वा लोकाः स्युरिति ब्रह्मवादिनः आहुरिति यद्यस्मात्तस्मादेतत्फलमन्वीक्ष्याहं ब्रह्म प्रजापालनार्थो योजित इत्यन्वयः तदनुध्यानात्तस्य प्रजापालनस्यानुष्ठानादित्यनुषङ्गः श्रीनारायणप्रसादेन भाविनो लोकाः कथं प्रजापालनेन स्युरिति तत्राह । यस्येति ॥ २३ ॥

व्यतिरेकमाह । य उद्धरेदिति । भागं षष्ठांशं पुण्यम् ॥ २४ ॥

इदानीं प्रजाः प्रत्याह । तत्प्रजा इति । यस्मात्प्रजानामरक्षणे प्रत्यवायो भवति तत्तस्मात् हे प्रजाः ! यद्यनसूयवो यूयमधोक्षजे हरौ धियं कुरुत तर्हि नोऽनुग्रहः कृतो भवेदित्यन्वयः तत्रापि किं तत्राह । भर्तृपिण्डार्थमिति । भर्तुर्मम षष्ठांशादिप्रयुक्तात्मप्रयोजनार्थं न केवलं मम युष्माकमप्यस्ति [illegible] त्याह । स्वार्थमिति ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

काञ्चनोरुरिति काञ्चनस्तम्भोरुरित्यर्थः । उदग्रचाग्रिति चिबुकः ॥ १६ ॥

परिवीयोपवीयवेति सम्बन्धोक्तिः ॥ १७—१६ ॥

चार्विचत्रेति स्वरवर्णोच्चारविशेषेण चारु श्रोत्रप्रियम् । मनुप्रासादिना चित्रपदम् । अश्लीलनिरासेन सविनयमेव सर्वहिताभिरुचिरार्थोपदेशेन श्लक्ष्णां प्रशस्तं व्याकरणानुगमेन मृष्टं शुद्धम् । सुविचारलभ्यतात्पर्यत्वेन गूढं गम्भीरार्थम् । अतित्वराभावेन पूर्वपराविरोधेन च अविक्लवमव्याकुलम् ॥ २०—२२ ॥

तस्येति । कामिनृपाणामपि तादृशभगवदादेशप्रवर्त्तनार्थमेवोक्तं नतु स्वार्थं वास्तवार्थे तु लोका मक्तजनाः । दिष्टदिगिति सम्बन्धः दिष्टं दिशानीति ॥ २३—२५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

व्यूढं विस्तीर्णं वक्षो यस्य सः । वलिभिस्त्रिभिर्वल्गु सुन्दरं दलवत् अधोऽग्रमश्वत्थपत्रमिवोपरि विस्तृतमधस्तात् संकुचितमुदरं यस्य दक्षिणावर्त्तवत्त्रिम्ना नाभिर्यस्य सः काञ्चनस्तम्भाविवोरू यस्य उन्नताग्रौ पादौ यस्य सः ॥ १६ ॥

कृष्णाजिनमुपवीय उत्तरीयं कृत्वा ॥ १७ ॥ १८ ॥ १६ ॥

चारु मनोहरत्वात् सरसं चित्रपदं सालङ्कारं श्लक्ष्णां मधुराक्षरं मृष्टं निर्दोषम् । गूढं सव्यङ्ग्यम् अविक्लवं झटित्यर्थबोधकम् ॥२०॥

साधवो य इत्यन्यैरनागतैरपि मम न प्रयोजनमिति भावः । न च नृपत्वादहं युष्मान् किमप्यादिशामि शास्मि वा । किन्तु किमपि जिज्ञासुरहं युष्माभिरेव शासनीय मादेष्टव्यश्चेत्याह । सत्सु साधुषु भागवतः प्राप्तेषु सत्सु धर्मे जिज्ञासुभिः पुंभिः स्वमनीषितं स्वविचारितमावेद्यं ज्ञापयितुमर्हमेव स्वेषु प्रामाण्याभावादिति भावः ॥ २१ ॥

न च त्वं राजा अस्माकमाराधनीय इति वाच्यं प्रत्युत युष्माकमेव दृश्यादिसाधनलक्षणे आराधने परमेश्वरेणाहं प्रवर्त्तित इत्याह । अहमिति । धात्रा परमेश्वरेण नियोजितः कुत्र कुत्र कर्मणीत्यत आह । दण्डधर इति । विकर्मरोगोपशमनौषधरूपे दण्डधर इत्यर्थः । रक्षितेति दस्युचौरादिभ्यो रक्षणे वृत्तिद इति जीविकाप्रदाने । स्वेषु सेतुषु पृथक् पृथक् स्थापयितेति प्रति स्ववर्णाश्रमाविधर्ममर्य्यादायाः स्थापने इति युष्माकं बहुविधपरिचर्य्याभारो मम मूर्द्ध्नि न्यस्तो वर्त्तत इति भावः ॥ २२ ॥

तस्याहं प्रतिमासिकं प्रतिवार्षिकं वेतनमपि प्राप्नोमीत्याह । तस्य मम तत्तत्स्वकर्मानुष्ठानात् यान् लोकान् प्राप्यान् ब्रह्मवादिन आहुस्ते स्युरित्यन्वयः । लोकाः पारत्रिकाः मदिच्छानुरूपाः कामानां मदभिलषितानां सम्यग्दोहः प्रपूरणं यत्र यस्य ममेति दिष्टदृक् सर्वधर्मसाक्षी मत्प्रभुः । यदुक्तं तेनैव श्रेयः प्रजापालनमेवेत्यादि ॥ २३ ॥

किञ्च । मम कृत्येषु मध्ये धर्मप्रवर्तनमेव मुख्यं नित्यञ्च यदभावे ममानिष्टं स्यादित्याह । य इति भगमैश्वर्यम् ॥ २४ ॥

तत्तस्मात् हे प्रजाः! भर्त्तुर्भरणकर्त्तुर्मम पिण्डार्थे पिण्डदानवत् परलोकहितार्थे स्वेषामेवार्थे कार्य्यं कुरुत युष्माभिः स्वकृत्य एव [illegible] अनीर्ष्यता भविष्यतीति नात्र मदर्थे पृथक् कोऽपि [illegible] स्वार्थमेव वदन् विशिनष्टि । हे अधो- [illegible] "[illegible] मम आधत्स्व मयि बुद्धिं निवेशयेति" [illegible] भजतेत्यर्थः ॥ २५ ॥

श्रीमद्[illegible]

व्यूढनिम्नाक्षवक्षो[illegible] न्दलवदधोऽग्राश्वत्थपत्र[illegible] उन्नताग्रौ पादौ यस्य स तथा ॥ १६ ॥

सूक्ष्माः वक्राः असिताः कृष्णाः स्निग्धाः मूर्द्धजाः केशा यस्य । कम्बुवत्कन्धरा ग्रीवा यस्य वासः परिधाय उत्तरीयमुपवीयोपवीतमिव धृत्वा ॥ १७ ॥

व्यञ्जिता प्रकटिता अशेषगात्रश्रीः शोभा यस्य नियमे निमित्ते न्यस्तानि भूषणानि येन ॥ १८ ॥

शिशिरे सन्तापघ्ने स्निग्धे च तारे यस्य ते अक्षिणी यस्य स तथा इदं वक्ष्यमाणं वाक्यमूचिवान् ॥ १६ ॥

चारूणि मनोहराणि चित्राणि पदानि यस्मिन् तत् गूढं गम्भीराभिप्रायम् अविक्लवं वैक्लव्यरहितम् किं बहुना मृष्टं सर्वगुणयुक्तत्वात् श्लक्ष्णं प्रशस्तं सर्वदोषवर्जितत्वात् ॥ २० ॥

धर्मे जिज्ञासुभिः ज्ञातुमिच्छद्भिरस्मद्विधैः पुरुषार्थसिद्धये स्वमनीषितं सत्सु शिष्टेषु आवेद्यं युक्तमयुक्तं वेति परीक्षार्थं विज्ञापनीयं शृणुत ॥ २१ ॥

सत्सु स्वमनीषितविज्ञापनमित्येतत् प्रजाशिक्षणादौ प्रवृत्तप्रजाशिक्षणाद्यधिकारं स्वस्य दर्शयति । अहमिति । धात्रा परमात्मना पृथक् वर्णाश्रमोचितेषु मर्यादासु प्रजानां स्थापिता योजितः कृतः तत्र मर्यादावतां रक्षिता वृत्तिदश्च योजितः । निर्मर्यादानां दण्डधरो योजित इत्यन्वयः ॥ २२ ॥

प्रजारक्षणादिफलमाह । तस्येति । दिष्टदृक् दैवज्ञो हरिर्यस्य तुष्यति तस्य ब्रह्मवादिनो यान् लोकानाहुः ते कामसन्दोहाः कामपूरकाः लोकाः तस्य धातुर्नियोगकर्तुर्मे तदनुष्ठानात् प्रजारक्षणाद्यनुष्ठानात्स्युः ॥ २३ ॥

प्रजारक्षणाद्यभावे दोषमाह । य इति । शमलं पापम् भगमैश्वर्यम् ॥ २४ ॥

तत्तस्मात् हे प्रजाः ! अनसूयवः असूयादोषारोपस्तद्रहिता भर्तृपिण्डार्थे मम तुष्ट्यर्थे स्वकल्याणार्थे च कुरुत पृथक् स्वेषु सेतुषु निष्ठामिति शेषः कथम्भूताः अधोक्षजधियः अधर्मेणाऽधमेवाराधनीय इत्येवं वासुदेवविषयकबुद्धयः तर्हि वो मेऽनुग्रहः कृतः स्यात् ॥ २५ ॥

भाषाटीका ।

जिनके विस्तृ तवक्ष स्थल है कटि भागस्थूल है त्रिवलि से शोभित पीपल के पत्र सरीका उदर है गहरी नाभी है दिव्य तेजहै सुवर्ण से प्रकाशमान जंघाहैं ऊंचे चरणहैं ॥१६॥

जिन के पतले टेढे चिकने केश हैं शङ्खसी ग्रीवा है बड़े मूल्य के उत्तम दो वस्त्रों को पहिरे ओढे हैं ॥ १७ ॥

यज्ञ के नियम से सब भूषणों के छोडदेने से सकल शरीर की शोभा प्रगट हो रही है जिन के कृष्ण मृग के चर्म को धारण किये हैं दिव्य शोभा युक्त हैं सन्ध्यादि कर्मों को किये हैं जो कुश को हाथ में लिये हैं ॥ १८ ॥

सन्ताप को मिटाने वाली नेत्र की पुतली हैं जिनके ऐसे पृथु महाराज ने देखा चारोंतरफ फिर सभा को खुसी करते हुये के वचन बोले ॥ १९ ॥

तदनुमोदध्वं पितृदेवर्षयोऽमलाः।
शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलम् ॥ २६ ॥
अस्ति यज्ञपतिर्नाम केषांचिदर्ह सत्तमाः!।
इहामुत्र च लक्ष्यन्ते ज्योत्स्नावत्यः क्वचिद्भुवः ॥ २७ ॥
मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः।
प्रियव्रतस्य राजर्षेरङ्गस्यास्मत्पितुः पितुः ॥ २८ ॥
ईदृशानामथान्येषामजस्य च भवस्य च।
प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता ॥ २९ ॥
दौहित्रादीनृते मृत्योः शोच्यान् धर्मविमोहितान्।
वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना ॥ ३० ॥
यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः।
सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिःसृता सरित् ॥ ३१ ॥
विनिर्धुताशेषमनोमलः पुमानसङ्गविज्ञानविशेषवीर्यवान्।
यदङ्घ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते ॥ ३२ ॥

भाषाटीका।

सुन्दर विचित्र पदोंवाली अतिसरल बहुत सफा गूढ आशयवाली प्रगल्भ ऐसी वाणी सबके उपकार के लिये बोले ॥२०॥ महाराज बोले हे सभा वाले साधुजन जो यहां आये हो आपका भला हो आप सुनो जो सत्पुरुष हैं उन के विषय मे जिज्ञासु पुरुषों को अपना विचार जनाना चाहिये ॥ २१ ॥
मै इस संसार मे प्रजों के मध्य मे दण्ड देने वाला रक्षा करने वाला सब की जीविका देने वाला अपने मर्यादाओं मे अलग् अलग् स्थापन करने वाला राजा नियोजित हुआ हूं ॥ २२ ॥
उन धर्मों को मै अनुष्ठान करूंगा तब भगवान् सन्तुष्ट होंगे तब कामना के पूरण करने वाले जो लोक ब्रह्मवादियों के कहे हैं सो मेरे को मिलेंगे ॥ २३ ॥

जो राजा प्रजों को धर्म मे शिक्षा नहीं दे कर किस्ती लेता है वह प्रजा के पाप को भोगता है अपने ऐश्वर्य का नाश करता है ॥ २४ ॥

तिस हेतु से हे प्रजा गण! अपने मालिक के परलोक सुधर ने को अपने भले होने को परमात्मा मे मन लगाकर सब कर्म करोतो मेरे पर बड़ा अनुग्रह होगा ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

शास्तुः शिक्षयितुरनुज्ञातुरनुमोदितुश्च प्रेत्य परलोके यत्फलं तत्तु तुल्यम् ॥ २६ ॥

कर्म कर्तव्यमित्यनुमोदामहे ननु वासुदेवेऽर्पणीयमिति वेनादिभिस्तदङ्गीकारादित्येवं वादिनः शनैः सम्बोधयन्नाह हे अर्हसत्तमाः! यज्ञपतिर्नाम परमेश्वरः केषाञ्चिन्मते तावदस्ति तथापि विप्रतिपत्तेर्न तत्सिद्धिरित्याशङ्क्य जगद्वैचित्र्यान्यथानुपपत्तिप्रमाणयति। इहामुत्र च ज्योत्स्नावत्यः कान्तिमत्यो भुवो भोगभूमयः शरीराणि च ॥ २७ ॥

नन्विदं कर्मवैचित्र्यादेव सेत्स्यति तथापि विद्वदनुभवेनेश्वरसिद्धिरित्याह। मनोरिति त्रिभिः। अस्मत्पितामहस्याङ्गस्य ॥ २८ ॥

कृत्यमस्ति। अवश्यं कर्मफलदात्रा भाव्यमिति तेषां मतमित्यर्थः ॥ २९ ॥

मृत्योर्दौहित्राद्वेनादीन्विना धर्मे विमोहितान् अतः शोच्यान् ननु कर्मैव फलंदास्यतिविध्युद्देशगतावादेवताः किं परमेश्वरेणेत्यत्राह। वर्गेति। वर्गोऽत्र त्रिवर्गः स्वर्गो धर्मस्य फलमपवर्गो मोक्षस्तेषामैकात्म्यं नैकरूप्येण सर्वानुगतेन हेतुना तत्रापि प्रायेण हेतुना अयम्भावः न तावज्जडस्य कर्मणः फलदातृत्वं घटते नचाधीनदेवतानां स्वातन्त्र्यम् अन्तर्यामिश्रुतेः। नच तदा कर्मसाम्ये फलतारतम्यं कचित्तदसिद्धिश्च सम्भवति। अतः स्वातन्त्र्येण कर्तुमकर्तुमन्यथा कर्तुं समर्थेन परमेश्वरेण भाव्यमिति ॥ ३० ॥

किञ्च। जीवानां मोक्षदः परमेश्वर एव नाधीनदेवतास्तासामपि जीवत्वाविशेषादित्याशयेनाह। त्रिभिः। यस्य पादयोः सेवायामभिरुचिस्तपस्विनां संसारतप्तानामशेषैर्जन्मभिः समृद्धं धियो मलं सद्यः क्षपयति तमेव भजतेति तृतीयेनान्वयः कथम्भूता अहन्यहनि वर्द्धमाना सती सात्त्विकी तत्पादसम्बन्धस्यैवेष माहिमेति दृष्टान्तेनाह। यथेति ॥ ३१ ॥

विनिर्धुता अशेषा मनोमला यस्य असङ्गो वैराग्यं तेन विज्ञानस्य विशेषः साक्षात्कारस्तदेव वीर्यं यस्य। यस्याङ्घ्रिमूले कृताश्रयः सन् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यूयं तन्मदनुशासनमनुमोदध्वं किमनुमोदनमात्रसाध्यं तत्राह । कर्तुरिति । यत् यस्मात्कर्तुः प्रयोक्तुस्त्व शास्तुः प्रयोजकस्य अनुज्ञातुः अनुमन्तुः तत्र प्रवृत्तस्य प्रवर्तकत्वं प्रयोजकत्वं प्रवृत्तस्य प्रवर्तकत्वमनुमन्तृत्वमिति विवेकः प्रेत्येति कृदन्तयोगात्कर्तरि षष्ठी कर्त्रादिभिः प्रेत्य परलोकं प्राप्य तुल्यं फलमनुभूयत इत्यर्थः ॥ २६ ॥

अत्र यस्य तुष्यति दिष्टदृक् कुरुताभोक्षजाधिय इति कर्मणां भगवदाराधनरूपत्वमाराधितात्कर्मभिर्भगवतश्च फलप्राप्तिरवगम्यते तत्र निरीश्वरवादिनां केषाञ्चिन्मत इदमुक्तमनुपपन्नमित्युक्ताद्येश्वरसिसाधयिषया तत्सद्भावं तावत्प्रतिजानीते । अस्तीति । ते हि निरीश्वरवादिन एवमाहुः प्रकृतिपुरुषातिरेकेणेश्वराख्यः कश्चित्पदार्थो न विद्यते प्रमाणाभावात् न तावत्प्रत्यक्षं तदविषयत्वात् तस्य नाप्यनुमानं प्रत्यक्षोपलब्धसाध्यधर्माव्यभिचारिसाधनधर्मविषयत्वेनानुमानस्य प्रत्यक्षाविषये तदप्रवृत्तेः नापि शब्दः न तावल्लौकिकः भ्रमप्रमादादिदोषसंस्पर्शासम्भावनया तस्य प्रामाण्यानिश्चयायोगात् नापि "सत्यं ज्ञानमनन्तं निष्क्रियं निष्कलम्" इत्यादिवैदिकशब्दः लोके वृद्धव्यवहारादन्यत्र शब्दस्य बोधकत्वशक्त्यवधारणासम्भवात् व्यवहारस्य च कार्यबुद्धिपूर्वकत्वेन कार्यरूपार्थ एव शब्दस्य प्रामाण्यमिति लौकिकव्युत्पत्त्यनुसारेण वैदिकशब्दानामपि कार्यवस्तुपरत्वेनैव व्युत्पत्तिनिश्चयात्सिद्धरूपे ईश्वरे तेषां प्रामाण्यासम्भवात् अत एवास्मात्फलप्राप्तिश्चासम्भाविनी न चेष्टापूर्तं बहुधाजातं ब्रह्मविदाप्नोति परमित्यादिकमामुष्मिकं ब्रह्मोपासनात्तत्प्राप्तिरूपं च फलं श्रुतमिति वाच्यं तस्य कर्मसु कर्तृभूतस्य प्रत्यगात्मनो याथात्म्यवेदनप्रतिपादनपरत्वात् अतः कर्तुः संस्कारद्वारेण विद्यायाः क्रतुशेषत्वात्तत्र फलश्रुतिरर्थवादमात्रं न च विचित्रसृष्ट्यन्यथानुपपत्त्या ईश्वरसिद्धिस्ततः फलसिद्धिश्चेति वक्तुं युक्तं पुण्यापुण्यरूपानुष्ठितकर्मसंस्कृतायाः प्रकृतेरेव पुरुषार्थानुरूपं विचित्रपरिणामसम्भवात् यथा विषादिदूषितानामन्नपानादीनामौषधविशेषाप्यायितानां च सुखदुःखहेतुभूतपरिणामविशेषस्य देशकालादिव्यवस्थया दर्शनं तद्वदिति संग्रहः हे सत्तमाः ! केषाञ्चिदास्तिकानां मते यज्ञपतिर्नाम यज्ञाराध्यस्तत्फलप्रदश्चेश्वराख्यः कश्चिदस्ति तत्र तावद्विचित्रसृष्ट्यन्यथानुपपत्तिं प्रमाणयति । इहामुत्रचेति । इह लोके चामुष्मिंश्च लोके ज्योत्स्नावत्यः प्रकाशबहुलाः भुवः विचित्रा भोगभूमयः तल्लोकारो विचित्रशरीराश्च दृश्यन्ते एतच्च दर्शनमीश्वरमन्तरेणानुपपन्नं यदुक्तम् प्रकृतेरेव जीवकर्मानुगुणं विचित्रपरिणामसंभव इति नैतदुपपद्यते सर्वेश्वरानधिष्ठितायाः तस्या विचित्रपरिणामासंभवात् यद्यनधिष्ठिताया अपि तस्याः परिणामः संभाव्येत तर्हि प्रलयदशायां तस्याः विचित्रपरिणामार्थमीश्वरानपेक्षणात् सततपरिणामस्वभावत्वे नापरिणामित्वेनावस्थानं न स्यात् ईश्वराधिष्ठितत्वे तु तस्य सत्यसंकल्पत्वेन विचित्रसृष्टितदभावावुपपन्नौ न च क्षेत्रज्ञाधिष्ठितत्वेन तावुपपन्नाविति वक्तुं शक्यं तेषामनुन्मत्तानां [illegible]पुण्यानुष्ठानपूर्वकपशुपादपत्वादिशरीरापादनस्या स[illegible]भ्युपगमे तु "इष्टापूर्तं बहुधा जातं जायमानम् ।

[illegible]भूतानां येन सर्वमिदं ततम् ।

। तमभ्यर्च्य सिद्धिं विन्दति मानवः ।

[illegible] विपाभ्यजस्रमनुमान[illegible]

इत्युक्तरीत्या भागवन्नु[illegible] सत्यसङ्कल्पः स्वमाहात्म्यानुगुण[illegible] समीचीनान्येतान्यसमीचीनानीति कर्मद्वैविध्यं संविधाय तदुपादानोचितदेहेन्द्रियादिकं तन्नियमनशक्तिं च सर्वेषां क्षेत्रज्ञानां सामान्येन प्रदिश्य स्वशासनावबोधिवेदाख्यशास्त्रं च प्रदर्श्य तदुपसंहारार्थं चान्तरात्मतयानुप्रविश्यानुमन्तृतया च नियच्छन् तत्र पुण्यरूपकर्मकारिणं स्वशासनानुवर्तिनं ज्ञात्वा धर्मार्थकाममोक्षैर्वर्धयति शासनातिवर्तिनं च तद्विपर्ययैर्योजयतीति सर्वमेतदुपपन्नं वैचित्र्यमिति भावः न च सत्यं ज्ञानमित्यादिभिः कर्माङ्गभूतप्रत्यगात्मयाथात्म्यं विविच्यते इति वक्तुं शक्यं कर्तुः प्रत्यगात्मनः शुद्धस्याशुद्धस्य च सद्योतकल्पस्यानिष्यादिहेयसम्बन्धयोगस्यासम्भावनीयस्वरूपस्वभावद्वयोः निरस्तनिखिलहेयगन्धानन्तकल्याणगुणाकरस्य सङ्कल्पकृतजगदुदय।विभवलयलीलसर्वशक्तिस्वज्ञानानन्दादिस्वरूपस्वभावैकान्तयोः श्रवणात् तथाहि "अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत यः सर्वज्ञः सर्ववित् यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति नचैषां वाक्यानां सिद्धवस्तुपरत्वासम्भवः याद्दच्छिकव्युत्पत्तेरपि शारीरकमीमांसायां सिद्धान्तितत्वेन कार्यार्थ एव व्युत्पत्तिरिति निर्बन्धस्य निर्निबन्धनत्वात् फलश्रुतिरर्थवादरूपेऽप्यपि न युक्तिमत् अर्थवादः प्रतीयमानार्थे तात्पर्याभावेऽपि रात्रिसत्रप्रतिष्ठापगोरणशतयातनासाध्यसाधनभावे शर्कराञ्जनद्रव्यपशुविशेषादेरर्थवादोक्तस्यापि विवक्षिततत्वादिति संक्षेपः२७

केषांचिदित्युक्तानास्तिकान् प्रदर्शयन् तेषामीश्वराभ्युपगमोऽस्तीत्याह । मनोरिति । अस्मत्पितुः पितुः अस्मत्पितामहस्याङ्गस्य ॥ २८ ॥

अजस्य चतुर्मुखस्य भवस्य रुद्रस्य मन्वादीनां गदाभृता भगवता कृत्यं कर्म कर्तव्यं कर्म फलदानरूपं प्रयोजनमस्ति मन्वादीनां मते अवश्यं कर्मफलदात्रा भवितव्यमित्यभ्युपगतमित्यर्थः ॥ २६ ॥

नन्वचेतनस्य क्षणभाविनः कर्मणः फलप्रदत्वासंभवेऽप्यपूर्वाख्यशक्तिकल्पनाद्वारेण फलसाधनत्वं स्यात् विध्युद्देशभूतदेवताया वा किमीश्वरेणेति चेत्याशङ्कां परिहरन् दर्शयति । वर्गाविति । वर्गो धर्मादिः स्वर्गो धर्मफलं अपवर्गो मोक्षः एषां प्रायशः ऐकात्म्यहेतुना एकमात्मा स्वरूपं येषां तेषां भाव ऐकात्म्यम् एकेनैव प्रदेयत्वरूपैकात्म्यं तद्रूपेण हेतुना वर्गादीनामेकेनैव प्रदेयत्वभवणात्समरणरूपहेतुना ईश्वरोऽभ्युपगतो मन्वादिभिरित्यर्थः तथा च श्रूयते "इष्टापूर्तं बहुधाजातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः ॥ तदेवाग्निः तद्वायुस्तत्सूर्यस्तदु चन्द्रमा" इत्यादि स्मर्यते च "यो यो यां यां तनुं भक्तः धर्मार्थकाममोक्षाख्यं य इच्छेत्" इत्यादि अयं भावः यजदेवपूजायामिति देवताराधनभूतयागाद्याराध्यभूताग्निवाय्वादिदेवतानामेव तत्तत्फलहेतुतया तस्मिन् तस्मिन्नपि वाक्ये व्यपदेशस्तावद्दृश्यते वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" इत्यादिषु तत्र हि कामिनः सिसाधयिषितफलसाधनत्वप्रकारोपदेशो विध्यपेक्षित एवेति नातत्परत्वशङ्का युक्ता एवमपेक्षितेऽपि फलसाधनत्वप्रकारे शब्दादेवावगते सति तत्परित्यागेन श्रुतपूर्वा-

[illegible] चन्द्रिका

[illegible] फलसाधनत्वं स एवैनं [illegible] समाराधनतया फलदा-
त्रित्वेनावस्थितस्य परमपुरुषस्यैवेति श्रूयते इष्टापूर्तमित्यादिका-
तद्देवाग्निस्तद्वायुरित्यादिका चेति अतोऽपूर्वस्य देवताया भा न
फलसाधनत्वमिति मन्वाद्युपादानं प्रशंसमात्रं नतु परिगणन-
मित्याशयेनाह। दौहित्रादीनिति। धर्मे विमोहितान् धर्मस्वरूपतदनु-
ष्ठानतत्साधनतत्फलसाधनादिकमजानानान् अत एव शोच्यान्
मृत्योर्दौहित्रश्वेन् आदिशब्दः प्रकारे ततत्सदृशानित्यर्थः वेना-
दीन् ऋते विना सर्वेषां मते ईश्वरोऽस्तीत्यर्थः ॥ ३० ॥

एवं केवलकर्मणां तन्मूलकापूर्वस्य स्वातन्त्र्येण देवतायाश्च फलसाधनत्वाभावः परमपुरुषस्यैव साधनभावश्चोपपादितः इदानीं तद्भक्तिमेव तस्य भगवत्पदारविन्दभजनस्यैवानर्थनिरासकत्वपूर्वकपुरुषार्थोपायकत्वमाह। यत्पादेति। तप सन्ताप आध्यात्मिकादिः तप सन्ताप इति धात्वर्थानुरोधात् तद्रूपां तापत्रयातुराणामित्यर्थः यस्य भगवतः पादयोर्या सेवा भक्तिस्तस्यामभिरुचिरुरुः प्रवर्द्धमाना सती अनेकजन्मभिः अनन्तजन्मभिरुपचितं सम्वर्द्धितं धियो मनसः मलं सद्यः क्षिणोति क्षपयति तमेव भजतेति तृतीयेनान्वयः तत्पादसम्बन्धस्यैव महिमेति दृष्टान्तेनाह। यथेति। यथा तत्पादाङ्गुष्ठविनिःसृता सरित् गङ्गा मलं क्षिणोति तथेत्यर्थः ॥ ३१ ॥

किं मलक्षपणसाध्यं तत्राह। विनिर्धुतं निरस्तमशेषं मनो मलं यस्य असङ्गो वैराग्यम्। इदं साधनसप्तकोपलक्षणं विज्ञानं प्रकृतिविविक्तात्मयाथात्म्यवेदनं ताभ्यां विशिष्यते इति विशेषः अङ्गभूतज्ञानकर्मकृतोपकार इत्यर्थः तदेव वीर्यं बलं यस्य भक्तियोगस्य सोऽस्यास्तीति तथा यस्य भगवतोऽङ्घ्रिमूले कृतकेतनः कृतस्थानः तदेकनिरतः अनेन भक्तियोगस्य विजातीयप्रत्ययान्तराव्यवहितत्वं विवक्षितम् ईदृशः पुमान् क्लेशावहां गर्भजन्मजरामरणादिक्लेशकारिणीं संसृतिं पुनर्न प्रतिपद्यते ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

सम्ब्यानुद्दिश्याह। यूयमिति। तेन किमस्माकं फलमित्यत उक्तम् अनुज्ञातुरिति। अनुज्ञात्रादीनां शास्त्रेषु यत्फलमुक्तं तत्तदनुज्ञानुमारिफलं स्यादित्यभिप्रायेण तुल्यमित्युक्तं नतु कर्त्रनुज्ञात्रोस्तुल्यफलत्वं स्यादन्यथा कृतहान्यादिदोषापत्तिरिति ॥ २६ ॥

ननु यद्यखिलजसद्भावे प्रमाणं स्यात्तर्हि तद्वियं कुरुतेति विधातुं युक्तं तदेव कुत इति तत्राह। अस्तीति। यद् दृष्टं तदेव सत् यददृष्टं तदेवासदिति वादिनोऽपेक्ष्य केषां चिदित्युक्तं केषां चिद्व्यासादीनां महात्मनां पक्षे यज्ञपतिर्नाम विष्णुरस्तीत्यन्वयः "यज्ञो यज्ञपतिर्यज्वा" इत्यादि स्मृतेः श्रीनारायणस्य प्रसादेन प्राप्या लोकास्तेन नियता देवताश्च सन्तीत्येतदेकोक्त्याहाद्दृष्टेति। इह मनुष्यलोके तच्छरीरे च। अमुत्र स्वर्गादौ ज्योत्स्नावत्यः प्रकाशभूयिष्ठा भुवः स्थानविशेषाः इन्द्रियादिप्रेरकत्वेन भवनाद्भुवो देवताश्च दृश्यन्ते। प्रमाणत इति शेषः। "प्रकाशवद्भुवो देवामानुषाश्चापि केचन" इति वचनात्। दुर्लभत्वात्कचिदित्युक्तमिहेत्यनेन विलक्षणं लक्षयति सुखहेतुत्वेन चन्द्रिकया तुल्यरत्नप्रकाशेन प्रकाशितत्वात् ज्योत्स्नावत्य इति ॥ २७ ॥

केषां चिदिति सुविस्तीर्णत्वाभावमतो निर्दिशति। मनोरिति। अस्मात्पितुर्वेनस्य पितुः ॥ २८ ॥

अजस्य ब्रह्मणः गदाभृतो हरेः। कृत्यं पूजालक्षणं कार्यमस्ति ॥ २९ ॥

स्वर्गादेरन्याधीनतया तत्प्राप्त्यर्थं तदुपादानस्यैव कर्तव्यत्वेन तत्र किं गदाभृतः कृत्येनेति तत्राह। राज्येति। राज्यादेः प्रायेणान्याधीनत्वमन्तरेणैवैकात्मनः समस्तात्प्रधानस्य हरेर्हेतुता कारणत्वम्। "एकात्मा हरिरुद्दिष्टः प्रधानत्वात्समस्तत" इति वचनात् "ज्ञानादेव स्वर्गो ज्ञानादेवापवर्ग" इति श्रुतेः स्वर्गादिप्राप्त्यर्थमपि श्रीनारायणस्य पूजा ज्ञानजनित्री कार्येत्याशयः ननु प्रायः शब्दस्य प्राचुर्यार्थावधारणार्थत्वे निषिध्यावशिष्टात्वनिषेधः कथं क्रियत इति चेन्न तस्यावधारणाक्षेपे प्रयोगदर्शनात् तदुक्तम् "प्रायः पदं स्यात्प्राचुर्ये चाक्षेपात्मावधारणे। अर्थतोऽवधृतिः क्षेपो सुखाक्षेपोऽवधारणम्" इति। एकश्रेतनो जीव एव राज्यादेः कारणमधिकृतत्वादिति चेन्न विपक्षाविरोधात् अनाम्नायत्वाच्च "एकात्मा हरिरुद्दिष्टः प्रधानत्वात्समस्तत" इति। एतत्समाख्यानस्मृतिविरोधाच्च केषां चित्येनैव केषां चिदस्तीत्युक्तं नास्तिकानाह। दौहित्रादीनिति मृत्योर्दौहित्रो दुहितुः पुत्रो वेनः ॥ ३० ॥

यज्ञपतिरस्तु राज्यादेर्हेतुर्येन विधिना फलसिद्धिः स्यात्तं प्रकारमुपदिशेत्यत आह। यत्पादेति। अत्र गङ्गादृष्टान्तो बुद्ध्यवतारार्थं नतु गङ्गाकृष्णपादसेवयोः फलसाम्याभिप्रायेण कृष्णपादसेवा साक्षाज्ज्ञानसाध्यप्रसादसाधनं गङ्गासेवा तु शुद्धान्तःकरणस्य भगवत्सेवामुत्पाद्य तत्साधनमिति परम्परयोपमकृच्छ्रं ॥ ३१ ॥

नष्टमनोमलस्य किमात्यन्तिकफलमत्राह। विनिर्धुतेति। निरस्तमनोदोषस्य पुंसो विषयासङ्गलक्षणवैराग्याज्जाताया भक्तेर्विज्ञानं भवति तदेव विशेषवीर्यमस्यास्तीति असङ्गविज्ञानविशेषवीर्यवान् यस्याङ्घ्रिमूले कृताश्रयः विज्ञानात्पूर्वं यथा संसारमाप्नोति तथा नाप्नोतीत्यस्मिन्नर्थे पुनरिति संसारक्लेशप्रतिपत्तिमपि नाप्नोति किं पुनस्तत्प्राप्तिरित्यतः प्रपद्यत इति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

यूयमिति। तत् पूर्वोक्तं भगवद्धर्मम् अनुमोदने हेतुः कर्तुस्तद्धर्मानुष्ठातुः परलोके यत्फलं तच्छिक्षयितुरनुमोदितुश्च भवतीति ॥ २६ ॥

इन्द्रपाखण्डभ्रंशितमतीन् प्रति प्रथममाह। अस्तीति। हे अङ्ग सत्तमाः! यज्ञपतिर्नाम सर्वकर्मफलदातृत्वेन श्रुतिप्रतिपादितः परमेश्वरः केषाञ्चिच्छ्रुत्यर्थतत्त्वज्ञानां मते तावदस्ति। तथापि विप्रतिपत्तेर्न तत्सिद्धिरित्याशङ्क्य तत्र जगद्वैचित्र्यान्यथानुपपत्तिप्रमाणमभ्युपेत्याहक्रमित्याह। इह प्रत्यक्षेणामुत्र शास्त्रेण तद्दृष्टिलब्धेनानेन ज्योत्स्नावत्यः कान्तिमत्यो भुवो भोगभूमयो देहाश्च कुचित् कचिदेवोपलभ्यन्ते न च कर्मसाम्ये फलतारतम्यम्। कचित् कचिच्च तदसिद्धिश्च भवति। अतः स्वातन्त्र्येण परमेश्वरेच्छा भाव्यम्। केषाञ्चिदिह सत्तमा इति पाठस्तु स्वाम्यधृतः ॥ २७ ॥

अत्र विद्वदनुभवो हि प्रमाणमित्याह। मनोरिति त्रिकेण। अस्मत्पितामहस्याङ्गस्य। प्रह्लादध्रुवौ तदानीं प्राणादेव साक्षौ गच्छितौ ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गदाभृता परमेश्वरेण कृत्यमस्ति हृदये बहिरप्याविर्भूय तेषां मुहुः कृत्यसम्पादनात् तेन यत्कृत्यं करणीयं तत्तेषामस्तीत्यर्थः । तेषामेव तेन कृत्यमस्ति नान्येषामित्यर्थो वा । तदन्यांस्तु निन्दितत्वेनाह । मृत्योर्दौहित्रादीन् वेणप्रभृतीन् धर्म्मे विमोहितान् । गदाभृच्छब्देन तन्नाम्ना प्रसिद्धात् ॥ २९ ॥

श्रीविष्णोरन्यत्र परमेश्वरत्वं वारयति । श्रुतियुक्तिविद्वदनुभवेषु तं गदाभृतं विशिनष्टि । वर्गेति वर्गोऽत्र त्रिवर्गः धर्म्मस्य तत्फलतः अपवर्गो मोक्षः तेषामैकात्म्येन रूपेण सर्व्वानुगतेन हेतुना । तदुक्तं स्कान्दे ।

बन्धको भवपाशेन भवपाशाच्च मोचकः ।
कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः ॥

इति दौहित्रेत्यादिकद्वयोः पद्ययोर्गौडीये विपर्ययेण पाठश्चित्सुखपुण्यारण्ययोर्मतः मूलन्तु स्वाम्यसम्मतं ऐकात्म्येत्यत्र एकार्थेति चित्सुखः ॥ ३० ॥

तत्र शुद्धभक्तास्तु विशिष्टा इत्याह । यदिति द्वाभ्याम् ॥३१॥ विज्ञानस्य विशेषणत्वं भगवत्पर्यन्तानुभवात् ॥ ३२ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कार्य्यं खलु सर्व्वानुमोदनेन सिद्ध्यतीत्यत आह । यूयमिति । शास्तुः शिक्षयितुः अनुज्ञातुरनुमोदयितुः प्रेत्य परलोके यत्फलं तत्तुल्यम् ॥ २६ ॥

ननु कुरुताधोक्षजंप्रिय इत्यधोक्षजाराधनं प्रवर्तयितुमीहसे तत्कथं सम्भवेत् त्वत्पित्रा वेणेन तदुपदेशकैरन्यैरप्यनङ्गीकृतत्वादित्यत आह । अस्तीति । हे महत्सत्तमा! इति विपरीतलक्षणया यज्ञपतिर्नाम परमेश्वरः केषाञ्चिन्मते तावदस्ति तथापि विप्रतिपत्तेर्न तत्सिद्धिरित्याशङ्क्य जगद्वैचित्र्यान्यथानुपपत्त्या प्रमाणयति । इह प्रत्यक्षेणामुत्र शास्त्रेण च ज्योत्स्नावत्यः कान्तिवैचित्र्यवत्यः क्वचिदित्यज्योत्स्नावत्यश्च अतिशयोक्त्या दृष्टादृष्टशुभकर्मणां फलतारतम्यवत्यः फलाभाववत्यश्च । भुवः भोगभूमयो देहाश्च लक्ष्यन्ते । अयमर्थः । न तावत् कर्मणः फलदातृत्वं घटते जडत्वात् । न चार्वाग्देवतानां स्वातन्त्र्यमन्तर्यामिश्रुतेः । न च तत्कर्मसाम्ये फलतारतम्यं क्वचित्तदभावश्च सम्भवति । अतः कर्तुमकर्तुमन्यथा कर्तुं समर्थेन परमेश्वरेण भाव्यं यस्यैवादरतारतम्ये सति फलतारतम्यमादराभावे फलाभाव इति ॥२७॥

विद्वदनुभवेनापीश्वरसिद्धिमाह । मनोः स्वायम्भुवस्यास्मत्पितुः पितुः पितामहस्येत्यर्थः । प्रह्लादवत्तौ तदानीं शास्त्रादेव ज्ञात्वा गणितौ ॥ २८ ॥

गदाभृता कृत्यमस्ति गदाधारणान्मधुरमनोहररूपवतेत्यर्थः । कृत्यञ्च तेषां निरन्तरसाक्षात्चरणपरिचरणमेव ज्ञेयम् । तदन्यांस्तु निन्द्यत्वेनाह । मृत्योर्दौहित्रादीन् वेणादीन् विना धर्मे विमोहि- [illegible] शोच्यान् मृत्योरित्यनेन ते अथ यद्यत्र मन्मते [illegible] मृत्योस्तन्मातामहस्यैव पुरीं प्रस्थापयि- [illegible] ॥ २९ ॥

[illegible] । वर्गेति । वर्गोऽत्र त्रिवर्गः स्वर्गो धर्मस्य [illegible] तेषाम् ऐकात्म्यहेतुना एकोऽसहायश्चासा- [illegible]

मैकात्म्येन [illegible] स्वर्गापवर्गकामैरपि गदाभृदेव [illegible] सकामानाञ्च गदाभृता [illegible] "अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भ[illegible] यजेत पुरुषं परम"इति । यत् कर्मभिर्यत्तपसेत्यादौ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसेत्यादिकञ्च । अत्र प्रायेणेत्यनेन क्वचित् कर्मज्ञानादिसापेक्षस्वस्वरूपेणेति कर्मज्ञानादिमिश्रयापि भक्त्या भक्तिमिश्रैरपि कर्मज्ञानादिभिर्वर्गादिसिद्धिर्नतु भक्त्या विनेति निर्गलितार्थः । भक्तेस्तु तत्स्वरूपत्वन्तु प्रसिद्धम् ॥ ३० ॥

उक्तमेवार्थं क्रमेण विवृण्वन् भगवतः केवलयैव भक्त्या यथा जनः कृतार्थो भवति नतु तथा तपोज्ञानादिभिः किमुत कर्मभिरित्याह । यदिति द्वाभ्याम् । तपस्विनामिति तपोऽभिरपि बुद्धेर्मालिन्यं दूरीकर्तुमशक्नुवतामित्यर्थः सद्य इति यदैव महत्कृपया पादसेवाभिरुचिर्भवत्तदैवेत्यर्थः । तत्रश्चान्वहं प्रतिदिनं वर्द्धमानैव स्यात् सती शुद्धसत्त्वस्वरूपा नित्येत्यर्थः । एतत्पादसम्बन्धस्यैवैष महिमेति दृष्टान्तेनाह । यथेति । तं भजतेति तृतीयेनान्वयः ॥ ३१ ॥

ततश्चासङ्गो वैराग्यं विज्ञानविशेषः श्रीमूर्त्तिसौन्दर्याद्यनुभवः ताभ्यामेव यद्वीर्यं प्रभावस्तद्वान् । केवलमाश्रयः इति भक्तेः कैवल्यं दर्शितम् ॥ ३२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनुज्ञातुः अनुमोदितुः ॥ २६ ॥

अधोक्षजप्रिय इत्यनेनोक्तपरमात्मनि वेनादिभिर्विमोहितानां केषाञ्चिदसंभावनामालक्ष्य तान् प्रति शनैः परमात्मतत्त्वं वर्णयति । अस्तीति । केषां चित् वेनादिव्यतिरिक्तानां मते यज्ञपतिरस्ति यतो यज्ञादिफलेन इह महत्सत्तमाः पूज्यतमाः नरोत्तमाः अमुत्र सूर्यादयो यज्ञपतिकृताः लक्ष्यन्ते क्वचित् इह श्वपचादयः अमुत्र राह्वादयः अज्योत्स्नावत्यः भुवः शरीररूपाः पापफलभोगभूमयः यज्ञादिकर्मवर्जिताः यज्ञपतिकृता एव लक्ष्यन्ते अतः उत्तमभावस्य प्राप्तेः अधमभावान्निवृत्तेश्चासम्भवात् ॥ २७ ॥

जीवानां मुमुक्षुबुभुक्षूणां भुक्तिमुक्तिप्रदेन परमेश्वरेणावश्यं भाव्यमित्याह । मनोरितित्रिभिः ॥ २८ ॥

कृत्यं प्रयोजनमस्ति मुक्तिरूपं प्रयोजनं गदाभृतैव हेतुभूतेन साधितमित्यर्थः ॥ २९ ॥

धर्मविमोहितान् । उचिते धर्मे मोक्षमार्गभूते विमोहितान् अत एव शोच्यान् । गर्ह्यान् मृत्योर्दौहित्रादीन् सुनीथात्मजादीन् प्रायेण ऋते । तेषामपि जन्मादिप्रदात्रा गदाभृतैव कृत्यमस्त्यतः प्रायग्रहणम् कीदृशेन वर्गस्वर्गापवर्गाणामैकात्म्यहेतुना वर्गस्त्रिवर्गस्तत्फलभूतः स्वर्गश्च अपवर्गो मोक्षश्च तेषामैकात्म्येनाद्वितीयेन हेतुना ॥ ३० ॥

अथ यत्पादसेवा रुचिर्बहुजन्मोपचितं तपस्विनां बुद्धिमलं हरति यच्चरणं शरणं गतो जनो विधूतमनोमलः संसृतिं न प्रपद्यते तं यूयमपि भजतेत्याह । यदितित्रिभिः ॥ ३१ ॥

असंगो वैराग्यं विज्ञानमात्मानात्मपरमात्मविषयकं ज्ञानं ताभ्यां विशेषतो वीर्यवान् हरिभक्तिवलवान् ॥ ३२ ॥

[redacted]त्मवृत्तिभिर्मनोवचः कायगुणैः स्वकर्मभिः ।
[redacted]कामदुघाङ्घ्रिपङ्कजं यथाधिकारावसितार्थसिद्धयः ॥ ३३ ॥
[redacted]नेकगुणोऽगुणोऽध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः ।
सम्पद्यतेऽर्थाशयलिङ्गनामभिर्विशुद्धविज्ञानघनः स्वरूपतः ॥ ३४ ॥
प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनाम् ।
क्रियाफलत्वेन विभुर्विभाव्यते यथानलो दारुषु तद्गुणात्मकः ॥ ३५ ॥
अहो ममामी वितरन्त्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरम् ।
स्वधर्मयोगेन यजन्ति मामका निरन्तरं क्षोणितले दृढव्रताः ॥ ३६ ॥
मा जातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्यया च ।
देदीप्यमानेऽजितदेवतानां कुले स्वयं राजकुलाद्द्विजानाम् ॥ ३७ ॥
ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवन्दनात् ।
अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥ ३८ ॥
यत्सेवयाशेषगुहाशयः स्वराट् विप्रप्रियस्तुष्यति काममीश्वरः ।
तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यताम् ॥ ३९ ॥
पुमांल्लभेतानतिवेलमात्मनः प्रसीदतोऽत्यन्तशमं स्वतः स्वयम् ।
यन्नित्यसम्बन्धनिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजाम् ॥ ४० ॥

भाषाटीका ।

हे पितर देवर्षि आप निर्मल हो आप इस बात की सम्मति करो क्योंकि करने वाले को शिक्षा मे वाले को अनु मोदन करने वाले को परलोक मे बरोबर फल होता है ॥ २६ ॥

हे सत्पुरुषों! यद्यपि आग्रही अज्ञानी लोग नहीं मानते हैं तथापि यज्ञों का कर्ता भोक्ता भगवान् ईश्वर अवश्य है क्योंकि इस लोक तथा परलोक मे प्रकाश वाली भोग्य भूमि बहुत दीखती हैं बिना ईश्वर के यह विचित्रता नहीं होसकी है तिससे कोइ पुरुषों के मत मे ईश्वर अवश्य है ॥ २७ ॥

मनु महाराज उत्तानपाद ध्रुवजी महाराज राजर्षि प्रियव्रत हमारे पिता के पिता अङ्ग राजा इस प्रकार के और ब्रह्मा महादेव प्रह्लाद जी बलि राजा इन सबों का भगवान् मे भक्ति है इनों ने भगवान् को धर्म अर्थ काम मोक्ष के फल दाता समझ कर ईश्वर को माने हैं एक मृत्युका बेचता वेनादिक शोचने लायक धर्म मे मोहित लोक न माने तो क्या चिन्ता है ॥ २८ ॥ २९ ॥ ३० ॥

जिन भगवान के चरण सेवा की नित्य बढती हुई रुचिमात्र होने से तपस्या करने वालों के अनेक जन्मों के बुद्धि के मल शीघ्र दूर हो जाते हैं जैसा कि उन के चरणों से निकली गङ्गा जी से होता है ॥ ३१ ॥

जिन के चरण कमल के आश्रय लेने से मनुष्य के सब मन के मल दूर हो जाते हैं विज्ञान साक्षात्कार होने से बुद्धि का बल बढता है तब मनुष्य फिर क्लेश दायक संसार मे नहीं गिरता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मवृत्तिभिरध्यापनादिभिः मनोवचःकायानां गुणैर्ध्यान-स्तुतिसपर्याभिः अमायिनो निष्कपटाः सन्तः ननु ब्रह्मादिभिः सेव्ये किमहमद्भक्त्या मांस्यति तथाह । यथाधिकारमेवावसिता निश्चिता समाप्ता वार्थसिद्धिर्येषाम् ॥ ३३ ॥

स्वकर्मभिर्यागादिभिर्भजतेत्युक्तम् तत्र "ब्रह्मार्पणं ब्रह्महविः" इति न्यायेन सर्वेषु यागतदङ्गफलेषु भगवद्रूपतया कर्मकर्तव्यं न भिन्न-दृष्टयेति वक्तुं तेषां भगवद्रूपतामाह । द्वाभ्याम । असौ भगवानेव स्वरूपतो विशुद्धविज्ञानघनोऽप्यगुणो निर्विशेषणोऽपि सन्निह कर्म-मार्गेऽनेकगुणो नानाविशेषणवान् अध्वरो यज्ञः सम्पद्यते "यज्ञो वै विष्णुः" इतिश्रुतेः अनेकगुणत्वमेवाह । पृथग्विधानि यानि द्रव्या-दीनि तैः तत्र द्रव्याणि व्रीह्यादीनि गुणाः शुक्लादयः क्रिया अव-घातादयः उक्तयो मन्त्राः अर्थोऽङ्गमात्म उपकारः आशयः सङ्कल्पः लिङ्गमपूर्वार्थानां शक्तिः नाम ज्योतिष्टोमादि तैरध्वरः सम्प-द्यते ॥ ३४ ॥

यागतदङ्गानां भगवद्रूपत्वमुक्त्वा यागफलस्यापि भगवद्रूप-तामाह । प्रधानेति एष विभुः परमानन्दोऽपि शरीरे चेतनां विषया-कारां बुद्धिं प्रतिपद्य तदभिव्यङ्ग्यानन्दरूपः सन् क्रियाफलत्वेन प्रतीयते "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः । यथानलो दारुषु विषयस्तद्गुणात्मको दाहधर्मैर्दैर्घ्यवक्रत्वादि-भिस्तद्वत् । कथंभूते शरीरे प्रधानमव्यक्तम् कालस्तत्क्षोभकः आश-यो वासना धर्मोऽदृष्टं तैः संगृह्यते अस्मिन् इति तथाविधे ॥ ३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवमप्रवृत्तान्भगवज्जने प्रवर्त्य स्वतः प्रवृत्तानां प्रवृत्तिमभिनन्दनेन द्रढयति । महो इति वितरन्ति कुर्वन्ति ॥ ३६ ॥

इदानीं हरिभक्तिदार्ढ्याय ब्राह्मणभक्तिं विधत्ते । माजातिबत्यद्दाभिः महत्यश्च ता ऋद्धयश्च ताभिर्यद्राजकुलस्य तेजस्तस्मात्तत्काशाद्द्विजानां कुलमजितो देवता येषां वैष्णवानां तेषां च कुले मा जातु प्रभवेत्कदाचिदपि प्रभावं न करोतु कथम्भूते समृद्धिभिर्विनापि स्वयमेव तितिक्षादिभिर्देदीप्यमाने ॥ ३७ ॥

ब्राह्मणांस्तुवन्नाह । यच्चरणाभिवन्दनाद्धरिर्वक्ष्मीं यशश्चावाप यत्सेवया चेश्वरस्तुष्यति तदेव ब्रह्मकुलं निषेव्यतामिति द्वयोरन्वयः ॥ ३८ ॥

तस्य हरेर्लोकसंग्रहरूपो यो धर्मस्तत्परैः ॥ ३९ ॥

ननु ब्रह्मकुल एव नित्यं सेव्यमाने सर्वदेवतामुखभूतेऽग्नौ यज्ञाद्यनुष्ठानं न स्यात्तच्च तेन विनाचित्तशुद्धिर्नच तया विना मोक्षः स्यादित्याशङ्क्याह । पुमानिति द्वाभ्याम् । यस्य ब्रह्मकुलस्य नित्यं सम्बन्धेन निषेवया पुमान् स्वयमेव ज्ञानाभ्यासादिकं विनाप्यत्युत्तमं मोक्षं लभेत कुतः यत्सेवया स्वत एवानतिवेलं शीघ्रं प्रसीदतः शुद्ध्यत आत्मनश्चित्तात् ततः परं श्रेष्ठं देवानां किं मुखमस्ति ब्राह्मणसेवयैव यज्ञादिफलं ज्ञानफलं तत्सर्वं भवतीत्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्मात्स्वकर्मभिः वर्णाश्रमोचितैः पञ्चमहायज्ञादिभिः आत्मवृत्तिभिः "शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च" इत्यादिस्थानोक्तशमादिभिः मनोवचःकायगुणैर्ध्यानस्तुतिपरिचर्यादिभिः अमायिनो निष्कपटाः सन्तः कथंभूतं कामं समीहितं दोग्धि प्रपूरयतीति कामधुक् तदङ्घ्रिपङ्कजं यस्य यथाधिकारावसितार्थसिद्धयः अधिकमर्थमधिकृत्य क्रियते साध्यते इति व्युत्पत्तेः यथाधिकारं स्वसमीहितं फलमनतिक्रम्यावसिता निश्चिता अर्थसिद्धिः फलसिद्धिर्येषां ते स्वसमीहितार्थानुसारेण फलसिद्धिभाजिनीरत्येवं निश्चितबुद्धय इत्यर्थः । निश्चयस्याप्यनुष्ठानोपयोगित्वात्संशयस्यानर्थावहत्वात् तथा च स्मर्यते "नायं लोकोऽस्ति न परो न सुखं संशयात्मनः । अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति" इति ॥ ३३ ॥

ननु प्रतिकर्मणां द्रव्यदेतादिभेदादेव भेदः अन्यथा कर्मैक्यमेव स्यात् ततश्च प्रतिनियतसाधनोपसंहारप्रयासो व्यर्थः स्यात् एवं च कथमेकदेवतोद्देशेन सर्वकर्मानुष्ठानं कुरुतेत्युच्यते तत्राह । प्रमाणेति । अत्र गुणाध्वर इति पाठः गुणोऽध्वर इति च तत्रव्यस्तपाठे गुणा इति छेदः भगवद्विशेषणं हेयगुणरहितइत्यर्थः अनेकगुणा इति शुभगुणविधानात्समस्तपाठे त्वध्वरविशेषणं सत्त्वादिगुणान्वित इत्यर्थः कर्तृद्वारा तदन्वयो बोध्यः तत्र स्वरूपतः स्वरूपेण [redacted] नः विज्ञानशब्देन अनुकूलात्मकज्ञानं विवक्षितं घनशब्दात्प्रतत्वमभिप्रेतं विज्ञानैकस्वरूप इत्यर्थः अगुणाः निरस्तानेकगुणाः अनन्तकल्याणगुणाः योऽसौ परमात्मा स [redacted] नेकद्रव्याणि श्रीह्याज्यपश्वादीनि गुणाः शुक्लामाव- [redacted] भेतेत्यादिविध्युद्देशभूतशुक्लादयः क्रियाः अवहननाद्यः [redacted] यः उक्तयो मन्त्राः पृथग्विभक्तं भिन्नमप्यन्वेतव्यं [redacted] दिभिः अध्वरः सन् अध्वरस्य द्रव्यादिसङ्घात-

रूपत्वाद्द्रव्यजीवा [redacted] शयलिङ्गनामभिः सम्य [redacted] फलं तस्य आशयः [redacted] गात् लिङ्गान्यग्नीन्द्रादि [redacted] दिशब्दाः तैं संपद्यते अग्नीन्द्रादिलिङ्गस्य फलाश्रयत्वं फल क्रियाया अग्नीन्द्राद्याश्रितत्वाद्द्रोध्यम् अध्वराराध्यत्वेन तत्फल नावगतेन्द्रादिनामरूपात्मको भवतीत्यर्थः तथा च श्रुतिः " वै विष्णुः तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमा" इत्यग्नीन्द्र द्वारभेदेन द्रव्यादिभेदेन च कर्मणां भेदः अन्यान्तरात्म वस्थितस्य परमपुरुषस्यैकस्यैवाराध्यत्वफलप्रदत्वाद्युपपत्तिव ष्यतः एकदेवताराधनत्वमप्युपपन्नमिति भावः ॥ ३४ ॥

एवं कर्मतदाराध्यदेवतारूपत्वमुक्तम् अथ कर्मभोक्तृजीव त्वं तत्फलरूपत्वं चाह । प्रधानेति । एषः भगवान् प्रधानं प्र कालस्तद्गुणक्षोभकः आशयो वासना धर्मः अदृष्टमेभिः स उत्पादन इति तथा तस्मिन् शरीरे चेतनां शब्दाद्यनुभ ज्ञानं प्रतिपद्य जीवद्वारा प्रतिपद्येत्यर्थः तत्र जीवादिभिः साम धिकरण्ये च हेतुः"विभुः य आत्मनि तिष्ठन्"इत्युक्तरीत्या जीव रात्मतयावस्थानात् सर्वजगदुपादानत्वादुपादानत्वस्य च अ वस्थाविशेषवतः प्रागवस्थायोगित्वरूपत्वाज्जीवं प्रत्युपादान च जीवधर्मभूतज्ञानसङ्कोचविकाशरूपविकाराश्रयत्वस्यापि द्वारकत्वेन विभोः परस्य सत्त्वात् शब्दाद्यनुभवरूपं प्रतिपद्येत्युक्तं क्रियाफलत्वेन स्वर्गादिरूपतया विभाव्यते वि यते एवं कर्मतदाराध्यतत्फलभोक्तृतत्फलरूपत्वमुक्तं तत्र कर्म गतदोषसंस्पर्शमाशङ्क्य तत्रेत्यभिप्रायेण दृष्टान्तमाह । यथ दारुषु अनलोऽग्निर्यथा तद्गुणात्मकः दारुगतवैरूप्यवक्रत्वादिमा यते तद्वत् वस्तुत एकरूपोऽप्यनलोऽभिज्ञानैरवैरूप्यादिभिर्विव प्रतीयते तथेत्यर्थः सामानाधिकरण्येन व्यपदिश्यत इति ॥ ३

तदेवमप्रवृत्तान् भगवज्जने प्रवर्त्य स्वतः प्रवृत्तानां प्रवृ नन्दनेन प्रथयति । अहो इति । ये भूतले मामकाः मद्विष सिनो जनाः दृढमनाः दृढसंकल्पाः स्ववर्णाश्रमधर्मयोगेन भुजामिन्द्रादीनामपीश्वरम अन्तरात्मानं गुरुं हितोपदे हरिं स्वाभितदुरितहरं नित्यं भजन्ति ते ऽमी जनाः मम अ वितरन्ति कुर्वन्ति अहो इति हर्षे ॥ ३६ ॥

इदानीं भगवद्भक्तिदार्ढ्याय ब्राह्मणभक्तिं विधत्ते । माजाति द्भिः । तत्र तावत् ब्राह्मणकुलस्य राजकुलनिग्रहाविषयत्वं यते महर्द्धिभिः महत्यश्च ता ऋद्धयस्ताभिर्यद्राजकुलस्य तेजस्त त्सकाशात् द्विजानां कथंभूतानामजितो भगवान् देवता येषां कुले जातु कदाचिदपि मा प्रभवेत् प्रभावं न करोतु कथंभूते स भिर्विनापि स्वयमेव तितिक्षादिभिः देदीप्यमाने यद्वा राज स्य ब्राह्मणकुलनिग्रहाविषयत्वं प्रार्थयते अजितदेवतानां नां कुले तितिक्षया द्वन्द्वसहनेन तपसा कृच्छ्रादिना अध्ये या वा आतिथ्यया अतिथ्याराधनया चकाराद्ब्रह्मचर्या ग्रहः एभिर्देदीप्यमाने सति तेषां तेजः महर्द्धिभिः राज द्धेतोः कदाचिन्मा प्रभवेत् महर्द्धिप्रयुक्तगर्वसहिताद्रा जाद्ब्राह्मणकुलं कुपितं माभूदित्यर्थः कुलद्वयमन्योऽन्यं यथा मनुगृह्णात्विति भावः ॥ ३७ ॥

यच्चरणाभिवन्दनात् येषां चरणाभिवन्दनात् हरि जगत्पवित्रं यशश्चावाप यत्सेवया चेश्वरस्तुष्यति तदेव ब्र निषेव्यतामिति द्वयोरन्वयः हरिं विशिनष्टि । अक्षुण

[redacted] देवः पुराणः पुरुष [redacted] सम्बन्धस्य सोपाधिक- [redacted]तया यश आदिसम्बन्धस्य ब्राह्मणसेवा- फलत्वैककथनमात्रतात्पर्यकत्वादस्य श्लोकस्यार्थवादवाक्यस्य- स्वार्थे तात्पर्याभावात् । विधेस्तावकात्वात् न चार्थवादस्य स्वार्थे तात्पर्याभावे सतीतरेषामपि यश आदिसम्बन्धेऽपि तात्पर्यं नास्तीति वक्तुं शक्यं ब्राह्मणसेवाविध्यपेक्षितफलसमर्थकत्वेन तत्र तात्पर्यनिश्चयात् नह्यसता गुणेन प्ररोचना संभवति नच पयः पिब शिखा ते वर्द्धत इति बालानुपच्छन्दन वाक्ये असतापि गुणेन प्ररोचना दृश्यते इति वाच्यं तत्रापि यद्यमयशोभिश्रयस्तत्प्रवृत्तेः प्रवृत्त्यर्थप्ररोचनायां एवानुपपत्तेः तस्मात्तत्रासतामजानतां बालानां पयःपानादिप्रवृत्त्यर्थं शिखावर्धनादिकमसदपि फलत्वेन कीर्त्यते तत्रासत्वं प्रत्यक्षतोऽवगतमिह तु मन्वादिषु ब्राह्मणसेवकेषु यशःसम्बन्धस्यैव प्रत्यक्षतुल्यशास्त्रेणावगमादसता निश्चायकस्य प्रमाणान्तरस्याभावात् नच तेषां तत्सम्बन्धं ब्राह्मणसेवातिरिक्तमदृष्टान्तरमेव कारणमिति वक्तुं युक्तम् अदृष्टान्तरस्यापि स्ववर्णाश्रमैकान्तनित्यनैमित्तिकपूर्वकयागजन्यत्वात् स्ववर्णाश्रमधर्मेषु ब्राह्मणसेवाया अप्यनुप्रविष्टत्वात् स्वराट् स्वतन्त्रः अकर्मवश्यः तथापि विप्रप्रियःविप्राधीनः बहुव्रीहिषष्ठीतत्पुरुषसमाससिद्धैर्येनान्योऽन्यं भृशं प्रीतिविषयत्वलाभाद्विषयवैलक्षण्याधीनत्वात्पारतन्त्र्यस्य स्वतन्त्रस्यापि स्वेच्छया पारतन्त्र्योपपत्तेः ईश्वरस्तुष्यति ईश्वरस्याकर्मवश्यत्वं नाम देवमनुष्यादिसजातीयचेष्टां कुर्वतोऽपि तच्चेष्टायत्तसुखदुःखाद्यस्पर्शित्वं नत्वैतादृशप्रतिषिद्धं यच्चेष्टं तत्प्रयुक्तसुखाद्यस्पर्शनं चेति विप्रतिषिद्धमिति शङ्क्यं स्वाङ्गनारक्षणव्यापारेषु तथादर्शनात् एवं चेश्वरस्य ब्राह्मणसेवातद्भावजन्यसुखाद्यस्पर्शिनोऽपि तत्सेवापरायणत्वकथनेन द्विजसेवाया आवश्यकत्वद्योतनाय स्वराडिति विशेषणं तन्वन्यमेवयान्यः कथं तुष्येत्तत्राह । अशेषगुहाशयः। सेवकसेव्ययोरुभयोरपि हृदयगुहायां तदन्तरात्मतया निविष्टत्वेन सेवाजन्यद्विजादिनिष्ठप्रीतिरपि द्विजादिद्वाराश्रयः सेवकनिष्ठसेवाश्रद्धादिकमवेक्ष्य तुष्यतीत्यर्थः कामं तुष्यतीत्यनेन द्विजसेवातोऽधिकसन्तोषहेतुर्नास्तीति द्योत्यते तस्मात् द्विजसेवाया यश आदिहेतुत्वाच्च तद्धर्मपरैः द्विजसेवैकशीलैः तदुपयुक्तं गुणमाह । विनीतैः एकविशेषणोपादानेन द्विजप्रसादेनेति नियमान्तरेणान्यो हेतुरनुपेक्षित इति सूचितं सर्वात्मना करणत्रयैकयेन ब्रह्मकुलं निषेव्यताम् ॥३८-३९॥

किञ्च "प्रसादे सर्वदुःखानां हानिरस्योपजायते । प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते" इत्युक्तरीत्या सर्वदुःखहानिहेतुभूतमनःप्रसादनिर्वर्तकत्वादपि द्विजसेवैव कार्येत्याह।पुमानिति। येषां ब्राह्मणानां नित्यसम्बन्धरूपसेवया पुमान् अतिवेलं शीघ्रं अगमे व प्रयत्नान्तरेणैव प्रसीदति आत्मनः मनसः शमं शान्ति लभेत ततः शान्तमनसः किमस्ति असाध्यमिति शेषः शान्तमनसामसाध्यं किञ्चिदपि नास्तीत्यर्थः किञ्च हविर्भुजामिन्द्रादीनां मुखं ब्राह्मणसेवयैव तन्मुखानां हविर्भुजां वचाराध्यदेवानामपिसेवाकृता स्यात् "ब्राह्मणकुलं ब्राह्मणोऽस्य मुखमासीत्" इति ब्राह्मणकुलस्य भगवदावेशावतारस्य ब्रह्मणो मुखत्वात्तदाराधनेनैव हविर्भुगन्तरात्मत्वावस्थितः परमात्मा तुष्यतीति ब्राह्मणा एवाराधिभिराराध्याः इति भावः ॥ ४० ॥

एवं तत्सेवाफलमुक्तातदुपास्तिं विधत्ते। तमेवेति। फलस्यानुभवसिद्धत्वादन्ययोगव्यवच्छेदार्थ एवशब्दः भजतैवेत्ययोगव्यवच्छेदार्थं वा आत्मनि हरावेव वृत्तिर्वर्तनं येषां ते तथा तैः अयमेव मन आदीनां गुणः यद्विष्णुविषयत्वेन चरणम् । स्वकर्मभिः स्वस्वविहिताश्रमादिकर्मभिः । उक्तमेतत्सर्वमप्रयोजकं व्याजिन इत्यत उक्तममायिन इति फलपूर्वविधाने क्षिप्रप्रवृत्तिर्भवतीति भावेनोक्तं कामदुघेति वेदानुकूलमिति द्योतनाय दुघेति इदमेव दर्शयितुं भावमाह । यथेति । "अथात आनन्दस्य मीमांसा भवति" इत्यादिश्रुतौ मनुष्यात्ममारभ्य ब्रह्मपर्यन्तं योग्यमधिकारं योग्यतालक्षणस्तस्मिन्नवस्थिता निर्णीता अर्थास्सिद्धिरानन्दप्राप्तिर्यां तदर्थमित्यर्थः । अर्थः मोक्षः । "अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने" इति यादवः ॥ ३३ ॥

स्वकर्मभिरित्युक्तकर्मकरणप्रकारमाह । अस्मान्निति। "आत्मा वा इदमेक एवाग्र आसीत्" इत्यादिश्रुतिसिद्धोयोऽसौ श्रीनारायण इह जीवराशौ सता पुंसानुष्ठितैरनेकगुणाध्वरैः सम्पद्यते प्राप्यत* इत्यन्वयः ते चाधिकारभेदात् बहव इत्याशयेनाह । पृथगिति । षोडशर्त्विग्भेदभिन्नैरनेकगुणत्वं व्यनक्ति । द्रव्येति । द्रव्यस्पुरोडाशादिकल्पोक्तगुणविशिष्टं "द्रव्यं गुणानामाधार" इति यादवः गुणो विशिष्टमातापितृजन्यत्वादिक्रिया ऋत्विग्व्यापारः इन्द्राग्नय इत्याद्युक्तयो येषु ते तथा तैः अर्थेषु यजमानेषु आशायोऽन्तःकरणं येषां ते देवा अर्थाशयास्तेषां लिङ्गानि यज्ञध्रुत्वादीनीन्द्रादिनामानि च येषु ते तथा तैः यज्ञाद्याशयत्वं मुक्ताश्रयत्वं चक्रधरादिलिङ्गं नारायणादिनाम च येषु ते तथा तैः कथं प्राप्यते । विशुद्धविज्ञानघनस्वरूपतः एवं ज्ञानेन प्राप्य इत्यर्थः अनेन कर्मणा शुद्धान्तःकरणाज्जातं ज्ञानं संसारनिवर्तकमित्युक्त्या "कर्मणैव हि संसिद्धिमास्थिता जनकादय" इत्यादेर्गतिरुक्तेति ज्ञायते ॥ ३४ ॥

कर्मसाधनज्ञानेन ज्ञायत इत्युक्तं तत्र विशिष्टतया ज्ञानं मुक्तिसाधनं स्यादिति तं प्रकारं ब्रूते । प्रधानेति । प्रधानं प्रकृतिः कालः फलपाचकः आशयोऽन्तःकरणं कर्मजीवादृष्टमेतानि सङ्घातीति प्रधानकालाशयकर्मसङ्ग्रहः त्यक्तेषु सर्वेषु शरीरमेव शिष्यते यस्य सशरीरशेषो जीवस्तं प्रतिपद्य प्राप्य येनके ज्ञानशक्तिमान्नित्याविलुप्तज्ञान इत्यर्थः विभुः श्रीनारायणोऽयं क्रियाफलत्वेन कर्मफलदातृत्वेन पुण्यकर्मभिः पुरुषैर्विभाव्यते ज्ञायते इत्यन्वयः। फलमत उपपत्तेः इति सूत्राक्षरैः कर्मफलदातृत्वं सिद्धमत्र दृष्टान्तमाह । यथेति । यथानलोऽग्निस्तत्तद्दारुणां गुणा स्थौल्यादिकमादत्ते दारुस्थौल्याद्यनुसारेण स्वयं च स्थौल्यादिमान् भवतीति तद्गुणात्मको विच्युक्तगुणवत्सु दारुषु अग्निमंथनादिनाभिव्यक्तो ज्ञायते तथा प्रधानादिशब्दाभिधेयवस्त्वादिभिः परिवृतो जीवान्तर्गतो जीवपरिमाणगुणानुकारी तदनुष्ठितकर्मफलदातृत्वेन गुरुशिष्यव्याख्यानश्रवणलक्षणमथनेनाभिव्यक्तो हरिः ध्यायेत इति भावः प्रधानादीनां हर्यधीनत्वं तद्भिन्नत्वं च दर्शयितुं तद्ग्रहणं देहस्थत्वेऽपि तद्गुणासम्पृक्ताभावदर्शनाय दार्थमवनिदर्शनं किञ्चानेन देहदोषदारुणासामर्थ्यं अगन्धस्पर्शरूपावद्धिरहितत्वं सूचयितुं दावनलपदमुपात्तमिति ज्ञापयति ॥ ३५ ॥

---

* सम्पद्यत इत्यस्य सम्पन्नो भवतीत्यन्यथाप्रतीतेरदातरपोक्रमर्थ प्रदर्शयति ॥

श्रीमा...

गुणाशिष्यव्याख्यानावि... अथ गुरुः शिष्याश्च श्रीनारायणमुखीं(?)पञ्चरात्रं व्याख्यानाद्-मुखव्यापारत्वेनात एव मुख्यत्वेन सात्त्विकत्वेन च स्वत एव-व्याख्यानादौ प्रवृत्तिसम्भवाद्ब्राह्मणा एवेत्यभिप्रेत्याधुना तानाभिष्टौति। अहो वचेति। धर्मादित्यनेन हरेर्मुखजातत्वं परामृशति वर्तेति चित्तं द्रवीकरोति अहो इति सम्यगानुमुखीकरोति इष्टदेवतात्वेन गुरुत्वेन स्वविहितकर्मफलदातृत्वेन श्रीनारायण एव पूज्य इत्यतो विशेषणत्रयम् "एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः। यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा" इति वचनात् स्वधर्मयोगो भक्तियोगस्तेन यजन्ति पूजयन्ति भगवद्भक्तत्वेन स्वस्वेतः प्रीतिजनकत्वान्मामका इत्युक्तं कृष्याद्यन्यव्यापारराहित्यप्रकटनाय निरन्तरामिति एतत्सूचनाय धृतव्रता इति सत्रादिकर्मसु दीक्षितानामन्यव्यापाराभावस्तथापीति कर्मणां फलाभिव्यञ्जनाय क्षोणितले पतनदुःख-यहेतुत्वात् प्रतिष्ठाहेतुत्वाच्च क्षोणितल इति विगुणत्वे तत्प्रतिष्ठायामिति धातुः ॥ ३६ ॥

कुलवंश्यानां पश्चात् शिक्षामाह। मा जात्विति। राजकुले विद्यमानाभिर्महर्द्धिभिः समुत्थितं तेजः प्रभावलक्षणमजितः श्रीनारायणो देवता येषां ते तथा तेषां तितिक्षादिना वेर्द्धिष्यमाणे द्विजानां कुले जातु कदाचिदपि मा प्रभवेत् कुलक्षये समर्थं न भवेत् ॥ ३७ ॥

न केवलं ब्रह्मकुलं नाभिभवनीयं किन्तु तत्र भक्तिरपि कर्तव्येत्यत्र कैमुत्यन्यायमाह। ब्रह्मण्यदेव इति। "अर्कमर्कटमण्डूकविष्णुवासववायवः। तुरङ्गसिंहशीतांशुयमाश्च हरयो दश" इति निगदाद्धरिरिन्द्रो यस्य श्रीनारायणस्य चरणाभिवन्दनादनपायिनीं लक्ष्मीमवाप जगत्पवित्रं यशश्चावाप सोऽपि पुरातनः पुरुषो ब्रह्मण्यदेवो ब्राह्मणप्रियश्च। देवः क्रीडाविदुषकश्चेत्यन्वयः ब्राह्मणप्रियत्वं क्रीडामात्रमिति दर्शयितुं देव इति पदम् अत एव महत्तमाग्रणीरित्युक्तं महतामिन्द्रादीनां सकाशादुत्तमा ब्रह्मादयस्तेषामप्यग्रणीः श्रेष्ठस्तस्मात् क्रीडामात्रमिदम् अत एवानुपपत्त्या हरिशब्देनेन्द्र एव गृहीतः "यत्प्रसादेन देवेन्द्रो येर्देभ्(?)तयश्चाभवत्। सोऽपि विष्णुरमेयात्मा सदा ब्राह्मणवत्सल" इति स्मृतेश्च प्रतीतार्थपरित्यागो युक्तः अजितदेवतानामित्युक्तविरोधाच्च ॥ ३८ ॥

अस्तु विष्णुर्द्विजप्रियस्ततः प्रकृते किमित्याशङ्क्य विष्णुभक्तिमवमृश्य ब्राह्मणसेवाकार्येत्याह। यत्सेवयेति। अपवर्गावाप्तौ श्रीलक्ष्मीकान्तप्रसाद एवापेक्षणीयोऽन्तः स्थितिदेवप्रीत्या किमित्यता वा यत्संवयेति भगवत्प्रसादोत्पत्तौ विप्रसेवाद्वारमित्यर्थः स्वराट् स्वतन्त्रः यतो विष्णुप्रसादो भवति तस्माद्ब्राह्मणकुलं निषेव्यतामित्युपसंहरति। तदेवेति। तद्धर्मपरैर्विष्णुधर्मपरैः ॥ ३९ ॥

ब्राह्मणसेवाप्रसन्नश्रीनारायणप्रसादान्मौक्तिकपरमानन्दोऽपि भवतीत्याह। पुमानिति। यस्य हरेर्नित्यसम्बन्धो येषां ते यदस्य-... तेषां निषेवया सेवासम्बन्धरूपतः पुमानितिवेत्तं प्रसादतोऽत्यन्तशमं भगवन्निष्ठाजन्यमुक्तिमोक्ष (१) सुखात्परमन्यत्सुखं हविर्भुजाम्स्त्येव हविर्भुजो देवताः। किं विशिष्ट

...नन्तात्पर्यप्रकाशितम्।

स्मनो मनमः प्रसादतो...

ततः श्रीनारायणनिष्ठायाः स्वतोऽधिकमिमं स्वयं स्वरूपसुखं करोति इत्युत्तरत्रापि सम्बध्यतां शेषं पूर्ववत् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पृथगपि यथाधिकारं भजतेत्याह। तमेवेति। स्वकर्मभिश्च ॥ ३३ ॥

अगुणः प्राकृतगुणरहितोऽपि ॥ ३४ ॥

चेतनां जीवस्य बुद्धिं प्रतिपद्य नियन्तृरूपेण प्रकाशकत्वेन चानिश्य तमाद्यात्क्रियापक्षरूपतया स्वयमेव बहिरपि स्वाभर्शीक्रियाफलत्वेन विभाव्यते प्रकाशते कर्मकर्तरि प्रयोगः ॥ ३५ ॥ ३६ ॥

माजात्वित्यस्य टीकायतात्त्विकार्थं ब्राह्मणभक्तिमिति वेषधरमात्रस्यापि ब्राह्मणान्तःपातोऽङ्गीकृतः पद्यार्थं द्वयोरपि व्याख्यास्यामानत्वात् ॥ ३७ ॥

ब्रह्मण्येति स्तुतिमात्रमिदमिति टीकाभिप्रायः। तथाप्यत्र ज्ञातभगवन्महिमस्वाभावस्तुतिरनुचितेति। तत्राविप्रो हविदेव स्वयं लोकसंग्रहार्थास्तीतिरियेवं समाधेयम्। यद्वा। यच्चरणाभिवन्दनमनन्तगुणगणयुणादनपायिनीं लक्ष्मीं सर्वाश्रयणीयतारूपां भक्तिसम्पत्तिमवाप सर्वेषां लोकानामाश्रयणीयो बभूवेति तादृशदेवभूगुपदीक्षार्थायत्यर्थः। अतो पशास्त्रेति ॥ ३८ ॥

विनीतैरित्यत्र हितं भवेति कश्चित् ॥ ३९ ॥

ततः परामिति तु परया यांजनीयम् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

ननु गार्हस्थ्यकर्मनिमग्ना वयं कथं केवलया भक्त्या भजाम-स्तत्र कर्ममिश्रां भक्तिमुपदिशन्नाह। तमेवेति। स्वकर्मभिर्वर्णाश्रमविहितकर्मभिरेव या आत्मवृत्तयस्ताभिः सहिता अपि गत आदीनां गुणैः स्मरणकीर्त्तनप्रणत्यादिभिर्भजत। यद्वा। गत आदीनां गुणैर्विद्यादिगानादिभारवहनादिभिः स्वकर्मभिर्या आत्मवृत्तयो जीविकास्ताभिरेव भजत। स्वजीविका अपि ता भगवदर्थे या किञ्चिन्मात्रयोऽपि नित्यं यदि विनियुक्ताः स्युस्तर्हि हरिभक्तिरेव भवन्तीत्यर्थः। यथाधिकारं ब्राह्मणादिवर्णाश्रमधर्ममननिमित्तकैवासिता निश्चिता अर्थसिद्धिर्यैस्ते। यद्वा। यथेति येषां येषां येषु शिल्पेष्वधिकार औत्पत्तिकस्तैरेव भगवदर्थे कृतैस्ते तैलिकताम्बूलिकपर्यन्ता अपि कृतार्था भवन्तीत्यर्थः। आत्मनः स्वस्यैव वृत्तिः सत्ता येषु तैः स्वकर्मनिर्वर्णाश्रमधर्मैरपि सहिताः सन्तो भजतेति भक्तेः प्राधान्यमभिहितम् ॥ ३३ ॥

कर्मस्वरूपतोऽशुद्धं अतं राजसमपि भगवदर्पितं सत्त्वप्रधानगुणीभूतसत्त्वांशेन विशुद्धसत्त्वं चैतन्यमेव फलतो भवतीति अकिमिश्रं कर्मोपदिशति द्वाभ्याम्। असाविति। तज्जन्या... दर्शयति असावक्षरोऽनेकगुणो नानाविशेषवान्...ऽपि भगवदर्पणरूपभक्तिमाहात्म्यात्तत्फलदशायामगुणो निर्गुणीतो भवन् स्वरूपतो विशुद्धविज्ञानघनः ब्रह्मानन्दरूपत्वेन सम्य-

[illegible] सर्वतोऽपि [illegible] विशुद्धविज्ञान-
घनोऽपि अणुकोऽपि अस्मिन् कर्ममार्गेऽनेकगुणोऽध्वरो यज्ञः सम्प-
द्यते । अनेक गुणत्वमाह । पृथग्विधानि यानि द्रव्यादीनि तैः
तत्र द्रव्याणि व्रीह्यादीनि गुणाः शुक्लादयः । क्रिया अवघाता-
दयः उक्तयो मन्त्राः । अर्थोऽङ्गसाध्य उपकार आशयः सङ्कल्पः
लिङ्गं पदार्थानां शक्तिः नाम ज्योतिष्टोमादि तैश्च ॥ ३४ ॥

भगवदर्पितस्य कर्मणस्तस्मिन्नभक्तेश्च फलं भगवत्प्राप्ति-
रेवेत्याह । प्रधानमव्यक्तं कालः क्षोभकः आशयो वासना धर्मोऽ
दृष्टमेतैः संयुज्यते जन्यत इति तथा तस्मिन् शरीरे चेतनां
स्वार्पितकर्मकरणे बुद्धिं प्रतिपद्य अन्तर्भावितणयर्थत्वात्
निष्पाद्येत्यर्थः कृपया कर्म्मफलत्वेन विभुः स्वयमेव भगवान् विभा-
व्यते प्रकाश्यते कर्म्मकर्त्तरि प्रयोगः । "यदत्र क्रियते कर्म भग-
वत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम्" इति
वचनात्तदर्पितकर्मा भक्तिमिश्रज्ञानद्वारा तमेव प्राप्नोतीत्यर्थः ।
किञ्च । कर्म्मार्पणभक्ताभक्तितारतम्येन ज्ञानतारतम्येन च भग-
वत्प्राप्तितारतम्यं भवेदित्याह । यथा चन्दनागुरुचन्दनखदिरा-
दिस्थितोऽग्निस्तत्तद्गुणानुरूपां भवत्येव भगवानप्युपासकस्यो-
पासनातारतम्येन फलप्रदो भवेत् भक्तिमिश्रकर्मिणो निष्कामाय
मोक्षं कर्मिमिश्रभक्तिमते शान्तरतिश्चैव भक्तितारतम्यवते साक्षो-
क्यादिकञ्च ददातीति भक्तेर्गुणभावप्राधान्यादिकं दर्शितम् ॥ ३५ ॥

भो महाराजाधिराज प्रभो ! भवदुपदेशेन वयं कृतार्थी कृ-
तास्तदद्य नित्यं भगवन्तं भजाम इत्यानन्दजल्पिनो जनान् व-
श्यीकृत्याह । अहो इति ॥ ३६ ॥

इदानीं भक्तेः सुस्थिरत्वार्थं वैष्णवब्राह्मणानां निषिद्धमति
मा जानन्निति । महद्भिरिभिर्महासम्पत्तिभिर्हेतुभिर्यद्राजकुलात् राजकु-
लस्य तेजस्तत् जातु कदाचिदपि मा प्रभुवेत् प्रभावं मा करोतु
कुत्र अजितदेवतानां वैष्णवानां कुले द्विजानां कुले च कीद-
शे महद्भिरिभिर्नापि तितिक्षादिभिः स्वयमेव देदीप्यमाने ॥ ३७ ॥

अकिञ्चनानाञ्च ब्राह्मणभक्तिं विधत्ते सप्तभिः । यच्चरणेत्या-
दिकं लोकसंग्रहार्थकभगवद्वचनानुवादमात्रं ज्ञेयम् ॥ ३८ ॥

तदेव तस्मादेव हेतोः ॥ ३९ ॥

ननु ब्रह्मकुल एव नित्यं सेव्यमाने सर्वदेवतामुखभूतेऽग्नौ
यज्ञाद्यनुष्ठानं न स्यात् न च तेन विना चित्तशुद्धिर्न च तया
विना मोक्षः स्यादित्याशङ्क्याह । पुमानिति द्वाभ्याम् । यस्य ब्राह्मण-
कुलस्य नित्यसम्बन्धेन निषेवया आत्मनो मनसः प्रसादतः कषाय-
प्रसन्नीभवतः अत्यन्तशमं मोक्षं स्वयं लभेत अनतिवेलं शीघ्रमेव
अतएव ततः परं किं हविर्भुजां देवानां मुखमस्ति ब्राह्मणसेवयैव
यज्ञादिफलं ज्ञानफलं च सर्व्वमेव सिद्ध्यतीत्यर्थः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतः यथाधिकारमवस्थिताः निश्चिताः अर्थानां चतुर्विधपुरुषा-
र्थानां सिद्धिर्यैस्ते हरिभजनेन सर्वपुरुषार्थसिद्धिरिति कृतविश्वा-
सा इत्यर्थः अमायिनो निष्कपटाः यूयम् स्वकर्मभिः स्वोचितैर्य-
ज्ञादिकर्मभिः मनोवचः कायगुणैः ध्यानगुणगानपरिचर्याभिः
आत्मीय वृत्तिर्निर्वाहहेतुर्यैर्वा तैः सर्वैरपि तमेव भजतेत्य-
न्वयः ॥ ३३ ॥

[illegible] उक्तं तत्र "[illegible] ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा
हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना" इति श्रीमुखोक्तानुसा-
रेण सर्वत्र तत्फलभोक्तरि तत्फलेन भगवद्बुद्धिः कर्तव्येत्यत्र ।
असाविति द्वाभ्याम् । असौ हरिरेवाध्वरः साङ्गस्य यज्ञस्य तदा
यत्तत्स्थितिप्रवृत्त्यादिमत्त्वेन तदभिन्नत्वात् यज्ञो वै विष्णुस्तदेवाग्निस्तद-
द्वायुस्तत्सूर्यस्तदु चन्द्रमा इत्यादिश्रुतेः कथंभूतोऽध्वरः पृथग्विधैर्द्र-
व्यादिभिः अर्थाशयलिङ्गनामभिश्च इह कर्मकाण्डे संपद्यते सम्यक्
ज्ञायते गत्यर्थानां ज्ञानार्थत्वात् तत्र द्रव्याणि व्रीह्यादीनि गुणाः
शुक्लादयः क्रिया अवहननादयः उक्तयो मन्त्राः अर्थोऽङ्गसाध्य
उपकारः आशयः संकल्पः लिङ्गं पदार्थशक्तिः नामज्योतिष्टो-
मादि कथंभूतः असौ विशुद्धविज्ञानघनः स्वरूपतः व्रीह्यादि-
वत् जडत्वपरिच्छिन्नत्वादिधर्मको न भवति यतोऽगुणो हेयगुण-
रहितः अनेकगुणः अनेकमङ्गलगुणगणार्णवः ॥ ३४ ॥

एषः विभुर्विष्णुः प्रधानं प्रकृतिः कालः क्षोभकः आशयो वासना
धर्मः कर्मैतः संयुज्यते जन्यते इति तथा तस्मिन् चेतनां प्रतिपद्य
तत्त्वमसि श्वेतकेतो आपि मां विद्धीति श्रुतिस्मृतिभ्याम् अंशांशिनोरभेद-
विवक्षया स्वात्मजीवरूपेण "अन्तः प्रविष्टः शास्ता जनानाम्" इत्यन्त-
र्यामिरूपेण च बाह्याभ्यन्तरेन्द्रियजन्यं बोधं क्रियाफलत्वेन
स्वर्गादिरूपेण विभाव्यते निश्चीयते भोग्यरूपत्वेऽपि तदसाधारणेन
रूपेण सर्वदोषास्पृष्टत्वं भगवतो दृष्टान्तेनाह । दारुषु अनलो
यथा तद्गुणात्मकः दाहकत्वादीनामनलगुणानामेवात्माश्रयः ।
तद्गुणात्मैव तद्गुणात्मकः । न तु दाहकत्वादीनां दारुगुणानामाश्रय
इत्यर्थः ॥ ३५ ॥

भगवदाराधने देशादिसंगदोषतोऽप्रवृत्तान् [illegible]
वृत्तानभिनन्दति । अहो इति । योगितले ये हरिं [illegible]
देशादं यजन्ति ते अहो मम अनुग्रहं वितरन्ति [illegible]
मामकाः ममातिप्रियाः ॥ ३६ ॥

विप्राणां गवां जनार्दनस्य तद्भक्तानां च [illegible] ।
माजाविश्यब्भिः महद्भिरिभिः राजकुलात् [illegible] कदाचि-
दपि अजितदेवतानां विष्णुभक्तानां द्विजानां च [illegible] मा प्रभ-
वेत् कथंभूते राजमहद्भिरनपेक्षवेरीः तितिक्षादिभिर्दीप्य-
माने ॥ ३७ ॥

लोकसंग्रहार्थं भगवानपि विप्रान् सत्करोतीत्याह [illegible]
देव इति ॥ ३८ ॥

ब्रह्मकुलसेवया भगवान् तुष्यतीत्याह । त [illegible]
यत्सेवयेति लोकसंग्रहरूपेण धर्मस्तत्परैः ॥ ३९ ॥

ब्रह्मकुलसेवया शीघ्रमन्तःकरणशुद्धिर्जायते [illegible]
श्रेष्ठं हविर्भुजां मुखं नास्तीत्याह । पुमानिति । यस्य [illegible]
नित्यसम्बन्धेन निषेवया पुमान् जनः अनतिवेलं [illegible]
प्रसीदतः आत्मनोऽन्तःकरणस्यात्यन्तशमं स्वयमेव लभेत ततः
परं श्रेष्ठं हविर्भुजां देवानां मुखम् अत्र कर्मभूमौ किमस्ति ना-
स्तीत्यर्थः तद्ब्रह्मकुलं निषेव्यतामिति पूर्वेणान्वयः ॥ ४० ॥

भाषाटीका ।

उन भगवान् को आप लोग भजो अपनी वृत्तियों से उन का
आराधन करो मन कर्म वचन से अपने कर्म [illegible] अर्पण कर
निष्कपट हो कर भजो उन के चरण कमल कामधेनु हैं तुम्हारे
अधिकार के अनुरूप सब सिद्धि प्राप्त हो जाय गी ॥ ३३ ॥

यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपो मङ्गलमौनसंयमैः ।
समाधिना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभासते ॥ ४२ ॥
तेषामहं पादसरोजरेणुमार्या ! वहे या (२) धिकिरीटमा (३) युः ।
यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजन्ति ॥ ४३ ॥
गुणायनं शीलधनं कृतज्ञं वृद्धाश्रयं संवृणते नु सम्पदः ।
प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यम् ॥ ४४ ॥

॥ मैत्रेय उवाच ॥

इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः ।
तुष्टुवुर्हृष्टमनसः साधुवादेन सात्वतः ॥ ४५ ॥
पुत्रेण जयते लोकानिति सत्यवती श्रुतिः ।
ब्रह्मदण्डहतः पापो यद्वेनोऽत्यतरत्तमः ॥ ४६ ॥
हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ।
विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः ॥ ४७ ॥
वीरवर्य ! पितः ! पृथ्व्याः समाः संजीव शाश्वतीः ।
यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्त्तरि ॥ ४८ ॥

भाषाटीका ।

वही भगवान् यद्यपि गुण रहित हैं विज्ञान घन स्वरूप हैं [illegible]पणा रहित हैं तथापि अलग अलग ब्रीहि आदिक द्रव्य [illegible]क्ल आदि गुण अवघातादिक्रिया वैदिक मंत्र अंग साध्य [illegible]र्थ संकल्प पदार्थों की शक्ति ज्योतिष्टोमादिनाम इन सब [illegible]कारोंसे अनेक गुण वाले होकर इस कर्म मार्ग में यज्ञ [illegible]पसे प्रसिद्ध हैं ॥ ३४ ॥

वही विभु भगवान् परमानंद स्वरूप होकरभी प्रकृति [illegible] वासना धर्म इन से घना हुआ जो शरीर तिसमें [illegible]षयाकार बुद्धि स्वरूप का प्राप्त होने से क्रिया फल रूप [illegible] जाते हैं जैसे अग्नि काष्ठमें काष्ठके ही आकार से भान [illegible]ता है तैसे ॥ ३५ ॥

जो हमारे प्रजा पृथिवी में दृढ व्रत धारण करके जगत् [illegible] यज्ञ भोक्ता देवतों के ईश्वर श्रीहरि को अपने वर्णा[illegible] धर्म योग से आराधन करते हैं अहो वे प्रजा लोग. मेरे [illegible] करते हैं ॥ ३६ ॥

[illegible] के होने से राजकुल से पैदा हुआ जो [illegible] करके स्वयं दीप्तिमान ब्राह्मण वैष्णवों [illegible] को मत प्रगट करे ॥ ३७ ॥

[illegible] पुरुष हरि भगवान् ने भी अति

[illegible] जिन ब्राह्मणों की सेवा करने से अचला लक्ष्मी तथा जगत्को पवित्र करने वाला यश को प्राप्त किया महापुरुषों में अग्रगण्य हो गये ॥ ३८ ॥

जिस ब्रह्मकुल के सेवा करने से सर्वांतर्यामी स्वयं प्रका[illegible] ब्राह्मण प्रिय परमेश्वर अति संतुष्ट होते हैं उसी ब्राह्म[illegible] कुल को भगवद्धर्म तत्पर होकर सब प्रकार से [illegible] होकर आप लोग सेवन करो ॥ ३९ ॥

जिस ब्राह्मण कुल के निष्कपट सेवा करने से चित्त निर्मल हो जाता है तब शीघ्र ही और उपाय के बिना [illegible] पुरुष मोक्ष को प्राप्त हो जावे उस ब्राह्मण कुलके मुख को छोडकर और अग्नि आदिक कौन देवतों का मुख हो सकता है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हरेरपि तदेव परं मुखमित्याह । अश्नातीति । इज्यानां पूज्याना-मिन्द्रादीनां नामभिर्यस्य मुखे श्रद्धया हुतं हविरनन्तो यथाश्नाति तथा चेतनया रहिते हुताशने हुतं नाश्नाति [illegible] [illegible]कोविदैः सर्वदेवमयश्चैतन्यमूर्तिरनन्त इतितत्त्वं [illegible] एवं भूतोऽसौ तत्राह । पारमहंस्यं [illegible] तत्परानहंस्या[illegible] पारमहंस्यपर्यान्ता गावो वाचो यस्मिन् उपनिषत्[illegible]

[illegible]युः इतिश्रीविजयध्वजतीर्थः । (२) वहेवेति प्रार्थनायां लिङ् । (३) आयुरिति छेदः आयुः पर्यन्तं ।

[illegible] पारमहंस्य परि[illegible]
[illegible] यामियन्ता सन्यासी
स च पारमहंस्यपर्यगुर्बानरूपः सर्वान्तर्यामीत्यर्थः ॥ ४१ ॥

न केवलं चेतनत्वेन हुताशनाद्विशेषः किन्तु वेदज्ञानादपीत्याह । यदित्यव्ययम् । ये ब्रह्मवेदं नित्यं बिभ्रति तेषामित्युत्तरेणान्वयः मङ्गलं नाम " प्रशस्ताचरणं नित्यमप्रशस्तस्य वर्जनम् एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः " मौनमध्ययनविरोधिवार्तात्यागः समाधिना चित्तस्थैर्येण । अर्थहृदये वेदार्थमपि विचारयन्तीत्यर्थः । यत्र वेदे इदं विश्वमवभासते यथादर्शे मुखम् ॥ ४२ ॥

हे आर्यो ! आआयुर्यावज्जीवमधिकिरीटं मुकुटस्योपरि वहेयेति प्रार्थनायां लिङ् यं रेणुम् ॥ ४३ ॥

गुणभजनस्य फलमाह । गुणायनमन्वनुसम्पदः संवृणते सम्यग्भजन्ति तस्मात्प्रसीदतां प्रसीदतु गवाञ्च कुलम् ॥४४॥४५॥

साधुवादमाह पुत्रेणेतिषड्भिः यथतो वेनोऽपि तमो नरकमत्यतितदाह ॥ ४६—४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु "अग्निमुखा वै देवा" इति देवानामग्निमुखत्वश्रवणात् अग्नौ हुतमेव हविर्भुगन्तरात्मभूतपरमात्मप्रीतये भविष्यति तत्राह । अश्नातीति । सत्यमग्निरपि तन्मुखमिति तथापि तत्त्वकोविदैर्ब्राह्मणानां भगवत्प्रियतमशरीरत्वं जानद्भिः "न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम्" इति भगवद्वचनात् इज्यनामभिः आराध्येन्द्रादिनामभिः यस्य ब्राह्मणस्य मुखे श्रद्धया हुतं हविरनन्तो भगवान् यथा अश्नाति तथा चेतनया रहिते हुताशने अग्नौ हुतं नाश्नाति कुत एवं भूतोऽसौ तत्राह । पारमहंस्यपर्यगुः परमहंसा भगवदुपासकाः तेषां भावः कर्म वा पारमहंस्यं ज्ञाननिष्ठेति यावत् यद्वा चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् परमहंसा एव पारमहंस्याः तान् परित्यज्य न गच्छति तैः परितो नीयत इति वा अगुः गाङ्गतानिवासमाचपूर्वात् गेशब्दस्यस्मात् वा कुर्भ्रश्चेत्यौणादिकसूत्रे [illegible]निर्देशात् आत्वन्तरादपि कुप्रत्ययस्याभ्युगमात्कुप्रत्यये "अतसोपदाटिच" इत्यालोपः न च तत्रापि सन्वद्भावस्यापिविधावाद् द्वित्वापत्तिः बहुवग्रहणात्तदभावात् यद्वा मुगय्वादेराकृतिगणत्वात्कुप्रत्ययः "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । ज्ञानीत्वात्मैव मे मतम्" इति भगवद्गीतोक्तरीत्या निरतिशयप्रीतिविषयात् परमहंसात् अत्यादरेणाश्रयमाणस्तत्रैव नित्यम् सन्निहित इति तत्साक्षात्तन्मुखे न्यस्तमिव भुङ्क्ते इति भावः ४१

न केवलं चेतनत्वेन हुताशनाद्विशेषः किन्तु वेदतदर्थज्ञानानुष्ठानादिनापीत्याह । यदिति । यद्ब्रह्मकुलं विरजं रागाद्युपेतं भ्रमप्रमादादिपुरुषदोषविनिर्मुक्तं च सनातनमनादिब्रह्मपरं ब्रह्म तत्स्वरूपप्रकाशकं वेदं च श्रद्धा उपासनायामध्ययनाध्यापनजपपारायणादिषु त्वरा उपासनोपयुक्तस्नानकर्मयोगे ऽध्ययनानुपयुक्तकालक्षमतादिभ्य कर्मयोगस्य कृच्छ्रादिरूपावशनादिगर्भेत्यागः सन्देमाभिवाने गुप्तं मङ्गलं विशुद्धाचारः मौनं वाङ्नियमः आरम्भणसंकोचनं च संयमः आलोचयुक्तशमदमादिः अध्ययनानुपयुक्तकरणनियमञ्च समाधिना ध्यानेन धारण-

[illegible] अनेकानि [illegible] उपासनाश्र-
[illegible] अस्मिंल्लोके विप्र-
[illegible] माचयकुलं गुणमयं बिभ्रति । यत् ब्रह्मणि परस्मिन् वेदे च इदं विश्वं पद्मात्मकरूपादिकं च आदर्श इवावभासते प्रकाशते ॥ ४२ ॥

तेषां ब्राह्मणानां पादसरोजरेणुं हे आर्याः ! आयुः आआयुः इत्याङ्प्रश्लेषोऽत्र बोध्यः यावज्जीवमित्यर्थः अधिकिरीटं मुकुटोपरि वहेयेति प्रार्थनायां लिङ् किन्तद्वहनसाध्यं तत्राह । यं ब्राह्मणपादसरोजरेणुं नित्यदा बिभ्रतः वहतः पुरुषस्य पापमाशु नश्यति अमुं वहन्तं सर्वगुणाः कल्याणगुणाः भजन्ति आश्रयन्ते ॥ ४३ ॥

तं च गुणालयं शुभगुणाश्रयं शीलमेव धनं यस्य तं कृतमुपकारं जानातीति कृतज्ञं वृद्धान् ज्ञानाधिकान् आश्रयते इति तं सर्वाः सम्पदः वृणुते वृणीते लट् आत्मनेपदं छान्दसम् इति ह्रस्वादादेशः आद्यस्तयोरात इत्यालोपः सम्यक् भजन्ते उपसंहरन्ति ब्रह्मकुलं द्विजकुलं गवां च कुलं सानुचरः सभक्तः भगवांश्च मह्यं प्रसीदताम् ॥ ४४ ॥

एवं वदन्तं नृपतिं पृथुं पित्रादयः साधवः गुणाज्ञास्तुष्टमनसः साधुवादेन साधुसाध्विति वादेन तुष्टुवुः स्तुतवन्तः ॥ ४५ ॥

स्तुतिमेवाह । पुत्रेण लोकान् पुण्यलोकान् पिता जयति साधयतीति श्रुतिः जनश्रुतिः सत्यवती अबाधिता पुत्रेणेति पुत्रशब्दावयवार्थविषयभूतेनेत्यर्थः पुंसंज्ञकान्नरकात्त्रायते इति हि पुत्रशब्दं निदर्शयन्ति यत् यस्माद्वेनोऽपि तमः नरकमतरत् ॥ ४६ ॥

तथा हिरण्यकशिपुरपि भगवन्निन्दया तमो विविक्षुः प्रवेशमाशङ्कितः "मा सा सार्या सन् वक्तव्य" इति संजन्तात् समासंशभिश्रुतः इत्युः सुनोः प्रह्लादस्यानुभावतः प्रभावात् तमः नरकं अत्यगात् अतिक्रम्य भगवन्तमगादित्यर्थः ॥ ४७ ॥

तस्मात्त्वं वीरश्रेष्ठ ! पृथ्व्याः पितस्त्वं शाश्वतीः समाः सम्वत्सरान् सञ्जीव काबाध्वनोरत्यन्तसंयोग इति द्वितीया यस्य तव सर्वलोकानामेकस्मिन्नद्वितीये भर्तर्यच्युते ईदृशी भक्तिः रस्ति ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि ब्रह्मकुलसेवा कर्तव्येत्याह । अश्नातीति । भगवत्तत्त्वकोविदैः पुरुषैरिज्यस्य हरेर्नामभिर्यन्मुखे श्रद्धया हुतमनन्तो यथाश्नाति तथा चेतनया बहिष्कृते जडे हुताशने हुतं नाश्नातीत्यन्वयः अनन्त इत्यनेन न केवलमात्रं फलं किन्तु अनन्तमेवेति ध्वनयति अनुनयार्थः खलुशब्दः वा इत्यनेन नाहं तथाश्नामीति प्रसिद्धिं स्मारयति ब्राह्मणास्वपि यतिमुखाशनेन हरेर्विशेषतस्तृप्तिरित्यभिप्रेत्याह । पारमहंस्येति । पारमहंस्यैः (२) परमहंसाश्रमस्थैर्वर्या वरणीया गावो यस्य स पारमहंस्यवर्यगुः । तत्र तद्वचनाभिप्रायं विद्वत्वा अनुगानुष्ठातार इत्यर्थः यद्वा परमहंसविषया वर्या मतो वरा गावो यस्य तथा यतीनामधिकं स्तौतीति तेषामेव तत्त्वज्ञाना[illegible]दित्यर्थः चित्रगुशब्दवदयं शब्दः ॥ ४१ ॥

नन्वग्नेत आधिक्य चेतनावत्त्वं प्रयोजकं [illegible]
पात्रत्वं स्यादित्याशङ्क्य ब्रह्मकुलस्य वैशिष्ट्य[illegible]
यावद्ब्रह्माधिष्ठितं तावती वागिति श्रुतिर्वेद[illegible]

---

(२) पारमहंस्यवर्यगुरित्यस्य तात्पर्य[illegible]

श्री[illegible]

मात्त्वात् प्रथमत्वे[illegible]
विशिष्टब्रह्मवेदं हरेस्त[illegible]
भाति । भ्रष्टेति "आचारहीनं न पुनन्ति वेदा" इति वचनं भ्रष्टं पुण्यं संयमो दमः समाधिरेकाग्रता । किमर्थमित्यत उक्तमर्थसिद्धय इति । पुरुषार्थोपयोगीन्द्रियज्ञानप्रयासोऽपि न कार्यं इत्याह । यत्रेति । यत्र ब्रह्मणि श्रीनारायणे इदं जगदादर्शे दर्पण इवावभासते वेदे चेदं पुरुषार्थचतुष्टयं ज्ञायते यद्वा यत्र ब्रह्मकुले इदमुक्तं ब्रह्मद्वयं दर्पण इवावभाति ॥ ४२ ॥

एवं ब्रह्मकुलमभिष्टूयास्मत्क्रियोपदेशतस्तत्सेवा यावदायुः कर्तव्येति विधत्ते । तेषामिति । हे आर्याः ! तत्त्वज्ञानोत्पत्तौ प्रथमसाधनं पापप्रणाशः सोऽप्यनेन स्यादित्याशयेनाह । यं नित्यदेति । उत्तरफलमाहामुमिति अमुं पुरुषम् ॥ ४३ ॥

एतदेव विशिनष्टि । गुणालयमिति । सम्पदो गुणालयत्वाद्विशिष्टं पुरुषमनुसम्भूयात इत्यन्वयः सम्भृणुत इतिपाठे सम्भृणुत इति व्याख्येयं यं नित्यसम्बन्धमिषेवयेत्यादौ प्रस्तुतो जनार्दनः पारमहंस्यवर्यगुरित्यनेन ध्वनिता गावश्च ब्रह्मकुलं च प्रसीदत्वित्युपसंहरति । प्रसीदतामिति । ब्रह्मकुलसेवावद्गोकुलसेवा श्रवणादिपरिवृतश्रीजनार्दनसेवा च यथाशास्त्रविहितं मुमुक्षुणा कर्तव्येत्यतो वाह । प्रसीदतामिति ॥ ४४ ॥

इदानीं मैत्रेयः पृथुकार्यविप्रतिपत्तिः सर्वस्याभूदिति वक्ति । इतीति । साधुवादेन निर्दोषवाक्येन ॥ ४५ ॥

सूचितं स्पष्टयति । पुत्रेणेति । सोऽयं मनुष्यलोकः पुत्रेण जय्य इत्यादिकं श्रौतमपि दृष्टचरितमित्याहुरित्याह । ब्रह्मदण्डेति । शश्वत्पुत्रेण पितरोऽत्यायन्बहुलं तम इति श्रुतिरत्र प्रमाणम् । पापस्य वेनस्य तमस्तरणं सत्यश्रेत्सर्वेऽपि मुक्तिप्राप्तियोग्या इत्यायातं ननु नारकी कोऽपीति चेन्न वेनशब्दस्य तामसराजससात्त्विकभेदेनाभिधेयत्रित्वस्य प्रामाणिकत्वात् "वेनस्थो राजसो जीवः पृथुना स्वर्गति गतः । स्वयं तु तम एवाप सात्त्विकः पृथुतामगात्" इति स्मृतेः तथाच वाक्ययोजना ब्रह्मदण्डहतो विप्रशापहतः पापो दैत्यो नाम्ना वेनस्तमोऽतरादिति यत्तदिति प्रशंसामात्रं नतु सत्यं सत्यन्तु सर्वस्मादत्याधिकं दुःखोदर्कं तमोऽत्यतरदगच्छत्तॄ प्लवनतरणयोरिति धातोः प्लुगताविति च "अतिरत्याद्यधिकार्थोक्तौ प्रशंसायामति क्रम" इत्यभिधानात् यत्तामसो वेनः सर्वदुःखकरो दैत्यः सोऽत्यतरत्सुखभोगलोकमतिक्रम्यागच्छदन्धन्तम इति शेषः ब्राह्मणानां विप्राणां दण्डो राजयोग्यशिक्षा तया हतो गतः दण्डोऽस्त्री शासने राज्ञामिति यादवः हन हिंसागत्योरिति धातोः । रजोगुणपाने पातीति वा पापो राजसो 'वेनस्तमोऽत्यतरत् तमोऽतिक्रम्य स्वर्गति गतः पृथुगणेनेति शेषः । यदतरत् तर्तुमशक्यं तमोगुण इति शेषः तदतिक्रम्य वर्तमानं सत्त्वं वेत्तीति ब्रह्मांशो वेनोऽप्यभिकार्थी भक्त्यादिगुणविस्ताराभिधेयं पृथुत्वमतरदाप्नोदिति । पापान्पाति रक्षतीति पापिवाति संहरतीतिवा पापः ब्रह्म वेदस्तदुक्तो दण्डो हिंसा यस्य पशोः सब्रह्मदण्डः तं पशुं हन्तीति नाम्यमविहितमिति ब्रह्मदण्डहतः दण्डो हिंसायां लकुडे गुड इति च ॥ ४६ ॥

हिरण्यकशिपुरपि सनकादिशप्तो जयः श्रीहरिपार्षदस्तस्य

* वेदवादीरर्थप्रकीर्तनामिदं ।

[illegible]
पृथ्व्याः पितः । [illegible] मनु [illegible]
पृथावपि भक्तेः कर्तव्यत्वम् प्रतीयते अथ कथं भगवत्येव भक्तिः कर्तव्येति चेदुच्यते तत्र पृथुत्वपरमेश्वरमपेक्ष्यैवकारेणान्ययोगव्यवच्छेदः क्रियते यो ब्रह्मत्वमाविश्येत्युत्तरत्र पृथुत्वप्रतीतेः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

मुख्यत्वमित्याह । पर्यगुरिति । गाव इन्द्रियाणि ॥ यस्मात् यं परित्यज्य इतोऽर्वा पूर्वत्र न गच्छन्ति इवातन्त्र्येण न तिष्ठन्तीत्यर्थः । उत्तरत्र यमेव लब्ध्य वर्तन्त इत्यर्थः ॥ ४१ ॥

यद्ब्रह्मेति युग्मकम् । यदिति जसोलुक् छान्दसः योऽधिकिरीटमायुरिति चित्तसुखः यो रेणुः ॥ ४२ ॥ ४३ ॥

गुणाश्रयमिति । तादृशं ब्राह्मणमेकमप्याश्रितवन्तमित्यर्थः गुणायनमित्यादिकमधिकारिणो गुणाश्रयस्य विशेषणम । गुणा अत्र शान्त्यादयः सम्पदो विद्यादयश्च त एव गुणशब्देन पूर्वोक्ताः । अत्र ब्राह्मणानामेव सर्वोपदेष्टृत्वात् प्रसादत्वेन श्रेष्ठ्यमभिप्रेतमिति। प्रसीदतां ब्रह्मकुलमित्यन्तमुक्तैव गवामित्युक्तिः॥४४॥ ॥ ४५ ॥

पुत्रेणेति। सत्पुत्रेणेत्यर्थः। तमः श्रीपृथुजन्मनः पूर्वं कतिचिद्दिनानि प्राप्तं नरकम् । अनुभावतः श्रीनृसिंहादिप्रादुर्भावकारणात् भक्तिलक्षणात् प्रभावादित्यर्थः । श्रीवाराहाद्यवतारे कारणान्तरमप्यस्ति । अत्र तु स एव कारणमिति भावः ॥ ४६ ॥ ४७ ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हरेरपि तदेव परं मुखमित्याह । अश्नातीति । अन्वया हुतं दत्तम् इज्यानां नामभिरिति यथा इन्द्राय स्वाहा आदित्याय स्वाहेति इज्यानामिन्द्रादीनां नाम्ना वह्नावाहुतिर्दीयते तथैव तेषां नाम्ना यदि ब्राह्मणमुखे पक्वान्नानि समर्पयति तदा अनन्त एवाश्नाति तस्मिंश्च भुक्तवति तेषां शाश्वती तृप्तिः प्रीतिश्च स्यादित्यर्थः। चेतनया बहिष्कृते रहिते पारमहंस्यवर्त्मनि भक्तांश्चाहंन्तीति पारमहंस्यपर्या गावो वेदवाचोऽङ्घ्रिरेणवश्च यस्य सः ॥ ४१ ॥

चेतनत्वेनैव हुताशनाद्विप्राणां श्रैष्ठ्यं न किन्तु वेदज्ञानादिनेत्याह । यद्यस्माद्ब्रह्म वेदं श्रद्धादिभिर्बिभ्रति मङ्गलं नाम "प्रशस्ताचरणं नित्यमप्रशस्तस्य वर्जनम् । एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः । मौनमध्ययनविरोधिवार्तात्यागः समाधिना चित्तस्थैर्येण किमर्थमर्थानां वस्तुमात्राणां दृष्टये ज्ञानाय । कथमेवमत आह । यत्र वेदे इदं जगत् सर्वमेव अर्थमासते ज्ञानविषयीभवति आदर्शे दर्पणे इव ॥ ४२ ॥

हे आर्याः ! आ आयुर्यावज्जीवं अधिकिरीटं वहेय आर्षिनायां लिङ् यं रेणुम अमुं बिभ्रतं पुमांसम ॥ ४३ ॥

गुणभजनस्य फलमाह । गुणायनमिति । सम्यक् स्वयमेव वृणुते पतिम्वरा इवेत्यर्थः । तस्मात् प्रसीदतां प्रसीदतु ॥ ४४॥४५॥

तमो नरकम । हे पृथ्व्याः पितः ! ॥४६—४८॥

...र्भिर्यतेः ! त्वयैव नाथेन मुकुन्दनाथाः ।
...र्विप्रो ... कथां (१) श्यमाके ॥ ४९ ॥
नात्यद्भुतमिदं नाथ ! तवाजीव्यानुशासनम् ।
प्रजानुरागो महतां प्रकृतिः करुणात्मनाम् ॥ ५० ॥
अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो ! ।
भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ॥ ५१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवानपि ब्रह्मकुलमुखे यथा अश्नाति तथा हुताशने नाश्नातीत्याह। अश्नातीति। अनन्तः अपरिमितस्वरूपगुणः पारमहंस्यपर्यगुः पारमहंस्यं ज्ञानं तत्पराणाधिकुर्वन्तीति पारमहंस्यपर्याः गावो वेदान्तवाचो यस्मिन्निति वेदान्तैकवेद्यो भगवान् तत्त्वकोविदैः श्रद्धया यन्मुखे हुतं यथा हुताशने इज्यमानमभिहुतं नाश्नाति तद्ब्रह्मकुलं नित्यमिति पूर्वेणान्वयः ॥ ४१ ॥

धत्ते इत्यन्वयं ये ब्राह्मणाः नित्यमनादिसिद्धं ब्रह्म वेदं विरजं शुद्धं ... परं ब्रह्म च बिभ्रति तेषामित्युत्तरेणान्वयः यत्र शब्दब्रह्मणि विषयतया परब्रह्मणि कार्यतया इदं विश्वमादर्शतले इवावभासते यथावद्दृश्यते कर्म्म प्रयोजनाय बिभ्रति अर्थदृश्ये शब्दब्रह्म तदर्थज्ञानाय परं ब्रह्म तत्कार्यज्ञानाय "यद्विज्ञाने सर्वं विज्ञातं भवति,, इति श्रुतः यद्वाऽर्थस्य याजनस्य दृश्ये ज्ञानाय पुरुषार्थस्यानुद्धयलाभायेति फलितार्थः कैरुपायैः श्रद्धादिभिः तत्र मङ्गलं गुरुचरणप्रणामादि मौनमयुक्तभाषणत्यागः समाधिश्चित्तैकाग्र्यम् ॥ ४२ ॥

हेश्रार्याः ! तेषामुभयब्रह्मविदां पादसरोजरेणुम् अधिकिरीटं किरीटोपरि आआयुर्वयश्चान्तं वहेयेति प्रार्थनायां लिङ् यत्पद्मरेणुं बिभ्रतः पापमाशु नश्यति अमुं बिभ्रतम् सर्वदा सर्वगुणाः भजन्ति आश्रयन्ति ॥ ४३ ॥

तेषां गुणानामेकदेशं गुणाभजनस्य फलं च दर्शयति। शीलधनमित्येको गुणः कृतज्ञमिति द्वितीयः वृद्धाश्रयमिति ज्ञानभक्त्यादिगुणगणमूलभूतः श्रद्धाश्रयत्वलक्षणो महागुणो दर्शितः एवमादिगुणाश्रयम् अनु अनुलक्ष्य संवृणुते सम्यगाश्रयन्ते तस्माद्ब्रह्म कलकुवां कुलं च मानुचरः अनुचरैर्वैष्णवैः सहितः जनार्द्दनश्च मह्यं प्रसीदतां प्रसीदतु ॥ ४४ ॥

साधुवादेन पृथुकृतेन हृष्टमनसः तुष्टुवुः स्तुवन्तः ॥ ४५ ॥

स्तुतिमाह। पुत्रेणेति षड्भिः। पुत्रेण लोकान् जयति साधयति इतीति शेषः इति श्रुतिः सत्यवती यथार्था यतो वेनोऽपि नमः प्रमत्तु अतितमाद् भवता पुत्रीभूतेनेति शेषः ॥ ४६ ॥

दृष्टान्ततया प्रह्लादेन हिरण्यकशिपुस्तमोऽत्यगादित्याह। हिरण्यकशिपुरिति। अत्यगादिति क्रियापदेन शास्त्रप्रसिद्धः पूर्वकल्पीयो हिरण्यकशिपुः सूच्यते ॥ ४७ ॥

शाश्वतीः समाः बहुलसंवत्सरान् ॥ ४८ ॥

भाषाटीका ।

उपनिषदोंमें प्रतिपादित अनन्त भगवान् भी तत्त्व वेत्ता पुरुषों के ब्राह्मणोंके मुख में श्रद्धा पूर्वक इन्द्रादि नामों से अर्पण किये पदार्थ को ग्रहण करतेहैं तैसे चेतना से रहित अग्नि में अर्पण करनेसे नहीं भोजन करते हैं ॥ ४१ ॥

नित्य निर्मल सनातन वेद को श्रद्धा तप सदाचार मित भाषण संयम समाधि से ब्राह्मण लोग धारण करतेहैं जिससे उनकी दिव्य दृष्टि होती है उस वेद में सब साधन दर्पण मे मुख सरीके दीखते हैं ॥ ४२ ॥

हे श्रेष्ठ पुरुषो ! उन ब्राह्मणों के चरण रेणु को आयु के समाप्ति पर्यन्त मै अपने मस्तक के किरीट में धारण करता हूं जिस की रेणु के धारण करने वालेके पाप नष्ट होते हैं और सब गुण उसको मिलते हैं ॥ ४३ ॥

शीलादि गुणवाला सुखभाव को धन सरीका रखने वाला कियेका उपकार मानने वाला वृद्ध पुरुषों का आश्रय करने वाला जो पुरुष हो उसको सब संपत्ति स्वयं चाहती हैं इसी के लिये ब्राह्मण वंशी गउका कुल भागवतों के सहित जनार्दन भगवान् हमारे ऊपर संतुष्ट होवें ॥ ४४ ॥

मैत्रेयजी बोले इस प्रकार कथन करने वाले महाराज से पितर देवता ब्राह्मण महात्मा सब सन्तुष्ट होकर साधु साधु बोलने लगे ॥ ४५ ॥

पुत्रसे पिता को दिव्य लोक की प्राप्ति होती है यह कथन सत्य ही है जिसी हेतु से कि ब्राह्मणों के दंड से मरा पापी वेन भी आज नरक को जीत गया ॥ ४६ ॥

हिरण्यकशिपू भी भगवान् की निन्दा से नरक को जानेवाला था परन्तु अपने पुत्र प्रह्लाद के प्रभावसे नरक को जीत गया ॥ ४७ ॥

हेवीरश्रेष्ठ ! हे पृथिवी के पिता ! आप सदाकाल जीते रहो जिन आपकी सब लोक के एक मालिक होने पर भी नारायण में ऐसी भक्ती है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मुकुन्दनाथाः स्म त्वत्प्राप्त्यमेव मुकुन्दनाथत्वे पर्यवसितमित्यर्थः तत्र हेतुर्य इति ॥ ४९ ॥

आजीविनां सेवकानाम् आसम्यगनुशासनम् प्रजासु अनुरागः प्रकृतिः स्वभावः ॥ ५० ॥

उपासादितः प्रापितः कर्मभिर्भ्राम्यताम् ॥ ५१ ॥

ईश्वरदृष्ट्या विप्रादयोऽपि प्रणमन्ति । नमन्ति । ...

(१) श्यमाकेतिश्रीविजयध्वजतीर्थः ।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पारमहंस्यां संहितायां पृथुचरिते पृथुवाक्य एकविंशोऽध्यायः ॥ २१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्राह्मणजातिमभिप्रायं क्षत्रं क्षत्रियं बिभर्ति क्षत्रं चाविश्य ब्रह्म बिभर्ति तदुभयं चाविश्येदं विश्वं बिभर्ति ॥ ५२ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

हे पवित्रकीर्ते ! वयं त्वयैव नाथेन मुकुन्दनाथाः त्वन्नाथत्वमेवास्माकं मुकुन्दनाथत्वे पर्यवसितमित्यर्थः कुतः यो भवान् ब्रह्मण्यदेवस्य उत्तमश्लोकस्य विष्णोः कथां व्यनक्ति प्रकाशयति ॥ ४९ ॥

नाथ ! तव आजीव्यानुशासनं राजानमाजीवन्त्युपजीव्याः तेषामस्माकम् अनुशासनमिति यदिदं नात्यद्भुतं कुतः महात्मनां करुणात्मनां कृपास्वभावानां प्रजास्वनुरागः प्रकृतिः स्वभावः ॥ ५० ॥

हे प्रभो ! दैवसंज्ञितैः दैवापरपर्यायैः कर्मभिः भ्रमतां संसरताम् अत एव नष्टदृष्टीनां नोऽस्माकं अधुना त्वया तमसः नरकस्य पारस्तीरमुपासादितः प्रापितः ॥ ५१ ॥

ईश्वरदृष्ट्या प्रणमन्ति । नमइति । ब्राह्मणजातिमभिष्ठाय क्षत्रं बिभर्ति क्षत्रमाविश्य ब्रह्मकुलं बिभर्ति तदुभयमाविश्य इदं विश्वं बिभर्ति तस्मै भरणोपयुक्त गुणमाह। विशुद्धसत्त्वाय रजस्तमोभ्यामनभिभूतसत्त्वप्रचुराय अत एव महीयसे परमपुरुषविभूतिभूताय तुभ्यं नमः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे- श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम् एकविंशोऽध्यायः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुकुन्दो नाथो येषां ते तथा अनेनाप्युक्तशङ्का पर्यहारि व्यनक्ति अस्माभिर्दुष्प्रापामपि कथां व्यक्तां करोषि ॥ ४९ ॥

तव भृत्यानामस्माकमनुशासनं नैकान्तनियतमित्याहुरित्याह । नात्यन्तिकमिति ॥ ५० ॥

उपासादितः प्रापितः भ्राम्यतामेकत्राषस्थानमलभमानानाम् ॥ ५१ ॥

अहो यद्यमित्यत्रान्तर्याम्यपेक्षयेत्युक्तं तत्तत्स्वधामप्रेषां सिद्धमिति भावेन तत्सिद्धान्तं प्रकटयति । नम इति । यो विष्णुः क्षत्रं राजकुलोत्पन्नं पृथुमाविश्येदं ब्रह्म ब्राह्मणकुलं बिभर्तीत्यन्वयः॥५२॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् एकविंशोऽध्यायः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

व्यनक्तीति कश्चित् । व्यनक्तीरिति चित्सुखः ॥ ४९-५२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य एकविंशतितमोऽध्यायः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मुकुन्दनाथाभूम तवैव मुकुन्दत्वात् मुकुन्दभक्ति विधायकत्वादेति भावः यो भवान् ॥ ४९ ॥

आजीविनां सेवकानाम् आ सम्यगनुशासनं प्रजास्वनुराग प्रकृतिः स्वभावः ॥ ५० ॥ ५१ ॥

ईश्वरदृष्ट्या विप्रादयोऽपि प्रणमन्ति । नम इति । ब्रह्माविश्य ब्राह्मणजातिमभिष्ठाय क्षत्रं क्षत्रियं बिभर्ति । क्षत्रमाविश्य ब्रह्म बिभर्ति । तदुभयमाविश्य इदं विश्वं बिभर्ति ॥ ५२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । चतुर्थ एकविंशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे पवित्रकीर्ते ! त्वया नाथेन वयं मुकुन्दनाथाः स्म यतो यं भवान् विष्णोः कथां व्यनक्ति प्रकटयति ॥ ४९ ॥

हेनाथ ! आजीविनां भवदाश्रितजीविकानाम् अनुशासनमिति तव नात्यद्भुतम् यतो महतां प्रजानुरागः प्रकृतिः स्वभाव एव ॥ ५० ॥

दैवसंज्ञितैः प्राकृतैः फलोन्मुखैः कर्मभिर्भ्राम्यतां तमसः संसारस्य पारस्त्वयोपासादितो दर्शितः ॥ ५१ ॥

हृष्टाः नमः कुर्वन्ति । यो हरिः ब्रह्म ब्राह्मणजातिं प्रविश्यात्रेया

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकविंशाध्यायार्थप्रकाशः ॥ २१ ॥

———

भाषाटीका।

हे पवित्र यश वाले महाराज! आपके मालिक होनेसे ही हम लोग परमेश्वर को स्वामी मानने लगे जो आप उत्तम श्लोकों में उत्तम ब्रह्मण्य देव विष्णु भगवान् की कथा को हमसे प्रगट करते हैं ॥ ४९ ॥

हे नाथ! आप को यह बात कुछ आश्चर्य नहीं है जो आप हमसेवकों को उपदेश करते हो जिससे कि प्रजा को अनुरक्त करना यह दया वालों का स्वभावही है ॥ ५० ॥

हे प्रभो! प्रारब्ध नामक कर्मों से भ्रमते हुये अज्ञानी हम लोगों को आज आपने अज्ञान अन्ध से पार कर दिया है ।५१।

विशुद्ध सत्व स्वरूप पुरुष महान् परमेश्वर के अर्थ नमस्कार है जो भगवान् ब्राह्मण क्षत्रिय वैश्य इनमे प्रवेश होकर अपने प्रभाव से इस जगत्को पालन करते हैं ॥ ५२ ॥

इति श्रीभागवत चतुर्थस्कन्ध एकवीसवां अध्यायका
भाषानुवाद लक्ष्मणाचार्य कृत
समाप्त ॥ १५ ॥

———

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे एकविंशोऽध्यायः समाप्तः ॥ २१ ॥

———

—○:*:○—

॥ मैत्रेय उवाच ॥

जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमम् ।
तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः ॥ १ ॥
तांस्तु सिद्धेश्वरान् राजा व्योम्नोऽवतरतोऽर्चिषा ।
लोकानपापान् कुर्वत्या सानुगोऽचष्ट लक्षितान् ॥ २ ॥
तद्दर्शनोद्गतान् प्राणान् प्रत्यादित्सुरिवोत्थितः ।
ससदस्यानुगो वैन्य इन्द्रियेशो गुणानिव ॥ ३ ॥
गौरवाद्यन्त्रितः सभ्यः प्रश्रयानतकन्धरः ।
विधिवत् पूजयाञ्चक्रे गृहीताध्यर्हणासनान् ॥ ४ ॥
तत्पादशौचसलिलैर्मार्जितालकबन्धनः ।
तत्र शीलवतां वृत्तमाचरन मानयन्निव ॥ ५ ॥
हाटकासन आसीनान् स्वधिष्ण्येष्विव पावकान् ।
श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान् ॥ ६ ॥

॥ पृथुरुवाच ॥

अहो आचरितं किं मे मङ्गलं मङ्गलायनाः ! ।
यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां च योगिभिः ॥ ७ ॥
किं तस्य दुर्लभतरमिह लोके परत्र च ।
यस्य विप्राः प्रसीदन्ति शिवो विष्णुश्च सानुगः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वाविंशे तु परं ज्ञानं पृथवे हरिशासनात् ।
सनत्कुमारो भगवानुपादिशदितीर्यते ॥ १ ॥

मुनयः सनकादयः ॥ १ ॥

अर्चिषा लक्षितान्सनकादयइति ज्ञापितान् । अचष्टापश्यत ॥२ ॥

तेषां दर्शनेनोद्गतान् प्राणान्प्राप्तुमिच्छुरिव । अयंभावः "ऊर्ध्वं प्राणाह्युत्क्रामन्ति यूनःस्थविर आयति । प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते" इतिस्मृतेः प्राणास्तावत्तत्तेजसाक्षिप्तास्तान्प्रत्युद्गच्छन्त्यतः प्राणहानिः स्यादिति भयादिव ससम्भ्रमप्रत्युत्थानं चकारेति सह सदस्यैरनुगैश्च वर्तमानः इन्द्रियेशो जीवो गुणान्शब्दादीन्प्रति यथोद्गच्छतीत्यौत्सुक्ये दृष्टान्तः ॥ ३ ॥

यन्त्रितो वशीकृतः गृहीतमध्यर्हणमर्घ्यमासनञ्च यैस्तान् मार्जितं क्षालितमलकबन्धनं यस्य मानयन्निव व्यवहारः ॥ ५ ॥

भवस्याप्यग्रजत्वेन मान्यान् ॥ ६ ॥

प्रीतः प्राहेत्युक्तं तदेव प्रीतिपूर्वकं वचनमाह । अहो इतिद्वाभ्यां । हेमङ्गलायनाः ! मङ्गलमयनं येषाम् मया किमङ्गलमाचरितम् यस्य मे योगिभिरपि दुर्दर्शानां वो दर्शनमासीत् ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तं भगवता ह्रस्वेन कालेन गृहोपयानाम् द्रष्टासि सिद्धानिति । कुमारागमनं तैश्च तत्त्वोपदेश इति तद्विस्तरेण वर्णयितुं कुमारागमनमाह मुनिः । जनेष्विति । विपुलपराक्रमं पृथुं प्रस्तवं जनेषु प्रगृणत्सु वदत्सु सत्सु सूर्यस्येव वर्चो येषां ते चत्वारो मुनयः तत्रोपजग्मुरित्यर्थः ॥ १ ॥

लोकानपापान् कुर्वन्त्या अर्चिषा लक्षितान् सनकादय इति लक्षितान् व्योम्नः आकाशादवरोहतः तान् सिद्धेश्वरान् सानुगः सभृत्यो राजा अचष्ट अद्राक्षीत् ॥ २ ॥

तेषां दर्शने नोद्गतान् प्राणान् पुनः प्राप्तुमिच्छुरिव । ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आगते । प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते । इत्ययमर्थः सूचितः प्राणास्तावत्तत्तेजसा

[redacted]
शब्दादीनुग्रहणीत्यौत्सुक्ये दृष्टान्तः उत्थितः ॥ ३ ॥

गौरवात् यन्त्रितः वशीकृतः सद्यः प्रश्रयेण विनयेन नता कन्धरा यस्य सः गृहीताभ्यर्हणाम् अर्घ्यमासनं चयैस्तान् यथाविधि पूजयांचक्रे ॥ ४ ॥

तत्पादानां शौचैः सलिलैर्मार्जितं चालितम् अलकबन्धनम् केशबन्धनं यस्य शीलवतां वृत्तं मानयन्निव स्वयमाचरन् ॥ ५ ॥

हाटकासने स्वधिष्ण्ये वेदिकायां पावकानिवासीनानुपविष्टान् श्रद्धासंयमाभ्यां तद्वाक्यश्रवणत्वरातदुपयुक्तकरणनियमनाभ्यां संयुक्तः भवाग्रजान् रुद्रात्पूर्वजान्सनकादीन् प्राह ॥ ६ ॥

उक्तमेवाह । अहो इति दशभिः । हेमङ्गलायनाः! मङ्गलं किं मे मया किं पुण्यम् अहो आचरितं कृतं यतः यस्य मे योगिभिरपि दुर्दर्शानां दुःखेनापि द्रष्टुमशक्यानां वो युष्माकं दर्शनमासीत् सुकृतमन्तरेण मादृशानां भवद्दर्शनं न संभाव्यते इत्यर्थः ॥ ७ ॥

किमस्मद्दर्शनसाध्यं तत्राह । यस्य पुंसः विप्रा भवादृशाः शिवो रुद्रो मङ्गलरूपो वा विष्णुश्च प्रसीदति तस्य इह परत्र वा लोके किं दुर्लभतरमस्ति सर्वं सुलभमेवेत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पृथुसनत्कुमारसम्वादोपदेशेन सर्वस्माद्विष्णुमनुग्रहमन्तरेण दुर्ज्ञेयं भगवत्तत्त्वं निरूप्यतेऽस्मिन्नध्याये । तत्रादौ सनत्कुमारादिमुनीनामागतिं वक्ति । जनेष्विति ॥ १ ॥

अर्चिषा लक्षितान् लक्षणतो ज्ञातानचष्ट अद्राक्षीत् ॥ २ ॥

तेषां दर्शनेनोद्गतान् प्राणान् प्रादातुमिच्छुरिव अयं भावः

ऊर्ध्वं प्राणाह्युत्क्रामन्ति यूनः स्थविर आगते ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते

इति स्मृतेः प्राणास्तावत् तेजसा क्षिप्तास्तान् प्रत्यागच्छन्ति अतः स्वयमनभिगच्छतः प्राणहानिः स्यादिति भयादिव ससम्भ्रमः प्रत्युद्गमनं चकारेति इन्द्रियेशो जीवो गुणानिन्द्रियाणीव ॥ ३ ॥ ४ ॥ ५ ॥

हाटकासने सुवर्णपीठे स्वधिष्ण्येषु स्वस्थानेषु स्थितान् संयमः प्रश्रयः भवाग्रजान् शिवज्येष्ठान् तृतीयस्कन्धे हरात्पूर्वजातत्वोक्तेः संसाराग्रजातत्वं तद्विरुद्धत्वादुपेक्षणीयम् ॥ ६ ॥

संसारिणां सतां संदर्शनस्य दुर्लभत्वात् अतः पूर्वाचरितं मङ्गलं ममास्तीति ध्वनयन्विस्मयीकरोति । अहो इति । कृष्णो कृष्णविषये ॥ ७ ॥

नैतच्चित्रमित्याह । किन्तस्येति । अनुगतेन प्राणेन सह वर्तत इति सानुगः कस्मिन्नहमिति श्रुतिः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अर्चिषा कथम्भूतया लोकानपापान् कुर्वत्येति चित्सुखः । कुर्वाणानिति कश्चित् ॥ १ ॥ २ ॥

प्रत्यादित्सुरिति चित्सुखः प्रत्यापित्सुरिति कश्चित्॥३ ॥ ४ ॥ ॥ ५ ॥ ६ ॥ ७ ॥

किञ्च । स्वाधस्थाश्च विप्राः साधारणा न भवन्तीत्यर्थान्तरन्यासेन व्यनक्ति । किन्तस्येति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्वाविंशे परमं ज्ञानं ज्ञापयित्वा ततः परम् ।
सनत्कुमारः पृथवे शुद्धां भक्तिमुपादिशत् ॥ ० ॥

प्रगृणत्सु स्तुवत्सु । पृथौ स्वसद्मोपवनं गते चेति शेषः । तथैव भगवदुक्तेः ॥ १ ॥

अर्चिषा लक्षितान् सनकादय इति ज्ञापितान् । अचष्ट अपश्यत् ॥ २ ॥

अभ्युत्थानमुत्प्रेक्षते तेषां दर्शनेन दर्शनतेजसा उद्गतान् प्राणान् प्रति प्राप्तुमिच्छुरिव ।

ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते

इतिस्मृतेरभ्यर्हितानभ्युत्थानत आयुःक्षयोक्तेः इन्द्रियेशो जीवो गुणान् गन्धादीन् प्रतीत्यौत्सुक्ये दृष्टान्तः ॥ ३ ॥

यन्त्रितः सङ्कुचित कायिकवाचिकवृत्तिः ॥ ४ ॥

शीलवतां वृत्तमिति शीलवद्भिरेवं वर्तितव्यमिति स्वयमाचरन् मानयन्निव मन्ये ज्ञाने ॥ ५ ॥

भवस्याप्यग्रजत्वेन मान्यान् ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्वाविंशे श्रीकुमारा भगवत्परस्य भगवत्प्राप्तिं तद्विमुखस्य संसारमुक्तवन्त इत्याह । जनेष्विति । प्रगृणत्सु स्तुवत्सु ॥ १ ॥

लोकान् अपापान् कुर्वत्या अर्चिषा दीप्त्या लक्षितान् सनकादय इति ज्ञापितान् सानुगः राजा पृथुः अचष्ट अपश्यत् ॥ २ ॥

ऊर्ध्वं प्रणा ह्युत्क्रामन्ति यूनः स्थविर आगते ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते

इतिस्मृतेः श्रेष्ठे आगते इतरस्य प्रत्युत्थानाभिवादाभावे आयुर्हानिर्भवेत्तद्रक्षार्थं प्रत्युत्थानादिकं कृतवानित्याह । तद्विति । तेषां दर्शनेनोद्गतान् प्राणान् प्रत्यादित्सुः प्राप्तुमिच्छुरिवोत्थितः इन्द्रियेशो जितेन्द्रियगुणान् तपोव्रतहरिगाथाश्रवणादीन् प्रति जीवो गन्धादीन् प्रति वा यथोत्थायगच्छतीत्यौत्सुक्ये दृष्टान्तः उत्थित इत्यादिनात्र "चक्षुर्दद्यान्मनो दद्याद्वाचं दद्यात्सु सूनृताम् । उत्थाय चासनं दद्यात्स यज्ञः पञ्च दक्षिण" इति पञ्च दक्षिणो यज्ञोऽपि दर्शितः ॥ ३ ॥

यन्त्रितस्तदधीनतायुक्तः प्रश्रयेण विनयेनानता कन्धरा यस्य सः गृहीतमभ्यर्हणमर्घ्यमासनं च यैस्तान् विधिवत्पूजयाञ्चक्रे ॥ ४ ॥

तेषां चरणक्षालनजलैः मार्जितमार्द्रीकृतमलकबन्धनं यस्य सः शीलवतां वृत्तं विनयप्रार्थनादिरूपं मानयन् इव अङ्गीकुर्वन्निव स्वयमाचरत् ॥ ५ ॥

हाटकासने सुवर्णासने आसीनान् भवाग्रजान् शिवपूर्वजान् शिवादीनामपि पूज्यानित्यर्थः ॥ ६ ॥

मङ्गलं परं ब्रह्म अयनमाश्रयो येषां मङ्गलमयनं स्थानं वा

अधना अपि ते धन्याः साधवो गृहमेधिनः ।
यद्गृहा ह्यर्हवर्याम्बुतृणभूमीश्वरावराः ॥ १० ॥
व्यालालयद्रुमा वै तेऽप्यरिक्ताखिलसम्पदः ।
यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ॥ ११ ॥
स्वागतं वो द्विजश्रेष्ठा ! यद्व्रतानि मुमुक्षवः ।
चरन्ति श्रद्धया धीरा बाला एव बृहन्ति च ॥ १२ ॥
कच्चिन्नः कुशलं नाथा ! इन्द्रियार्थार्थवेदिनाम् ।
व्यसनावाप एतस्मिन्पतितानां स्वकर्मभिः ॥ १३ ॥
भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते ।
कुशलाकुशला यत्र न सन्ति मतिवृत्तयः ॥ १४ ॥
तदहं कृतविश्रम्भः सुहृदो वस्तपस्विनाम् ।
संपृच्छे भव एतस्मिन्क्षेमः केनाञ्जसा भवेत् ॥ १५ ॥
व्यक्तमात्मवतामात्मा भगवानात्मभावनः ।
स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

येषां तत्सम्बोधने हेमङ्गलायनाः ! मे मया किं मङ्गलं शुभमाचरितम् ॥ ७ ॥ ८ ॥

भाषाटीका ।

मैत्रेयजी बोले पृथु महाराज से जब मनुष्य ऐसा कहते थे तबही सूर्य कैसे तेज वाले चार मुनि जहां पर आये ।१।

आकाश से उतरते हुये अपने तेजसे सब लोकों के पाप को दूर करते हुये ऐसे सिद्धेश्वरों का अपने भृत्यों सहित राजाने दर्शन किया ॥ २ ॥

उनके दर्शन से उठे हुये प्राणोंको लौटाने सरीकी चेष्टा से सब सभा सदों के चाकरों के सहित जैसे मन इन्द्रियों के सहित गंधादि ग्रहण मे प्रवृत्त होता है तैसे उठे ॥ ३ ॥

पृथु महाराज उनके प्रभाव से वशी भूत होकर प्रेम से मस्तक नम्र करके दिव्य आसनों पर उनको बैठा कर विधि पूर्वक पूजा करते भये ॥ ४ ॥

तहां सुन्दर स्वभाव वालों के स्वभाव को मानकर आचरण करते से महाराज ने उन मुनिन के चरणों के जलसे अपने मस्तक के केशों को शुद्ध किया ॥ ५ ॥

वेदी मे स्थित अग्नि के तुल्य सुवर्ण सिंहासन मे बैठे उन ऋषिन के आगे श्रद्धा कर चित्त को एकाग्रकर के प्रसन्नता से महादेवजी के बड़े भ्राता मुनियों से महाराज प्रार्थना करने लगे ॥ ६ ॥

पृथु महाराज बोले हे मङ्गल स्वरूप मुनिगण ! मैंने क्या जाने कौनसा पुण्य किया है कि जिस के प्रभाव से मुनियों को दुर्लभ जो आपका दर्शन सो मोकूं हुआ ॥ ७ ॥

उस पुरुष को इस लोक मे तथा परलोक में क्या दुर्लभ है जिस पर ब्राह्मण तथा श्री विष्णु तथा शिवजी तथा भगवान् विष्णु के भक्त भी प्रसन्न होजांवें ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुर्दर्शत्वमेवाह। नैवेति।सर्वदृशमात्मानं यथा सर्वं दृश्या न जानन्ते येऽस्य विश्वस्य हेतवो महदादयो मन्वादयो वा। यद्वा कथंभूतान् । येऽस्य सर्वदृगात्मदर्शनस्य हेतवस्तान् ॥ ९ ॥

येषां साधूनां गृहा महर्णां पूज्यानां वर्या वरणीयाः स्वीकारार्हा अम्ब्वादयो येषु तादृशाः अम्बु च तृणञ्च भूमिश्च ईश्वरो गृहस्वामी चावरा भृत्यादयश्च ॥ १० ॥

व्यालानामालया द्रुमा एव ते अरिक्ताः पूर्णा अखिलाः सम्पदो येषु तादृशा अपि यद्गृहा ये गृहास्तीर्थपादीया वैष्णवास्तेषां पादतीर्थेन विवर्जिताः ॥ ११ ॥

स्वागतं भद्रमागमनं जातम्। यद्यस्माद्बाला एव भवन्तो बृहन्ति व्रतानि चरन्ति यद्वा येषां वोव्रतान्यन्ये बालाश्चरन्ति ॥ १२ ॥

इन्द्रियार्था विषयास्तानेवार्थं पुरुषार्थं ये विदन्ति तेषां नः व्यसनान्युप्यन्ते यस्मिंस्तस्मिन् संसारे ॥ १३ ॥

नन्वभ्यागतानां कुशलं पृच्छन्ति लोके न स्वात्मस्वत्राह। भवत्स्विति ॥ १४ ॥

…का ।
…तानां सुहृदो वो युष्मा-
…णानुरूप… किन्तु साक्षाद्भगवानेवेत्याह । व्यक्तं
चित्तमात्मवतां धीरा…मात्मा तेष्वात्मत्वेन प्रकाशमानः ।
आत्मानं भावयति प्रकाश…तीति तथा । अजः श्रीनारायणः इमां
पृथ्वीं चरति ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दुर्दर्शत्वमेवाह । नैवेति । लोकान् पर्यटनोऽपि यान् युष्मान् लोको नैव लक्षयते न पश्यति यथा सर्वदृशं सर्वज्ञमात्मानम अस्य विश्वस्य हेतुभूताः ब्रह्मादयः सर्वेऽपि न लक्षयन्ते तथेत्यर्थः यस्य हेतव इति पाठे तु हेतवः ब्रह्मादयः सर्वे यस्य यत्संबन्धिनः यस्य शेषभूताः तं सर्वज्ञमात्मानं यथा न लक्षयन्ति तथेत्यर्थः ॥ ९ ॥

तद्दर्शनेन स्वस्य धन्यतामाविष्करोति । अधना इति । गृहमेधिनः अधन्या अपि यदि साधवः तर्हि ते धन्या एव हि यतः येषां गृहमेधिनां साधूनां गृहाः अर्हाः पूज्या भवादृशैस्तैर्वर्याः वरणीयाः स्वीकार्याः अम्बु जलं तृणां भूमिः ईश्वरो गृहस्वामी अपरे गृहवासिनो भृत्यादयश्च येषु तथा भूता भवन्ति ॥ १० ॥

एवमन्वयमुखेन धन्यतामाविष्कृत्य व्यतिरेकमुखेनाप्याविष्करोति । व्यालेति । अरिक्ताखिलसम्पदः अरिक्ताः पूर्णाः अखिलाः सम्पदः येषु तादृशा अपि यद्गृहा गृहमेधिनां गृहाः यदि तीर्थपाद्भगवान् तत्संबन्धिनस्तीर्थपादीया भागवतास्तेषां पादतीर्थेन विवर्जितास्तर्हि एते गृहाः व्यालालयद्रुमाः सर्पावासचन्दनद्रुमप्रख्याः ॥ ११ ॥

एवमन्वयव्यतिरेकाभ्यां तदागमनेन स्वस्य धन्यतामभिधाय तेषां स्वागतप्रश्नपूर्वकं स्वाभाविकीं धन्यतामाह । स्वागतमिति । हे द्विजश्रेष्ठाः ! वः युष्माभिः स्वागतं कुशलमागतं किं भवताम- कुशलमस्तीत्यभिप्रायः यत् यस्मात् बाला एव भवन्तः मुमुक्षवः अत एव धीरा जितेन्द्रियाः सन्तः बृहन्ति व्रतानि चरन्ति यद्वा येषां वो व्रतानि युष्माभिर्दर्शितान्येवान्यमुमुक्षवः बृहन्ति दीर्घकालनिर्वृत्या निवृत्तिधर्मरूपव्रतानि चरन्ति ॥ १२ ॥

कालाभिप्रेतकुशलाभावमेव व्यक्तुं स्वस्य तावत्कुशलाभावं व्यनक्ति । कच्चिदिति । किमस्माकं कुशलमस्तीत्यर्थः कथं भूतानां हेनाथाः ! इन्द्रियार्थान् शब्दादीनेवार्थान् पुरुषार्थरूपान् विन्दन्तीति तथा तेषामत एव यस्मिन्नुत्पन्ने बीजानि स आवापः क्षेत्रं व्यसनानामावापः संसारः तस्मिन् स्वकर्मभिः पतितानाम् ॥ १३ ॥

नन्वभ्यागतानां नः कुशलं किं न पृच्छसि तत्राह । भवत्सु कुशलप्रश्नः नेष्यते तत्र हेतुः आत्मारामेषु ब्रह्मात्मकस्वात्मानुभवैकपरेषु ननु आत्मारामाणां कदाचित्कुशलसंभावनया कुशलप्रश्न इष्यतां तत्राह । यत्र आत्मारामेषु कुशलाकुशलरूपा मतिवृत्तय एव न सन्ति कुशलाकुशलविषयचिन्तनरूपमतिवृत्तयो हि सङ्गकामक्रोधसंमोहादिजननद्वारा सुखदुःखादिहेतवः अतस्तासामेवाभावात्कुतो भयं स्वकुशलसंभावनेत्यर्थः मतिवृत्तीनां च सङ्गादिद्वारा कुशलनिमित्तत्वं भगवता गीतम् ।

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात् क्रोधोऽभिजायते ।
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ १४ ॥

तस्मात् अहं कृतविश्वासः सन् तपस्विनां तापत्रयभुराणामस्माकं सुहृदो युष्मान् एतस्मिन्संसारे वर्तमानस्य केन हेतुना क्षेमः सुखं मोक्ष इति यावत् अञ्जसा सुखेन भवेदिति पृच्छामि ॥ १५ ॥

स्वभक्ताननुग्रहीतुं भगवानेव भवादृशरूपश्चरतीत्याह । व्यक्तमिति । आत्मवतां प्रशंसायां मतुप् प्रशस्तचित्तानां ज्ञानिनामात्मा निरतिशयप्रीतिविषयः प्रीतिमांश्च तथाहि गीतम् । "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय" इति । आत्मशब्देनात्मत्वप्रयुक्तम तदुभयं विवक्षितम् आत्मा हि निरतिशयप्रीतिविषयः स्वशरीरे प्रीतिमांश्च आत्मभावनः आत्मनः जीवान् भावयति स्वविषयज्ञानप्रदानादिना सत्तावतः करोतीत्यात्मभावनः स्वपरयाथात्म्यज्ञानविधुरा हि जीवाः स्थावरपर्यन्तजन्माभिरसत्प्रायास्तानात्मवतः करोतीत्यर्थः सिद्धाः ज्ञानिनः तद्रूपः तथाच गीतं भगवता "ज्ञानी त्वात्मैव मे मतम्" इति अजो भगवान्स्वानां भक्तानामनुग्रहाय स्वाननुग्रहीतुमिमां पृथिवीं चरति व्यक्तं निश्चितम् ॥१६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुर्दर्शत्वमधिकदृष्टान्तत्वे नोपपादयति । नैवेति । लक्ष्यते लक्षणावत्तयापि भवद्विषयं ज्ञानं नाप्नोति असम्भवपरिहाराय पर्यटत इति सर्वो जनः सर्वदृशं साक्षित्वेन पश्यन्तमात्मानं परमात्मानं यथा न जानाति ब्रह्मादीनां, तद्विषयज्ञानसम्भवात् कथं सर्व इति सर्वं कवलीक्रियते इत्यत उक्तं य इति । येन ब्रह्मादयोऽस्य जगतो हेतवः कारणभूतास्तेऽपि न विदन्तीति अत्रेदं तात्पर्यं यथात्मानं स्वं हरिर्वेत्ति तथा न जानन्तीति तदुक्तं "सर्वज्ञाश्च विरिञ्चाद्या न जानीयुर्हरिं परम् । हेतवो जगतोऽप्यस्य यथासौ वेद केशव,, इति अनेन वेदाहमेतमित्यादिगीतिरप्युक्ता भवति दुष्टजनव्यामोहनाय वा तद्विषयज्ञानस्य दुःसाध्यत्वज्ञापनाय वाधिकदृष्टान्तप्रयोजनं किञ्च जगत्कारणतामावदानोऽयं हेतुशब्दो विरिञ्चादीनां सार्वज्ञ्यमप्याक्षिपक सर्वात्मना ज्ञानाभावो युक्त इति श्रीनारायणवत्तद्विषयज्ञानाभाव एव उच्यत इति व्यनक्तीति ॥ ९ ॥

भवतां पुरुषेष्वनुग्राहकत्वे भगवद्भक्तिसामग्रीमत्त्वमेव प्रयोजकं ननु धनिकत्वादिकमित्याशयेनाह । अधना अपीति । अर्हवर्याः पूज्यश्रेष्ठास्तेभ्यो दत्तमम्बु च तृणं च भूमिश्च सुवाचश्चार्हवर्याम्बुतृणभूमिसुवाचस्ता धारयन्ति बिभ्रतीति तथोक्ताः ॥ १० ॥

तीर्थपादो विष्णुस्तस्य भक्तास्तीर्थपादीयास्तेषां पादतीर्थैर्वर्जिताः सम्पर्करहिता हिशब्दो यथा शब्दार्थे यथा व्यालालया दुष्टसर्पाश्रया वृक्षा वर्ज्यास्तथा तादृग्गृहाः सम्पत्युक्तत्वेऽपि वर्ज्या इत्यर्थः ॥ ११ ॥

किम्बहुजल्पनेनेति भावेन तदागमनं लालयति । स्वागतमिति । वो युष्माकं स्वागमनं सुष्ठु अस्माकं सुखहेतुत्वादिति शेषः कथमस्मदागमनं सुखहेतुरत्राह यद्व्रतानीति । मुमुक्षवो धीराः श्रद्धया यद्व्रतानि चरन्ति ते यूयं वयोदर्शनेन बाला अपि बृहन्ति ज्ञानेन वर्धन्ते ज्ञानवृद्धत्वादागमनं भद्रमित्यर्थः ॥ १२ ॥

राजा स्वस्वागतवचनानन्तरं पुंसं प्रति दुष्टं च स्वस्तिकमिति मुनिवचनात्पूर्वं स्वकुशलमाक्षिपति । कच्चिदिति । व्यसन-

श्री[illegible]

बीजांस्युच्यन्तेऽहि[illegible]
स्वीकृतकर्मभिः पतितानां नः कुशलं का[illegible]
आत्मनो यानेन कुशलं पृच्छति अस्माकं कुशलं भविष्यति कच्चिदिति ॥ १३ ॥

नन्वभ्यागतास्मत्कुशलप्रशंसामन्तरेणात्मकुशलप्रश्नः कथमञ्जाघटीतीति तत्राह । भवत्स्विति । इदं कुशलमकुशलमिति मतिवृत्तयो यत्र येषु भवत्सु न सन्ति अतो भवत्सुखप्रश्नो नेष्यते कुतः आत्मना सह आरामो रमणं क्रीडा येषां ते तथा तेषु अतो भवत्सु कुशलप्रश्नाशाभावादौत्सुक्यादात्मकुशलप्रश्न इति भावः ॥ १४ ॥

अस्तु तर्हि तव कुशलं भविष्यतीत्यभिमतं वेद्यतो वयमकुशलाब्धिमग्नास्तस्मादेतादृशानां केन प्रकारेण कुशलं स्यादिति तं प्रकारं पृच्छामीत्याह । तद्वहमिति । तपस्विनां सुहृदोऽत्र पूज्यान् भये संसारे क्षेमं संसारोच्छेदलक्षणं मङ्गलमञ्जसा क्षिप्रं स्रागभ्याटित्यञ्जसाह्वायेत्यमरः ॥ १५ ॥

ननु मोक्षविषयप्रश्नपरिहारो दुरवबोधोऽतोऽन्यं पृच्छ नाचिकेतो मरणं मानुप्राक्षीरिति श्रुतेरित्याशङ्क्य भवन्तो भगवद्विशेषसन्निधानपात्रत्वात्पृष्टार्थव्याख्यानसमर्था इत्यभिप्रेत्याह । व्यक्तमिति । व्यक्तं स्पष्टे बुधे तु नेत्यभिधानात् अत्र स्पष्टं व्यक्तमित्यर्थः आत्मवतां ब्रह्मादियोगिनामात्माभीष्टवर्षी हि आत्मभावनो मनःप्रेरकश्चेतनानां सत्ताप्रदो जन्मादिविरहितो भगवान् स्वभक्तानामनुग्रहायेमां भूमिं सिद्धरूपी भवादृशाः सिद्धास्त एव रूपं प्रतिमास्यास्तीति चरतीत्यन्वयः "हरेस्तु प्रतिमाः प्राज्ञास्तत्रस्थः केशवः स्वयम् । ददाति ज्ञानमीशेशः परमात्मा स्वयं प्रभुः" इत्यतो ज्ञानिनां प्रतिमात्वं सिद्धमतोऽप्यत्रात्मवतां व्यक्तं स्पष्टमिति पुनरावृत्त्या योज्यम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

य इति पूर्वोक्तान् विशिनष्टि । नैवेति । आत्मानं परमात्मानं एवमस्य साकारत्वं दर्शितम् ॥ ९ ॥

तृणभूमिसुधाम्भारा इति चित्सुखः । फलमूलैस्तृणैर्वापि वाग्भिरद्भिर्विलोचनैः । पूज्यन्ते तीर्थिनः सद्भिर्विलुप्तविभवैरपि । अत्रेदं पद्यं कश्चित् पठते तत्र वाक्यस्य टीकामते दशा पद्यत्वाविशेषबोधश्च । किन्तस्येत्यादिपद्याभावात् । किन्त्वेतन्मते टीकासंवादिता स्यात् । किन्तस्येत्यादिकगद्येऽप्यस्यैव दुर्दर्शत्वमाहेति । सहसा योजनात् शलाकाप्राप्ततन्तूभयमेव ॥ १० ॥

तदेवं ब्राह्मणत्वेन स्तुत्वा वैष्णवत्वेन स्तौति । व्यालेति । द्रुमा होते इति क्वचित् ॥ ११ ॥

अथ तान् वैष्णवत्वेऽपि ज्ञानप्रधानात् । आद्या तदंशेन स्तौति । स्वागतमिति त्रिभिः । बाला एव बाल्यावस्थामारभ्येत्यर्थः । बृहन्ति सर्वतो महान्ति व्रतानि परिव्राडुचितानि ॥ १२—१४ ॥

पूर्वं न कामये नाथ तदप्यहं कश्चिदित्यादौ शुद्धभक्त्येकनिष्ठत्वेन व्यक्तोऽपि स उत्तमःश्लोकेत्यादौ भगवल्लीलाश्रवणमात्रेण सङ्गतानुषाङ्गिकज्ञानप्राप्तिरपि स इत्थं लोकगुरुणेति पूर्वोक्तश्रीभगवन्निर्देशगौरवेण । तत्र शीलवतां वृत्तमाचरन्नित्यत्रोक्तमहदादरस्वभावेन च तद्विवक्षितम् ज्ञानमपि श्रोतुमनुमोदते । तद्वहमिति ॥ १५ ॥

[illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दुर्दर्शत्वमाह । नैव लक्ष्यते न पश्य[illegible] यथा सर्वदृशं सर्वदर्शिनमात्मानं सर्वोऽपि लोको न पश्यति लोकस्य का वार्ता येऽस्य जगतो हेतवो ब्रह्ममरीचिप्रभृतयः तेऽपि न पश्यन्ति ॥ ९ ॥

येषां साधूनां गृहाः अर्हाः अर्हाणां पूज्यजनानां वर्ण्या वरणीयाः स्वीकारार्हा अम्ब्वादयो येषु भक्ष्यद्रव्याभावे पानार्थमम्बु च तदभावे शय्यार्थं तृणानि च तदभावे आसनार्थं परिष्क्रियमाणा भूमिश्च तदभावे प्रीतिवागञ्जल्याद्यर्थमीश्वरो गृहस्वामी च तस्याप्यभावे अवराश्च साष्टाङ्गप्रणिपाताद्यर्थं तत्पुत्रकलत्रादयश्च येषु ते ॥ १० ॥

व्यालतुल्यानां कटुवाग्वर्षिणां पुत्रकलत्रादीनामालयाः येषु तथाभूता द्रुमा एव तद्वृक्षवत्ता येषां छायापि कैरपि भीत्या न स्पृश्यत इति भावः अरिक्ताः पूर्णा अखिलसम्पदो येषां तथाभूताः तथाभूता अपि येषां गृहास्तीर्थपादीयानां वैष्णवानां पादतीर्थेन पादप्रक्षालनोदकेन रहिताः ॥ ११ ॥

यद्यस्मात् बृहन्ति व्रतानि ब्रह्मचर्यादीनि । मुमुक्षवः श्रद्धया चरन्ति भवन्तस्तु बाला एव मुक्ता एवेति ब्रह्मचर्यं कष्टं मुमुक्षाकष्टञ्च न जानन्तीति भावः ॥ १२ ॥

इन्द्रियार्थविषयसुखमेव पुरुषार्थं जानतामस्माकं व्यसनान्युप्यन्ते यस्मिन् तस्मिन् संसारे ॥ १३ ॥

नन्वभ्यागतान् प्रति कुशलप्रश्नस्तेषामेव क्रियते नत्वात्मन इत्यत आह । भवत्स्विति । तेनाभ्यागतेषु कुशलप्रश्नस्यावश्यकत्वात् युष्मत्सम्बन्धिकुशलप्रश्नस्यानौचित्यात् स्वसम्बन्ध्येव कुशलं पृष्टमिति भावः ॥ १४ ॥

किञ्च । युष्मदागमनमस्मदुद्धारप्रयोजनकमेव बुध्यते अस्मदात्मकुशलप्रश्न एव मम सम्प्रति युज्यते इत्याह । तद्वहमिति क्षेमः क्षेमम् ॥ १५ ॥

भवन्त खलु मदिष्टदेवो भगवान्नारायण एवेत्यहं जानामीत्याह । व्यक्तमिति । आत्मा स्वयमेव सेव्यत्वेन वर्तते येषां ते आत्मवन्तो भक्तास्तेषामात्मा आत्मैव प्रीतिविषयीभूत इत्यर्थः । स्वानां स्वेषां भक्तानामात्मानं भावयति प्रकाशयतीति । सः इमां पृथ्वीम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वदृशं सर्वद्रष्टारमात्मानं परमेश्वरम् अस्य विश्वस्य हेतवः प्रकृतिमहदादयः ॥ ९ ॥

अर्हाणां पूज्यानां वर्ण्या स्वीकारार्हाः अम्बुतृणादयो येषां तादृशा येषां गृहाः ते अधना अपि गृहमेधिनो धन्याः यतस्ते साधवः तत्रेश्वरो गृहस्वामी अवराः पुत्रादयः ॥ १० ॥

अरिक्ता अनपगताः अखिलाः सम्पदो येषु तथाभूता अपि ये गृहाः तीर्थं पादयोर्यस्य स तीर्थपात् विष्णुस्तदीयानां पादतीर्थेन यदि विवर्जिताः स्युस्तर्हि एते व्यालालयद्रुमा इव वा शब्द इवार्थे व्यालो दुष्टगजे सर्पे इतिमेदिनीकारकोशः ॥ ११ ॥

॥ मैत्रेय उवाच ॥

[illegible]कर्ण्य सारं सुष्ठु मितं मधु ।
स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह ॥ १७ ॥

॥ सनत्कुमार उवाच ॥

साधु पृष्टं महाराज ! सर्वभूतहितात्मना ।
भवता विदुषा चापि साधूनां मतिरीदृशी ॥ १८ ॥
सङ्गमः खलु साधूनामुभयेषां च संमतः ।
यत्सम्भाषणसम्प्रश्नः सर्वेषां वितनोति शम् ॥ १९ ॥
अस्त्येव राजन् ! भवतो मधुद्विषः पादारविन्दस्य गुणानुवादने ।
रतिर्दुरापा विधुनोति नैष्ठिकी कामं कषायं मलमन्तरात्मनः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भो द्विजश्रेष्ठाः ! वो युष्माकं स्वागतं शोभनमागमनं जातम् । येषां वो दुश्चरन्ति व्रतानि नैष्ठिकब्रह्मचर्यपूर्वकाणि भगवदाराधनरूपाणि धीरा जितेन्द्रियाः बालाः निरहङ्कारा मुमुक्षवः एव चरन्तीति योजना ॥ १२ ॥

हेनाथाः ! इन्द्रियार्थेषु शब्दादिषु अस्थिरेषु । अर्थवेदिनां स्थिरत्वमतीनां व्यसनानि दुःखान्येवोत्पद्यन्ते यस्मिन् तस्मिन् संसारे पतितानां नः कच्चित्कुशलमस्ति ॥ १३ ॥

नन्वस्मत्कुशलप्रश्नः कुतो न कृत इत्यत आह । भवत्स्विति चम वेत्तु ॥ १४ ॥

यस्माद्यूयमात्मारामाः तस्मात् कृतविश्वासः अत्र तपस्विनां मुमुक्षूणां सुहृदो युष्मान् अञ्जसा साक्षाज्जगत्यास्मिल्लसंसृताः क्षेमः केन भवेदिति संपृच्छे पृच्छामि ॥ १५ ॥

व्यक्तं निश्चितम् आत्मा परमेश्वरः जिज्ञास्यतया विद्यते येषां तेषामात्माश्रयः स्वानामनुग्रहाय आत्मभावनः आत्मानं भावयतीति । अयमस्मीति प्रकटयतीति तथा सिद्धरूपी योगेश्वररूपी चरति ॥ १६ ॥

भाषाटीका ।

संसार में घूमने पर भी जिनको कोई नहीं जानता है जैसे कि इस जगत् के साक्षी परमात्मा तथा इसके हेतु महत्तत्वादिकों को कोई नहीं जानता है ॥ ९ ॥

जिनके घरके मालिक नौकर भूमि जल तृण ये सब पदार्थ महात्माओं के सेवा के लायक हैं वे लोग निर्धन होकर भी धन्य हैं ॥ १० ॥

जिनके घरमें तीर्थपाद भगवान् के भक्तों के चरणोदक कभी नहीं गिरे हैं उनके सम्पत्ति से भरे हों वो भी सर्पों के रहने के वृक्ष हैं ॥ ११ ॥

हे महा भागो ! आपका सुन्दर आगमन हुआ जो कि आप लोग बालक ही होकर मुमुक्षु होने से नैष्ठिक ब्रह्मचर्यव्रत को धीरबुद्धि से श्रद्धापूर्वक धारण करते हो ॥ १२ ॥

दुःख के खान इस संसार में अपने कर्मों से पड़े हुये हम लोग इन्द्रियों के भोग्य रूप रसादिकों को अच्छे जानने वाले हैं हमारा कुशल होगा क्या ॥ १३ ॥

आपतो आत्माराम हो आपसे तो कुशल का प्रश्न हो नहीं सकता है क्योंकि आप लोगों में तो कुशल अकुशल गुण की वृत्ति कोई भी नहीं है ॥ १४ ॥

सो मैं आप सुहृद् तपस्वी जनोंपर विश्वास करके पूछता हूं कि इस संसार में अनायास से किस उपाय से कल्याण होगा ॥ १५ ॥

यह बात निश्चित है कि ज्ञानी पुरुषों का आत्मा अन्तर्यामी भगवान् उनको अपना स्वरूप प्रकाश करते हैं सो जगत् के अपने भक्तों के अनुग्रह के हेतु से सिद्ध रूप से जगत् मे विचरते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सूक्तं शोभनवचनम् सारं न्याय्यम् सुष्ठु गम्भीरार्थम् मितमल्पाक्षरम् मधु श्रोत्रप्रियम् मुखप्रसत्त्या स्मयमान इव प्रतीयमानः ॥ १७ ॥

विदुषा जानतापि ईदृशी परार्थैकपरा ॥ १८ ॥

स्वयमपि पृथोःसङ्गममभिनन्दति । सङ्गमइति । उभयेषां वक्तॄणां श्रोतॄणाञ्च येषां सम्भाषणसहितः सम्प्रश्नः सर्वेषां शं सुखं विस्तारयति ॥ १९ ॥

तदेवं सङ्गमप्रश्नं चाभिनन्द्यानुवादमुखेनैव मोक्षसाधनमुपदिशति। अस्त्येवेति । गुणानामनुवादने प्रश्नद्वारेणानुवादप्रवर्तने भवता इत्यर्थः आत्मनो मनसोऽन्तरन्तस्थं कामात्मकं मलं विधुनोति कषायं चानुरागवदनिवर्त्यम् ॥ २० ॥

सा श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाध्यात्मिकयोगनिष्ठया ।
योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च ॥ २२ ॥
अर्थेन्द्रियारामसगोष्ठ्यतृष्णया तत्सम्मतानामपरिग्रहेण च ।
विविक्तरुच्या परितोष आत्मन्विना हरेर्गुणपीयूषपानात् ॥ २३ ॥
अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुन्दाचरिताग्र्यसीधुना ।
यमैरकामैर्नियमैश्चाप्यनिन्दया निरीहया द्वन्द्वतितिक्षया च ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चित्तशुद्ध्यैव बहिर्वैराग्यमात्मरतिश्च भवति नच ततोऽधिकं साधनमस्ति शास्त्रेषु तयोरेव मोक्षहेतुत्वमिश्चयादित्याह । शास्त्रेष्विति । सम्यग्विमृशेषु सम्यग्विचारवत्सु शास्त्रेषु क्षेमस्य हेतुरेतावानेव सुनिश्चितः कोऽसौ आत्मव्यतिरिक्ते देहादावसङ्गो वैराग्यमात्मनिच दृढा रतिः प्रीतिः आत्मनो विशेषणं निर्गुणे ब्रह्मणीति ॥ २१ ॥

नन्वेतदेवातिदुर्लभमित्याशङ्क्योत्तमाधिकारिणः अवणमात्रेण भवत्यन्यस्य तु चित्तशुद्ध्यनुसारेण साधनतारतम्यतोवर्धमानया भक्त्येत्यभिप्रेत्याह।सेति चतुर्भिः।सा श्रद्धा।सिरतिरसङ्गश्च श्रद्धादिभिः स्यादिति चतुर्थेनान्वयः जिज्ञासया तत्तद्विशेषबुभुत्सया पुण्यं श्रवो यशो यस्य तस्य हरेः पुण्यया कथया च ॥ २२ ॥

अर्थारामा अर्थनिष्ठास्तामसा इन्द्रियारामाः कामनिष्ठा राजसास्तैः सह या गोष्ठी तस्यामतृष्णया तेषां च येसम्मता अर्थाः कामाश्च तेषामपरिग्रहेणानासक्त्या विविक्ते विजने या रुचिस्तया साचात्मन्येव परितोषे सति स्यात्किन्तु हरेर्गुणपीयूषपानाद्विना तस्मिन्सति विविक्ते रुचिर्नकार्या नचात्मनि परितोषः कार्य इत्यर्थः ॥ २३ ॥

पारमहंस्यचर्यया उपशमादिप्रधानया वृत्त्या स्मृत्यात्महितानुसंधानेन मुकुन्दाचरितमेवाग्र्यं सीधु श्रेष्ठममृतं तच्चरितस्मृतिसुखेनेत्यर्थः मार्गान्तरस्यानिन्दया निरीहया योगक्षेमार्थक्रियाराहित्येन शीतोष्णादिद्वन्द्वसहनेन ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पृथोः सूक्तं शोभनं वचनं सारं न्याय्यं सुष्ठु गम्भीरार्थं मितमल्पं मधु श्रोत्रप्रियं श्रुत्वा प्रीत्या स्मयमान इव कुमारः प्रत्युवाच ॥ १७ ॥

तत्र सत्सङ्गत्यादिप्रणाड्योत्तरोत्तरमहरहरभ्यासाधेयातिशयसाधनसप्तकानुगृहीतप्रयाणानुवृत्तप्रीतिरूपापन्नाविच्छिन्नप्रत्ययसन्तापलपरभक्त्यपरपर्यायभगवद्भक्तियोग एव क्षेमहेतुरिति विविक्षुस्तावत्प्रश्नमभिनन्दति । साध्विति ! हे महाराज ! भवता साधु सम्यक् पृष्टं कथं भूतेन विदुषापि तत्त्वहितपुरुषार्थज्ञानवतापि सर्वभूतहितात्मना सर्वभूतहितकरणप्रवृत्तिबुद्धिमता भूतहितार्थमेव त्वया पृच्छ्यते नतु स्वयं वेत्तुम् स्वत एव इत्यादिरर्थः भूतहिताचरणमेव साधूनां स्वभाव इत्याह । साधूनां साधयन्ति परकार्यमिति साधवः तेषां गतिः प्रवृत्तिः ॥ १८ ॥

ईदृशभूतहिताचरणरूपा सत्संङ्गतिस्तावन्मुख्यकारणमित्याह सङ्गम इति । उभयेषां बुभुक्षूणां मुमुक्षूणां च समीहित भोगमोक्षादेः प्रथमं साधूनां सङ्गम एवेति सम्मतः सत्सङ्गमस्य भोगमोक्षसाधनत्वमुपपादयति । येषां साधूनां सम्भाषण सहितःसंप्रश्नः सम्भाषणसंप्रश्नः शाकपार्थिवादित्वादुत्तरपदलोपी समासः यद्वा संभाषणावसरेसंप्रश्नः सम्यक् प्रणिपातसेवापूर्वः स्वर्गापवर्गसाधनप्रश्नः सर्वेषामुभयेषां स्वर्गापवर्गसुखं वितनोति सति संप्रश्ने साधुभिर्भोगमोक्षसाधने उपदिश्येते इति साधुष्व प्रश्नः शमपेक्षितं वितनोतीत्यर्थः ॥ १९ ॥

एवं सत्संगस्य भोगमोक्षप्रथमकारणत्वमुक्तं तत्र भोगसाधनत्वमेव प्रथमं सत्सङ्गः ततः सम्भाषणं ततः प्रश्नः ततस्तत्साधनयोगाद्युपदेशस्ततः साधनोपसंहारेण यागाद्यनुष्ठानं ततो भोग इति इयं च प्रणाडी मुमुक्षाधिकृतस्य कर्मणामल्पास्थिरत्वनिर्णयपूर्वकानन्तास्थिरफलापातप्रतीतिः पुरुषस्य न च स्येति तामनादृत्य सैत्सङ्गतेर्मोक्षसाधनत्वप्रणाड्योपपिपादयिषुस्तावत्सङ्गतिस्ततः सम्भाषणं ततः प्रश्नः ततो भगवद्गुणानुभवणं ततस्तत्रानुराग इत्येतत्पञ्चकं तावत्त्वयि सिद्धमेवत्यात अस्त्येवेति । हे राजन्मधुद्विषः पादारविन्दयोः ये गुणाः तेषामनुवादने अनुश्रवणे सदा रतिर्भवतोऽस्त्येव रतिरस्त्येवेत्यनेन तत्पूर्वभाविसङ्गत्यादिचतुष्टयमप्यस्तीत्यर्थादुक्तं भवति तेन विरत्यसम्भवात् अस्तीति सिद्धवन्निर्देशेन रत्यन्तं पञ्चकमवश्यं मुमुक्षूणां प्रथमं सम्पादनीयमित्युक्तं भवति यतः रतिः सिद्ध ततो भक्त्यन्तरमुत्तरोत्तरसाध्यं सिद्धप्रायमेवेत्यभिप्रायेणाह। येति या नैष्ठिकी अव्यभिचरिता भगवद्गुणानुवादनरतिः अन्तरात्ममनसः मलरूपं कषायं वातुरागवदनिवर्त्यं पुण्यरूपं कर्म काभृशं विधुनोति क्षपयति ॥ २० ॥

रत्यन्तरभाविसाधनजातं विवक्षुः साक्षान्मोक्षसाधनभूतउक्तविधाभक्तिरेवेत्याह । शास्त्रेष्विति । नृणां मोक्षस्य क्षेमसमीचीनसाधनविवर्णो येषु तेषु शास्त्रेषु साक्षान्निरपेक्षो हेतुसाधनम् इयानेव सुनिश्चितः एवकारेण "तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते तमेव विदित्वातिमृत्युमेति" इत्युक्तोऽन्तरोपायत्वं विवक्षितम् इयानित्युक्तः कोऽसौ तत्राह । निर्गुणे सत्त्वादिगुणरहिते आत्मनि किञ्चिवेनेत्याह ब्रह्मणि अपेक्षा गुणभूतइति ब्रह्मणीत्यनेनैव गुणत्रयराहित्यपरत्वं निर्गुणत्वम्

...प्रभृतिभिरुक्ता।

...सङ्कः समुपासनमती-

...जकजन्मसाधनस्वरूप-
साक्षात्कारलक्षणपरज्ञानजन्यभगवत्प्रीत्यतिशयरूपा परमभक्ति-
र्विवक्षिता तस्यां च दार्ढ्यं नाम चाञ्चल्यराहित्यं चाञ्चल्यं च
मध्ये मध्ये विषयान्तरानुचिन्तनरूपं तच्च विषयान्तरासक्तिजन-
कद्वारा भक्तिविरोधि चाञ्चल्यकार्यमपि निषिध्यते असङ्ग आत्म
व्यतिरिक्त इति अत एवात्मव्यतिरिक्तासङ्गस्यापि पृथग्वा रत्या
सह वा उपायत्वभ्रमो न कार्यः ॥ २१ ॥

एवं विजातीयप्रत्ययान्तराव्यवहितप्रीत्यतिशयरूपा परमभक्तिः
साक्षात् क्षेमहेतुरित्युक्तम् एवंभूता परमभक्तिः कथं निष्पद्यत
इति जिज्ञासायां तत्साधनान्युपदिशति । सेति । निर्गुणे ब्रह्मणि
या रतिः सद्गत्यनात्मनि असङ्गश्च श्रद्धादिभिः स्यात् इति यथा-
र्थेनान्वयः अत्र निर्गुण इत्यस्य पूर्ववदर्थं अनात्मनि आत्मव्यति-
रिक्ते शब्दादिविषये तस्य सदसत्त्वं नाम संनिहितासंनिहितत्वं
यद्यप्यत्र श्रद्धादीनामवश्यसम्पादनीयत्वाभिप्रायेण सम्भावित-
क्रमयाऽतिक्रममनादृत्य ते कथिताः तथापि क्रममाश्रित्यैव व्याख्या-
यते तत्र प्रथमं नित्यं योगेश्वरोपासनया योगेश्वरा योगश्रेष्ठाः "योगि-
नामपि सर्वेषामद्गतेनान्तरात्मना । श्रद्धावान् भजते यो मां स मे युक्त-
तमो मत" इत्युक्तविधया युक्ततमाः भागवतास्तेषामुपासना सेवा
तदानुकूल्येन वृत्तिः तया ततः पुण्यश्रवःकथया पुण्यश्रवसः भग-
वतः कथया भगवत्पुण्यश्रवणेनेत्यर्थः आश्रयतः स्वतश्च पुण्य-
रूपत्वख्यापनाय पुण्यश्रवःकथया पुण्ययेत्युक्तं ततः ॥ २२ ॥

अर्थेन्द्रियारामगोष्ठ्यतृष्णया अर्थारामाः अर्थपरायणाः तैः सह
गोष्ठी तस्यां या अतृष्णा अनासक्तिस्तया तेषामर्थेन्द्रियारामाणां
सम्मता अर्थाः कामाश्च तेषामपरिग्रहेण भगवद्गुणानुश्रवणेन
च भगवत एव पुरुषार्थरूपत्वमर्थकामयोस्तद्विपर्ययरूपत्वं ज्ञात्वा
तयोर्विरक्तः स्यादिति गुणानुश्रवणातृष्णयोः पौर्वापर्यं युक्तं
ततः जिज्ञासया तत्त्वहितपुरुषार्थविवित्सया ततः आचार्यवत्त-
येत्यर्थसिद्धं पुमानाचार्यवानिति वक्ष्यमाणत्वात् "आचार्यवान्
पुरुषो वेद आचार्याद्धैव हि विदिता विद्या" साधिष्ठं प्रापत्"इति
श्रुतेराचार्यवत्ताया अपि साधनत्वनिश्चयात् अनेन "परीक्ष्य
लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन तद्वि-
ज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्य-
नयोरुभयोरनुसंहितः ततः आध्यात्मिकयोगनिष्ठया आचार्यो-
पदिष्टो भगवदुपासनाय आध्यात्मिको योगः तस्मिन् या निष्ठा
मननात्मिका तया ततः श्रद्धया आध्यात्मिकयोगानुष्ठानविषयया
त्वरया एवं पूर्वकालसाधनजातमुक्तम् अथ समस्तकालसाधन-
जातमुच्यते अत्र न पौर्वापर्यं सम्भूय सर्वेषामनुष्ठानविधानात्
ततः भगवद्धर्मचर्यया भगवद्धर्मा भगवदाराधनैकवेषाः पञ्च-
महायज्ञादयो नित्यनैमित्तिकाः तेषां चर्या आध्यात्मिकयोगाङ्गत्वे-
नानुष्ठानं तया पारमहंस्या परमहंसानां सम्बन्धिनी या चर्या
ब्रह्मात्मकस्वात्मयाथात्म्यानुभवरूपा तया आध्यात्मिकयोगस्य
बालकर्मयोगाभ्यां निर्वर्त्यत्वात् विविक्तरुच्या आत्माश्रयानिमित्ता-
दुद्यानादिषु रुच्या आत्मन् आत्मनि च यः परितोषस्तेन आत्मा-
नुभवजनितसन्तोषमात्रेणैव न तु तद्व्यतिरिक्तसन्तोषेणेत्यर्थः तर्हि
किम्भगवद्गुणानुभवजनितसन्तोषोऽपि निषिध्यते नेत्याह हरे-
र्भगवतो गुणानुश्रवणस्मरणरूपं पीयूषममृतं तस्य पानात् विना
तदन्यविषयानुभवजातसन्तोषाभावेनेत्यर्थः ॥ २१ ॥

अहिंसया भूतद्रोहत्यागेन ... ... अपि शुभा-
श्रवसंकीर्तनरूपस्मृत्या तथा श्रीजीवोत्पत्त्यादिकथासु मुकुन्दकथा-
चरितानि चेष्टितानि तान्येवासवः श्रेष्ठ सीधु अमृतं तच्चरितश्रवण-
भावनास्मरणरूपामृतसुखेनेत्यर्थः यमैर्बाह्येन्द्रियनिग्रहैः, अकामै-
रन्तरिन्द्रियनिग्रहैः शमैरित्यर्थः नियमैः शौचाचारादिभिः अनि-
न्दया इतरसाध्यसाधनादीनामनिन्दया तन्निन्दायां चित्तस्य
तत्प्रावण्यप्रयुक्तचाञ्चल्यं स्यादिति भावः निरीहया देहधारणाय-
नुपयुक्तचेष्टाराहित्येन द्वन्द्वानां शीतोष्णाधिव्याध्यादीनां तितिक्षा
सहिष्णुता तया ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पृथोः कण्ठशोषणपर्यन्तं तदुक्तं श्रुत्वा निरपेक्षत्वादन्यतो
गतं तैरिति शङ्का मा भूत्सूक्तत्वात्सारत्वात कर्णसुखत्वात्प्रत्युत्तर-
यितुं शक्तत्वाच्चेति तत्र सनत्कुमारस्तं प्रत्याहेत्याह । मैत्रेय इति
मधु नाम सुखं विन्द्यादित्यादेः ॥ १७ ॥

किमाह । साध्विति । तथाहि साधूनां गतिः स्थितिरीदृशी
स्वयं विद्वानपि लोकोपकाराय प्रवर्ततइति ॥ १८ ॥

न केवलं तवैवास्मद्दर्शनेन शमस्माकमपीति भावेनाह । सङ्ग-
म इति । शम्भगवज्जिज्ञासलक्षणं सुखम ॥ १९ ॥

अत्र शिक्षणीयांशोऽस्माकं नास्तीति भावेनाह । अस्त्येवेति ।
भवतोऽस्य मधुद्विषः पादारविन्दे गुणानुवादलक्षणा रतिरस्त्ये-
व या रतिः कषायं मनः कलुषीकुर्वाणां कामं विषयतृष्णा-
लक्षणं कषेण क (१) येणेन गच्छतीति कषायं पापम् एवमुभय-
विधमन्तरात्मनो मलं किट्टं विधुनोतीत्यन्वयः अनेन हरौ रति-
रितरत्र हरिद्विष्यरतिर्विरक्तिरिति द्वयं पुरुषार्थस्य मुख्यसाधन-
मुक्तमिति ज्ञेयं तदुक्तं "रतिः परात्मनि हरावन्यत्रारतिरेव
च । पुमर्थसाधनं द्वयं नातोऽन्यन्मुख्यमिष्यत" इति ॥ २० ॥

एतदेव विशिनष्टि । शास्त्रेष्विति । सम्यग्विमृशेषु समीचीन-
विचारवत्सु कोऽसावित्यत आह । असङ्ग इति । आत्मनो व्यतिरि-
क्ते परमात्मनो भिन्ने ब्रह्मादितृणान्तवस्तुनि असङ्गो हेयलक्षणा
बुद्धिर्ब्रह्मणि परिपूर्णे निर्गुणे सत्त्वादिगुणरहिते निर्णीतान-
न्तादिगुणे वा निर्निर्णयनिषेधयोरित्यभिधानात् हरौ या रतिः
एतत् द्वयं मुख्यसाधनमित्यर्थः ॥ २१ ॥

एतादृशं साधनं कथं स्यादिति तत्साधनान्याह । तच्छ्रद्धयेति ।
तस्मिन् हरौ श्रद्धया भगवद्धर्माणां वर्णाश्रमादिविहितानां
चर्यया चरणेन जिज्ञासया ब्रह्मविचारेण आध्यात्मिकयोगोऽ
ष्टाङ्गयोगस्तन्निष्ठया पुण्यश्रवा हरिस्तस्य कथया ॥ २२ ॥

अर्थस्य देहस्य इन्द्रियाणां आरामेषु क्रीडावनेषु गुणेषु
विषयेष्वतृष्णया हेयबुद्ध्या तेषां विषयाणां संमतानां स्रक्-
चन्दनवनितादीनामपरिग्रहेणास्वीकारेण आत्मन् देहभोगविषये
परितोषोऽलंबुद्धिः ॥ २३ ॥

स्मृत्या जन्मजरादिचिन्तया सीधुसुधा पूर्वत्र कथवाक्यप्रबन्ध
इति धातोः भगवद्गुणसंदर्भशाखेण उत्तरत्र तत्कृतकंसवधादि-
पराक्रमलक्षणकर्मामृतपानेन । "अहिंसासत्यमस्तेयं ब्रह्मचर्यं दया-

---

(१) आवृत्तिमभिप्रेत्य कषायपदस्य स्वाभिमतार्थं तात्पर्यप्रदर्शि-
तार्थोऽयंकषायपदस्य ।

श्रीम[illegible]

र्जवम्। क्षमा धृतिः [illegible] वाचा सर्वभूतेषु [illegible] गिभिः। तपः सन्तोष आस्तिक्यं [illegible] सिद्धान्तश्रवणं चैव ह्रीमतिश्च जपो व्रतम्। एते तु नियमाः प्रोक्ताः" इति याज्ञवल्क्ययोगशास्त्रे अभिधानात् अभिप्राया अकपटस्मरणेन निरीहया प्रतिनिषिद्धचेष्टया ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

मूकमुत्तमप्रतिपाद्यवचनं श्रीसनत्कुमारोऽपि तस्य तथैव सिद्धान्तत्वं व्यञ्जयति तथापि तस्य तत्पृच्छायां पूर्वोक्तं हेतुद्वयमनुक्त्वा गौरवविशेषाय वक्ष्यमाणभगवदभिप्रेतान्याहितरूपहेत्वन्तरमेव योजयति च। साध्विति। अतः प्रकटो ज्ञानमयोऽर्थोऽस्मात् प्रति प्रतिपाद्यः अप्रकटो भक्तिमयस्तु भवद्विधान् प्रति इति भावः तत्र प्रथमः टीकायां स्पष्टः चरमस्त्वत्रावगन्तव्यः ॥ १७ ॥ १८ ॥

किं वक्तव्यं भवादृशां साधूनां सङ्गमः सङ्गः नृणामेव सम्मतः परमसुखप्रद इति। परन्तु तद्वक्तृश्रोतॄणामपि तादृश इत्यर्थः तत्र हेतुः। यदिति ॥ १६ ॥

यतोऽस्माभिर्यदुपदेष्टव्यं ज्ञानं ततोऽप्युत्कृष्टा या श्रीभगवति रतिः सैव त्वय्यस्ति। ततस्तत्साधनाय कामादिनाशोपदेशस्तु सुतरां पुनरुक्त एवेत्याह। अस्त्येवेति ॥ २० ॥

तथैव योजयति। शास्त्रेष्विति। किमुतप्राकृतानन्तपरमकल्याणगुणाकृष्टात्मारामगणे भगवतीत्यर्थः ॥ २१ ॥

सेति। अनुष्कम् ॥ २२ ॥

तथैवाह। विना हरेरिति ॥ २३ ॥

अनिन्द्या शास्त्रीयमार्गान्तरस्याकृतसमया अनिन्द्ययेति चित्सुखः ईश्वरध्यानेनेति च तद्व्याख्या ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सारं स्थार्थं सुष्ठु गम्भीरार्थं मितमल्पाक्षरं मधु मधुरं स्मयमान इव प्रसन्नमुख इत्यर्थः ॥ १७ ॥ १८ ॥

भो राजन्! यथैवास्मत्सङ्गो भवदभिवाञ्छितस्तथैव भवत्सङ्गोऽप्यस्मदभिवाञ्छित इत्याह। सङ्गम इति। उभयेषां सङ्गः नृणां सङ्गम्यमानानाञ्च सम्मतः अभिलषितः। सर्वेषां श्रोतृवक्तृसन्निहिततत्संसर्गान्निहितानामपि ॥ १६ ॥

किञ्च। त्वमात्मनः क्षेमं पृच्छसि तव तु क्षेमं भगवति नैष्ठिकी रतिर्विराजमानैव दृश्यत इत्याह। अस्त्येवेति। कषायं भानुरागवदनिवर्त्यमपि कामं यथेष्टं निर्मूलमेव वा विधुनोति सा रतिः सत्व सदेति कषायासम्भव उक्तः ॥ २० ॥

तदपि त्वत्प्रश्नस्योत्तरमवश्यं देयमिति क्षेमस्य हेतुं शृविवक्षाह। शास्त्रेष्विति। बहुवचनेन न कस्याप्यत्र विप्रतिपत्तिः सम्प्रतिपन्नेषु सत्स्वपि विचारतस्त्विति अविचारितशास्त्रा विप्रतिपद्यन्तां नाम किन्त्वेतिति दयामंत्रेति वस्तुत्वमेवकाराभ्यामेतदर्थस्य सारत्वं सुनिश्चितमिति न पुनरेतदर्थं शास्त्राणि पुनर्व्याख्यामीति द्योतितं

[illegible]

[illegible] विविक्तः सेवनादिति [illegible] पुण्यया कथया ॥ २२ ॥

अर्थारामा अनसंग्रहेच्छवः। इन्द्रियारामा भोगासक्तास्तैः सह या गोष्ठी तस्यामतृष्णया विरक्ति। हरेर्गुणपीयूषपाने चेत् लभ्यते तदा विविक्तत्वमिति तत आत्मपरितोषो विहाय जनसंसर्गमपि परस्मादपि गायकादेः सकाशादपि कृष्णलीलाकथां श्रवणमागच्छेदित्यर्थः ॥ २३ ॥

पारमहंस्यचर्य्यया उपशमप्रधानवृत्त्या। स्मृत्या श्रीशुकपरिषत्सदाचारधारणेन मुकुन्दस्याचरितं चरित्रं तदेव अग्र्यं सीधु मधु तेन स्वाद्यमानेनेत्यर्थः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सूक्तं शुद्धं वाक्यं तत्पूर्वोक्तम् ॥ १७ ॥

विदुषापि भवता सर्वभूतहितात्मना साधु पृष्टम् यतः साधूनां मतिः ईदृशी सर्वभूतहितकारिणी ॥ १८ ॥

उभयेषां श्रोतॄणां आचार्यवक्तॄणां च सम्मतः एतेषां संभाषणसहितः सम्प्रश्नः सर्वेषां शकुन्त्यायां वितनोति ॥ १६ ॥

क्षेमः केन भवेदिति प्रश्नः अस्माभिः क्षेमसाधनभूता वक्तुं योग्या सा मधुद्विषः पादारविन्दस्य गुणानुवादने रतिः भवतोऽस्त्येव सैवान्तरात्मनः कषायं दुर्निवर्त्यङ्गमं संसाराशक्तिलक्षणम् सङ्कल्पं विधुनोति ॥ २० ॥

नृणां क्षेमस्य भगवत्प्राप्तिलक्षणस्य मोक्षस्य शास्त्रेषु सुनिश्चितोऽर्थोऽस्ति तमाह। निर्गुणे हेयगुणरहिते आत्मनि परमात्मनि दृढा रतिः आत्मव्यतिरिक्ते परमात्मव्यतिरिक्ते असङ्गश्चेति ॥ २१ ॥

तस्याः साधनान्याह। सेति चतुर्भिः। सा श्रद्धादिभिः स्यादिति चतुर्णेन संबन्धः पुण्यश्रवसो भगवतः पुण्यया कथया च ॥२२॥

अर्थारामैरिन्द्रियारामैश्च सह या गोष्ठी तस्यामतृष्णया तत्सम्मतानां तत्सङ्गिनामपरिग्रहेणासङ्गेन च विविक्तरुच्या एकान्तवासेनेति यावत् हरेर्गुणपीयूषपानाहिता आत्मन आत्मनि परमेश्वरे यः परितोषः ध्यानेनानन्दस्थितिस्तेन ॥ २३ ॥

स्मृत्या आत्मानात्मपरमात्मरूपादिस्मरणेन च मुकुन्दाचरितमेवाग्र्यं मुख्यं सीधु इतरविस्मारकममृतं तेन हृदि भावितेन ॥ २४ ॥

भाषाटीका।

मैत्रेयजी बोले पृथु महाराज के सुन्दर मधुर बोल को सुन कुछ मन्दहास युक्त होकर सनत्कुमारजी बोले ॥ १७ ॥

सनत्कुमारजी कहने लगे कि हे महाराज आप सर्वभूतों के हितैषी विद्वान् हो सत्पुरुषों की ऐसी ही मति होती है ॥ १८ ॥

महात्मों के संग में तो पूछने वाले का तथा कहने वाले का दोनों का सम्मत है क्योंकि उनका प्रश्न उत्तर सबका कल्याण करता है ॥ १६ ॥

[illegible]गुणाभिधानेन विजृम्भमाणया ।
[illegible]सत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः ॥ २५ ॥
यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा ।
दहत्यवीर्यं हृदयं जीवकोशं पञ्चात्मकं योनिमिवोत्थितोऽग्निः ॥ २६ ॥
दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरन्तर्विचष्टे ।
परात्मनोर्यद्व्यवधानं पुरस्तात्स्वप्ने यथा पुरुषस्तद्विनाशे ॥ २७ ॥
आत्मानमिन्द्रियार्थं च परं यदुभयोरपि ।
सत्याशय उपाधौ वै पुमान् पश्यति नान्यदा ॥ २८ ॥

भाषाटीका ।

हे राजन् ! मधुसूदन भगवान् के चरण कमल के गुणों का अनुवाद करने मे जो आपकी मति है सो और को दुर्लभ है एक निष्ठावाली जो मति सो अन्तरात्मा का कषाय रूप मल को दूर करती है ॥ २० ॥

सब शास्त्रों मे सब विचारों मे इतनाही एक कल्याण का उत्तम निश्चित कर्तव्य है सो क्या कि परमात्मा से भिन्न संसार मे वैराग्य तथा प्राकृत गुण रहित ब्रह्म मे अनुराग होजाना ॥ २१ ॥

वह रति किससे होती है कि भगवद्धर्मों के आचरण करने से जिज्ञासा करनेसे अध्यात्म योग मे निष्ठा होने से योगीश्वरों की उपासना करने से और नित्य प्रति भगवान् की पवित्र कथा के श्रवण होने से ॥ २२ ॥

धन रूपादिक विषय इनमे निरत पुरुषों के सङ्ग को छोड़ने से उनके सम्मत पदार्थों के त्यागने से श्रीहरि कथामृत पान के बिना अन्य विषय मे एकान्त रुचि न होने से आत्म स्वरूप मे सन्तुष्ट होनेसे ॥ २३ ॥

हिंसा के त्यागने से परम हंस वृत्ति के धारण से आत्म हित के अनुसन्धान से भगवच्चरित्र रूपी श्रेष्ठ अमृत पान करने से कामना के त्याग से यमादिक व्रतों से निन्दा के त्याग मेसे चेष्टाओं के परित्याग से शीत उष्णा दिक के सहने से ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथयेत्यत्रोक्तमपि कथनं भक्तयन्तरङ्गत्वेन पुनरुच्यते तत्परा हरिभक्तास्तेषां कर्णपूराः कर्णालङ्कारभूता ये हरेर्गुणास्तेषामभिधानेन सदसति कार्यकारणरूपे ॥ २५ ॥

भवत्वन्यत्रासङ्ग आत्मरतिश्च ततः किमत आह । यदा निष्ठां प्राप्ता रतिर्भवति तदाचार्यवान् सन् ज्ञानवैराग्ययोर्वेगेनावीर्यं निर्वासनं सजीवस्य कोशमावरकं हृदयं पुमान्दहति कथम्भूतं पञ्चमहाभूतप्रधानं यद्वा अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च तदात्मकम् उत्थितः प्रज्वलितोऽग्निर्योनिमरणिमिव यद्वा यदा रतिराचार्यानुग्रहस्तदा ज्ञानविरागयोर्वेगेनोत्थितः साक्षात्कारोऽवीर्यं पुनः प्ररोहक्षमं यथा न भवत्येवं हृदयं दहति शोषं समानम ॥ २६ ॥

ततः किमत आह । दग्ध आशयो हृदयमुपाधिर्यस्य अतएव मुक्ताः समस्तास्तद्गुणाः कर्तृत्वादयो येन आत्मनः सकाशाद्बहिर्घटादयन्तः सुखदुःखादि नैव विचष्टे न पश्यत्येव कुतस्त्यपेक्षायां द्रष्टृदृश्यप्रतीतेरन्तःकरणहेतुत्वादित्याह । परो दृश्य आत्मा द्रष्टा तयोर्यद्व्यवधानं भेदकं पूर्वमासीत्तस्य विनाशे सति यथा स्वप्ने राजाहमित्यारोपितं सैन्यादिद्रष्टारं दृश्यं सैन्यञ्च स्वप्नावस्थानाशे न पश्यति तद्वत् ॥ २७ ॥

द्रष्टृदृश्यभेदप्रतीतेरन्तःकरण—हेतुत्वमन्वयव्यतिरेकाभ्यामुपपादयति । आत्मानमिति । आत्मानं द्रष्टारमिन्द्रियार्थं दृश्यमुभयोस्तयोः परं सम्बन्धहेतुमहङ्कारं चाशयोऽन्तःकरणे सत्येव जाग्रत्स्वप्नयोः पश्यत्यन्यदा सुषुप्तौ न तदुक्तं "दृश्यानुरञ्जितं द्रष्टृदृश्यद्रष्ट्रनुरञ्जितम् अहङ्कृत्योभयं रक्तं तन्नाशोऽद्वैततात्मन" इति ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हरेर्भगवतः तत्परा भागवतास्तेषां कर्णपूराः । कर्णालङ्कारभूताः कर्णेषु प्रवाहरूपा वा ये गुणाः गुणशब्दस्य सापेक्षत्वेऽपि सम्बन्धिशब्दत्वात् समासः तेषामभिधानेन विजृम्भमाणया भक्त्या परभक्त्या भगवद्गुणश्रवणस्मरणादेरर्थकामवैतृष्ण्यात् तत्त्वहितपुरुषार्थविविदिषाजननद्वाराचार्योपसत्तिहेतुत्वाभिप्रायेण पुण्यश्रवःकथया पुण्यया चेत्युक्तम् उपासनदशायामध्यानन्दकत्वाभिप्रायेण मुकुन्दाचरिताग्र्यशीधुनेत्युक्तम् अत्र तु आप्रयाणानुवर्तमानाहरहरभ्यासाधेयातिशयदर्शनसमानाकारं ध्यानोपासनादिशब्दवाच्यपरभक्तिजनितभगवत्स्वरूपसाक्षात्कारलक्षणपरज्ञानजन्यभगवत्प्रीत्यतिशयरूपसमाधिपरमभक्त्याद्यपरपर्यायरतिनिष्पादकत्वेऽनुग्राहकत्वाभिप्रायेण हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेनेत्युक्तमिति न पौनरुक्त्यम् ॥ २५ ॥

एवं श्रद्धादिसहकृतपरभक्तिजन्यपरज्ञानजन्यसमाध्यपरपर्यायरतेः क्षेमसाधनत्वमुपपाद्य केन प्रकारेण रतेः साधनत्वमिति विवित्सायामाह । यदेति । यदा च ब्रह्मणि नैष्ठिकी दृढा रतिः तदा आचार्यवान् आचार्यानुग्रहविषयः पुरुषः ज्ञानविरागसहकृतरत्यात्मकज्ञानवेगेन उद्रिक्तरत्येत्यर्थः हृदयं हृत्स्थानं प्राप्नुवन् जीवात्मा हृदि ह्ययमात्मेति श्रुतेः पञ्चात्मकं पञ्चभूतात्मकं जीवकोशं शरीरम् अबीजं बीजरहितं भिन्नाज्ञानरूपमूलं यथा तथा यद्वा छिन्नपुण्यपापमूलं यथा दहति सन्तापयति अज्ञानकृतपुण्यपापमूलो हि देहसम्बन्धः देहसम्बन्धनिमित्ताज्ञानमूलकपुण्यपापात्मकं

श्रीम[illegible]

कर्म्म निःशेषं [illegible]

[illegible]विस्य आत्मा [illegible]

[illegible] त्मना जीवस्य च [illegible] पुरस्तात् [illegible]

उत्थितः ज्वलितोऽग्निः योनिमरणिमिवेत्यर्थः दहत्यवीर्यमिति पाठेऽप्ययमेवार्थः देहस्य वीर्यं मतं हि पुण्यपापात्मकं कर्मैव ॥ २६ ॥

एवं देहसम्बन्धनिमित्तं पुण्यपापरूपं कर्म निःशेषं दग्ध्वा रत्या मुक्तस्य न पुनः पञ्चात्मकजीवकोशसम्बन्ध इत्याह। दग्धाशय इति। एवं दग्धाशयः दग्धशरीरः मुक्तः समस्ता गुणा देहगुणा रागादयो येन सः आत्मनः बहिर्भूतं शरीरमन्तः अन्तर्भूतं रागादिदोषजातं च न विचष्टे न पश्यति न पुनर्देहादिसम्बन्धं प्राप्नोतीत्यर्थः बहिरन्तश्च विशिनष्टि। तद्विनाशे देहविनाशे पुरस्तात्संसृतिदशायां परात्मनोर्जीवपरयोर्यद्व्यवधानं व्यवधायकं सम्बन्धज्ञानच्यावकं भवति तच्छरीरं तज्जन्यरागद्वेषादिकं च न पश्यति परात्मनोर्व्यवधानं पुरस्तादित्यनेन मुक्तजीवपरयोः सम्बन्धज्ञानप्रच्यावो नेत्युक्तं भवति स्वप्ने यथा देहं रागादिकं च पश्यति तथेत्यर्थः देहाद्यस्थिरत्वेश्वरत्वज्ञापनाय स्वप्नदृष्टान्तः ॥ २७ ॥

कुतो न पश्यति तत्राह। आत्मानमिति। आत्मानं देहमिन्द्रियार्थं शब्दादिकमुभयोर्देहेन्द्रियार्थयोर्यत्परमन्यत् भोगोपकरणभोगस्थानादिकं तत्सर्वमाशये वासनाख्ये उपाधौ सति पुमान् पश्यति नान्यथेत्यर्थः वासना करणकलेवरभोगस्थानभोगोपकरणादिषु प्रापय्यम्॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तत्परा हरिपरास्तेषां कर्णौ पूरयन्तीति कर्णपूरणाः कर्णाभरणां वा यद्धरेर्मुहुर्गुणाभिधानं तेन लिङ्गव्यत्ययश्छान्दसः यद्वा हरेर्गुणाभिधानेन विजृम्भमाणया भक्त्या कीदृश्या तत्परकर्णपूरणा एतैरुक्तैः साधनैः सदसत्कार्यकारणात्मकप्रपञ्चविषयेऽसङ्गः स्यात् प्रथमा सप्तम्यर्थे परात्मनि मुक्तप्रपञ्चस्वामिनि निर्गुणे ब्रह्मणि च रतिः स्यादित्यन्वयः यद्वा सदसतो जगतः परश्चात्मा चेति सदसत्परात्मा तस्मिन् ॥ २५ ॥

अस्तु ब्रह्मण्यसङ्गनिशिता रतिस्ततः किं तत्राह। यदेति। यदा ब्रह्मणि नैष्ठिकी सर्वोत्कृष्टा रतिरपरोक्षज्ञानलक्षणा भवति तदाचार्यवांस्तदुपदिष्टार्थसाफल्यात्सद्भक्तिमान् पुमान् ज्ञानवैराग्ययो रंहसोद्रेकेणाबीजं (१) हृदयं स्वरूपोपाधिं विना बाह्योपाधिं दहतीत्यन्वयः किमनेन जीवस्येत्यत उक्तं जीवकोशमिति जीवस्य गृहस्थानीयं तर्हि तद्दाहे जीवोऽपि दग्धः स्यादित्यत उक्तं पञ्चात्मकमिति पञ्चभूतस्वरूपमत एव प्राकृतमित्युच्यते "जीवोपाधिर्द्विधा प्रोक्तः स्वरूपं बाह्यमेव च। बाह्योपाधिर्लयं याति मुक्तावन्यस्य तु स्थितिः। सर्वोपाधिविनाशे हि प्रतिबिम्बः कथं भवेत् कथं चात्मविनाशाय प्रयत्नः सेत्स्यते क्वचित्। अपुमर्थता च मुक्तेः स्यादभावात्पुंस एव तु। ज्ञानज्ञेयाद्यभावाच्च सर्वथा नोपपद्यते तस्मादेतन्मतं येषां तमोनिष्ठा हि ते मताः" । इति वचनात् न स्वरूपबीजहृदयदाहोऽत्रार्थः किन्त्वस्वरूपोपाधेरित्यभिप्रायः तत्र दृष्टान्तमाह। योनिमिति। अरणेरुत्थितोऽग्निरिवेति ॥ २६ ॥

बीजाशयनाशे (२) तद्गुणानां ज्ञानादीनामपि नाशादात्मनो बहि-

(१) नात्रनञ्निषेधार्थः किन्तु तदन्यत्ववाचीत्यभिप्रायेणाप्रयुक्तत्तात्पर्यानुसृतंव्याख्यानमिदम्। (२) एतच्छ्लोकापरतात्पर्ययोजनां मनसि निधायैतदनुसारेणायोजयति।

[illegible]

जवनिका स्यामीयावस्था तदा यथा स्वप्ने संदिग्धज्ञानमेतदज्ञानं भवतीति तत्र तद्विनाशे बीजहृदयनाशे स्वपुरुष एवात्मनाश एवातः स्वरूपज्ञाननाशात्संसारावस्थैवोत्तमा स्यात्किञ्चित् ज्ञानस्यापि संभवादित्यर्थः उक्तावन्यथा स्वीकारे भिदा यदि न दृश्येत जीवात्मपरमात्मनोः मुक्तौ तदा विमोक्षाय को यत्नं कर्तुमर्हति। "मग्नस्य हि परे ज्ञाने किं न दुःखतरं भवेत् प्रवृत्तिधर्ममेवाहं मन्ये भरतसत्तम" । इति प्रमाणविरोध आपद्येत इति ॥ २७ ॥

अतः फलितमाह। आत्मानमिति। आत्मानं जीवमिन्द्रियार्थं शब्दादिविषयं च यदप्युभयोरात्मेन्द्रियार्थयोः परमुत्तममीश्वरतत्त्वं बीजाशयलक्षणे उपाधौ सत्येव पुमान् पश्यति अन्यथा तदभावे न पश्यतीत्यन्वयः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

ननु हरेर्गुणश्रवणादिश्चेत्तर्हि स एव पुरुषार्थः स्यात् कथं ब्रह्मज्ञानं साधनत्वेन निर्दिश्यते। उच्यते। मुमुक्षूणां [illegible] ननु तदेकपुरुषार्थिनामित्याह। हरेरिति तत्पराणां तदेकभूषणानां कर्णपूररूपाः श्लेषेण कर्णौ पूरयन्तीत्यपेक्षान्तरनाशकाश्च ये गुणास्तेषामेवान्यकर्तृकेनान्यविषयेण वाभिधानेन विजृम्भमाणा या भक्तिर्मुमुक्षामयी तयैव केवलया हि निश्चितमसङ्गो वैराग्यं निर्गुणे ब्रह्मणि च रतिः स्यादिति योज्यम् ॥ २५—३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

कथयेत्यत्रोक्तमपि कथनं भक्तावन्तरङ्गत्वेन पुनरुक्तमपते तत्परा हरिभक्तास्तेषां कर्णपूराः कर्णालङ्कारभूता ये हरेर्गुणास्तेषामभिधानेन। अनात्मनि आत्मव्यतिरिक्ते सदसति अनात्मके जगति असङ्गोऽनासक्तिः ॥ २५ ॥

ततः किं स्यादित्यत आह। यदेति। आचार्यवान् गुरुभक्तिमान् रत्युत्थयोर्ज्ञानवैराग्ययोर्वेगेन अवीर्यं निष्प्रभावं जीवस्य कोषमावरकं हृदयमहङ्कारात्मकं लिङ्गदेहं पुमान् दहति कथम्भूतं पञ्चात्मकं अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशास्तदात्मकं यथा अरणावुत्थितोऽग्निः स्वयोनिमरणिमेव दहति तथैव प्राकृतगुणेन्द्रियादौ लिङ्गदेह एव उत्थिता रतिस्तमेव दहति वह्निना काष्ठं दहतीत्युक्तौ वह्निरेव काष्ठं दहतीति बहार्थान्तिक सङ्गतिः ॥ २६ ॥

ततः किमत आह। दग्धाशयो दग्धलिङ्गदेहः। अतएव मुक्तास्त्यक्ताः समस्तास्तद्गुणाः कर्तृत्वादयो येन सः। आत्मनः अस्य बहिर्भावं शब्दस्पर्शादिकं भोग्यमर्थमन्तः शोकमोहादिकञ्च नैव विचष्टे। परात्मनोः परमात्मजीवात्मनोर्यद्देव मध्ये पुरस्तात् पूर्वं व्यवधानमासीत्तञ्च पश्यतीत्यव्यवहितं परमात्मानमेव पश्यतीत्यर्थः। यथा स्वप्ने दृष्टं स्वप्नविनाशे सति न पश्यति ॥ २७ ॥

लिङ्गदेह एव जीवस्योपाधिः स एव व्यवधानञ्चासीत्तदपास्तत्सत्त्वे तमेव पश्यति तदभावे परमात्मानमेव पश्यतीत्याह। आत्मानं भोक्तारमुपाधिधर्मभ्रान्तं जीवमिन्द्रियार्थं भोग्यञ्च परं भोगार्थं सुखदुःखञ्च आशये लिङ्गदेहे उपाधौ सत्येव पुमान्

[illegible]ति सति सर्वत्र जलादावपि पूरुषः ।
[illegible]पि भिदां पश्यति नान्यथा ॥ २९ ॥
इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः ।
चेतनां हरते बुद्धेः स्तम्बस्तोयमिव ह्रदात् ॥ ३० ॥
भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये ।
तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ॥ ३१ ॥
नातःपरतरो लोके पुंसः स्वार्थव्यतिक्रमः ।
यदध्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पश्यति न त्वन्यदा लिङ्गदेहाभावे तदा तु परमात्मानमेव पश्यतीति भावः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मुहुः पुनः पुनः तत्पराणां कर्णपूराः श्रोत्रभूषणा ये हरेर्गुणास्ते षामभिधानेन विजृम्भमाणया भक्त्या च सदसति स्थूलसूक्ष्मरूपे अनात्मनि आत्मव्यतिरिक्ते संसारे असङ्गः ब्रह्मणि परमात्मनि रतिस्तया ध्रुवानुस्मृत्यपरपर्यायया भगवद्भावप्राप्तिलक्षणः क्षेमश्च स्यात् ॥ २५ ॥

एवं श्रद्धादिसंयुक्तया भक्त्या भगवति रतिस्तया मोक्षलक्षणः क्षेम इत्युक्तमथ संक्षेपतो मुक्तिक्रममाह । यर्हीति । यदा मुक्त्यर्हे जन्मनि पुमानाचार्यवान् भवति "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् आचार्यवान्पुरुषो वेद" इत्यादिश्रुतेः । ज्ञानप्रदं गुरुं प्राप्नोतीत्यर्थः तदा तत्प्रसादलब्धज्ञानविरागयोरंहसा वेगेन ब्रह्मणि नैष्ठिकी ध्रुवानुस्मृतिलक्षणा रतिर्भवति स ज्ञानवैराग्यरतिसम्पन्नः पुमान् । अवीर्यं दुर्बलं हृदयं मनोयुक्तं जीवकोशमात्मावरकं पञ्चात्मकं पञ्चतन्मात्रात्मकं लिङ्गदेहं योनि काष्ठमग्निरिव दहति मुक्तो भवतीत्यन्वयः ॥ २६ ॥

तदा दग्धाशयः दग्ध आशयो नानावासनामयो ऽहङ्कारो यस्य सः अत एव मुक्ताः समस्ताः तद्गुणाः अहङ्कारगुणा येन सः आत्मनः सकाशात् बहिः मित्रशत्र्वादिसत्कृतमन्तर्मानापमानादि नैव विचष्टे नैव पश्यति यथा स्वप्ने मित्रशत्र्वादि बहिः तत्कृतं मानापमानादिच अन्तर्दृष्टं तद्विनाशे तु नैव विचष्टे तद्वत् । परः परमात्मा आत्मा जीवस्तयोः पुरस्तात् यद्व्यवधानम् । अन्योऽसावन्योऽहमस्मि न स वेद यथा पशुरित्यादिश्रुत्या दर्शितमत्यन्तभेदं च नैव विचष्टे ॥ २७ ॥

आत्मानं पाञ्चभौतिकं देहमिन्द्रियाणि श्रोत्रादीनि अर्थान् शब्दादीन् समाहारद्वन्द्वैकवचनम् यदुभयोरिन्द्रियार्थयोः परं विश्वे तत्र आशये नानावासनामये अहंकारे उपाधौ सति पश्यति अन्यदा तल्लयस्थाने सुषुप्त्यादौ न पश्यति मुक्तौ समूलाहंकारनाशे आत्मनो बहिरन्तर्न विचष्टे इति किमुत वक्तव्यम् ॥ २८ ॥

भाषाटीका ।

भगवत् भक्तों के कर्णों के आभूषण रूप भगवद् गुणों के सुनने से बढ़ीहुई भक्ती से संसार में वैराग्य होता है और कार्य कारण रूप प्राकृत गुण रहित परब्रह्म में रुचि होती है ॥२५॥

जब ब्रह्म में निश्चल रति होती है तब पुरुष आचार्य की शरणागती लेकर ज्ञान वैराग्य के वेग से वासना रहित हुआ लिंग शरीर पंचकोशात्मक जो है तिसको जला देता है जैसे कि काष्ठ में निकला अग्नि काष्ठ को जलावै तैसे ॥ २६ ॥

परमात्मा जीवात्मा के स्वरूप ज्ञान में व्यवधान करनेवाला जो आशय तिसके नाश होने से हृदयरूप उपाधि दग्ध होजाता है इसी से उपाधिकृत अहंकारादिक नष्ट होजाते हैं तब स्वप्न के नाश होने से जैसे स्वप्न पदार्थ नहीं दीखते हैं तैसे आत्मा के बाहिर भीतर के विकारों को नहीं देखता है ॥ २७ ॥

अन्तःकरण रूप उपाधि के रहने से पुरुष अपने आत्मा का कर्तृत्व तथा इन्द्रियों के अर्थ और इन दोनों से परे जो अहङ्कार तिसको जाग्रत स्वप्न अवस्थों में देखता है सुषुप्ति में समाधि मे नहीं देखता है ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकस्मिन्नात्मनि द्रष्टयादिभेदप्रतीतिरौपाधिकीति दृष्टान्तेन स्पष्टयति । निमित्तइति । लोकेऽपिच सर्वत्र जलदर्पणादौ भेदनिमित्ते सत्येवात्मनो बिम्बभूतस्य परस्य प्रतिबिम्बस्य च भेदं पश्यति नतु जलाद्यभावे ॥ २९ ॥

तदेवं चतुर्भिरसङ्गात्मरत्योर्मोक्षहेतुत्वमुक्तमिदानीमनात्मरतेः संसारहेतुत्वमाह । इन्द्रियैरिति चतुर्भिः । ध्यायतां गुणारोपेण स्मरतां पुंसामिन्द्रियाणि स्मृतैर्विषयैराकृष्यन्ते तैश्च मनश्चाकृष्यते विषयासक्तिं प्राप्यते तच्च बुद्धेःसकाशात्तद्धर्मं चेतनां विचारसामर्थ्यं हरति एतच्चाविवेकिना न लक्ष्यत इति दृष्टान्तेनाह तीरजः कुशादिस्तम्बो यथा मूलैस्तोयं ह्रदादपहरति तद्वत् ॥ ३० ॥

चित्तं चेतनामनु तस्यामपहृतायां स्मृतिः पूर्वापरानुसन्धानं भ्रश्यति एवं तद्रोधं ज्ञानभ्रंशमात्मन एव हेतोरात्मनोऽपह्नवं नाशं प्राहुः ॥ ३१ ॥

एवंभूतो नाशो भवतु ततश्च किमित्यत आह । यदधि यमधिकृत्यान्यस्य विषयस्य प्रियतमत्वम् आत्मनस्तु कामाय सर्वं प्रियं भवतीतिश्रुतेः तस्यात्मनः स्वेनैवयो व्यतिक्रमो ऽपह्नवस्तस्मादयः स्वार्थनाशोऽतः परतरःस्वार्थनाशो नास्ति ॥ ३२ ॥

श्रीमद्वीर[illegible]

एवं मुक्तावु[illegible]

जीवसम्बन्धज्ञा[illegible]

सम्बन्धज्ञानाभावमाह । निमित्त इति । जडे शरीरे सर्वस्मिन् जडादौ निमित्ते शरीराद्युपाधौ सति आत्मनः स्वस्य परस्य परमात्मनश्च भिदां सम्बन्धविरहं पश्यति अन्यथा उपाध्यभावे मुक्तावित्यर्थः न पश्यति यद्वा भिदां वैषम्यं पश्यति नान्यदा शरीराद्युपाधिविगमे परमसाम्याविर्भावात् वैषम्यं पश्यतीत्यर्थः ॥ २९ ॥

अत्र दृढाहंरतिर्नोत्पद्यते रतिरिति अन्तरा विषयान्तरानुचिन्तनं रतिविरोधीत्यवगम्यते तस्य च विरोधित्वं सङ्गादिजननद्वारेति सङ्गः प्रतिषिद्धः असङ्ग आत्मव्यतिरिक्ते असङ्गः सदसत्स्वात्मनि ज्ञानविरागरहस्सेति तद्विषयचिन्तनायाः सङ्गादिद्वारा रतिविरोधित्वमुपपादयति । इन्द्रियैरित्यादिना । ध्यायतां विषयचिन्तनं कुर्वतां विषयैः शब्दादिभिः आकृष्टानि यानीन्द्रियाणि तैर्मन आकृष्टं आक्षिप्तं सत् बुद्धेः पुरुषार्थतत्साधनव्यवसायात्मिकाया बुद्धेः चेतनां तत्सम्बन्धिज्ञानं पुरुषार्थतत्साधनविषयां व्यवसायरूपां बुद्धिं स्फूर्तिं हरति तत्र दृष्टान्तः स्तम्बः तीरस्थकुशादिस्तम्बः केन चिदाकृष्टो यथा तीरशैथिल्यहेतुतया ह्रदात्तोयमपि स्यावयति तद्वदिति यद्वा स्तम्बो यथा मूलं तोयं ह्रदादुपहरति । चिन्तना विषयशब्दादिविषयाक्षिप्तवाक्षेन्द्रियाक्षिप्तमनसि शब्दादिविषयेषु अन्यपरे सति मोक्षतदुपायानवसातुं बुद्धिर्न शक्नोतीत्युक्तं भवति ॥ ३० ॥

एवं व्यवसाये भग्ने सति अनुस्मृतिरुपासनं योगकालानुसन्धानं भ्रंशयति तदनुग्राहकं कालान्तरेपूपास्यसंशीलनरूपं चित्तं चिन्तनं च भ्रंशयति एवं स्मृतिक्षये उपासनाक्षये सति ज्ञानभ्रंशः स्वपरयाथात्म्यज्ञानभ्रंशो भवति तद्रोधकं ज्ञानभ्रंशकत्वयः सूरयः आत्मनः एव हेतोरात्मापह्नवम् आत्मनस्तिरोधानं प्राहुः उपासनविच्छेदादात्मरूपस्य भगवच्छेषतया न विशदावभास इत्यर्थः तथा चोक्तम्

> योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
> किं तेन न कृतं पापं चौरेणात्मापहारिणेति ॥ ३१ ॥

एतदेवाह । नात इति । आत्मनः हेतोः स्वस्य व्यतिक्रमात्स्वस्वरूपातिलङ्घनात्स्वस्वरूपं विहायात्मनोऽन्यस्य प्रेयस्त्वं शब्दादिविषयप्रेयस्त्वं यदस्ति अतः परतरः पुंसः स्वार्थव्यतिक्रमः स्वपुरुषार्थविरहः लोके नास्ति ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र दृष्टान्तमाह । निमित्त इति । जीवात्मपरमात्मनोर्भेदस्यान्वयव्यतिरेकसिद्धत्वेन प्रामाणिकत्वात्तदपलापे महासुरत्वमेव स्यादिति भावः ॥ २९ ॥

जीवपरयोः स्वरूपभेदाप्रतीतौ किं कारणमित्याशङ्क्याज्ञानमेव तत्र कारणं तदपि विषयातिसक्त्या स्यादित्याह । इन्द्रियैरिति । पुंसो मनोबुद्धेश्चेतनां बहुस्मरणशक्तिं हरत इत्यन्वयः "बहुस्मरणशक्तिस्तु चेतनेत्युच्यते बुधैरिति" वचनात् मनसो हरणे कारणानीन्द्रियाणीत्याह । इन्द्रियैरिति । हरिकथाश्रवणादियोग्यैः श्रोत्रादीन्द्रियैरात्मेवे कार्यं हेतुरित्याह । विषयाकृष्टैरिति । दृष्टान्तेन स्पष्टयति करोति स्तम्ब इति स्तम्बो जलनिर्गमद्वारम् ॥ ३० ॥

बुद्धेर्बहुस्मरणशक्तिभ्रंशे सर्वानार्था आपद्यन्त इत्याह । भ्रंश-

[illegible]

ज्ञानं भ्रंशयति तद्वस्तु ततः किं तत्राह । तद्रोधमिति । कथय आत्मनो ज्ञानस्वरूपस्य तस्य तादृशस्य ज्ञानस्य रोधं, नाशमात्मनः स्वरूपस्यापह्नवं नाशं प्राहुरित्यन्वयः ॥ ३१ ॥

अतश्च किमनिष्टमापन्नमत्राह । नात इति । पुंसः स्वार्थव्यतिक्रमः स्वप्रयोजनस्य व्यतिक्रमो नाशोऽतः स्वरूपभूतज्ञाननाशात्परतरोऽन्यतमो नाशो लोके नास्तीत्यन्वयः आत्मनो निरवयवत्वात्तन्नाशोऽनवशेषो घटादीनां सावयवत्वेन तन्नाशः सावशेषो यद्व इति विशेषद्योतनाय लोक इत्युक्तं ननु देहपुत्रादेरपि प्रेयस्त्वात्तन्नाशस्यापि महानाशत्वेन दुःखहेतुत्वात् किं ज्ञाननाशो विशिष्योच्यत इति तत्राह । यदस्तीति । आत्मनोऽन्यस्य देहपुत्रादेर्यद्यपि प्रेयस्त्वमस्ति तथापि पुत्रादेरात्मशेषत्वेन प्रियत्वात्तन्नाशस्य स्वव्यतिक्रमात्स्वरूपज्ञाननाशादाधिक्यं नास्तीति पूर्वमध्याहारेणान्वेतव्यमत एव नातः परतर इत्युक्तम् । केचिच्चात्र स्तीति पठन्ति । तत्पक्षेऽध्याहारं विनान्वयः कर्तव्यः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आत्मनः सोपाधेः आत्मापह्नवं निरुपाधेरात्मनोऽस्फूर्तिमित्यर्थः ॥ ३१ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उपाधिसत्त्व एवोपाधिधर्माध्यासः । सत्योपाधिः कर्मवशान्मानुषदेवतिर्यगादिर्भवति न तु तदभाव इत्यत्र दृष्टान्तमाह । निमित्त इति । जलतैलदर्पणचक्षुरादौ निमित्ते विद्यमान एव पुरुषः आत्मनः स्वस्य परस्यापि च भिदामुपाधेर्मध्यमोत्तमाधमभेदं पश्यति तत्र जले चाञ्चल्यं दर्पणे नैर्मल्यं चक्षुषि मालिन्यञ्च यथा पश्यति तथैव मानुषदेवतिर्यक्शरीरेषु भद्राभद्रं केवलभद्रं केवलाभद्रञ्च पश्यति नान्यदेति ज्ञानेनोपाधिनाशे तु न तथा पश्यति किन्तु परमात्मानमेव पश्यति भक्त्या उपाध्यपगमे तु एकस्मिन्नात्मनि हृदयादि-भेदे प्रतीतिरौपाधिकीति दृष्टान्तेन स्पष्टयति । निमित्त इति । लोकेऽपि सर्वत्र जलदर्पणादौ भेदनिमित्ते सत्येव आत्मनो बिम्बभूतस्य परस्य प्रतिबिम्बस्य च भेदं पश्यति न तु जलाद्यभावेन शुद्धो जीवो रतिमहिम्नैव लब्धचिद्देहानन्दविग्रहः परमात्मन एव तस्य नारायणरामकृष्णादिचिद्विलासाकारस्य षडैश्वर्यमाधुर्यवतः सौन्दर्यादिकं श्रीवदनादिभिरास्वादयेदिति मुख्यञ्च फलं द्रष्टव्यम् । तस्मिन् यथा परमहंसमहामुनीनामन्वयश्रीय चरणौ वलयन्त्यिति पूर्वोक्तेः ॥ २९ ॥

इदानीमात्मव्यतिरिक्तवस्त्वासक्तः संसारहेतुत्वमाह । इन्द्रियैरिति चतुर्भिः । ध्यातुमनिच्छतामप्यभ्यासपारवश्येनैव ध्यायतामरसयत्यपि तिष्ठतां पुंसामिन्द्रियाणि विषयैः पुत्रकलत्रादीनां शब्दस्पर्शादिभिः स्मृत्यारूढैः प्रथममाकृष्यन्ते, ततो विषयाकृष्टैरिन्द्रियैर्मन आक्षिप्तं भवति । तच्च बुद्धेश्चेतनां विचारसामर्थ्यं हरते । अवाञ्छितहरणे दृष्टान्तः स्तम्बः कुशा[illegible]तीरजः अम्बुस्तोयं ह्रदादपहरति तद्वत् ॥ ३० ॥

[illegible]र्यार्थाभिध्यानं सर्वार्थापह्नवो नृणाम् ।
[illegible]ज्ञानविज्ञानायेनाविशति मुख्यताम् (१) ॥ ३३ ॥
न कुर्यात्कर्हिचित्सङ्गं तमस्तीव्रं तितीरिषुः ।
धर्मार्थकाममोक्षाणां यदत्यन्तविघातकम् ॥ ३४ ॥
तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते ।
त्रैवर्ग्योऽर्थो यतो नित्यं कृतान्तभयसंयुतः ॥ ३५ ॥
परेऽवरे च ये भावा गुणव्यतिकरादनु ।
न तेषां विद्यते क्षेममीशविध्वंसिताशिषाम् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च चित्त चेतनामनु तस्यामपहृतायां सत्यां स्मृतिः पूर्वापरानुसन्धानं भ्रश्यति । एवं तद्रोधे ज्ञानभ्रंशमात्मन एव हेतोरात्मनोऽपह्नवं नाशं प्राहुः ॥ ३१ ॥

यद्यस्मात् आत्मनः सकाशात् अन्यस्य देहादेः प्रेयस्त्वं कीदृशमपि अधिकम् । यद्वा न विद्यते धीः परामर्शो यत्र तत्तच्च स्वेनैव स्वत एव यो व्यतिक्रमस्तस्मात् न त्वन्यदत्र कारणमित्यर्थः जीवस्य तस्याविद्यासंसर्गोऽनादिर्यादृच्छिक एवेति प्राक् प्रतिपादितम् । तस्माज्जीवात्मकः परमात्मविषयकः प्रीत्यतिशयो युज्यते । तदर्थं भक्तिरेव कर्तुमुचितेति भावः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु मुक्तौ आत्मपरमात्मनोरत्यन्तं भेदं मा पश्यतु इह कुतः पश्यतीत्यत्राज्ञानान्निमित्तात्पश्यतीत्याह । निमित्ते इति । जलादौ निमित्ते सति जले चरणाग्रे भूमौ निहिते दर्पणे च ऊर्ध्वमस्तकतयावस्थितस्यात्मनः परस्य देवदत्तादेश्चापि भिन्नां भेदं वैपरीत्यमधोमस्तकत्वमित्यर्थः पश्यति नान्यदा जलादिनिमित्ताभावे न पश्यति। एवं यावदज्ञानं तावदात्मनोऽत्यन्ततो ब्रह्मभिन्नत्वं पश्यति जाते ज्ञाने तु आत्मनो ब्रह्मात्मकत्वं पश्यतीत्यर्थः ॥ २९ ॥

एवं भगवत्परस्य मुक्तिमुक्त्वाथ तद्विमुखस्य संसारमाह । इन्द्रियैरित्यादिना । ध्यायतां विषयस्मरणपराणां मनः विषयाकृष्टैरिन्द्रियैराक्षिप्तमभिभूतं सत् बुद्धेश्चेतनां स्तम्बो ह्रदात्तोयमिव हरते ॥ ३० ॥

चित्तमनु चेतनापहारानन्तरम् स्मृतिः पूर्वापरानुसंधानं भ्रश्यति स्मृतिक्षये ज्ञानभ्रंशः ज्ञानरोधः तद्रोधं ज्ञानरोधन्तु कवयः कान्तदर्शिनः आत्मन एव हेतोः आत्मनोऽपह्नवं नाशं प्राहुः नाशशब्दार्थोऽत्र विस्मृतिः ॥ ३१ ॥

आत्मविस्मृतिरेव महती हानिरित्याह । नात इति । लोके पुंसः स्वार्थव्यतिक्रमः स्वार्थस्य हानिः अतः परतरः श्रेष्ठः नास्ति यतः कुतः यत् यं आत्मानम् अधि अधिकृत्य अन्यस्य विषयस्य प्रेयस्त्वं प्रियतमत्वं तस्यात्मनः स्वेनैव यो व्यतिक्रमः विस्मृतिस्तस्मात् आत्मार्थेऽन्यस्य प्रियत्वे श्रुतिर्मानम् "नवा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति" इति

स्मृतिश्च

आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि इति ॥ ३२ ॥

भाषाटीका ।

सर्वत्र जगत् में जल तथा दर्पणादि निमित्त रहने से अपने बिम्ब प्रति बिम्ब के भेदको पुरुष देखता है बिना निमित्तके समय पर नहीं देखता है ॥ २९ ॥

विषयों को स्मरण करने वाले पुरुषों का मन उन विषयों से खिंचजाता है तब वह मन बुद्धि मेंसे, विचार शक्तिको हर लेता है कैसे कि जैसे जलसे किनारे का कुशस्तंब जलको हरण करै तैसे ॥ ३० ॥

विचार के नष्ट होने से पूर्वापर अनुसंधान नष्ट हो जाता है उस स्मृति के नाश होने से ज्ञानका नाश होजाता है ज्ञान का नाश होना जो है तिसी को ज्ञानी जन आत्मा का नाश होना कहते हैं ॥ ३१ ॥

इस संसार में पुरुष का इस बात से दूसरा कोई स्वार्थ नाश नहीं है जोकि आत्म स्वरूप के न जानने से आत्मा से भिन्न वस्तु को प्रिय मानना है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कुत इत्यत आह । अर्थेन्द्रियार्थाभिध्यानमिन्द्रियस्यार्थः कामस्तस्याभिध्यानं सर्वार्थनाशः ज्ञानं विज्ञानञ्च परोक्षापरोक्षम् येन ध्यानेन मुख्यतां स्थावरताम् ॥ ३३ ॥

अनात्मरतेरनर्थहेतुत्वमुक्तं सङ्गस्याप्याह । नेति । यद्वस्तु धर्मादीनां विघातकं तस्मिन्सङ्गम् तमः संसारम् ॥ ३४ ॥

तुल्यवन्निर्देशात्पुरुषार्थसाम्यभ्रान्तिं वारयति । तत्रापीति कृतान्तः कालः ॥ ३५ ॥

भयसंयुतत्वमेवाह । परे ब्रह्मादयोऽवरेऽस्मदादयो गुणक्षोभादनु पश्चाद्भवन्ति ईशः कालस्तेन विध्वंसिता आशिषो येषाम् ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विषयध्यानतत्संयोगयोरनर्थकारित्वमुपसंहरति । अर्थेन्द्रियेति द्वाभ्याम् । अर्थेन्द्रियाणि शब्दाद्यर्थविषयाणि श्रोत्रादीनि तेषामर्थस्य

(१) संसित इति मुख्यतामिति च श्रीविजयध्वज तीर्थः ।

श्रीमद्विश्व[illegible]

शब्दादेरभिध्यानं [illegible]
धर्मादिसाधनभूतयागादेरपि तदेकमनस्कत्वं कामस्यास्तसर्वपुरु-
षार्थविरोधीत्युक्तं येन शब्दाद्यभिध्यानेन ज्ञानविज्ञानभ्रंशितः ज्ञानं
शास्त्रजन्यं विज्ञानमुपासनात्मकं तयोः समाहारद्वन्द्वः तस्मा-
द्भ्रंशितः मुख्यतां स्थावरतामाविशति प्राप्नोति ॥ ३३ ॥

तीव्रमनर्थकृत्तमः अज्ञानं तितीरिषुः तरितुमिच्छुः कर्हिचित्-
सङ्गं न कुर्यात् यद्विषयासङ्गनं धर्मादीनामत्यन्तविघा-
तकम् ॥ ३४ ॥

धर्मादिभिः साकं मोक्षस्य तुल्यवन्निर्देशात्तस्येतरपुरुषार्थसाम्यं
वारयति । तत्रापीति । तत्रापि चतुर्णां मध्ये मोक्ष एव एव पुरुषार्थः
आत्यन्तिकतया अन्यतमतीत्यवर्तमानतया नित्यतयेत्यर्थः इष्यते
इच्छाविषयो भवति त्रैवर्गरूपार्थः कृतान्तः कालः तद्भयसंयुतः ३५

अनित्यतामेवाह । परावरे । उत्कृष्टापकृष्टरूपा ये भावाः पदार्थाः
आब्रह्मस्तम्बपर्यन्ता गुणव्यतिकरात् गुणवैषम्यरूपस्तद्धेः अनु-
पश्चाद्भवन्ति ननु प्रलये अत एव ईशेन कालरूपेण परमात्मना
विध्वंसिता आशिषो येषां क्षेमो रक्षणं स्थिरत्वमित्यर्थः न
विद्यते इत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ तस्मान्नृणामिन्द्रियार्थानां विषयाणामभिध्यानं निरन्तरं
भावितं सर्वार्थानां सर्वपुरुषार्थानामपह्नवो विनाशहेतुः येने-
न्द्रियैरिन्द्रियार्थाभिध्यानेन ज्ञानविज्ञानात्सामान्यविशेषलक्षण-
ज्ञानाद्भ्रंसितो भ्रंशितो मुख्यतां विवेकराहित्यमाविशति प्राप्नो-
तीत्यर्थः ॥ ३३ ॥

विषयाभिध्यानस्यापि दुष्टसंसर्गो मूलकारणं स विपश्चिता
न कार्य इत्याह । न कुर्यादिति । धर्मादीनामत्यन्तविघातकमिति
यदतो विपश्चित्तीव्रतमास्तितीर्षुणा मनसा कदापि दुष्टसङ्गं न
कुर्यादित्यन्वयः न कार्यः कर्हिचित्सङ्ग इति वा पाठः तदा विप-
श्चितेति योज्यम् ॥ ३४ ॥

धर्मादिभिः सह पाठात् मोक्षस्यापि तत्तुल्यता स्यादिति
शङ्कां परिहरति । तत्रापीति । स्वपक्षपातस्वभ्यासाद्भोगार्थं व्यापृ-
तस्य तु । अधेत्ततोऽनेकशास्त्रयथार्थस्मरणोशिता । नश्यत्यतः
स्मृतेर्नाशाद्गगवत्पक्षपातिता । विनश्यत्येतेन चैवास्य अधेज्ञानावि-
पर्ययः । न च ज्ञानविपर्यासादन्यन्नाशकरं क्वचित् । सर्वस्यैतस्य
मूलं हि दुष्टसंसर्ग एव तु । दुष्टसङ्गो विरक्तस्याप्यन्यथा ज्ञान-
कारणम् । दुष्टसङ्गाद्धि विध्याम्भ आत्मत्वं मन्यतेऽबुधः । अभावं
स्वात्मनोऽन्यस्य मुक्तिं चापि निरात्मताम् । इति समाख्यास्मृति-
मिश्रव्याद्यमेवार्थो न शुकतीर्थोक्तार्थो प्राह्यः तमोहेतुत्वात्
मोक्षस्यात्यन्तिकत्वं कस्माद्विशिष्योच्यते धर्मादेरपि पुरुषार्थ-
त्वादित्यत्राह । त्रैवर्ग्य इति । त्रिवर्गसम्बन्धिपुरुषार्थः कृतान्तस्य
कालात्मनो हरेर्भ्रूविभ्रमजनितनाशलक्षणभयसंयुतो यतस्तस्मा-
दिति शेषः भविष्यन्नाशमवलोक्य नित्यमिति ॥ ३५ ॥

त्रैवर्ग्यार्थो ब्रह्मलोकादिसम्बन्धी नानित्य इति तत्राह । परा-
वरेष्विति । गुणव्यतिकरान्मूलप्रकृतेरनु अनन्तरं ये भावाः पदार्थाः
परावरे पश्यदतीतकाले ये वर्तमाना उत्कृष्टनिकृष्टलक्षणा वा
ईशस्य कालनाम्नो हरेर्भ्रूविभ्रमणविध्वंसिताशिषां विना-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नयेति चित्सुखः ॥ ३३ ॥

धर्माद्ययस्त्रयोऽप्यत्र मोक्षस्यानुकूला ग्राह्याः । धर्मस्य ह्यापवर्ग्य-
स्येत्यादि न्यायेन । तितीरिषुरित्यत्र तितीर्षुरिति क्वचित् विघा-
तनमिति गौडाः नैष चित्सुखसंमतः ॥ ३४ ॥ ३५ ॥

तत्र हेतुः पर इति सम्बन्धोक्तिः परावर इति चित्सुखः ॥३६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यत्तु अर्थस्य धनस्य इन्द्रियार्थानां विषयाणाञ्च ध्यानं तदे-
व सर्वार्थनाशः येनाभिध्यानेन ज्ञानात् विज्ञानाच्च भ्रंशितो मुख्यतां
स्थावरताम् ॥ ३३ ॥

सङ्गं धर्मशास्त्रविविक्तमेव ननु विषयासक्तिमात्रं निषि-
द्धेतरविषयासक्तिमतामेव त्रिवर्गेऽधिकारादिति केचिदाहुः सङ्गं
विषयासक्तिमात्रमेव धर्माद्यस्त्रयोऽप्यत्र मोक्षस्यानुकूला एव
ग्राह्याः धर्मस्य ह्यापवर्ग्यस्येति न्यायेन इत्यन्ये । यत् यः ॥ ३४ ॥

तत्रापि तेष्वपि मध्ये त्रैवर्ग्यः त्रिवर्गभवः ॥ ३५ ॥

भयसंयुतत्वमेवाह । परे ब्रह्मादयः अपरे इन्द्रादयश्च ये गुण-
क्षोभादनु पश्चाद्भवन्ति । ईशः कालः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विषयध्यानस्येन्द्रियैराक्षिप्तं मनो दुःखेभ्रेतमां हरतीत्यादिना
आत्माऽपह्नवहेतुत्वमुक्तमथ विषयध्यानस्य सर्वापह्नवहेतुत्वमाह ।
अर्थेति । अर्थेन्द्रियार्थाभिध्यानम् अर्थानां विषयाणामिन्द्रिया-
र्थायेन्द्रियप्रीतये यदभिध्यानं तदेव सर्वेषामर्थानां पुरुषार्थानाम-
पह्नवो नाशः येन अर्थेन्द्रियार्थाभिध्यानेन ज्ञानाद्भ्रंशितो मुख्यतां
स्थावरतां विशति ॥ ३३ ॥

अतः तमोधर्मादिसाधनदुःखं तितीरिषुः यत्रस्तु धर्मादीना-
मत्यन्तं विघातकं तत्र सङ्गं कर्हिचिदपि न कुर्यात् ॥ ३४ ॥

तेषु मोक्षो मुख्यः पुरुषार्थस्तदर्थी तद्विघातके विशेषतः
सङ्गं न कुर्यादित्याशयेनाह । तत्रापीति । कृतान्तात्कालाद्भयं तत्सं-
युतः ॥ ३५ ॥

त्रैवर्ग्यस्यार्थस्य कालभयसंयुतत्वमेवाह । परे इति । परे आमु-
ष्मिकाः अपरे ऐहिकाः किं बहुना गुणव्यतिकरात् गुणक्षो-
भादनु पाश्चात्याः ये प्राकृता भावास्तेषां क्षेमः स्वास्थ्यं न भवति
यतः ईशेन कालशक्तिना विध्वंसिता आशिषो येषाम् ॥ ३६ ॥

भाषाटीका ।

धन रूपादिकों का जो ध्यान करना है वही मनुष्यों का
सर्व नाशक है जिससे कि ज्ञान विज्ञान से छूट कर मनुष्य
स्थावर योनिको प्राप्त हो जाता है ॥ ३३ ॥

इस हेतु से जो अज्ञान के तरने को चाहता है जो पुरुष
धर्म अर्थ काम मोक्ष इनके विघातक वस्तु की आसक्ति
न करे ॥ ३४ ॥

[redacted]य तस्थुषाञ्च देहेन्द्रियासुधिषणात्मभिरावृतानाम् ।
[redacted] विश्वमविः प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि ॥ ३७ ॥
[redacted]मतया विभाति माया विवेकविधुतिः स्रजि वाहिबुद्धिः ।
तं नि[redacted]मुक्तपरिशुद्धविशुद्धतत्त्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ॥ ३८ ॥
यत्पादपङ्कजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः ।
तद्वन्न रिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवम् ॥ ३९ ॥
कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीरषन्ति ।
तत्त्वं हरेर्भगवतो भजनीयमङ्घ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम् ॥ ४० ॥

(१) (मनोमात्रमिदं विश्वं यथा स्वप्ने मनःक्रिया ।
क्रियाच वासना मात्रं सानीहायामप्रलीयते ॥ ० ॥
आत्मात्वनीहया साक्षात्स्वयञ्ज्योतिः प्रसिध्यति ।
एवं व्युदस्यात्ममायामानंस्तूपरमेन्मुनिः ॥ ० ॥
न यत्र निद्रा मूर्च्छावा नार्थदृक्च मनोरथः ।
नानुवृत्तिर्नप्रलयस्तद्ब्रह्मपरमाम्विदुः ॥ ० ॥)

भाषाटीका ।

तिन चारों में मोक्ष ही एक उत्तम पुरुषार्थ है जिससे कि धर्म अर्थ काम तो नित्य ही काल के भय से संयुक्त हैं ॥ ३५ ॥

सत्त्वादि गुणों के पीछे उत्पन्न होनेवाले ब्रह्मादिक तथा अस्मदादिक सब प्राणि जो हैं तिनके मनो रथों को ईश्वर नाश करता है तिससे इनको सुख नहीं होता है ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्माद्नात्मरतिरनर्थहेतुस्तस्माज्जगतां जङ्गमानां तस्थुषां स्थावराणां च देहादिभिरात्मभावहङ्कारेण आवृतानां हृदि यश्चकास्ति प्रकाशते तमवेहि कथं सोऽहमीति सोऽस्तीतिपाठे स एवैकोऽस्ति ततोऽन्यदसदित्यर्थः ननु जीवो हृदि चकास्ति नान्यस्तत्राह। क्षेत्रविदं जीवं तपति नियमयतीति क्षेत्रवित्तपस्तस्य भावस्तत्ता तयाऽन्तर्यामिरूपेण यद्वा क्षेत्रवित्त्वे अहं ममतास्पदे पातीति क्षेत्रवित्तपस्तेन रूपेण जीवस्तु पारतन्त्र्यान्न पाति ननु कर्म जीवं नियच्छति न साक्षिः प्रत्यक्षः तर्हि बुद्धिः न प्रत्यक्प्रातिलोम्येन चकास्ति बुद्धिस्तु पराग्विषयाकारेण तर्ह्यहंकारः न विष्वव्याप्तत्वेन सतु परिच्छिन्नः एवंभूतो यो भगवांस्तमवेहीति ॥ ३७ ॥

स्थावरजङ्गमादीनां हृदि चकास्तीत्युक्ते तेषां सत्वं तत्संबन्धादीश्वरस्य मालिन्यं च प्रसक्तं निराकुर्वन्नुद्दिष्टभक्त्या तं प्रणमति यस्मिन्निदं विश्वं सदसदात्मतयोत्कृष्टनिकृष्टभावेन कार्यकारणभावेन वा मायैव विभाति तं प्रपद्ये मायात्वे हेतुः विवेकेन विधुतिर्निराकृतिर्यस्य तत् स्रजि वहि वाह्यस्तो दृष्टान्ते नित्यमुक्तम् यतः परिशुद्धम् अतः विशुद्धं तत्त्वं सत्यमतएव प्रत्यूढाभिभूता कर्मभिः कलिला मलिना प्रकृतिर्येन तम् ॥ ३८ ॥

तमवेहीति ज्ञानमुपदिष्टं तस्य दुष्करत्वेन भक्तिमुपदिशति द्वाभ्याम् । यस्य पादपङ्कजयोः पलाशान्यङ्गुलयस्तेषां विलासः कान्तिस्तस्य भक्त्या स्मृत्या कर्माशयमहङ्काररूपं हृदयग्रन्थिं कर्मभिरेव ग्रथितम् रिक्ता निर्विषया मतिर्येषाम रुद्धः प्रत्याहृतः स्रोतोगणा इन्द्रियवर्गो यैः अरणां शरणम् ॥ ३९ ॥

ननु ब्रह्मविदाप्नोति परमितिश्रुतेः कथं यतयो नोद्ग्रथयन्तीत्युच्यते तत्राह। कृच्छ्र इति । अप्लवेशां न प्लवस्तरणोहेतुरीश ईशो येषान्तेषां महानिह तरणे कृच्छ्रः क्लेशः तेऽसुखेन योगादिनेन्द्रियवर्गमाह भवार्णवं तितीर्षन्ति तत्तस्मात् उडुपम्प्लवम् दुस्तरार्णवमित्यर्थः अर्णशब्दे वकाराभाव आर्षः यद्वा दुस्तरोदकरूपं व्यसनमित्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमविद्याकारणामनित्यत्वमुक्तम् अथ पारमहंस्यचर्यैकहेतुभूतं प्रकृतिविलक्षणस्य नित्यस्यात्मस्वरूपस्य भगवदात्मकत्वेनानुसन्धानमाह। तदिति । तत्तस्मात् हेनरेन्द्र!असवः प्राणाः धिषणात्मशब्देन ज्ञानद्वारभूतं मन उच्यते देहेन्द्रियप्राणमनोभिरावृतानां देहाद्यात्मकानामित्यर्थः तस्थुषां स्थावराणां जगतां जङ्गमानां च क्षेत्रविदः क्षेत्रज्ञाः स्थावरजङ्गमास्तथा जीवाः तपति अन्तरात्मतया नियच्छतीति तपः तस्य भावस्तत्ता तया जीवान्तरात्मतया यः हृदि स्थितः प्रत्यक् स्वस्मै भासमानः अनेन पराचोऽचेतनाद्विलक्षणं विश्वगादिः विष्वक्सर्वतः आविः प्रकाशमानः स्वरूपेण गुणैश्च व्यापक इत्यर्थः अनेन जीववैलक्षण्यमुक्तं भगवान् पूर्णषाड्गुण्यः अनेनोभयवैलक्षण्यमुक्तं चकास्ति स भगवानहमस्मीत्यवेहि भगवदात्मकोऽहमस्मीति बुध्यस्वेत्यर्थः

(१) अयमेवश्लोकः [illegible] टीकाः श्रीविजयध्वजतीर्थमते ।

श्रीमद्गीता [illegible]

यद्वा देहे द्रियप्रा[illegible]
यः [illegible] मङ्कूप्रमकाराख्ये शरीरादिके ते वानीत [illegible]
विभ्रः तस्य भावस्तत्त्वं तथा जीवरूपतथा प्रसादयोर्विशदया: प्रत्य-
ग्भूतो हृदि प्रकाशि तं जीवात्मानं स भगवानस्मीत्यबोह भग-
वद्वात्म्यहमिति बुद्ध्यस्वेत्यर्थः "तत्त्वमसि अयमात्मा ब्रह्म" इत्यादि-
वदयं सामान्यविकरण्येनानुसन्धानविरोधः शरीरविषयबुद्धिशब्दा-
दीनां शरीरिपर्यन्तत्वमाकृतिनयेन यथा गौरित्यादिवद्बोध्यम् ।३७।

ननु भगवतः क्षेत्रज्ञशरीरत्वेन तद्रूपतयावस्थितो क्षेत्रज्ञगतदो-
षप्रसक्तिर्भवेदित्याह । यांश्चमिति । क्षेत्रज्ञरूपे मायाविवेकविधुत्वे
मायायाः सकाशाज्जीवपरयोः विवेकस्तस्य विधूननहेतुः विवेक-
ज्ञानविरोधिसदसदात्मतया कार्यकारणरूपेण इदं देवमनुष्यादि
नानाविधरूपजातं त्वयि सर्वबुद्धिरिव विभाति जीवतादात्म्येन
प्रतिभातीत्यर्थः तं नित्यमुक्तपरिशुद्धविशुद्धतत्त्वं स्वतः प्रकृति-
सम्बन्धकर्मरहितस्वप्रकाशस्वरूपं तथापि प्रवृद्धकर्मकलिलप्रकृति-
प्रभृता अनादितया कूटमूलं यत्कर्म तेन कलिला मिश्रा प्रकृ
तिर्यस्य तं स्वमंसूपकर्मामिश्रनामानमित्यर्थः प्रपद्ये अनुसन्धे
यथा नृसिंहो भगवान् श्वेत इति नृसिंहमूर्तेर्भगवतः श्वेतत्वं
विग्रहद्वारकं तद्वद्व्यवधानेन एवं क्षेत्रज्ञरूपस्य भगवतः क्षेत्रज्ञ-
द्वारेव कर्मसम्बन्धाज्ञानादिकं न त्वव्यवधानेनेत्यर्थः ॥ ३८ ॥

एवं क्षेत्रज्ञशरीरत्वेनावस्थानं निर्दोषत्वं चोक्त्वा अथ स्वरूपे-
णावस्थितिमाह। यत्पादेति। यद्वा तुभ्यमुपदिष्टभगवद्भक्तियोगं सर्वे-
ऽपि मुमुक्षवोऽनुतिष्ठन्ति अतस्त्वमपि तमेवानुतिष्ठेत्याह। यत्पादेति।
तिक्तेषु भगवद्व्यतिरिक्तेषु मतिः रिक्तमतिः अभगवदात्मकत्वबु-
द्धिर्वा न विद्यते रिक्तमतिर्येषां ते अरिक्तमतयः तमेव मन्वाना
इत्यर्थः निरस्तस्रोतोगणाः निरस्तः प्रत्याहृतः स्रोतोगणाः इन्द्रि-
यवर्गो यैस्ते सन्तः माधवः यस्य भगवतः पादपङ्कजयोः पलाशा
इवाङ्कुलयस्तेषां विलासः कान्तिस्तस्याः भक्त्या कर्म च आशा-
यस्य कर्माशयम् आशायो वासनाप्रथितं स्वसम्बन्धमुद्ग्रथयन्ति
नाशयन्ति महमास्वमपि तमेव अरत्वम क्रमशो करणे त्युद सम्प्रा-
पकामित्यर्थः वासुदेवं भजस्व भगवद्भक्तिमन्तरेण संसारार्णवो
दुस्तरः ॥ ३९ ॥

अतस्तमेव भजस्वेत्युपसंहरति । कृच्छ्र इति । अपवेशा ईश्वरा-
व्यवलम्बरहिताः षड्वर्गनक्रं षडिन्द्रियवर्गग्राहं भवार्णवमिह दुःखे-
न ये तितीर्षयन्ति तर्तुमिच्छन्ति तेषां महान्कृच्छ्रः क्लेशः तस्त-
स्मात्त्वं हरेर्भगवतः भजनीयं सुखाराध्यमङ्घ्रिमुडुपं प्लवं
कृत्वा व्यसनं दुःखात्मकं दुस्तरार्णं तर्तुमशक्यं भवार्णवमुत्त
र पारं गच्छ ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(जगतो हरिच्छा बुद्धिपूर्वं सृष्ट्वा तत्प्रसादेन तस्य बन्धनि-
वृत्तिरन्यथोक्तानर्थं एवेत्याह । मनोमात्रमिति । इदं प्रत्यक्षप्रमाण-
सिद्धं विश्वं ब्रह्मादिस्तम्बपर्यन्तं हरेर्मनसामितं निर्मितं जातं
[illegible] मीयते संह्रियते मी हिंसायामिति धातोः अमात्रे अप-
रिच्छिन्ने मनसि स्थितत्वाद्वा मनोमात्रं तदुक्तम मनोमात्रं हरे-
र्यस्मात्मनसा मीयते जगदिति अत्र दृष्टान्तमाह । यथेति । केयं
क्रियमाणेति चेत् तत्राह । क्रियाचेति कर्मे हरेरिच्छया आग्रदृष्ट-

वस [illegible]
हरेरिच्छाधीनं जगतो हरेरनीहायां सृष्ट्यापाररहित्यावस्थाय
अस्वातन्त्र्यगुणसौक्ष्म्यवद्यायां जीवैः सह कार्यानुप्रवेशपूर्वकम
व्यक्ततामाप्नोति न तु [illegible] तत्तद्भावं । अनीहायामिति । यतो
हरेरिच्छाधीना जगतः स्थितिः अतो विष्णोरनीहायां जीवैः
सकलं जगदिति च ॥ ० ॥

ननु मुक्तैः कीदृशो विष्णुः प्राप्यत इति तत्राह । आत्मेति
स्वयंज्योतिर्नित्याविलुप्तप्रकाशः साक्षात्तुर्य आत्मा, जाग्रदाद्यवस्थ
नुभविनो जीवात्मना भिन्नो विष्णुरनीहया अवस्थितस्तु जाग्र
द्व्यापारशून्य एव व्याप्तरूपी प्रसिध्यति प्राप्तं मुमुक्षुभि
रिति शेषः अनीहावस्थ एवासौ मुमुक्षुभिरवाप्यत इति [illegible]
फलमाह । एवमिति । जीवपरयोरेवमुक्तभिन्नस्वस्वामिभाव
ज्ञानभूमिः विद्यापरपर्यायामात्ममायां बन्धशक्तिं व्युदस्यो
परमेश्वरमुपगम्य सुखवन्तां रतिं प्राप्य निर्मूलितसंसार
भवेदित्यर्थः एवं विज्ञानबन्धशक्तिं व्युदस्य हरिमाप्नुते प्रकृति
र्विद्या च माया च भ्रमश्चेत्यभिधीयते । बन्धशक्तिर्यथा लोको
बध्नामीत्यनिशं भुवीति च ॥ ० ॥

अनीहावस्थ एव मुमुक्षुभिःप्राप्य इत्युक्तं तत्स्वरूपमाचष्टे न
यत्रेति । निद्रा सुषुप्तिर्मूर्च्छा मोहः अथवा जाग्रत् अनुवृत्तिर्जीव-
न्मुक्तिः अनुवृत्तिरिति प्राचीनैर्जीवन्मुक्तिरुदीर्यत इति च एताः
निद्राद्यवस्थाः यत्र न सन्ति [illegible] क्तिर्व्याकुलता न अवस्थिता तद्वि-
जितात्मनो मनो अवधतो मुमुक्षुः प्राप्यं ब्रह्मेत्यन्वयः ॥ ० ॥)

ननु जीवात्मा तत्तुल्यविकारः परमात्मा च कथं ज्ञातव्य
इत्याशङ्क्य तत्त्वं विविच्योपदिशन्नाह । तत्त्वमिति । हेनरेन्द्र स्थाव-
जङ्गमयोः स्थावरजङ्गमयोरंशं विभ्राणाभिमानो दुःखः एकको
जीवोऽपि स दुःखीति श्रुतिः सर्वं इदि स्थितमवेहि इदि ह्येष
आत्मेति श्रुतेः अनेन जीवात्मनो देहे कुत्रावस्थानमिति शङ्का
परिहृतेति ज्ञायते त्वं क इति तत्राह । सोऽस्मीति । योऽहं तव सख-
शो जीवोऽस्मि तं मां (१) तदात्मा इत्यवेहि अनेन तात-
त्पर्यानमावश्यकमित्युक्तं भवति अथ जीवस्वरूपज्ञानान्तर-
मीश्वरज्ञानं प्रवदामीत्याह । अग्रेति । यः क्षेत्रविक्षेत्रज्ञः सर्वान्त-
र्यामी सर्वस्य प्रत्यक् अस्ति आभिमुख्येन प्रकाशते दुर्भेद-
शरीरस्थोऽपि तत्सम्बन्धरहिततया जीवव्यतिरिक्तो जीवस्यास्य-
स्योपकारित्वेन सान्निध्येनावभासते स भगवांस्तुभ्यं सुखादिप्रदः
श्रीनारायण इत्यवेहि तं विशानहि । जगतामिति । देहेन्द्रि-
याणां वासनः प्रकाश विषया बुद्धिश्चात्माहंकारश्चेत्येतैरावृतानां
जगतां जङ्गमानां तद्भुवां स्थावराणां च तत्त्वं सर्वसत्ताप्रद-
त्वात् तदुक्तम्

> सर्वसत्ताप्रदत्वात्तु सर्वतत्त्वं हरिः स्मृतः ।
> सर्वत्र वितनत्वाद्वा सोऽहं त्वमिति चोच्यते
> सर्वान्तर्यामिकत्वात्तु न जीवात्मतया हरिरिति च ।
> अभिमानस्त्वहंकार आत्मा चेत्यभिधीयत इति

बन्धकात्मात्माहंकारः व्यवधानेन [illegible]योऽपि यौग्यता-
पेक्षया भवेदिति वचनात् सात्त्विकानां जीवपरमेश्वराणां विशि-

१ तात्पर्यांकमिदम् ।

[illegible] मुक्तेः [illegible] [illegible]न्वय इति दर्शितं । किञ्च तत्त्वज्ञानस्य गोपनीयत्वेन परोक्षत्वस्य देवप्रीतिहेतुत्वात् "परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष" इति श्रुतेः । अतो यथा-पाठमर्थे यदन्तोऽसुरमधिकारित्वात् मोक्षशास्त्राधिकारिणा इति बुद्ध्या सन्निरस्तस्तस्य परिवर्जनीयमर्थतावलम्बनमिति तात्पर्यम् ॥३७॥

ननु मायाकल्पितपञ्चभूतात्मदेहे अहमेव सुखदुःखे अनुभवति अहमेव संसरति अहमेव मुक्तिं यात्याचार्योक्तेः । विमुक्तश्च मुच्यत इति श्रुतेश्चातो न स्वामित्वभावेनात्र प्रपत्त्यङ्गीकारो युक्त इति तत्राह । यस्मिन्निति । इदं सर्पपृथिव्यादिकमसङ्गगनादिकं जगद्-यस्मिन्भगवति आत्मतया निजस्वरूपतया विभातीति योऽयमयो-गिराडान्तः स मायाविवेकविद्युतिः मायायोगात्मप्रकृत्यभिधेययो-र्विवेकात् विजिर् पृथग्भावे इति धातोः ज्ञानदेहो हरिः पञ्च-भूतदेहो जीव इति पृथक्कृत्वाऽज्ञानाद्विधुतिर्विध्वंसो यस्यायो-गिराडान्तस्य स तथोक्तः एतदेव दृष्टान्तेन स्पष्टयति । स्रजीति । स्रजि मालाकृतौ रज्ज्वादिबुद्धिर्वा अयं भावः यथाऽज्ञातत्वा-ज्ज्ञानीद्रष्टा सर्पज्ञानमुत्पन्नं गुरूपदेशात्सर्पमात्रनिरोधनत्वाफ-लाद्यभावज्ञानाद्रज्जुस्पर्शाज्ञानाद्वा विधूयते तथा प्रमाणा-बाहुल्यदर्शनात्सत्वज्ञानोपदेष्ट्राचार्यवाक्याद्वा प्रज्ञाणो जगदात्मत्वं विधूयते नित्यमुक्तत्वादिज्ञानान्नित्यसाधारणानां सत्त्वात् प्रज्ञाणः संसारो युक्त इति एवं च यच्छब्देनोक्तं तच्छब्देन परा-मृश्य प्रपद्य इति क्रियापदेनान्वेति तमिति । जीवव्यावृत्त्यर्थं नित्य-शब्दः प्रेत्यकमभिनयति निर्मुक्तं नित्यपरिशुद्धं च नित्यवि-शुद्धं च सत्त्वमनारोपितं रूपं यस्य स च अत एव प्रत्यूढे निरस्ते कर्मपुण्यपापलक्षणमलं सत्त्वविशुद्धकलिलप्रकृतिश्च येन स तथा तं परमरूपतया आत्मनात्मानङ्गजगन्नासिकं विवेकज्ञानिना रज्जौ सर्पभावद्विधूयते तं नित्यमुक्तभावेन विरतप्रकृतिं भजेत् "न भ्रान्तिर्जगतो हरिर्न भ्रान्तिर्हरिद्वयोमते अन्योऽन्यात्मतया दृष्टि भ्रान्तिरित्यवधार्यताम् । मायेति ज्ञाननाम स्यान्मायेति प्रकृतिस्तथा ज्ञानस्वरूपं विष्णोस्तु प्रकृतिश्च हरेस्ततः एवं विवेकिनो विश्वं ब्रह्मरूपेण नेष्यते । पञ्चभूतात्मकं देहं विष्णोः पश्यन्त्ययोगिनः । तथा नयोगिराडान्तो ज्ञानदेहो यतो हरेः" इति प्रमाणबाहुल्यान्मा-यादिशब्दानामुक्त पदार्थो न दुर्वाच्यकल्पित इति निरवद्यं सर्प भावं सर्पज्ञानवत् ॥ ३८ ॥

एवं विश्वसंसारोच्छेदे कारणं हरेः सर्वोत्तमत्वज्ञानं भक्त्य-विनाभूतमतो भक्तिरेव प्रधानमित्याह । यत्पादेति । यस्य पादप-ङ्कजयोः पत्रायमाणास्वङ्गुलीषु तत्त्वं नोद्ग्रथयन्ति कुत इति हेतुगर्भविशेषणमाह । विरुद्धेति । विरुद्धमार्गाः स्रोतोगुणाः संसार-गुणा येषां ते तथोक्ताः संसारगुणानां विरुद्धत्वेन हेयत्वेन प्रती-यमानत्वादित्यर्थः संसारगुणानां विरुद्धत्वेन प्रतीतौ किं कारण-मितिचेत् नैजः सर्वगुणोत्कर्षस्वभावो दुस्त्यजः तदुक्तम् ।

नैजः सर्वगुणोत्कर्षः सर्वेभ्यो महदुच्यत

इति च अनेन तत्त्वज्ञानिषु तत्तद्गुणोत्कर्षो महत्त्वकारण-मित्युक्तम् भवति हिमतौ च ज्ञानदौर्बल्यं कारणम् ।

अनाद्यन्तं परं ब्रह्म न देवा ऋषयो विदुः ।
एकस्तद्वेद भगवान् प्रभुर्नारायणो विराडिति ॥

अनेन श्रीनारायणाते सर्वेषामिति क्रमतं सम्माव्यत इति

मुक्तिरूपं [illegible] तं भागवतमर्यं परन्तं प्रपद्येऽन्वयः ॥ ३९ ॥

संसारोत्तारहेतुत्वाङ्गकैरेव सर्वगुणोत्कृष्टत्वमित्यभिप्रेत्याह । कृच्छ्र इति । महर्षयो मकिलप्रयातरीरहिताः पङ्गुते अव भक्तो यस्मिन् स तथा तं अवार्णवं ये तितीर्षन्ति तर्तुमिच्छन्ति तेषामिह महान् कृच्छ्र इति । यस्मात्तस्मात्त्वं हरेर्भजनीयमङ्घ्रिमुडुपं नावं कृत्वा व्यसनं विविधापद्युक्तम् दुस्तरार्णवं ज्ञानमात्रं विना तर्तुम-शक्यं संसारसमुद्रमुत्तरेत्यन्वयः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्त्वमिति । मनाकृतानामिति चित्सुखः । विलपतेति सम्ब-न्धोक्तिः सोऽस्मीति तदंशत्वं नियतदधिष्ठानत्वं वा । तस्मिन् परमप्रेमास्पदत्वव्यञ्जनार्थमेवोक्तम् । सोऽस्तीतिपाठेऽपि प्रवित्त पतयेति विशेषणेन तदर्थमेव ज्ञेयं न तु विवर्त्तवादिनामिव स्थाणु-पुरुषवत् कल्पनामयमित्यभिप्रायात् ॥ ३७ ॥

यस्मिन् श्रीभगवति तं प्रपद्य इत्यनेन सोऽस्तीत्येव पाठः स्थापितः ॥ ३८ ॥

त्वदर्मीदा श्रीहरिमक्तिस्तु सर्वत्र परमश्रेयोरूपेत्याह । यत्-पादेति द्वाभ्याम् । तद्वत्तद्विमतयेति चित्सुखः ॥ ३९ ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स च केवलमोक्षो भक्तेर्गुणाभावे ऽपि निर्भेदब्रह्मज्ञान-सिद्धा स्यादित्याह । तत्तस्माज्जगतां जङ्गमानां तद्गुणां आवरा-णाञ्च देहेन्द्रियमनःप्राणबुद्ध्यहङ्कारैरावृतानां हृदि यच्चकास्ति प्रका-शते तं परमात्मानमवेहि जानीहि । ज्ञानप्रकारमाह । सोऽस्मीति भानुकिरणस्यापि भानुत्वमिव शुद्धपरमात्मकिरणोऽहं परमा-त्मैव न तु मायेति सोऽस्तीति पाठे स एकोऽस्ति नान्य इत्यर्थः । ननु जीवो हृदि चकास्ति तत्राह । विश्वकृत्सर्वतो भावेन भाति प्रकटमेव क्षेत्रविदं जीवं तपति नियमयतीति क्षेत्रवित्तपस्तस्य भावस्तत्ता तया अन्तर्यामिरूपेणेत्यर्थः । कीदृशं चकास्ति प्रत्यक् प्रतिलोमम् ॥ ३७ ॥

स्थावरजङ्गमादीनां हृदि चकास्तीत्युक्तेस्तेषां पृथक् सत्त्वं तत्सम्बन्धादीश्वरस्यापि मालिन्यं प्रसक्तं निराकुर्वन् प्रणमति यस्मिन्निदं विश्वं सदसदात्मतया उत्कृष्टनिकृष्टभावेन कार्य-कारणभावेन वा स्थितं माया विभाति मायात्वे हेतुः विवेकेनैव विधुतिर्निराकृतिर्यस्य तत् । विवेकश्चायं विश्वस्य मायिकत्वा-न्मायात्वेन मायायाश्च परमात्मनो बहिरङ्गशक्तित्वात् जीवस्य च तत्तटस्थशक्तित्वात् शक्तिशक्तिमतोर्भेदाभावमननात् निर्भेदात्म-ज्ञानमेवेति । स्रजि अहिबुद्धिर्यथेति वा शब्देन विवर्त्तवादिनां विवर्त्तवादेन वा निर्भेदात्मज्ञानसिद्धिरिति परमतञ्च दर्शितम् । तं नित्यमुक्तम् । यतः परिशुद्धं ततः यतो विशुद्धं तत्त्वं सत्त्व प्रत्यूढा अभिभूता भवति कर्मभिः कलिला मलिना प्रकृतिर्यस्मात् तं प्रपद्य इति प्रपत्तिरूपया भक्त्या विना मोक्षो न भवेदिति भक्ते-रङ्गत्वमभिव्यज्य गुणाभावो दर्शितः ॥ ३८ ॥

तदेव सा अवज्ञयेत्यादिना भक्तेः प्राधान्ये ज्ञानमिश्रया भक्त्या साध्यां मुक्तिसहितां शान्तरतिमुक्त्वा तस्य मरन्त्रेति श्लोकद्वयेन भक्तिमिश्रज्ञानसाध्यां सायुज्यमुक्तिञ्च दर्शयित्वा तमवेहि सोऽस्मीति पदैस्तस्य शुद्धदास्यभक्त्यैक स्पृहस्य तत्रारुचिमभिप्रेत्य

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी [illegible]

मुक्तेः कैवल्ये शुद्धभक्त्या तदमीप्सया साध्यं प्रेमाख्यमानुषङ्गिकमुक्तिकं चदैस्तामेव भक्तिं सर्वेभ्योत्कर्षयति । यत् पादेति द्वाभ्याम् । यस्य पादपङ्कजयोः पलाशाभ्यङ्गुलयस्तेषां विलासभक्त्या विचेष्टया खामः प्रतिक्षणवर्धमाना कान्तिर्यस्यां तया साधनरूपया भक्त्या साध्यरूपया च । यद्वा । विलासयुक्तया भक्त्या विविधाङ्गुलशिल्पया अभ्यञ्जनोद्वर्तनस्नपनसंवाहनचित्रप्रसाधनादिरूपय्येया । यद्वा । अङ्गुलीनां विलासः कान्तिस्तस्य भक्त्या स्मृत्यापीयर्थः । कर्माशयं कर्मवासनामयमहङ्कारं ग्रथितम् । येनैव ज्ञानकर्मणा तद्विपरीतेन भगवत्कर्मणा उद्ग्रथयन्ति । सन्तो वैष्णवाः तद्वत् यतयः सन्यासिनो न कुतः । रिक्ता निर्विषया अविद्यमाना मतिर्यां ते रिक्तधना इव निर्बुद्धयोऽसन्तश्चेत्यर्थः । सन्तस्तु भगवद्विषयमतयः सुबुद्धय एवेति भावः । निरुद्धो नद्यादेः स्रोतसामखेन्द्रियाणां गणो यैः । नहि स्रोतांसि निरोद्धुं शक्यानि भवन्तीति निर्बुद्धित्व चिह्नमेतदेवेति भावः । सन्तस्तु भगवत्सौन्दर्यातादिषु प्रसारितचक्षुरादीन्द्रियगणाः सुधियः सुखिनश्चेति भावः । तमरणं शरणं वसुदेवनन्दनं भज अन्यथा भरणं निःसंग्रामव अन्यथा तव इन्द्रियैः सह संग्रामो भविष्यति तत्र च त्वमेव पराभूतो भविष्यसीति भावः ॥ ३९ ॥

तैर्यतिभिः संसारतरणं न सुकरमित्याह । कृच्छ्र इति । अप्लवेशां प्लवस्तरणे हेतुः ईट् समर्थः ईशो हरिर्वा येषां तेषां महान् इह कृच्छ्रः क्लेशः । यत इन्द्रियषड्वर्गनक्रं भवार्णवमसुखेन तरीतुमिच्छन्ति न तु तरन्तीत्यर्थः । यदि कामादिनक्रैर्न हन्यमानः षडिन्द्रियनक्रैश्च न चर्व्यमाणः [illegible] तदा ज्ञानवैराग्याभ्यां कोऽपि चिरेणैव कथञ्चिदेव तेषां मध्ये कोऽपि कष्टेनैव तरतीति भावः । तस्मात्त्वं हरेरङ्घ्रिमबुध्यं प्लवं कृत्वा व्यसनं संसारदुस्तरार्णवमुत्तर । अम्भोरुहं कृत्वेति समाश्रिता ये पदपल्लवमिति त्वत्पादपोतेन महत्कृतेनेत्यादुक्तेर्हरिपदप्लवाश्रयणमात्रेणैव भवार्णवस्य गोवत्सपदप्रमाणत्वे जाते तत्तरणे खलु कः प्रयास इति प्लवारोहणं नावाकृनीयम् ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ जीवब्रह्मणोः "तत्त्वमसि क्षेत्रज्ञं चापि मां विद्धि आत्मत्वेनावगच्छन्ति ग्राहयन्ति च" इत्यादिश्रुतिसूत्रसाधितभेदसहिष्णवभेदलक्षणसामानाधिकरण्यभावनया भगवद्भजनेन संसारमुक्तरेत्याह । नादति चतुर्भिः । यस्मान्मोक्ष पदार्थं आत्यन्तिकतयेच्यते । त्रैवर्गिकोऽर्थो नित्यं कृतान्तभयसंयुतस्तस्मात् हे नरेन्द्र ! त्वं मोक्षसिद्धये जगतां जङ्गमानां तस्थुषां स्थावराणां च देहादिभिः आत्मनाहङ्कारेण चावृतानां व्याप्तानां हृदि प्रत्यक् यथाकालि प्रकाशते तं सोऽहमीत्येवेहि तदात्मकोऽस्मीति भावय ननु "शृद्व ज्ञायमानेमिति श्रुत्या" किं क्षेत्रज्ञः स इत्यत्राह । क्षेत्रविदां जीवान् तपति नियमयतीति क्षेत्रविच्छपस्तस्य भावस्तत्ता तया विभक्ष सर्वतः मायिः प्रकटः ॥ ३७ ॥

मुमुक्षुजनशिक्षार्थं श्रीपृथुं प्रत्युपविष्टा ब्रह्मात्मकत्वभावनाय स्वयमपि तथैव भावनया हरिं शरणं व्रजति भगवान् सनत्कुमारः यस्मिन्निति । तं भगवन्तम् आत्मतयोक्तश्रुतिस्मृतिसूत्रोक्तेनात्मत्वेन

[illegible] क्षिपत्येव विद्यां [illegible] ज्ञानादिभिरिति श्रुत्या ब्रह्माभिन्नत्वरूपयाम् [illegible] मं प्रति आहयित्वा स्वयं गृहीत्वा भगवत [illegible] ब्रह्मरूपयमाह । इदं प्रसिद्धं अजि अहिबुद्धिरिव [illegible] त्वमनुष्यत्वादि बुद्धिरूपं विवेकविधुति ज्ञा [illegible] न् आभाति न विभाति नास्तीत्यर्थः । त [illegible] प्रसूतकर्मकलिलप्रकृतिमिति प्रत्यूढा सर्व [illegible] कलिला मलिना प्रकृतिः स्वभावो यस्मात् [illegible] मित्यर्थः यस्मिन् सत् मुक्तत्वमसत् बद्धत्वं [illegible] लिप्यं च भविभाति तं प्रपद्ये तत्र हे [illegible] परिशुद्धविशुद्धतत्त्वमिति ॥ ३८ ॥

अहं तं प्रपद्ये [illegible] मीं त्वमपि तमेव भजेत्याह यदिति । त [illegible] रं भज ननु ज्ञानमात्रेण मुक्तिः स्यादेव [illegible] ह । यस्य पादपङ्कजयोः पलाशानि अङ्गु [illegible] हारो यत्र तस्य तदङ्गुलिसंस्पृष्टस्य देया [illegible] थवः ग्रथितमनादितः सम्बद्धं कर्माशयं [illegible] उद्ग्रथयन्ति रिक्तमतयो भक्तिरहितबुद्धयो [illegible] न्द्रियवर्गं अपि यतयः ज्ञानादिबहुसाधन [illegible] उद्ग्रथयन्ति तमाऽस्मत्वाहं प्रपद्ये त्वमपि तमेव [illegible] ३९ ॥

हरिभक्तिरहिताः [illegible] मवयन्ति भवतस्तेषाम् [illegible] र्णां नास्ति [illegible] रिविमुखानामिह भवार्णवतरणे महान् [illegible] ज्ञानवैराग्येन्द्रियदमनादिरूपः क्लेश एव [illegible] रहितेन ज्ञानादिप्रयासेन ते षड्वर्गनक्रं [illegible] तितीर्षयन्ति तस्मात्त्वं हरेः अङ्घ्रिमुद्र [illegible] दुःखरूपम् दुस्तरार्णमुत्तार्णान्तदुःखेन [illegible] मुत्तर ॥ ४० ॥

हे नरेन्द्र ! [illegible] इन्द्रिय प्राण बुद्धि अहंकार इनों से आवृत्त जो [illegible] तिनके हृदय में जो भगवान् जीवान्तर्यामी [illegible] र प्रकाश मान हैं उनको तुम जानो कि हमारे [illegible] ॥

विवेक से [illegible] या जो कि परमेश्वर में कार्य कारण रूप से ज्ञात होती है जैसे कि रस्सी में सर्प की बुद्धि वो भगवान् नित्य मुक्त हैं सब प्रकार से शुद्ध हैं ज्ञान स्वरूप हैं कर्मों से मलिन प्रकृति के दूर करने वाले हैं तिनके मैं शरण प्राप्त हूं ॥ ३८ ॥

जिनके चरण कमल के पत्ररूपी अंगुलियों की कान्ति के स्मरण से महात्माजन कर्म वासनाकि ग्रन्थियों जैसे दूर करते हैं तैसे भगवद्भक्ति से रहित सब इन्द्रियों के रोकने वाले भी योगी जन ग्रन्थियों नहीं दूर कर सकते हैं इसे आश्रयरूप वासुदेव भगवान् को भजो ॥ ३९ ॥

छैः इन्द्रिय समूह रूपी भ्रमर [illegible] ऐसा संसार रूपी समुद्र को दुःख रूपी योगाद [illegible] तरने चाहते हैं ईश्वररूपी नौका नहीं [illegible] बड़ा कठिन

॥ मैत्रेय उवाच ॥

स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा ।
दर्शितात्मगतिः सम्यक् प्रशस्योवाच तं नृपः ॥ ४१ ॥

॥ राजोवाच ॥

कृतो मेऽनुग्रहः पूर्वं हरिणाऽऽर्तानुकम्पिना ।
तमापादयितुं ब्रह्मन् ! भगवन् ! यूयमागताः ॥ ४२ ॥
निष्पादितश्च कार्त्स्न्येन भगवद्भिर्घृणालुभिः ।
(१) साधूच्छिष्टं हि मे सर्वमात्मना सह किं ददे ॥ ४३ ॥
प्राणा दाराः सुता ब्रह्मन् ! गृहाश्च सपरिच्छदाः ।
राज्यं बलं मही कोश इति सर्वं निवेदितम् ॥ ४४ ॥

[illegible] ।

है तिससे तुम भजने योग्य [illegible] के चरण को नौका करके दुस्तर संसार सागर को तरजाओ ॥ ४० ॥

श्रीधरस्वामि[illegible]दीपिका ।

आत्ममेधसा ब्रह्मविदा द[illegible]तिस्तत्त्वं यस्मै सः ॥ ४१ ॥

ब्रह्मन्निति[illegible] [illegible] यूयमित्युक्तिः सर्वो-[illegible]ति ॥ ४२ ॥

आत्मना देहेन सह सर्वं [illegible] साधूच्छिष्टं साधुभिः [illegible] मह्यं प्रसादरूपेण [illegible] स्वत्वाभावाद्गुरुदक्षि-णार्थं किम्ददे न हि पित्रा [illegible] दानरूपेण प्रत्य-र्प्यते ॥ ४३ ॥

[illegible] तदीयस्यैव समर्पणं यथा भृत्यो राज्ञे सेवादिरूपेण ताम्बूलादिकमर्पयति तथा [illegible] सर्वं निवेदितं स्वीकुरुतेत्याह । प्राणा इति ॥ ४४ ॥

श्रीमद्वीरराघवाचार्य[illegible]चन्द्रचन्द्रिका ।

आत्ममेधसा ब्रह्मविदा [illegible] सनत्कुमारेण दर्शिता आत्मनो गतिस्तत्त्वं यस्य स नृपः [illegible] सम्यक् प्रशंसां कृत्वा तं कुमारमुवाच ॥ ४१ ॥

आर्तानां तापत्रयातुराणाम् अनुकम्पिना हरिणा पूर्वं मे मह्यमनुग्रहः कृतः हे ब्रह्मन् ! भगवन् ! तमनुग्रहमापादयितुं निष्पादयितुं यूयमत्रागताः ॥ ४२ ॥

दयालुभिर्भवद्भिर्यत्समीहितं कार्त्स्न्येन निष्पादितं मद्यो-पदेष्टुं तुभ्यं मदीयं किन्देयमस्तीत्याह । साधूच्छिष्टमिति । आत्मना देहेन सह सर्वं मे मदीयं साधूनामुच्छिष्टं साधूनामनुग्रहलब्ध-मित्यर्थः अतो भवदनुग्रहाल्लब्धं भवद्भ्यः किन्ददे गुरुदक्षिणार्थं किं ददे मद्यनुग्रहात् पित्रा दत्तं पुनस्तस्मै दीयत इत्यर्थः ॥ ४३ ॥

यद्यप्येवं तथापि राज्ञे भृत्येनेव मया निवेदितं स्वीकुरुते-त्याह । प्राणा इति । [illegible] [illegible] दाराः धनानि सपरिच्छदाः सोपकरणा गृहा राज्यं बलं मही कोशः सहात्मकोशः पञ्चा-कारत्वात्कोश इत्युक्तम् यद्वा कोशः रत्नभाण्डारादिरूपः [illegible] स्तद्व्यतिरिक्तधनपरः इति शब्दः प्रकारे एवं विधमन्यत्सर्वमपि निवेदितं तुभ्यं मयेति शेषः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतः परमुपदेष्टव्यांशो नास्त्यतः परं राज्ञा किमुक्तमत्राह । स एवमिति । आत्मनो हरेर्मेधा ज्ञानं यस्य स तथा तेन मनो योगवता वा ॥ ४१ ॥

किमवोचत्तत्राह । कृत इति ॥ ४२ ॥

तदपूरणे भगवदागमनेनापि किं प्रयोजनमिति शङ्कां सा नास्तीत्याशयेनाह । निष्पादितमिति । घृणालुभिर्दयाशीलैः एव मुपकर्तृभ्यो युष्मभ्यं कापि गुरुदक्षिणा मया दातव्या तद्गुरुद-क्षिणात्वेन किं धनमात्मना देहेन सह ददे ददामि न मम किञ्चि-त्स्वाधीनमस्तीत्यर्थः राज्यादिकमस्ति चेत्सर्वं तत्साधुभ्यो दत्तं तदधीनमहं कथं दास्यामि परकीयदानाच्चौर्यमापद्यत इतिभाव-नोक्तं साधुदत्तमिति ॥ ४३ ॥

ननु तथापि साधुभिरात्मसात्कृतं राज्यादिकं तद्दातव्यमिति चेत्सत्यं तद्दातुं योग्यं चेद्दास्यामीत्याह । प्राणा इति । दारा वित्तानि ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आत्ममेधसापि दर्शिता आत्मनः स्वस्य गतिः भगवद्रूपा यस्मै सः ॥ ४१ ॥

भूतपूर्वान्तःस्वभक्तिस्थापकतत्तदभिप्रायकश्रीभगवदाविर्भाव-तदुपदेशलाभेनानुमोदते । कृत इति ॥ ४२ ॥

निष्पादितमिति वित्तसुखः । घृणालुभिरिति चित्तसुखस्यापि मतः । ननु घृणात्मभिरिति । साधुभिर्भगवद्भक्तैर्भृग्वादिभिरुच्छिष्ट-यज्ञान्ते मया दत्तं सत् निजोच्छिष्टवन्मय्येव समर्पितं वारश-मनादरणीयं किं ददे ॥ ४३ ॥

(१) साधुदत्तमि[illegible] ।

सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥ ४५ ॥

(१) स्वमेव ब्राह्मणो भुङ्क्ते स्वम्वस्ते स्वं ददाति च

तस्यैवानुग्रहेणान्नं भुञ्जते क्षत्रियादयः ॥ ४६ ॥

यैरीदृशी भगवतो गतिरात्मवाद एकान्ततो निगमिभिः प्रतिप[illegible]

तुष्यन्त्वदभ्रकरुणाः स्वकृतेन नित्यं को नाम तत्प्रतिकरोति [illegible] ४७ ॥

॥ मैत्रेयउवाच ॥

त आत्मयोगपतय आदिराजेन पूजिताः ।

शीलं तदीयं शंसन्तः खेऽभूवन्मिषतान्नृणाम्[illegible]

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

साधुभ्यो दत्तमेव विवृणोति । निवेदितं निवेदनरूपेणैव दत्तं पूर्वं तैरेव प्राणादीनां मह्यं समर्पितत्वात् ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आत्ममेधसा आत्मविदा ॥ ४१ ॥

ब्रह्मन्निति सनत्कुमारस्यैकस्य प्राधान्यात् यूयमिति सर्व्वान् प्रत्युक्तिः ॥ ४२ ॥

गुरुदक्षिणार्थं दातुं किमपि न पश्यामीत्याह। साधूच्छिष्टमिति। साधुभिर्युष्माभिरेव भृग्वादिभिः स्वीयं राज्यादिकं प्रसादीकृत्य मह्यं दत्तं कथं पुनर्दास्यामि पित्रा दत्तस्य ताम्बूलचर्वितस्य तस्मै प्रतिदानानौचित्यात् ॥ ४३ ॥

ननु साधूनां राज्यादिषु कथं स्वत्वं जातं तत्राह । प्राणा इति । अश्वमेधयागान्ते प्राणादिकं सर्व्वं मया पूर्वमेव दत्तं पुनश्च तैर्निजोच्छिष्टं मह्यमेव समर्पितमिति भावः ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मनि परमात्मनि श्रीकृष्णे मेधा यस्य तेन दर्शितात्मनः परमात्मनो गतिस्तत्त्वं यस्मै सः ॥ ४१ ॥

ब्रह्मन् इति भगवन्निति च सम्बोधनं सर्वेषां तुल्यस्वभावत्वात् यूयमिति बहुवचनं तद्बहुत्वविषयम् । तमनुग्रहमापादयितुं साधयितुम् ॥ ४२ ॥

स चानुग्रहो घृणालुभिः कृपालुभिः निष्पादितः आत्मना सह देहेन सह सर्वं राज्यादिकं साधूनामुच्छिष्टवदनपेक्ष्यमतः किं ददे ॥ ४३ ॥

यद्यप्यनपेक्षं तथापि गुरुनिष्कृत्यर्थं यदस्ति तद्देयमेवेत्याह । प्राणा इति । तत्रापि अन्यत्र दानं सम्भवति गुरुकोपिणो हरेस्तु सर्वं स्वत एवास्ति अतो भवदीयमेव प्राणादिकं सर्वं निवेदितं सर्वं निवेदितमर्पितं स्वीकुरुत ॥ ४४ ॥ ४५ ॥ ४६ ॥

मैत्रेयजी बोले आत[illegible]कुमार जी ने जब इस प्रकार आत्मका [illegible]व महाराज बड़ी प्रशंसा करके बोले ॥ ४[illegible]

महाराज बोले हे [illegible] दुःखितों पर कृपा करने वाले श्री हरिने [illegible]ा तिसी को सम्पादन करने को आप स[illegible]

आप दयालु हैं आ[illegible]के अनुग्रह की सर्व प्रकार से सिद्ध करदि[illegible] साधु महात्मों का उच्छिष्ट है तो मैं आप[illegible] ॥ ४३ ॥

हे ब्रह्मन् ! प्राण [illegible]नि सहित गृहराज्य, सेना पृथिवी अथवा [illegible] मैंने आपको अर्पण किया है ॥ ४४ ॥

श्री[illegible]पिका ।

आत्मनः स्वत्व[illegible]पत्यञ्चेति द्वाभ्याम् ॥४५॥

वस्ते परिधत्ते [illegible]तु दाने स्वतन्त्राः ॥४६॥

सत्यपि स्वत्वे [illegible]त्युपकर्तुं शक्यमित्याह । यैरिति । आत्मवादे [illegible]तो निश्चयेन निगमिभिर्वेद विद्भिः ते नित्यमन[illegible]ीनोऽञ्जल्याकर्मणा तुष्यन्तु को नाम तत्कृतमु[illegible]ीत्युदपात्रमञ्जलिभ्विना । मयाञ्जलिरेव तेभ्[illegible]नोदपात्रमुपहासास्पदम् । प्रत्युपकारे प्रवृत्त[illegible] सर्वेदित्यर्थः ॥ ४७ ॥

खेऽभूवन्नाको[illegible]।

श्रीमद्वी[illegible]त्तत्त्वचन्द्रिका ।

ननु मयोत्त[illegible]ाह । सैनापत्यम् । सेनानायकत्वं दण्ड[illegible]तथा सर्वलोकाधिपत्यं वेदशास्त्रविदर्हति[illegible] ४५ [illegible]

पतत्वेषप[illegible]व स्वमेवान्नं भुङ्क्ते स्वीय-

---

(१) अयं श्रीविजयध्वजतीर्थ मतेनास्ति ।

श्रीमद्वि[illegible]
सम्पन्नसर्वं
[illegible]

नैनस्तु [illegible] महतां संवि[illegible] ।
आप्त[illegible]मामितामानं मेन [illegible]परद्दयितः ॥ ४९ ॥
कर्माणि च यथाकालं यथादेशं यथाबलम् ।
यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतम् ॥ ५० ॥

श्रीमद्वीरराघवा[illegible]र्यकृतभागवतचन्द्रचन्द्रिका ।

मेव वस्त्रादिकं वस्ते परि[illegible] ददाति च क्षत्रियादिभ्यः तस्यैव ब्राह्मणस्यैवानुग्रहेण [illegible] क्षत्रियादयो भुञ्जते ॥ ४६ ॥

सत्यपि स्वत्वे सर्वस्वेना[illegible] न गुरोः प्रत्युपकर्तुं शक्यमित्याह । यैरिति । आत्मवादे अध्यात्मवि[illegible] एकान्ततो निश्चयेन निगमिभिः निगमानुसारिभिः यैर्युष्माभि[illegible] ईदृशी दुस्तरमहाव्यसनात्मक- संसारार्णवनिस्तरणोपायभूता [illegible] अस्माकं प्रतिपादिता ते नित्य- मनल्प करुणाः भवन्तः स्व[illegible] कर्मणा तुष्यन्तु कोनाम त्वत्कृतमुपकारं प्रति स्वयमुपक[illegible] उदपात्रं तोयाञ्जलिं विना उदकप्रदानपूर्वकमञ्जलिबन्धनमेव [illegible] प्रत्युपकार इत्यर्थः ॥ ४७ ॥

आत्मयोगं पान्ति [illegible]स्थामित्यात्मयोग- पतयस्ते सनकादयः आदिराजेन पृथुना पूजिताः सन्तः तदीयं पृथोः सम्बन्धि शीलं प्रशंसन्तो [illegible] मिषतां पश्यतां सतां खे प्रभूवन् नभाकाशमारूढा इत्यर्थः ॥ ४८ ॥

श्रीमद्विजय[illegible]पदरत्नावली ।

[illegible] सर्वं निवेदितमिति [illegible] युष्म- [illegible] मया [illegible] ॥ ४५ ॥ ४६ ॥

किं बहुना[illegible] अर्थ[illegible]मित्याह । यैरीदृशीति । निगमिभिर्वेदविकैरात्मवादे वेदान्ते एकान्ततो मुख्येन निर्णीत- त्वात् यैर्भवद्भिरीदृशी हरेर्गति[illegible] प्रतिपादिता ते यूयं स्वकृ- तेन तुष्य[illegible]न्वयः किं [illegible] तुष्य- न्विति ॥ ४७ ॥

तस्मिन्नेव वचनमन्ते तैः किमकारीत्यत आह । त आत्मेति । आत्म- योगस्यात्मयोगस्योपदेष्टृत्वेन पतयः मिषतां पश्यतां खे आकाशे ॥ ४८ ॥

श्रीमज्जीवगोस्वामि[illegible]

तत्र हेतुमाह । सैनापत्यमिति [illegible] ॥

स्वमिति । ब्राह्मणस्यैव[illegible] अन्यथा तु दोषाय स्यादिति तात्पर्यम् ॥ ४६ ॥

स्वकृतेन दीनोद्धरण[illegible]र्थः । टीकायां द्विती- यार्थे प्रत्युत विनोदपात्रं भवतीति [illegible] ॥ ४७ ॥

अथ मैत्रेय उवाचेति क्वचित् । लोकेऽत्र [illegible] चित्तसुख- स्यास्मत् ॥ ४८ ॥

श्रीमद्विश्वनाथ[illegible]

ननु सैनापत्यादिभिः किं [illegible] । सेनेति ।

मास्तु फलमेतैस्तस्य तदपि तस्यैव दानपात्रत्वात् स एव कृपया- स्मर्हातुमर्हतीति भावः ॥ ४५ ॥

यस्मादेवं तस्मात् स्वयमेवेत्याह । वस्ते परिधत्ते ॥ ४६ ॥

सत्यपि स्वत्वे सर्वस्वेनापि नैव गुरोः प्रत्युपकर्तुं शक्यमित्याह । यैरिति । आत्मवादे अध्यात्मविचारे निगमिभिर्वेदविद्भिः स्वकृतेनैव दीनोद्धारकर्म्मणा स्वाभाविकेन तत्प्रत्युपकरोति को नाम न कोऽपि उदपात्रमञ्जलिं बिभर्ति मयाञ्जलिरेव बद्ध इति भावः । यद्वा विनोदपात्रमुपहासास्पदं प्रत्युपकारे प्रवृत्तो जनो जनाना- मुपहासास्पदं भवेदित्यर्थः ॥ ४७ ॥

तेऽभूवन्नाकाशमार्गेण सत्यलोकं गताः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यैर्निगमिभिर्वेदान्तविद्भिः आत्मवादे परमात्मस्वरूपविचारे भगवतः परमात्मनः गतिस्तत्त्वमेकान्ततो मुख्यविरोधेन सिद्धा- न्तनिश्चयेनेत्यर्थः नः प्रतिपादिता ते नित्यमनल्पकरुणाः तेनैव अन- ल्पकरुणात्वगुणेन स्वकृतेन स्वकीये शिष्ये मयि कृतेन सदुप- देशद्वारा प्रकाशितेन तुष्यन्तु उदपात्राञ्जलिमात्रं विना न कस्मति करोति ॥ ४७ ॥

तेऽभूवन् आकाशे अगमन् ॥ ४८ ॥

भाषाटीका ।

सेनापति का अधिकार राजका अधिकार दण्डदाता का अधिकार सर्वलोकों का अधिकार वेदशास्त्र जानने वाले ब्राह्मण ही को होना योग्य है ॥ ४५ ॥

ब्राह्मण अपने ही पदार्थों को भोगता है अपने ही वस्त्र को पहरता है अपने ही पदार्थ को देता है ब्राह्मण के ही अनुग्रह से क्षत्रियादिक सब पदार्थ को भोगते हैं ॥ ४६ ॥

आप लोग वेदार्थ के जानने वाले हैं आपने आत्मा के प्रसंग मे अत्यन्त करके इस प्रकार का मार्ग हमको बताया है आप लोग बड़े दयालु हो अपने किये के उपकार से आपको संतुष्ट होना चाहिये और कौन ऐसा है कि जो केवल हाथ जोड़ने के बिना कुछ आपका प्रत्युपकार कर सके ॥ ४७ ॥

मैत्रेयजी बोले ये आत्म ज्ञानियों मे श्रेष्ठ मुनिजन पृथु महाराज से पूजित भये महाराज के गुणों की प्रशंसा करते हुये मनुष्यों के देखते देखते आकाश मार्ग मे चले गये ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

धुर्यो मुख्यः अध्यात्मशिक्षया संस्थितिरेकाग्रता तयात्मन्यव- स्थितः सन्नेमे ॥ ४९ ॥

ब्रह्मसात्कृतं ब्रह्मण्यर्पितं यथा भवति तथा ॥ ५० ॥

कर्माण्यसङ्ग मन्वान आत्मानं प्रकृतेः परम् ॥ ५१ ॥
गृहेषु वर्तमानोऽपि स साम्राज्यश्रियान्वितः । [illegible]
नासज्जतेन्द्रियार्थेषु निरहम्मतिरर्कवत् ॥ ५२ [illegible]
एवमध्यात्मयोगेन कर्माण्यनुसमाचरन् ॥ [illegible]
पुत्रानुत्पादयामास पञ्चार्चिष्यात्मसम्मतान् [illegible]
विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम् । [illegible]
सर्वेषां लोकपालानां दधारैकः पृथुर्गुणान् ॥ [illegible]
गोपीथाय जगत्सृष्टेः काले स्वे स्वेऽच्युतात्मक [illegible]
वह पुरुष अवश्य ही ठगा गया है आत्मद्रोही है । बड़े कठिन से जो मोक्ष प्राप्त होने योग्य मनुष्य शरीर को प्राप्त होकर भी विषय में आसक्त होता है ॥ २८ ॥

मैत्रेयजी बोले देवतों की स्त्री न के ऐसे स्तुति करने पर अर्चि महा रानी उस पति लोक को गई जिस लोक को भगवद्भक्त पृथु महाराज गये ॥ २९ ॥

इस प्रकार के प्रभाव वाले उत्तम ऐश्वर्यवान् पृथु महाराज भये उन का उत्तम चरित्र हमने आप के आगेकहा है ॥ ३० ॥

जो पुरुष श्रद्धा से सावधान होकर महापुण्य रूप इस कथा को पढ़े अथवा सुनावे सो पृथु महाराज की पदवी को प्राप्तहोय ॥ ३१ ॥

ब्राह्मण होतो ब्रह्मतेज वाला हो क्षत्रिय होतो पृथिवी का राजा वैश्यहोतो वैश्यों का पति हो शूद्रहोतो उत्तमता को प्राप्त होवे ॥ ३२ ॥

(१) संग्रामाभिमुख इति [illegible]र्थः ।

वैन्यस्य चरितं पुण्यं शृणुयाच्छ्रावयेत्पठेत् ॥ ३७ ॥
वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकम् ।
अस्मिन् कृतमतिर्मर्त्यः पार्थवीं गतिमाप्नुयात् ॥ [illegible]
अनुदिनमिदमादरेण शृण्वन् पृथुचरितं प्रथयन् विमुक्त[illegible]
भगवति भवसिन्धुपोतपादे स च निपुणां लभते रतिं म[illegible]

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे [illegible]
पारमहंस्यां संहितायां वैयासिक्यां
पृथुचरितं नाम त्रयोविंशोऽध्यायः ॥ २३ [illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यपि बहूनि फलानि भवन्ति तथापि मुक्तान्यसङ्ग एव श्रवणादि कुर्यात् ॥ ३७ ॥

महतो भगवतो माहात्म्यस्य सूचकम् । पार्थवीं पृथुसम्बन्धिनीम् पार्थिवीमिति वा पाठः ॥ ३८ ॥

प्रथयन् कीर्तयन् भवसिन्धौ पोतः पादो यस्य ॥ ३९ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नरो नारी वा एता आदरेण युक्तः त्रिःकृत्वः त्रिवारमिदमाकर्ण्य अप्रजाः सुप्रजाः विद्यारूपद्रविणबलादियुक्तपुत्रवान् भवेत् निर्धनः धनवतां मध्ये श्रेष्ठः अनभिव्यक्तकीर्तिः विपुलकीर्तिः मूर्खः ज्ञानविधुरः पण्डितो भवेत् ॥ ३३ ॥

अहित मङ्गलं ईयतेऽनेनेति तथा अमङ्गलं निवारयतीति तथा धन्यं धनसम्पादकं यशस्करम् आयुष्करं स्वर्गसाधनं कलिदोषहरम् ॥ ३४ ॥

धर्मादीनां सिद्धिं सम्यगभीप्सुभिः चतुर्णां धर्मादीनां परं कारणं साधनमेतत् चरित्रं श्रद्धयानुश्राव्यम् ॥ ३५ ॥

एतच्चरितं श्रुत्वा राजा संग्रामाभिमुखो यान् याति तस्मै अभियात्रे बलिं हरन्ति यथा राजानः पृथवे ॥ ३६ ॥

यद्यप्येवं विधानि बहूनि फलानि तथापि त्यक्तान्यफलसङ्गः भगवति भक्तिमुद्वहन्कुर्वन् ॥ ३७ ॥

वैचित्रवीर्येणां विचित्रवीर्येशालिनामभिमतं महतो भगवतो माहात्म्यस्य सूचकं वैन्यस्य चरितं शृणुयात् श्रावयेत् पठेच्च एवं चेदस्मिन् भगवति कृतमतिर्मर्त्यः पार्थिवीं पृथुना लब्धां गतिमाप्नुयात् ॥ ३८ ॥

य इदं पृथुचरितमत्यादरेण अनुदिनं शृण्वन्प्रथयन्कीर्तयन् विमुक्तान्यफलासङ्गः स मर्त्यः भवसिन्धौ पोतौ प्लवरूपौ पादौ यस्य तस्मिन् भगवति निपुणां मतिं लभेत ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्विजय[illegible]वी ।

श्रवणाद्यावृत्त्यासाधा[illegible] इति ॥ ३३ ॥

प्रतिपन्थिनिवारकं चे[illegible] तत्कथं स्यादित्यतस्तद्विशिनष्टि । इदमिति [illegible]

व्याख्यातुर्विशेषफ[illegible] चरितस्य तावत् सामर्थ्याभावे तदिच्छया[illegible]तुर्णामिति एतत्सामान्यस्वभावे किमनेनेत्य[illegible]रकृदम ॥ ३५ ॥

असकृदावृत्त्या किमि[illegible]यादित्याह । संग्रामाभिमुख इति ॥ ३९ ॥

भगवद्भक्त्यविनाभा[illegible] उक्तं फलं स्यान्नान्यथा इत्याह । मुक्तेति [illegible]

पुनस्तात्पर्यादस्मि[illegible]चित्रवीर्येति । हेविदुर! पार्थवीं पृथोर्विद्य[illegible]

तस्य चरितस्य[illegible] कथं भागवतानामुपकार्यत इति तत्राह । [illegible] व्याख्यां कुर्वन् भवसिन्धोः संसारसमु[illegible]रीभूते निपुणां श्रीहरिप्रसादजननसमर्थाम् [illegible]

इति श्री[illegible] चतुर्थस्कन्धे
श्रीमद्वि[illegible]रत्नावल्याम्
[illegible] २३ ॥

श्रीम[illegible]सन्दर्भः ।

मनुष्य इति । [illegible]रता दर्शिता ॥ ३९ ॥

इति श्री[illegible]णे चतुर्थस्कन्धे
श्रीम[illegible]मसन्दर्भस्य
[illegible] २३ ॥

श्रीमद्वि[illegible]सारार्थदर्शिनी ।

अमलां शुद्धां[illegible]दि मुक्तान्यसङ्गः त्यक्तान्यफल एव शृणुया[illegible]

हे विचित्रवी[illegible] माहात्म्यस्य [illegible] पृथूपाख्यानमिदमभि[illegible]सम्बन्धिनीम् ॥ ३८ ॥ ३९ ॥

इति सा[illegible]यां भक्तचेतसाम् ।
त्रयोवि[illegible] सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible]ः कृतः भिवारमाकर्ण्य सुप्रजा भवेत् धनवत्तमः धनव-[illegible] श्रेष्ठो भवेत् ॥ ३३ ॥

अमाङ्गल्यस्याहितस्य निवारणम् ॥ ३४ ॥

सम्यक् सिद्धिमभीप्सुभिः श्रद्धयैतदनुश्राव्यमिति सार्द्धश्लोकान्वयः ॥ ३५ ॥ ३६ ॥ ॥

उत्तमाधिकारिणमप्याह । मुक्तान्यसंग इति ॥ ३७ ॥

हे वैचित्रवीर्य ! विदुर ! महतो भगवतो माहात्म्यसूचकं वैन्यस्य चरितमभिहितं [illegible]मस्मिन् चरिते पार्थवीं पृथुसंबन्धिनीं गम्यते इति गतिस्तां भगवद्गत्यप्राप्तिम् ॥ ३८

प्रथयन् कीर्तयन् भवसिन्धोः पोतस्तारकः पादो यस्य तस्मिन् गम्यते अनया इति गतिर्भक्तिस्ताम् ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोविंशाध्यायार्थप्रकाशः ॥ २३ ॥

भाषाटीका ।

नर अथवा नारी आदर से तीन बार यदि इस को श्रवण करेतो अपुत्री पुत्रवान् हो निर्धन धनीहो विना कीर्तिवाला कीर्तिमान् मूर्ख हो तो पंडित होजावे ॥ ३३ ॥

यह चरित्र मनुष्यों का कल्याण कारक है अमङ्गलनाशक है धनदायक है यशदायक है आयुदायक है स्वर्गदायक है कलिमलनाशक है ॥ ३४

धर्म अर्थ काम मोक्ष की अच्छि सिद्धि चाहने वालों को श्रद्धा से इसका श्रवण करना चाहिये यह चारों की सिद्धि का कारण है ॥ ३५ ॥

विजय को उद्यत होकर राजा जिनके सन्मुख जाय वे सब शत्रु राजा इसी का पूजा भेट करते हैं जैसे पृथु जी को करते थे ॥ ३६ ॥

पृथु महाराज के पवित्र चरित्र को जो सुने सुनावे पढे पढावे सो भगवान् में निर्मल भक्ति को प्राप्त होकर अन्य विषयों से विरक्त रहे ॥ ३७ ॥

हे विदुर ! महापुरुषों के माहात्म्य के जनाने वाला यह चरित्र है जो मनुष्य इस में बुद्धि को लगावेगा सो पृथु महाराज की गति को प्राप्त होगा ॥ ३८ ॥

जो मनुष्य फल की इच्छा छोडकर इस पृथु चरित्र को सुने फैलावे सो मनुष्य संसार सागर के नौका जो भगवान् तिन में सुन्दर प्रीति को प्राप्त होजावे ॥ ३९ ॥

इति श्रीभागवत चतुर्थस्कन्ध त्रयोविंशाध्यायका
भाषानुवाद लक्ष्मणाचार्य कृत
समाप्त ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

———:*:———

॥ चतुर्विंशोऽध्यायः ॥

—○:*:○—

॥ मैत्रेय उवाच ॥

विजिताश्वोऽधिराजासीत् पृथुपुत्रः पृथुश्रवाः ।
यवीयोभ्योऽददात्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः ॥
हर्यक्षायादिशत्प्राचीं धूम्रकेशाय दक्षिणाम् ।
प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः ॥ ॥
अन्तर्धानगतिं शक्राल्लब्ध्वान्तर्धानसंज्ञितः ।
अपत्यत्रयमाधत्त शिखण्डिन्यां सुसम्मतम् ॥
पावकः पवमानश्च शुचिरित्यग्नयः पुरा ।
वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः ॥४ ॥
अन्तर्धानो नभस्वत्यां हविर्धानमविन्दत ।
य इन्द्रमश्वहर्तारं विद्वानपि न जघ्निवान् ॥
राज्ञां वृत्तिं करादानदण्डशुल्कादिदारुणाम् ।
मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह ॥
तत्रापि हंसं पुरुषं परमात्मानमात्मदृक् ।
यजंस्तल्लोकतामाप कुशलेन समाधिना
हविर्धानाद्धविर्धानी विदुरासूत षट् सुतान्
बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम्
(१ बर्हिषत्सुमहाभागो हाविर्धानिः प्रजापतिः
क्रियाकाण्डेषु निष्णातो योगेषु च कुरू
यस्येदं देवयजनमनुयज्ञं वितन्वतः ।
प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम्

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशभिरध्यायैः पृथोश्चरितमीरितम् ।
प्रचेतसामथाष्टाभिस्तन्मध्ये पञ्चभिः पितुः ॥ १ ॥
चतुर्विंशे प्रपौत्राणां पृथोः प्राचीनबर्हिषः ।
प्रचेतसां शिवस्तेभ्यो रुद्रगीतं च वर्ण्यते ॥ २ ॥

अधिराज आसीदित्यर्थः । यवीयोभ्यः कनिष्ठेभ्यः काष्ठा दिशः ॥ १ ॥

तुर्यां चतुर्थीमुत्तरां दिशम् ॥ २ ॥

लब्ध्वा पृथोरश्वमेधेऽश्वविजयावसरे ॥ ३ ॥

अपत्यत्रयमेवाह
त्पन्नाः सन्तो योगग
नभस्वत्यामन्य
इति एतेन शक्राद
स अन्तर्धानो
त्मिकां मन्यमानो
हन्ति स्थानां
तद्रूपेण समाधिन
हाविर्धानिर्हवि

यः शापस्तस्मान्मनुष्येषू-
४ ॥
न्तर्धानस्य विशेषणम् य
रणमुक्तम् ॥ ५ ॥
नादिभिर्दारुणां परपीडा-
रुषं सूर्यम् । कुशलं पुण्यं
षु च प्राणायामादिषु ॥ ६॥

(१) महाबाहो इति श्री वीरराघवः ।

श्रीधरस्वामिकृतभावार्थदीपिका

[illegible] क्रियाकाण्डनिष्णातत्वमाह । यस्येति । इदं वसुधातलं देव-[illegible]नं यज्ञवाटं वितन्वतः यत्रैको यज्ञः कृतस्तत्समीप एव यज्ञान्तरं कुर्वतः सतः अत एव प्राचीनबर्हिरित्युच्यते ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं कार्त्स्न्येन पृथुचरितमभिधाय तत्सन्ततिं तच्चरित्रं चाभिधातुमुपक्रमते मुनिः । विजिताश्व इति । विजिताश्वः पृथोः पुत्रः विपुलकीर्तिः अधिर[illegible] [illegible]रभ्रातृभ्यस्तत्रो विजिताश्वः यवीयोभ्यः कनिष्ठेभ्यः भ्रातृभ्यः काष्ठा दिशः प्रादात् ॥ १ ॥

कां काष्ठां कस्मै प्रदादित्याह । हर्यक्षाय प्राचीं दिशं धूम्रकेशाय दक्षिणां दिशं वृकसंज्ञाय प्रतीचीं दिशं तुरीयाय चतुर्थीमुदीचीं दिशं द्रविणसे विभुर्विजिताश्वः अदिशद्दत्तवान् ॥ २ ॥

पृथोरश्वविजयावसरे [illegible]कादन्तर्धानगतिं तिरोधानगतिं लब्ध्वा अन्तर्धानसंज्ञितः [illegible]ख्योऽभूत् विजिताश्वस्यैव अन्तर्धान इति नामान्तरमित्यर्थः अन्तर्धानसंज्ञितो विजिताश्वः शिखण्डिन्यां सुसम्मतमपत्यत्रयमाधत्त उत्पादयामास ॥ ३ ॥

अपत्यत्रयमेवाह । पावक इति । पुरा यो वसिष्ठस्य शापः तस्मात् त्रयोऽग्नयः गार्हपत्याहवनीयदक्षिणाग्नयः पावकादिरूपेण मनुष्येषूत्पन्नास्ते [illegible] [illegible]मिहित्वं प्राप्ताः आहवनीयत्वादेः संस्कारकेरूपत्वात्तेषां [illegible]स्यनर्हत्वात्तदभिमानिदेवतानामुत्पत्तिरत्र विवक्षिता ॥ ४ ॥

नभस्वत्यामन्यस्यां भार्यायामन्तर्धानो विजिताश्वः हविर्धानं पुत्रं लेभे अन्तर्धानं विजि[illegible] यः अन्तर्धानोऽश्वहर्तारं विद्वान् जानन्नपि न जघ्निवान् एतेन शक्रादन्तर्धानगतिलाभे कारणमुक्तम् ॥ ५ ॥

राज्ञां वृत्तिं करादानदण्डशुल्कादिभिरतिदारुणां परपीडात्मिकां मन्यमानः दीर्घसत्रानुष्ठान[illegible]न विससर्जेत्याश्चर्यम् ॥ ६ ॥

तत्रापि दीर्घसत्रेऽपि हंसं [illegible] [illegible] हन्तीति हंसं शुद्धं वा परमात्मानं पुरुषं परमपुरुषमात्म[illegible] प्रकृतिविलक्षणज्ञानात्मकस्वात्मयाथात्म्यज्ञानी सन् यजन् [illegible]न विघ्नानुपहतेन समाधिना भगवल्लोकमवाप ॥ ७ ॥

हे विदुर ! हविर्धानादन्तर्धान[illegible] हविर्धानी तद्भार्या बर्हिषदादीन् षट्सुतान् असूत ॥ [illegible] ॥

हे महाबाहो ! हाविर्धानिः हवि[illegible]पत्यं बर्हिषत् प्रजापालनपरः क्रियाकाण्डेषु योगेषु [illegible] [illegible]णातः निष्ठितोऽभूत् हे कुरूद्वह ! ॥ ९ ॥

क्रियाकाण्डेषु निष्णातत्वमेवाह [illegible]यस्येति । इदं वसुधातलं देवयजनं यज्ञवाटं वितन्वतः यत्र [illegible] एको यज्ञः कृतस्तत्समीप एव देशे पुनर्यज्ञान्तरं कुर्वतः प्र[illegible]गैः कुशैः कृत्स्नं वसुधातलमास्तृतमासीत् अत एव प्राचीन[illegible]रित्युच्यते ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृत[illegible] [illegible]वली ।

ईश्वराज्ञामनभिज्ञेनमोक्षमि[illegible] [illegible]भाविस्वतो मोक्षसिद्धये ब्रह्मज्ञानोपदेशप्रकारो [illegible] [illegible]तज्जुषां देवानामुत्तमाधिकारित्वं चेति द्वयमस्मि[illegible] [illegible]च्यते तत्रादावेतस्योपोद्घातमाह । विजिताश्व इति । [illegible] ॥ १ ॥

दुर्वीं मुदीचीमुत्तराम् ॥ २ ॥

अन्तर्धानगतिमदृश्यविद्याम् नाम्ना शिखण्डिन्यां भार्यायाम् ॥ ३ ॥

पुरा पूर्वजन्मनि । अग्नीनां मनुष्ययोनावुत्पत्तौ निमित्तमाह । वसिष्ठेति । तत्कृत्यमाह । पुनरिति ॥ ४ ॥

अन्तर्धानो विजिताश्व एव । तं विशिनष्टि । य इन्द्रमिति ॥ ५ ॥

कर्माधिकारे स्थितस्य तस्य सन्न्यासप्रकारं वक्ति । राज्ञामिति ॥ ६ ॥

भगवदर्पणक्रियया क्रियमाणस्य कर्मणा उत्पन्नज्ञानफलमाह । तत्रापीति । हंसं निर्मलम् ॥ ७ ॥ ८ ॥

हविर्धानपुत्रो बर्हिष्मत्कर्मकाण्डेषु प्रवर्तमानो निवृत्तिमार्गाविरोधेनोभयत्र निष्णातोऽभूदित्याह । बर्हिष्मस्विति ॥ ९ ॥

तत्र क्रियाकाण्डनैष्णात्यं विशदयति । यस्येति । अनेन प्राचीनबर्हिरिति नामध्वनयति देवयजनं यज्ञक्षेत्रम् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

राज्ञामिति । साक्षात्यागे राजमर्यादाभङ्गः स्यादिति भावः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पृथोः प्रपौत्रात् प्राचीनबर्हिषो ये प्रचेतसः ।
चतुर्विंशे रुद्रगीतं त आपुरिति कीर्त्यते ॥

अधिराजा अधिराजः यवीयोभ्यः स्वकनिष्ठेभ्यः ॥ १ ॥ २ ॥

लब्ध्वा पितुरश्वमेधीयाश्वविजयावसरे इन्द्रात् अन्तर्धाननामा ॥ ३ ॥

योगगतिमाप्तिमम ॥ ४ ॥

नभस्वत्यामन्यस्यां भार्यायां योऽन्तर्धानः । विद्वानपि न जघ्निवानिति शक्रादन्तर्धानगतिलाभे कारणम् ॥ ५ ॥

योऽन्तर्धानो राज्ञां वृत्तिं विससर्ज । कुतः करादानादिभिर्दारुणां मन्यमानः ॥ ६ ॥

अत्रापि दीर्घसत्रेऽपि कर्मकुर्वन्नपि हंसावतारं यजन् तस्य लोकएव लोको वासस्थानं यस्य मृगेक्षणातिवत् समासः तस्य भावस्तत्ता ताम् हन्ति स्वानां क्लेशमिति हंसस्तं पुरुषं पूर्णम् ॥ ७ ॥ ८ ॥ ९ ॥

यस्येदं वसुधातलं कुशैरास्तृतमाच्छादितमासीदिति । पृथिव्यां तादृशं स्थलं नासीद्यत्र तेन यज्ञः कृतो नासीदित्यत एव स प्राचीनबर्हिरित्युच्यत इति भावः । तत्राप्यनुयज्ञं प्रति यज्ञमेवं देवानां सर्वेषामेव यजनं वितन्वतः विस्ताय्यं मुख्यकल्पेनैव कुर्वतः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवमेकादशभिरध्यायैः पृथुचरितमुक्त्वाऽथाष्टाभिस्तत्पुत्रपौत्रादिचरितमाह तत्र चतुर्विंशे विजिताश्वादिगुणवर्णनपूर्वकम् रुद्रगीतं वर्ण्यते । विजिताश्वः पृथुश्रवाः महायशाः अधिराजासीत् अधिराजः आसीत् यवीयोभ्यः कनिष्ठेभ्यः काष्ठा दिशः १-२ ॥

यां वीक्ष्य चारुसर्वाङ्गीं किशोरीं सुष्ठ्वलङ्कृताम् ।
परिक्रमन्तीमुद्वाहे चकमेऽग्निः शुकीमिव ॥ ११ ॥
विबुधासुरगन्धर्वमुनिसिद्धनरोरगाः ।
विजिताः सूर्यया दिक्षु क्वणयन्त्यैव नूपुरैः ॥ [illegible]
प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन् । [illegible]
तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः । [illegible]
पित्रादिष्टाः प्रजासर्गे तपसेऽर्णवमाविशन् । [illegible]
दशवर्षसहस्राणि तपसार्चंस्तपस्पतिम् ॥ १[illegible]
यदुक्तं पथि दृष्टेन गिरिशेन प्रसीदता । [illegible]
तद्ध्यायन्तो जपन्तश्च पूजयन्तश्च संयताः [illegible]

॥ विदुर उवाच ॥

प्रचेतसां गिरित्रेण यथासीत्पथि सङ्गमः [illegible]
यदुताह हरः प्रीतस्तन्नो ब्रह्मन् ! वदार्थ[illegible]

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पृथोरश्वमेधविजयावसरे विजिताश्व एव शक्रादन्तर्द्धान-[illegible]ति लब्ध्वा अन्तर्धानसंज्ञितोऽभूत् ॥ ३ ॥

योगगतिमाग्नेयीं गताः ॥ ४ ॥ ५ ॥

[illegible]तर्धानः [illegible]पि परमेश्वरभक्त्या मुक्तिमाह । राज्ञामिति[illegible] । [illegible]ज्ञां हार्ति करादानादिभिर्दारुणाम् हिंस्रां मन्यमानो विस-[illegible]र्ज ह ॥ ६ ॥

तत्र व्याजमात्रेण क्रियमाणे दीर्घसत्रे द्वन्ति भक्तक्लेशमिति [illegible] कथायां पासकत्वरूपवित् कुशलेन निर्विघ्नेन [illegible]श्यक् समाधिना यजन् पूजयन् तल्लोकतां भगवत्पार्षदत्व-[illegible]प ॥ ७ ॥ ८ ॥

योगेषु ज्ञानवैराग्यभक्तिषु ॥ ९ ॥

तस्य क्रियाकाण्डेषु निष्णातत्वमाह । यस्येति । अनुयज्ञं यज्ञैको [illegible]ः कृतस्तदनुतत्समीपे यज्ञान्तरं कुर्वतः प्राचीनाग्रैः कुशै-[illegible]स्तृतं वसुधातलं देवयजनं देवपूजनस्थानमासीत् अत एव [illegible]चीनबर्हिरिति तस्य नाम ॥ १० ॥

भाषाटीका ।

मैत्रेयजी बोले पृथु महाराज के पुत्र विजिताश्व नाम [illegible] राजा हुये सो बडी कीर्ति वाले थे उनने अपने छोटे भ्राताओं को सब दिशा दान करदियीं ॥ १ ॥

हर्यक्ष को पूर्व दिशा दिया धूम्रकेश को दक्षिण दिशा दिया । वृकको पश्चिम दिशा दिया द्रविणस को उत्तर दिशा दिया ॥ २ ॥

इन्द्र से अन्तर्धान गति को प्राप्त होकर अन्तर्धान ऐसा [illegible]

को प्राप्त हुये फिरशि[illegible] [illegible]पन सम्मत तीन पुत्रों को उत्पन्न किये ॥ ३ [illegible]

पावक पवमान [illegible] पूर्वकाल में वशिष्ठ के शाप से पैदा भये [illegible] [illegible] होगये ॥ ४ ॥

अन्तर्धानने नभ[illegible] [illegible]र्धान को उत्पन्न किया जिनके चोरूप हुआले [illegible] [illegible] भी नहीं मारा था ॥ ५ ॥

किसी का लेना [illegible] [illegible]ति दण्ड देना इत्यादि दारुण कर्म जानक[illegible] [illegible]मिष से राज्य को छोड दिया ॥ ६ ॥

फिर वनमें भी [illegible] होकर हंस पुरुष पर-मात्मा का आराधन[illegible] [illegible]माधि से भगवत् के लोक को प्राप्त होगये ॥ [illegible]

हे विदुरजी ! [illegible] [illegible]से हविर्धानी ने छः पुत्र पैदा किये बर्हिषद [illegible] [illegible] जितव्रत ॥ ८ ॥

हविर्धान के पु[illegible] [illegible]ग्यशाली होकर प्रजापति भये हे कुरूद्वह ! [illegible] [illegible]योग शास्त्र में भी निपुण भये ॥ ९ ॥

जिनके सब [illegible] [illegible] में सब पृथिवी तल प्राचीन अग्रवाले कुशों से [illegible]

श्री[illegible] [illegible]ार्थदीपिका ।

समुद्रस्य कन्[illegible] [illegible]ोपदिष्टां शतद्रुतिनाम किशोरीं वालां परिक्रमन्तीं [illegible] [illegible]मीम् शुकीमिवेति एवं आख्या-यते । सप्तर्षीणां [illegible] [illegible]नामाग्नि: कामसन्तप्तोऽभूत् त [illegible] तज्जायो स्वाह[illegible] [illegible]रूपधारिणी सती रमयामास । रमयित्वा च त[illegible] [illegible]शरस्तम्बे निक्षिप्तवत्यासीत् तं

सङ्गमः खलु विप्रर्षे ! शिवेनेह शरीरिणाम् ।
दुर्लभो मुनयो दध्युरसङ्गाद्यमभीप्सितम् ॥ १७ ॥
आत्मारामोऽपि यस्त्वस्य लोककल्पस्य राधसे ।
शक्त्यायुक्तो विचरति घोरया भगवान् भवः ॥ १८ ॥
॥ मैत्रेय उवाच ॥
प्रचेतसः पितुर्वाक्यं शिरसादाय साधवः ।
दिशं प्रतीचीं प्रययुस्तपस्यादृतचेतसः ॥ १९ ॥
समुद्रमुपविस्तीर्णमपश्यन् सुमहत्सरः ।
महन्मन इव स्वच्छं प्रसन्नसलिलाशयम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथा सप्तर्षिभार्याभिरग्निः ... तथेत्यर्थः ... स्तुकीमिवेति पाठे स्तोकमृतधाराभिरित्यर्थः ॥ ११ ॥

नूपुरैः पादौ कणयन्त्येव तद्ध्वनिमात्रेणेत्यर्थः ॥ १२ ॥

ध्रुवं नाम व्रतमाचरन्तः ... धर्मस्नाता धर्मपारगाः ॥ १३ ॥

तपसा तपसां पतिं हरिम् ... ॥ १४ ॥ १५ १६ ॥

मुनयोऽपि संगत्यागेनाप्तुमिष्टं ... केवलं न तु प्रापुः । तेन शिवेन ॥ १७ ॥

ननु मुनीनां किं तत्सङ्गेन ... आशङ्क्याह । आत्मारामोऽपि लोकरक्षणाया ... ॥ १८ ॥

पूर्वोक्तकारिणां शिवदर्शनं ... प्रचेतस इति ॥ १९ ॥

समुद्रमुपसमुद्रं ... "उपोऽधिके च" इति कर्मप्रवचनीयः प्रसन्नाः सलिलाशया ... ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तं प्राचीनबर्हिः समुद्रस्य ... ब्रह्मणा उपदिष्टां शतद्रुतिमित्याख्यामुपयेमे तां ... बालां चारुणि सुन्दराणि सर्वाण्यप्यङ्गानि ... उद्वाहे विवाहे परिक्रमन्तीमग्निं ... शतद्रुतिम् ... इव अग्नयर्थः । सप्तर्षीणां सप्त ... तद्भार्यादर्शनेन ... तं च तद्भार्याः स्वाहानाम सप्तर्षिभार्यारूपधारिणी ... रमयित्वा च तद्रेतः शुकीरूपेण ... आगच्छत् तां च यथा सप्तर्षिभार्या अग्न्यादिः ... स्तुकीमिति पाठे स्तोकघृतधाराभिरित्यर्थः ॥ ११ ॥

सूर्यया नवोढयेव नूपुरैः ... विबुधादयः सर्वे विजिताः वशीकृता मोहिता ... ॥

प्राचीनबर्हिषः सकाशात् शतद्रुत्याम् ... अभवन्नुदभवन् पुत्रान् विधिनामस्तीति नाम प्रतानि ... धर्मस्नाताः धर्मनिष्णाताः धर्मपारगा इति यावत् ... सर्वत्र विचिन्तितुमित्यावासमधिगम्य ... प्रचेतसः प्रचेता नामानः ॥ १३ ॥

प्रजासर्गे पित्रा उपदिष्टाः प्रथमं तपश्चर्तुं वनमरण्यमाविशन् दशसंख्याकवर्षाणां वत्सराणां सहस्राणि तपसां पतिं भगवन्तं तपसा आर्चन्नर्चयामासुः ॥ १४ ॥

पथि मार्गे दृष्टेन प्रसीदता गिरिशेन रुद्रेण यदुक्तमुपदिष्टं तद्ध्यायन्तस्तदर्थं ध्यायन्तस्तज्जपन्तश्च समाहितचित्ताः पूजयन्तश्च आर्चन्निति पूर्वेणान्वयः ॥ १५ ॥

गिरिशेनोक्तं ध्यायन्त इत्याद्युक्तं तत्र किमुक्तं गिरिशेनेति पृच्छति विदुरः । यदा यस्मिन् काले पथि गिरित्रेण सह प्रचेतसां सङ्गम आसीत् हे ब्रह्मन् ! प्रीतो हरो रुद्रः अर्थवत् पुरुषार्थसाधनं यदाह तन्नो अस्मभ्यं वद ॥ १६ ॥

शिवसङ्गमस्य दौर्लभ्यमाह । हे विप्रर्षे ! शरीरिणां नृणां संसारे शिवेन साकं सङ्गमो दुर्लभः दुःखेनापि लब्धुमशक्यः मुनयः अभीप्सितं प्राप्तुमिष्टं यं शिवमसङ्गात् विषयान्तरसङ्गत्यागात् दध्युरेव केवलं न तु प्रापुस्तेन शिवेन ॥ १७ ॥

ननु मुनीनां किंतद्ध्यानेन घोरत्वादित्याशङ्क्याह । योऽयं भगवान् उत्पत्त्यादिज्ञानवान् हरः आत्मारामोऽपि आत्मारामत्वेन लोकसञ्चारप्रयोजनरहितोऽपीत्यर्थः इमिलोकस्य राधसे सिद्धये दीनानजुग्रहीतुमिति यावत् शक्त्या स्त्रिया सह युक्तः घोरया भूर्या उपलक्षितो विचरति ॥ १८ ॥

एवमापृष्टो मुनिस्तत् यथा वक्तुमुपक्रमते । प्रचेतस इति । साधवः प्रचेतसः पितुः प्राचीनबर्हिषः वाक्यं प्रजाः सृजतेति वाक्यं शिरस्याधाय अतिगौरवेण शिरसानुमोद्य सृष्ट्यर्थं तपसा दृतचेतसः प्रतीचीं दिशं प्रति ययुः ॥ १९ ॥

समुद्रमुपसमुद्रात् किञ्चिन्न्यूनम् । उपोऽधिके च" इति कर्मप्रवचनीयत्वे तद्योगात् द्वितीया समुद्रसमीपे वा विस्तीर्णं सुशोभनं महत् अतिसरः अपश्यन् महत्स्वमन इव स्वच्छमिति महतां ज्ञानिनां मन इव स्वच्छं निर्मलं प्रसन्नाः सलिलाशया ये मत्स्यादयः यस्मिन् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रचेतसिकस्वास्य पत्नीकरणं कथमिति चाकूतं निवारयितुमाह । सामुद्रीमिति समुद्रपुत्रीति वचनादयं विशेषो ज्ञातव्यः देवर्षयः ब्रह्मलोकां तां शिशिनाहि । यामिति । शुकीमिव यथा नाम्ना शुकी राजपुत्रीमग्निः प्रदक्षिणीकुर्वाणां कामितवान् ...

श्रीमद्विजयध्वजतीर्थकृतपद[illegible]

[illegible]मेनामन्वावर्तन्तु [illegible]

शुकीमग्निरावर्तन्तीं प्रदक्षिणाम्। आदायान्तरधाद्दानसमये मन्मथातुर" इति वचनादयं विशेषो ज्ञातव्यः ॥ ११ ॥

अग्निश्चक्रम इति यदेतच्चित्रमिति भावेनाह। विबुधेति। अग्नेरपि विबुधैकत्वात् सूर्या नवोढा सूर्ये विहर्तुं नासहेति श्रुतः ॥ १२ ॥

तुल्यं नाम व्रतं च येषां ते तथा किं तत्तुल्यं नामेत्यत्राह। प्रचेतस इति ॥ १३ ॥

तत्कर्माह। पित्रादिष्टा इति ॥ १४ ॥

एषां को गुरुः किं जप्यं किंध्येयमत्राह। यदुक्तमिति ॥ १५ ॥

संक्षेपेणोक्तम् विस्तरतः श्रोतुं विदुरः पृच्छति। प्रचेतसामिति। यद्वा। किं वा अर्थवत्प्रयोजनवत् ॥ १६ ॥

पथिकानां पुरुषाणां तत्र सङ्गमः सुलभः स्यादतः किञ्चोद्यमत्राह। सङ्गम इति। असङ्गा मुनयः सतामभीप्सितमदधुस्तेन शिवेन सह सङ्गमः ॥ १७ ॥

जगतो निरोगत्वाय विचरतोऽपि शिवस्यात्मारामत्वेन निःस्पृहस्य सङ्गमेऽपि सम्भाषणं न सम्भाव्यत इत्याशयेनाह। आत्मारामोऽपीऽति। यस्त्वस्य लोककल्पस्य जनस्य रोगान्मुक्तत्वस्य राधसे सिद्धये तीव्रया शक्त्येत्यनेन सम्भाषणानुपपत्तिं सूचयति ॥ १८ ॥

सम्भाषणस्य योग्यावस्थां वक्ष्यन्मैत्रेयः प्रचेतसां कथामादित आवर्तयति। प्रचेतस इति ॥ १९ ॥

समुद्रमुपससमुद्रस्य समीपे विस्तीर्णं दक्षिणोत्तरायतं महतः कपवस्य मुनेर्मन इव स्वच्छं। यद्वा। महतां श्रीनारायणस्य चरणारविन्दपरायणानां मनो यथा निर्मलं तथा ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

सामुद्रीमित्यर्द्धकम् ॥ ११ ॥ १२ ॥

धर्मस्नाता इत्यत्र धनुःस्नाता इति चित्सुखः धनुर्वेदपारगाः ॥ १३ ॥ १४ ॥ १५ ॥

घोरया तुष्टं प्रति ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

समुद्रमिति त्रिकम्। समुद्रमुप उपसमुद्रं तत्समीपमित्यर्थः स्वच्छत्वं स्वलस्य प्रसन्नत्वं सलिलस्य किं कुर्वत् सरः विष्णुपद्मकोश रजो विक्षिपत्। कीदृशं तद्रजः पवनेन उत्सवः उद्रेको यस्य तत् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

समुद्रस्य [illegible]न्यां देवदेवेन ब्रह्मणोपदिष्टाम् शुकीमिवेत्येवं व्याख्यायते। महर्षीणां सत्रे तद्भार्यादर्शनेनाग्निः कामार्त्तोऽभूत् तत्र तद्भार्य्या स्वाहा नाम सप्तर्षिभार्य्या रूपधारिणी सती रमयामास रमयित्वा च तद्रेतः शुकीरूपेण शरस्तंबे निधायागच्छत् तां यथा सप्तर्षिभार्य्याभ्रान्त्या अग्निः कामितवान् तद्वत्। स्तुकीमिवेति पाठे स्तोक घृतधारामिवेत्यर्थः ॥ ११ ॥

सूर्य्याया नवोढयैव विजिताः। तत्र नूपुरैः पादौ क्वणन्त्यैव स्वामिमात्रेणैव नतु तां केऽपिद्रष्टुं शेकुरिति भावः ॥ १२ ॥ १३ ॥

तपस्यां पाणि हरिमर्च्चयामासुः। कीदृशाः यदुक्तं [illegible]निशम तदेव ध्यायन्तः। यत् रहो रहस्यं प्रीतः सन् वाचा अभिधायैव आह ॥ १४ ॥ १५ ॥ १६ ॥

[illegible] तु आह ॥ १४ ॥

मुनीनां [illegible] कृपया सकामानामपि कामं धातुदृष्योऽपि भवतीत्याह। आत्मेति। लोककल्पस्य राधसे लोकमनोरथकल्पस्य सिद्धये ॥ १८ ॥ १९ ॥

समुद्रमुपसमुद्रात् किञ्चिन्न्यूनं उपोऽधिके हीने चेति कर्म्मप्रवचनीयः ॥ २० ॥

श्रीमच्छुकदे[illegible]ः।

सामुद्रीं समुद्रपुत्रीम् [illegible] यामग्निश्चकमे इत्युत्तरेणान्वयः उद्वाहे वि[illegible] परि[illegible] प्रदक्षिणं गच्छन्तीमग्निश्चकमे अकामयत शुकीमिव [illegible] सत्रे सप्तर्षीभार्यादर्शनेन कामसंतप्तमग्नि [illegible] सप्तर्षीभार्यारूपेण रमयित्वा तद्रेतः शुकीरूपेण [illegible] गच्छत् तां यथाग्निः सप्तर्षिभार्या भ्रान्त्याचकमे [illegible]

यया सूर्यया नवोढ[illegible] विजिता मोहिताः तदपि नूपुरैः पादौ क्वण[illegible]मात्रेणैवेत्यर्थः ॥ १२ ॥

सर्वे दशापि तुल्यं [illegible] धर्मस्नाताः कृतधर्मानुष्ठाना इत्यर्थः ॥ १३ ॥

अर्णवं तत्तीरगं सर[illegible]स्पतिं हरिम् अर्चन्प्रार्चितवन्तः ॥ १४ ॥

संयताः जितेन्द्रियाः [illegible]

यमभीप्सितं सङ्ग[illegible]गेन दध्युरेव स सङ्गमो दुर्लभः यद्वा। यं शिवं[illegible] ॥ १७ ॥

घोरया संहारशक्त[illegible]यः कल्पः स्वधर्मे निपुणस्तज्जनस्य राधसे पा[illegible]८ ॥ १९ ॥

समुद्रमुपतत्समी[illegible]सलिलाशयाः जलचराः यस्मिन् तत् ॥ २० ॥

सुन्दर अङ्गवा[illegible]या वाली सुन्दर गहना पहरी हुई जिसको [illegible]को वखत परिक्रमा करते समय अग्निने भी [illegible]सर्षियों की भार्या शुकी की इच्छा की थी ॥ १[illegible]

देवता असुर [illegible] नर उरग इन सबोंको सब दिशा में [illegible] के शब्द रूपी नगाड़े से जीत लिया ॥ १२ [illegible]

शतद्रुती में [illegible]दश पुत्र भये समान नाम वाले धर्म में बड़े नि[illegible] ॥ १३ ॥

पिता ने प्रजा[illegible]या तब तपस्या करने को समुद्र में गये ॥ १[illegible]

दश हजार [illegible] से भगवान् कीनी रस्म में मिले हुये श्री म[illegible]हा था उसी का ध्यान करते जप पूजन करने [illegible] ॥ १५ ॥

विदुरजी बो[illegible]देवजी के साथ मार्ग में जैसे सङ्ग हुआ प्रस[illegible] जी ने जो कहा हो सो यथार्थ हमसे कहो ॥ [illegible]

नीलरक्तोत्पलाम्भोज कल्हारेन्दीवराकरम् ।
हंससारसचक्राह्वकारण्डवनिकूजितम् ॥ २१ ॥
मत्तभ्रमरसौस्वर्यहृष्टरोमलताङ्घ्रिपम् ।
पद्मकोशरजो दिक्षु विक्षिपत्पवनोत्सवम् ॥ २२ ॥
तत्र गान्धर्वमाकर्ण्य दिव्यमार्गमनोहरम् ।
विसिस्म्यू राजपुत्रास्ते मृदङ्गपणवाद्यनु ॥ २३ ॥
तर्ह्येव सरसस्तस्मान्निष्क्रामन्तं सहानुगम् ।
उपगीयमानममरप्रवरं विबुधानुगैः ॥ २४ ॥
(१) तप्तहेमनिकायाभं शितिकण्ठं त्रिलोचनम् ।
प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ॥ २५ ॥
स तान् प्रपन्नार्तिहरो भगवान् धर्मवत्सलः ।
धर्मज्ञान् शीलसम्पन्नान् प्रीतः प्रीतानुवाच ह ॥ २६ ॥

॥ श्रीरुद्र उवाच ॥

यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितम् ।
अनुग्रहाय भद्रं व एवं मे दर्शनं कृतम् ॥ २७ ॥
यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् ।
भगवन्तं वासुदेवं प्रपन्नः स प्रियो हि मे ॥ २८ ॥
स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चितामेति ततः परं हि माम् ।
अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यये ॥२९॥
अथ भागवता यूयं प्रियाः स्थ भगवान् यथा ।
न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥ ३० ॥

भाषा[illegible]का ।

हे विप्रर्षि ! इस संसार में [illegible]रधारी को महादेवजी के साथ सङ्गम होना बड़ा दुर्लभ है क्योंकि मुनिलोग जिनकी इच्छा से ध्यान करते हैं ॥ १७ ॥

जो भगवान् महादेवजी [illegible] आत्माराम हैं तो भी लोक कार्य के लिये घोर शक्ति से युक्त होकर [illegible]चरते हैं ॥ १८ ॥

प्रचेता संपूर्ण साधु पिता के [illegible] को मस्तक से ग्रहण करके तपस्यामें मन लगाकर पश्चिम [illegible] को चले गये ॥ १९ ॥

समुद्र के किनारे पर बड़ा [illegible] सरोवर देखा जो कि सत्पुरुषों के मन सरीखा निर्मल [illegible] निर्मल जिसमे जल भरा है ॥ २० ॥

श्रीधरस्वामिकृत[illegible]दीपिका

नीलोत्पलादीनामाकरं उत्पत्ति[illegible] [illegible]म्भोजकल्हारादि शाविदित[illegible]चविकासीनि इत्यविद[illegible] तस्य पुनरुक्तिः प्राचुर्यज्ञापनार्थम् हंसादिभिर्निकूजितम् ॥ २१ ॥

मत्तानां भ्रमराणां सौस्वर्येण हृष्टरोमाणो लताङ्घ्रिपा: यस्मिन् पद्मकोशरजो दिक्षु विक्षिपता पवनेनोत्सवो यस्मिन् ॥ २२ ॥

तत्र मृदङ्गपणवादिवाद्यमनु पश्चाद्दिव्यैर्मार्गभेदैर्मनोहरं गान्धर्वं गानमाकर्ण्य विस्मयं प्राप्ताः पाठान्तरे मृदङ्गपणवादि अचत्स्वत् तेषां ध्वनिमतिरस्कुर्वदित्यर्थः ॥ २३ ॥

ते च त्रिलोचनं वीक्ष्य जाताश्चर्याः प्रणेमुरित्युत्तरेणान्वयः ॥२४॥

तप्तहेमराशिसदृशाकान्ति शितिर्नीलः कण्ठो यस्य तम् ॥२५॥२६॥

वेदिषदो बर्हिषदः चिकीर्षितं भगवदाराधनं विदितम् ॥२७॥

अनुग्रहकारणमाह । यः साक्षाद्वासुदेवं प्रपन्नः स हि मे प्रियः कथंभूतम् रंहसः सूक्ष्मात्त्रिगुणात्प्रधानाज्जीवसंज्ञितात्पुरुषात्परं प्रकृतिपुरुषयोर्नियन्तारमित्यर्थः ॥ २८ ॥

तत्किं तस्य महत्तमत्वादित्याह । स्वधर्मनिष्ठः पुमान्बहुभिर्जन्मभिर्विरिञ्चतां प्राप्नोति ततोऽपि पुण्यातिशयेन मामेति भागवतस्तु देहान्तेऽव्याकृतं प्रपञ्चातीतं वैष्णवं पदमेति यथा हं रुद्रो

(१) तप्त हे मनि कर्ण[illegible] [illegible]जतीर्थः

भूत्वा विकारि कवहर्तमानो विबुधा देवास्तविकारिकाः [illegible]
ऽहङ्कारान्ते विप्रभङ्गे सत्येष्यन्ति ॥ २४ ॥

अथ भागवतत्वाद्यूयं मे प्रियाः इथ भवद्भिरपि मयि प्रीतिः कार्येत्याशयेनाह । मदन्यो भागवतानां च प्रेयानास्ति ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नीलोत्पलादीनामाकरं जन्मस्थानमुत्पलानि रात्रिविकासीनि अम्भोजानि दिनविकासीनि कह्लाराणि सन्ध्याविकासीनि इन्दीवरं नीलोत्पलं तस्य पुनरुक्तिः प्राचुर्यज्ञापनार्था हंसादिभिः विकूजितं चक्राह्वाः चक्रवाकाः ॥ २१ ॥

मत्ता ये भ्रमरास्तेषां सौस्वर्येण मधुरस्वरेण हृष्टरोमाणो जताङ्घ्रिपा यस्मिन् उपश्लिष्टलताग्रैः हृष्टरोमाण इव अङ्घ्रिपा यस्मिन् तदित्यर्थः। पद्मकोशेषु यद्रजः तत् क्रमे दिक्षु विक्षिपता पवनेन उत्सवो यस्मिन् ॥ २२ ॥

तत्र मृदङ्गादिभिरन्वितं दिव्यैर्मार्गभेदैः प्रकारभेदैः मनोहरं गान्धर्वं गानमाकर्ण्य ते राजपुत्राः विस्मिता [illegible] ॥ २३ ॥

तदैव तस्मात्सरसो विनिर्गच्छन्तं विबुधानुगैः गन्धर्वकिन्नरादिभिः उपगीयमानममरश्रेष्ठं सप्रमथगणम् ॥ २४ ॥

तप्तहेमराशिसदृशकान्तिं नीलः कण्ठो यस्य तं प्रसादाभिमुखं त्रिलोचनम् रुद्रं वीक्ष्य संजातहर्षाः प्रचेतसः प्रणेमुः नमस्कृतवन्तः ॥२५॥

स भक्तवत्सलो भगवान् गिरीशः प्रपन्नान् नमस्कुर्वाणान् धर्मज्ञान् विनयादिशीलसंपन्नान्प्रचेतसः स्वदर्शनप्रीतान्स्वयमपि प्रीत उवाच ॥ २६ ॥

उक्तिमेवाह । यूयमिति । यावदध्यायसमाप्ति यूयं वेदिषदः प्राचीनबर्हिषः पुत्राः वः युष्माकं चिकीर्षितं भगवदाराधनम् च विदितं वः अनुग्रहाय युष्माननुग्रहीतुं मे मम दर्शनम् कृतं कारितं मयेत्यर्थः ॥ २७ ॥

अनुग्रहकारणमाह । य इति । त्रिगुणात्मकात्तमसः प्रधानात् जीवाच्च साक्षात्परं विलक्षणं सूक्ष्मादिति पाठे त्रिगुणात्मकावस्थात् सूक्ष्मात्कारणावस्थाच्च तमसः प्रधानात् जीवाच्च परमित्यर्थः भगवन्तं प्रकृतिपुरुषवैलक्षण्यापादकपूर्णज्ञानादिगुणं वासुदेवं यः प्रपन्नः स मे प्रियः भगवद्भक्तस्य सर्वो कृतार्थादिति भावः ॥ २८ ॥

सर्वोत्कृष्टतामेवाह । स्वधर्मनिष्ठ इति । पुमान् शतजन्मभिः कृतस्ववर्णाश्रमधर्मनिष्ठः विरञ्चितां विरञ्चिसालोक्यं तत्साम्यं वा एति मामित्यवाप्नोति तत् परं ततः परस्तान्मामेति अथानन्तरं भागवतः निवृत्तिधर्मानुष्ठानपरः अव्याकृतं चक्षुराद्यनवगम्यं [illegible] वा वैष्णवं विष्णोः सम्बन्धिपदं स्थानमेति अहं विबुधाः ब्रह्मेन्द्रादयश्च कलात्यये स्वस्वाधिकारान्ते यथा प्राप्नुवन्ति तथेत्यर्थः ॥ २९ ॥

अथ ननु यूयं भागवता स्थ भवथ अतो मम भगवान् यथा प्रियः एवं यूयमपि प्रिया भवथ भागवतानां भागवतेभ्यः अन्यः प्रियः कश्चिन्नास्ति ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कतिपयैः श्लोकैः सरसः सेवनीयत्वं वक्ति । नीलेत्यादिना । नीलोत्पलानां रक्तोत्पलानामम्बुजानामम्भोजानामिन्दीवराणां पद्म-

[illegible]

[illegible] सौगन्धेन शोभनकल्परंपरया हृष्टरोम [illegible] युक्ता अङ्घ्रिपाः वृक्षा यत्र तत्तथा तद्रोमाञ्चोत्पत्त्यर्थः विक्षु पद्मकोशरजो विक्षिपतः प्रसारयतः पवनस्योत्सवः शाल्यमाल्यसौरभ्यलक्षणो यस्मिंस्तथा तत "कोशोऽस्त्री मुकुले दिव्यं शालं" इति यादवः ॥ २२ ॥

दिव्यो मार्गो येषां ते दिव्य [illegible] तथा मनोहरं दिव्यमार्गमिति पाठे दिव्याः क्रीडाविके [illegible] मृदङ्गभेदाःयस्मिन् स्तत्तथा तादृशं गान्धर्वं गानं मृ [illegible] ॥ २३ ॥ २४ ॥

तप्तहेमनिकर्षस्तप्तसुवर्ण [illegible] मिमेवं नैर्मल्ये दृष्टान्तोऽयं ननु धावल्ये तप्तहेम [illegible] : कश्चिद्दित्यतः शितिकण्ठमिति । सोऽपि मयूरः [illegible] जोत्तममिति २५

प्रणतिफलमाह । स तानिति [illegible]

वो युष्माकमनुग्रहायैवैवं [illegible] दर्शनं कृतमित्यन्वयः । अनेन तीर्थं [illegible] परिहार उक्तो भवति [illegible] ॥

विष्णुभक्तानस्मान्कथं [illegible] ति चेत्तत्राह । यः पर इति । यो जीवसङ्घात् [illegible] त्वात् साक्षात् परमं भगवन्तं वासुदेवं [illegible] प्रियो हि कस्मात् तस्माद्भवन्तो मदनुग्रहयो [illegible] जीवमायां प्रकृतिं सिसृक्षतीं तम आसीत्तमसा [illegible] नतर्केण तस्मात्तत्त्वस्य जीवशब्दवाच्यत्वं [illegible] च सिद्धम् ॥ २८ ॥

इतोऽप्यनुगृह्णामीति [illegible] जन्मसाध्यो भगवत्प्रसादः किमुतान्येषामिति [illegible] पदप्राप्तिसाधनसामग्रीमाह । स्वधर्मेति । [illegible] स्वधर्मास्तेषु निष्ठा नितरां स्थितिर्यस्य स [illegible] कः पुमान्सुकृतजन्मभिरेकोनशतजन्मस्यः [illegible] हयुपासनार्जित भगवत्प्रसादेन विरि [illegible] प्रोतीत्यन्वयः ततः परं ब्रह्मपदानुभवानन्तरं मां [illegible] न श्रीहारमानं ब्रह्मण इति सूचयति अव्याकृत [illegible] गुणत्रयात्मा कालं परं समनुभूयेत्युक्तेरव्याकृत [illegible] त्वमित्यर्थः ।

> ऋजवो नाम [illegible] पदस्यं तु ।
> त एव शतज [illegible] का हरेः ॥
> प्राप्य ब्रह्मप [illegible] नुमोदिता ।
> तया ततो [illegible] हरिसन्निधौ ॥
> अनादिकाल [illegible] न संशयः ।
> विशिष्टा [illegible] धामिकागमः ॥
> सर्वेऽपि [illegible] प्रयान्तः ।
> स्वपदप्राप्ति [illegible] करवाप्यत इति ॥

निर्णायकवचना [illegible] पर: उक्तार्थं विवाक्ति । भागवत इति । अथ [illegible] यतो भगवद्भिन्नार्थयमि युक्तो ब्रह्मा यथाहं यथायो [illegible] कारणसंघातैः सह कलात्यये षोडशकलात्मकशरीर [illegible] त्प्रलये वैष्णवं पदमपर्वि [illegible] भगवत्स्वरूपमेतीत्य [illegible] ऽप्यनेनैव व्याख्यातास्तथा हि यथा ऋजुस्थं [illegible] जन्मसञ्चितपुण्यसञ्चयेन ब्रह्मपदं प्राप्यानुभूय [illegible] कलाक्षां मुक्तिमाप्नुत इति तथाहं चत्वारिंश [illegible] कृतः [illegible] पदं [illegible] नुभूय तथेन्द्रोऽपि [illegible] मरापादितैः पुण्यैरिन्द्रपदं सम-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

...भूय स्वधर्मनिष्ठः शतजन्मभिः पुरुषः विरिञ्चताम् एति तत ऊर्ध्वं शतजन्मभिरुत्पादितैः शुभैः स्वस्वयोग्यं पदं प्राप्य तत्तत्पदभोगयोग्यसुकृतं भुक्त्वा ब्रह्मणा सह विमुक्तिमाप्नुम इति । तदुक्तं "तथैव चत्वारिंशद्भिः पदं शैवं च जन्मभिः । विंशद्भिरैन्द्रं दशभिरन्येषामप्युदीरितम्,, इति यथाहम्मंति पाठे यथाहं श्रीहरिप्रसादेन शैवं पदमाप्तोऽस्मि तथा स्वधर्मनिष्ठः पुमान् शतजन्मभिर्विरिञ्चतामेतीति योज्यं विद्धि रुद्रो रुद्रत्वं महत्त्वमिति श्रुतिश्च ॥ २९ ॥

ततः प्रश्नेत किं फलमित्यत आह । अथेति । अथैवमुक्तप्रकारेणानादिकालमारभ्य भगवद्भक्तोऽहं यस्मात्तस्माद्भागवता भगवद्भक्तत्वाद्यूयं मे प्रियाः स्थ यथा भगवानित्याधिकदृष्टान्तः न केवलं यूयमेव मत्प्रियाः अन्येऽपि भगवद्भक्ता इत्याह । नम इति । भागवतानां सकाशात् चशब्दात् प्रेम्णो निरुपमत्वादितरत्वमाह अनेनासुरेभ्यो वरदानेन तत्प्रीतिरौपचारिकीति दर्शितम् । यद्वा युष्माकमपि भागवत एव प्रियो न तु कोऽप्यन्यथा भागवतत्वहानिरित्याशयेनाह । नम इति । मम भागवतानां युष्माकं च भागवतादन्यः प्रेयान्नास्तीत्यन्वयः । अनेन युष्माकं चाहमपि प्रिय इति ध्वनितम् ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नव गान्धर्वमिति । पणवाद्यवदिति पाठे मत्प श्रेयः ॥ २३ ॥

तर्हीति । हेमनिकायाभमिति चितसुखः सुवर्णराशिसदृशप्रभम् ॥ २४ ॥ २५ ॥

प्रपन्नान् गिरिश इति क्वचित् ॥ २६ ॥

दर्शनमिति हेतुमयस्यन्ताद्भावे युष्मद्दर्शनमित्यर्थः ॥ २७ ॥

ब्रह्मणो हि प्रतिष्ठाहमिति न्यायात् रहस इति ब्रह्मणोऽपि । यद्वा रहसः चतुःश्लोकीमोक्षस्य रहस्याख्यस्य प्रेम्णः परं परमाश्रयम् । रंहस इति केचित्कालमयः सूक्ष्मादिति स्वटीकायामस्वारस्यात् तमस इति चितसुखः ॥ २८ ॥

स्वधर्मेत्यस्य टीकायां ततः कामिति तत्र हेतुः क इत्यर्थः । विबुधा इत्यत्र विबुधैरिति चितसुखः विबुधैः कार्यैः सह ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नीलञ्च तद्रक्तञ्चेति नयायुते उत्पलमत एव इन्दीवरं नीलोत्पलमिति न पुनरुक्तिः ॥ २१ ॥

मत्तभ्रमराणां सौस्वर्येण हृष्टमाना इव मुकुलयुक्ता लताङ्घ्रिपाश्च यत्र तत् । पद्मकोशरजांसि दिक्षु विक्षिपता पवनेन उत्सवो यत्र तत् ॥ २२ ॥

गान्धर्वं गानं मार्गो गानलक्षणविशेषः कृत्वा मृदङ्गपणवादिवाद्यमनु पश्चात् पणवाद्यवदिति पाठे मत्प श्रेयः । यद्वा मृदङ्गपणवादि कीदृशमवत् रक्षत् । तत्र ... अपि गानमतिरस्कुर्वदित्यर्थः ॥ २३—२६ ॥

चिकीर्षितं भगवदाराधनमेव ... वो युष्माकमनुग्रहाय एव दर्शनं कृतं दत्तम् । यद्वा वोऽस्मभ्यं ... युष्मत्कर्तृकानुग्रहप्राप्तये मयैव दर्शनं कृतम् । यद्वा । वो ... अनुग्रहाय युष्मानुग्रहीतुं युष्माकं दर्शनं मया कृतमित्यर्थः ॥ २७ ॥

अनुग्रहे कारणमाह । यः ... प्रपन्नः स हि मे प्रियः कथम्भूतं रहसः सूक्ष्मात् त्रिगुणात् प्रधानात् जीवसंज्ञितात् पुरुषाच्च परं प्रकृतिपुरुषयोर्नियन्तारमित्यर्थ इति स्वामिचरणाः । यद्वा । त्रिगुणान्मायाशक्तेः जीवसंज्ञितात् जीवशक्तेः अपि रहः सर्वदुर्लक्ष्यं यत् निर्गुणं ब्रह्म तस्मादपि परं ब्रह्मणो हि प्रतिष्ठाहमिति गीताभ्यः । यः साक्षात् प्रपन्नः न तु कर्मार्पणद्वारा नापि देवतान्तरभक्तिज्ञानादिव्यवधानेनेत्यर्थः । स हि सद्य प्रिय इति तेन मद्भक्तोऽपि न मे यथाप्रिय इति भावः ॥ २८ ॥

ब्रह्मरुद्रविष्णूनामस्माकं सुकृतैः प्राप्तितारतम्यं मन्मुखादेव यूयं शृणुतेति वदन् विष्णोः सर्वतः श्रैष्ठ्यमाह । स्वधर्मनिष्ठः पुमान् शतजन्मभिर्विरिञ्चतां विरिञ्चिपदमेति तत्प्राप्त्यनिष्ठत्वे शतजन्मभिरपि न प्राप्नोतीत्यर्थः ततो विरिञ्चितोऽपि परं श्रेष्ठं मां ततोऽपि पुण्यातिशयैरेवेति । भागवतस्तु अथ देहान्त एव अव्याकृतं प्रपञ्चातीतं वैष्णवं पदं वैकुण्ठमेति । यथाहमिमि प्रतिक्षणमेव वैकुण्ठे वसन्नेकेन प्रकाशेन भगवन्तं भजामीत्यर्थः । विबुधाश्चाधिकारिकभक्ताः कला लिङ्गं तस्यात्यये स्वस्वाधिकारान्तेऽपि लिङ्गभङ्गे पवैष्यन्तीतीति भक्तिसाधनसाध्यसमयानां सुखलभ्यत्वेनापि सर्वोत्कर्षो दर्शितः ॥ २९ ॥

अथ अतएव भागवतानाञ्चेति चकारेण यथेत्यस्यान्वयात् भागवतानां यथा भगवतोऽन्यः प्रेयान्नास्ति तथा मत्तः मत्तोऽपीत्यर्थः ॥ ३० ॥ ३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उत्पलादिपद्मजातिभेदानामाकरम् , हंसादिभिः कूजितम् ॥ २१ ॥

मत्तभ्रमराणां सौस्वर्येण स्वरसौष्ठवेन हृष्यमाणा लताङ्घ्रिपा यत्र तत् पद्मकोशेषु यद्रजस्तद्दिक्षु विक्षिपता पवनेन उत्सवो यत्र तत् ॥ २२ ॥

तत्र सरसि मृदङ्गपणवादिवाद्यमनुपश्चादिड्यं स्वरालापमार्गैर्मनोहरम् गान्धर्वं गानम् आकर्ण्य ते राजपुत्रा विस्मिताः विस्मयं प्रापुः ॥ २३ ॥

तर्ह्येव तस्मात् सरसो विनिष्क्रामन्तं त्रिलोचनं वीक्ष्य जातकौतुकाः प्रणेमुरित्युत्तरेणान्वयः विबुधानुगैरुपगीयमानम् ॥ २४ ॥

तप्तहेमनिकायः प्रज्वलितसुवर्णराशिस्तद्वद्भा यस्य तम् शितिकण्ठं नीलकण्ठम् ॥ २५ ॥ २६ ॥

वेदिषदः बर्हिषदः यूयं पुत्राः वो युष्माकं भद्रं भवतु वश्चिकीर्षितं भगवदाराधनं विदितं ज्ञातमतो वोऽनुग्रहाय दर्शनमस्मद्दर्शनं मे मया कृतं कारितम् ॥ २७ ॥

रंहसः कालवेगात् त्रिगुणात् जीवसंज्ञितात् पुरुषात् परं तेषां नियन्तारं वासुदेवं यः अन्यो व्यवहारानुसारेण प्रिय इति भावः ॥ २८ ॥

यो वासुदेवं प्रपन्नः स मे साक्षात्प्रिय इति स्वप्रियत्वकथनेन वासुदेवं प्रपन्नस्य श्रैष्ठ्यमुक्तमथ शीघ्रं मुक्त्यर्हत्वेन तच्छ्रैष्ठ्यमाह । स्वधर्मनिष्ठः स्वधर्मनिष्ठ इति विरञ्चिधर्मनिष्ठः विरञ्चितां चतुराननताम् ततः परं ततोऽपि बहुजन्मानन्तरं मामेति मद्धर्मनिष्ठः भागवतस्तु अथ प्रारब्धक्षयानन्तरमेव अव्याकृतं संसारविलक्षणं नित्यं वैष्णवं पदं स्थानमेवैति यथाहं रुद्रः विबुधा ब्रह्मादयः कल्पात्यये अधिकारान्ते लिङ्गभङ्गे सत्येष्यन्ति ॥ २९ ॥

अथ अतो यथा भगवान् मम प्रियस्तथा यूयं भागवताः

निःश्रेयसकरं चापि श्रूयतां तद्वदामि वः ॥ ३१ ॥

॥ मैत्रेय उवाच ॥

इत्यनुक्रोशहृदयो भगवानाह तान् शिवः ।

बद्धाञ्जलीन्राजपुत्रान् नारायणपरो वचः ॥ ३२ ॥

॥ श्रीरुद्र उवाच ॥

जितन्त आत्मविद्वुर्य ! स्वस्तये स्वस्तिरस्तु मे ।

भवता राधसा राद्धं सर्वस्मा आत्मने नमः ॥ ३३ ॥

नमः पङ्कजनाभाय भूतसूक्ष्मेन्द्रियात्मने ।

वासुदेवाय शान्ताय कूटस्थाय स्वरोचिषे ॥ ३४ [illegible]

सङ्कर्षणाय सूक्ष्माय दुरन्तायान्तकाय च ।

नमो विश्वप्रबोधाय प्रद्युम्नायान्तरात्मने ॥ ३५ [illegible]

नमो नमोऽनिरुद्धाय हृषीकेशेन्द्रियात्मने ।

नमः परमहंसाय पूर्णाय निभृतात्मने ॥ ३६ [illegible]

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रियाः कथ भन्थ भागवतानां भागवतेभ्यः भगवतश्च अन्यः मत् मे प्रेयान भवति ॥ ३० ॥

भाषाटीका ।

जिस सरोवर में नीलवर्ण के लालवर्ण के कमल कुमोदिनी कल्हार खिले हैं हंस सारस चकवाक कारण्डव आदि पक्षि शब्द कर रहे हैं ॥ २१ ॥

मतवाले भौरान का सुन्दरस्वर सुन पडता है खिले पुष्पयुक्त लता लगे हुये पेड किनारेपर हैं चारो तरफ पवन का उड़ाया कमलों के पुष्पोंका रज पड़ा है उहां पर त्रिव्य गानमार्ग से मनको हरने वाला है ॥ २२ ॥

उहां पर गांधर्व गान को श्रवण कर के उस के पीछे मृदङ्ग का पणव का बाजा सुनके राज पुत्र सब विस्मित भये ॥ २३ ॥

तिसी समय मे उस सरोवर मेंसे निकलते हुये श्री महादेवजी का दर्शन किया सब भृत्यगण उनके सङ्ग मे हैं देवतोंके समुदाय गान करते हैं ॥ २४ ॥

तम सुवर्ण सी कांती वाले नीलकण्ठ वाले तीन नेत्र वाले प्रसन्न मुखारविन्द वाले श्री रुद्रजी को देखते मात्र सबके मन में बडा कौतुक हुआ आकर नमस्कार सबने किया ॥ २५ ॥

धर्मके रक्षा करनेवाले भगवान् महादेवजी ने उनको भगवद्भक्त धर्मज्ञ शील युक्त प्रसन्न चित्त वाले जानकर प्रसन्न होकर वचन बोले ॥ २६ ॥

श्री रुद्र बोले आप लोग बर्हिषद के पुत्रहो आपके मनोरथको मैने जान लिया है तुमारे ऊपर कृपा करने को मैने ऐसा दर्शन दिया है ॥ २७ ॥

जो प्राणी त्रिगुण म[illegible] से पर भगवान् वासुदेव के शरण कूं प्र[illegible]त्यन्त प्रिय है ॥ २८ ॥

जो पुरुष अपने व[illegible]क चलता है तो ऐसे सौ जन्म बीतने [illegible] होता है उससे आगे मेरे पद को प्राप्त [illegible] भगवद्भक्त है सोतो जैसे हम तथा अधि[illegible] लिङ्ग देह के अनन्तर प्रकृति मण्डल से पृ[illegible]कुण्ठ को प्राप्त हो जाता है ॥ २९ ॥

इसी से आप लो[illegible] भगवान् सबी के प्रिय हो मेरों को भागवतों से [illegible]मी और प्रिय नहीं है ॥ ३० ॥

श्रीभ[illegible]पिका ।

अत इदं जप्तव्[illegible] विविक्तमसंकीर्णं यथा भवति ॥ ३१ ॥

सूद्गयादौ प्र[illegible] प्रोक्तमिष्टदम् ।

स्तोत्रं प्राह प्र[illegible] भगवान् शिवः ॥ ३२ ॥

ते जितन्तवोत्क[illegible]णां स्वस्तये शोभनत्वाये स्वानन्दलाभायेत्यर्थः [illegible] स्वानन्दस्वस्तास्तु ननु समोत्कर्षो मद्यये एव [illegible] भवता राधसा [illegible] राद्धम् सिद्धम् त्व[illegible]य नित्यं सिद्ध इत्यर्थः [illegible] भूतायात्मने तुभ्यं [illegible]रूपाय च ॥ ३३ ॥

सर्वरूपत्वं प्र[illegible] गैर्दशभिः । पङ्कजं लोकात्मकं नाभौ यस्य तस्मै [illegible]कारणत्वादेव सूक्ष्माणां [illegible] येरूपाणि भूतानि [illegible] इन्द्रियाणि च [illegible] नियन्ते अन्तः[illegible]त्वेन प्रकाशते । [illegible] श्लोकार्थः । व[illegible]षि अपि ये कूटस्थाय निर्विकाराय विश्वस्यैकक[illegible]

स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः ।
नमो हिरण्यवीर्याय चातुर्होत्राय तन्तवे ॥ ३७ ॥
नम ऊर्ज इषे त्रय्याः पतये यज्ञरेतसे ।
तृप्तिदाय च जीवानां नमः सर्वरसात्मने ॥ ३८ ॥
सर्वसत्त्वात्मदेहाय विशेषाय स्थवीयसे ।
नमस्त्रैलोक्यपालाय सहओजोबलाय च ॥ ३९ ॥
(१) अर्थलिङ्गाय नभसे नमोऽन्तर्बहिरात्मने ।
नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सङ्कर्षणायाहङ्काराभिमानिने सूक्ष्मायाव्यक्ताय दुरन्तायानन्ताय अन्तकाय मुखाग्निना लोकदाहकाय विश्वस्य प्रकृष्टो बोधो यस्मात् अन्तरात्मने बुद्ध्यभिमानिने ॥ ३५ ॥

हृषीकाणामीशं यदिन्द्रियं तस्मै तदात्मने सूर्यरूपेण प्रणमति । परमहंसाय सूर्याय पूर्णाय तेजसा विश्वव्यापिने निभृतात्मने क्षयवृद्धिशून्याय ॥ ३६ ॥

स्वर्गापवर्गयोर्द्वाराय शुचिष्वन्तः करणे निषीदतीति शुचिषत् तस्मै 'हंसः शुचिषदि' ति श्रुतेः हिरण्यं वीर्यं यस्य तस्मै अग्निरूपाय चातुर्होत्रं कर्म तस्मै तत्साधनायेत्यर्थः कुतः तन्तवे तद्विस्तारकाय ॥ ३७ ॥

सोमत्वमाह । ऊर्जे पितृणामन्नाय इषे देवानामन्नाय यज्ञरेतसे सोमाय सहि पितृणां देवानां चान्नम् एवं रूपाय त्रय्याः पतये इत्थे नमः सूर्याग्निसोमत्वेनैव तेजस्त्वमुक्तम् जलत्वमाह । सर्वरसात्मने जलरूपाय ॥ ३८ ॥

विशेषाय पृथ्वीरूपाय सर्वेषां सत्त्वानां प्राणिनां ये आत्मानस्तेषां देहाय स्थवीयसे विराड्देहाय त्रैलोक्यपालाय वायवे सह आदिरूपाय सहि प्राणरूपेण त्रैलोक्यं पालयति सह आदिधर्मा च ३९

नभसे आकाशायार्थानां लिङ्गाय ज्ञापकाय शब्दगुणत्वात् अन्तर्बहिरात्मनेऽन्तर्बहिर्व्यवहारावकाशदाय एवं महाभूतरूपत्वमुक्तम् । अमुष्मै स्वर्गाय भूरिवर्चसे "एष वै ज्योतिष्मन्तम्पुण्यं लोकं याति,, इति श्रुतेः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत इदं वक्ष्यमाणं जप्यं शृणुतेत्यन्वयः जप्यं विशिनष्टि । विविक्तमसङ्कीर्णं यद्वा विविक्तं कर्तरि क्तः विवेचकं प्रकृतिपुरुषविवेचकत्वेन परमात्मविवेचकमित्यर्थः अत एव पवित्रमत एव मङ्गलं धर्मादिपुरुषार्थसाधनानां निःश्रेयसकरं मुक्तिसाधनमत एव परं वः युष्मभ्यं वदामि ॥ ३१ ॥

इत्येवं वदामीति प्रतिज्ञापूर्वकमनुक्तोपदेशः भगवान्नारायण एव पदः प्राप्यः प्रापकश्च यस्य सः [illegible]: वचांसि प्राञ्जलिपुटानि वैतान् राजपुत्रान् प्रति वचः [illegible]यमाह ॥ ३२ ॥

स्वरूपरूपस्वभावैस्तत्सर्वोत्कृष्टत्वं भक्तानुग्रहार्थमेव न स्वार्थमिति वदन् सर्वान्तरात्मत्वगुणविशिष्टं नमस्करोति । जितमिति । हे आत्मवित्सु ! आत्मवतां ज्ञानिनां धुर्य [illegible] ते तव जितमुत्कर्षः स्वरूपेण गुणैश्च निरतिशयोत्कर्षः जितमिति भावे क्तः स्वस्तये आत्मविदामिति शेषः यद्वा आत्मविद्धुर्या योगीश्वरास्तेषां स्वस्तये सुखाय त्वामुपासीनानां निरतिशयानन्दावह स्वरूपरूपगुणा भक्तानुग्रहैकप्रयोजना इत्यर्थः अतो मे त्वामुपासीनस्य मम स्वस्तिः त्वदनुभूतिसम्भूतं सुखमस्तु नत्वसत्त्वां प्राप्नुयादित्यर्थः मे स्थायित्वेनावतिष्ठत्वित्यर्थः ननु विषयानन्दवदनुभूतिसम्भूतानन्दोऽपि क्षणिक एव स्यादत्राह । राधसा सिद्धरूपेण भवता सिद्धं संसिद्धं साध्यत्वेन विषयाणामस्थिरत्वादनुभवसम्भूतानन्दोऽप्यस्थिरः तव तु सिद्धरूपत्वात्त्वां नित्यमनुभवतो मम त्वदनुभवसम्भूतानन्दः स्थायीति भावः अत्र परमात्मानन्दसाधनभूततद्विषयभक्तेः स्थैर्यं प्रार्थ्यते ननु मम कथं सर्वोत्कृष्टता ममापि देवादीनां मध्येऽन्यतमत्वादित्यत्राह । सर्वस्मा आत्मने नम इति । सर्वस्मै प्रपञ्चरूपाय तत्र हेतुः आत्मन इति यथा देवमनुष्यादिशरीरेष्वात्मतयानुप्रविष्टो जीवः देवोऽहमिति देवादिनामाभिकरणत्वेन व्यपदिश्यते तद्वत्परमात्मा "यः पृथिव्यां तिष्ठन् य आत्मनि तिष्ठन्,, इति चिदचिदन्तरात्मतयावस्थितत्वतद्व्यपदेशेन व्यपदिश्यते तत्तदन्तरात्मत्वमेव तत्तद्व्यपदेशव्यपदेश्यत्वनिमित्तमितियुक्तमात्मत्वस्य सर्वत्वव्यपदेशहेतुत्वं । यद्वा आत्मनः आकाशः संभूत इत्यत्रेवात्मशब्दः कारणात्मपरः तथा चायमर्थः कारणं हि मृद्द्रव्यम् कार्यात्मना परिणतं मृद्द्रव्यं घट इति कार्याभेदेन व्यपदिश्यते तथा सूक्ष्मचिदचिद्विशिष्टः कारणभूतः परमात्मा स्थूलचिदचिद्विशिष्टब्रह्मरूपप्रपञ्चव्यपदेशव्यपदेश्य इति युक्तं कारणात्मत्वस्य सर्वस्य व्यपदेशहेतुत्वम् एवं चेदृशं सर्वात्मत्वसर्वकारणत्वप्रयुक्तसर्वात्मकत्वं त्वय्येवैकान्तमिति त्वमेव सर्वोत्कृष्ट इति ॥ ३३ ॥

अन्यदप्युत्कर्षावहं गुणजातं वदन् तद्विशिष्टं नमस्करोति । नम इति । पङ्कजनाभाय लोकात्मकं पङ्कजं नाभौ यस्य तस्मै एवं कार्यावस्थप्रपञ्चरूपमुक्तं कारणावस्थप्रपञ्चरूपतामाह । भूतसूक्ष्माणामिन्द्रियाणां चात्मनं आश्रयाय उभयनिर्वाहकमन्तरात्मत्वं तत्प्रयुक्तदोषास्पृष्टत्वं चाह । वासुदेवाय वासुश्चासौ देवश्च तस्मै "सर्वत्रासौ समस्तं च वसत्यत्रेव वै यत" इत्युक्तनिर्वचनव्युत्पत्तिनिरुक्तवासुशब्दवाच्यसर्वान्तरात्मत्वगुणविशिष्टाय तथापि देवाय तद्व्याप्यगतदोषास्पर्शेन देदीप्यमानाय अत एव शान्ताय अशनायापिपासाशोकमोहजरामृत्युभिरूर्मिभिर्विरहिताय अत एव कूटस्थाय निर्विकाराय अत एव स्वरोचिषे नित्यासंकुचितापरिच्छिन्नज्ञानप्रकाशाय ॥ ३४ ॥

(१) शब्दलिङ्गायेति श्रीवीरराघव[illegible] ।

कारणावस्थप्रपञ्चात्मकत्वं ... प्रपञ्चस्य हि ... कार्या-
वस्थत्वगुणविशिष्टतामाह । सङ्कर्षणाय । समिति एकीकारे अवि-
भक्तनामरूपत्वेन कर्षणाय कर्षयत्याकर्षयति अस्मिन् जगदुप-
संहरति तथा तस्मै केनाकारेण संहर्तृत्वं तत्राह । अन्तकाय ।
मुखाग्निना लोकदाहकाय अत एव सूक्ष्माय नामरूपविभागानर्ह-
सूक्ष्मचिदचिद्विशिष्टाय एवं भूतायापि दुरन्ताय अन्तर्विनाश-
अनुपसंहार्यायेत्यर्थः। उपसंहारो हि कार्यस्य कारणेन सह संश्लेषः
तस्य कारणान्तराभावेनानुपसंहार्यत्वात्कारणानां काष्ठाभूतायेत्यर्थः
फलितः एवं कार्यावस्थकारणावस्थप्रपञ्चरूपत्वतदनुगुणगुणपूर्वकं
नमस्कृत्य जगद्रक्षकत्वतदुपयुक्तगुणविशिष्टं नमस्करोति ।
नम इति । विश्वप्रबोधाय विश्वं प्रबोधयति धर्मादि-
पुरुषार्थतत्साधनप्रकाशकवेदाख्यशास्त्रोपदेशेन वेदयतीति ।
विश्वप्रबोधस्तस्मै विश्वोद्बोधयित्र इत्यर्थः । न केवलमुपदेश-
मात्रेणापि तु व्यूहविभवान्तर्यामित्वादिरूपेण विभवमूलत्व-
सर्वसाधुनिग्रहानुग्रहदेहेन्द्रियादिसञ्जीवयितृत्वादिभिश्चेत्याह ।
प्रद्युम्नाय । दुष्टनिग्रहशिष्टानुग्रहैकप्रयोजनरामकृष्णादिमूलप्र-
द्युम्नव्यूहाय अन्तरात्मने सर्वदेशकालावस्थासु पूर्णपत्सर्व-
जन्तूनां प्रवेशपूर्वकं प्रशासनेन भर्त्रे ॥ ३५ ॥

नमसोऽनिरुद्धः तत्तद्गुणविशेषविशिष्टत्वाभिप्रायेण अनि-
रुद्धाय अनिरुद्धव्यूहाय । हृषीकाणामिन्द्रियाणां पतीशाय मन
इन्द्रियाणि च तदात्मने तद्रूपाय सर्वात्मकत्वे विशिष्य हृषीके-
शेन्द्रियग्रहणमनिरुद्धोपासनस्याभकृतं तथा चोक्तं तृतीये ।

यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरम् ।
शारदेन्दीवरश्यामं संराध्यमृषिभिः शनैरिति ॥

उक्तस्य जगद्रूपत्वादेर्जीवस्येव देवादिरूपत्वात् कर्मायत्तत्व-
शङ्कामाह । परमहंसाय । हिनस्ति कर्माण्यं पुण्यापुण्यरूपमन-
माश्रितेषु स्वमिश्रेति हंसस्ततः कर्मधारयाच्चतुर्थी अपहतपाप्म-
ने इत्यर्थः पूर्णाय अन्तर्बहिश्च व्याप्य स्थिताय नित्यनिरुपाधिका-
न्तर्बहिर्व्याप्तिकृतं जगद्रूपत्वं न भगवत औपाधिकं जीवस्य तु
देवादिशरीरेष्वभिव्याप्तिः "पिप्पलं स्वाद्वत्ति" इति श्रुतेः कर्मकृतेति ।
तस्य देवादिरूपमौपाधिकमिति ततः परमात्मनो वैलक्षण्यसिद्धिः
यद्वा । परमहंसाय अपहतपाप्मने अत एव निर्वृतात्मने शोकरहि-
ताय निभृतात्मने इति पाठे सकलशोकशून्याय अत एव पूर्णाय
सर्वदान्तर्बहिश्च व्याप्य स्थिताय । यद्वा पूर्णाय व्यापकाय निभृता-
त्मने अवाप्तसमस्तकामाय अयमपि जगद्रक्षणोपयुक्त एव गुणः
अवाप्तसमस्तकामो हि स्वाश्रितान् सर्वाहितकामप्रदानेन सम्यक्
पालयति नतु [illegible] ॥ ३६ ॥

अन्यदपि जगद्रक्षणोपयुक्तं गुणजातमाह । स्वर्गापवर्गयोः
द्वाराय साधनभूताय ।

इष्टापूर्तं बहुधाजातं जायमानं विश्वं बिभर्ति ।
भुवनस्य नाभिः अमृतस्यैव सेतुः इत्यादि श्रुतेः ।

सेतुरिव सेतुर्लम्भकः प्रापकः सेतुर्हि तीरान्तरप्रापकः स्वर्गा-
पवर्गद्वारत्वमेवोपपादयन्नमस्करोति नित्यं सदा शुचिषु योगाधि-
ष्ठेषु सीदति रमत इति शुचिषत् योगिभिर्नित्यमुपास्यत्वेन
तत्समीहितापवर्गप्रदाय इत्यर्थः । हिरण्यं वीर्यं यस्य सोऽग्निस्तस्मै
... तत्फलदत्वादिभिः स्वर्गद्वारायेत्यर्थः ॥ ३७ ॥

ऊर्जे पितृणामन्नम् इष्टदेवानाममृतं तद्रूपाय ऊर्गिडादिरूपेण पितॄन् देवा-
नां तृप्तिमापादयन् तदन्तर्यामिरूपेण यः फलदस्तस्मै इत्यर्थः । स्वधा-
शब्दस्य पतये स्वाहाय प्रतिपाद्याय च यज्ञस्य रेतः फलं तद्रूपाय
अथ हिरण्यरूपायेत्याहवनीयाद्यग्निरूपत्वमुक्तम् । चातुर्होत्राय
तन्तव इति । द्रव्यक्रियामन्त्रात्मकयज्ञरूपत्वम् ऊर्जे इष इति
पक्षाराध्यदेवतारूपत्वं त्रय्याः पतये इति स्वर्गापवर्गतत्साधन-
प्रकाशकवेदकारणत्वमेवं स्वर्गापवर्गद्वारत्वं स्वर्गद्वारत्वेन देह-
लौकिकसुखसाधनत्वमभिप्रेतं तदुपपादयन्नमस्करोति जीवानां
तृप्तिदाय शब्दस्पर्शादिविषयानुभवजसुखप्रदायेत्यर्थः । एतदु-
पपादकं सर्वरसात्मन इति । सर्वे रसाः कट्वम्ललवणमाधुर्यादयः
तदात्मने तद्रूपायेत्यर्थः कट्वादिरसानां च गुणपरिणामरूप-
त्वात् । रसोऽहमप्सु कौन्तेय इति । रसस्य तद्विभूतित्वगानात् सर्व-
रसात्मन इत्युक्तं इदं शब्दस्पर्शरूपात्मकत्वस्याप्युपलक्षणम् ॥ ३८ ॥

स्थवीयसे स्थूलाय विशेषाय पृथिव्यात्मने गन्धरूपायेत्यर्थः ।
पुण्यो गन्धः पृथिव्यां चेति गीतावचनात् एवं गन्धरसादिभो-
ग्यरूपेण तृप्तिदत्वमुक्तम् अथ भोक्तृभोगोपकरणभोगस्थानादिरूपे-
ण तृप्तिदत्वमाह । सर्वसर्वात्मदेहाय सर्वमचेतनजातं भोगोपक-
रणभोगस्थानरूपं सर्वे आत्मानो भोक्तारो जीवाश्च देहः शरी-
रं यस्य तस्मै प्रकारान्तरेणापि तृप्तिदत्वमाह सहः प्रवृत्ति-
सामर्थ्यमिन्द्रियशक्तिः ओजः तेजः बलं धारणसामर्थ्यं देह-
शक्तिस्तद्रूपाय सह आदिरूपेण तृप्तिदायेत्यर्थः एवमाकारैर्जग-
द्रक्षकत्वमित्याह । त्रैलोक्यपालाय उक्तविधया त्रैलोक्यान्तर्गत-
कृत्स्नजगत्पालायेत्यर्थः ॥ ३९ ॥

एवं जगदुपादानत्वतत्तदन्तरात्मत्वतद्रक्षकत्वतत्संहर्तृत्वादिभि-
स्तदेकाससाधारणधर्मैः सर्वोत्कर्षं नमस्कृत्य अथ चिदचिदात्मकं
सर्वमपि वस्तु तच्छरीरमेवातस्तदात्मकत्वमस्तीत्यभिप्रायेण सर्वा-
त्मकत्वेन नमस्करोति । शब्दलिङ्गायेति । शब्द आकाशगुणः स
लिङ्गं शरीरं यस्य तस्मै नमस्ते आकाशरूपाय च इदं वाय्वा-
दितद्गुणशरीरकत्वस्याप्युपलक्षणं शब्दादिषु नियमनपूर्वकम
व्याप्यतच्छरीरकत्वेन स्थितायेत्यर्थः व्याप्तिश्च येषामपि च न बहिरे-
व स्थितेषु तेषामिव नान्तरेव किं त्वन्तर्बहिश्चेत्याह । अन्तर्बहिरात्मने ,
इति । अतति संततमविच्छेदेन व्याप्नोतीत्यात्मा अन्तर्बहिश्च व्याप्य
स्थितायेत्यर्थः तथा च श्रूयते ।

। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।

इति पुण्याय यज्ञादिपुण्यशरीराय अमुष्मै नरस्वर्गादिलोक-
रूपाय लोकाय तल्लोकरूपाय भूरिवर्चसे ज्ञानप्रचुरतेजोरू-
पाय ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुप्रसन्नेन मनसा यत्किंचिदुपदिश्यते चेन्द्रस्य
मानुभाविकं स्यादित्यस्य वाक्यस्यावसरमाहवान माह । इद-
मिति । अनेन बहुपुरश्चरणमन्तरेण क्षिप्रं सत्यं फलदीत्युक्तं
भवति ॥ ३१ ॥

न केवलं [illegible] वेत्याह । इतीति । मन्त्रकोपे-

श्रीमद्वीरराघवाचार्यकृतभक्तिचन्द्रिका । ...स्वर्गापवर्गादिसकलपुरुषार्थसिद्धिजनकत्वमपि द्योतयति शिष्योपदेशकाले शिष्याणामिदं शुभं च सूचयति ॥ ३२ ॥

अोपदेशः कथितो युष्माकमिति भावेनाह । जितमिति । हेमारम्भविदुषो परमात्मज्ञानिषु श्रेष्ठाः वो जितं सर्वमिति शेषः कुतः स्वस्तये भगवदुपासनाख्यसत्कर्मणे मयोपदिष्टमिति यत्तस्मादिति शेषः "प्रशस्ते कर्मणि तथा सच्छब्दः पार्थयुज्यत" इति स्मृतिः । किञ्च भगवति भवतां भक्तिरनुदिनमेधतामिति भावेनाह । आस्तामिति । युष्माकं हरौ स्वस्तिः समीचीनसद्भावः सती भक्तिरस्तु ततश्च तया भक्त्या भवतां राधसे सिद्धये भगवत्तत्त्वं राद्धं पूज्यं कथं सर्वस्मै सर्वान्तर्यामिणे आत्मने स्वामिने नम इत्येतदेवास्माकं शक्यं नातोऽन्यदिति सङ्कल्प्येत्यर्थः "सर्वान्तर्यामिकत्वात्तु सर्वनामा जनार्दनः । ननु सर्वस्वरूपत्वात्सर्वशेषी हरिर्यत" । इतिवचनात्सर्वनामा न जगदात्मत्वमनेनोच्यत इत्यर्थः ॥ ३३ ॥

इदानीं ध्येयस्वरूपं दिशति । नमः पङ्कजनाभायेत्यादिना । भूतानि पञ्चभूतानि पञ्चभूतसूक्ष्माणि शब्दादीनि इन्द्रियाणि श्रोत्रादीनि पतित्वात्सततं व्याप्य तिष्ठतीति अत सातत्यगमन इति धातुः तस्मै ॥ ३४ ॥

दुरन्तावान्तभयवर्जिताय विश्वप्रबोधाय पूर्णज्ञानाय विश्वस्य प्रबोधो यस्मादिति वा स तथा तस्मै ॥ ३५ ॥

हृषीकमिन्द्रियं प्रोक्तमित्यतो हृषीकेशो जीवस्तस्येन्द्रियस्वामिने किञ्च इन्द्रियमिन्द्रस्य विद्यमाने यत्र किञ्च तस्यात्मा स्वामी हृषीकेशस्वायमिन्द्रियात्मा चेति विग्रहस्तस्मै निभृतात्मने स्तिमितरूपाय ॥ ३६ ॥

शुचिवह्नौ सीदति तिष्ठतीति शुचिषत् तस्मै योऽग्नौ तिष्ठन्निति श्रुतेः हिनोति दुःखं रतिं प्रापयतीति हिरण्यं तादृशं वीर्यं यस्य स तथा तस्मै स्वर्णवर्णरेतस इति वा चतुर्षु होतृषु स्थित्वा तैः क्रियमाणं यत्कर्म तत्कर्तृत्वाच्चातुर्होत्रस्तस्मै तन्तवे व्याताय संततिप्रवर्तकाय वा ॥ ३७ ॥

ऊर्जे पित्र्यंदात्रे इषं देवान्नदात्रे इच्छारूपाय वा यज्ञे रेतो रतिर्यस्य स तथा तस्मै सर्वरसात्मने सर्वरसानां दात्रे ॥ ३८ ॥

सर्वसत्त्वानां सर्वप्राणिनामात्मदा ईहा चेष्टा यस्य स तथा तस्मै आत्मानं ददातीत्यात्मदा य आत्मदेति श्रुतेः सर्वप्राणिस्वात्मदेहस्तस्तत्तत्तनुमात्रस्वरूपं यस्य स तथा तस्मै इति वा विशेषाय विशिष्टाय पृथिव्यां स्थित्वा तस्याः सर्वस्मात्त्रिशेषं करोतीति वा गुणगुणिनोरभेदाभिप्रायेण सहः इत्याद्युक्तं सहश्चित्तशक्तिः ओजोऽवष्टम्भशक्तिः बलम्बाह्याद्यवयवशक्तिः ॥ ३९ ॥

अर्थः शास्त्रं वेदाख्यं लिङ्गं ज्ञापकं प्रमाणं यस्य स तथा तस्मै अर्थस्य पुरुषार्थस्य लिङ्गं हेतुस्तस्मा इति वा नभसे आकाशवदसङ्गाय न भस्यते प्रकाश्यते न ज्ञायत इति वा भसभर्त्सनदीप्त्योरिति धातुः पुण्याय पुनानाय लोकाय प्रकाशाय अमुष्मै अधिदेववासिने पुण्याय लोकाय स्वर्गादिलोकदात्रे वा ॥ ४० ॥

श्रीमज्जीवदेवाचार्यकृतभक्तिरत्नावली । ...

इह यतिपो धातुनिर्देशो भक्तानुध्यानं सत्तामेव वदति स्वात्मविचक्षणानां स्वस्तये शोभनसत्त्वे सम्यक्फलाय ते तव जितमुत्कर्षो गुणादिप्रकाश इत्यर्थः । मुक्तानामपि सिद्धानामित्यादेः यस्मादेव स एव पुरुषार्थः । तस्मात्सुमापि स एव स्वस्तिरस्तु प्रार्थनायां लोट् । तत्र किं तव साधनमित्याशङ्क्य विभक्तिपरिणामेनाह । ते तुभ्यं नम इति । तत्र च मम न स्वातन्त्र्यं किन्तु तवैवेति । तदेव नमो विशिनष्टि । भवतेति । राधसा सर्वसाधकेन राद्धं सिद्धं सर्वसाधकत्वे हेतुः आत्मने अन्तर्यामिणे सर्वस्मै सर्वरूपाय चेति । यद्वा । स च स्वस्तिर्दीनमनसो रूप एव योग्य इति तदेव करोति तं नम इति । अन्यत् समानं वासुदेवादय एते पद्मनाभस्यैवांशाः । ननु महावासुदेवादयः निर्विकारायेति व्याख्यायां विकारस्तदाभास इति सङ्कर्षणादीनां तदाभासत्वं दर्शितम् । दुर्व्योधात्र वर्ण्येति कचित् ॥ ३३ ॥ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

अर्थेत्यर्धकम् । नम इत्यर्धकम् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अनुक्रोशः कृपा हृदये यस्य सः ॥ ३२ ॥

सभा समाजस्थानं हृद्रूपा [illegible]मास्मिति श्रुतेः चत्वरं [illegible] चतुष्पथः सर्वतो नाडीप्रचारः रथ्या राजमार्गाः सुषुम्नारूप[illegible] [illegible]त्वात् ताभिः आक्रीडं [illegible] [illegible] [illegible]यतनं सुखस्थानं तत्तुल्या [illegible] [illegible] [illegible] [illegible] तत्तुल्या जागरावस्था [illegible] [illegible]स्थानत्वात् ध्वजा पताकाः केशास्ता[illegible] [illegible] [illegible] [illegible] [illegible]तुलाम् ॥ १६ ॥

यथ पुर्या बाह्योपवनं तथा देहस्य [illegible] दिव्यद्रुमादिरूपोऽतो नात्र विशेषकल्पना [illegible] इति। पुष्प्यः अस्तु लक्षस्व देहस्य बाह्ये [illegible] बुद्धेः दिव्यद्रुमयुतादिविषयकवृत्तिरूपे [illegible] वर्गे प्रमदां ददर्शेति चतुर्थेनान्वयः वि[illegible] दिना। दिव्यद्रुमादिभिराकुले व्याप्ते नदन्तो [illegible] हलो येषु ते अलाशया यस्मिन् ॥ १७ ॥

हिमनिर्झरायां विप्रुष्मता बिन्दुयुक्तेन शीतलेन कुसुमाकरसंबन्धिना सुगन्धेन वायुना चलन्तः [illegible]शाखा नवपत्राणि विटपाः शाखाश्च येषां तरुविटपिभिर्नलिनी[illegible] सरसीनां तटेषु संपत्समृद्धिर्यत्र तस्मिन् ॥ १८ ॥

नानाविधैः अरण्यमृगाणां वनपशूनां [illegible] समूहैः मुनिव्रतैः मुनीनामिव व्रतं येषां तैः अनाबाधे [illegible]रहिते यत्र उपवने पान्थः कोकिलकूजितैः आत्मानमाहूतं म[illegible] ॥ १९ ॥

तत्रोपवने यदृच्छया स्वभावत एवागतां [illegible] प्रमदोत्तमाम् जीवविमोहिनीं बुद्धिं ददर्श [illegible]नुवर्णयति। भृत्यैरिति सार्धैस्त्रिभिः। दशभिरिन्द्रियैः [illegible]कमेकं प्रतिशतं वृत्तयस्ताद्भिः सहायान्तीम् ॥ २० ॥

भाषाटीका।

वह पुरञ्जन राजा अपने भोगस्थानको [illegible] हुआ सब पृथिवी में घूमता था परन्तु कहींपर अनुकूल [illegible] न मिला तिससे दुःखित सा होकर चिन्ता करने लगा ॥ ११ ॥

स्त्रीकाणां सखा तस्या बहुरूपोऽग्रणीः स्त्रियः ॥ ...

...शीर्षाहिना गुप्तां ... सर्वतः ।

...षमायामृषभम... कामरूपिणीम् ॥ २१ ॥

...तां युवतीं बालां ...षोडां वराननाम् ।

...विन्यस्तकर्णाभ्यां ...ती कुण्डलश्रियम् ॥ २२ ॥

...ङ्गनीवीं सुश्रोणीं ...मां कनकमेखलाम् ।

...यां कणन्नुपां ...पुरैर्देवतामिव ॥ २३ ॥

...नौ व्यञ्जितकैशो... वृत्तौ निरन्तरौ ।

वस्त्रान्तेन निगूहन्... डया गजगामिनीम् ॥ २४ ॥

तामाह ललितं ... व्रीडस्मितशोभनाम् ।

स्निग्धेनापाङ्गपुङ्खे... ष्टः प्रेमोद्भ्रमद्भ्रुवा ॥ २५ ॥

का त्वं कञ्जपल... ! कस्यासीह कुतः सति ! ।

इमामुपपुरीं ... किञ्चिकीर्षसि शंस मे ॥ २६ ॥

क एतेऽनुपथ... एकादशमहाभटाः ॥

एता वा लल... ः ! कोऽयं तेऽहि पुरःसरः ॥ २७ ॥

...टीका ।

... (शरीर) देखे तिन... को ... क्योंकि वे मक... नहीं ... वांछित सब क... भोग ...सके ॥

...त के दक्षिण दिशा ... भारत वर्ष में ... शरीर) देखी ... दर्वाजे हैं ... त है ॥ १३ ॥

...न अटारी खाई ... मांसादिक युक्त ... यादि नेत्र छिद्रादि ... चांदि ... शिखर हैं तिनसे बड़ी शोभा है १४ ॥

...स्फटिक वैदूर्य मुक्ता माणिक्य इनसे ... शरीर में नाडी ... शोभा ... री की पुरी दीखती ... ॥ १५ ॥

...स्थान चतुष्पथ ... क्रीडा के ... स्थान ध्वजा पता... क हैं प सब ... १६ ॥

... एक उपवन है ... सुन्दर उस ... तलाव भी वहां हैं वहां के सरोवर ... हैं जिससे मालूम होता है कि सरो- ... हैं ॥ १७ ॥

और सरोवर के किनारे जो वृक्ष हैं उनके शाखा पत्र सब ठण्डे जलके बिन्दु सहित शीतल पवन से हलरी के इस से उस स्थान की बड़ी शोभा हो रही है ॥ १८ ॥

और नाना प्रकार के जङ्गल के जन्तु सब आपस में बैर को त्याग कर के स्थित हैं तिस से किसी बाधा की सम्भावना नहीं है और वृक्षों पर कोकिल शब्द करते हैं उस से मालूम होता है कि मार्ग आने वालों को बुलाते हैं ॥ १९ ॥

उस ठिकाने पुरञ्जन जीवने दैवयोगसे आई हुई एक उत्तम स्त्री को देखा (वह विवेक वाली बुद्धि है) उसके सौ सौ भृत्यों को साथ में लिये दश नौकर हैं वे वृत्तियों के सहित एकादश इन्द्रिय हैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्च शीर्षाणि वृत्तयो यस्य तेनाऽहिना प्राणेन प्रतीहारेण पालकेन गुप्ताम् ऋषभं भर्तारमन्वेषन्तीं षोडशवार्षिकीम् ॥ २१ ॥ गन्धज्ञानादिभिर्बुद्ध्यवयवैः सुनासत्वादिनिरूप्यते सर्वं विषयवती रञ्जितौ कर्णौ ताभ्यां कुण्डलशोभां वहतीम् ॥ २२ ॥ असमयं हि सौम्य ! मम इति मदकृष्यां तदवलोकनादि भुजङ्ग- सारेण श्यामामित्युक्तम् नूपुरैः कणन्त्याम नूपुरेण पादाङ्गु- लीयकानामप्युपलक्षणाद्गुडवत्तम् ॥ २३ ॥

...ः सटीकः श्रीविजयध्वजतीर्थमते ।

त्वं ह्रीः [illegible] पतिं विचिन्वती किं मुनिवद्रहो [illegible] ।
त्वदङ्घ्रिकामाप्तसमस्तकामं क्व पद्मकोशः पतितः कराग्रात् [illegible] २८

नासां वरोर्वन्यतमा भुवि स्पृक् पुरीमिमां वीरवरेण साकं [illegible]
अर्हस्यलंकर्तुमदभ्रकर्मणा लोकं परं श्रीरिव यज्ञपुंसा ॥ [illegible] ॥

यदेष मापाङ्गविखण्डितेन्द्रियं सव्रीडभावस्मितविभ्रमद्भ्रुवा [illegible]
त्वयोपसृष्टो भगवान् मनोभवः प्रबाधतेऽथानुगृहाण शोभने [illegible] ! ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यञ्जिते कैशोरे यौवनोपक्रमौ याभ्याम् समौ च वृत्तौ च ॥ २४ ॥

तामाहेति । तयोः सम्बोधोक्तिः सम्बन्धवाक्यार्थाय अपाङ्ग एव पुङ्खो मूलप्रान्तो यस्य कटाक्षस्य बाणस्य तेन स्पृष्टो विद्धः प्रेम्णा उद्भ्रमन्ती भ्रूर्धनुःस्थानीया यस्मिंस्तेन ॥ २५ ॥

कुतः स्थानादिहागतासि हे सति ! पुर्याः समीपस्था उपपुरी भूस्तामास्थाय किं कर्तुमिच्छसीत्यर्थः ॥ २६ ॥

ते तव केऽनुपथा अनुवर्तिन एते के एकादशो महान् भटो वृहद्दलत्वेन वक्ष्यमाणो येषु दशासु ते बुद्धेर्मनसः पृथगुपादाने बुद्धिपरिवारकेन्द्रियसहायतया तत्परिवारत्वविवक्षया ॥ २७ ॥

• त्वं ह्रीः किंस्वित् पतिं धर्मं विचिन्वती अथवा भवानी पतिं शिवं विचिन्वती अथवा किं वाक् सरस्वती पतिं ब्रह्माणम् रमा पतिं विष्णुम् मुनिरिव संयता सती कथम्भूतं पतिम् त्वदङ्घ्रिकामेनैव त्वत्कृतया त्वदङ्घ्रिकामनयैव प्राप्ताः समस्ताः कामा येन तम् ॥ २८ ॥

• हे वरोरु ! आसां मध्ये त्वमन्यतमापि न सम्भवसि यतो भुविस्पृक् नहि देवता भुवं स्पृशन्ति वीरवरेण मया ननु त्वमकर्मा कथं त्वया सहालङ्करोमीति चेत्तत्राह । अदभ्रमनल्पं कर्म त्वत्सङ्गार्थस्य मम तेन त्वत्तोऽकर्मत्वेन त्वत्सङ्गात्सकर्मा भवामीत्यर्थः परं वैकुण्ठम् ॥ २९ ॥

यदस्मात्तवापाङ्गेन विखण्डितमिन्द्रियं मनो यस्य तं मां मनोभवो बाधते अथ तस्मादनुगृहाण सव्रीडं यद्भावेन प्रेम्णा स्मितं तेन विभ्रमन्ती या भ्रूस्तयोपसृष्टः प्रेरितः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पञ्च शीर्षाणि पञ्च वृत्तयो यस्य तेनाहिना प्राणेन प्रतिहारेण पालकेन अहेर्वायुभक्षत्वेन तत्प्रचुरत्वादहिनेत्युक्तं सर्वतो गुप्तां रक्षितां सर्वेषामिन्द्रियाणां प्राणाधीनवृत्तित्वादहिना गुप्तामित्युक्तम् ऋषभं पतिमन्वेषमाणाम् अनेन चेतनैकधार्यत्वं तत्प्रवर्त्यत्वञ्च विवक्षितमप्रौढामिति बुद्धेश्चेतनेन सह संबन्धदशायामप्रौढप्रमेव कार्यक्षमत्वेऽपि तद्योग्यतास्तीति सूचयति कामरूपिणीमित्यनेन गन्धरसादिविज्ञानभेदभिन्नतां सूचयति ॥ २१ ॥

तदेव प्रपञ्चयति । सुनासामिति । बुद्धिवृत्तयो हि गन्धरसादिविज्ञानभेदेन तदवान्तरभेदेन च बहुविधाः ताभिर्बुद्धिवृत्तिभिस्तस्याः, सुनसत्वादि रूप्यते सुनासां शोभना नासा गन्धात्मिका प्राणेन्द्रियवृत्तिर्यस्यास्ताम् एवम् [illegible] पि दन्तकपोलाननशोणापाङ्गस्तनादिरूपव्यापारजन्यहर्षादीनामपि [illegible] बुद्धिवृत्तिभिस्ताभिः सुदन्तत्वादिरूपणं क्रियते नासिकादन्तकपोल [illegible] ननकर्णशोणापाङ्गस्तनादिविशेषणानां शोभनत्वसमाविन्द [illegible] त्यादीनामपि स्वविशेष्यभूतनासिकादेर्गन्धादिवृत्तिद्वारा बु [illegible] विशेषणत्वं द्रष्टव्यं समं विन्यस्ती रचितौ कर्णौ ताभ्यां कु [illegible] शोभां दधतीम् "अवमयं हि सौम्य ! मन" इति यत् कु [illegible] स्येत्याविभूत्यमुक्तांशश्यामाभिरयुक्तं कुण्डलश्रीसम्बन्धः [illegible] कुण्डलालङ्कृतकर्णा अकरणभोगेन्द्रियश्रवणवृत्तिद्वारा ॥ २२ ॥

एवं पिशङ्गनीविकनकमेखलासं [illegible] ऽपि स्तनगाभिमतव्यापारजन्यहर्षादिवृत्तिद्वारेति द्रष्टव्यं [illegible] नूपुरैः कणद्भ्यां पद्भ्यां चरन्तीं नूपुरगमनसम्बन्धोऽपि पादेन्द्रियवृत्ति [illegible] द्वारा कर्णाभ्यां स्पष्टं नूपुरैरिति बहुवचनं पादाङ्गुलीयकानामु [illegible] मन्यथा नूपुराभ्यामिति ब्रूयात ॥ २३ ॥

व्यञ्जिते कैशोरे यौवनोपक्रमो य [illegible] समौ च तौ वृत्तौ च निर्गतावन्तराल संश्लिष्टावित्यर्थः स्त [illegible] व्रीडया वज्रगा वस्त्रान्तेन निगूहन्तीं छादयन्तीं गज इव गच्छ [illegible] तीं गजगामिनीम् ॥ २४ ॥

व्रीडया सहितं यस्मिन् तेन [illegible] स्मितं प्रति वीरः पुरञ्जनः प्रेम्णा उद्भ्रमन्त्यौ भ्रुवौ यस्मि [illegible] स्निग्धापाङ्ग एव पुङ्खो मूलप्रान्तो यस्य कटाक्षबाणस्य ते [illegible] स्पृष्टो [illegible] श्लक्ष्णं यथा तथाह तयोः सम्बोधोक्तिः संबन्धवा [illegible] क्यम् ॥ २५ ॥

हे पद्मदललोचने ! का त्वं किंजातीया [illegible] संबन्धिनी पुत्री असि कुतः स्थानादिहागतासि [illegible] सति ! [illegible] मुपपुरीमस्याः पुर्याः समीपे किं कर्तुमिच्छसि ॥ [illegible]

एतेऽनुपथा अनुवर्तिनः क एते एकादश [illegible] बुद्धिमनसोर्वृत्तिकृतभेदमाश्रित्य मनसा सहेन्द्रिया [illegible] एकादशो महाभटो मनोरूपो येषां ते क एते इत्युक्त [illegible] : का इति वृत्त्यभिप्रायेण प्रश्नः तासामानन्त्या [illegible] त [illegible] अग्रगाको निर्देशः पुरःसरति गच्छतीति पुरःसरोऽहिः [illegible] प्रा [illegible] ध्याप्रियमाणां तदनु सर्वेन्द्रियव्यापारात्पुरः [illegible] रूपतत्कारणात्संबन्धकारणात्तत्कार्थावस्तु प्राप्ति [illegible] का- भिप्रायकं का त्वमिति प्रश्नकथनं ज्ञानकर्मेन्द्रिये [illegible] : बुद्ध्यायत्ता उत इति संशयनिराचिकीर्षाभिप्राय [illegible] इति प्रश्नकथनं बुद्धेरपि प्राणायत्तप्रवृत्तिरिति [illegible] तेऽहिः पुरःसर इति प्रश्नोक्तिः ॥ २७ ॥

त्वं ह्रीरिति । यस्यास्तवाङ्घ्रिकामनये [illegible] पतिं मुनिवद्रहः एकान्ते विचिन्वती [illegible] ह्रीः भूमिः उत शङ्करं विचिन्वती भवानी [illegible]

बिम्बवती वाक् स[illegible]मया विष्णुं बिभ्रती रमा
लक्ष्मीरसि यदि रम[illegible] करात्मक यदितः कराग्रे
पद्मकाशाभावान्न रमेव[illegible] कपेण प्रत्युक्तिः रमाद्रीणां
विष्णव्यादिभिरिवानाधि[illegible] पनाय कथासौन्दर्याय वा
एवमग्रेऽप्यनुपयुक्तं [illegible] द्रष्टव्यम् ॥ २८ ॥

एवंहयाद्यन्यतमा[illegible] काचि त्वं न भवसीत्याह-
नामानिति हे वरोरु[illegible] नीयमानानां मध्येऽन्यतमा
नासि न भवसि त[illegible] भुवः स्पृक् भुवं स्पृशतीति
भूस्पृक् न हि रमादी[illegible] भुवं स्पृशतीति भावः मनो-
मत्प्रार्थितं कुर्विस्या[illegible] कर्मणानल्पकर्मणा वीरवरेण
वीरश्रेष्ठेन मया सा[illegible] मप्रमुखीमलङ्कर्तुं शोभयितु-
मर्हसि परं लोकं [illegible] विष्णुना सह श्रीर्लक्ष्मीरिव
मया सह पुरीं प्र[illegible] र्थः ॥ २९ ॥

यतस्मात्तवा[illegible] मिन्द्रियं मनो यस्य तं मां
सव्रीडं यद्भावेन [illegible] न सविभ्रमा या भ्रूस्तयोपसृष्टः
[illegible] मनोभवः [illegible] प्रयातः अनुगृहाण हे शो-
भने ॥ ३० ॥

[illegible]कृतपदरत्नावली ।

अत्र पुरं[illegible] भार्यायास्ते सर्वेऽपि मानु-
षेन्द्रियाभिमा[illegible] देवेन्द्रियतद्वृत्तीनामभिमानिन्य
इति । तदुक्त[illegible]

ये [illegible] ार्यायाः सर्व एव च ।
ते[illegible] विद्यया अभिमानिनः ।
[illegible] तेऽपि चैतेषु संस्थिताः ।
[illegible] मानुरास्तेऽपि मानुषा इति ।

तेषां सर्वे[illegible] नामा जीवो वा तत्तद्विषयवैचि-
त्र्यमपेक्ष्य [illegible] जीवस्य तु योनीनां वैचित्र्यात् ॥०॥

पञ्च[illegible] दिपञ्चवृत्त्यात्त्याशिरसा मुख्यप्राणा-
ख्यसर्पेण[illegible] लक्षणवर्तमानेन ऋषभं पतिं स्वकृत्य-
नुकूलवृ[illegible] त्यर्थः अत एवाप्रौढामनूढामपरि-
गृहीतप[illegible] त्यर्थः कामरूपिणीं विषयवैचित्र्यास्त-
त्ताका[illegible] २१ ॥

उ[illegible] सिकां सुदतीं विषयवृत्तिलक्षणादन्ताम्
यस्यां [illegible] अभ्यन्तरवृत्तिलक्षणाभ्यां शोभनाभ्यां वरं
वरणीं[illegible] : सा तथा नाम नचेष्टायामिति धातुः
नमं [illegible] पाभ्यां कपिलाभ्यां ग्राणान्तःकरणवि-
शेषा[illegible] भेदेन ताभ्यां मनोरूपाभ्यां कुण्डल-
श्रियं [illegible] श्रियं बिभ्रतीं वर्तमानाम् ॥ २२ ॥

[illegible] का नीवी आच्छादकवृत्तिर्यस्याः, सा
तथा[illegible] मुख्याश्रयवृत्तिमतीं श्यामां तत्तोगुणप्र-
धुप[illegible] गुणालक्षणासुवर्णकाञ्चीं पद्भ्यां रजस्त-
मो[illegible] यां नूपुरैः शिञ्जकलभाषणालक्षणैः कथा-
[illegible] लक्षणायुक्त्या ऊहनीया न वाच्यवृत्त्या काचि-
[illegible] तत्रिविषयत्वाद्दृश्यतामिवेति ॥ २३ ॥

[illegible] मभिव्यञ्जितमध्यमावस्थौ मध्यमां बुद्धिसं-

वस्तुवृत्तलक्षणोपेतौ [illegible] बुद्धिं [illegible]
लघुर्वरहितावित्यर्थः व्रीडया वृत्तिविशेषेण, वक्षुप्तेन [illegible]
माच्छादन इति धातोराच्छादकशक्तिवृत्तिभागेन निगूहन्तीमन-
भिव्यक्तिं कुर्वाणां गजगामिनीं गजवदूर्ध्वमूलाधाराद्धारकर्त्री
बुद्धिम् ॥ २४ ॥

आहेति । स्वकार्यविषये प्रवर्तयितुमभिमुखीचकार वीरो
विशिष्टप्राणबलोपेतः स व्रीडस्मितशोभिनीं स्वकार्याभिमुखीम
अपाङ्गमेत्यादिनापि तत्प्रयोगवृत्तिविशेषं दर्शयति प्रेम्णा भ्रमं-
ती भ्रूः प्रेमभ्रमद्भ्रूस्तया ॥ २५ ॥

का त्वमित्यादिश्लोकानुकारवचनं भ्रान्त्या प्रलापो वा उपपु-
रीमित्यनेन ज्ञायते अभ्यर्णोपपुरीति ह्रस्वत्वेन प्रयोगः स्यात्
देहसमीपे वर्तमानाम् ॥ २६ ॥

अनुपथाः स्वमार्गमनुवर्तमाना ये इमे मनसा सह एकाद-
शभटा एते ललविलास इति धातोः ललना विलासोपेता वृत्ति-
विशेषाः हि गन्ता चितिधातोः अहिरगनः सह भजः पुरःसरो
नासिकारन्ध्रचरः श्वासः ॥ २७ ॥

त्वं ह्रीरित्यादिकमनुकरणं लज्जावृत्तिविशिष्टत्वात् ह्रीः संक-
ल्पवृत्त्या भवानीति वचनवृत्त्या वाक् रमणवृत्त्या रमा पतिं देह-
स्वामिनं वने देहलक्षणे वासभवने मुनिवन्मनोवत् स्वहर्षिता-
नाम्बेनाप्ताः समस्ताः कामा येन स तथा अविरचितविषयार्थी
इति धातोः यथा भक्तप्रयोगे विलापनत्वं तथा मनसोऽपि मनसा
संकल्प्य पुरुषस्य विषयोपगमनात् यत्कोशः कन्दुकवर्ग [illegible]
मनः कराग्रावृत्तिविशेषात्पतितो गतः क वा वृत्तिमुपगत इति
वाक्यार्थः स्पष्टः ॥ २८ ॥

हे वरोरु ! यदि त्वमासां ह्रीमुखानां वृत्तिविशेषाणामन्यतमा
वृत्तिविशिष्टा नासि किंतु स्थिरवृत्तिविशिष्टासि भुवि [illegible]-
णि स्पृक् आशावती तर्हि व्यग्रकर्मणा महापराक्रमवता वीरव-
रेण मया साकमिमां पुरीं देहलक्षणामलंकर्तुमर्हसि कथमि-
व यज्ञपुंसा श्रीनारायणेन सह श्रीः परं लोकं वैकुण्ठमिव-
मिवेत्यन्वयः अव्यग्रकर्मणेति कर्मानन्त्यं दर्शयति ॥ २९ ॥

हे शोभने ! व्रीडया सहितो हासः व्रीडाहासस्तेन युक्तेन मुखे-
न विभ्रमन्त्यौ भ्रुवौ यस्याः सा तथा तस्यास्तव सकाशादुप-
सृष्टः प्राप्त एव मनोभवो मनसो जातो रागलक्षणो वृत्ति-
विशेषो भगवांस्ताभिः भूज्यो मा मां प्रबाधते सानुकूलकर्म-
णा यः सङ्गं करोति यतस्मादथ तस्मादनुगृहाणेत्यन्वयः
कथम्भूतं मामपाङ्गेन शरीराहितेन वृत्तिविशेषेण विक्षिप्तता-
नीन्द्रियाणि यस्य स तथा तम् ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

स्निग्धेन स्निग्धत्वादलब्धभङ्गेनापाङ्गरूपेण बाणस्य पुङ्खेन
तत्पर्यन्तभागेनापि स्पृष्टो विद्ध इत्यर्थः ॥ २५—२९ ॥

यदेव तेऽपाङ्गेति । अयोपसृष्ट इति प्रबाधतेऽथानुगृहाणेति
प्रथमतृतीयचतुर्थचरणेषु पाठा दृश्यन्ते । तत्र स्वयोजित विषयत्व-
संमतश्च । किन्तु यदेव तेऽपाङ्गेति अयोपसृष्ट इति प्रबाधते
मानुगृहाणेत्येव पाठाः स्वामिसंमता दृश्यन्ते ॥ ३०—३१ ॥

[illegible]

[illegible] पञ्चवृत्तिः प्राणः तेन प्रतीहारेण द्वार-
पालेन गुप्तां रक्षिताम्। कुचयोः तस्या उपभोकारं पतिं जीवमप्री-
तिमिवाप्रीतेव कान्ता यथा पतिं मोहयति तथैवाविद्यावृत्ति-
[illegible]मित्यर्थः। कामरूपिणीं नित्यविविधश्रृङ्गारधारिणीं पक्षे
विविधवासनावतीम् ॥ २१ ॥

गन्धकामादिभिर्बुद्धेर्वृत्तिभिरेवावयवैः सुधाकल्पामिव रूप्यते
[illegible]कर्णासकयो वृत्ताः सुकपोलत्वं बुद्धेः स्वच्छता
मानमं बुद्धेरप्रमाणः सर्वं यथा स्यात्तथा [illegible] कौशलेन
विन्यस्ताविव यौ कर्णौ ताभ्यां कुण्डलशोभां बिभ्रतीं प्रवृत्ति-
निवृत्तिधारणार्थमवधारयन्तीम् ॥ २२ ॥

शिराङ्गनीर्णां पीताम्बरां रजोगुणमयसमस्तालंकृतां श्यामामिति
बुद्धेः श्यामत्वात् तत्र तस्या जीवान् प्रति सुखप्राणीयेश्वरावरकमे-
[illegible]नीयत्वात्। कणाभ्यामिति। चलन्तीमित्याभ्यां बुद्धेरस्थैर्यमेव
[illegible] धाव्हितमिति द्योतितं नूपुरैरिति बहुवचनेन पादाङ्गुली-
[illegible]न्यप्युपलक्षितानि ॥ २३ ॥

समौ रागद्वेषौ। यदुक्तं। इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ
व्यवस्थितौ। न तयोर्वशमागच्छेत्तौ ह्यस्य परिपन्थिनाविति।
[illegible]विरत एव वृद्धस्यापि रागद्वेषौ नित्यतत्त्वावेन
[illegible] समौ च वृत्तौ वर्तुलौ च पक्षे समं तुल्यमेव
[illegible] चरितं ययोस्तौ। निरन्तरावतिपीनत्वाम्मृद्-
[illegible] पक्षे वस्तुतस्तयोरैक्येन निर्भेदौ यदुक्तं।
[illegible] एष क्रोध एष रजोगुणसमुद्भव इति बिभ्रतीमिति
रागद्वेषावपि [illegible] बिभृते एव ॥ २४ ॥

अविद्यावृत्त्या जीवः [illegible]एव बध्नाति। न तु नमीश्व-
[illegible] बलात्कारेण बध्नातीति वक्तुं तयोः सम्बन्धस्य प्रका-
[illegible] तामाहेति। स्निग्धेन स्निग्धत्वाद्वक्रभङ्गेन अपाङ्गरूपेण
[illegible] कटाक्षशरेण विद्ध इत्यर्थः। यतो वीरः
वीरत्वादेव तद्व्यग्रचित्त इत्यर्थः। पक्षे भोगोत्साहवत्त्वाद्वीरः।
[illegible]। अविद्या खलु भोग्यपदार्थभूतं यं दर्शयति जीवस्तत्र
सुरसबुद्ध्या भोक्तृत्वमङ्गीकुर्वन् अनुरज्यति। ईश्वरस्तु तत्र विरस-
बुद्ध्या ततो विरज्यतीति ॥ २५ ॥

यद्यपि बुद्ध्यादिभिः सहैव जीवस्य सर्वदा स्थितिस्तथापि
[illegible] बुद्ध्यादयो विलक्षणा भवन्तीत्यनुरा-
[illegible] तां बुद्धिमपरिचिन्वन्निव पृच्छति। का त्वमिति। कुतः
[illegible]गतासि। हे सखि! पुर्याः समीपस्था उपपुरी उपवन-
[illegible] किं कर्तुमिच्छसि ॥ २६ ॥

अनुपथा अनुवर्तिनः एकादशो महाभटो येभ्यस्ते वृद्धल
[illegible] मम आलक्ष्य [illegible] इन्द्रियवृत्तीरा-
[illegible] क्रीडोपकरणीभूत इति प्राणमालक्ष्य प्रश्नः ॥ २७ ॥

लोके अविवेकात् स्वस्य बुद्धिकर्तृकेति सर्वस्याभिमतिरिति
पुरञ्जनवाक्येनाभिव्यञ्जयति। त्वं ह्रीरिति। तस्या मुखनेत्राद्यवय-
[illegible] हिरमालक्ष्य न त्वं ह्रीमती किन्तु साक्षात् स्वयं
ह्रीरेव मां मोहयन्ती सती किं पतिं भर्म विचिन्वती अत्र वने
रहो वससे इति स्वबुद्धिवृत्तिमाधुर्यैः स्वमोहनप्रपञ्चः। अथवा
भवानीति सौन्दर्यमालक्ष्योक्तः पतिं शिवं विचिन्वती किं वाक्
[illegible] तस्या महाबुद्धिमत्तामालक्ष्य पतिं ब्रह्माणं रमा
लक्ष्मीरिति महासम्पत्तिमभिलक्ष्य पतिं विष्णुं मुनिरिव संयता

[illegible]

येन ते। लोकेऽपि [illegible] सर्वमैश्वर्यं [illegible]
भुवते। केति पञ्चकोशो [illegible] स च जीवस्य विवेक [illegible]
तया तद्विचितमेव सहस्रशीर्षा [illegible]रतः स्थित इति भेयम् ॥ २८ ॥

त्वदनुरूपोऽहमेवेति वक्तुं [illegible] सन्देहं स्वयमेव निरस्यति
नासामिति। हे वरोरु! यतस्त्वं [illegible] स्पृहा न। हि देवता भुवं स्पृ-
शन्ति वीरवरेण मया परं [illegible] पक्षे किमाश्रितविवेकप्राप्त्या
स्वबुद्धिर्न सर्वोत्कृष्टा मन्यते [illegible]कः किन्तु स्वानुरूपामेवेति
भावः ॥ २९ ॥

यद्यस्मात्तवापाङ्गेन विकाशि[illegible]मिन्द्रियं चक्षुर्यस्य तं मां मनो-
भवो मदनस्त्वया उपस्रष्टुः प्रेरितः [illegible]न् बाधते। पक्षे विकाशितत्वा-
मवक्षुर्ग मनोभवो वैषयिकीवासना [illegible]स्वयैवाधिक्येन निर्मितां
मां बाधते अतोऽनुगृहाण त्वदीयानि [illegible]दीनुपभोक्तुं समे-
येत्यर्थः। वस्तुतस्त्वनुगृहाण कामिनीं [illegible] सन्दर्शयेति देव-
घटितोऽर्थः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पञ्चशीर्षोऽपि प्राणापानादि[illegible] यस्य तेनाहिना देहवि-
वरेणान्यांशुनेत्यर्थः प्रतिहारेण [illegible] गुप्तां रक्षिताम
चेतनं विना अचेतनरूपायाः [illegible]मायाः प्रमदाया इव
हीनत्वात् सुप्तं चेतनमन्वेषमाणां मृगकान्तिमपीडां बालां
भगवदनुग्रहं विना मुक्तिमार्गेऽलाभवतीं कामरूपिणीं संसार-
मार्गे नानारूपधारिणीम् ॥ २१ ॥

गन्धादिविषयविकाशिनाभिर्वृत्तिभिः [illegible] समाधि-
न्यस्तौ रचितौ यौ कर्णौ ताभ्यां कुण्डलाभ्यां बिभ्रतीं श्रोत्र-
सिद्धकुण्डलादिविषयकाभिर्वृत्तिभिः [illegible] ॥ २२ ॥
श्यामामित्यनेन तस्यास्तृष्णा [illegible]रूपेण नित्यं तारुण्यं विवक्षि-
तं यथोक्तं महाभारते।

जीर्यन्ति जीर्यतः केशा दन्ता [illegible] जीर्यतः।

अहो बलीयसी तृष्णा या नित्यं तरु[illegible]यते [illegible]।

नूपुराभ्यामिति वक्तव्ये बहुवचनमेकैक[illegible]नूपुर[illegible]विषयिका
वृत्तयोऽनेकरूपा इति द्योतयति देवतामि[illegible]यनेना[illegible] बहिः
शुद्धेवेति द्योत्यते ॥ २३ ॥ २४ ॥

कथासौन्दर्याय संवन्धदार्ढ्याय च तयोः [illegible]तामाहेति-
वीरः पुरञ्जनः व्रीडया संहितं यस्मिन् तं मन[illegible] मिलनमनां
तां पुरञ्जनीं लज्जितं यथा तथाह कथंभूतः [illegible]
भ्रूधनुःस्थानीया यत्र तेन अपाङ्ग एव पुङ्खो [illegible] तेन
कटाक्षरूपेण बाणेन स्पृष्टो विद्धः ॥ २५ ॥

तद्वाक्यमाह। कात्वमिति षड्भिः। इमां पु[illegible] किमि
कीर्षसि मे मह्यं शंस कथय ॥ २६ ॥

ते तव ये अनुपथाः अनुचरास्ते एते के [illegible]या-
यथालक्ष्याहैकादशमहाभटा इति। एकादशोम[illegible]
सु ते सहस्त्रिरालक्ष्याह। एता चेति। प्राणमा[illegible]
सरति गच्छतीति अग्रगः अयमहिनागः ॥ २७ ॥

त्वं ह्रीः असि त्वदङ्घ्रिरेव काम्यते इति [illegible]
समस्ताः कामा येन तं स्वप्राप्त्यैव [illegible]
धर्मं वने रहः एकान्ते मुनिर्वाञ्छन्ती [illegible]

[illegible] में [illegible] मद्रीडया नाभिमुखं [illegible] ॥ २१ ॥

॥ नारद उवाच ॥

इत्थं पुरञ्जनं नारी याचमानमधीरवत् ।
अभ्यनन्दत तं वीरं हसन्ती वीरमोहिता ॥ २२ ॥

न विदाम वयं सम्यक्कर्तारं पुरुषर्षभ ! ।
आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥ २३ ॥

[illegible] सन्तमात्मानं विदाम न ततः परम् ।
[illegible] निर्मिता वीर ! पुरी शरणमात्मनः ॥ २४ ॥

श्रीम[illegible]न्तप्रदीपः ।

[illegible] पतिं [illegible] सरस्वती असि पतिं [illegible] [illegible] त्वं [illegible] विचिन्वती यद्वा [illegible] त्वमसि तर्हि [illegible] पतितः ॥ २८ ॥

आसामन्य[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥ २९ ॥

[illegible]

भाषाटीका ।

(हे ! [illegible] स्त्रियों के सहित उन वशों का मालिक सब के [illegible] वाला बहु रूप धारियों मे श्रेष्ठ उस नारीका [illegible] ॥ २० ॥

यह [illegible] ही है कामरूपिणी है पांच फणवाला एक सर्प [illegible] है तिस से यह सब प्रकार से सुरक्षित है ।

[illegible] अति सुन्दर गण्डस्थल सुन्दर है बाला-वस्था [illegible] है सुन्दर समकर्णों की शोभा से कुण्ड[illegible] करती है ॥ २२ ॥

[illegible] है पिङ्गलवर्ण उसकी ओढनी है उस का क[illegible] शोभित है नूपुरबाजा से शब्दायमान चर-णोंसे [illegible] सरी की मालूम देती है ॥ २३ ॥

[illegible] अवस्था को जना रहे हैं सुन्दर गोल है [illegible] दोनों स्तनों को लज्जा के मारे वस्त्र के [illegible] है हस्ती सरीखा गमन करतीहै ॥ २४ ॥

[illegible] लज्जा सहित मनोहर कटाक्षरूपी [illegible] [illegible] वह वीर जीव पुरंजन उस पुर्वी स्त्री से [illegible] ॥ २५ ॥

हे कमल दल लोचनी ! तू कौन है कौनकी है यहां कहां से आई है हे सति ! उपवनवाली इस पुरी मे तू क्या करनेको आई है सो मेरे से कह देना ॥ २६ ॥

ए ग्यारह [illegible] कौन तेरे साथ हैं हे सुन्दर [illegible] [illegible] कौन हैं यह आगे [illegible] सर्प कौन है ॥ २७ ॥

तू [illegible] है अथवा [illegible] है [illegible] [illegible] [illegible] [illegible] पति को [illegible] [illegible] पति के [illegible] [illegible] तेरे हाथ में [illegible] ॥ २८ ॥

[illegible] तू कोई नहीं है क्योंकि पृथ्वी को स्पर्श [illegible] [illegible] परन्तु तु [illegible] में [illegible] [illegible] मेरे सहित इस पुरी को [illegible] [illegible] [illegible] [illegible] विष्णु के सहित [illegible] शोभित करती है ॥ २९ ॥

तेरे नेत्र के कटाक्षों से मेरी सब इन्द्रिय शिथिल हो गई हैं मन्दहास युक्त लज्जा युक्त भृकुटी सहित तेरा कटाक्ष है तेरा चलाया हुआ भगवान् कामदेव मेरे को बाधा करता है हे शोभने ! मेरे पर अनुग्रह करदे ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्व्रीडया सम्मुखं न भवति तदाननमुन्नीय मे [illegible] [illegible] यस्मिन् सुतारे [illegible] [illegible] यस्मिन् [illegible] [illegible] ये [illegible] [illegible] [illegible] [illegible] वाक्यानि यस्मिन् ॥ ३१ ॥

हेवीर ! सापि तं दृष्ट्वा मोहिता सती तमाह ॥ ३२ ॥

यत्पृष्टं कस्यासीत्यनेन कस्य पुत्री गोत्रजेति [illegible] किं नामासीति तत्राह । आत्मनो मम परस्य तथापि [illegible] सम्यङ् न विद्मः गोत्रं नाम च यत्कृतं [illegible] विद्मः ॥ ३३ ॥

आत्मनो मम [illegible] पुरी येन निर्मिता [illegible] विद्मः ॥ ३४ ॥

[illegible] मे मरा [illegible]
सुप्तायां मयि जागर्ति नागोऽयं पालयन् पुरीम् ॥ ३५ ॥
दिष्ट्याऽऽगतोऽसि भद्रं ते ग्राम्यान् कामानभीप्ससे ।
उद्वहिष्यामि तांस्तेऽहं स्वबन्धुभिररिन्दम ! ॥ ३६ ॥
इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो ! ।
मयोपनीतान् गृह्णानः कामभोगान् शतं समाः ॥ ३७ ॥
कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदम् ।
असम्परायाभिमुखमश्वस्तनविदं पशुम् ॥ ३८ ॥
धर्मो ह्यत्रार्थकामौ च प्रजानन्दोऽमृतं यशः
लोका विशोका विरजा यान्न केवलिनो विदुः ॥ ३९ ॥
पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह ।
क्षेम्यं वदन्ति शरणं भवेऽस्मिन् यद्गृहाश्रमः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्पृष्टं क एते अनुपथा इति तत्राह । एत इति ॥ ३५ ॥

आगतो नाम गोत्रादि [illegible] पर्याप्त्या भद्रं तावत् [illegible] उद्वहिष्यामि सम्पादयिष्यामि स्वबन्धुभिः सखिभिः सखीभिश्च ॥ ३६ ॥

समाः सम्वत्सरान् मनुष्यदेहप्रवेशात्प्रभृतमित्युक्तम् ॥ ३७ ॥

प्रवृत्तिस्वभावस्याविवृत्तिमिच्छापूर्वकं तत्सङ्गमभिनन्दति । कमिति पञ्चभिः । त्वत्तोऽन्यं कं नु रमये अरतिज्ञं नैष्ठिकम् । अकोविदम् [illegible] । सम्परायो मृत्युस्तदभिमुखं परलोकचिन्ताशून्यम् । अश्वस्तनविदं श्व इदं कर्तव्यमितीहलोकचिन्ताशून्यम् । अतएव पशुतुल्यम् ॥ ३८ ॥

अत्र गार्हस्थ्ये । प्रजानन्दः पुत्रसुखम् । अमृतं मोक्षः । केवलिनो यतयः ॥ ३९ ॥

गृहाश्रम इति यदेतत्क्षेमार्हं शरण्यमाश्रयं वदन्ति ॥ ४० ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यन्मुखं व्रीडयाभिमुखं न भवति तत् स्वमाननमुन्नीय मह्यं दर्शय आननं विशिनष्टि । शोभने भ्रुवौ यस्मिन् सुतारे कनीनिके लोचने यस्मिन् व्यालम्बिनो दीर्घा ये नीलालकास्तेषां वृन्देन संवृतं वल्गूनि वाचकानि वाक्यानि यस्मिन् शुचि स्मितं यस्मिन् शुचिस्मिते इतिपाठे सम्बोधनम् ॥ ३१ ॥

एवमधीरवद्विजितेन्द्रियवद्याचमानं पुरञ्जनं नारी प्रमदा वीरं [illegible] मोहिता सती वीरं तं मोहयन्ती अभ्यनन्दत्तानेना-न्योन्यानुरागातिशयं सूच्यते ॥ ३२ ॥

यत्पृष्टं कस्यासीति अनेन कस्य पुत्रीजातेति कास्त्वमिति किं-कर्तृका किमासीति तत्राह । नेति । आत्मनो मम परस्य तथापि कर्तारं सुतारं सम्यक् न विद्मः कर्तारं विशिनष्टि । गोत्रं नाम च यत्कृतं येन कर्त्रा कृतं भवति ॥ ३३ ॥

इहास्यां पुर्यामधुना सन्तं वसन्तं आत्मानं पुरीमन्यः प्रविश्य नियन्तारं त्वां जानीमः ततः आत्मनः स्वेतः मत्तश्च परं विलक्षणं पुरुषं न विद्मः कोऽसौ परः यं न विद्म इति वदसि तत्राह । हेवीर ! आत्मनस्तव मम च शरणमिदं पुरं येन निर्मितं तमिन्मर्थं इहाद्य सन्तमात्मानं विद्म इत्यनेन केवलसंसारिणो जीवस्य बुद्धिः [illegible] न तु यथाऽस्माभिरुक्तं न विद्म वयं वीर ! कर्तारं न विद्म ततः परं येनेयं निर्मिता वीर ! पुरीत्यनेन जीवस्य कर्तृत्वादि [illegible] परमपुरुषमापाततस्तत्वतश्च न विषयीकरोतीत्युक्तम् ॥ ३४ ॥

यत्पृष्टं क एतेऽनुपथा इति तत्राह । एत इति । [illegible] महाभटाः ता ललनाश्च मे मम सखायः [illegible] भृत्या इत्यर्थः अनेनेन्द्रियाणां तद्वृत्तीनां च बुद्धेः [illegible] यत्पृष्टं कोऽयं तेऽहिः पुरः सर इति तत्राह । मयि सुप्तायां सत्यामयं नागः पुरीं पालयन् जागर्ति अनेन बुद्धीन्द्रियमनआदिषु सर्वेषु सुप्ते निर्व्यापारेषु सत्स्वपि प्राणव्यापारोऽस्तीति [illegible] प्राधान्यमुक्तम् ॥ ३५ ॥

आगतो नाम गोत्रादि इहाया पुर्यामागतो [illegible] मनुष्यदेहसंबन्धो दैवकृतो दुर्लभ इत्युक्तम् अतस्ते भद्रं ता [illegible] माहशब्दादीनवाप्स्यसि हेऽरिन्दम ! अहं स्वबन्धु [illegible] भिरि-न्द्रियैः सहेत्यर्थः तान् ग्राम्यान् भोगांस्ते [illegible] सम्पादयिष्यामि ॥ ३६ ॥

हे विभो ! नव द्वारामिमां पुरीं शतं समाः सम्वत्स [illegible] तान्प्रापितान्कामान् गृह्णानः अधितिष्ठस्व मनुष्य [illegible] येण शतमित्युक्तम् ॥ ३७ ॥

संसारिणो जीवस्य प्रवृत्तिस्वभावस्याविवृत्ति [illegible] सङ्गमभिनन्दति पञ्चभिः । कंनिति ! त्वत्तोऽन्यं [illegible] गाभ्यनेन निवृत्तिमार्गनिष्ठो न बुधपधीन इत्य [illegible] नैष्ठिक विरक्तमित्यर्थः अत एवाकोविदमित [illegible]

मुखं मरणाभीरुमिति वा "[illegible] प्रतीक्षन्ते मृत्युं प्रियमिवा-तिथिमि"त्युक्तेः मन्वन्तमाविदं [illegible] स्वर्गादिभोग्यत्वेन न वेत्तीत्यर्थः [illegible] "एने वै निरयास्तात ! स्थानस्य परमात्मनः" इति ।

वासुदेवे मनो यस्य [illegible] जपहोमार्चनादिषु ।

तस्यान्तरायो मैवेन्द्र ! देवेन्द्रत्वादिकं फलमिति ।

स्वर्गादिसुखस्य मुमुक्षोर्बाधकादित्यर्थः पशुं पशुतुल्यमिति भिन्दति ॥ ३८ ॥

एवं निवृत्तिधर्मस्यं निन्दित्वा प्रवृत्तिधर्ममाह स्तौति । धर्मं इति । अत्र प्रवृत्तिमार्गे धर्मः स्वर्गादिसाधनो यागादिरूपो धर्मः तथार्थः कामो प्रजानन्दः पुत्रसुखमनूनं मोक्षः यशः कीर्तिः विशोकाः निःदुःखा विरजाश्च निर्मला लोकाः पुण्यलोकाश्च सिध्यन्तीति शेषः लोकान् विजानहि । यान् लोकान् केवलिनो निवृत्तिधर्मस्था न विदुः ॥ ३९ ॥

"किञ्चास्मिन्भवे गृहाश्रम इति यदेतत्पित्रादीनां क्षेमार्हं शरणमाश्रयं वदन्ति पित्रादीनां गृहाश्रमिणामाराधनमाश्रित्यावस्थानात् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे शुचिस्मिते ! विमेघाविकासं स्वदाननं तव वेषाविशेषं मे दर्शयेत्यन्वयः सुभ्रु शोभना भ्रूर्भ्रमगर्तादिक विषयेषु यस्य तत्तथा, सुतरां शोभनं लोचनमालोचनं लौकिकं ज्ञानं यस्य तत्तथा ततस्तर्हि किमिति न प्रकाशते इत्यत उक्तं व्यालम्बीति व्यालम्बिनामविकासिनां भ्रमराणां नीलालकोपमचूर्णानां तामसानां वृत्तिविशेषाणां वृन्देन संवृतं गूढं तस्माच्च प्रकाशत इत्यर्थः तर्हि कथं दर्शनमिति तत्राह । वल्गीयेति । तामसवृत्तिविशेषाद् पृथक्कृत्य पुनरपि कीदृशं वल्गु सुंदरं वाचकं वचनम् वाक्यं यस्य तत्तथा यदाननं व्रीडया वृत्तिविशेषेण ममाननभिमुखं न संमुखं तदिति शेषः ॥ ३१ ॥

नरः पुरुषस्त्वं पुंस्विनी नारी वैषयिकी बुद्धिः रमन्ती उल्लसन्ती विशि [illegible] ज्ञानं यस्य स वीरस्तमपि मोहयितुं शीलमस्या [illegible] मोहिनीति ॥ ३२ ॥

[illegible] देहाय

यदुक्तं । [illegible] ह । नेति । हे पुरुषश्रेष्ठ ! कर्तारमुत्पादकं मत्तो [illegible] भ्यग् वयमावयोः न विद्म न जानीम हे [illegible] कश्चिदस्तीति सामान्यमेव न तु विशिष्टमित्यतः [illegible] आत्मनो मम परस्योत्पादकस्यापि यथा नाम [illegible] तदपि न जानीमह इत्यन्वयः अन्यामणो नाम [illegible]

[illegible] येऽस्मिन् येऽद्य स्थितास्त्विति तत्राह । इहेति । इहं [illegible] महमित्यद्येदानीं जानीमहे उत्तरकाले सम्बन्धः [illegible] ततोऽन्यत्किमपि न विद्म इत्यन्वयः तस्मा [illegible] येनेश्वरेण मम शरणं निवासयोग्यं पु [illegible] ॥ ३४ ॥

[illegible] न तत्राह । एत इति ॥ ३५ ॥

[illegible] ः ॥ ३६ ॥

दुष्यन्तीरीरमिहामिप्रेतम् ॥ ३७ ॥

अत्र हि ज्ञानोत्पत्तिः कुत इति तत्राह । काश्चिदिति । का वृत्तिस्तत्स्वरूपं मनुष्यशरीरप्रविष्टं चेतनं [illegible] पश्वादिशरीरगतं चेतसुखितं कुर्यादित्यन्वयः कुत [illegible] उक्तम् । अरतिज्ञमिति ।

—[illegible] त्मनात्मनिवेशन व्यावृत्तमनुदात्तमानव इति स्मृतेः ।

परमात्मरतिज्ञानरहितं शब्दादिविषयरतिज्ञानहीनं वा तदपि कुत इत्यत उक्तम् । अकोविदमिति । अपण्डितत्वादित्यर्थः पण्डितत्वाभावः कथमित्यत आह । असांपरायेति । सांपरायो मोक्षस्तदभिमुखो न भवतीत्यसांपरायाभिमुखस्तं गृहाभिमुखकामो न ज्ञानाभिमुखत्वं कथमित्यत उक्तमद्यश्वस्तनविदमिति श्वस्तनं भविष्यद्वेत्तीत्यद्यश्वस्तनवित्तं न विदुः श्वस्तनं न लोकालोकाविति श्रुतिः श्वस्तनं तमपीदृशमिति न वेत्तीत्यद्यश्वस्तनवित्तं वा कोऽन्यो वेद विद्य इत्युक्तं पशुमिति तत्त्वज्ञानरहितमत्र सहृदयसहृशी द्वे यथासंभवं विशेषणैकत्वपर्यवतया ज्ञातव्ये असहायविवक्षायां पाशुपतागमज्ञानशून्यम् अन्यथोक्तार्थः असहायपक्षेऽपि स्वमतानुसारेण मोक्षादिकं इत्यसौवार्थेन इदं समस्तमुपपन्नमिति ॥ ३८ ॥

इतोऽपि श्वस्तनोऽपि नास्त्येवेत्याह । धर्म इति । अत्र भवति धर्मादयः सन्तीति हि यस्मात्तस्मात्प्रजानन्दः । पुत्रसुखमनूनं मोक्षमन्योन्यमविरोधेन धर्मादयः पुमर्थानां न सुखाकमिति भावेनाह । यानिति । केवलिनो निर्विकल्पना उदङ्कमरिका वा ॥ ३९ ॥

सर्वाश्रमाणामुपजीव्यत्वात् गृहाश्रम एव व्यावर्तितमाह । पितृदेवेति । आत्मनोऽस्य देहस्य क्षेमं मोक्षयोग्यं शरण्यं वदन्तीति यत्तस्मादिति शेषः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इतिहासपक्षे पुरञ्जनभोगार्थं परोक्षेण काचिदेव निर्मितेयमिति न विद्मेत्युक्तम् ॥ ३३—३४—३५ ॥

सांस्वंऽहमित्यत्र स्नेहानिति कश्चित् ॥ ३९—५३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्मृतिभ्रष्टस्य कामिनो जीवस्य वैयग्र्यं दर्शयति । त्वमिति । वल्गु मनोहरं यथा स्यात्तथा वक्तीति तत् । यदाननं तदेवं न ममाभिमुखमिति भगवत्यपि देवि मदीयचिन्मयज्ञानानन्दभोगादहं स्वतो वञ्चित एव किन्तु स्त्रीयां रूपादिविषयसम्पत्ति सम्प्रति मन्नोपभोग्यत्वेनोपकल्पय अत्रमेतावता वाक्येन तत्राननामत्यादिना रूपरसगन्धस्पर्शानां वाचकमिति शब्दस्य च भोगप्रार्थनाभिव्यञ्जिता ॥ ३१ ॥

अधीरवत् वस्तुतस्तु चिद्रूपत्वाद्धीरमेव । हेवीरेति । तथैव कथं कथ्यत इति ध्वनिः । मोहिनेति । यथा चिद्रूपमायूर्ध्वकस्तथा जीवोऽनुरञ्जितस्तथा चिन्मायूर्ध्वजीविनापि स्वानुरञ्जितेत्यर्थः ॥ ३२ ॥

यत् पृष्टं कस्यासि कासीति तत्राह । न विद्मेति । कथापक्षे कस्यचिन्मुनेर्मोहनार्थमायातायाः कस्याश्चिदप्सरस इयं कन्येति वा जानीते स्म अध्यात्मपक्षे या जीवज्ञानमावृणोति सा कस्मादीश्वरमहं जानामीति व्याहर्तुमर्हतु नोचमिति । किं गोत्रजाहं नामापि किं नाम्नी चाहमिति न विद्म ॥ ३३ ॥

तर्हि किं जानामीत्यत आह । इहाद्येति । येनात्मनः [illegible] मम वा शरणमाश्रयं पुरी निर्मिता तं न विद्मेति कथापक्षे [illegible]

कोऽपिन्मुखिना कर्दमेनेव विषयभोगाय पुरीं भोगभूमिं निर्मिता इति राज्ञां ज्ञायते स्म ॥ ३४ ॥

यत्तुहं क एतेऽमुकास्तं इति तेजाहु इत्यत इति । सवाव इन्द्रियाणि सर्वपत्स्वपूरकः । प्राणाः प्राणा: यदि सुप्तयोरद्याः सुप्ता-वां सत्यां जागर्ति । अयं इन्द्रियाणां जये सुषुप्तौ मनोवृत्तो-रपि जये प्राणो विराजत एव ॥ ३५ ॥

विषयमाग्येनैव आगतः मनुष्यशरीरं प्राप्तोऽसीति । उप-हिष्यामि संपादयिष्यामि स्वबन्धुभिः सखिभिः सखीभिश्च समाः सम्बत्सरान् मनुष्यलोकेऽस्मिन् ॥ ३६—३७ ॥

कथापक्षे सम्प्रति पतिवरैवाहमकस्मात् प्राप्ते त्वां वदन्ती नान्यमन्वेषयामीत्याह । कमिति । अध्यात्मपक्षे तु बुद्धि-रियं राजसी किञ्चित् सत्त्वमिश्रत्वाद्धार्मिकेति तामस्यां सात्त्वि-क्या च बुद्ध्या आवृतं पुमांसं निन्दति । परैरिति पञ्चभिः । अप्र-दर्शनिगतत्वादरतिज्ञं पश्वादियोनिगतत्वेन रतिज्ञत्वेऽप्यकोविदम् । विप्रयविज्ञादिजातित्वेन कोविदत्वेऽपि संपरायो मृत्युं तदनभि-ज्ञमधीरमित्यर्थः । क्षत्रियजातित्वेन धीरत्वेऽपि श्वः परश्वो वा मरणानन्तरं मे किं भविष्यतीति आगमुख्यत्वात् धार्मिकमित्यर्थः । पशुतुल्यत्वात्पशुम् ॥ ३८ ॥

त्रिवर्गसाधकं गार्हस्थ्यमभिनन्दति । धर्म इति । अत्रार्थकस्तुश्च आनन्दः पुत्रपौत्रादिप्राप्तलक्षण आनन्दो वा अमृतमुक्तमीयं यज्ञ-विहादि । अमृतं यज्ञशेषे स्वाहीनूपे संचिके धृत इति मेदिनी । लोका यागादिप्राप्याः । केवलिनो यतयो याज्ञ विदुः अतः यानत्वात् चतुर्वर्गपुरुषार्थस्थानमभिनन्दनात् सात्त्विकी बुद्धिरपि निर्दिष्टा । अध्यात्मपक्षे त्रिवर्गस्योपपादनमविद्यैवेत्युक्तम् ॥ ३९ ॥

गृहाश्रमस्तु सर्वेषां सुखद इत्याह । पित्रिति । अस्मिन् भवे मनुष्यजन्मनि यत् क्षेमं शरणं वदन्ति स गृहाश्रमः ॥४०—४१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे शुचिस्मिते ! यत् व्रीडया अनभिमुखं तदाननमुन्नीय मे मह्यं त्वं दर्शय शोभने भ्रुवौ यस्मिन् सुतारे लोचने यस्मिन् श्यामाश्च दीर्घा ये नीलाः अलकालतादृश्येन सम्भृतम् वल्गूनि मधुराणि मारम्भाणि वचांसि यस्मिन् तत् ॥ ३१ ॥

धीरेण पुरञ्जनेन मोहिता ॥ ३२ ॥

आत्मनः परस्य तव च कर्त्तारं यत् कृतं गोत्रं नाम च तदपि न विदाम न विद्मः ॥ ३३ ॥

इमं आत्मानं पुरीं च पुरञ्जनायार्पयन्त्याह । इहेति । आत्मानं स्वामिनमिह मम समीपे अद्य सन्तं परं त्वां च न विदाम येन कारणेन निर्मिता तव इयं मदुक्तिका भार्या शरणं गृहरूपा पुरी स निर्मिता तं च न विदाम न विद्मः ॥ ३४ ॥ ३५ ॥

दिष्ट्या आगतोऽसि भवते भद्रं भवतु यान् कामान् त्वम-भिलषसे तांश्च स्वबन्धुभिः सह अहं उपहरिष्यामि सम्पादयि-ष्यामि ॥ ३६ ॥

समाः सम्वत्सरान् ॥ ३७ ॥

निवृत्तिविरुद्धां विद्या प्रवृत्तौ दर्शितै स्थापतो निवृत्तिनिष्ठापूर्वकं तत्सङ्गमभिनन्दति । कमिति पञ्चभिः । त्वदन्यम् अरतिज्ञं नैष्ठि-

कम् ... अस्वर्गम् ... संपरायो मृत्युः पुत्रोत्पादनादिना देहं हित्वा ... यास्यामीति सम्पराया-भिमुखं तद्विपरीतं पुत्रोत्पत्त्यपेक्षकमित्यर्थः अपश्यन्तमविदम् इदं ... पुत्रादिसुखाय श्वः ... परश्वोपुत्राद्विस्त्वाभिना-विपर्ययज्ञ एव पशुमैहिकासुख सुखानर्हम् के रमये न कमनीयम् ॥ ३८ ॥

अत्र गार्हस्थ्ये केवलिनो विरक्ताः ॥ ३९ ॥

भवे संसारे ॥ ४० ॥ ४१ ॥

भाषाटीका

हे सुभ्रु ! तुमारा मुख सुन्दर है दोनों भृकुटियों से सुशो-भित है इस मुख में जो नेत्र हैं सो सुन्दर तारा वाले हैं यह मुख सुन्दर नीलवर्णी के केशों से युक्त है जिस मुख में सुन्दर मनोहर वचन हैं जो मुख लज्जा के मारे हमारे सन्मुख नहीं होता है सुन्दर मन्दहास वाले इस मुख को उठाकर मेरे को दिखाओ ॥ ३१ ॥

श्री नारदजी बोले इस प्रकार से अधीर सरीके होकर जब पुरञ्जन ने याचना करी तब वह नारी वीर के स्वरूप से मोहित होकर हसती हुई पुरञ्जन से बोली ॥ ३२ ॥

हे पुरुषर्षभ ! अपने अथवा दूसरे के करने वाले को हम नहीं जानते हैं नाम गोत्र कहनेवाले को भी नहीं जानते हैं ॥ ३३ ॥

अपना इहांपर रहना मात्र हम जानते हैं इससे आगे हे वीर ! जिसने हमारे स्थान इस पुरी को बनाया है तिसको नहीं जानते हैं ॥ ३४ ॥

हे मानद ! ये सब नर नारी मेरे सखा और सखी हैं मैं जब सोती हूं तब यह सर्प इस पुरी को पालन करता हुआ जगता रहता है ॥ ३५ ॥

हे अरिन्दम ! आप अच्छे आये आपका भला होवे आप विषय भोग को चाहते हैं तब मैं अपने बन्धुओं के सहित तुमारे उन कामों को पूर्ण करोंगी ॥ ३६ ॥

हे विभो ! इस नौ मुख वाली पुरी में विश्राम रहो मैं तुम को सबकामों को देउंगी सैकड़ों वर्ष पर्यन्त उनको ग्रहण करते हुये तुम रहो ॥ ३७ ॥

तुमको छोड़कर मैं दूसरे कौन को रमाऊं जो कि रतिको नहीं जानता है अपण्डित है परलोक चिन्ता रहित कल होने की बात को नहीं जानने वाला पशु सरीखा है ॥ ३८ ॥

इस गृहस्थ आश्रम में धर्म अर्थ काम [illegible] शोक रहित निर्मल लोक प्राप्त होसकते [illegible] को विरक्त पुरुष नहीं जानते हैं ॥ ३९ ॥

इस संसार में गृहस्थाश्रम पितृ देवता [illegible] और भूतमात्र सबका कल्याण कारक आश्रय [illegible] का कथन है ॥ ४० ॥

का नाम वीर ! विख्यातं वदान्यं प्रियदर्शनम् ।
न वृणीत प्रियं प्राप्तं मादृशी त्वादृशं पतिम् ॥ ४१ ॥

कस्या मनस्ते भुवि भोगिभोगयोः स्त्रिया न सज्जेद्भुजयोर्महाभुज ! ।
योऽनाथवर्गाधिमलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुम् ॥ ४२ ॥

॥ नारद उवाच ॥

इति तौ दम्पती तत्र समुद्य समयं मिथः ।
तां प्रविश्य पुरीं राजन् ! मुमुदाते शतं समाः ॥ ४३ ॥

उपगीयमानो ललितं तत्र तत्र च गायकैः ।
क्रीडन् परिवृतः स्त्रीभिर्ह्रदिनीमाविशच्छुचौ ॥ ४४ ॥

सप्तोपरि कृता द्वारः पुरस्तस्यास्तु द्वे अधः ।
पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः ॥ ४५ ॥

पञ्चद्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा ।
पश्चिमे द्वे अमूषां ते नामानि नृप ! वर्णये ॥ ४६ ॥

खद्योताविर्मुखी च प्राग्द्वारावेकत्र निर्मिते ।
विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः ॥ ४७ ॥

नलिनी नालिनी च प्राग्द्वारावेकत्र निर्मिते ।
अवधूतसखस्ताभ्यां विषयं याति सौरभम् ॥ ४८ ॥

मुख्या नाम पुरस्ताद्द्वास्तयापणबहूदनौ ।
विषयौ याति पुरराड्रसज्ञविपणान्वितः ॥ ४९ ॥

पितृहूर्नृप ! पुर्या द्वार्दक्षिणेन पुरञ्जनः ।
राष्ट्रं दक्षिणपञ्चालं याति श्रुतधरान्वितः ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भोगिभोगयोः सर्पदेहाकारयोस्तव भुजयोर्न सज्जेदेवं भूतं कस्याः स्त्रिया मनः स्याच्च कस्या अपि । यो भवाननाथवर्गाधिमलं तोमाल्लेषामाधिमलमल्पर्थमपोहितुं सर्वत्र चरति केनापोहितुम् घृणयोद्धतः [illegible] विकासितो यः स्मितपूर्वकोऽवलोकस्तेन ॥ ४२ ॥

[illegible] मा: संवत्सरान् ॥ ४३ ॥

[illegible] संक्षेपेणाऽऽह । उपगीयमान इति । [illegible] स्य [illegible] काशं स्नापस्थानम् । शुचौ निदाघे ॥ ४४ ॥

[illegible] दर्शनपूर्वकं आन्नवचस्यां प्रपञ्चयति । सप्तेति [illegible] स्याः पुर उपरि कृता द्वारः सप्त कृता इति [illegible] सिके श्रोत्रे मुखं चेति सप्त अधो द्वे द्वारौ [illegible] श्वनेति आत्मनः सम्यग्विज्ञानादनियत- [illegible]

[illegible] द्वारः पौरस्त्याः पूर्वदिग्भवाः ॥ ४६ ॥

खद्योतवदल्पप्रकाशा वामनेत्ररूपा आविः प्रकटं मुखं यस्याः सा बहुप्रकाशा दक्षिणनेत्ररूपा "तस्माद्दक्षिणोऽर्धं आत्मनो वीर्यावत्तर" इति श्रुतेः [illegible] तत्र प्रकाशाधिक्यम् । चक्षुः संज्ञं विभ्राजितं रूपम् द्युमत्सखश्चक्षुःसहितः ॥ ४७ ॥

नलनालशब्दौ छिद्रवचनौ तद्वती नलिनी नालिनी च नासादक्षिणनासिके अत्रापि संज्ञाभेदादेव कार्याधिक्यं पूर्ववज्ज्ञेयम् । अवधूतो वायुरधिष्ठितो घ्राणः सौरभं गन्धम् ॥ ४८ ॥

मुख्या प्रधाना आस्यम् । आपणो भाषणम् । बहूदनमित्रमन्नम् । बहोदन इत्युक्तिः परोक्षवादत्वाय रसज्ञं रसनेन्द्रियं विपणो वागिन्द्रियं ताभ्यामन्वितः ॥ ४९ ॥

दक्षिणेनेति न तृतीया किन्तु दक्षिणस्यां [illegible] तद्धितोऽयमेनप्रत्ययोऽव्ययसंज्ञः एवमुत्तरेणेति [illegible] विषयाद्यास्यतोऽभ्यागतानां प्रकाशनादित्यपि [illegible] [illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रथमं श्रोतव्यं कर्मकाण्डमित्येतावता साम्येन प्रवृत्तसंज्ञस्य कर्मकाण्डस्यैव दक्षिणकर्णेन श्रवणमिष्यते । अतस्तदर्थमनुष्ठाय पितृभिराहूतः पितृलोकप्रापकं पितृयानं प्रपद्यते तदनेन प्रकारेण पितृणामाह्वानमनेन भवतीति पितृहूर्दक्षिणकर्णः एवं तद्विपरीतेनोत्तरः कर्णो देवहूः तथा च व्याख्यास्यति । "पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः । प्रवृत्तं च निवृत्तं च शास्त्रं पञ्चालसंज्ञितम् । पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत्" इति ॥ ५० ॥ ५१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे वीर ! विख्यातं कामिष्वेव प्रसिद्धं यद्राज्यं स्यागिनं कामाहं विहितमस्य जन्ता(?)मित्यर्थः अत एव प्रियेषु शब्दादिविषयेषु दर्शनं दृष्टिर्यस्य तं कथापक्षे विख्यातं यशस्विनं यद्राज्यं दानशीलं प्रियदर्शनं सुन्दरमित्यर्थः ईदृशं त्वादृशं निःसमं पतिं देवात्प्राप्तं मादृशी निःसमाना कान्ता स्वयं न वृणोत वृणुयादेवेत्यर्थः ॥४१॥

हे महाभुज ! भुजगेन्द्रभोगयोः सर्पदेहाकारयोः तव भुजयोः कस्याः स्त्रियाः मनः न सक्तं(?) भवेत् अनाथवर्गाः दीनानां स्तोमाः तेषामार्तिमपमत्यर्थमपोहितुं सर्वत्र चरति केन हेतुनापोहितुं घृणयोत्कृतः अतिशयितो यः स्मितपूर्वको विलोकस्तेन ॥ ४२ ॥

एवं संबन्धदार्ढ्यापनाय तयोः संवादमभिधायोपसंहरन् तयोर्व्यापारमाह नारदः । तौ दम्पती पुरञ्जनपुरञ्जन्यौ मिथोऽन्योन्यं समयं संकेतं समुद्य समुदीर्य देवाद्न्योऽन्यं दृढतरं संबन्धमित्यर्थः हे राजन् ! प्राचीनबर्हिः तां पुरीं प्रविश्य शतं समाः संवत्सरान् मुमुदाते ॥ ४३ ॥

एवं जीवपुरञ्जयोर्जीवकर्मानुरूपदेवावस्थारम्भपुरुषसंकल्पायत्ततदुत्तरसंबन्धं तत्प्रयुक्तदेहसंबन्धं च पारोक्ष्यरूपेणाभिधाय शुश्रूषोः प्राचीनबर्हिषः प्राप्यपरब्रह्मव्यतिरिक्तवैतृष्ण्यजननार्थं प्राप्य तृष्णाजननार्थं संसरतो जीवस्य जाग्रत्स्वप्नसुषुप्तिमरणावस्थासु दोषानुद्घाटयितुं जाग्रदाद्यवस्थाः प्रतिपिपादयिषुः कथाव्याजेन तावत्समासतः सुषुप्त्यवस्थामाह । उपगीयमान इति । ललितं यथा भवति तथा गायकैरुपगीयमानः पुरञ्जनः स्त्रीभिः परिवृतस्तत्र तत्र क्रीडन् शुचौ आषाढे क्रीडानिमित्तश्रमापनोदनाय हृदिनीं सरसीमाविशदिति कथापक्षे अर्थः पक्षान्तरे तु जाग्रदवस्थायां स्त्रीभिरिन्द्रियवृत्तिभिस्तत्र तत्र क्रीडन् शब्दादिविषयाननुभवन् व्यापृतकरणत्वात्तत्प्रयुक्तश्रमनिर्हरणाय शुचौ हृदिनीमाविशदित्यर्थः हृदिनीशब्देन पुरीतदाख्या नाडी विवक्षिता शुचिशब्देन ब्रह्म शुचौ ब्रह्मणयाविश्य तद्द्वारा हृदिनीमाविशदित्यर्थः प्रासादखट्वापर्यङ्कवत्समुच्चयेन नाडी पुरीतद्ब्रह्माणि हि जीवस्य सुषुप्तिस्थानं नतु विकल्पेन अथ यत्रैतत्सुषुप्तः समस्त संप्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति अथ यदा सुषुप्तो भवति यदा न कस्य चन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेत इति तथा य एतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवतीति श्रुत्यन्तरमपि

सुषुप्तिस्थानत्रयस्य [illegible] समुच्चये संभवति नाडीकाधानत्रयविकल्पस्याप्यन्याय्यत्वात् संभवति च प्रासादखट्वापर्यङ्कादीनां कार्यभेदः तत्र नाडीपुरीततौ प्राकारखट्वास्थानीयौ ब्रह्म च पर्यङ्कस्थानीयं ततो ब्रह्मैव साक्षात्सुषुप्तिस्थानम् ॥ ४४ ॥

इदानीं जाग्रदवस्थां प्रतिपादयति । सप्तेत्यादि यावदध्यायसमाप्ति तत्र नवभिर्द्वार्भिः पुरीं लक्षितलक्षणामिति द्वाररूपेण कल्पितानां चक्षुरादीन्द्रियस्थानानामिन्द्रियाणां च गोलकानि तत्कार्याणि तद्विषयांश्च कथयन्नाह । सप्तेति । तस्याः पुरः पुर्याः सप्त द्वारः उपरि कृताः चक्षुर्द्वयश्रोत्रद्वयनासिकाद्वयं मुखं चेति द्वे द्वाराववधः कृते कल्पिते गुदं शिश्नं चेति किमर्थमेवं कल्पिता इत्यत्राह । तस्याः पुर्यां यः कश्चन ईश्वरः पृथगसङ्करेण विषयान् शब्दादीन्प्रति गत्यर्थं विषयानवगन्तुमित्यर्थः संसारिणो जीवस्य स्वपरव्यापारस्यज्ञानाभावान्मनुष्यशरीरस्यानियतत्वाच्च यः कश्चनेत्युक्तं कथापक्षे विषयशब्दो देशपरः देशान्प्रतिगत्यर्थमित्यर्थः ॥ ४५ ॥

पञ्चेति । तत्र तासु सप्तसु द्वार्षु पञ्चद्वारः पौरस्त्याः पूर्वदिग्भवाः एका दक्षिणा तथा एकोत्तरा द्वे पश्चिमे पश्चिमदिग्भवे हे नृपते ! तुभ्यममूषां द्वारां नामानि गुणनामानि वर्णये ॥ ४६ ॥

खद्योता खद्योतवदल्पप्रकाशा चामनेत्ररूपा आविः प्रकटं मुखं यस्याः सा बहुप्रकाशा दक्षिणनेत्ररूपा ज्ञानुभवाच्च तत्र प्रकाशाधिक्यमवगन्तव्यम् एते द्वारावेकत्र निर्मिते लग्ने ताभ्यां खद्योताविर्मुखीभ्यां द्वार्भ्यां द्युमत्सखः द्युमान्सूर्यस्तदधिष्ठेयं चक्षुरिन्द्रियमपि द्युमत्तदेव सखा यस्य सः । यद्वा । द्युमतः सखा द्युमत्सखः "राजाहःसखिभ्य इतिटच्" चक्षुषा सहित इत्यर्थः विभ्राजितमालोकादिना प्रकाशरूपं जनपदं विषयं यात्यवगच्छति कथापक्षे तु खद्योतादिशब्दा अन्वर्थादिशब्दवत्केवलसंज्ञाशब्दा इत्यवगन्तव्यं जनपदं देशं याति गच्छतीत्यर्थः ॥ ४७ ॥

नलिनालिनीशब्दौ छिद्रवचनौ नलमस्या अस्तीति नलिनी एवं नालिनी वामदक्षिणनासिके अत्रापि संज्ञाभेदादेव कार्यन्यूनाधिक्यं पूर्ववज्ज्ञेयं अवधूनयति कम्पयतीत्यवधूतो वायुस्तत्सखो स्त्वधिष्ठितो घ्राणः ताभ्यां द्वार्भ्यां सौरभं गन्धं विषयं याति ॥४८॥

मुख्येति । मुख्या प्रधाना आस्य रूपा द्वाः पूर्वदिग्भवा तया मुख्यया द्वारा पणः पणनं व्यवहारः भाषणं बहूदनश्चित्रमन्नं बहोदनः इत्यनुक्तिः परोक्षवादत्वाय पणबहूदनौ विषयौ पुरराट् पुरञ्जनः रसनेन्द्रियं विपणो वागिन्द्रियं ताभ्यामन्वितो याति ॥ ४९ ॥

पुर्या दक्षिणेन दक्षिणस्यां दिशि एतदन्ताख्यं पितृहूर्नाम द्वाः पितॄन् जिहीते गच्छत्यनयेति पितृहूः ओहाङ् गतौ इत्यस्मात् द्युतिभ्यः क्विप् कूर्वित कूप्रत्ययो बाहुलकात् [illegible] कप्राप्तिसाधनभूता यागादिक्रिया तदवबोधिनी [illegible] पितृहूशब्दार्थः तत्र दक्षिणकर्णस्य बलाधिक्य[illegible] त्रिवर्गप्रापणयाच प्रवृत्तिशास्त्रश्रवणे प्रवर्तते [illegible] श्रोतव्यं पितृलोकप्राप्तिसाधनकर्मप्रकाशकप्रवृत्ति[illegible] त्वाद्दक्षिणकर्णः पितृहूः अनन्तरं श्रोतव्य[illegible] धर्मप्रकाशकोत्तरणाश्रवणसाधनत्वात्[illegible] त्तरमागतदर्थश्रवणादपि बलाधिक्याद्[illegible] प्रवर्तत इति । कथमेतदुच्यते इति चेत् [illegible]

[illegible]नामाधेयत्वात्पूर्वभागवर्तीनां शाखप्राधान्येन दक्षिण-कर्णश्रवणविधानमुत्तरभागवर्तीनां तु वामकर्णप्राधान्येन श्रवणविधानं चानुमीयते यथा दक्षिणे दीक्षितः पूर्वमंके सर्वं हि मनुष्या भजन्त इत्यत्र दक्षार्थत्वान्मनुष्याः सव्यनयनाञ्जनं पूर्वं कुर्युरित्येवं प्रमाणान्तरेणाप्राप्तस्य सव्यनयनाञ्जनस्य सिद्धव-न्निर्देशानुपपत्तौ सव्यनयनस्य प्रथमाञ्जनेन दक्षविशेषावगात-सिद्धवन्निर्देशानुपपत्त्यानुमीयते एवं प्रथमं सव्यनयनाञ्जनं कर्त-व्यमिति विधिरनुमीयते तद्वत् यथा वा तस्मात्पर्ण मयं प्रपर्णं न प्रति प्रयच्छन्तीति प्रत्यागतस्य प्रत्यर्पणं प्रमाणान्तरेणाप्राप्तमपि तस्मादिति प्रसिद्धवन्निर्देशानुपपत्त्या प्रत्यागतो न प्रत्यर्पणीय इति विधिरनुमीयते तद्वत्पूर्वोत्तरभागयोर्यथाक्रमं दक्षिणोत्त-रकर्णप्राधान्येन श्रवणमन्यतोऽप्राप्तमप्यनेनैव सिद्धवन्निर्देशा-नुपपत्त्यानामधेयबलेन विधीयत इति निश्चयः पुरञ्जनः पितृहूत्यारा श्रुतिधरः श्रोत्रेन्द्रियं श्रवणविषयं शब्दं धरत्यवगच्छतीत्यनेनेति व्युत्पत्तेः तेनान्वितो युक्तः दक्षिणपाञ्चालं दक्षिणद्वारगम्यं पाञ्चालं यजति व्यक्तीकरोतीति पाञ्चालं पच्यते व्यक्तीक्रियत इति वा पाञ्चालं पचिव्यक्तीकरणे इत्यस्मात् "तमिमिनिच्छि-विकापिपालिपञ्चिभ्यः कालन्" इत्यौणादिककालन्प्रत्ययान्तः पाञ्चालशब्दः ततः प्रज्ञादित्वात्स्वार्थेऽण् प्रवृत्तिधर्मप्रकाशकशास्त्र-ात्मकं राष्ट्रं याति ॥ ५० ॥

श्रीलक्ष्मीनृसिंहकल्याणतीर्थकृतपदरत्नावली ।

किं बहुनोक्तेन फलितं वक्तीत्याह । कामेनेति । वदान्यं पुत्रक-लत्राद्यभीष्टप्रदानशीलं स्वयं प्राप्तवान् ॥ ४१ ॥

त्वादृशमित्युक्तं किंचिद्विशिनष्टि । कस्या मन इति । अनाथव-र्गस्यास्मदादेराधिं मनो दुःखं मलमपोहितुं वरसि पृथया हृद-यीकृतमुदूम्भितं यस्मितं तत्पूर्वकोऽपाङ्गवीक्षितस्तेन दर्शनेन कस्याः स्त्रियाः ॥ ४२ ॥

परमफलितमाह । इतीति । समयं प्रमाणपूर्वकं समुच्च सन्धाय कृत्वा देहप्राप्तेः पूर्वं तदनन्तरं वा बाह्यार्थविवक्षयैतद्वचः पुरीं देहं शतं समा इति शतं वर्षाण्यपर्यन्तं विहितिश्रुतेरर्थमनुकरोति मुदहर्ष इति धातोः हर्षशोकयोः सुखदुःखयोर्हेतुत्वादुभयं पर्यायेण बुद्धिपुरुषौ प्राप्तवन्तावित्यर्थः ॥ ४३ ॥

तत्र प्रथमं मोहप्रकारमाह । उपगीयमान इति । जाग्रदाद्यव-स्थायां तत्र तत्र प्रतीन्द्रियविषयं गायकवर्गैः शब्दादिभिर्वि-षयैरुप[illegible] सेव्यमानः सन्ध्यावस्थायां स्त्रीभिः केवलं मनो[illegible]रिवृतः "स्त्रीभिर्वा यानैर्वा" इति श्रुतेः सुप्तौ अपि [illegible] शीतलामनायासोपकारामिव सुषुप्तिकाले [illegible]नरूपस्थितिमाविशत् सुतावस्थायामभ्युदित-ं[illegible]वा सम्यक् सुखी [illegible]

[illegible] । तदा सम्पन्नो भवतीति श्रुतेः ।

[illegible]रूपैर्भोगादिभिः परिवृतः क्रीडत्विहरन् [illegible] [illegible]रिभ्यां प्रज्ञानाभ्यां हृदयस्थानेहृदयान्ते [illegible] [illegible]व्यायादित्यर्थः ॥ ४४ ॥

पुरः उपरि सप्त द्वाराः कुहुः द्वे नेत्रे द्वे नासिके कर्णौ [illegible] चेति अधो द्वे पायूपस्थे इति कलममाह । विषयमत्यर्थमिति । कृत्रि-मिति विषयानार्थं निर्मिता इत्यर्थः तस्यां पुर्यां कथमेतद्वार, वक्तुः मङ्को लोकविलक्षणाः क्रीनारायणोऽस्तीत्यन्वयः जीवो वा अणु-रसामर्थ्योपेतत्वादीश्वर इत्युच्यते देहस्वामित्वाद्वा स्वपक्ष-प्रयाणेमप्राप्यत्वेन यः करोतीति ॥ ४५ ॥

तत्रापि विभागमाह । पञ्चेति । आसामुपरि द्वारां मध्ये पौर-स्त्याः पुरस्ताद्भवाः पञ्चद्वारो नेत्राद्य इत्यर्थः पश्चात्पूर्वे पञ्च दक्षिणकर्णलक्षणा दक्षिणा तथोत्तरा वामकर्णलक्षणा पश्चिमे द्वेऽधोभागे द्वे पायूपस्थे अमूर्ता नव द्वाराम् ॥ ४६ ॥

खे आकाशे सति द्योतते रूपं गृह्णातीति खद्योता खद्योत-वत् द्योतते इति वा दक्षिणचक्षुर्लक्षणा आविः प्रकाशे सति मुखवदभिमुखी भवतीति साविर्मुखी प्रकाशमुखी न तमोमुखी तमसि रूपग्रहणाभावादिति वामचक्षुर्लक्षणा ताभ्यां विभ्राजितं प्रकाशितं जनपदं प्रभुः पद्मावद्यम्ना रूपाख्यं याति विषयी-करोति गृह्णातीत्यर्थः कथंभूतः द्युमानादित्यश्चक्षुर्लक्षणः सखा यस्य स तथा चक्षुरिन्द्रियसहित इत्यर्थः द्युमानादित्यस्तस्या-त्महेतुत्वाच्चक्षुषोऽपि तन्नाम

आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदिति श्रुतेः ।

आदित्यो ह्येष चक्षुस्तेनानुगृहीतं रूपं गृह्णातीति च ॥ ४७ ॥

नली नाम श्वासः सोऽस्या अस्तीति नलिनी नलीवेत्त्याभिधे-योऽस्या विद्यत इति नालिनी नलनाली श्वासोच्छ्वासौ तयोः सञ्चारे हेतुत्वान्नलिनी नालिनीति द्वे गोलके नासिकारन्ध्रे नयोरुपरि तिर्यक् पुनोत्थ्यप्रवृत्ते वायुः प्राणेन्द्रियाभिमानी तेन प्रेर्यमाणं प्राणेन्द्रियमपि तच्छब्दवाच्यं तदेव सखा यस्य स तथा प्राणेन्द्रियसहित इत्यर्थः सौरभं विषयं गन्धस्वरूपं गृह्णाति ॥ ४८ ॥

पुरस्तान्मुख्यानाम द्वारः आस्यमिन्द्रियवच्छास्ति पुरवाद्ह पुरञ्जनस्तया द्वारा आपणबहूदनौ पणव्यवहार इति धातोः आपणो वदनव्यापारः बहूदनो नानाविधभोज्यजातं तौ याति व्यवहरति अभ्यवहरति च रसज्ञो जिह्वेन्द्रियं विपणो वागिन्द्रियं ताभ्यामन्वितः ॥ ४९ ॥

नाम्ना पितृभूः पातृत्वात्पितरो देवाः प्रियाश्चन्द्रमसः पञ्च-मानस्य दक्षिणकर्णलक्षणा शारीरस्थानात्मा पुरो द्वारस्तेन दक्षिणकर्णलक्षणेन द्वारेण उत्क्रान्तः पुरञ्जनो यजमानो दक्षिण-पाञ्चालं दक्षिणानां देवानां लोकसत्त्वयं राष्ट्रं यत्र प्राप्नोति पञ्चेन्द्रियाश्रयं याति भूषयति । भवं भूषय इति धातोः पञ्चे-न्द्रियाणामयं बुद्धिहेतुत्वादिति वास पुरं प्रशस्तयं अथवा प्रादुर्भावयति प्रकाशयतीति पुरञ्जनः तस्य द्वारी दक्षिणपाञ्चालं नित्यतया वाश्यवनमनुष्ठितेति वा दक्षिणलक्षणपानलक्षणं इतिहासादिना सह पञ्चसंख्योपेतो वेदः स एवार्थं प्रवर्तयन् नान्यार्थेनोति कृत्वा अत एव पुरञ्जनो दक्षिणपाञ्चालं पञ्चविषयात्मकं राष्ट्रं याति एतदुक्तार्थं पञ्चानां शब्दानां समूहः पाञ्चः स यस्यास्ति सोऽनुमिति बुद्धिहेतुत्वादिति कृत्वा सर्वमप्यनेन व्याख्यातम् । उत्तरेति । श्रुतं लोकं श्राव्यं वा निगमं वा प्राप्तमपि श्रुतधरः श्रोत्रेन्द्रियं तेन सहायः सहितः ॥ ५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भोगिभोगयोः सर्पशरीराकारयोस्तव भुजयोः कस्याः स्त्रिया मनो न स्यात् अपि तु सत् कृपया न सज्जेदित्यावृत्त्या अन्वयः । यो भवान् अनाथवर्गाणामस्मदादीनामाधिमन्तःपीडामपोहितुं दूरीकर्तुं चरति केन स्मितावलोकेन हे पृथोऽरुत ! कृपया उद्‌यत आध्यात्मपक्षे चैतन्येनैव दुःखादयः सनाथा भवन्तीत्युक्तम् ॥४२॥

समयं सङ्केतं समुप समुदीर्य ॥ ४३ ॥

तत्र मुमुदाते शतं समा इत्यादिना जाग्रदवस्थां संक्षेपेणोक्त्वा स्वप्नावस्थामाह । क्रीडन्निति क्रीभिरूर्ल इति । स्वप्ने इन्द्रियाणामवसन्नत्वात् तत्संस्कारेण तद्वृत्तीनामेव तत्तत्कार्यकारित्वात् सुषुप्त्यवस्थामाह । हृदिनीं नदीं हृदयाकाशं स्वापव्यामन शुचौ निदाघे सुषुप्तौ च ॥ ४४ ॥

इदानीं नवद्वारप्रदर्शनपूर्वकं जाग्रदवस्थां विस्तरेणाह । सप्तेति । तस्याः पुरः पुर्याः उपरि ऊर्ध्वप्रदेशे अधो द्वे श्रोत्रे नेत्रे नासिके मुखञ्चेति सप्त द्वारः अधो गुदलिङ्गे इति द्वे द्वारौ य ईश्वरः पुरञ्जनः तस्य ॥ ४५ ॥

तासु सप्तसु मध्ये पञ्च द्वारः पौरस्त्याः पूर्वाभिमुखाः दक्षिणा एका दक्षिणाभिमुखी दक्षिणकर्णरूपा उत्तराभिमुखी वामकर्णरूपा ॥ ४६ ॥

खद्योतवदल्पप्रकाशा वामनेत्ररूपा आविर्मुखी बहुप्रकाशा दक्षिणनेत्ररूपा "तस्माद्दक्षिणाक्ष्णात्ममो वीर्यवत्तर" इति श्रुतेः एकत्र संनिवेशे विभ्राजितं रूपं द्युमत्सखः चक्षुःसहितः ॥ ४७ ॥

नलिनीनालिन्यौ छिद्रद्वयौ तद्रूपौ वामदक्षिणनासिके प्राङ्मुखौ अवधूतो वाय्वधिष्ठितो प्राणः कथापक्षे विषयं देशं बहुसुरभिमत्त्वात् सौरभं पक्षे गन्धम् ॥ ४८ ॥

सर्वद्वारमुख्यत्वात् सर्वसञ्जीवकत्वाच्च मुख्या तथा एकत्वेऽपि आपणबहूदनौ द्वौ देशौ अन्यत्र द्वाभ्यां द्वाभ्यामेकदेशं यातीत्यपि मुख्यत्वे हेतुः । पक्षे मुख्या आस्यमापणो भाषणं बहूदनञ्च भक्ष्यं बहोदन इत्यनुक्तिः परोक्षवादत्वात् । रसज्ञं रसनेन्द्रियं विपणो वागिन्द्रियं ताभ्यां युक्तः ॥ ४९ ॥

हे नृप ! दक्षिणेन दक्षिणस्यां दिशि दक्षिणामुखीत्यर्थः ॥ ५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भुजगेन्द्रभोगयोर्नागराजदेहतुल्ययोः अनाथवर्गस्य अशरणजनसमूहस्य आधिमन्तं मनोव्यथारूपं भवं घृणाया कृपयोद्धतेनातिशयितेन स्मितावलोकेनापोहितुं निराकर्तुं चरति ॥ ४२ ॥

इत्येवं समयं सम्बन्धनिबन्धं मिथः परस्परं समुदीर्य समाः शतवत्सराः ॥ ४३ ॥

उपगीयमान इत्यनेन जाग्रदवस्था हृदिनीं हृदयाकाशविलासेन सुषुप्तावस्था च सूच्यते शुचौ कथापक्षे ग्रीष्मे अध्यात्मपक्षे अवकाशे ॥ ४४ ॥

अधुना नवद्वारानुवादपूर्वकं जाग्रदवस्थां प्रपञ्चयति । सप्तेति आऽध्यायसमाप्तेः । तस्याः पुरः यः कश्चनेश्वरो जीवस्तस्य पृथग्विषयगत्यर्थं सप्त द्वारस्तस्यामुपरि कृता द्वे अधः ॥ ४५ ॥

पौरस्त्याः पूर्वाभिमुखाः ॥ ४६ ॥

खद्योतादल्पप्रकाशा वामनेत्ररूपा आविर्मुखी विपुलप्रकाशा दक्षिणनेत्ररूपा ताभ्यां द्युमत्सखः चक्षुरिन्द्रियसहायो जीवः विभ्राजितं जनपदं रूपं विषयं याति ॥ ४७ ॥

नलिनी [illegible] इत्युच्यते नलिनी अन्यन्नामनालःपुटरूपा नालमपि छिद्रमेवास्त्या अस्तीति नालिनी अपानच्छिद्रदक्षिणनासापुटरूपा सत्तामिहसामर्थ्यात् ताभ्यामवधूतसखः प्राणेन्द्रियसहायः ॥ ४८ ॥

पुरस्तात् पूर्वा द्वार्मुख्या प्रधाना आस्यरूपा तया 'रसज्ञविपणाभ्यां रसनावाग्भ्यामिन्द्रियाभ्यामन्वितः पुरोद्द देशे आपणबहूदनौ भाषणचित्राशरूपौ विषयौ याति कथोभयक्रमणादापणबहोदनाविति नोक्तम् ॥ ४९ ॥

दक्षिणेनेति । एनप्प्रत्ययान्तमव्ययम् दक्षिणस्यां दिशि पितृलोकप्रापकप्रवृत्तिशास्त्रश्रवणद्वारा पितृणामाह्वानं भवत्यनेनेति पितृहूर्दक्षिणः कर्णस्तद्रूपा पुर्या द्वाः तया द्वारा दक्षिणपाञ्चालं कथापक्षे दक्षिणपाञ्चालदेशविशेषमध्यात्मपक्षे दक्षिणं प्रथमतः श्रोतव्यं पञ्चानां विषयाणां प्रकाशनीयात्वं पाञ्चालं प्रवृत्तिपरं शास्त्रम् तस्य पूर्वं श्रोतव्यत्वाद्दक्षिणकर्णस्य च स्वविषयेपूर्वपातित्वाच्चेत्युक्तम् श्रुतधरान्वितः श्रोत्रेन्द्रियान्वितः याति प्राप्नोति ॥ ५० ॥

भाषाटीका ।

हेवीर ! हमसरी की ऐसी कौन स्त्री है कि जो तुमसरीके पति को न वरे क्योंकि आप विख्यात हो दानी हो रूपवान् हो स्वयं आगये हो ॥ ४१ ॥

हे महाभुज ! इस संसार में किस स्त्री का मन सर्प के शरीर के तुल्य आपके भुजों में आसक्त न होगा जो आप कृपा से युक्त हो कर हमसरीके दुःखितों का दुःख को मन्द हास युक्त अवलोकन से दूर करने को विचरते हो ॥ ४२ ॥

श्री नारदजी बोले इस प्रकार वे दोनों पति पत्नी आपस में प्रतिज्ञा करके हे राजन् ! उस पुरी में प्रवेश करके सौ-वर्ष पर्यन्त आनन्दित रहे ॥ ४३ ॥

राजा पुरञ्जन एक दिन ग्रीष्म ऋतु में मनोहर गीत गान करते हुये गायकों को साथ में लेकर स्त्रियों के साथ में क्रीडा करता हुआ सरोवर में प्रविष्ट हुआ ॥ ४४ ॥

उस शरीर रूप पुर के ऊपर में मुख आदि सात द्वार हैं नीचे दो द्वार हैं यह सब उस पुरके मालिक जीवके देश विषयों के भोग को जाने के मार्ग हैं ॥ ४५ ॥

हे नृप ! तिन में पांच द्वार पूर्व के हैं एक दक्षिण मे एक उत्तर में है दो नीचे हैं इन सबों के नाम मैं तुम से कहता हूं ॥ ४६ ॥

खद्योता आविर्मुखी दो द्वार एक ठिकाने पूर्व के हैं उन दोनों से द्युमत् का सखा होकर विभ्राजित नाम देश को राजा जाता है ये दोनों नेत्र हैं रूप देश [illegible] ॥ ४७ ॥

नलिनी नालिनी एक ठिकाने पूर्व के द्वार हैं उन में से राजा अवधूत का सखा हो कर सौरभ नाम देश को जाता है ए दो नासा छिद्र हैं गन्ध देश है ॥ ४८ ॥

मुख्या नाम पूर्व का द्वार है उन में से राजा [illegible] विपण को साथ में ले कर पणबहूदन [illegible] देशों को जाता है यह मुख है भोजन सम्भाषण दो [illegible] हैं ॥ ४९ ॥

पितृहू नाम का पुर का दक्षिण द्वार [illegible] उस में से पुरञ्जन राजा श्रुतधर के साथ दक्षिण पाञ्चाल देश को जाता है यह दहिना कान है शब्द ग्रहण विषय है ॥ ५० ॥

देवहूर्नाम पुर्या द्वा उत्तरेण पुरञ्जनः ।
राष्ट्रमुत्तरपाञ्चालं याति श्रुतधरान्वितः ॥ ५१ ॥
आसुरी नाम पश्चाद्द्वास्तया याति पुरञ्जनः ।
ग्रामकं नाम विषयं दुर्मदेन समन्वितः ॥ ५२ ॥
निर्ऋतिर्नाम पश्चाद्द्वास्तया याति पुरञ्जनः ।
वैशसं नाम विषयं लुब्धकेन समन्वितः ॥ ५३ ॥
अन्धावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ * ।
अक्षण्वतामधिपतिस्ताभ्यां याति करोति च ॥ ५४ ॥
स यर्ह्यन्तःपुरगतो विषूचीनसमन्वितः ।
मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवम् ॥ ५५ ॥
एवं कर्मसु संसक्तः कामात्मा वञ्चितोऽबुधः ।
महिषी यद्यदीहेत तत्तदेवान्ववर्तत ॥ ५६ ॥
क्वचित्पिबन्त्यां पिबति मदिरां मदविह्वलः ।
अश्नन्त्यां क्वचिदश्नाति जक्षत्यां सह जक्षिति ॥ ५७ ॥
क्वचिद्गायति गायन्त्यां रुदत्यां रुदति क्वचित् ।
क्वचिद्धसन्त्यां हसति जल्पन्त्यामनुजल्पति ॥ ५८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

असुरा इन्द्रियारामास्तेषामियमासुरी शिश्नद्वाः ग्रामकं ग्राम्यजनानां कं सुखं व्यवायं दुर्मदेन गुह्येन्द्रियेण ॥ ५२ ॥

निर्ऋतिर्नाम गुदो मृत्युद्वारत्वात् वैशसं मलविसर्गम् लुब्धकेन वायुना तेनोत्क्रान्तस्य दुःखप्राप्तेर्लुब्धकसाम्यम् ॥ ५३ ॥

अमीषां मध्ये निर्वाक् पादः पेशस्कृद्धस्तस्तावुभावन्धौ छिद्राभावात् स्वतो ज्ञानक्रियाशक्त्यभावाच्च अक्षण्वतामिन्द्रियवतां देहानामधिपतिः पुरञ्जनः त्वगिन्द्रियस्यानुक्तिः सर्वेष्वन्तर्भावात् ॥ ५४ ॥

अन्तः पुरं हृदयं गतः विषूचीनं सर्वतोमुखं मनः मोहप्रसादहर्षास्तमःसत्त्वरजःकार्याणि जाया बुद्धिरात्मजा इन्द्रियपरिणामास्तदुद्भवम् ॥ ५५ ॥ ५६ ॥

जक्षत्यां भक्षयन्त्याम् ॥ ५७ ॥ ५८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पुर्या उत्तरेण उत्तरस्यां दिशि देवहूर्नाम द्वाः तया पुरञ्जनः श्रुतधरान्वितः उत्तरपाञ्चालं याति यद्यपि प्रवृत्तिनिवृत्त्यनवबोधिनः शब्दाः सन्ति संसारिणो जीवस्य श्रोतव्यास्तथापि श्रोतव्यानां मध्ये प्रवृत्त्यवबोधिशास्त्रात्मकशब्दस्यैव श्रोतव्यत्वाभिप्रायेण दक्षिणपाञ्चालमुत्तरपाञ्चालमित्युक्तम् एवं पूर्वत्रापि याति सौरममित्यादिषु द्रष्टव्यम् ॥ ५१ ॥

पुर्याः पश्चादासुरीनाम द्वाः असूयते क्षिप्यतेऽनेनेन्द्रियविषयसुखं मेढ्रस्तत्र: [illegible] दिद्वाद्यमित्यादिना शीघ्र तया पुरञ्जनः दुर्मदेन दुरुद्धरः मदो यस्य तेन उपस्थेन्द्रियेण समन्वितः ग्रामकं ग्राम्यजनानां कर्म मैथुनादिकं याति ॥ ५२ ॥

पुर्याः पश्चान्निर्ऋतिर्नाम द्वाः निर्ऋतिर्नाशः मृत्युद्वारत्वाद्गुदं निर्ऋतिः तया पुरञ्जनः लुब्धकेन पाय्विन्द्रियेण तेनोत्क्रान्तस्य दुःखप्राप्तेर्लुब्धकसाम्यं तेन समन्वितः वैशसं नरकं दुःखं याति ॥ ५३ ॥

अमीषां पौराणां पुर्याः सम्बन्धिनां द्वाराणां मध्ये उभौ द्वौ पादपाणी अन्धावन्धौ निर्वाक्पेशस्कृतौ वाक्शब्देनात्र वागिन्द्रियाधिष्ठानं मुखरूपं छिद्रं लक्ष्यते छिद्रपेशस्कृतमान्स्यानिर्वाक्पेशस्कृतावित्युच्येते पेशस्कृन्नाम हि कीटविशेषः स्वापानाविसृतैस्तन्तुभिः स्वनिवासभूतं कवचं निर्माय स्वनिर्गमनद्वारं तन्मुखमप्यज्ञानेन पिधाय तत्रैव विनश्यति तद्वत्पाणिपादयोर्निश्छिद्रत्वाज्ज्ञानाभावाच्च तौ निर्वाक्पेशस्कृतावित्युच्येते ताभ्यां द्वाभ्याम् अक्षण्वतामिन्द्रियवतां देहानामधिपतिः पुरञ्जनः याति गच्छत्यागच्छति करोति कर्म करोति च ॥ ५४ ॥

अन्तःपुरं हृदयं गतः प्रविष्टः "हृदि ह्ययमात्मा प्रतिष्ठित" इति श्रुतेः स पुरञ्जनः यदा विषूचीनेन मनसा विष्वगञ्चति सर्वतो व्याप्नोति इति विषूचीन इति व्युत्पत्तेः समन्वितो भवति तदा जाया बुद्धिरात्मजा इन्द्रियवृत्तयः ताभ्यामुद्भवं मोहादीनामन्यतमं याति मोहप्रसादहर्षाः तमःसत्त्वरजःकार्याणि मनोगुणा अत्र त्वगिन्द्रियस्यानुक्तिः सर्वेष्वन्तर्भावात् ॥ ५५ ॥

[illegible]न्द्रियस्थानविषयाणां [illegible] कार्याणि वाभिधाय मनःपर्यन्तसर्वेन्द्रिययुक्तस्य बुद्धिपारवश्यमाह

---

* निर्वाक्पेशस्कृदुभावपि विति श्रीविजयध्वजतीर्थः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

मयमिति। यद्वा अत एव कामप्रवण आत्मा मनो यस्य कर्मसु काम्यसाधनेषु कर्मस्वासक्तः अत एव दैवेन वञ्चितः महिषी बुद्धिर्यद्यदीहेत व्याप्रियेत यद्यच्छब्दादिविषयं प्रतीन्द्रियाणि प्रवर्तयतीत्यर्थः तत्तदेवान्ववर्ततानुवृत्तवान् ॥ ५६ ॥

अनुवर्तनमेवोपपादयति चतुर्भिः। क्वचिदिति। पिबन्त्यां पाने व्याप्रियमाणायां बुद्धौ पिपासामुत्पादयन्त्यां सत्यामित्यर्थः मदविह्वलः मद्यपरवशः सन् मदिरां पिबति एवमुत्तरत्रापि द्वयमश्नन्त्यां भुञ्जन्त्यां जक्षत्यां चर्वन्त्याम् ॥ ५७ ॥ ५८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

पुर्या वामकर्णरूपया देवहूर्नाम द्वाःस्थितः प्रजादिरूपेण क्रीडादिगुणोपेतत्वाद्देवः पितृगणः प्रियो भवत्यस्य श्राद्धादिकर्तुरिति तेनोत्तरेण वामकर्णलक्षणद्वारेणोत्तराः पुरञ्जनः उत्तरपाञ्चाल-मूर्ध्वलोकप्राप्तिहेतुत्वादुत्तराः उत्तरन्ति विमृश्य वर्तन्त इत्युत्तराः पितरस्तेषां लोकलक्षणं राष्ट्रं याति श्रवणेन पूर्वोक्तेन संयोजितः श्रुतधरं पुरं जनयतीति पुरञ्जनलक्षणो जीवः उत्तरमुत्कृष्टं पाञ्चालं प्रवृत्तशास्त्रमिति वा अन्यत्र पूर्वोक्त एव विप्रेतरप्रतीतार्थं परित्यज्य व्यत्ययस्य कथने कारणमिति-चेदुच्यते। दक्षिणश्रोत्रमार्गेण देवलोकं व्रजत्यसौ। वामश्रोत्रेण पितृयाणमिति वेदविदो विदुरिति प्रमाणम् ॥ ५१ ॥

असुरजनहितत्वादासुरी नाम पश्चाद्द्वाः शिश्नलक्षणास्ति तया द्वारा ग्राम्यकं नाम मैथुनकं सुखं विषयं [illegible] वृषो मदो यस्य स तथा तेनोपस्थेन्द्रियेण सहितः असूनामिन्द्रियाणां रतिहेतुत्वादासुरीति वा सुखहेतुत्वाद्वा सतामपि ग्राह्यम् ॥ ५२ ॥

निर्गच्छत्यस्मात्पुरीषलक्षणमलमिति निर्ऋतिर्नामाधो द्वाः गुदलक्षणमिदं वैशसं पुरीषोत्सर्गलक्षणं विषयं पापं हिंसालक्षणं नरकं वा लुब्धकेनार्वागिन्द्रियेण कुत्सितेन मलमोचनादेषा संज्ञा ॥ ५३ ॥

अमीषां द्वाराणां मध्ये उभौ निर्वाक्पेशस्करौ पादौ हस्तश्चान्धौ ज्ञानशून्यौ भवतः। निर्गतं वाक्यं यस्मात् स निर्वाक्यः पादः कर्तुः पुरुषस्योपकरणभूतत्वादुपस्करो हस्तः हस आदान इति धातोरादानत्वात् अन्धाणीन्द्रियाणि विद्यन्ते येषां तेऽन्धवन्तो जीवास्तेषां पतिः पुरञ्जनस्ताभ्यां पादहस्ताभ्यां याति करोति चेत्यन्वयः ॥ ५४ ॥

कश्चिद्व्याख्यान्तः पुरङ्गतो विष्वक् सर्वतोऽञ्चतीति विषूचि मनस्तेन सहितः स्वयं पुरञ्जनो जायात्मजेभ्य उद्भवो जन्म यस्य स तथा तमोमोहाद्यन्यतमं यातीत्यन्वयः जाया भक्तिरात्मजो ज्ञानं भक्तिज्ञाने तज्ज्ञानादुत्पन्नं प्रसीदत्यनेनेति प्रसादः परमानन्दः मुह्यत्यनेनेति मोहो निरयः हृष्यत्यनेनेति हर्षः स्वर्गलाभात् ॥ ५५ ॥

इदानीमस्य बुद्धेः प्रकारं दर्शयति। एवमिति। कामप्रकर्मसु काम्यन्त इति कामा विषयास्तेष्वात्मा मनो यस्य स तथा वञ्चितो दैवेनेति शेषः अबुधो विवेकशून्यः महिषी बुद्धिलक्षणा मतं हितमिति महिषी अन्यत्र मतं ददातीति महिषी यद्यत्कर्मकार्यमुमीहेत तत्तत्कर्माण्यन्ववर्तत अन्वकरोदेव ॥ ५६ ॥

अर्थमाह तदाह। क्वचिदिति। पिबन्त्यां पातुमिच्छन्त्यां बुद्ध्या पूज्यम् अनेन महद्भिरपि व्यभिचेतेति ज्ञातव्यम् ॥ ५७ ॥ ५८ ॥ ५९ ॥ ॥ ६० ॥ ६१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अन्धाविति ज्ञानहीनत्वात् ॥ ५४—६१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

उत्तरेण उत्तरस्यां दिशि श्रुतधरः श्रोत्रेन्द्रियं दक्षिणकर्णेन बलाधिक्यात् प्राधान्याच्च कर्मकाण्डश्रवणं वामकर्णेन ज्ञानकाण्डश्रवणमिति ज्ञापयितुं द्वारयोर्नामभेदः कृतः। पञ्चानामपि विषयाणां श्रोत्रेणैव प्रथमग्रहणात् पाञ्चालमिति संज्ञा ज्ञेया ॥ ५१ ॥

असुरा इन्द्रियारामास्तेषामियमासुरी शिश्नद्वाः ग्रामकं ग्रामस्थजनानां कं सुखं अथार्थं दुर्मदेन उपस्थेन्द्रियेण ॥ ५२ ॥

निर्ऋतिर्गुदं मृत्युद्वारत्वात्। वैशसं मलविसर्गं लुब्धकेन पायुना तेनोत्क्रान्तस्य दुःखप्राप्तेर्लुब्धकसाम्यम् ॥ ५३ ॥

अमीषां मध्ये निर्वाक् पादः पेशस्कृत् हस्तस्तावुभावप्यन्धौ विज्ञाभावात्। अक्षण्वतामिन्द्रियवतां द्वाराणामधिपतिः ॥ ५४ ॥

अन्तःपुरं हृदयं विषु सर्वतोऽञ्चतीति विषूचीनं मनस्तद्युक्तः। मोह[illegible]णि जाया बुद्धिः आत्मजाः सामान्यविशेषनिश्चयज्ञानादयस्तदुत्थम् ॥ ५५—५६ ॥

जीवस्योपाधिधर्माध्यासं प्रपञ्चयति। क्वचिदित्यादि। यदुक्तं प्रकृतेः क्रियमाणानि गुणैरात्मनि मन्यत इति जक्षत्यां चर्वन्त्याम् ॥ ५७—५८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ब्रह्मप्रापकशास्त्रश्रवणद्वारा देवस्य ब्रह्मणः प्राप्तिमनेन भवत्यतो देवहूर्वामकर्णस्तद्रूपा पुर्या द्वाः उत्तरेणोत्तरस्यां दिशि तयोत्तरपाञ्चालम् कथापक्षे देशविशेषमध्यात्मपक्षे उत्तरं कर्मकाण्डविचारानन्तरश्रोतव्यम्। पञ्चानामुपासककृपाफलभक्तिरसतद्विरोधिपदार्थानां प्रकाशनमायान्तं निवृत्तिशास्त्रम् ॥ ५१ ॥

असुराः औपस्थ्यसुखलुब्धास्तत्सम्बन्धिनी उपस्थस्थानरूपा तया दुर्मदेनोपस्थेन्द्रियेण समन्वितः ग्रामकं ग्रामे यत्कं सुखं मैथुनं तद्याति ॥ ५२ ॥

निर्ऋतिः गुदरूपा द्वाः तया लुब्धकेन पायुना समन्वितः वैशसं मलविसर्गविषयं याति ॥ ५३ ॥

अमीषां पौराणां पुरगतानां द्वाराणां मध्ये उभौ अन्धौ निर्दिष्टौ निर्वाक् पादः पेशस्कृत् हस्तः ताभ्याम् अक्षण्वतामिन्द्रियगोलकानामधिपतिर्याति करोति च स्वगतुक्तिः सर्वेष्वन्तर्भावाभिप्रायेण ॥ ५४ ॥

स यर्हि विष्वगञ्चतीति विषूचीनम् मनस्तेन समन्वितोऽन्तःपुरं हृदयं गतो भवति तदा जायात्मजा जायाबुद्धिस्तदात्मजा इन्द्रियद्वारा तमःसत्त्वरजोवृत्तयस्तदुत्थं मोहं तमोवृत्तिकार्यं प्रसादं सत्त्ववृत्तिकार्यं हर्षं रजोवृत्तिकार्यं च याति ॥ ५५ ॥

एवं कर्मसु संसक्तः यतः कामेषु कर्मफलेषु आत्मा बुद्धिर्यस्य सः अतोऽबुधः हेयोपादेयविवेकहीनः अतो वञ्चितो दुरन्ते-

कचिद्ध्यायति ध्यायन्त्यां शोचन्त्यामनुशोचति ।
अनुशेते शयानायामन्वास्ते कचिदासतीम् ॥ ५९ ॥
(१) कचिच्छृणोति शृण्वन्त्यां पश्यन्त्यामनुपश्यति ।
कचिज्जिघ्रति जिघ्रन्त्यां स्पृशन्त्यां स्पृशति कचित् ॥ ६० ॥
कचिच्च शोचतीं जायामनुशोचति दीनवत् ।
अनुहृष्यति हृष्यन्त्यां मुदितामनुमोदते ॥ ६१ ॥
विप्रलब्धो महिष्यैवं सर्वप्रकृतिवञ्चितः ।
नेच्छन्ननुकरोत्यज्ञः क्लैब्यात् क्रीडामृगो यथा ॥ ६२ ॥
इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां पुरञ्जनोपाख्याने
पञ्चविंशतितमोऽध्यायः ॥ २५ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

ति शेषः अत एव महिषी बुद्धिर्यद्यदीहते तत्तदेव अन्ववर्तत अनुवर्तितवान् ॥ ५६ ॥

ध्यायतीव लेलायतीवेत्यादिश्रुतिमुपबृंहयति । कचिदित्यादिना। अदत्यां भक्षयन्त्याम् ॥ ५७ ॥ ५८ ॥

भाषाटीका ।

देवहू नामक ओपुर का द्वार है उत्तर की तरफ जिससे राजा श्रुतधरके साथ उत्तर पंचाल नाम देश को जाता है वह बायां कान है शास्त्र विषय है ॥ ५१ ॥

आसुरी नाम पीछे का द्वार है जिससे दुर्मद के साथ ग्रामक नाम देश को राजा जाता है वह लिङ्ग इन्द्रिय है मैथुन इसका विषय है ॥ ५२ ॥

निर्ऋति नाम के पीछे का द्वार है जिससे पुरञ्जन राजा लुब्धक के साथ वैशस नामक देश को जाता है वह गुदा इन्द्रिय है मल त्याग इसका विषय है ॥ ५३ ॥

इन सब द्वारों मे निर्वाक् पेशस्कृत ये दोनो अन्धे द्वार हैं इन दोनों से छिद्र वाले सब इन्द्रियों का पवि गमन तथा ग्रहण करता है यह हस्त और पाद हैं चलना पकड़ना इनका विषय है ॥ ५४ ॥

जब वह राजा विषूचीन के साथ अन्तः पुर को जाता है तब स्त्री पुत्रों के हेतु से मोह प्रसाद हर्ष को प्राप्त होता है यहां मन के सहित जीव बुद्धि के वृत्तियों को भोगता है ॥ ५५ ॥

इस प्रकार से वह राजा कर्म मे आसक्त होकर कामों मे वश होकर वंचित होगया तब रानी जो कुछ चाहे तिसी काम को करने लगा यहां बुद्धि की वृत्तियों मे आत्मा प्रवृत्त हो जाता है ॥ ५६ ॥

कभी रानी के मदिरा पीने से मद से विह्वल होकर आपभी मदिरा पीता है उसके खाने से आप खाता है चर्वणादि भक्षण करने से आपभी भक्षण करता है ॥ ५७ ॥

उसके गाने से आपभी गाता है उसके रोने से आपभी रोता है उसके हँसने से आपभी हँसता है उसके बोलने से आपभी बोलता है ॥ ५८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आसतीमासीनाम् ॥ ५९ ॥ ६० ॥ ६१ ॥

सर्वासंगत्यादिवञ्चिता प्रकृतिः स्वभावो वञ्चितोऽस्य सर्वथा प्रकृत्या वञ्चित इति वा नेच्छन्नपिच्छन् क्लैब्यात्पारवश्यात् ॥ ६२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आसतीमासीनामासितवन्तं अनयन्तीमनुसृत्यास्ते ॥ ५९ ॥

एवं शोचतीमनुशोचतीत्यादेरर्थः ॥ ६०–६१ ॥

एवं महिष्या बुद्ध्या विप्रलब्धः विशेषेण विमोहितः अत एव सर्वा प्रकृतिरकोपाद्यात्मस्वभावः वञ्चिता यस्य सः त्यक्तस्वभाव इत्यर्थः नेच्छन्ननिच्छन्नपि क्लैब्यात्पारवश्यादनुकरोति यथा क्रीडायां मृगः ॥ ६२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तथाहि महोऽस्यास्तीति महि ब्रह्म तस्मिन्नित्योरस्यसंमुखे हरौ सीदति विषयीकृत्य वर्तत इति महिषी सद्बुद्धिस्तया विशेषेण प्रलब्धः आत्मामीष्टकार्यलाभः सर्वप्रकृतिवञ्चितो वञ्चितसर्वज्ञानस्वभावः अविष्णुं जानातीत्यज्ञः सद्बुद्ध्यभीष्टचारक्रीडामृगत्वमपि युक्तम् ॥ ६२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
पञ्चविंशोऽध्यायः ॥ २५ ॥

(१) अयंश्लोकः श्रीवीरराघवाचार्यमतेनाधिकः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विप्रलम्भः अत्र जीवस्य शक्तिमत्त्वायां "परामिध्यानात्तु तिरो- हितं ततोह्यस्य बन्धविपर्य्ययौ" इत्येतत् सूत्रमप्यनुसन्धेयम् ॥ ६२॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आसतीमासीनाम् ॥ ५९—६०—६१ ॥

विशेषेण प्रकर्षेण एवमनेन प्रकारेण लब्धः प्राप्तः सर्व्वथा प्रकृत्या स्वभावेन ज्ञानानन्दादिरूपया वञ्चितस्त्याजितः वेच्छन् एकेन स्वभावेन वस्तुतस्तदनिच्छन्नपि क्रीडयाऽत्र प्राप्तस्य प्रापकादपरस्मात् स्वभावात् अनुकरोति तद्धर्ममात्मन्यध्य- स्यति ॥ ६२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थे पञ्चविंशोऽयं सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आसतीमासीनाम् ॥ ५९ ॥ ६० ॥

इत्यमुयां बहिरिन्द्रपदार्थदर्शनादिना मुदितामिष्टपदार्थस्मर- णेन ॥ ६१ ॥

माहिष्या बुद्ध्या विप्रलब्धो मोहितः तत्र हेतुः अस्तौ विमुक्त- स्य शक्तिभूतया प्रकृत्या वञ्चितः अत एवाज्ञः आत्मानात्मपरमा- त्मज्ञानहीनः वेच्छन् अनिच्छन् अपि क्रीड्याऽऽरतन्त्र्यात्क्रीडार्थो मृगः यथा अनुकरोति ॥ ६२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चविंशा-
ध्यायार्थप्रकाशः ॥ २५ ॥

भाषाटीका ।

उसके दौड़ने से आपभी दौड़ता है उसके खड़ी होने से आपभी खड़ा होता है उसके सोने से आपभी सोता है उसके बैठने से आपभी बैठता है ॥ ५९ ॥

उसके सुनने से सुनता है उसके देखने से आप देखता है उसके सूंघने से सूंघता है उसके छूने से आप छूता है ॥ ६० ॥

कभी उस को शोच करती देख कर आप भी दुखी सा होकर शोचता है उस के हर्ष होने से हर्षित होता है उस के आनन्दित होने से आनंदित होता है ॥ ६१ ॥

इस प्रकार रानी से वंचित होने से सब निजस्वभाव से वंचित होगया तब जो नहीं चाहता है सो काम भी अज्ञानी होकर करता है काष्ठपुतली से जैसे खेलने का मृग परवश होवे करे तैसे ॥ ६२ ॥

इति श्रीभागवत चतुर्थस्कन्ध पचीसवांअध्याय का
भाषानुवाद ब्रह्मणाचार्यकृत
समाप्त ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पञ्चविंशोऽध्यायः समाप्तः ॥ २५ ॥

षड्विंशोऽध्यायः ।

॥ नारद उवाच ॥

स एकदा महेष्वासो रथं पञ्चाश्वमाशुगम् ।
द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम् ॥ १ ॥
एकरश्म्येकदमनमेकनीडं द्विकूबरम् ।
पञ्चप्रहरणं सप्तवरूथं पञ्चविक्रमम् ॥ २ ॥
हैमोपस्करमारुह्य स्वर्णवर्माक्षयेषुधिः ।
एकादशचमूनाथः पञ्चप्रस्थमगाद्वनम् ॥ ३ ॥
चचार मृगयां तत्र दृप्त आत्तेषुकार्मुकः ।
विहाय जायामतदर्हां मृगव्यसनलालसः ॥ ४ ॥
आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः ।
न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ॥ ५ ॥
तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान् पशून् वने ।
यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥ ६ ॥
य एवं कर्मनियतं विद्वान् कुर्वीत मानवः ।
कर्मणा तेन राजेन्द्र! ज्ञानेन न स लिप्यते ॥ ७ ॥
अन्यथा कर्म कुर्वाणो मानारूढो निबध्यते ।
गुणप्रवाहपतितो नष्टप्रज्ञो व्रजत्यधः ॥ ८ ॥
तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः ।
विप्लवोऽभूद्दुःखितानां दुःसहः करुणात्मनाम् ॥ ९ ॥
शशान् वराहान् महिषान् गवयान् रुरुशल्यकान् ।
मेध्यानन्यांश्च विविधान् विनिघ्नन् श्रममध्यगात् ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षड्विंशे मृगयाव्याजात्स्वप्नजागरणोक्तितः ।
सञ्चरिस्नागयोगाभ्यां संसृतिः सा प्रपञ्च्यते ॥ १ ॥

तदेवमात्मन उपाधिकृतां सुषुप्तावस्थां जाग्रदवस्थां चोक्त्वेदानीं स्वप्नावस्थामाह । स एकदेति दशभिः । महानिष्वासो धनुः कर्तृत्वभोक्तृत्वाद्यभिनिवेशो यस्य स रथमारुह्य पञ्चप्रस्थं वनमगादिति तृतीयेनान्वयः । रथं तदाभीमेव विभूतं स्वप्नदेहम् जाग्रद्देहस्य ज्ञातसम्बन्धस्योपभोग्यपुरत्वेनोक्तत्वात् । पञ्च ज्ञानेन्द्रियाण्यश्वा यस्य आशुगं शीघ्रगतिम् । द्वे अहन्ताममते ईषे दण्डके यस्य द्वे पुण्यपापे चक्रे यस्य एकं प्रधानमक्षो यस्य त्रयो गुणा वेणवो ध्वजा यस्य पञ्च प्राणा बन्धुराणि बन्धनानि यस्य ॥ १ ॥

एकं मनो रश्मिः प्रग्रहो यस्य एका बुद्धिर्मनः सूतो यस्य तस्य तथा एकं हृदयं नीडं रथिन उपवेशस्थानं यस्मिन् द्वौ शोकमोहौ कूबरौ युगबन्धनस्थानं यस्य पञ्च शब्दादयो विषयाः प्रगृह्यन्ते प्रक्षिप्यन्ते यस्मिन् । अस्य व्याख्यानं भविष्यति पञ्चेन्द्रियार्थप्रक्षेप इति सप्त धातवो वरूथा रक्षार्थं चर्मावरणानि यस्य पञ्च कर्मेन्द्रियाणां विक्रमा गतिप्रकारा यस्य ॥ २ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हैमोपस्करं सौवर्णाभरणम् स्वर्णमयो वर्म कवचम् । रजोगुणवृत्तः अक्षयेषुधिः इषुधिर्निषङ्गः अनन्तवासनाऽहङ्कारोपाधिः एकादशो मनोरूपश्चमूनाथः सेनापतिर्यस्य वासनामयस्य अतः प्रग्रहत्वं सङ्कल्पविकल्पात्मकस्य बुद्धकर्तृत्वेन वश्यमानस्य चमूनाथत्वमिति विभागः । पञ्चशब्दादयो विषयाः प्रस्थाः सानवो यस्मिंस्तद्वनं भजनीयं देशमगात् ॥ ३ ॥

आत्ता गृहीता इषवो रागादिरूपाः कार्मुकं च भोगाद्यभिनिवेशरूपं येन जायां विवेकवर्तीं बुद्धिं विहाय अनर्हां त्यागाहाम् । त्यागे हेतुः मृग्यन्त इति मृगा विषयास्तेषु व्यसने भोगासक्तिस्तेन लालसातिस्पृहा यस्य ॥ ४ ॥

बाणै रागादिभिः वनेषु भजनीयदेशेषु वनगोचरान् भजनीयविषयान् व्यहनदात्मसात्कृतवान् कथापक्षे तु स्पष्टमेव ॥ ५ ॥

नन्वासुरीं वृत्तिमाश्रितस्येति निन्दितं मृगया निन्द्यते कथापक्षे तावन्न प्राप्तौ विहितैव साध्यात्मपक्षेऽपि जीवस्य विषयभोगो विहित एवेत्याशङ्क्याह । तीर्थेष्विति त्रिभिः । अयं भावः नहि मृगया विधीयते रागप्राप्तत्वात्किन्तु नियम्यते प्रवृत्तिः सङ्कोच्यते नियममेव चतुर्विधं दर्शयति । यथाकामत्वार्थं लुब्धो रागी सन् हन्यात्तर्हि तीर्थेषु श्राद्धादिष्वेव तत्रापि प्रतिषिद्धेषु प्रख्यातेष्वेव न निष्प्रयोजनादिषु तत्रापि राजैव मेध्यानेव वनएव यावदुपयोगमेवेति एवं जीवस्य विषयसेवापि यावदुपयोगं न यथेष्टमिति नियम एवेत्यर्थः ॥ ६ ॥

अतो नावश्यकत्वमित्याह । य इति । एवं नियतं कर्म विद्वान् नैमित्तिकमुपलक्षणम् । तदन्येन वा कर्मणोक्तमनुष्ठितेन यज्ज्ञानं भवति तेन ज्ञानेन हेतुना सोऽनुष्ठाता न लिप्यते ॥ ७ ॥

अन्यथा नियमोल्लङ्घनेऽन्तःकरणशुद्ध्यभावात् कर्तृत्वाभिमानमारूढः कर्मभिरनुबध्यते ततश्च गुणप्रवाहे पतितोऽधो व्रजति ॥ ८ ॥

प्रासङ्गिकं परिसमाप्य पुनर्मृगयामेवानुवर्णयति । तत्रेति । छिन्ना वाजाः पक्षा येषां तैः विप्लवो नाशः करुणात्मनां कृपालूनां दुःसहः ॥ ९ ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सुषुप्त्यवस्थां जाग्रदवस्थां चाभिधायेदानीं स्वप्नावस्थामाह दशभिः । सइति । स पुरञ्जन एकदा सुषुप्त्यनन्तरं महानिष्वासो धनुः कर्तृत्वभोक्तृत्वाद्यभिनिवेशो यस्य सः रथमारुह्य पञ्चप्रस्थं वनमगादिति तृतीयेनान्वयः रथशब्देनात्र शरीरं विवक्षितम् ।

आत्मानं रथिनं विद्धि शरीरं रथमेव च ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ।

इन्द्रियाणि हयानाहुरित्यादिश्रुत्या उपासननिर्वृत्तौ शरीरादीनां रथादिभावेनान्यत्र निरूपितत्वात् तच्च शरीरमत्रापि स्वप्नावस्थायां विवक्षितम् तद्धि तदानीमेव स्वप्नदृक्पुण्यपापानुरोधेनेश्वरसृष्टं भवति जाग्रद्देहस्य तु जातरूपस्वरोपभोग्यपुरत्वेनोक्तत्वात् रथं विशिनष्टि । पञ्चाश्वं पञ्च ज्ञानेन्द्रियाणि चक्षुरादीन्यश्वा यस्य तमाशुगं शीघ्रगम् अनेनापि स्वप्नमेव शरीरमत्र विवक्षितमित्यवगम्यते जाग्रद्देहस्याशुगत्वासम्भवादिति भावः द्वावहङ्कारमम-

कारौ ईषिके दण्डिके यस्य तं द्वे पुण्यपापे चक्रे यस्य तं तथैकः प्रधानमक्षो यस्य त्रयो गुणाः सत्त्वादयो वेणवो ध्वजा यस्य तं पञ्च प्राणा बन्धुराणि बन्धनानि यस्य तथाभूतम् ॥ १ ॥

पुनः कीदृशम् एकं मनो रश्मिः प्रग्रहरज्जुर्यस्य तम् एका बुद्धिर्मनः सारथिर्यस्य एकं हृदयं नीडं रथिन उपवेशस्थानं यस्य द्वौ शोकमोहौ कूबरं युगबन्धनस्थानं यस्य पञ्च शब्दाद्या विषयाः प्रहूयन्ते प्रक्षिप्यन्ते आधार्यन्ते यस्मिन् तं सप्त धातवो वरूथाः चर्माद्यावरणानि यस्य तं पञ्च कर्मेन्द्रियाणि विक्रमा गतिप्रकारा यस्य तथाभूतम् ॥ २ ॥

हैमोपस्करं सुवर्णाभरणं स्वर्णाभरणविशिष्टस्य देहस्य सुखिसम्बन्धाभिप्रायेण हैमोपस्करमित्युक्तं कथासौन्दर्याय वा एवमनुपयुक्तं कथासौन्दर्यायेति द्रष्टव्यं स्वर्णमयं वर्म कवचं रजोगुणवृत्तिर्यस्य अक्षयेषुधिः इषवो बाणा धीयन्तेऽस्मिन्निति इषुभिर्निषङ्गः अक्षय इषुधिरनन्तवासनामयोऽहङ्कारो यस्य स तत्र बुद्धिपूर्वकप्रवृत्तिहेतुः संस्कारविशेषो वासना साचाज्ञानवासना-कर्मवासनाप्रकृतिसम्बन्धवासना चेति त्रिप्रकारा अविद्यानाम ज्ञानानुदयान्यथाज्ञानविपरीतज्ञानरूपेण त्रिविधमज्ञानं प्रकृतिसम्बन्धः स्थूलसूक्ष्मरूपाचित्सम्बन्धः स च देवमनुष्यादिदेहभेदेन बहुविधः सजातीयकर्मारम्भे रुचिः सा च विषयभेदाद्बहुप्रकारा पुण्यापुण्यरूपेण द्विविधं कर्मेति ज्ञेयम् एकादशेन्द्रियवृत्त्यात्मकसेनापतिः पञ्च शब्दादयो विषयाः प्रस्थाः सानवो यस्मिंस्तद्भूतं भोगस्थानमगात् ॥ ३ ॥

तत्र वने दृप्तः गर्वितः स्वाप्नदेहपरवश इत्यर्थः आत्ताः स्वीकृता इषवः बाणरूपाः कार्मुकं कर्तृत्वाद्यभिनिवेशो यस्य अनर्हां त्यागानर्हां जायां विवेकात्मिकां सात्त्विकीं बुद्धिं विहाय त्यागे हेतुः मृग्यन्त इति मृगाः शब्दादिविषयास्तेषु यद्व्यसनमनर्थाभिनिवेशं दुःखं तेन लालसः अन्वेषणासक्तः ॥ ४ ॥

आसुरीं तामसीं वृत्तिं बुद्धिमाश्रित्य घोरात्मा घोर आत्मा चित्तं यस्य सः रजोगुणकार्यक्रोधाविष्टः कामादिरोगेषु क्रुद्धचित्त इत्यर्थः अत एव निरनुग्रहः विरोधिष्वनुग्रहरहितः निशितैः कार्यक्षमैः विषयसान्निध्यापादकैरिति यावत् बाणैः कर्मवासनारूपैः शरैः वनेषु भोगस्थानेषु वनगोचरान् वनगोचरमृगतुल्यान् दैवोपसादितान् इत्यर्थः न्यहनदात्मसात्कृतवान् कथापक्षे स्पष्टमेव ॥ ५ ॥

नन्वासुरीं वृत्तिमाश्रित्य इति मृगयानिन्दा न युक्ता कथापक्षे राज्ञस्तस्य विहितत्वात् अध्यात्मपक्षेऽपि दैवोपसादितविषयभोगो विहित एवेत्यत्राह । तीर्थेष्विति त्रिभिः । मृगयाया रागप्राप्तत्वान्न सा विधीयते किन्तु नियम्यते मृगयाप्रवृत्तिः सङ्कोच्यते इत्यर्थः नियममेव चतुर्विधमुपदर्शयति लुब्धो रागी सन् यदि निहन्यात्तर्हि तीर्थेषु श्राद्धादिषु तन्निमित्तेषु तत्रापि प्रतिषेधेषु विहितमांसकेषु एवेति । तत्रापि राजैव मेध्यानेव वन एव यावदुपयोगमेवेति अध्यात्मपक्षेऽपि जीवस्य यावदुपभोगमेव विषयभोगो नियम्यते इतिभावः ॥ ६ ॥

य एवं विद्वान् हिंसाया विषयभोगस्य च रागप्राप्ततां तन्नियमं च विद्वान् कुर्वीत हिंसां विषयभोगं च कुर्याद्वा न कुर्याद्वा रागप्राप्तत्वेनावश्यकत्वाभावादितिभावः रागप्राप्तस्य हि पक्षे प्रत्यवायाभावमात्रं क्रियते नादृष्टम् अतः सुतरां रागप्राप्तस्य त्यागेन प्रत्यवाय इति नबेत्युक्तं तेनैवं नियतेन कर्मणा ज्ञानेन एवं कृतेन कर्मणा यज्ज्ञानं भवति तेन हेतुना सः कर्ता न लिप्यते पापे-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रति शेषः यद्वा स विद्वान् ज्ञानेन रागप्रमाणानां व्याज्योपादेय-विवेकज्ञानरूपेण हेतुना कर्मणामभिध्यापकरूपकर्मणा न लिप्यते ॥ ७ ॥

अन्यथा नियतं कर्म कुर्वाणः अहं ममाभिमानारूढः कर्मभिरनादिपुण्यापुण्यकर्मभिरनुबध्यते वशीक्रियते ततः कर्मपारवश्याद् दुष्प्रमादे संसारे पतितः नष्टदेहात्मविवेकः अधो नरकं व्रजति ॥ ८ ॥

एवं प्रासङ्गिकं परिसमाप्य प्रकृतां मृगयामनुवर्णयति । तत्रेति । त्रिचित्रवाजा नानाविधवासनारूपा विचित्रपत्राः येषां ते वासनाभिरूपोद्घावितैरित्यर्थः शिलीमुखैः पुण्यापुण्यकर्मभिर्हेतुभूतैः निर्भिन्नान्यनुभवेन जीर्णानि गात्राण्यवयवा येषां तेषां मृगाणां विषयाणां विध्वंसी नाथः करुणात्मनां कृपाकूनां दुःसहोऽभूत् कामिभिरनुजीर्णावयवान् विनष्टान् शब्दादिविषयाननुसन्दधतां सर्वभूतसुहृदां ज्ञानिनां विषयविप्लवो मनसापि दुर्विषहोऽभूदित्यर्थः कथापक्षेऽप्ययमेवार्थः ॥ ९ ॥

शशान् वराहानित्यादिकथनं शब्दादिभेदेन च विषयवैचित्र्यज्ञापनाय कथापक्षे तु तस्मोत्सर्गाय मेध्यान् विहितानन्यानविहितांश्च विषयान् निम्नधारमसात्कुर्वन् ऽपापूतकरणत्वाच्च श्रममध्यगात् प्राप्तवान् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अधुना आत्मदर्शनोपकारकत्वेन संसारमपि कथयन् ज्ञानवैराग्यप्रवेशं तावदाह । स एकदेति । स पुरञ्जनः एकदा आत्मविषयभोगप्रापककर्मत्वे आत्मभोगप्रापककर्माभावे सति पञ्चेन्द्रियद्वारेण सूनार्थमात्मा प्रतिष्ठति यस्मिन्निति पञ्चप्रस्थं वनं आत्महितयत्नकान्तारममादनुबभूवेत्यर्थः । अन्वयः किं कृत्वा कथंभूत इति तदाह । महेष्वास इति । महान् इति महः प्रणवः स एवेष्वासो धनुर्यस्य स तथा यथार्थकथनमेतत् अन्यत्र महांश्चासौ इष्वासो यस्येति सर्वोत्कर्षोत्कर्षकत्वोग्रुगुणाव्यं वर्म यस्य स तथा प्रवृत्ति निवृत्तिलक्षणे इषुधी यस्य स तथा एकादशेन्द्रियलक्षणाया सेनाया नाथः पञ्चेन्द्रियाण्येवाश्वा यस्य स तथा तम् आशुगच्छत्वादिना आयत इत्यादिविकारं परिणामलक्षणमित्याशुगत्वं द्वे पुण्यपापलक्षणे कर्मणी एव चक्रे यस्य स तथा तम् एकः सूत्रात्मा वायुरक्षो यस्य स तथा तं त्रयः सत्त्वादिगुणा एव वेणवो ध्वजा यस्य स तथा तं पञ्चप्राणा एव विनतोन्नतप्रदेशा बन्धुराख्या यस्य स तथा तम् अनेन प्राणसञ्चारहेतवो नाडीविशेषाः कथ्यन्ते ज्ञातारो वा ॥ १ ॥

एको मनआख्यो रश्मिः प्रग्रहो यस्य स च एको बुद्ध्याख्यो दमनः सारथिर्यस्य सचैकरक्ष्यविकारमनःसत्तम ।

> बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ।
> प्राणा बन्धुरमुद्दिष्टा गुणाः सत्त्वादयो ध्वजाः ॥
> मूलवायुरक्षसंज्ञके द्वे पुण्यदुष्कृते ।
> इन्द्रियाण्यश्वसंज्ञानि हृदयं नीडमुच्यते ॥
> शीतोष्णलक्षणौ द्वौ तु कूबरौ शब्दपूर्वकम् ।
> पञ्चप्रहरणं सप्तत्वगाद्या गुप्तयः स्मृताः ॥
> पूर्विर्माणा विक्रमाख्या देहाख्यो रथ उच्यते ।

इत्यध्यात्मयोगे पर्वं हृदय नक्षत्रं नीडं यस्य स तथा तं शीतोष्णलक्षणौ कूबरौ युगन्धरौ यस्य स तथा तं पञ्चप्रहरणमिन्द्रियाणां पञ्चशब्दादिविषयाणां च सन्निकर्षलक्षणानि प्रहरणानि यस्मिन्स तथा तं पञ्चसूनासाधनानि प्रहरणानि यस्मिन्निति वा सप्तत्वगाद्या धातवो वरूथं गुप्तिर्यस्य स तथा तं पञ्चानां भूतानां विक्रमः प्रमाणो यस्मिन्स तथा तम् ॥ २ ॥

हैमोपस्करं मुकुटकुण्डलाभरणैः स्वर्णविकारैर्भूषितं रथं रममतामिति धातोः ज्ञानलक्षणगमनसाधनं देहमात्रं तीर्णाङ्गिनेति अक्षय्येषुधिरनन्ततूणः अक्षमाणामन्तःकरणोपाधिरिति वा इषून् रागादीनस्यति निरस्यति गमयतीति इष्वासो ज्ञानरूपः स च महान् यस्य स इति वा ॥ ३ ॥

इषवश्च कार्मुकं चापं गृहीतं येन स तथा रागाद्या इषवः । कार्मुकं विवेककार्यं सकलं सुखमनेनेति निरुक्त्या । तत्र आत्मविषयकानने मृगयां शब्दादिभोगलक्षणां चचार बुभुजे यद्यप्ययम् अतर्ह्यो त्यागायोग्यां सङ्कल्पलक्षणां विहायासक्तिलक्षणां चाहायेति शेष इति विवेकः मृग्यन्त इति मृगा विषयास्तेषां आसने भोगलक्षणे जातसंज्वरः उत्सुकः अन्यत्र हरिणानां हिंसनायोत्कट व्यापारत्वात् ॥ ४ ॥

आसुरीं हिंसालक्षणां वृत्तिं घोरात्मा विषयप्रसङ्गनिमित्तसंसारभयरहितः निर्गतोऽनुग्रहो दयालक्षणो यस्मात्स तथाभूत इनत् । इनहिंसागत्योरिति नितरामगच्छत्सेवते स्म शितैः शिलीमुखैः कपटमनीर्णवृत्तिभिः वनेषु आत्मप्रियपक्षदेशेषु धनुर्वेदोक्तमत्यशब्दादिविषयलक्षणान्मृगान् ॥ ५ ॥

ननु राजा हि मृगयानिरततया पशुहिंसया । राजा मृगार्थी मृगयां चरन् दोषेण लिप्यत इति अग्नीषोमीयं पशुमालभेतेत्यादौ विहितत्वात्कथमासुरीं वृत्तिमास्थितेति निन्द्यत इति तत्राह । तीर्थेष्विति । श्रुतिषेषु श्रुतिस्मृतिविहितेषु यज्ञस्थानेषु राजा अविहिताचारनिष्ठया शोभमानो मेध्यान् पशून् अजानप्रभृतीन् यावदर्थं यावत् प्रयोजनं लुब्धः कर्तृत्वाभिमानी हन्यादिवत्यत्र नियम्यते विधिवाक्यैरिति शेषः अध्यात्मेतिप्रमाणकेषु तीर्थेषु शास्त्रेषु विहितान्मेध्यान्मेधयोग्यान् ज्ञानयोग्यान् पशून् गोधर्मान् रमणीयान् विषयान् वने विषयव्यवहारे वर्तमानो लुब्धो गृध्नुर्यावता देहावस्थितिस्तावन्मात्रमलमत्यर्थं हन्यात् उद्दिश्य सेवार्थमिति शेष इति नियम्यते शिक्षाविषयीक्रियत इति मतमिति विशेषणादलुब्धो लोकोपकारार्थं पशून् प्रन् आत्मार्थादधिकमपि हननमपि कुर्वन्न दुष्यतीति तात्पर्यं ज्ञायते । तदुक्तम् ।

> उपकारः सतां येन तत्कृत्वा नैव दुष्यति ।
> अतीवनिन्दितमपि बह्वाहिंसा युगेव वा ।
> अथ वा ज्ञानिनः कर्म न दुष्टमपि लिप्यत इति ॥ ६ ॥

ननु नियतकर्माकरणो ज्ञानिनोऽपि दुष्कर्मलेपः स्यादिति तत्राह । य एवमिति । यो नियतमनियतं वा विद्वान् जानन्नेव विविधं पुण्यं पापं वा कर्म कुर्वीत न वा कुर्वीत स ज्ञाता तेनोभयविधेन कर्मणा न लिप्यते तेन विलिप्तेनेत्यत्र अकर्म कर्मेति कर्मलेपाभावे ज्ञानं कारणमित्यर्थः ।

> तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते ।
> एवमेवं विदि पापं कर्म न श्लिष्यत इति श्रुतेः ।

अथवा ज्ञानिनः कर्म न दुष्टमपि लिप्यत इति स्मृतेश्च ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अन्यपक्षे बाधकमाह । अन्यथेति । अन्यथा ज्ञानाभावे । अधर्मोऽपि भवतीत्याह । गुणप्रवाह इति ॥ ८ ॥

एवं प्रासङ्गिकीं कथां समाप्य प्रकृतमनुसरति । तत्रेति । तत्र विपद्बहुले वने विचित्राजैरनेकाङ्कुरमुखाद्युपलक्षितैः शिखीमुखैः शिलावत् दृढमुखैर्वेणुपदैरिन्द्रियमनःप्राप्तविशेषैर्निर्भिन्नगात्राणां दुःखितानामाथर्वाणां करुणात्मनां पापनिमित्तेन मुक्तानामस्माकं कोऽपि न गतिरस्तीति दुःखितानामिव स्थितानां यथाशास्त्रमुक्तानां क्रियायां विषयो विनाशः समाप्तिलक्षणोऽभूदित्यन्वयः अन्यत्र स्पष्टम् ॥ ९ ॥

क्षुधाम् बहाराणिति । मेध्यान्मांसिहिपानित्यादिना स्वमेध्यान् क्षुधावलितक्षयितानाम्बलवत्प्रान्तरथीयायेनाहेयान्माहिषान्महितं हत्वा तीर्ति विघटया सनवाम इति धातुरतस्य इन्प्रत्ययः सकारस्य मूर्धन्यादेशः गतवान् गतवयसः अरत्नं गतामिति शेषः हस्व दोषगहेन्द्र यं सुखं विज्ञापयतीति शास्त्रज्ञानित्येवमादिविषयान् नियम्य गच्छन्मुञ्जान इत्यर्थः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

स एकदेति त्रिकम । टीकायामेका बुद्धिरविवेकवती । पञ्चविषया हृतमृगकामीयाः । पूर्वत्र शब्दादयो वासनामयविषयाः । अत्र तु तद्वासना इति भेदः ॥ १–१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

धार्मिकस्यापि जीवस्य दैवाद्वासनयावतः।

षड्भिशो सविषयस्थानः पुनः प्रातिभ्र वर्ण्यते ॥

धार्मिकस्य विवेकिनोऽपि जीवस्य कदाचिद्दैववशाद्वासनाबलात्तेनैवाविवेकतो निषिद्धविषयासक्तिः स्यादिति दर्शयन् विषयजीववातिरेकाश्रयिव देहं रथरूपत्वेन वर्णयति । स एकदेति समये रथमारुह्य पञ्चप्रस्थं वनमगादिति तृतीयेनान्वयः महानिष्वासो धनुः कर्तृत्वभोक्तृत्वाभिनिवेशो यस्य सः । पञ्चज्ञानेन्द्रियाण्यश्वा यस्य आशुगं शीघ्रगतिम् । द्वे अहन्ताममते ईषे दण्डके यस्य द्वे पुण्यपापे चक्रे यस्य एकं प्रधानमक्षो यस्य त्रयो गुणा वेणवो ध्वजा यस्य पञ्च प्राणा बन्धुराणि निबन्धनानि यस्य एकं मनोरश्मिः प्रग्रहो यस्य सः एका बुद्धिर्दमनः सूतो यस्य तञ्च तञ्च । एकं हृदयं नीडं रथिन उपवेशस्थानं यत्र द्वौ शोकमोहौ कूबरौ युगबन्धनस्थानं यस्य पञ्चेन्द्रियव्यापाराः अवणादयः प्रहरणान्यस्त्राणि यस्य सप्त धातवो वरूथा रथरक्षार्थं चर्माद्यावरणानि यस्य पञ्चविक्रमं कथापक्षे विस्तृतविक्रमं पथि विस्तारे अध्यात्मपक्षे पञ्चकर्मेन्द्रियाणि विक्रमा गमनानि यस्य हैमोपस्करं स्वर्णमयपरिच्छदम् । अध्यात्मपक्षे हैमा हिमसम्बन्धिन उपस्करा आतिआवरणमूर्तय एव परिच्छदा यस्य स्वर्णवर्म्मा रजोगुणात्मकः अक्षयेषुधिः अनन्तवासनः । एकादश चमूनाथाः सेनान्यो यस्य सः । पक्षे एकादशो मनोरूपचमूपतिर्यस्य सः । वासनाहेतोर्मैवतः अमहत्वं सङ्कल्पविकल्पात्मकस्य मनसो बृहद्वस्त्वेन ... इति विज्ञानः । पञ्चप्रस्थं पञ्चप्रस्थसंज्ञम् । पक्षे एव शब्दादिविषयरूपाणि प्रस्थानि सानूनि यत्र तत् ॥ १–३ ॥

मृगयां परदारगमनादिपापम् । इषवो रागद्वेषादयः कार्मुकम् भोगाभिनिवेशरूपं चर्मधारीणां बुद्धिम् ॥ ४ ॥

व्यघ्नन्निति वाण्यादिकरणकहिंसादिपापं कृतवानित्यर्थः ॥ ५ ॥

ननु कथापक्षे राज्ञो मृगया विहितैव अध्यात्मपक्षेऽपि जीवस्य भोक्तृत्वाद्विषयभोग उचित एवेति किमिति निन्द्यत इत्यत आह । तीर्थेष्विति त्रिभिः । अयं भावः नहि मृगया विधीयते रागप्राप्तत्वात् किन्तु नियम्यते प्रवृत्तिः सङ्कोच्यते । नियममेव चक्षुर्भ्यां दर्शयति यदाजमस्यर्थं लुब्धो रागी सन् हन्यात् तर्हि तीर्थेषु श्राद्धादिष्वेव । तत्रापि श्रुतिदृष्टेषु प्रख्यातेष्वेव नमित्यश्राद्धादिषु तत्रापि राजैव मेध्यानेव वन एव यावदुपयोगमेवेति एवं जीवस्य विषयसेवापि यावदुपयोगमेव न यथेष्टमित्यस्यनुज्ञा रूपो नियम एवेत्यर्थः ॥ ६ ॥

स तेन कर्मणा न लिप्यते । ज्ञानेनेति तत् कर्म अन्येन ज्ञानेन हेतुनेत्यर्थः ॥ ७ ॥

अन्यथा नियमोल्लङ्घनेन अन्तःकरणशुद्ध्यभावात् कर्तृत्वाभिमानमारूढः कर्मभिरनुबध्यते ततश्च गुणप्रवाहपतितोऽधो व्रजति । तेनाध्यात्मपक्षेऽपि निषिद्धेतरविषयभोग एव जीवस्योक्त इत्यर्थः ॥ ८ ॥

प्रासङ्गिकं परिसमाप्य प्रकृतमाह । तत्रेति । विभिन्नपक्षैः शरैर्विलुप्तो नाशः । पक्षे विविधदोषयुक्तैरिन्द्रियैर्विविधहिंसादिपापं करुणात्मनां कृपालूनामस्मादृशां दुःसहः । अतएव त्वमेव प्रबोध्य इति भावः ॥ ९ ॥

श्रममध्यगादिति धार्मिक जीवोहि कथञ्चिद्दैववशात् कश्चित् कालमधर्मं कृत्वा अनुतापं प्राप्तः स्यादित्यर्थः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तदेव सुषुप्त्यवस्थां जाग्रदवस्थां चोक्त्वाथ षड्भिशो मृगयाव्याजेन स्वप्नावस्थां पुनर्जाग्रदवस्थां च प्रपञ्चयति । स इति । स पुरञ्जनः एकदा स्वप्नवेलायाम् अध्यात्मपक्षे महान् कर्तृत्वभोक्तृत्वाद्यभिनिवेशो धनुर्यस्य सः रथं जीवस्य स्वप्नशरीरादिनिर्मातृत्वे अनिष्टपाकादिनिर्मातृत्ववत् अनिष्टशरीरादिनिर्मातृत्वाभावात् परमेश्वरनिर्मितं स्वप्नशरीरम् जाग्रद्देहस्य तु शतसंवत्सरोपभोग्यपुरत्वेनोक्तत्वात् आरुह्य पञ्चप्रस्थं वनमगादिति तृतीयेनान्वयः कीदृशं रथं पञ्चाश्वम् पञ्च ज्ञानेन्द्रियाण्यश्वा यस्य तमाशुगं शीघ्रगं द्वे अहंकारममकाररूपे ईषे दण्डके यस्य तम् द्वे पुण्यपापरूपे चक्रे यस्य तम् एकं प्रधानमक्षो यस्य तम् त्रयो गुणाः वेणवो ध्वजा यस्य पञ्च प्राणाः बन्धुराणि बन्धनानि यस्य तम् ॥ १ ॥

एकं मनो रश्मिर्यस्य तम् एका बुद्धिर्दमनः सूतो यस्य तम् अनेकरूपत्वाद्बुद्धेः कलत्रत्वं युक्तमेव एकं हृदयं नीडं यस्य तम् द्वौ शोकमोहौ कूबरौ बन्धनस्थानं यस्य तम् पञ्चेन्द्रियार्थाः शब्दादयः प्रहियन्ते आपात्यन्ते यस्मिन्निति पञ्चप्रहरणानि सप्त धातवो वरूथाः चर्माद्यावरणानि यस्य तम् पञ्चकर्मेन्द्रियाणि विक्रमाः गतिप्रकारा यस्य तम् ॥ २ ॥

हैमोपस्करं स्वप्नदृष्टपुण्यानुसारेण स्वर्णालंकारयुक्तम् स्वर्णमयं वर्म कवचं यस्य सः रजो गुणवृत्तिरित्यर्थः अक्षयो बहुबाणयुक्तः इषुधिर्निषङ्गो यस्य सः नानावासनाश्रयाहंकार इत्यर्थः एकादशो मनोरूपचमूनाथो यस्य सः मनसः

ततः क्षुत्तृट्परिश्रान्तो निवृत्तो गृहमेयिवान् ।
कृतस्नानोचिताहारः सम्विवेश गतक्लमः ॥ ११ ॥
आत्मानमर्हयाञ्चक्रे धूपालेपस्रगादिभिः ।
साध्वलङ्कृतसर्वाङ्गो महिष्यामादधे मनः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नेकरूपत्वात् रश्मित्वं अमूनाथत्वं युक्तमेव पञ्चेन्द्रियार्थाः प्रक-
षु तिष्ठन्तीति प्रस्थाः मृगाः यस्मिन् तद्वनमगात् ॥ ३ ॥

आत्ताः गृहीताः वासनारूपाः इषवः कर्तृत्वभोक्तृत्वाद्यभिमानि-
शरूपः कार्मुकश्च येन सः अतदर्हाम् त्यागानर्हाम् जायां जाग्रद्व्य-
हारयोग्यां बुद्धिं विहाय मृग्यन्ते इति मृगाः इन्द्रियार्थास्तद्व्य-
ने भोगे लालसा यस्य सः मृगयां कथापक्षे वध्यपश्वन्वेषण-
पामध्यात्मपक्षे इन्द्रियार्थान्वेषणरूपां चचार ॥ ४ ॥

घोरात्मा दुष्टचित्तः बाणैः वासनारूपैः वनेषु भोगस्थानेषु
भोगेच्चरान् शब्दादिरूपान् मृगान् व्यहनत् हनहिंसागत्योरि-
स्मात् अग्रहीत् ॥ ५ ॥

आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रह

इत्यर्द्धेन कथापक्षे मृगयाध्यात्मपक्षे विषयसेवाचानिषेति
चितं तदेवोपपादयति । तीर्थेष्विति त्रिभिः । यद्यप्यमत्यर्थं लुब्धो
वति तथापि तीर्थेषु श्राद्धादिष्वेव तत्रापि प्रतिहस्तेषु प्रत्यालो-
तेन नतु नित्यश्राद्धादिषु तत्रापि राजैव मेध्यानेव वने एव याव-
प्रयोगमेव पशून् हन्यादिति बहुभिः प्रकारैर्नियम्यते पशुहिंसासं
कोच्यते नतु अग्नीषोमीयं पशुमालभेतेत्यादिवाक्यैर्विधीयते राग
प्राप्तत्वात् एवं जीवस्य विषयसेवापि ऋतौ भार्यामुपेयादित्यादि-
वाक्यैः संकोच्यते इत्यर्थः ॥ ६ ॥

यो मानवः कर्म हिंसात्मकं विषयसेवनात्मकं च एवं नियतै
षड्भिः प्रकारैः संकोचितमपि यो विद्वान् तत्त्ववित् स तेन ज्ञानेन
तत्त्वबोधेन न कुर्वीत अत एव कर्मणा न लिप्यते इति नकार-
द्वयोभयत्र सम्बन्धः ॥ ७ ॥

विद्वान् हिंस्रं कर्म न करोति मन्दाधिकारी तूक्तरीत्या नियमे-
न कुर्यात् अन्यथा तु तादृशकर्म कुर्वाणः यतो मानारूढो यतो
गुणप्रवाहपतितोऽत एव नष्टप्रज्ञो निबध्यते कर्मणेति शेषः
अत एवाधो व्रजति ॥ ८ ॥

प्रासंगिकमुक्त्वा प्रकृतमाह । तत्रेति । विप्लवो विनाशः ॥९॥१०॥

भाषाटीका ।

(नारदजी बोले एक दिन वह राजा पुरंजन हाथ मे बड़ा धनुष को लेकर पांच घोड़ों से जल्दी चलने वाला दोदण्ड वाला दो चक्र वाला एक धुरा वाला तीन ध्वजा वाला पांच बंधन वाला एक रस्सी वाला एक सारथी वाला एक सारथिस्थान वाला दो जुआ वाला पांच आयुध वाला सात आवरण वाला पांच गति प्रकार वाला तथा सुवर्ण के आभरणों वाला जो रथ तिसपर बैठा सुवर्णका कवच पहरा अक्षय तरकस बांधे ग्यारह सेनापतिन को साथ में लेकर पंच प्रस्थ नामक वन को गया इहां पर कर्तृत्व का अभिमान धनुष है रजोगुण कवच है वासना बाण हैं अहंकार तरकस है मन ही ग्यारह इन्द्रियों का नाथ है वासनायुक्त मन ही रस्सी है पांच इन्द्रिय घोड़े हैं संवत्सरवेग गति है अहंता ममता दो दण्ड हैं पुण्य पाप दो चक्र हैं प्रधान ही धुरा है सत्त्वादि तीन गुण ध्वजा हैं पांच प्राण ही बन्धन हैं वासनासहित एक मन लगाम है एक बुद्धि सारथी है एक हृदयही बैठने का स्थानहै शोक मोह दोनों जुआ हैं शब्दादिकों का विषयके व्यापार आयुध हैं त्वगादि सात धातु वरूथ हैं कर्मेन्द्रिय व्यापार ही विक्रम हैं रजोगुण सुवर्ण का देह रथ है पृथिव्यादिक पांच शिखर वाले स्वप्नावस्थामें जीवका प्रवेश होना है ॥ १ ॥ २ ॥ ३ ॥

गर्वित होकर धनुषबाण को हाथ में लेकर मृगों के व्यसन में लालसा करके नहीं छोड़ने लायक भार्या को छोड़कर जङ्गल में शिकार खेलने लगा इहां रागादिक बाण हैं अभिनिवेश धनुष है शब्दादिक विषय मृग हैं विवेकशाली बुद्धि भार्या है ॥ ४ ॥

आसुरी वृत्तिको ग्रहण करके घोर चित्त से दया को छोड़कर तीखे बाणों से वन में घूमने वाले मृगों को वनमें मारने लगा इहां जगत् अवस्था के संस्कार से स्वप्न में वही विषय भोग किये हैं ॥ ५ ॥

यदि मांस की अति इच्छा होतो शास्त्रों में कहे हुये श्राद्धादि कर्मों में ही राजा जङ्गल में जाकर प्रयोजन मात्र पवित्र मृगों को मारे ऐसी शास्त्र की आज्ञा है ॥ ६ ॥

हे राजेन्द्र ! इस प्रकार से जान कर जो मनुष्य नियत कर्म करता है सो उस कर्म में लिप्त नहीं होता है ॥ ७ ॥

शास्त्र विधि को छोड़ कर कर्म करै तो अभिमान होने से बन्ध जाता है गुण प्रवाह में पड़कर ज्ञान नष्ट होने से नरक को जाता है ॥ ८ ॥

तहांपर जिन मृगों के शरीर काटे हैं उनके बड़े दुःख से बहुतों का नाश होगया इहां इन्द्रियों से पाप करना हिंसा है ॥ ९ ॥

खरगोश हैं सूअर हैं भैंसा हैं रोज मृग हैं रुरु मृग हैं सेह हैं ऐसे पवित्र मृग तथा अन्य मृगों के मारने से राजा को परिश्रम होगया इहां स्वप्न देख कर थकजाना है ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं स्वप्नावस्था वर्णिता इदानीं पुनरपि विवेकवत्या बुद्ध्या रममाणस्य सुखादिलक्षणां प्रपञ्चयितुमाख्यायिकाशेषमनुवर्णयति तस्याः प्रणयकुपितायाः अनुनयं मन्वानस्य [illegible] । तत इत्या-दश्य [illegible] । [illegible] ॥ ११ ॥ [illegible]

तृप्तो हृष्टः सुदृप्तश्च कन्दर्पाकृष्टमानसः ।
न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनीम् ॥ १३ ॥
अन्तःपुरस्त्रियोऽपृच्छद्विमना इव वेदिषत् ! ।
अपि वः कुशलं रामाः ! सेश्वरीणां यथा पुरा ।
न तथैतर्हि रोचन्ते गृहेषु गृहसम्पदः ॥ १४ ॥
यदि न स्याद्गृहे माता पत्नी वा पतिदेवता ।
व्यङ्गे रथ इव प्राज्ञः को नामासीत दीनवत् ॥ १५ ॥
क वर्तते सा ललना मज्जन्तं व्यसनार्णवे ।
या मामुद्धरते प्रज्ञां दीपयन्ती पदे पदे ॥ १६ ॥
॥ रामा ऊचुः ॥
नरनाथ ! न जानीमस्त्वत्प्रिया यद्व्यवस्यति ।
भूतले निरवस्तारे शयानां पश्य शत्रुहन् ! ॥ १७ ॥
॥ नारद उवाच ॥
पुरञ्जनः स्वमहिषीं निरीक्ष्यावधुतां भुवि ।
तत्सङ्गोन्मथितज्ञानो वैक्लव्यं परमं ययौ ॥ १८ ॥
सान्त्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता ।
प्रेयस्याः स्नेहसंरम्भलिङ्गमात्मनि नाभ्यगात् ॥ १९ ॥
अनुनिन्येऽथ शनकैर्वीरोऽनुनयकोविदः ।
पस्पर्श पादयुगलमाह चोत्सङ्गलालिताम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका

गृहमेधिनीं सात्त्विकीं बुद्धिं राजस्यां बुद्ध्यां वर्तमानो नापश्यत् ॥ १३ ॥

वेदिषत् हे प्राचीनबर्हिः ! अन्तःपुरस्त्रियस्तत्सखीः सेश्वरीणाम् स्वामिनीसहितानाम् । यथा पुरेत्यादि पृथग्वाक्यम् ॥ १४ ॥

व्यङ्गे चक्रादिहीने ॥ १५ ॥ १६ ॥

निरवस्तारे आस्तरणरहिते ॥ १७ ॥

अवधुतां त्यक्तदेहादराम् । तत्सङ्गोन्मथितं व्याकुलं ज्ञानं यस्य ॥ १८ ॥

स्नेहसंरम्भः प्रणयकोपस्तस्य लिङ्गं कुटिलदृष्ट्यादि स्वात्मनि नाभ्यगात् ॥ १९ ॥

उत्सङ्गमारोप्य लालिताम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं राजस्या बुद्धेः कार्यभूतां आत्मवश्यां तामस्या बुद्धेः कार्यभूतां स्वप्नावस्थां चाभिधायेदानीं विज्ञानं कुर्वीतेति सूचितविवेकः कथमुदेतीति विविदिषायां प्रणयकलहनिमित्तकोपाविष्टप्रियानुनयनकथनव्याजेन संसारिणो जीवस्य विवेकात्मसात्त्विककर्तृत्वं द्योतयन् "प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी" इत्युक्तसात्त्विकबुद्ध्यभावायां देहात्मदर्शनिमित्तपरितापात्मयं तत्सात्त्विक्यां तत्तदुचितसाधनैस्तल्लब्धिं च द्योतयन् कथापक्षे तत्सौभाग्याय तां बुद्धिं महिषीत्वेनेन्द्रियवृत्तीरन्तःपुरस्त्रीत्वेन परिकल्प्य तदनुनयप्रकारमाह । तत इत्यादिना । क्षुत्तृड्भ्यामशनायापिपासाभ्यां परिश्रान्तः क्लान्तशरीरोऽपि क्षुत्तृषोरनुवृत्तेरेवमुक्तं ततः स्वात्मविषयानुभवरूपमृगयाया निवृत्तः गृहं पुरत्वेन रूपितजाग्रद्देहगतहृदयस्थानमेयिवान्प्राप्तः ततः कृतं स्नानमुचित आहारश्च येन सः अत एव गतश्रमः सम्यगुपविष्टवान् ॥ ११ ॥

ततो धूपादिभिरात्मानमर्हयांचक्रे ततः साधु सम्यगलंकृतानि सर्वाण्यङ्गानि येन सः महिष्यां मन आदधे कृतस्नानोचिताहार इत्यनेन सुखजनकविवेकात्मसात्त्विकबुद्ध्युत्पत्तिप्रारम्भावस्थायाः सुखकरत्वं सूच्यते स्नानाहारधूपालेपनस्रग्भूषणाद्यलङ्कारैर्जातानन्द इव महिष्यां विवेकात्मिकायां बुद्धौ मन आदधे निहितवानित्यर्थः कथापक्षेतु स्पष्टोऽर्थः ॥ १२ ॥

उचिताहारेण तृप्तः धूपालेपस्रगादिभिर्हृष्टः सुदृप्तः तृप्तिहृष्टिभ्यां सुतरां दृप्तः अत एव च कन्दर्पेणाकृष्टं वशीकृतं मानसं यस्य सः गृहमेधिनः स्वस्य संबन्धिनीं गृहिणीं गृहमस्या अस्तीति तां स्वाश्रय प्रवर्तयितां वरारोहां वरस्त्रियं न व्यचष्ट न ददर्श यथा कामपरवशः स्वगृहे एव क्वचिदन्तर्हितां प्रियां नाप-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

[illegible]र्थं जीवो विवेकात्मकबुद्धिविप्लापरवशस्तां कामयमि-र्मां [illegible] लब्धवानित्यर्थः ॥ १३ ॥

हे वेदिषद्! प्राचीनबर्हिः विमना इव दुःखितमना इवान्तः पुरस्त्रियः ... त्सखीरपृच्छत्पुरञ्जनः तद्वामनिमित्तवैमनस्यः बुद्धिसूतकेन्द्रि-यवृत्तीः पप्रच्छ कर्येन्द्रियवृत्त्या बुद्धिः सात्त्विकी स्यादिति परिशी-लितवानित्यर्थः ॥ १४ ॥

प्रश्नमेवाह । अपीतित्रिभिः । हे रामाः! स्त्रियः सेश्वरीणां स्वामिभिःसहितानां वः युष्माकमपि कुशलमपिशब्दः प्रश्ने कुश-लप्रश्ने हेतुः हि यस्मात् गृहेषु पुरा मातृवत् व्यापार वृत्ता-नां गृहसंपदः यथैव रोचन्ते न तथेदानीं रोचन्ते विवेकाभावेन न कोऽपि पुरुषस्य गुणाः प्रकाशतेऽतो विवेकः किमुदेष्यतीति [illegible]न्तितवानित्यर्थः ॥ १५ ॥

गृहेषु माता वा पतिर्देवता यस्याः सा पत्नी वा यदि न स्यात्तर्हि व्यङ्गे चक्राश्वादिरहिते रथ इव प्राज्ञः बुद्धिमान् को नाम पुरुषो दीनवदासीत असेदित्यर्थः विवेकाभावे देहत्यागो [illegible] इति भावः सा ललना क वर्तते कथंभूता ललना व्यसना-र्णवे दुःखार्णवे मज्जन्तं मां पदे पदे यया स्वयं प्रज्ञा दी-पयन्ती बोधयन्ती सती उद्धरेद् व्यसनार्णवात् यथा विरहशोका-तुरं पुमांसं प्रौढा प्रिया तदनुकूलाचरणहितोपदेशादिना शोक-मपनुद्य सुखयति तद्वद्विवेकात्मिका बुद्धिरपि पदे पदे हिताहितं प्रकाशयन्ती पुमांसमुद्धरति ईदृशी बुद्धिः क वर्तत इति व्यज्यते ॥ १६ ॥

हे नरनाथ! त्वत्प्रिया यद्यवस्यति निश्चिनोति तत्र जानीमः तदर्थं वैमनस्यमापन्ना तद्वैमनस्यहेतुं न जानीमः त्वत्प्रियां तु जानीम इत्याहुः हे शत्रुहन्निरवस्तारे आस्तरणरहिते भूतले शयानां पश्यति कथापक्षेऽर्थः अध्यात्मपक्षे [illegible]वाधितेन्द्रियवृत्तीनां सर्वासां निश्चयात्मिकबुद्धिसूतकत्वात्क-र्मेन्द्रियवृत्त्या सामोदतीत्यालोच्य यदनादरवशात्प्रियाना-दृता सतीव मद्विमुखी अभूदित्यनुसंहितवानित्यर्थः आदरो बुद्धेः [illegible] ॥ १७ ॥

पुरञ्जनो भुवि पतितां महिषीं निरीक्ष्य तत्सङ्गे नोन्मथितं व्याकुलं ज्ञानं यस्य सः परमं भृशं वैक्लव्यं शोकपारवश्यं ययौ । अहो मदीयेयं बुद्धिरेतावन्तं कालमेवं विपरीताभूदिति-वैक्लव्यं ययावित्यर्थः ॥ १८ ॥

ततः श्लक्ष्णया मृदुया वाचा विब्रुवता प्रतप्तेन हृदयेन मनसा सान्त्वयन्ननुनयन् प्रेयस्याः प्रियायाः प्रेमसंरम्भः प्रण-ये स्वस्मिन् यः कोपः तस्य चिह्नं कारणमात्मनि मनसि नाभ्य-गात निश्चितवान् विवेकोदयसाधन[illegible]मन्विच्छन् ताव-देतावत्कालं तदनु हृदये कारणमन्वेषयन्नपि तन्नाभ्यगादित्यर्थः तस्य दैवायत्तत्वादितिभावः ॥ १९ ॥

वीरः पुरञ्जनः अनुनये सान्त्वने कोविदः कुशलः अनुनय-कोविदैरिति तृतीयान्तपाठे तु वाक्यैरिति विशेष्यमध्याहार्यं [illegible] मनुनिन्ये सान्त्वयामास अनुनयप्रकारमेवाह । पाद-युगलं स्पृशन् प्रियायाः पादौ गृहीतवान् तत उत्सङ्गमारोप्य [illegible] । अध्यात्मपक्षे अनुनये [illegible] कथायैः [illegible] पश्चात् पादयुगलमित्यनेनाध्यात्मबुद्धिवि-वेकात्मिकां बुद्धिमनुचक्षुषैव वर्तयामीति प्रतिज्ञातवानित्युक्तम् अथवा [illegible] विवेकात्मिकया बुद्ध्या एवमनुसंहितवानित्युक्तम् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जीवो विषयाननुभूय सुषुप्तिप्राप्तिप्रकारमाह । तत इति । ततो जागरणाभिद्रुतः [illegible]मनोवृत्तिभ्यां व्याप्तः श्रान्तः इडापिङ्गलानाडीविशेषं प्राप्तः कृतं जाग्रद्विषयभोगरजोमार्जनल-क्षणस्नानं येन सः उचितं आहारः स्वरूपसुखावाप्तिलक्षणो यस्य स तथा संविवेश सुप्तोऽभूदित्यन्वयः ॥ ११ ॥

स्वापात्पूर्वव्यापारमाह । आत्मानमिति । महिष्यां बुद्धौ अथवा [illegible]भिरात्मानमन्तर्यामिवचनात्मकमहं‍रूपमहंकारके संपादितवानलंकारमकरोत् ।

सता सोम्य! तदा संपन्नो भवतीति श्रुतेः ।

संपत्तिरस्याङ्कुरयुक्तसर्वावयवः इव इत्यादिना सुप्तावस्था विशिष्य वण्यते अनेन स्वप्नप्राप्तिरपि निरूप्यत इति ज्ञातव्यं तदा दुरत्ययकालभवः स्पष्ट एव स्वप्नप्रापककर्मोद्रेके सति महिष्यां बुद्धौ मम भाव इत्युपपद्यते कं स्वरूपसुखं दर्शयति प्रकटयतीति कन्दर्पः स्वाप्तेनोत्कृष्टं मानसं यस्य स तथा स्वप्नावस्थायामपि व्यापारस्य सत्वात् ॥ १२ ॥

बुद्ध्याहिनमनाः किमकरोदिति । तत्राह । न व्यचष्टेति । गृहमे-धिनी गृहाश्रमवर्तिनी गृहिणी नानाविधसमाकारमनोहरस्प-र्शा वरस्य इन्द्ररोहो विषयतया यस्याः सा वरारोहा तां शास्त्रीयां बुद्धिं न व्यचष्ट दर्शनं नाम निश्चयज्ञानं नोद्भूतीति ज्ञातव्यं स्वप्नस्य वासनात्मकत्वात् निर्णयज्ञानाभावात् इत्यर्थः हे वेदिषद्! प्राचीनबर्हिः अन्तः पुरस्त्रियः इन्द्रियवृत्तीर्भ-मोवृत्तीर्वा अपृच्छत् स्वप्नव्यापारमकरोत् ॥ १३ ॥

हे रामा! इतिवृत्तयः सम्बोध्यन्ते ईश्वरीबुद्धिः गृहसम्पदः शरीरेन्द्रियादिशोभाः बुद्धौ विद्यमानायां रोचन्ते नान्यदेति ॥१४॥

व्यङ्गे चक्राश्वादिरहिते रथे प्राज्ञो बुद्धिमान् रथी अङ्गवै-कल्येन प्राणेन हीने देहे प्राज्ञः सुषुप्तिप्रवर्तकः परमात्मा ॥ १५ ॥

पदे पदेऽनुत्तमां मम प्रज्ञां दीपयन्ती भगवद्विषयज्ञानमुद्बो-धयन्ती या मामुद्धरति संसारादिति शेषः सा ललना शोभना बुद्धिः क वर्तत इत्यन्वयः ॥ १६ ॥

बाह्यकथामनुसृत्योत्तरकथाप्रत्युत्तरमाह । नरनाथेति । यद्यव-स्यति यन्निश्चित्य तिष्ठति तन्न जानीम इत्यन्वयः निरवस्तारे आस्तरणरहिते भूतले पूर्वं भगवत्पादमूले शयानां विज्ञीकु-र्वाणां यथार्थदर्शनमेतत् ॥ १७ ॥

इदानीमसद्बुद्धिनिमित्तप्रवृत्तिप्रकारमाह । पुरञ्जन इति । प्राची-नकर्मवैचित्र्यात् प्रतिक्षणं वृत्तिभेदोऽपि प्रामाणिक एवेत्यत एतद्वचनमुपपद्यत इति अवधुतां सत्पूर्तिभिरितिशेषः तस्या वैष-यिकया बुद्धेः सङ्गेन स्त्रीकारेण तादृशकर्मणा [illegible] नष्टं ज्ञानं यथार्थलक्षणं यस्य स तथा ॥ १८ ॥

प्रेयस्या बुद्धेः प्रेम्णा संरम्भो हिंसालक्षणो भावो यस्तस्य चिह्नं कारणमात्मनि स्वस्मिन्नाभ्यगात् न ज्ञातवान् रजसा कुण्ठितान्तरत्वात् रम्भ हिंसायाम् ॥ १९ ॥

अनुनिन्ये इत्यादिवाक्यालङ्कारः अनुनयनं नाम विषयबुद्धिस्वरू-पप्रकटनं बुद्धेभान वादिचरणाः पादाक्रमणादिरूपं [illegible] [illegible] मनोज्ञत्व उत्सङ्गे सम्भावितात्मिकबुद्धि बोधयामास ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अन्तरिति सार्द्धकम् ॥ १४—१८ ॥

नाऽध्यगाद् गभीरकोपत्वात् ॥ १९—२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

क्षुत्तृट्परिश्रान्त इति कृतानां दुष्कृतानां स्मरणाद्व्याकुल इत्यर्थः। निवृत्त इति पापेभ्यो विरत इत्यर्थः। गृहमेधिनामित्य-धर्ममर्यादां विहाय पुनर्धर्ममर्यादायां स्थातुमिच्छेत्यर्थः। कृत-स्नान इति ब्राह्मणानामन्त्य पापप्रायश्चित्तं कृतवानित्यर्थः। उचिताहारः मांसमदिराद्यशुचिभक्ष्यां त्यक्त्वेत्यर्थः। संविवेश किञ्चित् स्थिरीबभूवेत्यर्थः॥ ११॥

आत्मानमर्हयाञ्चक्र इति साधून् मुनीन् विदुषश्च सम्मान्या-नीय तैः स्वान्तःकरणं शोधयामासेत्यर्थः। कैः धूपादिभिरिति धर्मज्ञानवैराग्यादिनानोपाख्यानोपदेशैः। साध्वलङ्कृतसर्वाङ्ग इति शास्त्रानुसरणीकृतसर्वेन्द्रियवृत्तिक इत्यर्थः। महिष्यामिति पूर्वावस्थाप्राप्तायां धर्मशीलायां बुद्धावित्यर्थः॥ १२॥

दृप्त इत्यादिना अधर्मसंस्कारोऽपगत उक्तः। कन्दर्पाकृष्टमास इति पूर्वदशावर्तिनीं धर्मनिष्ठावतीं बुद्धिं युवतिमिव प्राप्तुमत्यु-त्सुक इत्यर्थः। अन्यदाहेति कथापक्षे मृगयाव्याजेन वनं गत्वा कामपि कामिनीं रमयामासेति पुरञ्जनी मानिनी बभूवेति हेतोरिति भावः। अध्यात्मपक्षे आगन्तुकपापकृतमनोमालिन्यस्य निःशेषानपगमात् प्राक्तनी धर्मप्रयोजिका बुद्धिरीप्सितापि न झटित्याविर्भवेदित्येव विवक्षितम्॥ १३॥

वेदिषत् हे प्राचीनबर्हि! सेश्वरीणां स्वामिनीसहितानामेतर्हि इदानीं तां विनेत्यर्थः। पक्षे अन्तःपुरस्त्रीः अन्तःकरणवृत्तीः पूर्व-दशावत्या धर्मप्रवर्तिनीर्मनाक् प्रादुर्भूता वीक्ष्य परामृशत्। हन्तैतादृश्य एव मम बुद्धिवृत्तयो यदि सांप्रतिकपापसंस्कारानु-च्छिद्यमानाः स्थिराः स्युस्तदैव ममोद्धार इति कुशलप्रश्नस्यार्थः। ननु, विषयभोगेन सुखीभव किं ते धर्मेणेत्यत आह। एतर्हि इदानीं निषिद्धविषया न रोचन्ते॥ १४॥

माता विष्णुभक्तिः पत्नी धर्मशीला बुद्धिः। व्यङ्गे चक्रादि-हीने॥ १५॥

क वर्तत इति सद्बुद्धिवृत्तय एव काश्चन नानुभूयन्ते ननु वस्तुतः सद्बुद्धिरिति मनसि चिन्तयति स्म॥ १६॥

निरवस्तारे आस्तरणरहिते। पक्षे तव हृदयमेव तस्याः पुष्पपर्यङ्कस्तस्माच्च्युतिरेव तस्याः सद्बुद्धेर्निरवस्तारे भूतले शयनं शत्रुहन्! हे वीर पक्षे त्यक्तपाप!॥ १७॥

अवधूतां त्यक्तदेहावरणां पक्षे स्वेनैव स्वहृदयात् च्यावितत्वात् क्षपिताम्। निरीक्ष्य हन्त ममैवायं महापराध इति विचार्य तत्-सङ्गेन तस्याः पुनरादिरसथा उन्मथितज्ञानः तिरस्कृतस्वदुर्बुद्धिक इत्यर्थः। वैक्लव्यं दैन्यम्॥ १८॥

सान्त्वयन्निति मज्ज्ञानाद्वियं मे प्राक्तनी बुद्धिः पुनरप्याविर्भवति यां विनैव मम दुर्गतिरिति मनोऽनुतापः। प्रेमसंरम्भचिह्नं नाध्य-गादिति ममाप्येवं पापाचरणं केन कारणेनाभूदिति सम्यक् परा-मर्शो॥ १९॥

अनुनिन्य इति पुनरप्यारभ्य दुर्विषयभोगे बुद्धिर्मया नैव कार्येति परस्पर्शं पादयुगलमिति अहङ्कारत्यागसाधुजनसंमानादेव तस्याः पादौ तौ परस्पर्शं प्राप उत्सङ्गलालितां स्वहृदयनिकटमेवानीता॥ २०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पुनश्चप्रति बुद्धिसङ्गत्या संसारप्रावण्यं जीवस्य, वर्णयति-तत इत्यादिना। आर्हायिवान् प्राप्तः कृते स्नानमुचित माहा-रश्च येन स तथा कृतस्नान इत्यादिवाक्यानि कथासौन्दर्यार्थानि॥ ११॥

महिष्यां विवेकवत्यां बुद्धौ॥ १२॥ १३॥

हे वेदिषत्! सेश्वरीणां वः कुशलमित्यपृच्छत्॥ १४॥

यथा मात्रादिदर्शने तथा यतर्हि तवदर्शने न रोचन्ते व्यङ्गे चक्रादिहीने॥ १५॥

पदे पदे प्रतिक्षणं प्रज्ञां चेतनाम्॥ १६॥

यद्व्यवस्यति निश्चिनोति तन्न जानीमः। निरवस्तारे निरास्त-रणे॥ १७॥

अवधूतामवधूताम्। तत्सङ्गेन तदासक्त्या उन्मथितं ज्ञानं धैर्यं यस्य सः। अध्यात्मपक्षे पुरञ्जन इत्यादिना जीवस्य बुद्ध्य-धीनत्वमात्रं वर्ण्यते॥ १८॥

प्रेयस्याः प्रियायाः संरम्भः सस्निग्धकोपस्तस्य चिह्नं बीज-मात्रमपि चित्तेनाऽप्यमान् न ज्ञातवान्॥ १९॥

अनुनये सान्त्वने कोविदश्चतुरः। अनुनिन्ये सान्त्वयामास अनुनयकोविदत्वं दर्शयति। परस्पर्शेत्यादिना। उत्सङ्गमङ्कमारोप्य लालितामाह॥ २०॥

भाषाटीका।

तब क्षुधा तृषासे श्रमित होने से लौट कर घर को आगया स्नान भोजनकरके थकाई मिटनेसे बैठ गया यहां पापों से निवृत्त होना विश्राम कहा है॥ ११॥

सुन्दर तरह से शरीर को भूषित किया धूप चन्दन माला आदि से सर्वांग में युक्त होकर फिर अपनी रानी पर मनको लगाया॥ १२॥

तृप्त है हर्षित है गर्वितहै कन्दर्प से मन उसका खिचगया है फिर घरमें अपनी गृहमेधिनी सुन्दरी गृहणी को नहीं देखाहै॥१३॥

हे वेदिषत्! प्राचीन बर्हिः अन्तः पुरकी स्त्रियों को बडा दुखित होकर पूछने लगा हे स्त्रियों तुमारी ईश्वरीके सहित तुमारा सब कुशल है कि नहीं॥ १४॥

अब पहिले सरी की घरकी सम्पत्ति नहीं रुचती है यदि घरमें माता अथवा पतिको देवता मानने वाली पत्नी नहीं न होवे तब तो विना पहिया के रथ सरी के उस घर में दुखी सरी का कौन रह सकता है॥ १५॥

वह ललना अब कहां है जोकि दुखसागर मे डूबते मे मेरे को बुद्धि बढाकर सदा क्षमा में उद्धार करती थी॥ १६॥

स्त्री जन बोली हे नरनाथ! हम नहीं जानते हैं कि तुमारी प्यारी क्या विचारती है हे शत्रुहन! विना बिछाये पृथिवी में पडी है सो देखो॥ १७॥

नारदजी बोले पुरञ्जन ने अपनी रानी को देखा कि पृथिवी में पडी है तब तो उसके संग से ज्ञानके नष्ट होजाने से बडी विकलता को प्राप्त होगया॥ १८॥

॥ पुरञ्जन उवाच ॥

नूनं त्वकृतपुण्यास्ते भृत्या येष्वीश्वराः शुभे! ।
कृतागःस्वात्मसात्कृत्वा शिक्षादण्डं न युञ्जते ॥ २१ ॥
परमोऽनुग्रहो दण्डो भृत्येषु प्रभुणार्पितः ।
बालो न वेद तत्तन्वि!बन्धुकृत्यममर्षणः ॥ २२ ॥
सा त्वं मुखं सुदति!सुभ्र्वनुरागभारव्रीडाविलम्बविलसद्धसितावलोकम् ।
नीलालकालिभिरुपस्कृतमुन्नसं नः स्वानां प्रदर्शय मनस्विनि!वल्गुवाक्यम् ॥ २३ ॥
तस्मिन्दधे दममहं तव वीरपत्नि!योऽन्यत्र भूसुरकुलात्कृतकिल्बिषस्तम् ।
पश्ये न वीतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र दासात् ॥ २४ ॥
वक्त्रं न ते वितिलकं मलिनं विहर्षं संरम्भभीममविमृष्टमपेतरागम् ।
पश्ये स्तनावपि शुचोपहतौ सुजातौ बिम्बाधरं विगतकुङ्कुमपङ्करागम् ॥ २५ ॥
तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरङ्गतस्य मृगयाव्यसनातुरस्य ।
का देवरं वशगतं कुसुमास्त्रवेगविस्रस्तपौंस्नमुशती न भजेत कृत्ये ॥ २६ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पारम-
हंस्यां संहितायां वैयासिक्यां पुरञ्जनोपाख्याने
षड्विंशोऽध्यायः ॥ २६ ॥

भाषाटीका

बड़े कोमल वचन से रानी को समझाने लगा हृदय भय से कांपता था उसका तो भी प्यारी का अपने पर क्रोध होने के चिन्हं को उसने नहीं जान पाया ॥ १९ ॥

तबतो बड़ी बिनती करने में चतुर उस वीरने धीरे से उसकी बिनती करने का आरम्भ किया दोनों चरणोंको भी अपने गोद मे लेकर प्यार करके बोलने लगा ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृतमागोऽपराधो यैस्तेषु आत्मसात्कृत्वा अस्मदधीनोऽयमिति मत्वा शिक्षार्थं दण्डं न कुर्वन्ति ते भृत्या मन्दभाग्याः ॥ २१ ॥

यतः परमोऽनुग्रहो दण्डः । यस्तु दण्डतो विषीदति सोऽज्ञ इत्याह । बाल इति।बन्धुकृत्यं शिक्षाकरणम् अमर्षणः क्रोधी ॥२२॥

हेसुदति! हेसुभ्रु!हेमनस्विनि! सा त्वमस्माकं स्वामिन्यतः स्वाना-म्मुखं प्रदर्शय । कीदृशम् । अनुरागभारेण व्रीडया यो विलम्बो मन्थरता तेन विलसन्हसितावलोको यस्मिन् नीला अलका एवालयस्तैरुपस्कृतं भूषितम् । उन्नतनासिकम् । वल्गु वाक्यं यस्मि-स्तत् ॥ २३ ॥

हेवीरपत्नि! वीरस्य मम भार्ये यस्ते कृतापराधस्तस्मिन्नहं ब्राह्मणकुलादन्यत्रान्यस्मिन्मुररिपुदासादितरत्र च दमं दधे दण्डं करोमि किन्तु तं विगतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै लो-कत्रयाद्बहिरपि न पश्यामि [illegible]यादेवासौ मरिष्यतीत्यर्थः ॥ २४ ॥

ते वक्त्रमितः पूर्वं कदाचिदपि वितिलकं न पश्यामि । संर-म्भेण कोपावेशेन भीमं भयङ्करमविमृष्टमनुज्ज्वलम् । अपेत-रागं स्नेहशून्यं तथा ते सुजातौ शोभनौ स्तनावपि शोका-श्रुभिरुपहतौ न पश्यामि तथा बिम्बफलाकारमधरं च विगतः कुङ्कुमपङ्कतुल्यस्ताम्बूलरागो यस्मात्तादृशं न पश्यामि इदानीं कुत एवं जातमिति शेषः पाठान्तरे एवं भूतं मुखं स्तनौ च पश्यन् शं न विन्दामीत्यन्वयः विगतः कुङ्कुमपङ्करागो याभ्यामिति स्तनयोर्विशेषणम् ॥ २५ ॥

तत्तस्मात्कृतं किल्बिषमपराधो येन तस्य किल्बिषमेवाह । स्वैरं स्वातन्त्र्येण त्वामपृष्ट्वा मृगयां गतस्य देवो देवनं क्रीडा तां राति ददातीति देवरः कान्तस्तं कामवेगेन विस्रस्तं गतं पौंस्नं पौरुषं धैर्यं यस्य तम् । उशती कामयमाना कृत्ये कर्तु योग्येऽर्थे का न भजेत ॥ २६ ॥

इतिश्रीभागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे शुभे ! ईश्वराः स्वामिनः येषु कृतापराधेषु भृत्येष्वात्मसात्कृत्वा मदधीना एतेऽतो नैते दण्डनीया इति मत्वा शिक्षार्थं दण्डं न कुर्वन्ति ते भृत्या मन्दभाग्या इत्यर्थः ॥ २१ ॥

कुतो यतः प्रभुणा भृत्येष्वर्पितो दण्डः परमोऽनुग्रहः भृत्यानां हितायैव भवतीत्यर्थः यस्तु दण्डितो विषीदति सोऽज्ञ इत्याह । बाल इति । अमर्षणाः दण्डं नमर्षतीत्यमर्षणाः हेतन्वि ! तन्वङ्गि स्वामिनः कृतं शिक्षाकरणमनुग्रह इति न वेद स बालो मूर्खः अज्ञ इत्यर्थः अतो मम शिक्षार्थमेव स्वामिनी त्वं विमुक्त्यभूरित्यर्थः अध्यात्मपक्षे तु स्वामिनीवन्मद्गृहिणीकान्ताया बुद्ध्या विवेकात्मिकाया इतः पूर्वमनुग्रहोऽस्मदनुग्रहार्थ एव यतोऽहमिदानीं विवेकाभावनिमित्तपरितापयुक्तः तामेवातीवाहतवानित्यनुसंधेय इत्यर्थः ॥ २२ ॥

हे सुदति ! हे सुभ्रूः हे मनस्विनि ! सा त्वमस्माकं स्वामिन्यतः स्वानां नो मुखं प्रदर्शय कीदृशमनुरागभारेण व्रीडया च यो विडम्बो मन्थरस्तेन विलसद्विलसितावलोको यस्मिन् नीलालका एवालयस्तैरुपस्कृतं भूषितमुन्नतनासिकं वल्गुवाक्यं यस्मिन् निरतिशयसौन्दर्ययुक्तायाः प्रियाया उक्तविधमुखावलोकनसंजातमानन्दमनुभूयमान इवाहं स्थिरे निरतिशयसुखापादकाविवेकोदये सुखीत्यनुसंहितवानित्यर्थः ॥ २३ ॥

हे वीरपत्नि ! वीरस्य मम भार्ये यस्ते तुभ्यं कृतकिल्बिषः कृतापराधः तस्मिन्नहं ब्राह्मणकुलादन्यत्र कुलेऽपि मुररिपुदासादन्यत्र यमं दण्डं दधे करोमि मे त्वत्सहायस्य मम क्रुद्धस्य सतः त्रैलोक्याद्बहिरपीतिशेषः त्रैलोक्याद्बहिश्चाभ्यन्तरलोकैर्मुदितं विगतभयं च पुरुषं न पश्यामि यदीयं व्यवसायात्मिका बुद्धिर्मम संप्रति स्थितास्यात्तदा तत्सहायोऽहं तद्विरोधिनो निरस्यामिविवेकिना मयासाध्यं किमपि त्रिलोक्या अन्तर्बहिश्च न विद्यते मुररिपुदासादयस्तु विवेकिनो ममानुकूला एवेत्यनुसन्दधे ॥ २४ ॥

ते तव वक्त्रमितः पूर्वं कदाचिदपि वितिलकं तिलकरहितं न पश्यामि इदानीं तु मलिनं विगतहर्षं संरम्भेण क्रोधावेशेन भीमं भयङ्करमविमृष्टमनुज्ज्वलमपेतरागं स्नेहशून्यं तथा ते सुजातौ स्तनौ अपि शोकाश्रुभिरुपहतौ तथा बिम्बफलाकारमधरं च विगतकुङ्कुमपङ्कतुल्यः ताम्बूलरागो यस्मिन् तादृशं पश्यामि कुतएवं जातमिति शेषः व्यवसायात्मिकबुद्धेरभिव्यक्तेः प्रारम्भदशायामविशदत्वात्तादृशावस्थां तां प्रियानादरनिमित्तक्रोधेनात्मानमनलं कुर्वन्तीं शोचन्तीं स्त्रियमिवोत्प्रोक्ष्यते इत्यर्थः ॥ २५ ॥

तस्मात्कृतं किल्बिषमपराधो येन तस्य किल्बिषमेवाह । स्वैरं स्वातन्त्र्येण त्वामपृष्ट्वा मृगयाकृतस्य मे प्रसीद प्रसन्ना भव देवं देवनं क्रीडां राति ददातीति देवरः कान्तस्तं कामवेगेन विस्रस्तं गतं पौरुषं धैर्यं यस्य तमत एव वशंगतं का स्त्री कामयमाना कृत्ये कर्तुं योग्यकार्ये न भजते भजतैवेत्यर्थः विवेकाभावादप्रसन्नस्य मम अप्रमावस्थाभूतो विवेकात्मकबुद्धियुक्तोऽहं प्रसन्नो वर्तेयमेव महंममाभिमानौ विहाय वशीकृतं कार्योपादकं मां व्यवसायात्मिका बुद्धिरपीहानुवर्तिष्यतीत्यनुसंहितवानित्यर्थः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ये येषु कृतापराधेषु शिक्षालक्षणं दण्डं न कुर्वते नूनं तेऽकृतपुण्या इत्यन्वयः ॥ २१ ॥

दण्डस्य निग्रहलक्षणत्वात् कथं प्रार्थ्यत इत्यत आह । परम इति । तर्हि लोकः कथं दुःखं मन्यत इति तत्राह । बाल इति । दण्डस्य पापप्रायश्चित्तरूपत्वान्न जानातीत्यर्थः अनुतापादिवृत्तिविशेष इति ज्ञातव्यम् ॥ २२ ॥

उपस्कृतं मण्डितम् ॥ २३ ॥

भूसुरकुलात् ब्रह्मकुलात् क्रुद्धस्य मे सकाशाद्वीतभयं गतभयं तं न पश्ये ॥ २४ ॥

इतः पूर्वं वक्त्रादिकं विगततिलकादिकं न पश्यामीत्यन्वयः शुचा शोकाश्रुणोपहतौ सुजातौ कोमलौ ॥ २५ ॥

कुसुमास्त्रस्य कामस्य वेगेन विस्रस्तं श्लथितं पौंस्नं पौरुषं यस्य स तथा तं देवं रतिक्रीडादिकं राति ददातीति देवरः पतिस्तं कृत्ये प्रयोजननिमित्ते प्राप्तमुपर्वी कामयमाना का स्त्री न भजेत ॥ २६ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अन्यत्र भूसुरकुलादिकं धर्मनिष्ठजीवमात्रकुलस्य पुरञ्जनाख्यानात् ॥ २४—२६ ॥

इतिश्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

कथापक्षे प्रिये मह्यं यत् कोपरूपं दण्डं करोषि तत्कृपया सापराधमपि निजदासमबुधं शिक्षयस्यतस्त्वामेतज्जन्मनि कदापि न त्यक्ष्यामीत्यर्थान्तरन्यासेनाह । नूनमिति द्वाभ्याम् । आत्मसात् कृत्वा अस्मदधीनोऽयमिति मत्वा शिक्षार्थं दण्डं येषु न कुर्वन्ति ते भृत्या मन्दभाग्यास्तेन येषु दण्डं कुर्वन्ति ते भूरिभाग्या इत्यहं ते दण्डपात्रीभवन्नात्मानं भूरिभाग्यमेव मन्य इति भावः । अध्यात्मपक्षे हन्त हन्त प्रतिष्ठितस्यापि मम कादाचित्कपापाचरणेन संप्रति यल्लोकनिन्दा चित्ताप्रसादौ परमदुःसहावभूतां तत् परमेश्वरेणैव मह्यं शिक्षादण्डो दत्तस्तदहमेतज्जन्मनि पुनः कदापि सद्बुद्धिं न त्यक्ष्यामीति तां सद्बुद्धिमेव मनसा सम्बोध्याह । नूनमिति द्वाभ्याम् ॥ २१ ॥

यस्तु दण्डितो विषीदति सोऽज्ञ इत्याह । बाल इति । अमर्षणः क्रोधी एव सद्बुद्धिं प्रति स्वगतमाह । त्वां सद्बुद्धिं त्यक्तवतो मम यः साम्प्रतिकोऽनुतापः एष एव त्वद्दत्तो दण्डः परमो ममानुग्रह एव यतः पुनरपि पापासक्तिर्न मे भाविनीति भावः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रेयसीं प्रार्थयते । तन्म इति । किल्बिषमेवाह । स्वैरमित्यादि । देवो देवनं क्रीडा तं राति ददातीति देवरः कान्तस्तं स्मरशरवेगेनैव विद्धस्तपौरुषं पुरुषार्हं स्वातन्त्र्यं यस्य तम् । उशती कमनीया कृत्ये कान्तविषयकस्नेहोचिते कर्मणि का न भजेत पक्षे सखुद्धिमेव साक्षात् कृत्वाह प्रसीद प्रसन्ना भवन्ती मम हार्दि विराजस्व मम कीदृशस्य स्वैरं निरङ्कुशमेव कृतकिल्बिषस्य मृगयां गतस्य व्याधस्येव पापिन इत्यर्थः । व्याधो मृगवधाजीवो मृगयुर्लुब्धको हि स इत्यभिधानात् सखुद्धेः स्वस्मिन्नवस्थितिमर्थान्तरन्यासेनाह । केति । स्त्री यथा कान्तं सापराधमपि न जहाति तथैव हे सखुद्धे ! मां त्वं न जहीहीत्यर्थः ॥ २६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षड्विंशोऽयं चतुर्थस्य सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदि मया तवापराधः कृतस्तत्र शिक्षार्थं मयि दण्डं न करोषि तर्हि मम मन्दभाग्यता स्यादतोऽस्वलोकनमात्रेणापि दण्डं नियोजयेत्याशयेनाह । नूनमित्यादि ॥ २१—२२ ॥

हेसुदति ! हेसुभ्रु ! हेमनस्विनि ! । या मया कोपिता सा त्वं स्वकं मुखं प्रदर्शय । प्राभिमुख्येनावलोकयेत्यर्थः । स्वकीयेषु कृतापराधेषु भावविशेषं स्वावलोकनमात्रेणैव दण्डो भवतीति भावः कीदृशम् । अनुरागभारेण क्रीडाविभ्रमो क्रीडानाविष्कृतं लज्जया विलसत् हसितमवलोकश्च यस्मिन् तत् । नीलालकवृन्दैः लसितैरुन्नसं उन्नतं नासा यस्मिन् । बल्गूनि वाक्यानि यस्मिन् तत् ॥ २३ ॥

यद्यन्येन तेऽपकृतं तर्हि तत्र दण्डं करोमीत्याह । तस्मिन्निति । हे वीरपत्नि ! त्रिलोक्याः अन्यत्र त्रैलोक्याः बहिश्च वीतभयं मम दण्डाविषयं भूसुरकुलात् अन्यत्र मुररिपोर्दासाच्च इतरत्र न पश्ये अतः ते यत्सम्बन्धी यो जनस्तस्य तव च कृतकिल्बिषस्य यस्तस्मिन्नहं दण्डं दधे करोमि तं सूचयेति शेषः ॥ २४ ॥

स्वैरं कृतं कर्म सत्यं तामिममेव ... वक्तेति विलोक्य ... करोमि । वक्रमिति ... । ते वक्रं मुखं विलकं शृङ्गाररहितं संरम्भेण भीमं भयदम् अविशुद्धमकृतोद्धूलनम् अपेतरागं गतस्नेहं सुजातौ स्तनौ च शुचोपहतौ शोकाश्रुसिक्तौ बिम्बाधरं च विगतकुङ्कुमपङ्कसदृशताम्बूलरागं यस्मात्तथाभूतम् पूर्वं कदापि नपश्ये इदानीं तु पश्यामीति भावः ॥ २५ ॥

तत्र मम स्वैरगमनमेव कारणमितिवदन् क्षमापयति । तस्मादिति । व्यसनातुरस्य स्वैरं स्वातन्त्र्येण त्वामपृष्ट्वैव मृगयां गतस्य ततस्मादेव कृतकिल्बिषस्य मे प्रसीद प्रसन्ना भव तत्र हेतुं दर्शयति देवं देवनं क्रीडां राति ददातीति देवः क्रीडामदनं कुसुमास्त्रस्य कामस्य वेगेन विक्षतं पीडितं धैर्यं यस्य तं तथापि वशोगतमुशती कामयमाना कृत्ये कर्तुं योग्ये का न भजेत ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षड्विंशाध्यायार्थप्रकाशः ॥ २६ ॥

भाषाटीका ।

पुरञ्जन बोला हे शुभे ! वे लोग पुण्यात्मा नहीं हैं कि जिनके स्वामी लोग अपना समुझकर अपराध करनेपर दण्ड नहीं देते हैं जिससे कि उन को शिक्षा होवे ॥ २१ ॥

प्रभु जब भृत्य के ऊपर दण्ड करता है तब बड़ा अनुग्रह जानना चाहिये जो भृत्य दण्ड को नहीं सहता है वह तो हेलम्बि ! मूर्ख ही है ॥ २२ ॥

सो हे मनस्विनि उत्साह मन वाली हम भृत्यों को अपने मुखका दर्शन कराओ यह मुख कैसा है कि सुंदर जिसमें दांत हैं अनुराग का जो भार बड़ा तिसमें जो धीरता जिससे प्रकाशमान मन्दहास युक्त चितवन् है जिसमें और भौंरा सरीखे काले बालों से शोभित है ऊंची जिसमें नासिका है सुन्दर जिस में वचन हैं ॥ २३ ॥

हे वीर ! भगवान् का दास वैष्णव तथा सामान्यभी ब्राह्मण इन दोनों को छोड़ कर और दूसरे मैं किसी को नहीं देखता हूं कि जो तेरा अपराध करके फिर तीनों लोक में कहीं भी सुख से रहे मैं उसको अवश्य दण्ड देने वाला हूं ॥ २४ ॥

भाषाटीका।

आज से पहिले हमने तुमारे मुखको विना तिलक का मालिन हर्ष रहित क्रोध से भयंकर विना मार्जित चन्दनादि रहित नहीं देखा था स्तन दोनों भी आंसू से युक्त नहीं देखे थे बिम्बसरीका अधरभी कुङ्कुम राग से रहित नहीं देखा था ॥ २५ ॥

सो अब तू मेरे पर प्रसन्न हो मैं सुहद हूं मैंने अपराध किया है मैं अपने इच्छा से सिकार खेलने चला गया मैं व्यसनों से आतुर हो गया जगत में ऐसी स्त्री कौन होगी कि जो क्रीडा करने वाला अपने वशवर्ती कामवाण के वेग से पौरुष को छोडने वाला अपने कार्य में तत्पर पुरुष को आप भी सुन्दरी होकर भी नहीं भजैगी ॥ २६ ॥

इति श्रीभागवत चतुर्थस्कन्ध छबीसवां अध्याय का भाषानुवाद लक्ष्मणाचार्य कृत समाप्त ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे षड्विंशोऽध्यायः समाप्तः ॥ २६ ॥

॥ सप्तविंशो[illegible]ध्यायः ॥

॥ [illegible]

इत्थं पुरञ्जनं सध्रू[illegible]मैः ।
पुरञ्जनी महाराज ! रेमे [illegible] ॥ १ ॥
स राजा महिषीं राजन् ! [illegible]आननाम् ।
कृतस्वस्त्ययनां तृप्तामभ्यनन्[illegible] ॥ २ ॥
तयोपगूढः परिरब्धकन्धरो रहोऽनुमन्त्रैरप[illegible]
न कालरंहो बुबुधे दुरत्ययं दिवानिशेति प्र[illegible] ॥ ३ ॥
शयान उन्नद्धमदो महामना महार्हतल्पे महि[illegible]
तामेव वीरो मनुते परं यतस्तमोऽभिभूतो न नि[illegible] ॥ ४ ॥
तयैवं रममाणस्य कामकश्मलचेतसः ।
क्षणार्द्धमिव राजेन्द्र ! व्यतिक्रान्तं नवं वयः ॥ ५ ॥
तस्यामजनयत्पुत्रान् पुरञ्जन्यां पुरञ्जनः ।
शतान्येकादश विराडायुषोऽर्धमथात्यगात् ॥ ६ ॥
दुहितॄर्दशोत्तरशतम्पितृमातृयशस्करीः ।
शीलौदार्यगुणोपेताः पौरञ्जन्यः प्रजापते ! ॥ ७ ॥
स पञ्चालपतिः पुत्रान् पितृवंशविवर्द्धनान् ।
दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ॥ ८ ॥
पुत्राणां चाभवन् पुत्रा एकैकस्य शतं शतम् ।
यैर्वै पौरञ्जनो वंशः पञ्चालेषु समेधितः ॥ ९ ॥
तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु ।
निरूढेन ममत्वेन विषयेष्वन्वबध्यत ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तविंशे प्रियापुत्राद्यासक्त्या विस्मृतात्मनः ॥
कालकन्यादुष्टसेनाभिर्जरारोगाद्युदीर्यते ॥ १ ॥

तदेवं जीवस्यानुनयादिकथासौन्दर्येणात्यन्तमुपाधिवशत्वमु-
क्त्वा तन्निमित्तां संसारपरम्परां निरूपयितुमाह । इत्थमिति । अत्र
च प्रतिपदं कथञ्चिदध्यात्मपक्षेऽपि योजयितुं शक्यमेव श्रीना-
रदेन तु जीवस्य स्त्रीपुरुषवासनादार्ढ्येन विचित्रा संसृतिर्भव-
तीत्येतावदेव कथातात्पर्यं दर्शितम् । कश्चित्पुमान्कश्चिच्च स्त्री
कश्चिन्नोभयमन्धधीः । देवो मनुष्यस्तिर्यग्वा यथा कर्मगुणं भव
इति वदता तत्रादौ पुंस्त्वेन संसृतिरध्यायत्रयेणोक्ता ततश्चैकेना-
ध्यायेन स्त्रीत्वेन संसृतिं प्रदर्श्येश्वरप्रसादलब्धज्ञानेन मोक्ष इत्यु-
क्तम् तत्तत्तदेव यथोपयोगं व्याख्यातमिति पञ्चाध्याय्यारम्भः
प्रतीयते प्रतिपदमध्यात्मयोजना तु दुर्घटा [illegible]प्रयोजना चेति
समोऽतिव्यापनमनादृत्य यथोपयोगमेव व्याख्यास्यामः सध्रूक्
सम्यक् विभ्रमैर्विलासैः ॥ १ ॥

कृतं स्वस्त्ययनं मङ्गलं कुङ्कुमसिन्दूरादिभिर्यस्यास्ताम् ॥ २ ॥

उपगूढः परिरब्धः परिरब्धा कन्धरा तस्या येन रहः एकान्ते
अनुमन्त्रैरनुकूलैर्गुह्यभाषणैः अपकृष्टा चेतना विवेको यस्य कालरंहः
आयुर्व्ययरूपं प्रमदेव परिग्रहो न ज्ञानसाधनं यस्य ॥ ३ ॥

महार्हतल्पे तत्कृतशय्यायां शयानः अहिषिया भुज उपधि-

श्रीवंशीधरस्वामिकृतभावार्थदीपिका।

उपधानमुच्छीर्षकं यस्य सविसर्गपाठे शयनक्रियाविशेषणम् तां महिषीमेव परं पुरुषार्थममन्यत न तु यन्निजं रूपं ब्रह्म तत् तमसा अज्ञानेनाभिभूतो यतः ॥ ४ ॥ ५ ॥

पुत्रानिन्द्रियपरिणामान् दुहितॄस्तदनन्तरं बुद्धिवृत्तीः पुत्रसंख्या च बाहुल्यमात्रविवक्षया दुहितृसंख्या तु पुत्रेभ्यो न्यूनत्वेन गार्हस्थ्यसौन्दर्यार्थमेव विराट् सम्राट् आयुषोऽर्धमित्यादि कथासौन्दर्यार्थमेव ॥ ६ ॥

पुरञ्जनकन्याश्चास्यपौरञ्जन्यः हे प्रजापते! ॥ ७ ॥

दारैः परिणामानन्तरं हिताहितचिन्ताभिः [illegible]धर्मोगैः ॥ ८ ॥

पुत्राणां पुत्राः कर्माणि पञ्चाचेषु [illegible] ॥ ९ ॥

तेषु पुत्रादिषु तेषामपि ये रिक्थहारा[illegible] च ॥ १० ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभाग[illegible]का।

एवं जाग्रत्स्वप्नसुषुप्त्यादिवि[illegible]स्थादिः [illegible]न्तो जीवस्य उद्गमोऽपि कदाचिद्दैवात्सञ्जातपरिता[illegible] विवेकात्मकबुद्ध्युदयः इदानीमेव च सञ्जातविवेकमपि म[illegible]सम्बन्धादियुक्तं पुमांसम्।

यया धर्ममधर्मं च कार्यं चाकार्यमेव च।
अयथावत्प्रजानाति बुद्धिः सा पार्थ! राजसी।
अधर्मं धर्ममिति या मन्यते तमसा वृता।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ! तामसी।

इत्युक्तविधरजस्तमःप्रचुरा सती बुद्धिः पुनःप्रसह्य वशीकृत्य संसारयामासेत्याह। इत्थमिति। हे महाराज! इत्थं दैवात्कदाचित् सञ्जातविवेकमपि पुरञ्जनं विभ्रमैः धर्माधर्मकार्याकार्यादिविषयकैर्विभ्रमैर्भ्रमजननद्वारेत्यर्थः सम्यक् सम्यक् ध्याने. स्ववशमानीय पुरञ्जनी रजःप्रचुरा बुद्धिः पतिं रमयती स्वकार्यप्रवणं कुर्वती स्वयं रेमे व्यापृतवती कथापक्षे तु सम्यग्विभ्रमैर्विलासै रम्यत् स्पष्टं केचिदत्र प्रतिपदं कथञ्चिदध्यात्मपक्षे योजयितुं शक्यमेव श्रीनारदेन तु जीवस्य स्त्रीपुरुषवासना दार्ढ्येन विचित्रा संसृतिर्भवतीत्येतावदेव कथातात्पर्यं दर्शितम्।

कश्चित्पुमान् कश्चिच्च स्त्री कश्चिच्चोभयमन्धधीः।
देवो मनुष्यस्तिर्यग् वा यथा कर्म गुणं भव

इति वदता तत्रादौ पुंस्त्वेन संसृतिरध्यायत्रयेणोक्ता ततश्चैकेनाध्यायेन स्त्रीत्वेन संसृतिं प्रदर्श्येश्वरप्रसादाल्लब्धज्ञानेन मोक्ष इत्युक्तं तावतैव यथोपयोगं व्याख्यातमिति पञ्चाध्याय्यर्थः प्रतीयते प्रतिपदमध्यात्मयोजना तु दुर्घटा निष्प्रयोजना चेति स्वग्रौक्ष्यानवमनादृत्य यथोपयोगमेव व्याख्यास्याम इत्याहुः तत्र प्रतिपदमध्यात्मयोजनमनुपयुक्तं चेत् किमर्थं तत्कथनमिति दृष्टव्यं न च कथासौन्दर्यार्थमिति वक्तुं शक्यमध्यात्मोपयुक्तांशकथनेनैव तत्सौन्दर्याभावादन्यथा कथासौन्दर्यार्थमप्यनुपयुक्तांशानां बहूनां सत्त्वेन तेषामपि कथनापत्तेः यदपि कश्चित्पुमानित्यादि तत्र कश्चित्पुमानित्यादिग्रन्थस्य निगमनपरत्वेन प्रधानप्रतिपाद्यस्यैव निगमनीयत्वेन तस्य प्रतिपदमध्यात्मयोजनाभावे प्रमाणत्वाभावाद्धि यावन्तोऽर्थाः कथितास्ते सर्वे निगमनीया इत्यस्ति नियमः यदपि यथोपदेशं व्याख्यातमित्यादि तदपि न अप्रसिद्धपदव्युत्पत्तिकल्पनेन तदनुकूलतया प्रसिद्धव्युत्पत्तीनां पदानां व्याख्यातुं शक्यत्वेन तावन्मात्रव्युत्पत्तिप्रदर्शनात् यदपि चोक्तं प्रतिपदमध्यात्मयोजना दुर्घटा निष्प्रयोजना चेति तत्र निष्प्रयोजनत्वं यथोपदेशं व्याख्यातेषु पुरञ्जनादिष्वर्थविशिष्टं जीवस्य स्त्रीपुरुषवासनादार्ढ्येन विचित्रा संसृतिर्भवति ईश्वरप्रसादलब्धज्ञानेन मोक्ष इत्युक्तयैव चारितार्थ्येन पञ्चाध्याय्या वैयर्थ्यस्य दुष्परत्वात् दुर्घटा चेति परमवशिष्यते तथात्यन्तदुर्घटं यत्पदमध्यात्मपक्षे अद्रिहीयान्यानि पदानि सर्वाणि तत्पक्षे व्याख्येयान्येवानुपयुक्तं पदमगत्या कथासौन्दर्यार्थमिति वक्तुं युक्तं यत्र श्लोकस्थानां सर्वेषामपि पदानां दौर्घट्यं ना त्वं मुखं सुदति सुभ्रनु रागभारेत्यादौ तत्र संघातात्मकवाक्यार्थयोस्तत्वस्यकस्य चिदुपयुक्तार्थस्य योजना कर्तव्या ॥ १ ॥

तथाहि हे राजन्! स राजा पुरञ्जनः सुस्नातां कृतमङ्गलस्नानां रुचिरमुज्ज्वलमम्बरं यस्याः कृतं स्वस्त्ययनं मङ्गलं कुङ्कुमसिन्दूरादिभिर्यस्यास्तां तृप्तां स्वाद्वन्नपानादिभिरुपागतां समीपमागतां महिषीमभ्यनन्दत सुस्नातां रुचिराम्बरादिभिः सुन्दरतरां महिषीमभिनन्दयन् स्त्रियमिव राजसीं बुद्धिमनुकूलाममन्यतेत्यर्थः॥२॥

तया महिष्या उपगूढः आश्लिष्टः परिरब्ध आश्लिष्टा महिष्याः कन्धरा येन स अनेन जीवबुद्ध्योरन्योऽन्यं दृढतरसंबन्धः सूचितः एकत्वेनानुसंधानं च व्यज्यते रह एकान्ते अनुकूलैर्गुप्तभाषणैः शब्दादिविषयचिन्तनैरपकृष्टा चेतना विवेको यस्य प्रमदैव प्रमदाजस्य कारिणी बुद्धिरेव परिग्रहो न विवेको यस्य सः ॥ ३ ॥

महार्हतल्पे उत्कृष्टशय्यायां हृदये शयानः अधितिष्ठन् कालरंहः कालवेगमायुष्यं दुरत्ययं संसारिणां वर्जनीयं दिवा निशोत्स्वबं[illegible] न बुबुधे नानुसंहितवानित्यर्थः कथापक्षे तु स्पष्टोऽर्थः महार्हतल्पे उत्कृष्टशय्यायां हृदये महिष्या भुज एव उपधिः उपधीयतेऽस्मिन् शिर इत्युपधिरुपधानमुच्छीर्षकं यस्य सः शयानः अनन्त बुद्धिपारवश्यं प्राप्तं व्यवायतः विषयभोगात्तमसाभिभूतः अज्ञानतिरोहितः तामेव महिषीमेव बुद्धिसङ्कृतं वैषयिकसुखमेव पुरुषार्थममनुत न तु निजं स्वरूपं तत्परं परमात्मस्वरूपं च नान्वमन्यत इत्यर्थः ॥ ४ ॥

तया महिष्या एवं तत्पारवश्येन रममाणस्य संसरतः अत एव कामैः शब्दादिभिरनुभूयमानैः कश्मलं मलिनं चेतो यस्य हे राजेन्द्र! नवं नूतनं वयः क्षणार्धमिव व्यतिक्रान्तं देहविशिष्टस्यैव भोक्तृत्वाद्देहाभिप्रायेण नवं वयो व्यतिक्रान्तमित्युक्तं पक्षान्तरे स्पष्टमेवार्थः ॥ ५ ॥

तस्यां महिष्यां पुरञ्जनः पुत्रानिन्द्रियपरिणामरूपानेकादशशतानि अजीजनदुत्पादयामास आयुषः हे विराट् इति संबोधनं पुरुषायुषः शतसंवत्सरात्मकस्यार्धपञ्चाशद्वर्षात्मकमतिक्रान्तमभूत् इदमपि देहाभिप्रायेणोक्तम् ॥ ६ ॥

दुहितॄरिन्द्रियपरिणामानन्तरभाविनी बुद्धिवृत्तिरूपाः दशाधिकशतं पित्रोर्जीवबुद्ध्योः भ्रातॄणामिन्द्रियपरिणामानां च यशस्करीरनुकूलाः अनुकूलो हि यशस्करो न तु प्रतिकूलः शीलं राजसतामसस्वभावः अनन्तसुखाभिव्यक्तिजनकस्वरूपमौदार्यरूपश्च यो गुणः तेनोपेताः युक्ता अजीजनदित्यनुषङ्गः सर्वा अपि दुहितरो दशाधिकशतं पौरञ्जन्यः पुरञ्जनस्यापत्यस्त्रीत्वात्पौरञ्जन्य इत्युच्यन्ते हे प्रजापते! अत्र पुत्रसंख्या बाहुल्यमात्राभिप्राया दुहितृसंख्या च पुत्रेभ्यो न्यूनत्वेन गार्हस्थ्यसौन्दर्यार्थं ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

[illegible]: पाञ्चालपतिः पञ्चभिः विषयान्स्वयंकीकुर्वन्त्यनुभावयन्तीति पञ्चालाः इन्द्रियाणि त एव पाञ्चालाः प्रज्ञादित्वात्स्वार्थेऽण् तेषां पतिःकरणाधिपो जीव इत्यर्थः पित्रोर्वशं विशेषेण वर्त्तयन्तीति तान् इन्द्रियपरिणामरूपान् दारैर्हिताहिताचिन्तारूपाभिर्भार्याभिः संयोजयामास तथा दुहितॄः वरैरुचितैर्विषयभोगरूपैः पतिभिः संयोजयामास ॥ ८ ॥

पञ्चायां पुत्राः पुण्यापुण्यरूपकर्मरूपा एकैकस्य शतं शतं शतशब्दो बाहुल्याभिप्रायकः अभवन् पौत्रान्भिशिमाह्रि । यैः पौत्रैः पौरञ्जनो वंशः संसारः तेषु पाञ्चालेषु शब्दादिविषयेषु निमित्तेषु निमित्तमिह फलं शब्दादिविषयभोगार्थमित्यर्थः समेधितः सम्वर्द्धितः यद्वा वंश इन्द्रियपरिणामतदनन्तरबुद्धिवृत्तिरूपपुत्रपुत्र्यादिरूपो वंशः शब्दादिविषयेषु कर्मभिरेव समेधित इत्यर्थः ॥ ९ ॥

तेषु तस्य पुरञ्जनस्य रिक्थहारेषु पुत्रेषु गृहं शरीरं कोशः अहं ममाभिमानाश्रयोऽहंकारः अनुजीविन इन्द्रियप्राणादयः तेषु निरूढेन रूढमूलेन ममत्वेन ममकारेणासक्तः न प्राबुध्यत स्वस्वरूपपरमात्मस्वरूप इति शेषः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पुरञ्जननाम्नो जीवस्य जाग्रत्स्वप्नयोरन्यस्यामवस्थायां विषयप्रसरणमाह । इत्थमिति । विभ्रमैर्वृत्तिविशेषैरेमे विष * येषु व्यावृत्तवत्यां जयन्त्यां सुषुप्तजनपरिस्थितम् ॥ १ ॥

रुचिरेण कमनीयेनाम्बरेण नानावस्त्रेण सम्भृतां कृतं स्वस्त्ययनं स्वस्त्याशीर्वचनस्यायनं वृत्तिविशेषो यस्याः सा तथा तां तामसानां तामससङ्गमो दुःखकारण इति द्योतनायैव मुक्तिः ॥ २ ॥

कयाचित्स्त्रिया परिरब्धः वृत्त्यन्तरालम्बकन्धरः "कण्ठो ग्रीवा कन्धरा च" इत्यभिधाने रहोऽनुमन्त्रैर्भाषितादिलक्षणावृत्तिभिरपकृष्टं चेतनं स्वरूपज्ञानं यस्य स तथा इदं दिवाज्ञानमियं निशाज्ञानमिति कालंहो ज्ञानाज्ञानविशेषावस्थां प्रमदाविषयिकबुद्धिरेव परिग्रहो यस्य स तथा ॥ ३ ॥

शयानस्तत्स्वमजानन्महार्हतल्पे ज्ञानमाणिनि वृत्तिविशेषे महिषीभुजोपधे बुद्धेरहङ्कारलक्षणावृत्तिशिरोऽधिष्ठाने नामैवामनुत कर्त्ता भोक्ता सुखी दुःखीति तद्धर्मानात्मन्यमन्यत तत्र कारणमाह । व्यवायत इति । मैथुनलक्षणाज्ञानवृत्तिविशेषात् इदमेवाह । तम इति । निजमात्मानं तत्परं ब्रह्मलक्षणं तत्त्वं नामन्यत निजमात्मीयमित्यभिधानम् ॥ ४ ॥

वयः शुद्धज्ञानानन्दरूपलक्षणं व्यतिक्रान्तं गतप्रायमासीत् ॥ ५ ॥

अभिभूतनिजज्ञानस्य तस्य विषयबुद्धेर्नानापुरखुत्पत्तिप्रकारमाह । तस्यामिति । चक्षुरादीनि मनोऽन्तानीन्द्रियाण्येकादशसंज्ञानि विषयीकृत्य शतमनन्ताः परिणामा वृत्तयो भवन्ति ताः ज्ञानान्येकादशपुत्रा उच्यन्ते बाल्यावस्थायां बुद्धिविस्ताराभावायौवनावस्थायां तत्सम्भावनमपेक्ष्यायुषोऽर्धमगादित्युच्यते विषयमेव राजयतीति विराट् ॥ ६ ॥

परिणामानन्तरं बुद्धिवृत्तयो दुहितॄरित्युच्यन्ते पितृशब्दवाच्यानामिन्द्रियाणां परिणामानां भ्रातृशब्दवाच्यानां ज्ञानानन्दलक्षणयशस्वी नाशनीः "कृ विक्षेप" इति धातुः स्वजातिप्रसिद्धशीलौदार्यगुणयुक्ताः वाह्यविवक्षया संख्याकथनमन्तरस्यानेकत्वेन संख्यैव पौरञ्जन्योऽनेकत्वहजननहेतवः हेप्रजापते ! ॥ ७ ॥

पुत्रान् बुद्धिपरिणामान् दारैः परिणामानन्तरचेष्टाभिः संयोजनं दुहितॄर्बुद्धिवृत्तीः सदृशैर्वरैर्वृत्तियोग्यविषयैः ॥ ८ ॥

[illegible] पुत्रा अभवन्निति परिणतवृत्तिभ्यो वृत्त्यन्तराणीति [illegible]षु ॥ ९ ॥

[illegible] विषयधनं हरन्तीति तद्रिक्थहारास्तेषु नाना [illegible]गृहं तत्त्व कोशो मनस्तदुपजीव्यवर्तन्त इति [illegible] निगूढेन प्रविष्टेन ममेते परिणामादय इति [illegible] विशेषेण सक्तो नात्मानं परञ्च जानातीत्यन्वय[illegible]

[illegible]कृतक्रमसन्दर्भः

ममुते इत्यत्र [illegible]सम्मतः पाठः । किञ्च सर्वत्राहवः ॥ १—५ ॥

तस्यामिति सार्द्ध[illegible] प्राप् इति क्वचित् । मूलपाठस्तु न चित्सुखसम्म[illegible]

शीलेत्यर्द्धकम् ॥ ७ ॥

सपत्नेतिटीकायां हिताहितचिन्तापि यथा सौगन्ध्यसौरूप्यादौ हितचिन्ता दौर्गन्ध्यकौरूप्यादावहितचिन्तेति ॥ ८ ॥ ९ ॥

अन्वबध्यतेत्यत्र अन्वरुध्यतेति क्वचित् किन्तु मूलपाठ एव चित्सुखसम्मतः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सङ्गुद्धा सङ्क्लिस्यास्य सुकृतान्यपि कुर्वतः ।

सप्तविंशे जरारोगाद्युपाख्यानेन कथ्यते ॥ ० ॥

तदेवं धार्मिकस्यापि जीवस्य कदाचिदन्तराये प्राप्ते विषिधदुष्कृतदूषितान्तःकरणस्यापि पुनर्लब्धविवेकस्य दानव्रततपःप्रायश्चित्तादिकं कृतवतोऽपि मनोमालिन्यानपगमादनुपदमनुतापसहस्रविदीर्णस्य भाग्यवशादेव पुनरपि सद्बुद्धिप्राप्तिः प्रपञ्चिता इदानीं पूर्ववदेव धर्मबुद्धिमतः सदाचारस्य तस्य गार्हस्थ्यमाह । इत्थमिति । सध्रयक् सम्यक् विभ्रमैर्विलासैः । पक्षेऽधर्मे मतिं परित्यज्य पूर्ववद्धर्मबुद्धावेवासक्तो बभूवेत्यर्थः ॥ १ ॥

सुस्नातेत्यादिना क्षीयसद्बुद्धेः प्रसन्नतामालब्ध विगतमनोमालिन्यः कृतार्थो बभूवेत्युक्तम् ॥ २ ॥

अनुमन्त्रैरनुकूलगुह्यभाषणैः पक्षे धर्मकर्मनिर्वाहमन्त्रणाभिः । अपकृष्टा विलुप्तीकृता चेतना संसारतरणलक्षणा बुद्धिर्यस्य सः । कालस्य रंहो वेगं वैराग्याभावान्न बुबुधे कीदृशमिदं दिनमागतमियं निशा आगतेति एतत्प्रकारकामित्यर्थः ॥ ३ ॥

महिष्या भुज एव उपधिरुपधानं यस्य सः । अविसर्गपाठे शयनक्रियाविशेषणम् । तामेव व्यवायती हेतोर्मनुते । स्त्रीसङ्गसुखमेव पुरुषार्थममन्यत अमनुतेति च पाठः । ननु निजं स्त्रीयं

---

* । इदंशोध्यमपिबहुपुस्तकेष्वेवमेवातोनशोध्यते ।

ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः।
देवान् पितॄन् भूतपतीन्नानाकामो यथा भवान् ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

परंच किमपि ममनुत अगण्यमित्यर्थः। तमसा अज्ञानेन यतोऽभिभूतः । अध्यात्मपक्षे अथवायतो धर्मपत्नीसङ्गो धर्मासक्त्या धर्ममेव पुरुषार्थममन्यत नतु मोक्षं यतो न निजम जीवस्वरूपं नापि परं परमेश्वरस्वरूपं धार्मिक इत्युपलक्षणं। महामना दानशीलः महार्हतल्पे पुण्यकर्मणि [illegible]: महिषी भुजोपधिरविद्योपाधिः ॥ ४—५ ॥

पुत्रान् विवेकनिर्णयसंशयादीन् । दुहितॄः [illegible] चिन्तायाः पुत्रसंख्या बाहुल्यमा[illegible]पुत्रेभ्यो न्यूनत्वेन गार्हस्थ्यसौन्दर्यार्थं विरा[illegible] जीवस्यायुषोऽर्धमत्यगादिति पञ्चाशद्वर्षपर्यन्तं [illegible]रूपत्वमधिकमिति विवक्षया पितृमातृ[illegible] पुण्यक्रियाहेतुरूपत्वात् ॥ ६ ॥

पुरञ्जनकन्यात्वात् ताः पौरञ्जन्य [illegible] पः ॥ ७ ॥

दारैर्मतिभृत्यादिभिः वरैर्वि[illegible]भिः ॥ ८ ॥

पुत्राणां पुत्राः पुण्यपाप[illegible] शब्दादिषु ॥ ९ ॥

तेषु विवेकादिषु पुत्रेषु तस्य [illegible] रिक्यहारेषु अभिमानादिषु गृहानुजीविषु [illegible] कोशानुजीविषु सह भोज नादिषु ॥ १० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सप्तविधो जीवस्य नानाबुद्धिवृत्तिविमोहितस्य जरारोगादिनानादुःखप्राप्तिर्भवतीति वर्ण्यते। इत्थमिति। पुरञ्जनी जीवाभिष्ठिता बुद्धिः पुरञ्जनं जीवमित्थं पृथक् सम्यक् वक्ष्यमाणीय विभ्रमैर्विलासैः आत्मपरमात्मस्वरूपाविज्ञानं बिना बुद्ध्यात्मभ्रान्त्या जीवस्य स्त्रीपुत्रपुंसकभावनानादेहतन्निबन्धनजरामयादिदुःखावाप्तिरित्यध्यायार्थः अन्यत्कथा सौन्दर्यार्थम् ॥ १ ॥

कृतं स्वस्त्ययनं मङ्गलं वस्त्राभरणकुङ्कुमसिन्दूरादिभिर्येस्यास्तां तृप्तां भोजनपानादिभिः प्रसन्नाम् ॥ २ ॥

उपगूढ आलिङ्गितः परिरब्धा भार्याकन्धरा येन सः रहोनुमन्त्रैः एकान्ते अनुकूलैर्भाषणैः अपकृष्टा अपनीता चेतना विवेको यस्य सः कालस्य रंहो वेगं विवाणिशोति न वेद यतः प्रमदया परितः अहो अहणं यस्य सः ॥ ३ ॥

महिषी भुजेवोपधिरुपबर्हणं यस्य सः तामेव परं पुरुषार्थ मनुते नतु निजं स्वस्वरूपं यत्परं सर्वात्मभूतं वासुदेवस्वरूपं च यतस्तमोऽभिभूतः अज्ञानावृतः ॥ ४ ॥

नवं वयः श्रेयःसाधनयोग्यं यौवनम् ॥ ५ ॥

विराट् विकद्धः पुत्रान् अध्यात्मपक्षे इन्द्रियपरिणामान् ॥६॥

हेप्रजापते! दुहितॄः इन्द्रियपरिणामानन्तरबुद्धिवृत्तीः तस्यामजनयदिति पूर्वेणान्वयः ॥ ७ ॥

दारैरिहामिहचिन्तारूपाभिर्भार्याभिःवरैरचितैर्विषयभोगरूपैः८

पुत्राणां पुत्राः कर्माणि पञ्चालेषु शब्दादिविषयेषु ॥ ९ ॥

तेषु पुत्रादिषु तद्रिक्थहारेषु तेषां पुत्रेषु गृहादिषु च नितराम रूढेन ममत्वेनान्वबध्यत ॥ १० ॥

———

भाषाटीका

नारदजी बोले हे महाराज! प्राचीनबर्हि इस प्रकार से पुरञ्जनी अपने विभ्रमभावों से वश करके पतिको रमाती हुई आपभी रमण करती हुई रही इहां पर भोग मे जीव बुद्धि का परतंत्रही जाना है यह कहा गया है ॥ १ ॥

हे राजन्! अपनी रानी जब सुंदर स्नान करके सब मङ्गल सिंगार करके मुख का शोभा बनाकर तृप्त होकर जब पास मे आई तब पुरञ्जन राजा प्रसन्न हुआ ॥ २ ॥

उस रानी ने इसके कांधे में हाथ डाला है इसने उसके कांधे मे डाला एकांत मे संभाषण भये से राजा का चित्त खिंच गया तब दिन रात के बीतने से भी कठिन काल वेगको इसने नहीं जाना (विषयासक्तपुरुषको आयु का जाना मालुम नहीं पड़ता है) ॥ ३ ॥

अत्यंत मद के होजाने से वह राजा बडी खुसी से सोता रहता था बडी अच्छी शय्या मे रानी के गलबाहीं डार कर रहने से उसको अज्ञान ऐसा हुआ कि जो अपना पराया कुछ नहीं समुझता था (अर्थ दोनो पक्ष में एकही है) ॥ ४ ॥

हे राजेन्द्र! उस रानीके साथ मे उसके रमण के काम मे चित्त लगजाने से नूतन अवस्था क्षणार्धके तुल्य चलागया ॥ ५ ॥

तब उस पुरञ्जनी में पुरञ्जनने ग्यारहसौ पुत्र पैदा किये तब उस की आधी आयु बीतगई (इहां इन्द्रियों के परिणामही पुत्र हैं) ॥ ६ ॥

एकसौदश पुत्री पैदा करीं जोकि पिता माता के यशकरने वाली हैं हेराजन्! शील औदार्य गुणवाली हैं (एसब बुद्धिकी वृत्ती हैं) ॥ ७ ॥

उस पाञ्चाल पति राजा ने पुत्रोंको दुसरी लडकियों के साथ लडकियों का दुसरे पुत्रों के साथ सदृश योग्यता जानकर संयोग विवाह करदिया (इहां हिताहित चिन्ता विषय भोगोंका योग है) ॥ ८ ॥

एक एक पुत्र के सौ सौ पुत्र भये जिनोंसे पुरञ्जन का वंश पञ्चाल देशों में बढगया (इहां नाना कर्म ही पुत्र हैं विषय पाञ्चाल हैं ॥ ९ ॥

उन पुत्रो में उनके पुत्रों में घर के अनुचरों में ममता के बढने से राजा विषयोंमे बन्धगया (इहां आचारादिचक्र इन्द्रि प्राणोंका कथन है) ॥ १० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

युक्तेष्वात्महितेषु कर्मस्वनवहितस्य स वै कालो जरासमयः ॥१२

युक्तेष्वेवं प्रमत्तस्य कुटुम्बासक्तचेतसः ।
आससाद स वै कालो योऽप्रियः प्रिययोषिताम् ॥ १२ ॥
चण्डवेग इति ख्यातो गन्धर्वाधिपतिर्नृप ! ।
गन्धर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयम् ॥ १३ ॥
गन्धर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः ।
परिवृत्त्या विलुम्पन्ति सर्वकामविनिर्मिताम् ॥ १४
ते चण्डवेगानुचराः पुरञ्जनपुरं [illegible] ।
हर्तुमारेभिरे तत्र प्रत्यषेधत् [illegible] १५ ॥
स सप्तभिः शतैरेको विंशत्य[illegible] ।
पुरञ्जनपुराध्यक्षो गन्धर्वैर्युयुधे [illegible]
क्षीयमाणे स्वसम्बन्धे एकस्मिन् [illegible]
चिन्तां परां जगामार्तः सराष्ट्रपुरबान्[illegible]
स एव पुर्यां मधुभुक्पञ्चालेषु स्वपार्षदैः [illegible]
उपनीतं बलिं गृह्णन् स्त्रीजितो नाविदद्भय[illegible]
कालस्य दुहिता काचित्त्रिलोकीं वरमिच्छती [illegible]
पर्यटन्ती न बर्हिष्मन् ! प्रत्यनन्दत कश्चन ॥ १९ ॥
दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा ।
या तुष्टा राजर्षये तु वृतादात्पूरवे वरम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चण्डवेगः सम्वत्सरेणावर्तमानेनोपलक्षितः गन्धर्वा दिवसाः ॥ १३ ॥

गन्धर्व्यो रात्रयः तादृशीस्तादृश्यः मैथुन्यो दिवसैर्मिथुनीभूय स्थिताः सिताश्चासिताश्च शुक्लकृष्णपक्षीयाः परिभ्रमणेन सर्वैः कामैः सह विनिर्मितां पुरीमपहरन्ति ॥ १४ ॥

प्रजागरः प्राणः ॥ १५ ॥

विंशत्या च सह ॥ १६ ॥

स्वसम्बन्धे स्वसम्बन्धिनि प्राणे ॥ १७ ॥

स एव मधुभुक् क्षुद्रसुखभोक्ता स्वपार्षदैरिन्द्रियैः नाविदज्ज्ञातवान् ॥ १८ ॥

कालस्य दुहिता जरास्ति तां न प्रत्यनन्दत नैच्छत् बर्हिष्मन् हे प्राचीनबर्हिः ॥ १९ ॥

पूरवे ययातिपुत्राय तेन वृता सती वरमदात् ययातिः शुक्रशापाज्जरां प्राप्य पुत्रानुवाच इमां गृह्णीतेति तां ज्येष्ठाश्चत्वारो न जगृहुः पूरुस्तु जगृहे ततो ययातिस्तस्मै राज्यं ददाविति जरैवादादित्युक्तम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

नानाकामः नानाभूतान् शब्दादिविषयान् कामयमानः पशुमारकैः हिंसागर्भैरत एव घोरैः क्रतुभिः कर्मेन्द्रियव्यापाररूपैः दीक्षितः कृतसङ्कल्पः कर्मेन्द्रियव्यापाररूपान् क्रतूनारब्धवानित्यर्थः तेषां प्रायशः पञ्चसूनादिहिंसागर्भत्वात्पशुमारकैरित्युक्तम् देवादीनीजे इष्टवान् देवशब्दो देवाधिष्ठितेन्द्रियपरः इन्द्रियाण्यपतर्पयदित्यर्थः पितॄन् भूतपतीनिति दृष्टान्ताभिप्रायकं यथा भवान् देवपितृभूतपतीनीजे तथायं देवानीजे इत्यर्थः ॥ ११ ॥

युक्तेषु दृढतराभिसन्धियुक्तेषु कर्मसु प्रमत्तस्य नितरामासक्तस्य कुटुम्बे दुःखितभृत्यादावासक्तचित्तस्य स वै कालः जरासमयः आससाद प्राप्तः देहस्यैवमुक्तं कालं विशिनष्टि । यः कालः प्रिययोषितां परस्परमप्रियकरः ॥ १२ ॥

चण्डवेग आशुवेगः संवत्सररूपः कालः ख्यातः प्रसिद्धः स हि गन्धर्वाणां गन्धर्वाश्च गन्धर्व्यश्च "पुमान्स्त्रिया" इत्येकशेषः तेषामधिपतिः तस्य बलिनः प्रसह्यायुर्हरतः चण्डवेगस्य भृत्या षष्ट्यधिकशतत्रयदिवसात्मकाः गन्धर्वाः परोक्षमायारूपधनापहारित्वाद्गन्धर्वरूपत्वेन कल्प्यन्ते ॥ १३ ॥

तथा तादृशीरस्य चण्डवेगस्य सम्बन्धिन्यः तादृश्यः आर्थत्वाद्वचनव्यत्ययेन द्वितीया षष्ट्युत्तरशतत्रयसङ्ख्याका गन्धर्व्यः रात्र्या-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रिमकाः मैथुन्यः दिवसैरेवं मिथुनीभूय स्थिताः सिताश्चासिताश्च शुक्लकृष्णपक्षीयाः परिवृत्त्या परिभ्रमणेन सर्वैः शब्दादिभिः तस्करैश्च विनिर्मितां पुरीं शरीरं विलुम्पन्ति अपहरन्ति अपहर्तुमारेभिरे इत्यर्थः जराप्राप्त्यनन्तरप्राप्ता इत्यर्थः एतत्सर्वं वृद्धश्लोकमिति द्रष्टव्यम् ॥ १४ ॥

चण्डवेगस्यानुचरास्ते गन्धर्वाः पुरञ्जनस्य पुरीं यदा हर्तुमारेभिरे आरब्धवन्तः अत्र पुर्यां यः प्रजागरः प्राणः सुषुप्त्यवस्थायामपि प्राणव्यापारात्प्रजागर इत्युक्तं प्रत्यपेधयत्प्रत्यवारयत यावत् प्राणव्यापारस्तावच्छरीरस्यावैकल्येन [illegible] इत्युक्तम् ॥ १५ ॥

स एकः प्रजागरः सप्तभिर्विंशत्या [illegible] पञ्चकतन्मात्रपञ्चकज्ञानेन्द्रियपञ्चककर्मेन्द्रिय[illegible] चतुष्टयमनोबुद्ध्यहङ्काराात्मकैः शरैः शतं [illegible] पलक्षणां यावत् प्रारब्धावसानं [illegible] पावः बली गन्धर्वैः सह युयुधे युद्धं [illegible] प्रापयामासेत्यर्थः ॥ १६ ॥

बहुभिः सार्धं युधि एकस्मिन् [illegible] क्षीयमाणे सति शतवत्सरावसान इत्यर्थः [illegible] प्रजागरः परां चिन्तामवाप शरीरं [illegible] इत्यर्थः ॥ १७ ॥

स पुरञ्जनः मधुभुक् [illegible] पाञ्चालेषु शब्दादिविषयेषु मैथ्ये उपानीतं प्रापितं [illegible] शब्दाद्यन्यतमं विषयं गृह्णन् अनुभवन् स्त्रिया बुद्ध्या जितो वशीकृतः भयं मृत्युभयं नाविन्दन्नालोचितवान् ॥ १८ ॥

काचित्कालस्य दुहिता जरा रूपा काचिदस्ति सा त्रिलोक्यां वरं पतिमिच्छती पर्यटत् हे बर्हिष्मन् तां कालकन्यां कोऽपि पुमान्[illegible]नन्दत नावृणोत् ॥ १९ ॥

अनभिनन्दने हेतुं वदन् तन्निमित्तं गुणनामधेयमाह । दौर्भगेन दुष्टं भगं सौन्दर्यं यस्माद्भवति स दुर्भगः स एव दौर्भगस्तेनात्मना स्वरूपेण लोके दुर्भगेति विश्रुता प्रख्याता तां विशिनष्टि । या कालकन्या ययातिपुत्रेण पूरुणा वृता सती तुष्टा तस्मै राजर्षये पूरवे वरं राजासनरूपमदात् ययातिर्देवयानीगमनमनुकुर्वञ्शुक्रशापाज्जरां प्राप्य पुत्रानुवाचेमां जरां गृह्णीतेति तां च ज्येष्ठाश्चत्वारो न जगृहुः पूरुस्तु जगृहे ततो ययातिस्तस्मै राज्यं ददाविति जरैवादादित्युक्तम् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवान् काम्यफलदान् भूतपतीन् भैरवादीन् ॥ ११ ॥

एवं विधया क्रियया युक्तेषु काम्येषु सक्तस्येति शेषः हरौ मनो योगवत्सु ज्ञानेषु एवमुक्तप्रकारेण प्रमत्तस्य तद्वार्तारहितस्येति वा प्रिया हृद्या योषितो येषान्ते तथा तेषां विषयिणामपि योऽप्रियोऽनपेक्षितः ॥ १२ ॥

गन्धर्वाणां कलाकाष्ठादीनां सावयवानामधिपतिश्चण्डो वेगो यस्य स तथेति ख्यातः स काल आसत्सादित्यन्वयः गन्धर्वा दिवसाः ॥ १३ ॥

गन्धर्व्यो रात्रयस्तावतीस्तावत्यः मिथुनीभूय वर्तमाना मैथुन्यः सिताः दिवसा असिता रात्रय इति सितासितपरिवृत्त्या परिभ्रमणेन पुनः पुनरावर्तनेन कामात् विलुम्पन्ति अपयन्तीत्यन्वयः ॥ १४ ॥

हन्तु [illegible] प्रजागरः प्राणः प्राणाख्य एवैतस्मिन्पुरे [illegible]ीति ध्रुवः प्राणवायुव्यापाराय प्रवर्तत इत्यर्थः ॥ १५ ॥

स सप्तभिः शतैर्विंशद्भिश्चाहोरात्रैः शतं समाः शतवर्षपर्यन्तं युयुधे तेषां पराक्रमं निरुध्य स्वयं प्राणबलाद्देहमपालयदित्यर्थः ॥ १६ ॥

राष्ट्रेण विषयेण पुरेण देहेन बान्धवैरिन्द्रियैः सहवर्तमानः ॥ १७ ॥

स्त्रीजितो बुद्ध्या विवेकं प्राप्तः विषयेषु स्वपार्षदैरिन्द्रियैरुपनीतं बलिं रूपादिविषयं गृह्णन् मधुभुक् कर्मफलभुक् कालनिमित्तं भयं नाज्ञासीदित्यन्वयः ॥ १८ ॥

अस्ति जायते परिणमते वर्धत इति चतुरूर्मिप्रकारप्राप्तिं निरूप्य अपक्षीयते विनश्यतीत्येतद्द्वयं जराप्राप्तिमाह । कालस्येति । कालात् जरा जायत इति कालस्य दुहितेति । विशेषनामाभावात्काचिदिति ॥ १९ ॥

या स्वात्मनः शरीरस्य दौर्भाग्यत्वेन सौन्दर्याभावेन लोके दुष्टो भगो यस्याः सा तथेति विश्रुता यां जरां तुष्टः पिता ययातिः राजश्रेष्ठाय पूरवे वरमदात् तां कश्चन न प्रत्यनन्दतेत्यन्वयः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथा भवानिति । विभक्तिपरिणामेनापि सर्वत्र योज्यम् ॥ ११ ॥
युक्तेष्विति सार्धकम् । योऽप्रिय इत्यत्र यो वर इति क्वचित् । प्रियवोषितामिति चित्सुखः ॥ १२ ॥ १३ ॥

गन्धर्वा इति सार्धकम् । तावतीत्येव पाठः ॥ १४ ॥ १५ ॥

विंशकेनेत्यत्र विंशत्या चेति टीका विंशद्भिरिति चित्सुखः ॥ १६—२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ईज इति पद्यद्वये साम्यं यथा भवानिति तथैव कथ्येत कथ्यते तव दृष्टान्तत्वं तुसङ्गोपनार्थमेवेति भावः ॥ ११ ॥

एवं युक्तेषु भक्तिवैराग्यादिव्यवहारमहितेषु प्रमत्तस्यानवहितस्य । स कालः जरासमयः । प्रिययोषितां कान्ताजनानामप्रियः सम्भोगप्रातिकूल्यात् ॥ १२ ॥

किञ्च चण्डवेगः सम्वत्सर इति ख्यातो यो गन्धर्वाधिपतिस्तस्य । गन्धर्वा दिवसाः पुरीं विलुम्पन्तीत्यन्वयः । गन्धर्व्यो रात्रयः तावतीस्तावत्यः मैथुन्यः दिवसैर्मिथुनीभूय स्थिताः ॥ १३ ॥

सिताश्चासिताश्च शुक्लकृष्णपक्षीयाः परिवृत्त्या परिभ्रमणेन पुरीमपहरन्तीति जन्मारभ्य प्रतिदिनमायुरपहार एव पुर्या अपहार उपचरितः ॥ १४ ॥

यदा पञ्चाशद्वर्षानन्तरं पुरं देहमपि हर्तुमारेभिरे तदा प्रजागरः प्राण एव प्रत्यषेधत् । मा पुरमरे मयि तिष्ठति लुम्पतेति साटोपमाह इति पञ्चाशद्वर्षानन्तरमपि त्रिंशद्वर्षपर्यन्तं वधं नापयातीत्युक्तम् ॥ १५ ॥

कदाचिदटमाना सा ब्रह्मलोकान् महीं गतम् ।
वव्रे बृहद्व्रतं मां तु जानती काममोहिता ॥ २१ ॥
मयि संरभ्य विपुलमदाच्छापं सुदुःसहम् ।
स्थातुमर्हसि नैकत्र मद्याच्ञाभिमुखो मुने! ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

युद्धन्तु प्रजागरस्य तैः सार्द्धं जन्मारभ्यैवाभूदित्याह सप्तभिः शतैर्विंशकेन चेति वर्षगतानां दिनानां रात्रीणाञ्च तावत्ये संख्या दर्शिता । शतं समा यावत् परमायुरित्यर्थः ॥ १६ ॥

त्रिपञ्चाशद्वर्षपर्य्यन्तं प्रजागरस्य प्रायः पराजयो नाभूत् तदनन्तरं तु तस्योत्तरोत्तरं पराजय एवेत्याह । क्षीयमाणे स्वसम्बन्धे स्वसम्बन्धिनि प्राणे आर्त्तः पुरञ्जनः ॥ १७ ॥

मधुभुक् क्षुद्रसुखभोक्ता स्वपार्षदैरिन्द्रियैः ॥ १८ ॥

प्रकटमेव जरा प्रवेशमुपाख्यानेनाह । कालस्येति । हे बर्हिष्मन् कोऽपि न प्रत्यनन्दत् नैच्छत् ॥ १९ ॥

पूरवे ययातिपुत्राय तेन वृता सती वरमदादिति येयमिन्तस्मै स्वीयजराग्राहिणे तुष्टो राज्यमदादिति अतैवाहाबित्युक्तम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नाना ऐहिकामुष्मिकभोगविषयाः कामाः संकल्पा यस्य सः यथा भवान् तथा ईजे ॥ ११ ॥

युक्तेषु योग्यतया गृहीतेषु क्रतुषु । एवं यथा त्वं प्रमत्तोऽसि तथा प्रमत्तस्य । स कालः जरापादकः सम्वत्सरः ॥ १२ ॥

चण्डवेगो दुर्निवारवेगः । गन्धर्वाणां दिवसानां पतिः ॥ १३ ॥

तादृशीः उक्तसंख्याकाः सिताः शुक्लाः असिताः कृष्णाः याः सन्ति ताः निशाः अस्य चण्डवेगस्य गन्धर्व्यः मैथुन्यः । दिवसरूपैर्गन्धर्वैर्मिथुनीभूय स्थिताः । परिवृत्त्या पुनः पुनरावृत्त्या सर्वैः कामैः सह विनिर्मितां पुरीं विलुम्पयन्ति ॥ १४ ॥ १५ ॥

स प्रजागरः एक एव सप्तभिः शतैर्विंशत्या च सह शतं समाः । सम्वत्सरान् युयुधे ॥ १६ ॥

एकस्मिन् स्वसम्बन्धिनि प्राणे बहुभि र्युधि क्षीयमाणे राष्ट्रपुरबान्धवैः विषयं देहबुद्ध्यादिभिः । सह चिन्तां जगाम पुरञ्जन इति शेषः ॥ १७ ॥

पुर्य्यां देहे पञ्चालेषु विषयेषु मधुभुक् रसास्वादी स्वपार्षदैरिन्द्रियैरुपनीतं बलिं विषयसुखं गृह्णन् । मयं कालभयं नाविन्दत् । यतः स्त्रीजितः बुद्धिजितः ॥ १८ ॥

वरमिच्छती तदर्थं त्रिलोकीं पर्यटन्ती काचिदुर्लक्षणादिः । कालस्य दुहिता जरास्ति हे बर्हिष्मन् । तां कश्चन अपि न प्रत्यनन्दत नैच्छत् ॥ १९ ॥

ययातिना दत्ता पूरुणा वृता अतो या तुष्टा राजर्षये पूरवे त्वं राजा भवेति वरमदात् । ययातिना तुष्टेन वरो दत्तः वरदाने सैव निमित्तमतो या तुष्टा वरमदादित्युक्तम् । पूर्वकल्पीयं ययातिपरि[illegible]स्मृत्य भविष्यं वा भूतवत् कथा सङ्गत्यर्थं सर्वत्रैव [illegible]क्तम् ॥ २० ॥

भाषाटीका ।

[illegible] जाते हैं घोर यज्ञों में दीक्षा लेकर जैसे आप [illegible]ाचा होकर देवता पितरभूत पतियों को यज[illegible] पक्ष में तथा अध्यात्म पक्ष में अर्थ तुल्य [illegible]

इस [illegible]षय के आसक्त होने से भगवद्धर्म में उसका [illegible] वह काल उपस्थित होगया जो कि स्त्रियों [illegible]ं प्रिय नहीं है ॥ १२ ॥

हे नृप ! [illegible] गन्धर्वों का पती है उसके साथ [illegible]ीनसौ साठ गन्धर्व हैं यहांपर दिन ही गन्ध[illegible] वर्ष है ॥ १३ ॥

इसी प्रकार उनकी [illegible] कृष्णा कन्याभी हैं जो परि भ्रमण से उस पु[illegible] को लूटती हैं यहां शुक्ल कृष्ण पक्ष की रात्री आयु को [illegible] करती है ॥ १४ ॥

इस चण्ड वेगके जितने अनुचर उनने जब पुरञ्जन की पुरी को नाश करना विचारा तब पांच मस्तक वाले नागने उन को रोका [प्राण के रहने से मरण नहीं होता है]॥ १५ ॥

उस नागने सातसौ बीस गन्धर्वों के साथ सौ वर्ष तक युद्ध किया [प्राण का रहना ही युद्ध है] ॥ १६ ॥

बहुत गन्धर्वों के साथ उस एक नाग के युद्ध करने से जब बल हीन होगया तब पुरका अधि पती पुरञ्जन बड़ी चिन्ता को प्राप्त हुआ (देहका बल हारने से प्राण दुर्बल होताहै तब जीव को चिन्ता होती है) ॥ १७ ॥

वह राजा पाञ्चाल देशों में अपने प्रजाओं की भेट को ग्रहण करता हुआ स्त्री के बस होकर विसयों के भोगने में भय को भूलगया (विषयों के भोगने में आयु का क्षय होना मालूम नहीं पड़ता है) ॥ ॥ १८ ॥

हे बर्हिस्मन् काल की पुत्री जरा नामक तीनों लोकोंमें वर के इच्छा से घूमती थी उस को किसी ने अङ्गीकार नहीं किया (वृद्ध अवस्था को कोई नहीं चाहता है) ॥ १९ ॥

अपने दुर्भग होने से लोक में दुर्भगा करके विख्यात है जिसने पुरु राजा के वरणे से उसको वरदान दिया (अर्थ दोनों पक्ष मे एक ही है) ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका

सा अथ बृहद्व्रतं नैष्ठिकम् ॥ २१ ॥

प्रत्याख्यातवति मयि संरभ्य कोपं कृत्वा नैकत्र स्थातुमर्हसीति शापमदात् ॥ २२ ॥

ततो विहतसङ्कल्पा कन्यका यवनेश्वरम् ।
मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिम् ॥ २३ ॥
ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिम् ।
सङ्कल्पस्त्वयि भूतानां कृतः किल न रिष्यति ॥ २४ ॥
द्वाविमावनुशोचन्ति बालावसदवग्रहौ ।
यल्लोकशास्त्रोपनतं न राति न तदिच्छति ॥ २५ ॥
अथो भ[illegible] मां भद्र ! भजन्तीं मे दयां कुरु ।
एता[illegible] यदार्तननु कम्पते ॥ २६ ॥

श्रीधरस्वामिकृतभावा[illegible]

आधयो ऽयाधयश्च यवनास्तेषामी[illegible] ॥ २३ ॥

हेवीर ! त्वामीप्सितं पतिं वृणे[illegible] ॥ २४ ॥

लोकतो वेदतश्च यद्देयत्वेन [illegible] तथाच्य-मानं यो न ददाति यश्च दी[illegible] न गृह्णाति इमौ द्वौ कर्मभूतावनुशोचन्ति सन्[illegible]

पुरुषेण कर्तव्यो [illegible] ॥

श्रीमद्वीरराघ[illegible]चन्द्रिका ।

कदाचित्सा कालकन्या भूमौ [illegible] पर्यटन्ती ब्रह्मलोकात्सत्य-लोकान्महीं भूमिं गता मार्गे मां बृहद्व्रतं नैष्ठिकं आनत्यपि काममोहिता सती वव्रे ॥ २१ ॥

प्रत्याख्याता मया सा तु कालकन्या विशाम्पते! ततो मया प्रत्या-ख्याता मयि संरभ्य क्रोधं कृत्वा विपुलं महान्तं दुःसहं दुरतिक्रमणीयं शापमदात् शापमेवाह । हेमुने ! त्वं यतो मया-ऽऽभिमुखस्ततः एकत्र चिरेण स्थातुं नार्हसीति ॥ २२ ॥

ततो विहतसंकल्पा भ्रष्टमनोरथा कालकन्यका आधयो ऽयाध-यश्च यवनाः तत्कृत्पीडाकारित्वात्तेषामीश्वरं मया उपादिष्टं नाम्ना भयं भयनामानं पतिमासाद्य वव्रे ॥ २३ ॥

वरणप्रकारमेवाह । ऋषभमिति । हेवीर ! यवनानामृषभमीश्वरं त्वामीप्सितं वृणे त्वयि कृतो भूतानां संकल्पः न रिष्यति न नश्यति ॥ २४ ॥

त्वयाहं न प्रत्याख्येया इत्याह । द्वाविति । लोकतो वेदतश्च यद्दे-यत्वेन ग्राह्यत्वेन स्वेनोपनतं प्राप्तं तथाच्यमानाय यो न ददाति यश्च दीयमानं यो नेच्छति न गृह्णातीमौ द्वौ असदवग्रहावस-दर्थः अवग्रहोऽभिमानः आग्रहो वा ययोस्तावत एव बालावज्ञौ कर्मभूतावनुशोचन्ति इमौ प्रत्यनुशोचन्ति सन्त इत्यर्थः ॥ २५ ॥

हेभद्र ! भजन्तीं मां भजस्व मयि दयां कुरु पौरुषः पुरुषेण कर्तव्यो धर्मः एतावानेव किं तद्यदार्तानुकम्पते ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तु शब्दोऽप्यर्थे या मां बृहद्व्रतं ब्रह्मचारिणं आनत्यापि ब्रह्म-लोकाद् महीमागतं वव्र इत्यन्वयः तत्र हेतुः काममोहितेति ॥ २१ ॥

ततः किमभूदिति तत्राह । मयीति ॥ २२ ॥

सा कन्या यवनेश्वरं नाम्ना व्याधीनां स्वामिनं नाम्ना भयं मृत्युं पतिं वव्र इत्यन्वयः ॥ २३ ॥

न रिष्यति न नश्यति ॥ २४ ॥

असदवग्रह आग्रहो ययोस्तौ तथा बालौ स्वकार्याज्ञौ । अनु-शोचन्ति सर्वं इति शेषः कौ तौ यौ लोकशास्त्रयोरविरोधतयो-पनतं प्रासमर्थिभ्यो न राति न ददाति दायं स्त्रीयं नेच्छति ताविति शेषः अन्वयेन लोकविहितं वेदशास्त्रीयमपि न कर्तव्य-मित्यायातं समस्वेन सहोक्तेन"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्य-व्यवस्थितौ"इत्यादिविधानं व्यर्थमितीयं शङ्का ।

अलौकिकं च शास्त्रीयं कर्तव्यं लौकिकं कुतः ।
लोकार्थं शास्त्रहा याति निरयं त्वितरः सुरान् ।

इत्यनेन परिहर्तव्या तस्माच्छास्त्रानुसारि लौकिकं कर्तव्यं नेतर-दिति तात्पर्यमितरः शास्त्रानुकूललौकिकं कुर्वाणः सुरान् याति स्वर्गादिपुरुषार्थमाप्नोतीत्यर्थः ॥ २५ ॥

उपसंहरति । अथो इति । यस्मादिदं शास्त्रीयमथो तस्मात् संक्षिप्य स्वकार्यस्य कर्तव्यतामाह । एतावानिति । पौरुषः पुरुषनिष्ठः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यतो भूतानामन्यैरपि भूतैस्त्वयि कृतः सङ्कल्पो मनोरथो न रिष्यति नष्टुं नार्हति । मम तु त्वदेकपरायणायाः सुतरां नार्ह-तीत्यर्थः ॥ २४—२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

महीं गतामिति प्राकृतमनुष्यस्त्रीत्वेनेत्यर्थः । बृहद्व्रतं नैष्ठिकं ब्रह्मचारिणं संन्यासिनं वा महाप्रभाववन्तं वा साक्षात्कमपि न त्यज-तीत्यर्थः ॥ २१ ॥

मयि प्रत्याख्यातवति संरभ्य क्रोधं कृत्वा पक्षे महेशस्य कर्मादिरूपत्वाभावात् वहिर्मिराहित्येन तस्याः प्रवेशासामर्थ्य-मेव मत्प्रत्याख्यानत्वेन कृपालुत्वेन सर्वत्र मम गमनमेव तस्याः शापफलत्वेनोत्प्रेक्षितमिदं ज्ञेयम् ॥ २२

मयोपदिष्टमिति लोकानां भयमेव अत्वा श्रीघ्र भवत्विति स्वस्य दयालुत्वं सूचितम् ॥ २३ ॥

कालकन्योदितवचो निशम्य यवनेश्वरः ।
विकीर्षुर्देवगुह्यं स सस्मितं तामभाषत ॥ २७ ॥
मया निरूपितस्तुभ्यं पतिरात्मसमाधिना ।
नाभिनन्दति लोकोऽयं त्वामभद्रामसंमताम् ॥ २८ ॥
त्वमव्यक्तगतिर्भुङ्क्ष्व लोकं कर्मविनिर्मितम् ।
याहि मे पृतनायुक्ता प्रजानाशं [redacted] ॥ २९ ॥
प्रज्वारोऽयं मम भ्राता त्वं [redacted] भव ।
चराम्युभाभ्यां लोकेऽस्मिन् [redacted] कः ॥ ३० ॥
इति श्रीमद्भागवते महापुराणे [redacted]
हंस्यां संहितायां वैयासिक्यां पुर [redacted]
सप्तविंशोऽध्यायः ॥ २७ [redacted]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यवनानामाधिव्याधीनां न रिष्यति न नश्यति पक्षे भूतानां भगवद्भक्तानां सङ्कल्पो न रिष्यति लोकानां भयं जीर्णा भविष्यति नारदेन यः सङ्कल्पः कृतः सोऽन्यथा भवितुं नार्हतीति त्वं मे पतिर्भव यथा त्वामहं भुञ्जे भूतभावेन भगवद्भक्तोऽप्यु-च्यते यदुक्तं भूतानि भव्यानि जनार्दनस्येति ॥ २४ ॥

वाचावली सन्तोऽभूत्योऽपि लोकशास्त्रावलोपन्नमनुचितं वस्तु देयं न ददाति । अतो न गृह्णातीति तेन कन्याहं स्वयम्वरा अकस्मात्त्वद्गृहमागता गृहस्थेन त्वया ग्राह्येति भावः । पक्षे लोकेषु कृपालुना नारदेन यदभिलषितं भयं जीर्णा भविष्यति तल्लोकशास्त्रोचितमेवातस्त्वं मां गृहाणेत्यर्थः ॥ २५ ॥

पौरुषः पुरुषेण निर्वृत्तः । पक्षे स्ववशं प्रकाशयापि त्वया जरां न गृह्णामीति वक्तुमशक्यं नारदोक्तिवचारवामहं गिलन्ती संहरिष्याम्येवेति स्वगतं वदन्ती बाहिर्वक्रोक्त्या सोत्प्रासमाह । अथो इति ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

संरभ्य संकुप्य नैकत्र स्थातुमर्हसीति शापमदात् ॥ २१ ॥ २२ ॥

यवनानामाधीनां व्याधीनां चेश्वरं भयनामानं मृत्युं पतिम् वव्रे ॥ २३ ॥

भूतानां भूतेरस्मद्विधैः त्वयि कृतः सङ्कल्पः न रिष्यति व्यर्थो न भवति ॥ २४ ॥

लोकशास्त्राभ्यामुपनतं देयतया ग्राह्यतया प्राप्तम् तत्पात्रेण याच्यमानं यो न ददाति न ददाति चक्र तथा दीयमानं नेच्छति न स्वीकरोति इमौ द्वौ असदाग्रहौ दुराग्रहौ शोचन्ति दानादान-तत्त्वज्ञा इति शेषः ॥ २५ ॥

अथो अतः हे भद्र ! मां भजस्व मे मयि दयां कुरु पुरुषेण कृतः पौरुषो धर्मः एतावानेव यमेवाह । यद्दार्ताननुकम्पते इति ॥ २६ ॥

भाषाटीका ।

वह काल कन्या त्रिलोकी में विचरती हुई एक दिन ब्रह्म-लोकसे पृथिवीमें [redacted] राजर्षिको देखकर वरके वर्णी यद्यपि मैं ब्रह्मचारी [redacted] रहित होकर वरके वर्णी (ब्रह्मचारी आदिको [redacted]) ॥ २१ ॥

मेरे ऊपर वह कोप [redacted] कठोर शाप देती भई कहा कि मेरे याचना [redacted] से तुम एक ठिकाने नहीं रहने पाओगे (लोकोप[redacted] के अर्थ पर्यटन करना उत्तम है) ॥ २२ ॥

तब तो वह कन्या अपने मनोरथ के भङ्ग होने से हमारे उपदेश से भयनामक पतिको वरण करती हुई (जरा भयकन्या का पति मृत्यु है) ॥ २३ ॥

उससे बोली कि हे वीर ! यवनों के श्रेष्ठ आपको मैं वरण करती हूं तुमारे विषय में भूतों का किया हुआ सङ्कल्प निष्फल नहीं होता है (यहां कथा की शोभा मात्र है) ॥ २४ ॥

ये दोनों पुरुष सोचते हैं क्योंकि इन दोनों का दुराग्रह है जोकि लोक व्यवहार से प्राप्त वस्तु को लेने से नहीं लेता है और जो मागने से नहीं देता है (कथामात्र है) ॥ २५ ॥

इस हेतु से मैं तुमारा अनुवर्तन करती हूं हे भद्र ! आप मेरे ऊपर दया करो यदि एक मनुष्य का परम धर्म है जो कि दुखितों के ऊपर दया करता है [कथा मात्र है] २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

देवगुह्यं मरणम् । तद्धि प्राणिनां वैराग्यार्थमस्य देवैर्गो-प्यते ॥ २७ ॥

तुभ्यं तव आत्मसमाधिना ज्ञानदृष्ट्या याच्यमानोऽयं लोकस्त्वां नेच्छति ॥ २८ ॥

अतोऽव्यक्तगतिः कुतः प्राप्तेत्यलक्षितगतिः सती लोकमाक्रम्य भुंक्ष्व एवं सर्वोऽपि लोकस्तव पतिः स्यादित्यर्थः । नचैवं त्वया शङ्कनीयं प्रतिकूलां मां लोको हनिष्यतीति यस्मात्त्वमेव प्रजा-नाशं करिष्यसीत्याह । याहीति । या मदीया यवनपृतना तया युक्ता ॥ २९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च । प्रज्वार इति । मारको वैष्णवो ज्वरः माहेश्वरस्य त्वाध्यन्तः पातित्वात् भीमा घोराः सैनिका यस्य ॥ ३० ॥

इति श्रीभागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

कालकन्ययोदितं वचः श्रुत्वा स यवने[illegible] देव गुह्यं मरणं तांश्च प्राणिनां वैराग्यानु[illegible] मिच्छुः स्मितेन सहितं यथा तथा सम[illegible] ॥

तुभ्यं मया आत्मसमाधिना [illegible] त्यर्थः लोकरूपः पतिर्निरूपितो [illegible] आह । याच्यमानो लोकस्त्वामभद्रामसत्तम[illegible] ॥

अतोऽव्यक्तगतिः कुतः प्राप्[illegible] कर्मनिर्मितं लोकमाक्रम्य भुङ्क्ष्व एवं सर्वो[illegible] पतिः स्यादित्यर्थः । नचैवं त्वया प्रतिकूलीयं मां [illegible] लोको हनिष्यतीति यस्मात्त्वमेव लोकस्य नाशं क[illegible] । याहीति । या मदीया पृतना यवनानां सेना [illegible] ॥ २९ ॥

प्रज्वारो वैष्णवज्वरः त्वां [illegible]ति लोकं प्रतिप्रापयिष्यति अत्र प्रज्वार, इति मारको वैष्णवज्वरो विवक्षितः न माहेश्वरस्तस्य त्वाध्यन्तःपातित्वेन मारकत्वाभावात् प्रज्वारो मम भ्राता त्वं च मे भगिनी, स्वसा भव उभाभ्यां प्रज्वारकालकन्याभ्यां युवाभ्यां सहाहं भीमसैनिकः यवनसेनानायकः अव्यक्तगतिः सन् लोके चरामि अत्र कालस्य दुहिता काचिदित्यादिश्लोकद्वयेन जराया लोकविद्वेषविषयत्वमुक्तं कदाचिदटमानेत्यादिना श्लोकत्रयेण नारदस्य जराक्रान्तत्वमुक्तम् एतच्च नैष्ठिकसनकादीनामप्युपलक्षणं स्वस्य शापग्रस्तत्वकथनं तस्यावर्जनीयत्वाभिप्रायकं ततो विहतसङ्कल्पेत्यादिना जराविध्याधिप्रज्वारभयानां पूर्वस्योत्तरोत्तरहेतुत्वमन्योऽन्यसाहित्येन मरणहेतुत्वं चोक्तं जरादीनां परस्परमाषणादिकथनं तेषां मूर्तिमत्त्वाभिप्रायेण तदभिष्ठातृदेवताभिप्रायेण वा उपपन्नम् ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्मादुर्भगत्वमनपेक्ष्य तद्वचनस्यादरप्रकारमाह । कालकन्येति देवस्य विधातुर्गुह्यं रहस्यं वधमाणमर्थं सस्मितमभाषतेत्यन्वयः ॥ २७ ॥

अत्र मोक्षोपायमुपदिशति । नाभिनन्दतीति । अयं लोकोऽसम्मतां त्वां नाभिनन्दतीति यस्मात् ॥ २८ ॥

तस्मात्त्वमव्यक्तगतिर्लोकं भुंक्ष्व ॥ २९ ॥

वीरोऽयं मम भ्राता प्रज्वारः [illegible]: सोऽप्रजोऽनपत्यस्त्वां प्रयोक्ष्यति प्रहीष्यति [illegible]: भीमा भयङ्कराः सैनिकाः सेनापतयो यस्य स तथा सः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्वमित्यर्द्धकम् । याहीत्यर्द्धकम् । प्रजानाशमित्यत्र प्रज्वारस्त्वामिति चित्सुखः ॥ २९ ॥

प्रज्वारोऽयमित्यत्र अग्रजोऽयमिति चित्सुखः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

देवस्य परमेश्वरस्य गुह्यं रहस्यं संसारचक्रप्रवर्त्तनं चिकीर्षुः । सस्मितमिति त्वद्वचनमिदमप्रत्याख्येयमिति स्मितेन ज्ञापयन्नित्यर्थः ॥ २७ ॥

तुभ्यं त्वां भोजयितुमित्यर्थः । आत्मसमाधिना मनसोभावनया अयं भूर्लोकस्थो लोकः त्वां नेच्छति ॥ २८ ॥

अतस्त्वमव्यक्तगतिः कुतः प्राप्तेत्यलक्षितगतिः सती लोकमाक्रम्य बलात्कारेण सर्व्व एव लोकस्तव पतिः स्यादित्यर्थः । प्रतिकूलां मां लोको हनिष्यतीति विभेषि चेत् मत्पृतना यवनसेना तया युक्ता सती याहीति प्रजानां त्वया भुक्तानां नाशं त्वं प्रणेष्यसि करिष्यसि त्वां हन्तुं पुनः कः प्रभवेदिति भावः ॥ २९ ॥

प्रज्वार इति मारको वैष्णवज्वरः माहेश्वरस्यतु त्वाध्यन्तःपातित्वात् मम भगिनी कापि नास्तीति त्वमेव भगिनी भव ननु नारदोक्तमन्यथा भवितुं नार्हतीति त्वं मे पतिरेव भवेति सत्यम् । यवनम्लेच्छानामस्माकं भगिन्यपि भार्य्या स्यात्ततस्तव भ्राताप्यहं पतिस्तस्मान्नारदोक्तमपि प्रमाणीकरणीयं भगवद्भक्तानां निकटमहं यामि तेम्मामपि निर्भरं भुक्त्वा संहर । नारदं यथा पतिं नाकृथास्तथान्यमपि भगवद्भक्तं त्वमपि पतिं न कुरुष्व । अतएव मयोक्तं त्वमव्यक्तगतिर्भुङ्क्ष्व लोकं कर्मविनिर्मितमिति भक्तानां कर्मविनिर्मितत्वाभावात्ते तव पतयो न भवन्तीति तेषु तेष्वहमेव ते पतिरिति नारदोक्तमपि सुसङ्गतमभूदिति ३०

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थे सप्तविंशोऽयं सङ्गतः सङ्गतः सताम् ॥ २७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दीव्यति व्यवहरति पित्रादिरूपेणेति देवो जीवः स गुह्यः तादृशव्यवहारानर्हो भवति यस्मात्तन्मरणम् । चिकीर्षुः अनयैव प्राणिनां मरणं भवतु इतीच्छावान् ॥ २७ ॥

तुभ्यं तव अयं लोकस्त्वां नाभिनन्दति नेच्छति ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अतः प्रज्वारेणायं दुर्लभया गतिर्यस्या सा त्वं लोकं भुङ्क्ष्व। सर्वोऽपि कर्मनिर्मितो लोकस्त्वया भुज्यमानस्तव पतिरित्यर्थः ॥२९॥ प्रज्वारो मारको ज्वरः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तविंशाध्यायार्थप्रकाशः ॥ २७ ॥

भाषाटीका।

यवनेश्वर कालकन्या के कथन को श्रवण कर के देवताओं मे भी गुप्त कुछकार्य करने की इच्छा से मंद हासले उस कालकन्या से बोला (यहांगोप्य प्राणियोंका मरण है)॥ २७॥

मैंने अपने विचार से तेरे लिये एक पति निश्चे किया है जिससे कि यह लोक अमङ्गलरूप होने से कोई भी नहीं चाहता है ॥ २८ ॥

तिससे तू अपने स्वरूप को छिपा कर कर्म निर्मित जो लोक है तिस में आकर हमारे सेना के सहित उसको भोग कर सब प्रजाओं का नाश करेगी (जरा वस्था के शरीर में आने से रोगादिक सेना सहाय होता है तब मृत्यु होता है) ॥ २९ ॥

यह प्रज्वार नाम का हमारा भाई है तू हमारी बहन होजा तुम [illegible] के साथ में भयङ्कर सेना को लेकर छिपकर संसार मे [illegible] (जरा सहित ज्वर का संयोग होने से मृत्यु [illegible] ॥

[illegible]गवत चतुर्थस्कंध सत्ताइसवां अध्यायका [illegible]षानुवाद वल्लभाचार्य कृत [illegible] समाप्त ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे सप्तविंश[illegible] ॥ २७ ॥

॥ अष्टाविंशोऽध्यायः ॥

—:॰:—

॥ नारद उवाच ॥

सैनिका भयनाम्नो ये बर्हिष्मन्! दिष्टकारिणः ।
प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमाम् ॥ १ ॥
त एकदा तु रभसा पुरञ्जनपुरीं नृप ! ।
रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालिताम् ॥ २ ॥
कालकन्यापि बुभुजे पुरञ्जनपुरं बलात् ।
ययाभिभूतः पुरुषः सद्यो निःसारतामियात् ॥ ३ ॥
तयोपभुज्यमानां वै यवनाः सर्वतो दिशम् ॥
द्वार्भिः प्रविश्य सुभृशं प्रार्दयन् सकलां पुरीम् ॥ ४ ॥
तस्यां प्रपीडयमानायामभिमानी पुरञ्जनः ।
अवापोरुविधांस्तापान् कुटुम्बी ममताकुलः ॥ ५ ॥
कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः ।
नष्टप्रज्ञो हृतैश्वर्यो गन्धर्वयवनैर्बलात् ॥ ६ ॥
विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् ।
पुत्रान् पौत्रानुगामात्यान् जायां च गतसौहृदाम् ॥ ७ ॥
आत्मानं कन्यया ग्रस्तं पञ्चालानरिदूषितान् ।
दुरन्तचिन्तामापन्नो न लेभे तत्प्रतिक्रियाम् ॥ ८ ॥
कामानभिलषन् दीनो यातयामांश्च कन्यया ।
विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन् ॥ ९ ॥
गन्धर्वयवनाक्रान्तां कालकन्योपमर्दिताम् ।
हातुं प्रचक्रमे राजा तां पुरीमनिकामतः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टाविंशे तु वैदर्भ्याख्यानेन स्त्रीविचिन्तया ।
स्त्रीत्वं प्राप्तस्य दैवेन कदाचिन्मुक्तिरुच्यते ॥ १ ॥

इदानीं तु पुरञ्जनस्य पुंदेहत्यागपूर्वकं स्त्रीत्वप्रकारमाह । सैनिका इत्यादि । राजसिंहस्य वेश्मनीत्यन्तेन दिष्टं दैवं कुर्वन्त्यधिकुर्वन्तीति तथा मृत्योरादेशकारिण इति वा ॥ १ ॥

जरत्पन्नगेन जीर्णप्राणेन पालिताम् ॥ २ ॥ ३ ॥

द्वार्भिश्चक्षुरादिभिः रोगरूपेण प्रविश्य ॥ ४ ॥ ५ ॥

कन्यया जरयोपगूढः संस्तत्प्रतिक्रियां न लेभे इति तृतीयेनान्वयः । हृतैश्वर्यं उत्थानादिष्वशक्तः ॥ ६ ॥

प्रतिकूलाननपेक्षितविषयप्रापणान् अनादृतानादरमकुर्वाणान् स्वाधीनत्वाभावात् अनुगा इन्द्रियाणि अमात्या इन्द्रियदेवाः गतसौहृदामध्यवसायाभावात् ॥ ७ ॥

कन्यया जरया ग्रस्तम् पञ्चालान् विषयान् अरिभिर्व्याध्यादिभिर्दूषितान् ॥ ८ ॥

कालकन्यया हेतुभूतया यातयामान्निःसारानपि कामानभिलषन् विगता आत्मनो गतिः पारलौकिकी ऐहिकः पुत्रादि-

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्नेहश्च यस्य सः गतिस्नेहादिति वा पाठः स राजा पुरञ्जनो हातुं प्रक्रमे उपक्रान्तवानिति द्वयोरन्वयः ॥ ९ ॥

अनिकामतोऽनिच्छयापि ॥ १० ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं जरादीनामुत्तरोत्तरदेहेतुत्वं संभूय मृतिहेतुत्वं चाभिधायेदानीमेते सर्वे पुरञ्जनपुरीमाविश्य पीडयन्तो विप्लावयामासुरिति वदन् ।

यं यं वापि स्मरन् भावं त्यजत्यन्ते कले वरम् ।

तं तमेवैति कौन्तेय ! सदा तद्भावभावित

इत्युक्तरीत्या कथापक्षे पुरञ्जनस्य राज्ञः स्त्रीचिन्तया अन्यप्राप्तिकथनव्याजेनाध्यात्मपक्षेऽपि जीवस्य कर्मवशात् स्त्रीप्राप्तिं तत्र पुनरदृष्टविशेषाद्भागवतसङ्गतिमीश्वरप्रसादं चाह । सप्तविंशेन नारदः । हे बर्हिष्मन् ! भयनाम्नो ये सैनिकाः सेनायां भवाः सैनिकाः विष्टकारिणः आदेशकारिणः ईश्वरस्येति शेषः प्रज्वारकालकन्याभ्यां सहेमां भूमिं विचेरुः पर्यटुः ॥ १ ॥

ते सैनिकाः कदाचिद्देहारम्भकमाहाभ्यामसाते अरण्यकमीव जीर्णप्रायेण पालितां भौमैर्भूम्यां सर्वभोगैः शब्दादिविषयभोगैराढ्यां पुरञ्जनपुरीं रुरुधुः ॥ २ ॥

कालकन्या जरापि पुरञ्जनपुरीं बलाद्भुङ्क्ते पुरञ्जनपुरं जराद्याध्यादिग्रस्तमभूदित्यर्थः कालकन्यां विशिनष्टि । यया कालकन्यया ऽभिभूतः पुरुषः निस्सारतां प्राप्नुयात् ॥ ३ ॥

तया कालकन्ययोपभुज्यमानां सकलां पुरञ्जनपुरीं यवनाः सर्वतो दिग्भ्यः द्वार्भिः प्रविश्य चक्षुरादिषु रोगरूपेण प्रविश्य भृशमधिकं प्रार्दयन् पीडितवन्तः ॥ ४ ॥

तस्यां पुर्यां यवनादिभिः प्रपीड्यमानायां ममेयं पुरीत्यभिमानी पुरञ्जनः कुटुम्बे बुद्धीन्द्रियमन आदिरूपेण या ममता तया आकुलः आक्षिप्तचित्तः बहुविधान् तापान् क्लेशान् प्राप ॥ ५ ॥

कन्यया बुद्धयोपगूढः दृढतरं संश्लिष्टः विषयेष्वेवात्मा चित्तं यस्य अतः कृपणः अत एव नष्टप्रज्ञः नष्टविवेकः नष्टश्रीर्बाध्यात्मिका यस्य यवनैर्बलात् हृतमैश्वर्यमुत्थानादिशक्तिरूपं यस्य सः तत्प्रतिक्रियां न लेभे इति तृतीयेनान्वयः ॥ ६ ॥

विशीर्णां शिथिलां स्वपुरं तथा प्रतिकूलाननपेक्षितविषयप्राणाननादृतानादरमकुर्वाणान् स्वाधीनत्वाभावात्पुत्रानिन्द्रियपरिणामरूपान् पुत्रपौत्रान् पुण्यापुण्यकर्मरूपान् तदनुगामीन्द्रियाद्यमात्यादिन्द्रियदेवताः गतं सौहृदं स्नेहो यस्यास्तां जायां तस्या अपि स्वाधीनत्वाभावात् ॥ ७ ॥

कन्यया जरया ग्रस्तमात्मानं शरीरमरिभिर्विप्रादिभिर्दूषितान् पाञ्चालान् विषयांश्च वीक्ष्य दृष्ट्वा अपारचिन्तामापन्नः तस्य पुरादिविशीर्णत्वादेः प्रतिक्रियां प्रतिकारं परिहारोपायं न लेभे ॥ ८ ॥

कालकन्यया हेतुभूतया यातयामान्निःसारानपि कामानभिलपन् दीनः कृपणः विगता आत्मनो गतिः पारलौकिकी ऐहिकः पुत्रादिस्नेहश्च यस्य पुत्रदारान् इन्द्रियपरिणामभूतकार्याश्रयमुपलालयन् ॥ ९ ॥

गन्धर्वरिहोरात्रकालैर्यवनैरोगाद्याधिभिश्चाक्रान्तां कालकन्यया ऽभ्यर्दितां पीडितां पुरीमकामतः अनिच्छयापि राजा पुरञ्जनो हातुं त्यक्तुं प्रचक्रमे उपक्रान्तवान् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ईश्वरेच्छोपनतकर्मवशाच्छरीरमनुविश्य स्थितस्य जीवस्य जाग्रदाद्यवस्थामेवं प्रतिपाद्याधुना शरीरवियोगलक्षणामवस्थां वक्तुमुपक्रमते । सैनिका इत्यादिना । बालादिदृष्याधिसमूहा इमाम [redacted] न जराद्विव्याश्रयोऽस्मिन् प्रपञ्च एवं गम्यतेति

[redacted] ानवसानवयया रुरुधुः शरीरं विविशुः

जरा [redacted] शेषालपरवं लक्ष्यते न तु प्राप्तस्य तस्य

निस्सा [redacted]

कन्या [redacted] ानन्तरं विवेश ॥ ३ ॥

प्रार्दयन् [redacted] क्षितस्याक्षिमान्द्यं बधिरत्वं दन्तभङ्गं [redacted] ठे घुरुघुरुत्वमित्यादिमानाव्याधयो [redacted]

पुत्रान् गोत्र [redacted] याणि अमात्यानमा सह वर्तनीया अमात्या [redacted] वास्तांश्च । अत सातत्यगमन इति धातोः । [redacted] पायो नास्तीति गतसौहृदाम् ॥ ७ ॥

कन्यया जरया [redacted] भिर्विषयानरिदूषितान् विप्रप्रतिद्वयान् ॥ ८ ॥

यातयामान् गतयामान् गतात्मसंविषयपरमात्मज्ञानः अत एव निःस्नेहः परमात्मनि भक्तिरहितो विरुद्धस्नेहो वा ॥ ९ ॥

अविकामतोऽनिच्छतः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कन्येति त्रिकम् ॥ १—६ ॥ ७—८ ॥

कामानिति युग्मकम् । गतीत्यत्र सुखीति चित्सुखः । अनिकामत इत्यस्य अनिच्छयापीति चित्सुखव्याख्या च ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्यक्त्वा शीर्णां पुरीं स्त्रीत्वं प्राप्तः सत्सङ्गतो हरौ ।

भक्त्या पुरञ्जनः प्राप तमष्टाविंशके स्फुटम् ॥ ० ॥

इदानीं जीवस्य स्थूलशरीरपरित्यागप्रकारमाह । सैनिका इत्यादिना । पुरीं विहायापगत इत्यन्तेन सैनिका भृत्याः विष्टकारिणः दुरदृष्टफलोत्पादकाः ॥ १ ॥

अरण्यभवेन जीर्णप्रायेण पालिताम् ॥ २ ॥

द्वार्भिश्चक्षुरादिभिः । अभिमानीति पुर्यामभिमानवत्त्वादेव ॥ ३ ॥ ४ ॥

विशीर्णां विशीर्यमाणां प्रतिकूलान् शोकादीन् अनादृतान् आदरमकुर्वाणान् सर्वथा निर्भिषितुमुपक्रान्तानित्यर्थः

भयनाम्नोऽग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः ।
ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ॥ ११ ॥
तस्यां सन्दह्यमानायां सपौरः सपरिच्छदः ।
कौटुम्बिकः कुटुम्बिन्या उपातप्यत सान्वयः ॥ १२ ॥
यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया ।
पुर्यां प्रज्वारसंसृष्टः पुरपालोऽन्वतप्यत ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पुत्रान् विवेकादीन् पौत्रान् धैर्यगाम्भीर्य[illegible] इन्द्रियाणि अमात्यान् मन आद्यधिष्ठातृ[illegible] कारात् गतसौहृदान् स्वस्वकृत्यादि सम्यग[illegible] भार्यां बुद्धिञ्च गतसौहृदामध्यवसायादिरहिताम् । [illegible] पाञ्चालान् शब्दादीन् अरिभिः रोगादिभिः [illegible] प्रतिक्रियां मन्त्रौषधादिभिरपि कृतेन क्षेमे ॥ ५ ॥ [illegible] ८ ॥

कामानभीष्टभोजनादीन् [illegible] जृम्भमाण्यादिहेती-रित्यर्थः विगता आत्मनो गतिः [illegible] पुत्रादि-स्नेहश्च यस्य सः स्नेहादिति च [illegible] । अनिकामतः अनि-च्छयापि ॥ ९ ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बुद्धिविमोहितस्य जीवस्य अन्तकाले जरादिनिमित्तकदेह-त्यागपूर्वकं "यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् तं तमेवैति कौन्तेय ! सदा तद्भावभावित" इति श्रीमुखोक्तप्रकारेण स्मरणानुरूप-देहान्तरलाभं गुर्वनुग्रहलब्धभगवज्ज्ञानभक्त्यादिसाधनसंपत्त्या मुक्तिं च वर्णयति । सैनिकत्यष्टाविंशत्याध्यायेन भयनाम्नः सैनिका आधयो व्याधयः दिष्टकारिणः प्राक्कर्मफलसाधकाः परमेश्वराज्ञाकारिणः प्रज्वारकालकन्याभ्यां सहेमामवनिं विचेरुः ॥ १ ॥

जरत्पन्नगो, जीर्णप्राणस्तेन ॥ २ ॥ ३ ॥

द्वार्भिरिन्द्रियच्छिद्रैः ॥ ४ ॥ ५ ॥

कन्योपगूढो जराभिभूतः गन्धर्वैरहोरात्रैः यवनैराधिभिश्च हृतैश्वर्योऽतश्चेष्टस्तत्प्रतिक्रियां न लेभे इतितृतीयेन सम्बन्धः ॥ ६ ॥

अनुगा इन्द्रियाणि अमात्यास्तदधिष्ठातृदेवाः तान् गतसौ-हृदामध्यवसायशून्याम् ॥ ७ ॥

पाञ्चालान् विषयान् अरिभिः अहोरात्राधिव्याधिरूपैः ॥ ८ ॥

कन्यया जरया यातयामान् गतसारानपि अभिलषन् पुरीम-निकामतः अनिच्छन्नपि हातुं प्रचक्रमे इति द्वयोरन्वयः ननु जी-वात्मनः अनात्मभूतदेहेन्द्रियबुद्ध्यादिसङ्क्रमात्कथं भूतदुःखावाप्तौ किंकारणमित्यत आह । विगतात्मगतिस्नेह इति । विगत आत्मगति-स्नेहः आत्मनो जीवस्य गतिर्भगवत्पादपद्मं तद्विषयकोऽनुरागः यस्मात्सः ॥ ९ ॥ १० ॥

भाषाटीका ।

नारदजी बोले हे बर्हिष्मन् ! भय नामा के आज्ञा करने वाले जो सैनिक सो प्रज्वार काल कन्या के सहित इस पृथिवी मे घूमने लगे ॥ १ ॥

हे नृप ! वह सब एक दिन बडे वेग से जाकर पृथिवी मे भयमे युक्त वृद्ध नाग से पालित पुरंजन की पुरी को घेरते भये (जरा-दिक दुर्बल शरीर को घेर लेते हैं) ॥ २ ॥

काल कन्या ने भी उस पुरंजन पुर को बलात्कार से भोग किया जिसके बस होने से पुरुष शीघ्रही निर्बल हो जाता है ॥ ३ ॥

उसके भोगते हुई उस पुरी को देख कर यवनों ने चारों तरफ से द्वारों में से प्रवेश होकर भंजन किया (शरीर वृद्ध होने से रोग होते हैं) ॥ ४ ॥

उस पुरी के पीडित होने से उसका अभिमानी पुरंजन कुटुम्बी होने से ममता से आकुल होकर नाना प्रकार के सन्तापन कूं प्राप्त हुआ (जीवदेह के अध्याससे दुखी होता है) ॥ ५ ॥

कन्या से आलिङ्गित होने से गत श्री दीन विषयासक्त नष्ट बुद्धि हो गया तब यवनों ने उस के ऐश्वर्य को नष्ट कर दिया ॥ ६ ॥

पुरंजन ने देखा कि अपनी पुरी टूटगईहै पुत्र पौत्र भृत्य मन्त्री सब प्रतिकूलहैं आदर नहीं करते हैं भार्या स्नेह नहीं करती है ॥ ७ ॥

आत्मा को कन्या ने प्राप्त करालियाहै पंचाल देशों को शत्रुओं ने घेरालियाहै तब राजा को बडी चिन्ता भई उस-का उपाय कुछभी नहीं देखा (शरीर वृद्धावस्था युक्त होनेसे अनेक दुःख होते हैं) ॥ ८ ॥

बडा दुखित होकर काम कन्या के बस होकर हीन भो-गनकी चाहना करने लगा आत्माके स्नेहको छोड कर स्त्री पुत्रनका स्नेहकरने लगा ॥ ९ ॥

गंधर्व गणोंसे आक्रान्त और काल कन्यासे मर्दित उस पुरीकूं इच्छा नही रहने पर राजाने छोडने का विचार किया [शरीर दुखित होने से छोडनेकी इच्छा होती है] ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स परिच्छदो भृत्यवर्गसहितः । कुटुम्बेन दीव्यतीति कौटु-

न शेके सोऽवितुं तत्र पुरुकृच्छ्रोरुवेपथुः ।
गन्तुमैच्छत्ततो वृक्षकोटरादिव सानलात् ॥ १४ ॥
शिथिलावयवो यर्हि गन्धर्वैर्हृतपौरुषः ।
यवनैररिभी राजन्नुपरुद्धो रुरोद ह ॥ १५ ॥
दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान् ।
स्वत्वावशिष्टं यत्किञ्चिद्गृहकोश [redacted] ॥ १६ ॥
अहं ममेति स्वीकृत्य गृहे [redacted]
दध्यौ प्रमदया दीनो विप्रयो [redacted] १७ ॥
लोकान्तरं गतवति मय्यनाथा [redacted]
वर्तिष्यते कथं त्वेषा बालकाननु [redacted]
न मय्यनाशिते भुङ्क्ते नास्नाते स्ना [redacted]
मयि रुष्टे सुसन्त्रस्ता भर्त्सिते यतवाग् [redacted]
प्रबोधयति माऽविज्ञं व्युषिते शोककर्शिता [redacted]
वर्त्मैतद्गृहमेधीयं वीरसूरपि नेष्यति ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

म्बिकः कुटुम्बिन्या स्वामिन्याऽत्र विवक्षितः । सान्वयः पुत्रादिसहितः॥ १२ ॥

यवनैरुपरुद्धान्यायतनानि यस्य स पुरपालः ॥ १३ ॥

पुरु बहु कृच्छ्रं तेन उरुर्वेपथुर्यस्य वृक्षकोटरादिव सर्पः॥ १४ ॥

कण्ठे उपरुद्धो रुरोद घुरघुरध्वनिं चकार ॥ १५ ॥

दुहित्रादीन्दध्यावित्युत्तरेणान्वयः । जामयोऽत्र स्नुषाः स्वत्वमात्रेणावशिष्टम् । भोगस्तु प्रागेव क्षीणः ॥ १६ ॥ १७ ॥

ध्यानमेवाह । लोकान्तरमिति ॥ १८ ॥

अनाशितेऽभोजिते भर्त्सिते भर्त्सने कृते यतवाग्भवति ॥ १९ ॥

अविज्ञमविवेकिनं माम् । व्युषिते देशान्तरं गते गृहमेधीयं वर्त्म गृहधर्ममपि किं नेष्यत्यनुवर्तयिष्यति । युक्तमेतत् यतो वीरसूः पुत्रवती । किं वा मद्विरहमसहमाना मरिष्यत्येवेत्यर्थः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भयनाम्नो योऽप्रजो भ्राता प्रज्वारः स उपस्थितः पुरञ्जनपुरीमधिष्ठितः भ्रातुर्भयनाम्नः प्रियं कर्तुमिच्छया कृत्स्नां तां पुरीं ददाह प्रज्वाराख्यो विष्णुज्वरः शरीरं प्रविश्य भृशं तेप इत्यर्थः ॥ ११ ॥

तस्यां पुर्यां नितरां प्रज्वारेण तप्यमानायां भार्यासहितः भृत्यवर्गसहितश्च कुटुम्बेन सह दीव्यतीति कौटुम्बिकः कुटुम्बिन्या सह महिष्या सह सान्वयः पुत्रादिसहितः उपातप्यत ॥ १२ ॥

कालकन्यया पुर्यां ग्रस्तायां सत्यां यवनैरुपरुद्धान्यायतनानि यस्य सः पुरपालः प्रजागरः प्रज्वारेण संस्पृष्टः अन्वतप्यत स पुरपालः प्राणः ॥ १३ ॥

पुरु बहु कृच्छ्रं दुःखं तेन उरुर्वेपथुर्यस्य पुरि इति पाठे पुर्यां मुषितुमवस्थातुं न शशाक नाशक्नोत् किन्तु ततः पुर्यामग्निसहिताद्वृक्षकोटरात्सर्प इव गन्तुमैच्छत् ॥ १४ ॥

यदा गन्धर्वैः शिथिलाः अवयवा यस्य हृतं पौरुषं सामर्थ्यं यस्य तदायं हे राजन्! यवनैरुपरुद्धः रुरोद व्याध्यादिभिर्निरुद्धमर्मः घर्घरध्वनिं चकारेत्यर्थः ॥ १५ ॥

दुहित्रादीन् दध्यौ ध्यातवानित्युत्तरेणान्वयः दुहितॄरिति देहानुबन्धिचिन्ताभिप्रायकं जामयोऽत्र स्नुषाः तांश्च जामातरः दुहितॄणां पतयः पार्षदा भृत्याश्चेति द्वन्द्वः तान् स्वत्वमात्रेणावशिष्टं भोगस्तु प्रागेव क्षीणः यत्किञ्चिद्गृहादिरूपं वस्तु ॥१६॥

तथाहं ममाभिमानविषयं कृत्वा गृहेषु दारेषु कुमतिः कुत्सिता मतिर्यस्य आसक्तबुद्धिर्गृही पुरञ्जनः प्रमदया सह विप्रयोगे वियोगे उपस्थिते प्रतीते सति दध्यौ दुःखात्मिकां प्रमदां विहाय गमिष्यामि उत सहैवेति चिन्तामकरोदित्यर्थः ॥ १७ ॥

ध्यानमेवाह । मयि लोकान्तरं प्रति गतवति सति इयमनाथा कुटुम्बिनी बालकान् प्रत्यनुशोचन्ती कथं वर्तिष्यते मय्यनाशितेऽभोजिते न भुङ्क्ते एवमुत्तरत्रापि भर्त्सिते भर्त्सने कृते भयाद्यतवाक् नियता वाग्यस्याः सा मौनं बिभर्तीत्यर्थः ॥ १८ ॥

अविज्ञमविवेकिनं मां प्रबोधयति विबोधयति व्युषिते देशान्तरङ्गते शोकेन कर्शिता गृहमेधीयं वर्त्म तत् गृहस्थधर्मं किं नेष्यत्यनुवर्तिष्यते युक्तमेतद्यतो वीरसूः पुत्रवती । किं वा मद्विरहमसहमाना मरिष्यति ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दारकाः पुत्राः दारिका दुहितरश्च अपरायणाः न विद्यते परमयनमाश्रयो येषां ते अपरायणाः मयि गते सति कथं नु वर्त्तिष्यन्ते भिन्ना नौर्येषां ते पुरुषाः उदधौ समुद्रे इवेति अत्र लोकान्तरं गतवतीत्यनेन सर्वेन्द्रियपरिणामहेतुभूता जीवैकायत्ता बुद्धिर्लोकान्तरं गच्छता जीवेन सह गच्छति उतनेत्याशङ्क्योत्थापिता धर्मैतद्गृहमेधीयमित्यर्थेन सहैव गच्छतीत्युक्तं तथा कथं दारका इत्यनेन परिणामपरिणामितदनन्तबुद्धिवृत्तिकारणानीन्द्रियाण्यपि किंसहैव गच्छन्तीति उत नेति संशय्य सहैव गच्छन्तीत्युक्तं भवति । एतदेव कथासौन्दर्याय परोक्षमिति [illegible] गीतं भगवता ।

मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ।
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ [illegible]

बुद्धेर्मनोवृत्तिविशेषमात्रत्वेन [illegible] [illegible] बुद्धेरपि गमनं गीतं भवति इति गम्यते ॥ [illegible] ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रज्वारः पुरीं ददाहेति शरीरे च ज्वरः प्रवृत्त इत्यर्थः भ्रातुर्मृत्युरात्मनो हितकरो [illegible] ॥ ११ ॥ १२ ॥

यवनैर्याधिभिरुपरुद्धमावतनं यस्मै शरीरनाडीबन्धनं यस्य स तथा पुरपालः प्राणः अनुतापो जीवस्तेषां प्रेक्ष्य ॥ १३ ॥

सामन्तादग्निवृतात् गृहविवरादिव ॥ १४ ॥ १५ ॥

अधुना कामिनां मरणाऽवस्थां दर्शयति । दुहितृरिति । अत्र प्रवृत्तिमन्तरेण बालादुहित्रादयोऽपि प्रहातुं शक्यन्ते ॥ १६ ॥

स्त्रियोगे मरणलक्षणो प्रमदया बुद्धया अन्यया च ॥ १७ ॥

लोकान्तरं गतवतीत्यादि कथाबङ्कारः ॥ १८ ॥

अनाशिते अभुक्ते भर्त्सिते भर्त्सने कृते वैतवाक् तूष्णीं भावमाश्रिता ॥ १९ ॥

व्युषितेऽन्यत्र स्थितेनेष्यत्यनुवर्तयिष्यति किम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दुहितृरिति युग्मकम् । अहं ममेतिस्वीकृत्येति काचित् ॥ १६—१९ ॥

मा विज्ञमित्यत्र मां विज्ञमिति चित्सुखः ॥ २०—२९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रज्वारो विष्णुज्वरः ॥ ॥ ११ ॥

स पौरः सप्तधातुसहितः सपरिच्छदः सर्वेन्द्रियभृत्यवर्गसहितः कुटुम्बेन दीव्यतीति कौटुम्बिकः कुटुम्बिन्या बुद्धया सह सन्ध्यभाव आर्त्तः सान्वयः पुत्रपौत्रादियुक्तः ॥ १२ ॥

पुरपालः प्रजागरः प्राणः ॥ १३ ॥

स पुरपालः अधितुं दहितुं वृक्षकोटरादिव सर्पः ॥ १४ ॥

सरोद आसन्नमृत्युर्घुरघुरध्वनिं चकार ॥ १५ ॥

ग्रामयोऽत्र इन्द्रियाः । प्रमदया स्त्रिया सह विप्रयोगे उपस्थित इति जीवस्य स्थूलशरीरभङ्गे बुद्ध्या वियोगाभावात् प्रमदेयं न पुरञ्जनी किन्तु संसारिणो जीवस्य सर्वेन्द्रियभोग्या ममतास्पदीभूता व्यावहारिक्येव भार्य्या व्याख्येया दुहित्रादयोऽप्यत्र तत्सम्बन्धिन्यो मनःकल्पनामयाश्चैव व्याख्येयाः मरणकाले च जीवस्य स्त्रीपुत्रादीनामेव स्मरणं सम्भवति न तु बुद्धिविवेकादीनामिति कश्चिदाहुः । अन्येतु धर्म्मवती बुद्धिरेव पुरञ्जनीत्वेन पूर्वं प्रस्तुतेत्यतो मृत्युसमये धर्म्मबुद्धया विच्छेदो बुद्ध्यन्तरेण संयोगः न मय्यनाशिते भुङ्क्ते इत्यादिकं तु सहाविच्छेदात् पूर्वमेव यदुक्तं तदेवाग्रे वक्ष्यते तच्च ममाधुनापि धर्म्माचरणे तृप्तिर्न जाता किं करोमि मरणमुपस्थितमित्येतस्यैवार्थस्योत्प्रेक्षया विवरणं ज्ञेयमित्याचक्षते ॥ १६-१७-१८ ॥

अनाशिते अभोजिते भर्त्सिते भर्त्सनं कृतवति ॥ १९ ॥

मामविज्ञं व्युषिते प्रवासं गते सति । अपि किं नेष्यति अनुवर्त्तयिष्यति युक्तमेतत् यतो वीरसूः पुत्रवती किं वा मद्विरहमसहमाना मरिष्यत्येवेत्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ददाहातपत् ॥ ११ ॥

कुटुम्बिनी बुद्धिस्तया सह ॥ १२ ॥ १३ ॥

वृक्षकोटरात् पन्नग ॥ १४ ॥ १५ ॥

दुहित्रादीन् ध्यायिरित्यग्रिमेणान्वयः आमयः आमभार्याः स्वत्वमात्रेणावशिष्टं यथात् भोगस्तु प्रागेव क्षीणं ममत्वमात्रविषयमित्यर्थः ॥ १६ ॥

गृहेषु गृहादिषु अहं ममेति स्वीकृत्य दध्यौ ॥ १७ ॥

ध्यानमेवाह । लोकान्तरं गतवतीत्यादिना । अनेन कथापक्षेऽपि न केवलं पुर्याः भार्यायाश्च वियोगः किन्तु देहवियोगोऽपीति द्योत्यते ॥ १८ ॥

अनाशिते अभोजिते भर्त्सिते भर्त्सने कृते ॥ १९ ॥

मा मामविज्ञं प्रबोधयति मयि व्युषिते देशान्तरं गते गृहमेधीयमेतद्धर्मं मार्गं नेष्यति किमनुवर्तयिष्यति ॥ २० ॥

भाषाटीका ।

भय नाम वाले का बड़ा भाई प्रज्वार नाम का है उस ने आकर अपने भाई के प्रीति से सम्पूर्ण पुरी को जला दिया (ज्वर शरीर में दाह करता है) ॥ ११ ॥

उस पुरी के जलने से अपनी सामग्री तथा पुरवासियों के सहित कुटुम्बिनी के सहित पुत्रादिकों के सहित सन्ताप करने लगा (अर्थ तुल्य है) ॥ १२ ॥

यवन ने सब स्थान को जब रोक लिया कालकन्या ने जब ग्रास कर लिया प्रज्वारने भी आक्रमण कर लिया तब पुरवासी राजा सन्ताप करने लगा (रोगादि होने से पीड़ा होती है) ॥ १३ ॥

बड़े कष्ट होने से कांपने लगा रक्षा भी नहीं करने सका उहांसे जाने भी नहीं सका जैसे कि अग्निवाले वृक्ष को कोटर में ॥ १४ ॥

जब शरीर के अवयवशिथिल हो गये तो गंधर्वों ने पौरुष को हर लिया तब यवन शत्रुओं ने जब घेर लिया तब रोदन करने लगा (मरण से पहिले प्राण के कष्ट का कथन है ॥ १५ ॥

कथं नु दारका दीना दारकीर्वाऽपरायणाः ।
वर्तिष्यन्ते मयि गते भिन्ननाव इवोदधौ ॥ २१ ॥
एवं कृपणया बुद्ध्या शोचन्तमतदर्हणम् ।
ग्रहीतुं कृतधीरेनं भयनामाभ्यपद्यत ॥ २२ ॥
पशुवद्यवनैरेष नीयमानः स्वकं क्षयम् ।
अन्वद्रवन्ननुपथाः शोचन्तो [redacted]तुराः ॥ २३ ॥
पुरीं विहायोपगत उपरु[redacted] ।
यदा तमेवानुपुरी विश[redacted] ॥ २४ ॥
विकृष्यमाणः प्रसभं यवने[redacted]
नाविन्दत्तमसाविष्टः सखायं [redacted] ॥
तं यज्ञपशवोऽनेन संज्ञप्ता येऽदय[redacted]
कुठारैश्छिच्छिदुः क्रुद्धाः स्मरन्तो म[redacted] ॥
अनन्तपारे तमसि मग्नो नष्टस्मृतिः स[redacted]
शाश्वतीरनुभूयार्तिं प्रमदासङ्गदूषितः ॥ २७ [redacted]
तामेव मनसा गृह्णन् बभूव प्रमदोत्तमा ।
अनन्तरं विदर्भस्य राजसिंहस्य वेश्मनि ॥ २८ [redacted]
उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः ।
युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरञ्जयः ॥ २९ ॥
तस्यां स जनयाञ्चक्रे आत्मजामसितेक्षणाम् ।
यवीयसः सप्त सुतान् सप्तद्रविडभूभृतः ॥ ३० ॥

भाषाटीका ।

अपनी पुत्री पौत्र बहू जमाइ पार्षद और जो कुछ अवशिष्ट स्वत्व है घर खजाना इन पदार्थों में अहन्ता ममता को स्वीकार करके कुटम्बी गृहस्थ होने से दुखित होकर वियोग के समय मे स्त्री के सहित शोच करने लगा ॥ १६ ॥ १७ ॥

हम अब लोकान्तर को चले जांयं गे तब अनाथा हमारी कुटुंबिनी बालकों का सोच करती कैसे रहैगी ॥ १८ ॥

यह मेरे में तत्पर होकर मेरे न खाने से नहीं खाती है मेरे नहीं नहाने से नहीं नहाती है मेरे रोष होने से डरती है डराने से भय से चुप हो जाती है ॥ १९ ॥

मै भूलताहूं तब मेरेको समझाती है मै विदेश जाऊं तब शोचती है अब बीरोंकी माता होने परभी इस गृहस्थ धर्म को नहीं चला सकेगी [देह नाश होते समय मे दुखिको मोह होता है) ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न विद्यते परमयनमाश्रयो येषां तेऽपरायणाः पुत्राः कन्याश्च । यद्वा पराश्रयाः कन्याः भिन्ना नौर्येषाम् ॥ २१ ॥

अतदर्हणं वस्तुतस्तस्य अज्ञत्वात् ॥ २२ ॥

प्रकृतिमेव यदा स्वयं स्थानं नीयमानस्तदानुपथाः प्राणा इन्द्रियाणि च । तथाच श्रुतिः । तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति ॥ २३ ॥

प्रकृतिं महाभूतात्मताम् ॥ २४ ॥

नाविन्दत न सस्मार पुरः पूर्वं सखायं सन्तमीश्वरम् ॥ २५ ॥

अदयालुना काम्यकर्मसु ये संज्ञप्ता हताः । अमीवं पापं क्रौर्यं वा ॥ २६ ॥

शाश्वतीः समा आर्तिमनुभूय ॥ २७ ॥

अन्तकाले तां भार्यामेव मनसा गृह्णन्स्मरन्ननन्तरं विदर्भस्य वेश्मनि प्रमदोत्तमा बभूव । अतः पद्मन्सिमन् प्रकाण्डे पतान्येव प्रकृतेप्रपेपुणि विचित्रम । स्त्रीध्यानेन स्त्रीत्वप्राप्तावपि भक्तिमत-

श्रीधरस्वामिकृतभावार्थदीपिका

ध्यानेन पूर्वाख्येन च धार्मिकाद्विदर्भाज्जन्मासूत्। धार्मिकसङ्गेन च विशुद्धस्य भागवतेन मलयध्वजेन सङ्गोऽभूत्। ततो विष्णुभक्तिस्ततो वैराग्यं ततस्तमेव भर्तृरूपं गुरुं पातिव्रत्यधर्मेण भजतो भगवत्प्रसादलब्धज्ञानेन मोक्ष इति। अन्यत्तु कथालङ्कारमात्रं तथापि किञ्चिद्वृत्तिसामान्येनेह योजयिष्यामः। विदर्भस्य विशिष्टधर्मोपलक्षितस्य कर्मठस्य राजसिंहस्य धर्मेण हि प्रजापालनेन यज्ञादिना च शोभया राजन्ते तेषु श्रेष्ठस्य वेश्मनि ॥ २९ ॥

मलयोपलक्षिते दक्षिणदेशे ध्वज इव दर्शनीयः [illegible] श्रीविष्णुभक्तप्रधानो देशः तत्र मुख्यो महाभागवत [illegible] निश्चयबुद्धिस्तामर्हतीति पाण्ड्यः स उपयेमे [illegible] सङ्ग प्राप्त इत्यर्थः ॥ २९ ॥

आत्मजां श्रीकृष्णसे[illegible] [illegible] [illegible] भूदित्यर्थः असितस्य श्रीकृष्णस्येक्षणे [illegible] यवीयसः सप्तसुतान् "श्रवणं कीर्तनं विष्णोः [illegible] पादसेवनम्। अर्चनं वन्दनं दास्यमिति" भक्ति[illegible] [illegible]लनिवेदनयोस्तु पदार्थज्ञानोत्तरकालत्वात्तस्य च [illegible]मत्वात्वादि-दानीमनुत्पत्तेः सप्तेत्युक्तम् भगवद्धर्मेष्ठया [illegible]कीर्तनादिकं जातमित्यर्थः द्रविडभूमिपालकान् द्रविडभूमिर्हि श्रवणादिभक्तिभिरेव सुरक्षितास्तीति प्रसिद्धम् ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं कृपणया बुद्ध्या शोचन्तमनर्हणं शोकानर्हं वस्तुतोऽपहतपाप्मत्वादिगुणाष्टकविशिष्टत्वात् एवं पुरञ्जनं प्रहीतुं पुराद्विभ्रंशयितुं कृतधीर्निश्चितबुद्धिर्भयनामा मृत्युः प्राप्तः ॥ २२ ॥

यथा स्वकं स्वकीयकर्मानुगुणं स्थानं प्रति यवनैः पशुवन्नीयमानः तदानुपथाः प्राणा इन्द्रियाणि च शोचन्तः यवनैः पीडिता अत एवातुराः शोचन्तोऽन्वद्रवन्ननुसृत्य गतवन्तः तथा च श्रुतिः

तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं
सर्वे प्राणा अनूत्क्रामन्तीति।

प्राणो ज्येष्ठः प्राणः सर्वे प्राणा इन्द्रियाणीत्यर्थः ॥ २३ ॥

यवनैरुपरुद्धः पुरीं स्थूलशरीरं तु विहायैव गतः भुजङ्गवत्छाद्यमानं वृक्षकोटरं विहाय यथा भुजङ्गमो गच्छति तद्वदित्यर्थः यदा गतस्तदा तमेव तद्गमनानन्तरमेव पुरी विशीर्णा शिथिला सती प्रकृतिं महाभूतात्मतां गता प्राप्तवती कथापक्षे तु, दारापत्यादयः सर्वे पुरञ्जनविश्लेषमसहमानास्तेनैव सह विनष्टाः अभूवन्पुरी च विनष्टाभूदित्यर्थः ॥ २४ ॥

बलीयसा यवनेन प्रसभं पुरः पुर्यां विकृष्यमाणः तमोऽन्धकाराविष्टः सखायं स्वेन सहवर्तमानं सह वृत्तिर्हि सख्युर्धर्मः सुहृदं विपुलापराधस्येऽपि किञ्चिदानुकूल्येन दिदृक्षिणाबुद्धिमन्तं परमात्मानं नाविन्दत नास्मरत् ॥ २५ ॥

भववासना इत्याहिहितमानेन पुरञ्जनेन यज्ञे कर्मेन्द्रियव्यापाररूपे यज्ञे ये पशवः संज्ञप्ताः हिंसिताः ते पशवः आत्मवैशसं स्वविषये[illegible] [illegible] एव क्रुद्धाः कुठारसदृशैः शृङ्गैस्तं चिच्छिदुः ॥ २६ ॥

अनन्तपारेऽपारे तमसि नरके मग्नः अत एव गतविवेकः शाश्वतीः समाः सम्वत्सरान्। [illegible]संयोग इति द्वितीया। आर्ति दुःखमनुभूय प्रमदासङ्गदूषितः प्रमदासङ्गेन दूषितान्तःकरण इत्यर्थः प्रमदात्र देहानुबन्धिनी भार्या विवक्षिता ननु बुद्धिरूपा बुद्धिसङ्गस्यासंसारमनुवर्तमानत्वेन सर्वेषां सर्वदा स्त्रीजन्मापत्तेः ॥ २७ ॥

तां भार्यामेव मनसा गृह्णन्नन्तकाले स्मरन्ननन्तरं राजसिंहस्य विदर्भस्य वेश्मनि प्रमदोत्तमा बभूवेत्यन्वयः एवं तिर्यगादिरूपेण संसरतो जीवस्यादृष्टविशेषपरिपाकवशान्मनुष्यजन्मप्राप्तस्य तत्रापि जाग्रत्स्वप्नसुषुप्त्यवस्थासु दोषाननुसन्धाय पुनर्वैराग्यकरादिसञ्जातविवेकस्यापि प्रबलकर्मरूपप्रतिबन्धवशाद्रजस्तमःप्रचुरबुद्धिपारवश्येन देहदेहानुबन्धिविषयाहंममाभिमानप्रस्तस्य जरामरणाद्यवस्थासु दोषाननभिध्यायतो देहावसाने देहानुबन्धिप्रमदास्मरणनिमित्तस्त्रीजन्मप्राप्तिः तत्रापि प्राक्तनकादाचित्कयादृच्छिकपुण्यवशात्सत्कुलप्रसूतिः ततो महाभागवतभर्तृसम्बन्धः तत्सेवाप्रकारं ततस्तेन तुष्टस्य भगवतः प्रसादाज्ज्ञानोदयश्चाह। तत्र कथापक्षेऽपि विदर्भादिपदानां शीत एवार्थः जीवात्मपक्षे तु विदर्भस्य विशिष्टं दर्भोपलक्षितं कर्म यस्य तस्य राजन्ते सत्कर्मानुष्ठानेनेति ते राजानः कर्मानुष्ठानपराः तेषां मध्ये सिंहस्य श्रेष्ठस्य वेश्मनि गृहे प्रमदा बभूव पुरञ्जनः कर्मविशेषेण विशिष्टकुले जीवत्वं प्राप्त इत्यर्थः ॥ २८ ॥

तां वैदर्भीं विदर्भस्य दुहितरं वीर्यं भगवद्भक्तियोगानुष्ठानसामर्थ्यमेव पणः शुल्कबन्धनं यस्यास्तां भागवतमेव वृणु यामीत्येवंसङ्कल्पवतीं मलयध्वजः मलयपर्वतोपलक्षितदक्षिणदेशः तत्र ध्वज इव दर्शनीयः स हि विष्णुभक्तिप्रधानो देशः तत्र मुख्यो भागवत इत्यर्थः तथा पण्डा बुद्धिर्निश्चयात्मिका तामर्हतीति पाण्ड्यः परस्य परमात्मनः पुरं पुरवद्वासस्थानं शरीरम् अथ "यदिदमस्मिन्ब्रह्मपुरम्" इति श्रुतेः तज्जयतीति पुरञ्जयः देहगुणाद्याजित इत्यर्थः युधि इन्द्रियजयरूपे युद्धे राजन्यान् जितेन्द्रियानभिजित्य जितेन्द्रियश्रेष्ठोऽभूदित्यर्थः उपयेमे यद्यप्यत्र "राज्ञो जातावेवेति वाच्यम्" इति जातौ नियमितोऽयं यत्प्रत्ययः तदन्तो राजन्यशब्दः क्षत्रियजातीयवचनस्तथाप्यत्र गौण्या वृत्त्या जितेन्द्रियपरः क्षत्रियजातीयो हि जयेन राजत इति जयगुणयोगाज्जितेन्द्रिये तस्य वृत्तेः सम्भवात् ॥ २९ ॥

स मलयध्वजस्तस्यां वैदर्भ्यामसिते श्रीकृष्णे ईक्षणं दृष्टिर्यस्याः तां श्रीकृष्णसेवारुचिरूपामात्मजां सञ्जनयाञ्चक्रे वैदर्भ्यां भागवतसङ्गेन भगवत्सेवारुचिरभूदित्यर्थः तथा यवीयसः आत्मजाया अनु जातान् सप्तसुतान्।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यमित्येवं रूपान्

सख्यात्मनिवेदनयोस्तु भगवद्भजनपायित्वतत्फलैकान्तिकानुसन्धानरूपयोर्भगवतैव उत्तरत्रैव वक्ष्यमाणयोरिदानीमनुत्पत्तेः सप्तेत्युक्तं भगवद्धर्मेष्ठया तच्छ्रवणकीर्तनादिकं जातमित्यर्थः द्रविडभूमिपालकान् द्रविडभूमिर्हि श्रवणादिभिरेव सुरक्षितास्तीति प्रसिद्धम् ॥ ३० ॥

एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदम् ।
भोक्ष्यते यद्वंशधरैर्मही मन्वन्तरं परम् ॥ ३१ ॥
अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम् ।
यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः ॥ ३२ ॥
विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः ।
आरिराधयिषुः कृष्णं स जगाम कुलाचलम् ॥ ३३ ॥
हित्वा गृहान् सुतान् भोगान् [illegible]णा ।
अन्वधावत पाण्डयेशं ज्योत्[illegible] ॥ ३४ ॥
तत्र चन्द्रवसा नाम ताम्रपर्णी [illegible]
तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो [illegible]
कन्दाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणो[illegible]
वर्त्तमानः शनैर्गात्रकर्षणं तप आस्थि[illegible]
शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये [illegible]
सुखदुःखे इति द्वन्द्वान्यजयत्समदर्शनः ॥ [illegible]
तपसा विद्यया पक्वकषायो नियमैर्यमैः
युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः ॥ ३[illegible] ॥
आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः ।
वासुदेवे भगवति नान्यद्वेदोद्वहन् रतिम् ॥ ३९ ॥
स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि ।
विद्वान् स्वप्न इवामर्शसाक्षिणं विरराम ह ॥ ४० ॥

भाषाटीका ।

तब पाण्ड्यदेशका राजा मलयध्वज ने युद्ध मे राजों को जीत कर पराक्रम के मूल्य से इसे लेकर विवाह किया ॥ २९ ॥

उस मलयध्वज राजा ने उस वैदर्भी के मध्य में एक कन्या सात पुत्र द्राविड के राजा उत्पन्न किये (दक्षिण देशमेंपरम भागवत का शिष्य हुआ तब भगवान् में रुचि श्रवणादिक सात भक्ति ओंसे संपन्न होगया) ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अर्बुदमिति श्रवणादीनां प्रत्येकमनेकै प्रकारा अनवच्छिन्नार्थः तदुक्तम "भक्तियोगो बहुविधो मार्गैर्भामिनि ! भाव्यत" इति येषां वंशधरैः यतः प्रवृत्तैः सम्प्रदायभेदैः कृत्स्ना मही मन्वन्तरं ततः परं च भोक्ष्यते विद्याकामकर्मभ्योऽपि रक्षिष्यते ॥ ३१ ॥

अगस्त्यः अगानि निष्क्रियाणि गात्राणि स्त्यायति सङ्घात-यतीत्यगस्त्यो मनः स प्राक्प्रथमजातां दुहितरं कृष्णसेवार्थंच-मुपयेमे तस्य सतः कृष्णे दृढो रति यबन्धेत्यर्थः धृतानि शमे-दमादीनि व्रतानि यया तां रतिम् दृढेभ्यः सत्यलोकादिभोगे-भ्योऽपि च्युतस्तद्रहितः कृष्णरतावैहामुत्र भोगविरागो जात इत्यर्थः स एवोपशमात्मकत्वान्मुनिः कथंभूत: इध्मवाह आत्मजो यस्य सः "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम" इत्यादिश्रुतिप्रसिद्धा समिद्वहनोपलक्षिता गुरू-पसत्तिर्वैराग्यादभूदित्यर्थः तह्यविरक्तस्य गुरूपसत्तिः संभवति कथापक्षे यथाश्रुतमेव ॥ ३२ ॥

क्ष्मां विभज्य तत्र श्रवणादिभक्तिभेदं व्यवस्थाप्य ॥ ३३ ॥

इदानीं पञ्चमस्य स्त्रीभावं प्राप्तस्य सर्वतो विरक्तस्य "पतिरेव गुरुः स्त्रीणाम्" इति वचनात्पतिसेवया गुरुशुश्रूषाप्रकारम दर्शयितुमाह । हित्वेत्यादिना मनोदृश इत्यन्तेन ग्रन्थेन । मत्त्य-तीति मदिरमीक्षणं यस्याः ॥ ३४ ॥

तत्र चन्द्रवसाद्या नद्यस्तासां पुण्यैः सलिलैरुभयत्रान्तर्बहि-श्चात्मनो मलं क्षालयंस्तप आस्थित इत्युत्तरेणान्वयः ॥ ३५ ॥

कन्दैः मूलैः हिरण्यैः इत्यादिर्बीजम ॥ ३६ ॥ ३७ ॥

विषयोपासनया पक्वकषायो दग्धकामादिवासनः युयुजे आत्मनो अङ्गतां भावयामास अक्षाणीन्द्रियाणि अनिलः प्राणः आशयश्चित्तम विजिता अक्षादयो येन ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

आस्तेस्म वर्षशतमिति ज्ञानस्य दुःसाधनतां दर्शयति। अत एव हरौ भक्तिं कृतवानित्याह। वासुदेवे रतिमुद्वहन्नन्यद्देहादिकं न वेद॥ ३९॥

स एवं वर्तमान आत्मन्यात्मानं विद्वानन्यस्मादुपरराम कथम् विद्वान् व्यतिरिक्ततया देहादिव्यतिरिक्तत्वेन कुतः व्यापकतया देहादिप्रकाशकत्वेन ननु देहाद्याकारो विमर्शो एतत्प्रकाशयति न तु निराकार आत्मा अत आह। आमर्शस्यापि साक्षिणम् अयं भावः आमर्शो नामान्तःकरणवृत्तिः सा च जडत्वादात्मप्रकाशमपेक्षते यथा स्वप्ने ममेदं शिरश्छिन्नमित्यामृशन्तो तद्व्यतिरिक्तमात्मानं वेत्ति तद्वत्॥ ४०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

हे राजन्! तेषां पुत्राणामेकैकस्यार्बुदमर्बुदं पुत्रा अभवन् श्रवणकीर्तनादीनां प्रत्येकमनेकप्रकारत्वमभिप्रेत्य वंशधरैर्येषां यतः प्रसूतेः सम्प्रदायभेदैर्मन्वन्तरम् यैः इयं मही भोक्ष्यते उपभुज्यते श्रवणकीर्तनादिसम्प्रदायभेदैः व्याप्ता इत्यर्थः॥ ३१॥

अगस्त्योपलक्षितो मुमुक्षुर्दृढव्रतस्य भगवदाराधिकां दुहितरं भगवत्सेवारुच्यात्मिकामुपयेमे स्वीकृतवान् दुहितरं विशिनष्टि। यस्यां दुहितरि इध्मवाहात्मजः इध्मवाहः समित्पाणिः तेन तत्पूर्वकगुरूपसत्तिर्लक्ष्यते 'गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुतिप्रसिद्धसमिद्धारपूर्वकगुरूपसदनाज्जातो ब्रह्मोपदेशात्मको मुनिः उपदिष्टस्यार्थस्य मननप्रवृत्तत्वान्मुनिः दृढं व्रतं श्रवणोपयुक्तशमदमात्मकं व्रतं यस्य सः "प्रशान्तचित्ताय शमान्विताय" इति श्रुतेः उपासनोपयुक्तशमादीनां श्रवणकालेऽभावाच्च जातः बभूव॥ ३२॥

तनयेभ्यः श्रवणकीर्तनादिभ्यः पुत्रेभ्यः क्ष्मां स्वोपजीव्यां भगवद्भक्त्यात्मिकां पृथ्वीं विभज्य श्रवणकीर्तनादिसाध्यामनुसन्धाय स मलयध्वजः कृष्णमाराधयितुमिच्छुः कुलाचलं मलयपर्वतं प्रतिजगाम गतः॥ ३३॥

गुरूपसत्तिपूर्वकशमादियुक्तश्रवणमननादिपूर्विकां श्रवणकीर्तनादिसाध्यभगवत्सेवारुचिं वैदर्भीमुत्पाद्य तया सह भगवन्तमाराधयितुं विविक्तं पुण्यदेशं ययावित्युक्तमथ मलयध्वजस्य महाभागवतस्याष्टाङ्गयुक्तभगवद्भक्तियोगानुष्ठानप्रकारं वैदर्भ्याः पत्युः परिचर्याप्रकारं चाह। हित्वेत्यादिना मनोदश इत्यन्तेन ग्रन्थेन मदिरे भगवत्सेवाहर्षरूपमोक्षणां ज्ञानं यस्याः सा वैदर्भी सुखान् सुखप्रदान् गृहान् सुखशब्दस्तत्साधनेषूपचारात्प्रयुक्तः अत एव पुत्रं त्यक्त्वा पाण्ड्येशं मलयध्वजमन्वधावतानुसृत्य गतवती यथा रजनीकरं चन्द्रं ज्योत्स्ना चन्द्रिका॥ ३४॥

तत्र कुलाचले चन्द्रवसा ताम्रपर्णी प्रसिद्धा नदी तस्याः पुण्यैः सलिलैरात्मनः स्वस्योभयमान्तर्बाह्यं च मलं मृजन् स्नानपानादिभिः शोधयन् तप आस्थित इत्युत्तरेणान्वयः॥ ३५॥

कन्दाष्टिभिः कन्दबीजानि कन्दाष्ट्यादिभिः पूर्वपूर्वालाभे उत्तरोत्तरैर्वर्तमानः देहधारणं कुर्वाणः पश्चाच्छनैः गात्रकर्षणं शरीरशोषणं तप अनशनतप आस्थित इत्यर्थः॥ ३६॥

ततः समदर्शनः शीतोष्णादिनिमित्तचित्तविकाररहितः शीतोष्णादिद्वन्द्वान्यजयत्॥ ३७॥

तपसा कर्मयोगेन विद्यया ज्ञानयोगेन च दग्धः निरस्तः कषायः भावरागवद्दाहकत्वं पुण्यापुण्यात्मकं पापं यस्य सः यमैर्नियमैश्च विजितान्यक्षाणीन्द्रियाण्ययमनिलः प्राणः प्राणायामैः करणं च येन स ब्रह्मणा परमात्मनात्मानं प्रत्यगात्मानं युयुजे अधिकरणस्यैव करणत्वविवक्षया तृतीया ब्रह्मण्यात्मानं युयुजे ब्रह्मात्मकं स्वात्मानमनुसंहितवानित्यर्थः॥ ३८॥

स्थाणुरिवैकत्र देशे दिव्यं वर्षशतं निश्चल आस्ते उपविष्टवान् भगवति वासुदेवे रतिमनुरागात्मिकां भक्तिमुद्वहन् कुत्रचिदन्यच्छरीरादिकं न वेद न सस्मार॥ ३९॥

स मलयध्वजः साक्षाद्गुरुमात्मानं परमात्मानमात्मनि जीवात्मानं व्यापकतया विलक्षणतया व्यापकत्वरूपवैलक्षण्येनेत्यर्थः विद्वान्स्वप्न इवामृश्य स्वप्न इवानित्यं देहवृत्तान्तमामृश्य तस्माद्विरराम केवलपरमात्मानुसन्धानपरोऽभूदित्यर्थः॥ ४०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अर्बुदमर्बुदमित्यनेन सत्यो वृत्तयो गृह्यन्ते मही शास्त्रविरुद्धविषयलक्षणामन्वन्तरं मनुष्यजीवनावधिपरं शतवर्षं प्रारब्धपुण्यवशात् बुद्ध्यावरणादिभिः प्राणैरिन्द्रियैरेव विषयान् भुङ्क्त इत्यर्थः॥ ३१॥

"स्तौ एचै शब्दसङ्घाते,, इति धातोः। अगं भगवन्तं स्त्यायति शब्दसमूहेन स्तुतिं करोतीत्यगस्त्यो भक्तः प्राग्भं पुरातनं श्रीनारायणं वैदर्भीति दुहिता भक्तिस्तामुपयेमे संसारनिवर्तने शक्तिमत्त्वस्यालाभमकरोदित्यर्थः कीदृशी ब्रह्मचर्यादिव्रतसाध्यां दृढच्युतः पुत्रादिस्नेहो यस्मात्स दृढच्युतः पूर्वस्माद्विरागो दृढतरोऽभूदित्यर्थः इध्मवासो गुरुकुलवास एवात्मजो यस्य स तथा वैराग्यादेव गुरुकुलवासो भवति "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इति श्रुतेः सौम्येमाः समिध आहरेति च॥ ३२॥

वैराग्यादिसम्पत्त्या राजत इति राजा विवेकित्वादृषिः राजासावृषिश्चेति राजर्षिः वैराग्यविवेकज्ञानसम्पन्नः गुरुवासनाङ्कितः पुरुषस्तनयस्थानीयेभ्यो विरागादिभ्य इन्द्रियेभ्यो वा क्ष्मां शास्त्रलक्षणां भोग्यलक्षणां वा विभज्येदं श्रोतव्यं नेदमिति विविच्यायं विषयः सेवनीयो नायमिति कुलाचलं निश्चलं वासार्थं गुरुकुलं जगाम वैराग्यादिगुणसंपन्नः शरीरयात्रानिर्वाहकविषयभोगी गुरुकुलसन्निधिमवात्सीदित्यर्थः कृष्णं पूर्णानन्दमाराध्यापरोक्षीकर्तुकाम इत्यर्थः॥ ३३॥

मदिरेक्षणस्तां रातीति मदिरं तादृशमीक्षणं ज्ञानं यस्याम् सा तथा शुद्धज्ञाना विषयानुषक्तं विहाय तदनुसारिणी बभूवेति पाण्ड्येशमन्वपद्यतेत्यभिप्रायः अत्र सुतशब्देन रागादयो लक्ष्यन्ते तानविहायेत्यर्थः मुक्तावपि बुद्ध्यात्मनो राहित्यम् नास्तीति दर्शयितुं ज्योत्स्नेवेति॥ ३४॥

तत्र गुरुकुलवासे चन्द्रवदाह्लादकं निर्मलं च वस्तु ज्ञापयतीति वेदान्तशास्त्रं पयो चन्द्रवसीतिपाठे शमादिनिसृत्राठकारस्य मकारः चन्द्रबिम्बं विषयीकरोतीति वा नामलोकप्रसिद्धं "पर्णं आच्छादने,, इति धातोः ताम्रं रजस्तमश्च पर्णयत्याच्छादयति परिभवतीति ताम्रपर्णी वेदान्तव्याख्या नाम्नाम्राश्रेति ताम्रं ब्रह्म पृणातीति प्रकाशलक्षणं दानं करोतीति वा "पृण दाने,, इतिधातोः नदीवत्पदवर्णस्वरलक्षणप्रवाहात् श्रोतृ-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

...ह्लादजननाख्या वरीदका तस्या व्याख्यायाः प्रका- ...म्यैः शोषकैः सलिलैर्युक्तिजलधीरामनोऽन्तःकरणस्य ...प्रमयश्च प्रतिवादिनिमित्तचाह्नी दुर्युक्तिमर्ज सैन्धवायन्तरमर्ज ...सृजन् शोषयन् ॥ ३५ ॥

"मूल प्रतिष्ठायाम्" इतिधातोः मूलं जगदाधारं ब्रह्म फलन्ति निष्पादयन्तीति मूलफलानि तैः कं सुखं ददातीति कन्दं मिता- हारं तदादिर्येषां मितस्वादादीनां तानि कन्दादीनि योगसाध- नानि तैः ।

नात्यश्नतस्तु योगोऽस्ति नचैकान्तमनश्नत इतिस्मृतेः

पुष्पवत्मृदुलैः पर्णैरात्महादनैरुद्गतमर्क दुःखं येभ्यस्तान्युद्- कानि तृणानि आस्तरणानि तैरेतैश्च वर्तमानः शारीरयात्रां कुर्वाणः गं श्रा १ तज्मयतीति गात्रमज्ञानं कर्षयत्यपीकरोतीतिगात्र- कर्षणं "तप आलोचन" इति धातोरालोचनं मननमनुतिष्ठन्॥३६॥

शीतोष्णादीनि द्वन्द्वान्यजयत् सहमानो वर्तत इत्यन्वयः शीतोष्णादिशब्दैः कामादयो लक्ष्यन्ते इति ज्ञातव्यमुभयेषां शारीराधिकरणत्वात् ॥ ३७ ॥

तपसा मननलक्षणेन जातया विद्यया ज्ञानेन निवर्तादि- मिश्र पक्वकषायः शिथिलीकृतपाप आत्मानमन्तःकरणं ब्रह्मणा युयुजे विषयेभ्य आनीय श्रीनारायणेन सह वर्तमानमकरोत् तदेकनिष्ठमकुरुतेत्यर्थः यद्वाऽत्मानमन्तर्यामिरूपं ब्रह्मणा व्याप्ति- रूपेण युयुजे एकत्वेन दृष्टवानित्यर्थः विजिताक्षानिलात्मा वशीकृतेन्द्रियप्राणान्तःकरणः आशयोऽस्मिन्नात्मा वा ॥ ३८ ॥

इत्याधुरितवस्थित एकत्र गुरुकुले श्रुतमतः शास्त्रे बुद्धिप्रसाद- जनके विविक्तस्थाने वा दिव्यं वर्षशतं बहुकालमुपासीन आस्त इत्यन्वयः मुक्तिसाधनं भक्तिरेव नान्यदिति तस्या अतिशय फलमाह । वासुदेव इति । उपासको वासुदेवे भगवति वेदान्त- विचारनिर्णीतगुणरत्नाकरे हरावुपासनाख्यां रतिमुद्वहन् कुर्वन्नस्वतन्त्रं वस्तु न वेद किन्तु सर्वं तदधीनमेव ज्ञातवा- नित्यर्थः ॥ ३९ ॥

ननु ब्रह्मव्यतिरिक्तस्य वस्तुनोऽभावादेकमेवाद्वितीयमिति श्रुतेरेतदेव नान्यद्वेदेति प्रतीत एवार्थः किं न स्यादिति तत्राह । सऽव्यापकतयेति । स आसृष्टत्व विचारात्मनि जीवे स्थितं साक्षिणं "अनेन शारीरमभिप्रहत्यासुतः सुतानभिचाकशीति,, इति श्रुतेः । साक्षात् द्रष्टृत्वेन वर्तमानं अग्ने यथा परतन्त्रतया जीवं पश्यति तथा अन्यदपीति विद्वांस्तथात्मानं, परमात्मानम् व्यापकतया सर्वेव्याप्तित्वेन चेतनाचेतनात्मकजगद्व्यतिरिक्ततया च विद्वान् विरराम संसाराद्विरक्तो जीवन्मुक्तत्वस्याभावेक्षणमयः यद्वा- त्मानं व्यापकतयाऽत्मनि जीवे व्यतिरिक्तं तथा च विद्वान् अग्र इव स्वतन्त्रं साक्षिणं जीवं परतन्त्रमासृष्टत्व विविच्य विररामेति हेत्वनेन जीवस्याऽत्मत्वमन्वये हरेरस्वतन्त्रत्वे ।

यतः अन्यो न अतन्त्रस्तततस्तदृष्टेकः परः ।
जीवादन्यस्तु विज्ञेयः स विष्णुरथवाऽर्थतत्त्वः ।

इति प्रसिद्धिः सूच्यते ॥ ४० ॥

---

१ गंधानमभाति न भातीति गात्रमितिकाठः सम्यक् ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

...लमोऽपि ...योऽपि ब्रह्मज्ञानवतस्तस्तुल्योऽभवत् वा ...जितं ... प्रथमजां दुहितरं कृष्णसेवारतिमुपयेमे स्वीकृतवान् । ...मनस्तेनानुमोदितवानित्यर्थः । भूतानि ...मादीनि व्रतानि यथा तां रतिं ...वर्धयां तदङ्गीकृतार्थं हरेः ...पापनारादिहेतोऽसौ ...द्योततीति च्युतः सर्वेन्द्रियाणि- ...स भक्तियोगो जातः इहार्थे हेतुः मुनिजनवन्दित ...इत्याह स्थिरीभूता येष्वाचा यत्र बहवः आत्मजाः ...तरसोऽभूत् ॥ ३२ ॥

...ः कृष्णमिमुपरिहत्य तपो ज्ञानाभ्यासमपि ...यें कुमारांश्च प्रथमम् ॥ ३३ ॥

...हे श्रीभगवद्रूपे इयतो यस्याः पापक्षेत्रादर्प गुरु... ॥ ३४ ॥

... सर्वं नामेति विषसूत्रः कन्दादिभिरिर- ति विय... ३६ ॥ ३७ ॥

आत्मानं ... सर्वाश्रये भगवति युयुजे तद्- काश्रयत्वेन ... रश्मिपरमाणुमिव ॥ ३८ ॥

तथा स्मरन्... निरवयवच्छिन्ना आतिष्ठत् । आस्त इति ॥ ३९ ...

तमत्र सर्वत्रैव... आतमित्याह । स इति । आत्मनि सुखजीवेऽभिन्नतया... विद्वातावत् परमात्मानं सर्व- व्यापकव्यतिरिक्तस्वरूपतया ... विद्वान् आत्मा । तदर्थाद्वैयाद्वि- रराम । व्यापकत्वेन व्यतिरिक्तत्वेन दृष्टान्तः । अन्ते तत्रत्वसर्व- प्रपञ्चतद्वारामित्येति ज्ञानशैलत्व आसृष्टयेति सम्बन्धोक्तिः ॥४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तेषामेकैकस्याष्टदुष्टत्वमिति पूर्वपौर्वापर्यभेदात् पञ्चे भव- णादीनां प्रत्येकं नामलीलादिभेदैर्नामादीनाञ्च प्रत्येकमवतार- भेदैस्तेषामपि दास्यसख्याद्यभिलक्षितत्वभेदैरित्येवमसंख्या एव प्रकारा इत्यर्थः । यदुक्तं "भक्तियोगो बहुविधो मार्गैर्भामिनि ! भाव्यते" इति । येषां यथाधरैयैतः प्रवृत्तैः सम्प्रदायभेदैः । कृत्वा ब्रह्मी मन्वन्तरं ततः परं च मोक्ष्यते अविद्याकामकर्मभ्योऽपि रक्षिष्यते ॥ ३१ ॥

प्रागुदितरं प्रथमजातां दुहितरमगकत्व उपयेमे पक्षे अतानि अतोगत्यसमर्थानीन्द्रियाणि स्थापति सङ्गत्वमपि जीवन् मिलिती करोतीत्यसंस्थो मनः स कृष्णसेवार्थं स्वीचकार रतानि इयाद्यमादीनि व्रतानि यथा यतो वा महत्कृपया अवीय मनः कृष्णसेवासक्तं बभूवेत्यर्थः यत्नामसितेस्तस्यां रहेभ्यः सत्यलीलादिभ्योऽपि च्युतस्तदुद्दिहतः इहात्मनीनो चिरमनां जात इत्यर्थः । यद्वा इहैभ्यो ज्ञानादिभ्यस्तत्साध्येभ्यो मोक्षादि- भ्यश्च च्युतः अतः कृष्णसेवारसमेकतानस्वाद्यत्वास्वादनस्तत्स्प- स्पृहादाहित्वं आतमित्यर्थः कथं भूतः इत्यत आह आत्मजो अस्य सः "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यादि श्रुतिभावितया समित्पाणीनोऽप्रकल्पिता गुरुरूपपि- रभूदित्यर्थः । कथायान्ते अगस्त्यस्य पुत्रो दृढच्युतः तस्य पुत्र इध्मवाह इति भवदव्यमस्य कन्यायां उक्तः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इमां विभज्य तत्र तत्र श्रवणादिभक्तिभेदं प्रवर्त्त्येत्यर्थः । कुलाचलमेकान्तस्थलं भक्तिप्रदं वैकुण्ठादिपर्वतं वा ॥ ३३ ॥

सुतान् हित्वेति पतिव्रता पत्युरिव गुरोः सेवायां प्रवृत्तः शिष्यः श्रवणकीर्त्तनादीन्यपि भोगान् तदुत्थान् प्रेमानन्दानपि गृहान् तदुचितविविक्तस्थलमपि नैवापेक्षेत श्रीगुरुसेवयैव सुखेन सर्वसाध्यसिद्ध्यर्थमित्युपदेशो व्यञ्जितः मादयतीति मत् इरा वाणी इत्यमत्यां वाण्यां बेवलत्वगुणायामेव ईक्षणं यस्याः । गुरुसेवाया एव वेदेन सर्वाधिकफलोक्तत्वादित्यर्थः मदयतीति मदिरं श्रीभगवद्रूपं तत्रेक्षणं यस्या इति सुधर्मः । कथापक्षे तु मदिरा ईक्षणयोर्यस्याः सा परमसुरूपवती-त्यर्थः ॥ ३४ ॥ ३५ ॥

उभयत्र अन्तर्बहिश्चात्मनो मलं क्षालयंस्तप आस्थितः तस्य तपश्चरणं पृथुवदत्युत्कण्ठामूलकमेव व्याख्येयम् ॥ ३६ ॥ ३७ ॥

ब्रह्मणि उत्तरश्लोकस्पष्टीभूतार्थे वासुदेवे आत्मानं मनः ॥ ३८ ॥

तादृशस्मरणभक्त्या भगवति रतिरव्यवच्छिन्ना जातेत्याह । आस्त इति ॥ ३९ ॥

तादृशरत्या च सर्वत्र भगवत्स्फूर्त्तिरभूदित्याह । स इति । व्यापकतया जातरतित्वेन सर्वास्वेव दिक्षु स्फुरद्रूपतया विद्वान् जानन् तदप्यात्मनि स्वस्मिन् व्यतिरिक्ततया वियुक्तत्वेनैव जानन् प्रेमोत्कण्ठातापेन विरराम मूर्च्छां प्रापेत्यर्थः । विरहोत्थ-स्फूर्त्तिजनितभगवद्दर्शनेन विरहो नश्याम्यतीत्यत्र दृष्टान्तः स्वप्न इव जानन् । नहि स्वप्ने भुक्तेनौदनादिना स्वप्नोत्थितस्य जनस्य क्षुधा शाम्यतीत्यर्थः । ननु स्फूर्त्तौ किं प्रमाणमित्यतो विशिनष्टि आमर्शो नामान्तःकरणवृत्तिः स एव साक्षी नतु लोचनं यत्र तम् । अन्तःकरणवृत्तीनां विरहसन्तापानपगमात् लोचनाभ्यां तद्दर्शनमपि तत् स्फूर्त्तिजनितमेवेत्यनुभवादिति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेषां श्रवणादीनामेकैकस्य अर्बुदमर्बुदमभवन् बहवो भेदा अभवन्नित्यर्थः येषां वंशधरैः पुत्रपौत्रैर्मन्वन्तरम् ततोऽपि परं सर्वदेत्यर्थः मही भोक्ष्यते अधर्मतो रक्षिष्यते ॥ ३१ ॥

प्राग्दुहितरं श्रीकृष्णसेवारुचिं धृतव्रतां धृतं कृष्णप्रीणनरूपं व्रतं यया ताम् अङ्गानि स्वापयति चालयतीत्यगस्त्यो जीवान्तःकरणं कथंभूतः मुनिर्यन्ता सारार्थावगन्ता उपयेमे स्वीकृतवान् यस्याम् "स गुरुमेवाभिगच्छेत् समित्पाणिः" इति श्रुतेरिध्मवाहो मुमुक्षुस्तस्य आत्मजः आत्मजवत् हित इत्यर्थः यतो दृढच्युतः दृढा अतिरोहितामुष्मिकभोगवासना च्युता यतः स विरागो जातः ॥ ३२ ॥

मलयध्वजो वैदर्भ्यां गुरुरूपः पतिः इमां तनयेभ्यो विभज्य जगत्यां श्रीकृष्णश्रवणादीन्यवस्थाप्य कुलाचलं कुलं श्रीकृष्ण-भजनोपकरणसमूहोऽचलं सुदृढं यत्र तदेकान्तं श्रीकृष्णाराध-नस्थानम् जगाम ॥ ३३ ॥

अथ पुरञ्जनस्य श्रीध्यानात्म्यश्रीत्वं प्राप्तस्य विषयेभ्यो विरक्तस्य पतिकपद्मस्मार्कं प्रपञ्चयति । हित्वेत्यादिना । मदयतीति मदि-रक्षितरागविस्मारणमीक्षणं यस्याः सा ॥ ३४ ॥

तत्र मलयध्वज इति शेषः श्रीकृष्णाराधन[illegible] पवित्रिताः भरतखण्डस्था या नद्यस्तासां पुण्यैः [illegible]-न्तर्बहिश्च आत्मनो मलं मृजन् तप आस्थित [illegible] चन्द्रवसादि नदीविशेषोक्तिः ॥ ३५—३६—३७ ॥

पक्वाः भर्जिताः कषायाः कामादिवासना यस्य सः जिता-न्यक्षाणीन्द्रियाणि अनिलः प्राणः आशयो मनश्च येन सः ॥ ३८ ॥

स्थाणुरिव स्थिरो निश्चलः एकत्र दिव्यं वर्षशतमास्ते उपविष्टवान् वासुदेवे रतिमुद्वहन् अन्यत् न वेद दिव्यं वर्षशत-मित्यनेन गार्हस्थ्यं परित्यज्य श्रीकृष्णाराधने स्वजीवनकालं योजितवानित्यर्थः अन्यन्न वेदेत्यनेन समाधिवाक्यमुक्तम् ॥ ३९ ॥

आत्मानात्मपरमात्मपदार्थानां मध्ये परमात्मानं रतिविष-यत्वेन देहयुक्तमथात्मानं ज्ञातृत्वेन अनात्मानं देहादिकमनि-त्यत्वेन जानन् अनात्मतो विरक्तोऽभूदित्याह । व्यापकतयेति । स्वप्ने अमर्थः अन्तःकरणवृत्तिविशेषस्तत्साक्षिणं यथा अमर्थव्यतिरि-क्ततया जानाति तथा आत्मनि देहे व्यतिरिक्ततया देहभिन्न-तया आत्मानं तत्साक्षिणं व्यापकतया करचरणादिगतसुखदुःख-ज्ञातृत्वेन धर्मेण पूर्णतया विद्वान् विरराम देहाद्यनात्मदर्शना-दिति शेषः ॥ ४० ॥

भाषाटीका ।

हे राजन् ! तिनों के मध्यमें एक एक के दश दश हजार पुत्र भये जिन के वंशवाले इस पृथिवी को मन्वतर भर भोग करेंगे ॥ ३१ ॥

मलयध्वज की पहिली पुत्री धृत व्रता नाम की तिसका अग-स्त्यने विवाह करके ग्रहण किया जिसके मध्यमें दृढ च्युत मुनि उत्पन्नहुआ उसका पुत्र इध्मवाह हुआ [मन कृष्ण की भक्ति में लग गया] ॥ ३२ ॥

मलयध्वज जी श्रीकृष्ण की आराधना करने के लिये अपने पुत्रों को पृथिवी को देकर कुलाचल पर्वतको गये (पृथिवी में श्रवणादिभक्ति को स्थापन कर के कुरुक्षेत्र को गये) ॥३३॥

युवा अवस्था वाली वैदर्भी घर पुत्र भोग सबको छोड कर जैसे चांदनी चन्द्र के पीछे जाती है तैसे पांड्य राजा के पीछे होली (पहिले पुरञ्जन अब वैदर्भी जीव गुरु के शरण गया] ॥ ३४ ॥

वहांपर ताम्रपर्णी चन्द्रवसा वटोदकादि नदीहैं उन के स्नानों से नित्य ही वाहिर भीतर के मलको नाश किया॥३५॥

कंद मूल फल गुठली पुष्प पत्ता तृण जल इन चीजों से निरन्तर शरीर का निर्वाह करके शरीर की शोषक तपस्या किया (गुरु की तपस्या कही है) ॥ ३६ ॥

शीत गर्मी पवन वर्षा क्षुधा प्यास प्रिय अप्रिय सुख दुःख इन द्वन्द्वों को सहा समदर्शन होगया ॥ ३७ ॥

तप से ज्ञान से सब मल नष्ट होगये नियम यम से ब्रह्ममें मन को लगाया इन्द्रिय अन्तःकरण श्वास इन को रोक लिया ॥ ३८ ॥

दिव्य सौ वर्ष पर्यन्त एक जगे स्थिर होकर महा भगवान् वासुदेव में मनके लगाने से दूसरा कुछ भी नहीं देखा ॥ ३९ ॥

साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप ! ।
विशुद्धज्ञानदीपेन स्फुरता विश्वतो मुखम् ॥ ४१ ॥
परे ब्रह्मणि चात्मानं परं ब्रह्म तथात्मनि ।
वीक्षमाणो विहायेक्षामस्मादुपरराम ह ॥ ४२ ॥
पतिं परमधर्मज्ञं वैदर्भी मलयध्वजम् ।
प्रेम्णा पर्यचरद्धित्वा भोगान् सा पतिदेवता ॥ ४३ ॥
चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा ।
बभावुपपतिं शान्ता शिखा शान्तमिवानलम् ॥ ४४ ॥
अजानती प्रियतमं यदोपरतमङ्गना ।
सुस्थिरासनमासाद्य यथापूर्वमुपाचरत् ॥ ४५ ॥
यदा नोपालभेताङ्घ्रावूष्माणं पत्युरर्चती ।
आसीत्संविग्नहृदया यूथभ्रष्टा मृगी यथा ॥ ४६ ॥
आत्मानं शोचती दीनमबन्धुं विक्लवाश्रुभिः ।
स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा ॥ ४७ ॥
उत्तिष्ठोत्तिष्ठ राजर्षे! इमामुदधिमेखलाम् ।
दस्युभ्यः क्षत्रबन्धुभ्यो बिभ्यतीं पातुमर्हसि ॥ ४८ ॥
एवं विलपती बाला विपिनेऽनुगता पतिम् ।
पतिता पादयोर्भर्तू रुदन्त्यश्रूण्यवर्तयत् ॥ ४९ ॥
चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ।
आदीप्य चानुमरणे विलपन्ती मनो दधे ॥ ५० ॥

भाषाटीका ।

देहादिकों से पृथक् सर्वत्र व्यापक आत्माको जानकर अन्तःकरण का साक्षी समझकर जगत् से निवृत्त होगया ॥४०॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

केन विद्वांस्तत्राह । साक्षाद्धरिरेव यो गुरुस्तेनोक्तेन सर्वतोमुखं यथा तथा स्फुरतानवच्छिन्नेन ज्ञानेन ॥ ४१ ॥

तदेवाह । पर इति । ब्रह्मैवाहं न संसारीति ब्रह्मण्यात्मन ईक्षणे शोकादिनिवृत्तिः अहमेव ब्रह्मेत्यात्मनि ब्रह्मण ईक्षणे ब्रह्मपारोक्ष्यनिवृत्तिः अतो व्यतिहारेणेक्षमाणोऽस्मात्संसारादुपरराम नन्वेवमपि जीवस्य कुतो ब्रह्मत्वापत्तिः ईक्षणस्यैव व्यवधायकत्वादित्याशङ्क्याह । ईक्षां विहाय दृग्दृश्यनामकद्वयस्याः स्वयमेवोपशान्तेरिति भावः ॥ ४२ ॥ ४३ ॥

उपपतिं पत्युः समीपे यद्वा पत्युः किञ्चिन्मात्रं न्यूना तत्समाना सती बभाविस्यर्थः "उपोऽधिके च" इति कर्मप्रवचनीयस्तद्योगे च द्वितीया शान्तमङ्गारावस्थमनलमुपशान्ता शुभ्रा ज्वाला यथा भवति तद्वत् ॥ ४४ ॥

तदानीमपि सुस्थिरमासनं यस्य मृत एवाजानती यदा तदा यथा पूर्वमसेवत ॥ ४५ ॥

पत्युरङ्घ्रिमर्चयन्ती यदा तस्मिन्नङ्घ्रावूष्माणं नापश्यत् ॥४६॥
अबन्धुं पतिरहितम् अश्रुभिरासिच्य ॥ ४७ ॥
क्षत्रबन्धुभ्योऽधार्मिकक्षत्रियेभ्योऽपि ॥ ४८ ॥
अवर्तयत्प्रवर्तयामास ॥ ४९ ॥
तस्यां निधायाग्निदानेनादीप्य च ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

साक्षाद् भगवान् हरिरेव गुरुः तेनोक्तेन सर्वतो मुखं स्फुरताकुण्ठितेन विशुद्धज्ञानदीपेन [illegible] दीपेन ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आत्मानं प्रत्यगात्मानं परे ब्रह्मणि परं ब्रह्म प्रत्यगात्मनोऽस्य-माया: उपासनेन साक्षात्कुर्वन्नित्यर्थः परे ब्रह्मणीति धारकत्वमुक्तं परं ब्रह्मेति व्यापकत्वमुक्तं तत ईहां विहाय उपरराम उपासना-त्मकं ज्ञानं हित्वोपरराम यावदुपरममामरणमुपासितवा-नित्यर्थः ॥ ४२ ॥

वैदर्भी भोगान् हित्वा पतिरेव देवता यस्याः सा भगवदाग-मनरूपसर्वोत्कृष्टधर्मनिष्ठं मलयध्वजं पतिं प्रेम्णा पर्यचरत्परिचर्यां चक्रे ॥ ४३ ॥

चीरं वासो वस्त्रं यस्याः सा व्रतेनानशनादिना क्षामा कृशीभूता वेणीभूता जटीभूता: शिरोरुहा: केशा यस्याः सा उपपतिं पत्युः समीपे यद्वा पत्युः किञ्चिन्मात्रं न्यूना अस्मात् सतीत्यर्थः "उपोऽधिके च,, इतिकर्मप्रवचनीयत्वेन तद्योगे द्वितीया शान्तमङ्गारावस्थमनलं शान्ता निर्धूमा शिखा ज्वाला यथा भाति तद्वद्बभौ ॥ ४४ ॥

[illegible] पतिरुपरराम तदानीमपि सुस्थिरासनमासाद्यावस्थित[illegible] प्रियतमं पतिमजानती अङ्गना वैदर्भी यथा पूर्वं [illegible] पर्यचरत् ॥ ४५ ॥

यदा चार्चती पत्युरङ्घ्रौ ऊष्माणं नोपलभेत नोपलब्धवती तदा [illegible] दुःखितचित्तासीदभूत् यथा [illegible] मृगी इव तद्वत् ॥ ४६ ॥

[illegible] पतिरहितमत एव दीनमात्मानं शोचन्तीति विक्लवाश्रुभिः शोकोद्गतनेत्रजलैः स्तनावासिञ्च्य एकान्ते सुस्वरं प्ररुरोद हेति खेदे ॥ ४७ ॥

तदेवाह ! हे राजर्षे ! जितेन्द्रियश्रेष्ठ उत्तिष्ठोत्तिष्ठ चत्रबन्धुभ्यो धार्मिकक्षत्रियेभ्यः अत एव दस्युरूपेभ्य: केवलत्रिवर्गनिष्ठेभ्यः इत्यर्थः बिभ्यतीं भयं प्राप्तवतीं निवृत्तिमार्गलोपेन बिभ्यतीमित्यर्थः इमामुदधिमेखलां समुद्रवेष्टितां भूमिं पातुं सम्यग्ज्ञानवृत्तधर्मप्रव-र्तनेन रक्षितुमर्हसि ॥ ४८ ॥

पतिमनुसृत्य विजनेऽरण्ये गता बाला वैदर्भी एवं विलपन्ती भर्तुः पादयोः पतिता रुदत्यश्रूण्यवर्तयन्निवर्तयामास ॥ ४९ ॥

दारुमयीं चितिं कृत्वा विरचय्य तस्यां चित्यां पत्युः कलेवरं शरीरं प्रदीप्य प्रज्वाल्य विलपन्ती पत्युः पादयोरनुमरणे सह गमने मनो दधे धृतवती ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्राभेदश्रुतेः कोऽभिप्राय इत्याशङ्क्य जीवान्तर्यामिणो हरेः ब्रह्मविदाप्नोति परमिति श्रुतिप्रतिपाद्यस्य व्याप्तस्यापि न कश्चि-द्भेदोऽस्तीत्यर्थं इत्यभिप्रेत्याह । साक्षादिति ॥ ४१ ॥

आत्मानं जीवान्तर्यामिणामीक्षां तयोर्भेददर्शनमस्माच्छरीराद् हेत्वनेन अस्य प्रामाणिकत्वं द्योतयति ॥ ४२ ॥

पतिं स्वाश्रयमिन्द्रियद्वारेण भोगान्विहाय परिचर्यां नाम-तस्य हितप्रेरकत्वम् ॥ ४३ ॥

चीरवासा: सत्त्वगुणात्मके * यो चक्षुषि शिरोरुहलक्षणा वृत्तयो यस्याः सा तथा उपपति पत्युः स्वमनसः समीपे शान्तमि-

* इदं वाक्यं शोध्यं तथापि बहुपुस्तकेष्वेवमेवातो न शो-ध्यते ॥

स्थेनेन धूमरहितेव ननु निर्वाणत्वं न हि [illegible] शिखा [illegible] पक्षे यथा स्थित एवार्थः अभूत् दृष्टान्तस्य [illegible] तद्विशेष धूमता ज्वलतोऽग्नेः शिखेव निर्मलतया [illegible]-त्यर्थः ॥ ४४ ॥

इदानीं पुरञ्जनीविशेषाद् वक्ष्यति । अजानतीति । अङ्गना भ-गवज्ज्ञानसाधना उपरतं जीवन्मुक्तावस्थाप्राप्तं प्रियतमं स्वस्या आत्यन्तिकं प्रियं तमजानती बाह्यवृत्तिविशिष्टं सुस्थिरासनं तद-वृत्तिनिर्दिष्टमस्वस्थं पीठमाप्य पूर्वसंस्कारवशात् यथा पूर्वमुपा-चरत् शुभकर्मणि प्रेरयामास ॥ ४५ ॥

यदैवं प्रेरयति च यदा पत्युरङ्घ्र्यवयवैकदेशे ऊष्माणमौष्ण्यं नोपलभेत शुष्कजलनारिकेलफलवत् देहाभिमानं विहाय स्थितत्वाद्दोष्ण्यानुपलम्भस्तस्या इति ततोऽपि वृत्त्यन्तर-वैशिष्ट्यमाह । आसीदिति । तदा संविग्नहृदया वृत्त्यन्तरावशि-ष्टान्तिमिभ्रवृत्तिमपहाय स्वरूपमुखेनावतिष्ठते तदेवमव-स्याविशेष इति तात्पर्यं ज्ञातव्यम् ॥ ४६ ॥

बन्धुः स्वामी तदनुमानरहित्याद्बन्धुः शोचन्ती प्रकाश-यन्ती विक्लवेत्यादिना प्रतिबन्धमनन्तवृत्तिवृत्तयो बध्यन्ते विपिनं देहबन्धे स्थिता सुस्वरं प्ररुरोदेतीदं पुरञ्जनस्यामुक्तिकाले नाशात् विदाविदुस्तथा व्यापारविलोपाद्गुणामेवैकं प्रतिबन्धं ज्ञातव्यम् ॥ ४७ ॥

उदधिः कर्म तदेव मेखला रशनेव यस्याः सा तथा तां दस्युभ्योऽहङ्कारादिभ्यः क्षत्रबन्धुभ्यो मिथ्याज्ञानादिभ्यो बिभ्य-तीं मां रक्षितुमर्हसि त्वदनुगृहीतया शुश्रूषाज्ञानादया निवर्तस्व इत्यर्थः ॥ ४८ ॥

विपिने वासनावने विलपतीव भावतीव दर्शयती भर्तुः पादयोः पतिता स्वामिनं विहाय स्थिता अश्रूण्यवर्तयन्मुक्तैव भवत् ॥ ४९ ॥

दारुमयीं भेदविषयां चितिं सन्निवदं कृत्वा प्रकाश्य तस्यां सन्निधि पत्युः कलेवरं संसारकारणमार्गोप्य दग्ध्वा अनुमरणे अनु-स्यूतदोषनाशे मनो दधे तादृशीं वृत्तिं प्राकाशयत् ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

तदेवं येन विज्ञानेन जीवन्मुक्तिदशामाप तेनात्यन्तिकमुक्ति-मप्यापेत्याह । साक्षादिति युग्मकेन ॥ ४१ ॥

परे ब्रह्मणि भगवति तदाश्रयत्वेनेत्यर्थः । आत्मनि शुद्धे तदधिष्ठातृत्वेनेत्यर्थः । ईक्षां सिद्धत्वात् तत्प्रयत्नं विहायेत्यर्थः अस्मादेहद्वयलक्षणोपाधेरुपरराम ननु तस्मात्तदीशात्तेनुर्विवक्ष-त्याविर्भावादपीत्यर्थः अनन्तादीनां कालनाद्यासीदपवस्या नाश-कामावात् न आश्रयस्य विद्यमानत्वाच्च ॥ ४२ ॥

वैदर्भ्यास्तु पुरञ्जनस्तु तत्सेवयैव मान्यं प्रापेत्याह । पतिमि-त्यादिना ॥ ४३—४४ ॥

यथा पूर्वं श्रीभगवत्प्रतिमामिवार्च्यमानमपि पाद्यादिनोपा-चरत् आनर्च ॥ ४५—४९ ॥

चितिमिति । अहमस्मीत्यात्मपक्षे श्रोत्रादिकमौपचारिक-मेव ॥ ५० ॥

**तत्र पूर्वेतरः कश्चित्सखा ब्राह्मण आत्मवान् ।
सान्त्वयन् वल्गुना साम्ना तामाह रुदतीं प्रभो ! ॥ ५१ ॥**

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततश्च तस्योत्पन्नप्रेम्णो भगवतः साक्षाद्दर्शनमप्यभूदित्याह । साक्षादेव भगवता हरिणा सन्तापहारिणा विश्वतो मुखं स्फुरता समन्तादेव प्रस्फुरत्तेजसा गुरुणा सता उक्त उपदिष्टो यो ज्ञानदीपः स्वमाधुर्य्यानुभवप्रकारस्तेन तस्मिन्नेव परे ब्रह्मणि आत्मानमीक्षमाणः वासुदेवे भगवति माध्यहं दोग्धहम् रतिमिति पूर्व्वोक्तेः भगवति स्वरतिमुद्वहन्तमनुरागिणं पश्यन्नित्यर्थः तथैव "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति भगवदुक्तेः । आत्मनि स्वस्मिंश्च परब्रह्म सानुरागमीक्षमाणः तत्कृपा एव प्रवर्त्तितानन्दमूर्च्छावशादीक्षां विहाय अस्मात् स्थूलसूक्ष्मोपाधिद्वयात् स्पष्टमेव विरराम ऐश्वर्य्यपक्षीयास्तु श्लोकद्वयमिदमेवं व्याचक्षे स मलयध्वज आत्मानं परमेश्वरं सर्व्वव्यापकतया सर्व्वस्माच्च व्याप्याज्जगतो व्यतिरिक्ततया च आत्मनि स्वस्मिन्नधिष्ठातारं विद्वान् जानन् विरराम संसारादित्यर्थः । व्यापकत्वे व्यतिरिक्तत्वे च दृष्टान्तः आमर्शसाक्षिणं मम आविष्टारं जीवमध्यात्मादिव्यापकमथ च स्वप्ने सुषुप्तावध्यात्मादिव्यतिरिक्तमिव सुखमहमस्वाप्समित्यत्र तत्तद्व्यतिरिक्तस्य केवलस्यात्मन एवानुभवादिति नन्वेतज्ज्ञानं कुतोऽसाववापेति तत्राह । साक्षादिति । ददामि बुद्धियोगन्तं येन मामुपयान्ति ते इति भगवदुक्तेः तेनैव ज्ञानदीपेन परे ब्रह्मणि भगवत्याश्रयतत्त्वे आत्मानं शुद्धजीवमाश्रितमीक्षमाणः तथा आत्मनि शुद्धजीवे च स्वमेव परं ब्रह्म भगवन्तमधिष्ठातारमीक्षमाणः । विहायेक्षामिति जातप्रेमत्वादन्ते तं परामर्शमपि विहायेत्यर्थः श्रीभागवतस्य मोहिनीत्वादितोऽप्यन्यथा कश्चिद्व्याचक्षते तत्तु त एव गृह्णन्ति न भक्ताः ॥ ४१—४२ ॥

तदेवं श्रीगुरुदेवस्य सिद्धिदशापर्य्यन्तं शिष्यस्तं परिचरन्नेव वर्त्तते इति दर्शयति । पतिमिति चतुर्भिः ॥ ४३ ॥

पतिमुप "उपोऽधिके च" हीनेऽपि कर्म्म प्रवचनीयस्तद्योगे द्वितीया पत्युः सकाशात् किञ्चिन्मात्रन्यूनेत्यर्थः । शान्तमङ्गारमस्थं निर्धूममनलमुपशान्ता शुक्रा ज्वाला यथा भाति तद्वत् ॥ ४४-४५ ॥

अर्चतीति अर्चन्ती नोपलभेत नोपालभत ॥ ४६ ॥

गुरोः साधकशरीरापगमे सति । पत्युर्विच्छेदे पतिव्रतेव शिष्यस्तद्विच्छेदसन्तप्तो विलापमग्नो भवतीत्याह । आत्मानं शोचति मामितः परं कस्त्रास्यन इति शोकाकुला ॥ ४७ ॥

उत्तिष्ठेति पक्षे हे गुरो ! इमां पृथ्वीं त्वया प्रवर्त्तितश्रवणादिभक्तिगतिं दस्युभ्यः भक्तिविरोधिमतेभ्यो बिभ्यतीम् ॥ ४८ ॥

अवर्त्तयत् प्रवर्त्तयामास ॥ ४९ ॥

तस्यां निधाय अग्निदानेनादीप्य च पक्षे श्रीगुरोर्देहसंस्कारं कृत्वा श्रीमद्गुरुचरणवियुक्तोऽहं तदीयगुणानुस्मरणमयशोकदावाग्निदग्धदेहं प्राणां धर्तुमशक्नुवंस्तदुपदिष्टश्रवणकीर्त्तनादिभक्तौ नैव शक्तिं धारयामि । तस्मादद्यैव मरिष्यामीति शिष्यो मनसि निश्चिनोतीति दर्शयामास ॥ ५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मलयध्वजस्य मोक्षमाह । साक्षादिति द्वाभ्याम् । "ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन् देहं स याति परमां गतिम्" इति साक्षाद्भगवतोक्तेन अन्तकाले भगवत्स्मरणात्मकेन सर्वतो मुखं स्फुरताऽकुण्ठेन ज्ञानमेव दीपस्तेन ॥ ४१ ॥

परे ब्रह्मणि अंशिनि आत्मानमंशभूतम् आत्मनि अंशे परं ब्रह्म अंशि स्वरूपमीक्षमाणः ईक्षां संसारेक्षां विहाय अस्मात् संसारात् उपरराम मुक्तोऽभूदित्यर्थः ॥ ४२ ॥

वैदर्भीवृत्तमाह । पतिमित्यादिना ॥ ४३ ॥ ४४ ॥

सुखितपरमासनं यस्य तं प्रियतममुपारतं मृतमजानती यथाऽऽसाद्य पूर्ववदुपाचरत् ॥ ४५ ॥

अङ्घ्रिमर्चती तच्छोष्मायां नोपलभेत नापश्यत् ॥ ४६—४८ ॥

विपिने पतिमनुगता तस्य पादयोः पतिता अश्रूणि अवर्तयत अमुञ्चत् ॥ ४९ ॥

आदिश्य अनुमरणे मनो दधे ॥ ५० ॥

भाषाटीका ।

हेनृप ! हरिगुरु साक्षात् भगवान् का कहा हुआ जो निर्मल, ज्ञान रूप दीप सर्वत्र प्रकाश मान् तिससे परब्रह्म मे आत्मा को आत्मा मे परब्रह्म को देखता हुआ संसार की इच्छा को छोडकर विषयों से उपरत होगया ॥ ४१—४२ ॥

परमधर्म के जानने वाले मलयध्वज पति के सब प्रकार की सेवा को करती हुई वैदर्भी पति को देवता मानकर करने लगी ॥ ४३ ॥

चीरवस्त्र धारण करके व्रतों से कृशित होकर मस्तक मे वेणी को धारण करके शान्त अग्नि के पीछे जैसी अग्निशिखा होती है तैसे पति के समीप मे रहती थी ॥ ४४ ॥

इसप्रकार सेवा करने मे पति ने शरीर त्यागा ऐसा न जान कर सुन्दर स्थिर आसन से पहिले सरीकी सेवा करती रही ॥ ४५ ॥

पति के अर्चन समय मे जब चरण मे गर्मी नहीं मालूम पडी तब यूथ से छूटी मृगी सरीकी दुखित होगई ॥ ४६ ॥

कोइ बन्धु न रहनेसे विकल के आंसु से स्तनों को सिंचतीहुई आत्मा को शोचती हुई जङ्गलमे वडे स्वरसे रोदन करने लगी ॥४७॥

हे राजर्षि ! उठो उठो समुद्र की परिखा वाली इस पृथिवी को रक्षा करो हीन क्षत्रियों से यह पृथिवी डरतीहै ॥ ४८ ॥

इस प्रकार विलाप करती हुई बाला वन में पति के पावों मे गिरकर रोकर आंसुओं को गिराने लगी ॥ ४९ ॥

काष्ठों की चिता बनाकर उस में पति के शरीर को रखकर अग्नि जलाकर पति के पीछे मरने की इच्छा किया ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका

पूर्वेतरोऽविज्ञातेश्वरः सखा ब्राह्मणवेषेणेति बुद्धिः सखा प्रियवाक्येन सम्बोधयत् ॥ ५१ ॥

॥ ब्राह्मण उवाच ॥

का त्वं कस्यासि कोवाऽयं शयानो यस्य शोचसि ।
जानासि किं सखायं मां येनाग्रे विचचर्थ ह ॥ ५२ ॥
अपि स्मरसि चात्मानमविज्ञातसखं सखे ! ।
हित्वा मां पदमन्विच्छन् भौमभोगरतो गतः ॥ ५३ ॥
हंसावहं च त्वं चार्य ! सखायौ मानसायनौ ।
अभूतामन्तरा वौकः सहस्रपरिवत्सरान् ॥ ५४ ॥
स त्वं विहाय मां बन्धो ! गतो ग्राम्यमतिर्महीम् ।
विचरन् पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया ॥ ५५ ॥
पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम् ।
षट्कुलं पञ्चविपणं पञ्चप्रकृतिस्त्रीधवम् ॥ ५६ ॥
पञ्चेन्द्रियार्था आरामा द्वारः प्राणा नव प्रभो ! ।
तेजोऽबन्नानि कोष्ठानि कुलमिन्द्रियसंग्रहः ॥ ५७ ॥
विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया ।
शक्त्यधीशः पुमांस्त्वत्र प्रविष्टो नावबुध्यते ॥ ५८ ॥
तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रुतस्मृतिः ।
तत्सङ्गादीदृशीं प्राप्तो दशां पापीयसीं प्रभो ! ॥ ५९ ॥
न त्वं विदर्भदुहिता नायं वीरः सुहृत्तव ।
न पतिस्त्वं पुरञ्जन्या रुद्धो नवमुखे यया ॥ ६० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्य यं शोचसि अग्रे सुप्तेः पूर्वं विचचर्थ ह मयि स्थितत्वेन सख्यसुखमनुभूतवानसि ॥ ५२ ॥

ननु नाहमावयोः सख्यं सहचरत्वं च जानामीति चेत्तत्राह । यद्यपि मां न जानासि तथाप्यात्मानं त्वामविज्ञातसखमविज्ञातः कश्चिन्मे सखा आसीदित्येवं किं स्मरसि सख इति पुंस्त्वनिर्देशः प्राक्तनपुंस्त्वस्मरणाय सख्यं स्मारयन् स्ववियोगकृतमनर्थमाह । हित्वेति । सार्धैः षड्भिः पदं स्थानम् ॥ ५३ ॥

हंसौ शुद्धौ मानसं हृदयमयनं ययोः कथापक्षे मानससरसि स्थितौ पक्षिभावभूतावास्तां ओको गृहम् अन्तरा विनैव वा सहस्रवर्षाणि सहस्रपरिवत्सरान् महाप्रलयो यावत् ॥ ५४ ॥

हे बन्धो ! ग्राम्ये सुखे मतिर्यस्य स्त्रिया मायया ॥ ५५ ॥

पञ्चोद्यानादय आरामा उपवनानि यस्मिन् नव द्वाराणि नासाच्छिद्राणि यस्मिन् एकः प्राणः पालो यस्मिन् त्रीणि पृथिव्यप्तेजांसि कोष्ठानि प्राकारा यस्मिन् षट् ज्ञानेन्द्रियमनांसि कुलान्यभीष्टविषयसमर्पका वणिजो यस्मिन् पञ्च विपण्या हट्टाः कर्मेन्द्रियाणि यस्मिन् पञ्च भूतानि प्रकृतिरुपादानकारणं यस्य स्त्री बुद्धिरेव धवः पतिः स्वामिनी यस्मिन् ॥ ५६ ॥

स्वयमेवेमं श्लोकं व्याचष्टे । पञ्चेन्द्रियार्था इति षट्कुलामिति षट्त्वमेकपालामिति च स्पष्टत्वान्न व्याख्यातम् ॥ ५७ ॥

भूतान्येवाव्यया प्रकृतिरुपादानं यस्य स्त्रीधवमित्यस्य व्याख्यानं शक्तिरधीशा यस्य तद्वशः सन्नित्यर्थः ॥ ५८ ॥

स्पृष्टोऽभिभूतः अतो न विद्यते श्रुते प्रज्ञस्ये स्मृतिर्यस्य ॥ ५९ ॥

तत्त्वमुपादिशति । न त्वमिति चतुर्भिः । सुहृत्पतिः नवद्वारे पुरे यया रुद्धोऽसि तस्याः ॥ ६० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र तस्मिन्नवसरे पूर्वतरः पुरातनः ईश्वररूपः कश्चित् सखात्मवान् ब्राह्मणः आगत्य वल्गुना मधुरेण साम्ना मामवाक्येन सान्त्वयन्नुपलालयन् रुदन्तीं प्रत्याह । हे प्रभो ! निरुपाधिक-

[illegible]वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

[illegible]कसुकृतमात्रसन्तुष्टो भगवान् ब्राह्मणरूपेणागत्य [illegible]वचनमाह भागवतसम्बन्धमात्रतुष्टो भगवान्वैदर्भीमनुश[illegible] यावत् ॥ ५१ ॥

[illegible]उक्तिमेवाह । का त्वमित्यादिना । तथैवान्तरमार्यौरित्यन्तेन [illegible]त्वमिति कथं जातीयकेति प्रश्नः कस्यासि कस्य संबन्धिन्यसि-का वायमित्यपि तथा यस्य शोचसि यदर्थे शोचसि शयानस्य स्वस्य च स्वरूपमुभयोः संबन्धं देहप्रयुक्तमविदित्वा-किं वृथा शोचसीत्यभिप्रायः सखायं मां जानासि किं स्वस्वरूपमेवाजानती त्वं कथं मत्स्वरूपं जानासीत्यर्थः तत्र हेतुर्येन मया हेतुनाग्रे सृष्ट्यादौ विश्वकर्थ विकृतवानसि अनादिरस्वकर्मानुगुणमत्संकल्पेन स्वपरस्वरूपं विस्मृत्य देवमनुष्यादिविकारं प्राप्तोऽसीत्यर्थः ॥ ५२ ॥

यद्यपि मां न जानासि तथाप्यात्मानं त्वामविज्ञातसख-मविज्ञातः कश्चिन्मे सखा आसीदिति किं स्मरसि हे सखे ! इति पुंस्त्वनिर्देशः प्रकृतिविलक्षणपुरुषस्वरूपस्मरणाय सख्यं स्मारयन्स्ववियोगकृतमनर्थमाह । हित्वेति सार्द्धैः षड्भिः । मामन्तरात्मभूतं हित्वा प्राप्यभोगः शब्दादिविषयानुभवः तस्मिन्नासक्तः पदं भोगस्थानं देवमनुष्यादिशरीरमभिलषन् गतः प्रकृतियोगं प्राप्तः स्वपरयाथात्म्यज्ञानविधुरो जात इत्यर्थः ॥ ५३ ॥

हे आर्य ! त्वं चाहं सहस्रपरिवत्सरानन्तकालमन्तरावोकः शरीररूपगृहमध्य एवान्तरेति मध्येऽव्ययं वाशब्द एवार्थः ओको गृहं मानसायनौ हृत्पद्मगृहगतौ सखायौ हंसावभूताम् सखिशब्दार्थसामानाधिकरण्याच्छेषे प्रथमः इति प्रथमपुरुषः अत्र हंसत्वविधानाय युष्मदस्मदोः सखित्वमुद्दिश्यते उद्देश्यानुगुणा च सर्वत्र तिङ्विभक्तिः प्रयुज्यते तद्यथा त्वं वाहमस्मि भगवो देवते त्वमसीति भगवो देवते त्वमसीति अत्र सखित्वं न विधेयं युष्मदस्मदर्थोद्देशेनात्र पूर्वतरः कश्चित्सखा अविज्ञातसखं सखे इत्यनेनैव प्राप्तत्वाद्धंसत्वं त्वप्राप्तं हंसत्वं शुद्धत्वं हिनस्ति निरस्यति विकारानिति हंसः तत्रायमर्थः अपास्तमरणौ स्वतो निरस्तविषयसुखाविति औपाधिको हि जीवस्य विषयभोगः कथापवे मानसलरसि स्थितौ वासिनावभूताम् ॥ ५४ ॥

स त्वं हंसस्त्वं बन्धुं सखायं मां विहाय विस्मृत्य ग्रामेषु शब्दादिषु मतिर्यस्य सः महीं प्रकृतिमयस्थलं प्राप्तः तत्रापि पदं निवासस्थानं विचिन्वन् यथा मही विश्वरन्ध्रकादाविरपदमदाक्षीरित्यन्वयः पदं विशिनष्टि स्त्रिया प्रकृत्या निर्मितम् ॥ ५५ ॥

पञ्चारामं पञ्चारामा उपवनानि यस्मिन् नवद्वाराणि छिद्राणि यस्मिन्नेकः पालः पालको यस्मिन् त्रीणि कोष्ठानि प्राकारा यस्मिन् षट्कुलानि अभीष्टविषयसमर्पकाणि यस्मिन् पञ्चविपणाः हट्टा यस्मिन् पञ्चप्रकृतिरुपादानकारणं यस्य स्त्री भार्या एव धवा स्वामिनी यस्मिन् तत् ॥ ५६ ॥

स्वयमेव श्लोकं व्याचष्टे । पञ्चेति । पञ्चेन्द्रियार्थाः शब्दादयः आरामाः प्राणायनाः प्राणाधीना इन्द्रियाणि चक्षुरादीनि तेषां प्राणावस्थानदृष्टिरवासनदाभयावाच [illegible]पादिरूपाणि छिद्राणि नव द्वारः प्राणायना इन्द्रियस्थानानि गोलकानि छिद्राणि इति यावत् नवद्वार एकः प्राणः पालो यस्मिन्निति [illegible] त्वाच्च व्याकरोति तेजोऽबन्नानि तेजआपश्चान्नं पृथिवी च एतानि कोष्ठानीत्यर्थः इन्द्रियसंग्रहः मनसा सह ज्ञानेन्द्रियषट्कसमुदायः प्रत्येकं कुलवदभीष्टप्रापकत्वात्कुलमित्यर्थः ॥ ५७ ॥

क्रियाशक्तिः कर्मेन्द्रियाणि पञ्च विपणाः पञ्च प्रकृतीत्यस्य व्याख्यानं भूतप्रकृतिरिति भूतानि पञ्च पृथिव्यादीन्येव-अन्यथा नित्या प्रकृतिरुपादानकारणमत्र भूतान्तर्गतानां तेजोऽबन्नानां कथायां देहारम्भकत्वात्प्रकृतित्वं कोष्ठस्थानीयादिस्थितधिरमांसरूपेण परिणामात्तेजोऽबन्नानि कोष्ठानीत्युक्तं तथा च श्रुतं "अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो भागः तत्पुरीषं यो मध्यमस्तन्मांसमापः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो भागः तन्मूत्रं यो मध्यमस्तल्लोहितं तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो भागस्तदस्थीति यद्यपि कोष्ठस्थानीयत्वेन परिणतेषु तेजोऽबन्नेषु पञ्चीकरणप्रक्रियया वाय्वाकाशावपि प्रविष्टौ तथापि भूयस्त्वांशानां बाहुल्यात्त्रिकोष्ठमित्युक्तं भूतात्मकोपादानस्य प्रतिक्षणपरिणामित्वादनित्यत्वाद[illegible] प्रधानाव्ययस्य नित्यत्वादव्ययेत्युक्तं तथा च श्रुतिः "गौरनाद्यन्तवती अजामेकामिति" च स्मर्यते च प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपीति स्त्रीधवमित्यस्य व्याख्या [illegible] इति [illegible]र्धीशा यस्य तद्यथाः त्वमित्यर्थः पुमान् भवान् तत्र पदे प्रविष्टः नावबुध्यते स्वात्मानं मां च न आस्मरति ॥ ५८ ॥

तस्मिन् पदे त्वं रामया स्त्रिया युक्त्या स्पृष्टोऽभिभूतः रममाणः विषयाननुभवन्नन एव गता स्मृतिः स्वपरयाथात्म्यज्ञानरूपा यस्य सः तत्सङ्गाद्बुद्धिनिमित्तदेहानुबन्धिस्त्रीसङ्गात् पापीयसीमीदृशीं स्त्रीयोनिरूपां दशां प्राप्तः हे विभो ! धर्मतो व्यापकस्वभाव ! ॥ ५९ ॥

एवं स्त्रीवियोगनिमित्तप्रकृति परिणामरूपबुद्धिपारवश्यनिमित्तेयं संसृतिरूपानर्थपरम्परेत्यभिप्राय सर्वं प्रकृतिपरिणामरूपवैचित्र्यं नात्मनो धर्मः किन्तु बुद्धिसङ्गनिमित्त औपाधिक आत्मनि प्रतीयत इति वदन् प्रकृतिविलक्षणज्ञानात्मकप्रत्यगात्मयाथात्म्यमुपदिशति । नेति । त्वं विदर्भस्य दुहिता न भवसि अयं वीरो मलयध्वजस्तव पतिरपि न भवति नव द्वारे पुरे यस्या रुद्धा रुद्धोऽस्मि तस्याः पुरञ्जन्यास्त्वं पतिरपि न भवसि विदर्भदुहितृत्वादीनां देहाकारत्वेनात्माकारत्वाभावादिति भावः ॥ ६० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र तस्यामवस्थायां कश्चिद्वेदान्तवाक्यार्थो हितोपदेष्टृत्वेन सखिधर्मे वर्तमानो ब्राह्मणो ब्रह्मसम्बन्धी निर्दोषशब्दलक्षणागमसम्बन्धी वाग्मवान् परमात्मगुणप्रतिपादनपरः सान्त्वा अखिलार्थप्रकाशनेन सान्त्वयन् प्रतिपदं दर्शितान्वयः बुद्धिमाह अबोधयदिति कथापवे प्रतीत एवार्थः ॥ ५१ ॥

तदनुकरणतया बोध्यत इत्याह । केति । का [illegible] जातिविशिष्टा न कापि किञ्च कस्यासि कं पुरुषमाश्रित्य तिष्ठसि न कमपि सर्वचेतनानुस्यूतत्वात्त निर्देष्टुं शक्यते यस्य शोचसि यदत्वमिति प्रकाशक वर्तते अयं शयानः [illegible] पदार्थः कः पाञ्चभौतिकत्वात्तवास्य न कोऽपि सम्बन्धः किन्तु [illegible] त्वं का नामतो गोत्रतो निरूतम् न तव [illegible] [illegible] पुत्री भार्या वा न कस्यापीत्यर्थः [illegible] वाऽयं शयानस्तव [illegible] सत्येन [illegible] यस्य भर्ता [illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न इति वा अग्रे पूर्वकाले येन मया विचरणार्थं विचारितवानसि, तं सखायं त्वया सह वर्तमानं मां जानासि किं अविज्ञानात् जातु प्राप्तिरस्तीत्येतच्छ्लोकाभिप्रायः ॥ ५२ ॥

किञ्च हसखे ! अविज्ञातः । परमात्मा सखा यस्य स तथा तमात्मानं त्वं स्मरस्यपि न स्मरसि चेत् स्मरेति वार्थः । चिरङ्कुरुप्याग्मनोरम्भराविरमुभयावपयामिदानीं आत्मानं चेतनमविभज्येवाह । हित्वेति । विषयभोगरतस्तदर्थं भोगस्थानमभिवाञ्छन् मृगयन्मां हित्वा गतः पृथक्कृत इव अमत इति पाठे पदमभिवाञ्छन्नमूर्विलत्यन्वयः ॥ ५३ ॥

वाक्यार्थाभिमानी कश्चिच्चेतनः स्वात्मनो रूपं च तस्यत उपदिशति । हंसाविति । आर्य ! प्राक् अहं च त्वं च हंसौ यतो निर्वेपो मानसं स्थानमयनं ययोस्तौ तथा सहस्रपरिवत्सरान् बहुकालं रममाणौ अवात्स्व अभ्यत्र मानससरोवराभयो हंसौ अर्थिनौ प्राक् धीयं पुरुषविषयात्प्राप्तावास्मृतिः ॥ ५४ ॥

पुनः आरब्धकर्मवशात् अन्यमतिर्मां विहाय कर्मभूमिं गतो विचरन् पर्यटन् किञ्चित्पदं भोगस्थानमद्राक्षीः स्त्रिया विषयबुद्ध्या रचितम् ॥ ५५ ॥

पञ्च पादाः प्राणा यस्मिंस्तथा तत् स्त्रीपतयः पतिः स्वामी यस्मिन् तत्स्त्र्यधिपम् ॥ ५६ ॥

पञ्चारामार्थमाह । पञ्चेति । इन्द्रियार्थाः शब्दादयः नवद्वारमित्यस्यार्थमाह । द्वार इति । प्राणाख्यो द्वार इत्युच्यन्ते त्रिकोष्ठमाह । तेज इति । षट्कुलमाह । गोलकेति । गोलकाख्यानीन्द्रियाणि गृह्यन्त इति गोलकेन्द्रियसङ्ग्रहः ॥ ५७ ॥

विपण्यां व्यवहारः क्रियाशक्तिः कर्मेन्द्रियशक्तिः पञ्चप्रकृतीत्येतदाह । भूतेति । पञ्चभूतानां या प्रकृतिर्मूलकारणं सा पञ्चप्रकृतिरित्युच्यते अव्यया नित्या स्त्रीत्यमाह । शक्तीति । शक्तिर्बुद्धिः सैवाधीशा पुरोपभोगे कारणं यस्य स शक्त्यधीशः अथवा कोष्ठानि भाण्डागारस्थानानि कुलानि बहिष्ठपदार्थदर्शनाय निर्मितस्थानानि ॥ ५८ ॥

रामया विषयबुद्ध्या स्पृष्टो वशीकृतः हतस्मृतिः आत्मज्ञानरहितः विषयबुद्धिसङ्गफलं नरकादि भवतीत्यर्थः ॥ ५९ ॥

न त्वमित्यादि विषयवैराग्यमुच्यते ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ब्राह्मणरूपो भूत्वा ॥ ५१ ॥ ५२ ॥

कथापक्षे सखे इति जीवत्वमात्रस्मरणाय ॥ ५३ ॥

यद्यपि परमात्मसन्दर्भे ज्ञानेच्छुरयमधिकारीत्यभेदोपदेशपर्यवसायकं व्याख्यातम् । तथाप्यपरितोषादत्र भक्तिपर्यवसानत्वमेव व्याख्यायते यथा सख्यमेव स्थापयति हंसौ मानसायनौ महाप्रलयसमये तु भोक्तृरूपमुपाधिमन्तरेवामूतामभूवेत्यर्थः सहस्रपरिवत्सरान् इत्यादिना महाप्रलयोपलक्षणम् ॥ ५४ ॥

[illegible] हेतुमाह । स त्वमिति सार्द्धैः षड्भिर्मन्यसे इत्य [illegible] । तत्र [illegible] । [illegible] तथा विचरन्

मां विहायाहन्ताममतापरो व्यवधाय मही [illegible] इवां गतः सन् विचरन् पश्यासीत्यर्थः ॥ ५५ ॥ ५६ ॥

पञ्चेन्द्रिया इति युग्मकम् ॥ ५७ ॥

विभो ! हे सर्व्वसाधनसमर्थ तथा पीत्यर्थः ॥५८॥५९॥६०॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अगुणाविरहव्याकुलोमानवशावामिव शिष्यस्य भगवद्धर्मं स्यादिति द्योतयति । तत्रेति । पूर्व्वमरः अनादिरीश्वरः सखा । द्वासुपर्णावित्यादि श्रुतेः आसयाः आसयावजाधारीति साक्षात् स्वीयस्वरूपदर्शनं प्रेम्णा विना न भवतीति ज्ञापयति स्मेति भावः आत्मवान् अन्तराच्छन्नीकृतस्वस्वरूपयुक्तः ॥५१॥

कोऽयं शयान इति प्रश्ने मम श्रीगुरुरयमिति कथापक्षे मम पतिरयमिति चेत् मां किं जानासीति ननु त्वमेव विप्रो मम क इत्यत आह । सखायमिति । कथं त्वया सह मम सख्यमित्यत आह । येन मया सह अग्रे सृष्टेः पूर्व्वं विचरार्थं । मय्येव मिलित्वा मत्सङ्गेन सुखमनुभूतवान् त्वमेवासीरित्यर्थः ॥ ५२ ॥

नन्वहं किमपि न जानामीति तत्राह । अपीति । यद्यपि मां न जानासि तदप्यात्मानं स्वमविज्ञानस्वमविज्ञातः कश्चिन्मे सखासीत्येवं किं स्मरसि बहुप्रीतावपि इत्यार्थः अविज्ञातस्य सखायमिति वा सखीत्यप्रयुज्य सखे इति पुंस्त्वनिर्देशः प्राप्तनपुंसत्वं स्मारयितुम् एवमग्रेऽपि त्वमेव स्मारय चेदन [illegible] । हित्वेति । सृष्ट्यारम्भे प्राचीनकर्म्मवशादेवेत्यर्थः पदं स्थानम् ॥ ५३ ॥

हंसौ शुद्धावात्मानौ मानसे हृदयमयनं ययोस्तौ कथापक्षे मानससरसि स्थितौ पक्षिणावभूताम् आवां [illegible] विनैव वासाद् एवार्थे सहस्रं परिवत्सरान् महाप्रलयं याव-दित्यर्थः ॥ ५४ ॥

स्त्रिया मायया ॥ ५५ ॥

पञ्चविषया आरामा उपवनानि यत्र नव द्वाराणि प्राणच्छिद्राणि यत्र एकः प्राण एव पालो यत्र त्रीणि पृथक्पृथक्तेजांसि कोष्ठानि यत्र षट् ज्ञानेन्द्रियमनांसि कुलानि वणिजो यत्र तत् पञ्च कर्म्मेन्द्रियाणि विपणा हट्टा यत्र तत् पञ्च महाभूतानि प्रकृतिरुपादानकारणं यस्य तत् स्त्री बुद्धिरेव धवः पतिः स्वामिनी यस्मिन् तत् ॥ ५६ ॥

श्लोकमिमं स्वयमेव व्याचष्टे । पञ्चेति । प्राणाः प्राणच्छिद्राणि नव कुलमिति वणिजामेवार्थतः प्राप्तं भूतानि पञ्चैव प्रकृतिः कारणमत्र पदं प्रविष्टः पुमान् मुह्यति । कीदृशः शक्तिर्बुद्धिरेव अधीशा यस्य स इति स्त्रीधवामित्यस्य व्याख्यानं तत्पदं स्त्रीस्वामिकमिति किं वाच्यं तत्र प्रविष्टः पुमानपि स्त्रीस्वामिक एव भवेदित्यर्थस्य द्योतनार्थं पुंविशेषणत्वेनोपन्यस्तम् ॥ ५७ ॥ ५८ ॥

न श्रुता न श्रवणविषयीकृता स्मृतिः स्वज्ञानं येन सः ॥५९॥

नन्वेवं यद्यहमश्रुतस्मृतिरेवास्मि तर्हि मत्स्मृतिं त्वमेव भावयेत्यत । आह । नेति । त्वं विदर्भस्य प्राकृतजीवस्य कस्यापि न दुहिता नापत्यं किन्तु मच्छक्तिरूपो जीवोऽसीति भावः । अयं वीरोऽपि न ते सुहृत् हितकारी किन्त्वयमेव एतद्रूपवत्स्वदुर्गुरुभूत्वा स्वभक्तिमुपदिश्य स्वस्यानुरूपं कृत्यमकरवम् । इति पद्यद्वयं पृथक् पृथक् व्याचष्टे यथा नवमुखं पुर त्वं कठ-

माया ह्येषा मया सृष्टा यत्पुमांसं स्त्रियं सतीम् ।
मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिम् ॥ ६१ ॥
अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ।
न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ॥ ६२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्याः पुरञ्जन्यास्त्वं न पतिः किन्तु अविद्योपाहितं चैतन्य-मसि कथापक्षे स्पष्टमेव ॥ ६० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पूर्वतरः अनादिः परमेश्वरः ब्राह्मणाः ब्राह्मणरूपः साम्ना-नुकूलवाक्येन ॥ ५१ ॥

यस्य यम् येन मया कर्मफलमभुञ्जता साक्षिमात्रेण हेतुना अमे सुहृदः पूर्वं विचरर्थं ह नानायोनिषु सुखादिकमनुभूतवानसि तं मां "द्वा सुपर्णा सयुजा सखाया समानं वृक्षम्" इति श्रुतिसिद्धं जानासि किम् ॥ ५२ ॥

अविज्ञातः सखा यस्य तमात्मानं नवद्वारपुर्यन्वेषणकाङ्क्षिकं स्मरसि अपि किम् स वरं स्मारयन् स्वाविबोगकृतमनर्थमाह । हित्वेति षड्भिः । भौममार्गेषु शब्दादिविषयेषु रतः तदर्थं पदं स्थानमभिवक्षन् मां हित्वा तदेव गतः नवद्वारस्थानासक्तोऽभूरित्यर्थः पुंस्त्वनिर्देशः प्राक्तनपुंस्त्वस्मरणाच ॥ ५३ ॥

तदेव प्रपञ्चयति । हंसावित्यादिना । हे आर्य ! ओकः अन्तरा-स्थूलं शरीरं विनैव वाशब्दोऽवधारणे सहस्रपरिवत्सरान् अहं त्वं च सखायौ अभूनां कण्ठभूतौ मानसं सूक्ष्मशरीरगतं हृदय-मयनं ययोस्तौ इत्यन्वयः ॥ ५४ ॥

ग्राम्ये सुखे मतिर्यस्य सः अत एव मां विहाय अत्यन्ततो विस्मृत्य ॥ ५५ ॥

पञ्चविषया आरामा उपवनानि यस्मिंस्तत् नव द्वाराणि प्राणाच्छिद्राणि यस्मिंस्तत् एकः प्राणः पालो यस्मिंस्तत् पृथिव्य-प्तेजोरूपत्रिकोष्ठकम् षट्कुलानि कुत्सितविषयग्राहकाणि मनः-सहितानि ज्ञानेन्द्रियाणि यस्मिंस्तत् पञ्चकर्मेन्द्रियाणि विपणो हट्टो यस्मिंस्तत् पञ्चभूतानि प्रकृतिरुपादानं यस्य तत् स्त्री बुद्धिर्भेवा स्वामिनी यस्य तत् ॥ ५६ ॥

पूर्वश्लोकं स्वयं व्याचष्टे । पञ्चेति । प्राणाः प्राणच्छिद्रा-णीन्द्रियगोलकानि नवद्वारः एकपालमिति स्पष्टत्वान्न व्याख्या-तम् ॥ ५७ ॥

क्रियाशक्तिः कर्मेन्द्रियगणः भूतानि अव्यया नित्या प्रकृति-रुपादानम् शक्तिर्बुद्धिरधीशा भवा यस्य सः बुद्धिवशः पुमान् भवान् स्वात्मानं मच्छक्तिभूतं मां च नावबुध्यते ॥ ५८ ॥

रामया बुद्ध्या स्पृष्टोऽभिभूतः अतो न विद्यते ध्रुवे तत्त्वसु-मुखाच्छूने अंशांशितत्त्वे स्मृतिर्यस्य सः ॥ ५९ ॥

सुहृत्पतिर्नास्ति अध्यात्मपक्षे गुरुत्वनिषेधो नास्ति यद् यया हेतुभूतया पूर्वत्र पुमांसमिदानीं सतीं श्रेष्ठां स्त्रियं मन्यसे सैषा मया सृष्टा महदादिरूपैर्नानावस्थां नीता विश्वमो-हिनी माया यतः उभयं पुंस्त्वस्त्रीत्वयुग्मं जीवे नास्ति अतः अहं पुमान् अहं स्त्री इत्याग्रहं हित्वा यत् यौ हंसौ तयोरावयोर्गति स्वरूपं पश्य ॥ ६०—६१ ॥

भाषाटीका ।

हे प्रभो ! उसी समय पर आत्मज्ञानी पूर्वका सखा कोई ब्राह्मण आकर उसके समझाने के लिये मनोहर साम युक्त वचनोंसे उसरोती हुई वैदर्भी से बोला (अनादि सखा अंतर्यामी परमात्मा है) ॥ ५१ ॥

ब्राह्मण बोला कि तू कौन है किसकी कन्या है यह कौन है जिसको शोचती है जिसके साथ पहिले विचरती थी मैं सखा हूं मेरे को जानती है किनहीं (अन्तर्यामी भगवान् ही जीव को समुझाते हैं ॥ ५२ ॥

हे सखा अपना नाम अज्ञात सखा जानते हो कि नहीं भोग स्थान की चाहना कर के पृथिवी के भोगों में रत हो कर मेरे को छोड कर तुम चले गये थे ॥ ५३ ॥

हे आर्य ! हम तुमदोनों हंस थे मानसरोवर में रहते थे हजारों वर्ष तक विना घर के रहे (प्रलय काल में जीव का शरीर नहीं रहता है) ॥ ५४ ॥

हे बन्धो ! विषय सुख में मन लगने से मेरे को छोड कर तुम पृथिवी को चले गये घूमते घूमते कोई एक स्त्री का बना मकान को तुमने देखा (अनेक योनि में भ्रमते माया का बनाया मनुष्य शरीर देखा) ॥ ५५ ॥

उस स्थान मे पांच उपवन हैं नौ दरवाजे हैं एक रक्षक है तीन परकोटा हैं छै दुकान वाले हैं पांच दुकान हैं पांच उसके कारण हैं स्त्री उसकी मालिकिनी है ॥ ५६ ॥

तिसमे रूपादिक पांच विषय आराम हैं नौ प्राण इन्द्रियों के द्वार हैं एक मुख्य प्राण पालक है पृथिव्यादिक कोष्ठ हैं इन्द्रियों का समूह दुकान वाले हैं ॥ ५७ ॥

कर्मेन्द्रिय दुकान हैं महा भूत कारण हैं बुद्धि उस पुरका मालिक है पुरुषको उस पुरमें प्रवेश होने से अपना ज्ञान नहीं रहता है ॥ ५८ ॥

तिस पुरमे तुम प्रवेश होकर स्त्रीका संग पाकर अपने सखा को भूल गये तब हे प्रभो ! उस स्त्री के संग से ऐसी खोटी दशा को प्राप्त भये हो ॥ ५९ ॥

तुम विदर्भ की पुत्री नहीं हो वह वीर तुमारा पति नहीं है जिसने तुमको नौ द्वारके पुर मे रोका था उस पुरंजनी के पति भी तुम नही हो ॥ ६० ॥

श्रीधरस्वामिकृतभावार्थदीपिका

पुमांसं पूर्वजन्मनि यदमन्यथा इदानीं च सतीं श्रेष्ठां स्त्रियं यन्मन्यसे एषा माया यत उभयमिदं [illegible] नास्ति [illegible]

यथा पुरुष आत्मानमेकमादर्शचक्षुषोः ।
द्विधा भूतमवेक्षेत तथैवान्तरमावयोः ॥ ६३ ॥
एवं समानसो हंसो हंसेन प्रतिबोधितः ।
स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिम् ॥ ६४
बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितम् ।
यत्परोक्षप्रियो देवो भगवान् विश्वभावनः ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां पुरञ्जनोपाख्याने
अष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

तावां हंसौ शुद्धौ नौ आवयोर्वक्ष्यमाणां गतिं स्वरूपं पश्य ॥ ६१ ॥

तत्त्वंपदार्थयोर्भिन्नांशेनैक्यमाह । अहमेव भवान् उपचारं प्राप्तोऽसि न चान्य इति व्यतिहारोपदेश उक्ताभिप्रायः किन्नु अन्तरम् ॥ ६२ ॥

तर्हि कथमावयोरत्यन्तसर्वज्ञत्वादिधर्मभेदस्तत्राह । यथेति । आत्मानं देहमादर्शे निर्मले महान्ते भिन्नं चावेक्षेत परस्य चक्षुषि च तद्विपरीतम् विद्याविद्योपाधिकृतो धर्मभेद इत्यर्थः ॥ ६३ ॥

एवममुना प्रकारेण स मानसो हंसः क्षेत्रज्ञो हंसेन परमात्मना बोधितः सन् स्वस्थ आत्मनि स्थितः संश्चिरं ध्यात्वा तद्व्यभिचारेण तद्विरहवियोगेन विषयाभिलाषबुद्ध्या नष्टां स्मृतिमहं ब्रह्मास्मीति ज्ञानं पुनः प्राप्तवान् ॥ ६४ ॥

कथामात्रमिति बुद्धिं वारयति । बर्हिष्मन्निति । पारोक्ष्येण राजकथामिषेण तत्र हेतुः यद्यस्मात् हे बर्हिष्मन् प्राचीनबर्हिः एतद्ध्यात्मकथामिषेणात्मकथाप्रदर्शिता यस्माद्देवः श्रीनारायणः परोक्षप्रियः साक्षादात्मज्ञानकथनेन तव चेतसि कथा नायातीति भावः ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।
अष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अत्र पञ्चमहेतोः पूर्वजन्मनि पुमांसमिदानीं सतीं श्रेष्ठां स्त्रियं मन्यसे एवा हेतुभूता मया सृष्टा मायैव अत उभयमप्यात्मनि न वस्तुतोऽस्ति हि यस्मात्तावां हंसौ शुद्धौ नौ आवयोः अथ अधुना गतिं वक्ष्यमाणं स्वरूपं पश्य विमर्शयेत्यर्थः ॥ ६१ ॥

किञ्च वक्ष्यमाणमेवाह । अहं भवान् भवच्छरीरकः त्वमेवाहं मद्रूप एवाहं त्वं कदाचिदपि न मच्छरीरत्वरहितः अहं तव सदा आत्मा त्वं तु मम सदा शरीरभूत इत्यर्थः यथान्यस्त्वमतो न मत्तोऽन्यः न मत्तः पृथग्भूत इत्यर्थः किञ्च अभयं नौ आवयोः छिद्रं सम्बन्धवैधुर्यं मनागपि कदापि जातु कदाचित् कवयो विद्वांसः न पश्यन्ति एवं स्वरूपनियमकथनेनापृथक्सिद्धजातिगुणप्रभादिविशेषणविशिष्टव्यक्तिगुणिमत्स्थाप्य जीवेश्वरात्मकं वस्तुविशिष्टरूपेणैकमेवेत्युक्तं भवति भो इत्यव्ययं सम्बुद्धौ ॥ ६२ ॥

एतदेव दृष्टान्तेन दर्शयति । यथेति । पुरुषः पुरुषाकारमात्मानं आदर्शे महत्युपाधौ चक्षुषि परस्य चक्षुष्यल्पे उपाधौ द्विधाभूतं वृद्धिमात्त्वेन ह्रासमात्त्वेन च द्वैधाभूतं यथाऽवेक्षेत पश्येत तथा आवयोरप्यन्तरं यथा जातिगुणाद्यपृथक्सिद्धविशेषणविशिष्टं पुरुषाख्यं मांसपिण्डं तत्तद्विशेषणादियुक्तमेकमेव विशिष्टं वस्त्वादर्शचक्षुराद्युपाधिप्रयुक्तवृद्धिह्रासादिगुणविशिष्टमवेक्षेत एवं शरीरात्मभावेन नियतविशेषणविशेष्यभूतं जीवेश्वरात्मकं विशिष्टमेकमेव वस्तु स्थूलसूक्ष्मशरीरेष्वनुप्रविष्टमुपाधिवशाद्भिन्नाभूतमिव पश्यतीत्यर्थः पुरुषमवेक्षेत इत्यनेनायमर्थोऽवगम्यते पुरुषो हि जातिगुणाद्यनेकविशेषणविशिष्टः जातिव्यक्त्योरिव गुणगुणिनोरिव प्रभाप्रभावतोरिव शरीरात्मनोरावयोर्भेदनिभावः बिम्बप्रतिबिम्बयोरिव जीवेशयोरौपाधिको भेदः न स्वाभाविक इति तु नार्थः आदर्शचक्षुषोरित्युपाधिद्वित्वकथनादादर्शचक्षुर्गतयोः प्रतिबिम्बयोः बिम्बेन साकमभेदेऽपि तयोः परस्परं भेदसद्भावावगमात् आदर्शप्रतिबिम्बाच्चक्षुःप्रतिबिम्बोऽन्यः बिम्बप्रतिबिम्बयोरभेदस्वरताप्यवश्यं प्रतिबिम्बानां भेदोऽभ्युपगन्तव्यः अन्यथा बिम्बप्रतिबिम्बयोरिव तेषु वै वैलक्षण्यं न प्रतीयेत अभेदसाधकसामग्र्यभावाच्च भेदकप्रतिबिम्बत्वं साधकं प्रतिबिम्बानां बिम्बावस्थात्वेन तासां भिन्नत्वात्तत एव हि पिण्डस्य घटत्वकपालत्वाद्यवस्थानां परस्परभेदः एकमृदवस्थात्वमात्रेणाभेदाभ्युपगमः प्रतीतिपराहतः तस्मात्तत्र बिम्बप्रतिबिम्बयोरौपाधिकभेदप्रतिपादनपरोऽयं श्लोकः किन्तु यथोक्तार्थपर एव अस्तु वात्र बिम्बप्रतिबिम्बयोरेव दृष्टान्तत्वं तथापि तयोर्यत्साधर्म्यं तदेवात्र दृष्टान्तीकृतं न तु तादात्म्यमप्यविवक्षोपयुक्तांशमात्रेण दृष्टान्तसम्भवात् अङ्गीकृतत्वादात्मं स्वेतरप्रकरणविरुद्धं अपरथात्यात्मज्ञानाभावनिमित्तदेहात्मभ्रमस्वतन्त्रात्मभ्रमवतः तन्निवृत्तये भिन्नमात्रोऽस्मि स्वतन्त्रोपदेशप्रकरणे जीवपरयोः पारमार्थिकसत्वित्वप्रतिपादनात्सत्त्वित्वं हि पदार्थद्वयनिरूपितं न च सत्त्वित्वमपि स्त्रीपुंसभावादिवदौपाधिकमेवात्रोपदिश्यत इति वक्तुं शक्यं तत्सहोपाधि-

[illegible]भावार्थकृतभागवतचन्द्रचन्द्रिका ।

[illegible]मप्यौपाधिकत्वप्रसङ्गात् मायायोगा अथा-
[illegible] संसारित्वनृत्वावगमाच नहि सर्वज्ञ ईश्वरो मुग्धतः
[illegible] संसारं स्वस्मिन्नारोपयतीति युक्तिमत् किञ्च येनात्मे-
[illegible] माया लेशामयास्तृ इति अपृथक्सिद्धसर्वज्ञत्वादिगुणाविशि-
[illegible]त्यात्मवाचिनोऽहं शब्दस्य जीवमात्रोपयोग्यत्वं संसारित्व-
विशिष्टजीववाचिनो भवच्छब्दस्य मुख्यार्थपरित्यागेन चैतन्यमात्र-
रूपपरत्वमस्वरसमिति दिक् विस्तरस्तु तत्त्वमस्यादि-
वाक्यस्य जीवब्रह्मतादात्म्यपरत्वे(१)भाष्योक्तपूर्वपक्षानुसारेणानुस-
न्धेयः स्वपक्षे उपपत्तिरपि तदुक्तरीत्या एवानुसन्धेया ॥ ६३ ॥

सख्योः सम्वादमुपसंहरति । एवमिति । हंसेन परमात्मनैवं
प्रतिबोधितः आवेदितस्वपरयाथात्म्यो मानसः मनसा सहचरे-
मानो जीवः तदव्यभिचारेण पूर्वं स्वपरयाथात्म्यज्ञानाभावेन नष्टां
स्मृतिं पुनराप स्वात्मनो भगवच्छेषत्वैकरसतामनुसंदधानो
मुक्तो बभूवेति भावः ॥ ६४ ॥

उपाख्यानमुपसंहरति । हे बर्हिष्मन्नेतत् [illegible]तमध्यात्मज्ञानम्
[illegible] प्रभूतं पारोक्ष्येणान्यापदेशमुखेन प्रदर्शितमतो न
त्वयैषा केवलं कथामात्रबुद्धिः कर्तव्येति भावः पारोक्ष्येण किमर्थ-
मुपदिष्टं तत्राह । यद्यस्माद्विश्वस्य कारणभूतो भगवान् परोक्षप्रियः
"परोक्षप्रिया इव हि देवा" इति श्रुत्या देवानां परोक्षप्रियत्वा-
[illegible]त्तासार्वभौमो भगवान् परोक्षवादेन नितरां तुष्यतीति
एवमुक्तमित्यर्थः इदं चोपलक्षणम् [illegible] उक्तं परोक्षप्रिया
इव हि देवा इत्यर्थस्यापीत्यपि साक्षात्कृते: भवतु [illegible]
नादिभिर्भगवत्स्तोत्राभावप्रसङ्गाच्च तस्मात्पारोक्ष्यकीर्तनं श्रोतृबु-
[illegible]मेवेति द्रष्टव्यम् ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवत-
चन्द्रचन्द्रिकायामष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रारब्धकर्मयोगेन विधफलानुभवार्थं मया मदन्तर्यामिणा हरिणा
सृष्टा संकल्पितैषा माया बन्धकशक्तिरिच्छा वा सा चाविद्यस्य
[illegible]त्याह । यदिति । तर्हि किं तत्त्वज्ञानमिति तद्विविच्याह । हंस-
मिति । तदयमेव नामयोगादिरहितत्वेन चेतनं हंसं निर्मलं पश्य
आत्मनो हरेर्गति तत्सत्तात्मत्वेन स्थितां पश्य आत्मनी मम
गतिं त्वां प्रबोध्य गच्छन्तो मम यात्रां पश्येति वा अनेन बोध्य-
बोधकयोरनुभवसिद्धस्वरूपाभिन्नो भेद इति ज्ञातव्यम् ॥ ६१ ॥

ननु "कर्माणि विज्ञानमयश्चात्मा परेऽव्यये सर्वं एकीभवन्ति
तत्त्वमस्यहं ब्रह्मास्मि" इत्यादिश्रुतिभिरैक्यस्य प्रतिपाद्यत्वात्कथं
भेदोऽङ्गीकृत इति ज्ञायते न चैवमौपचारिकं गुरुशिष्योप-
देशाद्यविप्रलम्भानुपपत्तेरित्याशङ्क्य जीवस्य ब्रह्मत्वाचेतनत्वेन
[illegible]भेदव्यपदेशः "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञ-
वत्" इति सूत्रात् जीवस्य ब्रह्मत्वात् सदृशत्वाच्च केवलः कल्प्यते
तद्भेदेन ननु जीवब्रह्मणः इति प्रमाणविरोधस्तद्व्यवस्थाय स्वस्य
सर्वमात्मत्वाभावात्कथं के पश्येदिति दूषितत्वात्तदभेदस्याप्रयोज-
त्याह । अहमिति । भवानहं त्वं मत्तोऽन्यो न च त्वन्तु अहमेवेति

विवक्षव पश्य [illegible] । येति [illegible]दर्शिनः कवि-
[illegible]मपि नावयोर्विच्छिद्रमन्तरं पश्यन्ति "कृत्यं कर्म च कार-
ण" इति वाक्यार्थं पश्यन्तोऽस्मदन्तर्यामिणमन्तरेणावयोः तथापि
[illegible] किमुत [illegible]परिहारच[illegible]प्रवृत्तौ [illegible]
शून्येष्वपीयत्वेऽस्मदर्थानियमस्तत्स्वपरेण्योरिव भेदं पश्यन्तोऽपि न
पश्यन्तीत्यभिप्रायः भवदन्तर्यामिमदन्तर्यामी चान्यो न भवति किन्तु
[illegible] प्रभुरिति जानीहि त्वयि नियतत्वमित्यर्थाज्जानीहि
प्रमाणवन्तो [illegible] वा [illegible] किन्तु [illegible]
[illegible] विचक्षणा अन्यथा न पश्येयुः कुतः नौ
अनायु किंतु क्रियावेव विभेद इति न पश्यन्ति किंतु महान्तं
भेदं पश्यन्तीति वा ॥ ६२ ॥

जीवस्याभेदस्यान्ये भेदः परस्येत्यत्र दृष्टान्तमाह । यथेति ।
आदर्शचक्षुषोः प्रतीयमानस्य प्रतिबिम्बस्य सत्तादेर्बुद्धिस्थाधीन-
त्वात्तदेवेदमितिवदावयोरन्तरं मत्सत्ताद्य अन्यस्मात्स्वाध्यधीन-
त्वादावां तदभिन्नाविति व्यवहारः यथा दर्पणाद्युपाधिप्रयुक्तमा-
त्मानं बहुधा पश्यन्ति तथाऽस्मयोरन्तर्यामिणोरन्तरमिति वा ॥ ६३ ॥

उपसंहरति । एवमिति । तदव्यभिचारेण विषयबुद्धिप्रसङ्गाति-
शयेन नष्टां तिरोहितां स्मृतिं शास्त्रविषयामापेत्यन्वयः ॥ ६४ ॥

कथा [illegible] निरूपितं इत्यतः कथमधिगन-
मिति तत्राह । बर्हिष्मन्निति परोक्षवाद्यापदेशेन एवं कथने
किङ्कारणं तत्राह । यत्परोक्षेति । "परोक्षप्रिया इव हि देवाः" इत्या-
दिश्रुतिः अनेनाह मयाभिवाद्रव्यमनुक्तं [illegible] न [illegible]
इत्येतत्सुतरामबोधि ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

हंसाधिकस्य हंसमिति चित्सुखः मामिति शेषः [illegible]
नौ इति क्वचित् ॥ ६१ ॥

सख्योपयोगि शुद्धत्वं प्रतिपादयन् द्वयोरैक्यमप्यत्यावर्तते ।
मोऽभवमित्यधिकेनाहमित्येकेन ॥ ६२ ॥

ननु द्वयोरन्तरत्वे सति कथं माया तवाधिकार्यां मम पुनरधि-
कारिणीति माया शेषेत्यत्र दर्शितं कथं वा भवेयं तत्राह । यथेति ।
अत्र विद्वत्पुरुषाभिमुखेष्वादर्शादिषु स्वच्छेषु चाक्षुषं तेजो यत्र
सत् बलीयसा सौर्येण तेजसा प्रतिहतं सत् परावर्तितं मुखसंयुक्तं
सत् तदेव मुखं प्राहयन्तोऽवयवानां तेषामभिमुखतां च मुखस्याभा-
सयत् । पूर्वदृष्टाभिमुखमवलोक्य द्विरेषामाभिमुख्यम् मुखमध्या-
रोपयतीत्येवं ज्ञायते प्रतिबिम्बमिति केचिन्मन्यन्ते तथापि सति
तथैव प्रतीत्येन दोषवशादित्यादौ को वा हेतुः [illegible]प्रतिबिम्बे
च तद्विरोधिकल्पनान्तरं मृग्येत तथा सूर्यप्रतिबिम्बमाशङ्क्या-
सितेन दृश्यते तत्र चाभासे चक्षुष्याधिकमनुभूयते तत्र को
वा हेतुः । तस्मादन्यथानुपपत्त्यैवमेव मन्यते सर्वत्र वस्तुन आका-
रानुकारिणीच्छटा सर्वत्रावर्ताहत देशे न त्वेव किन्तु मुख-
[illegible]मते [illegible] तु [illegible]
[illegible] प्रतिबिम्बमुपपद्यते [illegible]
वस्तुनस्तथैवैतत्त्वा शक्तिः [illegible] आसयतीति

[illegible] श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेव प्रतिभासितमेव प्रतिबिम्बत्वं यदेव विम्बत्वं [illegible] इति द्विधाभासमुद्गिरतीति तस्मादयमर्थः आदर्शे [illegible] स्वात्मनो निजदेहस्यानन्याकारव्यवहारत्वेन [illegible] [illegible] तर्हीन्द्रियं [illegible] तत्तादृशि साक्षात् [illegible] मेव यथा द्विधा भूतमेव [illegible] भेदांशः [illegible] [illegible] प्राकृतोपाधौ प्रतिफलनप्रायत्वादिति भावः । चक्षुषा निकृष्टप्रतिबिम्बोपाधितया व्याख्यानन्तु विचार्य चक्षुः शब्देन सान्निहितं स्वचक्षुः परित्यज्य परचक्षुर्ग्रहणं कष्टं [illegible] न तु रूपं जाति च रूपं नैवादिष्टान्ते [illegible] नापादयामिति न एव चाभेदात्मको भेदः [illegible] निर्दिष्टः जानासि किं सखायं मामिति इमौ [illegible] त्वं चायं ! सखावौपित्युपक्रमोऽप्यासामञ्जस्यमापद्येत ॥ ६३ ॥

मुनिरपि तथैवोपसंहरति । एवमिति । स्वस्थः प्राधानिकावेशरहितः सन् नष्टप्राभिचारेण पूर्वमीश्वराख्यहंसवाक्यमुखेनयामहा निरोहितां स्मृतिं जानासि अपि किं सखायं मामिति अपि स्मरसि चात्मानमविज्ञातसखामित्यत्र पूर्वोक्त [illegible] पुनराप इति अत्र पुनः शब्देन स्मृतिशब्देन नाम [illegible] [illegible] किन्तु अनाद्यावृतस्यापि सख्यस्य स्वाभाविकत्वाद्नादित्वादित्यर्थः कृतहान्यकृताभ्यागमप्रसङ्गात् ॥ ६४ ॥

अथ सर्वस्यापि प्रसङ्गस्य भगवत्प्रीतिपरत्वमेव दर्शयति । बर्हिरिति ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

अष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु यद्येव तर्हि कथं मे नथा तथा प्रतीतिरित्यत आह । मायेति । यतः कदाचित् स्वं पुमांसं मन्यसे कदाचित् सती स्त्रियं कदाचिदुभयं नपुंसकमित्यर्थः उपलक्षणमेतत् कदाचिन्मनुष्यं कदाचिद्देवतिर्यगादिकं च यद्यस्माद्विनिर्मितमायां हंसो गुरुं जीवयोर्गति पश्यमात्मा स्वरूपं पश्य ॥ ६१ ॥

अहं परमात्मैव भवान् जीवः नचान्यः मत्तश्चेतन्यरूपात् भिन्न इत्यर्थः । ननु किमेतन्मत्सखा सूपे तत्राह । भो मच्छुद्धभक्त ! अहमपि यथात्मनस्तथा त्वमेव विचक्ष्व सधिमर्शं पश्य । "इन्तु कोपे समाकथानः शिवे च कुक्कुरेऽपि च,, इतिमेदिनी ननु त्वद्दासत्वं मम तथा मतप्रभोत्वत्वापि नातः परोऽन्यः कलङ्को यदा चयोरभेद इति तत्राह । नेति । नौ आवयोश्छिद्रमीदृशं कलङ्कं जातु कदाचिदपि विनागीवदपि कवयो विज्ञा न पश्यन्ति किन्त्वाबयोर्भेदं पश्यन्तीत्यर्थः ॥ ६२ ॥

ननु अहं भवानिति त्वदुक्तिरेव सांद्रमवाक्या तत्र नाकुत्साक्षेदित्याह । यथेति । पुरुषो जीव आत्मानं स्वं एकमपि मोक्षदशायां बन्धदशायाञ्च क्रमेण आदर्शचक्षुषोर्द्विधा भूतमादर्शे प्रतिबिम्बरूपेण यथोचितप्रमाणं सम्पूर्णतेजस्कं महाभवतः [illegible] चक्षुषि तु अत्यल्पप्रमाणमस्पतेजस्कमतिक्षुद्रं [illegible] ईक्षेत यथेति यथा एकस्यापि द्विधा भूतत्वमुपा-

धिधर्मोपलब्धत्वाधिक्यमत्वात् भेदमोपेक्ष्य तथैव आवयोः [illegible] जीवात्मनोः सदैव द्विधाभूतयोरन्तरं सदैव भेदमीक्षेत । [illegible] भवकाशायाधिपादिभ्याम्यर्थं भत्तास्व्यं,, इत्यमरः । [illegible] [illegible] पद [illegible] स्वत्र जीवो यद्यस [illegible] निरुपाधि रूपपि इवेश्वरस्तथा सकललोकदेहगतः सर्वान्तर्यामी [illegible] सम्पूर्णतेजस्को महानिश्चलो मुक्तजीव इव सदैव विभेद एव जीवः अत्यल्पप्रमाण एव अल्पतेजस्कोऽतिक्षुद्रः सदैव उपाधिधर्मग्रस्तः कदाचिदेव मुक्तिदशायामावित इति सर्वेचापरो मेव जानीयादित्यर्थः । यदुक्तमहं भवान न चान्य इति तत्र चाह यथा चित् तथा सङ्गतो भवानपि चित् तु जड़ो नागेत्यर्थः । एतत् परमयोरभ्यान्तरन्तु शास्त्रकलाइव मोहिनीत्वव्यापकमसुरेभ्य प्राकृतमनात्मगावहिन्य भगवदनभिमतत्वात् यदुक्तम । तृतीये भगवतैव "यथोल्मुकाद्विस्फुलिङ्गाद्धूमाद्वापि स्वसम्भवात् । अप्यात्मत्वेनाभिमतात् यथाग्निः पृथगुल्मुकात् । भूतेन्द्रियान्तःकरणात् प्रधाना ज्जीवसञ्ज्ञितात् । आत्मा तथा पृथग्द्रष्टा भगवान् ब्रह्मसंज्ञित" इति श्रुत्या च "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति" इति स्मृत्या च "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा" इति तथा [illegible] भगवान् निरुपाधिरेव तस्य निरुपाधित्वमथा सुरमतमेवोक्तमिति ज्ञेयम ॥ ६३ ॥

उपसंहरति । एवमिति । स्वस्थः प्राधानिकावेशरहितः । नष्टप्रभिचारेण भगवद्धंसमुखेन नष्टां स्मृतिं पूर्वमेव श्रीगुरुभक्त्या प्राप्तमत्र पुनः प्राप नष्टात्मास्वाद्वणकथनात् सुपर्णोपदेशसम्प्राप्य प्रेमपत्त्रपत्रमासिरेव श्रीनारदेन परमपुरुषार्थोऽभिमतो ज्ञेयः ॥ ६४ ॥

कथामात्रमिदमिति बुद्धिः मा कुरु इत्याह । बर्हिष्मन्निति पारोक्ष्येण राजकथामिषेण तव हेतु: । यस्मात् तदेव ज्ञप्ति निर्णीतं कथा कथितेति भावः ॥ ६५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

अष्टाविंशश्चतुर्थस्य सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तामेव गतिं दर्शयति । अहमिति द्वाभ्याम । अहं भवानेव नान्यः त्वं चाहमेव नान्यः भो सखे ! इति त्वं विचक्ष्व ननु परिच्छिन्नत्वबुद्धिवद्धत्वाज्ञत्वादिधर्मिणो मम परिपूर्णत्वसर्वज्ञत्वादिधर्मिणा भगवता सह अहं भवान् त्वमहमित्यैक्यं कथं घटते इत्यत आह । कवयः मनाक् ईषदपि जातु कदाचिदपि नौ आवयोः छिद्रं पृथगवस्थानं न पश्यन्ति न हि अंशांशिनोः गुणिनोः प्रभाप्रभावतोः जातिव्यक्त्योः कार्यकारणयोः पृथगवस्थानं संभवति ततः स्वरूपतो भिन्नयोरप्यावयोः पृथगवस्थानाभावादैक्य इति स्वाभाविकः आवयोर्भेदाभेद सम्बन्ध इत्यर्थः अत्र प्रमाणभूतं शास्त्रं पूर्वमेवोदाहृतम् ॥ ६१ ॥

स्वाभाविकभेदाभेदसम्बन्धमेव दृष्टान्तेनोपपादयति । यथेति । यथा पुमान् आत्मानं स्वशरीरमेकमेव देहमादर्शे चक्षुषि च ततोऽन्यपुरुषान्तरनेत्रे च द्विधाभूतं समाधत एव चक्षुरादिगतगणनं युक्त्यादिप्रकारं आत्मनमेवैक्ष्यत तथैव आवयोरपि नोहं मत्तं तथान्तरं भेदमनेवर्धनेति योजना ॥ ६२ ॥

...श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपा ।

...रिया आत्मपरमात्मविस्मृतिपूर्वकयुक्ताया आत्मा सखिक

स्मृतिमात्मपरमात्मस्मृतिं पुनराप ॥ ६४ ॥

...हरनीत्यर्हिष्मन्निति परोक्षया राजकथामिषेण ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टाविंशाध्यायार्थप्रकाशः ॥ २८ ॥

भाषाटीका ।

यह केवल हमारी बनाई माया है जो तुम पुरुष स्त्री ...नी अपने को मानते हो जो उभय रहित मानते हो हम दोनों ...र हैं हमारी गति को देखो ॥ ६१ ॥

जो हम हैं सो तुम हो दूसरे नहीं हो तुम ही हम हैं विचार ...र देखो विद्वान् लोग हमारे तुम्हारे मध्यमें कुछ भी अन्तर ...हीं देखते हैं यहांपर जीव ईश्वर का व्याप्य व्यापक भाव है एवं शरीर शरीरि भाव है ...भाव है तिससे भेद रहते पर भी अभेद निर्देश किया है ॥ ६२ ॥

जैसे पुरुष अपने शरीरको दर्पण में भिन्नरूप से देखता है वैसे ही तुमदा हमारा फरक है यहां जीवों के अज्ञान से देवमनुष्यादिक भेद प्रतीत होता है और आत्मा तो शुद्ध स्वरूप ज्ञानाकार ईश्वर के तुल्य ही है ॥ ६३ ॥

इस प्रकार से हंस के समझाने से स्वस्थ होगया तब उस सखा के वियोग होने से जो चली गई थी उस स्मृति को फिर प्राप्त होगया ॥ ६४ ॥

हे बर्हिष्मन् ! यह अध्यात्म ज्ञानपरोक्षरूप से हमने कहा है क्योंकि विश्वपालक भगवान् परोक्ष के प्रिय हैं ॥ ६५ ॥

इति श्रीभागवत चतुर्थस्कन्ध अट्ठाईसवां अध्याय
का भाषानुवाद वल्लभाचार्य कृत
समाप्त ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे अष्टाविंशोऽध्यायः समाप्तः ॥ २८ ॥

॥ ऊनत्रिंशोऽध्यायः ॥

॥ प्राचीनबर्हिरुवाच ॥
भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते ।
कवयस्तद्विजानन्ति न वयं कर्ममोहिताः ॥ १ ॥
॥ नारद उवाच ॥
पुरुषं पुरञ्जनं विद्याद् यद्व्यनक्त्यात्मनः पुरम् ।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥ २ ॥
यो ऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः ।
यन्न विज्ञायते पुम्भिर्नामभिर्वा क्रियागुणैः ॥ ३ ॥
यदा जिघृक्षन् पुरुषः कात्स्न्र्येन प्रकृतेर्गुणान् ।
नवद्वारं द्विहस्ताङ्घ्रि तत्रामनुत साध्विति ॥ ४ ॥
बुद्धिं तु प्रमदां विद्यान्ममाहमिति यत्कृतम् ।
यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्ते ऽक्षभिर्गुणान् ॥ ५ ॥
सखाय इन्द्रियगणा ज्ञानं कर्म च यत्कृतम् ।
सख्यस्तद्वृत्तयः प्राणः पञ्चवृत्तिर्यथोरगः ॥ ६ ॥
बृहद्बलं मनो विद्यादुभयेन्द्रियनायकम् ।
पञ्चालाः पञ्च विषया यन्मध्ये नवखं पुरम् ॥ ७ ॥
अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति ।
द्वे द्वे द्वारौ बहिर्याति यस्तदिन्द्रियसंयुतः ॥ ८ ॥
अक्षिणी नासिके आस्यमिति पञ्च पुरः कृताः ।
दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः ॥ ९ ॥
पश्चिमे इत्यधो द्वारौ गुदं शिश्नमिहोच्यते ।
खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्मिते ।
रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।
ऊनत्रिंशे परोक्षार्थव्याख्यानेनोपसंहृतम् ।
जीवस्य भवसंसारो मुक्तिश्चेति स्फुटम् ॥ १ ॥

कवयोऽध्यात्मविदः ॥ १ ॥

व्यनक्ति निर्मिमीते ... पुरुषस्य ... । पुरं अनुशेते इति पुरञ्जनः ... व्याख्यातं भवति । ... बहुपादः ॥ २ ॥

अविज्ञातशब्देनाहृतो व्याहृत उक्तो यः स ईश्वरः अविज्ञातनामविवक्षिः यद्यस्मात्पुम्भिर्नामादियोगेन न विज्ञायते ॥ ३ ॥

तत्र तेषु पुरेषु मध्ये ॥ ४ ॥

अक्षभिरिन्द्रियैः ॥ ५ ॥

पञ्चवृत्तिरपञ्चशिराः सर्प इव प्राणः ॥ ६ ॥

... महाभटो नायक इत्यु-

[illegible]धरस्वामिकृतभावार्थदीपिका ।

[illegible] वृहद्बलं यस्य तन्मनः नव यानि द्वाराणि [illegible]
[illegible] इत्यादेरर्थं संक्षेपेणाह । यस्ताविन्द्रियसंयुतः स ताभिर्द्वाभिर्बहिर्यातीति ॥ ८ ॥

[illegible]ः पूर्वभागे कृताः ॥ ९ ॥

[illegible] नेत्रे इति रूपमिति चक्षुषेति खद्योताविर्मुखी व्याख्याने [illegible] [illegible]वाद् ईश्वरः पुरञ्जनः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतदध्यात्मं पारोक्ष्येण प्रदर्शितमित्युक्तम् । तत्राध्यात्मनि कथं पुरञ्जनपदव्युत्पत्तिरिति विविदिषायां राजा पृच्छति । भगवन्निति । हे भगवन् ! तेऽध्यात्मविदुत्तमस्य ते तव वचः परोक्षरूपं वाक्यमस्माभिः केवलं देहात्मबुद्धिभिः सम्यक् नावगम्यते नानुरूप्यते अध्यात्मविदस्तु त्वद्वचो जानन्ति कर्मस्वेव यज्ञादावेव मोहिताः यद्वा कर्मणा पुण्यापुण्यादिकर्मणा तिरोहितस्वपरयाथात्म्याः वयं कथं जानीमः ॥ १ ॥

एवमापृष्टो भगवान्नारदः पुरञ्जनादीनि पदान्यध्यात्मविषयानुकूलतया व्युत्पादयति । पुरुषमित्यादिना । पुरुषं विद्यात् पुरञ्जनं पुरञ्जनशब्दवाच्यं विद्यात् पुरुषे पुरञ्जनपदप्रवृत्तौ निमित्तमाह । यः पुरुषः आत्मना मनसा सह पुरं शरीरं व्यनक्ति इतरेतरं संप्रभातीति पुरञ्जनः पूःशब्दे उपपदे अञ्जेर्ल्युट् पूःशब्दस्तु शरीरे गौण्या वृत्त्या प्रयुज्यते नन्वत्र सर्वाणि पदानि मुख्यार्थान्येवेत्याशङ्क्य इति भावः पुरं विशिनष्टि । एकद्वित्र्यादयः पादा यस्य बहवः पादा यस्य न विद्यन्ते पादा यस्य तत् ॥ २ ॥

योऽविज्ञातशब्देनाहृत उक्तः तस्य पुरञ्जनाख्यस्य पुरुषस्य सखा स ईश्वरः तस्मिन्नविज्ञातशब्दप्रवृत्तिनिमित्तमाह । यस्मात्पुंभिर्नामादिभिर्न विज्ञायेत इत्यविज्ञातः यद्यपि हरिश्चिन्त्यमानाभिः जगद्व्यापारादिक्रियाभिः सत्यज्ञानादिगुणैश्च शास्त्रतो ज्ञायत एव तथापीयत्तया न ज्ञायते नामक्रियागुणानामानन्त्यादिति भावः न विज्ञायत इति कर्मणि व्युत्पत्तिः कर्तरि व्युत्पत्तेरप्युपलक्षणं सा च दर्शिता पुरस्तात् ॥ ३ ॥

यदायं पुरुषः क्षेत्रज्ञः प्रकृतेर्गुणान् ज्ञानकर्मोभयेन्द्रियविषयान्कार्त्स्न्येन अजिघृक्षत् ग्रहीतुमैच्छत् अनुभवितुमैच्छदित्यर्थः तदा नव द्वाराणि छिद्राणि यस्य द्वौ हस्तौ पादौ च यस्य तन्मनुष्यशरीरं साधु समीचीनमित्यमनुत तिर्यगादिशरीरेषु सर्वेन्द्रियाणामनभिव्यक्तेः सर्वविषयानुभवासंभवान्मनुष्यशरीरमेव सर्वविषयानुभवयोग्यं मत्वा दैवात्तदुपलभ्य तत्र स्थित्यममुतेत्यर्थः अनेन सोऽन्वेषमाणः शरणमित्यादिना कोकिलकूजितैरित्यन्तं व्याख्यातम् ॥ ४ ॥

बुद्धिं प्रमदां विद्यात्तत्र प्रमदाशब्दप्रवृत्तौ निमित्तमाह । यया बुद्ध्या ममाहमिति कृतं मदभिमतविकारः अहं ममाभिमानरूपमदहेतुत्वाद्बुद्धिः प्रमदेत्युच्यत इत्यर्थः किञ्च यां बुद्धिमाविष्ठायाध्यामरिन्द्रियैः गुणान् शब्दादीन् विषयानस्मिन् देहे भुङ्क्ते गुणानुभवजन्यमदहेतुत्वाच्च प्रमदा बुद्धिरित्यर्थः ॥ ५ ॥

सख्य इन्द्रियगणा इत्यस्यार्थमाह । सखाय इति । इन्द्रियगणाः ज्ञानकर्मोभयेन्द्रियगणाः सखायः भृत्याः तत्र सखित्वप्रवृत्तिनिमित्तमाह । तद्वृत्तय इन्द्रियवृत्तयः ज्ञानं अध्यवसित-विषयकं ज्ञानं [illegible] बुद्धिसाध्यं कर्मकृतं येन्द्रियगणेन कृतं सह प्रवृत्तिमत्त्वमन्योन्यापेक्षत्वं साखित्वमत्र विवक्षितं एकैकशतनायकैरित्यस्यार्थमाह । सख्य इति । तद्वृत्तयः इन्द्रियवृत्तयः सख्यः भवन्ति पञ्चशीर्षाहिमित्यस्यार्थमाह । प्राण इति । पञ्चवृत्तित्वात्पञ्च शिराः सर्प इव प्राणः ॥ ६ ॥

[illegible]त्युगममित्यभिप्रेत्य एकादशमहाभटा इत्यनेनोक्तमेकादशमहाभटमाह । स्वविषयेषु प्रसह्य प्रवर्तकत्वात् बृहद्बलं बलवत् एव ज्ञानकर्मोभयेन्द्रियाणां नायकं मन एकादशो महाभट इत्यर्थः [illegible] प्रकरणे पञ्चालशब्दो बहुष्वर्थेषु प्रयुक्तः दक्षिणपञ्चालमुत्तरपञ्चालमित्यत्र शास्त्रं सपाञ्चालपतिरित्यत्रेन्द्रियेषु पौरञ्जनो वंशः पाञ्चालेष्विति विषयेषु तत्र मुख्यार्थमाह । पञ्चशब्दादयो विषयाः पञ्चालाः [illegible]त्वेकाकियन्ते इति व्युत्पत्तेः तत्संबन्धिषु लाक्षणिकप्रयोगः अनेकार्थकल्पनायोगादिति भावः सप्तोपरि कृता द्वार इत्यादेरर्थमाह । यत्पुरं मध्ये यस्य पुरस्य मध्ये नवानां [illegible] द्वाराणां समाहारः नवखमाविर्नास्तिकाद्यरूपमित्यर्थः यद्वा पुरं मध्ये यन्नवकं यानि नव द्वाराणि तत्र द्वे अक्षिणी द्वे नासिके द्वौ कर्णौ शिश्नगुह्ये द्वौ इत्येवं द्वे द्वे द्वारी मुखमेकमिति मिलित्वा नवानामित्यन्वयः द्युमत्सख इत्यादेरर्थं संक्षेपेणाह । यस्ताविन्द्रियसंयुतः अक्ष्यादिच्छिद्रगतेन्द्रिययुक्तः स आत्मा ताभिर्द्वाभिर्बहिर्याति बहिष्ठान् शब्दादिविषयानन्तु भवति इत्यर्थः ॥ ७–८ ॥

पञ्चद्वारस्तु पौरस्त्या इत्यस्यार्थमाह । अक्षिणी नासिके आस्यं मुखमित्येवं पञ्चद्वारः पूर्वभागे कृताः अत्र व्याख्यायां क्रमो न विवक्षितः दक्षिणोत्तरद्वाराण्याह । दक्षिणो दक्षिणः कर्णः अत्र दक्षिणेति प्रतीकोपादानं दक्षिणः कर्ण इति व्याख्यानमेवमग्रेऽपि ॥ ९ ॥

पश्चिमे द्वे इत्युक्ते पश्चिमे द्वाराण्याह । पश्चिम इतीति तत्र पश्चिमे इति प्रतीकमनूद्य तस्याधो द्वाराविति व्याख्यानं ते चाधो द्वारी के इत्यत्राह । गुदशिश्नाविहोदिताविति । इहास्मिन्प्रकरणे वर्णितौ कथितौ खद्योताविर्मुख्यावित्यादेरर्थमाह । खद्योतेति । एकत्र निर्मिते लग्ने ये खद्योताविर्मुखीशब्दविवक्षिते द्वारी ते अत्र प्रकरणे नेत्रे इत्यर्थः अत्र नेत्रे इति व्याख्यानं शेषः प्रतीकः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्तिजनितज्ञानमेव हरेः प्रसादजनकं न कर्मादिकं तत्साधनमित्येतदस्मिन्नध्याये निरूप्यते तत्रादौ प्राचीनबर्हिः स्वयं विद्वानपि लोकोपकाराय सम्यक् पृच्छति । भगवन्निति । नारदस्य दुर्बोधं भगवन्निति सम्बोधनमस्माभिरस्मादृशैः प्रवृत्तकर्मकत्वभावपरिहारार्थं सम्यगिति तत्र किंकारणं तत्राह न वयमिति । कर्मिणां कर्माभावेन विविदिषन्ति यज्ञेन दानेनेत्यादिविधानं व्यर्थमितीयं शङ्का कथं इत्यनेन परिहारि कर्मणा शुद्धान्तःकरणस्य हर्युपासनासाध्यप्रकारेणातिक्रान्तदर्शनस्य कथितत्वात् ॥ १ ॥

स्वमतीरयनेन पुरञ्जनपदं निरुक्तं पुरस्य देहरूपाञ्जनं यस्मात्स पुरञ्जन इत्यर्थः "अञ्जू व्यक्तिकरणे" इति धातुः पुरञ्जनपति [illegible] पुरस्थितिं करिष्यामित्याह । एकेति । एकपाद्वाद्विजातिजन्तुशरीरापेक्षया[illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

...शरीरमपेक्ष्य वा द्वौ पादौ मनुष्यादेर्येषाम्... अपदकं सर्पादि ॥ २ ॥

ननु परमात्मनोऽप्यविज्ञातत्वाविशेषाद्... तत्राह। यदीति। अनेन भक्तानुग्रहार्थं नामरूपादिप्रदर्शनं न ... तथा परमात्मनः शुक्लभास्वरमपाकजाप्राकृतं... प्रदर्शितम् ॥ ३ ॥

यदा प्रकृतेर्गुणान् जिघृक्षन् ... नवद्वारादिलक्षणं साधुतरमित्यर्थः ॥ ४ ॥

... "नमश्चमामिन्द्रियं श्रोत्रम्" इत्यभिधानाद्... प्राग्दिशं गतः ... गुणानित्यन्वयः ॥ ५ ॥

... "उरस्तु वक्षसि श्रेष्ठे" इत्यभिधानात् उरः श्रेष्ठः... (१) "अश्वत्थ" एतस्मात्... भोक्ता प्रसाद... पञ्चवृत्तिः नागस्य ॥ ६ ॥

"मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति" इति श्रुतेः ज्ञानकर्मेन्द्रियाणां विषयं ... नव स्थानं द्वारलक्षणानि छिद्राणि यस्य तत्त्वोक्तं तत्पुरं शरीरम् ॥ ७ ॥

तत्त्वादीन्द्रियसंयुतः ... बाह्यविषयभुक्तो सति नेत्रादीन्द्रियैर्वा विषयं भुङ्क्ते इत्यर्थः ॥ ८ ॥

... द्वे द्वे द्वार इत्युक्तं ... ॥ ९ ॥

पश्चिमे द्वे इत्युक्तं तत्राह। पश्चिमे इति। ... ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

न सस्मरिति कथारीतिरित्यध्यात्मरीतेः ॥ १ ॥ २ ॥

आहूत इत्यत्र आह्वय इति चित्सुखः पुम्भिरज्ञातः ... ॥ ३—४ ॥

बुद्धिर्ममाहमिति ... ॥ ५—७ ॥

द्वे द्वे इति मुखस्यापि ... ॥ ८ ॥

... नासिके इति सार्द्धकम् ॥ ९ ॥

... व्याख्यानम् ॥ १०—११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

एकोनत्रिंशकेऽध्यात्मपक्षव्याख्यानमुच्यते।

...॥

सम्यगिति किञ्चिदुक्तमिति ... ॥ १ ॥

पुरुषं जीवम् ॥ २ ॥

अविज्ञातनाम्नेत्याहुतो व्याहृतो वा स ... ॥ ३ ॥

तत्र तेषु पुरेषु विश्वेषामादिषु मध्ये ॥ ४ ॥

बुद्धिमविद्यामक्षभिरिन्द्रियैः ॥ ५ ॥

पञ्चवृत्तित्वात् पञ्चशिराः सर्प इव ॥ ६ ॥

एकादश महाभटा इत्यनेनैकादशो महाभटो ... ते व्याचष्टे बृहद्बलं यस्य तन्मनः नव खानि द्वाराणि यस्य ॥ ७ ॥

द्वे द्वे द्वारौ मुखादिकमेकैका च ... बहिर्याति यः ... जीव इत्यर्थः ॥ ८ ॥

पुरः प्राङ्मुखस्य पुरञ्जनपुरस्य पूर्वभागे कृताः ॥ ९ ॥

... व्याख्या मेत्र इति रूपमिति ... व्याख्या ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एकोनत्रिंशे पूर्वोक्ताख्यानं करोति। भगवन्नित्यादिना पृष्टः श्रीनारदः। ते वचो युष्मदर्थं वाक्यं नावगम्यते न विदुः ॥ १ ॥

पुरुषं जीवं पुरञ्जनं विद्यात् यतः आत्मनः पुरं कर्मणा व्यनक्ति प्रकटयति द्व्यादयः पादा यस्य तत् बहवः पादा यस्य तत् न विद्यन्ते पादा यस्य तत् ॥ २ ॥

यः अविज्ञातसंज्ञोऽभिहित आहुतः उदाहृतः स तस्य जीवस्य सखा ईश्वरः यतः नामभिः ... अहं ऋग्वेदी अहं यजुर्वेदीत्यादिभिः क्रियाभिर्यज्ञतपोवृत्तादिभिर्गुणैरुदारत्वादिभिश्च ... पुंभिर्न विज्ञायते ... ॥ ३ ॥

प्रकृतेर्गुणान् प्रकृतिगुणकार्यभूतान् शब्दादीन् यदा जिघृक्षन् गृहीतुमिच्छन् तदा तत्र तेषु पुरेषु नवद्वारं मनुष्यशरीरं साध्विति अमनुत ॥ ४ ॥

अक्षिभिरिन्द्रियैः गुणान् विषयान् ॥ ५

यत येन गतेन ज्ञानं शब्दादिबोधकरूपं कर्म च आदानादिरूपं कृतं भवति पञ्चवृत्तित्वात् पञ्चशिराः उरगः यथा प्राणः ॥ ६ ॥ ७ ॥ ८ ॥

पुरः पूर्वदिशि कृताः ॥ ९ ॥ १० ॥

भाषाटीका।

राजा प्राचीनबर्हि बोले हे भगवन्! नारदजी आपके वचन को हम लोग नहीं समझ सकते हैं ज्ञानी सब बात को जान सकते हैं कर्म मे मोहित हम लोग नहीं जान सकते हैं ॥ १ ॥

नारदजी बोले जीव को पुरञ्जन जानना चाहिये क्योंकि आत्मा के पुरको प्रगट करता है वह पुर एक पाद द्विपाद त्रिपाद बहु पाद बिना पाद के है ॥ २ ॥

अविज्ञाता नाम से जो सखा कहा सो ईश्वर है जिसको कि कोई पुरुष नाम क्रिया गुणों से किसी प्रकार नहीं जान सकता है ॥ ३ ॥

जब पुरुष सब प्रकारसे प्रकृति के गुणोंको ग्रहण करने चाहा था मुखादि नौ द्वार वाला दो हाथ पांव वाला पुरको देखकर उसको बहुत अच्छा माना ॥ ४ ॥

(१) सूत्रम्।

अहिमती नालिनी नाले नस्यः सौरभ उच्यते ।
घ्राणोऽवधूतो मुख्यास्यं विपणो वाग्रसविद्रसः ॥ ११ ॥
आपणो व्यवहारोऽत्र चित्रमन्धो बहूदनम् ।
पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः ॥ १२ ॥
प्रवृत्तं च निवृत्तं च शास्त्रं पञ्चालसंज्ञितम् ।
पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् ॥ १३ ॥
आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः ।
उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते ॥ १४ ॥
वैशसं नरकं पायुर्लुब्धकोऽन्धौ तु मे शृणु ।
हस्तपादौ पुमांस्ताभ्यां युक्तो याति करोति च ॥ १५ ॥
अन्तःपुरं च हृदयं विषूचिर्मन उच्यते ।
तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः ॥ १६ ॥
यथा यथा विक्रियते गुणाक्तो विकरोति वा ।
तथा तथोपद्रष्टात्मा तद्वृत्तीरनुकार्यते ॥ १७ ॥
देहो रथस्त्विन्द्रियाश्वः संवत्सररयो गतिः ।
द्विकर्मचक्रस्त्रिगुणध्वजः पञ्चासुबन्धुरः ॥ १८ ॥
मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वन्द्वकूबरः ।
पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः ॥ १९ ॥
आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति ।
एकादशेन्द्रियचमूः पञ्चसूनाविनोदकृत् ।
संवत्सरश्चण्डवेगः कालो येनोपलक्षितः ॥ २० ॥

भाषाटीका ।

प्रज्ञा को बुद्धि जानना चाहिये जिसका किया मैं मेरा ऐसा अभिमान होता है जिस बुद्धिके परवश होने से पुरुष इस शरीर में इन्द्रियों से विषयों को भोगता है ॥ ५ ॥
इन्द्रियगण जो हैं सोई सखा है जिसका कि ज्ञान कर्म कार्य होता है उन इन्द्रियों की वृत्ति सखी हैं पांच वृत्तिवाला प्राण ही सर्प है ॥ ६ ॥

दोनों प्रकार की इन्द्रियों का नायक एकादश नामक मन है पांचरूपादिक विषय पञ्चाल हैं जिसके मध्य में नौ द्वारवाला पुर है ॥ ७ ॥

दो नेत्र दो नासिका दो कर्ण मुख लिङ्ग गुदा ये दो द्वार एक ठिकाने हैं उन रस्तों से उन इन्द्रियों सहित जीव बाहिर जाता है ॥ ८ ॥

दो आंख नाक दो मुख ऐसे पांच पूर्व के द्वार हैं दक्षिण कर्ण दक्षिण द्वार है उत्तर कर्ण उत्तर द्वार है ॥ ९ ॥

नीचे के दो द्वार पश्चिम हैं लिङ्ग गुदा खद्योता आविर्मुखी दो नेत्र एकत्र बनाये हैं जीव नेत्रों से विभ्राजित नामक रूप को देखता है ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नस्ये इति व्याख्या अवधुनोतीत्यवधूतो वायुस्तद्वानवधूतो नि[illegible]श्वासेन सहैकस्थानत्वात् घ्राणोऽवधूतः । आस्यमिति व्याख्या रसज्ञविपणान्वित इत्यत्र रसज्ञशब्दनिर्दिष्टस्य रसविदित्यनुवादः रसज्ञशब्दनिर्दिष्टस्य रसविदित्यनुवादः रस इति व्याख्या रसनेन्द्रियमित्यर्थः विपणो वाग्रसविद्रस इत्येव पाठः [illegible] ॥ ११ ॥
अन्यौऽस्पष्ट ॥ १२ ॥ १३ ॥
ग्रामकर्मित्यस्यानुवादो ग्रामिणां रतिरिति तस्य व्याख्या व्यवाय इति ॥ १४ ॥ १५ ॥
विषूचीमनवाणीत्यनुवादो विषूचिरिति [illegible] रजोभिः ॥ १६ ॥

श्रीवरस्वामिकृतभावार्थदीपिका ।

महिषी बचदीदेतेत्यादेरर्थं सङ्गृह्णाह । यथा यथा बुद्धिः [illegible] विक्रियते जाग्रति विकरोति वा इन्द्रियाणि परिणमयति [illegible] बुद्धे रक्तो लिप्त आत्मा तथा तथा तस्या दुर्दीहेरीनस्य [illegible] [illegible] अन्वगुणवद्वैव सन् [illegible]कार्यते ॥ १७ ॥

[illegible]मिनेतद्व्याचष्टे । सम्वत्सरस्यैवाप्रतिहती रयो वेगः प्रतीतितो यस्य स सम्वत्सररथः वस्तुतस्त्वगतिः [illegible] [illegible]वेन विहृतत्वेन देशान्तरगत्वभावात् पाठान्तरे [illegible] [illegible] तरकं रथस्य ताभ्यां गतिर्भवतेति प्रीतिमिन्यस्य व्याख्या [illegible] न कृता छिनत्ति इत्यस्य व्याख्या छिनत्त्येका इति [illegible] [illegible] इति त्रिवेणुपदव्याख्या ॥ १८ ॥

पञ्चमहरयामित्येतद्व्याचष्टे । पञ्चेन्द्रियार्थप्रक्षेप इति ॥ १९ ॥

पञ्चेन्द्रियैः सूनाविनोदमिवाभ्यायेन विषयसेवां करोतीति [illegible]सूनाविनोदकृत अनेन पृचार मृगयां तत्रेत्यादिव्याख्या- [illegible] ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

* एवं विभ्राजितमित्यस्य व्याख्यानं रूपमिति शेषः प्रतीक [illegible]: पुरञ्जनः बद्योतादिशब्दास्तु गौणाः अतोऽत्र न प्रवृत्तिनि-[illegible]मुक्तं नासे गन्ध इति च व्याख्यानं शेषः प्रतीकः ॥ ११ ॥

[illegible] इति व्याख्यानमवधूत इति प्रतीकः मुख्येति प्रतीक-[illegible] व्याख्यानमाहृयमिति रसज्ञविपणी व्याचष्टे । विपणीचामिति [illegible] इति प्रतीकः वागिन्द्रियमिति व्याख्या रसविदित्यर्थेत: [illegible]कः रसज्ञविपण्यान्वित इति मूलाद्रसः रसनेन्द्रियमिति [illegible]ख्यानं आपणबहूदनौ व्याचष्टे । आपण इति प्रतीकः व्यवहारः वागुव्यवहार इति व्याख्या बहूदनमिति प्रतीकः [illegible]मिति व्याख्या ॥ १२ ॥

पितृहूरित्यनुवादः दक्षिणकर्णाविति व्याख्यानम् । दक्षिणा दक्षिणः कर्णो इत्यनेन दक्षिणैका तथोत्तरेति व्याख्यानं पितृहूर्दक्षिणः कर्णः इत्यनेन तु पितृहूर्नाम पुर्या द्वा देवहूर्नाम पुर्या द्वारित्युक्तगुणनामविषयौ दक्षिणोत्तरकर्णावित्युच्यत इति भेदः क्रममनादृत्य तृतीयाध्यायोक्तचण्डवेगादिपदार्थानाह । सार्धत्रिभिः [illegible] इति प्रतीकः संवत्सर इति विवरणं तत्र तत्प्रवृत्ती निमित्तमाह [illegible] कालः पुरुषायुष्करूपः कालः येन संवत्सरेण चक्र-[illegible] क्रमतोपलक्षितः ज्ञापितः परिच्छिन्नः चक्रवर्ती वेगेन पुरुषायुषस्य परिच्छेदकत्वाच्चण्डवेग इत्युच्यत इत्यर्थः ॥ १३ ॥

तस्य चण्डवेगस्य संबन्धिनो गन्धर्वा गन्धर्व्यश्च यथाक्रमं महानि रात्रयश्च स्मृता इत्यर्थः तत्र गन्धर्वप्रवृत्ती निमित्तमाह । यतः [illegible]शतत्रयमहानि रात्रयश्च परिक्रामन्त्या परिवर्तनेन गन्ध-[illegible] पुरुषायुषं हरन्ति अतो गन्धर्वगुणयोगात्त-[illegible] इत्यर्थः ॥ १४ ॥

कालकन्येत्यस्य व्याख्या जरेति कालस्य पुरुषायुषं हरतः दुहि-[illegible]: प्रीत्यावहत्वात्सा कालदुहितेत्युच्यते । त्रिलोक्यां वर-[illegible]दि: प्रज्वारस्त्वां प्रयोग्यतीत्यस्य संग्रहार्थमाह ।

* [illegible] श्रीवीरराघवमते त्रिशद्दशोकपर्यन्तं [illegible] पञ्चदशे [illegible] व्याख्यानं [illegible] [illegible]: पाठके: ।

लोकस्तां [illegible] सार्धेन चचार लोकस्येति शेषः ॥ १५ ॥

भीमाः सैनिका यस्येति बहुव्रीहर्थं प्रत्युपसर्जनीभूत[illegible]-[illegible]माह । आधयः मनः पीडा व्याधयो देहपीडास्तत्र [illegible], सैनिकाः एते भूतानामुपसर्गाश्च यथा दुराः यथाः [illegible] [illegible]: अतीव दुःखावहत्वादुरवः उपसर्गाः [illegible] [illegible]भयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्या[illegible]: साधिव्याधिजन्मजरामरणादयः तत्राधिव्याधीनां भीम[illegible]-[illegible]त्यागमृत्योस्तस्येति प्राधान्येन निर्देशात्तद्व्यतिरिक्तपर उपसर्ग-शब्दः प्रज्वारपदार्थमाह । विविधो ज्वर इति ॥ १६ ॥

एवं क्रममनादृत्य तृतीयाध्यायस्थपदानि व्याख्याय सिंहा-वलोकनन्यायेन पुनरेतदध्यायस्थपदान्येवावशिष्टानि व्याख्येयानि व्याचष्टे । प्रवृत्तं चेति । दक्षिणपाञ्चालमुत्तरपाञ्चालमित्युक्तपाञ्चाल-शब्दार्थमाह । प्रवृत्तं प्रवर्तकं कर्तरि क्तः त्रिवर्गतत्साधकरूपा-[illegible] प्रवर्तकं [illegible] प्रवृत्तमित्युच्यते निवृत्तं निवर्तकं त्रिव-र्गतत्साधनेभ्यस्तन्निवृत्तं त्रिवर्गस्यास्थिरफलत्वोपदेशपूर्वकं ततो निवृत्यानन्तस्थिरफलब्रह्मोपासनतत्स्वरूपरूपगुणादिप्रकाशकं शास्त्रं निवृत्तमित्युच्यते तदेवं शास्त्रद्वयं पाञ्चालसंज्ञकमित्यर्थः पञ्चेति व्यक्तीकरोति त्रिवर्गं तत्साधनं तन्निवृत्तीरितिव्युत्पत्तेः एवं पाञ्चालद्वि-[illegible] प्रवृत्तिनिवृत्त्यात्मकशास्त्रद्वयपरत्वं सामान्येनाभिधाय तस्य दक्षिणोत्तराभ्यां विशेषितस्य प्रवृत्ते निवृत्ते च क्रमेण प्रवृत्तौ निमि-त्तमाह । पितृयानमिति । पितरो हि दाक्षिणात्याः तान् यान्त्यनेनेति पितृयानं प्रवृत्तशास्त्रोदितकर्मैव [illegible] पितृनारांश्च तांव-[illegible] [illegible]पितृप्राप्तिसाधनप्रकाशकत्वात् पितृ-यानं [illegible] दक्षिणपाञ्चालमित्युच्यते एवं देवयानमुत्तरपाञ्चा-लमिति श्रुतधरान्वित इत्युक्तश्रुतधरपदार्थमाह । श्रोत्रादीति श्रोत्रेन्द्रियाच्छ[illegible]ादीति प्रतीकः श्रोत्रादिति व्याख्यानं तदन्वित इत्युक्तोऽन्वयः किंरूप इति विविक्षायां हेतुत्वेनेति श्रोत्रस्य हेतुपञ्चमी प्रयुक्ता किंप्रति हेतुत्वमिति विविक्षायां [illegible] व्रजेदित्युक्तं [illegible] इति शेषः व्रज गतौ सर्वे गत्यर्था ज्ञानार्था इतिन्यायेन पितृयानदेवयानापरपर्यायं दक्षिणोत्तरपाञ्चालं शास्त्रं श्रोत्रेन्द्रियेण साधनरूपेण हेतुनावगच्छति [illegible] इत्यर्थः ॥१७॥

आसुरीनाम पश्चाद्द्वारित्यस्यार्थमाह । आसुरीमेढ्रमिति । आसु-रीतिप्रतीकः मेढ्रमिति व्याख्या पश्चादित्यस्य व्याख्या अवाङ्गिति आसुरपदप्रवृत्तिनिमित्तं तूक्तं पुरस्तादत्रानुक्तिस्तु स्पष्टत्वात् ग्राम्यक-मित्यर्थतोऽनुवदति ग्रामिणां रतिः तस्य व्याख्या व्यवाय इति मैथुन-मित्यर्थः दुर्मदशब्दानुवादेन तदर्थमाह । उपस्थ इति । निरृति-मित्यस्यार्थं माह । निरृतिरिति प्रतीकः गुद इति व्याख्या ॥ १८ ॥

वैशसशब्दानुवादेन तदर्थमाह । वैशसं नारकमिति । नरके भवं नारकं दुःखमित्यर्थः । लुब्धक इति प्रतीकः पायुरिति व्या-ख्या अन्धावमीषामित्यस्यार्थमाह । अन्धाविति । मे मत्तः अन्ध-शब्दार्थौ शृणु पाणिपादावन्धौ इति प्रतीकः पाणिपादौ व्याख्या जातिपरोऽयं निर्देशः पाणी पादौ चेति विवक्षितार्थः अन्धपदप्र-वृत्तिनिमित्तं निर्वाक्पेशस्करत्वं पूर्वमेवोक्तं शेषोऽनुवादः ॥ १९ ॥

स यर्हि इत्यस्यार्थमाह । अन्तःपुरमिति । अन्तःपुरमित्यनुवादः हृदयमिति व्याख्या विषूचीनमित्यस्यार्थोऽनूद्यते विषूचीरिति [illegible] [illegible]र्थः शेषोऽनुवादः तद्गुणैः सत्त्वरजस्तमोभिः ॥ २० ॥

[illegible] ।

[illegible]ाह । [illegible] ॥ ११ ॥

[illegible]ाह । प्राण इति । मुख्यप्राण पुरस्ताद्दृष्टा इत्य[illegible]ति । या मुख्या नामद्वारः [illegible] रसनविषयान्वित इत्य[illegible] इति । [illegible] वागिन्द्रियं [illegible] रसः [illegible] [illegible] व्याचष्टे । [illegible] इति । [illegible] इत्यादौ [illegible] विधिधीरणः ॥ १२ ॥

[illegible]शब्दस्यार्थान्तरमाह । प्रवृत्तिमिति ॥ १३ ॥

[illegible] श्रीत्रमिति तेजोऽवकान्तः पितृयानादिमार्गे [illegible] [illegible]र्यः कृत्यमाह । मेहनार्थमिति । मेहनं पुरीषोत्सर्जनं [illegible] [illegible] ॥ १४ ॥ १५ ॥ १६ ॥

[illegible]मनोगुण[illegible]गुणैर्वा एतदेव प्रतिपादयति । यथेति । [illegible] [illegible] मनो बुद्धिर्वा [illegible] [illegible]नेति शेषः [illegible] प्रमाद[illegible] स्वयं वा विकरोतीत्याह । गुणेति ॥ १७ ॥

[illegible] यथा [illegible] परिणमते तथा तथा [illegible] [illegible] जीव[illegible] [illegible] यथा मनो विक्रियते गुणात्मक [illegible] गुणरूपिता बुद्धिस्तथा [illegible]रोति बुद्धिर्यथा विकरोति [illegible] [illegible] मनोविकारानुकारि [illegible] [illegible] यस्य स तथा [illegible] [illegible] ॥ १८ ॥

[illegible] [illegible] [illegible] [illegible] [illegible] यस्य स तथा [illegible]माह । [illegible] इति ॥ १९ ॥

[illegible]माह । [illegible]ति । प्रतीतितः [illegible] [illegible] सा मृगतृष्णिका तां तदुक्तम् "[illegible] [illegible] [illegible] । मृगतृष्णोदकतः प्रादुर्भाने [illegible] [illegible]ः" इति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

[illegible] इति [illegible] ॥ १४ ॥

यथा यथा विक्रियते गुणाक्त इत्येव पाठः ॥ १५-१७

आकूतिः कर्मेन्द्रियपञ्चकं सम्वत्सर इत्येकम् ॥ १८—२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

[illegible] वायुस्तदात्म[illegible] [illegible]दुद्घाणो[illegible] [illegible] [illegible] इत्यस्य व्याख्या [illegible] रसनविषयान्वित इत्यस्य व्याख्या वागिति [illegible] इत्यस्य व्याख्या [illegible]ित्यनुवादः रस इति व्याख्या तु रसो रसनेन्द्रियं [illegible] [illegible] ॥ ११ ॥

[illegible] । पाति भूतधरान्वितः भूतधरपद[illegible] व्याख्या ओजादिति ॥ १२ ॥ १३ ॥

भामकं नाम विषयमित्यत्र भ्रामकमित्यस्य भ्रामिकां [illegible] [illegible]रित्यनुवादः व्याख्या तु [illegible] इति ॥ १४ ॥ १५ ॥

[illegible] [illegible] [illegible] तु [illegible] इति । [illegible]मनोगुणैस्तमःसत्त्वरजोभिः ॥ १६ ॥

[illegible] । [illegible] बुद्धिः [illegible] [illegible] विकरोति [illegible] विपरिणमयति तथा [illegible] गुणाक[illegible] [illegible] आत्मा तथा [illegible] [illegible] [illegible] [illegible] [illegible] ॥ १७ ॥

[illegible] रथो येन [illegible] [illegible] [illegible] संकल्प [illegible] एव गति[illegible] [illegible] इति [illegible] [illegible]ः ध्वजो [illegible] ॥ १८ ॥

पञ्चमहरथ इत्यस्य व्याख्या पञ्चानामिन्द्रियाणामर्थेषु शब्दादिषु [illegible] प्रक्षेपः । [illegible] पञ्चमहद्व्योमी[illegible] [illegible] ॥ १९ ॥

आकूतिः कर्मेन्द्रियपञ्चकं विक्रममिति [illegible] [illegible] व्याख्या पञ्चेन्द्रियैः [illegible] [illegible] करोति इति पञ्च[illegible] । [illegible] [illegible] [illegible] [illegible] ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ईश्वरः पुरुषः रसनविषयान्वित [illegible] । [illegible] [illegible] इति । विषयः [illegible] [illegible] रसवित् [illegible] रसः रसनेन्द्रियम् ॥ ११ ॥

[illegible] [illegible] ॥ १२ ॥

प्रवृत्तं [illegible] [illegible] पितृयानं पितृलोकप्रापकं [illegible] [illegible] पाञ्चालसंज्ञितं देवयानं परमेश्वरप्रापकं [illegible] [illegible] [illegible] ॥ १३ ॥

मेहनमुपस्थेन्द्रियस्थानम् भ्रामकमित्यस्यानुवादः भ्रामिकां [illegible]रिति तद्व्याख्या [illegible] इति ॥ १४—१५ ॥

[illegible]मनोगुणैस्तमःसत्त्वरजोभिः ॥ १६ ॥

[illegible] । बुद्धिर्यथा [illegible] [illegible] जाग्रति विकरोति इन्द्रियाणि परिणामयति तथा [illegible] गुणैः [illegible] [illegible] उपद्रष्टा जीवः तस्याः [illegible] [illegible] [illegible]ते ॥ १७ ॥

एवं पञ्च[illegible] पदानि संक्षेपतो व्याख्याय षड्विंशाध्यायगतानि पदानि व्याचष्टे देहो रथ इत्यादित्रिभिः [illegible] [illegible] इव गतिर्यस्य सः वस्तु सम्वत्सरस्यैव प्रतिहतौ रथो [illegible] प्रतीतितो यस्य स सम्वत्सररथी वस्तुतोऽगतिः [illegible] [illegible] [illegible] देशान्तरगत्यभावादिति तदुक्तम् "[illegible] रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् [illegible] सृजते" इत्यादिश्रुतेः [illegible] परमेश्वरकृतायाः [illegible] [illegible] [illegible] जीवस्य [illegible] [illegible] पापपुण्ये कर्मणी [illegible] यस्य सः [illegible] [illegible] [illegible] [illegible] ॥

आकूतिः कर्मेन्द्रियमयः [illegible] [illegible] [illegible]

तत्राहानीह गन्धर्वा गन्धर्व्यो रात्रयः स्मृताः ।
हरन्त्यायुः परिक्रान्त्या षष्ट्युत्तरशतत्रयम् ॥ २१ ॥
कालकन्या जरा साक्षाल्लोकस्तां नाभिनन्दति
स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः ॥ २२ ॥
आधयो व्याधयस्तस्य सैनिका यवनाश्चराः ।
भूतोपसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः ॥ २३ ॥
एवं बहुविधैर्दुःखैर्दैवभूतात्मसम्भवैः ।
क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः ॥ २४ ॥
प्राणेन्द्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः ।
शेते कामलवान् ध्यायन् ममाहमिति कर्मकृत् ॥ २५ ॥
यदात्मानमविज्ञाय भगवन्तं परं गुरुम् ।
पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् ॥ २६ ॥
गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः ।
शुक्लं कृष्णं लोहितं वा यथा कर्माभिजायते ॥ २७ ॥
शुक्लात्प्रकाशभूयिष्ठाँल्लोकानाप्नोति कर्हिचित् ।
दुःखोदर्कान् क्रियायासांस्तमःशोकोत्कटान् क्वचित् ॥ २८ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

[illegible] दुःखोदर्को यो विनोदस्तत्कृत् मृगतृष्णां मृगतृष्णावत् निःसारां मृगयां प्रति धावति अनेन प्रकारं मृगयां तत्र्यादि व्याख्यातम् ॥ २० ॥

भाषाटीका ।

नलिनी नालिनी दो नासिका हैं गन्ध सौरभ है प्राण अवधूत है मुख्या मुख है विपणा वाक् इन्द्रिय है रस जानने वाला रसविद रसज्ञ है ॥ ११ ॥

व्यवहार आपण है नाना प्रकार के अन्न बहूदन हैं दहिना कान पितृहू है उत्तर कर्ण देवहू है ॥ १२ ॥

प्रवृत्त निवृत्त शास्त्र पञ्चाल है पितृयान देवयान दोनों को श्रुत धरके साथ कान के रस्ते जीव जाता है ॥ १३ ॥

नीचे का द्वार आसुरी नाम का सो लिङ्ग है व्यवाय मैथुन [illegible] का रति है लिङ्ग का नाम दुर्मद है गुदा का नाम निर्ऋति है ॥ १४ ॥

वैशस नरक का नाम है लुब्धक गुदा का नाम है हस्त पाद दोनों अन्ध हैं तिन दोनों से युक्त होकर जाता है और कार्य्य [illegible] ॥ १५ ॥

अन्तःपुर हृदय है मन विषूची है तहाँपर तिस मन के [illegible] अनेक प्रकार हर्ष को प्राप्त होता है ॥ १६ ॥

गुण युक्त होने से जैसे विकार युक्त होता है अथवा विकार करता है तैसे उपद्रष्टा जीव उन वृत्तियों का अनुकरण करता है ॥ १७ ॥

देह रथ है इन्द्रिय घोड़ा हैं संवत्सर का वेग गति है पुण्य पाप दो कर्म चक्र हैं तीन गुण ध्वजा हैं पाञ्च प्राण बंधुर हैं ॥ १८ ॥

मन लगाम है बुद्धि सारथी है हृदय रथिके बैठने का स्थान है शोक मोहादि क्षुधा के बन्धन स्थान हैं इन्द्रियों के पाञ्च अर्थ रूपादिक प्रक्षेप हैं ॥ १९ ॥

पाञ्च कर्मेन्द्रिय बाहिर का विक्रम है मृगतृष्णा को दौड़ता है एक इन्द्रिय सेना हैं पञ्चसूना का विनोद करने वाला है ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परिक्रान्त्या परिभ्रमणेन ॥ २१ ॥

भगिनीत्वेन जगृहे लोकानां क्षयाय ॥ २२ ॥

चराः सञ्चारिणः भूतानामुपसर्गे पीडायामाशु शीघ्रो मृत्युहेतू रयो वेगो यस्य प्रज्वारस्येति प्रहाष्ट्व्याख्या पाठान्तरे भूतकना अरयः अनेन चारिभिरुपरक्ष इत्यपिदं व्याख्यातम द्विविधः शीतोष्णरूपेण प्रवेशनिर्गमभेदात् ॥ २३ ॥

एवं परोक्षत्वेनोक्तमर्थं व्याख्याय सर्वकथातात्पर्यमाह एवमित्यादिविरमकर्मेत्यन्तेन आधिदैविकादिभिर्दुःखैः क्लिश्यव-

क्वचित्पुमान्क्वचिच्च स्त्री क्वचिन्नोभयमन्धधीः ।
देवो मनुष्यस्तिर्यग्वा यथा कर्मगुणं भवः ॥ २९ ॥
क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहम् ।
चरन् विन्दति यद्दिष्टं दण्डमोदनमेव वा ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मम अहमिति देहे यातं कर्माणि शेते वर्तेत इति द्वयोरन्वयः ॥ २४ ॥

अशनायापिपासादीन् प्राणधर्मानन्धत्वादीनिन्द्रियधर्मान् कामादीन् मनोधर्मांश्च निर्गुणोऽप्यात्मन्यध्यस्य कामकृतान् विषयसुखलेशान् ध्यायन् कर्मकृत् ॥ २५ ॥

ततः किमत आह । यदेति द्वाभ्याम् । स्वदृक् स्वप्रकाशस्वभावोऽपि ॥ २६ ॥

शुक्लं सात्त्विकम् कृष्णं तामसम् लोहितं राजसम् यथा कर्म तथा जायते ॥ २७ ॥

तदेवाह । शुक्लादिति द्वाभ्याम् । प्रकाशो भूयिष्ठो येषु दुःखमुदर्के उत्तरफलं येषु क्रियया आयासो येषु तान् लोहितान् तमःशोकादुत्कटौ येषु तान् कृष्णादिति ज्ञेयम् ॥ २८ ॥

नोभयं नपुंसकम् यथाकर्मगुणं कर्मगुणानतिक्रम्य ॥ २९ ॥

तेषु दैववशेन सुखदुःखे प्राप्नोतीति सदृष्टान्तमाह । द्वाभ्याम् क्षुधा परीतो व्याप्तः सारमेयः श्वा दण्डं दण्डेन ताडनम् ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं कर्मस्थित्यादेः संग्रहेणार्थमाह । यदेति । यदा स्वप्ने विक्रियते कर्मणि चकारः बुद्धिरिति शेषः यदा च जाग्रति विकरोतीन्द्रियाणि परिणमयति तदा तदा स्वप्नजाग्रदवस्थयोस्तस्या गुणैरक्तो लिप्तः आत्मा स्वभावतः उपद्रष्टापि तस्याः सुप्तीर्दर्शनश्रवणाद्याः प्रत्यनुकार्यते बलादनुवर्त्यते ॥ २१ ॥

एवं प्रथमाध्यायस्थपदानि व्याख्यातान्यथ द्वितीयाध्यायस्थपदानि व्याचष्टे देह इतित्रिभिः यो रथ उक्तः स देहः येऽश्वा उक्तास्ते इन्द्रियरूपाश्वाः आशुगमित्यत्र विवक्षिता गतिः सम्वत्सररयः सम्वत्सरवेगतुल्या तूर्णप्रतिपत्तिः स्वाभ्यन्देहप्राप्तिर्हि तत्कालमात्रावसायित्वेनातितूर्णाद्वे पुण्यापुण्यरूपे कर्मणी चक्रे यस्य सः पुण्यापुण्यकर्मणी एव द्विचक्रमितिचक्रशब्देन विवक्षिते इत्यर्थः त्रिवेणु मित्यत्र विवक्षिता वेणवो ध्वजाः सत्त्वरजस्तमोगुणा इत्यर्थः पंच प्राणा प्राणाः पतद्वनमनन्नं कुरुत इतिश्रुतेः बन्धुरा बन्धनानि यस्य बन्धुरत्वेन विवक्षिताः पञ्च प्राणा इत्यर्थः पञ्चासुबन्धुर इत्यपिपाठः व्याख्यायां विशेषानुपगमात् ॥ २२ ॥

[illegible]दम: प्रग्रहत्वेन यो विवक्षितः स मनः यः सूत उक्तः स बुद्धिः यदीडं रथिन उपवेशनस्थानं तत्कूबर इत्युच्यते [illegible] शोकमोहौ कूबरं युगबन्धनस्थानं यस्य द्विकूबरमित्युक्तौ द्वौ पदार्थौ द्वन्द्वात्मकशोकमोहावित्यर्थः पञ्चप्रहरणामित्युक्ताः पञ्चप्रहरणानि तन्मात्राः पदार्थाः पञ्चेन्द्रियार्थाः शब्दादय इत्यर्थः पञ्चेन्द्रियाणां प्रक्षेपा इवेति षडूर्मिः सप्तधातवः वरूथाः [illegible] यस्य सप्तवरूथमित्यत्र वरूथत्वेन रूपिताः सप्तपदार्थाः सप्तधातव इत्यर्थः ॥ २३ ॥

पञ्च विक्रममित्यत्र विक्रमत्वेन गतिप्रकारत्वेन विवक्षिता आकूतिः पञ्चकर्मेन्द्रियाणीत्यर्थः बाह्यबहिष्ठविषयात्मकः एकादशेन्द्रियप्रधानेन चमूः सेना यस्य स पञ्चसूनाहिंसा पूर्वविमोदस्तं करोतीति तथा मृगतृष्णां मृगमरीचिकावस्तुकाभासरूपविषयानुभूतिं करोतीत्यर्थः अथ स एकदामेहष्वासो इदं पञ्चाश्वमाशुगमित्यादीनां द्वयानां श्लोकानां स्वप्नावस्थापरत्वेन पूर्वव्याख्यातत्वादस्माभिरपि स्वप्नावस्थापरत्वेनैव व्याख्याताः तद्व्याख्यानपक्षिवं देहो रथस्त्विन्द्रियाश्वा इतिश्लोकत्रयं च तदनुरोधेन व्याख्यातं वस्तुतस्तु इयश्लोका जाग्रद्देहतद्व्यापारपरत्वेनैव व्याख्येया व्याख्यानस्वारस्यात् व्याख्याने हि संवत्सररयेगतिरित्युक्तं नहि स्वाप्नदेहस्य संवत्सरवेगात्मकगतिः संभवति तस्य तत्कालमात्रावसायित्वात्तस्य तत्सत्त्वप्रतीतिमात्रपरत्वे चास्त्येकादशेन्द्रियचमूपतिरित्युक्तत्वाच्च नहि स्वप्ने एकादशेन्द्रियाणां व्यापृतिः संभवति तत्सम्बन्धमात्रविवक्षायामस्वारस्यं पञ्चसूनाविनोदकृदित्युक्तत्वाच्च हि पञ्चसूनानां जाग्रद्देहनिष्पाद्यत्वं युक्तं तस्मादिदं जाग्रद्देहतद्व्यापारपरमेव व्याख्येयं तथाहि भोगायतनत्वख्यापनाय पूर्वं पुरत्वरूपितं जाग्रदवस्थस्य [illegible] शरीरमेवेदानीं रथत्वेन रूप्यते देहो रथित्वेन इन्द्रियाद्योऽश्वादित्वेन किमर्थमेवं रूपणमिति चेदुच्यते रथोहि स्वाभिमतदेशान्तरप्रापणसमर्थः तद्वन्मनुष्यशरीरमपि वैष्णवपदप्राप्तिसाधनानुष्ठानोपयोगीति ज्ञापनाय रथभावेन रूप्यते तथाहि कठवल्लीष्वाम्नायते ।

आत्मानं रथिनं विद्धि शरीरं रथमेव च ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।
यस्तु विज्ञानवान् भवत्यमनस्कः सदा शुचिः ।
न स तत्पदमाप्नोति यस्माद्भूयो न जायते ।
विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति ।

एतत्कृत्यर्थं यथाश्वोपवृंहित इति श्रुत्या रथादिभावेन रूपितानामेव देहादीनामत्रापि तद्भावरूपणरूपसंवादात् तद्विवृत्तौ मृगया नोक्ता अत्र रूप्यते इति चेत् अत्र विवक्षिता मृगया श्रुतावप्युक्तैव यस्तु विज्ञानवान् भवत्यमनस्क इत्यत्र परब्रह्मप्राप्तिसाधनोपसंहारोपयुक्तशरीरं [illegible] [illegible] पुरुषार्थबुद्धि [illegible] [illegible] मृगया विवक्षिता सा च [illegible] [illegible] [illegible] [illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नवान् सं न भवतीत्यविज्ञानवान् विवेकात्मकसात्त्विकबुद्ध्या विरहित इत्यर्थः न विद्यते शुचिः कामाचाराहिनी यस्य सोऽशुचिरित्यर्थावगमात् श्लोकार्थस्तु पूर्वोक्त एव, [illegible] पृथक् [illegible] न कथिता स्यात्तत्र तद्दोषानुकीर्तनेन श्रोतुर्वैराग्योदयो न स्यादिति वाच्यं आप्रदवस्थाप्रपञ्चेनैव [illegible] प्येवं [illegible]ति ज्ञातुं शक्यत्वेन तस्याः पृथग्वक्तव्यत्वात् अत एव हि सुषुप्त्यवस्था पृथङ् नोक्तेति मन्तव्यः ॥ २४ ॥

एवं परोक्षेणोक्तमर्थं व्याख्याय कृत्स्नकथातात्पर्यमाह । एवमित्यादिना । त्रिभिस्तापैस्तदवान्तरभेदेन बहुविधैर्दुःखैरेवं शतवर्षं यावच्छरीरं क्लिश्यमानः देही [illegible] तमोवृतस्तमसाज्ञानेनावृतोऽभिभूतः ॥ २५ ॥

प्राणादेर्धर्मानात्मन्यध्यस्य पिपासुरहं बुभुक्षुरहं काणोऽहं बधिरोऽहं दुःख्यहं सुख्यहमित्येवं प्राणादिधर्मानात्मन्यारोप्य सुखलेशान्वाविष्टस्तथाहं ममाभिमानकृत्वा पुनर्देहान्तरप्राप्तिहेतुभूतकर्माणि कुर्वन् शरीरे वसति ॥ २६ ॥

कुतोऽयं संसार इति विविदिषायां [illegible] रूपोपासनापर ज्ञानाभावादेवेत्याह । यदेति । आत्मानं हितोपदेष्टारं प्रकृतिपुरुषविलक्षणं षाड्गुण्यपूर्णं परमात्मानं [illegible] [illegible]: स्वमा[illegible]: स्वदृक् स्वानुभवपरोऽपि प्रकृतेर्गुणेषु शब्दादिषु यदा विषज्जेत विरतो [illegible] भवेत् ॥ २७ ॥

गुणेष्वेव शब्दादिष्वभिमानी भोग्यताबुद्धिमानत एव विषय[illegible]: विषयाभिसाधनतया शुक्लं सात्त्विकं कृष्णं तामसं लोहितं राजसमित्येवं रूपेण त्रिविधानि कर्माणि कुरुते तदा [illegible] स्वशुक्लादिरूपस्वकर्मानुसारेणाभिजायते पुनर्जन्मान्तरं प्रतिपद्यते ॥ २८ ॥

[illegible]माह शुक्लात्सात्त्विकात्कर्मणो हेतोः प्रकाशभूयिष्ठान्प्रकाशः भू[illegible] येषु तान् लोकान् देहान्कर्हिचित्प्राप्नोति कर्हिचिदित्यनेन [illegible] कर्म तत्प्रयुक्तः सात्त्विको देहश्च दुर्लभ इत्युक्तं क्रियायाः [illegible]: दुःखोदर्कान् दुःखमुत्तरं येषां तान् दुःखपर[illegible]कानित्यर्थः तान् लोकान् तमस्तामसात्कर्मणः विभ[illegible]गार्थः यत्र तमःशोकावज्ञानशोकावुत्कटौ येषु तान् तामसात् कर्मणः इति वा शेषः कश्चिद्रजस्तमः प्रचुरम्लेच्छादिदेशेषु सात्त्विकादिकर्मकर्तृस्वरूपं तत् स्पष्टं गीतं भगवता "नियतं सङ्गरहितमरागद्वेषतः कृतं अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते । यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः । क्रियते बहुलायासं तद्राजसमुदाहृतम् अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् । मोहादारभ्यते कर्म [illegible]" इत्यादिना ॥ २९ ॥

[illegible]कर्मानुसारेण जन्मापि नपुंस्त्वादिरूपेण नियतं प्राप्नोति [illegible]त्याह । कश्चिदिति । [illegible]: नोभयं नपुंसकं भवतीत्यर्थः तत्रापि यथा कर्मगुणं कर्मगुणावमतिक्रम्य देहादिरूपेण [illegible] भवतीति शेषः ॥ ३० ॥

[illegible]कृतपदरत्नावली ।

[illegible] विषयसेवाबन्धपाहिंसाकथाविनोद[illegible] [illegible] येन सम्वत्सरेण द्विपरार्धगुणस्य [illegible] ॥ [illegible] ॥

[illegible]तिकाख्या प्रक्रियया पुनःपुनरावर्तनेनेत्यर्थः ॥ २३ ॥

[illegible] जगत इति शेषः भूतोपसर्गो ग्रहोपद्रवाः ॥ [illegible] ॥

अधुना [illegible] उक्तमर्थं विवृण्वन् प्रत्यक्ष[illegible]मिति । [illegible]भूतान्यात्मविषयतया आति[illegible] विधैर्दुःखैः क्लिश्यमानस्तमोवृतस्तत्परिहारोपायमजानन् दे[illegible] इति श्लोकद्वयेनान्वयः कियन्तं कालं शतवर्षं कल्पसत्वात् "शतायुः पुरुष" इति न्यूनातिरेकसम्भवेऽप्येवमुक्तं दुःखोत्पत्तौ कारण[illegible] कामेति । प्राणधर्मानशनपिपासादीनिन्द्रियधर्मानन्धत्वादीन् [illegible] धर्मान् शोकमोहादीनात्मनि [illegible]स्यारोप्य बुभुक्षि[illegible]तोऽहमन्धः काणोऽहं शुष्कोऽहं मुग्धोऽहमिति निर्गुण[illegible] अतो गुणरहितः ननु शरीरकारणक्षये मोक्षसम्भवात् [illegible] भवोऽप्युपकाराय स्यादिति इत्यत आह । कर्मकृदिति । आत्मनुदे [illegible]माहर्षात्कर्माणि नियमेन तु । [illegible] देहानां करोत्यव[illegible] त्यादेनं कर्मक्षयान्मुक्तिः नन्वस्तु कर्मकर्तृत्वं हर्षपर्वणेन क्रियमाणानां न दुःखदातृत्वमित्यत आह । ममेति ॥ २४ ॥ २५ ॥

कर्मकृदित्यत्र कीदृशं कर्म करोतीति तत्राह । यदेति । [illegible]गामी पुरुषः संसारे इष्टानिष्टफलदमात्मानं [illegible]नियाम[illegible]विहाय प्राकृतेषु गुणेषु विषज्जते तदा स गुणाभिमानी देही शुक्लादीनि सात्त्विकादीनि कर्माणि यथा कुरुते तथा सात्त्विकादिशरीरतया जायते अवशः विष्णुवशः स इत्यनेन कर्मणः [illegible]मिदाह आत्मशब्दस्य साधारणत्वेन कथं निर्णय इत्यतो [illegible]मित्यादिविशेषणद्वयम् ॥ २६ ॥ २७ ॥

त्रिविधानां कर्मणां फलमाह । शुक्लादिति । प्रकाशभूयिष्ठांस्तेजोमयान् देवादीन् क्रियायासान् क्लेशकर्मसाध्यान् राजसान् दुःखप्रचुरान् मनुष्यादीन् तमः शोकोत्कटान् तामसान् स्वकर्मणः शोकभूयिष्ठान् तिर्यगादीनाप्नोतीत्यन्वयः ॥ २८ ॥

कश्चित्कश्चिदिति । बहुजन्मापेक्षया नोभयं नपुंसकत्व[illegible] विशिनष्टि । देव इति । यथा कर्मगुणं यथा यथा कर्मणां गुणानामानुगुण्यं तथा भव उत्पत्तिर्देवादिविषया ॥ २९ ॥

तत्र दृष्टान्तमाह । क्षुदिति । दण्ड प्रहारं विहं दैवतः प्राप्तम् ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

परिमुत्स्येऽपत्रपरिक्राम्येति कश्चित् ॥ २१—२३ ॥

एवमिति युग्मकम् ॥ २४ ॥ २५ ॥

यदेति युग्मकम् ॥ २६—२९ ॥

क्षुदिति युग्मकम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

परित्यक्त्या परिभ्रमणेन ॥ २१ ॥

लोकानां क्षपाय असारं अधुत्वेन जगृहे पत्ने [illegible] असारमपि तां जगृहे अधर्मवंशोद्भवत्वात् [illegible]रपि तस्याः स्वयमेव पतिरभूदिति कालकन्या वैष्णवजनेष्वपि कृपालोर्नारदस्याज्ञया मृत्युमेव जरयतीति ॥ २२ ॥

[illegible]: सञ्चारिणः भूतसम्बन्धमुपसर्गाः [illegible] सूर्यास्तमक्षुध्यादिकृताः आसतन्त्रा [illegible]: [illegible]: श्रान्तवेगा यस्य सः त्रिविधो ज्वरः शीतोष्णभयात् भूतोपसर्गा-

तथा कामाशयो जीव उच्चावचपथा भ्रमन् ।
उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम् ॥ ३१ ॥
दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु ।
जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एव इति पाठे भूतकृताः राजचौरकृमिजलादिकृता उपसर्गाः ओहास्तु ज्वरः अनेन आदिभिरुपलक्ष इत्यादिपदव्याख्या ॥ २३ ॥

कथेवं वैराग्यार्थेत्याह । एवमिति । दैवेत्याधिदैविकाधिभौतिकाध्यात्मिकैः प्राणधर्म्मान् क्षुत्पिपासादीन् इन्द्रियधर्म्मान् अन्धत्वादीन् मनोधर्म्मान् कामादीन् निर्गुणोऽप्यात्मन्यध्यस्य ॥ २४ ॥ २५ ॥

आत्मानं परमात्मानम् ॥ २६ ॥ २७ ॥

शुक्लं सात्त्विकं कृष्णं तामसं लोहितं राजसं दुःखमुखकं उत्तरफलं येषु सुखपदार्थेषु तान् क्रियया आयासश्च येषु तान् लोहिताख्याप्नोति तमःशोकावेव उत्कटौ येषु तान् कृष्णानिति ज्ञेयम् ॥ २८ ॥

पुरञ्जनः परस्मिन् जन्मनि स्त्री कथं बभूवेत्यत आह क्वचिदिति । सोऽयं नपुंसकं कर्मगुणाननतिक्रम्य यथा कर्मगुणम् ॥ २९ ॥

तेषु जन्मसु दैववशादेव सुखदुःखे प्राप्नोतीति सदृष्टान्तमाह श्वाऽन्नम् । दीन इति । राजकीय सारमेयव्यावृत्त्यर्थं सारमेयः श्वा ॥ ३०—३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ सप्तविंशाध्यायगतानि पदानि व्याचष्टे सम्वत्सर इत्यादिसार्धैस्त्रिभिः येन सम्वत्सरेण परिक्रामता निरन्तरया आवृत्या ॥ २१ ॥

तथाच लोकानां मरणाय स्वसारं भगिनीतया जगृहे ॥ २२ ॥

ज्वराः अस्थिराः भूतान्युपसर्गे क्लेशे आशु रयो मारको वेगो यस्य सः द्विविधः शीतोष्णरूपेण प्रवेशनिर्गमभेदात् ॥ २३ ॥

अथाष्टाविंशाध्यायार्थं कश्चित्पुमानित्यादिकश्चित्स्त्रीतिवाक्यैः सूचयन् कृत्स्नप्रकरणतात्पर्यमाह । एवमित्यादिना । तमोवृतोऽनादिमायावृतः ॥ २४ ॥

निर्गुणोऽपि अशनादिधर्मरहितोऽपि अशनापिपासादीन् प्राणधर्मान् बधिरत्वादीन् इन्द्रियधर्मान् राजसत्वादीन् मनोधर्मान् आत्मन्यध्यस्यारोप्य कामलवान् सुखलेशान् ध्यायन् अहं मम इति हेतोः कर्मकृत् शेते देहे वसति ॥ २५ ॥

प्रकृतेर्गुणेषु देहादिषु गुणकार्येषु स्वरूप् स्वदेहेन्द्रियादिषु आत्मबुद्धिः भार्यादिदेहेन्द्रियादिषु स्वीयबुद्धिः सन् विसज्जते अयं देवदत्तादिनामको गौरत्वादिगुणकोऽहमिमे भार्यापुत्रादयो ममेत्येवं सक्तिं करोतीत्यर्थः ॥ २६ ॥

गुणाभिमानी गुणकार्येषु स्वपरदेहादिष्वहं ममेत्यभिमानवान् शुक्लं सात्त्विकं कृष्णं तामसं लोहितं राजसं यथा कर्म तथैवाभिजायते देहं लभते ॥ २७ ॥

शुक्लात्कर्मणः प्रकाशबहुलान् लोकानसौ कर्मफलानि भुङ्क्ते चौरेति लोकान् देहान् क्रियाभिरायासो येषु तान् लोहितान् तमःशोकाद्युत्कटौ येषु तान् कृष्णान् ॥ २८ ॥

कश्चित्पुमान् कश्चित्स्त्री च भवति कश्चिदयं भवति नपुंसकत्वात् यतः कर्मगुणाननतिक्रम्येति यथाकर्मगुणं भवो जन्म भवति ॥ २९ ॥

सारमेयः श्वा ॥ ३० ॥

भाषाटीका ।

संवत्सर ही चण्डवेग है जिससे काल उपस्थित होता है दिन उसके गन्धर्व हैं रात्रि गन्धर्वी हैं वेही तीनसौ साठ मिलकर आयु को हरते हैं ॥ २१ ॥

जराअवस्था साक्षात्काल कन्या है मनुष्यादि उसको नहीं चाहते हैं सब के वध करने को उस बहिन को मृत्यु यवनेश्वरने ग्रहण किया ॥ २२ ॥

आधि व्याधि उसके सेना वाले यवन दूत हैं प्राणियों की पीडा करने में शीघ्र वेग वाला प्रज्वार दो प्रकार का ज्वर है ॥ २३ ॥

इस प्रकार बहुत से दैव भूत आत्मा के दुःखों से दुःखित होकर जीव सौ वर्ष पर्यन्त अज्ञानयुक्त रहता है ॥ २४ ॥

प्राण इन्द्रिय मनके धर्मों को आत्मा के मान लेता है आप इनके गुणों से रहित है काम के कणों को ध्यान करता सोता रहता है मैं हूं मेरा है ऐसे कर्म करता है ॥ २५ ॥

स्वयं प्रकाश है तो भी परम गुरु भगवान् को नहीं जानकर पुरुष प्रकृति के गुणों में जब आसक्त हो जाता है ॥ २६ ॥

तब वह गुणों का अभिमानी होने से परवश होकर कर्म करता है सात्त्विक राजस तामस जैसा करे तैसा देह होता है ॥ २७ ॥

कभी सत्त्व गुण से बहुत प्रकाश मान लोकों को जाता है कभी तमोगुण से क्रिया से बड़ा परिश्रम जिनमें और दुःख के प्राप्त करने वाले इन लोकों मे आता है ॥ २८ ॥

कभी पुरुष कभी स्त्री कभी मन्दबुद्धि होने से नपुंसक कर्म गुण के अनुसार देवता मनुष्य पक्षी होता है ॥ २९ ॥

क्षुधा से युक्त कुत्ता जैसे दुःखित होकर घर घर में घूमता है जो कुछ दैव से दण्ड प्रहार अथवा भोजन को पाता है ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कामध्वस्त आशयो यस्य ॥ ३१ ॥

ननु तर्हि सुखस्य सम्भवाद्दुःखस्य च प्रतीकारसम्भवात् [illegible] देयत्वं तत्राह । दुःखेष्विति । दुःखस्य प्रतीकारसम्भवात् [illegible] तस्य प्रतिक्रिया यद्यपि त्रिविधेषु दुःखेषु मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियोगो नास्ति ॥ ३२ ॥

यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् ।
तं स्कन्धेन स आधत्ते तथा सर्वाः प्रतिक्रियाः ॥ ३३ ॥
नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम् ।
द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ! ॥ ३४ ॥
अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ।
मनसा लिङ्गरूपेण स्वप्ने विचरतो यथा ॥ ३५ ॥
अथात्मनोऽर्थभूतस्य यतोऽनर्थपरम्परा ।
संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ॥ ३६ ॥
वासुदेवे भगवति भक्तियोगः समाहितः ।
सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥ ३७ ॥
सोऽचिरादेव राजर्षे ! स्यादच्युतकथाश्रयः ।
शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः ॥ ३८ ॥
यत्र भागवता राजन् ! साधवो विशदाशयाः ।
भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ॥ ३९ ॥
तस्मिन् महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवन्ति ।
ता ये पिबन्त्यवितृषो नृप ! गाढकर्णैस्तान्न स्पृशन्त्यशनतृड् भयशोकमोहाः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रतिक्रियायामपि दुःखरूपत्वादिति सदृष्टान्तमाह । यथेति ॥ ३३ ॥

दुःखस्य मूलभूतानि कर्माणि प्रतिक्रियादिकर्मभिर्नैव निवर्तन्त इत्याह । नैकान्ततोऽत्यन्तं सवासनं केवलं ज्ञानरहितमविद्योपसृतं प्राप्तमतो विरोधाभ्र निवर्त्यनिवर्तकत्वमिति भावः अत्र दृष्टान्तः॰ स्वप्ने दृष्टः स्वप्नः प्रबोधं विना यथा तं स्वप्नमनर्थं न प्रतिकरोतीत्यर्थः ॥ ३४ ॥

ननु तर्हि ज्ञानविलसितसंसृतिहेतोर्देहादेरप्यसत्त्वादिकतन्निवर्तनप्रयासेन तत्राह । अर्थेहीति । लिङ्गरूपेणोपाधिभूतेन ॥ ३५ ॥
तदेवं संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह । अथ तस्मात्पुरुषार्थभूतस्यैवात्मनो यतो ज्ञानान्मनसो वा अनर्थपरम्परारूपा संसृतिर्भवति तस्य व्यवच्छेदो गुरुरूपे वासुदेवे भक्त्यैव ॥ ३६ ॥

ननु संसृतिनिवृत्तिर्वैराग्यपूर्वकाज्ज्ञानादेव नतु भक्त्या "तरति शोकमात्मवित्" इत्यादिश्रुतेस्तत्राह । वासुदेव इति । सध्रीचीनेन समीचीनेन प्रकारेण ॥ ३७ ॥

नन्वसौ महाफलो भक्तियोगः कथं स्यादत आह । सोऽच्युतस्य कथामाश्रित्य वर्तमानो ऽचिरात्स्यात् कस्य [illegible] । शृण्वतोऽधीयानस्य च ॥ ३८ ॥
[illegible] इत्यत्राह । यत्रेति । भगवतो गुणानुकथने श्रवणे च [illegible] चेतो येषां ते ॥ ३९ ॥
ननु [illegible] सङ्गं विना स्वयमेव हरिकथाश्रवणादिना भक्तिर्भवेदित्याशङ्क्याह । द्वाभ्याम । तस्मिन् स्थाने महद्भिर्मुखरिताः कीर्तिताः मधुभिच्चरित्रमेव पीयूषं तदेव शिष्यत इति शेषो यासु असारांशरहितशुद्धामृतवाहिन्य इत्यर्थः अवितृषोऽलम्बुद्धिशून्याः सन्तो गाढैः सावधानैः कर्णैर्ये ताः सरितः पिबन्ति सेवन्ते अशनशब्देन क्षुल्लक्ष्यते अशनादयस्तान्न स्पृशन्ति भक्तिरसिकान्न बाधन्त इत्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवंविधेषु जन्मसुखलाभो दुर्लभ इति सदृष्टान्तमाह । यथेति द्वाभ्यां यथा क्षुधा परिद्यूनः व्याप्तः अत एव दीनः सारमेयः श्वा प्रतिगृहमटन्यादृष्टं यत् स्वकर्मायत्तं दण्डेन ताडनं चोदनं वा विन्दति प्राप्नोति ॥ ३१ ॥

एवं जीवोऽपि कामव्याप्तः आशयो यस्य उच्चावचपथा उत्कृष्टापकृष्टमार्गेण उपर्यूर्ध्वं लोकेषु अधः मध्ये अधो लोकेषु भ्रमन् नरकेषु मध्येऽहलोकेषु "ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः । जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः" इत्युक्तरीत्या भ्रमन् दिष्टं दैवागतम् प्रियमप्रियं वा याति प्राप्नोति ॥ ३२ ॥
ननु तर्हि सुखस्य सम्भवात् दुःखस्य प्रतीकाररूपकर्मान्तरसम्भवान्नैकान्ततो हेयत्वं तत्राह । दुःखेष्विति । दैवभूतात्महेतुभ्य आधिदैविकाधिभौतिकाध्यात्मिकतापरूपेषु त्रिविधेषु दुःखेष्वन्यतरस्य यदि प्रतिक्रियास्यात्तथाप्यन्यतरेण न व्यवच्छेदः आत्यन्तिकः भगवदुपासनमन्तरेण न तापत्रयविनाशनसमर्था प्रतिक्रियास्तीति भावः ॥ ३३ ॥

[illegible] राघवाचार्यकृतभागवतचन्द्रचन्द्रिका [illegible]।

[illegible] दुःखरूपेति दृष्टान्तमाह। यथाहीति। यथा [illegible] शिरसा उद्वहन् शिरसो विश्रान्तये तद्भारं [illegible] उद्वहति तथा सर्वाः प्रतिक्रिया दुःखरूपा [illegible] अकालपविश्रान्तिकरास्ता अपि दुःखरूपा इत्यर्थः [illegible] प्रतीकारोऽपि कर्मात्मक एव दुःखहेतुरपि कर्मैव [illegible] अज्ञानमूलत्वेन दुःखहेतौ कर्मणि कर्मान्तरेण प्रतिकृतेऽपि [illegible] निवर्तते ततश्च पुनरपि दुःखनिमित्तकर्मोदयाद्वैकान्ततः [illegible] प्रतीकारः संभवतीत्याह। केवलं ज्ञानविधुरं [illegible] कर्मणां दुःखहेतूनामैकान्ततः निःशेषतः प्रतीकारो न भवति द्वयं निवर्त्यं निवर्तकं चेत्युभयविधं कर्म हि यस्मादविद्योपसृष्टं देहात्मभ्रान्तिरूपाहंकारममकारात्मकाज्ञानेन उपसृष्टं गर्भितं तन्मूलमित्यर्थः तत्र दृष्टान्तः स्वप्ने स्वप्न इवेति स्वशिरश्छेदादिविषये स्वप्ने जागरणेन निवृत्तेऽप्यज्ञानस्य मूलस्यानिवृत्तेः पुनः स्वप्नो भवति तद्वत्स्वप्ननिवर्तकं स्वप्नान्तरमिवेति वा ज्ञानहीनस्य कर्मणि प्रतिकृतेऽपि नाविद्यानिवृत्तिरित्यर्थः ॥ ३४ ॥

नन्वहंममाभिमानरूपाज्ञानमेव कर्मद्वारा दुःखहेतुरित्युक्तं तदज्ञानमेव प्रतिक्रियतां तत्राह। अर्थे इति। अर्थे आत्मन्यविद्यमानेऽपि देवत्वमनुष्यत्वाद्याकाराभावेऽपि देहात्मभ्रान्तिमूला दुःखरूपा संसृतिर्न निवर्तते कुत इत्यत्राह। मनसेति। लिङ्गरूपेण हन्तुर्देहात्माभिमानहेतुभूतमनःसद्भावादित्यर्थः मनसो भ्रान्तिजननद्वारा दुःखादिहेतुत्वे दृष्टान्तमाह। स्वप्न इति। यथा स्वप्ने विचरतः संकल्पादिकं कुर्वतो मनसो हेतोर्देशान्तरगमनराज्याभिषेकस्वशिरश्छेदादिनिमित्तसुखदुःखादिकं भवति तथेत्यर्थः ॥ ३५ ॥

अतः पुरुषार्थभूतस्यात्मनो देहात्मभ्रान्त्यहंकारममकारतन्मूलोपाधिकानेकाद्यनर्थरूपसंसारहेतुत्वान्मनस्तदेव वशीकर्तव्यं वशीकरणोपायश्च भगवद्भक्तिरेवेत्याह। अथेति। अथातः पुरुषार्थभूतस्यात्मनः अनर्थपरंपरा दुःखपरम्परारूपा संसृतिर्यतो मनसो भवति तद्व्यवच्छेदः तस्य मनसो व्यवच्छेदः परमभक्तियोगोऽपि मनिर्निमित्तमुदेति दुःखनिमित्तदेहात्मभ्रान्त्याद्यजनकस्वरूपो व्यवच्छेदः मुक्तिरिति यावत् गुरौ भगवति परमया भक्त्या भवति ॥ ३६ ॥

कथं तद्व्यवच्छेदहेतुरसंबन्धस्तत्राह। वासुदेव इति। सध्रीचीनेन समीचीनेन प्रकारेण वासुदेवे भगवति समाहितो निहितः कृत इति यावत् भक्तियोगः परमभक्तियोगः वैराग्यं विषयेष्वनासक्तिं ज्ञानं परं ज्ञानं च जनयिष्यति परभक्त्यादिप्रज्ञाख्या सुखदुःखादिनिवर्तकः परमभक्तियोग उदेष्यतीत्यर्थः ॥ ३७ ॥

परभक्तियोगोऽपि कुतः स्यात्तत्राह स इति। अच्युतकथाश्रयः अच्युतस्य कथैवाश्रयो यस्य सः परभक्तियोगः अचिरादेव स्यात् हे राजर्षे! भगवत्कथाश्रवणात्परभक्तियोग उदेष्यतीत्यर्थः। अच्युत कथाश्रयः परभक्तियोगः कथंभूतः स्यादित्याह। नित्यदा अच्युतकथाः शृण्वतः [illegible] कथाश्रवणविधायिनिष्ठायुक्तस्य नित्यमधीयतः कथा अधीयानस्य ॥ ३८ ॥

कुत्र शृण्वतस्तत्राह। यत्रेति। हे राजन् साधवः विमलान्तःकरणाः भगवतो गुणानुकथने श्रवणे च [illegible] सत्वरं चेतो येषां ते यत्र वसन्ति तत्रेत्यर्थः ॥ ३९ ॥

[illegible] श्रवणं च कानि दुःखानि नश्यन्ति तत्राह। तस्मिन्निति। तस्मिन् देशे सन्निर्मुखरिताः मधुभिदो [illegible] पीयूष तदेव शेषः शिष्यत इति शेषः [illegible] सारांशो यासु ताः सरितो नदीरूपा अच्युतकथाः परितः स्रवन्ति प्रवर्तन्ते भागवतप्रमुखरेभ्यो मुखम्-[illegible] भावः ताः सरिद्रूपाः भगवत्कथा ये जना अवितृप्त अवतृप्तिमन्तः सन्तो गाढैः रसास्वादैः कर्णैः पिबन्ति शृण्वन्ति तानशनादयः न स्पृशन्ति न बाधन्ते ॥४०॥

श्रीवल्लिजयध्वजतीर्थकृतपदरत्नावली।

कामे विषये आशयो यस्य स तथा ॥ ३१ ॥

एवं भ्रमतः सुखं कापि न स्यादिति तत्राह। दुःखेष्विति। दैवादिकेषु दुःखेषु मध्ये एकतरेण दुःखेनापि जीवस्य व्यवच्छेदो वियोगो नास्तीत्यन्वयः प्रतिक्रियया सुखं स्यादत्राह। स्कन्धेदिति। तस्य तस्य दुःखस्य प्रतिक्रिया परिहारः सोऽपि दुःखमेव ॥ ३२ ॥

स्कन्धस्य यथा भवति तथा सर्वाः प्रतिक्रिया दुःखरूपा इत्यन्वयः ॥ ३३ ॥

अग्निष्टोमादिकर्मणा [illegible] निवृत्तौ (१) प्रबोधकाभावात्सर्वदुःखव्यवच्छेदो घटत इति चेत्तत्राह। नैकान्तत इति। केवलं श्रीनारायणार्पणबुद्धिरहितं कर्म कर्मणामैकान्ततो [illegible] प्रतीकारो न भवति कुत इति तत्राह। द्वयमिति। निवार्यं निवर्तकं चेति कर्मद्वयमविद्योपसृतमीश्वराज्ञाननुविद्धं हि यस्मात्तस्मादिति शेषः तत्र दृष्टान्तः स्वप्ने वर्तमानः स्वप्नो यथा तस्य निवर्तको न भवति किन्तु"अतः प्रबोधोऽस्मात्"इति तत्र प्रबोधादीश्वर एव स्वप्नसंसृत्योः (२] कियानेव विशेष इति ॥ ३४ ॥

स्वप्नवच्चरेः संसारो निवर्ततामिति तत्राह। अर्थे इति। हरेरपरोक्षज्ञानलक्षणपदार्थे अविद्यमाने संसृतिर्न निवर्तते कथमिव [illegible] वासनानां गमकेनोद्बोधकेन मनसा स्वप्ने विचरतो विषयान् भुञ्जानस्य पुंसः संसारो यथा न निवर्तते निद्राया अनिवृत्तत्वात् तथात्र ननु स्वप्नसंसारयोः कथं साम्यं स्वप्नदृष्टानां [illegible] महत्त्वात्संसारदृष्टानां किञ्चित्स्थायित्वदर्शनादित्यत्रापीदमेवोत्तरमित्यभिप्रायेणोक्तमर्थे इति अयं भावः यथार्थज्ञानाभावानुभयोः साम्यं ननु स्थायित्वास्थायित्वात् न हि दृष्टान्तदार्ष्टान्तिकयोः सर्वसाम्यं कापि दृष्टं "संसृतेः स्वप्नसाम्यं तु यथार्थज्ञानवर्जनम्,,इति वचनात्" जाग्रत्यविद्यमानं तु देहात्मत्वं तु केवलमविद्यमानं स्वप्ने तु जाग्रत्स्वज्ञानमेव च"इति वचनात् उभयत्र यथार्थज्ञानाभावोऽपि ज्ञायते संसारे लब्धजन्मा यदि भगवज्ज्ञाने [illegible] दृष्टेऽयं संसारो निष्प्रयोजनः स्यादित्यतो अर्थे [illegible] पीति न तु मिथ्यात्वादितीममर्थं हि शब्देन सूचयति ॥ ३५ ॥

एवं [illegible] ज्ञानोत्पत्तौ किं मुख्यसाधनमत्राह। अथेति। यस्मात्केवलकर्मणो दुःखहेतुः संसारः सति भगवज्ज्ञाने च निवर्तते अथ तस्मात्संसारनिवृत्त्यर्थेऽर्थभूतस्य पुरुषार्थेभ्यस्यात्मनो [illegible] यतो यस्य हरेरज्ञानादनर्थपरम्परा [illegible] संसृतिर्या तद्व्यवच्छेदस्तस्य संसारस्य निवृत्तिर्यथा हरिभक्त्या स्यादिति अतस्तस्मात्तस्य हरेः [illegible] कुर्यादित्यन्वयः ॥ ३६ ॥

---

[१] निवृत्तौ सत्यां दुःखोद्बोधकनिमित्ताभावादित्यर्थः। [२] नर्कोऽपि विशेषइत्यर्थः।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानद्वारा भक्तेः संसारोच्छेदकत्वमिति भावेनाह । वासुदेव इति । सध्रीचीनेन प्राणायामादिकाहुना निर्गुणब्रह्मकेवलान्तःकरणेन समाहितः सम्यक् स्थापितः सध्रीचीनेन निष्कामेन पुरुषेणेति वा यद्यपि भक्तः पूर्वभाविवैराग्यं तथापि पश्चात् दृढं कृतवती-त्यतो वैराग्यं जनयिष्यतीति ज्ञानं त्रिविधम् ॥ ३७ ॥

भक्तियोगस्य साधनमाह । सोऽचिरादिति । अच्युतकथा आश्रयो यस्य स तथा अनेन हरिकथाभक्तियोगस्य साधनमच्युतकथाधि-कारप्रकारमाह । शृण्वत ; इति । अद्वादिगुणसम्पत्तिरधिकारल-क्षणम् ॥ ३८ ॥

कुत्रयं सम्भूयत इति तत्राह । यत्रेति । मध्यप्रचेतसस्तदेक-चित्ताः ॥ ३९ ॥

तस्मिन् सतां समाजे महद्भिर्मुखरिताः शब्दात्मना निर्गमिता यास्ताः सरितस्ताम् पुरुषान् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

भगवद्गुणानामनुकथने अनुभवेन च व्यग्रं विवशं चेतो येषां ते तत्र तत्कथा तत्र अयत्नसापेक्षा न च साधनान्तरस्य व्यपेक्षा न च परिच्छिन्नेत्याह । तस्मिन्निति महान्तो मुखरिता आभिरिति आहिताग्न्यादित्वान्निष्ठायाः परनिपातः ॥ ३१—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु निर्बुद्धिः श्वा दण्डप्रहारं प्राप्नोति बुद्धिमांस्तु दुःखस्य कारणमेव न करोति दैवात् प्राप्तौ रोगादिदुःखस्य प्रतिकारञ्च करोतीति तत्राह । दुःखेषु त्रिविधेषु मध्ये एकतरेणापि न व्यवच्छेदो न विरहः तत्तद्दुःखस्य प्रतिक्रियापि स्यात्तेनत्वपि न प्रतिक्रियायामपि दुःखरूपत्वादिति भावः ॥ ३२ ॥

तत्र दृष्टान्तः यथाहीति ॥ ३३ ॥

ननु यस्माद्दुःखस्य कारणं दुष्कृतकर्म्मैव तस्मात् सर्व्वदु-ष्कृतक्षयकामनया कर्म्मभिर्महृदाति यागकर्म्मणि कृते सर्व्वदुः-खनाशः स्यादेवेति तत्राह । नैकान्तत इति । इयं दुष्कृतं कर्म्म दु-ष्कृतनिवर्त्तकञ्च कर्म्मेति द्वितयमविद्यामुपस्तृतमाश्रितं तद्द्वयस्य तमोरजोगुणजन्यत्वादिति भावः । तद्यथा रजसि सत्त्वांशेन तमसो निवर्त्तकेऽपि तमोंऽशस्तिष्ठति तथा सर्व्वदुष्कृतनिवर्त्तकेऽपि यागकर्म्मणि पशुहिंसालक्षणं दुष्कृतं तिष्ठत्येवेत्यत्र दृष्टान्तः । स्वप्ने दुःखी सुत इति । दुःखप्राप्तिस्तत्स्वप्नमध्य एव पुनः स्वप्ने पुत्रो जीवतीति तद्दुःखोपशमः किञ्च तदैव तं पुत्रं सर्पो दशतीति पुनर्दुःखप्राप्तिरिति प्रबोधं विना यथा स्वाप्निकं दुःखं न निवर्त्तते तथा संसारनिवृत्तिं विना सांसारिकं दुःखं न निवर्त्तत इत्युक्तम् ३४

ननु सुखदुःखादेर्देहधर्म्मत्वाद्वस्तुतस्तत्सङ्गस्य जीवात्मनो दुःखादिकं नैव विद्यत इत्यविद्यमानस्य दुःखस्य किं निवर्त्त-नप्रयासेनेत्यत आह । अर्थे दुःखादौ जीवात्मनोऽवस्तुभूतेऽपि तन्निवर्त्तनं विना संसृतिर्न निवर्त्तते यथा स्वप्ने लिङ्गरूपेणा-पाधिभूतेन मनसा सह विचरतो जीवस्यासत्त्वमपि सर्पादिकं वस्तु दुःखदमेव प्रबोधं विना ॥ ३५ ॥

तर्हि संसारनिवृत्तिरेव कथं भवेत्तत्राह । अथेति । मायिकक-स्मरणाद्ये आत्मनो जीवस्य परमार्थभूतस्य यत एवाविद्यातो-ऽनर्थपरम्परा संसृतिस्तस्या विच्छेदो गुरौ भक्त्येति गुरुर्न स्यादित्यादिना हरिभक्त्युपदेशकस्यैव गुरुत्वविधानाद्गुरौ हरौ च भक्त्याभावानं तस्याः पुरुजनत्वापरत्वमिदं भवतु गुरौ हरौ च भक्त्या निखातो विख्यातः ॥ ३६ ॥

साधनभक्त्या प्रेमभक्त्येत्या भक्तिर्भवतीत्याह वासुदेव इति द्वाभ्याम् । भक्तियोगः प्रेमा भगवत्येव सम्यगाहित इति अत्रानन्त-रस्सुखे तात्पर्यं ननु स्वसुखे सध्रीचीनेन समीचीनेन प्रका-रेण [illegible] वैराग्यञ्च तद्विति सायुज्यप्रयोजनकयोर्ज्ञानवैराग्य-योर्व्यावृत्तिः । यदुक्तम् । "वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम्„इति तत्राप्यहैतुकपदं [illegible] न्यासेन अत एव ज्ञानवैराग्ययोर्भक्त्युत्थत्वात्तदर्थं भक्तेर्न पृथक् प्रयतनीयत्वमिति द्योतितम् ॥ ३७ ॥

अस्य भक्तियोगस्य साधनमपि भक्तियोग एवेत्याह । सोऽचि-रादिति । अच्युतकथामाश्रयत इति । तत्रान्य इत्यर्थः कस्य स्यात्त-त्राह । शृण्वत इति । अधीयतः भगवद्धर्म्मानधीयानस्य श्रवणा-दिभक्तिप्रचारमकमार्गं शेषम् ॥ ३८ ॥

कुत्र स्यात्तत्राह । यत्रेति । यथैव गृहासक्ता गृहकर्म्मव्यग्रास्तथैव हन्तायमनुकथनस्य समयः हा हा अवणस्य समयो व्यतीतः सम्प्रति कीर्त्तनस्य समयोऽप्येति हा हन्त मन्दभाग्योऽहं निद्रा-लस्यदुर्दैवकृत्यगमितसमयः शीघ्रगतिरेव भक्तसमाजं केन प्रकारेण गच्छामीत्येवं व्यग्रं चेतो येषां ते ॥ ३९ ॥

यत्र भागवतास्तत्रैव भगवत्कथा इति कोऽयं नियम इति चेत्तत्राह । तस्मिन् महत्सदसि मुखं रान्ति गृह्णन्तीति मुखराः महद्भिर्मुखराः कृता इति मुखरिताः स्वयमेव मुखप्राप्तीकृताः या महतां मुखे सदा तिष्ठन्तीत्यर्थः ता एव कास्तत्राह । मधु-भिदश्चरित्रपीयूषाणां ये शेषाः महद्भिरास्वाद्यास्वाद्य महाप्रसा-दीकृतास्त एव सरितो महानद्यः परितश्चतुर्दिक्षु प्रतिमहान्त एव स्रवन्ति ता ये पिबन्तीति तासां स्वादाधिक्यं तेषाञ्च तृष्णाधिक्यं सूचितम् । ता इति । तासामेकमपि कणं परित्यक्तुं न शक्नुवन्तीत्यनुरागी व्यञ्जितः अवितृषः अत एव क्षुत्तृष्णा-र्त्तादिभिः दृढत्वेन भवसम्भावनाशून्यैः अशनतृट्कुमार्ग्य मुखे इति भोजनाकाङ्क्षा भयादयश्च न स्पृशन्तीति भक्तैरेव कृपया परस्परं प्रोजितत्वात् प्राकिञ्चन्येनैवभयाभावात् ते न स्मरन्त्यतितरां प्रिय-मित्रानुरक्ता विस्मृतममतास्पदत्वेनैव शोकमोहाद्य भावादिति ४०

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कामा विषयभोगसङ्कल्पा आशये अन्तः करणे यस्य सः दिष्टं कर्मानुसृतं प्रियाप्रियं सुखं दुःखं वा याति प्राप्नोति ॥ ३१ ॥

"अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्„इति श्रुतेर्दुःखस्य स्वकृतकर्मफलस्य प्रतिक्रिया नास्ति "पुण्येन पापमपनुदति" इति श्रुतेः स्यात्तेन तत्प्रतिक्रिया तथापि त्रिविधेषु दुःखेषु मध्ये एकतरे-णापि दुःखेन व्यवच्छेदो वियोगो न घटेत प्रतिक्रियाया अपि दुःखरूपत्वात् ॥ ३२ ॥

दुःखनिवारणाय पुण्यकर्माचरणरूपा प्रतिक्रियापि दुःखरूपै-वेतीत्युक्तं तत्र दृष्टान्तमाह । यथाहीति ॥ ३३ ॥

अथ पुण्यकर्माचरणात्मिका दुःखरूपापि प्रतिक्रिया यदि निःशेषं दुःखमूलं कर्म हन्यात्तदानुष्ठेया भवेत्सा तु न तथा विधे-त्याह । नैकान्तत इति । केवलं ज्ञानहीनं कर्म कर्मणां दुःखमूलानाम् एकान्ततो निःशेषतः प्रतिकारो नास्ति तेषां वासनात्मकं मूलं नोत्पाटयति यतो द्वयं निवर्त्यं निवर्तकं च अविद्योपसृतमनात्मनि देहे आत्मत्वाभिमानरूपेणाज्ञानेन उपसृष्टम् अतो ऽज्ञानमूलत्वेन तयो-

एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः ।
न करोति हरेर्नूनं कथामृतनिधौ रतिम् ॥ ४१ ॥
प्रजापतिपतिः साक्षाद्भगवान् गिरिशो मनुः
दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः ॥ ४२ ॥
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
भृगुर्वसिष्ठ इत्येते मदन्ता ब्रह्मवादिनः ॥ ४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नात्यन्ततो बाध्यबाधकसम्बन्धः अत्र दृष्टान्तमाह । स्वप्ने स्वप्न इव मृगं मां व्याघ्रोहन्तु मायातीत्येवम्विधे स्वप्ने निवारयामि मृगहननार्हो व्याघ्रोऽहमिति स्वप्नान्तरः निःशेषतो निवर्तको भवति उभयस्वप्नमूलभूतस्याज्ञानस्यानिवृत्तत्वात् प्रबोधस्यो-भयस्वप्ननिवर्तकस्याभावात् ॥ ३४ ॥

ननु पुरञ्जनोपाख्यानेनानेन देहादिविलक्षणतया वर्णितस्य भगवदात्मकस्य ज्ञानस्वरूपस्य वस्तुतो देहरूपत्वाभावात् पूर्वोक्ता संसृतिः स्वत एव निवृत्ता भगवद्भजनादिसाधनस्य नास्त्यपेक्षे-त्यत्राह । अर्थे इत्यादि । अर्थे देहात्माभिमानरूपे अविद्यमानेऽपि उक्तात्मज्ञानेन बाधितेऽपि नानावासनामूलेन मनसा लिङ्गेन संसृ-तिहेतुना विचरतः पुंसः संसृतिकर्मानुष्ठानपूर्वकपुरञ्जन्यादिजन्म-मरणप्रवाहो न निवर्तते इत्यन्वयः ॥ ३५ ॥

अथ अतो हेतोर्यतो येन मनसा अर्थभूतस्य भगवदात्मकत्वेन पुरुषार्थस्वरूपस्य अनर्थपरम्परा अनर्थस्य देहात्मभ्रमस्य परम्परा अनुवृत्तिर्यस्यां तथाभूता संसृतिर्वर्तते तस्य मनसः व्यवच्छेदो परमया तपो व्रतकर्मात्मज्ञानेभ्यः श्रेष्ठया गुरौ भगवति भक्त्या भवति ॥ ३६ ॥

सध्रीचीनेन आत्मज्ञानवता समीचीनेन पुरुषेण वासुदेवे समाहितः सम्यगर्पितो भक्तियोगः ज्ञानं भजनीयस्वरूपगुणान-न्दादिनिरतिशयत्वविषयकम् तदनन्तरं वैराग्यं भजनीयेतरसा-तिशयपदार्थेभ्यो विरक्तिं जनयति चकारात्तदनन्तरं प्रेमविशेष-लक्षणो भक्तियोगश्च वैराग्यविजृम्भितो भवति ततः कृतार्थो भवतीत्यर्थः ॥ ३७ ॥

ननु यतो वासुदेवज्ञानमन्यत्र वैराग्यं च भवति स भक्ति-योगः कीदृशस्य पुरुषस्य स्यात्किमात्मकश्चेत्यत्राह । श्रद्दधानस्य जनस्य अत एव निरयदा शृण्वतः नित्यदा अधीयतः अच्यु-तकथा इति शेषः अचिरादेव स्यात् अत एव अच्युतकथाश्रयः स्यात् अच्युतकथैवाश्रयो यस्य सः अच्युतकथाश्रवणकीर्तना-द्यात्मक इत्यर्थः ॥ ३८ ॥

ननु स कुत्र स्यादित्यत्राह । यत्रेति ॥ ३९ ॥

भागवतसमाजे हरिकथामृतपानं मतं क्षुत्तृडादयोऽपि नाभिभ-वन्तीत्यन्वयव्यतिरेकाभ्यामाह । तस्मिन्निति श्लोकद्वयेन । तस्मिन् भागवतसमाजे महद्भिर्मुखरिताः वर्णिताः मधुभिच्चरित्रमेव पीयूषं तदेव स्रिष्यते इति शेषः असत्कथाकलिविनाशिनीषु वासु वा अवितृषः अविगततृषः तास्वतिलुब्धाः ॥ ४० ॥ ४१ ॥

भाषाटीका ।

तिसी प्रकार अन्तःकरण मे कामना रखने वाला पुरुष ऊंचे नीचे मार्ग में घूमता हुआ स्वर्ग में अथवा नरक में सुख दुःख कर्म फलको प्राप्त होता है ॥ ३१ ॥

दैहिक दैविक भौतिक तीनों प्रकार के दुःखों में से जीव नहीं छूटता है यदि छूटने का उपाय भी हो तो एक के छूट-ने से दूसरा हो जाता है ॥ ३२ ॥

जैसे कोई मनुष्य मस्तक के भार को ढोने में भारी मान-कर कांधेपर लेलेवे तो अधिक सुख नहीं [illegible]से ही सब दुःखों के निवृत्ति के उपाय भी हैं ॥ ३३ ॥

केवल कर्म ही कर्मों का निवर्तक नहीं हो सकता है क्योंकि दोनों ही अज्ञान के अभिमान से किये जाते हैं जैसे कि स्वप्न का भय जगने बिना नष्ट नहीं होता है हे अनघ ! राजन् ! ॥ ३४ ॥

यथार्थ नहीं है तो भी संसार निवृत्त नहीं होता है जैसे मनके द्वारा लिङ्ग शरीर से स्वप्न में विचरने वाले जीव को सुखादिक होते हैं ॥ ३५ ॥

यथार्थ रूप जो आत्मा तिसका अनर्थ की परम्परा सोई संसार है उसका नाश होना परमगुरु भगवान् की भक्तीसेहै॥३६॥

वासुदेव भगवान् के विषे सावधानतासे किया जो भक्तियोग सो अच्छे प्रकार से वैराग्य और ज्ञान को उत्पन्न करेगा ॥ ३७ ॥

हे राजर्षि अच्युत कथा का आश्रय लेने वाला वह भक्ति-योग नित्य प्रति सुनने वाले कूं तथा पढने वाले कूं शीघ्र ही होता है ॥ ३८ ॥

हे राजन् ! जहांपर निर्मल अन्तःकरण वाले भगवान् के गुणानुवाद के कथन श्रवण में व्यग्रचित्त वाले भागवत [illegible] हैं ॥ ३९ ॥

तहांपर महत् पुरुषों के मुख से गिरी हुई भगवान् के चरित्र-रूपी शुद्ध अमृत की नदी बहती है तिनको जो लोग नहीं तृप्त-होकर पीते हैं हे नृप ! सावधान कर्णों से सुनने से उनको भूख प्यास भय शोक मोह नहीं बाधा करते हैं ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्सङ्गमन्तरेण स्वयमेव कथाविन्तनादावालस्यादिना रसा-वेशाभावाच्च क्षुत्पिपासाद्यभिभूतस्य भक्तिर्न सम्भवतीत्याह । एते-रिति ॥ ४१ ॥

भगवद्गुणमहिमन्तरेण तु न कस्यापि ज्ञानसम्भव इति कैमु-त्यन्यायेनाह चतुर्भिः । प्रजापतिपतिरित्यादि ॥ ४२ ॥

अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः ।
पश्यन्तोऽपि न पश्यन्ति पश्यन्तं परमेश्वरम् ॥ ४४ ॥
शब्दब्रह्मणि दुष्पारे चरन्त उरुविस्तरे ।
मन्त्रलिङ्गैर्व्यवच्छिन्नं भजन्तो न विदुः परम् ॥ ४५ ॥
यदा यमनुगृह्णाति भगवानात्मभावितः ।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥ ४६ ॥
तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु ।
मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ॥ ४७ ॥
स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः ।
आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥ ४८ ॥
आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमण्डलम् ।
स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परम् ।
तत्कर्म हरितोषं यत् सा विद्या तन्मतिर्यया ॥ ४९ ॥
हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः ।
तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मदन्ताः अहं नारदोऽन्ते येषाम् ॥ ४३ ॥

वाचां पतयोऽपि तपोविद्यासमाधिभिरुपायैः पश्यन्तो विचिन्वन्तोऽपि पश्यन्तं सर्वसाक्षिणं न पश्यन्ति ॥ ४४ ॥

कुत इत्यत आह । शब्दब्रह्मणि वेदे उरुर्विस्तारो यस्य अर्थतोऽपि पारशून्ये तस्मिन् वर्तमानाः मन्त्राणां लिङ्गैर्वज्रहस्तत्वादिगुणयुक्तविविधदेवताभिधानसामर्थ्यैः परिच्छिन्नमेवेन्द्रादिरूपं तत्तत्कर्माग्रहेण भजन्तः परं परमेश्वरं न विदुः ॥ ४५ ॥

तर्ह्यन्यः कोनाम कर्माग्रहं हित्वा परमेश्वरमेव भजेदित्यत आह । यदा यमनुगृह्णाति अनुग्रहे हेतुः आत्मनि भावितः सन् स तदा लोके लोकव्यवहारे वेदे च कर्ममार्गे परिनिष्ठितां मतिं त्यजति ॥ ४६ ॥

अर्थकाशिषु परमार्थत्वेन प्रकाशमानेषु पुरुषार्थबुद्धिं मा [illegible]: प्ररोचनार्थं केवलं श्रोत्रप्रियेषु न स्पृष्टं वस्तु यैः ॥ ४७ ॥

ननु वेदेन स्वर्गादिसाधनत्वेनोक्तानि कर्माणीति वेदवादिनो वदन्ति कथमस्पृष्टवस्तुष्वित्युच्यते तत्राह । ये धूम्रधियो मलिनबुद्धयः सकर्मकं कर्मपरं वेदमाहुस्ते अतद्विदोऽवेदज्ञाः यतस्ते स्वं स्वरूपभूतं लोकमात्मतत्त्वं वेदतात्पर्यगोचरं न विदुः यत्र देवोऽस्ति ॥ ४८ ॥

त्वं तु महामूर्ख इत्याह । आस्तीर्येति । बृहद्वधाद्बहुपशुवधात् मानी यज्वाहमित्यहङ्कारी अतस्तब्धोऽविनीतः सन् कर्म नावैषि परं विद्यास्वरूपं तच्च न वेत्सि नारदः स्वयं कृपया तद्द्वयं निरूपयति । हरिं तोषयतीति हरितोषं यत्तदेव कर्म यया तस्मिन् हरौ मतिर्भवति सैव विद्या महाफलत्वात् ॥ ४९ ॥

कुत इत्यपेक्षायां हरेः परमफलत्वं दर्शयन्नाह । द्वाभ्याम् । हरिर्देहभृतामात्मा ईश्वरश्च तत्र हेतुः स्वयं स्वातन्त्र्येण प्रकृतिः कारणमतस्तेषां तत्पादमूलमेव शरणमाश्रयः यतो यस्मिन् ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भगवत्कथाश्रवणविरोधिनः अशमादय एवेत्याह । यत्तैरिति । स्वभावजैर्देहस्वभावप्रयुक्तैरेतैरशनादिभिर्नित्यमुपद्रुतो जीवलोकः हरेः कथामृतसमुद्रे रतिं न करोति नूनं निश्चयः भगवत्कथाश्रवणाभिमुख्यविरोधिनोऽशनादीन् शनैः सात्त्विकदेशस्थभागवतसंसर्गातलब्धभगवद्गुणश्रवणेन निरस्येदित्यर्थः ॥ ४१ ॥

एवं प्रथमं भागवतसङ्गः ततो भगवद्गुणानुश्रवणं ततो भगवदुपासनं ततो विरागस्ततो भगवत्साक्षात्काररूपं परज्ञानं ततो भगवदनुभवजन्यप्रीत्युत्कर्षरूपा परभक्तिः ततो मुक्तिरिति प्रणाडी कथिता इदानीं प्राप्यस्य परमात्मनो वाङ्मनसापरिच्छेद्यस्वरूपस्वभावस्य प्राप्त्युपयुक्तभक्तियोगानुष्ठानकारणं तदनुग्रहमन्तरेण नान्योऽस्तीत्याह । प्रजापतिपतिरित्यादिना । प्रजापतिश्चतुर्मुखः गिरिशो रुद्रः मनुः स्वायंभुवः प्रजाध्यक्षा दक्षादयः आदिशब्देन कश्यपादयो ग्राह्याः तथा नैष्ठिकब्रह्मचारिणः सनकादयः ॥ ४२ ॥

मरीच्यादयो मत्पर्यन्ता नारदपर्यन्ताः सर्वे ब्रह्मवादिनः ॥ ४३ ॥

तथा च वाचस्पतयः बृहस्पतिव्यासादयोऽद्यापि तपोविद्याद्युपायैः पश्यन्तोऽपि उपासीना अपि सर्वज्ञं परमेश्वरं इयत्तया न पश्यन्ति वाङ्मनसापरिच्छेद्यस्वरूपस्वभावत्वादिति भावः ॥ ४४ ॥

एत एव न जानन्ति किमु कर्मजडाः मादृशा न जानन्तीत्याह ।

[illegible]ाथवा वाक्यकृतभागवततत्त्वार्थदीपिका।

[illegible] उरुविस्तरे "ऽनन्ता वेदा इति" श्रुतविस्तरे पुष्पारे [illegible]र्थे शब्दब्रह्मणि शब्दात्मके ब्रह्मणि वेदे चरन्तः [illegible]पुत्रवृष्ट्यन्नस्वर्गाद्यैहिकामुष्मिकफलभिप्सवः मन्त्रलिङ्गैः [illegible]ग्रहस्तत्वाविगुणलिङ्गैर्व्यवच्छिन्नं युक्तमिन्द्रादिदेवतावर्गं [illegible] सर्माहितसाधनतया यजन्तः परम्परमात्मानं न विदुरपरि[illegible]स्वरूपत्वमावस्यैयस्तया वेद्यत्वमसंभवि अपरिच्छिन्नत्वेन [illegible]नेऽपि तदुपासनमेव कार्यं न केवलं कर्मेति भावः ॥ ४५ ॥

यद्वा भगवानात्मभावित आत्मना स्वेनैव भावितः यदीयानुमक्तिकप्रासङ्गिकयादृच्छिकाद्यन्यतमात्तसुकृतव्याजमात्रसन्तुष्टेन स्वेनैव भावितः स्वयोन्मुखः यमनुगृह्णाति स पुमाल्लोके देहयापनोपयुक्ते कर्मणि शिश्नोदरादिव्यापारे वेदे च वेदपूर्वभागमात्रोदिते च कर्मणि परिनिष्ठितां मतिं जहाति भगवतानुगृहीत एवमुक्त्युपायोपसंहाराय प्रभवतीत्यर्थः ॥ ४६ ॥

तस्माद्भगवदनुग्रहस्यैव कारणत्वाद्बर्हिष्मन्! भगवदनुग्रहानुसत्सङ्गस्त्वमर्थकाशिषु स्वर्गादिफलशोभिषु कर्मस्वज्ञानार्थदृष्टि पुरुषार्थसाधनमतिं मा कृथाः तत्र हेतुः श्रोत्रस्पर्शिषु प्रशेचनया केवलं श्रोत्रप्रियेषु न स्पृष्टं वस्तु निरतिशयपुरुषार्थरूपं यैस्तेष्वनित्याल्पफलेषु बहीयासेत्यर्थः ॥ ४७ ॥

ननु "अपाम सोममृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्" इत्यादिभिः कर्मसाध्यफलस्यापि नित्यत्वावगमात्कथमस्पृष्टवस्तुत्वमित्युक्तं तत्राह। धूम्राधियः। रजस्तमःप्रचुरबुद्धयः धूमवदावरकत्वात्तमसो धूम्रधिय इत्युक्ते यत्र पूर्वोत्तरभागात्मके वेदे जनार्दनो भगवान्कर्मभिराराध्यत्वेनोपास्यत्वेन च प्रतिपन्नः तं वेदं सकर्मकं कर्मणा सहितं केवलकर्मतात्पर्यकमाहुस्तेऽतद्विदः वेदतात्पर्यानभिज्ञा न ब्रह्म विदन्ति इत्यर्थः यतस्ते स्वरूपभूतं लोकमात्मतत्त्वमपि न विदुः केवलदेहात्मवादिनः अक्षय्यं ह वा इत्यादिवाक्यानि भगवदाराधनत्वेन कृतानि चातुर्मास्यादिकर्माणि भगवदुपासननिर्वर्तनद्वारा निःश्रेयसरूपानन्तत्वप्राप्तिप्रतिपादनपराणीत्येवं विधतात्पर्यमजानन्तः तानि वाक्यानि केवलस्वर्गादिसुखसाधनभूतकर्मपराणीति मन्वानाः केवलमज्ञा इत्यर्थः ॥ ४८ ॥

त्वमास्त्वमपि केवलकर्मज्ञो भूत्वा प्राग्भूर्द्भिः कृत्स्नां क्षितिमवहननीयं आस्तरणपूर्वकमिष्ट्वा बृहद्भावात्पशुहिंसया मानीमहायज्वाहमित्यभिमानवतः स्तब्धोऽविनीतः कर्म भगवदाराधनरूपं कर्म नावैषि न जानासि किं तत्कर्म यत्परं श्रेष्ठं परमपुरुषार्थभूतमोक्षसाधनभूतं निवृत्तिधर्मापरपर्यायम् ॥ ४९ ॥

मुक्तिसाधनं कर्म विद्यां च निर्दिशति। तदिति। हरितोषं भगवत्तोष कारणं यदेव कर्म प्रशस्तमितरत्तु निन्दितं यया विद्यया ज्ञानेन तन्मतिः हरिभक्तिः भवति सैव विद्या प्रशस्ता इतरा निन्दितेत्यर्थः तथाचोक्तं "तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये। आयासायापरं कर्म विद्यान्या शिल्पनैपुणम्" इति कासौ विद्या यया हरिमतिरिति जिज्ञासायां तत्वहितपुरुषार्थज्ञानमेवेत्याह। हरिरिति। भगवान्निरस्तनिखिलदोषः समस्तकल्याणगुणाकरः ईश्वरः स्वयं प्रकृतिर्जगदुपादानकारणं देहभृतामात्मान्तः प्रविश्य धारकः निरस्तनिखिलदोषत्वसमस्तकल्याणगुणाकरत्वस्वान्तरात्मत्ववि-

शिष्टरूपं चरणं भगवच्चरणं स्वतन्त्रत्वादिकं तस्य तत्त्वमित्यर्थः ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अज्ञानादिरूपर्थफलमाह। पतैरिति। पतैरज्ञानादिभिः स्वभावजैः सहजैर्हरिकथामृतनिधिपातिविघ्नफलैः ॥ ४१ ॥

अधुनाज्ञानाद्युपद्रवविधुरस्यापि साकल्येन श्रीहरिज्ञानं दुर्लभमित्याह। प्रजापतिरित्यादिना "प्रजापतिपतिर्ब्रह्मा विरिञ्चोऽपि कथ्यत" इति वचनात् प्रजापतिपतिर्ब्रह्मा ॥ ४२ ॥

अहमेवान्तो येषां ते मदन्ताः ॥ ४३ ॥

ब्रह्मवादित्वेऽपि वाक्पटुत्वाभावात्र पश्यन्तीत्यतो वाचस्पतय इति "यत्पश्यन्तोऽपि न पश्यन्ति तद्विष्णोः परमं पदम्,, इत्यन्वयः ॥ ४४ ॥

तत्साधनमानबाहुल्याभावात्तद्विषयज्ञानानुदयात्र पश्यन्ति चेदत्राह। शब्देति। निर्दोषः शब्द आगम इति निर्दोषशब्दगणो पुष्पारेऽनन्ते कुत इत्यत उक्तम्। उरुविस्तर इति। चरन्तो जिज्ञासया वर्तमाना अपि मन्त्रलिङ्गैर्वेदोक्तलक्षणैर्व्यवच्छिन्नमुक्तमात्रं नतु सम्यगुक्तमेवं विधं परं परमात्मानं भजन्त उपासमाना अपि तत्र विदुरित्यन्वयः। विभ्रडापि हिरण्मयं वरुणो वस्तनिर्णिजमित्यादिवेदो ब्रह्मण्यनुभवानारोहयितृत्वेन यदि अतोऽप्रसिद्धस्वरूपत्वेन सम्यक् न जानन्ति तस्य सेवायां न व्यर्था तत्प्रसादेनानुभवारोहोऽपि क्रमेण स्यादिति तदुक्तम्,, वेदोऽवदन्नपि हरिं न सम्यग्वक्ति कुत्रचित्। नारोहयत्यनुभवमप्रसिद्धस्वरूपतः। तथाप्यनुभवारोहः प्रसन्ने केशवे भवेत्,, किञ्चिदेव सम्यक् स्वयं चानुभवत्यमुमिति यद्वा मन्त्रार्थैर्लिङ्गैरुग्रोऽमर्त्यविषोक्तलक्षणं क्रोडीकृतं कृष्णरामादिलक्षणं परमं भजन्तोऽपि तत्प्रसादमन्तरेण परं व्याप्तं साकल्येन न विदुरिति शबलं भजन्तः परं शुद्धं न विदुरित्यर्थोऽनुपपन्नः परमार्थभेदाभावेनैकस्मिन् ज्ञातेऽन्यज्ञानस्य नान्तरीयकत्वात् "येनाश्रुतं श्रुतं भवति" इति श्रुतेश्च यथा रामस्मरणेन कृष्णस्वरूपज्ञानं जायतस्तयोरैक्यावादित्याद्युः ॥ ४५ ॥

नन्विदानीं मायया क्षिप्तमपि चेतनसमवेतं ज्ञानमरघवशात्क्वचिदिच्छाकालेऽनुसंधानलक्षणं किञ्चिद्विशेषमापादयेत् अतोऽनुसंधानाननुसंधाने युक्ते इति तत्राह। सर्वेषामिति। इह कर्मभुवि सर्वेषां जन्तूनां सन्ततं देहपोषणे प्रज्ञा बुद्धिः समायत्ता सन्तापास्ति नृणां तया प्रज्ञया को विशेषः स्वरूपानुसंधानलक्षणः संपादको न कोऽपीत्यन्वयः स्वात्मत्वे स्वदेहादीनां मिथ्यात्वेनार्थक्रियायामसामर्थ्याद्वेध न कस्य चिदैक्येन संधानमवश्यं भातीति ॥ ४६ ॥

जीवन्मुक्त्यवस्थायामपि जीवात्मस्वाहा नेहरेर्भेदः सत्य इति भावेन स्वरूपत्वासिद्धये साधनमाह। लब्ध्वेति। इह बहुजन्मनामन्ते भगवद्बोधितपूर्वादृष्टविशेषान्मनुष्यत्वं लब्ध्वा ममाहमिति देहाद्यसद्ग्रहं संसारे देही हित्वात्मन्यात्मज्ञाने नेदं कलेवरं विहाय यः संसारी जीवात्मा विशिष्यते नतु ब्रह्मेत्यन्वयः ॥ ४७ ॥

हरिप्रसादं विना तज्ज्ञानं न स्यात्तस्मिन् सत्युत्पद्यमानस्य ज्ञानस्य फलमाह। यदेति। यदात्मेति रूपगन्धाभि भावयामि चेति सुरोक्तप्रकारेणात्मनमाचितः मम स्वामी हरिर्नित्यमिति भावेनोपाश्रितो-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सकलस्यानुगृहात्यात्मानं प्रकाश्यानुभवमुत्पादयति स पुमाँल्लोके वेदे च परिनिष्ठितां मतिं जहाति बाह्यपदार्थविषयां संनिवृत्य प्रहाय परमात्मानमेव सर्वेन्द्रियैरनुभवन्नास्त इत्यन्वयः अनेनापरोक्षस्य मुक्तिकरणे कथां व्यनक्ति तदुक्तम् ।

यदा त्वनुभवीभूयाच्छब्दमात्रानुरोधनम् ।
त्यक्त्वाय तं विदुः माध्वास्त्यक्तवेद इति स्म ह ॥
यदैव त्यक्तवेदः स्याद्यथास्मान्मुच्यते भवात् ।

इति विरोध शब्दवशाद्यंबद्धमहाबोधरात्रान्तानुप्रवेशः स्यादित्यत उक्तम् "प्रायस्तु वैदिका एव रुद्राद्या अपि वै पुरा" इति अपिशब्देन मुक्तियोग्यमात्रे गृहीते पुरेत्यनेन जन्मप्रभृतिवैदिकत्वमस्तीति ज्ञापयति । प्राय इत्यनेन त्यक्तवेदत्वं पश्चादिति तदप्येतत् अयं कस्य मुख्यमित्यत "उक्तं वैदिकस्त्यक्तवेदश्च ब्रह्मैवैकः प्रजापतिः,, इति रुद्रादीनां कथंकारं पश्चादपि त्यक्तवेदत्वं प्राप्तमित्यत उक्तं "तपस्तु केशवं भक्त्या सम्पूज्य बहुजन्मसु । त्यक्तवेदत्वमापन्नाः प्रसादात्परमेष्ठिन,, इति "केवलं वेदशब्देन जानन् वैदिक उच्यते वेदं विनाप्यनुभवाज्जानंस्तु त्यक्तवैदिक,, इत्यनेन मिथो विरुद्धयोर्वैदिकत्यक्तवेदत्वयोरेकाधिकरणत्वं कथं युज्यत इतीदं चोद्यमपनोदितम् "तत्त्वं वेदानुसारेण चिन्तयन्वैदिको भवेत् । वेद ऊहानुसारेयस्य स त्यक्तवैदिक" इत्यनेन वेदशब्देन ज्ञातृत्वं तमन्तरेणानुभवितृत्वं च कथं विविच्यत इति चोद्यं परिहृतं त्यक्तवैदिकस्त्यक्तवेदरीशिरित्यर्थः ॥ ० ॥ *

उपसंहरति । तस्मादिति । यस्माज्ज्ञानेनैव मोक्षस्तस्मादज्ञानाज्जगत्तत्त्वापरिज्ञानादर्थकाशिषु प्रयोजनत्वेन प्रकाशमानेष्वग्निष्टोमादिविषयेषु कर्मस्वर्थदृष्टिं मा कृथाः न कुरु इत्यन्वयः तत्प्रवृत्तौ निमित्तमाह । श्रोत्रस्पर्शिष्विति । अपाम सोममिति श्रवणेन्द्रियं स्पृशन्तीति श्रोत्रस्पर्शीनि तेषु हेयत्वे कारणं वक्ति । अस्पृष्टवस्तुष्विति । परमात्माख्यवस्तुसम्बन्धगन्धरहितेषु ॥ ० ॥

अज्ञानादित्युक्तं विवृणोति । स्वर्लोकमिति । ये कर्मनिष्ठास्ते यत्र लोके अनार्हनो देवोऽस्ति तं स्वलोकं स्वेन प्राप्यं वैकुण्ठादिस्थानं न विदुरित्यन्वयः अनेन वैकुण्ठादिस्थानमीदृशमिति न जानन्ति किमुत हरिमित्यर्थादुक्तमिति ज्ञायते अन्यथा विदुरित्याह । आहुरिति । धूम्रे धूमरते धूममार्गे धीर्येषां ते धूम्रधियः तत्र निमित्तमाह । अतद्विद इति । तस्य वेदस्य तत्त्वं अप्रलक्षणं न विदन्तीति कर्मणा सह वर्तत इति सकर्मकस्तम् ॥ ४८ ॥

कर्मविनाभ्यत्र वक्तीति सकर्मकत्वमित्ययमविवेक इत्याह । आस्तीर्येति । पृथक्तां बहूनां वधात् संज्ञपनलक्षणात् यज्ञाहमिति मानी त्वं कर्म जानासि प्राचीनाग्रदर्भास्तरणं कृत्वा पशुसंज्ञपनमेव जानासि न तु कर्मस्वरूपमित्यर्थः "कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतमित्यादिना विधीयमानं यत्परं कर्म तन्न जानासीत्युच्यते न तु कर्ममात्रम् ॥ ४९ ॥

---

* सर्वेषामेव जन्मनां सततं देहपोषणे ।
अस्तिप्रज्ञासमायत्ता कीर्तिशेषस्तदावृणाम् ॥
ब्रह्मवेद्ध्यातो मनुष्यत्वं हित्वा देहाद्यसत्त्वम् ।
आत्मस्तुत्यादिहावेदं जीवात्मा सविशिष्यते ॥

इतिपद्यं पञ्चचत्वारिंशदनन्तरं श्रीविजयध्वजतीर्थमते पठ्यमानं बहीक लुप्यते तदनन्तरं पदैरित्यादिपद्यानि ।

कर्मोपकारक्षमत्वाभ्यां क्रियमाणस्य कर्मणः [illegible] परत्व-भाव इति तदाह । तत्कर्मेति । हरेस्तोषोऽनुभवश्च यो [illegible] तस्मात् भक्त्यापेक्षबुद्ध्या क्रियमाणस्य कर्मणः परत्वं न [illegible] सामग्र्या तदपरत्वेन (१) हरितृप्तिहेतुत्वात् ननु [illegible] वेदविद्याधिकारित्वेन कर्मानुष्ठानस्य तत्पूर्वकत्वमस्तीति [illegible] सांविधेति । यथा विद्यया तस्य हरेर्मतिज्ञानमुत्पद्यते सा [illegible] वेदार्थज्ञानलक्षणा नाभ्या अन्यात्वविद्या कर्मविषया हेयपक्ष [illegible] कोऽसौ हरिर्येन तज्ज्ञानपूर्वकमनुष्ठितं कर्म सफलं स्यात्तत्राह हरिरिति । दुरितहरणशीलत्वाच्छरीरदेहभृतां जीवानामात्मा स्वामी स्वयं सर्वरूपावृत्तः प्रकृतिमूलकारणमीश्वराणामाद्यैश्वर्यरूप एषां गुणानामधिकरणभूतो यः स हरिरिति ज्ञातव्यम् ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पदैरिति । महत्सङ्गप्रभावेनैव सा कथा तद्विषयाशिका रतिं जनयतीति भावः ॥ ४१ ॥

तां विना साधनान्तरैस्त्वस्मद्विधानामपि भगवज्ज्ञानं न स्यात् किमुतान्येषामित्याह । चतुर्भिः । तत्र प्रजापतीति त्रिकं तपः कृच्छ्रादि विद्या उपासना समाधिर्विशेषैकाग्र्यं पश्यन्तोऽपीति यथार्थज्ञानात् ॥ ४२-४३-४४ ॥

ततः कर्मनिष्ठास्तु सुतरामेव न जानन्तीत्याह । शब्देति ॥ ४५॥

महत्सु भक्तातारतम्यात्तु भगवदनुग्रहः समयमेवमपेक्ष्य प्रवर्तमानः सर्वनिरपेक्षां भक्तिं ददातीत्याह । यदा यस्येति । आत्मनि मद्द्वारा कथाश्रवणेन शुद्धे चित्ते भावितः सन् यदा यस्यानुगृह्णाति तदा स लोके लौकिकव्यवहारे वेदे च कर्मकाण्डे परिनिष्ठितामपि मतिं जहाति ॥ ४६ ॥

अर्थकाशिषु अर्थत्वेन प्रतीयमानेषु ॥ ४७ ॥

आहुः अत्र "क इत्था वेद यत्र स" इत्येषाः श्रुतेरर्थमाह । स्वमिति । ये धूम्रधियो वेदं सकर्मकं कर्ममात्रप्रतिपादकमाहुः ते स्वं जनार्दनस्य स्वं स्वरूपं लोकं वैकुण्ठाख्यं न विदुः किन्तु स्वर्गादिकमेव विदुः । यत्र लोके यत्परं कर्म भगवद्धर्मलक्षणं तच्च विदुः ॥ ४८ ॥

तस्य कर्मत्वं परत्वं च दर्शयति । तदिति । यद्धरितोषं तदेतुकं तदेव कर्म तस्यैव कर्तव्यत्वादिति भावः । तथा सैव च विद्या शास्त्रोत्थं ज्ञानं यया तन्मतिस्तदनुभवोऽपि भवतीति ॥ ४९-५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सत्सङ्गमन्तरेण स्वयमेव हरिकथाचिन्तनाद्यावृत्त्यादिना रसावेशाभावाच्च क्षुत्पिपासाद्यभिभूतस्य भक्तिर्न प्रायो विकसतीति व्यञ्जितमेवार्थमभिधयान्याह । पदैरिति ॥ ४१ ॥

ननु "तरति शोकमात्मवित्,, इति श्रुतेर्ज्ञानिनां किं भक्त्येति तत्र कैमुत्यन्यायेन ज्ञानिनो नैव जानन्तीत्याह । प्रजेति चतुर्भिः । भगवान् सर्वज्ञः महान्ता इति न केवलं तामेव किन्तामि अपि स्वात्मानमपि एते तपोविद्यासमाधिभिर्न पश्यन्तीति भक्त्या तु पश्यन्तीत्यर्थः । एतेषां भक्तिमत्त्वस्यापि प्रसिद्धेः एते वयं भक्त्या

---

(१) विद्यमानप्रत्ययेन ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

... वराका इति भावः वाचस्पतय इति अन्यान् प्रति ... उपदेष्टु सरस्वतीपतयो भवन्ति स्वयन्तु तात्पर्यं नैव ... भक्तिं विना व्याख्यानादिति भावः अद्यापीति तप ... परिपाकश्च ज्ञापितः अज्ञानस्य कक्षायां पश्यन्तोऽपि ... वन्तोऽपि न पश्यन्तीति ॥ ४२—४४ ॥

कर्मिणस्तु सुतरामेव न जानन्तीत्याह । शब्दब्रह्मणि वेदे ... पारे अर्थतः उरु विस्तर इति शब्दतोऽपि दुष्पारे मन्त्रलिङ्गैर्वे- ... हस्तत्वादिचिह्नैर्विशिष्टमिन्द्रादिकं भजन्तः परं परमेश्वरं ... विदुः ॥ ४५ ॥

ननु यदि ज्ञानिनः कर्मिणश्च न जानन्ति तदा कस्तं जानाति भक्त एवेति चेत् स भक्त एव कथं स्यात् केन वा चिह्नेन स ज्ञेय इत्यत आह । यदेति । आत्मनि मनसि भावितः अर्थात्भक्तैरेव हे भगवन्निमं जनं संसारादुद्धरमङ्गीकुर्विति सभक्तैर्मनसि निवेदितो भगवान् यदा यस्य यमनुगृह्णाति तदैव स भक्तः लोके लौकिकव्यवहारे वेदे च कर्मकाण्डे परिनिष्ठितामपि मतिं त्यजति ॥ ४६ ॥

अतो हे प्रकाशान्त इत्यर्थकाशिवस्तेषु अर्थवादि पुरुषार्थबुद्धिं प्ररोचनाय केवलं श्रोत्रप्रियेषु न स्पृष्टं वस्तु येस्तेषु ॥ ४७ ॥

ननु तर्हि कथमेते मत्पुरोधसो मुनयो विद्वांसो मां यागादि-कर्मैव कारयन्तीति तत्राह । स्वमिति । यत्र जनार्दनो देवो वर्तते तं लोकं वैकुण्ठं वा स्वीयं स्वप्राप्यं न विदुः किन्तु स्वर्गमेव तं विदुरित्यर्थः । यतो धूम्रधियो मलिनबुद्धयो वेदं सकर्मकं कर्मपरमेवाहुः । अतद्विदः वेदार्थानभिज्ञाः । उक्तञ्च । भगवता "कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता । मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः" इति ॥ ४८ ॥

त्वन्तु तैरनभिज्ञैरध्यापितो महामूर्ख एवेत्याह । आस्तीर्येति । दृप्तभावात् दृप्तपशुवधात् मानी महायज्वाहमित्यहङ्कारी स्तब्धो-ऽविनीतः ॥ ४९ ॥

ननु तर्हि परमेव कर्म्म किं तद्दिति कृपया त्वमेव ब्रूहीत्यत-आह । तदिति । अन्यत्पुनः कर्म्मैव नोच्यत इति भावः । सेति अन्या पुनर्विद्यैव नोच्यत इति भावः ॥ ५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वासुदेवस्वरूपगुणादीयत्ताविविदिषु प्रति तदीयेयत्तां तु ब्रह्मा-दयोऽपि न जानन्तीत्याह । प्रजापतिरिति त्रिभिः ॥ ४२—४३ ॥

तप आदिभिर्यथोपदेशं पश्यन्तोऽपि न पश्यन्ति । एतावत्त्वेन तु न जानन्ति ॥ ४४ ॥

कर्मनिष्ठास्त्विन्द्रादिरूपे तदंशं भजन्तो भगवन्तं न जानन्तीत्याह । शब्दब्रह्मणीति । अर्थतो दुष्पारे स्वरूपत उरुविस्तरे वर्तन्तः । अध्ययनादिना प्रविष्टा अपि तन्मन्त्रलिङ्गैर्वज्रहस्तत्वादिगुणयुक्ते-न्द्रादिदेवताभिधानसामर्थ्यैः परिच्छिन्नमेतावत्त्वेन मितमिन्द्रादिकं भगवदंशं भजन्तः परं भगवन्तं न विदुः वेदो भगवत्कृपा-धीनात् स्वर्गादिप्रापकेन्द्रादियजनरूपे कर्मणि नियोजयति ननु भगवदाराधने इति भावः ॥ ४५ ॥

भगवान् आत्मना जीवेन भावितः प्रार्थितः यदा यं जीव-मनुगृह्णाति स लोके स्वर्गादौ अयं लोकः कर्मणा मम प्राप्य इत्येवं निष्ठितां वेदे च कर्म एव देवः कर्मैव फलदः इत्येवं निष्ठितां मतिं जहाति वेदं वासुदेवपरं मत्वा तद्भक्तो भवतीति भावः ॥ ४६ ॥

अज्ञानाद् वेदस्य कर्मपरत्वभ्रमाद् अर्थकाशिषु प्रवृत्त्यर्थवद्-भिरयेन भासमानेषु श्रोत्रस्पर्शिषु कर्मारम्भेषु न स्पृष्टं वस्तु परब्रह्मस्वरूपं यैस्तेषु त्वमर्थवदिति पुरुषार्थबुद्धिं मा कृथाः ॥ ४७ ॥

ये धूम्रधियो धूम्रोपलक्षितकर्ममार्गेणैव धीर्येषां तथा भूतास्ते यत्र वेदे जनार्दनः देवो विषयतया द्योतते तं वेदं सकर्मकं कर्मपरं प्राहुः । तेऽतद्विदः वेदार्थानभिज्ञाः सर्ववेदार्थभूतं जनार्दनं न जानन्ति किं बहुना स्वं लोकं आत्मानमपि न विदुरित्यन्वयः ॥ ४८ ॥

त्वं तु दृप्तभावात् आत्मविस्मरणात् सप्राग्विप्राहीनः दर्भैः क्षितिमण्डलमास्तीर्य मानी वासि यतः परं वेद कर्म नावैषि कर्मज्ञानहीनोऽसीत्यर्थः ॥ ४९ ॥

ननु किं कर्म का विद्या कथ्यतामित्याह ॥ तदिति । सर्वस्यात्-मनैव प्रकृतिर्निमित्तोपादानरूपो हेतुः ॥ ५० ॥

भाषाटीका ।

अभाव ही से पैदा होने वाले इन क्षुधादिकों से जीव-लोक सब दुःखित है तिसीसे हरि कथा समुद्र में प्रेम नहीं करता है ऐसा मालूम होता है ॥ ४१ ॥

साक्षात् प्रजापति के पति ब्रह्माजी महादेवजी मनुजी दक्षादिक प्रजापति सनकादिक ब्रह्मचारी ॥ ४२ ॥

मरीचि अत्रि अङ्गिरा पुलस्त्य पुलह क्रतु भृगु वशिष्ठ इनोंसे लेकर हमपर्यन्त ब्रह्मज्ञानी ॥ ४३ ॥

अब पर्यन्त सब बडे विद्वान् लोक तप विद्या समाधि से जिस परमेश्वर को ढूंढने से भी नहीं देखते हैं ॥ ४४ ॥

अत्यन्त कठिन अर्थ वाला बहुत विस्तार वाला जो वेद तिसमें रात दिन परिश्रम करनेवाले लोग मन्त्रों के लिङ्गों से तिरो-हित भगवान् को नहीं जान सकते हैं ॥ ४५ ॥

मन में ध्यान करनेसे जिसको जिस वखत भगवान् स्वीकार कर लेताहै सो पुरुष उसी समय लोक में तथा वेद में परि-निष्ठित जो मति है तिसको छोड देता है ॥ ४६ ॥

तिससे हे बर्हिष्मन् ! राजन् ! अज्ञान से पुरुषार्थ सरीखे दीखने वाले श्रोत्र में फलश्रवण से सुखकारक परमतत्त्व को नहीं स्पर्श करने वाले जो कर्म तिनमें यथार्थ बुद्धि नहीं करना ॥ ४७ ॥

रागद्वेषादि से जिनकी बुद्धि अच्छादित है वे लोग वेद को कर्मप्रतिपादक कहते हैं वे लोग अपने लोक को नहीं जानते हैं कि जहां साक्षाज्जनार्दन भगवान् हैं ॥ ४८ ॥

तुमने कुशाओं से सब पृथिवी को ढांक दिया है बडे पशु-प्राणियोंका करके धृष्ट अभिमानी हो रहे हो कर्म को तथा परमात्मा के स्वरूप को तुम नहीं जानते हो जिससे परमात्मा का सन्तोष होवे सोइ कर्म है जिससे भगवान् में मति हो वे सोई विद्या है ॥ ४९ ॥

हरि ही सब देहधारियों के अन्तर्यामी हैं और सब के कारण हैं सबके नियन्ता हैं उनका पादमूलही सब मनुष्यों को इस संसार में रक्षक है ॥ ५० ॥

स वै प्रियतमश्चात्मा यतो न भयमण्वपि ।
इति वेद स वै विद्वान् यो विद्वान्स गुरुर्हरिः ॥ ५१ ॥

॥ नारद उवाच ॥

प्रश्न एवं हि संछिन्नो भवतः पुरुषर्षभ ! ।
अत्र मे वदतो गुह्यं निशामय सुनिश्चितम् ॥ ५२ ॥

क्षुद्रं चरं सुमनसां शरणे मिथित्वा रक्तं षडङ्घ्रिगणसामसु लुब्धकर्णम् ।
अग्रे वृकानसुतृपो विगणय्य यान्तं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नम् ॥ ५३ ॥

सुमनःसमधर्मणां स्त्रीणां शरण आश्रमे पुष्पमधुगन्धवत्क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जैह्व्यौपस्थ्यादि विचिन्वन्तं मिथुनीभूय तदभिनिवेशितमनसं षडङ्घ्रिगणसामगीतवदतिमनोहरवनितादिजनालापेष्वतितरामतिप्रलोभितकर्णमग्रे वृकयूथवदात्मन आयुर्हरतोऽहोरात्रान्तान्कालभवविशेषान् विगणय्य गृहेषु विहरन्तं पृष्ठत एव परोक्षमनुप्रवृत्तो लुब्धकः कृतान्तोऽन्तःशरेण यमिह पराविध्यति तमिममात्मानमहो राजन् ! भिन्नहृदयं द्रष्टुमर्हसीति ॥ ५४ ॥

स त्वं विचक्ष्य मृगचेष्टितमात्मनोऽन्तश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते ।
जह्यङ्गनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण ॥ ५५ ॥

॥ राजोवाच ॥

श्रुतमन्वीक्षितं ब्रह्मन् ! भगवान् यदभाषत ।
नैतज्जानन्त्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि ॥ ५६ ॥
संशयोऽत्र तु मे विप्र ! संछिन्नस्तत्कृतो महान् ।
ऋषयोऽपि हि मुह्यन्ति यत्र नेन्द्रियवृत्तयः ॥ ५७ ॥
कर्माण्यारभते येन पुमानिह विहाय तम्
अमुत्रान्येन देहेन जुष्टानि स यदश्नुते ॥ ५८ ॥
इति वेद विदां वादः श्रूयते तत्र तत्र ह ।
कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते ॥ ५९ ॥

॥ नारद उवाच ॥

येनैवारभते कर्म तेनैवामुत्र तत्पुमान् ।
भुङ्क्ते ह्यव्यवधानेन लिङ्गेन मनसा स्वयम् ॥ ६० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु च तज्जनेऽप्यभजन इव दुःखं भयं चेत्याह । स वा इति । इति यो वेद स एव विद्वान् स गुरुः स एव हरिश्च ॥ ५१ ॥

[illegible] । प्रश्न इति । एवं भवतः प्रश्नः संछिन्नः परिहृतः [illegible] कथारूपेण कथितेऽपि [illegible] पुराणमं [illegible] गुह्यार्थमवबोधयितुं हरिणरूपकमाह अत्रेति । वदतो मे वचः शृणु ॥ ५२ ॥

क्षुद्रमल्पं चरतीति तथा तम् [illegible] सुमनसां पुष्पाणां शरणे आश्रमे वाटिकायां मिथित्वा मिथः परस्परं स्त्रिया सह मिलित्वा तत्रैव रक्तमासक्तं षडङ्घ्रयो भ्रमरास्तेषां गणास्तेषां सामसु गीतेषु लुब्धः कर्णो यस्य तम् परेषामसुभिः प्राणैः तृप्यन्तीत्यसुतृपस्तानविगणय्यागणयित्वा लुब्धकस्य बाणेन भिन्नं मृगं मृगयान्वेषय ॥ ५३ ॥

श्लोकं प्रस्तुते योजयन् व्याचष्टे । सुमनोभिः समानो धर्मः परिणामविरसत्वं यासां स्त्रीणां मिथित्वमस्य व्याख्या मिथुनी

श्रीधरस्वामिकृतभावार्थदीपिका ।

...भिः सहेति शेषः । एकामित्यस्य व्याख्या ताभिरभि-
...वेशितं मनो येन असुतृप इत्यस्य व्याख्या आयुर्हरत इति ।
...मित्यस्य व्याख्या विहरन्तीमिति अन्तर्नाशकार्याः पृष्ठेन
...पद्य विध्यति दूरादेव ताडयति ॥ ५४ ॥

उपदेशसारमाह । स इति । विचक्ष्य विचार्य अन्तर्हृदि
...तं कर्णयोर्धुनीं नदीमिव प्रवृत्तिं चित्ते नियच्छ एतच्च
...न्द्रियोपलक्षणार्थमङ्गनाश्रमं गृहाश्रमं च जहि । कामुकानामस-
...मातिकामुकानां यानि यूथानि तेषां गाथा वार्ता यस्मिन्
...णां जीवानां शरणमाश्रयम् एवं क्रमेण सर्वतो विरम ॥ ५५ ॥

अर्थान्तरं प्रष्टुं पूर्वोक्तमर्थमनुवदति । श्रुतमन्वीक्षितं विचारितं च ब्रह्मन् ! हे नारद ! एतत्त्वदुक्तमास्मि तच्च मुपाध्याया ये मम कर्मोपदेष्टार आचार्यास्ते न जानन्ति ॥ ५६ ॥

अतस्तत्कृत उपाध्यायकृतस्तद्वाक्यविरोधेनासम्भावनारूपो महान् संशयः संछिन्नस्त्वया अत्र तु कश्चित्संशयो वर्तते यत्रेन्द्रियवृत्तीनामप्रवृत्तेर्मुह्यन्ति ॥ ५७ ॥

संशयमाह । द्वाभ्याम् । कर्माणि येन देहेन करोति तमेव विहायामुत्र लोकान्तरे कर्मोपस्थापितेनान्येन देहेन तुष्टान्युपभुक्तानि जीवोऽश्नुते प्राप्नोति ॥ ५८ ॥

इति वादः श्रूयते "प्राप्य पुण्यकृतांल्लोकान्" इति "शरीरजैः कर्मदोषैर्याति स्थावरतां नरः" इति त्वया चोक्तं शाश्वतीरनुभूयानिमिति एतच्च कर्तृभोक्तृदेहभेदेन कृतनाशाकृताभ्यागमप्रसङ्गाच्च सङ्गच्छत इति भावः । संशयान्तरमाह । प्रोक्तं वेदोक्तं कर्म यत्क्रियते अनेकत्वानन्तरक्षण एव परोक्षमदृश्यं सच प्रकाशते अतः कर्मणो नष्टत्वात्तद्भोगोऽपि दुर्घट इति भावः ॥ ५९ ॥

प्रथमस्योत्तरम् । येनैवेति । अव्यवधानेन कर्तृभोक्तृदेहविच्छेदं विना स्थूलदेहनाशेऽपि मनः प्रधानस्य लिङ्गदेहस्यानाशान्नाकृतोपप्रसङ्ग इत्यर्थः ॥ ६० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्त्वमुक्तं हितमाह । तस्य भगवत आत्मनो निरुपाधिकशेषिणः पादमूलं शरणं समीहितोपायः इह यतः यत्पादमूलशरणवरणान्नृणां क्षेमः सुखं भवेदित्यर्थः एवं हित उक्तः सह्युपायः पुरुषार्थमाह । स वै भगवानस्य शरणं गतस्य प्रियतमः निरतिशयप्रीतिविषयः "प्रियो हि ज्ञानिनोऽत्यर्थम्" इति भगवदुक्तेः एवं पुरुषार्थ उक्तः निरतिशयसुखमेव हि पुरुषार्थः भगवतो निरतिशयसुखरूपत्वं यस्मादानन्दो भवतीति व्यजनादित्यादिश्रुत्यावगमात् कोह्येवान्यात्कः प्राण्याद्येष आकाश आनन्दो न स्यात् "एष ह्येवानन्दयाति" इत्यानन्दावहत्वश्रवणाद्भगवदनुभव एव पुरुषार्थ इति भावः ॥ ५१ ॥

इत्युक्तविधानाम् तत्त्वहितपुरुषार्थानाम् यो वेद स वै स एव विद्वान् यश्च विद्वान् स एव गुरुः यश्च गुरुः स एव हरिः आचार्यो ब्रह्मणो मूर्तिरित्युक्तेः तत्त्वहितपुरुषार्थज्ञानमेवावश्यमुपादेयमिति भावः "ब्रूहि मे विपुलं ज्ञानं येन मुच्येय बन्धनात्" इति त्वया कृतस्य ज्ञानविषयप्रश्नस्येदमेव हरिर्देहभृतामित्युक्तं प्रश्नानुत्तरमन्यत्सर्वमेतदुपपादकमित्यभिप्रायेण उपसंहरति । अत्र इति । हे पुरुषर्षभ ! भवतः प्रश्नः एवं छिन्नः हेयोपादेयज्ञानविषयप्रश्नः तदुपादानविवेकमाहोत्तरे आत इत्यर्थः ॥ ५२ ॥

एवं प्रमात्मनो बन्धमोक्षकारणे कथिते अनुमेव कथितान्यामपि नातिनिर्विषयाणि [illegible] प्रतीयमाना सन्ति तदुपपादमेव महाभयकम्पितसकलजगति गृहान्निर्यापयितुं हरिणरूपकमाह । अत्रेति वदतो वचः सुनिश्चितं गुह्यं निशामय शृणु किन्तदित्यत्राह । क्षुद्रं चरं क्षुद्रमल्पं चरतीति तथा मधुगन्धः ऋतुकालस्य जगुप्रत्ययः पूर्वपदस्य मुमागमः क्रियाविशेषणं सुमनसां पुष्पाणां शरणे आश्रमे वाटिकायां मिथित्वा मिथः परस्परं स्त्रियासह मिलित्वा तत्रैव रक्तं षडङ्घ्रयो भ्रमरास्तेषां गणस्तस्य सामसु गीतेषु लुब्धौ कर्णौ यस्य तं परेषामसुभिः जीवनवृत्त्या तर्पयन्तीत्यसुतृपः तानग्रे स्थितान् वृकान्विगणय्यानालोच्य यान्तं चरन्तं पृष्ठे लुब्धकस्य बाणेन भिन्नं मृगं हरिणं मृगयान्वेषय विचारयेति मृगपक्षेऽर्थः अङ्गनापक्षेतु क्षुद्रं चरं फलभोक्तारं सुमनसां स्त्रीणां शरणे गृहे मिथित्वा मिथुनीभूय षडङ्घ्रिगणसामसु मृगसदृशगायकगीतेषु वृकान् वृकवच्छोषकानहोरात्रादीनसुतृप आयुर्हराननिगणय्य पृष्ठे परोक्षे लुब्धकबाणभिन्नं मृत्युपराध्वस्तं मृगसदृशमात्मानं मृगय पर्यालोचयेति ॥ ५३ ॥

अर्थमेव श्लोकं प्रस्तुतेऽर्थे योजयन् व्याचष्टे । सुमनस इति । सुमनोभिः पुष्पैः समानो धर्मो यासां तासां परिणामविरसत्वादिसाम्येन स्त्रीणां शरणे इति प्रतीकः आश्रमे इतिव्याख्या गृहस्थाश्रम इत्यर्थः क्षुद्रं चरमिति व्याचष्टे पुष्पेति पुष्पगतमकरन्दलेशवद्रूपं काम्यकर्मणां परिणामजकामसुखलवं काम्यन्त इति कामा विषयास्तेषां सुखलेशो लेहत्वं जिह्वयास्वादितमौपचारिकम् उपस्थेनेन्द्रियेणास्वादितं चार्दित्वेन्य तद्विचिन्वन्तं मिथित्वेत्यस्य व्याख्यानं मिथुनीभूयेति एकमित्यस्य व्याख्या तदभिनिवेशितमनसमिति तासु अभिनिवेशितं मनो येन तं षडङ्घ्रिगणसामस्विति व्याचष्टे भ्रमरगणानां सामगीतवन्मधुरध्वनिवदतिमनोहरा ये स्त्रीणांविषयसीञ्जनाचारास्तेषु लुब्धकवाणमिति व्याचष्टे अतितरां प्रलोभितौ कर्णौ यस्य तमग्र इत्यादि व्याचष्टेऽग्रे पुरतः वृकसमूहवदात्मनः स्वस्यायुर्हरानहोरात्रादिकालविशेषानविगणय्य यान्तमिति व्याचष्टे गृहेषु मृगमिव चरन्तं वैषयिकसुखदुःखादिकमनुभवन्तं पृष्ठे इति सप्तम्यन्तं सार्वविभक्तिकस्तसिल्प्रत्ययान्तेनानूद्य व्याचष्टे । पृष्ठतः परोक्षमिति लुब्धकवाणभिन्नमितिव्याचष्टे अनुप्रवृत्त इति सामर्थ्यलब्धं लुब्ध इत्यस्य व्याख्यानम् कृतान्त इति आत्तः स्वीकृतः शरः मारणरूपो येन इह शरीरिणं देहिनं परा विध्यति दूरादेव ताडयति मृगयेति व्याचष्टे । तमिमं देहिनमात्मानं स्वात्मानं द्रष्टुमालोचयितुमर्हसि तत्र दृष्टान्तः यथेति ॥२४॥

उपदेशसारमाह । स इति । स त्वमुक्तविधस्त्वं मृगचेष्टितं विचक्ष्यालोच्यात्मनः अन्तर्हृदि हृद्गुहायां चित्तं मनः नियच्छ नियतं कुरु चित्ते च कर्णयोर्धुनीं कर्णयोर्धुनीं नदीमिव स्थितां श्रवणमनसी अथ वायमासां कर्मसु रुच्युत्पादकामर्थवादात्मिकां श्रुतिं नियच्छ कर्मसु रुचिं त्यजेत्यर्थः कर्णयोर्धुनीं वृत्तिमिति वा अस्मिन्नपि पक्षे स एवार्थः अङ्गनायाः स्त्रियः आश्रमं जहि गृहाश्रमं त्यज कीदृशमसत्तमानामतिकामुकानां यानि यूथानि तेषां गाथा वार्ता यस्मिन् इत्थं जीवानां शरणमित्युपायं रक्षितारं च भगवन्तं हरिं वृणु शरणं गच्छ अन्ततश्चर्...

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भावमिति पाठेऽसत्समपूर्यनाय: मिथोऽद्धको यस्य तमकूमाश्रम-मित्यर्थः विरम सांसारिकप्रवृत्तेरिति शेषः ॥ ५५ ॥

एवमुपदिष्टार्थविद्विदीश्वरतस्वः कर्मसमुत्पादितवैराग्यो राजा उक्तमभिनन्दन् पुनरन्यानि संशयपदानि पृच्छति । श्रुतमिति त्रिभिः । हे ब्रह्मन् ! भगवान् भवान् यदभाषत तदान्वीक्षिकमात्मान्वीक्षणोपयोगि श्रोतव्यमर्थजातं मया श्रुतमन्वीक्षितमितिपाठे विचारितमित्यर्थः एतद्भवतोपदिष्टमस्मदुपाध्यायाः कर्मविदोऽध्वरस्ते न जानन्ति तत्र किञ्चमाह । यदि विदुस्तर्हि किमर्थं न ब्रूयुरेतत्प्रत्युत जानन्त्वेवातिगुह्यं भवतोपदिष्टमिति भावः ॥ ५६ ॥

अतस्तत्कृत उपाध्यायकृतः तद्वाक्यविरोधेनात्मतत्त्वेऽस्मा-कमाकूपो महान् संशयः संछिन्नस्त्वया अत्र तु कश्चित्संशयोऽनुवर्तते यत्र संशयपदे इन्द्रियवृत्तीनामप्रवृत्तेस्तत्र ऋषयोऽपि मुह्यन्ति ॥ ५७ ॥

किमत्र संशयपदं तदाह । कर्माणीति । पुमान् येन देहेन कर्माणि पुण्यापुण्यरूपाणि अत्र लोके आरभते करोति तं देहमिहैव विहाय कर्मोपस्थापितेनान्येन देहेन ज्युष्टानि सेवितानि विपर्यस्तानि सुखदुःखान्यसकृत्पुनः पुनर्भुङ्क्ते ॥ ५८ ॥

इत्येवंविधा वेदविदां भवादृशानां वाचस्तत्र तत्र स्मृति-पुराणादिषु श्रूयन्ते तथाहि "सूत्र वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टकुलजातिरूपायुःश्रुत-वित्तसुखमेधसो जन्म प्रतिपद्यन्ते विष्वञ्चो विपरीता नश्यन्ति" इति भवताप्युक्तं "गुणाभिमानी स तदा कर्माणि कुरुते ऽवशः । शुक्लं कृष्णम" इत्यादिना संशयविषयमुद्घाटयति । कर्मैवेति । प्रोक्तं सुख-दुःखहेतुत्वेन ब्रह्मवादिभिः प्रोक्तं पुण्यापुण्यरूपं कर्म क्रियते जनैः तथाकृत्स्नत्वग्ग एव परोक्षमदृश्यं सत्र प्रकाशते न प्रकाशत इति वर्तमाननिर्देशेन प्राक्तनदेहकृतानां यथास्मिन् देहे न प्रकाशस्तथैतद्देहकृतानामुत्तरजन्मन्यप्रकाशस्तथा यथेष पूर्वक्षणगोचरानामुत्तरोत्तरक्षणगोचरत्वं तथेति च दृष्टान्तद्वयमभिप्रेतं चकारेण कर्मणि हेतुभूतं सत्त्वादिगुणयुक्तं मनस्तद्युक्तं शरीरं च न प्रकाशत इति विवक्षितं नहि पूर्वदेहकृतकर्माणि तन्निमित्तसत्त्वादिगुणयुक्तं मनस्तद्युक्तं च शरीरं चेदानीमुपलभ्यते अतस्ते कर्मगुणमनोदेहाः पूर्वं नासन् अतस्ते नेदानीं सुखादिहेतवः एवं तत्तद्देहकृतकर्मगुणमनोदेहाः उत्तरजन्मसुखदुःखादिहेतवो न भविष्यन्ति किन्तु निर्निमित्तमेव सुखदुःखप्राप्तिरिति मे प्रतिभातीत्यर्थः ॥ ५९ ॥

एवमापृष्टो भगवान् नारदस्तत्प्रश्नं परिहरति । येनैवेति । तत्र यदुक्तमुत्तरोत्तरजन्मसुखदुःखादिहेतुभूतकर्माश्रयपूर्वदेहानां विनष्टत्वात्तन्निमित्तं सुखदुःखादिकमनुपपन्नं तद्वाशुविनाशित्वमात्रं चिराश्रयकर्मोत्पकालिकसुखादिहेतुः नहि विनष्टानां कुलालपरिव्यण्डचक्रादिव्यापाराणां कालान्तरभाविघटादिहेतुत्वमिति येनैव मनसा निमित्तभूतेन पुरुषः कर्म आरभते तेनैवाविच्छिन्नेनाविच्छिन्नेन लिङ्गेन पुण्यापुण्यकर्महेतुभूतेन मनसा तत्कर्मानुगुणं सुखदुःखादिफलमनुभव परलोके भुङ्क्ते स्थूलशरीरकर्मणो विनाशोऽपि मनसो लिङ्गभूतस्य साक्षात्पुण्यकर्मनिमित्तमनस्तत्प्रतिनिमित्तरूपः पुण्यापुण्यविषयस्य क्षेत्रज्ञस्य च देहान्तरेऽप्यनुवृत्तेः सुखाद्युपपत्तिरिति भावः पुण्यापुण्ययोर्मन-

चित्तमहानुग्रहरूपत्वं तदधीनमाधिकरणे(१)भाष्यादौ व्यक्तम्

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरिरेवंविधश्चेत्ततः किमत्राह । तस्माहेति । यतो यस्मात् भवेप्सुर्वा तस्य हरेः पादमूलं शरणं रक्षकं "शरणं गृहरक्षित्रो" इत्यभिधानं ननु पित्रादीनां वयसि गते पुत्रादीनामपि शरण्यत्वदृष्टेर्मातृकं विशिष्योच्यत इति तत्राह । सवा इति । भवत्या पक्षे पुत्रादीनां प्रियत्वात् हरेः प्रियतमत्वं कुत इति तत्राह । इति । श्रीनारायणचरणारविन्दशरणं गतस्यास्य संसारे यद्यपि भयं नास्ति यतोऽयं तस्माद्धरिः पुत्रादेः प्रेष्ठ इति पुंसस्तत्पादमूलं शरणमित्यन्वयः एवं वेत्तुरेव विद्वत्तानामेव इत्याह । इतीति । इतिशब्दो हेत्वर्थः यस्माद्धरिचरणशरणं मोक्षादिसर्वपुरुषार्थावाप्तिस्तस्मात् एवं वेद सवा एव विद्वान्यः कुतः स्वगुरुः आपेक्षिताशेषज्ञानोपदेष्टा तत्र हरेः सर्वधानविशेषात्तत्सामर्थ्यमस्येति भावेनाह । हरिरिति । अनेन गुरुविशब्दप्रयोगेण देवादीनां मुख्यविद्वत्तेत्याह ॥ ५१ ॥

प्रश्नेति निशामय शृणु ॥ ५२ ॥ ५३ ॥

स्वाभीष्टप्रकाशनाय स्वयमेव व्याचष्टे । सुमनसामिति । सुमनसां समानधर्मिणां पुष्पवत्कोमलशरीराणां स्त्रीणां आश्रमे अन्यत्र पुष्पाश्रये वने क्षुद्रं पुष्पमधुगन्धवदल्पं किम्पाकाग्रकर्मविपाकजं प्रवृत्तकर्मफलं विषयसुखलेशं जैह्वोपस्थादिविषयं चरं चरन्तं भुञ्जानमितस्ततो गत्वा विचिन्वन्तमन्विच्छन्तं तद्-र्थित्वान् मिथुनीभूय तदभिनिविष्टचेतनं षडङ्घ्रिगणसामगानवत् भ्रमरनिकरसुन्दरगानवदतिमनोहरस्त्रीजनसंलापेषु अतितराम-त्यन्तं प्रवीणितौ कर्णौ यस्य स तथा तं तदेकमग्रमीक्षणमित्यर्थः कुतोऽग्रे वृकात् वृकसधर्माणमायुर्हरतोऽहोरात्रादिकालविशेषानविगणय्यागणयित्वा कान्ते गृहे विहरन्तमित्यर्थः पृष्ठे परोक्षमवस्थितः उपाये स्थितो लुब्धकसमानः कृतान्तः शरसमेनान्तकेन यमास्त्रेण परविध्यति तमिममात्मानं जीवं भिन्नहृदयं मृगपर्यन्तोपमयावलोक्य च प्रभुर्महेशीत्यर्थः कथमिव मृगयुहतं मृगं हरिणमिवेति ॥ ५४ ॥

महाकवे अस्याचेष्टितमुपदिशामीत्याह । स त्वमिति । यः पूर्वं कर्मठः स त्वं मृगवच्चेष्टितं चेष्टा यस्य स तथा तं मृगस्येव विषयानन्विच्छतां जीवस्य चेष्टितमिति वा विचक्ष्व पश्य आत्मनस्तव चित्ते पूर्वकृतस्मरणसमर्थमन्तःकरणविशेषमन्तःस्थिते हृदि सर्वपापहरे हृत्पद्मे हरौ नियच्छ तत्रैव स्थापय कर्णधुनीं कर्णाधारमिव स्थितां चित्तिं बुद्धिं च हरौ स्थापय कर्णेन्द्रियप्रवृत्तिहेतुभूतां वा कर्णाश्रयधुनीं वा तत्कथाश्रवणे बुद्धिं च तद्गुणनिर्णये वा प्रसक्तमानां विषयिणां गृहस्य गाथा विषयवार्तावदाकारो वास्मिन् तमङ्गनाश्रम जहि हंसो निर्दोषः परमात्मा मम शरणमिति कृत्वा प्रीणीहि तृप्तो भव वहा हंसानां संन्यासिनां शरणं प्रीणीहीति क्रमेण सावमतामनुसारेण विरम संसाराद्विरतो भूया इत्यन्वयः ॥ ५५ ॥

राजा तावदियन्तं कालं मया भाषितं तदस्य श्रुतं नाभूत्प्रतिवाक्याभवणादिति संशयनिरासायाह । श्रुतमिति । श्रुतं श्रुति-प्रसिद्धमन्वीक्षितं विचारितमात्मयोग्यज्ञानं यद्भगवानभाषत

(१) तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ ४ ॥ १ ॥ १३ ॥ इति सूत्रे श्रीमाध्यादौ ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

...या जानन्ति तत्र हेतुमाह। किमेतेति। प्रथमं स्वप्नु-...दृष्टवीक्षितमाश्रितमिति वा ॥ ५६ ॥

...तत्राह। संशय इति। अनाश्रितार्थे मे संशयो न ...परवान्मया न छेदित इति नेत्याह। तत्कृत इति। तत्कृते ...र्थविषये महान् संशय इत्यर्थः सूक्ष्मत्वेनाज्ञातविषयत्वात् ...त्वं न तु स्थूलपरिमाणत्वादिति भावेनाह। कृपयेति। कुत ...न्तीत्यत आह। यन्नेति। यत्र संशयार्थे चक्षुरादीन्द्रियव्यापारा-...परत्वादित्यर्थः अतस्त्वां पृच्छामीति शेषः ॥ ५७ ॥

कोऽसौ संशय इत्यत आह। कर्माणीति। इह पुमान् येन देहेन कर्मा-...रभते तस्य प्रारब्धकर्मक्षये तं देहं विहायामुत्र परलोके ...पुमान् येन प्रेतान्येन भुङ्क्ते कर्मफलानि प्रस्तुत इति ...कथमन्यः कर्ताऽन्यो भोक्तेत्यकृताभ्यागमादिदोषापत्तेः ॥ ५८ ॥

तदप्रामाणिकमिति च वक्तुं न शक्यमित्याह। इतीति। शृण्वन्त इत्यनेन श्रुतयः स्मृतयोऽपि गृह्यन्ते तेनावाच्यप्रसिद्धिर्घोत्यते अतो महान् संशय इत्यर्थः अनेन देहव्यतिरिक्तात्मसद्भावे कथमिति संशयो युज्यते स एव नास्ति देहभस्मीभावेन तस्यापि भस्मीभूतत्वादिति मतमपि प्रत्युक्तमागमस्याप्रामाण्ये तद्गुरु-वाक्यस्यापि समन्यायः स्यादिति किञ्च स्वर्गादिकामैर्जनैः कर्म क्रियते तत्परोक्षं पश्चात् प्रकाशते नष्टत्वादतस्तादृशं कर्माथ फलं न ददाति नहि मृतः पिता पुत्रायामीय कदलीफलं ददातीति युज्यत इत्ययमन्योऽपि संशयः ॥ ५९ ॥

प्रथमप्रश्नं प्रत्याह। येनेति। लिङ्गं शरीरं तस्य मनःप्रधानत्वा-ल्लिङ्गेन मनसेति सामानाधिकरण्यं मनसा प्रेरितेन येन लिङ्गेन देहेन पुमान् कर्मारभते तेनैवामुत्र स्वर्गादावव्यवधानेन प्रत्यक्षेण कायेन स्वकं कर्म भुङ्क्ते तत्फलं सुखदुःखलक्षणमनुभवतीत्यन्वयः स्थूलशरीरस्य लिङ्गनिमित्तत्वात्तत्रापि कर्तुर्लिङ्गस्याविनष्टत्वा-दकृताभ्यागमादिदोषप्रसक्तिः सूक्ष्मरूपेण सत्त्वात् लिङ्गेन बीजकर्मफलज्ञापकेन मनसा तत्फलानुभवोपपत्तेरिति वा ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तस्मादेवं भूतो गुरुरेवाश्रयणीय इत्युपदिशन् पुरञ्जनोपा-ख्यानाभिनिवासितमाह। स वै इति सार्द्धेन। वै प्रसिद्धे रूप-गुणलीलादिभिर्मनोहरत्वेन स हरिनामा सर्वेषां प्रियतमः परमप्रीतानां योग्यः यत एव चात्मा स्वात्मेति पाठे स्वेषां जीवानां रश्मिस्थानीयानां देहभृतां मण्डलस्थानीयः यस्मादेव च यतः सकाशादण्वपि भयं न जायते इति यो वेद स एव विद्वान् स एव गुरुः य एवम्भूतो गुरुः स तु हरिरेवे-त्यर्थः ॥ ५१ ॥

प्रश्नेत्यर्द्धकम् अन्नेत्यर्द्धकम् ॥ ५२ ॥ ५३ ॥

सुमन इत्यादिगद्यान्ते द्रष्टुमर्हसीत्यनन्तरं यथा मृगयुद्धतं मृगमिति कश्चिदधिकं वर्त्तते ॥ ५४—५६ ॥

अत्र श्रीभगवद्धर्मेऽपि तु संशयः छिन्न एव किन्तु कर्ममार्गस्यैकः संशयावर्त्तते तच्छेदने च संप्रत्यनुपादेयमपि केवलम् मुमुक्षु-त्वमुत्पादयितुमात्यर्थमेव सूच्यत इत्याशयेनाह। कोऽसौ तत्र कर्माणीति सार्द्धकं कर्मस्थकं येन देहेनारभते तेनैव भुङ्क्ते

सेवितानि निर्वर्त्तितानि ...येन ...देहेन समश्नुते इति हि वेदविदां वादः ...र्थः कर्मैव ...स्यात् तत्त्व ...तन्मात्रादिवत् ...रूपत्वेनचान्यत्र ...सम्भवात् कथमन्येन देहेन तद्भोगः संभवतीत्यर्थः ॥ ५७—६१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

स हरिरेव प्रियतम आत्मा असौ जीवस्तु प्रियः एवेत्यर्थः तत्र हेतुः यतो भजनात् अस्य जीवात्मनस्तु स्वर्गादिभोगप्र-दानरूपाद्भजनात् कमेव भवतीत्यर्थः। इति विमेदेनैवात्मद्वयं यो वेद स एव विद्वांस्त्वया ज्ञेयः य एवं विद्वान् स एव त्वया गुरुराश्रयणीयः य एवं गुरुः स एव हरिस्त्वयोपासनीय इत्यर्थः ॥ ५१ ॥

उक्तमर्थमुपसंहरति। प्रश्नः संच्छिन्नः परिहृतः तदेवं पुर-ञ्जनोपाख्यानेन वैराग्यभक्तिभ्यामात्मन उद्धारप्रकारमवगच्छपि प्रत्याख्यमानैर्हतैः पुत्राणामिव राज्येऽभिषिच्य प्रव्रजिष्यामीति मनसि विचारयन्तं राजानमभिसृत्य तं सद्य एव गृहान्निःसा-रयितुं पुनर्हरिणरूपककथामाह। अत्र वदतो मे गुह्यं वचः शृणु ॥ ५२ ॥

क्षुद्रमिति। मृगं हरिणं मृगय अन्विष्य आत्मानमजानन्तं स्वयं एव मरिष्यन्तमन्वेषय कीदृशं क्षुद्रं तुच्छादिभक्षकं चरन्तमिति तथा तं मृगयम आर्षः। सुमनसां पुष्पाणां शरणं उद्याने मिथित्वा स्त्रिया सह मिथुनीभूय रक्तमासक्तं तासु सङ्गी-तेषु अग्रे तं भक्षयितुमेव निलीनान् वृकान् अज्ञानादेव अवि-गणय्य यान्तं पृष्ठे तु निलीय वर्त्तमानस्य लुब्धकस्य वाणै-र्भिन्नं भिन्नप्रायमन्वेषय तेन शीघ्रमिमं पुष्पोद्यानादन्यत्र नय अन्यथा वृका लुब्धकाश्चैनं हनिष्यन्त्येवेति भावः ॥ ५३ ॥

श्लोकमिमं प्रस्तुतं योजयन् व्याचष्टे। तत्र सुमनसां शरणे इत्यस्य व्याख्या सुमनःसमधर्मणामिति परिणामविरसत्वात् नवमालिकापुष्पतुल्यानां क्षुद्रं चरन्तमित्यस्य व्याख्या पुष्पमधि-त्यादि मिथित्वेत्यस्य व्याख्या मिथुनीभूय स्त्रीभिः सहेति शेषः। रक्तमित्यस्य व्याख्या तासु स्त्रीष्वेव अभिनिवेशितं चित्तम् असुतृप इत्यस्य व्याख्या आयुर्हरत इति यान्तमित्यस्य व्याख्या विहरन्तमिति अतितरामित्यस्यैव विशेषणमन्तःशरेण अन्तर्नालिकायां गूढेन शरेण अवच्छिन्नेन रमणव्यापारेणोत्थैः द्रष्टुमर्हसीति दृष्ट्वा च शीघ्रमिममङ्गनाश्रमाद्बहिष्कुरु। तदैवान्त-कहस्तादसौ विच्युतो भविष्यतीति भावः ॥ ५४ ॥

व्यञ्जितमर्थमभिधायापि स्पष्टमाह। स त्वमिति। विचक्ष्येत्यादि विचार्य्य अन्तर्हृदि चित्तं मनो नियच्छ कर्मयोर्बुद्धौ मतिमिव "अपाम सोमममृता अभूम" इत्यादिफलश्रुतिं चित्ते निधाय निर्जीवी-कुर्विति फलश्रुतेर्विचारासहत्वेन वैयर्थ्यादिति भावः। हंसानां शरणं पर्णशालां भगवन्तं प्रति प्रीणीहि प्रीणयेति वा क्रमेण विषयानन्दाद्विरम ॥ ५५ ॥

यद्भवानभाषत तच्छ्रुतमनु पश्चादीक्षितं विचार्य्य साक्षात् कृतं च ये मुनयोऽग्रत्या मां कर्माण्यापयन्ति ते एतन्न जानन्ति यदि च जानन्ति तर्हि किं न कुर्युस्तीत्यागमस्मात्स्वयमेव मे गुरवश्चेति भावः ॥ ५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भगवन्तः उपाध्यायकृतः तद्वाक्यश्रवणेन भक्तिज्ञानवैराग्येष्वसम्भावनारूपो यः संशय आसीत् स त्वया विशेषेण प्रकर्षेण सम्यक्प्रकारेण छिन्नः यत्र येषु इन्द्रियवृत्त्युपयोऽपि न प्रभवन्ति ये जितेन्द्रियाः तदर्थः ते [illegible]ऽपि हि निश्चितं मुह्यन्ति मोहादेव कर्म्म कुर्व्वन्ति मद्विधान् कर्म्म कारयन्ति च तर्हि मद्विधानां का वार्त्तेति भावः॥ ५०॥

किञ्च कर्म्मवर्त्मन्येकः संशयो वर्त्तते तमपि संछिन्धीत्याह। कर्म्माणि येन देहेन कुरुते पुमान् जीवस्तं देहमिहैव विहाय अमुत्र लोकान्तरे अन्येन देहेन जुहाति उपभुङ्क्ते स्वर्गनरकादीनि अश्नुते प्राप्नोति इति यत् भूयते स कथं सङ्गच्छते न ह्यन्येन क्रियतेऽन्येन भुज्यते इत्युचितमिति भावः॥ ५८॥

संशयान्तरमाह। कर्म्म प्रोक्तं वेदोक्तं क्रियते जनैः तत्र तदनन्तरक्षण एव परोक्षं स्यात् अन्यमदृष्टं यत्तस्यापि सत्त्वे प्रमाणादर्शनात्तदपि न प्रकाशते अतो लोकान्तरे कथं तत् फलस्य भोग इति॥ ५९॥

प्रथमस्योत्तरमाह। येनैवेति। लिङ्गेन लिङ्गदेहेन मनसा मनःप्रधानेन पापपुण्ययोर्मनःप्रधानैरिन्द्रियैरेव कारणात् तत्फलयोः स्वर्गनरकयोरपीन्द्रियैरेव भोगात् न विद्यते व्यवधानं यस्य तेनाव्यवधानेन अविङ्क्तेति स्थूलदेहस्य तत्र व्यवधायकत्वशक्तेः॥ ६०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

स एव अन्येषामज्ञानहरत्वाद्धरिरत एव गुरुः॥ ५१॥

संछिन्नः कृतोत्तरः निशामय शृणु॥ ५२॥

क्षरणे वाटिकायां मिथित्वा भार्याभिर्मिलित्वा रक्तं सुखासक्तं क्षुद्रंचरम् अल्पं सुखं सेवमानम् मृगय आलोचय॥ ५३॥

श्लोकं स्वयं व्याचष्टे। सुमन इति सुमनःसमधर्म्माणां सुमनोभिः समानो धर्म्मः सद्यो विरूपत्वादिलक्षणो यासां तासाम् आश्रमे गार्हस्थ्ये मिथुनीभूय ताभिर्मिलित्वा क्षुद्रतमं कामलवसुखं विचिन्वन्तं तस्मिन्सुखेऽभिनिवेशितं मानसं कृतान्तः कालः अन्तःशरेण अलक्ष्यवेगेन पराविध्यति तमिममात्मानं द्रष्टुमर्हसि॥ ५४॥

स मृगोपमस्त्वमात्मनो मृगचेष्टितं विलक्ष्य विचार्य कर्णधर्त्विम। कर्णाभ्यामुपलक्षितां कर्णवृत्तिं तदुपलक्षिताः सर्वेन्द्रियवृत्तीश्चित्ते नियच्छ सर्वेन्द्रियवृत्तीश्चित्तेनावरुध्य चित्तं च हृदन्तर्भ श्रीकृष्णे योजयेत्यर्थः। कुत्र गार्हस्थ्यत्यागेन संयच्छ इत्याह। जहीति। असत्तमानां यूथस्य गाथां कथां यत्र तत्र हि हंसानां सारग्राहिणां वैष्णवश्रेष्ठानां शरणं श्रीकृष्णं प्रीणीहि एवं क्रमेण विरम संसारादिति शेषः॥ ५५॥

हे राजन्। भगवान् यदभाषत तन्मया श्रुतम् अन्वीक्षितं विचारितं च॥ ५६॥

अत्र आशिषः तस्ये तत्कृतः उपाध्यायावालकृतः॥ ५७॥

तु शब्देन सूचितं संशयमाह। येनेति द्वाभ्याम्। येन कर्म्मयत्र आसते करोति तं देहं विहाय स कर्त्ता अमुत्र लोकान्तरे स्वकदेहेन यथापि जुहाति सेवितानि तानि फलत्वेन प्राप्य अन्येन देहेनाश्नुते॥ ५८॥

प्रोक्तं पुण्यकृतात् लोकमिति "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नर" इतिस्मृतिरूपो वेदविदां वाक्यनम तथाश्रुति. श्रूयते च अन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वेति कर्मकालेऽन्यदेहः फलभोगकालेऽन्य इत्येकः संशयः संशयान्तरमाह। यत्प्रोक्तं कार्यत्वेन वा वर्णितं जनेन क्रियते तत्परोक्षमदृश्यं सत् पुनरन्तरे न प्रकाशते तत्केनामुत्र भोगसिद्धिरिति॥ ५९॥

अयं स्थूलसूक्ष्मदेहद्वयवान् स्थूले गृहबद्धायतमानः येनैव कर्म आरभते तेनैव मनसा मनःप्रधानेन लिङ्गदेहेन अव्यवधानेन कर्म्मकाले तत्फलभोगकाले च व्यवच्छेदशून्येन तत्फलं सुकृतकर्म्मफलं भुङ्क्ते अनेन देहद्वयस्योपयोगित्वमात्रं जीवस्य कर्तृत्वभोक्तृत्वादिधर्म्मवत्त्वमुक्तम्॥ ६०॥

भाषाटीका।

श्री हरि सब देह धारियों के अन्तर्यामी हैं जगत्कारण नियन्ता हैं जिन सब मनुष्यों का कल्याण होना है उनको भगवान् के चरणकमल का शरण जाना चाहिये वही सब के प्रियतम आत्मा हैं उनसे किञ्चित भी भय नहीं होती है इस प्रकार जो जानता है सो ही विद्वान् है जो विद्वान है सो गुरु है सोई हरि है॥ ५१॥

श्री नारदजी बोले हे पुरुषश्रेष्ठ! तुम्हारे प्रश्न के संशयों को हमने छेदन करदिया अब इस विषय में हम कुछ कहते हैं वह बात निश्चित है तिसको तुम श्रवण करो॥ ५२॥

छोटे से घास आदि को खाने वाला कोई फूलों के वन में स्त्री के साथ मिलकर उसी स्थानादिमें आसक्त है भ्रमरों के गान में कान लगाया हुआ दूसरे के मांसों से शरीर पालने वाले भेडियों को आगे देखकर भी नहीं गिनने वाला पीछे बहेलिया के बाण जिस पर लगे हैं ऐसे मृग को तुम ढूंढो॥ ५३॥

फूलों सरी की अल्दी सूखने वाली स्त्रियों के घर में रहकर फूलों की बासवरी के अति तुच्छ काम्य कर्मों के फल का लेशमात्र को ढूंढने वाला स्त्रियों के साथ में रहकर उन्हींमें मन लगाकर रहने वाला भौंरों के गान सरीखे स्त्री पुत्रादिकों के वचनों में कान को लगाने वाला भेडियाके यूथ सरीके अपने आयु के हरने वाले अहोरात्र गण को नहीं गिनकर घरों में विहार करने वाला जो मनुष्य है तिसको विना जनाये पीछे धोके में मारने वाला काल बाण मारता है हे राजन्! इस अपने आत्मा को तुम देखो इस का हृदय बाणों से बिंधा हुआ है॥ ५४॥ ५५॥

सो तुम अब मृगसरीकी अपनी गति जानकर अपने अन्तःकरण में चित्त को रोको श्रवण मे जो विषयों का श्रवण होता है तिसको भी रोको असत्पुरुषों की कथा जिसमे होती है ऐसा स्त्री का आश्रम घर को त्यागो जीवों का रक्षक परमात्मा को प्रसन्न करो क्रम से निवृत्त होवो॥ ५६॥

शयानमिममुत्सृज्य श्वसन्तं पुरुषो यथा ।
कर्मात्मन्याहितं भुङ्क्ते तादृशेनेतरेण वा ॥ ६१ ॥
ममैते मनसा यद्यदसावहमिति ब्रुवन् ।
गृह्णीयात्तत्पुमान् राद्धं कर्म येन पुनर्भवः ॥ ६२ ॥
यथाऽनुमीयते चित्तमुभयैरिन्द्रियेहितैः ।
एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ॥ ६३ ॥
नानुभूतं क्वचानेन देहेनादृष्टमश्रुतम् ।
कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ॥ ६४ ॥
तेनास्य तादृशं राजन् ! लिङ्गिनो देहसम्भवम् ।
श्रद्धत्स्वाननुभूतोऽर्थो न मनः स्प्रष्टुमर्हति ॥ ६५ ॥
मन एव मनुष्यस्य पूर्वरूपाणि शंसति ।
भविष्यतश्च भद्रं ते तथैव न भविष्यतः ॥ ६६ ॥
अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते ।
यथा तथाऽनुमन्तव्यं देशकालक्रियाश्रयम् ॥ ६७ ॥
सर्वे क्रमानुरोधेन मनसीन्द्रियगोचराः ।
आयान्ति वर्गशो यान्ति सर्वे समनसो जनाः ॥ ६८ ॥
सत्त्वैकनिष्ठे मनसि भगवत्पार्श्ववर्तिनि ।
तमश्चन्द्रमसीवेदमुपरज्यावभासते ॥ ६९ ॥
नाहं ममेति भावोऽयं पुरुषे व्यवधीयते ।
यावद्बुद्धिमनोक्षार्थगुणव्यूहो ह्यनादिमान् ॥ ७० ॥

भाषाटीका ।

राजा प्राचीनबर्हि बोले हे भगवन् ! नारदजी जो आपने कहा है तिस को मैंने श्रवण किया है विचारा भी है इस बात को ये सब उपाध्यायलोग नहीं जानते होंगे यदि जानते होते तो क्यों नहीं कहते ॥ ५७ ॥

इस विषय मे उन उपाध्यायों का किया जो सन्देह मेरे को था सो आप के कथन से निवृत्त होगया इस बात में कोई इन्द्रियवृत्ति नहीं प्रवेश हो सकती है ऋषि लोग भी मोहित हो जाते हैं ॥ ५८ ॥

मनुष्य यहांपर जिस शरीर से कर्मों को करता है तिस शरीर को यहां छोड कर वहां दूसरे शरीर से कर्म फलों को भोगता है ॥ ५९ ॥

इस प्रकार से वेदवादियों का वचन सुना जाता है जहां तहां शास्त्रों में परमशास्त्रोक्त कर्म जो किया जाता है सो परोक्ष होने से दीखता नहीं है फलभोग परलोक में कैसे किस को होता है ॥ ६० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लिङ्गदेहविशिष्टस्य भोक्तृत्वं जाग्रद्दृष्टान्तेन स्पष्टयति । शयानमिमं जाग्रद्देहं श्वसन्तं जीवं समुत्सृज्य तदभिमानं त्यक्त्वा स्वप्ने मनसि संस्काररूपेणाहितं कर्म यथा भुङ्क्ते तादृशेन यथा-मद्देहसदृशेन कर्मोपस्थापितेन देहान्तरेण वा पश्वादिदेहेन तथा-लोकान्तरेऽपीति भावः ॥ ६१ ॥

ननु भवतु नाम लिङ्गविशिष्टस्यानेन दृष्टान्तेन भोक्तृत्वं कर्तृत्वं तु दानप्रतिग्रहादिषु स्थूलदेहविशिष्टस्यैव दृश्यते तत्राह । ममैते पुत्रादयोऽसावहं ब्राह्मण इति ब्रुवन्मनसा यद्यदेव गृह्णीयात् ततो देहाद्राद्धं सिद्धं कर्म पुमान् गृह्णीयात् येन कर्मणाऽहङ्कारगृहीतेन पुनर्भवो भवति अन्यथा जन्मानुपपत्तेः अतोऽपि

श्रीमद्[illegible]कृतभावार्थदीपिका ।

मनुर्मनोलिङ्गस्यैव [illegible] तु देहस्य पुत्रादिदेहवृत्त[illegible]मिति [illegible]: ॥ ६२ ॥

यदुक्तं कर्म[illegible]भोगः इति तत्राह । यथेति । उभयैर्ज्ञान[illegible]रिन्द्रिया[illegible]कर्मप्रवृत्तिभिश्चित्तमनुमीयते [illegible] सर्वेन्द्रियविषयसम्बन्धे युगपज्ज्ञानानुत्पत्तेः तदुक्तमक्षपादेन "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" इति एवं चित्तवृत्तिभिरपि पूर्वदेहजं कर्म लक्ष्यते तासामपि युगपदनुत्पत्तेः ॥ ६३ ॥

इतोऽपि कर्म लक्ष्यत इत्याह । नानुभूतमिति द्वाभ्याम् । अनेन वर्तमानेन देहेन क्व कुत्रचिदपि चानुभूतमननुभूतमनुपभुक्तमदृष्टं चाश्रुतं च यद्रूपं यदात्मकं यादृक् यत्प्रकारं च तत्कदाचित्स्वप्नमनोरथादिष्वात्मनि मनस्युपलभ्यते ॥ ६४ ॥

तेन हेतुनास्य लिङ्गिनो वासनाश्रयस्य जीवस्य तादृशं तदनुभवादियुक्तं पूर्वदेहसम्भवं श्रद्धत्स्व निश्चयेन मन्यस्व नह्यननुभूतोऽर्थो मनःस्प्रष्टुं मनसि स्फुरितुमर्हति ॥ ६५ ॥

किञ्च मनोवृत्त्यैव पूर्वापराणि शुभाशुभनिमित्तानि शरीराणि ज्ञायन्त इत्याह । मन एवेति । भद्रं त इति सम्यगवधानार्थमाशिषाभिनन्दति भविष्यत उत्कृष्टं प्राप्स्यतो न भविष्यतो नीचत्वं प्राप्स्यतोऽपि भावीनि रूपाणि शंसति मन एवौदार्यकार्पण्यादिवृत्तिभिः पूर्वमप्येवमेवासीत्पश्चादप्येवमेव भविष्यतीति ज्ञापयतीत्यर्थः ॥ ६६ ॥

ननु कदाचिददर्शनानर्हमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समुद्रो दिवा नक्षत्राणि स्वशिरश्छेद इत्यादि तत्राह । अदृष्टमिति । अन्यदेशाश्रयं समुद्रादिकं पर्वताग्रे निशाश्रयं नक्षत्रादिकं दिवा अन्यकृतादिक्रियाश्रयं स्वशिरश्छेदनाश्रयम् निद्रादिदोषेण हि तथा प्रतीयत इत्यनुमन्तव्यम् परस्यापि तदनुपपत्तेस्तुल्यत्वादिति भावः ॥ ६७ ॥

ननु दरिद्रः कश्चिदात्मानं महाराजं पश्यति राजा च रङ्कमात्मानं पश्यति तत्कथमसम्भावितं सङ्गच्छेत तत्राह । सर्व इति । आयान्ति भोग्यत्वेन प्राप्नुवन्ति यान्ति च भोगानन्तरम् यदि च कश्चिदमना भवेत्तर्ह्येवं न स्यान्न त्वेतदस्तीत्याह । सर्वे समनस इति । अतः सर्वेषां समनस्कत्वान्मनसि च सर्वार्थानां क्रमेण प्रवेशादात्यन्तादृष्टचरः कस्यापि कश्चिदर्थोऽस्तीत्यर्थः ॥ ६८ ॥

तदेवं सर्वैरपि सर्वेऽर्थाः क्रमेण दृश्यन्त इत्युक्तमिदानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह । सत्त्वैकनिष्ठे भगवत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसीदं विश्वमुपरज्य संयोगमिव प्राप्यावभासते प्रतीत्यनर्हस्यापि कदाचित्प्रतीतौ दृष्टान्तः चन्द्रमस्युपरज्य तमो राहुरिव तदिदं शुद्धे मनसि सर्वविषयस्फुरणं योगिप्रत्यक्षमिति प्रसिद्धम् ॥ ६९ ॥

तदेवं स्थूलदेहनाशेऽपि लिङ्गदेहस्यानाशादन्यः कर्ता भोक्तेति दोषो नास्तीत्युक्तम् । तत्रैवं शङ्कते । ननु लिङ्गदेहस्य स्थूलदेहद्वारेणैव कर्तृत्वभोक्तृत्वे न तु केवलस्य तत्र कदाचित् स्थूलदेहाभावे जीवस्य कर्तृत्वभोक्तृत्वाभावान्मुक्तिः प्रसज्येत तत्राह । अहं ममेति भावः स्थूलदेहसम्बन्धः पुरुषे जीवे न व्यवधीयते न विच्छिन्नो भवति किंपर्यन्तम् बुद्ध्यादीनां व्यूहः परिणामो लिङ्गं यावदस्ति अनादिमाननादिः सन् ॥ ७० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

लिङ्गात्मनोरनुवृत्त्या भोगोपपत्तिं दृष्टान्तेन स्पष्टयति । [illegible]मिति । शयानमिमं जाग्रद्देहं श्वसन्तं जीवन्तमुत्सृज्य तद[illegible] त्यक्त्वा आत्मनि मनस्याहितं देवोपसादितं कर्म स्वप्नदृष्टेनानुभ[illegible] तत्कालमात्रावस्थायि सुखदुःखादिस्वकर्मफलं यथा पुमान् तादृ[illegible] शयानदेहसदृशेन मनुष्यदेहेनान्येन देवादिशरीरेण वा स्व[illegible] भुङ्क्ते लिङ्गात्मनोरनुवृत्तेस्तथा लोकान्तरेऽपीति भावः ॥ ६१ ॥

यदुक्तं कर्मक्रियमाणमनन्तरक्षण एव विनष्टं सत्कालान्तरानुभाव्यफलहेतुः कथमिति तत्राह । ममेति । पुमानसावहं ब्राह्मणोऽहं क्षत्रियोऽहमिति ब्रुवन् देहात्माभिमानयुक्त इत्यर्थः ममेदं तन्मत्फलसाधनत्वान्मदर्थमिदं कर्मेति मनसा यद्यत्कर्म गृह्णीयात्कुर्यादित्यर्थः तत्तत्कर्मेति राद्धं सिद्धं कर्मणो विनाशेऽपि कर्मणः शक्तिरीश्वरस्य निग्रहानुग्रहरूपा सिद्धैवेत्यर्थः कर्म विशिनष्टि । येन कर्मणा पुनर्भवः पुनर्जन्म भवेत् ॥ ६२ ॥

मनसः कर्मणः पूर्वजन्मनश्च सद्भावे प्रमाणमाह । यथेति उभयैर्ज्ञानकर्मरूपैरिन्द्रियैर्हितैः कार्याचित्तवृत्तिभिर्मनोऽनुमीयते सत्यपि सर्वेन्द्रियविषयसम्बन्धे युगपज्ज्ञानानुपपत्तेः । तदुक्तमक्षपादेन "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" इति एवं चित्तवृत्तिभिरपि पूर्वदेहजं कर्म लक्ष्यते तासामपि युगपदनुपपत्तेरिन्द्रियैर्हितैरित्यपिपाठः तत्र हितैर्गतैर्निवृत्तव्यापारैरिन्द्रियैरुभयैर्ज्ञानकर्मरूपैर्द्विविधैर्मनोऽनुमीयते तेषां क्रमव्यापारदर्शनादित्यर्थः एवं चित्तवृत्तिभिः पूर्वदेहकृतं कर्मानुमीयते ॥ ६३ ॥

तदेव विवृणोति । नानुभूतमित्यादिना । यादृगात्मनः मृदात्मको घट इति वदयं निर्देशः यादृशस्य वस्तुनो यद्रूपमनेन देहेनोपलक्षितेन पुंसा कुत्र चिदपि न दृष्टं न श्रुतमिन्द्रियान्तरेण प्रमाणान्तरेण वानुभूतं तत्र कदाचित् स्वप्नमनोरथादिषूपलभ्यते न कुत्रस्थ भवेदिह जन्मन्यननुभूतमपि किञ्चित्कदाचिद्बुद्धिस्थं भवति इच्छाविषयतया मनसि वर्तेत इत्यर्थः ६४

ततः किमित्यत्राह । तेनेति । अस्य लिङ्गिनः मनोयुक्तस्य पुंसः तेनानुभूतार्थस्यैव मनोरथविषयत्वेन हेतुना हे राजन् ! तादृशं मनोरथविषयतदर्थानुभवयोग्यं देहसम्भवं श्रद्धत्स्व निश्चयेन मन्यस्व अननुभूतार्थो न मनः स्प्रष्टुमर्हति नह्यननुभूतार्थो मनः मनसि स्प्रष्टुं स्फुरितुमर्हति न पूर्वकालाननुभूतार्थः कालान्तरे मनोरथविषयः स्यादित्यर्थः । अनुभूतार्थ एव मनोरथः इह जन्मन्यनुभूतार्थविषयमनोरथो वासनया सा च पूर्वानुभवादनुभवश्च देहयोगेनेति पूर्वजन्मसिद्धिः । जन्मतारतम्यानिर्हेतुकत्वायोगात्कर्मतारतम्यासिद्धिश्चेत्यर्थः ॥ ६५ ॥

मन एवेति । इदानीं सदसद्वृत्तिविशेषान्वितं "मन एव मनुष्यस्य पूर्वरूपाणि शंसति" प्रकृष्टाप्रकृष्टवामनानिमित्तसत्त्वादिगुणप्रचुरपूर्वदेहयोगाननुमापयति । भविष्यतो देहयोगांश्च भविष्यतः वर्तमानसत्त्वादिगुणप्रचुरदेहयोगांश्च शंसति सति सत्त्वैकनिष्ठे इति वक्ष्यमाणत्वात् यद्वा न भविष्यतः अभविष्यतः वर्तमानमनुष्यरूपाणीत्यर्थः भद्रं ते इति सम्यगवधारणार्थमाशिषाभिनन्दति ॥ ६६ ॥

अननुभूतार्थानां मनोरथाविषयत्वं नानुभूतं क्वचानेनेति व्यतिरेकमुखेनाभिधायान्वयमुखेनाप्याह । अदृष्टमिति । इह जन्मनि काचदप्यदृष्टमश्रुतं च मनसि दृश्यते मनोरथगोचरो भवतीत्यर्थः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

…रेण मनोरथगोचरत्वं पूर्वानुभवश्च तमाह । यथेति । …कालक्रियाश्रयं देशाश्रयं कालाश्रयं क्रियाश्रयं च रूपं यथा येन येन प्रकारेण बुद्धिस्थं भवति तत्तथानुमन्तव्यं नत्वेवं …पि कार्त्स्न्येन वक्तुं शक्यं बुद्धिस्थानां रूपाणामानन्त्या… र्थः मम निवासदेश ईदृशः स्यादेवंविधः कालो भवे-मेवं करवाणीति मनुष्याणामसम्भावितमर्थविशेषं प्रति मनो-सहस्रं यथा रुचि मनसि वर्तते इति यावत् ॥ ६७ ॥

ततः किं पूर्वजन्मनः कर्मणश्च सिद्धावित्यत्राह । सर्व इति । जन्मनि मनोरथविषयभूताः पदार्थाः पूर्वजन्मनि क्रमेणेन्द्रियगोचरा भूत्वा क्रमेणेति मनःसद्भावोऽपि दर्शितः मनसोऽभावे सर्वेन्द्रियसम्बन्धाद्युगपत्सर्वेन्द्रियवृत्तिप्रसङ्गः तत्सद्भावे तु येनेन्द्रियेण मनसः संयोगः तस्यैवेन्द्रियस्य व्यापार इत्युपपत्तिश्च क्रमेणेन्द्रियगोचरा भूत्वा मनसि वर्तन्ते पूर्वानुभवजनितवासना विशेषेण हि प्रतिपुरुषं रुचिविशेषः न हि विना कारणेन कार्यं भवति एवं मनसि वर्तमानमनोरथसहस्रानुगुणां वासनानुमीयते सा च पूर्वानुभवमनुमापयति इह जन्मनि तादृगनुभवाभावाद्देहान्तरेण तदनुभव इति पूर्वजन्मसिद्धिः जन्मतारतम्यस्य निर्हेतुकत्वायोगाद्विविधादृष्टसिद्धिरिति मनसः कर्मणः पूर्वजन्मनश्चोपादानं कृतं भवति आयान्ति वासनोन्मेषाद्दायान्ति बुद्धिस्था भवन्ति यान्ति वासनाभिभवाच्च बुद्धिस्था भवन्ति यदिकश्चिदमना भवेत्तर्ह्येवं न स्यान्नस्त्वेतदस्तीत्याह । सर्वं इति । अतः सर्वेषां समनस्कत्वान्मनसि च सर्वार्थानां क्रमावभासनानुसारेण प्रवेशादत्यन्ताननुभूतोऽर्थः कस्यापि कश्चिदस्तीत्यर्थः नन्विह जन्मनि जन्मान्तरे वानुभूतार्थ एव मनोरथ विषय इत्युक्तं यद्येवं तर्हि मुक्तानन्दोऽपि मुमुक्षोः कदाचिन्मनोरथविषयो भवेदिति सोऽपि पूर्वमनुभूत एव स्यादस्त्विति चेन्न पुनर्जन्मानुपपत्तेः "न च पुनरावर्तते" इति श्रुतेः "अनावृत्तिः शब्दात्" इत्यादिसूत्रस्य च विरोधप्रसङ्गान्मैवं प्रकृतिपरिणामात्मकदेहानुभाव्यानामेवाननुभूतानां मनोरथविषयत्वासंभवाभिप्रायत्वात्तदुक्तेः अस्तु वा मुक्तानन्दोऽपि मनोरथविषयस्तथापि मनोरथविषयो भवन्मुक्तानन्दः "सोऽश्नुते सर्वान् कामान्सह ब्रह्मणा" इत्यादिवाक्यावगतनिरतिशयानन्दरूपत्वेन परोक्षमेव मनोरथविषयो भवेदनुभवोऽपि पूर्वं शब्दजन्यप्रमितिविषयत्वेन परोक्षमेव स्यादत एव हि यद्रूपं यादृगात्मनः यथायथानुमन्तव्यं देशकालक्रियाश्रयमित्युक्तं यादृग्रूपेण पूर्वमनुभूतं तादृग्रूपेणैव मनोरथविषयो भवतीति हि तदर्थः ततश्चेदानीं मनोरथविषयस्यापि मुक्तानन्दस्य सोऽश्नुते इत्यादिमुक्तानन्दप्रकरणावगतप्रकारवैशिष्ट्येन परोक्षमेव मनोरथविषयत्वात्तस्य पूर्वानुभवोऽपि तादृश एव कल्प्यत इत्यपरोक्षमनुभूयमान एव मुक्तानन्दः पुनर्भवाभावहेतुरिति न श्रुतिसूत्रादिविरोधः न च देशकालादयोऽप्यपरोक्षं न मनोरथविषया इति तेषामपि परोक्षएव पूर्वानुभव इति न कस्यापि साक्षात् पूर्वानुभवोऽनुमीयत इति वाच्यम् अपरोक्षं प्राकृतदेहानुभवयोग्यानामपि परोक्षानुभवकल्पनायां मानाभावात् कल्पकस्य परोक्षविषयमनोरथस्य परोक्षमपरोक्षं वानुभूतवस्तु विषयकत्वदर्शनादिति ॥ ६८ ॥

इदमेवाभिप्रेत्याह । सत्त्वैकनिष्ठ इति । सत्त्वैकप्रचुरे मनसि भगवत्पार्श्ववर्तिनि मनश्चन्द्रमोपमके कुर्वति सति तम् नश्यति चन्द्रमस्युदिते सति … वङ्कूत्वावभास [redacted] …य इव न नि… [redacted] …वङ्कजनोपक्रम… [redacted] …परोक्षरूपत्वात्… [redacted] …स्यर्थः देहात्मभ्रम [redacted] …त साक्षादनुभवविषया एवेति भावः ॥ ६९ ॥

किमकर्त्व्यं संसारदशायां आत्मस्वरूपतदानन्दादिकमपरोक्षं नावभासत इति यतः आत्मस्वरूपमेवापरोक्षं नावभासत इति सहेतुकमाह । अहमिति । अनादिमान् जीवः अथेन्द्रियमर्थाः शब्दादयः गुणाः सत्त्वादिः एतैर्विवृतः आवृतः व्यूह इति पाठे यामुत्थादयो व्यूहः संयोगस्येत्यर्थः तावदहंममेति भावो व्यवधीयते व्यवधित्वान्न्वयेते स्वरूपतिरोधायकोऽहंममाभिमानो न निवर्तते किन्त्वनुवर्तत इत्यर्थः ॥ ७० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कथमिव स्वप्नकाले असन्तं प्राणवृत्तिमन्तं पर्यङ्कं शयानं दृष्टिविषयं देहमुत्सृज्य पुरुषो भोक्ता तादृशेन शयने शयानशरीरसदृशेन इतरेण पतितदेहविलक्षणदेहेन आत्मनि कल्पयाहितं सञ्चितं कर्म भुङ्क्ते एतदुक्तं भवति स्थूलदेहस्य शय्यायां शयनत्वात्स्वप्नभोगनिमित्तकर्मोपार्जितेन देहेन भिन्न एव यथा भोक्तृत्वमत्राप्येवमिति आत्मन्याहितमित्यनेन द्वितीयप्रश्नोऽपि प्रत्युक्त इति ज्ञायते ॥ ६१ ॥

ननु साक्षात्कर्तृत्वं भोक्तृत्वं मनसो लिङ्गस्योतोभयोस्तत्कृतो वेति संशयनिरासायमाह । ममेति । यः पुमान्ममेदं सुखसाधनमिति मनसा सङ्कल्प्य कृष्णाद्भिर्वयाहिताग्नेः पुत्रो ऽसावहं नारायणमिश्रो याज्ञिकः कथं स्यामिति वाचा वदन् यद्यत्कर्म कर्तुं पाण्यादुपादत्ते स एव पुमांस्तद्वाऽऽदं सिद्धं कर्म भुङ्क्ते येन भुक्तशेषेण कर्मणा पुनर्भवः पुनरुत्पत्तिर्मर्त्यलोक इति शेषः तस्मात्साक्षात्कर्ता भोक्ता च पुरुष एव तत्र मनसोऽन्तरङ्गत्वमिति भावः अनेन जन्मान्तरेऽपि कर्मणः फलदातृत्वप्रतीतेः किं पुनः परलोक इति दर्शितम् ॥ ६२ ॥

ननु कर्मणो देहाद्यारम्भकत्वं कथं सञ्जाघटीति मानवस्थानन्तरक्षण एव नष्टत्वादत एव मनसोऽप्यन्तरङ्गत्वमिति (१) न शक्यं कृष्णचापमुक्तशरवेगसंस्कारवत्कर्मणोऽपि कार्यकालव्याप्तत्वोपपत्तिरन्तरङ्गत्वं मनसोऽन्वयव्यतिरेकसिद्धमित्यभिप्रेत्याह । यथेति । उभयेषां ज्ञानकर्मेन्द्रियाणामुभयविधवृत्तिहेतुभूतमन्तःकरणापरपर्यायमस्तीत्यनुमीयते तस्मिन् सति ज्ञानं कर्म चोत्पद्यते असति आलोकादिसाधनसामग्र्यां सत्यामपि तदभावात्तन्मयामकमन्तःकरणं किञ्चिदस्तीति ज्ञायते यथा तथान्तःकरणवृत्तिविषयेषु मनोव्यापारैः प्राग्देहजातं कर्मबलं शुक्लकृष्णात्मकमन्यतममिति वक्ष्यतेऽनुमीयते देहवत् एवं ज्ञानसम्भवात्कर्मणो देहाद्यारम्भकत्वं च युक्तमिति बोद्धव्यम् ॥ ६३ ॥

(१) कथंसंजाघटीतीति पूर्वग्रन्थः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

[illegible] तथापि वासना- [illegible] नुभूतमिति । यद्रूपं [illegible] यस्य तथाहक् [illegible] कदाचित्कालेऽनेन [illegible] मनस्युपल- भ्यते तेनोपलम्भेन पूर्वस्मिन् जन्मनि दृष्टं श्रुतमनुभूतमित्यु- पलभ्येत कुत्येत मत्स्वन्यथा अनेन देहेन जाग्रदवस्थायामदृष्ट- मश्रुतमननुभूतं नोपलभ्यते स्वप्ने किमु स्वप्ने दृष्टादिकमेव यथा तथा पूर्वस्मिन् जन्मनि दृष्टादिकमनेन देहेन पश्य- तीति वा ॥ ६४ ॥

ननु, कर्मणो देहाद्यारम्भकत्वं कथमित्यस्य चोद्यस्य परि- हारः कथं स्फुटित इति तत्राह । तेनेति । यतः पूर्वकर्मानुसारेण दर्शनादिकं तेन तदनुसारेणास्य लिङ्गिनो देहसम्भवः तादृशः पूर्वानुसृत इति असत्ख्यातिं कुत कुत इत्यत उक्तमेवार्थं स्मारयति। अननुभूतार्थमिति । यतः पूर्वस्मिन् जन्मन्यननुभूतो योऽर्थस्तत्र मनः स्प्रष्टुं नार्हति इत्यन्वयः ॥ ६५ ॥

ननु देहवन्मनसोऽप्यनेकत्वे कथमेतदुक्तं घटत इत्याशङ्क्या- मोघं लिङ्गशरीरबद्धमन्तःकरणमेकमनन्यमित्यभिप्रेत्याह । मन इति । मनसोऽनेकत्वे पूर्वानुभूतहिताविज्ञापनमनुपपन्नं स्यादित्यर्थः "रूपं शब्दे पशौ श्लोके प्रत्यावृत्तो हितादिषु" इति यादवः स्वानुभव- सिद्धः सर्वानुभूतार्थोऽपि कर्मणो देहाद्यारम्भकत्वं युक्तं मनसा संयुक्तत्वादित्यतोवाह । मन [१] इति । यथा ते तव मनो भविष्यतस्तथा न भविष्यतः स्ववस्तुनो विषयं भद्रं शंसति ज्ञापयति तथा मनुष्यस्य मनः पूर्वरूपाणि सात्विकानि कर्माणि शंसति यथा न भविष्यतो वर्तमानस्य तव मनःपूर्वरूपाणि शंसत्येवं भविष्यतोऽपि तावद्भद्रं ज्ञापयतीति वा ॥ ६६ ॥

ननु यद्यपि पूर्वानुभूतमेव मनःस्प्रष्टुमर्हति नाननुभूतमिति । तदयुक्तं यतः स्वप्नादौ स्वशिरश्छेदनादिकमत्यन्तादृष्टचरं दृश्यते तत्राह । अदृष्टमिति । इह जन्मन्यदृष्टमश्रुतं वा कश्चिन्मनसि दृश्यते तद्यथा घटते, तथानुमन्तव्यं घटनीयं कथमत्राह । देशेति । देश- कालक्रिया आश्रयो यस्य दर्शनस्य तत्तथा देशान्तरे शिरः कालान्तरे छेदनक्रियां दृष्ट्वा स्वप्ने तयोः सामानाधिकरण्यं भ्रान्त्या पश्यतीति अथवा नानुभूतमित्यनेन यदवादि तदनेना- नुमीयते अत्र जन्मनि यद्दृष्टादिकं दृश्यते मनसि तद्यथा पूर्वं जन्मनि दृष्टं श्रुतमनुभूतं तथानुमानं कर्तव्यं जाग्रति वाह्या- लीप्रदेशे पूर्वाह्णे चरन्तमश्वं दृष्ट्वा स्वप्ने यथा तदश्वं पश्यति तथा कर्मण्यपि तथार्यावर्ते द्वापरे सम्भूतोऽर्जुनः पञ्चतामुपेत्य केरलदेशे कलिकाले जातो यद्भारतादिकं पश्यति करोति वा (२] तदार्यावर्ते द्वापरेऽनुष्ठितमिति ज्ञातव्यं दृष्टश्रुतदर्शनादिमात्र एव दृष्टान्त इति न विरोधः ॥ ६७ ॥

ननु यदि पूर्वदृष्टादिकमेवेदानीं दृश्यते भूयते [illegible] तर्हि जन्मनामनन्तत्वाद्बहुमहमिकया युगपद्दर्शनादिकं प्र[illegible] तदयुक्तं विरोधादित्याह । सर्व इति । ये सर्वे शब्दादयो [illegible] बहुजन्मस्विन्द्रियद्वारेण मनसि प्रविष्टा वासनारूपेण [illegible] सर्वेन्द्रियगोचरा विषयाः सुमनसो [illegible] क्रमानुरोधेन क्रममनुसृत्य मनसि जीवे वर्गश आयान्ति ज[illegible] वेगात् यान्ति च नदीप्रवाहवदित्यन्वयः इन्द्रियद्वारेण मन[illegible] प्रविष्टा इन्द्रियगोचराः शब्दादयः क्रमशो जीवे वर्गश आयान्ति पुनः सुप्ते मनसो वेगाद्यान्ति च सर्वपदार्थानामि जन्मनि जन्मान्तरे वा मनसीन्द्रियद्वारेण प्रवेशात्संस्काररूपेण स्थिरत्वादिहादृष्टस्य चाश्रुतस्य चानुभवो युज्यते इत्यतोवाह सर्व इति । दवीयसि देशे काले चानुभूतानामधुनानुभवः कथं घटत इत्यतोवाह । सत्त्व इति । अचिन्त्यानन्तैश्वर्यशक्तिः प्रयोज केति संतोष्टव्यम् ॥ ६८ ॥

जीवस्य मनआदेः स्वरूपत्वेऽनेकजन्मानुभूतपदार्थसंस्कारा णामनन्तत्वेन तदनुभवेनैव कालगमनात्कदाचिन्मुक्त्यनुदयं यावज्जीवं संसार एव स्यात् असत्त्वरूपत्वे लिङ्गशरीरादेः स्थूल- देहनाश एव नाशसम्भवेन पूर्वदृष्टादिपदार्थदर्शनाद्यनुपपत्ति- रिति तत्राह । सत्त्वैकनिष्ठ इति । सत्त्वो जीवस्तदेकनिष्ठं तद्रूपे भगवत्पार्श्ववर्तिनि भगवद्विषये मनसि इदं लिङ्गशरीरादिकमु- परज्य स्वेच्छया सङ्गमव्यावभासते भिन्नतयेतिशेषः कथमिव चन्द्रमसि तमो राहुरिव मेघान्धकारो वा लिङ्गशरीरादेः स्वरूपत्वेऽपि भगवदपरोक्षज्ञानं विना स्थूलदेहनाश एव नाशा- भावाच्चिरायुष्ट्वेन स्थितिसम्भवात्पूर्वकर्मनिमित्तसुखदुःखानुभवो घटत इति भावः यद्वा सत्त्वगुणानैयकार्यनिष्ठोत्कर्षो यस्मिन्स- त्त्वस्त्वैकनिष्ठं तस्मिन्भगवत्पार्श्ववर्तिनीत्यनेन सत्त्वगुणोत्कर्षं लक्षयति अन्यथा तत्र स्यादेवंविधमनसि इदं दुःखादिकमुप- रज्यावभासत प्रतीयते निदर्शनं व्याख्यातार्थम् ॥ ६९ ॥

नन्वेवं तर्हि कियन्तं कालमिदं दुःखादिकमवभासते इति तत्राह । नाहमिति । यावत्पुरुषेऽनादिमानयमहंममेति भावो न व्यवधीयते तिरोहितो नष्टो न भवति तावद्बुद्धिमनोऽर्थगु- णव्यूहः संसारोऽपि न तिरोहितो भवतीत्यर्थः "अनादिमानिति- व्यूहविशेषणं वा अनेन संसारस्य मिथ्यात्वं निराचष्ट अक्षमि- न्द्रियं श्रोत" इत्यभिधानम् ॥ ७० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नानुभूतमिति युग्मकम् ॥ ६४—७३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

लिङ्गदेहनैव यद्यपि कर्तृत्वभोक्तृत्वे भवतस्तदपि ते स्थूल- देहं विना न सिद्ध्यत इति चेत् सत्यं स तु स्थूलदेहो यः कश्चन कर्मणैवोपस्थाप्यते इति सदृष्टान्तमाह । शयानमिमं जाग्रद्देहं श्वसन्तं जीवन्तमुत्सृज्य तदभिमानं त्यक्त्वा आत्मनि मनसि संस्काररूपेणाहितं कर्म यथा भुङ्क्ते तादृशेन शयानदेहसदृशेन कर्मोपस्थापितेन स्थूलदेहेन अन्येन वा पश्वादिदेहेन तथा लोकान्तरेऽपीति भावः ॥ ६१ ॥

---

[१] यथा मन एव पूर्वरूपाणि शरीराणि शंसति ज्ञापयति तथैव भविष्यतः स्वर्गादिकं गच्छतः नभविष्यतः वर्तमानस्य च ते तव भद्रं पूर्वोत्तरकालगतं पुण्यरूपमदृष्टं मन एव शंसति अस्तीति ज्ञापयति कथमन्यथा तवेदानीं साम्राज्याधिपत्यमुत्तरत्र स्वर्ग- प्राप्तिः स्यादित्याशयः ॥

[२] स्वस्वप्न इति शेषः ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

...देहे केवलमभिमानमात्रं तेन च यत् सहायकं जीवस्य ...यति । ममैते यागाः स्वर्गफला इति इदमहं कर्म करोमि ब्रुवन् मनसा यद्यदेहं स्थूलं गृह्णीयादभिमानविषयीकुर्यात् ततो देहादृतिं सिद्धं कर्म्मैव सलिङ्गो जीवो गृह्णीयात् न तु तं स्थूलं देहं प्रयोजनाभावादेवेति भावः ततश्च न कर्म्मणोऽत्रमहङ्कारगृहीतेन पुनर्भवो भवति अन्यथा जन्मानुपपत्तेः ॥ ६२ ॥

यत् पूर्व्वं कर्म्मणस्तत्र काल एव नष्टत्वात्तामुत्र भोग इति तत्राह । यथेति । उभयैर्ज्ञानकर्म्मरूपैरिन्द्रियाणामीहितैर्युगपदनुस्थितैश्चित्तमनुमीयते सत्यपि सर्व्वेन्द्रियविषयसम्बन्धे युगपज्ज्ञानानुत्पत्तेः तदुक्तमक्षपादेन "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" इति । तस्माद्यदा येनेन्द्रियेण मनसो योगस्तदा तस्येन्द्रियस्यैव विषयज्ञानमिति एवमेव चित्तस्य सर्व्वाभिर्वृत्तिभिर्युगपदनुभूताभिः पूर्व्वदेहजं कर्म्म लक्ष्यते । येन येन कर्म्मणा भद्रा यदा या या चित्तवृत्तिर्युज्यते सा सैव भद्रा अभद्रा वाप्युद्भवतीत्यर्थः । तेन कर्म्मणः समनन्तरक्षण एवोपरतत्वेऽपि तत्संस्काररूपतद्रूपास्तिष्ठन्त्येवेति सिद्धान्तो दर्शितः ॥ ६३ ॥

ननु स्थूलदेहनाशेऽपि लिङ्गदेहो यन्न नश्यतीत्येतत् कथं प्रतीमस्तत्राह । नानुभूतमिति द्वाभ्याम् । अनेन वर्त्तमानेन देहेन कश्चिच्च कदापि अननुभूतमनुपभुक्तमदृष्टमश्रुतञ्च पूर्व्वदेहगतं वस्तु स्वप्नमनोरथादौ उपलभ्येत तच्च यद्रूपं यादृक् यत् प्रकारकञ्च आत्मनि मनसि उपलभ्येत तद्रूपं तादृगेव पूर्व्वदेहसम्भवं लिङ्गिनोऽस्य जीवस्य भवतस्त्वं निश्चयेन मन्यस्व हे राजन् ! नह्यननुभूतोऽर्थो मनःस्पृष्टुं मनसि स्फुरितुमर्हति तस्मात् बाल्ये दृष्टमुतं वस्तु यथा वार्द्धके स्फुरति तथैव पूर्व्वपूर्व्वस्थूलदेहगतमेतद्देहस्थे मनसि स्फुरति चित्तदेवेदं मनो नान्यदिति जानीयादिति भावः ॥ ६४ ॥ ६५ ॥

किञ्च मनोवृत्त्यैव पूर्व्वापराण्यशुभानि शुभानि च शरीराणि ज्ञायन्त इत्याह । मन एव कर्त्तृ उन्मत्तशान्तत्वादिभिः कार्पण्यौदार्यादिभिश्च मनुष्यस्य पूर्व्वरूपाणि पूर्व्वपूर्व्वशरीराणि पूर्व्वमप्ययमेवासीदिति संशति कथयति भविष्यतश्च तस्य भावीनि शरीराणि एवमेवायं भविष्यतीति तथा ज्ञानवैराग्यादिदृष्ट्या पूर्व्वमप्यस्य नामरूपासीत् न भविष्यत इति पुनर्न जनिष्यमाणस्यास्य मुक्तिर्भविष्यतीति मन एव ज्ञापयत्यत एकमेव मनोमयं लिङ्गशरीरं न पुनःपुनर्जातमित्यर्थः भद्रं इत्येतत् त्वं बुध्यस्वेति कृपया आशीर्वादः ॥ ६६ ॥

ननु कथं कदाचिद्दर्शनानर्हमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समुद्रः दिवानक्षत्राणि शिरश्छेद इत्यादीन्यत आह । अदृष्टं दर्शनानर्हमश्रुतं श्रवणानर्हं यथा येन प्रकारेण दृश्यते तथा तेनैव प्रकारेण देशकालक्रियाश्रयं तत्तदनुमन्तव्यं तत्र अन्यदेशाश्रयः समुद्रः पर्व्वताग्रे निशाश्रयं नक्षत्रादिकं दिवा अभ्यङ्गादिक्रियाश्रयं शिरः स्नानक्रियायां धातुवैषम्यप्रयुक्तया स्वप्नगतया भ्रान्त्या प्रतीतम् ॥ ६७ ॥

एकेनैव लिङ्गदेहेन एक-सहस्राण् स्थूलदेहान् प्रविश्य कालभेदेन एक एव [redacted]
इत्याह । सर्व्वे [redacted]
तदेवं सर्व्वे [redacted]
युगपदपि सर्व्वे [redacted]
भूतावेव एका [redacted]
पार्श्ववर्त्तिनि सति इव विश्वमुपरज्य [redacted]
भगवान् यथा विश्वं पश्यति तथा तदिच्छावशात्तद्भक्तोऽपि पश्यति यथा व्रजेश्वरी मृद्भक्षणलीलायामित्यर्थः । प्रतीत्यनर्हस्यापि कदाचित् प्रतीतौ दृष्टान्तः । चन्द्रमसि उपरज्य तमः राहुरिव ॥ ६९ ॥

तदेवं स्थूलदेहनाशेऽपि लिङ्गदेहस्यानाशादन्यः कर्त्तान्यो भोक्तेति दोषो नास्तीत्युक्तम् । तदेवं व्याकुरुते । ननु लिङ्गदेहस्य स्थूलदेहद्वारैव कर्तृत्वभोक्तृत्वे स्यातां न तु केवलस्य तत् कदाचित् स्थूलदेहाभावे जीवस्य कर्तृत्वाद्यभावान्मुक्तिः प्रसज्जेतेति तत्राह । नाहमिति । अहं ममेति भावः स्थूलदेहसम्बन्धः पुरुषे जीवे न व्यवधीयते न विच्छिन्नो भवति किं पर्य्यन्तं बुद्धिमनोऽस्मार्थरूपो गुणव्यूहो गुणपरिणामो लिङ्गं यावदस्ति । नन्वयं कदारभ्य प्रवृत्तस्तत्राह । अनादिमान् अविज्ञातादिकालः ॥ ७० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उक्तार्थं स्वप्नदृष्टान्तेन स्पष्टयति । शयानमिति । यथेमं स्थूलं देहं शयानं श्वसन्तं सप्राणमेवोत्सृज्य विस्मृत्य आत्मनि मनसि आहितं तात्कालिककर्मफलदेनेश्वरेण प्रकाशितं कर्म कर्मफलं तादृशेन शयानदेहसदृशेनान्येन वा पश्चाद्विदेहेन स्वकर्मानुसारीश्वरोपस्थापितेन भुङ्क्ते तद्वल्लोकान्तरेऽपीत्यर्थः ॥ ६१ ॥

शिष्यबुद्धिवैशद्यार्थं देहदेहिपदार्थभेदं दर्शयन् उत्तरोत्तरदेहादिप्राप्तिक्रमं दर्शयति । ममेति । अहमिति ब्रुवन् असौ पुरुषो जीवः मनसा लिङ्गेन यद्यत् अहं मम विषयं शरीरादिकम् गृह्णीयात् येन शरीरादिना भूयो रार्द्धं सिद्धं कर्म गृह्णीयात् येन कर्मणा निमित्तेन पुनर्भवो भूयो जन्मेति अनेन देह एवात्मा मन एव कर्ता इत्याद्यो भ्रान्तिविलसिता वादा निराकृताः ॥ ६२ ॥

यदुक्तं कर्मपरोक्षं सत् प्रकाशतेऽतोऽमुत्र कथं भोग इति तत्राह । यथेति । यत्र चित्तं लग्नं भवति तस्मिन् विषये तस्येन्द्रियस्येहितं चेष्टा भवति एवमिन्द्रियवृत्तिभिश्चित्तमनुमीयते एवमेव आसन्नमपीष्टमपि हित्वा अनासन्नेऽपि अनिष्टेऽपि यदा चित्तवृत्तिः स्यात्तादृशीभिः प्राग्देहजं कर्म लक्ष्यते ॥ ६३ ॥

ननु स्थूलदेहे लिङ्गदेहस्तत्र देही कर्त्तेति कुतो ज्ञायते इति शङ्कां निराकर्तुं स्थूलदेहे गृहवदायतनभूते मनःप्रधानं लिङ्गदेहं तस्मिन्नपि गृहवदायतनभूते चोत्रकं चाह । नेति द्वाभ्याम् । अनेन देहेन कश्चिददृष्टमश्रुतम् तच्च अनुभूतं स्वर्गादिभिर्ज्ञातम् एवं भूतमपि वस्तु कदाचित्स्वप्नमनोरथादौ आत्मनि मनसि यद्रूपं पूर्वदेहे अनुभूतं तादृगेवोपलभ्यते ॥ ६४ ॥

तेनापूर्वपदार्थोपलम्भेन अस्य लिङ्गिनः लिङ्गं मनःप्रधानं सूक्ष्मं शरीरं गृहवदस्यास्तीति लिङ्गी जीवस्तस्य तादृशं पूर्वदर्शि-

सुषिप्त्यौं ... मेषु प्राणायनविघ्नातनः ।
... ति ज्ञानं मृत्युमपघातयोरपि ॥ ७१ ॥
... कल्यादेकावशाविधं तदा ।
... पूर्वतो नूनः कुह्वां चन्द्रमसो यथा ॥ ७२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पवारम्भहेतुभूतं देहसम्भवं देहः ... स्थूलदेह-कारणं मनः अकृत्स्न निश्चयेन मन्यस्य अननुभूतोऽर्थो मनःस्प्रष्टु मार्हति अनेकस्थूलदेहारवे कारणभूतं मनस्तत्प्रवर्तको जीवः कर्तेत्यर्थः ॥ ६५ ॥

किञ्च मनुष्यस्य मनःसात्त्विकादिवृत्तिभिः सात्त्विकादीनि पूर्वकर्माणि शंसति तथा भविष्यतो न भविष्यतश्च पदार्थस्योत्साहानुत्साहादिरूपाभिर्वृत्तिभिः सिद्धिमसिद्धिं च शंसति ते तव मनस्तु भद्रं कल्याणमस्त्वित्यर्थः ॥ ६६ ॥

मन्वग्निशिखोपरि यवाङ्कुरं निशीथे सूर्यमण्डलं भूचरस्य खेगमनं च अदृष्टमश्रुतं च मनसि कचित्स्वप्ने दृश्यतेऽतोऽननुभूतार्थो न मनः स्प्रष्टुमर्हतीति कथं घटेतेत्यत्राह । अदृष्टमिति । अदृष्टमश्रुतं च यन्मनसि दृश्यते तद्देशकालक्रियाः आश्रयो निमित्तं यत्पार्थक्यं भवति तथाहि देशान्तरेऽनुभूतं यवाङ्कुरं देशान्तरेऽनुभूताया वह्निशिखाया उपरि मनसि स्वप्नवशात् दृश्यते एवं सूर्यमण्डलमपि दिवानुभूतं निशीथे दृश्यते एवं खेचराणां खेऽनुभूतं गमनं भूचरस्य दृश्यते अतो यथा तथानुमन्तव्यम् ॥ ६७ ॥

किं बहुना सर्वे इन्द्रियगोचरा अनुभूता एव देवमनुष्यपश्वादयः पदार्था वर्गशः समुदायभावेन क्रमानुरोधेन एकैकशः मनसि आयान्ति संयुज्यन्ते यान्ति वियुज्यन्ते च यतः सर्वे समनस एव जनाः सर्वे इन्द्रियगोचराः शब्दादयः देवादिषु आयान्ति यान्ति चेति योजना ॥ ६८ ॥

भगवद्ध्यानभाविते मनसि तु सर्वं दृश्यते इत्याह । सत्त्वैकनिष्ठे सत्त्वगुणप्रचुरे भगवत्पार्श्ववर्तिनि तद्ध्यानपरे तमः राहु अनुग्रहमसीव इदं विश्वमुपरज्याभासते विषयतया प्रतीयते ॥ ६९ ॥

भगवद्ध्यानपरे मनसि विश्वं दृश्यते तन्मनो मुक्तिहेतुरित्यर्थादुक्तमथ भगवत्पराङ्मुखस्य मनसः देहगेहादावहंममादिवृत्तिमन्मन एव संसारहेतुरिति च दर्शयन् मनोनिमित्तकं संसारनिवृत्तये हरिं भजेत्याह । नाहमिति दशभिः । अहमिति देहे आत्मत्वबुद्धिरूपो भावः ममेति गृहादौ मदीयत्वबुद्धिरूपो भावः पुरुषे न व्यपधीयते न वियुक्तो भवति यावत्तावत् अनादिमान् अनादितः प्रवृत्तः बुद्ध्यादीनां व्यूहः समूहो यस्मिन् संसारः जन्ममरणप्रवाहोऽप्यस्ति ॥ ७० ॥

भाषाटीका ।

श्री नारदजी बोले मनुष्य जिस शरीर से कर्म करता है तिसी लिङ्गशरीर से मन के द्वारा वही पुरुष स्वयं भोगता है दूसरा कोई बीच में व्यवधान नहीं होता है जैसे इस लोक में प्राणी निश्वास लेते हुये पड़े इस शरीर को छोड़के आने पर अपने आत्मा में रखे हुये कर्म फल को अन्य देह से अथवा दूसरे देह से मरणानन्तर भोगता है तैसे ही परलोक में ॥ ६१ ॥

मन ही से मेरे ये सब हैं मैं इनका मालिक हूं ऐसा कहकर उसी कर्म फल को ग्रहण करलेता है तिसी से फिर जन्मादिक होते हैं ॥ ६२ ॥

जैसे ज्ञान कर्म दोनों इन्द्रियों के चेष्टा से चित्त का भान होता है तैसे ही चित्त की अपूर्व वृत्तियों से पूर्वजन्म का कर्म भी जाना जाता है ॥ ६३ ॥

इसी देह से जिसका अनुभव नहीं किया है न देखा है न सुना है तिस पदार्थ की कभी भी प्राप्ति नहीं होती है जो जिस प्रकार का पदार्थ हो सो तैसा मालूम देता है ॥ ६४ ॥

तिस हेतु से हे राजन् ! इस लिङ्ग शरीर वाले जीव का पूर्व जन्मथा ऐसी श्रद्धा करो क्यों कि बिना जाना पदार्थ मन में कभी नहीं आसका है ॥ ६५ ॥

हे राजन् ! तुमारा कल्याण हो मनुष्य का मन ही शान्ति क्रम आदि भावों से मनुष्य के पूर्व जन्म के रूपों को जनाता है तथा होने वाले को जनाता है तथा मोक्ष होने वाले रूपों को जानता है ॥ ६६ ॥

बिना देखी बिना सुनी बातें भी कभी स्वप्नादिक में मन में आती हैं जैसी देखी तैसे देशकाल के व्यतिक्रम से आती जाती है ऐसा जानना चाहिये जैसे नीचे का समुद्र पर्वत पर दीख जाता है ॥ ६७ ॥

इन्द्रियों के विषय में आने वाले सब पदार्थ क्रिया क्रम के अनुरोध से बहुत से आते जाते रहते हैं तिसीसे नाना प्रकार के मन वाले जीव नाना योनि को प्राप्त होते हैं ॥ ६८ ॥

जब जिस का मन सत्त्वगुण में स्थित होता है तब भगवत्संनिकट में पहुंचता है तब सब ही वस्तु का ज्ञान हो जाता है जैसे चन्द्रमा के समीपमात्र राहु के होने से चन्द्रमा में कालापन आजाता है ॥ ६९ ॥

जब पर्यन्त अनादि काल का बना हुआ बुद्धि मन इन्द्रिय समुदायरूप गुणसमूह विद्यमान रहता है तबतक पुरुष का अहङ्कार ममकार नहीं नष्ट होता है ॥ ७० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आपादादावहङ्कारादयभावात् लिङ्गच्छेदमाशङ्क्याह । द्वाभ्याम् । सुषुप्त्यादिषु उपताप इष्टवियोगादिदुःखम् । तेष्वहमिति ज्ञानमहङ्कारो नेहते न प्रकाशते प्राणायनानामिन्द्रियाणां विघातात् । इन्द्रियैरिदं कारणपदवस्तुग्रहणे अहङ्कारः स्फुरति नान्यथेत्यर्थः ॥ ७१ ॥

अर्थे ह्यविद्यमानेऽपि संसृतिर्न [redacted]
ध्यायतो विषयानस्य स्वप्ने [redacted]
एवं पञ्चविधं लिङ्गं त्रिवृत् [redacted]
एष चेतनया युक्तो जीव इत्य [redacted]
अनेन पुरुषो देहानुपादत्ते विमुञ्चति ।
हर्षं शोकं भयं दुःखं सुखं चानेन विन्दति ॥ ७५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपौष्कल्यादसम्पूर्णत्वात्प्राणायनानामिति शेषः । यूनस्तरुणस्य यदेकादशविधमेकादशेन्द्रियैः स्फुटं लिङ्गमहङ्कारणं तन्न दृश्यते गर्भादाविति सतोऽप्यनभिव्यक्तौ दृष्टान्तः कुहाममावास्यायां चन्द्रमसो लिङ्गं रूपमिव ॥ ७२ ॥

तस्मादहङ्कारास्पदस्य स्थूलदेहस्याविच्छेदाद्वस्तुभूतार्थाभावेऽपि संसृतिनिवृत्तिर्नास्तीत्याह । अर्थे हीति ॥ ७३ ॥

यावल्लिङ्गं स्थूलदेहाविच्छेदात्संसारानिवृत्तिरित्येतत्प्रपञ्चयति । एवमिति सार्धैस्त्रिभिः । पञ्चविधं पञ्चतन्मात्रात्मकं त्रिवृत्त्रिगुणम् । षोडशविकारात्मना विस्तृतम् ॥ ७४ ॥ ७५ ॥

अथ स्वप्ने पुरुषं कृत्स्नं कृष्यादन्तं पश्यति च एवं ... त्यादिका ॥ ७३ ॥

एवं प्रश्नस्योत्तरमभिधाय पुनरपि स्मरणाय देहात्मबोधाकारं वदन् देहसम्बन्धस्योत्तरोत्तरदेहसम्बन्धकारणार्थहेतुत्वमाह । एवमिति । पञ्चविधं पञ्चप्रकारं पञ्चभूतात्मकं षोडशविस्तरमेकादशेन्द्रियं तदाश्रयप्राणादिपञ्चकोपेतं त्रिवृत्त्रिगुणात्मकं लिङ्गशरीरमेवं भूतमिति देहाकार उक्तः जीवस्वरूपमाह । एष इति । चेतनया युक्तः एवजानातीति ज्ञानाश्रयतयास्फुटतरमवभासमानोऽहमर्थो जीव इत्यभिधीयत इत्यर्थः ॥ ७४ ॥

अनेन लिङ्गेन युक्तः तदेवात्मीयमवभासमानः स पुरुषः देहान् बहुदेहानुपादत्ते विमुञ्चति तत्कृतहर्षशोकादिकं च विन्दति आगामिसुखविषयं ज्ञानं हर्षः आगामिदुःखविषयं ज्ञानं भयं तत्र देहानुपादत्ते जीव अनेनादीयमानेन रमणीयदेहेन हर्षं सुखं च विन्दत्यनभिमते न तु शोकं विमुञ्चमानेन तु भयं दुःखञ्च विन्दत्युपात्तदेहत्यागस्यानिष्टत्वात् ॥ ७५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किमुत संसारिणो जीवस्य बुद्ध्यादिभ्यो विलक्षणं स्वरूपमपरोक्षं नावभासत इति यतोऽमहमर्थोऽप्यज्ञानादहंबुद्धिविषयत्वेनावभासमानो देहः सुषुप्त्यादौ नावभासत इत्याह । सुप्तीति । उपतापशब्देनातिशयितदुःखसम्भेदो विवक्षितः मृत्युर्मरणं प्रज्वारो ज्वरः उपलक्षणमेतत् ज्वरादिमूर्छे मरणे चेति यावत् एतास्ववस्थासु प्राणायनस्य प्राणाश्रयस्य जीवस्य विघाततः ज्ञानस्यातिसङ्कोचात् सहि ज्ञानसंकोचापरपर्यायस्तद्धर्मी विघातः संभवति तेनाहमिति ज्ञानं नेहते न स्फुरति देहेऽहंबुद्धिर्नास्तीति देहप्रतिपत्त्यभावाद्वित्यर्थः ॥ ७१ ॥

ननु सुषुप्त्यादावपि ज्ञानकर्मोभयेन्द्रियगुणस्य मनसश्च सद्भावादहमिति ज्ञानं कुतो नेहते तत्राह । गर्भ इति । यूनः तरुणस्य स्फुटं यदेकादशविधं लिङ्गं कर्मेन्द्रियज्ञानेन्द्रियमनआत्मकं लिङ्गं व्यापारहेतुभूतं तद्गर्भे बाल्ये अपिशब्दात् सुषुप्त्यादौ चापौष्कल्यादपुष्कलशक्तित्वाच्च दृश्यते नाभिव्यक्तं नष्टप्रायं भवतीत्यर्थः सतोऽप्यनभिव्यक्तौ दृष्टान्तः कुहाममावास्यायां चन्द्रमसो लिङ्गं रूपमिवेति ॥ ७२ ॥

ननु यदि गर्भादौ लिङ्गमेकादशविधमनभिव्यक्तं तर्हि तद्व्यापाराभावात्संसृतिर्न स्यादित्यत्राह । अर्थेति । अनभिव्यक्तशक्तित्वादिन्द्रियाणां तद्व्यापाराभावादर्थे शब्दादिविषये विद्यमानेऽपि शब्दादिविषयानुभवाभावेऽपि विषयान् ध्यायतः वर्तमानसमीपे भूते वदुपचारादेशः विषयध्यानप्रयुक्तवासनाविशिष्टस्येत्यर्थः संसृतिस्तद्रागानुवृत्त्या संसारोऽनुवर्तते यथा स्वाप्नपदार्थानां प्रबोधदशायामविद्यमानत्वेऽपि स्वाप्नार्थः ज्ञानसूचितसुखदुःखाद्यनर्थागमस्तद्वदित्यर्थः यथा च श्रुतिः "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने" इति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु यद्यहं ममेति भावतिरोभावः पुरुषार्थस्तर्हि सुप्त्यादौ तत्सद्भावात्तदनुदयः कथमत्राह । सुप्तीति । सुप्त्यादौ प्राणानामिन्द्रियाणामयनस्य प्रवृत्तिलक्षणस्य विघाततो निरोधादस्मीत्यहमिति ज्ञानं नेहते नाभिव्यज्यते तथापि स्वरूपेन्द्रियेणास्त्येव सुखमहमस्वाप्समित्युत्तरकालीनानुभवदर्शनात् तदभावे परामर्शानुपपत्तेः उपतापः पुत्रादिवियोगदुःखानलज्वालाप्रवेशः मृत्युरपमृत्युरत्र देवदूतैर्नीतस्य किमर्थमानीतोऽयं न यतः स्वस्थानमितिवचनात् प्रत्यानयनदर्शनानुभवात् साक्षाद्देहवियोगलक्षणमरणेऽहमिति ज्ञानं सम्भवेत् प्रज्वारोऽतिरोगावस्था ॥ ७१ ॥

ननु इन्तैवं तर्हि गर्भादेरक्रान्तस्य तत्कालीनसुखदुःखपरामर्शादर्शनादत्राह । गर्भ इति । गर्भे वर्तमानस्य बाल्ये वयसि स्थितस्यायूनः बालस्य पुंसोऽपौष्कल्यादनुपचितावयवत्वात् पञ्च पञ्चज्ञानकर्मभेदेन संख्यातानीन्द्रियाणि मनश्चैकादशविधमेकादशभ्यो विधीयते उत्पाद्यतेऽहंममेति ज्ञानाख्यं लिङ्गं लक्षणं न दृश्यते न ज्ञायते उक्तहेतोरित्यन्वयः यावान् यावच्छरीरस्योपचयस्तावदिन्द्रियाणां पौष्कल्यं तस्मिन्नुपचिते तेषामिति नियमात्तन्निमित्तमहंममेति ज्ञानं तदभावे तदभाव इति गर्भादौ तदभाव इत्यर्थः अस्त्वरूपत्वमात्रे दृष्टान्तमाह । चन्द्रमस इति । यथामावास्यायां चन्द्रमसो लिङ्गं शरीरं न दृश्यते तथेति ॥ ७२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु [illegible] [illegible]विषयाः संस[illegible] [illegible] अपि सन्[illegible] [illegible]ऽप्यविद्यमान [illegible] [illegible] निवर्तते [illegible] [illegible]कानु- रूपे लि[illegible] [illegible]मायत इति [illegible] [illegible]मित्य र्थः स्वप्ने प्रवर्तमानस्य पुंसः प्रबोधावधावेऽनर्थागमो यथा न निवर्तेते तथेति विषयध्यानेन संसारपरम्परा स्यादित्यभिप्रायेणानर्थागम इत्युक्तं चन्द्रबिम्बावरणानां मेघादीनां वाय्वादिसद्भाव एव कारणं प्रत्यक्षसिद्धमिति ज्ञातव्यम् ॥ ७३ ॥

देहात्मबुद्धेः संसारस्य तत्वेन प्रतीतिः कथमित्याशङ्क्य योऽन्यगन्योरिव चिदचितोः संयोगलक्षणसम्पर्कादौपचारिकीयं प्रतीतिरित्यभिप्रेत्य तत्स्वरूपं निरूपयति । एकमिति । एकं लिङ्गं लिङ्गशरीरं षोडशविस्तरं कथं त्रिवृत प्राणेन्द्रियान्तःकरणभेदेन त्रिविधमनेन षोडशविस्तरत्वमवगतं कथं पञ्चविधं त्रिधाभिन्नया पञ्चविधया पञ्च प्राणाः पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणीति पञ्चदशविधं मनसा षोडशविधं तदुक्तं "प्राणेन्द्रियान्तःकरणभेदेन त्रिविधं मतम् । पञ्च पञ्चैव ते सर्वे प्राणा बुद्धीन्द्रियाणि च । कर्मेन्द्रियाणि च तथा तस्मात्पञ्चविधं स्मृतम् । लिङ्गं षोडशकं प्राहुर्मनसा सह तत्पुनः,, । इति एव षोडशविस्तारो देहश्चेतनया युक्तो जीवः [illegible]रित्युच्यते इतिशब्दोऽत्र समाप्तिवचनः ॥ ७४ ॥

अनेन लिङ्गशरीरेण स्थूलदेहानुपादत्ते अनेन स्थूलदेहेन हर्षादिकमाप्नोति ॥ ७५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

चेतनया जीवाख्यचिच्छक्तिविशेषेण जीवो व्यावहारिकः ॥ ७४-७५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

ननु लिङ्गदेहसद्भावे एव परःसहस्राणां स्थूलदेहानां नाशा उद्भवश्च यथा भवति तथा स्थूलदेहसद्भावेऽपि प्रतिसुषुप्ति सूक्ष्मदेहानां नाशं सुषुप्त्यन्ते चोद्भवश्च कथं न ब्रूमस्तत्राह । सुप्तीति द्वाभ्याम् । उपताप इष्टवियोगादिदुःखं सुप्त्यादिषु प्राणानामयनमिन्द्रियेषु सञ्चलनं तस्य विघातात् विघातजन्यादिन्द्रियाणां स्वस्वव्यापारासामर्थ्यात् अहमिति ज्ञानं अहङ्कारः अहममुक इति ज्ञानं नेहते न प्रकाशते तत्र सुषुप्तौ मन आदि सर्वेन्द्रियेषु प्राणसञ्चारणाभावः स्वप्ने बहिर्ज्ञानेन्द्रियेष्वेवेति ज्ञेयम् । मृत्युप्रज्वाराभ्यां जनिते कष्टेऽपि सुप्त्यादिषु यथा पूर्वं विघाताधिक्यं ननु लिङ्गस्याभावः ॥ ७१ ॥

अपौगण्डत्वात् असम्पूर्णत्वात् इन्द्रियायतनानामिति शेषः यूनस्तरुणस्य यदेकादशविधमेकादशेन्द्रियैः स्फुटं लिङ्गदेहमहङ्कारकार्यं तन्न दृश्यते । सतोऽप्यनभिव्यक्तौ दृष्टान्तः । कुहाममावास्यायां चन्द्रमसो लिङ्गं रूपमिव ॥ ७२ ॥

एवं सुषुप्त्यादिषु लिङ्गस्य विघात एव नत्वभावः । ये च सुषुप्तिप्रलययोर्लिङ्गस्य प्रकृतौ लयादभावमाहुस्तन्मतेऽपि जीवस्य तदा न मुक्तिः किन्तु संसार एवेति सदृष्टान्तमाह । [illegible] लिङ्गशरीरे विषयध्यानादनिवृत्तस्य पुंसः स्वप्ने विषयाभावेऽपि विषय[illegible]रूपस्यानर्थस्य यथा आगमनं तथैव सुषुप्तौ लि[illegible] येऽप्य अविद्या तत्संस्काराणामपगमात् न मुक्तिः किन्तु संसार एवेत्यर्थः ॥ ७३ ॥

लिङ्गशरीरमेव किं तत्राह । एकमिति । पञ्चविधं पञ्चप्राण[illegible] विधा विद्धत्यद्विर्णा कुर्वन्तो यत्र तत् त्रिवृत् त्रिगुणं षो[illegible] शविकारात्मना विस्तृतं जीवो लिङ्गदेहः ॥ ७४—७५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

देहे ममत्वोऽहं वृत्तेः स्वप्नादिषु सूक्ष्मं रूपमाह । सुप्तीति द्वाभ्याम् । यथा कुहाममावास्यायां चन्द्रमसो लिङ्गं शरीरं गर्भे बाल्ये च यूनो लिङ्गं शूरत्वादि अपौगण्डत्वाच्च दृश्यते तथा प्राणायनानामिन्द्रियाणां विघातात् लयात् सुषुप्त्यादिषु अहमिति ज्ञानं देहात्माभिमानरूपमनोवृत्तिरेकादशत्रिधम् अहं देहरूप एव मन्ताश्रोतेत्याद्येकादशभेदवत् नेहते प्रकटरूपेण न प्रकाशते इति द्वयोरन्वयः ॥ ७१ ॥ ७२ ॥

एवं प्रतिपादिते देहात्माभिमाने आत्मनो देहरूपत्वाभावादविद्यमानेऽपि तन्निमित्ता संसृतिर्जन्ममरणप्रवाहो न निवर्तते अस्य मनुष्यत्वेन सतः स्वप्ने विषयान् अनात्मभूतान् मृगादीन् आत्मत्वेन ध्यायतः अनर्थागमः व्याघ्रादिभ्यो वधादिरूपो यथा न निवर्तते तद्वत् ॥ ७३ ॥

जन्ममरणरूपां संसृतिं प्रपञ्चयितुं तदुपयोगिभूतं लिङ्गशरीरं वर्णयति । त्रिवृत् त्रिगुणमयमेकादशेन्द्रियाणि पञ्चप्राणा इत्येवं षोडशविस्तृतं पञ्चविधं पञ्चतन्मात्रात्मकं तदित्थमेकविंशतितत्वात्मकम् प्राणानामेकत्वविवक्षया सप्तदशतत्वात्मकं प्राणस्य स्पर्शतन्मात्रेऽन्तर्भावात् षोडशतत्वात्मकं लिङ्गं लिङ्गशरीरमित्यभिधीयते चेतनया ज्ञातृत्वलक्षणया युक्तः स्वयमपि ज्ञानस्वरूपः एव जीवः कर्ता भोक्ता अभिधीयते जीवस्य लिङ्गशरीरे आत्मत्वाभिमानाल्लिङ्गशरीरस्यापि जीवेति क्वचित्संज्ञास्ति ॥७४॥

संसृतिं प्रपञ्चयति अनेन सूक्ष्मेण लिङ्गदेहेन पुरुषो जावः देहान् स्थूलान् उपादत्ते विमुञ्चति हर्षादिकं चानेन विन्दति अनेन जीवस्य कर्तृत्वं भोक्तृत्वं सूक्ष्मदेहस्य कारणत्वं स्थूलदेहस्य हर्षादेश्च कर्मभूतस्यायतनत्वं भोग्यत्वं च यथायथमुक्तम् ॥ ७५ ॥

भाषाटीका

सुषुप्तिके समय मूर्छा के समय अतिचिन्ता के समय इन्द्रियों के व्याकुल हो जाने से मै हूं मेरा है, ऐसा ज्ञान नहीं होता है ज्वर मे मरणमे भी नहीं होता है ॥ ७१ ॥

गर्भस्थ जन्तु का बालक का एकादश इन्द्रियों के विषयों का भान नहीं होता है क्यों कि उस समयमे इन्द्रिय अति दुर्बल रहती हैं युवा अवस्था मे उसीको सब ज्ञान होता है जैसे कि अमावसको चन्द्रमा रहकर भी नहीं दीखता है ॥ ७२ ॥

विषयों के ध्यान करने से इस पुरुषको कुछविद्यमान नहीं है तो भी संसार निवृत्त नहीं होता है जैसे की स्वप्न मे झूठा ही अनर्थ दुःखदायक होता है ॥ ७३ ॥

यथा तृणजलूकैवं नोपयात्यपयाति च ।
न त्यजेन्म्रियमाणोऽपि प्रा [redacted]
यावदन्यं न विन्देत व्यवधा [redacted]
मन एव मनुष्येन्द्र! भूतानां [redacted]
यदाक्षैश्चरितान् ध्यायन् कर्माण्याचिनुतेऽसकृत् ।
सति कर्मण्यविद्यायां बन्धः कर्मण्यनात्मनः ॥ ७८ ॥
अतस्तदपवादार्थं भज सर्वात्मना हरिम् ।
पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ॥ ७९ ॥
(भक्तिः कृष्णे दया जीवेष्वकुण्ठज्ञानमात्मनि ।
यदि स्यादात्मनो भूयादपवर्गस्तु संसृतेः ॥ ० ॥

भाषाटीका ।

इसप्रकार से पञ्चतन्मात्रा एकादश इंद्रिय सहित जो मन है सोई त्रिगुण मय विस्तृत लिङ्ग देह है जोतिस के साथ युक्त चेतना से सहित आत्मा सो जीव संज्ञक है ॥ ७४ ॥

इसी लिङ्ग देहसे पुरुष स्थूल शरीरों को धारण करता है और छोड़ता है इसीसे हर्षशोक भय दुःख सुखको प्राप्त होता है ॥ ७५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेकं देहं विसृज्य देहान्तरप्रवेशात्पूर्वं विदेहता स्यादेवेत्यत आह । यथेति । नापयाति पूर्वतृणस्यात्यागात् अपयाति च तृणान्तरधारणात् । तथा प्राग्देहाभिमतिं न त्यजेन्म्रियमाणोऽपि ॥ ७६ ॥

अन्यं देहम् कर्मणा प्राग्देहारम्भकाणां व्यवधानेन विच्छेदेन समाप्त्या प्रकरणार्थमुपसंहरति । मन एवेति । भवभावनं संसारहेतुः ॥ ७७ ॥

कथं सति तदाह । यदेति । चरितानुपभुक्तान् यतः कर्मणि सति । नन्वसङ्गस्य कुतः कर्म तत्राह । अविद्यायां सत्यामनात्मनो देहादेः कर्मणि बन्धो भवति ॥ ७८ ॥

विश्वस्थित्यादयो यतो हरेर्भवन्ति ॥ ७९ ॥

हंसयोर्जीवेश्वरयोः ॥ ८० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अभिहितमेवाह । यथेति । यथेयं प्रसिद्धा तृणजलूका । स्वावष्टम्भतृणं हित्वा नोपयाति तृणान्तरं प्रति न गच्छति किन्तु तदेव तृणमुपयाति दृढतरं संश्लिष्यति एवं म्रियमाणोऽपि जनः मरणे प्राग्देहाभिमतिं न त्यजतीत्यर्थः नापयात्यपयाति चेति पाठे यथैव दैववशादपयाति मनसा त्यक्तुं नेच्छति ॥ ७६ ॥

देहाभिमानपरित्यागस्यावधिमाह । यावदिति । कर्मणा व्यवधानेन कर्मभिस्तिरोधानेन यावद्देहादन्यमात्मानं न विन्देत तावत्त्यजेदित्यर्थः प्रकरणार्थमुपसंहरति । मन इति हे मनुष्येन्द्र ! भूतानां भवभावनं जन्म हेतुर्मन एव ॥ ७७ ॥

तदेवोपपादयति । अक्षैरिन्द्रियैश्चरितान् पूर्वमनुभुक्तान् विषयान् येन मनसा ध्यायन् कर्माण्यसकृदाचिनुते करोति सति कर्मण्यविद्याया बन्धः अविद्याया इति पञ्चमी कर्मणि सति तत्कृतदेहनाहङ्कारममरूपाविद्याया आत्मनो बन्धः स्यात्सत्यविद्यायां बन्धः कर्मकृतः कर्म च विषयानुभवहेतुः अविद्यया कर्म कर्मणा चाविद्येत्यनादिः प्रवाह इत्यर्थः ॥ ७८ ॥

तन्मोचनोपायमाह । अत इति । तस्य देहविलक्षणस्य ज्ञानात्मकस्य आत्मनः अवबोधार्थं सर्वात्मना करणत्रयेण हरिं भगवन्तं भजस्व आत्मापरोक्षमपि भगवत्प्रसादादेव भवतीति भावः कथम्भूतो जानीयात्तत्राह । विश्वं चिदचिदात्मकं जगत्तदात्मकं पश्यन् विश्वस्य तदात्मकत्वे हेतुं वदन् हरिं विशिनष्टि । यतो हरेर्हेतोः विश्वस्य स्थितिरप्ययोत्पत्त्याख्यामी भवन्ति हरेर्विश्वस्य स्थित्यादिकारणत्वात्तदात्मकं विश्वं पश्यतीत्यर्थः स्थित्यादीनां तदात्मकत्वे हेतुत्वं श्रुतं "सर्वं खल्विदं ब्रह्म तज्जलानिति" ॥ ७९ ॥

मध्यायमुपसंहरति मुनिः । भागवतानां मध्ये मुख्यः भगवान् नारदो हंसयोर्जीवपरयोर्गति स्वरूपं प्रदर्श्य उपदिश्य नृपं प्राचीनबर्हिषमामन्त्र्यानुज्ञाप्य ततो ब्रह्मलोकमगात् ॥ ८० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु यदानेन संसारी स्थूलदेहानुपादत्ते तदा हर्षादिकं विन्दते यदा तान्मुञ्चति तदा निवृत्तहर्षादित्वेन मुक्तिः स्यादित्यत आह । यथेति । तृणजलूका कीटविशेषः यावदन्यतृणं न विन्देत तावन्नोपयाति यावद्विन्दते तावदेवापयाति पूर्वं गृहीतं विसृज्य पश्चात्तृणान्तरं यथा याति तथायं जनो म्रियमाणोऽपि पूर्वदेहाभिमतिं नत्यजेद्देहान्तरं प्राप्य पूर्वं त्यजतीत्यर्थः किमिति नादित नत्यजतीति तत्राह । व्यवधानेनेति । कर्मणां प्राचीनानां व्यव-

अहं [illegible]भूते [illegible]या । [illegible]

[illegible] भूतं सर्वत्र[illegible]ः ॥ ० ॥)

[illegible] उवाच ॥

[illegible]नारदो हंसयोर्गतिम् ।

प्रदक्ष्य [illegible]मामन्त्र्य सिद्धलोकं ततोऽगमत् ॥ ८० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

[illegible]नेन विज्ञकफलदातृत्वेन हेतुना [illegible] पूर्वेषां कर्मणां सत्येन भगवत्प्रसादमन्तरेण विनाशानुपपत्तेः सर्वदेहवियोगासम्भवेन मुच्यमुच्य इति भावः ॥ ७६ ॥

[illegible]दर्शनेन जातया विरक्त्या कर्माकरणेन [illegible]देहार-म्भककर्माभावेन देहाभावाविर्भावोपपत्तिरिति तत्राह। मन एवेति। मनः [illegible]रितं कर्मध्यायंस्तदनुसारेणासकृत् कर्मणा-चिनुते करोतीति [illegible] एव [illegible] भवं संसारं जन्म वा भावयति उत्पादयतीति भवभावनं मनः प्रधानत्वद्योत-नार्थ एवशब्दः "न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्" इति स्मृतेः ॥ ७७ ॥

अविद्यायां विषयेच्छायां सत्यां कर्म भवति तस्मिन्सत्या-त्मनो जीवस्य [illegible]ः "कर्मणः कर्महेतुक" इति [illegible]-[illegible]र्थे कर्मनिवृत्त्यर्थं [illegible] पुत्रादिस्नेहत्यागेन हरिं भजे-त्यन्वयः एवं जीवं [illegible]तीति [illegible]रेच्छायां वा तस्येच्छाया [illegible] न [illegible]मीति ॥ ७८ ॥

भजनं नाम गुणोपसंहारस्तदर्थं तद्ध्यानमाह। [illegible]मिति। [illegible] हरेर्विश्वस्य स्थित्यादयः [illegible] तद्धान्तं तद-भिन्न[illegible] [illegible]मिति पूर्वेणान्वयः तत्तद्विकार्युपाधि-योग्यानां गुणानां स्थित्यादावन्तर्भावस्तदर्थं स्थित्यादि-ग्रहणम् ॥ ७९ ॥

([illegible]पासीनस्य कदा साधनसामग्र्या मुक्तिः स्यादि-[illegible] । भक्तिरिति । कृष्णे पूर्णानन्दे [illegible]परोक्षज्ञानजननी [illegible] [illegible]मेतत् [illegible]गुरुमारभ्य [illegible] [illegible]मेषु तत्त-द्योग्यतानुसारेण निष्कपटा भक्तिश्च जीवेषु [illegible]रेषु यावि-[illegible] द्रवीभावता दया दयदानगतिशोषणेष्विति धातोः [illegible] [illegible]पणेहतुर्हेयश्चात्मनि [illegible]रूपेऽकुण्ठज्ञानं हरि-दर्शनानन्तरं देहादिव्यतिरेकेण ज्ञानानन्दरूपोऽहमित्यभ्यवधानेन निरन्तरानुभवलक्षणमितीयं साधनसामग्री यदि यदा स्यात्तदा [illegible]व्यवधानमन्तरेणात्मनस्तव संसारादपवर्गः क्रिया साध्य-फलावाप्तिः स्यादित्यन्वयः ।

देहादिव्यतिरेकेण चिद्रूपोऽहमिति स्फुटम् ।
सदैवानुभवो भक्तिर्विष्णौ तद्दर्शनादनु ।
यस्यासौ मुच्यते क्षिप्रं संसारान्नात्र संशयः ।

इत्यनेन हेतुनापि तु शब्दसूचितेनोक्त एवार्थो नाशितार्थः ॥ ० ॥

ननु प्रथमभाविवीरा[illegible]नन्तरेण भजनादिना कथं मुच्यमुच्य इत्यतः सिद्धावलोकनन्यायेन तदाह । अहमिति । अहं [illegible]गादिफलं [illegible]फलक[illegible]पाति भूतमुत्पन्न-मिदं सर्वं जगदन्यथाऽनित्यं कथमिव [illegible]पदार्थसमम्

नश्वरत्वात्स्वप्नसमं न तु वीथमिथ[illegible]त्वात् संसारस्यमिदं सर्वं भविष्यदयाकृया यतः अतः आहुः स्वप्नसमं प्राहा जगदिदं (१) मृषेति वचनाच्च मिथ्यात्वं प्रपञ्चस्येति अस्तु भूतमनि-त्यत्वात् स्वप्नसमं भविष्यच्च स्वप्नसमं न स्यादित्याशङ्क्य यथा भूतमनित्यत्वात् स्वप्नसमं तथा भविष्यच्च सर्वमनित्यत्वेन स्वप्नसममित्याह । भूतमिति । स्वप्नशब्दस्य कथं स्वप्नार्थत्वमप-र्यायत्वाद्वितीयमाशङ्क्य "सुषुप्तिस्वप्नयोश्चैव स्वर्गव्योम्नोस्तथैव च । अन्योऽन्यनामता ज्ञेया मनोबुद्ध्योस्तथैव च" इत्यनेन परिहृतं-व्येति सर्वमनित्यं चेत्सत्यं वस्तु किं तदाह । सर्व रहो रह इति सर्वं रहः सर्वेषामप्रतिवादेषु रहस्यं गुरूपदेशात्प्राग्रह इति स्वभक्तद्वेषात् स्वयं च निर्दोषतया सदा स्थितं रहो ब्रह्म तदुक्तम् ।

रहो ब्रह्म तथा [illegible]ः स्वःसत्यमिति गीयत इति ।

नित्यमिदोष ब्रह्मेतरत्सर्वमनित्यमसारं चेति विज्ञानं वैराग्यमिति भावः विरक्त्या भक्तिस्तया गुणोपसंहारलक्षणमुपासनं तेनापरो-क्षज्ञानं तेन श्रीनारायणप्रसादस्तेन स्वयोग्यमुक्तिरिति क्रममु-[illegible] वैराग्यस्य सर्वत्रानुसन्धानार्थं पश्चादप्युक्तमिति ज्ञातव्यम् ०॥)

उपसंहरति । भागवतमुख्य इति । हंसयोर्जीवपरमात्मनोर्गतिं सच्चिदानन्दलक्षणां हरेर्जगदुत्पत्त्यादिलक्षणां जीवस्य तदधीनत्वा-दिलक्षणां वा जिज्ञासितेषु नारदस्य प्राधान्यद्योतनाय प्रथमपा-दस्याक्षरयोजनम् ॥ ८० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथेति सार्द्धकम् ॥ ७७ ॥

मन इत्यर्द्धकम् ॥ ७८ ॥

अविद्यायां सत्यामिति यथा सम्मोहितो जीव इति न्यायेन तत्कुमनयिम् अतस्तदपवादार्थमित्यत्र भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य इत्यादिकमुपजीव्यम् ॥ ७६-८१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

देहत्यागदेहान्तरप्रवेशयोर्मध्यक्षणेऽप्यभिमानाविच्छेदमाह ।

यथेति । नापयाति पूर्वतृणस्यात्यागात् अपयाति च तृणान्तर-धारणात् कर्मणामुत्तरदेहारम्भकाणां व्यवधानेन विशेषतो धारणेन ॥ ७६ ॥

प्रकरणमुपसंहरति । मन एवेति । भवभावनं संसारहेतुः ॥ ७७ ॥

केन प्रकारेणेत्यत आह । यदेति । चरितान् उपभुक्तान् पदार्थान् यतः कर्माणि एकस्मिन्नपि बीजरूपे स्थिते सति अविद्यायां सत्यामनात्मनो देहादेः कर्माणि बन्धो भवति ॥ ७८—७६ ॥

हंसयोर्जीवेश्वरयोः ॥ ८० ॥

(१) मृषा यत [illegible] [illegible] ।

प्राचीनबर्हीं राजर्षिः प्रजासर्ग[illegible] ।
आदिश्य पुत्रानगमत्तपसे [illegible]
तत्रैकाग्रमना धीरो गोविन्द[illegible]
विमुक्तसङ्गोऽनुभजन्भक्त्या [illegible]
एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणाऽनघ ! ।
यः श्रावयेद्यः शृणुयात् स लिङ्गेन विमुच्यते ॥ ८[illegible]
एतन्मुकुन्दयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचम् ।
यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबन्धः ॥ ८४ ॥
अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतम् ।
एवं स्त्रियाश्रमः पुंसश्छिन्नोऽमुत्र च संशयः ॥ ८५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पारमहंस्यां संहितायां वैया-
सिक्यां श्रीनारदप्राचीनबर्हिःसम्वादे पुरञ्जनोपाख्याने
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लिङ्गे चिरकालस्थायिनि अहम्बुद्धौ सत्यां विद्वानः स्थूलदेहे आत्मत्वबुद्धेरनुवृत्तिमाह । यथेति । इहं लोके प्रसिद्धा तृणजलूका यदा तृणान्तरं गच्छति तदा तद्ग्रहणं विना पूर्वतृणं नोपयाति तद्गृहीत्वा तु अपयाति एवमुत्तरदेहे आत्मबुद्धिं विना म्रियमाणोऽपि प्राग्देहाभिमानि पूर्वशरीरे आत्मत्वबुद्धिं न त्यजेन्नत्यजति ॥ ७८ ॥

देहात्मत्वानुवृत्तेरवधिमाह । यावदिति । ध्यानेन देहात्मत्वबुद्धिवृत्तिविच्छेदात्मकेन कर्मणा वेदान्तश्रवणादिभिश्च ॥ अन्यं देहेन्द्रियादिविलक्षणमात्मतत्त्वं यावन्न वेद तावन्न त्यजति फलितमर्थमाह । देहात्मत्वबुद्ध्यादिनानावृत्तिमन्मन एव भवं जन्ममरणप्रवाहरूपं संसारं भावयतीति तत् ॥ ७७ ॥

भवमेवोपपादयति । यदेति । अविद्यायाम् "अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते । यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्वगा" इति स्मृतेः । अनादितः प्रवृत्ते अविद्यासंज्ञके कर्मणि सत्यपि चरिताम् । पूर्वविषयभोगान् ध्यायन् मनोरिन्द्रियैर्वन्धनभूतानि पुनःकर्माण्येवाचिनुते असकृत् जन्मनि जन्मनि न तु महाविकर्मकर्मरूपामविद्यां निराकर्तुं यतते यदा तदा अनात्मनः देहात्मबुद्धेः कर्मणि बन्धः पुनःपुनर्जन्ममरणलक्षणः संसार इत्यर्थः ॥ ७८ ॥

तदपवादार्थं जन्ममरणप्रवाहरूपबन्धनिराकरणार्थमित्यर्थः ७९
हंसयोः जीवब्रह्मणोः ॥ ८०-८१-८२ ॥

भाषा टीका ।

जिस प्रकार से जोंक एक तृण में से दूसरे तृणमें आता भी है नहीं भी तैसे ही मरनेपर भी पूर्वके देह की अभिमति को नहीं छोड़ता है ॥ ७६ ॥

जब पर्यन्त आत्मकर्म के ध्यान होने से अथवा पूर्वकर्म के समान होने से दूसरे [illegible] जान होता है ह मनुष्येन्द्र ! सब प्राणियों का मन ही संसार का कारण है ॥ ७७ ॥

जब अविद्या में रहकर आत्मस्वरूप को भूल जाता है तब शुभाशुभ कर्मों को करता है निरन्तर कर्म के करने से उसका भोग होता है फिर इन्द्रियों से किये कर्मों को ध्यान करता है फिर उसको बन्धन होता है ॥ ७८ ॥

जिन भगवान् से जगत्की उत्पत्ति स्थिति प्रलय होता है तिनको सब जगत् में व्यापक समझकर सब प्रकार से उनका भजन करो तब तुम्हारा संसार निवृत्त होगा ॥ ७९ ॥

(श्रीकृष्ण में भक्ति जीवों में दया आत्मा में अबाधित ज्ञान यदि हो जाय तो संसार से मुक्त होजाय ॥ ० ॥

प्रपञ्च जो वस्तु है सो स्वप्न के तुल्य नश्वर है भूतकाल भविष्यत्काल वर्तमान काल में भी जो दीखता है सो स्वप्न के तुल्य है ॥ ० ॥)

मैत्रेयजी बोले सब भागवतों में मुख्य भगवान् नारदजी जीवात्मा परमात्मा की स्थिति को दिखाकर राजा से सम्मति लेकर सिद्धों के स्थान को चले गये ॥ ८० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुत्रानादिश्येति । पुत्रानागमादेशं मन्त्रिणामग्रे कथयित्वा । कापिलाश्रमं गङ्गासागरसङ्गमम् ॥ ८१ ॥ ८२ ॥ ८३ ॥

आत्मशौचं मनःशोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलदम् ॥ ८४ ॥

स्त्री बुद्धिस्तत्सहितस्याश्रमो लिङ्गदेहस्तस्य छिन्नो भवति अमुत्र कर्मफलभोगः कथमिति संशयश्छिन्नः ॥ ८५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका [illegible]

ततः प्राचीनबर्हिः [illegible]

[illegible]

[illegible] तेन [illegible]

[illegible] तत्सा [illegible] इत्यनेन तत्सालोक्यता-सिद्धि [illegible] तेन भगवता समानात्मतां समानता तत्साधर्म्यमित्यर्थः अथ श्रावणादिफलमाह । एतदिति । हेऽनघ ! देवर्षिणा गीतमेतदध्यात्मपारोक्ष्यं यः पुरुषः श्रावयेच्छृणुयाद्वा बद्धिङ्गेन संसृष्टिहेतुना मनसा दुःखेन हेतुना अन्येन वा विमुच्यतं मुक्तो भवेदित्यर्थः ॥ ८२॥ ८३ ॥

एतदध्यात्मपारोक्ष्यं मुकुन्दयशसा युक्तमितिशेषः अत एव भुवनं पुनानं पावनीकुर्वाणं नारदमुखाद्विनिर्गलितमात्मशोधं मनःशोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलदं कीर्त्यमानं कथ्यमानं यः पुमानधिगच्छति स पुमान्निरस्तसमस्तबन्धः अस्मिन्भवे संसारे न भ्रमति ॥ ८४ ॥

उक्तार्थमुपसंहरति । अद्भुतमिदमध्यात्मपारोक्ष्यमध्यात्मतत्त्वस्य पारोक्ष्यं परोक्षवादो यस्मिंस्तत एवाद्भुतमाश्चर्यमध्यात्मस्य पारोक्ष्यं दुःशकमित्यद्भुतमित्यर्थः मया तुभ्यमभिहितं तथा पुंसः स्त्रैणस्य स्त्रियाश्रमः गृहस्थाश्रमत्वेन कथितः संसारश्च कथितः अमुत्र परलोके संशयः फलानुभवविषयो भवदीयः संशयश्च छिन्नः निरस्तः ॥ ८५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"सर्गः स्वभावानर्मोक्तिर्निश्रेयसाध्यायसुधिषु" इत्यभिधानात् प्रजानां स्वभावविद्याधर्मादिपुरुषार्थरक्षणे तत्परिपन्थिनिरासेनेति शेषः ॥ ८१ ॥

विमुक्तसङ्गो निष्कामस्तस्य हरेः साम्यतां निर्दोषत्वलक्षणाम् ॥ ८२ ॥

एतस्येतिहासस्याभ्यासेन किं फलमुदेति येनायमवश्यं ज्ञातव्यः स्यादन्यथा नारदेन बालक्रीडाकथावन्निर्मोदार्थमुक्तकथानुकेरिति परीक्षितो हार्दं चोद्यं शुकः परिहरतीत्याह । एतदिति । अधिकात्मनः परमात्मनोऽभिन्नात्मनः प्रत्यक्षसिद्धस्य जीवात्मनो वा स्वरूपं पारोक्ष्यं परोक्षतया शब्दलक्षणतया गीतं वर्णितं न साक्षादुक्तं देवप्रियत्वात् "परोक्षप्रिया इव हि देवा" इति श्रुतेरित्यर्थः देवर्षिणेत्यनेन नारदस्य विनोदकथाकथनस्वभावो नास्तीति ध्वनयति लिङ्गेन शरीरेण मुच्यते रहितो भवतीत्यनेन तृतीयावचनेन पूर्वमपि स्वरूपाङ्गिनमिति ध्वनयति स्वरूपभूतदेहेन सहस्वैव गच्छतीति च "सोऽनामन्दाद्रिमुक्त आनन्दी भवति" इति श्रुतेः ॥ ८३ ॥

न केवलमिदं प्राचीनबर्हिषः प्रयोजनं किन्तु सर्वेषामपीति भावेन पुनरुक्तं विशिनष्टि । एतदिति । मुकुन्दस्य यशसा सहितमेतत्पुरञ्जनोपाख्यानमात्मशोधमात्मनो मनसः शुचिता यस्मात्तथा पारमेष्ठ्यं परमेष्ठिनः सर्वोत्तमस्य हरेः इतो परमस्थानमधिगच्छति गुरोः सकाशाज्जानाति भवे संसारे यस्मिन्न्

अन्योऽपि जानाति अधिगच्छति वा अनेन संसारेण एवं न तु बद्ध्य इति मन्वादाकूतं निवारयति मुच्येति ॥ ८४ ॥

[illegible] मिदमनेनैकेन मैत्रेयेणाधिगतत्वादेतावदध्यात्मविद्[illegible] सिद्धिरिति भावेनाह । अध्यात्मेति । मया मैत्रेयनाम्ना गद्[illegible] श्रुतमिदं नारदेन प्राचीनबर्हिषे उपदिष्टमध्यात्मपारोक्ष्य[illegible] कात् शुकमुखादधीतमेव तवोपदिष्टमत एव त्वयाऽप्यवधि[illegible] धीत्याप्रसज्जनीयमिति शेषः नन्वेतदधिगमेन यदि वेदविषयो[illegible] संशयविच्छेदः स्यात्तर्ह्यधिगन्तव्यान्तराभावेन धन्यः स्यामतः क[illegible] निर्वृतः स्यादत्आह । एवमिति । यः पुंसो जिज्ञासोस्तव्या आश्र[illegible] यशिवेदी ग्रन्थयः संशयोऽध्यात्मस्वरूपे छिन्न एवानुष्ठानविद्या[illegible] विषयरूपे च संशयो मम छिन्नोऽत्र एव तथापि छिन्नः स्या[illegible] दिति शेषः अनेन पुरञ्जनोपाख्यानस्य वेदविषयत्वप्रतीतेस्तद[illegible] तिभक्त्या ध्येयमिति सिद्धं यद्वा एतदध्यात्मपारोक्ष्यमधिग[illegible] यथा एवं मयीचाधिगता एकविषयात् ततः किं फलमत्आह आश्रय इति । पुंस आश्रय इहामुत्र च संशयच्छिन्नो भवती[illegible] त्येतत्फलं भवतीत्यर्थः अतिगहनं जलनिधिवत्क्षुराग्रमिव दुर्म[illegible] निशितं तीक्ष्णं पुरञ्जनोपाख्यानं व्याख्यानच्छलेन मयावतारि तरणि[illegible] रिव अपोमतल्पं प्रवणात्मज इव पयोराशौ क्षुर (१) धारामिव निगदतोतारितमध्यात्मपारोक्ष्यम् ॥ ८५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्साम्यताम् तत्सारूप्यम् ॥ ८२-८३ ॥

मुकुन्दयशसा । तस्मिन्नहन्मुखरिता इत्यादिना लक्षणेन तद्यशो महिम्ना ॥ ८४ ॥

स्त्रियाश्रय इति छान्दस ह्रस्वादेशः ॥ ८५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पुत्राणामादिश्येति पुत्राणामादेशं मन्त्रिणामग्रे कथयित्वा पुत्राणां तदा तत्रानागमनात् ॥ ८१ ॥

साम्यतां साम्यं सारूप्यम् ॥ ८२ ॥

एतदुपाख्यानं मुकुन्दयशसा कर्मादिभ्यो भक्त्युत्कर्षबोधनया तस्मिन्नहन्मुखरिता मधुभिच्चरित्रेत्यादिना व्यञ्जितेन वा पारमेष्ठ्यं परमेष्ठिनः कर्म परमेष्ठिनाप्येतन्नित्यं कीर्त्यते इत्यर्थः तरुतं वा ॥ ८३—८४ ॥

स्त्री बुद्धिस्तत्सहितस्याश्रयोऽहङ्कारः पक्षे गार्हस्थ्यलक्षणः अमुत्र कर्मफलभोगः कथमिति संशयश्च छिन्नः ॥ ८५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्थे एकोनत्रिंशः सङ्गतः सङ्गतः सताम् ॥ २९ ॥

---

(१) क्षुरधारातुल्या इत्यादिमूलादि [illegible] पर्यन्तं सुधियः केचित् ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

... विमुच्यते लिङ्गदेहं हित्वा भगवत्साम्यं प्राप्नोति ... स्वरूपात्मा युक्तम् । अत एव भुवनं पुनाति विश्वं पवि- ...मात्मशीर्षं मनःशोधकम् परमेष्ठी भव परमपदं ... वासुदेवस्तत्प्रापकम् यः कीर्त्यमानमधिगच्छति स ... संसारे न भ्रमति किन्तु मुक्तसमस्तबन्धो भवति ॥ ८४ ॥

अध्यात्मस्यात्मतत्त्वस्य पारोक्ष्यं गोप्यतया वर्णनं यस्मिंस्तत् पुरञ्जनोपाख्यानं मयाधिगतं गुरुमुखात् एवमेव श्रुतं तया भया बुद्ध्या हेतुभूतया पुंसो जीवस्य भ्रमः पुनः पुनर्जन्मम-रणावर्त्तनलक्षणः अभिगत इति फलितोऽर्थः अतः यथोपदेशं सर्वं वर्णितमिति भावः अमुत्र कर्मफलभोगः कथमिति संशयश्च छिन्नः ॥ ८५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकोनत्रिंशाध्यायार्थप्रकाशः ॥ २९ ॥

भावार्थदीपिका ।

प्राचीनबर्हि राजर्षि भी अपने पुत्रों को प्रजों का ऐश्वर्य समर्पण कर के तपस्या करने को कपिल जी के आश्रम को गये ॥ ८१ ॥

[redacted] ... संसार को पवित्र करते जाता है नारदजी के मुख से निकला है आत्मा का पवित्र कर ने वाला है इस के कथन करने से जो सुनता है वो परमपद को प्राप्त होता है सब बन्धन से छूट जाता है इस संसार में नहीं भ्रमता है ॥ ८४ ॥

इति अद्भुत अध्यात्मपारोक्ष्य को मैंने अध्ययन किया है इस प्रकार से जो बुद्धि से आत्मा का बन्धन है परलोक मे ऐसा कर्मफल भोगना होता है उसका संशय छूट गया है ॥ ८५ ॥

इति श्रीमद्भागवत चतुर्थस्कन्ध उन्तीसवां अध्याय
का भाषानुवाद ब्रह्मचारिकृत
समाप्त ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे एकोनत्रिंशोऽध्यायः समाप्तः ॥ २९ ॥

[illegible]ध्यायः ॥

॥ विदुर उवाच ॥

ये त्वयाऽभिहिता ब्रह्मन्! सुताः प्राचीनबर्हिषः ।
ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम् ॥ १ ॥
किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः ।
आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ॥ २ ॥

॥ मैत्रेय उवाच ॥

प्रचेतसोऽन्तरुदधौ पितुरादेशकारिणः ।
जपयज्ञेन तपसा पुरञ्जनमतोषयन् ॥ ३ ॥
दशवर्षसहस्रान्ते पुरुषस्तु सनातनः ।
तेषामाविरभूत्कृच्छ्रं शान्तेन शमयन् रुचा ॥ ४ ॥
सुपर्णस्कन्धमारूढो मेरुशृङ्गमिवाम्बुदः ।
पीतवासा मणिग्रीवः कुर्वन् वितिमिरा दिशः ॥ ५ ॥
काशिष्णुना कनकवर्णविभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः ।
अष्टायुधैरनुचरैर्मुनिभिः सुरेन्द्रैरासेवितो गरुडकिन्नरगीतकीर्तिः ॥ ६ ॥
पीनायताष्टभुजमण्डलमध्यलक्ष्म्या स्पर्धच्छ्रिया परिवृतो वनमालयाद्यः ।
बर्हिष्मतः पुरुष आह सुतान् प्रपन्नान् पर्जन्यनादरुतया सघृणावलोकः ॥ ७ ॥

॥ श्रीभगवानुवाच ॥

वरं वृणीध्वं भद्रं वो यूयं मे नृपनन्दनाः! ।
सौहार्देनापृथग्धर्मास्तुष्टोऽहं सौहृदेन वः ॥ ८ ॥
योऽनुस्मरति सन्ध्यायां युष्माननुदिनं नरः ।
तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदम् ॥ ९ ॥
ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः ।
स्तुवन्त्यहं कामवरान् दास्ये प्रज्ञां च शोभनाम् ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रसङ्गात्स्वयंभोः प्रोक्तं वृत्तं प्राचीनबर्हिषः ।
वर्ण्यते च पुनस्त्रिंश्यां प्रस्तुतं तत्प्रचेतसाम् ॥ १ ॥
तत्र त्रिंशे तपस्तुष्टाद्विष्णोर्लब्धवरास्ततः ।
आगत्य वार्क्षीमुद्वाह्य राज्यं चक्रुरितीर्यते ॥ २ ॥

हरिं प्रतोष्य कां सिद्धिमापुः ॥ १ ॥

हे बार्हस्पत्य ! कस्यां चिद्विद्यायां बृहस्पतेर्मैत्रेयः शिष्य इति ज्ञातव्यम् ते यदृच्छया गिरिशं प्राप्य तस्यैव कैवल्यनाथप्रियस्य गिरिशस्य पार्श्ववर्तिनस्तदनुगृहीताः सन्तो नूनं परं मोक्षं प्रापुरेव ततः पूर्वं त्विहाथ [illegible] किं प्रापुः ॥ २ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

[illegible]गीतजपरूपेण यज्ञेन तपसा च पुरञ्जनं हरिम् ॥ ३ ॥
[illegible]तां कृच्छ्रं तपः क्लेशं दृष्ट्वा कान्त्या शमयन् शान्तेन शुद्ध[illegible]ण वपुषा आविर्भूतः ॥ ४ ॥

सुपर्णस्कन्धमारूढ इत्यादीनां बर्हिष्मतः सुताः इति तृतीयेनान्वयः ॥ ५ ॥

कनकमयेन वर्णवता विभूषणेन भ्राजमानं कपोलं वदनं च यस्य अष्टभिरायुधैः गरुड एव किंकरस्तेन पन्नगैर्गीता कीर्तिर्यस्य ॥ ६ ॥

पीनाश्च ते आयता अष्टौ भुजास्तेषां मण्डलं समूहस्तन्मध्ये स्थितया लक्ष्म्या स्पर्धमाना श्रीः शोभा यस्यास्तया वनमालया परिवृत आद्यः पुरुष आह पर्जन्यस्य नाद इव रुतं नादो यस्यास्तया वाचा सघृणोऽवलोको यस्य ॥ ७ ॥

यूयं मे मत्तो वृणीध्वम् सौहार्देन हेतुनापृथग्धर्मो येषां तेषां सम्बोधनं वः परस्परं सौहृदेन तुष्टोऽहम् ॥ ८ ॥

भूतेषु सौहृदं च भविष्यति ॥ ९ ॥

तेभ्यो दास्ये किं पुनर्युष्मभ्यमिति शेषः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं प्रचेतसां वृत्तमसमाप्यैवान्तरे प्राचीनबर्हिषो वृत्तान्त उक्त इदानीं तद्वृत्तान्तशेषशुश्रूषया पृच्छति विदुरः। य इति। हे ब्रह्मन्! मैत्रेय ये प्राचीनबर्हिषः पुत्रास्त्वयाभिहिताः ते रुद्रगीतेन स्तोत्रेण हरिं प्रतोष्य तोषयित्वा कां सिद्धिं फलमापुः प्रापुः ॥ १ ॥

हे बार्हस्पत्य! मैत्रेय! कस्यांचिद्विद्यायां बृहस्पतेर्मैत्रेयः शिष्यः यदृच्छया गिरिशं प्राप्य कैवल्यनाथस्य मोक्षाधिपतेर्भगवतो यः प्रियो रुद्रः तस्य पार्श्ववर्तिनः तेनानुगृहीताः प्रचेतसः नूनं परं मोक्षं प्रापुरेव ततः पूर्वं त्विहात्र लोके परत्र लोके वा किं प्रापुः ॥ २ ॥

एवमापृष्टो मुनिः प्रचेतसां कथाशेषमाह। प्रचेतस इति। पितुराज्ञाकारिणः अन्तरुदधौ समुद्रजलमध्ये रुद्रगीतजपयज्ञेन तपसा तप आलोचने निदिध्यासनेन च निरञ्जनमपहतपाप्मानं परमपुरुषमतोषयन् ॥ ३ ॥

सनातनः परमपुरुषः दशवर्षसहस्रान्ते दशसहस्रसंख्यातवत्सरपर्यन्ततपश्चर्यान्ते तेषां कृच्छ्रं तपः क्लेशं दृष्ट्वा कान्त्या शमयन् शान्तेन शुद्धसत्त्वमयेन वपुषा आविरभूत् ॥ ४ ॥

पुरुषं विशिनष्टि। सुपर्णेति सार्धद्वयेन। सुपर्णस्य गरुडस्य स्कन्धे आरूढः तमुपचरयति मेरोः शृङ्गमम्बुदो नीलमेघ इवेति पीतं पिशङ्गो वासो वस्त्रं यस्य सः मणिः कौस्तुभः ग्रीवायां यस्य सः दिशः वितिमराः प्रकाशवहुलाः कुर्वाणः ॥ ५ ॥

पुनः कीदृशः काशिष्णुनेति कनकमयशोभनवर्णविभूषणेनात एव काशिष्णुना भ्राजिष्णुना प्रकाशनस्वभावेनेत्यर्थः भ्राजमानं कपोलं वदनं च यस्य सः प्रकाशमानकिरीटयुक्तः अष्टायुधैः शङ्खचक्रगदापद्मशार्ङ्गशरखड्गखेटैः एषामायुधानामन्तर्भूतत्वेऽपि अनितरान्यायेनानुचराणां प्रयुक्तः परशुपाशाङ्कुशाद्यन्यतमो वाचाष्टमो विवक्षितः महायुधै[illegible] इत्यपि निषक्तिः अनुचरैः

[illegible]स्तिः प्रदेशप्रदेशविनिमय सेवितः गरुड एव किंकरः [illegible]विरचितः तेन गीता [illegible] गीता [illegible]
ध्ये स्थितया [illegible]
वनमालया परिवृतः आद्य आदौ [illegible]
प्रपन्नान् बर्हिष्मतः सुतान् इति पर्जन्यनाद इव [illegible]
युक्तास्तया वाचा सघृणः कृपायुक्तोऽवलोको यस्य स आह ॥ ७ ॥

हे नृपनन्दनाः! यूयं मे मत्तः वरं वृणीध्वं वः भद्रमस्तु परस्परसौहृदेनापृथग्धर्मास्तुल्यधर्माणः यूयं वः युष्माकं सौहृदं नाहं तुष्टः ॥ ८ ॥

यो नरः अनुदिनं सायं प्रातः सन्ध्यायां युष्माननुस्मरति तस्य नरस्य भ्रातृष्वात्मसाम्यमात्मना तुल्यं आत्मनीव प्रीतिः तथा भूतेषु सौहृदं च भविष्यति ॥ ९ ॥

ये नराः सायंप्रातः समाहितचित्ताः सन्तो रुद्रगीतेन मां स्तुवन्ति तेभ्योऽप्यहं कामवरान् काम्यन्त इति कामाः तान् अभीष्टान् वरान् प्रज्ञां च दास्ये किं पुनः युष्माकम् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अस्यके कभावो हरिस्तप आदिसाधनसामर्थ्येन प्रसन्नो व्यक्तो भवतीत्येतद्ब्रह्मघुत्तमत्वं च निरूप्यतेऽस्मिन्नध्याये। तत्र पूर्वप्रसक्तप्रमेयं विस्तरतः श्रोतुकामो विदुरो मैत्रेयं पृच्छति। ये त्वयेति। रुद्रगीतेन सदा शिवोपदिष्टेन स्तोत्रेण हरिं प्रतोष्य कां सिद्धिं पुरुषार्थरूपां प्रापुरित्यन्वयः ॥ १ ॥

विष्णुतद्भक्तभक्तानां सिद्धिरस्त्येव सा नु कीदृशीति श्रीवेन पृच्छतीत्याह। किमेति। "तदेतत्प्रेय" इतिश्रुतेः कैवल्यनाथश्चासौ प्रियश्च कैवल्यनाथप्रियस्तस्य कैवल्यनाथप्रियस्य विष्णोः कैवल्यस्य नाथः कैवल्यनाथस्तस्य कैवल्यनाथस्य प्रियो रुद्रस्तस्य वा पार्श्ववर्तिनः समीपे वर्तमानाः पुरुषा इह लोकेऽथवामुष्मिँल्लोके किं पुरुषार्थलक्षणं सुखं नार्हन्ति सर्वमर्हन्ति तत्र प्रचेतसो यदृच्छया देवेच्छया गिरिशमासाद्य परमुत्कृष्टं सुखं नूनं किं प्रापुरित्यन्वयः गिरेर्ब्रह्मणः प्रसादेन शं सुखं यस्य स गिरिशः "तं ब्रह्मगिरिरित्याचक्षत" इति श्रुतेः गिरि वाचि शेत इति वा गिरौ कैलासे शेत इति गिरिशः पूर्ववाल्लुक्समासः डीकोड-प्रत्ययश्च "पृपालनपूरणयोः" इति धातोः परं जगत्पालनं मुक्तिलक्षणपूर्णानन्दमुतेति अनेन प्रचेतसो यानि योग्यानि कल्याण्यर्हन्ति तेषु किमनुकूलमापुरिति प्रश्नतात्पर्यार्थः ॥ २ ॥

जगत्पालनादिसर्वाः सिद्धीरापुरिति परिहारं वक्तुमुपक्रमते इत्याह। मैत्रेय इति। जपयज्ञेन रुद्रगीताख्यस्तोत्रजपेन पुराणां शरीराणां जननाज्जन्मना व्यञ्जयितृत्वात्पुरञ्जनो विष्णुः पुरे अञ्जनात् व्यञ्जनात्पुरञ्जनो जीवः यतस्तपसा पुरञ्जनं जीवनामानमतोषयंस्तेन पुरञ्जनं विष्णुमतोषयन् प्रसादाभिमुखं चकुरित्यर्थद्वयद्योतनाय पुरञ्जनपदं प्रायोजीत्यतः पूर्वोक्तः पुरञ्जनोऽभिधीयते "पुरेषु स्वजनाज्जीवः पुरञ्जन इतीरितः। पुरस्थां जननाद्विष्णुर्व्यञ्जकत्वं द्वयोरपि" इति वचनादिसत्रिमसमर्थत्वमिति वृद्धसानां

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दृष्टाः इक्षुवद्यानां नाविकस्यतस्त [illegible]
[illegible]
वचतोऽर्पणाति युज्यते ॥ ३ ॥

[illegible] ॥ ४ ॥

[illegible] कण्ठामुक्तकौस्तुभः वितिमिराः निरस्तान्धकाराः ॥ ५ ॥

कान्त्या दीप्तौ भ्राजन्त्यौ राजन्त्यौ कपोलाभ्यां युक्तं वदनं यस्य स तथा भ्राजादित्युत्तरात्मनेपदे परस्मैपदित्वं कादाचित्कमिति ध्वनयति ॥ ६ ॥

पीनानामायतानामष्टानां भुजानां मण्डलस्य मध्ये वक्षसि स्थितया लक्ष्म्या सह स्पर्धमानवद्वर्तमाना श्रीर्विकासलक्षणा यस्याः सा तथा अश्ववद्वाचरतीत्यश्वविस्वारी दृष्टान्तदोषपरिहारोऽयं प्रयोगः न हि हरेरपि वक्षसि स्थितयोर्लक्ष्मीवनमालयोः पौरुषस्पर्धा सञ्जायतीति पर्जन्यो मेघस्तद्वदद्भुतं ध्वनिर्यस्याः सा तथा वाचेति शेषः घृणया दयया सह वर्तत इति सघृणस्तादृशोऽवलोको यस्य स तथा ॥ ७ ॥

सौहार्देन हेतुनापृथग्धर्माः एकविषयधर्मचारिणः तेन किं तत्राह । तुष्ट इति । अतो वरं वृणीध्वमित्यर्थः ॥ ८ ॥

न केवलं मत्तो युष्माकमेव फलमन्येषां भवदनुस्मर्तृणामपि फलविशेषो भवतीत्याह । यु इति । यथामतमीतिहृत्तमं तोषकरं युष्मदपृथग्धर्मैरवस्मरतामितरेषामपि भ्रातृत्वात्मसाम्यफलं स्यात्तथा ॥ ९ ॥

रुद्रगीतेन मां स्तुवद्भ्योऽपि कामवरान् दास्यामीत्याह । ये तु स्तुमिति ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सुपर्णेति त्रिकम् । काशिष्णुना भ्राजमानेन कनकवर्णानालीकिकत्वान्न तु कनकमयेनेत्यर्थः । तेन विभूषणेन कुण्डलादिना पूर्वं श्रीरुद्रोपदिष्टपरमव्योमाख्यमहावैकुण्ठाधिपचतुर्भुजरूपेण ध्यातस्यापि श्रीभगवतोऽष्टभुजत्वेनाविर्भावस्याभिप्रायोऽयम् । नाधुना भवद्भ्यस्तन्निष्ठदानार्थमहमाविर्भूतः किन्तु आपातसान्त्वनार्थमेवेति ॥ १-७ ॥

स्वाभाविकेन सौहार्देन हेतुना वो युष्माकं मनुपासकानामित्यर्थः सौहृदेन वैशिष्ट्यं प्रातेन तेन तुष्टोऽहं यथा न तथा मदुपासनयापीत्यर्थः ॥ ८ ॥

भ्रातृषु समवायं मन्त्रकेषु आत्मसाम्यं आत्मनीव परस्परस्नेहम् ॥ ९-१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्रियो प्रचेतसो लब्धवराः स्तुत्वा हरेर्जलात् ।
नत्वा वृक्ष्या तरून् वार्क्षी लब्ध्वा राज्यं मुदा व्यधुः ॥

प्रचेतसां कथामध्ये एव तत्पितुः प्राचीनबर्हिषो नारदोपदेशात्मोक्षप्राप्तिश्च युक्तलेनामेवापरिशिष्टां कथां पृच्छति । हरिं प्रतोष्य कां सिद्धिमापुः ॥ १ ॥

हे बार्हस्पत्य ! कस्यापि ह्रियायामुक्तवन्मैत्रेयो बृहस्पतिशिष्य इति प्रसिद्धेः प्रचेतसः इह लोके परत्र च किं [illegible] वस्तु प्रापुः किं कृत्वा यदृच्छयैव गिरिशो देवमीशः कैवल्यनाथस्य प्रियाः पार्श्ववर्तिनश्च ॥ २ ॥

रुद्रगीतरूपेण जपयज्ञेन पुरुषं हरिम् ॥ ३ ॥

शान्तेन शान्तया रुचा ॥ ४-५ ॥

कनकमयेन वर्णवता नानारत्नजटितत्वेन नानावर्णवता विभूषणेन कुण्डलादिना भुजमण्डलमध्ये लक्ष्मीः शोभा यस्यास्तया स्पर्धन्ती स्पर्धमाना श्रीर्लक्ष्मीर्यया तया भासः पुरुषः पर्जन्यनाद इव कलं नादो यस्यास्तया वाचा आह । सकृपावलोकः ॥ ६-९ ॥

तेभ्यो दास्ये किं पुनर्युष्मभ्यमिति भावः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रियो प्राचीनबर्हिषः पुत्रास्ततपः प्रसन्नाद्भगवतो वरं लब्ध्वा वार्क्षीमूढाः यथोचितं राज्यं चक्रुरित्युच्यते तत्रादौ प्रागुपक्षिप्तं प्रचेतोवृत्तं पृच्छति । ये इति ॥ १ ॥

सिद्धिमेव त्रिधा विभज्य पृच्छति हे बार्हस्पत्य ! बृहस्पतिशिष्य ! प्रचेतसः यदृच्छया गिरिशमासाद्य कैवल्यनाथो मुक्तिप्रदो हरिस्तस्य प्रियो भक्तः गिरिशस्तस्य पार्श्ववर्तिनः शिष्याः सन्तः नूनं निश्चितं फलं प्रापुरत्रैवेह किं भौमसुखं प्रापुः किं वा परत्र स्वर्गे सुखं प्रापुः अथ वा परं मोक्षम ॥ २ ॥

जपयज्ञेन गीरिशोपदिष्टस्तोत्रजपेन तपसा च पुरञ्जनं विश्वजनकं सनातनं पुरुषम् ॥ ३ ॥

शान्तेन परमानन्दरूपेण आविरभूत् किङ्कुर्वन् तेषां दुःखं संसारतापं रुचा कान्त्या शमयन् अपनयन् ॥ ४ ॥ ५ ॥

काशिष्णुना दीप्तिमता कनके आधारभूते वर्णाः अकीयवर्णप्रधानाः मणयो यस्मिन् विभूषणे तेन भ्राजत्कपोलं वदनं यस्य स गरुडेन किन्नरैश्च भक्तविशेषैः गीता कीर्तिर्यस्य सः ॥ ६ ॥

पीनायताष्टभुजमण्डलमध्यगतया लक्ष्म्या सह स्पर्धती श्रीर्यस्यास्तया वनमालया परिवृतः सघृणावलोकः कृपार्द्रदृष्टिः पर्जन्यनादवत् मेघध्वनिवत् सन् ध्वनिर्यस्यास्तया वाचया, आह ॥ ७ ॥

मे मत्तः अपृथग्धर्माः समानधर्माः ॥ ८-११ ॥

भाषाटीका ।

विदुरजी बोले प्राचीनबर्हि के पुत्र जो प्रचेता आपने कहे सो रुद्रगीत से भगवान् को सन्तुष्ट करके किस सिद्धि को प्राप्त भये ॥ १ ॥

हे बृहस्पति के शिष्य ! मैत्रेयजी इस लोक में और परलोक में कैवल्यनाथ विष्णु के पार्श्ववर्ति जो प्रचेता सो दैवयोग से महादेवजी को प्राप्त होकर किस सिद्धि को प्राप्त भये ॥ २ ॥

यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः ।
अथो व उशती कीर्ति [illegible]
भविता विश्रुतः पु[illegible]
स एतामात्मवीर्येण [illegible]
कण्डोः प्रम्लोचया लब्धा कन्या कमललोचना ।
तां चापविद्धां जगृहुर्भूरुहा नृपनन्दनाः ! ॥ १३ ॥
क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीम् ।
देशिनीं रोदमानाया निदधे स दयान्वितः ॥ १४ ॥
प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता ।
तत्र कन्यां वरारोहां तामुद्वहत मा-चिरम् ॥ १५ ॥
अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा ।
अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया ॥ १६ ॥
दिव्यवर्षसहस्राणां सहस्रमहतौजसः ।
भौमान् भोक्ष्यथ भोगान् वै दिव्यांश्चानुग्रहान्मम ॥ १७ ॥
अथ मय्यनपायिन्या भक्त्या पक्वगुणाशयाः ।
उपयास्यथ मद्धाम निर्विद्य निरयादतः ॥ १८ ॥
गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम् ।
मद्वार्तायातयामानां न बन्धाय गृहा मताः ॥ १९ ॥
नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः ।
न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः ॥ २० ॥

भाषाटीका

मैत्रेय जी बोले पिता की आज्ञा करने वाले प्रचेता समुद्र में जब गये तब जपयज्ञ से भगवान् को सन्तुष्ट किये ॥ ३ ॥

दश हजार वर्ष बीतने पर सनातन पुरुष उनके आगे प्रगट भये दर्शन करने से उनके दुःख निवृत्त होगये ॥ ४ ॥

जैसे मेरु के शिखर पर मेघ होवे तैसे गरुडजी पर विराजे हैं पीताम्बर पहिरे हैं कण्ठमें मणिहै कान्तिसे जगत् में प्रकाश करदिया ॥ ५ ॥

प्रकाशमान सुवर्ण भूषण से मुखारविन्द आपका प्रकाशमान है किरीटों की शोभा होरही है आठ भुजोंसे शोभित हैं सब पार्षद स्तुति करते हैं देवता सेवन करतेहैं गरुडजी तथा किन्नरगण कीर्ति का गान कर रहे हैं ॥ ६ ॥

बंडपुष्ट लम्बे आठ भुजोंके मण्डलके मध्यमें जो लक्ष्मीजी तिनके साथ विवाद करने वाली वनमाला से वेष्टितहैं भगवान् आद्यपुरुष नारायण शरणागत जो प्राचीन बर्हि के पुत्र तिनों से मेघ के नादवरी की वाणी से दयायुक्त होकर वचन बोले ॥ ७ ॥

श्री भगवान् बोले हे राजपुत्रो ! तुम लोग मेरे से वरमागों तुमलोग सुहृदपनेसे सब एक धर्म वाले हो तुम्हारी सुहृदपनेसे मैं सन्तुष्ट हुआ हूं ॥ ८ ॥

जो मनुष्य सायङ्काल में आप लोगोंका स्मरण करेगा उसके भाइयों में अत्यन्त मेल रहेगा प्राणीमात्र में मित्रता होगी ॥ ९ ॥

जो लोग सायंकाल में प्रातःकाल में सावधान होकर रुद्रगीत से हमारी स्तुति करेंगे उनको मैं अभीष्ट वर तथा सुन्दर ज्ञान देउंगा ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका

अग्रहीष्ट गृहीतवन्तः । अथो इति हेतोः भविष्यति यथा लोकाननुव्याप्स्यति [illegible] त्यर्थः ॥ ११ ॥

आत्मनो वीर्येण सन्तानेन ॥ १२ ॥

पुत्रार्थमादौ भार्यां सम्पादयति । भगवान् कण्डोरिति त्रिभिः । तपोनाशार्थमिन्द्रप्रेषितया प्रम्लोचया कण्डुर्नाम ऋषिर्मुक्तात्

श्रीधरस्वामिकृतभावार्थदीपिका ।

[illegible] सी च ततः [illegible]

[illegible]

[illegible] राजा [illegible]

[illegible]

[illegible] च [illegible] वाचयन् [illegible]द्वीगेन्ध्यादिराहित्यं चोकम् ॥ १४ ॥

मामनुवर्तमानेन पित्रा नियुक्ताः सन्तस्तत्र प्रजाविसर्गे निमित्ते तामुद्वहत ॥ १५ ॥

ननु बहूनां कथमेका भार्या स्यात्तत्राह । अपृथग्धर्मः शीलं येषां तेषां वः पत्नी भूयात् । अर्पितो मनस्सु आशयो यया धर्म-शीलयोरैक्यान्महाफलत्वाच्च न दृष्टादृष्टविरोध इति भावः ॥ १६ ॥

अहतौजसोऽप्रतिहतबलाः सन्तः ॥ १७ ॥

पक्वगुणो दग्धकामादिमल आशयो येषाम् । अतो लोकद्वयभोगाभिरपप्रायाभिर्विध मत्स्थानं प्राप्स्यथ ॥ १८ ॥

ननु गृहेषु प्रविष्टानामस्माकं तदासक्तया बन्ध एव स्यात्कुतस्तद्भक्तिर्निर्वेदो वा तत्राह । गृहेष्विति । कुशलं मय्यर्पितं कर्म येषाम् । मद्वार्तया यातो यामः कालो येषाम् ॥ १९ ॥

त्वद्वार्ताश्रोतृणां गृहैर्न बन्ध इति कुतस्तत्राह । नव्यवदिति । यद्यस्मात्कथाश्रवणात् वः सर्वज्ञोऽहमीश्वरो ब्रह्मवादिभिः प्रवक्तृभिर्निमित्तभूतैः श्रोतृणां हृत् हृदयं न व्यवत्प्रतिपदं नूतनवत् अये प्राप्नोमि ब्रह्मसाक्षात्कारो भवतीत्यर्थः । ननु त्वत्कथाश्रवणं कथं ब्रह्मसाक्षात्कारस्तत्राह । योऽहमेतदेव ब्रह्म तत्र हेतुः । यतो गताः यं मां प्राप्ताः सन्तो मोहशोकहर्षांश्च प्राप्नुवन्त्यतो मत्कथाश्रवणेन नव्यवन्मम हृद्याविर्भावादस्यैव ब्रह्मसाक्षात्कारत्वाद्गृहेषु वसतामपि न बन्ध इत्यर्थः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्यस्माद्यूयं पितुरादेशमाज्ञां मुदा युक्ताः सन्तोऽप्रहीष्ट गृहीतवन्तः अतो वः युष्माकमुशती कमनीया कीर्तिर्लोकाननुभविष्यति प्राप्स्यति लोकेषु विस्तरिष्यति इत्यर्थः ॥ ११ ॥

कण्डोर्मुनेर्दुहितरं यूयमुद्वहतेति वक्ष्यमाणस्तावत्कण्डुवृत्तान्तं च प्रस्तौति । भवितेति विश्रुतः विभुरात्मनः पुत्रः गुणैर्विश्रुतः पितुर्नावमः अन्यूनः विभुना समः भविता भविष्यति इत्यर्थः यः वैश्रुत एतां त्रिलोकीमात्मनो वीर्येण सन्तानेन पूरयिष्यति ॥१२॥

वैश्रुतस्य कण्डोः सकाशात् प्रम्लोचया तपोनाशार्थमिन्द्रेण प्रेषितया प्रम्लोचाख्यया अप्सरसा स्त्रिया या कन्या प्रसवोचिता लब्धा तां कन्यामपविद्धां पुनः स्वर्गं प्रतिगच्छन्त्या प्रम्लोचया वृक्षेषु त्यक्तां भूरुहा वनस्पतयः जगृहुः दुहितरममन्यन्त हे नृपनन्दनाः॥१३॥

क्षुधा क्षामायाः पीडितायाः अतो रोदमानायाः तस्याः कन्यायाः मुखे वनस्पतीनां राजा सोम इति प्रसिद्धः अमृतस्राविणीं देशिनीं तर्जनीमङ्गुलीं निदधे निहितवान् अनेनाप्सरसो गर्भसम्भवेनामृताहारित्वेन च तस्या लावण्यं क्रमदौर्गन्ध्यादिराहित्यं चोक्तम् ॥ १४ ॥

नानुवर्तमानेन पित्रा बर्हिष्मता वः युष्मभ्यं प्रजासर्गे

सुधियः प्राचेतसः अतस्तत्र प्रजासर्गे यतमाना [illegible]कांक्षिणीं कन्यामुद्वहत चिरं विलम्बं मा कुरुत ॥

ननु बहूनां कथमेका भार्या स्यात्तत्राह । अपृथग्धर्मः येषां सर्वेषां वः युष्माकं पतिषु भवत्सु अर्पितः आशयो [illegible]धर्मः शीलं यस्याः सेयं सुमध्यमा पत्नी भूयात् शीलयोरैक्यान्महाफलत्वाच्च न दृष्टविरोध इति भावः ॥ १६

दिव्यानां देवमानपरिच्छिन्नानां वर्षसहस्राणां सहस्रं । अमितौजसः अमितमोज इन्द्रियशक्तिर्येषां ते यूयं भौमान् भोक्ष्यथ ॥ १७ ॥

अनन्तरमव्यभिचारिण्या अविभक्त्या पक्वगुणाः धर्मकामादिमलाः आशयोऽन्तःकरणं येषां तेऽतो निरयात्संसाराभिर्विधनिर्वेदं लब्ध्वा पक्वगुणाशया इति पाठे शान्तसत्त्वादिगुणावासनाः मद्धाम मत्स्थानमुपयास्यथ प्राप्स्यथ ॥ १८ ॥

ननु भौमभोगासक्तानां मत्त्वद्भक्तिः कथं भविष्यति तत्राह गृहेष्वाविशतां प्रविष्टानामपि कुशलमनभिसंहितफलं कर्म येषां मद्वार्तायातयामानां मत्कथाक्षपितकालानां गृहाः बन्धाय न मताः बन्धका न भवन्तीत्यर्थः ॥ १९ ॥

त्वद्वार्ताश्रोतृणां गृहैर्न बन्ध इति कुतस्त तत्राह । न व्यवदिति । यत् यस्मात्कथाश्रवणात् वः सर्वज्ञोऽहमीश्वरः ब्रह्मवादिभिः प्रवक्तृभिर्निमित्तभूतैः श्रोतृणां हृत् हृदयं न व्यवत्प्रतिपदं नूतनवद्ये प्राप्नोमि व्यवच्छिद्यते यत्र इति पाठे तु गृहेषु परब्रह्मभूतं मां कथयद्भिः वक्तृभिः मत्स्वरूपात्मना ज्ञानयज्ञो न व्यवच्छिद्यते विच्छिन्नो न भवतीत्यर्थः यत्र विशिनष्टि यतो ज्ञानयोगात्मनि गताः प्राकृतैर्मोहादिभिर्युक्ता न भवन्तीत्याह ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अन्यं च वरं दास्यामीत्याह । यद्यूयमिति । अनेन विमलकीर्तिकामैः पुरुषैर्गुर्वादेशः सर्वथानुष्ठेय इति शिक्षा दर्शिता ॥ ११ ॥

सत्पुत्राभावे किम्प्रयोजनं जन्मना "सोऽयं मनुष्यलोकः पुत्रेणाजय्य" इति श्रुतेस्तत्राह । भवतेति । पुत्रशब्दार्थं व्यनक्ति । य एतामिति ॥ १२ ॥

अनुकूलभार्याभावे कथमौरसपुत्रसम्पादित्यतस्तत्प्राप्तिं वक्तुमुपक्रमते । कण्डोरिति । प्रम्लोचयाप्सरसा मातापितृमरणाकारणयोगे तज्जातस्थानस्थपरिहारार्थमपविद्धां त्यक्तां भूरुहा वृक्षा जगृहुरित्यन्वयः ॥ १३ ॥

क्षुत्क्षामायाः श्रान्तायाः स सोमः ॥ १४ ॥

प्रजाविसर्गे प्रजानां विविधसृष्टौ ततः किमत्राह । तत्रेति । तत्र तस्मिन् कार्ये कर्तव्ये सति ॥ १५ ॥

बहूनामस्माकमियमेकानुकूला कथं स्यादत्रापि तादृशं वरं दास्यामीत्याह । अपृथग्धर्मशीलानामिति ॥ १६ ॥

दिव्यवर्षसहस्राणामित्यत्र सहस्रशब्दो बहुलवाची प्रतीतार्थस्य प्रमाणविरुद्धत्वादनुपपन्नत्वं तदुक्तम् ।

मनुष्याणां वत्सराणां वसुद्वादशकं पुरा ।

प्रचेतोभिरियं पृथ्वी पालिताऽव्याहतेन्द्रियैरिति ॥ १७ ॥

एवमैहिकं वरं दत्वा पारत्रिकं वरं ददाति । अथेति । पक्वः परिपाकं प्राप्तो गुणाशयः [illegible] कषायो येषां ते तथा मतो

[illegible]श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली [illegible]

[illegible]मात्संसारात् "अतो निन्दाहितुविविधेषु" इत्यभि[illegible]

[illegible]पयपुपमिश्रिताद "चित्रमालेव्यमित्रयो [illegible]" इत्य[illegible]

[illegible] ॥ १८ ॥

[illegible] गृहाविष्टचेतस्त्वेन पुत्रमित्रादिस्नेहबद्धानां कथं धाम [illegible]
[illegible]त इति तत्राह । गृहेष्विति । मद्वार्तया यातो गतो यामः काल[illegible]
[illegible] येषां ते तथा "गृहाः पुंसि च भूम्नि" इत्यमरः अस्ति
पुल्लिङ्गः ॥ १९ ॥

ननु मद्वार्ता संसारच्छेदिनी यदि तर्हि सर्वेऽपि किं न
मुक्तास्तस्याः सुलभत्वादिति तत्राह । न व्यथाद्विजेति । यतो
मम हरेः प्रसादाद्भक्ताः सूक्ष्मेण मत्सावगच्छन्तो जानन्तो
ये विपदि न मुह्यन्ति न शोचन्ति संपदि न हृष्यन्ति तैर्ब्र-
ह्मवादिभिरप्येतद्यद्ब्रह्मविज्ञानरूपं ब्रह्म यथानुभवं न व्यव-
च्छिद्यत इत्यन्वयः अतो मद्वार्ताया असुलभत्वात्र सर्वेषां मुक्ति-
रित्यर्थः ब्रह्मवादिभिर्भेदवाद्भिर्युद्धेऽपि यद्ब्रह्म निजकर्म न व्यवच्छिद्यते
यतो भवन्तो मदाज्ञया गृहागता न मोहादिकं कुर्वन्तीत्येव-
माद्विमयापविष्टमेतद्रहस्यं तस्मान्मा शोचतेत्यपस्यापठ्यानं सूक्ष्मेण
"ममर्मा विप्रो वाचा वक्तुं न शक्नुम" इति वचनेन निरस्तमिति
ज्ञायते यत्पदस्य निजकर्मार्थत्वं ब्रह्मपदस्य रहस्यार्थत्वं च न
व्यवच्छिद्यत इति ग्रन्थव्यत्यासश्च सम्प्रदायापरिज्ञानविजृम्भितं
चेति यद्ब्रह्म विष्णुर्देवता ब्रह्मविदाप्नोति परमिति सूत्रभाष्य ब्रह्म-
वादिभिरिति प्रसिद्धपक्षपरिहाराय ब्रह्मेति [illegible]वासुदेवे ब्रह्म
इति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

न व्यथादिति तैर्व्याख्यातम् यद्वा यः परमेश्वरोऽहं यज्ञव्य-
वत् हृदये भामि एतदेव ब्रह्मेति ब्रह्मवादिभिरुच्यत इत्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

लोकान् अनुलक्ष्यीकृत्य ॥ ११ ॥

गुणैर्ब्रह्मणः सकाशादनवमोऽन्यूनः ॥ १२ ॥

ननु कस्यां मद्भार्यायां पुत्रो भवितेत्यत आह । कण्डोरिति
त्रिभिः । तपोनाशार्थमिन्द्रप्रेषितया प्रम्लोचया कण्डुर्नाम ऋषि-
र्बहुकालं रेमे । सा च ततः स्वर्गं गच्छन्ती कण्डोर्जातं गर्भं वृक्षेषु
त्यक्त्वा जगामेत्यत आह । अपविद्धां त्यक्तां हे नृपनन्दनाः ! ॥ १३ ॥

सोमो वनस्पतीनां राजा स प्रसिद्धः ॥ १४ ॥

पित्रा प्राचीनबर्हिषा मामनुवर्तमानेन तत्र गत्वा ॥ १५ ॥

ननु बहूनां कथमेका भार्या स्यात्तत्राह । अपृथगिति ।
भूयादिति मदाशीर्वाद एव दुष्टत्वदोषमुपशमयिष्यतीति
भावः ॥ १६ ॥

दिव्यानां वर्षसहस्राणां सम्बन्धिनं कालमभिव्याप्य सह-
स्रमनन्ताम् भोगान् भोक्ष्यथेत्यन्वयः । सहस्राणामिति कति-
नामाद्यमेतेति वत् त्रयाणामित्यर्थः ॥ १७ ॥

हे भक्त्या पक्वगुणाशयाः ! अथ भौमभोगान्ते मद्धाम
यास्यथेत्यन्वयः । न तु भविष्यन्त्या भक्त्या पक्वगुणाशयाः सन्त
एवेति व्याख्येयम् । अपक्वकषायाणां भगवद्दर्शनासम्भवात्तदुक्तम्
"अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम्,, इति । अतः इदन्तास्प-
दत्वात् पारमेष्ठ्यादि प[illegible] ॥ १८ ॥

[illegible] लोकान् लोकान् [illegible] लोकानिकृत्य निष्पतुल्ये
[illegible]मनाभिनिपतीति तत्राह ।
[illegible]
[illegible]बन्धकत्वं [illegible]
[illegible]ध्यानामत एव ममानुग्रहान्मामि[illegible] [illegible]तोऽ-
न्यत्रापि यत्र विषयभोगेऽपि मद्भक्तेरसङ्कोचः प्रत्युत वृद्धिरेव
स्फूर्ति [illegible] स विषयभोगो [illegible] न
बन्धकः । पृथुप्रह्लादध्रुवमन्वादिषु तथा दर्शनात् अविपक्वकषा-
येषु तु भक्तेषु मदनुग्रहो भोगसंपादक एव दुष्टो वदुक्तम् ।
"यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः" इत्यादि ॥ १९ ॥

तेषां भक्तानां कुतो बन्धदुःखं मद्भक्तेषां हृदयेऽ[illegible]
सुखं प्राप्तुं नित्यं वासमीक्षाह । अव्ययेति । [illegible]
दिभिर्ब्रह्म उच्यत इति शेषः । यद्ब्रह्म यत्र ब्रह्मणि गता जीवा
न मुह्यन्ति मोहशोकहर्षान् प्राप्नुवन्ति सोऽहं तु त्रिधाऽपि
यदस्मात्तेषां कुशलकर्मणां हृत् हृदयकमलं नव्यवत् प्रति-
पदं नूतनवत् अये प्राप्नोमि आनामीति वा तेषां हृदये नव्य-
वदहं भामीति सन्दर्भः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लोकान् अनुलोकीदृष्टितपर्यन्तान् ॥ ११ ॥

अनवमोऽन्यूनः विश्रुतः विख्यातकीर्तिः आत्मवीर्येण स्व-
सन्तानेन ॥ १२ ॥

कण्डोः सकाशाल्लब्धां तत्तपोनाशार्थमागतया तपोनाशानन्तरं तां
कन्यामपविद्धां स्वर्गं गच्छन्त्या प्रम्लोचया त्यक्ताम् भूरुहा द्रुमा
जगृहुः ॥ १३ ॥

यः राजा भूरुहाणामिति शेषः सः सोमः ॥ १४ ॥

तत्र प्रजासर्गे निमित्ते ॥ १५ ॥

अपृथग्धर्मशीलानां भवतां समानधर्मशीला मदाज्ञया बहु-
भिरेकभार्यास्वीकारे न कोऽपि दोष इति भावः ॥ १६ ॥

ममानुग्रहादहतौजसः अव्याहतबलाः ॥ १७ ॥

पक्वगुणाः दग्धवासनः आशयो येषाम् "एते वै निरयाश्चतात
लोकस्य परमात्मनः,, इतिस्मृतेः अतो निरयात् प्राकृतमण्ड-
लात् मद्धाम मदीयं लोकम् ॥ १८ ॥

मद्वार्तया यातो यामः कालो येषांतेषाम् ॥ १९ ॥

ब्रह्मवादिभिर्मद्वार्ता वदद्भिर्वेदभूतैः यद्ब्रह्मोऽहं येषां हृत् मनः
नव्यवत् प्रत्यहं श्रुतोऽपि अभूतपूर्ववत् अत्यद्भुतत्वात् अये
प्राप्नोमि ते मोहादिकं न प्राप्नुवन्ति यतः एतत् मद्भक्तां ब्रह्म-
गताः ब्रह्मवादिना प्राप्ताः ॥ २० ॥

भाषाटीका ।

जिस हेतु से कि तुमने आनन्द से पिता की आज्ञा को
ग्रहण किया है तिससे तुमारी दिव्यकीर्ति लोकों में फैलेगी ॥११॥

गुणों से ब्रह्माजी के तुल्य लोक में विख्यात तुमारा
एक पुत्र होगा जो कि अपने सन्तानों से त्रिलोकी को पूर्ण
करदेगा ॥ १२ ॥

हे राजपुत्रों ! कण्डुमुनि के प्रम्लोचा अप्सरा से एक

[illegible] आजानेयः प्रचेतसः ।
[illegible] गद्गदया सुहृत्तमम् ॥ २१ ॥

॥ प्रचेतस ऊचुः ॥

नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय ।
मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः ॥ २२ ॥
शुद्धाय शान्ताय नमः स्वनिष्ठया मनस्यपार्थं विलसद्द्वयाय ।
नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय ॥ २३ ॥
नमो विशुद्धसत्त्वाय हरये हरिमेधसे ।
वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम् ॥ २४ ॥
नमः कमलनाभाय नमः कमलमालिने ।
नमः कमलपादाय नमस्ते कमलेक्षण ! ॥ २५ ॥
नमः कमलकिञ्जल्कपिशङ्गामलवाससे ।
सर्वभूतनिवासाय नमो युञ्ज्महि साक्षिणे ॥ २६ ॥
रूपं भगवता त्वेतदशेषक्लेशसंक्षयम्
आविष्कृतं नः क्लिष्टानां किमन्यदनुकम्पितम् ॥ २७ ॥
एतावत्त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः ।
यदनुस्मर्यते काले स्वबुद्ध्याऽभद्ररन्धन ! ॥ २८ ॥
येनोपशान्तिर्भूतानां क्षुल्लकानामपीहताम् ।
अन्तर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः ॥ २९ ॥
असावेव वरोऽस्माकमीप्सितो जगतः पते ! ।
प्रसन्नो भगवान् येषामपवर्गगुरुर्गतिः ॥ ३० ॥

भाषाटीका ।

सुन्दर नेत्र वाली कन्या उत्पन्न हुई है उसको प्रम्लोचा अप्सरा फेंक गई तब वृक्षों ने उसको लेलिया है ॥ १३ ॥

जब वह कन्या भूखसे रोने लगी तब चन्द्रमा ने दया से अमृत-वर्षाने वाली तर्जनी अंगुली को उस कन्या के मुख में दिया तिससे वह रूपवती है ॥ १४ ॥

मेरे अनुवर्तन करने वाले राजा प्राचीनबर्हि ने तुमको प्रजा वृद्धि करने की आज्ञा दी है तो उस सुन्दर कन्या का तुम लोग विवाह करो देर मत करो ॥ १५ ॥

तुम सब एक ही शील धर्म वाले हो तब वह कन्या भी तुम सबो में एकही सरीका चित्त रक्खेगी कुछ अन्तर नहीं पड़ेगा ॥ १६ ॥

तुम लोग दिव्य पराक्रम वाले होकर तीन हजार दिव्य-वर्षों तक पृथ्वी को भोगो गे इसमे हमारा अनुग्रह है ॥ १७ ॥

तदनन्तर मेरी एकाग्र भक्ति करके गुण कृत कामादिकों को नष्ट करोगे फिर नरक रूप इस संसार से छूटकर हमारे धाम को आजाओगे ॥ १८ ॥

जो लोग हमारे में सब कर्मों को अर्पण कर देते है और हमारी कथा में दिन गमाते हैं उन लोगों को घर द्वार बन्धक नहीं होते हैं ॥ १९ ॥

मैं सर्वज्ञ जिनलोगों के हृदय में नूतन सा होकर सदा प्राप्तहोता हूं उस प्राप्त होने ही को ब्रह्मवादि लोग ब्रह्म साक्षात्कार कहते हैं जिस ब्रह्मको प्राप्त होने से मनुष्य न शोचते हैं न मोह को प्राप्त होते हैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुरुषार्थं भाजयति [illegible] तम् ॥ २१ ॥
वेदैः [illegible] उदारगुणा आह्वया

श्रीधरस्वामि[illegible]

[illegible] च यस्य मनोवचसोर[illegible] मनोवचसोरगोचरायेत्यर्थः अत एव सर्वेषाम्[illegible] [illegible]तोऽनवगतोऽध्वा यस्य तस्मै ते नमः ॥ २२ ॥

[illegible]निष्ठया स्वरूपस्थित्या शुद्धाय अतः शान्ताय मनसि [illegible] मत्यपार्थे ऽप्यर्थमेव विलसद्भिः स्फुरितं द्वयं यस्मिन् गृहीता [illegible]गुणैर्विग्रहा ब्रह्मादिमूर्तयो येन ॥ २३ ॥

[illegible]स्तु विशुद्धसत्त्वरूपाय संसारं हरति मेधा ज्ञानं यस्य [illegible] ॥ २४ ॥ २५ ॥

[illegible]वयुक्ष्महि कृतवन्तो वयम् ॥ २६ ॥

[illegible]मयुक्तं वरं वृणीध्वमिति तन्मनसि निधायाहुः। रूपमिति। समस्तानां क्लेशानां संक्षयो यस्मात् नः आविष्कृतं प्रकटितम् अतोऽप्यतिकमनुकम्पितमनुकम्पा इयमेवास्माकं परमानुकम्पेत्यर्थः ॥ २७ ॥

कुत इत्यत आह। हे अमङ्गलध्वनामङ्गलनाशन ! त्वमस्माभिर्योऽत्र [illegible] विवक्षितः एतावदेव दीनेषु वत्सलैः प्रभुभिर्भाव्यं कार्यम् किमन्यद्वाह। यदिति। अस्मदीया एत इति बुद्ध्या उचिते कालेऽनुस्मर्यत इति यत् त्वया तु रूपमपि दर्शितमिति भावः ॥ २८ ॥

येनानुस्मरणेन स्मृतानां तेषामुपशान्तिः सुखं भवति किञ्च क्षुल्लकानामपि भूतानामन्तर्हृदयेऽन्तर्हितोऽन्तर्यामिरूपेण स्थितो भवानीहितानिच्छूनां त्वदुपासकानां नोऽस्माकमाशिषः कस्माद्धेतोर्न वेद जानात्येवेत्यर्थः ॥ २९ ॥

तथापि वक्तव्यं चेत्तर्हि येषामस्माकं भगवान् प्रसन्नोऽसावेव वरः भगवत्प्रसाद एवास्माकमीप्सितो वर इत्यर्थः अपवर्गगुरुः मोक्षमार्गप्रदर्शकः गतिः स्वतश्च पुरुषार्थभूतः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं भगवतोक्ताः प्रचेतसस्तमेव जनार्दनमगृणन्नित्याह। मैत्रेय एवमुक्तप्रकारेण ब्रुवाणां पुरुषार्थानामाश्रयं सुहृत्तमं जनार्दनं तस्य जनार्दनस्य दर्शनेन ध्वस्तानि कामक्रोधादीनि रजस्तमआदिकार्यरूपाणि मलानि येषां ते प्राञ्जलयः बद्धाञ्जलयो गद्गदगिरागृणन् तुष्टुवुः ॥ २१ ॥

आध्यात्मिकादिदुःखानां नाशाय उदारगुणाः यस्याह्वयैर्नामभिः निरूपिताः स निरूपितोदारगुणाह्वयः तस्मै मनोवचसोर्वेगादपि पुरोऽग्रतो वेगो यस्य वाङ्मनसागोचरायेत्यर्थः सर्वेषामक्षाणामिन्द्रियाणां मार्गा वृत्तयः तैरगतः अविषयीकृतः अध्वा स्वस्वप्राप्त्युपायः यस्य इन्द्रियग्राह्यागोचरस्य प्राप्त्युपायायेत्यर्थः ॥ २२ ॥

शुद्धाय कर्मोपाधिरहिताय शान्ताय ऊर्मिषट्करहिताय अत्र हेतुः स्वनिष्ठया स्वस्मिन्निष्ठाऽविच्छेदः अविच्छिन्नस्वानुभूत्याऽपार्थेऽपगतपुरुषार्थे पुरुषार्थभूतस्वरूपज्ञानरहिते मनसि विलसत्परस्पर वैलक्षण्येन स्फुरत् द्वयं देहात्मनोर्द्वयं येषां ते विलसद्द्वयाः स्वस्वरूपज्ञानविधुरेऽपि मनसि [illegible]त्मज्ञानसंपन्ना इत्यर्थः. तेषां जीवानाम्[illegible] जगतः स्थानलयोदयेषु स्थितिल[illegible]स्थित्याद्यर्थ

[illegible] ज्ञानं मायावपुर्गुणानिमिति इतिपर्यां- [illegible] विग्रहो पृथग्विग्रह- [illegible]

विग्रहार्थं [illegible] असत्त्वायेति। हरये[illegible] यसर्वभूतान्तरात्मने आनन्दकन्दाय स्वायत्तां भक्तानां [illegible]

कमलं-अमत्कुल[illegible] नाभौ यस्य कमलमालाध्यास्तीति तस्मै ब्रह्मादिस्वाम्यस्वर्गीय इतिः अत इति ठनादिति तपरकरणात् कमलवत्स्पर्शे कोमले सुगन्धी सुन्दरौ च यस्य कमलदलवद्विशाले अक्षिणी यस्य तस्मै ॥ २५ ॥

कमलकिञ्जल्कपिशङ्गममलञ्च वासो यस्य सर्वभूतानां निवासायाधाराय सर्वाणि भूतानि निवासः वासस्थानं शरीरं यस्येति वा [illegible] [illegible] वासुदेवायेत्यनेनैवावगतं तथापि तद्विवरणरूपमिदं व्याख्येयं साक्षिणे सर्वसाक्षिद्रष्ट्रे तुभ्यं नमः कुर्महि करवाम ॥ २६ ॥

भगवद्दर्शनेनैवास्माकमस्मत्समस्तपुरुषार्थतामाहुः। आविष्कृतमिति अशेषाणां क्लेशानां संक्षयो यस्मात्तदेतद्रूपं भवता तापत्रयातुराणामस्माकमाविष्कृतं प्रकटीकृतं इतोऽप्यधिकमनुकम्पनमस्ति इयमेव त्वया कर्तव्यानुकम्पेत्यर्थः अतो नास्माभिर्वरणीयोऽस्तीति भावः ॥ २७ ॥

हे अमङ्गलनिरासक ! वत्सलैः प्रभुभिर्दीनेषु भाव्यं कर्तव्यम् एतावदेव [illegible] अस्मदीया एत इति। बुद्ध्या उचितकालेऽनुस्मर्यत इति यत्त्वया तु रूपमपि दर्शितमिति भावः ॥ २८ ॥

येनानुस्मरणेन क्षुल्लकानां क्षुद्राणामुपशान्तिः दुरितोपशान्तिर्भवति किञ्चेहतां कामयमानानां नोऽस्माकमन्तर्हृदये अन्तरात्मत्वेन स्थितो भवानाशिषः कामान् कस्माद्धेतोर्न वेद जानात्येवेत्यर्थः ॥ २९ ॥

तथापि वक्तव्यं चेत्तर्हि येषामस्माकं भगवान् प्रसन्नः असावेव वरः कुतः यतस्त्वमपवर्गगुरुः मुक्तिसाधनोपदेष्टा गतिरपवर्गसाधनभूतश्च ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

प्रचेतोभिरेवं भगवतो मतमवाप्य अपवृहितं किमकारीति तत्राह। एवमिति ॥ २१ ॥

स्तुतिः प्रेक्षावाद्भिर्महर्षीणां चेदुपादेया स्यादन्यथेत्थं वाधिरवत्प्रयोजिकात्यतोऽपि अनन्तगुणविशिष्टामाहुरित्याह। नमो नम इति। निरूपितोदारगुणाह्वयाय निरूपिता उदारगुणा येषां ते तथा महागुणा आह्वया नामानि यस्य स तथा तस्मै मनोवचोवेगपुरोजवाय वाङ्मनसयोर्वेगादपि पुरःस्थितवेगाय यद्वा वाङ्मनसवेगमतीत्यवर्तमवेगाय "तद्धावतोऽन्यानत्येति" इति श्रुतेः सर्वाक्षाणां सर्वेन्द्रियाणां मार्गैर्विमार्गैर्वाऽगताध्वनेऽज्ञातमार्गाय ॥ २२ ॥

शुद्धायेत्येतदनुद्धाक्षेपत्वे सिद्धं शान्ताय [illegible] भावाय अपगतोऽपेक्षितोऽर्थो यस्मात्तदपार्थं तस्मिन् सुष्ठु निष्ठा व्यवस्था यस्य नास्ति तत्स्वनिष्ठं संशयात्मकमित्यर्थः तत्र स्थित-

श्रीमद्विश्वनाथ[illegible]

[illegible] ... [illegible]

[illegible] युक्त यथार्थो ननु प्रकटितप्रपञ्चरूपायेति नित्यं [illegible] मायाया गुणाः प्रकृतेः सत्त्वादिगुणाः सत्त्वादिगुणप्रवर्तनानुगुणाः सत्त्वादिगुणरहिता ज्ञानानन्दात्मका विग्रहा मत्स्यादिशब्दवाच्याश्च येन स तथा तस्मै नित्यं गृहीताः सत्त्वाद्या विग्रहाश्च यथः सदा "ज्ञानानन्दात्मकास्ते तु विग्रहा निर्गुणास्तथा । द्वौ तत्र ब्रह्मरुद्ररूपावेको वैकुण्ठधामग" इति वचनाच्च प्रकृतिगुणविरचितदेहत्वं हरेरङ्गीकर्तुं युक्तम् ॥ २३ ॥

विशुद्धश्चायं सत्त्वः सर्वगुणात्मकश्च विशुद्धसत्त्वस्तस्मै "हरिः सर्वगुणात्मत्वात्सत्त्व इत्यभिधीयते" इतिवचनात् रजआदिभिरहितसत्त्वगुणायेत्यर्थो बोधितः हरणात् ज्ञानरूपत्वाद्दिमेधाविभो: स्मृत इत्यतः पापहरणात् ज्ञानरूपत्वाद्धरिमेधाः मृष्टी रजःसम्पर्कात्कांपिलवर्णाज्ञान इत्यर्थो न ग्राह्यः "हरितो कपिले त्रिषु" इत्यभिधानात् अतो गदित एवार्थस्तस्मै ॥ २४ ॥ २५ ॥

कुर्वुक्त्महि नमस्काराख्यं योगमकाण्डे ॥ २६ ॥

अनुकम्पया भवताप्येतद्रूपमाविष्कृतमन्यथिकमस्मदनुकम्पां विना ● किमपीत्यर्थः ॥ २७ ॥

अमद्रुरन्धन !व्यापद्दन ! ॥ २८ ॥

यदुक्तं हरिणा वरं वृणीध्वमिति तत्राहुरित्याह । येनेति । क्षुल्लकानामल्पकानामपि भूतानामन्तर्हृदये अन्तर्हितस्तत्त्वं तेषामीहितं चेष्टितं चावेषि तस्माच्च आशिषः कस्माच्च वेदापि तु वेदैव[illegible]यः ॥ २९ ॥

त्वत्प्रसादादन्यो वरो न प्रार्थनीय इत्याहुरित्याह । असाविति । येषामस्माकं भगवान् प्रसन्नः असौ भगवत्प्रसाद एवेप्सितो वरो नान्य इत्यन्वयः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

तद्दर्शनाद् ध्वस्तानि तमोरजोमलानि येस्ते ॥ २१ ॥ २२ ॥

[illegible] तव निष्ठया तन्निष्ठायां जातायां जनानां मनसि अपार्थमेव विलसदाभासमानं द्वयं कारणकार्यात्मकं जगत् किं वा कर्मज्ञानात्मकं साधनं यस्मात् तस्मै जगत् स्थानादिषु निमित्तेषु गृहीता स्वाधिष्ठानीकृता माया गुणाः सत्त्वादयो यैः तादृशा विग्रहाः श्रीविष्ण्वादयो यस्य तस्मै ॥ २३—२८ ॥

तत्र च [illegible]ति स्वदौरात्म्यं कथं गोपनीयमित्याहुः । क्षुल्लकानामिति सपादार्द्धेन ॥ २९ ॥

सत्यपि दौरात्म्ये विचारतस्त्वितदमुपलभामहे इत्याहुः । असाविति । भवत्प्रसाद एवास्माकमीप्सितो वर इत्यर्थः । अपवर्गतो [illegible]कैवल्यादपि गुरुर्महती या गतिः फलं तद्रूपः । यद्वा अपवर्गस्य भक्तियोगस्य गुरुरुपदेष्टा तदुचिता गतिश्च ॥ ३० ॥

[illegible]सिद्धान्तसारार्थदर्शिनी ।

[illegible] भाजनं पात्रं ध्वस्ततमोरजसोऽपि य[illegible] [illegible]योगदुःखमात्सर्यरहिता इत्यर्थः ॥ २१ ॥

[illegible]पिता वेदैरुक्ता उदारा गुणा आह्वया नामानि च [illegible] तस्मै मनोवचसोर्वेगादपि पुरोऽग्रतो जवो वेगो [illegible] तस्मै ॥ २२ ॥

मनसि अपार्थं निष्प्रयोजनं विलसत् देदीप्यमानमपि द्वैतं यस्मात्तस्मै यं प्राप्तानां मनसि विविधभोगयुक्तमपि [illegible] निष्प्रयोजनमेव स्यादित्यर्थः । गृहीता मायागुणमया [illegible] रुद्ररूपा विग्रहा येन तस्मै ॥ २३—२५ ॥

नमो वृक्ष्महि कृतवन्तः ॥ २६—२७ ॥

एतावत्त्वं एतावदेव विभुभिः प्रभुभिस्तत्र भवद्भिः यत्कार्यं जीवसेवाकार्ये दासबुद्ध्या स्मर्यते हे प्रपन्नदुःखहन्तः ! ॥ २८ ॥

येन त्वत्कर्तृकानुस्मरणेनैव तेषामुपशान्तिः सुखं क्षुल्लकान् क्षुद्राणामपि ईहितां सकामानामपि योऽस्माकं अन्तर्हृदयमध्ये वर्तमानः स भवत्समाकमाशिषः कामान् कस्माच्च वेद कौरवा अन्तरात्मान्तःकरणानां हितं शुद्धिर्यस्मात् सः ॥ २९ ॥

तदपि याचाम्युच्यत इत्याहुः । असाविति । अपवर्गान्मोक्षादपि गुरुत्वमेव यदि प्राप्तस्तदा मोक्षपर्यन्तैर्वरैरलमिति भावः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुरुषार्थान् भाजयति प्रापयतीति तथा तं भगुणान् अस्तुवन् ॥ २१ ॥

वेदैर्निरूपिता वर्णिताः उदारा भक्तमनोरथपूरका गुणाः । आह्वया नामानि च यस्य तस्मै मनोवचसो वेगादपि पुरः अग्रतो जवो वेगो यस्य तस्मै सर्वेषां प्राणिनामक्षमार्गैरिन्द्रियवृत्तिभिरगतोऽसंस्पृष्टः अध्वा दर्शनमार्गो यस्य तस्मै "नाहं प्रकाशः सर्वस्य योगमाया समावृत" इति श्रीमुखोक्तेश्च ॥ २२ ॥

स्वनिष्ठया स्वकीये उपास्ये वासुदेवे या निष्ठा तया मनसि उपासकचित्ते अपार्थं निरर्थकं यथा भवति तथा विलसत् द्वयं तदितरोपासनीयसाधनादिकं पुत्रवित्तादिकं च द्वैतं यस्मात् उपास्यात् तस्मै "योऽन्यां देवतामुपासते न स वेद किं प्रजया किं धनेन येषामयमात्मलोक" इतिश्रुतेः गृहीताः प्रकटीकृता मायागुणमया विग्रहा येषां ते मायागुणविग्रहाः । यत्सत्त्वतः सुरगणा रजसः प्रजेशा मन्योस्तु भूतपतयः स भवान् गुणेश्च इति वक्ष्यमाणाः येन तस्मै यद्वा गृहीतो मायागुणविग्रहो विराड्देहो येन तस्मै ॥ २३ ॥

हरति संसारं मेधा यस्य यद्विषया बुद्धिर्मुक्तिं ददाति तस्मै ॥ २४ ॥ २५ ॥

मधुकृत्महि कुर्मः ॥ २६ ॥

वरं वृणीध्वमित्युक्तं तत्र यद्यपि त्वद्दर्शनेनैव कृतार्थानाम् न वराकाङ्क्षा तथापि [illegible] दीयतामित्याहुः रूपमित्यादिसप्तभिः गृही[illegible]

वर वृणीम [illegible]
मन्नस्त्वा [illegible]
पारिजातेऽ [illegible]
त्वदङ्घ्रिमूलमाश्रि [illegible]

यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः ।
तावद्भवत्प्रसङ्गानां सङ्गः स्यान्नो भवे भवे ॥ २३ ॥
तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ २४ ॥
यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः ।
निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ॥ २५ ॥
यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः ।
संस्तूयते सत्कथासु मुक्तसङ्गैः पुनः पुनः ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे प्रपन्नदुःखघ्न ! दीनेषु प्रपन्नेषु वत्सलैः विभुभिः एता- वत्त्वं स्वार्थत्वप्रत्ययः । एतावदेव भाव्यं कार्ष्ण्यम् यत्काले उचित- काले स्वबुद्ध्या स्वकीयत्वेनानुस्मर्य्यते ॥ २८ ॥

येन भगवतः प्रपन्नजनस्मरणेन भूतानां स्मृतानां शान्तिः भवं स्यात् किमु क्षुल्लकानां भोगार्थं कर्मासक्तानामपि भवान् अन्तर्हृदये अन्तर्हितः अन्तर्यामितया स्थितः आशिषो वेद नोऽस्माकमीहतामुपासनं कुर्वतामाशिषः कस्माद्धेतोर्न वेद जाना- त्येवेत्यर्थः ॥ २९ ॥

यत्प्रसन्नोऽभूत् प्रसन्नतया दृष्टिगोचरो जात इत्येव त्वत्प्रसाद एव नोऽस्माकमीप्सितो वरः ॥ ३० ॥

भाषा टीका ।

मैत्रेय जी बोले धर्मादि पुरुषार्थों को देने वाले जनार्दन भगवान् जब इस प्रकार आज्ञा किये तब भगवान् के दर्शन ही से उन प्रचेतों के मनके सब रजोगुण के मल नष्ट होगये थे फिर सर्व विश्व सुहृद समझकर गद्गद वचन से स्तुति करने लगे ॥ २१ ॥

प्रचेता बोले हे प्रभो ! आप सब जीवों के क्लेश के नाश करने वाले हो आपके गुण कर्मों को वेद गान करते हैं मनसे वचन से भी आपका बड़ा वेग है आपके मार्ग को किसी की कोई इन्द्रिय नहीं जान सक्ती है ऐसे आपके अर्थ नमस्कार है ॥ २२ ॥

अपने स्वरूप में स्थित होने से आप शुद्ध हो शान्त हो जीवों के मनमें अज्ञान होने से आप में भेददृष्टि होती है जगत्की उत्पत्तिस्थिति प्रलय में आप अपनी विचित्र शक्ति से कामादि गुण युक्त [illegible] को धारण करते हो तिन आपके लिये न [illegible]

आपके ज्ञान होने से संसार छूटजाता है आप विशुद्ध सत्व- मूर्ति हो श्रीवासुदेव कृष्ण सब सात्वतों के प्रभु हो श्रीहरि आपके अर्थ नमस्कार है ॥ २४ ॥

हे कमल नेत्र ! आपके नाभि से कमल हुआ है आपके कमल की माला है आपके चरण कमल सरीके हैं ऐसे आपके अर्थ नमस्कार है ॥ २५ ॥

कमल के केसर के तुल्य आपके पीत वस्त्र हैं सर्व भूतों में आपका निवास है आप सबके साक्षी हो आपको हम नम- स्कार करते हैं ॥ २६ ॥

भगवान् होकर आपने हम दुखित जनों के सब क्लेशों के नाश करने वाले इस दिव्यरूपको प्रगट करके दर्शन कराया इससे और अधिक दया का चिह्न क्या होगा ॥ २७ ॥

हे अमङ्गलनाशक ! प्रभु मालिकों को इतना ही चाहिये कि जो दीनोंपर दयाल होकर सेवादिक समयपर सेवक की याद मात्र करलेवें ॥ २८ ॥

आपके याद के करते ही नाश से अति तुच्छ बहिर्मुख जीवों की भी सब शान्ति होजाती है आपतो सबके हृदय में स्थित हो तो हमारे मनोरथों को क्यों न जानते होंगे ॥ २९ ॥

हे जगत् के पति ! हम लोगों का यही वर परम अभीष्ट है जो कि आप मोक्ष के दाता हरि भगवान् हमपर प्रसन्न होगये हैं ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यप्येवं तथापि हे नाथ ! त्वत्तः परमेकं वृणीमहे [illegible]- तात् । परतः कारणादपि परात् । "[illegible] वर" इति श्रुतेः । अतो यद्यपि त्वं दातुं समर्थो न च देयानां [illegible]- [illegible] ॥ ३१ ॥



यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या ।
आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव ॥ ३९ ॥
यन्नः सुतप्तं तप एतदीश ! निरन्धसां कालमदभ्रमप्सु ।
सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तथापि यथा सारङ्गो भ्रमरः पारिजाते सुखेन लब्धे सति सुखममन्यन्वृक्षान्तरं न सेवते तथा वयमपि साक्षात्त्वदङ्घ्रिमूलं प्राप्य किं किं वृणीमहि न किञ्चिदित्यर्थः । यद्वा । किमन्यमन्यत्तुच्छं किमर्थं वृणीमहि यद्वा यदि वृणीमहि तर्हि किं किं वृणीमहि अनन्तत्वेन मनोरथानामनवसानादित्यर्थः ॥ ३२ ॥

अत एतावदेव प्रार्थयाम इत्याहुः । यावदिति । स्पृहा व्याप्ताः भवन्ति प्रकृष्टः सङ्गो येषां तेषां सङ्गोऽस्माकं स्यात् ॥ ३३ ॥

ननु राज्यभोगान् स्वर्गापवर्गौ च विहाय किमिदं प्रार्थ्यते तत्राहुः । तुलयामेति । भगवत्सङ्गिनां सङ्गस्य लवेनापि ॥ ३४ ॥

सत्सङ्गस्य श्रैष्ठ्यं प्रपञ्चयति । येष्विति त्रिभिः । यत्र येषु यतो मिथः कथाभिः निर्वैरं वैराभावः उद्वेगो भयम् ॥ ३५ ॥ ३६ ॥

पद्भ्यां पावनेच्छया संसाराद्भीतस्य ॥ ३७ ॥

सत्सङ्गफलमस्माभिरेवानुभूतमित्याहुः । वयं त्विति । तव यः प्रियः सखा तस्य भवस्य । अत्यन्तमचिकित्स्यस्य भवस्य जन्मनो मृत्योश्च भिषक्तमं त्वामेव त्वां गतिं प्राप्ताः ॥ ३८ ॥

वरान्तरं वृणते । यन्न इति द्वाभ्याम् । नता नमस्कृताः ॥ ३९ ॥ निरन्धसां निराहाराणाम् अदभ्रं बहुकालम् । ते परितोषणाय भवत्विति वृणीमहे ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भवत्स्वेवमथापि हे नाथ ! परतो देहविलक्षणादात्मनः पराद्विलक्षणात्त्वत् स्वतः प्रकृतिपुरुषविलक्षणात्त्वत्त इत्यर्थः वरं वृणीमहे कस्वरं वृणुतेऽति जिज्ञासायां त्वदीयानन्तगुणगणानुकथनानुभवव्यपदेशानां भागवतानां सङ्गमितिवक्तुं तावदनन्तत्वमाहुः । यद्यस्मात्त्वद्विभूतीनामन्तो नास्ति अतस्त्वमनन्त इति गीयसे ॥ ३१ ॥

भागवतसङ्गलभ्यत्वद्गुणानुभवमन्तरेणान्यं न वृणीमह इत्याहुः । पारिजाते मकरन्दनिर्भरे लब्धे सति सारङ्गो भृङ्गोऽन्यं न सेवते एवं त्वदङ्घ्रिमूलं निरतिशयसुखावहमासाद्य किं किं वृणीमहे न किमपीत्यर्थः ॥ ३२ ॥

एतावदेव प्रार्थयाम इत्याहुः । ते तव मायया स्पृष्टा मोहिताः सन्तो वयं स्वकर्मभिरिह संसारे यावद्भ्रमामस्तावद्भवतः प्रसङ्गो येषां तेषां भागवतानां सङ्गं प्रति जन्म नोऽस्माकं स्यादित्येष एव वरोऽस्माभिर्वरणीयः ॥ ३३ ॥

ननु राज्यभोगस्वर्गादि हित्वा किमिदं प्रार्थ्यते तत्राहुः । तुलयामेति । भगवत्सङ्गिनां सङ्गस्य लवेनापि लेशेनापि स्वर्गादिकं न तुलयाम न तुल्यं मन्यामहे किमुत मर्त्यानां मर्त्यतुल्यानामाशिषः राज्यभोगादिरूपास्तुलयाम इत्यर्थः ॥ ३४ ॥

सत्सङ्गस्य श्रैष्ठ्यं प्रपञ्चयति । यत्रेति त्रिभिः । यत्र भागवतेषु मिथः कर्तरिकः पापशोधिका मधुरा या कथा भगवत्कथा ईड्यन्ते प्रस्तूयन्ते यतः याभ्यः कथाभ्यः श्रूयमाणाभ्यः तृष्णाया विषयबुभुक्षायाः प्रशमः प्रशान्तिः यत्र सत्सङ्गे सति भूतेषु निर्वैरं वैराभावः यत्र सत्सङ्गे सति कश्चन उद्वेगः भयं च नास्ति ॥ ३५ ॥

यत्र सत्कथासु मुक्तसङ्गैः साधुभिः पुनः पुनः भगवान्नारायण एव न्यासिनां संन्यासिनां गतिरित्युपायः प्रस्तूयते ॥ ३६ ॥

तेषां सतां तीर्थानां गङ्गादीनां पावनेच्छया गङ्गादीन् पवित्रीकर्तुमिच्छया पद्भ्यां चरतां तावकानां त्वद्भक्तानां समागमः सङ्गमः संसाराद्भीतस्य किं न रोचेत रोचेतैवेत्यर्थः ॥ ३७ ॥

सत्सङ्गस्य फलमस्माभिरेवानुभूतमित्याहुः । वयं त्विति । हे भगवन् ! त्वत्प्रियस्य त्वत्सखस्य भवरूपमृत्युचिकित्सकस्य भवस्य रुद्रस्य क्षणमात्रसङ्गमेन भिषक्तमं संसृतिरूपरोगनिवारकं त्वां गतिं शरण्यं गताः प्राप्ताः स्मः ॥ ३८ ॥

एवं सत्सङ्गं वृत्वा वरान्तरं वृणुते । यन्न इति द्वाभ्याम् । यदस्मदीयमध्ययनादिकं तदेतत्सर्वं सर्वान्तरात्मनः परमपुरुषस्य तव परितोषणाय वृणीमहे त्वत्परितोषणाय भवत्वित्यन्वयः नोऽस्माभिः प्रसादिताः प्रसादं प्रापिताः ये सन्तः तदनुवृत्त्या गुरवो वृद्धा विप्राश्च प्रसादिताः प्रसादं प्रापिताः आर्या गुर्वादयो नता नमस्कृताः तथा सुहृदादयः अनसूययैव प्रसादिताः निरन्धसां निराहाराणां नोऽस्माकमदभ्रं बहुकालमप्सु जलेषु यत्सन्तप्तं तपः एतदध्यापनगुर्वादिप्रसादननमस्कारतपआदिकम् ॥ ३९ ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

